# "અહો શ્રુતજ્ઞાનમ્" ગ્રંથ જીર્ણોધ્ધાર 33

## શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસનમ્

## સ્વોપજ્ઞશબ્દમહાર્ણવન્યાસ (બૃહન્ન્યાસ અધ્યાય-૨)

: દ્રવ્ય સહાયક :

પરમ પૂજ્ય સંઘસ્થવિર સ્વ. સિધ્ધિસૂરિજી (બાપજી) મ.ના
સમુદાયના હાલ પૂ. ગચ્છાધિપતિ રામચંદ્રસૂરિ મ.સા.ના
આજ્ઞાનુવર્તિનિ સાધ્વિજી શ્રી પૂર્ણભદ્રાશ્રીજી મ.સા.ની પ્રેરણાથી
શા. લહેરીબેન વનેચંદજીના ઉપાશ્રયના શ્રાવિકા બહેનોની
સૂત્રોની બોલીની ઉપજમાંથી

: સંયોજક :

શાહ બાબુલાલ સરેમલ બેડાવાળા
શ્રી આશાપૂરણપાર્શ્વનાથ જૈન જ્ઞાનભંડાર
શા. વીમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન
હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-3૮000૫
(મો.) ૯૪૨૬૫૮૫૯0૪ (ઓ.) ૨૨૧3૨૫૪3 (રહે.) ૨૭૫0૫૭૨0

સંવત ૨0૬૫ ઈ.સ. ૨00૯

॥ अर्हम् ॥

श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम् - ५०

आशैशवशीलशालिने श्रीनेमीश्वराय नमः ॥

कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिभगवद्भिः श्रीसिद्धराजाभ्यर्थनया प्रणीतं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

**[ स्वोपज्ञतत्त्वप्रकाशिकाभिधानबृहद्वृत्ति * * * स्वोपज्ञशब्दमहार्णव-न्यास * * * मनीषिश्रीकनकप्रभसूरिरचितन्यास-सारसमुद्धार * * * संवलितम् ]**

तत्र

## द्वितीयोऽध्यायः ॥

[ सिन्धु-तरङ्गवृत्तिद्वययुक्त-न्यायसमुच्चयात्मक-परिशिष्टादिना समलङ्कृतः ]

बृहन्न्यासानुसन्धानकारः सम्पादकश्च —

तपोगच्छाधिपति-शासनसम्राट्-सूरिचक्रचक्रवर्ति-जगद्गुरुश्रीविजयनेमिसूरीश्वरपट्टालङ्कारो 'व्याकरणवाचस्पति-कविरत्न-शास्त्रविशारद' इतिपदालङ्कृतः श्रीविजयलावण्यसूरिः

卐 卐 卐 卐 卐

प्रकाशकम्—

श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिरम्

[ बोटाद, सौराष्ट्र ]

वीर सं० २४८३ ] नेमि सं० ८ [ विक्रम सं० २०१३

मुद्रणस्थलम्—

निर्णयसागर प्रेस, २६।२८ कोलभाट स्ट्रीट, मुंबई नं० २

Rs. 25=00, Rs. 30=

# श्रीसिद्धहेमचन्द्रशब्दानुशासने द्वितीयाध्यायसूत्रानुक्रमणिका ।

अकखाद्य-वा ।२।३।८०॥
अकमेरुकस्य ।२।२।९३॥
अङप्रतिस्त-म्मः ।२।३।४१॥
अच्च् प्रा-श्च ।२।१।१०४॥
अजादेः ।२।४।१६॥
अज्ञाने ज्ञः षष्ठी ।२।२।८०॥
अञ्चः ।२।४।३॥
अणञेये-ताम् ।२।४।२०॥
अतः कृकमि-स्य ।२।३।५॥
अतोऽह्नस्य ।२।३।७३॥
अदसो दः सेस्तु डौ ।२।१।४३॥
अदुरुपसर्गा-नेः ।२।३।७७॥
अद् व्यञ्जने ।२।१।३५॥
अधश्चतुर्थात् तथोर्धः ।२।१।७९॥
अधातूदृदितः ।२।४।२॥
अधिकेन भूयसस्ते ।२।२।१११॥
अधेः शीङ्स्थास० ।२।२।२०॥
अनक् ।२।१।३६॥
अनञो मूलात् ।२।४।५८॥
अनाच्छादजा-वा ।२।४।४७॥
अनार्षे वृद्ध-ष्यः ।२।४।७८॥
अनो वा ।२।४।११॥
अनोऽस्य ।२।१।१०८॥
अपायेऽवधिरपादा० ।२।२।२९॥
अपोऽद् भे ।२।१।४॥
अप्रत्यादावसाधुना ।२।२।१०१॥
अभिनिष्ठानः ।२।३।२४॥
अभ्यम् भ्यसः ।२।१।१८॥
अमा त्वामा ।२।१।२४॥
अमौ मः ।२।१।१६॥
अयमियं पुं-स्त्रौ ।२।१।३८॥
अलुपि वा ।२।३।१९॥
अवः स्वपः ।२।३।५७॥
अवर्णादश्नो-ङ्योः ।२।१।११५॥
अवाच्चाश्रयो-रे ।२।३।४२॥
अविशेषणे-दः ।२।२।१२२॥
अशिशोः ।२।४।८॥
असंभस्त्राजिनैक० ।२।४।५७॥
*

असत्काण्ड-त् ।२।४।५६॥
असत्त्वाराद० ।२।२।१२०॥
असदिवा-म् ।२।१।२५॥
असहनञ् दिभ्यः ।२।४।३८॥
असुको वाकि ।२।१।४४॥
असो-ङसिवू-टाम् ।२।३।४८॥
अस्य ङ्यां लुक् ।२।४।८६॥
अस्याऽयत्त-नाम् ।२।४।१११॥
अह्नः ।२।१।७ ॥
आख्यातर्युपयोगे ।२।२।७३॥
आङावधौ ।२।२।७०॥
आत् ।२।४।१८॥
आ द्वन्द्वे ।२।२।३९॥
आ द्वेरः ।२।१।४१॥
आपत्यस्य क्यच्च्व्योः ।२।४।९१॥
आम आकम् ।२।१।२०॥
आमन्त्र्ये ।२।२।३२॥
आरादर्थैः ।२।२।७८॥
आ रायो व्यञ्जने ।२।१।५॥
आर्यक्षत्रियाद्वा ।२।४।६६॥
इच्चापुंसो-रे ।२।४।१०७॥
इञ इतः ।२।४।७१॥
इणः ।२।१।५१॥
इतोऽक्त्यर्थात् ।२।४।३२॥
इदमः ।२।१।३४॥
ईर्ङौ वा ।२।१।१०९॥
उः पदान्तेऽनूत् ।२।१।११८॥
उतोऽप्राणिन-ऊङ् ।२।४।७३॥
उत्कृष्टेऽनूपेन ।२।२।३९॥
उत्पातेन ज्ञाप्ये ।२।२।५९॥
उदच उदीच् ।२।१।१०३॥
उदन्वानब्धौ च ।२।१।९७॥
उपमानसहित-रोः ।२।४।७५॥
उपसर्गस्यायौ ।२।३।१००॥
उपसर्गात् सुग्-त्वे ।२।३।३९॥
उपसर्गाद्दिवः ।२।२।१७॥
उपान्वध्याङ्वसः ।२।२।२१॥
उपेनाधिकिनि ।२।२।१०५॥

ऊढायाम् ।२।४।५१॥
ऊध्नः ।२।४।७॥
ऋचि पादः-दे ।२।४।१७॥
ऋणाद्धेतोः ।२।२।७६॥
ऋते द्वितीया च ।२।२।११४॥
ऋतो रः-मि ।२।१।२॥
ऋत्विज्दिश्-गः ।२।१।६९॥
ऋफिडादीनां ।२।३।१०४॥
ऋर ललं-षु ।२।३।९९॥
एत्यकः ।२।३।२६॥
एष्यदृणेनः ।२।२।२४॥
कपेर्गोत्रे ।२।३।२९॥
कबरमणि-देः ।२।४।४२॥
करणं च ।२।२।१९॥
कर्तरि ।२।२।८६॥
कर्तुर्व्याप्यं कर्म ।२।२।३॥
कर्मणि ।२।२।४०॥
कर्मणि कृतः ।२।२।८३॥
कर्माभिप्रेयः संप्रदा० ।२।२।२५॥
कवर्गैकस्वरवति ।२।३।७६॥
काण्डात् प्रमा-त्रे ।२।४।२४॥
कालाध्वनोर्व्याप्तौ ।२।२।४२॥
कालाध्वभा-णाम् ।२।२।२३॥
काले भान्नवाऽऽधारे ।२।२।४८॥
किमः क-च ।२।१।४०॥
कुरुच्छुरः ।२।१।६६॥
कुलाख्यानाम् ।२।४।७९॥
कुशलायु-याम् ।२।२।९७॥
कृगः प्रतियत्ने ।२।२।१२॥
कृताद्यैः ।२।२।४७॥
कृत्यस्य वा ।२।२।८८॥
केवलमामक-जात् ।२।४।२९॥
कौरव्यमाण्डूकासुरेः ।२।४।७०॥
क्तयोरसदाधारे ।२।२।९१॥
क्ताच्च नाम्नि वा ।२।४।२८॥
क्तादल्पे ।२।४।४५॥
क्तादेशोऽषि ।२।१।६१॥
क्नः पलितासितात् ।२।४।३७॥

क्रियामध्येऽध्व-च ।२।२।११०॥
क्रियाविशेषणात् ।२।२।४१॥
क्रियाश्रयस्या-णम् ।२।२।३०॥
क्रियाहेतुः कारकम् ।२।२।१॥
क्रीतात् करणादेः ।२।४।४४॥
क्रुद्-द्रुहे-पः ।२।२।२७॥
क्रौड्यादीनाम् ।२।४।८०॥
क्लीबे ।२।४।९७॥
क्लीबे वा ।२।१।९३॥
क्सुष्मतौ च ।२।१।१०५॥
क्विब्वृत्तेरसुधियस्तौ ।२।१।५८॥
क्षुभ्नादीनाम् ।२।३।९६॥
गडदबादे-ये ।२।१।७७॥
गतिबोधा-दाम् ।२।२।५॥
गते गम्येऽध्व-वा ।२।२।१०७॥
गतेर्नवाऽनाप्ते ।२।२।६३॥
गतौ सेधः ।२।३।६१॥
गम्ययपः कर्माधारे ।२।२।७४॥
गम्यस्याप्ये ।२।२।६२॥
गवियुधेः स्थिरस्य ।२।३।२५॥
गिरिनद्यादीनाम् ।२।३।६८॥
गुणाद्-नवा ।२।२।७७॥
गुरावेकश्च ।२।२।१२४॥
गोण्या मेये ।२।४।१०३॥
गोऽम्बाम्ब-स्य ।२।३।३०॥
गोश्चान्ते-ही ।२।४।९६॥
गौणात् सम-या ।२।२।३३॥
गौरादिभ्यो मुख्यान् ।२।४।१९॥
ग्रामाग्रान्नियः ।२।३।७१॥
ग्रो यङि ।२।३।१०१॥
घस्-वसः ।२।३।३६॥
ङसेश्चाद् ।२।१।१९॥
ङेङसा ते मे ।२।१।२३॥
ङ्यादीदूतः के ।२।४।१०४॥
ङ्यादेर्गौण-च्योः ।२।४।९५॥
ङ्यापो बहुलं नाम्नि ।२।४।९९॥
चजः कगम् ।२।१।८६॥
चतुर्थी ।२।२।५३॥
चतुस्त्रेर्हा-सि २।३।७४॥
चर्मण्वत्य-त् ।२।१।९६॥
चाहहवैवयोगे २।१।२९॥
जपादीनां पो वः ।२।३।१०५॥
जराया ज-वा ।२।१।३॥
जस्विशे-क्ये ।२।१।२६॥
जातेरयान्त-त् ।२।४।५४॥
जात्याख्यायां-वत् ।२।२।१२१॥
जास-नाट-याम् ।२।२।१४॥
ज्योतिरायु-स्य ।२।३।१७॥
टाङ्योसि यः ।२।१।७॥
टौस्यनः ।२।१।२७॥
डित्यन्त्यस्वरादेः ।२।१।११४॥
णषमसत् परे स्यादि० ।२।१।६०॥
णस्वराघोषा-श्च ।२।४।४॥
णिस्तोरेवा-णि ।२।३।३७॥
णेर्वा ।२।३।८८॥
तः सौ सः ।२।१।४२॥
तद्धितयस्वरेऽनाति ।२।४।९२॥
तद्भद्रायुष्य-षि ।२।२।६६॥
तद्युक्ते हेतौ ।२।२।१००॥
तव मम ङसा ।२।१।१५॥
तादर्थ्ये ।२।२।५४॥
ताभ्यां वा-त् ।२।४।१५॥
तारका वर्णका-त्ये ।२।४।११३॥
तिरसो वा ।२।३।२॥
तिष्यपुष्ययोर्भाणि ।२।४।९०॥
तुभ्यं मह्यं ङ्या ।२।१।१४॥
तुमोऽर्थे भा-त् ।२।२।६१॥
तुल्यार्थैस्तृतीयाष० ।२।२।११६॥
तृतीयाल्पीयसः ।२।२।११२॥
तृन्नुदन्ता-स्य ।२।२।९०॥
त्यदामेन-ते ।२।१।३३॥
त्रिचतुरस्-दौ ।२।१।१॥
त्वमह-कः ।२।१।१२॥
त्वमौ प्र-न् ।२।१।११॥
त्वे ।२।४।१००॥
दन्तपादना-वा ।२।१।१०१॥
दामः संप्रदा-च ।२।२।५२॥
दाम्नः ।२।४।१०॥
दिव औः सौ ।२।१।११७॥
दन्पुनर्वर्षाकारैर्भुवः ।२।१।५९॥
दृश्यभिवदोरात्मने ।२।२।९॥
दृश्यर्थैश्चिन्तायाम् ।२।१।३०॥
देशे ।२।३।७०॥
देशेऽन्तरो-नः ।२।३।९१॥
दैवयज्ञिशौचिवृ-र्वा ।२।४।८२॥
दो मः स्यादौ ।२।१।३९॥
द्विगोः समाहारात् ।२।४।२२॥
द्वितीयाषष्ठ्यावे० ।२।२।११७॥
द्वित्रिस्वरौ-भ्यः ।२।३।६७॥
द्वित्वेऽधोऽध्युपरिभिः ।२।२।३४॥
द्वित्वेऽप्यन्ते-वा ।२।३।८१॥
द्वित्वे वाम् नौ ।२।१।२२॥
द्विषो वातृशः ।२।२।८४॥
द्विहेतो-वा ।२।२।८७॥
द्वयेषसूत-स्य ।२।४।१०९॥
धवाद्योगा-त् ।२।४।५९॥
धागस्तथोश्च ।२।१।७८॥
धातोरिवर्णो-ये ।२।१।५०॥
धुटस्तृतीयः ।२।१।७६॥
न ।२।२।१८॥
न कचि ।२।४।१०५॥
नखमुखादनाम्नि ।२।४।४०॥
न ख्यापुग्-श्च ।२।३।९०॥
नमस्पुरसो-सः ।२।३।१॥
न यि तद्धिते ।२।१।६५॥
न राजन्य-के ।२।४।९४॥
नरिका मामिका ।२।४।११२॥
न वमन्तसंयोगात् ।२।१।१११॥
नवापः ।२।४।१०६॥
नवा शोणादेः ।२।४।३१॥
नवा सुजर्थैः काले ।२।२।९६॥
नवा स्वरे ।२।३।१०२॥
नशः शः ।२।३।७८॥
नशो वा ।२।१।७०॥
नसस्य ।२।३।६५॥
न स्सः ।२।३।५९॥
नहाहोर्धतौ ।२।१।८५॥
नाथः ।२।२।१०॥
नान्यत् ।२।१।२७॥
नामन्त्र्ये ।२।१।९२॥

नामिनस्तयोः षः ।२।३।८॥
नाम्न प्रथमै-हौ ।२।२।३१॥
नाम्नि ।२।१।३५॥
नाम्नि ।२।४।१२॥
नाम्नो नोऽनह्नः ।२।१।९१॥
नाम्यन्तस्था-पि ।२।३।१५॥
नाम्यादेरेव ने ।२।३।८६॥
नारी सखी-श्रू ।२।४।७६॥
नासिकोदरौ-ष्ठात् ।२।४।३९॥
निंसनिक्ष-वा ।२।३।८४॥
नित्यमन्वादेशे ।२।१।३१॥
निनद्याः-ले ।२।३।२०॥
निपुणेन चार्चायाम् ।२।२।१०३॥
निप्रेभ्यो घ्नः ।२।२।१५॥
निरभ्यनोश्च-नि ।२।३।५०॥
निर्दुःसुवेः-तेः ।२।३।५६॥
निर्दुर्बहि-राम् ।२।३।९॥
निर्दुःसोः-स्नाम् ।२।३।३१॥
निर्नेः स्फुरस्फुलोः ।२।३।५३॥
निर्विण्णः ।२।३।८९॥
निष्प्रा-नस्य ।२।३।६६॥
निसस्तपेऽनासेवा० ।२।३।३५॥
नीलात्प्राण्यौषध्योः ।२।४।२७॥
नुर्जातेः ।२।४।७२॥
नृतेर्यङि ।२।३।९५॥
नेर्ङ्मादापत ण्यौ ।२।३।७९॥
नैकार्थेऽक्रिये ।२।३।१२॥
नोपसर्गात्-हा ।२।२।२८॥
नोपान्त्यवतः ।२।४।१३॥
नोभयोर्हेतोः २।२।८९॥
नोर्म्यादिभ्यः ।२।१।९९॥
पक्षाच्चोपमानादेः ।२।४।४३॥
पञ्चम्यपादाने ।२।२।६९॥
पतिवत्न्यन्त-ण्योः ।२।४।५३॥
पत्युर्नः ।२।४।४८॥
पदस्य ।२।१।८९॥
पदाद्युग्-त्वे ।२।१।२१॥
पदान्ते ।२।१।६४॥
पदेऽन्तरेऽना-ते ।२।३।९३॥
पद्धतेः ।२।४।३३॥
परिक्रयणे ।२।२।६७॥
परिनिवेः सेवः ।२।३।४६॥
परिमाणा-ह्यात् ।२।४।२३॥
परेः ।२।३।५२॥
परेर्घाङ्कयोगे ।२।३।१०३॥
पर्यपाभ्यां वर्ज्ये ।२।२।७१॥
पाककर्णपर्ण-त् ।२।४।५५॥
पाठे धात्वादेर्णो नः ।२।३।९७॥
पाणिगृहीतीति ।२।४।५२॥
पादाद्योः ।२।१।२८॥
पानस्य भावकरणे ।२।३।६९॥
पुंसः ।२।३।३॥
पुच्छात् ।२।४।४१॥
पुरुषाद्वा ।२।४।२५॥
पूतक्रतुवृषा-च ।२।४।६०॥
पूर्वपदस्था-गः ।२।३।६४॥
पृथग् नाना-व ।२।२।११३॥
प्रतेः स्नातस्य सूत्रे ।२।३।२१॥
प्रत्यनोर्गृणा-रि ।२।२।५७॥
प्रत्यये ।२।३।६॥
प्रत्याङः श्रु-नि ।२।२।५६॥
प्रभृत्यन्यार्थ-रैः ।२।२।७५॥
प्रष्ठोऽग्रगे ।२।३।३२॥
प्रसितोत्सु-द्धैः ।२।२।४९॥
प्राग्गिनात् ।२।१।४८॥
प्रादुरुपसर्गा-स्तेः ।२।३।५८॥
फल्गुनीप्रो-भे ।२।२।१२३॥
बन्धौ बहुव्रीहौ ।२।४।८४॥
बहुष्वेरीः ।२।१।४९॥
बाह्वन्तक-म्नि ।२।४।७४॥
बिल्वकीयादेरीयस्य ।२।४।९३॥
भक्षेर्हिंसायाम् २।२।६॥
भागिनि च-भिः ।२।२।३७॥
भाजगोण-शे ।२।४।३०॥
भादितो वा ।२।३।२७॥
भीरुष्ठानादयः ।२।३।३३॥
भोजसूतयोः-त्योः ।२।४।८१॥
भ्रातुष्पुत्र-यः ।२।३।१४॥
भ्रुवोऽच्च-ह्योः ।२।४।१०१॥
भ्रूश्नोः ।२।१।५३॥
भ्वादेर्दादेर्घः ।२।१।८३॥
भ्वादेर्नामिनो-ने ।२।१।६३॥
मत्स्यस्य यः ।२।४।८ ॥
मनः ।२।४।१४॥
मनोरौ च वा ।२।४।६१॥
मन्तस्य युवा-योः ।२।१।१०॥
मन्यस्यानावा-ने ।२।२।६४॥
मातमातृमातृके वा ।२।४।८५॥
मातुलाचार्यो-द्वा २।४।६३॥
मातृपितुः स्वसुः ।२।३।१८॥
मादुवर्णोऽनु ।२।१।४७॥
मालेषीके-ते ।२।४।१०२॥
मावर्णान्तो-वः ।२।१।९४॥
मासनिशा-वा ।२।१।१००॥
मुहद्रुहष्णुहष्णिहो वा ।२।१।८४॥
मो नो म्वोश्च ।२।१।६७॥
मोर्वा ।२।१।९॥
मोऽवर्णस्य ।२।१।४५॥
यजसृज-षः ।२।१।८७॥
यञो डायन् च वा ।२।४।६७॥
यतः प्रतिनि-ना ।२।२।७२॥
यद्भावो भावलक्षणम् ।२।२।१०६॥
यद्भेदैस्तद्वदाख्या ।२।२।४६॥
यद्वीक्ष्ये राधीक्षी ।२।२।५८॥
यवयवनार-स्वे ।२।४।६५॥
यस्वरेपा-टि ।२।१।१०२॥
युजञ्चकुञ्चो नो ङः ।२।१।७१॥
युष्मदस्मदोः ।२।१।६॥
यूनस्तिः ।२।४।७७॥
यूयं वयं जसा ।२।१।१३॥
योऽनेकस्वरस्य ।२।१।५६॥
रषृवर्णान्नो-रे ।२।३।६३॥
राजन्वान् सुराज्ञि ।२।१।९८॥
रात् सः ।२।१।९०॥
रिरिष्टात्-ता ।२।२।८२॥
रुचिक्लृप्य-षु ।२।२।५५॥
रुजार्थस्या-रि ।२।२।१३॥
रेवतरोहिणाद् भे ।२।४।२६॥
रोः काम्ये ।२।३।७॥
रो लुप्यरि ।२।१।७५॥

नाम्यन्तात्-ढः ।२।१।८०॥
लक्षणवीप्स्ये-ना ।२।२।३६॥
लुगस्यादेत्यपदे ।२।१।११३॥
लुगातोऽनापः ।२।१।१०७॥
लोहितादिश-त् ।२।४।६८॥
वमि वा ।२।३।८३॥
वयस्यनन्त्ये ।२।४।२१॥
वरुणेन्द्र-न्तः ।२।४।६२॥
वहेः प्रवेयः ।२।२।७॥
वाऽकर्मणा-णौ ।२।२।४॥
वा क्लीबे ।२।२।९२॥
वाद्रौ ।२।१।४६॥
वा पादः ।२।४।६॥
वा बहुव्रीहेः ।२।४।५॥
वाभिनिविशः ।२।२।२२॥
वाम्शसि ।२।१।५५॥
वाह्याद्वाहनस्य ।२।३।७२॥
विकुशमिपरेः-स्य ।२।३।२८॥
विना ते तृतीया च ।२।२।११५॥
विनिमेयद्यूतपणं-ह्नो ।२।२।१६
वेः ।२।३।५४॥
वेः स्कन्दोऽक्तयोः ।२।३।५१॥
वेः स्त्रः ।२।३।२३॥
वेदूतोऽनव्य-दे ।२।४।९८॥
वेसुसोऽपेक्षायाम् ।२।३।११॥
वैकत्र द्वयोः ।२।२।८५॥
वोत्तरपद-ह्वः ।२।३।७५॥
वौ वार्त्तिका ।२।४।११०॥
व्यञ्जनात्तद्धितस्य ।२।४।८८॥
व्यञ्जनादेर्नाम्युपा० ।२।३।८७॥
व्यवात्स्वनोऽशने ।२।३।४३॥
व्याप्ये क्तेनः ।२।२।९९॥
व्याप्ये द्विद्रो-याम् ।२।२।५०॥
शक्तार्थ-वषड्नमः-भिः ।२।२।६८॥
शक्तेः शस्त्रे ।२।४।३४॥
शसो नः ।२।१।१७॥
शिरोऽधसः-क्ये ।२।३।४॥
शेषे ।२।२।८१॥
शेषे लुक् ।२।१।८॥
श्यशवः ।२।१।११६॥
श्येतैतहरित-नश्च ।२।४।३६॥
श्लाघह्नुस्था-ज्ये ।२।२।६०॥
श्वन्युवन्म-उः ।२।१।१०६॥
षः सोऽष्ट्यै-ष्कः ।२।३।९८॥
षढोः कस्सि ।२।१।६२॥
षष्ठी वानादरे ।२।२।१०८॥
षात्पदे ।२।३।९२॥
षादिहन्-णि ।२।१।११०॥
षावटाद्वा ।२।४।६९॥
ष्या पुत्रपत्योः-षे ।२।४।८३॥
संख्यादेर्हाय-सि ।२।४।९॥
संयोगस्या-क् ।२।१।८८॥
संयोगात् ।२।१।५२॥
सजुषः ।२।१।७३॥
सञ्जेर्वा ।२।३।३८॥
सदोऽप्रतेः-देः ।२।३।४४॥
सपत्न्यादौ ।२।४।५०॥
सपूर्वात्-द्वा ।२।१।३२॥
सप्तमी चा-णे ।२।२।१०९॥
सप्तम्यधिकरणे ।२।२।९५॥
समासेऽग्नेः स्तुतः ।२।३।१६॥
समासेऽसमस्तस्य ।२।३।१३॥
समो गमृ-शः ।२।३।८४॥
समो ज्ञोऽ-वा ।२।२।५१॥
सयसितस्य ।२।३।४७॥
सर्वादेः सर्वाः ।२।२।११९॥
सर्वोभया-सा ।२।२।३५॥
सहार्थे ।२।२।४५॥
सादेः ।२।४।४९॥
साधकतमं करणम् ।२।२।२४॥
साधुना ।२।२।१०२॥
सिचो यङि ।२।३।६०॥
सिद्धौ तृतीया ।२।२।४३॥
सुगः स्यसनि ।२।३।६२॥
सुचो वा ।२।३।१०॥
सूर्यागस्त्ययो-च ।२।४।८९॥
सूर्याद्देवतायां वा ।२।४।६४॥
सो रुः ।२।१।७२॥
स्कभ्नः ।२।३।५५॥
स्तुस्वञ्जश्चा-वा ।२।३।४९॥
स्तोकाल्प-णे ।२।२।७९॥
स्त्रियाः ।२।१।५४॥
स्त्रियां नृतो-ङीः ।२।४।१॥
स्थासेनिसेध-पि ।२।३।४०॥
स्नानस्य नाम्नि ।२।३।२२॥
स्पृहेर्व्याप्यं वा ।२।२।२६॥
स्मृत्यर्थ-दयेशः ।२।२।११॥
स्यादौ वः ।२।१।५७॥
स्रंस्-ध्वंस्-द्ः ।२।१।६८॥
स्वञ्जश्च ।२।३।४५॥
स्वज्ञाऽजभ-कात् ।२।४।१०८॥
स्वतन्त्रः कर्त्ता ।२।२।२॥
स्वरात् ।२।३।८५॥
स्वरादुतो-रोः ।२।४।३५॥
स्वाङ्गादेरकृत-हेः ।२।४।४६॥
स्वामीश्वरा-तैः ।२।२।९८॥
स्वेशेऽधिना ।२।२।१०४॥
हनः ।२।३।८२॥
हनो घि ।२।३।९४॥
हनो ह्नो घ्नः ।२।१।११२॥
हितसुखाभ्याम् ।२।२।६५॥
हृक्रोर्नवा ।२।२।८॥
हेतुकर्तृकरणे-णे ।२।२।४४॥
हेतुसहार्थेऽनुना ।२।२।३८॥
हेत्वर्थैस्तृ-द्याः ।२।२।११८॥
हो धुट्पदान्ते ।२।१।८२॥
ह्नस्वान्नाम्नस्ति ।२।३।३४॥

अर्हम्

आशैशवशीलशालिने श्रीनेमीश्वराय नमो नमः।

कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिभगवत्प्रणीतं–

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम्।

[ स्वोपज्ञतत्त्वप्रकाशिकाभिधबृहद्वृत्ति–तत्त्वप्रकाशिकाप्रकाशशब्दमहार्णव-

न्यास–मनीषिकनकप्रभविरचितन्याससारसमुद्धारसंवलितम् ]

तत्र

## [ द्वितीयोऽध्यायः ]

### त्रि-चतुरस्तिसृ-चतसृ स्यादौ ।२।१।१॥

त० प्र०—स्त्रियामित्यनुवर्तते, 'त्रि चतुर्' इत्येतयोः स्त्रीलिङ्गे वर्तमानयोस्तत्संबन्धिन्यन्यसंबन्धिनि वा स्यादौ विभक्तौ [परतः] 'तिसृ चतसृ' इत्येतावादेशौ यथासंख्यं भवतः। तिस्रस्तिष्ठन्ति, तिस्रः पश्य; चतस्रस्तिष्ठन्ति, चतस्रः पश्य; तिसृभिः, चतसृभिः; तिसृभ्यः, चतसृभ्यः; तिसृणाम्, चतसृणाम्; तिसृषु, चतसृषु। प्रियास्तिस्रोऽस्येति प्रियतिसा पुरुषः, प्रियतिस्रौ, प्रियतिस्रः; एवम्– प्रियचतसा, प्रियचतस्रौ, प्रियचतस्रः; प्रियास्तिस्रोऽस्य कुलस्य प्रियतिसृ कुलम्, प्रियतिसृणी, प्रियतिसृणि; एवम्– प्रियचसृणी, प्रियचतसृणि; एषु विभक्त्याश्रयत्वेन बहिरङ्गलक्षणस्य तिसृ-चतस्रादेशस्यासिद्धत्वात् समासान्तः कज् न भवति, परत्वाच्च तिस्रादेशे कृते पश्चान्नागमः। स्यादाविति किम्? प्रियत्रिकः, प्रियचतुष्कः, तिसृणां प्रियस्त्रिप्रियः, चतुष्प्रियः, प्रियत्रि कुलम्, प्रियचतुष्कुलम्। कथं तर्हि प्रियतिसृ कुलम्? "नामिनो लुग् वा" [१. ४. ६१.] इति लुकि सति स्थानिवद्भावाद् भविष्यति, यथा–हे त्रपो!। स्त्रियामित्येव–त्रयः, चत्वारः; त्रीणि, चत्वारि; प्रियास्त्रयः त्रीणि वा यस्याः सा प्रियत्रिः, प्रियत्र्यौ, प्रियत्रयः; एवम्–प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः; अत्र त्रि-चतुरावस्त्रियाम्, समास एव तु स्त्रियामित्यादेशौ न भवतः। कथं तिसृका नाम ग्रामः? संज्ञाशब्दोऽयम् ॥ १ ॥

श० न्या०–अर्हम्। त्रि-चतु०। स्त्रियामिति–पूर्वसूत्रादिति शेषः, तच्च श्रुतत्वात् 'त्रि-चतुरः' इत्यस्यैव विशेषणम्, यतस्त्रि-चतु-र्युष्मदस्मद्ग्रहणेष्वर्थग्रहणमेषामेव विशेषणम्–'स्त्रियाम्, द्वयोः, एकस्मिन्' इति यथा निर्दिष्टास्ते श्रूयमाणानामेव शब्दानां विशेषणानि, न तु समुदायस्येत्याह–**'त्रि चतुर्' इत्येतयोरि**त्यादि। प्राप्तविशेषणसम्बन्धैस्त्रि-चतुरादिभिश्च स्याद्याक्षिप्तं नाम विशेष्यते, तेनात्र नामाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चेति केवलयोस्तदन्तस्य चादेशानां प्रवृत्तिः, ते च * निर्दिश्यमानस्यादेशा भवन्ति * इति त्रिशब्दादीनां भवन्तीति, ततश्च यद्यपि समासः पुंसि नपुंसके वा वर्तते [तथापि] त्रिचतुरौ स्त्रियाम् [इति] भवत्येव तदादेश इत्युदाहरति– **प्रियास्तिस्रोऽस्ये**त्यादि–अत्र * अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते * इत्यादेशात् प्रथममेव समासावयवस्य स्यादेः "ऐकार्थ्ये" [३. २. ८.] इति लुपि 'प्रियत्रि, प्रियचतुर्' इति स्थिताभ्यां परत्वमात्रविज्ञानादन्यपदार्थसम्बन्धिन्यपि स्यादौ "त्रि-चतुर०" [२. १. १.] इति तिस्राद्यादेशे "ऋदुशनस्-पुरुदंशो०" [१. ४. ८४.] इति सेर्डादेशे "ऋतो रः०" [२. १. २.] इति यथासम्भवं रत्वे च 'प्रियतिसा' इत्यादि। अथेह "ऋन्नित्यदितः" [७. ३. १७१.] इति तिस्राद्यादेशे च बहुव्रीहेरुच्यमानः समासान्तः कच् कस्मान्न भवतीत्यत आह– **एष्वि**त्यादि-समासान्तस्तावत् समासाद् भवन् समासादेव भवति, न विभक्तिमपेक्षत इत्यन्तरङ्गः, आदेशः पुनर्विभक्तिमपेक्षमाणो बहिरङ्गः, तत्रान्तरङ्गे कचि कर्तव्ये बहिरङ्गस्तिसृ-चतस्रादेशोऽसिद्ध इति ऋदन्तत्वाभावाद् ऋल्लक्षणा [ऋल्लक्षणः] कच् न भवतीत्यर्थः। अथ प्रियतिसृणी इत्यादिषु स्यादौ स्वरे

* कृताकृतप्रसङ्गित्वेन * नित्यत्वाद् "अनाम्स्वरे नोऽन्तः" [१. ४. ६४.] इति पूर्वं नागमे कृते पश्चात् तेन व्यवधानात् कथं तिस्रादेश इति ? नैवम्-तिस्रादेशे कृते *सन्निपात* परिभाषया नागमस्याप्रवृत्तेः; शब्दान्तरप्रवृत्तेर्वा अनित्यत्वाद् द्वयोरन्यत्र सावकाशत्वात् परत्वात् पूर्वं तिस्रादेशे कृत एवेत्याह-**परत्वादि**त्यादि-किञ्च, "ऋतो रः स्वरेऽनि" [२. १. २.] इत्यत्रानीति वचनमनर्थकं स्यात्, स्वरादौ पूर्वं नकारे तिस्राद्यादेशाभावाद् रत्वप्रसङ्ग एव नास्तीत्यनीति वचनानागमादेः पूर्वमपि तिस्रादेश इति विज्ञायत इति । प्रियास्तिस्रो यस्येत्यादिविग्रहे * अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते * इति "ऐकार्थ्ये" [३. २. ८.] इति समासावयवविभक्तेर्लुपि "शेषाद् वा" [७. ३. १७५.] इति कचि तेन स्यादेर्व्यवधानात् तिस्राद्यादेशाभावे-**प्रियत्रिक** इत्यादि । **कथमि**ति-प्रियतिसृ कुलमित्यादौ प्रियत्रिशब्दाद् "अनतो लुप्" [१. ४. ५९] इति अन्तरङ्गमपि तिस्रादेशं बाधित्वा लुपि कृतायां "लुप्यय्वृल्लेनत्" [७. ४. ११२.] इति स्थानिवद्भावप्रतिषेधात् स्यादेरभावात् कथं तिस्रादेश इति प्रश्नार्थः । समाधत्ते-"**नामिनः०**" इत्यादि-लुक्पक्षे "लुप्यय्वृल्लेनत्" [७. ४. ११२.] इत्यनुपस्थानादित्यर्थः । यदा तु समास एव स्त्रियां वर्तते, त्रि-चतुरी तु पुं-नपुंसकयोस्तदादेशाभावः, स्त्रियामिति विशेषणस्य त्रि-चतुरोरेव निर्णीतत्वादित्याह-**अत्रे**त्यादि । **कथमि**ति-त्रिशब्दात् संज्ञायां के आपि बहुवचने च स्यादेर्व्यवधानात् कथं तिसृभाव इति प्रष्टुरभिप्रायः । समाधत्ते-**संज्ञाशब्दोऽयमि**ति-स्त्रीलिङ्गं बहुवचनविषयं चेदं नामोच्यते, नात्र त्रिशब्दार्थोऽस्तीत्य[व्युत्प]न्नमेवेदम्, पृषोदरादिदर्शनाद् वाऽत्र त्रिशब्दस्य तिसृभावः ॥ २. १. १. ॥

---

**न्या० स०—त्रि-चतुर** इति । **स्त्रियामित्यनुवर्तत** इति-पूर्वसूत्रादिति शेषः, तच्च श्रुतत्वात् 'त्रि-चतुरः' इत्यस्यैव विशेषणम् । '**तिस्रः**' इत्यादौ विधानसामर्थ्यान्न णत्वम् । **परत्वादि**ति-ननु*कृताकृतप्रसङ्गित्वेन नित्यत्वात्* *आदेशादागमः* इति च न्यायात् पूर्वं नागम एव प्राप्नोति, नैवम्-शब्दान्तरप्राप्त्या नागमोऽप्यनित्यः, यद्वा परत्वादिति कोऽर्थः ? प्रकृष्टत्वादित्यर्थः, प्रकृष्टत्वं च * आगमात् सर्वादेशः * इति न्यायात्; किञ्च, "ऋतो रः स्वरेऽनि" [२. १. २.] इत्यत्रानीति वचनमनर्थकं स्यात्, स्वरादौ पूर्वं नकारे तिस्राद्यादेशाभावाद् रत्वप्रसङ्ग एव नास्तीति अनीति वचनात् पूर्वं नागमादेस्तिस्राद्यादेश इति **प्रियतिसृ कुलमि**ति । "नामिनो लुग् वा" [१. ४. ६१.] इत्यत्र चतुर्शब्दस्यापि लुग्विकल्पमिच्छन्त्येके, तन्मते- प्रियचतस कुलम्, प्रियचतुर्वा कुलमिति । **प्रियत्रिरि**त्यादि- स्त्रीलिङ्गविवक्षायामपि समासाद् ङीप्रत्यये प्रियत्र्येव, "शेषाद् वा" [७. ३. १७५.] इति कचि प्रियत्रिकैव, आदेशो न भवति, प्रथमं ङीप्रत्यये पश्चाद् बहुव्रीहिसमासे "ऋन्नित्यदितः" [७. ३. १७१.] इति कचेव, यदा तु केवलात् त्रिशब्दाद् ङीस्तदा तु एकदेशविकृतत्वेनादेशो भवति । **कथं तिसृका नामे**ति- त्रिशब्दात् संज्ञायां के आपि बहुवचने च स्यादेर्व्यवधानात् कथं तिसृभाव इति प्रष्टुः संशयः । समाधत्ते-**स्त्रीलिङ्गे बहुवचनविषयः संज्ञाशब्दोऽयमि**ति-तस्यन्ति परबलान्यासु "निष्क-तुरुष्क०" [उणा० २६] इति निपात्यते ॥ १ ॥

---

# ऋतो रः स्वरेऽनि । २ । १ । २ ॥

**त० प्र०—**तिसृ-चतसृसम्बन्धिन ऋकारस्य स्थाने तत्सम्बन्धिन्यन्यसम्बन्धिनि वा स्वरादौ स्यादौ परतो रादेशो भवति, अनि- नकारविषयादन्यत्र; समानदीर्घत्वा-ऽर्डुरामपवादः । तिस्रः, चतस्रस्तिष्ठन्ति पश्य वा; प्रियतिस्रौ, प्रियचतस्रौ; प्रियतिस्रम्, प्रियचतस्रम्; प्रियतिस्रः प्रियचतस्र आगतं स्वं वा; प्रियतिस्रि प्रियचतस्रि निधेहि । **स्वर इ**ति किम् ? तिसृभिः, चतसृभिः । **अनी**ति किम् ? प्रियतिसृणी, प्रियचतसृणी; प्रियतिसृणि, पियचतसृणि; तिसृणाम्, चतसृणाम् । **ऋत इ**ति तिसृ-चतस्रोः प्रतिपत्त्यर्थम्, इतरथा हि तदपवादस्त्रिचतुरोरेवायमादेशो विज्ञायेत । अन्ये तूपसर्जनयोस्तिसृ-चतसृशब्दयोर्ङौ घुटि चानि स्वरादौ रत्वविकल्पमिच्छन्ति, तन्मते-प्रियतिस्रि प्रियतिसरि; प्रियचतस्रि, प्रियचतसरि; प्रियतिस्रौ, प्रियतिसरौ; प्रियचतस्रौ, प्रियचतसरौ; प्रियतिस्रः, प्रियतिसरः; प्रियचतस्रः, प्रियचतसरः; प्रियतिस्रम्, प्रियतिसरम्; प्रियचतस्रम्, प्रियचतसरम्; प्रधानस्य तु नित्यमेव रत्वम्-तिस्रः, परमतिस्रः; चतस्रः, परमचतस्रः । अपरे त्वनि स्वरे सर्वत्र विकल्पं जश्-शसोस्तु नित्यं मन्यन्ते, तन्मते-प्रियतिस्रौ, प्रियतिसरौ; प्रियचतस्रौ, प्रियचतसरौ; प्रियतिस्रः, प्रियतिसुः, प्रियचतस्रः, प्रियचतसुः आगतं स्वं वा, इत्यादि । जस्-शसोस्तु-तिस्रः, चतस्रः, परमतिस्रः, परमचतस्रः, प्रियतिस्रः, प्रियचतस्रस्तिष्ठन्ति पश्य वेति नित्यमेव रत्वम् ॥ २ ॥

---

**श० न्या०**—ऋतो र० । **र** इति विधेयम्, **स्वर** इति निमित्तम्, **अनी**ति च तस्य विशेषणम्, **ऋत** इति षष्ठ्यन्तेन स्थानी ऋकारः प्रतिनिर्दिश्यते, स च त्रि-चतुर इत्यनेन विशेष्यते, तत्र त्रि-चतुरोर्ऋकाराभावात् तदादेशप्रतिपत्तिरित्याह-**तिसृ-चतसृशब्दसम्बन्धिन** इत्यादि । अथ स्वरादौ तिस्राद्यादेशे परत्वान्नागमादेशाच्चानेन ( देशात् प्रागेवानेन ) रत्व-

प्रवृत्तेः क्वानीत्युपयुज्यते ? उच्यते-अनीति विषयसप्तमीयम्, तेन नकारविषये रत्वस्य व्यावृत्तिरित्याह—**नकारविषयादन्यत्र** । स्वरादौ तिस्राद्यादेशे "इवर्णादेः०" [१. २. २१.] इति रत्वं बाधित्वा परत्वात् "शसोऽता सश्च नः पुंसि" [१. ४. ४९.] इति समानदीर्घत्वे "अर्चौ च" [१. ४. ३९.] इत्यरि "ऋतो डुर्" [१. ४. ३७.] इति डुरि च प्राप्ते रत्वं विधीयत इति तेषामपवादो भवतीत्याह—**समाने**त्यादि । ननु ऋत इति किमर्थम् ? यावता पूर्वसूत्रात् 'तिसृ-चतसृ' इत्येतयोरनुवृत्तौ तयोश्च षष्ठ्यन्ततया विपरिणामेन कार्यप्रतिपत्तौ "षष्ठ्या अन्तस्य" [७. ४. १०६.] इति तदन्तस्य विधिर्भवन् ऋकारस्यैव भविष्यतीत्याह—**ऋत** इत्यादि- अयमर्थः-"तिसृ-चतसृ०" इति प्राग् विधेयतया प्रतिपन्नम्, न कार्ययोगितया, कार्ययोगे तु त्रि-चतुर इत्यस्यैव कार्ययोगितया प्रतिपन्नस्य कार्ययोगार्थेहानुवृत्तिर्विज्ञायेत, तत्रायं विधिस्तिसृ-चतस्रोः प्राप्तयोस्त्रि-चतुरोरारभ्यमाणस्तदपवादः स्यात्, न तदन्तस्य, ऋत इत्युच्यमाने तु तिसृ-चतस्रावन्तरेण त्रि-चतुरोर्ऋकाराभावात् तयोरेवायमादेशो विज्ञायत इति तदपवादो रेफो मा भूदिति ऋकार[स्य] इत्युच्यते । तिस्राद्यादेशस्य ङौ घुटि चानि स्वरादौ शकटसूनुर्विकल्पमिच्छतीत्याह-**अन्ये त्वि**त्यादि । ललितस्वभावस्तु प्रधानेऽप्रधाने च जस्-शसोरेव नित्यं मन्यते, अन्यत्र तु विकल्पमित्याह—**अपरे त्विति** । वार्तिककारस्तु जस्-शसोरेव रेफमिति ॥ २. १. २. ॥

**न्या० स०—ऋतो र** इत्यादि । **अनी**ति नकारः प्रत्ययरूप आगमरूपो वा । **समानदीर्घत्वे**ति-"शसोऽता०" [१. ४. ४९.] इति "अर्चौ च" [१. ४. ३९.] इति "ऋतो डुर्" [१. ४. ३७.] इति प्राप्तानाम् । **तदपवाद** इति-व्यञ्जनादौ स्यादौ पूर्वयोगः सावकाशः, स्वरादौ तु अयमेव स्यात् । **अन्ये तु** इति-शाकटायनादयः । **अपरे तु** इति-विश्रान्तविद्याधरादयः ॥ २ ॥

## जराया जरस् वा ।२।१।३॥

**त० प्र०—जराशब्दस्य स्वसम्बन्धिन्यन्यसम्बन्धिनि वा स्वरादौ स्यादौ परतो 'जरस्' इत्ययमादेशो वा भवति । जरसौ, जरसः, जरसम्, जरसौ, जरसः, जरसा, जरसे, जरसः, जरसः, जरसोः, जरसाम्, जरसि, जरसोः; पक्षे-जरे, जराः, जराम्, जरे, जराः; जरया, जरायै, जरायाः २, जरयोः २, जराणाम्, जरायाम्; ❀ एकदेशविकृतस्यानन्यत्वात् ❀ अतिजरसौ, अतिजरौ २; अतिजरसः, अतिजराः; अतिजरसम्, अतिजरम्; अतिजरसः, अतिजरान्; अतिजरसा, अतिजरेण; अतिजरसैः, अतिजरैः; अतिजरसे, अतिजराय; अतिजरसः, अतिजरात्; अतिजरसः, अतिजरस्य; अतिजरसोः, अतिजरयोः २; अतिजरसाम्, अतिजराणाम्; अतिजरसि, अतिजरे; नपुंसके स्यमोरम्भावे-अतिजरसम्, अतिजरम्, "जरसो वा" [१. ४. ६०.] इति लुपि-अतिजरः; अतिजरसी, अतिजरे तिष्ठतः पश्य वा; शौ परत्वाज्जरसादेशस्ततो नाऽऽगमः- अतिजरांसि, अतिजराणि तिष्ठन्ति पश्य वा । स्त्रियां तु विभक्तेरापा व्यवधानान्न भवति । स्वर इत्येव- जरा, जराभ्याम्, जराभिः । स्यादावित्येव-जराग्रम्, जारः, जारेयः ॥ ३ ॥**

**श० न्या०—जराया०** । "जृष् झृष्च् जरसि" इत्यतः "षितोऽङ्" [५. ३. १०७.] इत्यङि "ऋवर्णदृशोऽङि" [४. ३. ७.] इति गुणे "आत्" [२. ४. १८.] इत्यापि जरा, ततः स्यादौ स्वरादावनेकवर्णत्वात् सर्वस्य पक्षे जरसादेशः । अथ जरामतिक्रान्तावित्यादिविग्रहे "गोश्चान्ते०" [२. ४. ९६.] इति ह्रस्वत्वे जराशब्दस्याभावात् कथं जरसादेश इत्याह—**एकदेशविकृतस्ये**त्यादि । ननु 'जरसा दन्ताः शीर्यन्ते, जरसे चापरि(रे) दद्युः' इति तृतीया-चतुर्थ्येकवचनयोरेव बाहुल्येन जरसादेशस्य प्रयोगदर्शनात् कथं सर्वत्रोदाहृतम् ? उच्यते-स्वरादौ सामान्येन विधानाद् विशिष्टस्वरग्रहणे प्रमाणाभावादिति । अत्र च स्याद्याक्षिप्तनामाधिकारे तस्य च तदन्तस्य च ग्रहणाद् यथा केवलस्य भवति तथा तदन्तस्यापि, तत्र यदा नपुंसकं जराशब्दान्तनामाभिधेयम्-"अतिजरांसि ब्राह्मणकुलानि' इति तदा नपुंसकाश्रये ह्रस्वत्वे कृते * एकदेशविकृतस्यानन्यत्वेन * जराशब्दान्तं नाम भवति, ततो जस्-शसोः श्यादेशे कृते जरसादेशश्च प्राप्नोति स्वरान्तलक्षणो नागमश्च, तत्र 'जरसा, कुण्डानि' इत्यत्र द्वयोः सावकाशत्वात् परत्वाज्जरसादेश एवेत्याह—**शौ परत्वादि**त्यादि । ननु पूर्वमपि नागमे कृते सनागमस्यादेशे पुनर्धुडन्तलक्षणे नागमे च रूपस्य सिद्धत्वात् किं परत्वचिन्तयेति ? उच्यते-यदि पूर्वं नागमः स्यात्, स च पूर्वप्रकृतिभक्तः प्रकृतिमेव न व्यवदध्यात्, अवयवस्य तु जरशब्दस्य व्यवधायक इति * निर्दिश्यमानस्यादेशा भवन्ति * इति नामाधिकारे सत्यपि तदुत्तरपदग्रहणे जरान्तायाः प्रकृतेर्योऽवयवो जरशब्दस्तस्य विभक्तौ जरसादेशो विधीयमानो न प्राप्नोति, अथापि [यदि स्यात् तदा] सकारात् परस्य नागमस्य श्रवणं स्यात्, तस्मात् परत्वात् पूर्वं जरसादेश एवैष्टव्यः, तत्र कृते धुडन्तलक्षणो

नागमः । अत एवातिजराः स्त्रिय इत्यादौ " गोश्चान्ते० " [२. ४. ९६.] इति ह्रस्वत्वे " आत् " [ २. ४. १८. ] इत्यापि तेन विभक्तिस्वरस्य व्यवधानाज्जरसादेशो न भवतीत्याह-**स्त्रियां त्वित्यादि** । [ **जराग्रमिति-** ] जराया अग्रमिति समासः, असमासो वा । जराया अयं " तस्येदम् " [ ६. ३. १६०. ] इत्यणि-**जारः** । जराया अपत्यमिति " द्विस्वरादनद्याः " [ ६. १. ७१. ] इत्येयणि-**जारेयः**, अत्र स्यादावित्यनुवर्तमानान्न भवति ॥ २. १. ३. ॥

**न्या० स०**—जराया इत्यादि । 'जरसा, कुण्डानि' इत्यत्र द्वयोः सावकाशत्वात् परत्वाज्जरसादेश एवेत्याह-**शौ परत्वादिति** । ननु पूर्वमपि नागमे कृते सनागमस्यादेशे पुनर्नुडन्तलक्षणनागमे च रूपस्य सिद्धत्वात् किं परत्वचिन्तयेति ? उच्यते-यदि पूर्वं नागमः स्यात् स च पूर्वभक्तः प्रकृतिमेवानन्यवद्विदध्यात्, अवयवस्य तु जरशब्दस्य विभक्तौ जरसादेशो विधीयमानो न प्राप्नोति; अथवा पूर्वं नागमस्ततः * आगमोऽनुपघाती * इत्यनेन न्यायेन जरसादेशे कृते सकारात् परस्य नागमस्य श्रवणं स्यात्, यथा-'अतिजरसन्' इति तस्मात् परत्वाज्जरसादेश इति । **स्त्रियां त्विति**—'अतिजरया' इत्यत्र हि अतिजरशब्दात् प्रवृत्तेनाप्प्रत्ययेन जराशब्दो व्यवधीयते । जारः, जारेयः, जराया अयम् " तस्येदम् " [ ६. ३. १०४. ] इत्यण्, जराया अपत्यम् " द्विस्वरादनद्या० " [ ६. १. ७१. ] इति एयण् ॥ ३ ॥

## अपोऽद् भे ।२।१।४॥

**त० प्र०-'अप्' इत्येतस्य स्वसम्बन्धिन्यन्यसम्बन्धिनि वा भकारादौ स्यादौ परतः 'अद्' इत्ययमादेशो भवति । अद्भिः, अद्भ्यः, स्वद्भ्याम्, अत्यद्भ्याम् । भ इति किम् ? आपस्तिष्ठन्ति, अपः पश्य, अपाम्, अप्सु । स्यादावित्येव-अब्भक्षः ॥ ४ ॥**

**श० न्या०-अपो०** । अत्र नामाधिकारात् तस्य च तदन्तस्य च ग्रहणेऽप्येकवर्णत्वात् " षष्ठ्या अन्तस्य " [ ७. ४. १०६. ] इति पकारस्यायं दकार आदेशः, अथवा " अद् " इत्ययमादेशः, तत्रापि प्रागप्यकारस्य विद्यमानत्वादनुवादकत्वाद् दकारमात्रस्यात्रादेशत्वम्, अथवा समुदाय उपादेयस्तदर्थमवयवोपादानम्, तत्र यदर्थः प्रयासः स एव साक्षादुपादीयत इति विद्यमानस्याप्यकारस्य पुनरुपादानम् । अप्शब्दस्य केवलस्य बह्वर्थविषयत्वाद् बहुवचनेनोदाहरति-**अद्भिरित्यादि** । शोभना अतिशयिता वा आपो ययोरिति विग्रहे " पूजास्वतेः प्राक् टात् " [ ७. ३. ७१. ] इति समासान्तप्रतिषेधे 'स्वप्, अत्यप्' इति स्थिताद् भ्यामि सत्यपि तदन्तग्रहणे * निर्दिश्यमानस्यादेशा भवन्ति * इति अप एवादेशो-**स्वद्भ्याम्, अत्यद्भ्याम्** । स्यादौ भकारस्याकारान्तस्याविद्यमानत्वाद् भ इत्यकार उच्चारणार्थः ॥ २. १. ४. ॥

**न्या० स०**—**अपोऽद् भे** इति । **स्वद्भ्याम्**-शोभना अतिशयिता वा आपो ययोरिति विग्रहे " पूजास्वतेः प्राक् टात् " [ ७. ३. ७२. ] इति समासान्तप्रतिषेधे भ्यामि सत्यपि तदन्तग्रहणे * निर्दिश्यमानस्यादेशा भवन्ति * इत्यप एवादेशः । **अब्भक्ष** इति-" शीलि-कामि० " [ ५. १. ७३. ] इति णः ॥ ४ ॥

## आ रायो व्यञ्जने ।२।१।५॥

**त० प्र०—स्वसम्बन्धिन्यन्यसम्बन्धिनि वा व्यञ्जनादौ स्यादौ परे रैशब्दस्याऽऽकारोऽन्तादेशो भवति । राः, हे राः !, अतिराः, राभ्याम् ३, राभिः, राभ्यः ३, रासु; ※ एकदेशविकृतस्यानन्यत्वाद् ※ अतिराभ्यां कुलाभ्याम्, अतिरासु कुलेषु । व्यञ्जन इति किम् ? रायौ, रायः । स्यादावित्येव-रैसूत्रम्, रैमयम् । स्मीत्येव सिद्धे व्यञ्जनग्रहणमुत्तरार्थम् ॥ ५ ॥**

**श० न्या०-आ रायो०** । आकारस्यैकवर्णत्वात् " षष्ठ्या अन्तस्य " [ ७. ४. १०६. ] इति रैशब्दान्तस्यैव भवतीत्याह-**आकारोऽन्तादेश** इति । अथ सत्यपि तदन्तग्रहणे रैशब्दान्तस्य नपुंसकवृत्तौ " क्लीबे " [ २. ४. ९३. ] इति ह्रस्वत्वे ततो भ्यामादौ रैशब्दस्योच्यमानमात्वं रैशब्दाभावान्न स्यादिष्यते चेत्याह-**एकदेशविकृतेत्यादि** । अथ सकार-भकारावन्तरेण रैशब्दात् स्यादेरन्यस्य व्यञ्जनस्यासम्भवाल्लाघवार्थं च स्मीत्येवोच्यतां किं व्यञ्जनग्रहणेनेत्याह-**स्मीत्यादि**-यद्येवं तत्रैव क्रियतां किमत्रानेन संदेहास्पदेन ? नैवम्-अप्रधानत्वाद् रैशब्दादामो नामादेशोऽप्यस्ति तत्रापि यदि प्रयोगस्तदा तस्मिन्नपि भवितव्यमित्येतदर्थमिहोपादानम् ॥ २. १. ५. ॥

**न्या० स०**—**आ रायो** इत्यादि । आकारस्यैकवर्णत्वात् " षष्ठ्या अन्त्यस्य " [ ७. ४. १०६. ] इति रैशब्दान्तस्यैव भवति । **स्मीत्येव सिद्धे** इति—आमि तु रायमतिक्रान्तानि यानि तेषां " क्लीबे " [ २. ४. ९७. ] इत्यनेन ह्रस्वत्वे सति * सन्निपातलक्षण० * इत्यादिन्यायाद् इकाररूपं ह्रस्वमाश्रित्य समुत्पन्नो नाम् तद्विघाताय नोत्सहते, तर्हि " दीर्घो नामि० " [ १. ४. ४७. ] इत्यादिना दीर्घोऽपि न प्राप्नोति, सत्यम्--तदा अनित्यत्वादस्य न्यायस्य भवत्येव दीर्घः, यतो न्याया हि स्थविरयष्टिन्यायेन प्रवर्तन्ते । **उत्तरार्थमिति**-यद्येवं तत्रैव क्रियताम्, किमत्रानेन सन्देहास्पदेन ?

नैवम्-केचित् * सन्निपात० * न्यायमनित्यमाश्रित्य 'अतिराणाम्' इत्याकारमपीच्छन्ति, तन्मतसंग्रहार्थं व्यञ्जनग्रहणमिहार्थमपि, तेन स्वमतेऽपि सम्मतम् ॥ ५ ॥

## युष्मदस्मदोः । २ । १ । ६ ॥

**त० प्र०—'युष्मद् अस्मद्' इत्येतयोः शब्दयोः स्वसम्बन्धिन्यन्यसम्बन्धिनि वा व्यञ्जनादौ स्यादौ परे आकारोऽन्तादेशो भवति । त्वाम्, माम्; अतित्वाम्, अतिमाम्; युवाम्, आवाम्; अतियुवाम्, अत्यावाम्; युष्मान्, अस्मान्; अतियुष्मान्, अत्यस्मान्; युवाभ्याम्, आवाभ्याम्; अतियुवाभ्याम्, अत्यावाभ्याम्; युष्माभिः, अस्माभिः; अतियुष्माभिः, अत्यस्माभिः; युष्मासु, अस्मासु; अतियुष्मासु, अत्यस्मासु । युष्मयतेरस्मयतेश्च क्विप्– युष्म्, अस्म्; अनयोरमौभ्यांसु परत्वात् त्व-माद्यादेशे कृते पश्चादात्वम्– त्वाम्, माम्; युवाम्, आवाम्; युवाभ्याम्, आवाभ्याम् । व्यञ्जन इत्येव– युष्मभ्यम्, अस्मभ्यम् ॥ ६ ॥**

**श० न्या०—**युष्मद्० । अविवक्षितार्थयोरप्रायोगिकयोरेतावनुकरणे इति त्यदादिकार्यं शेषो युष्मदस्मदादिकार्यं च यत्वादि न प्रवर्तते । 'युष्मदस्मद्'शब्दादमः परत्वाद् "अमौ मः" [२. १. १६.] इति मादेशे "त्वमौ प्रत्ययोत्तरपदे०" [२. १. ११.] इति त्व-मादेशे "युष्मदस्मदोः" [२. १. ६.] इत्यन्तस्याऽऽत्वे "समानानाम्०" [१. २. १.] इति दीर्घत्वे **त्वाम्, माम्,** एवं नामाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणात् तदन्तप्रतिपत्तौ-**अतित्वाम्, अतिमाम्** । **युवाम्, आवाम्,** इति-औकारयोः "अमौ मः" [२. १. १६.] इति मादेशे "मन्तस्य०" [२. १. १०.] इति युवावादेशे पूर्ववद् दीर्घादि । त्वामाचष्टे 'णिज् बहुलं नाम्नः०' [३. ४. ४२.] इति णिचि "त्र्यन्त्यस्वरादेः" [७. ४. ४३.] इत्यन्तलोपे क्विपि अमौभ्यांसु परत्वादम औकारयोश्च मादेशे व्यञ्जनादित्वाश्रितत्वात् प्रकृतिमकारस्याऽऽत्वे मान्तत्वाभावात् त्व-माद्यादेशाभावे 'त्वाम्, माम्, युवाम्, आवाम्' इत्यादयो न सिद्ध्येयुरिष्यन्ते चेत्याह-**अनयोरि**त्यादि-अयमर्थः–द्वयोरन्यत्र सावकाशत्वाच्छब्दान्तरप्रवृत्त्या चाऽनित्यत्वात् पूर्वं त्वमाद्यादेश इति ॥ २. १. ६. ॥

**न्या० स०—**युष्मदस्मदोरिति--अत्राविवक्षितार्थयोर्युष्मदस्मदोरेतावनुकरणे इति त्यदादिकार्यमेकशेषः "टाङ्योसि०" [२. १. ७.] इत्यनेन युष्मदस्मदादिकार्यं च यत्वादि न प्रवर्तते । **अतित्वामि**ति नामाधिकारात् तदन्तप्रतिपत्तौ तदन्तमुदाहरति । **युष्मयते**रित्यादि–युवां युष्मान् वेति विग्रहः, न तु त्वां मामिति णिचि सति त्व-मौ स्याताम् । **अमौभ्यांस्विति**–अयमर्थः–द्वयोरन्यत्र सावकाशत्वात् शब्दान्तरप्राप्त्या चानित्यत्वात् परत्वात् पूर्वं त्व-माद्यादेश इति, प्रथममात्वे तु सति मन्तत्वाभावात् त्व-माद्यो न स्युः, णिज्वाक्यावस्थायि यद् बहुवचनं [तत्] क्विब्वृत्तौ गौणं बभूवेति त्वमौ भवतः । **व्यञ्जन इत्येवे**ति–ननु व्यञ्जनग्रहणं विनापि 'युष्मभ्यम्' इत्यादयः प्रयोगा अनेनात्वे कृते "लुगातोऽनापः" [२. १. १०७.] इत्याकारलोपे सिध्यन्ति, किं व्यञ्जनाधिकारेण ? सत्यम्-- सूत्रस्य व्यक्त्या प्रवर्तनाद् आत्वे कृते लुबादिकं न प्रवर्तेत इति व्यञ्जनग्रहणम्, तथा व्यञ्जनाभावे 'युष्माकम्, युषाकम्,' इत्यादावनेन सूत्रेण आकार एव स्यात्, न तु "मोर्वा" [२. १. ९.] इति मकारलोपः । **युष्मभ्यमि**ति– ननु "लुगस्य०" [२. १. ११३.] इत्यल्लोपे "मोर्वा" [२. १. ९.] कथं न ? उच्यते– स्वरस्य स्थानिवत्त्वात्, तर्हि युष्म्शब्दाद् भ्यसोऽभ्यमादेशे लुग् न प्राप्नोति ? नैवम्– प्रत्यासत्त्या यस्मिन् प्रत्यये लुग् भवति तस्मिन्नेव प्रत्यये पूर्वस्य यदि कार्यं भवति तदा स्थानिवत्त्वम्, अत्र तु प्रत्ययान्तरे लुक्, अतः स्थानिवत्त्वाभावः, "मोर्वा" [२. १. ९.] इति सूत्रस्यानवकाशत्वाद् वा स्थानिवत्त्वाभावः ॥ ६ ॥

## टाङ्योसि यः । २ । १ । ७ ॥

**त० प्र०—'युष्मद् अस्मद्' इत्येतयोः स्वसम्बन्धिष्वन्यसम्बन्धिषु वा 'टा ङि ओस्' इत्येतेषु स्यादिषु परेषु यकारोऽन्तादेशो भवति । (टा–) त्वया, मया; अतित्वया, अतिमया; अतियुवया, अत्यावया; अतियुष्मया, अत्यस्मया; (ङि–) त्वयि, मयि; अतित्वयि, अतिमयि; प्रिययुवयि, प्रियावयि; प्रिययुष्मयि, प्रियास्मयि; (ओस्–) युवयोः, आवयोः; अतियुवयोः, अत्यावयोः; अतित्वयोः, अतिमयोः; अतियुष्मयोः, अत्यस्मयोः । टाङ्योसीति किम् ? त्वत्, मत् । लुगपवादौ योगौ ॥ ७ ॥**

**श० न्या०—**टाङ्योसि० । अत्र समाहारद्वन्द्वात् सप्तमी । **त्वये**त्यादि–अत्र 'युष्मदस्मद्'शब्दाट्टादौ परत्वात् "त्वमौ प्रत्ययोत्तरपदे०" [२. १. ११.] इति मन्तस्य त्व-मादेशे "शेषे लुग्" [२. १. ८.] इत्यस्यापवादोऽनेन यत्वम् । **अतियुवये**त्यादि–अत्र युष्मदस्मदोर्द्विवचन-बहुवचनवृत्तित्वात् त्व-मादेशाभावः । अथ ओसि यत्ववचनं किमर्थम् ? ओस्ग्रहणमन्तरेणापि "शेषे लुग्" [२. १. ८.] इत्यन्तस्य लोपे "एद् बहुस्भोसि" [१. ४. ४.] इत्येत्वे यादेशे च युवयोरित्यादौ यत्वं सिद्ध्यति, सत्यम्–णिच्यन्त्यस्वरादिलोपेऽकारस्याभावाद् युव्योरित्यादौ यत्वं न सिद्ध्यतीति ओसि यत्ववचनम् ॥ २. १. ७. ॥

**न्या० स०–टाङयो०** इत्यादि–ओश्च ओश्च–ओसौ " स्यादावसंख्येयः " [ ३. १. ११९. ] इत्येकशेषः, ततः टाश्च ङिश्च ओसौ च इति कार्य्यम्, तेन षष्ठी-सप्तम्योरपि ग्रहः, अन्यथा ङिना साहचर्यात् सप्तम्या एव ओसो ग्रहणं स्यात्। नन्वत्र ओसग्रहणाभावेऽपि " शेषे लुक् " [ २. १. ८. ] इति दलोपे " एद् बहुस्भोसि " [ १. ४. ४. ] इत्यनेन एत्वे " एदैतोऽयाय् " [ १. २. २३. ] इत्ययादेशे च 'अतियुवयोः' इत्यादि सिध्यति, सत्यम्——णिच्यन्त्यस्वरादिलोपे युवा-ऽऽवादेशे " शेषे लुक् " [ २. १. ८. ] इत्यकारलोपे अकारस्याभावाद् 'युव्योः' इत्यादौ यत्वं न सिध्यतीति ओसग्रहणम् ॥ ७ ॥

## शेषे लुक् ।२।१।८॥

**त० प्र०—यस्मिन् प्रत्यये आत्व-यकारौ विहितौ ततोऽन्यः शेषः, तस्मिन् स्यादौ परे युष्मदस्मदोरन्तस्य लुग् भवति। युष्मभ्यम्, अस्मभ्यम्; अतियुष्मभ्यम्, अत्यस्मभ्यम्; त्वद्, मद्; अतित्वद्, अतिमद्; युष्मद्, अस्मद्; अतियुष्मद्, अत्यस्मद्; युष्माकम्, अस्माकम्; अतियुष्माकम्, अत्यस्माकम्। "अलिङ्गे युष्मदस्मदी" इति अन्तलोपे स्त्रियामाप् न भवति। शेष इति किम्? त्वयि, मयि ॥ ८ ॥**

**श० न्या०–शेषे०** । उपयुक्तादन्यः शेषः, कश्चोपयुक्तः? यस्मिन्नात्व-यकारौ स उपयुक्त इत्याह-**यस्मिन्नित्यादि**। युष्मदस्मद्भ्यां भ्यसि परत्वाद् " अभ्यं भ्यसः " [ २. १. १८. ] इत्यभ्यमादेशे " शेषे लुग् " [ २. १. ८. ] इत्यन्तस्य दकारस्य लोपे " लुगस्यादेत्यपदे " [ २. १. ११३. ] इत्यकारलोपे-**युष्मभ्यम्, अस्मभ्यम्। त्वद्,** इत्यादि-अत्र ङसो भ्यसश्च " ङसेश्चाद् " [ २. १. १९. ] इत्यदादेशे मपर्यन्तस्य एकत्वे वर्तमानस्य त्व-मादेशे च पूर्ववदन्तलोपादिः। अथ त्वं ब्राह्मणीत्यादिसामानाधिकरण्यात् सत्त्ववृत्तित्वात् संभाव्यमानलिङ्गयोगित्वात् 'युष्भ्यम्' इत्यादौ " षष्ठ्या अन्तस्य " [ ७. ४. १०६. ] इति दकारमात्रलोपेऽकारान्तत्वात् स्त्रियामाप् प्राप्नोति, ततश्चानिष्टरूपतापत्तिरतस्तन्निवृत्त्यर्थमन्तस्वरादेरिति वक्तव्यम्, न च वक्तव्यमित्याह–**अलिङ्गे** इत्यादि-न विद्यते स्त्रीत्वं पुंस्त्वं नपुंसकत्वं वा भेदे उपादेयमनयोरपरामृष्टलिङ्गभेदस्य लिङ्गसामान्ययुक्तस्यार्थ......॥ २. १. ८. ॥

**न्या० स०—शेषे** इत्यादि–शेषग्रहणाभावे टाङ्योसीत्यधिकार आगच्छेत्, न च वाच्यम्--टाङ्योसीत्यधिकारो यद्यभिप्रेतः स्यात् तदा " टाङ्योसि य-लुकौ " इत्येकमेव कुर्यात्, यतो 'लुग्' इति उत्तरार्थं पृथक्करणं कर्त्तव्यमेव, अन्यथा " टाङ्योसि य-लुकौ " इत्यधिकारोऽग्रेतनेऽपि सूत्रे गच्छेदित्याशङ्कायां शेषग्रहणम्। **स्त्रियामाप् न भवतीति**– केवलयोर्युष्मदस्मदोः " नन्ता सङ्ख्या० " [ लि० परलि० ४ ] इति लक्षणेनालिङ्गत्वभणनात्। अथ बहुव्रीहौ तत्पुरुषे च अन्यपदार्थादिप्रधानत्वेन युष्मदस्मदन्तस्य स्त्रीत्वे आप् कथं न भवति? उच्यते– * सन्निपात० * लक्षणन्यायाद् दलोपोऽभ्यमः सन्निधानव्यवधाने न निमित्तम्, तर्हि 'युष्मभ्यम्' इत्यादिषु केवलेष्वपि अत एव न्यायाद् आप् न भविष्यति, किं लिङ्गानुशासने तयोर्वर्जनेन? सत्यम्--न्यायानां * स्थविरयष्टि० * न्यायेन प्रवृत्तेर्विश्वासः कर्तुमशक्यः ॥ ८ ॥

## मोर्वा ।२।१।९॥

**त० प्र०—'युष्मद् अस्मद्' इत्येतयोर्मकारान्तयोः त्वसम्बन्धिन्यन्यसम्बन्धिनि वा शेषे स्यादौ परे मकारस्य लुग् वा भवति। युवां युष्मान् वा आवामस्मान् वाऽऽचष्टे– णिचि क्विपि तल्लुकि च–'युष्म्, अस्म्' इति मान्तत्वम्। युष्मभ्यम्, अस्मभ्यम्; युषभ्यम्, असभ्यम्; युष्मद्, युषद्; अस्मद्, असद्; युष्माकम्, युषाकम्; अस्माकम्, असाकम्। शेष इत्येव– युषान्, असान्; युषाभिः, असाभिः; युषासु, असासु; एषु पूर्वेण मकारस्याऽऽत्वम्। टाङ्योसि नित्यत्वात् त्व-मादिकार्येभ्यः प्रथममेव पूर्वेण मकारस्य यत्वे– युष्या, अस्या; युष्यि, अस्यि; युष्योः, अस्योः। अथ शब्दान्तरप्राप्त्या यत्वमप्यनित्यमित्याश्रीयते तदा परत्वात् पूर्वं त्व-माद्यादेशे अकारस्य यत्वे– त्व्या, म्या; त्व्यि, म्यि; युव्योः, आव्योः। अथ * सकृद्गते स्पर्द्धे यद्बाधितं तद्बाधितमेव * इत्याश्रीयते तदा यत्वाभावे–त्वेन, मेन; युवयोः, आवयोः; त्वे, मे; अत्रासर्वादिसम्बन्धित्वाद् ङेः स्मिन्नादेशो न भवति; अथ * क्विबर्थं प्रकृतिरेवाह * इति सर्वादिसम्बन्धित्वं तदा भवत्येव स्मिन्नादेशः; सि-जस्-ङे-ङस्प्रत्यये तु परत्वात् त्वमहमादय एव आदेशा भवन्ति– त्वम्, अहम्; यूयम्, वयम्; तुभ्यम्, मह्यम्; तव, मम। एके तु मन्तयोर्युष्मदस्मदोरादेशान् नेच्छन्ति ॥ ९ ॥**

**श० न्या०–मोर्वा** ।......नास्ति युष्मदस्मद्भ्यां सामानाधिकरण्यं तेन तत्रामन्तयोरपि युष्मस्मदोर्मपर्यन्तस्य रूपस्य कार्यं भविष्यतीति सामानाधिकरण्येनाह-**'युष्मद् अस्मद्' इत्येतयोर्मकारान्तयोरि**ति। तदन्तत्वं " विशेषणमन्तः " [ ७. ४. ११३. ] इति भवति, मन्तयोश्च युष्मदस्मदोः " षष्ठ्या अन्तस्य " [ ७. ४. १०६. ] इति न्यायाद् मकारस्यैव कार्यं भविष्यतीत्याह-**मकारस्य लुग् वेति**। यथा च मान्तत्वं तथोदाहरति-**युवामित्यादि**- अत्र प्रक्रियोक्ता, **युष्मभ्यम्,**

**युषभ्यम्**, इत्याद्युदाहरणम्, तत्र 'युष्म्, अस्म्' इति स्थिताच्चतुर्थीबहुवचनस्याऽभ्यमादेशे पक्षे मकारलोपे च-**युष्मभ्यम्, युषभ्यमि**त्यादि, तथा पञ्चम्या भ्यसो ङसेर्वा "ङसेश्चाद्" [२. १. १९.] इत्यदादेशे-**युष्मद्**, इत्यादि। शसि भिसि सुपि तु "शेषे" इति वचनात् पूर्वैणत्वमेवेत्याह-**पृष्वि**त्यादि। अथ 'युष्म्, अस्म्' इति स्थितस्य टायां ङावोसि च यत्वं च प्राप्नोति त्व-माद्यादेशश्च, ततो नित्यत्वान्मकारस्य यत्वे मपर्यन्तत्वाभावात् पश्चात् त्व-माद्यादेशाभाव इत्याह-**टाङ्योसी**त्यादि। अथ शब्दान्तरप्रवृत्त्या यत्वस्यानित्यत्वे द्वयोरन्यत्र सावकाशत्वात् परत्वात् त्व-माद्यादेशः, तदापि * पुनः प्रसङ्गविज्ञानाद् * अकारस्य यत्वं प्राप्नोतीत्याह-**अथे**त्यादि। अथ सामान्याश्रयत्वात् पुनः प्रसङ्गविज्ञानाभावात् * सकृद्गते० * इत्याश्रयणात् [णं] तदा यत्वाभाव एवेत्याह-**अथे**त्यादि। अथ 'त्वे, मे' इत्यत्राऽकारान्तत्वात् स्मिन्नादेशः कथं न भवतीत्याह-**अत्रे**त्यादि। **अथे**ति-दध्यादिशब्दस्य स्यमोर्लोपेऽपि तदर्थाभिधायिकत्ववत् प्रकृतेरेव क्विबर्थाभिधायिकत्वम्, अन्वय-व्यतिरेकाभ्यामवस्थितस्यैव तदर्थाभिधायकत्वात् सर्वादिसम्बन्धित्वाद् भवति स्मिन्नादेश इत्यर्थः। **सि-जस्-ङे-ङस्प्रत्ययेषु** त्विति-परत्वाद् द्वयोरन्यत्र सावकाशत्वेनेति शेषः। **ऐके त्वि**ति-तन्मते मकारस्य लुग् भवत्येव ॥ २. १. ९. ॥

**न्या० स०-मोर्वे**ति। ननु 'युवामाचष्टे' इति वाक्ये णिचि क्विपि स्यादौ युवादेशः कथं न भवति? सत्यम्-यदा युष्मदसदी द्वित्वे तदा स्यादिर्न, यदा तु स्यादिस्तदा न द्वित्वे इति न युवादेशः। **शब्दान्तरे**ति-प्राग् मकारस्य पश्चाद् अकारस्य यप्राप्तिः, अथवा पूर्वं युष्मिति प्रकृतेः पश्चात् त्वेति प्रकृतेः। **अत्रासर्वादिसम्बन्धित्वादि**ति-युष्मदस्मदी त्वमहंवाचके सर्वादिगणमध्ये दृश्येते, अत्र तु त्वां मां वक्ति यस्तद्वाचके इति न सर्वादिनी। **अथ क्विबर्थमि**ति- क्विबन्तयोर्युष्मदस्मदोर्योऽर्थस्तमर्थं क्विप्सहिता युष्मदस्मद्रूपा प्रकृतिरेवाह, नहि प्रकृतिं विना क्विप् भवति। **स्मिन्नादेश** इति- तेन **त्वस्मिन्, मस्मिन्**, * सन्निपात० * न्यायस्याऽनित्यत्वे- **त्वास्मिन्, मास्मिन्**, इत्यपि। **सि-जसि**ति-एतेन प्रक्रियागौरवं निरस्तं भवति, अन्यथा अनेन मकारलोपेऽपि सिप्रत्ययादिना सह त्वमहमाद्यादेशे सर्वेऽपि प्रयोगाः सिध्यन्ति ॥ ९ ॥

## मन्तस्य युवा-ऽऽवौ द्वयोः । २ । १ । १० ॥

**त० प्र०**- द्वित्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मन्तस्य मकारावसानस्यावयवस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा स्यादौ परे यथासंख्यं 'युव आव' इत्येतावादेशौ भवतः। **युवाम्, आवाम् २; युवाभ्याम्, आवाभ्याम् ३; युवयोः, आवयोः २;** अतिक्रान्तौ युवाम् [आवां वा]- **अतियुवाम्, अत्यावाम्**; अतिक्रान्तं युवाम् [आवां वा]- **अतियुवाम्, अत्यावां** पश्य; अतिक्रान्तौ युवामावां वा- **अतियुवाम्, अत्यावां** पश्य; **एवम्- अतियुवान्, अत्यावान्; अतियुवया, अत्यावया; अतियुवाभ्याम्, अत्यावाभ्याम्; अतियुवाभिः, अत्यावाभिः; अतियुवाभ्याम्, अत्यावाभ्याम्; अतियुवत्, अत्यावत्; अतियुवाभ्याम्. अत्यावाभ्यामा**गतम्; **अतियुवत्, अत्यावत्; अतियुवयोः. अत्यावयोः** स्वम्; **अतियुवाकम्, अत्यावाकम्; अतियुवयि, अत्यावयि; अतियुवयोः, अत्यावयोः; अतियुवासु, अत्यावासु**; 'सि जस् ङे ङस्' इत्येतेषु पुनः परत्वात् त्व-महमादयः। **मन्तस्येति किम्? मकारावधेर्यथा स्यात्, न तु सर्वस्य, तेन 'युवकाभ्याम्, आवकाभ्याम्' इत्यत्राक्श्रुतिः, 'युवयोः, आवयोः' इत्यत्र तु दकारस्य यत्वं सिद्धम्, अन्यथा 'युव्योः, आव्योः' इत्यनिष्टं स्यात्। द्वयोरिति किम्? युष्मान्, अस्मान्; युष्माभिः, अस्माभिः; युष्मभ्यम्, अस्मभ्यम्; युष्मत्, अस्मत्; युष्माकम्, अस्माकम्; युष्मासु, अस्मासु। द्वयोरिति युष्मदस्मद्विशेषणं किम्? युष्मानस्मानतिक्रान्तौ- अतियुष्माम्, अत्यस्माम् २; अतियुष्माभ्याम्, अत्यस्माभ्याम् ३; अतियुष्मयोः, अत्यस्मयोः २; अत्र समास एव द्वित्वविशिष्टेऽर्थे वर्तते न युष्मदस्मदी इति युवावादेशौ न भवतः। स्यादावित्येव- युवयोः पुत्रः- युष्मत्पुत्रः, आवयोः पुत्रः- अस्मत्पुत्रः; युवयोरिदं- युष्मदीयम्, आवयोरिदम्- अस्मदीयम् ॥ १० ॥**

**श० न्या०-मन्तस्य०**। **द्वयोरि**ति-द्रव्यप्रधानत्वात् सामान्यवाचिनापि युष्मदस्मदर्थ एव द्वित्वविशिष्टो निर्दिश्यतेऽर्थान्तरे तयोर्वृत्त्यभावात् तयोरेव विशेषणम्, स्यादिविशेषणत्वे तु गुणाभिधायित्वात् स्यादेर्गुणप्रधानतया 'द्वित्व' इति निर्दिश्येत, यथा- "द्वित्वे वाम्-नौ" [२. १. २२.] इत्याह-**द्वित्वविशिष्ट** इत्यादि। **अर्थ** इति-स्वाभिधेय इत्यर्थः। "मोर्वा" [२. १. ९.] इति युष्मदस्मत्तुल्यसङ्ख्यानिर्देशात् सामानाधिकरण्याकाङ्क्षणादिह वैयधिकरण्येन युष्मदस्मद्भ्यां मन्तस्येति विशेष्यत इत्याह-**युष्मदस्मदोर्मन्तस्ये**त्यादि-यदि मन्तयोर्युष्मदस्मदोरिति सामानाधिकरण्यं विज्ञायेत तदा णिजन्तात् क्विप्येव विधिः स्यान्न दकारान्तयोरिति। ननु "शेषे लुक्" [२. १. ८.] इत्यादौ स्वयं कार्ययोगित्वेन विज्ञातयोर्युष्मदस्मदोः कथमिह मन्तस्येत्येतद्विशेषणत्वम्? सत्यम्-भवतु तत्र कार्ययोगित्वेन विशेष्यत्वमिहानुवृत्तयोस्तु विशेषणतैव विज्ञायते, शब्दो हि यत्र सन्नि-

धीयते तत्र तदुपकारयोग्यतया परिणतिमासादयति, यदि घात्रापि युष्मदस्मदावेव कार्ययोगिणौ तदाऽन्तग्रहगमनर्थकं मोरित्येवोच्यते( स्येत ), पूर्वसूत्रोक्तं चानुवर्तयेदिति, वैयधिकरण्ये तु 'म' इत्युच्यमाने मकारस्यैव कार्ययोगित्वं स्यादिति तदन्तस्य कार्ययोगित्वार्थमन्तग्रहगमनर्थ( मर्थ )वदिति। नन्वत्रान्तर्भूतान्यार्थपरिग्रहार्थं परिग्रहणं विधेयम्, अन्यथा 'युष्, अस्' इत्येतयोरेव आदेशाः स्युर्न 'युष्म्, अस्म्' इत्येतयोः, नैष दोषः-अन्तशब्दस्यावयववाचित्वादवयवेन विगृह्यमाणत्वात् समुदायस्य समासार्थत्वादन्यपदार्थेऽवश्यमन्तर्भावादिति। न च नद्यन्तं क्षेत्रमित्यत्रान्तशब्दसद्भावेऽपि नद्याः क्षेत्रेऽननुप्रवेशात् कथमेवमुच्यत इति ? तत्रावयवार्थासम्भवादन्तशब्दस्य समीपवचनत्वात्, यत्र त्ववयवत्वं सामीप्यं च सम्भवति तत्रावयवत्वमेवाश्रीयतेऽन्तशब्दस्यावयववाचित्वेन प्रसिद्धतरत्वात्, ततश्च मपर्यन्तस्याऽऽदेशलाभान्नार्थः परिग्रहणेन, एवं तर्ह्यवधियोतनार्थं परिग्रहणं कर्तव्यम्, यदि युष्मदस्मदी मन्ते, अथाऽप्यमन्ते सर्वस्याप्यादेशाः स्युरिति, अन्यथा मन्तस्येत्युच्यमाने यत्रैव मन्ते युष्मदस्मदी तत्रैवाऽऽदेशाः स्युः, तथा च सति सामानाधिकरण्येन विशेषणविशेष्यभावः स्यात्; अथापि तस्य प्रयोक्तुरायत्तत्वाद् वैयधिकरण्यमाश्रीयते–युष्मदस्मदोरवयवस्य मन्तस्येति, तथापि यत्र मान्ते युष्मदस्मदी तत्र भेदाभावादादेशा न स्युः, न च व्यपदेशिवद्भावोऽस्ति, अनाम्नेति प्रतिषेधात्, परिग्रहणे तु युष्मदस्मदवयवेऽपि युष्मदस्मच्छब्दो वर्तत इति सर्वत्रादेशसिद्धिः, वैयधिकरण्येन वा संबन्धे परिग्रहणोपादानसामर्थ्यादनाम्नेति प्रतिषेधाप्रवृत्तेर्मान्तयोरपि तयोरादेशः सिद्ध्यति, न कर्त्तव्यम् "विशेषणमन्तः" [ ७. ४. ११३. ] इत्यन्तत्वे लब्धे पुनरन्तग्रहणात् तदर्थलाभादिति। [ उपसर्जनयोर्युष्मदस्मदोर्द्व्यर्थवाचित्वे विगृह्य उदाहरति– ] **अतिक्रान्तौ युवामिति**– एवम् **अत्यावाम्** इत्यत्रापि द्रष्टव्यम्, उक्तविग्रहानुसारेण तु ज्ञायत इति नोक्तम्। **अतिक्रान्तं युवामिति**–समासार्थेऽमेकवचनम्, अत्यावामित्यादावुक्तानुसारेण विग्रहः सुज्ञान इति वृत्तौ न प्रदर्शितः। सि-जस्-ङे-ङसोऽतिक्रमयोदाहृतम्, किमेतौ युवाऽऽवौ तत्र न भवतः ? ओमित्याह—**सी**त्यादि। अथ मन्तस्येति किमर्थं यावत् सर्वादेशेऽपि न काचिदिष्टक्षतिरित्याह-**मन्तस्ये**त्यादि -"युष्मदस्मदोरसोभादिस्यादेः" [ ७. ३. ३० ] इत्यन्तस्वरात् पूर्वमकि कृते *तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्* मन्तस्येत्यन्तरेण सर्वस्यादेशेऽक्श्रवणं न स्यात्, तथा युवयोरावयोरित्यत्र सर्वादेशाभावे दकारस्य यत्वम्, यदि सर्वादेशः स्यात् किमत्रानिष्टं स्यात् ? [ यतस्तत्रापि "एद् बहुस्भोसि" [ १. ४. ४. ] इत्येत्वे सिद्ध्यत्येव युवयोरावयोरिति सत्यम्-यद्येत्वं लभ्येत, तदेव न "टाङ्योसि यः" [ २. १. ७. ] इति तदपवादस्य यत्वस्य प्रवृत्तेरतो युव्योराव्योरित्यनिष्टं स्यात् ] **युष्मानि**त्यादि–अत्र बह्वर्थे युष्मदस्मदी न द्व्यर्थे इति द्वयोरिति वचनाद् युवा-ऽऽवौ न भवतः। **द्वयोरिती**ति–यदि द्वयोरिति युष्मदस्मदी न विशेष्येताम्, किन्तु स्यादिर्विशेष्येत तदाऽत्रापि समासस्य द्व्यर्थवृत्तित्वात् तत्सम्बन्धिनि द्वित्वाभिधायिनि स्यादावादेशौ स्यातामिति द्वयोरिति युष्मदस्मदोर्विशेषणात् तयोश्च बह्वर्थवृत्तित्वाद् युवा-ऽऽवौ न भवत इति। **युष्मत्पुत्र** इत्यादि–अत्र प्रत्ययस्य स्यादेः "ऐकार्थ्ये" [ ३. २. ८. ] इति लुपि युष्मदस्मदोर्द्व्यर्थत्वात् स्यादावित्यधिकारमन्तरेणापि युवा-ऽऽवौ प्राप्नुतः, स्यादावित्यधिक्रियमाणे "लुप्यय्वृल्लेनत्" [ ७. ४. ११२. ] इति स्थानिवत्त्वप्रतिषेधात् स्याद्यभावान्न भवत इति ॥ २. १. १०. ॥

**न्या० स०—मन्तस्ये**त्यादि। द्वित्वेति वृत्त्यंशः–**द्वयोरि**त्यनेन द्रव्यप्रधानत्वात् सामान्यवाचिनापि युष्मदस्मदर्थ एव द्वित्वविशिष्टो निर्दिश्यतेऽर्थान्तरे तयोर्वृत्त्यभावात्। स्यादिविशेषणत्वे तु गुणाभिधायित्वात् स्यादेर्गुणप्रधानतया द्वित्वे इति भावप्रत्ययान्तेन निर्दिश्येत, यथा "द्वित्वे वाम्नौ" [ २. १. २२. ] इति। युवा-ऽऽवादेशयोः सस्वरत्वे णिचि क्विपि तल्लोपे च 'युव्योः, आव्योः' इत्यादिषु फलं दृश्यम्। एवम्–उत्तरसूत्रे त्विय, म्यि। **परत्वात् त्वमहमादय** इति–यदि परत्वेन त्वमहमादयः करिष्यन्ते तर्हि *परादन्तरङ्गं बलीयः* इति न्यायात् युवा-ऽऽवादय एवादेशाः प्राप्स्यन्ति न त्वमहमादयः, सत्यम्— परत्वाद्–विशेषविहितत्वेन प्रकृष्टत्वादित्यर्थः ॥ १० ॥

## त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्। २। १। ११॥

**त० प्र०**—एकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मकारान्तस्यावयवस्य स्वसम्बन्धिन्यन्यसम्बन्धिनि वा स्यादौ परे प्रत्ययोत्तरपदयोश्च परयोर्यथासंख्यं 'त्व म' इत्येतावादेशौ भवतः। त्वाम्, माम्; त्वया, मया; त्वद्, मद्; त्वयि, मयि; अतिक्रान्तौ त्वाम्–[ मां वा– ] अतित्वाम्, अतिमाम् तिष्ठतः; अतिक्रान्तं त्वां मां वा–अतित्वाम्, अतिमां पश्य; अतित्वान्, अतिमान्; अतित्वया, अतिमया; अतित्वाभ्याम्, अतिमाभ्याम्; अतित्वाभिः, अतिमाभिः; अतित्वाभ्याम्, अतिमाभ्यां देहि; अतित्वभ्यम्, अतिमभ्यम्; अतित्वत्, अतिमत्; अतित्वाभ्याम्, अतिमाभ्यामागतम्; अतित्वद्, अतिमद्; अतित्वयोः, अतिमयोः स्वम्; अतित्वाकम्, अतिमाकम्;

अतित्वयि, अतिमयि; अतित्वयोः, अतिमयोः; अतित्वासु, अतिमासु । सि-जस्-ङे-ङस्सु पुनः परत्वात् त्वमहमादयो भवन्ति । प्रत्ययोत्तरपदयोः खल्वपि– तवायं– [ ममायं वा– ] त्वदीयः, मदीयः; त्वन्मयम्, मन्मयम्; त्वामिच्छति– [ मामिच्छति वा– ] त्वद्यति, मद्यति; त्वमिवाचरति– [ अहमिवाचरति वा– ] त्वद्यते, मद्यते; त्वया कृतं मया कृतं– त्वत्कृतम्, मत्कृतम्; त्वत्पुत्रः, मत्पुत्रः; त्वद्धितम्, मद्धितम्; त्वत्प्रधानः, मत्प्रधानः । 'त्वामाचष्टे– [ मामाचष्टे वा– ] त्वदयति, मदयति' इत्यत्र नित्यत्वादन्त्यस्वरादिलोपात् प्रागेव त्व-मादेशौ । कश्चित्तु 'पूर्वमन्त्यस्वरादिलोपे त्व-मादेशे अकारस्य वृद्धौ प्वागमे— त्वापयति, मापयति; क्विपि तु– 'त्वाप्, माप्' इत्याह । एकस्मिन्निति किम्? युष्माकम्, अस्माकम् । एकत्वेन युष्मदस्मदोर्विशेषणादिह न भवति— अतिक्रान्तं युष्मान्– [ अस्मान् वा– ] अतियुष्माम्, अत्यस्माम्; अतियुष्मया, अत्यस्मया; अतियुष्मद्, अत्यस्मद्; अतियुष्मयि, अत्यस्मयि, । प्रत्ययोत्तरपदे चेति किम्? त्वय्यधि, मय्यधि– अधियुष्मद्, अध्यस्मद् । अन्तरङ्गत्वात् स्यादिद्वारेणैव त्व-मादेशे सिद्धे प्रत्ययोत्तरपदग्रहणं ॐ बहिरङ्गाऽपि लुप् अन्तरङ्गान् विधीन् बाधते ॐ इति न्यायज्ञापनार्थम्, तेन– 'यद्, तद्' इत्यादावन्तरङ्गमपि त्यदाद्यत्वादि न भवति । एके तु निमित्तनिरपेक्षमेकत्वविशिष्टेऽर्थे वर्तमानयोस्त्व-मादेशाविच्छन्ति, तन्मते– अधित्वत्, अधिमत् । मन्तस्येत्येव– त्वकं पिताऽस्य त्वकत्पितृकः, अत्राक्सहितस्य मा भूत् । प्रत्ययग्रहणेनैव सिद्धे स्यादावित्युत्तरार्थमनुवर्तते ॥ ११ ॥

---

**श० न्या०–त्व-मौ०** । उत्तरं च तत् पदं चेति " दिगधिकं संज्ञा०" [ ३. १. ९८.] इति कर्मधारयस्तद्गर्भः प्रत्ययेन समाहारद्वन्द्वः । **त्वदीयः, मदीय** इति–तवायं ममायमिति " दोरीयः " [ ६. ३. ३२. ] इतीयप्रत्ययः । **त्वन्मयम्, मन्मयमि**ति– " दोरप्राणिनः " [ ६. २. ४९. ] इति मयट् । **त्वद्यति, मद्यती**ति–" अमाव्ययाद्०" [ ३. ४. २३.] इति क्यन् । **त्वद्यते, मद्यत** इति " क्यङ् " [ ३. ४. २६. ] इति क्यङ् । **त्वत्कृतम्, मत्कृतमि**ति–त्वया कृतमित्यादि० [ विग्रहे ]' 'कारकं कृता" [ ३. १. ६८. ] इति तृतीयातत्पुरुषः । तव पुत्रो मम पुत्र इति विगृह्य षष्ठीसमासे–**त्वत्पुत्रः, मत्पुत्र** इति, बहुव्रीहिर्वा । **त्वद्धितम्, मद्धितमि**ति– तुभ्यं हितं मह्यं हितमिति " हिताऽऽदिभिः " [ ३. १. ७१. ] इति चतुर्थीतत्पुरुषः । त्वं प्रधानमस्य अहं प्रधानमस्येति बहुव्रीहौ–**त्वत्प्रधानः, मत्प्रधानः** । एषु " ऐकार्थ्ये " [ ३. २. ८. ] इति स्यादेर्लुप्यपि प्रत्ययोत्तरपदग्रहणाद् युष्मदस्मदोर्मकारान्तावयवस्य यथासङ्ख्यं त्व-मादेशौ । अथ **त्वद्यति मद्यती**त्यत्र द्वयोरन्यत्र सावकाशत्वादन्त्यस्वरादिलोपः कस्मान्न भवतीत्याह—**अत्र नित्यत्वादि**त्यादि–* कृताकृतप्रसङ्गित्वाद् * इति शेषः । **कश्चित् त्वि**ति–शब्दान्तरप्रवृत्त्या द्वयोरनित्यत्वादन्यत्र सावकाशत्वात् परत्वादन्त्यस्वरादिलोप इत्यर्थः । **युष्माकमि**त्यादि–यद्यत्रैकस्मिन्निति न स्यात् [ तदा ] द्वयोर्बहुषु च वर्तमानयोरपि युष्मदस्मदोस्त्वमादेशौ [ प्रसज्येताम् । अतियुष्मामित्यादिसमासार्थस्यैकत्वेऽपि युष्मदस्मदोरेकत्वाभावात् त्व-मादेशौ ] न भवतः, प्रकरणादिवशादुपसर्जनपदार्थनिष्ठस्य बहुत्वस्याप्यवगतिरिति बहुवचनान्तानामप्युपसर्जनपदानां समासः । **अधियुष्मद्, अध्यस्मदि**ति- त्वयि अधि, [ इति ] मयि अधीति विगृह्य " विभक्ति-समीप० " [ ३. १. ३९. ] इत्यव्ययीभावः, " अनतो लुप् " [ ३. २. ६. ] इति सेर्लुपि " लुप्यय्वृल्लेनत् " [ ७. ४. ११२. ] इति स्थानिवत्त्वप्रतिषेधेन प्रत्ययोत्तरपदे चेति वचनात् त्व-मौ न भवतः । प्रत्ययोत्तरपदग्रहणमतिरिच्यते स्यादावित्येव सिद्धत्वात्, परत्वान्नित्यत्वाद् वा " ऐकार्थ्ये " [ ३. २. ८. ] इति स्यादेर्लुपि प्रत्ययलक्षणप्रतिषेधात् स्यादेरभावादिति [ व इति ] न वाच्यम्, 'ऐकार्थ्ये' लुप् पठ्यते, ऐकार्थ्यं च प्रकृतिप्रत्ययावाश्रित्य पूर्वोत्तरपदापेक्षं समासं चाऽऽश्रित्य भवतीति तस्य बहिरङ्गत्वात् तदाश्रया लुबपि बहिरङ्गा, विभक्तिमात्रमाश्रित्यादेशयोर्विधानादन्तरङ्गत्वम्, * असिद्धं बहिरङ्गमन्तरङ्गे * इति न्यायान्नित्यादप्यन्तरङ्गस्य बलीयस्त्वम्, तयोः कर्त्तव्ययोर्लुपोऽसिद्धत्वात् ताभ्यामेव पूर्वं प्रवर्त्तितव्यम्, ततो लुबिति न किञ्चिदनिष्टमिति, तथा चोक्तम्—* पर-नित्याऽन्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वम् * इति, उच्यते–एवं सिद्धे सति प्रत्ययोत्तरपदग्रहणं ज्ञापयति * अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते * इत्याह–**अन्तरङ्गादि**त्यादि–प्रयोजनं च 'यत्, तद्' इत्यादावन्तरङ्गमपि त्यदाद्यत्वादिकं बाधित्वा बहिरङ्गापि लुप् प्रवर्तते इति । **एके त्वि**ति–प्रत्ययोत्तरपदस्यादिलक्षणनिमित्तनिरपेक्षमेकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदोर्मान्तावयवस्य 'अधित्वद्' इत्यादौ त्व-मादेशाविति कश्चिन्मन्यते, तदत्यन्ताऽपास्यत्वात् प्रमाणत्वेन नादरणीयमिति । **मन्तस्येत्येवे**ति–सर्वादेशे हि **त्वकत्पितृक** इत्यादावका सहितयोरपि स्यादित्यर्थः । अथ चकारः किमर्थः? स्याद्यनुवर्त्तनार्थः, ननु स्यादेरपि प्रत्ययत्वात् प्रत्ययग्रहणेनैव तत्रापि भविष्यतीत्यत आह–**प्रत्ययग्रहणे**-

नैवेत्यादि-स्यादावित्यनुवर्तनमुत्तरसूत्रे प्रयोजनवदित्यर्थः ॥ २. १. ११. ॥

**न्या० स०—त्व-मौ०** इत्यादि। त्वदयतीति—अत्र नित्यत्वादन्त्यस्वरादिलोपात् प्रागेव त्व-मादेशौ, पश्चादपि अन्त्यस्वरादिलोपो न *लोपात् स्वरादेशः* इति न्यायात् "लुगस्ये०" [२.१.११३.] इत्येव प्रवर्त्तते, तस्मिन्नपि कृते न भवति "नैकस्वरस्य" [७. ४. ४४.] इति निषेधात्; "ञ्णिति" [४.३.५०.] इत्यादिना वृद्धिरपि न अधातुत्वात्। **कश्चित् त्विति**—उत्पलः। शब्दान्तरप्रवृत्त्या द्वयोरप्यनित्यत्वादन्यत्र सावकाशत्वात् परत्वादन्त्यस्वरादिलोप इत्यर्थः। **अकारस्य वृद्धाविति**—अतो "ञ्णिति" [४. ३. ५०.] इत्यनेन सूत्रेण। ननु प्रत्ययोत्तरपदग्रहणं किमर्थम्? स्यादावित्येव सिद्धत्वात्, न च परत्वात् "ऐकार्थ्ये" [३.२.८.] इति स्यादेर्लुपि *प्रत्ययलोप०* इति न्यायस्य "लुप्यय्वृल्लेनत्" [७.४.११२.] इति निषेधात् स्यादेरभाव इति वाच्यम्, यत "ऐकार्थ्ये" [३.२.८.] इति लुबुच्यते, ऐकार्थ्यं च प्रकृतिप्रत्ययौ पूर्वोत्तरपदे चाश्रित्य भवतीति तस्य बहिरङ्गत्वात् तदाश्रया लुबपि बहिरङ्गा, विभक्तिमात्रमाश्रित्य विधानात् त्व-मादेशयोरन्तरङ्गत्वम्, ततः *असिद्धं बहिरङ्गमन्तरङ्गे* इति न्यायान्नित्यादपि अन्तरङ्गस्य बलीयस्त्वात् त्वमादेशयोः कर्तव्ययोः लुपोऽसिद्धत्वात् ताभ्यामेव पूर्वं प्रवर्त्तितव्यं ततो लुबिति न किञ्चिदनिष्टमित्याह-**अन्तरङ्गत्वादिति**। ननु यदा स्यादिग्रहणमेव क्रियते न प्रत्ययोत्तरपदग्रहणं तदा 'त्वदीयः, त्वत्पुत्रः' इत्यादौ प्रागेव परत्वात् ङसा सह तव-ममादेशौ प्राप्नुतः, तत्कथमन्तरङ्गत्वात् स्यादिद्वारेणैव सिध्यतीति? सत्यम्—यौ त्व-मौ भवतस्तावद्रूपाश्रितौ, यतः प्रकृतिमेवाश्रयतः, यौ तु तव-ममौ तौ प्रकृतेः प्रत्ययस्य च स्थाने भवत इति बह्वाश्रितावित्यन्तरङ्गत्वात् त्व-मौ प्राप्नुत इति स्यादिद्वारेणैव सिध्यतीति; तव-ममादेशे तु कर्त्तव्ये एकस्थानित्वेनान्तरङ्गत्वात् परत्वाच्च ङसो लुबेवेति। **एके त्विति**—चन्द्रादयः ॥११॥

## त्वमहं सिना प्राक् चाकः ।२।१।१२॥

**त० प्र०—युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा सिना सह यथासंख्यं 'त्वम् अहम्' इत्येतावादेशौ भवतः, तौ चाक्प्रत्ययप्रसङ्गेऽकः प्रागेव भवतः। त्वम्, अहम्; अतिक्रान्तस्त्वाम्—अतित्वम्, अत्यहम्; अतिक्रान्तो युवाम्—अतित्वम्, अत्यहम्; अतिक्रान्तो युष्मान्—अतित्वम्, अत्यहम्; प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य स प्रियत्वम्, प्रियाहम्; एषु परत्वात् त्व-मौ युवा-ऽऽवौ च बाधित्वा त्वमहमावेव भवतः। सिनेति किम्? युष्माभिः, अस्माभिः; सिलुपि च "लुप्यय्वृल्लेनत्" [७. ४. ११२.] इति निषेधान्न भवति—त्वं पुत्रोऽस्य त्वत्पुत्रः, मत्पुत्रः; एवमुत्तरेष्वपि। प्राक् चाक इति किम्? 'त्वकम्' 'अहकम्' इत्यत्राकः श्रुतिर्यथा स्यात्, अन्यथा पूर्वमकि सति *तन्मध्यपतितस्तद्ग्रहणेन गृह्यते* इति न्यायात् साकोरप्यादेशः स्यात्। केचित् तु 'त्वां मां चाऽऽचष्टे' इति णौ त्व-मादेशे वृद्धौ क्विपि मन्तयोरेव त्वा-ऽहादेशविधानात् सौ—त्वाम्, माम्, इति, धातोरेव वृद्धिरिति मते—त्वम्, मम्, इत्येव च भवतीति मन्यन्ते, ते हि प्रकृतिमात्रस्याऽऽदेशान् ङे—जस्-सी-नाममादेशं ङसस्त्वकारं चेच्छन्ति ॥ १२ ॥**

**श० न्या०—त्वमहम्०**। युष्मदस्मदोरित्येव वर्तते, न मन्तस्येति वा नैकस्मिन्निति वा लक्ष्यानुगुणत्वादित्याह-**युष्मदस्मदोरित्यादि**। **त्वम्, अहमित्यादि**-अत्र "त्व-मौ प्रत्ययोत्तरपदे०" [२. १. ११.] इति "मन्तस्य युवा-ऽऽवौ०" [२. १. १०.] इति च त्वमाद्यादेशश्च प्राप्नोति, त्वमहमादेशश्च, तत्र त्वां युवामित्यादौ त्व-माद्यादेशः सावकाशः, अतिक्रान्तो युष्मानस्मान् वा-अतित्वमित्यादौ त्वमहमादेशश्च, तत्रान्यत्र द्वयोः सावकाशत्वादत्रोभयप्राप्तौ परत्वात् त्वमहमादेश एवेत्याह-**एष्वित्यादि**।.........

अथ 'त्वं पुत्रोऽस्य-त्वत्पुत्रः' इत्यादौ *अन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गा लुप् प्रवर्तते* इति न्यायाद् "ऐकार्थ्ये" [३. २. ८.] इति सेर्लुप्यपि प्रत्ययलोपलक्षणेन स्थानित्वात् त्वमहमादेशः कस्मान्न भवतीत्याह-**सिलुपि चेत्यादि**। एवं तर्हि कथमहंकारः, आहङ्कारिकाणीन्द्रियाणि, अहंमनः, अहंप्रत्ययग्राह्य आत्मा' इति? सेर्लुपा लुप्तत्वा[सेर्लुप्तत्वा]दभावादादेशाभावादुत्तरपदे च त्व-मयोर्विधानादिति, उच्यते-"ऊर्जा-ऽहं-शुभमो युस्" [७. २. १७.] इति वचनादन्य एवायमहं शब्दस्ततो न दोषः। न चात्राप्ययमेवास्त्विति वाच्यम्, अस्मद्प्रयोगनिवृत्त्यर्थत्वादस्य, समुदाय एव वाऽयमस्मदर्थः, प्रकृति-प्रत्ययौ सादृश्यात् भ्रममात्रम्, सर्व एवादेशो लोकेऽर्थगत्यर्थः, स विषयविशेषे स्थानिस्थितिनिर्वृत्त्यर्थमादिश्यते, असौ नियतोऽन्यत्र दृष्टः, तत्रार्थोऽभिधानसामर्थ्यादनिवारितो [भवति] यथाऽस्त्यादीनां भ्वादयः, एवं-ममता, ममकारः, निर्ममः, निरहंकार इत्याद्यनुसन्धेयम्, अहमहमिकादयस्तु साधवो यथा भवन्ति तथा "मयूरव्यंसकेत्यादयः" [३. १. ११६.] इत्यत्र निर्णेष्यामः। **त्वकमित्यादि**-अत्र प्राक् चाक इति वचनात् परमप्यकं बाधित्वा त्वमहमादेशे पश्चादक्, अन्यथा *तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्* सकोरपि युष्मदस्मदोरादेशेऽक्श्रवणं न स्यादित्याह-**अन्यथेत्यादि**। **केचित् त्वि-**

ति– पाणिन्यादय इत्यर्थः, ते हि प्रकृतिमात्रस्य युष्मदस्मद्रूपस्य आदेशान् " तुभ्य-मह्यौ ङयि " [ पा. ७. २. ९५.] " यूय-वयौ जसि " [ पा. ७. २. ९३.] " त्वा-ऽहौ सौ " [ पा. ७. २. ९४. ] इति तुभ्यादीन्, ङे-जस्-सीनां " ङे-प्रथमयोरम् " [ पा. ७. १. २८.] इत्यमादेशं ङसस्तु " युष्मदस्मद्भ्यां ङसोऽश् " [ पा. ७. १. २७.] इत्यकारं चेच्छन्तीत्यर्थः ॥ २. १. १२ ॥

**न्या० स०—त्वमहमि**त्यादि। **सिनेति किम्?** ननु सावि‌ति कृते " दीर्घङ्याब्० " [ १.४.४५.] इत्यादिना सेर्लुकि च सर्वे प्रयोगा निष्पद्यन्त इति, न–" युष्मदस्मदोः " [ २.१.६.] इत्यात्वं स्यात्; आदेशविधानसामर्थ्यान्न भविष्यतीति चेत्? सत्यम्– तदा आत्वाभावेऽस्यापि सेः शेषत्वं स्यात्, तथा च " मोर्वा " [ २.१.९.] इति वालोपः स्यात्, पक्षे च चरितार्थता सूत्रस्य स्यादिति। **त्वकम्, अहकमिति**– " युष्मदस्मदोऽसोभादि० " [ ७.३.३०.] इति अक्। **पूर्वमकी**ति– निरपेक्षत्वेनान्तरङ्गत्वात्। **केचित् त्विति**– पाणिनीयादयः। **त्वमादेशे वृद्धाविति**– त्वादयतीति वाक्ये कृते क्विप्। **त्वाहादेशविधानादिति**– त्वा-ऽहादेशौ न भवत इति शेषः। धातोरेव वृद्धिरिति मते तु– त्वदयतीति वाक्यम्। ननु तन्मते– त्वम्, अहं, यूयम्, वयमित्यादयः कथं सिध्यन्तीत्याह–**ते हि**। **प्रकृतिमात्रस्ये**ति–विभक्तिरहितस्येत्यर्थः। **आदेशानिति**–" तुभ्य-मह्यौ ङयि० " [ पा० ७.२.९५.] " यूय-वयौ जसि० " [ पा० ७.२.९३.] " त्वा-ऽहौ सौ० " [ पा० ७.२.९४.] इति तुभ्यादीन् आदेशान्, ङे-जस्-सीनां " ङेप्रथमयोरम् " [ पा० ७.१.२८.] इत्यमादेशम्, ङसस्तु " युष्मदस्मद्भ्यां ङसोऽश् [ पा०७.१.२७.] इत्यकारं चेच्छन्तीत्यर्थः। स्वमते तु– त्वमहमित्येव भवति ॥ १२॥

## यूयं वयं जसा ।२।१।१३॥

**त० प्र०—**युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा जसा सह यथासंख्यं 'यूयं वयम्' इत्येतावादेशौ भवतः, प्राक् चाकः। **यूयम्, वयम्; परमयूयम्, परमवयम्; प्रियस्त्वं प्रियौ युवां प्रिया यूयं च येषां ते– प्रिययूयम्, प्रियवयम्; अतिक्रान्तास्त्वां युवां युष्मान् वा– अतियूयम्, अतिवयम्।** जसेति किम्? यूयं पुत्रा अस्य– **युष्मत्पुत्रः, अस्मत्पुत्रः।** प्राक् चाक इत्येव? **यूयकम्, वयकम्** ॥ १३ ॥

**श० न्या०–यूयम्०।** **प्रिययूयम्, प्रियवयमिति**—अत्रैकत्व-द्वित्वयोर्युष्मदस्मदोर्वर्त्तमानत्वात् " त्व-मौ प्रत्ययोत्तरपदे च० " [ २. १. ११.] इति " मन्तस्य युवा-ऽऽवौ० " [ २. १. १०.] इति च त्व-माद्यादेशानन्यत्र सावकाशान् बाधित्वा यूयम् वयमित्यत्र सावकाशौ यूय-वयमादेशौ परत्वादुभयप्राप्तौ भवतः। **युष्मत्पुत्रः, अस्मत्पुत्र** इति– यूयं पुत्रा अस्येत्यादिविग्रहे " ऐकार्थ्ये " [ ३. २. ८.] इति जसो लुपि " लुप्यय्वृल्लेनत् " [ ७. ४. ११२.] इति स्थानिवत्त्वप्रतिषेधात् जसोऽभावाज्जसेति वचनादादेशौ न भवतः। **यूयकं वयक**मिति पूर्ववत् ॥ २. १. १३. ॥

**न्या० स०—यूयं वयमि**त्यादि। प्रियस्त्वं प्रियौ युवामिति वाक्ये एकत्व-द्वित्वयोर्युष्मदोर्वर्त्तमानत्वात् " त्व-मौ प्रत्ययोत्तरपदे० " [ २.१.११.] इति " मन्तस्य युवा-ऽऽवौ० " [ २.१.१.] इति च त्व-माद्यादेशानन्यत्र सावकाशान् बाधित्वा यूयं वयमित्यत्र सावकाशौ यूयं वयमादेशौ परत्वादुभयप्राप्तौ सत्यां तावेव भवतः। **यूयक**मित्यादौ कुत्सिताद्यर्थे " युष्मदस्मदोऽसोभादि " [ ७.३.३०.] इत्यक्, एवम्– उत्तरत्रापि ॥ १३ ॥

## तुभ्यं मह्यं ङया ।२।१।१४॥

**त० प्र०—**युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा ङेप्रत्ययेन सह यथासंख्यं 'तुभ्यं मह्यम्' इत्येतावादेशौ भवतः, प्राक् चाकः। **तुभ्यम्, मह्यम्; परमतुभ्यम्, परममह्यम्, प्रियस्त्वम् प्रियौ युवां प्रिया यूयं वा यस्य तस्मै–प्रियतुभ्यम्, प्रियमह्यम्; अतिक्रान्तस्त्वां युवां युष्मान् वा तस्मै अतितुभ्यम्, अतिमह्यम्।** ङयेति किम्? तुभ्यं हितं **त्वद्धितम्, मद्धितम्।** प्राक् चाक इत्येव? **तुभ्यकम् मह्यकम्** ॥ १४ ॥

**न्या० स०—तुभ्य**मित्यादि–[ नेह व्याख्या दृश्यते ]॥ १४ ॥

## तव मम ङसा ।२।१।१५॥

**त० प्र०—**युष्मदस्मदोः स्वसम्बन्धिनाऽन्यसम्बन्धिना वा ङस्प्रत्ययेन सह यथासंख्यं 'तव मम' इत्येतावादेशौ भवतः, प्राक् चाकः। **तव, मम; प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य तस्य–प्रियतव, प्रियमम; अतिक्रान्तस्त्वां युवां युष्मान् वा तस्य–अतितव, अतिमम।** ङसेति किम्? तव प्रियः **त्वत्प्रियः, मत्प्रियः।** प्राक् चाक इत्येव? **तवक, ममक** ॥ १५ ॥

**श० न्या०—**" तुभ्यं मह्यं ङया " " तव मम ङसा " इति पूर्वेण तुल्ययोगौ योगौ। कथं तवता, ममता, तवायितम्, ममायितम्, तवममतायां च सत्यामिति, उच्यते–स्यादिप्रतिरूपाण्येतान्यव्ययानि, ततः शब्दान्तरत्वात् सिद्धम्। द्वयोर्ममता, बहूनां ममतेत्यपि पूर्ववत् ॥ २. १. १४–१५. ॥

**न्या० स०—तव ममे**त्यादि । कथं तवता, ममता; तवायितम्, ममायितम्? सत्यम्—स्याद्यन्तप्रतिरूपकाण्यव्ययान्येतानि, ततः शब्दान्तरत्वात् सिद्धम् ॥ १५ ॥

## अमौ मः । २ । १ । १६ ॥

**त० प्र०—युष्मदस्मद्भ्यां परयोस्तत्सम्बन्धिनोरन्यसम्बन्धिनोर्वा 'अम् औ' इत्येतयोर्म इत्ययमादेशो भवति, अकार उच्चारणार्थः । त्वाम्, माम्; अतित्वाम्, अतिमाम्; युवाम्, आवाम्; अतियुवाम्, अत्यावां तिष्ठतः पश्य वा ॥ १६ ॥**

**श० न्या०-अमौ०** । अमाविति लुप्तषष्ठी द्विवचनम् । **अकार उच्चारणार्थः**, अकारमन्तरेण व्यञ्जनोच्चारणमसुकरमिति 'म्' इत्ययमादेशः, अकारस्तु तस्योच्चारणार्थ इत्युपादीयत इत्येकवर्णत्वेऽपि "प्रत्ययस्य" [ ७. ४. १०८. ] इति न्यायादमः सर्वस्यापि भवति, तेन व्यञ्जनादित्वात् त्वां मामित्यादौ "युष्मदस्मदोः" [ २. १. ६. ] इत्याकारः सिद्ध्यति । सूत्रे विशेषस्यानिर्देशादाविति रूपस्य समानत्वात् प्रथमाद्वितीयाद्विवचनयो[ रुभयो ]रपि ग्रहणम्, अत एव तद्द्योतनार्थं तिष्ठतः पश्य वेत्यनुप्रयोगो वृत्तावुदाहृत इति ॥ २. १. १६. ॥

**न्या० स०—अमौ म** इति- औश्च औश्च आवौ "स्यादावसंख्येयः" इत्येकशेषः, ततोऽम् च आवौ च अमौ, तस्य 'अमौ' लुप्तषष्ठ्येकवचनान्तं पदम्, एकशेषाभावे तु अमा साहचर्याद् द्वितीयासत्कस्यैव ग्रहणं स्यात् । ननु अम्ग्रहणं किमर्थम्? यावता त्वामिति निष्पाद्यम्, तच्च युष्मदोऽमि निमित्ते त्वादेशे "शेषे लुक्" [ २. १. ८. ] इति दस्य लुकि "समानादमोऽतः" [ १. ४. ४६. ] इत्यमोऽस्य लुकि "युष्मदस्मदोः" [ २. १. ६. ] इत्यन्तस्यात्वे च सिद्धम्, नैवम्—अन्तरङ्गेऽन्तस्यात्वे कार्ये बहिरङ्गोऽकारस्य लुगसिद्ध इति ॥ १६ ॥

## शसो नः । २ । १ । १७ ॥

**त० प्र०—युष्मदस्मद्भ्यां परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा शसः स्थाने 'न' इत्ययमादेशो भवति, अकार उच्चारणार्थः । युष्मान्, अस्मान्; प्रिययुष्मान्, प्रियास्मान्; प्रियस्त्वं येषां तान् प्रियत्वान्, प्रियमान्; प्रियौ युवां येषां तान् प्रिययुवान्, प्रियावान् ॥ १७ ॥**

**श० न्या०-शसो०** । [ अकार उच्चारणार्थ इति- ] "शसोऽता सश्च नः पुंसि" [ १. ४. ४९. ] इतिवदत्रापि नकारस्याकार उच्चारणार्थः, व्यञ्जनान्तादेशप्रस्तावात्, अत एवैकवर्णत्वेऽप्यस्य समस्तादेशत्वसिद्धिः "प्रत्ययस्य" [ ७. ४. १०८. ] इति न्यायाद् वा । ननु युष्मानित्यादौ द्वयं प्राप्नोति- "शेषे" [ २. १. ८. ] इत्यन्तलोपोऽनेन नकारश्च, तत्र * कृताकृतप्रसङ्गित्वेन * नकारस्य नित्यत्वाल्लोपस्य च कृते नकारे शेषत्वाभावादप्रसङ्गादनित्यत्वात् पूर्वं नकार एव भवति यद्येवं किमनेन? "शसोऽता०" [ १. ४. ४९. ] इत्यनेनैव सिद्धत्वात्, उच्यते-"अलिङ्गे युष्मदस्मदी०" [ लिङ्गानुशासने १०१ ] इति पुंस्त्वाभावान्नकारो न सिद्ध्यतीति वचनम्, अभ्युपगमे वा लिङ्गस्य स्त्री-नपुंसकार्थम्-युष्मान् ब्राह्मणीः, युष्मान् कुलानीत्यादि । अतत्सम्बन्धिन्युदाहरति-**प्रिययुष्मानि**त्यादि ॥ २. १. १७. ॥

**न्या० स०—शसो न** इति । ननु युष्मानित्यादौ द्वयं प्राप्नोति- "शेषे०" [ २.१.८. ] इत्यनेनान्तलोपोऽनेन नकारश्च, तत्र * कृताकृतप्रसङ्गित्वेन० * नकारस्य नित्यत्वाल्लोपस्य च कृते नकारे शेषत्वाभावादप्रसङ्गित्वेनानित्यत्वात् पूर्वं नकार एव भवतीति; यद्येवं किमनेन? "शसोऽता०" [ १.४.४९. ] इत्यनेनैव सिद्धत्वात्, नैवम्- अलिङ्गे युष्मदस्मदी इति पुंस्त्वाभावान्नकारो न सिध्यतीति वचनम्; बहुव्रीह्यादावभ्युपगमे वा लिङ्गस्य स्त्री-नपुंसकार्थम्- प्रिययुष्मान् ब्राह्मणीः, प्रिययुष्मान् कुलानीत्यादि ॥ १७ ॥

## अभ्यं भ्यसः । २ । १ । १८ ॥

**त० प्र०—युष्मदस्मद्भ्यां परस्य स्वसम्बन्धिनोऽन्यसम्बन्धिनो वा भ्यसश्चतुर्थीबहुवचनस्य स्थानेऽभ्यमादेशो भवति । युष्मभ्यम्, अस्मभ्यं दीयते; प्रिययुष्मभ्यम्, प्रियास्मभ्यम्; त्वामतिक्रान्तेभ्यः-अतित्वभ्यम्, अतिमभ्यम्; युवामतिक्रान्तेभ्यः -अतियुवभ्यम्, अत्यावभ्यम् । अकारादिकरणमात्वबाधनार्थम् ॥ १८ ॥**

**श० न्या०-अभ्यं०** । कार्यिणः प्रथममुपादाने कर्त्तव्ये कार्यस्य पूर्वमुपादानं प्रत्यासत्तिसूचनार्थम्, पाठापेक्षया च चतुर्थ्येव प्रत्यासन्ना तस्या एव चादेश इत्याह- **चतुर्थीबहुवचनस्ये**ति- ननु पारिशेष्यादप्यस्यार्थस्य सिद्धेः( द्धिः,) तथाहि- "ङसेश्चाद्" [ २. १. १९. ] इत्यत्र चकारेण भ्यसोऽनुवृत्तिः कृता, साहचर्याच्च स पञ्चम्या गृह्यत इति परिशिष्टश्चतुर्थीभ्यसेव सम्भवतीति, एवं तर्ह्यादेशाभिव्यक्त्यर्थम्, अन्यथा भ्यसोऽभ्यमिति व्यञ्जनादिरप्यादेश इति संदिह्येत, ननु भवतु प्रक्रियागौरवं परिहृतं भविष्यति, कृते तस्मिन् "लुगस्यादेत्यपदे०" [ २. १. ११३. ] इति लुका भाव्यमित्यत आह-**अकारादि-[ करणमि ]**ति- अन्यथा "युष्मदस्मदोः" [ २. १. ६. ] इत्यात्वप्रसङ्गः, गिचि च युष्मभ्यमस्मभ्यमिति यथा स्यादिति ॥ २. १. १८. ॥

**न्या० स०—अभ्यमित्यादि** । कार्यिणः प्रथमं निर्देशे प्राप्ते कार्यस्य प्रथममुपादानं प्रत्यासत्तिसूचनार्थम्, पाठापेक्षया च चतुर्थ्येव प्रत्यासन्नेति तस्या एवादेशः, यद्वा "ङसेश्चाद्" [ २.१.१९. ] इत्यत्र चकारो भ्यसोऽनुकर्षणार्थः, स च ङसिसाहचर्यात् पञ्चमीसम्बन्ध्येव गृह्यत इति पारिशेष्यादिह चतुर्थीभ्यसो ग्रहणमित्याह–**चतुर्थीबहुवचनस्येति** ॥ १८ ॥

## ङसेश्चाद् । २ । १ । १९ ॥

**त० प्र०—युष्मदस्मद्भ्यां परस्य स्वसम्बन्धिनोऽन्यसम्बन्धिनो वा ङसेश्चकारात् तत्सहचरितस्य भ्यसः स्थाने 'अद्' इत्ययमादेशो भवति** । त्वद्, मद्; त्वां युवां युष्मान् वाऽतिक्रान्तात्–अतित्वद्, अतिमद्; अतियुवद्, अत्यावद्; अतियुष्मद्, अत्यस्मद् । भ्यस्–युष्मद्, अस्मद्; त्वां युवां युष्मान् वाऽतिक्रान्तेभ्यः–अतित्वद्, अतिमद्; अतियुवद्, अत्यावद्; अतियुष्मद्, अत्यस्मद् । **पञ्चमीभ्यसो ग्रहणाच्चतुर्थीभ्यसो न भवति**–युष्मभ्यम्, अस्मभ्यम् ॥ १९ ॥

**श० न्या०—ङसे०** । चकारेण भ्यसोऽनुकर्षणाद् भिन्नविभक्तिनिर्देशाद् युष्मदस्मद्भ्यां विभक्तत्वाद् यथासङ्ख्याऽभावः, [ चकारेण भ्यसोऽनुकरणेऽपि भ्यसो ङसश्चैकवचनान्तनिर्देशेन भिन्नवचननिर्दिष्टाभ्यां युष्मदस्मद्भ्यां सह वैषम्याद् यथासङ्ख्याभावः ] अत आह–**युष्मदस्मद्भ्यामिति** । तत्सम्बन्धिन्युदाहरति–**त्वां युवामित्यादि** । **पञ्चमीभ्यस** इति–ननु भवत्वत्र साहचर्यात् पञ्चमीभ्यसो ग्रहणेन चतुर्थीभ्यसोऽदादेशाभावः, अभ्यमादेशस्तु पञ्चमीभ्यसः कस्मान्न भवति? न चादेशेनापोहितत्वादिति वाच्यम्, तत्सूत्रस्य व्यक्तिनिष्ठत्वेन पञ्चमीभ्यसं प्रत्यचरितार्थत्वेन पाक्षिकी प्रवृत्तिः स्यात्, अन्यथा तत्रानर्थक्यं स्यात्, न च पूर्वसूत्रे पञ्चमीभ्यसोऽग्रहणमिति वाच्यम्, यतोऽन्यथात्रानुवृत्तिरेव न स्यात्, नहि गोधा सर्पन्ती सर्पणादहिर्भवति, एवं चतुर्थीभ्यसनुवर्त्तनात् पञ्चमीभ्यस् भवति, तस्मात् पूर्वसूत्रे पञ्चमीभ्यसपि ग्राह्य इति तस्याप्यभ्यमादेशेन भाव्यम्, नैवम्–जातौ तत्सूत्रं प्रवृत्तं, जातिश्च सकृल्लक्ष्ये प्रवृत्ता सती प्रवृत्तैवेत्यपवादेनाऽदादेशेन बाधितत्वादभ्यमादेशोऽस्य न प्रवर्ततेऽत आह–**पञ्चमी**ति । नन्वनुवर्तनादर्थेष्वन्यथात्वं मा भूत्, शब्देषु तु दर्शनाद् भवतु? तर्हि, आवृत्त्यैव व्याख्यायते–पञ्चमीभ्यसस्तत्र सूत्रे ग्रहणाभावाच्चतुर्थीभ्यसस्तु युष्मभ्यमस्मभ्यम्, पञ्चमीभ्यसोऽभ्यमादेशाभाव इति ॥ २. १. १९. ॥

**न्या० स०—ङसेरित्यादि**–चकारेण भ्यसोऽनुकर्षणेऽपि भ्यसो ङसेश्चैकवचनानन्तनिर्देशेन द्विवचनानन्तनिर्दिष्टाभ्यां युष्मदस्मद्भ्यां सह वैषम्याद् यथासंख्याभाव इति ॥ १९ ॥

## आम आकम् । २ । १ । २० ॥

**त० प्र०—'युष्मद् अस्मद्' इत्येताभ्यां परस्य स्वसम्बन्धिनोऽन्यसम्बन्धिनो वाऽऽमः स्थाने 'आकम्' इत्यादेशो भवति** । युष्माकम्, अस्माकम्; प्रिययुष्माकम्, प्रियास्माकम्; त्वां युवां युष्मान् वाऽतिक्रान्तानाम्–अतित्वाकम्, अतिमाकम्; अतियुवाकम्, अत्यावाकम्; अतियुष्माकम्, अत्यस्माकम्; आकमित्याकारो ण्यन्तार्थम्–युष्मानाचक्षाणानां णौ क्विपि–युष्माकम्, अस्माकम्; । केचित् तु तत्सम्बन्धिन एवाऽऽमः आकमादेशमिच्छन्ति, तथाऽऽम्प्रत्यये दकारस्य यत्वमपीच्छन्ति, तन्मते–प्रिया यूयं येषां तेषां प्रिययुष्मयाम्, प्रियास्मयाम्; एवम्–अतियुष्मयाम्, अत्यस्मयाम् ॥ २० ॥

**श० न्या०—आम०** । अतत्सम्बन्धिन्युदाहरति–**प्रिययुष्माकमित्यादि** । बहुव्रीहेः सुज्ञानत्वात् तदप्रदर्शनेनातिशब्देन विग्रहं दर्शयति–**त्वां युवामित्यादि**, एवमन्यत्रापि ज्ञेयम् । अथाऽऽकमित्याकारकरणं किमर्थं कमित्युक्तेऽपि "युष्मदस्मदोः" [ २. १. ६. ] इत्याकारस्य सिद्धत्वादित्यत आह–**आकार** इत्यादि–यथाकारो नोपदीयेत ण्यन्ते आकारश्रुतिर्न स्यादित्यर्थः । **केचित् त्विति**–पाणिनिसूत्रमात्रानुसारिणः, ते हि "साम आकम्" [ पा. ७. १. ३३. ] इति पश्यन्तः कृतसामादेशस्याकं मन्यन्ते, स च "अवर्णस्यामः साम्" [ १. ४. १५. ] इति सूत्रेणानुपसर्जनस्यैव, तत्रैव चासौ तत्सम्बन्धी भवतीति णिचि सति न भवति, उपसर्जनादेव "टाङ्योसि०" [ २. १. ७. ] इति यत्वं चेच्छन्ति इति तत्राऽऽमोऽप्यनुप्रवेशादित्यर्थः ॥ २. १. २०. ॥

**न्या० स०—आम** इत्यादि । आमः कमिति कृते "युष्मदस्मदोः" [ २. १. ६. ] इत्यात्वे कृते युष्माकमित्यादि सिध्यति, किमाकारकरणेनेत्याह–**आकमित्यादि** । **केचित् त्विति**–पाणिनिसूत्रानुसारिणः, ते हि "साम आकम्" [पा० ७. १. ३३.] इति पठन्तः ( पश्यन्तः ) कृतसामादेशस्याम आकमिच्छन्ति, स च "अवर्णस्यामः" [ १.४.१५. ] इति तत्सम्बन्धिन एवेति ॥ २० ॥

## पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे । २ । १ । २१ ॥

**त० प्र०—द्वितीया चतुर्थी षष्ठी च युग्विभक्तिः, तया बहुत्वविषयया सह पदात् परयोर्युष्मदस्मदोर्यथासंख्यं 'वस्नस्'**

**इत्येतावादेशौ वा भवतः, तच्चेत् पदं युष्मदस्मदी चैकवाक्ये भवतः, अन्वादेशे नित्यं विधास्यमानत्वादिह विकल्पो लभ्यते, एवमुत्तरसूत्रत्रयेऽपि । धर्मो वो रक्षतु, धर्मो नो रक्षतु; धर्मो युष्मान् रक्षतु, धर्मोऽस्मान् रक्षतु; तपो वो दीयते, तपो नो दीयते; तपो युष्मभ्यं दीयते, तपोऽस्मभ्यं दीयते; शीलं वः स्वम्, शीलं नः स्वम्; शीलं युष्माकं स्वम्, शीलमस्माकं स्वम् । पदादिति किम् ? युष्मान् धर्मो रक्षतु, अस्मान् धर्मो रक्षतु । युग्विभक्त्येति किम् ? ज्ञाने यूयं तिष्ठत, शीले वयं स्थास्यामः; ज्ञाने युष्माभिः स्थितम्, शीलेऽस्माभिः स्थितम्; ज्ञानं युष्मदागतम्, शीलमस्मदागतम्; ज्ञानं युष्मासु तिष्ठति, शीलमस्मास्वायतते; ग्रामे युष्मत्पुत्रः, नगरेऽस्मत्पुत्रः; इति युष्मदुपाध्यायो ब्रूते, इत्यस्मदाचार्योऽनुशास्ति । एकवाक्य इति किम् ? एकस्मिन् पदे निमित्त-निमित्तिनोर्भावे मा भूत्—अतियुष्मान् पश्यति, अत्यस्मान् पश्यति; वाक्यान्तरे च मा भूत्—ओदनं पचत, युष्माकं भविष्यति; पटं वयत, अस्माकं भविष्यति । ननु च वाक्यन्तरस्थात् पदात् परयोर्युष्मदस्मदोः सामर्थ्याभावादेव वस्-नसादयो न भविष्यन्ति, किमेकवाक्यग्रहणेन ? नैवं शङ्क्यम्—युक्तयुक्तादपि पदादसमर्थत्वात् न प्राप्नुवन्ति—इति स्म नः पिता कथयति, इति वः श्रेयसी ब्रवीमि, इति मे माताऽब्रोचत्, शालीनां ते ओदनं दास्यामि; अत्र हि युष्मदस्मदी पित्रादिभिर्युक्ते न पित्रादियुक्तैरिति–स्मादिभिरिति वस्नसादयो न स्युः, अतः पारम्पर्येणापि युक्तादेकवाक्यस्थात् पदात् परयोर्युष्मस्मदोर्वस्नसादयो भवन्त्वित्येकवाक्यग्रहणमर्थवत् । बहुत्व इति किम् ? धर्मो युवां रक्षतु, धर्मस्त्वां रक्षतु । स्याद्यधिकारे विभक्तिग्रहणं युक्स्यादिवचननिवृत्त्यर्थम्, तेन ज्ञाने युवां तिष्ठतः, शीले आवां तिष्ठाव इत्यत्रोत्तरेण वाम्-नावादेशौ न भवतः ॥ २१ ॥**

**श० न्या०—पदाद्०** । पद्यते गम्यते कर्तृकर्मादिविशिष्टोऽर्थोऽनेनेति पदं- स्याद्यन्तम्, योजनं-युक्, सममविषमं सङ्ख्यास्थानं युग्ममिति यत् सङ्ख्यायते, तेन परिच्छिन्नं वस्त्वपि युगित्युच्यते, अत्र प्रस्तावादनोजस्था विभक्तिर्द्वितीया-चतुर्थी-षष्ठीरूपा गृह्यते, अत आह- **द्वितीये**त्यादि । कार्यकार्यिणोस्तुल्यत्वाद् यथासङ्ख्यमत आह- **युष्मदस्मदो**रिति । द्विविधं वाक्यं- लौकिकं शास्त्रीयं च, तत्र लौकिकम्- 'एकार्थत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्' इति, अत्रानेकमपि त्याद्यन्तं सम्भवति- पश्य, मृगो धावति; हन्ति, इति पलायते; वर्षति, इति धावति; यो भुङ्क्ते तमानय; व्रीहीन् वप, लुनीहि पुनीहि; यतते, भवति, पचतीत्यादि, भवति ह्येतदेकार्थं साकाङ्क्षं च विभागे- पश्य, किम् ? मृगो धावतीत्येतदिति, यद्यपि धावतीत्यनेन पदेन पदरूपेण न मृगसरणस्य कर्मतोपादीयते, वाक्यरूपेण तूपादीयत एव, वाक्यरूपत्वं नाम योऽस्य शब्दान्तरसन्निधौ प्रयुज्यमानत्वम्, तत्र केवलेन पदेनानुपादीयमानोऽपि विशेषः प्रतीयते, यथा राज्ञः पुरुष इति पुरुषस्य राजसम्बन्धित्वम्, न चेदं केवलात् पुरुषपदात् प्रतीयते, न चायं पुरुषगतो विशेषो राज्ञ इत्यस्यार्थः शक्यः प्रतिपत्तुम्, नहि राज्ञ इति केवलात् पुरुषस्य राज्ञः सम्बन्धिता प्रतीयते, सम्बन्धिमात्रं तु प्रतीयत एव तद्वदत्रापि भवतीति, केवलादप्रतीयमानमपि पश्येति पदान्तरसन्निधौ मृगसरणस्य कर्मत्वं प्रतीयते, न चैकस्यैकदा साध्यत्वं साधनत्वं च विरुध्यते, अपेक्षाभेदात् पितृ-पुत्रत्ववत्, तथाहि- तस्यैव पितरमपेक्ष्य पुत्रत्वं पुत्रं चापेक्ष्य पितृत्वं न विरुध्यते, एकापेक्षया तु विरुध्यते, तथाहि- नहि यमेव प्रति पुत्रत्वं तमेव प्रति पितृत्वमित्यमेवमत्रापि मृगापेक्षया साध्यस्यापि दृश्यपेक्षया कर्मत्वमुपपद्यते, इत्याकाङ्क्षोपपत्तेरनेकमपि त्याद्यन्तमेकस्मिन् वाक्ये सम्भवति, तत्र * कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः * इति "सविशेषणमाख्यातं वाक्यम्" [१. १. २६.] इति परिभाषिते त्याद्यन्तभेदे वाक्यभेदार्थं शास्त्रीयं वाक्यं गृह्यत इत्याह- **एकवाक्ये** इति- एकस्मिन्-अभिन्ने, आधारभूते वाक्य इत्यर्थः । अभिन्नत्वं चानेकाधेयाऽपेक्षया, तत्र युष्मदस्मदोः कार्यिणोः श्रुतत्वात् पदादित्यस्य तद्विशेषणस्य च यदभिन्नं वाक्यमाधार इत्यमुमेवार्थं स्फुटयन्नाह- **तच्चे**त्यादि । नन्वेकवाक्य इत्यनुपपन्नं वाक्यस्य तत्प्रतिपाद्यस्य चार्थस्याभावात्, तथाहि- नैवं किञ्चिद् वाक्यमस्ति पदान्येवैतान्यर्थवन्ति लोके प्रयुज्यन्ते- देवदत्त ! गामभ्याज शुक्लामिति, एतदुपायस्त्वशब्द एवार्थः प्रगीयते, यथा हर्षः शोको वा, एतत्तु विरुद्धम्, वाक्यस्य " अधातु-विभक्ति-वाक्यम्० " [१. १. २७.] इत्यर्थवत्त्वेन प्राप्ताया नामसंज्ञायाः प्रतिषेधात्, तथा भाष्येऽप्युक्तम्- लोकेऽर्थवन्ति वाक्यानि दृश्यन्ते, अनर्थकानि च, अन्ये मन्यन्ते- आद्यमेव पदं वाक्यमितराणि तदुपकारकाणीति, तेषामप्यानर्थक्यमनुवादो वा शेषपदानां प्रसज्यते, तस्मात् समुदितानि पदानि वाक्यम्, पदार्थव्यतिरेकेण चाऽर्थान्तरमुपप्लवते । तत्र केचिन्मन्यन्ते- सामान्याऽवस्थितान्येव पदानि, वाक्ये केवलमभ्यावापो भवत्यर्थस्य, तद्यथा- पशुमानयेति-पशुशब्दः पशुत्वमाह, तस्य यदा छागमित्येतदुपादीयते तदाऽस्य नाधिक्यं न न्यूनता जातेरविकार्यत्वात्, किन्त्वधिकोऽर्थ उपादीयते-छागत्वैकार्थसमवायिपशुत्वमानेतव्यमिति, या तु पश्वन्तराणां निवृत्तिः सा शब्दवती, असम्भवन्नियमो नामाऽयम्, नहि सम्भवोऽस्ति यच्छागत्वैकार्थसमवायि च स्यात्, जात्यन्तरैकार्थसमवायि चेति, ए...[ वं छागा ]दिशब्दप्रयोगेऽपि शुक्लामान-

येति, एवं संसर्गं वाक्यार्थं शब्दवन्तं मन्यन्ते, भेदमशब्दम् । येषां तु दर्शनं- विशिष्टार्थान्येवैतानि पदानि वाक्यविषयाणि, सामान्यं त्वन्वय-व्यतिरेकाभ्यामपोध्रियते, तेषां भेदः शब्दवान्, संसर्गोऽशब्दः । केश्चित् तूभयमपि शब्दवद् गृहीतम्, तत्र यथैव चित्रं रूपं न रक्तं न पीतं न शुक्लमन्यदेव रूपान्तरमेवं वाक्यार्थोऽप्यनेकार्थसंसृष्टः प्रतिपत्तव्यः । अन्ये मन्यन्ते-साध्यत्वात् क्रियायाः प्राधान्यम्, तदर्थमुपादानं साधनादीनाम्, तस्मात् क्रियाविशेषो वाक्यार्थ इति, यथाऽनेकद्रव्यसन्निधाने प्रधानं व्यपदिश्यते- घृतं पक्वम्, तैलं पक्वमिति, कथ्यमानान्यपि हि न रास्नादीनि व्यपदिश्यन्ते । अपरे मन्यन्ते-प्रच्युत्य सामान्यात् पदानि वाक्येऽवतिष्ठन्त इति, एवमाहुः- उभयशक्तीनि पदानि, कयाचित् कयाचिच्छक्त्या व्यवह्रियन्ते- सामान्यशक्त्या विशेषशक्त्या वा, तस्मादर्थोपादानत्यागकृतो दोषो न भवतीति । एतेषु च क्रियापक्षो युक्ततर इति स एव “ सविशेषणमाख्यातम्० ” [ १. १. २६. ] इत्यनेनादृत इति । ननु प्रयोगे वस्नसादीनां विकल्पेन प्रयुज्यमानत्वात् सूत्रे च तदर्थस्य वाग्रहणादेर्नवेत्यधिकारस्य वाऽभावात् कथं विकल्पो लभ्यत इत्याह- **अन्वादेश** इत्यादि- पक्षे कार्यस्यासंभावनायां नित्यग्रहणमनर्थवद् भवति, व्यभिचारे विशेषणस्यार्थवत्त्वात् तदभावे तु तत्र नित्यग्रहणमानर्थक्यमश्नुवीतेत्यर्थः । **धर्मो वो रक्षत्वि**त्यादि- अत्र युष्मदस्मच्छब्दात् शसादिषु “ शसो नः ” [ २. १. १७. ] “ शेषे लुक् ” [ २. १. ८. ] इत्यादीनि बाधित्वा नित्यत्वादनवकाशत्वाच्च वस्नसावेव भवतः, एवमुत्तरसूत्रेष्वपि । रक्षन्त्वित्यादयोऽनुप्रयोगा द्वितीयादिविभक्त्यभिव्यक्त्यर्थाः । **इति युष्मदुपाध्यायो ब्रूत** इति- अत्रेति एवमित्यस्यार्थे, युष्माकमुपाध्याय इति विगृह्य षष्ठीसमासः, अत्र युग्विभक्त्येति “ समानानां तेन० ” [ १. २. १. ] इत्यादिवत् षष्ठ्यर्थे तृतीयाविधानाद् विभक्तेरपि कार्यित्वाद् * अन्तरङ्गानपि विधीन् बाधित्वा लुप् प्रवर्तते * इति तस्याः पूर्वं लोपात् “ लुप्यय्वृल्लेनत् ” [ ७. ४. ११२. ] इति स्थानिवद्भावप्रतिषेधात् कार्यिविभक्तेरभावादादेशाभाव इत्यर्थः । परार्थं शब्दप्रयोगाद् वाक्या [ वाक्यस्यैव ] प्रत्यायकत्वात् केवलस्य पदस्य प्रयोगाभावात् पदादित्यपि वाक्यं गम्यत एव, तत्स्थस्यैव तस्य प्रयोगात्, यत्रापि केवलस्य प्रयोगस्तत्रापि तदाक्षिप्तपदान्तरसव्यपेक्षाद् वाक्यादेवार्थप्रत्यय इति वाक्यस्य लाभात् तद्ग्रहणमतिरिच्यत इति विशेषस्याभावात् तत्सम्बद्धविशेषणस्याऽप्येकशब्दस्याभाव इति, किञ्च, यस्यैव वाक्यस्य पदादिति पदं प्रत्यासत्तेस्तस्यैव वाक्यस्य युष्मदस्मदी परिगृह्येत [ परिगृह्येयाताम् ] इत्येकग्रहणमप्यनर्थकमिति पृच्छति- **एकवाक्य** इत्यादि । समाधत्ते-**एकस्मिन्नि**त्यादि-अयं भावः- एकवाक्य इत्युभयावधारणार्थम्, तत्रैकस्मिन् वाक्ये एवेत्यवधारणेनैकं पदं व्यवच्छिद्यते, तेनातियुष्मान् पश्यतीत्यादावन्तर्वर्तिविभक्त्याश्रयेण पदात् परत्वेऽपि समास्यैकपद्ये वस्नसौ भवतः, एकस्मिन्नेव वाक्ये इत्यनेन च वाक्यान्तरं [ व्यवच्छिद्यते ] तच्चावधारणमुपात्तयोरेव विशेषण-विशेष्ययोः सम्भवति, न सामर्थ्यलब्धयोरिति । **ओदनं पचते**ति- अत्राख्यातभेदाद् वाक्यभेदः । **ननु चे**ति- पदादिति लिङ्गात् समर्थपरिभाषोपस्थानात् किं द्वितीयावधारणार्थेन एकवाक्यग्रहणेनेत्यर्थः । ननु वाक्ये व्यपेक्षालक्षणस्य सामर्थ्यस्याङ्गीकृतत्वात् तस्यात्र सद्भाव उच्यते, तथाहि- युष्मच्छब्दवाच्यो योऽर्थस्तत्साधनेन पाकेन युष्मत्स्वामिक ओदनो भविष्यत्येवम्भूता पाकस्य युष्मदस्मदोरपेक्षाऽस्त्येव, नैवम् विशिष्टापेक्षा [ व्यपेक्षा, सा च येनैव रूपेणार्थेन वा वाक्ये पदमुपात्तं साक्षात् तेनैव, न रूपान्तरेणार्थान्तरेण वा, अत्र तु प्रकारान्तरेण, तथाहि- युष्मदर्थकर्तृकेण पचिना कर्मत्वेनापेक्ष्यमाण ओदनो युष्माकं भविष्यतीति युष्मदर्थस्वामिको भवतिनाकर्तृत्वेनापेक्ष्यत इति विशिष्टापेक्षाऽ ]भावात् सामाथ्याभावः । **नैवं शक्यमि**ति- अयमभिप्रायः- एकवाक्यग्रहणमन्तरेण वाक्यान्तरे सामर्थ्याभावादादेशाभावे यत्रैकवाक्येऽपि सामर्थ्यं न स्यात् तत्र वस्नसादयो न स्युः, यथा- **इति स्म नः पिता कथयती**त्यादौ, अत्र हि इति-स्मेत्यादिपदं यथावस्थितं युष्मदादिना साक्षान्नापेक्ष्यते, किं तर्हि ? पित्रादिकम्, तेन च तदित्येकवाक्यग्रहणात् सामर्थ्याभावेऽप्येकवाक्ये पदात् परस्य युष्मदादेरादेशसिद्धिरिति, इतिशब्द एवमर्थे, एवं कथितवानित्यर्थः । **बहुत्व** इति- अथ द्विवचनैकवचनयोरादेशान्तरविधानाद् बहुत्व एव वस्नसौ विज्ञायेते, तथाहि- द्वित्वे वाम्-नावुक्तौ, एकत्वे तु ते-मे-त्वा-मा उक्ता इति पारिशेष्याद् बहुत्वमवसीयते, न चैतद्विषयेऽप्यनयोः प्रवृत्तिः स्यादिति वाच्यम्, यतोऽपवादविषयपरिहारेणोत्सर्गः प्रवर्तते, * पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः * इति * प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते * इति, सत्यम्- न्यायानुवादकत्वादस्य । किञ्च, यथा ध्यण्विषये “ कृ-वृ-षि० ” [ ५. १. ४२. ] इति क्यप् प्रारभ्यमाणोऽपवादोऽपि पक्षे ध्यणः प्रवृत्तिं न विहन्ति, एवमत्रापि वामादयः पक्षे न वस्नसोः प्रवृत्तिमुपहन्युः, अत एव “ ङे-ङसा ते-मे ” [ २. १. २३. ] इत्यत्र ङे-ङसोरुपादानं कृतम्, अन्यथा द्वित्व-बहुत्वयोर्वस्नसादिभिराघ्रातत्वादेकत्वमवसीयते, तत्रापि द्वितीयैकवचनस्य त्वा-माऽऽदेशविधानात् ङे-ङसावेव परिशिष्येते [ किं तदुपादानेन ? ] तदुपादानं तु * अपवादविषये पक्षे क्वचिदुत्सर्गः प्रवर्तते * इति । इह स्याद्यधिकारात् स्यादेश्च विभक्तिग्रहणमन्तरेण [ विभक्तौ

लब्धायां ] विभक्तिग्रहणं युकुस्यादिवचननिवृत्त्यर्थमित्याह– **स्याद्यधिकारे** इत्यादि ॥ २. १. २१. ॥

**न्या० स०**—पदादित्यादि—पद्यते गम्यते कर्तृकर्मविशिष्टोऽर्थोऽनेनेति पदम् । विभक्त्या सह समानाधिकरणार्थं युनक्तीति युङ् कर्तरि क्विप्, यद्वा योजनं युङ्० सममविषमं संख्यास्थानं युग्ममिति यत् संख्यायते, तेन परिच्छिन्नं वस्त्वपि [ वस्त्वपि ] युगित्युच्यते, ततः समसंख्या द्वितीया-चतुर्थी-षष्ठीरूपा विभक्तयो युग्शब्देनोच्यन्त इति । **धर्मो वो रक्षत्विति**—अत्र पदादेशः पदवदिति 'वस्' इत्यस्य पदत्वे "सो रुः" [ २. १. ७२. ] इति रुत्वं बभूव । तथा "शसो नः" [ २. १. १०. ] "शेषे लुक्" [ २. १. ८. ] इत्यादीनि बाधित्वा नित्यत्वाद् निरवकाशत्वाच्च वस्नसावेव भवत इति । **एकवाक्य** इति—एकं च तद् वाक्यं चेति "पूर्वकालैक०" [ ३. १. ९०. ] इत्यनेन समासे एकस्य पूर्वनिपातः, ततो विशेषणस्य व्यवच्छेदकत्वात् *सर्वं वाक्यं सावधारणं भवति* इति न्यायाच्च एकस्मिन् वाक्य एव भवतीति न तु पदे, अतियुष्मान् पश्यतीत्यादौ तु यथैकस्मिन् वाक्ये तथा एक विभक्त्यपेक्षया एकस्मिन् पदेऽपि युष्मदस्मदी स्त इति, तथा एकस्मिन्नेव वाक्य इत्यवधारणाद् यदि पदं युष्मदस्मदी चैकस्मिन्नेव वाक्ये भवतो न तु वाक्यान्तरे तदा वस्नसौ भवतः । **सामर्थ्याभावादेवेति**—परस्परव्यपेक्षालक्षणसम्बन्धाभावादेनेत्यर्थः । **किमेकवाक्यग्रहणेनेति**—किं सविशेषणेन वाक्यग्रहणेन ? वाक्यग्रहणमेव पदव्यवच्छेदाय कर्तुं युक्तं किमेकग्रहणेनेत्यर्थः । **युक्तयुक्तादिति**—युक्तेन युष्मदस्मत्संबद्धेन मित्रादिना यत् युक्तमिति-स्मेत्यादि तस्मादित्यर्थः । **इति-स्मेत्यादि**—अत्रेतिस्मेत्यादि पदं साक्षात् युष्मदादिकं नापेक्षते, किं तर्हि पित्रादिकमिति एकवाक्यग्रहणात् सामर्थ्याभावेऽपि एकवाक्ये पदात् परस्य युष्मदादेरादेशः सिद्धः । तथा 'युष्मदुत्वे' इत्यप्युक्ते द्वितीया-चतुर्थी-षष्ठी बहुवचनानि लब्धानि, विभक्तिग्रहणं तूत्तरार्थमिह च क्लिष्टतापरिहारार्थमिति ॥ २१ ॥

## द्वित्वे वाम्नौ । २ । १ । २२ ॥

**त० प्र०**—पदात् परयोर्युष्मदस्मदोर्द्वित्वविषयया युग्विभक्त्या सह यथासंख्यं वाम्नावित्येतावादेशौ वा भवतः, तच्चेत् पदं युष्मदस्मदी चैकवाक्ये भवतः । धर्मो वां रक्षतु, धर्मो नौ रक्षतु; धर्मो युवां रक्षतु, धर्म आवां रक्षतु; शीलं वां दीयते, शीलं नौ दीयते; शीलं युवाभ्यां दीयते, शीलमावाभ्यां दीयते; ज्ञानं वां स्वम्, ज्ञानं नौ स्वम्; ज्ञानं युवयोः स्वम्, ज्ञानमावयोः स्वम् । युग्विभक्त्येत्येव–ग्रामे युष्मत्पुत्रः, नगरेऽस्मत्पुत्रः । पदादित्येव–युवां धर्मो रक्षतु, आवां धर्मो रक्षतु । एकवाक्य इत्येव–ओदनं पचत, युवयोर्भविष्यति, आवयोर्भविष्यति ॥ २२ ॥

**श० न्या०**—द्वित्वे० । द्वित्व इति भावप्रत्ययान्तेन सङ्ख्या निर्दिश्यते, सङ्ख्यायां च विभक्तिर्वर्तते, न युष्मदस्मदी द्रव्यवृत्तित्वात् तयोरिति द्वित्व इति विभक्तेरेव विशेषणमित्याह– **द्वित्वविषययेत्यादि** । अत्रोदाहरणानि प्रत्युदाहरणानि च पूर्वानुसारेण सुज्ञानानीति ॥ २. १. २२. ॥

**न्या० स०**—**द्वित्वे** इत्यादि । द्वित्व इति भावप्रत्ययान्तेन संख्या निर्दिश्यते, संख्यायां च विभक्तिर्वर्तते न युष्मदस्मदी द्रव्यवृत्तित्वात् तयोरिति द्वित्व इति विभक्तेरेव विशेषणमित्याह–**द्वित्वविषययेति** ॥ २२ ॥

## ङे-ङसा ते-मे । २ । १ । २३ ॥

**त० प्र०**—'ते-मे' इति लुप्तद्विवचनान्तं पदम्, पदात् परयोर्युष्मदस्मदोर्'ङे ङस्'इत्येताभ्यां सह 'ते मे'इत्येतावादेशौ यथासंख्यं वा भवत एकवाक्ये, ङेङसेत्येकवचनं स्थानिभ्यामादेशाभ्यां च यथासंख्यनिवृत्त्यर्थम् । धर्मस्ते दीयते, धर्मस्तुभ्यं दीयते; धर्मो मे दीयते, धर्मो मह्यं दीयते; शीलं ते स्वम्, शीलं तव स्वम्; शीलं मे स्वम्, शीलं मम स्वम्; धर्मस्ते स्वम्, धर्मो मे स्वम्; धर्मस्तव स्वम्, धर्मो मम स्वम् । पदादित्येव–तुभ्यं धर्मो दीयते, मह्यं धर्मो दीयते; तव शीलं स्वम्, मम शीलं स्वम् । एकवाक्य इत्येव–ओदनं पच, तव भविष्यति, मम भविष्यति; त्वां युवां युष्मान् वाऽतिक्रान्ताय–अतितुभ्यम् । ङे–ङसेति किम् ? पटस्त्वया क्रियते । धर्मो मया क्रियते । कथं 'न मे श्रुता नापि च दृष्टपूर्वा' [ ] न मे–न मयेति ह्यत्रार्थः; असाधुरेवायम्; स्यादिप्रतिरूपकमव्ययं वा ॥ २३ ॥

**श० न्या०**—ङे ङसा० । ते-मे इति– लक्षणस्य लक्ष्यानुसारित्वाद् युष्मदस्मदोः कार्यिणोर्द्विवचनान्तत्वाद् व्याख्यानाद् यथासङ्ख्यार्थं 'ते-मे' इति लुप्तप्रथमाद्विवचनान्तं कार्यपदमित्यर्थः । अथ ङे-ङसोर्द्वित्वसङ्ख्याविषयत्वात् किमर्थमेकवचनम् ? सत्यम्– कार्यिणोः कार्ययोश्च द्विवचनान्तत्वादनयोरपि द्विवचनान्तत्वे यथासङ्ख्यं स्यात् तन्निवृत्त्यर्थमेकवचनमित्याह– **ङे-ङसेत्यादि** । कथमीति– अस्मदस्तृतीयैकवचनेन [सह] कथं 'मे' इत्ययमादेश इत्यर्थः । समाधत्ते– **असाधुरेवेत्यादि**–योयं तृतीयैकवचनेन 'मे' इत्ययमादेशः सोऽसाधुर्ङे-ङस्भ्यां सहैव विधानादिति । अथ बहुलं शिष्टप्रयुक्तेरिति चेत् ? तदा स्यादिरूपकमेवमर्थमित्याह– **स्यादीत्यादि** ॥ २. १. २३. ॥

**न्या० स०** – ङे-ङसेत्यादि । दृष्टपूर्वेति–पूर्वं दृष्टा " नाम नाम्ना० " [ ३. १. १८. ] इति सः, ( स्त्री चेत् ) ॥ २३ ॥

## अमा त्वा-मा । २ । १ । २४ ॥

**त० प्र०**—पदात् परयोर्युष्मदस्मदोरमा–द्वितीयैकवचनेन सह 'त्वा मा' इत्येतावादेशौ यथासंख्यं वा भवत एकवाक्ये । धर्मस्त्वा रक्षतु, धर्मो मा रक्षतु; धर्मस्त्वां रक्षतु, धर्मो मां रक्षतु । पदादित्येव–त्वामीक्षते, मामीक्षते । एकवाक्य इत्येव–अतित्वां पश्यतु, अतिमां पश्यतु ॥ २४ ॥

**श० न्या०**–अमा० । अम् यद्यप्यनेकप्रकारोऽस्ति, तथाहि– " अतः स्यमोऽम् " [ १. ४. ५७. ] इति, " अमव्ययीभावस्या० " [ ३. २. २. ] इति, आख्यातविभक्तेः ' अम्व् अम् ' इति, तथापि युष्मदस्मद्भ्यामन्यस्यासम्भवाद् द्वितीयैकवचनमेव गृह्यत इत्याह– **अमा–द्वितीयैकवचनेने**ति । त्वा-मा इति लुप्तप्रथमाद्विवचनान्तं यथासङ्ख्यार्थं विज्ञेयमित्याह– **यथासङ्ख्य**मिति ॥ २. १. २४ ॥

**न्या० स०—अमा त्वा-मा** इति । अम् यद्यप्यनेकप्रकारोऽस्ति, तथाहि--एकः " अतः स्यमोऽम् " [ १. ४. ५७. ] इति, द्वितीयो " अव्ययीभावस्या० " [ ३. २. २. ] इति, तृतीय आख्यातविभक्तेः ' अम्व् अम् ' इति, तथापि युष्मदस्मद्भ्यामन्यस्यासंभवाद् द्वितीयैकवचनमेव गृह्यते इत्याह–**अमा–द्वितीयैकवचनेने**ति ॥ २४ ॥

## असदिवाऽऽमन्त्र्यं पूर्वम् । २ । १ । २५ ॥

**त० प्र०**—आमन्त्र्यते यत् तदामन्त्र्यम्, तद्वाचि पदं युष्मदस्मद्भ्यां पूर्वमसदि–अविद्यमानमिव भवति, सति तस्मिन् यत् कार्यं तन्न भवति, असति यत् तद् भवतीत्यर्थः । श्रमणा ! युष्मान् रक्षतु धर्मः, श्रमणा ! अस्मान् रक्षतु धर्मः; श्रमणा ! युष्मभ्यं दीयते, श्रमणा ! अस्मभ्यं दीयते; श्रमणा ! युष्माकं शीलम्, श्रमणा ! अस्माकं शीलम्; श्रमणौ युवां रक्षतु धर्मः, श्रमणौ ! आवां रक्षतु धर्मः; श्रमणौ ! युवाभ्यां दीयते, आवाभ्यां दीयते; श्रमणौ ! युवयोः स्वम्, आवयोः स्वम्; श्रमण ! त्वां रक्षतु तपः, मां रक्षतु तपः; श्रमण ! तुभ्यं दीयते, मह्यं दीयते; श्रमण ! तव शीलम्, मम शीलम्; एष्वामन्त्र्यस्यासत्त्वाद् वस्नसादयो न भवन्ति । ' ग्रामश्चैत्र ! ते स्वमथो ' इत्यादौ चैत्रपदस्यामन्त्र्यस्यासत्त्वाद् ग्रामपदापेक्षयाऽन्त्यादेशे नित्यं ते-मयादिविधिः, न तु " सपूर्वात् प्रथमान्ताद् वा " [ २. १. ३२. ] इति विकल्पः । इवकरणं किम् ? श्रवणं यथा स्यात् । आमन्त्र्यमिति किम् ? धर्मो वो रक्षतु, धर्मो नो रक्षतु । पूर्वमिति किम् ? " मयैतत् सर्वमाख्यातं, युष्माकं मुनिपुङ्गवाः ! " परस्य ह्यसद्वत्त्वे पादादिलक्षणः प्रतिषेधो न स्यात् । व्यवहितेऽपि पूर्वशब्दो वर्त्तते, तेन–'चैत्र ! धर्मो वोऽथो रक्षतु, चैत्र ! धर्मो नोऽथो रक्षतु' अत्र "सपूर्वात् प्रथमान्ताद् वा " [ २. १. ३२. ] इति विकल्पो न भवति ॥ २५ ॥

**श० न्या०**–असदिवा० । आमन्त्र्यमिति कर्मणि यः, योऽर्थः स्वेन धर्मेण प्रसिद्धो धर्मान्तरसम्बन्धं प्रत्यभीमुखीक्रियते स आमन्त्र्यः, यथा देवदत्तो देवदत्तत्वेन प्रसिद्धोऽर्थान्तरेऽभिमुखीक्रियते– यथा देवदत्त ! भुङ्क्ष्व, अधीष्वेति, तत्रार्थे कार्यासम्भवादुपचारादामन्त्र्याभिधायि पदमामन्त्र्यं विज्ञायत इत्याह– **आमन्त्र्यते यत् तदामन्त्र्यम्, तद्वाचि पदं** प्रथमान्तमित्यर्थः । **पूर्वमि**ति परमपेक्ष्य, तच्च प्रकृतत्वाद् युष्मदस्मदपेक्षमेवेत्याह– **युष्मदस्मद्भ्यां पूर्वमि**ति । **असदिवे**ति स्पष्टयति– **अविद्यमानमि**वेत्यादि । **श्रमणा ! युष्मान् रक्षत्वि**त्यादि– अत्र श्रमणा इत्यामन्त्र्यं तस्याविद्यमानत्वे युष्मदस्मदोः पदात् परत्वं नेति वस्-नसादयो न भवन्तीत्याह– **एष्वि**त्यादि । अथ पूर्वस्याऽऽमन्त्र्यस्याविद्यमानवद्भावात् कथं ' ग्रामश्चैत्र ! ते स्वमथो ' [ इत्यादौ पदात् परयोः ] युष्मदस्मदोरुच्यमानस्ते-मयाद्यादेश इत्याह–**ग्राम** इत्यादि– तथाऽऽमन्त्र्यस्यासत्त्वात् सपूर्वत्वाभावात् " सपूर्वात्० " [ २. १. ३२.] इति विकल्पाभावः । **इव करणं किमि**[ ति-असदि ]-त्युक्तेऽसत्त्वसिद्धेः किमर्थमिवकरणमिति प्रश्नार्थः । समाधत्ते– **श्रवणं यथा स्यादि**ति– इवकरणमन्तरेणासदित्युच्यमाने युष्मदस्मद्भ्यां पूर्वमामन्त्र्यस्य प्रयोगाभावः स्यादतः प्रयोगनिवृत्तिर्माभूत् तन्निमित्तककार्याभाव एव य[ था ] स्यादित्येवमर्थमिवग्रहणम् । ननु च परार्थे प्रयुज्यमानाः शब्दा अतिदेशं गमयन्ति, यथा–गौरयं वाहीक इति, तत्र च विद्यमानस्यासदिति वचनादि(द)-तिदेशो गम्यते, अतिदेशधर्मश्च स्वाश्रयानिवृत्तिरिति गतार्थ [ गतार्थत्वान्नार्थ ] इव ग्रहणेन सत्यम्– एवं तु मन्यते–इवग्रहणमन्तरेणाप्रयोगव्यवस्थार्थमिदं स्यात्, ततश्च कुतश्चित् पूर्वमामन्त्र्यं न भवति, तथा च सति पूर्वस्यामन्त्र्यस्य परेणामन्त्र्येण सह निरन्तरता न स्यात् । [ **पूर्वमिति किमिति**– ] यदि पूर्वमिति नोच्यते तदा " मयैतत् सर्वमाख्यातं युष्माकं मुनिपुङ्गवाः ! " इत्यत्र युष्मच्छब्दात् परमपि मुनिपुङ्गवा इत्यामन्त्र्यमविद्यमानवत् स्यात् । अथ परस्याविद्यमानवद्भावे को दोष इत्याह– **परस्य ही**त्यादि–" युष्माकं मुनिपुङ्गवाः " इत्येतावान् पादः, तस्यादिः ' युष्माकम् ' इति, तत्र परस्याविद्यमानत्वे पादाभावाद् युष्माकमित्यस्य पदादित्वाभावात् " पादाद्योः " [ २. १. २८. ]

इति प्रतिषेधस्याप्यभावात् पदात् परस्यैमाऽऽदेशः प्रसज्येत । अथ प्रत्यासत्तेरव्यवहितस्यैव पूर्वस्याविद्यमानवद्भावः, ततश्चैत्र ! धर्मो वोऽथो रक्षत्वित्यादौ विहितस्यामन्त्र्यस्य चैत्रादेरविद्यमानवद्भावात् "सपूर्वात्०" [२. १. ३२.] इति विकल्पप्रसङ्ग इति, नैवम्- व्यवहितेऽपि पूर्वशब्दस्य दर्शनात्, यथा- मथुरायाः पूर्वं पाटलिपुत्रमिति, मथुरापाटलिपुत्रयोरनेकग्रामनगरान्तरितेऽपि पाटलिपुत्रे पूर्वशब्द इत्याह- **व्यवहितेऽपी**त्यादि- अयमर्थः- यद्यव्यवहितस्यैव पूर्वस्याविद्यमानवद्भावो न व्यवहितस्य तदा पूर्वग्रहणमपनीय "असदिवामन्त्र्यात्" इत्येवोच्येत, यतः पूर्वस्याप्यविद्यमानवद्भावे युष्मदस्मदोर्वस्नसाद्यभावः प्रयोजनम्, तदित्थमपि सिध्यति, किं पूर्वग्रहणेन ? तथोत्तरसूत्रेऽप्येतदानुगुण्येन "जस्विशेष्याद्" [२. १. २६.] इत्येव क्रियेत, अतः पूर्वग्रहणाद् व्यवहितस्यापि पूर्वस्याविद्यमानवद्भाव इति। **तेने**त्यादिना व्यवहितस्याविद्यमानवद्भावे सिद्धं प्रयोजनं दर्शितमिति ॥ २. १. २५ ॥

**न्या० स०—असदिवे**त्यादि–योऽर्थः स्वेन धर्मेण प्रसिद्धो धर्मान्तरसम्बन्धं प्रत्यभिमुखीक्रियते स आमन्त्र्यः, यथा देवदत्तो देवदत्तत्वेन प्रसिद्धो धर्मान्तरेऽभिमुखीक्रियते, यथा पच पठेत्यादि, तत्रार्थे कार्यासंभवादुपचारादामन्त्र्याभिधायि पदमामन्त्र्यं विज्ञायत इति । अथोत्तरत्र नित्यग्रहणादस्मिन् सूत्रे कथं विकल्पो न लभ्यते इति, उच्यते–नित्यं विधास्यमानत्वादिति भणनाद् यत्रैव वस्नसादयो विधीयन्ते तत्रैव विकल्प उपतिष्ठते न वस्नसादीनां निषेधे इति । अथवा यद्यत्रापि सूत्रे विकल्पः स्यात् तदा किमेतत्सूत्रकरणेन ? यतः "असदिवामन्त्र्यं पूर्वम्" [२. १. २५] इति कृतेऽपि वस्नसादयो विकल्पन्ते, ते च "पदाद् युग्विभक्त्या०" [२.१.२१.] इत्यनेनैव विकल्पेन भविष्यन्ति । **श्रवणं यथा स्या**दिति–अन्यथा लोपः स्यात् "ते लुग् वा" [३. २. १०८.] इत्यनेनैव । **पादादिलक्षण** इति–मुनिपुङ्गवा इत्यस्य पदस्याऽऽत्त्वे पदस्याभावादित्यर्थः । मुनिपुङ्गवा इति सिंहादित्वात् समासः कर्मधारयो वा । **व्यवहितेऽपी**ति–यथा मथुरायाः पूर्वं पाटलिपुत्रमिति । **पूर्वशब्दो वर्तते** इति–अयमर्थः–यद्यव्यवहितस्यैव पूर्वस्यानेनाऽसद्भावो विधीयेत न व्यवहितस्य तदा पूर्वग्रहणमपनीय "असदिवामन्त्र्याद्" इत्येव क्रियेत, यतः पूर्वस्याविद्यमानवद्भावे वस्नसाद्यभावः प्रयोजनम्, तच्चेत्थमपि कृते सिध्यति; तथोत्तरसूत्रेऽप्येतदानुगुण्येन "जस्विशेष्याद्" [२. १. २६.] इत्येवं विधीयेतेति ॥ २५ ॥

## जस्विशेष्यं वाऽऽमन्त्र्ये ।२।१।२६॥

**त० प्र०—तदतद्विषयं विशेष्यम्, तस्य व्यवच्छेदकं विशेषणम्; युष्मदस्मद्भ्यां पूर्वं जसन्तमामन्त्र्यं पदं विशेष्यमामन्त्र्ये पदे सामर्थ्यात् तद्विशेषणभूते परेऽसदिव वा भवति, पूर्वेण नित्यं प्राप्ते विकल्पः ।** जिनाः ! शरण्या ! युष्मान् शरणं प्रपद्ये, जिनाः ! शरण्या ! वः शरणं प्रपद्ये; जिनाः ! शरण्या ! अस्मान् रक्षत, जिनाः ! शरण्या ! नो रक्षत; सिद्धाः ! शरण्या ! युष्मानथो शरणं प्रपद्ये, सिद्धाः शरण्या ! वोऽथो शरणं प्रपद्ये; सिद्धाः ! शरण्या अस्मानथो रक्षत, सिद्धाः ! शरण्या ! नोऽथो रक्षत । जसिति किम् ? साधो ! सुविहित ! वोऽथो शरणं प्रपद्ये, साधो ! सुविहित ! नोऽथो रक्ष । विशेष्यमिति किम् ? शरण्याः ! साधवो ! युष्मान् शरणं प्रपद्ये, शरण्याः ! साधवोऽस्मान् रक्षत । आमन्त्र्य इति किम् ? आचार्या ! युष्मान् शरण्याः ! शरणं प्रपद्ये, अत्रामन्त्र्यं विशेषणं व्यवहितत्वाद् न परमिति न भवति । सामर्थ्याद् तद्विशेषणभूत इति किम् ? आचार्या ! उपाध्याया ! युष्मान् शरणं प्रपद्ये ॥ २६ ॥

**श० न्या०—जस्वि०** । विशिष्यते– भिद्यते व्यावर्तत इति विशेष्यम्, तद् विशेषणापेक्षं, विशेषणेन हि तद् विशिष्यत इति, विशेष्यं व्याचक्षाणस्तत् **तदतद्विषयमि**त्यादिना सविशेषणं व्याचष्टे, स चासरश्चेत्युपात्तोऽन्यस्त्वर्थः, यथा–नीलमुत्पलमित्यत्र नीलं रक्तं च, तौ विषयोऽस्य तदतद्विषयमुत्पलं तद् विशेष्यम्, तस्य व्यवच्छेदकं– भेदान्तराद् बुद्धेर्व्यावर्तकं विशेषणम्, विशिष्यतेऽनेनेति कृत्वा नीलमुच्यते । विशेष्यमित्यस्य विशेष्यमामन्त्र्यमिति वर्तत इत्याह– **आमन्त्र्यं पद**मित्यादि । **विशेष्यं** विशेष्याभिधायि पदमित्यर्थः । विशेष्यस्य विशेषणाकाङ्क्षिण एकवाक्योपात्तत्वेन सामर्थ्यात् सन्निहितत्वाद् विशेष्यनिमित्तम् 'आमन्त्र्ये' इत्येतदेव विशेषणं विज्ञायत इत्याह– **तद्विशेषणभूत** इति । पूर्वेण व्यवहितस्याप्यविद्यमानवद्भाव इत्यविद्यमानवद्भावे नित्यं प्राप्ते पक्षेऽनेन विद्यमानवद्भावस्तन्निवर्तनेन विधीयत इत्याह–**पूर्वेणे**त्यादि । **जिनाः शरण्या युष्मान् शरणं प्रपद्यते [ प्रपद्ये ]** इति– अत्र जिना इति जसन्तं विशेष्यम्, जिना हि व्यावर्त्यत्वेन विवक्ष्यन्ते, यतो रागादिजयाज्जिनाः, रागादिजयश्च क्षयोपशमभेदात् द्विधा, तत्रोपशमरूपे जये तत्प्रादुर्भावात् कदाचिदशरण्यत्वमपीति शरण्या इति व्यावर्तककत्वेन विशेषणम्, [ पूर्वेण ] नित्यमविद्यमानवद्भावे द्वयोरपि पदयोरविद्यमानवद्भावाद् **वः शरणमि**ति कदाचिदादेशश्रुतिर्न स्यात् । **साधोः [ सुविहित ! वोऽथो** इत्यत्र विशेष्यस्या ]मन्त्र्यस्यामन्त्र्ये तद्विशेषणभूतेऽपि जसिति वचनाजसन्तत्वाभावाद् विकल्पाभावे उत्तरेण नित्यं प्रतिषेध इति, अथ साधो ! सुविहितेति एक आमन्त्र्यते तत् कथं बहुवचनप्रयोगः ? सत्यम्– एकमामन्त्र्यमिति तेन सहान्येषामप्यभिधानाद् बहुवच-

नोपपत्तिरिति । **शरण्याः साधवो युष्मानि**त्यादि–अत्र शरण्या इति विशेषणं साधव इति विशेष्यम्, त [ त्रामन्त्र्ये ] परतो जसन्तविशेष्यस्य विकल्पेन विद्यमानवद्भावविधानाद् विशेषणस्य न भवतीत्यर्थः, नाप्युत्तरो निषेध इति पूर्वेण नित्यमविद्यमानवद्भाव एव । **आचार्या युष्मानि**त्यादि– अत्रामन्त्र्यस्य विशेष्यस्य व्यवहितत्वात् परत्रोपश्लेषाऽऽभावान्न भवति । **आचार्या उपाध्याया** इत्यादि– अत्र भिन्नाधिकरणयोः पदयोर्न पूर्वं विशेष्यं न परं विशेषणमिति सामर्थ्यात् तद्विशेषणभूते आमन्त्र्य इति वचनान्न भवति ॥ २. १. २६. ॥

**न्या० स०—**अस्वि० इत्यादि । **तदतद्विषयमिति**–शब्दप्रधानत्वात् स्याद्वादाश्रयणेन शब्दार्थयोरैक्याद् वाऽर्थाभावे त्यदादित्वाभावात् तच्छब्दावयवयोगात् समुदायोऽपि तद् इत्यादि कृत्वा कर्मधारयकरणात् बाहुलकाद् वा नैकशेषः, तच्च अतच्च तदतदी, द्वन्द्वे " आ द्वेरः " [ २. १. ४१. ] इति न " न सर्वादिः " [ १. ४. १२. ] इति निषेधात् । **सामर्थ्यात् तद्विशेषणभूत** इति । विशेष्यस्य विशेषणाकाङ्क्षिण एकवाक्योपात्तत्वेन सामर्थ्यात् सन्निहितत्वाद् विशेष्यत्वनिमित्तमामन्त्र्य इत्येतदेव विशेषणं विज्ञायत इति । **जिनाः ! शरण्या** इत्यत्र शरणमिति सामान्यकर्म, युष्मानिति विशेषकर्म । **सिद्धाः ! शरण्या ! युष्मानथो शरणं प्रपद्ये** इत्यादौ " सपूर्वात्० " [ २. १. ३२. ] इत्यादिना वा वस्नसौ प्राप्तावपि " असदिवा० " [ २. १. २५. ] इत्यनेन निषिद्धौ पुनरऽनेन विकल्प्येते । **जसिति किम् ? साधो ! सुविहितेति**–अत्र द्वयोरपि पदयोः " असदिवा० " [ २. १. २५. ] इत्यसत्त्वे प्राप्ते " नान्यत् " [ २. १. २७. ] इत्यनेन साधो ! इत्यस्यासत्त्वाभावः, " नित्यमन्वादेशे " [ २. १. ३१. ] इत्यनेन च वस्नसौ । **शरण्या ! साधवो ! युष्मानिति**–अत्र द्वयोरपि " असदिवा० " [ २. १. २५. ] इत्यसद्वद्भावः । **आचार्या ! युष्मान् शरण्या !** इति–अत्रामन्त्र्यस्य विशेष्यस्य व्यवहितत्वेन परत्रोपश्लेषाभावान्न भवति । **आचार्या ! उपाध्याया !** इति–अत्र भिन्नाधिकरणयोः पदयोर्न पूर्वं विशेष्यं न परं विशेषणमिति " सामर्थ्यात् तद्विशेषणभूते " इति भणनान्न भवति ॥ २६ ॥

## नान्यत् । २ । १ । २७ ॥

**त० प्र०**–युष्मदस्मद्भ्यां पूर्वं जसन्तादन्यदामन्त्र्यं पदं विशेष्यमामन्त्र्ये पदे तद्विशेषणभूते परेऽसदिव न भवति । साधो ! सुविहित ! त्वा शरणं प्रपद्ये, साधू ! सुविहितौ ! वां शरणं प्रपद्ये; साधो ! सुविहित ! मा रक्ष, साधू ! सुविहितौ नौ रक्षतम्; साधो ! सुविहित ! ते ज्ञानं दीयते, मे ज्ञानं दीयताम्; साधू ! सुविहितौ ! वां ज्ञानं दीयते, नौ ज्ञानं दीयताम्; साधो ! सुविहित ! ते शीलं स्वम्, मे शीलं स्वम्; साधू ! सुविहितौ ! वां शीलं स्वम्, नौ शीलं स्वम्; अत्र परस्य " असदिवामन्त्र्यं पूर्वम् " [ २. १. २५. ] इत्यसत्त्वेऽपि पूर्वविशेष्यपदाश्रया युष्मदस्मदादेशा भवन्ति । विशेष्यमित्येव– सुवहित ! तव शीलं, मम शीलम् ॥ २७ ॥

**श० न्या०–नान्यत्** । जस्विशेष्यमित्यस्य प्रधानतयाऽन्यदिति सम्बन्धात् तस्य च निषेधार्थत्वात् सविशेषणे च विधिनिषेधयोर्विशेषण एव पर्यवसितत्वात् अतोऽन्यद् गम्यत इत्याह–**जसन्तादन्यदि**ति । एतावता च शेषस्य विशेष्यादेरनुवृत्तिरनुमता भवतीति दर्शयति–**आमन्त्र्यं पदमि**त्यादि । **साधो ! सुविहित त्वा शरणं प्रपद्य** इत्यादि–अत्र परस्यामन्त्र्यस्याविद्यमानवद्भावेऽपि पूर्वस्याविद्यमानवद्भावाभावात् त्वामादय आदेशा भवन्ति । प्रत्युदाहरणं च सर्वानुसारेण बोद्धव्यम् । ननु विशेष्यस्यासत्त्वप्राप्तौ तद्विशेषणपदे परतः सत्त्वमनेन विधीयते, परपदस्य च " असदिवामन्त्र्यम्० " [ २. १. २५. ]इत्यसत्त्वात् परत्वाभावः, सत्यम्–असत्त्वं हि पूर्वस्य परभूतयुष्मदादिकार्यपेक्षयाऽऽश्रीयते, न तु विशेषणात् पूर्वकार्यपेक्षया । ननु चामन्त्र्यं पदममिमुखीभवेति किञ्चान्तरमाक्षिपद् वाक्यान्तरमेव ततश्च वाक्यभेदादेवादेशाभावः सिद्धः किमनेन ? नैवम्–अत एवारम्भाद् वाक्यभेदो नाश्रीयते, तेन साधो ! सुविहितेत्यादावेकवाक्यत्वादादेशाः सिद्धाः ॥ २. १. २७ ॥

**न्या० स०—नान्यदिति** । " जस् विशेष्यम्० " [ २. १. २६. ] इत्यस्य प्रधानतयाऽन्यदिति सम्बध्यते–इत्याह–**जसन्तादिति** ॥ २७ ॥

## पादाद्योः । २ । १ । २८ ॥

**त० प्र०—नियतपरिमाणमात्राक्षरपिण्डः पादः, पदात् परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तत् पादस्यादिभूतयोर्न भवति ।**

" वीरो विश्वेश्वरो देवो, युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं पापनाशनः " ॥१॥

पादाद्योरिति द्विवचनं युष्मदस्मदोरभिसम्बन्धार्थम्, पादादाविति ह्युच्यमाने आमन्त्रमभिसम्बध्येत । पादाद्योरिति किम् ?

" पान्तु वो देशनाकाले, जैनेन्द्रा दशनांशवः ।
भवकूपपतज्जन्तुजातोद्धरणरज्जवः " ॥ २ ॥ २८ ॥

**श० न्या०–पादा०** । पादस्यादी पादादी तयोः पादाद्योरिति । पादलक्षणमाह–**नियते**त्यादि–मात्राश्च अक्षराणि च मात्राक्षराणि, नियतं–निश्चितं परिमाणमियत्ता येषां तानि तथोक्तानि, नियतपरिमाणानि च तानि मात्राक्षराणि च [ नियतपरिमाणमात्राक्षराणि ] तेषां पिण्डः समूहः पाद इत्युच्यते, तत्र

मात्रासमूहः पादो यथाऽऽर्यादीनाम्, अक्षरसमूहः पादो यथा प्रतिष्ठादिजातीनाम्, विशेषनिर्णयश्चास्य छन्दोविचितौ द्रष्टव्यः। **पादाद्योरि**ति द्विवचनेन "असदिवामन्त्र्यम्०" [२. १. २५.] इत्यादौ युष्मदस्मदोः षष्ठ्यन्ततया सम्बन्धविकलयोरपीहान्यस्य प्रकान्तस्य द्वित्ववतोऽभावात् षष्ठ्यन्ततयैवानुवृत्तिरिति प्रदर्श्यते, ते च पदादिति विशेषणसम्बद्धे एवानुवर्तेते,षष्ठ्यन्तस्य च साक्षान्न तया सम्बन्धोऽस्ति किन्तु तदुक्तकार्यस्य तेन सम्बन्ध इत्याह- **पदात् परयोरि**त्यादि। **यदुक्तमि**ति सामान्येन सकलकार्यपरिग्रहार्थम्, विशेषेण दर्शयति-**वस्नसादी**ति-"शेषे लुग्" [२. १. ८.] इत्यादि तु न पदात् परयोरुक्तमिति तन्नाऽऽश्रीयते। **पादस्यादिभूतयोरि**ति- पादस्याऽऽदित्वं प्राप्तयोरित्यर्थः। **वीर** इत्यादि-अत्र देव इति पदात् परस्य युष्माकमित्यस्य भगवानित्यतः परस्यास्माकमित्यस्य च पादादिर्वस्नसावादेशौ प्राप्तौ न भवतः। अथ किमर्थं पादाद्योरिति द्विवचननिर्देशः? पादादावित्युच्यमाने पादस्य प्रथमावयवत्वे वर्तमानयोर्युष्मदस्मदोरिति विज्ञायमाने सिध्यत्येवेष्टम्, सत्यम्- सिध्यति, यद्येवमभिसम्बन्धो लभ्यते, स तु दुर्लभ इत्याह- **पादाद्योरि**त्यादि- पादाद्योरिति द्विवचनं पादाद्योर्युष्मदस्मदोरिति षष्ठ्यन्तयोरभिसम्बन्धो यथा स्यादित्येवमर्थं क्रियते पादादावित्युच्यमाने त्वेतद् दुर्लभमित्याह-**पादादाविति ह्युच्यमाने** इत्यादि- हिर्यस्मादर्थे तेनायमर्थः-यस्मात् पादादावित्युच्यमानेऽस्यामन्त्र्य इत्यनेनापि सम्बन्धो युज्यतेऽनुवृत्तौ तस्यैवानन्तरत्वाद् युष्मदादेश्च विप्रकृष्टत्वादतः पादाद्योरिति द्विवचनं युष्मदस्मदोरभिसम्बन्धार्थम्॥ २. १. २८.॥

**न्या० स०—पादा०** इत्यादि। मात्राश्च अक्षराणि च मात्राक्षराणि, नियतपरिमाणानि च तानि मात्राक्षराणि च तेषां पिण्डः, यद्वा मात्राक्षराणां पिण्डः २, नियतपरिमाणश्चासौ मात्राक्षरपिण्डश्च २। **पादादाविति ह्युच्यमाने** इति-पादादावित्यस्यान्त्याभिसम्बन्धे किं स्यात्?

"जिनेश! त्वां नमस्कृत्य, यन्नरो मुक्तिमिच्छति।
अतो नरसुराधीशस्तुत्यस्तोत्रं त्वमर्हसि"॥ १॥

इत्यत्रामन्त्र्यस्य पदस्यादिभूतस्य सत्त्वात् त्वादेशः प्रसज्यतेऽतो द्विवचनमदात् सूरिः। **देशनाकाल** इति-देशनं देशस्तं करोति "णिज् बहुलम्०" [३. ४. ४२.] देश्यते इति 'णिवेत्त्यास०' [५. ३. १११.] इत्यनः॥ २८॥

## चाहहवैवयोगे। २। १। २९॥

**त० प्र०**—'च अह ह वा एव' इत्येतैर्योगे-सम्बन्धे पदात् परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति। ज्ञानं युष्मांश्च रक्षतु, अस्मांश्च रक्षतु; ज्ञानं युष्मानह रक्षतु, अस्मानह रक्षतु; ज्ञानं युष्मान् ह रक्षतु, अस्मान् ह रक्षतु; ज्ञानं युष्मान् वा रक्षतु, अस्मान् वा रक्षतु; ज्ञानं युष्मानेव रक्षतु, अस्मानेव रक्षतु; ज्ञानं युष्मभ्यं च दीयते, अस्मभ्यं च दीयते; ज्ञानं युष्माकं च स्वम्, अस्माकं च स्वम्; ज्ञानं युवां च रक्षतु, ज्ञानमावां च रक्षतु; ज्ञानं युवाभ्यां च दीयते, आवाभ्यां च दीयते; ज्ञानं युवयोश्च स्वम्, आवयोश्च स्वम्; ज्ञानं त्वां च रक्षतु, मां च रक्षतु; ज्ञानं तुभ्यं च दीयते, मह्यं च दीयते; ज्ञानं तव च स्वम्, मम च स्वम्। योगग्रहणं किम्? ज्ञानं च शीलं च वो रक्षतु, नो रक्षतु; ज्ञानं च शीलं च वां दीयते, नौ दीयते; ज्ञानं च शीलं च ते स्वम्, मे स्वम्; ज्ञानं च शीलं च त्वा रक्षतु, मा रक्षतु; ज्ञानं च ते स्वम्, ज्ञानं च मे स्वम्; नैतेषु चशब्देन युष्मदस्मदोर्योगोऽपि तु ज्ञान-शीलयोः। "चाहहवैवैः" इत्येव सिद्धे योगग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम्॥ २९॥

**श० न्या०—चाह०।** चश्चाहश्च हश्च वाश्च एवश्च चाहहवैवास्तैर्योगे, चादिद्योत्यसमुच्चयाद्यर्थस्य साक्षाद् युष्मदस्मदर्थसम्बन्धे इत्यर्थः। **ज्ञानं युष्मांश्च रक्षत्वि**त्यादि- अत्र शसन्तयोश्चादियोगे साकल्येनोदाहृतम्, शसोऽन्यत्राप्येवमुदाहार्यम्, एतेषु द्वितीया-चतुर्थी-षष्ठीनां बहुवचने वस्नसौ न भवतः। **ज्ञानं युवां च रक्षत्वि**त्यादि-अत्र द्विवचने वाम्-नौ न भवतः। **ज्ञानं त्वां च रक्षत्वि**त्यादि- एतेष्वेकवचने त्वा-मा-ते-मयो न भवन्ति। **ज्ञानं च शीलं च वो रक्षत्वि**त्यादि- अत्र चशब्देन ज्ञान-शीलयोः सद्वितीयता द्योत्यते, न तु युष्मदर्थयोरिति युष्मदस्मदोर्योगाभावाद् योगग्रहणादत्र प्रतिषेधो न भवतीत्याह- **नैतेष्वि**त्यादि। अथ योगग्रहणं किमर्थम्? "चाहहवैवैः" इति तृतीयानिर्देशस्य सापेक्षत्वात् तृतीयैव युक्ताम्[युक्तम्, युक्ताव]ध्याहरिष्यति, यथा "गौणात् समया०" [२. २. ३३.] इत्यादावित्याह- **चाहवैवैरि**त्यादि। **योगग्रहणं साक्षाद् योगप्रतिपत्त्यर्थमि**ति- यदा चादिभिर्युष्मदस्मदर्थस्यैव समुच्चयविकल्पादयो द्योत्यन्ते तदा चादिभिः साक्षाद् युष्मदस्मदोर्योगः, यदा च तत्सम्बन्धिनः शीलादेस्तदा व्यवधानेन चादिभिर्युष्मदस्मदोर्योगः,तत्र साक्षाद्योगे प्रतिषेधो यथा स्याद्,व्यवधानेन योगे मा भूदित्येवमर्थं योगग्रहणम्। ननु सन्निकृष्टे साक्षाद् योगे प्रतिषेधस्य चरितार्थत्वान्न व्यवहिते विप्रकृष्टयोगे प्रवर्त्तिष्यत इति किं योगग्रहणेन? एवं तर्हि एतदेव योगग्रहणं ज्ञापकं युक्तयुक्तेऽप्यस्मिन् प्रकरणे कार्यं भवतीति॥ २. १. २९.॥

**न्या० स०—चाहहेत्यादि।** **योग** इति-चादिद्योत्यसमु-

चयोगार्थस्य साक्षाद् युष्मदस्मदर्थसम्बन्ध इत्यर्थः, ज्ञानं च शीलं चेत्यत्र चशब्देन ज्ञानशीलयोः सद्वितीयता द्योत्यते न तु युष्मदस्मदर्थयोरिति। योगग्रहणमिति– अयमर्थः–योगग्रहणं विना अर्थात् प्रकरणाद् वा चादिषु गम्यमानेष्वपि स्यादिति ॥ २९ ॥

## दृश्यर्थैश्चिन्तायाम् । २ । १ । ३० ॥

**त० प्र०—**दृशिना समानार्था दृश्यर्थाः, तैर्धातुभिश्चिन्तायां वर्तमानैर्योगे युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति। जनो युष्मान् संदृश्यागतः, जनोऽस्मान् संदृश्यागतः; जनो युवां समीक्ष्यागतः, जन आवां समीक्ष्यागतः; जनस्त्वामपेक्षते, जनो मामपेक्षते; ज्ञानं युष्मभ्यं दीयमानमुत्पश्यति, ज्ञानमस्मभ्यं दीयमानमुत्पश्यति; ज्ञानं युवाभ्यां दीयमानं निरूपयति, ज्ञानमावाभ्यां दीयमानं निरूपयति; ज्ञानं तुभ्यं दीयमानं निध्यायति, ज्ञानं मह्यं दीयमानं निध्यायति; जनो युष्माकं चित्तमुपलक्षयति, जनोऽस्माकं चित्तमुपलक्षयति; जनो युवयोः कार्यं संपश्यति, जन आवयोः कार्यं संपश्यति; गुरुस्तव कार्यमालोचयति, गुरुर्मम कार्यमालोचयति; सर्वत्र मनसा चिन्तनं दृश्यर्थानामर्थः। दृश्यर्थैरिति किम् ? जनो वो मन्यते, जनो नो मन्यते। चिन्तायामिति किम् ? जनो वः पश्यति, जनो नः पश्यति; जनो वामीक्षते, जनो नावीक्षते; जनस्त्वा लोकयति, जनो मा लोकयति; सर्वत्र चक्षुषा पश्यतीत्यर्थः ॥ ३० ॥

**श० न्या—**दृश्यर्थै०। दृश्यर्थैरिति–" इ–कि–श्तिव्० " [ ५. ३. १३८. ] इति धातोः स्वरूपेऽर्थे इकुप्रत्ययो [ वा किप्रत्ययो ] विधीयते, तत्र स्वरूपे विधीयमाने दृशेरर्थो येषामिति व्यधिकरणबहुव्रीहिप्रसङ्गात् तस्य च प्रायेणानिष्टत्वादर्थे प्रत्ययः, ततो दृशिरिति दृशेरर्थो दर्शनमालोचनमर्थो येषामित्यन्यपदार्थत्वेन धातव एव विज्ञायन्ते, युजिक्रियाकर्तृत्वात् कर्तरि तृतीया, युजिक्रियायाश्च सन्निधानं तृतीयया योगार्थस्याक्षेपात्, प्रोक्तस्य [प्राक्तनस्य] च योगग्रहणस्यानुवृत्तौ दृश्यर्थैः साक्षाद् युक्तयोरेव युष्मदस्मदोः प्रतिषेधः स्यात्, अत्र तु युक्तायुक्तेऽपि प्रतिषेध इष्यते, तत्र च पूर्वमेव युक्तिरुक्ता। **जनो युष्मान् संदृश्याऽऽगत** इत्यादौ सर्व[ त्र ] वाक्ये संदृश्येत्यादौ मनोवृत्तिरूपा चिन्ता दृश्यर्थ इति वस्–नसादयो न भविष्यन्तीत्याह–**सर्वत्रे**त्यादि। **जनो वो मन्यत** इति–मन्यतिर्नाऽयं दृश्यर्थः, दृश्यर्थो नाम स यश्चक्षुःसाधने विज्ञाने वर्तते, अतो न निषेध इति। **चिन्तायामिति**–विषयसप्तमीयम्, विषयार्थश्चानन्यत्र भावः, अतश्चक्षुषा यत्र दर्शनं तत्र प्रतिषेधाभावादादेश इति ॥ २. १. ३०. ॥

**न्या० स०—दृश्यर्थैरि**त्यादि। **दृश्यर्थैः** अत्रार्थे स्वरूपे वा किः, तत्र यदार्थे तदा दृशिरर्थो येषाम्, स्वरूपे तु दृशेरर्थो दर्शनमालोचनं येषां धातूनाम्। **जनो वो मन्यते** इति–नाऽयं दृश्यर्थः, दृश्यर्थो नाम [ स ] यश्चक्षुःसाधने विज्ञाने वर्तते, अतो न निषेध इति ॥ ३० ॥

## नित्यमन्वादेशे । २ । १ । ३१ ॥

**त० प्र०—**कथितानुकथनमन्वादेशः, कस्यचिद् वस्तुनः किञ्चित् क्रियादिकं विधातुं कथितस्य तेनान्येन वा शब्देन पुनरन्यद् विधातुं कथनमित्यर्थः, तस्मिन् विषये पदात् परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्नित्यं भवति। यूयं विनीतास्तद् वो गुरवो मानयन्ति, वयं विनीतास्तन्नो गुरवो मानयन्ति; युवां शीलवन्तौ तद् वां गुरवो मानयन्ति, आवां शीलवन्तौ तन्नौ गुरवो मानयन्ति; त्वं विद्वानथो ते क्षमाश्रमणैर्ज्ञानं दीयते, अहं विद्वानथो मे क्षमाश्रमणैर्ज्ञानं दीयते; धनवांस्त्वमथो त्वा लोको मानयति, धनवानहमथो मा लोको मानयति ॥ ३१ ॥

**श० न्या०—**नित्य०। अनुशब्दः पश्चाद्भावे, पश्चाद्भावश्च पूर्वभावापेक्षः, पूर्वभावश्च प्रत्यासत्तेरुत्तरपदार्थभूतस्यादेशस्यैव, आदेशश्च कथनम्, अनुकथनं च प्रत्यासत्तेः कथितस्यैवाधिकरणस्य, अन्यथा च तदन्यस्य प्रथमकथनमेव स्यान्नानुकथनमिति समानाधिकरणविषय इत्याह–**कथितानुकथनमन्वादेश** इति।

**कस्यचिद् वस्तुन** इत्यादिना कथितानुकथनमित्येतदेवाभिव्यनक्ति, कस्यचिद् द्रव्यस्य काञ्चित् क्रियां जातिं गुणं द्रव्यं वा प्रतिपादयितुं कथितस्य कार्यिभूतेन तदितरेण वा शब्देन पौनरुक्त्यं मा भूदिति विशेषान्तरं प्रतिपादयितुं पुनः कथनमन्वादेश इति यावत्। **तस्मिन् विषये** इति–यदुक्तं वस्–नसादि तन्नित्यं भवतीति नित्यतामात्रमनेन विधीयते नापूर्वं किञ्चिदिति। **यूयं विनीतास्तद् वो गुरवो मानयन्ती**त्यादि–**यूयं विनीता** इत्ययं प्रथमादेश उत्तरस्याऽन्वादेशताख्यापनार्थम्, **विनीता** इति विनीतत्वं प्रतिपादयितुं **यूयमिति** प्रतिपादितम्, **तद् वो गुरवो मानयन्ती**त्ययमन्वादेशः, अत्र **यूयमि**ति यत् प्रथममुक्तं तस्यैव च, **व** इति **गुरवो मानयन्ती**ति प्रतिपादयितुं द्वितीयं कथनम्, तत्र नित्यं वस्नसादेशः, एवं सर्वत्र। अथ किमर्थमिदम् ? सामान्येन वस्नसादीनां विधानादन्वादेशेऽपि सिद्धत्वात्, नित्यार्थमिति चेत् ? न–तत्र विकल्पाभावान्नित्यत्वस्यापि सिद्धत्वात्, न चानन्वादेशे विकल्पार्थमिति वाच्यम्, " अन्वादेशे " इत्यारम्भसामर्थ्या-

दनन्वादेशे विकल्पस्य सिद्धत्वात्, पृथक्करणादस्याधिकारार्थतापि माऽऽशङ्कनीया; नैवम्-" अन्वादेशे " इत्यारम्भेऽप्यन्वादेशे विकल्पोऽनन्वादेशे वेति निश्चेतुमशक्यत्वादत्र नित्यग्रहणं नित्यार्थमिति; न च " सपूर्वात्० " [ २. १. ३२. ] इत्यन्वादेशे विकल्पविधानान्नित्यग्रहणमन्तरेणापि " अन्वादेशे " इत्यारम्भादन्वादेश एव विकल्प इति वाच्यम्, यतोऽन्वादेशे विकल्पे सति सपूर्वादित्यस्य नियमार्थता स्यात्-सपूर्वात् प्रथमान्तादेवान्वादेशे विकल्पो न द्वितीयाद्यन्तात्, तथा सपूर्वादेव प्रथमान्ताद् विकल्पो न केवलात्, तत्रावधारणद्वयव्यावर्त्ये च विषये " पदाद् युग्० " [ २. १. २१. ] इत्यादिभिर्नित्य एव विधिः स्यादिति, तस्मादन्वादेश एव नित्यो विधिरन्यत्र तु विकल्प इति प्रतिपादनार्थं नित्यग्रहणम् ॥ २. १. ३१. ॥

**न्या० स०—नित्यमित्यादि** । नन्वत्र निषेधाधिकारे कथमिदं विधायकमभूत् ? सत्यम्—नित्यनिषेधाधिकारे यन्नित्यग्रहणं तदेवं बोधयति—विधानसूत्रमिदमिति । न चेदं वाच्यम्—अत्र नित्यग्रहणाभावे " पदाद्० " [ २. १. २१. ] इति सूत्रे कथं विकल्प इति, तदा हि तत्रैव नवेति कुर्यादिति । [ **कस्यचिद् वस्तुन** इति—] कस्यचिद् द्रव्यस्य काञ्चित् क्रियां जातिं गुणं द्रव्यं वा प्रतिपादयितुं कथितस्य तेन तदितरेण वा शब्देन पौनरुक्त्यं मा भूदिति विशेषान्तरं प्रतिपादयितुं पुनः कथनमन्वादेश इति यावत्, **तेनान्येन** वेति—युष्मदस्मच्छब्दाभ्यां कृत्वा विनीतत्वादिकं विधाय पुनर्युष्मदस्मद्भ्यां गुरुमाननादिकं विधीयते, अत्र सूत्रे तेनैव शब्देन कथनमस्ति, अन्येन तु कथनमुत्तरत्रैव ज्ञेयम्। **पुनरन्यद् विधातुमिति**—पुनःशब्दोपादानात् तस्यैव कथनं यदि भवति तदैवान्वादेशः, नह्यन्यस्य कथने पुनःशब्दार्थो घटते, तेन यत्रान्यस्य कथनं तत्र नान्वादेशः, ततश्च जिनदत्तमध्यापय, एतं च गुरुदत्तमित्यत्र तस्यैव जिनदत्तस्य पुनः कथनाभावादन्वादेशाभावात् " त्यदामेनद्० " [ २. १. ३३. ] इत्यनेन एनदादेशो न भवति। **यूयं विनीता** इति—अन्वादेशदर्शनार्थं वाक्यान्तरमिदमुपदर्शितम्, न तूत्तरपदसम्बद्धं बोधव्यम्, तेन तदित्यस्य पदस्य सपूर्वत्वाभावादुत्तरेण न विकल्पः, तदित्यव्ययं तस्मादित्यर्थे, विनीततामात्रमत्रानूद्यते नापूर्वं किञ्चिद् विधीयते, **यूयं विनीता** इति प्रथमादेश उत्तरस्यान्वादेशख्यापनार्थम्, **विनीता** इति विनीतत्वं प्रतिपादयितुं **यूयमित्युक्तम्** । **तद् वो गुरवो मानयन्तीति**—अयमन्वादेशः, **यूयमि**ति यत् प्रथममुक्तं तस्यैव च **गुरवो मानयन्तीति** प्रतिपादयितुं द्वितीयं कथनम्, तत्र वसादेशः, एवं सर्वत्र ॥ ३१ ॥

## सपूर्वात् प्रथमान्ताद् वा।२।१।३२॥

**त० प्र०**— विद्यमानपूर्वपदात् प्रथमान्तात् पदात् परयोर्युष्मदस्मदोरन्वादेशे वस्-नसादय आदेशा वा भवन्ति । यूयं विनीतास्तद् गुरवो वो मानयन्ति, तद् गुरवो युष्मान् मानयन्ति; वयं विनीतास्तद् गुरवो नो मानयन्ति, तद् गुरवोऽस्मान् मानयन्ति; युवां सुशीलौ तज्ज्ञानं वां दीयते, तज्ज्ञानं युवाभ्यां दीयते; आवां सुशीलौ तज्ज्ञानं नौ दीयते, तज्ज्ञानमावाभ्यां दीयते; सुशीलस्त्वमथो क्षमाश्रमणास्ते ज्ञानं प्रयच्छन्ति, अथो क्षमाश्रमणास्तुभ्यं ज्ञानं प्रयच्छन्ति; सुशीलोऽहमथो क्षमाश्रमणा मे ज्ञानं प्रयच्छन्ति, अथो क्षमाश्रमणा मह्यं ज्ञानं प्रयच्छन्ति; धनवानसि अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलस्तव स्वम्; धनवानहमथो ग्रामे कम्बलो मे स्वम्, अथो ग्रामे कम्बलो मम स्वम्; धनवांस्त्वं तल्लोकस्त्वा पूजयति, तल्लोकस्त्वां पूजयति; धनवानहं तल्लोको मा पूजयति, तल्लोको मां पूजयति। मध्येऽप्यन्वादेशो भवति— ग्रामे कम्बलो वः स्वमथो, ग्रामे कम्बलो युष्माकं स्वमथो इत्यादि । सपूर्वादिति किम् ? पटो युष्माकं स्वम्, अथो वः कम्बलः स्वम् । प्रथमान्तादिति किम् ? पटो नगरे युष्माकं स्वम्, अथो कम्बलो ग्रामे वः स्वम् । 'माणवक ! जटिलक ! ते स्वमथो इत्यादौ तु विशेषणपदस्य " असदिवामन्त्र्यं पूर्वम् " [ २. १. २५. ] इत्यसद्भावात् नास्ति सपूर्वप्रथमान्तमिति न भवत्येव विकल्पः। पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ॥ ३२ ॥

**श० न्या०—सपूर्वा०** । सहशब्दो विद्यमानवचनः, पूर्वशब्दो व्यवस्थार्थः, सह-विद्यमानं पूर्वं यस्मादिति पञ्चम्यर्थे बहुव्रीहौ " सहस्य स० " [ ३. २. १४३ .] इति सभावः । **यूयं विनीतास्तद् गुरवो वो मानयन्तीत्यादि**-एतेषु पक्षे वस्नसादयः । **माणवक ! जटिलक ! ते स्वमथो इत्यादाविति**-अत्र " असदिवामन्त्र्यं पूर्वम् " [ २. १. २५ ] इति जटिलकपदस्यासद्भावे सपूर्वप्रथमान्तत्वाभावाद् विकल्पाभावात् तत्पूर्वस्य च माणवकपदस्य " नान्यत् " [ २. १. २७. ] इति निषेधेन सद्भावात् पदात् परत्वे पूर्वेण नित्यं ते-मयादयः। प्रतिषेधफलतां पक्षेऽस्य दर्शयति—**पूर्वेणे**ति । प्रथमायाः प्रत्ययत्वात् " प्रत्ययः प्रकृत्यादेः " [ ७. ४. ११५. ] इत्यादिनाऽन्तस्य लब्धत्वादन्तग्रहणं न्यायानुवादकमिति ॥ २. १. ३२. ॥

**न्या० स०—सपूर्वादित्यादि** । सहशब्दो विद्यमानवचनः, पूर्वशब्दो व्यवस्थार्थः, सह-विद्यमानं पूर्वपदं यस्माद् " एकार्थं च०" [ ३. १. २२. ] इति समासः । **प्रथमान्ताद् वेति**—

प्रथमायाः प्रत्ययत्वात् "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इत्यादिनाऽन्तस्य लब्धत्वादन्तग्रहणं न्यायानुवादार्थमिति । **धनवानसी**त्यादि– अत्र अन्येन कथनमन्वादेशः, यतो धनवानसीत्यस्मिन्नन्वादेशादर्शके वाक्यान्तरे प्रथममसीत्युक्तम्, अथो ग्रामे कम्बलस्ते स्वमित्यत्र तु ते इत्युक्तम् । **गम्येऽप्यन्वादेशे भवती**ति– यूयं धनवन्त इत्यादिपदोपादाने हि साक्षादन्वादेशो भवति, 'अथो' इत्यादेस्तु द्योतकमात्रस्योपादाने गम्य एव । '**माणवक ! जटिलक ! ते स्वमथो**' इत्यादौ तु विशेषणपदस्य जटिलक ! इत्यस्य "असदिवा०" [ २. १. २५. ] इत्यसत्त्वम्, माणवक ! इत्यस्य तु विशेष्यपदस्य "असदिवामन्त्र्यम्०" [ २. १. २५ ] इति नाऽसत्त्वम्, "नान्यद्" [ २. १. २८. ] इति प्रतिषेधात् ॥ ३२ ॥

## त्यदामेनदेतदो द्वितीया-टौस्यवृत्त्यन्ते ।२।१।३३॥

**त० प्र०**—त्यदादीनां सम्बन्धिन एतदित्यस्य द्वितीयायां टायामोसि च परेऽन्वादेशे 'एनद्' इत्ययमादेशो भवति, अवृत्त्यन्ते– न चेदयमेतच्छब्दो वृत्तेरन्ते भवति । द्वितीया– उद्दिष्टमेतदध्ययनमथो एनदनुजानीत; एतकं साधुमावश्यकमध्यापयाथो एनमेव सूत्राणि, अत्र साकोऽप्यादेशः; सुशीलावेतौ सदेनौ गुरवो मानयन्ति, सुस्थिता एते सदेनान् देवा अपि नमस्यन्ति; टा– एतेन रात्रिरधीता अथो एनेनाहरप्यधीतम्; ओस्– एतयोः शोभनं शीलमथो एनयोर्महती कीर्तिः, सर्वाणि शास्त्राणि ज्ञातवन्तावेतौ अथो एनयोस्तिष्ठतोर्नान्यः पूजार्हः । त्यदामिति किम् ? एतदं संगृहाण अथो एतदमध्यापय, संज्ञायामसर्वादित्वादत्यदादिः । अवृत्त्यन्त इति किम् ? अथो परमैतं पश्य । अन्तग्रहणं किम् ? एनच्छ्रितकः, अत्रार्थात् प्रकरणाद् वाऽपेक्ष्ये निर्ज्ञाते सति समासोऽन्वादेशश्च । द्वितीया-टौसीति किम् ? एते मेधाविनो विनीता अथो एते शास्त्रस्य पात्रम्, एताभ्यां रात्रिरधीता अथो एताभ्यामहरप्यधीतम्, एतस्मै सूत्रं देहि, अथो एतस्मै अनुयोगमपि देहि; अभ्युदय-निःश्रेयसपदमेतच्छासनमथो एतस्मै नमो भगवते । अन्वादेश इत्येव– जिनदत्तमध्यापय एतं च गुरुदत्तम्, न पश्चात् कथनमात्रमन्वादेशः । यत्रापि वस्तुमात्रनिर्देशं कृत्वा विधानं क्रियते तत्रापि न भवति–

"ईषदर्थे क्रियायोगे, मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्, [वाक्य-स्मरणयोरङित्]" ॥ ३३ ॥

**श० न्या०**—त्यदा० । त्यच्छब्दस्य तत्प्रकारेष्वपि वर्तनात्, एकशेषात्, त्यदामिति बहुवचनात् त्यदादीनामिति विज्ञायते, तेन नैतद इति विशिष्यत इत्याह–**त्यदादीनां सम्बन्धिन एतदित्यस्ये**ति । **उद्दिष्टमेतदध्ययन**मिति प्रथमादेशः, **अथो एनदनुजानीते**त्ययमन्वादेशः, अत्रैतद एनदादेशः प्राप्नोति "अनतो लुप्" [ १. ४. ५९. ] इति लुब् वा, तत्र परस्मादप्येनदो नित्यत्वाद् *अन्तरङ्गानपि विधीन् बाधित्वा [ लुप् प्रवर्तते* ] इति च लुपि संजातायां "लुप्यय्वृल्लेनत्" [ ७. ४. ११२. ] इत्येनद्वर्जनात् स्थानिवद्भावप्रतिषेधाभावादेनदादेशः । ननु दकारविधानसामर्थ्याल्लुपि श्रवणार्थत्वादन्यत्र "आ द्वेरः" [ २. १. ४१. ] इत्यत्वसम्भवाल्लुप्येनदादेशो भविष्यति, किं "लुप्यय्वृल्लेनत्" [ ७. ४. ११२. ] इत्येनद्वर्जनेन ? नैवम्–दकारविधानसामर्थ्यादत्वबाधा किं न विज्ञायते ?, तत्र नात्वबाधा किन्तु नियमबाधैवेति प्रतिपत्तिर्दुष्करैवेत्येनद्ग्रहणम् । **एतक**मिति– अनुकम्पायामक्, अनेन साक आदेशो दर्श्यते । **एतदं सङ्गृहाण, अथो एतदमध्यापये**ति–अस्यैतदोऽत्यदादित्वान्नादेश इति । अत्यदादित्वं च प्रतिपादयितुमाह– [ **संज्ञाया**मिति ] असंज्ञायामिति गणे पाठात् संज्ञायां सर्वादेर्गणाद् बहिर्भावः, त्यदादिश्च सर्वाद्यन्तर्गणोऽतः संज्ञायां न त्यदादिरित्यर्थः । **एनच्छ्रितक** इति–एनं श्रित इति द्वितीया-[ न्तस्य ] "श्रितादिभिः" [ ३. १. ६२. ] इति समासे कुत्सितादौ कप् । प्रथमादेशसापेक्षत्वादन्वादेशस्य तत्रासामर्थ्यात् 'ऋद्धस्य राज्ञः पुरुषः' इत्यादिवत् समासाभावः, सामर्थ्यात् समासश्चेत् ? पूर्वकथनसापेक्षस्यान्वादेशस्याभाव इति परस्परविरोधादुभयाभावादत्रादेशाभाव इत्याह–**अर्थात् प्रकरणाद् वे**त्यादि–अर्थो वा तादृशो भवति, प्रकरणं वा, येन ताभ्यामेवापेक्ष्यस्य प्रथमादेशस्य निश्चितत्वाद् वृत्तावेवान्तर्भावान्निरपेक्षत्वात् समासो भवति, यथा–देवदत्तस्य गुरुकुलम्, ब्राह्मणस्य शुक्ला इत्यादि । **जिनदत्तमध्यापय, एतं च गुरुदत्त**मिति–नहि पश्चादुच्चारणमात्रमन्वादेशः, किं तर्हि ? एकस्यैवाभिधेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः, तेनेह न भवतीत्यर्थः । यद्येवम्–

"ईषदर्थे क्रियायोगे, मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्" इति [ इत्यत्र ] 'अयं दण्डो हरानेन' इत्यत्र [ च ] प्राप्नोति, नैवम्–यत्र किञ्चिद् विधाय वाक्यान्तरे पुनरन्यदुपदिश्यते सोऽन्वादेशः, अत्र तु वस्तुमात्रानुवादेन वेदनक्रियां प्रत्याकारस्य कर्मभावो दण्डस्य तु हरणक्रियां प्रति करणत्वं विधीयत इत्येकमेव विधानं न विधानान्तरमस्तीत्याह–**यत्रापी**त्यादि ॥ २. १. ३३. ॥

**न्या० स०**—त्यदामेनदेतदो द्वितीयेत्यादि । त्यच्च त्यदश्च त्यदः, "त्यदादिः" [ ३. १. १२०. ] इत्येकशेषः, "आ

द्रेः " [ २. १. ४१. ] इति तु न भवति सूत्रत्वात्, शब्दार्थयोर्भेदविवक्षायां निरर्थकत्वेन त्यदादित्वाभावाद् वा । **एताभ्यां रात्रिरधीतेति**– अत्राविवक्षितकर्मण इङ्धातोर्योगे रात्रिलक्षणस्याधारस्य "काला-ऽध्व-भाव-देशं वा०" [ २. २. २३. ] इति कालस्य कर्मत्वे ततश्चाधीतेत्यत्र कर्मणि क्ते सति कर्मण उक्तत्वाद् रात्रिशब्दात् प्रथमा, यदिवा रात्रिसहचरितमध्ययनमपि उपचाराद् रात्रिशब्देनोच्यते ततः साऽधीतेति । **अर्थात् प्रकरणाद् वेति**–प्रथमादेशसापेक्षत्वादन्वादेशस्य । ननु तत्रासामर्थ्यात् 'ऋद्धस्य राज्ञः पुरुषः' इत्यादिवत् समासाभावः, सामर्थ्यात् समासश्चेत् पूर्वकथनसापेक्षस्यान्वादेशस्याभाव इति परस्परविरोधादुभयाभावादन्वादेशाभाव इत्याह– **अर्थादित्यादि**–अर्थो वा तादृशो भवति प्रकरणं वा येन ताभ्यामेवापेक्ष्यस्य प्रथमादेशस्य निश्चितत्वाद् वृत्तावेवान्तर्भावान्निरपेक्षत्वात् समासो भवति, यथा देवदत्तस्य गुरुकुलम् । **वस्तुमात्रनिर्देशं कृत्वेति**–अनुवादमात्रं कृत्वेत्यर्थः, तत्रापि न भवति, यथा पतमातं ङितमित्यत्र ॥ ३३ ॥

## इदमः । २ । १ ३४ ॥

**त० प्र०**—त्यदादीनां सम्बन्धिन इदमित्यस्य द्वितीयायां टायामोसि च परेऽन्वादेशे 'एनद्' इत्ययमादेशो भवति, अवृत्त्यन्ते । उद्दिष्टमिदमध्ययनमथो एनदनुजानीत, इमकं साधुमावश्यकमध्यापय अथो एनमेव सूत्राणि, अत्र साकोऽप्यादेशः, सुशीलाविमौ तदेनौ गुरवो मानयन्ति, सुस्थिता इमे तदेनान् देवा अपि नमस्यन्ति; अनेन रात्रिरधीता अथो एनेनाहरप्यधीतम्; अनयोः शोभनं शीलमथो एनयोर्महती कीर्त्तिः, सर्वाणि शास्त्राणि ज्ञातवन्ताविमौ अथो एनयोस्तिष्ठतोर्नान्यः पूजार्हः । द्वितीया-टौसीत्येव– मत्पुत्रकौ शीलवन्ताविमकौ तिष्ठतः । अवृत्त्यन्त इत्येव–अथो परमेमं पश्य, वृत्त्यादौ तु भवत्येव– एनमेनां वा श्रित एनच्छ्रितकः । अन्वादेश इत्येव–चैत्रमध्यापय इमं च मैत्रम् । यत्रापि वस्तुमात्रनिर्देशं कृत्वा किञ्चिद् विधीयते तत्रापि न भवति–अयं दण्डो हरानेन फलानि । केचित् तु–इदम आदेशम् 'एनम्' इति मकरान्तं द्वितीयैकवचने आहुः, तन्मते–इदं कुण्डमानयाथो एनं परिवर्त्तयेत्यत्रैव भवति । योगविभाग उत्तरार्थः ॥ ३४ ॥

**श० न्या०**—इद० । "टौस्यनः" [ २. १. ३७. ] इति "दो मः०" [ २. १. ३९. ] इति च प्राप्तेऽयमारम्भः, अत्रोदाहरणानि प्रत्युदाहरणानि च पूर्वानुसारेण बोद्धव्यानि । **केचित् त्विति**–अस्य च मतस्य सर्वसम्मतेरभावादुपेक्षणीयत्वमित्युक्तम्–**तन्मत** इति–तस्यैव मते नान्यस्येत्यर्थः । अथ "त्यदामेनदेतदिदमो द्वितीया-टौस्यवृत्त्यन्ते" [ २. १. ३३. ] इत्येकयोगेनैव सिद्धत्वात् योगविभागः **किमर्थ** इत्याह–**योगविभाग उत्तरार्थ** इति–उत्तरसूत्रेष्विदम एवानुवृत्तिर्यथा स्यान्न त्वेतद इत्यर्थः, एतदिदम इति ह्युच्यमाने पृथगभिधानं नास्तीत्युभयोरप्यनुवृत्तिः स्यात् ॥ २. १. ३४. ॥

**न्या० स०**—**इदम** इति । "टौस्यनः" [ २. १. ३७. ] इति "दो मः०" [ २. १. ३९. ] इति च प्राप्तेऽयमपवादः । **मत्पुत्रकाविति**– कृत्रिमौ मत्पुत्रौ "तनु-पुत्राणु०" [ ७. ३. २३. ] इति कः, अनुकम्प्यौ वा मत्पुत्रौ "अनुकम्पा०" [ ७. ३. ३४. ] इति कः । **शीलवन्ताविमकौ तिष्ठत इति**– अत्रापि पूर्ववद् गम्यमानोऽन्वादेशः, अथो इत्यादि तु द्योतकत्वात् क्वापि प्रयुज्यते क्वापि न । **अयं दण्डो हरानेनेति**–अत्रानुवादमात्रमेव न तु निभाल्यतामित्यादि विधीयते । **केचित् त्विति**–पाणिनिप्रभृतयः । **अथो एनं परिवर्तयेत्यत्र भवति** न तु कुण्डशब्दस्य नपुंसकस्य विशेषणत्व एनदिति ॥ ३४ ॥

## अद् व्यञ्जने । २ । १ । ३५ ॥

**त० प्र०**—इदम इति षष्ठ्यन्तमपि सर्वादेशार्थं प्रथमान्ततयेह विपरिणंस्यते, त्यदादिसम्बन्धीदम्शब्दो व्यञ्जनादौ स्यादौ परेऽन्वादेशे गम्यमानेऽद् भवति, अवृत्त्यन्ते, तकार उच्चारणार्थः । इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम्, इमकैः शैक्षकैः रात्रिरधीता अथो एभिरहरप्यधीतम्, एवम्–इमकस्मै अथो अस्मै, इमिकस्यै अथो अस्यै, इमकस्मादथो अस्मात्, इमकस्याथो अस्य, इमकेषामथो एषाम्, इमिकस्मिन्नथो अस्मिन्, इमकस्यामथो अस्याम्, इमकेषु अथो एषु, इमिकासु अथो आसु । सौ तु परत्वादयमाद्यादेशः–अथो अयं शीलवान् । केचिदेतदोऽपीच्छन्ति–एताभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम्, एवम्–एतैः, एभिः, एतस्मै, अस्मै; इत्यादि । अन्वादेश इत्येव–इमकस्मै देहि । अवृत्त्यन्त इत्येव–अथो परमेमकाभ्यां रात्रिरधीता । व्यञ्जन इति किम्? अथो इमके तिष्ठन्ति । उत्तरत्र "अनक्" [ २. १. ३६. ] इति वचनादिह साक एव विधिः ॥ ३५ ॥

**श० न्या०**—अद् व्य० । ननु पूर्वसूत्रे इदमः षष्ठीनिर्दिष्टत्वात् "षष्ठ्या अन्तस्य" [ ७. ४. १०६. ] इति न्यायादन्तस्यैव प्राप्नोति कथं सर्वस्यायमादेश इति?, अथादित्यकारकरणात् सर्वस्यायमादेशोऽन्यथा "आ द्वेरः" [ २. १. ४१. ] इत्यकारे "लुगस्यादेत्यपदे" [ २. १. ११३. ] इति पूर्वस्य लुकि अकारस्याकारकरणमनर्थकं स्यात्, नैवम्–यथा

"सम्राट्" [१. ३. १६.] इत्यत्रानुस्वारलक्षणकार्यान्तरबाधनार्थं मकारस्य मकारकरणमेवमत्राप्याभ्यामित्यादौ दीर्घत्वादिकार्यान्तरबाधनार्थमकारस्याऽऽकारो भविष्यतीत्याह–**इदम** इत्यादि–अत एव कार्यी निमित्तं कार्यमिति निर्देशक्रमे प्राप्ते निमित्तात् पूर्वं कार्यनिर्देशः, यद्वा "अनक्" [२. १. ३६.] इत्युत्तरसूत्रे प्रथमान्तविशेषणोपादानादिदमः प्रथमान्ततया विपरिणामोऽवसीयते । **तकार उच्चारणार्थः** तकारमन्तरेणाकारस्य प्रथमायाः [सौ] "सो रुः" [२. १. ७२.] इत्यादौ कृते वैरूप्यात् स्वरूपेणोच्चारयितुमशक्यत्वात् तकार उच्चारणार्थो भवति । **इमकाभ्यां शैक्षकाभ्यां रात्रिरधीते**त्यादि–शिक्षायां भवावित्यणि तावनुकम्पिताविति कपि शैक्षकौ, यद्वा शिक्षामधीयाते इति "पद–क्रम–शिक्षा०" [६. २. १२६.] इत्यके तावेवेति प्रज्ञादित्वादणि वृद्धौ शैक्षकौ, ताभ्यां यथासम्भवं स्त्रियां पुंसि नपुंसके च द्रष्टव्योऽयमादेशः । अथ सावपि व्यञ्जनत्वात् कथं नायमादेश इत्याह–**सौ त्वि**त्यादि–अन्वादेशेऽयमायादेशः सावकाशो विभक्त्यन्तरे त्वन्वादेशेऽदादेशः, सौ त्वन्वादेशे परत्वादयमायादेश इत्यर्थः । **केचिदि**ति–अदादेशमिति शेषः । अथ किमर्थमिदम् ? यावतोत्तरसूत्रेणैवान्वादेशेऽनन्वादेशेऽपि सिद्ध इत्याह–**उत्तरत्रे**त्यादि–"अनक्" [२. १. ३७.] इति वचनादक्सहितस्य तेनादेशाभावादित्यर्थः ॥ छ ॥ २. १. ३५. ॥

---

**न्या० स०—अद् व्यञ्जने** इति–तकार उच्चारणार्थः, अन्यथा सौ "सो रुः" [२. १. ७२.] इत्यादौ कृते 'ओ' इत्यनिष्टं रूपं स्यात् । **प्रथमान्ततयेह विपरिणम्यत** इति–अत एव कार्यी निमित्तं कार्यमिति निर्देशक्रमे प्राप्ते निमित्तात् पूर्वं कार्यनिर्देशः, उत्तरत्र "अनक्" [२. १. ३६.] इति प्रथमान्तविशेषणोपादानाद् वा । **शैक्षकाभ्यामिति**–शिक्षेते इति शिक्षकौ, ततः स्वार्थे प्रज्ञाद्यण्; शिक्षणं शिक्षा "क्तेटो गुरो०" [५. ३. १०६.] इत्यप्रत्ययः, ततः शिक्षां वित्तोऽधीयाते वा "पद–क्रम–शिक्षा०" [६. २. १२६.] इत्यकः, ततः शिक्षकावेव प्रज्ञाद्यण्; अथवा शिक्षायां भवौ "शिक्षादेश्चाण्" [६. ३. १४८.] इत्यणि ततो यावादित्वात् कः । अथ सावपि व्यञ्जनादित्वात् कथं नायमादेश इत्याह–**सौ तु परत्वादि**ति । **केचिदि**ति–चान्द्र–भोज–क्षीरस्वामिप्रमुखाः । **साक एव विधिरि**ति–विश्रान्तादौ–अन्वादेशे साको निरकश्चादादेशविधानादिहैवमपि व्याख्या–साको यद्यादेशस्तदाऽन्वादेश एवेति निरकोऽन्वादेशेऽनन्वादेशे चोत्तरेणादादेशः सिद्धः ॥ २. १. ३५ ॥

# अनक् । २ । १ । ३६ ॥

**त० प्र०**—अन्वादेश इति निवृत्तं पृथग् योगात्, त्यदादिसम्बन्धिनि व्यञ्जनादौ स्यादौ परेऽग्वर्जित इदम् 'अद्' भवति । आभ्याम्, एभिः, आभिः; अस्मै, अस्यै; अस्मात्, अस्याः; अस्य, अस्याः; एषाम्, आसाम्; अस्मिन्, अस्याम्; एषु, आसु । अनगिति किम् ? इमकाभ्याम्, इमकेभ्यः, इमकस्मै, इमिकस्यै, इमकेषाम् । तत्सम्बन्धिविज्ञानादिह न भवति–अतीदंभ्याम्, अतीदंसु, प्रियेदंभ्याम्, प्रियेदंसु; इह तु भवति–परमाभ्याम्, परमैभिः, परमैभ्यः, परमास्मै, परमास्यै; परमास्मात्, परमास्याः; अत्र पूर्वोत्तरयोः पदयोः पूर्वं कार्ये कृते पश्चात् संधिकार्यम्, एतच्च "आतो नेन्द्रवरुणस्य" [७. ४. २९.] इत्यत्र ज्ञापयिष्यते । अभेदनिर्देशः सर्वादेशार्थः ॥ ३६ ॥

---

**श० न्या०—अन०** । **अन्वादेश इति निवृत्तं पृथग् योगात्** पृथक् सूत्रारम्भादिति भावः, अन्यथा साकोऽनकोऽप्यन्वादेशे पूर्वसूत्रेणैव सामान्यविधानेन सिद्धत्वात् सूत्रारम्भवैयर्थ्यमिति । **आभ्यामि**त्यादि–एतेषु भ्यामि भिसि चतुर्थ्येकवचनस्य स्मायादेशे च व्यञ्जनत्वा[व्यञ्जनादित्वा]देनेनादादेशः, * लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् * इत्याबन्तस्यापि प्राप्तिरित्यापि कृते ङितां यायादावनेनादादेशे सर्वादित्वाद् ङस्यन्त्यस्वरादिलोपे च–'**अस्यै**' इत्यादि । **इमकाभ्यामि**त्यादि–अत्र कुत्सितादौ परत्वादन्त्यस्वरात् पूर्वमकि 'इदकम्' इति स्थिते "अनक्" इति वचनादत्रादादेशाभावे "आ द्वेरः" [२. १. ४१.] इति मकारस्यात्वे "लुगस्यादेत्यपदे" [२. १. ११३.] इति पूर्वस्य लुकि "दो मः०" [२. १. ३९.] इति दकारस्य मत्वे यथासम्भवमात्वमेत्वं च । नन्विदम इत्यधिकारादिदमूरूपस्य विधिः, तत्राकि कृते इदमूरूपस्याभावादेव न भविष्यति किं प्रतिषेधेन ? सत्यम्–*तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणाद्*इति प्राप्नोतीति प्रतिषेध उच्यते । **तत्सम्बन्धिविज्ञानादि**ति–अतीदंभ्यामित्यादौ "प्रात्यव०" [३. १. ४७.] इत्यादि[ना] समासे इदम्शब्दस्याप्रधानत्वात् स्यादेस्तत्सम्बन्धित्वाभावान्न भवतीति, **परमाभ्यामि**त्यादौ तु विशेषणसमासे इदंशब्दस्यार्थस्यैव विशेष्यतया प्राधान्यात् तत्सम्बन्धित्वमिति स्यादेनादेश इति । अथ **परमाभ्यामि**त्यादौ परादप्यदादेशात् सति समासे स्याद्युत्पत्तिसापेक्षत्वाद् बहिरङ्गादन्तरङ्गे "अवर्णस्य०" [१. २. ६.] इत्येदादेशे कृते पश्चादिदमूरूपाभावादादेशाभावः

प्राप्नोतीत्याह-**अत्र पूर्वोत्तरपदयोरि**त्यादि। **एतच्चे**ति- " आतो नेन्द्रवरुणस्य " [ ७. ४. २९. ] इत्यत्रावर्णान्तात् पूर्वपदात् परस्य इन्द्र इत्यस्योत्तरपदस्य " देवतानाम् " [ ७. ४. २८. ] इति प्राप्तायाः वृद्धेः प्रतिषेध आरभ्यते, तत्र यद्यन्तरङ्गत्वाद् " अवर्णस्य० " [ १. २. ६. ] इत्येकादेश एकारः स्यात् तदाऽवर्णेवर्णयोरभावाद् वृद्धयसम्भवादिन्द्रप्रतिषेधोऽनर्थकः स्यात्। अथ " अनक् " [ २. १. ३६. ] इतीदमः पूर्वसूत्रे षष्ठ्यन्तनिर्दिष्टस्य विशेषणत्वात् कथं कार्यिणाभेदनिर्देश इत्याह-**अभेदनिर्देश** इत्यादि ॥ छ ॥ २. १. ३६. ॥

**न्या० स०—अन**गिति। **पृथग् योगा**दिति- पृथग् योगारम्भादिति, अन्यथा साकोऽनकोऽप्यन्वादेशे पूर्वसूत्रेणैव सामान्यविधानेन सिद्धत्वात् सूत्रारम्भवैयर्थ्यमिति। अन्वादेशनिवृत्तौ तत्सम्बद्धमवृत्स्यन्त इति च निवृत्तम्। ननु परमाभ्यामित्यादौ परादप्यदादेशाद् समासे सति स्याद्युत्पत्तिसापेक्षत्वेन बहिरङ्गादन्तरङ्गे " अवर्णस्य० " [ १. २. ६. ] इत्येत्वे कृते इदमूरूपाभावाददादेशाभावः प्राप्नोतीत्याह- **अत्रे**ति- किञ्च, परमैभिरित्यादिषु परमशब्दसम्बन्धिनाऽकारेण सह यदि एत्वलक्षणः संधिः प्रथममेव क्रियते तदा*उभयस्थाने यः समुत्पद्यते स लभतेऽन्यतरव्यपदेशम्*इति न्यायाद् यदा एकारस्य इदम्शब्दसम्बन्धिता तदा एकारेण सह इदमोऽत्वं स्यात्, ततः पूर्वस्य व्यञ्जनान्ततायामनिष्टरूपापत्तिः, यदा तु एत्वस्य इदम्सम्बन्धिता न भवति तदा एकारस्य स्थितिः स्यात्, इत्युभयथाप्यनिष्टापत्तिः। **एतच्चे**ति-कथमाग्नेन्द्रमित्यत्र प्रयोगे आकाराद् इन्द्र-वरुणस्थस्य स्वरस्य वृद्धिर्न भवतीत्युक्तम्, ततश्च यदि पूर्वमेव सन्धिकार्यं स्यात् तदा निषेधोऽनेन व्यर्थ एवेत्यर्थः ॥ २. १. ३६ ॥

## टौस्यनः । २ । १ । ३७ ॥

**त० प्र०—त्यदादिसम्बन्धिनि टायामोसि च परेऽग्वर्जितस्येदमः स्थाने ' अन ' इत्ययमादेशो भवति। अनेन, अनया; अनयोः स्वम्, अनयोर्निधेहि; परमानेन, परमानयोः। त्यदादिसम्बन्धिविज्ञानादिह न भवति–अतीदमा, अतीदमोः, प्रियेदमा, प्रियेदमोः। अनक इत्येव- इमकेन, इमिकया; इमकयोः इमिकयोः ॥ ३७ ॥**

**श० न्या०—टौस्य०। अनेने**त्यादि-एतेष्विदमोऽनादेशे टाया इनादेश ओस्येत्वं च, स्त्रियां त्वनादेशादापि "टौस्येत्" [ १. ४. १९. ] इत्येत्वमिति, शेषं पूर्वानुसारेण बोधव्यम् ॥ छ ॥ २. १. ३७. ॥

**न्या० स०—टौस्यन** इति- [नेह व्याख्या दृश्यते]॥२.१.३७॥

## अयमियं पुं-स्त्रियोः सौ । २ । १ । ३८ ॥

**त० प्र०—त्यदां सम्बन्धिनि सौ परे पुंलिङ्ग-स्त्रीलिङ्गयोरिदमः स्थाने यथासंख्यम् ' अयम्, इयम् ' इत्येतावादेशौ भवतः। अयं पुमान्, इयं स्त्री; परमायम्, अनयम्; परमेयम्, अनियम्। सावित्ति किम्? इमौ, इमे। त्यदादिसम्बन्धिविज्ञादिह न भवति–अतीदं पुमान् स्त्री वा, एवं–प्रियेदम्। पुं-स्त्रियोरिति किम्? पुंसि ' इयम् ' स्त्रियाम् ' अयम् ' मा भूत्। नपुंसके तु नित्यत्वात् प्रथममेव सेर्लुपि इदं कुलमित्यत्र प्रसङ्ग एव नास्ति। साकोऽप्ययमियमादेशौ भवतः– अयम्, इयम्; अन्ये स्यादेशे कृते पश्चादकमिच्छन्ति–अयकम्, इयकम् ॥ ३८ ॥**

**श० न्या०—अयमि०। अयमियमि**ति लुप्तप्रथमाद्विवचनान्तं पदम्। **पुं-स्त्रियोरि**ति पूर्ववदलौकिको निर्देशः। अनेकवर्णत्वात् सर्वस्यादेशावित्यादेशमकारस्य विधानसामर्थ्याद् " आ द्वेरः " [ २. १. ४१. ] इत्यत्वं न भवति। अथ पुं-स्त्रियोरिति किमर्थम्? नपुंसके नित्यत्वाद् "अनतो लुप्" [ १. ४. ५९. ] इति लुपि " लुप्यय्वृल्लेनत् " [ ७. ४. ११२. ] इति स्थानिवद्भावप्रतिषेधात् सेरभावादादेशप्राप्तेरसम्भवात् पुं-स्त्रीलिङ्गयोरेवैतावादेशौ भविष्यत इत्याह–**पुं-स्त्रियोरि**त्यादि–अयमर्थः– पुं-स्त्रियोरित्युपादानमन्तरेणानियमेन द्वयोरपि लिङ्गयोर्द्वावप्यादेशौ भवत इत्यर्थः। **नपुंसके त्वि**ति–तुशब्दो यस्मादर्थे इति। **अन्ये त्वि**ति–पूर्वं हि इदमं ' इद् ' अवयवस्येययावादेशौ कुर्वन्ति। **अन्ये त्वि**ति–उभयोर्नित्यत्वात् परत्वाभावादपवादत्वादयमियमिति चादेशे कृते पश्चादकि सेरभावात् पुनरादेशाभावेऽकृश्रवणमिच्छन्तीत्यर्थः ॥ २. १. ३८ ॥

**न्या० स०—अयमियमित्यादि**- पूर्ववदलौकिको निर्देशः, लुप्तप्रथमाद्विवचनान्तं पदम्। **पुं-स्त्रियोरिति किम्? पुंसि इयं स्त्रियामयं मा भूदि**ति–ननु कथमिदमुक्तम्? यावता नपुंसके अयमियमादेशनिवृत्त्यर्थं पुं-स्त्रियोरिति वचनं स्यात्, तत्राह– **नपुंसके तु नित्यत्वादि**त्यादि। *अपेक्षातोऽधिकार* इति " अनक् " [ २.१.३६. ] इत्यत्र न सम्बध्यते, तेन मतान्तरे साकोऽप्यादेशः। केषाञ्चिन्मते– अकारान्त आदेशः, सेः स्थाने म् ॥ २.१.३८ ॥

## दो मः स्यादौ । २ । १ । ३९ ॥

**त० प्र०—त्यदां सम्बन्धिनि स्यादौ परत इदमो दकारस्य मकारादेशो भवति। इमौ, परमेमौ, इमे, इमम्, इमौ, इमान्, इमकौ, इमकेन, इमकाभ्याम्। त्यदादिसम्बन्धिविज्ञानादिह न भवति– अतीदमौ, प्रियेदमौ ॥ ३९ ॥**

**श० न्या०—दो म०** । स्याद्यधिकारे स्यादावित्युपादानात् स्यादिरेवानुवर्तते, न किञ्चित् तद्विशेषणमित्याह-**स्यादौ परत** इति । अथ मकारस्य मकारकरणवैयर्थ्यात् "आ द्वेरः" [२. १. ४१.] इत्यत्वप्रवृत्तेश्च व्यञ्जनत्वेन स्वरस्यानासन्नत्वादसम्भवादेकवर्णत्वेनान्तस्य भवन्नपि सामर्थ्यादुपान्त्यस्य दकारस्यैव भविष्यति, किं द इत्यादेशिनिर्देशेन ? नैवम्-कार्यान्तरबाधनार्थं "सम्राट्" [१. ३. १६.] इत्यादिवन्मकारस्यापि वा स्यादिति दग्रहणम् । उदाहरणादिकं च पूर्वानुसारेण बोधव्यम् ॥ छ ॥ २. १. ३९. ॥

**न्या० स०—दो मः स्यादाविति** । स्याद्यधिकारे स्यादावित्युपादानात् स्यादिरेवाऽनुवर्त्तते, न किञ्चित् तद्विशेषणमित्याह– **स्यादाविति** ॥ २. १. ३९ ॥

## किमः कस्तसादौ च । २ । १ । ४० ॥

**त० प्र०—त्यदादिसम्बन्धिनि स्यादौ तसादौ च प्रत्यये परे किम्शब्दस्य स्थाने 'क' इत्यकारान्त आदेशो भवति । कः, कौ, के; कम्, कौ, कान्; केन, काभ्याम्, कैः; स्त्रियाम्– का, के, काः; काम्, के, काः; नपुंसके– के, कानि; परमकः परमकौ; अकः, अकौ; साकोऽपि–कः, कौ; तसादौ– कदा, कर्हि । तसादौ चेति किम् ? किं तिष्ठति, किं पश्य, किंतराम् । त्यदादिसम्बन्धिविज्ञानादिह न भवति– अतिकिम्, अतिकिमौ, अतिकिमः; प्रियकिम्, प्रियकिमौ, प्रियकिमः । आदिशब्दस्य व्यवस्थावाचित्वात् तसादयस्थमवसाना ग्राह्याः ॥ ४० ॥**

**श० न्या०—किम०** । **क** इत्यस्य कार्यत्वान्निमित्तात् पश्चान्निर्देशे प्राप्ते पूर्वनिर्देशः 'किमः कः, स्यादौ तसादौ च' इति सूत्रभेदज्ञापनार्थः, तेन स्वस्थान एव चकारसम्बन्ध इत्याह-**स्यादौ तसादौ चेति**-तेन प्राधान्याद् द्वयोरुत्तरत्रानुवृत्तिः । क्रमेण स्यादौ लिङ्गत्रयेऽप्युदाहरति-**क** इत्यादि, **के** इति औकारद्वये, **का** इति जसि शसि च, नपुंसके **कानी**ति, अत्रापि सावमि च *अन्तरङ्गानपि विधीन् बाधित्वा लुप् प्रवर्तते* इति "अनत०" [१. ४. ५९.] इति पूर्वं लुपि "लुप्यय्वृल्लेनत्" [७. ४. ११२.] इति स्थानिवद्भावप्रतिषेधात् स्यादेरभावान्नोदाहृतम् । तदन्तस्यापि स्वसम्बन्धिन्युदाहरति- **परमक** इत्यादि । * तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात् * साकोऽपि-अज्ञातः क इति "त्यादि-सर्वादेः०" [७. ३. २९.] इत्यकि-क इत्यादि । कस्मिन् काले इति "किं-यत्तद्०" [७. २. ९५.] इति दाप्रत्यये-**कदा**, एवम्-"अनद्यतने र्हिः" [७. २. १०१.] इति र्हौ-**कर्हि** । इदमनयोः प्रकृष्टं किं "द्वयोर्विभज्ये च०" [७. ३. ६.] इति तरपि "किंत्याद्येऽव्ययाद्०" [७. ३. ८.] इत्यन्तस्यामि स्यादेस्तसादेश्चाभावादादेशाभावे-**किन्तरामि**ति । अथ किमर्थं किमः क इति गुरुकरणम् ? "आ द्वेरस्तसादौ च" इति कृत्वा "इमः" इति क्रियताम्, न चैवं सति "तिम तीम ष्टिम ष्टीमच् आर्द्रभावे" इत्यस्य क्विबन्तस्य स्यादौ प्रसङ्ग इति वाच्यम्, त्यदादिविशेषणात्-त्यदादीनां य इमिति, नापि "दो मः०" [२. १. ३९.] इति दस्य मत्वे कृते इदम इममिमावित्यत्र प्रसज्यते *लक्षणप्रतिपदोक्त*परिभाषाश्रयणात्, नाप्येकवर्णत्वादन्तस्य स्यादिति वाच्यम्, * नानर्थके तदन्तविधिः * इत्याश्रयणादिति, [ द्विशब्दात् पूर्वं किमः पाठे तु ] मस्य "आ द्वेरः" [२. १. ४१.] इत्यत्वे पूर्वस्य चेकार[स्य] विधानसामर्थ्यादनेन [अत्वे] द्वयोरकारयोः "लुगस्यादेत्यपदे" [२. १. ११३.] इति पूर्वस्य लुकि क इत्यादि सिद्ध्यति, यद्वाऽभेदनिर्देशात् सर्वस्यापीमोऽकारादेशे न कश्चिद् दोष इति; नैवम्-साकोऽपि यथा स्यादित्येवमर्थं गुरुकरणम् । **आदिशब्दस्ये**ति-व्यवस्था मर्यादा, शास्त्रे तु पूर्वाचार्यकृतो नियमः, तेन थमवसानपरिग्रहात् किन्तरामित्यादौ तदुत्तरेषु न भवति ॥ छ ॥ २. १. ४० ॥

**न्या० स०—किमः क इति** । न च वाच्यमिदं सूत्रं किमर्थम् ? यतः "आ द्वेरस्तसादौ च" अग्रे "इमः" इति क्रियमाणे साक[साकोऽ]स्यानिष्टं रूपं स्यात्– ककः, ककौ । नन्वत्र तसादाविति किमर्थम् ? तसि तावत् "इतोऽतः कुतः" [७.२.९०.] इति निपातनं वक्ष्यते, सत्यम्– उत्तरार्थमिदम्, अथवा थमन्तार्थं तसादिग्रहणम्, अन्यथाऽनवधिकं ज्ञायेत । अत्र पूर्वसूत्रात् स्यादावित्यनुवर्त्तमानेन सह तसादावित्यस्य समुच्चयार्थश्चकारः, यथा "विशेष्यं विशेषेण०" [३.१.९६.] इत्यत्र, अत एव "आ द्वेरः" [२.१.४१.] इत्यत्र स्यादावित्यस्यानुवृत्तिः, अन्यथा चानुकृष्टत्वान्नानुवर्त्तेत । **थमवसाना** इति–तेन किंतरामित्यादौ तदुत्तरेषु न भवति ॥ २. १. ४० ॥

## आ द्वेरः । २ । १ । ४१ ॥

**त० प्र०—द्विशब्दमभिव्याप्य त्यदादीनामन्तस्य तत्सम्बन्धिनि स्यादौ तसादौ च प्रत्यये परेऽकार आदेशो भवति । स्यः, त्यौ, त्ये; सः, तौ, ते; यः, यौ, ये; अमू, अमी; इमौ, इमे; एषः, एतौ, एते; एकः, एवम्– द्वौ, त्यकौ,**

परमस्यौ; स्त्रियाम्– स्या, त्ये, स्याः, द्वे; नपुंसके–त्ये, त्यानि, द्वे; तसादौ– ततः, तत्र, तथा, तर्हि, यतः, यत्र, यदा, यथा। त्यदादिसम्बन्धिविज्ञानादिह न भवति– अतितद्, अतितदौ, अतितदः; प्रियतद्, प्रियतदौ, प्रियतदः। आ द्वेरिति किम्? भवान् ॥ ४१ ॥

---

**श० न्या०—आ द्वे०।** "आङऽवधौ" [ २. २. ७०.] इत्यवधौ पञ्चमी, अवधिश्चाभिव्याप्तिरित्याह–**द्विशब्दमि**त्यादि। **स्य** इत्यादि–एतेष्वन्त्यस्याकारे द्वयोरकारयोः "लुगस्यादेरत्यपदे" [ २. १. ११३.] इति यथासम्भवं पूर्वस्य लुकि "तः सौ सः" [ २. १. ४२.] इति तकारस्य सत्वम्। त्यदामित्यनुवर्तनात् तस्य च स्यादावित्यस्य विशेषणत्वात् सम्बन्धिविज्ञानादतितदित्यादावतत्सम्बन्धिनि स्यादौ न भवतीत्याह–**त्यदादी**त्यादि। **भवानि**ति–उदित्वाद् "ऋदुदितः" [ १. ४. ७०.] इति नागमे "अभ्वादेः०" [ १. ४. ९०.] इति दीर्घत्वे "पदस्य" [ २. १. ८९.] इति तकारलोपः।

अथ आ द्वेरिति ग्रहणं किमर्थम्? अस्मदन्तानां भवदन्तानां मा भूत्, केषाञ्चिद् 'युष्मद् भवतु अस्मद्' इति पाठः, केषाञ्चिद् 'युष्मद् अस्मद् भवतु' इति पाठः, किंशब्दस्य तु कादेशविधानात् प्रसङ्ग एव नास्ति, केचिद् द्विशब्दात् पूर्वमभिधीयते [ किम्शब्दम् ], तदा तु "किमद्ध्यादिसर्वाद्यवैपुल्य०" [ ७. २. ८९.] इति किम्शब्दस्योपादानं न विधेयम्, तत्र सत्यपि द्विशब्दात् परतः शब्दचतुष्टयस्य पाठे भवच्छब्दस्यैवापत्तिदोषः, न किंयुष्मदस्मदाम्, किमः कादेशेन युष्मदस्मदोरात्वयत्वलोपैरत्वस्य बाधितत्वात्; नैषोऽस्ति दोषः–यदयं त्यदादीनामत्वे सिद्धे युष्मदस्मदोः शेषे लुकं शास्ति तज्ज्ञापयति–ततः प्रागकार इति, नैवम्–उपसर्जनार्थत्वात् तस्य ज्ञापने सामर्थ्याभावात्, तथाहि–उपसर्जनानामतितदित्यादौ त्यदाद्यत्वाभावादुपसर्जनयुष्मदस्मदर्थो लोपः–त्वामतिक्रान्ता मामतिक्रान्ता ये तेभ्योऽतित्वभ्यम्, अतिमभ्यमिति; किञ्चात्वे सत्यप्रसङ्गात् तदभावार्थः "शेषे लुग्" [२. १. ८.] इति अन्त्यस्वरादिलोपो बोद्धव्यः; तत्र तर्ह्यन्त्यस्वरादिलोपो वक्तव्यः, न च वचनादेवान्त्यस्वरादिलोपो भविष्यतीति वाच्यम्, उपसर्जनस्यात्वासिद्धेरुपसर्जनार्थत्वात् तस्य, न वक्तव्यः, शेषग्रहणादेवास्यार्थस्य लब्धत्वात्, तथाहि–लोपमुत्सर्गं विधाय व्यञ्जनादावात्वं टाङ्योसि यत्वमपवादो विधास्यत इति शेषग्रहणं विभक्तिविशेषणार्थमनर्थकम्, तत् क्रियमाणं लोपस्य विषयार्थं स्यात्, तेन मान्ताद् योऽन्यः स शेषः, स चान्त्यस्वरादिरेव, तस्य लोपः, "शेषे" [ २. १. ८.] इति लोपस्य स्थानं लाघवार्थं विषयसप्तम्या निर्दिष्टं षष्ठी–सप्तम्योरर्थे प्रत्यभेदाद्, यथा घटे रूपं घटस्य रूपमिति; एवं तर्हि "किमः कः०" [ २. १. ४०.] इति ज्ञापकाद् द्विपर्यन्तानामेव ग्रहणं भविष्यति, तथाहि–"किमद्ध्यादिसर्वादि०" [ २. २. ८९.] इति किम्शब्दस्य भेदेनोपादानाद् द्विशब्दात् परः किंशब्दः सर्वादौ पठ्यत इति निर्णयात्, यदि तु द्विशब्दात् परेषामात्वं स्यात् किमः कं न विदध्यात्, किन्तु "आ द्वेरः" [ २. १. ४१.] इत्यनन्तरं "किमः" इत्येवं ब्रूयात्, पूर्वसूत्रादकारानुवृत्त्या पूर्वेणान्तस्यात्वे तत्रोक्तानुवाददोषादन्त्याभावेऽन्त्यसदेशस्यापि ग्रहणादनेन त्विकारस्य, न तु ककारस्येति द्वयोरकारयोः "लुगस्यादेत्यपदे" [ २. १. ११३.] इति पूर्वस्य लुकि क इति सिद्धमित्यादेशविधानं प्रकृतार्थज्ञापनाय भवति, ननु तथापि कुत एतत् ज्ञापकम्? किम इत्येवोच्यमानेऽन्त्यस्य मकारस्य पूर्वेणाकारे कृते पुनरनेनापि स्यात्; न चोक्तानुवाददोषादन्त्यस्य न भविष्यतीति वाच्यम्, काभ्यां केभ्य इति विध्यन्तरबाधनार्थत्वादिति कथं द्विपर्यन्तानां भविष्यति, न पुनरस्मदन्तानां भवदन्तानां वा। किञ्चावश्यं कादेशः सामर्थोऽपि वक्तव्यः, तेनाज्ञाताद्यर्थविवक्षायां क इत्येव भवति, न तु कक इति। न च *निर्दिश्यमानस्यादेशा भवन्ति* इति साकः कादेशो न प्राप्नोतीति वाच्यम्, "किमः कः०" [ २. १. ४०.] इति वचनसामर्थ्याद् भविष्यति, तस्माद् द्विपर्यन्तानां यथा स्यादित्येवमर्थम् 'आ द्वेः' इति वचनमिति स्थितम् ॥ छ ॥ २. १. ४१. ॥

---

**न्या० स०—आ द्वेर** इति। द्वाविच्छति क्यनि क्विपि तयोर्लोपे सौ अनेनेकारस्यात्वं न, त्यदादिसम्बन्धिस्याद्यभावाद् द्वीरित्येव भवति। **एक** इति–रूपनिर्णयार्थमिदं दर्शितं न तु किञ्चित् फलम् ॥ २. १. ४१. ॥

---

## तः सौ सः। २। १। ४२॥

**त० प्र०—आ द्वेस्त्यदादीनां सम्बन्धिनि सौ परे तकारस्य सकारादेशो भवति। स्यः, स्या, स्यकः, परमस्यः; सः, सा, सकः, परमसः; एषः, एषा, एषकः, परमैषः; हे स!, हे परमस!, हे परमैष!। त इति किम्? यः। साविति किम्? त्यद्, तद्, त्यौ, तौ। त्यदादिसम्बन्धिविज्ञानादिह न भवति– प्रियत्यद्, प्रियैतत् पुमान्। आ द्वेरित्येव– भवती ॥ ४२ ॥**

---

**श० न्या०—तः सौ०। परमस्य** इति–परमशब्देन त्यदर्थस्य विशेषणात् पूजोच्यते, यथा जातिशब्दार्थेषु तत्र सम्भविगुण-क्रियाकृतप्रकर्षस्तरबादिना–गौरयं यः [ सीरं वहति, गोतरोऽयं यो वहति ] शकटं च सीरं च, गौरियं या समां समां विजायते, गोतरेयं या समां समां विजायते स्त्रीवत्सा चेति।

**भवती**ति पुंसि तकारस्य सकारेऽपि "पदस्य" [ २. १. ८९. ] इति लोपे विशेषाभावात् स्त्रियामुदाहृतम् ॥ छ ॥ २. १. ४२. ॥

**न्या० स०—तः सौ स** इति । **भवती**ति- *नामग्रहणे०* इति न्यायादत्रापि सत्वे भवसीति स्यात्, नपुंसके सेरभावात् पुल्लिङ्गे तु सेः स्थानित्वेन सत्वे कृतेऽपि "पदस्य" [ २. १. ८९. ] इति सलोपे विशेषाभावात् स्त्रियामुदाहृतम् ॥ २. १. ४२ ॥

## अदसो दः सेस्तु डौ । २ । १ । ४३ ॥

**त० प्र०—त्यदादिसंबन्धिनि सौ परेऽदसो दकारस्य सकारादेशो भवति, सेस्तु डौ । असौ, असकौ; हे असौ !, हे असकौ विद्वन् !; असौ, असकौ स्त्री; हे असौ !, हे असकौ स्त्रि ! । सावित्येव-अदः, अमू । त्यदादिसंबन्धिविज्ञानादिह न भवति-अत्यदाः । डित्करणमन्त्यस्वरादिलोपार्थम्, तेन "औता" [ १. ४. २०. ], "एदापः" [ १. ४. ४२. ], "दीर्घङ्याब्व्यञ्जनात् सेः" [ १. ४. ४५. ], "अस्यायत्तक्षिपकादीनाम्" [ २. ४. ११० ] इति कार्याणि न भवन्ति, अन्यथा सेस्त्वौरित्येव क्रियेत ॥ ४३ ॥**

**श० न्या०**—अद० । द इति षष्ठ्यन्तं कार्यिपदम्, **अदस** इति तद्विशेषणमित्याह-**अदसो दकारस्ये**ति । अथादस इति किमर्थम् ? पारिशेष्याददस एव दकारस्य सकारो भविष्यति, तथाहि- अष्टौ त्यदादयः, तत्र चतुर्णामन्त्यो दकारः, त्रयाणां त्वनन्त्यः, तत्र "सास्य पौर्णमासी" [ ६. २. ९८. ] "सोऽस्य भृतिवस्नांशम्" [ ६. ४. १६८. ] इत्यादिज्ञापकादन्त्यदकारस्य न भविष्यति, किञ्चान्त्यदकारस्य सकारेऽपि "डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्यन्त्यस्वरादिलोपे विशेषाभावात् सकारकरणमनर्थकं स्यात्; न चानन्त्यस्य भवन्निदमोऽपि स्यादिति वाच्यम्, "अयमियं पुं-स्त्रियोः सौ" [ २. १. ३८. ] इति विशेषविधानादियमयमोस्तत्र बाधकत्वात्, द्विशब्दस्य च द्वित्वार्थविषयत्वात् सेरभावादप्रसङ्ग इति, नैवम्- ज्ञापकोपन्यासस्य तद्विषयस्यैव दर्शनात् तस्य च स्वविषय एव चरितार्थत्वात् सर्वोद्देशेनाप्रवृत्तेस्त्यद्-तद्-यदेतदामन्त्यदकारस्य सकारः स्यात्, अदस एव यथा स्यादन्यस्य मा भूदित्येतदर्थमदस्ग्रहम् । ननु यद्यदस एव दस्य सत्वं विधीयते ततो द्वाविच्छति द्वीयतेः क्विप्यकार-यकार-क्विब्लोपे सावीकारस्य त्यदाद्यत्वे द्व इति प्राप्नोति, स्व इति चेष्यते, नैवम्- * यथालक्षणमप्रयुक्ते * इति तत्रैवोक्तत्वात्, उपसर्जनत्वात् त्यदाद्यत्वस्याभावाद् द्वीरित्येव भवति, यथा वा* प्रयुक्तानामन्वाख्यानारम्भात् * द्विशब्दस्य च क्यनन्तस्य क्विपि प्रयोगाभावान्न केनचिल्लक्षणेन प्रवर्तितव्यमिति । अदसोऽन्त्यस्य सौ चौत्वं सिलोपश्च वाच्यम्, अन्यथा हे असावित्यत्र त्यदाद्यत्वे कृते "अदेतः स्यमोर्लुक्" [ १. ४. ४४. ] इति लोपः प्राप्नोति, न भविष्यति, यतः "अदेतः स्यमोर्लुक्" [ १. ४. ४४. ] इत्यत्राम् ग्रहणाद् यदि सेरादेशस्य लोपस्तदाऽम एव नान्यस्य, हे अन्यतरदितिवत्; तर्ह्यसौ स्त्रीति स्त्रियामापः "औता" [ १. ४. २०. ] इत्येत्वं प्राप्नोति, तदपि न-* निरनुबन्धग्रहणे न सानुबन्धकस्य * इत्यस्य सानुबन्धकस्य न भविष्यति; इह तर्हि 'असकौ ब्राह्मणी' इत्यत्वे आपि सति * वार्णात् प्राकृतं बलीयः * इति "ऐदौत् सन्ध्यक्षरैः" [ १. २. १२. ] इत्यौत्वमन्त्यस्वरादिलोपं च बाधित्वा "अस्यायत्तक्षिपकादीनाम्" [ २. १. १११. ] इतीत्वं प्राप्नोति, नैषोऽपि दोषः-'आप्परे' इति आ + आप्-आबिति प्रश्लिष्टनिर्देशाद् यत्राकाररूपं श्रूयते तत्रेत्वं भवति, इह तु औत्वे लोपे वा सत्याकाराभावः; न च कारिके इत्यत्र "औता" [ १. ४. २०. ] "एदापः" [ १. ४. ४२. ] इति वा एकारे कृते आकाराभावादित्वाप्रसङ्ग इति वाच्यम्, अन्तरङ्गत्वात् प्राक् स्याद्युत्पत्तेरित्वसद्भावात्, असकावित्यत्र तु प्राक् स्याद्युत्पत्तेराप्य(राबेव ना)स्तीति; एवं तर्ह्यपि कृते आदेशात् पूर्वं * वार्णात् प्राकृतं बलीयः * इतीत्वं प्राप्नोतीत्याकाररूप एवासाविति किं प्रश्लेषनिर्देशेन ? तस्मात् प्रश्लेषनिर्देशसामर्थ्याद् यथा असकावित्यत्र * वार्णात् प्राकृतं० * इति बाधित्वा लोपादि भवति, एवं कारिके इत्यत्रापि अन्तरङ्गमित्वं बाधित्वा स्यादिस्तत्कार्यं च प्राप्नोतीति इत्वाप्रसङ्गः, नैवम्-समानकालप्राप्तिकमेव ह्यादेशमित्वं प्रतीक्षन्ते(ते) न तु भिन्नकालप्राप्तिकमित्यदोषः; एवं तर्हि 'असकौ ब्राह्मणि !, असौ ब्राह्मणी' इत्यत्र "एदापः" [ १. ४. ४२. ] इति "दीर्घङ्याब्०" [ १. ४. ४५. ] इति च एत्व-लोपयोः प्रसङ्गः, नैषोऽपि दोषः—डित्करणात्, तस्य ह्येतदेव प्रयोजनम्- अन्त्यस्वरादिलोपो यथा स्यात्, अन्यथा सेरौत्वे त्यदाद्यत्वे "ऐदौत् सन्ध्यक्षरैः" [ १. २. १२. ] इत्येकादेशेनापि सिध्यतीत्याह- **डित्करणमि**त्यादि ॥ छ ॥ २. १. ४३. ॥

**न्या० स०—अदसो०** । **असावि**ति- सेरनेन डौ "डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्येव कार्यं, न तु "आ द्वेरः" [ २. १. ४१. ] इति प्रक्रियालाघवार्थं डित्करणस्य सर्वकार्यबाधकत्वेन व्याख्यास्यमानत्वाच्च । **हे असौ ! हे असकौ विद्वन्नि**ति- अत्र औरित्यपि कृते* तदादेशा०* इति सेः स्थानित्वेऽपि "अदेतः स्यमोः०" [ १. ४. ४४. ] इत्यस्य न प्रसङ्गः, सिद्धारेणाऽमोऽपि लुपि सिद्धायां यत् अम्ग्रहणं तदन्यस्य स्यादेशस्य निवृत्त्यर्थमिति तत्र व्याख्यानात् । **कार्याणि न भवन्तीति**—एतानि च स्त्रियां

प्राप्नुवन्ति, तथाहि—अदस्शब्दात् सौ अनेन औकारे " आ द्वेरः " [२. १. ४१.] इत्यत्वे आपि औव्यपदेशे " औता " [ १. ४. २०.] इत्यस्य, सिव्यपदेशे तु आमन्त्ये " एदापः " [ १. ४. ४२.] इत्यस्य, अनामन्त्ये तु " दीर्घङ्याब्० " [ १. ४. ४५.] इत्यस्य, अकि तु " अस्यायत्तत्० " [ २. ४. १११.] इत्यस्य प्राप्तिः। अथ " औता " [ १. ४. २०.] इत्यत्र प्रथमा-द्वितीयाद्विवचनेनेति व्याख्यानात् कथं सिस्थानौकारस्य प्राप्तिः, सत्यम्— अत्रैवं स्थिते तत्रैवं व्याख्यातमिति " औता " [ १. ४. २०.] प्राप्नोत्येव ॥ २. १. ४३ ॥

## असुको वाऽकि । २ । १ । ४४ ॥

**त० प्र०—**त्यदादिसंबन्धिनि सौ परेऽदसोऽकि सति 'असुक' इति दस्य सः सकारात् परस्याकारस्योकारः सेश्च डौत्वाभावो वा निपात्यते । असुकः, असकौ; हे असुक !, हे असकौ !; असुका, असकौ स्त्री । केचित् तु 'असुकस्' इति सान्तं सिना सह निपातयन्ति ॥ ४४ ॥

**श० न्या०—**असु० । अदस इति वर्तते, तस्याकीति विशेषणमित्याह- **अदसोऽकीति** । **असुकः, असकौ, हे असुक !** " अदेतः स्यमोर्लुक् " [ १. ४. ४४.] इति सेर्लोपः । **हे असकाविति** पुंस्युदाहृतम्, **असुका, असकौ,** इति स्त्रियाम्, आमन्त्ये तु-हे असुके इति द्रष्टव्यम् । **केचित् त्विति**— सिना सह निपातनस्य च " अभ्वादेरत्वसः० " [ १. ४. ९०.] इति दीर्घत्वाभावः फलम् ॥ छ ॥ २. १. ४४. ॥

**न्या० स०—असुको०** । **असुक** इति— अत्र परत्वा-न्नित्यत्वाच्च " अभ्वादेः० " [ १. ४. ९०.] इति बाधित्वा सस्य " आ द्वेरः " [ २. १. ४१.] " लुगस्या० " [ २. १. ११३.] इत्यलोपः, सो रुः । **केचित् त्वसुकसिति**— तन्मते संबोधने स्त्रियां च 'असुकः' इति विसर्गान्त एव, स्वमते तु स्त्रियाऽसुका इति, स्त्रीसंबोधने तु हे असुके ! इति ॥ २ । १ । ४४ ॥

## मोऽवर्णस्य । २ । १ । ४५ ॥

**त० प्र०—**अवर्णान्तस्य त्यदादिसंबन्धिनोऽदसो दकारस्य मकार आदेशो भवति । अमू नरौ, स्त्रियौ, कुले वा; अमी नराः, अमूः स्त्रियः, अमूनि कुलानि; अमुं नरम्, अमूं स्त्रियम्, अमूः स्त्रीः, अमून् नरान्, अमूनि कुलानि; अमुकौ नरौ, अमुके स्त्रियौ कुले वा; परमामुम्; अमूदृक्, अमूदृशः, अमूदृक्षः, अत्र " अन्य-त्यदादेराः " [ ३. २. १५२.] इत्यात्वे सत्य-वर्णान्तत्वम् । अवर्णस्येति किम् ? अदः कुलम्, अदस्यति ॥ ४५ ॥

**श० न्या०—**मोऽव० । 'अवर्णस्य' इत्यदसो विशेषणम्, विशेषणे च तदन्तप्रतिपत्तिरित्याह- **अवर्णान्तस्येति** । **अमू** इति- अदस् औ, त्यदाद्यत्वे " लुगस्यादेत्यपदे " [ २. १. ११३.] इत्यकारलोपेऽवर्णान्तत्वादनेन मत्वे " ऐदौत् सन्ध्यक्षरैः " [ १. २. १२.] इत्यौत्वे " मादुवर्णोऽनु " [ २. १. ४७.] इत्यूत्वे- **अमू नरौ,** एवं स्त्रियामपि, नपुंसके तु औकारस्येत्वादौ- **अमू** इति द्रष्टव्यम् । **अमी नरा** इति- जसि त्यदाद्यत्वे मत्वे " जस इः " [ १. ४. ९.] इतीत्वे " अवर्णस्य० " [ १. २. ६.] इत्येत्वे " बहुष्वेरीः " [ २. १. ४९.] इति तस्य ईत्वे- अमी, एवमन्यदपि । अथ कथममूदृगिव दृश्यत इत्यदसः परतो दृशेः " त्यदाद्यन्यसमानाद्० " [ ५. १. १५२.] इति क्विपि टकि सकि च स्याद्यभावादत्वाभावादत्वाभावेऽमूदृगित्यादौ मत्वमित्याह- **अत्र " अन्य-त्यदादेः० " [ ३. २. १५२.]** इत्यादि । **अदः कुलमिति**- नपुंसकात् सेर्लुपि " लुप्यय्वृल्लेनत् " [ ७. ४. ११२.] इति स्थानिवद्भावप्रतिषेधात् स्यादेरभावादत्वाभावेऽवर्णाभावः । अमुमिच्छतीति " अमाव्ययात्० " [ ३. ४. २३.] इति क्यनि- **अदस्यति** । अथादस्शब्दान्नपुंसकवृत्तेः स्वरे **परे** सेर्लुपि " सो रुः " [ २. १. ७२.] इति रुत्वे " रोर्यः " [ १. ३. २६.] इति यत्वे " स्वरे वा " [ १. ३. २४.] इति यलोपेऽवर्णान्तत्वान्मत्वप्रसङ्गः, उच्यते- पदान्तरापेक्षत्वेन यलोपस्य बहिरङ्गत्वात्, तदनपेक्षत्वेन मविधेरन्तरङ्गत्वाद् * असिद्धं च बहिरङ्गमन्तरङ्गे * इति यलोपस्यासिद्धत्वादनवर्णान्तत्वान्मकाराभावः ॥ छ ॥ २. १. ४५. ॥

**न्या० स०—मोऽवर्णस्य** । ननु अदः कुलमिच्छतीत्यस्मिन् वाक्ये अदस्शब्दान्नपुंसकादमो लुपि " सो रुः " [ २. १. ७२.] इति रुत्वे " रोर्यः " [ १. ३. २६.] इति यत्वे " स्वरे वा " [ १. ३. २४.] इति यलोपेऽवर्णान्तत्वान्मत्वप्रसङ्ग इति, सत्यम्— पदान्तरापेक्षत्वेन यलोपस्य बहिरङ्गत्वाद् तदनपेक्षत्वेन मत्वविधेरन्तरङ्गत्वाद् *असिद्धं बहिरङ्गम्०* इति लोपस्यासिद्धत्वेऽनवर्णान्तत्वाद् मकाराभावः ॥ २ । १ । ४५ ॥

## वाऽद्रौ । २ । १ । ४६ ॥

**त० प्र०—**अदसोऽद्राववन्ते सति दकारस्य मकारो वा भवति । द्रावत्र दकारौ तत्र विकल्पे सति चातूरूप्यं भवति— अदमुयङ्, अमुद्र्यङ्, अमुमुयङ्, अदद्र्यङ्; तदाह—

" परतः केचिदिच्छन्ति, केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति, केचिदिच्छन्ति नोभयोः ॥४६॥ "

**श० न्या०—वाऽद्रौ** । अदसोऽवयवस्याद्यागमस्य तद्ग्रहणेन ग्रहणात् तस्मिंश्च सत्यदस इकारान्तत्वादवर्णान्तत्वाभावादप्राप्ते उभयत्र विकल्पे चातूरूप्यं सम्पद्यते, अत आह– **द्वावत्रे**त्यादि– अयमर्थः– विकल्पोऽत्रानेकधा सम्भवति, सामान्याश्रयणाच्च समुच्चितसर्वविकल्पपरिग्रहः, विशेषे हि विशेषान्तरं परिह्रियते, न सामान्ये सर्वात्मकत्वात् सामान्यस्येति । अदःपूर्वादञ्चतेरदोऽञ्चतीति क्विपि "सर्वादि०" [ ३. २ १२२.] इति डद्र्यागमे "अञ्चोऽनर्चायाम्" [ ४. २. ४६.] इति नलोपे सौ "अचः" [ १. ४. ६९.] इति नागमे "पदस्य" [ २. १. ८९.] इत्यन्तलोपे "युजञ्च०" [ २. ७. ७१.] इति नस्य ङकारेऽनेन परस्य पूर्वस्योभयोश्च क्रमेण मकारे रूपाणि, **एतदेव तदाहे**त्यनेन दर्शयति– **परत** इत्यादि–पूर्वे अमुद्र्यङित्यत्र पूर्वस्य मत्वं नेच्छन्ति ॥ छ ॥ २. १. ४६.॥

**न्या०–स०—वाद्रौ** । अदसोऽवयवस्याऽऽगमस्य तद्ग्रहणेन ग्रहणात् तस्मिन् सत्यदस इकारान्तत्वेन अवर्णान्तत्वाभावादप्राप्तेऽयं योगः । **अमुमुयङि**ति– 'समुदाये प्रवृत्ता अपि शब्दा अवयवेऽपि वर्त्तन्ते' इति मात्राशब्दोऽर्धमात्रायामपि, तेन **अमुमुयङि**त्यत्र अर्द्धमात्रिकस्यापि रः स्थाने एकमात्रिक उकारादेशो भवति । अत्र वा व्यवस्थितविभाषार्थो न विकल्पार्थः, तेन क्वापि कथञ्चिद् विकल्पः प्रवर्त्तते, यदि तु विकल्पार्थः स्यात् तदा प्रथममेव प्रयोगद्वयं स्यात्, तस्यनेनैव विकल्पस्य चरितार्थत्वात् । **अदसो दकारस्ये**ति– अद्रेरागमत्वाददसग्रहणेन ग्रहणाददसो दकारस्येत्युक्तेऽपि अदसोऽद्रेश्च दस्य मः सिद्धः । **दकारस्ये**त्यत्र एकवचनान्तत्वादेकस्यैव दस्य म इति तु न वाच्यम्, दजात्याश्रयणात् । **चातूरूप्यमि**ति– चत्वारि रूपाण्येव, स्वार्थे भेषजादित्वात् ट्यण्, चतुर्णां रूपाणां भावः "पतिराजान्त०" [ ७. १. ६०. ] इत्यनेन वा ॥ २. १. ४६. ॥

## मादुवर्णोऽनु । २ । १ । ४७ ॥

**त० प्र०—अदसः संबन्धिनो मकारात् परस्य वर्णमात्रस्योवर्ण आदेशो भवति, अनु—पश्चात् कार्यान्तरेभ्यः; आसन्नत्वाद् मात्रिकस्य स्थाने मात्रिकः, द्विमात्रस्य द्विमात्रः, त्रिमात्रस्य त्रिमात्रः । अमुम्, अमू, अमू३ इति; "प्रश्ने च प्रतिपदम्" [ ७. ४. ९८.] इति प्लुतः । अमुमुयङ्, अमुमुईचः, अदमुईचः, अदमुईचा; "अदोमु-मी" [१. २. ३५.] इति संधिप्रतिषेधः । अन्विति किमर्थम् ? ' अमुष्मै, अमुष्मात्, अमुष्य, अमुष्मिन्, अमूषाम्; अमुया, अमुयोः,' इत्यादिषु स्मैप्रभृतिकार्येषु कृतेषूवर्णो यथा स्यादित्येवमर्थम् ॥ ४७ ॥**

**श० न्या०—मादु०** । मादिति सन्निहितो मकारोऽन्तोद्यते ( मकारोऽदसो गृह्यते ), अन्यस्यात्रासन्निहितत्वादित्याह– **अदसः सम्बन्धिनो मकारादि**ति । अत्र कार्यिविशेषस्यानिर्देशाद् वर्णमात्रस्य परिग्रह इत्याह– **वर्णमात्रस्ये**ति । अत्र कार्यस्य विधेयतया प्राधान्यादनुशब्दस्य पश्चादर्थस्य तद्विशेषणत्वात् सजातीयकार्यान्तरापेक्षयैव पश्चाद्भावः सम्बन्धीत्याह– **पश्चात् कार्यान्तरेभ्य** इति । वर्णमात्रस्य कार्यिणः परिग्रहादासन्नत्वान्मात्रिकादेः स्थाने मात्रिकादिरादेशः, यत्र चार्धमात्रः स्थानी तत्रापि द्विमात्र[-त्रिमात्र]योरतिविप्रकृष्टत्वान्मात्रिकस्य त्वदूरविप्रकृष्टत्वादासन्नत्वात् स एव भवतीत्याह– **आसन्नत्वादि**त्यादि–समुदाये प्रवृत्ता अपि शब्दा अवयवेऽपि वर्तन्त इति मात्राशब्दोऽर्धमात्रायामपि द्रष्टव्यः । अदःशब्दादमि औकारे च त्यदाद्यत्वे "लुगस्या०" [ २. १. ११३.] इत्यकारलोपे "मोऽवर्णस्य" [ २. १. ४५.] इति मत्वे "समानादमोऽतः" [ १. ४. ४६. ] इत्यकारलोपे "ऐदौत् सन्ध्यक्षरैः" [ १. २. १२.] इत्येकादेशे "प्रश्ने च प्रतिपदम्" [ ७. ४. ९८.] इत्येकत्र प्लुतेऽनेन मात्रिकाद्युवर्णादेशे–**अमुम्, अमू, अमू३,** इति । **अमुमुयङि**त्यादि–अत्र[ शसि ]ङसि-ङसोष्टायां च "अच् प्राग्०" [ २. १. १०४.] इत्यकारापगमे इकारस्य दीर्घत्वम् । अथात्र "इवर्णादेः०" [ १. २. २१.] इति वकारः कस्मान्न भवतीत्याह– **"अदोमु-मी" [ १. २. ३५.]** इत्यादि । अथ मत्वे कृते पूर्वं पश्चाद् वा उवर्णादेशे– अमुमित्यादीनां सिद्धत्वात् किमर्थमनुग्रहणमित्याह– **अन्वि**त्यादि– अत्र ह्यमुष्मैप्रभृतिषु परत्वान्नित्यत्वान्मकारात् परस्याकारस्य उवर्णादेशेऽकारान्तत्वाभावात् स्मैप्रभृतीनामभावः स्यादित्यर्थः, एतेषु "क्लित्यदिति" [ १. ४. २३.] इत्योत्वं न भवति, 'अदित्' इत्यस्य विषयसप्तम्या प्रकृतेरपि विशेषणत्वाद् दकाराद् एति– उत्पद्यते यस्तद्विषयवर्जनान्मकारस्य च तदादेशत्वेन दकारत्वात्, अत एव 'दै-दास्' इत्यत्र ऐदिति न कृतम् ॥ छ ॥ २. १. ४७. ॥

**न्या०–स०—मादुव०** । ननु पञ्चम्या निर्देशाद् उवर्णः प्रत्ययः कथं न भवति ?, सत्यम्– "अदो मु-मी" [ १. २. ३५.] इति सूत्रनिर्देशाद् वर्णमात्रस्य स्थानित्वं लब्धमिति । **अनु–पश्चादि**ति– अत्रानुना पूर्वं संबन्धः, तस्य च पश्चादर्थत्वात् "प्रभृत्यन्यार्थ०" [ २. २. ७५.] इति दिग्योगलक्षणा पञ्चमी, यदि तु पूर्वं पश्चादित्यनेन योगो विवक्ष्यते तदा "रिरिष्टात्०" [ २. २. ८२.] इत्यनेन 'कार्यान्तरेभ्यः' इत्यत्र षष्ठी स्यात्, पश्चादिति अखण्डमव्ययं वा । अथात्रानुग्रहणं किमर्थं ? यतो यदि कार्यान्तरात् प्रागुवर्णो भवति तदा इनादेवेत्युत्तरसूत्रे नियमार्थं

व्याख्यायमानेऽन्वर्थस्य लब्धत्वात्, सत्यम्– एवमपि नियमाशङ्का स्यात्, इनादेशस्तावत् प्रत्ययादेशस्ततोऽन्यस्मादपि प्रत्ययादेशादेव पश्चादुवर्णः प्रकृत्यादेशात् परत्वात् पूर्वमपि भवेत्, तथा चामुया अमुयोरित्यादयो न सिध्येयुः । **अमुष्मै** इति– नन्वत्र " ङित्यदिति " [ १. ४. २३. ] इति औत्वं स्मैआदेशे कृते कथं न भवति ? उच्यते– अदितीत्यत्र नञः पर्युदासाश्रयणात्, स हि सदृशग्राही, ततो यत्र साक्षात् स्वरोऽग्रे भवति तत्रैव पूर्वस्योकारस्य ओकारत्वादिति साक्षात् स्वरवर्जनात्, इति कक्कलस्य व्याख्या । तथाऽदितीति विषयसप्तम्यां प्रकृतेरपि विशेषणाद् दकारात् एति– उत्पद्यते यस्तद्विषयवर्जनान्मकारस्य तदादेशत्वेन दकारत्वात्, अत एव 'दैदास्' इत्यत्र ऐदिति न कृतमिति न्यासकारव्याख्या ॥ २. १. ४७. ॥

## प्रागिनात् । २ । १ । ४८ ॥

**त० प्र०—अदसो मात् परस्य वर्णमात्रस्येनादेशात् प्रागुवर्णो भवति, अन्वित्यस्यापवादोऽयम् । अमुना पुंसा कुलेन वा । इनादिति किम् ? अमुया स्त्रिया ॥ ४८ ॥**

**श० न्या०—**प्रागि० । प्राक्शब्दस्येनादेशे विशेषणत्वात् तस्य च दिक्शब्दत्वात् तद्योगे " प्रभृत्यन्यार्थदिक्शब्द० " [ २. २. ७५. ] इति इनात् पञ्चमीत्याह– **इनादेशात् प्रागि**ति । अथ परत्वान्नित्यत्वादिनादेशात् पूर्वमुवर्णः सिद्ध एव किमनेनेति ? नैवम्– तत्रानुग्रहणादिनादेशात् पश्चात् स्यात्, तदपवादोऽयमुच्यत इत्याह– **अन्विती**त्यादि । अदःशब्दच्छायां त्यदाद्यत्वे मत्वे उत्वे च " टः पुंसि ना " [ १. ४. २४. ] इति नादेशे, नपुंसके च " अनामस्वरे नोऽन्तः " [ १. ४. ६४. ] इति नागमे–**अमुना** । **अमुये**ति– अत्र त्यदाद्यत्वे स्त्रियामापि अकारान्तत्वाभावादिनदेशासम्भवात् " टौस्येत् " [ १. ४. १९. ] इत्येत्वे पश्चादुत्वमिति ॥ छ ॥ २. १. ४८. ॥

**न्या० स०—**प्रागिनात् [ नेह व्याख्यातम् ] ॥ २.१.४८.॥

## बहुष्वेरीः । २ । १ । ४९ ॥

**त० प्र०—बहुष्वर्थेषु वर्तमानस्यादसो मकारात् परस्यैकारस्य स्थाने ईकार आदेशो भवति । अमी, अमीभिः, अमीभ्यः २, अमीषाम्, अमीषु । बहुष्विति किम् ? अमू कन्ये, अमू कुले । एरिति किम् ? अमूः कन्याः, अमून् नरान् । मादित्येव– अमुके, अमुकेभ्यः ॥ ४९ ॥**

**श० न्या०—**बहु० । अदसो मादिति च वर्तते, तत्र सम्भवव्यभिचारयोगात्, 'बहुषु' इत्यदस इत्यस्य विशेषणम्, न मादित्यस्येत्याह– **बहुष्वर्थेष्वि**त्यादि । नन्विकारस्य षष्ठ्या- मेकत्वस्य समानत्वात् ततश्चादसोऽग्रागमे कृते तदवयवस्यैकारस्य यत्वं बाधित्वा ईत्वं स्यात्, इति कथमेकारस्येत्युक्तम् ? नैवम्– अदसोऽग्रवयवस्यैकारस्य सम्भवाद् " वाऽद्रौ " [ २. १. ४६. ] इत्यनन्तरमेवेदं कुर्यात्, एकारपरिग्रहे चानेकप्रयोगसिद्धेर्व्याप्तिन्याये सम्भवत्येकप्रयोगं प्रति योगानारम्भाच, किञ्च " अदोमु-मी " [ १. २. ३५. ] इत्यत्र मीतिनिर्देशाद्, नहीकारपरिग्रहेऽदसोऽमीरूपसम्भवोऽस्तीति, तस्मात् सूक्तम्– **एकारस्ये**ति । **अमी** अदस् [ जस् ] त्यदाद्यत्वादि, जस इः, अवर्णस्यैत्वम्, अनेनेत्वम् । **अमीभिरि**त्यादि– एषु भिसि भ्यसि आमि सुपि च त्यदाद्यत्वादावामः सामादेशे च " एद् बहुस्भोसि " [ १. ४. ४. ] इति सर्वत्र एत्वमनेनेत्वं च । **अमू कन्ये** इति– अत्रादस औकारे त्यदाद्यत्वे आबादौ " औता " [ १. ४. २०. ] इत्येत्वे बहुष्विति वचनादत्र द्वित्वे वर्तमानत्वादीत्वं न भवति, एवम्– **अमू कुले** इत्यत्रापि । **अमूः कन्याः**, इति– अदसः शसि त्यदाद्यत्वादौ " शसोऽता० " [ १. ४. ४९. ] इति दीर्घत्वे " मादुवर्णोऽनु ", [ २. १. ४७. ] इति आकारस्य ऊकारः " सो रुः " [ २. १. ७२. ] इति रुत्वं " रः पदान्ते० " [ १. ३. ५३. ] इति विसर्गः । **अमून्**, इति– " शसोऽता० " [ १. ४. ४९. ] इति पुंसि सकारस्य नकारः, शेषं पूर्ववत् । **अमुके अमुकेभ्य** इति– अत्राकः * तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणेऽपि * मादिति वचनान्मकारात् परस्यैकारस्येति विशेषणादत्रोकारककाराभ्यां व्यवधानादीत्वाभावः ॥ छ ॥ २. १. ४९. ॥

**न्या० स०—**बहुष्वेरी० । **अमुकेभ्यः** अत्राकः *तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणेऽपि* उकारेण व्यवधानाद् अनेन ईत्वाभावः ॥ २. १. ४९. ॥

## धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये । २ । १ । ५० ॥

**त० प्र०—धातुसंबन्धिन इवर्णस्योवर्णस्य च स्थाने स्वरादौ प्रत्यये परे यथासंख्यम् ' इय् उव् ' इत्येतावादेशौ भवतः । नियौ, नियः; लुवौ, लुवः; अधीयाते, अधीयते; लुलुवतुः, लुलुवुः; नुनुवतुः, नुनुवुः; स्वमिच्छति क्यन् क्विप्– स्वीः, स्वियौ, स्वियः; एवं– स्त्रियौ, स्त्रियः; अधीयन् । धातोरिति किम् ? लक्ष्म्याः । इवर्णोवर्णस्येति किम् ? ग्लायति, वाचः । स्वर इति किम् ? नीः, लूः । प्रत्यय इति किम् ? न्यर्थः, ल्वर्थः । इयुवभ्यां गुणवृद्धी परत्वाद् भवतः–नयनम्, लवनम्; नायकः, लावकः ॥ ५० ॥**

**श० न्या०—धातो०** । **धातुसम्बन्धिन** इति– अथेवर्णोवर्णस्येति धातोरित्यस्य विशेषणत्वात् तदन्तसंप्रत्ययाद् धातोरिवर्णोवर्णान्तस्येति समानाधिकरषष्ठ्यां सम्भवन्त्यां व्यधिकरणषष्ठ्याः प्रतिपत्तिगौरवात् परिग्रहायोगात् कथमेवमुच्यत इति, न च समानाधिकरणषष्ठ्यामनेकवर्णत्वात् सर्वादेशप्रसङ्ग इति वाच्यम्, यतो * निर्दिश्यमानस्यादेशा भवन्ति * इति इवर्णोवर्णयोरेवेयुवौ भविष्यत इति, सत्यम्– एतदर्थस्यैव स्पष्टीकरणायोक्तम्, अत एव सूत्रे इवर्णोवर्णस्येति विशेषणस्य पूर्व[ म ]निर्देशो व्यधिकरणषष्ठीप्रतिपत्त्यर्थः, तत्र च धातोरिति विशेषणमिवर्णोवर्णस्येति विशेष्यमिति । स्वर इति प्रत्ययस्य विशेषणात् तत्र च "सप्तम्या आदिः" [ ७. ४. ११४. ] इत्यादिसंप्रत्यय इत्युक्तम्– **स्वरादावि**ति– केवलस्य व्यपदेशिवद्भावात् स्वरादित्वम् । नयतेर्लुनातेश्च क्विपि तल्लुकि च औकारे जसि च * क्विबन्ता धातुत्वं न जहति * इति धातुत्वमेवात्र वेदितव्यमित्यनेनेयुवोः कृतयोः– **नियौ, नियः**, इत्यादयः । **अधीयाते, अधीयते,** इति– अधिपूर्वाद् "इङ्क् अध्ययने" इत्यतो वर्तमानाया आतेऽन्तेप्रत्यये "अनतोऽन्तोऽदात्मने" [ ४. २. ११४. ] इत्यदादेशे स्वरादित्वादियादेशः । **लुलुवतुः, लुलुवु[ः, नुनुवतुः, नुनुवु ]**रिति– लुनातेर्नौतेश्च परोक्षा[ या ] अतुसि उसि च "द्विर्धातुः०" [ २. १. ५०. ] इति द्विर्वचने "ह्रस्वः" [ ४. १. ३९. ] इति द्विरुक्तस्य ह्रस्वत्वे स्वरादित्वादुवादेशः । **लक्ष्म्या** इति– औणादिकत्वाद् धातुत्वाभाव इत्यर्थः, स च पूर्वं साधित एव । "म्लै गात्रविनामे" इत्यतो वर्तमानायास्तिवि शवि आयादेशे– **म्लायति** । **वाचः** उच्यत इति "दिद्युद्दद्दृज्जगद्०" [ ५. २. ८३. ] इति क्विपि निपातनात्– वाच्, ततो जस्, इवर्णादिग्रहणमन्तरेणात्रापि स्यादित्यर्थः । **न्यर्थः, ल्वर्थः**, इति– नियोऽर्थ इति षष्ठीसमासः, अथ नयतेर्लुनातेश्च [ "करणाधारे" ५. ३. १२९. इति ] करणाधारेऽनटि "णक-तृचौ" [ ५. १. ४८. ] इति कर्तरि णके च इवर्णोवर्णान्तत्वादियुवौ कस्मान्न भवत इत्याह– **इयुवभ्यामि**त्यादि– नियौ लुवावित्यादावस्य विधेः सावकाशत्वात्, करणं कारक इत्यादौ तु गुण-वृद्ध्योः, नयनमित्यादौ तूभयप्राप्तौ इयुवौ बाधित्वा गुण-वृद्धी स्यातामित्यर्थः ॥ छ ॥ २. १. ५०. ॥

**न्या० स०—धातेरिवर्णो०** । युवर्णस्येति कर्तव्ये यदिवर्णोवर्णस्येति कृतं तद् विचित्रा सूत्रकृतिरिति दर्शनार्थम् । **प्रत्यये** इति– *प्रत्ययाऽप्रत्यययोः०* इति न्यायेन प्रत्यय एव भविष्यति, किं तद्ग्रहणेन ? सत्यम्– *न्यायानां स्थविरयष्टि*न्यायेन प्रवृत्तेः । **नियौ, नियः**, इति– ननु *गौणमुख्ययोः०*इति मुख्यस्यैवेयुवौ प्राप्नुतः, नैवम्– "स्यादौ वः" [ २. १. ५७. ] इति सूत्रस्यैतदपवादत्वाद् गौणस्यापि भवति । **स्त्रियावि**ति– ननु "स्त्रियाः" [ २. १. ५४. ] इत्यनेनापि इय् सिद्धः, किमत्रोदाहरणेन ? सत्यम्– तेन नाम्न इय् भवति, अनेन तु धातोः, अत एव यत्र क्विबन्तः स्त्रीशब्दो भवति तत्रानेन "वाऽम्-शसि" [ २.१.५५. ] इति विकल्पो बाध्यते ॥ २. १. ५० ॥

## इणः । २ । १ । ५१ ॥

**त० प्र०—इणो धातोः स्वरादौ प्रत्यये परे 'इय्' इत्ययमादेशो भवति, यत्वापवादः । ईयतुः, ईयुः । कथं यन्ति, यन्तु ? परत्वेन "ह्विणोरप्विति व्यौ" [ ४. ३. १५. ] इति यत्वस्यैव भावात् । 'अयनम्, आयकः' इत्यत्रापि परत्वाद् गुण-वृद्धी एव ॥ ५१ ॥**

**श० न्या०—इणः** । धातोरिति वर्तते, इह व्यभिचाराभावेऽपि धातोरित्युत्तरार्थमनुवर्तनीयम्, तेन चेण् विशेषयितव्यः, विशेषणविशेष्यभावं प्रति कामचारादित्याह– **इणो धातोरि**ति । अस्य चोवर्णस्याभावादियित्ययमेव सम्बध्यत इत्याह– **इयित्ययमादेश** इति । अथेणो धातुत्वात् पूर्वेणैव स्वरादावियादेशो भविष्यति, सत्यम्– इणः परोक्षादौ द्विरुक्तस्यानेकस्वरत्वाद् "योऽनेकस्वरस्य" [ २. १. ५६. ] इति यत्वं स्याद्, अतस्तदपवादोऽयमुच्यत इत्याह– **यत्वापवाद** इति । **ईयतुः, ईयुरि**ति– "इंण्क् गतौ" अतः परोक्षाया अतुसि उसि च "द्विर्धातुः०" [ ४. १. १. ] इति द्विर्वचनम्, अतोऽनेकस्वरत्वादन्त्यस्येयादेशः पूर्वस्य समानदीर्घत्वमिति । **कथमि**ति– एतेर्वर्तमानाया अन्तिप्रत्यये पञ्चम्या अन्तुप्रत्यये च स्वरादित्वाद् "इणः" [ २. १. ५१. ] इतीयादेशः कस्मान्न भवतीत्याह– **अत्रापी**त्यादि– अयमर्थः– * पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् * इति परत्वाद् गुण-वृद्धी भवतः ॥ छ ॥ २. १. ५१. ॥

**न्या० स०—इणः** । अत्र व्यभिचाराभावेऽपि धातोरित्युत्तरार्थमनुवर्तनीयम् । **यत्वापवाद** इति– "योऽनेकस्वरस्य" [ २. १. ५६. ] इति प्राप्तस्य । **परत्वेने**ति– शितीति विशेषविहितत्वात् प्रकृष्टत्वेनेत्यर्थः, परत्वं तु स्पर्धाभावान्न घटते । **परत्वादि**ति– *पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्* इति "योऽनेकस्वरस्य" [ २. १. ५६. ] इति प्राप्तं यत्वं

बाधने, न तु गुण-वृद्धी । ईयतुरित्यत्र द्वित्वे कृते *वर्णात् प्राकृतं बलीयः* इति न्यायात् प्रथममियादेशस्ततो दीर्घः ॥ २. १. ५१. ॥

## संयोगात् । २ । १ । ५२ ॥

**त० प्र०—**धातुसंबन्धिन इवर्णस्योवर्णस्य च धातुसम्बन्धिन एव संयोगात् परस्य स्वरादौ प्रत्यये परे इयुवादेशौ य्वोरपवादौ भवतः । यवक्रियौ, यवक्रियः; कटप्रुवौ, कटप्रुवः; शिश्रियतुः, शिश्रियुः । धातुना संयोगस्य विशेषणादिह न भवति– उन्न्यौ, उन्न्यः; सकृल्ल्वौ, सकृल्ल्वः ॥ ५२ ॥

**श० न्या०—**संयो० । "क्विब्वृत्तेः०" [ २. १. ५८. ] इत्यादि[ ना ] यत्वे वत्वे च प्राप्ते तदपवादोऽयमारभ्यते । धातोरित्यनुवर्तमानेन संयोगादिति विशिष्यत इत्याह– **धातुसम्बन्धिन एव संयोगादि**ति । नन्विवर्णोवर्णयोरेव कार्यितया प्राधान्याद् धातोरिति विशेषणं युज्यते न तु संयोगस्य तद्विशेषणत्वेनाप्रधानत्वात्, प्रधानासम्भवे हि विशेषणं गौणे युज्यते, न तु प्रधाने उपपद्यमानम्, ततो धातोरवयवो य इवर्ण उवर्णश्च संयोगात् परस्तयोरियुवाविति विशेषण-विशेष्यभावादधात्ववयवौ व्यावर्त्यौ लभ्येते, अथ तत्र "इवर्णादेः०" [ १. २. २१. ] इति यकार-वकारयोः सम्भवादव्यावर्त्यत्वमिति चेत् ? न– यत्र समानदीर्घत्वं बाधकमस्ति तत्र व्यभिचारादर्थवदिवर्णोवर्णयोर्धातोरिति विशेषणमिति प्रधानगामिनि सम्भवति विशेषणे गुणस्य तेन सम्बन्धो न न्याय्यः, नैवम्– य्वोरपवादावियुवौ विधीयेते, तौ च धातोरेवेवर्णोवर्णयोर्भवत इति व्यभिचाराभावाद् धातुप्रकरण एवास्यारम्भात् तयोर्धातुविशेषणमनर्थकमिति प्रधानस्य धातुना सम्बन्धो निष्प्रयोजनः, तदीयस्य संयोगलक्षणस्य गुणस्य तेन सम्बन्धः क्रियत इति, **धातुसम्बन्धिन इवर्णस्ये**त्यादिपूर्वसूत्रसिद्धार्थानुवादश्च धातोरित्यस्याप्राधान्यप्रदर्शनार्थं न तु व्यवच्छेदार्थमिति । **यवक्रियावि**त्यादि– यवपूर्वात् क्रीणातेः क्विप्, कटपूर्वात् प्रवतेश्च "दिद्युद्दद्द०" [ ५. २. ८३. ] इति क्विपि दीर्घः, "श्रिग् सेवायाम्" इत्यतः परोक्षाया अतुस् उस् "द्विर्धातुः०" [ ४. १. १. ] इति द्विर्वचनं "व्यञ्जनस्यानादेः०" [ ४. १. ४४. ] इति रेफस्य लोपः, एतेषु धातुसंयोगपूर्वं इवर्ण उवर्णश्चेति तयोः स्वरादावियुवाविति । धातुना संयोगस्य विशेषणे फलमाह– **धातुने**त्यादि– अन्यथा यवक्रियावित्यादिवद् धातुसंयोगादिवान्यसंयोगादपि परयोरिवर्णोवर्णयोरुन्न्यावित्यादावपि य्वौ बाधित्वा इयुवौ स्यातामिति ॥ छ ॥ २. १. ५२. ॥

**न्या० स०—**संयोगात् । य्वोरपवादाविति– "क्विब्वृत्तेः०" [ २. १. ५८ ] "योऽनेकस्वरस्य" [ २. १. ५६. ] इति विहितयोः ॥ २. १. ५२. ॥

## भ्रू-श्नोः । २ । १ । ५३ ॥

**त० प्र०—**' भ्रू श्नु ' इत्येतयोरुवर्णस्य संयोगात् परस्य स्वरादौ प्रत्यये परे उवादेशो भवति । भ्रुवौ, भ्रुवः, क्यन्-क्विबन्तस्य "धातोरिवर्णोवर्णस्य०" [ २. १. ५०. ] इत्यादिनैवोवादेशः । आप्नुवन्ति, राध्नुवन्ति, तक्ष्णुवन्ति । संयोगादित्येव– सुन्वन्ति, चिन्वन्ति । स्वर इत्येव– भ्रूः, आप्नुतः । प्रत्यय इत्येव– भ्र्वग्रम् ॥ ५३ ॥

**श० न्या०—**भ्रूश्नोः । भ्रूशब्द औणादिकः, क्विबन्तस्य तु धातुत्वाहानेः पूर्वेणैव सिद्ध इत्याह– **क्यन्-क्विबन्तस्ये**त्यादि । "आप्लृंट् व्याप्तौ" इत्यतो वर्तमानाया अन्तौ "स्वादेः" [ ३. ४. ७५. ] इति श्नुप्रत्यये धातुसंयोगात् परस्य श्नुप्रत्ययोवर्णस्योवादेशे– **आप्नुवन्ति,** एवम्– **राध्नुवन्ति, तक्ष्णुवन्ति,** इत्याद्यपि द्रष्टव्यम् । **भ्र्वग्रमि**ति– भ्रुवोऽग्रमिति षष्ठीसमासः ॥ २. १. ५३. ॥

**न्या० स०—**भ्रूश्नोः । संयोगात् परस्येति विशेषणं श्नोर्न तु भ्रूशब्दस्याव्यभिचारात् ॥ २. १. ५३. ॥

## स्त्रियाः । २ । १ । ५४ ॥

**त० प्र०—**स्त्रीशब्दसंबन्धिन इवर्णस्य स्वरादौ प्रत्यये परे इयादेशो भवति । स्त्रियौ, स्त्रियः, स्त्रियाम्; परमस्त्रियौ, अतिस्त्रियौ नरौ । शस्त्रीशब्दसंबन्धिनस्त्वनर्थकत्वाद् न भवति । स्वर इत्येव– स्त्रीभिः । प्रत्यय इत्येव– स्त्र्यर्थः । कथम् ' अतिस्त्रयः, अतिस्त्रिणा, अतिस्त्रये, अतिस्त्रेः २, अतिस्त्रौ ' ? "इदुतोऽस्त्रेरीदूत्" [ १. ४. २१. ] इत्यत्र स्त्रीशब्दवर्जनात् परोऽपीयादेशो बाध्यते । स्त्रीणामित्यत्र तु प्रागेव नाम्, एतच्च "वेयुवोऽस्त्रियाः" [ १. ४. ३०. ] इत्यत्रोक्तम् । पृथग्योग उत्तरार्थः ॥ ५४ ॥

**श० न्या०—**स्त्रियाः । अर्थस्य प्रत्ययस्य च ग्रहणं यत्नापेक्षं, स्वरूपग्रहणं त्वयत्नसिद्धमेवेति तदेवेहाश्रीयते, "जातेरयान्तनित्यस्त्रीशूद्राद्" [ २. ४. ५४. ] इति "द्विस्वरादनद्याः" [ ७. १. ७१. ] इति च निर्देशादर्थ-प्रत्ययग्रहणमित्याह– **स्त्रीशब्दसम्बन्धिन** इति । **स्त्रियौ, स्त्रियः,** इत्यादि– अत्र स्त्रीति स्त्यायतेः सूतेर्वा "स्त्री" [ उणा० ४५०. ] इति निपातनात् त्रट् प्रत्ययाद् ङ्यां भवति, तत औ जस्, सप्तम्येकवचनस्य [ ङेः ] च "स्त्रीदूतः" [ १.

४. २९.] इत्याम्, नायं धातुरिति पूर्वेणाप्राप्त इत्यनेनेयादेशः। स्वरादिप्रत्ययेन प्रकृतेराक्षेपात् स्त्रिया इति तस्या विशेषणत्वात् तदन्तसम्प्रत्ययात् तदन्तस्याप्युदाहरति- **परमस्त्रियावित्यादि**- परमे च ते स्त्रियाविति विशेषणसमासः, स्त्रियमतिक्रान्ताविति प्रादिसमासः, "गोश्चान्ते०" [२. ४. ९६.] इति ह्रस्वत्वं, ततः स्याद्यौकारे * एकदेशविकृतस्यानन्यत्वात् * परमात्रि च स्वरादिप्रत्यये विधानादत्रापीयादेशः। न च तदन्तग्रहणात् शस्त्रीशब्दस्यापि स्त्र्यन्तत्वादियादेशप्रसङ्ग इति वाच्यम्, तदेकदेशस्यानर्थकत्वादित्याह- **शस्त्रीत्यादि**। स्त्रिया अर्थः **स्त्र्यर्थ** इति षष्ठीसमासः। **कथमिति**- अयं चार्थस्तत्रैव व्याख्यातत्वान्नेह व्याख्यायते। **पृथग्योग** इति- "वाऽम्शसि" [२. १. ५५.] इत्यत्र स्त्रीशब्दानुवृत्तिः प्रयोजनमस्येत्यर्थः, अन्यथा "स्त्रीभ्रूश्रोः" इति लाघवार्थं पूर्वेणैकयोगमेव कुर्यात् ॥ छ ॥ २. १. ५४. ॥

---

**न्या० स०—स्त्रियाः।** **स्त्रियामित्यत्र** *निरनुबन्धग्रहणे०* इति न्यायाद् "ह्रस्वापश्च" [१. ४. ३२.] इत्यनेन नाम् न। **परमस्त्रियाविति**- *ग्रहणवता०* इति नोपतिष्ठते "वेयुवः०" [१. ४. ३०.] इत्यत्र 'अस्त्रियाः' इति निर्देशात्, यद्वा स्वरादिप्रत्ययेन प्रकृतेराक्षेपात् स्त्रिया इति तस्या विशेषणत्वेन तदन्तसंप्रत्ययात् तदन्तस्याप्युदाहरणम्। तर्हि शस्त्रीशब्दस्यापि स्त्र्यन्तत्वादियादेशः प्राप्नोतीत्याह- **अनर्थकत्वादिति**। **एतच्चेति**- 'अस्त्रियाः' इति निर्देशात् परादपि इयुव्यत्वादिकार्यात् 'प्रथममेव स्त्रीदूदाश्रितं कार्यं भवति' इत्याद्युक्तं तत्रेत्यर्थः ॥ २. १. ५४. ॥

---

## वाऽम्-शसि । २ । १ । ५५ ॥

**त० प्र०—स्त्रीशब्दसंबन्धिन इवर्णस्यामि शसि च परे इयादेशो वा भवति। स्त्रियम्, स्त्रीम्; स्त्रियः, स्त्रीः; परमस्त्रियम्, परमस्त्रीम्; परमस्त्रियः, परमस्त्रीः; अतिस्त्रियम्, अतिस्त्रिम् नरम्; अतिस्त्रियः, अतिस्त्रीन् नरान्। क्यनाद्यन्तस्य तु धातुत्वात् "धातोरिवर्णो०" [२. १. ५०.] इत्यादिना नित्यमियादेशः- स्त्रीमिच्छति स्त्रीवाचरति वा- स्त्री ब्राह्मणः, तं स्त्रियम्, तान् स्त्रियः ॥ ५५ ॥**

---

**श० न्या०—वाम०।** षष्ठीबहुवचनस्य नाम्विषयत्वेन स्वरादित्वाभावात् शस्साहचर्याच्च वाम्शसीति तुल्यायामपि संहितायां द्वितीयैकवचनस्यैव ग्रहणम्, स्त्रीशब्दस्य संख्यैकार्थत्वाभावाद्यातस्तद्धितशसोऽनुत्पत्तेरुत्पत्तौ वा स्वरादित्वाभावाद् द्वितीयाबहुवचनस्यैव शसो ग्रहणात् तस्याव्यभिचारात् तेन साहचर्यम्। **क्यनाद्यन्तस्येति**- अथ धातुरूपस्यैव स्त्रीशब्दस्य विकल्पार्थमिदं कस्मान्न भवतीति कथमुक्तं- "**धातोरिवर्णोवर्ण०**" [२. १. ५०.] **इत्यादिना नित्यमियादेश** इति, उच्यते- "स्त्रियाः" [२. १. ५४.] इत्यारम्भाद्धातोरेव स्त्रीशब्दस्य ग्रहणम्, स एवेहानुवर्तते, न चानुवर्तनादन्यथात्वं भवति, यदाह श्रीशेषः- नहि गोधा सर्पन्ती सर्पणादहिर्भवति, तस्मात् सूक्तमुक्तं- **धातोः पूर्वेणेत्यादि** ॥ छ ॥ २. १. ५५. ॥

---

**न्या० स०—वाऽम्-शसि।** अत्र षष्ठीबहुवचनस्य नाम्विषयत्वेन स्वरादित्वाभावाद् शस्साहचर्याच्च तुल्यायामपि संहितायां द्वितीयैकवचनस्यैव ग्रहणम्, स्त्रीशब्दस्य संख्यैकार्थत्वाभावाद् तद्धितशसोऽनुत्पत्तेः सङ्ख्यैकार्थत्वयोगादुत्पत्तौ वा स्वरादित्वाभावाद् द्वितीयाबहुवचनस्यैव शसो ग्रहणात्, अतस्तस्याऽव्यभिचारात् तेन साहचर्यम्। **क्यनाद्यन्तस्येति**- अथ धातुरूपस्यैव स्त्रीशब्दस्य विकल्पार्थमिदं कस्मान्न भवति? कथमुक्तं- "**धातोरिवर्णोवर्ण०**" [२. १. ५०.] **इत्यादिना नित्यमियादेश** इति, उच्यते- "स्त्रियाः" [२. १. ५४.] इति प्रागारम्भादधातोरेव स्त्रीशब्दस्य ग्रहणम्, स एव चाऽनुवर्त्तते, न चानुवर्त्तमानस्यान्यथात्वं भवति, यदाह श्रीशेषराजः- 'नहि गोधा सर्पन्ती सर्पणादहिर्भवति' इति, तस्माद्युक्तमुक्तं- "**धातोरिवर्णोवर्ण०**" [२. १. ५०.] **इत्यादिना इयादेश** इति ॥ २. १. ५५. ॥

---

## योऽनेकस्वरस्य । २ । १ । ५६ ॥

**त० प्र०—धातोरित्यनुवर्तते, अनेकस्वरस्य धातोः संबन्धिनः प्रत्यासत्तेरिवर्णस्य स्थाने स्वरादौ प्रत्यये परे यकारादेशो भवति। चिच्यतुः, चिच्युः; निन्यतुः, निन्युः। सखायमिच्छति क्यन् क्विप्- सखीः, सख्युः; एवं- पत्युः, सख्यि, पत्यि। अनेकस्वरस्येति किम्? नियौ, नियः, परमनियौ, परमनियः। "रिं पिंत् गतौ" रियति, पियति। इवर्णस्येत्येव? लुलुवतुः, लुलुवुः ॥ ५६ ॥**

---

**श० न्या०—योऽने०।** "इवर्णादे०" [१. २. २१.] इत्यनेनैव यत्वस्य सिद्धत्वादिय्बाधकमिदम्, न च सवर्णार्थमिति वाच्यम्, तथा सति स्वग्रहणमिवर्णग्रहणं वा कृत्वा संदेहनिवृत्त्यर्थमत्र तत्र वा कुर्यात्। इय् धातोरिवर्णस्यैव विधीयते, अतः सामर्थ्यात् तस्यानुवर्तनमित्याह- **धातोरित्यनुवर्तते**। अन्यस्यासम्भवाद् 'अनेकस्वरस्य' इति विशेषणीभूतस्यापि धातोरित्यस्य विशेषणमित्याह- **अनेकस्वरस्य धातोरिति**। इवर्णोवर्णयोः स्थानिनोरनुवृत्तावपि कार्यस्य तालव्यत्वाद् "आसन्नः" [७. ४. १२०.] इति परिभाषा-

सामर्थ्यादिवर्णस्यैव स्थानित्वमित्याह- **प्रत्यासत्तेरि**त्यादि । चिनोतेरतुसि उसि द्विर्वचने धातोरनेकस्वरत्वाद् यत्वम्, एवं- **निन्यतुरि**त्यादि । क्विबन्तानां धातुत्वाहानेस्तदन्तमुदाहरति- **सखायमिच्छतीत्या**दि । नयतेः क्विपि तल्लुकि च औ-जसोरनेकस्वरत्वाभावाद् यत्वाभावे "धातोरिवर्णोवर्णस्य०" [२. १. ५०.] इतीयादेशे- **नियौ, नियः**, एवं- **परमनियावि**त्यादावपि समासस्यानेकस्वरत्वं न धातोरिति । **लुलुवतुः, लुलुवुरि**ति- प्रत्यासत्तेरिवर्णस्यैव स्थानित्वादुवर्णस्य यत्वं न भवति ॥ छ ॥ २. १. ५६. ॥

**न्या० स०—योऽनेक०** । **धातोरित्यनुवर्त्तेत** इति- *विशेषातिदिष्टः प्रकृतं न बाधते* इति न्यायाद् इयुवाधकमिदम् । **परमनियाविति**- अत्र समासस्यानेकस्वरत्वं न धातोः ॥ २. १. ५६ ॥

## स्यादौ वः । २ । १ । ५७ ॥

**त० प्र०—अनेकस्वरस्य धातोः संबन्धिनः प्रत्यासत्तेरुवर्णस्य स्थाने स्वरादौ स्यादौ प्रत्यये परे वकारादेशो भवति । वसुमिच्छति क्यन् क्विप्- वसूः, वस्वौ, वस्वः । स्यादाविति किम्? लुलुवुः ॥ ५७ ॥**

**श० न्या०—स्यादौ०** । पूर्वेण तुल्यगमम् । वसेः "भृ-मृ-तृ-त्सरि०" [ उणा० ७१६. ] इत्युप्रत्यये वसु, तस्य देवविशेषाद्यर्थस्य पुंस्त्वम्, यदुक्तम्- "देवभेदा-ऽग्नि-भा-योक्त्र-वक्र-राजसु ना वसु । क्लीबे वृद्ध्यौषध-स्थान-रै-रत्ने मधुरे त्रिषु ॥१॥" [ ] अतः पुंस्युदाहरति- **वसुमिति**, तस्य क्यनन्तस्य दीर्घत्वे क्विब्लुकि च- **वसूरि**ति प्रकृतिः, **वस्वौ, वस्वः**, इत्युदाहरणे ॥ छ ॥ २. १. ५७. ॥

**न्या० स०—स्यादौ वः** । उवृबाधनार्थमिदम् । **वसुमिच्छतीति**- देवमग्निं राजानं वेत्यर्थः, द्रव्यवृत्तिस्तु नपुंसकः ॥ २. १. ५७. ॥

## क्विब्वृत्तेरसुधियस्तौ । २ । १ । ५८ ॥

**त० प्र०—क्विबन्तेनैव या वृत्तिः- समासः, तस्या असुधियः- सुधीशब्दवर्जितायाः संबन्धिनो धातोरिवर्णोवर्णस्य स्थाने स्वरादौ स्यादौ प्रत्यये परे तौ-** यकार-वकारादेशौ भवतः । उन्न्यौ, उन्न्यः; सुल्वौ, सुल्वः; तिरोन्यौ, तिरोन्यः; तिरोल्वौ, तिरोल्वः; ग्रामण्यौ, ग्रामण्यः; खलप्वौ, खलप्वः; एषु स्याद्युत्पत्तेः प्रागेव क्विबन्तेन समासः । एवं नयनशीलो- नीः, सेनां नेता- सेनानीः, सेनान्यौ, सेनान्यः; यद्वा नयतीति- नीः, पश्चात् साधनेन योगः; परमस्य नेता- परमनीः, परमन्यौ, परमन्यः; क्विब्ग्रहणादिह न भवति- परमश्चासौ नीश्च- परमनीः, परमनियौ, परमनियः; स्याद्यन्तेनात्र विशेषणसमासो न तु क्विबन्तेन । वृत्तिग्रहणादिह न भवति- ब्राह्मणस्य नियौ । असुधिय इति किम्? सुष्ठु ध्यायति दधाति वा- सुधीः "दिद्युद्०" [ ५. २. ८३ ] इत्यादिना क्विप् धीभावश्च, सुधियौ, सुधियः । सुपूर्वस्यैव वर्जनादिह भवत्येव- प्रध्यौ, आध्यौ, उद्ध्यौ ॥ ५८ ॥

**श० न्या०—क्विब्वृत्ते०** । क्विपो वृत्तिः क्विब्वृत्तिस्तृतीयातत्पुरुषः, वृत्तिस्थस्य धातोः स्यादौ कार्यविधानात् तस्य च केवलस्य वृत्त्यसम्भवाद् वृत्तिग्रहणादेव क्विपि लब्धे क्विब्ग्रहणमवधारणार्थम्, अत एवावधारणस्य शब्दाश्रयत्वादसामर्थ्यमपि नास्तीत्याह- **क्विबन्तेनैवे**त्यादि । अनन्तरस्यैव वकारस्यानुवृत्तिर्मा भूदित्युभयानुवृत्त्यर्थं **तावि**त्युक्तमित्याह- **तौ यकार-वकाराविति** । उत्पूर्वान्नयतेः सुपूर्वाल्लुनातेः क्विपि तल्लुकि औ-जसोरनेन यकार-वकारे- **उन्न्यौ, उन्न्यः, सुल्वौ, सुल्वः,** इत्यादि । एवं खलं पुनीतः पवेते वेति क्विपि- **खलप्वौ । एष्वि**ति- "ङस्युक्तं कृता" [ ३. १. ४९. ] इति शेषः । सेनां नयत इति क्विपि- **सेनान्यौ** । सेनानीशब्दस्यैवार्थकथनम्- **नयनशील** इत्यादि । यदापि नयतीति नीः, पश्चात् सेनाशब्देन कर्मषष्ठ्यन्तेन कारकत्वात् स्याद्युत्पत्तेः पूर्वं क्विबन्तेन समासस्तदापि यत्वे सेनान्याविति भवतीत्याह- **यद्वा नयतीति नीः, पश्चात् साधनेन योग** इति- अर्थभेदाभावात् प्रक्रियाभेदमात्रमेतदुपदर्शितमिति, परमार्थतस्तु सोपपदादेव क्विप्; यद्येवमनेनैव न्यायेन परमन्याविति प्राप्नोति, परमनियाविति चेष्यते, तत् कथमिति? उच्यते- क्विबन्तेन वृत्तेरभावात्, तदभावश्च कारकत्वाभावात्, तथाहि- यदा परमश्चासौ नीश्चेति "सन्महत्०" [ ३. १. १०७. ] इति विशेषणसमासस्तदा नीशब्देन क्विबन्तेन कर्तृशक्त्युपसर्जनं द्रव्यमाख्यायते, ततस्तद्विशेषणं परमशब्दो न कारकाभिधायी; यदापि षष्ठीसमासस्तदापि शेषविवक्षायां तिरोधीयते समासहेतुभूतकारकत्वविवक्षा; यदापि परमं शास्त्रं नयतीति नयनक्रियाकर्मणः शास्त्रादेर्विशेषणं परमशब्दस्तदा सत्यपि कर्मत्वे शास्त्राद्यपेक्षत्वात् सामर्थ्याभावात् 'ऋद्धस्य राज्ञः पुरुषः' इतिवद् वृत्तेरभावः, तस्मात् परमनियावित्येव भवतीत्याह- **परमस्य नेता परमनीरि**त्यादि । **परमन्य** इत्यनन्तरम् 'इति' शब्दोऽध्याहार्यः, **न भवती**त्यनन्तरं तु दृष्टान्तार्थं यथाशब्दः, तेनायमर्थः- यथा **परमश्चासौ नीश्च परमनीः, परमनियौ, परमनियः**, इति परमशब्दस्याकारकत्वात् क्विबन्तेन समासाभावात् क्विब्ग्रहणादिह यत्वं न भवति, एवं तत एव **परमन्यौ, परमन्यः**, इति यत्ववान् प्रयोगो न भवतीति

तात्पर्यार्थः । **प्रध्यावित्यादि**– सुपूर्वस्यैव धियो यत्वप्रतिषेधादन्यपूर्वस्य भवत्येवेति ॥ छ ॥ २. १. ५८.॥

**न्या० स०**—**क्विब्वृत्तेः०** । **क्विबन्तेनैवेति**– नन्वत्रावधारणं कस्माल्लब्धम्? उच्यते– वृत्तिस्थस्य धातोः स्यादौ कार्यविधानात् तस्य च केवलस्य वृत्त्यसंभवाद् वृत्तिग्रहणादेव क्विपि लब्धे क्विब्ग्रहणमवधारणार्थम्, अत एवावधारणस्य शब्दाभयत्वादसामर्थ्यमपि नास्ति । **सेनानीरिति**– **सेनां नेतेत्यर्थकथनम्**, यावता सेनाशब्दस्य षष्ठ्यन्तस्य *गतिकारक०* इति न्यायेन नीशब्देन क्विबन्तेन "कृति" [ ३. १. ७७. ] इति समासः, न च वाच्यं "न नाम्यैक०" [ ३. २. ९. ] इति नियमेन द्वितीयैव प्राप्नोति, न षष्ठी, तत् कथं? "कृति" [ ३. १. ७७. ] इति समासः, उच्यते– "ङस्युक्तं कृता" [ ३. १. ४९. ] इत्यस्यैव विषयेऽयं नियमो न "कृति" [ ३. १. ७७. ] इत्यस्य । यद्यपि नयतीति– नीः, पश्चात् तु परमशब्देन कर्मषष्ठ्यन्तेन कारकत्वात् स्याद्युत्पत्तेः पूर्वं क्विबन्तेन समासस्तदापि यत्वं भवतीत्याह– **यद्वेत्यादि**– उभयत्राप्यर्थभेदाभावात् प्रक्रियाभेदमात्रमेतदुपदर्शितमिति, परमार्थ[त]स्तु सोपपदादेव क्विप् । ननु बहवः सेनान्यो यस्येति कृते यत्वं भवति वा न वा? भवत्येव, यतः सेनानीशब्दस्य क्विबन्तेन वृत्तिरस्ति । **परमनीरिति**– परमशब्दस्याकारकत्वाद् क्विबन्तेन समासाभावात् क्विब्ग्रहणादिह यत्वं न भवति ॥ २. १. ५८.॥

## दृन्-पुन-र्वर्षा-कारैर्भुवः । २ । १ । ५९ ॥

**त० प्र०**—**'दृन् पुनर् वर्षा कार' इत्येतैः सह या क्विब्वृत्तिस्तत्संबन्धिनो भुवो धातोरुवर्णस्य स्वरादौ स्यादौ प्रत्यये परे वकारादेशो भवति । दृन्– हिंसन् भवतीति– दृन्भूः– सविषः कीटविशेषः, दृन्भ्वौ; दृन्भ्वः । पुनर्भूः– पुनरूढा स्त्री, पुनर्भ्वौ, पुनर्भ्वः । वर्षाभूः– ओषधीविशेषो दर्दुरश्च, वर्षाभ्वौ, वर्षाभ्वः । कारे कारेण वा भवतीति– कारभूः, कारभ्वौ, कारभ्वः । करशब्देनापीच्छन्त्येके– करभ्वौ, करभ्वः । काराशब्देनाप्यन्ये– काराभ्वौ, काराभ्वः । दृन्नादिभिरिति किम्? स्वयंभुवौ, प्रतिभुवौ, मित्रभुवौ, विभुवौ, आत्मभुवौ । पूर्वेणैव सिद्धे नियमार्थमिदम्– एतैरेव भुवो नान्यैरिति** ॥ ५९ ॥

**श० न्या०**—**दृन्-पु०** । **दृन्-पुन-र्वर्षा-कारैरिति** तृतीयानिर्देशात् क्विब्वृत्तेरिति प्रकरणादेतैः सह क्विब्वृत्तिर्विज्ञायत इत्याह– **दृन्-पुनरित्यादि** । "दृहु वृद्धौ" अत उदित्त्वान्नागमे क्विप्यन्तलोपे– दृन्, धातूनामनेकार्थत्वाद् हिंसाऽपि गम्यत इत्याह– **दृन्– हिंसन्निति** । दृन्भूशब्दस्यार्थमाह– **सविष** इत्यादि । एवं पुनःपूर्वाद् भवतेः क्विपि– **पुनर्भूः– पुनरूढा स्त्री** "अक्षता वा क्षता वापि पुनर्भूः संस्कृता पुनः ।" इति वचनात् । वर्षन्तीत्यचि आपि वर्षाः, तासु भवतीति **वर्षाभूः**, तदर्थानुवादः– **ओषधीविशेषो दर्दुरश्च** । क्रियत इति कारः– वणिग्भिः कर्षकैः पशुपालैश्च स्वरक्षार्थं देयो राजभाग इति, तत्पूर्वाद् भवतेः क्विपि– **कारभूरिति** प्रकृतिः । मतान्तरमुपन्यस्यति– **करशब्देनेत्यादि**– उभय[माह] शकटः, स हि करशब्दं पठित्वा कर-कारशब्दयोरेकार्थत्वाद् * एकदेशविकृतं तदेव * इति कारशब्देनापीच्छति, तथा 'कारा' इति च पाठान्तरं मन्यते, देवनन्दी तु कारशब्दमेव पठति । **स्वयम्भुवावित्यादि**– स्वयं भवतः, प्रतिभवतः, मित्रे मित्रे मित्राद् वा भवतः, विभवतः, आत्मना भवतः, इति क्विप्यौकारे उवादेशः । अथ भुवः क्विबन्तस्य दृन्नादिभिर्वृत्तौ पूर्वेणैव सिद्धत्वात् किमर्थमिदमित्याशङ्कयाह– **पूर्वेणैवेत्यादि** । अथवा **स्वयम्भुवावित्यादौ** मा भूदनेन पूर्वेण कस्मान्न भवतीत्याशङ्कयाह– **पूर्वेणेत्यादि** । तत्र चान्यत्र च प्राप्तस्य कार्यस्य ततोऽन्यतो व्यावर्त्य तस्मिन् निबद्धोऽन्यत्र कार्यस्याभावफलो नियमः, स चात्र द्विधा सम्भवति– दृन्नादिभिर्भुव एव नान्यस्य धातोः, भुवो दृन्नादिभिरेव नान्यैः स्वयमादिभिरिति, तत्रेष्टं नियमं दर्शयति– **एतैरेवेत्यादि**– तृतीयाबहुवचनलभ्यश्चायमर्थः, तद्धि अधिकार्थमुपादीयते, अधिकश्चात्रायमेवार्थः, अन्यथा "वर्षा-दृन्पुनाकाराद् भुवः" इति चन्द्रगोमिवत् पञ्चम्येकवचनेनैव निर्दिशेत् । सारसङ्ग्रहादौ तु दृन्शब्दो न पठ्यत इति ॥छ॥२.१.५९॥

**न्या० स०**—**दृन्-पुन०** । **दृन्– हिंसन्निति**– "दृह दृहु" इति धातुः, दृंहतीति क्विपि तल्लोपे सिलोपे च "पदस्य" [ २. १. ८९. ] इति हलोपे– दृन् इति रूपम् । **वर्षाभूरिति**– "भेक्यां पुनर्नवायां स्त्री, वर्षाभूर्दर्दुरे ( नपस्त्रीण् ) पुमान् । इति वैजयन्तीकारः । **कारेति**– क्रियत इति– कारः, राजलभ्यो भागः । **करभ्वाविति**– उभयं शाकटायनः, स हि करशब्दं पठित्वा कर-कारशब्दयोरेकार्थत्वाद् * एकदेशविकृतं तदेव * इति कारशब्देनापीच्छति, काराशब्दं तु देवनन्दी । **स्वयंभुवाविति**– अत्रापि "दियुद्दृत्०" [ ५. २. ८३. ] इत्यादिना क्विप्, न तु "शंसंस्वयम्०" [ ५. २. ८४. ] इत्यादिना डुः, तदा हि धातुत्वं न स्यात् । **एतैरेवेति** प्रकृतिनियमोऽयम्, एतैर्योगे भुव एव नान्यस्य धातोरिति तूपपदनियमो न भवति, "अस्वयंभुवोऽव्" [ ७. ४. ७०. ] इति सूत्रनिर्देशात्, एवंविधे हि नियमे क्रियमाणे एतैर्भुव एव नान्यस्येत्यन्ये धातवो नियन्त्रिताः स्युः, भुवस्तु एतैरन्यैश्च योगे वत्वं स्यात्, तथा च 'अस्वयंभुवः' इति न स्यात् ॥ २. १. ५९.॥

## ण-षमसत् परे स्यादिविधौ च ।२।१।६०॥

**त० प्र०**—इतः सूत्रादारभ्य यत् परं कार्यं विधास्यते तस्मिन् पूर्वस्मिंश्च स्याद्यधिकारविहिते विधौ कर्तव्ये णत्वं षत्वं च असद्– असिद्धं द्रष्टव्यम्, एतत्सूत्रनिर्दिष्टयोश्च णत्वषत्वयोः परे षत्वे णत्वमसद् द्रष्टव्यम्, ण-षशास्त्रं वा परे स्यादिविधौ च शास्त्रे प्रवर्त्तमानेऽसद् द्रष्टव्यम्। पूष्णः, तक्ष्णः, अत्र णत्वस्यासत्त्वादनोऽकारलोपो भवति। पिपठीः, अत्र षत्वस्यासत्त्वात् सकारस्य रुर्भवति। स्यादिविधौ च– अर्वाणौ, सर्पींषि; अत्र णत्व-षत्वयोरसिद्धत्वादुपान्त्यदीर्घत्वं सिद्धम्। असत् पर इत्यधिकारो " रात् सः " [ २. १. ९०. ] इति यावत्, स्यादिविधौ चेति तु " नोम्यादिभ्यः " [ २. १. ९९. ] इति यावत् ॥ ६० ॥

**श० न्या०**—ण-ष०। णो विधेयत्वेन एष्वस्तीत्यभ्राद्यकारे णशब्देन णत्वविधायकानि सूत्राण्युच्यन्ते, एवं षशब्देनापि षत्वविधायकानीति, पश्चात् समाहारो द्वन्द्वः। यद्येवं तान्येव साक्षादत्र किमिति न पठ्यन्ते? उच्यते– सुखार्थं हि तेषामन्यत्र पाठः। परशब्दस्यावधिसापेक्षत्वादन्यस्यावधेरश्रूयमाणस्य निष्प्रमाणत्वादस्यैव सूत्रस्यावधित्वमित्याह– **इतः सूत्रादि**त्यादि। परस्य स्यादिविधेरसम्भवात् सम्भवे वा परग्रहणेनैव सिद्धत्वात् **पूर्वस्मिन्नि**ति विशेषणमुक्तम्। ण-षशब्देन तद्विधायकशास्त्राभिधानेऽपि शास्त्रस्य कार्यसम्पादनाय प्रवृत्तत्वादप्रधानत्वात् कार्यस्यैव प्राधान्यमिति तस्यैवासत्त्वं दर्शयतीत्याह– **णत्वमि**त्यादि। ण-षाभ्यां तच्छास्त्रयोरभिधानात् तत्र च षत्वशास्त्रस्य पूर्वभावित्वात् पूर्वं निर्देशे प्राप्ते परनिर्देशस्तस्मिन् णत्वमसिद्धं भवतीति ज्ञापनार्थमित्याह– **एतत्सूत्रनिर्दिष्टयोरि**त्यादि– विपर्ययनिर्देशे तु अभिषुणोतीत्यादि न सिध्यति, षत्वस्य णत्वेऽसत्त्वात्। **ण-षशास्त्रं वे**ति– अयमभिप्रायः– शास्त्रस्यैवासिद्धत्वं युक्तम्, कार्यासिद्धत्वाश्रयणे हि यथा देवदत्तस्य हन्तरि हतेऽपि न पुनर्देवदत्तस्य प्रादुर्भावो भवति तथा कार्येऽसिद्धत्वमापादितेऽपि न प्रकृतेः पुनः प्रत्यापत्तिर्भवति, ततः पूष्ण इत्यत्र णत्वस्यासिद्धत्वेऽपि प्रत्यापत्तेरभावान्नानन्ता प्रकृतिरिति तन्निबन्धनोऽनोऽकारलोपो न स्यात्, शास्त्रासिद्धत्वे नकारलोपशास्त्रमेव तावत् प्रवर्तते न णत्वशास्त्रमिति न भवत्येष प्रसङ्गः। किञ्च पौर्वापर्यं शास्त्रयोरेव मुख्यं कार्ययोस्तु गौणम्, परेण शास्त्रेण विधीयमानत्वात् पूर्वम् [ पूर्वेण शास्त्रेण परेण शास्त्रेण च विधीयमानत्वाद् 'इदं पूर्वम्, इदं परम्' इति व्यवहारात्, ] मुख्यं तु तयोः पौर्वापर्यं नास्ति, लक्ष्ये कार्याणां व्यवस्थानात्, लक्ष्यस्य च क्रमेण सन्निवेशाभावात् तद्गतकार्यस्यापि क्रमेण सन्निवेशाभावः, न च मुख्ये सम्भवति गौणग्रहणं युक्तम्, तस्माच्छास्त्रस्यैवासिद्धत्वं युज्यत इति। ननु सिद्धं ण-षशास्त्रं तत्कार्यं च, तत् कथमनेन वचनेनाविद्यमानतामापादयितुं शक्यते? आस्तां तावदेकेन वचनेन वचनशतेनापि सतोऽसत्त्वमापादयितुमशक्यम्, अवश्यं चैतदङ्गीकर्तव्यम्, अन्यथा न कश्चिद् दुःखविरसां दशामनुभवेत्, आपतन्त्येवासावसद्वचनेन निराक्रियेत, तस्मात् 'सतः सत्त्वाश्नोपपद्यत' [सतः सत्त्वादसत्वं नोपपद्यत] इत्यसम्बद्धमिदम्, उच्यते– परार्थे प्रयुज्यमानः शब्दो वतिमन्तरेणापि अतिदेशं गमयति, यथा– अब्रह्मदत्ते ब्रह्मदत्तोऽयमिति, तद्वदिहापि असद्– असदिव सत् कार्यं न करोतीत्यर्थः, यथा असत् कार्यं न करोति, एवं सदपि यत् कार्यं न करोति तद् असत्साधर्म्यादसदित्युच्यते, तदेतदसत्त्ववचनमादेशनिमित्तकानां कार्याणां प्रतिषेधार्थं स्थानिनिमित्तकानां च प्राप्त्यर्थमिति। **पूष्णः, तक्ष्णः,** इति– अत्र ङस्-ङसि-शस् वा, ततः परत्वादनोऽकारलोपं बाधित्वा णत्वं प्राप्तं, तस्यासद्वचनेन प्रवृत्त्यभावादनन्तत्वाद् " अनोऽस्य " [ २. १. १०८. ] इत्यकारलोपो भवति। **पिपठीरि**ति– पठेः पठितुमिच्छतीति " तुमर्हाद्० " [ ३. ४. २१. ] इति सनि " स्ताद्यशितः० " [ ४. ४. ३२. ] इति इटि " सन्-यङश्च " [ ४. १. ३. ] इति द्विर्वचने " व्यञ्जनस्यानादेः० " [ ४. १. ४४. ] इत्यनादिलोपे " सन्यस्य " [ ४. १. ५९. ] इतीत्वे " नाम्यन्तस्था० " [ २. ३. १५. ] इति षत्वे पिपठीषतीति क्विपि " अतः " [ ४. ३. ८२. ] इत्यकारलोपे क्विब्लोपे सौ " दीर्घङ्याब्० " [ १. ४. ४५. ] इति तस्य लोपेऽपि षत्वकार्यस्यासत्त्वाश्रयणात् कार्यासत्त्वे च प्रयोजनान्तराभावात् प्रकृतिप्रत्यापत्तेः " सो रुः " [ २. १. ७२. ] इति रुत्वं " पदान्ते " [ २. १. ६४. ] इति दीर्घत्वं ततो " रः पदान्ते० " [ १. ३. ५३. ] इति विसर्गः। **स्यादिविधौ चे**ति– अर्वन्शब्दादौकारे परत्वेन प्रवर्तमानमपि णत्वं बाधित्वाऽसद्वचनात् स्याद्यधिकारविहितत्वाद् " नि दीर्घः " [ १. ४. ८५. ] इत्युपान्त्यदीर्घत्वे– **अर्वाणौ,** एवं सर्पिःशब्दाद् " नपुंसकस्य " [ १. ४. ५५. ] इति जसः शसो वा श्यादेशे " स्वराच्छौ " [ १. ४. ६५. ] इति नागमे षत्वस्यासत्त्वादुपान्त्यदीर्घत्वे– **सर्पींषि,** इति। असत् पर इति स्यादिविधौ चेत्युत्तरत्रानुवर्त्येत इत्याह– **असत् पर** इत्यादि। **अधिकार** इति– अधि–उपरि, क्रियते–अनुवर्त्येत इत्यधिकारः। आ कुतोऽयमधिकार इत्याह– **" रात् सः "** [ २. १. ९०. ] इत्यादि। नन्वेवं तर्हि येऽत्र षष्ठीनिर्देशाः सप्तमीनिर्देशाः पञ्चमीनिर्देशाश्च क्रियन्ते तेऽप्यसिद्धाः स्युः, ततश्च " पदस्य " [ २. १. ८९ ] " रात् सः " [ २. १. ९० ] इत्यादौ षष्ठीनिर्देशाः " षष्ठ्या अन्त्यस्य "

[ ७. ४. १०६. ] इति परस्यां परिभाषायामसिद्धा इति तेषु सा न व्यवस्थापिका स्यात्, एवं समीपयोगेऽप्येषा षष्ठी स्यात्, ततश्च पदान्ते वर्तमानस्य संयोगस्य यः समीपे तस्यापि लोपः स्यात्, तथा "ह्रो धुट्-पदान्ते" [ २. १. ८२. ] इत्यादौ सप्तमीनिर्देशस्यासिद्धत्वात् "सप्तम्या पूर्वस्य" [ ७. ४. ११४. ] इति परिभाषा नोपतिष्ठेत, ततश्च पूर्वस्यैवानन्तरे भवितव्यमित्यस्य नियमस्याभावात् सामान्येन पूर्वस्य परस्य चानन्तरे व्यवहिते च धुटि स्यात्; तथा "अधश्चतुर्थाद्०" [ २. १. ७९. ] इत्यादौ पञ्चमीनिर्देशस्यासिद्धत्वात् "पञ्चम्या निर्दिष्टे परस्य" [ ७. ४. १०४. ] इत्यनुपस्थानात् परयोर्व्यवहितयोश्च तकार-थकारयोः कार्यं स्यात्; उच्यते– गौणस्यापि कार्यस्यासत्त्वाश्रयणात् तदुपायत्वात् षष्ठीनिर्देशादेरसत्त्वं नास्ति, शास्त्रासिद्धत्वेऽपि शास्त्रस्यासिद्धत्वम्, विभक्तिनिर्देशश्च न शास्त्रम्, तदङ्गत्वेऽपि तस्याप्राधान्यादसिद्धत्वं नास्ति, विभक्तिनिर्देशसामर्थ्याद् वा, असिद्धत्वे हि विभक्तिविशेषनिर्देशोपादानमनर्थकं स्यात्, तस्मात् "षष्ठ्यन्तस्य" [ ७. ४. १०६. ] इत्यादिपरिभाषासु प्रवर्त्यमानासु तन्निर्देशो नासिद्ध इति । किञ्च, प्रवर्तमानेऽप्यसत्त्वे परिभाषासु न दोषः, तथाहि– द्वेऽत्र दर्शने, केचित् कार्यकालतां संज्ञापरिभाषाणां मन्यन्ते, यद्यपि कार्येभ्यो बहिस्ता निर्दिष्टास्तथापि प्रधानानुविधायित्वाद् गुणानां कार्येणाभिन्नदेशता तासां न्याय्या, देशभेदेन तु निर्देशः सकलप्रधानोपकारार्थः, प्रधानदेशे तु तासामुपदेशे यस्यैव प्रधानस्य समीपे उपदिष्टास्तदेव ता उपकुर्युर्न प्रधानान्तरम्, एवं पाठक्रमेण यद्यपि प्रधानेभ्यो भिन्नदेशाः संज्ञापरिभाषास्तथाप्यार्थेन क्रमेण तद्देशा एव ता इति परत्वं प्रधानापेक्षया तासां नास्तीति न तासु तान्यसिद्धानीति तेष्वपि पठिता व्यवस्थापिका एवेति तदनुपस्थाने यदनिष्टं न तस्यास्ति प्रसङ्गः । केचित् तु तासां 'यत्रैवोपदेशतामेव' [ यत्रैवोपदेशस्तद्देशतामेव ] न्याय्यां मन्यन्ते, किञ्चिदेव प्रधानं कार्यमभिसन्धाय ता उपदिश्यमाना यत्रैवोपदिष्टास्तद्देशा एव ता इति प्रधानं पूर्वं ताश्च परा इति तासु तस्यासिद्धत्वमस्त्येव, किन्तु यथेष्टसिद्धये क्वचिज्जातिः पदार्थ आश्रीयते, क्वचिद् व्यक्तिः, एवमेतयोर्दर्शनयोरिष्टसिद्धयर्थं क्वचित् कस्यचिदाश्रयणमिति न किञ्चिदनिष्टम् । यदि कार्यकाले संज्ञा-परिभाषे तदा विपूर्वस्य स्फुरेरवपूर्वस्य गुरेश्च [ घ्यणि ] सत्यप्यनयोः कुटादिपाठे ङिगतिप्रतिषेधाद् ङित्वाभावात् "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषायाश्च भावे उपान्त्यगुणाप्रवृत्तौ "भ्वादेर्नामिनः०" [ २. १. ६३. ] इति दीर्घत्वेऽनिष्टं रूपं स्यात्, गुणश्चेष्यते– विस्फोर्यम्, अवगोर्यमिति, अङ्गवैकल्याद्धि अस्या अनवतारः, तथाहि– पूर्व-परयोर्लक्षणयोस्तुल्यबलयोरेकत्र विषये विरोधे आपतितेऽप्रवृत्तौ पर्यायेण [ण] वा प्राप्तौ "स्पर्धे" इति परं व्यवस्थाप्यते, इह तु परस्मिन् लक्षणे कर्तव्ये पूर्वस्यासिद्धत्वादेकत्र पूर्व-परयोस्तुल्यबलयोरप्राप्तेः "स्पर्धे" [ ७. ४. ११९. ] इत्यस्या अङ्गवैकल्याद् व्यवस्थापकत्वं नास्तीति पूर्वस्यैव दीर्घत्वलक्षणस्य प्रवृत्तिर्नोत्तरस्येति, सत्यम्– मा भूत् परिभाषासामर्थ्यादुत्तरस्य प्रवृत्तिः, पूर्वस्यासत्त्वादेवोत्तरस्य प्रवृत्तिर्भविष्यतीत्यदोषः । तथाऽपवादस्य पूर्वस्यापि परस्मिन्नुत्सर्गे कर्तव्ये नासिद्धत्वम्, अपवादवचनस्य निर्विषयत्वे तस्य निर्विषयत्वेन वैयर्थ्यप्रसङ्गात् । वचनप्रामाण्यात् पर्यायेण तयोर्भाव इत्यपि न वाच्यम्, तथा सति तत्र वेति कुर्यात् ॥ छ ॥ २. १. ६० ॥

**न्या० स०—ण-षम०।** णो विधेयत्वेन एष्वस्तीत्यभावकारे णशब्देन णत्वविधायकानि सूत्राण्युच्यन्ते, एवं षशब्देनापि षत्वविधायकानि । **एतत्सूत्रनिर्दिष्टयोरि**ति– यदि तु सप्तमपादोक्तक्रमेण 'ष-ण' इति क्रियते (तदा णत्वमसद् द्रष्टव्यम्, पूर्वं कृतस्य णत्वस्यासत्त्वात् प्रनष्ट इति सिद्धम्, न च 'श' इति व्यावृत्त्या पूर्वमेव न भविष्यति, धातोः पश्चादुपसर्गसंबन्ध इति मते व्यावृत्तेश्चरितार्थत्वाद् 'अभिषुणोति' इत्यादि न सिद्ध्यति, "उपसर्गात् सुग्०" [ २. ३. ३९. ] इत्यनेन विहितस्य षत्वस्य णत्वे परेऽसत्त्वात्), तदाभिषुणोतीत्यादि न सिध्यति, "उपसर्गात् सुग्०" [ २. ३. ३९. ] इत्यनेन विहितस्य षत्वस्य णत्वे परेऽसत्त्वात् "रषृवर्णात्०" [ २. ३. ६३. ] इत्यनेन षकारात् विधीयमानं णत्वं न स्यात् । **ण-षशास्त्रं** वेति– अयमभिप्रायः— शास्त्रस्यैवासिद्धत्वं युक्तम्, कार्यासिद्धत्वाश्रयणे हि यथा देवदत्तस्य हन्तरि हतेऽपि न पुनर्देवदत्तस्य प्रादुर्भावो भवति तथा कार्येऽसिद्धत्वमापादितेऽपि न प्रकृतेः पुनः प्रत्यापत्तिर्भवति, ततः पूष्ण इत्यत्र णत्वस्यासिद्धत्वेऽपि नकारप्रत्यापत्तेरभावान्नानन्ता प्रकृतिरिति तन्निबन्धनोऽनोऽकारलोपो न स्यात्, शास्त्रासिद्धत्वे त्वकारलोपशास्त्रमेव तावत् प्रवर्त्तते, न णत्वशास्त्रमिति । **अधिकार** इति– अधि– उपरि, क्रियते– अनुवर्त्यत इत्यधिकारो वर्ण्णि ॥ २.१.६०.॥

## क्ताऽऽदेशोऽषि । २ । १ । ६१ ॥

**त० प्र०—ककारेण उपलक्षितस्य तकारस्य स्थाने य आदेशः स षकारादन्यस्मिन् परे कार्ये स्यादिविधौ च कर्तव्येऽसन् द्रष्टव्यः । क्षामिमान्, अत्र "क्षै-शुषि-पचो म-क-वम्" [ ४. २. ७८. ] इति क्तादेशस्य मकारस्यासत्त्वात् "मावर्णान्त०" [ २. १. ९४. ] इत्यादिना मतोर्मो वो न भवति; शुष्किका, अत्र ककारस्यासत्त्वात् "स्वज्ञाज०" [ २. ४. १०८. ] इत्यादिनेत्वविकल्पो न भवति, "अस्याय-त्तत्क्षिपकादीनाम्" [ २. ४. ११०. ] इति तु नित्यमेव इत्वं**

भवति; पक्कम्, अत्र वत्वस्यासत्त्वाद् धुटि कत्वं भवति; बुद्ध्वा, दग्ध्वा, अत्र क्तादेशस्य धकारस्यासत्त्वात् "ग-ड-द-बादेः०" [२. १. ७७.] इत्यादिना आदेश्चतुर्थो न भवति। स्यादिविधौ च-लून्युः, पून्युः, अत्र क्तादेशस्य नत्वस्यासत्त्वात् स्याश्रित उर् भवति । अषीति किम्? वृक्णः, वृक्णवान्, अत्र क्तादेशस्य नत्वस्य सत्त्वात् "यजसृज०" [२. १. ८७.] इत्यादिना धुण्निमित्तः षो न भवति, कत्वे त्वसत्त्वात् सद् भवत्येव । परे स्यादिविधौ चेत्येव-लग्नः, मग्नः, अत्र स्यादिविधौ पूर्वसूत्रकार्ये "अघोषे प्रथमोऽशिटः" [१. ३. ४०.] इति प्रथमत्वे नत्वस्यासत्त्वाभावादघोषनिमित्तः प्रथमो न भवत्येव; एवं क्षामेण, शुष्केणेत्यादौ पूर्वं णत्वं प्रति मत्व-कत्वयोः सत्त्वात् तकारेण व्यवधानं नास्तीति णत्वं भवति ॥ ६१ ॥

---

**श० न्या०—क्तादे०।** क्तस्येत्यनुवादात् तस्य च समुदायरूपस्य कार्यानिर्देशात् ककार इद् इह ग्राह्यो न त्ववयव इत्याह- **ककारेणे**त्यादि- कस्तः क्तः, तस्यादेश इति षष्ठीसमासः, स च क्त-क्तवतु-क्तीन् प्रयोजयति, अत एव 'कित् त' इत्यनुक्त्वा 'क्त' इत्युक्तम्। 'परे' इति वर्तते, तत् तु परत्वमेतत्सूत्रापेक्षं विज्ञायते, न विधिवाक्यापेक्षम्, 'अषि' इति प्रतिषेधात्, एतत्सूत्रापेक्षे हि परत्वे षत्वमपि "यज-सृज०" [२. १. ८७.] इति परम्, तस्मिन्नप्यसत्त्वे प्राप्ते 'अषि' प्रतिषेधो युज्यते । **क्षामिमानि**ति- "क्षैं क्षये" इत्यतः "आत् सन्ध्यक्षरस्य" [४. २. १.] इति कृताकाराद् "गत्यर्थाकर्मक०" [५. १. ११.] इति कर्तरि विहितस्य क्तस्य "क्षै-शुषि-पचो म-क-वम्" [४. २. ७८.] इति मकारे- क्षाम[:,त]स्यापत्यम् "अत इञ्" [६. १. ३१.] इतीञि- क्षामिः, सोऽस्यास्तीति मतौ- क्षामिमान, यद्वा क्षामोऽस्यास्तीति क्षामी, "एकस्वरात् कृतो जातेः, सप्तम्यां च न तौ स्मृतौ" इत्यस्य प्रायिकत्वाद् "अतोऽनेकस्वरात्" [७. २. ६.] इतीनि- क्षामिणोऽत्र सन्तीति भिन्नवृत्तित्वादसरूपत्वाद् वा तदन्तादपि मत्वर्थीयो न विरुध्यत इति "तदस्यास्त्यस्मिन्निति" [७. २. १.] इति मतौ-क्षामिमान्, अत्र च क्तादेशस्य मकारस्यासत्त्वाद् "मावर्णान्तोपान्त०" [२. १. ९४.] इति मतोर्मकारस्य वकारो न भवतीत्याह- **अत्रे**त्यादि। **शुष्कके**ति- शुष्यति स्मेति शुषेरकर्मकलक्षणः कर्तरि क्तः "क्षै-शुषि०" [४. २. ७८.] इति क्ततकारस्य ककारः, ततः "आत्" [२. ४. १८.] इत्याप्- शुष्का, अज्ञातादिविवक्षायां कपि "ङ्यादीदूतः के" [२. ४. १०४.] इति ह्रस्वत्वे पुनः ककारस्यासत्त्वात् "स्वज्ञाज०" [२. ४. १०८.] इत्यादिना विकल्पस्याभावाद् "अस्यायत्तत्क्षिपकादीनाम्" [२. ४. १११.] इति नित्यमित्त्वम्। **पक्कमि**ति- पच्यते स्मेति क्तप्रत्यये "क्षै-शुषि०" [४. २. ७८.] इति परत्वात् तकारस्य वकारे तस्यासत्त्वात् "च-जः क-गम्" [२. १. ८६.] इति धुटि कत्वमिति। एवं बोधनं पूर्वं दहनं पूर्वमिति बुधेर्दहेश्च "प्राक्काले" [५. ४. ४७.] इति क्त्वाप्रत्यये "भ्वादेर्दादेर्घः" [२. १. ८३.] इति हस्य घत्वे "अधश्चतुर्थाद्०" [२. १. ७९.] इति तकारस्य धकारे तस्यासिद्धत्वाद् "ग-ड-द-बादेः०" [२. १. ७७.] इत्यादिना आदिचतुर्थाभावे "तृतीयस्तृतीय-चतुर्थे" [१. ३. ४९.] इति तृतीयत्वे- **बुद्ध्वा, दग्ध्वा। स्यादिविधौ चे**ति- लूनी-पूनीशब्दौ पूर्ववत्, ततो ङसि-ङसोः क्तादेशस्य नत्वस्यासत्त्वात् त्याश्रिते "खि-ति-खी-तीय०" [१. ४. ३६.] इत्युरि कृते - **लून्युः, पून्यु**रिति। वृश्चतेः कर्म-कत्रोः क्तक्तवतू, "सस्य श-षौ" [१. ३. ६१.] इति सस्य शत्वे ओदित्त्वात् क्ततकारस्य नकारे 'अषि' इति वचनात् तस्यासत्त्वाभावाद् "यज-सृज०" [२. १. ८७.] इति धुड्निमित्तस्य षकारस्याभावे कत्वस्य भावे च "संयोगस्यादौ०" [२. १. ८८.] इति **संयो**गादिलोपे "रषृवर्णाद्०" [२. ३. ६१.] इति णत्वे- **वृक्णः, वृक्णवानि**ति। **लग्नः, मग्न** इति- "ओलस्जैत् व्रीडे" "टुमस्जोंत् शुद्धौ" आभ्यां क्तः, तस्य "सूयत्याद्योदितः" [४. २. ७०.] इति तकारस्य नकारः, संयोगादिलोपः, "च-जः क-गम्" [२. १. ८६.] इति नत्वस्यासत्त्वाद् गकारः, अत्र 'परे स्यादिविधौ च' इति वचनाद् "अघोषे प्रथमोऽशिटः" [१. ३. ५०] इति पूर्वसूत्रकार्ये नत्वस्यासत्त्वाभाव इति। **पक्वमि**ति- "ण-षमसत् परे०" [२. १. ६०.] इत्यत्र णत्वस्य निर्दिष्टत्वादेतत्सूत्रापेक्षया पूर्वत्वमित्यर्थः। क्षीव इतीड्विधावसत्त्वेऽपि "अनुपसर्गाः क्षीव०" [४. २. ८०] इति निपातनादिडभावः, ततः क्षीवेण चरति "नौ-द्विस्वरादिक०" [६. ४. १०.] इति द्विस्वरलक्षण इकः सिद्धः, यदि च इटमानीय निपातनादिट्छब्दलोपो विधीयेत तदा तस्यासिद्धत्वात् त्रिस्वरवाद् द्विस्वरलक्षण इको न स्यादित्यर्थः ॥छ॥२.१.६१.॥

---

**न्या० स०—क्तादेशोऽषि ।** ककारेण उपलक्षितस्तः क्त इति व्युत्पत्तिकरणात् क्त-क्तवतु-क्ति-क्त्वानां ग्रहणं सिद्धं, ककारोपलक्षितस्य तकारस्य सर्वेष्वेषु विद्यमानत्वात्। **परे कार्ये इति**- परत्वमेतत्सूत्रापेक्षं विज्ञायते, न क्तादेशविधायकसूत्रापेक्षम्, अषीति प्रतिषेधात्, एतत्सूत्रापेक्षे हि परत्वे "यज-सृज०" [२. १. ८७.] इति षत्वमपि परम्, तस्मिन्नप्यसत्त्वे प्राप्तेऽषीति प्रतिषेधो युज्यते। **क्षामिमानि**ति- क्षामस्यापत्यम् "अत इञ्" [६. १. ३१.] [इतीञ्] ततो मतुः, यद्वा क्षामोऽस्यास्ति इन्, ततः क्षाम्यत्राऽस्ति मतुः । **लून्युः, पून्यु**रिति- लूनं पूनं चेच्छति क्यन्

"क्यनि" [४. ३. ११२.] इति ईकारः, ततो ङस्; यदापि लवनं-लूनिः, तामिच्छति या स्त्री क्यन् लूनीयतीत्यादिप्रक्रिया क्रियते, तदापि ग्रामणीशब्दवद् विशेषेण नित्यस्त्रीत्वाभावाद् "योऽनेकस्वरस्य" [२. १. ५६.] इति यत्वे लून्युः, पून्युरित्येव भवति; यदा तु लूनिमिच्छति यः पुमान् इत्यादि क्रियते, तदा यो लूनिशब्दः स्त्रीलिङ्गः स ईदन्तो न भवति, यस्तु क्यन्नन्तः स ईदन्तः स न स्त्रीलिङ्ग इति "स्त्रीदूतः" [१. ४. २९.] इत्यस्य प्राप्तिरेव नास्तीति यत्वे- लून्युः, पून्युरित्येव; यदा तु क्त्यन्तादेव ङस् तदा स्त्रिया ङितां वा [१. ४. २८.] इति दासि तत्पक्षे तु "ङित्यदिति" [१. ४. २३.] इत्येत्वे लून्या लूनेरिति रूपद्वयम्। ननु अषीति किमर्थं? यतः षत्वरूपे परे कार्ये कर्त्तव्ये क्तादेशस्याऽसत्त्वं प्राप्तमनेन निषिध्यते, तच्च 'परे कार्ये' इति भणनान्न प्राप्नोति, णत्व-षत्वयोः पूर्वसूत्रे ग्रहणादिति, सत्यम्- अत एव प्रतिषेधात् पूर्वत्र णत्वसहचरितं सप्तमपादनिर्दिष्टं षत्वं गृह्यते, तेन अद्राक्षीदित्यादि सिद्धम्, अन्यथा यदि पूर्वसूत्रे सामान्येन षत्वमङ्गीक्रियते तदाऽत्र "ष-ढोः कस्सि" [२. १. ६२.] इति परे कार्ये कर्त्तव्ये परत्वस्याऽसत्त्वाद् कत्वं न स्यादिति। मग्न इति- "मस्जेः सः" [४. ४. ११०.] इति सस्य नः, "नो व्यञ्जन०" [४. २. ४५] इति लुप् ॥ २. १. ६१.॥

## ष-ढोः कः सि। २। १। ६२॥

**त० प्र०—षकार-ढकारयोः स्थाने सकारे परे ककार आदेशो भवति।** पिष्-पेक्ष्यति, पिपिक्षति; दृश्-अद्राक्षीत्; सृज्- अस्राक्षीत्; यज्- अयाक्षीत्। ढ- लिह्- लेक्ष्यति, लिलिक्षति; वह्- वक्ष्यति; गुहौ- निघोक्ष्यति। सीति किम्? पिनष्टि। 'असत् परे' इत्यधिकाराद् निघोक्ष्यतीत्यत्र ढस्थानस्य ककारस्यासत्त्वाच्चतुर्थान्तलक्षण आदेशश्चतुर्थो भवति ॥ ६२ ॥

**श० न्या०—ष-ढोः०।** ष-ढोरिति स्थाननिर्देशार्थं षष्ठीद्विवचनमित्याह- **षकार-ढकारयोः स्थाने** इति। "पिष्लृंप् संचूर्णने" [इत्यतो] भविष्यन्त्याः स्यतौ "एकस्वराद्०" [४. ४. ५६.] इतीट्प्रतिषेधे "लघोरुपान्त्यस्य" [इति गुणेऽनेन षस्य कत्वे "नाम्यन्तस्थाकवर्गाद्०" [२. ३. १५.] इति सस्य षत्वे- **पेक्ष्यति। पिपिक्षतीति**- पिषेः सन्, द्विर्वचनादि। "दृशूं प्रेक्षणे" [अतः] अद्यतन्या दौ "सिजद्यतन्याम्" [३. ४. ५३.] इति सिचि "सः सिजस्तेः०" [४. ३. ६५.] इतीति परत्वाद् वृद्धेः प्रागेव "अः सृजि-दृशः०" [४. ४. १११.] इत्यकारागमे "व्यञ्जनानाम्०" [४. ३. ४५.] इत्यकारस्य वृद्धौ "यज-सृज०" [२. १. ८७.] इति शस्य षत्वे तस्यानेन कत्वे "नाम्यन्तस्था०" [२. ३. १५.] इति सस्य षत्वे- **अद्राक्षीत्**; एवं "सृजंत् विसर्गे" **अस्राक्षीत्**; "यजीं देवपूजादौ" **अयाक्षीत्**। "लिहींक् आस्वादने" [अतः] स्यतौ उपान्त्यगुणे "हो धुट्-पदान्ते" [२. १. ८२.] इति हस्य ढत्वेऽनेन कत्वे सकारस्य षत्वे- **लेक्ष्यति**। लिहेः सनि "उपान्त्ये" [४. ३. ३४.] इति सनः कित्वाद् गुणाभावे द्विर्वचनादौ- **लिलिक्षति**। "वहीं प्रापणे" **वक्ष्यति**। सिलुबन्तान्नि-शब्दात् परस्य "गुहौक् संवरणे" इत्यस्य स्यतौ गुणे "हो धुट्-पदान्ते" [२. १. ८२.] इति ढत्वे नित्यस्यापि कादेशस्य परेऽसत्त्वाद् "ग-ड-द-बादेः०" [२. १. ७७.] इत्यादेश्चतुर्थत्वे ततोऽनेन कत्वे- **निघोक्ष्यती**त्याह- **'असत् पर' इत्यधिकारादि**त्यादि- 'श्लेष्मणः स्थाने कटुकमौषधं प्रयुञ्जीत' इतिवत् स्थानशब्दस्य निवृत्तिवचनत्वात् ककारो विधेयतयाऽस्त्यस्मिन्नित्यभ्राद्यकारे ककारशब्देन तच्छास्त्रस्याभिधानात् ढनिवर्तकस्य ककारशास्त्रस्यासत्त्वादित्यर्थः। कश्चिच्छासेरपि सौ विकल्पेन ककारमिच्छति- साक्षि, सास्सि ॥छ॥ २. १. ६२. ॥

**न्या० स०—ष-ढोः कस्सि। निघोक्ष्यति** स्यतिप्रत्यये गुणे "हो धुट्-पदान्ते" [२. १. ८२.] इति ढत्वे नित्यस्यापि कादेशस्य परेऽसत्त्वात् "ग-ड-द-बादेः०" [२. १. ७७.] इत्यादेश्चतुर्थत्वे ततोऽनेन कत्वं सिद्धम्। कश्चिच्छासेरपि सौ विकल्पेन ककारमिच्छति, तन्मते-शाक्षि, शास्सि ॥ २. १. ६२.॥

## भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने। २। १। ६३॥

**त० प्र०—भ्वादेर्धातोरवयवभूतौ यौ रेफ-वकारौ तयोः परयोस्तस्यैव भ्वादेर्नामिनो दीर्घो भवति, व्यञ्जने- ताभ्यां चेत् परं व्यञ्जनं भवति।** हूर्च्छा, हूर्च्छिता, मूर्च्छा, मूर्च्छिता, आस्तीर्णम्, प्रस्तीर्णम्, पूर्त्तम्, अवगूर्णम्, कूर्दते, ऊर्दिषते, चिकीर्षति, तुतूर्षति, बुभूर्षति, दीव्यति, सीव्यति, दीव्यात्, सीव्यात्। असद्विधौ स्वरादेशस्य लोपस्य स्थानिवद्भावप्रतिषेधात्-प्रतिदीव्ना, प्रतिदीव्ने। भ्वादेरिति किम्? चतुर्भिः, चतुर्थः, कुर्कुरमिच्छति- कुर्कुरीयति, एवं- चतुर्यति, दिव्यति। नामिन इति किम्? स्मर्यते, भव्यम्। वोरिति किम्? बुध्यते। व्यञ्जन इति किम्? विकिरति। र्वोर्भ्वादिसंबन्धिविशेषणं किम्? दीव्यतेः क्वनिपि वकारलोपे- दिवन्, दिव्ना, दिव्ने। नामिनो भ्वादिसंबन्धिविशेषणं किम्?

दधिव्रज्या । प्रत्यासत्त्या तस्यैवेति विशेषणं किम् ? ग्रामणिव्रज्या ॥ ६३ ॥

---

**श० न्या०—भ्वादे०** । **भ्वादेरि**त्यवयवसम्बद्धं षष्ठ्यन्तमेकमप्येकशेषेण तन्त्रेणावृत्त्या वा " सर्वादिः० " [ १. ४. ७. ] इतिवद् द्विधा भेदाद् ' नामिनः ' इत्यनेन ' र्वोः ' इत्यनेन च विशेष्यद्वयेन प्राधान्यात् सम्बन्धमनुभवतीत्याह– **भ्वादेधातोरवयवभूतौ यौ रेफ-वकारौ, भ्वादेर्नामिन** इति– यदि त्वेकशेषादिना द्विधा भेदो नाङ्गीक्रियेत तदैकस्यैकसम्बन्धिनैवाकाङ्क्षायाः पूर्णत्वात् सत्यामपि योग्यतायामनाकाङ्क्षतः सम्बन्धेऽतिप्रसङ्गाभेतरेण सम्बन्धः स्यात्, नहि भवति देवदत्तस्य पाणी पादाविति, पाणि-पादस्य परस्परं विशेषण-विशेष्यतया विरुद्धप्रतीतिजनकत्वात् । न चैवमन्यस्य भ्वादेर्नामी, अन्यस्य च रेफ-वकाराविति वाच्यम्, एकशेषादिना एकत्वेन निर्देशस्यैकस्यैव द्वयसम्बन्धार्थत्वाद्, इत्युक्तं–**तस्यैवे**ति– यस्यैव भ्वादे रेफ-वकारौ तस्यैव नामीत्यर्थः । ' भ्वादेः ' इति विशेषितेन ' र्वोः ' इति सप्तम्यन्तेन ' व्यञ्जने ' इति व्यधिकरणतया विशेष्यत इत्याह– **ताभ्यां चेत् परं व्यञ्जनमि**ति । व्यञ्जनस्य ' भ्वादेः ' इत्यनेन सम्बन्धाभावात् तस्य प्रत्ययस्य च व्यञ्जने सामान्येनोदाहरति– **हूर्च्छे**त्यादि– " हुर्छा कौटिल्ये ", " मूर्छा मोह-समुच्छ्राययोः " आभ्यां भिदादित्वादङि आपि, अन्यत्र तृचि इटि, अनेन दीर्घत्वे " हादेर्हस्वरस्य० " [१. ३. ३१.] इति द्वित्वं, ततः " अघोषे प्रथमोऽशिटः " [ १. ३. ५०. ] इति प्रथमश्चकारः। आङ्पूर्वात् प्रपूर्वाच्च स्तृणातेः क्ते " ॠतां क्ङितीर् " [ ४. ४. ११६. ] इतीरादेशे " रदादमूर्च्छमदः० " [ ४. २. ६९. ] इति क्तकारस्य नत्वेऽनेन दीर्घत्वे [ " रषृवर्णाद्० " [ २. ३. ६३. ] इति णत्वे च– **आस्तीर्णम्, प्रस्तीर्णमि**ति । " पॄश् पालन-पूरणयोः " इत्यतः क्ते " ओष्ठ्यादुर् " [ ४. ४. ११७. ] इत्युरादेशेऽनेन दीर्घत्वे ] द्वित्वे च– **पूर्त्तम्** । अवपूर्वाद् "गुरैति उद्यमे" इत्यतः क्ते [ ऽनेन दीर्घत्वे च– ]**अवगूर्णम्** । "कुर्दि क्रीडायाम्" इत्यतो वर्तमानायास्तेप्रत्यये शवि दीर्घत्वे– **कूर्दते** । "उर्दि मान-क्रीडयोश्च" अतः सन् इट् "अयि रः" [४. १. ६४.] इति रेफस्याद्विरुक्तेः "सन्यङश्च" [ ४. १. ३. ] इति ' दि ' इति द्विर्वचनेऽनेन धातोरुकारस्य रेफे दीर्घत्वे– **ऊर्दिदिषते** । करोतेर्वृणोतेश्च "स्वर-हन्-गमोः०" [ ४. १. १०४. ] इति सनि दीर्घत्वे इरादेशे उरादेशे च ततो द्विर्वचनादौ– **चिकीर्षति, वुवूर्षति** । "दिवूच् क्रीडादौ" " षिवूच् उतौ " आभ्यां वर्तमानयोस्तिवि श्येऽनेन दीर्घत्वे– **दीव्यति, सीव्यति**; एवमाशिषः क्याति– **दीव्यात्, सीव्यात्** । ननु प्रतिपूर्वाद् दिवेः " ल्वू-पू-यु० " [ उणा० ९०१. ] इति क्त्वनि तृतीयैकवचने चतुर्थ्येकवचने च " अनोऽस्य " [ २. १. १०८. ] इत्यकारलोपे तस्य " स्वरस्य परे प्राग्विधौ " [ ७. ४. ११०. ] इति स्थानिवद्भावे व्यञ्जनाभावात् '**प्रतिदीव्ना, प्रतीदीव्ने** ' इति कथं दीर्घत्वमित्याह– **असद्विधा**वित्यादि– " न सन्धि-ङी० " [ ७. ४. १११. ] इत्यनेनेति शेषः । **चतुर्भिरि**ति– चतुर् भिस् । **चतुर्थ** इति– चतुर्णां पूरण इति " चतुरः " [ ७. १. १६३. ] इति थट्प्रत्यये । करोतेः " श्वसुर-कुकुन्दुर० " [ उणा० ४२६. ] इति निपातनात् कुर्कुरः, तमिच्छति क्यनि ईत्वे तिवादौ– **कुर्कुरीयति**; एवं चतुर इच्छति क्यनि–**चतुर्यति**, [दिवमिच्छति] **दिव्यति**; एतेषु भ्वादिग्रहणाद् भ्वादिपठितस्यैव धातोरवयवयो रेफ-वकारयोर्धातोरेव नामिनो दीर्घो भवतीति विज्ञाना न्नामधातोर्न भवति । " स्मृं चिन्तायाम् " अतस्तेप्रत्यये " क्यः शिति " [ ३. ४. ७०. ] इति क्ये " क्ययङाशीर्ये " [ ४. ३. १०. ] इति गुणे– **स्मर्यते** । अस्तेः " अस्ति-ब्रुवोर्भू-वचावशिति " [ ४. ४. १. ] इति भ्वादेशे " य एचातः " [ ५. १. २८. ] इति ये " य्यक्ये " [ १. २. २५. ] इत्यवादेशे– **भव्यम्** । " बुधिच् ज्ञाने " अतो वर्तमानायास्तेप्रत्यये " दिवादेः श्यः " [ ३. ४. ७२. ] इति श्ये– **बुध्यते** । विपूर्वात् " कॄत् विक्षेपे " इत्यतस्तिवि " तुदादेः शः " [ ३. ४. ८१. ] इति शे इरादेशे च– **विकिरति** । **र्वोर्भ्वादी**ति– आवृत्त्योभयनिर्देशादित्यर्थः । दिवेः " मन् वन्० " [ ५. १. १४७. ] इति क्वनिपि " य्वोः प्वय्व्यञ्जने " [ ४. ४. १२१. ] इति वलोपे प्रत्ययवकारत्वाद् दीर्घत्वाभावेन ' **दिव्ना, दिव्ने** ' इति– तत्र क्वचिद्ग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् क्वचिदयं स्वरूपेण न भवति, क्वचित् पिन्न भवतीति तागमाभावः । **नामिनो भ्वादी**ति– पूर्वोक्त एव हेतुः । व्रजेर्भावे " आस्यटि-व्रज्-यजः० " [५. ३. ९७.] इति क्यपि आपि [ व्रज्या, ] " दधि धारणे " [ अतः ] "०मण्यादिभ्यः " [ उणा० ६०७. ] इति इप्रत्यये [ दधि], दध्नो व्रज्या **दधिव्रज्या**, अत्र धातोरिकाराभावाद् दीर्घत्वाभावः । यद्येवं ग्रामं नयतीति क्विपि "ग्रामाग्राद्०" [ २. ३. ७१. ] इति णत्वे " वेदूतोऽनव्यय० " [ २. ४. ९८. ] इति ह्रस्वत्वे ग्रामणिनो व्रज्या **ग्रामणिव्रज्या** इत्यत्र धात्विकारसम्भवाद् दीर्घत्वप्रसङ्गः, उच्यते– भ्वादेर्भ्वादेरित्यनुक्त्वा आवृत्त्यैकत्वेनोपादनस्यैतदेव प्रयोजनं– यदेकस्यैव धातोर्द्वयं भवति, अत्र तु भेदाद् दीर्घत्वाभावः, एतदेवाह– **प्रत्यासत्त्ये**ति– अत्रैकेन प्रयत्नेन द्वयोरुपादानं प्रत्यासत्तिः, शब्दान्तरं प्रतीत्य शब्दान्तरस्यासत्तिरिति व्युत्पत्तेः, इयमेव हि शब्दस्य शब्दा-

न्तरेण प्रत्यासत्तिः- यदेकप्रयत्नेनोच्चारणं नाम, एकवाक्योपात्त-[त्व]लक्षणप्रत्यासत्तिर्नेहोपयुज्यते, यथा 'वृक्षात् पत्रं पतति' इत्युक्ते कङ्क-कुररादिसम्बन्धव्यवच्छेदार्थं पत्रस्यैतद्वाक्यस्थेनात्र वृक्षशब्देनाकाङ्क्षा पूर्यते, वृक्षस्य पत्रं न तु कङ्क-कुररादेः, सम्बन्धिशब्दप्रायत्वेन साक्षाल्लग्नत्वात् पत्रस्य; अत्र तु र्वोरिति निमित्तमात्रेणैव चरितार्थत्वादाकाङ्क्षाया अभावाद् भ्वादेरिति नापेक्षते, भ्वादेरिति तु द्वितीयं सम्बन्धिपदमनुपपद्यमानसम्बन्धं र्वोरित्यपेक्षत इति विपर्ययात् तन्न्यायाभावः; * कंसपात्री * न्यायोऽपि नेहोपतिष्ठते, तत्र हि एका कंसपात्री आवर्तमानाऽनेकस्मिन्नसद्भोजिन्युपयुज्यते, तथा शब्दोऽप्यावृत्त्येति ॥छ॥ २.१.६३.॥

**न्या० स०—भ्वादेर्नामिनो०।** "रदादमूर्छ०" [४.२.६९.] इति सूत्रे 'मूर्छ' इति निर्देशात् * प्रत्ययाप्रत्यययोः * इति नाश्रीयते। **भ्वादेरिति** आवृत्त्या नामिन इत्यनेन र्वोरित्यनेन च सम्बध्यते। **हूर्च्छेति**- अत्राऽन्। **मूर्च्छेति**- अत्र भिदाद्यङ्। **बुभूर्षति** "इवृध०" [४.४.४७.] इति वेट्। **दीव्यात्** अत्राशीःक्यात्, सप्तम्यां तु- दीव्येत्, सीव्येत्। **असद्विधाविति**- अथात्र दीर्घद्वारेणैव स्थानिवद्भावप्रतिषेधो भविष्यति, किमनेन सूत्रेणाऽसदधिकारविहितेन? नैवम्- 'ओर्मा, मोर्मा' इत्यत्र सार्थकत्वात्, तथाहि- ऊर्वतीति मूर्च्छतीति मनि "राल्लुक्" [४.१.११०.] इति वकार-छकारयोर्लोपे एतत्सूत्रविहितदीर्घस्यासद्विधित्वेनासत्त्वे "लघोरुपान्त्यस्य" [४.३.४.] इति गुणो भवति, अन्यथा लघ्वभावात् स न स्यात्। **दिव्ना, दिव्ने,** इतो- य-ल-वानां सानुनासिक-निरनुनासिकत्वेऽप्यत्र निरनुनासिकत्वं विवक्षितमिति "अनुनासिके च०" [४.१.१०८.] इत्यूट् न भवति। "मन् वन् क्वनिप्०" [५.१.१४७.] इति क्वनिप्विधायके सूत्रे क्वचिद्ग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् क्वचिदयं स्वरूपेण न भवति, क्वचित् पानुबन्धो न भवतीति तागमाभावः। **प्रत्यासत्त्येति**- अत्रैकेन प्रयत्नेन द्वयोरुपादानं प्रत्यासत्तिः, शब्दान्तरं प्रतीत्य शब्दान्तरस्यासत्तिरिति व्युत्पत्तेः, इयमेव हि शब्दस्य शब्दान्तरेण प्रत्यासत्तिः- यदेकप्रयत्नेनोच्चारणं नाम, एकवाक्योपात्तलक्षणप्रत्यासत्तिर्नेहोपयुज्यते ॥ २.१.६३.॥

## पदान्ते । २ । १ । ६४ ॥

**त० प्र०—पदान्ते वर्तमानयोर्भ्वादिसंबन्धिनो रेफ-वकारयोः परयोस्तस्यैव भ्वादेर्नामिनो दीर्घो भवति। गीः, गीर्भ्याम्, गीर्षु, गीस्तरा, गीरर्थः; धूः, धूर्मान्; आशीः, आशीर्भिः; सजूः, सजूःषु; पिपठीः, पिपठीर्भ्यः। पदान्त इति किम्? गिरौ, गिरः; लुवौ, लुवः। नामिन इत्येव- अजागः। र्वोरित्येव- मधुलिट्। भ्वादेरित्येव- अग्निः, वायुः, चतुर्भिः ॥६४॥**

**श० न्या०—पदान्ते।** गिरतेः क्विपि "ऋतां क्ङितीर्" [४.४.११६.] इतीरादेशे सौ तल्लुकि दीर्घत्वे- **गीः।** "नाम सिदय्व्यञ्जने" [१.१.२१.] इति पदत्वे उदाहरति- **गीर्भ्याम्,** "अरोः सुपि रः" [१.३.५७.] इति रेफस्य रत्वे च- **गीर्षु,** प्रकृष्टा गीरिति "द्वयोर्विभज्ये च०" [७.३.६.] इति तरपि आपि च रेफस्य सत्वे- **गीस्तरा।** अन्तर्वर्तिविभक्त्यपेक्षया पदत्वे बहुव्रीहौ तत्पुरुषे वा **गीरर्थः।** धुर्वेः क्विपि "राल्लुक्" [४.१.११०.] इति वलोपे सौ पदत्वे दीर्घत्वे च- **धूः।** धूर्विद्यतेऽस्येति "तदस्यास्त्यस्मिन्निति०" [७.२.१.] इति मतौ- **धूर्मान्।** "आङः शासूङि इच्छायाम्" अतः सम्पदादित्वात् क्विपि इसादेशे सौ तल्लुकि- **[आशीः].** "सजुषः" [२.१.७३.] रुत्वे दीर्घत्वे- **सजूः।** जागर्तेर्ह्यस्तन्या दिवि गुणे "व्यञ्जनाद्देः०" [४.३.७८.] इति दिवो लुकि "अड् धातोः०" [४.४.२९.] इत्यडागमे- **अजागः।** **[अग्निरिति-]** अग्निशब्दात् सौ रुत्वे भ्वादिसम्बन्धिनो रेफस्याभावान्न भवति। ननु यथात्र भ्वादिसम्बन्धी रेफो न भवति तथा नाम्यपि नास्तीति कथमुच्यते- रेफाभावाद् दीर्घत्वाभाव इति, उच्यते- भ्वाद्यनुवर्तनाभावे एकशब्दोपात्तं नामिविशेषणार्थमपि भ्वादिग्रहणं नास्तीत्यस्ति प्राप्तिः ॥छ॥ २.१.६४.॥

**न्या० स०—पदान्ते।** **पिपठीरिति**- ननु 'भ्वादेः संबन्धिनो नामिनो दीर्घः' इत्युक्तम्, तत् कथमत्र 'पिपठिष्' इत्यस्याऽभ्वादिरूपस्य संबन्धिनो नामिनो दीर्घ इति? सत्यम्- भ्वाद्यवयवेन 'पठ्' इत्यनेन योगात् समुदायोऽपि 'पिपठिष्' इत्येवंरूपो भ्वादिः; यद्येवं पूर्वसूत्रोदाहृतेषु 'चतुर्भिः, चतुर्थः' इत्यादिष्वप्यनेन प्रकारेण भ्वादिसंबन्धित्वमस्त्येव तत् कथं न दीर्घः? सत्यम्- धातुत्वे सति भ्वाद्यभ्वादिचिन्ता क्रियते, अत्र तु धातुत्वस्याप्यभावः, तर्हि 'कुर्कुरीयति, चतुर्यति, दिव्यति' इत्यादिषु धातुत्वमस्ति ततोऽनेन प्रकारेण भ्वादित्वमप्यस्ति ततो दीर्घः स्यात्, सत्यम्- यद्यप्येषां प्रत्ययान्तानां धातुत्वमस्ति तथापि पिपठीरित्यादिवदेतेषु न भ्वाद्यवयवात् प्रत्ययो विधीयते, किं तर्हि? नाम्न एव, ततो भ्वाद्यवयवयोगाभावात् 'कुर्करीय' इत्यादेः समुदायस्य न भ्वादित्वम्। **आशीरिति**- अत्र नित्यमपि विसर्गं बाधित्वा * नित्यादन्तरङ्गम् * इति न्यायात् प्रथममनेन दीर्घः, ततो विसर्गः ॥ २.१.६४.॥

## न यि तद्धिते । २ । १ । ६५ ॥

**त० प्र०—यकारादौ तद्धिते परे यौ र्वौ तयोः परयोर्नामिनो दीर्घो न भवति। धुरं वहति- धुर्यः, गिरि साधुः- गिर्यः; वकारान्तो धातुर्नाम्युपान्त्यस्तद्धिते न संभवति। यीति**

**किम्? गीर्वत्, धूर्वत्। तद्धित इति किम्? गिरमिच्छति– गीर्यति, धूर्यति; गीरिवाचरति– गीर्यते, एवं– धूर्यते; क्ये– कीर्यते, गीर्यते; दीव्यति, सीव्यति; कीर्यात्, गीर्यात्, दीव्यात्, सीव्यात्। केचित् तु क्यन्-क्यङोरपि प्रतिषेधमिच्छन्ति, तन्मते– 'गिर्यति, गिर्यते; धुर्यति, धुर्यते,' इत्येव भवति। इह कस्मान्न भवति?– पुर्याम्, गिर्योः, किर्योः, बहिरङ्गलक्षणस्य यत्वस्यासिद्धत्वेन व्यञ्जनस्याभावात्॥ ६५॥**

**श० न्या०—न यि०।** "धुरो यैयण्०" [७. १. ३.] इति ये– **धुर्यः**। "तत्र साधौ" [७. १. १५.] इति ये– **गिर्यः**। यथा यकारे [रकारे] उदाहृतं तथा वकारेऽपि किमिति नोदाह्रियते? अत आह– **वकारान्त** इत्यादि– अयमभिप्रायः– दिवि भवं दिव्यमित्यत्र वकारस्यौणादिकत्वाद् धातुत्वाभावात् सम्भवेऽपि दीर्घत्वाभावः, धातोश्च क्विबादावप्रयोगिणि वकारस्य "अनुनासिके च०" [४. १. १०८.] इत्यूटा भाव्यमिति वकारान्तत्वाभावः। गीरिव "स्यादेरिवे" [७. १. ५२.] इति वति "नाम सिदय्व्यञ्जने" [१. १. २१.] पदान्तत्वे यकाराभावात् प्रतिषेधाभावे "पदान्ते" [२. १. ६४.] इति दीर्घत्वे– **गीर्वत्**। "अमाव्ययात्०" [३. ४. २३.] इति क्यनि– **गीर्यति**। "क्यङ्" [३. ४. २६.] इति क्यङि– **गीर्यते**। "कॄत् विक्षेपे" "गॄत् निगरणे" अनयोः "ऋतां क्ङितीर्" [४. ४. ११६.] इतीरादेशे– **कीर्यते, गीर्यते**। "दिवूच् क्रीडादौ", "षिवूच् उतौ" अनयोः श्ये– **दीव्यति, सीव्यति**। आशीःक्याति–**कीर्यादि**त्यादि। "पृश् पालन-पूरणयोः", "गॄत् निगरणे", "कॄत् विक्षेपे" इत्येभ्यो नाम्युपान्त्य-कॄ-गॄ-शॄ-पॄ-पूङ्भ्यः कित्" [उणा० ६०९.] इति किति इप्रत्यये पुरिशब्दात् "स्त्रिया ङितां वा०" [१. ४. २८.] इति ङेर्दामादेशे, किरि-गिरिभ्यामोसि, यत्वे च व्यञ्जनस्य सद्भावाद् दीर्घत्वं कस्मान्न भवति? उच्यते–प्रकृतिमात्राश्रितत्वेनान्तरङ्गे दीर्घत्वे [कर्तव्ये] प्रत्ययाश्रितत्वेन यत्वस्य बहिरङ्गत्वेनासिद्धत्वान्न भवतीत्याह– **इह कस्मादि**त्यादि। अथवाऽव्युत्पन्नत्वादुणादीनां भ्वादिसम्बन्धित्वाभावाद् दीर्घत्वाभावः, [एवं] यदि तर्हि *उणादयोऽव्युत्पन्नानि नामानि* इति 'प्रतिदीव्ना' इत्यत्रापि दीर्घत्वं न सिध्यति तस्याप्यौणादिकत्वादिति; अथ व्युत्पाद्यते, न वाच्यं तर्हि– *उणादयोऽव्युत्पन्नानि* इति, नह्येकत्र सूत्रे व्युत्पत्तिपक्षोऽव्युत्पत्तिपक्षश्चोभयमाश्रयितुं युक्तम्; योऽपि "मन् वन् क्वनिप् विच् क्वचित्" [५. १.१४७.] इति क्वनिप्प्रत्ययान्तं प्रतिदिवन्शब्दं व्युत्पादयति तस्यापि दीर्घत्वं न सिध्यति, "य्वोः प्वय्व्यञ्जने" [४. ४. १२१.] इति वलोपे भ्वादेर्वकारान्तत्वाभावादिति; अत्र स्थविरः– कर्तव्योऽत्र यत्नः, एष क्रियते– "हलि च" [ ]इत्यत्र 'व्यक्तिः पदार्थः' इत्येतद् दर्शनमाश्रीयते, अस्मिन् दर्शने प्रतिलक्ष्यं लक्षणभेदो भवतीति यावन्ति लक्ष्याणि तावन्त्येव लक्षणानि भवन्ति, तत्र भिन्नेषु लक्षणेषु लक्ष्यानुरोधात् क्वचित् 'प्रतिदीव्ना' इत्यादौ व्युत्पत्तिपक्ष आश्रीयते, क्वचित् पुनः "जॄषो रश्च वः" [उणा० ६१४.] इति किति रौ 'जिव्रिः, किर्योः, गिर्योः' इत्यादावव्युत्पत्तिपक्ष इति सर्वं सुस्थमिति। नन्विदमपि बहिरङ्गत्वेनासिद्धत्वाद्वलोपस्य नैवात्र व्यञ्जने परतो वकारान्तता धातोरुपपद्यत, इति, नैष दोषः– अनित्यत्वादस्याः परिभाषाया इति ॥ छ॥ २. १. ६५.॥

**न्या० स०—न यि त०। नाम्युपान्त्य** इति– अयमर्थः– यदा 'दिव्' इत्यादेः क्विप् तदा ऊटा भाव्यमिति न वकारान्तत्वम्, यदा तु विच् तदा गुणे कृते एकारस्य दीर्घरूपस्य दीर्घकरणं व्यर्थम्; ननु दिव्यमित्यत्र संभवति वान्तो नाम्युपान्त्यश्च धातुः, सत्यम्–अत्रापि डिवप्रत्ययान्तस्य औणादिकत्वाद् दिवो न धातुत्वमिति न वान्तो नाम्युपान्त्यश्च धातुः संभवति। **पुर्यामिति**– पुरशब्दाज्जातित्वाद् ङ्यां "पृश् पालन-पूरणयोः" इत्यस्मात् "नाम्युपान्त्य-कॄ-गॄ-शॄ-पॄ-पूङ्भ्यः कित्" [उणा० ६०९.] इति किति इप्रत्यये वा; एवं **गिर्योः, किर्योरि**ति। **बहिरङ्गलक्षणस्येति**– प्रत्ययाश्रितत्वेन यत्वं बहिरङ्गं दीर्घत्वं तु प्रकृतिमात्राश्रितत्वेनान्तरङ्गम्॥ २. १. ६५.॥

## कुरु-च्छुरः। २। १। ६६॥

**त० प्र०—कुरु-च्छुरोः संबन्धिनो नामिनो रेफे परे दीर्घो न भवति। कुर्यात्, कुर्वः, कुर्मः; छुर्यात्, छुर्यते। कुर्वित्युकारः किम्? "कुरत् शब्दे"– कूर्यात्, कूर्यते; केचिदस्यापि प्रतिषेधमिच्छन्ति। अथ द्विर्वचने पूर्वस्य कस्माद् दीर्घो न भवति?– रीः रिर्वा– रिर्यतुः, रिर्युः; वीः– विव्यतुः, विव्युः; बहिरङ्गलक्षणस्य यत्वस्यासिद्धत्वेन व्यञ्जनस्याभावात्। 'संविव्याय, विव्याध' इत्यादौ तु नामिनोऽसिद्धत्वात्॥६६॥**

**श० न्या०—कुरु०।** कृगः सप्तम्या याति वसि मसि च "कृग्-तनादेरुः" [३. ४. ८३.] इत्युप्रत्यये "नामिनो गुणोऽक्ङिति" [४. ३. १.] इति गुणे "अतः शित्युत्" [४. २. ८९.] इत्युकारे "कृगो यि च" [४. २. ८८.] इत्युकारलोपेऽनेन दीर्घत्वप्रतिषेधे– **कुर्यादि**त्यादि। "छुरत् छेदने" अत आशीःक्याति "क्यः शिति" [३. ४. ७०.] इति क्ये च– **छुर्यात्, छुर्यते**। 'कुरु' इत्युकारनिर्देशात् "कुरत् शब्दे" इत्यस्य न भवति, अन्यथा प्रतिपदोक्तत्वादस्यैव ग्रहणं स्यादत आह– **कुर्वि**त्यादि। कृग इति तु नोच्यते,

चिकीर्षतीत्युप्रत्ययाभावेऽपि प्रतिषेधप्रसङ्गादिति । ननु " रीङ् गत्यादौ " " रिंत् गतौ " " वींक् प्रजनादौ " एभ्योऽतुसि उसि च द्वित्वे " योऽनेकस्वरस्य " [ २. १. ५६. ] इति यत्वे दीर्घत्वं कस्मान्न भवति ? उच्यते- प्रत्ययाश्रितत्वेन बहिरङ्गस्य यत्वस्य प्रकृतिमात्राश्रितत्वेनान्तरङ्गे दीर्घत्वेऽसिद्धत्वाद् व्यञ्जनाभावाद् दीर्घत्वाभावोऽत आह- **अथ द्विर्वचन** इत्यादि। " व्येंग् संवरणे ", " व्यधंच् ताडने " आभ्यां परोक्षाणवि " व्यस्थव्-णवि " [ ४. २. ३. ] इति प्रतिषेधादात्वाभावे " द्विर्धातुः० " [ ४. १. १. ] इति द्वित्वेऽनादिव्यञ्जनलोपे " ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः " [ ४. १. ७१. ] इति पूर्वस्येत्वे तस्य पूर्वापेक्षित्वाद् बहिरङ्गत्वेनासिद्धत्वान्नामिनोऽभावाद् दीर्घत्वाभावे " नामिनोऽकलि-हलेः " [ ४. ३. ५१. ] इति वृद्धावायादेश इत्याह- **संविव्याये**त्यादि । कुर्दादीनां 'स्फूर्जा' इति लिङ्गाद् दीर्घत्वं न भवतीति चन्द्रः, अत्र रत्नमितिः- " कुर्द खुर्द गुर्द क्रीडायाम् " इत्यादीनां रेफोपान्त्यानां दीर्घो नेष्यते, स कस्मात् ( सोऽकस्मात् ) प्रतिषेधमन्तरेण न स्यादित्याशङ्क्य ज्ञापकेन निवृत्तिमाह- कुर्दादीनामित्यादि- यदि रेफोपान्त्यानां न दीर्घो भवति ततश्च दीर्घाभावस्य ' स्फूर्जा ' इति लिङ्गमिति ॥ छ ॥ २. १. ६६. ॥

**न्या० स०—कुरु०** । **कुर्विंत्युकारः किमिति**- अन्यथा प्रतिपदोक्तत्वात् " कुरत् शब्दे " इत्यस्यैव ग्रहणं स्यात्; तर्हि " कुच्छुरः " इति निर्विवादं क्रियताम्, न च वाच्यं " कुच्छुरः " इति कृते " कुंगृट् हिंसायाम् " इत्यस्यापि ग्रहणं स्यात्, कृणोतीत्यादौ रेफाभावात् करिष्यतीत्यादौ तु नाम्यभवेन दीर्घत्वप्राप्तेरभावाच्चेति, उच्यते- एवंविधे सूत्रे कृते चिकीर्षतीत्यादौ दीर्घनिषेधः स्यात्। **संविव्याय, विव्याधेति**- " व्येंग् व्यधंच् " आभ्यां णवि " व्यस्थव्-णवि " [ ४. २. ३. ] इत्यात्वप्रतिषेधे द्वित्वे अनादिव्यञ्जनलोपे " ह्रस्वः " [ ४. १. ३९. ] इत्यनेन ह्रस्वत्वे तस्य च कार्यान्तरबाधनार्थं " ज्या-व्ये-व्यधि० " [ ४. १. ७१. ] इति इकारस्यापीत्वे प्रथमे प्रयोगे " नामिनोऽकलि-हलेः " इति एत ऐत्वे आयि च सिद्धम्। **नामिनोऽसिद्धत्वादि**ति- द्वित्वे कृते प्रत्ययाश्रितत्वेन बहिरङ्गस्य प्रकृत्याश्रितत्वेनान्तरङ्गे दीर्घत्वे कर्तव्ये " ह्रस्वः " [ ४. १. ३९. ] इत्यनेन कृतस्य इकारस्य इत्यर्थः, न तु वृद्धबाधनार्थं " ज्या-व्ये-व्यधि० " [ ४. १. ७१. ] इति कृतस्य इकारस्यापि मध्ये इकारस्यासिद्धत्वं, यतस्तस्यासिद्धत्वे " ह्रस्वः " [ ४. १. ३९. ] इत्यनेन कृत इकारः सिद्धः स्यात्, तस्य च नामित्वात् ततो ' नामिनोऽसिद्धत्वाद् ' इति यदुक्तं तद् व्याहतं स्यात्। ननु ' नामिनोऽसिद्धत्वाद् ' इति किमित्युक्तं ? यावता यद्यप्यत्रानेन दीर्घो भविष्यति तथापि " ह्रस्वः " [ ४. १. ३९. ] इत्यनेन ह्रस्वे कृते संविव्यायेत्यादि सेत्स्यति, सत्यम्- ह्रस्वरूपे परस्मिन् कार्ये विधेये दीर्घत्वं दीर्घत्वशास्त्रं वाऽसिद्धं भवतीति; यदापि नित्यत्वाद् विशेषविधानाद् वा " ह्रस्वः " [ ४. १. ३९. ] इति बाधित्वा " ज्या-व्ये-व्यधि० " [ ४. १. ७१. ] इति प्रवर्तते तदापि प्रत्ययाश्रितत्वेन बहिरङ्गत्वेनासिद्धत्वान्नामिनोऽभावाद् दीर्घाभावः । कुर्दते, कुर्दनेत्यादिषु ' टुवोस्फूर्जा ' इति ज्ञापकाद् दीर्घत्वं न भवति, कथं ? यदि रेफोपान्त्यानां दीर्घः स्यात् तदा " टुवोस्फूर्जा वज्रनिर्घोषे " इत्यस्यापि दीर्घः सिद्ध इति दीर्घोच्चारणं न कर्तव्यम्, तस्मादत्र दीर्घं कुर्वन् ज्ञापयति- भ्वादेरित्ययं विधिरनित्यः ॥ २. १. ६६. ॥

## मो नो म्-वोश्च । २ । १ । ६७ ॥

**त० प्र०—मकारान्तस्य भ्वादेरन्तस्य पदान्ते वर्तमानस्य मकार-वकारयोश्च परयोर्नकारादेशो भवति, स चासन् परे । प्रशान्, प्रतान्, प्रदान्, परिक्रान्; प्रशान्भ्याम्, प्रतान्भ्याम्, प्रदान्भ्याम्, परिक्रान्भ्याम्; नत्वस्यासत्त्वान्नलोपाभावः । म्-वोः खल्वपि- जङ्गन्मि, जङ्गन्वः, जङ्गन्मः, जगन्वान्; नन्नन्मि, नन्नन्वः, नन्नन्मः । म्वोश्चेति किम् ? प्रशामौ, प्रतामौ । म इति किम् ? छित्, भित् । भ्वादेरित्येव- इदम्, किम् ॥ ६७ ॥**

**श० न्या०—मो नो०** । भ्वादेरिति वर्तते, तस्य म इति विशेषणमत आह- **मकारान्तस्य भ्वादे**रिति । भ्वादेर्योऽवयवो मकारस्तस्येति विशेष्यमाणे ' गम्यते, जङ्गम्यते ' इति " अदीर्घाद् विरामैक० " [ १. ३. ३२. ] इति द्वित्वादावपि मकारस्य प्रसज्येत । ननु पूर्वत्रावयवषष्ठ्यन्तं भ्वादेरिति विशेषणं कथमत्र मकारस्य विशेष्यं ? *नहि गोधा सर्पन्ती सर्पणादहिर्भवति* इति न्यायादिति चेत् ? मैवम्- द्रव्येष्वयं न्यायः, यदनुवर्तनाद् द्रव्यं द्रव्यान्तरं न भवति, शब्देषु तु द्वैतं भवतीति नित्यदर्शने स एव शब्दोऽनुवर्तत इति, उच्चरितप्रध्वंसी शब्द इति दर्शने तु तत्सदृशं शब्दान्तरमुत्तरत्रोपतिष्ठ इति तत्त्वेनाध्यवसानाच्च स एवेत्युच्यते, इति भ्वादेः शब्दान्तरत्वाद् युक्ता तस्य विशेष्यता, अन्यथा ' नोपाधेरुपाधिर्भवति, विशेषणस्य वा विशेषणम् ' इति कथं तस्य विशेषणीभूतस्य मकारो विशेषणं स्यादिति युक्तमुक्तं- मकारान्तस्य भ्वादेरिति । "षष्ठ्यान्तस्य " [ ७. ४. १०८. ] इत्यन्तलाभात् तस्य च कार्यित्वेन प्राधान्यात् पदान्ते इति विशेषणमत आह- **अन्तस्य पदान्ते वर्तमानस्ये**ति- धातोस्तु विशेषणत्वे ' प्रशान्, प्रतान् ' इत्यादावेव स्यात्, सोपपद एव हि धातुः पदान्ते सम्भवति, निरुपपदे तु धातुरेव पदं स्यात्, न पदान्ते, तत्र

च व्यपदेशिवद्भाव आश्रयणीयः स्यादित्याह- **अन्तस्य पदान्त** इति- पदान्ते वर्तमानस्यान्तस्येत्यर्थः । स एव चान्तो मकार-नकाराभ्यां विशेष्यत इति म इति षष्ठ्यन्तकार्यी, 'न' इत्यकारस्योच्चारणार्थत्वान्न इति प्रथमान्तं कार्यम्, व्यतिक्रमस्तु नाशङ्कनीयः, कार्यी निमित्तं कार्यमित्येष हि निर्देशक्रम इति । "शमू दमूच् उपशमे", "तमूच् काङ्क्षायाम्", "क्लमूच् ग्लानौ" प्रशाम्यतीत्यादि क्विप् "अहन्पञ्चम०" [ ४. १. १०५. ] इति दीर्घत्वे सेर्लुकि अनेन नत्वे नकारस्य चासत्त्वान्नलोपाभावे- **प्रशानि**त्यादि । म्वोर्नकारस्यावस्थानाद् विधानसामर्थ्याल्लोपाभावो नाशङ्कनीय इत्याह- **नत्वस्ये**ति । "गम्लं गतौ" अतो "गत्यार्थात् कुटिले" [ ३. ४. ११. ] इति यङि द्वित्वेऽनादिलोपे "ग-होर्जः" [ ४. १. ४०. ] इति जकारे "मुरतः०" [ ४. १. ५१. ] इति म्वागमे "तौ मु-मो व्यञ्जने०" [ १. ३. १४. ] इति वर्गान्ते "बहुलं लुप्" [ ३. ४. १४. ] इति यङो लुपि मिव् वस् मस्, अनेन नकारे- **जङ्गन्मी**त्यादि । अस्यैव "तत्र क्वसु-कानौ०" [ ५. २. २. ] इति क्वसौ उदित्त्वान्ने "न्स्-महतोः" [ १. ४. ८६. ] इति दीर्घत्वे "पदस्य" [ २. १. ८९. ] इति सलोपे- **जगन्वान्** । "णमं प्रह्वत्वे" [ अतो "व्यञ्जनादेरेकस्वराद्" ] "भृशाभीक्ष्ण्ये०" [ ३. ४. ९. ] इति यङि शेषं पूर्ववदिति- **नन्नन्मी**त्यादि ॥ छ ॥ २. १. ६७. ॥

**स्था० स०—मो नो०।** पदान्त इत्यनुवर्त्तमानेन समुच्चयार्थश्चकारो न तु पदान्त इत्यस्याऽनुकर्षणार्थः । विधानसामर्थ्याल्लोपाभावो नाशङ्कनीयो म्वोर्विधानस्य चरितार्थत्वादित्याह—नत्वस्यासत्त्वादिति । खल्वपीति- अप्यर्थेऽखण्डमव्ययम् ॥ २ । १ । ६७ ॥

## स्रन्स्-ध्वन्स्-क्वस्सनडुहो दः । २ । १ । ६८ ॥

**त० प्र०—**स्रन्स्-ध्वन्सोः क्वस्प्रत्ययान्तस्य सकारान्तस्यानडुह्शब्दस्य च योऽन्त्यस्तस्य पदान्ते वर्तमानस्य दकारो भवति । उखास्रत्, उखास्रद्; पर्णध्वत्, पर्णध्वद्; विद्वद्, विद्वत् कुलम्; उपसेदिवद्, उपसेदिवत् कुलम्; स्वनडुद्, स्वनडुत् कुलम्; उखास्रद्भ्याम्, पर्णध्वद्भिः, विद्वत्सु, विद्वत्ता, उपसेदिवत्तमः, अनडुद्भ्याम् । क्वस्सिति द्विसकारपाठः किम्? सान्तस्यैव यथा स्यात्, इह मा भूत्- विद्वान्, हे विद्वन्!, उपसेदिवान्, हे उपसेदिवन्!; सकारस्य "पदस्य" [ २. १. ८९. ] इति लोपेन निवर्तितत्वात् । एवं तर्हि 'अनड्वान्, हे अनड्वन्' इत्यत्र नकारस्यापि प्राप्नोति, तत्र विशेषणाभावात्, नैवम्- नकारविधानसामर्थ्यान्न भविष्यति । एतच्च दत्वं ❁येन नाप्राप्ते०❁ इति न्यायाद् रुत्व-ढत्वयोरेव बाधकम्, संयोगान्तलोपे पुनः प्राप्ते चाप्राप्ते चारभ्यत इति तस्य बाधकं न भवति । पदान्त इत्येव- उखास्रसौ, पर्णध्वसौ, विद्वांसौ, अनड्वाहौ ॥ ६८ ॥

**श० न्या०—स्रन्स्०।** क्वसः स इति षष्ठीतत्पुरुषगर्भात् समाहारद्वन्द्वात् षष्ठ्या निर्देशः, सत्यपि सम्भवे स्रन्स्-ध्वन्सौ सकारेण न विशेष्येते व्यभिचाराभावात्, क्वसश्च प्रत्ययत्वात् तदन्तसम्प्रत्ययः, अत आह- **क्वस्प्रत्ययान्तस्य च सकारान्तस्ये**ति । "षष्ठ्यान्तस्य" [ ७. ४. १०६. ] इति विधेयत्वेनान्तस्य कार्यित्वात् तद्विशेषणं पदान्त इत्यत आह- **योऽन्त्यस्तस्य पदान्ते वर्तमानस्ये**ति । "स्रन्सूङ् सन्सूङ् अवस्रंसने", "ध्वन्सूङ् गतौ च" "उषेः किल्लुक् च" [ उणा० ८८. ] इति खे आपि च- उखा, "पॄश् पालन-पूरणयोः" "इणुर्विशावेणिपॄक्०" [ उणा० १८२. ] इति णे-पर्णम्, उखया स्रंसते पर्णानि ध्वंसते क्वौ "नो व्यञ्जनस्या०" [ ४. २. ४५. ] इति नलोपे सौ तल्लुक्यनेन दत्वे "विरामे वा" [ १. ३. ५१. ] इत्येकत्र तकारः, तकारे तु विधीयमाने 'परेऽसद्' इति वचनाद् "धुटस्तृतीयः" [ २. १. ७६. ] इति दत्वाभावाद् दकारश्रवणं न स्यादिति सूत्रे दकारो विहितः- **उखास्रत्, उखास्रद्,** इत्यादि । विदेः "वा वेत्तेः क्वसुः" [ ५. २. २२. ] इति क्वसौ "अनतो लुप्" [ १. ४. ५९. ] इति सेर्लुपि- **विद्वत्** । उपपूर्वात् "षद्लृं विशरणादौ" इत्यतः पूर्ववत् क्वसौ "अनादेशादेः०" [ ४. १. २४. ] इत्येत्वे "घसेकस्वराद्०" [ ४. ४. ८२ ] इतीटि नपुंसके सेर्लुपि- **उपसेदिवत्** । एकत्वे कप्रसङ्गात् शोभना अनड्वाहो यस्य कुलस्येति विग्रहः- **स्वनडुत्** । "नाम सिदय्व्यञ्जने" [ १. १. २१. ] इत्यु( इति पदत्वेऽप्यु )दाहरति- **उखास्रद्भ्या**मित्यादौ । विदुषो भावः- **विद्वत्ता** "भावे त्व-तल्" [ ७. १. ५५. इति तल् ]। बहूनां मध्ये प्रकृष्ट उपसेदिवान् "प्रकृष्टे तमप्" [ ७. ३. ५. ] इति तमपि- **उपसेदिवत्तमः** । यङ्लुबन्ताभ्यां स्रंसि-ध्वंसिभ्यां क्विप् न दृश्यते, क्वसोः ककारः "वसं निवासे" "वसिक् आच्छादने" अनयोर्व्युदासार्थः, तेन वसेः क्विपि यजादित्वाद् वृति दीर्घत्वे- ऊः; क्षौमं वस्ते क्विपि- क्षौमवः । अथ वसति-वस्त्योः सकारान्तत्वाव्यभिचाराद् व्यभिचारे च विशेषणस्यार्थवत्त्वाद् व्यभिचारिणः क्वस एव ग्रहणं भविष्यति 'वस्' इति सकारोपादानात्, नैवम्- अन्यथापि प्रतीतिः स्यात्- 'यङ्लुबन्तयोरेतयोरेव ह्यस्तनीसिवन्तयोर्वस्सिति रूपाद् ग्रहणं स्यात्, इह मा भूद्' इति । विद्वस्शब्दात् सौ उदित्वान्नागमे "न्स-महतोः" [ १. ४. ८६. ] इत्यनामन्त्र्ये सौ दीर्घत्वे "पदस्य"

[२. १. ८९.] इति प्रकृतिसकारलोपे सकारान्तत्वाभावान्नकारस्य दत्वाभावे- **विद्वान्, हे विद्वन्!**, इत्यादि। ननु यद्येवमनडुह्शब्दाद् "अनडुहः सौ" [१. ४. ७२.] इति नागमे "पदस्य" [२. १. ८९.] इति हलोपे दत्वप्रसङ्गः, उच्यते- यदि कृतस्यापि नकारस्य दत्वं स्यात् तद्विधानमनर्थकं स्यादत आह- **एवं तर्ही**त्यादि- व्याख्यातप्रायम्। ननु यदि नकारविधानसामर्थ्यात् प्राप्नुवन् विधिर्न भवति 'अनड्वांस्तत्र' इत्यादौ "नोऽप्रशानः०" [१. ३. ८.] इति सकारोऽपि न प्राप्नोति, * यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते * इति, दत्वं च प्रति नकारोपदेशोऽनर्थको न सत्वं प्रति, तस्य तन्निमित्तत्वादिति। त्रयाणां सकारान्तत्वादनडुहश्च हकारान्तत्वात् "सो रुः" [२. १. ७२.] "हो धुट्-पदान्ते" [२. १. ८२.] इत्येतद्विषय एवास्यारम्भादपवादत्वात् तयोर्बाधकं [दत्वम्,] 'विद्वद्भिः' इत्यादौ संयोगान्तलोपस्याप्रवृत्तावस्य चरितार्थत्वादबाधकत्वाद् 'विद्वान्' इत्यत्र तूभयप्राप्तौ दत्वस्य परेऽसत्त्वात् स एव प्रवर्तत इत्याह- **एतच्च दत्वमि**त्यादि ॥ छ ॥ २. १. ६८. ॥

**न्या० स०**---स्रंस्-ध्वंस्-क्वस्० । **उखास्रदिति**- उखया- पुतेन स्थाल्या वा स्रंसते। **ननु** दकारकरणं किमर्थं? तकार एव क्रियताम्, यतस्तकारेऽपि कृते "धुटस्तृतीयः" [२. १. ७६.] **इत्यनेन** दकारो भविष्यति, नैवम्- तकारे विधीयमाने परेऽसदिति वचनाद् "धुटस्तृतीयः" [२. १. ७६.] इति दत्वाभावाद् दकारस्य श्रवणं न स्यात्। **स्वनडुदिति**-अत्र बहुत्वे वाक्यं कार्यम्, एकत्वे तु "पुमनडुन्नौ०" [७. ३. १७३.] इति कच् स्यात्। **कसिसतीति**- कसोः ककारो "वसं निवासे" "वसिक् आच्छादने" अनयोर्व्युदासार्थः, तेन वसेः क्विपि यजादित्वाद् य्वृति दीर्घत्वे- ऊः, क्षौमं वस्ते क्विपि- क्षौमवः। अथ वसति-वस्त्योः सकारान्तत्वाव्यभिचाराद् व्यभिचारे च विशेषणस्यार्थवत्त्वाद् व्यभिचारिणः कस एव ग्रहणं भविष्यति, कुतः? वस्सिति सकारोपादानात्, नैवम्- अन्यथापि प्रतीतिः स्यात्, यङ्लुबन्तयोरेतयोरेव ह्यस्तनीसिवन्तयोर्विशेषविहितत्वेन "सेः स्-द्-धां च०" [४. ३. ७९.] इति सिवलोपाभावे वस्सिति द्विःसकाररूपं ग्रहणं स्यात्, इतीह मा भूदिति ककारकरणम्। **रुत्व-ढत्वयोरेव बाधकमिति**- अनडुह्शब्दे "हो धुट्-पदान्ते" [२. १. ८२.] इत्यनेन ढत्वस्य शेषेषु रुत्वस्य प्राप्तिः। **प्राप्ते चाप्राप्ते चेति**- क्लीबे विद्वत् कुलमित्यादिष्वप्राप्ते, पुंस्त्वे तु विद्वानित्यादौ प्राप्ते इति तस्य न बाधकम् ॥ २. १. ६८. ॥

## ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-

## दधृषुष्णिहो गः । २ । १ । ६९ ॥

**त० प्र०**---एषां पदान्ते वर्तमानानां गोऽन्तादेशो भवति। ऋतुम् ऋतौ ऋतवे ऋतुप्रयोजनो वा यजते- ऋत्विक्, ऋत्विग्; दिश्यते इति- दिक्, दिग्; पश्यति दर्शनं वा- दृक्, दृग्; अन्य इव दृश्यते- अन्यादृग्, अन्यादृक्; एवं- यादृग्, यादृक्; तादृग्, तादृक्; घृतं स्पृशति- घृतस्पृग्, घृतस्पृक्; मन्त्रेण स्पृशति- मन्त्रस्पृग्, मन्त्रस्पृक्; सृज्यत इति कुत्-संपदादित्वात् क्विप्, अत एव निर्देशाद् ऋतो रत्वं च, "सृं गतौ" इत्यस्य वा कज्- स्रग्, स्रक्; धृष्णोतीति- दधृष्, अत एव निर्देशाद् द्वित्वम्- दधृग्, दधृक्; ऊर्ध्वं स्निह्यति नह्यति वा, अत एव निर्देशाद् उदो दकारस्य लोपे सस्य षत्वं, नहेर्नकारस्य च ष्णिरादेशः- उष्णिग्, उष्णिक्; ऋत्विग्भ्याम्, दिग्भ्याम्, घृतस्पृग्भ्याम्, स्रग्भ्याम्, दधृग्भ्याम्, उष्णिग्भ्याम्। पदान्त इत्येव- ऋत्विजौ, दिशौ, दृशौ, घृतस्पृशौ, स्रजौ, दधृषौ, उष्णिहौ ॥ ६९ ॥

**श० न्या०**- ऋत्विज्० । "यजीं देवपूजादौ", "दिशींत् अतिसर्जने", "दृशृं प्रेक्षणे", "स्पृशंत् संस्पर्शे", "सृजंत् विसर्गे", "ञिधृषाट् प्रागल्भ्ये", "ष्णिहौच् प्रीतौ" "णहींच् बन्धने" इति च, एषां क्विपि, अन्य-यत्-तदाम् "अन्यत्यदादेराः" [३. १. १५२.] इत्यात्वे सिलोपेऽनेन गत्वे पक्षे "विरामे०" [१. ३. ५१.] इति प्रथमत्वे- **ऋत्विगादयः** ॥ छ ॥ २. १. ६९. ॥

**न्या० स०**---ऋत्विज्० । **ऋत्विगिति**- प्रयोजनं प्रवर्तको यस्येति वाक्ये "मयूर०" [३. १. ११६.] इति प्रयोजनशब्दलोपः, अत एव निपातनाद् वा। **ऋतुप्रयोजन** इति अर्थकथनं वा, तत्र पक्षे ऋतुना हेतुभूतेन यजत इत्यर्थः। ननु 'ऋत्विग्-दिग्-दृग्' इति गान्ता निपाताः क्रियन्तां, किं गविधानेन? सत्यम्- गनिपातने गत्वसंनियोगशिष्टत्वैव ज्ञायेत, ततो व्यावृत्तौ दधृषौ, उष्णिहाविति न स्याताम्, गत्वे तु विहिते निपातनं सर्वत्र भवति, गत्वं तु पदान्त एव भवतीति। **स्रगिति**- सरति मस्तकादिकमिति "ऋधि-पृथि०" [उणा० ८७४.] इत्यनेन बहुवचनात् किदज् ॥ २. १. ६९. ॥

## नशो वा । २ । १ । ७० ॥

**त० प्र०**---नशेः पदान्ते गोऽन्तादेशो वा भवति। जीवस्य नशनम्- जीवनग्, जीवनक्; पक्षे- जीवनड्, जीवनट्; जीवनग्भ्याम्, जीवनड्भ्याम्। पदान्त इत्येव- जीवनशौ ॥७०॥

**श० न्या०**- नशो० । "जीव प्राणधारणे" जीवतीति

"नाम्युपान्त्य०" [५. १. ५४.] इति के- जीव, नशेः कुधादित्वात् क्विपि कृद्योगे कर्तृषष्ठीसमासे- **जीवनक्**, गत्वाभावपक्षे "यजसृज०" [२. १. ८७.] इति षत्वे "धुटस्तृतीयः" [२. १ ७६.] इति तृतीयत्वे- **जीवनट्** ॥ छ ॥ २. १. ७०. ॥

**न्या० स०—नशो वा।** जीवतीति अच्, जीवस्य कोऽर्थः? जीवस्य जीवतो वा नशनं "स्यादिभ्यो वा [५. ३. ११५.] इति क्विप् ॥ २. १. ७०. ॥

## युजञ्च-क्रुञ्चो नो ङः । २ । १ । ७१ ॥

**त० प्र०—युज्-अञ्च-क्रुञ्चां नकारस्य पदान्ते वर्तमानस्य ङकार आदेशो भवति। युनक्तेः क्विपि, धुटि नागमे, संयोगान्तलोपे- युङ्; अञ्चतेरनर्चायां नलोपे, धुटि नागमे, अर्चायां तु नलोपाभावे- प्राङ्, प्राङ्भ्याम्, प्राङ्षु, प्राङ्क्षु; क्रुञ्चेरत एव निर्देशाद् "नो व्यञ्जनस्यानुदितः [४. २. ४५.] इति नलोपाभावे- क्रुङ्, क्रुङ्भ्याम्, क्रुङ्षु; क्रुङ्क्षु। पदान्त इत्येव- युञ्जौ, युञ्जः; प्राञ्चौ, प्राञ्चः; क्रुञ्चौ, क्रुञ्चः ॥७१॥**

**श० न्या०- युज०।** "युजृंपी योगे", "अञ्चू गतौ च" कर्तरि क्विपि "अञ्चोऽनर्चायाम्" [४. २. ४६.] इति नलोपे "युजः०" [१. ४. ७१.] इति "अचः" [१. ४. ६९.] इति च नागमे- **युङ्**, इत्यादि। "क्रुञ्च गतौ" इत्यस्मात् क्विपि- **क्रुङ्** ॥ छ ॥ २. १. ७१. ॥

**न्या० स०—युजञ्च०।** ननु न इति किमर्थं? "षष्ठ्यान्त्यस्य" [७. ४. १०६.] इति सर्वेषामन्तस्यैव नस्य भविष्यति, सत्यम्-"युजिन् समाधौ" इत्यस्यापि पदान्ते 'युङ्' इत्यनिष्टम्, अपदान्ते "क्रुञ्च गतौ" इत्यस्य 'क्रुचौ क्रुच' इत्यपि अनिष्टे स्याताम्, अधुना तु नकारे कृते सूत्रसामर्थ्यान्न तस्य लुग्, इत्यपि फलम् ॥ २. १. ७१. ॥

## सो रुः । २ । १ । ७२ ॥

**त० प्र०—पदान्ते वर्तमानस्य सकारस्य रुरादेशो भवति। मित्रशीः, आशीः, अग्निरत्र, वायुरत्र, अग्निर्गच्छति, पयः, पयोभ्याम्, पयोवत्। उकारः "अरोः सुपि रः' [१. ३. ५७.] इत्यत्र विशेषणार्थः ॥ ७२ ॥**

**श० न्या०- सो रुः।** "शासूक् अनुशिष्टौ" इत्यतो मित्रं शास्तीति क्विपि इसादेशे सिलोपेऽनेन रुत्वे- **मित्रशीः**। **आशीः** पूर्ववत्। **उकार** इति- उकारमन्तरेण तत्र 'अरः' इत्युक्ते एतत्सूत्रविहितस्य रेफस्य वचनवैयर्थ्यं मा भूदिति 'पयःसु' इत्यादौ रेफो 'गीर्षु' इत्यादौ तु 'अरः' इति प्रतिषेधाद् विसर्ग इति विपर्ययप्रतीतिः स्यादित्यर्थः ॥ छ ॥ २. १. ७२. ॥

**न्या० स०—सो०।** [नेह व्याख्यातम्] ॥ २. १. ७२. ॥

## सजुषः । २ । १ । ७३ ॥

**त० प्र०—'सजुष्' इत्येतस्य पदान्ते वर्तमानस्य रुरन्तादेशो भवति। सजूर्देवैः, सजूर्ऋषिभिः; सहपूर्वस्य जुषेः क्विपि सहस्य सभावे रूपमेतत्। सजूर्भ्याम्, सजूर्वत्। पदान्त इत्येव? सजुषौ ॥ ७३ ॥**

**श० न्या०- सजु०।** सह जुषते इति क्विपि, अत एव निर्देशात् सभावे "आसन्नः" [७. ४. १२०.] इति "धुटस्तृतीयः" [२. १. ७६.] इति डत्वे प्राप्ते तदपवादोऽनेन रेफ इति, समानपूर्वस्य जुषः क्विपि सम्भाव्यते एतद्रूपम्, अर्थसङ्गतिस्तु तत्पूर्वस्य नास्तीति तदपाकरणार्थमाह- **सहपूर्वस्ये**त्यादि ॥ छ ॥ २. १. ७३. ॥

**न्या० स०—सजुषः।** डत्वापवादः। **सजूरिति**- प्रथमे सर्वज्ञवचनः, द्वितीये मुनिवचनः। **सभावे** इति- अस्मादेव निर्देशात् ॥ २. १. ७३. ॥

## अह्नः । २ । १ । ७४ ॥

**त० प्र०—अहन्शब्दस्य पदान्ते रुरित्ययमादेशो भवति, स चासन् परे स्यादिविधौ च। दीर्घाण्यहान्यस्मिन्- हे दीर्घाहो निदाघ!, दीर्घाहा निदाघः, अत्र रुत्वस्यासत्त्वाद् नान्तलक्षणो दीर्घो भवति। कश्चित् तु दीर्घत्वं नेच्छति, तन्मते- दीर्घाहो निदाघः। अहोभ्याम्, अहस्सु। अहन् शत्रुमित्यत्राहन्शब्दस्य त्याद्यन्तस्य लाक्षणिकत्वान्न भवति ॥ ७४ ॥**

**श० न्या०- अह्नः।** हे दीर्घाह इति- हेशब्द आमन्त्र्यद्योतनार्थः, अनामन्त्र्ये तु "नि दीर्घः" [१. ४. ८५.] इति दीर्घत्वे "अवर्ण-भो-भगोऽघो०" [१. ३. २२.] इति रुलोपे- **दीर्घाहा निदाघ** इति। अथात्र सिलोपे परत्वाद् नकारस्य रुत्वे नान्तत्वाभावात् कथं दीर्घ इति चेत्? न- स्याद्यधिकारविहितत्वाद् दीर्घे कर्तव्ये रुत्वस्यासिद्धत्वादित्याह- **अत्र रुत्वस्ये**त्यादि। **अहोभ्याम्, अहःसु**, इति- अत्र "नाम सिदय्व्यञ्जने" [१. १. २१.] इति पदत्वान्नस्य रुत्वम्। ननु हनेर्ह्यस्तन्या दिवि सिवि वा "अड् धातोरादिः०" [४. ४. २९.] इत्यडागमे "व्यञ्जनाद् देः सश्च दः" [४. ३. ७८.] इति "सेः स्-द्-धां च रुर्वा" [४. ३. ७९.]

इति च दिव्-सिवोर्लोपे 'अहन्' इत्येतस्य पदत्वान्नस्य रुत्वं कस्मान्न भवति? प्रतिपदोक्ते हि सति लाक्षणिकं *लक्षणप्रतिपदोक्त*परिभाषया निराक्रियते, न च प्रतिपदोक्तस्य संभवो नामापि, तथाहि- अह्नः "श्वन्मातरिश्वन्मूर्धन्०" [उणा० ९०२.] इत्यनि निपातने कथं प्रतिपदोक्तं स्यात्? तस्माद्धातोरह्नः संजातपदसंज्ञकस्य नाम्नश्च रुत्वेन भवितव्यमिति यः शङ्कते तं प्रत्याह- **अहन् शत्रुमि**त्यादि- अयमभिप्रायः- *उणादयोऽव्युत्पन्नानि नामानि* इत्यस्मिन् पक्षे नाम्नः प्रतिपदोक्तस्य सम्भवाल्लाक्षणिकस्य न ग्रहणमिति, व्युत्पत्तिपक्षस्तु नेहाश्रित इति ॥छ॥ २. १. ७४.॥

**न्या० स०—अह्नः**। **कश्चित् त्विति**- दुर्गसिंहः। **लाक्षणिकत्वादिति**-अयमभिप्रायः- *उणादयोऽव्युत्पन्नानि नामानि* इत्यस्मिन् पक्षे नाम्नः प्रतिपदोक्तस्य संभवाल्लाक्षणिकस्य न ग्रहणमिति, व्युत्पत्तिपक्षस्तु इह नाश्रितः ॥ २. १. ७४.॥

## रो लुप्यरि। २। १। ७५॥

**त० प्र०—अहन्शब्दस्य लुपि सत्यामरेफे परे पदान्ते रोऽन्तादेशो भवति, रोरपवादः। अहरधीते, अहरेति, अहर्ददाति, अहर्भुङ्क्ते, दीर्घाहाश्चासौ मासश्च दीर्घाहर्मासः, अहःकाम्यति, अहर्वान्। लुपीति किम्? हे दीर्घाहोऽत्र। अरीति किम्? अहोरूपम्, अहोरात्रः, गतमहो रात्रिरागता, कृत्स्नमहो रथन्तरं गायति, सर्वमहो रमयस्व, यातं शनैः सर्वमहो रथेन। अन्ये तु रात्रि-रूप-रथन्तरेष्वेव रेफादिषु परेषु रेफप्रतिषेधमिच्छन्ति ॥७५॥**

**श० न्या०—रो लु०**। "अह्नः" [२. १. ७४.] इत्येव [सिद्धे] अहन्शब्दस्य रेफादन्यस्मिन् परे "अतोऽति रोरुः" [१. ३. २०.] इत्यादिना उत्वं मा भूदिति तदपवादोऽयमुच्यत इत्याह- **रोरित्या**दि। '**अहरधीते**' इत्यादौ "काला-ऽध्वनोर्व्याप्तौ" [२. २. ४२.] इति द्वितीयैकवचनस्य "अनतो लुप्" [१. ४. ५९.] इति लुप्। "ऐकार्थ्ये" [३. २. ८.] इति लुपि- **दीर्घाहर्मास** इत्यादयः। [**अहोरूपमिति-**] अह्नो रूपमिति षष्ठीसमासः; यदा त्वह एव रूपत्वं विवक्ष्यते, कर्मधारयस्य च वैकल्पिकत्वादप्रवृत्तौ नपुंसके सेर्लुप्यसमासे- **अहो रूपम्**। अहश्च रात्रिश्चेति द्वन्द्वे "ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसाहोरात्र०" [७. ३. ९७.] इत्यति- **अहोरात्रः**। **गतमह** इति- "अनतः०" [१. ४. ५९.] इति सेर्लुप्। रथं तरति "भृ-वृजि-तृ-तप-दमे०" [५. १. ११२.] इति खे उपपदसमासे "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च" [३. २. १११.] इति मागमे "तौ मु-मौ व्यञ्जने०" [१. ३. १४.] इति [अनुस्वारादौ कृते 'रथन्तर' इति] प्रकृतेरहोरूपवत् समासेऽसमासे वा- **अहोरथन्तरम्**। **सर्वमह** इत्यादावहःशब्दाद् द्वितीया-प्रथमयोरेकवचनम्। **अन्ये** इति- वाक्यकार इत्यर्थः, व्याख्यातारस्तु नेदं परिगणनमित्याहुः, इति **सर्वमहो रमयस्वे**त्यन्यत्राप्युदाहृतम् ॥ छ ॥ २. १. ७५.॥

**न्या० स०—रो लुप्यरि**। **अहरधीते** इति- "काला-ऽध्वनोः०" [२. २. ४२.] द्वितीया। **अहःकाम्यतीति**- "रोः काम्ये" [२. ३. ७.] इति नियमात् "प्रत्यये" [२. ३. ६.] इत्यनेन न सकारः। **हे दीर्घाहोऽत्रेति**- अत्र वाक्ये विभक्तेर्लुबस्ति तत् कथं रो न भवति? सत्यम्- लुपीति प्रत्यासत्त्या व्याख्येयम्- यदपेक्षया लुप् पदत्वमपि यदि तदपेक्षया भवति, अत्र तु वाक्यविभक्त्यपेक्षया लुप्, साक्षाद्विभक्त्यपेक्षया तु पदत्वम्; वाक्यविभक्त्यपेक्षयैव पदत्वमपीति न च वाच्यम्, "वृत्त्यन्तोऽसषे" [१. १. २५.] इति निषेधात्। **रथन्तरमिति**- रथं- रथस्थं तरति- अतिक्रामति "भृ-वृजि०" [५. १. ११२.] इति खः, सामविशेषः। **यातमिति**- कर्मणि क्तः ॥ २. १. ७५.॥

## धुटस्तृतीयः। २। १। ७६॥

**त० प्र०**—धुटां पदान्ते वर्तमानानां तृतीयो भवति। **वाग्, वाग्भिः; अज्, अज्भिः; षड्, षड्भिः; विद्युद्, विद्युद्भिः; ककुब्, ककुब्भिः; विड्, विड्भिः। केचित् तु विसर्ग-जिह्वामूलीययोरप्यलाक्षणिकयोस्तृतीयत्वं गत्वमिच्छन्तीति तन्मते- सुपूर्वाद् दुःखयतेर्दु×खयतेर्वा क्विपि संयोगान्तलोपे- 'सुदुग्, सुदुग्भ्याम्' इति सिद्धम्। पदान्त इत्येव- वाचौ। कश्चरति, कष्टीकते, कस्तरतीत्यादिष्वादेशविधानसामर्थ्यात्, षष्ठ इत्यत्र तु "षष्ठी०" [२. २. १०८.] इति निर्देशान्न भवति ॥७६॥**

**श० न्या०**—धुट०। ब्रूते वक्तीति वा "दिद्युद्-ददृद्०" [५. २. ८३.] इति क्विपि दीर्घत्वे सिलुकि "च-जः क-गम्" [२. १. ८६.] इति कत्वे तस्यानेन तृतीयत्वे- **वाग्**। भिसि- **वाग्भिः**। संज्ञाशब्दत्वात् कत्वाभावेऽनेन जकारे- **अज्**। षष्शब्दात् "इति-ष्-णः०" [१.४.५४.] इति जस्-शसोर्लुकि मूर्धन्यस्य षकारस्य "आसन्नः" [७.४.१२०.] इति तृतीये डकारे- **षड्**। विपूर्वाद् द्युतेः क्विपि सिलोपे तृतीयत्वे च-

**विधुद्** । **ककुबि**ति साधितम् । विशतीति क्विपि कित्त्वाद् गुणप्रतिषेधे सिलोपे “ यज-सृज० ” [ २. १. ८७. ] इति शस्य षत्वेऽनेन तृतीये डकारे **विड्** । **केचित् त्वि**ति– शकटः । **अलाक्षणिकयोरि**ति– प्रतिपदोक्तयोरित्यर्थः । “ दुःखग् तत्क्रियायाम् ” अत्र ‘ दुःख ’ इति खकारात् पूर्वः कैश्चिद् विसर्गः पठ्यते, कैश्चिज्जिह्वामूलीयः, तत्रोभयत्रापि णिलोपे प्रकृतिखकारस्य संयोगान्तस्य “ पदस्य ” [ २. १. ८९. ] इति लोपे विसर्गजिह्वामूलीययोः प्रतिपदोक्तत्वाद् धुट्त्वात् कण्ठ्यत्वादनेन तृतीयो गकार इत्युदाहरति– **सुपूर्वादि**त्यादि । अथ कश्चरतीत्यादौ रेफादेशस्य शकारादेर्धुट्त्वात् तृतीयो जकारादिः कस्मान्न भवति ? यद्यपि सो रुत्वस्य परेऽसत्त्वात् तृतीयस्याप्राप्तिस्तथापि मातश्चरतीत्यादिषु प्राप्नोतीत्यत आह– **कश्चरतीत्यादि**– यदि हि श-ष-सानां जकारादिस्तृतीयः स्यात् तदा शषसानपनीय सकारमेव विदध्यादित्यर्थः । एवं तर्हि षषस्थटि “ तवर्गस्य श्चवर्ग० ” [ १. ३. ६०. ] इति ठत्वे कृते प्रकृतिषकारस्य तृतीयः कस्मान्न भवतीत्याह– **षष्ठ** इत्यादि– तृतीयत्वे हि “ षष्ठी० ” [ २.१.१०८. ] इति निर्देशो न स्यादित्यर्थः ॥छ॥ २.१.७६.॥

**न्या० स०––धुटः०** । **अज्भिरि**ति–अत्र संज्ञाशब्दत्वात् “ च-जः क-गम् ” [ २. १. ८६. ] इति न भवति । **अलाक्षणिकयोरि**ति– “ रः क-ख-प-फ० ” [ १. ३. ५. ] इत्यादिलक्षणेनाकृतयोरित्यर्थः । **दुःखयतेर्दुᳵखयतेर्वे**ति– “ सुख दुःखण्० ” इत्यत्र दुःखधातुर्विसर्गान्वितो मतान्तरेण जिह्वामूलीयान्वितश्च पठ्यते । **संयोगान्तलोपे** इति–ननु व्यञ्जननैरन्तर्यं संयोगः, न च विसर्जनीय-जीह्वामूलीययोर्व्यञ्जनसंज्ञास्ति, तत् कथं ? “ पदस्य ” [ २. १. ८९. ] इत्यन्तलोपः, सत्यम्–कस्यादिः–कादिरिति व्युत्पत्त्या ‘ अं-अः ’ इत्येतयोर्व्यञ्जनत्वे ततश्च “ अं-अः-ᳵक० ” [ १. १. १६. ] इति सूत्रे ‘ अं-अः ’ इति साहचर्यात् ‘ ᳵक ’ इत्यस्यापि व्यञ्जनत्वे संयोगान्तलोपो भवति, कण्ठ्यत्वाच्च स्थान्यासन्नो गकारः, न तु ‘ ᳶप ’ इत्यनेन साहचर्याद् वर्णमात्रत्वनिबन्धनो व्यञ्जनत्वाभावः, कुतः ? ‘ अं-अः-ᳶप-ᳵक ’ इत्यकरणात् । **कश्चरती**ति–यद्यप्यत्र कत्वस्य परेऽसत्त्वात् तृतीयस्याप्राप्तिस्तथापि मातश्चरतीत्यादिषु प्राप्नोतीत्याह-- **विधानसामर्थ्यादि**ति ॥ २. १. ७६. ॥

## ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये । २ । १ । ७७ ॥

**त० प्र०––ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्य धातुरूपावयवस्यादेश्चतुर्थ आसन्नो भवति, पदान्ते सकारादौ ध्वशब्दादौ च प्रत्यये परे । पर्णघुट्, पर्णघुड्भ्याम्, पर्णघुट्त्वम्; तुण्ढिभमाचष्टे णौ क्विपि– तुण्ढिप्, तुण्ढिब्भ्याम्, तुण्ढिप्त्वम्; गोधुक्, गोधुग्भ्याम्, गोधुक्त्वम्; गर्दभमाचष्टे णौ क्विप्–गर्धप्, गर्धब्भ्याम्, गर्धप्त्वम्; धर्मभुत्, धर्मभुद्भ्याम्, धर्मभुत्त्वम् । स्ध्वोः– गुहौ–निघोक्ष्यते, न्यघूढ्वम्; दुहू–धोक्ष्यते, अधुग्ध्वम्; बुध्– भोत्स्यते, बुभुत्सते, अभुद्ध्वम् । ग-ड-द-बादेरिति किम् ? क्रुत्, क्रोत्स्यति; जम्भेर्यङ्लुपि–अजंझप् । चतुर्थान्तस्येति किम् ? सुगण्, दास्यति । एकस्वरस्येति किम् ? दाम लेढि क्विप्, दामलिहमिच्छति क्यन्, दामलिह्यति क्विप्– दामलिट् । स्ध्वोश्चेति किम् ? धर्मबुधौ, बोद्धा । वर्णविधित्वेन स्थानिवद्भावो नास्तीति ‘ अबुद्ध, अबुद्धाः ’ इत्यत्र सिज्लुकि न भवति । धकारस्य वकारोपश्लिष्टस्य ग्रहणं किम् ? “ दधि धारणे ” इत्यस्य यङ्लुपि हौ धिभावे–दादर्द्धि । प्रत्यय इति किम् ? धाग् वस् द्वित्वम्, “ श्नश्चाऽऽतः ” [ ४. २. ९६. ] इत्याकारलोपे “ अदीर्घाद् विरामैकव्यञ्जने ” [ १.३.३२. ] इति धकारस्य द्विर्भावे– दद्ध्वः, दद्ध्वहे ॥७७॥**

**श० न्या०––ग-ड-द०** । ग-ड-द-बा आदिर्यस्य, चतुर्थोऽन्तो यस्य, एकः स्वरो यस्येति त्रीण्यप्यन्यपदार्थाक्षिप्तस्यावयवस्य समानाधिकरणानि, स चावयवत्वेनादेरित्यस्य स्थानात्-( नार्थ )षष्ठ्यन्तस्य कार्यिणो विशेषणम्, तस्य च स्थाने चतुर्थो भवन्नासन्नत्वाद् ग-ड-द-बस्थाने घ-ढ-ध-भरूप एव भवति, स्ध्वोरिति प्रत्ययस्य विशेषणम्, तत्र च ध्वरत्यादिप्रत्ययः, तदेकविभक्तिनिर्दिष्टत्वेन सकारोऽपि त्यादिरेव, तौ च धातोरेव सम्भवतः, तत्साहचर्यात् पदान्त(स्थस्यापि त )स्यैवेति तदाक्षिप्तो धातुरवयवित्वेनावयवस्य विशेषणम्, रूपशब्दस्तु वृत्तौ भ्वाद्यभ्वादिधातुमात्रपरिग्रहार्थः, **स्ध्वोश्चे**ति चकारेण पदान्त इति समुच्चीयते, तत्र पदान्त इत्यस्य विषयित्वेन विशेषणम्, प्रत्यय इति तु परत्वेन । “ गुहौग् संवरणे ” पर्णानि गूहतीति क्विपि सिलोपे पदान्तत्वे “ हो धुट्० ” [ २. १. ८२. ] इति ढत्वेऽनेनादिचतुर्थत्वे– **पर्णघुडि**त्यादि । ननु धातोरवयवस्येत्युच्यते, अत्र त्ववयवातिरिक्तस्य ‘ तुण्डिभ् ’ इत्यादिवद् धातोरभावात् कथं प्राप्तिः ? उच्यते– धातुरूपावयवस्येत्यत्र वृत्तौ समस्तनिर्देश उभयसमासपरिग्रहार्थः, तेन यदा धातुरूपोऽवयव इति विग्रहस्तदा धातुरवयवः समुदायस्त्ववयवीति सिध्यति– पर्णघुट्, यदा तु धातुरूपस्यावयव इति विग्रहस्तदा ‘ तुण्डिभ् ’ [ इत्यत्र ‘ डिभ् ’ ] इत्यवयवः, तदतिरिक्तस्तु धातुरवयवी, लक्ष्यसिद्ध्यर्थं क्वचित् किञ्चिदाश्रीयते, अथवा यत्र तदतिरिक्तो धातुर्नास्ति तत्र व्यपदेशिवद्भावात् सिद्धिरिति सर्वं समञ्जसम्; शब्दरूपावयवस्येति वा वृत्तौ पठनीयम्, तत्र च ‘ गुहू डिभ् ’

इत्येवंरूपः शब्दोऽवयवो गडदबादिश्चतुर्थान्त एकस्वर इति, कुण्डमुम्भतीत्यादीनां तु क्विबेव नास्तीति किं तद्व्यावृत्त्यर्थेन धातुग्रहणेनेति । " तुडुङ् तोडने " अस्य " उदितः स्वराम्नोन्तः " [ ४. ४. ९८. ]इति नागमे " किलि-पिलि-पिशि-चिटि-त्रुटि-शुण्ठि-तुण्डि० " [ उणा० ६०८. ]इति इप्रत्यये- [ तुण्डिः ], साऽस्यास्तीति " वलि-वटि-तुण्डेर्भः " [ ७. २. १६. ] इति भे तुण्डिभः । गां दोग्धीति क्विपि सिलोपे " भ्वादेर्दादेर्घः "[ २. १. ८३. ]इति घेऽनेनादिचतुर्थत्वे " विरामे वा "[ १. ३. ५१.] इति कत्वे- **गोधुक्** । " गर्द शब्दे " अतः " कॄ-शॄ-गॄ-शलि०" [ उणा०३२९. ] इत्यभे- गर्दभः। " बुधिंच् ज्ञाने " धर्म बुध्यत इति क्विपि- **धर्मभुत्** । निपूर्वाद् गुहेर्भविष्यन्त्याः स्यतेप्रत्यये उपान्त्यगुणे ढत्वेऽनेन घत्वे कत्वे षत्वे च- **निघोक्ष्यते**, अस्मादद्यतनीध्वमि " ह-शिट० "[ ३. ४. ५५.] इति सकि " दुह-दिह-लिह०[ ४. ३. ७४. ]इति सको लुकि " अड् धातोरादिः० "[ ४. ४. २९.] इत्यडागमे " हो धुट्पदान्ते " [ २. १. ८२. ] इति ढत्वे आदिचतुर्थत्वे "तवर्गस्य श्चवर्ग०" [ १. ३. ६०. ]इति धस्य ढत्वे " ढस्तड्ढे " [ १. ३. ४२. ] इति दीर्घत्वे ढलोपे च- **न्यघूढ्वम्** । " क्रुधंच् कोपे " क्रोधनं क्रुधादित्वात् क्विपि लुकि- **क्रुत्** । " जभैङ् गात्रविनामे " गर्हितं जम्भते यङि तल्लुपि द्वित्वेऽनादिव्यञ्जनलोपे " जप-जभ० " [ ४. १. ५२. ]इति म्वागमे " व्यञ्जनाद् देः सश्च दः "[ ४. ३. ७८. ] इति ह्यस्तन्या दिवो लुप्यडागमे च- **अजञ्जप्** । " डुदांग्क् दाने " अतो " मन् " [ उणा०९११. ]इति मनि- दामन्, दामानं लेढि क्विपि दामलिहमिच्छति " अमाव्ययाद्० "[ ३. ४. २३. ]इति क्यनि क्विपि अलोपे यलोपे च सौ- **दामलिट्**- अत्र दादिश्चतुर्थान्त एकस्वरो नास्तीत्यादेश्चतुर्थो न भवति; यदा तु शब्दरूपावयवस्येति पठ्यते तदा दामानं लेढीति क्विप्येव- **दामलिट्** । अथ बुधेरद्यतन्यास्तप्रत्यये सिचो लुप्यडागमे सिचः स्थानिवद्भावादादेश्चतुर्थः कस्मान्न भवतीत्याह- **वर्णविधित्वेनेत्यादि** । **दद्ध्व** इति- अत्र धकारद्विर्भावे प्रत्ययग्रहणाद् वकारोपश्लिष्टधकारस्य प्रत्ययत्वाभावाद् दादेश्चतुर्थान्तस्य एकस्वरस्यावयवस्यादेश्चतुर्थो न भवति ॥ छ ॥ २. १. ७७. ॥

**न्या० स०**—गड-द-बादे० । धातुरूपावयवस्येति—अत्र धातुरूपावयवस्येति विशेष्यम्, अस्य च समासद्वयं–' पर्णघुड् ' इत्यादौ सिसाधयिषिते धातुरूपश्चाऽसौ अवयवश्च ' गुह् ' इत्यादिः, अवयवश्चावयव्यपेक्षयाभिधीयत इति ' पर्णगुह् ' इत्यादिसमुदायोऽवयवी; ' तुण्ढिब् ' इत्यादौ तु साधयितुमिष्टे धातुरूपस्यावयव इति षष्ठीसमासः, धातुरूपं ' तुण्डिभ् ' इत्यादि, तस्याऽवयवो ' डिभ् ' इत्यादिः; समासद्वयेऽपि च कुण्डमुम्भति–'कुण्डोब्' इति निरस्तम्, नहि ' कुण्डोब् ' इत्यस्य समुदायस्य मध्ये 'डोब्' इति धातुरूपोऽवयवो नापि धातुरूपस्य अवयव इति आदिचतुर्थत्वाभावः; यद्वा धातुरूपस्यावयव इत्येवं षष्ठीसमास एव क्रियते, एवं च क्रियमाणे ' तुण्ढिब् ' इत्यादीनि * आद्यन्तवदेकस्मिन् * इति न्यायनिरपेक्षाणि सिध्यन्ति, पर्णघुडित्यादीनि तु * आद्यन्तवदेकस्मिन् * इति न्यायेन; अन्यच्च–स्ध्वौ प्रत्ययौ धातोरव्यभिचारिणाविति चानुकृष्टत्वेनानयोः साहचर्यात् पदान्त इत्यपि धातोरेवेति धातुरूपावयवस्येति तस्यैव युक्तत्वादिति, रूपशब्दस्तु भ्वाद्यभ्वादिधातुमात्रपरिग्रहार्थः । **सकारादौ** चेति–ध्वस्त्यादिप्रत्ययस्तदेकविभक्तिनिर्दिष्टत्वेन सकारोऽपि स्यादिरेवेति । **तुण्डिभेति**–" तुडुङ् तोडने " अस्य " उदितः स्वराम्नोऽन्तः " [ ४. ४. ९८. ] इति नागमे " किलि-पिलि० " [ उणा० ६०८. ] इति इप्रत्यये–तुण्डिः, साऽस्याऽस्तीति " वलि-वटि-तुण्डेर्भः " [ ७. २. १६. ] इति भः । **न्यघूढ्वमिति**–अद्यतन्या ध्वमि सकि " दुह-दिह० " [ ४. ३. ७४. ] इति तस्य लुकि अटि ढत्वे घत्वे " तवर्गस्य० " [ १. ३. ६०. ] इति धस्य ढत्वे " ढस्तड्ढे " [ १. ३. ४२. ] इति ढलोपे रूपमिदम् । **वर्णविधित्वेनेति**–वर्णे सकाररूपे परतो विधिः । **सिज्लुकि न भवतीति**–ननु सिज्लोपात् पूर्वमेव किमिति नादिचतुर्थत्वम् ? नैवम्–परस्मिन् सिच्लोपरूपे कार्ये विधेये आदिचतुर्थत्वस्याऽसदधिकारविहितत्वेनाऽसत्त्वात्। **प्रत्यय इति किमिति**–ननु * प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव० * इति न्यायेन प्रत्यये एव भविष्यति, किं प्रत्ययग्रहणेन ? सत्यम्–' दद्ध्वः, दद्ध्वहे ' इत्यत्र यदा * उभयोः स्थाने० * इति न्यायेन ' ध्व ' इत्यस्य प्रकृतिप्रत्ययस्थाननिष्पन्नस्य प्रत्ययव्यपदेशः स्यात् तदा आदिचतुर्थत्वं भवेत्, सति तु प्रत्ययग्रहणे न्यायनिरपेक्षो यः प्रत्ययस्तस्मिन्नेव भवति नेतरस्मिन् प्रत्ययग्रहणसामर्थ्यात् ॥२. १. ७७.॥

## धागस्त-थोश्च । २ । १ । ७८ ॥

**त० प्र०**—दधातेश्चतुर्थान्तस्य दकारादेरादेर्दकारस्य त-थयोः स्ध्वोश्च प्रत्यययोः परयोश्चतुर्थो भवति । धत्तः, धत्ते, धत्थः, धत्थ, धत्से, धत्स्व, धद्ध्वे धद्ध्वम्; अत्रासद्विधित्वाद् वचनसामर्थ्याद् वाऽऽतो लोपस्य स्वरादेशत्वेऽपि स्थानिवद्भावो न भवति । गकारः किम् ? धयतेर्मा भूत्, द्धेर्यङ्लुपि- दात्तः, दात्थः, दधातेरपि यङ्लुबन्तस्य मा भूत्, *" तिवा शवाऽनुबन्धेन निर्दिष्टं यद्गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥ " *इति न्यायात्- दात्तः, दात्थः । केचित् तु यङ्लुबन्तस्यापीच्छन्ति- धात्तः, धात्थः, धात्थ । तथो-

श्चेति किम्? दध्वः, दध्मः। चतुर्थान्तस्येत्येव—दधाति, दधासि ॥ ७८ ॥

**श० न्या०—धाग०**। असद्विधौ स्थानिवद्भावप्रतिषेधस्य केषाञ्चिदसम्मतत्वात् तन्मतेऽपि सिध्यत्वित्येतदर्थं 'तथोश्च' इति चकारः स्ध्वोरनुकर्षणार्थ इत्याह- **तथयोः स्ध्वोश्चेति**। **धत्त** इत्यादि- "डुधांग्क् धारणे" अतः 'तस् ते थस् थ से स्व ध्वे ध्वम्' इत्येतेषु "हवः शिति" [४. १. १२.] इति द्वित्वे "ह्रस्वः" [४. १. ३९.] इति ह्रस्वत्वे "द्वितीय-तुर्ययोः पूर्वौ [४. १. ४२.] इति दत्वे "श्नश्चातः" [४. २. ९६.] इत्याकारलोपेऽनेनादेश्चतुर्थत्वे "अघोषे प्रथमोऽशिटः" [१. ३. ५०.] इति प्रथमत्वे "तृतीयस्तृतीय०" [१. ३. ४९.] इति दत्वम्। अथात्राकारलोपस्य स्वरादेशत्वेन "स्वरस्य परे प्राग्विधौ" [७. ४. ११०.] इति स्थानिवद्भावाच्चतुर्थान्तत्वाभावात् कथमादेश्चतुर्थः? इत्यत आह- **अत्रासद्विधित्वादि**त्यादि- असद्विधौ "न सन्धि-ङी-य-क्वि-द्वि-दीर्घासद्विधौ०" [७. ४. १११.] इति प्रतिषेधाच्चतुर्थान्तस्येति विशेषणस्याधिकारापन्नस्यापि सूत्रैकदेशत्वेन वचनत्वात् तत्सामर्थ्याच्च स्थानिवद्भावाभावाच्चतुर्थान्तोऽयमित्यर्थः। "ट्धें पाने", "डुधांग्क् धारणे" वा, अतोऽत्यर्थं पुनः पुनर्धयति दधाति वा "व्यञ्जनादेकस्वराद्०" [३. ४. ९.] इति यङि तस्य "बहुलं लुप्" [३. ४. १४.] इति लुप्, "सन्यङश्च" [४. १. ३.] इति द्विर्वचने ह्रस्वत्वे "द्वितीय-तुर्ययोः०" [४. १. ४२.] इति दत्वे "आगुणावन्यादेः" [४. १. ४८.] इत्यात्वे ततस्तसि थसि च "श्नश्चातः" [४. २. ९६.] इत्याकारलोपे 'धाग' इति वचनादादिचतुर्थत्वाभावात् प्रथमत्वे- **दात्तः, दात्थः**, इति। अमुमेवार्थं पूर्वाचार्योक्तिन द्रढयति- **तिवेत्यादि**। **केचित्त्विति**- देवनन्दी ॥ छ ॥ २. १. ७८. ॥

**न्या० स०— धागः०**। नन्वत्र चकारकरणं किमर्थं? स्ध्वोः पूर्वेणैव सिद्धत्वात्, सत्यम्—यङ्लुपि "क्रियाव्यतिहार०" [३. ३. २३.] इति आत्मनेपदे से 'व्यतिधात्से' इति स्यात्, कृते चकारे 'व्यतिदात्से' इत्येव, न त्वादेश्चतुर्थः * तिवा शवा० * इति न्यायात् ॥ २. १. ७८. ॥

## अधश्चतुर्थात् त-थोर्धः । २ । १ । ७९ ॥

**त० प्र०**—चतुर्थात् परयोस्तकार-थकारयोर्धारूपवर्जिताद् धातोर्विहितयोः स्थाने धकार आदेशो भवति। दोग्धा, दोग्धुम्, अदुग्ध, अदुग्धाः; लेढा, लेढुम्, अलीढ, अलीढाः; बोद्धा, बोद्धुम्, अबुद्ध, अबुद्धाः; लब्धा, लब्धुम्, अलब्ध, अलब्धाः। अध इति किम्? दधातेर्यङ्लुबन्तधयतेश्च मा भूत्- धत्तः, धत्थः, दात्तः, दात्थः। केचित् तु यङ्लुबन्तधयतेरपीच्छन्ति- दाद्धः, दाद्ध। विहितविशेषणं किम्? ज्ञानभुत्त्वम्, अत्र नामविहिते त्वे मा भूत् ॥ ७९ ॥

**श० न्या०—अध०**। पूर्वसूत्रे निमित्तत्वेनोपादानादिह तथोरित्यस्य पुनरुपादानं कार्यित्वार्थमित्याह- **चतुर्थात् परयोस्तकार-थकारयोरि**त्यादि। दुहेस्तृचि दोहनायेति तुमि घत्वे गुणेऽनेन धत्वे तृतीयत्वे- **दोग्धा, दोग्धुम्**, अद्यतन्यास्त-थासोः पूर्ववत् सकौ लुक्, एवं- लिहेः सम्लुक्, एवं- बुधेर्लभेश्च सिचो "धुड्-ह्रस्वाद्०" [४. ३. ७०.] इति लुकि, एषु घत्व-ढत्व-धत्वेषु "तवर्गस्य०" [१. ३. ६०.] इति धस्य ढत्वे "ढस्तड्ढे" [१. ३. ४२.] इति ढलोपे दीर्घत्वादिषु यथासम्भवं कृतेषु- **अदुग्धे**त्यादीनि। धागो **धत्तः, धत्थः**, यङ्लुबन्तधयतेरस्यैव वा तसि थसि पञ्चमीते चानेन धत्वे- **दाद्ध** इत्यादयः। ज्ञानं बुध्यते इति क्विपि ज्ञानबुधो भाव इति त्वे "ग-ड-द-बादेः०" [२. १. ७७.] इत्यादिचतुर्थत्वे धातोर्विहितयोस्तथोरिति विहितविशेषणान्नाम्नो विहितस्य धकारो न भवतीति ॥ छ ॥ २. १. ७९. ॥

**न्या० स०—अधश्चतुर्था०**। पूर्वसूत्रे निमित्तत्वेनोपादानाद् इह त-थोरित्यस्य पुनरुपादानं कार्यित्वार्थम्। **चतुर्थादिति**—ननु "ग-ड-द-बादेः०" [२. १. ७७.] इत्यतश्चतुर्थान्तस्येत्यधिकारोऽनुवर्त्यः, * अर्थवशाद्० * इति पञ्चम्यन्तं कृत्वा रूपाणि साधयिष्यन्ते, किं चतुर्थादित्यनेन? सत्यम्—क्लिष्टा प्रतिपत्तिरियमिति सुखार्थम्। **यङ्लुबन्तधयतेश्चेति**—केवलस्य तु शवा व्यवधानाच्चतुर्थान्तत्वाभावः। **नामविहिते** इति—* क्विबन्ता धातुत्वं न त्यजन्ति * इति न्यायादपि न भवति, 'अधः' इति वर्जनेन पर्युदासाश्रयणाच्छुद्धधातोरेव परिग्रहात् ॥ २. १. ७९. ॥

## नाम्यन्तात् परोक्षा-ऽद्यतन्याशिषो धो ढः । २ । १ । ८० ॥

**त० प्र०**—रेफान्तान्नाम्यन्ताच्च धातोः परासां परोक्षाऽद्यतन्याशिषां विभक्तीनां यो धकारस्तस्य ढकार आदेशो भवति। अतीर्ढ्वम्, तीर्षीढ्वम्, तुष्टुढ्वे, चकृढ्वे, अदिढ्वम्, अधिढ्वम्, अचेढ्वम्, अच्योढ्वम्, अकृढ्वम् चेषीढ्वम्, कृषीढ्वम्। नाम्यन्तादिति किम्? अपग्ध्वम्, पक्षीध्वम्। नाम्यन्तादिति धातोर्विशेषणं किम्? ववसिध्वे, आसिध्वम्, आसिषीध्वम्। परोक्षाद्यतन्याशिष इति किम्? स्तुध्वे, स्तुध्वम्, अस्तुध्वम् ॥ ८० ॥

**श० न्या०—नाम्यन्ता०** । नाम्यन्ताद् धातोरिति परोक्षादीनां विशेषणम्, ताश्च तेन विशेषिता धकारस्य कार्यिण इति दर्शयति- **रेफान्तादि**त्यादि । ननु धकारस्य कार्यभाक्त्वात् परोक्षादिभिश्च विशिष्यमाणत्वात् प्राधान्यम्, परोक्षादीनां तु विपर्ययाद् गुणत्वम्, गुण-प्रधानसन्निधौ च प्रधानस्यैव धकारस्य नाम्यन्तेन धातुना सम्बन्धो न्याय्यः, सत्यम्- किन्तु नाम्यन्तधातुना धकारे विशिष्यमाणे 'चकृढ्वे, अचेढ्वम्' इत्यत्रैव स्यात्, 'चेषीढ्वम्' इत्यादौ न स्यात्, सीशब्देन नामिनो व्यवधानात्, तत्र *येन नाव्यवधानं तेन व्यहितेऽपि* इति यद्यपि सीशब्दव्यवधानेऽपि मूर्धन्यः कर्तुं शक्यते, तथापि वचनसामर्थ्यादर्थप्रतिपत्तौ मन्दधियः प्रतिपत्तिगौरवं स्यात्, स च विशेषणैः परोक्षादिभिस्तु विशिष्यमाणे सर्वत्र सिध्यति, यत्र हि विशेषणसम्बन्धमनुभूय गुणः प्रधानस्य भूयांसमुपकारं कर्तुं समर्थो भवति तत्र विशेषणकृतं तावदुपकारमनुभवति, पश्चात् प्रधानेन सम्बन्धम्, असमर्थस्योपकारकत्वायोगात्, तथोक्तम्—

" गुणः कृताङ्गसंस्कारः, प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि, तथा भूयसि वर्तते ॥ "

अत्र च कृतविशेषणसम्बन्धैरेतैर्धकारस्य विशेषणे 'चेषीढ्वम्' इत्यादावक्लिष्टयैव कल्पनया ढत्वसिद्धिः प्रधानस्य महानुपकार इति । तरतेरद्यतन्या ध्वमि "सो धि वा"[४. ३. ७२.]इति सिचो लुकि "ऋतां क्ङितीर्"[४. ४. ११६.]इतीरादेशे "भ्वादेः०"[२. १. ६३.]इति दीर्घत्वे "अड् धातोः०"[४. ४. २९.] इत्यडागमे- **अतीर्ढ्वम्**, आशिषः सीध्वमि- **तीर्षीढ्वम्** । रेफात् परोक्षाधकारो न सम्भवतीति नोदाहृतः । [**तुष्टुढ्वे, चकृढ्वे**, इति-] "ष्टुंग्क् स्तुतौ", "डुकृंग् करणे" आभ्यां परोक्षाध्वे "इन्ध्यसंयोगाद्०"[४. ३. २१.] इति कित्त्वाद् गुणाभावः । [**अदिढ्वम्**,] ददाति-दधात्योः "इश्च स्था-दः"[४. ३. ४१.]इति इकारः, ध्वमि सर्वत्र "सो धि वा" [४. ३. ७२.] इति सिचो लोपः । [**अचेढ्वम्, अच्योढ्वम्**, इति-] चिनोति-च्यवत्योः "नामिनो गुणः०" [४. ३. १.]इति गुणः । **अकृढ्वम्, कृषीढ्वमि**ति- कित्वाद् गुणाभावः । पचेः "च-जः क-गम्"[२. १. ८६.]इति कत्वे "धुटस्तृतीयः"[१. ३. ४९.]इति गत्वे- **अपग्ध्वम्**, अस्यैव सीध्वमि- **पक्षीध्वम्** । वसेर्क्वसुप्रत्यये "स्कृसृ-वृ-भृ-स्तु०" [४. ४. ८१.]इतीटः प्रत्ययग्रहणेन ग्रहणाद् धातोर्नाम्यन्तत्वाभावात् ढत्वाभावे- **ववसिध्वे** । एवम्- "आसिक् उपवेशने" इत्यस्याद्यतन्या ध्वमि सिचि इटि "सो धि वा" [४. ३. ७२.]इति सिचो लुकि- **आसिध्वम्**, आशिषः सीध्वमि- **आसिषीध्वम्** । स्तौतेर्वर्तमानाया ध्वे पञ्चम्याः ह्यस्तन्योर्ध्वमि च "शिदविद्"[४. ३. २०.]इति ङित्त्वाद् गुणाभावे- **स्तुध्वे**, इत्यादि ॥ छ॥ २. १. ८०. ॥

**न्या० स०—नाम्यन्तात्०** । धातोर्नामीति विशेषणाद् विशेषणेन च तदन्तविधेर्भावात् तदन्तत्वे लब्धे अन्तग्रहणं सुखार्थम् । रान्तादनिटः परोक्षा न संभवति, सेटस्तु 'तत्वरिध्वे' इत्यादिषूत्तरेण विकल्प एव, तथाऽत्र रग्रहणाभावेऽपि नाम्यन्तादित्यत्र विहितत्व्याख्याने क्रियमाणे परत्वात् "ऋतां क्ङितीर्" [४. ४. ११६.] इत्यनेन इरादेशे सत्यपि 'अतीर्ढ्वम्' इत्यादीनि सिध्यन्ति, किन्तु 'अदिढ्वम्, अधिढ्वम्' इत्यादीनि न सिध्यन्तीति रग्रहणमिति । अतीर्ढ्वमित्यत्र "ऋवर्णाद्"[४. ३. ३६.] इति सिचः कित्त्वम्, 'अदिढ्वम्' इत्यादौ "इश्च स्था-दः" [४. ३. ४१.] इत्यनेन इत्वं सिचः कित्त्वं च; इत्वविधानादेव गुणो न भविष्यति, किं कित्त्वेनेति न वाच्यम्, विधानस्य 'अदित' इत्यादौ ह्रस्वद्वारेण सिचो लुपि चरितार्थत्वादिति । अकृढ्वं, कृषीढ्वमित्यनयोः "ऋवर्णात्" [४. ३. ३६.] इत्यनेन सिच्-सीध्वमोः कित्त्वाद् गुणाभावः । **अपग्ध्वमिति**- "सो धि वा" [४. ३. ७२.] इति विकल्पेन सिचो लुप्प्रवृत्तेः पक्षे 'अपग्ड्ढ्वम्' इत्यत्राऽद्यतनीध्वमि सिचि धातुचकारस्य "च-जः क-गम्" [२. १. ८६.] इति कत्वे "नाम्यन्तस्था०" [२. ३. १५.] इत्यनेन सिचः षत्वे "तृतीयस्तृतीय०" [१. ३. ४८.] इति षस्य डत्वे "तवर्गस्य०" [१. ३. ६०.] इति ध्वमो धस्य ढत्वे च सिद्धिः ॥ २. १. ८०. ॥

## हान्तस्थाञ्जीड्भ्यां वा । २ । १ । ८१ ॥

**त० प्र०—हकारादन्तस्थायाश्च पराञ्जेरिटश्च परासां परोक्षाद्यतन्याशिषां संबन्धिनो धकारस्य ढकारो वा भवति । वचनभेदो यथासंख्यनिवृत्त्यर्थः । अग्राहिढ्वम्, अग्राहिध्वम्; ग्राहिषीढ्वम्, ग्राहिषीध्वम्; अनायिढ्वम्, अनायिध्वम्; नायिषीढ्वम्, नायिषीध्वम्; अकारिढ्वम्, अकारिध्वम्; कारिषीढ्वम्, कारिषीध्वम्; अलाविढ्वम्, अलाविध्वम्; लाविषीढ्वम्, लाविषीध्वम्; परोक्षायां ञिर्न संभवतीति नोदाहृतः । इटः-** जगृहिढ्वे, जगृहिध्वे; अग्रहीढ्वम्, अग्रहीध्वम्; ग्रहीषीढ्वम्, ग्रहीषीध्वम्; उपदिदीयिढ्वे, उपदिदीयिध्वे; आयिढ्वम्, आयिध्वम्; अयिषीढ्वम्, अयिषीध्वम्; तत्वरिढ्वे, तत्वरिध्वे; अत्वरिढ्वम्, अत्वरिध्वम्; त्वरिषीढ्वम्, त्वरिषीध्वम्; ववलिढ्वे, ववलिध्वे; अवलिढ्वम्, अवलिध्वम्; संवलिषीढ्वम्, संवलिषीध्वम्; लुलुविढ्वे, लुलुविध्वे; अलविढ्वम्,

अलविध्वम्; लविषीढ्वम् लविषीध्वम्। हान्तस्थादिति किम्? घानिषीध्वम्, आसिषीध्वम् ॥ ८१ ॥

**श० न्या०—हान्त०। हान्तस्थाद्**इति समाहारद्वन्द्वात् पञ्चमी, ञिश्च इट् चेति इतरेतरयोगाद् यथासंख्याभावार्थं पञ्चमीद्विवचनम्। "ग्रहीश् उपादाने", "णींग् प्रापणे", "डुकृंग् करणे", "लूग्श् छेदने" एभ्यः परोक्षायां ञिटोऽसम्भवादद्यतन्याशिषोर्ध्वम्-सीध्वमोः "स्वर-ग्रह-दृश०"[ ३. ४. ६९. ]इति ञिटि "ञ्णिति" [ ४. ३. ५०. ] "नामिनोऽकलि-हलेः"[ ४. ३. ५१. ]इति च वृद्धौ "सो धि वा" [ ४. ३. ७२. ]इति सिचो लुकि अनेन ढत्वे- **अग्राहिढ्वम्,** इत्यादि। ग्रहेः परोक्षायां ध्वे "स्कस्-वृ०" [ ४. ४. ८१.] इति इटि "ग्रह-व्रश्च-भ्रस्ज०" [ ४. १. ८४. ]इति य्वृति द्विर्वचनादावनेन ढत्वेऽस्यैव ध्वम्-सीध्वमोः "गृह्णोऽपरोक्षायाम्" [ ४. ४. ३४. ]इति दीर्घत्वेऽनेन ढत्वे- **जगृहिढ्वे,** इत्यादि। "दीङ्च् क्षये", "अयि गतौ", "ञित्वरिष् सम्भ्रमे", "वलि संवरणे", "लूग्श् छेदने" इत्येतेभ्यो ध्वे-ध्वम्-सीध्वम्सु "स्कस०"[ ४. ४. ८१. ]इति "स्ताद्यशितः०" [ ४. ४. ३१. ]इति च यथासंभवमिटि सिज्लुकि च "अड् धातोः०"[४. ४. २९. ]इत्यडागमे "स्वरादेस्तासु"[ ४. ४. ३१. ]इति वृद्धौ "दीय् दीङः"[ ४. ३. ९३. ]इति दीङो दीयादेशेऽनेन ढत्वे- **उपदिदीयिढ्वे,** इत्यादि। हन्तेरासेश्च सीध्वमि "स्वर-ग्रह-दृश०"[ ३. ४. ६९. ] इति ञिटि "ञि-णवि०"[ ४. ३. १०१. ]इति घनादेशे "ञ्णिति" [ ४. ३. ५० ] इति वृद्धौ च- **घानिषीध्वम्, आसिषीध्वम्।** *एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य*इति न्यायज्ञापनार्थं ञिग्रहणम्। ञिटः स्वतन्त्रत्वाद् इटस्तु प्रत्ययावयवत्वेन प्रत्ययत्वाद् धातोर्नाम्यन्तत्वाभावात् पूर्वेण न प्राप्नोतीत्यप्राप्ते विभाषेयमिति ॥ छ ॥ २. १. ८१. ॥

**न्या० स०—हान्त०।** ञिटः स्वतन्त्रत्वात्, इटस्तु प्रत्ययावयवत्वेन प्रत्ययत्वाद् धातोर्नाम्यन्तत्वाभावे पूर्वेण न प्राप्नोतीत्यप्राप्ते विभाषेयम् ॥ २. १. ८१. ॥

## हो धुट्-पदान्ते। २। १। ८२ ॥

**त० प्र०—**हकारस्य धुटि प्रत्यये परे पदान्ते च ढकारादेशो भवति। लेढा, लेक्ष्यति; वोढा, वक्ष्यति। पदान्ते— मधुलिट्, मधुलिड्भ्याम्, मधुलिड्भिः, मधुलिट्त्वम्, मधुलिड्वत्, मधुलिट्कल्पः। धुट्-पदान्त इति किम्? मधुलिहौ। असत् परं इत्येव- गुडलिण्मान्, अत्र ढत्व-तृतीयत्वयोरसत्त्वात् "मावर्णा०" [ २. १. ९४. ] इत्यादिना मतोर्मो वत्वं न भवति। ऊढमाख्यत्- औजढत्, अत्र ढत्व-धत्वयोरसत्त्वादन्त्यस्वरादिलोपस्य च द्वित्वे स्थानिवद्भावाद्-कारेण सह 'हृत'इति द्विर्वचनम्। केचित् त्वन्त्यस्वरादिलोपस्य स्थानित्वमनिच्छन्तो 'हृति'इति द्वित्वे ऊढमूर्हि वाख्यत्- औजिढदिति मन्यन्ते ॥ ८२ ॥

**श० न्या०—हो धु०।** "वहीं प्रापणे" तृचि अनेन ढत्वे "अधश्चतुर्थाद्०" [ २. १. ७९. ] इति तस्य धत्वे "तवर्गस्य श्चवर्ग०" [ १. ३. ६०. ] इति ढत्वे "सहि-वहेरोच्च०" [ १. ३. ४३. ] इति ढलोपे ओत्वे च- **वोढा।** मधुलिडिव "स्यादेरिवे" [ ७. १. ५२. ] इति वत्- **मधुलिड्वत्,** ईषदपरिसमाप्तो मधुलिट् "अतमबादेः०" [ ७. ३. ११. ] इति कल्पपि- **मधुलिट्कल्पः।** अथ गुडलिड् विद्यतेऽस्य "तदस्यास्त्यस्मिन्०" [ ७. २. १. ] इति मतौ ढत्वे तृतीयत्वे च "मावर्णान्तोपान्त०" [ २. १. ९४. ] इति वकारः कस्मान्न भवतीत्याह- **अथ ढत्व-तृतीयत्वयोरित्यादि। ऊढमाख्यदि**ति- वहेः के "यजादि०" [ ४. १. ७९. ] इति य्वृति हस्य ढत्वे "अधश्चतुर्थाद्०" [ २. १. ७९. ] इति धत्वे "तवर्गस्य०" [ १. ३. ६०. ] इति ढत्वे "ढस्तड्ढे" [ १. ३. ४२. ] इति ढलोपे दीर्घत्वे च- ऊढः, तमाख्यदिति णिचि "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यकारलोपे ङौ ङे ढत्वादीनां परेऽसत्त्वाद् णिकृतस्य स्थानिवत्त्वाद् 'हृत' इति द्वित्वेऽनादिव्यञ्जनलोपे "ग-होर्जः" [ ४. १. ४०. ] इति जत्वे समानस्य लुप्तत्वात् सन्वद्भावाभावे "स्वरादेः०" [ ४. ४. ३१. ] इति वृद्धौ- **औजढत्,** त्र्यन्तस्य च- **औजिढदि**ति, इति जयादित्य-स्थविरप्रभृतयः। **केचित् त्वि**ति- चन्द्रगोमि-देवनन्दिप्रभृतयः, ते हि णेरिष्टवद्भावं विधाय इष्टे त्र्यन्त्यस्वरादिलोपमिच्छन्ति, णौ कृतस्य हि स्थानिवद्भावो न त्विष्टकृतस्येति भावः ॥ छ ॥ २. १. ८२. ॥

**न्या० स०—हो धुट्०। मधुलिहावि**ति—यदा * गतिकारक० * इति न्यायाद् मधुशब्दस्य 'लिह्' इत्यनेनाऽविभक्त्यन्तेन समासस्तदाऽन्तर्वर्तिविभक्त्यभावात् पदत्वप्राप्तिरेव नास्तीति यद्यपि 'लीढः' इति कृत्वा मधुनो लिहाविति विभक्त्यन्तेन समासस्तदापि "कृत्यन्तोऽसखे" [ १. १. २५. ] इति पदत्वाभाव इत्युभयथाप्यपदत्वं 'लिह्' इत्यस्येति। **द्वित्वे स्थानिवत्त्वादि**ति- ननु कथमत्र स्थानित्वम्? अकारेण सह क्तेति (हृतेति) द्विर्वचने कर्तव्ये पूर्वविधित्वाभावात्, सत्यम्–निमित्तापेक्षयापीह प्राग्विधिरिष्यते; यद्वा 'हृत्' इत्यनयोः प्राग्विधित्वमस्त्येव, अवयवयोश्च समुदायोपचा-

राद् ' हृत ' इत्यस्यापि स्वरादेशस्थान्यन्तरस्य प्राग्विधित्वमिति; यदि निमित्तापेक्षया प्राग्विधिरिष्यते, तर्हि नयनमित्यत्र स्वरादेशस्य गुणस्य स्थानित्वेऽयादेशो न प्राप्नोति, सत्यम्–निमित्तापेक्षया प्राग्विधित्वं प्रायिकमिति । **केचित्** त्विति–चन्द्रगोमि–देवनन्द्यादयः ॥ २. १. ८२. ॥

## भ्वादेर्दादेर्घः । २ । १ । ८३ ॥

**त० प्र०**—भ्वादेर्धातोर्यो दकारादिरवयवस्तदवयवस्य **हकारस्य धुटि** प्रत्यये **परे पदान्ते च घकारादेशो भवति**, ढस्यापवादः । दग्धा, दग्धुम्, धक्ष्यति; दोग्धा, दोग्धुम्, धोक्ष्यति; एषु व्यपदेशिवद्भावाद् धातोरवयवस्य दादित्वम्, **अधाक्षीत्** । पदान्ते– अधोग्, गोधुक्, काष्ठधक्, गोधुग्भ्याम्, काष्ठधग्भ्याम्, गोधुक्षु, काष्ठधक्षु । भ्वादेरिति **किम्** ? दामलिहमिच्छति क्यन् क्विप्– दामलिट् , एवं दषद्घुट् । दादेरिति किम् ? सोढा, मधुलिट् । ह इत्येव– अदात् । धुट्-पदान्त इत्येव–गोदुहो, गोदुहः ॥ ८३ ॥

**श० न्या०**—भ्वादेः० । अधोगित्यादिसिद्ध्यर्थं भ्वादेरिति दादेरित्यस्य व्यधिकरणं [ विशेषणम् ], तच्च हकारस्य, एतस्य च धुट् पूर्ववत् पदान्त इति च, अत आह– **भ्वादेरि**त्यादि । ढकारस्य लेढेत्यादौ घत्वानवष्टब्धस्य विषयस्य सद्भावात्, घत्वस्य तु तदतिरिक्तस्य विषयस्याभावात् तदपवादो घत्वमित्यत आह– **ढस्यापवाद** इति– यद्वा परेऽसत्त्वात् ढत्वमनेनापोद्यत इत्यर्थः । " दहं भस्मीकरणे ", " दुहींक् क्षरणे " पूर्ववत् तृजादौ व्यपदेशिवद्भावाद् दादित्वादनेन घत्वे चतुर्थत्व-कत्व-षत्वादिषु च– **अधाक्षीत्** । दुहेर्ह्यस्तन्या दिवो लुकि अडागमे उपान्त्यगुणे घत्वे कत्वे च– **अधोक्** । गां दोग्धि, काष्ठं दहतीति क्विपि सि-भ्याम्-सुप्सु पूर्ववद् यथासम्भवं घत्व-धत्व-कत्वादिषु– **गोधुक्**, इत्यादि । अथ प्रयोगे घकारस्य स्वरूपेणावस्थानाभावाद् " धुटस्तृतीयः " [ २. १. ७६. ] इति गकारेण भाव्यमिति स एवोच्यताम्, नैवम्– घकाराभावे चतुर्थान्तत्वाभावाद् ' अधोक् ' इत्यादौ " ग-ड-द-बादेः० " [ २. १. ७७. ] इत्यादिनाऽऽदेश्चतुर्थो न स्यात्, तदर्थमुपादानम् । **भ्वादेरिति किमि**ति– ननु, किमिति ? अत्र भ्वादेरित्युपादीयते, " भ्वादेर्नामिनः० " [ २. १. ६३. ] इत्यत एव तदनुवृत्तेस्तत एव तत्साध्यार्थसिद्धेः, यथा " ग-ड-द-बादेः० " [ २. १. ७७. ] इत्यत्र; न च " स्नस्-ध्वन्स्-क्वस्सनडुहो दः " [ २. १. ६८. ] " सो रुः " [ २. १. ७२. ] " अहः " [ २. १. ७४. ] " रो लुप्यरि " [ २. १. ७५. ] " धुटस्तृतीयः " [ २. १. ७६. ] " हो धुट्-पदान्ते " [ २. १. ८२. ] इत्यादावनुवर्तनाद् दोष इति वाच्यम्, सम्बद्धस्यानुवर्तनात् स्वसम्बद्धेनैवाकाङ्क्षानिवृत्तेस्तेष्वप्रवृत्तेर्दोषाभावादिति " ग-ड-द-बादेः० " [ २. १. ७७. ] इत्यत्र ' नामिनोर्वोः ' इत्यादीनामाकाङ्क्षाणां निवृत्तेर्भ्वादेरित्यवयवषष्ठ्यन्तस्य गडदबादिना आकाङ्क्षा पूर्यते, एवमन्यत्रापि तदनुवर्तनाद् दादिनेति किमनेनेति ? एवं तर्हि " ग-ड-द-बादेः० " [ २. १. ७७. ] इत्यत्र यथानुवर्तनाद् धातुमात्रं तद् भवति, न तु पठितधात्वर्थम्, अन्यथा ' तुण्डिभ्, गर्दभ् ' इत्याद्यसिद्धेः; न च कुण्डमुम्भतीति कुण्डोबित्यादिव्यावृत्त्यर्थम्, लोके प्रयुज्यमानानां शब्दानामन्वाख्यायकं शास्त्रं तत्तद्व्युत्पादकम्, न चैते क्विबन्ताः प्रयुज्यन्ते इति, एवमन्यत्रापि धातुमात्रपरिग्रहे क्यन्नन्तदामलिडित्यादौ प्रसङ्गः, अस्ति ह्यत्र दादिर्धातुर्हान्तश्चेति, तस्माद् विशिष्टसम्बन्धिप्रतिपत्त्यर्थं भ्वादेरित्युपादीयते, अन्यथा सम्बन्धिमात्रप्रतीतेरत्रापि स्यादिति भावः । यद्येवं भ्वादेर्दादेरित्येतत् समानाधिकरणं विशेषणं भवतु– दकारादेर्धातोरिति, यदाह– चन्द्रः– दामलिडिति भवत्ययं दादिर्न तु भ्वादिः समुदायस्य धातुष्वपाठात्, अतो दादिग्रहणेन तदभक्तत्वादग्रहणादधोगित्यत्रापि घत्वम्, पाठे ह्यसौ दादिरेवेति, सत्यम्– अधोगित्यादौ पाठे दादित्वेऽपि प्रयोगे तददर्शनान्मन्दमतिर्घत्वाभावमाशङ्केत, अनेनैवाशयेन वृत्ताववयवस्येति व्यावृत्तिर्नोपात्तेति । सद्देत्युचि सोढेत्यादौ दादित्वाभावात् घत्वाभावः ॥ छ ॥ २. १. ८३. ॥

**न्या० स०**—भ्वादे० । यदि भ्वादेरित्यस्य दादेरिति समानाधिकरणं विशेषणं भवेत्, तदाऽदुग्धेत्यादयोऽडागमे कृते दादित्वाभावान्न सिध्येयुरिति भ्वादेरित्यस्य दादेरिति व्यधिकरणं विशेषणं व्याख्यातम् । नन्वत्र सर्वेष्वपि प्रयोगेषु घस्य गः क्रियते, ततो ग एव क्रियताम्, किं घकरणेनेति, सत्यम्–गकारे क्रियमाणे चतुर्थान्तत्वाभावादधोगित्यादौ " ग-ड-द-ब० " [ २. १. ७७. ] इत्यादिना चतुर्थत्वं न स्यात् ॥ २. १. ८३. ॥

## मुह-द्रुह-स्नुह-स्निहो वा । २ । १ । ८४ ॥

**त० प्र०**—**एषां संबन्धिनो हकारस्य धुटि प्रत्यये पदान्ते च घकारादेशो वा भवति**, द्रुहः प्राप्तेऽन्येषामप्राप्ते विकल्पः । मुह्– मोग्धा, मोढा; उन्मुक्, उन्मुट्; उन्मुग्भ्याम्, उन्मुड्भ्याम्; द्रुह्– द्रोग्धा, द्रोढा; मित्रध्रुक्, मित्रध्रुट्; मित्रध्रुग्भ्याम्, मित्रध्रुड्भ्याम्; स्नुह्– स्नोग्धा, स्नोढा; उत्स्नुक्, उत्स्नुट्; उत्स्नुग्भ्याम्, उत्स्नुड्भ्याम्; स्निह्– स्नेग्धा, स्नेढा; चेलस्निक्, चेलस्निट्; चेलस्निग्भ्याम्, चेलस्निड्भ्याम् । धुट्-पदान्त इत्येव– उन्मुहौ, उन्मुहः । मुहादेरिति गणनिर्देशात्

कृत्वा धातुपरिगणनं यङ्लुप्यपि विध्यर्थम्– मोमोग्धि, मोमोढि वा, दोद्रोग्धि, दोद्रोढि ॥ ८४ ॥

**श० न्या०—मुह०।** "मुहौच् वैचित्ये", "द्रुहौच् जिघांसायाम्", "ष्णुहौच् उद्गिरणे", "ष्णिहौच् प्रीतौ" द्रुहेः पूर्वेण प्राप्ते इतरेषामप्राप्तेऽनेन घत्वं विधीयते, अत आह– **द्रुहेत्**यादि। एषां "स्तौयशशितः०" [ ४. ४. ३७. ] इति नित्यमिटि प्राप्ते "धूगौदितः" [ ४. ४. ३८. ] इतीडभावपक्षे मोग्धेत्यादीन्युदाहरणानि। मित्राय द्रुह्यति, चेलेन स्निह्यति क्विप्– [ **मित्रध्रुक्, चेलस्निक्** ]। अथ किमेते मुहादयः स्वरूपेणोपादीयन्ते ? मुहादेरित्येवोच्यताम्, न चाधिकानां प्रसङ्गः, तदनन्तरं वृत्करणात्, तद्धि पुषादिपरिसमाप्त्यर्थमपि भविष्यति, उच्यते– गणनिर्देशे *"तिवा शवाऽनुबन्धेन, निर्दिष्टं यद् गणेन च० ।*" इति वचनाद् यङ्लोपे न स्यात्, अत आह– **मुहादेरिती**त्यादि। अथ बोभवीतीत्यादय एव नियता यङ्लुबन्ता लोके प्रयुज्यन्ते, इत्येषां प्रयोगो न भविष्यति, एवं तर्हि स्पष्टार्थः पाठः ॥ छ ॥ २. १. ८४. ॥

**न्या० स०—मुह०।** चेलस्निक् चेलं स्निह्यति–सिञ्चतीत्यर्थः, सेचनार्थत्वं त्वस्य "स्वस्नेहन०" [ ५. ४. ६५. ] इति सूत्रे स्निह्यतेऽनेनेति स्नेहनमुदकादीति दर्शनाद् विज्ञायत इति। ननु किं मुहादयः स्वरूपेणोपादीयन्ते ? मुहादेरित्येवोच्यताम्, न चैवं कृतेऽधिकानां प्रसङ्गस्तदनन्तरं वृत्करणात्, तद्धि पुष्पादिवद् मुहादिपरिसमाप्त्यर्थमपि भविष्यतीत्याह–**मुहादेरि**ति ॥ २. १. ८४. ॥

## नहा-ऽऽहोर्ध-तौ । २ । १ । ८५ ॥

**त० प्र०—नहेर्ब्रूग्स्थानस्याहश्च धातोः संबन्धिनो हकारस्य धुटि प्रत्यये पदान्ते च यथासंख्यं धकार-तकारावादेशौ भवतः। नद्धा, नत्स्यति, उपानत्, परीणत्, उपानद्भ्याम्, उपानत्कल्पः; आह्– आत्थ, आहेर्नियतविषयत्वात् पदान्तता नास्ति। धुट्-पदान्त इत्येव– उपनह्यति, उपानहौ, उपानहः; आह, आहतुः, आहुः। आहेरादेशान्तरकरणम् "अधश्चतुर्थात् त-थोर्धः" [ २. १. ७९. ] इति थकारस्य धत्वनिवृत्त्यर्थम् ॥ ८५ ॥**

**श० न्या०– नहा०।** "ब्रूगः पञ्चानां पञ्चाहश्च" [ ४. २. ११८. ] इति विहित आह् गृह्यते, अन्यस्यासम्भवादत आह– **ब्रूग्स्थानस्ये**ति। "णहींच् बन्धने", "ब्रूंग्क् व्यक्तायां वाचि" एतौ हकारस्य व्यधिकरणं विशेषणम्। कार्य-कार्यिणोरुभयोर्द्वित्वनिर्देशो यथासंख्यार्थः। **नद्धे**त्यादि धुट्युदाहरति। उपनह्यति, परिणह्यति क्वौ "गति-कारकस्य०" [ ३. २. ८५. ]इति दीर्घत्वे "अदुरुपसर्गान्तर०" [ २. ३. ७७. ]इति णत्वे सौ च– **उपानदि**त्यादि पदान्ते उदाहरति। ब्रूगो वर्तमानासिवस्थवादेशेऽनेन हकारस्य तकारे– **आत्थे**ति, नियतविषयत्वादस्य पदान्ते नोदाहृतम्। उपपूर्वान्नहेस्तिवि "दिवादेः०" [ ३. ४. ७२. ]इति श्ये– **उपनह्यति**। ब्रूगस्तिव्-तस्-अन्तीनां स्थाने 'णव् अतुस् उस्' कृतेषु, आहादेशे च– **आहे**त्यादि। नन्वाहेरपि धकारे "अघोषे प्रथमः०" [ १. ३. ५०. ]इति तकारे सति **आत्थे**ति सिद्ध्यतीत्युभयोर्धकार एवोच्यतां किं तकारेण ? नैवम्– धकारे सति थकारस्य धत्वप्रसङ्गः, अत आह– **आहेरि**त्यादि। न च सिवस्थविधानादेव धत्वं न भविष्यति, अन्यथा सिवो धत्वमेव विदध्यादिति वाच्यम्, लाघवार्थं तत स्यात्, अन्यथा "ब्रूगः पञ्चानां०" [ ४. २. ११८. ] इत्यत्र "सिवो धः" इति सूत्रान्तरे कृते गौरवं स्यात्, तस्मात् सूक्तं– **धत्वनिवृत्त्यर्थमि**ति ॥ छ ॥ २. १. ८५. ॥

**न्या० स०—नहाऽऽहो०।** **ब्रूस्थानस्ये**ति– अन्यस्यासंभवात्। **आत्थे**ति– नन्वाहेरपि धकारे "अघोषे प्रथम०" [ १. ३. ५०. ]इति तकारे कृते 'आत्थ' इति सिध्यतीत्युभयोरपि धकार एव क्रियतां, किं तकारकरणेनेत्याह– **आहेरादेशान्तरे**त्यादि– न च सिवस्थविधानादेव धत्वं न भविष्यति, अन्यथा सिवो धत्वमेव विदध्यादिति वाच्यम्, यतो लाघवार्थं तद् भवेत्, अन्यथा "ब्रूगः पञ्चानाम्०" [ ४. २. ११८. ]इत्यत्र "सिवो धः" इति सूत्रान्तरे कृते गौरवं स्यात्, तस्मात् सूक्तं– **धत्वनिवृत्त्यर्थमि**ति ॥ २. १. ८५. ॥

## च-जः क-गम् । २ । १ । ८६ ॥

**त० प्र०—चकार-जकारयोर्धुटि प्रत्यये परे पदान्ते च ककार-गकारावादेशौ भवतः। वक्ता, वक्तुम्, वक्ष्यति, ओदनपक्, त्वक्, वाक्, वाग्भिः, वाक्त्वम्; जः– त्यक्ता, त्यक्तुम्, त्यक्ष्यति, अर्धभाग्, स्वप्नग्, तृष्णक्। धुट्-पदान्त इत्येव– वच्मि, वाचौ, वाचः। प्रत्यय इत्येव– हृच्छति, मज्जति। कथं तच्चक्षुः, तच्चणः, तच्चरति ?, उच्यते– अत्र दस्य परत्वात् तृतीयत्वे पश्चाच्चवर्गत्वे प्रथमत्वम्, ततस्तृतीयस्य "च-जः क-गम्" [ २. १. ८६. ] इति परेऽसत्त्वेन च-जयोरभावात् कत्व-गत्वे न भवतः; अज्झलावित्यत्र तु संज्ञाशब्दत्वान्न भवति ॥ ८६ ॥**

**श० न्या०—च-जः०।** वचेर्ब्रूगो वा तृजादिषु अनेन कत्वे– **वक्ते**त्यादि। पदान्ते दर्शयति– ओदनं पचति– **ओदनपक्**। "त्वचत् संवरणे" अतः क्विपि "तनूयी विस्तारे" अतो "वा तनेर्ङ्वच्" [ उणा० ८७२. ] इति ङ्वचि– **त्वक्**।

जकारस्योदाहरति– "त्यजं हानौ" **त्यक्ता** । "भजीं सेवायाम्" इत्यतोऽर्धं भजति "भजो विण्" [५. १. १४६.] इति विणि– **अर्धभाक्** । "ञिष्वपंक् शये", "ञितृषच् पिपासायाम्" आभ्यां "तृषि-धृषि०" [५. २. ८०.] इति नजिङि– **स्वप्नक्**, **तृष्णक्** । वचेर्मिवि– **वच्मि** । "इषत् इच्छायाम्" तिवि शे "गमिषद्यमश्छः" [४. २. १०६.] इति छत्वे प्रथमे च– **इच्छति** । "टुमस्जोंत् शुद्धौ" "सस्य श-षौ" [१. ३. ६१.] इति शकारस्य "तृतीयस्तृतीय-चतुर्थे" [१. ३. ४९.] इति जकारे– **मज्जति** । तेन वित्त इति तच्छब्दात् "तेन वित्ते चञ्चु-चणौ" [७. १. १७५.] इति चञ्चु-चणयोश्चरतौ च परत्वात् पूर्वं तृतीयत्वे "तवर्गस्य श्चवर्ग०" [१. ३. ६०.] इति जत्वे गत्वम् "अघोषे प्रथमः०" [१. ३. ५०.] इति चत्वे कत्वं कस्मान्न भवति ? नैवम्– परेऽसदिति परे गत्वे कत्वे च पूर्वस्य दकारस्यासत्त्वेन तत्स्थानयोश्च-जयोरप्यभावात् क-गयोरभाव इत्याह– **कथमि**त्यादि । अच हल् च–अज्झलावित्यत्र चकारस्य सत्त्वेऽपि संज्ञाव्याघातप्रसङ्गात् कत्वं न भवति, 'अच्' इति हि पूर्वैः स्वराः संज्ञायन्ते, कत्वे तु समानसंज्ञा स्यादित्याह–**अज्झलावि**त्यादि ॥ छ ॥ २. १. ८६. ॥

---

**न्या० स०—**च-जः० । 'धुट्-पदान्त' इत्यस्य च-जाभ्यां क-गाभ्यां प्रत्येकमभिसंबन्धाद् यथासंख्याभावः, प्रत्येकमभिसंबन्धश्च "प्रागिनात्" [२. १. ४८.] "स्त्यादिर्विभक्तिः" [१. १. १९.] इति सूत्रनिर्दिष्टकत्व-गत्वरूपज्ञापकात्, किञ्च यदि 'धुट्-पदान्त' इत्यनेन सह यथासंख्यमभिप्रेतं स्यात् तदा "ऋत्विग्०" [२. १. ६९.] इत्यधिकारे जग्रहणं कृत्वा गत्वं विदध्यादिति । अथात्र सूत्रे किमर्थमादेशद्वयविधानम् ? यावता कविधानं गविधानं वा क्रियताम्, यथालक्षणं कस्य गत्वे गस्य कत्वे च सर्वसाध्यसिद्धेः, सत्यम्– गाऽभावे लग्नादयः, काऽभावे पकादयो न सिध्येयुरिति क-गग्रहणम् ॥ २. १. ८६. ॥

---

## यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रश्च-परिव्राजः शः षः । २ । १ । ८७ ॥

**त० प्र०—**यजादीनां धातूनां च-जः शकारस्य च धुटि प्रत्यये परे पदान्ते च षकार आदेशो भवति । यज्– यष्टा, यष्टुम्, देवेट्, उपयट्, उपयड्भ्याम्; सृज्– स्रष्टा, स्रष्टुम्, तीर्थसृट्, तीर्थसृड्भ्याम्; मृज्– मार्ष्टा, मार्ष्टुम्, कंसपरिमृट्, कंसपरिमृड्भ्याम्; राज्– सम्राट्, सम्राड्भ्याम्; भ्राज्– विभ्राट्, विभ्राड्भ्याम्; राज-भ्राजोः क्विपेव धुट्, अन्यस्तु इटा व्यवधीयते, राष्टिः, भ्राष्टिः, केचित् तु क्तिं नेच्छन्ति; भ्रस्ज्– भ्रष्टा, भ्रष्टुम्, भर्ष्टा, भर्ष्टुम्, धानाभृड्, धानाभृड्भ्याम्; व्रश्च्– व्रष्टा, व्रष्टुम्, मूलवृट्, मूलवृड्भ्याम्; परिव्राज्– परिव्राड्, परिव्राड्भ्याम्, "दिद्युद्दद्०" [५. २. ८३.] इत्यादिना क्विबन्तस्यैव निपातनाद् धुट्यसंभवान्नोदाहृतम् । शकारान्त– लिश्– लेष्टा, लेष्टुम्, लिट्, लिड्भ्याम्; छादेशोऽपि शकारो गृह्यते–प्रष्टा, प्रष्टुम्, शब्दप्राड्, शब्दप्राड्भ्याम् । राजिसहचरितस्य भ्राजेर्ग्रहणात् "एजृङ् भेजृङ् भ्राजि दीप्तौ" इत्यस्य गत्वमेव– विभ्राक्, विभ्राग्भ्याम्; अत एव भ्राजेरात्मनेपदिनोऽपि "राजृग् टुभ्राजि दीप्तौ" इत्युभयपदिषु पुनः पाठः साहचर्यार्थम् । धुट्-पदान्त इत्येव– देवेजौ, देवेजः, रज्जुसृजौ, कंसपरिमृजौ, सम्राजौ, विभ्राजौ, धानाभृज्जौ, मूलवृश्चौ, परिव्राजौ, शब्दप्राशौ, उच्छैत्– समुशौ । यजादिधातुसाहचर्यात् शकारस्यापि धातोः संबन्धिन एव ग्रहणादिह न भवति– निशाशब्दस्यान्तलोपे "धुटस्तृतीयः" [२. १. ७६.] इति जकारे– निज्भ्याम्, सुपि तु जकारस्य प्रथमत्वे "सस्य श-षौ" [१. ३. ६१.] इति सुपः सकारस्य शत्वे "प्रथमादधुटि शश्छः" [१. ३. ४.] इति छत्वे– निच्छु, जकारस्य तु परे गत्वेऽसत्त्वात् "च-जः क-गम्" [२. १. ८६.] इति गत्वं न भवति । च-ज इत्येव– वृक्षवृश्चमाचष्टे णौ विचि– वृक्षव्, अत्र वकारस्य मा भूत् । कथमसृग्, असृग्भ्याम्, रज्जुसृग्, रज्जुसृग्भ्याम् ?, असृज्-रज्जुसृज्शब्दयोरौणादिकयोर्भविष्यति । कश्चित् तु "अनुनासिके च च्छ्वः शूट्" [४. १. १०८.] इति शत्वविधेरनित्यत्वज्ञापनार्थं छकारस्यापि षत्वमिच्छति, तन्मते– पथिप्राच्छौ, पथिप्राच्छः, शब्दप्राच्छौ शब्दप्राच्छः । "उच्छैत् विवासे" समुच्छौ, समुच्छः ॥ ८७ ॥

---

**श० न्या०—**यज० । यजादीनामिति– "यजीं देवपूजादौ", "सृजंत् विसर्गे", "मृजौक् शुद्धौ", "राजृग् टुभ्राजि दीप्तौ", "भ्रस्जींत् पाके", "ओव्रश्चौत् छेदने", परिपूर्वो "व्रज गतौ" कृतदीर्घः क्विबन्तः, इत्येतेषामित्यर्थः । यजेस्तृजादौ "एकस्वराद्०" [४. ४. ५६.] इतीड्भावेऽनेन षत्वे "तवर्गस्य०" [१. ३. ६०.] इति टत्वे–**यष्टे**त्यादि । पदान्ते– देवेभ्यो देवान् वा यजतीति क्विपि य्वृति– **देवेट्** । [ **स्रष्टे**त्यादि- ] सृजेस्तृजादौ "अः सृजि-दृशि०" [४. ४. ३८.] इति इत्यकारः, तीर्थं सृजति क्विप् । मृजेस्तृजादौ 'धूगौदितः' इतीड्भावे उपान्त्यगुणे "मृजोऽस्य०" [४. ३. ४२.] इति वृद्धौ– **मार्ष्टा**, **मार्ष्टुम्**, कंसं परिमार्ष्टीति क्विप् । [ **सम्राडि-**

त्यादि- ] संराजते, भ्राजते, विभ्राजते क्विप्। **राज-भ्राजोरि**त्यादि– "तेर्ग्रहादिभ्यः" [ ४. ४. ३३. ] इति नियमाद् राज-भ्राजोरग्रहादित्वात् क्ताविड्भाव इत्यर्थः। **[राष्टिः, भ्राष्टि**रिति– ] राजनं भ्राजनं "श्वादिभ्यः" [ ५. ३. ९२. ]इति क्तिः। **केचित् त्विति**– अनयोः क्त्यन्तयोः प्रयोगाभावात् प्रयुक्तानामन्वाख्यानारम्भाद् * यथालक्षणमप्रयुक्ते * इति वचनादप्रयुक्ते लक्षणमेव न प्रयोक्तव्यमित्यभिप्रायः, यदाह–साधारणः क्तिन्नप्यनयोरनभिधानान्न भवति। भ्रस्जेस्तृजादौ– **भ्रष्टा, [भर्ष्टा,]** "भृज्जो भर्ज्" [ ४. ४. ६. ]इति पक्षे भर्जादेशः। धाना भृज्जति क्विप्– **[धानाभृड्]**। एवं व्रश्चेस्तृजादौ "धूगौदितः" [ ४. ४. ३८. ]इति पक्षे इड्भावः– **व्रष्टा, व्रष्टुम्,** मूलं वृश्चतीति क्विप्। परिपूर्वाद् व्रजेः "दिद्युद्दद्जगद्०" [ ५. २. ८३. ]इति क्वौ दीर्घत्वे– **परिव्राट्**। "लिशंत् गतौ" तृजादौ "एकस्वराद्०" [ ४. ४. ५६. ] इतीड्भावे– **लेष्टा, लेष्टुम्,** लिशतीति क्विप्। केचिद् "अनुनासिके च च्छ्वः शूट्" [ ४. १. १०८ ]इति च्छिरत्यनुवर्त्य तृजादौ छत्वमनिच्छन्तोऽत्र सूत्रे छग्रहणं कृत्वा छकारस्य षत्वमिच्छन्ति, अस्माकं तु तृजादावपि षत्वस्येष्टत्वात् तद्द्वारेणैव षत्वसिद्धेरित्याह– **छादेशोऽपी**त्यादि। "प्रछंत् ज्ञीप्सायाम्" "स्वरेभ्यः" [ १. ३. ३०. ]इति द्वित्वे पूर्वस्य "अघोषे०" [ १. ३. ५०. ]इति चत्वेऽनेन षत्वे– **प्रष्टा, प्रष्टुम्,** शब्दं पृच्छतीति "दिद्युद्दद्०" [ ५. २. ८३. ] इति क्विपि दीर्घत्वे–**शब्दप्राट्**। अथ विपूर्वस्य भ्राजेः क्विबन्तस्य गत्वे विभ्रागिति प्रयोगदर्शनात् कथं तत्सिद्धिरित्याह–**राजिसहचरितस्ये**त्यादि। "उछैत् विवासे" क्विपि शत्वे–**समुशौ**। अथ श इति सामान्येनोपादानाद् "मास-निशा-ऽऽसनस्य" [ २. १. १००. ] इत्यन्तलोपे शस्य षत्वं कस्मान्न प्राप्नोति? उच्यते–यजादयो धातवस्तत्साहचर्याच्छकारोऽपि धातोरेवेत्याह–**यजादी**त्यादि। **सुपि त्विति**–"अघोषे प्रथमोऽशिटः" [ १. ३. ५०. ] इति प्रथमत्वे इत्यर्थः। अथ परत्वात् प्रथमं बाधित्वा "च-जः क-गम्" [ २. १. ८६. ] इति जस्य गत्वं कस्मान्न भवतीत्याह–**जकारस्य त्वि**त्यादि–एवं जकारस्य परेऽसत्त्वात् कारणाभावेन कार्याभावस्य सुलभत्वात् तत्स्थानिनश्चकारस्याप्यसत्त्वात् कत्वाप्रवृत्तिरिति। **च-ज इत्येवे**ति–च-ज इत्यधिकारो वकारस्य कत्वादिर्मा भूदित्येतदर्थः। **कथमि**ति–नञ्पूर्वस्य क्विबन्तस्य सृजेः षत्वेन भाव्यम्, कथं गत्वमित्यर्थः। समाधत्ते–**औणादिकस्ये**ति–अस्यत इति न सृज्यत इति वा "ऋधि-प्रथि०" [ उणा० ८७४. ] इति [ बहुवचनादजि ] बाहुलकादेकत्राकारस्य ऋकारेऽन्यत्राकार-जकारयोर्लोपे–**असृक्**। पन्थानं पृच्छति क्विपि शत्वविधेरनित्यत्वाच्छकारान्तादौजसोः– **शब्दप्राच्छावि**त्यादि–तन्मतस्य चाशास्यत्वात् **'कश्चित्'** इत्येकवचनेन निर्देशः ॥ छ ॥ २. १. ८७. ॥

---

**न्या० स०—यज-सृज०। क्विरेव धुडिति–** "तेर्ग्रहादिभ्यः [ ४. ४. ३३. ] इति नियमात् क्तौ इड्भाव इत्यर्थः, ननु यङ्लुबन्तयोरनयोरन्योऽपि तिवादिर्धुट् संभवति, तद् कथं क्विरेव धुडिति, सत्यम्– यङ्लुबन्तयोरनयोर्धातुपारायणिकानामेव मते प्रयोग इष्यते, न वैयाकरणानामिति क्विरेवेत्युक्तम्। **साहचर्यार्थमिति**– न चात्मनेपदानित्यत्वज्ञापनार्थं पुनः पाठ इति वाच्यम्, तदा ह्यात्मनेपदिष्वेव पुनः पठ्येत, नाप्येकस्य ट्वनुबन्धत्वादथुर्भवत्यन्यस्य नेति वाच्यम्, यतः ट्वनुबन्धादपि "असरूप०" [ ५. १. १६. ] इति सूत्राद् उत्सर्गः प्रवर्तिष्यते, तस्मादेकेनापि धातुनाऽर्थाभेदेन प्रयोगद्वयं सिध्यति, परं साहचर्याय द्विः पाठ इति। **कथमसृगिति**– नञ्पूर्वस्य सृजेः क्विबन्तस्य षत्वेन भाव्यम्, तद् कथं गत्वमित्याह– **औणादिकयोरिति**– अस्यत इति न सृज्यत इति वा "ऋधिपृथि०" [ उणा० ८७४. ] इति क्विदजि बाहुलकादेकत्रास्य ऋत्वेऽन्यत्र जकारा-ऽकारयोर्लोपे चाऽसृज्शब्दसिद्धिः। **पथिप्राच्छाविति**– पन्थानं पृच्छतः "दिद्युत्०" [ ५. २. ८३. ] इति क्विप्। धुटि पदान्ते च पूर्वाण्येवोदाहरणानि, व्यावृत्तौ तु विशेषः। स्वमते तु पथिप्राशावित्याद्येव भवति ॥ २. १. ८७. ॥

---

## संयोगस्यादौ स्कोर्लुक् । २ । १ । ८८ ॥

**त० प्र०—**धुटि प्रत्यये पदान्ते च यः संयोगस्तस्यादौ वर्तमानयोः सकार-ककारयोर्लुग् भवति। **ओलस्जैति–लग्नः, लग्नवान्, साधुलक्, साधुलग्भ्याम्; मस्ज्–साधुमक्, साधुमग्भ्याम्; ओव्रश्चौत्–वृक्णः, वृक्णवान्, मूलवृट्, मूलवृड्भ्याम्; भ्रस्ज्–भृष्टः, भृष्टवान्, यवभृट्, यवभृड्भ्याम्; कू–तक्षौ–तष्टः, तष्टवान्, काष्ठतट्, काष्ठतड्भ्याम्, अक्षौ अष्टः, अष्टवान्, तृणाट्, तृणाड्भ्याम् 'तृणाट्कल्पः; चक्षि–आचष्टे।** ननु स्कोर्लुकः परस्मिन्नसत्त्वात् "पदस्य" [ २. १. ८९ ] इति संयोगान्तस्य लोपः स्यात्, नैवम्–स्कोः पदान्ते लुको विधानादसत्त्वाभावः, अन्यथा हि समुदायस्यैव लोपं विदध्यात्। संयोगान्तस्येति किम्? साता, क्रुतम्। आदाविति किम्? शङ्केर्वङ्केश्च यङ्लुपि–शाशङ्क्ति, वावङ्क्ति। स्कोरिति किम्? नर्नर्ति। "अड्ड अभियोगे", "अट्टि हिंसाऽतिक्रमयोः" अनयोः क्विपि उत्तरसूत्रेण डकार-टकारयोर्लुकि दकारस्य च प्रथमत्वे–क्षेत्रप्रात्, गृहप्रात्। अन्ये त्वट्टिं तोपान्त्यं पठन्ति, तन्मते–क्विपि अत्, अद्। अन्यस्त्वदूडतेः

संयोगादेर्दकारस्यापि लोपमिच्छति, तन्मते–अट्, अड्भ्याम्, तथा " अट्ट अतिक्रम-हिंसयोः " इति पठन् संयोगादेष्टकारस्यापि लोपमिच्छति–अट्, अड्भ्याम् । धुट्-पदान्त इत्येव–साधुमज्जौ, काष्टतक्षौ । प्रत्यय इत्येव–पृथक्स्थाता । वास्यर्थं काक्यर्थमित्यत्र तु यत्वस्य बहिरङ्गत्वेनासिद्धत्वात् संयोगादित्वेऽसत्यनेनादेरुत्तरेण चान्तस्य लुग् न भवति । कथं मांसं पिपक्षति क्विप्–मांसपिपक्, वचो विवक्षते–वचोविवक् ?, क्त्वस्य परस्मिल्लोपेऽसत्त्वान्न भवति ॥ ८८ ॥

---

**श० न्या०—संयो०** । संयुज्यन्ते वर्णा वर्णानि वाऽस्मिन्निति " व्यञ्जनाद् घञ् " [ ५. ३. १३२. ] इति घञि संयोगः, स च वैयाकरणसम्प्रदायादनेकव्यञ्जननैरन्तर्यमुच्यत इति, धुटीत्यनेन च संयोगो विशिष्यते, तेन स्कोरिति, सकार-ककारयोरेकविभक्तिनिर्दिष्टयोरपि प्रत्येकं लुका सम्बन्ध उभयोरेकसंयोगादित्वासंभवात् । " ओलस्जैति व्रीडे " अतः क्तक्तवत्वोः " डीयश्व्यैदितः " [ ४. ४. ६१. ] इतीट्प्रतिषेधे आदिसकारलोपे " च-जः क-गम् " [ २. १. ८६. ] इति गत्वे " सूयत्याद्योदितः " [ ४. २. ७०. ] इति क्ततकारस्य नत्वे–**लग्नः, लग्नवान्** । **साधुलग्**, इति–साधु लज्जत इति क्विप् । मस्जेः पूर्ववत् क्विप्–**साधुमक्** । व्रस्चेः क्तादौ " ग्रह-व्रश्च० " [ ४. १. ८४. ] इति य्वृति दन्त्यादेशसामर्थ्यात् " सस्य श-षौ " [ १. ३. ६१. ] इति कृततालव्यस्यापि लोपे चस्य कत्वे ओदित्त्वात् तकारस्य नत्वे "रषृवर्णाद्०" [ २. ३. ६३. ] इति णत्वे च–**वृक्णः, वृक्णवान्**, मूलं वृश्चतीति क्विप् [ -**मूलवृट्** ] । एवं भ्रस्जेर्भृति सलोपे "यज-सृज०" [ २. १. ८७. ] इति षत्वे–**भृष्टः, भृष्टवान्, यवभृट्** । " तक्षौ तनूकरणे " क्तादौ " धूगौदितः " [ ४. ४. ३८. ] इतीट्प्रतिषेधे संयोगादिककारलोपे " तवर्गस्य० " [ १. ३. ६०. ] इति तस्य टत्वे, काष्ठं तक्षतीति क्विपि च–**तष्टः**, इत्यादि । " अक्षौ व्याप्तौ च " इत्यतः–**अष्टः, अष्टवान्**, तृणपूर्वादस्मादेव क्विपि–**तृणाट्**, "अतमबादेः०" [ ७. ३. ११. ] इति कल्पपि–**तृणाट्कल्पः** । आङ्पूर्वात् " चक्षिक् व्यक्तायां वाचि " इत्यतस्तेप्रत्यये–**आचष्टे** । **नन्वि**ति–अयमर्थः–पूर्वं संयोगान्तलोपे सकार-ककारयोः संयोगादित्वाभावात् पश्चाल्लुग् न प्राप्नोतीत्याक्षेपार्थः । परिहरति–**नैवमि**ति–यदि हि पदान्ते संयोगाद्योः सकार-ककारयोर्लोपशास्त्रस्यासत्त्वात् " पदस्य " [ २. १. ८९. ] इति संयोगान्तलोपः स्यात् तदा निर्विषयत्वात् स्कोर्लुग्विधानमनर्थकं स्यात् । अथ स्कोर्लुकि कृते लुग्विधेश्चरितार्थत्वात् कार्यासत्त्वपक्षमाश्रित्य " पदस्य " [ २. १. ८९. ] इति अत्र लोपप्रसङ्गः, न–एवं सति सकार-ककारादिसमुदायस्यैव पदान्तसंयोगे लोपं विदध्यादित्याह–**अन्यथा ही**त्यादि । " षोंच् अन्तकर्मणि " अस्य " आत् संध्यक्षरस्य " [ ४. २. १. ] इत्यात्वे तृचि–**साता** । करोतेः क्ते–**कृतम्** । " शकुङ् शङ्कायाम् ", " वकुङ् कौटिल्ये " " उदितः स्वरान्नोऽन्तः " [ ४. ४. ९८. ] इति नागमे " व्यञ्जनादेरेकस्वराद्० " [ ३. ४. ९. ] इति यङि तस्य " बहुलं लुप् " [ ३. ४. १४. ] इति लुपि " सन्यङश्च " [ ४. १. ३. ] इति द्विर्वचनेऽनादिव्यञ्जनलोपे " आ-गुणौ० " [ ४. १. ४८. ] इत्यात्वे " म्नां धुड्वर्ग्ये० " [ १. ३. ३९. ] इति परवर्गान्त्यत्वे तिव्यादिग्रहणात् संयोगान्तककारलोपाभावे–**शाशङ्क्ति**, इत्यादि । एवं नृत्यतेर्यङ्लुपि–**नर्नर्ति** । [ **क्षेत्रप्राट्, गृहप्राट्,** ] क्षेत्रं प्राड्विति, गृहं प्राट्ते, इत्युभयोर्दीपान्त्ययोः क्विप् । **अन्ये त्वि**ति– भीमसेनादयः । [ **पृथक्स्थाता** ] 'पृथक्' इत्यव्ययपूर्वात् तिष्ठतेस्तृच्, अस्ति ह्यत्र ककारः सकारश्च संयोगादिः, प्रत्ययाभावाल्लोपाभावः । वास्यै इदम्, काक्यै इदम्, इत्यस्त्रपदेन विग्रहे "इवर्णादेः०" [ १. २. २१. ] इत्युभयपदाश्रितस्य यत्वस्यासिद्धत्वादेकपदाश्रितोऽन्तरङ्गः संयोगाद्योः स्कोर्लोपः "पदस्य" [ २. १. ८९. ] इति संयोगान्तलोपश्च न भवतीत्याह–**वास्यर्थमि**त्यादि ] **कथमि**ति–पचेर्वचेश्च सनि " सन्यङश्च " [ ४. १. ३. ] इति द्वित्वेऽनादिव्यञ्जनलोपे " सन्यस्य " [ ४. १. ५९. ] इतीकारे " च-जः क-गम् " [ २. १. ८६. ] इति ककारस्य " संयोगस्यादौ० " [ २. १. ८८. ] इति लोपे प्राप्ते तस्यासत्त्वाल्लोपाभाव इत्यर्थः ॥ छ ॥ २ ॥ १ ॥ ८८ ॥

---

**न्या० स०—संयोग०** । संयुज्यन्ते वर्णा अत्रेति " व्यञ्जनाद्० " [ ५. ३. १३२. ] इति घञि संयोगः, स च वैयाकरणसंप्रदायाद् व्यञ्जननैरन्तर्यमुच्यते, * दन्त्यापदिष्टम् * इति न्यायात् तालव्यशस्य लुग् दर्शितः, दन्त्यस्य तु सस्य 'अवावग्' इत्यत्र " ककुङ् श्वकुङ्० " इति पठितस्य वस्केर्ज्ञेय इति । **समुदायस्यैव लोपं विदध्यादि**ति–कया युक्त्या ? संयोगेति प्रथमं, पदस्येति द्वितीयम्, अन्ते चेति तृतीयं सूत्रं कुर्यात्, तत्राद्यस्यार्थः–धुटि प्रत्यये संयोगादिस्थयोः सकार-ककारयोर्लुग् भवति, द्वितीयस्यार्थः– पदान्ते वर्तमानस्य सकारककारादिसंयोगस्य सकलस्यापि लुक्, तृतीयस्यार्थः–" पदस्य " इत्यतः पदान्त इत्यनुवर्तते, ततः पदान्ते संयोगसम्बन्धिनोऽन्तस्य लुग् भवतीत्यकरणाल्लुकः स्थानित्वं न भवति । **अन्ये तु अत्[ट्]मि**ति–तन्मत-स्वमतयोः " न बदनम्० " [ ४. १. ५. ] इत्यत्र विशेषः, तन्मते–अतिट्टिषते, स्वमते तु–अट्टिटिषत इति ! **पृथक्स्थाते**ति । पृथक्शब्दः कान्तोऽव्ययम्,

न तु “ क्षधि-गृधि० ” [ उणा० ८७४. ] इत्यनेनाजन्तः, तदा “ च-जः० ” [ २. १. ८६. ] इति गत्वस्य परेऽसत्त्वात् तदादेशस्य कत्वस्याप्यसत्त्वे द्वयङ्गविकलता स्यात्। मांसपिपगिति–नन्वत्र “ स्वरस्य० ” [ ७. ४. ११०. ] इति स्थानिवद्भावेन पदान्ते संयोगस्याभावात् ककारलोपो न प्राप्नोति, न चासद्विधौ स्थानित्वनिषेध इति वाच्यम्, अस्कृलुकीति भणनात्, सत्यम्–नञ्निर्दिष्टस्यानित्यत्वेन स्थानित्वाभावात् प्राप्तिर्विद्यते, यथा मधुगित्यत्र ॥ २. १. ८८. ॥

## पदस्य । २ । १ । ८९ ॥

**त० प्र०—पदान्ते वर्तमानस्य संयोगस्य लुगन्तादेशो भवति, स च परे स्यादिविधौ च पूर्वस्मिन्नसन् द्रष्टव्यः। पुमान्, पुम्भ्याम्, पुम्भिः, पुम्भ्यः, पुंसु, पुंवत्, पुंरूप्यः, पुंमयः, पुंजातीयः; एवं–‘ गोमान्, अनड्वान्, महान्, भूयान्, कुर्वन्, श्रेयान् ’ इत्यादौ संयोगान्तलोपस्य परकार्येऽसत्त्वादुत्तरसूत्रेण नलोपो न भवति, स्यादिविधौ चासत्त्वादत्वादिलक्षणो दीर्घो भवति। पदस्येति किम्? स्कन्त्वा, स्यन्त्वा; ‘भवाञ्छ् शेते ’ इत्यादौ तु ञादेशविधानसामर्थ्यान्न भवति ॥ ८९ ॥**

**श० न्या०—पदस्य।** **पदस्येति** स्थानषष्ठ्यन्तं विशेष्यम्, ‘ संयोगस्य ’ इति समानाधिकरणं तद्विशेषणम्, ततश्च “ विशेषणमन्तः ” [ ७. ४. ११३. ] इति संयोगस्यान्तत्वम्, “ षष्ठ्याऽन्त्यस्य ” [ ७. ४. १०६. ] इत्युपस्थानाच्च संयोगान्तस्य पदस्य योऽन्त्योऽवयवस्तस्य लुगित्यर्थः सिद्धो भवतीत्यत आह–**पदान्ते वर्तमानस्य संयोगस्येति**। **पुमानि**त्यादि–‘पुम्स्’ शब्दात् सि-भ्याम्-भिस्-भ्यस्-सुपः, सौ “ पुंसोः पुमन्स् ” [ १. ४. ७३. ] [ इति ‘ पुमन्स् ’ इत्यादेशे ] व्यञ्जनान्तत्वात् सेर्लोपे “ न्समहतोः ” [ १. ४. ८६. ] इति दीर्घत्वम्, “ धुटस्तृतीयः ” [ २. १. ७६. ] इत्येतदपवादस्य “ सो रुः ” [ २. १. ७२. ] इत्येतस्य परस्मिन्नसत्त्वात् परत्वात् “ पदस्य ” [ २. १. ८९. ] इति सर्वत्र सकारलोपः। **[ पुंवत् ]** पुमानिवेति “ स्यादेरिवे ” [ ७. १. ५२. ] इति वत्। **पुंरूप्यः, पुंमय** इति–“ नृ-हेतुभ्यो रूप्य-मयटौ वा ” [ ६. ३. १५६. ] इति रूप्य-मयटौ। **पुंजातीय** इति–“ प्रकारे जातीयर् ” [ ७. २. ७५. ] इति जातीयर्। **एवमि**ति–गावो विद्यन्तेऽस्येति मतौ सौ “ ऋदुदितः ” [ १. ४. ७०. ] इति नागमे–**गोमान्**। “ अनडुहः सौ ” [ १. ४. ७२. ] इति नागमे–**अनड्वान्**। **महानि**ति–“ ऋदुदितः ” [ १. ४. ७०. ] इति नागमः “ न्समहतोः ” [ १. ४. ८६. ] इति दीर्घत्वम्। बहोरीयसौ “ भूर्लुक् चेवर्णस्य ” [ ७. ४. ४१. ] भूभावेवर्णलुकोः–**भूयान्**। करोतेः शतरि–**कुर्वन्**। प्रशस्यशब्दस्येयसौ “ प्रशस्यस्य श्रः ” [ ७. ४. ३४. ] इति श्रादेशे–**श्रेयान्**। अथ पुमानित्यादौ “ पदस्य ” [ २. १. ८९. ] इति संयोगान्तलोपे “ नाम्नो नोऽनह्नः ” [ २. १. ९१. ] इति नकारलोपः कस्मान्न भवतीत्याह–**संयोगान्तलोपस्ये**त्यादि। **स्यादिविधौ चेति**–गोमानित्यादौ “ पदस्य ” [ २. १. ८९. ] इति संयोगान्तलोपस्येति शेषः। **[ स्कन्त्वा, स्यन्त्वा, ]** “ स्कन्दृं गति-शोषणयोः ” “ स्यन्दौङ् स्रवणे ” “ प्राक्काले ” [ ५. ४. ४७. ] इति क्त्वा, “ एकस्वराद्० ” [ ६. २. ४८. ] इति “ धुगौदितः ” [ ४. ४. ३८. ] इति चेडभावः, अत्र पदान्ते संयोगान्तस्य लुक् भवतीत्युच्यमानेऽपि संयोगान्तस्य पदस्यैव लोप इत्यर्थस्य सिद्धत्वात् “ पदस्य ” इति वचनं पदान्तसम्बद्धधुड्निवृत्त्यर्थमित्यर्थः। अत्र ‘ भवाञ्छ् शेते ’ इत्यत्र नकारस्य ञादेशे संयोगान्तलोपः कस्मान्न भवतीत्याह–**भवाञ्छ् शेते** इत्यादि–अन्यथा प्रक्रियालाघवार्थं ञकारमेव विदध्यादित्यर्थः ॥ छ ॥ २. १. ८९. ॥

**न्या० स०—पदस्य।** **पदान्ते वर्तमानस्येति**– पदस्य विशेष्यस्य “ विशेषणमन्तः ” [ ७. ४. ११३. ] इति परिभाषया संयोगान्तस्येति स्थिते पदान्ते वर्तमानस्येति व्याख्यातम्, **अत्र** पदान्ते संयोगस्य लुग् भवतीत्युच्यमानेऽपि संयोगान्तस्य पदस्यैव लोप इत्यर्थस्य सिद्धत्वात् पदस्येति वचनं पदान्तसम्बद्धधुट्निवृत्त्यर्थम्, तेन स्कन्त्वेत्यादौ धुडादौ लुक् न भवति। **भूयानिति** अपदसंज्ञकेऽपि तद्धिते “ अस्वयंभुवोऽव् ” [ ७. ४. ७०. ] न, “ भूर्लुक् च० ” [ ७. ४. ४१. ] इत्यत्र ककारप्रश्लेषात्, न च भूविधानादेव न भविष्यतीति वाच्यम्, विधानं भूमेत्यत्र पदसंज्ञके चरितार्थम्। **सामर्थ्यान्न भवतीति**–अन्यथा प्रक्रियालाघवार्थं ञकारमेव विदध्यादित्यर्थः ॥ २. १. ८९ ॥

## रात् सः । २ । १ । ९० ॥

**त० प्र०—पदान्ते वर्तमानस्य संयोगस्य सम्बन्धिनो रेफात् परस्य सकारस्यैव लुग् भवति। चिकीः, चिकीर्भ्याम्, चिकीर्षु; अत्र चिकीर्षतीति क्विपि “ अतः ” [ ४. ३. ८२. ] इत्यकारलोपे षत्वस्य परेऽसत्त्वात् सकारस्यैव लोपः; एवं–जिहीः, जिहीर्भ्याम्, जिहीर्षु; कटचिकीः, पटजिहीः। पूर्वेणैव सिद्धे नियमार्थं वचनम्, तेन रात् परस्य संयोगान्तस्य सस्यैव लोपो नान्यस्य–ऊर्क्, ऊर्भ्याम्, न्यमार्ट्; गृधेः स्पर्धेश्च यङ्लुपि द्वित्वे “ रिरौ च लुपि ” [ ४. १. ५६. ]**

इति पूर्वस्य रागमे " आगुणावन्यादेः " [ ४. १. ४८. ] इति दीर्घत्वे च ह्यस्तन्याः सिवि आदेश्चतुर्थत्वे " लघोरुपान्त्यस्य " [ ४. ३. ४. ] इति गुणे " सेः स्द्धां च रुर्वा " [ ४. ३. ७९. ] इति सिव्लुकि धकारस्य च रुत्वे " रो रे लुग् दीर्घश्चादिदुतः " [ १. ३. ४१. ] इति रलोपे पूर्वस्य दीर्घत्वे अडागमे च सिद्धम्–अजर्धाः, अपास्पाः । रादेव सस्येति तु विपरीतनियमो न भवति–" पुंवत् कर्मधारये " [ ३. २. ५७. ] इत्यत्र पुंवदिति निर्देशात् ॥ ९० ॥

**श० न्या०–रात् सः** । ' संयोगस्य ' इति ' रात् ' इत्यस्य विशेषणम्, तत्तु ' सः ' इत्यस्य षष्ठ्यन्तस्येत्याह–**संयोगस्य सम्बन्धिनो रेफादि**त्यादि, अत्र संयोगशब्देन पूर्वव्याख्यानानुसारेण संयोगान्तं पदमुच्यते, तेनायमर्थ[ः–**पदान्ते वर्तमानस्ये**ति । करोतेः सनि " स्वरहन० " [ ४. १. १०४. ] इति दीर्घ ]त्वे " ऋतां क्ङिति० " [ ४. ४. ११६. ] इतीरादेशे " सन्यङश्च " [ ४. १. ३. ] इति द्विर्वचनेऽनादिव्यञ्जनलोपे " कङश्चञ् " [ ४. १. ४६. ] इति चत्वे क्विपि अकारलोपेऽनेन सकारलोपे–**चिकीरि**त्यादि, अथात्र रेफात् परत्वात् पदान्ते कृतस्य सस्य षत्वेन भवितव्यम्, कथं लोप इत्याह–**अत्रे**त्यादि । **एवमि**ति–हरतेः पूर्ववत् सन्नादौ **जिहीरि**त्यादि । पदान्ते वर्तमानस्य संयोगस्य सम्बन्धिनो रेफात् परस्य सकारस्य " पदस्य " [ २. १. ८९. ] इत्यनेनैव लोपे सिद्धौ नियमार्थमिदमित्याह–**पूर्वेणैवे**त्यादि । **तेने**ति–अनेन नियममेव दर्शयति । [ ऊर्क् ] " ऊर्जण् बल-प्राणनयोः " चुरादित्वाण्णिचि क्विपि णिलोपे पदत्वे ' रात् सस्यैव ' इति नियमात् " पदस्य " [ २. १. ८९. ] इति जकारलोपो न भवति । निपूर्वात् " मृजौक् शुद्धौ " अतो ह्यस्तन्या दिवि उपान्त्यगुणे " मृजोऽस्य० " [ ४. ३. ४२. ] इति वृद्धौ दिलोपे " अड् धातोः० " [ ४. ४. २९. ] इत्यडागमे " यजसृज० " [ २. १. ८७. ] इति षत्वे तृतीयत्वे प्रथमत्वे च–**न्यमार्ट्** । " गृधूच् अभिकाङ्क्षायाम् " **अजघाः** । " स्पर्धि संघर्षे "–**अपास्पाः । रादेव सस्येति त्वि**ति–" पुंवत् कर्मधारये " [ ३. २. ५७. ] इत्यत्र ' पुंवत् ' इति कृतसंयोगान्तसकारलोपस्य ' पुम्स् 'शब्दस्य पाठाद् विपरीतनियमो न भवति, अत्र हि संयोगान्तसकारलोपो न स्यात् । यद्येवं बिभर्तेर्जागर्तेश्च ह्यस्तन्या दिवि " ह्वः शिति " [ ४. १. १२. ] इति भृगो द्वित्वे " ऋतोऽत् " [ ४. १. ३८. ] इत्यत्वे " पृ-भृ-मा० " [ ४. १. ५८. ] इतीत्वे " द्वितीयतुर्ययोः० " [ ४. १. ४२. ] इति बत्वे गुणे नियमाल्लोपो न प्राप्नोति, नैष दोषः–प्रकरणात् पूर्वसूत्रविहितस्यैवायं नियमः, न " व्यञ्जनाद् देः० " [ ४. ३. ७८. ] इत्युत्तरसूत्रविहितस्य; यद्वा " रात् त्सः " इति द्वितकारनिर्देशात् । नन्वेवं तर्हि कीर्तयतेरप्रत्यये ' कीः ' इति प्राप्नोति, ' कीर्त् ' इति चेष्यते, अत्र भाष्यम्– * यथालक्षणमप्रयुक्ते * लोके प्रयुक्तानामिदमन्वाख्यानमित्यप्रयुक्ते लक्षणानामप्रवृत्तिलक्षणमित्यर्थः, तत्रास्य प्रयोगाभावान्न दोष इति ॥ छ ॥ २. १. ९०. ॥

**न्या० स०–रात्सः । रात् परस्य सस्यैवे**ति–यद्येवम् ' अबिभः, अजागः ' इत्यादौ बिभर्तेर्जागर्तेश्च ह्यस्तन्या दिवि " ह्वः० " [ ४. १. १२. ] इति द्वित्वे अत्वे " पृभृ० " [ ४. १. ५८. ] इतीत्वे " द्वितीय० " [ ४. १. ४२. ] इति बत्वे गुणे च नियमाल्लोपो न प्राप्नोतीति, नैवम्–प्रकरणात् पूर्वसूत्रविहितस्यैवायं नियमो न " व्यञ्जनाद्देः० [ ४. ३. ७८. ] इत्युत्तरसूत्रविहितस्य; यद्वा सूत्रे द्वितकारनिर्देशो ज्ञातव्यः, द्वितकारनिर्देशेऽपि न कोऽप्युच्चारणकृतो भेदोऽस्ति, ततश्च रात् परस्य तकारसकारस्यैव लुग् नान्यस्येति सूत्रार्थः समर्जनि; यद्येवं तर्हि कीर्तयतेः क्विपि कीरिति प्राप्नोति, अत्र भाष्यं–लोके प्रयुक्तानामिदमन्वाख्यानं, लोके च ' कीर्त् ' इत्येव दृश्यते, न कीरिति । **अजघा** इति– नन्वत्र " सेः स्द्धाम्० " [ ४. ३. ७९. ] इति सेर्लुकि रुत्वे च कर्तव्ये " ग-ड-द-बा० " [ २. १. ७७. ] इति घत्वस्यासत्त्वात् कृते रुत्वे चतुर्थान्तत्वाभावात् कथं घकारः ? सत्यम् * असिद्धं बहिरङ्गम्० * इति भविष्यति, अन्वित्यधिकाराच्च " रो रे लुग्० " [ १. ३. ४१. ] इति न पूर्वं लुगिति प्राप्तिः ॥ २. १. ९० ॥

## नाम्नो नोऽनह्नः । २ । १ । ९१ ॥

**त० प्र०–पदान्ते वर्तमानस्य नाम्नो नकरस्य लुग् भवति, अनह्नः–स चेदहन्शब्दसम्बन्धी न भवति, स चासन् स्यादिविधौ; पर इति निवृत्तम् । राजा, वृत्रहा, दण्डी, वाग्मी, राजपुरुषः, राजकाम्यति, राजकल्पः । स्यादिविधावसत्त्वाद् ' राजभ्याम्, राजभिः, राजसु ' इत्यादौ दीर्घत्वैस्त्वैत्वान्यकारान्तत्वाभावान्न भवन्ति । अनह्न इति किम् ? अहरेति, अहरधीते, अहोरूपम्, दीर्घाहा निदाघः; अत्र परविधौ रेफ-रुत्वयोरसत्त्वान्नलोपः स्यात्, सावकाशं च तदुभयं संबोधने–हे अहः ! हे दीर्घाहः !। पदस्येत्येव–राजानौ । स्यादिविधावित्येव–राजायते, चर्मायते, अत्र क्यविधौ सत्त्वात् " दीर्घश्च्वियङ्यक्क्येषु च " [ ४. ३. १०८. ] इति क्येऽन्त्याकारदीर्घः सिद्धः । नाम्न इति किम् ? अहन्नहितम्, कुर्वीरन्, सर्वस्मिन्; वृक्षान् । वृत्रहभ्याम्, वृत्रहभिरित्यत्र तु * असिद्धं**

**बहिरङ्गमन्तरङ्गे * इति नलोपस्यासिद्धत्वात् “ ह्रस्वस्य तः पित्कृति ” [ ४. ४. ११४. ] इति तोऽन्तो न भवति ॥ ९१ ॥**

**श० न्या०—नाम्नो०। ‘नाम्नः’** इत्यवयवषष्ठ्यन्तं **‘नः’** इत्यस्य विशेषणम्, नाम्नोऽवयवस्य नकारस्येत्यर्थः, ‘पदान्ते’ इति चानुवर्तमानं विषयतया तस्यैव विशेषणमत आह–**पदान्त** इत्यादि। **पर इति त्वि**ति– * इष्टतो ह्यधिकाराणां प्रवृत्ति-निवृत्ती * इति न्यायात्। **राजे**ति–सेर्व्यञ्जनालोपे दीर्घत्वे सिलुकः स्थानिवद्भावे “ तदन्तं० ” [ १. १. २०. ] इति पदत्वेऽनेन लोपः। “ ब्रह्म-भ्रूण-वृत्रात्० ” [ ५. १. १६१. ] [ इति ] क्विपि–**वृत्रहा**। [ **राजपुरुष** इत्यादि– ] ‘ राज्ञः पुरुषः, राजानमिच्छति, ईषदपरिसमाप्तो राजा ’ इत्यादिवाक्येऽन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वम्। **स्यादिविधावि**ति–राजभ्यामित्यादौ “ नाम सिदय्व्यञ्जने ” [ १. १. २१. ] इति पदत्वान्नलोपे स्यादिविधौ तस्यासत्त्वादकारान्तत्वाभावाद् “ अत आः स्यादौ० ” [ १. ४. १. ] इति “ भिस ऐस् ” [ १. ४. २. ] इति “ एद् बहुस्भोसि ” [ १. ४. ४. ] चेति दीर्घत्वादीनि न भवन्तीति। **अहरेती**त्यादि–“ अनतः० ” [ १. ४. ५९. ] इत्यमो लुप्, प्रशस्तमहरिति “ त्यादेश्च० ” [ ७. ३. १०. ] इति रूपप्, दीर्घाण्यहानि अस्मिन्निति बहुव्रीहिः। नन्वत्र “ रो लुप्यरि ” [ २. १. ७५. ] इति “ अह्नः ” [ २. १. ७४. ] इति च विशेषविहितत्वेनापवादत्वान्नलोपमपोद्य रेफ-रुत्वे भविष्यतः, किमनह इति प्रतिषेधेन ? उच्यते–रेफ-रुत्वयोः परेऽसत्त्वान्नलोपः स्यादित्याह–**अत्र रेफ-रुत्वयोरि**त्यादि। न चैवं सति रेफ-रुत्वयोरनवकाशत्वमिति वाच्यम्, हे अहः ! हे दीर्घाहः ! इत्यादौ सम्बोधने तयोः सावकाशत्वादित्याह–**सावकाशं चे**त्यादि। **‘राजानौ’** इत्यत्रौकारान्तं पदं, न नकारान्तमिति नलुग् न भवति। **स्यादिविधावित्येवे**ति–राजेवाचरतीत्यादिवाक्ये क्यङि नलोपेऽस्यादिविधित्वेन नलोपस्यासत्त्वाभावात् स्वरान्तत्वाद् “ दीर्घश्चियङ्० ” [ ४. ३. १०. ] इति दीर्घत्वे–**राजायते, चर्मायते,** इति सिद्धमित्याह–**अत्र क्यविधावि**त्यादि। हन्तेर्ह्यस्तन्या दिवो लोपेऽडागमे–**अहन्**। करोतेः सप्तम्या ईरनि “ कृगतनादे० ” [ ३. ४. ८३. ] इत्युप्रत्यये “ नामिन० ” [ ४. ३. १. ] इति गुणे “ अतः शित्युत् ” [ ४. २. ८९. ] इत्युत्वे वत्वे–**कुर्वीरन्**। “ ङेः स्मिन् ” [ १. ४. ८. ] इति **सर्वस्मिन्**। **वृक्षानि**ति–“ शसोऽता सश्च नः पुंसि ” [ १. ४. ४९. ], अत्र नाम्न इति विशेषणाद् धातोर्विभक्तेश्चानाम्नो नकारस्य लोपो न भवति। ननु वृत्रहभ्यामित्यादावस्यादिविधित्वान्नलोपस्यासत्त्वाभावाद्–“ ह्रस्वस्य तः० ” [ ४. ४. ११३. ] इति तोऽन्तः कस्मान्न भवतीत्याह–**वृत्रहभ्यामि**त्यादि– धातुमात्राश्रितत्वेन तोऽन्तोऽन्तरङ्गो बाह्यस्याद्यपेक्षणान्नलोपो बहिरङ्गः ॥ छ ॥ २. १. ९१. ॥

**न्या० स०—नाम्नो०।** नन्वत्र विशेषविधानात् “ रो लुप्यरि ” [ २. १. ७५. ] इति “ अह्नः ” [ २. १. ७४. ] इति च रेफ-रुत्वे एव भविष्यतः, किमहन्प्रतिषेधेन ? इत्याह–**असत्त्वादिति**। न चैवं तयोरनवकाशतेत्याह–**सावकाशमिति तदुभयमि**ति रेफ-रुत्वलक्षणम्। **सम्बोधन** इति–“नामन्त्र्ये ” [ २. १. ९२. ] इति नलोपप्रतिषेधात्। **अहन्नहितमि**ति–* लक्षण-प्रतिपदोक्तयोः० * इति प्रतिपदोक्तस्यैवाहन्शब्दस्य निषेध इत्यत्र प्राप्तिः; परं नाम्न इति व्यावृत्त्या निषिध्यते। **वृत्रहभ्यामि**ति–धातुमात्राश्रितत्वेन तोऽन्तोऽन्तरङ्गो बाह्यस्याद्यपेक्षणान्नलोपो बहिरङ्गः ॥ ९१ ॥

## नामन्त्र्ये । २ । १ । ९२ ॥

**त० प्र०—आमन्त्र्येऽर्थे वर्तमानस्य नाम्नः सम्बन्धिनो नकारस्य लुग् न भवति। हे राजन् !, हे तक्षन् !, हे सीमन् !, हे बहुराजन् !; एतदेव प्रतिषेधवचनं ज्ञापकम्–सिलुकः स्थानिवद्भावेन “ अधातुविभक्ति० ” [ १. १. २७. ] इति नामसंज्ञाप्रतिषेधो न भवतीति। ‘ हे राजवृन्दारक ! ’ इत्यत्र समुदायार्थे आमन्त्र्यो नावयवार्थ इति नलोपप्रतिषेधो न भवति, अवयवार्थस्य त्वामन्त्र्यत्वेऽसामर्थ्यात् समास एव न स्यात् ॥ ९२ ॥**

**श० न्या०—नाम०। ‘ आमन्त्र्ये ’** इति विषयतया नाम्नो विशेषणमित्याह–**आमन्त्र्येऽर्थे वर्तमानस्ये**त्यादि। पूर्वेण प्राप्ते प्रतिषेधार्थमिदम्। **हे राजन्नि**त्यादि–अत्र सेर्लोपः। अथ हे राजन्नित्यादौ सिलुकः स्थानिवद्भावेन “ अधातुविभक्ति० ” [ १. १. २७. ] इति नामसंज्ञाप्रतिषेधे पूर्वेण लोप एव न प्राप्नोति, कथमनेन प्रतिषिध्यत इत्याह–**एतदेवे**त्यादि–अन्यथा प्राप्तिपूर्वकत्वात् प्रतिषेधस्य पूर्वेणाप्राप्ताविदमनर्थकं स्यादित्यर्थः। नन्वामन्त्र्ये नलोपप्रतिषेधात् ‘ राजन् वृन्दारक ’ इत्यामन्त्र्यार्थयोः “ वृन्दारकनागकुञ्जरैः ” [ ३. १. १०८. ] इति समासे ‘ राजन्वृन्दारक ! ’ इति [ भाव्यम् ], नैष दोषः–यदि पूर्वपदार्थोत्तरपदार्थसम्बोधनपूर्वकं समुदायार्थसम्बोधनं प्रतीयेत तदा स्यादामन्त्र्यार्थयोर्विशेषणसमासः, न चैवम्, पूर्वपदार्थावच्छिन्नो योऽसावुत्तरपदार्थः समासेनाभिधीयते तस्यैव सम्बोध्यमानताऽवगम्यते, इति नामार्थप्रथमान्तयोरेव समासे कृते समुदायात् सम्बोधनविभक्तेरुत्पन्नायाः “ अदेतः स्यमोर्लुक् ” [ १. ४. ४४. ] इति लुकि **‘ हे राजवृन्दारक ! ’** इति प्रयोग उपपन्नो

भवति, वाक्ये हि एकार्थीभावाभावादवयवार्थसम्बोधनं गम्यते, समासे तु तद्विपर्ययात् समुदायार्थसम्बोधनमिति वाक्य-समासयोर्भिन्नार्थत्वात् सामर्थ्याभावात् समासाभावः स्यात्, तथा चोक्तम्–' विग्रहवाक्यार्थाभिधाने यः समर्थः स समर्थो वेदितव्यः ' इत्याह–**अत्र त्वित्यादि**। अत्रामन्त्र्य इति सामान्याभिधानेऽपि औ-जसोर्नकारस्य पदान्तत्वाभावाद् द्रव्यस्यैव सम्बोधनार्हत्वात् संख्यायाश्चासत्त्वरूपत्वात् परिशिष्टः सिरेव लभ्यते, संख्येयेऽपि वर्तमानायाः संख्याया आमन्त्रणादर्शनाद्, दर्शने तु ' आमन्त्र्ये ' इत्येकवचनस्य विवक्षितत्वात् [ द्विवचनबहुवचनयोर्न लोपाभावः ] ॥ छ ॥ २. १. ९२. ॥

**न्या० स०—नामन्त्र्ये**। ' आमन्त्र्ये ' इत्येकवचनात् ' पञ्च, सप्त ' इत्यादीनां नलोपनिषेधो न भवतीति चन्द्रगोमीयमतम्। अन्ये त्वेतेषामामन्त्रणमपि नेच्छन्ति, अमुमेवार्थं न्यासकारः स्पष्टयति– अत्रामन्त्र्य इति सामान्याभिधानेऽपि औ-जसोर्नकारस्य पदान्तत्वाभावाद् द्रव्यस्यैव सम्बोधनार्हत्वात् संख्यायाश्चाऽसत्त्वरूपत्वात् परिशिष्टः सिरेव लभ्यते, संख्येयेऽपि वर्तमानायाः संख्याया आमन्त्रणादर्शनात्, दर्शने तु ' आमन्त्र्ये ' इत्येकत्वस्य विवक्षित्वाद् द्विवचन-बहुवचनयोर्न लोपाभावः; ' आमन्त्र्ये ' इत्येकवचनाद् यत्रैक एवामन्त्र्यस्तत्रैवानेन लोपनिषेधो यत्र बहवस्तत्र न, यथा ' हे पञ्च पुरुषाः ' इत्यादौ। ननु हे राजन्नित्यादौ सिलुकः स्थानिवद्भावेन " अधातुविभक्ति० " [ १. १. २७. ] इत्यनेन नामत्वाभावे पूर्वेण प्राप्तिरेव न, किं प्रतिषेधेन ? इत्याह– **एतदेवेति**। न च वाच्यं सिलुकः स्थानिवत्त्वेन " नाम सिद्० " [ १. १. २१. ] इति पदत्वं प्राप्नोति, तस्मिंश्च सति नलुक् भविष्यतीति, यतः " स्थानीवाऽवर्णविधौ " [ ७. ४. १०९. ], अत्र तु व्यञ्जनलक्षणो वर्णविधिरिति स्थानित्वं न प्रवर्तत इति ॥ २. १. ९२ ॥

## क्लीबे वा । २ । १ । ९३ ॥

**त० प्र०—आमन्त्र्यविषयस्य नाम्नः क्लीबे– नपुंसकलिङ्गे वर्तमानस्य नस्य लुग् वा भवति। हे चर्म !, हे चर्मन् !; हे दाम !, हे दामन् ! ॥ ९३ ॥**

**श० न्या०—क्लीबे०**। ' आमन्त्र्ये ' इति ' क्लीबे ' इति च नाम्नो व्यधिकरणे विशेषणे, तच्चावयवषष्ठ्यन्तं नकारस्येत्याह–**आमन्त्र्यविषयस्येत्यादि**। " नाम्नो नः० " [ २. १. ९१. ] इति प्राप्तस्य " नामन्त्र्ये " [ २. १. ९२. ] इति प्रतिषिद्धस्य नलोपस्य पक्षे प्रतिप्रसवार्थो योगः। चरेर्मनि– **हे चर्म !** ॥ छ ॥ २. १. ९३. ॥

**न्या० स०—क्लीबे**। [ नेह व्याख्या दृश्यते ] ॥ २. १. ९३ ॥

## मा-ऽवर्णान्तोपान्ता-ऽपञ्चमवर्गान्मतोर्मो वः । २ । १ । ९४ ॥

**त० प्र०—मश्चावर्णश्च मावर्णौ, तौ प्रत्येकमन्तोपान्तौ यस्य तस्मात्–मकारान्तान्मकारोपान्ताच्चावर्णान्तादवर्णोपान्ताच्च, पञ्चमरहितवर्गान्ताच्च नाम्नः परस्य मतोर्मकारस्य वकार आदेशो भवति। मकरान्तात्– किंवान्, इदंवान्, शंवान्- मकारोपान्तात्– शमीवान्, लक्ष्मीवान्, दाडिमीवान्; अवर्णान्तात्– वृक्षवान्, प्लक्षवान्, खट्वावान्, मालावान्; अवर्णोपान्तात्– अहर्वान्, सुगण्वान्, पयस्वान्, दृषद्वान्, वार्वान्, भास्वान्; अपञ्चमवर्गात्– मरुत्वान्, विद्युत्वान्, उदश्वित्वान्, तडित्वान्, समिद्वान्। मा-ऽवर्णान्तोपान्ता-ऽपञ्चमवर्गादिति किम् ? अग्निमान्, वायुमान्, पितृमान्, नृमान्। नृमतोरपत्यं नार्मत इत्यत्र तु वृद्धे बहिरङ्गलक्षणत्वान्न भवति ॥ ९४ ॥**

**श० न्या०—माव०**। अन्तोपान्तशब्दौ यथासंख्यनिवृत्त्यर्थं माऽवर्गाभ्यां प्रत्येकमभिसम्बध्येते इत्याह–**तौ प्रत्येकमित्यादि**– यदि चान्तोपान्ताभ्यां मावर्णयोर्यथासंख्यमभिसम्बन्धः स्यात् तदा मन्तत्वाभावादूर्म्यादीनां प्राप्तिरयोगात् प्रतिषेधोऽनर्थकः स्यात्, अथ " नाम्नि " [ २. १. ९५. ] इति प्राप्तिरूर्म्यादीनां वार्यत इति चेत् ? न–" नाम्न्यूर्म्यादिभ्यः " इत्येकयोगाकरणात्, [ असंज्ञायामूर्मिमान् ] इत्यादिलक्ष्यदर्शनात्, व्याख्यानतो वा " भोगवद्गौरिमतोर्नाम्नि " [ ३. २. ६५. ] इति लिङ्गाद् वा प्रत्येकमभिसम्बन्धो निर्णीयत इति। **मतोरित्यवयवयोगे** षष्ठी, मतोरवयवस्य मकारस्येत्यर्थः, मग्रहणमन्तरेण च स्थानषष्ठ्यां " षष्ठ्याऽन्त्यस्य " [ ७. ४. १०६. ] इति तकारस्य " प्रत्ययस्य " [ ७. ४. १०८. ] इति सर्वस्य वा वत्वं स्यादिति। अत्राधिकारायातं षष्ठ्यन्तमपि ' नाम्नः ' इत्यर्थवशात् पञ्चमीविपरिणतं, मतुप्रत्ययसामर्थ्यलब्धं वा मावर्गान्तेत्यादिना विशिष्यत इत्याह–**मकारान्तादित्यादि**। " पदस्य " [ २. १. ८९. ] इति नानुवर्तते, अत्र यदि " पदस्य " इत्यनुवर्तेत [ तदा ] तस्य विशेष्यत्वाद् मावर्णान्तोपान्तापञ्चमवर्गात् परो यो मतुस्तदन्तस्य तस्य [ पदस्य ] मो वो भवतीति विज्ञायेत, तत्र ' किंवान्, किंवद्भ्याम् ' इत्यादावेव पदस्य मत्वन्तत्वाद् वत्वं स्यात्, ' किंवन्तौ, किंवन्तः ' इत्यादौ तु न स्यात् पदस्यामत्वन्तत्वात्, ' शमीवान् ' इति प्रकृतिमकारस्य च प्राप्नोति, यदि च " पदस्य " इति विशेषणं विज्ञायेत [ तदा ] पदस्य यो मतुर्मावर्गान्तोपान्ताऽपञ्चमवर्गपरस्तत्र व्यवच्छेद्याभावाद् विशेषणानर्थक्यं, नहि कश्चिन्मतुः पदस्य न भवति, न चात्रोत्तरत्र व्यापारोऽस्तीति वृत्तौ

न दर्शितमिति। [**किंवानित्यादि-**] केऽस्य सन्ति, इमेऽस्य सन्ति, शम् अस्यास्ति "तदस्यास्त्यस्मिन्निति" [७. २. १.] इति मतुः, मस्यानेन वत्वम्, प्रकृतिमकारस्य "तौ मुमो व्यञ्जने स्वौ" [१. ३. १४.] इत्यनुस्वारः, ततः सिलुकि "ऋदुदितः" [१. ४. ७०.] इति नागमे "अभ्वादेः०" [२. १. ८३.] इति दीर्घत्वं "पदस्य" [२. १. ८९.] इत्यन्तलोपः। [**शमीवानित्यादि-**] शमशब्दाद् ङ्यां शमी, "लक्ष्मेर्मोऽन्तश्च" [उणा० ७१५] इति [ईप्रत्यये-] लक्ष्मी, ददातेः "दो डिमः" [उणा० ३५५.] इति डिमे ङ्यां च दाडिमी, सर्वत्र पूर्ववन्मतुः, एवं-**वृक्षवानित्यादि**। यथासम्भवं "रो लुप्यरि" [२. १. ७५.] इति रेफः, सकारान्ततकारान्तयोश्च पदत्वप्रतिषेधात् तृतीयो न भवति [-**अहर्वान्, पयस्वान्, मरुत्वान्**] नरोऽस्य सन्तीति-**नृमान्**। **नार्मत** इति- अणि वृद्धावारादेशे तद्धितापेक्षोऽयमाकारो बहिरङ्गः, तदनपेक्षं वत्वमन्तरङ्गमिति ॥ छ ॥ २. १. ९४. ॥

**न्या० स०—मावर्णा०।** अत्र मकारा-ऽवर्णयोरन्तोपान्ताभ्यां सह यथासंख्यं न "नोर्म्यादिभ्यः" [२. १. ९९.] इति निषेधस्य व्यर्थत्वात्, यत ऊर्मिमानित्यत्र मान्तत्वस्य यवमानित्यत्रावर्णोपान्तत्वस्याभावात्, "भोगवद्गौरिमतोः०" [३. २. ६५.] इति निर्देशाद् वा। **बहिरङ्गलक्षणत्वादिति-** तद्धितापेक्षत्वेन वृद्धिर्बहिरङ्गा, तदनपेक्षं तु वत्वमन्तरङ्गमिति ॥ २. १. ९४. ॥

## नाम्नि ।२।१।९५॥

**त० प्र०—नाम्नि- संज्ञायां विषये मतोर्मकारस्य वकारादेशो भवति। अहीवती, कपीवती, मणीवती, मुनीवती, ऋषीवती; एवंनामानो नद्यः; "नद्यां मतुः" [७. २. ७२.] इति चातुरर्थिको मतुः। आसन्दीवान् नाम ग्रामः ॥ ९५॥**

**श० न्या०—नाम्नि।** नाम द्विविधम्- देवदत्तादि निरूढलक्षणाकं लौकिकं यत् 'संज्ञा' इति प्रसिद्धम्, "अधातुविभक्ति०" [१. १. २७.] इति शास्त्रीयं यत् पूर्वैः 'प्रातिपदिकम्' इति गीयते, तत्र प्रत्यासन्नत्वात् शास्त्रीयस्यैव ग्रहणे प्राप्ते नामाधिकारेणैव तदर्थस्य लाभान्नाम्नीत्यतिरिच्यमानमधिकार्थपरिग्रहाय भवत् तु लौकिकमेव ज्ञापयतीत्याह-**नाम्नि संज्ञायामिति**-एवमन्यत्रापि नाम्नीति सप्तम्यन्तमेतदनुकरणं सदभेदादेतदर्थमेव गमयतीति। **विषय** इति-अनन्यत्र भाव इत्यर्थः। **अहीवतीत्यादि**-"अहुङ् गतौ", "कपुङ् चलने" "उदितः०" [४. ४. ९८.] इति ने "अम्भि-कुण्ठि-कम्प्यंहिभ्यो नलुक् च" [उणा० ६१४.] इति, मणेः "पदि-पठि-पचि०" [उणा० ६०७.] इत्यादिना, [मन्यतेः] "मनेरुदेतौ चास्य वा" [उणा० ६१२.] इति, "ऋषैत् गतौ" [इत्यतः] "नाम्युपान्त्य०" [उणा० ६०९.] इत्यादिभिः 'किति' [इः किदिश्च प्रत्ययौ], निवासादिषु चतुर्ष्वर्थेषु "नद्यां मतुः" [६. २. ७२.] इति मतुः, "अनजिरादिबहुस्वर०" [३. २. ७८.] इति दीर्घत्वम्, "अधातूदृदितः" [२. ४. २.] इति ङीः। '**एवंनामानो नद्यः**' इति नामतामेषां दर्शयति। **आसन्दीवान् नाम ग्राम** इति-आसतेऽस्मिन्नित्यासनम्, तद् विद्यते यस्मिन् ग्राम इत्यासनशब्दस्य पृषोदरादित्वादासन्दीभावेऽनेन मतोर्वत्वे-आसन्दीवान् ग्रामः, आसन्दीवद् अहिस्थलम्, संज्ञाया अन्यत्र-आसनवानित्येव, यथा च संज्ञाया अभावाद् वत्वासन्दीभावयोरभावस्तथा "अनजिरादिबहुस्वर०" [३. २. ७८.] इति दीर्घत्वस्यापि। अपरे त्वासन्दीशब्दोऽस्ति [इत्याहुः], तत्र वेदे यथा- "आसन्दीमारुह्य उद्गाता" इति, लोके यथा- औदुम्बरी राजासन्दी भवति, उदुम्बरस्य विकार औदुम्बरी, राज्ञ आसन्दी राजासन्दी, सोमासनमित्यर्थः, तस्माच्चासन्दीशब्दाद् आसन्दी अस्मिन्नस्तीति मतुः, तस्यानेन वत्वमिति ॥ छ ॥ २. १. ९५ ॥

**न्या० स०—नाम्नि।** नाम द्विविधं, देवदत्तादि निरूढलक्षणाकं लौकिकं यत् संज्ञेति प्रसिद्धम्, "अधातुविभक्ति०" [१. १. २७.] इति शास्त्रीयं च, तत्र प्रत्यासन्नत्वाच्छास्त्रीयस्यैव ग्रहणे प्राप्ते नामाधिकारेणैव तदर्थस्य लाभान्नाम्नीत्यतिरिच्यमानमधिकार्थपरिग्रहाय भवल्लौकिकमेव ज्ञापयतीत्याह- **संज्ञायामिति**। **आसन्दीवानिति**- आसते जना अस्मिन्नित्यासनं, तद् विद्यते यस्मिन् ग्रामे इत्यासनशब्दस्य पृषोदरादित्वादासन्दीभावेऽनेन मतोर्वत्वे आसन्दीवान् ग्रामः, आसन्दीवद् अहिस्थलम्; संज्ञाया अन्यत्र- आसनवानित्येव भवति, यथा च संज्ञाया अभावाद् वत्वा-ऽऽसन्दीभावयोरभावस्तथा "अनजिरादिबहुस्वरादि०" [३. २. ७८.] दीर्घत्वस्यापि। अपरे त्वासन्दीशब्दोऽस्तीति मन्यन्ते, आसम्- आसिक्रियां नन्दति- अणि पृषोदरादित्वात्, आसेर्धातोः "कुमुद०" [६. २. ९६.] इति वा- आसन्दी- वेत्रासनं, साऽत्रास्ति मध्वादिः ["मध्वादेः" ६. २. ७३. इति मतुः]; वेदे यथा- आसन्दीमारुह्य उद्गातेति, लोके यथा- औदुम्बरी राजासन्दी भवति, उदुम्बरस्य विकारः- औदुम्बरी, राज्ञ आसन्दी- राजासन्दी, सोमासनमित्यर्थः ॥ २. १. ९५. ॥

## चर्मण्वत्य-ऽष्ठीवच्-चक्रीवत्-कक्षीवद्-रुमण्वत् ॥ २ । १ । ९६ ॥

**त० प्र०—एते शब्दा मत्वन्ता नाम्नि विषये निपा-**

त्यन्ते । चर्मन्शब्दस्य नलोपाभावो णत्वं च निपात्यते– चर्मण्वती नाम नदी, अस्थिशब्दस्याष्ठीभावः–अष्ठीवान् जङ्घोरुसंधिः, चक्रशब्दस्य चक्रीभावः– चक्रीवान् नाम गर्दभः, चक्रीवान् नाम राजा, कक्ष्याशब्दस्य कक्षीभावः– कक्षीवान् नाम ऋषिः, लवणशब्दस्य रुमण्भावः– रुमण्वान् नाम पर्वतः । अन्ये त्वाहुः– रुमन्निति प्रकृत्यन्तरमस्ति, तस्यैतन्निपातनं नकारलोपाभावार्थं णत्वार्थं च, वत्वं तु यथायोगमस्त्येव । नाम्नीत्येव– चर्मवती, अस्थिमान्, चक्रवान्, कक्ष्यावान्, लवणवान् ॥ ९६ ॥

श० न्या०—चर्म० । चरेः "मन्" [ उणा० ९११. ] इति मनि–चर्मन् । अस्यतेः "वीसञ्जयसिभ्यस्थिक्" [ उणा० ६६९. ] इति थिकि–अस्थि । करोतेर्घञर्थे "कृगो द्वे च" [ उणा० ७. ] इति किदप्रत्यये द्वित्वे च–चक्रम् । कषेः "मा-वा-वद्यमि०" [ उणा० ५६४. ] इति से–कक्षः, कक्षे भवा कक्षाय हिता वा कक्षे साधुर्वा "दिगादिदेहांशाद् यः" [ ६. ३. १२४. ] इत्यादिभिर्ये–कक्ष्या । लुनाति दोषानिति नन्द्यादित्वादने तत एव पाठाणत्वे–लवणम् । अन्ये त्विति–संज्ञाया अभावे रुमवदित्येव भवति ॥ छ ॥ २. १. ९६. ॥

न्या० स०—चर्मण्वत्यष्ठीव० । कक्ष्याशब्दस्येति–कक्षे भवा कक्षाय हिता वा कक्षे साधुर्वा "दिगादिदेहांशाद्यः०" [ ६. ३. १२४. ] इत्यादिभिर्ये–कक्ष्या महाणः सादृश्यमुद्योगश्चेत्यर्थः । लवण[ शब्द ]स्येति–लुनाति वैरस्यं नन्द्याद्यनः, अत( तत )एव गणपाठाण्णत्वम् ॥ २. १. ९६ ॥

## उदन्वानब्धौ च । २ । १ । ९७ ॥

त० प्र०—आपो धीयन्तेऽस्मिन्नित्यब्धिः, अब्धौ नाम्नि चोदन्वानिति उदकशब्दस्य मतावुदन्भावो निपात्यते । उदन्वान् घटः, उदन्वान् मेघः, यस्मिन्नुदकं धीयते स एवमुच्यते; नाम्नि– उदन्वान् समुद्रः, उदन्वान् नाम ऋषिः, यस्यौदन्वतः पुत्रः; उदन्वान् नाम आश्रमः । अब्धौ चेति किम् ? उदकवान् घटः, अत्र घटस्योदकसम्बन्धमात्रं विवक्षितं, न दधातीत्यर्थः ॥ ९७ ॥

श० न्या०–उदन्वा० । आपो धीयन्तेऽस्मिन्निति "व्याप्यादाधारे" [ ५. ३. ८८. ] इति किप्रत्यये–अब्धिः, लोकाधीनावधारणार्थत्वाच्छब्दार्थसम्बन्धस्य यौगिकत्वेऽपि तडागादावप्रवृत्तेः समुद्रस्यैवायं यौगिको व्यपदेशः, नहि लोकोऽब्धिशब्दाद् जलाधारभावापन्नमपि घटादिकमभ्यवस्यति, यदा त्वर्थो ( अवयवार्थो ) न विवक्ष्यते तदा "नाम्नि" [ २. १. ९५. ] इत्यनेनैव सिध्यति, तस्मिन् मतौ उदन्भावो निपात्यते, न तु वत्वम्, तस्यावर्णोपान्तत्वादेव सिद्धेः, नलोपाभावोऽप्युदन्भावसामर्थ्यादेव, अन्यथोदभाव एव निपात्येत, सूत्रे च "उदवानब्धौ च" इत्युच्येत । उदन्वान् घट इति, उदन्वान् मेघ इति– अत्रोदन्वानिति निपातनं समुद्र एव, घट-मेघौ तु तज्जलाधारत्वादिनिमित्तात् समुद्रः कुण्डिकेतिवत् तच्छब्देन व्यपदिश्येते, यदाह–उदधिर्घट इत्युपमानत्वात्, अब्धावेव विशिष्टावयवार्थसम्बन्धिन उदन्वानिति निपात्यते । अब्धिग्रहणं ह्यसंज्ञार्थमत आह–यस्मिन्नित्यादि । संज्ञायां त्ववयवार्थो व्युत्पत्त्य एव, प्रत्यस्तमितावयवार्थतया संज्ञाया ऋष्याश्रमावप्युच्येते इत्याह–उदन्वान् नाम ऋषिरित्यादि–उदन्वतोऽप्रसिद्धत्वात् प्रसिद्धेन औदन्वताख्येन पुत्रेण तस्य सद्भावः प्रतिपाद्यते, तस्य सद्भावं विना तत्सद्भावाभावात् । उदकवान् घट इति–समुद्रस्योदकधारणनिमित्तोऽब्धिव्यपदेशो न तु सर्वस्योदकाधारस्यापि घटादेरिति तत्रोदन्वानिति न भवति, अत एवाह–अत्र घटस्येत्यादि–यो दधात्यर्थः समुद्रेऽब्धिशब्दस्य प्रवर्तमानस्य निमित्तं घटादौ तस्यासम्भवाद् विवक्षा नास्तीति तत्राब्धिशब्दस्यासम्भवादब्धौ साधुत्वेन विधीयमान उदन्वानिति तत्र न भवति, अत एव चन्द्रगोमि-देवनन्दि-ललितस्वभावादिभिरब्धिग्रहणमकृत्वा संज्ञामात्र एवोदन्वानिति निपातनं कृतम्, आचार्यपाणिनिना तूदधिग्रहणं कृतम्, तच्चोत्पलसाधारणादिभिरित्थमेव व्याख्यातम्, अस्माभिरपि तदनुसारेणाब्धिशब्दस्तथैव व्याख्यातः, अन्यथा व्याख्याने तु लोकप्रतीतिविरोध एव स्यादिति, विशेषचर्चा तु "उदकस्योदः पेषन्धि०" [ ३. २. १०४. ] इत्यत्र करिष्यते ॥ छ ॥ २. १. ९७. ॥

न्या० स०—उदन्वान्० । उदन्भावसामर्थ्यान्नलोपो न, अन्यथा-उदभावो निपात्येत ॥ २. १. ९७ ॥

## राजन्वान् सुराज्ञि । २ । १ । ९८ ॥

त० प्र०—शोभनो राजा यस्य तस्मिन्नभिधेये राजन्वानिति मतौ नलोपाभावो निपात्यते । राजन्वान् देशः, राजन्वती पृथ्वी; राजन्वत्यः प्रजाः । सुराज्ञीति किम् ? राजवान् देशः ॥ ९८ ॥

श० न्या०—राज० । सुराज्ञीति बहुव्रीहिर्न तत्पुरुषस्तस्यायोगादित्याह– शोभनो राजा यस्येत्यादि । राज-

स्वामित्यत्र निपात्यमाह- **मतौ नलोपाभावो निपात्यत** इति- अवर्णोपान्तत्वाद् वत्वस्य सिद्धत्वादित्यर्थः । शोभनो राजाऽस्यास्मिन् वास्तीति- **राजन्वान् देश** इति-शोभनत्वं च राज्ञो नलोपाभावेन गम्यते। **राजन्वानि**ति लिङ्गवचने न तन्त्रे इत्युदाहरति-**राजन्वती**त्यादि। **राजवान् देश** इति- अत्र राजसत्तासम्बन्धमात्रं विवक्षितं न तु राज्ञः शोभनत्वं निन्दितत्वं चेति सुशब्दार्थाभावान्नलोपो भवत्येव ॥ छ ॥ २.१.९८.॥

**न्या० स०—राजन्वान्०**। सुराज्ञीति- शोभननृपतौ वाच्ये। यदा तु राजन्शब्देन चन्द्रोऽभिधीयते तदा **राजवान् देश** इत्येव, निपातनस्येष्टविषयत्वात् ॥ २. १. ९८ ॥

## नोर्म्यादिभ्यः । २ । १ । ९९ ॥

**त० प्र०**—ऊर्मि इत्येवमादिभ्यो नामभ्यः **परस्य मतोर्मकारस्य वकारादेशो न भवति**। ऊर्मिमान्, दल्मिमान्, भूमिमान्, तिमिमान्, कृ(क)मिमान्, एभ्यो मोपान्त्यत्वात् प्राप्ते; यवमान्, कुञ्चामान्, द्राक्षामान्, ध्राक्षामान्, वासामान्, एभ्योऽवर्णान्तत्वात् प्राप्ते; हरित्मान्, गरुत्मान्, ध्वजित्मान्, ककुद्मान्, एभ्योऽपञ्चमवर्गादिति प्राप्ते; ज्योतिष्मती, महिष्मान्, गोमती, कान्तिमती, शिम्बीमती हरिमती, चारुमती, इक्षुमती, बन्धुमती, मधुमती, बिन्दुमती, इन्दुमती, द्रुमती, वसुमती, अंशुमती, श्रुमती, हनूमती, सानुमती, भानुमती; एभ्यः "नाम्नि" [ २. १. ९५. ] इति प्राप्ते प्रतिषेधोऽयम्। ऊर्मि, दल्मि, भूमि, तिमि, कृ(क)मि, यव, कुञ्चा, द्राक्षा, ध्राक्षा, वासा, हरित्, गरुत्, ध्वजित्, ककुद्द्, ज्योतिस्, महिष, गो, कान्ति, शिम्बी, हरि, चारु, इक्षु, बन्धु, मधु, बिन्दु, इन्दु, द्रु, वसु, अंशु, श्रु, हनु, सानु, भानु, इत्यूर्म्यादिः। बहुवचनमाकृतिगणार्थम्, तेन यस्य सति निमित्ते मतोर्वत्वं न दृश्यते स ऊर्म्यादिषु द्रष्टव्यः ॥ ९९ ॥

**श० न्या०—नोर्म्या०**। ऊर्म्यादिभ्यो मोपान्तत्वाद् यवादिभ्योऽवर्णान्तत्वाद् हरिदादिभ्योऽपञ्चमवर्गान्तत्वाज्ज्योतिरादिभ्यश्च संज्ञाविषयत्वाद् वत्वे प्राप्ते प्रतिषेधोऽयमारभ्यत इत्याह- **ऊर्मिमानि**त्यादि। "ऋंक् गतौ" अतः "ऋतेरुच्चातः" [ उणा० ६८९. ] इति मिप्रत्यये कृतगुणस्याकारस्य ऊकारे च-**ऊर्मि**। "दल विशरणे" अतः "नी-सा-कृ-यु-शृ-व-लि-दलि०" [ उणा० ६८७. ] इति मिप्रत्यये- **दल्मि**। भवतेः "कृ-भूभ्याम्" [ उणा० ६९०. ] इति किम्मिप्रत्यये- **भूमि**। "तमूच् काङ्क्षायाम्" अतः "कमि-तमि-स्तम्भे-रिभ्य०" [ उणा० ६९३. ] इति इप्रत्यये अकारस्य चेकारे- **तिमि**। एवं करोतेः "कृ-भूभ्याम्०" [ उणा० ६९०. ] इति मिप्रत्यये-**कृमि**। यौतेः "युवर्ण-वृ-दृ०" [ ५. ३. २८. ] इत्यलि-**यव**। कुञ्चेः क्विप्यजादित्वादापि-**कुञ्चा**। रसेर्ध्रजेश्च "लाक्षा-द्राक्षा-भिक्षा०" [ उणा० ५९७. ] इति निपातनात्-**द्राक्षा, ध्राक्षा**। वातेः "मा-वा-वद्यमि०" [ उणा० ५६४. ] इति सकारे-**वासा**। हरतेः "हृ-सृ-रुहि०" [ उणा० ८८७. ] इतीति-**हरित्**। "गृत् निगरणे" इत्यतः "ग्रो मादिर्वा" [ उणा० ८९०. ] इत्युति-**गरुत्**। अध्वानं जयतीति क्विपि तागमे पृषोदरादित्वादकारलोपे-**ध्वजित्**। ककेर्बाहुलकादुदि-**ककुद्**, अत्र गणे द्वितीयो दकारो मतौ "प्रत्यये च" [ १. ३. २. ] इत्यनुनासिकबाधनार्थः। द्युतेः "द्युतेरादेश्च जः" [ उणा० ९९१. ] इतीसि आदेर्जकारे च-**ज्योतिस्**। [ "मह पूजायाम्" इत्यतः ] "महिविभ्यां टित्" [ उणा० ५४७. ] इति टिदिषे-**महिष**। गमेः [ "द्यु-गमिभ्यां डोः" उणा० ८६७. इति ] डोप्रत्यये-**गो**। कमेः क्तौ "अहन्पञ्चमस्य" [ ४. १. १०७. ] इति दीर्घत्वे-**कान्ति**। "शृधूङ् शब्दकुत्सायाम्" अतः "डी-नी-बन्धि-शृधि०" [ उणादि० ३२५. ] इति डिदिम्बे ङ्यां-**शिम्बी**। हृगः "स्वरेभ्यः०" [ उणा० ६०६. ] इति इप्रत्यये-**हरि**। चरेः "मि-वहि-चरि०" [ उणा० ७२६. ] इति णिदुप्रत्यये-**चारु**। इषेः "मस्जीष्यशिभ्यः" [ उणा० ८२६. ] इति सुकि-**इक्षु**। "बन्धंश् बन्धने" अस्माद् "भृ-मृ-तृ-त्सरि०" [ उणा० ७१६. ] इत्युप्रत्यये-**बन्धु**। "मनिंच् ज्ञाने" अतः "मनि-जनिभ्यां धन्तौ च" [ उणा० ७२१. ] इत्युप्रत्यये नस्य धत्वे च-**मधु**। "बिदु अवयवे", "इदु परमैश्वर्ये" आभ्यां "भृ-मृ-तृ-त्सरि०" [ उणा० ७१६. ] इत्युप्रत्यये-**बिन्दु, इन्दु**। "द्रु गतौ" अतः "द्यु-द्रुभ्याम्" [ उणा० ७४४. ] इति डित्युप्रत्यये-**द्रु**। "वसं निवासे" अतः "भृ-मृ-तृ-त्सरि०" [ उणा० ७१६. ] इत्युप्रत्यये-**वसु**। [ "अशौटि व्याप्तौ" इत्यतः ] "अशेरान्नोऽन्तश्च" [ उणा० ७१९. ] इत्युप्रत्यये नागमे च-**अंशु**। शृणोतेः क्विपि * आगमशासनमनित्यम् * इति तागमाभावे-**श्रु**। हन्तेः "कुन्हनेस्तुक्-नुकौ" [ उणा० ७९१. ] इति नुकि बाहुलकान्नलुकि-**हनु**। सनोतेः "कृ-पा-जि०" [ उणा० १ ] इत्युणि-**सानु**। "भांक् दीप्तौ" अतः "दा-माभ्यां नुः" [ उणा० ७८६. ] इति नुप्रत्यये- **भानु**। बहुवचनाद् अवृत्करणाच्चाकृतिगणोऽयम्, तामेवाकृतिं **तेने**त्यादिना दर्शयति ॥ छ॥ २. १. ९९. ॥

**न्या० स०—नोर्म्यादिभ्यः** । **दलिमानिति**– दलिमरिन्द्रः प्रहरणविशेषो वा, सोऽस्यास्ति । **तिमिमान्, क्रिमिमानिति**– " क्रमि-तमि० " [ उणा० ६१३. ] इति द्वयोरपि निपातनम्, क्रिमिः-क्षुद्रजन्तुः, तिमिर्महामत्स्यः । गरुत्– पिच्छं, तदस्यास्ति । **ध्वजिस्मानिति**– अध्वानं जयति क्विप्, पृषोदरादिः । **ककुद्मानिति**– ककतेर्बाहुलकादुदप्रत्यये गणे द्विदकारपाठान्मतौ नानुनासिकः । **महिष्मानिति**– " नडकुमुद० " [ ६. २. ७४. ] इति डिति मतौ *असिद्धं बहिरङ्गम्*इत्यकारलोपस्यासिद्धत्वान्न " धुटस्तृतीयः " [ २. १. ७६. ] न च वाच्यं " स्वरस्य परे० " [ ७. ४. ११०. ] इति स्थानित्वं, तस्यासद्विधौ " न सन्धि० " [ ७. ४. १११. ] इति निषेधात् । **कान्तिमतीप्रभृति बन्धुमतीं** यावत् सर्वेषु " नवां मतुः " [ ६. २. ७२. ] **शिम्बीमती** " डी-नी-बन्धि-श्रधि०" [ उणा० ३२५. ] इति डिदिम्बः, गौरादिङीः । **मधुमती** " मध्वादेः " [ ६. २. ७३. ] इति मतुः । शृणोतीति क्विप् *आगमशासनमनित्यम् * इति तागमाभावे– श्रुशब्दः । **हलूमानिति**– " अनजिरादि " [ ३. २. ७८. ] इति दीर्घः ॥ २. १. ९९. ॥

## मास-निशा-ऽऽसनस्य शसादौ लुग् वा । २ । १ । १०० ॥

**त० प्र०**—एषां शसादौ स्यादौ परे लुगन्तादेशो वा भवति । मासः, मासान्; मासि, मासे; निशः, निशाः; निशि, निशायाम्; निज्भ्याम्, निशाभ्याम्; निच्छु, निशासु; आसनि, आसने । शसादाविति किम्? मासौ, मासाः, मासरूप्यः ॥१००॥

**श० न्या०—मास०** । " मांक् माने " [ इत्यतः ] " मा-वा-वधमि० " [ उणा० ५६४. ] इति से–मासः, निशेः " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के आपि–निशा, आस्यतेऽस्मिन्निति " करणाधारे " [ ५. ३. १२९. ] इत्यनटि–आसनम्, एभ्यः शसादौ पक्षेऽन्तलोपे–**मास** इत्यादि । **निज्भ्यामिति**–भ्याम्यन्तलोपे " धुटस्तृतीयः " [ २. १. ७६. ] इति सस्य जत्वे परेऽसत्त्वाद् जस्य गत्वं न भवति । सुप्यन्तलोपे " तृतीयत्वे " अघोषे प्रथमः० " [ १. ३. ५०. ] इति प्रथमत्वे " सस्य श-षौ " [ १. ३. ६१. ] इति [ सस्य ] शत्वे " प्रथमादधुटि० " [ १. ३. ४. ] इति छत्वे–**निच्छु** । " षष्ठ्या० " [ ७. २. ८०. इति ] रूप्यपि–**मासरूप्यः** ॥ छ ॥ २. १. १००. ॥

**न्या० स०—मास-निशा०** । **स्यादाविति**– स्यादेरन्यः शसादिर्न सम्भवतीति स्यादावुदाहारि, अथ " संख्यैकार्थात्० " [ ७. २. १५१. ] इति शसूसंभवस्तदादिशब्दस्याकलादीनामसंभवेनानर्थक्यम्, यद्वा * मण्डूकप्लुत० * न्यायेन स्यादिरनुवर्त्तनीय इति, आदिशब्दस्य व्यवस्थावाचित्वाद् वा स्यादिरेव लभ्यते । मासशब्दस्य भ्याम्यनेनान्तलोपे * असिद्धं बहिरङ्गम्० * इति अकार[ स्य ] स्थानित्वेन " सो रुः " [ २. १. ७२. इति ] रुत्वाभावे " धुटस्तृतीयः " [ २. १. ७६. ] इति दत्वे तु न्यायानित्यत्वात्– माद्भ्यामिति मन्यते भाष्यकृत्, दुर्गस्तु– मास्भ्यामिति, स्वमते तु द्वयमपि भवति । **निज्भ्यामिति**– अत्र निश्शब्दे सत्यपि निशाग्रहणं निज्भ्यामित्यस्य सिध्यर्थं, निश्शब्दस्य हि भ्यामि निड्भ्यामित्येव भवति, क्विबन्तत्वाद् धातुत्वे " यज-सृज० " [ २. १. ८७. ] इत्यादिना षत्वप्राप्तेः ॥२. १. १००.॥

## दन्त-पाद-नासिका-हृदया-ऽसृग्-यूषो-दक-दोर्यकृच्छकृतो दत्-पन्नस्-हृदसन्-यूषन्नुदन्-दोषन्-यकञ्-शकन् वा । २ । १ । १०१ ॥

**त० प्र०**—दन्तादीनां यथासंख्यं शसादौ स्यादौ परे दत् इत्येवमादय आदेशा वा भवन्ति । दन्त– दतः, दन्तान् पश्य; दता, दन्तेन; दद्भ्याम् ३, दन्ताभ्याम् ३; दद्भिः, दन्तैः; दत्सु, दन्तेषु; पाद–पदः, पादान्; पदा, पादेन; नासिका-नसः, नासिकाः; नसा, नासिकया; हृदय–हृदि, हृदये; असृज्– अस्ना, असृजा; यूष– यूष्णा, यूषेण; उदक– उद्ना, उदकेन; दोस्–दोष्णा, दोषा; यकृत्– यक्ना, यकृता; शकृत्– शक्ना, शकृता; शक्नि, शकनि, शकृति । शसादावित्येव– दन्तौ, दन्तकल्पः ॥ १०१ ॥

**श० न्या०—दन्त०** । आदेशिनामादेशानां च तुल्यसंख्यत्वाद् यथासंख्यमत्र सम्बध्यत इत्याह–**दन्तादीनां यथासंख्यमिति** । ननु ददाद्यादेशवत् पूर्वसूत्रेऽपि 'मास्' इत्यादि समस्तादेशः कर्तुमुचितः, तथा च सति प्रकरणभेदोऽपि न स्यात्, अत एव पूर्वैः–" पद्-दन्नो-मास्-हृन्निशसन्-युषन्-यकन्-शकन्नुदन्नासन्० " [ पाणि० ६. १. ६३. ] इत्यादेशमात्रमेव कृतम्, प्रकृतिस्तु तत्रानुमितेति, सत्यम्– तत्रोपलक्षणभूतेन लुक्शब्देन लाघवार्थं लुगन्त आदेश उच्यते, अत एव वृत्तावुक्तम्– **लुगन्तादेश** इति– लुगन्तश्चासावादेशश्चेति तत्र प्रत्येतव्यम्, अन्तलोपे सति यादृशमेषां रूपं भवति तादृशा 'मास् निश् आसन्' इत्येवंरूपा आदेशास्तेन विधीयन्ते न तु लुगिति । ननु पूर्वैश्छन्दोविषयत्वमेषामुक्तम्, न च छान्दसा भवद्भिर्व्युत्पाद्यन्त इति "मास–निशा०" [२. १. १००.] इत्यादिसूत्रद्वयमनर्थकम्, नैवम्– " अपोऽद्भे "

[ ९. १. ४. ] [ " अपो भि " पाणि० ७. ४. ४८. ] इत्यत्र सूत्रे वार्तिककारेणोक्तम्- [ अपो भि मासच्छन्दसि, ] मास उपसंख्यानं छन्दसि, माद्भिरिष्ट्वा इन्द्रो वृत्रहा [ इति भाष्ये ] " पद् दत् नो मास् " [ पा० सू० ६. १. ६३. ] इति मासशब्दस्य मासादेशस्य छन्दस्येव विधानात्, " मासश्छन्दसि " [ वार्तिके ] इति दत्वविधौ छन्दोग्रहणं न कर्तव्यम्, तत् क्रियते, भाषायामपि क्वचित् पदादयः प्रयुज्यन्त इति ज्ञापनार्थम् [ इति कैयटे ], अत एव प्रविरलप्रयोगविषयत्वात्, सर्वासु विभक्तिषु नोदाह्रियन्ते । " दमूच् उपशमे " अतः " दम्यमि० " [ उणा० २०० ] इति ते—**दन्त** । " पदिंच् गतौ " अतः पद्यत इति " पद-रुज-विश-स्पृश० " [ ५. ३. १६. ] इति घञि—**पाद** । " णसि कौटिल्ये " अतः " नसि-वसि० " [ उणा० ४०. ] इति णिदिके—**नासिका** । हरतेः " गय-हृदयादयः " [ उणा० ३७०. ] इति निपातनादये दागमे च—**हृदय** । '**असृज्**'-शब्दो व्युत्पादितः । यौतेः " योरुच्च वा " [ उणा० ५४१. ] इति षे ऊकारे च— **यूष** । " उन्दैप् क्लेदने " अतः " धु-धून्दि० " [ उणा० २९. ] इति कित्यके— **उदक** । " दाम्यतेः " यमि-दमिभ्यां डोस् " [ उणा० १००५. ] इति डोसि **दोस्** । [ " यजीं देवपूजादौ " अतः ] " यजेः क च " [ उणा० ८९२. ] इति ऋति कादेशे च—**यकृत्** । " शक्लृंट् शक्तौ " अतः " शक ऋत् " [ उणा० ८९१. ] इति ऋति— **शकृत्** । एषां शसादौ पक्षे ददाद्यादेशे— **दत** इत्यादि । " अतमवादेः " [ ७. ३. ११. ] इति कल्पपि— **दन्तकल्पः** ॥ छ ॥ २. १. १०१. ॥

---

**न्या० स०—दन्तपाद०** । ननु पूर्वैश्छन्दोविषयत्वमेषामुक्तमिति " मास-निशा० " [ २. १. १००. ] इत्यादि सूत्रं निरर्थकम्, सत्यम्—भाषायामपि क्वचित् पदादयः प्रयुज्यन्त इति ज्ञापनार्थत्वात्, अत एव प्रविरलप्रयोगविषयत्वात् सर्वासु विभक्तिषु नोदाह्रियते । अत एव चान्द्र-भोजौ मन्येते— पाद-पद्शब्दाभ्यामपि पदा, पादेनेत्यादि सिद्धं, परं पद्शब्दश्चरणवाच्येव, पादशब्दस्य त्वनेकार्थस्यापि ' पदा, पादेन ' इत्यादि सिद्ध्यर्थं पादशब्दोपादानम् । हृदय-हृद्भ्यां सिद्धे हृदयोपादानमृषौ विशेषार्थम्— हृदः हृदयान् ऋषीन् । हृद्शब्दस्तु ऋषिवचनो नास्ति ॥ २. १. १०१. ॥

---

## य स्वरे पादः पदणि-क्य-घुटि

## । २ । १ । १०२ ॥

**त० प्र०—**पादिति पादशब्दस्य लुप्ताकारस्य पादयतेर्वा कृतणिलोपस्य निर्देशः, पादन्तस्य नाम्नो णि-क्य-घुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे पदित्यमादेशो भवति; स च ॐनिर्दिश्यमानस्यादेशा भवन्तिॐ इति पाच्छब्दस्यैव भवति न तदन्तस्य सर्वस्य । व्याघ्रस्येव पादावस्य— व्याघ्रपात्, तस्यापत्यम्— वैयाघ्रपद्यः; द्वौ पादावस्य द्विपात्— द्विपदः पश्य, द्विपदा, द्विपदे, त्रिपदी गाथा; व्याघ्रपदी स्त्री कुले वा; द्वौ द्वौ पादौ ददाति— द्विपदिकां ददाति, द्विपदे हितम्— द्विपदीयम्; पादमाचष्टे पद्यमानं प्रयुङ्क्ते वेति पादयतेः क्विपि पाद्— पदः पश्य, पदा, पदे, पदी कुले; अत्र व्यपदेशिवद्भावेन पादन्तत्वम् । य-स्वर इति किम् ? द्विपाद्भ्याम्, द्विपाद्भिः, द्विपात्काम्यति । अणि-क्य-घुटीति किम् ? पादमाचष्टे— पादयति; क्येति क्यन्-क्यङोरविशेषेण ग्रहणम्, व्याघ्रपादमिच्छति स इवाचरतीति च— व्याघ्रपाद्यति, व्याघ्रपाद्यते, द्विपादौ, द्विपादः, द्विपान्दि कुलानि । नाम्न इत्येव— उपपद्यत इत्येवंशील उपपादुकः । पादयतेः क्विबन्तस्य प्रयोगो नास्तीति कश्चित् ॥ १०२ ॥

---

**श० न्या०—यस्वरे०** । [ **पादः** ] ' सुपाद्, द्विपदिकां ददाति ' इत्यादिप्रयोगस्थपाच्छब्दानुकरणात् षष्ठी । ननु द्विधा पाच्छब्दस्य सम्भवः— " पात् पादस्याहस्त्यादेः " [ ७. ३. १४८. ] इत्यादिभिः कृतपादादेशस्य, तथा पादयतेः क्विबन्तस्य णिलुकि, तत् कस्येह ग्रहणम् ? उच्यते—शास्त्रस्यानुवादकत्वेनाकारकत्वात् पादयतेश्च क्विबन्तस्य लोके प्रयोगाभावादादेशस्यैव ग्रहणमत आह— **पादि**त्यादि—वाशब्द इवार्थो दृष्टान्तार्थः, आकारो रूपम्, ततश्चायमर्थः— यथा पादयतेः क्विबन्तस्य प्रयोगाभावेन लुप्तरूपस्य नष्टरूपस्वीकारः, एवं पादस्य पादित्यादेशेन लुप्ताकारस्य निर्देशः । तत्र च पादशब्दस्य समास एवादेशो विधीयते, तेन सामर्थ्यात् तदन्तस्य कार्यं विज्ञायत इत्याह— **पादन्तस्य नाम्न** इति— यदि तु पादयतेः क्विबन्तस्य प्रयोगः स्यात् ततश्च तस्मिन् केवले मुख्ये सति तदन्तस्य न स्यादिति । यद्येवमनेकवर्णत्वात् सर्वस्य पादन्तस्य प्राप्नोति, केवलस्येष्यते, तस्मात् पच्छब्दादेशमपास्य " पादो ह्रस्वः " इति कर्तव्यम् [ इति ] यः शङ्कते तं प्रत्याह— **स च निर्दिश्यमानस्ये**ति— अयमर्थः—यत् सूत्रे षष्ठ्या निर्दिश्यते, तस्यादेशैः सम्बन्धो न तु यत् तेन प्रत्याय्यते तस्य, इह च पाद इति निर्दिश्यते, तेन तु तदन्तं व्याघ्रपाद् द्विपादित्यादि प्रत्याय्यत इति न तस्यादेशः, तथाहि— त्वो यवादेशो निर्दिश्यमानस्य त्वस्य एव प्रवर्तते, न तु तेन प्रत्याय्यमानस्य समुदायस्येति । **व्याघ्रपात्** व्याङ्पूर्वाद् जिघ्रतेः " व्याघ्राघ्रे० "

[ ५. १. ५७. ] इति डे– व्याघ्रः, तस्येव पादावस्येति " पात् पादस्या० " [ ७. ३. १४८. ] इति पाद्भावे तस्यापत्यं वृद्धमिति गर्गादित्वाद् वृद्धेऽपत्ये यञि " य्वः पदान्तात्० " [ ७. ४. ५. ] इत्यैकारागमेऽनेन पदादेशे–**वैयाघ्रपद्यः**। द्विपूर्वस्य " सुसंख्यात् " [ ७. ३. १५०. ] इति पद्भावे शसादौ **द्विपद** इत्यादि। " वा पादः " [ २. ४. ६. ] इति ङ्यां **त्रिपदी, गाथे**ति स्त्रीत्वाभिव्यक्त्यर्थम्। **स्त्री कुले वे**त्यनुप्रयोगौ स्त्रीत्व-नपुंसकत्वाभिव्यक्त्यर्थौ। **द्विपदिकां ददातीति**– " संख्या समाहारे च० " [ ३. १. ९९. ] इति समासः, " संख्यादेः पादादिभ्यः० " [ ७. २. १५२. ] इत्यकल् अन्तस्य च लुक्, तत आप् " अस्यायत्तत्० " [ २. ४. १११. ] इतीत्वम्, ततोऽम्। **द्विपदीयमि**ति– द्विपदे हितमिति विगृह्य " तस्मै हिते " [ ७. १. ३५. ] इतीयः। पादयतेः क्विबन्तस्य प्रयोगाभावं द्रढयति–**पादमाचष्टे** इत्यादिना। **अत्रे**ति–एषु पादयतेः क्विबन्तप्रयोगेषु, [ **पादन्तत्वं** ] पाच्छब्दस्यान्तत्वं विनाशवत्त्वम्, एते पूर्वोक्ताः प्रयोगा लोके न प्रयुज्यन्ते, अत्र हेतुमाह– **व्यपदेशिवद्भावेने**ति–अपदेशो व्याजश्छद्म, विशिष्टो व्याज एषाम् [ अस्य ] अस्तीति व्यपदेशी, स इव एषां सत्ता, बुद्ध्यैवैते कल्प्यन्ते, न तु लोके प्रयुज्यन्ते, इत्यभियुक्तैरेषां [ व्याजवती संज्ञा लक्ष्यते, अभियुक्ता हि स्थविर-चन्द्रोत्पल-देवनन्दि-साधारण-भाष्यकारप्रभृतयः पादयतेः क्विप् न दृश्यत इति वदन्त एषां ] व्याजवतीं संज्ञां व्यपदिशन्ति। सूत्रेऽपि केचन समासान्तग्रहणं कुर्वन्ति। व्याजमेव दर्शयति–पादमाचष्टे...... [ इत्यादिना ]। पूर्वोक्तमेवार्थमभियुक्तस्मृत्या द्रढयति–**पादयतेः क्विबन्तस्य प्रयोगो नास्तीति कश्चिदि**ति। अस्य क्विबन्तस्य प्रविरलविषयोऽपि प्रयोगो न कश्चिदस्तीति सम्बन्ध इति। अन्ये त्वभियुक्तस्मृतिमनभिनन्दयन्तः क्विबन्तस्य प्रयोगं प्रतिजानते, अत एवानभिरुचितत्वादेष पक्षः ' पादयतेर्वा ' इत्यादिना ' पादमाचष्टे ' इत्यादिना च वाक्यद्वयेन श्लिष्टोक्त्या वृत्तौ दर्शितः, तत्र दोषशब्दमध्याहृत्यैवं व्याख्या– पादयतेः क्विबन्तस्य प्रयोगोऽस्तीति न कश्चिद् दोष इति ॥ छ ॥ २. १. १०२. ॥

**न्या० स०—य-स्वर०। पादन्तस्य नाम्न** इति–पूर्वसूत्रेषु नाम्न इत्यधिचक्राणोऽपि नाऽध्याहारि, धातोस्तत्रासम्भवात्, अत्र धातुसम्भवे नाम्न इति विशेषणं चक्रे। अनेकवर्णत्वात् सर्वस्य पादन्तस्य प्राप्नोतीत्याह– **निर्दिश्यमानस्ये**ति। **द्विपदिकामि**ति– " संख्या समाहारे च० " [ ३. १. ९९. ] इति सुप्रख्यादारपैत्कल् (?) [ " सु-संख्यात् " ७. ३. १५०. इति पाद्, " संख्यादे० " ७. २. १५२. इत्यकल् ] अलोपश्च, ननु " अवर्णेवर्णस्य " [ ७. ४. ६८. ] इति सिद्धेऽकल्सन्नियोगे किमल्लोपेन, सत्यम्– स्थानित्वाभावार्थम्, अन्यथा " स्वरस्य० " [ ७. ४; ११०. ] इति स्थानित्वे पादशब्दाभावान्न स्यात् पदादेशः। **पादमाचष्टे पादयती**ति– अत्र व्यञ्जनान्तः पाच्छब्दो लिख्यते, सस्वरे तु णिज्यल्लोपे " स्वरस्य० " [ ७. ४. ११०. ] इति स्थानित्वे पाच्छब्दाभावाद् द्व्यङ्गविकलत्वं स्यात्, तर्हि पादमाचष्ट इति वाक्ये पदः पश्येति यद् दर्शितं तत् कथम् ?, उच्यते– प्रत्यासत्तिन्यायाद्, यस्मिन् प्रत्ययेऽकारलोपस्तस्मिन् यद्यादेशोऽपि प्राप्नोति, अत्र तु णावकारलोपः शसि त्वादेशः, यदा व्यञ्जनान्ताण्णिज् तदा " नैकस्वरस्य " [ ७. ४. ४४. ] इत्यन्त्यस्वरादिलोपाभावः। **कश्चिदि**ति– देवनन्दी ॥ २.१.१०२ ॥

## उदच उदीच् । २ । १ । १०३ ॥

**त० प्र०—उदचि**ति उत्पूर्वस्याञ्चतेः कृतनलोपस्य निर्देशः, **उदचो नाम्नोऽणि-क्य-घुटि यकारादौ स्वरादौ च प्रत्यये परे ' उदीच् ' इत्ययमादेशो भवति। उदीच्यः; उदीचः पश्य, उदीची स्त्री कुले वा, उदीचा, उदीचे। य-स्वर इत्येव– उदग्भ्याम्, उदक्काम्यति। अणि-क्य-घुटीत्येव– उदञ्चमाचष्टे– उदयति; उदञ्चमिच्छति– उदच्यति, उदगिवाचरति– उदच्यते; उदञ्चौ, उदञ्चः, उदञ्चि कुलानि। अच इति लुप्तनकारस्याञ्चेर्निर्देशाद्– उदञ्चा, उदञ्चे, क्विप्यर्चायां निषेधान्नलोपाभावः ॥ १०३ ॥**

**श० न्या०—उदच०। उदच** इति ' उदञ्चौ ' इत्यादिप्रयोगप्रकृतेरनुकरणमित्याह–**उदचिती**त्यादि। तस्य च नाम्न इत्यधिकृतं धातुत्वव्यवच्छेदार्थं समानाधिकरणं विशेषणमित्याह– **उदचो नाम्न** इति। उदञ्चतीति क्विपि " अञ्चोऽनर्चायाम् " [ ४. २. ४६. ] इति नलोपे " तत्र साधौ " [ ७. १. १५. ] इति " भवे " [ ६. ३. १२३. ] इति वा ये शसि च– **उदीच्यः, उदीचः**। स्त्रियाम् " अञ्चः " [ २. ४. ३. ] इति ङ्याम्, नपुंसके तु " औरीः " [ १. ४. ५६. ] इतीत्वे– **उदीची। स्त्री कुले** इत्यनुप्रयोगौ लिङ्गाभिव्यक्त्यर्थौ। भ्यामि " च-जः क-गम् " [ २. १. ८६. ] इति कत्वे तृतीयत्वे– **उदग्भ्याम्**। उदञ्चमिच्छति " द्वितीयायाः काम्यः " [ ३. ४. २२. ] इति काम्ये– [ **उदक्काम्यति** ]। **उदयती**ति– णिचि " त्र्यन्त्यस्वरादेः " [ ७. ४. ४३. ] इत्यन्त्यस्वरादिलोपः। **उदच्यति** " अमाव्ययात् क्यन्० " [ ३. ४. २३. ] इति क्यन्। " क्यङ् " [ ३. ४. २६. ] इति क्यङि– **उदच्यते**।

**उदञ्चावि**त्यादि- " अचः " [ १. ४. ६९. ] इति नागमः । एतेषु ' अणिक्यघुटि ' इति वचनाण्णिजादावादेशो न भवति । अथ ' उदञ्चा ' इत्यादावघुट्स्वरे आदेशः कस्मान्न भवतीत्याह- अच इत्यादि । [ **क्विप्यर्चायामि**ति- ] क्विपि " अञ्चोऽनर्चायाम् " [ ४. २. ४६. ] इत्यत्रानर्चायामिति वचनादिति शेषः ॥ छ ॥ २. १. १०३. ॥

**न्या० स०—उदच०** । **उदयतीति**- ननु णिवर्जनं किमर्थम् ?, न च वाच्यं- णिवर्जनाभावे उदीचादेशः स्यात्, यतो भवतु- उदीचादेशः, तथापि " त्र्यन्त्यस्वरादेः " [ ७. ४. ४३. ] इति लोपे उदयतीति भविष्यति, अत्रोच्यते- विशेषविहितत्वाल्लुकं बाधित्वा प्रथममेवादेशः स्यात्, तथा च * सकृद्गते स्पर्धे०* इति न्यायात् पश्चादपि न स्यात् ॥ २. १. १०३. ॥

## अच्च् प्राग् दीर्घश्च । २ । १ । १०४ ॥

**त० प्र०—अचिति**- अनकारस्याञ्चेर्निर्देशः, **अचिति** नाम णि-क्य-घुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे चकारमात्रं भवति, प्राक्- पूर्वोऽनन्तरस्वरश्च दीर्घो भवति । प्राच्यः, प्रतीच्यः; प्राचः, प्राचा; दधीचः, दधीचा; मधूचः, मधूचा; पितृचः, पितृचा; प्राची, प्रतीची स्त्री कुले वा । अन्वाचयशिष्टत्वाद् दीर्घस्वस्य तदभावेऽपि चादेशो भवति- दृषच्चा, दृषच्चे; अत्र *स्वरस्य ह्रस्व-दीर्घ-प्लुताः * इति न्यायाद् दृषदो दीर्घो न भवति । य-स्वर इत्येव- प्रत्यग्भ्याम्, मध्वग्भ्याम् । अणि-क्य-घुटीत्येव- दध्यञ्चमाचष्टे- दध्ययति; दध्यच्यति, दध्यच्यते; दध्यञ्चौ, दध्यञ्चः, दध्यञ्चि कुलानि । अच इति लुप्तनकारस्याञ्चेर्ग्रहणादिह न भवति- साध्वञ्चः पश्य, साध्वञ्चा, साध्वञ्चे ॥ १०४ ॥

**श० न्या०—अच्च्०** । **' अच् '** इत्यनाकारस्याञ्चेः कार्यिणो निर्देशः, **' च् '** इति कार्यनिर्देशः, अभेदनिर्देशस्तु समस्तादेशार्थः । **प्रागिति**- पूर्वत्वं चादेशापेक्षया, तत्रापि सन्निहितपरित्यागे व्यवहितपरिग्रहे कारणाभावादनन्तर एव गृह्यत इत्याह- **प्राक्- पूर्वोऽनन्तर** इति । प्राञ्चतीति क्विपि पूर्ववद् यादावनेन चादेशे दीर्घत्वे च- **प्राच्य** इति । अथ दृषदमञ्चतीति क्विपि टादावनन्तरपूर्वस्वराभावे दीर्घत्वाभावादेकयोगनिर्दिष्टत्वादादेशस्याप्यभावात् कथं ' दृषच्चा ' इत्यादि सिध्यतीत्याह-**अन्वाचयशिष्टत्वादि**त्यादि-चकारसमुच्चितत्वेनाप्रधानत्वादित्यर्थः, प्रधानवाक्यनिर्दिष्टस्यैव चावश्यविधेयत्वम्, यथा- ' एधानाहर्तुमरण्यं गच्छ, शाकमप्यानेष्यसि ' इत्येधाहरणस्येति । अथात्र दकारस्य दन्त्यत्वाद् लृकारो दीर्घे आसन्नत्वात् कस्मान्न भवतीत्याह- **अत्र स्वरस्ये**त्यादि । शेषं पूर्वेण तुल्ययगमम् ॥ छ ॥ २. १. १०४. ॥

**न्या० स०—अच्च् प्राग्०** । अथ दृषदमञ्चतीति क्विपि टादावनन्तरपूर्वस्वराभावे दीर्घत्वाभावादेकयोगनिर्दिष्टत्वादादेशस्याप्यभावात् कथं दृषच्चेत्यादि सिध्यतीत्याह- **अन्वाचयशिष्टत्वादिति**- अथ व्यवहितस्यापि कथं न भवति ? सत्यम्- प्राक्शब्दस्यानन्तरार्थत्वात्, अत एव पूर्वशब्दमपास्य प्राक्शब्दोपादानमनन्तरार्थम्, अनु-पश्चाद्, आचयनं-मीलनम्- अन्वाचयः, तेन शिष्टोऽन्वाचयशिष्टः । **दीर्घो न भवतीति**- स्थान्यासन्नत्वाद् लृकारः । **दध्ययतीति**- परत्वात् " समानानां० " [ १. २. १. ] इति दीर्घं बाधित्वा गुणः, तथाऽत्र मतान्तराभिप्रायेण " न वृद्धिश्चाविति० " [ ४. ३. ११. ] इति दधीकारवृद्धिनिषेधः, क्विङिल्लोपे सत्यविति प्रत्यये परे गुण-वृद्धी न भवत इति मतान्तरे व्याख्या । अथवा स्वर-व्यञ्जनयोरभेदन्यायेन " स्वरस्य० " [ ७. ४. ११०. ] इति अच्स्थानित्वमतो वृद्धेरभावः ॥ १०४ ॥

## क्वसुष् मतौ च । २ । १ । १०५ ॥

**त० प्र० — णि-क्य-घुड्वर्जिते यकारादौ स्वरादौ मतौ च** प्रत्यये परे क्वस् उष् भवति । विदुषि साधुः- विदुष्यः, पेचुषि साधुः- पेचुष्यः; विदुषः; विदुषा, विदुषे, विदुषी स्त्री कुले वा, विदुष इदं- वैदुषम्, पेचुषः, पेचुषा, पेचुषे, पेचुषी स्त्री कुले वा, पेचुष इदं- पैचुषम्; विदुष्मान्, पेचुष्मान् । मतौ चेति किम् ? विद्वद्भिः, पेचिवद्भिः, विद्वत्काम्यति । अणि-क्य-घुटीत्येव- विद्वांसमाचष्टे- विद्वयति; विद्वस्यति, विद्वस्यते; विद्वांसौ, विद्वांसः, विद्वांसि कुलानि ॥ १०५ ॥

**श० न्या०—क्वसु०** । वेत्तेः [ " वा वेत्तेः० " ५. २. २२. इति ] क्वसौ " तत्र साधौ " [ ७. १. १५. ] इति येऽनेनोषादेशे- **विदुष्यः** । एवं पचेः " तत्र क्वसु-कानौ० " [ ५. २. २. ] इति क्वसौ " अनादेशादे० " [ ४. १. २४. ] इत्येत्वे द्विर्वचनाभावे पूर्ववद् यादौ- **पेचुष्यः** । **विदुषीति**- " अधातूदृदितः " [ २. ४. २. ] इति स्त्रियां ङीप्रत्ययः, नपुंसके तु " औरीः " [ १. ४. ५६. ] इतीत्वम् । " तस्येदम् " [ ६. ३. १६०. ] इत्यणि- **पैचुषम्** । विद्वांसोऽस्य सन्तीति " तदस्यास्त्यस्मिन्० " [ ७. २. १. ] इति मतावुषादेशे च- **विदुष्मान्**, एवं **पेचुष्मान्** । ननु च ' पपुषः, निन्युषः ' इत्यादौ य-स्वरादावुच्यमानस्योषादेशस्य बहिरङ्गत्वेनासिद्धत्वात् तदपेक्षाण्यन्तरङ्गाण्याकारलोपादीनि न प्राप्नुवन्ति, नैष दोषः-नहि वस्त्वन्तरानपेक्षमन्तरङ्गं बहिरङ्गं वा स्वाभाविकं किञ्चिदस्ति, परस्परापेक्षया युगपत्प्राप्तौ तयो-

रवस्थानात्, यथा- 'स्योनः' इत्यत्र यत्व-गुणयोः, पपुष इत्यादौ तु युगपत् प्राप्तिर्नास्ति, उषादेशप्राप्तिकाले आकारलोपादीनां निमित्ताभावादप्रसङ्गाद्, आकारलोपादिप्राप्तिकाले च निर्वृत्त उषादेश इति तेषां निमित्तमेवेति नास्ति परिभाषोपस्थानम्, यदाह- भाष्यम्- "बहिरङ्गमन्तरङ्गमिति प्रतिद्वन्द्विभाविनावेतावर्थौ, ......न चात्रान्तरङ्गबहिरङ्गयोर्युगपदवस्थानमस्ति" [पाणि० सू० ६. ४. २२.] इति, * न स्वरानन्तर्ये * इति प्रतिषेधाद् वा। न चात्रान्तरङ्गत्वादिटा भाव्यमिति वाच्यम्, नित्यत्वादिदं बाधित्वोषु भवति, वर्णविधित्वात् [स्थानिवद्भावा]भावादिटोऽप्रसङ्गः, भवतु वा पूर्वमिट्, तदवयवत्वात् सेट्कस्य वसोरुषादेशो भविष्यति। 'उष्' इति षकारो "नाम्यन्तस्था०" [२. ३. १५.] इति सिद्धः, तस्य प्रक्रियालाघवार्थमनुवादोऽयम्, परमार्थतस्तु 'उस्' इति सकारान्त एवायमादेश इति। **विद्वत्काम्यती**त्यादि- पूर्ववत् काम्यादि ॥ छ ॥ २. १. १०५. ॥

**न्या० स०**—कसुष्म०। पेचुष्य इति। *आगमा यद्गुणीभूता०* इतीट्सहितस्य कस उष्। उषिति षकारस्य "नाम्यन्तस्था०" [२. ३. १५.] इति सिद्धे प्रक्रियालाघवार्थं षकारकरणम् ॥ २. १. १०५ ॥

## श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः । २ । १ । १०६ ॥

**त० प्र०**—श्वन् युवन् मघवन्नित्येतेषां सस्वरो वकारो ङी-स्याद्यघुट्स्वरे परे उर्भवति। शुनी स्त्री, प्रियशुनी कुले, शुनः, शुना, शुने; अतियूनी स्त्री, प्रिययूनी कुले, यूनः, यूना यूने; मघोनी, अतिमघोनी स्त्री, प्रियमघोनी कुले, मघोनः, मघोने। ङीस्याद्यघुट्स्वर इति किम्? शौवनम्, यौवनम्, माघवनम्। अघुटिति किम्? श्वानौ, युवानौ, मघवानौ, अतिश्वानि, अतियुवानि, अतिमघवानि कुलानि। स्वर इति किम्? श्वभ्याम्। नकारान्तनिर्देशादिह न भवति- गोष्ठश्वेन, युवतीः पश्य, युवत्या, मघवतः पश्य, मघवता। अर्थवद्ग्रहणादिह न भवति- तत्त्वदृश्वना, मातरिश्वना ॥ १०६ ॥

**श० न्या०**—श्वन्०। **सस्वरो वकार** इति- सस्वरत्वं च वकारस्य कार्यिणो **मघोन** इति निर्देशात्, अन्यथा व्यञ्जनमात्रस्योत्वे सूत्रे मघोन इति निर्देशो नोपपद्येत। श्वयतेः "श्वन्-मातरिश्वन्-मूर्धन्०" [उणा० ९०२.] इत्यनि निपातनादिकारलोपे- **श्वन्**। योतेः "लू-पू-यु-वृषि०" [उणा० ९०१.] इति कित्यनि- **युवन्**। मह्वेः "श्वन्-मातारिश्वन्-मूर्धन्०" [उणा० ९०२.] इत्यनि नलोपेऽवन्ते च- **मघवन्**। [**शुनी**] 'श्वन्' इत्यतः "स्त्रियां नृत०" [२. ४. १.] इति ङीप्रत्ययः। [**प्रियशुनी**] प्रियः श्वा ययोः कुलयोरिति बहुव्रीहिः, ततः "औरीः" [१. ४. ५६.] इतीत्वम्। [**अतियूनी**] युवानमतिक्रान्तेति समासाद् ङीः। **प्रिययूनी कुले** इति-पूर्ववदीत्वम्। मघवानमतिक्रान्तेति- **अतिमघोनी**। शुन इदं 'तस्येदम्" [६. ३. १६०.] इत्यणि द्वारादित्वादौकारागमे- **शौवनम्**। **यौवनमि**ति- यूनां भावः कर्म वा युवादित्वादण्, "अणि" [७. ४. ५२.] इत्यन्त्यस्वरादिलोपप्रतिषेधः। मघोन इदं "तस्येदम्" [६. ३. १६०.] इत्यणि- **माघवनम्**। **श्वानावि**त्यादि- "नि दीर्घः" [१. ४. ८५.] इति घुटि दीर्घत्वम्। अथ 'श्वन्०' इत्यादौ नकारान्तनिर्देशः किमर्थ इत्यत आह- **नकारान्तनिर्देशादि**ति। गोष्ठे श्वा इति विगृह्य "गोष्ठाऽतेः शुनः" [७. ३. ११०.] इत्यटि "नोऽपदस्य०" [७. ४. ६१.] इति नकारलोपे टाया इनादेशे- **गोष्ठश्वेन**, "यूनस्तिः" [२. ४. ७७.] इति तिप्रत्यये शसादौ- **युवतीरि**त्यादि, अत्र नकारान्तनिर्देशमन्तरेण "विशेषणमन्तः" [७. ४. ११३.] इति * नामग्रहणे लिङ्गविशिष्टस्यापि * इति च न्यायादुत्वं स्यादिति। अथ तत्त्वं दृष्टवान् दशः क्वनिपि, तथा मातर्पूर्वस्य श्वयतेः "श्वन्-मातरिश्वन्०" [उणा० ९०२.] इति निपातनाट्टादावुत्वं कस्मान्न भवतीत्याह- **अर्थवद्ग्रहणादि**त्यादि- अत्रोभयत्रापि 'श्वन्' इत्यनर्थकम् ॥ छ ॥ २. १. १०६. ॥

**न्या० स०**—श्वन्-युवन्०। ङीग्रहणात् स्यादावघुट्स्वरे लब्धे स्यादिग्रहणमघुट्स्वरस्याप्रत्ययत्वशङ्कानिरासार्थम्, शङ्का हि कथम्?, ङीप्रत्ययोऽघुट्स्वरोऽपि प्रत्यय एवेति नाशङ्कनीयम्, ङीग्रहणात्, अप्रत्ययाऽघुट्सम्भवश्च श्वौदन इत्यादिषु, अथाऽघुडित्यत्र पर्युदासात् स्यादिर्लक्ष्यते, तन्न- प्रसज्यवृत्तिनिराकरणे हेतोरभावात्। **प्रियशुनी** इति स्त्रियां तु बहुव्रीहौ "नोपान्त्यवतः" [२. ४. १३.] इति त्रयाणामपि ङीप्रतिषेधः, उपान्त्यवत्त्वा च श्वन्शब्दस्य "न व-मन्त०" [२. १. १११.] इति प्रतिषेधात्, इतरयोस्त्वनेनोत्वविधानात्, यत्तु प्रियशुनीति दृश्यते तत्- प्रथममेव ङ्यां कर्मधारये। **शौवनम्**- शुन इदमिति कार्ये, विकारे तु "एकस्वरात्" [६. २. ४८.] इति मयट् स्यात्। **अतिश्वानी**ति-अतिक्रान्तः श्वा यैरिति वाक्यम्, तत्पुरुषे तु "गोष्ठाऽतेः शुनः" [७. ३. ११.] इति समासान्तः स्यात्। **गोष्ठश्वेने**ति- गोष्ठे श्वेव "सप्तमी शौण्डाद्यैः" [३. १. ८८.] [इति] सः, "गोष्ठाऽतेः०" [७. ३. ११.] इत्यट्।

नन्वत्र समासान्तः समासस्यावयवो भवति, ततश्चानेनाघुट्स्वरादिप्रत्ययस्य व्यवधानाद् प्राप्तिरेव नास्तीति किमुक्तं- नकारान्तनिर्देशादिति, अत्रोच्यते- भाष्यकारवचनाद् यथा समासान्तः समासावयवो भवति, एवमुत्तरपदावयवोऽपीष्यते, ततश्च श्वन्ग्रहणेन तदवयवत्वादस्यापि ग्रहणमित्यघुट्स्वरादिप्रत्ययस्य न व्यवधानमतो यदुक्तं **नकारान्तनिर्देशादि**ति तत् साध्वेव । **मघवत** इति- मघो ज्ञानं सुखं वाऽस्याऽस्तीति, मघा वा आराधकाः सन्त्यस्य "ङ्यापो बहुलम्०" [ २. ४. ९९. ] इति ह्रस्वः । **मातरिश्वनेति**- मां तरति विच्, मातरि- अन्तरिक्षे श्वयति "श्वन्-मातरिश्वन्०" [ उणा० ९०२. ] इति साधुः, अत एव निर्देशात् सप्तम्यलुप् ॥ २. १. १०६. ॥

## लुगातोऽनापः । २ । १ । १०७ ॥

**त० प्र०—आप्वर्जितस्याऽऽकारस्य ङीस्याद्यघुट्स्वरे परे लुग् भवति । कीलालपः, कीलालपा, कीलालपे, शुभंयः, शुभंया, शुभंये, क्त्वः, श्नः; हाहे देहि । आत इति किम्? नदीः । अनाप इति किम्?** खट्वाः, शालाः, मालाः पश्य । **ङी-स्याद्यघुट्स्वर इत्येव- कीलालपास्तिष्ठन्ति, कीलालपां पश्य, कीलालपाभ्याम्** ॥ १०७ ॥

**श० न्या०**—लुगा० । अत्रासम्भवेऽप्युत्तरार्थं 'ङी' इत्यनुवर्तते । **कीलालप** इत्यादि- कीलालं पिबतीति क्विप् विच् वा, ततः शसादि, एवं शुभं यातीति **शुभंय** इत्यादि । **क्त्वः, श्नः**, इति- क्त्वा-श्नाप्रत्यययोरनुकरणम्, अनुकरणशब्दा अपि हि लक्षणं प्रयोजयन्ति, यथा- "अव्यक्तानुकरणादनेकस्वरात्०" [ ७. २. १४५. ] इति, यथैव चान्येऽर्थपरा देवदत्तादिभिः शब्दैर्व्यवहरन्ति, एवं वैयाकरणा अपि प्रकृति-प्रत्ययादीन् प्रत्याययन्तस्तदनुकरणैरेभिर्व्यवहारमारभन्ते । अथ 'क्त्वायां, टायाम्' इत्येवमपि वैयाकरणा व्यवहरन्ति, तत् कथमिति, उच्यते- स स्त्रीलिङ्ग आबन्तोऽनुकरणशब्दो य उदाहृतः सोऽनाबन्तः, उभयथा दर्शनादुभयं व्यवस्थाप्यत इति । **हाहे** इति- ङयि अनुकरणस्याकारलोपः । **देहीति**- "हौ दः" [ ४. १. ३१. ] इत्येत्वम् । **नदीरिति**- अत्र शस्, आकारस्याभावाल्लोपो न भवति । **खट्वा** इत्यादि- एतेषु "आत्" [ २. ४. १८. ] इत्याप्, ततः शस्, अनाप इति वचनाल्लुगभावः । **कीलालपा** इत्यादि- जस् अम् भ्याम् ॥ छ ॥ २. १. १०७. ॥

**न्या० स०**—लुगा० । क्त्वा-टाशब्दयोः केचिदस्त्रीत्वं केचित् स्त्रीत्वं चेच्छन्ति, तत्र, स्त्रीत्वेऽनाप इति वचनादनेन लुगभावे- क्त्वायाः, टायाः, इत्येव भवति, अस्त्रीत्वे त्वनेन लुकि- क्त्वः, टः, इत्याद्येव । **हाहे देहीति**- "ओहांङ्क् गतौ" हाशब्दं जिहीते- गीतकाले कर्तव्यतया आप्नोतीति विच् ॥ २. १. १०७. ॥

## अनोऽस्य । २ । १ । १०८ ॥

**त० प्र०—अनोऽकारस्य ङी-स्याद्यघुट्स्वरे परे लुग् भवति । राज्ञी, राज्ञः, राज्ञा, राज्ञे; तक्ष्णः, तक्ष्णा, तक्ष्णे । ङी-स्याद्यघुट्स्वर इत्येव- राजानौ, राजानः, सुराजानि कुलानि; राजभ्याम्** ॥ १०८ ॥

**श० न्या०**—अनो० । 'अनः' इत्यवयवसम्बन्धषष्ठ्यन्तम् 'अस्य' इत्यस्य कार्यिणो विशेषणमित्याह- **अनोऽकारस्येति** । **राज्ञी** "स्त्रियां नृतः०" [ २. ४. १. ] इति ङीः, ततोऽनोऽकारलोपः, एवमघुट्स्वरेऽपि । "तक्षौ तनूकरणे" अतः "उक्षि-तक्ष्यक्षि०" [ उणा० ९००. ] इत्यनि शसादावनोऽकारलोपे- **तक्ष्णा**, इत्यादि । शोभनो राजा येषां कुलानामिति "नपुंसकस्य शिः" [ १. ४. ५५. ] इति जसः शसो वा शौ "नि दीर्घः" [ १. ४. ८५. ] इति दीर्घत्वे- **सुराजानि** ॥ छ ॥ २. १. १०८. ॥

**न्या० स०**—अनोऽस्य [नेह व्याख्या दृश्यते] ॥ २. १. १०८. ॥

## ई-ङौ वा । २ । १ । १०९ ॥

**त० प्र०—अनोऽकारस्येकारे ङौ च परे लुग् वा भवति । साम्नी, सामनी; दाम्नी, दामनी; सुराज्ञी, सुराजनी कुले; राज्ञि, राजनि; दध्नि, दधनि** ॥ १०९ ॥

**श० न्या०**—ई-ङौ० । 'अनः' इति 'अस्य' इति 'लुग्' इति च वर्तत इत्याह- **अनोऽकारस्ये**त्यादि । '**साम्नी**' इत्यादौ "औरीः" [ १. ४. ५६. ] इतीत्वम्, तत्र पूर्वेण नित्ये प्राप्ते पक्षे तदभावार्थोऽयं विकल्पः, तस्य भावाभावोभयार्थकत्वात्, तत्र भावसिद्धावभावफलो विकल्पविधिः, अभावसिद्धौ भावफलः, उभयसिद्धावुभयफलः, अत्र भावस्य पूर्वेण सिद्धत्वादभावफल इति ॥ छ ॥ २. १. १०९. ॥

**न्या० स०**—ई-ङौ वेति । ङिर्विभक्तिस्तत्साहचर्यादीकारोऽपि विभक्तिरूप एव ग्राह्यः, तेनौकारस्थानिनीकारेऽनेन विकल्पः; ङीप्रत्यये तु राज्ञीत्यादिषु पूर्वेण नित्यमेव, *निरनुबन्धग्रहण०* न्यायाद् वा ॥ २. १. १०९. ॥

## षादि-हन्-धृतराज्ञोऽणि । २ । १ । ११० ॥

**त० प्र०—षकारादेरनो हन् धृतराजन्नित्येतयोश्चाकार-**

स्याणि प्रत्यये परे लुग् भवति । औक्ष्णः, ताक्ष्णः, भ्रौणघ्नः, वार्त्रघ्नः, धार्तराज्ञः । षादीनामिति किम् ? सामनः, वैमनः । अणीति किम् ? ताक्षण्यः ॥ ११० ॥

**श० न्या०—षादि०** । 'हन्' इति 'भ्रूणहन्' इत्यादिप्रयोगस्थस्य हनोऽनुकरणम्, 'धृतराजन्' इति प्रायोगिकस्य 'धृतराज्ञः [ जन् ]' शब्दस्यानुकरणम् । 'अनोऽस्य' इति [ 'लुग्' इति च ] वर्तते । उक्ष्णोऽपत्यमिति "ङसोऽपत्ये" [ ६. १. २८. ] इत्यणि वृद्धौ 'अनपत्ये' इत्यधिकृत्य "उक्ष्णो लुग्" [ ७. ४. ५६. ] इति लुग्विधानादपत्ये नलोपाभावादनः सद्भावेऽप्यणः स्याद्यघुट्स्वरत्वाभावात् पूर्वेणाप्राप्तावनेनाकारलोपे नस्य णत्वे- **औक्ष्ण** इति । एवं तक्ष्णोऽपत्यमिति "शिवादेरण्" [ ६. १. ६०. ] इत्यणि- **ताक्ष्णः**, कारुलक्षणस्तु ञ्य् कुर्वादिञ्येन बाधनात् पक्षे न भवति । भ्रूणं हतवान् [ इति ] क्विपि भ्रूणघ्नोऽपत्यमित्यणि अनोऽकारलोपे "हनो ह्नो घ्नः" [ २. १. ११२. ] घ्नादेशे- **भ्रौणघ्नः** । एवं वृत्रं हतवानिति [ क्विपि वृत्रघ्नोऽपत्यमित्यणि अनोऽकारलोपे घ्नादेशे च- ] **वार्त्रघ्नः** । धृता राजानो येन तस्यापत्यमिति विगृह्य पूर्ववदणादावनोऽकारलोपे "तवर्गस्य०" [ १. ३. ६०. ] इति नकारस्य ञकारे- **धार्तराज्ञः** । **सामनः, वैमनः,** इति- "देवता" [ ६. २. १०१. ] इत्यण् । तक्ष्णोऽपत्यमिति "कुर्वादेर्ञ्यः" [ ६. १. १००. ] इति ञ्यः [ ञ्ये **ताक्षण्यः** ] ॥ छ ॥ २. १. ११०. ॥

**न्या० स०—षादिहन्०** । ताक्ष्ण इति- "सेनान्त०" [ ६. १. १०२. ] इत्यनेन कारुद्वारा प्राप्तस्य ञ्यस्य बाधकः "शिवादेरण्" [ ६. १. ६०. ] इत्यण् । **सामन** इति- द्वयोरपि देवतार्थे, वेत्त्यधीते वेत्यर्थे, इदमर्थे वाऽण्, "अणि" [ ७. ४. ५२. ] इत्यनो लोपाभावः । **ताक्षण्य** इति- अत्र "कुर्वादेर्ञ्यः" [ ६. १. १००. ] [ इति ञ्यः ] ॥ २. १. ११० ॥

## न वमन्तसंयोगात् । २ । १ । १११ ॥

**त० प्र०—**वकारान्तान्मकारान्ताच्च संयोगात् परस्यानोऽकारस्य लुग् न भवति । पर्वणा, पर्वणे; तत्त्वदृश्वना, तत्त्वदृश्वने; कर्मणा, कर्मणे; भस्मना, भस्मने; अश्मना, अश्मने; पर्वणी, कर्मणी, पर्वणि, कर्मणि । संयोगादिति किम् ? प्रतिदीव्ना, साम्ना । वमन्तेति किम् ? तक्ष्णा, मूर्ध्ना ॥ १११ ॥

**श० न्या०—न व०** । वकार-मकारयोः संयोगविशेषणत्वेन "विशेषणमन्तः" [ ७. ४. ११३. ] इत्यन्तत्वे लब्धेऽन्तग्रहणं विस्पष्टार्थम्, अन्यथा 'व-मसंयोगात्' इति समस्तनिर्देशे तयोरेव संयोगादित्याशङ्का स्यात्, 'व-मः संयोगात्' इति व्यस्तनिर्देशेऽपि वकार-मकाराभ्यां परो यः संयोगस्तस्मादित्यपि प्रतीयेतेति । "पॄश् पालन-पूरणयोः" अतः "स्ना-मदि०" [ उणा० ९०४. ] इति वनि गुणे टादौ "अनोऽस्य" [ २. १. १०८. ] इत्यकारलोपप्राप्तौ वकारान्तसंयोगपरत्वादनेन निषेधे- **पर्वणे**त्यादि । एवं **तत्त्वदृश्वने**त्यादि । भसेः सौत्रात् "अशौटि व्याप्तौ" इत्यतश्च "मन्" [ उणा० ९११. ] इति मनि टायां- **भस्मना, अश्मना** । **पर्वणी** इत्यादि- अत्र "ई-ङौ वा" [ २. १. १०९. ] इति विकल्पः प्राप्तः प्रतिषिध्यते । **प्रतिदीव्ना, साम्ने**ति- अत्र वकार-मकाराभ्यामेव परोऽन्, न तु तत्संयोगादिति प्रतिषेधो न भवति । **तक्ष्णा, मूर्ध्ने**ति- अत्र संयोगमात्रात् परो न तु वमन्तादिति "अनोऽस्य" [ २. १. १०८. ] इति लुग् भवति ॥ छ ॥ २. १. १११. ॥

**न्या० स०—न व-मन्त०** । अत्र वकार-मकारयोः संयोगविशेषणत्वेन "विशेषणमन्तः" [ ७. ४. ११३. ] इति तदन्तत्वे लब्धेऽन्तग्रहणं स्पष्टार्थम्, अन्यथा व-मसंयोगादिति समस्तनिर्देशे तयोरेव संयोगादित्याशङ्का स्यात्, वमः संयोगादिति व्यस्तनिर्देशेऽपि वकार-मकाराभ्यां परो यः संयोगस्तस्मादित्यपि प्रतीयेतेति न्यासकारः । **प्रतिदीव्ने**ति- प्रतिदिवा- अह्नः, अपराह्णश्च ॥ २. १. १११. ॥

## हनो ह्नो घ्नः । २ । १ । ११२ ॥

**त० प्र०—**हन्तेः 'ह्न' इत्येवंरूपस्य घ्न इत्ययमादेशो भवति । भ्रूणघ्नी स्त्री, भ्रूणघ्ना, भ्रूणघ्ने, भ्रूणघ्नी कुले, भ्रूणघ्नि, घ्नन्, घ्नन्ति, अघ्नन् । हन इति किम् ? प्लीह्नः, अह्नः, अह्नी; अह्नि । ह्न इति किम् ? वृत्रहणौ, वृत्रहयति ॥ ११२ ॥

**श० न्या०—हनो०** । हनो ह्न इति समानाधिकरणे षष्ठ्यावित्याह- **हन्तेरि**त्यादि । भ्रूणपूर्वाद् हन्तेः क्विपि "नवा शोणादेः" [ २. ४. ३१. ] इति ङ्याम् "अनोऽस्य" [ २. १. १०८. ] इत्यनोऽकारलोपेऽनेन 'ह्' इत्यस्य घ्नादेशे **भ्रूणघ्नी,** एवं नपुंसके औकारस्येत्वे "ई-ङौ वा" [ २. १. १०९. ] इत्यकारलोपेऽनेन घ्नादेशे- **भ्रूणघ्नी, कुले** इति नपुंसकत्वाभिव्यक्त्यर्थोऽनुप्रयोगः । **घ्नन्**, इति- "शत्रानशौ०" [ ५. २. २०. ] इति शतृप्रत्ययः, "गम-हन-जन-खन०" [ ४. २. ४४. ] इत्यकारलोपः, एवं **घ्नन्ती**त्यादि । प्लिहेः रंहेश्च "श्वन्-मातरिश्वन्०" [ उणा० ९०२. ] इति निपात-

नादनि 'प्लीहन्, अहन्, इति स्थितस्य ङसादावकारलोपे- **प्लीह्न** इत्यादि- अत्र हन् इति हन्तेरनुकरणाद् * अर्थवद्ग्रहणे० * इति न्यायाद् वाऽत्रान्यस्य न भवति । वृत्रहणमाचष्ट इति णिच्यन्त्यस्वरादिलोपे- **वृत्रहयति** ॥ छ ॥ २. १. ११२. ॥

**न्या० स०—हनो०** । भ्रूणघ्नीति- "नवा शोणादेः" [ २. ४. ३१. ] इति ङीः प्रत्ययः । **प्लीहून** इत्यादिषु हन् इति हन्तेरनुकरणात्, * अर्थवद्ग्रहण० * इति न्यायाद् वाऽन्यस्य न भवति ॥ २. १. ११२. ॥

## लुगस्यादेत्यपदे । २ । १ । ११३ ॥

**त० प्र०—अपदेऽपदादावकारे एकारे च परेऽकारस्य लुग् भवति । सः, तौ, ते; युष्मभ्यम्, अस्मभ्यम्, पचन्ति, पठन्ति, विवक्षन्, पचे, यजे । अस्येति किम्? अदन्ति, आसे । अदेतीति किम्? श्रमणे, संयते । अपद इति किम्? दण्डाग्रम्, तवैषा ॥ २. १. ११३. ॥**

**श० न्या०—लुग०** । [ **अदेति** ] अच एच्चेति समाहारद्वन्द्वात् सप्तमी, 'अपदे' इति 'अस्य' विशेषणम्, अपदान्ते वर्तमानस्याकारस्य लुग् भवतीत्यत आह- **अपदे** इत्यादि । **अपदादौ** इत्यादिशब्दस्यावयववाचित्वादपदावयवस्याकारस्य सप्तम्या निर्दिष्टे पूर्वस्य- प्रथमस्याव्यवहितस्येत्यर्थः । **स** इति- तद् सि "आ द्वेरः" [ २. १. ४१. ] [ इत्यत्वे ] "लुगस्यादेत्यपदे" [ २. १. ११३. ] इत्यपवादत्वाद्वा( त् ) समानदीर्घत्वं बाधित्वाऽकारलोपः, "तः सौ सः" [ २. १. ४२. ] इति तकारस्य सकारः । एवम्- औकारे जसि चात्वादौ- **तौ,** इत्यादि- ताविति लोपाभावेऽपि सिध्यति, परमेकवचन-बहुवचने उदाहरता मध्यवर्ति प्रसङ्गलिखितमुदाहरणम् । "अभ्यं भ्यसः" [ २. १. १८. ] इति [ अभ्यमि ] कृते- **युष्मभ्यमित्यादि** । **पचन्ति, पठन्तीति**- पचेः पठेश्चान्तिप्रत्यये "कर्तर्यनद्भ्यः०" [ ३. ४. ७१. ] इति शव् । वक्तुमिच्छतीति "तुमर्हाद्०" [ ३. ४. २१. ] इति सनि द्विर्वचनेऽनादिव्यञ्जनलोपे "सन्यस्य" [ ४. १. ५९. ] इतीत्वे चस्य कत्वे षत्वे च विवक्षतीति "शत्रानशौ०" [ ५. २. २०. ] इति शतृप्रत्यये शवि सन्-शवोरकारलोपे सिलोपे "ऋदुदितः" [ १. ४. ७०. ] इति नागमे संयोगान्तलोपे- **विवक्षन्** । एवं पचेर्यजेश्च वर्तमानाया एप्रत्यये "कर्तरि०" [ ३. ४. ७१. ] इति शवि अकारलोपे- **पचे, यजे** । "अदंक् भक्षणे" अतोऽन्तौ- **अदन्ति** । "आसिक् उपवेशने" अत एप्रत्यये- **आसे । श्रमणे, संयते** इति- सप्तम्येकवचने ङिः । दण्डस्याग्रं- **दण्डाग्रमि**ति षष्ठीसमासः, 'दण्ड!' इति सम्बोधनपदं वा ॥ छ ॥ २. १. ११३. ॥

**न्या० स०— लुगस्या०** । अपद इति अदेतोर्विशेषणम् । **दण्डाग्रमिति**- नन्वत्र "वृत्यन्तोऽसषे" [ १. १. २५. ] इति प्रतिषेधादग्र इत्यस्य पदत्वाभावात् कथं नाकारलोपः, सत्यम्- सावधारणव्याख्यानात्- अपद एवेति, अत्र वृत्तेः पूर्वं पदत्वमासीदिति; तर्हि प्रायणमित्यत्र * गतिकारक० * इति न्यायादविभक्त्यन्तेनाऽयनेत्यनेन समासे प्राप्नोति, सत्यम्- अपद इत्युत्तरपदमपि गृह्यते, "ते लुग् वा" [ ३. २. १०८. ] इत्युत्तरशब्दलोपादिति, यथा "वेदूतोऽनव्यय०" [ २. ४. ९८. ] इत्यत्र ॥ २. १. ११३. ॥

## ङित्यन्त्यस्वरादेः । २ । १ । ११४ ॥

**त० प्र०—स्वराणां सन्निविष्टानां योऽन्त्यः स्वरस्तदादेः शब्दरूपस्य ङिति परे लुग् भवति । मुनौ, साधौ; पितुः, मातुः; पिता, माता; एषु व्यपदेशिवद्भावादन्त्यस्वरादित्वम् । महत्याः करः- महाकरः, महाघासः, उपसरजः, मन्दुरजः' त्रिंशता क्रीतम्- त्रिंशकम्, आसन्नाश्चत्वारो येषामासन्नचताः, अदूरचताः । ङितीति किम्? दृषदौ, दृषदः ॥ ११४ ॥**

**श० न्या०—ङित्य०** । सति यस्मिन् यस्मात् पूर्वमस्ति परं नास्ति सोऽन्तस्तत्र भवोऽन्त्यः, अन्त्यस्वर आदिर्यस्य शब्दरूपस्येति च बहुव्रीहिः, तत्र यदि स्वरस्यान्त्यत्वं स्वरव्यञ्जनसमुदायापेक्षं, न तदादिरन्यः सम्भवतीत्यादिग्रहणमनर्थकं स्यात्, अतस्तुल्यजातीयापेक्षमेवान्त्यत्वं विज्ञायत इत्याह- **स्वराणामि**ति । तत्रापि न सन्निवेशानपेक्षमन्त्यत्वमित्याह- **सन्निविष्टानामि**ति । एवं विशिष्टेनान्त्येन स्वरेण विशिष्टं समासार्थं समु[ पा ]दाय लोपमाह- **योऽन्त्यस्वरस्तदादेः शब्दरूपस्ये**ति । [ **ङिति परे लुग् भवती**ति- ] ङकार इत्- अप्रयोगी यस्य तस्मिन् परे लुग् भवतीति । **मुनौ, साधौ** इति- [ ङेः ] "ङिडौं" [ १. ४. २५. ] इति डौ अनेनान्त्यस्वरादेर्लुक् । **पितुः, मातुः**, "ऋतो डुर्" [ १. ४. ३७. ] इति [ ङसिङसो वा ] डुर् ऋकारस्य लोपः । **पिता, माता,** "ऋदुशनस्-पुरुदंश०" [ १. ४. ८४. ] इति सेर्डादेशः, अत्र सर्वत्र "इवर्णादेरस्वे०" [ १. २. २१. ] इति प्राप्ते परत्वाड्डित्त्वस्यानवकाशत्वाच्च लुगेव । अथा[न्त्या]न्त्यस्वर एव न तु तदादिः कश्चिदस्तीत्याह- **एष्वि**त्यादि । **महाकर** इत्यादि- महत्याः कर इत्यादिषष्ठीसमासे "महतः कर-घास०" [ ३. २. ६८. ] इत्यधिकारे "स्त्रियाम्" [ ३. २. ६९. ] इतीकारस्य डादेशेऽङ्ग्रूपस्य लुक् । उपसरे जातो मन्दुरायां जात इति

" सप्तम्याः " [ ५. १. १६९. ] इति डे ' अन् ' इत्यस्य लोपे " ङ्यापो बहुलं० " [ २. ४. ९९. ] इति यथासम्भवं ह्रस्वत्वे-**उपसरजः, मन्दुरजः** । **त्रिंशकमि**ति-" त्रिंशद्-विंशतेर्डकः० " [ ६. ४. १२९. ] इति डकः । **आसन्नचताः, अदूरचताः,** इति- " आसन्नाऽदूरा-ऽधिका-ऽध्यर्ध० " [ ३. १. २०. ] इति बहुव्रीहिः " प्रमाणी-संख्याड्डः " [ ७. ३. १२८. ] इति डस्ततो जस् ॥ छ ॥ २. १. ११४. ॥

**न्या० स०—डित्यन्त्य०** । सति यस्मिन् यस्माद् पूर्वमस्ति परं नास्ति सोऽन्तस्तत्र भवोऽन्त्यः । **मुनौ** अत्र सर्वत्र " इवर्णादेरस्व० " [ १. २. २१. ] इति प्राप्ते परत्वादनवकाशत्वाच्च ङित्त्वस्य लुगेव । **उपसरज** इति- उपसरे देशे जातः । **मन्दुरज** इति- मन्दुरे मन्दुरायां वा जातः " ङ्यापो बहुलं नाम्नि " [ २. ४. ९९. ] इति ह्रस्वः ॥ २. १. ११४. ॥

## अवर्णादश्नोऽन्तो वाऽतुरी-ङ्योः ॥ २ । १ । ११५ ॥

**त० प्र०—श्नावर्जितादवर्णात् परस्यातुः स्थानेऽन्त इत्यादेशो वा भवति, ई-ङ्योः- ईप्रत्यये ङीप्रत्यये च परे । तुदन्ती तुदती कुले; तुदन्ती तुदती स्त्री; करिष्यन्ती करिष्यती कुले; करिष्यन्ती करिष्यती स्त्री; भान्ती भाती कुले; भान्ती भाती स्त्री; प्सान्ती प्साती कुले; प्सान्ती प्साती स्त्री । अवर्णादिति किम् ? अदती सुन्वती रुन्धती तन्वती स्त्री कुले वा, पृथु शतृः; अधीयती स्त्री कुले वा, अत्रातृश् ; जरती स्त्री कुले वा, अत्रातृः । अश्न इति किम् ? क्रीणती लुनती स्त्री कुले वा । ई-ङ्योरिति किम् ? तुदता कुलेन । अवर्णादिति विशेषणादश्न इति प्रतिषेधाच्च लोप-दीर्घाभ्यां पूर्वमेवानेनान्तः, भूतपूर्वतया वा पश्चात् । ' ददती स्त्री, ददती कुले ' इत्यत्र तु कृतेऽप्यन्तादेशे " अन्तो नो लुक् " [ ४. २. ९४. ] इति नलोपः ॥ ११५ ॥**

**श० न्या०—अव०** । श्नावर्जितादवर्णादिति- श्नाशब्देन श्नान्तसमुदाय उच्यते, अवर्णादित्यप्यवर्णान्तः, नह्यवर्णात् परः शताऽस्ति, न च तत्राश्न इति प्रतिषेधो युक्तस्तेनायमर्थः- श्नान्तवर्जितादवर्णात् [ अवर्णान्तात् समुदायात् ] परस्येति, अथवा ' अवर्णाद् ' इति समुदायैकदेशोऽवर्ण एवोच्यते, श्नाशब्देन तु श्नाशब्दसम्बन्ध्यवर्ण इति, तत्रायमर्थः- श्नावर्जितात्- श्नाप्रत्ययावयवो यो न भवति, तस्मादवर्णात् परस्येत्यर्थः । **तुदन्ती, तुदती कुले** इत्यादि- "तुदींत् व्यथने" इत्यतः "शत्रानशौ०" [ ५. २. २०. ] इति शतृप्रत्ययः, तुदादित्वात् शः, औकारस्य " औरीः " [ १. ४. ५६. ] इतीत्वम्, " स्त्रियां नृतः० " [ २. ४. १. ] इति यथासम्भवं ङीप्रत्ययः, पक्षेऽनेनान्तादेशस्ततो " लुगस्यादेत्यपदे " [ २. १. ११३. ] इत्यस्य लुक् एवं करोतेः " शत्रानशावेष्यति० " [ ५. २. २०. ] इति स्यसहिते शतृप्रत्यये " हनृतः० " [ ४. ४. ४९. ] इतीटि " नाम्यन्तस्था० " [ २. ३. १५. ] इति षत्वे पूर्ववदीत्वादौ- **करिष्यन्ती,** इत्यादि । एवं " भांक् दीप्तौ ", " प्सांक् भक्षणे "- **भान्ती** इत्यादि । " अदंक् भक्षणे ", " षुंग्ट् अभिषवे ", " रुधूंपी आवरणे " अतः शतृप्रत्यये यथासम्भवं " स्वादेः श्नुः " [ ३. ४. ७५. ] " रुधां स्वराद्० " [ ३. ४. ८२. ] " कृग्-तनादेः० " [ ३. ४. ८३. ] इति च " श्ना-ऽस्त्योर्लुक् " [ ४. २. ९०. ] इति श्नस्याकारलोपे ' अवर्णाद् ' इति वचनादन्तादेशाभावे- **अदती,** इत्यादि । अधिपूर्वाद् " इंङ्क् अध्ययने " इत्यतो " धारीङः० " [ ५. २. २५. ] इत्यतृशि " धातोरिवर्णोवर्णस्य० " [ २. १. ५०. ] इतीयादेशे ङ्यामौकारस्येकारे वा- **अधीयती । जरती,** इति- जीर्यतेः " जृषोऽतृः " [ ५. १. १७३. ] इत्यतृः । **क्रीणती, लुनती,** क्रीणातेर्लुनातेश्च शतरि " क्र्यादेः० " [ ३. ४. ७९. ] इति श्नाप्रत्यये " श्नश्चातः " [ ४. २. ९६. ] इत्याकारलोपः । **तुदता,** इति- अत्र टायाम् ' ईङ्योः ' इति वचनान्न भवति । अथ ' तुदन्ती ' इत्यादौ मूलोदाहरणे ' ईङ्योः ' इत्यनपेक्षत्वेन वर्णमात्राश्रयत्वेन चान्तरङ्गत्वात् " लुगस्यादेत्यपदे " [ २. १. ११३. ] इति " समानानां तेन० " [ १. २. १. ] इति च अकारलोप-दीर्घत्वयोः कृतयोरवर्णात् परत्वं [ शतृप्रत्ययस्य ] न सम्भवति, तत् कथमन्तादेशः, अवर्णशतृप्रत्ययेकारङीमात्रापेक्षत्वेन बहिरङ्गत्वादित्याह- **अवर्णादिती**त्यादि- यदि प्रागेवान्तादेशाल्लोप-दीर्घौ स्यातां तदाऽवर्णात् परस्यातुः स्थानेऽन्त इति वचनमसम्भवदर्थमनर्थकं स्यात्, तथा लोपेन प्रागेवाकारनिवृत्तेः प्राप्त्यभावाद् ' अश्नः ' इति प्रतिषेधोऽप्यनर्थक इत्यतोऽन्तरङ्गावपि लोप-दीर्घावस्मिन् विषयेऽन्तादेशात् पश्चाद् भवतः, अन्यथा तदनुपपत्तेरिति; अथवाऽन्तरङ्गत्वाल्लोप-दीर्घयोः कृतयोरपि वचनसामर्थ्याद् भूतपूर्वतया पश्चादप्यन्तादेश इति । * वार्णात् प्राकृतं बलीयः * इति तु नेहोपतिष्ठते भिन्नकालत्वात्, तथाहि- ईङ्योः सद्भावेऽन्तादेशः प्राप्नोति, लोप-दीर्घौ तु ततः प्रागेव, यत्र हि वार्ण-प्राकृतयोर्युगपत् प्राप्तिः ' कारक ' इत्यादौ तत्रेदमुपतिष्ठत इति । नन्वेवं तर्हि ' ददती ' इत्यादावाकारलोपेऽपि भूतपूर्वतया शतुरन्तादेशे नकारश्रवणप्रसङ्ग इत्याह- **अत्र त्वि**त्यादि ॥ छ ॥ २. १. ११५. ॥

**न्या० स०—अवर्णादश्नो०** । ननु तुदन्ती भान्तीत्यादावीङ्योरनपेक्षत्वेन वर्णमात्राश्रयत्वेन चान्तरङ्गत्वात् " लुगस्यादेत्यपदे ",

[ २. १. ११३. ] इति " समानानाम्० " [ १. २. १. ] इति च अकारलोप-दीर्घत्वयोः कृतयोरवर्णात् परत्वं शतृप्रत्ययस्य नास्ति तत् कथमकाराऽवर्णेशतृप्रत्ययङीभावापेक्षत्वेन बहिरङ्गोऽन्त इत्यादेश इत्याह- **अवर्णादित्यादि** । **भूतपूर्वतयेति**- * वार्णात् प्राकृतं बलीयः * इति तु नेहोपतिष्ठते, भिन्नकालत्वात्, तथाहि- ई-ङ्योः सद्भावेऽन्तादेशः प्राप्नोति, लोप-दीर्घौ तु ततः प्रागेव, यत्र हि वार्ण-प्राकृतयोर्युगपत् प्राप्तिः ' कारकः ' इत्यादौ तत्रेदमुपतिष्ठत इति ॥ २. १. ११५. ॥

## श्य-शवः । २ । १ । ११६ ॥

**त० प्र०—श्याच्छवश्च परस्यातुरी-ङ्योः परतोऽन्त इत्यादेशो भवति । दीव्यन्ती सीव्यन्ती स्त्री कुले वा; भवन्ती, चोरयन्ती स्त्री कुले वा; धारयन्ती शास्त्रं स्त्री कुले वा । श्य-शव इति किम् ? चरती स्त्री कुले वा । ई-ङ्योरित्येव- दीव्यता, भवता ॥ ११६ ॥**

**श० न्या०—**श्य-श० । ई-ङ्योरिति वर्तते निमित्तान्तरस्यानुपादानात् । **दीव्यन्ती सीव्यन्ती कुले स्त्री वा** " दिवूच् क्रीडादौ ", " षिवूच् उतौ " आभ्यां शतृप्रत्ययः, " दिवादेः श्यः " [ ३. ४. ७२. ] इति श्यः, ततः पूर्ववदी-ङ्योरन्तादेशः । **भवन्ती** इत्यादि- " भू सत्तायाम् " " चुरण् स्तेये " " धृंङ् धारणे " [ एभ्यः शतृप्रत्यये यथासम्भवं णिचि शवि च पूर्ववदी-ङ्योरन्तादेशः । ] **जरती** " जॄषोऽतृः " [ ५. १. १७३. ] इत्यतृः । ननु ई-ङ्योः पूर्वेणैव शतुरन्तादेशः सिद्धः, किमर्थमिदम् ? नैष दोषः- नित्यार्थत्वादस्य ॥ छ ॥ २. १. ११६. ॥

**न्या० स०—श्य-शवः** [नेह व्याख्या दृश्यते] २. १. ११६. ॥

## दिव औः सौ । २ । १ । ११७ ॥

**त० प्र०**— दिवोऽन्तस्य सौ परे और्भवति । **द्यौः, प्रियद्यौः, हे द्यौः !, अतिद्यौः !** । * निरनुबन्धग्रहणे न सानुबन्धकस्य* इति धातोर्न भवति- **अक्षैर्दीव्यति क्विप् ऊट्- अक्षद्यूः । साविति किम् ? दिवं पश्य । द्यामिति** तु द्योशब्दस्य " आ अम्-शसोऽता " [ १. ४. ७५. ] इत्याकारे रूपम् ॥ ११७ ॥

**श० न्या०—**दिव० । **' दिवः '** इति स्थानषष्ठ्यन्तम्, ततश्च " षष्ठ्यान्त्यस्य " [ ७. ४. १०६. ] इत्युपतिष्ठत इत्याह- **दिवोऽन्तस्येति** । दिव औकारेण सम्बन्धात् सेः परत्वमात्रविज्ञानात् तत्सम्बन्धि[ नीवान्यसम्बन्धि ]न्यप्युदाहरति- **द्यौरित्यादि**- दीव्यतेः " दिवेर्डिव् " [ उणा० ९४९. ] इति डिवि- दिव् औणादिकः, ततः सावनेन वकारस्यौत्वं सो रुत्वादि, प्रिया द्यौर्यस्येति " परतः स्त्री पुंवद् " [ ३. २. ४९. ] इति पुंवद्भावः, अतिक्रान्तो दिवमिति प्रादिसमासः । अथाक्षपूर्वाद् दीव्यतेः क्विप्यूटि कृते * एकदेशविकृतस्यानन्यत्वात् * औत्वं कस्मान्न भवति ? नह्यधातोरित्यस्तीत्याह- **निरनुबन्धग्रहणेनेत्यादि**- सूत्रे हि निरनुबन्धोपादानाद् व्युत्पन्नमननुबन्धकं ' दिव् ' इति नाम गृह्यते, व्युत्पत्तिपक्षेऽप्यवयवानां सानुबन्धकत्वं न तु नाम्न इति । ननु दिवो वकारस्य " आ अम्-शसोऽता " [ १. ४. ७५. ] इत्याकारो विभाषया वक्तव्यः, अन्यथा दिवमित्यादेव स्यात्, न तु द्यामित्यादीत्याह- **द्यामित्यादि**- " द्युंक् अभिगमने " अतः " द्यु-गमिभ्यां डोः " [ उणा० ८६७. ] इति डोः, ततोऽम् ॥ छ ॥ २. १. ११७. ॥

**न्या० स०—दिव औः सौ । द्यौरिति**- अत्र " उः पदान्ते० " [ २. १. ११८. ] इति प्राप्तेऽप्यचरितार्थत्वात् साविति विशेषविधानाद् वा औरेवानेन प्रवर्तते, न तूकारः । दिव औकारेण सम्बन्धात् सेः परत्वमात्रविज्ञानात् तत्सम्बन्धिन्य( नीवा )न्यसम्बन्धिन्यप्युदाहरति- **प्रियद्यौरित्यादि । अक्षद्यूरिति**- * एकदेशविकृतम्० * इति प्राप्तिः ॥ २. १. ११७. ॥

## उः पदान्तेऽनूत् । २ । १ । ११८ ॥

**त० प्र०**—पदान्ते वर्तमानस्य दिवोऽन्तस्योकारादेशो **भवति, स चानूत्**- तस्य तूकारस्य दीर्घत्वं न भवतीत्यर्थः । **द्युभ्याम्, द्युभिः, द्युभ्यः, द्युषु, अतिद्युभ्याम्, परमद्युभ्याम्, द्युगतः, द्युकामः, द्युत्वम्, द्युकल्पः, विमलद्यु दिनम् । पदान्त इति किम् ? दिव्यति, दिव्यम्, दिवौ, दिवम्, दिवि । अनूदिति किम् ? अद्यौर्द्यौर्भवति- द्युभवतीत्यत्र** " दीर्घश्च्वि-यङ्यक्येषु च " [ ४. ३. १०८. ] इत्यनेन च्वौ दीर्घत्वं न भवति । ऊकारस्य प्रतिषेधाद् वृद्धिर्भवत्येव- **द्युकामस्यापत्यं द्यौकामिः । दिवाश्रयः, दिवौकस इति तु पृषोदरादित्वादकारागमे भविष्यति, वृत्तिविषये वाऽकारान्तो दिवशब्दोऽस्ति ॥ ११८ ॥**

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनबृहद्वृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः ॥

प्रावृड् जातेति भो[ हे ] भूपाः, मा स्म त्यजत काननम् ।
हरिः शेतेऽत्र न त्वेषो, मूलराजमहीपतिः ॥ ५ ॥

**श० न्या०—**उः पदान्ते० । पदान्त इति न्यायप्राप्तस्य दिवोऽन्तस्य विशेषणमित्याह- **पदान्ते वर्तमानस्य दिवोऽन्तस्येति । द्युभ्यामित्यादि**- " नाम सिदय्व्यञ्जने " [ १. १.

२१. ] इति पदत्वम्, अतिक्रान्तौ दिवमिति, परमे च [ ते दिवौ च, ] दिवं गतः, दिवं कामयते " शीलि-कामि० " [ ५. १. ७३. ] इति णः, दिवो भावः, ईषदपरिसमाप्ता द्यौः, विमला द्यौर्यस्मिन्, इति विग्रहः । दिवमिच्छतीति क्यनि- **दिव्यति** । दिवि भवमिति " द्युप्रागपागुदक्-प्रतीचः " [ ६. ३. ८. ] इति ये- **दिव्यम्** । तत्राग्व्यञ्जन इति वचनादत्रापदत्वम् । एवं **दिवावित्यादि** । ननु द्युभ्यामित्यादौ दीर्घप्रसङ्ग एव नास्ति, कथमुच्यते- ' अनूद् ' इत्याह- **अद्यौर्द्यौरित्यादि** । **द्यौकामिरित्यत्र** तु ऊकारमात्रप्रतिषेधादिञि वृद्धिर्भवत्येवेत्याह- **ऊकारप्रतिषेधादित्यादि** । ननु **दिवाश्रय** इत्यादावन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे " उः पदान्ते० " [ २. १. ११८. ] इत्युत्वे कथं दिवाश्रय इत्यादीत्यत आह- **पृषोदरादित्वादित्यादि** ॥ छ ॥ २. १. ११८. ॥

इत्याचार्य**श्रीहेमचन्द्र**विरचिते स्वोपज्ञ**तत्त्वप्रकाशिका**प्रकाशे **शब्दमहार्णवन्यासे** द्वितीयस्याध्यायस्य प्रथमः पादः ॥

ग्रन्थाग्रम्-१८२८ ॥

अनुसन्धानकारस्य—

**प्रावृड् जाते**ति-मूलराजविजययात्रासु प्रस्तुतासु तत्पराक्रमभीतान् स्वनगराणि विहाय काननमाश्रितान् ' वर्षाकाले समागते निद्रारहिततया ख्यातानां देवानां मध्ये वरेण्यस्य विष्णोरपि शयनश्रवणेन तत्तुल्योऽयमपि मूलराजनृपतिः शयान इव निर्व्यापारो भवेद् ' इति विचार्य वनान्निर्गत्य स्वगृहान् गन्तुमिच्छतो विरोधिभूपानुद्दिश्य तद्धितमिच्छोः कस्यचिदुक्तिरियम् । **हे भूपाः** ! मूलराजविरोधात् प्राक् पृथ्वीपालकत्वेन प्रसिद्धाः ! सम्प्रति तु भयात् काननिवासाः !, **प्रावृट्** वर्षासमयः, **जाता** प्रादुर्भूता, **इति** हेतोः, अस्मिन् समये नास्ति मूलराजभयमिति मत्वेत्यर्थः, **काननं** वनं, **मा स्म त्यजत** न मुञ्चत, तत्रैव निलीनास्तिष्ठतेति भावः, किमिति वनत्यागो निषिध्यत इत्याशङ्कायामाह- **अत्र** वर्षाकाले, **हरिः** तन्नाम्ना ख्यातो विष्णुः, **शेते** शयनमाश्रयति, **तु** किन्तु, **एष मूलराजमहीपतिः** असौ मूलराजरूपो विष्णुस्तु न शेते, किन्तु सर्वदा जागरूक एव तिष्ठतीति न वनाश्रयणकारणापगमः, येन हेतुना भवन्तः काननमाश्रिताः स साम्प्रतमप्यस्त्येति काननत्यागकारणाभावान्न काननत्यागो युक्त इति भावः, ' **एषो मूलराजमहीपतिः** ' इति पाठे तु एषः-गमनशील इत्यर्थः । अत्र हरेरपि शयने तत्त्वेनाध्यवसितस्य मूलराजस्य शयनाभावरूपो व्यतिरेको ध्वनित इति व्यतिरेकालङ्कारध्वनिः । अत्र सम्भवन्तोऽप्यन्येऽर्थाः प्रकृतविरुद्धा इति नोल्लिखिताः ॥ ५ ॥

**न्या० स०**—उः पदान्ते० । **दिवमिति**- कलापकेऽस्य दिव्शब्दस्यामि सति अन्त्यस्यात्वं विकल्पेन भवति, ततो द्यामित्यपि भवति, शस्यपि विकल्पेनाकारमिच्छन्ति केचित् । अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वेऽनेनोत्वे कथं दिवाश्रय इत्यादीत्यत आह- **अकारागमे भविष्यतीति**-अकारागमे चाकारागमकरणसामर्थ्यादेव उत्वं विभक्तेः पूर्वं वाऽकारागमे पदान्तत्वाभावादेव वा । **वृत्तिविषय** इति- समासविषये प्रयुज्यते, केवलस्तु न प्रयुज्यत इत्यर्थः ॥ २. १. ११८. ॥

॥ इति द्वितीयस्य प्रथमः पादः ॥

## क्रियाहेतुः कारकम् । २ । २ । १ ॥

**त० प्र०**—क्रियाया हेतुः- कारणं **कर्त्रादि कारकसंज्ञं भवति, तत्र द्रव्याणां स्व-पराश्रयसमवेतक्रियानिर्वर्तकं सामर्थ्यं शक्तिरित्याचक्षते; शक्तिश्च सहभूर्यावद्द्रव्यभाविनी च** क्रियाकाल एवाभिव्यज्यते । **करोतीति कारकमित्यन्वर्थसंज्ञासमाश्रयणाच्चानाश्रितव्यापारस्य निमित्तत्वमात्रेण हेत्वादेः कारकसंज्ञा न भवति । कारकप्रदेशाः-" कारके कृता " [ ३. १. ६८. ] इत्येवमादयः ॥ १ ॥**

**श० न्या०**—**क्रिया०** । क्रियाया हेतुः- कारणं निर्वर्तकमिति यावत्, क्रियास्वरूपं च " क्रियार्थो धातुः " [ ३. ३. ३. ] इत्यत्र निर्णेष्यामः । **कारकमिति** संज्ञाया भाव्यमानत्वाद् भूतविभक्त्यनुपपत्त्या भाव्यमानविभक्त्या प्रथमया निर्देशः । कारकशब्दः कर्तृमात्रपर्यायः, **कर्त्रादी**त्यत्र कर्तृशब्दस्तु कर्तृविशेषवचन इति **कर्त्रादि कारकसंज्ञमि**ति विशेषण-विशेष्यभाव उपपन्न इति, अन्यथा ' वृक्षो वृक्षसंज्ञः ' इतिवदनुपपन्नः स्यात्, अर्थस्याभेदादिति । कारकशब्दाभिधेयं निर्वक्ति- **तच्चे**त्यादि- चः पुनरर्थे, तत् पुनरित्यर्थः, क्रिया हि द्विविधा- कर्तृस्था कर्मस्था चेति, तत्र कर्तृस्था कर्तृसमवायिनी, यथा- आसन-गमनादिका, कर्मस्था च कर्मसमवायिनी, यथा पाकादिका; कर्तृ-कर्मणी च क्वचित् स्वाश्रयसमवेतक्रियाया निर्वर्तके, क्वचित् पराश्रयसमवेतक्रियायाः, शेषाणि पराश्रयसमवेतक्रियानिर्वर्तकान्येव । **द्रव्याणां सामर्थ्यं कारकमि**ति सम्बन्धः, द्रव्यस्य तु कारकत्वे प्रतिबन्धकमन्त्रादिसन्निधाना-ऽसन्निधानाभ्यां दहनादेर्दाहादिक्रियोत्पत्त्यनुत्पत्ती न स्याताम्, द्रव्यस्वरूपस्य सर्वदा विद्यमानत्वादुत्पत्तिरेव स्यात्, तस्माच्छक्तिरेव कारकमित्यास्थेयम् । शक्तिर्हि द्रव्यस्य धर्मः, तस्य चतुष्टयी गतिः- कश्चित् सहभूर्यावद्द्रव्यभावी च, यथा- स्फटिकस्य शौक्ल्यम् १, कश्चित् सहभूरयावद्द्रव्यभावी [च], यथा- अपक्वघटस्य श्यामिका २, कश्चिदसहभूर्यावद्द्रव्यभावी च, यथा- तस्यैव घटस्य पाकजा रूपादयः ३,

कश्चिदसहभूरयावद्द्रव्यभावी [च], यथा- मेषयोः क्रियासंयोगः ४, तत्र शक्तिलक्षणस्य धर्मस्य स्वरूपमाह- **शक्तिश्चे**त्यादि- न चैवं सर्वदा क्रियोत्पत्तिप्रसङ्ग इति वाच्यम्, अभिव्यक्ताया एव तस्याः कारणत्वात्, यथा केतक्यादिजलानां वर्षाद्यभिभूतस्य गन्धस्य तरुणतरणिकिरणसम्पर्काभिव्यक्तस्य गन्धोपलम्भक्रियाहेतुत्वम्, न चैतावता तस्यासत्त्वम्, उत्तरकालमभिव्यज्यमानत्वात्; न च तदैव तस्योत्पत्तिरित्यपि वाच्यम्, रविकरस्पर्शस्य गन्धोत्पत्तौ सामर्थ्यानवधारणात्, सामर्थ्ये वा जलान्तरेऽपि ततो गन्धोत्पत्तिः स्यात्, तस्मात् क्रियाकालाभिव्यक्ता शक्तिः कारकमिति स्थितम्।

'अथ संज्ञा' इति प्रकृत्य कारकादयः शब्दाः पठितव्याः, अन्यथा 'कारकादयः संज्ञा' इत्येष सम्यक् प्रत्ययो न स्यात्, अतः संज्ञाधिकार इति वक्तव्यम्, तथा क्रियमाणेऽपि संज्ञा-संज्ञिनोरसन्देहो वक्तव्यः, कथमन्यथा 'कारकशब्दः संज्ञा, क्रियाहेतुः संज्ञी' इति, न पुनर्व्यत्यय इति; अत्रोच्यते- यत् तावत् संज्ञासंप्रत्ययार्थः संज्ञाधिकारः कर्तव्यः, तन्न- आचार्याचारात् संज्ञासिद्धेः, तद्यथा- लोके माता-पितरौ पुत्रस्य जातस्य संवृत्तेऽवकाशे नाम कुरुतः- देवदत्तो, यज्ञदत्त इति, तयोराचारादन्येऽपि जानन्ति- इयमस्य संज्ञेति, एवमिहापि केचिद् व्याचक्षाणा आहुः- 'कारकशब्दः संज्ञा, क्रियाहेतुः संज्ञी' इति, अपरे कारकमित्युक्त्वा कर्त्रादीन्युदाहरन्ति, तेन मन्यामहे-यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिन इति; यदपि 'संज्ञा-संज्ञिनोरसन्देहो वक्तव्यः' इत्युक्तम्, तदपि न- आचार्यव्यवहारादेव तस्य सिद्धत्वात्, कारकशब्दस्य हि प्रत्यायनशक्तिव्याख्यानेन प्रकाश्यते, यथाऽकारादीनां वर्णत्वमिति। अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिन इति, लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते, आकृत्या हि साहचर्याद् भेदो लक्ष्यते, तेनायमर्थः- कारकशब्द एकत्वात् संज्ञा, क्रियाहेतुशब्देन प्रत्यायितानां बहुत्वात् संज्ञित्वं, लाघवार्थत्वात् संज्ञाकरणस्य। तथा आवर्तिन्यः संज्ञा भवन्ति, कारकशब्दश्चावर्तते, न क्रियाहेतुशब्दः, तद्यथा- देवदत्तशब्द आवर्तते, न मांसपिण्ड इति। अथवा सतः कार्यिणः कार्येण भाव्यमिति पूर्वोच्चारितः संज्ञी, पश्चादुच्चारिता संज्ञेति। किं वाऽस्थानेऽयं यत्नः क्रियते? नहीदं लोकाद् भिद्यते, यथा- अगोज्ञाय कश्चिद् गां सक्थनि कर्णे वा गृहीत्वोपदिशति- अयं गौरिति, न चास्मायाचष्टे- इयमस्य संज्ञेति; भवति चास्य संप्रत्ययः, तस्मादन्तरेणापि संज्ञाशब्दप्रयोगं लोकव्यवहारवदत्र संज्ञा-संज्ञिसम्बन्धः सिध्यतीति। अथ संज्ञिनिर्देशः किमर्थः? अकारकस्य मा भूदित्येवमर्थः, अन्यथा 'ग्रामस्य समीपादागच्छति' इत्यकारकस्यापि ग्रामस्यापादानसंज्ञा प्रसज्येत, तथाहि- यो वृक्षशाखायाः पतत्यसौ वृक्षादपि पतति, एवं यो ग्रामसमीपादागच्छति ग्रामादप्यसावागच्छतीत्यपाये ग्रामस्यावधित्वमस्ति, आगमने तु निर्वर्तकत्वाभावः, समीपविशेषणत्वेनोपात्तत्वादिति। अथ नात्र ग्रामोऽपाययुक्तः, किं तर्हि? समीपं, तस्य विशेषणत्वेनोपादानात्, अपायो हि संश्लेषपूर्वकः, संश्लेषश्च सन्नसन् वा बुद्ध्या कल्प्यते, स च समीपस्यैव विवक्षितो न तु ग्रामस्य, यदा च ग्रामोऽपाययुक्तो भवति भवति तदाऽपादानसंज्ञा, यथा- ग्रामादागच्छतीति; एवं तर्हि वृक्षस्य पत्रं पततीत्यत्रापादानसंज्ञा प्राप्नोति, ग्रामस्य समीपादित्यत्रापाययुक्तार्थान्तरसद्भावान्नास्ति ग्रामस्यापाययोगः, इह त्वर्थान्तरस्यानिर्देशाद् वृक्षस्यैवापाययुक्तत्वमिति, नैतदप्यस्ति- यतो नात्रापायो विवक्षितः, कस्तर्हि? सम्बन्धः; पर्णविशेषणत्वेन वृक्षस्य विवक्षितत्वात्; न चैवं पततीति प्रयोगानुपपत्तिः, वृक्षमजहत्यपि पर्णे शाखास्थे भूमिं स्पृशति 'वृक्षस्य पत्रं पतति' इति प्रयोगस्य दर्शनात्, सति ह्यवधौ गतिरपायो भवति नान्यथा, गतिविशेषत्वादपायस्य, यदा चापायो विवक्षितो भवति भवति तदाऽपादानसंज्ञा, यथा- वृक्षात् पर्णं पततीति, सम्बन्धस्तु तदा न विशेषितो भवति, न ज्ञायते- कङ्कस्य वा कुररस्य वा, सम्बन्धिविशेषस्य शब्देनाऽसमर्पणात्, प्रत्यासत्त्या तु वृक्ष एव सम्बन्धित्वेन प्रतीयते इति, तस्मादवध्यादय एव संज्ञिनो लप्स्यन्ते: सत्यम्- तथापि विशिष्टः संज्ञी निर्देष्टव्यः- यत् क्रियाया निर्वर्तकं सम्पादकं तत् कारकसंज्ञं भवतीति। ननु तथापि संज्ञिविशेषस्यानिर्देशात् क्रियानिमित्तमात्रस्यापि हेत्वादेः प्रसङ्ग इत्याह— **करोती**ति- चकारोऽवधारणे, अयमर्थः- कारक इति महती संज्ञाऽन्वर्था विज्ञायते- करोतीति कारकमिति, साध्यत्वेन च क्रियैव शब्दात् प्रतीयते, क्रियानिर्वर्तकस्यैव कारकसंज्ञा कर्त्रादिसंज्ञा च प्रवर्तते, न तु हेत्वादेर्निमित्तमात्रस्यानाश्रितव्यापारत्वेनानिर्वर्तकस्य। ननु करोतीति कारकमित्याश्रीयते तदा स्वतन्त्रस्यैव कर्तृसंज्ञावत् कारकसंज्ञापि प्राप्नोति, न तु करणादीनां परतन्त्रत्वेनाकर्तृत्वात्, ततश्च करणं कारकमधिकरणं कारकमिति न स्यात्, नैष दोषः- प्रतिकारकं पचादीनां क्रियाभेदात् करणा-ऽधिकरणयोः कर्तृभावः, तथाहि- अधिश्रयणोदकसेचनतण्डुलावपनैधोऽपकर्ष[णादि]क्रियाः कुर्वन् देवदत्तः पचतीत्युच्यते, अत्र तदा पचिर्वर्तते, एतत्प्रधानस्य कर्तुः कर्तृत्वम्; ['स्थाली] द्रोणं पचति, आढकं पचति' इति ग्रहणक्रियां स्थिरत्वादा क्रियासमाप्तेस्तण्डुलानां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते, अत्र तदा पचिर्वर्तते- एतदधिकरणस्य कर्तृत्वम्; एधाः पचन्ति, आ विक्लित्तेर्ज्वलनक्रियां

कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते, अत्र तदा पचिर्वर्तते– एतत्करणस्य कर्तृत्वम्; अनेकार्थत्वाच्च धातूनां तादर्थ्याच्च तद्रूपासङ्गात् करणादिव्यापारे पचेर्वृत्तिर्द्रष्टव्या, एवमन्यत्रापि सर्वेषां स्वव्यापारे स्वातन्त्र्यात् तदनुष्ठानद्वारेण प्रधानक्रियायामुपयोगात् कर्तृसन्निधावपि स्वव्यापारस्यानिवर्तनात् पारतन्त्र्यावस्थायामप्यनिवृत्तं कारकत्वमित्यर्थः । ननु च यथा करणा-ऽधिकरणयोः कर्तृत्वं निदर्शितं न तथाऽपादानादीनां निदर्श्यते, नह्यपादाने ग्रामे विवक्षिते ग्राम आगच्छतीति प्रयोगोऽस्ति, उच्यते– सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यं च विवक्षितम्, तयोश्च स्वातन्त्र्य-पारतन्त्र्ययोः पर्यायेण वचनम्, वचनाश्रया च संज्ञा भवति, यथा बलाहकाद् विद्योतते [ विद्युत् ], बलाहके विद्योतते, बलाहको विद्योतत इति, तथाहि– बलाहकादिति निःसरणाङ्गे द्योतने द्युतिर्वर्तते, पृथग्भावश्च विवक्षित इत्यपादानत्वम्, ‘ बलाहके ’ इत्यत्र तु स्थित्यङ्गे द्योतने द्युतिर्वर्तते, बलाहके स्थित्वा ज्योतीरूपा विद्युद् विद्योतत इत्यर्थः, बलाहक इति च विद्युतो बलाहकस्य चाभेदविवक्षायां प्रयोगः; ग्राम आगच्छतीत्यर्थान्तरावगमादपादानव्यापारानवसायात् प्रयोगाभावः; एवं ब्राह्मणाय ददातीत्यर्थे ब्राह्मणो ददातीति प्रयोगाभावः; शब्दशक्तिस्वाभाव्याच्चापादान-सम्प्रदानव्यापारे धातुर्न वर्तते; वस्तुतस्त्वपादानस्यावधिभावेनावस्थानं व्यापारोऽस्ति, सम्प्रदानस्याप्यनुमननादिलक्षणः प्रतीयमानोऽपि च व्यापारः कारकव्यपदेशनिबन्धनम्, यथा–‘ प्रविश, पिण्डीम् ’ इति, स्वव्यापारमन्तरेण प्रधानक्रियायामुपयोगाभावात् । ननु सर्वत्रात्र स्वातन्त्र्यं पारतन्त्र्यं चास्ति, तत्र प्रधानत्वात् कर्तृसंज्ञैव प्राप्नोति; अथ परत्वादपानादयः, तथाहि– अपादानादीनामवकाशो यदा स्वातन्त्र्यं नास्ति, कर्तृसंज्ञाया अवकाशो देवदत्तः पचतीति, उभयप्राप्तौ चापादानादयः, तत्र– सर्वत्र स्वातन्त्र्यस्य सद्भावान्नास्ति कर्तृसंज्ञाविनिर्मुक्तोऽपादानादिसंज्ञानामवकाशः; अत्रोच्यते– उद्भूतस्वातन्त्र्यविवक्षायां कर्तृसंज्ञा, यथा– स्थाली पचतीति; उद्भूतपारतन्त्र्यविवक्षायां तु न्यग्भावात् सदपि स्वातन्त्र्यं स्वकार्ये न प्रयुङ्क्ते, यथा– राजसन्निधौ तदनुपयोगि स्वकार्यममात्या नारभन्ते, तस्मात् सर्वत्र स्वातन्त्र्य-पारतन्त्र्यसद्भावेऽपि पर्यायेणैव वचनं तदाश्रया च संज्ञेत्यदोषः । ननु संभवनक्रियां धारणक्रियां च कुर्वती स्थाली स्वतन्त्रेत्युक्तं, केदानीं परतन्त्रा ?; न च प्रक्षालने परिवर्तने च परतन्त्रेति वाच्यम्, नहि प्रक्षालन-परिवर्तने करिष्यतीति स्थाल्युपादीयते, किन्तु सम्भवन-धारणक्रिये करिष्यतीति प्रक्षालनाद्यभावेऽपि पाकनिष्पादात् तेषां तत्रानङ्गत्वात्; एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने परतन्त्रेति; ननु च भोः कर्तृस्थेऽपि यत्ने कथ्यमाने स्थाली सम्भवन-धारणक्रिये करोति, तत्र स्वतन्त्रा, केदानीं परतन्त्रेति; एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा, तद्यथा– अमात्यानां राज्ञा सह समवाये पारतन्त्र्यं, व्यवाये स्वातन्त्र्यम् । ननु सामग्रीतः क्रियोत्पादात् सर्वेषां च तत्र साम्यान्न कस्यचित् प्राधान्यं संभावयाम इति कथं ज्ञायते– प्रधानं कर्ता इति, उच्यते– सर्वेषु साधनेषु सन्निहितेषु कर्त्ता प्रवर्तयिता भवति, तदधीनप्रवृत्ति-निवृत्तित्वात् करणादीनां, तस्य च प्रागन्यतः शक्तिलाभात् प्रतिनिध्यदर्शनात् करणाद्यभावेऽपि ‘ आस्ते, शेते ’ इत्यादौ केवलस्य कर्तुर्दर्शनात्, कर्तृरहितानां करणादीनामदर्शनात् प्राधान्यं कर्तुरिति । यद्वा सर्वेषां धारणक्रियायां कर्तृत्वम्, अवान्तरव्यापारविवक्षायां तु करणादिरूपत्वम्, यथा– मातापित्रोरपत्योत्पादने कर्तृत्वम्, तदविवक्षायां तु– अयमस्यामियमस्माद् वा जनयतीत्यधिकरणत्वमपादानत्वं च व्यवतिष्ठते । एवं च स्वातन्त्र्य-पारतन्त्र्ययोश्च विरोधाभावात् करणं कारकमित्यादिविशेषणविशेष्यभावोऽपि । कर्तृसंज्ञा तु करणत्वाद्यवस्थायां न भवति “ स्वतन्त्रः कर्ता ” [ २. २. २.] इत्यत्र कारकत्वादेव स्वातन्त्र्ये लब्धे पुनः स्वतन्त्रश्रुतिर्नियमार्था, तेन [ स्वतः ] स्वातन्त्र्यमेव यस्य तस्य कर्तृसंज्ञा, न तु पारतन्त्र्यसहितस्वातन्त्र्ययुक्तस्य, कारकसंज्ञा तु वस्तुस्थित्या विद्यमानमनुद्भूतत्वेनाविवक्षितमपि स्वातन्त्र्यमाश्रित्य करणादीनां विधानसामर्थ्यात् प्रवर्तते; यत्र च शक्तीनां निमित्त-निमित्तिभावेन युगपद्विवक्षा तत्र संज्ञानां विप्रतिषेध उच्यते, यथा– धनुषा विध्यतीति, विनाऽपायविवक्षया धनुषः साधकतमत्वाभावात् संज्ञाद्वयप्रसङ्गे “ स्पर्धे परः ”[ ७. ४. ११९.]इत्यत्र परग्रहणस्येष्टवाचित्वात् क्वचित् पूर्वमिति करणसंज्ञा । असिश्छिनत्तीति सत्येव साधकतमत्वे स्वातन्त्र्यस्य विवक्षितत्वात् कर्तृसंज्ञा, तदा तु तैक्ष्ण्यादीनां करणत्वं, तैक्ष्ण्यादीनां तु कर्तृत्वविवक्षायामात्मनः करणत्वम्, तैक्ष्ण्यमेव हि वस्तुस्थित्यैकमपि विवक्षावशाद् द्वेधाऽवतिष्ठत इति कर्तृत्वं करणत्वस्याबाधकमिति ॥ छ ॥ २. २. १. ॥

---

**न्या० स०—क्रियाहेतुः०** । क्रियत इति क्रिया “ कृगः श च वा ” [ ५. ३. १००. ] “ क्यः शिति ” [ ३. ४. ७०. ] “ रिः श-क्या-ऽऽशीर्ये ” [ ४. ३. ११०. ] भाव-कर्मणोरिति व्युत्पत्तिः; यदा त्वपादानादौ शप्रत्ययस्तदा क्यो नास्ति, तदेयादेशः । क्रियायाः कारकमित्युक्ते क्रियायां कर्तुर्मुख्यत्वात् तस्यैव कारकत्वं स्यात् *गौणमुख्ययोः०* इति न्यायात् । हेतुः कारकमित्युक्ते तु द्रव्यस्य मुख्यत्वात् तद्धेतोरेव कटं करोतीत्यादौ कारकत्वं स्याद्, न तु चैत्रो यातीत्यादौ । कारकशब्दः कर्तृ-

मात्रपर्यायः, **कर्त्रादीत्यत्र** कर्तृशब्दस्तु कर्तृविशेषवचनः । यथा-(दा)ह पाणिनिः-

स्वव्यापारे तु कर्तृत्वं, सर्वत्रैवास्ति कारके ।
व्यापारभेदापेक्षायां, करणत्वादिसंभवः ॥ १ ॥
फलार्थी यः स्वतन्त्रः सन्, फलायारभते क्रियाम् ।
नियोक्ता परतन्त्राणां, स कर्ता नाम कारकम् ॥ २ ॥
प्रवृत्तौ च निवृत्तौ च, कारकाणां य ईश्वरः ।
अप्रयुक्तः प्रयुक्तो वा, स कर्ता फलसाधकः ॥ ३ ॥

तेन **कर्त्रादि कारकसंज्ञमिति** विशेषण-विशेष्यभाव उपपद्यत इति, अन्यथा वृक्षो वृक्षसंज्ञ इतिवदनुपपन्नः स्यादिति। **तच्च द्रव्याणामिति**- द्रव्याणां सामर्थ्यं कारकमिति सम्बन्धः, द्रव्यस्य तु कारकत्वे प्रतिबन्धकमन्त्रादिसन्निधाना-ऽसन्निधानाभ्यां दहनादेर्दाहादिक्रियोत्पत्त्यनुत्पत्ती न स्याताम्, तत्स्वरूपस्य सर्वदा विद्यमानत्वादुत्पत्तिरेव स्यात्, तस्माच्छक्तिरेव कारकमिति श्रेयः, चैत्रादेस्तु कारकत्वं शक्ति-शक्तिमतोरभेदनयेन। **स्व-पराश्रयेति**- अयमर्थः- त्रयी क्रिया, सा च चैत्र आस्त इति स्वाश्रिता, कटं करोतीति पराश्रिता, अन्योऽन्यमाश्लिष्यत इत्युभयाश्रिता। शक्तिरिह द्रव्यस्य धर्मः, तस्य चतुष्टयी गतिः- कश्चित् सहभूर्यावद्द्रव्यभावी च, यथा स्फटिकस्य नैर्मल्यं, सुवर्णस्य पीतत्वम् १, कश्चित् सहभूरयावद्द्रव्यभावी, यथा- अपक्वघटे श्यामिका २, कश्चिदसहभूर्यावद्द्रव्यभावी, यथा- तस्यैव घटस्य पाकजा रूपादयः, यथा- लाक्षारक्तस्य कम्बलस्य रागः ३, कश्चिदसहभूरयावद्द्रव्यभावी, यथा- मेषयोः संयोगः, यथा- पटे हरिद्रारागः ४। **क्रियाकाल** इति- क्रियायाः शक्तिं प्रति ज्ञापकः कालः, तत्र क्रियाकाले समवहितसकलोपकरणे शक्तिरभिव्यज्यते- प्रकटीक्रियते- अवगता भवति। **अभिव्यज्यत** इति कर्मणि कर्तृकर्मणि वा, तथाहि- क्रियया कर्त्र्या शक्तिः प्रकाश्यते- प्रकटीक्रियते, अभिव्यनक्ति- प्रकटीकरोति क्रिया कर्त्री शक्तिं, सैवं विवक्ष्यते,- नाहमभिव्यनज्मि स्वयमेवाभिव्यज्यते शक्तिः। **अन्वर्थसंज्ञासमाश्रयणाच्चे**ति- चकार एवार्थे। **हेत्वादेरि**त्यादिशब्दात् सम्बन्धस्य सहार्थस्य चाकारकत्वं, तेन विद्ययोषित इत्यादौ "कारकं कृता" [ ३. १. ६८. ] इति न समासः, बहूनामिदं वस्त्रमित्यादौ "बहुल्पार्थ०" [ ७. २. १५०. ] इति शस् नाभूत् ॥ २. २. १. ॥

## स्वतन्त्रः कर्ता । २ । २ । २ ॥

**त० प्र०—क्रियाहेतुभूतो यः क्रियासिद्धावपरायत्ततया प्राधान्येन विवक्ष्यते स कारकविशेषः कर्तृसंज्ञो भवति । देवदत्तः पचति, जिनदत्तेन कृतम्, स्थाली पचति, चौरस्य रुजति रोगः, प्रेषितः करोति; अस्य च कर्तुरधिश्रयणादयः पचिक्रियायामवान्तरव्यापारा भवन्ति, एतान् कुर्वन् देवदत्तः पचतीत्युच्यते । प्रयोजकोऽपि कर्तैव- पचन्तं देवदत्तं प्रयुङ्क्ते- देवदत्तेन पाचयति चैत्रः । अत्र स्वशब्द आत्मवचनः, तन्त्रशब्दः प्रधानार्थः, स्वं[ स्व आत्मा ]तन्त्रमस्य स्वतन्त्र आत्मप्रधानः । किं पुनः कारकान्तरेभ्यः कर्तुः प्राधान्यम् ?, यत् करणादीनि प्रयुङ्क्ते, न तैः प्रयुज्यते; तानि न्यक्करोति, न तैर्न्यक्क्रियते; तानि निर्वर्तयति, न तैर्निर्वर्त्यते; तानि प्रतिनिधत्ते, न तैः प्रतिनिधीयते; तेभ्यः स प्रथममात्मलाभं लभते, न तानि तस्मात्; स तैर्विनाऽपि दृश्यते, न तानि तेनेति । कर्तृप्रदेशाः- "इङितः कर्तरि" [ ३. ३. २२. ] इत्यादयः ॥ २ ॥**

**श० न्या०—स्वतन्त्रः०** । देवदत्तः **पचतीत्यादि**- देवदत्तोऽत्र कर्तृत्वात् कर्तृप्रत्ययेन तिवोच्यत इति प्रथमा, क्तप्रत्ययेन कर्तुरनभिधानाज्जिनदत्तात् तृतीया, अधिकरणरूपायाः स्थाल्याः स्वातन्त्र्यस्य विवक्षितत्वात् कर्तृत्वम्, रुजतीत्यत्र रोगलक्षणस्य भावस्य कर्तृत्वात् "रुजार्थस्याज्वरि०" [ २. २. १३. ] इति कर्मणो विकल्पितत्वाच्चौरात् षष्ठी । **प्रेषित** इति- प्रयोज्यावस्थायामपि स्वातन्त्र्यस्याहानेः कर्तृत्वम् । **अस्य च कर्तुरि**ति- एषु तदा पचिर्वर्तत इति भावः । **प्रयोजकोऽपी**ति- स्वतन्त्रत्वादिति शेषः । अस्ति स्वशब्द आत्मीयवचन आत्मवचनश्च, तन्त्रशब्दोऽपि विततन्तुवचनः, वितता हि तन्तवस्तन्त्रम्, आस्तीर्णं तन्त्रम्, अप्रोतं तन्त्रं, वितानमिति गम्यते, प्रधानार्थश्च; तत्र स्वमात्मीयं तन्त्रं यस्येति तन्तुवायेऽपि प्राप्नोति, यद्यपि 'तन्तुवायो वयति, भुङ्क्ते' इत्यादौ [ तन्तुवायस्य ] कर्तृसंज्ञेष्यते तथापि विशेषविहितत्वादपान( दानादिसंज्ञा )विषयेऽपि स्यात्, 'मुनिरधीते' इत्यादौ च मुन्यादेर्न स्यादिति व्याप्तेर्न्यायात् द्वितीय एव पक्ष आश्रीयत इत्याह- **अत्र स्वशब्द** इत्यादि । **आत्मप्रधान** इति तस्य पर्यायः, यस्यागुणभावेन धातुना व्यापार उच्यते सर्वोऽसौ स्वतन्त्र इति, अयमर्थः- स्वतन्त्रशब्दो रूढिवचनः समासप्रतिरूपकः प्रधानार्थः, '**स्वशब्द आत्मवचनः**' इत्याद्यवयवार्थकथनं तु पदघटनामात्रार्थमिति; तेन यदुच्यते- "अप्रधानमपेक्ष्य प्रधानं भवतीति यत्राधिकरणादीन्यपराण्यप्रधानानि कारकाणि सन्ति- 'देवदत्तः स्थाल्यां काष्ठैरोदनं पचति' इत्यादौ तत्रैव स्यात्, यत्र तु तेषामविवक्षा 'आस्ते, शेते' इत्यादौ तत्र न स्याद्" इति, तदपि प्रत्युक्तम् । प्राधान्यं पृच्छति- **किं पुनरि**ति- क्रियाया अनेककारकसाध्यत्वात् तां प्रति सर्वेषां प्रधानत्वादित्यर्थः । समाधत्ते- **यत् करणादीनी**त्यादि- एतच्च प्रसङ्गात् कारकसूत्रे निर्णीतमिति नेह प्रतन्यते । यद्येवं पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति कर्तृसंज्ञा न प्राप्नोति,

अस्वतन्त्रत्वात्, यथा- कर्तृसन्निधौ करणादीनां स्वातन्त्र्याभावस्तथा प्रयोजकसन्निधौ प्रयोज्यस्यापीति पारतन्त्र्यादकर्तृत्वाद् यज्ञदत्तेनेति कर्तृतृतीया न प्राप्नोति, नैष दोषः- प्रयोजकसन्निधानेऽपि प्रयोज्यस्य करणादिकारकविनियोगादिना स्वातन्त्र्यस्य क्रियासिद्धौ सद्भावात्, यदि तु प्रयोज्यस्य स्वातन्त्र्यं न स्यान्नैवाऽसौ साधनान्तरविनियोगादिना क्रियां कुर्यात्, तथा चाकुर्वत्यपि प्रयोज्ये प्रयोजकः कारयतीति व्यपदिश्येत, न चाऽकुर्वत्यपि तस्मिन् कारयतीत्येतद् भवतीति प्राधान्यात् सिद्धमस्य कर्तृत्वम् । यद् नन्दिरत्नमतिः—

" यः क्रियां कर्म-कर्तृस्थां, कुरुते मुख्यभावतः ।
अप्रयुक्तः प्रयुक्तो वा, स कर्ता नाम कारकम् ॥ "

किञ्च, योऽपि मन्यते- प्रयोज्यस्य स्वातन्त्र्येण स्वव्यापारं प्रत्यप्रवर्तनात् किल कर्तृसंज्ञोपसंख्येया, तेनापि चेदमवश्यमभ्युपेयम्- यः करोति स स्वतन्त्रो न त्वकुर्वन्निति, एवं चेत् प्रयोजकसन्निधानेऽपि स्वार्थदर्शनात् प्रयोज्यः करोति नान्यथेति तस्य स्वातन्त्र्यमस्तीत्यकामेनाप्यङ्गीकार्यम्, तथा चोक्तं भाष्यकृता- " नहि कश्चित् परोऽनुग्रहीतव्य इति प्रवर्तते, सर्वे इमे स्वभूत्यर्थं यतन्ते " इति, प्रेषितोऽप्यसौ स्वार्थदर्शनादिच्छायां सत्यां क्रियां करोति तददर्शनान्न करोतीति स्वतन्त्र एवेति । ननु प्रैषादूर्ध्वं प्रयोज्यस्य स्वव्यापारे प्रवर्तनात् स्वातन्त्र्यमिति सिध्यति तृतीया, प्रैषकाले तु कथम्? तत्र स्वव्यापाराप्रवर्तनात्, प्रवृत्तौ च प्रैषवैयर्थ्यात् स्वातन्त्र्यं नास्ति, स्वतन्त्रस्य च प्रयोजकः प्रयोक्तेति तद्व्यापारे णिग् न स्यात्, नैष दोषः- तस्य स्वतन्त्रत्वात्, दृष्टसामर्थ्यः सम्भावितसामर्थ्यो वा क्रियायां स्वातन्त्र्येण समाश्रित एव नियोज्यशब्देनोच्यते । नन्वेकस्य स्वातन्त्र्यं पारतन्त्र्यं च विप्रतिषिद्धं, प्रयोजकसन्निधौ पारतन्त्र्येण स्वातन्त्र्यस्य तिरस्कृतत्वाद् यौगपद्यानुपपत्तिः, उच्यते-एकापेक्षया विरोधः, अत्र च प्रैषापेक्षया पारतन्त्र्यं करणाद्यपेक्षया च स्वातन्त्र्यमित्यविरोधः । यद्येवं नदीकूलं पततीत्यादौ स्वातन्त्र्याभावात् कर्तृत्वाभावः तथाहि- स्वातन्त्र्यं नाम परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वं चेतनव्यापारो नाचेतनस्य कूलादेः संभवति, उच्यते- सामान्येन कर्तृव्यापारे पदं निष्पाद्य पश्चात् पदान्तरयोगः, नह्यन्तरङ्गं पदसंस्कारं बहिरङ्गः पदान्तरसम्बन्धो बाधत इति ॥छ॥ २. २. २. ॥

**न्या० स०**—स्वतन्त्रः० । अत्र कारकत्वादेव स्वातन्त्र्ये लब्धे पुनः स्वातन्त्र्यश्रुतिर्नियमार्था, तेन स्वातन्त्र्यमेव यस्य तस्य कर्तृसंज्ञा, न तु पारतन्त्र्यसहितस्वातन्त्र्ययुक्तस्य । **अपरायत्ततयेति**- प्राधान्यं च कया हेतुभूतया? अपरायत्ततया, यद्वा सामानाधिकरण्यं प्राधान्येन किंरूपेण? अपरायत्ततया । **प्रेषितः करोतीति**- प्रयोज्यावस्थायामपि स्वातन्त्र्यस्याऽहानेः कर्तृत्वम्, यदुक्तम्—

" यः क्रियां कर्म-कर्तृस्थां, कुरुते मुख्यभावतः ।
अप्रयुक्तः प्रयुक्तो वा, स कर्ता नाम कारकम् ॥ "

**प्रयोजकोऽपि कर्त्तैवेति**- स्वतन्त्रत्वादिति शेषः । **तन्त्रशब्दः प्रधानार्थ इति**- न विततन्तुवचनः, वितता हि तन्तवस्तन्त्रम्; यस्याऽगुणभावेन धातुना व्यापार उच्यते सर्वोऽसौ स्वतन्त्र इति रूढिशब्दोऽयम्, स्वशब्द आत्मवचन इत्याद्यवयवार्थकथनं तु पदघटनामात्रार्थमिति, तेन यत्रैव करणादीन्यप्रधानानि सन्ति-' देवदत्तः स्थाल्यां काष्ठैरोदनं पचति ' इत्यादौ तत्रैव कर्तृसंज्ञेत्येवं न, किन्तु तदभावेऽपि, तेन ' आस्ते, शेते ' इत्यादावपि । **स्थाली पचतीति**- अधिकरणरूपायाः स्थाल्याः स्वातन्त्र्यस्य विवक्षितत्वात् कर्तृत्वम् । **रुजतीति**- अत्र रोगलक्षणस्य भावस्य कर्तृत्वात् " रुजार्थस्याज्वरिसंतापे० " [ २. २. १३. ] इति कर्मणो विकल्पितत्वाच्चौराद् षष्ठी । **तानि प्रतिनिधत्त इति**- प्रतिबिम्बीकरोति कर्त्ता हि कर्मादीनि कर्तृत्वेन, यथा- ओदनः पच्यते स्वयमेव, असिश्छिनत्ति, ब्राह्मणो ददाति, कुशूलः पचति, स्थाली पचतीत्यादि; न तु कर्मादिभिः कर्ता कर्मादित्वेन प्रतिबिम्ब्यते ॥ २. २. २. ॥

## कर्तुर्व्याप्यं कर्म । २ । २ । ३ ॥

**त० प्र०**—कर्त्रा क्रियया यद् विशेषेणाप्तुमिष्यते तद् व्याप्यं, तत् कारकं कर्मसंज्ञं भवति, प्रसिद्धस्यानुवादेनाप्रसिद्धस्य विधानं लक्षणार्थः; तेन यत् कर्म-यत् कर्त्रा क्रियते तद् व्याप्यसंज्ञं भवतीत्यपि सूत्रार्थः । तत् त्रेधा- निर्वर्त्यम् १, विकार्यम् २, प्राप्यं ३ च । तत्र यदसज्जायते जन्मना वा प्रकाश्यते तन्निर्वर्त्यम्- कटं करोति, पुत्रं प्रसूते; प्रकृत्युच्छेदेन गुणान्तराधानेन वा यद् विकृतिमापाद्यते तद् विकार्यम्- काष्ठं दहति, काण्डं लुनाति; यत्र तु क्रियाकृतो विशेषो नास्ति तत् प्राप्यम्- आदित्यं पश्यति, ग्रामं गच्छति । अस्य तु त्रिविधस्यापि यथाक्रममवान्तरव्यापाराः- निर्वर्तते, विकुरुते, आभासमुपगच्छतीत्यादयः । त्रिविधमप्येतत् पुनस्त्रिविधम्- इष्टम् १, अनिष्टम् २, अनुभयं ३ च; यदवाप्तुं क्रियाऽऽरभ्यते तदिष्टम्- कटादि; यद् द्विष्टं प्राप्यते तदनिष्टम्- अहिं लङ्घयति, विषं भक्षयति, कण्टकान् मृद्नाति, चौरान् पश्यति; यत्र नेच्छा न च द्वेषस्तदनुभयम्- ग्रामं गच्छन् वृक्षमूलान्युपसर्पति, वृक्षच्छायां लङ्घयति । पुनस्तत् कर्म द्विविधं प्रधानेतरप्रभेदात्, तच्च द्विकर्मकेषु धातुषु दुहि-भिक्षि-रुधि-प्रच्छि-चिग्-ब्रूग्-शास्त्यर्थेषु याचि-जयति-प्रभृतिषु च भवति- दुह्यर्थे- गां

दोग्धि पयः, गां क्षावयति पयः, गां क्षारयति पयः; भिक्ष्यर्थे- पौरवं गां भिक्षते, पौरवं गां याचते, चैत्रं शतं मृगयते, चैत्रं शतं प्रार्थयते; एवं-गामवरुणद्धि व्रजम्; छात्रं पन्थानं पृच्छति, छात्रं वाक्यं चोदयति; वृक्षमवचिनोति फलानि; शिष्यं धर्मं ब्रूते, शिष्यं धर्ममनुशास्ति; कुद्धं याचते क्षमावस्थाम्, अविनीतं याचते विनयम्, याचिरिहाप्यनुनयार्थः, तेन भिक्ष्यर्थाद् भेदः; गर्गान् शतं जयति, गर्गान् शतं दण्डयति, ग्रामं शाखां कर्षति, काशान् कटं करोति, अमृतमम्बुनिधिं मथ्नाति, अजां ग्रामं नयति, ग्रामं भारं हरति, उपसरजमश्वं मुष्णाति; ग्रामं भारं वहति, शतमीकं शतं गृह्णाति, तण्डुलानोदनं पचति, अत्र यदर्थं क्रियाऽऽरभ्यते तत् पयःप्रभृति प्रधानं कर्म, तत्- सिद्धये तु यदन्यत् क्रियया व्याप्यते गवादि तदप्रधानम्; यदा तु पयोऽर्था प्रवृत्तिरविवक्षिता तदा प्रधानस्यासन्निधानाद् गवादेरेव प्राधान्यम्, यथा- आश्चर्यो गवां दोह इति। तत्र दुहादीनामप्रधाने कर्मणि कर्मजः प्रत्ययो भवति- गौर्दुह्यते दुग्धा दोह्या वा पयो मैत्रेण, याच्यते पौरवः कम्बलम्, अवरुध्यते गां व्रजः, पृच्छयते धर्ममाचार्यः, भिक्ष्यते गां चैत्रः, अवचीयते वृक्षः फलानि, उच्यते शिष्यो धर्मम्, शिष्यते शिष्यो धर्मम्, जीयते शतं चैत्रः, गर्गाः शतं दण्ड्यन्ताम्, " देवासुरैरमृतमम्बुनिधिर्ममन्थे " इत्यादि। नी-वहि-हरति- प्रभृतीनां तु प्रधाने कर्मणि- नीयते नीता नेतव्या वा ग्राम- मजा, उह्यते भारो ग्रामम्, ह्रियते कुम्भो ग्रामम्, कृष्यते ग्रामं शाखेति। गत्यर्थानामकर्मणां च णिगन्तानां प्रधान एव कर्मणि- गमयति मैत्रं ग्रामम्, गम्यते गमितो गम्यो वा मैत्रो ग्रामं चैत्रेण, आसयति मासं मैत्रम्, आस्यते मासं मैत्रश्चैत्रेण। अन्यस्त्वप्रधानेऽपीच्छति- गम्यते मैत्रं ग्रामश्चैत्रेण, आस्यते मासो मैत्रं चैत्रेण। बोधा-ऽऽहारार्थ-शब्दकर्मकाणां तु णिगन्तानामुभयत्र- बोधयति शिष्यं धर्मम्, बोध्यते शिष्यो धर्मम्, बोध्यते शिष्यं धर्म इति वा, भोजयत्यतिथिमोदनम्, भोज्यतेऽतिथिरोदनम्, भोज्यतेऽतिथिमोदन इति वा, पाठयति शिष्यं ग्रन्थम्, पाठ्यते शिष्यो ग्रन्थम्, पाठ्यते शिष्यं ग्रन्थ इति वा; सर्वत्र चोक्ते कर्मणि द्वितीया न भवतीति वक्ष्यते। कर्तुरिति किम्? माषेष्वश्वं बध्नाति, अश्वेन कर्मणा भक्षण- क्रियया स्पर्शनक्रियया वा माषाणां व्याप्यानां कर्मणां कर्म- संज्ञा मा भूत्। वीति किम्? पयसा ओदनं भुङ्क्ते, अत्र करणस्य मा भूत्। कर्म-व्याप्यप्रदेशाः- " कर्मणोऽण् " [ ५. १. ७२. ] " व्याप्याच्चेवात् " [ ५. ४. ७१. ] इत्यादयः ॥ ३ ॥

श० न्या०—कर्तुः०। कर्तुरिति " कृत्यस्य वा "[२. २. ८८.]इति कर्तरि षष्ठी, स च सम्बन्धिशब्दत्वादनुपात्तामपि कर्तृसम्बन्धिनीं क्रियामुपस्थापयतीत्याह- **कर्त्रा क्रिययेत्यादि-** कर्ता च क्रियया विना न किञ्चिदाप्तुं शक्नोतीति सामर्थ्यात् क्रियाकरणभावेनावतिष्ठते, ततोऽयमर्थः- यत्याद्विक्रया क्रियया यद् विशेषेणाप्तुमिष्यते कर्त्रा तत् कारकं कर्मेति। एवमाप्ते च प्रापणे आप्नोतिर्वर्तत इति प्रकृतिप्रत्ययार्थौ वितत्य व्याचष्टे- **आप्तुमिष्यत** इति। किमर्थं क्रियया तदाप्तुमिष्यते? निर्वर्तयितुं गुणान्तराण्याधापयितुं विषयीकर्तुं वा, अत एव निर्वर्त्यं विकार्यं प्राप्यं चेति त्रेधा तदुच्यते। नामपदैः परिनिष्ठि- तस्यार्थस्य सत्यप्यभिधाने वस्तुवृत्तेन द्रव्यस्य निर्वर्त्यत्वं क्रिया- नुष्ठानद्वारेण न विरुध्यते, क्रिया चैव हि भाव्यते; स्वभाव- सिद्धं द्रव्यमिति तु यदुच्यते तन्नामपदाभिधानशक्तिस्वाभाव्य- समाश्रयणेन। व्याप्यशब्दस्य संज्ञात्वेनानुपात्तत्वात् कथं " व्याप्ये क्तेनः "[ २. २. ९९. ]इत्यादौ व्याप्यशब्देन व्यवहारः?, उच्यते- कस्यचिद् व्याप्यं प्रसिद्धं कस्यचित् कर्मेति, तत्र यद् यस्य प्रसिद्धं तस्य तदनुवादेनाप्रसिद्धं लक्षणेन विधीयत इत्याह- **प्रसिद्धस्ये**त्यादि। सामान्येनोक्तस्य कर्मणो विभाग- माह- **तत् त्रेधे**त्यादि। निर्वृत्तिर्द्विधा- केचिदसत उत्पत्तिं निर्वृत्तिमाचक्षते, सत एवाभिव्यक्तिमन्ये; व्याकरणस्य चार्थव्यव- स्थायामव्यापाराच्छब्दव्युत्पादन एव प्रवृत्तत्वादुभयमप्याह- **सत्रे**- त्यादि- सतो भवनायोगादसदेव भवतीत्यर्थः, असतः खर- विषाणस्येव सतो गगनस्येव निर्वर्तनायोगात् प्रकाश एव जन्म, एतच्च स्थानान्तरे निर्णेष्यामः। अत्रोदाहरणमाह- **कटं करोति, पुत्रं प्रसूत** इति- कटगतां निष्पत्तिमनुतिष्ठन् कटं निर्वर्तय- तीत्यर्थः। **विकृतिमापाद्यत** इति- यत्प्रकृतिकं सदुत्तरमव- स्थान्तरं नीयते तद् विकार्यमित्यर्थः। विकार्यते- विकारं नीयत इति व्युत्पत्त्या तद् द्विविधम्, प्रकृत्युच्छेदेन यथा- **काष्ठं दहति,** नह्यत्र काष्ठमसदेव जन्यते तस्य कारणान्तरेभ्यः प्रागेवोत्पन्नत्वात्, उत्पन्नं तु केवलं भस्माख्यामवस्थामापद्यत इति; प्रकृत्युच्छेदमन्तरेणापि गुणान्तराधानेन च यथा- **काण्डं लुनाति,** अत्र काण्डशब्देन तत्कारणभूता वीरणा उच्यन्ते, वीरणशब्दप्रवृत्तिनिमित्तस्य वीरणस्व( त्व )रूपस्य काण्डलक्षण- विकारावस्थायामपि भावात् काण्डलक्षणविकारोत्पादनेन वीरणाद् विकरोतीत्यर्थः। **क्रियाकृत** इति- क्रियया जनित इत्यर्थः। **विशेष** इति- निर्वृत्ति-विकारलक्षणः, नहि दृशि-गमिक्रियाभ्यां व्याप्यमानयोरादित्य-ग्रामयोः प्राप्तेरन्यः कश्चिद् विशेषो लभ्यत इति प्राप्यमेतत्। अवान्तरव्यापारशालिन एव कारकत्वं, यथा- कर्तुश्छिदिक्रियायां दृढमुष्टिनिपीडनादिः, नह्यनपेक्षितदृढमुष्टि- निपीडनो जाल्मकरपञ्जरोदरे लुठन्नपि कठोरधारः कुठारः प्रतितिष्ठ- त्यनिष्ठुरस्यापि काष्ठस्य छिदायै, तत्रास्य कर्मणः कीदृशोऽवान्तर-

व्यापार इत्याह- **अस्य तु त्रिविधस्यापी**त्यादि- नह्य निर्वर्तमानं शशविषाणमिव निर्वर्तयितुं शक्यं, तस्मान्निर्वर्त्यस्य निर्वृत्तियोग्यत्वमवान्तरव्यापारः, एवं- विकृतिमनुपगच्छतो वज्रस्येव विकार्यत्वायोगाद् विकार्यस्य विकृत्यभिमुखत्वम्, तथा आभासायोग्यस्य परमनिकृष्टपरमाण्वादेरिवाभास्यत्वविरहाद् प्राप्यस्याभासगमनमिति । त्रिविधस्यापि पुनरिष्टादिभेदेन त्रैविध्यमस्तीत्याह- **त्रिविधमप्येतदि**त्यादि । इष्टादिस्वरूपं व्याचष्टे- **यदवाप्तुमि**त्यादि- कटादेः पूर्वमभिसंहितत्वादिष्टत्वम्, अहिप्रभृतेस्तु प्रतिकूलत्वादनिष्टत्वम्, तत्रानिष्टमुदाहरति- **अहिं लङ्घयती**त्यादि- अहिः " अम्मि-कुण्ठि० " [ उणा० ६१४. ] इति इप्रत्यये नलोपे चाहिः, ततोऽम्, " लघुङ् गतौ " अतः प्रयोक्तृव्यापारे णिगि तिवादौ- **लङ्घयति**, " विष्लृंकी व्याप्तौ " अतः " तुदादि-विषि० " [ उणा० ५. ] इत्यकारे कितिं- **विषम्**, " भक्षण् अदने ", " कटु गतौ " अतो " दृ-कृ-नृ० " [ उणा० २७. ] इत्यकः, " मृदश् क्षोदे " " क्र्यादेः० " [ ३. ४. ७९. ] इति श्ना । वृक्षमूलादीनि न तावदिष्टानि पूर्वमनभिसंहितत्वात्, नाप्यनिष्टानि अप्रतिकूलत्वात्, किन्तु गमनक्रियायामारभ्यमाणायामन्तरालस्थत्वेन नान्तरीयकतयोपसर्प्यमाणानीत्वम् । **वृक्षच्छायां लङ्घयती**त्यत्रापि ग्रामं गच्छन्निति सम्बन्धनीयम् । गुण-मुख्यभेदात् पुनरस्य द्वैविध्यमस्तीत्याह- **पुनस्तदि**ति । तद् द्विविधं येषु धातुषु भवति तान् दर्शयति- **तच्चे**त्यादि । **गामि**ति- गोशब्दादमि " आ अम्-शसोऽता " [ १. ४. ७५. ] इत्याकारः । **दोग्धी**ति- " दुहींक् क्षरणे ", " क्षुं गतौ ", " क्षर संचलने ", " प्रयोक्तृव्यापारे० " [ ३. ४. २०. ] इति णिग्; " भिक्षि याच्ञायाम् ", " डुयाच़ृग् याच्ञायाम् ", " मृगणि अन्वेषणे " अदन्तः, प्रपूर्वः " अर्थणि उपयाचने ", " रुधूंपी आवरणे ", रुधां स्वरा० " [ ३. ४. ८१. ] इति श्नः, ततो धत्व-तृतीयत्वे; " प्रच्छं ज्ञीप्सायाम् " " ग्रह-व्रश्च-भ्रस्ज-प्रच्छः " [ ४. १. ८४. ] इति य्वृत्, " चुदण् संचोदने ", अवपूर्वः " चिंगट् चयने ", " ब्रूंक् व्यक्तायां वाचि ", अनुपूर्वः " शासूक् अनुशिष्टौ " । ननु भिक्षि-याच्योरेकार्थत्वात् कथं द्वयोरुपादानमित्याह- **याचिरिहानुनयार्थ** इति- याचिर्हि याच्ञायामनुनये च वर्तते, भिक्षिस्तु याच्ञायामेवेत्यनयोर्भेदः, नन्वेवमपि याचेरेवोपादातव्यस्तेनैव याच्ञा-ऽनुनययोरभिधानात्, अस्त्येतत्, किन्त्वेवं यथा याच्ञार्था धातवो गृह्यन्ते एवमनुनयार्था अपि गृह्येरन्, अत्र पुनर्भिक्षिग्रहणाद् याच्ञार्थानां सर्वेषां ग्रहणम्, याचिग्रहणात् तु तस्यैवानुनयार्थस्येति, **क्रुद्धं याचते शमावस्थाम्, अविनीतं याचते विनयमि**त्येतस्य प्रयोजनम् । " जिं जये ", " दण्डण् दण्डनिपातने ", " कृषं विलेखने ", " डुकृंग् करणे ", " मन्थश् विलोडने ", " णींग् प्रापणे ", " हृंग् हरणे ", " मुषश् स्तेये ", " वहीं प्रापणे ", " ग्रहीश् उपादाने ", " डुपचींष् पाके ", एषु प्रधानाऽप्रधाने कर्मणी भेदेन कथयति- **अत्र यदर्थमि**त्यादि- पयःप्रभृतेरुपयुज्यमानत्वेन विशेषेणाप्यत्वात् प्राधान्यं, गोप्रभृतेस्तु तदर्थमुपादानादप्राधान्यमित्यर्थः । नयत्यादीनां च प्रापणार्थत्वात् प्रापणायाश्चान्तर्भूतप्राप्तिकत्वात् तत्र प्राप्तेरजाभारव्यापारस्य गुणभूतस्य कर्मभूतो ग्रामो गुणकर्म, देवदत्तव्यापारस्य प्रधानस्य अजाभारश्च कर्मभूतः प्रधानं कर्म, सर्वमिदं कर्तुर्व्याप्यत्वात् कर्मेति । यद्येवं गवादेः परार्थत्वात् क्रियायोगाभावादव्याप्यत्वात् कर्मसंज्ञा न सिध्यति, **'गां दोग्धि पयः'** इत्यत्रापादानसंज्ञा प्राप्नोति, 'गोः पय आदत्ते' इत्यर्थावसायात्; एवं **क्षारयति, स्रावयती**त्यत्रापि द्रष्टव्यम्; एवम्- **'पौरवं गां भिक्षते'** इत्यादावपि 'पौरवाद् गां जिघृक्षते' इत्याद्यर्थसंप्रत्ययात्, न याचितादेवापायो भवति, याचितोऽसौ यदि ददाति ततोऽपायेन युज्यते, यतो याचितोऽपि याचनाकाले नाध्यवस्यति- नूनमस्मादिदं वस्तु निर्गत्य मां प्राप्नोतीति; एवं **गामवरुणद्धि व्रजमि**ति व्रजे गां स्थापयतीति संप्रत्ययाद् व्रजस्य स्थानक्रियापेक्षयाऽधारत्वम्; **छात्रं पन्थानं पृच्छती**त्यादावपि पन्थानं वाक्यं वाऽऽचिख्यापयिषति छात्रमित्यर्थः, तत्रापि 'छात्रान्मार्गोपदेशं वाक्योपदेशं च जिघृक्षते' इत्यर्थसंप्रत्ययादपादानत्वम्; न प्रश्नादेवापायो भवति, प्रष्टोऽसौ यद्याचष्टे ततोऽपायेन युज्यते; **वृक्षमवचिनोति फलानि** वृक्षेण फलानि त्याजयतीत्यर्थः, अत्रापि 'वृक्षात् फलान्यादत्ते' इत्यर्थावसायादपादानत्वम्; **शिष्यं धर्मं ब्रूते** इत्यादौ तु धर्मेण वचनानुशासनकर्मणा शिष्यस्याभिप्रेयमाणत्वात् संप्रदानसंज्ञा प्राप्नोति; एवं- **गर्गान् शतं जयती**त्यादावपि 'गर्गेभ्यः शतं, ग्रामाच्च शाखां गृह्णाति' इत्यर्थसंप्रत्ययादपादानत्वम्; तस्माद् यत्नान्तरं कर्तव्यम्; नैतदस्ति- अवधित्वाद्यविवक्षायां क्रियानिमित्तभावमात्रेण तद्व्याप्यत्वस्य विवक्षितत्वात् " कर्तुर्व्याप्यं कर्म "[ २. २. ३. ]इत्यनेनैव सिद्धत्वात् । आश्चर्यो गवां दोहः, गां दोग्धि पयः, पौरवं याचत इत्यादौ तु क्षीराद्यर्थप्रवृत्तेरविवक्षायां गवादेर्दोहादिना विशेषेणाप्यत्वदर्शनात् क्रियाव्याप्तिरस्तीति गम्यत इत्याह- **यदा त्वि**त्यादि- गवादेरेव प्राधान्यमिति गोः क्रियाव्याप्तिर्गम्यत इति शेषः, अवधित्वादिविवक्षायां तु भवत्येव- गोर्दोग्धि पय इत्यादि । ननु 'गां दोग्धि पयः' इत्यस्यायमर्थः- गौः पयस्त्यजति, देवदत्तो गवा पयस्त्याजयति, तत्र प्रयोक्तृ-

व्यापारेणाप्यमानत्वाद् गोः कर्मत्वं, न तु दोहादिनेति, नैतदस्ति- यथा ण्यन्तेषु धातुषु क्रियाविष्टः प्रयुज्यत इति प्रतीतिः, नैवमिह निष्क्रियस्यापि गवादेर्दोहनादिषु विनियोगात् । इहौदनं पचतीति लोके प्रयुज्यमानत्वाच्छास्त्रेऽप्युदाह्रियमाणत्वात् तत्र ओदनः पच्येतेति द्रव्यान्तरमभिनिर्वर्त्यतेत्यर्थः स्यात्, ओदनशब्दस्य तण्डुलविकार[ विशेष ]वचनत्वात्, पचेश्च विक्लित्त्युपसर्जनविक्लेदनवचनत्वान्निर्वृत्तस्यौदनस्य विक्लेदनान्तरकरणात्, न चेत्थं लोके प्रतीतिरस्ति, नैष दोषः- तादर्थ्यात् ताच्छब्द्यं भविष्यति, ओदनार्थास्तण्डुला ओदन इति, गौणार्थाश्रयेणैव सर्वलोकस्य प्रयोगदर्शनादिदमत्र न नोदनीयम्- मुख्यस्यैवोदनस्य पुनर्विक्लित्तिकरणे कस्मादयं प्रयोगो न भवतीति, ओदनविकारविशेषप्रतिपादनाय च गौणार्थपरिग्रहः, तण्डुलान् पचतीत्युक्ते विकारान्तरमपि प्रतीयते; अथ कथं भवितव्यम्- तण्डुलानोदनं पचतीति? आहोस्वित् तण्डुलानामोदनं पचतीति? उभयथा प्रयोगदर्शनात्, प्रकृति-विकृत्योः साक्षादुपादानात् तादर्थ्यात् ताच्छब्द्यानुपपत्त्या, विक्लेदनवचने पचौ तु तण्डुलानामोदनं पचतीति प्रयोगायोगाद् द्रव्यान्तरनिर्वृत्तिप्रत्ययप्रसङ्गाच्च, निर्वर्तनवचने तु पचौ तण्डुलानां कर्मभावाघटनात् तण्डुलानोदनं पचतीति प्रयोगाभावप्रसङ्गात्, उच्यते- उभयथापि भवितव्यम्, इह तावत् तण्डुलानोदनं पचतीति द्व्यर्थः पचिः- तण्डुलान् पचति(न्) ओदनं निर्वर्तयति, अत्र हि विक्लेदनोपसर्जने निर्वर्तने पचिर्वर्तते, तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयति, तत्रोपसर्जनविक्लेदनक्रियापेक्षं तण्डुलानां कर्मत्वं, प्रधानभूतनिर्वर्तनपेक्षं त्वोदनस्य, तण्डुलानामोदनं पचतीत्यत्रापि द्व्यर्थः पचिः, विकारयोगे च षष्ठी, तण्डुलविकारमोदनं निर्वर्तयतीति, अत्र तण्डुलानां सम्बन्धिनं विकार[ विशेष ]मोदनं विक्लित्त्या निर्वर्तयतीत्यर्थः, सा च विक्लित्तिः सामर्थ्यात् तण्डुलानामेव विज्ञायत इत्युभयमपि समञ्जसम् । अथ द्विकर्मकेषु दुहादिधातुषु कर्मणि तिवादय उत्पद्यमानाः प्राधान्याप्राधान्याभ्यां भिन्नकक्षमनेकं कर्म युगपदभिधातुमसमर्थाः किं प्रधानकर्मण्युत्पद्यन्ते? अथ गुणकर्मणि? इति, तत्र प्रधानाऽप्रधानसन्निधौ प्रधानाभिधानस्यैव न्याय्यत्वमिति केचित्, तदयुक्तम्- अप्रधानकर्मण्येव त्यादि-कृत्य-क्त-खलर्था इति गौर्दुह्यते दुग्धा दोह्या वा पय इत्याह- **तत्र दुहादीनामित्यादि**- अयमर्थः- यतः पयोऽर्थी प्रथमं गवि प्रवर्तते, ततोऽन्तरङ्गत्वाद् दुह्यादिषु गुणकर्मणि तिवादयो भवन्ति । उक्तं च-

"गुणकर्मणि त्या(ला)दिविधिः, पूर्वं गुणकर्मणा भवति योगः(गात्)।
मुख्यं कर्म प्रेप्सुर्यस्माद्, गव्येव यतते प्राक् ॥
तस्माच्छुद्धस्य दुहेर्भवति, गवा पूर्वमेव सम्बन्धः ।
गोदुहिना पयसस्तु प्राक्, तस्मात् त्या(ला)दयस्तस्मिन्" ॥

इति । **गौर्दुह्यते** दुहेः "तत् साप्या-ऽनाप्या०" [३. ३. २१.] इति कर्मण्यात्मनेपदेन "क्यः शिति" [३. ४. ७०.] इति क्यसहितेन गुणकर्मणोऽभिहितत्वम् । **नी-वहि-हरतिप्रभृतीनामिति**- तुशब्दः पुनरर्थे, प्रधाने कर्मणि कर्मजः प्रत्ययो भवतीति सम्बन्धः; अजादेः प्राधान्यान्नेतुश्च तत्रैव पूर्वं क्रियाप्रवर्तनादन्तरङ्गत्वाच्च तत्रैव प्रधाने 'कर्मज इति । केचिदाहुः- "नाऽमी नयत्यादयो द्विकर्मका अन्यकर्मत्वात्, अजां नयति ग्रामम्- अजां गृहीत्वा ग्रामं यातीति ह्यत्रार्थः, नयतिस्तु प्राप्तिमात्रवाची, गम्यमानक्रियापेक्षयापि कर्मत्वं दृश्यते, यथा- प्रविश पिण्डीमिति भक्षणक्रियापेक्षया" इति, एतच्चायुक्तम्- अजा नीयते ग्राममित्यत्र कर्मण्युत्पद्यमानेनात्मनेपदेनाजाकर्मणोऽभिधानं न प्राप्नोति; गृह्णातेरजा कर्म, न नयतेरिति, तस्मादन्यकर्मत्वमजाया नेष्टव्यम् । **गत्यर्थानामिति**- प्रधान एव कर्मणि- कर्तृकर्मणि कर्मजः प्रत्ययो भवतीति सम्बन्धः, प्राधान्यं च तस्य "गतिबोधा-ऽऽहारार्थ०" [ २. २. ५. ]इति कर्मसंज्ञाया विधीयमान[ त्वेन कृत्रिम ]त्वात् कर्तुः प्रथमप्रवृत्तिविषयत्वाद् **वा**, गुणकर्मण्यपीति मतान्तरव्यवच्छेदार्थमेवकारः । तदेव मतान्तरं दर्शयति- **अन्यस्त्वित्यादि**- अप्राधान्यं चात्र ग्रामादेः प्रधानार्थया क्रियया व्याप्यत्वात् । **बोधाहारार्थशब्दकर्मणामिति**- प्रधानेऽप्रधाने च कर्मजः प्रत्ययो भवतीत्यर्थः, अयमाशयः- **शिष्यं धर्मं ब्रूते, बोधयति शिष्यं धर्ममित्यादावनियतो** गुणप्रधानभावः; तथाहि- वाक्यस्य धर्मप्रतिपादनपरत्वे धर्मस्य प्राधान्यं शिष्यादेर्गुणभावः, शिष्यादिसंस्कारपरायां तु प्रवृत्तौ शिष्यादेः प्राधान्यं धर्मस्य गुणभावः; तथा- अर्थस्य शब्देन प्रतिपाद्यत्वाच्छब्दस्य प्राधान्यं प्रमाणयन्तः- अभिधाव्यापारेण प्रयोक्तृव्यापारस्य प्राधान्यात् प्रयोज्यस्यैव कर्मणः प्राधान्यं, गुणभूतप्रयोज्यव्यापारकर्मणस्तु गुणभावः; शब्दस्यार्थपरत्वादर्थस्यैव प्राधान्यं समर्थयन्तः- आर्थेन तु न्यायेन प्रयोज्यव्यापारस्य प्राधान्यं तदर्थत्वात् प्रयोजकव्यापारस्य, तत्प्राधान्याच्च तत्कर्मणोऽपि प्राधान्यमिति विवदन्ते आचार्याः, स्मृतिरियं, न स्वमतिपरिकल्पनाऽत्र ज्यायसीत्युभयत्र पर्यायेण सिद्धः कर्मजः प्रत्यय इति । कर्मजप्रत्ययेनैव कर्मणोऽभिहितत्वात् सर्वत्र कर्मणि द्वितीया न भवतीत्याह- **सर्वत्र चेत्यादि**- अयमर्थः- यत्र तिवादिभिः कर्मादय उच्यन्ते तत्र गवादिशब्दः स्वार्थव्यतिरिक्तेऽर्थमात्र एवेति प्रथमैव ततो युक्ता, न द्वितीयादयः कर्मादौ वृत्त्यभावादिति । वस्त्वन्तरं विशेषेणाप्तुं कर्तैवेच्छति, नान्यत् तदधीनं करणादिकमिति मन्यमानः पृच्छति- **कर्तुरिति किमिति**- कर्मणापि नियमेन यदाप्तुमिष्यते तस्यापि कर्मसंज्ञा स्यादिति मन्यमानः प्रत्याचष्टे- **माषेष्वित्यादि**- अत्र बध्नाति क्रिययाऽश्वः

कर्त्रा विशेषेण यथाऽऽप्तुमिष्यते तथा भक्षणादिक्रियया प्रतीयमानयाऽश्वेन माषा इत्यसति कर्तृग्रहणे कर्मणाऽश्वेन व्याप्यमानानामपि माषाणामधिकरणसंज्ञां बाधित्वा कर्मसंज्ञा स्यात्, कर्तृग्रहणात् तु न भवतीत्यर्थः । नन्वेवमपि कर्तुर्गुणत्वाद् गुणे च संख्याया विवक्षणाद् द्वाभ्यां कर्तृभ्यां बहुभिर्वा यद् विशेषेणाप्तुमिष्यते तस्य कर्मसंज्ञा न स्यात्, नैष दोषः– कारकान्तरव्याप्यस्य कर्मसंज्ञाप्रसङ्गनिवारणपरत्वाच्छास्त्रस्य च लक्ष्यसंस्कारकत्वात् कर्तुर्गुणस्यापि संख्या न विवक्ष्यते; संख्याया अविवक्षणाच्च प्रधानस्यानियमेन विस्फारः; यथेह– कटं करोति, कटौ करोति, कटान् करोतीति कर्मसंज्ञा भवति, तथेहापि भवति– कटं कुरुतः, कटं कुर्वन्तीति, व्याप्यं च कर्मसंज्ञया संश्रियमाणत्वात् प्रधानमिति तस्य संख्या न विवक्ष्यते, 'प्रधानसंख्या न विवक्ष्यते' इत्येतस्य चार्थस्य ज्ञापकमेकशेषसूत्रे एकग्रहणम् । **वीति किमिति**– कर्तुः साध्यत्वात् क्रिया पूर्वमाप्तुमिष्टा, कर्म तु तत्फलत्वेन, ततश्च क्रियाया आप्तुमिष्टाया विशेषेण फलम्, 'पयसा ओदनं भुङ्क्ते' इत्यत्र तु पयसः संस्कारकत्वादोदनस्य संस्कार्यस्यैव विशेषेणाप्तुमिष्टत्वमिति तस्यैव कर्मत्वं, न पयसः करणस्य । नन्वेवं तर्हि यदा कश्चित् कञ्चिदामन्त्रयते– सिद्धं भुज्यतामिति, आह– प्रभूतं भुक्तवानस्मि, आमन्त्रयमाण आह– दधि खलु भविष्यति, पयः खलु भविष्यति, आमन्त्रयमाण आह– दध्ना खलु भुञ्जीय, पयसा खलु भुञ्जीय, अत्र चान्वय-व्यतिरेकाभ्यां दधि-पयसोरेव विशेषेणाप्यत्वात् कर्मसंज्ञा प्राप्नोति न त्वोदनस्येति; उच्यते– तस्याप्योदन एवाप्तुमिष्टः, दधिपयसोस्तु संस्कारकत्वात् करणभावः; गुणेषु ह्युपकारकेषु केवलेषु नादरः, किं तर्हि ? तत्संस्कृते ओदनादौ, तद्यथा– भुञ्जीयाहमोदनं यदि मृदुर्विशदः स्यादिति, यद्यत्र मार्दवमात्रे आदरः स्यात् पङ्कमपि भक्षयेत्, वैशद्यमात्रादरे तु सिकता अपि, एवमिहापि दध्यादिगुणमोदनं भुञ्जीयेत्यदोषः ॥ छ ॥ २. २. ३. ॥

**न्या० स०—कर्तुर्व्या०** । **कर्तुरित्यत्र** प्रथमव्याख्याने व्याप्येत्यस्य कृत्प्रत्ययान्तस्य योगे "कृत्यस्य वा" [ २. २. ८८. ] इति कर्तरि षष्ठी । ननु यदा द्वैतीयीकं व्याख्यानं– कर्तुः कर्म व्याप्यमिति क्रियते तदा कर्मणा योगे कर्तृशब्दात् केन सूत्रेण षष्ठी वर्तिष्ठ ?, उच्यते– कृच्छेषा उणादय इति कृत्वा कर्मशब्द औणादिकप्रत्ययान्तोऽपि कृदन्तः, ततस्तद्योगे "कर्तरि" [ २. २. ८६. ] इति षष्ठी । **विकार्यमिति**– विकार्यते स्वभावोच्छेदेनान्यथात्वं लभ्यत इति । **निर्वर्त्त** इति–

" निर्वृत्त्यादिषु यत् पूर्वमनुभूय स्वतन्त्रताम् ।
कर्त्रन्तराणां व्यापारे, कर्म संपद्यते ततः " ॥

**विकुर्वत** इति–अन्यथा विकृतिमनुपगच्छतो वज्रस्येव विकार्यत्वायोगः स्यात् । **आभासमुपगच्छतीति**– तथाऽऽभासाऽयोग्यस्य परमनिकृष्टपरमाण्वादेरिवाभास्यत्वविरहः स्यादिति व्याप्यस्याभासगमनमवान्तरव्यापार इति । **विषं भक्षयतीति**– यदाज्ञातं सत् भक्ष्यते तदैवानिष्टम्, यदा तु राजभीतेन व्याध्यतिक्रान्तेन वा भक्ष्यते तदा इष्टमेव । **गां दोग्धि पय** इति– अन्तर्भूतण्यर्थत्वेनामीषां द्विकर्मकत्वम्, अन्तर्भूतण्यर्थाः सकर्मकाः सर्वे, तेनायमर्थः– गौः कर्त्री पयः कर्म मुञ्चति, तां गां मोचयतीति । **गां स्रावयति पय इति**– "गतिबोधा०" [ २. २. ५. ] इत्यत्र बहुवचनादन्येषामपि अणिकर्तुः कर्मत्वम्, तेन गवादीनामपि कर्मत्वं युक्तं, नात्र नियमः प्रवर्तते, एतेऽपि ईदृशा अपि द्विकर्मका उच्यन्ते इति । यद्वा "बहुलमेतन्निदर्शनम्" [ धातुपारायणम् ] इति णिजन्तता सर्वत्र । **पौरवं गां भिक्षते**– अस्ति राजा पुरुर्नाम, तदपत्यं– "पुरु-मगध०" [ ६. १. ११६. ] इत्यणि पौरवः, अयं च याच्यमानो हृष्टो म्लानो वा भवतीति विकार्यं कर्म, **भिक्षते** कोऽर्थः ? याचनापूर्वकं गां दापयति वियोजयतीति वेत्यर्थः । **गामवरुणद्धीति**– व्रजं सेवमानं सेवयतीत्यर्थः । **पृच्छति** कथापयति । **चोदयतीति** वादयतीत्यर्थः । **वृक्षमवचिनोतीति**– वृक्षः फलानि वियुङ्क्ते, तं वियोजयतीत्यर्थः । **ब्रूते** कथयन्तं कथापयति । **अनुशास्ति** ज्ञापयति । **याचते** कारयते । **अनुनयार्थ** इति– तेन भिक्ष्यर्थमध्ये याचिद्वाराऽनुनयार्थानां न ग्रहः, भिक्षिर्याच्ञायामेव, याचिस्तूभयार्थ इति । **जयति** मोचयति । **कर्षति** कर्षयति । **करोति** योजयति । **मथ्नाति**– वियोजयति । **नयति** प्रापयति । **हरति** वियोजयति प्रापयति वा । **मुष्णाति** त्याजयति, **[ उपसरजम् ]** उपसरः– पुरुषविशेषो देशो वा, तत्र जातः, कोऽर्थः ? परस्वामिकं सन्तमात्मस्वामिकं करोति । **वहति** प्रापयति । **गृह्णाति** त्याजयति । **तण्डुलानोदनं पचति** तण्डुलान् विक्लेदयन् विकुर्वन् ओदनं करोतीत्यर्थो धातूनामनेकार्थत्वादिति । **दुहादीनामिति**–

" दुहादेर्गौणकं कर्म, नीवहादेः प्रधानकम् ।
णिगन्ते कर्तृकर्मैवमन्यद् वा वक्ति कर्मजः " ॥

" येनापविद्धसलिलस्फुटनागसद्मा,
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्तनैरहिपतेरयमाहिताङ्कः,
खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ " [ ]

**नेतव्या वा ग्राममजेति**– अजादेः प्राधान्यान्नेतुश्च पूर्वं तत्रैव क्रियाप्रवर्तनादन्तरङ्गत्वाच्च तत्रैव प्रधाने कर्मज इति । केचिदाहुः– न अमी नयत्यादयो द्विकर्मका अन्यकर्मत्वात्, तथाहि– अजां नयति ग्रामम्– अजां गृहीत्वा ग्रामं यातीति सूत्रार्थः, नयतिस्तु प्राप्तिमात्रवाची, गम्यमानक्रियापेक्षयापि कर्मत्वं दृश्यते, यथा– 'प्रविश, पिण्डीं, द्वारम्' इति, भक्षणक्रियापेक्षया पिधानक्रियापेक्षया चेति, नैवम्–

एवं सति ' अजा नीयते ग्रामम् ' इत्यत्र कर्मण्युत्पद्यमानेनात्मनेपदेनाजाकर्मणोऽभिधानं न प्राप्नोति, यतो गृह्णातेरजा कर्म, न नयतेरिति, तस्मादन्यकर्मत्वमजाया नैष्टव्यमिति । **अकर्मणामिति**– नित्याकर्मकाणामविवक्षितकर्मकाणां चेत्यर्थः । **प्रधान एव कर्मणीति**– कर्तृकर्मणि कर्मजः प्रत्ययो भवतीति सम्बन्धः, प्राधान्यं च तस्य " गतिबोधाहारार्थ० " [ २. २. ५. ] इति कर्मसंज्ञाया विधीयमानत्वेन कृत्रिमत्वात् कर्तुः प्रथमप्रवृत्तिविषयत्वाद् वा । **प्रधान एवेति**– अन्यस्त्वप्रधानेऽपीच्छति तन्मतक्षेपणायात्रैवकारः । **आसयति मासं मैत्रमिति**– आस्ते मासं मैत्रः, तमासीनं परः प्रयुङ्क्ते, मासस्य " काला-ऽध्व-भाव० " [ २. २. २३. ] इति कर्मसंज्ञा, काला-ऽध्व-देश-भावैश्च सर्वेऽपि धातवः सकर्मका इत्यन्यकर्मापेक्षया अकर्मका इह ग्राह्याः । **बोधयति शिष्यं धर्ममित्यत्र** वाक्यस्य धर्मप्रतिपादनपरत्वे धर्मस्य प्राधान्यं शिष्यादेर्गुणभावः, शिष्यादिसंस्कारपरतायां तु प्रवृत्तौ शिष्यादेः प्राधान्यं धर्मस्य गुणभाव इत्युभयत्र कर्मजः प्रत्यय इति । **पाठयति शिष्यं ग्रन्थमिति**– अर्थस्य शब्देन प्रतिपाद्यत्वाच्छब्दस्य प्राधान्यं, शब्दस्यार्थपरत्वादर्थस्यैव प्राधान्यमिति समर्थयन्ते गरीयांसो विद्वांसः । **पयसा ओदनमिति**– अत्र पय इति न व्याप्यमोदनापेक्षयाऽन्याङ्गत्वात्, यच्चाऽनन्याङ्गं तदेव व्याप्यमिति ॥ २. २. ३. ॥

## वाऽकर्मणामणिक्कर्ता णौ । २ । २ । ४ ॥

**त० प्र०**—अविवक्षितकर्माणोऽकर्माण उत्तरत्र नित्यग्रहणात्, तेषामणिगवस्थायां यः कर्ता स णौ– णिगि सति कर्मसंज्ञो वा भवति । पचति चैत्रः, पाचयति चैत्रं चैत्रेण वा; लिखति मैत्रः, लेखयति मैत्रं मैत्रेण वा । गत्यर्थादीनां तु परत्वान्नित्य एव विधिः– गच्छति चैत्रः, गमयति चैत्रमित्यादि । किं करोतीति व्यापारमात्रविवक्षायां चाविवक्षितकर्माणो भवन्ति ॥ ४ ॥

**श० न्या०—वाऽक०** । न विद्यते णिग् येषां तेऽणिगस्तेषां कर्तेति विग्रहः । नन्वकर्माणः सकर्माणोऽप्यविवक्षितकर्माणः सर्वथाऽविद्यमानकर्माणश्चोच्यन्ते, तत् केषामिह ग्रहणमित्याह– **अविवक्षितकर्माण** इत्यादि । अत्रोपपत्तिः– **उत्तरत्र नित्यग्रहणादिति**– अयमर्थः– ये हि सर्वथाऽविद्यमानव्याप्यास्तेषामणिक्कर्तुः " गति-बोधा-ऽऽहारार्थ० " [ २. २. ५. ] इति सूत्रेणापवादतया नित्यं कर्मसंज्ञाविधानादिहाविवक्षितकर्माण एवाकर्माणो गृह्यन्त इति । तानेवोदाहरति– **पचति चैत्र** इत्यादि । नन्वेवं तर्हि गत्यर्थादीनामप्यविवक्षितकर्मत्वेन विकल्पः प्राप्नोति, नित्यश्च विधिरिष्यत इत्याह– **गत्यर्थादीनामित्यादि**– ' पाचयति चैत्रं चैत्रेण वा, गमयति ग्रामम् ' इत्यादौ द्वयोः सावकाशत्वात्, गमयति चैत्रमित्यादौ त्वविवक्षितकर्मत्वेन युगपदुभयप्राप्तौ परत्वात् " गतिबोधा-ऽऽहारार्थ० " [ २. २. ५. ] इति नित्य एव विधिः । नन्वोदनं पचतीत्यादिप्रयोगदर्शनात् कथं पचादीनामविवक्षितकर्मकत्वमित्याह– **किं करोतीत्यादि**– अयमर्थः– शब्दप्रयोगस्य परार्थत्वात् परेण च किं करोतीति व्यापारमात्रस्य जिज्ञासितत्वात्, अन्यथोन्मत्तत्वप्रसङ्गात्, प्रतिपादयितुस्तावन्मात्रस्यैव विवक्षितत्वादौदासीन्यमात्रनिवृत्तिपरतया प्रयोगाच्छब्देन कर्मणोऽसमर्पणादविवक्षितकर्मत्वम्; यदाह—

" धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया " ॥ छ ॥ २. २. ४ ॥

**न्या० स०—वाऽकर्म०** । **अविवक्षितेति**– नन्वेवं तर्हि गत्यर्थादीनामप्यविवक्षितकर्मकत्वेन विकल्पः प्राप्नोतीत्याह– **गत्यर्थादीनामिति** ॥ २. २. ४. ॥

## गति-बोधाऽऽहारार्थ-शब्दकर्म-नित्याऽकर्मणाम-नी-खाद्यदि-ह्वा-शब्दाय-क्रन्दाम् । २ । २ । ५ ॥

**त० प्र०**—गतिः– देशान्तरप्राप्तिः, बोधः– ज्ञानमात्रं तद्विशेषश्च, शब्दः कर्म– क्रिया व्याप्यं च येषां ते शब्दकर्माणः, नित्याऽकर्माणः– सर्वथाऽविद्यमानव्याप्याः; गत्यर्थ-बोधार्था-ऽऽहारार्थानां शब्दकर्मणां नित्याऽकर्मणां च धातूनां नी-खाद्यदि-ह्वयति-शब्दायति-क्रन्दवर्जितानामणिगवस्थायां यः कर्ता स णौ सति कर्मसंज्ञो भवति । गत्यर्थः– गच्छति मैत्रो ग्रामम्, गमयति मैत्रं ग्रामम्; याति मैत्रो ग्रामम्, यापयति मैत्रं ग्रामम्; देशान्तरप्राप्तेरन्यत्र न भवति– स्त्रियं गमयति मैत्रेण चैत्रः, भजनार्थोऽत्र गमिः । सामान्यबोधार्थः– बुध्यते शिष्यो धर्मम्, बोधयति गुरुः शिष्यं धर्मम्; जानाति शिष्यो धर्मम्, ज्ञापयति गुरुः शिष्यं धर्मम्; एवमुपलम्भयति, अवगमयतीत्यादि । विशेषबोधार्थः– पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणं वणिक्; एवं घ्रापयति मैत्रमुत्पलम्, स्पर्शयति मैत्रं वस्त्रम्, श्रावयति शिष्यं धर्मम्, स्मारयति शिष्यं धर्मम्, अध्यापयति शिष्यं शास्त्रम् । अन्ये तु बोधविशेषार्थस्य दृशेरेवेच्छन्ति नाऽन्येषाम्, तन्मते– ' जिघ्रत्युत्पलं चैत्रः, घ्रापयत्युत्पलं चैत्रेण मैत्रः, एवं स्पर्शयति चैत्रेण वस्त्रम्, श्रावयति धर्मं शिष्येण ' इत्यादौ प्रयोज्यकर्तरि तृतीयैव भवति । आहारार्थः– भुङ्क्ते बटुरोदनम्, भोजयति बटुमोदनम्; अश्नाति बटुर्भक्तम्, आशयति बटुं भक्तम् । शब्दक्रियः– जल्पति मैत्रो

**द्रव्यम्, जल्पयति मैत्रं द्रव्यम्; एवमालापयति मित्रं मैत्रम्, संभाषयति मैत्रं भार्याम्, शब्दव्याप्यः– शृणोति शब्दं मैत्रः, श्रावयति शब्दं मैत्रम्, अधीते बटुर्वेदम्; अध्यापयति बटुं वेदम्; पूर्व– जल्पयति मित्रं वाक्यम्, विज्ञापयति गुरुं वाक्यम्, उपलम्भयति शिष्यं विद्याम्। नित्याकर्मकः– आस्ते मैत्रः, आसयति मैत्रं चैत्रः; शेते मैत्रः, शाययति मैत्रं चैत्रः। नित्यग्रहणं पूर्वत्राविवक्षितकर्मकपरिग्रहार्थम्, अन्यथा विभागो न ज्ञायेत। काला-ऽध्व-भाव-देशैश्च सर्वेऽपि धातवः सकर्मका एवेत्यन्यकर्मापेक्षया नित्याकर्मका वेदितव्याः। गत्यर्थादीनामिति किम्? पचत्योदनं चैत्रः, पाचयत्योदनं चैत्रेण मैत्रः। अणिक्कर्तेत्येव– गमयति चैत्रो मैत्रम्, तमपरः प्रयुङ्क्ते– गमयति चैत्रेण मैत्रं जिनदत्तः। नयत्यादिवर्जनं किम्? नयतेः प्रापणोपसर्जनप्राप्त्यर्थत्वेन गत्यर्थत्वात् खाद्यत्योराहारार्थत्वात् ह्वाशब्दायक्रन्दां च शब्दकर्मकत्वात् कर्मत्वे प्राप्ते प्रतिषेधार्थम्– नयति भारं चैत्रः, नाययति भारं चैत्रेण; खादयत्यपूपं मैत्रेण, आदयत्योदनं मैत्रेण, ह्वाययति चैत्रं मैत्रेण, शब्दाययति चैत्रं मैत्रेण, क्रन्दयति मित्रं मैत्रेण; कर्मसंज्ञाप्रतिषेधात् स्वव्यापाराऽऽश्रयं कर्तृत्वमेव। प्रेषणा-ऽध्येषणादिना प्रयोजकव्यापारेण णिगन्तत्वाच्येनाणिक्कर्तुर्व्याप्यत्वात् कर्मसंज्ञा सिद्धैव, नियमार्थं तु वचनम्– प्रयोजकव्यापारेण व्याप्यमानस्य गत्यर्थादिसम्बन्धिन एव प्रयोज्यस्य कर्तुः कर्मसंज्ञा भवति; तेनाऽन्यधातुसम्बन्धिनः कर्तृत्वमेव भवति ॥ ५ ॥**

---

**श० न्या०—गति०।** गमनं– गतिः, बोधनं– बोधः, आहरणम्– आहारः, तेऽर्था येषामिति बहुव्रीहिः, [ अत्र गत्याद्यर्थो गत्यादिशब्देनोच्यत इत्यर्थशब्दस्य प्रत्येकमभिसम्बन्धः, शब्दः कर्म– क्रिया व्याप्यं च येषामित्यात्रापि बहुव्रीहिः, ] न विद्यते कर्म येषां तेऽकर्माणः, नित्यमकर्माणः– नित्याकर्माण इति निरुक्तपदुवत् समासः, ततो द्वन्द्वात् षष्ठीबहुवचनम्। आहारस्य सुप्रसिद्धत्वाद् गति-बोधयोः स्वरूपमाह– **गतिरि**त्यादि। **शब्दः कर्म– क्रिया व्याप्यं चे**ति– नन्वेकेन प्रयत्नेनोभयाग्रहणाद् वाक्यभेदप्रसङ्गात् कथमुभयपरिग्रहः? उच्यते– ह्वयत्यादीनां त्रयाणां शब्दक्रियत्वेन प्राप्त्यभावात् प्रतिषेधवैयर्थ्यप्रसङ्गात् कर्मशब्दस्य क्रियावचनता, ह्वयत्यादयो हि धातवः साध्यमानावस्थं क्रियारूपं शब्दमभिदधतीति शब्दक्रियत्वादतिप्रसङ्गे सति प्रतिषेधो विधीयते; शब्दायतेश्च शब्दं करोतीति [ "शब्दादेः कृतौ वा" [ ३. ४. ३५. इति ] क्यङि शब्दक्रियालक्षणस्य कर्मणोऽन्तर्भावात् कर्मान्तरायोगाच्चाकर्मकत्वादपि संज्ञाप्रसङ्ग इति; एवं च जल्पति-विलपत्याभाषतीनां जल्पयति देवदत्तमित्यादौ शब्दन[ क्रियावृत्तीनां ] क्रियाग्रहणे सिध्यति, देवदत्तं जल्पतीत्यादौ शब्दकर्मकत्वाभावात्; एवं च कर्मग्रहणानर्थक्यम्, "गति-बोधा-ऽऽहार-शब्दार्थ०" इति कृते सिध्यतीति कर्मग्रहणं साधनकर्मपरिग्रहार्थं, तेन 'शृणोति, विजानाति, उपलभते' इत्येषामपि सिध्यति, शृणोत्यादयो हि उपलब्धिरूपेऽर्थे वर्तमानाः शब्दक्रिया न भवन्ति, शब्दसाधनकर्माणस्तु भवन्ति तद्विषयत्वेनैव प्रयोगात्; एवं–जल्पत्यादीनामपि श्लोकादिद्रव्यविशेषशब्दकर्मणां साधनकर्मपरिग्रहादेव सिद्धिः; न चैषां बुद्ध्यर्थता, बोधशब्देन बोधसामान्याश्रयणपक्षे वेत्त्यादयो हि ज्ञानमात्रवचनाः; बुद्ध्यर्थावपि 'जानाति, उपलभते' इत्येतौ यद्युपलब्धिमात्रवचनौ तथापि प्रयोजकव्यापारविवक्षायां प्रकरणादिवशाद् यदा शब्दविवक्षायामेवोपलब्धिं प्रत्याययतस्तदा साधनकर्मवचनात् सिध्यति न त्वन्यथेत्युभयार्थोऽत्र कर्मशब्दः, न च वाक्यभेदः, श्वेतो धावतीतिवत्। स्थविरोत्पलौ तु साधनवचनमेव कर्म शब्दं व्याचक्षाते, यदाहोत्पलः– यद्येवं जल्पि-विलप्याभाषीणां शब्दव्यतिरिक्तकर्मणामणिक्कर्ता णौ कर्मसंज्ञो न स्यात्, प्रीतिं जल्पति देवदत्तः, प्रीतिं जल्पयति देवदत्तम्; चौर्यं विलपति देवदत्तः, चौर्यं विलापयति देवदत्तम्; आभाषतेऽपराधं देवदत्तः, आभाषयति देवदत्तमपराधम्; नैष दोषः– जल्पन-विलपना-ऽऽभाषणाङ्ग बोधने जल्पिप्रभृतयो वर्तन्त इति। **नित्याकर्मणामि**त्यत्र तु साधनवचन एव कर्मशब्दो द्वितीयार्थग्रहणे प्रमाणाभावात् साधनवचनस्यैव पूर्वं बुद्धावुपारोहात्, किञ्च क्रियार्थप्रतिषेधे धर्मिण एवाभावात्, नहि क्रियार्थाभावे धातोः सम्भवोऽस्तीति। **गमयती**त्यादि– "गम्लृं गतौ" अतः "प्रयोक्तृव्यापारे०" [ ३. ४. २. ] इति णिग्, "यांक् प्रापणे" अतो णिग् "अर्तिरी०" [ ४. २. २१. ] इति पोऽन्तः। **देशान्तरप्राप्तेरि**ति– अत एव गतिर्देशान्तरप्राप्तिरिति पूर्वमतिप्रसङ्गो निवर्तितः, तथाहि– गच्छतीत्युक्ते स एवार्थः प्रतीयते, प्राप्त्यन्तरे तु प्राप्तिसामान्यादुपचारेण वृत्तिरतो *गौण-मुख्ययोर्मुख्ये सम्प्रत्ययः* इति सोऽर्थो न गृह्यते, स्त्रियं गच्छति देवदत्तः स्त्रियं गमयति देवदत्तेनेति भजनलक्षणप्राप्तौ न भवति। **बोधयती**त्यादि– "बुधिंच् ज्ञाने" अतो णिग् नाम्युपान्त्यगुणः, "ज्ञांश् अवबोधने", उपपूर्वो डुलभिंष् प्राप्तौ", अवपूर्वो "गम्लृं गतौ", इति; अत्र हि बुध्यादयश्चक्षुरादीन्द्रियसाधनज्ञानविशेषस्याप्रतिपादनात् सामान्यबोध एव वर्तन्त इत्यर्थः। **दर्शयती**ति– "दृशृं प्रेक्षणे", रूपं तर्कयतीति "कर्मणोऽण्" [ ५. ३. १४. ] इत्यणि– रूपतर्कः, कर्षेणाप्यत इति "भुजि-पत्यादिभ्यः०" [ ५. ३. १२८. ] इति कर्मण्यनटि प्रज्ञादित्वात् स्वार्थेऽणि– कार्षापणः।

एवं– "घ्रां गन्धोपादाने", "स्पृशंत् संस्पर्शे", "श्रुंट् श्रवणे", "स्मृं चिन्तायाम्", "ध्यैं चिन्तायाम्" एभ्यो पूर्ववणिगादिः; अत्र दृश्यादीनां चक्षुरादिसाधनजनितज्ञानविशेषवृत्तीनां विशेषबोधार्थतेत्यर्थः। **अन्ये त्विति**– ते हि गत्यादिसूत्रे दृशिग्रहणमुपादाय बोधार्थत्वेनैव सिद्धे दृशिग्रहणाद् दृशेरेव विशेषबोधार्थस्य परिग्रहो नान्येषामित्याचक्षते, तन्मते– प्रयोज्ये कर्तरि कर्मसंज्ञाया अभावात् तृतीयैव भवति। [ **आहारार्थे** इति ] आहारो– निगरणं, सोऽर्थोऽस्य। **भोजयतीत्यादि**– "भुजंप् अभ्यवहारार्थः", "अशश् भोजने" पूर्ववणिगादिः। कर्मग्रहणस्य क्रिया-व्याप्ययोर्वाचकत्वाच्छब्दक्रियान् शब्दव्याप्यांश्च क्रमेणोदाहरति– **जल्पयति मैत्रमित्यादि** । **उपलम्भयतीति** "लभः" [ ४. ४. १०३. ] इति नागमः। अत्र शृणोत्यादिस्तावच्छब्दविषयामेवोपलब्धिमाचष्ट इति शब्दकर्मकः, जानातिरुपलभिश्च यद्यपि सामान्येन सर्वविषयामुपलब्धिमाहतुस्तथापि यदा सोपलब्धिः कुतश्चिच्छब्दविषया भवति तदा शब्दकर्मकाविति प्रयोज्यस्य कर्तुः कर्मता; **वाक्यं विद्यामिति** च शब्दविषयो दर्श्यते। **आसयतीत्यादि**– अथ नित्यग्रहणमन्तरेणाप्यकर्मकग्रहणेनैव कर्मसत्तामात्रप्रतिषेधेनैवेष्टार्थो लभ्यत इति किमर्थं नित्यग्रहणमित्याह– **नित्यग्रहणमित्यादि**– असति नित्यग्रहणे उभयत्राकर्मग्रहणे विषयभेदकल्पनायां क्व किं परिगृह्यत इति विषयविभागो न ज्ञायते, सति तु नित्यग्रहणे इहात्यन्ताऽसत्कर्मपरिग्रहः, पूर्वत्राविवक्षितकर्मपरिग्रह इति विज्ञायत इत्यर्थः। ननु च काला-ऽध्व-भाव-देशा-ऽऽधारा अकर्मणामपि कर्म भवति– 'गोदोहमास्ते, मासमास्ते' इत्यादौ, तत्र नित्याकर्मणामसम्भव एवेत्यत आह– **काला-ऽध्व-भाव-देशैरित्यादि**– वचनप्रामाण्यात् कालादिभ्योऽन्येन कर्मणा नित्याकर्मका वेदितव्याः, येषां कालादिभ्योऽन्यत् कर्म वस्तुतो नैवास्ति तेऽकर्माणः; अथैवं किं न विज्ञायते– कालादिभ्योऽन्येन कर्मणा सकर्मका अपि येषां कालादि कर्म नैवास्ति ते नित्याकर्माणः, यथा कालादिभिः सकर्मका अप्यन्यकर्मापेक्षयाऽकर्मका इति, नैतदस्ति– तैः सर्वेषां सकर्मकत्वात्, नहि ते धातवः सन्ति येषां कालादयः कर्म न भवन्ति, सकर्मकाणामप्यविवक्षितकर्मकत्वोपपत्तेः। **पाचयत्योदनं चैत्रेण मैत्र** इति– "डुपचींष् पाके" अतो णिग्, अकारस्य वृद्धिः, गत्याद्यर्थानां पचिरन्तर्गतो न भवतीत्यस्य प्रयोज्ये कर्तरि तृतीयैव भवति, न द्वितीया, गत्याद्यर्थवचनेन निवर्तितत्वात्। **गमयति चैत्रेण मैत्रं जिनदत्त** इति– अत्र गमयतेश्चैत्रः प्रयोजकः कर्ता, **तमपरः प्रयुङ्क्ते** इति– तत्स्थेन [तमित्यनेन] चैत्रस्य कर्तुरभिसम्बन्धः, **अपर** इति– कश्चिज्जिनदत्तादिः, अत्र चाणिकर्तैत्यनुवर्तनाण्णिकर्तुः कर्मसंज्ञा न भवतीति। **नयत्यादिवर्जनं किमिति**– प्रतिषेधस्य प्राप्तिपूर्वकत्वान्नयत्यादेश्च प्रापणाद्यर्थत्वेनागत्याद्यर्थत्वात् प्राप्त्यभावात् किं प्रतिषेधेनेति प्रश्नार्थः। उत्तरयति– **नयतेरित्यादि**–प्रापणा– प्राप्तौ प्रयुक्तिः, तत्र च गुणीभूता प्राप्तिरपि प्रतीयते, सा च गतिरिति नयतेर्गत्यर्थतेति। ननु नयत्यादीनां णावणिकर्तुः कर्मसंज्ञाप्रतिषेधात् तद्बाधिता कर्तृसंज्ञाऽपि न प्राप्नोतीत्याह– **कर्मसंज्ञाप्रतिषेधादित्यादि**– अयमर्थः– कर्मसंज्ञा हि कर्तृत्वस्य प्रतिबन्धिका, तन्निवृत्तौ च प्रतिबन्धार्हस्य प्रतिबन्धकमन्त्रादिनिवृत्तौ वह्नेर्दाहकत्वमिव कर्तुः कर्तृत्वं व्यवतिष्ठत एवेत्यर्थः। ननु कर्मसंज्ञाधिकारे गत्यादिसूत्रं, तत्र च प्रयोजकव्यापारेण प्रेषणा-ऽध्येषणादिलक्षणेन प्रयोज्यस्य कर्तुर्व्याप्यमानत्वात् कर्मसंज्ञा सिध्यत्येव, न च तस्य स्वतन्त्रत्वात् कर्तृसंज्ञाऽपि प्राप्नोतीति वाच्यम्, प्रत्ययार्थप्राधान्यात् तत्प्रयुक्तया कर्मसंज्ञयैव प्रवर्तितव्यं, गुणप्रधानसन्निधौ च प्रधानस्य प्रयोजकत्वे सम्भवति पृथग् गुणस्तद्विरुद्धं स्वकार्यं न प्रयुङ्क्त इति किमर्थमेतदिति ? उच्यते– प्रयोज्यस्य कर्मसंज्ञायां सिद्धायां गत्याद्यर्थानामेव 'णिगन्तानामणिकर्तुः कर्मसंज्ञा भवति, नान्येषाम्' इति नियमार्थमेतदित्यत आह– **प्रेषणा-ऽध्येषणादिनेत्यादि**। नियमफलं दर्शयति– **तेनेत्यादि**। नन्वेवमपि गत्याद्यर्थानामणिकर्तुर्यथा णौ कर्मसंज्ञा तथा णिकर्तुरप्यपरस्मिन् णौ सा प्रसज्यते, यथा– गमयति चैत्रो, मैत्रं तं जिनदत्तः प्रयुङ्क्त इति, नैवम्– एतेषामणिकर्तैव कर्मसंज्ञो नान्य इत्यपि नियमः प्रत्येतव्य इति; न चैकेन लक्षणेन नियमद्वयस्य कर्तुमशक्यत्वादस्मिंश्च सति प्राक्तनस्यासत्त्वात् कथं नियमद्वयलाभ इति वाच्यम्, अणिग्ग्रहणात्, अन्यथा कर्ता णावित्येवोच्येत, एवमपि णौ कर्मसंज्ञाविधानादणिकर्तृलाभः स्यात्, णिगवस्थायां हि तस्य कर्मसंज्ञा विधीयते, तत् कथं तत्रासौ कर्ता स्यादित्यतिरिच्यमानमणिग्ग्रहणं नियमार्थमिति नियमद्वयलाभः, द्वयोरपि नियमयोर्व्यतिकृता व्यावृत्तिर्दर्शिता, गमयतेरगत्यर्थत्वादपि प्रयोजककर्तुः प्रयोज्यत्वेऽपि कर्मसंज्ञाया अप्रवृत्तिरिति स्पष्टतया द्वितीयो नियमो न दर्शितः, सर्वत्र च प्रधानयुक्तसंज्ञाया अभावे गुणक्रियानिमित्ता कर्तृसंज्ञा प्रवर्तत इति तत्र तृतीयेति। यच्च– 'दाप्योऽसौ पञ्च कृष्णलानि' मनुः, 'देवदत्तः शतं दापितः' सूरसेनः परश्वं व्याजित इति वात्स्यः, "मुक्ताजालं चिरपरिचितं त्याजितः" इति कालिदासः, स एष कविप्रवाहो यदि सम्मतस्तदा बहुवचनादनुसम्बन्धेयः ॥ छ ॥ २. २. ५. ॥

---

**न्या० स०**—गतिबोधा०। न विद्यते कर्म येषां तेऽकर्माणः, नित्यमकर्माण इति विस्पष्टपटुवत् समासः, ततो द्वन्द्वात् षष्ठीबहुवचनम्। आहारस्य सुप्रसिद्धत्वाद् गतिबोधयोः स्वरूपमाह– **गतिः**–

देशान्तरप्राप्तिरिति । **बुध्यते शिष्यो धर्मम्–** अत्र हि बुध्यादयश्चक्षुरादीन्द्रियसाधनज्ञानविशेषस्याप्रतिपादनात् सामान्यबोध एव वर्तन्त इत्यर्थः । **दर्शयति रूपतर्कमिति–** रूपं तर्कयतीति "कर्मणोऽण्" [५. ३. १४.] इत्यणि रूपतर्कः, कर्षेणाप्यत इति "भुजि-पत्यादिभ्यः०" [५. ३. १२८.] इति कर्मण्यनटि "पूर्वपदस्थ०" [२. ३. ६४.] इति णत्वे प्रज्ञादित्वात् स्वार्थेऽणि **कार्षापणः**, अत्र दृश्यादीनां चक्षुरादिसाधनजनितज्ञानविशेषवृत्तीनां विशेषबोधार्थतेत्यर्थः । **अन्ये त्विति–** ते हि गत्यादिसूत्रे दृशिमुपादाय बोधार्थत्वेनैव सिद्धे दृशिग्रहणाद् दृशेरेव विशेषबोधार्थस्य परिग्रहो नान्येषामित्याचक्षते । **खादयत्यपूपमिति–** अत्र "चल्याहारार्थेङ्०" [३. ३. १०८.] इति परस्मैपदम् । **आदयत्योदनमिति–** अत्र फलवत्त्वाभावात् "परिमुह०" [३. ३. ९४.] इति नात्मनेपदम्, मतान्तरेण वा प्रयोगोऽयम्, ते हि "परिमुह०" [३. ३. ९४.] इत्यत्रादधातुमपठन्त आत्मनेपदं नेच्छन्ति ॥ २. २. ५ ॥

## भक्षेर्हिंसायाम् । २ । २ । ६ ॥

**त० प्र०—भक्षेः स्वार्थिकण्यन्तस्य हिंसार्थस्याणिक्कर्ता णौ कर्मसंज्ञो भवति । भक्षयन्ति सस्यं बलीवर्दाः, तान् प्रयुङ्क्ते– भक्षयति सस्यं बलीवर्दान् मैत्रः; उक्ते च कर्मणि– भक्ष्यन्ते यवं बलीवर्दाः, भक्ष्यते यवो बलीवर्दान् मैत्रेणेति वा । वनस्पतीनां प्रसव-प्ररोह-वृद्ध्यादिमत्त्वेन चेतनत्वात् तद्विशेषस्य सस्यस्य प्राणवियोगस्तद्भक्षणात् स्वाम्युपघातो वाऽत्र हिंसेति भक्षेर्हिंसार्थता । हिंसायामिति किम् ? भक्षयति पिण्डीं शिशुः, तं प्रयुङ्क्ते– भक्षयति पिण्डीं शिशुना; भक्षयति राजद्रव्यं नियुक्तेन; भक्षयति पुत्रान् गार्ग्या, भक्षयतिरत्राक्रोशे । आहारार्थत्वात् प्राप्ते नियमार्थं वचनम् ॥ ६ ॥**

**श० न्या०—भक्षे०** । भक्षिश्चुरादित्वात् स्वार्थिकणिजन्तः, ततः कर्ता ह्यस्वार्थिकणिगपेक्षयाऽणिक्कर्ता भवतीत्याह– **भक्षेः स्वार्थिकण्यन्तस्येत्यादि** । **भक्षयति सस्यमित्यादि–** अत्र स्वार्थिकस्य णेरन्यस्मिन् णौ "णेरनिटि" [४. ३. ८३.] इति लुक् । ननु हिंसा हि प्राणव्यपरोपणलक्षणा, सा च प्राणिन्येव सचेतने सम्भवति, कथमचेतने सस्ये ? नहि तत्रायुरिन्द्रियबलोच्छ्वासलक्षणा रस-मल-धातूनां परिणतिहेतवः प्राणाः सन्तीत्यत आह– **वनस्पतिनामित्यादि–** नह्यभावोऽनुपलम्भमात्रादेव सिध्यति, भूतलच्छन्नमूल-कीलक-जलादीनामभावप्रसङ्गात्, किन्तु योग्यानुपलम्भः, उपलम्भयोग्यता च देश-काल-स्वरूपाऽविप्रकृष्टस्यैवार्थस्य, प्राणाश्च चैतन्याविनाभाविनः स्वरूपविप्रकृष्टत्वेन सर्वत्रानुमानग्राह्या एव, तथा च सत्यन्तर्गर्भमूर्च्छितेष्वपि प्राणवत्त्वं सिध्यतीति, तस्मात् प्रसूतिमत्स्त्रीवत् प्रवृद्धिमद्दारकवद् वा प्रसव-प्ररोहादिलिङ्गदर्शनात् सस्येऽपि शक्यत एव प्रागानुमानं कर्तुमिति । जैनागमश्चात्र प्राणानवगमयति, यथा—

" मृत्यूत्पत्ति-ग्लानि-निद्रा-प्रबोधै-
वृद्धि-ह्रास-त्रास-रोगादिभिश्च ।
लिङ्गैर्ज्ञेया जीवतैकेन्द्रियाणां,
जैनात् सूत्राच्चाण्डवन्निश्चलानाम् " ॥ इति ।

ततः सम्भवति तत्र प्राणवियोगलक्षणा हिंसेति । प्रकारान्तरेण हिंसामाह– **तद्भक्षणादित्यादि–** यस्य तत् सस्यं तस्य स आत्मा जीव इति तद्भक्षणात् स तत्स्वामी हिंसितो भवतीति हिंसानुबन्धि भक्षणमपि हिंसेति भक्षेर्हिंसावृत्तित्वम् । **भक्षयति पिण्डीं शिशुनेति–** पिण्ड्यामप्राणित्वान्न भक्षणं हिंसात्मकं, नापि तदनुबन्धीति न भवति कर्मसंज्ञेति । एवं– **भक्षयति राजद्रव्यमित्यत्रापि** द्रष्टव्यम् । ननु पुत्रभक्षणस्य हिंसात्मकत्वाद् भक्षयति पुत्रान् गार्ग्येति कथं कर्मत्वाभाव इत्यत आह– **भक्षयतिरत्राऽऽक्रोश** इति । नह्यत्र गार्गी स्वयं पुत्रान् भक्षयति, न च तामन्यस्तत्र प्रयुङ्क्ते, अपि तु एवमाक्रोशति– भक्षय पुत्रानिति भक्षिर्न हिंसाविषयः । ननु **भक्षयति पिण्डीं शिशुनेत्यादौ** मा भूदनेन कर्मत्वं, भक्षयतेराहारार्थत्वात् पूर्वेण कस्मान्न भवतीत्यत आह– **आहारार्थत्वादित्यादि–** भक्षिरयमाहारार्थो नह्यस्यान्योऽर्थोऽस्ति, अन्यत्र तु 'सर्वभक्षः कृतान्तः' इत्यादौ तद्व्यापारारोपा वृत्तिः, तत्रास्य पूर्वेण प्राप्नोतीति नेदं विध्यर्थम्, अपि तु * सिद्धे सत्यारम्भ० * इति नियमार्थं, विधि-निषेधव्यतिरेकेण शब्दव्यापाराभावात् ॥ छ ॥ २. २. ६. ॥

**न्या० स०—भक्षेर्हिंसा० । भक्ष्यन्ते यवं बलीवर्दा इति–** यवानदतां यवानां विनाशयत्वेन हिंसा । ननु हिंसा हि प्राणव्यपरोपणलक्षणा, सा च प्राणिन्येव सचेतने सम्भवति, कथमचेतने सस्ये ? नहि तत्रायुरिन्द्रियबलोच्छ्वासलक्षणा रसमलधातूनां परिणतिहेतवः प्राणाः सन्तीत्यत आह– **वनस्पतीनामिति** । **वृद्ध्यादिमत्त्वेनेति–** वनस्पतयः सचेतना वृद्ध्यादिमत्त्वात्, यो यो वृद्धिमान् स स सचेतनः, यथा पुरुषः, वृद्ध्यादिमन्तश्चैते, तस्मात् सचेतना इति पञ्चावयवमनुमानमिति । **भक्षयति पुत्रानिति–** ननु पुत्रभक्षणस्य हिंसात्मकत्वाद् भक्षयति पुत्रान् गार्ग्येति कथं कर्मत्वाभावः ? इत्याह– **भक्षयतिरत्रेति–** नह्यत्र गार्गी स्वयं पुत्रान् भक्षयति, न च तामन्यस्तत्र प्रयुङ्क्ते, अपि त्वेवमाक्रोशति– भक्षय पुत्रानिति भक्षिर्न हिंसाविषयः ॥ २. २. ६. ॥

## वहेः प्रवेयः । २ । २ । ७ ॥

**त० प्र०**—प्रवीयते- प्राजतिक्रियया व्याप्यते यः स प्रवेयः, वहेरणिकर्ता प्रवेयो णौ कर्मसंज्ञो भवति। वहन्ति बलीवर्दा भारम्, तान् प्रयुङ्क्ते नियोक्ता- वाहयति भारं बलीवर्दान्; [वाहयिता भारस्य बलीवर्दान्,] वाहयिता बलीवर्दानां भारम्; वाह्यन्ते भारं बलीवर्दाः। प्रवेय इति किम्? वाहयति भारं मैत्रेण, नात्र मैत्रो बलीवर्दादिवत् प्रवेयः। प्राप्त्यर्थस्य प्रापणार्थस्य च वहेर्गत्यर्थत्वाद्, अकर्मकस्य च नित्याऽकर्मकत्वात् पूर्वेण सिद्धे नियमार्थम्, अविवक्षितकर्मकस्य तु पक्षे विध्यर्थं चेदम् ॥ ७ ॥

**श० न्या०**—वहेः०। प्रपूर्वादजतेर्वीभावे कर्मणि यप्रत्यये रूपमित्याह- **प्रवीयते- प्राजतिक्रियया व्याप्यत** इति- नियन्तुः सारथेः प्रयोजयितुर्व्यापारस्य कर्मेत्यर्थः। **वाहयति भारं मैत्रेणेति**- नात्र मैत्रो बलीवर्दादिवत् प्रवेय इति कर्मभावो न भवति। **प्राप्त्यर्थस्य प्रापणार्थस्य चे**त्यादिना सूत्रतात्पर्यमाचष्टे, तत्र वहतिः प्राप्त्यर्थो यथा- वहन्ति बलीवर्दा- देशान्तरं प्राप्नुवन्तीति, प्रापणार्थो यथा- ग्रामं भारं वहति बलीवर्दः- ग्रामं प्रापयतीति, अत्रापि प्रापणोपसर्जनं प्राप्तिरस्त्येव, अकर्मको यथा- वहति नदी [स्यन्दत इत्यर्थः]; तत्र प्राप्तिगतिरूपत्वात् प्राप्त्यर्थस्याकर्मकस्य च गत्यादिसूत्रेणैव सिद्धत्वान्नियमार्थं वचनमिति वहेः प्रवेय एव कर्ता णौ कर्म भवति नान्य इति। यदाऽपि वहेरविवक्षितकर्मत्वं तत्र पक्षे प्राप्तिर्नैवेति तत्र विध्यर्थमित्याह- **अविवक्षितकर्मकस्य त्वि**त्यादि। नन्वेवं विधौ सति नियमो नोपपद्येत, उच्यते- आवृत्त्या उभयार्थपरिग्रहः ॥ छ ॥ २. २. ७. ॥

**न्या० स०**—वहेः प्र०। सूत्रतात्पर्यमाचष्टे- **प्राप्त्यर्थस्येति**- तत्र वहतिः प्राप्त्यर्थो यथा- वहन्ति बलीवर्दाः- देशान्तरं प्राप्नुवन्तीति, अत्रानेकार्थत्वात् प्राप्त्यर्थः, यद्वाऽणिगन्तस्यानटि प्रापणमिति रूपे प्राप्त्यर्थत्वम्; प्रापणार्थो यथा- ग्रामं भारं वहति बलीवर्दः- ग्रामं प्रापयतीति, अत्रापि प्रापणोपसर्जने[नं] प्राप्तिरस्त्येव तेन गत्यर्थत्वम्; अकर्मको यथा- वहति नदी- स्यन्दत इत्यर्थः, अनेकार्थत्वात् स्यन्त्यर्थः। **वाहयिता भारं बलीवर्दानामिति**- अत्र बलीवर्दशब्दात् "वैकत्र द्वयोः" [२. २. ८५.] इति प्राप्तषष्ठीविकल्पाद् द्वितीया, तद्विमुक्तपक्षे भारस्येत्यत्र "कर्मणि कृतः" [२. २. ८३.] इत्यनेन षष्ठी, द्वितीयप्रयोगे त्वेतद्विपर्ययः; "वैकत्र द्वयोः" [२. २. ८५.] इति षष्ठीप्रवृत्त्युदाहरणं तु- वाहयिता भारस्य बलीवर्दानामिति गम्यमपि ज्ञेयम्, अत्र तु निष्प्रयोजनत्वान्न दर्शितम् ॥ २. २. ७. ॥

## हृ-क्रोर्नवा । २ । २ । ८ ॥

**त० प्र०**—हरतेः करोतेश्चाणिकर्ता णौ कर्मसंज्ञो वा भवति, प्राप्ते चाप्राप्ते चायं विकल्पः। प्राप्ते- विहरति देशमाचार्यः, विहारयति देशमाचार्यमाचार्येण वा; एवम्- आहारयत्योदनं बालकं बालकेन वा; विकुर्वते सैन्धवाः, विकारयति सैन्धवान् सैन्धवैरिति वा; विकुरुते स्वरं क्रोष्टा, विकारयति स्वरं क्रोष्टारं क्रोष्टुना वा; अत्र गत्यर्था-ऽऽहारार्थ-नित्याकर्मक-शब्दकर्मकत्वेन यथासंख्यं प्राप्तिः। अप्राप्ते- हरति द्रव्यं मैत्रः, हारयति द्रव्यं मैत्रं मैत्रेण वा; करोति कटं चैत्रः, कारयति कटं चैत्रं चैत्रेण वा; अत्र हरतिश्चौर्यार्थो न प्रापणार्थ इत्यप्राप्तिः। प्रापणार्थत्वे तु प्राप्ते विभाषा। कारयिता कटस्य देवदत्तं देवदत्तेन वा, कारयिता कटं देवदत्तस्य देवदत्तेन वा ॥ ८ ॥

**श० न्या०**—हृ-क्रो०। यदा हरतिर्गतौ वर्ततेऽभ्यवहारे वा, करोतिश्च वल्गनादावकर्मकः शब्दकर्मकश्च, तदा पूर्वेण प्राप्तिः; यदा तु हरतिः स्तेयादौ वर्तते, करोतिश्च सकर्मको भवति तदाऽप्राप्ते, विशेषानुपादानादुभयत्र विकल्पोऽयमित्याह- **प्राप्ते चाप्राप्ते चे**त्यादि। तत्र प्राप्ते दर्शयति- **विहारयति देशमाचार्यमाचार्येण वे**त्यादि- अत्र गत्यर्थ आहारार्थश्चेति प्राप्तिः। **विकारयति सैन्धवान् सैन्धवैर्वे**ति- नित्याकर्मेति प्राप्तिः, सैन्धवाः- अश्वाः, विकुर्वते- वल्गन्तीति ह्यकर्मकः करोत्यर्थः। **विकारयति स्वरं क्रोष्टारं क्रोष्टुना वे**त्यत्र शब्दकर्मेति प्राप्तिरिति विवेकेन दर्शयति- **अत्रे**त्यादि। **हारयति द्रव्यं मैत्रं मैत्रेण वे**त्यादौ तु चौर्यार्थो हरतिः करोतिश्चोत्पादनार्थ इत्यप्राप्तिः ॥ छ ॥ २. २. ८. ॥

**न्या० स०**—हृ-क्रो०। हृसाहचर्याद् कृधातोरपि भ्वादेरेव ग्रहः, तेन "कृत् विक्षेपे" "कृंगट् हिंसायाम्" इत्यनयोर्व्यवच्छेदः। **प्राप्ते चेति**—यदा हरतिर्गतौ वर्ततेऽभ्यवहारे वा, करोतिश्च वल्गनादावकर्मकः शब्दकर्मकश्च, तदा पूर्वेण प्राप्ते, यदा हरतिः स्तेयादौ वर्तते, करोतिश्च सकर्मको भवति, तदाऽप्राप्ते विशेषानुपादानादुभयत्र विकल्पोऽयमिति। **कारयिता कटस्य देवदत्तं देवदत्तेन वेति**- प्रथमप्रयोगे देवदत्तशब्दाद् द्वितीयप्रयोगे तु कटशब्दात् "वैकत्र द्वयोः" [२. २. ८५.] इत्यनेन प्राप्तषष्ठीविकल्पाद् द्वितीया, तद्विमुक्तकर्मणि "कर्मणि कृतः" [२. २. ८३.] इत्यनेन षष्ठी, यद्यत्र "वैकत्र द्वयोः" [२. २. ८५.] इत्यनेन षष्ठीप्रवृत्तिः स्यान्न विकल्पस्तदा द्वितीये कर्मणि "कर्मणि कृतः" [२. २. ८३.] इत्यनेन नित्यं षष्ठी स्यात्, कर्तृप्रधानदेवदत्तशब्दात् तु "द्विहेतोरस्त्र्यणकस्य वा" [२. २. ८७.] इत्यनेन

प्राप्तकर्तृषष्ठीविकल्पात् तृतीया; " वैकत्र द्वयोः " [ २. २. ८५. ] इत्यस्य " द्विहेतोरस्यणकस्य वा " [ २. २. ८८. ] इत्यस्य च प्रवृत्त्युदाहरणं– कारयिता कटस्य देवदत्तस्य, कटं देवदत्तस्य वेति गम्यमपि ज्ञेयम्, अत्र तु निष्प्रयोजनत्वान्न दर्शितम् ॥ २. २. ८ ॥

## दृश्यभिवदोरात्मने । २ । २ । ९ ॥

**त० प्र०—दृशेरभिपूर्वस्य वदतेश्चाऽऽत्मनेपदविषयेऽणिकर्ता णौ कर्मसंज्ञो वा भवति । पश्यन्ति भृत्या राजानम्, तान् राजैवानुकूलाचरणेन प्रयुङ्क्ते– दर्शयते राजा भृत्यान् भृत्यैर्वा; अभिवदति गुरुं शिष्यः, अभिवादयते गुरुः शिष्यं शिष्येण वा; अथवा– अभिवदति गुरुं शिष्यः, तं मैत्रः प्रयुङ्क्ते– अभिवादयते गुरुं शिष्यं शिष्येण वा मैत्रः; एवं– दर्शयमानो राजा भृत्यान् भृत्यैर्वा, अभिवादयमानो गुरुः शिष्यं शिष्येण वा; अथवा– अभिवादयमानो गुरुं शिष्यं शिष्येण वा मैत्रः । आत्मन इति किम् ? पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणम्; अभिवदति गुरुं शिष्यः, अभिवादयति गुरुं शिष्येण । दृशेर्बोधार्थत्वेन नित्यं कर्मत्वे प्राप्ते, अभिवदेस्तु नित्यमप्राप्ते विकल्पः; यदा तु अभिवदिर्न प्रणामार्थः, किन्तु शब्दक्रियस्तदा– अभिवादयति गुरुं शिष्यं मैत्र इति नित्यं प्राप्ते विभाषेति । णिजन्तस्यापि वदेर्णिगीच्छन्त्येके– अभिवादयति गुरुर्देवदत्तम्, तस्मिन्नाशिषं प्रयुङ्क्त इत्यर्थः, अभिवादयते गुरुं देवदत्तो गुरुणेति वा; आत्मन्याशिषं प्रयोजयतीत्यर्थः । णिगन्तस्यापीति कश्चित्– अभिवदति गुरुः स्वयमाशिषम्, तं शिष्यः प्रयुङ्क्ते– अभिवादयति गुरुमाशिषं शिष्यः, तं मैत्रः प्रयुङ्क्ते– अभिवादयते गुरुमाशिषं शिष्यं शिष्येण वा मैत्रः । नामधातोरभिवादयतेरपीच्छत्यन्यः ॥ ९ ॥**

**श० न्या०—**दृश्य० । आत्मन इत्यनुवर्तमानस्य णावित्यस्य विषयतया विशेषणमित्याह– **आत्मनेपदविषय** इति । **दर्शयते राजा भृत्यान् भृत्यैर्वे**त्यादि– " दृशं प्रेक्षणे " अभिपूर्वो " वद व्यक्तायां वाचि " आभ्यां प्रयोक्तृव्यापारे णिग्, एतेषु " अणिक्कर्मणिक्कर्तृकात्० " [ ३. ३. ८८. ] इत्यात्मनेपदम् । **अथवे**ति– अन्यस्यापि प्रयोजकत्वे विभाषया प्रयोज्यस्य कर्मत्वम्, तत्रोभयत्रापि " ईगितः " [ ३. ३. ९५. ] इत्यनेन फलवत्कर्तर्यात्मनेपदम् । **एवमि**ति– " पराणिकानाऽऽनशौ चात्मनेपदम् " [ ३. ३. २०. ] इत्यानशोऽप्यात्मनेपदत्वात् तद्विषये णावणिक्कर्ता पक्षे कर्म भवतीत्यतिदेशार्थः । **दर्शयति रूपतर्कं कार्षापणमि**त्यादि– नह्येतौ विवक्षितफलवत्कर्तृकौ, नाप्यणिक्कर्म-णिक्कर्तृकावित्यनात्मनेपदविषयत्वाद् विकल्पो न भवति । अथ विकल्पो हि प्राप्ते कार्ये पक्षे निवृत्तिफलः, अप्राप्ते च प्रवृत्तिफलः, तत्रायं प्राप्ते वा स्यादप्राप्ते वेत्यत आह– **दृशेरि**त्यादि । **अभिवदेस्त्वि**ति– प्रणामार्थत्वेनेति शेषः, इति प्राप्ता-ऽप्राप्तविकल्पोऽयमित्यर्थः । **यदा त्वि**ति– शब्दक्रियत्वे गत्यादिसूत्रेणोभयत्र नित्यकर्मत्वे प्राप्ते प्राप्त एव विभाषेति । **णिजन्तस्यापी**ति– **एके** इति शकट इति, " वदिग् भाषणे " इति युजादित्वात् " युजादेर्नवा " [ ३. ४. १८. ] इति णिच्, तत्रेकारो णिजभावपक्षे आत्मनेपदार्थः, ततोऽभिवादयति– आशास्ते, इत्यभिवादयतिरयमाशीःप्रयोगे वर्तत इत्याह– **तस्मिन्नि**त्यादि । **अभिवादयते गुरुं देवदत्तः** अत्राभिवादीति णिजन्ताण्णिग्, तत्र गुरुः प्रयोज्यो देवदत्तः प्रयोक्ता, तद्दर्शयति– **आत्मनी**त्यादि । **णिगन्तस्यापी**ति– तदाऽभिवदतिराशीःप्रयोगे वर्तत इति, शेषं पूर्ववत् । **नामधातोरि**ति– **अन्य** इति रत्नमतिः, तथा च स आह– अभिवादिः सुब्धातुरिति नामधातुरित्यर्थः ॥ छ ॥ २. २. ९. ॥

**न्या० स०—** दृश्यभि० । **दर्शयते राजे**ति– अत्र " अणिक्कर्म० " [ ३. ३. ८८. ] इत्यात्मनेपदम् । **अभिवादयते गुरुं शिष्यं शिष्येण वा मैत्र** इति– फलवत्त्वविवक्षायामात्मनेपदम् । **अभिवादयति गुरुर्देवदत्तमि**त्यत्र " युजादेर्नवा " [ ३. ४. १८. ] विकल्पेन णिचि णिजभावपक्षे आत्मनेपदं चरितार्थं, वाक्यावस्थायां परस्मैपदमत्र । **कश्चिदि**ति दुर्गसिंहमतम् । **अन्य** इति रत्नमतिः, तथा च स आह– सुब्धातुर्नामधातुरित्यर्थः ॥ २. २. ९. ॥

## नाथः । २ । २ । १० ॥

**त० प्र०—अणिक्कर्ता णाविति निवृत्तं पृथग्योगात्, आत्मनेपदविषयस्य नाथतेर्व्याप्यं कर्म वा भवति, आत्मनेपदविषयत्वं चास्याशिष्येवेति तत्रैवायं विधिः । सर्पिषो नाथते, सर्पिर्नाथते, सर्पिर्मे भूयादित्याशास्त इत्यर्थः; सर्पिषो नाथमानः, सर्पिर्नाथमानः सर्पिषो नाथिष्यमाणः, सर्पिर्नाथिष्यमाणः; सर्पिषो नाथ्यते, सर्पिर्नाथ्यते । आत्मन इत्येव– पुत्रमुपनाथति पाठाय, उपयाचत इत्यर्थः ॥ १० ॥**

**श० न्या०—**नाथः० । **अणिक्कर्ता णाविति निवृत्तमि**ति– अत्र हेतुः– **पृथग्योगादि**ति– अयमर्थः– अणिक्कर्ता णावित्यनुवृत्तौ हि पूर्वेण समानविषयत्वादेकयोगमेव कुर्यादिति । अनन्तरत्वादात्मन इत्येवानुवर्तेत इत्याह– **आत्मनेपदविषयस्य नाथतेरि**ति । नाथतेश्चोपतापैश्वर्याऽऽशीर्याचनलक्षणार्थचतुष्टये वर्तमानस्याप्याशीरर्थस्यैवात्मनेपदविषयत्व-

मित्याह-**आत्मन** इत्यादि- अन्यत्र नात्मनेपदं नाप्येष विकल्प इत्यर्थः। "नाथृङ् उपतापादौ" तस्यार्थविशेषं दर्शयति- **सर्पिर्मे भूयादि**त्यादि। **नाथमान** इति- "शत्रानशा०" [५. २. २०.] इत्यानश्, एष्यति तु स्यसहितः। **नाथ्यत** इति- "तत् साप्यानाप्या०" [३. ३. २१.] इत्यकर्मण्यात्मनेपदम्। **उपनाथती**ति- अत्रोपयाचनार्थस्य "आशिषि नाथः" [३. ३. ३५.] इत्यात्मनेपदाभावात् कर्मविकल्पो न भवतीति ॥ छ ॥ २. २. १०. ॥

**न्या० स०**—नाथः०। **कर्म वा भवतीति**-"कर्तुर्व्याप्यम्०" [२. २. ३.] इत्यनेन नित्यं प्राप्ते पक्षे निषेधः साध्यः। **आत्मनेपदविषयत्वं चेति**- कर्त्रपेक्षयेदमुक्तं, भावकर्मणोस्तु सर्वधातूनामप्यात्मनेपदमस्त्येव। सर्पिषो नाथत इत्यादिषु सर्वेषु कर्माभावपक्षे "शेषे" [२. २. ८१.] इत्यनेन षष्ठी ॥ २. २. १०. ॥

## स्मृत्यर्थदयेशः । २ । २ । ११ ॥

**त० प्र०—स्मरणार्थानां दयतेरीशश्च व्याप्यं कर्म वा भवति। मातुः स्मरति, मातरं स्मरति; मातुः स्मर्यते माता स्मर्यते; मातुः स्मर्तव्यम्, माता स्मर्तव्या; मातुः स्मृतम्, माता स्मृता; मातुः सुस्मरम्, माता सुस्मरा; मातुः स्मृतः पुत्रः, माता स्मृता पुत्रेण; एवं- मातुरध्येति, मातरमध्येति; मातुर्ध्यायति, मातरं ध्यायति; मातुरुत्कण्ठते, मातरमुत्कण्ठत इत्यादि। सर्पिषो दयते, सर्पिर्दयते; लोकानामीष्टे, लोकानीष्टे। ननु कर्माविवक्षायां पक्षे माषाणामश्नीयादित्यादिवत् शेषे षष्ठी सिद्धैव, तत् किमनेन? सत्यम्- किन्तु "षष्ठ्ययत्नाच्छेषे" [३. १. ७६.] इत्ययत्नजे शेषे षष्ठ्याः समासो वक्ष्यते, ततो मातुः स्मृतमित्यादौ समासो मा भूदित्यनेन प्रकारेण यत्नाच्छेषो विधीयते, नियमार्थं च, तेनैषां धातूनां कर्मैव शेषत्वेन विवक्ष्यते, न कारकान्तरं, तेन 'मात्रा स्मृतम्, मनसा स्मृतम्' इत्यादौ कर्तृ-करणयोः शेषविवक्षाभावात् षष्ठी न भवति। व्याप्यमित्येव- कथासु स्मरति, गुणैः स्मरति ॥ ११ ॥**

**श० न्या०**—स्मृत्य०। **मातुः स्मरती**त्यादि- पक्षे कर्मत्वाभावान्न द्वितीयेति "शेषे" [२. २. ८१.] इत्युत्सर्गेण षष्ठी भवति, "तत् साप्याऽनाप्यात्०" [३. ३. २१.] इति कर्मणि भावे चात्मनेपद-कृत्य-क्त-खलर्था भवन्ति, कर्त्राधारणयोश्च क्तः। कर्मत्वे तु कर्मणि द्वितीया, एवं- मातुरध्येतीत्यादावपि द्रष्टव्यम्, "इंक् स्मरणे" अधिपूर्वः, 'इङिकावध्युपसर्गं न व्यभिचरतः' "ध्यैं चिन्तायाम्", उत्पूर्वः "कठुङ् शोके," "दयि दानादौ", "ईशिक् ऐश्वर्ये"। ननिवदं कर्म भवति, कर्मभावजनितसम्बन्धसम्बन्धि च, तत्र कर्माविवक्षायां "शेषे" [२. २. ८१.] इत्यनेनैव **षष्ठी**, यथा- राज्ञः पुरुष इत्यत्र राजा पुरुषाय वृत्तिं ददाति, तं बिभर्तीति कर्तृभावजनितसम्बन्धसम्बन्धित्वेन राज्ञ इत्यत्र षष्ठी; द्रव्ययोस्तस्येदंभावे क्रियोपनिधीयते, तया विना द्रव्यागमयःशलाकाकल्पनामुपश्लेषायोगात्, क्रियायां तु क्रियान्तरं नापेक्ष्यते जतुवत्, नहि काष्ठसंश्लेषहेतोर्जतुनः संश्लेषे जत्वन्तरमपेक्ष्यते, तत्रापि स्थित्यादिक्रियाऽस्तीत्यपरे; तत्र यदा स्मरणादेः प्राप्यतया मात्रादि विवक्ष्यते तदा कर्मणि द्वितीयादि भवति; यदा तु स्मरणादिविशेषविवक्षा स्मरणादीनां प्रतिसाधनं भेदात्, अन्यथा हि माता स्मर्यते, अन्यथा हि जायेति, तदा मातुर्यत् स्मरणं तत् करोतीत्यर्थः; न च कर्मभावनिवर्तने षष्ठ्या प्रवर्तितायामपि तत्कर्मप्रतिपत्तिः, सम्बन्धिमात्रो हि ततः प्रतीयते, अतो विवक्षाभेदाद् द्वितीयादेः षष्ठ्यादेश्च सिद्धेरयं विकल्पोऽनर्थक इति पृच्छति- **नन्वि**त्यादि। समाधत्ते- **सत्यमि**त्यादि- अयमभिप्रायः- यदीदं द्विधा व्यवस्थापनं न स्यात्, स्वतो द्विधाभावेन षष्ठ्यां मातुः स्मृतमित्यादौ "षष्ठ्ययत्नात्०" [३. १. ७६.] इति समासः प्राप्नोति, सति त्वस्मिन्ननेन यत्नेन प्रापिता भवतीत्ययत्नादिति निषेधात् समासो न भवतीत्येतदर्थमारभ्यते। प्रयोजनान्तरमाह- **नियमार्थं चे**ति। नियमफलं दर्शयति- **तेने**त्यादि। स्मृत्यर्थादीनां कर्माकर्म वा भवति, सम्बन्धिरूपेण च सामान्येनाभिधीयते, कारकान्तरं तु करणादिकं करणादिरूपेणैवोच्यते, न सम्बन्धिरूपेणेति तद्व्यवच्छेदमुदाहरति- **मात्रा स्मृतं, मनसा स्मृतमि**ति- मात्रेति कर्ता, मनसेति करणम्। **कथास्वि**त्यादि- अत्र व्याप्यमित्यनुवर्तनादव्याप्यस्याधिकरणादेः कर्मविकल्पो न भवतीति ॥ छ ॥ २. २. ११. ॥

**न्या० स०** —**स्मृत्यर्थ०**। सामान्येन चिन्तनार्थ उक्तोऽपि स्मृधातुरनुभूतस्यार्थस्य विशिष्टे चिन्तने वर्तमानो गृह्यते, एवंविधाश्चाध्येत्यादयोऽपि गृह्यन्ते, तेन मनसा परिकल्पितचिन्तनार्थानां समीक्षादीनां व्युदासः। **लोकानामीष्टे** इति- व्यापारेषु नियुङ्क्ते स्वायत्तीकरोतीत्यर्थः ॥ २. २. ११. ॥

## कृगः प्रतियत्ने । २ । २ । १२ ॥

**त० प्र०**—पुनर्यत्नः- प्रतियत्नः, सतो गुणाऽऽधानायाऽपायपरिहाराय वा समीहा; तस्मिन् वर्तमानस्य करोतेर्व्याप्यं वा कर्म भवति। **एधोदकस्योपस्कुरुते, एधोदकमुपस्कुरुते, शस्त्रपत्रस्योपस्कुरुते, शस्त्रपत्रमुपस्कुरुते। प्रतियत्न इति किम्?**

**कटं करोति** । व्याप्यमित्येव- एधोदकस्योपस्कुरुते बुद्ध्या, **करणस्य मा भूत्** ॥ १२ ॥

**श० न्या०—**कृगः० । यतनं- यत्नः, प्रतिशब्दः पुनरर्थे इत्याह- **पुनर्यत्नः- प्रतियत्न** इति । प्रथमं तावदर्थस्यात्मलाभाय यत्नो भवति, लब्धात्मनो यो यत्नोऽधिकान् गुणानुत्पादयितुं परिपूर्णगुणस्य वा तादवस्थ्यं रक्षितुं स प्रतियत्नः, समीहेत्याह- **सतो गुणाधानायेत्यादि** । **उपस्कुरुत** इति- " उपाद् भूषासमवायप्रतियत्न० " [ ४. ४. ९२. ] इति सट्, " गन्धनावक्षेपसेवा० " [ ३. ३. ७६. ] इत्यात्मनेपदम् । शस्त्र-पत्रशब्दौ " नी-दांव्-शसु० " [ ५. २. ८८. ] इति त्रडन्तौ ॥ छ ॥ २. २. १२. ॥

**न्या० स०—कृगः प्र०** । प्रतिशब्दः पुनरर्थेऽव्ययम्, " अव्ययं प्रवृद्धादिभिः " [ ३. १. ४८. ] [ इति ] सः । **सतो गुणाधानायेति**- ननु यत्नद्वये सति पुनर्यत्न इत्युपयुज्यते, तत् कथमत्र प्रतियत्नः ? उच्यते- प्रथमं तावदर्थस्यात्मलाभाय यत्नो भवति, लब्धात्मनो यो यत्नोऽधिकान् गुणानुत्पादयितुं परिपूर्णगुणस्य वा तादवस्थ्यं रक्षितुं सः प्रतियत्नः । **कटं करोतीति**- अभूतः सन् निर्वर्त्त्यः कटोऽत्र, यत्र तु वर्णिकया रक्तं कटं करोति, तत्रापि विकार्यमेव कर्म न प्रतियत्नः, उपपूर्वस्यैव करोतेः प्रतियत्नविषयत्वात्, " गन्धना० " [ ३. ३. ७६. ] इत्यात्मनेपदं चोपपूर्वस्यैव, अत एव मूलोदाहरणेष्वपि- उपपूर्व एव दर्शितः । **एधोदकस्येति**- एधाश्चोदकानि च " अप्राणिपश्वादेः " [ ३. १. १३६. ] इत्येकत्वम् ॥ २. २. १२ ॥

## रुजार्थस्याज्वरि-संतापेर्भावे कर्तरि ॥ २ । २ । १३ ॥

**त० प्र०—**रुजा- पीडा, तदर्थस्य धातोर्ज्वरि-संतापिवर्जितस्य व्याप्यं वा कर्मसंज्ञं भवति, भावे कर्तरि- भावश्चेद्रुजार्थस्य कर्ता भवति । चौरस्य रुजति, चौरं रुजति रोगः; अपथ्याशिनां रुज्यते रोगेण, अपथ्याशिनो रुज्यन्ते रोगेण; चौरस्य रुग्णम्, चौरो रुग्ण इत्यादि । चौरस्यामयति, चौरमामयति रोगः; चौरस्य व्यथयति, चौरं व्यथयति रोगः; चौरस्य पीडयति, चौरं पीडयति रोगः । रुजार्थस्येति किम् ? " एति जीवन्तमानन्दः " [ विष्णुपुराणे ] । ज्वरि-संतापिवर्जनं किम् ? आद्यूनं ज्वरयति, अत्याशिनं संतापयति । कर्तरीति किम् ? चैत्रं रुजत्यत्यशने वातः । भाव इति किम् ? मैत्रं रुजति श्लेष्मा, अत्र श्लेष्मा द्रव्यं, न भावः; रोगो व्याधिरामयः शिरोऽर्तिरित्यादयो भावरूपाः कर्त्तार इति ॥ १३ ॥

**श० न्या०—**रुजा० । " रुजोंत् भङ्गे " इत्यस्माद् भिदादित्वादङि रुजेत्याह- **रुजा- पीडेति**- अथवा " रुजोंत् भङ्गे । " इत्यागन्तुनाकारेण निर्दिष्टोऽनुक्रियते, रुक् अर्थो यस्यासाविति विग्रहः । **भावश्चेदिति**- साध्यरूपस्य भावस्य कर्तृत्वानुपपत्तेः सामान्यशब्दोऽपि भावशब्दः सिद्धरूपे भावे वर्तत इति तात्पर्यार्थः । **चौरस्य रुजतीत्यादि**- " चुरण् स्तेये " इत्यस्माणिजन्तस्य भिदादित्वादङि चुरा, सा शीलमस्य चौरः, " अङ्स्थाच्छत्रादेरञ् " [ ६. ४. ६०. ] इत्यञि वृद्धिः, रुजतीति " पदरुज० " [ ५. ३. १६. ] इति घञि- रोगः; अपथ्यमश्नन्तीत्येवंशीलाः " अजातेः शीले " [ ५. १. १५४. ] इति णिन्, **रुज्यत** इति " तत् साप्यानाप्यात्० " [ ३. ३. २१. ] इति भावे- आत्मनेपदम्, **रुज्यन्ते** कर्मणि, **रुग्णमिति** " क्लीबे " [ ५. ३. १२३. ] इति भावे क्तः, **रुग्ण** इति कर्मणि [क्तः], " सूयत्याद्योदितः " [ ४. २. ७०. ] इति तकारस्य नकारः, " रषृवर्णाद्० " [ २. ३. ६३. ] इति णत्वम् । **आमयतीति**- " अमत् रोगे ", " व्यथिष् भय-चलनयोः ", " पीडण् गहने ", **' एति जीवन्तमानन्दः '** इति- जीवतेः " रुहि-नन्दि-जीवि० " [ उणा० २२०. ] इत्यन्तप्रत्ययः शतृप्रत्ययो वा । **आद्यूनं ज्वरयतीत्यादि**- ज्वरि-संतापिप्रतिषेधादिह न भवति, **चैत्रं रुजत्यत्यशने वात** इति- भावोऽस्ति न तु कर्तेति न भवति । **मैत्रं रुजति श्लेष्मेति**- श्लिष्यतेर्मन् । अथ रुजार्थस्य धातोर्भावरूपाः के कर्तार इत्यत आह- **रोग** इत्यादि ॥ छ २. २. १३. ॥

**न्या० स०—रुजार्थस्य०** । " रुजोंत् भङ्गे " इत्यस्माद् भिदात्वङि- रुजा । **भावश्चेदिति**- साध्यरूपस्य भावस्य कर्तृत्वानुपपत्तेः सामान्यशब्दोऽपि भावशब्दः सिद्धरूपे भावे वर्तत इति तात्पर्यार्थः ।

" एति जीवन्तमानन्दो नरं वर्षशतादपि ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ॥ " [ विष्णुपुराणे । ]

**चैत्रं रुजत्यत्यशने वात** इति- अत्र योऽत्यशनरूपो भावो न स कर्ता, यस्तु वातरूपः कर्ता स द्रव्यं, न भावः । अत्र सूत्रे व्यथितप्योर्गत्यादिसूत्रेणाणिक्कर्तुः कर्मत्वम् ॥ २. २. १३. ॥

## जास-नाट-क्राथ-पिषो हिंसायाम् ॥ २ । २ । १४ ॥

**त० प्र०—**एषां हिंसायां वर्तमानानां व्याप्यं वा कर्म भवति । " ब्रूस पिस जस बर्हण् हिंसायाम् " " जसण् ताडने " इति चुरादी गृह्येते, न " जसूच् मोक्षणे " इति दैवादिकः, तस्याऽहिंसार्थत्वात्, चौरस्योज्जासयति, चौरमुज्जासयति; चौर-

स्योज्जास्यते, चौर उज्जास्यते चैत्रेण; तथा " नटण् अवस्यन्दने " इति, अयमपि चुरादिर्न तु " णट नृत्तौ " इति भ्वादिः, चौरस्योन्नाटयति, चौरमुन्नाटयति; एवं– क्राथिर्घटादिः—चौरस्योत्क्राथयति, चौरमुत्क्राथयति; चौरस्य पिनष्टि, चौरं पिनष्टि । जास-नाट-क्राथानामाकारोपान्त्यनिर्देशो यत्राकारश्रुतिस्तत्र यथा स्यादित्येवमर्थः, तेनेह न भवति– दस्युमुदजीजसत्, चौरमनीनटत्; दस्युमुदचिक्रथत्; अत एव च क्राथेः कर्मसंज्ञाप्रतिषेधपक्षे ह्रस्वत्वाभावः, कर्मणि तु ह्रस्वत्वमेव । हिंसायामिति किम् ? चौरं बन्धनाज्जासयति– मोचयतीत्यर्थः, नटं नाटयति– नर्तयतीत्यर्थः । अभावकर्तृकार्थं वचनम् ॥ १४ ॥

श० न्या०—जास-नाट० । " **जसूच् मोक्षणे " इति दैवादिक** इति– अत्रोपपत्तिः– **तस्याहिंसार्थत्वादि**ति– हिंसायामिति वचनाद्धिंसार्थपरिग्रहादित्यर्थः । **न तु " णट नृत्तौ " इति भ्वादिरि**ति– अत्राप्यहिंसार्थत्वादित्येव हेतुः । **क्राथिर्घटादिरि**ति– " क्नथ क्नथ क्रथ क्लथ हिंसार्थाः " इति घटादौ, " पिष्लृंप् संचूर्णने " । ननु च जस-नट-क्रथेति धातवः पठ्यन्ते, तत्र निर्देशे तथैव निर्देष्टव्यम्, जास-नाट-क्राथेत्याकारः किमर्थः ? अथ ण्यन्तनिर्देशस्तर्हि जासि-नाटि-क्राथीति भवितव्यमित्यत आह– **जास-नाट-क्राथानामि**त्यादि– आकारेण न जस्यादिधातुमात्रं निर्दिश्यते, अपि तु यद् एषामाकारवद् रूपं तदुच्यते– जास-नाट-क्राथेति, तेन यत्र प्रयोगे एषां धातूनामाकारस्तत्रैवायं विधिर्नान्यत्र, तेनेह न भवति– **दस्युमुदजीजसत्** जसेर्नटेश्च चुरादित्वाण्णिच्; उत्क्रथति कश्चित्, तमन्यः प्रयुङ्क्ते इति प्रयोक्तृव्यापारे णिग् "ञिगति" [ ४. ३. ५. ] इत्यस्य वृद्धिस्ततोऽद्यतन्या दिः, " णि-श्रि-द्रु-स्रु-कमः० " [ ३. ४. ५८. ] इति ङः, ततः " उपान्त्यस्यासमानलोपि० " [ ४. २. ३५. ] इति ह्रस्वः, ततो द्विर्वचनादिः, अत्र जासेत्यादि नाकारवद् रूपमस्तीति नायं विकल्पः । अथ चौरस्योत्क्राथयतीति कथमाकारो घटादित्वात् ? सूत्रे क्राथेत्युपादानाद् विज्ञायते– सत्यपि घटादित्वेऽस्ति णिगि क्रथेराकारः, अन्यथा– अस्यानुपपत्तेः, न च णिगं विनाऽस्य कर्मास्ति, अकर्मकत्वात्, स च यदि सर्वत्र स्यादस्य घटादित्वमनर्थकमिति कर्माभाव एव न भवतीत्याह– **कर्मत्वे तु ह्रस्वत्वमेवे**ति । [ **चौरं बन्धनाज्जासयती**ति– ] चौरो बन्धनाज्जस्यति, तमन्यः प्रयुङ्क्ते इति णिग्, हिंसायामिति वचनान्न भवति; एवं– **नटं नाटयती**त्यत्रापि द्रष्टव्यम् । अथ हिंसाया रुजारूपत्वात् " रुजार्थस्या० " [ २. २. १३. ] इत्यनेनैव कर्मविकल्पो भविष्यति, किमर्थमिदम् ? यदि जास-नाट-क्राथेत्याकारार्थ– यत्राकारस्तत्रैव यथा स्यादिति, तथापि पिष्ग्रहणमनर्थकमित्याह– **अभावकर्तृकार्थं वचनमि**ति– तत्र हि भावे कर्तरि विधिरिष्यते, अत्र तु चौरस्योज्जासयति देवदत्त इत्यभावेऽपि यथा स्यादित्येवमर्थम् ॥ छ ॥ २. २. १४. ॥

**न्या० स०—**जास-नाट० । " **नटण् अवस्यन्दने** " इति– अवस्यन्दनं हिंसाभेदः । **न तु " णट नृत्तौ "** इति– अत्राप्यहिंसार्थत्वादित्येव हेतुः । **आकारोपान्त्यनिर्देश** इति– ननु जास-नाट-क्राथेत्याकारः किमर्थः ? यतो जस-नट-क्रथेति धातवः पठ्यन्ते, तेषां निर्देशे तथैव निर्देष्टव्यम्; अथ ण्यन्तनिर्देशस्तर्हि जासि-नाटि-क्राथीति भवितव्यमित्याह– **यत्राकारश्रुतिस्तत्रे**ति । **एवं– क्राथिर्घटादिरि**ति– एवम्– अमुना प्रकारेणापरमपि निर्णीयते, किं तत् ? क्राथिर्घटादिर्गृह्यते, न तु " क्रथ अर्दिण् हिंसायाम् " इति यौजादिकः, इति वैयाकरणानां मतम्; धातुपारायणकारैस्तु उपलक्षणत्वाद् यौजादिकोऽपि । ननु यथा " घटादेर्ह्रस्वः " [ ४. २. २४. ] पक्षे निषिध्यते, तथा दस्युमुदजीजसदित्यादौ " उपान्त्यस्य० " [ ४. २. ३५. ] इत्यस्यापि किं न निषेधः ? सत्यम्– *यस्मिन् प्राप्त एव०* इति न्यायात् " घटादेः० " [ ४. २. २४. ] इत्यस्यैव निषेधः । ननु हिंसाया रुजारूपत्वात् " रुजार्थस्य० " [ २. २. १३. ] इत्यनेनैव कर्मविकल्पो भविष्यति, किमनेनेति ? अथ जास-नाट-क्राथेत्याकारश्रवणार्थमिदं सूत्रं विधीयते, तदा पिष्ग्रहणमनर्थकं स्यात्, तस्मात् पूर्वेणैव सिद्धमित्याह– **अभावकर्तृकार्थमि**ति ॥ २. २. १४ ॥

## नि-प्रेभ्यो घ्नः । २ । २ । १५ ॥

**त० प्र०—नि-प्राभ्यां परस्य हिंसायां वर्तमानस्य हन्तेर्व्याप्यं वा कर्म भवति, बहुवचनं समस्त-व्यस्त-विपर्यस्त-संग्रहार्थम् । चौरस्य निप्रहन्ति, चौरं निप्रहन्ति; चौरस्य चौरं वा निहन्ति; चौरस्य चौरं वा प्रहन्ति; चौरस्य चौरं वा प्रणिहन्ति; चौराणां निप्रहण्यते, चौरा निप्रहण्यन्ते राज्ञा । नि-प्रेभ्य इति किम् ? चौरं हन्ति, चौरमाहन्ति । हिंसायामित्येव– रागादीन् निहन्ति ॥ १५ ॥**

श० न्या०—नि-प्रे० । **बहुवचनं समस्त-व्यस्त-विपर्यस्तसंग्रहार्थमि**ति– तत्रेयमुपपत्तिः– निना सहितो निसहितः, निसहितः प्रो निप्रः, अनेन समासेन संघातस्य ग्रहणं, यथाश्रुतस्य विपर्यस्तस्याऽप्युभयत्र निना सहितस्य प्रस्यावगतेः, निश्च प्रश्च निप्रमिति समाहारद्वन्द्वे कृते " क्लीबमन्यनैकं च वा " [ ३. १. १२८. ] इति कर्मधारयनिवृत्तौ द्वन्द्वस्य शेषे द्वन्द्वेन च विगृहीतौ व्यस्तौ निप्रौ प्रतिपाद्येते, इत्ययमधिकोऽर्थो बहुवचनाल्लभ्यते, सर्वत्र च बहुवचनमधिकार्थसंसूचनार्थमित्येष न्यायोऽत्र व्याकरणे द्रष्टव्य इति क्रमेणोदाहरति । **निप्रहण्यत**

इति भावे, **निप्रहण्यन्त** इति कर्मणि, " तत् साप्यानाप्यात्० " [ ३. ३. २१. ] इत्युभयत्रात्मनेपदम् । **रागादीन् निहन्तीत्यत्र** हिंसायामित्यनुवर्तनाद् रागादीनामचेतनतया प्राणव्यपरोपणलक्षणाया हिंसाया अभावान्न भवतीत्यर्थः ॥ छ ॥ २. २. १५. ॥

**न्या० स०—निप्रेभ्यो०** । निना सहितः प्रो निप्रः, प्रेण सहितो निः प्रनिः, निप्रश्च निश्च प्रश्च प्रनिश्च, यदा तु प्र-निभ्यां पूर्वमुपसर्गान्तरं प्रयुज्यते तदा न भवति, बहुवचनेन ज्ञापितत्वात्, अन्यथा " वाम्यवाम्याम् " [ ४. १. ९९. ] इतिवद् द्विवचनेनापि समस्तादिग्रहणमात्रं भवेत् । **संग्रहार्थमिति**— यद्येतदर्थं तर्हि न प्रदेयं, यत्रापि व्यस्त-विपर्यस्तौ नि-प्रौ भविष्यतः, तत्रापि नेः प्राग् वा परो हन्नस्तीति, उच्यते— तर्हि-अन्योपसर्गपूर्वस्य हन्तेर्वा कर्मसंज्ञानिवृत्त्यर्थम्, तेन चौरं विप्रहन्ति विनिहन्ति वेत्यादौ पूर्वेण नित्यं कर्मसंज्ञा । **प्रहन्तीति**— अत्र " म्नां० " [१. ३. ३९.] इति बहुवचनाद् " हनः " [ २. ३. ८२. ] इत्यनेन णत्वाभावः । **रागादीन् निहन्तीत्यत्र** रागादीनामचेतनतया प्राणव्यपरोपणलक्षणाया हिंसाया अभावान्न भवतीत्यर्थः ॥ २. २. १५ ॥

## विनिमेय-द्यूतपणं पण-व्यवहोः । २ । २ । १६ ॥

**त० प्र०—विनिमेयः**- क्रय-विक्रेयोऽर्थः, **द्यूतपणो**—द्यूतजेयम्; पणतेर्व्यवपूर्वस्य च हरतेर्व्याप्यौ विनिमेयद्यूतपणौ वा कर्मसंज्ञौ भवतः । शतस्य पणायति, शतं पणायति; सहस्रस्य सहस्रं वा पणायति, क्रय-विक्रये द्यूतपणत्वे वा तद् विनियुङ्क्त इत्यर्थः; एवं- दशानां व्यवहरति, दश व्यवहरति; पञ्चानां पञ्च वा व्यवहरति । विनिमेय-द्यूतपणमिति किम् ? साधून् पणायति— स्तौतीत्यर्थः, शलाकां व्यवहरति— विगणयन् गोपायतीत्यर्थः । वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥ १६ ॥

**श० न्या०—विनि०** । विनिमेयं व्याचष्टे— **क्रय-विक्रेयोऽर्थ** इति— क्रेयो य आत्मना ग्राह्यो, विक्रेयो यो देय इति । द्यूतस्य पणो द्यूतपणस्तमाह— **द्यूतपणो द्यूतजेयमिति**— द्यूते द्यूतेन वा जित्वा यत् स्वीकर्तव्यमिति । तदुभयं- विनिमेयो द्यूतपणश्च पणव्यवहोर्धात्वोर्व्याप्यं कर्म वर्तते तस्य पक्षे कर्मत्वप्रतिषेधः । **शतस्य पणायती**त्यादि— " पणि व्यवहार-स्तुत्योः" अतो " गुपौ-धूप-विच्छि-पणि-पनेः० " [ ३. ४. १. ] इत्यायः, तिव् च । **क्रय-विक्रये द्यूतपणत्वे वा तद् विनियुङ्क्त इत्यर्थ** इति— अनेन शत-सहस्रयोर्विनिमेय-द्यूतपणत्वे, कर्मता च दर्श्यते । **एवमिति**— पूर्ववदित्यर्थः । **साधून् पणायती**ति— अत्र स्तुत्यर्थत्वाद् विनिमेयत्वाद्यभावान्न भवतीत्यर्थः । **शलाकां व्यवहरती**ति— अत्रानेकार्थत्वाद् धातूनां विगणनपूर्वके गोपने व्यवहरतिर्वर्तत इति न विधिः । अथ पण-व्यवह्रोरित्यत्र विनिमेय-द्यूतपणवत् समाहारद्वन्द्वादेकवचनं किमिति वचनभेदाभावार्थं नोपादीयत इत्याह— **वचनभेद** इत्यादि— असति हि तस्मिंस्तुल्यत्वाद् यथासंख्यं स्यात् ॥ छ ॥ २. २. १६. ॥

**न्या० स०—विनिमेय०** । शतं पणायतीति— *प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानां ग्रहणम्* इति सूत्रे पणेत्युक्तेऽपि पणायतेरिह ग्रहः आत्मनेपदं तु प्रति अयं न्यायोऽनित्यः, इदं च कुतो लभ्यते ? " कर्मणिङ् " [ ३. ४. २. ] इत्यत्र णिङिति ङकारोपादानात् । **गोपायतीत्यर्थ** इति— अनेकार्थत्वाद् धातूनाम् ॥ २. २. १६ ॥

## उपसर्गाद् दिवः । २ । २ । १७ ॥

**त० प्र०**—उपसर्गात् परस्य दिवो व्याप्यौ विनिमेय-द्यूतपणौ वा कर्मसंज्ञौ भवतः । शतस्य प्रदीव्यति, शतं प्रदीव्यति; शतस्य प्रदीव्यते, शतं प्रदीव्यते; शतस्य प्रद्यूतम्, शतं प्रद्यूतम्; शतस्य प्रदेवितव्यम्, शतं प्रदेवितव्यम्; शतस्य सुप्रदेवम्, शतं सुप्रदेवम् । विनिमेय-द्यूतपणमित्येव— शलाकां प्रतिदीव्यति— विगणयन्नपहरतीत्यर्थः । उपसर्गादिति किम् ? शतस्य दीव्यति ॥ १७ ॥

**श० न्या०—उप०** । प्रपूर्वाद् दिवेस्तिवि श्ये " भ्वादेः० " [ २. १. ६३. ] इति दीर्घत्वे— **शतस्य प्रदीव्यती**त्यादि— एषु कर्मसंज्ञापक्षे कर्मणि द्वितीयाऽऽत्मनेपद-क्त-कृत्य-खलर्थाश्च भवन्ति, कर्मत्वाभावपक्षे " शेषे " [ २. २. ८१. ] इति षष्ठी, भावे चात्मनेपदादय इति । **प्रद्यूत**मिति –क्ते " अनुनासिके च च्छ्वः शूट् " [ ४. १. १०८. ] इत्यूट् ॥ छ ॥ २. २. १७. ॥

**न्या० स०**—उप० [ नेह व्याख्या दृश्यते । ] २.२.१७.॥

## न । २ । २ । १८ ॥

**त० प्र०**—विनिमेय-द्यूतपणौ दिवो व्याप्यौ कर्मसंज्ञौ न भवतः, उपसर्गपूर्वस्य विकल्पविधानादनुपसर्गस्यायं निषेधः । शतस्य दीव्यति, सहस्रस्य दीव्यति, निषिद्धे च कर्मणि षष्ठ्येव भवति; ' शतस्य दीव्यते, शतस्य द्यूतम्, शतस्य देवितव्यम्, शतस्य सुदेवम् ', इत्यादौ भावे— आत्मनेपद-क्त-कृत्य-खलः सिद्धाः; ' शतस्य द्यूतो मैत्रः ' इत्यत्र च कर्तरि क्तः । विनिमेय-द्यूतपणमित्येव— जिनं दीव्यति— स्तौतीत्यर्थः, भूमिं दीव्यति— संधिना विजिगीषत इत्यर्थः, सन्धिपणोऽत्र न द्यूतपणः; द्यूतं

दीव्यति, अक्षान् दीव्यति, अत्र क्रिया तत्साधनं च व्याप्यं न तु पणः ॥ १८ ॥

**श० न्या०—न** । अत्र विनिमेय-द्यूतपणमिति दिव इति चानुवर्तते । **उपसर्गपूर्वस्ये**ति- सूत्रे विशेषानुपादानेऽपीति शेषः । **शतस्य दीव्यती**ति- कर्मसंज्ञायाः प्रतिषेधादकर्मकत्वात् सर्वत्र षष्ठी, भावे चात्मनेपदादयः, कर्तरि च क्त इति । **स्तौतीत्यर्थः** इत्यर्थकथनेन विनिमेयत्व-द्यूतपणत्वाभाव उच्यते, यदि हि धातुर्व्यवहारे विजिगीषायां च वर्तते तदा तत्कर्म विनिमेयो द्यूतपणश्च स्यान्नान्यत्र । द्यूतग्रहणानुवृत्तेः सन्धिपणस्य प्रतिषेधो न भवतीत्याह- **भूमिं दीव्यती**ति । **क्रिया तत्साधनं चे**ति- अयमर्थः- यदि द्यूतमिति द्यूतक्रियामात्रं गृह्यते ततो द्यूतं दीव्यतीत्यत्र प्रतिषेधः प्राप्नोति, अथ द्यूतविषयं साधनमुपचाराद् गृह्यते, अक्षान् दीव्यतीत्यत्र प्राप्नोति, न पण एवेति तदर्थं द्यूतपण इत्यनुवर्त्यते इति ॥ छ ॥ २. २. १८. ॥

**न्या० स०—न** । **सन्धिना विजिगीषत** इति- समर्थेन सन्धिं कृत्वाऽन्येषां भूमिं विजिगीषत इत्यर्थः, तथा च नीतिः-

" समर्थेन समं राज्ञा, सन्धिं कृत्वा विचक्षणः ।
स्वल्पोऽपि धनसंयुक्तान्, राजन्यानवमानयेत् ॥ १ ॥ "

**अत्र क्रिये**त्यादि- क्रिया द्यूतरूपा, तत्साधनं चाक्षा इत्यर्थः । **शतस्य सुदेव**मिति- अत्र ' सु ' इति निपातान्तरं, नोपसर्गः, अत एव सुस्थितं दुःस्थितमित्यादौ " स्था-सेनि० " [ २. ३. ४०.] इत्यनेन षत्वं न भवति ॥ २. २. १८ ॥

## करणं च । २ । २ । १९ ॥

**त० प्र०—दीव्यतेः करणं कर्मसंज्ञं चकारात् करणसंज्ञं च** भवति, कर्म-करणसंज्ञे युगपद् भजतीत्यर्थः । **अक्षान् दीव्यति, अक्षाणां देवनम्, अक्षा दीव्यन्ते, अक्षा देवितव्याः, अक्षाः सुदेवाः, अक्षदेवः, अक्षा द्यूताश्चैत्रेण**; एषु कर्मत्वे द्वितीया-षष्ठ्यात्मनेपद-तव्य-खलण्-क्तप्रत्ययास्तन्निमित्ताः सिद्धाः । **अक्षैर्दीव्यति, अक्षैर्देवनम्, अक्षैर्दीव्यते, अक्षैर्देवितव्यम्, अक्षैः सुदेवं मैत्रेण, अक्षैर्द्यूतं चैत्रेण, अक्षा देवनाः**; एषु करणत्वे तृतीयाऽनटौ, भावे- आत्मनेपदादयश्च सिद्धाः । आत्मनेपदादिभिश्चोक्तयोः कर्म-करणयोः द्वितीया-षष्ठी-तृतीया यथायोगं न भवन्ति । करणं वेत्येव सिद्धे चकारः संज्ञाद्वयसमावेशार्थः, तेनाक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र करणत्वात् तृतीया भवति, कर्मत्वाच्च गत्यादिसूत्रेण नित्याकर्मकलक्षणमणिकर्तुः कर्मत्वम्, देवयतेश्च " अणिगि प्राणि० " [ ३. ३. १०७.] इत्यादिनाऽकर्मकलक्षणं परस्मैपदं न भवति । अथाक्षान् दीव्यतीत्यत्र सत्यपि संज्ञाद्वयसमावेशे परत्वात् करणत्वनिमित्तया तृतीयथैव भवितव्यम्, नैवम्- स्पर्धे हि परः, समानविषययोश्च स्पर्धः, न च द्वितीया-तृतीययोः प्रतिनियतकर्मकरणशक्त्यभिधायिन्योः समानविषयत्वमस्तीति द्वितीयाऽपि भवत्येव, ※ प्रतिकार्यं संज्ञा भिद्यन्ते ※ इति वा दर्शनेऽनवकाशत्वात् संज्ञाद्वयस्य विभक्त्योः पर्यायेण प्रवृत्तिरविरुद्धा । दिव इत्येव- दात्रेण लुनाति । करणमिति किम् ? गृहे दीव्यति ॥ १९ ॥

**श० न्या०—कर०** । दिव इत्यनुवर्तमानं करणमित्यस्य विशेषणमित्याह- **दीव्यतेः करणमि**ति । चकारस्यान्यत् समुच्चेतव्यं नास्तीति तदेव प्रतीयते, असति चकारे तन्निवृत्तेरित्याह- **चकारात् करणसंज्ञं चे**ति । ननु च करणं कथं कर्म भवति ? भिन्नौ हि तौ स्वभावौ- प्रकृष्यमाणव्यापारता क्रियमाणता चेति, धर्मप्रधानश्चायं निर्देशः- करणमिति, न वचनादसत् सम्भवति; अथ करणत्वयुक्तं भवतीति विज्ञायते तदा सर्वद्रव्याणां सर्वकारकशक्तियुक्तत्वाद् द्रव्यान्तरवदस्य कर्मत्वाद् वचनमिदमनर्थकमिति, उच्यते- कर्मशब्दवाच्यं करणशब्दवाच्यं च युगपद् भवतीत्याह- **कर्मे**त्यादि । **अक्षान् दीव्यती**त्यादि- " करणाऽऽधारे " [ ५. ३. १२९.] इत्यनटि- **देवनम्**, अक्षान् दीव्यतीति " कर्मणोऽण् " [ ५. ३. १४.] इत्यणि- **अक्षदेवः** । अत्र कर्मसंज्ञायाः कार्यं दर्शयति- **एष्वि**त्यादि- " कर्मणि " [२. २. ४०.] इति द्वितीया " कर्मणि कृतः " [ २. २. ८३. ] इति षष्ठी, " तत्साप्यानाप्यात्० " [ ३. ३. २१.] इत्यात्मनेपदादयः । **अक्षैर्दीव्यती**त्यादि- " हेतु-कर्तृ-करणेत्थंभूत० " [ २. २. ४४. ] इति सर्वत्र करणे तृतीया । **देवनाः** इति " करणाधारे " [ ५. ३. १२९. ] इति करणेऽनट् । करणत्वस्य कार्यं दर्शयति- **एष्वि**त्यादि । अथ ' अक्षा दीव्यन्ते ' इत्यादौ द्वितीयादयः कथं न भवन्तीत्याह- **आत्मनेपदादिभिश्चे**ति- अनुक्तयोः कर्मकरणयोस्तासां विधानादित्यर्थः । **करणं वेत्येवे**ति- कर्मेत्यनुवृत्तौ- करणं कर्म वा भवतीति सूत्रार्थे न युगपत् संज्ञाद्वयसमावेशः स्यात्, विकल्पस्य पाक्षिकप्रवृत्ति-निवृत्तिफलकत्वादित्यर्थः । समावेशस्य प्रयोजनं दर्शयति- **तेने**त्यादि- अत्र वाक्ये करणत्वादक्षैरिति तृतीया भवति, कर्मत्वाच्च तेषामक्षाणामणिकर्तुः प्रयोज्यस्य चैत्रस्य कर्मत्वं न भवति, असति तु कर्मत्वे गत्यादिसूत्रेण नित्याकर्मकलक्षणं तस्य कर्मत्वं स्यात्, ततश्च ततो द्वितीया प्रसज्येत, न तृतीया; कर्मत्वाभावात् तु कर्त्राश्रया तृतीयैवेति; तथाऽक्षाणां कर्मत्वाद् दिवेः सकर्मकत्वे देवयतेः " अणिगि प्राणिकर्तृकानाप्याद्० " [ ३. ३. १०७. ] इत्यनाप्यलक्षणं परस्मैपदं न भवतीति संबन्धः ।

यद्येवमक्षा दीव्यन्त इत्यत्राप्यकर्मकव्यपदेशव्यावृत्त्यर्थत्वात् कर्मसंज्ञा सावकाशा, अक्षा देवना इत्यत्र चानडर्थत्वात् करणसंज्ञा, अक्षान् दीव्यतीत्यत्र तु कर्म-करणत्वस्वभावत्वादक्षादेर्द्वितीया-तृतीयाप्राप्तौ स्पर्द्धत्वात् परत्वात् तृतीयैव प्राप्नोतीत्याक्षिपति– **अथे**त्यादि । परिहरति– **नैवमि**त्यादि– अयमर्थः– द्वयोरेकविषयसन्निपाते स्पर्द्ध उच्यते, न च तृतीया कर्मकरणशक्ती द्योतयितुं प्रभवतीति विषयभेदात् कुतः स्पर्द्ध इति । यद्वा * प्रतिकार्यं संज्ञा भिद्यन्ते * इति पक्षोऽत्राश्रीयते, तेन " कर्मणि " [ २. २. ४०. ] इत्यत्र कार्ये यत् कर्मसंज्ञाया उपस्थानं तदनवकाशमिति द्वितीयापीति पर्यायेण द्वयोः प्रवृत्तिरेकत्रासम्भवादिति परिहारान्तरमाह– **प्रतिकार्यमि**त्यादि ॥ छ ॥ २. २. १९. ॥

**न्या० स०—कर०** । चकारस्यान्यत् समुच्चेतव्यं नास्तीति करणमेव प्रतीयते, करणस्य कर्मसंज्ञायामप्राप्तायां विधीयमानायां निर्वर्त्यादयो धर्मा न चिन्त्या असम्भवात् । **युगपद् भजती**ति– फलं भवतु मा वा, संज्ञाद्वयं तु सर्वप्रयोगेषु वेदितव्यम्; न च संज्ञाद्वयं युगपन्निरवकाशमिति वाच्यम्, अक्षैर्देवयत इत्यत्र चरितार्थत्वात्, अत्राक्षान् देवयत इत्यपि प्रयोगो भवति । **करणं वेत्येवे**ति– न च विकल्पेऽपि युगपत् संज्ञाद्वयं भविष्यतीति वाच्यं विकल्पस्य पाक्षिकप्रवृत्ति-निवृत्तिफलत्वात् । **प्रतिकार्यमि**ति– एकस्यापि कर्मणः करणस्य वा कार्यं कार्यं प्रति संज्ञाऽभिधायकानि सूत्राणि भिद्यन्त इत्यर्थः । **इति वा दर्शन** इति– शाकटादीनां पाणिनेश्च, तेषां परमुभयप्राप्ताविति सूत्राभावः, विष्णुवार्तिक एव सूत्रसद्भावः ॥ २. २. १९. ॥

## अधेः शीङ्-स्था-ऽऽस आधारः ।२।२।२०॥

**त० प्र०—अधेः सम्बद्धानां ' शीङ् स्था आस् ' इत्येतेषां य आधारस्तत् कारकं कर्मसंज्ञं भवति । ग्राममधिशेते, ग्रामस्याधिशयनम्, ग्रामोऽधिशय्यते, ग्रामोऽधिशयितः; ग्राममधितिष्ठति; ग्राममध्यास्ते । अधेरिति किम् ? शयने शेते, गृहे तिष्ठति, कटे आस्ते । आधार इति किम् ? ग्रामोऽधिशयितो मैत्रेण, पौरुषेणाधितिष्ठति; कर्तृ-करणे न भवतः । अकर्मका अपि हि धातवः सोपसर्गाः सकर्मका भवन्तीति सिद्धं सकर्मकत्वम्, आधारबाधनार्थं तु वचनम् ॥ २० ॥**

**श० न्या०—अधेः०** । अधेरिति षष्ठ्यन्तेन शीङ्स्थाऽऽस इति षष्ठ्यन्तं विशिष्यते, तेन चाऽऽधार इत्याह – **अधेः सम्बद्धानामि**त्यादि । **ग्राममधिशेते** इति– ग्रस्यते भोगिभिरिति " ग्रसिहागृभ्यां ग्रा-जिह्रौ च " [ उणा० ३३९. ] इति मे– ग्रामः, अधिपूर्वः " शीङ्क् स्वप्ने " ततस्तेप्रत्ययः, " शीङ एः शिति " [ ४. ३. १०४. ] इत्येकारः, अधिशीङ्कर्मकत्वाद् ग्रामाद् द्वितीया, कृत्प्रयोगे कर्मणि षष्ठी, आत्मनेपदादयश्च । **अधितिष्ठती**ति– " ष्ठां गतिनिवृत्तौ " ततस्तिव्, " श्रौति-कृवु-धिवु० " [ ४. २. १०८. ] इति तिष्ठादेशः । " आसिक् उपवेशने " इत्य[तस्तेप्रत्ययेऽ]**ध्यास्ते । ग्रामोऽधिशयितो मैत्रेणे**त्यादि– अत्र यो मैत्रादिः कर्तृकरणरूपः स कर्म न भवति, कर्मभावे हि यथाऽऽधारे सप्तमीं बाधित्वा द्वितीया भवति तथा तृतीयामपि बाधित्वा द्वितीया स्यात् । अथ किमर्थमिदमारभ्यते ? यावताऽकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति, यथा– गुरुमधिशेते, गुरुमुपतिष्ठत इति, तथाऽत्राऽपि **ग्राममधिशेते** इति ग्रामोऽधिशयनादिना व्याप्यत इति नात्राधार्याधारभावे ग्रामं गच्छतीत्यत आह– **अकर्मका अपी**त्यादि– अयमभिप्रायः– सिद्धमेवं कर्मत्वं, परमेषामाधारभावबाधनार्थं वचनं, यथा– अन्यषामाधार आधाररूपेणोच्यते, यथा– अयं लोके गुरुमठे शेते तथैषामाधारकर्मभावेनैवोच्यते नाधाररूपतयेत्येतदर्थं वचनमित्यर्थः ॥ छ ॥ २. २. २०. ॥

**न्या० स०—अधे०** । [नेह व्याख्या दृश्यते] ॥ २. २. २०. ॥

## उपान्वध्याङ्वसः ।२।२।२१॥

**त० प्र०—उप-अनु-अधि-आङ्भिर्विशिष्टस्य वसतेर्य आधारः स कर्मसंज्ञो भवति । ग्राममुपवसति, ग्राममुपोषितः, ग्रामस्योपवसनम्, ग्राम उपोष्यते, पर्वतमनुवसति; पुरमधिवसति; आवसथमावसति । अन्वादिसाहचर्यादुपस्य स्थानार्थकस्यैव ग्रहणं नाशननिवृत्त्यर्थस्य; तेन ग्रामे उपवसति– भोजननिवृत्तिं करोतीत्यत्र न भवति । ❀ अदाद्यनदाद्योरनदादेरेव ग्रहणम् ❀ इति वस्तेर्न भवति ॥ २१ ॥**

**श० न्या०—उपा०** । उपादिभिर्द्वन्द्वं कृत्वा ततस्ते पूर्वे यस्मात् स चासौ वसतिश्चेति बहुव्रीहिगर्भो विशेषणसमासः, अत आह– **उप–अन्वि**त्यादि । उपपूर्वात् " वसं निवासे " अतः कर्मणि क्ते " क्षुध-वसस्तेषाम् " [ ४. ४. ४३. ] इतीटि " यजादि-वचेः किति " [ ४. १. ७१. ] इति य्वृति, " घस्वसः " [ २. ३. ३६. ] इति षत्वे– **उपोषितः**, भावेऽनटि– **उपवसनम्** । **ग्राम उपोष्यत** इति– आत्मनेपदेनोक्तत्वात् कर्मणो ग्रामात् प्रथमा । ननु स्थानार्थस्यैव वसेर्ग्रहणमिष्यते, तेन ग्रामे तिष्ठतीत्यत्रार्थे ग्राममुपवसतीति प्रयोगः, अस्थानार्थत्वे तु– ग्रामे उपवसतीति, तदेतत् कथम् ?, उच्यते– नात्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणं, किन्त्वनुपसर्गस्य– ग्रामेऽसौ

वसन् त्रिरात्रमुपवसति, विशिष्टाऽऽधारावस्थितत्वेन निश्चिते देवदत्ते भोजननिवृत्तिं विशिष्टकालां प्रत्याययितुमिदं प्रयुज्यते– ग्रामे उपवसतीति, तत्रान्तरङ्गत्वात् प्रतीयमानवसिक्रियापेक्षो ग्रामस्याधिकरणभावः, उपवसनं तु स्वरूपेणैव कालमपेक्षत इति कालेनैवास्यान्तरङ्गः सम्बन्धो ग्रामादिना तु बहिरङ्ग इति; अत्र कश्चिदाह– भवेत् सिद्धं, यदा वसतिर्विवक्षितः, यदा तूपवसतिरेव तदा प्राप्नोति, न चोपवसेराधारभावं प्रति ग्रामादिरयोग्य एव येनान्यापेक्ष एवास्याधारभावः कल्पेत, तस्माद् यतितव्यमेवात्र; अत्रोच्यते– साहचर्यात् स्थानार्थस्यैव परिग्रहः, अन्वादिपूर्वो वसतिः स्थानार्थमाचष्टे, शब्दशक्तिरत्र प्रमाणं, तत्साहचर्यादुपपूर्वस्यापि स्थानार्थस्य परिग्रहो न तु भोजननिवृत्तिवचनस्येत्यत आह– **अन्वादिसाहचर्ये**ति । स्थानार्थद्योतकत्वादुपशब्दोऽपि स्थानार्थ इत्युक्तम्– [ **स्थानार्थकस्यैवे**ति ] । **अदाद्यनदाद्यो**रिति– पूर्वाचार्यस्मृतिरियमित्यर्थः ॥ छ ॥ २. २. २१. ॥

**न्या० स०**—उपान्वध्या० । उपादिभिर्द्वन्द्वं कृत्वा ततस्ते पूर्वे यस्मात् स चासौ वसश्चेति बहुव्रीहिगर्भो विशेषणसमासो मयूरव्यंसकादित्वात् पूर्वस्य लोपश्च, एभ्यः परो वसिति वा समासः । शब्दशक्तिप्रामाण्यादन्वादिपूर्वो वसतिः स्थानार्थमाचष्टे, तत्साहचर्यादुपपूर्वस्यापि स्थानार्थस्य परिग्रहो न तु भोजननिवृत्तिवचनस्येत्यत आह– **अन्वादिसाहचर्यादि**ति । स्थानार्थद्योतकत्वादुपशब्दोऽपि स्थानार्थ इत्युक्तं– **स्थानार्थस्ये**ति ॥ २. २. २१. ॥

## वाऽभि-निविशः । २ । २ । २२ ॥

**त० प्र०—अभि-निनोपसर्गसमुदायेन विशिष्टस्य विशेराधारः कर्मसंज्ञो वा भवति । ग्राममभिनिविशते, पर्वतमभिनिविशते, ग्रामोऽभिनिविश्यते; ग्रामोऽभिनिविष्टः । व्यवस्थितविभाषेयं, तेन क्वचित् कर्मसंज्ञैव क्वचिदाधारसंज्ञैव भवति– कल्याणेऽभिनिविशते, या या संज्ञा यस्मिन् यस्मिन् संज्ञिन्यभिनिविशते, एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानाम्, अर्थेऽभिनिविष्टः ॥ २२ ॥**

**श० न्या०**—वाऽभि० । अभिः पूर्वो यस्मादसावभिपूर्वः, अभिपूर्वश्चासौ निश्च– अभिनिः, तस्य पूर्वशब्देन बहुव्रीहिं कृत्वा पुनर्विशा कर्मधारयात् षष्ठी; उभयत्र मयूरव्यंसकादित्वात् पूर्वशब्दलोपः, द्वन्द्वे हि अभि-निशब्दयोः प्रत्येकं सम्बन्धः स्यात्, यथा– " उपाऽन्वध्याङ्वसः " [ २. २. २१. ] इत्यत्रेत्याह– **अभि-निनोपसर्गे**त्यादि । पर्वः— " दृ-पॄ-मृ-मृ-शी-यजि० " [ उणा० २०७.] इत्यते– पर्वतः, अभिनिपूर्वात् " विशंत् प्रवेशने " अतः " निविशः " [ ३. ३. २४.] इत्यात्मनेपदे ते शे च– **अभिनिविशते** । **व्यवस्थितविभाषेयमि**ति– नात्र वाशब्दो विकल्पार्थो येन समकक्ष्यतया द्वितीया-सप्तम्यौ, किं तर्हि ? प्रयोगव्यवस्थयेति । शिखादित्वादिनि–संज्ञी । तत्रेयं व्यवस्था– अभिनिपूर्वस्य विशेरस्ति– समुदायार्थोऽवयवार्थश्च, तत्र यत्रावयवानुगमस्तत्र कर्मभावः– **ग्राममभिनिविशत** इति, अत्र हि ग्राममाभिमुख्येन निविशत इति प्रतीयते; यत्र तु समुदायार्थ एव नाऽवयवार्थस्तत्राधिकरणभावः– यथा **कल्याणेऽभिनिविशते, अर्थेऽभिनिविष्ट** इति– अत्र हि धातूपसर्गसमुदायेन मनस एकाग्रतातात्पर्यमुच्यते, यथा– ग्रामे उपवसतीति भोजनत्यागः । **या या संज्ञा यस्मिन् यस्मिन् संज्ञिन्यभिनिविशते** इत्यत्र च संज्ञानां विषयेणाव्यभिचारः ॥ छ ॥ २. २. २२. ॥

**न्या० स०**—वाऽभिनि० । अभिः पूर्वो यस्मान्नेः सोऽभिपूर्वश्चासौ निश्च– अभिनिः, ततः परो विट्, तस्य, " मयूरव्यंसक० " [ ३. १. ११६. ] इति पूर्व-परयोर्लोपः; अभेर्निस्तेन युक्तो विट्, इति वा; न तु द्वन्द्वः, अभिश्च निश्चेत्येवंरूपे द्वन्द्वे ह्यभि-निशब्दयोः प्रत्येकमभिसम्बन्धः स्यात्, यथा– " उपान्वध्याङ्वसः " [ २. २. २१. ] इत्यत्र । **व्यवस्थितविभाषेयमिति**– नात्र वाशब्दो विकल्पार्थो येन समकक्षतया द्वितीयासप्तम्यौ, किं तर्हि ? प्रयोगव्यवस्थयेति ॥ २. २. २२. ॥

## कालाऽध्व-भाव-देशं वाऽकर्म चाकर्मणाम् । २ । २ । २३ ॥

**त० प्र०—कालो– मुहूर्तादिः, अध्वा– गन्तव्यं क्षेत्रं क्रोशादि, भावः– क्रिया गोदोहादिः, देशो– जनपद-ग्राम-नदी-पर्वतादिः; अकर्मकाणां धातूनां प्रयोगे कालादिराधारः कर्मसंज्ञो वा भवति, अकर्म च– यत्रापि पक्षे कर्मसंज्ञा तत्राकर्मसंज्ञाऽपि वा भवतीत्यर्थः । कालः– मासमास्ते, मास आस्यते; संवत्सरं स्वपिति, संवत्सरः सुप्यते; दिवसं शेते, दिवसः शय्यते; अध्वा– क्रोशं स्वपिति, क्रोशः सुप्यते; योजनमास्ते, योजनमास्यते; भावः– गोदोहमास्ते, गोदोह आस्यते; ओदनपाकं शेते, ओदनपाकः शय्यते; देशः– कुरून् आस्ते, कुरव आस्यन्ते; ग्रामं वसति, ग्राम उष्यते । अविवक्षितकर्माणः सकर्मका अप्यकर्मकाः– मासं पचति, मासः पच्यते; क्रोशमधीते, क्रोशोऽधीयते; ओदनपाकं पठति, ओदनपाकः पठ्यते; कुरून् पठति, कुरवः पठ्यन्ते; पक्षे– रात्रौ सुप्यते, रात्रौ नृत्तं च द्रक्ष्यसि, क्रोशे सुप्यते, गोदोहे आस्ते, ओदनपाके स्वपिति, पञ्चालेषु वसति, ग्रामे वसति, ग्रामे वासः, ग्रामे वासी, तथा– रात्रावधीतम्, दिवसे भुक्तम् । कालाऽध्व-भाव-देशमिति किम् ? प्रासादे आस्ते, शय्यायां**

शेते । अकर्म चेति किम् ? मासमास्यते, क्रोशं सुप्यते, गोदोहमासितः, इदं गोदोहमासितम्, गोदोहमास्यते, कुरून् सुप्यते; एषु "तत् साप्यानाप्या०" [ ३. ३. २१. ] इति, "गत्यर्था-ऽकर्मक-पिब-भुजेः" [ ५. १. ११. ] "अद्यर्थाच्चाऽऽधारे" [ ५. १. १२. ] इति भावे कर्तर्याधारे च यथायथमात्मनेपद-क्तौ सिद्धौ । अकर्मणामिति किम् ? रात्रावुद्देशोऽधीतः, अहन्यध्ययनमधीतम् । कथं पचत्योदनं मासम्, भक्षयति धानाः क्रोशम्, पिबति पयो गोदोहम्, भजति सुखं कुरून् ? द्विकर्मकत्वात् "कर्तुर्व्याप्यं कर्म" [ २. २. ३. ] इत्येव भविष्यति । अन्ये तु सकर्मकाणामकर्मकाणां च प्रयोगे काला-ऽध्व-भावानामत्यन्तसंयोगे सति नित्यं कर्मत्वमिच्छन्ति– मासमास्ते, दिवसं पचत्योदनम्, क्रोशं स्वपिति, क्रोशं पठति वेदम्, गोदोहमास्ते, गोदोहं पचत्योदनम् । अनेन कर्मसंज्ञायां कर्मणि त्याद्यादयोऽपि– आस्यते मासः, सुप्यते क्रोशः, आसितो मासः, शयितः क्रोश इत्यादि । "काला-ऽध्वनोर्व्याप्तौ" [ २. २. ४२. ] इति च गुणद्रव्ययोगे एवेच्छन्ति न तु क्रियायोगे; अत्यन्तसंयोगादन्यत्र तु– रात्रौ शेते, अध्वनि स्थित इत्यादावाधारत्वमेव ॥ २३ ॥

**श० न्या०—काला०** । अनिर्ज्ञातपरिमाणायाः क्रियायाः परिच्छेदिका निर्ज्ञातपरिमाणा क्रिया कालः, स च मुहूर्तादिस्वरूप इत्याह– **कालो मुहूर्तादिरि**ति । **गन्तव्यमि**ति– गमनार्हं, तेनाध्वशब्दाभिधेयस्याध्वनः कर्मसंज्ञा न भवति, नह्यसावध्वविशेषक्रोशयोजनादिवद् गमनमर्हति । **भावः–क्रिये**ति– घञादिवाच्या सिद्धताख्या, न च साध्यमानेत्यर्थः । **पर्वतादिरि**ति– आदिशब्देन खेट-कर्वट-मडम्बादिर्गृह्यते । **आस्यत** इति– आत्मनेपदेन कर्मणोऽभिहितत्वाद् मासात् प्रथमा, तत्रापि गौणाधिकारात् "काला-ऽध्वनो०" [ २. २. ४२. ] इत्यनेनापि द्वितीया न भवति, एवं सर्वत्र । **शय्यते** इति– "क्ङिति यि शय्" [ ४. ३. १०५. ] । **गोदोहमास्ते, ओदनपाकं शेते**– अत्र गोदोहन-पाकादीनां सत्यपि क्रियारूपत्वेन कालत्वे मासादय एव तद्वाचित्वेन लोके प्रसिद्धा न तु गोदोहादय इति भावस्य पृथगुपादानम् । **अकर्मणामि**ति नित्याकर्मणामविवक्षितकर्मणां च सामान्येनोपादानमित्यविवक्षितकर्मकानुदाहरति– **मासं पचती**त्यादि । **अकर्म चेति किमि**ति– अस्मिन्नसति **मासमास्यते, क्रोशं सुप्यत** इति भावे आत्मनेपदं न स्यात् सकर्मकत्वादिति, कर्मण्यात्मनेपदे तु तेनैवाभिहितत्वात् कर्मणो द्वितीया न स्यात्; न चाभिहिते कर्मणि व्याप्तावपि द्वितीयेष्यते, एवं– **गोदोहमासितः, इदं गोदोहमासितमि**ति । कर्तर्याधारे च सकर्मकत्वादकर्मकलक्षणः क्तो न स्यादित्याह– **एष्वि**त्यादि । **कथमि**ति– अकर्मणां प्रयोगे कर्मसंज्ञा विधानात् पच्यादीनां सकर्मकत्वात् कथं मासादेः कर्मत्वमित्यर्थः । समाधत्ते– **द्विकर्मकत्वादि**त्यादि– पूर्वेण सिद्धत्वान्नानेन कर्मसंज्ञेत्यर्थः । **अन्ये त्वि**ति– तत्र येषां बाह्यमोदनादि कर्मास्ति ते तदाप्तौ स्वमर्थमाप्यन्तरापेक्षया कर्माऽपि करणभावेनाचक्षते– पचत्योदनं पाकेनाप्नोतीति, तेन सकर्मका उच्यन्ते, येषां तु बाह्यं कर्म नास्ति, न तदर्थः करणमाप्तौ, तेऽकर्मका इति बाह्यकर्मापेक्षयोच्यन्ते । तथा सर्वत्र कर्मसंज्ञायां कर्मण्यात्मनेपदादयोऽपि तन्मते सिध्यन्तीत्याह– **अनेने**त्यादि । नन्वेवमनेन व्याप्तौ कर्मसंज्ञायां "कर्मणि" [ २. २. ४०. ] इति द्वितीयासिद्धौ "कालाऽध्वनोर्व्याप्तौ" [ २. २. ४२. ] इति सूत्रं किमर्थमित्याशङ्कां तन्मतेनैव परिहरति– **कालाऽध्वनोरि**त्यादि– अत्रासनादिक्रियायोगो न तु गुणद्रव्ययोग इत्यर्थः, अत्र कृत्प्रयोगे कर्मणि षष्ठी नेष्यते, केचिदिच्छन्ति– मासस्य आसना । यदुत्पलः– काला-ऽध्वनोर्लेकृत्य-क्त-खलर्थाथा संज्ञा, द्वितीया तु "काला-ऽध्वनो०" [ २. २. ४२. ] इत्यनेनैव सिद्धा, इतरयोस्तु द्वितीयार्थमपि ॥ छ ॥ २. २. २३. ॥

**न्या० स०—काला-ऽध्व०** । **मास आस्यत** इत्यत्र व्याप्तिविवक्षायामपि गौणाधिकारात् "काला-ऽध्वनो०" [ २. २. ४२. ] इत्यनेनापि द्वितीया न भवति । **अध्वा– गन्तव्यमि**ति गमनार्हं, तेनाध्वशब्दाभिधेयस्याध्वनः कर्मसंज्ञा न भवति, नह्यसावध्वविशेषक्रोश-योजनादिवद् गमनमर्हति, यद्वाऽर्थप्रधानोऽयं निर्देशः, तेन कालाऽध्व-भाव-देशानां साक्षात्प्रयोगे न भवति, अपि तु तदर्थप्रतिपादकशब्दप्रयोगे । **भावः–क्रियेति**– क्रिया घञादिवाच्या सिद्धताख्या न तु साध्यमानेत्यर्थः । **पर्वतादिरि**ति– आदिशब्दात् खेट-कर्बट-मडम्बादिर्गृह्यते । **गोदोहमास्ते** अत्र सामीप्यक आधारः, यदा तु गोदोहविशिष्टः कालो विवक्ष्यते तदा नैमित्तिकोऽपि । एवम्– **ओदनपाक** इत्यत्रापि । **मासं पचतीति– अकर्मणामि**त्यत्र नित्याकर्मणामविवक्षितकर्मणां च सामान्येन ग्रहणम्, इत्यविवक्षितकर्मकानुदाहरति ।

"उलूखलैराभरणैः, पिशाचीवदभाषत ।
एतत् तु ते दिवानृत्तं, **रात्रौ नृत्तं च द्रक्ष्यसि**" ॥ १ ॥

**इदं गोदोहमासितमि**ति– अत्र बाहुलकात् षष्ठीप्राप्तिं प्रति न कर्मता, तेन "कर्मणि कृतः" [ २. २. ८३. ] इत्यनेन न षष्ठी, इदं सक्तूनां पीतमितिवदत्राधारे क्तः प्रत्ययः । **कथमि**ति– पचादीनां सकर्मकत्वान्न प्राप्नोतीत्याशङ्कार्थः । **पचत्योदनं मासमि**त्यादि– एषां धातूनां स्वभावेन द्विकर्मकत्वम्, अथवा सर्वेऽप्यमी धातवः प्राप्यु-

पसर्जने स्वार्थे वर्तन्ते, ततो मासादि प्राप्येत्यादिरर्थो भवति द्विकर्मकता च । **अन्येरि**वति- विश्रान्तविद्याधरादयः । ननूत्तरेण "काला-ध्वनोर्व्याप्तौ" [ २. २. ४२. ] इत्यनेन सामान्येन सकर्मणामकर्मणां च प्रयोगे द्वितीया भविष्यति किमनेन कर्मसंज्ञाविधानसूत्रेणेत्याह- **अनेन कर्मसंज्ञाया**मित्यादि- कालाऽध्वापेक्षयेदमुक्तं भावापेक्षया तु द्वितीयार्थमपि । यद्यत्यन्तसंयोगे "काला-ऽध्व-भाव०" [ २. २. २३. ] इति प्रवर्तते तर्हि "काला-ऽध्वनोर्व्याप्तौ" [ २. २. ४२. ] इति क्व प्रवर्त्स्यतीत्याह- **काले**ति । "काला-ऽध्वनोः०" [ २. २. ४२. ] इति गुणद्रव्ययोगे, क्रियायोगे तु "काला-ऽध्व-भाव०" [ २. २. २३. ] इति प्रवर्त्तत इत्यनयोस्तन्मते विभागः ॥ २. २. २३ ॥

## साधकतमं करणम् । २ । २ । २४ ॥

**त० प्र०—क्रियासिद्धौ यत् प्रकृष्टोपकारकत्वेनाव्यवधानेन विवक्षितं तत् साधकतमं कारकं करणसंज्ञं भवति । काष्ठैः स्थाल्यां पचति, दात्रेण लुनाति, दानेन भोगानाप्नोति; अस्य पाकादिक्रियासु ज्वलनादयोऽवान्तरव्यापाराः, विवक्षया च प्रकृष्टोपकारकत्वात् साधकतमत्वम् । तमग्रहणमपादानादिसंज्ञाविधौ तरतमयोगो नास्तीति ज्ञापनार्थम्, तेन- कुसूलात् पचति, गङ्गायां घोषः प्रतिवसतीति व्यवहितोपचरितयोरपि अपादानत्वमधिकरणत्वं च भवति । अस्य च कारकान्तराऽपेक्षया प्रकर्षो न स्वकक्षायाम्, तेनैकस्यां क्रियायामनेकमपि करणं भवति- नावा नदीस्रोतसा व्रजति, रथेन पथा दीपिकया याति, सूपेन सर्पिषा लवणेन पाणिनौदनं भुङ्क्ते । करणप्रदेशाः- "करणं च" [ २. २. १९. ] इत्यादयः ॥२४॥**

**श० न्या०**—साध० । "सिध्यतेरज्ञाने" [ ४. २. ११. ] इति सिध्यतेर्णिग्येवात्वे "णक-तृचौ" [ ५. १. ४८. ] इति णके तमपि च- **साधकतमं,** क्रियतेऽनेनेति- **करणम्** । **प्रकृष्टोपकारकत्वेने**ति- प्रकर्षः- प्रकृष्टं, तेनोपकारकम्; अथवा, प्रकृष्यते स्म- प्रकृष्टः, तस्योपकारकशब्देन कर्मधारयः । ननु सामग्रीतः क्रियासिद्धिः, तत्र कथं किंचित् सातिशयोपकारकं किञ्चिद् विपरीतम् ?, अन्वय-व्यतिरेकाभ्यां हि तत्र सर्वेषां सामान्यमवगम्यते, तस्मात् क्रियासिद्धौ साधकतमस्य संभवो नास्तीति सम्भवं कल्पनया दर्शयति- **अव्यवधानेन विवक्षितमि**ति- वस्तुवृत्तेन साधकतमस्य सम्भवो नास्ति, यद्व्यापारसामनन्तर्येण तु क्रियासिद्धिर्विवक्ष्यते तस्य कल्पनया साधकतमस्येयं संज्ञा, युक्तं चैतत्, एवं हि नैयत्येन न किञ्चित् करणम्; तथाहि- काष्ठैः पचतीति कदाचित् काष्ठानि करणं, काष्ठसम्बन्धिज्वलनलक्षणव्यापारसामनन्तर्येण क्वचित् क्रियासिद्धेर्विवक्षितत्वात्; कदाचित् स्थाल्या पचतीति स्थालीव्यापारसंभवनधारणलक्षणसामनन्तर्येण पचिक्रियासिद्धौ विवक्षितायां स्थाली करणम्; यदाह—

" क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र, करणत्वं तदा स्मृतम् " ॥१॥
" वस्तुतस्तदनिर्देश्यं, नहि वस्त्वव्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः " ॥२॥

**दात्रेण लुनाती**त्यादि- दात्रशब्दात् "हेतुकर्तृकरणेत्थंभूत०" [ २. २. ४४. ] इति तृतीया, लुनातेश्च श्नाप्रत्यये प्वादित्वाद्ध्रस्वः । **अस्ये**ति- करणस्येत्यर्थः, अवान्तरव्यापारशालिन एव कारकत्वे विशेषसंज्ञेति तात्पर्यम् । **विवक्षा चे**ति व्याख्यातप्रायम् । कारकाधिकारात् साधकत्वे लब्धे पुनः साधकश्रुतिः प्रकर्षमवगमयिष्यति, यथा- अभिरूपाय कन्यादानस्य सिद्धत्वात् 'अभिरूपाय कन्या देया' इति लौकिके वाक्येऽभिरूपग्रहणं प्रकर्षपरिग्रहार्थम्; तत् किमर्थं तमग्रहणमित्याह- **तमग्रहणमि**त्यादि- अयमभिप्रायः- तमग्रहणं ज्ञापनार्थम्, एतदनेन ज्ञाप्यते- अस्मिन् कारकाधिकारे सामान्यशब्दः सूत्रोपारूढो यत्नमन्तरेण न विशेषे वर्तते, तेन "अपायेऽवधिरपादानम्" [ २. २. २९. ] [ "क्रियाऽऽश्रयस्य ] आधारोऽधिकरणम्" [ २. २. ३०. ] इत्यवधिमात्रस्याधारमात्रस्य चापादानसंज्ञाऽधिकरणसंज्ञा च सिद्धा भवति, अन्यथा 'वृक्षात् पर्णं पतति, दध्नि सर्पिः' इत्यादावव्यवहितस्यानुपचरितस्यैव च स्यात्, वृक्षस्याव्यवधानेनावधित्वादाधाराधेययोश्च साक्षात् सम्बन्धादिति; नहि कुसूलस्याव्यधानेनावधित्वमस्ति, कुसूलाद्धि सूर्पादिनोद्धृत्य ततः पचतीति सूर्पादेरेवाव्यवहितावधिभावः; तथा गङ्गायां घोष इत्यत्र घोष-गङ्गाकूलाभ्यामाधेयाभ्यां यः संयुक्तो देशस्तेन गङ्गाया योगो न तु घोषगङ्गाकूलाभ्यामेव, एवं च विप्रकृष्टोऽत्र गङ्गाया आधारभाव इत्यधिकरणसंज्ञा न स्यात् । ननु '**तरतमयोगो नास्ति**' इति कथं केवलयोः प्रत्यययोः प्रयोगः ? उच्यते- प्रत्ययानुकरणत्वात् तयोरनुकरणाभ्यां चानुकार्यौ प्रत्ययौ प्रतीयेते, ताभ्यामपि साहचर्यात् तदर्थः प्रकर्षो लक्ष्यत इति । **तम**श्रुतिरेतज्ज्ञापयति- प्रकर्षप्रत्ययमन्तरेणेह प्रकरणात् सामर्थ्यगम्यः प्रकर्षो नाश्रीयत इति । कारकान्तरापेक्षश्च करणस्यातिशयो न स्वस्थान इत्याह- **अस्य चे**त्यादि । **नावा नदीस्रोतसा व्रजती**त्यादौ सर्वेषां क्रियानिष्पत्तौ सन्निपत्योपकारकत्वात् करणत्वं सिद्धमित्यर्थः ॥छ॥ २. २. २४. ॥

**न्या० स०—साधकतमं०** । सिध्यतेर्णिगि "सिध्यतेरज्ञाने" [ ४. २. ११. ]इत्यात्वे णके तमपि च सिद्धम् । **प्रकृष्टोपकारकत्वेने**ति- प्रकर्षेण प्रकृष्टं, तेनोपकारकम्, यद्वा प्रकृष्यते स्म प्रकृष्टः,

ततः **प्रकृष्टं** च तदुपकारकं चेति कर्मधारयः । प्रकृष्टोपकारकत्वस्य को हेतुः ? अव्यवधानम्, यद्वा प्रकृष्टोपकारकत्वमपि किंस्वरूपम्, अव्यवधानमिति; अन्येषु मिलितेष्वपि लवनादिक्रिया दात्रादि विना न शक्यत इति कर्त्रा अव्यवहितं दात्रादि करणमपेक्ष्यत इति तस्य प्रकृष्टत्वम्, यत् प्रकृष्टोपकारकत्वेन स्थाल्यादिकमपि कर्त्राऽव्यवहितमपेक्ष्यते तदपि करणमेव; ननु प्रकृष्टोपकारकत्वं कर्तुरप्यस्ति तस्यापि करणत्वं प्राप्नोति, नैवम्– तस्य स्वातन्त्र्यं लक्षणमस्ति । **साधकतममिति**– ननु सामग्रीतः क्रियासिद्धिस्तत्र कथं किञ्चित् साधकतमं किञ्चिद् तद्विपरीतम् ? अन्वय-व्यतिरेकाभ्यां हि तत्र सर्वेषां सामान्यं साधारण्यमेवावगम्यते, तस्माद् क्रियासिद्धौ साधकतमस्य संभवो नास्तीति संभवं कल्पनया दर्शयति– **विवक्षयेति**– परमार्थवृत्त्या साधकतमत्वस्य सम्भवो नास्ति, यद्व्यापारानन्तर्येण तु क्रियासिद्धिर्विवक्ष्यते तस्य कल्पनया साधकतमस्येयं संज्ञा । **अस्येति**– ज्वलनरूप उत्पात-निपातरूपः पुण्यरूपश्च यथाक्रमं प्रयोगत्रयेऽप्यवान्तरव्यापारः । * गौण-मुख्ययो० * इति न्यायात् साधकतमस्यैव भविष्यति किं तमग्रहणेनेत्याह– **तमग्रहणमिति** । **अपादानादीति**– अन्यैरपादानं प्रथममुक्तमिति तन्मतापेक्षयेत्युक्तम्, यद्वा स्वमतापेक्षयाऽपि "कादिर्व्यञ्जनम्" [ १. १. १०. ] इतिवत् । **तरतमयोग इति**– साहचर्याद् तरतमगतः प्रकर्षो लक्ष्यते । **स्वकक्षायामिति**– स्वकक्षा स्ववर्ग इति यावत् । ननु यदि स्ववर्गेऽपि प्रकर्षोऽपेक्ष्यते तदाऽन्येषां करणानां किं स्याद् ? उच्यते– तदा करणान्तराणां सम्बन्धे षष्ठी स्यात् ॥ २. २. २४. ॥

## कर्माऽभिप्रेयः संप्रदानम् । २ । २ । २५ ॥

**त० प्र०—कर्मणा– व्याप्येन क्रियया वा करणभूतेन, यमभिप्रेयते– श्रद्धानुग्रहादिकाम्यया यमभिसंबध्नाति, स कर्माभिप्रेयः कारकं संप्रदानसंज्ञं भवति । देवाय बलिं ददाति, द्विजाय गामुत्सृजति, याचकायार्थं प्रयच्छति, शिष्याय धर्ममुपदिशति, राज्ञे कार्यमावेदयति; अस्यावान्तरव्यापाराः– अनिराकरणम्, प्रेरणम्, अनुमतिश्च; तान् कुर्वंस्त्यागादौ कारकत्वं लभते । क्रियाऽभिप्रेयः खल्वपि– पत्ये शेते, श्राद्धाय निगल्हते, युद्धाय सन्नह्यते, देवेभ्यो नमति, प्रणम्य शितिकण्ठाय, निवेद्यतां महाराजाय सुग्रीवाय । अभिग्रहणादिह न भवति– घ्नतः पृष्ठं ददाति, रजकस्य वस्त्रं ददाति, राज्ञो दण्डं ददाति; इह च भवति– वाताय चक्षुर्ददाति, छात्राय चपेटां प्रयच्छति । सम्प्रदानप्रदेशाः– "दामः संप्रदानेऽधर्म्ये आत्मने च" [ २. २. ५२. ] इत्यादयः ॥ २५ ॥**

**श० न्या०—कर्मा० । करणभूतेनेति**– ननु कथं कर्मणः करणत्वम् ? उच्यते– क्रियाभेदात्, ददातिना ह्याप्तुमिष्टत्वाद् बल्यादिरर्थः कर्म, तेन देवादिरभिसंबध्यत इत्यभिसंबन्धेन साधकतमत्वात् करणम्, यथा– निपीयमानेन मधुना मत्त इति । **देवाय बलिं ददातीत्यादि**– अत्र देवो बलिकर्मकं दानमनिराकुर्वन् द्विजश्च गोकर्मकं दानमनुमन्यमानो याचकादिश्चार्थादिकर्मके दानादौ प्रेरणां कुर्वंस्तत्र निमित्तमित्याह– **अस्येत्यादि**– अवान्तरव्यापारवत एव कारकत्वे विशेसंज्ञाविषयत्वात्, उक्तं च–

"अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणा-ऽनुमतिभ्यां वा, लभते संप्रदानताम्" ॥

क्रियाग्रहणमपि कर्तव्यम्, इहापि यथा स्यात्– '**पत्ये शेते**' इति– उपसर्पणाङ्गे शयने शेतिर्वर्तते, **श्राद्धाय निगल्हते** इति– श्राद्धं निन्दति नास्तिकत्वात्, **युद्धाय संनह्यते** सन्नहनाङ्गे निश्चये सन्नहिर्वर्तते, युद्धविषयं सन्नहनपूर्वकं निश्चयं करोतीत्यर्थः; न कर्तव्यम्– अनेनैव सिद्धत्वात्, क्रियां हि लोके कर्मेत्युपचरन्ति– कां क्रियां करिष्यसि ? किं कर्म करिष्यसीति; एवमपि * कृत्रिमा-ऽकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति * इति न प्राप्नोति, नैवम्– क्रियाऽपि हि कृत्रिमं कर्म; तथाऽपि न सिध्यति, 'पत्ये शेते' इत्यादौ क्रियान्तरानुपादानम्, [ क्रियान्तरानुपादानात्, क्रियान्तरानुपादाने ] एकस्या एव क्रियायाः कर्मकरणभावस्यैकदा[ दैका ]त्मन्येव विरोधात्; किञ्च कर्तुर्व्याप्यं कर्मोच्यते, कथं च नाम क्रिया क्रियाया व्याप्या स्यादिति, अत्रोच्यते– क्रियाऽपि संदर्शन-प्रार्थना-ऽध्यवसायादिभिरवश्यं पूर्वभाविनीभिराप्तुमिष्टत्वात् कर्म भवति; तथाहि– य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्धया तावत् कञ्चिदर्थं संपश्यति, संदृष्टे प्रार्थना, प्रार्थनायामध्यवसायः, अध्यवसाये आरम्भः, आरंभे निर्वृतिः, निर्वृतौ फलावाप्तिः, इत्येवं क्रियापि कृत्रिमं कर्मेति, प्रतीयमानक्रियाऽपेक्षस्यापि 'प्रविश, पिण्डीम्' इत्यादाविव कारकभावस्य भावादित्याह– **क्रियाऽभिप्रेयः खल्वपीति**– यद्येवं ग्रामं गच्छतीत्यादौ ग्रामादेरपि क्रियाऽभिसंबध्यमानस्य संप्रदानसंज्ञाप्रसङ्गः, नैष दोषः– यदा संदर्शनादयो धात्वर्थाद् भेदेन विवक्ष्यन्ते तदा तेषां प्राप्तकर्मभावया क्रियया यदभिसंबध्यते तस्येयं संप्रदानसंज्ञा, अत्र तु भेदस्याविवक्षितत्वाद् गम्यर्थत्वात् संदर्शनादीनां गमिवाच्यतैव, गमनं ह्यत्र विततवितमन्तर्भूतसंदर्शनादिकं विवक्षितं, तत् कथमात्मन एवात्मना व्याप्यमानता स्यात्; सा च भेदाभेदविवक्षाप्रयोगदर्शनवशेन नियतविषयैवाश्रीयत इति प्रयोगस्यासङ्कर इति । अथ **घ्नतः पृष्ठं ददाति, रजकस्य वस्त्रं ददातीत्यादौ** दीयमानपृष्ठ-वस्त्रलक्षणेन कर्मणा घ्नतो रजकस्य च व्याप्यमानत्वात् संप्रदानसंज्ञा कुतो न भवतीत्याह–

**अभिग्रहणादि**त्यादि- अभिरभिमतार्थः, प्र आरम्भार्थः, केवलस्य हि ईयतेर्गमनं वाच्यं नाभिसंबन्धः, ततोऽभिग्रहणं विशिष्टसम्बन्धप्रतिपत्त्यर्थम्, विशिष्टश्च सम्बन्धः कर्तुः श्रद्धाऽनुग्रहाऽपायापगमकामनाजनितः, स चात्र नास्तीति; कर्मणा सम्बन्धमात्रेण हि संप्रदानत्वेऽभिग्रहणमनर्थकं स्यादित्यर्थः । **वाताय चक्षुर्ददाति, छात्राय चपेटां प्रयच्छती**त्यत्र तु श्रद्धादिजनितसंबन्धस्य विद्यमानत्वाद् भवत्येवेत्याह- **इह च भवती**ति । कैश्चिदन्वर्थसंज्ञाविधानाद् ददातिक्रियाविषयैव संप्रदानसंज्ञेत्युपगतम्, दानं च स्वत्वनिवृत्तिः परस्वत्वापत्तिपर्यन्तेति प्रत्यज्ञायि, तदुभयमपि न युक्तम्- अन्यत्रापि भाष्यकारेण संज्ञाया अभ्युपगमात्, तथा स्वत्वनिवृत्त्यभावेऽपि च ददातेः प्रयोगस्य दर्शनात्, यथा- न पापाय मतिं दद्यात्, खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति चेति ॥ छ ॥ २. २. २५. ॥

**न्या० स—कर्मा०** । ईङ्त् "य एचातः" [ ५. १. २८. ] ये गुणे "उपसर्गस्था०" [ १. २. १९. ] इत्यलोपे- अभिप्रेयः, कर्मणाऽभिप्रेयः "कारकं कृता" [ ३. १. ६८. ] सः, **वृत्तौ** तु यमभिप्रेयत इत्यर्थकथनमेव, संप्रदीयते तस्मै बाहुलकादनट्, **श्रद्धा-ऽनुग्रहादिकाम्यये**ति- तथेतिप्रत्ययः श्रद्धा, अनुग्रह उपकारः, आदिशब्दात् कीर्त्यपायाभावादिग्रहः । **श्राद्धाय निगल्हते** स्वयं श्राद्धं कर्तुं यजमानेनाकारितं द्विजान्तरं निन्दतीत्यर्थः ।

"**प्रणम्य शितिकण्ठाय**, विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥ १ ॥"

अद्येतनं रामायणगद्यम् । **अभिग्रहणादि**ति- अभिरभिमतार्थः, प्र आरम्भार्थः, केवलस्य हि ईयतेर्गमनं वाच्यं, नाभिसम्बन्धः, ततोऽभिग्रहणं विशिष्टसम्बन्धप्रतिपत्त्यर्थं, विशिष्टश्च सम्बन्धः कर्तुः श्रद्धा-ऽनुग्रहा-ऽपायापगमकामनाजनितः, स चात्र नास्तीति; प्रेय इति सूत्रे क्रियमाणे कर्मणा क्रियया यः सम्बध्यमानो भवति स सम्प्रदानसंज्ञ इत्युक्ते प्रतः पृष्ठं ददातीत्यत्रापि स्यात् । **निवेद्यतामि**ति- "विदिण् चेतनाख्याने" । **रजकस्य वस्त्रं ददाती**ति- परिपूर्णमूल्यमलभमानस्य रजकस्य पराङ्मुखत्वम् । **छात्राय चपेटां प्रयच्छती**ति- चपेटया आहतः सन् छात्रोऽभिमुखो विनयपरो भवति ।

"अनुमन्त्रनिराकर्तृप्रेरकं त्यागकारणम् ।
व्याप्येनाप्तं ददातेस्तु सम्प्रदानं प्रकीर्तितम् ॥ १ ॥
संप्रदानं तदेव स्यात्, पूजानुग्रहकाम्यया ।
दीयमानेन संयोगात्, स्वामित्वं लभते यदि ॥ २ ॥"

॥ २. २. २५. ॥

## स्पृहेर्व्याप्यं वा । २ । २ । २६ ॥

**त० प्र०—**स्पृहयतेर्धातोर्व्याप्यं वा सम्प्रदानसंज्ञं भवति । पुष्पेभ्यः पुष्पाणि वा स्पृहयति । व्याप्यमिति किम्? पुष्पेभ्यः स्पृहयति वने, आधारस्य मा भूत् । संप्रदानसंज्ञापक्षे धातोरकर्मकत्वम्, तेन पुष्पेभ्यः स्पृह्यते मैत्रेण, पुष्पेभ्यः स्पृहयितव्यम्, पुष्पेभ्यः सुस्पृहम्, पुष्पेभ्यः स्पृहितो मैत्रः; एषु भावे- आत्मनेपद-तव्य-खलः कर्तरि च क्तः सिद्धः ॥ २६ ॥

**श० न्या०—स्पृहे०** । **पुष्पेभ्यः स्पृहयती**त्यादि- अत्रादन्तत्वात् स्पृहेरकारलोपस्य "स्वरस्य परे०" [ ७. ४. ११०. ] इति स्थानिवद्भावाल्लघूपान्त्यगुणाभावः, अत्र हि पुष्पादेः कर्तुः क्रियाव्याप्यत्वान्नित्यं कर्मसंज्ञायां प्राप्तायां पक्षे सम्प्रदानसंज्ञा विधीयत इति, तस्यां च धातोरकर्मकत्वाद् भावे आत्मनेपदादयः कर्तरि च क्तः सिद्ध्यतीत्याह- **संप्रदानसंज्ञापक्षे** इत्यादि ॥ छ ॥ २. २. २६. ॥

**न्या० श०—स्पृहे०** । [नेह व्याख्या दृश्यते] ॥ २. २. २६. ॥

## क्रुद्-द्रुहेर्ष्या-ऽसूयार्थैर्यं प्रति कोपः । २ । २ । २७ ॥

**त० प्र०—**अमर्षः- क्रोधः, अपचिकीर्षा- द्रोहः, ईर्ष्या- परसम्पत्तौ चेतसो व्यारोषः, गुणेषु दोषाऽऽविष्करणमसूया; एतदर्थैर्धातुभिर्योगे यं प्रति कोपस्तत् कारकं संप्रदानसंज्ञं भवति । मैत्राय क्रुध्यति, मैत्राय कुप्यति, मैत्राय रुष्यति; मैत्राय द्रुह्यति, मैत्रायापचिकीर्षति, मैत्रायापकरोति; मैत्रायेर्ष्यति, मैत्रायेक्ष्यति, मैत्राय सूक्ष्यति; चैत्रायासूयति । यं प्रति इति किम्? मनसा क्रुध्यति, मनसा द्रुह्यति, मनसेर्ष्यति, मनसाऽसूयति; करणस्य मा भूत् । प्रतिग्रहणं किम्? यस्मिन्नित्युच्यमाने कर्तुरपि स्यात्- मैत्रेण क्रुध्यते । कोप इति किम्? शिष्यस्य कुप्यति विनयार्थम्, धनिनो द्रुह्यति धनार्थी, भार्यामीर्ष्यति- मैनामन्योऽद्राक्षीदिति, चैत्रमसूयति लिप्सया । संप्रदानसंज्ञया कर्मसंज्ञाया बाधितत्वाद् भावे आत्मनेपदादयः कर्तरि च क्तः सिद्धः- मैत्रायेर्ष्यते, मैत्रायासूय्यते, मैत्रायेर्ष्यितव्यम्, मैत्रायासूयितव्यम्, मैत्राय दुरीर्ष्यम्, मैत्राय दुरसूयम्, मैत्रायेर्ष्यितश्चैत्रः, मैत्रायासूयितः । कथं चौरस्य द्विषन्? योऽस्मिन् द्वेष्टि, यं च वयं द्विष्मः? इति; द्विषेरप्रीत्यर्थत्वान्न भविष्यति ॥ २७ ॥

**श० न्या०—क्रुद्-द्रु०** । **यं प्रति कोप** इति । यच्छब्दात् प्रतिशब्दयोगे "भागिनि च०" [ २. २. ३७. ] इति द्वितीया । **अमर्षः क्रोध** इत्यादिना क्रुधादिधातूनामर्थमाचष्टे । **अपचिकीर्षा** अपकर्तुमिच्छा, स द्रोहः; अन्ये त्वपकार एव द्रोह इत्याहुः, तथाहि-अपकुर्वन् स्वामिनमभिद्रुह्यतीत्यभिधीयते, तेषा-

मपचिकीर्षेत्यपकारेच्छया तत्पूर्वकापकारोपलक्षणादपकार एवोक्तो भवतीति वेदितव्यः। **एतदर्थैरि**ति– एतेऽर्था येषां तैर्धातुभिरिति धातुव्यतिरेकेणान्येषामेतदर्थानामभावादिति । अत्रेदं विचार्यते– कोपाद् द्रोहादयो भिन्नस्वभावा व्याख्याताः, तत् कथं तदर्थानां 'यं प्रति कोपः' इति सामान्येनैतद् विशेषणमुपपद्यते ? तेषां हि यं प्रति द्रोहो यं प्रतीर्ष्या यं प्रत्यसूयेत्येव घटते, नैष दोषः– क्रोधस्तावत् कोप एव, द्रोहादयोऽपि द्विप्रकाराः– केचित् कोपहेतुकाः, केचिद्वस्त्वन्तरहेतुकाः, तत्रेह पूर्वेषां ग्रहणं यथा स्यादुत्तरेषां मा भूदित्येवमर्थं 'यं प्रति कोपः' इति सामान्येन विशेषणमुपात्तम्, अन्यथा व्यभिचाराभावादिदमनुपादेयं स्यात्; कोपशब्दोऽपि द्विप्रकारोऽत्र परिगृहीतो मुख्यार्थो गौणार्थश्चेति, गौणार्थत्वं च तस्य कार्ये कारणोपचारात् कोपकार्यद्रोहाद्यर्थवृत्तित्वात्, सामान्यविवक्षया चैकवचनम्। एवं च **भार्यामीर्ष्यती**ति कोपकारणिकाया ईर्ष्याया भार्यायामसम्भवान्न प्रवर्तते संप्रदानसंज्ञा, अत्र हि परकर्तृकदर्शननिमित्ता भार्यायामीर्ष्या, यदाह– **मैनामन्योऽद्राक्षीदि**ति । तथा **शिष्यस्य कुप्यती**त्यादिषु पूर्वोत्तरोदाहरणेषु क्रोध-द्रोहा-ऽसूयानामकोपप्रभवत्वात् संप्रदानत्वाभावः । ननु कोपः क्रोध एवेति भेदाभावात् कथं पौर्वापर्यम् ? उच्यते– प्रथमामनुद्भूतां कोपावस्थां द्वितीयां चोद्भूतां विकृतवाक्कायव्यापारानुमीयमानामाश्रित्य नाकुपितः कुप्यतीत्येतदुच्यत इत्यदोषः । "क्रुधंच् कोपे", "द्रुहौच् जिघांसायाम्", अनयोरकर्मकत्वात् तदर्थानां यं प्रति कोपस्तत्र षष्ठ्यां प्राप्तायां तदपवादः संप्रदानसंज्ञा । "सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः", **असूये**ति कण्ड्वादिर्यगन्तः; अनयोस्तु सकर्मकत्वात् कर्मसंज्ञायाः [ प्राप्तौ संप्रदानसंज्ञा ]। **कथमि**ति– द्विषेः क्रुधाद्यर्थत्वात् कथं चौरादेः संप्रदानसंज्ञा ?, न भवतीति प्रश्नार्थः। समाधत्ते– **द्विषेरि**त्यादि– अत्रानभिनन्दने द्विषिर्वर्तते, यथा– औषधं द्वेष्टीति ॥ २७.॥

**न्या० स०—क्रुद्-द्रुहेर्ष्या०**। शब्दशक्तिस्वाभाव्यात् क्रुधि-द्रुही अकर्मकावेव, सम्बन्धषष्ठ्यां प्राप्तायां संप्रदानम्। **मनसा क्रुध्यतीति–नात्र** मनस उपरि कोपः किन्तु तेन कृत्वाऽन्यस्य पुरुषादेः । **कर्तुरपीति**– न केवलं विषयसप्तम्यां यं प्रति कोपस्तस्य संप्रदानत्वम्, आधारमात्रत्वेन कर्तुरपि स्यादित्यर्थः । **शिष्यस्य कुप्यतीति**– शिष्यसम्बन्धिनोऽविनयस्योपरि कोपो न तु शिष्यस्य। **धनिनो द्रुह्यतीति**– अत्र धनस्योपरि द्रोहो न तु प्राणानाम्, **भार्यामीर्ष्यतीति**– अन्येनावलोक्यमानां न सहते, वृत्तौ **मैनामिति**– तात्पर्यार्थोऽकथि । **द्विषेरप्रीत्यर्थत्वादिति**– अप्रीतिमात्रमेव विवक्षितं न तु क्रुधादय इत्यर्थः । अत्रेदं विचार्यते– क्रोपाद् द्रोहादयो भिन्नस्वभावा व्याख्याताः, तत् कथं तदर्थानां **यं प्रति कोप** इति सामान्येनैतद् विशेषणमुपपद्यते, तेषां हि यं प्रति द्रोहो यं प्रतीर्ष्या यं प्रत्यसूयेत्येव घटते, नैष दोषः– क्रोधस्तावत् कोप एव, द्रोहादयस्तु द्विप्रकाराः– केचित् कोपहेतुकाः केचिद् वस्त्वन्तरहेतुकाः, तत्रेह पूर्वेषां ग्रहणं यथा स्यादुत्तरेषां मा भूदित्येवमर्थं 'यं प्रति कोपः' इति सामान्येन विशेषणमुपात्तम्, अन्यथाऽव्यभिचारादिदमनुपादेयं स्यात् ॥ २. २. २७.॥

## नोपसर्गात् क्रुद्-द्रुहा । २ । २ । २८॥

**त० प्र०—उपसर्गात् पराभ्यां क्रुधि-द्रुहिभ्यां योगे यं प्रति कोपस्तत् कारकं संप्रदानसंज्ञं न भवति। मैत्रमभिक्रुध्यति, मैत्रमभिद्रुह्यति; क्रुधि-द्रुही सोपसर्गौ सकर्मकाविति द्वितीया। उपसर्गादिति किम्? मैत्राय क्रुध्यति, मैत्राय द्रुह्यति ॥ २८ ॥**

**श० न्या०—नोप०**। क्रुधश्च द्रुहश्चेति समाहारद्वन्द्वात् तृतीया। **मैत्रमभिक्रुध्यति, मैत्रमभिद्रुह्यति,** अत्र संप्रदानसंज्ञायाः प्रतिषेधाच्चतुर्थ्यभावाद् द्वितीया। अथ केनात्र द्वितीया ? यदि "लक्षणवीप्स्येत्थंभूतेष्वभिना" [२. २. ३६.] इत्यनेन, नेह चतुर्थीप्राप्तिरस्ति, क्रुधि-द्रुहिभ्यां सम्बन्धाभावादनुपसर्गत्वादुपसर्गात् परत्वस्य चासम्भवात् प्रतिषेधोऽनर्थकः स्यात्, तथा मैत्रस्याभिक्रोद्धा, मैत्रस्याभिद्रोग्धेति कर्मणि षष्ठी न स्यात्, आत्मनेपदादयश्च न स्युरिति, अत इह कर्मत्वमेषितव्यम्, तच्चानयोरकर्मकत्वान्न लभ्यत इत्याह– **क्रुधि-द्रुही सोपसर्गावि**त्यादि– यद्यप्येतावनुपसर्गावकर्मकौ तथापि सोपसर्गौ सकर्मकौ भवतः। **मैत्रमभिक्रुध्यति** मैत्रमभिगम्याऽभिमुखीकृत्य वा क्रुध्यतीति, अकर्मका अपि हि धातवः सोपसर्गाः सकर्मका भवन्तीत्युक्तत्वात्, अतः "कर्मणि" [२. २. ४०.] इत्येवात्र द्वितीया। अथ यदा मैत्रादेर्लक्षणाद्यर्थेनाभिना योगस्तदा क्रुधादीनामुपसर्गपरत्वाभावात् प्रतिषेधाप्रवृत्तेः संप्रदानत्वेन "लक्षणवीप्स्ये०" [२. २. ३६.] इति द्वितीया वा स्यात्, संप्रदानचतुर्थी वेति? उच्यते– वृक्षमभि, मैत्राय क्रुध्यतीत्यादौ द्वयोः सावकाशत्वादिहोभयप्राप्तौ परत्वाच्चतुर्थ्यामुत्पन्नायां मैत्रायाभिक्रुध्यतीत्येव स्यादिति ॥ छ ॥ २. २. २८.॥

**न्या० स०—नोपसर्गात् क्रुद्-द्रुहा**। मैत्रमभिक्रुध्यतीत्यत्र अभिव्याप्य कोपवान् अपचिकीर्षावान्, अभिव्याप्त्युपसर्जने वृत्तिः कोपादौ ॥ २. २. २८.॥

## अपायेऽवधिरपादानम् । २ । २ । २९ ॥

**त० प्र०**—सावधिकं गमनमपायः, तत्र यदवधिभूतमपायेनानधिष्ठितं तत् कारकमपादानसंज्ञं भवति। ग्रामादागच्छति, पर्वतादवरोहति, सार्थाद्धीनः, वृक्षात् पर्णं पतति, धावतोऽश्वात् पतितः, पततो देवदत्ताद् धावत्यश्वः, मेषान्मेषोऽपसर्पति । तदेतत् त्रिविधम्– निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियं च; यत्र धातुनाऽपायलक्षणो विषयो निर्दिष्टस्तन्निर्दिष्टविषयम्, यथा– ग्रामादागच्छति; यत्र तु धातुर्धात्वन्तराऽर्थाङ्गं स्वार्थमाह तदुपात्तविषयम्, यथा– बलाहकाद् विद्योतते विद्युत्, अत्र हि निःसरणाङ्गे विद्योतने विद्युतिर्वर्तते, यथा वा– कुशूलात् पचति, अत्राप्यादानाऽङ्गे पाके पचिर्वर्तत इति; यत्र तु क्रियावाचि पदं न श्रूयते केवलं क्रिया प्रतीयते तदपेक्षितक्रियम्, यथा– सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतराः । अपायश्च कायसंसर्गपूर्वको बुद्धिसंसर्गपूर्वको वा विभाग उच्यते, तेन—

" बुद्ध्या समीहितैकत्वान्, पञ्चालान् कुरुभिर्यदा ।
बुद्ध्या विभजते वक्ता, तदाऽपायः प्रतीयते ॥ इति,

अत्रापादानत्वं भवति; एवम्– अधर्माज्जुगुप्सते, अधर्माद् विरमति, धर्मात् प्रमाद्यति, अत्र यः प्रेक्षापूर्वकारी भवति स दुःखहेतुमधर्मं बुद्ध्या प्राप्य नानेन कृत्यमस्तीति ततो निवर्तते, नास्तिकस्तु बुद्ध्या धर्मं प्राप्य नैनं करिष्यामीति ततो निवर्तत इति निवृत्त्यङ्गेषु जुगुप्सा-विराम-प्रमादेष्वेते धातवो वर्तन्त इति बुद्धिसंसर्गपूर्वकोऽपायः । तथा– चौरेभ्यो बिभेति, चौरेभ्य उद्विजते, चौरेभ्यस्त्रायते, चौरेभ्यो रक्षति, अत्र बुद्धिमान् वध-बन्ध-परिक्लेशकारिणश्चौरान् बुद्ध्या प्राप्य तेभ्यो निवर्तते, चौरेभ्यस्त्रायत इत्यत्रापि कश्चित् सुहृद् यदीमं चौराः पश्येयुर्नूनमस्य धनमपहरेयुरिति बुद्ध्या तं चौरैः संयोज्य तेभ्यो निवर्तयतीत्यपाय एव । अध्ययनात् पराजयते, भोजनात् पराजयते, अत्राध्ययनं भोजनं वाऽसहमानस्ततो निवर्तत इत्यपाय एव । यवेभ्यो गां रक्षति, यवेभ्यो गां निषेधयति, कूपादन्धं वारयति, इहापि गवादेर्यवादिसम्पर्कं बुद्ध्या समीक्ष्यान्यतरस्य विनाशं पश्यन् गवादीन् यवादिभ्यो निवर्तयतीत्यपाय एव । उपाध्यायादन्तर्धत्ते, उपाध्यान्निलीयते, मा मामुपाध्यायोऽद्राक्षीदिति तिरोभवतीत्यत्राप्यपायः । शृङ्गाच्छरो जायते, गोमयाद् वृश्चिको जायते, गोलोमा-ऽविलोमभ्यो दूर्वा जायते, बीजादङ्कुरो जायते, अत्र शृङ्गादिभ्यः शरादयो निष्क्रामन्तीति स्फुट एवापायः; यदि निष्क्रामन्ति किं? नाऽत्यन्ताय निष्क्रामन्ति सन्ततत्वादन्याऽन्यप्रादुर्भावाद् वा। हिमवतो गङ्गा प्रभवति, महाहिमवतो रोहिता प्रभवति, अत्राप्यापः संक्रामन्तीत्यपायोऽस्ति; यद्यपक्रामन्ति किं? नात्यन्तमपक्रामन्ति सन्ततत्वादन्यान्यप्रादुर्भावाद् वा । वलभ्याः शत्रुञ्जयः षड् योजनानि षट्सु वा योजनेषु भवति, अत्र वलभ्या निःसृत्य गतानि योजनानि, गतेषु वा तेषु, भवतीत्यर्थः; कार्तिक्या आग्रहायणी मासे, ततः प्रभृति मासे गते भवतीत्यर्थः; उभयत्रापायः प्रतीयते । चैत्रान्मैत्रः पटुः, अयमस्मादधिकः, अयमस्मादूनः, माथुराः पाटलिपुत्रकेभ्य आढ्यतराः, अत्र मैत्रादयः पुंस्त्वादिना संसृष्टाः पटुत्वादिधर्मेण ततो विभक्ताः प्रतीयन्ते इति सर्वत्राप्यपायविवक्षा । विवक्षान्तरे त्वपादानत्वाभावे यथायोगं विभक्तयो भवन्ति– बलाहके विद्योतते, बलाहकं विद्योतते, अधर्मं जुगुप्सते, अधर्मेण जुगुप्सते, मौर्ख्येण प्रमाद्यति, चौरैर्भयम्, चौरैर्बिभेति, चौरेषु बिभेति, चौराणां बिभेति, भोजनेन पराजयते, शत्रून् पराजयते, यवेषु गां वारयति; शृङ्गे शरो जायत इति ॥ २९ ॥

---

**श० न्या०—अपा०** । अथावधिग्रहणं किमर्थम्? न च 'ग्रामादागच्छति शकटेन' इत्यपाये शकटस्यापि साधनत्वादपादानसंज्ञा स्यादिति वाच्यम्, 'धनुषा विध्यति' इतिवत् करणसंज्ञया तस्या बाधनात्; तथा 'ग्रामादागच्छन् कंसपात्र्यां पाणिनौदनं भुङ्क्ते' इत्यत्राप्यधिकरणसंज्ञा बाधिका भविष्यति; नन्वागमने कंसपात्री साधनमेव न भवति, भुजिक्रियायां तु सा साधनमवधिभूता आधारभूता च, तत्र च परत्वादधिकरणसंज्ञेति, नैवम्– वस्तुस्थित्याऽत्राऽऽगमनं प्रधानम्, तदङ्गं तु भोजनं, शब्दात् तु विपरीतो गुणप्रधानभावः प्रतीयते; तदुक्तं हरिणा–

" चङ्क्रम्यमाणोऽधीष्वात्र, जपंश्चङ्क्रमणं कुरु ।
तादर्थ्यस्याविशेषेऽपि, शब्दाद् भेदः प्रतीयते ॥ "

तत्र कंसपात्री भुजेः साधनत्वात् तद्द्वारेणागमनस्यापि भवत्येव साधनमिति; एवं तर्हि 'वृक्षस्य पर्णं पतति' इत्यादौ स्यात्, अपायस्य विद्यमानत्वात्, नन्वत्रापि कारकत्वाभावात् संज्ञा न भविष्यति, अपायाभावाच्च, सत्येवावधावपायो भवतीति पूर्वमुक्तत्वात्; सत्यम्– सतीहावधिग्रहणे विशिष्टोऽपायो लभ्यते, अन्यथा पातमात्रस्य लोकेऽपायत्वेन प्रसिद्धत्वात् तस्यैव ग्रहणं स्यादित्याह– **सावधिकं गमनमपाय** इति । अवधिश्च नैवंविधस्य गमनस्याधिष्ठानमित्याह– **अपायेनानधिष्ठितमि**ति– उक्तलक्षणेन गमनेनानाविष्ट इत्यर्थः । नन्वेवं तर्हि गतियुक्तेषु 'धावतोऽश्वात् पतितः' इत्यादावपादानत्वं न स्यात्, 'ग्रामादागच्छति, पर्वतादवरोहति' इत्यादावेव स्यात्, अत्र हि धावन्नश्वः पातस्य निमित्तं, धावनं च गमनमेवेति नास्त्यश्वस्यापायेनानधिष्ठितत्वम्, नैष दोषः– नहि गमनमात्रमपायः, किं तर्हि? सावधिकं गमनं, तच्च देवदत्तकर्तृकं पात-

रूपं; तेन च धावतोऽप्यश्वस्याविशेषाभावान्न विरुद्धयतेऽपादानसंज्ञेति। एवं तर्हि ग्रामान्नागच्छतीत्यत्र कथमपादानसंज्ञा? उक्तस्य गमनस्याभावात्, यस्यां हि सत्यामपादानसंज्ञा स्यात् प्रतिषिध्यतेऽत्र सा गमनक्रिया, नैष दोषः- अत्र ह्यपादानसंज्ञायामुपजातायां पश्चात् प्रतिषेधेन सम्बन्धः, अन्यथा प्रतिषेधस्य विषयो न प्रतिपादितः स्यात्; तथाहि- अपादानसाधनागमनक्रिया प्रतिषेद्धुमिष्टा, यदि चादावेव प्रतिषेधसम्बन्धः स्यादागमनाभावात् तदसम्बद्धस्य ग्रामस्यापादानसंज्ञा न स्यात्, ततश्च या प्रतिषेध्याऽपादानसाधनागमनक्रिया प्रतिषेधस्य विषयः सा न शक्यते प्रदर्शयितुम्, न चाप्रदर्शितविषयः प्रतिषेधो युज्यते, तस्मात् पूर्वमपादानसंज्ञा भवति । ननु **कुशूलात् पचती**ति कथं कुशूलस्यापादानसंज्ञा? नहि पचनमपायो येनापायेऽवधिः स्यादित्याह- **तदेतत् त्रिविधमिति** । **निर्दिष्टविषयमि**त्यादिना त्रैविध्यमेव स्वरूपोदाहरणाभ्यामाचष्टे । **अत्र हि निःसरणाङ्ग** इति- निःसरणं चापायरूपमिति भावः । **सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा** इति- अत्र सांकाश्यकैः पाटलिपुत्रकाणां समगुणत्वाद् यः साम्यं ज्ञातवान् स प्रकर्षाश्रयेण पुनर्बुद्धया पृथक् कृत्वा वाक्यं प्रयुङ्क्ते इति, सिद्धाऽपादानसंज्ञेति । ननु कायसंसर्गपूर्वको विभागो मुख्यो बुद्धिपरिकल्पितस्तु गौणः, ततश्च * गौण-मुख्ययोर्मुख्यस्यैव परिग्रहात् * सांकाश्यकेभ्य इत्यादौ कारकशेषत्वात् षष्ठी प्राप्नोति, नैवम्- " साधकतमं करणम् " [ २. २. २४. ] इत्यत्र तमग्रहणेन गौणग्रहणस्यापि ज्ञापितत्वादुभयरूपस्याप्यपायस्य परिग्रह इत्याह- **अपायश्चे**त्यादि । **तेने**त्यादिना गौणपरिग्रहफलं दर्शयति । जुगुप्सा-विराम-प्रमादार्थानां प्रयोगेऽपादानसंज्ञार्थं न यत्नान्तरमन्वेष्यं, तत्रापि बुद्धिकृतापायस्य विद्यमानत्वेनानेनैव सिद्धत्वादित्याह- **एवमि**त्यादि । यथा चात्र बुद्धिपरिकल्पितोऽपायः सम्भवति तथा दर्शयति- **अत्र य** इत्यादि । **निवृत्त्यङ्गे**ष्विति- निवृत्तिश्चापायरूपेत्यर्थः । **तथे**ति- बुद्धिकृतापायस्य विद्यमानत्वात् ' भीत्यर्थानां धातूनां भयहेतुरपादानम् ' इत्यपि न वक्तव्यमित्यर्थः । " चुरण् स्तेये " " चुरादिभ्यः० " [ ३. ४. १७. ] इति णिचोऽनित्यत्वात् तदभावे भिदादित्वादङि, अपि च- चुरा, सा शीलमस्य " अङ्गस्थाच्छत्रादेरञ् " [ ६. ४. ६०. ] इत्यञि वृद्धौ भ्यसि च- **चौरेभ्य** इति- भयमाकुलीभावः, त्राणमनर्थप्रतिघात इति तेभ्यो निवर्तत इति निवृत्त्यङ्गे भये बिभेत्यादयो वर्तन्त इत्युपात्तविषयमेतदपादानमित्यर्थः । **अत्रापीति- 'अध्ययनात् पराजयते, भोजनात् पराजयते'** इत्यत्र दुःखमध्ययनं, दुर्वचं[ दुर्धरं च ], गुरवश्च दुरुपचाराः, भोजनमपि व्याधितस्यालूनैर्भुक्तवतो वा विरसत्वादिना दुःखमिति द्वयं बुद्धया प्राप्यासहमानस्ततो निवर्तत इति पूर्ववदपादानसंज्ञेति ' पराजेरसोढेऽर्थेऽपादानं ' न वक्तव्यम्, तत्रासोढग्रहणात् पराजयतिर्ग्लानीभाववृत्तिर्गृह्यते, न तु शत्रून् पराजयत इतिवदभिभववृत्तिः । अथवा **यवेभ्यो गां रक्षती**त्यादावपादानसंज्ञार्थं ' वारणार्थानामीप्सित ' इति न वक्तव्यम् । ननु यस्यात्मीया यवा न गावस्तस्य ईप्सिता यवाः, यस्य त्वात्मीया गावस्तस्य कथं यवा ईप्सिताः? ईप्सितशब्दस्याभिप्रेतपर्यायस्य लोके रूढत्वाद्, उच्यते- यस्यापि परकीया यवास्तस्यापि ते ईप्सिताः, यत ईप्सितशब्दः क्रियाशब्द आश्रीयते न रूढिशब्दः, तत्र वारणक्रियया परकीया अपि यवा वारयितुमाप्तुमिष्टा भवन्ति, ' मा नशन्नेते ' इति तेभ्यो गां वारयति, यद्येवं **कूपादन्धं वारयती**त्यत्र न प्राप्नोति, नहि तस्य कूप ईप्सितः, [ एवेप्सितः, ] अन्धस्य सम्बन्धे कूपस्य न विनाशो न च राजभयम्, नैष दोषः- अन्धं प्रत्यनुकम्पायाः सद्भावात् तस्यापि कूप एवेप्सितो वारणक्रिययाऽऽप्तुमिष्टत्वात्, स हि पश्यति- अन्धः कूपं मा प्रापदिति, अन्धस्य च प्रवृत्त्यनुमेया ईप्सा, तदाह- यथैवान्यत्रापश्यतोऽन्धस्येप्सा तथा कूपेऽपि, स ह्यपश्यन्नपि गन्तव्यं जिगमिषति, अन्यथा न क्वचित् तस्य प्रवृत्तिः स्यादिति; अत्रापि न यत्नान्तरं विधेयमित्याह- **इहापी**त्यादि- अयं हि पश्यति गवादेर्यवादिसम्पर्के नूनमन्यतरस्य विनाशेन भाव्यं, ततश्चाधर्म-राजभयादिस्ततो निवर्तयतीति सिद्धमपादानमिति । **उपाध्यायादन्तर्धत्त** इत्यादि- अत्रापि पश्यत्ययं- यदि मामुपाध्यायः पश्यति, ध्रुवं प्रेषणमुपालम्भो वेति स बुद्धया प्राप्य ततो निवर्तत इति येनादर्शनक्रियाकर्त्रा उपाध्यायेनात्मनो व्यवधाननिमित्तमदर्शनमिच्छति तस्यापि कर्तुरपायेऽवधित्वस्य सिद्धत्वात् " अन्तर्द्धौ येनादर्शनमिच्छति " [ पाणिनि० १. ४. २८. ] इत्यपि न वक्तव्यमित्याह- **मामुपाध्याय** इत्यादि । तथा जन्यर्थस्य कर्ता जायमानस्तस्य प्रकृतिरुपादानसहकारिलक्षणं कारणमपादानमित्यपि न वक्तव्यम्, **शृङ्गाच्छरो जायते, गोमयाद् वृश्चिको** जायत इत्यादि कथमित्याशङ्कायामाह- **अत्र शृङ्गादिभ्य** इति । पुनः पृच्छति- **यदि निष्क्रामन्ती**ति- अयमर्थः- यदि यतोऽपक्रामति तत् पुनस्तत्र न दृश्यत इति प्रसिद्धम्, इह तु तत्रास्ति दर्शनमिति । समाधत्ते- **सन्ततत्वादि**ति- यथा बिलाद् दीर्घभोगो भोगी निष्क्रामन्नप्यविच्छेदात् तत्रोपलभ्यते तथा शरादयोऽपीति सिद्धाऽपादानसंज्ञा, लोकप्रसिद्धयाश्रयेणैतदुच्यते, लोके यद् यस्माज्जायते तत् तस्मान्निर्गच्छतीत्युच्यते;

तर्कप्रियास्तु प्रक्रिया भिद्यन्ते– वैशेषिकदर्शने परमाण्वादि-समवेतं कारणेभ्योऽपृथग्देशं कार्यमुत्पद्यत इति नास्ति कार्यस्यापक्रमः, सांख्यदर्शनेऽप्याविर्भाव-तिरोभावलक्षणजन्म-नाशरूपपरिणामाभ्युपगमान्नास्त्यपक्रम इति । अथवा **अन्यान्यप्रादुर्भाववादि**त्वेनान्ये चान्ये च भवन्ति, क्षणिकपक्षं द्रव्यान्तराऽऽरम्भपक्षं **वा** परिणामपक्षं वाऽऽश्रित्यैतदुच्यते, ननु सतो जन्माऽयोगादसतश्च कर्तृत्वासम्भवात् कथं **शृङ्गाच्छरो जायते** इत्यादिप्रयोगः ? नैष दोषः– बुद्धिव्यवस्थितस्यार्थस्य क्रियायां कारकरूपत्वोपगमादिति । एवं ' भुवः कर्तुः प्रभवोऽपादानम् ' इत्यपि न वक्तव्यम्, **हिमवतो गङ्गा प्रभवति** प्रथमत उपलभ्यत इत्यर्थः; अयं चार्थो धातूनामनेकार्थत्वाद् वेदितव्यः । जन्यर्थस्तु न सम्भवत्येव, नहि हिमवान् गङ्गायाः कारणं, सा ह्यन्येभ्य एव कारणेभ्य उत्पन्नेति । यथा च न वक्तव्यं तथा दर्शयति– **अत्राऽपी**त्यादि । **यद्यपक्रामती**त्यादिना पूर्ववत् प्रश्न-परिहारौ व्याचष्टे । तथा **वलभ्याः शत्रुञ्जयः षड् योजनानि, षट्सु वा योजनेष्वि**ति– वलभेः " कृ-शृ-गृ-शालि० " [ उणा० ३२९. ] इत्यमे ततो गौरादित्वात् ङ्यां वलभी; अत्र प्रतीयमानमाह– **अत्र वलभ्या** इत्यादि– निःसृत्येत्येतदपेक्षया वलभ्युपात्तविषयमपादानमित्यतः पञ्चमी । गतेषु भवतीत्येतदपेक्षया **षट्सु योजनेष्वि**ति " यद्भावो भावलक्षणम् " [२. २. १०६.] इति सप्तमी; एवं– **कार्तिक्या आग्रहायणी मासे** ततः प्रभृति मासे गते भवतीति प्रतीतेः पूर्ववत् पञ्चमी-सप्तम्यावित्यर्थ इत्याह– **उभयत्रे**त्यादि– ततो ' यतश्चाध्वकालनिर्माणं ततः पञ्चमी ' इति न वक्तव्यम् । कृत्तिकाभिश्चन्द्रयुक्ताभिर्युक्ता पौर्णमासी " चन्द्रयुक्तात् काले० " [ ६. २. ६. ] इत्यणि ङ्यां च– कार्तिकी, एवमग्रहायणेन– मृगशिरसा चन्द्रोपेतेन युक्ता पौर्णमासी– [ आग्रहायणी ] । तथा **चैत्रान्मैत्रः पटुरि**त्यादावपि चैत्रादेः पञ्चमीविधानार्थं " पञ्चमी विभक्ते " [ पाणिनि– २. ३. ४२ ] इति नारम्भणीयम्, अत्राप्यपायस्य विद्यमानत्वात्, यथा चापायस्तथा प्रतिपादयति– **अत्र मैत्रादय** इत्यादि– अयमर्थः– मा भूदत्र विभागे शब्दान्तरोपादानम्, अत एव शब्दादत्र विभागः प्रतीयते, तथाहि– चैत्रान्मैत्रः पटुरित्यत्र विनाऽपि तरप्प्रत्ययं पटुत्वेन द्वयोः संसृष्टयोरतिशयेन चैत्रान्मैत्रः पृथक् क्रियमाण एव प्रतीयते; तथा '**अयमस्मादधिकोऽयमस्मादूनः**' इत्यत्राप्याढ्यत्वेनान्येन वा एकवर्गीकृतयोरेकस्मादितरस्य शब्दशक्तिस्वाभाव्याद् विभागः प्रतीयत एव; तथा माथुराश्च पाटलिपुत्रकाश्च द्वयेऽप्याढ्या इत्येकरूपा अनेन रूपेण संसृष्टा आढ्यतरा इति प्रत्ययार्थेनातिशयेन पाटलिपुत्रकेभ्यो माथुराश्च बुद्ध्या विभज्यमानाः प्रतीयन्त इत्यस्ति विभागः, विभागश्चापायः, तत्र भवतु मा वा शब्दान्तरोपादानं प्रतीयमानापायाऽवद्योतनार्थं पञ्चमी भवति, प्रतीयमानाऽपि हि क्रिया विभक्तिनिमित्तधर्माऽऽविर्भावाय भवत्येवेति प्रागुक्तत्वादिति न यत्नान्तरमास्थेयम् । नन्वेवं तर्हि विवक्षान्तरे विभक्त्यन्तरं प्राप्नोति यत्नान्तरमनारम्भमाणस्येति चेत् ?, सत्यम्– इष्टमेवैतदित्याह– **विवक्षान्तरे त्वि**त्यादि– यथायोगमाधारविवक्षायां सप्तमी, कर्मविवक्षायां द्वितीयेत्याद्युदाहरणानुसारेण द्रष्टव्यम् ॥ छ ॥ २. २. २९. ॥

---

**न्या० स०—अपायेऽवधि०** । " इंक् " अपायनं " युवर्ण० " [ ५. ३. २८. ] इत्यलि, " अवि-वधि० " धातुना भावाकर्त्रोरेभि वा । अवधीयते– मर्यादीक्रियते **बुद्धया** " उपसर्गाद्‌: किः " [ ५. ३. ८७. ] । **गमनमि**ति– अपायहेतुत्वाद् गमनमप्यपायः, उपलक्षणं चेदं, तेन– परमार्थतो विभागोऽपाय इति सिद्धम् । **ग्रामादागच्छती**ति– ग्रामादेरौदासीन्यमेवान्तरव्यापारः । **सार्थाद्धीनः** कर्मकर्तरि कर्मणि वाऽत्र क्तप्रत्ययः । **उपात्तविषयमिति**– उप– समीपे धातुना धात्वन्तरस्यात्तः– स्वीकृतो विषयोऽर्थो यत्र तत् । **धात्वन्तरार्थाङ्गमि**ति– धात्वन्तरार्थोऽङ्गं– विशेषणं यस्य, धात्वन्तरार्थस्य वाऽङ्गम् । **निःसरणाङ्ग** इति– निःसरणं चापायरूपमिति भावः । यदा तु बलाहकान्निःसृत्य कुशूलादादायेति च निःसृत्या-ऽऽदायशब्दवन्तौ प्रयोगौ क्रियेते तदा वियुति-पचिधातू केवले स्वार्थे वियोजने विच्छेदने च वर्तेते, 'निःसरति, आददाति' क्रियापेक्षया तु बलाहक-कुशूलयोर्निर्दिष्टविषयमपादानत्वम् । **सांकाश्यकेभ्य** इति– संकाशेन निर्वृत्तं " सुपन्थ्यादेर्ञ्यः " [ ६. २. ८४. ], तत्र भवाः– " प्रस्थपुर० " [ ६. ३. ४३. ] इत्यकञ्, अत्र निर्धार्यन्त इति क्रिया प्रतीयते । **अपायश्चे**ति– ननु कायसंसर्गपूर्वको विभागो मुख्यो बुद्धिपरिकल्पितस्तु गौणः, ततश्च * गौण-मुख्ययोर्मुख्यस्यैव परिग्रहात् * सांकाश्यकेभ्य इत्यादौ कारकशेषत्वाद् षष्ठी प्राप्नोति, नैवम्– " साधकतमं करणम् " [ २. २. २४. ] इत्यत्र तमग्रहणेन गौणग्रहणस्यापि ज्ञापितत्वादुभयरूपस्यापि अपायस्य परिग्रह इति । अत्र माहेश्वरव्याकरणश्लोकः– " बुद्ध्येत्यादि । **तथा– चौरेभ्यो बिभेतीति**– अत्र बुद्धिकृतापायस्य विद्यमानत्वाद् " भीत्राणार्थानां धातूनां भयहेतुरुपादानम् " इति यदन्यैरुक्तं तदत्र न वक्तव्यम्, भयम्– आकुलीभावः, त्राणम्– अनर्थप्रतीघात इति । **तेभ्यो निवर्तत** इति– निवृत्त्यङ्गे भये बिभेत्यादयो वर्तन्त इत्युपात्तविषयमेतदपादानम् । **अध्ययनात् पराजयते, भोजनात् पराजयत** इति– अत्र पराजिरसहने वर्तते, ' दुःखमध्ययनं दुर्वहं, गुरवश्च दुरुपचाराः, भोजनमपि व्याधितस्यातृप्तेर्भुक्तवतो वा विरसत्वादिना दुःखम् ' इति ततो निवर्तत इति " पराजेरसोढेऽर्थे "

इति न वक्तव्यम्, तत्रासोढग्रहणात् पराजयतिरसहनार्थो गृह्यते न तु 'शत्रून् पराजयते' इतिवदभिभववृत्तिः। **यवेभ्यो गां रक्षतीति**– अत्र "वारणार्थानामीप्सितम्" इति न वक्तव्यम्। **स्फुट एवेति**– कायसंसर्गपूर्वक इत्यर्थः। **शृङ्गाच्छरो जायत इति**– उक्तं च गोपुराणे—

"गोलोमाज्जायते दूर्वा, गोमयाद् वृश्चिकः स्मृतः ।
गोदोहाद् गोरसं प्राहुर्गोशृङ्गादुच्यते शरः ॥ १ ॥"

**यदि निष्क्रामन्तीति**– अयमर्थः– यत् किल यतोऽपक्रामति तत् पुनस्तत्र न दृश्यत इति प्रसिद्धम्, इह तु तत्र तस्यास्ति दर्शनमित्याह– **अत्यन्तायेति**–अत्यन्तमित्यर्थेऽव्ययं, क्रियाविशेषणत्वादम्। **सन्ततत्वादिति**– निष्क्रमणस्येति गम्यते, अयमर्थः– एकेऽवयवा निष्क्रान्ता अन्ये निष्क्रामन्तः सन्तीति, यथा बिलाद् दीर्घभोगो भोगी निष्क्रामन्नपि सन्ततत्वात् तत्रोपलभ्यते तथा शरादयोऽपीत्यर्थः। **अन्यान्यप्रादुर्भावाद् वेति**– अन्यावयवयोगात् समुदायोऽप्यन्यः, ततोऽन्यश्चासावन्यश्चेति कार्यम्, समाहारे तु "त्यदादिः" [ ३. १. १२०. ] इत्यनेनैकशेषः स्यात्। **गङ्गा प्रभवतीति**– ततः प्रथममुपलभ्यत इत्यर्थः, अत्रापि "भुवः कर्तुः प्रभवोऽपादानम्" इत्यपि न वक्तव्यम्। **अत्यन्तमिति** अन्तमतिक्रान्तम्। **षड् योजनानीति**– अत्र षड्योजनस्वरूपस्याध्वनः शत्रुञ्जय इत्यनेनाध्वनोऽन्तेन सह "गतेर्गम्ये०" [ २. २. १०७. ] इति सूत्रेण सामानाधिकरण्यं, तस्माच्च शत्रुञ्जय इत्यस्माद् या प्रथमा विभक्तिः सा योजनानीत्यत्रापीति। **गतानीति**– चैत्रेण कर्त्रा षड् योजनानि गतानि– अतिक्रान्तानीति योजनानां कर्मत्वम्, उपचाराद् योजनस्थनरगतापेक्षया योजनान्यपि गतशब्देनोच्यन्त इति तेषां कर्तृत्वं वा। **गतेष्विति**– अतिक्रान्तेष्वित्यर्थः। **आग्रहायणीति**– अग्रं हायनस्य "पूर्वपदस्थात्०" [ २. ३. ६४. ] इति णत्वम्, अग्रहायणेन– मृगशिरसा चन्द्रयुक्तेन युक्ता पौर्णमासी "चन्द्रयुक्ता०" [ ६. २. ६. ] इत्यण्। **बलाहकमिति**– तं प्राप्यान्तर्भूतण्यर्थो वा ॥ २. २. २९. ॥

## क्रियाऽऽश्रयस्याऽऽधारोऽधिकरणम् । २ । २ । ३० ॥

**त० प्र०**—क्रियाऽऽश्रयस्य कर्तुः कर्मणो वा य आधारस्तत् कारकमधिकरणसंज्ञं भवति, अत्रापि प्रसिद्धाऽनुवादेनाप्रसिद्धस्य विधानमिति यत् क्रियाऽऽश्रयस्याधिकरणं तदाधारसंज्ञं भवतीत्यपि सूत्रार्थः। कटे आस्ते, स्थाल्यां पचति; चैत्रसमवायिन्यामासिक्रियायां तदाश्रयं चैत्रं धारयन् कटादिर्हेतुतां प्रतिपद्यते, तण्डुलसमवायिन्यां च विघटनक्रियायां तदाश्रयांस्तण्डुलान् धारयन्ती स्थाली हेतुत्वं प्रतिपद्यत इत्युभयत्र कारकत्वम्। तत् षोढा– वैषयिकम्, औपश्लेषिकम्, अभिव्यापकं, सामीप्यकम्, नैमित्तिकम्; औपचारिकं च। तत्र अनन्यत्र भावो विषयः, तस्मै प्रभवति– वैषयिकम्– दिवि देवाः, नभसि तारकाः, भुवि मनुष्याः, पाताले पन्नगाः। एकदेशमात्रसंयोग उपश्लेषः, तत्र भवम्– औपश्लेषिकम्– कटे आस्ते, पर्यङ्के शेते, शाखायां लम्बते, गृहे तिष्ठति। यस्याधेयेन समस्तावयवसंयोगस्तद्– अभिव्यापकम्, तद्धि आधेयेनाभिव्याप्यते, आधेयं वाऽभिव्याप्नोतीति कृद् "बहुलम्" [ ५. १. २. ] इति कर्मण्यपि णकः; तिलेषु तैलम्, दध्नि सर्पिः, गवि गोत्वम्, तन्तुषु पटः। यद् आधेयसन्निधिमात्रेण क्रियाहेतुस्तत्– सामीप्यकम्– गङ्गायां घोषः, कूपेषु गर्गकुलम्, बन्धुष्वास्ते, गुरौ वसति। निमित्तमेव– नैमित्तिकम्– युद्धे सन्नह्यते, शरदि पुष्यन्ति सप्तच्छदाः, आतपे क्लाम्यति, छायायामाश्वसिति। उपचारे भवम्– औपचारिकम्– अङ्गुल्यग्रे करिशतमास्ते, स मे मुष्टिमध्ये तिष्ठति, यो यस्य द्वेष्यः स तस्याऽक्ष्णोः प्रतिवसति, यो यस्य प्रियः स तस्य हृदये वसति। अधिकरणा-ऽऽधारप्रदेशाः– "सप्तम्यधिकरणे" [ २. २. ९५. ], "अद्यर्थाच्चाधारे" [ ५. १. १२. ] इत्यादयः ॥ ३० ॥

**श० न्या०**— क्रिया०। आश्रीयत इत्याश्रयः "भूश्यद०" [ ५. ३. २३. ] इत्यलि, क्रियाया आश्रयः– क्रियाश्रयः, क्रियासम्पादक इत्यर्थः, स च कर्ता कर्म च, द्विविधा हि क्रिया– कर्तृस्था कर्तृसमवायिनी कर्मस्था च कर्मसमवायिनी, ते तां जनयन्ती तस्या आश्रयौ भवतः। आध्रियेते– क्रियाश्रयौ कर्तृ-कर्मणी अवतिष्ठेते अस्मिन्निति "व्यायावाया०" [ ५. ३. १३४. ] इत्यादिना घञ्याधारः, अत आह– **क्रियाऽऽश्रयस्येत्यादि**– क्रियाऽऽधार इत्येतावत्युच्यमाने साक्षात् क्रियाधारभूतयोः कर्तृ-कर्मणोरेव संज्ञा स्यान्न तु तदाश्रयस्य कटादेः, मुख्याभावे हि गौणाश्रयणं स्यात्; न च कर्तृ-कर्मणोः कर्तृ-कर्मसंज्ञाभ्यां बाधितत्वान्मुख्यासम्भवाद् गौणस्वीकार इति वाच्यम्, कर्मस्थक्रियेषु कर्तुः क्रियाश्रयत्वाभावाद् अस्याप्रवृत्तौ कर्तृसंज्ञायाश्चरितार्थत्वात्, कर्तृस्थक्रियेषु च कर्मणः क्रियाऽऽश्रयत्वाभावात् कर्मसंज्ञायाः, तस्मादाश्रयस्येति कर्तव्यम्। **अत्रापीति**– यथा "कर्तुर्व्याप्यं कर्म" [ २. २. ३. ] इत्यत्र तथाऽत्रापीत्यर्थः, अयं च व्याख्यातप्रायः। कर्तुः कर्मणश्च क्रमेणाधारं दर्शयति– **कटे आस्ते** इत्यादि। एतदेव भावयति– **चैत्रे**त्यादिना– चैत्रे कर्तर्यासिक्रिया समवेतेत्यर्थः, तण्डुलेषु कर्मसु विक्लेदनक्रिया, विशेषेण स्फुटो भेदोऽवयवानामुच्छूनतालक्षणोऽत्र **विघटन**शब्देनाभिधीयते। यद्येवं क्रियाऽऽश्रयस्योपकारकत्वात् क्रियासिद्धौ व्यापाराभावात् कारकत्वा-

भावात् संज्ञाया अभावः, उच्यते– क्रियाऽऽश्रयस्य धारणद्वारेण क्रियासिद्धावुपकारकत्वात् कारकत्वाददोषः; तदुक्तम्—

“ कर्तृ-कर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ, शास्त्रेऽधिकरणं स्मृतम् ” ॥ १ ॥

अत एवोक्तं– **हेतुत्वं प्रतिपद्यत** इति । अधिकरणभेदानाह– **तत् षोढे**त्यादि । **अनन्यत्र भाव** इति– यथा चक्षुरादिप्रवृत्तीनामन्यत्राभावाचक्षुरादीनां रूपादयो विषयाः, ते हि तत्र वि(तत्राव)सी(धी)यन्ते, नान्यत्र भवन्तीत्युच्यन्ते, एवं देवादीनामन्यत्र प्रवृत्त्यभावाद् दिवादयो विषया इति । “ तस्मै योगादेः शक्ते ” [ ६. ४. ९४. ] इतीकणि– **वैषयिकम्** । **औपश्लेषिकमि**ति– अध्यात्मादित्वादिकण्, कटादेर्देवदत्तादिना एकदेशमात्रसंयोगस्य सम्भवादौपश्लेषिकम् । **यस्याधेयेने**ति– यस्य तैलादिना समस्तावयवानां व्याप्तिः– संयोगसमवायलक्षणा, संयोगशब्दस्य सम्बन्धमात्रवाचकत्वादित्यर्थः । सा च व्याप्तिराधाराऽऽधेययोः समानेति द्वयोः कर्तृत्वमविशिष्टमित्याह– **तद्वी**त्यादि– तद् अधिकरणमित्यर्थः, कर्मणि कर्तरि वा णके– तिलादेरेवाधिकरणत्वमिति । **तिलेषु तैलमि**त्यादि– अत्र तिलावयवास्तैलाद्यवयवान् व्याप्याऽवतिष्ठन्ते, तैलाद्यवयवा वा तिलाद्यवयवानिति । अनवयवस्यापि गोत्वादेः व्यक्त्याद्यवयवान् व्याप्यावतिष्ठमानस्य व्यक्त्यादिरभिव्यापक एवाऽऽधारः– **गवि गोत्वं, तन्तुषु पट** इति, क्रियाया अश्रवणेऽपि प्रतीयमानक्रियाऽपेक्ष आधारः । **यदाधेयसन्निधिमात्रेणे**ति– सन्निधिः– अदूरदेशावस्थितिः, तन्मात्रेणेति, संयोग-समवायावत्राऽप्रयोजकावित्यर्थः । **सामीप्यकमि**ति– भेषजादित्वात् स्वार्थिकष्ट्यण्, ततो यावादित्वात् कः । **गङ्गाया घोष** इत्यादीति– नन्वाश्रय आधारो भवति, आश्रयश्च संयोग-समवायाभ्यां, न चावस्थितिक्रियाश्रयेण घोषादिना गङ्गादेः संयोग-समवायौ स्तः, नैष दोषः– यदायत्ता हि यस्य स्थितिः स विनाऽपि संयोग-समवायौ तस्याश्रयो भवति, तथाहि– यथा– पुरुषस्य न राज्ञा सह संयोग-समवायौ स्तः, अथ च तदधीनस्थितित्वाद् राजाश्रयः पुरुष इति लोके व्यपदिश्यते, घोषादीनां च गङ्गाद्यायत्ता स्थितिरिति सन्निधिमात्रेण क्रियाहेतुत्वाद् युक्तो गङ्गादीनामाश्रयभावः यदा तु गङ्गादिशब्देन तत्समीप एव देशोऽभिधीयते तदा औपश्लेषिक एवाधार इति । **नैमित्तिकमि**ति– विनयादित्वात् स्वार्थिक इकण् । **युद्धे सन्नह्यत** इत्यादि– अत्र हि सन्नहनादीनां युद्धादिनिमित्तानां विवक्षितत्वाद् युद्धादिर्नैमित्तिकमिति आधारो भवति, सन्नहनादयस्त्वन्यत्रापि केनचिन्निमित्तेन सम्भवन्तीति न युद्धादिर्वैषयिकः । अन्यत्रावस्थितस्यान्यत्राध्यारोप उपचारस्तत्र भवम्– **औपचारिकमि**ति– आध्यात्मिकत्वादिकण् । **अङ्गुल्यग्रे करिशतमि**त्यादि– अत्र हि करिशतादीनामन्यत्रावस्थितानां केनापि प्रयोजनादिनाऽङ्गुल्यग्रादावध्यारोप्यमाणानामङ्गुल्यग्रादिरौपश्लेषिकाद् भिन्न औपचारिक आधार उच्यते, यदा त्वङ्गुल्यग्रादिशब्देनोपचारादाधेयाधिष्ठितो देश एवोच्यते तदा औपश्लेषिक एवाधारः । अत एवाहुः–

“ आधारस्त्रिविधो ज्ञेयः, कटाऽऽकाश-तिलादिषु ।
औपश्लेषिको वैषयिकोऽभिव्यापक एव च ” ॥

॥ छ ॥ २. २. ३० ॥

---

**न्या० स०—क्रियाऽऽश्रयस्य०** । आश्रीयत इत्याश्रयः “ भूश्यद० ” [ ५. ३. २३. ] इत्यलि, क्रियाया आश्रय क्रियाश्रयः, क्रियासम्पादक इत्यर्थः । आश्रियेते अवतिष्ठेते क्रियाश्रयौ कर्तृ-कर्मणी अस्मिन्निति “ न्यायावाय० ” [ ५. ३. १३४. ] इत्यादिना घञि– आधारः । **विघटनक्रियाया**मिति– विघटनमवयवानामुच्छूनता । **हेतुत्वं प्रतिपद्यत** इति– यदुक्तं—

“ कर्तृकर्मव्यवहितामसाक्षाद्धारयद् क्रियाम् ।
उपकुर्वद् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ” ॥ १ ॥

विषयाय प्रभवति “ तस्मै योगादेः शक्ते ” [ ६. ४. ९४. ] इतीकणि– **वैषयिकम्** । **औपश्लेषिकमि**ति– “ अध्यात्मादिभ्य इकण् ” [ ६. ३. ७८. ] । **गवि गोत्वमि**ति– अनवयवस्यापि गोत्वादेर्व्यक्त्याद्यवयवान् व्याप्याऽवतिष्ठमानस्य व्यक्त्यादिरभिव्यापक एवाधारः । **सामीप्यकमि**ति– भेषजादिष्ट्यणन्तात् स्वार्थे कः । नन्वाश्रय आधारो भवति, आश्रयश्च संयोग-समवायाभ्यां भवति, न चावस्थितिक्रियाश्रयेण घोषादिना गङ्गादेः संयोग-समवायौ स्तः, नैष दोषः– यदायत्ता हि यस्य स्थितिः स विनाऽपि संयोग-समवायौ तस्याश्रयो भवति, यथा– राजपुरुष इत्यत्र न राज्ञा सह संयोग-समवायौ स्तः, अथ च तदधीनस्थितित्वाद् राजाश्रय पुरुष इति लोके व्यपदिश्यते । **नैमित्तिकमि**ति– अत्र “ विनयादिभ्यः ” [ ७. २. १६९. ] इतीकण् । **युद्धे सन्नह्यत** इति– सन्नहनादयोऽन्यत्रापि केनचिन्निमित्तेन सम्भवन्तीति न युद्धादिर्वैषयिकः । **औपचारिकमि**ति– अत्र “ अध्यात्मादिभ्य इकण् ” [ ६. ३. ७८. ], अन्यत्रावस्थितस्यान्यत्राध्यारोप उपचारः । **अङ्गुल्यग्रे करिशतमि**ति– अत्र हि करिशतादीनामन्यत्रावस्थितानां केनापि प्रयोजनादिनाऽङ्गुल्यग्रादावध्यारोप्यमाणानामङ्गुल्यग्रादिरौपश्लेषिकाद् भिन्न औपचारिक आधार उच्यते, यदा त्वङ्गुल्यग्रादिशब्देनोपचारादाधेयाधिष्ठितो देश एवोच्यते तदा औपश्लेषिक एवाधारः; अत एवाह—

“ आधारस्त्रिविधो ज्ञेयः कटा-ऽऽकाश-तिलादिषु ।
औपश्लेषिको वैषयिकोऽभिव्यापक एव च ॥ १ ॥ ”

अक्ष्णोः प्रतिवसतीति– यथा अक्षिस्थं तृणादि दुःखकारि तथा द्वेष्योऽपीत्यर्थः ॥ २. २. ३०. ॥

## नाम्नः प्रथमैक-द्वि-बहौ । २ । २ । ३१ ॥

त० प्र०—एकत्व-द्वित्व-बहुत्वविशिष्टेऽर्थे वर्तमानान्नाम्नः परा यथासंख्यं 'सि-ओ-जस्' लक्षणा प्रथमा विभक्तिर्भवति । कर्मादिशक्तिषु द्वितीयादिविभक्तीनां विधास्यमानत्वादिह विशेषानभिधानाच्च परिशिष्टेऽर्थमात्रे प्रथमेति विज्ञायते । तत्र द्वितीयादिविनिर्मुक्तः स्वार्थ-द्रव्य-लिङ्ग-संख्या-शक्तिलक्षणोऽसमग्रः समग्रो वा पञ्चको नामार्थोऽर्थमात्रम्, तेषु शब्दस्यार्थे प्रवृत्तिनिमित्तं स्वरूप-जाति-गुण-क्रिया-द्रव्य-सम्बन्धादिरूपं त्व-तलादिप्रत्ययाभिधेयं स्वार्थः, स च भावो विशेषणं गुण इति चाख्यायते– डित्थः, डवित्थः, गौः, अश्वः, शुक्लः, कृष्णः; कारकः, पाचकः, दण्डी, विषाणी, राजपुरुषः, औपगवः, गार्ग्याः, पञ्चालाः; यत् पुनरिदं-तदित्यादिना वस्तूपलक्षणेन सर्वनाम्ना व्यपदिश्यते, स्वार्थस्य व्यवच्छेद्यं लिङ्ग-सङ्ख्या-शक्त्याद्याश्रयः सत्त्वभूतं तद् द्रव्यं विशेष्यमिति चाख्यायते– इयं जातिः, अयं गुणः, इदं कर्मेति; यदर्थे सदसद् वा शब्दत एवावसीयते तत् स्त्यानादिसंस्कार हेतुः स्त्री पुमान् नपुंसकमिति लिङ्गम्– स्त्री, पुमान्, नपुंसकम्, पट्वी, खट्वा, युवतिः; यस्यामेकवचन-द्विवचन-बहुवचनानि भवन्ति सा भेदप्रतिपत्तिहेतुरेकत्वादिका सङ्ख्या– एकः, द्वौ, बहवः; वृक्षः, वृक्षौ, वृक्षाः,

" निमित्तमेक इत्यत्र विभक्त्या नाभिधीयते ।
तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते " ॥ १ ॥

यस्यां स्यादिभिरनभिहितायां द्वितीयाद्या व्यतिरेकविभक्तयः षष्ठी च भवति, सा स्वपराऽऽश्रयाऽऽश्रितक्रियोत्पत्तिहेतुः कारकरूपा तत्पूर्वकसम्बन्धरूपा च शक्तिः, सा चाभिहिताऽर्थमात्रम्– क्रियते कटः, कृतः कटः, पचति चैत्रः, स्नानीयं चूर्णम्, दानीयो ब्राह्मणः, गोघ्नोऽतिथिः, प्रस्रवणो गिरिः, भयानको व्याघ्रः, स्थानीयं नगरम्, गोदोहनी पारी, गोमान् मैत्रः, चित्रगुश्चैत्रः । अर्थमात्रं चोपचरितमपि, यथा साहचर्यात्– कुन्ताः प्रविशन्ति, छत्रिणो गच्छन्ति; स्थानात्– मञ्चाः क्रोशन्ति; गिरिर्दह्यते; तादर्थ्यात्– इन्द्रः स्थूणा, प्रदीपो मल्लिका; वृत्तात्– यमोऽयं राजा, कुबेरोऽयं राजा; मानात्– प्रस्थो व्रीहिः, खारी मुद्गाः, धरणात्– तुला चन्दनम्; सामीप्यात्– गङ्गातटं गङ्गा; योगात्– रक्तः कम्बलः; साधनात्–अन्नं प्राणाः, आयुर्घृतम्; आधिपत्यात्– ग्रामाधिपतिर्ग्रामः । अलिङ्गमपि– त्वम्, अहम्, पञ्च, षट्, कति; अलिङ्ग-सङ्ख्यमपि– उच्चैः, नीचैः, स्वः, प्रातः; शक्तिप्रधानमपि– यतः, यत्र, यथा, यदा; द्योत्यमपि– प्रपचति, प्रतिष्ठते, प्रतीक्षते, प्रतिपालयति; स्वरूपमात्रमपि– अध्यागच्छति, पर्यागच्छति, प्रलम्बते, निषिञ्चति । तदयं वस्तुसंक्षेपः– स्याद्यन्तपदसामानाधिकरण्ये प्रथमेति, यत्रापि स्याद्यन्तं पदं न श्रूयते– वृक्षः, प्लक्ष इति, तत्रापि गम्यते, यदाह– 'यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते' इति । नाम्न इति किम्? निरर्थकाद् वर्णाद् धातुवाक्याभ्यां च मा भूत् । एक-द्वि-बहाविति च सङ्करनिवृत्त्यर्थम् । ननु चाव्ययेभ्य एकत्वाद्यभावादनेन प्रथमा न प्राप्नोति, सत्यम्– लुब्विधानात् तु विभक्तीनां विधिर्विज्ञायते तदन्तर्गतत्वाच्च प्रथमाया अपि, तस्य च फलम्– अथो स्वस्ते गृहम्, अथो स्वस्तव गृहमित्यादिषु " सपूर्वात् प्रथमान्ताद् वा " [ २. १. ३२. ] इति विभाषया 'ते– मे' आदेशौ, पदसंज्ञा च " अव्ययस्य " [ ३. २. ७. ] इत्यत्र वक्ष्यते । एक-द्वि-बहावित्यादिविभक्तिविधानादिति ॥ ३१ ॥

श० न्या०—नाम्न० । 'मर्यादाभिविधौ' इतिवत् '**एक-द्वि-बहौ**' इति कर्मधारयात् सप्तमी । अर्थवच्छब्दरूपं नाम । अर्थश्च द्विविधो– जातिर्द्रव्यं च, तत्र जातेर्नामार्थत्वे तस्या एकत्वाद् द्वित्वबहुत्वासम्भवात् तत्सहचरितद्रव्यगतं द्वित्वं बहुत्वं चाश्रयणीयम्, ततश्च वृक्ष इत्यत्राप्यवगतबहुत्वसद्भावाद् बहुवचनप्रसङ्गः । अस्तु तर्हि द्रव्यं नामार्थः, तत्राभिधेयगतमेव बहुत्वमाश्रीयते, वृक्षशब्दस्य त्ववयवी वाच्यो न त्ववयवा इति बहुत्वाप्रसङ्गः । आकृतिपक्षेऽप्यदोषः, प्रत्यासत्त्या तदाधारद्रव्यगतं द्वित्वं बहुत्वं चाश्रीयते, न त्ववयवगतं जातेरवयवेष्वनाश्रितत्वात्, दारा इत्यादौ त्ववयवाऽवयविनोरभेदविवक्षायां बहुत्वमाकृत्याधारगतमेवेति बहुवचनं वाच्यम् । ननु द्रव्येऽपि नामार्थे विशेषाभावादर्थशब्दस्य वस्तुपर्यायस्यापि सम्भवात् 'वृक्षः, प्लक्षः' इत्यत्रापि बहुवचनप्रसङ्गः, बहवस्तेऽर्थाः– मूलं स्कन्धः फलं पलाश[म्] इति; एवं तर्हि शब्दसंज्ञा एता येष्वर्थेषु स्यादयो विधीयन्ते तेषु एकद्विबहुषु, केषु च स्यादयो विधीयन्ते? [ अत्र भाष्यम्–कर्मादिषु, न वै कर्मादयो विभक्त्यर्थाः, के तर्हि? एकत्वादयः, ] एकत्वादिषु; न च स्कन्ध-शाखा-फल-फलाशादिरूपेणानेकत्वेऽपि वृक्षादिशब्दरूपं तथाऽऽचष्टे इति न तस्य सा संख्येति बहुवचनं न भवतीति मनस्याधायाह– **एकत्वद्वित्वबहुत्वविशिष्टेऽर्थे वर्तमानाद्**िति । यद्येवम् 'एक-द्वि-बहौ' इति प्रकृत्यर्थविशेषणत्वात् कः प्रत्ययार्थः?, त एवेति ब्रूमः * अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति * इति; तथाहि– पञ्चको नामार्थः, दधि पश्य, पयः पयो रज(जरय)ति, वासो वासच्छादयतीत्यादौ विभक्तिश्रवण-

मन्तरेणापि पञ्चाप्यर्थाः स्वार्थादयः प्रतीयन्ते, विभक्तयस्तु क्वचित् द्योतकत्वेनापेक्ष्यन्ते; तत् सिद्धमेतत्– कर्माद्येकार्थसमवेत एवैकत्वादौ एकवचन-द्विवचन-बहुवचनानि भवन्ति, न त्ववयवगते । यद्येवं स तर्हि तथा निर्देशः कर्तव्यः, नह्यन्तरेण भावप्रत्ययं गुणप्रधानो निर्देशो भवति, ततश्च ' इत्येके मन्यन्ते, तदेके मन्यन्ते ' इत्यत्रैकवचनं प्राप्नोति, यतो नामार्थ एकत्वमप्यत्रास्ति बहुत्वं च, एकद्विबहावित्यत्र च विशेषानुपादानाद् यावान् कश्चिदेकशब्दवाच्योऽर्थस्तस्य ग्रहणेन भाव्यम्' तत्रैकवचनप्रसङ्गः, अथात्र परत्वात् बहुवचनमेवेति, एवं तर्हि बहुरोदनो बहुः सूप इति विशेषानुपादानाद् वैपुल्यरूपस्यापि बहुत्वस्य ग्रहणात् परत्वाद् बहुवचनप्रसङ्गः, नैष दोषः– "अन्तरेणापि भावप्रत्ययं गुणस्य गुणिविशेषकत्वेनोपादानाद् गुणगुणिनोरभेदोपचारात् सामानाधिकरण्याद् गुणप्रधाननिर्देशस्य सम्भवात्, यथा– पटः शुक्ल इति, " (?) [ अत्र भाष्यम्–अन्तरेणापि भावप्रत्ययं गुणप्रधानो निर्देशः, कथम् ? इह कदाचिद् गुणो गुणिविशेषको भवति ' पटः शुक्लः ' इति, कदाचिद् गुणिना गुणो व्यपदिश्यते ' पटस्य शुक्लः ' इति, तद् यदा तावद् गुणो विशेषको भवति ' शुक्लः पटः ' इति तदा सामानाधिकरण्यं गुणगुणिनोः, तदा नान्तरेण भावप्रत्ययं गुणप्रधानो निर्देशो भवति । ] यदा तु गुणिना गुणो व्यपदिश्यते– पटस्य शुक्ल इति, तदा स्वप्रधानो गुणो भवतीति द्रव्ये व्यतिरेकविभक्तिः षष्ठी, आधारविवक्षायां तु सप्तम्यपि, यथा– कर्मणि या संख्येति, कर्मादिभिरेकत्वादीनां विशेषणाद् विनापि भावप्रत्ययं गुणप्रधाननिर्देशप्रतीतिरिति । अथैवं बहुत्वस्यैकत्वात् सर्वदा बहाविति भाव्यं, कथं " बहुषु बहुवचनम् " [ पाणि० १. ४. २१. ] इति प्रयोगः ?, उच्यते– आश्रयगतं बहुत्वं बहुत्वे गुणे आरोप्य निर्देशाददोषः । तथा ' इत्येके मन्यन्ते ' इत्यत्रान्यार्थवृत्तेर्ग्रहणादेकवचनप्रसङ्गोऽपि न वाच्यः, एकशब्दस्याऽन्याऽसहाय-संख्या-प्रथमा-ऽन्य-प्रधान-साधारणार्थवृत्तित्वेनानेकार्थत्वार्थत्वात्, तथाहि– सर्वमदोयन्त [ ' सधमादो द्युम्न ' इति भाष्ये ] एकास्ताः, एकाः– अन्या इत्यन्यार्थवृत्तिः; एकव्यञ्जनम्, एकाकिभिः क्षुद्रकैर्जितमित्यादावसहायवृत्तिः, एको द्वौ बहव इति संख्यावृत्तिरित्यादि; बहुशब्दश्च विपुलार्थवृत्तिरपि, एतच्च [ एवं च ] एक-द्वि-बहावित्यत्र संख्यार्थवृत्तिना द्विशब्देन साहचर्यादेक-बहुशब्दावपि तदर्थवृत्ती [ गृह्येते ], प्रसिद्धथा च संख्येयार्थत्वमेकादीनामष्टादशान्तानामुच्यते– "आ दशभ्यः संख्या संख्येये वर्तते " इति, अन्यथा च " द्वयेकयोर्द्विवचनैकवचने " [ पाणिनि–१. ४. २२. ] इति समुदायस्य त्र्यर्थत्वाद् बहुवचनप्रसङ्गः, द्वित्वैकत्ववृत्तित्वे त्वेक-द्विशब्दयोर्द्विवचनमुपपन्नं भवति । ननु लौकिकादेव प्रयोगादेकत्वादिष्वेकवचनादीनां व्यवस्था भविष्यति, किमर्थमेकद्विबहाविति ? उच्यते– सामान्येन विधानाद् दृष्टाविरुद्धप्रयोगाच्च नियमार्थमिदं, तथाहि– संख्यानिर्देशमन्तरेण सामान्येन नाममात्रात् स्यादयो विधीयन्ते, धातुमात्राच्च त्यादयः । अथ शास्त्रेऽनुपात्तोऽप्यर्थः प्रयोगादेव व्यवस्थाप्यते, यतः स्यादयस्तावत् स्वार्थे विधीयमानाः ' पञ्चको नामार्थः ' इति दर्शने संख्यायां सिद्धाः, संख्याविशेषावगतिस्तु लोकात् सिद्धा, त्यादयोऽपि कर्तृ-कर्मणोर्विधीयमानाः स्वभावतः संख्यायुक्तयोरेव तयोर्वाचका भविष्यन्ति, संख्याविशेषश्च प्रयोगदर्शनादवगम्यते; एतदप्यसाधीयः– दृश्यते खल्वपि लोके विप्रयोगः [ विरुद्धः प्रयोगः ] तद्यथा– 'अक्षीणि मे दर्शनीयानि, पादा मे सुकुमारतराः ' इति द्वित्वेऽपि लोके बहुवचनं दृश्यत इति व्यतिकरः प्राप्नोति, अव्यतिकरश्चेष्यते, तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थमिदम्, यतो वक्ष्यते– **एक-द्वि-बहाविति च सङ्करनिवृत्त्यर्थमि**ति । न चैवं ब्राह्मण( णाः ) सङ्घ इत्यत्र ब्राह्मणसङ्घरूपस्यार्थस्य ब्राह्मणरूपेण बहुत्वात् सङ्घरूपेण चैकत्वात् संख्याद्वययोगात् वचनव्यतिकरप्रसङ्ग इति वाच्यम्, भिन्नपदवाच्यत्वेन भिन्नार्थत्वात् तयोः, नहि ब्राह्मणरूपेण सङ्घपदं तमर्थमाचष्टे, सङ्घरूपेण वा ब्राह्मणपदम्, भिन्न एव पदार्थः, तदेकत्वं पदद्वयगम्यं वाक्यार्थ इति शब्दार्थभेदान्नेतरसंख्येतरस्येति न वचनव्यतिकरः । एक-द्वि-बहाविति नाम्नो विशेषणत्वादविशेषेण प्रथमाया विधानात् कर्माद्येकत्वेऽपि प्रसङ्ग इत्यत आह– **कर्मादिशक्तिष्वि**ति । **परिशिष्टे** उद्धृते इत्यर्थः । तदेव परिशिष्टमर्थमाचष्टे– **तत्र द्वितीयादिविनिर्मुक्त** इत्यादि । तत्र पञ्चकस्य नामार्थस्योक्तक्रमेण लक्षणमाचष्टे– **तेष्वि**त्यादि । **स्वार्थ** इति– स्वस्यैवार्थः स्वार्थो विशेषणमसाधारणोऽर्थः, **प्रवृत्तिनिमित्तमि**ति– यतः शब्दस्य प्रवृत्तिस्तदुच्यते । यदा हि स्वरूपान्तरानुपादानः शब्दः स्वाभिधेये प्रवर्तते, तदा सोऽयमित्यभिसम्बन्धेन शब्दस्वरूपविशिष्टस्यैवार्थस्य प्रतीतेः शब्दस्वरूपमेव स्वार्थो, विशेष्यं तु द्रव्यं, यथा– **डित्थ** इत्यादि । जातिरनुवृत्तिप्रत्ययहेतुः यथा– **गौरि**त्यादि । अत्र तद्विशिष्टस्य द्रव्यस्य प्रतीतेर्जातिः स्वार्थः । गुणः– शुक्लादिः, शुक्लपट इत्यादौ तद्विशिष्टस्य द्रव्यस्य प्रतीतेर्गुणः स्वार्थः । **कारकः** इत्यादौ क्रियाविशिष्टद्रव्यावभासमानात् क्रिया स्वार्थः, क्रियाविशिष्टसम्बन्धो वा । द्रव्यमपि यदा द्रव्यान्तरस्य विशेषणभूतं भवति– यष्टीः प्रवेशय, कुन्तान् प्रवेशयेति, तदा यष्ट्यादि द्रव्यं विशेषणभावापन्नं स्वार्थः, द्रव्यान्तरं विशेष्यभावापन्नं पुरुषादि तु द्रव्यम् । क्वचित् सम्बन्धोऽपि स्वार्थः, यत्र सम्बन्धनिमित्तः प्रत्ययो यथा– **दण्डी**,

**विषाणी,** अत्र हि दण्ड-विषाणयोः सम्बन्धः स्वार्थः । आदिशब्दाद् राजपुरुषादावप्युन्नेयमित्युदाहरति- [ **राजपुरुष** इत्यादि ] । **गर्गाः पञ्चालाः** इति- एतावानत्र विशेषः- बह्वयादावुपचाराद् द्रव्यान्तरप्रतीतिरत्र तु प्रत्ययलुपेति । स्वार्थश्च शास्त्रान्तरे भाव इति विशेषणमिति गुण इति चोच्यत इत्युक्तं- **स चे**त्यादि । द्रव्यं व्याचष्टे- **यत् पुन**रित्यादि । **वस्तूपलक्षणेने**ति- इदं-तदित्यादिचिह्नेन वस्तु ज्ञायत इत्यर्थः । **स्वार्थस्य व्यवच्छेद्यमि**ति- स्वरूपादिलक्षणस्य स्वार्थस्य विशेषणत्वात् तस्य च व्यवच्छेदकत्वात् तेन कर्तृभूतेन व्यवच्छिद्यत इत्यर्थः । लिङ्ग-संख्या-शक्तयो वक्ष्यमाणलक्षणाः, आदिशब्दात् स्वरूपादिः, तद्धर्मत्वात् तेषां द्रव्यमाश्रयो भवति । लिङ्गं व्याचष्टे- **यदर्थे** इत्यादि- अर्थे- शब्दाभिधेयेऽवादौ- **ङ्याबादिसंस्कारहेतु**रिति- तेन हेतुभूतेन ङ्याबादिना शब्दस्य संस्कारः क्रियत इत्यर्थः । संख्यामाह- **यस्यामि**त्यादि । **भेदप्रतिपत्तिहेतु**रिति- तथा हि पदार्थानां भेदः प्रतीयते; भेदपरिगणनलक्षणत्वात् तस्याः । ननु नामार्थव्यतिरेकेणान्येषामेकत्वादीनां विशेषणभूतानामभावादेक इत्यादौ प्रथमाया अभावः, अत्रोच्यते- एकत्वादिष्वपि व्यतिरिक्ता एकत्वादयः सन्ति, एतदेवाह- **निमित्तमेक** इत्यादि- यथा शतमित्यत्र प्रवृत्तिनिमित्तं शतसङ्ख्याऽन्या, अन्या च विभक्तिवाच्या नामार्थगतैकत्वसंख्या, तथैक इत्यत्रापि प्रवृत्तिनिमित्त-विभक्तिवाच्ये द्वे एकत्वे, तत्र तदभिधानाय प्रथमा भविष्यति । एवं शब्दशक्त्याश्रयेणैकत्वादिभेदेन प्रथमोक्ता, अभेदेऽपि दोषाभावः, यत उभयवचना एते- द्रव्यं चैवाहुर्गुणं च, तत्र गुणोपसर्जनं द्रव्यमभिधीयते नाम्ना, द्रव्योपसर्जनस्तु गुणो विभक्त्या, यथा- शौक्ल्यमिति, गुणोपसर्जनद्रव्याभिधायिनः शुक्लशब्दाद् द्रव्योपसर्जने तस्मिन्नेव गुणे भावप्रत्ययः, तदेवं यस्मिन् द्रव्ये स्थित एकत्वादिगुणस्तस्य द्रव्यस्यानुक्ता एकत्वादयः प्राधान्येन तदभिधानाय प्रथमा भविष्यति । अथवा संख्या नामेयं परप्रधाना, संख्येयमनया विशेष्यम्, यदि च प्रथमा न स्यात् संख्येयमविशेषितं स्यात्, केवलस्य नाम्नः प्रयोगाभावात् प्रथमाया अभावे एकादिशब्दानुच्चारणात् । अथवा ' प्रत्ययपरैव प्रकृतिः प्रयोज्या न केवला ' इत्येवंरूपात् समयाद् भविष्यति, अन्या अपि कस्मान्न भवन्तीति न वाच्यं, कर्मादीनामभावात् ' कर्मण्येव द्वितीया ' इत्येवं द्वितीयादीनां नियतत्वात्, एवं तर्हि षष्ठी प्राप्नोति, कर्माद्यभावो हि शेषः, अशेषत्वान्न भविष्यति, उपयुक्तादन्यो हि शेषो नामार्थस्य च प्रथमाविधावुपयोगात् तस्य चाव्यतिरिक्तस्येह सद्भावात्, वचनव्यतिकरप्रसङ्गोऽपि नास्ति सामर्थ्याद् व्यवस्थासिद्धेः, एक इत्यत्रैकमेवैकत्वं, तच्च नामार्थेनाभितमित्यप्राप्ता प्रथमा समयवशेन प्राप्यते, तत्र यथा समयश्च पालितो भवति, एकत्वानुगुणं चान्यत्राभिधाने दृष्टसामर्थ्यं वचनं भवति, तथा कर्तव्यमिति । शक्तिस्वरूपं लक्षयति- **यस्यामि**त्यादि, **त्यादिभिरि**ति- तिशब्देन तिवादय आख्यातप्रत्ययाः, आदिशब्देन च कृत्-तद्धित-समासा उच्यन्ते, तैरनुक्तायामित्यर्थः, **व्यतिरेकविभक्तय** इति- आधिक्यविभक्तय इत्यर्थः, [ **स्वपराश्रये**ति- ] तत्र कर्तृकर्मशक्ती स्वाश्रयगतक्रियोत्पत्तिहेतुभूते अपि, अन्यास्तु करणादिशक्तयः पराश्रयगतक्रियोत्पत्तिहेतुभूता एव, **तत्पूर्विके**ति- क्रियाकारकपूर्विकेत्यर्थः । **सा चे**ति- [ दर्शिता शक्तिः पुनः ] **अभिहिता** निर्दिष्टा उक्ता इति यावत् । **क्रियते कट** इत्यादि- आत्मनेपदादिभिः कर्मादिशक्तीनामभिहितत्वादर्थमात्रत्वात् तत्र सर्वत्र प्रथमेति । **स्नानीयमि**त्यादि- बहुलवचनात् करणसम्प्रदानयोरनीयः, तत एव सम्प्रदाने टकि- **गोघ्नः । प्रस्रवण** इति- प्रस्रवत्यस्मादिति " भुजिपत्यादिभ्य० " [ ५. ३. १२८. ] इत्यपादानेऽनट् । बिभेत्यस्मादिति विग्रहे " शीभीराजेः० " [ उणा. ७१. ] इत्यानके- **भयानकः । स्थानीयमि**ति- बहुलवचनादधिकरणेऽनीयः; एवं- गावो दुह्यन्तेऽस्यामिति- **गोदोहनी । गोमानि**त्यत्र तु सम्बन्धरूपायां शक्तौ मतुः । **चित्रगुरि**त्यत्र समासः । **उपचरितमि**ति- अध्यारोपितमित्यर्थः, अध्यारोपश्चातस्मिंस्तदिति प्रत्ययः, स च सहचरणादिनिमित्तादनेकधा भिद्यते, यदाहुः- सहचरण-स्थान-तादर्थ्य-वृत्तमानधरण-सामीप्य-योग-साधना-ऽधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटका-ऽन्न-पुरुषेष्वतद्भावेऽपि तद्वदुपचारः । क्रमेणोदाहरति- **साहचर्यादि**त्यादिना । **' अहम्, पञ्च, कति '** इत्येषामलिङ्गत्वं " नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः " [ लिङ्गानुशासन० ] इत्यनुशासनात् । **अलिङ्गसङ्ख्यमपी**ति- सर्वलिङ्गसङ्ख्यास्वेकरूपत्वात्, उच्चैःप्रभृतीनामर्थमात्रे विशिष्टलिङ्गसंख्याभ्यामयोगादलिङ्गसंख्यमित्यर्थः । तसादिभ्योऽपादानादिशक्तीनां प्रतीयमानत्वाद् ' यतः ' इत्यादेरर्थमात्रे शक्तिप्रधानं भवतीत्याह- **शक्तिप्रधानमि**त्यादि । **द्योत्यमपी**ति- प्राग्उपसर्गाणां क्रियार्थद्योतकत्वादन्यथोपसर्गत्वाभावात् तदर्थमात्रं द्योत्यमेवेति । **स्वरूपमात्रमपी**ति- सोपसर्गानुपसर्गधात्वर्थस्याध्यादिभिर्वैशिष्ट्यप्रतीतेः ' आगच्छति ' इत्यादिक्रियापदार्थ एव तदर्थ इत्यर्थः । नन्वर्थमात्रे प्रथमेत्युक्तत्वान्मात्रग्रहणस्य चाधिकार्थव्यवच्छेदकत्वाद् वीर(रः) पुरुष इत्यादौ सामानाधिकरण्यात् पदार्थमात्राद् विशेषणविशेष्यभावस्याधिकस्य प्रतीतेः प्रथमा न प्राप्नोति, समासविधानमपि प्रथमोत्पत्तेर्लिङ्गं न भवति, वीरं पुरुषमानयेति द्वितीयान्तानामपि समास-

सम्भवादिति प्रथमा विधेया, नैष दोषः– आधिक्यस्य वाक्यार्थत्वाद् वीरनाम्नोऽनपेक्षितशब्दान्तरार्थसंसर्गोपहितविशेषणभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते; एवं- पुरुषशब्दादपि, पश्चादाकाङ्क्षादिवशेन विशेषणविशेष्यभावावगतिरूपजायमाना बहिरङ्गत्वादन्तरङ्गं पदसंस्कारं पूर्वप्रवृत्तं बाधितुं न शक्नोतीति सिद्धा प्रथमेति । अथवा त्यादि-कृत्-तद्धित-समासैरभिहितायां कर्त्रादिशक्तौ प्रथमेत्युक्तम्, ततश्च वीरपुरुष इत्यत्रार्थाधिक्येऽप्यभिहितत्वमात्राश्रया प्रथमेति। यद्येवं ' प्रासादे आस्ते ' इत्यत्रापि सदिक्रियाऽऽसिक्रियाद्वयसाधनाधिकरणशक्तिद्वयसद्भावादासिप्रत्ययेनानभिहितेऽप्यधिकरणे एकस्याः शक्तेरभिहितत्वात् तदाश्रया प्रथमा प्राप्नोति, उच्यते– गुणक्रियया अधिकरणशक्तेरभिहितत्वेऽपि प्रधानक्रियाऽनभिहिताऽधिकरणशक्त्यपेक्षया प्रधानानुयायित्वाद् व्यवहाराणां सप्तम्येव भवति । तस्मात् स्थितमेतत्– ' त्यादिसमानाधिकरणे प्रथमा ' इत्यमुमर्थं हृदि निश्चित्याह– **तदर्थं वस्तुसंक्षेप** इत्यादि । **भवन्ती**शब्देन पूर्वाचार्यप्रसिद्धया वर्तमानाऽभिधीयते । ननु वर्णस्य निरर्थकत्वाद् धातुवाक्यार्थयोश्चासत्त्वरूपत्वात् संख्यायाः सत्त्वधर्मरूपत्वेन तद्रूपस्याभावात् सत्त्ववाचिनो नाम्न एव प्रथमा भविष्यति, किं नाम्न इत्यनेन ?, उच्यते– यथा धातोरसत्त्ववाचित्वेऽपि साधनाश्रयामेकत्वादिसंख्यामाश्रित्य तिवादीनामेकवचनादीनि प्रवर्तन्ते, तथा स्यादीनामपि प्रवर्तेरन्, एवं वाक्यादप्यवयवगतां वर्णाच्च निरर्थकादपि स्वरूपगतां संख्यामाश्रित्य प्रथमा स्यादित्याह– **निरर्थका**दित्यादि । **एकद्विबहावि**ति **च संकरनिवृत्त्यर्थ**मिति– व्याख्यातप्रायम् । नन्वेकत्वादौ वर्तमानान्नाम्नः प्रथमेत्युक्तम्, अव्ययादीनां चैकत्वाद्यर्थाभावान्न ततः प्रथमा प्राप्नोतीत्याक्षिपति– **ननु चे**त्यादि । समाधत्ते– **सत्यमि**त्यादि– यदि ह्यव्ययेभ्यो विभक्तयो न स्युर्न ततः " अव्ययस्य " [ ३. २. ७. ] इति विभक्तीनां लुबुपपद्यते; यद्वा व्याकरणसूत्रेषु पद-संहिता-क्रमभेदात् त्रिधा पाठो भवति, तत्र पदपाठः पदशुद्ध्यर्थः, संहितापाठो ग्रन्थावधारणार्थः, क्रमपाठः पदशुद्ध्यर्थोऽर्थविशेषार्थश्च, तत्र क्रमपाठमाश्रित्य वाक्यस्य नानात्वे " नाम्नः प्रथमा० " [ २. २. ३१. ] इति वाक्यादव्ययेभ्योऽपि सिद्धा प्रथमेति । **तस्य चे**त्यादिनाऽव्ययेभ्यो विभक्तेः फलं दर्शयति । **पदसंज्ञा चे**ति– फलमिति सम्बध्यते । **एकद्विबहावि**ति– विभक्तिविधानं यावदेकद्विबहावित्यधिकारो द्रष्टव्यः । स्वार्थ-द्रव्य-लिङ्ग-संख्या-कर्मादिसमुदायो विभक्त्यन्तान्नाम्नः प्रतीयते, तत्र स्वार्थः- शब्दस्य प्रवृत्तिनिमित्तं विशेषणं जाति-गुण-क्रिया-स्वरूप( यादि )लक्षणं, तदाधारो– द्रव्यं विशेष्यं, एतावर्थौ नाम विभक्तिमन्तरेणापि प्रतीतेर्न व्यभिचरतीत्यपोद्धारे नाम्नः क्रियमाणेऽविप्रतिपत्तिरेतयोर्नामार्थत्वे । लिङ्गं तु किञ्चिन्नाम्न एव प्रतीयते– शरत्, दरत्, मधु, हे देवदत्त !; किञ्चित् प्रत्ययाभिव्यङ्ग्यं– कुमारी, प्रष्ठी; किञ्चिद् विभक्तिसन्निधाने एव गृह्यते– तटं, तटः, [ तटीति ] । संख्या-कर्मादयोऽपि कदाचिन्नात्र एव प्रतीयन्ते– पयस्तिष्ठति, पयः पश्यति, मधु तिष्ठति, मधु पश्यति । अतोऽत्र कामचाराभ्युपमेऽन्वाख्या कारणम्– कश्चित् संख्या-कर्मादीन् विभक्तिवाच्यान् अभ्युपगच्छति, त्रिको नामार्थ इति, कश्चित् सङ्ख्यैव विभक्तिवाच्या, चतुष्को नामार्थ इति, कश्चित् पुनः पञ्चाप्यर्था नामवाच्या विभक्तयस्तु द्योतिकाः संख्या-कर्मादीनां स्त्रीप्रत्ययाश्च लिङ्गस्येति प्रतिपन्नः; न चात्र काकदन्तपरीक्षायामादरः-किमत्र युक्तं दर्शनमिति, सर्वस्यैवापोद्धारिकस्यार्थस्य परिकल्पनारूपत्वात् । यदाह—

" वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः ।
स्याद् वा संख्यावतोऽर्थस्य, समुदायोऽभिधायकः ॥१॥" इति ।

तत्रवार्तिककार-श्लोकवार्तिककारयोः पञ्चक एव नामार्थ इति दर्शनम्, उभाभ्यां नियमार्थत्वस्योपगमात् । भाष्यकारोऽप्यनेकदर्शनोपन्यासेऽपि पञ्चकेनैव नामार्थेन व्यवहरति, यदाह– ' पञ्चक एव नामार्थोऽनेनाश्रितः ' इति; युक्तिरस्यामेव कल्पनायां दृश्यते– संख्या-कर्मादयो हि नामवाच्यस्य द्रव्यस्य धर्माः, स्वार्थोपसर्जनश्च शब्दो द्रव्य एव वर्तते, द्रव्येणैवानयननयनादिव्यवहारः, तत्र द्रव्यवाचिना शब्देन द्रव्यधर्माणामभ्यन्तरीकरणमिति नायुक्तमेतन्नामार्थत्वेन पञ्चानामभिसंधानम्, विभक्तयः स्त्रीप्रत्ययाश्च द्योतका विशेषवृत्तित्वस्येति । यदा त्वयं न्यायोऽङ्गीक्रियते–' संख्या-कर्मादयो विभक्तिवाच्याः, स्त्रियां चाभिधेयायां स्त्रीप्रत्ययः ' तदा विभक्तिमन्तरेण स्त्रीप्रत्ययेन च विना कथं संख्यादिप्रतिपत्तिः स्यात् ?- पयः पयो जरयति, शरदागतेति । नहि बभ्रुः, मण्डुः, लमक इति प्रत्ययमन्तरेणापत्यार्थे वर्तन्ते; ननु च प्रत्ययमन्तरेणापि वर्तन्ते– गर्गाः, वत्साः, बिदाः, उर्वा इति, तत्र यदि संख्या-कर्मादयो विनैव विभक्तेर्नाम्नोऽपि प्रतीतेर्नामार्थ इति व्यवस्थाप्यते, अपत्यार्थोऽपि तर्हि कदाचित् प्रकृतिमात्रादेव प्रतीयत इति सोऽपि प्रकृत्यर्थ एव स्यात्, ततश्च सर्व एव स्वार्थिकाः प्रत्ययाः प्रसक्ताः, विषम उपन्यासः– प्रकृत्यर्थात् स्वाद्यप्रकृतिवाच्यात् पितुरर्थान्तरभूतोऽपत्यार्थः पुत्रादिवाच्यो न पितुरेवासौ संख्यावद्गुणः, तत्राद्यप्रकृतिशब्दा गर्गादयो विनैव प्रत्ययैरसन्तभिन्नार्थाभिधायिनो बहुवचनविषया नित्यमनपत्या बहुत्व एव वर्तन्ते, तेषां बभ्र्वादीनामिव सोऽयमित्यभिसम्बन्धेनापत्यार्थे प्रवृत्तानामसाधुत्वे प्रयुक्ते लुपा साधुत्वमनुगम्यते– प्रत्ययमन्तरेणाप्येतेऽपत्यार्थे साधवः, सोऽयमित्यभिसम्बन्धमात्रेण

त्वपत्यप्रत्ययेन विना बभ्र्वादयो यद्यप्यपत्ये प्रयुज्येरन्, नावश्यमपत्य एव नियमो भवेद्, अनेकनिमित्तत्वात् ताच्छब्दस्य, क्वचित् तत्स्थत्वात्– मञ्चाः क्रोशन्ति, गिरिर्दह्यते; क्वचित् तात्कर्म्याद्– अब्रह्मदत्ते ब्रह्मदत्त इति तत्क्रियाचरणात्; क्वचित् सामीप्यात्– गङ्गायां घोषः, कूपे गर्गकुलम्; क्वचित् तत्साहचर्यात्– यष्टीः प्रवेशय, कुन्तान् प्रवेशयेति; उक्तं भाष्ये– चतुर्भिः प्रकारैरतस्मिन् स इति भवतीति । यथा प्रष्ठोऽयमित्यभिसम्बन्धे लिङ्गस्य स्त्रीप्रत्ययेनोपव्यक्तिमन्तरेण प्रष्ठादिषु प्रयुक्तेषु न नियमेन– जायैव प्रतीयते, तस्माच्च गर्गादयः सोऽयमित्यभिसम्बन्धेन प्रवृत्ताः, अपि तु स एवैषामर्थो बहुवचनविषयाणामिति लुपाऽन्वाख्यायते । यदाह—

“ विनैव प्रत्ययैर्वृत्तौ, ये भिन्नार्थाभिधायिनः ।
गर्गादयो लुका तेषां, साधुत्वमनुगम्यते ॥ १ ॥
सोऽयमित्यभिसम्बन्धात्, प्रत्ययेन विना यदि ।
बभ्र्वादयः प्रयुज्येरन्, नापत्यनियमो भवेत् ॥ २ ॥
सोऽयमित्यभिसम्बन्धे, लिङ्गोपव्यञ्जनादृते ।
प्रष्ठादिषु न जायैव, नियमेन प्रतीयते ॥ ३ ॥ ”

एवं यथाऽपत्यार्थः सति प्रत्यये प्रत्ययस्यैवान्वयव्यतिरेकाभ्यां दृष्ट इति प्रत्ययार्थ उपगम्यते; क्वचित् प्रत्ययमन्तरेणापि नियमेन प्रतीतेः प्रकृतिविशेषवाच्योऽपीत्यभ्युपेयते, यथा वृत्त्यन्तरेणोच्यते– गर्गापत्यम्, उपग्वपत्यम् इति । तथा संख्या-कर्मादयोऽपि यत्र विभक्त्यन्वयव्यतिरेकानुविधायिनः ‘ पयसी, पयांसि, पयसा, पयसः ’ इति प्रतीयन्ते, भवन्तु तत्र विभक्त्यर्थाः, यत्र तु तामन्तरेणापि दृश्यन्ते– ‘ पयः, पयो जरयति ’ इत्यादौ तत्र नामविशेषस्यापि संख्या-कर्मादयोऽर्था इति त्रिको नामार्थः, संख्या-कर्मादयश्च विभक्तिवाच्या एवेति प्रतिज्ञा हीयते, पञ्चके तु नामार्थे विभक्तिमर्थविशेषस्य द्योतिकां सहायमात्रमपेक्षते कदाचिन्नाम, यथा– धातुरर्थविशेषे वर्तितुमुपसर्गमिति न कश्चिदुपगतविरोधो दृश्यते ॥ छ ॥ २. २. ३१. ॥

---

**न्या० स०—नाम्नः प्रथ०। तत्रे**ति– एवं स्थिते सतीत्यर्थः । **तेष्वि**ति पञ्चकस्य नामार्थस्य क्रमेण लक्षणमाह– **जातिरि**ति– नित्यत्वैकत्वे सत्यनेकत्र समवेता जातिः, अत्र जातिलक्षणे नित्यपदाभावे पटेन व्यभिचारः, एकत्वाभावे विशेषेषु व्यभिचारः, अनेकत्राभावे परमाणौ विशेषेण व्यभिचारः । **सम्बन्धादी**ति– आदिशब्दान्नित्यद्रव्यवृत्तयोऽन्त्या विशेषा अतीन्द्रियदृष्टिगम्या योगिसंवेदनीयाः, तेऽपि स्वार्थः । **स्वार्थ** इति– स्वस्यैवार्थः स्वार्थो विशेषणमसाधारणोऽर्थः प्रवृत्तिनिमित्तमिति । **गौरि**ति– जातिरनुवृत्तप्रत्ययहेतुः, अत्र तद्विशिष्टस्य द्रव्यस्य प्रतीतेर्जातिः स्वार्थः । **शुक्ल** इति– गुणः शुक्लत्वादिः, शुक्लः पट इत्यादौ तद्विशिष्टस्य द्रव्यस्य प्रतीतेर्गुणः स्वार्थः । **गर्गा** इति– गर्गस्यापत्यानि “ गर्गादेर्यञ् ” [ ६. १. ४२. ], “ यञञो० ” [ ६. १. १२६. ] इत्यनेन लोपः । **पञ्चाला** इति– पञ्चालानां राष्ट्रस्य राजानः, पञ्चालस्य राज्ञोऽपत्यानि वा “ राष्ट्र-क्षत्रियात्० ” [ ६. १. ११४. ] अञ् । **स्वार्थस्य व्यवच्छेद्यमि**ति– अत्र कर्तरि षष्ठी, स्वार्थेन व्यवच्छिद्यते । **शक्त्याद्याश्रय** इति– आदिशब्दात् स्वरूपादिस्वार्थपरिग्रहः । **इयं जातिरि**ति– जातिर्द्रव्यमेकत्वं नित्यत्वं व्यापकत्वं च स्वार्थः । **अयं गुण** इति– तेन कर्मादिभ्यो व्यवच्छिद्यते, रूप-स्पर्श-गन्धादयो द्रव्यं गुणत्वं स्वार्थः । **इदं कर्मे**ति– तेन गुणादिभ्यो व्यवच्छिद्यते, कर्मत्वं प्रवृत्तिनिमित्तम् । **यदर्थे सदसद्वे**ति– शब्दधर्मो लिङ्गमिति मतापेक्षया । **भेदप्रतिपत्तिहेतुरि**ति– भेदो विशेषज्ञानोत्पत्तिरूपः, तया हि पदार्थानां भेदः प्रतीयते, भेदः परिगणनं संख्येति लक्षणत्वात् तस्याः । **ननु** नामार्थव्यतिरेकेणान्येषामेकत्वादीनां विशेषणभूतानामभावादेक इत्यादौ प्रथमाया अभावः प्राप्नोतीत्याह– **निमित्तमि**ति– निमित्तमेकत्वसंख्यालक्षणम्, तद्वतस्त्वेकत्वसङ्ख्यावतो यदेकत्वं तत्र विभक्तिप्रवृत्तिः, यथा वृक्ष इत्यत्र वृक्षत्ववतो द्रव्यस्यैकत्वं प्रतिपाद्यते, तथाऽत्राप्येकेन सामान्यमेकत्वं सिना त्वेकत्वसङ्ख्यावत एकत्वं प्रतिपाद्यते, यथा– सामान्यं दण्डमानय दण्डिनो दण्डमानयेति । **त्यादिभिरि**ति– तिशब्देन तिवादय आख्यातप्रत्यया आदिशब्देन च कृत्-तद्धित-समासा उच्यन्ते । **व्यतिरेके**ति– व्यतिरिच्यत इति व्यतिरेकस्तस्मिन् व्यतिरेके– नामार्थादतिरेके आधिक्ये द्वितीयाद्या विभक्तयो व्यतिरेकविभक्तयः, विशेषविभक्तय इत्यर्थः । **तत्पूर्वकसम्बन्धरूपा चे**ति[1]– ते क्रियाकारके पूर्वे यस्य स चासौ सम्बन्धश्च स एव रूपं यस्याः शक्तेः सा तथा । **स्नानीयं चूर्णमित्यादिषु** सर्वेषु बाहुलकात् करणादिष्वनीयादयः । **उपचरितमपी**ति– अध्यारोपितमित्यर्थः, सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धरण-सामीप्य-योग-साधना-ऽऽधिपत्येभ्यो ब्राह्मण-मञ्च-कट–

---

( १ ) अयमर्थः– राज्ञः पुरुष इत्यत्र योऽयं राज-पुरुषयोः सम्बन्धो नायं कारणान्तरनैरपेक्ष्येणाकस्मादुपजायते, अपि तु, अन्तर्भूतक्रियाकारकसम्बन्धनिबन्धनः, यतः पुरुषो योगक्षेमकामो राजानमुपसर्पति, राजापि तमभिलषितधनदानादिना बिभर्ति; क्रियान्तरं वा प्रकल्पनीयं, ततो राज्ञाऽसौ सम्बन्धीभूत इति राज्ञः पुरुष इति । उपगोरपत्यमित्यत्रापि जनिक्रियाजनितः सम्बन्धः– उपगुरपत्यं जनयति, तदपि ततो जायत इत्युपगोरपत्यमिति । पशोः पाद इत्यत्रापि– अवस्थितिक्रियालम्भितः सम्बन्धः, यतः पशुः पादेऽवस्थितोऽतः पशोः पाद इति । एवं वृक्षस्य शाखेत्यादावप्यवयवक्रियाजनितत्वं सम्बन्धस्येति ॥

–राज-सक्तु-चन्दन-गङ्गा-शाटका-ऽन्न-पुरुषेष्वतद्भावेऽपि तद्वदुपचारः। **छत्रिणो गच्छन्ति**– छत्रिसहचरिताः पुरुषा यान्तीत्यर्थः। **शक्तिप्रधानमपीति**– यत इत्यादिभ्योऽपादानादिशक्तीनां प्रतीयमानत्वं न शक्तिमतोऽतोऽर्थमात्रं शक्तिप्रधानम्। **द्योत्यमपीति**– प्रादुपसर्गाणां क्रियार्थद्योतकत्वाद् अन्यथोपसर्गत्वाभावात् तदर्थमात्रं द्योत्यमेवेति। **स्वरूपमात्रमपीति**– सोपसर्गा-ऽनुपसर्गधात्वर्थस्याध्यादिभिर्वैशिष्ट्याप्रतीतेः; आगच्छतीत्यादिक्रियापदार्थ एव तदर्थ इत्यर्थः। **नाम्न इति किमिति**– ननु वर्णस्य निरर्थकत्वाद् धातु-वाक्यार्थयोश्चासत्त्वरूपत्वाद् संख्यायाः सत्त्वधर्मरूपत्वेन प्रवृत्त्यभावात् सत्त्ववाचिनो नाम्न एव प्रथमा भविष्यति, किं नाम्न इत्यनेन? उच्यते– यथा धातोरसत्त्ववाचित्वेऽपि साधनाश्रयामेकत्वादिसङ्ख्यामाश्रित्य तिवादीनामेकवचनादीनि प्रवर्तन्ते तथा स्यादीनामपि प्रवर्तेरन्, एवं वाक्यादप्यवयवगतां वर्णाच्च निरर्थकादपि स्वरूपगतां सङ्ख्यामाश्रित्य प्रथमा स्यादित्याह– **निरर्थकाद् वर्णाद् धातु-वाक्याभ्यां चेति**– उपलक्षणत्वात् पदादपि। नन्वर्थमात्रे प्रथमेत्युक्तवान्मात्रग्रहणस्य चाधिकार्थव्यवच्छेदकत्वाद् वीरपुरुष इत्यादौ सामानाधिकरण्येनार्थमात्राद् विशेषणविशेष्यभावस्याधिकस्य प्रतीतेः प्रथमा न प्राप्नोति, समासविधानमपि प्रथमोत्पत्तेर्लिङ्गं न भवति, वीरपुरुषमानयेति द्वितीयाद्यन्तानामपि समाससम्भवादिति प्रथमा न विधेया, नैष दोषः– आधिक्यस्य वाक्यार्थत्वाद् वीरनाम्नोऽनपेक्षितशब्दान्तरार्थसंसर्गोपविशेषणभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते, एवं पुरुषशब्दादपि ॥ २. २. ३१. ॥

## आमन्त्र्ये। २। २। ३२॥

**त० प्र०**—प्रसिद्धतत्सम्बन्धस्य किमप्याख्यातुमभिमुखीकरणमामन्त्रणम्, तद्विषय आमन्त्र्यः; तस्मिन्नर्थे वर्तमानान्नाम्न एक-द्वि-बहौ यथासंख्यं प्रथमा विभक्तिर्भवति। हे देवदत्त!, हे देवदत्तौ!, हे देवदत्ताः!; हे पचन्!, हे पचमान!। **आमन्त्र्य इति किम्?** राजा भव, अत्र राजा नाऽऽमन्त्र्यः, किन्तु स एव विधीयत इति पूर्वेणैव प्रथमा। षष्ठीप्राप्तौ वचनम् ॥ ३२ ॥

**श० न्या०**—आमन्त्र्ये०। क्रमेण कर्म-प्रयोजन-स्वरूपैरामन्त्र्यं व्याचष्टे– **प्रसिद्धे**त्यादि– तथाहि– अभिमुखीकरणक्रियाविषयत्वात् **प्रसिद्धतत्सम्बन्धस्ये**ति कर्म, इष्टत्वात् **किमप्याख्यातु**मिति प्रयोजनम्, अव्यभिचाराद् **अभिमुखीकरणमि**ति स्वरूपम्, प्रसिद्धस्तेन– आमन्त्रणे[न] शब्देन द्रव्यस्य सह वाच्यवाचकभावलक्षणः सम्बन्धो यस्य तत् तथोक्तं तस्येत्यर्थः, शेषं सुबोधम्। नन्वामन्त्रणविषयस्य देवदत्तादेः सत्त्वभूतस्यामन्त्र्यस्यैकत्वादिसंख्यायोगात् तद्वाचिनो नाम्नः पूर्वेणैव प्रथमा भविष्यति, किमर्थमिदमारभ्यत इत्याह– **षष्ठीप्राप्तौ वचनमि**ति– आमन्त्र्यपदं हि क्रियाविशेषणं भवति– हे देवदत्त! व्रजाम्यहमिति, अत्राभिमुखीकृतदेवदत्तविशिष्टा व्रज्या प्रतीयते, यदाह हरिः–

"आमन्त्रितपदं यच्च, तत् क्रियाया विशेषकम्।
व्रजामि देवदत्तेति, निघातोऽत्र प्रतीयते" ॥ १ ॥

ततश्च देवदत्तादेः क्रियाविशेषणात् कर्माद्यतिरिक्ताऽऽमन्त्रणसम्बन्धे शेषरूपे वर्तमानाद् गौणात् प्रथमाऽपवादः षष्ठी प्राप्नोति, तद्बाधनार्थमिदमुच्यते ॥ छ ॥ २. २. ३२ ॥

**न्या० स०—आमन्त्र्ये। प्रसिद्धतत्सम्बन्धस्येति**– तेन– पाण्डित्य-देवदत्तत्वादिना प्रवृत्तिनिमित्तेन सम्बन्धः, यद्वा तेन– आमन्त्र्यवाचिना देवदत्तादिशब्देन सम्बन्धो वाच्यवाचकभावलक्षणः, प्रसिद्धस्तत्सम्बन्धो यस्य देवदत्तादेस्तस्य कर्मतापन्नस्य, येन शब्देन आत्मा निरवधानः सावधानः क्रियते तदामन्त्रणमिति स्पष्टार्थः। **तद्विषय आमन्त्र्य इति**– आमन्त्र्यपदं हि क्रियाया विशेषणं भवति; हे देवदत्त! व्रजाम्यहमित्यत्राभिमुखीकृतदेवदत्तविशिष्टा व्रज्या प्रतीयते, यदाह हरिः–

"आमन्त्रितपदं यच्च, तत् क्रियाया विशेषकम्।
व्रजामि देवदत्तेति, निघातोऽत्र प्रतीयते" ॥ १ ॥

ततश्च देवदत्तादेः क्रियाविशेषणात् कर्माद्यतिरिक्तामन्त्रणसम्बन्धे शेषरूपे वर्तमानाद् गौणात् प्रथमापवादः षष्ठी प्राप्नोति तद्बाधनार्थमिदमुच्यते, सम्बन्धश्चामन्त्र्यामन्त्रणभावो विषयविषयिभावो वा ॥ २. २. ३२. ॥

## गौणात् समया-निकषा-हा-धिगन्तरा-ऽन्तरेणा-ऽति-येन-तेनैर्द्वितीया। २। २। ३३॥

**त० प्र०**—आख्यातपदेनासमानाधिकरणं गौणम्, गौणान्नाम्नः समयादिभिर्निपातैर्युक्तादेक-द्वि-बहौ यथासङ्ख्यम् अमौशस्रूपा द्वितीया विभक्तिर्भवति; षष्ठ्यपवादः। समया पर्वतं नदी, निकषा पर्वतं वनम्, हा देवदत्तं वर्धते व्याधिः, धिग् जाल्मम्, अन्तरा निषधं नीलं च विदेहाः, अन्तरेण गन्धमादनं माल्यवन्तं चोत्तराः कुरवः, अन्तरेण धर्मं सुखं न भवति, अति वृद्धं कुरून् महद् बलम्, कुरूनतिक्रमेण वृद्धमित्यर्थः; येन पश्चिमां गतः, तेन पश्चिमां नीतः। अन्तराऽन्तरेणशब्दौ साहचर्यान्निपातौ गृह्येते, तथाऽन्तराशब्दो मध्यमाधेयप्रधानमाचष्टे, अन्तरेणशब्दस्तच्च विनार्थं च; तेनेह न भवति– राजधान्या अन्तरायां पुरि वसति, किं ते केशवा-

ऽर्जुनयोरन्तरेण गतेनेति । ' हा तात !, धिग् जाल्म !, हा सुभ्रु ! इत्यादावामन्त्र्यतया विवक्षा, न हादियुक्तत्वेनेति न भवति । हा कृतं चैत्रस्य, धिक् कृतं मैत्रस्येत्यत्र च हा-धिक्शब्दाभ्यां कृतशब्दे न्यग्भूतत्वान्न चैत्रादेः साक्षाद् योगः, किं तर्हि ? तद्विशिष्टेन कृतशब्देन । बहुवचनादन्येनापि युक्ताद् भवति– न देवदत्तं प्रति भाति किञ्चित्, बुभुक्षितं न प्रति भाति किञ्चित्, " वृणीष्व भद्रे ! प्रति भाति यस्त्वाम्, " " योऽक्षपादमृषिं न्यायः, प्रत्यभाद् वदतां वरम् ", धातु-सम्बद्धोऽत्र प्रतिस्तेन " भागिनि च प्रतिपर्यनुभिः " [ २. २. ३७. ] इति न सिध्यति । गौणादिति किम् ? अन्तरा गार्हपत्यमाहवनीयं च वेदिः, अत्र प्रधानाद् वेदिशब्दान्न भवति ॥ ३३ ॥

---

**श० न्या०—गौणा०** । प्रधानमुपकार्यं, यदर्थमन्यदुपादीयते, यस्याऽऽख्यातपदेन सामानाधिकरण्यमिति, ततोऽन्यत् तस्योपकारकं यत् तदर्थं तद्विशेषणं, यस्याऽऽख्यातपदेनासामानाधिकरण्यं तद् गौणमित्याह– **आख्यातपदेने**त्यादि । सर्वत्र सम्बन्धषष्ठ्यां प्राप्तायां द्वितीयाविधानम् । युक्तादित्यपेक्ष्य समयादिद्वन्द्वात् तृतीया, युक्तत्वं च प्रकृतेरेव विज्ञायते, न यस्य कस्यचिदित्याह– **गौणादि**त्यादि । **समया पर्वतं नदी**त्यादि– अत्र समयेत्यादेः समीपवचनस्य पर्वतादिविशेषणं नद्यादि विशेष्यमित्युभयोरपि युक्तत्वं, तत्र विशेषणमस्तीत्याख्यातपदेनासमानाधिकरणं गौणमिति गौणादिति वचनात् ततो द्वितीया । **हा देवदत्तमि**ति– अत्र शोच्यता देवदत्तस्य हाशब्देन द्योत्यते, यस्य तच्छोच्यत्वं स तेन युक्तः । तत्र निमित्तमित्याह– **वर्धते व्याधिरि**ति । **धिग् जाल्ममि**ति– अत्र जाल्मस्य निन्द्यता । **अन्तरा निषधं नीलं च विदेहा** इति– निषध-नीलयोर्मध्य इत्यर्थः । एवम्– **अन्तरेण गन्धमादनं माल्यवन्तं चे**ति । **अन्तरेण धर्मं** विना धर्मेणेत्यर्थः । अथान्तराशब्दः स्त्रियामाबन्तोऽप्यस्ति, अव्ययं च, एवमन्तरेणेत्यपि अन्तरशब्दात् तृतीयस्यां भवत्यव्ययं च, तत्र विशेषानुपादानात् सामान्येनोभयस्यापि ग्रहणं कुतो न भवतीत्याह– **अन्तरा-ऽन्तरेणशब्दावि**त्यादि– समयादिभिर्निपातैः सहैकवाक्योपात्तत्वादेतावपि निपातावित्यर्थः । **तथाऽन्तराशब्द** इति– आधीयत इत्याधेयं " य एचातः " [ ५. १. २८. ] इति य एत्वं च, मध्यशब्दस्य सप्तम्यन्तस्य यादृशोऽर्थस्तादृशोऽन्तराशब्दस्यापीति, उद्भूताधारशक्तिकोऽयमित्यर्थः । अन्तरेणशब्दस्य त्वेको दर्शितोऽर्थोऽपरो विनार्थश्चेत्याह– **अन्तरेणे**त्यादि । **राजधान्या अन्तरायामि**त्यादि– बाह्यायामभ्यन्तरायां चेत्यर्थः । **किं ते** इत्यादि– अत्रान्तरशब्दो विशेषवाची, गमिर्ज्ञानार्थः, विशेषेण ज्ञातेन किं प्रयोजनमित्यर्थः । यदा तु सामान्येन कष्टादौ हाशब्दादिकं प्रयुज्य कश्चिदामन्त्र्यते हा तातेत्यादि तदा न हाशब्दादिना तातादिर्युक्त इति प्रथमैव भवति, यतस्तृतीयया तैर्युक्तमाक्षिप्यत इत्याह– **हा तातेत्यादि** । यद्वा पदान्तरप्रयोगानपेक्षितयाऽत्रान्तरङ्गत्वादामन्त्र्यविभक्तेः प्रथमाया एव न्याय्यत्वमिति । **न्यग्भूतत्वादि**ति– तत्सम्बन्ध एवोपक्षीणशक्तित्वात् तत्सम्बन्ध्यन्तरेण न सम्बन्धमर्हत इत्यर्थः । सर्वत्र बहुवचनमधिकार्थमिति परिभाषितत्वाच्छिष्टप्रयोगाच्च विशेषावसायात् तल्लभ्यमर्थं दर्शयति– **न देवदत्तमि**त्यादि । बुभुक्षा सञ्जाता अस्येति " तदस्य संजातं० " [ ७. १. १३८. ] इति इते– बुभुक्षितः, **न प्रतिभाति** न रोचत इत्यत्र प्रतिर्भातिक्रियाविशेषणं न तस्य देवदत्तादिना योग इति " भागिनि च प्रतिपर्यनुभिः " [ २. २. ३७. ] इत्यतो द्वितीया न न सिध्यतीति । यदा तु देवदत्तं प्रति न किञ्चित् प्रतिभातीति विवक्षा तदा तेनैव सिध्यति । नन्वन्तराऽन्तरेणशब्दाभिधेयस्य मध्यस्यावधिसव्यपेक्षत्वाद् गार्हपत्याऽऽहवनीययोर्मध्यस्य चाधारशक्तिप्रधान्यस्य मध्यस्य ताभ्यामभिधेयत्वात् तस्य च प्रधानभूताधेयाधीनत्वात् तत्र यथा मध्यावच्छेदकाभ्यां षष्ठीमपोद्य द्वितीया विधीयते तथा मध्येनावच्छिद्यमानादाधेयादपि कुतो न विधीयत इत्याह– **गौणादिति किमि**त्यादि । यद्यप्यवधिराधेयश्चान्तरार्थेन युक्तौ तथापि गौणादिति वचनादप्रधानादवधिभूताद् गार्हपत्यादेर्द्वितीया न प्रधानादिति, अत एव द्वयोरन्तरा कश्चित् पुरुष इत्यादौ द्विशब्दादेर्द्वितीयस्या अभावः- अत्र ह्यनिश्चितावधिकं मध्यं प्रतीयते, द्वयोः सम्बन्धी कश्चिन्मध्य इत्येतावदर्थप्रतीतेः, मध्यं तु द्विशब्दार्थावधिकम्, उताऽन्यावधिकमिति संशय एव ॥ छ ॥ २. २. ३३. ॥

---

**न्या० स०—गौणात् स०** । **गौणादि**ति– " तत आगते " [ ६. ३. १४९. ] प्रज्ञाद्यणि वा । अत्र सूत्रे येन-तेनौ मुक्त्वाऽन्ये वाचकाः । **समया पर्वतं नदी** निकटे निकटा वा । निकषति दूरभावं " समिण्-निकषिभ्यामाः " [ उणा० ५९८. ], जहाति सौख्यं विच्, धयति निन्दाभावं " द्रागादयः " [उणा० ८७०. ] इति निकषा-हा-धिक्शब्दानां व्युत्पत्तिः । **हा देवदत्तमि**ति– हा– कष्टं देवदत्तस्य, यतो वर्द्धते व्याधिः । **अन्तरा निषधमि**ति– अन्तं राति " डित् " [ उणा० ६०५. ] इत्याः । **अन्तरेण गन्धमादनमि**ति– अन्तरे– मध्ये नयति " क्वचित् " [ ५. १. १७१. ] इति डे " तत्पुरुषे कृति " [ ३. २. २०. ] इत्यलुपि " पूर्वपदस्थ० " [ २. ३. ६४. ] इति णत्वे च; यद्वा– अन्तरेति " इणुर्विशावेणि० " [ उणा० १८२. ] इति णप्रत्ययः । **अति वृद्धमि**ति– कुरूणामतिक्रमेण पाण्डवानां महद्–

**बृहद्** बलं वर्त्तत इत्यर्थः । **येन पश्चिमामिति**–अत्र येन-तेनौ लक्ष्यलक्षणभावं द्योतयतः, पश्चिमां प्रति लक्ष्यीकृत्य गत इत्यर्थः, अयं गतः, कां प्रति ? पश्चिमां, पश्चिमया लक्षणेन देवदत्तस्याप्रसिद्धं गमनं लक्ष्यते । **अन्तराऽन्तरेणेति**–अथाऽऽन्तराशब्दः स्त्रियामावन्तोऽप्यस्ति, अव्ययं च; **अन्तरेणे**त्यपि अन्तराशब्दात् तृतीयायां भवति, अव्ययं च; तत्र विशेषानुपादानात् सामान्येनोभयस्यापि ग्रहणं कुतो न भवतीत्याह– **साहचर्यादि**ति समयादिभिर्निपातैः सहैकवाक्योपात्तत्वादेतावपि निपातावित्यर्थः । **अन्येनापीति**– द्विधा व्याख्येयम्– समयादिव्यतिरिक्तेन यावच्छब्दादिना नाम्ना नामव्यतिरिक्तेन धात्वादिनापि योगे गौणान्नाम्नो द्वितीया भवतीति । अक्षं– तृतीयनेत्रं पादे यस्य स तथा ॥२. २. ३३.॥

## द्वित्वेऽधोऽध्युपरिभिः । २ । २ । ३४ ॥

**त० प्र०—अधस्– अधि–उपरिभिर्युक्ताद् गौणान्नाम्न एषामेव द्वित्वे सति द्वितीया भवति, षष्ठ्यपवादः; बहुवचनमेक-द्वि-बहावित्ति यथासङ्ख्यनिवृत्त्यर्थम् । अधोऽधो ग्रामं ग्रामाः, अध्यधि ग्रामं क्षेत्राणि; उपर्युपरि ग्रामं ग्रामाः । द्वित्व इति किम् ? अधः प्रासादस्य, हर्म्यस्योपरि प्रासादः; असामीप्याच्च द्वित्वं न भवति ॥ ३४ ॥**

**श० न्या०—द्वित्वे०** । अधःप्रभृतयः कृतद्विर्वचनाः समीपवचना एव, अन्यत्र द्वित्वस्याभावात्, यस्य तत्सामीप्यं ग्रामादेस्ततः सम्बन्धे षष्ठ्यां प्राप्तायामयमारभ्यत इत्याह– **षष्ठ्यपवाद** इति । **बहुवचनमि**ति– अन्यथा समानसङ्ख्यत्वाद् यथासङ्ख्यं स्यादित्यर्थः । **अधोऽधो ग्राममि**त्यादि–" सामीप्येऽधोऽध्युपरि " [ ७. ४. ७९. ] इति सर्वत्र द्विर्वचनम् । **अधःप्रासादस्ये**ति– औत्तराधर्यमात्रमत्र विवक्षितं न सामीप्यमिति द्वित्वाभाव इत्याह– **असामीप्यादि**त्यादि ॥ छ ॥ २. २. ३४. ॥

**न्या० स०—द्वित्वेऽधो०** । " सामीप्येऽधोऽध्युपरि " [ ७. ४. ७९. ] इति द्वित्वम् । **असामीप्याच्चे**ति– औत्तराधर्यमात्रं विवक्षितं न सामीप्यमिति द्वित्वाभावः ॥ २. २. ३४. ॥

## सर्वोभयाऽभि-परिणा तसा ।२।२।३५॥

**त० प्र०—सर्वादिभिस्तसन्तैर्युक्ताद् गौणान्नाम्नो द्वितीया भवति, षष्ठ्यपवादः । सर्वतो ग्रामं वनानि, उभयतो ग्रामं वनानि, अभितो ग्रामं क्षेत्राणि, परितो ग्रामं क्षेत्राणि ॥ ३५ ॥**

**श० न्या०—सर्वो०** । **तसे**ति सर्वादिविशेषणत्वात् " विशेषणमन्तः " [ ७. ४. ११३. ] इति न्यायात् तदन्तप्रतिपत्तिरित्याह– **सर्वादिभिस्तसन्तैरि**ति । **षष्ठ्यपवाद** इति– पूर्वेण गतार्थम् । **सर्वतः, उभयत** इति– सप्तम्यन्तात् " आद्यादिभ्यः " [ ७. २. ८४. ] इति तसुः, अभि-परिशब्दाभ्यां " पर्यभेः० " [ ७. २. ८३. ] इति तसुः । आभिमुख्यवृत्तिरपि तसन्तप्रतिरूपको निपातोऽभितःशब्दोऽस्ति, सोऽपीह गृह्यते, तद्योगेऽपि षष्ठी प्राप्नोति ॥ छ ॥ २. २. ३५ ॥

**न्या० स०—सर्वोभ०** । सर्वादिविशेषणत्वात् " विशेषणमन्तः " [ ७. ४. ११३. ] इति न्यायाद् **सर्वादिभिस्तसन्तैरि**ति ॥ २. २. ३५. ॥

## लक्षण-वीप्स्येत्थंभूतेष्वभिना ।२।२।३६॥

**त० प्र०—लक्ष्यते दृश्यते येन तल्लक्षणं– चिह्नम्, अवयवशः समुदायस्य क्रियादिना साकल्येन प्राप्तीच्छा– वीप्सा, तत्कर्म वीप्स्यम्; केनचिद् विवक्षितेन विशेषेण भाव इत्थंभावः, तद्विषय इत्थंभूतः; एष्वर्थेषु वर्तमानादभिना युक्ताद् गौणान्नाम्नो द्वितीया भवति । वृक्षमभि विद्योतते विद्युत्, अत्र वृक्षो लक्षणम्, विद्योतमाना विद्युल्लक्ष्यम्, अनयोश्च लक्ष्यलक्षणभावः सम्बन्धोऽभिना द्योत्यते; वृक्षं वृक्षमभि सेकः, एकैकस्य वृक्षस्य सेक इत्यर्थः; साधुर्देवदत्तो मातरमभि, मातृविषये साधुत्वप्रकारं प्राप्त इत्यर्थः । लक्षणादिष्विति किम् ? यदत्र ममाऽभि स्यात् तद् दीयताम्, अत्राऽभिना भागसम्बन्धो द्योत्यते, योऽत्र मम भागः स्यादित्यर्थः । अत्रापि बहुवचनं यथासङ्ख्याऽभावार्थम्, एवमुत्तरत्र ॥ ३६ ॥**

**श० न्या०—लक्ष०** । " लक्षीण् दर्शने " करणेऽनडित्याह– **लक्ष्यते– दृश्यते येने**ति । तत् पर्यायान्तरेणाचष्टे– **चिह्नमि**ति । विपूर्वादाप्नोतेः सनि ततो यप्रत्यये वीप्स्यं, विपूर्वश्चाप्नोतिराप्तिविशेषमाह, तदिच्छायां सन्नित्याह– **अवयवशः साकल्येन प्राप्ती**ति । व्याप्तिमाप्तिविशेषमाह, व्याप्तिश्च द्विष्ठा क्रिया न विना व्याप्यं व्यापकं च भवतीत्युभयमाक्षिपतीत्युक्तं– **समुदायस्य क्रियादिने**ति– अत्र **क्रियादिने**ति व्यापकम्, आदिशब्देन जाति-गुण-द्रव्य-स्वरूपपरिग्रहः, **समुदायस्ये**ति व्याप्यं, समुदायश्च वृक्षादिपदवाच्योऽर्थसार्थ उच्यते; निर्भेदस्यार्थस्य व्याप्यत्वाभावात्, गगनमभ्रं व्याप्नोतीत्यादावपि गगनस्य कल्पितप्रदेशभेदपुरःसरव्याप्तिप्रतीतेरनेकात्मनः समुदायस्यैव व्याप्तिः सम्भवतीति । समुदायस्य च साकल्येन द्विधा भवति– अवयवशः स्वतश्च, यथा– क्रोशं कुटिला नदी, मासं गुडधाना इति, तत्र सन्प्रत्ययसन्निपातेऽवयवशो व्याप्तिरित्युक्तम**वयवश** इति, समुदायस्य प्रत्येकमवयवा वृक्षादयोऽनवयवेन

पृथक्सेकादिना सम्बन्ध्यन्त इतीयत्मात्रा( इतीयन्मात्रा, इतीयमात्मनो )व्याप्तिः, तस्या या इच्छा सा वीप्सा, तत्कर्म वीप्स्यमिति। अनेन प्रकारेण- इत्थं भवति स्माऽस्मिन्निति "अवर्ण्याचा०" [५. १. १२.] इत्यधिकरणे क्तः, अनेनेति कश्चिद् विवक्षितः प्रकारः प्रत्यक्षत्वेनोच्यते, प्रकारश्च सामान्यस्य भेदको धर्मो विशेष इत्याह- **केनचिदि**त्यादि। **लक्ष्यलक्षणभावः सम्बन्ध** इति- वृक्षं प्राप्य विद्योतत इति प्राप्तिक्रियाजनित इति शेषः, अत्र सम्बन्धस्योभयाधिष्ठानतया विद्युतोऽभिना योगेऽपि गौणादिति वचनात् प्रधानत्वात् ततो न द्वितीया। **वृक्षं वृक्षमभि सेक** इति- सेक इति भावे घञन्तः, अत्र वृक्षस्य वृक्षस्य सेक इति सेकेन वृक्षाणां वीप्स्यमानानां सेकं प्रति यस्तेषां साध्यसाधनभावलक्षणः सम्बन्धः सोऽभिना द्योत्यते, वीप्सा तु द्विर्वचनद्योत्यैवेति। अन्ये त्वन्यथा वर्णयन्ति- वीप्सा-वीप्स्यमानयोः सम्बन्धो द्विर्वचनेनैव द्योत्यते न त्वभिना, इति सम्बन्धमद्योतयतापि तेन योगे वचनाद् द्वितीयेति। **साधुर्देवदत्तो मातरमभि** अत्र मातुर्देवदत्तस्य साधुभावं प्रति विषयता, देवदत्त इत्थं प्रकारं मातृविषये प्राप्त इत्यर्थः, योऽसौ मातुरित्थंप्राप्त्या विषयविषयिभावलक्षणः सम्बन्धः सोऽभिना द्योत्यत इति। **यदत्र ममाभि स्यात् तद्दीयतामि**ति- अत्र ममेति न लक्षणादिरिति ततो द्वितीया न भवति, तदभावे गौणात् प्रथमापवादः "शेषे" [२. २. ८१.] इति षष्ठी। नन्वभ्यादयः सम्बन्धद्योतिनः, तत् कस्मिन्नत्र सम्बन्धेऽभिरित्याह- **अभिने**त्यादि- भागेन यः सम्बन्धोऽस्मदर्थस्य भागिभावः स द्योत्यते, तेन ममेति षष्ठी सम्बन्धमात्रेऽपि सम्बन्धविशेषो भागसम्बन्धः प्रतीयते; तद् व्यक्तमाह- **योऽत्र मम भागः स्यादित्यर्थ** इति। अथ कथं 'यदत्र मामभिष्याद्' इत्यत्र द्वितीयाप्रयोगः?, अत्राभिरस्तिना युक्त उपसर्गः, अत एव "प्रादुरुपसर्गात्०" [२. ३. ५८.] इत्यस्तेः षत्वम्, उच्यते- अभियुक्तोऽस्तिराभजतीत्यस्मिन्नर्थे वर्तते, तत्र "कर्मणि" [२. २. ४०.] इति द्वितीया, पूर्वत्र तु वृक्षादिधर्मं सेकाद्यपेक्षया विषयभावसम्बन्धमभिर्द्योतयति न क्रियाधर्ममिति धातुसम्बन्धाभावादनुपसर्गत्वाच्च ततः षत्वमिति। अथ 'लक्षण-वीप्सेत्थंभूतेषु' इति बहुवचनं किमर्थम्? लाघवार्थमेकवचनमेव निर्दिश्यतामितीत्याह- **अत्रापी**त्यादि- यद्येकवचनेन निर्दिश्येत तदैकद्विबहावित्यस्याप्येकवचनान्तत्वेन समसङ्ख्यत्वाद् यथासंख्यं स्यात्, ततश्च लक्षणे एकस्मिन्नर्थे वीप्स्ये द्वयोरित्थंभूते बहुषु द्वितीयेत्यर्थः स्यात्, बहुवचनं तु सङ्ख्याभेदोपादानार्थमिति। एवमुत्तरसूत्रेष्वपि द्रष्टव्यम् ॥ छ ॥ २. २. ३६ ॥

**न्या० स०—लक्षण०।** **समुदायस्ये**ति- वनादेरित्यर्थः। **साकल्यने**ति- सहार्थे तृतीया। **इत्थंभूत** इति- अनेन साधुत्वादिना प्रकारेण [ प्रकारः- सामान्यस्य भेदको धर्मो विशेष इत्यर्थः ] इत्थं भवनं "क्लीबे" [५. ३. १२३.] क्तः, इत्थंभूतमत्रास्ति "अभ्रादिभ्यः" [७. २. ४६.]; यद्वा- इत्थं देवदत्तो भवत्यस्मिन् मात्रादौ "अवर्ण्यात्०" [५. १. १२.] इति क्ते- इत्थंभूतो मात्रादिः, "अव्ययं प्र०" [३. १. ४८.] इति सः। **वृक्षं वृक्षमभिसेक** इति- अत्र वृक्षस्य वृक्षस्य सेक इति सेकेन वृक्षाणां वीप्स्यमानानां सेकं प्रति यस्तेषां साध्यसाधनभावलक्षणः सम्बन्धः सोऽभिना द्योत्यते; वीप्सा तु द्विर्वचनद्योत्यैवेति। अन्ये त्वन्यथा वर्णयन्ति- वीप्सा-विप्स्यमानयोः सम्बन्धो द्विर्वचनेनैव द्योत्यते, न त्वभिना, इति सम्बन्धमद्योतयतापि तेन योगे वचनाद् द्वितीयेति ॥ २. २. ३६. ॥

## भागिनि च प्रति-पर्यनुभिः ।२।२।३७॥

**त० प्र०—स्वीक्रियमाणोंऽशो भागः, तत्स्वामी भागी, तत्र लक्षणादिषु चार्थेषु वर्तमानात् प्रति-पर्यनुभिर्युक्ताद् गौणान्नाम्नो द्वितीया भवति। भागिनि- यदत्र मां प्रति मां परि मामनु स्यात्, योऽत्र मम भाग आभवति स दीयतामित्यर्थः; लक्षणे- वृक्षं प्रति वृक्षं परि वृक्षमनु विद्योतते विद्युत्; वीप्स्ये- वृक्षं वृक्षं प्रति वृक्षं वृक्षं परि वृक्षं वृक्षमनु सेचनम्; इत्थंभूते- साधुर्देवदत्तो मातरं प्रति मातरं परि मातरमनु। एतेष्विति किम्? अनु वदनस्याशनिर्गता, समीप इत्यर्थः ॥ ३७ ॥**

**श० न्या०—भागि०।** भजन्ति तमिति भागस्तस्यार्थमाह- **स्वीक्रियमाणोंऽश** इति- यस्त्वस्वीक्रियमाणेऽप्यंशे भागशब्दः प्रयुज्यते- 'नगरस्य भागः, प्रियङ्गोर्भागः' इति स स्वीक्रियमाणांशसादृश्यादिति भागस्येश्वरो भागी, यमसावाभजति स भागोऽस्यास्तीति भागी, तस्य स्वाम्युच्यते। **च**कारेणानन्तरा लक्षणादयोऽर्था अनुकृष्यन्त इत्याह- **तत्र लक्षणादिषु चार्थे**ष्विति। **यदत्र मां प्रती**त्यादि- योऽत्र मम भागः स्यादित्यर्थः। **समीप इत्यर्थ** इति- अनेन वनस्य समीपीभाव इति वीप्सादिभावाभाव उक्तः ॥ छ ॥ २. २. ३७. ॥

**न्या० स०—भागिनि च०।** **आभवतीति**- आङ्पूर्वको भूधातुर्भोगासमे वर्तत इति हि धातुपारायणविदः। **स्वीक्रियमाण** इति- यस्त्वस्वीक्रियमाणेऽप्यंशे भागशब्दः प्रयुज्यते- 'नगरस्य भागः, प्रियङ्गोर्भागः' इति स स्वीक्रियमाणभागसादृश्यादिति ॥ २. २. ३७. ॥

## हेतु-सहार्थेऽनुना । २ । २ । ३८ ॥

**त० प्र०**—हेतुर्जनकः, सहार्थस्तुल्ययोगो विद्यमानता च, तद्विषयोऽपि सहार्थ उपचारात्; तयोर्वर्तमानादनुना युक्ताद् गौणान्नाम्नो द्वितीया भवति । जिनजन्मोत्सवमन्वागच्छन् सुराः, देवेन्द्रोपपाताऽध्ययनमन्वागच्छद् देवेन्द्रः, तेन हेतुनेत्यर्थः; पर्वतमन्ववसिता सेना, नदीमन्ववसिता पुरी; पर्वतनदीभ्यां सह सम्बद्धेत्यर्थः अन्ये तु तृतीयार्थमात्र इच्छन्ति- पर्वतमन्ववसिता सेना, पर्वतेन कर्त्रा करणेन वा कृतान्तेत्यर्थः । तृतीयाऽपवादो योगः ॥ ३८ ॥

**श० न्या०**—**हेतु०** । हेतुर्द्विविधः- जनको ज्ञापकश्च, तत्र ज्ञापकस्य लक्षणत्वात् तत्र पूर्वसूत्रेणैव द्वितीया सिद्धेति जनक एव गृह्यत इत्याह- **हेतुर्जनक** इति । **सहार्थ** इत्यादि- ननु तुल्ययोगाद्यर्थे सहादय एव शब्दा वर्तन्ते न पर्वतादिशब्दा इति कथं ततो द्वितीयेत्याह- **तद्विषयोऽपी**त्यादि- तस्य सहार्थस्य तुल्ययोगादेर्योऽसौ विषय आश्रयः पर्वतादिरर्थः सोऽप्युपचारात् सहार्थशब्दवाच्य इत्यदोषः । **जिनजन्मोत्सवमन्वागच्छन् सुरा** इति- अत्र जिनजन्मोत्सवो हेतुः, सुरागमनं हेतुमत्, तत्र जिनजन्मोत्सवस्य हेतुभावः सुरागमनापेक्षः; सोऽनुना द्योत्यते, तद्युक्ताद् गौणाद् द्वितीयेति । एवं देवेन्द्रोपपातस्यागमविशेषस्याध्ययनपरावर्तनमपि देवेन्द्रागमस्य हेतुरित्याह- **तेन हेतुनेत्यर्थ** इति- अत्र " हेतु-कर्तृ-करणेत्थंभूतलक्षणे " [ २. २. ४४. ] इति प्राप्तां तृतीयां बाधित्वा द्वितीया भवति । **पर्वतमन्ववसिता सेने**ति- अव-पूर्वस्य सिनोतेः कर्मणि क्तस्तदर्थमाह- **पर्वतनदीभ्यामि**त्यादि- पर्वतादिना सह यः सहभावः सोऽनुना द्योत्यत इति । अत्र यथा साकंप्रभृतिभिः सहार्थवाचकैर्योगे तृतीया भवति तथाऽनुनाऽपि सहार्थेन स्यात्, सा द्वितीययाऽनुना बाध्यत इति । **अन्ये त्वि**ति- कर्तृता करणभावो वा तृतीयार्थ इत्याह- **पर्वतेन कर्त्रे**त्यादि । **कृतान्तेत्यर्थ** इति- अत्र पक्षेऽवसितेत्यत्र-पूर्वस्य स्यतेः क्ते रूपम् । ननु हेतोरपि लक्षणत्वात् तत्र पूर्वेणैव द्वितीया भविष्यति किं हेतुग्रहणेन ?, नैवम्- जनकस्य लक्षणत्वाभावात्, येन पुनः पुनर्लक्ष्यते तल्लक्षणम्, पौनःपुन्येन साहचर्यविगमे हि लक्ष्यलक्षणभावो भवति, सकृच्चैते जिन-जन्मोत्सवं निशम्य देवा आगच्छन्तीत्यन्वय-व्यतिरेकाभ्यां जिन-जन्मोत्सवस्य कारणत्वावगमात् । ननु लक्षणेन हेतुव्याप्तौ हेत्वहेतुविषयत्वाल्लक्षणस्य नावश्यं तदेव लक्षणं येन पुनः पुनर्लक्ष्यते, किं तर्हि ? यत् सकृदपि निमित्तत्वाय कल्पते तदपि लक्षणं भवति, कार्योत्पत्तिनिमित्तमपि तद्विशेषावगतिहेतुत्वाल्लक्षणमेव यथा- अपि भवान् कमण्डलुना छात्रमद्राक्षीदिति, सकृदेवासौ कमण्डलुपाणिश्छात्रो दृष्टः, तस्य लक्षणं द्वितीयार्थे तर्हि भविष्यति । ननु द्वितीया सिद्धा, न सिद्ध्यति- परत्वाद् हेत्वाश्रया तृतीया बाधिका स्यात्, * येन नाप्राप्ते० * इति न्यायेनान्वादिभिर्युक्ते द्वितीया षष्ठ्या एव बाधिका, तां तु परत्वात् तृतीया बाधिकेति पुनर्विधानं स्थानान्तरप्राप्तामपि तृतीयां द्वितीया बाधत इत्याह- **तृतीयाऽपवादो योग** इति ॥ छ ॥ २. २. ३८. ॥

**न्या० स०** — **हेतुस०** । हेतुर्द्विविधः— जनको ज्ञापकश्च, तत्र ज्ञापकस्य लक्षणत्वात् " भागिनि च० " [ २. २. ३७. ] इति सूत्रेण द्वितीया सिद्धेति जनक एवेह गृह्यत इत्याह- **हेतुर्जनक** इति । **तुल्ययोग** इति- ननु तुल्ययोगाद्यर्थे सहादय एव शब्दा वर्तन्ते न पर्वतादिशब्दा इति कथं ततो द्वितीयेत्याह- **तद्विषयोऽपीति** । देवेन्द्रमुपपातयति कर्मणोऽणि- **देवेन्द्रोपपातम्** । **अवसितेति**- अवसिनोति स्म, कर्मकर्तरि वाऽवसीयते स्म "गत्यर्थ०" [ ५. १. ११. ] इति क्तः । तुल्ययोगोऽभिन्नैः सह विद्यमानता तु भिन्नैरित्यनयोर्भेदः, विद्यमानतायाम्- अनु कर्माणि संसारीत्युदाहरणं ज्ञातव्यम् ॥ ३८ ॥

## उत्कृष्टेऽनूपेन । २ । २ । ३९ ॥

**त० प्र०**—उत्कृष्टेऽर्थे वर्तमानादनूपाभ्यां युक्ताद् गौणान्नाम्नो द्वितीया भवति । अनु सिद्धसेनं कवयः, अनु मल्लवादिनं तार्किकाः, उपोमास्वातिं सङ्ग्रहीतारः, उप जिनभद्रक्षमाश्रमणं व्याख्यातारः, तस्मादन्ये हीना इत्यर्थः ॥३९॥

**श० न्या०**—**उत्कृ०** । उत्कृष्टशब्दो हीनापेक्षः, तेन हीनोत्कृष्टसम्बन्धेऽनुना द्योत्ये द्वितीया विधीयते । उत्पूर्वात् कृषतेः कर्मणि क्ते " यद्भावः० " [ २. २. १०६. ] इति सप्तम्याम्- **उत्कृष्ट** इति । **अनु सिद्धसेनं कवय** इति- सिद्धसेनकविनिष्ठस्य हीनोत्कृष्टसम्बन्धस्यापेक्षणक्रियाजनितत्वमनुना ख्याप्यते, यथाऽत्र सिद्धसेनमुत्कृष्टमनूद्य कवीनां हीनत्वविधाने दत्तमुदाहरणं, तथा कवीन् हीनाननूद्य सिद्धसेनस्योत्कृष्टत्वेऽप्युदाहरणं द्रष्टव्यम्, यथा- अनु कवीन् सिद्धसेन इति; एवमुपेऽपि । **सङ्ग्रहीतार** इति- सङ्ग्रहविधातार इति, सङ्ग्रहश्च शास्त्रेषु विततस्य प्रकीर्णस्य चार्थस्य संक्षेपेणैकत्र सम्यग्ग्रहणमिति । तदाह- **तस्मादन्ये हीना इत्यर्थ** इति । ननु " लक्षण-वीप्स्ये० " [ २. २. ३६. ] इत्यादिसूत्रचतुष्टयी किमर्थमारभ्यते ? यतोऽप्रयुज्यमानां काञ्चित् सकर्मिकां क्रियामाश्रित्य " कर्मणि " [ २. २. ४०. ] इत्यनेनैव द्वितीया भविष्यति,

यथा- प्रादेशं प्रादेशं विपरिलिखतीति, नात्र वेर्लिखिं प्रति क्रियायोगः, किन्त्वप्रयुज्यमानं धातुं प्रति, न हि प्रादेशो लिख्यते, प्रादेशे च योग्या क्रिया वेराक्षेप्येति सामर्थ्याद् विमानक्रियाया आक्षेपः, तदपेक्षया द्वितीया- प्रादेशं प्रादेशं विमाय परिलिखतीति । अत्र केचिदाहुः- अन्वादयो गम्यादिक्रियाजनिते नामार्थव्यतिरेके विषयभावादौ वर्तन्ते, यथा- राज्ञः पुरुष इत्यत्र भरणादिक्रियाजनिते नामार्थव्यतिरेके पुरुषसम्बन्धे षष्ठी; नहि क्रियामन्तरेणाधःशलाकाकल्पानां नामार्थानां कश्चित् सम्बन्धः, तत्रान्तर्भावेऽपि क्रियाया न क्रियासम्बन्ध उच्यते, अपि तु स्वेन स्वामिनः सम्बन्ध एव; तद्वदत्रापि विषयभावादिरूपसम्बन्धो न तु कर्मतेतीदं द्वितीयाविधानम्; प्रदेशं प्रादेशं विपरिलिखतीत्यत्र त्वप्रयुज्यमान[मा]धात्वपेक्षया कर्मतैवोच्यते, न त्वन्यत् किञ्चित्, यथा- प्रविश पिण्डीमिति भक्षयेति प्रतीयमानापेक्षया । ईदृशी शब्दशक्तिः, न ह्येकरूपा एव भावा भवन्ति ॥ छ ॥ २. २. ३९ ॥

**न्या० स०**—उत्कृ० । स्वयमेव उत्कृष्यते स्म कर्मकर्तरि क्तः, उत्कृष्टशब्दो हीनापेक्षः, तेन हीनोत्कृष्टसम्बन्धेऽनुना योगे द्वितीयाऽनेन विधीयते । उमां- कीर्तिं सुष्ठु अततीति " पादाच्यात्यजिभ्याम् " [ उणा० ६२०. ] इति इः णित्; यद्वा- उमा- कीर्तिः स्वातिरिवोज्ज्वला यस्य; यद्वा- उमा- माता, स्वातिः- पिता, तयोर्जातत्वात् पुत्रोऽप्युमास्वातिः ॥ २. २. ३९. ॥

## कर्मणि । २ । २ । ४० ॥

**त० प्र०**—गौणान्नाम्नः कर्मणि कारके द्वितीया भवति । कटं करोति, ओदनं पचति, आदित्यं पश्यति, अहिं लङ्घयति, ग्रामं गच्छन् वृक्षमूलान्युपसर्पति, अजां नयति ग्रामम्, गां दोग्धि पयः । अथेह कस्मान्न भवति ?- क्रियते कटः, कृतः कटः, शतेन क्रीतः- शत्यः पटः; आरूढो वानरो यं स आरूढवानरो वृक्ष इति; त्यादि-कृत्-तद्धित-समासैरभिहितत्वाल्लोक-शास्त्रयोश्चाभिहितेऽर्थे शब्दप्रयोगायोगात् । यद्येवं कटं करोति भीष्ममुदारं दर्शनीयमिति भीष्मादिविशेषणविशिष्टस्य कटस्य करोतिक्रियया व्याप्यत्वात् कर्मत्वम्, तच्च कटशब्दादेवोत्पन्नया द्वितीययाऽभिहितमिति भीष्मादिभ्यो द्वितीया न प्राप्नोति, यथा- कृतः कटो भीष्म उदारो दर्शनीय इति करोतेः क्तप्रत्ययेनेति, नैवम्- भीष्मत्वादियुक्तस्य कटस्य सम्बन्धिकर्मत्वं प्रतिपाद्यम्, न च जातिशब्दाः सम्भविनोऽपि गुणान् प्रतिपादयितुं समर्था इति तत्प्रतिपादनाय यथा भीष्मादिशब्दप्रयोगो भवति तथा द्वितीयाऽपि तेभ्यो भविष्यति, नहि सामान्यवाचिनः कटशब्दादुत्पद्यमाना द्वितीया भीष्मादीनामनियताधाराणां गुणानां कर्मत्वमभिधातुं शक्नोति; यदि वा कटोऽपि कर्म भीष्मादयोऽपि, यथैव ह्ययं कटं करोत्येवं तद्गतान् भीष्मादीनपि, तत्र यद् यत् करोतिना व्याप्तुमिष्टं तत् सर्वं द्रव्यं गुणश्च कर्मेति सर्वेषां पृथक् कर्मत्वे प्रत्येकं द्वितीया, पश्चात्त्वेकवाक्यतया विशेषणविशेष्यभाव इति; यदिवा द्रव्यस्य क्रियासु साक्षादुपयोगादस्तु कटस्यैव कर्मत्वम्, भीष्मादीनां तु ❀ न केवला प्रकृतिः प्रयोक्तव्या ❀ इति नियमाद् अविभक्तिकानामप्रयोगार्हत्वादेकविभक्तिमन्तरेण च सामानाधिकरण्यविशेषणत्वायोगाद्, यथा- ईश्वरसुहृदां स्वयं निर्धनत्वेऽपि तदेकयोगक्षेमत्वात् तद्धनेनैव फलभाक्त्वं भवत्येवमकर्मणामपि कटकर्मत्वेनैव द्वितीया भविष्यति; कृतः कटो भीष्म उदारो दर्शनीय इत्यादौ तु करोतेरुत्पद्यमानः क्तो यस्य यस्य तया क्रियया सम्बन्धस्तस्य तस्य साकल्येन कर्मत्वमभिदधातीति क्वचिदपि द्वितीया न भवति; कथं तर्हि 'कृतं पश्य, आहृतमाहर, कर्त्रा क्रियते, दात्रेण लुनाति, दानीयाय ददाति, भीमाद् बिभेति, प्रासादे प्रसीदति, शयने शेते,' इत्यादिषु क्तादिभिरभिहितेषु कर्मादिषु द्वितीयादयो भवन्ति ?, उच्यते- कर्मादिसामान्यं कृद्भिरभिहितं, तत्राप्यभिहितः सोऽर्थोऽन्तर्भूतो नामार्थः सम्पन्न इति कर्मादिशक्तियुक्तं द्रव्यमेव तदन्तैः शब्दैरभिधीयते, यथेदं कर्म, इदं करणमिति, तत्र याऽसौ स्वरूप-कालभिन्नायां क्रियायां सव्यापारतया कर्मादिरूपता तदभिधानाय यथायथं द्वितीयादयो भवन्ति, यत्र पुनरेकद्रव्याधारा प्रधानाऽप्रधानक्रियाविषयाऽनेका शक्तिर्भवति तत्र प्रधानक्रियाविषयायां शक्तौ प्रत्ययैरभिहितायामप्रधानक्रियाविषया शक्तिः प्रधानशक्त्यनुरोधादभिहितवत् प्रकाशमाना विभक्त्युत्पत्तौ निमित्तं न भवति, यथौदनः पक्त्वा भुज्यते देवदत्तेनेति भावाऽभिधायिना क्त्वाप्रत्ययेनौदनाधिकरणाप्रधानपचिक्रियाविषया कर्मशक्तिरनभिहिताऽपि प्रधानभुजिक्रियाविषयाऽऽत्मनेपदेनाभिहितेति तद्वत् प्रकाशमाना द्वितीयोत्पत्तौ निमित्तं न भवति, यथा च ग्रामो गन्तुमिष्यते देवदत्तेनेति ग्रामस्य प्रधानेषिक्रियाविषयां कर्मशक्तिमात्मनेपदेनाभिदधताऽप्रधानमभिक्रियाविषयाऽपि कर्मशक्तिरुपभुक्तेति तदभिधानाय द्वितीयाचतुर्थ्यौ न भवत इति । इह च गौणत्वं क्रियाऽपेक्षं, तेनाऽजां नयति ग्राममित्यादौ ग्रामाद्यपेक्षयाऽजादेः प्रधानत्वेऽपि गौणत्वं न विहन्यत इति । इह तु- कृतपूर्वी कटं, भुक्तपूर्वी ओदनम्, व्याकरणं सूत्रयतीत्यादौ यः कृतादिभिः कटादेरभिसम्बन्धः स प्रत्ययेऽर्थान्तराऽभिधायिन्युत्पन्ने कृतादीनामुपसर्जनत्वान्निवर्तते, क्रियया तु सह सम्बन्धोऽस्तीति व्याप्यत्वाद् द्वितीया भवति ॥ ४० ॥

**श० न्या०—कर्म०।** निर्वर्त्यादिभेदेन त्रिविधस्यापि कर्मणोऽत्र विशेषानुपादानाद् ग्रहणमिति त्रिविधेऽप्युदाहरति- **कटं करोती**ति निर्वर्त्ये, **ओदनं पचती**ति विकार्ये, अत्र ह्योदनशब्दस्तण्डुलवृत्तिरतस्तण्डुलान् पचतीत्यर्थः, **आदित्यं पश्यती**ति प्राप्ये। संख्यादि-कर्मादिशक्ती विभक्तिवाच्ये, तत्र त्यादि-कृत्-तद्धित-समासैरनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयाद्या विभक्तयो यथा स्युरिति 'अनभिहिते' इति प्रकृत्य द्वितीयादीनां विधानमुचितं, तच्च नेह कृतमिति कृत्-तद्धित-समासाभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादय प्राप्नुवन्तीत्याशङ्कयाह- **अथेह कस्मान्न भवती**त्यादि। **क्रियत** इति- कर्मण्यात्मनेपदम्। **कृत** इति- कर्मणि क्तः। **शत्य** इति- शतेन क्रीत इति "शतात् केवलात्०" [ ६. ४. १३१. ] इति यप्रत्ययः। परिहरति- **त्यादी**त्यादिना। अयमर्थः- अभिपूर्वस्तावद् दधातिर्बन्धनोच्चारण-प्रतिपादनेषु वर्तते, 'अश्वाभिधानीमादत्ते' इत्यत्र बन्धननिवृत्तिः, 'अभिहितः श्लोकः' इत्युच्चारणवृत्तिः, 'अभिहितोऽर्थः' इति प्रतिपादनवृत्तिः, हिनोतेरपि गति-वृद्ध्यर्थस्य 'अभिहितम्' इति भवति, तत्र वक्ष्यमाणानां कर्माद्यर्थानां बन्धनाद्यर्थचतुष्टयासम्भवात् प्रतिपादनवचन एवाभिहितशब्द आश्रयणीयः, यावदुक्तं भवति 'अनुक्तेऽनिर्दिष्टे' इति तावदनभिहित इति [ यावत्-तावच्छब्दौ निपातावभिन्नार्थत्वं प्रतिपादयतः ] ततोऽन्यत्र त्यादिभिरभिहिते कर्मादौ प्रयोजनाभावाद् द्वितीयानामप्रवृत्तेरनर्थकोऽनभिहिताधिकार इति स्वोक्तमेव युक्त्यन्तरेण द्रढयति- **लोकशास्त्रयोश्चे**त्यादिना। अयमाशयः- अर्थप्रत्यायनाय लोके शब्दः प्रयुज्यते, स चार्थो यदा शब्दान्तरेण प्रतिपादितः स्यात् तदा प्रयोजनाभावाच्छब्दान्तरप्रयोगेण न भाव्यम्, अक्षिनिकोचादिभिरप्यधिगतेऽर्थे शब्दो न प्रयुज्यते, किं पुनः शब्दान्तरप्रतिपादिते, यथा- चित्रगुः, शबलगुरित्यत्र बहुव्रीहिणोक्तार्थत्वान्मत्वर्थीयो न भवति; गर्गाः, वत्साः, बिदाः, उर्वा इति यञन्तेनाञन्तेन चोक्तत्वादपत्यार्थस्य यञञोर्लोपे विरोधाभावादुक्तार्थत्वाश्रयेणैवाणोऽनुत्पत्तिः; एवं सप्तपर्णोऽष्टापद इति वीप्सायां विषये द्विर्वचनमुच्यते, अस्ति चेह वीप्सा- सप्त सप्त पर्णान्यस्येति; समासेन तु शब्दशक्तिस्वाभाव्याद् वीप्साया गमितत्वाद् द्विर्वचनाभाव इति। ननु दर्शितेषु नोक्तार्थत्वेन मत्वर्थीयाद्यभावः, किन्त्वन्यथा; तथाहि- अस्तिसामानाधिकरण्ये मत्वर्थीयो विधीयते, न चात्रास्ति सामानाधिकरण्यं वर्तिपदार्थयोरन्यपदार्थे उपसङ्क्रान्तत्वादस्त्यर्थस्य तत्रैवान्तर्भूतत्वात् स्वार्थस्य संसृष्टत्वात्, यदाऽप्यन्यपदार्थेन तद्वत्ता प्रतिपिपादयिषिता भवति तदा भवत्येव चित्रगुमानिति; तथा "वाऽऽद्यात्" [ ६. १. ११. ] इत्यधिकारादपत्यवद्वाचिनः षष्ठ्यन्तात् प्रत्ययेन भाव्यं, न त्वपत्यवाचिनो द्वितीयमर्थमुपक्रान्तात्; यञञोश्च लुपि कृते प्रकृतिरेवापत्यार्थाभिधायिनीत्यण् न भवति; तथा वीप्स्यमानार्थाभिधायिनः पदस्य द्विर्वचनं विधीयते, पर्वार्थस्य वीप्सायोगः, न चात्र पर्वशब्दस्य प्रयोगोऽस्ति- पर्वणि पर्वणि सप्त पर्णान्यस्येति, पङ्क्तौ पङ्क्तावष्टौ पदानीति हि वीप्सायुक्तं पदं न प्रयुज्यते [ सप्तपर्णशब्दस्तु तादृशे वृक्षविशेषे रूढ इति भावः ]। एवं तर्हि श्न-बहुच्-कप्रत्ययेषूक्तार्थत्वमाश्रयणीयं, तथाहि- छिनत्तीति श्नेनोक्तत्वात् कर्तृत्वस्य ( कर्तरि ) शव् न भवति 'भाव-कर्म-कर्तारो विकरणार्था' इति पूर्वाचार्यसमयात्; बहुकृतं बहुभुक्तमितीषदूनत्वस्य बहुनोक्तत्वात् कल्पबादयो न भवन्ति; उच्चकैः, नीचकैरिति कुत्सनादीनामकैव द्योतितत्वात् कप् न भवति। न चात्राप्यपवादत्वाच्छ्नादयः शवादीनां बाधका इत्यन्यथासिद्धत्वादुक्तत्वस्य दृष्टान्ताभावादहेतुत्वमिति वाच्यम्, समानादेशे उत्स( समानदेशैरुत्स )र्गाणामपवादैर्बाधनान्नानादेशत्वात् तदप्राप्तेरन्यथासिद्धत्वादुक्तत्वस्य दृष्टान्तभावाद्धेतुत्वादिति। अत्रानभिहिताधिकारवादी प्रत्यवतिष्ठते- किमिहाऽकर्तव्योऽनभिहिताधिकारः क्रियते ?, आहोस्विद् 'अपूपौ द्वौ' इत्यभिहितेऽपि प्रत्ययेन द्वित्वे द्विशब्दस्य लोके प्रयोगदर्शनाच्छ्नादिभिरभिहिते शवादिनिवृत्त्यर्थोऽन्यत्र कर्तव्यः सन्न क्रियते ? इति, उच्यते- इहाऽकर्तव्यः क्रियते, अपूपौ द्वाविति तु गतार्थस्यापि द्विशब्दस्य लोके प्रयोगदर्शनात्, अन्यस्य [ शास्त्रविहितस्येत्यर्थः, लौकिके प्रयोगे लाघवानादरादिति भावः ] गतार्थस्याप्रयोगः प्रयोजनभावात् सिद्ध एवेत्यभिहिते विहितं न भविष्यति। अत्र स एव पुनः प्रत्यवतिष्ठते- नन्वनभिहितो विभक्त्यर्थः, तथाहि- "कर्मणि" [ २. २. ४०. ] इत्यत्र 'एकद्विबहौ' इत्येकवाक्यतापत्तौ यदैकत्वादीनि विशेषणानि, कर्मादीनि विशेष्याणि- एकस्य यत् कर्म तत्र द्वितीयैकवचनमिति, तदा कर्म द्वितीयाया अर्थः सम्पद्यते, तच्च यदा त्यादिभिरभिहितं भवति तदा गतार्थत्वाद् द्वितीयायाः प्राप्तिरेव नास्तीति नार्थोऽनभिहितवचनेन; यदा तु कर्मादीनां विशेषणत्वम्, एकत्वादीनां विशेष्यत्वं- कर्मणो यदेकत्वादि तत्र द्वितीयेति, तदैकत्वादयो विभक्त्यर्थाः सम्पद्यन्ते; ते चाभिहितेष्वपि त्याद्यादिभिः कर्मादिष्वनभिहिता इति तदभिधानाय [ द्वितीयादीनां प्रसङ्गे तन्निवारणाय ] कर्तव्योऽनभिहिताधिकार इति; न च "कर्मणि" [ २. २. ४०. ] इत्यादौ कर्मादीनां श्रुतत्वात् तेषामेव विभक्त्यर्थत्वेन भाव्यमिति वाच्यम्, कर्मणीति सप्तमीनिर्देशस्यैकत्वाद्यपेक्षत्वादभिधेयत्वाप्रतिपत्तेः, कर्मणि यदेकत्वादि तत्र द्वितीयेति प्रतिपत्तिः, यश्च मन्यते कर्मादयो विभक्त्यर्थास्तेष्व-

नुक्तेषु विभक्तीनामुत्पत्तिरिति नार्थोऽनभिहिताधिकारेणेति, तस्य 'वृक्षः, प्लक्षः' इत्यादौ प्रथमा न प्राप्नोति, नामार्थस्यापि प्रथमार्थत्वात् तस्य च तेनैवोक्तत्वात्; एकत्वादीनां तु विभक्त्यर्थत्वे तदभिधानाय प्रथमा प्रवर्तेत इति, नैष दोषः- न क्वचिन्नाम्नाऽनुक्तो नामार्थस्तेन "नाम्नः प्रथम०" [२. २. ३१.] इति वचनसामर्थ्यान्नाम्नोऽपि नामार्थे प्रथमा भविष्यति, द्वितीयादयस्त्वनभिहिते कर्मादौ सावकाशत्वादभिहिते न भविष्यन्तीति। अनभिहिताधिकारवादिन एवायं दोषो यस्य ते एकत्वादयो विभक्त्यर्था इति, पचत्योदनं देवदत्त इत्येकत्वस्य त्यादिनोक्तत्वात् प्रथमाया अभावः, अनभिहितैकत्वाद्यभिधानाय तव विभक्तिविधानम्, पचतीति च कर्तुरेकत्वं तिवाभिहितमिति प्रथमा न स्यादिति [ नैष दोषः- न क्वचित् तिवानभिहितत्वमेकत्वादीनामिति वचनसामर्थ्याद् भविष्यति, न च वृक्षः प्लक्ष इत्यादावनभिहिते सावकाशत्वात् कथं वचनसामर्थ्यमिति वाच्यम्, तत्राप्यप्रयुज्यमानस्यास्तीत्यस्य गम्यमानत्वादभिधानात् सूक्तं वचनसामर्थ्यादिति ]। ननु च यदि कर्मादयो विभक्त्यर्थास्तदा यथा 'कृतः कटो भीष्मः' इत्यादौ क्तेन कर्मणोऽभिहितत्वाद् द्वितीया न भवति, एवं कटं करोति भीष्ममित्यादौ भीष्मादिविशेषणविशिष्टात् कटादुत्पन्नया द्वितीययोक्तत्वाद् भीष्मादिभ्यः कर्मणि द्वितीयस्या अप्रसङ्ग इत्येकं सन्धित्सतोऽन्यत् प्रच्यवत इति, अनभिहिताधिकारपक्षे तु त्यादि-कृत्-तद्धित-समासैरनभिहित इति परिगणनाद् दोषाभाव इति चेतसि निधायाऽऽक्षिपति परिहरति च- **यद्येवमित्यादि**- अयमर्थः- भीष्मत्वादियुक्तकटसम्बन्धि कर्मत्वं प्रतिपाद्यं, तत्र यथा कटशब्देन जातिशब्दत्वाद् भीष्मत्वादिगुणानामनभिधानात् तदभिधानाय भीष्मादिशब्दप्रयोगस्तथा द्वितीयाऽपि तेभ्यो भविष्यति, नह्यन्यथा भीष्मादिगुणानामनियताधारत्वात् तद्विशिष्टत्वं कटस्य प्रत्याययितुं शक्यत इति। अथवा यद् यत् करोतिक्रिययाऽऽप्तुमिष्यते तत् सर्वं द्रव्यं गुणश्च कर्म भवति, नह्यसौ कटमात्रेण तुष्यति, तत्र करोतिक्रियया पृथक् सर्वेषां व्याप्यतया कर्मत्वे द्वितीयोत्पत्तिः, पश्चात् त्वेकवाक्यतया विशेषणविशेष्यभाव इत्याह- **यदि वेत्यादि**। ननु यद्यपि गुणद्रव्ययोः करोतिना सम्बन्धस्तथाऽपि व्याप्यमित्यत्र विशब्दश्रुत्या प्रकर्षस्याश्रितत्वाद् द्रव्यस्यैव च क्रियान्तरे उपयोक्ष्यमाणत्वात् कर्मत्वं न गुणस्येति कथं भीष्मादिभ्यो द्वितीया?, उच्यते- भवतु कट एव कर्म, तथापि तत्सामानाधिकरण्यात् तदेकयोगक्षेमत्वात् केवलानां च नाम्नां नियमात् प्रयोगाऽनर्हत्वाद् भीष्मादीनां स्वयमकर्मत्वेऽपि विशेष्यसम्बन्धिन्यैव विभक्त्या भाव्यम्, यथा- ईश्वरसुहृदः स्वयं निर्धना अपि तदीयेन धनेन तत्फलभाजः, एवं गुणा अपि। अस्ति खल्वपि क्तप्रत्ययद्वितीययोर्वैषम्यम्, करोतेरुत्पद्यमानः क्तः साकल्येन भीष्मादिगुणगतमपि कर्माभिधत्ते, कटशब्दात् पुनरुत्पद्यमानया द्वितीयया कटस्थं यत् कर्मत्वं तच्छक्यमभिधातुं न तु भीष्मादिगुणगतं विशेषकर्मत्वं, नामार्थगताया एव कर्मशक्तेर्वाचिका द्वितीयेत्यत आह- **यदि वा द्रव्यस्येत्यादि**। किञ्च यस्यैवैकत्वादयो विभक्त्यर्थास्तस्यायं दोषः- अभिहिते प्रथमाया अभावः- एकः, द्वौ, बहव इति, अनभिहितैकत्वाद्यभिधानाय तव विभक्तिविधानम्, तानि चैकादिभिरेवोक्तानीति प्रथमाया अप्राप्तिः। ननु यस्यापि कर्मादयो विभक्त्यर्थास्तस्याप्ययं दोषः, यतः तेनापि "कर्मणि" [२. २. ४०.] इत्यादीनामेकद्विबहुष्वित्यनेनैकवाक्यताऽभ्युपगन्तव्या, गुणप्रधानभाव एव तस्य तु विपरीतः, तत्र नामार्थगतैकत्वादिविशिष्टे कर्मणि द्वितीयेत्येवमादिर्वाक्यार्थः [ तस्य ] सम्पद्यते, एवं चैकत्वादिविशिष्टस्य कर्मणो वाचिका द्वितीया, तच्च नाम्नैवाभिहितम्, नामार्थव्यतिरेकेणान्येषामेकत्वादीनां विशेषणीभूतानामभावादेक इत्यादौ भवतोऽपि प्रथमाया अभाव इति; अत्रोच्यते- एकत्वादिष्वपि व्यतिरिक्ता एकत्वादयः सन्ति, तदुक्तं हरिणा—

" निमित्तमेक इत्यत्र, विभक्त्या नाभिधीयते।
तद्गतस्तु यदेकत्वं, विभक्तिस्तत्र वर्तते॥ " इति,

यथा- शतमित्यत्र प्रवृत्तिनिमित्तं शतसंख्याऽन्या, अन्या च विभक्तिवाच्या नामार्थशतैकत्वसंख्या, तथैक इत्यत्रापि प्रवृत्तिनिमित्तविभक्तिवाच्ये द्वे एकत्वे इति। यद्येवं ममापि तेष्वनभिहितेषु प्रथमा भविष्यति, किञ्चैकादय उभयवचना द्रव्यं चाहुर्गुणं च, तत्र नाम्ना गुणोपसर्जनं द्रव्यमभिधीयते, द्रव्योपसर्जनस्तु गुणो विभक्त्या, यथा- शौक्ल्यमिति गुणोपसर्जनद्रव्याभिधायिनः शुक्लशब्दाद् द्रव्योपसर्जने तस्मिन्नेव गुणे भावप्रत्ययः, तदेवं यस्मिन् द्रव्ये स्थित एकत्वादिगुणस्तस्य द्रव्यस्य प्राधान्येनानुक्ता एकत्वादयस्तदभिधानाय प्रथमा भविष्यति; अथवा सङ्ख्या नामेयं परप्रधाना, सङ्ख्येयमनया विशेष्यम्, यदि च प्रथमा न स्यात् केवलस्य नाम्नः प्रयोगाभावात् प्रथमाया अभावे एकादिशब्दानुच्चारणात्; अथवा 'प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या न केवला' इत्येवंरूपात् समयाद् भविष्यति; अन्या अपि कस्मान्न भवन्ति?, कर्मादीनामभावात्, कर्मण्येव द्वितीयेत्येवं द्वितीयादीनां नियतत्वात्; तर्हि षष्ठी प्राप्नोति, कर्माद्यभावस्य शेषरूपत्वात्; न- अशेषत्वान्न भविष्यति, उपयुक्तादन्यो हि शेषः, नामार्थस्य च प्रथमाविधावुपयोगात् तस्य

चाव्यतिरिक्तस्येह सद्भावात्; वचनव्यतिकरप्रसङ्गोऽपि नास्ति सामार्थ्याद् व्यवस्थासिद्धेः; एक इत्यत्रैकमेवैकत्वं, तच्च नाम्नैवाभिहितमित्यप्राप्ताऽपि प्रथमा समयवशेन प्राप्यते, तत्र यथा समयश्च पालितो भवति, एकत्वानुगुणं चान्यत्र तदभिधाने दृष्टसामर्थ्यं वचनं भवति, इति सङ्ख्याविभक्त्यर्थस्तत्रानभिहिताधिकारः परिगणनं च कृत्-तद्धित-समासैरिति युक्तम्, क्रियते कटः, कटः, कृतः, औपगवः, चित्रगुरित्यादौ कर्मा-ऽपत्यापत्यवत्-स्वस्वामिसम्बन्धानां त्यादि-कृत्-तद्धित-समासैरभिहितत्वाद् द्वितीयादयो न भवन्ति, तथाऽनभिहितमिति सामान्येन विधीयमाने यत्र बहूनि नामानि समानाधिकरणानि विवक्षितानि तत्रैकयोगक्षेमत्वादेकत्र उत्पन्नया द्वितीयया सर्वनामार्थगतं कर्मत्वमभिहितमित्यन्येभ्यो द्वितीया न प्राप्नोति । का तर्हि स्यात् ? षष्ठी, अशेषत्वान्न षष्ठी, कर्मादीनामभावादन्याश्च नितान्तं न प्राप्नुवन्ति, समयश्च कृतः- न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्ययः, न चान्योत्पद्यमाना सामानाधिकरण्यसम्बन्धमुत्सहते वक्तुमिति द्वितीया भविष्यतीति; सत्यम्- अस्तु सङ्ख्याऽपि विभक्त्यर्थः, तथापि न कर्तव्योऽनभिहिताधिकारः, स हि 'क्रियते कटः' इत्यादौ द्वितीयादिनिवारणाय क्रियते, यदि चात्र द्वितीयादयः स्युस्ततः प्रथमा निरवकाशैव स्यात्, तस्मादनवकाशत्वात् प्रथमैव द्वितीयादीनां बाधिका भविष्यति नार्थोऽनभिहिताधिकारेण । अथाकारके 'वृक्षः, प्लक्षः' इत्यादौ क्रियापदमात्रस्याप्यश्रवणाद् विभक्त्यन्तराप्राप्तेः सावकाशा प्रथमेति चेत् ? न- अत्राप्यस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽस्ति, वृक्ष इत्युक्तेऽस्तीति गम्यते, यतो ज्ञातं वस्तु परं प्रतिपादयितुं शब्दः प्रयुज्यते, ज्ञानं च सत इति यत्र क्रियापदान्तरस्याप्रयोगस्तत्रौत्सर्गतः सत्ताप्रतीतिरित्यस्तीति क्रियापदानुषङ्गात् कर्तरि तृतीयाप्रसङ्गादनवकाशा प्रथमेति । यदभिहिते कर्मादावनवकाशत्वात् प्रथमैव प्राप्नोतीत्युच्यते, एवं तर्हि द्वयोः क्रिययोरन्यतरकारकेऽभिहिते द्वितीयादिविभक्तिर्न प्राप्नोति- कृतं पश्य, अत्र करोतिक्रियायाः पश्यतिक्रियायाश्चैकमेव कटादिकं कर्म, तच्चान्यतरेण करोतिप्रत्ययेन क्तेनाभिहितमिति द्वितीया न प्राप्नोति, यत्रापि सैव सा क्रिया, यथा- कर्त्रा क्रियते, अत्र खल्वेकैव करणक्रिया, तस्याश्च कर्ता तृचाभिहित इति तृतीयाया अप्राप्तिः, एवं दात्रेण लुनातीत्यादावपि द्रष्टव्यम्; द्रव्यं च कारकं, तद्व्यतिरेकेण शक्तिसद्भावे प्रमाणाभावात्, न तावत् प्रत्यक्षं द्रव्यव्यतिरिक्तशक्तिस्वरूपपरिच्छेदि समुपजायते, द्रव्यस्वरूपातिरेकेण शक्तिरूपानुपलम्भात्, प्रत्यक्षाप्रवृत्तौ च तत्पूर्वकस्यानुमानस्यापि शक्तिसद्भावावेदने नास्ति सामर्थ्यम्, कार्यं च द्रव्यस्वरूपायत्तमेवेति कार्यव्यतिरेकादपि नास्ति शक्तिसद्भावावगमः, द्रव्यस्य चैकत्वाद् युगपदभिहितत्वानभिहितत्वासम्भव इत्याशङ्क्य पृच्छति- **कथमि**त्यादि । समाधत्ते- **उच्यत** इत्यादि । **कर्मादिसामान्यमि**ति- करणादिक्रियामात्रयोग्यमित्यर्थः । **तत्रापि** अभिधाने सत्यपीति । **अभिहित** इति प्रथमोत्पत्तिनिमित्तकथनम्; अनुद्भूतोऽपि कर्मादिरर्थो गुणभावेन कृदभिधेयत्वादभिहित इत्युच्यते, तत्राऽभिहितोऽपि कश्चिन्नान्तर्भवति, यथा- राज्ञः पुरुष इत्यत्र वाक्ये षष्ठ्या सम्बन्धोऽभिधीयते, न तु क्वचिदन्तर्भावमुपयातीति द्वयोरुपादानम् । **तदन्तैरि**ति- कृदन्तैः । **तत्रे**ति- कर्मादिशक्तियुक्ते द्रव्ये इति । **स्वरूप-कालभिन्नायामि**ति- तत्र स्वरूपकालभिन्ना यथा- **कृतं पश्ये**ति अत्र हि करोतिक्रियाया अतीतकालप्रत्ययोक्तायाः पश्येति वर्तमानकाला क्रिया स्वरूपतः कालतश्च भिद्यत इति, **आहृतमाहरे**त्यत्र त्वाहरेति क्रिया कालत एव भिद्यते, एवं- **कर्त्रा क्रियत** इत्यादावपि भिन्नपदप्रत्याय्ये भिन्ने एव करणक्रिये, एकपदोपात्ते हि क्रियासाधनसम्बन्धेऽनेन विभक्तयो निवार्यन्ते न तु वाक्योपात्ते; तथाहि- शय्यतेऽस्मिन्निति शयनमुच्यते, यदि च शयनक्रिया शेतेः सन्निधीयते तदा तदपेक्षया तच्छयनमुच्यते, एवं सामर्थ्याच्छेतेः शेतिः कर्त्री भवति, सर्वकालश्च प्रत्ययः, अनटः सामान्येन विधानात्, अपरस्या बाह्यं देवदत्तादि साधनं, वर्तमानकालश्च प्रत्ययः, एवं कर्त्रा क्रियत इत्यादावपि द्रष्टव्यः; तदयमर्थः- यदा नामार्थस्य स्वरूपकालभिन्नक्रियाविशेषे विवक्षायां कर्मादिशक्तिलक्षणार्थातिरेको भवति तदा नामार्थतां शक्तयो न प्रतिपद्यन्ते इति व्यभिचाराद् द्वितीयादिविभक्तिनिमित्तं भवति, यदा त्वपरोपकारित्वेन स्वनिष्ठतया नामार्थो विवक्ष्यते तदा व्यभिचाराभावात् ताः शक्तयः कर्मादिसंज्ञामेव प्राप्ता न विभक्त्युत्पत्तिं प्रयोजयन्ति, तदुक्तम्—

"स्वशब्दैरभिधानेऽपि, स धर्मो नाभिधीयते ।
विभक्त्यादिभिरेवासावुपकारः प्रतीयते ॥ १ ॥"

तत्रायं वस्तुसंक्षेपः- कर्म-करण-सम्प्रदानादिशब्दैः करणादिक्रियामात्रयोग्यवस्तुमात्रमनुद्भूतशक्तिकमभिधीयते, तत्र क्रियान्तरापेक्षोद्भूतशक्तिप्रतिपादनाय विभक्तिरवश्योत्पाद्येति । ननु द्रव्यस्य कारकत्वात् तस्य चैकत्वाद् युगपदुद्भूतत्वादिविरुद्धधर्मासंभवस्योक्तत्वात् कथमेष परिहार इति ?, उच्यते- शक्तेः कारकत्वात् तस्याश्च भेदादभिहितत्वानभिहितत्वसम्भवाद् भवत्येष परिहार इति । कथं पुनर्ज्ञायते- शक्तिः कारकं, न द्रव्यमिति चेत् ?, उच्यते- एवं हि कश्चित् कञ्चित् पृच्छति- क्व ? देवदत्त इति, स तस्मायाचष्टे वृक्षेऽसाविति, कस्मिन् ?, यः पुरस्तिष्ठतीति, स वृक्षोऽधिकरणं भूत्वाऽन्येन शब्देनाभिसम्बध्यमानः कर्ता सम्पद्यते, द्रव्ये तु साधने यदधिकरणं तदधिकरणमेव

स्यात्; अयमभिप्रायः- यदि द्रव्यं साधनं स्यात् तदा तस्यैकरूपत्वात् तन्निबन्धनाऽबाधितप्रत्यभिज्ञाविषयत्वान्नानार्थक्रियानिबन्धनो व्यपदेशभेदो न स्यात्, दृश्यते चासाविति नानाशक्तिसद्भावावगमः सिद्ध इति । नन्वेकस्यापि द्रव्यस्य स्वरूपादिभिन्नक्रियायां व्यापारवत्तयाऽनेककर्मादिशक्त्यधिष्ठानत्वात् तदभिधानाय च द्वितीयादिप्रवृत्तेः प्रतिपादितत्वादोदनः पक्त्वा भुज्यत इति भुजिप्रत्ययेन कर्मशक्तेरभिहितत्वेऽपि पचिप्रत्ययेनानभिहितादोदनाद् द्वितीया कस्मान्न भवतीत्यत आह- **यत्र पुनरि**त्यादि । एकस्मिन् वाक्ये युगपदनेकप्रधानक्रियाणामसम्भवात् प्रधानाप्रधानक्रियाविषयैवानेका शक्तिरिति तत्क्रियापेक्षया शक्तेरपि गुणप्रधानभावो भवतीत्यतः प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाश्यते, तस्यास्तदनुबन्धित्वादित्युक्तं- **प्रधानशक्त्यनुरोधादि**त्यादि । अत्रैवोदाहरणान्तरं दर्शयति- **यथा च ग्रामं गन्तुमिष्यत** इति- स्पष्टार्थम् । ननु गौणान्नाम्नः कर्मणि द्वितीयेत्युक्तम्, अजां नयति ग्राममित्यादौ तु ग्रामाद्यपेक्षया अजादेः प्रधानत्वान्न ततो द्वितीया प्राप्नोतीत्याह- **इह च गौणत्वमि**त्यादि । ननु यदि त्यादि-कृत्-तद्धित-समासैरभिहितत्वात् कर्मादिषु द्वितीयादयो न भवन्तीत्युच्यते, तदा कृतपूर्वी कटमित्यादौ कृतादिशब्देनैव कटादिकर्मणोऽभिहितत्वात् कथं द्वितीयेति ?, उच्यते- योऽसौ कृतादिभिः कटादेरभिसम्बन्धः स वृत्तेः परार्थाभिधायित्वेन कृतादीनामुपसर्जनत्वादुत्पन्ने प्रत्ययेऽर्थान्तराभिधायित्वान्निवर्तते, अस्ति च करोतेरभिसम्बन्धः कटादिनेति कृत्वा द्वितीया भविष्यति । न च प्रत्ययाभावोऽसामर्थ्यात्, यतो नेदं युगपदुभयं भवति- वाक्यं च प्रत्ययश्च, यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिः, तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः- कृतपूर्वी किम् ?, कटमिति, एवमन्यत्रापीत्याह- **इह त्वि**त्यादि- अत्रायं तात्पर्यार्थः- कृतः कटः पूर्वमनेनेति वाक्ये कृतकटयोः सामानाधिकरण्यम्, अस्मिंश्चार्थविशेषे वृत्त्या न भाव्यं, तस्याः सामान्यविषयत्वात्, सामान्येन च व्यवहारयोगात् तस्मात् कर्मसामान्ये भावे वा क्त उत्पद्यते । तत्र कृतं पूर्वमनेनेत्यस्मिन्नर्थे कृतपूर्विशब्दो वर्तते, तेन पूर्वं कृतवानित्ययमर्थः सम्पद्यते, तत्र करोतिवाच्यक्रियापेक्षमस्ति कटादेः कर्मत्वम्; तथाहि हरिः—

" विशेषकर्मसम्बन्धे नियु( निर्भु )क्तेऽपि कृता( कटा )दिभिः ।
विशेषनिर्पेक्षोऽन्यः कृतशब्दः प्रवर्तते ॥ १ ॥ "

" अकर्मकत्वे सत्येवं क्तान्तं( ते ), भावाभिधायि तत्( यिनि ) ।
ततः क्रियावता कर्त्रा, योगो भवति कर्मणाम् ॥ २ ॥ "

**यथा च ग्रामं गतो देवदत्त** इत्यत्रासमासे कर्तृविशेषगतया न्यग्भूतापि क्रिया ग्रामादिकर्मणा सम्बध्यते, एवं कृतपूर्वीत्यादौ विगृहीतापि, यत् स एवाह—

" अविग्रहा गतादिस्था, यथा ग्रामादिकर्मभिः ।
संबध्यते क्रिया तद्वत्, कृतपूर्व्यादिषु स्थिता ॥ ३ ॥

**व्याकरणं सूत्रयती**त्यत्रापि लक्ष्ये लक्ष्यलक्षणसमुदाये वा व्याकरणशब्दो वर्तते, तत्र व्याकरणस्य सूत्रं करोतीति वाक्ये भेदनिबन्धना षष्ठी, यदा तु लक्षण एव व्याकरणसूत्रशब्दो वर्तते तदा व्यपदेशिवद्भावनिमित्ता षष्ठी, उत्पन्ने तु प्रत्यये योऽसौ सूत्रव्याकरणयोरभिसम्बन्ध स निवर्तते, अस्ति च करोतेर्व्याकरणेनाभिसम्बन्ध इति द्वितीया भवति, तदयमर्थः- वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनाभिधीयते, णिचि तूत्पन्ने सत्त्वभावातिवर्तनात् करोत्यर्थाभिधायी सूत्रशब्दः सम्पद्यते, परार्थाभिधायित्वाद् वृत्तेरिति, प्रक्रियागतविभागाश्रयणेन चेदमुच्यते, परमार्थतश्च धात्वन्तरं सूत्रिः सूत्रणक्रियावचन इति ॥ छ ॥ २. २. ४०. ॥

---

**न्या० स०—कर्मणि** । **शब्दप्रयोगायोगादि**ति—अर्थप्रत्यायनाय हि लोके शब्दः प्रयुज्यते, स चार्थो यदा शब्दान्तरेण प्रतिपादितः स्यात् तदा प्रयोजनाभावाच्छब्दान्तरप्रयोगो न कर्तव्यः । **अनियताधाराणामि**ति- नहि भीष्मत्वादीनां कट एवाधारः किं त्वन्येऽपि । **न केवला प्रकृतिरि**ति- नापदं प्रयुञ्जीतेति न्यायात् । **तदेकयोग-क्षेमत्वादि**ति- अलब्धलाभो योगः, लब्धार्थपरिरक्षणं क्षेमः, तस्य देवदत्तादेर्यावेकौ योग-क्षेमौ तयोर्भावः । **कर्मादिसामान्यमि**ति- करणादिक्रियामात्रयोग्यमित्यर्थः । **तत्रापी**ति- सामान्यकर्माभिधानेऽपि । **अन्तर्भूत** इति- तत्राभिहितोऽपि कश्चिन्नान्तर्भवति, यथा- राज्ञः पुरुष इत्यत्र वाक्ये षष्ठ्या सम्बन्धोऽभिधीयते, न तु कश्चिदन्तर्भावमुपयातीति द्वयोरुपादानम् । **तत्रे**ति-कर्मादिशक्तियुक्ते द्रव्य इत्यर्थः । **स्वरूपकालभिन्नाया**मिति—कृताहृतेत्यादिक्रियापेक्षया स्वरूपेण कालेन च प्रस्याहरेत्यादिका क्रिया भिन्ना । **सव्यापारतये**ति- कारकत्वेनेत्यर्थः । **यथायथमि**ति- या यस्य स्वा इत्यर्थः । **प्रधानाप्रधानक्रिये**ति- एकस्मिन् वाक्ये युगपदनेकप्रधानक्रियाणामसम्भवात् प्रधानाप्रधानक्रियाविषयैवानेका शक्तिरिति तत्क्रियापेक्षया शक्तेरपि गुणप्रधानभावो भवतीत्यत आह- **प्रधानशक्त्यनुरोधादि**त्यादि । अत्रैवोदाहरणान्तरं दर्शयति- **यथा च ग्रामो गन्तुमिष्यत** इति । **ननु** गौणान्नाम्नः कर्मणि द्वितीयेत्युक्तम्, अजां नयति ग्राममित्यादौ तु ग्रामाद्यपेक्षया अजादेः प्रधानत्वान्न ततो द्वितीया प्राप्नोतीत्याह-- **इह चे**ति । **क्रियापेक्ष**मिति- आख्यातपदेनासमानाधिकरणं गौणमिति गौणत्वस्य द्वयोरपि कर्मणोर्भावात् क्रियापेक्षं गौणत्वमाश्रितम् । **न विहन्यत** इति- तेन गौणत्वाजाशब्दाददपि द्वितीया सिद्धा ॥ २. २. ४०. ॥

## क्रियाविशेषणात् । २ । २ । ४१ ॥

**त० प्र०—क्रियाया यद् विशेषणं तद्वाचिनो गौणान्नाम्नो द्वितीया भवति । मृदु पचति, स्तोकं पचति, मन्दं गच्छति, सुखं शेते, दुःखं जीवति, सयुक्तिकं भाषते, अथो पचति शोभनं ते भार्या, अत्र "सपूर्वात् प्रथमान्ताद्वा" [ २. १. ३२. ] इति विकल्पो न भवति । द्वितीयार्थं च वचनं न कर्मसंज्ञार्थं, तेन कृद्योगे कर्मनिमित्ता षष्ठी न भवति; ओदनस्य शोभनं पक्ता, सुखं स्थाता, कष्टं स्थाता, चिरमासिता, तथा मन्दं गन्ता ग्रामायेत्यादौ चतुर्थी न भवति ॥ ४१ ॥**

**श० न्या०—क्रिया०** । करोतेर्भावे कर्मणि वा शप्रत्यये—क्रिया, विपूर्वात् "शिष्लृंप् विशेषणे" इत्यतो विशिष्यते—अवच्छिद्यतेऽनेनेति करणेऽनटि— विशेषणम्, धात्वर्थः क्रिया परिणाम-परिस्पन्द-वर्तनालक्षणा त्रिधा, तस्या यद् विशेषणमवच्छेदकं तत इति । ननु च रूपाद्युपाधिवत् क्रिया द्रव्यस्यैवोपाधिः, न चोपाधेरुपाध्यन्तरसम्भवः, "निर्गुणा गुणाः क्रिया च" इति वचनात्, तत् कथं क्रियाया विशेषणसम्भवः ? सत्यमेतत्—किन्तु सजातीयस्य द्रव्योपाधेरपेक्षयोत्कर्षो दृश्यते, यथा— शुक्लः, शुक्लतरः, शुक्लतम इति, रूपरसादीनां कला इति प्रविभागप्रचयापचयाभ्यामुत्कर्षापकर्षवृत्तित्वं स्यात्, तत् तूपाध्यन्तरयोगात्, तदाहुस्तत्त्वविदः—

"भवेद् द्विगुणमाधुर्यमनन्तगुणकालकम् ।
द्रव्यं चतुर्गुणोद्भूतगन्धमाम्रफलादिकम्" ॥ १ ॥

यथा च रूपादीनां तथा क्रियाणामपि परस्परापेक्षया विशेषणसम्भवे शोभनं पचतीत्येवं विशेषणयोगः स्यात्, कथमन्यथा पापच्यते पचतितरामित्यादौ तासामेकरूपत्वाद् यङादिप्रत्ययविधिः स्यात् । ननु चासत्त्वभूता क्रिया, तदुपाधिस्तु सुतरामसत्त्वभूतः तत् कथं सत्त्वाभिधायिना नाम्ना प्रतिपाद्यत इति, उच्यते— धातुप्रकृतिवाच्याऽसत्त्वभूतैव क्रिया यथा क्रियाशब्देन नामरूपेण सत्त्वरूपापन्ना प्रतिपाद्यते, तथोपाधिरपि सत्त्वरूपापन्नः शोभनादिशब्देनेत्यदोषः । कथं पुनरसत्त्वभूतोऽर्थः सत्त्वरूपेण प्रकाश्यत इति चेत् ? स्ववाचकप्रकाशबलादिति ब्रूमः, स्वशक्तिरियं वाचकानां यदसत्त्वं [ सत्त्वरूपतया प्रकाशयन्ति; पदार्थस्य वा स्वरूपमिदमीदृशं यद्विशिष्टेन वाचकेनाभिधीयमानोऽसत्त्वरूपः ] सत्त्वरूपतयापि प्रकाशते, तदुक्तम्—

"व्यपदेशे पदार्थानामन्या सत्तौपचारिकी ।
सर्वावस्थासु सर्वेषामात्मरूपनिदर्शिनी ॥ १ ॥"
"स्फटिकादि यथा द्रव्यं भिन्नरूपैरुपाश्रयैः ।
स्वशक्तियोगात् संबद्धः ताद्रूप्येणैव गम्यते ॥२॥" इत्यादि ।

उदाहरणं— **मृदु पचती**त्यादि । ननु "क्रियाऽव्ययविशेषणे" [ लिङ्गानुशासने- ] इति लिङ्गकारिकावचनान्नपुंसकत्वमेकत्वं च क्रियाविशेषणानामभिहितं, तत्र "नाम्नः प्रथमा०" [ २. २. ३१. ] इति सूत्रेण सामान्यविहिता यथाऽन्येभ्यस्तथा क्रियाविशेषणादपि प्रथमा । अन्ये त्वाहुः— धात्वर्थः क्रिया, सा च कारकचक्रनिष्पाद्यत्वात् कर्मरूपतां नातिक्रामति, ततो यथा— भीष्ममुदारं दृश्यं कटं करोतीत्यादौ कटादिकर्मविशेषणतया भीष्मादिशब्देभ्यो द्वितीया तथा मन्दं पचति, साधु गच्छतीत्यादौ कर्मत्वात् क्रियाविशेषणादपि स्यात्, किमनेनेत्याशङ्कयाह— **द्वितीयार्थमि**त्यादि । तत्फलं दर्शयति— **तेने**त्यादि— अयमर्थः— यदेदं न स्याद् तदा यथौदनस्य पक्तेत्यादौ कृदन्तकर्मत्वादोदनादिशब्दात् कर्मणि षष्ठी, एवं शोभनं पक्तेत्यादौ शोभनशब्दादपि स्यात्, न चासाविष्टा, शिष्टासम्मतत्वात्; तथा मन्दं गन्ता ग्रामायेत्यादौ चतुर्थी चानिष्टा स्यात् । ननु शोभनं पक्तेत्यादौ "कर्मणि कृतः" [ २. २. ८३. ] इत्यनेन कर्मणि षष्ठ्युच्यते, [ शोभनमिति ] क्रियाविशेषणत्वेन कृदन्तस्य कर्म, तद्धि कृदन्तधातुवाच्यायाः क्रियाया विशेषणं, न च सा क्रिया आत्मन एव कर्मापि तु करोतीति क्रियान्तरस्य, सा यस्याः क्रियायाः कर्म तस्या एवेदमपि कर्म तत्सामानाधिकरण्याद्वयस्य कर्मत्वमिति क्रियाविशेषणे षष्ठी न भवति; नैवम्— नात्र पचतीत्यादिक्रियायाः कर्मत्वं, नह्यत्र क्रियान्तरमस्ति यदपेक्षया धात्वर्थस्य कर्मता स्यात्, तथाहि— धातुर्विक्लेदार्थो देवदत्तादिव्यापारं क्रियामाचष्टे, प्रत्ययः साधनं, तं च व्यापारं दर्शयता विक्लेदार्थं पाकशब्दमुपादाय पाकं करोतीत्युच्यते, न त्वत्र धातूपात्ताया विक्लेदसाधनदेवदत्तादिव्यापारलक्षणायाः क्रियायाः कर्मत्वापत्तौ क्रियान्तरं प्रतीयते येनेदं कर्म स्यात्, अतः क्रियाविशेषणात् प्रथमैव भवति, न विभक्त्यन्तरस्य प्राप्तिरस्तीति; नन्वस्तु प्रथमा, प्रथमाद्वितीयैकवचनयो रूपे प्रत्ययविशेष इत्युक्तत्वाद् दोषाभावात्, नैवम्— प्रथमाविधाने— **अथो पचति शोभनं ते भार्ये**त्यादौ 'ते-मे' विधानं "सपूर्वात् प्रथमान्ताद् वा" [ २. १. ३२. ] इत्यन्वादेशे विकल्पितं स्याद् नित्यं चेष्यत इति प्रथमाविधिर्नेष्ट इति द्वितीयार्थमिदमुच्यते ॥ छ ॥ २. २. ४१. ॥

**न्या० स०—क्रियावि०** । प्रत्यासत्तेः क्रियाविशेषणं यत् समानाधिकरणं तस्मादेव द्वितीया । नन्विदं सूत्रं प्रथमाधिकारे क्रियतां, प्रथमयाऽपि सर्वाण्यपि रूपाणि सेत्स्यन्ति, उच्यते— पुण्यवांस्त्वमथो पचति शोभनं ते भार्येत्यादौ विकल्पः प्राप्नोति । ननु रूपाद्युपाधिवत् क्रिया द्रव्यस्यैवोपाधिर्न चोपाधेरुपाध्यन्तरसम्भवः, निर्गुणा गुणाः क्रिया चेति वचनात्, तत् कथं क्रियाया विशेषणसम्भवः ? सत्यमेतत्— किन्तु सजातीयस्य द्रव्योपाधेरपेक्षयो-

त्कर्षो दृश्यते, यथा– शुक्लः, शुक्लतरः, शुक्लतम इति, रूप-रसादीनां कला इति प्रविभागप्रचयापचयाभ्यामुत्कर्षापकर्षवृत्तित्वं भवति, तत् तूपाध्यन्तरयोगात्, तदाहुस्तद्विदः—

" भवेद् द्विगुणमाधुर्यमनन्तगुणकालकम् ।
द्रव्यं चतुर्गुणोद्भूतगन्धमाम्रफलादिकम् ॥ १ ॥ "

यथा च रूपादीनां तथा क्रियाणामपि परस्परापेक्षया विशेषसम्भवाच्छोभनं पचतीत्येवं विशेषणयोगः स्यात्, कथमन्यथा पापच्यते पचतितरामित्यादौ तासामेकरूपत्वाद् यङादिप्रत्ययविधिः स्यात्। ननु चासत्त्वभूता क्रिया, तदुपाधिस्तु सुतरामसत्त्वभूतः, तत् कथं सत्त्वाभिधायिना नाम्ना प्रतिपाद्यत इति, उच्यते–धातुप्रकृतिवाच्याऽसत्त्वभूतैव क्रिया यथा क्रियाशब्देन नामरूपेण सत्त्वरूपापन्ना प्रतिपाद्यते तथोपाधिरपि सत्त्वरूपापन्नः शोभनादिशब्देनेत्यदोषः । **मन्दं गन्तेति**– मन्दशब्दस्य हि कर्मत्वे " गतेर्नवाऽऽप्ते " [ २. २. ६३. ] इत्यनेन ततश्चतुर्थी स्यात्; यदा गन्तेत्यत्र तृच् तदा मतान्तरेण ग्रामशब्दाच्चतुर्थी, स्वमते तु " कर्मणि कृतः " [ २. २. ८३. ] इत्यनेन परत्वात् षष्ठ्येव भवति, यदा तु तृन् तदा " तृन्नुदन्त० " [ २. २. ९०. ] इति षष्ठीनिषेधात् स्वमतेऽपि चतुर्थी ॥ २. २. ४१ ॥

## काला-ऽध्वनोर्व्याप्तौ । २ । २ । ४२ ॥

**त० प्र०—स्वेन संबन्धिना द्रव्य-गुण-क्रियारूपेण कार्त्स्न्येन संबन्धो व्याप्तिः, अत्यन्तसंयोग इति यावत्, तस्यां द्योत्यायां कालेऽध्वनि च वर्तमानाद् गौणान्नाम्नो द्वितीया भवति । मासं गुडधानाः, मासं कल्याणी, मासमधीते; क्रोशं पर्वतः, क्रोशं कुटिला नदी, क्रोशमधीते । काला-ऽध्वनोरिति किम् ?, स्थाल्यां पचति । व्याप्ताविति किम् ? मासस्य मासे वा द्व्यहं गुडधानाः, मासस्य मासे वा एकरात्रं कल्याणी, मासस्य मासे वा द्विरधीते; क्रोशस्य क्रोशे वा एकदेशे पर्वतः, क्रोशस्य क्रोशे वा एकदेशे कुटिला नदी, क्रोशस्य क्रोशे वा** एकदेशेऽधीते । षष्ठ्या सप्तम्या वा अयमपवादः, तेन मासमधीते, क्रोशमधीते इत्यकर्मकत्वे इदमुदाहरणम्, कर्मत्वे " कर्मणि " [ २. २. ४०. ] इत्येव द्वितीया सिद्धा । भावादपीच्छन्त्यन्ये– गोदोहं वक्रः, गोदोहं बुद्बुदाः ॥ ४२ ॥

१. कथं पुनरसत्त्वभूतोऽर्थः सत्त्वरूपेण प्रकाश्यत इति चेत्? स्ववाचकप्रकाशबलादिति ब्रूमः, स्वशक्तिरियं– वाचकानां यदसत्त्वं सत्त्वरूपतया प्रकाशयन्ति; पदार्थस्य वा स्वरूपमिदमीदृशं यद् विशिष्टेन वाचकेनाभिधीयमानोऽसत्त्वरूपतया प्रकाश्यते, तदुक्तम्—

" व्यपदेशे पदार्थानामन्या सत्तौपचारिकी ।
सर्वावस्थासु सर्वेषामात्मरूपनिदर्शिनी ॥ १ ॥
स्फटिकादि यथा द्रव्यं, भिन्नरूपैरुपाश्रयैः ।
स्वशक्तियोगात् सम्बद्धं, ताद्रूप्येणैव गम्यते ॥ २ ॥ "

इति ॥ ४१ ॥

**श० न्या०—काला०** । व्याप्तिं व्याचष्टे-**स्वेन सम्बन्धिनेत्**यादिना । सम्बन्धिनं दर्शयति– **द्रव्य-गुण-क्रियारूपेणे**ति । **अत्यन्तसंयोग** इति– तत्र संयोगस्याविच्छेद इत्यर्थः । कालाध्वनोरित्यनेन गौणादित्यनुवर्तमानं विशिष्यते, तेन च प्रत्ययाक्षिप्ता नामप्रकृतिरित्याह- **कालेऽध्वनि च वर्तमानादि**त्यादि । काला-ऽध्वनोः प्रत्येकं गुणक्रियाभिरत्यन्तसंयोगे क्रमेण द्वितीयामुदाहरति– **मासं गुडधाना** इत्यादि– गुडधाना इति द्रव्येण जातिरूपेण व्यक्तिरूपेण वा व्याप्तिः [ कालस्य ], **क्रोशं पर्वत** इत्यध्वनः, **मासं कल्याणी, क्रोशं कुटिला नदी**ति तयोर्गुणेन व्याप्तिः, **मासमधीते क्रोशमधीत** इति क्रियया । **स्थाल्यां पचती**ति पाकेन स्थाल्यां व्याप्तायामपि **कालाध्वनोरि**ति वचनादत्र द्वितीया न भवति; तदभावे " सप्तम्यधिकरणे " [२. २. ९५.] इति सप्तमी । द्वयोरह्नोः समाहार इति " द्विगोरन्नह्नः " [ ७.३. ९९. ] इत्यटि द्व्यहम्, द्वौ वारावस्य "द्वि-त्रि-चतुर०" [७. २. ११०.] इति सुचि द्विः, अत्र गुडधानादिना मासस्य क्रोशस्य वा कार्त्स्न्येन सम्बन्धाभावात् षष्ठी सप्तमी वा भवतीति । एवं– **क्रोशस्य क्रोशे वा एकदेशे पर्वत** इत्यादावपि व्याप्तेरभावो द्रष्टव्य इति, अत्र कालाऽध्वनोः सम्बन्धमात्रविवक्षायां षष्ठी, आधारविवक्षायां तु सप्तमी । इयं च द्वितीया षष्ठी-सप्तम्योरुक्तेन प्रकारेण बाधिकेत्याह- **षष्ठ्याः सप्तम्या वाऽयमपवाद** इति । न च कालाऽध्वनोः कर्मत्वेन द्वितीययैव भाव्यं, किमर्थमेतदिति वाच्यम्, " काला-ऽध्व-भाव-देशं वा कर्म चाकर्मणाम् " [ २. २. २३. ] इत्यकर्मकधातुसम्बन्धित्वेनाधारस्य कर्मसंज्ञाविधानात् सकर्मकधातुसम्बन्धित्वेऽनयोरुक्तेन प्रकारेण षष्ठी सप्तमी वा स्यान्न कर्मत्वमित्याह- **तेने**त्यादि ॥ छ ॥ २. २. ४२. ॥

**न्या० स०—काला-ऽध्वनो०** । **स्वेन संबन्धिनेत्**यत्र " द्वि-हेतो० " [ २. २. ८७. ] इत्यनेन विकल्पेन षष्ठीविधानात् कर्तरि तृतीया । **कार्त्स्न्येने**ति सहार्थे तृतीया । **संबन्ध** इति– अत्र काला-ऽध्वनोः कर्मतापन्नयोरिति गम्यम् । **मासस्य मासे वा द्व्यहं गुडधाना** इति– अत्र द्व्यहशब्दादनेन द्वितीया, मासशब्दात् तु व्याप्तेरभावान्न, एवमुत्तरेष्वपि । **क्रोशस्य क्रोशे वा एकदेश** इति– अत्रैकदेशशब्दाद् व्याप्तेः संभवेऽपि अध्वनोऽभावादनेन द्वितीया न । **अकर्मकत्व इदमि**ति– अयमर्थः–यदा शास्त्रादिकर्मणा इङ्धातुः

सकर्मको विवक्ष्यते तदा "कालाऽध्व-भाव-देशं वा०" [२. २. २३.] इत्यस्य प्राप्तिरेव नास्ति, तत्राऽकर्मणामिति भणनात्, यदा त्व-विवक्षितकर्मत्वेनाकर्मको धातुर्विवक्ष्यते तदा " काला-ध्व-भाव-देशं वा० " [ २. २. २३. ] इत्यस्य प्राप्तावप्यकर्मसंज्ञापक्ष आश्रीयते, कर्मत्वपक्षे हि " कर्मणि " [ २. २. ४०. ] इत्येव सिद्धेः ॥ २. २. ४२. ]

## सिद्धौ तृतीया । २ । २ । ४३ ॥

**त० प्र०—सिद्धौ**– क्रियाफलनिष्पत्तौ, द्योत्यायां काला-ऽध्ववाचिनो गौणान्नाम्नः ' टा-भ्याम्-भिस् 'लक्षणा यथा-संख्यमेक-द्वि-बहौ तृतीया विभक्तिर्भवति, व्याप्तौ गम्यायाम्। **मासेन मासाभ्यां मासैर्वाऽऽवश्यकमधीतम्, क्रोशेन क्रोशाभ्यां, क्रोशैर्वा प्राभृतमधीतम्।** सिद्धाविति किम्? **मासमधीत आचारो नानेन गृहीतः** अत्र व्याप्तिमात्रं गम्यते न सिद्धिः। भावादपीच्छन्त्यन्ये– **गोदोहेन कृतः कटः।** द्वितीयाऽपवादो योगः ॥ ४३ ॥

**श० न्या०—सिद्धौ०।** यद्यपि त्रिप्रकारा व्याप्तिः प्रस्तुता तथापि सामर्थ्यात् क्रियाव्याप्तेरेव सिद्धाविति विशेषणं, यस्य ह्यारम्भस्तस्य सिद्धिः, द्रव्य-गुणयोश्च सिद्धरूपयोः शब्देन प्रतिपादनान्न तावारभ्येते नापि निष्पद्येते इति न ताभ्यां व्याप्तेः सिद्धया सम्बन्धः। ननु यदि क्रिया सिद्धिं व्यभिचरेत् तद् युज्यत एतद् विशेषणं क्रियाव्याप्तेः, न च काचित् क्रिया-ऽपरिसमाप्ताऽस्ति, सत्यमेतत्–किन्तु काचित् फलं सम्पाद्य समाप्यते, काचिदन्यथा, तत्र विशेषणोपादानसामर्थ्यादधिगत-फला या समाप्यते तद्व्याप्तौ द्वितीयाबाधिका तृतीयेत्याह– **सिद्धौ– क्रियाफलनिष्पत्ताव**ित्यादि। सिद्धिः क्रियाफल-निष्पत्तिः, ततश्च क्रियाव्याप्तावेवायं विधिर्न द्रव्य-गुणव्याप्ता-विति क्रियाव्याप्तावेवोदाहरति– **मासेन मासाभ्यां मासैर्वावश्यकमधीतम**िति– आवश्यकं नाम– अध्ययनविशेषः, **अधीतम**िति सिद्धं गृहीतं शिक्षितमिति यदर्थमध्ययनं तत्फल-निष्पत्तिर्गम्यते, तदभावे प्रत्युदाहरणे द्वितीयैवेत्युदाहरति– **मासमधीतम**ित्यादि– अत्र व्याप्तिमात्रं गम्यते, न सिद्धिरिति सिद्ध्यर्थ(र्थी)विवक्षामात्रेण तृतीयाया अभावः। अत्रापि काला-ध्वनोर्व्याप्तेर्विद्यमानत्वात् पूर्वेण द्वितीयायां प्राप्तायां तद्बाधनार्थो योगः, तेन यदुच्यते कैश्चित्– ' मासेनानुवाकोऽधीतः, क्रोशेना-नुवाकोऽधीत इति करण एव तृतीयेदं नारम्भणीयम् ' इति, तद-सम्यगित्याह– **द्वितीयापवादो योग** इति ॥छ॥२. २. ४३.॥

**न्या० स०—सिद्धौ तृ०।** सिद्धाविति– यद्यपि त्रिप्रकारा व्याप्तिः प्रस्तुता तथापि सामर्थ्यात् क्रियाव्याप्तेरेव सिद्धाविति विशेषणम्, यस्य ह्यारम्भस्तस्य सिद्धिः, द्रव्य-गुणयोश्च सिद्धरूपयोः शब्देनाप्रतिपादनान्न तावारभ्येते, नापि निष्पद्येते इति न ताभ्यां व्याप्तेः सिद्धया संबन्धः। ननु यदि क्रिया सिद्धिं व्यभिचरेत् तदा युज्येत एतद्विशेषणं क्रियाव्याप्तेः, न च काचित् क्रियाऽपरिसमाप्ताऽस्ति, सत्यमेतत्– किन्तु काचित् फलं संपाद्य समाप्यते, काचिदन्यथा, तत्र विशेषणोपादानसामर्थ्यादधिगतफला या समाप्यते तद्व्याप्तौ द्वितीयाबाधिका तृतीयेत्याह– **क्रियाफले**त्यादि। **मासेनावश्यकम**िति– अत्र आवश्यकं नाम– अध्ययनविशेषः, **अधीतम**िति सिद्धं गृहीतं शिक्षितमिति यदर्थमध्ययनं तत्फलनिष्पत्तिर्गम्यते। **द्वितीयापवाद** इति– काला-ऽध्वनोर्व्याप्तेर्विद्यमानत्वात् पूर्वेण द्वितीयायां प्राप्तायां तद्बाधनार्थो योगः, तेन यदुच्यते कैश्चिद्– ' मासेनाऽनुवाकोऽधीतः, क्रोशेनानुवाकोऽधीत इति करण एव तृतीया इतीदं नारम्भणीयम् ' इति तदसम्यगिति ॥ २. २. ४३. ॥

## हेतु-कर्तृ-करणेत्थम्भूतलक्षणे । २।२।४४ ॥

**त० प्र०—**फलसाधनयोग्यः पदार्थो हेतुः, इमं– कञ्चित् प्रकारं भूतः– आपन्नः–इत्थम्भूतः, स लक्ष्यते येन स इत्थम्भूत-लक्षणः; हेत्वादिष्वर्थेषु वर्तमानाद् गौणान्नाम्नस्तृतीया भवति। **हेतौ– धनेन कुलम्, अन्नेन वसति, विद्यया यशः, कन्यया शोकः, तीक्ष्णेन परशुना छिनत्ति; कर्तरि– चैत्रेण कृतम्, मैत्रेण भुज्यते; करणे– दात्रेण लुनाति, मनसा मेरुं गच्छति, समेन धावति– समेन पथा ग्रामं धावतीत्यर्थः, एवं– विषमेण धावति, आकाशेन याति; आधारविवक्षायां तु सप्तम्यपि– समे धावति, विषमे धावति, आकाशे याति; इत्थम्भूतलक्षणे– अपि भवान् कमण्डलुना छात्रमद्राक्षीत्, चूलया परिव्राजक-मद्राक्षीत्; छात्रत्वादिकं प्रकारमापन्नस्य मनुष्यस्य कमण्ड-ल्वादि लक्षणम्। इत्थम्भूतग्रहणं किम्? वृक्षं प्रति विद्यो-तनम्। अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदित्यत्र तु लक्ष्यप्रधानो निर्देशो न लक्षणप्रधान इति न भवति। " सहार्थे " [ २. २. ४५. ] इत्येव तृतीया सिध्यति, लक्ष्यलक्षणभावे तु षष्ठी मा भूदितीत्थंभूतलक्षणग्रहणम्। तथा ' धान्येनार्थः, धान्येनाऽर्थी, मासेन पूर्वः, मासेनाऽवरः, असिना कलहः, वाचा निपुणः, गुडेन मिश्रः, आचारेण श्लक्ष्णः, माषेणोनः, माषेण न्यूनः, मासेन विकलः, पुंसाऽनुजः, शष्कुलया खण्डः; गिरिणा काणः ' इत्यादौ हेतौ कृत-भवत्यादि-गम्यमानक्रियाऽपेक्षया कर्तरि करणे वा तृतीयेति ॥ ४४ ॥**

**श० न्या०—हेतु०।** कर्तृप्रयोजकस्यापि शास्त्रकृता हेतु-त्वेन व्यवहारादुभयगतत्वेऽपि लौकिक एव हेतुरिह गृह्यते, कर्तुः प्रयोजके हि कर्तृत्वात् कर्तृद्वारेणैव तृतीयासिद्धेरित्याह–

**फलसाधनयोग्य** इत्यादि-फलं- कार्यं, तस्य साधनं- भावना निष्पादनं करणमिति यावत्, तत्र योग्यः- सामान्यतो दृष्टसामर्थ्यः; योग्यग्रहणमन्तरेण तु फलसाधन इत्युच्यमाने यः फलं साधयति क्रियाविष्टस्तत्र प्रतिपत्तिः स्यात्, योग्यग्रहणे तु योग्यतामात्रप्रतिपत्तावकुर्वन्नपि तत्फलं हेतुरिति हेतुत्वं फलसाधनयोग्यत्वम्, तेन रूपेण पदार्थो हेतुरुच्यत इति हेतुतृतीयया तत्र तस्य योग्यतामात्रं द्योत्यते; तथा च धनादीनि कुलादिकमकुर्वन्त्यपि योग्यतामात्रेण तृतीयामुत्पादयन्ति, यत्रापि क्रिया दृश्यते 'अन्नेन वसति' इति तत्रापि क्रियायामन्नादेर्योग्यतामात्रविवक्षयैव हेतुतृतीया, प्रकृष्यमाणव्यापारविवक्षायां तु करणे तृतीया स्यादिति । ननु योग्यस्य हेतुत्वे सर्वमेव कारकं हेतुरेव स्यादयोग्यस्याकारकत्वात्, तत्र कर्तृ-करणयोस्तृतीयाविधानमनर्थकं हेतावित्येव गतत्वात्, कर्मादौ च यद्यपि विभक्त्यन्तरं विहितं तथापि यत्र कारकत्वमेव भवति न कर्मादिविशिष्टरूपता तत्रापवादाभावात् तृतीया प्राप्नोति- नटस्य शृणोति ग्रन्थिकस्य शृणोतीति, उच्यते- न हेतुमात्रं कारकत्वम्, अपि तु विशिष्टं रूपं क्रियाया निर्वर्तकं नाम, तत्रापि कर्त्रादिभावो विशिष्टः; तस्य विशिष्टरूपस्य कर्तृ-करणयोस्तृतीयाविधानम्, अन्यथा तत्र षष्ठी स्यात्, नटस्य शृणोतीत्यत्रापि योग्यता न विवक्षिता, अपि तु क्रियायामप्रधानतामात्रमिति न भवति, तद्विवक्षायां तु तत्रापि तृतीया भवत्येव- नटेन शृणोतीति । **इममि**ति प्रत्यक्षीक्रियमाणस्य प्रकृत्यर्थस्यानवधारणात् तमाह- **किञ्चिदि**ति-विवक्षितमित्यर्थः, **प्रकारमि**ति थम्प्रत्ययार्थः, **आपन्न** इति भूतार्थः, भूतः प्राप्त्यर्थस्य प्रयोगात्, स लक्ष्यते येनेति लक्षयतेः करणेऽनट्, इत्थम्भूतस्य लक्षणमिति कर्मषष्ठ्या समासः, वृत्तौ **स लक्ष्यते येने**त्यादि तात्पर्यकथनम् । क्रमेणोदाहरति-**धनेन कुलमि**त्यादि- कुलकरणे धनस्य योग्यता परिदृष्टा, तत् संप्रत्यकुर्वदपि तत्र हेतुरिति व्यपदिश्यते, **अन्नेन वसती**ति- वसनक्रियालक्षणस्य फलस्य साधनयोग्यत्वादन्नं हेतुः, एवं- विद्या-कन्या-तैक्ष्ण्यानामपि तद्योग्यत्वाद्धेतुत्वं द्रष्टव्यम् । अथ यूपाय दार्वित्यादौ तादर्थ्यलक्षणे सम्बन्धे हेतुमद्भावस्य प्रकारभूते प्रतिपाद्ये दारुणो हेतोः कस्मात् तृतीया न भवति ?, उच्यते- हेतुमतो यूपादेस्तादर्थ्यचतुर्थ्योत्पद्यमानया द्विष्ठस्य सम्बन्धस्याभिहितत्वादगौणत्वाच्च सम्बन्धाभिधायिन्यास्तृतीयस्या अप्रवृत्तिः, तृतीययाऽथाभिहिते दारुणा यूप इति चतुर्थ्या इति । **चैत्रेण कृतं मैत्रेण भुज्यते** अत्र चैत्रादिः करणादिक्रियायाः कर्तेति ततस्तृतीयेति । **दात्रेण लुनाती**त्यादीनि- अत्र दात्रादिना देवदत्तादिः कर्ता लवनादिक्रियां करोतीति साधकतमत्वाद् दात्रादि करणमिति ततस्तृतीया । **छात्रत्वादिकमि**त्यादिनेत्थम्भूतलक्षणार्थमुदाहरणे योजयति, अनुगमत्वात्, सामान्यस्य भेदको धर्मः प्रकार इति मनुष्य इति सामान्यभेदकश्छात्रत्वादिको धर्मः प्रकार इत्यर्थः, आदिशब्देन कुमारत्वादिपरिग्रहः, **तमापन्नस्य** प्राप्तस्य, **कमण्डल्वादि** आदिशब्देनावदातवर्णादि च, **लक्षणं** तेन हि स इत्थंभूतो दृश्यत इति ततस्तृतीया । ननु कमण्डल्वादिलक्षणस्य हेतुत्वमप्यस्तीति तद्द्वारेणैव भविष्यति, उच्यते- न तावच्छात्रादिस्वरूपं लक्षणाधीनमिति न तस्य लक्षणं हेतुः, छात्रादिप्रतीतेस्तु तद्धेतुः, न चेह तत्प्रतीतिः केनचिदभिधीयते, सूत्रेण त्वनेन तृतीया विधीयमाना लक्षणत्वमवद्योतयतीति युक्तोऽस्यारम्भ इति । **वृक्षं प्रति विद्योतनम्** अत्र विद्योतनं नाम प्रकारः, तमापन्नस्य कस्यचिन्न वृक्षो लक्षणम्, अपि तु तस्यैव तत्प्रकारापन्नं विवक्षितमिति । ननु चात्रासत्यपीत्थम्भूतग्रहणे तृतीया न भविष्यति "लक्षण-वीप्स्येत्थंभूतेषु०" [ २. २. ३६. ] इत्यादिना प्रत्यादियोगे लक्षणे द्वितीयस्या अपवादरूपाया विधीमानत्वात्, सत्यमेवेतत्-जातौ पदार्थे, व्यक्तौ तु पर्यायः स्यादिति प्रत्युदाह्रियते । अथवा **वृक्षं प्रती**ति वृक्षस्य लक्षणत्वप्रदर्शनपरमेतत्, प्राप्तिस्त्वत्रेत्थम्भूतग्रहणाभावे वृक्षेण विद्योतनमिति तृतीयाप्रसक्तौ प्रत्ययभाव एव विज्ञायत इत्यदोषः । अथेत्थम्भूतलक्षणे लक्ष्यवाचिशब्दस्थे प्रतिषेधो वक्तव्यः, अन्यथा कमण्डलुपाणिं छात्रमद्राक्षीदिति बहुव्रीहौ कृते कमण्डलुशब्दात् तृतीया स्यात्; न च * प्रत्ययलक्षणेन * " अधातुविभक्ति० " [ १. १. २७. ] इति नामसंज्ञाप्रतिषेधः, " नामन्त्ये " [ २. १. ९२. ] इति नलोपप्रतिषेधज्ञापकात्, न च तृतीयस्या लुप् प्राप्नोति, समासनामावयवत्वात् कृते समासे तस्या उत्पादात्; नैष दोषः- इत्थंभूतस्य लक्षणेनापृथग्भावात् ततस्तृतीया न भवति, यत्रेत्थंभूतस्य लक्षणं पृथग्भूतं तत्र तृतीया भवति, न चात्रेत्थम्भूतस्य लक्षणं पृथग्भूतम्, तथाहि- अयं प्राधान्येन लक्षणं निर्दिशति, इत्थम्भूतस्य लक्षणमिति षष्ठीतत्पुरुषस्योत्तरपदार्थप्रधानत्वादित्थंभूतस्य यल्लक्षणं प्रधानम्- अप्राप्तोपसर्जनभावं, तत्र तृतीया, यथा- कमण्डलुना छात्रमद्राक्षीदिति, बहुव्रीहौ तु स्वार्थोपसर्जनादन्यपदार्थाभिधायित्वाद् वर्तिपदानां नास्ति लक्षणस्य प्राधान्यम्- अन्यपदार्थलक्ष्यस्यैव प्राधान्यादित्याह- **अत्र तु लक्ष्यप्रधान** इत्यादि । ननु कमण्डलुना छात्रमद्राक्षीदित्यादौ कमण्डलुना सह छात्रमद्राक्षीदिति सहार्थयोगोपपत्तेः " सहार्थे " [ २. २. ४५. ] तृतीया सिद्ध्यति तदनर्थकमित्थम्भूतग्रहणमित्याह- **सहार्थ** इत्यादि- अयमर्थः- अत्र सहार्थयोगः सम्भवति, तद्विवक्षायां च तृतीया सिध्यति, लक्ष्यलक्षणभावश्चेहाधिकोऽस्ति, तत्र षष्ठीबाधनायानेन तृतीया विधीयत इति । ननु **धान्येनार्थो धान्येनार्थी**त्यादौ क्रियापदाश्रवणात् कर्तृ-करणयोरभावात् षष्ठी

प्राप्नोतीत्याह– **हेतावि**त्यादि– गम्यमानक्रियापेक्षयाऽपि कर्त्रादि भावदर्शनाद्, यथा– प्रविश पिण्डीमिति ॥ छ ॥ २. २. ४४. ॥

**न्या० स०—हेतु-क०** । फलसाधनयोग्य[1] इति– फलं– कार्यं, तस्य साधनं– निष्पादनं करणमिति यावत्, तत्र योग्यः– सामान्यतो दृष्टसामर्थ्यः, योग्यग्रहणमन्तरेण फलसाधन इत्युच्यमाने यः फलं साधयति क्रियाविष्टस्तत्र प्रतिपत्तिः स्यात्, योग्यग्रहणेन तु योग्यतामात्रप्रतिपत्तावकुर्वन्नपि तत्फलं हेतुरिति, योग्योऽत्र निर्व्यापारो गृह्यते, सव्यापारत्वे तु कर्तृत्वमेव, धनादीनि कुलादिकमकुर्वन्त्यपि योग्यतामात्रेण तृतीयामुत्पादयन्ति, अन्नेन वसतीत्यादावपि क्रियायामन्नादेर्योग्यतामात्रविवक्षैवेति हेतावेव तृतीया । **इममिति**– प्रत्यक्षम्, **कञ्चिदिति**– विवक्षितम्, **प्रकारमिति** थम्प्रत्ययार्थः, **आपन्न** इति भूतार्थः, भूङः प्राप्त्यर्थस्य प्रयोगात् । **स लक्ष्यते येनेति**– लक्ष्यतेः करणेऽनट्, इत्थम्भूतस्य लक्षणमिति कर्मषष्ठ्या समासः, वृत्तौ **स लक्ष्यते येनेति** स्वर्थकथनमात्रम् ।

**इत्थम्भूतग्रहणं किमिति**– ननु इत्थम्भूतग्रहणं किमर्थम् ? यतो 'लक्षणे' इत्युक्तेऽपि '**अपि भवान् कमण्डलुना छात्रमद्राक्षीद्**' इत्याद्युदाहरणानि भविष्यन्ति, अथेत्थं भणिष्यन्ति भवन्तः– वृक्षं प्रति विद्योतनमित्यत्रापि तृतीया स्यात्, तन्न– यतो "भागिनि०" [ २. २. ३७. ] इति सूत्रेण प्रतिना योगे द्वितीया भविष्यति, एवं सति प्रतेरयोगेऽपि द्योतकत्वाद् वृक्षं विद्योतनं स्यात्, न तु वृक्षेणेति, सत्यम्– इत्थंभूतग्रहणमेवं ज्ञापयति– यत्र साक्षात् प्रतिना योगो भवति तत्र "भागिनि च प्रतिपर्यनुभिः" [ २. २. ३७. ] इति सूत्रेण द्वितीया भवति, अत्र तु वृक्षस्य विद्योतनमित्येव भवति । **अपि भवान् कमण्डलुपाणिमिति**– "विशेषणसर्वादि०" [ ३. १. १५०. ] इति सूत्रेण विशेषणद्वारेण पाणेः पूर्वनिपाते प्राप्ते "न सप्तमीन्द्वादिभ्यश्च" [ ३. १. १५५. ] इति निषेधात् कमण्डलोः प्राग्निपातः । ननु वाक्यावस्थायां कमण्डलुशब्दात् किमिति न तृतीया ? उच्यते– वाक्ये आख्यातपदेन सामानाधिकरण्यमिति प्रधानत्वेन गौणत्वाभावात्; तर्हि समासे सति कथं न ? उच्यते– तदा लक्ष्यप्रधानत्वान्न; ननु समासे सति विभक्त्यन्तवर्जनान्नामत्वाभावे नाम्नो विहितायास्तृतीयायाः कथमत्र प्राप्तिः ?, नैवम्– "नामन्त्र्ये" [ २. १. ९२. ] इति प्रतिषेधसूत्रकरणात्, तद्धि हे राजन्नित्यादिषु नलोपाभावार्थम्, तन्न युक्तम्– प्राप्तिपूर्वको हि प्रतिषेधः, अत्र तु "नाम्नो नोऽनह्नः" [ २. १. ९१. ] इत्यनेन हे राजन्नित्यादिषु विभक्तिद्वारा नामत्वाभावे नलोपप्राप्तिरेव नास्ति, तस्माद् "नामन्त्र्ये" [ २. १. ९२. ] इति प्रतिषेधसूत्रकरणान्नामकार्यं प्रतिपन्नम्, ततः समासमध्येऽपि प्राप्तिः; तर्हि धर्मश्रित इत्यादावपि समासे द्वितीयादिप्रसङ्गः स्यात्, तन्न– कर्मादिशक्तेः संबन्धस्य च समासेनैवाभिहितत्वात्; तर्हि नामार्थमात्रे प्रथमा भवतु, तदपि न– आख्यातपदसामानाधिकरण्ये प्रथमा; तर्हि नीलोत्पलमित्यादिषु नीलेन सहाख्यातपदसामानाधिकरण्ये कथं प्रथमा ?, उच्यते– तत्रापि सामानाधिकरण्यं नास्ति, अन्यथा सापेक्षत्वे समासोऽपि न स्यादिति; तर्हि कमण्डलुपाणिशब्दात् उपसर्जनीभूतलक्षणात् तृतीया प्राप्नोति, न– लक्षणस्य प्राधान्ये तृतीया न लक्ष्यस्य इति न भवतीति शाकटायनः ॥ २. २. ४४. ॥

# सहार्थे । २ । २ । ४५ ॥

**त० प्र०**—सहार्थस्तुल्ययोगो विद्यमानता च, तस्मिन् शब्दादर्थाद् वा गम्यमाने गौणान्नाम्नस्तृतीया भवति । पुत्रेण सहाऽऽगतः, पुत्रेण सह स्थूलः, पुत्रेण सह गोमान्, शिष्येण सह ब्राह्मणः, तिलैः सह माषान् वपति, "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।" अर्थग्रहणात्– पुत्रेण साकम्, पुत्रेण समम्, पुत्रेण सार्धं, पुत्रेणामा, पुत्रेण युगपद्; अर्थाद् गम्यमाने– पुत्रेणाऽऽगतः, वृद्धो यूना, न्यक्षेण करोति; एवं– कार्त्स्न्येन, साकल्येन, अनवयवेनेत्यादावपि सहार्थोऽस्ति । 'सुखेनास्ते, दुःखेन जीवति, कष्टेन क्रामति, अनायासेन करोति' इत्यादावास्यादिक्रियाभिः सह सुखादेः सहार्थोऽस्ति, क्रियाविशेषणत्वविवक्षायां तु द्वितीयैव– सुखमास्ते, दुःखं जीवति, कष्टं क्रामति, अनायासं करोतीत्यादि । गौणादित्येव– सहोभौ चरतो धर्मम्, चैत्रमैत्राभ्यां सह कृतमिति तु कर्तर्येव तृतीया ॥ ४५ ॥

**श० न्या०**—**सहा०** । सहस्य– सहशब्दस्यार्थो योग्यः सहार्थः, तुल्यः– साधारणोऽप्रधानस्य प्रधानेन क्रियादिना यः सम्बन्धः स **तुल्ययोगः**, **विद्यमानता** सत्ता । ननु च विद्यमानतायामपि तुल्ययोगोऽस्त्येव सत्तया सहोभयोः सम्बन्धात्, तथाहि– "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" इति सहैव दशभिः पुत्रैः सतीति शक्यं प्रतिपत्तुं, तत्र विद्यमानता चेति तुल्ययोगात् किं पृथगुपादीयते ? उच्यते– विवक्षितयोगाभावात्, सहैव दशभिरित्यत्र वहनमात्रं विवक्षितं, तद् गर्दभ्या एव न तत्पुत्राणाम्, यथा पुत्रेण सहाऽऽगत इत्यागमनमुभयोरपीति तुल्ययोगाद् विद्यमानता पृथगुपादीयते । तुल्ययोगोऽपि केनचित् क्रियादिना भवति, तत्र **पुत्रेण सहागत** इत्यत्रागमनक्रियया पितापुत्रयोस्तुल्ययोगः, **पुत्रेण सह स्थूल** इत्यत्र स्थौल्येन गुणेन, **पुत्रेण सह गोमानि**त्यत्र च गोभिर्द्रव्येण, **शिष्येण सह ब्राह्मण** इत्यत्र ब्राह्मणेन

१ कर्तृप्रयोजकस्यापि शास्त्रकृतां हेतुत्वेन व्यवहारादुभयगतत्वेऽपि लौकिक एव हेतुरिह गृह्यते, कर्तुः प्रयोजके हि कर्तृत्वात् कर्तृद्वारेणैव तृतीयासिद्धेरित्याह– **फलसाधनयोग्य** इति ।

जात्येति, सर्वत्रात्र यद्यप्युभयोः क्रियादियोगस्तथाप्यागत इत्यादिशब्देनाभिधीयमानक्रियादियुक्तः पित्रादिरभिधायां प्रधानमितरदप्रधानम्, तत्र षष्ठयां प्राप्तायां तृतीया । ननु पुत्रेण सहागत इत्यत्र प्रधानकर्तरि क्तस्य विधानात् तत्रैकेन शब्देन भिन्नकक्षत्वाद् गुण-प्रधानयोः कर्त्रोरभिधानासंभवात् प्रधाने कार्ये संप्रत्ययात् प्रधानस्यैवाभिधानादप्रधानस्य प्रतीयमानगमिक्रियापेक्षकर्तृत्वाश्रयेण सिद्धा तृतीया, एवं तर्हि पुत्रेण सह स्थूल इत्यादौ सम्बन्धप्रतिपादनपरत्वात् क्रियाया अभावात् पुत्रस्य कर्तृत्वाभावात् तृतीया न सिद्ध्यतीत्येवमर्थम् । किञ्च पुत्रेण सहागमनं देवदत्तस्येत्यनटा कर्तुरनभिहितत्वादुभयत्र षष्ठीप्रसङ्गे प्रधान एव षष्ठी, अप्रधाने तु तृतीयेति । अथ प्रधानयोरेव कर्तृ-कर्मणोः षष्ठीत्यप्रधाने कर्तरि तृतीयैव भविष्यति, नैवम्– कृत्प्रयोगे प्रधानाऽप्रधानकर्त्रोः षष्ठीदर्शनात्, यथा– भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यप्रधाने षष्ठीबाधनार्थं तृतीयाभिधानम् । अथवा तिलैः सह माषान् वपतीत्यत्रोप्यमानत्वान्माषाः प्रधानं कर्म, तिलास्तु तथायुक्ततया वृषमूलानीवोपसर्पणेऽप्रधानमित्यप्रधाने कर्मणि द्वितीयायां प्राप्तायां तृतीया विधीयते । ननु तिलैर्मिश्रीकृत्य माषा उप्यन्त इत्यन्तरङ्गत्वाद् पूर्वं मिश्रणक्रियायां तिलानां करणत्वात् पश्चाद् वपनक्रियायां कर्मत्वात् तत्र करण इत्यनेन सिद्धा तृतीया, सत्यम्– सिद्ध्यत्येवं यदि मिश्रीकृत्य वपति, यदा तु न मिश्रणं केवलमेककालता– तिलवापकाल एव माषान् वपति, तदा मिश्रीकरणाभावेन तिलानां करणत्वाभावान्न सिद्ध्यति तृतीयेति । यद्वा कस्यचिद् माषबीजवाप उपस्थितस्तदर्थं च क्षेत्रमुपार्जितं, तत्रान्यदपि किञ्चिदुप्यते, यदि भविष्यति भविष्यतीत्येकक्षेत्रे च वापात् सहयोगः कालभेदेऽप्यविरुद्ध इति । **सहैव दशभिः पुत्रैरि**ति विद्यमानतायामुदाहरणम्, अत्रापि प्रतियोगिनो नानाविभक्तियोगे तृतीयाविधानं द्रष्टव्यम् । अथोदाहृते सहेनेत्यपि सिध्यति, किमर्थमर्थग्रहणमित्याह– **अर्थग्रहणादि**ति– सहशब्देन लक्षितो योऽर्थस्तस्मिन्नपि यथा स्यादित्येवमर्थमित्यर्थः, तेन सहशब्दस्याप्रयोगेऽपि तदर्थस्य सद्भावेन भवति, अन्यथा सहेनेत्युच्यमाने तच्छब्दप्रयोग एव विज्ञायेत । तदप्रयोगे तदर्थसद्भावो द्विधा भवति– पर्यायशब्दप्रयोगादर्थ-प्रकरणादेश्च तदर्थप्रतिपत्तेर्वेत्युदाहरति– **पुत्रेण साकमि**त्यादि– अत्र पर्यायशब्दप्रयोगात्, पुत्रेणागत इत्यादावर्थात् सहार्थसत्तेति । **सुखेनास्त** इति– अत्रापि सहार्थ एव तृतीयेत्याह– **आस्यादी**त्यादि । यदा तु विशेषणत्वविवक्षा तदा "क्रियाविशेषणात्" [ २. २. ४१. ] इति द्वितीयेत्याह– **क्रिये**त्यादि । **गौणादि**त्येवेति– असति गौणाधिकारे प्रधानादपि स्यादित्यर्थः । ननु * उपदविभक्तेः कारकविभक्तिर्बलीयसी * इति यथा– गाः स्वामी व्रजति, अत्र व्रजिक्रियापेक्षया गवां कर्मत्वात् तन्निबन्धना द्वितीया "स्वामीश्वरा०" [ २. २. ९८. ] इति प्राप्ते उपपदविभक्ती षष्ठी-सप्तम्यौ बाधित्वा प्रवर्तते, तथा **उभावि**त्यत्र तृतीयामुपपदविभक्तिं बाधित्वा कारकविभक्तिः प्रथमा भविष्यति । अथ शिष्येणोपाध्यायस्य गौरित्यत्र गवापेक्षया शिष्योपाध्यायौ द्वावपि गुणौ, उपाध्यायापेक्षया तु शिष्यो गुणः, उपाध्यायस्य शब्देन गवा सम्बन्धाच्छिष्यस्य तु सहयोगानुपपत्त्या, तत्रासति गौणादित्यधिकारे उभाभ्यामपि शिष्योपाध्यायाभ्यां षष्ठीं बाधित्वा तृतीया स्यादिति; नैवम्– अत्राप्युपाध्यायस्य गवा सम्बन्धोऽन्तरङ्ग इत्युपाध्यायात् षष्ठ्येव भविष्यति; सत्यम्– अत्रानुवादार्थं गौणादित्यधिक्रियते इति । **चैत्रमैत्राभ्यामि**ति– क्तप्रत्ययेन कर्तुरनुक्तत्वादिति शेषः ॥ छ ॥ २. २. ४५. ॥

**न्या० स०—सहार्थे** । तुल्यः– साधारणोऽप्रधानस्य प्रधानेन क्रियादिना यः संबन्धः स– **तुल्ययोगः** । **विद्यमानता चे**ति– ननु च विद्यमानतायामपि तुल्ययोगोऽस्त्येव, सत्तया सहोभयोः सम्बन्धात्, तथाहि– "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।" इति सहैव दशभिः पुत्रैः सतीति शक्यं प्रतिपत्तुम्, तत्र विद्यमानता चेति तुल्ययोगात् किं पृथग् निर्दिश्यते, उच्यते– विवक्षितयोगाभावात्, सहैव दशभिरित्यत्र वहनमात्रं विवक्षितं, तद् गर्दभ्या एव न तत्पुत्राणां, यथा पुत्रेण सहागत इत्यागमनमुभयोरपीति तुल्ययोगाद् विद्यमानता भिन्ना । **न्यक्षेण** सामस्त्येनेत्यर्थः ॥ २. २. ४५. ॥

## यद्भेदैस्तद्वदाख्या । २ । २ । ४६ ॥

**त० प्र०—यस्य**– भेदिनः प्रकारवतोऽर्थस्य, **भेदैः**– प्रकारैर्विशेषैः, **तद्वतः**– तत्प्रकारवदर्थयुक्तस्य, **आख्या**– निर्देशो भवति, तद्वाचिनो गौणान्नाम्नस्तृतीया भवति । **अक्ष्णा काणः, पादेन खञ्जः, हस्तेन कुणिः, शिरसा खल्वाटः, प्रकृत्या दर्शनीयः, प्रायेण वैयाकरणः, गोत्रेण काश्यपः, जात्या ब्राह्मणः, जात्या सुशीलः, स्वभावेनोदारः, निसर्गेण प्राज्ञः, वर्णेन गौरः, स्पर्शेन शीतः, वचनेन मृदुः, रसेन स्वादुः, सुखेन सुरूपः, उरसा विशालः, बाहुभ्यां दृढः**– सर्वत्र पुरुषस्तद्वान् संबध्यते । यद्ग्रहणं प्रकृतिनिर्देशार्थम्, तत इत्याक्षेपात् । भेदग्रहणं किम् ? **यष्टीः प्रवेशय, कुन्तान् प्रवेशय** । तद्वद्ग्रहणं किम् ? **अक्षि काणं पश्य** । आख्याग्रहणं प्रसिद्धिपरिग्रहार्थम्,

१. आदि शब्दात् स्थौल्यादिगुणो गवादिद्रव्यं ब्राह्मण्यादिजातिग्रहः ।

तेनाऽक्ष्णा दीर्घ इति न भवति । कृत-भवत्यादिक्रियाऽध्याहारेण कर्तृ-करणयोस्तृतीया सिद्धैव, संबन्धषष्ठीनिवृत्त्यर्थं तु **वचनम्** ॥ ४६ ॥

---

**श० न्या०—यद्भे०** । यस्य भेदैरिति षष्ठीसमासः, **यस्ये**त्यनेन च यस्य ते भेदाः स भेदी निर्दिश्यत इत्याह- **यस्य भेदिन** इति । तमेवार्थं स्पष्टयति- **प्रकारवतोऽर्थस्ये**ति । भेदशब्दः प्रकारवचन इत्याह- **भेदैः- प्रकारैरि**ति । पुनः स्पष्टयति- **विशेषैरि**ति- जातौ बहुवचनम्, यद्भेदैर्यद्भेदेनेत्यर्थः । **तद्वदाख्ये**त्यपि षष्ठीसमास इत्याह- **तद्वत** इति । **यद्भेदैरि**ति- यच्छब्देन निर्दिष्टो भेदी ' अक्ष्णा काणः ' इत्यक्ष्यादिरर्थस्तच्छब्देन निर्दिश्यते, सोऽस्यास्तीति तद्वानिति यस्य सोऽक्ष्यादिरर्थः स देवदत्तादिरुच्यत इत्याह- **तत्प्रकारवदर्थयुक्तस्ये**ति- स प्रकारवानक्ष्यादिरर्थस्तेन युक्तस्य देवदत्तादेरित्यर्थः । **अक्ष्णा काण** इति- अक्षि काणं चाकाणं च भवति, इति तद्भेदेन काण इत्यक्षिमान् देवदत्त आख्यायते, अवयवधर्मेण हि समुदायो व्यपदिश्यते, यथा-आढ्यमिदं नगरमित्यक्षिशब्दात् तृतीया; एवं- **पादेन खञ्जः, हस्तेन कुणिरि**त्यादावपि द्रष्टव्यम्, " कुंक् शब्दे " अतः " ऋतृषृ-सृ-कृ-वृषिभ्यः कित् " [ उणा० ६३५. ] इति किति णिप्रत्यये- कुणिः । खलन्ति- अपगच्छन्ति केशा अस्मादिति "कपाट-विराट०" [उणा० १४८.] इत्यादिशब्दात् आटप्रत्यये निपातनाद् वागमे च- **शिरसा खल्वाटः** । **प्रकृत्या दर्शनीय** इति- प्रकृतिः- स्वभावः, तद्भेदो दर्शनीयत्वम्, स्वभावो हि दर्शनीयत्वमदर्शनीयत्वं च भवति, तद्भेदेन दर्शनीय इति प्रकृतिमानाख्यायते । **प्रायेण वैयाकरण** इति- प्रैतीति " तन्-व्यधि० " [ ५. १. ६४. ] इति णे- प्रायः, तद्भेदो वैयाकरणत्वं तार्किकत्वं चेति, तद्भेदेन वैयाकरण इति तद्वान्निर्दिश्यते । **गोत्रेण काश्यपः** काश्यपो माठर इति च गोत्रभेदः, तेन गोत्रमाख्यायते काश्यप इति । **जात्या ब्राह्मण** इत्यत्रापि जातिभेदेन ब्राह्मण्येन तद्वानिति प्रकृत्यादिभ्यस्तृतीयेत्याह- **सर्वत्रे**त्यादि । ननु च प्रकृत्या दर्शनीयः, प्रायेण वैयाकरण इति युक्तः प्रयोगः, दर्शनीयत्वं प्राकृतं वैकृतं चास्ति, वैयाकरणत्वं च प्रायिकमन्यच्च, तत्रेतरव्युदासार्थं प्रकृत्या प्रायेणेति चार्थवत्, काण इत्यादिप्रयोगे त्वक्ष्णेत्यादिरव्यभिचारेण प्रतीतेरयुक्तः प्रयोगोऽर्थगत्यर्थत्वाच्छब्दप्रयोगस्येति, उच्यते- लोकोऽत्र पर्यनुयोक्तव्यो योऽर्थवतोऽनर्थकतामनपेक्ष्य प्रतीतेऽपि शब्दान् प्रयुङ्क्ते, लोके च न सर्व एव सूक्ष्मेक्षिकया शब्दान् प्रयुङ्क्ते, यस्त्वेवं समीक्षते स न प्रयुङ्क्ते, तत्रापि चोपचरितार्थनिवृत्तिरक्ष्णेत्यादिप्रयोगे प्रयोजनं- सत्यमयं काणो न तूपचार इति । **यद्ग्रहणमि**ति- अयमर्थः- यच्छब्देन तत् इत्याक्षिप्यते, ततस्तस्मादिति च प्रकृतिर्निर्दिश्यते- यद्भेदैस्तद्वदाख्या भवति ततस्तृतीया भवतीति यद्ग्रहणं प्रकृतिनिर्देशार्थम्, असति तु यदित्यस्मिन् प्रकारवद्वचनप्रकृतित्वं विज्ञायेत । **यष्टीः प्रवेशये**ति- यदि भेदग्रहणं न क्रियेत ' येन तद्वदाख्या ' इत्युच्यमानेऽत्रापि स्यादत्र हि यष्ट्यादिना तद्वानुपचारेणाख्यायते, अक्ष्णा काण इत्यादौ च न स्यात्, नह्यत्राक्ष्यादिशब्देन तद्वान्निर्दिश्यते, इतीष्टाऽनिष्टयोः सिद्ध्यसिद्ध्यर्थं भेदग्रहणम् । **अक्षि काणं पश्ये**ति- यदि तद्वदिति नोपादीयेत अत्रापि स्यात्, काणशब्देन हि अक्षिभेदेनाक्ष्याख्यायते, तद्वद्ग्रहणे तु काणशब्देनेहाऽक्षिमानाख्यायत इति न भवति, अक्षि काणमिति च द्वितीयान्तं विज्ञेयं, तेन गौणादित्यधिकारादिह न भवतीत्येतन्नाशङ्कनीयम् । **आख्याग्रहणमि**ति- यद्भेदैस्तद्वन्तं यत्र लोक आचष्टे तत्र यथा स्यादिति प्रसिद्धिपरिग्रहार्थं, तेन लौकिकप्रयोगाभावान्न भवति, तद् दर्शयति- **अक्ष्णा दीर्घ इति न भवती**ति-दीर्घ इति लोकः कायेनाचष्टे, न त्वक्ष्णेत्यर्थः । ननु किमर्थमिदमारभ्यते, यावता अक्ष्णा काण इत्यादौ कृत-भवत्यादिक्रियाध्याहारेणाक्षिशब्दादिभ्यः कर्तृकरणलक्षणैव तृतीया भविष्यतीत्याह- **कृत-भवत्यादी**त्यादि- यद्यप्यश्रुतां क्रियां कल्पयित्वा तदाश्रयेण करणादिकल्पनायां सिद्धत्येव तृतीया, तथापि यदा नामार्थसम्बन्धो विवक्ष्यते क्रियामकल्पयित्वा तदा षष्ठी मा भूत् तृतीयैव यथा स्यादित्येवमर्थम् । ननु मा भूत् कर्त्रादौ तृतीया, इत्थंभूतलक्षणत्वादक्ष्यादेर्भविष्यति, यदाह—

" इत्थंभूतस्य काणस्य, लक्षणं ह्यक्षि बुध्यते ।
ततस्तृतीया तेनैव, तत्र सूत्रेण सिद्ध्यति ॥ "

अत्रोच्यते- अक्ष्यादेरित्थंभूतस्य काणादिलक्ष्यस्य भेदाभावाल्लक्षणत्वानुपपत्तिः, यदाह उद्द्योतकरः—

" लक्ष्यलक्षणभावो हि, भेदे सत्युपपद्यते ।
यथा छात्रकमण्डल्वोश्छात्रोपाध्याययोर्यथा ॥ १ ॥
लक्षणादातपत्रादेस्तत्र लक्ष्यं तु भिद्यते ।
इह त्वेवमसंभाव्यमभेदादक्षिकाणयोः ॥ २ ॥
यत् तत् काणं तदेवाक्षि, लक्ष्यते तत्र तेन किम् ।
तत् काणः पुरुष इत्येतत्, कथं तूपचारतः ॥ ३ ॥"

॥ छ ॥ २. २. ४६. ॥

---

**न्या० स०—यद्भेदै०** । अवयवावयविलक्षणसंबन्धे षष्ठीप्राप्तौ वचनम् । यस्य- भेदिनश्चक्षुरादेः, भेदैः- काणत्वादिभिः, तद्वतः चक्षुरादिमतः पुरुषादेस्तत्प्रकारवदर्थयुक्तस्य, कोऽर्थः ? सः- प्रकारवान् अक्ष्यादिरर्थः, तेन युक्तस्य चैत्रादेः, आख्या- निर्देशो भवति **तद्वाचिन** अक्ष्यादिवाचिनः, तृतीया भवतीत्यर्थः । **अक्ष्णा**

**काणः** अक्षि काणं चाकाणं च भवतीति काणत्वभेदेन तद्वांश्चैत्रादिर्निर्दिश्यते । **शिरसा खल्वाटः** खलन्ति– अपगच्छन्ति केशा अस्मादिति " कपाट० " [ उणा० १४८. ] इत्यादिशब्दात् साधुः । **प्रकृत्या दर्शनीयः** प्रकृतिः–स्वभावः, तद्भेदः– दर्शनीयत्वम्, स्वभावो हि दर्शनीयत्वमदर्शनीयत्वं च भवति, तद्भेदेन दर्शनीय इति प्रकृतिमानाख्यायते । प्रैतीति " तन्व्यधि० " [ ५. १. ६४. ] इति णे– प्रायः, तद्भेदो वैयाकरणत्वं तार्किकत्वं चेति तद्भेदेन वैयाकरण इति तद्वान् निर्दिश्यते। ननु च ' प्रकृत्या दर्शनीयः, प्रायेण वैयाकरणः ' इति युक्तः प्रयोगः, दर्शनीयत्वं हि प्राकृतं वैकृतं चास्ति, वैयाकरणत्वं च प्रायिकमन्यच्च, तत्रेतरव्युदासार्थं प्रकृत्या प्रायेणेति चार्थवत्, काण इत्यादिप्रयोगे त्वक्ष्णेत्यादिरव्यभिचारेण प्रतीतेरयुक्तः प्रयोगोऽर्थस्य गतत्वात्, उच्यते– लोकोऽत्र पर्यनुयोक्तव्यः योऽर्थवतोऽनर्थकतामनपेक्ष्य प्रतीतेऽपि शब्दान् प्रयुङ्क्ते, लोके च न सर्व एवं सूक्ष्मेक्षिकया शब्दान् प्रयुङ्क्ते, यद्वा सूक्ष्मेक्षिकया प्रयोगेऽपि उपचरितार्थनिवृत्तिरक्ष्णेत्यादिप्रयोगे प्रयोजनं– सत्यमयं काणो न तूपचारेणेति । **गोत्रेण काश्यपः** काश्यपो माठर इति च गोत्रभेदः, तेन गोत्रमानाख्यायते– काश्यप इति । **भेदग्रहणं किमिति**– यदि भेदग्रहणं न क्रियते तदा ' येन तद्वदाख्या ' इत्युच्यमाने यष्टीः प्रवेशयेत्यत्रैव स्यात्, अत्र हि यष्ट्यादिना तद्वानुपचारेणाख्यायते, अक्ष्णा काण इत्यादौ च न स्यात्, नक्षत्राक्ष्यादिशब्देन तद्वान्निर्दिश्यते। **अक्षि काणं पश्येति**– काणशब्देन हि अक्षिभेदेनाक्ष्याख्यायते, न तद्वान् चैत्रादिः । **षष्ठीनिवृत्त्यर्थं तु वचनमिति**– तथापि न विधेयमेतत् सूत्रं, मा भूत् कर्त्रादौ तृतीया, इत्थंभूतलक्षणत्वादक्ष्यादेर्भविष्यति, यदाह—

" इत्थंभूतस्य काणस्य, लक्षणं ह्यक्षि बुध्यते ।
ततस्तृतीया तेनैव, तत्र सूत्रेण सिध्यति ॥ १ ॥

अत्रोच्यते– अक्ष्यादेरित्थंभूतस्य काणादिलक्ष्यस्य भेदाभावाल्लक्षणत्वानुपपत्तिः, यदाह उद्द्योतकरः—

" लक्ष्यलक्षणभावो हि, भेदे सत्युपपद्यते ।
यथा छात्र-कमण्डल्वोश्छात्रोपाध्याययोर्यथा ॥ १ ॥
लक्षणादातपत्रादेस्तत्र लक्ष्यं तु भिद्यते ।
इह त्वेवमसंभाव्यमभेदादक्षि-काणयोः ॥ २ ॥
यत् तत् काणं तदेवाक्षि, लक्ष्यते तत्र तेन किम् ? ।
तत् काणः पुरुष इत्येतत् कथं तूपचारतः ॥ ३ ॥" २. २. ४६.॥

## कृताद्यैः । २ । २ । ४७ ॥

**त० प्र०—कृत इत्येवंप्रकारैर्निषेधार्थैर्युक्ताद् गौणान्नाम्नस्तृतीया भवति । कृतं तेन, भवतु तेन, अलमतिप्रसङ्गेन, किं गतेन । कृत, कृतम्, भवतु, अलम् किम्; एवंप्रकाराः कृतादयः ॥ ४७ ॥**

**श० न्या०**—कृता० । कृतादयो न गर्गादिगणवत् सन्निविष्टा एव केचन, किं तर्हि ? कृतप्रकाराः शक्तितोऽवसेया इत्याह– **कृत एवंप्रकारैरिति**– निषेधार्थवृत्तित्वं च कृतादीनामनेकार्थत्वाल्लक्षणातो वा स्यात्। **किं गतेनेति**– नायं प्रश्ने किंशब्दः, किं तर्हि ? निषेधे, यद्वा प्रश्नार्थवृत्तिरेवायं प्रक्रमात् तु निषेधप्रतीतिः सामर्थ्याक्षिप्तलक्षणया न तु शाब्दीति युक्ततरः प्रश्नः ॥ छ ॥ २. २. ४७ ॥

**न्या० स०**—कृताद्यैः० । [ नेह व्याख्यातम् ॥ २. २. ४७. ॥]

## काले भान्नवाऽऽधारे । २ । २ । ४८ ॥

**त० प्र०—काले वर्तमानान्नक्षत्रवाचिनो गौणान्नाम्न आधारे तृतीया वा भवति । पुष्येण पायसमश्नीयात्, पुष्ये पायसमश्नीयात्; मघाभिः पललौदनम्, मघासु पललौदनम् । काल इति किम् ?, पुष्येऽर्कः, मघासु ग्रहः, अध्वनि मा भूत् । चित्रासु जाता चित्रा माणविका, तस्यां– चित्रायामास्ते, अत्र माणविकायां मा भूत् । भादिति किम् ? " तिलपुष्पेषु यत् क्षीरं, तिलच्छेदेषु यद् दधि । " अत्र तिलपुष्प-तिलच्छेदशब्दौ स्वाऽवच्छिन्ने काले वर्तेते इति प्राप्नोति । आधार इति किम् ? अद्य पुष्यं विद्धि । ' स्थाल्या पच्यते ' इत्यादिवत् आधारस्य करणविवक्षायां तृतीया सिध्यति संबन्धविवक्षायां तु षष्ठी मा भूदिति वचनम् ॥ ४८ ॥**

**श० न्या०**—काले० । भशब्दो नक्षत्रवाचीत्याह– **नक्षत्रवाचिन** इति । ननु यदि नक्षत्रवाचिन इति शब्दोपलक्षणत्वान्न तदानीमसौ नक्षत्रं वक्ति, नक्षत्रोपाधिकं तु कालं, रूपसामान्याच्च तत्त्वाध्यवसायः । **पुष्येण पायसमश्नीयादिति**– पुष्येण चन्द्रोपेतेन युक्तः काल इति " चन्द्रयुक्तात् काले० " [ ६. २. ६. ] इत्यणि ' लुब्त्वप्रयुक्ते ' इति लुपि पुष्यशब्दो नक्षत्रवाची काले वर्तते, तत आधारे तृतीया, तद्विमुक्ते पक्षे सप्तमी– **पुष्ये पायसमिति**, एवं **मघासु पललौदनमि**त्याद्यपि, स्वार्थिकप्रत्यया नातिवर्तन्ते प्रकृतिलिङ्गवचनानीति कालेऽपि नक्षत्रशब्दो नक्षत्रलिङ्गसंख्य एव, अत्राप्यश्नीयादिति योज्यम् । **पुष्येऽर्कः, मघासु ग्रह इति**– अत्र विशिष्टतारकावच्छिन्ने क्षेत्रे पुष्यमघाशब्दौ वर्तेते न काले इति तद्ग्रहणान्न सिद्ध्यति । **चित्रासु जाता चित्रा माणविका, तस्यां चित्रायामास्त इति**– अत्र चित्राभिश्चन्द्रयुक्ताभिर्युक्तः काल इति पूर्ववदण्, तल्लोपश्च, ततश्चित्रासु जाता " भर्तृसन्ध्यादेरण् " [ ६. ३. ८९. ] इत्यण् " चित्रा-रेवती-रोहिण्याः० " [ ६. ३. १०८. ] इति तल्लोपः, " ङ्यादेर्गौणस्य० " [ २. ४. ९५. ] इत्याकारनिवृत्तौ पुनराः " आत् " [ २. ४. १८. ] इत्याप्,

इदानीं यद्यपि चित्राशब्दो माणविकायां वर्तमानः कालमप्युपाधित्वेनोपादत्ते, तत्र चास्य वृत्तिः सम्भाव्यते, तथापि काल इति सप्तम्या शब्दप्रवृत्तेराधारत्वेन कालो निर्दिश्यते, इह च चित्रायामास्त इति तत्कालजातायां माणविकायां नक्षत्रशब्दस्य वृत्तिर्न तु काले, यद्यपि च विशेषणत्वेन प्रतीयमानत्वात् कालेऽपि वृत्तिः संभाव्यते तथापि तत्र कालस्य * गौण-मुख्ययोश्च मुख्ये कार्यसंप्रत्ययात् * न भवति । "**तिलपुष्पेषु यत् क्षीरं, तिलच्छेदेषु यद् दधि ।**" इति- अत्र तिलपुष्प-तिलच्छेदशब्दावुपचारेण यत्र तिलाः पुष्पन्ति छिद्यन्ते वा तस्मिन् काले वर्तेते न तु नक्षत्रशब्दाविति भादिति वचनान्न भवति । **अद्य पुष्यं विद्धि** अत्र नक्षत्रवाचिनः शब्दस्य काले वर्तमानत्वेऽप्याधार इति वचनात् कर्मणस्तृतीया न भवति । **स्थाल्या पच्यत इत्यादिवदि**ति- आधारस्य करणविवक्षया तृतीयायामाधारो नाधारभावेन प्रतीयते, किन्तु करणभावेन, अस्ति चाधारस्य करणविवक्षा, यथा- स्थाल्या पच्यत इत्याधारो हि स्थालीपाकस्य करणभावेनापि निर्दिश्यते, वस्तुनोऽनेकशक्तियुक्तत्वात् किमर्थमेतदारभ्यत इत्याक्षेपार्थः, यथैवाधारस्य करणविवक्षाऽस्ति तथा सम्बन्धविवक्षापि, यथा- वृक्षे शाखा, वृक्षस्य शाखेति, तत्रेह षष्ठी मा भूत्, तृतीया यथा स्यादित्येवमर्थं वचनमिति समाध्यर्थः ॥ छ ॥ २. २. ४८. ॥

**न्या० स०—काले भा०** । स्वार्थिकप्रत्यया नातिवर्तन्ते प्रकृतिलिङ्गवचनानीति कालेऽपि नक्षत्रशब्दो नक्षत्रलिङ्गसंख्य एव । **पुष्येण पायसमश्नीयात्** पुष्येण चन्द्रयुक्तेनेत्यादिप्रक्रियायां पुष्यशब्दः काले वर्तते, पयसि संस्कृतं भक्ष्यं "संस्कृते भक्ष्ये" [ ६. २. १४०. ] अण्, पयसा संस्कृतमिति तु कृते तृतीयाधिकारनिवेशितेन "संस्कृते" [ ६. ४. ३. ] इति सूत्रेण इकणेव भवति । **अध्वनि मा भूदि**ति- अत्र विशिष्टतारकावच्छिन्ने क्षेत्रे पुष्य-मघाशब्दौ वर्तेते, न काले इति । **चित्रा माणविका** इति- यद्यपि चित्राशब्दो माणविकायां वर्तमानः कालमप्युपाधित्वेनोपादत्ते, यतश्चित्रासु जाता या सा चित्रा इति विशेषणत्वेन प्रतीयमानत्वात् कालेऽपि वृत्तिः संभाव्यते, तथापि तत्र कालस्य गौणत्वात् * गौण-मुख्ययोश्च मुख्ये कार्यसंप्रत्ययात् * न भवति । **स्वावच्छिन्ने काले** इति- स्वेन- आत्मना, अवच्छिद्यते यस्तिलच्छेदतिलपुष्पविशिष्टः कालः, कोऽर्थः ?- यत्र काले तिलाः पुष्पन्ति तिलानां छेदश्च भवतीत्यर्थः ।

"तिलपुष्पेषु यत् क्षीरं, तिलच्छेदेषु यद् दधि ।
तिलवापेषु यत् तोयं, तेन वृद्धो न जीवति" ॥ १ ॥

इति सुश्रुतमतम्, सारोद्धारमते पूर्वार्द्धं तदेव, उत्तरार्द्धं तु-

"माघमासे च यद् भुक्तं, तेन वृद्धो विनश्यति ।"

कोऽर्थः ? पुनर्नवो भवति ॥ २. २. ४८. ॥

## प्रसितोत्सुका-ऽवबद्धैः । २ । २ । ४९ ॥

**त० प्र०**—एतैर्युक्तादाधारे वर्तमानाद् गौणान्नाम्नस्तृतीया वा भवति । केशैः प्रसितः, केशेषु प्रसितः; प्रकर्षेण सितो बद्धः प्रसितः, नित्यप्रसक्त इत्यर्थः; गृहेणोत्सुकः, गृहे उत्सुकः; केशैरवबद्धः, केशेष्ववबद्धः । आधार इत्येव- मनसा प्रसितः, मनसोत्सुकः, मनसाऽवबद्धः । करणतृतीयाया विकल्पो मा भूत् । अवबद्धोत्सुकशब्दसाहचर्यात् तदर्थ एव प्रसितशब्दोऽत्र गृह्यते । पूर्ववत् षष्ठीबाधनार्थं वचनम् । बहुवचनमेक-द्वि-बहाविति यथासंख्यनिवृत्त्यर्थम् ॥ ४९ ॥

**श० न्या०—प्रसि०** । प्रसितशब्दोऽयं गुणवचनोऽप्यस्ति- प्रकृष्टः सितः शुक्ल इति, क्रियावचनोऽप्यस्ति- यः स्यतेः सिनोतेर्वा भवतीति, तत्रोत्सुका-ऽवबद्धशब्दसाहचर्यात् तदर्थः सिनोतिरेव क्रान्तो गृह्यत इति, **प्रकर्षेण** सितो बद्ध इति, कश्चैवमुच्यत इत्याह- **नित्यप्रसक्त इत्यर्थ** इति- मुख्यव्यतिषङ्गरूपस्य बन्धनस्याभावात् सादृश्यात् गौणार्थपरिग्रहाद् यः केशसंस्कारे सक्तः स तत्र बद्ध इव भवति, यो हि यत्र प्रसक्तः स तत्र बद्ध इव भवति । प्रसितत्वमुत्सुकत्वमवबद्धत्वं च केशविषयमिति सप्तम्यधिकरण एव सिद्धा पक्षे तृतीयाविधानार्थं वचनम् । **विकल्पो मा भूदि**ति- अत्रापि करणविवक्षया तृतीयासिद्धौ पूर्ववत् समाधातव्यम् । ननु प्रसितशब्दस्य गुणवचनस्य क्रियार्थस्य च संभवादुभयार्थस्यापि ग्रहणप्रसङ्गः, न च गुणवचनस्य प्रयोगे तृतीयेष्यते, न च नियामकमस्तीत्याह- **अवबद्धे**त्यादि- उत्सुकशब्दोऽवबद्धार्थवृत्तिरिति । **पूर्ववदि**त्यादि गतार्थमिति ॥ छ ॥ २. २. ४९. ॥

**न्या० स०—प्रसितो०** । प्रसितशब्दोऽयं गुणवचनोऽप्यस्ति- प्रकृष्टः सितः शुक्ल इति, क्रियावचनोऽप्यस्ति- यः स्यतेः सिनोतेर्वा भवतीति, तत्रोत्सुकाऽवबद्धशब्दसाहचर्यात् तदर्थः सिनोतिरेव क्रान्तो गृह्यत इत्याह- **प्रकर्षेणे**त्यादि । ननु प्रसितशब्दस्य शुक्लगुणवचनस्य क्रियार्थस्य च संभवादुभयार्थस्यापि ग्रहणप्रसङ्ग इत्याह- **अवबद्धोत्सुकसाहचर्यादि**ति ॥ २. २. ४९. ॥

## व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् । २ । २ । ५० ॥

**त० प्र०**—व्याप्ये वर्तमानेभ्यो द्विद्रोणादिभ्यो गौणनामभ्यो वीप्सायां तृतीया वा भवति । द्विद्रोणेन धान्यं क्रीणाति, द्विद्रोणं द्विद्रोणं क्रीणाति, तृतीया वीप्सायां विहितेति तृतीयान्तस्य पदस्य द्विर्वचनं न भवति, द्वितीया तु कर्मणि विहिता न विप्सायामतस्तदन्तस्य द्विर्वचनं भवति । पूर्वं- पञ्चकेन

पशून् क्रीणाति, पञ्चकं पञ्चकं किणाति; सहस्रेणाऽश्वान् क्रीणाति, सहस्रं सहस्रं क्रीणाति, द्विद्रोणादयः प्रयोगगम्याः ॥ ५० ॥

**श० न्या०—व्याप्ये०** । **द्विद्रोणेने**ति–द्रवतेः "द्रोर्वा" [ उणा० ८४. ] इति णे– द्रोणः, द्वयोर्द्रोणयोः समाहारो द्विद्रोणं, पात्रादित्वात् स्त्रीत्वाभावः, अत्र द्रोणो व्रीहिराढको व्रीहिरितिवत् द्रोणशब्दो मेयवृत्तिः, तेन समानाधिकरणो द्विद्रोणशब्दः, **द्विद्रोणं द्विद्रोणं क्रीणाति** द्रोणद्वयसंघातं धान्यं क्रीणातीत्यर्थः, अत्र श्रूयमाणक्रीणातिक्रियाव्याप्यत्वाद् द्रोणादेर्धान्यादिविशेषणत्वाद् द्वितीयायां प्राप्तायां तृतीयाविधिः । ननु वीप्सायां तृतीयाविधानं, न च वीप्सा तृतीयान्तस्य दृश्यते, तत् कथमिदमित्याह– **द्विद्रोणं द्विद्रोण(?)[तृतीया विप्सायां]मि**त्यादि । पञ्च मानमस्य "संख्यायाः सङ्घ-सूत्र-पाठे" [६. ४. १७१.] इति के– **पञ्चकेन पशून् क्रीणाति** । पञ्चकं पञ्चकं सङ्घं पशून् क्रीणातीत्यर्थः । **पञ्चकं पञ्चकमि**त्यत्र पशुसामानाधिकरण्येऽपि पञ्चकशब्दाद् ब्राह्मणाः सङ्घ इतिवत् एकवचनम्, एवं– **सहस्रेणाश्वान् क्रीणाती**त्याद्यपि । आदिशब्दस्य प्रकारार्थत्वाद् येभ्यो वीप्सायां प्रयोगे तृतीया दृश्यते ते द्विद्रोणादयः, न तु गर्गादिवत् सन्निविष्टा इत्याह– **द्विद्रोणादयः प्रयोगगम्या** इति ॥ छ ॥ २. २. ५०. ॥

**न्या० स०—व्याप्ये द्वि०** । **द्विद्रोणेन धान्यं क्रीणाति**, द्वौ द्रोणौ मानमस्य धान्यस्य "मानम्" [६. ४. १६९.] इतीकण्, तस्य "अनाम्न्य०" [ ६. ४. १४१. ] इति लुप्, यद्वा द्वौ द्रोणौ मेयावस्य धान्यस्य, कोऽर्थः ? अनेन धान्येन द्वौ द्रोणौ मीयेते, तदा इकण् नागच्छति मेयवाचित्वाद् द्रोणस्य, यद्वा द्वयोर्द्रोणयोः समाहारो द्विद्रोणम्, पात्रादित्वात् स्त्रीत्वाभावः, अत्र द्रोणो व्रीहिराढको व्रीहिरितिवत् द्रोणशब्दो मेयवृत्तिः, तेन धान्यस्य समानाधिकरणो द्विद्रोणशब्दः । **एवं– पञ्चकेन पशून् क्रीणाती**ति– पञ्चेति संख्या मानमस्य "संख्यायाः संघसूत्र०" [ ६. ४. १७१. ] इति यथाविहितः "संख्याडतेः०" [ ६. ४. १३०. ] इति कः, पञ्चकं पञ्चकं संघं पशून् क्रीणातीत्यर्थः, **पञ्चकं पञ्चकमि**त्यत्र पशुसामानाधिकरण्येऽपि पञ्चकशब्दाद् ब्राह्मणाः संघ इतिवद् एकवचनम् । **द्विद्रोणादय** इति– आदिशब्दस्य प्रकारार्थत्वाद् येभ्यो वीप्सायां प्रयोगे तृतीया दृश्यते ते द्विद्रोणादयः, न तु गर्गादिवत् सन्निविष्टा इति ॥ २. २. ५०. ॥

## समो ज्ञोऽस्मृतौ वा । २ । २ । ५१ ॥

**त० प्र०—अस्मृतौ वर्तमानस्य संपूर्वस्य जानातेर्यद् व्याप्यं तत्र वर्तमानाद् गौणान्नाम्नस्तृतीया वा भवति । मात्रा संजानीते, मातरं संजानीते । सम इति किम् ? मातरं जानाति । ज्ञ इति किम् ? मातरं संवेत्ति । अस्मृताविति किम् ? मातरं संजानाति, मातुः संजानाति; स्मरतीत्यर्थः । व्याप्य इत्येव– मातरं स्वरेण संजानीते, करणे विकल्पो न भवति । मातुः संज्ञातेति कृतिपरत्वात् षष्ठी । नवाऽधिकारे वाग्रहणमुत्तरत्र तन्निवृत्त्यर्थम् ॥ ५१ ॥**

**श० न्या०—समो०** । **सम** इति पञ्चम्यन्तेन, **ज्ञ** इति षष्ठ्यन्तं विशिष्यत इत्याह– **संपूर्वस्य जानातेरि**ति । **मात्रा संजानीते** "ज्ञांश् अवबोधने" संपूर्वः, "संप्रतेः०" [ ३. ३. ६९. ] इत्यात्मनेपदम्, क्र्यादित्वात् श्नाप्रत्ययः, "जा ज्ञा-जनः०" [ ४. २. १०४. ] इति जादेशः, "एषामी-र्व्यञ्जने०" [ ४. २. ९७. ] इतीत्वम् । **[ मातरं ] जानाति** प्रतिपद्यत इत्यर्थः, सम इति वचनात् केवलस्यान्योपसर्गपूर्वस्य च न भवति । **मातरं संजानाति, मातुः संजानाति** अस्मृताविति वचनात् स्मृतौ तृतीयाया अभावात् "स्मृत्यर्थ-दयेशः" [ २. २. ११. ] इति पाक्षिके कर्मत्वे कर्मणि द्वितीया, अन्यत्र षष्ठी । **स्मरतीत्यर्थः** इत्यनेनास्मृतावित्यस्य व्यवच्छेद्यां स्मृत्यर्थतां दर्शयति । **मातरं स्वरेण संजानीते** नन्वत्र मातरमिति व्याप्यमस्त्येव, तत् कथमिदं व्याप्य इत्यस्यानुवर्तमानस्य प्रत्युदाहरणमिति, अथ स्वरेणेति करणे न भवतीति चेत् ? न– अत्र तृतीयायाः सिद्धत्वादित्यत आह– **करणे विकल्पो न भवती**ति– यद्यत्र व्याप्य इति नानुवर्तेत तदाऽनेन विधीयमानस्तृतीयाविकल्पः सामान्यविहितत्वात् करणेऽपि स्यात् । **मातुः संज्ञाते**ति– अत्र कृत्प्रयोगे इयं तृतीया च प्राप्नोति, "कर्मणि कृतः" [ २. २. ८३. ] इति षष्ठी च, उभयं चान्यत्र सावकाशं, तत्रोभयप्राप्तौ परत्वात् षष्ठ्येव भवतीत्याह– **कृती**त्यादि । **नवाधिकार** इति– नवाधिकारेणैव विकल्पस्य लब्धत्वात् तदर्थं वाग्रहणमुत्तरत्र नवाधिकारनिवृत्त्यर्थं, तेनोत्तरो नित्य एव विधिरित्यर्थः । कर्मणः करणविवक्षायां पक्षे तृतीयाया द्वितीयायाश्च सिद्धत्वात् सूत्रारम्भवैयर्थ्ये प्रत्युदाहरणेषु कृत्प्रयोगे चैवं तृतीया स्यादतः कर्मणि तद्विवक्षाव्युदासार्थमयं पाक्षिकस्तृतीयारम्भ इति ॥ छ ॥ २. २. ५१. ॥

**न्या० स०—समो ज्ञो०** । **संजानीते** इति– "सम्प्रतेरस्मृतौ" [ ३. ३. ६९. ] इत्यात्मनेपदम् ॥ २. २. ५१ ॥

## दामः संप्रदानेऽधर्म्ये आत्मने च । २ । २ । ५२ ॥

**त० प्र०**—संपूर्वस्य दामः संप्रदानेऽधर्म्यरूपे वर्तमाना-

आम्नस्तृतीया भवति, तत्संनियोगे च दाम आत्मनेपदं भवति। **दास्या संप्रयच्छते, वृषल्या संप्रयच्छते,** कामुकः सन् द्रव्यं दास्यै ददातीत्यर्थः। दाम इति किम्? दास्यै संददाति। संप्रदान इति किम्? द्रव्यं वृषल्या संप्रयच्छते, कर्मणि मा भूत्। अधर्म्ये इति किम्? पत्न्यै संप्रयच्छति। सम इत्येव-दास्यै प्रयच्छति। इह संपूर्वस्य दामः प्रशब्दव्यवधानमन्तरेण प्रयोगाऽभावात् तद्व्यवधानेऽपि भवति ॥ ५२ ॥

**श० न्या०**—दामः०। सम इत्यनुवर्तमानेन दाम इति विशिष्यत इत्याह- **संपूर्वस्य दाम** इति। **अधर्म्यरूप** इति- अधर्मशास्त्रनिबद्ध इत्यर्थः। आत्मनेपदस्य दाम् प्रकृतिर्विज्ञायत इत्याह- **तत्सन्नियोगे च दाम आत्मनेपदमि**ति। **दास्या संप्रयच्छते** दासी दानक्रियाकर्मणाऽभिप्रेयेति ततस्तृतीया। **संप्रयच्छत** इति- सम्प्र इत्युपसर्गपूर्वाद् "दांम् दाने" इत्यतोऽनेन वर्तमानात्मनेपदं, मध्ये शव्, "श्रौति-कृवु-धिवु-पा०" [४. २. १०८.] इति दामो यच्छादेशः, **कामुकः सन्नि**त्यादिना धात्वर्थस्याधर्मतां दर्शयति। **दास्यै संददाती**ति तु "डुदांग्क् दाने" संपूर्वः, ततस्तिव्, "हवः शिति" [४. १. १२.] इति द्विर्वचनं, नायं दामिति नात्र तृतीया नाप्यात्मनेपदमिति। **द्रव्यं वृषल्या संप्रयच्छत** इति- अत्रासति सम्प्रदान इति व्याप्य इत्यनुवृत्तेः क्रियाव्याप्यत्वाद् द्रव्यात् तृतीया प्रसज्येतेत्याह- **कर्मणि मा भूदि**ति। **पत्न्यै संप्रयच्छति** पत्न्यै दानं नाधर्म इत्यत्र न भवति। **दास्यै प्रयच्छती**ति- सम इत्यनुवृत्तेरत्र न भवति। ननु सम इति परदिग्योगलक्षणा पञ्चमी, ततश्च "पञ्चम्या निर्दिष्टे परस्य" [७.४.१०४.] तच्चानन्तरस्येति "समो ज्ञोऽस्मृतौ०" [२.२.५१.] इत्यत्र व्यवधाने सति न भवति, तत् कथं संप्रयच्छत इति प्रशब्देन व्यवधाने विधिरित्याह- **इह सम्पूर्वस्ये**त्यादि- इह- अस्मिन् सूत्रे प्रशब्देन समो व्यवधानेऽपि विधिर्भवति, कुतः? **प्रशब्दव्यवधानमन्तरेण प्रयोगाभावात्** नहि तद्व्यवधानमन्तरेण संपूर्वस्य दामः संयच्छतीति प्रयोगः, यत्र त्वस्ति तत्र यमेरेव, एवं च * येन नाव्यवधानं तेन व्यवहितेऽपि० * इति वचनप्रामाण्यात् प्रशब्देन व्यवधानमाश्रीयत इति; यद्वा सम इति पूर्वत्र पञ्चम्यन्तमपीति लक्ष्यवशात् षष्ठ्यन्तं विज्ञायते, तत्र व्यवधानेऽपि समा द्योत्यमानार्थत्वाद् दामः सम्बन्धोपपत्तेर्भवत्येव विधिः। नन्वनेन ब्राह्मणेन दानं प्रवृत्तमित्यादिवत् सम्प्रदानस्य करणत्वविवक्षायां दास्या संयच्छते कामुक इत्यादौ तृतीयोपपत्तेः किमर्थमिदमारभ्यते?, यद्वा सहार्थे इयं तृतीया, दास्यै स्वयं धनं ददाति साप्यात्मानं तस्मै ददातीति; दानपूर्वके वा संप्रयोगे दाम् वर्तते, दत्त्वा दास्या सह संभुङ्क्ते इति, एवं चात्र क्रियाव्यतिहारोपपत्तेस्तद्वारेणैवात्मनेपदम्, अत्रोच्यते- एवं हि धात्वन्तरेऽपि विनापि समुपसर्गेणाधर्म्यत्वाभावेऽपि धात्वर्थस्य प्रत्युदाहरणेऽप्युक्तविवक्षोपपत्तेस्तृतीया प्राप्नोति, द्रव्यं वृषल्या संप्रयच्छत इत्यत्रापि सम्प्रदानविवक्षायां चतुर्थी स्यात्, अत इह चतुर्थीप्रत्युदाहरणेषु च तृतीया मा भूदित्येवमर्थमिदं वक्तव्यमिति। विशिष्ट एव विषये लोकस्य विवक्षेति लोकविवक्षानियमो विना वचनेन दुरधिगम इति इदमारभ्यत इति ॥ छ ॥ २. २. ५२. ॥

**न्या० स०**—दामः सम्प्र०। नन्वनेन ब्राह्मणेन दानं प्रवृत्तमित्यादिवत् सम्प्रदानस्य करणत्वविवक्षायां 'दास्या संप्रयच्छते' इत्यादौ तृतीयोपपत्तेः किमर्थमिदमारभ्यते, यद्वा सहार्थे इयं तृतीया, तथाहि-दास्यै स्वयं धनं ददाति, साप्यात्मानं तस्मै ददातीति, दानपूर्वके सम्भोगे दाम् वर्तते, दत्त्वा दास्या सह सम्भुङ्क्ते इति, एवं चात्र क्रियाव्यतिहारोपपत्तेस्तद्वारेणैवात्मनेपदम्, अत्रोच्यते- एवं हि धात्वन्तरेऽपि विनापि समुपसर्गेणाधर्म्यत्वाभावेऽपि स्यात्, द्रव्यं वृषल्या सम्प्रयच्छत इत्यत्रापि सम्प्रदानविवक्षायां चतुर्थी स्यात्, अत इह चतुर्थीप्रत्युदाहरणेषु च तृतीया मा भूदित्येवमर्थमिदं वक्तव्यम्, विवक्षयापि न सिध्यति, विवक्षानियमो हि विना वचनेन दुरधिगम इतीदमारभ्यत इति। ननु सम इति परदिग्योगलक्षणा पञ्चमी, ततश्च "पञ्चम्या निर्दिष्टे परस्य" [७. ४. १०४.] तच्चानन्तरस्येति प्रशब्दस्य व्यवधाने न प्राप्नोतीत्याह- इह **सम्पूर्वस्ये**ति। यद्वा सम इति पूर्वत्र पञ्चम्यन्तमपीह लक्ष्यवशात् षष्ठ्यन्तं विज्ञायते, तत्र व्यवधानेऽपि समा द्योतमानार्थत्वाद् दामः सम्बन्धोपपत्तेर्भवत्येव विधिः ॥ २. २. ५२. ॥

## चतुर्थी। २। २। ५३॥

**त० प्र०**—संप्रदाने वर्तमानाद् गौणान्नाम्नो ङे-भ्यां-भ्यस्-लक्षणैक-द्वि-बहौ यथासंख्यं चतुर्थी विभक्तिर्भवति। **द्विजाय गां ददाति, शिष्याभ्यां धर्ममुपदिशति, मुनिभ्यो भिक्षां ददाति, पत्ये शेते, राज्ञे विज्ञपयति, राज्ञे दण्डं ददाति।** संप्रदान इत्येव- अजां नयति ग्रामम् ॥ ५३ ॥

**श० न्या०**—चतु०। **द्विजाय गां ददाती**ति- गवादिना कर्मणा द्विजादेर्व्याप्यमानतया विवक्षितत्वात् सम्प्रदानत्वात् ततश्चतुर्थी। **अजां ग्रामं नयती**त्यत्राजां देवदत्तः स्वव्यापारेण व्याप्नोति, अजा च ग्रामश्च तौ व्याप्यरूपौ, व्याप्येन व्याप्यमानस्य सम्प्रदानत्वादिह च तदभावाच्चतुर्थी न भवतीति ॥ छ ॥ २. २. ५३. ॥

**न्या० स०**—चतुर्थी। [नेह व्याख्या दृश्यते] ॥२.२.५३.॥

## तादर्थ्ये । २ । २ । ५४ ॥

**त० प्र०—किञ्चिद्** वस्तु संपादयितुं यत् प्रवृत्तं तत् तदर्थम्, तस्य भावे तादर्थ्ये—संबन्धविशेषे द्योत्ये गौणान्नाम्नः षष्ठ्यपवादश्चतुर्थी भवति। यूपाय दारु, कुण्डलाय हिरण्यम्, रन्धनाय स्थाली, अवहननायोलूखलम् ॥ ५४ ॥

**श० न्या०—त.द०** । तच्छब्देन कार्यं निर्दिश्यते, तस्मा इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनकारणमभिधीयत इत्याह- **किञ्चिद् वस्तु सम्प्रदायितुं यत् प्रवृत्तं तत् तदर्थमि**ति- तस्य भावस्तादर्थ्यमिति कार्यकारणसम्बन्ध उच्यते, समासकृत्तद्धितेषु [ भावप्रत्ययेन ] सम्बन्धाभिधानमिति वचनात् सम्बन्धस्य च द्विष्ठत्वेऽपि गौणादित्यधिकारादप्रधानाद् विशेषणादेव चतुर्थी भवति, तत उत्पद्यमानैवासौ वस्त्वन्तरार्थतां गमयितुं शक्नोतीति नान्यथेत्याह- **तस्य भाव** इत्यादि । **यूपाय दार्वि**ति- अत्र यूपादिहेतुभूतस्य दार्वादेर्हेतुर्हेतुमद्भावस्य चतुर्थ्यैव गमितत्वान्नामार्थव्यतिरेके च हेतुतृतीयाविधानादिह च नामार्थव्यतिरेकाभावाद्धेताविति तृतीया न भवति । ननु तस्मै इदं तदर्थमिति सत्यां चतुर्थ्यां समासः, सति च समासे तदुपादाने( दानेन ) चतुर्थीविधानमितीतरेतराश्रयादप्रसिद्धिनिर्देशस्येति, उच्यते- आचार्यप्रवृत्तिर्ज्ञापयति- भवत्यर्थशब्दयोगेन चतुर्थीति, यदयं तादर्थ्ये [ " तदर्थार्थेन " ३. १. ७२. ] इत्यर्थशब्देन समासं शास्ति; षष्ठीसमासो वा, सम्बन्धसामान्यविवक्षायामस्त्येव षष्ठी, यथा- गुरोरिदं गुर्वर्थमिति । ऊर्ध्वं खं- बिलं वास्येति पृषोदरादित्वादुलूखलम् ॥ छ ॥ २. २. ५४. ॥

**न्या० स०—तादर्थ्ये** । **यूपाय दारु** अत्र यूपादिहेतुभूतस्य दार्वादेर्हेतुतृतीया न, अगौणत्वात् ॥ २. २. ५४. ॥

## रुचिकृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु । २ । २ । ५५ ॥

**त० प्र०—रुच्यर्थैः** कृप्यर्थैर्धारिणा च धातुना योगे यथाक्रमं प्रेये विकारे उत्तमर्णे च वर्तमानाद् गौणान्नाम्नश्चतुर्थी भवति, वचनसाम्यं यथासंख्यार्थम्; बहुवचनं तु एक-द्वि-बह्वाविति यथासंख्याऽभावार्थम् । रुच्यर्थैः प्रेये- प्रीयमाणे- जिनदत्ताय रोचते धर्मः, गुरुदत्ताय स्वदते दधि; तस्याभिलाषमुत्पादयतीत्यर्थः । प्रेय इति किम् ? चैत्राय रोचते मोदको माधुर्येण, माधुर्यशब्दात् न भवति । प्रेयसंबन्धादभिलाषकरणार्थस्य रुचेर्ग्रहणम्, तेनेह न भवति- सर्वेषामेतद् रोचते कथं वा तवेति, प्रतिभातीत्यर्थः । कथं रोचते मम घृतं सह मुद्गैः शालयो दधिशरं कुकुराश्र ?, घृतमेव ममापि रोचते घृतशीतं च सशर्करं पयः ?, संबन्धमात्रविवक्षायां षष्ठ्येव भविष्यति । कृप्यर्थैर्विकारे- मूत्राय कल्पते यवागूः, उच्चाराय संपद्यते यवान्नम्, श्लेष्मणे जायते दधि, तद्विकाररूपमापद्यत इत्यर्थः । विकार इति किम् ? चैत्रस्य कल्पन्ते धनानि, संपद्यन्ते शालयः । गौणादित्येव- मूत्रमिदं संपद्यते यवागूः, उच्चारोऽयं संपद्यते यवान्नम्, शृङ्गाच्छरो जायते, गोमयाद् वृश्चिकः प्रभवति, मूत्रं संपद्यते यवाग्वाः; यवाग्वा इति च पञ्चमी अपायविवक्षायाम् । धारिणोत्तमर्णे- चैत्राय शतं धारयति । उत्तमर्ण इति किम् ? शतशब्दान्न भवति । उत्तमर्णो धनिकः ॥ ५५ ॥

**श० न्या०—रुचि०** । रुचिशब्दो रुच्यर्थे वर्तते, रुचिश्चान्यकर्तृकोऽभिलाषः, कृपिश्च [ क्लृपिश्च ] विकृतिल[क्षण]कृप्यर्थे, रुचिश्च कृपिश्च रुचिकृपी, तावर्थौ येषां ते रुचिकृप्यर्थाः, रुचिकृपिवाच्योऽर्थोऽन्येषां न संभवतीति सामर्थ्यादिवार्थलोपो द्रष्टव्यः, रुचि-कृपिवाच्योऽर्थो येषां ते तथोक्ताः, अत्र रुचि-कृपिभ्यामर्थशब्दः प्रत्येकमभिसम्बध्यते, न समुदायेन, तथा लक्ष्य[ व्यव ]स्थितेः, नापि प्रत्यासत्त्या कृपिनैव संबध्येत, तदा धारिवद् रुचिरप्यर्थशब्दात् पर एव क्रियेत, तथा सति किं रुचिना संबध्यते ? उत नेति सन्देहोऽपि न स्यात्, धारेश्च परनिपातेन लक्षणव्यभिचारो न कृतः स्यात्, रुचि-धारी समस्य कृप्यर्थेन समासात्, अन्यथा धारेरल्पस्वरत्वात् पूर्वनिपातनार्हस्य परनिपातेन लक्षणं व्यभिचारितं स्यादित्याह- **रुच्यर्थैः कृप्यर्थैरि**ति- रुचिकृपिसमानार्थैरित्यर्थः । **यथाक्रममि**ति- रुचिकृप्यर्थधारिभिरिति बहुवचनान्तस्य प्रेयविकारोत्तमर्णेष्विति बहुवचनान्तेन यथासंख्यमभिसम्बन्ध इत्याह- **वचनसाम्यं यथासंख्यार्थमि**ति । ननूभयत्रैकवचननिर्देशेऽपि साम्याद् यथासंख्यं भविष्यति, किं बहुवचनेनेत्याह-**बहुवचनं** त्वित्यादि-भिन्नवचनत्वादिति शेषः, एक-द्वि-बह्वावित्यस्य तु ङे-भ्यां-भ्यसित्यनेनैव यथासंख्यमिति । **रुच्यर्थैः प्रेये** इत्यादिना भेदेनोदाहरति । **प्रेय** इति प्रीणातेः " य एचातः " [ ५. १. २८. ] इति कर्मणि यप्रत्यये रूपमित्याह- **प्रीयमाण** इति । [ **रोचते** ] " रुचि अभिप्रीत्यां च " वर्तमानायास्तेप्रत्ययः, [ **स्वदते** ] " ष्वदि आस्वादने " पूर्ववत् तेप्रत्ययः, **तस्याभिलाषमि**त्यादिना रुच्यर्थतां दर्शयति । किं पुनरत्र प्राप्तम् ? केचिदाहुः- देवदत्तो रोचयति मोदकमिति प्राप्नोति, देवदत्तं हि प्राप्यमोदको रुचिविषयः, न सर्वमेव, भिन्नेच्छत्वात् प्राणिनाम् । कश्चिदाह- कर्मणि द्वितीयायां प्राप्तायां प्रीयमाणं देवदत्तं प्रीणयति मोदक इति । अन्य आहुः-कारकशेषत्वे षष्ठी प्राप्ता, नटस्य शृणोतीति यथेति, सर्वथा तु कारकस्याविवक्षायां

न भवति, देवदत्तस्य रोचते द्यूतं, न यज्ञदत्तस्येति सम्बन्धपरत्वाद् विवक्षायाः । यथोदाहृतं भर्तृहरिणा– यद्यपि पाणिनेरभिसन्धिता नित्यता अनित्यता चेति, तदाह—

" हेतुत्वे कर्मसंज्ञायां, शेषत्वेनापि कारकम् ।
रुच्यर्थादिषु शास्त्रेण, चतुर्थी संप्रकीर्तिता ॥ १ ॥

**चैत्राय रोचते मोदको माधुर्येणे**ति– माधुर्यं न प्रीयमाणमित्यतः प्रेयग्रहणान्न भवति । **प्रेयसम्बन्धादि**ति– अयमर्थः–रुचिर्दीप्तावप्यस्ति– रोचन्ते ज्योतींषि, दीप्यन्त इति; प्रतिभाने च– रोचते, प्रतिभातीति; अभिलाषकरणे च– रोचते, तस्याभिलाषं करोतीति; तत्राभिप्रायो [ तत्रापि प्रेयो ] नामाभिलाषकरण एव संभवति, यो हि यमभिलषति तस्याभिलाषस्य कर्ता तं प्रीणातीति तेन स प्रीयते, इति नार्थान्तरेऽस्ति प्रेय इति तदन्यथानुपपत्त्याऽभिलाषकरणार्थस्य रुचेर्ग्रहणात् **सर्वेषामेतद् रोचते** इत्यादौ प्रतिभानार्थप्रयोगे प्रेयाभावाच्चतुर्थी न भवतीति । यद्येवं **रोचते मम घृतं सह मुद्गैरि**त्यादावभिलाषकरणार्थस्य रुचेः प्रेयस्य सद्भावात् ततः कुतो न चतुर्थीति पृच्छति– **कथमि**त्यादि । समाधत्ते– **सम्बन्धमात्रविवक्षायामि**ति–अत्र सत्यपि प्रेयत्वे प्रेयता न विवक्षिता, अपि तु तत्क्रियासम्बन्धमात्रमिति न चतुर्थीति षष्ठ्येव भवति । **मूत्राय कल्पते यवागूः, कल्पते** " कृपौङ् सामर्थ्ये ", **सम्पद्यते** " पदिंच् गतौ " सम्पूर्वः, **जायते** " जनैचि प्रादुर्भावे " तद्विकाररूपमापद्यत इत्यर्थ इति, अनेन मूत्र-यवाग्वादीनां विकारविकारिभावं दर्शयति । **चैत्रस्य कल्पन्ते धनानी**ति– अत्र चैत्रो धनादीनां स्वामी, न विकार इति न भवति । **मूत्रमिदं सम्पद्यते यवागूरि**त्यादि– अत्र विकारविकारिणोरभेदविवक्षया विकारः प्रधानमेवेति गौणादित्यधिकारान्न भवति । **मूत्रं संपद्यते यवाग्वा** इत्यत्र विकारस्य प्राधान्यात् मा भूत् ततश्चतुर्थी, यवाग्वा इत्यत्र तु पञ्चमी कथमित्याह– **यवाग्वा** इत्यादि– ततो यवाग्वा अपगच्छदिदं मूत्रं सम्पद्यत इत्यपायोऽत्र विवक्षितः, तत्र " पञ्चम्यपादाने " [ २. २. ६९. ] इति पञ्चमी भवति । **चैत्राय शतं धारयति** " धृंङ्त् स्थाने " ध्रियते– तिष्ठति स्वरूपान्न प्रच्यवत इत्यर्थः, ततो ध्रियमाणं प्रयुङ्क्ते इति णिग्, ततस्तिवादिः । **शतशब्दान्न भवती**ति– शतं धारयतीत्यत्र धार्यमाणे शते कर्मण्युत्तमर्णत्वाभावान्न भवतीत्यर्थः । उत्तमर्णं व्याचष्टे– **उत्तमर्णो धनिक** इति– यो हि धनं प्रयुङ्क्ते स लोके उत्तमत्वेन प्रसिद्धः, यस्तु गृह्णाति सोऽधमत्वेन, उत्तमाधमाभ्यां सम्बद्धमृणमपि तथैव व्यपदेष्टव्यमित्युत्तमम् ऋणं यस्येति बहुव्रीहिणोत्तमर्णशब्देन धनिकोऽभिधीयत इत्यर्थः ॥ छ ॥ २. २. ५५. ॥

**न्या० स०–रुचि-क्लृप्यर्थ० । सम्बन्धमात्रेति**– अत्र सत्यपि प्रेयत्वे पेयता न विवक्षिता, अपि तु तत्क्रियासंबन्धमात्रमिति न चतुर्थी । **मूत्राय कल्पते यवागूः** यवागूः कर्त्री संपद्यते, किं संपद्यते ? मूत्रं– मूत्ररूपमित्यर्थः । ननु मूत्र-यवागूशब्दयोर्द्वयोरपि संपद्यते इति क्रियया सह सम्बन्धाद् गौणत्वाभावात् कथं मूत्रशब्दाच्चतुर्थी ?, उच्यते– एतत्सूत्रसामर्थ्यादेवात्र गौणमुख्यभावेन क्रियासंबन्धात् मूत्रस्य गौणत्वम्, तथाहि– प्रथमं यवाग्वा सह क्रियायाः संबन्धः पश्चान्मूत्रस्येति । गौणादिति व्यावृत्त्युदाहरणे तु मूत्रादेर्विशेष्यार्थं मूत्रादिकं प्रथमं क्रियया संबन्धनीयम्, यद्वा मूत्रायेति कोऽर्थः ? मूत्ररूपविकारसंबन्धित्वेन यवागूः संपद्यत इत्यर्थः । **तद्विकाररूपमिति**– अत्र तस्य यवाग्वादेर्विकारस्तस्य रूपं कर्मतापन्नमापद्यते– प्राप्नोति, मूत्रं कर्तृ, अकर्मकोऽपि पदिस्तदा तद्विकाररूपं मूत्रं कर्तृ आपद्यत सम्पद्यते इत्यर्थः, अत्र प्रथमायाः प्राप्तौ चतुर्थी । **चैत्रस्य कल्पन्ते** इत्यत्र चैत्रो धनादीनां स्वामी न विकार इति न भवति । **मूत्रं संपद्यते यवाग्वा** इति– यवाग्वा अपगच्छदिदं मूत्रं संपद्यत इत्यपायः । **चैत्राय शतं धारयतीति**– " धृंङ्त् अवस्थाने " ध्रियते– तिष्ठति स्वरूपान्न प्रच्यवते शतं कर्तृ, तत् ध्रियमाणं प्रयुङ्क्त इति णिग्, अपरपठितश्रुरादौ वा । **उत्तमर्णो धनिक** इति– यो हि धनं प्रयुङ्क्ते स लोके उत्तमत्वेन प्रसिद्धः, यस्तु गृह्णाति सोऽधमत्वेन, उत्तमाधमाभ्यां संबद्धमृणमपि तथैव व्यपदेष्टव्यमित्युत्तमम् ऋणं यस्येति कार्यम् ॥ २. २. ५५. ॥

## प्रत्याङः श्रुवाऽर्थिनि । २ । २ । ५६ ॥

**त० प्र०—प्रत्याङ्भ्यां परेण शृणोतिना युक्तादर्थिनि-अभिलाषुके वर्तमानाद् गौणान्नाम्नश्चतुर्थी भवति । द्विजाय गां प्रतिशृणोति, द्विजाय गामाशृणोति; याचितोऽयाचितो वा प्रतिजानीते इत्यर्थः । प्रत्याङ इति किम् ? चैत्रस्य शृणोति । अर्थिनीति किम् ? द्विजाय गां प्रतिशृणोतीत्यत्र गवि मा भूत् ॥ ५६ ॥**

**श० न्या०—प्रत्या०** । अर्थयत इत्यर्थी– अभिलाषुकः, " अर्थणि उपयाचने " इति हि पाठात्, **प्रत्याङः** इति पञ्चमी, न तु षष्ठी, षष्ठ्यां हि प्रत्याङ्श्रुवेति लाघवात् समस्येत, अस्ति हि तत्र समासः " षष्ठ्ययत्नात्० " [ ३. १. ७६. ] इति; न च तत्र समुदायानुकरणं स्यादिति वाच्यम्, ङकारानर्थक्यप्रसङ्गात्, तदा हि प्रत्याश्रुवेति निर्दिश्येत, अत एव च प्रत्येकमभिसम्बन्धो न समुदायेनेति द्विवचनेनाह– **प्रत्याङ्भ्यां परेणे**ति– एवमुत्तरत्रापि । **प्रतिशृणोती**ति– " श्रुंट् श्रवणे " प्रतिपूर्वः, ततस्तिव्, " स्वादेः श्नुः " [ ३. ४. ७५. ] इति

श्रुः, " श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा० " [ ४. २. १०८. ] इति श्रुवः शृभावः, इदं मे त्वया कर्तव्यमिति याचमाने, महत्त्वादयाचमानेऽपि केनाप्याकारादिना स्वाभिलाषं समर्पयति द्विजादौ ओमिति तस्य प्रतिपद्यते- अभ्युपगच्छतीति यावदित्यर्थः । **गवि मा भूदि**ति- असत्यर्थिनीत्यस्मिन् कर्मद्वितीयामन्यत्र सावकाशां परत्वाच्चतुर्थी बाधेतेत्यर्थिग्रहणम् ॥ छ ॥ २. २. ५६. ॥

**न्या० स०—प्रत्याङः०** । **अर्थिनी**ति- अर्थयते इत्यर्थी- अभिलाषुकः, " अर्थणि उपयाचने " इति पाठात् । **याचितोऽयाचितो वे**ति- अधमत्वाद् याचमाने महत्त्वादयाचमानेऽपि केनाप्याकारादिना स्वाभिलाषं समर्पयति द्विजादौ ओमिति तस्य प्रतिजानीते- प्रतिपद्यते, अभ्युपगच्छतीत्यर्थः ॥ २. २. ५६. ॥

## प्रत्यनोर्गृणाऽऽख्यातरि । २ । २ । ५७ ॥

**त० प्र०—प्रत्यनुभ्यां परेण गृणातिना योगे आख्यातरि वर्तमानाद् गौणान्नाम्नश्चतुर्थी भवति । आचार्याय प्रतिगृणाति, आचार्यायानुगृणाति; आचार्योक्तमनुवदति, प्रशंसन्तं वा प्रोत्साहयतीत्यर्थः । प्रत्यनोरिति किम् ? आचार्यं गृणाति । आख्यातरीति किम् ? आचार्याय मनसा प्रतिगृणातीत्यत्र मनसि मा भूत् ॥ ५७ ॥**

**श० न्या०—प्रत्य०** । **गृणे**ति- गृणातेरेस्तिवन्तस्यैकदेशोऽनुक्रियत इत्याह- **गृणातिना योग** इति । **आचार्योक्तमि**त्यादिना आचार्यस्याख्यातृत्वमाख्यातुमुदाहरणार्थमाचष्टे । **आचार्यं गृणाति** आचष्ट इत्यर्थः, अत्राचार्यमाचक्षाणमिति प्रतिपत्तव्यम्, अन्यथा द्व्यङ्गविकलं स्यादिति । अथ " श्रुवाङोऽर्थिनि " " गृणाऽनोराख्यातरि " इत्येवं किं न विन्यस्यते ? एवं हि विन्यस्यमाने प्रतेरिति पूर्वेणोत्तरेण चाऽनुवृत्त्याभिसम्बन्धात् द्विः प्रतिग्रहणं न कर्तव्यं भवति, वर्णेन चैकेन लाघवमिति, नैवम्- अक्षराधिक्याद् योगविभागश्चकाराकाङ्क्षणं च गरीय इति ॥ छ ॥ २. २. ५७. ॥

**न्या० स०—प्रत्यनो०** । **आचार्यं गृणाती**ति- आचष्टे इत्यर्थः, अत्राचार्यमाचक्षाणमिति प्रतिपत्तव्यम्, अन्यथा व्यङ्गविकलत्वं स्यात् ॥ २. २. ५७. ॥

## यद्वीक्ष्ये राधीक्षी । २ । २ । ५८ ॥

**त० प्र०—वीक्ष्यं- विमतिपूर्वकं निरूपणीयम्, विप्रश्नविषय इति यावत्, तद्विषया क्रियापि वीक्ष्यम्, यत्संबन्धिनि वीक्ष्ये राध्यतिरीक्षतिश्च वर्तते तस्मिन् वर्तमानाद् गौणान्नाम्नः सामर्थ्याद् राधीक्षिभ्यामेव युक्ताच्चतुर्थी भवति । मैत्राय राध्यति, मैत्रायेक्षते; तस्य दैवं पर्यालोचयतीत्यर्थः । स्त्रीभ्य ईक्षते- स्त्रीणामभिप्रायः कीदृश इति विमतिपूर्वकं निरूपयतीत्यर्थः । " ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम् " परस्त्रीणामभिप्राये यत् संदेहादीक्षितव्यं- निरूपयितव्यं- किमेवं करोषि नवेति, तद् रक्षसां कुलधर्मो न दोषः । दैवे एवेक्ष्ये इच्छन्त्येके । राधीक्ष्यर्थधातुयोगेऽपीच्छन्त्येके, मैत्राय राधयति, साधयति, पश्यति, जानीत इति चोदाहरन्ति । यद्ग्रहणं किम् ? मैत्रस्य शुभाशुभमीक्षते, शुभाऽशुभात् मा भूत्, मैत्रात् तु राधीक्षिभ्यां योगाभावादेव न भवति । वीक्ष्यग्रहणं किम् ? मैत्रमीक्षते । राधीक्ष्यर्थविषयाद् विप्रष्टव्यादिच्छत्यन्यः- लाभाय राध्यति, लाभाय राधयति, लाभाय साधयति, लाभायेक्षते, लाभाय पश्यति ॥ ५८ ॥**

**श० न्या०—यद्वी०** । वीक्ष्यं व्याचष्टे- **वीक्ष्यमि**त्यादिना, विविधा- विशेषानुपलम्भादेकस्मिन् वस्तुनि सादृश्यादिनिमित्तादनेकपक्षालम्बनानवधारणात्मिका मतिः- विमतिः, सन्देहज्ञानमिति यावत्, तत्पूर्वकं **निरूपणीयम्**- अदृष्टमिष्टानिष्टफलं पुण्यपापरूपम्, अप्रत्यक्षं पराभिप्रायादिकं वा, तस्यैव निरूपणार्हत्वात् । पुनः स्पष्टयति- **विप्रश्नविषय** इति- विशिष्टः प्रश्नः- विप्रश्नः, अभिमानोन्मादादिप्रयुक्तः पूर्वपक्षः, तस्य विषयः- आश्रयः, अविज्ञाततत्त्वसन्दिग्धोऽर्थः, निःसन्दिग्धे विप्रश्नस्याभावाद्धातोश्च क्रियावचनत्वात् तत्र वृत्त्यभावाद् वीक्ष्यविषया क्रियैवोपचाराद् वीक्ष्यशब्दाभिधेयेत्याह- **तद्विषये**त्यादि । **राध्यति** " राधंच् वृद्धौ " तिव् दिवादित्वात् श्यः । **तस्य दैवं पर्यालोचयतीत्यर्थ** इति- केनचित् पृष्टो नैमित्तिक इति शेषः, शुभाशुभं तत्कृतं फलं वा सुखदुःखात्मकं दैवम् । **स्त्रीभ्य ईक्षते** इत्यस्यार्थं **स्त्रीणामभिप्राय** इत्यादिना व्याचष्टे । ननु राधीक्ष्योर्वृद्धि-दर्शनयोर्वर्तमानत्वात् कथं दैवादिनिरूपणे वृत्तिः ? उच्यते- दर्शनविषयनिरूपणमत्र वृद्धि-दर्शनशब्दाभिधेयमिति न कश्चिद् दोष इति । विमतिपूर्वकाभिप्रायनिरूपणे स्वोक्तां चतुर्थीम् **" ईक्षितव्यं परस्त्रीभ्यः० "** इत्यादिना परोक्तेन द्रढयति । अपरे " राधीक्षी यद्दैवे " इति सूत्रं प्रणीय दैव एव ईक्ष्ये चतुर्थीं मन्यमानाः ' स्त्रीभ्य ईक्षते ' इत्यादौ न मन्यन्ते इत्याह- **दैव एवे**त्यादि । अन्ये तु ' राधीक्षी ' इत्यर्थनिर्देशमाहुः, यस्य साक्षाद्वीक्ष्यविषयतोपपद्यते सोऽर्थो राधीक्षी ' इति निर्दिष्टः, ततश्च तदर्थसंबंधातुप्रयोगे चतुर्थी भवतीत्याह- **राधीक्ष्यर्थधातुप्रयोगेऽपीच्छन्त्येक** इति- राध्नोति साध्नोति

च दैवं, तत् प्रयुङ्क्ते इति [ **राधयति, साधयति** ]। अथ यद्ग्रहणान्सा भूच्छुभाशुभाच्चतुर्थी, यस्य तद्दैवं ततो मैत्रात् कस्मान्न भवति, भवति ह्यत्र मैत्रो दैववान्, उच्यते- सामर्थ्याद् राधीक्षिभ्यामेव युक्ताच्चतुर्थीति व्याख्यानात्, मैत्रस्य त्वत्र शुभाशुभसम्बन्धितयैव विवक्षितत्वाद् राधीक्षिभ्यां योगाभावाच्च भवतीत्याह- **मैत्रात् त्वित्यादि**। **मैत्रमीक्षत** इति- अत्र मैत्रविषय एवेक्षतिर्न तद्वीक्ष्यविषय इति वीक्ष्यग्रहणान्न भवति। **राधीक्ष्यर्थविषयादिति**- विविधं प्रष्टव्यो विप्रष्टव्यः- किं भविष्यति न भविष्यति कथं भविष्यतीति, स यदा राधीक्ष्यर्थविषयो भवति तदा ततश्चतुर्थीति न दैववत्येवापि तु दैवेऽपीति। तन्मतमुदाहरति- **लाभाय राध्यतीत्यादि** ॥ छ ॥ २. २. ५८.॥

**न्या० स०— यद्वीक्ष्ये०**। विविधा- विशेषानुपलम्भादेकस्मिन् वस्तुनि सादृश्यादिनिमित्तादनेकपक्षालम्बनानवधारणात्मिका मतिः- विमतिः, संदेहज्ञानमिति यावत्, तत्पूर्वकं **निरूपणीयम्** अदृष्टमिष्टानिष्टफलं पुण्यपापरूपम्, अप्रत्यक्षं पराभिप्रायादिकं वा, तस्यैव निरूपणार्हत्वात्। पुनः स्पष्टयति- **विप्रश्नविषय** इति- विचारविषयो दैवादिर्लाभालाभादिर्वा। **क्रियाऽपीति**- पर्यालोचनात्मिका। **तस्य दैवमिति**- शुभाशुभमित्यर्थः।

" **ईक्षितव्यं परस्त्रीभ्यः, स्वधर्मो रक्षसामयम्।**
संक्रुध्यसि मृषा किं त्वं, दिदृक्षुं मां मृगेक्षणे ! ॥ १ ॥ "

**दैवे एवेक्ष्ये** इति- न त्वभिप्रायादावित्यर्थः। **एके** इति- शाकटायनाः। **एके** इति- चान्द्राः। राधिरपरपठितश्चुरादिर्णिगन्तो वा। साधिर्णिगन्त एव। **राधीक्षिभ्यां योगाभावादिति**- एवं तर्हि मैत्राय राध्यतीत्यादावपि संबन्धाभावान्न स्यात्, न- तत्र मैत्रेणैव सह राधीक्ष्योः संबन्धो विवक्षितोऽन्यस्याश्रुतत्वात्। **अन्य** इति- रत्नमतिर्बौद्धः ॥ २. २. ५८. ॥

## उत्पातेन ज्ञाप्ये । २ । २ । ५९ ॥

**त० प्र०**—उत्पातः- आकस्मिकं निमित्तम्, तेन ज्ञाप्ये- ज्ञाप्यमानेऽर्थे वर्तमानाद् गौणान्नाम्नश्चतुर्थी भवति।

" **वाताय कपिला विद्युदातपायाऽतिलोहिनी।**
पीता **वर्षाय** विज्ञेया, **दुर्भिक्षाय** सिता भवेत् ॥ १ ॥ "

वातादयः स्वकारणेभ्य एवोत्पद्यन्ते, विद्युता तु ज्ञाप्यन्त इति तादर्थ्यं नास्ति। उत्पातेनेति किम्? **राज्ञ इदं छत्रमायातं विद्धि राजानम्।** षष्ठ्यपवादो योगः ॥ ५९ ॥

**श० न्या०—उत्पात०**। **उत्पात** इत्यादिना उत्पातं व्याचष्टे। **वाताय कपिलेति**- अथ कपिलादिविद्युता वातादीनां जन्यमानत्वात् तेभ्यस्तादर्थ्ये चतुर्थ्येव भविष्यतीति चेत्? न- तादर्थ्याभावात्, तादर्थ्याभावमेव दर्शयति- **वातादय** इत्यादि। **राज्ञ इदं छत्रमायातं विद्धि राजानमिति**- अत्रानेन छत्रेणागच्छद्राजा ज्ञाप्यत इति राज्ञो ज्ञाप्यतामाचष्टे द्व्यङ्गविकलतां परिहर्तुमिति, नात्र च्छत्रमुत्पातः, उत्पातो हि नाम शुभाशुभसूचकः कादाचित्को महाभूतपरिणाम उच्यते, न चैवं छत्रमिति, तेन ज्ञाप्ये न भवति। **वाताय कपिले**त्यादौ ज्ञापकसम्बन्धविवक्षायां षष्ठ्यां प्राप्तायां तदपवादश्चतुर्थीत्याह- **षष्ठ्यपवादो योग** इति ॥ छ ॥ २. २. ५९. ॥

**न्या० स०— उत्पातेन०**। उत्क्रम्य प्रसिद्धं निमित्तं पततीति बाहुलकात् सोपसर्गादपि " वा ज्वलादि० " [ ५. १. ६२. ] इति णः। निमित्तं द्विधा- जनकं ज्ञापकं च, यत्र तादर्थ्यं तत्र जनक एव हेतुः, यथा- रन्धनाय स्थाली, अत्र तु तादर्थ्याभावात् ज्ञापक एव हेतुः। **षष्ठ्यपवाद** इति- ज्ञाप्यज्ञापकसंबन्धविवक्षायामित्यर्थः ॥ २. २. ५९. ॥

## श्लाघ-ह्नु-स्था-शपा प्रयोज्ये । २ । २ । ६० ॥

**त० प्र०—ज्ञाप्य इत्यनुवर्तते, श्लाघादिभिर्धातुभिर्युक्ताद् ज्ञाप्ये प्रयोज्येऽर्थे वर्तमानाद् गौणान्नाम्नश्चतुर्थी भवति। मैत्राय** श्लाघते, **मैत्राय** ह्नुते, **मैत्राय** तिष्ठते, **मैत्राय शपते**, श्लाघा-ह्नव-स्थान-शपथान् कुर्वाण आत्मानं परं वा ज्ञाप्यं जानन्तं मैत्रं प्रयोजयतीत्यर्थः। प्रयोज्य इति किम्? मैत्रायाऽऽत्मानं श्लाघते, मैत्राय शतं ह्नुते; आत्मादौ मा भूत्। केचित् त्वप्रयोज्यो यो ज्ञाप्यो य आख्यायते तत्रैवेच्छन्ति ॥ ६० ॥

**श० न्या०—श्लाघ०**। जानातेरणिक्प्रकृतेर्यः कर्मभूतः सोऽपि ज्ञाप्य इत्युच्यते, यथा- " उत्पातेन ज्ञाप्ये " [ २. २. ५९. ] इत्यत्र, यश्च जानातेः कर्ता णिगः कर्म सोऽपि यथा- ज्ञाप्यो धर्मं देवदत्त इति। श्लाघिप्रभृतयोऽप्यत्र विषये नयत्यादिवद् द्विकर्मकाः, तत्र जानातेः कर्तृभूतं ज्ञाप्यं परिग्रहीतुं प्रयोज्य इत्युच्यते, स च प्रयोज्यः- प्रवर्त्यः क्व भवतीत्याह- **अर्थे** इति- प्रकृत्यर्थे इत्यर्थः। " श्लाघृङ् कत्थने, " " ह्नुंक् अपनयने, " " ष्ठां गतिनिवृत्तौ, " अत्र " ज्ञीप्सास्थेये " [ ३. ३. ६४. ] इत्यात्मनेपदम्, " शपीं आक्रोशे " " शप उपलम्भने " [ ३. ३. ३५. ] इत्यात्मनेपदम्, मैत्रायात्मानं परं वा श्लाघ्यं कथयतीति योऽर्थः स **मैत्राय श्लाघते** इति, एवं-**मैत्राय ह्नुते** ह्नोतव्यं किञ्चिन्मैत्रं ज्ञापयति, **मैत्राय तिष्ठते** इति- स्थानेनात्मानं ज्ञापयति- प्रकाशयतीति, **मैत्राय शपते** वाचा मात्रादिशरीरस्पर्शनेन नाहं जाने न मया कृतमिति मैत्रं ज्ञापयतीत्यमुमेवार्थं स्पष्टयति- **श्लाघे-**

त्यादि । मैत्रायात्मानं श्लाघत इत्यादौ त्वात्मादिर्ज्ञाप्यः प्रयोज्यो न भवति, जानातेः कर्मत्वादिति प्रयोज्यग्रहणात् ततो न चतुर्थी-त्याह- **आत्मादौ मा भूदि**ति । दर्शनान्तरे प्रयोज्यग्रहणं प्रत्याचष्टे- **केचित् त्वि**त्यादि- तथा चान्येषां ग्रन्थे द्विकर्म-कोऽयं ज्ञापिः, तत्र केचिद् यस्मै आख्यायते तं ज्ञाप्यं संप्रदानत्वेन प्रतिपन्नाः, केचिद् य आख्यायते तमिति ॥ छ ॥ २. २. ६०. ॥

**न्या० स०—**श्लाघह्नु० । "युजण् संपर्चने" प्रयोज्यत इति "य एचातः" [ ५. १. २८. ] इति ये, प्रयोक्तुं शक्य इति वा "शक्तार्हे०" [ ५. ४. ३५. ] इति घ्यणि "निप्राद् युजः शक्ये" [ ४. १. ११६. ] इति गत्वाभावे- प्रयोज्यः । द्वितीयाप्राप्तौ वचनम् । **मैत्राय तिष्ठते** अत्र "ज्ञीप्सास्थेये" [ ३. ३. ६४. ] आत्मनेपदम्, स्थानेनात्मानं ज्ञापयतीत्यर्थः । **मैत्राय शपते** "शप उपलम्भने" [ ३. ३. ३५. ] आत्मनेपदम्, वाचा मात्रादि-शरीरस्पर्शनेन नाहं जाने न मया कृतमिति मैत्रं ज्ञापयतीत्यर्थः । **केचित् त्वि**ति- भोज-शाकटायनाः । यस्तु मैत्रादिर्जानन् ज्ञाप्यते तत्र न भवतीति, तथा च अन्येषां ग्रन्थे द्विकर्मकोऽयं ज्ञापिः, तत्र केचिद् यस्मै आख्यायते तद् ज्ञाप्यं संप्रदानत्वेन प्रतिपन्नाः, केचिद् य आख्यायते तमिति, तन्मते- मैत्रमात्मने श्लाघते इत्युदाहरणम् ॥ २. २. ६०. ॥

## तुमोऽर्थे भाववचनात् । २ । २ । ६१ ॥

**त० प्र०—**क्रियायां क्रियार्थायामुपपदे तुम् वक्ष्यते, तस्यार्थे ये भाववाचिनो घञादयः प्रत्यया विधास्यन्ते तदन्ताद् गौणान्नाम्नः स्वार्थे चतुर्थी भवति । पाकाय व्रजति, पक्तये व्रजति, पचनाय व्रजति, इज्यायै व्रजति; पक्तुं यष्टुं वा व्रजतीत्यर्थः । तादर्थ्यस्य प्रत्ययेनैवोक्तत्वात् चतुर्थी न प्राप्नोतीति शेषषष्ठी हेतुहेतुमद्भावविवक्षायां वा हेतुतृतीया स्यादिति चतुर्थ्यर्थं वचनम् । तुमोऽर्थे इति किम् ? पाकस्य, त्यागस्य, पाकेन वर्तते, त्यागेन वर्तते, अध्ययनेन वसति; नाऽत्र क्रियायां क्रियार्थायामुपपदे प्रत्ययो विहितः, किं तर्हि ? भावमात्रे, पश्चात् तु क्रिययाऽभिसंबन्ध इति हेतौ तृतीयैव भवति । भाववचनादिति किम् ? पक्ष्यतीति गां दास्यतीति च पाचकस्य व्रज्या, गोदायस्य परिसर्या । तुम इति व्यस्तनिर्देश उत्तरार्थः ॥ ६१ ॥

**श० न्या०—**तुमो० । यत्र हि तुम् विधीयते स तुमोऽर्थः, कुत्र च तुम् विधीयत इत्याह- **क्रियायामि**त्यादि । भवनं भावः, ब्रवीतीति वचनः, भावस्य वचनो भाववचनः, स च घञादिप्रत्ययः, ततश्च केवलाद् विभक्तेरसंभवान्नाम्नो विशेषणत्वाद् तदन्तलाभ इत्याह- **तदन्ताद् गौणान्नाम्न** इति । **पाकाय व्रजती**त्यादि- पक्तुं- पाकायेत्यादि विगृह्य "भाववचनाश्च" [ ५. ३. १५. ] इति घञादयः, अत्र व्रजतिक्रियायाः पच्याद्यर्थत्वं भाववचनेनैव प्रतिपादितमिति तादर्थ्यचतुर्थी न प्राप्नोति, शेषत्वात् षष्ठी स्यात् व्रजतिक्रियाया हेतुमत्त्वात् पाकस्य च हेतुत्वाद्धेतुलक्षणैव तृतीया स्यादित्याह- **तदर्थस्ये**त्यादि । **पाकस्य त्यागस्य** नात्र तुमोऽर्थे क्रियायां क्रियार्थायामुपपदे प्रत्यय इत्यतश्चतुर्थी न भवति । यद्येवं **पाकेन वर्तत** इत्यादौ क्रियायाः क्रियार्थाया उपपदभूताया विद्यमानत्वात् प्रत्ययस्य च भाववचनत्वात् ततः कुतो न चतुर्थी ? सत्यम्- अत्र भावमात्रे प्रत्ययमुत्पाद्य पश्चात् तदन्तः क्रिययाऽभिसंबध्यत इति न तुमोऽर्थे भाववचनप्रत्ययोऽतो हेतोस्तृतीयैव न चतुर्थीत्याह- **नात्रे**त्यादि । **पक्ष्यतीति गां दास्यतीति च पाकस्य व्रज्ये**त्यत्र व्रजिक्रियाया भविष्यत्पचनादिक्रियार्थाया उपपदत्वेऽपि कर्तरि णको विहित इति भाववचनग्रहणान्न ततश्चतुर्थीति । न च तुमर्थ इति समासनिर्देशो मात्रालाघवार्थं कुतो न कृत इत्याह- **तुम** इत्यादि । **उत्तरार्थ** इति- उत्तरसूत्रे प्रयोजनोऽयमित्यर्थः ॥ छ ॥ २. २. ६१. ॥

**न्या० स०—**तुमोऽर्थे० । भवनं भावः "भावाकर्त्रोः" [ ५. ३. १८. ] घञ्, वक्तीति ब्रवीतीति वा "रम्यादिभ्यः" [ ५. ३. १२६. ] कर्तर्यनट्, भावस्य वचनो भाववचनस्तस्मात् । पाकायेति- पक्तुं पक्ष्यते इति वा वाक्ये "भाववचनाः" [ ५. ३. १५. ] इति घञादयः ॥ २. २. ६१. ॥

## गम्यस्याऽऽप्ये । २ । २ । ६२ ॥

**त० प्र०—**यस्यार्थो गम्यते न च शब्दः प्रयुज्यते स गम्यः, तस्य तुमो यदाप्यं- व्याप्यं तत्र वर्तमानाद् गौणान्नाम्नश्चतुर्थी भवति । द्वितीयाऽपवादः । एधेभ्यो व्रजति, फलेभ्यो व्रजति; एधान् फलानि चाऽऽहर्तुं व्रजतीत्यर्थः । गम्यस्येति किम् ? एधानाहर्तुं व्रजति । आप्य इति किम् ? एधेभ्यो व्रजति शकटेन, करणात् मा भूत् । तुम इत्येव- प्रविश पिण्डीं द्वारम्, अत्र भक्षयेति पिधेहीति च गम्यम् ॥६२॥

**श० न्या०—**गम्य० । शब्दो ह्यर्थवानपि प्रयुज्य[ मानो-ऽप्रयुज्य ]मानश्च भवति; अप्रयुज्यमानश्चार्थ-प्रकरण-शब्दान्तर-सन्निधानैः प्रतीयमानार्थः, स च गम्य इत्युच्यत इत्याह- **यस्यार्थ** इत्यादि- अर्थ-प्रकरणादिनेति शेषः । **द्वितीयापवादो योग** इति- एधेभ्यो व्रजतीत्यत्र व्रज्याया एधाहरणार्थता गम्यते, न त्वेधार्थता, तेन तादर्थ्यचतुर्थ्या सूत्रारम्भमन्तरेण एधादि-

भ्यश्चतुर्थी सिध्यतीति न वक्तुं शक्यम्, आहरतेरप्रयुज्यमानस्य क्रियार्थव्रजतिक्रियोपपदस्य तुमन्तस्यैधानां कर्मत्वात्, तत्रानेन द्वितीयापवादश्चतुर्थी विधीयत इति। अत्रेहायमर्थो [ अत्र ह्ययमर्थो ] गम्यते– एधानाहर्तुं व्रजतीत्याह– **एधान् फलानि** चेत्यादि। **एधानाहर्तुं व्रजती**ति– अत्र तुमन्तस्य प्रयुज्यमानत्वाद् गम्यस्येति वचनात् तत्कर्मणि द्वितीयैव। आप्य इति किमर्थम्? **एधेभ्यो व्रजति शकटेने**ति करणे मा भूदित्याह– **आप्य इति किमि**त्यादि। **प्रविश पिण्डीं द्वारमि**ति– इह 'प्रविश गृहं, पिण्डीं भक्षय, द्वारं पिधेहि' इति वाक्येषु वाक्यैकदेशा अप्यर्थतः प्रकरणाच्छब्दान्तरसन्निधेर्वाऽवगमिततदर्थाः साधव इष्यन्ते, यदुक्तम्– "वाक्येषु वाक्यैकदेशा वर्तन्ते, पदेषु च पदैकदेशाः" इति, तत् तत्र प्रविशेर्गृहं कर्म, पिण्डी-द्वारे तु भक्षयति-पिधात्योरप्रयुक्तयोरर्थाद् गम्यमानयोरित्यत्र भक्षयेति पिधेहीति च गम्यमानस्याप्यं न तु तुमन्तस्येति तयोर्व्याप्ये न भवति ॥छ॥ २. २. ६२.॥

**न्या० स०—गम्यस्या०।** शब्दोऽर्थवानप्यप्रयुज्यमानः प्रयुज्यमानश्च भवति, अप्रयुज्यमानश्चार्थ-प्रकरण-शब्दान्तरसन्निधानैः प्रतीयमानार्थः, स च गम्य इत्युच्यते। **एधेभ्यो व्रजति** ननु एधार्थं व्रजतीति तादर्थ्ये एव चतुर्थी भविष्यति, किमनेन? उच्यते– व्रज्याया एधाहरणार्थतायां विश्रामोऽस्ति, न त्वेधार्थतायामिति न सिध्यति ॥ २. २. ६२. ॥

## गतेर्नवाऽनाप्ते। २। २। ६३॥

**त० प्र०—गतिः**– पादविहरणं, तस्या गतेराप्येऽनाप्ते– **असंप्राप्ते वर्तमानाद् गौणान्नाम्नश्चतुर्थी वा भवति। ग्रामं गच्छति, ग्रामाय गच्छति; नगरं व्रजति, नगराय व्रजति; विप्रनष्टः पन्थानं गच्छति, पथे गच्छति, उत्पथेन पन्थानं पथे वा गच्छति। गतेरिति किम्? आदित्यं पश्यति, मेरुं शृणोति, स्त्रियं गच्छति; मनसा मेरुं** गच्छतीत्यत्र ज्ञानार्थो गमिः। **आप्य इत्येव– ग्रामादागच्छति। अनाप्त इति किम्? पन्थानं गच्छति। कृद्योगे तु परत्वात् षष्ठ्येव भवति– ग्रामस्य गन्ता। द्वितीयैवेत्यन्ये– ग्रामं गन्ता। चतुर्थी चेत्यन्ये– ग्रामं गन्ता-ग्रामाय गन्तेति ॥ ६३ ॥**

**श० न्या०—गते०।** गतिशब्दस्य ज्ञानाद्यर्थत्वेऽप्यनाप्त इति वचनात् पादविहरणरूपैव गतिर्गृह्यते, ज्ञानादिव्याप्यस्याऽनाप्तत्वासम्भवादित्याह– **गतिः पादविहरणमि**ति। अनाप्त इत्यस्यार्थमाह– **असंप्राप्त** इति– अनाक्रान्त इत्यर्थः। गत्यर्था हि ज्ञानार्था भवन्ति, न च ज्ञानात्मिका गतिरिह गृह्यते इत्या**दित्यं पश्यती**त्यादौ न भवति। **स्त्रियं गच्छती**त्यत्र गमिर्मैथुनार्थो न गत्यर्थ इति न भवति। **ग्रामादागच्छति** अत्रासत्यामाप्य इत्यनुवृत्तौ ग्रामादित्यत्राप्ययं विधिः प्रसज्येतेति। **पन्थानं गच्छती**त्यत्र त्वनाप्तत्वाभावान्न भवति, अनाप्ते– असंप्राप्ते कर्मणि चतुर्थी, असंप्राप्तं तु तद् वस्तु यद्गमनेन संप्राप्स्यते तस्मिन् कर्मणि चतुर्थी, पन्थास्तु संप्राप्त इति चतुर्थ्यभावः। **कृद्योग** इति– अयमर्थः– ग्रामाय गच्छतीत्यादौ चतुर्थी सावकाशा, अपां स्रष्टेति षष्ठी, ग्रामस्य गन्तेत्युभयप्राप्तौ परत्वात् षष्ठ्येव भवतीति। **द्वितीयैवेत्यन्य** इति– सारसंग्रहकारादयः, ते हि– "गत्यर्थकर्मणि द्वितीया-चतुर्थ्यौ" इति सूत्रेण कर्मणि द्वितीयायां तदपवादो वैकल्पिकी चतुर्थ्यारभ्यते इति पक्षे द्वितीया सिद्धैवेति द्वितीयाग्रहणात् ग्रामं गन्तेत्यत्र कृत्कर्मणि अपवादभूतामपि षष्ठीं बाधित्वा द्वितीयैव भवति, चतुर्थी तु षष्ठ्या परत्वाद् बाध्यत एव" इति मन्यन्ते। **चतुर्थी चेत्यन्ये** इति– उत्पल इत्यर्थः, स ह्येवं मन्यते– द्वितीयाविषय इयं वैकल्पिकी चतुर्थ्यारभ्यते, द्वितीयस्याश्चात्रापवादात् कुतोऽपि विषय उपनत इति तद्विषये पक्षे चतुर्थी प्रवर्तत एव– **ग्रामं गन्ता, ग्रामाय गन्ते**ति, एतेषु चायं षष्ठीपक्षः श्रीशेषभट्टारकस्यापि सम्मत इति तदभिप्रायं साधारणभागकारोऽपि हरिणा प्रकीर्णके संप्रदानोद्देशे निर्णीतमाह– यथा कृद्योगलक्षणा षष्ठी न भवतीति तत्काव्यमिति साहसं च [ तत्कथनमतिसाहसं च ], कथं हि शब्दानां साधुत्वं युक्तिबलेन शक्यं व्यवस्थापयितुं, यत्र तुल्यपदार्थे उष्णं च तदुदकं च उष्णोदकमिति साधुः, उष्णं च तत् पानीयं च उष्णपानीयमिति कालदृष्टोऽपशब्दः, तापसश्चायं कुमारश्च तापसकुमार इति साधुः, तापसी चेयं कुमारी च तापसकुमारीति अचिकित्सोऽपशब्दः, पानीयोष्णं कुमारतापसीति चेति साधुरेव, एवंप्रकारेषु स्मृतिसमधिगम्यसाधुत्वेषु कथं युक्त्या निश्चय इति; तत्रायं भाष्यकार [:सूत्रकार ] इव व्याकरणे प्रमाणभूतः सर्ववृद्धानाम्, एतन्मतमवमत्य अन्यस्य कस्य किं ग्राह्यमिति न पेक्षापूर्वकारितेति ॥ छ ॥ २. २. ६३. ॥

**न्या० स०—गतेर्नवा०।** गतिशब्दस्य ज्ञानाद्यर्थत्वेऽप्यनाप्त इति वचनात् पादविहरणरूपैव गतिर्गृह्यते, ज्ञानादिव्याप्यस्याऽनाप्तत्वाऽसंभवादित्याह– **गतिः पादविहरणमि**ति। **स्त्रियं गच्छती**ति– भजनार्थोऽत्र गमिर्न गत्यर्थ इति न चतुर्थी। **पन्थानं गच्छती**ति– अनाप्ते– असंप्राप्ते कर्मणि चतुर्थी, पन्थास्तु संप्राप्त इति चतुर्थ्यभावः। **द्वितीयैवेत्यन्य** इति– सारसंग्रहकारादयः, ते हि– "गत्यर्थकर्मणि द्वितीया-चतुर्थ्यौ" इति सूत्रेण कर्मणि द्वितीयायां प्राप्तायां

तदपवादो वैकल्पिकी चतुर्थ्यारभ्यते इति पक्षे द्वितीया सिद्धैवेति द्वितीयाग्रहणात् ग्रामं गन्तेत्यत्र कृतः कर्मणि अपवादभूतामपि षष्ठीं बाधित्वा द्वितीयैव भवति, चतुर्थी तु षष्ठ्या परत्वाद् बाध्यत एवेति मन्यन्ते । **चतुर्थी चेत्यन्य** इति– उत्पल इत्यर्थः, स ह्येवं मन्यते– द्वितीयाविषय इयं वैकल्पिकी चतुर्थ्यारभ्यते, द्वितीयायाश्चात्रापवादात् कुतोऽपि विषय उपनत इति तद्विषये पक्षे चतुर्थी प्रवर्तत एव– **ग्रामं गन्ता, ग्रामाय गन्तेति** । एतेषु चायमस्मदभिमतः षष्ठीपक्षः श्रीशेषभट्टारकस्यापि संमतः, कथं हि शब्दानां साधुत्वं युक्तिबलेन शक्यं व्यवस्थापयितुं, यत्र तुल्यपदार्थे उष्णं च तदुदकं च उष्णोदकमिति साधुः, उष्णं च तत् पानीयं च उष्णपानीयमिति कालदृष्टोऽपशब्दः, तापसश्चायं कुमारश्च तापसकुमार इति साधुः, तापसी चेयं कुमारी च तापसकुमारीति अचिकित्स्योऽपशब्दः, पानीयोष्णं कुमारतापसी चेति साधुरेव ॥ २. २. ६३. ॥

## मन्यस्याऽनावादिभ्योऽतिकुत्सने । २ । २ । ६४ ॥

**त० प्र०—अतीव कुत्स्यतेऽनेनेत्यतिकुत्सनम्, तस्मिन् मन्यतेराप्ये वर्तमानात् नावादिगणवर्जिताद् गौणान्नाम्नश्चतुर्थी वा भवति । न त्वा तृणाय मन्ये, न त्वा तृणं मन्ये; न त्वा बुसाय मन्ये, न त्वा बुसं मन्ये; न त्वा लोष्ठाय मन्ये, न त्वा लोष्ठं मन्ये; न त्वा शुने मन्ये, न त्वा श्वानं मन्ये;** तृणाद्यपि न मन्ये– तृणादेरपि निकृष्टं मन्य इति कुत्स्यते । मन्यस्येति किम् ? न त्वा तृणं चिन्तयामि । श्यनिर्देशः किम् ? न त्वा तृणं मन्वे । अनावादिभ्य इति किम् ? न त्वा नावं मन्ये, न त्वा अन्नं मन्ये, न त्वा शुकं मन्ये, न त्वा शृगालं मन्ये, न त्वा काकं मन्ये; नावन्नयोरपि परप्रणेयताऽनायासोच्छेद्यतादिभिरतिकुत्सनत्वं भवति । कुत्सन इति किम् ? न त्वा रत्नं मन्ये, न ते मुखं चन्द्रं मन्ये, न ते मुखं पद्मं मन्ये; रत्नादिभ्योऽपि त्वदादीन् अधिकान् मन्य इति प्रशंसा । कुत्स्यतेऽनेनेति करणाश्रयणं किम् ? न त्वा तृणाय मन्य इति युष्मदो न भवति । अतिग्रहणं किम् ? त्वां तृणं मन्ये, सुवर्णं तृणं मन्ये; अत्र नञ्प्रयोगाभावे साम्यमात्रं प्रतीयते न त्वतिकुत्सा । कुत्सामात्रेऽपीच्छन्त्येके– तृणाय त्वां मन्ये, तृणाय मन्यमानः सर्वान्, हरिमपि अमंस्त तृणायेति । न त्वा तृणस्य मन्तेति कृद्योगे परत्वात् षष्ठी । चतुर्थ्यपीति कश्चित्– न तव बुसाय मन्ता, न तव बुसस्य मन्ता, न चैत्रस्य शुने मन्ता, न चैत्रस्य शुनो मन्तेति । उक्तकर्मणि तु– न त्वं बुसो मन्यसे मया, न चैत्रः श्वा मन्यते मया, नाऽहं बुसो मन्ये वृषलेनेत्यतिकुत्सनात् प्रथमेति । बहुवचनमाकृतिगणार्थम् ॥ ६४ ॥

**श० न्या०—मन्य०** । अतिकुत्सनशब्दस्यान्वर्थमाह– **अतीवे**त्यादि– तेनातिकुत्सनं– प्रकृष्य कुत्सितं, यद्वाचिनश्चतुर्थी विधीयते ततः प्रकर्षेण चेत् कुत्सां प्रतिपाद्यते तदा चतुर्थी भवति, न तु साम्यविवक्षायां, तेन प्रतिषेधयुक्तायां कुत्सायां चतुर्थीविधानम् [सम्पद्यते] । **मन्यस्ये**ति मन्यत इत्यत्र यद्विकरणपर्यन्तं रूपं तस्यानुकरणं, ततश्च मन्यतिपरिग्रह इत्याह– **मन्यतेरि**ति । **न त्वा तृणाये**त्यादि– तरतेः "भृग-तृण-गुण०" [उणा० १८६.] इति णे– तृणम्, "बुसच् उत्सर्गे" इत्यतो नाम्युपान्त्यत्वात् के– बुसः । तृणायापीत्यपिशब्दार्थो द्रष्टव्य इत्याह– **तृणाद्यपि न मन्यत** इति । एतदेव व्याचष्टे– **तृणादेरपी**त्यादि । **न त्वा तृणं चिन्तयामि** तृणमपि न चिन्तयामीत्यर्थः, अत्र मन्यस्येति वाचनान्न भवति । **न त्वा तृणं मन्वे** इति "मनूयि बोधने" वर्तमानाया एप्रत्ययः, ततः "कृग्तनादेरुः" इति श्यनिर्देशेन दिवादिपरिग्रहात् तनादेः कर्मणि न भवति **न त्वा नावं मन्ये** इति– नावादयो लक्ष्यदर्शनेनानुसर्तव्याः । "सर्तेर्गोऽन्तश्च" [उणा० ४७८.] इत्यालप्रत्यये गकारागमे च– सृगालः । अथ नावन्नयोरत्यन्तोपकारकत्वात् कथमतिकुत्सनत्वं गम्यत इत्याह– **नावन्नयोरपी**त्यादि– परेण स्वेच्छया प्रकर्षेण नीयतेऽभिमतं स्थानं परप्रणेयः, पराधीनप्रवृत्तिरिति यावत्, आदिशब्दादचेतनत्व-विनश्वरत्वादिपरिग्रहः । **न त्वा रत्नं मन्ये** इत्यादि अत्र कुत्सन इति वचनात् प्रशंसायां न भवति । यथा च प्रशंसा गम्यते तथाह– **रत्नादिभ्योऽपी**त्यादि । न त्वा तृणाय मन्य इत्यादौ युष्मदोऽपि मन्याप्यत्वात् पक्षे चतुर्थी प्राप्नोतीत्याह– **कुत्स्यत** इत्यादि– करणाश्रयणेन हि येन कुत्स्यते तत एवस्तृणादेश्चतुर्थीत्यर्थः । **त्वां तृणं मन्य** इति– अत्र नञ्प्रयोगाभावात् सातिशयकुत्साया अप्रतीयमानत्वात् साम्यमात्रविवक्षायां न भवतीत्येवेत्याह– **अत्र नञ्प्रयोगाभाव** इत्यादि । **कुत्सामात्रेऽपीच्छन्त्येके** इति– पाणिनिसूत्रव्याख्यातार एव साधारणभागप्रभृतयः । **परत्वादि**ति– उभयोरन्यत्र चरितार्थत्वादित्यर्थः । **चतुर्थ्यपीति कश्चिदि**ति– अजितयशोवादीत्यर्थः । **उक्तकर्मणि त्वि**ति– मन्यस्याप्ये कर्मद्वितीयाया विषये पक्षे चतुर्थी विधीयते, यत्र तु कर्मण्युक्तत्वाद् द्वितीयाया अप्रवृत्तिस्तत्र चतुर्थ्यपि न प्रवर्तते, उक्तकर्मणस्तु नामार्थत्वादतिकुत्सनात् प्रथमैवेत्यर्थः । "मन्यकर्मण्यनादरे उपमाने विभाषाऽप्राणिषु" इत्यापिशालिरधीते स्मेति । अथ नावादेरित्येकवचनेऽपि सिध्यति, बहुवचनं किमर्थमित्याह– **बहुवचनमि**त्यादि ॥ छ ॥ २. २. ६४. ॥

**न्या० स०—मन्यस्या०।** न त्वा बुसाय मन्ये " बुसच् उत्सर्गे " बुस्यति– त्यजति उपादेयभावमिति " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– बुसम्। **न त्वा नावं मन्ये** नावादयो लक्ष्यदर्शनेनानुसर्त्तव्याः। अथ नावन्नयोरत्यन्तोपकारकत्वात् कथमतिकुत्सनत्वं गम्यत इत्याह– **नावन्नयोरपी**ति– परेण स्वेच्छया अभिमतं स्थानं प्रकर्षेण नीयते परप्रणेयः, पराधीनप्रवृत्तिरित्यर्थः, तस्य भावः परप्रणेयता। **अनायासोच्छेद्यतादिभि**रिति– आदिशब्दादचेतनत्व-विनश्वरत्वादिग्रहः। **न त्वा शुकमि**ति– शुकः पाठितो भणति त्वं तदपि न। **न त्वा रत्नमि**ति– यतो रत्नं पाषाणः। **न ते मुखं चन्द्रमि**ति– चन्द्रे कलङ्कः, त्वन्मुखं निष्कलङ्कम्। **न ते मुखं पद्ममि**ति– पद्मस्य रात्रौ संकोचः, त्वदास्यस्य न कदापि। युष्मदोऽपि मन्यव्याप्यत्वात् पक्षे चतुर्थी प्राप्नोतीत्याह– **कुत्स्यतेऽनेने**ति।

" हरिमप्यमंसत तृणाय, कुरुपतिमजीगणन्नवा।
मान्तुलितभुवनत्रितयाः, सरितः सुतादबिभयुर्न भूभृतः " ॥१॥

**परत्वात् षष्ठी**ति– " कर्मणि कृतः " [ २. २. ८३. ] इत्यनेन तृणशब्दाद् नित्यं षष्ठी, युष्मच्छब्दात् तु " वैकत्र द्वयोः " [ २. २. ८५. ] इति षष्ठीविकल्पाद् द्वितीया, यदा तु युष्मदग्रतः " कर्मणि कृतः " [ २. २. ८३. ] इत्यनेन नित्यं षष्ठी तदा तृणशब्दाद् " वैकत्र द्वयोः " [ २. २. ८५. ] इत्यनेन विकल्पेन षष्ठी, तद्विकल्पपक्षे चतुर्थ्यपि– न तव तृणाय मन्ता, तृणस्य मन्ता, तृणं मन्तेति वा। **चतुर्थ्यपीति कश्चिदि**ति– अजितयशोवादी दुर्गसिंहश्च, " कर्मणि कृतः " [ २. २. ८३. ] इत्यनेन षष्ठीप्राप्तौ, " वैकत्र द्वयोः " [ २. २. ८५. ] इत्यस्य तु पक्षे सिद्धेवेति। **न त्वं बुसो मन्यसे** इति– अत्र विशेषणविशेष्यभावेन उभयमपि कर्म उक्तम्, यथा– कटः क्रियन्ते वीरणानि ॥२. २. ६४.॥

## हितसुखाभ्याम् । २ । २ । ६५ ॥

**त० प्र०—हित-सुखाभ्यां युक्ताद् गौणान्नाम्नश्चतुर्थी वा भवति। आतुराय आतुरस्य वा हितम्, आमयाविने आमयाविनो वा हितम्, चैत्राय चैत्रस्य वा सुखम् ॥ ६५ ॥**

**श० न्या०—हित०।** एताभ्यां योगे सम्बन्धलक्षणा षष्ठी सिद्धेति पक्षे चतुर्थ्यपि यथा स्यादिति वचनम्। आमीनातीत्यच्-आमयः, ततः " आमयाद् दीर्घश्च " [ ७. २. ४८. ] इति विनि दीर्घत्वे च– आमयावी ॥ छ ॥ २. २. ६५. ॥

**न्या० स०—हित०।** [ नेह व्याख्यातम् ] ॥ २. २. ६५.॥

## तद्भद्रा-ऽऽयुष्य-क्षेमा-ऽर्थाऽर्थेनाऽऽशिषि । २ । २ । ६६ ॥

**त० प्र०—तदिति हित-सुखयोः परामर्शः, अर्थशब्दः प्रत्येकमभिसंबध्यते; हिताद्यर्थैर्युक्ताद् गौणान्नाम्न आशिषि गम्यमानायां चतुर्थी वा भवति। हितार्थे– हितं जीवेभ्यो भूयात्, हितं जीवानां भूयात्; पथ्यं मैत्राय भूयात्, पथ्यं मैत्रस्य भूयात्; सुखार्थे– सुखं प्रजाभ्यो भूयात्, सुखं प्रजानां भूयात्; शं प्रजाभ्यो भूयात्, शं प्रजानां भूयात्; शर्म भवताद् भव्येभ्यः, शर्म भवताद् भव्यानाम्; भद्रार्थे– भद्रमस्तु जिनशासनाय, भद्रमस्तु जिनशासनस्य; मद्रमस्तु जिनशासनाय, मद्रमस्तु जिनशासनस्य; कल्याणमस्तु जिनशासनाय, कल्याणमस्तु जिनशासनस्य; आयुष्यार्थे– आयुष्यमस्तु चैत्राय, आयुष्यमस्तु चैत्रस्य; दीर्घमायुरस्तु मैत्राय, दीर्घमायुरस्तु मैत्रस्य; चिरं जीवितमस्तु मैत्राय, चिरं जीवितमस्तु मैत्रस्य; क्षेमार्थे– क्षेमं भूयात् संघाय, क्षेमं भूयात् संघस्य; कुशलं भूयात् संघाय, कुशलं भूयात् संघस्य; निरामयं भूयात् साधुभ्यः, निरामयं भूयात् साधूनाम्; अर्थार्थे– अर्थो भूयात् मैत्राय, अर्थो भूयात् मैत्रस्य; प्रयोजनं भूयात् मैत्राय, प्रयोजनं भूयात् मैत्रस्य; कार्यं भूयात् मैत्राय, कार्यं भूयात् मैत्रस्य। आशिषीति किम्? आयुष्यं प्राणिनां घृतम्, तत्त्वाख्याने न भवति। हित-सुखशब्दाभ्यां पूर्वेण विकल्पः सिद्ध एव, तदर्थार्थं तु तद्ग्रहणम् ॥ ६६ ॥**

**श० न्या०—तद्भ०। तदिती**ति– तच्छब्दस्य पूर्ववस्तुपरामर्शित्वादिति शेषः। **अर्थशब्द** इति– अन्त्य इति शेषः। **भवतादि**ति– " भू सत्तायाम् " ततः पञ्चम्या हिः " कर्त्तर्यनद्भ्यः शव् " [ ३. ४. ७१. इति शव् ] " आशिषि तु-ह्योः० " [ ४. २. ११९. ] इति तातङ्। " भडुङ् सुख-कल्याणयोः " ततो " भन्देर्वा " [ उणा० ३९१. ] इति रप्रत्यये– **भद्रम्।** " मदैच् हर्षे " अतो " भीवृधिरुधि० " [ उणा० ३८७. ] इति रप्रत्यये– **मद्रम्।** कलेः " कल्याण-पर्याणादयः " [ उणा० १९३. ] इत्याणप्रत्यये यागमे च– **कल्याणम्।** " इंण्क् गतौ " अत " इणो णित् " [ उणा० ९९८. ] इति णित्युसप्रत्यये वृद्धौ च– आयुः, तत आयुः प्रयोजनमस्येति " **स्वर्गस्वस्ति०** " [ ६. ४. १२३. ] इति यप्रत्यये– **आयुष्यम्।** " क्षित् निवास-गत्योः " अतः " अर्त्तीरि० " [ उणा० ३३८. ] इति मे प्रत्यये– **क्षेमम्।** " कुशच् श्लेषणे " इत्यतः " तृपि-चपि-कुपि-कुशि० " [ उणा० ४६८. ] इति किदले– **कुशलम्। आयुष्यं प्राणिनां घृतमि**ति– तत्त्वाख्यानमेतत्, नात्राशीरिति न भवति। अथ हितसुखाभ्यां योगे पूर्वेणैव चतुर्थीविकल्पः सिद्धः, किं पुनस्तदर्थेन तद्ग्रहणेनेत्याह– **हितसुखशब्दाभ्यामि**त्यादि– अयमर्थः– " हितसुखाभ्याम् " [ २. २.

६५.] इति पूर्वसूत्रेण पक्षे चतुर्थी विधीयत एवेति न तत्प्रापणार्थमिदम्, किन्तु तत्र शब्दग्रहणमिदं तु तदर्थार्थं पुनरुपादानमिति ॥ छ ॥ २. २. ६६. ॥

**न्या० स०—तद्भद्रा०** । भद्र-क्षेमार्थयोरन्यत्रैकार्थत्वेऽपि क्षेमम्–आपदोऽभावः, भद्रं– संपदुत्कर्ष इत्यर्थभेदाद् द्वितीयोपादानम् । **आयुष्यमस्तु चैत्रायेति**– आयुः प्रयोजनमस्य घृतादेरायुष्यं– घृतादि; ततश्च **दीर्घमायुरस्तु मैत्रायेत्यादौ** चतुर्थी न प्राप्नोति, यत आयुःशब्देन जीवितमेवाभिधीयते, न तु जीवितकारणं घृतादिकम्, उच्यते– कार्ये कारणोपचाराद्, यथा– इन्द्रः स्थूणा, यदा त्वायुरेव भेषजादि[त्वात्] स्वार्थे ष्यणि आयुष्यशब्दो निष्पाद्यते तदा निर्विवादं सिद्धमेव । आमयस्याभावः– **निरामयम्**, “ विभक्तिसमीप० ” [ ३. १. ३९. ] इति समासः । **आयुष्यं प्राणिनामिमिति**– अत्र आयुषि साधु “ तत्र साधौ ” [ ७. १. १५. ] यः । **तद्ग्रहणमिति**– तर्हि प्रागप्यर्थग्रहणमस्तु, सत्यम्– तदर्थानामाशिषि नियमार्थमिदम् ॥ २. २. ६६. ॥

## परिक्रयणे । २ । २ । ६७ ॥

**त० प्र०—परिक्रीयते– नियतकालं स्वीक्रियते येन तत् परिक्रयणं वेतनादि, तस्मिन् वर्तमानाद् गौणान्नाम्नश्चतुर्थी वा भवति । शताय परिक्रीतः, शतेन परिक्रीतः; “ संभोगाय परिक्रीता(तः) कर्ताऽस्मि तव नाऽप्रियम् । ” संभोगेन वा; शतादिना नियतकालं स्वीकृत इत्यर्थः । परीति किम् ? शतेन क्रीणाति, क्रयस्यात्र करणं न परिक्रयस्य । करणाश्रयणं किम् ? शताय परिक्रीतो मासम्, मासात् मा भूत् ॥ ६७ ॥**

**श० न्या०—परि०** । **नियतकालमिति**– स्तोकं कालमित्यर्थः । स्वीकारो ह्यात्मसात्करणं परिक्रय उच्यते, परिशब्दोऽत्र प्रत्यासत्तिं द्योतयति, यथा– सहस्रा गाव इति सहस्रप्रत्यासन्नाः संभाव्य सहस्रा गाव उच्यन्ते; एवमत्रापि क्रयप्रत्यासन्नोऽल्पकालो वेतनादिना स्वीकारः परिक्रय उच्यते, तत्र यत् करणं– परिक्रयक्रियायां साधकतमं वेतनादि तत् करणव्युत्पत्त्या परिक्रयणमुच्यते । **वेतनादी**त्यादिशब्देन बन्धकादिपरिग्रहः । **शताय परिक्रीत** इति– चतुर्थ्या मुक्ते करणे तृतीया, शतेन मूल्यादिभूतेन नियतकालं यः स्वीकृत स एवमुच्यत इत्याह– **शतादिने**त्यादि । **शतेन क्रीणाति** अत्र क्रय एव, न परिक्रयोऽतस्तस्य करणपक्षे न चतुर्थीति । **शताय परिक्रीतो मासमि**ति– यदि परिक्रयण इति प्रकृत्यर्थविषयतया निर्दिश्यते– परिक्रयणे– परिक्रये यदर्थः परिक्रयविषयस्ततश्चतुर्थीति मासादपि प्राप्नोति, करणाश्रयणत्वे न भवतीत्याह– **मासान्मा भूदिति** ॥ छ ॥ २. २. ६७. ॥

**न्या० स०—परिक्र०** । स्वीकारो ह्यात्मसात्करणं परिक्रय उच्यते, परिशब्दोऽत्र प्रत्यासत्तिं द्योतयति, यथा– परिसहस्रा गाव इति सहस्रप्रत्यासन्नाः संभाव्य परिसहस्रा गाव उच्यन्ते, एवमत्रापि क्रयप्रत्यासन्नोऽल्पकालो वेतनादिना स्वीकारः परिक्रय उच्यते, तत्र यत् करणं परिक्रयक्रियायां साधकतमं वेतनादि तत् करणव्युत्पत्त्या परिक्रयणमुच्यते । **वेतनादीति**– आदिपदाद् भाटकादिपरिग्रहः । **करणाश्रयणं किमिति**– करणाश्रयणं विना परिक्रीयतेऽस्मिन्नित्यनया व्युत्पत्त्या मासादपि स्याच्चतुर्थी । **शताय परिक्रीतो मासमिति**– क्रीत इति रूपं कर्मणि कर्तरि वा, तथाहि– परिक्रीयते स्म परिक्रीतः, कः कर्मतापन्नः ? चैत्रः, कं ? मासम्, कोऽर्थः ? मासे; यद्वा परिक्रीणीते स्म कर्तरि क्तः कर्मणोऽविवक्षितत्वात्; अथात्र मासमिति कर्म विद्यते तत् कथं कर्तरि क्तः, उच्यते– मासमित्यत्र “ कालाध्वभाव० ” [ २. २. ४२. ] इत्यनेनाधारस्य युगपत् कर्मसंज्ञाऽकर्मसंज्ञा च, तत्र कर्मसंज्ञायां कर्मणि द्वितीया, अकर्मसंज्ञायां तु कर्तरि क्तः ॥ २. २. ६७. ॥

## शक्तार्थ-वषड्-नमः-स्वस्ति-स्वाहा-स्वधाभिः । २ । २ । ६८ ॥

**त० प्र०—शक्तार्थैर्वषडादिभिश्च शब्दैर्युक्तात् गौणान्नाम्नश्चतुर्थी भवति, पृथग्योगाद् वेति निवृत्तम् । शक्तो मैत्रश्चैत्राय, शक्नोति मैत्रश्चैत्राय, प्रभवति मैत्रश्चैत्राय, अलं मल्लो मल्लाय, समर्थो मल्लो मल्लाय, प्रभुर्मल्लो मल्लाय; वषट्–वषडग्नये, वषडिन्द्राय; नमस्– नमोऽर्हद्भ्यः, नमः सिद्धेभ्यः; स्वस्ति– स्वस्ति प्रजाभ्यः, स्वस्ति संघाय; स्वाहा– इन्द्राय स्वाहा, अग्नये स्वाहा; स्वधा– पितृभ्यः स्वधा । स्वस्तिशब्दः क्षेमार्थः, तद्योगे आशिष्यपि परत्वाद् नित्यमेव– स्वस्ति संघाय भूयात्, स्वस्ति प्रजाभ्यो भूयात् । तृतीयया योगाऽभिधानादिह न भवति– नमो जिनाऽऽयतनेभ्यः, नात्र जिनानां नमसा योगः; नमस्यति जिनानित्यत्रापि नमस्यधातुना योगो न नमसा । यद्येवं कथं स्वयंभुवे नमस्कृत्येति ? नानेनात्र चतुर्थी, किन्तु नमस्कृतिलक्षणया क्रिययाऽभिप्रेयमाणत्वात् संप्रदानत्वे “ चतुर्थी ” [ २. २. ५३. ] इत्यनेनैव; स्वयंभुवं नमस्कृत्येत्यत्र तु क्रियाऽभिप्रेयत्वाविवक्षायां द्वितीयैव ॥ ६८ ॥**

**श० न्या०—शक्ता०** । **पृथग्योगादिति**– “हित-सुखाभ्याम्” [ २. २. ६५. ] इत्यतः स्वस्तिशब्दस्य पृथक्करणादित्यर्थः, अन्यथाऽनाशंसायां “ हितसुखस्वस्तिभिः ” इति कृतेऽनेन विकल्पः, आशंसायां तु “ तद्भद्र० ” [ २. २. ६६.] इत्यनेनेति, “ परिक्रयणे ” [ २. २. ६७. ] इत्यनेन त्वेकयोगत्वं न व्याख्येयमर्थस्यासङ्गतेः, तत्र हि परिक्रयणे वर्तमाना-

नाम्न इत्युक्तम्, अनेन त्वेकयोगे वषडादिवत् परिक्रयणशब्दस्वरूपपरिग्रहः स्यादिति। **शक्तो मैत्रश्चैत्राये**ति- शक्नोतेरकर्मकत्वादकर्मकलक्षणः कर्तरि क्तः। **शक्तार्थे** इति- नात्र प्रत्ययार्थो विवक्षितः, किन्तु प्रकृत्यर्थमात्रम्, अन्यथाऽलं मल्लो मल्लायेत्यत्र न स्यात्, नह्यत्र कर्ता प्रत्ययार्थोऽस्ति तस्यासत्त्ववाचित्वेन सामर्थ्यमात्रद्योतकत्वात्। **मल्ल** इति तु प्रथमा, अलं भवतादिति भवतिसामानाधिकरण्यात्, तेन शक्तेन मल्लेन मल्लायेत्याद्यपि द्रष्टव्यम्। **वषडिन्द्राये**ति। **स्वस्तिशब्द** इति- क्षेमार्थ इत्यनेन विकल्पप्राप्तिं दर्शयति। [ **परत्वान्नित्यमेवे**ति- ] स्वस्तिचतुर्थ्या अवकाशः- स्वस्ति जाल्माय, तत्त्वाख्यानमिदं जाल्मत्वादाशीरभावात्, क्षेमार्थचतुर्थ्या अवकाशः- कुशलं भूयात् संघाय, इहोभयं प्राप्नोति- स्वस्ति प्रजाभ्य इति, तत्र, परत्वादाशिष्यपि नित्यं स्वस्तिचतुर्थी भवतीत्यर्थः। **तृतीयया योगाभिधानादि**ति- शक्तार्थादिभिर्युक्तान्चतुर्थीत्यर्थावसायात् तैर्युक्तान्न भवतीत्यर्थः। **नमस्यति जिनानि**ति- अत्रापि नमसा योगाभावाज्जिनानित्यत्र चतुर्थ्यभावः, यद्वा नमःशब्दस्यार्थवतो ग्रहणात् तेन नानर्थकेन योगेन भवति, अत्र हि नमस्यधातुरर्थवांश्च तु तदेकदेशो नमःशब्द इति; अथवा पदान्तरसम्बन्धानपेक्षणादन्तरङ्गया कारकविभक्त्या द्वितीयया उपपदविभक्तिश्चतुर्थी बाध्यते *उपपदविभक्तेः कारकविभक्तिर्बलीयसी* इति न्यायात्। ननु कारकविभक्तिरपि क्रियापक्षापेक्षिणीति कथमन्तरङ्गा स्यात्? नैष दोषः- कारकस्य क्रियामात्रसम्बन्धाव्यभिचारात् स्वरूपान्तर्गतैव सापेक्षेति, विशिष्टक्रियापदश्रयणेन तु सैवापेक्षा नियम्यत इति, उपपदार्थापेक्षा तूपपदविभक्तिप्रकृतेर्नाम्नो न स्वाभिधेयान्तर्गता, इत्यमुमेवार्थं चेतसि निधाय पृच्छति- **यद्येवं कथमि**त्यादि- कारकविभक्त्या द्वितीयया बाध्यमाना कथमत्र चतुर्थीति प्रश्नार्थः। **परिहरति नानेनात्र चतुर्थी**त्यादि। यदि नमस्कृतिलक्षणक्रियाभिप्रेयमाणतया सम्प्रदानत्वं कथं तर्हि स्वयम्भुवं नमस्कृत्येत्यत्र तन्न भवतीति यदि कस्याप्याशङ्का स्यात् तदा तन्निवृत्त्यर्थमाह- **स्वयम्भुवमि**त्यादि। बहुवचनमसन्देहार्थम् ॥ २. २. ६८. ॥

**न्या० स०—शक्तार्थ०।** पृथग्योगाद् **वेति निवृत्तमि**ति- तत्र कश्चिद् सामस्त्येन पृथग्योगः, कश्चिदेकदेशेन संभवति, अत्र तावदेकदेशेन, तथाहि- “ हितसुखाभ्याम् ” [ २. २. ६५. ] इत्यनेन स्वस्तिशब्दस्यैकयोगाकरणात्, एकयोगे च कृतेऽनाशंसायां “ हितसुखस्वस्तिभिः ” इत्यनेन, आशंसायां तु “ तद्भद्र० ” [ २. २. ६६. ] इत्यनेन तदिति पूर्ववस्तुपरामर्शेन क्षेमद्वारेण वा विकल्पः सिद्ध एव, तदकरणाद् ‘ वा ’ इति निवृत्तमित्यर्थः। ननु कथमत्रैकदेशेन पृथग्योगो न सामस्त्येन ? उच्यते- “ तद्भद्र० ” [ २. २. ६६. ] इत्यत्र व्यभिचारात्, तथाहि- “ तद्भद्र० ” [ २. २. ६६. ] इत्यत्रार्थपरो निर्देशः, अयं तु शब्दपर एवेति; “ परिक्रयणे ” [ २. २. ६७. ] इत्यनेन तु एकयोगत्वं न व्याख्येयमर्थस्याऽसंगतेः, तत्र हि परिक्रयणे वर्तमानान्नाम्न इत्युक्तम्, अनेन त्वेकयोगे वषडादिवद् परिक्रयणशब्दस्वरूपपरिग्रहः स्यादिति। **परत्वान्नित्यमेवे**ति- ननु “ स्पर्द्धे ” [ ७. ४. ११९. ] परः, समानविषययोश्च स्पर्ध इति, समानविषयत्वं “ तद्भद्र० ” [ २. २. ६६. ] इत्यस्य दर्शयति, तथाहि- स्वस्ति जाल्मायेत्यत्र जाल्मत्वेनाशीरभावाद् तत्त्वाख्यानमिदमिति स्वस्तिचतुर्थ्या अवकाशः, क्षेमं भूयात् संघायेत्यत्र तु क्षेमचतुर्थ्या अवकाशः, स्वस्ति प्रजाभ्य इत्यत्रोभयप्राप्तौ परत्वादाशिष्यपि नित्यं स्वस्तिचतुर्थी भवतीत्यर्थः। **नमसे**ति- यद्वाऽस्तु नमसा योगः, तथापि नमःशब्दस्यार्थवतो ग्रहणादनर्थकयोगे न भवति, अत्र हि नमस्यधातुरर्थवांश्च तु तदेकदेशो नमःशब्द इति; अथवा पदान्तरसंबन्धानपेक्षणादन्तरङ्गया द्वितीयया कारकविभक्त्या उपपदविभक्तिस्तदपेक्षणाद् बहिरङ्गा चतुर्थी बाध्यते *उपपदविभक्तेः कारकविभक्तिर्बलीयसी* इति न्यायात्, ननु कारकविभक्तिरपि क्रियापदापेक्षिणीति कथमन्तरङ्गा ? नैष दोषः- कारकस्य क्रियामात्रसंबन्धाव्यभिचाराद् स्वरूपान्तर्गतैव सापेक्षा। **यद्येवमि**ति- कारकविभक्त्या द्वितीयया बाध्यमाना कथमत्र चतुर्थीति प्रश्नार्थः।

“ स्वयंभुवे नमस्कृत्य, ब्रह्मणेऽमिततेजसे ।
मुनिप्रणीतान् विविधान्, मन्त्रान् व्याख्यामि शाश्वतान् ॥१॥”

॥ २. २. ६८. ॥

## पञ्चम्यपादाने । २ । २ । ६९ ॥

**त० प्र०—**अपादाने कारके गौणान्नाम्नो यथासंख्यमेक-द्वि-बहौ ‘ ङसि-भ्यां-भ्यस् ’लक्षणा पञ्चमी विभक्तिर्भवति । ग्रामादागच्छति, पर्वतादवरोहति, गोदाभ्यामागच्छति, यवेभ्यो गां वारयति, कुसूलात् पचति, बलाहकाद् विद्योतते विद्युत्, चौराद् बिभेति ॥ ६९ ॥

**श० न्या०—पञ्च०। ग्रामादागच्छति** आगच्छतीति पदस्य योऽर्थ आगमनक्रियालक्षणस्तस्यावधिभावेन ग्रामो विवक्षित इति “ अपायेऽवधिरपादानम् ” [ २. २. २९. ] इत्यस्यापादानत्वात् पञ्चमी, एवं **पर्वतादवरोहती**त्यादावपि द्रष्टव्यम् ॥ छ ॥ २. २. ६९. ॥

**न्या० स०—पञ्च०।** [ नेह व्याख्यातम् ] ॥२. २. ६९. ॥

## आङाऽवधौ । २ । २ । ७० ॥

**त० प्र०—**अवधिर्मर्यादा, अभिविधिरपि तद्विशेष एवेति

**तस्यापि ग्रहणम्; अवधौ वर्तमानात् आङा युक्ताद् गौणान्नाम्नः पञ्चमी भवति । आ पाटलिपुत्राद् वृष्टो मेघः, पाटलिपुत्रमवधीकृत्य तद्व्याप्याऽव्याप्य वा वृष्ट इत्यर्थः; आ कुमारेभ्यो यशो गतं गौतमस्य ॥ ७० ॥**

**श० न्या०**—आङा० । अवधिशब्दस्य पर्यायेणार्थमाह– **अवधिर्मर्यादे**ति– प्रवृत्तस्य यत्र निरोधः स मर्यादा, **तद्विशेष एवे**ति– मर्यादाविशेषोऽभिविधिरिति मर्यादाभूतमेव यदा क्रियाया व्याप्यते तदाऽभिविधिरित्यवधिशब्देनैव मर्यादार्थेन तस्यैव सामान्येन ग्रहणमित्यर्थः । **आ पाटलिपुत्राद् वृष्टो मेघ** इति– अत्र वर्षणस्य पाटलिपुत्रमवधिराङा च युक्तमतस्ततः पञ्चमी । **पाटलीपुत्रमवधीकृत्ये**तावानर्थ आङा द्योत्यते, अवधि पुनरव्याप्तिरिति च विशेषो न गम्यते, प्रमाणान्तरेण तु गम्यत इत्याह– **तद्व्याप्याऽव्याप्य वे**ति । **आ कुमारेभ्यो यशो गतं गौतमस्य** समन्ततो विसर्पणेऽपि आ पाटलिपुत्रादिति पाटलिपुत्रवत् कुमारा अवधित्वेन प्रतीयन्ते ॥ छ ॥ २. २. ७०. ॥

**न्या० स०**—आङाव० । प्रवृत्तस्य यत्र निरोधः स मर्यादा, मर्यादाभूतमेव यदा क्रियया व्याप्यते तदाऽभिविधिः । **पाटलिपुत्रमवधीकृत्ये**ति– एतावानर्थ आङा द्योत्यते ॥ २. २. ७०. ॥

## पर्यपाभ्यां वर्ज्ये । २ । २ । ७१ ॥

**त० प्र०—वर्ज्ये-वर्जनीयेऽर्थे वर्तमानात् पर्यपाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी भवति । परि पाटलिपुत्राद् वृष्टो मेघः, परि परि पाटलिपुत्राद् वृष्टो देवः; अप पाटलिपुत्राद् वृष्टो देवः, पाटलिपुत्रं वर्जयित्वेत्यर्थः । वर्ज्ये इति किम्? अपशब्दो मैत्रस्य ॥ ७१ ॥**

**श० न्या०**—पर्य० । **परि पाटलिपुत्राद् वृष्टो देव** इत्यादौ वर्ज्य-वर्जकसम्बन्धः पर्यपाभ्यां द्योत्यत इति तत्र तद्युक्ताद् वर्जनीयात् सम्बन्धषष्ठ्यां प्राप्तायां पञ्चमी विधीयते इति । **परि परि पाटलिपुत्रादि**ति– " वाक्यस्य परिवर्जने " [ ७. ४. ८८. ] इति द्विर्वचनम् । **पाटलिपुत्रं वर्जयित्वेत्यर्थः** इत्यनेन पाटलिपुत्रस्य वर्ज्यत्वं दर्शयति । पर्यपौ तु पाटलिपुत्रस्य वृष्ट्या वर्ज्यमानतां द्योतयतः । **अपशब्दो मैत्रस्य** अपेतं(तः) शब्दादपशब्द इत्यप[पदार्थ]प्रधानः समासः, अत्रापेन युक्तो मैत्रो न वर्ज्य इति वर्ज्य इति वचनान्न भवति । ननु अपेन साहचर्यात् परेरपि वर्जनार्थस्य ग्रहणाद् वर्जनार्थाभ्यां पर्यपाभ्यां युक्तात् पञ्चमीत्यर्थावसायात् कर्तुर्यदर्थः क्रियारम्भस्तत्प्रधानमिति व्याप्यस्य वर्ज्यमानस्य प्राधान्यात् ताभ्यां युक्तत्वात् पाटलिपुत्रादेः क्रियाव्याप्ये द्वितीयायाः प्रसङ्गे सम्बन्धिरूपतया वाऽपेक्षिते षष्ठ्यां प्राप्तायां वर्जनीयादेव पञ्चमी भविष्यति, किं वर्ज्यग्रहणेन? सत्यम्– एवं सति प्रतिपत्तिगौरवं स्यात्, किञ्च नहि साहचर्यं नाम प्रमाणमस्ति, अर्थप्रकरणादिभिर्लोके सहचरितस्य ग्रहणात् सव्यभिचारत्वाच्चेत्यदोषः ॥छ॥ २. २. ७१. ॥

**न्या० स०**—पर्यपा० । वर्ज्य-वर्जकसंबन्धः पर्यपाभ्यां द्योत्यत इति । " वाक्यस्य परिवर्जने " [ ७. ४. ८८. ] इत्यनेन **परि परी**त्यत्र वा द्वित्वम् । **अपशब्दो मैत्रस्य** अपगतः शब्दात्, तत्पुरुषस्य पूर्वपदप्रधानत्वात् पूर्वपदेन 'अप' इत्यनेन सह मैत्रशब्दस्य योगोऽस्तीति न वर्ज्य इति व्यावृत्तेर्नाङ्गविकलता, अत्र मैत्रशब्दान्मा भूत् ॥ २. २. ७१. ॥

## यतः प्रतिनिधि-प्रतिदाने प्रतिना । २ । २ । ७२ ॥

**त० प्र०—प्रतिनिधीयत इति प्रतिनिधिर्मुख्यस्य सदृशोऽर्थः, प्रतिदानं– गृहीतस्य प्रत्यर्पणं विशोधनमिति यावत्; प्रतिना योगे यतः प्रतिनिधिर्यतश्च प्रतिदानं तद्वाचिनो गौणान्नाम्नः पञ्चमी भवति । प्रद्युम्नो वासुदेवात् प्रति, अभयकुमारः श्रेणिकतः प्रति, सदृश इत्यर्थः; तिलेभ्यः प्रति माषानस्मै प्रयच्छति, तिलान् गृहीत्वा माषान् ददातीत्यर्थः; एवं– सर्पिषोऽस्मै तैलं प्रति सिञ्चति, सर्पिषोऽस्मै तैलं प्रति सिक्त्वा व्रजति । यत इति किम्? 'तिलेभ्यः प्रति माषान् प्रयच्छति' इत्यत्र माषशब्दान्मा भूत् । प्रतिनिधि-प्रतिदान इति किम्? वृक्षं प्रति विद्योतते विद्युत् ॥ ७२ ॥**

**श० न्या०**—यतः० । **प्रतिनीधीयत** इति– मुख्यस्याऽसम्भवे कार्ये नियुज्यत इति मुख्यस्य सदृशोऽर्थ इत्याह– **प्रतिनिधिरि**त्यादि– मुख्यो यः क्वचित् कार्ये रूढसम्बन्धः, यथा– अर्जुनः शत्रुञ्जयः, तस्यासन्निधाने यस्तत्कार्ये तद्बुद्ध्या नियुज्यते स प्रतिनिधिरित्यर्थः । **प्रतिदानमि**ति–गृहीतस्य– पूर्वदत्तस्य तिलादेः, प्रत्यर्पणं– निर्यातनं, तुल्यजातीयेनातुल्यजातीयेन वेति शेषः । पुनः प्रत्यर्पणं स्पष्टयति– **विशोधनमि**ति । **यतः प्रतिनिधिर्यतश्च प्रतिदानमि**ति– यत इति यच्छब्दान्मुख्य-पूर्वदत्तप्रतिपादकाद् " गम्ययपः कर्माधारे " [ २. २. ७४. ] इति कर्मणि पञ्चमी, यमपेक्ष्य प्रतिनिधि-प्रतिदाने भवतस्ततः पञ्चमीति ह्यर्थो गम्यते, मुख्यपूर्वदत्ते चापेक्षिते भवतः सम्बन्धशब्दत्वादिति । **प्रद्युम्नो वासुदेवात् प्रति** प्रद्युम्नस्य वासुदेवप्रतिनिधित्वाद् वासुदेवात् पञ्चमी, पुपूर्वात् " भांक्

मान-शब्दयोः ” इत्यतो “ द्युसुनिभ्यो माङो डित्” [ उणा० २६६.] इति डिति ने– द्युम्नं, पश्चात् प्रेण बहुव्रीहौ– प्रद्युम्नः, एवम्– अभयकुमारस्य श्रेणिकप्रतिनिधित्वात् श्रेणिकात् पञ्चमी “ प्रतिना पञ्चम्याः ” [ ७. २. ८७.] इति तसुः। **तिलेभ्यः प्रति माषानस्मै प्रयच्छति** ये ते [ तिला ] माषार्थं पूर्वं गृहीतास्तेभ्यो माषाणां प्रतिदानमिति तिलशब्दात् पञ्चमी, इत्यमुमेवोदाहरणस्यार्थं स्पष्टयति– **तिलान् गृहीत्वे**त्यादिना, एवं– **सर्पिषोऽस्मै तैलं प्रति सिञ्चती**त्यादावपि द्रष्टव्यम्। अत्र यद्यपि मुख्य-प्रतिनिध्योर्गृहीतप्रतिदानयोश्च प्रतिना योगस्तथापि यत इति निर्देशान्मुख्याद् गृहीताच्च तद्युक्तात् पञ्चमी विधीयते, तत एव च तयोत्पद्यमानयोभयगतसंबन्धस्य प्रतिपादितत्वात्, इतराभ्यां तद्युक्ताभ्यामपि पञ्चम्या अप्रवृत्तिरितीत्याह– **यत इति किमि**त्यादि। ननु प्रतिनिधि-प्रतिदानयोः स्वेन प्रतियोगिना प्रतिनिधिप्रतिदानवता सम्बन्धमभिव्यक्तुं प्रतिः प्रयुज्यते; तत्र द्विष्ठत्वात् सम्बन्धस्य प्रतिनिधि-प्रतिदानयोः प्रति-निधिप्रतिदानवतोश्च तुल्येऽपि प्रतिना योगे प्रतिनिधि-प्रतिदानाभ्यां कारकविभक्तिविषयाभ्यां नोपपदपञ्चमी भविष्यति, किं तदर्थेन यत इत्यनेन ? उपपदविभक्त्यो हि षष्ठ्यपवादः, षष्ठी च सम्बन्धेऽस्येदम्भावलक्षणे, कारकभावस्य च सम्बन्धिकारणभूतस्य विवक्षायामस्येदमित्येवंरूपस्य सम्बन्धस्य फलभूतस्य प्राग्भावादेवोपपदविभक्तीनामनुपजातनिमित्तानां स्वत एवाभावः सिद्धः, अयमेव चार्थः पूर्वाचार्यैः परिभाषारूपेणानेन वचनेन पठ्यते– * उपपदविभक्तेः कारकविभक्तिर्बलीयसी * इति, तत्र यथा प्रद्युम्न-माषयोः कारकयोरसति प्रतिना सम्बन्धे ‘ वासुदेवस्य प्रतिनिधिरयं प्रद्युम्नः, तिलानां प्रतिदानं माषान् प्रयच्छति ’ इति कारकविभक्तिः प्रधानादप्रधानाच्च षष्ठी, तथा प्रतिनापि योगे तं सम्बन्धमभिधातुं पञ्चम्युत्पद्यमाना तत एव च प्रतियोगिनः षष्ठीयुक्तादुत्पत्स्यते न तु प्रतिनिधि-प्रतिदानाभ्यामिति न्यायादेव सिद्धम्, सत्यम्– इमामेव नियतविषयामुत्पत्तिं ‘ यतः ’ इत्यनेन दर्शयतीत्यदोषः। **वृक्षं प्रति विद्योतत** इति– अत्र वृक्षस्य प्रतिना योगेऽपि प्रतिनिधि-प्रतिदानयोरभावान्मुख्यगृहीतासंभवान्न ततः पञ्चमीति “ भागिनि च प्रतिपर्यनुभिः ” [ २. २. ३७. ] इति द्वितीयैव ॥ छ ॥ २. २. ७२. ॥

**न्या० स०**—यतः प्रति०। यस्मात् “ किमद्व्यादि० ” [ ७. २. ८९. ] इत्यपादाने तस् “ आ द्वेरः ” [ २. १. ४१. ] यदा यस्य यतः, तदा “ आद्यादिभ्यः ” [ ७. २. ८४.] “ पृषोदर० ” [ ३. २. १५५. ] इति दलोपः। प्रतिनिधि-प्रतिदानशब्दात् प्रथमा औ दीयते। **प्रतिनिधीयत** इति– प्रतीतः सन् मुख्यस्थाने निधीयते– आरोप्यते, सदृशः क्रियते इति तात्पर्यार्थः। **प्रतिदानमिति**– तुल्यजातीयेनाऽतुल्यजातीयेन वा विशोधनमिति शेषः। **प्रद्युम्नो वासुदेवात् प्रति** द्युभिर्मीयते “ द्युसुनिभ्यो माङो डित् ” [ उणा० २६६. ] नः, प्रकृष्टं द्युम्नं– पराक्रमो यस्य प्रद्युम्नः, सदृशः क्रियते, केन सह ? वासुदेवेनेति, “ तुल्यार्थैः० ” [ २. २. ११६. ] इति तृतीया-षष्ठ्योः प्राप्तिः। श्रेणीः कायति प्रसन्नचक्षुषेति– श्रेणिकः, तस्मात् “ प्रतिना पञ्चम्याः ” [ ७. २. ८७. ] इति तसुः। **तिलेभ्यः प्रतीति**– प्रयच्छति– प्रददाति, कान् ? माषान्, कथं भूतान् ? प्रति– प्रतिदानभूतान्, केषां ? तिलानामिति, प्रतिशब्दात् द्वितीयैकवचनम्। **प्रति सिञ्चति** नात्र सिचः प्रतिना योगोऽपि तु सर्पिष इति “ स्थासेनि० ” [ २. ३. ४०. ] इत्यनेनोपसर्गत्वाभावान्न षत्वम् ॥ २. २. ७२. ॥

## आख्यातर्युपयोगे । २ । २ । ७३ ॥

**त० प्र०**—आख्याता– प्रतिपादयिता, तत्र वर्तमानाद् **गौणान्नाम्नः पञ्चमी भवति; उपयोगे– नियमपूर्वकविद्याग्रहणविषये। उपाध्यायादधीते, आचार्यादागमयति, श्रावकात् शृणोति; प्रत्येकबुद्धादधिगच्छति। आख्यातरीति किम् ? उपाध्यायात् शास्त्रमागमयति, अत्र शास्त्रान्मा भूत्। उपयोग इति किम् ? नटस्य शृणोति, उपयोगविवक्षायां त्वन्यत्राऽपि भवति– नटाद् भारतं शृणोति। अपादानत्वेनैव सिद्धे उपयोग एव यथा स्यादित्येवमर्थं वचनम्** ॥ ७३ ॥

**श० न्या०**—आख्या०। अत्रोपपूर्वो युजि व्यापारमात्रेऽप्यस्ति– यथाऽयमस्मदर्थ उपयुज्यते– व्याप्रियत इति, स यदि विज्ञायेत नटस्य शृणोतीत्यत्रापि स्यात्, आख्यातृश्रोत्रोराख्यान-श्रवणलक्षणस्य व्यापारस्य विद्यमानत्वात्, तथोपादाने– स्वीकारेऽप्यस्ति, यथा– पक्वान्येतानि फलानि, एकशाखाप्रभवत्वादुपयुक्तफलवदिति, उपात्तफलवदिति गम्यते; ‘ यद्ययमत्रार्थः स्यात् तथापि नटस्य शृणोतीत्यत्रापि स्यात् ’ अत्रापि ह्युपाध्यायोच्चारितशब्दवन्नटोच्चारितशब्दः श्रोतृभिः श्रोत्रपथमुपगम्यत उपादीयते, तत्र न केवलमुपयोगग्रहणमनर्थकं, सूत्रमेवानर्थकं स्यात् तन्निवृत्त्यर्थत्वात् सूत्रस्य, अतो नायमर्थः, अपि त्वयमित्याह– **उपयोग** इत्यादि– नियमो विद्याग्रहणार्थं गुरुशुश्रूषादिकं शिष्यवृत्तमाख्यायते। **प्रत्येकबुद्धादधिगच्छति** किञ्चिन्निमित्तमासाद्यावाप्तपञ्चमहाव्रतप्राच्यजन्मसंस्कारोद्बुद्धसकलशास्त्रस्मृतिः– प्रत्येकबुद्धः। ननु यदा नटादेर्भरतशास्त्रादिकमात्मसात्कर्तुकामः शृणोति तदा कथं पञ्चमीत्याह– **उपयोगविवक्षायां त्वि**त्यादि– अयमर्थः– अत्रापि तदनुरूपोऽस्ति कश्चिन्नियमः, नह्यत्र प्रेक्षणवद् यथाकथञ्चिदनियमेनोपरोधेन वा

श्रवणम्, **नियमपूर्वकविद्याग्रहणमि**त्यनेन वा ग्रन्थस्यार्थस्य चैदंपर्येण परिग्रह एवोच्यते, स च तत्राप्यस्तीति भावः। विद्याग्रहणमित्येतावति तूच्यमाने प्रेक्षणकेऽपि शृण्वतः किमप्यस्ति विद्याग्रहणं, तद्व्यवच्छेदार्थं नियमपूर्वकमित्युपादीयते । **अथ** '**उपाध्यायादधीते**' इत्यादावुपाध्यायादेरस्ति विद्यापरिग्रहेऽपायेऽवधिभूतत्वं, ततो हि विद्या श्रोतारमुपैति, संततत्वान्नात्यन्ताय ततोऽपक्रामतीति "पञ्चम्यपादाने" [ २. २. ६९.] इति सिद्धा पञ्चमी, किमनेनेति, उच्यते– उपयोग एव यथा स्यात्, तदभावे मा भूदित्येवमर्थमिदमिति सूत्रतात्पर्यमाह– **अपादानत्वेनैवे**त्यादि ॥ छ ॥ २. २. ७३. ॥

**न्या० स०—आख्यातर्यु०**। **नियमपूर्वके**ति– नियमो विद्याग्रहणार्थं गुरुशुश्रूषादिकं शिष्यवृत्तमाख्यायते, न तूपयोगमात्रं, यत उपयोगमात्रं नटादपि भवत्यतस्तस्मादपि स्यात् पञ्चमी। **श्रावकादि**ति– श्रावयतीति णकः । **प्रत्येके**ति– प्रत्येकम्– इन्द्रध्वजादिकं निमित्तमाश्रित्य, बुद्धः– प्रत्येकबुद्धः ॥ २. २. ७३. ॥

## गम्ययपः कर्मा-ऽऽधारे । २ । २ । ७४ ॥

**त० प्र० —गम्यस्य– अप्रयुज्यमानस्य, यपो– यबन्तस्य, यत् कर्म आधारश्च तत्र वर्तमानाद् गौणान्नाम्नः पञ्चमी भवति; द्वितीया-सप्तम्योरपवादः । प्रासादात् प्रेक्षते, आसनात् प्रेक्षते; प्रासादमारुह्याऽऽसने चोपविश्य प्रेक्षते इत्यर्थः । गम्यग्रहणं किम् ? प्रासादमारुह्य शेते, आसने उपविश्य भुङ्क्ते; नह्यत्र यबन्तस्याऽप्रयोगे तदर्थः प्रतीयते। यब्ग्रहणं किम् ? प्रविश पिण्डीम्, प्रविश तर्पणम्, वृक्षे शाखा, ग्रामे चैत्रः; अत्र हि भक्षय-कुरु-अस्ति-वसतीनां गम्यता न तु यपः। ननु यथा कुशूलादादाय पचति– कुशूलात् पचतीत्यत्रादानाऽङ्गे पाके पचेर्वर्तनादुपात्तविषयमेतदपादानमिति पञ्चमी भवति, एवमिहाऽपि अपक्रमणाऽङ्गे दर्शने दृशेर्वर्तनाद् भविष्यति; तथाहि– तत् ततोऽपक्रामति, अनपक्रामद्धि न विषयं गृह्णीयात्, सत्यम्– किन्तु आरुह्य उपविश्येति यबन्तार्थोऽपि गम्यते, ततो यथा यबन्ते प्रयुज्यमाने कर्मा-ऽधिकरणयोर्द्वितीया-सप्तम्यौ भवतस्तद्वदप्रयुज्यमानेऽपि तदर्थप्रतीतेस्ते प्रसज्येयातामिति सूत्रमारभ्यते ॥ ७४ ॥**

**श० न्या०—गम्य०** । यबिति यबन्तं गृह्यते केवलस्य प्रयोगाभावादित्याह– **यपो यबन्तस्ये**ति । तत्र यबन्तस्य कर्मणि द्वितीया प्राप्नोति, आधारे च सप्तमी, तयोरपवादः पञ्चमीयमित्याह– **द्वितीये**त्यादि । **प्रासादात् प्रेक्षते** इत्यादिप्रयोगार्थं कथयन् गम्ययबन्तं दर्शयति, तथा च गम्यग्रहणं किमिति प्रत्युदाह्रियते– **प्रासादमारुह्य शेते, आसने उपविश्य भुङ्क्ते** इति । **तदर्थ** इति– आरुह्येत्यादियबन्तार्थ इत्यर्थः । **प्रविश पिण्डी**मित्यादावर्थात् प्रकरणाद् वा भक्षयेत्यादि गम्यमपेक्ष्यं, तत् तु न यबन्तमिति पञ्चमी न भवति। ननु किमर्थमिदं सूत्रमारभ्यते ? 'प्रासादात् प्रेक्षते, आसनात् प्रेक्षते' इति ततो दृष्टिरपैतीति प्रासादादेरपायेऽवधिभूतत्वादपादाने पञ्चमी सिद्धैव, तथाहि– तावदेकेषां दर्शनम्– अधिष्ठानदेशान्नात्यन्ताय निर्गच्छद् बहिरिन्द्रियं विषयं परिच्छिनत्ति, यथा जलौकसां पूर्वदेशापरित्यागेनापरदेशप्राप्तिस्तथेन्द्रियाणामप्यधिष्ठानापरित्यागेन विषयप्राप्तिरिति सप्तत्या( संतत्या )धिष्ठानविषयदेशयोर्व्याप्यित्वात् नानिन्द्रियमधिष्ठानमिति ततोऽपक्रान्त्या च स्पष्टोऽवधिभावः । येषां तु– क्षणिकानीन्द्रियाणि प्राप्यकारीणि चेति दर्शनं, तेषामपीन्द्रियक्षण एक[स्त]स्मिन् विषयदेशे गच्छति, अन्य इन्द्रियक्षणोऽधिष्ठानदेशे प्रादुर्भवतीत्यन्यान्यप्रादुर्भावान्न निरिन्द्रियाधिष्ठानदोष इति, ततोऽपक्रमेण द्योतितमवधित्वम् । येषां पुनरप्राप्यकारिणीन्द्रियाणि, तेषामपि प्रेक्षणक्रियायास्ततो भावात् प्रासादादेरनुपहतोऽवधिभाव इति । अपि चेमानीन्द्रियाणि प्राप्यकारिण्येवेति केषाञ्चिद् दर्शनं, यदि हि तानि तथा न स्युस्तदा दूरतरवर्तिनो व्यवहितमपि पदार्थमुपलम्भेरन्, अतोऽनुमिमीमहे, यदुत– सत्यस्मिन् नयनयुगले विततमुखा रश्मयो ये विषयमासाद्य गृह्णन्तीति, एवं च सर्वत्र 'प्रेक्षते' इत्यस्यायमर्थः– नयनदीधितयोऽस्य निःसृत्य विषयं गृह्णन्तीति भवति प्रासादो अवधित्वादपादानमिति, ततोऽनपक्रामच्चेवेन्द्रियं विषयं परिच्छिनत्तीति सिद्धाऽपादानपञ्चमीत्यमुमेवार्थं सम्प्रधार्योदाहरणप्रदर्शनपुरःसरमाक्षिपति– **नन्वि**त्यादि । परिहरति– **सत्यमि**त्यादि– अयमर्थः– सत्यं सिध्यति पञ्चमी, किन्तु प्रतीयमानयबन्तक्रियापेक्षया कर्मभावस्याधारभावस्य च विद्यमानत्वात् द्वितीया-सप्तम्यावपि स्यातां, तदर्थमिदमारभ्यते, तद्विवक्षेह नास्तीति लोकात् प्रतिपत्तौ तत इदं वचनं लघु मन्यत इति। किञ्च, न भवदुदीरितः प्रेक्षतेरर्थश्चक्षुरिन्द्रियकरणिकायामुपलब्धौ संभवति, प्रेक्षते देवदत्तः– चक्षुरिन्द्रियेण करणभूतेन पदार्थमुपलभत इति देवदत्तस्य कर्तृत्वमुपलभ्यते, न चक्षुरिन्द्रियस्य, यश्च चाक्षुषो व्यापारो निःसरणाङ्गो विषयग्रहणलक्षणः स न शब्दोपात्तः, केवलं नयनदीधितीनां विषयग्रहणेऽन्यथानुपपत्त्या व्यापारोऽनुमीयते, न चानुमानसमधिगम्योऽर्थः शब्दार्थो भवितुमर्हतीति 'प्रेक्षते' इति नायना रश्मयोऽस्य निःसृत्य विषयं गृह्णन्तीति अशब्दार्थोऽयमिति कथं प्रासादाद्गच्छतीति शब्दोपात्तक्रियापेक्षकारकभावे सत्यनुमितक्रियापेक्षया साक्षादशब्दोपात्तव्यापारकारकभावमुररीकृत्य पञ्चमीं समर्थयामहे ? तस्मात्

प्रासादात् प्रेक्षत इत्यत्र चक्षुषो न कर्तृत्वं नापि तद्रश्मेरित्यारब्धव्यमेवेदमिति । अपि च, आस्तां तावच्छब्दार्थताप्रयासः, नयनरश्मयोऽस्य निःसृत्य विषयं गृह्णन्तीत्ययमेव प्रेक्षतेर्भवत्वर्थः, प्रासादस्य तु तत्क्रियापेक्षयाऽपादानादन्यत्वं ब्रूमः, न तावत् प्रासादरश्मयः प्रसरन्ति, किन्तु चक्षूरश्मय इति, प्रत्युत प्रासादो देवदत्तस्याधार इति । स्यादेतत्– पारम्पर्येण प्रासादस्यावधिभावः, प्रासादस्थाच्चक्षुषो यतो निर्यान्त्यः पारम्पर्येण प्रासादादेव ते निर्यान्तीति, तदिदमतिसुभाषितम्, एवं हि मुखस्याप्यपादानत्वं स्यात्, ततश्च मुखात् प्रेक्षत इत्यपि प्रसज्येत, को हि विशेषः ? पारम्पर्येणावधिभावान्मुखस्य चा[ प्य ]पादानत्वमस्तु प्रासादस्येवेति । अपि च, केषाञ्चिदेव दर्शनं– यन्नायना रश्मयो विषयं गृह्णन्तीति । अन्येषां तथागतादीनां गोलकस्यैवैवंविधा काचिच्छक्तिरस्ति यया विषयं प्रतीप्सति, तथाहि– धातुदोषोपलिप्तकृष्णसारं पश्यदन्धमित्यभिदधति जना इति तेषां दर्शनं, तान् प्रति कात्र गतिः, न च विशेषोपेक्षया शब्दस्थितिरनवस्थाप्रसङ्गादिति युक्तमिदमारभ्यत इति ॥ छ ॥ २. २. ७४. ॥

**न्या० स०—गम्ययपः० ।** **एवमिहापीति**– अयमर्थः– प्रासादान्निःसृत्यापक्रम्य चक्षू रश्मिद्वारा प्रेक्षते, प्रासादान्निस्सरता चक्षुषा कृत्वा देवदत्तः प्रेक्षते वा । **तत् ततोऽपक्रामतीति**, अयमर्थः– ततः– प्रासादादेः, तत्– चक्षुरादि, अपैति– निस्सरतीति तस्यापायेऽवधिभूतत्वादपादाने पञ्चमी सिद्धैव । **अनपक्रामद्धीति**– एतन्नैयायिकमताभिप्रायेणोक्तं, ते हि प्राप्यकारीणीन्द्रियाणि मन्यन्ते । **दृशेर्वर्तनादिति**– दृशेरिति कोऽर्थः ? दृशिसमानार्थस्य ईक्षेरित्यर्थः ॥ २. २. ७४. ॥

## प्रभृत्यन्यार्थ-दिक्शब्द-बहिरारादितरैः । २ । २ । ७५ ॥

**त० प्र०—प्रभृत्यर्थैः अन्यार्थैः दिक्शब्दैः ' बहिस् आरात् इतर ' इत्येतैश्च शब्दैर्युक्ताद् गौणान्नाम्नः पञ्चमी** भवति । **प्रभृत्यर्थः**– ततः प्रभृति, कार्त्तिक्याः प्रभृति, आरभ्य ग्रीष्मात्, ग्रीष्मादारभ्य । **अन्यार्थः**– अन्यो मैत्रात्, भिन्नश्चैत्रात्, अर्थान्तरं घटात्, व्यतिरिक्तः पटात्, विलक्षणोऽश्वात्, पृथग् गजात्, हिरुग् गार्ग्यात् । **दिक्शब्दः**– ग्रामात् पूर्वस्यां दिशि वसति, ग्रामादुत्तरस्यां दिशि वसति; दिशि दृष्टाः शब्दा दिक्शब्दा इति देश-कालादिवृत्तिनापि भवति– पूर्वं उज्जयिन्या गोनर्दः, उत्तरो विन्ध्यात् पारियात्रः, पूर्वो ग्रीष्माद् वसन्तः, पश्चिमो रामाद् युधिष्ठिरः, एतदर्थमेव च शब्दशब्दोपादानम्; गम्यमानेनाऽपि च दिक्शब्देन भवति– क्रोशाल्लक्ष्यं विध्यति, परेणेति गम्यते, " कर्मेणिङ् " [ ३. ४. २. ] परो भवतीति गम्यते; प्राग् ग्रामात्, प्रत्यग् ग्रामात्, उदग् ग्रामात्, प्राचीनं ग्रामादाम्राः, दक्षिणाहि ग्रामात्, उत्तराहि ग्रामात्, दक्षिणा ग्रामात्, उत्तरा ग्रामात्, न्यग् मैत्रस्याऽवस्थित इत्युपसर्जनत्वान्न दिक्शब्दता । **बहिस्**– बहिर्ग्रामात्, बहिष्पुरात्, आरादित्यव्ययं दूरसमीपयोर्वाचकम्, तेन तद्योगे वक्ष्यमाणस्य " आरादर्थैः " [ २. २. ७८. ] इति विकल्पस्यापवादोऽयम्– आराद् ग्रामात् क्षेत्रम्, आरात् मैत्रात् पीठम्; इतरशब्दो द्वयोरुपलक्षितयोरन्यतरवचनः, तेनान्यार्थाद् भिद्यते– इतरश्चैत्रात्, तस्य द्वितीयो मैत्राद्विरित्यर्थः । अथ ' जिनदत्तादन्योऽयं मैत्रस्य, जिनदत्तादितरोऽयं चैत्रस्य, छात्राणां पूर्वमामन्त्रयस्व, कायस्य पूर्वम् ' इत्यादौ मैत्र-चैत्र-च्छात्र-कायशब्देभ्यः कथं न भवति ? उच्यते– प्रत्यासत्तेर्यस्यैवान्यत्वादिधर्मनिमित्तोऽन्यशब्दादिना योगस्तत एव जिनदत्तादेः पञ्चमी भवति, न मैत्रादेरिति ॥ ७५ ॥

**श० न्या०—प्रभृ० ।** अर्थशब्दः प्रभृत्यन्यशब्दाभ्यां प्रत्येकमभिसंबध्यत इत्याह– **प्रभृत्यर्थैरन्यार्थैरिति** । अत एव पर्यायप्रयोगेऽप्युदाहरति– **आरभ्येत्यादि** । **दिक्शब्दैरिति**– दिशां शब्दा दिक्शब्दा इति षष्ठीसमासः । के च दिशां शब्दाः ? ये दिक्षु वर्तन्ते, अतद्वृत्तेरपि तच्छब्दत्वेऽतिप्रसङ्गात् । न च वर्तमाननिमित्तसंभवे कालान्तरवृत्तिपरिग्रहो युक्तः, तत्र दिश्येव प्रयोगे पञ्चमी स्यान्नान्यत्र देशादावित्याह– **दिशि दृष्टा** इत्यादि– दिशि ये वाचकत्वेन दृष्टाः शब्दास्ते इह दिक्शब्दा इति विज्ञायन्ते, न तु दिशि वर्तमाना एव, तेन दिशो वाचकत्वेन दृष्टस्य शब्दस्य देशकाले, आदिशब्दाद् भावे द्रव्ये च वृत्तावपि तद्योगे पञ्चमी, यथा– **पूर्वं उज्जयिन्या गोनर्द** इत्यादि । अथ कथमिदं विज्ञायते ?– दिशि दृष्टा एव शब्दा दिक्शब्दाः, न दिशि वर्तमाना इत्याह– **एतदर्थमेव चे**त्यादि– चशब्दो यस्मादर्थे– यस्माद् दिक्शब्देति शब्दशब्दस्योपादानं दिशि दृष्टा एव शब्दा दिक्शब्दा इत्येवमर्थम् । नन्वेतदेव कथं विज्ञायते– एतदर्थमेव शब्दोपादानमिति ? उच्यते– अन्यथा शब्दशब्दोपादानानर्थक्यात्, यदि हि दिशि वर्तमानस्यैव प्रयोगे पञ्चमी स्याच्छब्दशब्दोपादानमनर्थं स्यात्, तत्र दृष्टाश्च तस्येति व्यपदिश्यन्ते, यथा– क्वचिद् ग्रामे दृष्टो मनुष्योऽन्यत्रापि दृश्यमानस्तस्य ग्रामस्यायं मनुष्य इति उपदिश्यते । **गम्यमानेनापी**ति– अप्रयुज्यमानेनेत्यर्थः । **प्राग् ग्रामादि**ति– प्रपूर्वादञ्चते क्विप्, ततः प्राची दिक् प्रदेशः कालो वेति " दिक्-शब्दाद् दिग्-देश-कालेषु० " [ ७. २. ११३. ] इति धाप्रत्ययः,

“ अदूरे० ” [ ७. २. १२२. ] इत्येनप्रत्ययो वा, तस्य “ लुबञ्चेः ” [ ७. २. १२३. ] इति लोपः, तद्योगे ग्रामादिति पञ्चमी, एवं- **प्रत्यग् ग्रामादि**त्यादावपि द्रष्टव्यम् । **दक्षिणाहि ग्रामात्** “ आहि दूरे ” [ ७. २. १२०. ] इत्याहिप्रत्ययः, एवम्- **उत्तराही**त्यत्रापि । **दक्षिणा ग्रामादि**ति- “ वा दक्षिणात्० ” [ ७. २. ११९. ] इत्याप्रत्ययः । **न्यग् मैत्रस्ये**ति- अयं क्रियाविशेषणत्वादुपसर्जनवचनो न दिक्शब्दः इति मैत्रस्येत्यत्र षष्ठी भवति, न पञ्चमीति । अथ दूरान्तिकार्थमारादित्यव्ययं सूत्रेऽनुक्रियते, तद्योगे च “ आरादर्थैः ” [ २. २. ७८. ] इत्यनेनैव पञ्चमी सिद्धा, किमिहोपादानेन ? सत्यम्- सिद्ध्यति परं विकल्पेन, इह त्वाराच्छब्दयोगे नित्यं तदपवादः पञ्चमीति [ तदाह- **“ आरादर्थैः ” [ २. २. ७८. ] इति विकल्पस्ये**त्यादि ] । इतरशब्दवाच्येऽर्थेऽन्यशब्दस्यापि वृत्तेः सूक्ष्ममन्तरमप्रतिपद्यमान इतरशब्दमन्यार्थमेव यो मन्यते तं प्रति भिन्नार्थतां दर्शयति- **इतरशब्द** इत्यादि- अयमर्थः- अन्य इति प्रकृतविलक्षणोऽर्थ उच्यते, इतर इति च दृश्यमानप्रतियोगीत्यर्थः । **अथ जिनदत्तादन्योऽयं मैत्रस्ये**ति- अयमर्थः- यथा जिनदत्तस्यान्यशब्दाभिधेयेनार्थेन योगस्तथा मैत्रस्यापि, तद्योगापेक्षया ह्यत्र षष्ठी- मैत्रस्येति, एतावांस्तु विशेषः- जिनदत्तापेक्षमयमिति शब्दाभिधेयस्यान्यत्वमित्यन्यत्वेन योगो जिनदत्तस्य, मैत्रस्य तु स पुत्रः पिता भृत्यो वेति पुत्रत्वादिविशिष्टेनान्यार्थेनेति, अनेकधर्माधिष्ठानं हि द्रव्यं भवति, तत्र योगाविशेषाद् यथाऽन्यत्वेन युक्ते जिनदत्ते पञ्चमी तथा स्वभावान्तरेण युक्ते मैत्रेऽपि स्यादिति, एवं- **छात्राणां पूर्वमामन्त्रयस्वे**त्यादावपि पञ्चमी प्राप्नोति, पूर्वेण दिक्शब्देन छात्रादीनामन्येन मैत्रवद् योगादित्याशङ्कां परिहरति- **उच्यत** इत्यादि- अत्रान्यत्वादि विशेषणमात्रं शब्देनाभिधीयते, न द्रव्यं विशेष्यं, सोऽशब्दार्थ एव शब्दाभिहिताद् विशेषणात् प्रतीयत इति प्रतिपत्तावन्यत्वादिना विशेषणेन योगे द्रव्येण योगेऽपि सोऽन्यादियोग इति पञ्चम्यप्रसङ्गः, अत्रोपपत्तिः- **प्रत्यासत्तेरि**ति- येन स्वभावभेदेन तद् द्रव्यमन्यादिव्यपदेशं लभते तेनैव योगो विज्ञायते, स्वभावान्तरेण तु योगे नासावन्यादियोगः, नहि तद् द्रव्यं तेनान्यादि भवति, अन्यत्वादिभावमात्रेणान्यादिप्रतिपत्तेः स्वभावान्तरयोगेऽपि पञ्चमीप्रतिपत्तौ नान्यत्वादिधर्मशून्यं किञ्चिदस्तीति व्यवच्छेद्याभावादन्यादिग्रहणमनर्थकं स्यादिति, **मैत्रस्ये**त्यत्र तु पुत्रत्वादिना योगः, अन्यत्वेन **जिनदत्ता**दित्यत्र, **छात्राणां पूर्वमि**त्यत्र पूर्वत्वं छात्रान्तरापेक्षं, न छात्राणामिति समुदायापेक्षं, समुदायस्य ह्येकदेशः स न तस्य समुदायापेक्षया पूर्वत्वं, तत्र पूर्वत्वेन योगश्छात्रान्तरस्य, समुदायस्य त्वेकदेशत्वेनेति न भवति । तथा **कायस्य पूर्वमि**त्यत्रापि पूर्वत्वं नाभ्याद्यवयवान्तरापेक्षया, कायस्य त्ववयवत्वेन तत् सम्बन्धीति न भवति, एवमन्यत्रापि । बहुवचनं लाघवार्थम् ॥ छ ॥ २. २. ७५. ॥

---

**न्या० स०—प्रभृत्य०** । दिशः शब्दाः, दिशि दृष्टाः शब्दा वा, तदा “ मयूर-व्यंसक० ” [ ३. १. ११६. ] इति दृष्टलोपः, दिशि ये वाचकत्वेन दृष्टास्ते इह दिक्शब्दा इति विज्ञायन्ते, न तु दिशि वर्तमाना एव, तेन दिशो वाचकत्वेन दृष्टस्य शब्दस्य देशे काले, आदिशब्दात् भावे द्रव्ये च वृत्तावपि तद्योगे पञ्चमी । **ग्रीष्मादारभ्ये**ति- आरभ्येति क्त्वान्तम्, अक्त्वान्तमव्ययं वा । **अर्थान्तरमि**ति- अर्थमन्तरयति, अथवा एकस्मादर्थादिति वा । **पृथगि**ति- पृथिः सूत्रधातुः “ रुधि-पृथि० ” [ उणा० ८७४. ] इति किदक् । **हिरुक्** इति- ह्रियते इति “ द्रागादयः ” [ उणा० ८७०. ] । **पारियात्र** इति- पारियातुरयं “ तस्येदम् ” [ ६. ३. १६०. ] अण्, अथवा परियाता देवता अस्य “ देवता ” [ ६. २. १०१. ] अण्, यद्वा परिगता यात्रा यस्यासौ परियात्रः, परियात्र एव पारियात्रः- पर्वतः, पर्वतसमीपदेशोऽपि । प्रागेव “ अदिक्स्त्रियाम्० ” [ ७. १. १०७. ] इति स्वार्थे ईनः, नपुंसकत्वं तु सामान्यभावेन, तथा च वर्तते, किं तत् ? **कर्तृ प्राचीनं**, किं तत् ? **आम्रा** इति, यथा प्राक्शब्दः केवलोऽपि दिग्वाची तथा स्वार्थिकेनप्रत्ययान्तोऽपि, ततस्तदन्तयोगेऽपि पञ्चमीति । अञ्चत्यन्तयोगे यथा प्राग् ग्रामादित्यादौ पञ्चमी तथाऽत्रापीति कश्चिन्मुह्येत् तं प्रत्याह- **न्यग् मैत्रस्ये**ति- न्यक्- उपसर्जनं यथा भवति एवमवस्थित इत्यर्थः । **अन्यार्थाद् भिद्यते** इति- अयमर्थः- अन्य इति प्रकृतिविलक्षणोऽर्थ उच्यते, इतर इति च दृश्यमानप्रतियोगीत्यर्थः, **छात्राणामि**ति- छात्राणामवयवश्छात्रस्तस्मात् पूर्वं छात्रमामन्त्रयस्वेति पूर्वत्वं छात्रान्तरापेक्षं, न **छात्राणा**मिति समुदायापेक्षम्, समुदायस्य हि एकदेशः सः, न तस्य समुदायापेक्षया पूर्वत्वम्, तत्र पूर्वत्वेन **योगश्छात्रान्तरस्य**, समुदायस्य त्वेकदेशत्वेनेति । **कायस्य पूर्वमि**ति- कायस्यावयविनो यद्भागान्तरं, किं विशिष्टं ? पूर्वं, कस्याः सकाशात् ? नाभेः कायस्य संबन्धि यदवयवान्तरं पूर्वं तस्य नाभिरूपेणाऽवयवान्तरेण सह संबन्धः, कायस्य त्ववयवत्वेन ॥ २. २. ७५. ॥

---

## ऋणाद्धेतोः । २ । २ । ७६ ॥

**त० प्र०—**फलसाधनयोग्यः पदार्थो हेतुः, हेतुभूतं यद् ऋणं तद्वाचिनो गौणान्नाम्नः पञ्चमी भवति; तृतीयाऽपवादः । शतात् बद्धः, सहस्राद् बद्धः । हेतोरिति किम् ? शतेन बद्धः, शतेन बन्धितः, शतेन चैत्रेण बन्धितः; कर्तरि प्रयोज्ये प्रयो-

जके च कर्तृलक्षणा तृतीया भवति, हेतुर्हि फलसाधनयोग्यः पदार्थः कर्त्रादिभ्योऽन्य उच्यते इति कथं कर्तुर्हेतुत्वम् ? ॥७६॥

**श० न्या०**—करणा० । **तृतीयापवाद** इति- अत्र **शताद् बद्ध** इत्यादावुत्तमर्णेनाधमर्णेन धार्यमाणमृणं शत-सहस्रे बन्धनानाविष्ट्यापारतया निमित्तभूते लौकिकौ हेतू, ततस्तृतीयाबाधिकाऽनेन पञ्चमी विधीयते । **कर्तरि प्रयोज्ये प्रयोजके चेति**- कर्तरीति तृतीयानिमित्तं शेषयोरपि योजनीयम्- प्रायोज्ये कर्तरि प्रयोजके च कर्तरीत्यर्थः । **शतेन बन्ध** इति- शतमृणं बन्धकत्वेन कर्तृ विवक्षितम्, अतस्तत्र “हेतुकर्तृकरण०” [ २. २. ४४. ] इति कर्तरि तृतीया । **शतेन बन्धित** इत्यत्र तु शतं बन्धकमन्यस्य णिक्क्रियाकर्तुः प्रयोज्यत्वेन विवक्षितमिति प्रायोज्ये कर्तरि तृतीया । **शतेन चैत्रेण बन्धित** इति- शतं णिगर्थकर्तृत्वेन विवक्षितं चैत्रस्य प्रकृतिकर्तुः प्रयोजकमिति प्रयोजके कर्तरि तृतीयेति । ननु बध्नातिरस्वतन्त्रीकरणवृत्तिर्न गत्यादिष्वन्तर्भवतीति कथं प्रयोज्यस्य कर्मसंज्ञा येन तत्कर्मणि क्तप्रत्ययस्योत्पादः, क एवमाह- प्रयोज्ये कर्मणि क्तप्रत्यय उत्पन्न इति, किं तर्हि ? प्रयोज्यस्य यत् कर्म तस्मिन्नयमिति कर्तृत्वेन विवक्षितस्य न हेतुभाव इत्याह- **हेतुर्ही**त्यादि- **हि**र्यस्मादर्थे, यस्माद्धेतुर्नाम- फलसाधनायोग्यः पदार्थः फलयोग्यत्वमात्रेण विनापि क्रियां हेतुराख्यायते, कर्त्रादि च कारकं क्रियाया निवर्तकं न क्रियामन्तरेण भवितुमर्हतीति न तत्र हेतुकार्यम्, अत एव कर्त्रादिभ्यो विलक्षणो हेतुरिति संस्काराभिवृत्त्यर्थं **फलसाधनयोग्य** इत्यादिना हेतुस्वरूपं पुनरुक्तम् । पूर्वं हि कर्तृविशेषमपि हेतुशब्देनाचक्षते, यतश्च “हेतुकर्तृकरण०” [ २. २. ४४. ] इत्यत्र हेतुग्रहणं कृत्वा कर्तृ-करणग्रहणं कृतमतो विज्ञायते- कर्त्रादिभ्यो विलक्षणो हेतुरिति ॥ छ ॥ २. २. ७६. ॥

**न्या० स०**—करणा० । [ नेह व्याख्या दृश्यते ]॥२. २. ७६. ॥

## गुणादस्त्रियां नवा । २ । २ । ७७ ॥

**त० प्र०**—अस्त्रियां वर्तमानाद् हेतुभूतगुणवाचिनो गौणान्नाम्नः पञ्चमी वा भवति । जाड्याद् बद्धः, जाड्येन बद्धः; पारिख्यात्याद् मुक्तः, पारिख्यात्येन मुक्तः; मोहाद् बद्धः, मोहेन बद्धः; ज्ञानाद् मुक्तः, ज्ञानेन मुक्तः । गुणादिति किम् ? धनेन कुलम् । हेतोरित्येव- जाड्यस्यैतद् रूपम् । अस्त्रियामिति किम् ? बुद्ध्या मुक्तः, प्रज्ञया मुक्तः, विद्यया यशः । अस्त्यत्राग्निर्धूमात्, नास्तीह घटोऽनुपलब्धेः, सर्वमनेकान्तात्मकं सत्त्वाऽन्यथानुपपत्तेरित्यादौ नाऽग्न्यादेर्धूमादिर्हेतुः, कस्य तर्हि ? तज्ज्ञानस्य, कथं तर्हि पञ्चमी ? “गम्ययपः कर्माऽऽधारे” [ २. २. ७४. ] इति भविष्यति, धूमादिकमुपलभ्याऽग्न्यादिः प्रतिपत्तव्य इति ह्यत्राऽर्थः, ज्ञानहेतुत्वविवक्षायां तु हेतुत्वलक्षणा तृतीया भवति- धूमेनाग्निः, अनुपलब्ध्या घटाऽभावः, सत्त्वान्यथानुपपत्त्या सर्वमनेकान्तात्मकं प्रतिपत्तव्यमिति ॥ ७७ ॥

**श० न्या०**—गुणा० । हेतोरिति वर्तते, तच्च **गुणादि**त्यस्य विशेषणमित्याह- **हेतुभूतगुणवाचिन** इति- द्रव्याश्रितः पर्यायो गुणः । **जाड्याद् बद्ध** इति- यदयं जडस्तस्माद् बद्ध इत्यर्थः, एवं- यदयं परिख्यातस्तस्मान्मुक्त इत्याद्यपि व्याख्येयम् । जडस्य भावः परिख्यातस्य भाव इति विगृह्य “पतिराजान्त०” [ ७. १. ६०. ] इति ट्यण् । पञ्चम्यभावपक्षे तु “हेतु-कर्तृ-करण०” [ २. २. ४४. ] इति हेतौ तृतीया, तस्यां प्राप्तायामयं विकल्प इति । **धनेन कुलमि**ति- धनं द्रव्यं न गुण इत्यत्र न भवति । **नाग्न्यादेर्धूमादिर्हेतुरिति**- अस्त्यत्राग्निर्धूमात्, नेयं हेतौ पञ्चमीत्यर्थः, हेतुर्हि फलसाधनयोग्यः पदार्थ आख्यायते, न चेह धूमादेर्ज्ञापकस्य हेतोरग्न्यादिः फलं, तस्य तेनाजन्यत्वात् । हेतावेवेयं पञ्चमीति मन्यमानः पृच्छति- **कस्य तर्ही**ति- धूमादिर्हेतुरिति शेषः । समाधत्ते- **तज्ज्ञानस्ये**ति । पुनः पृच्छति- **कथमि**ति- अयमर्थो भवतु वह्न्यादिज्ञानस्य धूमादेः हेतुस्तथापि धूमादेः पञ्चमी न प्राप्नोति, वाक्येऽश्रूयमाणवह्न्यादिप्रत्ययहेतुत्वादगुणत्वात् स्त्रीलिङ्गत्वाच्चेति, न चायमपप्रयोगः सर्वशिष्टैरविगानेन प्रयुज्यमानत्वादित्यत आह- **गम्ययप** इत्यादि । उदाहरणार्थं दर्शयन् पञ्चमीनिमित्तं दर्शयति- **धूमादिकमि**त्यादि । यदा तु धूमादेरग्न्यादिज्ञानहेतुत्वं विवक्ष्यते तदा “हेतु-कर्तृ-करण०” [ २. २. ४४. ] इति हेतौ तृतीयैव भवतीत्याह- **ज्ञानहेतुत्वविवक्षायां त्वि**त्यादि । **धूमेनाग्निरि**त्यादावपि प्रतिपत्तव्य इति योजनीयम् ॥ छ ॥ २. २. ७७. ॥

**न्या० स०**—गुणाद० । जडस्य भावः- दृढादित्वात् ट्यण् । परिख्यातस्य भावः “पतिराजान्त०” [ ७. १. ६०. ] इति ट्यण् । अस्त्यत्राग्निर्धूमादित्युदाहरणत्रयं यथाक्रमं शैव-बौद्ध-जैनमतेन । सत्त्वान्यथेति- सत्त्वम्- उत्पाद-व्यय-ध्रौव्ययुक्तत्वम्, तस्य सत्त्वस्य, अन्यथा- अनेकान्तात्मकत्वमन्तरेण, अनुपपत्तेः- अघटनात् ॥ २. २. ७७. ॥

## आरादर्थैः । २ । २ । ७८ ॥

**त० प्र०**—आराद् दूरा-ऽन्तिकयोः, तन्त्रेणोभयग्रहणम्; दूरार्थैरन्तिकार्थैश्च शब्दैर्युक्ताद् गौणान्नाम्नः पञ्चमी वा भवति ।

दूरं ग्रामात्, दूरं ग्रामस्य; विप्रकृष्टं ग्रामात्, विप्रकृष्टं ग्रामस्य; अन्तिकं ग्रामात्, अन्तिकं ग्रामस्य; अभ्याशं ग्रामात्, अभ्याशं ग्रामस्य; संनिकृष्टं ग्रामात्, संनिकृष्टं ग्रामस्य। **आरात्शब्दयोगे** तु प्रभृत्यादिसूत्रेण नित्यमेव पञ्चमी। अथ दूरं हितं ग्रामात्, दूरं हितं ग्रामस्य भूयादित्यादौ हितादियोगे पञ्चम्यभावपक्षे "हित-सुखाभ्याम्" [२. २. ६५.] इति चतुर्थी कस्मान्न भवति?, उच्यते– हित-सुखादियोगे सा चतुर्थी, इह तु दूरान्तिकादिनैव योगो न तद्विशेषणेन हितादिनेति न भवति, यदा तु हितादिना विशेष्यतया योगस्तदा चतुर्थी भवत्येव। अन्ये त्वसत्त्ववचनैरेवाऽऽरादर्थैरिच्छन्ति ॥ ७८ ॥

**श० न्या०—आरा०। आराद् दूराऽन्तिकयोः, तन्त्रेणे**ति– आराच्छब्दो दूरमित्यस्मिन्नर्थेऽन्तिकमित्यस्मिंश्चार्थे तन्त्रेण– साधारण्येन वर्तते, आराच्छब्दो ह्यर्थद्वयस्यापि साधारण इत्यर्थः, शब्दोपनिधानेन चेहार्थपरिग्रहः क्रियते– आरात्– आराच्छब्दवाच्यार्थो येषामिति, तत उभयस्यापि परिग्रहः, ततश्चायमर्थो भवतीत्याह– **दूरार्थैरन्तिकार्थैश्चे**ति। **दूरं ग्रामादि**ति– अत्र कारकशेषत्वात् षष्ठ्यां प्राप्तायामियं पञ्चमीति तद्विमुक्तपक्षे षष्ठी। "आरादर्थैः" इत्युच्यमाने आराच्छब्दोऽप्यारादर्थ इति तद्योगेऽप्ययं विधिः प्राप्नोति, यथा "न स्तं मत्वर्थे" [१. १. २३.] इति मतावपीति यः शङ्कते तं प्रत्याह– **आराच्छब्दे**त्यादि– "प्रभृत्यन्यार्थ-दिक्शब्द-बहिरारात्०" [२. २. ७५.] इत्याराच्छब्दयोगे नित्यं पञ्चमी भवति, तत्र ह्यारादग्रहणमस्य विकल्पस्यापवाद इति। ननु **दूरं हितं** ग्रामस्येत्यादौ पञ्चम्यभावपक्षे ग्रामस्य हितेन दूरेण च योगाद् हितयोगे "हितसुखाभ्याम्" [२. २. ६५.] इति चतुर्थ्यपि प्राप्नोतीत्यारादर्थैर्योगे षष्ठी-पञ्चम्यावेव यथा स्यातां, न त्वन्या विभक्तिरिति तद्बाधनार्थम् "आरादर्थै षष्ठी च" इति षष्ठीग्रहणं कर्तव्यम्, अन्यथात्र चतुर्थी स्यादिति पृच्छति– **अथे**त्यादि। समाधत्ते– **उच्यते** इत्यादि– अयमर्थः– वस्तुत उभययोगेऽपि शब्दो नोभययोगं प्राधान्येन साक्षादुपादत्ते, किन्त्वन्यतरयोगमेव, इतरेण तु तद्विशेषणभावापन्नेन योगः प्रकरणादेः पारम्पर्येण प्रतीयते इत्यारादर्थैर्विशेष्यतया योगे विवक्षिते चतुर्थीप्रसङ्ग एव नास्ति, यदा तु हितादिना योगः प्राधान्येन विवक्ष्यते, आरादर्थैश्च तद्विशेषणतया तदा चतुर्थी भवत्येव। **अन्ये त्वि**ति– ललितस्वभाव इत्यर्थः ॥ छ ॥ २. २. ७८. ॥

**न्या० स०—आरादर्थैः।** दूरान्तिकादिनैव योग इति– कथं? वर्तते, किं तद् कर्तृ? दूरं, कस्य? ग्रामस्य, किं भूतं दूरं? हितमिति दूरशब्देनैव ग्रामस्य संबन्धो विवक्षितो न तु हितशब्देन। **असत्त्ववचनैरि**ति– धर्ममात्रवृत्तिभिः। कारकशेषत्वात् षष्ठीप्राप्तौ वचनम् ॥ २. २. ७८. ॥

## स्तोका-ऽल्प-कृच्छ्र-कतिपयादसत्त्वे करणे । २ । २ । ७९ ॥

**त० प्र०**—यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणोऽसत्त्वम्, तेनैव वा रूपेणाऽभिधीयमानं द्रव्यादि; तस्मिन् करणे वर्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा भवति। स्तोकाद् मुक्तः, स्तोकेन मुक्तः; अल्पाद् मुक्तः, अल्पेन मुक्तः; कृच्छ्राद् मुक्तः, कृच्छ्रेण मुक्तः; कतिपयाद् मुक्तः, कतिपयेन मुक्तः। असत्त्व इति किम्? स्तोकेन विषेण हतः, अल्पेन मधुना मत्तः, कृच्छ्रेण भोजनेन निर्विण्णः; विषादिद्रव्यसामानाधिकरण्यादत्र सत्त्ववृत्तिता। करण इति किम्? क्रियाविशेषणे मा भूत्– स्तोकं चलति। इह च स्तोकादीनामसत्त्ववाचित्वाद् द्वित्व-बहुत्वाऽसंभवे एकवचनमेव।

"स्तोकस्य चाऽभिनिर्वृत्तेरनिर्वृत्तेश्च तस्य वा।
प्रसिद्धिं करणत्वस्य, स्तोकादीनां प्रचक्षते ॥१॥"७९॥

**श० न्या०—स्तोका०।** स्तोकादयः शब्दा यत्र सामानाधिकरण्यमनुभवन्ति– स्तोकं धनमिति तद् द्रव्यं, सीदन्त्यस्मिन् गुणादय इति व्युत्पत्त्या सत्त्वमुच्यते, न सत्त्वमसत्त्वम्, सत्त्वादन्यदसत्त्वम्, किं तदित्याह– **यत** इत्यादि– अनन्तपर्यायात्मके हि द्रव्ये शब्दः प्रवर्तमानः कञ्चिदेव स्वभावमुपादाय प्रवर्तते, अत एव शब्दान्तरोपात्तभेदस्य शब्दान्तरेणानुपादाने कस्यापि शब्दस्य तत्र प्रवर्तमानस्य न पर्यायशब्दतेति तत्र योऽसौ द्रव्ये स्तोकादिशब्दप्रवृत्तिनिमित्तभूतः पर्यायभेदः स गुणो द्रव्ये परार्थतया प्रतीयमानत्वादसत्त्वम्। अथ **स्तोकेन मुक्तः स्तोकान्मुक्त** इति द्रव्यादेव तद्रूपापन्नं परामृष्टरूपान्तरं करणतया प्रतीयते यत्, तत् कथमित्याह– **तेनैव वे**त्यादि– अयमर्थः– तिरोहितधनादिविशेषस्वभावान्तरं स्तोकादिरूपेण सामान्यात्मनाभिधीयमानं धनादिरूपव्यावृत्तं स्तोकादिरूपापन्नं द्रव्यं गुणः क्रिया वा यदा प्रतीयते तदा द्रव्याद्यसत्त्वमिति। **स्तोकान्मुक्त** इति पञ्चम्यभावपक्षे "हेतुकर्तृकरण०" [२. २. ४४.] इति करणे तृतीया। **स्तोकेन विषेण** इति– अत्र स्तोकादयः शब्दाः स्तोकत्वादिकं धर्मं प्रवृत्तिनिमित्तमुपादाय तद्वति विषादौ द्रव्ये सत्त्वे सामानाधिकरण्येन वर्तन्त इति नासत्त्ववृत्तय इत्याह– **विषादी**त्यादि। **स्तोकं चलती**ति– स्तोककर्तव्यरूपस्याख्यातेन चलनस्योच्यमानस्य [ स्तोकगुणः समानाधिकरणतया

विशेषणं, स्तोकस्य च क्रियाविशेषणत्वात् क्रियायाश्चासत्त्वभूतत्वात् स्तोकगुणान्विते चलने वृत्तस्य ] स्तोकशब्दस्यासत्त्ववृत्तितैवेत्यसति 'करणे' इति क्रियाविशेषणादपि पञ्चमी स्यादिति करण इत्युच्यते। एकार्थत्वेऽपि स्तोकादीनां भेदेनोपादानं पर्यायनिवृत्त्यर्थमितीह न भवति- मात्रया मुक्त इति। **इह चेति**- सत्त्वस्यैव विशेषसंख्यायोगित्वादिति शेषः। **स्तोकस्य चाभिनिर्वृत्तेरिति**- स्तोकस्याभिनिर्वृत्तत्वादिदं प्रयुज्यते- स्तोकेन मुक्तः, स्तोकेन मुक्तो निष्पन्नमि(इ)त्यर्थः। **अनिर्वृत्तेश्चेति**- स्तोकस्यानिष्पन्नत्वात् तेन मुक्त इत्यस्यां विवक्षायां करणत्वमाहुः ॥ छ ॥ २. २. ७९. ॥

**न्या० स०**—स्तोकाल्प०। यतः स्तोकत्वादेर्निमित्ताद् द्रव्ये विशेष्ये स्तोकादिशब्दप्रवृत्तिः स गुणोऽसत्त्वं, शब्दस्य प्रवृत्तिनिमित्तमित्यर्थः। **तेनैव चेति**-असत्त्वरूपेण, अयमर्थः- तिरोहितधनादि विशेष्यं स्तोकादिरूपेणैव सामान्यात्मनाऽभिधीयमानं धनादिरूपव्यावृत्तं स्तोकादिरूपापन्नं द्रव्यं गुणः क्रिया वा यदा प्रतीयते तदा द्रव्याद्यसत्त्वमिति। **असत्त्ववाचित्वादिति**- द्रव्यस्यैव विशेषसंख्यायोगित्वादिति शेषः। **द्वित्व-बहुत्वासंभवे इति**- एकत्वनिबन्धनैकवचनस्यापि असंभवे औत्सर्गिकमेकवचनम्। स्तोकाल्पादिशब्दानां स्तोकत्वाद्यर्थाभिधायकत्वेनासत्त्ववाचित्वात् क्रियां प्रति साधकतमत्वाभावात् करणत्वाभावे कथमनेन पञ्चमीत्याशङ्कायाममीषां पूर्वाचार्यप्रसिद्ध्या करणत्वमाह। यद्वा स्तोकेन राहुणा मुक्तः शशीत्यादौ मोचनामोचनलक्षणं क्रियाद्वयं विद्यते, यतः स्तोकेन मुक्त इति, कोऽर्थः ? किञ्चिन्मुक्तः किञ्चिदमुक्त इत्यर्थः, ततश्च कस्याः क्रियाया अपेक्षया अत्र करणसंज्ञेत्याह- **स्तोकस्येत्यादि**- स्तोकस्याऽभिनिर्वृत्तिं निष्पत्तिं, स्तोकस्य चाऽनिर्वृत्तिमनिष्पत्तिमाश्रित्य स्तोकादीनां, करणत्वप्रसिद्धिमाचक्षते पूर्वाचार्याः ॥ २. २. ७९. ॥

## अज्ञाने ज्ञः षष्ठी । २ । २ । ८० ॥

**त० प्र०**—अज्ञानेऽर्थे वर्तमानस्य जानातेः संबन्धिनि करणे वर्तमानाद् गौणान्नाम्न एक-द्वि-बहौ यथासंख्यं 'ङसोसाम्'-लक्षणा षष्ठी विभक्तिर्भवति। वेति निवृत्तम्। सर्पिषो जानीते- सर्पिषा करणभूतेन प्रवर्तत इत्यर्थः, प्रवृत्तिरत्र जानातेरर्थः; एवं सर्पिषोर्जानीते, सर्पिषां जानीते; अथवा- सर्पिषि रक्तो विरक्तो वा चित्तभ्रान्त्या सर्वमेवोदकादि सर्पीरूपेण प्रतिपद्यत इति मिथ्याज्ञानवचनोऽत्र जानातिः, मिथ्याज्ञानं चाज्ञानमेव भवति। अज्ञान इति किम् ? स्वरेण पुत्रं जानाति। करण इत्येव- तैलं सर्पिषो जानाति- तैलं सर्पीरूपेण प्रतिपद्यत इत्यर्थः, अत्र तैलात् कर्मणो मा भूत्, सर्पिषस्तु करणत्वाद् भवत्येव। तृतीयाऽपवादो योगः ॥ ८० ॥

**श० न्या०**—अज्ञा०। ननु ज्ञानमिति जानातेरेव भावेऽनडि रूपम्, ततश्च तदेव ज्ञानं नाम यो जानातेरर्थः, तत्र जानातिर्वर्तते, तत् कथमिदमुच्यते- **अज्ञानेऽर्थे वर्तमानस्य जानातेरिति**, उच्यते- ज्ञानमिति रूढिशब्दोऽयमवबोधि(धे) प्रमेयनिश्चये वर्तते, न जानात्यर्थमात्रे, **अनेकार्थत्वं च** धातूनामित्यज्ञानेऽवबोधादन्यत्रार्थे वर्तमानस्येत्ययमर्थ इत्यदोषः। **वेति निवृत्तमिति**- भिन्नप्रकरणत्वादिति शेषः। **सर्पिषा करणभूतेन प्रवर्तत इत्यर्थ इति**- "सर्पिषो जानीते" इत्यत्र सर्पिषो जानातिं प्रति करणत्वं, जानातेश्चाज्ञानार्थत्वं षष्ठीनिमित्तं दर्शयितुं वाक्यार्थ उक्तः। तत्र निष्कृष्याज्ञानरूपं जानात्यर्थमाह- **प्रवृत्तिरित्यादि**- अनेकार्थत्वाद् धातूनां प्रवृत्तौ जानातिरत्र वर्तत इत्यर्थः, तत्र च सर्पिरादि साधकतमं, भोजनादिस्तु तस्याविषयः, अत एव कर्मण्यसतीत्यधिकृत्याकर्मकत्वात् "ज्ञः" [ ३. ३. ८२. ] इत्यात्मनेपदम्। अथवा जानातेर्ज्ञानलक्षणेनार्थेनाव्यभिचारात् सर्वत्रैव तत्प्रतीतेरुच्यते चेदम्- 'अज्ञानार्थे वर्तमानस्य' इति, तत्र *गौणमुख्य*न्यायेन सम्यग्ज्ञानमविपरीतविषयपरिच्छेदकमज्ञानार्थस्य प्रतिषिध्यते, मिथ्याज्ञानवृत्तेस्तु तस्य करणे षष्ठी विधीयत इत्याह- **अथवेत्यादि**- यस्य हि सर्पिःष्वत्यन्तमभिष्वङ्गो वैमुख्यं वा तस्य तादृप्येण व्यामोहवशात् सर्वं ज्ञेयं परिच्छिन्दानस्य परिच्छित्तौ दध्यादिकर्मिकायां सर्पिः करणम्। यद्यपि च मिथ्याज्ञानतया लोके प्रसिद्धं तथापीह सूत्रार्थपर्यालोचनया तद् ज्ञानरूपतया न गृह्यते इत्युपसंहारद्वारेणाह- **मिथ्याज्ञानं चेत्यादि**- ज्ञानकार्याकारणात् ज्ञानरूपतया नैवेह तद् गृह्यत इत्यर्थः, ज्ञानकार्याकरणं ततः सम्यग्ज्ञानवदर्थक्रियानवाप्तेरिति। **स्वरेण पुत्रं जानाति** अत्रावबोधार्थत्वाद् जानातेरज्ञान इति वचनान्न भवति। **तैलं सर्पीरूपेण प्रतिपद्यत इत्यर्थः** इत्यनेन **तैलं सर्पिषो जानाती**त्यत्र तैलं कर्म, न करणमिति दर्शयति, ततश्च करण इति वचनात् तैलान्न भवति, सर्पिषस्तु भवतीति। इह 'सर्पिषो जानीते' इत्यत्र करणस्य सम्बन्धिरूपविवक्षया- सर्पिष इदं ज्ञानं नान्यस्येति षष्ठी सिध्यति, किमर्थोऽयं योग इत्याह- **तृतीयापवादो योग** इति- अयमर्थः- सिध्यति षष्ठी, किन्तु करणरूपविवक्षायां तृतीया प्राप्नोति तद्बाधनार्थो योग इति ॥ छ ॥ २. २. ८०. ॥

**न्या० स०**—अज्ञाने०। **वेति निवृत्तमिति**- भिन्नविभक्तिविधानादिति शेषः। **सर्पिषो जानीते** अत्र "ज्ञः" [ ३. ३. ८२. ] इत्यात्मनेपदम्। अत्र करणस्य संबन्धिरूपविवक्षया सर्पिष इदं ज्ञानं नान्यस्येति षष्ठी सिध्यतीति किमर्थोऽयं योग इत्याह- **तृतीयापवादो योग** इति- अयमर्थः- सिध्यति षष्ठी, किन्तु करण-

विवक्षायां तृतीया मा भूदित्ययं योगः। **सर्पिषामिति**– आज-गव्य-माहिषाणां घृतानामित्यर्थः ॥ २. २. ८० ॥

## शेषे । २ । २ । ८१ ॥

**त० प्र०**—कर्मादिभ्योऽन्यः क्रियाकारकपूर्वकः कर्माद्यविवक्षालक्षणोऽश्रूयमाणक्रियः श्रूयमाणक्रियो वाऽस्येदंभावरूपः स्वस्वामिभावादिः संबन्धविशेषः– शेषः, तत्र गौणान्नाम्नः षष्ठी भवति। राज्ञः पुरुषः, उपगोरपत्यम्, पशोः पादः, वृक्षस्य शाखा, क्षीरस्य विकारः, गवां समूहः, कुम्भस्य समीपम्, पृथिव्याः स्वामीति, न माषाणामश्नीयात्, सुभाषितस्य शिक्षते, न ते सुखस्य जानते, न तस्य सायमश्नीयात्, अन्नस्य नो देहि, अक्षाणां दीव्यति, घ्नतः पृष्ठं ददाति, नटस्य शृणोति, वृक्षस्य पर्णं पतति, महतां विभाषते। कथं पुनः कर्मादीनां सतामप्यविवक्षा? यथा– अनुदरा कन्या, अलोमिका एडकेति। गौणादित्येव– राज्ञः पुरुषः, अत्र संबन्धस्य द्विष्ठत्वेऽपि प्रधानात् पुरुषान्न भवति, प्राधान्यं चास्याऽऽख्यातपदसामानाधिकरण्यम्, तेन ततः प्रथमैव भवति, यदा तु पुरुषो राजानं प्रति गुणत्वं प्रतिपद्यते तदा पुरुषस्य राजेति भवत्येव। कथं राज्ञः पुरुषस्य कम्बल इति? राजाऽपेक्षया पुरुषस्य प्राधान्येऽपि कम्बलाऽपेक्षया गौणत्वाद् भवति। प्रथमाऽपवादो योगः॥ ८१ ॥

**श० न्या०**—शेषे०। शेषशब्दो यद्यप्यनेकार्थः, यथा– क्वचिदुपयुक्तेतरवचनः, क्वचिन्निवृत्तिमदवस्थानवचनः, क्वचिदप्रधानवचनः, क्वचिन्नागराजवचनः, तथापि न तावदिह निवृत्तिमदवस्थानवचनः, यतो यत्रार्थानां प्रथमाबलात् केषांचित् सन्निधानं केषांचिच्च निवृत्तिरवगम्यते तत्रायं, यथा– त्वमेव धरणीधरोऽद्य शेषः, सर्वे एवान्ये धरणीधारणहेतुभूता विनष्टास्त्वमेवाद्य शेष इति, इह चैतन्नास्ति नामार्थः, केवलं प्रथमाविधावुपयुक्तः, ततस्त्वन्योऽर्थो न कश्चिदिह सन्निधीयत इति; नाप्यप्रधानवचनो गौणाधिकारेणैव तदर्थलाभाच्छेषग्रहणानर्थक्यप्रसङ्गात्, तथा सति सर्वेषां कारकाणां क्रियार्थत्वेनाप्राधान्यात् सर्वेभ्य एव कारकेभ्यः षष्ठी स्यात्, वचनप्रामाण्याच्च द्वितीयादिभिः समावेशो न बाध्यबाधकभाव इति, अपि चाप्रधाने षष्ठीत्येवमर्थे जाते नीलमुत्पलमित्यादौ नीलशब्दाद् विशेष्यसमानाधिकरणादपि विशेषणत्वादप्रधान्यादुत्पलमित्यत्र कृतावकाशां प्रथमां बाधित्वा षष्ठ्येव स्यात्; नापि नागराजवचनः तथाहि– राज्ञः पुरुष इत्यत्र सम्बन्धे षष्ठी न स्यात्, अपि च शेषशब्दात् तृतीयादिविभक्तीनामनया षष्ठ्या बाधितत्वाच्छेषेण ध्रियते भूमिरित्यादिप्रयोगराशिर्न स्यात्, तस्मात् केषुचिदर्थेषु सत्सु शेषशब्द उपादीयमान उपयुक्तेतरवचन एव भवतीत्याह–**कर्मादिभ्योऽन्य** इत्यादि– ते हि पूर्वमुपयुक्ताः, नामार्थस्य प्रथमाविषयत्वात् कर्मादिभ्योऽन्यः सम्बन्ध एवात्रतिष्ठत इति सामर्थ्यात् सम्बन्धे षष्ठी भवति, नीलोत्पलमित्यत्र तु नीलमिति नामार्थादप्रच्युतं, विशेष्यसामानाधिकरण्येन प्रयोगात् ततोऽतः प्रथमैव भवति, न षष्ठी, विशेषणविशेष्यभावस्य नामार्थव्यतिरिक्तस्य वाक्यार्थत्वात्, यदुक्तं भाष्ये–आधिक्यस्य वाक्यार्थत्वादिति, यद्येवं राजपुरुष इत्यत्रापि सम्बन्धस्य वाक्यार्थत्वात् षष्ठी न प्राप्नोति, नैव दोषः– राज्ञ इति पदं सम्बन्धित्वेन विवक्षितत्वात् प्रयुक्तमिति, अतः सम्बन्धे षष्ठी कृता, एवं च भाष्य एव निर्णीतमित्यास्ताम्। स्यादेतत्– अत्र द्वयी कल्पना– नामार्थस्य कदाचित् प्रयोक्तृविवक्षया क्रियाभिसम्बन्धः, कदाचित् स्वनिष्ठ एव, यदा तावत् क्रियाभिसम्बन्धस्तदा कर्मादिशक्तीनामुद्भवः, यथा– वृक्षं पश्येति दृशिक्रियाविशेषात् कर्मत्वं, यदा तु स्वनिष्ठोऽव्यतिरिक्त एव तदा प्रथमाया विषयः, न चापरो नामार्थोऽस्ति, यत्र कर्मादिविशेषव्यतिरिक्तत्वमिति कः शेषो नामावतिष्ठते? यथेयं षष्ठी स्यादित्याशङ्क्याह– **क्रियाकारकपूर्वक** इति– अयमर्थः– 'राज्ञः पुरुषः' इत्यत्र योऽयं राज-पुरुषयोः सम्बन्धो नायं कारणान्तरनैरपेक्ष्येणाकस्मादुपजायते, अपि त्वन्तर्भूतक्रियाकारकसम्बन्धनिबन्धः, यतः पुरुषो योग-क्षेमकामो राजानमुपसर्पति, राजापि तमभिलषितधनदानादिना बिभर्त्ति, क्रियान्तरं वा प्रकल्पनीयम्, ततो राज्ञोऽसौ सम्बन्धिभूत इति **राज्ञः पुरुष** इति, उपगोरपत्यमित्यत्रापि जनिक्रियाजनितः सम्बन्धः, उपगुरपत्यं जनयति, तदपि ततो जायत इत्यु**पगोरपत्य**मिति; 'पशोः पादः' इत्यत्राप्यवस्थितिक्रियालम्भितः सम्बन्धः, यतः पशुः पादेऽवस्थितोऽतः **पशोः पाद** इति; एवं– **वृक्षस्य शाखे**त्यादावप्यवस्थितिक्रियाजनितत्वं सम्बन्धस्येति। एतच्च बाहुल्याभिप्रायेण न त्वैकान्तिकम्, यतः कारकाणां कर्मादीनामविवक्षया सामान्यकारकविवक्षायामेव केवलायां सम्बन्धप्रादुर्भावात् कारकशेष इति व्यवह्रियते इत्याह– **कर्माद्यविवक्षालक्षण** इति– कर्मादिभ्योऽन्य इति तु विशेषेभ्योऽन्यत्वं विवक्षितुं, न तु सामान्यादनाश्रितविशेषात् कारकादपि, एवं—

" सम्बन्धः कारकेभ्योऽन्यः, क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां वा, क्रियायां सोऽभिधीयते ॥ "

इत्यत्रापि द्रष्टव्यम्। तत्र राज्ञः पुरुष इत्यादौ क्रियाकारकपूर्वकोऽश्रूयमाणक्रियः स्वस्वामिभावादिः सम्बन्धः, न माषाणामश्नीयादित्यादौ तु श्रूयमाणक्रियात्वे सदपि कर्मत्वादि अविवक्षितत्वाद् विशेषणविशेष्यभाव एव प्रतिपाद्यते– माषसम्ब-

न्ध्यशनमिति । **स्वस्वामिभावादिरि**ति- आदिशब्दाज्जन्य-जनकभावादयो गृह्यन्ते । ननु क्रियामन्तरेण सम्बन्धाभावात् तस्य सर्वत्रावश्यंभावात् तस्य च निमित्तस्य च कर्मादेः सत्त्वात् कथं तस्याविवक्षेत्याक्षिपति- **कथं पुनरि**त्यादि । समाधत्ते- **यथाऽनुदरे**त्यादि । ननु शेषशब्देन स्वस्वामिभावादेः सम्बन्धस्याभिधानात् तस्य च द्विष्ठत्वाद् राज्ञः पुरुष इत्यत्र पुरुषशब्दादपि षष्ठी प्राप्नोति, तत्र प्रथमा वक्तव्या, प्रतिषिद्धायामपि षष्ठ्यां नामार्थमात्रे विधीयमानायाः प्रथमायाः सम्बन्धस्याधिकस्य भावादप्रसङ्ग इति; नैष दोषः- गौणाधिकारादप्रधानादेव भवतीत्याह- **गौणादित्येवे**त्यादि- प्रधानात् तु प्रथमाया अप्रसङ्गो न वाच्यः, आधिक्यस्य वाक्यार्थत्वादित्युक्तत्वादिति । राज्ञ इति सन्निधाने हि पुरुषस्य सम्बन्धित्वं प्रतीयते नान्यथा, पुरुषनाम तु स्वार्थमात्रे वर्तत इति प्रथमापि सिद्ध्यति; यद्येवं पुरुषपदसन्निधान एव राज्ञः सम्बन्धित्वावगमो नान्यथेति राजशब्दादपि प्रथमाप्रसङ्गः, नैष दोषः- राज्ञ इति केवले पदे उच्चार्यमाणे सम्बन्धित्वमनियतप्रतियोगि राज्ञो गम्यते, यस्माद् राजा परोपकारित्वेन विवक्षितो न स्वनिष्ठत्वेन, पुरुषस्य तु राजानमन्तरेण सोऽर्थो न प्रतीयत इति वाक्यार्थः । अस्त्यत्र कारणं- राजशब्दाद्धि भवान् षष्ठीमुच्चारयति, अङ्ग ! हि पुरुषशब्दादुच्चरिताद् गम्यते सोऽर्थ इति, ( अङ्ग ! हि भवान् पुरुषशब्दादप्युच्चारयतु, गंस्यते सोऽर्थः । ) ननु नैतेनैवं भवितव्यं, नहि शब्दस्य भावाभावाभ्यामर्थस्य भावाभावौ क्रियेते, किं तर्हि ? अर्थस्य प्रतिपिपादयिषया विषयीकरणाकरणाभ्यां शब्दस्योच्चारणानुच्चारणलक्षणौ भावाभावावित्यर्थः, तत्र परोपकारित्वेन राज्ञो विवक्षितत्वात् षष्ठी भवति, पुरुषस्य तूपकार्यतया स्वनिष्ठत्वेन विवक्षितत्वात् प्रथमा, तदुक्तं हरिणा—

" द्विष्ठोऽप्यसौ परार्थत्वाद्, गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानश्च, प्रधानेऽप्युपयुज्यते ॥ १ ॥ "

तस्मादर्थरूपमेवैतदेवंजातीयकं येनात्रान्तरेणापि पुरुषशब्दस्य प्रयोगं राजनि सोऽर्थो गम्यत इति; किं पुनस्तत् ? स्वामित्वं, " समास-कृत्-तद्धितेषु सम्बन्धाभिधानम् " इति वचनात् स्वस्वामिसम्बन्ध इत्यर्थः; किंकृतं पुनस्तत् ? स्वकृतं, ततश्चानियतं स्वमपेक्ष्य [ प्रथममेव ] राज्ञः सम्बन्धाश्रया षष्ठ्युत्पद्यते, पुरुषशब्दसन्निधौ तु स्वविशेषप्रतिपत्तिः, यथा- नामार्थानां क्रियाकृता विशेषाः शक्तयः प्रतीयन्ते, शक्तिकृताश्च कर्माद्याख्याः प्रादुर्भवन्ति, ताश्च पुनर्विभक्तौ कदाचिन्निमित्तत्वेनोपादीयन्ते, यदा क्रियां प्रति व्यापारावेशविवक्षा भवति- दात्रेण लुनातीति; कदाचिन्नेति यदा योग्यतामात्रविवक्षा भवति- [ दात्रं लवने करणमिति ] तदा, अयमर्थः—यदा नामार्थस्य क्रियावेशविवक्षायां शक्तिलक्षणार्थातिरेको भवति तदा नामार्थतां शक्तयो न प्रतिपद्यन्त इति व्यभिचाराद् विभक्तेर्निमित्तं भवति; यदा त्वपरोपकारित्वेन स्वनिष्ठतया नामार्थो विवक्ष्यते तदा व्यभिचाराभावात् ताः शक्तयः कर्मकरणसंज्ञामेव प्राप्ता न विभक्त्युत्पत्तिं प्रयोजयन्ति, तदुक्तम्—

" स्वशब्दैरभिधाने तु, स धर्मो नाभिधीयते ।
विभक्त्यादिभिरेवासावुपकारः प्रतीयते ॥ १ ॥ "

तदेवं यथा क्रियापेक्षया दात्रेणेति भवति तथा [ राज्ञ इति स्वापक्षेया, यथा ] च स्वनिष्ठत्वाश्रयेण दात्रं करणं तथा राजा स्वामीत्युक्तं भवति । यद्येवं तर्हि राजनि स्वकृतं स्वामित्वमेवं पुरुषेऽपि राजकृतं स्वत्वं ततः षष्ठी प्राप्नोति, उच्यते- राज्ञः पुरुष इति गुण-प्रधानभावेनार्थद्वयमवस्थितं, तत्र सम्बन्धो गुणे पदं न्यस्य द्विष्ठत्वात् प्रधानमपि स्पृशति, गुणश्च प्रधानोपकाराय प्रवृत्तो रूपान्तरमाश्रयति, प्रधानं तु स्वनिष्ठमेव, न तु रूपान्तरं भजत इति पुरुषशब्दान्न षष्ठी । अथ राज्ञः पुरुष इत्यत्र द्वयोरपि सम्बन्धं प्रति साधारण्यात् किं तत् पुरुषस्य प्राधान्यमित्याह- **प्राधान्यं चे**त्यादि । **तेने**त्यादिना प्राधान्यफलं दर्शयति । **यदा त्वि**ति- यदा तु पुरुषस्य गुणभावो राज्ञस्तु विशेष्यत्वात् प्राधान्यं तदा पुरुषस्य राजेति भवत्येव । **कथमि**ति- एकस्य गुणप्रधानभावो विरुध्यत इत्याशङ्कार्थः । समाधत्ते- **राजापेक्षे**त्यादि- एकस्यापि भिन्नविषयो गुणप्रधानभावो न विरुध्यते इत्यर्थः, तथाहि- स्वगुणे राजनि प्राधान्यमनुभूय पुनः प्रधानकम्बलापेक्षया शेषतामनुभवतीति । **प्रथमापवादो योग** इति- एक-द्वि-बहाविति संख्यामात्रमुपादाय नाम्नः प्रधानादप्रधानाच्च सामान्येन प्रथमा विधीयते, तत्रायं षष्ठीविधिर्गौणादिति विशेषमुपादाय प्रवर्तमानस्तदपवादो भवति ॥ छ ॥ २. २. ८१. ॥

---

**न्या० स०—शेषे०** । सरस्वतीकण्ठाभरणे कर्मादिकारकाणि, इन्द्र-चान्द्राभ्यां करणप्राधान्यं, श्रुतपालेन कलापके चाऽपादानस्य प्राधान्यं, शकटाभिप्रायेण स्वमते च कर्तुः प्राधान्यम् । **क्रियाकारकपूर्वक** इति- क्रिया च कारकं च क्रियाकारके, ते पूर्वे यस्य स तथा, यथा- राजपुरुषः, राजा कर्ता पुरुषं बिभर्ति अतो राजपुरुष इत्युच्यते । **कर्माद्यविवक्षालक्षण** इति- कर्मादिभ्योऽन्य इति तु विशेषेभ्योऽन्यत्वं विवक्षितुं न तु सामान्यादनाश्रितविशेषात् कारकादपि । **अश्रूयमाणक्रियः** यथा- **राज्ञः पुरुष** इत्यादि । **श्रूयमाणक्रियः**, यथा- **न माषाणामश्नीयादि**ति । **अस्येदंभावरूप** इति- अस्येदंशब्दस्य यो भावः- प्रवृत्तिनिमित्तं सः । **संबन्धविशेष** इति–

अत्र कारकसंबन्धाद् भिद्यमानः सम्बन्धः संबन्धविशेष उच्यते, यावता संबन्ध इत्युक्तेऽपि सिद्ध्येत्, विशेषस्थापनायोक्तम् । **राज्ञः पुरुष** इत्यादिषु यथाक्रमं संबन्धः कथ्यते– स्वस्वामिभावसंबन्धः, जन्य-जनकसं०, अवयवा-ऽवयविसं०, आधार-ऽऽधेयसं०, प्रकृति-विकारभावसंबन्धः, समूह-समूहिभावसं०, समीप-समीपिभावसं०, पाल्य-पालकभावसं०, आश्याशनभावसं०, शिक्षणीय-शिक्षणभावसं०, ज्ञान-ज्ञेयभावसं०, आस्यासनभावसं०, भक्ष्य-भक्षणभावसं०, देवन-द्यूतभावसं०, दान-दानिविषयसं०, श्रवण-श्रवणावधिभावसं०, पतन-पतनावधिभावसं०, विभाष्य-विभाषणभावसंबन्धः, इत्यादिः । **प्रथमापवाद** इति– एक-द्वि-बहाविति संख्यामात्रमुपादाय नाम्नः प्रधानादप्रधानाच्च सामान्येन प्रथमा विधीयते, तत्राऽयं षष्ठीविधिर्गौणादिति विशेषमुपादाय प्रवर्तमानस्तदपवादो भवति ॥ २. २. ८१.॥

## रि-रिष्टात्-स्तादस्तादसतसाता । २ । २ । ८२ ॥

**त० प्र०—‘ रि-रिष्टात्-स्तात्-अस्तात्-अस्-अतस्-आत् ’ प्रत्ययान्तैर्युक्ताद् गौणान्नाम्नः षष्ठी विभक्तिर्भवति । रि– उपरि ग्रामस्य, रिष्टात्– उपरिष्टाद् ग्रामस्य, स्तात्– परस्ताद् ग्रामस्य, अवरस्ताद् ग्रामस्य; अस्तात्– पुरस्ताद् ग्रामस्य, अवस्ताद् ग्रामस्य, अधस्ताद् ग्रामस्य; अस्– पुरो ग्रामस्य, अवो ग्रामस्य, अधो ग्रामस्य; अतस्– दक्षिणतो ग्रामस्य, उत्तरतो ग्रामस्य, परतो ग्रामस्य, अवरतो ग्रामस्य; आत्– अधराद् ग्रामस्य, दक्षिणाद् ग्रामस्य, उत्तराद् ग्रामस्य, पश्चाद् ग्रामस्य; दक्षिणपश्चाद् ग्रामस्य । पञ्चम्यपवादो योगः ॥ ८२ ॥**

**श० न्या०—रिरि०** । उपरीत्यादिप्रयोगस्थितानाम् “ ऊर्ध्वाद् रिरिष्टातावुपश्चास्य ” [ ७. २. ११४. ] इति, “ परावरात् स्तात् ” [ ७. २. ११६. ] इति “ पूर्वावराधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ” [ ७. २. ११५. ] इति, “ दक्षिणोत्तराच्चातास् ” [ ७. २. ११७. ] इति, “ अधरापराच्चात् ” [ ७. २. ११८. ] इत्यादिभिर्विहितानां प्रत्ययानां **रिरिष्टादि**त्याद्यनुकरणात् ततस्तृतीया । **उपरि ग्रामस्ये**ति– ऊर्ध्वशब्दस्य दिग्देशकालार्थस्य “ ऊर्ध्वाद्० ” [ ७. २. ११४. ] इत्यनेनैवोपभावः; एवं–पूर्वा-ऽवरा-ऽधराणां “ पूर्वावरधरेभ्यः० ” [ ७. २. ११५. ] इति यथाक्रमं ‘ पुर् अव् अध् ’ इत्येते भवन्ति; एवं– **पुरो ग्रामस्ये**त्यादावपि । **पश्चाद् ग्रामस्ये**ति– अपरशब्दस्य “ पश्चोऽपरस्य० ” [ ७. २. १२४. ] इति पश्चादेशः । अथ पूर्वेणेवेदं सिध्यति, किमर्थोऽयं योग इत्याह– **पञ्चम्यपवादो योग** इति– रिप्रभृतयः प्रत्ययाः स्वार्थिका दिक्शब्देभ्यो विधीयन्ते, ततस्तदन्ता अपि दिक्शब्दा एव इति “ शेषे ” [ २. २. ८१. ] इत्यस्यापवादः “ प्रभृत्यन्यार्थदिक्शब्द० ” [ २. २. ७५. ] इति पञ्चमी विधीयते, अत एव दक्षिणा ग्रामाद् रमणीयम्, दक्षिणाहि ग्रामाद् रमणीयमिति “ आही० ” [ ७. २. १२०. ] इति प्रत्ययद्वययोगे षष्ठी न लभ्यत इति पञ्चमीबाधनार्थोऽयमिति ॥ २ । २ । ८२. ॥

**न्या० स०—रिरिष्टा०** । **परस्तादिति**– परः परा वा प्रकृतिः “ परावरात् स्तात् ” [ ७. २. ११६. ] “ सर्वादयोऽस्यादौ ” [ ३. २. १६. ] इति पुंभावः । **दक्षिणपश्चादिति**– दक्षिणा च साऽपरा च दक्षिणापरा तस्यां वसति । रिप्रभृतयः प्रत्ययाः स्वार्थिका दिक्शब्देभ्यो विधीयन्ते, अतस्तदन्ता अपि दिक्शब्दा एव इति “ शेषे ” [ २. २. ८१. ] इत्यस्यापवादः “ **प्रभृत्यन्यार्थ०** ” [ २. २. ७५. ] इति पञ्चमी विधीयते । अत एव दक्षिणा ग्रामाद् रमणीयम्, दक्षिणाहि ग्रामाद् रमणीयमिति “ आही दूरे ” [ ७. २. १२०. ] इति प्रत्ययद्वययोगे षष्ठी न लभ्यत इत्याह– **पञ्चम्यपवाद** इति ॥ २. २. ८२. ॥

## कर्मणि कृतः । २ । २ । ८३ ॥

**त० प्र०—कृतः– कृदन्तस्य संबन्धिनि कर्मणि गौणान्नाम्नः षष्ठी भवति, द्वितीयाऽपवादः । अपां स्रष्टा, पुरां भेत्ता, वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शकः, यवानां लावकः, ओदनस्य भोजकः, विश्वस्य ज्ञाता, तीर्थस्य कर्ता, उदकस्य पिबः, ग्रामस्य गमनम्, गवां दोहः । कर्मणीति किम् ? शस्त्रेण भेत्ता । क्रियाविशेषणस्यापि कर्मत्वाभावान्न भवति– साधु पक्ता, स्तोकं पक्ता । कृत इति किम् ? कटं करोति, कृतपूर्वी कटम्, भुक्तपूर्वी ओदनम्; त्यादि-तद्धितयोः कर्मणि मा भूत् । कथमर्थस्य त्यागी ?, सुखस्य भोगी ?, विषयाणां जयी ?, वीराणां प्रसविनीति ? अत्र ताच्छीलिकयोर्घिनणिनोः कर्मेति भवति ॥ ८३ ॥**

**श० न्या०—कर्म० । अपां स्रष्टे**त्यादीनि, एतेषु “णक-तृचौ” [ ४. १. ४८. ] इति तृच्-णकौ, “ पां पाने ” इत्यतः “ घ्रा-ध्मा-पा० ” [ ५. १. ५८. ] इति शे “ श्रौति० ” [ ४. २. १०८. ] इति पिबादेशे **पिबः**, गमेर्भावे अनटि– **गमनम्**, एवं– दुहेर्घञि लघूपान्त्यगुणे– **दोहः** । कर्मणीति सामान्येन द्वितीयाविधानात् कृदन्तकर्मण्यपि द्वितीयाप्राप्तौ तदपवादस्तत्र षष्ठीत्याह– **द्वितीयापवाद** इति । **कृत इति किमिति**– एवं मन्यते– कर्म कारकं, तच्च क्रियामन्तरेण न सम्भवति, क्रियाया हि कारकं भवति, सा च वाचकं धातुं

प्रत्ययसहितमाक्षिपति, धातोश्च द्वये प्रत्यया विधीयन्ते- त्यादयः कृतश्च, तत्र "तद्वेत्त्यधीते" [ ६. २. ११७. ] इति ज्ञापकात् त्यादिप्रयोगे द्वितीयाविधानात् कृत्प्रयोग एव षष्ठी भविष्यतीति व्यावर्त्यासम्भवादिहानर्थकं कृद्ग्रहणं, नैवम्- कृद्ग्रहणमन्तरेण तद्धितप्रयोगेऽपि यत् कर्म तत्र षष्ठी स्यात्, तत्र च मा भूदित्येवमर्थं कृद्ग्रहणमित्युदाहरति- **कृतपूर्वी**त्यादि- सति त्वेवमर्थे कृद्ग्रहणे त्यादिव्यावृत्तिरपि प्रयोजनम्, कृतं पूर्वमनेन भुक्तं पूर्वमनेनेति "पूर्वमनेन सादेश्चेन्" [ ७. १. १६७. ] इत्यनेनेनेत्यस्मिन् कर्त्रर्थे इन्प्रत्ययः, तेन कृतपूर्वीति पूर्वं कृतवानित्यर्थः, तत्र यथा चित्रगुरिति बहुव्रीहिणा स्वामिसामान्येऽभिहिते विशेषाभिधानाय चैत्रादिः प्रयुज्यते तथात्रापि सामान्यकर्मण्यभिहिते विशिष्टकर्माभिधानाय कटादेः क्तेनानभिहितस्य द्वितीयान्तस्य प्रयोगः, सामान्येन व्यवहारासम्भवाद् विशेषेणावश्यं निर्वाहः कार्यः, एतद्विषयस्तु विचारः "कर्मणि" [ २. २. ४०. ] इत्यत्र सूत्रे कृत इति नेह प्रतन्यते। **कथमि**ति- त्यागादिभ्यस्त्यागोऽस्यास्तीति तद्धितप्रयोगेऽर्थस्येत्यादि कर्मणि षष्ठी न प्राप्नोतीत्याशङ्कार्थः। परिहरति- **अत्र ताच्छीलिकयो**रित्यादि- त्यजतीत्येवंशील इत्यादिविग्रहेषु "युज-भुज०" [ ५. २. ५०. ] इति घिनणि- **त्यागी भोगी** "जीण्दृक्षि०" [ ५. २. ७२. ] इति "प्रात्सूजोरिन्" [ ५. २. ७१. ] इति चेनि- **जयी प्रसविनी** ॥ छ ॥ २. २. ८३. ॥

**न्या० स०**—कर्मणि कृतः। **द्वितीयापवाद** इति- "कर्मणि" [ २. २. ४० ] इत्यनेन प्राप्तायाः। **पुत्रपौत्राणा**मिति- पुत्रस्यापत्यमनन्तरं "पुनर्भूपुत्र०" [ ६. १. ३९. ] इत्यञ्, पुत्रस्य पौत्राः पुत्रसहिताः पौत्रा वा इति विग्रहः, द्वन्द्वे तु "गवाश्वादिः" [ ३. १. १४४. ] इति समाहृतिः स्यात्। पिबतीति **पिब**ः "घ्राध्मा०" [ ५. १. ५८. ] इति शः। **कृत इति किमि**ति- अयमर्थः- ननु कर्म कारकं, तच्च क्रियामन्तरेण न संभवति, यतः क्रियायाः कारकं कारकं भवति, क्रिया च प्रत्ययसहितं धातुमाक्षिपति, धातोश्च द्वये एव प्रत्यया विधीयन्ते- त्यादयः कृतश्च, तत्र "तं पचति०" [ ६. ४. १६१. ] इत्यादिज्ञापकात् त्यादिप्रयोगे द्वितीयाविधानात् कृत्प्रयोग एव षष्ठी भविष्यति, किं कृद्ग्रहणेनेति, नैवम्- कृद्ग्रहणमन्तरेण तद्धितप्रयोगेऽपि यत् कर्म तत्रापि षष्ठी स्यात् तन्निषेधार्थं कृद्ग्रहणम्। **कृतपूर्वी कटमि**ति- वर्तते, कः कर्ता ? कृतपूर्वी, पूर्वं कृतवानित्यर्थः, कं कृतपूर्वी ? कटम्, तत्र यथा चित्रगुरित्यादौ बहुव्रीहिणा स्वामिसामान्येऽभिहिते विशेषाभिधानाय चैत्रादिः प्रयुज्यते तथाऽत्रापि सामान्यकर्मण्यभिहिते विशिष्टकर्माभिधानाय कटादेः क्तेनाऽनभिहितस्य द्वितीयान्तस्य प्रयोगः, सामान्येन व्यवहारासंभवाद् विशेषणावश्यं निर्वाहः कार्यः। **कथमि**ति- त्यागोऽस्यास्ति इति इनि तद्धितप्रत्ययेऽर्थस्येत्यादि कर्मणि षष्ठी न प्राप्नोतीत्याशङ्कार्थः। "युज-भुज०" [ ५. २. ५०. ] इति घिनण्। "जीण्-दृक्षि०" [ ५. २. ७२. ] इति "प्रात्सूजोरिन्" [ ५ २. ७१. ] इति यथाक्रमं त्यागीत्यादिषु प्रत्ययाः ॥ २. २. ८३. ॥

## द्विषो वाऽतृशः । २ । २ । ८४ ॥

**त० प्र०—अतृश्प्रत्ययान्तस्य द्विषः कर्मणि गौणान्नाम्नः षष्ठी वा भवति। चौरस्य द्विषन्, चौरं द्विषन्; "तृन्नु०" [ २. २. ९०. ] आदिसूत्रेण प्रतिषेधे प्राप्ते विकल्पोऽयम् ॥ ८४॥**

**श० न्या०**—द्विषो०। **चोरस्य द्विषन्नि**ति- "द्विषींक् अप्रीतौ" इत्यतः "सुग्द्विषार्ह०" [ ५. २. २६. ] इत्यतृश्, तद्योगे च कर्मणि षष्ठीप्रतिषेधादनेन विकल्पो विधीयत इत्याह- **तृन्नादिसूत्रेणे**त्यादि। अन्ये तु सम्बन्धविवक्षायामेवेयं षष्ठीति प्रतियन्तः सूत्रं नारभन्ते, एवं "वा क्लीबे" [ २. २. ९२. ] इत्याद्यपि ॥ छ ॥ २. २. ८४. ॥

**न्या० स०**—**द्विषो वाऽतृशः। विकल्पोऽयमि**ति- अन्ये तु संबन्धविवक्षायामेवेयं षष्ठीति प्रतियन्तः सूत्रं नारभन्ते, एवं- "वा क्लीबे" [ २. २. ९२. ] इत्यपि ॥ २. २. ८४. ॥

## वैकत्र द्वयोः । २ । २ । ८५ ॥

**त० प्र०—द्विकर्मकेषु धातुषु द्वयोः कर्मणोरेकत्रैकतरस्मिन् वा षष्ठी भवति, अन्यत्र पूर्वेण नित्यमेव। अजाया नेता स्रुघ्नम्, अजाया नेता स्रुघ्नस्य, अथवा- अजां नेता स्रुघ्नस्य, अजाया नेता स्रुघ्नस्य; पयसो दोहको गाम्, पयसो दोहको गोः; यदि वा गोर्दोहकः पयः, गोर्दोहकः पयसः। अन्ये तु नीवह्यादीनां द्विकर्मकाणां गौणे कर्मणि, दुहादीनां तु प्रधाने विकल्पमिच्छन्ति; उभयत्राऽपि नित्यमेवेत्यन्ये ॥ ८५ ॥**

**श० न्या०**—वैक०। **द्वयोरि**ति विशेषणसामर्थ्यात् कर्मणीत्यनुवर्तमानं विशेष्यं सप्तम्येकवचनान्तमपि द्विवचनान्तमिह सम्बध्यत इत्याह- **द्वयोः कर्मणोरि**ति। ते च द्वे कर्मणी द्विकर्मकेष्वेव धातुषु संभवत इत्युक्तं- **द्विकर्मकेषु धातुष्वि**ति। अथ कृत इत्यस्यैव षष्ठ्यन्तस्य द्वयोरिति विशेषणं कस्मान्न क्रियते ? तत्रापि हि द्वयोः[ :कृदन्तयो ]रेकं यत् कर्म तत्र षष्ठी वा भवतीत्ययमर्थः सम्पद्यते, तथा च सति 'अपां स्रष्टा भेत्ता च मैत्रः' इत्यादावेव विकल्पः स्यादिति, नैवम्- एवं सति "कर्मणि कृतो द्वयोश्च वा" इत्येकमेव योगं कुर्यात् तस्मिन्नपि हि सकलार्थस्य सिद्धत्वात् तमात्, पृथग्योगात् कर्मणि

एव विशेषणं न कृत इति। **एकत्रे**ति सामान्येन निर्देशात् प्रधानाप्रधानकर्मणोरविशेषेण ग्रहणमित्युभयत्रैवोदाहरति- **अजाया नेता स्रुघ्नमि**त्यादि । **अन्ये त्वे**ति- [ वार्तिककाराः ] ननु कर्मणीत्यधिकृतत्वादेकदेशस्य [ एकस्य, एकशब्दस्य वा ] च द्वितीयसव्यपेक्षत्वादेकस्मिन् कर्मणीत्युक्तेऽपि द्वयोः कर्मणोरेकतरस्मिन्निति गम्यत एव, किं द्वयोरित्यनेन ? उच्यते- द्विकर्मकेषु धातुष्वेकस्मिन् कर्मणि षष्ठीविकल्प इत्युच्यमाने * प्रधानाऽप्रधानसन्निधौ प्रधाने कार्यसम्प्रत्ययः * इति न्यायात् प्रधान एव कर्मणि स्यात्; यद्वा गौणादित्यधिकारात् कर्मापेक्षयापि गुणकर्मण्येव स्यात्, अत एव शकटः "कर्मणि गुणे" इति पठति; द्वयोरपि प्रधानाऽप्रधानकर्मणोः पर्यायेण षष्ठीविकल्प इत्येतदर्थं द्वयोरित्युपादानमित्यदोषः ॥छ॥ २.२.८५.॥

**न्या० स०—वैकत्र०** । द्वयोः कर्मणोरिति- ननु कृत इत्यस्यैव षष्ठ्यन्तस्य द्वयोरिति कस्मान्न विशेषणम् ?, तत्रापि हि द्वयोः कृदन्तयोरेकं यत् कर्म तत्र षष्ठी वा भवतीत्ययं सूत्रार्थो घटते, तथा च अपां स्रष्टा भेत्ता च मैत्र इत्यादावेव विकल्पः स्यादिति, नैवम्- एवं सति "कर्मणि कृतो द्वयोश्च वा" इत्येकमेव योगं कुर्यात्, एवं च सति एकस्य कृतः कर्मणि नित्यं षष्ठी भवति, द्वयोस्तु कृदन्तयोर्वा भवतीति सूत्रार्थे समस्तार्थस्य सिद्धत्वात्, तस्मात् पृथग् योगात् कर्मण एव विशेषणं न कृत इत्यस्य । अन्यत्रेति- यतः "कर्मणि कृतः" [ २. २. ८३. ] इत्यनेन द्वयोरपि कर्मणोः षष्ठी प्राप्ता पक्षेऽनेन निषिध्यते । अजाया नेता स्रुघ्नमिति- एकत्रेति सामान्येन निर्देशात् प्रधानाप्रधानकर्मणोरविशेषेण ग्रहणमित्युभयत्रैवोदाहरति । ननु कर्मणीत्यधिकृतत्वादेकशब्दस्य च द्वितीयसव्यपेक्षत्वात् एकत्रेत्युक्तेऽपि द्वयोः कर्मणोरेकतरस्मिन्निति गम्यत एव, किं द्वयोरित्यनेन ? नैवम्- एवं सति * प्रधानाप्रधानसंनिधौ प्रधाने कार्यसंप्रत्ययः * इति न्यायात् प्रधान एव कर्मणि स्यात्; यद्वा गौणादित्यधिकारात् कर्मापेक्षयापि गुणकर्मण्येव स्यादिति द्वयोरपि प्रधानाप्रधानकर्मणोः पर्यायेण षष्ठीविकल्पार्थं द्वयोरित्युपादानमित्यदोषः ॥ २. २. ८५. ॥

## कर्तरि । २ । २ । ८६ ॥

**त० प्र०—कृदन्तस्य कर्तरि गौणान्नाम्नः षष्ठी भवति, तृतीयाऽपवादः । भवत आसिका, भवतः शायिका, भवतः स्वापः, भवत आसना, भवतोऽग्रगामिका । कर्तरीति किम् ? गृहे शायिका । कृत इत्येव- त्वया शय्यते ॥ ८६ ॥**

**श० न्या०—कर्त०** । कृत इति वर्तते इत्याह- **[कृदन्तस्येति । ] तृतीयापवाद** इति- कृदन्तप्रयोगे कर्तृवाचिनः शब्दाद् "हेतु-कर्तृ-करण०" [२. २. ४४.] इति तृतीयायां प्राप्तायां तदपवादः षष्ठीत्यर्थः । **भवत आसिका, भवतः शायिके**ति- "आसिक् उपवेशने" "शीङ्क् स्वप्ने" आभ्यां "पर्यायार्हर्णोत्पत्तौ०" [ ५. ३. १२०. ] इति णकः **स्वाप** इति- "भावाऽकर्त्रोः" [ ५. ३. १८. ] इति घञ् । **आसने**ति "णिवेत्त्यासश्रन्थ०" [ ५. ३. १११. ] इत्यः । **भवतोऽग्रगामिका** पूर्ववण्णकः । **शय्यते** इति- "क्ङिति यि शय्" [ ४. ३. १०५. ] ॥छ॥ २. २. ८६. ॥

**न्या० स०—कर्तरि०** । आसितुं पर्यायः "पर्याय०" [ ५. ३. १२०. ] इति णकः, आसिका । आसनम्, आसना "णिवेत्ति०" [ ५. ३. १११. ] इत्यनः ॥ २. २. ८६ ॥

## द्विहेतोरस्त्र्यणकस्य वा । २ । २ । ८७ ॥

**त० प्र०—स्त्र्यधिकारविहिताभ्यामकार-णकाराभ्यामन्यस्य द्वयोः कर्तृ-कर्मषष्ठ्योः प्राप्तिहेतोः कृतः कर्तरि षष्ठी वा भवति, नित्यं प्राप्ते विभाषेयम्। विचित्रा सूत्रस्य कृतिराचार्यस्याऽऽचार्येण वा, साधु खल्विदं शब्दानामनुशासनमाचार्यस्याऽऽचार्येण वा, साध्वी संग्रहण्याः कृतिः क्षमाश्रमणस्य क्षमाश्रमणेन वा, आश्चर्यो गवां दोहोऽगोपालकस्य अगोपालकेन वा, साधु खलु पयसः पानं मैत्रस्य मैत्रेण वा, साध्वी खल्वनेकान्तजयपताकायाः कृतिराचार्यहरिभद्रस्याऽऽचार्यहरिभद्रेण वा । गम्यमानेऽपि कर्मणि भवति- अन्तर्द्धौ येनाऽदर्शनमिच्छति, यस्याऽदर्शनमिच्छतीति वा; अत्राऽऽत्मन इति कर्म गम्यते । द्विहेतोरित्येकवचननिर्देशः किम् ? आश्चर्यमोदनस्य नाम पाकोऽतिथीनां च प्रादुर्भाव इति, भिन्नकृतोः कर्तृ-कर्मषष्ठीहेतुत्वमत्रेति न भवति । अस्त्र्यणकस्येति किम् ? चिकीर्षा मैत्रस्य काव्यानाम्, भेदिका चैत्रस्य काष्ठानाम्; णिगन्तभिदेस्तु भेदिका चैत्रस्य मैत्रस्य काष्ठानाम् । कर्तरीत्येव- साधु खल्विदं शब्दानामनुशासनमाचार्यस्याऽऽचार्येण वेत्यत्र शब्दशब्दात् कर्मणि विकल्पो न भवति । अन्ये तु घजलप्रत्यययोर्द्विहेत्वोः कर्मण्येव षष्ठीमिच्छन्ति न कर्तरि- आश्चर्यो गवां दोहोऽगोपालकेन, आश्चर्यं इन्द्रियाणां जयो यूना ॥ ८७ ॥**

**श० न्या०—द्विहे०** । द्वयोर्हेतुरिति षष्ठीतत्पुरुषः, कृत इति वर्तते, तस्य चेदं विशेषणमित्याह- **द्वयोः कर्तृ-कर्मषष्ठ्योः प्राप्तिहेतोः कृत** इति। **नित्यं प्राप्त** इति- "कर्तरि" [ २. २. ८६. ] इति सूत्रेणेति शेषः । **विचित्रा सूत्रस्य कृतिराचार्यस्याचार्येण चे**ति- अत्र कृतिरिति

"स्त्रियां क्तिः" [५. ३. ९१.] इति भावे क्तिः, अस्य च कृतः सूत्रं कर्म, आचार्यः कर्ता, उभयत्र "कर्मणि कृतः" [२. २. ८३.] इति "कर्तरि" [२. २. ८६.] इति च द्वयोः षष्ठ्योः प्राप्तिरिति द्विहेतुरयं कृत्; एवमुत्तरत्रापि भावनीयम्। **अनुशासन**मिति- भावे करणाधारे वाऽनट्। **आश्चर्यमि**ति- अत्र पाक इत्येतदपेक्षया ओदनस्येति, न तदपेक्षमतिथीनां कर्तृत्वं, नह्यतिथयः पक्तारः, किन्तु प्रादुर्भवितार इति कृतो भिन्नत्वाच्च भवति; ननु कथमिदमुच्यते? घञ एकत्वादिति, नैवम्- धातुभेदात् तस्यापि भेद इत्यदोषः। **चिकीर्षे**ति- करोतेः सन्नन्तात् "शंसि-प्रत्ययात्" [५. ३. १०५.] इदित्यप्रत्यये आपि च रूपम्। **भेदिके**ति- पर्यायेण भेदनमिति "पर्यायार्हर्णोत्पत्तौ" [ ] इति णकः। **णिगन्तभिदेस्त्वि**ति- भिदेर्ण्यन्तात् पर्यायादिषु णकः। अथ कथं **चैत्रस्य मैत्रस्ये**त्युभयत्रापि कर्तरि षष्ठी, यतोऽत्र प्रयोजकः कर्ता णिगर्थस्य प्राधान्यात् प्रधानं, प्रयोज्यः कर्ता तु प्रकृत्यर्थस्याप्राधान्यादप्रधानम्, तत्र प्रधानाप्रधानसन्निधौ प्रधानादेव षष्ठी, नाप्रधानादिति, सत्यम्- तृतीयावत् कर्तृमात्रे षष्ठीत्याश्रयणात् भिन्नशब्दवाच्ययोः प्रधानाप्रधानयोः कर्त्रोरेकशब्दवाच्यताया अभावाद् विरोधाभावात् षष्ठी सिद्ध्यतीत्यदोषः। **अन्य** इति- ललितस्वभाव इत्यर्थः। काशिकाकारस्तु स्त्र्यधिकारविहितयोः प्रतिषेधादन्यस्मिन्नपि स्त्रीप्रत्यय एव षष्ठीमिच्छति। अपरे तु णकाकारयोर्भावाभिधायकयोः कृतोरुपयोगात् ताभ्यामन्यस्मिन् भावाभिधायक एव षष्ठीमिच्छन्ति ॥ छ ॥ २. २. ८७. ॥

**न्या० स०—द्विहेतो०। नित्यं प्राप्ते** इति- "कर्तरि" [२. २. ८६.] इत्यनेन। **खल्विदमि**ति- "खल संचये च" खलतीति "मृ-मृ-तॄ०" [उणा० ७१६.] इति बहुवचनादुः। [**संग्रहण्याः**] संगृह्यन्ते स्तोकशब्दैर्बहवोऽर्था अस्यामिति "क-ह्व-सृ०" [उणा० ६३८.] इत्यणिः। **अगोपालकेने**ति- पालयतीति णकः, गवां पालकः "अकेन क्रीडाजीवे०" [३. १. ८१.] समासः। **अन्तर्द्धौ येनादर्शनमिच्छतीति**- पञ्चमीविधायकं पाणिनिसूत्रमिदम्, अस्य चायमर्थः- अन्तर्द्धौ- अन्तर्द्धिविषये आत्मनः कर्मतापन्नस्य येनोपाध्यायादिना कर्तृभूतेन यददर्शनं तदिच्छतीत्यर्थः। **भिन्नकृतोरि**ति- ननु पाक इत्यत्रापि भावा-ऽकर्त्रोर्घञ्, प्रादुर्भाव इत्यत्रापि स एव, तत् कथं भिन्नकृतोरित्युच्यते, सत्यम्- धातुभेदात् तस्यापि भेद इत्यदोषः। **भेदिका चैत्रस्य मैत्रस्य काष्ठानामिति**- भेदयितुं पर्याय इत्येव कार्यं, भावे तु "णिवेत्ति०" [५. ३. १११.] इत्यनेनाऽनप्रत्यय एव स्यात्। नन्वत्र प्रयोज्य-प्रयोजककर्त्रोः प्रधाने प्रयोजके षष्ठी प्राप्नोति * गौण-मुख्ययोः० * इति न्यायाद्, सत्यम्- यथा एकवाक्यस्थयोः कर्त्रोस्तृतीया स्यात् तथा तद्बाधिका षष्ठ्यपि। **अन्ये तु वज्जलेति**- ललितस्वभाव इत्यर्थः। काशिकाकारस्तु स्त्र्यधिकारविहितयोरणकयोः प्रतिषेधादन्यस्मिन्नपि स्त्रीप्रत्यय एव षष्ठीमिच्छति। अपरे तु णकाकारयोर्भावाभिधायकयोः कृतोः प्रतिषेधाशंसनादन्यस्मिन् भावाभिधायक एव षष्ठीमिच्छन्ति ॥ २. २. ८७. ॥

## कृत्यस्य वा । २ । २ । ८८ ॥

**त० प्र०—कृत्यस्य कर्तरि गौणान्नाम्नः षष्ठी वा भवति।** भवतः कार्यः कटः, भवता कार्यः कटः; **कर्तव्यः, करणीयः, देयः, कृत्यो वा कटः। कर्तरीत्येव- गेयो माणवको गाथानाम्, प्रवचनीयो गुरुर्द्वादशाङ्गस्य ॥ ८८ ॥**

**श० न्या०—कृत्य०। कार्य** इति- "ऋवर्णव्यञ्जनाद्०" [५. १. १७.] इति कर्मणि घ्यण्। **कर्तव्यः करणीय** इति- "तव्यानीयौ" [५. १. २७.] इति तव्या-ऽनीयौ। **देय** इति- "य एचातः" इति यप्रत्यय आकारस्य च एत्वम्। **कृत्य** इति- "कृवृषि०" [५. १. ४२.] इति क्यप् "ह्रस्वस्य तः०" [४. ४. ११३.] इति तोऽन्तः **गेयो माणवको गाथानामि**ति- गायतीति गेयः "भव्यगेय०" [५. १. ७.] इति कर्तरि निपातः, गीयमानत्वाच्च गाथानां कर्मत्वम्, अतः कर्तरीत्यनुवर्तमानात् कर्मणि षष्ठीविकल्पो न भवति; एवं प्रवचनीय इत्यत्रापि द्रष्टव्यम् ॥ छ ॥ २. २. ८८. ॥

**न्या० स०—कृतस्य वा। गेयो माणवको गाथानामिति**- अत्र व्यावृत्तेर्गाथानामित्यत्र कर्मणि साफल्यं, माणवकात् तु अगौणत्वात् प्राप्तिरेव नास्ति ॥ २. २. ८८. ॥

## नोभयोर्हेतोः । २ । २ । ८९ ॥

**त० प्र०—उभयोः- कर्तृ-कर्मणोः षष्ठीहेतोः कृत्यस्य संबन्धिनोरुभयोरेव षष्ठी न भवति। नेतव्या ग्राममजा मैत्रेण, क्रष्टव्या ग्रामं शाखा चैत्रेण; जेतव्यः शतं मैत्रश्चैत्रेण। उभयोर्हेतोरिति किम्? एकैकहेतोर्मा भूत्- उपस्थानीयः पुत्रः पितुः, उपस्थानीयः पिता पुत्रस्य ॥ ८९ ॥**

**श० न्या०—नोभ०। उभयोरि**ति सप्तमीद्विवचनान्तं प्रकृतयोः कर्तृ-कर्मणोर्विशेषणमित्याह- **उभयोः कर्तृ-कर्मणोरि**ति। प्राप्त्यनुवादेन प्रतिषेधविषयं दर्शयति- **उभयोरेवे**ति- द्विकर्मकप्रयोगेऽयं प्रतिषेधो द्रष्टव्यस्तत्रैवोभयप्राप्तिसंभवात्। [**नेतव्या, क्रष्टव्या, जेतव्यः,**] नयतेः कर्षतेर्जयतेश्च "तव्यानीयौ [५. १. २७.] इति प्रधानकर्मणि तव्यः। ननु द्विकर्मकेषु धातुष्वयं प्रतिषेधः, [तत्रैवोभयप्राप्तिसम्भवात्,] तत्र प्रधानकर्मणः कृत्येनैवाभिहितत्वात् षष्ठ्यविषयत्वात्

* प्रधानाऽप्रधानसन्निधौ प्रधान एव सम्प्रत्ययः * इति न्यायात् तव्यादिवदप्रधानादप्यप्रसङ्गात् कर्तर्येव प्रतिषेधो न्याय्य इत्युभयग्रहणमतिरिच्यते, नैवम्– द्वितीयाबाधिका हि कृत्प्रयोगे षष्ठी विधीयते, द्वितीया चाप्रधानादप्यस्तीति तत्र षष्ठी स्यात्, न च "प्रधानकर्मण्याख्येये त्यादीनाहुर्द्विकर्मणाम्" इत्यत्रादिशब्देन षष्ठ्यपि गृह्यत इति वाच्यम्, तस्य व्यवस्थावाचित्वात् कृत्य-क्त-खलर्थानामेव ग्राहकत्वादिति। किञ्च "द्विकर्मणां धातूनां प्रधानकर्मणि तिवादय उत्पद्यन्ते" इति न्यायोऽयं, यतो ह्येकेन शब्देनाजा-ग्रामलक्षणयोर्द्वयोः कर्मणोः सन्निपातितयोरेकतरं कर्माभिधानीयं, न तु द्वे अपि कर्मणी, अजावत् ग्रामस्यानिनीषितत्वात् तथाप्रतीत्यभावाच्च, नह्यजा ग्रामो नीयत इत्युक्तेऽजा ग्रामं नीयते इतिवद् गुणमुख्यभावेन प्रतीतिरस्ति, किन्तु तौ द्वावपि किमप्यन्यन्नीयते इत्यर्थान्तरं प्रतीयेत इति, तदत्र कतरत् कर्माभिनोच्यतामिति विरोधात् प्रधानकर्मणि त्यादय उत्पद्यन्त इत्युच्यते, तेनोक्तम्– "प्रधानकर्मण्याख्येये त्यादीनाहुर्द्विकर्मणाम्" इति, षष्ठी तु भिन्नाभ्यां नामभ्यां कर्तृवाचिभ्यामुत्पद्यमाना भिन्नैवोच्यत इति विरोधाभावात् कथमसौ प्रधानादेव स्यात्, नाप्रधानात्, इत्यविशेषेणैवानयोत्पत्तव्यम्, तत्रापि तत्रभवद्भुजगविभुना षष्ठीविधावेव "प्रधानाद्वा [द्वि] षष्ठीष्यते" इतीष्टिरारब्धा। यद्येवं कथमुक्तं– "दुहादीनामप्रधाने कर्मणि तिवादयः" इति, तत्रापि पूर्वं प्रवृत्तिविषयत्वेनान्तरङ्गत्वाद् गवादेरेव प्राधान्यं, व्यवहारापेक्षया तु पयःप्रवृत्तेरिति ॥ छ ॥ २. २. ८९. ॥

**न्या० स०—नोभयोः०।** ननु द्विकर्मकेषु धातुषु तावदयं प्रतिषेधः, तत्रैवोभयप्राप्तिसंभवात्, तत्र प्रधानकर्मणः कृत्येनैवाभिहितत्वात् षष्ठ्यविषयत्वात् * प्रधाना-ऽप्रधानसंनिधौ प्रधान एव संप्रत्ययः * इति न्यायात् तव्यादिवत् अप्रधानादप्यप्रसङ्गात् कर्तर्येव प्रतिषेधो न्याय्य इत्युभयग्रहणमतिरिच्यते, नैवम्– द्वितीयाबाधिका हि कृत्प्रयोगे षष्ठी विधीयते, द्वितीया चाप्रधानाद् यथा भवति तथाऽत्र षष्ठ्यपि भविष्यति। **उपस्थानीयः पुत्रः पितुः** उपतिष्ठते "प्रवचनीयादयः" [ ५. १. ८. ] इति कर्तर्यनीयः, अत्र पितुः शब्दात् "कर्मणि कृतः" [ २. २. ८३. ] इति कर्मणि षष्ठी, द्वितीये तु उपस्थीयते इति कर्मणि "तव्या-ऽनीयौ [ ५. १. २७. ] "कृत्यस्य वा" [ २. २. ८८. ] इति कर्तरि पुत्रात् षष्ठी ॥ २. २. ८९. ॥

## तृन्नुदन्ता-ऽव्यय-क्वस्वाना-ऽतृश्-शतृ-ङि-णकच्-खलर्थस्य । २ । २ । ९० ॥

**त० प्र०—तृन् उदन्तस्य अव्ययस्य क्वसोरानस्य अतृशः शतुः ङेः णकचः खलर्थस्य च कृतः संबन्धिनोः कर्मकर्त्रोः षष्ठी न भवति। तृन्– वदिता जनाऽपवादान्; उदन्त– कन्यामलंकरिष्णुः, रिपून् जिष्णुः, शरान् क्षिप्णुः, ओदनं बुभुक्षुः, देवान् वन्दारुः, धारुर्वत्सो मातरम्, श्रद्धालुस्तत्त्वम्; अव्यय– कटं कृत्वा, पयः पायं पायं व्रजति, ओदनं भोक्तुं व्रजति; क्वसु– ओदनं पेचिवान्, तत्त्वं विद्वान्; आनेति उत्सृष्टाऽनुबन्धनिर्देशात् कान-शाना-ऽऽनशां ग्रहणम्, [ कान– ] कटं चक्राणः, वचनमनूचानः; शान– मलयं पवमानः, कतीह कवचमुद्वहमानाः, कतीह शत्रून् निघ्नानाः, कतीह वपुर्भूषयमाणाः; आनश्– ओदनं पचमानः, चैत्रेण पच्यमानः, कटं करिष्यमाणः, अतृश्– अधीयंस्तत्त्वार्थम्, धारयन्नाचाराङ्गम्; शतृ– कटं कुर्वन्, कटं करिष्यन्; ङि– परीषहान् सासहिः, कटं चक्रिः, दधिश्चित्तम्; णकच्– एधानाहारको व्रजति, कटं कारको व्रजति; चिन्निर्देशात् णकस्य न भवति– वर्षशतस्य पूरकः, पुत्रपौत्रस्य दर्शकः; खलर्थः– ईषत्करः कटो भवता, सुज्ञानं तत्त्वं भवता ॥ ९० ॥**

**श० न्या०—तृन्नु०।** "कर्मणि कृतः" [ २. २. ८३. ] इति "कर्तरि" [ २. २. ८६. ] इति च प्राप्तायाः षष्ठ्याः प्रतिषेधार्थमिदम्। वदेः "तृन् शील-धर्म-साधुषु" [ ५. २. २७. ] इति तृनि– **वदिता**। अलंपूर्वात् करोतेः "भ्राज्यलंकृग्०" [ ५. २. २८. ] इतीष्णौ– **अलंकरिष्णुः**। जयतेः "भूजेः०" [ ५. २. ३०. ] इति ष्णुकि– **जिष्णुः**। क्षिपतेः "त्रसि-गृधि०" [ ५. २. ३२. ] इति क्नौ णत्वे च– **क्षिप्णुः**। बुभुक्षेः "सन्-भिक्षा०" [ ५. २. ३३. ] इत्युप्रत्यये– **बुभुक्षुः**। वन्देः "शृ-वन्देः०" [ ५. २. ३५. ] इत्यारौ– **वन्दारुः**। धयतेः "दा-धे-सि०" [ ५. २. ३६. ] इति रौ– **धारुः**। श्रत्पूर्वाद् दधातेः "शीङ्-श्रद्धा" [ ५. २. ३७. ] इत्यालौ– **श्रद्धालुः**। **कृत्वेति**– "प्राक्काले" [ ५. ४. ४७. ] इति क्त्वाप्रत्ययः। पिबतेः "ख्णम् चाभीक्ष्ण्ये" [ ५. ४. ४८. ] इति ख्णमि द्वित्वे च– **पायं पायमिति**– भुजेः "क्रियायां क्रियार्थायाम्" [ ५. ३. १३. ] इति तुमि– **भोक्तुम्**। पचेः "तत्र क्वसुकानौ०" [ ५. २. २. ] इति क्वसौ "अनादेशादेः०" [ ४. १. २४. ] इत्यत्वे द्वित्वाभावे "घसैकस्वरात्०" [ ४. ४. ८२. ] इतीटि– **पेचिवान्**। कानादीनां सर्वेषामनुबन्धवतामपि 'आन' इति प्रयोगोपयोगिस्वरूपनिर्देशात् सर्वेऽपि तद्रूपा गृह्यन्त इत्याह– **आनेती**त्यादि। करोतेः "तत्र क्वसुकानौ०" [ ५. २. २. ] इति कानप्रत्यये द्वित्वादौ– **चक्राणः**। अनुपूर्वाद् वचेः "वेयि-वदनाश्वदनूचानम्" [ ५. २. ३. ] इति [ निपातनात् ] **अनूचानः**। पवतेः "पूङ्यजः०" [ ५. २. २२. ] इति

शाने- **पवमानः** । उत्पूर्वाद् वहे " वयः-शक्ति-शीले " [ ५. २. २४. ] इति शाने- **उद्वहमानाः**; एवं- **निघ्नानाः**, **भूषयमाणा** इत्यपि । **पचमान** इति- " शत्रानशौ० " [ ५. २. २०. ] इत्यानश् । **करिष्यमाण** इति- " ०एष्यति तु सस्यौ " [ ५. २. २०. ] इति स्यसहितः । अधिपूर्वादिङो धारयतेश्च " धारीङः " [ ५. २. २५. ] इत्यतृशि- **अधीयन्, धारयन्नि**ति । **कुर्वन्, करिष्यन्नि**ति–" शत्रानशौ० " [ ५. २. २०. ] इति शतृप्रत्ययो यथायोगं स्यसहितश्च । सासह्यतेः " डौ सासहि० "[ ५. २. ३८. ] इति डौ–**सासहिः** । एवं करोतेर्दधातेश्च " सस्रि-चक्रि-दधि० " [ ५. २. ३९. ] इति- **चक्रिः, दधिः** । आपूर्वाद्धरतेः " क्रियायां क्रियार्थायाम्० " [ ५. ३. १३. ] इति णके च- **आहारकः**; एवं **कारकः** । **चिन्निर्देशा**दिति- वर्षशतस्य पूरक इति " णक-तृचौ " [ ५. १. ४८. ] इति णकः, णकजिति निर्देशादत्र षष्ठीप्रतिषेधो न भवति । **ईषत्कर** इति- " दुःस्वीषतः० " [ ५. ३. १३९. ] इति खल् । **सुज्ञानमि**ति- " शासू-युधि० " [ ५. ३. १४१. ] इत्यः ॥ छ ॥ २. २. ९०. ॥

**न्या० स०—तृन्नुदन्ता०** । " कर्मणि कृतः " [ २. २. ८३. ] " कर्तरि " [ २. २. ८६. ] इति च प्राप्तायाः षष्ठ्या अपवादः । **पायं पायं** " ख्णम् चाभीक्ष्ण्ये " [ ५. ४. ४८. ] " भृशा० " [ ७. ४. ७३. ] इति द्वित्वं च । **भोक्तुं व्रजती**ति- अत्र हेतुहेतुमद्भावे तृतीया, " तुमोऽर्थे० " [ २. २. ६१. ] इत्यनेन चतुर्थी वा, संबन्धविवक्षायां षष्ठी वा । परिषह्यन्ते " स्थादिभ्यः कः " [ ५. ३. ८२. ] " असोङसिवूसहस्सटाम् " [ २. ३. ४८. ] षत्वम्- परिषहाः, " घञ्युपसर्गस्य० " [ ३. २. ८६. ] इति दीर्घः । आहरिष्यतीति " क्रियायाम्० " [ ५. ३. १३. ] इति णकचि- **आहारकः** ॥ छ ॥ २. २. ९०.]

## क्तयोरसदाधारे । २ । २ । ९१ ॥

**त० प्र०**—सतो वर्तमानादाधाराच्चान्यस्मिन्नर्थे विहितौ यौ क्तौ- क्तक्तवतू तत्संबन्धिनोः कर्म-कर्त्रोः षष्ठी न भवति । कटः कृतो मैत्रेण, कटं कृतवान्; गतो ग्रामं चैत्रः, ग्रामं गतवान् । असदाधार इति किम् ? राज्ञां ज्ञातः, राज्ञां बुद्धः, राज्ञां मतः, राज्ञामिष्टः, राज्ञां पूजितः, " कान्तो हरिश्चन्द्र इव प्रजानाम्; " " ज्ञानेच्छा० " [ ५. २. ९२ ] इत्यादिसूत्रेण सत्यत्र क्तः । कथं शीलितो मैत्रेण ?, रक्षितश्चैत्रेण ?; भूतेऽयं क्तः, वर्तमानताप्रतीतिस्तु प्रकरणादिनेति । अन्ये तु ज्ञानेच्छार्चार्थताच्छील्यादिभ्योऽतीते क्तं नेच्छन्ति, तन्मतेऽपशब्दावेतौ । आधारे- इदमोदनस्य भुक्तम्, इदं सक्तूनां पीतम्, इदमहेः सृप्तम्, इदमेषामासितम्; " अद्यर्थाच्चाऽऽधारे " [ ५. १. १२. ] इति क्तः ॥ ९१ ॥

**श० न्या०**—क्तयोः० । **सत** इत्यस्य पर्यायोऽयं- **वर्तमानादि**ति । ननु सन् धात्वर्थः, तत्र धातुरेव वर्तते कृत्प्रत्ययस्तु " कर्तरि " [ ५. १. ३. ] इत्यादिना कारके भावे च विधीयते, तत्र सति प्रत्ययविधिरेव नास्ति, कथं प्रतिषेधः ? **सतोऽन्यस्मिन्नर्थे** इति, नैष दोषः- सदर्थसहचारी प्रत्ययार्थोऽपि सन्नित्युच्यते; यद्वा धात्वर्थोऽपि सन्निति प्रत्ययत एव विज्ञायते, नहि धातुतः क्रियालक्षणो धात्वर्थो भूतो भवन् भविष्यन्निति वा ज्ञातुं शक्यते, धातुर्हि क्रियामात्रमाह, न त्वमुं विशेषं, स तु प्रत्ययादेव प्रतीयते इति कर्त्रादिकारकवृत्तिरपि प्रत्ययः सतीति विज्ञायत इति । क्रियते स्मेति के- **कृतः**, करोति स्मेति कर्तरि क्तवतुः । **गत** इति- गच्छति स्मेति " गत्यर्थाऽकर्मक० " [ ५. १. ११. ] इति कर्तरि क्तः । **राज्ञां ज्ञात** इत्यादि- कर्तरि षष्ठीयम्, " ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः० " [ ५. २. ९२. ] इत्यनेन वर्तमाने क्तः । अथ सति केन सूत्रेण क्तो भवतीत्याह- **ज्ञाने**-**च्छे**त्यादि- भूतकालविहितस्य च क्तस्य वर्तमानकालविहितो धातुसामान्यविशेषभावेन बाधक इति स्थितम् । **कथमि**ति- ' शीलितो मैत्रेण ' इत्यादावपि " ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः० " [ ५. २. ९२. ] इत्यनेन क्तः, तथा च वर्तमानप्रतीतिरित्यत्र कस्मान्न भवतीत्याशङ्कार्थः । परिहरति- **भूतेऽयं क्त** इति- अयमर्थः- वर्तमानायामपि क्रियायां केचित् क्रियाभागा गता भवन्ति, तत्र " क्त-क्तवतू " [ ५. १. १७४. ] इति भूतेऽयं क्तः, यद्येवं कथमत्र वर्तमानताप्रतीतिः ? अत्रापि शील्यत इत्याह- **वर्तमानते**त्यादि- आदिशब्दादर्थ-प्रकरण-शब्दान्तरसन्निध्यादिपरिग्रहः । **अन्य** इति- पूर्वे इत्यर्थः । **इदमोदनस्य भुक्तमि**त्यादि- " अद्यर्थाच्चाधारे " [ ५. १. १२. ] इत्याधारे क्ते, **ओदनस्य सक्तूना**मिति च " कर्मणि कृतः " [ २. २. ८३. ] इति कर्मणि षष्ठी । **अहेरेषामि**ति च कर्तरि षष्ठी, सदाधारादन्यत्र चातुःशब्द्यं भवति, यदा कर्तरि क्तस्तदा-इदमहिः सृप्तो देशम्, कर्मणि- अयमहिना सृप्तो देशः, भावे- अहेः सृप्तम्, अहिना सृप्तमिति ॥ छ ॥ २. २. ९१. ॥

**न्या० स०—क्तयोर०** । ननु सन् धात्वर्थः, तत्र धातुरेव वर्तते, कृत्प्रत्ययस्तु " कर्तरि " [ २. २. ८६. ] इत्यादिना कारके भावे च विधीयते, तत्र सति प्रत्ययविधिरेव नास्ति कथं प्रतिषेधः- **सतोऽन्यस्मिन्नर्थे** इति, नैष दोषः- सदर्थसहचारी प्रत्ययार्थोऽपि सन्नित्युच्यते; यद्वा धात्वर्थोऽपि सन्निति प्रत्ययत एव

विज्ञायते, नहि धातुतः क्रियालक्षणो धात्वर्थो भूतो भवन् भविष्यन्निति वा ज्ञातुं शक्यः, धातुर्हि क्रियामात्रमाह, न त्वमुं विशेषम्, स तु प्रत्ययादेव प्रतीयत इति कर्त्रादिकारकवृत्तिरपि प्रत्ययः सतीति विज्ञायते । **कथमिति**- शीलितो मैत्रेणेत्यादावपि- " ज्ञानेच्छा० " [ ५. २. ९२. ] इति क्तः, वर्तमानताप्रतीतिरप्यस्ति, तत् कथं निषेध इत्याशङ्कार्थः । **भूतेऽयं क्त इति**- यद्ययं भूते क्तः कथं वर्तमानताप्रतीतिः ? उच्यते- वर्तमानमध्ये भूतो भविष्यंश्च कालोऽस्त्यतो भूते क्तः, यथा कटं करोतीत्यत्र कटस्य येऽवयवा निष्पन्नास्तदपेक्षयाऽतीतत्वं, ये च निष्पद्यमानास्तदपेक्षया वर्तमानत्वं, ये च निष्पत्स्यन्ते तदपेक्षया भविष्यत्वम् । **अहेः सुप्तमिति**- सदाधारादन्यत्र चातुःशब्द्यं भवति, यदा कर्तरि क्तस्तदा- इममहिः सुप्तो देशं, यदा कर्मणि तदा- अयमहिना सुप्तो देशः, भावे तु " वा क्लीबे " [ २. २. ९२. ] इति वा षष्ठ्यामहेः सुप्तमहिना सुप्तमिति ॥ २. २. ९१. ]

## वा क्लीबे । २ । २ । ९२ ॥

**त० प्र०—क्लीबे यो विहितः क्तस्तस्य कर्तरि षष्ठी वा न भवति । छात्रस्य हसितम्, छात्रेण हसितम्; मयूरस्य नृत्तम्, मयूरेण नृत्तम्; कोकिलस्य व्याहृतम्, कोकिलेन व्याहृतम्; इहाहेः सुप्तम्, इहाऽहिना सुप्तम् । क्लीब इति किम् ? चैत्रेण कृतम्, " क्तक्तवतू " [ ५. १. १७४. ] इति भावे क्तः । पूर्वेण प्रतिषेधे प्राप्ते विकल्पोऽयम् ॥ ९२ ॥**

**श० न्या०—वा क्ली०** । ' भावे ' इत्यधिकृत्य " क्लीबे क्तः " [ ५. ३. १२३. ] इत्यनेन यः कालसामान्यावच्छिन्नधात्वर्थाभिधायिकत्वाद् धातोरुत्पन्नस्तत्प्रयोगे षष्ठीविकल्पोऽयमित्युदाहरति- **छात्रस्य हसितमि**त्यादि- हसनं **हसितम्**, नर्तनं **नृत्तम्**, व्याहरणं **व्याहृतम्** । **भावे क्त** इति- " तत् साप्यानाप्यात्० " [ ३. ३. २१. ] इत्यनेनेति शेषः । **पूर्वेणे**ति- " क्तयोरसदाधारे " [ २. २. ९१. ] इत्यनेनेत्यर्थः ॥ छ ॥ २. २. ९२. ॥

**न्या० स०—वा क्ली०** । [ नेह व्याख्या दृश्यते ] २. २. ९२. ॥

## अकमेरुकस्य । २ । २ । ९३ ॥

**त० प्र०—कमेरन्यस्योकप्रत्ययान्तस्य कर्मणि षष्ठी न भवति । आगामुकं वाराणसीं रक्ष आहुः, भोगानभिलाषुकः । अकमेरिति किम् ? दास्याः कामुकः ॥ ९३ ॥**

**श० न्या०—अक०** । **आगामुकमिति**- "शृकमगम०" [ ५. २. ४०. ] इति ताच्छीलिक उकण्, **आहुरि**त्येतदपेक्षया कर्मणि द्वितीया, एवं रक्षःशब्दादपि, वाराणसीशब्दात् तु गमिक्रियाकर्मणोऽनेन षष्ठी प्रतिषिध्यते, वरणा च असिश्च वरणासी नद्यौ, ते विधेते यस्याम् " अहरादिभ्यः० " [ ६. २. ८७. ] इत्यञि पृषोदरादित्वात् ह्रस्वदीर्घव्यत्ययेऽञन्तत्वाद् ङ्यां वाराणसी, आहुःशब्दो " ब्रूगः पञ्चानाम्० " [ ४. २. ११८. ] इति व्युत्पाद्यते । दासशब्दात् ङ्यां [ -दासी ], प्रतिषेधस्य प्रतिषेधात् षष्ठ्येव भवति ॥ छ ॥ २. २. ९३. ॥

**न्या० स०—अकमे०** । **वाराणसीति**- वरणा च असिश्च वरणासी नद्यौ, ते विधेते अस्याम् " अहरादिभ्योऽञ् " [ ६. २. ८७. ] पृषोदरादित्वात् ह्रस्वदीर्घव्यत्ययेऽञन्तत्वाद् ङ्याम्; यद्वा वराण इति वीरणस्याख्या, वराणास्तृणविशेषाः सन्त्यस्यां " तृणादेः सल् " [ ६. २. ८१. ] " लिन्मिन्यनि " [ लिङ्गानुशासने ] इति स्त्रीत्वे वराणसाया अदूरभवा " निवासादूर० " [ ६. २. ६९. ] इत्यण् ॥ २. २. ९३ ॥

## एष्यदृणेनः । २ । २ । ९४ ॥

**त० प्र०—एष्यत्यर्थे ऋणे च विहितस्येनः कर्मणि षष्ठी न भवति । इन इति इन्-णिनोर्ग्रहणम् । ग्रामं गमी, औणादिक इन्, ग्राममागामी औणादिको णिन्; शतं दायी, सहस्रं दायी, कारी मेऽसि कटम्, हारी मेऽसि भारम्; एष्वाधमर्ण्ये णिन् । एष्यदृणेति किम् ? अवश्यंकारी कटस्य, साधुदायी वित्तस्य ॥ ९४ ॥**

**श० न्या०—एष्य०** । एष्यच्च ऋणं च एष्यदृणे, तयोरिन् एष्यदृणेन्, एष्यता ऋणेन च प्रत्येकम् ' इन् ' विशिष्यत इत्याह- **एष्यती**त्यादि । **इन** इति स्वरूपनिर्देशाच्चिरनुबन्धस्य ऋणे च तस्यासम्भवादग्रहणात् सानुबन्धस्य ग्रहणमित्याह- **इन इति इन्-णिनोर्ग्रहणमिति** । **ग्रामं गमी**ति- " वर्त्स्यति गम्यादिः " [ ५. ३. १. ] इति वचनाद् " गमेरिन् " [ उणा० ९१९. ] इति भविष्यति इन्, एवम्- " आङश्च णित् " [ उणा० ९२०. ] इति णिति- **ग्राममागामी** । येषां तु " गतेर्नवाऽनाप्ते " [ २. २. ६३. ] इत्यस्य स्थाने " गत्यर्थकर्मणि० " इत्यत्र द्वितीयायां सिद्धायां द्वितीयाग्रहणमपवादविषयेऽपि षष्ठीबाधनार्थं तेषामत्र षष्ठीप्राप्तेरभावाद् ' ग्रामं गमी, ग्राममागामी ' इत्याद्युदाहरणानुपपत्तिः, प्रतिषेधस्य प्राप्तिपूर्वकत्वादिति । **शतं दायी**ति- ददातेः " णिन् चावश्यकाऽधमर्ण्ये " [ ५. ४. ३६. ] इति णिनि " आत ऐः कृञ्चौ " [ ४. ३. ५३. ] इति ऐत्वमायादेशश्च ॥ छ ॥ २. २. ९४. ॥

**न्या० स०—धृष्यद्०** । शतं दायी शतं धारयन् ददाति " णिन् चावश्यक० " [ ५. ४. ३६. ] इति णिन् । करोषीति हरसीति [ **कारी, हारी** ] पूर्ववण्णिन् ॥ २. २. ९४. ॥

## सप्तम्यधिकरणे । २ । २ । ९५ ॥

**त० प्र०—गौणान्नाम्न एक-द्वि-बहावधिकरणे कारके ' ङि-ओस्-सुप् 'लक्षणा यथासंख्यं सप्तमी विभक्तिर्भवति । दिवि देवाः, पर्यङ्के आस्ते, तिलेषु तैलम्, गुरौ वसति, युद्धे संनह्यते, अङ्गुल्यग्रे करिशतम् ॥ ९५ ॥**

**श० न्या०—सप्त०** । " क्रियाश्रयस्य कर्तुः कर्मणो वा य आधारस्तदधिकरणम् " इति प्रागुक्तं, तस्य चोक्तप्रकारेणैव षड् भेदा भवन्तीति तत्र क्रमेणोदाहरति– **दिवि देवा** इत्यादि ॥ छ ॥ २. २. ९५. ॥

**न्या० स०—सप्तम्यधि०** । अत्र सत्यर्थे वैषयिके वा सप्तमी ॥ २. २. ९५. ॥

## नवा सुजर्थैः काले । २ । २ । ९६ ॥

**त० प्र०—सुचोऽर्थो वारलक्षणो येषां प्रत्ययानां तदन्तैर्युक्तात् कालेऽधिकरणे वर्तमानाद् गौणान्नाम्नः सप्तमी वा भवति । द्विरह्नि भुङ्क्ते, पक्षे शेषे षष्ठी– द्विरह्नो भुङ्क्ते; मासे पञ्चकृत्वो भुङ्क्ते, मासस्य पञ्चकृत्वो भुङ्क्ते; बहुधाऽह्नि भुङ्क्ते, बहुधाह्नो भुङ्क्ते। सुजर्थैरिति किम् ? अह्नि भुङ्क्ते, रात्रौ शेते । बहुव्रीह्याश्रयणं किम् ? सुजर्थप्रत्ययस्याप्रयोगे गम्यमाने तदर्थे मा भूत्। काल इति किम् ? द्विः कांस्यपात्र्यां भुङ्क्ते । अधिकरणे इत्येव– द्विरह्ना भुङ्क्ते । आधारस्याऽऽधारत्वाऽविवक्षायां पक्षे शैषिकी षष्ठी सिद्धैव, नियमार्थं तु वचनम्, तेन प्रत्युदाहरणेषु शेषे षष्ठी न भवत्येव ॥ ९६ ॥**

**श० न्या०—नवा०** । सुचोऽर्थः सुज् इत्युपचारात्, तेन सुजर्थो येषामिति बहुव्रीहिः, एतच्च बहुवचनाद् विज्ञायते, अन्यपदार्थस्यानेकत्वाद् बहुत्वोपपत्तेः, तत्पुरुषे त्वर्थस्यैकत्वादेकवचनमेव स्यात्, यथा " सहार्थे " [ २. २. ४५. ] इति, इत्यवधार्याह– **सुचोऽर्थ** इत्यादि– सुजोऽर्थो वारः क्रियाभ्यावृत्तिः, स चार्थः प्रत्ययानामेवेत्याह– **प्रत्ययानामि**ति । **तदन्तैरि**ति– ते च प्रत्ययाः केवला न प्रयुज्यन्ते इत्येतदुच्यत इत्यर्थः । **' काले '** इति ' अधिकरणे ' इत्यस्यानुवर्तमानस्य विशेषणमित्याह– **कालेऽधिकरणे** इति । **द्विरह्नि भुङ्क्ते** द्वौ वारावस्येति " द्वि-त्रि-चतुरः० " [ ७. २. ११०. ] इति सुच् । तद्विमुक्तपक्षे त्वधिकरणस्य शेषविवक्षया " शेषे " [ २. २. ८१. ] इत्यनेन षष्ठीत्याह– **पक्ष** इत्यादि । **पञ्चकृत्व** इति– पञ्च वारा अस्येति " वारे कृत्वस् " [ ७. २. १०९. ] इति कृत्वस् । **बहुधेति**– बहव आसन्ना वारा अस्येति " बहोर्धाऽऽसन्ने " [ ७. २. ११२. ] इति धा, यद्यप्यत्रासत्तिरप्यस्ति तथापि सुचोऽर्थोऽस्तीति विकल्पो भवत्येव । **बहुव्रीह्याश्रयणं किमि**ति– बहुव्रीहौ हि शब्दप्रधानो निर्देशः, तत्र तदर्थैः शब्दैर्युक्तादिति युक्तत्वं यद्यपि नामार्थ एव, (तदापि) तथापि तत्प्रयोग एव भवति, अन्यथा बहुव्रीहेरानर्थक्यात्, तदभावे त्वर्थप्रधाने निर्देशेऽर्थादिना यदाऽह्नि भुङ्क्ते इति द्विस्त्रिर्वेति प्रतीयते तदापि स्यात्, तदा मा भूदित्येतदर्थं तदाश्रयणमित्यर्थः । **द्विरह्ना भुङ्क्ते** इति– अहरधिकरणमपि अत्राशने करणविवक्षामनुभवति, तत्राधिकरण इत्यधिकारात् सप्तम्यभावात् तृतीयैव भवति । अधिकरणमाधार इति पर्यायशब्दौ " क्रियाश्रयस्या० " [ २. २. ३०. ] इत्यत्र दर्शिताविति तत्पर्यायेणैवाह– **आधारस्ये**त्यादि– अत्रायमर्थः– आधारस्य सम्बन्धविवक्षाऽन्यत्र मा भूदित्येवमर्थं इत्यर्थः । नियमो व्यवच्छेदफल इत्याह– **तेने**त्यादि– सुजर्थैरेव योगे काले सप्तमी वा भवतीति नियमात् प्रत्युदाहरणेषु आधारसप्तम्येव, न षष्ठीति ॥ छ ॥ २. २. ९६. ॥

**न्या० स०—नवा सु०** । अधिकरणे नित्यं सप्तमी सिद्धैव, पक्षे षष्ठीविधानार्थं तु सूत्रम् । **बहुव्रीह्याश्रयणं किमिति**– अन्यथा षष्ठीतत्पुरुषाश्रयेण " सुजर्थे काले " इति कृते यदाऽर्थादिना ' द्विर्भुङ्क्ते ' इति द्विस्त्रिर्वेति प्रतीयते तदापि स्यात्, तदा मा भूदित्येवमर्थं तदाश्रयणमित्यर्थः । **द्विः कांस्यपात्र्यामिति**– कंसायेदं कंसीयं " परिणामिनि तदर्थे " [ ७. १. ४४. ] ईयः, ततः कंसीयस्य विकारः " कंसीयाञ्ञ्यः " [ ६. २. ४१. ] इति ञ्यो यलुक् च । **द्विरह्ना भुङ्क्ते** इति– अहरधिकरणमपि अत्राऽशने करणविवक्षामनुभवतीति तृतीयैव भवति । **नियमार्थं तु वचनमिति**– सुजर्थैरेव योगे काले सप्तमी वा भवति, सुजर्थैर्योगे काल एव वा सप्तमी भवतीत्युभयथापि नियमात् प्रत्युदाहरणेषु आधारसप्तम्येव न षष्ठीति ॥ २. २. ९६. ॥

## कुशला-ऽऽयुक्तेनाऽऽसेवायाम् । २ । २ । ९७ ॥

**त० प्र०—कुशलो– निपुणः, आयुक्तो– व्यापृतः; आभ्यां युक्तादाधारे वर्तमानाद् गौणान्नाम्नः सप्तमी वा भवति, आसेवायां– तात्पर्ये गम्यमाने । कुशलो विद्याग्रहणे, आयुक्तस्तपश्चरणे; पक्षे अधिकरणाऽविवक्षायां शेषषष्ठी– कुशलो विद्याग्रहणस्य, आयुक्तस्तपश्चरणस्य । आसेवायामिति किम् ?**

कुशलश्चित्रकर्मणि, न च करोति; आयुक्तो गौः शकटे– आकृष्य युक्त इत्यर्थः, "अधिकरणे" [२. २. ९५.] इत्येव नित्यं सप्तमी । पक्षे आधारस्याऽविवक्षायां विकल्पे सिद्धेऽनासेवायामाधाराऽविवक्षानिवृत्त्यर्थं वचनम् ॥ ९७ ॥

श० न्या०—कुश० । कुशलाऽऽयुक्तशब्दौ निपुणव्यापृतपर्यायावित्याह– **कुशलो निपुण** इत्यादि । **आसेवायामि**त्यस्य पर्यायमाह– **तात्पर्य** इति । **कुशलो विद्याग्रहण** इति– तत्परो निपुण इत्यर्थः । **आयुक्तस्तपश्चरणे** तात्पर्येण व्यापृत इत्यर्थः । **न च करोती**त्यासेवायास्तात्पर्यरूपाया अभावमाह । **आकृष्य युक्त इत्यर्थः** इत्यनेनाप्यर्थाभिधानेन तात्पर्याभावं एवाभिधीयते । **पक्षे आधारस्येति**– पूर्ववद् विभक्तिद्वयसिद्धिः, अनासेवायां विभक्त्यन्तरनिवृत्तिरेव सूत्रस्य फलमित्यर्थः ॥ छ ॥ २. २. ९७. ॥

न्या० स०—कुशलायुक्ते० । आयुक्त इति– "युजूंपी" आयुङ्क्ते स्म, "युजिच्" आयुज्यते स्म, कर्तरि क्तः ॥ २. २. ९७. ॥

## स्वामीश्वरा-ऽधिपति-दायाद-साक्षि-प्रतिभू-प्रसूतैः । २ । २ । ९८ ॥

त० प्र०—एभिर्युक्ताद् गौणान्नाम्नः सप्तमी वा भवति; पक्षे– शेषषष्ठी । गोषु स्वामी, गवां स्वामी; गोष्वीश्वरः, गवामीश्वरः; गोष्वधिपतिः, गवामधिपतिः; गोषु दायादः, गवां दायादः; गोषु साक्षी, गवां साक्षी; गोषु प्रतिभूः, गवां प्रतिभूः, गोषु प्रसूतः, गवां प्रसूतः । "स्वामीश्वराऽधिपति०" इति पर्यायोपादानात् पर्यायान्तरयोगे न भवति– ग्रामस्य राजा, ग्रामस्य पतिः; षष्ठ्येव भवति । सप्तम्यर्थं वचनम् ॥ ९८ ॥

श० न्या०—स्वामी० । **स्वामी**ति– स्वशब्दात् "स्वामिन्नीशे" [ ७. २. ४९. ] इति मिन् दीर्घत्वं च । ईष्टेः "स्थेशभास०" [ ५. २. ८१. ] इति वरे– **ईश्वरः**, दायमादत्त इति "दश्नाङः" [ ५. १. ७८. ] इति ङप्रत्ययः, दायमत्तीत्यदेर्वाऽण् [ **–दायादः** ] । स्वामीश्वराधिपतीनामेकार्थत्वेऽपि भेदेनोपादानं पर्यायान्तरनिवृत्त्यर्थमित्याह– **स्वामी**त्यादि– पर्यायान्तरयोगे न भवति, तदुदाहरति– **ग्रामस्य राजे**ति– स्वाम्यर्थग्रहणात् त्वत्रापि स्यात् तदर्थवृत्तित्वादिति । षष्ठी-सप्तम्यौ द्वे अपि प्राप्ते अनेन विधीयेते ? उतान्यतरा प्राप्तेत्याशङ्क्याह– **सप्तम्यर्थं वचनमि**ति– स्वाम्यादीनां गवादिसम्बन्धित्वं, तन्निवृत्तौ हि तेषां स्वाम्यादिभावाभावः, तत्रास्त्येव षष्ठी, सप्तमी तु नास्ति क्रियाप्रतीत्यभावादिति पक्षे सप्तमीप्रापणार्थं वचनमिति ॥ छ ॥ २. २. ९८. ॥

न्या० स०—स्वामीश्वरा० । **अधिपती**ति– अधिरूढः पतिं "प्रात्यव०" [ ३. १. ४७. ] इति सः, अधिकश्चाऽसौ पतिश्च वा । [प्रसूतः] प्रसूते स्म "गत्यर्थ०" [ ५. १. ११. ] इति क्तः । **सप्तम्यर्थं वचनमिति**– अयमर्थः– स्वाम्यादीनां गवादिसंबन्धित्वं, तन्निवृत्तौ हि तेषां स्वाम्यादिभावाभावः, तत्रास्त्येव षष्ठी, सप्तमी तु क्रियाप्रतीत्यभावान्नास्तीति पक्षे सप्तमीप्रापणार्थं वचनमिति ॥ २. २. ९८. ॥

## व्याप्ये क्तेनः । २ । २ । ९९ ॥

त० प्र०—इष्टादिभ्यः क्तान्तेभ्य इष्टमनेनेत्याद्यर्थे तद्धित इन् वक्ष्यते, क्तप्रत्ययान्ताद् य इन् तदन्तस्य व्याप्ये वर्तमानाद् गौणान्नाम्नः सप्तमी भवति; वेति निवृत्तम् । अधीतं व्याकरणमनेनेति वाक्याऽवस्थायामभिधायाऽधीतीति वृत्तौ क्तेनाऽनभिहिते कर्मणि प्रत्ययार्थकर्तृकेण च धात्वर्थेन व्याप्यमाने कृतपूर्वी कटमित्यादाविव द्वितीयायां प्राप्तायां तदपवादोऽयम् । अधीतं व्याकरणमनेनाऽधीती व्याकरणे, आम्नातं द्वादशाङ्गमनेनाऽऽम्नाती द्वादशाङ्गे, परिगणितं ज्योतिरनेन परिगणिती ज्योतिषि; इष्टो यज्ञोऽनेनेष्टी यज्ञे । क्तेन इति किम् ? कटं करोति । क्तग्रहणं किम् ? कृतपूर्वी कटम्, भुक्तपूर्वी ओदनम् । इन्ग्रहणं किम् ? उपश्लिष्टो गुरून् मैत्रः । व्याप्य इति किम् ?, मासमधीती व्याकरणे, अत्र मासान्मा भूत्, मासस्य हि न कर्मत्वम्, द्वितीया तु "काला-ऽध्वनोर्व्याप्तौ" [२. २. ४२.] इत्यनेन ॥ ९९ ॥

श० न्या०—व्याप्ये० । क्ताद् येन यस्मिंश्चार्थे इन् भवति तदाह– **इष्टादिभ्य** इति । क्ताद् इन्– क्तेन्, तस्य क्तेनः, इत्यस्यायमर्थ इत्याह– **क्तप्रत्ययान्ताद् य इन्नि**त्यादि । **वेति निवृत्तमि**ति– पृथग्योगादिति शेषः । अथ यस्मात् क्तप्रत्ययाद् इन् विधीयते तस्य यत् कर्म तत्राधिकरणविवक्षया सप्तमी सिध्यति, किमर्थमिदमित्याशङ्क्याह– **अधीतमि**त्यादि– अधीतं व्याकरणमनेनेति वाक्यावस्थायां क्तेन सामान्यकर्माभिधाय अधीतीति वृत्तौ क्तेनानभिहिते विशेषकर्मणि तदभिधानाय द्वितीया प्राप्नोति, गतो ग्राममितिवत्, प्रत्ययार्थकर्तृकेण धात्वर्थेन व्याप्यमानत्वात्, सामान्यस्य विशेषमन्तरेण अनवस्थानमित्यर्थप्रदर्शनार्थं व्याकरणशब्दोपादानमिति वृत्तेरर्थः । इदमत्र तात्पर्यम्– यथैव हि 'अधीती व्याकरणे' इत्यत्र कर्मणोऽधिकरणत्वेन विवक्षितत्वात् सप्तमी प्रवर्तते तथा कृतपूर्वी कटमित्यादावपि प्रवर्तेत, तस्माद् विवक्षाप्रविभागायेदमारभ्यत इति क्तेन्कर्मविषयेऽधिकरणविवक्षा नान्यत्रेति; अध्ययनम्– **अधीतम्** अविवक्षितकर्मकत्वादकर्मकादिङो भावे क्त-

प्रत्ययः, तत इष्टादित्वादिन्, एवमितरत्रापि; कर्मणि वा क्तः, तत्रापि लुप्यमानः क्तः कर्म सामान्यमाचष्टे न विशिष्टम्, इन्प्रकृतिर्हि क्तान्तोऽनेनेति कर्त्रा प्रत्ययार्थेनैकार्थीभावमापद्यमानो विशेषेण व्याकरणादिकर्मणा सम्बन्धं नार्हति, यद्यर्हेत् ततः प्रत्ययो नोत्पद्येत, सापेक्षत्वादसामर्थ्यात्, समर्थाच्च तद्धितस्य विधानादिति; तस्माद् योऽसौ विशेषकर्मणा क्तः सम्बन्धमुपगच्छति तस्मादयमिन्प्रकृतिभूतः क्तान्तः प्रत्ययार्थेऽत्यन्तमन्तर्लीनतामापद्यमानो विशेषेण सम्बन्धगमनाक्षमोऽन्य एवेति, अत एवाधीतमनेनेत्यादि इन उत्पत्तौ विग्रहो, न त्वधीतं व्याकरणमनेनेति, तस्मात् प्रागविवक्षितमपि विशिष्टं कर्म कर्त्रा पश्चात् सम्बन्धमुपैतीति, सामान्येन व्यवहारासंभवात्, तदुक्तम्– ' निर्विशेषं न सामान्यं भवेच्छशविषाणवत् " इति। तथेदमप्युक्तम्– " ततः क्रियावता कर्त्रा योगो भवति कर्मणा " इति। **अधीतं व्याकरणमनेने**त्यादि वाक्यचतुष्टयं तु नेन्विृत्त्यर्थं किन्त्वर्थकथनार्थं वृत्तौ दर्शितमिति ॥ छ ॥ २. २. ९९. ॥

**न्या० स०**—व्याप्ये क्तेनः। वेति **निवृत्तमिति**– व्याप्योपादानात्, तेन ह्यधिकारभेदः, पृथग्योगादिति वा। **प्रत्ययार्थे**त्यादि– प्रत्ययस्यार्थः प्रत्ययार्थः, प्रत्ययार्थः कर्ता यस्य धात्वर्थस्य अध्ययनलक्षणस्य स तथा, तेन व्याप्यमाने व्याकरण इति ॥ २. २. ९९. ॥

## तद्युक्ते हेतौ । २ । २ । १०० ॥

**त० प्र०**—हेतुर्निमित्तं कारणम्, तेन– व्याप्येन युक्ते– संयुक्ते हेतौ वर्तमानाद् गौणान्नाम्नः सप्तमी भवति। हेतुतृतीयाऽपवादः।

" चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति, सीम्नि पुष्पलको हतः " ॥ १ ॥

तद्युक्त इति किम्? वेतनेन धान्यं लुनाति, नाऽत्र वेतनं धान्येन संयुक्तम्, धनेन वसति। हेताविति किम्? देवस्य पादौ स्पृशति ॥ १०० ॥

**श० न्या०**—तद्यु०। **हेतुर्निमित्तं कारणमि**ति– नानादेशजविनेयानुग्रहार्थं पर्यायकथनम्। हेतुशब्दोपादानादिह विशिष्टमेव निमित्तमभिप्रेतं, न निमित्तमात्रम्, अन्यथा दात्रेण धान्यं लुनातीति निमित्तवाचिनो दात्रादपि स्यात्, न च *उपपदविभक्तेः कारकविभक्तिर्बलीयसी* इति न भविष्यतीति वाच्यं, यतः कारकश्रुत्या कर्तृकरणयोस्तृतीयावत् कारकेण कर्मणा सम्बन्धे विधीयमानत्वादस्या अपि कारकविभक्तित्वम्; सा ह्युपपदविभक्तिर्यत्र कारकगन्धोऽपि न स्यात्, यथा शक्तार्थवषडादिभिर्योगे चतुर्थीति, तस्माद्धेतुशब्दाभिधेयं विशिष्टमेव निमित्तं यत् क्रियायाः प्रयोजनं, यदर्थः क्रियारम्भः, न च दात्रार्थो लवनक्रियेति " हेतुकर्तृकरण० " [ २. २. ४४. ] इति तृतीया प्राप्नोतीत्याह– **हेतुतृतीये**ति। **चर्मणी**त्यादि– अत्र द्वीपिवधे चर्म निमित्तं– हेतुः, चर्मार्थी हन्ता हन्ति, तस्य च कर्मणा साधनेन द्वीपिनमित्यनेन युक्तत्वं– योगः सम्बन्धस्तस्य तच्चर्मेति; एवं– कुञ्जरहननस्य दन्तौ, चमरीहननस्य केशाः, पुष्पलकलक्षणवस्तुहननस्य सीमेति। द्विधा गता आपोऽस्मिन्निति " ऋक्-पूः० " [ ७. ३. ७६. ] इत्यति " द्व्यन्तरनवर्ण० " [ ३. २. १०९. ] इति ईयादेशे मत्वर्थीये इनि– द्वीपी, " मध्वादिभ्यः० " [ ७. २. २६. ] इति रे– कुञ्जरः, क्लिशेः " क्लिशेः के च " [ उणा० ३५०. ] इति शे के चादेशे– केशाः, चमेः " ऋच्छि-चटि-वटि० " [ उणा० ३९७. ] इत्यरे जातिङ्यां– चमरी, पुष्पं लातीति " आतो डः० " [ ५. १. ७६. ] इति डे अज्ञाताद्यर्थविवक्षायां च के– पुष्पलकः। कर्मसंयोगाभावे तु तृतीयैवेत्याह– **वेतनेने**त्यादि। **देवस्ये**ति– अस्त्यत्र पादलक्षणेन कर्मणा देवसंयोगो हेतुत्वं तु नास्ति ॥ छ ॥ २. २. १००. ॥

**न्या० स०**—**तद्युक्ते०**। तेन व्याप्येन युज्यते स्म। तथात्र नानादेशजविनेयानुग्रहार्थं युक्तं– **हेतुर्निमित्तं कारणमि**ति बहुतरपर्यायकथनम्, हेतुशब्दोपादानात् त्विह विशिष्टमेव निमित्तमभिप्रेतं, न निमित्तमात्रम्, अन्यथा " तद्युक्ते निमित्ते " इति कृते दात्रेण धान्यं लुनातीति निमित्तमात्रवाचिनो दात्रादपि स्यात् सप्तमी, *न चोपपदविभक्तेः कारकविभक्तिर्बलीयसी* इति न भविष्यतीति वाच्यम्, यतो यथा कर्तृ-करणयोस्तृतीया विहितेति तृतीयायाः कारकविभक्तित्वं तथाऽत्र सप्तम्या अपि ' व्याप्येन युक्तः ' इति कारकश्रुत्या कारकविभक्तित्वम्; सा ह्युपपदविभक्तिर्यत्र कारकगन्धोऽपि नास्ति, यथा शक्तार्थवषडादिभिर्योगे चतुर्थीति, तस्माद्धेतुशब्दाभिधेयं विशिष्टमेव निमित्तं, यदर्थः क्रियारम्भस्तदेवात्र निमित्तमभिप्रेतं न निमित्तमात्रं, तेन दात्रान्न सप्तमी, नहि दात्रार्थो लवनक्रियेति। **द्वीपिनमि**ति– द्विधा गता आपो यत्र " ऋक्पूः० " [ ७. ३. ७६. ] " द्व्यन्तरनवर्ण० " [ ३. २. १०९. ] इतीयादेशे द्वीपमस्यास्ति इन्, अयं नन्तः पुंलिङ्गः, यदा तु द्वीपमाचष्टे णिजि " विपिन० " [ उणा० २८४. ] इति निपात्यते तदाऽकारान्तः " अभिधानद्वीपिनौ " [ ] इति प्रतिपदपाठात् पुंक्लीबः। कुञ्जौ दन्तावस्य स्तो " मध्वादिभ्यो रः " [ ७. २. २६. ] पुष्पं लातीति डेऽज्ञाताद्यर्थविवक्षायां के च– पुष्पलकः। **देवस्य पादावि**ति– अस्त्यत्र पादलक्षणेन कर्मणा देवस्य योगो हेतुत्वं तु नास्तीति ॥ २. २. १००.॥

## अप्रत्यादावसाधुना । २ । २ । १०१ ॥

**त० प्र०**—असाधुशब्देन युक्ताद् गौणान्नाम्नोऽप्रत्यादौ–प्रत्यादिप्रयोगाऽभावे सप्तमी भवति । असाधुर्मैत्रो मातरि । अप्रत्यादाविति किम् ? असाधुर्मैत्रो मातरं प्रति, मातरं परि, मातरमनु, मातरमभि ॥ १०१ ॥

**श० न्या०**—अप्र० । साधुशब्देन सदाचार उच्यते, आचरणं च क्रियाविषयमिति मातृशब्देन तत्स्था परिचर्यादिक्रिया उच्यत इति मातृपरिचरणादिक्रियाणां सम्यगाचरिता मातरि साधुरित्युच्यते, तद्वैपरीत्येन **असाधुर्मातरी**ति, यदि तु साधुशब्दो भक्तिप्रधाने संकल्पविशेषे वर्तते तद्वैपरीत्ये चासाधुशब्दस्तदा मातुरेव विषयभावसंभवात् सिद्धैव सप्तमी नैतदुपयुज्यत इति । यद्येवमसाधुर्मैत्रो मातरीति मातृविषयस्य साधुत्वस्य निषेधाद् यत् प्रथमं मात्रा साधोर्योगादन्तरङ्गत्वादुत्तरेणैव सिद्धा सप्तमी किमनेनेति, नैवम्– पदान्तरसम्बन्धादेकपदवर्तित्वेन नञ्सम्बन्धस्यान्तरङ्गत्वादसमर्थनञ्समासस्य च नियतविषयत्वादर्थान्तराभिधायिना नञ्समासेनैव मातुः सम्बन्धो युक्तोऽब्राह्मणमानयेत्यादिवन्न साधुनेत्युत्तरेण न सिद्ध्यतीति वचनम् ॥ छ ॥ २. २. १०१ ॥

**न्या० स०**—अप्रत्यादा० । इहादिशब्दस्य व्यवस्थावाचित्वात् प्रति परि अनु अभि इत्येत एवाप्रत्यादावित्यनेन ग्राह्याः । ननु साधुशब्देन सदाचार उच्यते, आचरणं च क्रियाविषयमिति मातृशब्देन तत्स्था परिचर्यादिक्रिया उच्यते इति मातृपरिचरणादिक्रियाणां सम्यगाचरिता मातरि साधुरित्युच्यते, तद्वैपरीत्येनासाधुर्मातरीति, ततश्चाऽसाधुर्मैत्रो मातरीति मातृविषयस्य साधुत्वस्य निषेधात् प्रथमं मात्रा साधोर्योगादन्तरङ्गत्वादुत्तरेणैव सिद्धा सप्तमी, किमनेनेति, नैवम्– पदान्तरसंबन्धादेकपदवर्तित्वेन नञ्संबन्धस्यान्तरङ्गत्वादसमर्थनञ्समासस्य च नियतविषयत्वादर्थान्तराभिधायिना नञ्समासेनैव मातुः संबन्धो युक्तोऽब्राह्मणमानयेत्यादिवदिति "साधुना" [ २. २. १०२. ] इत्युत्तरेण न सिध्यतीति वचनम् । नन्वभियोगे "लक्षणवीप्स्य०" [ २. २. ३६. ] इत्यनेन, प्रत्यादियोगे तु "भागिनि०" [ २. २. ३७. ] इत्यनेन च द्वितीयाया विशेषविधानात् सप्तमी न भविष्यति, किमप्रत्यादावित्यनेन, सत्यम्– असाधुशब्दाभावेऽपि द्वितीया चरितार्था इति प्रत्यादिप्रयोगे सप्तमी स्यात् ॥ २. २. १०१. ॥

## साधुना । २ । २ । १०२ ॥

**त० प्र०**—साधुशब्देन युक्ताद् गौणान्नाम्नोऽप्रत्यादौ **सप्तमी भवति** । साधुर्मैत्रो राजनि, साधुर्मातरि । अप्रत्यादावित्येव साधुर्मैत्रो राजानं प्रति, राजानं परि, राजानमनु, राजानमभि । उत्तरत्राऽर्चायां विधानात्, अनर्चायां तु व्यावृत्तेस्तत्त्वाख्याने विधिरयम् । कथं तर्हि साधुर्भृत्यो राज्ञ इति ? भृत्यापेक्षाऽत्र षष्ठी न साध्वपेक्षा, साध्वपेक्षायां तु सप्तम्येव भवति ॥ १०२ ॥

**श० न्या०**—साधु० । सामान्येन विधानेऽप्युपपत्त्या विषयविशेषं दर्शयति– **उत्तरत्रे**त्यादि– पूर्वे त्वर्चाग्रहणमुत्तरत्र निपुणविशेषणार्थमेव प्रतियन्तः सर्वत्र साधुशब्दयोगे सप्तमीं प्रतियन्ति, यदुत्पलः– 'एवं चार्चाग्रहणं निपुणविशेषणार्थं संपद्यते' इति; उद्योतकरोऽपि– 'निपुणविशेषणार्थतायामर्थग्रहणस्य चरितार्थत्वात्' इत्यादि । **कथमि**ति– 'साधुर्भृत्यो राज्ञः' इत्यत्रापि तत्त्वाख्यानस्य सद्भावात् साधुयोगे सप्तमी प्राप्नोतीत्याशङ्कार्थः । परिहरति– **भृत्यापेक्षे**त्यादि– अत्र पराभिप्राये[ण] सप्तमीमाशङ्क्य तत्परिहारार्थं स्वगुरुमतमुपदर्शयन्नुद्योतकर आह– यथात्र स भवानस्मदुपाध्यायो व्याकरणरत्नाकरपूर्णचन्द्रमाः कैय्यटाख्यः शिष्यसार्थमिदमवोचत्– भृत्याऽपेक्षाऽत्र षष्ठी कृता न साध्वपेक्षया, अयमर्थः– योऽयं भृत्यो राज्ञः स साधुर्गुणवानिति, यदा तु साधुनैवाभिमुख्येन सम्बन्धस्तदा बाढं सप्तम्यैव भवितव्यम्, यथा राजनि साधुरिति ॥ छ ॥ २. २. १०२. ॥

**न्या० स०**—साधुना । **उत्तरत्रे**ति– पूर्वे त्वर्चाग्रहणमुत्तरत्र निपुणविशेषणार्थमेव प्रतियन्तः सर्वत्र साधुशब्दयोगे सप्तमीं प्रतियन्ति, यदुत्पलः– 'एवं चार्चाग्रहणं निपुणविशेषणार्थं संपद्यते' इति ॥ २. २. १०२. ॥

## निपुणेन चाऽर्चायाम् । २ । २ । १०३ ॥

**त० प्र०**—निपुणशब्देन साधुशब्देन च युक्ताद् गौणान्नाम्नोऽप्रत्यादौ सप्तमी भवति, अर्चायां गम्यमानायाम्, षष्ठ्यपवादः । मातरि निपुणः, पितरि साधुः । अर्चायामिति किम् ? निपुणो मैत्रो मातुः, साधुर्मैत्रः पितुः, मातैवैनं निपुणं मन्यते, पितैव साधुमित्यनर्चायां न भवति । अप्रत्यादावित्येव– निपुणो मैत्रो मातरं प्रति, मातरं परि, मातरमनु, मातरमभि ॥ १०३ ॥

**श० न्या०**—निपु० । **मातरि निपुण** इति– अत्र मातरि सुष्ठु वर्तते इति मैत्रादेः प्रशंसा गम्यत इति तद्योगे मातृशब्दात् सप्तमीति । एवं– **पितरि साधुरि**त्यत्रापि ॥ छ ॥ २. २. १०३. ॥

**न्या० स०**—निपुणेन० । अर्चायामिति– "अर्चिण् अर्चने" "भीषिभूषि०" [ ५. ३. १०९. ] इत्यङ् बहुवचनात् ।

**मातरि निपुणः** अत्र मातरि सुष्ठु वर्तत इति मैत्रादेः प्रशंसा गम्यत इति ॥ २. २. १०३. ॥

## स्वेशेऽधिना । २ । २ । १०४ ॥

**त० प्र०—स्वे- ईशितव्ये, ईशे च स्वामिनि वर्तमानादधिना युक्ताद् गौणान्नाम्नः सप्तमी भवति, अधिः स्वस्वामिसंबन्धं द्योतयति, तत्र स्व-स्वामिवाचिनोर्यद् गौणत्वेन विवक्ष्यते ततो भवति । स्वे- अधि मगधेषु श्रेणिकः; अध्यवन्तिषु प्रद्योतः; ईशे- अधि श्रेणिके मगधाः, अधि प्रद्योतेऽवन्तयः; षष्ठीबाधनार्थो योगः ॥ १०४ ॥**

**श० न्या०—स्वेशे०** । अधेरुपरिभावस्वस्वामिसम्बन्धयोर्द्योतकत्वेऽपि ' स्वेशे ' इति वचनादत्र स्व-स्वामिसम्बन्धद्योतीत्याह- **अधिरित्यादि** । सम्बन्धस्योभयनिष्ठत्वे युगपदुभयत्र सप्तमी स्यादित्याशङ्कायामाह- **तत्र स्वस्वामी**त्यादि- सर्वत्र सम्बन्धे किञ्चिदनूद्यते किञ्चिदाख्यायते, यत् प्रसिद्धं तदनूद्यते यदप्रसिद्धं तदाख्यायते- विधीयते ज्ञाप्यते, तत्र यद् विधीयते तत् प्रधानमितरदप्रधानम्, तत्र यदप्रधानतया विवक्ष्यते तत्र सप्तमी, नेतरत्रेत्युभयत्र पर्यायेण सप्तमी भवति, न यौगपद्येनेति । **अधि मगधेषु श्रेणिक** इति- मगधानामीशः श्रेणिक इत्यर्थः, एवम्- **अध्यवन्तिषु प्रद्योत** इति । **अधि श्रेणिके मगधाः** श्रेणिकस्य ईशितव्या मगधा इत्यर्थः, एवम्- **अधि प्रद्योतेऽवन्तयः** । नन्वत्र क्रमेण परस्परमाधाराधेयभावविवक्षया पर्यायेणाप्रधानात् " सप्तम्यधिकरणे " [ २. २. ९५. ] इत्येव सप्तमी भविष्यति किमनेनेति, उच्यते- सम्बन्धविवक्षया षष्ठ्यपि स्यादित्याह- **षष्ठीबाधनार्थो योग** इति । ननु " विभक्तिसमीप० " [ ३. १. ३९. ] इत्यादिना विभक्त्यर्थे यदव्ययं तद् विभक्त्यन्तेन सहाव्ययीभावो [ सह समस्यते, स चाव्ययीभावो ] भवति, यथा- ' अधिस्त्रि ' इति, एवमत्रापि कस्मान्न भवति ?, तथा सति नित्यः समास इति वाक्यं निवर्तेत, अथैवं सति वचनमिदमनर्थकं स्यात्, न च " सप्तम्या वा " [ ३. २. ४. ] इत्यभावपक्षे सप्तमीश्रवणं फलमिति वाच्यम् वर्तिपदसप्तमीलोपात्, समाससप्तम्या हि स विकल्पः; किञ्च षष्ठीबाधनार्थोऽयं योग इत्युक्तत्वात्, न चाव्ययीभावे षष्ठीभावाभावयोर्विशेषोऽस्ति, न चात्राधिर्विभक्त्यर्थेऽस्ति, क्व तर्हि ? स्वस्वामिभावे, तस्य च विषयभावं सप्तमी द्योतयति- एतद्विषयमस्य स्वत्वं स्वामित्वं चेति । ' अधिस्त्रि ' इत्यादौ त्वाधारः सप्तम्यर्थ एवाधेरर्थ इति, यदा तु सप्तम्यर्थ एवाधिस्तदात्राप्यव्ययीभाव एव 'अध्यवन्ति प्रद्योतः' इति ॥छ॥ २. २. १०४. ॥

**न्या० स०—स्वेशे०** । **ईशितव्य** इति- यथेष्टं विनियोज्ये । अधेरुपरिभाव-स्वस्वामिसंबन्धयोर्द्योतकत्वेऽपि ' स्वेशे ' इति वचनादत्र स्वस्वामिसंबन्धद्योती गृह्यते । संबन्धस्योभयनिष्ठत्वे युगपदुभयत्र सप्तमी स्यादित्याह- **यद्गौणत्वेनेति** । **अधि मगधेष्वित्यादिषु** " विभक्तिसमीप० " [ ३. १. ३९. ] इति नाव्ययीभावो विभक्त्यर्थत्वाभावात्, यतो विभक्तिर्विभक्त्यर्थः कारकम्, अत्र च षष्ठ्यपवादः सप्तमी इति न विभक्त्यर्थत्वम्; यदि च समासः स्यात् तदा वाक्यं निवर्तेत नित्यसमासत्वात् ' अधिस्त्रि ' इत्यादिवत्; यदा तु सप्तम्यर्थ एवाधिशब्दस्तदात्राप्यव्ययीभाव एव- अध्यवन्ति प्रद्योत इति । नन्वत्र क्रमेण परस्परमाधाराधेयभावविवक्षायां पर्यायेण " सप्तम्यधिकरणे " [ २. २. ९५ ] एव सप्तमी भविष्यति, किमनेनेति, सत्यम्- संबन्धविवक्षया षष्ठ्यपि स्यादित्याह- **षष्ठीबाधनार्थो योग** इति ॥ २. २. १०४. ॥

## उपेनाऽधिकिनि । २ । २ । १०५ ॥

**त० प्र०—उपेन युक्तादधिकिनि वर्तमानाद् गौणान्नाम्नः सप्तमी भवति, उपेत्यधिकाऽधिकिसंबन्धं द्योतयति । उप खार्यां द्रोणः, द्रोणोऽधिकः खार्या इत्यर्थः । उप निष्के कार्षापणः, कार्षापणोऽधिको निष्कस्येत्यर्थः । उपेनेति किम् ? खार्या उपरि द्रोणः । अधिकिनीति किम् ? अधिके मा भूत्, तेनोप द्रोणे खारीति न भवति ॥ १०५ ॥**

**श० न्या०—उपे०** । तत् कर्म च कर्ता चोभयमपि भवति, तत्रेहाधिकमिति कर्ताऽभिधीयते- यदध्यारोहति, ततः " अतोऽनेकस्वरात् " [ ७. २. ६. ] इतीनि अधिकीति कर्माभिधीयते- यदध्यारुह्यते, तयोर्यः सम्बन्धोऽध्यारोहणक्रियाजनितस्तमुपशब्दो द्योतयतीत्याह- **उपेने**त्यादि । अधिकसम्बन्धं च द्योतयितुं **अधिकिनी**ति मत्वर्थीयेन निर्देशः । **द्रोणोऽधिकः खार्या इत्यर्थ** इति- **उप खार्यां द्रोण** इत्यत्र खारी विशेषणं द्रोणो विशेष्य इति तथैवार्थाभिधानमिदमित्यर्थः । **अधिके मा भूदि**ति- अध्यारूढवति मा भूदित्यर्थः, तेनोप द्रोणे खारीति न भवतीति । अत्राप्याधारविवक्षायां सप्तमी सिद्धा, अधिकमध्यारूढं हि तत्रोपश्लिष्टं भवति, पूर्ववद् विभक्त्यन्तरबाधनार्थं वचनमिति ॥ छ ॥ २. २. १०५. ॥

**न्या० स०—उपेना०** । अत्रापि यदधिकं तदधिक्यारूढमित्याधारविवक्षायां सप्तमी सिद्धैव, परं पूर्ववद् विभक्त्यन्तरबाधनार्थम् । **अधिको निष्कस्येति**- साधुर्भृत्यो राज्ञ इतिवन्निष्कशब्दस्याधिकशब्देन सह संबन्धाभावात् " अधिकेन भूयसस्ते " [ २. २. १११. ] इत्यनेन निष्कशब्दान्न पञ्चमी ॥ २. २. १०५. ॥

## यद्भावो भावलक्षणम् । २ । २ । १०६ ॥

**त० प्र०**—भावः– क्रिया, प्रसिद्धं लक्षणमप्रसिद्धं लक्ष्यम्; यस्य संबन्धिना भावेन– क्रियया भावोऽपरक्रिया लक्ष्यते, तस्मिन् वर्तमानाद् गौणान्नाम्नः सप्तमी भवति । गोषु दुह्यमानासु गतः, दुग्धास्वागतः; अत्र कालतः प्रसिद्धेन गवां दोहेन भावेनाऽन्यस्य गमनमप्रसिद्धं लक्ष्यते; एवं– देवाऽर्चनायां क्रियमाणायां गतः कृतायामागतः । गम्यमानेनाऽपि भावेन भावलक्षणे भवति– आम्रेषु कलायमात्रेषु गतः, पक्वेषु आगतः; अत्र जातेष्विति गम्यते । गम्यमानमपि हि विभक्तेर्निमित्तं भवति, यथा– वृक्षे शाखा, ग्रामे चैत्रः; अत्र भवति, वसति चेत्याधारनिमित्तं गम्यते । यत्र क्रियाऽर्हाणां कारकत्वं तद्विपर्ययो वा, यथा– ऋद्धेषु भुञ्जानेषु दरिद्रा आसते, ऋद्धेष्वासीनेषु दरिद्रा भुञ्जते, यत्र च क्रियानर्हाणामकारकत्वं तद्विपर्ययो वा, यथा– दरिद्रेष्वासीनेषु ऋद्धा भुञ्जते, दरिद्रेषु भुञ्जानेषु ऋद्धा आसते; तत्राऽपि भावो भावस्य लक्षणं भवतीत्यनेनैव सप्तमी । यद्ग्रहणं प्रकृत्यर्थम् । भाव इति किम्? यो जटाभिस्तस्य भोजनम् । भावलक्षणमिति किम्? यस्य भोजनं स मैत्रः । तृतीयाऽपवादो योगः ॥ १०६ ॥

---

**श० न्या०**—यद्भा० । यद्यपि भाव-क्रिययोरन्यत्र परिस्पन्दमानसाधनसाध्यताऽपरिस्पन्दमानसाधनसाध्यता च [इति] विशेषः प्रतिपादितस्तथापीह यत् तत्सम्बद्धं सामान्यमुभयरूपं तदाश्रित्य तयोरभेदेनेहाश्रयणमिति दर्शयितुमाह– **भावः क्रिये**ति– उभयत्रापि भावशब्दः क्रियावचन इत्यर्थः, तत्र **यद्भाव** इति भावशब्देन लक्षणभावोऽभिधीयते, **भावलक्षणमि**ति लक्ष्यभावः, लक्षणस्य लक्ष्यापेक्षितत्वात् । अविज्ञातस्वरूपस्य च वस्तुनो हानमुपादानं च कर्तुं न शक्यत इति तयोः स्वरूपमाह– **प्रसिद्धमि**त्यादि– प्रकर्षेण ज्ञाता या क्रिया सैवेतरस्या अपरिच्छिन्नरूपायाः क्रियाया लक्षणमन्यां प्रति लक्षणत्वानुपपत्तेः । **गोषु दुह्यमानासु गतः** दुहेः कर्मण्यानश् " क्यः शिति " [ ३. ४. ७०. ] इति क्यः, " अतो म आने " [ ४. ४. ११४. ] इति मागमः, ग्रामं गच्छति स्मेति गत्यर्थत्वात् कर्तरि क्तः । **दुग्धास्वि**त्यत्र गोष्विति सम्बन्धनीयम्, अत्र दोहनक्रिया विशिष्टकालसमाश्रयणेन सर्वलोकैरनुष्ठीयमानतया प्रसिद्धत्वान्मैत्रादिगमनक्रियायाः कालतोऽप्रसिद्धाया लक्षणमित्याह– **अत्र कालत** इत्यादि– लक्षणवतश्च गोः सप्तमी । नन्वाम्रेषु कलायमात्रेषु गत इति लक्षणभूतक्रियाया अभावात् कथं तद्वतः सप्तमीत्याह– **गम्यमानेनापी**त्यादि । **अत्र जातेष्विति गम्यत** इति– जननलक्षणगम्यमाना क्रिया गमनस्य लक्षणमिति न दोषः । गम्यमानं विभक्तिनिमित्तं नेति कश्चिन्मन्यत इति तन्निमित्तभावं दृष्टान्तोपादानद्वारेण द्रढयति– **गम्यमानमपि ही**त्यादिना– अयमर्थः– **वृक्षे शाखे**त्यादौ गम्यमानक्रियैव कारकविभक्तेर्निमित्तं क्रियाप्रतिपत्तिमन्तरेण कारकविभक्तेरप्रतिपत्तेरिति । अथ **ऋद्धेषु भुञ्जानेषु दरिद्रा आसत** इत्यादौ यत्र क्रियार्हाणां कारकत्वं क्रियानर्हाणामकारकत्वं तद्विपर्यासो वा गम्यते तत्र कथमियं सप्तमी? अत्र ' ऋद्धा भुञ्जते, दरिद्रा आसते ' इत्येतावन्मात्रप्रतीतेर्भावयोर्लक्ष्यलक्षणभावाभावादित्याशङ्क्याह– **यत्र क्रियार्हाणामि**त्यादि– अनुष्ठानरूपमौचित्येनार्हन्तीति क्रियार्हाः । **तद्विपर्यय** इति– तच्छब्देन कारकत्वं परामृश्यते, क्रियार्हाणामपि कुतश्चिन्निमित्तात् कारकत्वविपर्ययो वेत्यर्थः, ऋध्नुवन्तीति– ऋद्धाः, भुजेरानशि– भुञ्जानाः, दरिद्रतीत्यचि– दरिद्राः, अत्र ऋद्धा भुजिक्रियामर्हन्तीति ते भुञ्जत इति क्रियार्हाणां कारकत्वम्, **ऋद्धेष्वासीनेषु दरिद्रा भुञ्जत** इति– ऋद्धानां भोजनक्रियार्हाणामपि भुक्तत्वाद् न ते पुनस्तां प्रति कर्तृत्वं भजन्त इत्यकारकत्वम्, **दरिद्रेष्वासीनेषु ऋद्धा भुञ्जत** इति दरिद्रा न भोजनार्हा इति ते न भुञ्जत इति क्रियानर्हाणामकारकत्वम्, तद्विपर्यासे च ' **दरिद्रेषु भुञ्जानेषु ऋद्धा आसते** ' इत्युदाहरणं द्रष्टव्यम्, अत्राप्येवं लक्ष्यलक्षणभावस्य विवक्षितत्वादनेनैव सप्तमी । **यद्ग्रहणं प्रकृत्यर्थमि**ति– यस्य भावो [ भावान्तरस्य ] लक्षणं ततो भाववतः सप्तमीष्यते, यद्ग्रहणमन्तरेण चैतन्न लभ्यते, यद्ग्रहणे तु यद्भावो भावलक्षणं तस्मिन्नित्याक्षेपाल्लभ्यत इति प्रकृत्यर्थं यद्ग्रहणम् । **यो जटाभिस्तस्य भोजनमि**त्यत्र जटा भोजनस्य भावस्य लक्षणं न तु भाव इति तद्वतस्तस्येत्यतः सप्तमी न भवति । **यस्य भोजनं स मैत्रः** अत्र भोजनेन भावेन मैत्रो द्रव्यं लक्ष्यते न भाव इति यस्येत्यतो भाववतः सप्तमी न भवति । **तृतीयापवादो योग** इति– असति ह्यस्मिन् सूत्रे "हेतुकर्तृकरणेत्थम्भूतलक्षणे" [ २. २. ४४. ] इति तृतीया प्राप्ताऽतस्तदपवादोऽयमित्यर्थः ॥ छ ॥ २. २. १०६. ॥

---

**न्या० स०**—यद्भावो० । **कलायमात्रेष्विति**– कलायो मालवकप्रसिद्धोऽधमधान्यविशेषो मानमेषां स्यात् " मात्रट् " [ ७. १. १४५. ] इत्यनेन मात्रट् । **यत्रेति**– अयमर्थः– अत्र ऋद्धानां दरिद्राणां च भुजिक्रियामासनक्रियां च प्रति यथासंख्यं कारकत्वं, कोऽर्थः? तां प्रति कर्तृत्वं, तद्विपर्ययोऽकारकत्वं वा, तत्रापि भावो भावस्य लक्षणमित्यनेनैव सप्तमी सिद्धेति, **यदन्यैः**– " क्रियार्हाणां कारकत्वं तद्विपर्ययो वा " " यत्र क्रियानर्हाणामकारकत्वं तद्विपर्ययो वा " इति सप्तमीविधायकं सूत्रद्वयं कृतं तदारम्भ-

णीयम्, यस्य भावो भावस्य लक्षणं ततो भाववतः सप्तमीष्यते, यद्ग्रहणमन्तरेण चैतन्न लभ्यते इत्याह– **यद्ग्रहणं प्रकृत्यर्थमिति** । यो जटाभिरुपलक्षितस्तस्य भोजनमित्यत्र न भावो भावस्य लक्षणमपि तु द्रव्यम् । **तृतीयापवाद** इति– इत्थंभूतलक्षणेऽर्थे ॥ २. २. १०६.॥

## गते गम्येऽध्वनोऽन्तेनैकार्थ्यं वा । २ । २ । १०७ ॥

**त० प्र०**—कुतश्चिदवधेर्विवक्षितस्याऽध्वनोऽवसानमन्तः, यद्भावो भावलक्षणं तस्याऽध्वनोऽध्ववाचिशब्दस्याऽध्वन एवाऽन्तेनाऽन्तवाचिना सहैकार्थ्यं सामानाधिकरण्यं वा भवति, तद्विभक्तिस्तस्माद् भवतीत्यर्थः; गते गम्ये– गतशब्देऽप्रयुज्यमाने इत्यर्थः । गवीधुमतः सांकाश्यं चत्वारि योजनानि, चतुर्षु योजनेषु गतेषु भवतीत्यर्थः; एवं लोकमध्याल्लोकान्तमुपर्यधश्च सप्त रज्जूनामनन्ति, पक्षे– पूर्वेण सप्तमी; गवीधुमतः सांकाश्यं चतुर्षु योजनेषु, गतेष्विति गम्यते । गत इति किम् ? दग्धेषु लुप्तेष्विति वा प्रतीतौ मा भूत् । गम्य इति किम् ? गतशब्दप्रयोगे मा भूत्– गवीधुमतः सांकाश्यं चतुर्षु योजनेषु गतेषु भवति, अत्रैकार्थ्यं न भवति; सप्तमी तु पूर्वेण नित्यं भवति । अध्वन इति किम् ? कार्तिक्या आग्रहायणी मासे, अत्राऽप्यैकार्थ्याभावे पूर्वेण नित्यं सप्तमी । अन्तेनेति किम् ? अद्य नश्चतुर्षु गव्यूतेषु भोजनम्, भोजनं हि भोक्तृधर्मो नाऽध्वनोऽन्त इति पूर्ववत् सप्तम्येव । नन्वन्तेन सहाऽध्वनोऽभेदोपचारात् सिद्धमेवैकार्थ्यं किमनेन ? सत्यम्– कालेऽप्येवं मा भूदिति वचनम् ॥ १०७ ॥

**श० न्या०**—गते० । **कुतश्चिदि**ति– गवीधुमदादेः । **अवधेरि**ति– व्यवस्थायाः, **विवक्षितस्ये**ति– इयत्तापरिच्छेदायोपात्तस्येत्यर्थः, यदित्थंभूत एवाध्वा अन्तेनैकार्थ्यमनुभवति । सूत्रार्थमाह– **तस्ये**ति– यच्छब्दोद्दिष्टः प्रतिनिर्दिश्यते । **ऐकार्थ्यमि**ति– विधेयकथनम् । एकोऽर्थो द्रव्यमनेकभेदाधिष्ठानमस्य [स] एकार्थस्तद्भाव ऐकार्थ्यं, तदाह– **सामानाधिकरण्यमि**ति । एवं चेदं जातमित्याह– **तद्विभक्तिरि**त्यादि । [ **गवीधुमतः सांकाश्यं चत्वारि योजनानी**ति– ] गवीधुमन्नाम नगरं, तत आरभ्य सांकाश्यं चत्वारि योजनानि, चतुर्भिर्योजनैः प्राप्यत इत्यर्थः, गवीधुमच्छब्दोऽव्युत्पन्नः, संकाशशब्दात् सुपथ्यादित्वाच्चातुरर्थिको ञ्यः– सांकाश्यं, युजेः करणेऽधिकरणे वाऽनटि– योजनम् । '**गतेषु अतिक्रान्तेषु भवतीत्यर्थः**' इत्यनेन लक्षणमुदाहरणे योजयति । एवं **लोकमध्यादि**त्यादावपि सप्तसु रज्जुषु गतासु लोकान्तमामनन्तीति पक्षे सप्तमी द्रष्टव्या । **गम्यत** इति– न प्रयुज्यत इत्यर्थः । **दग्धेषु लुप्तेष्विति वे**ति भावान्तरप्रदर्शनेन गतशब्दाभावमाह । **प्रतीतावि**ति– प्रकरणादेरिति शेषः । **गवीधुमतः सांकाश्यं चतुर्षु योजनेषु गतेषु भवती**ति– अत्र गतेष्विति प्रयुज्यमानं न गम्यम्, गम्यं हि प्रतीयमानार्थमप्रयुज्यमानमुच्यत इति गम्य इति वचनादिह न भवति । **पूर्वेणे**ति– "यद्भावो भावलक्षणम्" [ २. २. १०६. ] इत्यनेनेत्यर्थः । **कार्तिक्या आग्रहायणी मास** इति– अत्र मासे गत इति गतं गम्यमस्ति, परं मासः कालो नाध्वेति तस्यान्तेनाऽऽग्रहायण्या ऐकार्थ्यं न भवति । **अद्य नश्चतुर्षु गव्यूतेषु भोजनमि**ति– अत्र भोजनं क्रिया भोक्तृधर्मो नाध्वान्त इति नैकार्थ्यं, तदभावे "यद्भावो भावलक्षणम्" [ २. २. १०६. ] इति सप्तम्येव भवतीत्याह– **भोजनं ही**त्यादि । **नन्वन्तेने**ति– अध्वा-ऽन्तयोरभेदोपचारादेवैकार्थ्यं सिद्धं, किं तत्र वचनेनेत्याक्षेपार्थः । परिहरति– **सत्यमि**त्यादिना, अभेदोपचारे हि कालेऽपि स्यात्, अध्वनो अन्यत्र काले एवमुपचारो मा भूदध्वन्येव यथा स्यादित्येवमर्थमिदं वचनमित्यर्थः ॥ छ ॥ २. २. १०७. ॥

**न्या० स०**—गते गम्ये० । कुतश्चिदवधेः गवीधुमत इत्यादिलक्षणाद्, **विवक्षितस्य** इयत्तापरिच्छेदायोपात्तस्याध्वनोऽवसानं– सांकाश्याद्यन्तः । **यद्भाव** इति– यस्याध्वनश्चतुर्योजनरूपस्य भावेन गमनरूपेणाऽपरो भावः सांकाश्यभवनरूपो लक्ष्यते तस्येत्यर्थः । **ऐकार्थ्यमि**ति– एकोऽर्थो द्रव्यमनेकभेदाऽधिष्ठानं यस्य स एकार्थस्तस्य भाव ऐकार्थ्यम् । **तद्विभक्तिरि**ति– अन्यथैकविभक्तिमन्तरेण सामानाधिकरण्यं न घटेत । गवामीः– श्रीः तां दधाति "पृकाहृषि०" [ उणा० ७२९. ] इति किदुः, सोऽत्राऽस्ति मतुः, अव्युत्पन्नो वा गवीधुमच्छब्दः । **अद्य नश्चतुर्षु गव्यूतेष्वि**ति– गव्यूतिरत्रास्ति विषयतयाऽवयवितया वा "अभ्रादिभ्यः" [ ७. २. ४६. ] अः, गव्यूतं क्रोश एकः । **नन्वन्तेने**ति– चतुर्षु योजनेषु यत् सांकाश्यं तच्चत्वारि योजनानि ॥ २. २. १०७. ॥

## षष्ठी वाऽनादरे । २ । २ । १०८ ॥

**त० प्र०**—यद्भावो भावलक्षणं तस्मिन् भाववति वर्तमानाद् गौणान्नाम्नोऽनादरे गम्यमाने षष्ठी वा भवति, पक्षे पूर्वेण सप्तमी । रुदतो लोकस्य प्राव्राजीत्, रुदति लोके प्राव्राजीत्; क्रोशतो बन्धुवर्गस्य प्राव्राजीत्, क्रोशति बन्धुवर्गे प्राव्राजीत्; रुदन्तं क्रोशन्तं वाऽनादृत्य प्राव्राजीदित्यर्थः ॥ १०८ ॥

**श० न्या०**—षष्ठी० । वाशब्दः पक्षे सप्तमीप्राप्त्यर्थ इत्याह– **पक्षे पूर्वेण सप्तमी**ति । वाशब्दमन्तरेणानादरे षष्ठ्या सप्तमी अपवादतया बाध्येत । ननु "यद्भाव०" [ २. २. १०६.]

इति भावलक्षणे सामान्ये सप्तमी, तत्रानादर इति विशेषे षष्ठी, सप्तम्यामनादरप्रतीतिरर्थप्रकरणादेरित्यर्थभेदाच्च बाध्यबाधकभावोऽस्तीति किं पक्षे सप्तम्यर्थेन वाशब्देनेति, उच्यते-यथा अनादरादन्यत्र साम्यतः सप्तम्यस्ति, एवं " शेषे " [ २.२.८१. ] इत्यनेन षष्ठ्यपि, तत्रोभयत्रापि प्रव्रजन् रुदतापि लोकेन निवर्त्यमानस्तद्रोदनमनादृत्य प्राव्राजीदित्यनादरः प्रकरणादेः प्रतीयत इति समानेऽर्थे षष्ठी सप्तमीं बाधेतेति पक्षे तदर्थं वावचनमिति । **प्राव्राजीदि**ति- " व्रज गतौ " इत्यतोऽद्यतन्या दिः, " सिजद्यतन्याम् " [ ३. ४. ५३. ] इति सिज्, " सः सिजस्तेः० " [ ४. ३. ६५. ] इतीत्, " स्ताद्यशितः० " [ ४. ४. ३२. ] इति इट्, " वद-व्रज-लृ:० " [ ४. ३. ४८. ] इति वृद्धिः, " इट ईति " [ ४. ३. ७१. ] इति सिचो लुक्, " अड् धातो० " [ ४. ४. २९. ] इत्यडागमः ॥ छ ॥ २. २. १०८. ॥

**न्या० स०**—षष्ठी वा० । पक्षे **पूर्वेण सप्तमी**ति- वाशब्दमन्तरेणानादरे षष्ठ्याऽपवादतया सप्तमी बाध्येत । ननु " यद्भावः० " [ २. २. १०६. ] इति भावलक्षणे सामान्ये सप्तमी, तत्रानादर इति विशेषे षष्ठी, सप्तम्यामनादरप्रतीतिरर्थप्रकरणादेरित्यर्थभेदाच्च बाध्य-बाधकभावोऽस्तीति किं पक्षे सप्तम्यर्थेन वाशब्देनेति, उच्यते-यथाऽनादरादन्यत्र साम्यतः सप्तम्यस्ति, एवं " शेषे " [ २. २. ८१. ] इत्यनेन षष्ठ्यपि, तत्रोभयत्रापि प्रव्रजन् रुदतापि लोकेन निवर्त्यमानस्तद्रोदनमनादृत्य प्राव्राजीदित्यनादरः प्रकरणादेः प्रतीयत इति सामान्येऽर्थे षष्ठी सप्तमीं बाधेतेति पक्षे तदर्थं वावचनम् ॥ २. २. १०८. ॥

## सप्तमी चाऽविभागे निर्धारणे ।२।२।१०९॥

**त० प्र०**—जाति-गुण-क्रियादिभिः समुदायादेकदेशस्य **बुद्ध्या पृथक्करणं निर्धारणम्, तस्मिन् गम्यमाने गौणान्नाम्नः षष्ठी सप्तमी च भवति; अविभागे- निर्धार्यमाणस्यैकदेशस्य समुदायेन सह कथञ्चिदैक्ये शब्दाद् गम्यमाने । क्षत्रियः पुरुषाणां पुरुषेषु वा शूरतमः, शालयः शूकधान्यानां शूकधान्येषु पथ्यतमाः, कृष्णा गवां गोषु वा संपन्नक्षीरतमा, धावन्तो गच्छतां गच्छत्सु वा शीघ्रतमाः, युधिष्ठिरः श्रेष्ठतमः कुरूणां कुरुषु वा । अविभाग इति किम् ? माथुराः पाटलिपुत्रकेभ्य आढ्यतराः, पञ्चालाः कुरुभ्यः संपन्नतराः, मैत्रश्चैत्रात् पटुः, अयमस्मादधिकः; अत्र हि शब्दात् भेद एव प्रतीयते, न तु कथञ्चिदैक्यमिति न भवति । पञ्चमीबाधनार्थं वचनम्, अन्ये तु पञ्चमीमपीच्छन्ति- गोभ्यः कृष्णा संपन्नक्षीरतमा ॥ १०९ ॥**

**श० न्या०—सप्त०** । निर्पूर्वाद् धारयतेर्भावेऽनटि- निर्द्धारणम्, तच्च समुदायभावापन्नस्यैकदेशस्य केनचिद् धर्मेण ततः पृथक्करणम्, धर्मश्च जात्यादिरित्याह- **जाति- गुणे**त्यादि । विपूर्वाद् भजेर्भावे घञि- विभागो भेदः, तत्प्रतिषेधोऽविभागः, केनचिद् धर्मेण ऐक्यम्, तच्च सामर्थ्यान्निर्धार्यमाणस्य समुदायेन सहेत्याह- **निर्धार्यमाणस्ये**त्यादि । **क्षत्रियः पुरुषाणां पुरुषेषु वे**त्यादि- अत्र क्षत्रियत्व-शालित्वजात्या कृष्णत्वगुणेन धावनक्रियया, आदिशब्दाद् युधिष्ठिरव्यक्त्या च निर्धारणं द्रष्टव्यम् । ननु निर्धार्यमाणस्यावयवस्य समुदायाभ्यन्तरत्वात् समुदायस्य चाधिकरणविवक्षायां वृक्षे शाखेतिवत् सप्तम्याः सिद्धत्वात्, सम्बन्धविवक्षायां त्ववयवस्य वृक्षस्य शाखेतिवत् षष्ठ्या अपि सिद्धत्वात् किमनेनेति, नैवम्- विभागे प्रतिषेधार्थत्वादस्येत्याह- **अविभाग इति किमि**ति- अयमभिप्रायः- सर्वत्रैव निर्धारणस्य विभागरूपत्वेनाविभागपूर्वकत्वात् सूत्रस्य निर्विषयत्वादविभागग्रहणस्य सामर्थ्यादिदवधारणमाश्रीयते- अविभागो यत्र शब्दतः प्रतीयते तत्र निर्धारणे सप्तमी-षष्ठ्याविति, गोषु कृष्णत्वेन निर्धार्यमाणस्यावयवस्य गोत्वेनान्तर्भूतत्वाद् गोषु कृष्णेत्यादावेव सप्तमी षष्ठी च युज्यते, इह तु माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इति न केनचित् प्रकारेण माथुराणां पाटलिपुत्रकेष्वविभागः, नहि पाटलिपुत्रका माथुरा नाप्याढ्यतरा इति वाक्याद् भेद एव प्रतीयत इत्याह- **अत्र ही**त्यादि । गवां कृष्णेत्यादौ तु विभज्यमाना गौर्गोत्वेन समुदायादविभक्ता कार्ष्ण्येन तु विभक्ता, तस्माद् विभज्यमानस्यैकदेशस्य विभागाश्रयस्य च समुदायस्य यत्र विभागाविभागौ स एवानयोर्विषयः, यत्र तु तयोर्विभाग एव न कथञ्चिदैक्यं तत्र पञ्चम्येव भवति, अत एवाह- **पञ्चमीबाधनार्थमि**ति- निर्धारणस्य विभागरूपत्वाद् यस्य हि यतो विभागस्तस्य तदपेक्षयाऽवधिरूपत्वात् अपादानत्वात् " पञ्चम्यपादाने " [ २. २. ६९. ] इति पञ्चम्यां प्राप्तायां यत्राविभागोऽपि तत्र तदपवादो योग इत्यर्थः । यद्येवं सर्वथा समुदायभावानापन्ने निर्धारणमेव न युज्यते समुदायाद्धि एकदेशस्य पृथक्करणं निर्धारणमित्युक्तत्वात्, सत्यमेतत्- बुद्ध्या हि केनचिद् धर्मेण कल्पितेन माथुराः पाटलिपुत्रकाश्च समुदायभावमापद्यन्त इति सिद्ध्यति निर्धारणमित्यदोषः । **अन्ये**ति- अभयनन्दी, यदसावाह- प्रपञ्चार्थमिदं, समुदायेऽवयवोऽन्तर्भूत इत्यधिकरणविवक्षायामीप्सिद्धा, सम्बन्धविवक्षायां तापसिद्धा, अत एवापादाने कापि सिद्धा, गोभ्यः कृष्णा निर्धार्यन्त इति ॥ छ ॥ २. २. १०९. ॥

**न्या० स०—सप्तमी०** । क्षतात् त्रायते " स्था-पा० "

[ ५. १. १४२. ] इति कः, पृषोदरादित्वादलोपे क्षत्रं, तस्यापत्यं " क्षत्रादियः " [ ६. १. ९३. ], क्षत्रियः पुरुषाणामित्यादिषु क्षत्रियत्व-शालित्वजात्या कृष्णत्वगुणेन धावनक्रियया, आदिशब्दाद् युधिष्ठिरप्रभृतिसंज्ञया च निर्धारणम् । ननु निर्धार्यमाणस्यावयवस्य समुदायाभ्यन्तरत्वात् ततश्च समुदायस्याऽधिकरणविवक्षायां वृक्षे शाखेतिवद् सप्तम्याः सिद्धत्वात् संबन्धविवक्षायां त्ववयवस्य वृक्षस्य शाखेतिवद् षष्ठ्या अपि सिद्धत्वाद् किमनेनेति, नैवम्– विभागे प्रतिषेधार्थत्वादस्य सर्वत्रैव निर्धारणस्य विभागरूपत्वेनाऽविभागपूर्वकत्वादविभागग्रहणस्य निरर्थकत्वादविभागग्रहणसामर्थ्यादवधारणमाश्रीयते– अविभागो यत्र शब्दत एव प्रतीयते तत्र निर्धारणे सप्तमी-षष्ठ्याविति, यथा क्षत्रियः पुरुषाणां पुरुषेष्वित्यत्र निर्धार्यमाणस्य क्षत्रियस्य पुरुषत्वेनाऽविभागप्रतीतिः; तेन माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यत्र न भवति, नह्यत्र केनचित् प्रकारेण माथुराणां पाटलिपुत्रकेष्वविभागः शब्दतः प्रतीयते, नहि पाटलिपुत्रका माथुरा नाप्याढ्यतरा इति वाक्याद् भेद एव प्रतीयते इत्याह– **शब्दाद् गम्यमाने** इति । गवां कृष्णेत्यादौ विभज्यमाना गोर्गोत्वेन समुदायादविभक्ता, काष्र्ण्येन तु विभक्ता, तस्माद् विभज्यमानस्यैकदेशस्य विभागाश्रयस्य च समुदायस्य यत्र विभागाविभागौ स एवानयोर्विषयः, यत्र तु तयोर्विभाग एव, न कथञ्चिदैक्यं तत्र पञ्चम्येव भवति, अत एवाह– **पञ्चमीबाधनार्थमिति**– अयमर्थः– निर्धारणस्य विभागरूपत्वाद् यस्य हि यतो विभागस्तस्य तदपेक्षयाऽवधिरूपत्वाद् अपादानत्वात् " पञ्चम्यपादाने " [ २. २. ६९. ] इति पञ्चम्यां प्राप्तायां यत्र विभागोऽपि तत्र तदपवादो योग इत्यर्थः, यद्येवं सर्वथा समुदायभावानापन्ने निर्धारणमेव न युज्यते, समुदायाद्धि एकदेशस्य पृथक्करणं निर्धारणमित्युक्तत्वाद्, सत्यमेतत्– बुद्ध्या हि केनचिद् धर्मेण कल्पितेन माथुराः पाटलिपुत्रकाश्च समुदायभावमापद्यन्ते इति सिध्यति निर्धारणमित्यदोषः ॥ २. २. १०९. ॥

## क्रियामध्येऽध्वकाले पञ्चमी च ।२।२।११०॥

**त० प्र०**—क्रिययोर्मध्ये योऽध्वा कालश्च तस्मिन् वर्तमानाद् गौणान्नाम्नः पञ्चमी, चकारात् सप्तमी च भवति । **इहस्थोऽयमिष्वासः क्रोशाल्लक्ष्यं विध्यति, क्रोशे वा लक्ष्यं विध्यति**; इह धानुष्काऽवस्थानमिषुमोक्षो चैका क्रिया, लक्ष्यव्यधश्च द्वितीया, तन्मध्ये क्रोशोऽध्वा; **अद्य भुक्त्वा मुनिर्द्व्यहात् भोक्ता, द्व्यहे वा भोक्ता**; अत्र द्वयोर्भुक्तिक्रिययोर्मध्ये द्व्यहः कालः । ननु च ' क्रोशे स्थितं लक्ष्यं विध्यति ' द्व्यहे पूर्णे भुङ्क्ते, इत्यधिकरण एव सप्तमी; ' क्रोशात् निःसृत्य स्थितं लक्ष्यं विध्यति, द्व्यहमतिक्रम्याऽनु भुङ्क्ते ' इत्यपादाने " गम्ययपः कर्माऽऽधारे " [ २. २. ७४. ] इति पञ्चमी सिद्धैव, सत्यम्– यदा त्वस्यैव क्रियाकारकसंबन्धस्य फलभूता शेषसंबन्धलक्षणोत्तरावस्था विवक्ष्यते, यथा– द्विरह्नो भुङ्क्ते, योजनस्य शृणोतीति, तदाऽपि क्रियामध्ये षष्ठी मा भूदिति वचनम् ॥ ११० ॥

**श० न्या०**—क्रिया० । क्रियाया मध्यं क्रियामध्यमिति षष्ठीतत्पुरुषः, न च विग्रहवाक्यार्थप्रतिपादने यः शक्तः स समर्थ इति समासे च द्वित्वार्थानवगतेरसामर्थ्यात् समासाभाव इति वाच्यम्, मध्यस्य द्विष्ठत्वात् क्रियार्थगतस्य द्वित्वस्यावगमादित्याह– **क्रिययोर्मध्य** इति । **इह धानुष्कावस्थानमि**त्यादिना उदाहृतोदाहरणे लक्षणं योजयति । नन्विष्वास इति धनुरुच्यते, यथा–अङ्गराजो महेष्वास इति, धनुश्च व्यधने करणं, कर्ता तु मैत्रादिरतत् कथमुक्तम्– **इष्वासो विध्यतीति,** उच्यते– इष्वास इति क्रियाशब्दोऽयम्– इषूनस्यति– क्षिपतीति मैत्रादिरेवोच्यते, रूढिशब्दत्वेऽपि करणस्य स्वातन्त्र्यविवक्षायामिष्वासो विध्यतीत्युपपद्यत एव, **इहस्थोऽयमिष्वास** इति प्रत्येकं प्रतिपत्तव्यं वाक्यभेदात् । ननु चेहस्थोऽयमिष्वास इत्यादि क्रियाभेदाद् युक्तमुदाहरणम्, इदं त्वयुक्तम्– अद्य भुक्त्वाऽयं मुनिर्द्व्यहाद् भोक्तेति, भुजि क्रियाया एकत्वात्, सत्यम्– भुजिक्रियाया एकस्या अपि साधनभेदाद् भेदस्य सिद्धत्वादाधारो हि तस्या भिद्यत इत्याह– **अत्र द्वयोरित्यादि** **ननु चेति**– क्रियामध्यव्यवस्थितस्याध्वनोऽधिकरणात् सप्तमी सिद्धा, क्रोशैकदेशस्याधिकरणत्वात् क्रोशेऽप्यधिकरणत्वस्य वक्तुं शक्यत्वात्, एवं कालादपि द्व्यहे पूर्णे यदुपश्लिष्टमहस्तत्र भोक्तेत्यर्थावसायात्, पञ्चमी त्वध्वनोऽपादानत्वात्, क्रोशान्निर्गच्छद्भिः शरैर्लक्ष्यं विध्यतीत्यर्थावगमात्, कालात् तु " गम्ययपः० " [ २. २. ७४. ] इति द्व्यहमतिक्रम्य भोक्तेत्यर्थप्रतीतेरिति किमर्थोऽयं योग इत्याक्षेपार्थः । यद्यपि शरनिर्गमनस्य धनुरपादानं न क्रोशस्तथापि क्रोशस्थमेव धनुरत्र क्रोशशब्देनाभिधीयते, यथा– मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा मञ्चशब्देनेति । **सत्यमित्यादिना** परिहरति, अयमर्थः– यदा भोजन-श्रवणादौ कालाध्वनोः क्रियाकारकजन्यं शेषसम्बन्धित्वमेव केवलं विवक्ष्यते, न त्वपादानाधिकरणत्वे, तदा ताभ्यां षष्ठ्येव स्यादिति सूत्रारम्भः, तस्मात् षष्ठ्या बाधिके पञ्चमीसप्तम्यौ विधीयेते, किञ्च यदा द्व्यहक्रोशशब्दौ द्व्यहक्रोशविषयावेव न तदेकदेशविषयौ तदा नापायो नाप्याधारतेति षष्ठी प्राप्नोति; क्रोशं वाहयित्वा विध्यति, द्व्यहं वाहयित्वा भोक्तेति वा प्रतीतेर्द्वितीया प्राप्नोति तद्बाधनार्थोऽयं योग आरभ्यते,

वृत्तौ तु षष्ठी मा भूदिति षष्ठीग्रहणमुपलक्षणार्थं, तेन द्वितीयापि मा भूदित्यर्थः सिद्धो भवति ॥ छ ॥ २. २. ११०. ॥

**न्या० स०—क्रियामध्ये०** । **इहस्थोऽयमिति**– नन्विष्वास इति धनुरुच्यते, यथा– अङ्गराजो महेष्वास इति, महान् इष्वासो यस्येति व्युत्पत्तेः, धनुश्च व्यधने करणं, कर्ता तु मैत्रादिः, तत् कथमुक्तम्– इष्वासो विध्यतीति, उच्यते– इष्वास इति क्रियाशब्दोऽयमिति यः कश्चिदिषूनस्यति– क्षिपति स मैत्रादिरप्युच्यते; यद्वा रूढिशब्दत्वेऽपि करणस्य स्वातन्त्र्यविवक्षायामिष्वासो विध्यतीति उपपद्यत एव, यथा स्थालीकरणस्य कर्तृविवक्षायां स्थाली पचती-त्युच्यते । **अद्य भुक्त्वेति**– नन्विहस्थोऽयमिष्वास इत्यादि क्रियाभेदाद् युक्तमिदमुदाहरणम्, इदं त्वयुक्तमद्य भुक्त्वा मुनिर्द्व्यहाद् भोक्तेति भुजिक्रियाया एकत्वात्, सत्यम्– भुजिक्रियाया एकस्या अपि कालभेदाद् भेदस्य सिद्धत्वादाधारोऽपि तस्या भिद्यते । **अधिकरण एव सप्तमी**ति– क्रियामध्यव्यवस्थितस्याध्वनोऽधिकरणत्वात् सप्तमी सिद्धा, क्रोशैकदेशस्याधिकरणत्वात् क्रोशेऽप्यधिकरणत्वस्य वक्तुं शक्यत्वात्; एवं कालादपि द्व्यहे पूर्णे इत्यत्र पूर्णद्व्यहस्य यदुपश्लिष्टमहस्तत्र भोक्तेत्यर्थावसायादौपश्लेषिकी सप्तमी सिद्धा, पञ्चमी त्वध्वनोऽपादानत्वात् क्रोशान्निर्गच्छद्भिः शरैर्लक्ष्यं विध्यतीत्यर्थावगमात्; कालात् तु "गम्ययपः०" [ २. २. ७४. ] इति द्व्यहमतिक्रम्य भोक्तेत्यर्थप्रतीतेः, किमर्थोऽयं योग इत्याक्षेपार्थः; यथा च शरनिर्गमनस्य धनुरपादानं तथा क्रोशोऽपि तस्मादपि हि ते निर्गच्छन्ति, यद्वा क्रोशस्थं धनुरपि क्रोशेनाभिधीयते उपचारात्, मञ्चाः क्रोशन्तीतिवत् । **अस्यैवेति**– अपादानस्याधारस्य वेत्यर्थः । **फलभूतेति**– क्रियाकारकसंबन्धो हि कटं करोतीत्यादावप्यस्ति तदवच्छित्त्यै शेषसंबन्धलक्षणा फलभूता कार्यभूतोत्तरावस्था इत्युक्तम् । **षष्ठी मा भूदिति वचनमिति**– अयमर्थः– यदा भोजन-श्रवणादौ कालाऽध्वनोः क्रियाकारकजन्यं शेषसंबन्धित्वमेव केवलं विवक्ष्यते न त्वपादानाधिकरणत्वे तदा ताभ्यां षष्ठ्येव स्यादिति सूत्रारम्भः । किञ्च यदा द्व्यह-क्रोशशब्दौ द्व्यहक्रोशविषयावेव न तदेकदेशविषयौ तदा नापायो नाप्याधारतेति षष्ठी प्राप्नोति, क्रोशं वाहयित्वा विध्यति, द्व्यहं वाहयित्वा भोक्तेति वा प्रतीतेर्द्वितीया प्राप्नोति तद्बाधनार्थोऽयं योग आरभ्यते, वृत्तौ तु षष्ठी मा भूदिति षष्ठीग्रहणमुपलक्षणार्थम्, तेन द्वितीयाऽपि मा भूदित्यर्थः सिद्धो भवति ॥ २. २. ११०. ॥

## अधिकेन भूयसस्ते । २ । २ । १११ ॥

**त० प्र०—**अधिरूढ इत्यर्थेऽधिकशब्दो निपात्यते, अधिरूढ इति कर्तरि कर्मणि च क्तो भवति, तत्र यदा कर्तरि तदाऽधिक इत्यनेनाऽल्पीयानुच्यते, यदा तु कर्मणि तदा भूयान्, तत्र सामर्थ्यादल्पीयोवाचिनाऽधिकशब्देन युक्ताद् भूयसो– भूयोवाचिनो गौणान्नाम्नस्ते–सप्तमी-पञ्चम्यौ भवतः । अधिको द्रोणः खार्याम्, अधिको द्रोणः खार्याः ॥ १११ ॥

**श० न्या०—अधि०** । **अधिरूढ** इति, **चेति**, **तत्र यदेति**– अध्यारोहतीति शेषः, **यदेति**– अध्यारुह्यत इति शेषः, **भूयस** इत्युपादानादधिकशब्देनाल्पीयानेवोच्यते इत्याह– **तत्र सामर्थ्यादि**त्यादि । **अधिको द्रोणः खार्यामि**ति– अत्राधिकाधिकिसम्बन्धस्य विद्यमानत्वात् खारीशब्दात् "शेषे" [ २. २. ८१. ] इत्यनेन षष्ठी प्राप्नोति, तथाधिकशब्दस्य कर्तृसाधनाध्यरूढार्थत्वात् "कर्मणि" [ २. २. ४०. ] इति द्वितीया च, अतस्तयोर्बाधिके सप्तमी-पञ्चम्यावनेन विधीयेते ॥ छ ॥ २. २. १११. ॥

**न्या० स०—अधिकेन०** । **भूयस** इत्युपादानात् अधिकशब्देनाल्पीयानेवोच्यत इत्याह– **सामर्थ्यादिति** । अत्राधिकाधिकिसंबन्धस्य विद्यमानत्वात् खारीशब्दात् "शेषे" [ २. २. ८१. ] इत्यनेन षष्ठी प्राप्नोति, तथाऽधिकशब्दस्य कर्तृसाधनाध्यारूढार्थत्वात् "कर्मणि" [ २. २. ४०. ] इति द्वितीया च, अतस्तयोर्बाधिके सप्तमी-पञ्चम्यावनेन विधीयेते ॥ २. २. १११. ॥

## तृतीयाऽल्पीयसः । २ । २ । ११२ ॥

**त० प्र०—**अधिकशब्देन सामर्थ्याद् भूयोवाचिना युक्तादल्पीयोवाचकाद् गौणान्नाम्नस्तृतीया भवति । अधिका खारी द्रोणेन ॥ ११२ ॥

**श० न्या०—तृती०** । अधिकेनेति वर्तते, **अल्पीयस** इत्युपादानात् कर्मसाधनो भूयोऽर्थोऽधिकशब्दः प्रतिपत्तव्य इत्याह– **सामर्थ्याद् भूयोवाचिने**ति ॥ छ ॥ २. २. ११२. ॥

**न्या० स०—तृतीया०** । **सामर्थ्यादिति**– अल्पीयस इत्युपादानात् कर्मसाधनो भूयोऽर्थोऽधिकशब्दः प्रतिपत्तव्य इति कर्तरि तृतीया सिद्धैव षष्ठीबाधनार्थं तु वचनम् ॥ २. २. ११२. ॥

## पृथग्-नाना पञ्चमी च । २ । २ । ११३ ॥

**त० प्र०—**पृथग्-नानाशब्दाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी तृतीया च भवति । पृथग् मैत्रात्, पृथग् मैत्रेण; नाना चैत्रात्, नाना चैत्रेण । यदा पृथग्-नानाशब्दावन्यार्थौ तदा प्रभृत्यादिसूत्रेण पञ्चमी सिद्धैव तृतीयैवाऽनेन विधीयते, यदा त्वसहायार्थौ तदा पञ्चमीविधानार्थमपीदम् । अन्ये तु द्वितीयामपीच्छन्ति ॥ ११३ ॥

**श० न्या०—पृथ०** । **पृथग्नाने**ति तृतीयान्तमित्याह– **पृथग्नानाशब्दाभ्यां युक्तादिति** । तृतीयैवाऽनेन भवति,

पञ्चमी तु सिद्धैव, परत्वाद् विशेषविहितत्वाच्च तृतीया तामपि बाधेतेत्यनूद्यत इत्यर्थः । **यदा त्विति**– विशेषस्यानुपादानादुभयार्थयोरपि पृथग्नानाशब्दयोर्ग्रहणादसहायार्थपक्षे पञ्चमी न सिद्ध्यतीति तद्विधानार्थमपीदमुपपद्यत एवेति ॥ छ ॥ २.२.११३.॥

**न्या० स०**—पृथ० । [ नेह व्याख्या दृश्यते ] ॥२.२.११३.॥

## ऋते द्वितीया च । २ । २ । ११४ ॥

**त० प्र०**—ऋते इत्येतदव्ययं वर्जनार्थम्, तेन युक्ताद् गौणान्नाम्नो द्वितीया पञ्चमी च भवति । चित्रं यथाश्रयमृते, नद्यङ्गं विक्रियते रागमृते, ऋते धर्मात् कुतः सुखम् । द्वितीयां नेच्छन्त्येके ॥ ११४ ॥

**श० न्या०**—ऋते० । ऋते इत्यतोऽव्ययाद् वर्जनार्थादनुकार्यानुकरणयोरभेदस्य विवक्षितत्वाद् "अव्ययस्य" [ ३. २. ७. ] इति युक्तापेक्षयोत्पन्नस्य तृतीयैकवचनस्य लुबित्याह– **ऋते** इत्यादि । चकारेणानन्तरोक्ता पञ्चमी समुच्चीयते इत्याह– **द्वितीया पञ्चमी चेति** । यद्यपि पाणिन्यादिभिर्ऋतेशब्देन योगे द्वितीया नोक्ता तथापि शिष्टैः प्रयुज्यत इति शिष्टप्रयोगमेवोदाहरति– **चित्रं यथाश्रयमृते** इत्यादि । द्वितीयां नेच्छन्त्येके इति, **एके** इति पाणिन्यादयः ॥ छ ॥ २. २. ११४. ॥

**न्या० स०**—ऋते द्वि० । **नद्यङ्गं विक्रियत** इति– विषयादिभिः कर्तृभिरित्यर्थः, विक्रियत इति कर्मण्ययं प्रयोगः, कर्मकर्तरि तु "भूषार्थ०" [ ३. ४. ९३. ] इति किरादित्वात् क्यप्रतिषेधः स्यात् ॥ २. २. ११४. ॥

## विना ते तृतीया च । २ । २ । ११५ ॥

**त० प्र०**—विनाशब्देन युक्ताद् गौणान्नाम्नस्ते– द्वितीया-पञ्चम्यौ तृतीया च भवति । विना वातम्, विना वर्षम्, न विना शब्दभावनाम्, याञ्चां विना विद्धि, विना वातात्, विना वातेन । द्वितीयां नेच्छन्त्यन्ये ॥ ११५ ॥

**श० न्या०**—विना० । **विनेत्यपि** तृतीयान्तमव्ययमित्याह– **विनाशब्देनेति** । तच्छब्दस्य पूर्ववस्तुपरामर्शित्वात् **ते** इत्यनेनानन्तरोपात्ते द्वितीया-पञ्चम्यौ परामृश्येते इत्याह– **ते द्वितीया-पञ्चम्याविति** ॥ छ ॥ २. २. ११५. ॥

**न्या० स०**—विना ते० । विनेति तृतीयान्तमव्ययम् ।
"आद्यः करणविन्यासः, प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च, न विना शब्दभावनाम्" ॥२. २. ११५.॥

## तुल्यार्थैस्तृतीया-षष्ठ्यौ ।२।२।११६॥

**त० प्र०**—तुल्यार्थैर्युक्ताद् गौणान्नाम्नस्तृतीया-षष्ठ्यौ भवतः । मात्रा तुल्यः, मातुस्तुल्यः; पित्रा समानः, पितुः समानः; गुरुणा समः, गुरोः समः; चैत्रेण सदृशः, चैत्रस्य सदृशः । अर्थग्रहणं पर्यायार्थम् । उपमा नास्ति कृष्णस्य, तुला नास्ति सनत्कुमारस्येत्यादावुपमादयो न तुल्यार्था इति न भवति । गौणाधिकाराच्च गौरिव गवयः, यथा गौस्तथा गवय इत्यादौ न भवति । तृतीयामविकल्प्य षष्ठीविधानं सप्तमीबाधनार्थम्, तेन गवां तुल्यः स्वामी, गोभिस्तुल्यः स्वामीत्यत्र "स्वामीश्वरा०" [ २. २. ९८. ] इत्यादिना सप्तमी न भवति ॥ ११६ ॥

**श० न्या०**—तुल्या० । तुल्यः सदृशोऽर्थोऽभिधेयो येषां ते तुल्यार्थास्तैर्युक्तादिति तुल्यशब्दस्योपमेयार्थत्वात् तैर्युक्तादुपमानादित्यर्थः । **अर्थग्रहणं पर्यायार्थमिति**– तुल्यशब्दोऽयमर्थभेदमाचष्टे, तदभिधायिनः शब्दान्तरस्यापि परिग्रहार्थमित्यर्थः, असत्यर्थग्रहणे तुल्यशब्देन रूपतोऽर्थतो वा समानैः शब्दैर्योग इति विज्ञायेत, अर्थग्रहणे तु प्रत्यासत्तेस्तत्पर्याया विज्ञायन्त इति । इहोपमा नास्ति कृष्णस्येत्यादौ सादृश्यप्रतीतेरुपमादयः शब्दास्तुल्यार्था इति तद्युक्तात् कृष्णादेस्तृतीया स्यादिति यः कश्चिदाशङ्कते तं प्रत्याह– **उपमा नास्तीत्यादि**– तुल्यशब्दस्योपमेयवचनत्वादुपमादयस्तुल्यपर्याया न भवन्तीत्यर्थः । **गौणाधिकाराच्चेति**– **गौरिव गवय** इत्यादौ प्रधानान्न भवन्तीत्यर्थः, तुल्यार्थतापि नास्तीति चकारेण परिहारान्तरं समुच्चीयते इति शेषः । नन्वनन्तरत्वात् पूर्वसूत्रात् तृतीयाऽनुवर्तते, ततः "तुल्यार्थैर्वा" इति तद्विकल्पे कृते "शेषे" [ २. २. ८१. ] इत्यनेन पक्षे शेषलक्षणा षष्ठी सिद्धैव किमर्थं तद्विधानमित्याह– **तृतीयामविकल्प्येत्यादि** । षष्ठीविधानस्य फलं दर्शयति– **तेनेत्यादि** ॥ छ ॥ २. २. ११६. ॥

**न्या० स०**—तुल्यार्थैः० । **न तुल्यार्था** इति– तुल्यादयो हि धर्मिवाचकाः, तुलोपमादयस्तु तुल्यत्वादिधर्मवचना इति न तुल्यार्थाः । **गौणाधिकाराच्चेति**– प्रधानाद् गोशब्दान्न भवतीत्यर्थः, तुल्यार्थतापि नास्तीति चकारेण परिहारान्तरं समुच्चीयत इति शेषः । नन्वनन्तरात् पूर्वसूत्रात् तृतीयाऽनुवर्तते, ततः "तुल्यार्थैर्वा" इति तद्विकल्पे कृते "शेषे" [ २. २. ८१. ] इत्यनेन पक्षे शेषलक्षणा षष्ठी सिद्धैव, किमर्थं तद्विधानमित्याह– **तृतीयेत्यादि** । **गवां तुल्यः स्वामीति**– गवां तुल्य इत्यर्थः, यदस्मत्स्वामी गवां तुल्य इत्यर्थो विवक्ष्यते तदा गोशब्दस्य स्वामिशब्देनायोगात् सप्तमीप्राप्तिरेव नास्तीति । **गवय** इति–

"कीदृग् गवय इत्येवं पृष्टो नागरिकैर्यदा ।
वदत्यारण्यको वार्ता यथा गौर्गवयस्तथा ॥ २. २. ११६. ॥"

## द्वितीया-षष्ठ्यावेनेनाऽनञ्चेः ।२।२।११७॥

**त० प्र०**—एनप्रत्ययान्तेन युक्ताद् गौणान्नाम्नो द्वितीया-षष्ठ्यौ विभक्ती भवतः, न चेत् सोऽञ्चेः परो विहितो भवति । पूर्वेण ग्रामम्, पूर्वेण ग्रामस्य; अपरेण ग्रामम्, अपरेण ग्रामस्य; दक्षिणेन विजयार्धम्, दक्षिणेन विजयार्धस्य; उत्तरेण हिमवन्तम्, उत्तरेण हिमवतः । अनञ्चेरिति किम्? प्राग् ग्रामात्, प्रत्यग् ग्रामात्; उदग् ग्रामात् ॥ ११७ ॥

**श० न्या०**—द्विती० । **पूर्वेण ग्राममिति**- ग्रामाददूरा पूर्वा इति "अदूरे एनः" [ ७. २. १२२. ] इति एनप्रत्ययः । **प्राग् ग्रामादिति**- "लुबञ्चेः" [ ७. २. १२३. ] इति एनप्रत्ययस्य लुप् । **अनञ्चेरिति** प्रतिषेधात् द्वितीया-षष्ठ्योरभावात् "प्रभृत्यन्यार्थदिक्शब्द०" [ २. २. ७५. ] इति ग्रामात् पञ्चमी ॥ छ ॥ २. २. ११७. ॥

**न्या० स०**—द्वितीया० । पूर्वेणेति- पूर्वस्यामदूरवर्तिन्यां दिशि "अदूरे एनः" [ ७. २. १२२. ] ॥ २. २. ११७. ॥

## हेत्वर्थैस्तृतीयाद्याः । २ । २ । ११८ ॥

**त० प्र०**—हेतुर्निमित्तं कारणमिति पर्यायाः, एतदर्थैः शब्दैर्युक्तात् प्रत्यासत्तेस्तैरेव समानाधिकरणाद् गौणान्नाम्नस्तृतीयाद्यास्तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तम्यो भवन्ति । धनेन हेतुना वसति, धनाय हेतवे वसति, धनाद् हेतोर्वसति, धनस्य हेतोर्वसति, धने हेतौ वसति; एवं- धनेन निमित्तेन, धनेन कारणेन, धनेनाऽपदेशेन; धनेन प्रयोजनेनेत्यादयोऽपि । तत्सामानाधिकरण्याच्च हेत्वर्थेभ्योऽपि ता एव भवन्ति । प्रत्यासत्तेस्तैरेव समानाधिकरणादिति किम्? अन्नस्य हेतुः । अन्ये तु हेत्वर्थशब्दयोगे नेच्छन्ति, हेतुशब्दप्रयोगे तु षष्ठीमेवेच्छन्ति । असर्वाद्यर्थमिदम् ॥ ११८ ॥

**श० न्या०**—हेत्व० । **प्रत्यासत्तेः तैरेव समानाधिकरणादिति**- हेत्वर्थैस्तु व्यधिकरणाद्धेतुसम्बन्धे षष्ठ्येवास्ति, न तत्र तृतीयाद्या इति सामर्थ्याद् हेत्वर्थैः समानाधिकरणाद्धेतोरेव तृतीयाद्या भवन्तीति । अत्र च हेतोस्तृतीयायां गुणादस्त्रियामृणाच्च पञ्चम्यां प्राप्तायामयं विधिरारभ्यते इति । ननु ततोऽप्युत्तरसूत्रेण सर्वा विभक्तय इति सर्वविभक्त्यन्तर्गतत्वात् तृतीयाद्या अपि सिद्धाः, किमर्थमिदमित्याह- **असर्वाद्यर्थमिदमिति**- उत्तरसूत्रेण हि हेत्वर्थैर्युक्तात् सर्वादेरेव सर्वा विभक्तय उच्यन्ते, अनेन त्वसर्वादेरेवेत्यर्थः ॥ छ ॥ २. २. ११८. ॥

**न्या० स०**—हेत्वर्थैः० । प्रत्यासत्तेरिति- हेत्वर्थैस्तु व्यधिकरणाद् हेतुसंबन्धे षष्ठ्येवास्ति, न तत्र तृतीयाद्या इति सामर्थ्याद् हेत्वर्थैः समानाधिकरणाद् हेतोरेव तृतीयाद्या भवन्तीति । ननूत्तरसूत्रेण सर्वा विभक्तय इति सर्वविभक्त्यन्तर्गतत्वाद् तृतीयाद्या अपि सिद्धाः, किमर्थमिदमित्याह- **असर्वाद्यर्थमिति** । हेतौ तृतीयायां "ऋणाद्धेतोः" [ २. २. ७६. ], "गुणादस्त्रियां नवा" [ २. २. ७७. ] इति पञ्चम्यां प्राप्तायामयं विधिरारभ्यत इति ॥ २. २. ११८. ॥

## सर्वादेः सर्वाः । २ । २ । ११९ ॥

**त० प्र०**—हेत्वर्थैर्युक्तात् प्रत्यासत्तेस्तत्समानाधिकरणात् सर्वादेर्गौणान्नाम्नः सर्वा विभक्तयो भवन्ति । को हेतुर्वसति चैत्रः, कं हेतुं वसति, केन हेतुना, कस्मै हेतवे, कस्माद् हेतोः, कस्य हेतोः, कस्मिन् हेतौ; एवं यो हेतुः, यं हेतुम्, येन हेतुना, यस्मै हेतवे, यस्माद् हेतोः, यस्य हेतोः, यस्मिन् हेतौ; स हेतुः, तं हेतुम्, तेन हेतुना, तस्मै हेतवे, तस्माद् हेतोः, तस्य हेतोः, तस्मिन् हेतौ; सर्वो हेतुः, सर्वं हेतुम्; भवान् हेतुः, भवन्तं हेतुम्, भवता हेतुना; उभौ हेतू, उभाभ्यां हेतुभ्यामित्यादि; एवं किं कारणं?, किं निमित्तं?, किं प्रयोजनमित्यादि । तत्समानाधिकरणादित्येव- कस्य हेतुः । प्रथमां नेच्छन्त्येके, द्वितीयामपरे ॥ ११९ ॥

**श० न्या०**—सर्वा० । हेत्वर्थैरिति वर्तते, शेषं पूर्वेण गतार्थमिति । **एके** इति, **अपर** इति च वार्तिकव्याख्यातारः ॥ छ ॥ २. २. ११९. ॥

**न्या० स०**—सर्वादेः० । प्रियाः सर्वे यस्येति बहुव्रीहौ हेत्वर्थयोगेऽपि न सर्वा विभक्तयः, अन्यपदार्थप्रधानत्वेन सर्वादेर्गौणत्वात्, * गौणे मुख्ये च मुख्ये कार्यसंप्रत्ययः * कर्मधारये परमसर्वं हेतुं वसतीत्यादि तु भवति, * ग्रहणवता नाम्ना० * इति तु नोपतिष्ठतेऽत्र ॥ २. २. ११९. ॥

## असत्त्वारादर्थाट्टाङसिङ्यम् ।२।२।१२०॥

**त० प्र०**—सत्त्वं- द्रव्यं, ततोऽन्यदसत्त्वम्, आराद् दूराऽन्तिकयोः, तन्त्रेणोभयोर्ग्रहणम्; असत्त्ववाचिनो दूरार्थादन्तिकार्थाच्च 'टा ङसि ङि अम्' इत्येते प्रत्यया भवन्ति, गौणादिति निवृत्तम् । दूरेण ग्रामस्य ग्रामाद् वा, दूराद् ग्रामस्य ग्रामाद् वा, दूरे ग्रामस्य ग्रामाद् वा, दूरं ग्रामस्य ग्रामाद् वा वसति; एवं विप्रकृष्टेन, विप्रकृष्टात्, विप्रकृष्टे, विप्रकृष्टं ग्रामस्य ग्रामाद् वा तिष्ठति; अन्तिकार्थः- अन्तिकेन, अन्तिकात्, अन्तिके, अन्तिकं ग्रामस्य ग्रामाद् वा वसति; एवमभ्याशेन,

अभ्याशात्, अभ्याशे, अभ्याशं ग्रामस्य ग्रामाद् वा। केचिदारादर्थैः पञ्चम्यन्तैर्युक्तात् पञ्चमीं नेच्छन्ति, तेन– दूराद् ग्रामस्य, अन्तिकाद् ग्रामस्येत्येव भवति, न तत् सर्वसंमतं पञ्चम्या अपि दर्शनात्—

"दूरादावसथान्मूत्रं, दूरात् पादावसेचनम्।
दूराच्च भाव्यं दस्युभ्यो, दूराच्च कुपिताद् गुरोः" ॥१॥ इति।

असत्त्वेति किम्? दूरः पन्थाः, अन्तिकः पन्थाः, दूराय पथे देहि, अन्तिकाय पथे देहि, दूरस्य पथः, अन्तिकस्य पथः स्वम्। कथं चिरं?, चिरेण?, चिराय?, चिरात्?, चिरस्येति?; विभक्तिप्रतिरूपका निपाता एते, यथा– परस्परम्, परस्परेण, परस्परस्येत्यादयः ॥ १२० ॥

श० न्या०—अस०। **गौणादिति निवृत्तम्** अयमर्थः– असत्त्ववचनाद् दूरान्तिकार्थात् टादीनां विधानात् तस्य च यथास्वं प्रधानतया गौणत्वाभावात् प्रधानादेव तत्तष्टादय इत्यर्थः। **दूरेण ग्रामस्येति**– इदं तदिति सर्वनामप्रत्यवमर्शयोग्यार्थाभिधायकत्वेऽप्येतेषां धर्ममात्रेण प्रयोगादसत्त्वरूपार्थाभिधायकत्वं न विरुध्यते। चतसृणां विभक्तीनां तृतीया-पञ्चमी-सप्तमी-द्वितीयानां विधानात् तद्व्यतिरिक्ताः प्रथमा-चतुर्थी-षष्ठ्यः स्वे स्वे विषये एताभिरबाधनात् प्रवर्तन्त इति। **ग्रामस्य ग्रामाद् वेति**– "आरादर्थैः" [ २. २. ७८. ] इति विकल्पेन पञ्चमी, तद्विमुक्तपक्षे च "शेषे" [ २. २. ८१. ] इति षष्ठी। **केचिदारादर्थैरित्यादिना** मतान्तरमुपन्यस्य **दूरादावसथादित्यादिना** शिष्टप्रयुक्तोदाहरणप्रदर्शनेन दूषयति। **दूरः पन्था** इति– अत्र सत्त्ववाचित्वाद् दूरान्तिकार्थादपि टादयो न भवन्ति, किन्तु यथास्वं प्रथमादय इति। **कथमिति**– चिरशब्दाद् द्वितीयादिविभक्तीनां दर्शनात् तदर्थं यत्नान्तरमारभ्यमित्याशङ्कार्थः। परिहरति– **विभक्तिप्रतिरूपका** इति। स्वोक्तमेव **यथा परस्परमित्यादि**दृष्टान्तप्रदर्शनेन दृढयति ॥ छ ॥ २. २. १२०.॥

न्या० स०—असत्त्वा०। असत्त्वे आरादर्थः, न विद्यते सत्त्वं यस्य स चाऽसौ आरादर्थश्च वा। **गौणादिति निवृत्तमिति**– विभक्तिसंबद्धत्वात् तन्निवृत्तावित्यर्थः, अत्र हि टादीनि वचनान्युपात्तानि, न तृतीयाया विभक्तयः। **दूरेण ग्रामस्य ग्रामाद् वा** इत्यादि– इदं तदिति सर्वनामप्रत्यवमर्शयोग्यार्थाभिधायकत्वेऽप्येतेषां धर्ममात्रेण प्रयोगादसत्त्वरूपार्थाभिधायकत्वं न विरुध्यते, तथाऽत्र ग्रामशब्दात् "आरादर्थैः" [ २. २. ७८. ] इति वा पञ्चम्यां पक्षे "शेषे" [ २. २. ८१. ] इति षष्ठी। **अन्तिकाय पथे इति**– अत्रोपपदविभक्तेः कारकविभक्तिरिति पञ्चमीं बाधित्वा चतुर्थी। **न तत् सर्वसंमतमिति**– यतः काशिकाकारोऽप्याह– पञ्चम्या अपि दर्शनात् लोकाचारग्रन्थे। **कथमिति**– आरादर्थत्वाभावात् कथमेभ्यो द्वितीयाद्या इत्याशङ्कार्थः ॥ २. २. १२०. ॥

## जात्याख्यायां नवैकोऽसंख्यो बहुवत् ॥ २ । २ । १२१ ॥

त० प्र०—जातेरेकत्वादेकवचने एव प्राप्ते पक्षे बहुवचनार्थं बहुवद्भाव उच्यते, जातेराख्या– अभिधानं जात्याख्या; तस्यामेकोऽर्थो जातिलक्षणोऽसंख्यः– संख्यावाचिविशेषणरहितो बहुवद् वा भवति। संपन्नो यवः, संपन्ना यवाः; संपन्नो व्रीहिः, संपन्ना व्रीहयः; जात्यर्थस्य बहुवद्भावात् तद्विशेषणानामपि बहुवद्भावः, तथा चोभयवाचिभ्यो बहुवचनम्। जातिग्रहणं किम्? चैत्रः, मैत्रः। आख्याग्रहणं किम्? काश्यपप्रतिकृतिः काश्यपः, भवत्ययं जातिशब्दो न त्वनेन जातिराख्यायते, किं तर्हि? प्रतिकृतिः। एक इति किम्? संपन्नौ व्रीहि-यवौ, "मगधेषु स्तनौ पीनौ, कलिङ्गेष्वक्षिणी शुभे" इत्यादावपि सव्येतरत्वलक्षणाऽवान्तरजातिद्वयोपाधियोगादेकत्वं नास्तीति बहुवद्भावो न भवति; जातिमात्रविवक्षायां तु भवत्येव– मगधेषु स्तनाः पीनाः, स्तनः पीनः; कलिङ्गेष्वक्षीणि शुभानि, अक्षि शुभमिति। असंख्य इति किम्? एको व्रीहिः संपन्नः सुभिक्षं करोति, अत्र विशेषणभूतसंख्याप्रयोगोऽस्तीति 'एके व्रीहयः संपन्नाः सुभिक्षं कुर्वन्ति' इति न भवति ॥ १२१ ॥

श० न्या०—जात्या०। जायतेऽनया भिन्नेष्वभिन्नाभिधानप्रत्ययाविति– जातिः, आख्यानं चाख्या, तया षष्ठीसमासः, अनन्तरं वैषयिकेऽधिकरणे सप्तमी निमित्तसप्तमी वा, जातिर्नामाऽयमेकोऽर्थः, तदभिधाने एकवचनमेव प्राप्तमत इदमारभ्यते। **एकोऽर्थ** इति– एकसंख्याक इत्यर्थः। लौकिक्याश्च भेदपरिगणनरूपायाः संख्याया जातिलक्षणोऽर्थोऽसावेकः, न तु वैशेषिकसिद्धान्तप्रसिद्धाया गुणपदार्थसङ्गृहीतायाः, सा हि द्रव्य एव समवेता न पदार्थान्तरे, एतावता जात्यर्थस्य बहुवदित्यतिदेशो बहुवद्भावेन बहुत्वाश्रयकार्यप्रतिपत्त्यर्थो, न जातिशब्दस्य बहुवचनविधानार्थ इति, तथा [ सति ] सम्पन्ना यवा इति यवशब्दादेव जातिशब्दाद् बहुवचनं स्यात्, न सम्पन्नशब्दात् तद्विशेषणभूतादिति, जात्यर्थस्य बहुवद्भावे सम्पन्नादिविशेषणान्यपि सामानाधिकरण्याद् यवादिशब्दोपात्ते जात्यर्थे वर्तन्त इति तेभ्योऽपि बहुत्वाश्रयं बहुवचनमुपपन्नमित्याह– **जात्यर्थस्येत्यादि**। **चैत्रो मैत्र** इति– नेह जातिरभिधेया यदृच्छाशब्दत्वादनयोरिति, जातिर्हि सामान्यमुच्यते, यच्छबलशाबलेय-धवलधावलेयाद्यनेकव्यक्तिभेदेषु गौर्गौरित्याद्यनुवृत्तप्रत्ययकारणमिति, यदि च बालकुमारादि-

**भेदे**ऽनुवर्तमानमभिन्नं रूपं जातिरुच्येत तथा सति नाजातिः कश्चिच्छब्दार्थोऽस्तीति जातिग्रहणमनर्थकं स्यात् तस्मात् सादृश्यसामान्यमिति । **काश्यप** इति– काश्यपस्यापत्यं "बिदादेर्वृद्धे" [ ६. ४. ४१. ] इत्यञि– काश्यपः । अयं च काश्यपप्रतिकृतौ तत्तुल्येऽर्थे वर्तत इति **काश्यपप्रतिकृतिरि**त्यनेन दर्श्यते । **भवत्ययं जातिशब्द** इति– गोत्राभिधायिकत्वात्, न त्वनेन प्राधान्येन जातिराख्यायत इत्यभिप्रायः । जातिविशिष्टा हि प्रतिकृतिरत्र प्रतिपाद्या, आख्याग्रहणाच्च प्राधान्येन जातावभिधेयायां बहुवद्भाव इति विज्ञायते । **व्रीहि-यवावि**ति– द्वयोरत्र जात्योराख्या, न त्वेकस्या इति एकग्रहणाद् बहुवद्भावो न भवति । **मगधेष्वि**ति– **पीनौ स्तनावि**त्यत्र सव्य-दक्षिणस्तनभेदेन जातिद्वयमुच्यत इत्येकग्रहणान्न भवति, एवं– **शुभे अक्षिणी** इत्यत्रापि । एवं तर्हि पीनाः स्तना इत्यादिना न भवितव्यमित्याह– **जातिमात्रविवक्षायामि**त्यादि– अयमर्थः– केचित् पदार्थाः प्रत्येकं रमणीयाः, न तेषां सन्निपातः, यथा– कुण्डलयोश्चरणाभ्यां नूपुरयोश्च कर्णाभ्यामिति, प्रत्येकं रमणीयानां च सन्निपातो रमणीयः, यथा– अक्ष्यञ्जनसन्निपातः, तत्र 'कलिङ्गेष्वक्षिणी शुभे' इत्यत्र नैतद्विवक्षितं– शुभमक्षि कलिङ्गेष्विति, किं तर्हि ? तुल्यलक्षणत्वादक्ष्णोः सन्निपातः शुभ इति, इयं च विवक्षा न द्वित्वोपादानमन्तरेण सिद्ध्यतीत्युपात्तयोः सव्येतरयोरक्ष्णोर्न बहुवद्भाव इति; यदा त्वक्ष्णः शोभनत्वं विवक्षितं न सन्निपातशोभा तदा सव्येतरभेदोपादानेन नार्थ इति भवितव्यमेव पक्षे बहुवद्भावेन । अथेह कस्मान्न भवति– एको व्रीहिः सम्पन्नः सुभिक्षं करोति ?, अस्ति ह्यत्र एको जातिलक्षणोऽर्थ इत्याह– **असंख्य** इत्यादि । नन्वेक इति संख्याशब्दः प्रयुज्यमानः स्वतः सदेकत्वमुद्भावयति, तेन चैकत्वेन विरुद्धं बहुत्वमिति बहुवदतिदेशो न भविष्यति, किमसंख्य इति विशेषणेन ? सत्यम्– अस्यैवार्थस्यानुवादार्थत्वादित्यदोषः । ननु द्रव्यस्य संख्यावत्त्वात् तत्रानारम्भणीयम्, नैवम्– आश्रयभेदेन योऽसौ भेदः स काल्पनिको गौणः, तत् कथं यत्नमन्तरेणेति बहुवद्भावः स्यादित्यारम्भणीयम्, यद्येवं द्वित्वमप्येवं गौणम्, तत्र कथं द्विवचनं यत्नमन्तरेणेति तत्रापि यतितव्यम्, अथ सहे तन्नैतावता यदुपपन्नं कृतं तस्य व्याघातः, द्विवचने त्वेकशेषादियत्नः कार्य इति ॥ छ ॥ २. २. १२१. ॥

**स्या० स०**—जात्याख्यायां० । वैषयिकेऽधिकरणे सप्तमी निमित्तसप्तमी वा । **जात्यर्थस्ये**ति– न जातिशब्दस्य, तथा सति संपन्ना यवा इति यवशब्दादेव जातिशब्दाद् बहुवचनं स्यात्, न संपन्नशब्दात् तद्विशेषणभूतादिति, जात्यर्थस्य बहुवद्भावे संपन्नादिविशेषणान्यपि सामानाधिकरण्याद् यवादिशब्दोपात्ते जात्यर्थे वर्तन्त इति तेभ्योऽपि बहुत्वाश्रयं बहुवचनमुपपन्नमिति । **चैत्रः, मैत्र** इति– नेह जातिरभिधेया यदृच्छाशब्दत्वादनयोः, जातिर्हि सामान्यमुच्यते, यच्छबलशाबलेय-धवलधावलेयाद्यनेकव्यक्तिभेदेषु गौर्गौरित्याद्यनुवृत्तप्रत्ययकारणमिति, यदि च बालकुमारादिभेदेऽनुवर्तमानमभिन्नं रूपं जातिः कश्चिच्छब्दार्थोऽस्ति, इति जातिग्रहणमनर्थकं स्यात्, तस्मात् सादृश्यसामान्यमिह जातिर्न स्वरूपसामान्यमिति । **भवत्ययं जातिशब्द** इति– "गोत्रं च चरणैः सह" इति लक्षणेन परमाख्याग्रहणात् प्राधान्येन जातावभिधेयायां भवति, इह तु तद्विशिष्टा प्रतिकृतिराख्यायते इति ।

"मगधेषु स्तनौ पीनौ, कलिङ्गेष्वक्षिणी शुभे ।
बाहू प्रलम्बावङ्गेषु, वङ्गेषु चरणौ दृढौ" ॥ २. २. १२१. ॥

## अविशेषणे द्वौ चास्मदः । २ । २ । १२२ ॥

**त० प्र०**—अस्मदो द्वावेकश्चार्थो वा बहुवद् भवति, अविशेषणे– न चेत् तस्य विशेषणं प्रयुज्यते । आवां ब्रूवः, वयं ब्रूमः, अहं ब्रवीमि, वयं ब्रूमः । अविशेषण इति किम् ? आवां गार्ग्यौ ब्रूवः, अहं पण्डितो ब्रवीमि, अहं चैत्रो ब्रवीमि । कथं नाट्ये च दक्षा वयम् ?, "त्वं राजा वयमप्युपासितगुरुप्रज्ञाऽभिमानोन्नताः" ?, "सा बाला वयमप्रगल्भमनसः" ? इत्यादि; दक्षत्वादीनां विधेयत्वेनाऽविशेषणत्वाद् भविष्यति, यदनूद्यमानमवच्छेदकं तद्विशेषणमिति । एकाऽनेकस्वभावस्याऽऽत्मनोऽनेकस्वभावविवक्षायां बहुवचनं सिद्धमेव, सविशेषणप्रतिषेधार्थं तु वचनम् ॥ १२२ ॥

**श० न्या०**—अवि० । [ **अस्मद्** इति– ] अनुकरणत्वादस्मच्छब्दकार्यप्रवृत्तिः । **द्वावेकश्चार्थ** इति– नन्वेकसंख्याकप्रत्ययगात्मक( प्रत्येकात्मक )वचनत्वादस्मदः कथं द्वावर्थौ स्यातामिति, नैष दोषः– आत्मत्वं यदा परत्रोपचर्यते– अयं मे द्वितीय आत्मा, अहमेव वाऽयमिति, त्वं चाहं चावामित्येकशेषो वा तदा परस्याप्यस्मदर्थोपपत्तेरुपपन्नमस्मदर्थस्य द्वित्वमिति । **अविशेषणे** इति– यद्यत्र पर्युदासः स्यात्– विशेषणादन्यस्मिन्निति, तदा विशेषणे न विधिर्नापि प्रतिषेधः, विशेषणादन्यस्मिंस्तु प्रयुज्यमाने विधिरिति । सत्यप्यस्मदर्थस्य विशेषणे ततोऽन्यस्मिन् प्रयुज्यमाने स्यात्– अहं मैत्रो ब्रवीमीति, मित्रन्तस्य विशेष्यस्य भावात्, अतोऽविशेषण इति विशेषणाभाव इत्ययमर्थो विज्ञायत इत्याह– **न चेत् तस्ये**त्यादि । **अविशेषण इति किमि**ति– अत्र गोत्रं धर्मान्तरं संज्ञा चास्मदर्थस्य भेदकत्वेनोपादीयत इत्यविशेषण इत्यतो न भवति । **कथमि**ति– नाट्ये च दक्षा वयम्, त्वं राजा वयमित्यादौ कथं सविशेषणस्य बहुवद्भावो दृश्यत इति प्रश्नार्थः । समाधत्ते– **दक्षत्वादी**-

नामित्यादिना, यदनूद्यमानमवच्छेदकं तद् विशेषणं, दक्षत्वादिकं च विधीयमानं नानूद्यमानमिति नैवंविधो विषयः प्रतिषेधस्य । **एकानेकस्वभावस्ये**ति- अयमर्थः- एकोऽप्यात्मा यथैकत्वेनानुभूयते तथा द्रष्टा श्रोता मन्तेत्यादिनानात्वेनापि, नह्येकान्तेनैकत्वेनानेकत्वेन वेतरविनिर्मुक्तेन प्रतिपत्तिरस्ति, तत्र यथैकत्वेन द्वित्वेन च तस्मिन् विवक्षिते एकवचनं द्विवचनं च तथा बहुत्वस्याप्युपपत्तेर्बहुत्वविवक्षायां बहुवचनं सिद्धं, नहि भाविकमेव रूपं शब्दस्य प्रवर्तकमारोपितस्यापि प्रवर्तकत्वात्, न चातिदेशेन प्रापितेऽपि बहुवचने ततो द्वित्वैकत्वयोः प्रतिपत्तिरस्ति, तस्य बहुत्व एव नियमात्, नहि वस्तुशक्तिर्वचनेनान्यथा कर्तुं शक्यत इति, तत्र द्वित्वैकत्वप्रतिप्रतिः प्रमाणान्तरगम्यः शब्दादप्रतीयमानोऽशब्दोऽर्थ इति । यथा युष्मदर्थे गुरौ चैकस्मिन्नपि बहुवचनं प्रयुज्यते- यूयं ब्रूथ, भवन्तो ब्रुवन्तीति तथाऽस्मदर्थस्यापि बहुवचने सिद्धे सविशेषणे तस्मिन् विवक्षिते द्वयोरेकत्र बहुवद्भावप्रतिषेधार्थमिदं वचनमिति ॥ छ ॥ २. २. १२२. ॥

**न्या० स०—अविशे०** । न विशेषणमविशेषणम्, यद्वा विशेषणस्याभावः । **अस्मदः** इत्यत्र अनुकरणत्वादस्मच्छब्दकार्याप्रवृत्तिः । **अविशेषणे** इत्यत्र प्रतिषेधप्रधानः प्रसज्यो नञ्, यद्यत्र पर्युदासः स्याद्- विशेषणादन्यस्मिन्निति तदा विशेषणे न विधिर्नापि प्रतिषेधो विशेषणे ततोऽन्यस्मिंस्तु प्रयुज्यमाने विधिः, कोऽर्थः ? सत्यप्यस्मदर्थस्य विशेषणे ततोऽन्यस्मिन् प्रयुज्यमाने स्यादित्यर्थः, ततश्चाहं मैत्रो ब्रवीमीत्यत्रापि भिवन्तस्य विशेष्यस्य भावाद् मैत्र इति विशेषणे सत्यपि स्यादित्याह- **न चेत् तस्ये**ति । आवां **ब्रूव** इति- अत्र द्वयोर्मध्ये एको ब्रूते ततश्च कथमावां ब्रूव इति, उच्यते- द्वयोरप्यभेदोपचारात् । **विधेयत्वेने**ति- अज्ञातज्ञापनीयत्वेनेत्यर्थः । **एकानेकस्वभावस्ये**ति- अयमर्थः- एकोऽप्यात्मा यथैकत्वेनानुभूयते तथा द्रष्टा श्रोता मन्तेत्यादिनानात्वेनापि, नह्येकान्तेनैकत्वेनानेकत्वेन वेतरविनिर्मुक्तेन प्रतिपत्तिरस्ति, तत्र यथैकत्वेन द्वित्वेन च तस्मिन् विवक्षिते एकवचनं द्विवचनं च तथा बहुत्वविवक्षायां बहुवचनं सिद्धम् । नटानां नृत्तं "नटान्नृत्तं ज्यः" [ ६. ३. १६५. ] नाट्यम् ॥ २. २. १२२. ॥

## फल्गुनी-प्रोष्ठपदस्य भे । २ । २ । १२३ ।

**त० प्र०**—फल्गुनीशब्दस्य प्रोष्ठपदाशब्दस्य च **भे**- नक्षत्रे वर्तमानस्य **द्वा**वर्थौ **बहुवद् वा** भवतः । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः; कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः; उदिते पूर्वे फल्गुन्यौ, उदिताः पूर्वाः फल्गुन्यः; उदिते पूर्वे प्रोष्ठपदे, उदिताः पूर्वाः प्रोष्ठपदाः । **भ इति किम् ?** फल्गुनीषु जाते फल्गुन्यौ माणविके । **द्वावित्येव**- तेनैकस्मिन् ज्योतिषि न भवति- दृश्यते फल्गुनी । एकवचनान्तः प्रयोग एव नास्तीत्यन्ये । फल्गुनी-प्रोष्ठपदस्येति शब्दपरो निर्देशः किम् ? तत्पर्यायस्य मा भूत्- अथ पूर्वे भद्रपदे ॥ १२३ ॥

**श० न्या०—फल्गु०** । फल्गुनी च प्रौष्ठपदा चेति फल्गुनीप्रोष्ठपदमिति शब्दपरो निर्देशः, अतोऽर्थसम्बन्धे षष्ठी, फल्गुनीशब्दस्य प्रोष्ठपदाशब्दस्य च नक्षत्रे वर्तमानस्य यदभिधेयं तस्य च द्वावित्यनुवर्तमानं विशेषणम्, एतावता फल्गुनी-प्रोष्ठपदशब्दौ नक्षत्रशब्दावित्यर्थः, नक्षत्रशब्दश्चेहार्थगतं स्वभावं प्रवृत्तनिमित्तीकृत्य यदि न वर्तेत, [ तर्हि ] यावान् कश्चिन्नक्षत्रवाच्योऽर्थः स सर्वो न लभ्येत, नक्षत्रशब्दश्चेह चन्द्रोपेतायां ज्योतिरवस्थायां प्रयुज्यते, तथा च चन्द्रोपेतं ज्योतिर्विशेषमुपलभ्य ज्योतिर्विदो वदन्ति- अत्र नक्षत्रे पूर्वाः फल्गुन्य इत्यादि, विनापि चन्द्रेण तदुपलक्षितेऽपि किमिदं नक्षत्रं फल्गुन्यौ प्रौष्ठपदा वेति विनापि चन्द्रेण ज्योतिर्दर्शनादयं नक्षत्रव्यवहारः; काले च "चन्द्रयुक्तात् काले०" [ ६. २. ६. ] इति प्रत्ययस्य "लुप् त्वप्रयुक्ते" [ ६. २. ६. ] इति लुपि पूर्वासु फल्गुनीषु गतः पूर्वासु प्रोष्ठपदासु गत इति, नात्र सर्वत्रैकमनुवृत्तमन्यतो व्यावृत्तं वस्तुरूपमुपलभ्यते, शब्दस्तु तस्यार्थस्य साधारणस्तद्रूपभेदादतस्तेन सोऽर्थो लक्षणीयः । एवमर्थ एव च फल्गुनीप्रोष्ठपदस्येत्यर्थाद् व्यावृत्तः षष्ठ्यन्तः शब्दपरो निर्देशः, अन्यथा फल्गुनीप्रोष्ठपदं भमित्यभेदेन निर्दिशेतेत्याह- **फल्गुनीशब्दस्ये**त्यादि । **कदा पूर्वे फल्गुन्या**विति- चन्द्रोपेतं ज्योतिषी तद्युक्तो वा कालोऽत्रार्थः, तस्य भावानां प्रवृत्तविशेषत्वात् तत्त्वाध्यवसायाद् वा फल्गुन्यादिरूपत्वाद् द्विरूपता । **उदिते पूर्वे फल्गुन्या**विति- ज्योतिरत्रार्थः । **फल्गुनीषु जाते** इति- जातेऽर्थे "फल्गुन्याष्टः" [ ६. ३. १०६. ] इति टप्रत्यये "अवर्णेवर्णस्य" [ ७. ४. ६८. ] इतीकारलोपे टित्वात् ङ्यां- **फल्गुन्यौ माणविके** इति- भ इति वचनादत्र न भवति, माणविके इत्यत्र नक्षत्रार्थता दर्शिता । **एकस्मिन् ज्योतिषि मा भू**दिति- ननु फल्गुनीप्रोष्ठपदाशब्दौ नक्षत्रवाचित्वाद् द्वित्वाव्यभिचारिणौ, यतश्चन्द्रमसा योगेन नक्षत्रता, तेन च द्वयोरेव योगो न त्वेकैकस्य, तद् द्वितारमेव, तदेकं नक्षत्रमुच्यत इति किमर्थं तस्य द्वाविति विशेषणमनुवर्त्यत इति, नैष दोषः- भग्रहणेनात्र ज्योतिष्कस्योपलक्षितत्वात् तस्य च द्वयोरेकैकस्य चाविशिष्टत्वादत्रापि स्यात्- **दृश्यते फल्गुनी**ति । **अन्ये** इति- शाकटायनः । **अथ पूर्वे भद्रपदे** इति- अर्थपरे हि निर्देशेऽत्रापि तदर्थस्य विद्यमानत्वाद् बहुवद्भावः स्यादिति । अथ किमर्थमिदं, नहि बहुवचनाद् द्वित्व-

प्रतिपत्तिरस्ति, बहुत्वस्य ततः प्रतीतेः, बहुत्वं च तत्र यथाकथञ्चित् सम्पाद्यं, चन्द्रोपेते हि ज्योतिषी, इति बहुत्वं सिद्धम्, फल्गुनी-प्रोष्ठपदशब्दयोश्च चन्द्रमसि वृत्तिरुपचारान्मुख्योपचरितयोश्चार्थयोर्युगपदुपादानात् कालेऽपि तद्रूपाध्यारोपात्, चन्द्रस्यासन्निहितत्वेऽप्युदिताः पूर्वाः फल्गुन्यः इति पूर्वदृष्टसमुदायरूपेणैवाभिधानात्, द्विवचनं चन्द्राविवक्षायां तयोरेव ज्योतिषोर्भवति; न चैवं सति पुष्पादावतिप्रसङ्गः, तत्र बहुत्वसंप्रत्ययाभावात्, नियतविषयित्वादुपचारकल्पनाया अत्राभावान्न्यायात् प्रतीयमानायाश्च गरीयस्त्वादितीदमुच्यते ।॥छ॥ २.२.१२३.॥

**न्या० स०—फल्गु०** । **प्रोष्ठपदे** इति– प्रवृद्धः ओष्ठो यस्य प्रोष्ठो गौस्तस्येव पादौ यस्या ययोर्वा "सुप्रात०" [ ७. ३. १२९. ] इति निपात्यते ॥ २. २. १२३. ॥

## गुरावेकश्च । २ । २ । १२४ ॥

**त० प्र०—**गुरौ– गौरवार्हेऽर्थे वर्तमानस्य शब्दस्य द्वावेकश्चाऽर्थो बहुवद् वा भवति । त्वं गुरुः, यूयं गुरवः; युवां गुरू, यूयं गुरवः; स कारुणिक उपाध्यायः, ते कारुणिका उपाध्यायाः; तौ कारुणिकावुपाध्यायौ, ते कारुणिका उपाध्यायाः; एष मे पिता, एते मे पितरः; अयं तपस्वी, इमे तपस्विनः; गुरुशिष्यौ, गुरुशिष्याः; इह भवानाह, इह भवन्तस्त्वाहुः । आपः, दाराः, गृहाः, वर्षाः, पञ्चालाः जनपदः, गोदौ ग्रामः, खलतिकं वनानि, हरीतक्यः फलानि, पञ्चालमथुरे, चञ्चाऽभिरूपो मनुष्य इति । सर्वंलिङ्गसंख्ये वस्तुनि स्याद्वादमनुपतति मुख्योपचरितार्थाऽनुपातिनि च शब्दाऽऽत्मनि रूढितस्तत्तल्लिङ्गसंख्योपादानव्यवस्थाऽनुसर्तव्या ॥ १२४ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ द्वितीयस्याऽध्यायस्य द्वितीयः पादः समाप्तः ॥ २ । २ ॥

मूलार्कः श्रूयते शास्त्रे, सर्वकल्याणकारणम् ।
अधुना मूलराजस्तु, चित्रं लोकेषु गीयते ॥ ६ ॥

**श० न्या०—गुरा०** । **गुरावि**ति धर्मिप्रधानोऽयं निर्देश इत्याह– **गुरौ- गौरवार्हे** इति । नन्वाप इत्येकस्यामपि जलकणिकायां बहुवचनान्तोऽप्शब्दः प्रयुज्यते, दारशब्दश्चैकस्यामपि योषिति पुल्लिङ्गो बहुवचनायोगः [ बहुवचनान्तः ] एवं गृहशब्दोऽप्येकस्मिन्नपि गृहे, एवं वर्षा इत्येकस्मिन्नपि ऋतौ, एवं पञ्चाला इति बहुवचनान्तेनैकोऽर्थ उच्यते– जनपदः, तत्र बहुत्वाभावाद् बहुवचनायोगः, यद्यसौ बहुत्वसंख्यायोगी स्यात् तदैकवचनानुपपत्तिः– जनपद इति, एकत्वाभावात्, नह्येकोऽर्थ एको भवति अनेकश्च, विरोधात्, कथञ्चित् तथाभावे तूभयमप्युभयसंख्यायोगि स्यात् न चैतदिष्यत इति, एवं गोदौ ग्राम इति द्वित्वैकत्वनियमायोगः, एवं खलतिकं वनानीत्येकवचनान्तेन बह्वभिधानमनुपपन्नम्, तथा हरीतक्यः फलानीति स्त्रीनपुंसकयोर्लिङ्गयोरयोगः, तथा पञ्चालमथुरे इत्यनुत्तरपदस्य देशवृत्तेर्बहुविषयस्य बहुवद्भावप्रतिषेधानुपपत्तिः, एवं चञ्चाभिरूप इत्यादावपि चञ्चादिलिङ्गता स्यादित्यत्र यत्नः कर्तव्यो येन सर्वं समञ्जसं स्यादित्याशङ्कायामाह– **सर्वलिङ्गसंख्ये च वस्तुनी**त्यादि– सर्वाणि– त्रीण्यपि लिङ्गानि, सर्वाश्चैकत्वद्वित्वबहुत्वलक्षणाः संख्या एकस्मिन्नेव वस्तुनि सन्ति, तथाहि– वस्त्वर्थो मात्रेति शब्दाः सर्वत्र वस्तुतत्त्वे घटवस्तु घटार्थो घटमात्रेति प्रवर्तन्त इति लिङ्गानि दृश्यन्ते । गुणगुणिद्रव्यपर्यायाऽवयवावयविरूपे वस्तुनि घट इत्यभेदविवक्षायामेकत्वसंख्या, गुणि-गुणिनौ द्रव्यपर्यायौ अवयवावयविनौ घटो नैकैकमात्र इति द्वित्वसंख्या, गुण-पर्यायावयवानां बहुत्वात् तद्भेदविवक्षायां गुणाश्च गुणी गुणगुणिनो घटा इति बहुत्वसंख्या । न चैतदेकस्मिन् वस्तुनि स्याद्वादानुपातिनि विरुद्धं स्यात्, कथञ्चिदिति वादः स्याद्वादः, तथाहि– स एवायं मैत्र इत्याजन्ममरणमविच्छेदः प्रतीयते तन्न भेदमात्रं वस्तु; बालोऽयं न युवा, युवाऽयं न बालः, सुप्तोऽयं नोत्थितः, उत्थितोऽयं न सुप्तः, इति विच्छेदश्च प्रतीयते तन्नाभेदमात्रम्; न च तयोर्भेद एव मैत्रो बालो मैत्रो युवेत्येकत्वेन प्रतिभासनात्, गौरश्व इतिवद् भेदप्रतिभासाऽभावात्; एकान्तेन चाभेदेऽन्यतरविलोपः, तथा च भेदाभेदप्रतिभासायोगः, न चान्यतरस्य मिथ्यात्वमितराविशेषात्, तस्मादन्तरालावस्थं वस्तु, तदेतत् स्याद्वादानुपातीति नात्रानेकरूपता विरुध्यते, तदेवं क्रमाक्रमभाव्यनेकभेदात्मके वस्तुनि सर्वमुपपद्यते । **तत्राप** इति नैकस्यां व्यक्तौ प्रवर्तते, अपितु बहुव्यक्तिविषय एव । एवं **दाराद**योऽपि पुल्लिङ्गाः, । यथा द्वौ त्रय इति भेदविषया एव नैकैकविषयाः, एकद्रव्यविषयत्वेऽपि गुण-पर्यायाऽवयवभेदोपादानाद् वस्तुसामर्थ्याद् बहुत्वोपपत्तिः । एवं **पञ्चाला** इति वस्तुशक्तिस्वाभाव्यादवयवद्वारेण प्रवर्तते, **जनपद** इति समुदायद्वारेण । एवं **गोदौ ग्राम** इत्यादावप्येकानेकसंख्योपपत्तिः । **हरीतक्यः फलानी**ति लिङ्गभेदश्च सर्वलिङ्गत्वाद् वस्तुनः । **पञ्चालमथुरे** इति पञ्चालादीनां बहुत्वविषयाणां समासे उत्तरपदादन्यत्र समुदायाभिधानं न त्ववाभिधानमिति बहुत्वाभावः, नियतविषयाश्च शब्दशक्तयो भवन्ति,

यथा– राज्ञः पुरुष इति वाक्ये राजशब्दो विशेषणादियोगिनमर्थमाचष्टे, वृत्तौ तु तद्विलक्षणं राजपुरुष इति । **चञ्चाभिरूपो मनुष्य** इति सादृश्यान्मनुष्यवृत्तेश्च तद्रूपं यत्र विशेषणयोगि । पञ्चालादिशब्दानां च क्षत्रियाद्यर्थवृत्तीनामपि सोऽयमित्यभिसम्बन्धादुपचाराज्जनपदाद्यर्थेऽपि वृत्तिरित्युक्तं– **मुख्योपचरितार्थानुवर्तिनी**त्यादि । अत्र च रूढिः प्रमाणम्, यतो वृद्धव्यवहाराच्छब्दार्थव्युत्पत्तिरित्युच्यते– **रूढित** इति– रूढिः शिष्टव्यवहारे प्रसिद्धिः । **तत्तल्लिङ्गसंख्योपादानव्यवस्थे**ति– सा सा वेदानीं प्रदर्शितेति ॥ छ ॥ २. २. १२४. ॥

॥ इत्याचार्यश्री**हेमचन्द्र**मुनीन्द्रविरचिते स्वोपज्ञ**तत्त्वप्रकाशिका**–प्रकाशे **शब्दमहार्णवन्यासे**
द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ छ ॥
सर्वाग्रग्रन्थ -२९७५, अक्षर–२० ॥ छ ॥

[ मूलार्कः श्रूयते शास्त्रे, सर्वकल्याणकारणम् ।
अधुना मूलराजस्तु, चित्रं लोकेषु गीयते ॥ ६ ॥ ]

अनुसन्धानकारस्य—

शास्त्रे–ज्यौतिषादिनिमित्तानुशासने, मूलार्कः–मूलनक्षत्रीयसूर्यः, वार्षिकगत्या मूलनक्षत्रकक्षायां स्थितः सूर्य इति भावः, सर्वकल्याणकारणं– सर्वेषां कल्याणानां शुभफलानां कारणं निमित्तमिति, श्रूयते– श्रवणविषयीक्रियते, तन्नक्षत्रे हि सूर्यस्योत्तरायणाभिमुख्यसन्निधिरिति तस्य कल्याणकरत्वेन प्रसिद्धिरिति भावः । अधुना– साम्प्रतम्, मूलराजः– मूलनक्षत्रे स्थितो राजा– चन्द्रो मूलराजः, मूलनक्षत्रस्थितचन्द्र इति भावः, लोकेषु गीयते– उद्घोष्यते, सर्वकल्याणकारणमिति शेषः, तत् चित्रम्– आश्चर्यम् । इयं शास्त्रविरुद्धा लोकप्रसिद्धिरिति विरोधाभासालङ्कारध्वनिः, शास्त्रेण मूलनक्षत्रीयसूर्यस्य शुभत्वेन ख्यापिततया सम्प्रति तन्नक्षत्रीयचन्द्रस्य तथा ख्यातिराश्चर्यजनिकेति भावः । एतद्विरोधपरिहारस्तु मूलराजपदस्य प्रकृतवर्णनीयनृपपरत्वेन, तथा च मूलनक्षत्रीयसूर्यवदयमपि मूलराजनामा नृपः सर्वकल्याणकारणत्वेन सम्प्रति लोके ख्यायत इति भावः । एवं च विरोधाभासमूलिकोपमाध्वनिरिहेति विज्ञेयम् ॥ ६ ॥

**न्या० स०—गुरा०** । **कारुणिक** इति– करुणा प्रयोजनमस्य करुणया वा चरति । अयं भवान् **इहभवान्** " भवत्वायु:० " [ ७. २. ९१. ] इत्यधिकारात् " त्रप् च " [ ७. २. ९२. ] इति त्रप्, " ककुत्र० " [ ७. २. ९३. ] इति पश्चान्निपात्यते । इमे भवन्तः **इहभवन्तः** । पञ्चालानां देशोऽपि **पञ्चाला** उपचारात् । गोदौ– ह्रदौ तत्समीपग्रामोऽपि **गोदौ** । **खलतिकं वनानी**ति– खलतीति " कुशिक० " [ उणा० ४५. ] इत्यादिना निपात्यत इत्याम्नायः, यद्वा खलान् तिक्नोति " मूलविभुजादयः " [ ५. १. १४४. ] कः, खलतिकाख्यपर्वतसमीपवर्तिवनानामपि खलतिक इत्याख्या । हरति रोगानिति " हृरुहि० " [ उणा० ७९. ] इति ईतके– हरीतकी । पञ्चालाश्च मथुरा च **पञ्चालमथुरे** । चीयते उपचीयते तृणैरिति चञ्चा । " चमेर्डोंचञ्चौ " [ उणा० १२२. ] अभिमतं रूपं यस्य अभिमतं रूप्यते वा अभिरूपो मनुष्यश्चञ्चेव अकिञ्चित्करत्वात् **अनुपतती**ति– अनुयाति अनुव्रजतीत्यर्थः । **अनुसर्तव्ये**ति– लिङ्गानि च संख्याश्च, तास्ताश्च ताः लिङ्गसंख्याश्च तासामुपादानं तस्य व्यवस्था साऽनुसर्तव्या । **नन्वाप** इत्येकस्यामपि जलकणिकायां बहुवचनान्तोऽप्शब्दः प्रयुज्यते, **दार**शब्दश्चैकस्यामपि योषिति पुंल्लिङ्गो बहुवचनान्तः, एवं **गृह**शब्दोऽप्येकस्मिन्नपि गृहे, एवं **वर्षा** इत्येकस्मिन्नपि ऋतौ, एवं **पञ्चाला** इति बहुवचनान्तेनैकोऽर्थ उच्यते जनपदः, तत्र बहुत्वाभावाद् बहुवचनाऽयोगः, यद्यसौ बहुत्वसंख्यायोगी स्यात् तदैकवचनानुपपत्तिः जनपद इति एकत्वाभावात्, नह्येकोऽर्थ एको भवति अनेकश्च, विरोधात्, कथञ्चित् तथाभावे तूभयमप्युभयसंख्यायोगि स्यात्, न चैतदिष्यत इति, एवं **गोदौ ग्राम** इति द्वित्वैकत्वनियमाऽयोगः, **खलतिकं वनानी**त्येकवचनान्तेन बहुत्वाभिधानमनुपपन्नम्, तथा **हरीतक्यः फलानी**ति स्त्रीनपुंसकयोर्लिङ्गयोरयोगः, तथा **पञ्चालमथुरे** इत्यनुत्तरपदस्य देशवृत्तेर्बहुविषयस्य बहुवद्भावप्रतिषेधानुपपत्तिः, एवं **चञ्चाभिरूप** इत्यादावपि चञ्चादिलिङ्गता स्यादित्यत्र यत्नः कर्तव्यः, येन सर्वं समञ्जसं स्यादित्याशङ्कायामाह– **सर्वलिङ्गसंख्ये वस्तुनी**त्यादि– सर्वाणि– त्रीण्यपि लिङ्गानि, सर्वाश्च– एकत्व-द्वित्व-बहुत्वलक्षणाः संख्या एकस्मिन्नेव वस्तुनि सन्ति, तथाहि– वस्त्वर्थो गम्यत इति शब्दाः सर्वत्र वस्तुतत्त्वे– घटवस्तु घटार्थो घटमात्रेति प्रवर्त्तन्ते इति लिङ्गानि दृश्यन्ते; गुणगुणि-द्रव्यपर्याया-ऽवयवावयविरूपे वस्तुनि घट इत्यभेदविवक्षायामेकत्वसंख्या, गुण-गुणिनौ द्रव्य-पर्यायौ अवयवा-ऽवयविनौ घटौ नैकैकमात्र इति द्वित्वसंख्या, गुण-पर्याया-ऽवयवानां बहुत्वात् तद्भेदविवक्षायां गुणाश्च गुणी च गुणगुणिनो घटा इति बहुत्वसंख्या; न चैतदेकस्मिन् वस्तुनि स्याद्वादानुपातिनि विरुद्धं स्यात्, यतः कथञ्चिदिति वादः स्याद्वादः, तथाहि– स एवायं मैत्र इत्याजन्ममरणमविच्छेदः प्रतीयते, तत्र भेदमात्रं वस्तु, बालोऽयं न युवा, युवाऽयं न बालः, सुप्तोऽयं न उत्थितः, उत्थितोऽयं न सुप्त इति विच्छेदश्च प्रतीयते तत्राभेदमात्रम्, न च तयोर्भेद एव 'मैत्रो बालो मैत्रो युवा' इत्येकत्वेन प्रतिभासनात्, गौरश्वेतिवद् भेदप्रतिभासाभावात्, एकान्तेन भेदेऽन्यतरविलोपः, तथा च भेदाभेदप्रतिभासायोगः, न चान्यतरस्य मिथ्यात्वमितराविशेषात्, तस्मादन्तरालावस्थं वस्तु, तदेतत् स्याद्वादानुपातीति नात्रानेकरूपता विरुध्यते, तदेवं क्रमाक्रमभाव्यनेकभेदात्मके

वस्तुनि सर्वमुपपद्यते, तत्राप इति नैकस्यां व्यक्तौ प्रवर्तते, अपि तु बहुव्यक्तिविषय एव । एवं दारादयोऽपि पुल्लिङ्गाः, यथा द्वौ त्रय इति भेदविषया एव नैकैकविषया एव, एकद्रव्यविषयत्वेऽपि गुणपर्यायावयवभेदोपादानाद् वस्तुसामर्थ्याद् बहुत्वोपपत्तिः । एवं पञ्चाला इति वस्तुशक्तिस्वाभाव्यादवयवद्वारेण प्रवर्तते, जनपद इति समुदायद्वारेण । एवं गोदौ ग्राम इत्यादावप्येकानेकसंख्योपपत्तिः । हरीतक्यः फलानीति लिङ्गभेदश्च सर्वलिङ्गत्वाद् वस्तुनः । पञ्चालमथुरे इति पञ्चालादीनां बहुत्वविषयाणां समासे उत्तरपदादन्यत्र समुदायाभिधानं नत्ववयवाभिधानमिति बहुत्वाभावः, नियतविषयाश्च शब्दशक्तयो भवन्ति, यथा– राज्ञः पुरुष इति वाक्ये राजशब्दो विशेषणादियोगिनमर्थमाचष्टे, वृत्तौ तु तद्विलक्षणं राजपुरुष इति । चञ्चाभिरूपो मनुष्य इति सादृश्यान्मनुष्यवृत्तेश्च तद्रूपं यत्र विशेषणयोगि । पञ्चालादिशब्दानां च क्षत्रियाद्यर्थवृत्तीनामपि सोऽयमित्यभिसम्बन्धादुपचाराज्जनपदाद्यर्थेऽपि वृत्तिरित्युक्तं– मुख्योपचरितार्थानुपातिनीत्यादि । अत्र च रूढिः प्रमाणं, यतो वृद्धव्यवहाराच्छब्दार्थव्युत्पत्तिरित्युच्यते– **रूढित** इति– रूढिः शिष्टव्यवहारे प्रसिद्धिः । **तत्तल्लिङ्गसंख्योपादानव्यवस्थेति**– सा सा येदानीं प्रदर्शितेति ॥ २. २. १२४ ॥

॥ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

## अथ तृतीयः पादः

## नमस्-पुरसो गतेः क-ख-प-फि रः सः । २ । ३ । १ ॥

**त० प्र०—**गतिसंज्ञकयोः 'नमस् पुरस्' इत्येतयोः संबन्धिनो रेफस्य क-ख-प-फेषु परेषु सकारादेशो भवति । **नमस्कृत्य, नमस्करोति, नमस्कर्ता, नमस्कर्तुम्, नमस्कर्तव्यम्; पुरस्कृत्य, पुरस्करोति, पुरस्कर्ता, पुरस्कर्तुम्, पुरस्कर्तव्यम्; पुरस्खादः, पुरस्खादनम्; पुरस्पातः, पुरस्पतनम्, पुरस्फकः, पुरस्फकनम्** । गतेरिति किम्? **नमः कृत्वा, नमः करोति; नमःशब्दमुच्चारयतीत्यर्थः, नमःशब्दस्य कृग्योगे विकल्पेन गतिसंज्ञाविधानाद् वा तिरः पुरः करोति** ॥ १ ॥

**श० न्या०—नमः०** । नमःशब्दः साक्षादादौ पठ्यमानोऽनुक्रियते, पुरःशब्दोऽस्प्रत्ययान्तः, ततः समाहारद्वन्द्वात् षष्ठी, अनयोश्च " साक्षादादिश्च्व्यर्थे " [ ३. १. १४. ] " पुरोऽस्तमव्ययम् " [ ३. १. ४२. ] इति गतिसंज्ञा; **र** इति पूर्वनिर्दिष्टत्वेन कार्यित्वात् स्थानसम्बन्धे षष्ठी, **स** इति पश्चान्निर्दिष्टत्वात् कार्यत्वात् प्रथमा; अकार उच्चारणार्थः । **नमस्कृत्येति**– " प्राक्काले " [ ५. ४. ४७. ] इति कृतस्य क्त्वाप्रत्ययस्य " अनञः० " [ ३. २. १५४. ] इति यबादेशः । **नमस्करोतीति**– तिवि " कृग्– तनादेः० " [ ३. ४. ८३. ] इत्युप्रत्ययः । **नमस्कर्ता, नमस्कर्तुं, नमस्कर्तव्यमि**ति– तृच्-तुम्-तव्येषु " गति-क्वन्यः० " [ ३. १. ४२. ] इति समासः, एतेषु " सो रुः " [ २. १. ७२. ] इति कृतस्य रेफस्य " रः कख-पफयोः " [ १. ३. ५. ] इत्यादिबाधनार्थमनेन सकारः, एवं **पुरस्कृत्ये**त्यादाविति । **नमःशब्दमुच्चारयतीत्यर्थ** इत्यनेन च्व्यर्थाभावाद् गतिसंज्ञाया अभावं दर्शयति । सत्यपि वा च्व्यर्थे " कृगो नवा " [ ३. १. १०. ] इत्यतो नवाधिकारात् कृग्योगे गतिसंज्ञाया विकल्पितत्वात् तदभावपक्षे– **नमः कृत्वे**त्यादि प्रत्युदाहरणमित्याह– **नमःशब्दे**त्यादि । **[ पुरः ]** पिपर्तीति आजादिनिपातनात् क्विपि दीर्घत्वे च " ओष्ठ्यादुर् " [ ४. ४. ११७. ] इत्युरि– पूः, ततः शस् ॥ छ ॥ २. ३. १. ॥

**न्या० स०—नमस्-पुरसो०** । **नमस्कृत्येति**– अनमो नमः करणं पूर्वं– " साक्षादादिः० " [ ३. १. १४. ] इति गतिसंज्ञायां " गति-क्वन्यः० " [ ३. १. ४२. ] इति सः । **नमः कृत्वेति**– अत्र नमः शब्दान्तरं न त्वव्ययमिति अमः " अनतो लुप् " [ ३. २. ६. ] । **पुर इति**– " पृंक् " पिपर्तीति आजादिनिपातनात् क्विपि दीर्घत्वे च " ओष्ठ्यादुर् " [ ४. ४. ११७. ] इत्युरि– पूः, ततः शस् ॥ २. ३. १. ॥

## तिरसो वा । २ । ३ । २ ॥

**त० प्र०—**गतिसंज्ञकस्य तिरःशब्दस्य संबन्धिनो रेफस्य क-ख-प-फेषु परेषु सकाराऽऽदेशो वा भवति । **तिरस्कृत्य, तिरःकृत्य; तिरस्करोति, तिरःकरोति; तिरस्कर्ता, तिरःकर्ता; तिरस्कर्तुम्, तिरः कर्तुम्** । गतेरित्येव– **तिरः कृत्वा काष्ठं गतः**, अन्तर्धावपि " कृगो नवा " [ ३. १. १०. ] इति विकल्पेन गतिसंज्ञाविधानात् **तिरः कृत्वा** । अगतेरप्यन्तर्धाविच्छन्त्यन्यः **तिरस्कृत्वा** ॥ २ ॥

**श० न्या०—तिर०** । गतिरिति कख-पफीति चानुवर्तत इत्याह– **गतिसंज्ञकस्ये**त्यादि– गतिसंज्ञा चास्य " तिरोऽन्तर्धौ " [ ३. १. ९. ] " कृगो नवा " [ ३. १. १. ] इति च । **तिरस्कृत्य** कृगः पूर्ववत्त्वादिः, अनेन रेफस्य सकारः, पक्षे विसर्गादिः । **तिरः कृत्वा काष्ठं गत** इति– अनृजु काष्ठं कृत्वा गत इति ह्यर्थोऽत्र विवक्षितो न त्वन्तर्धिरिति गतेरभावात् सत्वाभावः । अन्तर्धावपि कृग्योगे पाक्षिकत्वाद् गतेः पक्षे तदभावः, अत आह– **अन्तर्धावि**त्यादि ॥ छ ॥ २. ३. २. ॥

**न्या० स०—तिर०** । [ नेह व्याख्या दृश्यते ] ॥ २. ३. २. ॥

## पुंसः । २ । ३ । ३ ॥

**त० प्र०—**पुम्स्शब्दसंबन्धिनो रेफस्य क-ख-प-फेषु परेषु सो भवति । पुंस्कोकिलः, पुंस्खननम्, पुंस्पाकः, पुंस्फलम्, पुंस्काम्यति, पुंस्कः, पुंस्पाशः ॥ ३ ॥

**श० न्या०—**पुंसः । **पुंस्कोकिल** इति- विशेषणसमासः । पुमांसमिच्छति अज्ञातादिर्निन्द्यश्च पुमानिति "द्वितीयायाः काम्यः" [ ३. ४. २२. ] "कुत्सिता-ऽल्पा-ऽज्ञाते" [ ७. ३. ३३. ] "निन्द्ये पाशप्" [ ७. ३. ४. ] इति काम्यादावन्त्यसकारलोपे "पुमोऽशिटि०" [ १. ३. ९. ] इति रेफे पूर्वस्यानुस्वारागमेऽनेन सत्वे- **पुंस्काम्यती**त्यादि ॥ छ ॥ ॥ २. ३. ३. ॥

**न्या० स०—पुंसः** । ननु "पुमोऽशिट्यघोषे०" [ १. ३. ९. ] इत्यत्र रमपहाय सत्वमेव विधीयतां किमनेनेति ? सत्यम्- एतद् विना 'पुंश्चरः, पुंष्टिट्टिभः,' इत्यादयो न सिद्ध्यन्तीति आरभ्यते; न च वाच्यं "सो रुः" [ २. १. ७२. ] इति रुत्वे तस्य शत्व-षत्वादौ च कृते सर्वाणि सेत्स्यन्ति ? विधानसामर्थ्येन रुत्वाभावात् । **पुंस्काम्यति** अत्र "रोः काम्ये" [ २. ३. ७. ] इति नियमात् "नामिनस्तयोः षः" [ २. ३. ८. ] इति षत्वं न, '**पुंस्कः, पुंस्पाशः**' इत्यत्र तु कृतमपि षत्वं परस्मिन् "पुंसः" [ २. ३. ३. ] इति सत्वे कर्तव्ये "णषमसत्०" [ २. १. ६० ] इत्यनेनासिद्धं, ततः सप्तमपादे सत्वापेक्षया परमपि षत्वं "णषम्०" [ २. १. ६०. ] इत्यत्र ज्ञातव्यम्, अतः षत्वमर्वाचीनं सत्वं तु परविधिरिति ॥ २. ३. ३. ॥

## शिरो-ऽधसः पदे समासैक्ये । २ । ३ । ४ ॥

**त० प्र०—**'शिरस् अधस्' इत्येतयोः संबन्धिनो रेफस्य पदशब्दे परे सो भवति, **समासैक्ये-** तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः । **शिरस्पदम्, अधस्पदम्;** "अव्ययं प्रवृद्धादिभिः" [ ३. १. ४८. ] इति समासः । पद इति किम् ? शिरःखण्डम् । समासेति किम् ? शिरःपदम्, अधः पदम् । ऐक्य इति किम् ? परमशिरःपदम्, परमाधःपदम् ॥ ४ ॥

**श० न्या०—शिरो०** । पद इति स्वरूपं गृह्यते, न तु संज्ञेत्याह- **पदशब्दे परे** इति- न च वाच्यं * स्वं रूपम् * इति * कृत्रिमाऽकृत्रिमयोः० * इति वा परिभाषितस्यैव ग्रहणं प्राप्नोति न तु स्वरूपस्येति, 'समास' इति वचनादुत्तरपदमन्तरेण च समासस्यासम्भवात् तस्य सामर्थ्यलब्धत्वात् पदग्रहणानर्थक्यप्रसङ्गादिति । **तौ चे[ दि ]**त्यादिना '**समासैक्ये**' इति स्पष्टयति । **शिरस्पदमि**ति षष्ठीसमासः । **अधस्पदमि**ति- लक्षणेनात्र समासाप्रवृत्तेः कथमत्र समासः ? अत आह- "**अव्ययम्०**" [ ३. १. ४८. ] इत्यादि- अत्र च नित्याधिकारो न स्मर्यत इति । अधः पदमिति- समासोऽपि मयूरव्यंसकादित्वाद् वा समासः । **परमशिरःपदमि**ति- अत्र शिरःशब्दस्य समासद्वयसम्बन्धित्वादैक्य इति वचनान्न भवति ॥ छ ॥ २. ३. ४. ॥

**न्या० स०—**शिरोऽधसः० । **पदशब्दे पर इति-** न वाच्यं * स्वं रूपं- शब्दस्य० * इत्यनेन * कृत्रिमाकृत्रिमयोः० * इत्यनेन वा "तदन्तं पदम्" [ १. १. २०. ] इत्यादि सूत्रैः परिभाषितस्य ग्रहणं प्राप्नोतीति, समास इति वचनादुत्तरपदमन्तरेण च समासस्यासम्भवात् तस्य सामर्थ्यलब्धत्वात् पदग्रहणानर्थक्यप्रसङ्गादिति । **शिरस्पदम्** अत्र "सप्तमी शौण्डाद्यैः" [ ३. १. ८८. ] इति सः, षष्ठीतत्पुरुषो वा । **अधः पदम्** इत्यत्र "अव्ययं प्रवृद्धादिभिः" [ ३. १. ४८. ] इति नित्यं से प्राप्ते बाहुलकाद् वाक्यमपि । "ऋते तृतीयासमासे" [ १. २. ८. ] इतिवत् समास इत्युक्तेऽपि तौ शाब्द्या वृत्त्या निर्दिश्येते इति न कोऽपि दोषः ॥ २. ३. ४. ॥

## अतः कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य । २ । ३ । ५ ॥

**त० प्र०—**अकारात् परस्यानव्ययसंबन्धिनो रेफस्य कृ-कम्यादिस्थेषु क-ख-प-फेषु परेषु सो भवति, तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः । कृ- अयस्कृत्, अयस्कारः, अयस्कृतम्; कमि- यशस्कामः, पयस्कामः; कंस- अयस्कंसः, पयस्कंसः; कुम्भ- अयस्कुम्भः, पयस्कुम्भः; द्वन्द्वे- पयस्कुम्भकपालानि; कुशा- अयस्कुशा; पयस्कुशा; कर्णी- अयस्कर्णी, पयस्कर्णी; पात्र-अयस्पात्रम्, पयस्पात्रम्; नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्- अयस्कुम्भी, पयस्पात्री; शुनस्कर्ण इति तु कस्कादिः । अत इति किम् ? गीःकारः, धूःकारः, भाःकरणम्, वाःपात्रम्, भास्कर इति तु कस्कादिः । कृकम्यादिष्विति किम् ? अयःकीलः, पयःपानम् । अनव्ययस्येति किम् ? स्वःकारः, प्रातःकामः । समास इत्येव- यशः करोति । ऐक्य इत्येव- उपपयःकारः, परमयशःकामः । अयसः कुम्भकपालम्- अयःकुम्भकपालम्, पयसः पात्रखण्डं- पयःपात्रखण्डम्; अत्र हि निमित्तनिमित्तिनौ नैकसमासस्थौ, यदा त्वेवं समासोऽयसः

कुम्भोऽयस्कुम्भस्तस्य कपालं तदा भवत्येवायस्कुम्भकपालमित्यादि । इह कृ-कम्योः केवलयोः समासो न भवतीति प्रत्ययान्तयोर्ग्रहणम् । अथ क्विबन्ता धातुत्वं न जहतीति क्विबन्तयोरेव कस्मात् न भवति ? " गतिकारकस्य " [ ३. २. ८५. ] इत्यादिसूत्रे क्विब्ग्रहणात्, नह्यन्यप्रत्ययान्तानां धातूत्तरपदानामग्रहणे क्विब्ग्रहणमर्थवद् भवति । कमिग्रहणात्, कामयतेर्न भवति– पयः कामयते पयःकामा " शीलि-कामि-भक्ष्याचरि " [ ५. ३. ८७. ] इत्यादिना णः । कमेस्त्वणि- पयस्कामीति भवति, कथं पयस्कामा ? कमनं कामः, पयसि कामोऽस्या इति बहुव्रीहिणा भविष्यति । कमिग्रहणेनैव कंसे लब्धे पृथक् कंसग्रहणं ज्ञापकम्-अस्तीदमपि दर्शनम्– ※ उणादयोऽव्युत्पन्नानि नामानि ※ इति ॥ ५ ॥

**श० न्या०—अतः०** । **अत** इति पञ्चम्यन्तः पूर्वतया रेफस्य विशेषणम्, **अनव्ययस्ये**ति च व्यधिकरणषष्ठ्यन्तमित्याह– **अकारादि**त्यादि । समासैक्य इत्यनुवर्तत इत्याह– **तौ चे[ दि ]**त्यादि । अयः करोतीति क्विपि तकारागमे " ङस्युक्तं कृता " [ ३. १. ४९. ] इति समासे " सो रुः " [ २. १. ७२. ] इति सकारस्य रेफः, तस्यानेन सकारे– **अयस्कृदि**ति । **अयस्कार** इति– अयः करोति घञन्तस्य वा षष्ठीसमासः । **अयस्काम** इति– कमेः ' अयः कामयते ' इति " कर्मणोऽण् " [ ५. १. ७२. ] इत्यण्, कमनं कामः, अयसि कामोऽस्येति वा विग्रहः, णिङो विकल्पेन विधानात् कमिर्भवति । **अयस्कंस** इति– अयसा मिश्रः कंस इति वृत्तिपदेनैव क्रियायाः प्रख्यापनान्नास्त्यसामर्थ्यं, विकारि-विकारसंबन्धषष्ठीसमासो वा, पुल्लिङ्गाश्रयेणैव दृश्यत इति स्त्रियां नोदाह्रियते । [ **अयस्कुम्भ** इति– ] अयसः कुम्भ इति विकार-विकारिलक्षणसम्बन्धषष्ठीसमासः । **अयस्कुशे**ति– अयोविकारस्याविवक्षितत्वात् " भाज-गोण० " [ २. ४. ३०. ] इति ङ्यभावे " आत् " [ २. ४. १८. ] इत्याप्, अयः प्रधानं यस्याः साऽयःप्रधाना, सा चासौ कुशा चेति कर्मधारयः; एवं **पयस्कुशे**ति । **अयस्कर्णी**त्यादि– अय इव कर्णौ यस्याः, पय इव कर्णौ यस्या इति विग्रह्य बहुव्रीहौ "नासिकोदर०" [ २. ४. ३९. ] इति वैकल्पिको ङीः, समुदायस्य तु जातिवाचित्वे प्रतिपाद्ये " पाक–कर्ण० " [ २. ४. ५५. ] इति नित्यः । **अयस्पात्रमि**ति– अयस्कुम्भवत् षष्ठीसमासः । **पयस्पात्रमि**ति– पयसः पूर्णं पात्रमित्यर्थप्रदर्शनेन षष्ठीसमासः । अथ कुम्भपात्रयोरकारान्तयोरुपादानात् कथं तयोरीकारान्तयोः सकार इत्याह– **नामग्रहणे** इत्यादि । **अयस्कुम्भी**ति– गौरादित्वात् ङीः । **अयस्पात्री**ति– पात्रशब्दात् पातेः पिबतेर्वा " नीदाव्शसूयुयुज० " [ ५. २ ८८. ] इति त्रडन्तत्वात् टित्वात् ङीः । नामोच्चारणे सामान्यमभेदो विवक्षते न भेदः, अतो लिङ्गतो भेदेऽपि तदेवेदमिति कार्यं भवति, लिङ्गविशिष्टग्रहणे तु न नामग्रहणं, लिङ्गविशिष्टग्रहणानर्थक्यप्रसङ्गात्, तत्र कर्णीति लिङ्गविशिष्टोपादानात् कथं शुनस्कर्ण इति कर्णे सकार इत्याह– **शुनस्कर्ण इति तु कस्कादि**रिति– कस्कादिपाठात् सकार इत्यर्थः । **भाःकरणमि**ति– भासः करणमिति षष्ठीसमासः । यदि ' अतः ' इत्युपादानादाकारादेः परस्य रेफस्य न भवति कथं तर्हि भास्कर इतीत्याह– **भास्कर इति च कस्कादि**रिति– भासं करोतीति " संख्या-ऽहर्दिवा " [ ५. १. १०२. ] इति टः । **अयः कील** इति– अयसः कील इति षष्ठीसमासः, एवं– **पयःपानम्**, अत्रापवादाभावाद् विसर्गादिः । **स्वःकार** इति – अत्राव्ययसम्बन्धित्वादनव्ययस्येति वचनान्न भवति । अथ अयसः कुम्भकपालम्– अयःकुम्भकपालमित्यादावनव्ययत्वात् समासस्य सत्त्वाच्च रेफस्य सकारः कस्मान्न भवतीत्याह– **अत्र ही**त्यादिः । अत्रापि यदा निमित्त-निमित्तिनोरेक एव समासस्तदा भवत्येवेत्याह– **यदा त्वि**त्यादि । अयःप्रभृतीनां पूर्वं कुम्भशब्देन षष्ठीसमासे कार्यं विधाय पश्चात् कपालशब्देन षष्ठीसमासः । अथ यदि कृकमिधातावुत्तरपदे सकारो विहितः, कथमयस्कृतम्, अयस्कार इति ? नह्यत्र धातुरुत्तरपदमस्तीत्याह– **इह कृ-कम्योरि**त्यादि । अथायस्कृदित्यत्र क्विबन्तो धातुरस्त्युत्तरपदमिति कथमुच्यते ? केवलयोः समासो न भवतीत्याशङ्कते– **अथे**त्यादि– प्रत्ययस्य लुप्तत्वात् तदर्थस्य प्रकृत्यैवाभिधानाद् धातुत्वाहानिरित्यर्थः । समाधत्ते– गतिकारकस्येत्यादिना, एतदेव व्यतिरेके प्रदर्शनेन स्पष्टयति– **नही**त्यादि– अयमर्थः– इदं हि क्विप्ग्रहणमुपनद्धमित्यादौ दीर्घत्वप्रतिषेधार्थं क्रियते, यदि च धातुग्रहणे धातुमात्रग्रहणं स्यान्न तु तदादेस्तदादावुत्तरपद इति विज्ञायमाने का प्रसक्तिरुपनद्धमित्यादौ दीर्घत्वस्य येन तन्निवृत्त्यर्थं क्विप्ग्रहणमर्थवत् स्यादिति, ततो विज्ञायते धातुग्रहणे तदादेस्तदा[ व ]यवस्य तदारब्धस्य प्रकृतिप्रत्ययसमुदायस्य ग्रहणमिति । यद्येवं पयःकामेति कथं सकाररहितं रूपमित्याह– **कमिग्रहणादि**त्यादि– कमिग्रहणे कामिग्रहणं न भवतीत्यर्थः । पुनः शङ्कते– **कथमि**ति । समाधत्ते– **कमनमि**त्यादि । ननु कमेरेव " मा-वा-वद्यमि-कमि० " [ उणा० ५६४. ] इति से– कंस इति भवति, तत्र कमिग्रहणेनैव सिद्धत्वात् कंसग्रहणमनर्थकमित्याशङ्क्याह– **कमिग्रहणेनैवे**त्यादि ॥ छ ॥ २. ३. ५. ॥

**न्या० स०—अतः कृ०।** **अयस्कार** इति– अयाय: करोतीति अर्थकथनमिदं, यतोऽयस् अम् कृ अण् इति समासः, ततोऽण्योगे कर्मनिमित्ता षष्ठी न भवति " न नाम्येकस्वरात्० " [ ३. २. ९. ] इत्यत्र सूत्रेऽमोऽलुप्समासविधानात्। **यशस्काम** इति– णिङो विकल्पेन विधानात् कमिर्भवति, वाक्यं तु णिङन्तस्यैव कार्यं, यतोऽशव्विषये स विकल्पः शव्विषये तु नित्यमेव। **अयस्कंस** इत्यत्र अयसा मिश्रः कंस इति वृत्तिपदेनैव क्रियायाः प्रख्यापनान्नास्त्यसामर्थ्यं, विकारिविकारसंबन्धषष्ठीसमासो वा, पुल्लिङ्गाश्रयेणैव दृश्यत इति स्त्रियां नोदाह्रियते। " कमूङ् " " मा-वा-वधमि० " [ उणा० ५६३. ] इति सः, कंस्ते इति वा भ्रूकंसः। **अयस्कुशे**ति– अयोविकारस्याविवक्षितत्वात् " भाजगोण० " [ २. ४. ३०. ] इति ङीर्न। अयःप्रधानं यस्याः सा अयःप्रधाना, सा चासौ कुशा चेति कर्मधारयः। **अयस्कर्णी**ति–अय इव कर्णौ यस्या इति बहुव्रीहौ " नासिकोदर० " [ २. ४. ३९. ] इति वैकल्पिको ङीः, समुदायस्य तु जातिवाचित्वे प्रतिपाद्ये " पाककर्ण० " [ २. ४. ५५. ] इति नित्यः; अय इव कर्णायति इति तु कृतेऽपि गौरादित्वाद् ङीः। **अयस्कुम्भी** इत्यत्र गौरादित्वाद् ङीः। **शुनस्कर्ण** इत्यत्र उष्ट्रमुखादित्वाद् से " षष्ठ्याः क्षेपे " [ ३. २. ३०. ] लुप् न। नन्वयस्कृतमित्यादौ कृग्धातुरुत्तरपदं नास्ति तत् कथं सकार इत्याह– **इह कृ-कम्योरि**ति। कथं **पयस्कामे**ति– कर्मणिङि " शीलिकामि० " [ ६. १. ७३. ] इति णे– पयःकामा, णिङभावे तु कर्मणोऽणि पयस्कामीति प्राप्नोति, तत् कथं पयस्कामेत्याह– **कमनमि**त्यादि ॥ २. ३. ५. ॥

## प्रत्यये । २ । ३ । ६ ॥

**त० प्र०—**अनव्ययस्य यो रेफस्तस्य प्रत्ययविषयेषु क-ख-प-फेषु सो भवति। पाश-कल्प-काः प्रयोजयन्ति, काम्ये विशेषविधानादन्यस्य चाभावात्। पयस्पाशम्, यशस्पाशम्; पयस्कल्पम्, यशस्कल्पम्; पयस्कम्, यशस्कम्। अनव्ययस्येत्येव– स्वःपाशम्, प्रातःकल्पम्। प्रत्यय इति किम्? पाशो बन्धः, कल्पो विधिः, कं शिरः, पयःपाशः, पयःकल्पः, पयःकम् ॥ ६ ॥

**श० न्या०—प्रत्य०।** इह प्रत्ययेन समासायोगात् समास इति नास्ति, तदभावे तत्सम्बद्धमैक्य इति च। अनन्तरसूत्रत्वात् त्वनव्ययस्येति वर्तत इत्याह– **अनव्ययस्य यो रेफ** इति। प्रत्यय इति क-ख-प-फीत्यस्य विषयतया विशेषणमित्याह– **प्रत्ययविषयेष्वि**त्यादि। यदर्थो योगस्तान् स्वरूपेणाह– **पाश-कल्प-काः प्रयोजयन्ती**ति– एते योगमिमं प्रवर्तयन्ति– कारयन्ति। अथ काम्येऽपि प्रत्ययविषयः ककारोऽस्ति, स किमर्थं नोपदिश्यत इत्याह– **काम्ये** इत्यादि– तस्मादन्यस्याभावादेत एव योगस्य प्रवर्तका इत्यर्थः। **पयस्पाशमि**ति– निन्द्यं पय इति " निन्द्ये पाशप् " [ ७. ३. ४. ] इति पाशप्; एवं– **यशस्पाशम्**। **पयस्कल्पं** इति– ईषदसमाप्तं पय इति " अतमबादेः० " [ ७. ३. ११. ] इति कल्पप्। एवं कुत्सिताद्यर्थे " कुत्सिता-ऽल्पा-ऽज्ञाते " [ ७. ३. ३३. ] इति कपि– **पयस्कम्**। **स्वःपाशमि**त्यादौ चानव्ययस्येत्यधिकारान्न भवति, स्वरादेरीषदसमाप्त्या योगः क्वचिदर्थान्तरे वृत्तावुपपद्यते। अथ कथं पयःपाशः, पयःकल्पः, पयःकमिति सकाराभावः? उच्यते– प्रत्यय इत्युपादानादेतेषामप्रत्ययत्वादित्याह– **प्रत्यय इति किमि**त्यादि ॥छ॥ २. ३. ६. ॥

**न्या० स०—प्रत्यये।** अत इतीह नाश्रीयते तेन पयस्कल्पेत्यादि सिद्धम्। इह प्रत्ययेन समासासम्भवात् समास इति सम्बद्धमैक्य इति च नानुवर्तते। **प्रत्यय इति किमि**ति– अत्र प्रत्ययग्रहणाभावे रोः काम्ये चेति कार्यं तस्य चायमर्थः– रोः स्थाने काम्ये चकारात् कखपफि च सो भवति, तर्हि नियमः कथमिति? उच्यते– कखपफमध्यपातित्वात् काम्यग्रहणे लब्धे यत् काम्यग्रहणं करोति तद् ज्ञापयति– रोरेव काम्ये, ततश्च प्रत्ययग्रहणं विना अयःपाश इत्यादिष्वपि " रोः काम्ये " [ २. ३. ७. ] इति सूत्रेण सत्वं स्यात्, तन्मा प्रसाङ्क्षीदिति प्रत्ययग्रहणम्। स्वःपाशमित्यादिषु औत्सर्गिकं नपुंसकत्वम्। **पयःकमि**त्यत्र पयसि कमिति कार्यं न तु षष्ठीसमासः, " तृप्ता० " [ ३. १. ८५. ] इति निषेधात् ॥ २. ३. ६. ॥

## रोः काम्ये । २ । ३ । ७ ॥

**त० प्र०—**अनव्ययसंबन्धिनो रेफस्य रोरेव काम्यप्रत्यये परे सो भवति। पयस्काम्यति, यशस्काम्यति। रोरिति किम्? द्वाःकाम्यति, वाःकाम्यति; अहःकाम्यति। प्रत्यय इत्येव– पुरुषैः काम्यम्। अनव्ययस्येत्येव– अधःकाम्यति। पूर्वेणैव सिद्धे रोरेवेति नियमार्थं वचनम् ॥ ७ ॥

**श० न्या०—रोः का०।** रोरिति रेफस्य कार्यिणः षष्ठ्यन्तं विशेषणमित्याह– **रेफस्य रोरि**ति। **पयस्काम्यती**ति– पय इच्छति " द्वितीयायाः काम्यः " [ ३. ४. २२. ] इति काम्यप्रत्ययः, ततो " नाम सिदय्व्यञ्जने " [ १. १. २१. ] इति पदत्वे " सो रुः " [ २. १. ७२. ] इति रेफे कृते तस्यानेन सकारस्ततस्तिबादिः; एवं– **यशस्काम्यती**ति। **द्वारि**ति– पूर्ववत् काम्यः, अत्र रोरित्युपादानान्न भवति।

**अहःकाम्यती**ति– " रो लुप्यरि " [ २. १. ७५. ] इति रः । ननु प्रत्ययत्वात् काम्ये रोरपि पूर्वेणैव भविष्यति, किमर्थमिदमित्याह– **पूर्वेणैवे**त्यादि । अत एवोक्तं– **रोरेवे**ति– नान्यस्येत्यर्थ इति ॥ छ ॥ २. ३. ७. ॥

**न्या० स०—रोः काम्ये । नियमार्थमि**ति– विपरीतनियमस्तु " वर्चस्का० " [ ३. २. ४८. ] इति निर्देशात् प्रत्यये रोः काम्ये चेत्येकयोगाभावाद् वा न ॥ २. ३. ७. ॥

## नामिनस्तयोः षः । २ । ३ । ८ ॥

**त० प्र०—तयोरिति प्रत्ययसूत्रसंगृहीतानां पाश-कल्प-कानां, रोः काम्ये इति यथानिर्दिष्टस्य काम्यस्य च ग्रहणम्; तयोः परयोर्नामिन उत्तरस्य रेफस्य षकार आदेशो भवति। सर्पिष्पाशम्, यजुष्पाशम्, धनुष्पाशम्, गीष्पाशा, धूष्पाशा; सर्पिष्कल्पम्, धनुष्कल्पम्; गीष्कल्पा, सर्पिष्कम्, सार्पिष्कः, धानुष्कः; सर्पिष्काम्यति, धनुष्काम्यति । नामिन इति किम्? अयस्कल्पम् । तयोरिति किम्? मुनिः करोति, भिन्धुः पापानि । रोः काम्य इत्येव? गीःकाम्यति, धूःकाम्यति ॥ ८ ॥**

**श० न्या०—नामिनः । तयोरि**ति पूर्वसूत्रद्वयोक्तविशिष्टनिमित्तसंग्रहार्थम्, अन्यथाऽस्यानर्थक्यप्रसङ्गादित्याह– **तयोरि**त्यादि– पूर्वेणैव सत्वे प्राप्ते तदपवादः षत्वं विधीयते । **सार्पिष्क** इति– सर्पिषा संस्कृत इति " संस्कृते " [ ६. ४. ३. ] इति इकण्, ततः " ऋवर्णोवर्ण० " [ ७. ४. ७१. ] इतीकारलोपः । **धानुष्क** इति– धनुः प्रहरणमस्येति " प्रहरणम् " [ ६. ४. ६२. ] इतीकण्, पूर्ववदिकारलोपः । रोरेव काम्य इति सम्बद्धानुवृत्त्या **गीःकाम्यती**त्यादौ न भवतीति ॥ छ ॥ २. ३. ८. ॥

**न्या० स०—नामिन०** । अत्र अनव्ययस्येति वर्तते, यतः पूर्वसूत्राभ्यां सकारे प्राप्तेऽयं ष इति, तेन उच्चैष्क इत्यादि न भवति, उच्चैष्काम्यतीत्यादि च । **सार्पिष्क** इति– " प्रत्यये " [ २. ३. ६. ] इति सूत्रे पाश-कल्प-का इत्युपलक्षणत्वादिकणोऽपि ग्रहणम्, यद्वा इकारे लुप्तेऽयमपि क इत्यनेनात्रापि षत्वं, सर्पिषा संस्कृतः " संस्कृते " [ ६. ४. ३. ] इतीकण्, सप्तमीवाक्ये तु " संस्कृते भक्ष्ये " [ ६. २. १४०. ] इत्यनेनाण् स्यात् ॥ २. ३. ८. ॥

## निर्दुर्बहिराविष्प्रादुश्चतुराम् । २ । ३ । ९ ॥

**त० प्र०—निरादीनां संबन्धिनो रेफस्य क-ख-प-फेषु परेषु षो भवति । बहुवचननिर्देशो निस्दुसोर्निर्दुरोश्च परिग्रहार्थः । निष्कृतम्, निष्पीतम्; दुष्कृतम्, दुष्पीतम्; बहिस्– बहिष्कृतम्, बहिष्पीतम्; आविस्– आविष्कृतम्, आविष्पीतम्; प्रादुस्– प्रादुष्कृतम्, चतुर्– चतुष्कण्टकम्, चतुष्पात्रम् । कथं निः ष्कुल ! दुः ष्पुरुष !, नैष्कुल्यम्, दौष्कुल्यम्?, एकदेशविकृतस्यानन्यत्वाद् भविष्यति ॥ ९ ॥**

**श० न्या०—निर्दु०** । अथात्र शास्त्रे बहुवचनस्य कार्यार्थत्वेनोक्तत्वात् किमत्र कार्यमित्याह– **बहुवचननिर्देश** इत्यादि । **पीतमि**ति– " एषामीर्व्यञ्जनेऽदः " [ ४. २. ९७. ] इतीकारः । अन्ये तु– निबन्धकाराः, प्रादुष्पीतमित्यप्यधीयन्ते, तच्च न युक्तम्, यदाहोद्योतकरः– प्रादुष्पीतमित्यसदेतदुदाहरणं विरोधात्, प्रादुःशब्दस्य कृभ्वस्तिविषय एवोपलम्भादिति । **चतुष्कण्टकं, चतुष्पात्रमि**ति– चतुःशब्दस्य कण्टक-पात्रशब्दाभ्यामन्यपदार्थसमासः, समाहारो वा, समाहारे तु पात्रादित्वात् स्त्रीत्वप्रतिषेधाद् ङीर्न भवति । **कथमि**ति– अयमभिप्रायः– निर्दुरोः षत्वमुच्यमानं कथमत्र स्यादन्यत्वात्, तथाहि– अत्र परत्वात् षकारात् पूर्वं " दूरादामन्त्र्यस्य० " [ ७. ४. ९९. ] इति प्लुतः, घ्यणि वृद्धिश्चेति । परिहरति– **एकदेशे**त्यादि ॥ छ ॥ २. ३. ९. ॥

**न्या० स०—निर्दुर्बहिः । प्रादुष्कृतमि**ति– अत्र अन्ये तु निबन्धकाराः प्रादुष्पीतमित्यप्यधीयते, तच्च न युक्तं, तथाह्युद्योतकरः– प्रादुष्पीतमित्यसदेतदुदाहरणं विरोधात्, प्रादुःशब्दस्य कृभ्वस्तिविषय एवोपलम्भादिति । **चतुष्कण्टकमि**ति– अत्र बहुव्रीहिः समाहारो वा, समाहारेऽपि पात्रादित्वात् स्त्रीत्वप्रतिषेधाद् ङीर्न भवति । **कथमि**ति– अयमाशयः– निर्दुरोः षत्वमुच्यमानमन्यत्वात् कथमत्र, तथाहि– अत्र परत्वात् षकरात् पूर्वं " दुरादामन्त्र्यस्य० " [ ७. ४. ९९. ] इति प्लुतः घ्यणि वृद्धिश्चेति ॥ २. ३. ९. ॥

## सुचो वा । २ । ३ । १० ॥

**त० प्र०—सुजन्तानां संबन्धिनो रेफस्य क-ख-प-फेषु परेषु षकारो वा भवति । द्विष्करोति, त्रिष्करोति, त्रिष्खनति, चतुष्पचति, चतुष्फलति; पक्षे जिह्वामूलीयोपध्मानीयौ विसर्जनीयश्च भवति– द्वि≍करोति, द्विः करोति; त्रि≍खनति, त्रिः खनति; चतु×पचति, चतुः पचति; चतु×फलति, चतुः फलति । सुजन्तस्य चतुरः परत्वादनेन विकल्पो न तु पूर्वेण नित्यो विधिः । कखपफीत्येव– द्विश्चरति, त्रिस्तरति ॥ १० ॥**

**श० न्या०—सुचो०** । जिह्वामूलीयोपध्मानीय-विसर्जनीयानां प्राप्तानां पक्षे षत्वं विधीयते । **सुच** इति न रेफस्य विशेषणं, तदा हि सुचः स्थाने यो रेफस्तस्य षत्वमिति विज्ञा-

येत, तथा च सति चतुष्पचतीति विकल्पो न स्यात्, नह्यत्र सुचः स्थाने रेफः "रात् सः" [ २. १. ९०. ] इति सुचो लोपात्, अतः सुजिति प्रत्ययः प्रकृत्यपेक्ष इति प्रकृति प्रत्ययस्य विशेषणत्वं, तत्र च तदन्तविज्ञानमित्याह- **सुजन्तानामिति**- एवं हि विज्ञायमाने सुचो लोपेऽपि स्थानिवद्भावेन सुजन्त एवायं चतुःशब्द इति विकल्पः सिध्यति, न चैवं त्रिष्करोतीति त्रिशब्दरेफस्यापि सुजन्तसम्बन्धित्वात् कस्मान्न भवतीति वाच्यम्, अनन्तरे कृतार्थत्वादिति । **द्विष्करोतीत्यादि**- "वारे कृत्वस्" [ ७. २. १०९. ] इत्यतो वार इत्यधिकृते "द्वि-त्रि-चतुर०" [ ७. २. ११०. ] इति सुच् । **सुजन्तस्येति**- न तु पूर्वेण "निर्दुर्बहिः०" [ २. ३. ९. ] इत्यनेनेत्यर्थः ॥ छ ॥ २. ३. १०. ॥

---

**न्या० स०—सुचो वा ।** सुच इति न रेफस्य विशेषणं, तेन चतुष्पचतीत्यत्रापि विकल्पः, नह्यत्र सुचः स्थाने रेफः "रात् सः" [ २. १. ९०. ] इति सुचो लोपात्, अतः सुजिति प्रकृतेर्विशेषणं, तत्र च तदन्तविज्ञानमित्याह- **सुजन्तानामिति**- एवं हि विज्ञायमाने सुचो लोपेऽपि स्थानिवद्भावेन सुजन्त एवायं चतुःशब्द इति । न चैवं त्रिष्करोतीति त्रिशब्दस्यापि सुजन्तसम्बन्धित्वात् कस्मान्न भवतीति वाच्यम्, अनन्तरे कृतार्थत्वादिति ॥ २. ३. १०. ॥

---

## वेसुसोऽपेक्षायाम् । २ । ३ । ११ ॥

**त० प्र०—**इस् उस्प्रत्ययान्तस्य यो रेफस्तस्य क-ख-प-फेषु परेषु षो वा भवति, अपेक्षायां- स्थानिनिमित्तपदे चेत् परस्परापेक्षे भवतः । सर्पिष्करोति, सर्पिष्खादति, सर्पिष्पिबति, सर्पिष्फेनायते; धनुष्करोति, धनुष्खण्डयति, धनुष्पतति, धनुष्फलति; परमसर्पिष्करोति, परमसर्पिष्पिबति, परमधनुष्पतति, परमधनुष्पठति; पक्षे सर्पिः करोति, परमसर्पिः करोतीत्यादि । इसुस इति किम् ? पय×करोति, पय×पिबति; इसुसोः प्रत्यययोर्ग्रहणादिह न भवति, मुनिः करोति, नदीभिः क्रियते, मुहुः पठति, भिन्द्युः पापानि; मुहुरित्यव्युत्पन्नमव्ययम् । इसा साहचर्यादुस औणादिकस्य ग्रहणम्, तेनेह न भवति- चक्रुः कुलानि । त्याद्युस्यपीच्छत्यन्यः । अपेक्षायामिति किम् ? तिष्ठतु सर्पिः, पिब त्वमुदकम् । एकार्थीभावे च न भवति- परमसर्पिःकुण्डम् ॥ ११ ॥

---

**श० न्या०—वेसु० ।** इसुसोः प्रत्ययत्वात् "प्रत्ययः प्रकृत्यादेः०" [ ७. ४. ११५. ] इति न्यायात् तदन्तयोर्ग्रहणमित्याह- **इसुस्प्रत्ययान्तस्येति** । रेफस्य तु सामानाधिकरण्येन विशेषणविशेष्यभावानुपपत्तेर्वैयधिकरण्येन विशेषणविशेष्यभाव इत्याह- **इसुस्प्रत्ययान्तस्य यो रेफस्तस्येति** । **स्थानि-निमित्ते पदे** इति- स्थानिपदं यत्र रेफस्य षकारः, निमित्तपदं यत्र क-ख-प-फाः, तयोरेव, व्यपेक्षा सम्भवति, न तु स्थानि-निमित्तयोर्वर्णयोः, अतस्तत्पदप्रतिपत्तिः, तथा च स्याद्यन्तवाच्येन कारकेण कर्मणा क्रिया निष्पादयितुमपेक्ष्यते, तिवन्तवाच्यया तु क्रियया कारकं निर्वर्त्तयितुं संस्कर्तुं विषयीकर्तुं वाऽपेक्ष्यत इति, एतदुक्तं भवति- क्रिया-साधनयोर्व्यपेक्षालक्षणः सम्बन्धः, अस्ति चात्र तयोर्व्यपेक्षा, तथाहि- क्रियाऽऽत्मलाभाय साधनमपेक्षते, साधनमपि क्रियां, नाक्रियं साधनमस्ति, साध्यं साधयत् साधनमुच्यते । **सर्पिष्करोतीति**- अत्र सर्पिः क्रियमाणत्वात् क्रियामपेक्षते- सर्पिः किं ? करोतीति; करोतीति च क्रिया न विना कर्मणोपपद्यते इति कर्मापेक्षते- करोति किं ? सर्पिरिति, कर्तृ वा सर्पिरिति; तदेवमेते पदे अपेक्षायां भवतः; एवमन्यत्राप्यपेक्षा द्रष्टव्या । इसुसित्युच्यमाने मुनिः करोतीत्यादावपि स्यादित्याह- **इसुसोः प्रत्यययोरित्यादि**- * प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव ग्रहणं * * लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव० * * अर्थवद्ग्रहणेनानर्थकस्य * इति इसुसोः प्रत्यययोरेव ग्रहणादिह न भवतीत्यर्थः । **मुहुरित्यव्युत्पन्नमिति**- न तु धनुरादिवदुस्प्रत्ययान्तम्, इह तर्हि प्राप्नोति- **चक्रुः कुलानीति**- अत्र हि करोतेः परोक्षाया उस्प्रत्ययोऽस्तीत्याशङ्क्याह- **इसा साहचर्यादित्यादि** । **तिष्ठतु सर्पिः, पिब त्वमुदकमिति**- अत्रतिष्ठतु-सर्पिरित्यनयोरपेक्षा, अत्र सर्पिषा स्थानक्रियाऽपेक्ष्यते, पानक्रियायां तदकारकमिति सर्पिष्पानक्रिययोरपेक्षाभावः । **एकार्थीभावे चेति**- अपेक्षाया भिन्नपदार्थगोचरत्वाद् वाक्य एव सम्भवः । वृत्तौ चैकार्थ्यात् तदभावात् **परमसर्पिःकुण्डमि**त्यादौ षत्वाभावः ॥ छ ॥ २. ३. ११. ॥

---

**न्या० स०—वेसु० ।** प्रत्यययोर्ग्रहणादिति- इह *०प्रत्ययाऽप्रत्यययोः०* *लक्षणप्रतिपदोक्तयोः०* *अर्थवद्ग्रहणे नानर्थकस्य* इत्यनेन च इसुसोः प्रत्यययोर्ग्रहणादिह न भवतीत्यर्थः ॥ २. ३. ११. ॥

---

## नैकार्थेऽक्रिये । २ । ३ । १२ ॥

**त० प्र०—**न विद्यते क्रिया प्रवृत्तिनिमित्तं यस्य तस्मिन्नेकार्थे- समानाधिकरणे पदे यत् कखपफं तस्मिन् परे इसुस्प्रत्ययान्तस्य संबन्धिनो रेफस्य षो न भवति, "वेसुसोऽपेक्षायाम्" [ २. ३. ११. ] इत्यस्यायं प्रतिषेधो नान्यस्य, तद्विषय एवारम्भात् सर्पि×कालकम् । यजु×पीतकम् । एकार्थे इति किम् ? सर्पिष्कुम्भे, सर्पि×कुम्भे; धनुष्पुरुषस्य,

धनुष्पुरुषस्य । अक्रिय इति किम् ? सर्पिष्क्रियते, सर्पिः क्रियते, धनुष्प्रासम्, धनुः प्रासम् ॥ १२ ॥

**श० न्या०—नैका०** । न विद्यते क्रिया यत्रेति बहुव्रीहिरित्याह- **न विद्यते क्रिये**त्यादि । एकशब्दः समानार्थः । यथा- चैत्र-मैत्रयोरेका मातेति, एका- समानेत्यर्थः, अर्थशब्दस्तु इदं-तदित्यादिसर्वनाम्ना व्यपदिश्यमानेऽनेकस्य युगपत् प्रयुज्यमानस्य भिन्नप्रवृत्तिनिमित्तकस्य शब्दस्याधिकरणे द्रव्ये वर्तते, एकोऽर्थोऽस्येत्येकार्थं समानाधिकरणमित्यर्थ इत्याह- **एकार्थे समानाधिकरण** इति । **वेसुसोऽपेक्षयामित्यस्ये**त्यादिप्रोक्तमेवोदाहरणाभ्यां द्रढयति- **सर्पिष्कालकं, यजुष्पीतकम्,** अत्र कालकं पीतकमिति गुणवचनं, न क्रियावाचि समानाधिकरणमतः प्रतिषेधः । अत्र क्रियार्थत्वात् क्रियापदं त्याद्यन्तं वा क्रियाशब्देनोच्यत इति प्रत्युदाहरति- **सर्पिष्क्रियते, धनुष्प्रासमि**ति ॥ छ ॥ २. २. १२. ॥

**न्या० स०—नैकार्थेऽक्रिये एकार्थे** इत्यत्र एकशब्दः समानार्थः, यथा चैत्रमैत्रयोरेकमातेति, एका- समानेत्यर्थः, अर्थशब्दस्तु इदं-तदित्यादि सर्वनाम्ना व्यपदिश्यमानेऽनेकस्य युगपत् प्रयुज्यमानस्य भिन्नप्रवृत्तिनिमित्तकस्य शब्दस्याधिकरणे द्रव्ये वर्तते । **सर्पिष्कालक**मित्यादि- कालकं पीतकमिति गुणवचनमक्रियावाचि समानाधिकरणमतः प्रतिषेधः । **पीतकमिति**–पीतशब्दः पावदित्वात् स्वार्थे कः, यद्वा पीतेन रक्तमिति " नीलपीतादकम् " [ ६. २. ४. ] इति कः ॥ २. ३. १२. ॥

## समासेऽसमस्तस्य । २ । ३ । १३ ॥

**त० प्र०—पूर्वेणासमस्तस्य इसुसुप्रत्ययान्तस्य संबन्धिनो रेफस्य क-ख-प-फे परे षो भवति, समासे- तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवतः । सर्पिष्कुम्भः, असर्पिः सर्पिः कृत्वा सर्पिष्कृत्य, सर्पिष्खण्डम्, सर्पिष्पानम्, सर्पिष्फलम्; धनुष्कृत्य, धनुष्खण्डम्, धनुष्पृष्ठम्, धनुष्फलम् । समास इति किम् ? तिष्ठतु सर्पिः, पिब त्वमुदकम् । असमस्तस्येति किम् ? परमसर्पिःकुण्डम्, इन्द्रधनुःखण्डम्; पूर्वेणापि न भवति समासे सत्यपेक्षाया अभावात् । इदमेवासमस्तस्येति वचनं ज्ञापकम्- इसुसोः "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इत्ययं नियमो न भवति, तेन परमसर्पिष्करोति, परमसर्पिः करोतीत्यत्र "वेसुसोऽपेक्षायाम्" [ २. ३. ११. ] इत्यनेनाधिकस्यापि विकल्पो भवति । बहुसर्पिष्कुण्डम्, बहुसर्पिष्पात्रमित्यत्र तु बहुप्रत्ययादेरपि असमस्तत्वादनेन नित्यं भवति ॥ १३ ॥**



**श० न्या०—समासे०** । न समस्तम्- असमस्तम्, अकृतसमासमित्यर्थः, तस्यासमस्तस्येति अनुवृत्तस्येसुसित्यस्य विशेषणम्, तत्र समास इत्यनेन पूर्वोत्तरयोः पदयोरेकस्याधिकरणस्य निर्देशात् ' उत्तरेणासमस्तस्य ' इति विज्ञानाभावात् पारिशेष्यात् पूर्वेणैव तद् विज्ञायत इत्याह- **पूर्वेण समस्तस्ये**ति । पदद्वयमन्तरेण समासस्यासम्भवात् सन्निहितत्वात् स्थानि-निमित्तयोरेव पदयोर्विज्ञायत इत्याह- **तौ चे**त्यादि- समास इति प्रत्यासत्तेः प्रविभाग आश्रीयते, न सामान्यमित्येकत्रोच्यते । **सर्पिष्कुम्भ** इति- सर्पिषः कुम्भ इति षष्ठीसमासः । **परमसर्पिःकुण्डमि**ति- अत्रासमस्तस्येति वचनात् पूर्वेण समस्तस्य षो न भवति । नन्विसुसोः प्रत्यययोर्ग्रहणात् " प्रत्ययः प्रकृत्यादेः " [ ७. ४. ११५. ] इति नियमादसत्यप्यसमस्तस्येति पूर्वेण समस्तस्य षो न भविष्यति, नहि तत्रेसुसन्तस्योत्तरेण समासोऽस्तीति, नैवम्- इसुसोर्ग्रहणं " प्रत्ययः प्रकृत्यादेः " [ ७. ४. ११५. ] इति नियमाभावात्, किमत्र ज्ञापकमिति चेत् ? इत्याह- **इदमेवे**त्यादि- यद्यत्रेयं परिभाषा स्यादसमस्तस्येत्यनर्थकमिति । ज्ञापकस्य प्रयोजनमाह- **तेने**त्यादि- ननु च परमसर्पिष्करोति, परमधनुष्करोतीति परमसर्पिःशब्दस्य परमधनुःशब्दस्य चेसुसन्तत्वान्मा भूत् षकारः, सर्पिःशब्दस्य धनुःशब्दस्येसुसन्तत्वात् तदाश्रयः षो भविष्यतीति किं तदर्थेन ज्ञापकेन ?, न चैवं सति परमसर्पिष्कुण्डमित्यत्रापि प्राप्नोति, सर्पिःशब्दस्य कुण्डेनासमासात्, परमसर्पिःशब्दो ह्यत्र कुण्डेन समस्यते न सर्पिःशब्दः; उच्यते- यद्यपि परमं सर्पिः परमसर्पिष्करोतीत्युत्तरपदार्थप्रधाने समासे प्रधानस्यापेक्षाया योगात् षत्वं सिध्यति, तथापि परमं सर्पिर्यस्य; सर्पिषः समीपं, सर्पिषो निष्क्रान्तमिति- परमसर्पिष्करोति, उपसर्पिष्करोति, निःसर्पिष्करोतीत्यत्र न सिध्यति, सर्पिःशब्दस्य करोतिक्रियायाश्च व्यपेक्षाया अभावात्, इति तदर्थमिदं ज्ञापकमिति भावः । ईषदसमाप्तं सर्पिः- बहुसर्पिः " नाम्नः प्राग् बहुर्वा " [ ७. ३. १२. ] इति बहुप्रत्ययः, बहुसर्पिषः कुण्डं- **बहुसर्पिःकुण्डमि**ति समासः, एवं- **बहुसर्पिष्पात्रमि**त्यत्रापि- अत्र बहोः प्रत्ययत्वात् समासो नास्तीति " समासेऽसमस्तस्य [ २. ३. १३. ] इति नित्यं षो भवति ॥ छ ॥ २. २. १३. ॥

**न्या० स०—समासे०** । **सर्पिष्पानमि**ति- " पानस्य भावकरणे " [ २. ३. ६९. ] इति णत्वे प्राप्ते " षात् पदे " [ २. ३. ९२. ] इति निषेधः । **इदमेवेति**- ननु परमसर्पिष्करोति परमधनुष्करोतीति परमसर्पिः- परमधनुःशब्दयोरिसुसन्तत्वाभावान्मा भूत् षकारः, परमुत्तरपदार्थप्रधानत्वात् समासस्य

सर्पि-धनुःशब्दयोरिसुसन्तत्वात् तदाश्रयः षो भविष्यति, किं तदर्थेन ज्ञापकेन; न चैवं सति परमसर्पिः कुण्डमित्यत्रापि प्राप्नोति, सर्पिःशब्दस्य कुण्डेनासमासात्, किन्तु परमसर्पिःशब्दः, उच्यते– यद्यपि परमसर्पिःकरोत्युत्तरपदार्थप्रधाने समासे प्रधानस्यापेक्षया योगात् षत्वं सिद्ध्यति, तथापि परमं सर्पिर्यस्य सर्पिषः समीपं सर्पिषो निष्क्रान्तमिति– परमसर्पिष्करोति, उपसर्पिष्करोति, निःसर्पिष्करोतीत्यत्र न सिद्ध्यति, सर्पिःशब्दस्य करोतिक्रियायाश्च व्यपेक्षाभावादिति तदर्थमिदं ज्ञापकमिति भावः ॥ २. ३. १३. ॥

## भ्रातुष्पुत्र-कस्कादयः । २ । ३ । १४ ॥

**त० प्र०—**भ्रातुष्पुत्रादयः कस्कादयश्च क-ख-प-फेषु परेषु रेफस्य स्थाने यथासंख्यं कृतषत्व-सत्वाः साधवो भवन्ति । भ्रातुष्पुत्रः, "ऋतां विद्या-योनिसंबन्धे" [ ३. २. ३७. ] इति षष्ठ्या अलुप्, **परमसर्पिष्कुण्डिका, परमधनुष्कपालम्, परमबर्हिष्पूलः, परमयजुष्पात्रम्;** अत्र सर्पिष्कुण्डिका-धनुष्कपाल-बर्हिष्पूल-यजुष्पात्राणां पूर्वेण षत्वे सिद्धेऽपि समस्तार्थमिह पाठः, अन्ये त्वेषां समस्तानां षत्वं न मन्यन्ते, तन्मते तु– परमसर्पिःकुण्डिकेत्यादिषु षत्वं न भवति । कस्कः– वीप्सायां द्विर्वचनम्; कुतः कुतः आगतः कौतस्कुतः; शुनस्कर्णः– "षष्ठ्याः क्षेपे" [ ३. २. ३०. ] इत्यलुप्; सद्यस्कालः– बहुव्रीहिरसमासो वा; सद्यः क्रयणं सद्यस्क्रीः, तत्र भवः– साद्यस्कः । भ्रातुष्पुत्र, सर्पिष्कुण्डिका, बर्हिष्पूल, यजुष्पात्र इति भ्रातुष्पुत्रादयः । कस्कः, कौतस्कुतः, शुनस्कर्णः, सद्यस्कालः, सद्यस्क्रीः, साद्यस्कः, भास्करः, अहस्करः, अयस्काण्डः, तमस्काण्डः, अयस्कान्तः, अयस्कुण्डः, मेदस्पिण्डः; अयस्पिण्ड इति कस्कादयः । बहुवचनमाकृतिगणार्थम्, तेन यथादर्शनमन्येऽपि भवन्ति । सर्वत्र नामिनः परस्य रेफस्य षत्वमन्यत्र सत्वं द्रष्टव्यम् ॥ १४ ॥

**श० न्या०—भ्रातु०** । 'भ्रातुष्पुत्रः, कस्कः' इत्यत्र यद् विसर्गात् पूर्वमकारान्तं रूपं तदनुक्रियते, आदिशब्दश्च प्रत्येकमभिसम्बध्यत इत्याह– **भ्रातुष्पुत्रादय** इत्यादि । जिह्वामूलीयोपध्मानीययोः प्राप्तयोरयमारम्भः । अत्र सकार–षकारौ द्वावपि सम्बध्येते, तत्र नामिनः परो यो रेफस्तस्य षकारो यस्त्वन्यस्तस्य सकार इत्याह– **यथासंख्यं कृतषत्व-सत्वा** इति । भ्रातुः पुत्र इति सदा [ षष्ठी ]समासः, एवं तर्हि "ऐकार्थ्ये" [ ३. २. २८. ] इति षष्ठ्या लुप् कुतो न भवतीत्याह– **ऋतामि**त्यादि । ननु च सर्पिष्कुण्डिकादीनां "समासेऽसमस्तस्य" [ २. ३. १४. ] इत्येव सिद्धः षकारः, तत् किमर्थमेषामिह पाठ इत्याह– **अत्र सर्पिष्कुण्डिके**त्यादि– पूर्वेण समस्तानामपि षत्वार्थमित्यर्थः । **अन्य** इति– वृत्तिकार-भाष्यकारादयः । **कस्क** इति– सौ परतः "किमः कः०" [ २. १. ४०. ] इति किंशब्दस्य कादेशः, वीप्सायां द्विर्वचनं, "सो रुः" [ २. १. ७२. ] इति रेफस्ततोऽनेन सत्वम् । **कौतस्कुत** इति– "किमद्व्यादि०" [ ७. २. ८९. ] इति तसि "इतोऽतः कुतः" [ ७. २. ९०. ] इति किमः कुशब्दादेशो निपात्यते, पूर्ववद् द्विर्वचनम्, तत आगत इति विगृह्य अत एव गणपाठात् "केहामात्र०" [ ६. ३. १६. ] इति त्यचं बाधित्वा "शेषे" [ ६. ३. १. ] इत्यण् । **शुनस्कर्ण** इति । शुनः कर्णः– शुनस्कर्णः, अत्र कथं रेफो यस्य सकार इत्याह– **षष्ठ्या** इत्यादि । शुनस्कर्ण इति, वाक्य एव सत्वमिति रत्नमतिः, समासे तु श्वकर्ण इति । **सद्यस्काल** इति– अन्ये तु सद्यः कालोऽस्येति विगृह्णन्तो वाक्ये सत्वे नेच्छन्ति । क्रीणातेः कुत्संपदादित्वात् क्विपि–क्रीः, सद्यःक्रीः–[ **सद्यस्क्रीः,** ] **सद्यः क्रयण**मिति त्वनर्थकमेतत् [ त्वर्थकथनमेतत् ], तत्र भवः– **साद्यस्कः,** सद्यस्क्रीशब्दादेव प्रत्यये साद्यस्कस्य सिद्धत्वात् पृथगुपादनं प्रत्ययान्तरव्यावृत्त्यर्थं, तेन सद्यस्क्रियो भावः सद्यःक्रीत्वं, सद्यःक्रीता; अपरे तु सद्यः क्रियत इति स्थादित्वात् के– सद्यस्कः क्रतुरित्याहुः, ततः प्रज्ञादित्वादण् । **भास्करः, अहस्कर** इति– "संख्याहर्दिवा०" [ ५. १. १०२. ] इति टः । **अयस्काण्डे**त्यादि– तत्रायःकर्षकः कान्तोऽयस्कान्तः, इतरेषां तु षष्ठीसमासः । नन्वयस्कान्त इति "अतः कृ-कमि०" [ २. ३. ५. ] इति सिद्धः, किमर्थोऽत्र पाठः ? उच्यते– तस्यैव प्रपञ्चार्थः समस्तार्थो वेति । कस्कादय इति बहुवचनं बहुत्वमेषां द्योतयदाकृतिगणतामस्य द्योतयतीत्याह– **बहुवचन**मित्यादि । अत्र प्रकरणे संहितायां कार्यमिति कः कोऽत्रन भवति ॥ छ ॥ २. ३. १४. ॥

**न्या० स०—भ्रातुष्पुत्र०** । **साद्यस्कः** सद्यस्क्रीशब्दादेव साद्यस्कस्य सिद्धत्वात् पृथगुपादानं प्रत्ययान्तरनिवृत्त्यर्थं, तेन सद्यस्क्रियो भावः– सद्यःक्रीता इत्यत्र न सत्वम् । **कौतस्कुतः** गणपाठादण्, अन्यथा "केहामात्र०" [ ६. ३. १६. ] इति त्यच् स्यात्, किञ्च तसन्तस्य प्रथमान्तत्वेन "ततः०" [ ६. ३. १४९. ] इति पञ्चम्यन्ताद् विधीयमानो न प्राप्नोति । केचित् त्वपञ्चम्यन्तादपि अणमिच्छन्ति, सतस्तन्मतेन "तत आगते" [ ६. ३. १४९. ] इत्यनेन वाऽण् । ननु द्वित्वे तत एकपदत्वाभावात् कथं "तत आगते" [ ६. ३. १४९. ] इत्यण् ? सत्यम्– भूतपूर्वकन्यायाद् भविष्यति । **अहस्करः**– अहः करोति लिहाद्यचिति

कार्यं, कृगस्तु " अतः कृकमि० " [ २. ३. ५. ] इति सिद्धमेव । **अयस्कान्तेति**– कनै इत्यस्य रूपं, कामपतेस्तु " अतः कृकमि० " [ २. ३. ५. ] इति सिद्धमेव, कामपतेर्वा समस्तार्थमिह पाठः, तेन परमायस्कान्त इत्यपि भवति । **कस्क** इति– यद्येवं " कः कः कुत्र न घुर्घुरायितघुर्घुरीघोरो घुरेत् भूकरः " इत्यादि कथम् ?, यतस्तत्रापि कस्कः इति स्यात्, सत्यम्– परमताभिप्रायेण, ते हि " भ्रातुष्पुत्र० " [ २. ३. १४. ] इति सूत्रं सन्धिविधौ विदधति, ततो विरामे विवक्षिते सति " न सन्धिः " [ १. ३. ५२. ] इत्यस्य प्रवृत्तेर्न सत्वम् ॥ २. ३. १४. ॥

## नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि । २ । ३ । १५ ॥

**त० प्र०**–नामिनोऽन्तस्थायाः कवर्गाच्च परस्य पदान्तः– पदमध्ये कृतस्य– विहितस्य कृतसंबन्धिनो वा सः सकारस्य षो भवति, शिटा नकारेण चान्तरेऽपि– व्यवधानेऽपि । नामिनः– आशिषा, अग्निषु, नदीषु, वायुषु, वधूषु, पितृषु, एषा, गोषु, नौषु, सिषेवे, शिष्यते, चिचीषति, सुष्वाप, लुलूषति, जेष्यति, अनैषीत्, अच्योष्ट, अकौषीत्; ' सर्पिष्मान्, यजुष्मान्, दोष्मान् ' इत्यादौ " न स्तं मत्वर्थे " [ १. १. २३. ] इति पदप्रतिषेधात् पदमध्यत्वम् । अन्तस्थायाः– गीर्षु, धूर्षु, चिकीर्षति, पुपूर्षति, हल्षु । कवर्गात्– वाक्षु, त्वक्षु, पिपक्षति, शिक्षति, अपाङ्क्षु, क्रुङ्क्षु । शिड्नान्तरेऽपि– सर्पिःषु, हविःषु, अत्र सकारेण व्यवधानम्; सर्पिःषु, धनुःषु; सर्पींषि, यजूंषि, ब्रह्माशींषि कुलानि नकारस्यावश्यमनुस्वारभवनात् शिट्ग्रहणेनैव सिद्धे नकारोपादानं नकारस्थानेनैवानुस्वारेण यथा स्यादित्येवमर्थम्, तेन मकारानुस्वारेण न भवति– पुंसु । शिटा नकारेण चान्तरे इति प्रत्येकं वाक्यपरिसमाप्तेरुभयव्यवधाने न भवति– " णिसुकि चुम्बने " निंस्से । नाम्यन्तस्थाकवर्गादिति किम् ? असौ, दास्यति । पदान्त इति किम् ? पदादौ पदान्ते च मा भूत्– दधिसेक्, दधिसेचौ; ईषदपरिसमाप्तः सेक्– बहुसेक्, बहुसेचौ; अत्रान्तर्वर्तिन्या विभक्त्या सेक्शब्दस्य पदत्वात् सकारस्य पदादित्वम्; अन्ते– अग्निस्तत्र । कृतस्येति किम् ? बिसम्, मुसलम्, सिसाधयिषति । अथ बिसं बिसं, मुसलं मुसलमित्यादौ द्वित्वे कृते सकारस्य षत्वं कस्माद् न भवति ? उच्यते– नात्र कृतः सकारः किन्तु तत्संपृक्तः समुदायो द्विरुच्चार्यते । तिसृभिरित्यत्र तु विधानबलात् न भवति । अधिकारश्चायमा षत्वविधेः ॥ १५ ॥

**श० न्या०**—नाम्य० । **नाम्यन्तस्थाकवर्गा**दिति समाहारद्वन्द्वात् पञ्चमीत्याह– **नामिन** इत्यादि । **पदान्तः कृतस्ये**ति सामानाधिकरण्यसम्बन्धे षष्ठीत्याह– **पदमध्ये कृतस्ये**त्यादि । **कृतसम्बन्धिन** इति– कृतो विहितो य आदेशादिस्तस्यावयवो यः सकारस्तस्येत्यर्थः । नाम्यन्तस्थाकवर्गादिति पञ्चमीनिर्देशात् " पञ्चम्याः [ पञ्चम्या निर्दिष्टे ] परस्य " [ ७. ४. १०४. ] इत्यनन्तरे कृतार्थत्वाद् व्यवधाने सति न प्राप्नोतीति तदर्थं **शिड्नान्तर** इत्याह– **शिटे**त्यादि । **आशिषे**ति– अत्र " आङः " [ ४. ४. १२०. ] इति शासेरिसादेशस्य विहितत्वादेकयैव च षष्ठ्या द्वयोरपि प्रतिपन्नत्वाद् गुणमुख्यभावाभावात् कृतस्य सकारस्येति प्रथममुक्तेऽपि कृतसम्बन्धिनः प्रथममुदाहरणम्; एवम्– **अग्निष्वि**त्यादि । **एषे**ति– " एतदश्च व्यञ्जने० " [ १. ४. ४६. ] [ इति सेर्लुक् " तः सौ सः " २. १. ४२. इति तकारस्य सकारः ] इत्यत्र कृत एव सकारः । अथ सर्पिष्मानित्यादौ मतौ " नाम सिदय्व्यञ्जने " [ १. १. २१. ] इति पदत्वात् पदमध्ये कृतत्वाभावात् कथं षकार इत्याह– **सर्पिष्मानि**त्यादि । **सर्पिष्वि**ति– ' सर्पिस् सु ' इति स्थिते " सो रुः " [ २. १. ७२. ] इति रुत्वे " शषसे शषसं वा " [ १. ३. ६. ] इति तस्य पक्षे सत्वं, सुपः सकारस्यानेन शिडन्तरितत्वात् षत्वम्, " सस्य शषौ " [ १. ३. ६१. ] इति प्रकृतिसकारस्यापि; पक्षे च रेफस्य " रः पदान्ते० " [ १. ३. ५३. ] इति [ विसर्गे तस्य ] शिट्त्वात् ततः परस्यापि सस्य षत्वम् । **सर्पींषी**ति– सर्पिःशब्दाजसः शसो वा " नपुंसकस्य० " [ १. ४. ५५. ] इति शिरादेशस्ततो " धुटां प्राक् " [ १. ४. ६६. ] इति नागमः " न्स्महतोः " [ १. ४. ८६. ] इति दीर्घः, " शिड्हेऽनुस्वारः " [ १. ३. ४०. ] इत्यनुस्वारः, ततोऽनेन षत्वम् । **ब्रह्माशींषी**ति– ब्रह्म आशिषो येषामिति विग्रहः । एतेषु नित्यत्वादन्तरङ्गत्वाद् वा षकारात् पूर्वं नकारस्यानुस्वारसद्भावात् तस्य च शिट्त्वात् तद्द्वारेणैव षकारस्य सिद्धत्वान्नकारोपादानं नकारस्थानिकादेवानुस्वारात् परस्य सस्य षत्वार्थमित्याह– **नकारस्ये**त्यादि । ननु यथा मूर्खैर्न प्रवेष्टव्यमिति मूर्खनिषेधनपरत्वाद् वाक्यस्य प्रत्येकं सहितानां च प्रवेशाऽभाव एवं शिड्-नकारयोः षत्वाप्रतिबन्धत्वप्रतिपादनायोपादानात् प्रत्येकं समुदायेन च व्यवाये षत्वप्रसङ्गात् प्रतिषेधो वक्तव्यः, न वक्तव्यः, प्रत्येकं वाक्यपरिसमाप्तेरिष्टत्वात्, यथा– गुण-वृद्धिसंज्ञे इत्याह– **शिटा नकारेण चे**ति– ननु चायमप्यस्ति दृष्टान्तः– समुदाये वाक्यपरिसमाप्तिः, यथा– गर्गाः शतं दण्ड्यन्तामिति, अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति, सर्वैश्च सर्वत्र व्यव-

साया( व्यवाया )संभवात् यथासम्भवं क्वचित् प्रत्येकं क्वचिदुभयं ( क्वचिदुभाभ्यां ) व्यवाये षत्वं भवति; एवं तर्हि शिटैव नकारेणैवेति योगविभागाद् द्वाभ्यां व्यवाये षत्वं न भविष्यति, "नाम्यन्तस्था" इति पञ्चमीनिर्देशादानन्तर्येण षत्वप्रतिपादनाद् योगद्वयेन चैकैकव्यवाये षत्वाभ्यनुज्ञानादिति; स तर्हि योगविभागः कर्त्तव्यः, न कर्त्तव्यः, प्रत्येकं वाक्यपरिसमाप्तेः, लक्ष्यदर्शनाद्धि लक्षणव्यवस्था, ततश्चैतद्वाक्योपात्ते प्रक्रियावाक्ये द्वे उपप्लवेते इति योगविभागसाध्यफलसिद्धिः । **दधिसेगि**ति– सिञ्चतीति क्विप्, ततो दध्नः सेक्– दधिसेक्, न तु दधि सिञ्चतीत्युपपदसमासः, तत्र प्रागेवोपपत्तेर्दर्शितत्वात् । पदादित्वं दर्शयति– **अत्रे**त्यादि । **अथे**ति– बिसं बिसमिति वीप्सायां द्वित्वे कृतसम्बन्धित्वात् षत्वं कस्मान्न भवतीत्याह–[ नात्रेत्यादि । ननु तिसृभिरित्यत्र त्रिशब्दस्य तिसादेशे कृते कृतसम्बन्धित्वात् कथं षत्वं न भवतीत्याह–] **तिसृभिरि**त्यादि ॥ २. ३. १५. ॥

**न्या० स०—नाम्यन्तस्था०** । **अनुस्वारभवनादिति**– नित्यत्वादन्तरङ्गत्वाच्चेत्यर्थः । **बिसमिति**– अव्युत्पन्नो ग्राह्यः, न तु "बटि-बीभ्यां डिसडिसौ" [ उणा० ५७९. ] इति; यद्वा "विसच् प्रेरणे" विस्यति "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के– विसम्; यदा तु डिस-डिसौ तदा विधानसामर्थ्यान्न भवति ॥ २. ३. १५. ॥

## समासेऽग्नेः स्तुतः । २ । ३ । १६ ॥

**त० प्र०—अग्निशब्दात् परस्य स्तुत्‌शब्दसंबन्धिनः सकारस्य समासे षो भवति । *अग्निष्टुत्, अग्निष्टुतौ; अग्निष्टुतः॥१६॥**

**श० न्या०**—समा० । **अग्निष्टुदि**ति अग्निं स्तौतीति क्विपि "ह्रस्वस्य तः०" [ ४. ४. ११३. ] इति तागमः "ङस्युक्तं कृता" [ ३. १. ४९. ] इति समासः ॥ छ ॥ ॥ २. ३. १६. ॥

**न्या० स०—समासे०** । असत्र इति वचनात् सकारस्य पदमध्यत्वं नास्तीति वचनम् ॥ २. ३. १६. ॥

## ज्योतिरायुर्भ्यां च स्तोमस्य । २ । ३ । १७ ॥

**त० प्र०—ज्योतिरायुःशब्दाभ्यामग्नेश्च परस्य स्तोमशब्दसंबन्धिनः सकारस्य समासे षो भवति । ज्योतिःष्टोमः, आयुःष्टोमः; अग्निष्टोमः । समास इत्येव– ज्योतिः स्तोमं दर्शयति ॥ १७ ॥**

**श० न्या०**—ज्योति० । चकारोऽग्नेरनुकर्षणार्थ इत्याह– **अग्नेश्चेति** । स्तौतेः "अर्तीरि०" [ उणा० ३३८. ] इति मे– स्तोमः । ज्योतिःष्टोमादयः षष्ठीसमासाः । ज्योतिःशब्दसकारस्य रुत्वं तस्य च "व्यत्यये लुग् वा" [ १. ३. ५६. ] इत्यस्य पाक्षिकत्वाद् विसर्गः । **ज्योतिः स्तोमं दर्शयती**ति सम्बन्धः ॥ छ ॥ २. ३. १७. ॥

**न्या० स०**—ज्योतिरायुः० । ज्योतिः स्तोमं दर्शयतीति– ज्योतिः प्रदीपादि कर्तृ समूहं दर्शयतीत्यर्थः ॥ २. ३. १७. ॥

## मातृ-पितुः स्वसुः । २ । ३ । १८ ॥

**त० प्र०—मातृपितृभ्यां परस्य स्वसृशब्दसंबन्धिनः सकारस्य समासे षो भवति । मातृष्वसा, पितृष्वसा । समास इत्येव– मातुः स्वसा, पितुः स्वसा ॥ १८ ॥**

**श० न्या०**—मातृ० । अकृतत्वात् पदादित्वाच्चाप्राप्ते विधानम् । प्रयोगस्थयोर्मातृ-पितृशब्दयोरनुकरणे एते, माता च पिता चेति समाहारद्वन्द्वात् पञ्चमी, अनुकरणस्याविवक्षितार्थत्वात् * प्रकृतिवदनुकरणम् * इत्यस्याभावादनुकरणत्वात् "आ द्वन्द्वे" [ ३. २. ३९. ] इति आकारो न भवति । वन्दिरत्नमतिस्तु– आकारस्यानिर्देश ऋकारान्तस्वरूपपरिग्रहार्थः, ऋकारान्तं च स्वरूपं षष्ठीतत्पुरुष एव न द्वन्द्व इति न मन्यते । **मातृष्वसे**त्यादिः षष्ठीसमासः ॥ छ ॥ २. ३. १८. ]

**न्या० स०—मातृ-पितुः०** । अकृतत्वात् पदादित्वाच्चाप्राप्तविधानम् । मातृपितुरित्यत्र सूत्रत्वात् "आ द्वन्द्वे" [ २. २. ३९. ] इति न प्रवर्तते । वन्दिरत्नमतिस्तु– आकारस्यानिर्देश ऋकारान्तस्वरूपपरिग्रहार्थः, ऋकारान्तस्वरूपं षष्ठीतत्पुरुष एव न तु द्वन्द्व इति मन्यते ॥ २. ३. १८ ॥

## अलुपि वा । २ । ३ । १९ ॥

**त० प्र०—मातृपितृभ्यां परस्य स्वसृशब्दसंबन्धिनः सकारस्याऽलुपि समासे षो वा भवति । मातुःष्वसा, मातुःस्वसा; पितुःष्वसा, पितुःस्वसा;– "स्वसृपत्योर्वा" [ ३. २. ३८. ] इति षष्ठ्या अलुप् । समास इत्येव– मातुः स्वसा, पितुः स्वसा ॥ १९ ॥**

**श० न्या०**—अलु० । पूर्वेणाप्राप्ते षत्वे विभाषेयमारभ्यते । मातृ-पितृ-शब्दाभ्यां केवलाभ्यां प्रकृति-प्रत्ययसमुदायात्मकयोर्मातुःपितुरित्येतयोरन्यत्वात् "ऋतां विद्या-योनिसम्बन्धे" इत्यधिकृत्य– "स्वसृपत्योर्वा" [ ३. २. ३८. ] इति स्वसृशब्दे परतः षष्ठ्या वा लुबुक्तेत्याह– **अलुप्समास** इति । **मातुष्वसे**ति– मातृशब्दात् ङस् "ऋतो डुर्" [ १. ४. ३७. ] इति डुर्, "शषसे शषसं वा" [ १. ३. ६. ] इत्यस्य

पाक्षिकत्वादन्तरङ्गत्वाद् रेफस्य विसर्गः, ततोऽनेन षत्वे षत्वमिति द्वैरूप्यम्, "शषसे शषसं वा" [१. ३. ६.] इति रस्य सत्वेऽपि पक्षे षत्वे द्वैरूप्यमिति चातूरूप्यम् ॥छ॥२. ३. १९.॥

**न्या० स०—अलुपि वा** । पूर्वेण प्राप्ते विभाषेयमारभ्यते । मातुःष्वसेति– "शषसे शषसं वा" [१. ३. ६.] इति पाक्षिके रस्य सत्वे चातूरूप्यम् ॥ २. ३. १९.॥

## नि-नद्याः स्नातेः कौशले । २ । ३ । २० ॥

**त० प्र०—निनदीशब्दाभ्यां परस्य स्नातेः संबन्धिनः सकारस्य समासे षो भवति, कौशले-नैपुण्ये गम्यमाने । निष्णः कटकरणे, निष्णातः कटकरणे; नदीष्णः प्रतरणे, नदीष्णातः प्रतरणे; कुशल इत्यर्थः । नद्याः स्नातस्य नेच्छन्त्येके । कौशल इति किम्? निस्नातः, नदीस्नः, यः स्रोतसा ह्रियते ॥ २० ॥**

**श० न्या०—निन०** । कुशलस्य भावः कर्म वेति युवाद्यणि– **कौशलम्** । कौशलमित्यस्यार्थमाह– **नैपुण** इति– अत्रापि युवाद्यण्, पूर्वोत्तरपदसमुदायेन चेन्नैपुणं गम्यत इत्यर्थः । **निस्नाती**ति– "उपसर्गादातः०" [५. ३. ११०.] इति डे– **निष्णः**, निस्नाति स्म अकर्मकत्वात् कर्तरि क्ते– **निष्णातः** । नद्यां स्नातीति "स्थापास्नात्रः कः" [५. १. १४२.] इति के– **नदीष्णः**, अत्रावयवार्थो व्युत्पत्तये एव समाश्रीयते, कृतषत्वेन त्वनेन क्रियासु तात्पर्येणानुष्ठातोच्यते । **एक** इति– चन्द्रप्रभृतयः, ते हि नद्याः स्नस्य नेः स्नातस्य चेच्छन्ति ॥ छ ॥ २. ३. २०. ॥

**न्या० स०—नि-नद्याः०** । नदीष्णातः प्रतरणे इत्यादिष्ववयवार्थो व्युत्पत्त्यर्थमेवाश्रीयते, कृतषत्वेन त्वनेन क्रियासु तात्पर्येणानुष्ठातोच्यते– 'नद्याः स्नातस्य' इत्यत्र । **एक** इति– चन्द्रप्रभृतयः, ते हि नद्याः स्नातस्य नेः स्नातस्य चेच्छन्ति ॥ २. ३. २० ॥

## प्रतेः स्नातस्य सूत्रे । २ । ३ । २१ ॥

**त० प्र०—प्रतेः परस्य स्नातसंबन्धिनः सकारस्य समासे षो भवति, सूत्रेऽभिधेये, विशेषानुपादानात् चोर्णादिसूत्रं व्याकरणादिसूत्रं च गृह्यते । प्रतिष्णातं सूत्रम्– ऊर्णादिसूत्रं क्षालनेन शुद्धम्, व्याकरणादिसूत्रं त्वतिव्याप्त्यादिदोषाभावेन शुद्धमित्यर्थः । सूत्र इति किम्? प्रतिस्नातमन्यत् । प्रत्ययान्तोपादानं प्रत्ययान्तरनिवृत्त्यर्थम्– प्रतिस्नातृ सूत्रम्, प्रतिस्नायकं सूत्रम् ॥ २१ ॥**

**श० न्या०—प्रते०** । **विशेषानुपादानादि**ति– तत्र कर्पासादिसूत्रस्याभिमुख्येन स्नानक्रियाकर्तृत्वं मुख्येनैव रूपेणास्ति, व्याकरणादिसूत्रस्य तु स्नानक्रियासाहचर्यात् शुद्धिरुपलक्ष्यत इत्याभिमुख्येन शुद्धमव्याप्त्यतिव्याप्तिरहितं प्रतिष्णातं तदभिधीयते । **प्रत्ययान्ते**ति– अन्यथा पूर्वसूत्रात् स्नातिरनुवर्तिष्यत एव किं तदुपादानेनेत्यर्थः ॥ छ ॥ २. ३. २१. ॥

**न्या० स०—प्रतेः स्ना०** । **प्रत्ययान्तरनिवृत्त्यर्थमि**ति– अन्यथा पूर्वसूत्रात् स्नातिरनुवर्तिष्यत एव किं तदुपादानेन इत्यर्थः ॥ २. ३. २१. ॥

## स्नानस्य नाम्नि । २ । ३ । २२ ॥

**त० प्र०—प्रतेः परस्य स्नानसंबन्धिनः सकारस्य समासे षो भवति, सूत्रविषये नाम्नि– समुदायश्चेत् सूत्रविषयं नाम भवतीत्यर्थः । प्रतिष्णानं सूत्रमित्यर्थः । नाम्नीति किम्? प्रतिस्नानमन्यत् ॥ २२ ॥**

**श० न्या०—स्नान०** । सूत्र इति वर्तते, तच्च नाम्नीत्यस्य विषयतया विज्ञायत इत्याह– **सूत्रविषये नाम्नी**ति । तच्च पूर्वोत्तरपदसमुदाये इत्याह– **समुदायश्चे**त्यादि । प्रतिस्नान्ति तेनेत्यनटि– **प्रतिष्णानम्** । सूत्रपर्यायोऽयमित्याह– **सूत्रमित्यर्थ** इति ॥ छ ॥ २. ३. २२. ॥

**न्या० स०—स्नानस्य नाम्नि** । **प्रतिष्णानमि**ति– प्रतिस्नातीति नन्द्यादिभ्यो रम्यादिभ्यो वाऽनः, अथवा प्रतिस्नाति तेनेति करणेऽनट् ॥ २. ३. २२. ॥

## वेः स्त्रः । २ । ३ । २३ ॥

**त० प्र०—वेः परस्य स्तृणातेः सकारस्य समासे षो भवति, नाम्नि– समुदायश्चेत् संज्ञाविषयो भवति । विष्टरो वृक्षः, विष्टरमासनम्, विष्टारपङ्क्तिश्छन्दः; विष्टारबृहती छन्दः । नाम्नीत्येव– विस्तरो वचसाम्, विस्तारः पटस्य ॥ २३ ॥**

**श० न्या०—वेः स्त्रः** । नाम्नीति विषयसप्तमीयमित्याह– **समुदायश्चेत् संज्ञाविषय** इति । विषयत्वं सामान्येनैकदेशेन च भवतीति क्रमेणोदाहरणानि– **विष्टर** इत्यादि– विस्तीर्यत इति "युवर्ण०" [५. ३. २८.] इत्यलि– **विष्टरः** । विष्टार इति हि छन्दोनाम्नोऽवयवः– **विष्टारपङ्क्तिः**, **विष्टारबृहती** छन्दोनाम, छन्द इति वृत्तमिह गृह्यते यस्य गायत्र्यादयो विशेषाः, न मन्त्रब्राह्मणं नामाधिकारात्, विपूर्वात् स्तृणातेः "छन्दोनाम्नि" [५. ३. ७०.] इति घञि विष्टार इति ॥ ॥ २. ३. २३. ॥

**न्या० स०—वेः स्त्रः** । **विष्टरमासनमि**ति अत्र विष्टरो-

ऽतरौ, नपुंसकत्वम्। **विष्टारपङ्क्तिरिति**– विस्तीर्यते "छन्दोनाम्नि" [५. ३. ७०.] इति घञ्, विस्तरस्य पङ्क्तिः, विस्तरस्य बृहतीति तु वाक्ये न घञ् संज्ञाया अभावात्, समुदायेन हि संज्ञा गम्यते। संज्ञाविषयत्वं च सामस्त्येन एकदेशेन च भवतीति क्रमेणोदाहरति– **विष्टर** इत्यादि– विस्तीर्यत इति "युवर्ण०" [५. ३. २८.] इत्यलि– विष्टरः। **विष्टार** इति हि छन्दोनाम्नोऽवयवः, **विष्टारपङ्क्तिः** ॥ २. ३. २३. ॥

## अभिनिष्टानः । २ । ३ । २४ ॥

**त० प्र०—'अभिनिस्' इत्येतस्मात् परः, स्तानशब्दः समासे कृतषत्वो निपात्यते, नाम्नि– समुदायश्चेत् संज्ञाविषयो भवति। अभिनिष्टानो वर्णः, विसर्गस्यैषा संज्ञा, वर्णमात्रस्येत्यन्ये। नाम्नीत्येव– अभिनिःस्तन्यते अभिनिस्तानो मृदङ्गः ॥ २४ ॥**

**श० न्या०—अभि०**। 'अभिनिस्' इति निपातसमुदायानुकरणं, "विग्रहस्तु "वाभिनिविशः" [२. २. २२.] इतिवत्। **अभिनिष्टान** इति– अभि-निस्तन्यत इति कर्मणि घञ्, ततोऽनेन षत्वम्। **अभिनिःस्तान** इति– अत्राभिनिस्तननक्रिययैव मृदङ्गस्य यौगिकोऽयमिति न भवति ॥ छ ॥ २. ३. २४. ॥

**न्या० स०—अभि-नि०**। अत्रोपलक्षणत्वान्निरोऽपि ग्रहः "व्यत्यये लुग् वा" [१. ३. ५६.] रलुक् ॥ २. ३. २४. ॥

## गवि-युधेः स्थिरस्य । २ । ३ । २५ ॥

**त० प्र०—'गवि युधि' इत्येताभ्यां परस्य स्थिरशब्दसंबन्धिनः सस्य समासे षो भवति, नाम्नि। गविष्ठिरः, अस्मादेव निर्देशात् सप्तम्या अलुप् युधिष्ठिरः ॥ २५ ॥**

**श० न्या०—गवि०**। गविश्च युधिश्चेति समाहारद्वन्द्वः, सप्तम्यन्तयोरनुकरणे एते, तिष्ठतेः "शुषीषि०" [उणा० ४१६.] इति किति इरे– स्थिरः, तेन गविशब्दस्य सप्तम्यन्तस्य "नाम्नि" [३. १. ९४.] इत्यनेन समासः, व्युत्पत्तिमात्रं चैतत्, नात्र संज्ञाशब्देषु सर्वत्रावयवार्थोऽस्तीति। **योधनं**– युत्, कुत्सम्पदादित्वात् क्विपि सप्तम्यन्तस्य तेनैव पूर्ववत् समासः। अथ समासे कृते गोशब्दात् सप्तम्या लुपा भवितव्यम्, तत् कथं गवेरुत्तरस्य स्थिरसकारस्य षत्वमिति, न च "अव्यञ्जनात् सप्तम्याः०" [३. २. १८.] इत्यवादेशे कृतेऽलुबत्रेति वक्तुं शक्यम्, * अन्तरङ्गानपि विधीन् बहिरङ्गा लुब् बाधते * इति अन्तरङ्गोऽप्यवादेशो लुपा बाध्यत इति कथं व्यञ्जनान्तात् सप्तमी स्यात्, युधिष्ठिर इत्यत्रैव तु व्यञ्जनान्तत्वात् तेनालुबुपपद्यत इत्याह– **अस्मादेवे**त्यादि– गवेरुत्तरस्य स्थिरसकारस्य षत्वविधानाद् व्यञ्जनान्तत्वाभावेऽपि गोशब्दात् सप्तम्या अलुब् व्यवस्थाप्यते, यदि हि गोशब्दाड्डेर्लुप् न स्यात् कथं गवेरुत्तरस्य स्थिरसकारस्य षत्वं [वि]दधीत; न च विधानसामर्थ्याद् वाक्ये तथाभावो भविष्यतीति वाच्यम्, "नाम्नि" [३. १. ९४.] इत्यनेन नित्यसमास एव विधि(धे)रारम्भात् कथं वाक्ये तथाभावात् प्रसङ्ग इति ॥ छ ॥ २. ३. २५. ॥

**न्या० स०—गवि-युधेः०**। अनयोः सप्तम्यन्तानुकरणयोरपि युधशब्दस्य यथाप्राप्तः "अद्व्यञ्जनात्०" [३. २. १८.] इत्यनेनैवालुप् ॥ २. ३. २५. ॥

## एत्यकः । २ । ३ । २६ ॥

**त० प्र०—ककारवर्जितान्नाम्यन्तस्थाकवर्गात् परस्य सकारस्य एति– एकारे परे समासे षो भवति, नाम्नि। हरिषेणः, श्रीषेणः, वायुषेणः, मातृषेणः। एतीति किम्? हरिसिंहः। अक इति किम्? विष्वक्सेनः, शतभिषक्सेनः। नाम्नीत्येव– पृथ्वी सेनास्य– पृथुसेनः। नाम्यन्तस्थाकवर्गादित्येव– सर्वसेनः, महासेनः ॥ २६ ॥**

**श० न्या०—एत्य०**। **एती**ति परसप्तमीत्याह– **एति– एकारे परे** इति। **हरिषेण** इति– हरिर्हरयो वा सेनायामस्येत्यन्यार्थसमासः, "गोश्चान्ते०" [२. ४. ९६.] इति ह्रस्वत्वम्, एवमन्यत्रापि। **विष्वक्सेन** इति– विषु अञ्चतीति क्विप्, "अञ्चोऽनर्चायाम्" [४. २. ४६.] इति नकारलोपः "अचः" [२. ४. ३.] इति ङीः, "अच्च् प्राग्०" [२. १. १०४.] इत्यकारलोपः, पूर्वस्य दीर्घत्वम्, विषूची सेनाऽस्येति– "परतः स्त्रीपुंवत्" [३. २. ४९.] इति पुंवद्भावः, "चजः क-गम्" [२. १. ८६.] इति कत्वं "धुटस्तृतीयः" [२. १. ७६.] इति गत्वं ततो नित्यत्वादन्तरङ्गत्वाच्च "अघोषे प्रथमः०" [१. ३. ५०.] इति कत्वेऽक इति प्रतिषेधात् षत्वं न भवति ॥ छ ॥ २. ३. २६. ॥

**न्या० स०—एत्यकः**। **विष्वक्सेनः** विषुवति परसेनां विषूः, प्रेरकः, तमञ्चति क्विपि ङ्यां विषूची; विषुशब्दोऽव्ययं वा नानार्थे वर्तते, तदञ्चति; यद्वा विष्वग्गित्ययं सामस्त्ये च वर्तते, परत्वात् त्रिष्वपि बहुव्रीहिः ॥ २. ३. २६ ॥

## भादितो वा । २ । ३ । २७ ॥

**त० प्र०—भं– नक्षत्रं, तद्वाचिन इकारान्तात् परस्य**

**सकारस्यैकारे परे समासे षो वा भवति, नाम्नि। रोहिणिषेणः, रोहिणिसेनः; रेवतिषेणः, रेवतिसेनः; भरणिषेणः, भरणिसेनः; "ङ्यापो बहुलं नाम्नि" [२. ४. ९९.] इति ह्रस्वः। इत इति किम्? पुनर्वसुषेणः, अत्र पूर्वेण नित्यमेव, शतभिषक्सेनः ॥ २७ ॥**

**श० न्या०**—भादि०। भशब्दो नक्षत्रवाचीत्याह– **भं नक्षत्रमि**ति। रोहतेः "द्रुह-वृहि-दक्षिभ्यः०" [उणा० १९४.] इति बहुवचनादिणे– रोहिणः, "रेवृङ् पवि गतौ" अतो "दृ-पृ-भृ-सृ-शी०" [उणा० २०७.] इति बहुवचनादते– रेवतः। बिभर्तेः करणेऽनटि– भरणः, "ऋ-हृ-सृ०" [उणा० ६३८.] इत्यादिनाऽणिप्रत्यये तु– भरणिः, "रेवत-रोहिणाद्भे" [२. ४. २६.] इति गौरादित्वादिदन्तत्वाच्च ङीप्रत्यये– रोहिण्य इव रेवत्य इव भरण्य इव सेना अस्येति बहुव्रीहौ "ङ्यापो बहुलं०" [२. ४. ९९.] इति ह्रस्वत्वे पक्षेऽनेन षत्वे "रषृवर्णाद्०" [२. ३. ६३.] इति णत्वे– **रोहिणिषेण** इत्यादि। **पूर्वेणे**ति– "एत्यकः" [२. ३. २६.] इत्यनेनेत्यर्थः। **शतभिषक्सेन** इति– शतं भिषजो यस्यामिति बहुव्रीहिः, इत उत्तरो नायमिति षत्वं न भवति ॥ छ ॥ २. ३. २७. ॥

**न्या० स०**—भादि०। बिभर्ति करणेऽनटि, "ऋ-हृ०" [उणा० ६३८.] इत्याद्यणौ वा भरणिः। रोहिण्य इव रेवत्य इव भरण्य इव कल्याणिनी सेना यस्येति। **पुनर्वसुषेण** इत्यादि– पुनर्वस्वनयोराराधितयोः पुनर्वसू, शतभिषज् नक्षत्रमतो भ इति व्यावृत्तेर्न व्यङ्गवैकल्यम् ॥ २. ३. २७. ॥

## वि-कु-शमि-परेः स्थलस्य। २। ३। २८॥

**त० प्र०—वि-कु-शमि-परिभ्यः परस्य स्थलशब्दसंबन्धिनः सकारस्य समासे षो भवति। नाम्नीति निवृत्तम्। विगतं वीनां वा पक्षिणां स्थलं– विष्ठलम्, कुत्सितं कोः– पृथ्व्या वा स्थलं– कुष्ठलम्, शमीनां स्थलं शमिष्ठलम्, "ङ्यापो बहुलं नाम्नि" [२. ४. ९९.] इति ह्रस्वः, सूत्रे ह्रस्वस्य शमिशब्दस्योच्चारणाद् दीर्घान्न भवति– शमीस्थलम्, दीर्घादप्येके; परिगतं स्थलं परिष्ठलम्। एभ्य इति किम्? भूमिस्थलम् ॥ २८ ॥**

**श० न्या०**—विकु०। विकुष्ठलादिशब्दैः संज्ञाया अप्रतीतेस्तन्निवृत्तिरित्याह– **नाम्नी**ति। वि-कुशब्दावव्यया-ऽनव्ययौ विशेषानुपादानात्, तत्राव्ययपक्षे "गति-क्वन्य०" [३. १. ४२.] इति "प्रात्यव०" [३. १. ४७.] इति च तत्पुरुषोऽन्यत्र षष्ठीसमास इत्याह– **विगतमि**त्यादि। "स्थल स्थाने" ज्वलादिणस्य विकल्पितत्वादचि तिष्ठतेर्वा कित्यले– स्थलम्, शाम्यतीत्यचि गौरादित्वाङ्ङ्यां– शमी; शमि इति ह्रस्वान्तस्येत्यर्थः ॥ छ ॥ २.३. २८. ॥

**न्या० स०**—वि-कु-शमि०। नाम्नीति **निवृत्तम्** विष्ठलादिशब्दात् संज्ञाया अप्रतीतेः उत्तरत्र गोत्रग्रहणाद् वा। **स्थलमि**ति– तिष्ठत्यत्र सिकतादिकमिति "स्थो वा" [उणा० ४७३.] अलः– स्थलः। **शमिष्ठलमि**ति– शमिशब्दः शमशब्दो वा, शमेः "इतोऽक्त्य०" [२. ४. ३२.] इति ङीः। अत्र शमाद् गौरादित्वाद् ङीः। वि-कुशब्दावव्यया-ऽनव्ययौ विशेषानुपादानाद् द्वावपि गृह्येते, तत्राव्ययपक्षे "गतिक्वन्य०" [३. १. ४२.] इति "प्रात्यव०" [३. १. ४७.] इति च तत्पुरुषोऽन्यत्र षष्ठीसमास इत्याह– **विगतं वीनां वे**ति। **दीर्घान्न भवती**ति– बाहुलकान्न ह्रस्व इत्यर्थः ॥ २. ३. २८. ॥

## कपेर्गोत्रे। २। ३। २९॥

**त० प्र०—कपिशब्दात् परस्य स्थलशब्दसंबन्धिनः सकारस्य समासे षो भवति, गोत्रेऽभिधेये। कपिष्ठलो, नाम गोत्रस्य प्रवर्तयिता, यस्य कापिष्ठलिः पुत्रः। गोत्रमिह लौकिकं गृह्यते, लोके चाद्यपुरुषा येऽपत्यसंततेः प्रवर्तयितारो यन्नाम्नोऽपत्यसंततिर्व्यपदिश्यते तेऽभिधीयन्ते। गोत्र इति किम्? कपीनां स्थलं कपिस्थलम् ॥ २९ ॥**

**श० न्या०**—कपेः०। नेह पूर्वाचार्यपरिभाषितं गोत्रं गृह्यते, किन्तु "भारद्वाजाऽऽङ्गिरसबार्हस्पत्याः प्रवरा भारद्वाजस्य" इत्यादि प्रवराध्यायपठितमित्याह– **गोत्रमिहे**त्यादि। कपिभिरावृतं स्थलमस्यासौ **कपिष्ठलः**, व्युत्पत्तयेऽवयवार्थोऽनुस्रियते, रूढ्या तु ऋषिविशेषस्य कपिष्ठलशब्दो वाचकः, तस्याप्रसिद्धत्वात् पुत्रेण प्रसिद्धेन निरूपणा क्रियत इत्युक्तं– **कपिष्ठलो नामे**त्यादि। बाह्वादेराकृतिगणत्वादृषित्वेऽपीञ्प्रत्ययः ॥ छ ॥ २. ३. २९. ॥

**न्या० स०**—कपेः। कपिभिरावृतं स्थलमस्य तस्यापत्यं "बाह्वादिभ्यो गोत्रे" [६. १. ३२.] इञ् प्रत्ययः। **गोत्रमिहे**त्यादि– न तु स्वापत्यसन्तानस्येत्यादि– लक्षणं शास्त्रीयम् ॥ २. ३. २९. ॥

## गो-ऽम्बा-ऽऽम्ब-सव्या-ऽप-द्वि-त्रि-भूम्य-ग्नि-शेकु-शङ्कु-कङ्कु-मञ्जि-पुञ्जि-बर्हिः-परमे-दिवेः स्थस्य। २। ३। ३०॥

**त० प्र०—'गो अम्बा आम्ब सव्य अप द्वि त्रि भूमि**

**अग्नि शेकु शङ्कु कु अङ्कु मञ्जि पुञ्जि बर्हिस् परमे दिवि' इत्येतेभ्यः परस्य स्थशब्दसंबन्धिनः सकारस्य समासे षो भवति। गोष्ठम्, अम्बाष्ठः, " ङ्यापो बहुलं नाम्नि " [ २. ४. ९९. ] इति ह्रस्वत्वे अम्बष्ठः, श्लिष्टनिर्देशादुभाभ्यामपि भवति– आम्बष्ठः; सव्यष्ठः, अपष्ठः, द्विष्ठः, त्रिष्ठः, भूमिष्ठः, अग्निष्ठः, शेकुष्ठः, शङ्कुष्ठः, कुष्ठः, अङ्कुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठः, बर्हिष्ठः, परमेष्ठः, दिविष्ठः, अत एव निपातनात् सप्तम्या अलुप्, " तत्पुरुषे कृति " [ ३. २. २०. ] इति तु "नेन्-सिद्धस्थे " [ ३. २. २९. ] इति प्रतिषेधात् नोपतिष्ठते ॥ ३० ॥**

**श० न्या०**—गोऽम्बा०। गोऽम्बादयो दिविपर्यन्ताः प्रायोगिका अनुक्रियन्ते, परमे-दिविशब्दौ सप्तम्यन्तौ, इतराणि नामानि, तिष्ठतेः कप्रत्ययान्तस्य स्थ इत्यनुकरणम्। " अम्बा, आम्ब, सव्य, अप " इत्येभ्योऽनाम्यन्तत्वादप्राप्तं षत्वं विधीयते, इतरेभ्यः पदादित्वात् प्रतिषिद्धं पुनर्विधीयते, बर्हिःशब्दस्य शिडन्तत्वात् प्राप्तम्। अम्ब्यत इति– **अम्बः** " भावाऽकर्त्रोः " [ ५. ३. १८. ] इति घञ्, तस्यायम**म्बः**, अमतेर्वा " शम्यमेर्णिद् वा " [ उणा० ३१८. ] इति वा णिति बप्रत्यये। सवनीयो " य एचातः " [ ५. १. २८. ] इति ये गुणेऽवादेशे च– **सव्यः**। **अपे**त्युपसर्गः, **कुरि**ति भूमिवाचकोऽव्ययश्च। " कै-शी-शमि-रमिभ्यः कुः " [ उणा० ७४९. ] इति कौ– शेकुः, शङ्कुः " फलि-वल्यमेर्गुः " [ उणा० ७५८. ] इति गौ– अङ्कुः। मञ्जः शब्दार्थस्य " पदि-पठि० " [ उणा० ६०७. ] इति इप्रत्यये– **मञ्जिः**। " बंहि-बृंहेर्नलुक् च " [ उणा० ९९०. ] इति इसि– **बर्हिः**। गावस्तिष्ठन्त्यस्मिन्निति– गोष्ठं " स्थादिभ्यः कः " [ ५. ३. ८२. ] इति कः। अपतिष्ठतेः " उपसर्गादातः " [ ५. ३. ११०. ] इति डे। अन्येभ्यस्तु सप्तम्यन्तेभ्यः " स्था-पा-स्ना-त्रः कः " [ ५. १. १४२. ] इति– के " ङस्युक्तं कृता " [ ३. १. ४९. ] इति तत्पुरुषेऽम्बष्ठादयः, " तत्पुरुषे कृति " [ ३. २. २०. ] इत्यनेन सप्तम्या अलुपो " नेन्सिद्धस्थे " [ ३. २. २९. ] इति प्रतिषेधोऽस्तीत्याह– **अत एव निपातनादि**ति। सव्येष्ठ इत्यत्राप्यलुबित्युद्योतकरः, तथैव सारसंग्रहादिषूपलम्भात् ॥ छ ॥ २. ३. ३०. ॥

**न्या० स०**—गोऽम्बाम्ब०। **आम्बष्ठः** अम्ब्यते अपह्नवकारितया घञि, अथवा अम्यते इति " शम्यमेर्णिद्वा " [ उणा० ३१८. ] अम्बोऽपह्नवकर्ता, तस्यायं कार्यभूतः अणि– आम्बोऽपह्नवरूपो धर्मः, तत्र तिष्ठतीत्यत्र सर्वत्र " स्था-पा-स्ना-त्रः कः " [ ५. १. १४२. ] अपतिष्ठतीत्यत्र तु " उपसर्गादातो डः " [ ५. १. ५६. ] इति डः प्रत्ययः– अपष्ठः। अधिकरणे तु गोष्ठमित्यत्र " स्थादिभ्यः कः " [ ५. ३. ८२. ] शीङ्क् शमूच् इत्यनयोः " कशी-शमि० " [ उणा० ७४९. ] इति कौ– शेकुरुद्भिद्विशेषः, शङ्कुस्तु " शङ्कुः पत्र-शिराजाले सङ्ख्या-कीलक-शम्भुषु। " सवनीयः सव्यः " य एचातः " [ ५. १. २८. ] मञ्जेः सौत्रस्य " पदि-पठि० " [ उणा० ६०७. ] इति इप्रत्यये– मञ्जिः। " पूङ् पवने " इत्यस्मात् " पुवः पुन् च " [ उणा० १२८. ] इति जे– पुञ्जः, स इवाचरति " कर्तुः क्विप्० " [ ३. ४. २५. ] तस्य लुप्। पुञ्जतीति " स्वरेभ्य इः " [ १. ३. ३०. ] पुञ्जिः ॥ २. ३. ३० ॥

## निर्दुस्सोः सेध-सन्धि-साम्नाम् । २ । ३ । ३१ ॥

**त० प्र०**—निरादिभ्यः परेषां सेधादीनां सस्य समासे षो भवति, वचनभेदाद् यथासंख्याभावः। **निःषेधः, दुःषेधः, सुषेधः; निःषन्धिः, दुःषन्धिः, सुषन्धिः; निःषाम, दुःषाम, सुषाम ॥ ३१ ॥**

**श० न्या०**—निर्दु०। सेधनं– सेधः " भावा-ऽकर्त्रोः " [ ५. ३. १८. ] इति घञ्, निर्गतः सेधः– **निषेधः**- दुर्गतः सेधः– **दुःषेधः**, एतौ गमिवाच्यायाः क्रियाया विशेषकौ, न सेधतेरिति तां प्रत्युपसर्गत्वाभावात् " स्था-सेनि० " [ २. ३. ४०. ] इत्यादिना षत्वं न प्राप्नोति। गतावत्र सेधतिरिति " गतौ सेधः " [ २. ३. ६१. ] इति प्रतिषेधाद् वा षत्वं न प्राप्नोतीत्यारम्भः। शोभनः सेधः– **सुषेधः** "सुः पूजायाम् " [ ३. १. ४४. ] इति समासः, अत एव चोपसर्गाभावादनेन षत्वम्। [ **निःषन्धिरित्यादि**– ] संधीयते संधानं वा सन्धिरिति " उपसर्गाद् दः किः " [ ५. ३. ८७. ] इति कौ शोभनः सन्धिः, निर्नष्टः सन्धिः, दुष्टः सन्धिः " प्रात्यव० " [ ३. १. ४७. ] इति " दुर्निन्दाः " [ ३. १. ४३. ] इति च तत्पुरुषः। निर्गतं दुष्टं शोभनं वा साम, अत्र रेफस्य सकारेऽनेन शिडन्तरत्वात् परसकारस्य षत्वे पूर्वसकारस्य च " सस्य श-षौ " [ १. ३. ६१. ] इति षत्वे– **निष्षामादयः** ॥ छ ॥ २. ३. ३१. ॥

**न्या० स०**—निर्दुस्सोः०। अत्र रेफस्य सकारेऽनेन शिडन्तरत्वात् परसकारस्य षत्वे पूर्वसकारस्य च " सस्य श-षौ " [ १. ३. ६१. ] इति षत्वे–निष्षेधादयः ॥ २. ३. ३१ ॥

## प्रष्ठोऽग्रगे । २ । ३ । ३२ ॥

**त० प्र०**—प्रात् परस्य स्थसकारस्य षो निपात्यते, अग्रगे–

अग्रगामिण्यभिधेये। प्रष्ठोऽग्रगामी, प्रस्थोऽन्यः ॥ ३२ ॥

**श० न्या०**—प्रष्ठो०। अग्रे गच्छतीति "नाम्नो गमः०" [५. १. १३१.] इति डे– अग्रगः पुरोयायी, प्रतिष्ठते– **प्रष्ठः** "उपसर्गादातः०" [५. ३. ११०.] इति डः, "स्था-पा-स्ना-त्रः०" [५. १. १४२.] इति तु न भवति, प्रायेण * नामग्रहणे उपसर्गस्य न ग्रहणम् * इत्यस्यार्थस्य ज्ञापयिष्यमाणत्वात् ॥ छ ॥ २. ३. ३२. ॥

**न्या० स०**—प्रष्ठोऽग्र०। प्रतिष्ठते– प्रष्ठः, "उपसर्गादातो डः०" [५. १. ५६.] न तु "स्था-पा०" [५. १. १४२.] इति कः, तस्य नामपूर्वाद्धातोर्विहितत्वात् नामग्रहणे च प्रायेणोपसर्गस्य न ग्रहणमित्यस्यार्थस्य ज्ञापयिष्यमाणत्वात्॥ २. ३. ३२. ॥

## भीरुष्ठानादयः। २। ३। ३३ ॥

**त० प्र०**—भीरुष्ठानादयः शब्दाः समासे कृतषत्वाः साधवो भवन्ति। भीरूणां स्थानं– **भीरुष्ठानम्**, अङ्गुलीनां सङ्गः– **अङ्गुलिषङ्गः**; **अङ्गुलिषङ्गा यवागूः**। '**भीरुष्ठान, अङ्गुलिषङ्ग, सव्येष्टृ, परमेष्ठिन्, सुष्ठु, दुष्ठु, अपष्ठु, वनिष्ठु, गौरिषक्थ, प्रतिष्णिका, नौषेचिका, दुन्दुभिषेवण**' इति **भीरुष्ठानादयः**। **समास इत्येव– भीरोः स्थानमित्यादि**। **बहुवचनमाकृतिगणार्थम्** ॥ ३३ ॥

**श० न्या०**—भीरु०। भीरुष्ठानादयः कृतषत्वा अत्रोपादीयन्तेऽतस्तेषां षत्वं वक्तुं न शक्यते, अपि तु तेषां षकारः साधुर्भवतीति प्रतीयतेऽत आह– **कृतषत्वा** इति। [**भीरुष्ठानम्**] बिभेतेः "भियो रुरुकः०" [५. २. ७६.] इति रौ– भीरुः, तिष्ठत्यस्मिन्निति स्थानम्, ततः कर्तृषष्ठीसमासः। सञ्जनं– सङ्गः "भाव-ऽकर्त्रोः" [५. ३. १८.] इति घञ्, अङ्गुलीनां सङ्गो यस्याः सा– **अङ्गुलिषङ्गा**। सव्ये तिष्ठतीति "सव्यात् स्थः" [उणा० ८५५.] इति डिति ऋप्रत्यये– सव्येष्ठृ, सौ– **सव्येष्ठा** सारथिः, अन्ये तु प्रत्ययान्तरस्य छन्दोविषयत्वादाकारान्तः क्विबन्तोऽयमिति मन्यन्ते, तदा 'सव्येष्ठाः' इति विसर्गान्तः, "तत्पुरुषे कृति" [३. २. २०.] इत्यलुप्। परमे तिष्ठतीति परमात् कित्" [उणा० ९२५.] इति इनि– **परमेष्ठी**, गणपाठादलुप्, उभयत्र "ङस्युक्तम्०" [३. १. ४९.] इति समासः। सु-दुर्-अप-व-निपरात् तिष्ठतेः "दुःस्वप-वनिभ्यः स्थः" [उणा० ७३२.] इति कित्युप्रत्यये– सुष्ठ्वादयः, शोभनं स्थानं यत्र, दुर्गतं स्थानं यत्र तत्– **सुष्ठु दुष्ठु** इति पृषोदरादित्वाद् वा, क्रियाप्रधानावेतौ सुष्ठु करोति दुष्ठु करोतीति क्रियापदसन्निधावेवैतयोः प्रयोगात्। गौर्या इव सक्थिनी यस्य "सक्थ्यक्ष्णः स्वाङ्गे" [७. ३. १२६.] इति समासान्ते "नोऽपदस्य" [७. ४. ६१.] इत्यन्त्यस्वरादेर्लुकि "ङ्यापो बहुलम्०" [२. ४. ९९.] इति पूर्वपदह्रस्वत्वे– **गौरिषक्थम्**। प्रतिस्नातीति "उपसर्गादातः" [५. ३. ११०.] इति डे– प्रतिस्ना, प्रतिस्नान्त्यस्यामिति "स्थादिभ्यः०" [५. ३. ८२.] इति के "गति-क्वन्यः०" [३. ५. ४२.] इति समासः, अतः स्वार्थे के "ङ्यादिदूतः०" [२. ४. १०४.] इति ह्रस्वत्वे "इच्चापुंसः०" [२. ४. १०७.] इतीत्वे षत्वे च– **प्रतिष्णिका**। सिञ्चतेः "णक-तृचौ" [५. १. ४८.] इति णके "आत्" [२. ४. १८.] इत्यापि "अस्यायत्तत्०" [२. ४. १११.] इतीत्वे– सेचिका, ततो नावा षष्ठीसमासे [षत्वे च–] **नौषेचिका**। सेवा– सेवनं, भावेऽनट्, ततो दुन्दुभिपूर्वात् पूर्ववत् षष्ठीसमासादिः। **बहुवचनमिति**– तेन नौषेचनं दुन्दुभिषेचनमित्यादिष्वस्य विहितलक्षणं षत्वं द्रष्टव्यम् ॥ छ ॥ २. ३. ३३. ॥

**न्या० स०**—भीरुष्ठान०। सव्ये तिष्ठति "सव्यात् स्थः" [उणा० ८५५.] इति डिति ऋप्रत्यये– सव्येष्ठृ, "तत्पुरुषे कृति" [३. २. २०.] इति सप्तम्यलुप्, असौ सव्येष्ठा– सारथिः। अन्ये– ऋप्रत्ययान्तस्य च्छन्दोविषयत्वादाकारान्तः क्विबन्तोऽयमिति मन्यन्ते, तन्मते– 'सव्येष्ठाः' इति विसर्गान्तः, "तत्पुरुषे कृति" [३. २. २०.] इत्यलुप्। परमेष्ठिनित्यत्र गणपाठसामर्थ्यादलुप्। **सुष्ठु** इत्यादि– अत्र "दुःस्वप-वनिभ्यः स्थः" [उणा० ७३२.] इति उप्रत्यये सुष्ठ्वादयः। शोभनं स्थानं यत्र तत् सुष्ठु दुष्ठु इति पृषोदरादित्वाद् वा, क्रियाप्रधानावेतौ सुष्ठु करोति दुष्ठु करोतीति क्रियापदसंनिधावेवैतयोः प्रयोगात्। **गौरिषक्थः** गौर्या इव सक्थिनी यस्य "सक्थ्यः०" [७. ३. १२६.] इति टः "ङ्यापो बहुलम्०" [२. ४. ९९.] इति ह्रस्वः। **प्रतिष्णिके**त्यत्र प्रतिस्नातीति "उपसर्गादातः०" [५. १. ५६.] इति प्रतिस्ना, यद्वा प्रतिस्नान्त्यस्यां "स्थादिभ्यः०" [५. ३. ८२.] इति के "गति-क्वन्य०" [३. १. ४२.] इति सः, ततः स्वार्थे के "ङ्यादीदूतः०" [२. ४. १०४.] इति ह्रस्वत्वे "इच्चापुंसोऽनि०" [२. ४. १०७.] इतीत्वे षत्वे। **आकृतिगणार्थमिति**– अत्र नौषेचनं दुन्दुभिषेचनमित्यादि ज्ञेयम् ॥ २. ३. ३३. ॥

## ह्रस्वान्नाम्नस्ति। २। ३। ३४ ॥

**त० प्र०**—नाम्नो विहिते तकारादौ प्रत्यये परे ह्रस्वा-

नामिन उत्तरस्य सकारस्य षो भवति । तल्-त्व-तस्-त्य-तय-तरप्-तमपः प्रयोजयन्ति । सर्पिष्टा, यजुष्टा; सर्पिष्ट्वम्, यजुष्ट्वम्; सर्पिष्टः, यजुष्टः; निष्ट्यः; चतुष्टयः; सर्पिष्टरम्, वपुष्टरम्; सर्पिष्टमम्, वपुष्टमम् । ॐअसिद्धं बहिरङ्गमन्तरङ्गेॐ इति प्लुतत्वस्यासिद्धत्वादिहापि भवति - सर्पि३ष्ट्वम्, चतु३ष्टयः, सर्पि३ष्टरम्, यजु३ष्टमम् । ह्रस्वादिति किम्? गीस्त्वम्, धूस्त्वम्, गीस्तरा, धूस्तमा, उच्चैस्तराम्, उच्चैस्तमाम् । नामिन इत्येव- तेजस्ता, तेजस्त्वम्, पयस्ता, पयस्त्वम्, तेजस्तरम्, तेजस्तमम् । नाम्न इति किम्? भिन्द्युस्तराम् । विहितविशेषणं किम्? सर्पिस्तत्र, सर्पिषस्तरणं तमनं वा- सर्पिस्तरः, सर्पिस्तमः । तीति किम्? सर्पिस्साद् भवति ॥ ३४ ॥

श० न्या०—ह्रस्वा० । **नाम्न** इति विहितविशेषणं पञ्चमी, ततो नाम्नो विहितस्तकारः, स च प्रत्यय एव भवतीत्याह- **तकारादौ प्रत्यये** इति । ह्रस्वादित्यन्तरस्थादीनामसम्भवान्नामिन एव विशेषणमित्याह- **ह्रस्वान्नामिन** इति । ये तकारादयः प्रत्ययाः षत्वमिदं प्रयोजयन्ति तान् दर्शयति- **तलि**त्यादि । सर्पिषो भावस्तलि "सो रुः" [२. १. ७२.] इति रुत्वे "चटते सद्वितीये" [१. ३ ७.] इति सत्वेऽनेन षत्वे- **सर्पिष्टा**, एवं- **यजुष्टे**त्यादि । **सर्पिष्ट्व**मिति त्वप्रत्ययान्तम् "आ त्वात् त्वादिः०" [लिङ्गानुशासने] इति नपुंसकम्, तलन्तं च लित्वात् स्त्रीलिङ्गम् । "अहीयरुहोपादानम्" [७. २. ८८.] इति तसौ- **सर्पिष्टः, यजुष्टः** । निर्गतो वर्णाश्रमेभ्यः "निसो गते" [६. ३. १८.] इति त्यचि- **निष्ट्य**श्चाण्डालादिः । चत्वारोऽवयवा यस्य "अवयवात् तयट्" [७. १. ५१.] इति तयटि- **चतुष्टयम्** । इदमनयोः प्रकृष्टं सर्पिर्वपुश्च "द्वयोः०" [७. ३. ३.] इति तरपि- **सर्पिष्टरम्, वपुष्टरम्** । इदममीषां प्रकृष्टं "प्रकृष्टे०" [७. ३. ५.] इति तमपि- **सर्पिष्टमम्, वपुष्टमम्** । **असिद्ध**मिति- अयमर्थः- परत्वात् षत्वात् पूर्वं "दूराद्०" [७. ४. ९९.] इत्यादिकृतस्यापि प्लुतस्यामन्त्र्याद्याश्रयत्वेन बहिरङ्गत्वेनासिद्धत्वात् । ह्रस्वादेव परः स इति **गीस्त्वमि**ति- अन्तरङ्गत्वात् "पदान्ते" [२. १. ६४.] इति दीर्घत्वं ततः सत्वम् । **उच्चैस्तरामि**ति- तरपः "किन्त्याद्येऽव्ययात्०" [७. ३. ८.] इत्यन्तस्यामादेशस्ततोऽव्ययत्वात् सेर्लुप् । **सर्पिस्सादि**ति- "व्याप्तौ०" [७. २. १३०.] इति स्सात् । ननु **सर्पिस्त**त्रेत्यादौ "वेसुसोऽपेक्षायाम्" [२. ३. ११.] इति कखपफीति व्यावृत्त्यैव षत्वव्यावृत्तेः सिद्धत्वात् किमनेन? नैवम्- अपेक्षायां प्राप्तिः, अनेन तु अनपेक्षायामपि शङ्क्यते- पश्यात्र सर्पिस्तत्र यजुर्वर्तत इति ॥छ॥२.३.३४.॥

न्या० स०—ह्रस्वान्ना० । **सर्पिष्ट** इत्यत्र "अहीयरुह०" [७. २. ८८.] इति तस् । **अन्तरङ्ग** इति- अयमर्थः- परत्वात् पूर्वमपि लुप्ते आमन्त्र्याद्याश्रयत्वेन बहिरङ्गत्वं लुपस्य । **सर्पिस्तत्रेति**- ननु **सर्पिस्त**त्रेत्यादौ "वेसुसोऽपेक्षायाम्" [२. ३. ११.] इत्यस्य कखपफीति व्यावृत्त्यैव षत्वव्यावृत्तेः सिद्धत्वात् किमनेन? नैवम्- अपेक्षायां प्राप्तिरनेन तु अनपेक्षायामपि शङ्क्यते, यथा- पश्यात्र सर्पिस्तत्र यजुर्वर्तत इति ॥ २. ३. ३४. ॥

## निसस्तपेऽनासेवायाम् । २ । ३ । ३५ ॥

**त० प्र०—**निसः संबन्धिनः सकारस्य तकारादौ तपतौ परे षो भवति, अनासेवायामर्थे, पुनः पुनः करणमासेवा । **निष्टपति सुवर्णम्**, सकृदग्निं स्पर्शयतीत्यर्थः । अनासेवायामिति किम्? निस्तपति सुवर्णं सुवर्णकारः, पुनः पुनस्तपतीत्यर्थः । 'निष्टप्तं रक्षो निष्टप्ता अरातयः' इत्यत्र तु सदप्यासेवनं न विवक्ष्यते । तीत्येव- निरतपत् । शब्निर्देशो यौवादिकपरिग्रहार्थः, यङ्लुब्निवृत्त्यर्थश्च, निस्तातप्ति, निस्तातपीति । ॐ "तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि" ॥ ॐ ॥ ३५॥

श० न्या०—निसः० । अन्यत्वादप्राप्ते वचनम् । **अनासेवायामर्थे** इति- अपुनः क्रियारूपे सामानाधिकरण्येऽनासेव्यतया धात्वर्थे विवक्षिते, वैयधिकरण्ये तु अनासेवायां विषये योऽर्थस्तत्र वर्तमान इति, अनासेव्यमानेऽर्थ इत्यर्थः । **आसेवा** आसेवनम्, पुनः पुनरनुष्ठानमित्याह- **पुन**रित्यादि । **निष्टपती**ति- "तपं संतापे" इत्यतो निस्पूर्वात् तिव् शव् निसः सस्य रुत्वं "चटते०" [१. ३. ७.] इति सत्वं, ततोऽनेन षत्वम् । '**निष्टप्तं रक्षो निष्टप्ता अरातयः**' इत्यत्रासेवनं गम्यते, तत् कथं षत्वमित्याशङ्कायामाह- **अत्रे**त्यादि- नहीह वस्तुनः सत्ता शब्दप्रवृत्तेः प्रधानकारणं, किं तर्हि? तद्विवक्षा, तस्य च सतोऽप्यत्र विवक्षा नास्तीति तन्निबन्धनस्य संस्कारस्याप्रवृत्तिः । **निरतपदि**ति- निस्पूर्वात् तपेर्ह्यस्तन्या दिव् शव् "अड् धातो०" [४. ४. २९.] इत्यडागमः, अत्र न तकारादिस्तपिरिति षो न भवति; न च पूर्वं धातोरुपसर्गेण योगादडागमात् पूर्वं षत्वं स्यादिति वाच्यम्, तीति विशेषणसामर्थ्यात्, यदि पूर्वमेव षः स्याद् व्यवच्छेद्याभावाद् विशेषणानर्थक्यं स्यात् । **तपे** इति शवा निर्देशस्तस्य प्रयोजनमाह- **शब्निर्देश** इत्यादि । निस्पूर्वात् तपेर्यङि तस्य लुपि द्विर्वचनेऽनादेर्व्यञ्जनस्य लुकि "आगुणावन्यादेः" [४. १. ४८.] इत्यात्वे "यङ्तुरुस्तोः०" [४. ३. ६४.] इति पक्षे ईति- **निस्तातपी**त्यादि । शवा

निर्देशे यङ्लुपि न भवतीत्यत्र प्रमाणत्वेनाश्रितमभियुक्तवचनमुपन्यस्यति- **तिवा शवेत्यादि** ॥ छ ॥ २. ३. ३५. ॥

**न्या० स०**—निसस्तपे० । निरतपदिति- अत्र पूर्वं कृतमपि षत्वं परस्मिन्नडागमे " णषमसत्० " [ २. १. ६०. ] इत्यनेन असिद्धम् । निस्तातपीति- अत्र भृशं निष्टपतीति वाक्यं कार्यम्, आभीक्ष्ण्ये तु अनासेवायामिति व्यावृत्त्यैव निरस्तत्वाद् । अन्त्यस्यादप्राप्ते वचनम् ॥ २. ३. ३५. ॥

## घस्-वसः । २ । ३ । ३६ ॥

**त० प्र०**—नाम्यन्तस्थाकवर्गात् परस्य घसेर्वसेश्च धातोः संबन्धिनः सकारस्य षो भवति । जक्षतुः, जक्षुः, जक्षिवान्; ऊषतुः, ऊषुः, उषितः, उषितवान् । वसिरिह प्रकृत्यन्तरम्, आदेशस्य कृतत्वेनैव सिद्धत्वात्, अकृतसकारार्थं वचनम् । शिड्नान्तरेऽपि- बहूंषि, बहुषु वसन्तीति नगराणि । नाम्यन्तस्थाकवर्गादित्येव- जघास, वसति ॥ ३६ ॥

**श० न्या०**— घस्व० । सति सद्भावेऽविकारमाश्रित्याह- **नाम्यन्तस्थे**त्यादि । **घस्वसः** इत्यवयवसम्बन्धे षष्ठीत्याह- [ **धातोः सम्बन्धिन** इत्यादि ] " घस्लृं अदने " परोक्षाया अतुसि उसि द्वित्वादौ " गम-हन० " [ ४. २. ४४. ] इत्युपान्त्याकारलोपे घकारात् परस्य सस्य षत्वे " अघोषे० " [ १. ३. ५. ] इति घस्य प्रथमत्वे- **जक्षतुः, जक्षुः** । **जक्षिवानि**ति- घसेकः० " [ ४. ४. ८२. ] इतीडागमः । **उषित** इति- " वसं निवासे " इत्यतः क्ते क्तवतौ च ' क्षुधवस० " [ ४. ४. ४३. ] इतीटि " यजादि० " [ ४. १. ७२. ] इति य्वृत्यनेन षत्वम् । **वसिरिहे**ति- न त्वादेशरूप इति शेषः, अत्र हेतुमाह- **आदेशस्ये**त्यादि । बहु वसन्तीति क्विपि य्वृति षत्वशास्त्रस्य स्यादिविध्यावसत्वात् " नपुंसक० " [ १. ४. ५५. ] इति जसः शौ " धुटां प्राक्० " [ १. ४. ६६. ] इति नकारागमेऽनेन षत्वे- **बहूंषि** । **जघास वसती**ति- अत्र नामीत्यादिनिमित्तरहितत्वात् ॥ छ ॥ २ । ३ । ३६ ॥

**न्या० स०**—घस्वसः ॥ अत्र वसो भौवादिकस्य ग्रहः, " वसिक् आच्छादने " इत्यस्य तु य्वृदभावेन नामिनः सस्यासंभवात्, * अदाद्यनदाद्योः * इति न्यायाद् वा । **बहूंषी**ति- वसन्तीति क्विपि य्वृति उषः, बहवः उषो वास्तव्या येषु तानि, अत्र नागमरूपे स्यादिविधौ प्रथमं कृतमपि षत्वं निवर्तत इति प्राग् नागमः, तस्मिन् च नामिनो व्यवधानेऽपि शिड्नान्तरेऽपि इति षत्वम् ॥ २. ३. ३६. ॥

## णि-स्तोरेवाऽस्वद-स्विद-सहः षणि । २ । ३ । ३७ ॥

**त० प्र०**—स्वद्-स्विद्-सहवर्जितानां ण्यन्तानां स्तौतेरेव च संबन्धिनः सकारस्य नाम्यन्तस्थाकवर्गात् परस्य षणि- षत्वभूते सनि परे षो भवति, नान्येषाम् । सिषेवयिषति, सुष्वापयिषति, सिषेधयिषति; तुष्टूषति । स्वदादिपर्युदासः किम्? सिस्वादयिषति, सिस्वेदयिषति, सिसाहयिषति । स्तौतिसाहचर्यात् स्वदादिपर्युदासेन सदृशग्रहणाच्च ण्यन्तानामपि षोपदेशानामेव ग्रहणम्, तथा च कृतत्वात् सकारस्य " नाम्यन्तस्थाकवर्गा० " [ २. ३. १५. ] आदिसूत्रेणैव सिद्धे नियमार्थं वचनम्- णिस्तोरेव षणि षत्वं नान्यस्य, तेनेह न भवति- सुसूषति, सिसिक्षति, सिसेविषति । एवकारः षण्येव णिस्तोरिति विपरीतनियमनिवृत्त्यर्थः, तेनेहापि भवति- असीषिवत्, तुष्टाव । षणीति किम्? सिषेव, सुष्वाप । षत्वे किम्? सुषुप्सति, तिष्ठासति । नकारः किम्? व्यतिसुषुपिषे । कथं प्रतीषिषति ?, अभीषिषति ? षणि निमित्ते धातोः षत्वनियम उक्तः, इह तु सन एव द्विरुक्तस्य षत्वं न धातोरिति न प्रतिषेधः । ' सोषुपिषते, सेषिविषिषते ' इत्यादौ तु यङि द्वित्वं पश्चात् सन्निति न प्रतिषेधः । येषां तु दर्शने द्वित्वेऽपि पुनः सनि द्विरुक्तिः, तन्मते-सुसोषुपिषत इत्यत्र षणि सुशब्दात् परस्य सस्य षत्वं न भवत्येव ॥ ३७ ॥

**श० न्या०**—णि-स्तो० । कृतषत्वणत्वः सन् षणीत्यनुक्रियत इत्याह- **षत्वभूते सनी**ति । सीव्यति स्वपिति सेधति कश्चित्, तमन्यः प्रयुङ्क्ते इति " प्रयोक्तृव्यापारे० " [ ३. ४. २०. ] णिगि यथायोगमुपान्त्यगुण-वृद्ध्योः, सेवयितुमिच्छतीत्यादि विगृह्य " तुमर्हात्० " [ ३. ४. २१. ] इति सनि इटि गुणादौ च " सन्यङश्च " [ ४. १. ३. ] इति द्वित्वेऽनादिव्यञ्जनलुकि ह्रस्वत्वे " स्वपो णावुः " [ ४. १. ६२. ] इति द्विरुक्तस्य स्वपः पूर्वान्तस्योत्वे " नाम्यन्तस्था० " [ २. ३. १५. ] इति सनः सस्य षत्वेऽनेन पूर्वपदस्थान्नाम्यादेः परस्य धातुसस्य षत्वे- **सिषेधयिषती**त्यादि । स्तोतुमिच्छति सनि " स्वरहन्० " [ ४. १. १०४. ] इति दीर्घत्वे द्वित्वे " अघोषे शिटः " [४. १. ४५.] इति पूर्वसकारस्य लुकि ततः प्रत्यय-प्रकृतिसकारयोः पूर्ववत् षत्वे तवर्गस्य टत्वे- **तुष्टूषति** । " ष्वदि आस्वादने " " ष्विदांच् गात्रप्रक्षरणे " " षहि मर्षणे " पूर्ववत् णिगादौ स्वदादिवर्जनात् षत्वाभावे- **सिस्वादयिषती**त्यादि । **णी**ति सामान्यनिर्देशात् ण्यन्तानां षोपदेशानामषोपदेशानां वा ग्रहणमित्याशङ्कायामाह- **स्तौतिसाह**-

**चर्यादि**त्यादि– अयमर्थः–स्तौतिः षोपदेशस्तत्साहचर्यात्– तेन सहैकवाक्योपात्तत्वादिति, एवं स्वदादयोऽपि षोपदेशास्तत्पर्युदासेन ण्यन्तानां षोपदेशानामेव ग्रहणं * नञिव युक्तं सदृशाधिकरणे तथा ह्यर्थसंप्रत्ययः * इति, तदत्र स्वदादिपर्युदासोऽपि षोपदेशग्रहणे हेतुः । **तथा चे**त्यादिना षोपदेशग्रहणस्य फलं दर्शयति, स्तौति-ण्यन्तयोरेव धात्वोरादेशसकारस्य सामर्थ्याद् द्वित्वे पूर्वनामिन उत्तरषत्वभूते सनि षत्वं नैतद्व्यतिरिक्तधात्वन्तरस्येत्यर्थः । नियमफलं दर्शयति– **तेने**त्यादि । **सुसूषति, सिसिक्षती**ति– सुनोतेः सिञ्चतेश्च सोतुमिच्छति सेक्तुमिच्छति पूर्ववत् सन्नादि । ननु षत्वे सिद्धे सतीदमारभ्यमाणमन्तरेणाप्येवकारकरणं नियमार्थं विज्ञास्यत एव, किमेवकारकरणेनेत्याह– **एवकार** इत्यादि– इष्टस्य ह्यर्थस्य नियमेनावधारणं यथा स्यात्, अनिष्टस्य मा भूदित्येवमर्थमित्यर्थः, सति ह्येवकारकरणे * यत एवकारस्ततोऽन्यत्रावधारणम् * इति न्यायादिष्टनियमलाभः, तेन ण्यन्तात् स्तौतेश्चान्यस्मिन्नपि प्रत्यये षत्वमिति दर्शयति– **असीषिवदि**त्यादि । सिव्यतेर्णिगि गुणेऽद्यतन्या दिप्रत्यये " णि-श्रि-द्रु-स्रु० " [ ३. ४. ५८. ] इति ङे ह्रस्वत्वेऽनादिव्यञ्जनलोपे " उपान्त्यस्यासमान० " [ ४. २. ३५. ] इत्युपान्तह्रस्वत्वे " लघोर्दीर्घः० " [ ४. १. ६४. ] इति पूर्वस्य दीर्घत्वे णिलोपे एवकारोपादानाद् विपरीतनियमनिवृत्तेर्ण्यन्तधातुसकारस्य षत्वे– **असीषिवत्**, एवं स्तौतेर्णौ द्वित्वादौ च– **तुष्टावे**ति, सिवेः स्यतेश्च णवि द्वित्वादौ– **सिषेवे**त्यादि, अत्र षणीत्युपादानात् षणमेवाश्रित्य नियमो यथा स्यात् प्रत्ययान्तरमाश्रित्य मा भूदित्यर्थं प्रत्ययान्तरे धात्वन्तरसकारस्य नियमाभावादत्र षत्वमिति । स्वप्तुमिच्छति स्थातुमिच्छति सनि " स्वपेर्यङ्ङे च [ ४. १. ८०. ] स्वपेर्वृति ततो द्वित्वादौ सनः षत्वाभावे नियमाभावाद् धातुसकारस्य ' नाम्यन्तस्था० " [ २. ३. १५. ] इति षत्वे " तवर्गस्य० " [ १. ३. ६०. ] इति थस्य ठत्वे– **सुषुप्सति, तिष्ठासति** । अथ किमर्थं सन् सानुबन्ध उपादीयते ? स्मर्यमाणो ह्यनुबन्धो विशेषको भवति, न श्रूयमाणः, ततः सूत्रे षे इति क्रियतां, स्मर्यमाणो नकारस्तस्य विशेषको भविष्यतीत्याह– **नकारः किमि**ति । अत्रोत्तरं **व्यतिसुषिषिषे** इति– नकारमन्तरेण षकारमात्रे नियमस्य विज्ञानादत्रापि प्रतिषेधः स्यादित्यर्थः । **कथमि**ति– ण्यन्तस्तौतिव्यतिरिक्तधात्वन्तरसकारस्य सनि षत्वभूते नियमात् कथं प्रतीषिषतीत्यादौ षकार इत्याशङ्कार्थः, प्रत्येतुमिच्छति, अध्येतुमिच्छति प्रतिपूर्वादधिपूर्वाच्च इणः सनि " स्वरादेः० [ ४. १. ४. ] इति सन एव द्वित्वे " सन्यस्य " [ ४. १. ५९. ] इति इत्वे " नाम्यन्त० [ २. ३. १५. ] इति परस्य षत्वे पूर्वस्यापि षत्वम् । परिहरति– **षणी**त्यादि– अयमर्थः– **षणी**ति निमित्तसप्तम्यन्तोपादानात् णिस्तोरेवेति नियमः क्रियमाणस्तुल्यजातीयस्य षण्परस्य धातोः सकारस्य शिशिक्षतीत्यादौ षत्वं व्यावर्तयति, **प्रतीषिषती**त्यादौ तु सन एव द्वित्वविधानात् षण्परत्वाभावात् षस्य नियमो न भवति । अथ यदि षण्परस्य धातोः सकारस्य षत्वनियमः, कथं तर्हि **सोषुपिषत** इत्यादौ षत्वप्रतिषेधो न भवतीत्याशङ्कायामाह– **यङि षत्वमि**त्यादि । **येषां त्वि**ति– देवनन्दिनः ॥ छ ॥ २. ३. ३७. ॥

**न्या० स०—णिस्तो०** । **प्रतीषिषती**ति– अत्र " इणंक् गतौ " इति लिख्यते, तस्य च ज्ञानार्थत्वाद् " सनीङश्च " [ ४. ४. २५ ] इति न गम्वादेशः । " इंक् स्मरणे " " इंङ्क् अध्ययने " इत्यनयोस्तु अज्ञान इति विशेषणं नासम्भवाद्, अतोऽनयोर्गम्वादेशः प्राप्नोतीत्येतौ न लिख्येते, " इणंक् गतौ " इत्यस्याप्यज्ञानार्थत्वविवक्षायामादेशप्राप्तिः । " इं ङु " इत्यस्य तु ज्ञानार्थत्वविवक्षायामविवक्षायामपि नादेशः, " इणिकोर्गाः " [ ४. ४. २३. ] इत्यत इणिकोश्चानुकृष्टत्वात् " सनीङश्च " [ ४. ४. २५. ] इति चकारेण । **सोषुपिषत** इति– अत्र यङोऽकारस्य स्थानित्वेन न गुणः, तथा " नाम्यन्तस्था० " [ २. ३. १५. ] इत्यस्यैवायं नियमः, एतद्विषय एवारम्भात् ॥ २. ३. ३७. ॥

## सञ्जेर्वा । २ । ३ । ३८ ॥

**त० प्र०**—इकारान्तनिर्देशात् सञ्ज इह ण्यन्तो गृह्यते, सञ्जयतेर्नाम्यन्तस्थाकवर्गात् परस्य षणि परे सस्य षो वा भवति । सिसञ्जयिषति, सिषञ्जयिषति । नित्यं एत्वमित्येके ॥ ३८ ॥

**श० न्या०—सञ्जे०** । **इकारान्तनिर्देशादि**ति– अत एवात्र प्रकरणे इकार उच्चारणार्थो न क्वचिदपि विहितः सञ्जेणिगि सञ्जयितुमिच्छतीति सनि द्वित्वादौ पक्षेऽनेन षत्वे– **सिषञ्जयिषती**त्यादि । **एक** इति– वृद्धा इत्यर्थः ॥ छ ॥ ॥ २. ३. ३८. ॥

**न्या० स०—सञ्जेर्वा** । इकारान्तनिर्देशादिति– अत एव इह इकार उच्चारणार्थो न क्वचिदपि विहितः ॥ २. ३. ३८. ॥

## उपसर्गात् सुग्-सुव-सो-स्तु-स्तुभोऽट्यप्यद्वित्वे । २ । ३ । ३९ ॥

**त० प्र०**—अद्वित्वे– द्विर्वचनाभावे सति सुनोति-सुवति-स्यति-स्तौति-स्तोभतीनां सकारस्योपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परस्य षो भवति, अट्यपि– अडागमेऽपि सति, अड्व्यवधानेऽपीत्यर्थः । सुग्– अभिषुणोति, परिषुणोति ।

शिड्नान्तरेऽपीत्यधिकारात्– निःषुणोति, दुःषुणोति; अभिषुण्वन्तं प्रयुङ्क्ते– अभिषावयति, अत्रोपसर्गसंबन्धे सति णिः। ण्यन्तानां धातूनामुपसर्गसंबन्धे न भवति– अभिसावयति, परिसावयति; अट्यपि– अभ्यषुणोत्, पर्यषुणोत्। णिनिर्देशात् सौति-सवत्योर्मा भूत– अभिसौति, अभिसवति। सुव– अभिषुवति, परिषुवति; अट्यपि– अभ्यषुवत्, पर्यषुवत्, शनिर्देशात्, सूति-सूयत्योर्न भवति– अभिसूते, अभिसूयते। सो– अभिष्यति, परिष्यति, अट्यपि– अभ्यष्यत्, पर्यष्यत्। स्तु– अभिष्टौति, परिष्टौति; सुष्टुतम्, सुष्टवम्, दुःष्टवम्; अट्यपि– अभ्यष्टौत्, प्रत्यष्टौत्। स्तुभ्– अभिष्टोभते, परिष्टोभते; अट्यपि– अभ्यष्टोभत, पर्यष्टोभत। उपसर्गादिति किम्? दधि सुनोति, मधु सुनोति। पूजायां सोः पूजा-ऽतिक्रमयोश्चातेरुपसर्गत्वाऽभावादिह न भवति– सुस्तुतम्, अतिस्तुतम्। *येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा* इति धात्वन्तरयोगे न भवति– निर्गताः सावका अस्मादसौ निःसावको देशः, अभिसावकीयतीत्यत्र सावकीयतेरभिना योगो न भवति। शिड्नान्तरेऽपीत्यधिकारात् अटा व्यवधाने न प्राप्नोतीत्यट्यपीति ग्रहणम्, अपिशब्दोऽभावार्थः; अन्यथाट्येव स्यात्। अद्वित्वे इति किम्? अभिसुसूषति, अभ्यसुसूषत्; परिसुसूषति, पर्यसुसूषत्; अभिसिषासति, अभ्यसिषासत्; अत्र पूर्वसकारस्य षत्वं न भवति, मूलधातोस्तु यथाप्राप्तं षत्वं भवत्येव। केचित् तूपसर्गपूर्वाणां सुनोत्यादीनां पञ्चानामपि सन्नन्त-स्तौति-वर्जितानां द्वित्वे सति मूलप्रकृतेरपि षत्वं नेच्छन्ति– अभ्यसूसवत्, अभिसुसाव, अभिसोसूयते; सो– अभ्यसीसयत्, अभिसेसीयते, अभिसिसासति; स्तु– अभितोस्तूयते, अभितुस्ताव, अभ्यतुस्तवत्; स्तुभ्– अभितुस्तुभे, अभितोस्तुभ्यते, अभ्यतुस्तुभत्; इत्यादि; पदादौ प्रतिषेधे प्राप्ते वचनम् ॥ ३९ ॥

---

**श० न्या०—उप०** । उपसृज्यतेऽनेन धात्वर्थः सम्बध्यत इत्युपसर्गः । **नाम्यन्तस्थे**त्याद्यधिकारादन्तस्थाद्यन्तस्योपसर्गस्यासम्भवान्नाम्यन्त उपसर्गोऽत्र गृह्यते, अतश्चेह नाम्यन्तादुपसर्गात् सुगादिसकारस्य षत्वमित्ययमर्थः सम्पद्यते, ततश्च निस उत्तरस्य सुनोत्यादिसकारस्य षत्वं न प्राप्नोति, अनाम्यन्तत्वादिति यः शङ्कते तं प्रत्याह– **उपसर्गस्थादि**त्यादि– एतेनोपसर्गस्थे षत्वनिमित्ते उपसर्गशब्दो वर्तत इति दर्शयति, उपसर्गस्थे च निमित्ते, उपसर्गशब्दस्य वर्त्तनान्निसोऽप्युत्तरस्य सुनोत्यादिसकारस्य षत्वं सिध्यतीति । **अटी**त्यट्शब्देन "अड् धातोः०" [ ४. ४. २९. ] इति निर्दिष्टोऽडागमो गृह्यते उपसर्ग-धात्वोरन्तरेऽन्यस्यासम्भवादित्याह– **अडागमे** इति । स चान्तर एव भवतीत्याह– **अड्व्यवधानेऽपी**ति– स्थानिनिमित्तयोर्मध्येऽटि सत्यपीति तात्पर्यार्थः । अभिपूर्वः परिपूर्वश्च "षुंग्ट् अभिषवे" "षः सोऽष्ट्यै०" [ २. ३. ९८. ] इति षस्य सत्वे तिवि "स्वादेः०" [ ३. ४. ७५. ] इति श्नौ गुणे पदादित्वात् "नाम्यन्तस्था०" [ २. ३. १५. ] इति प्राप्त्यभावादनेन षत्वे "रषृवर्णाद्०" [ २. ३. ६३. ] इति णत्वे– **अभिषुणोती**त्यादि, एवमन्यदपि । **अभिषावयती**ति– सुनोतेर्णिग् "नामि०" [ ४. ३. ५१. ] इति णिति वृद्धिः । **अत्रे**ति– अयं भावः– यदोपसर्गविशिष्टायां क्रियायां प्रयोज्यो नियुज्यते तदा प्रतिबन्धकाभावात् षत्वं प्रवर्त्तत एव, यदा तु ण्यर्थस्याभिर्विशेषणत्वादुपसर्गस्तदा न भवति– **अभिसावयती**ति । अभिषावयिषतीति [ **अभिषावयती**ति ] ह्युपसर्गविशिष्टः सुनोत्यर्थोऽभिषवणं प्रयुक्तविषयतया प्रतीयते, तद्धि तत्र वा कर्त्ता प्रयुज्यते– अभिषुण्वति, न तु– सुन्वभीतीति, यदाह भाष्यम्– "नासावेवं प्रेष्यते– सुन्वभीति, किं तर्ह्युपसर्गविशिष्टायां क्रियायामसौ प्रेष्यते– अभिषुण्विति" [ पाणि० ८. ३. ६५. ] अभिपूर्वात् सुनोतेर्ह्यस्तन्या दिवि श्नौ "अड् धातो०" [ ४. ४. २९. ] इत्यडागमे षत्वे– **अभ्यषुणोदि**ति । **सुगि**ति णकारेण "षुंक् प्रसवैश्वर्ययोः" इत्यदादेः "षुं प्रसवैश्वर्ययोः" इति भ्वादेश्च व्युदासेन "षुंग्ट् अभिषवे" इत्ययं धातुर्निर्दिश्यत इत्याह– **णिनिर्देशादित्या**दि । अभिपूर्वः परिपूर्वश्च "षूत् प्रेरणे" **अभिषुवती**त्यादि । **सूति-सूयत्योरि**ति– "षुङौक् प्राणिगर्भविमोचने" "षूङौच् प्राणिप्रसवे" इत्यनयोरित्यर्थः । **अभिष्यती**त्यादि– "ओतः श्ये" [ ४. २. १०३. ] इत्योकारलोपः । **सो** इत्योकारेण "षैं क्षये" इति सा इति व्युदासः । **अभिष्टौती**त्यादि– "ष्टुंक् स्तुतौ" "उत औविति०" [ ४. ३. ५९. ] इत्यौकारः । **अभिष्टोभत** इत्यादि– "ष्टुभूङ् स्तम्भे" । **दधि सुनोती**ति– दधि–मधुभ्यां सेरमो वा "अनतो लुप्" [ १. ४. ५९. ] इति लुप् असत्युपसर्गादित्यस्मिन् यथोपसर्गान्नाम्यन्तात् पदादिलक्षणप्रतिषेधो बाध्यते एवमन्यस्मादपि नाम्यन्ताद् बाध्येत, सुनोत्यादिव्यतिरिक्तधात्ववयवसकारे तु पदादिलक्षणप्रतिषेधस्यावकाशः– मधु सिनोति परिसिनोतीति यथा, तस्मादुपसर्गादित्युपादेयम् । क्रियमाणेऽप्युपसर्गादित्यस्मिन् **सुस्तुत**मित्यत्र कस्मान्न प्रवर्त्तत इत्याह– **पूजायामि**त्यादि । **येन धातुने**ति– अयमर्थः– उपसर्गसंज्ञायाः क्रियायोगे विधानादिह च सुनोत्यादीनामुपादानादेतद्वाच्यां क्रियां प्रति य उपसर्गस्तस्मादेतदीयस्य सकारस्य षत्वम्, **निःसावक** इत्यत्र तु गमिवाच्यायाः क्रियाया

निसूशब्दो विशेषक इति गमिमेव प्रत्यसावुपसर्गसंज्ञो न सुनोतिं प्रतीति सुनोतेरुपसर्गादुत्तरत्वाभावात् षत्वाभावः । नामधातोस्तर्हि प्रतिषेधो वक्तव्यस्तत्रापि स एव सुनोत्यादिरिति षत्वप्रसङ्गात्, सावकमिच्छति–सात्रकीयति, अभिसावकीयतीत्यत्रापि न दोषोऽनुपसर्गत्वादित्यत आह– **अत्रे**त्यादि– अभिः कथनर्थस्येच्छाया विशेषकत्वादुपसर्गो न सुनोतेः, सुनोत्युपसर्गत्वे त्वभिसात्रकमिच्छति अभिषावकीयतीति षत्वं भवत्येव । **शिङ्नान्तरेऽपीत्य**पिशब्दार्थं दर्शयति– **अपिशब्द** इत्यादि । अभिषोतुमभिषवितुमभिषातुं वेच्छति ऐच्छच्च– **अभिसुसूषती**त्यादि । **अत्रे**ति–अयमर्थः– सुनोतेः सुवतेः स्यतेश्चाद्वित्व इति वाचनादुपसर्गात् परस्य सकारस्य षत्वं व्यावर्त्यते, सुनोति-सुवत्योः पूर्वसरय षत्वे निवारिते मूलधातुसकारस्य 'णिस्तोरेव' इति नियमेन व्यावृत्तिः क्रियते, स्यतेस्तु सन् षत्वभूतो नास्तीति नाम्यन्ताद् धातुसकारस्य षत्वं भवत्येव, स्तौतिस्तोभत्योः पूर्वसकारो नास्तीति व्यावृत्तिर्न दर्शिता । **केचित्त्वि**ति– ललितः । **पदादावि**ति– पदान्तः कृतस्येति वचनात् पदादौ न प्राप्नोतीतीदमारभ्यते ॥ छ ॥ २. ३. ३९. ॥

**न्या० स०—उपसर्गा०** । अत्र प्रत्यष्टौत् न पर्यष्टौत् परिपूर्वस्य " स्तु-स्वञ्ज० " [ २. ३. ४९. ] इति विकल्पभणनात् । **ण्यन्तानामि**ति– धात्वन्तरत्वादिति शेषः । **अट्यपी**ति– विशेषविहितत्वेन पूर्वं कृतमपि षत्वं परस्मिन् अडागमेऽसिद्धं स्यादिति । **सौति-सवत्योरि**ति– " षुंकृ प्रसवे ", "षुं प्रसवैश्वर्ययोः" इत्यनयोः । **सूति-सूयत्योरि**ति– " षूङौक्, षूङौच् " इत्यनयोः । **सुष्टुत**मिति– सातिशयं स्तूयते स्म वाक्यम्, पूजायां तु सोरुपसर्गत्वाभावात् ॥ २. ३. ३९. ॥

## स्था-सेनि-सेध-सिच-सञ्जां द्वित्वेऽपि ।२।३।४०॥

**त० प्र०—**उपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परेषां स्थादीनां सकारस्य षो भवति, द्वित्वेऽपि अट्यपि– द्विर्वचनेनाऽटा द्वाभ्यां च व्यवधानेऽपीत्यर्थः । स्था– अधिष्ठास्यति, प्रतिष्ठास्यति, अधितष्ठौ, प्रतितष्ठौ, अध्यष्ठात्, अध्यष्ठास्यत्; सेनि– सेनया अभियाति– अभिषेणयति, अभिषिषेणयिषति, अभ्यषेणयत्, अभ्यषिषेणयिषत्; सेध– प्रतिषेधति, प्रतिषिषेधिषति, प्रत्यषेधत्, प्रत्यषिषेधिषत्; सिच– अभिषिञ्चति, सुषिक्तं नाम किं तवात्र, अभिषिषिक्षति, अभ्यषिञ्चत्, अभ्यषिषिक्षत्; सञ्ज– अभिषजति, अभिषषञ्ज, अभिषिषङ्क्षति, अभ्यषजत्, अभ्यषिषङ्क्षत्; ण्यन्तानामपि भवति– प्रतितिष्ठन्तं प्रयुङ्क्ते प्रतिष्ठापयति, एवं प्रतिषेधयति । उपसर्गादित्येव– अभिस्थास्यति, गतार्थत्वान्नात्राधिरुपसर्गः, वृक्षं वृक्षं परि सिञ्चति, अत्र वीप्स्यसंबद्धस्य परेर्धातुना संबन्धाभावात् नोपसर्गत्वम्, निर्गताः सेचका अस्मान्निःसेचको देशः, अत्र ※ येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा ※ इति न भवति । सेधेति कृतगुणस्य निर्देशः सिध्यतिनिवृत्त्यर्थः– अभिसिध्यति, अकारस्तूच्चारणार्थो न तु शवूनिर्देशः; तेन यङ्लुप्यपि भवति– प्रतिषेषिधीति । सेनेरषोपदेशार्थं स्था-सञ्जोरवर्णान्तव्यवधानेऽपि विध्यर्थं सिच्-सञ्ज-सेधां षणि नियमबाधनार्थं सर्वेषामड्व्यवधाने पदादौ च षत्वार्थं वचनम् ॥ ४० ॥

**श० न्या०—स्था-से०** । उपसर्गादित्यट्यपीति च वर्तत इत्याह– **उपसर्गादि**त्यादि– अत्राप्यपिशब्दस्य पूर्वोक्त एवार्थो द्रष्टव्यः । अधिपूर्वः प्रतिपूर्वश्च " ष्ठां गतिनिवृत्तौ " " षः सोऽष्टयै० " [ २. ३. ९८. ] इति षस्य सत्वे निमित्ताभावात् ठस्य थत्वे भविष्यन्त्यादौ यथायोगम् " अड् धातोः० " [ ४. ४. २९. ] इत्याडागमेऽनेन षत्वे " तवर्गस्य० " [ १. ३. ६०. ] इति थस्य ठत्वे "आतो णवः०" [ ४. २. १२०. ] इति णव औत्वे– **अधिष्ठास्यती**त्यादि । अथ 'सुस्थितो दुःस्थितः' इत्यादौ तु शिष्टप्रयुक्ते कथं षत्वाभावः ? उच्यते– उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाता इत्युपसर्गत्वाभावात् षत्वाभावः । सेनया अभियातीति " णिज् बहुलं नाम्नः० " [ ३. ४. ४२. ] इति सेनयेति तृतीयान्तादभियातीत्यर्थे णिचि " ऐकार्थ्ये " [ ३. २. ८. ] इति तृतीयालुपि ततोऽभिना योगे तिवादावनेन षत्वे– **अभिषेणयती**त्यादि । **प्रतिषेधती**ति– प्रतिपूर्वः " षिधू गत्यां " " षिधू शास्त्र-माङ्गल्ययोः " वेति । **अभिषिञ्चती**ति– " षिचींत् क्षरणे " अभिपूर्वतस्तिव् शः, मुचादित्वान्नोऽन्तः " स्रां धुड्वर्ग्ये० " [ १. ३. ३९. ] इति ञकारः । **सुषिक्तं नामे**ति– अत्र पूजार्थो नास्तीति सोरुपसर्गसंज्ञा । **अभिषजती**ति– " षञ्जं सङ्गे " तिव् शव् " दंश-सञ्जः शवि " [ ४. २. ४९. ] इति नलोपः । **गतार्थत्वादि**ति– " धातोः पूजार्थ० " [ ३. १. १. ] इति सूत्रेण गतार्थस्याधेरुपसर्गत्वस्य च प्रतिषेधादित्यर्थः । सेध [ 'सिध' ] इत्युक्ते साधिपरिग्रहः स्यादित्याह– **सेधे**त्यादि । यथा सिध्यतेर्निवृत्तिस्तथा यङ्लुबन्तस्यापीति कश्चिन्मन्येतेत्याह– **अकार** इत्यादि– अयमर्थः– सिध्यतिनिवृत्तेरन्यथैव सिद्धत्वाच्छव्निर्देशस्यानर्थकत्वादकारस्योच्चारणार्थतयोपादानात् तिवा शवेति नियमाभावाद् यङ्लुबन्तस्यापि परिग्रहात् षत्वमिति । अथ कृतत्वात् सकारस्य सामान्यलक्षणेनैव षत्वस्य सिद्धत्वात् किमर्थ-

मिदमित्याह- **सेनेरि**त्यादि- अव्युत्पन्नः सेनाशब्दः, सह इनेन नास्तीति सहस्य सादेशात् सेना, ततो णिचि सेनिर्धातुः, तस्य च स्वभावत एव सकारादित्वात् तत्सकारः कृतः कृतसम्बन्धी वा न भवतीत्यतो द्विर्वचनेनादाबड्व्यवधानेऽस्याषोपदेशस्यापि षत्वमारभ्यते, न केवलमषोपदेशार्थं यावदवर्णान्तादपि पूर्वात् स्था-सञ्जोः षोपदेशयोरपि षत्वार्थम्, अन्यथा नाम्यन्तस्थाकवर्गात् षत्वमुच्यमानं कथमवर्णान्तात् पूर्वाद् यत्नमन्तरेण स्यादभितष्ठाविति; णिस्तोरेवेति नियमेन षणि यद् बाधितं षत्वं तदटि द्वित्वे च यथा स्यादित्येवमर्थमपीदमारभ्यते; तथा शिड्नान्तरे पदमध्ये च तेन षत्वविधानादड्व्यवधाने पदादौ च तेन सर्वेषामपि षत्वं स्यादिति तदर्थमपीदमित्येतानि प्रयोजनान्युदाहृतोदाहरणेषु द्रष्टव्यानि ॥ छ ॥ २. ३. ४०. ॥

**न्या० स०— स्था-सेनि०** । अथ सुस्थितो दुस्थित इत्यादौ कथं षत्वाभावः ? उच्यते- उपसर्गप्रतिरूपका निपाता एते इत्युपसर्गत्वाभावात् षत्वाभावः । **ण्यन्तानामपीति**- णिगः प्रागेवोपसर्गसंबन्धात् । **अषोपदेशार्थमिति**- अषोपदेशत्वं च सह इनेन वर्तते इति व्युत्पत्तौ, सर्वेऽपि साधितस्यापि वा व्युत्पत्तिपक्षे । **स्था-सञ्जोरिति**- उपसर्गस्थस्य नामिनोऽवर्णान्तेन द्विर्वचनेनेत्यर्थः । **नियमबाधनार्थमिति**- सेनेस्तु "णि-स्तोरेवा०" [ २. ३. ३७. ] इति सिद्धं, तिष्ठतेस्तु सन् षत्वरूपो नास्तीति ॥ २. ३. ४०. ॥

## अङ्प्रतिस्तब्ध-निस्तब्धे स्तम्भः । २ । ३ । ४१ ॥

**त० प्र०**—उपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परस्य **स्तम्भः सकारस्य द्वित्वेऽपि अट्यपि षो भवति, न चेदसौ स्तम्भिर्ङे प्रतिस्तब्धे निस्तब्धे च विषये भवति । विष्टभ्नाति, प्रतिष्टभ्नाति, वितष्टम्भः, प्रतितष्टम्भः, प्रतिताष्टभ्यते, अभितिष्टम्भिषति, व्यष्टभ्नात्, प्रत्यष्टभ्नात् ।** अङ-प्रतिस्तब्ध-निस्तब्ध **इति किम् ? व्यतस्तम्भत्, प्रत्यतस्तम्भत्, प्रतिस्तब्धः, निस्तब्धः ॥ ४१ ॥**

**श० न्या०—अङ०** । ङश्च प्रतिस्तब्धश्च निस्तब्धश्चेति समाहारद्वन्द्वगर्भान्नञ्समासादाधारसप्तमीत्याह- **न चेदसावि**त्यादि । **विषय** इति- आश्रय आधारमात्रं, न त्वनन्यत्रभावलक्षणस्तद्विशेषस्तस्मिन्नित्यर्थः । विपूर्वात् प्रतिपूर्वाच्च स्तम्भू इति सौत्रात् "ष्टभुङ् स्तम्भे" इति धातोर्वा तिवादौ "स्तम्भू-स्तुम्भू०" [ ३. ४. ७८. ] इति यथायोगं श्नाप्रत्यये द्वित्वादौ स्तम्भेः सकारस्याकृतत्वात् सामान्यलक्षणेनाप्राप्तात्तेन षत्वे- **विष्टभ्नाती**त्यादि- उपलक्षणत्वात् स्तम्भते विष्टम्भते । स्तम्भू इति सौत्रात् पूर्ववदुपसर्गसहिताण्णिगि अद्यतन्या दिप्रत्यये "णि-श्रि०" [ ३. ४. ५८. ] इति ङे द्वित्वादौ- **व्यतस्तम्भदि**त्यादि । प्रतिपूर्वान्निपूर्वाच्च तत एव कर्मणि क्ते "नो व्यञ्जनस्य०" [ ४. २. ४५. ] इति नलोपे "अधश्चतुर्थात्०" [ २. १. ७९. ] इति तस्य धत्वे, "तृतीयः०" [ १. ३. ४९. ] इति भस्य तृतीयत्वे- **प्रतिस्तब्धः, निस्तब्धः**, एतेष्वङस्तब्धनिस्तब्ध इति प्रतिषेधात् षत्वाभावः ॥ छ ॥ २. ३. ४१. ॥

**न्या० स०—अङ्प्रति०** । ष्टभुङ् इत्यस्य लाक्षणिकत्वात् न ग्रहणमिति नैयासिकाः प्राहुः, पारायणकारैस्तु अस्यापि षत्वं कृतम्, एवमुत्तरसूत्रेऽपि ज्ञेयम् ॥ २. ३. ४१. ॥

## अवाच्चाश्रयोर्जाविदूरे । २ । ३ । ४२ ॥

**त० प्र०—अवादुपसर्गात् परस्य स्तम्भः सकारस्याश्रयादिष्वर्थेषु गम्यमानेषु द्वित्वेऽपि अट्यपि षो भवति, अङे- ङविषयश्चेत् स्तम्भिर्न भवति ।** आश्रयः-आलम्बनम्- **दुर्गमवष्टभ्नाति, दुर्गमवष्टभ्यास्ते, अवतष्टम्भ दुर्गम्, दुर्गमवाष्टभ्नात्;** ऊर्जं- ऊर्जित्वम्- **अहो वृषलस्यावष्टम्भः, अवष्टब्धो रिपुः शूरेण; अविदूरमनतिविप्रकृष्टम्-आसन्नमदूरासन्नं च गृह्यते- अवष्टब्धा शरात्, अवष्टब्धा सेना । अवादिति किम् ?** प्रस्तब्धः । **चकारोऽङ इत्यस्यानुवृत्त्यर्थोऽनुक्तसमुच्चयार्थश्च, तेन- 'उपष्टम्भः, उपष्टम्भकः, उपष्टब्धः' इत्यादावुपादपि भवति । उपादित्यकृत्वा चकारेण सूचनमनित्यार्थं, तेनो**पस्तब्ध इत्यपि भवति । आश्रयादिष्विति किम् ? अवस्तब्धो वृषलः शीतेन । अङ इत्येव- अवातस्तम्भत् ॥ ४२ ॥

**श० न्या०—अवा०** । आश्रयणमाश्रयः "भूश्यदोऽल्" [ ५. ३. २३. ] इत्यल्, ऊर्जयतेर्भावेऽलि- ऊर्जः, विशिष्टं दूरं- विदूरम्, प्रादिसमासे ततो नञ्समासः, ततः समाहारद्वन्द्वात् सप्तमी । अङ्प्रतिस्तब्धनिस्तब्ध इत्यनुवृत्तावपि 'प्रतिस्तब्धः, निस्तब्धः' इत्यस्याव्यभिचारादङ इत्यस्यैवोपयोग इत्याह- **अङे** इति । आश्रयं व्याचष्टे- **आश्रयः- आलम्बनमि**ति । अवपूर्वात् स्तम्भू इति सौत्रात् पूर्ववत् तिवादौ- **अवष्टभ्नाती**त्यादि । ऊर्जशब्दार्थमाह- **ऊर्जित्वमि**ति । **अवष्टम्भ** इति- "भावाऽकर्त्रोः" [ ५. ३. १८. ] इति घञ् । **अवष्टब्ध** इति- कर्मणि क्तप्रत्ययः, "नो व्यञ्जनस्य०" [ ४. २. ४५. ] इति नलोपः । **आसन्नमि**ति- विशब्देन दूरस्य विशेषितत्वात् तत्प्रतिषेधेन तदन्यग्रहणात् तत्सदृशग्रहणाच्च तदन्यदासन्नं तत्सदृशं चासन्नमिति यच्च नासन्नं नापि दूरमित्यर्थः । **अवष्टब्धा शरदि**ति- नातिदूरेत्यर्थः, आसन्ना दूरासन्ना

चेति विशेषः प्रकरणसमधिगम्यः, यदि चासन्नैवेत्यर्थः स्यादासन्नग्रहणमेव क्रियेत । **प्रस्तब्ध** इति- अवादिति वचनान्न भवति । चकारस्य प्रयोजनमाह- **चकार** इति- तेनावातस्तम्भदित्यत्र षत्वं न भवति । पुनर्द्वितीयं प्रयोजनमाह- **अनुक्तसमुच्चयार्थश्चे**ति । तस्य फलं दर्शयति- **तेनेति** । **उपष्टम्भ** इति- पूर्ववद् घञ् । **उपष्टम्भक** इति-" णक-तृचौ " [ ५. १. ४८. ] इति णकः । यद्येवमुपावादिति कस्मान्न क्रियते ? इत्याह- **उपावादि**त्यादि । अथात्र सर्वस्यैवार्थस्य सूत्र एव दर्शितत्वादुपाद् वेति पृथग्योगे विकल्पोऽपि सिध्यति, किमनेनानुक्तसमुच्चयार्थेन ? सत्यम्- एषोऽपि वैयाकरणमार्गोऽस्तीति प्रदर्शनार्थं चकार इत्यदोषः । **अवस्तब्धो वृषल** इति- शीतेनार्दितो निश्चेष्टो जात इत्यर्थः ॥ छ ॥ २. ३. ४२. ॥

**न्या० स०—अवाच्चा०** । समुदायानुवृत्तावपि व्यभिचारादड इत्यस्यैव ग्रह इत्याह- **अडे** इति । दुर्गमिति- दुःखेन गम्यते अस्मिन् इति " सुगदुर्गमाधारे " [ २. १. १३२. ] इति सिद्धिः, कर्मव्युत्पत्तौ तु खल् स्यात्, दुर्गं नगरादि बहुलं वृत्तेति क्लिबत्वम्, दुःखेन गम्यतेऽत्र तत्र वाच्यलिङ्गः । पारायणकारैस्तु सौवादिकस्यास्य अवष्टम्भते दण्डमिति न तु नैयासिकाः । अनित्यार्थमिति- यद्येवं तर्हि वोपादित्येवं विधमतः सूत्रात् पृथगेव कथं न कृतम्, सत्यम्- विचित्रा सूत्रकृतिः । अवस्तब्धो वृषलः शीतेनेति- सङ्कुचित इत्यर्थः ॥ २. ३. ४२. ॥

## व्यवात् स्वनोऽशने । २ । ३ । ४३ ॥

**त० प्र०—**वेरवाच्चोपसर्गात् परस्य स्वनो धातोः सकारस्याशने-भोजनेऽर्थे द्वित्वेऽपि अट्यपि षो भवति । पूर्वसूत्रे चानुकृष्टत्वादिहाङ इति नानुवर्तते । विष्वणति, अवष्वणति, भुङ्क्ते इत्यर्थः; सशब्दं भुङ्क्ते इत्यर्थ इत्यन्ये, भुञ्जानः कश्चिच्छब्दं करोतीत्यर्थ इत्यपरे । विषष्वाण, अवषष्वाण, विषंष्वण्यते, अवषंष्वण्यते, विषिष्वणिषति, अवषिष्वणिषति, व्यष्वणत्, अवाष्वणत्, व्यषिष्वणत्, अवाषिष्वणत् । व्यवादिति किम् ? अतिस्वनति, अत्यसिस्वनत् । अशन इति किम् ? विस्वनति, अवस्वनति मृदङ्गः; विविधं शब्दं करोतीत्यर्थः ॥ ४३ ॥

**श० न्या०—व्यवा०** । वेः परस्य स्वनतिसकारस्याकृतत्वात् पदादित्वादप्राप्तेऽवात् पुनरनाभ्यन्तत्वाच्चेदमारभ्यते । **अशने- भोजनेऽर्थ** इति- यद्यपि " स्वन शब्दे " इत्युच्यते तथाप्यनेकार्था धातव इति विशिष्टोपसर्गस्वनिरशनेऽपि विज्ञायते । **पूर्वसूत्रे चानुकृष्टत्वादि**ति- अत्र तु चकारस्याभावादिति शेषः । **विष्वणती**त्यादि- भोजनमत्र स्वनेरर्थ इत्याह- **भुङ्क्ते इत्यर्थ** इति । अन्ये तु न भोजनमात्रमत्रार्थः, किन्तु भोजनविशेषः, सशब्दं भोजनमित्याह- **सशब्दमित्यादि** । **अन्य** इति, **अपरे** इति- चन्द्रगोमीत्यर्थः, स हि स्वनिर्न भोजने किन्तु शब्द एव, स्वन्यर्थस्य [ स ]स्वननभोजनविषयः, भोजने यत् स्वननं तत्रैवेह स्वनिर्वर्तेत इत्याहेति । **विषष्वाणे**ति-णव् " ञ्णिति " [ ४. ३. ५०. ] इति वृद्धिः । **विषंष्वण्यत** इति- यङि द्वित्वेऽनादिव्यञ्जनलोपे " मुरतोऽनुनासिकस्य " [ ४. २. ५१. ] इति म्वागमः । **विषिष्वणिषती**ति- विष्वणितुमिच्छतीति सन् । **व्यषिष्वणदि**ति- स्वनेर्णिगन्तादद्यतन्या दिप्रत्ययः, " णि-श्रि-द्रु० " [ ३. ४. ५८. ] इति ङः, " उपान्त्यस्य० " [ ४. २. ३५. ] इति ह्रस्वः, " आद्योऽशः० " [ ४. १. २. ] इति द्वित्वमनादिव्यञ्जनलोपः, " असमानलोपे सन्वद्० " [ ४. १. ६३. ] इति पूर्वस्येत्वम् । **विस्वनती**ति- अशन इति वचनादत्र न भवति । ॥ छ. ॥ २. ३. ४३. ॥

**न्या० स०—व्यवा०** । [ नेह व्याख्यातम् ] ॥ २. ३. ४३. ]

## सदोऽप्रतेः परोक्षायां त्वादेः । २ । ३ । ४४ ॥

**त० प्र०—**प्रतिवर्जितोपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परस्य सदो धातोः सकारस्य द्वित्वेऽप्यट्यपि षो भवति, परोक्षायां तु द्वित्वे सति आदेः पूर्वस्यैव भवति । निषीदति, निषाषद्यते, विषाषद्यते, निषिषत्सति, न्यषीदत्, व्यषीदत्, परोक्षायां त्वादेरेव- निषसाद, विषसाद । अप्रतेरिति किम् ? प्रतिसीदति, प्रत्यसीषदत्, प्रतिसिषत्सति; अत्र प्रतेः परस्याद्यसकारस्य षत्वं न भवति । प्रकृतिसकारस्य तु नामिनः परस्य " नाम्यन्तस्था० " [ २. ३. १५. ] इत्यादिसूत्रेण भवत्येव; अस्यापि नेच्छन्त्येके- प्रत्यसीसदत्, प्रतिसिसत्सति । तुर्विशेषणार्थः, परोक्षायामेष विशेषोऽन्यत्र तूभयत्रापि भवति ॥ ४४ ॥

**श० न्या०—सदो०** । **अप्रते**रिति वचनादुपसर्गादिति वर्तत इति ज्ञायते, वादित्यनुवृत्तौ तस्यानर्थक्यादित्याह- **प्रतिवर्जितोपसर्गस्थानादि**ति । **परोक्षायां त्वादे**रित्यनेन **सद** इति विशिष्यते- परोक्षायां यः सद् तस्यादेः सकारस्येति । **आदे**रिति च द्वित्वेऽनादिव्यवच्छेदार्थम्, आह- **द्वित्वे सती**त्यादि । **निषीदति** " षद्लृंत् अवसादने " अतस्तिव् शः " श्रौति० " [ ४. २. १०८. ] इती सीदा-

देशः, स्थानिवद्भावात् षत्वम् । **निषाषद्यत** इति– गर्हितं निषीदति "गृ-लुप०" [ ३. ४. १२. ] इति यङ् द्वित्वम् "आगुणावन्यादेः" [ ४. १. ४८. ] इत्यात्वम्, अनेनोभयत्र षत्वम्; यङ्लुबन्तस्यापि यदि प्रयोगोऽस्ति तदा निषाषीदीति षत्वमेव । **निषसादे**ति– पूर्ववण्णवादि, परोक्षायां त्वादेरित्यस्मिन्नसति द्वित्वेऽपीत्यनुवर्त्तनाद् द्वयोरपि सकारयोर्निषाषद्यत इतिवत् स्यात्, इतीदं नियमार्थमुच्यते– परोक्षायां त्वादेरेव न परस्येत्यर्थः । **प्रतिसिषत्सति** प्रतिसत्तुमिच्छतीति सन्, अत्राप्रतेरिति वचनादादेः सकारस्य षत्वं स्यादन्यत्र निषाषद्यत इत्यादौ न स्यात्, अतोऽन्यत्राविशेषादादेरनादेश्च षत्वं, परोक्षायां त्वादेरेवेत्येष विशेषस्तु शब्दाद् गम्यत इत्यर्थः ॥ छ ॥ २. ३. ४४. ॥

**न्या० स०—सदो।** "षद्लृं विशरण०" इत्यस्य "षद्लृंत् अवसादने" इत्यस्य च ग्रहणम्। उपसर्गादित्यनुवर्तते । व्यवादित्यनुवृत्तौ तु तयोरेव विधानात् प्रतिवर्जनानर्थक्यं स्यात् ॥ २. ३. ४४.॥

## स्वञ्जश्च । २ । ३ । ४५ ॥

**त० प्र०—उपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परस्य स्वञ्जेः सकारस्य द्वित्वेऽप्यट्यपि षो भवति, परोक्षायां तु द्वित्वे सत्यादेरेव । अभिष्वजते, परिष्वजते प्रतिष्वजते, अभिषिष्वङ्क्षते, परिषिष्वङ्क्षते, प्रतिषिष्वङ्क्षते, अभिषाष्वज्यते, अभ्यष्वजत, प्रत्यष्वजत, अभ्यषष्वञ्जत; परोक्षायां त्वादेरेव– अभिषस्वजे, अभिषस्वञ्जे; परिषस्वजे, परिषस्वञ्जे; प्रतिषस्वजे, प्रतिषस्वञ्जे । योगविभागादप्रतेरिति नानुवर्तते, चकारः परोक्षायां त्वादेरित्यस्यानुकर्षणार्थः, ततश्चोत्तरत्राननुवृत्तिः ॥ ४५ ॥**

**श० न्या०—स्वञ्जः०** । **अभिष्वजते** इति– "ष्वञ्जित् सङ्गे" वर्त्तमानायास्ते प्रत्ययः, तुदादिरवाच्छः, "शिदवित्" [ ४. ३. २०. ] इति ङिद्वद्भावात् "नो व्यञ्जनस्य०" [ ४. २. ४५. ] इति नलोपेऽनेन षत्वम् । **अभिषस्वजे, अभिषस्वञ्जे,** "स्वञ्जेर्नवा" [ ४. ३. २२. ] इति परोक्षायाः पक्षे किद्वद्भावान्नलोपः । नन्वप्रतेरिति प्रकृतत्वात् कथं प्रतेरुदाह्रियत इत्याह– **योगविभागादि**त्यादि– अप्रतेरित्यनुवृत्त्या एकमेव योगं कुर्यात्, तथा च सति परोक्षायां त्वादेरित्यस्यानुकर्षणार्थोऽनर्थकश्चकारोऽपि न कृतः स्यादतो योगविभागाद् विज्ञायते– अप्रतेरिति नास्तीति । अथ योगविभागात् परोक्षायां त्वादेरिति नास्ति, अप्रतेरित्यस्तीति किं न विज्ञायते ? इत्थमप्यस्यार्थवत्त्वात्, नैष दोषः– व्याख्यानतो विशेषप्रतिपत्तिः; अथवेत्थमत्र व्याख्यायते– योगविभागः किमर्थः ? सदिस्वञ्ज इत्येक एव योगः क्रियतामित्याह– **योगविभागादि**त्यादि– एकयोगत्वे सदिवत् स्वञ्जेरप्यप्रतेरिति प्रतिषेधः स्यात्, अतस्तन्निवृत्त्यर्थो योगविभागः । **चकार** इति– अयमर्थः– चकारानुकृष्टमुत्तरत्र नानुवर्त्तत इति 'परिषिषेवे' इत्यत्रापि भवति ॥ छ ॥ २. ३. ४५. ॥

**न्या० स०—स्वञ्जश्च । अभिषिष्वङ्क्षते** नन्वत्र "णिस्तोरेव०" [ २. ३. ३७. ] इति नियमाद् मूलधातुसकारस्य षत्वं न प्राप्नोति, उच्यते– "स्पर्द्धे" परः, [ ७. ४. ११९. ] इति न्यायात् इदमेव प्रवर्तते । **अभिषस्वञ्ज** इति– अत्र "स्वञ्जेर्नवा" [ ४. ३. २२. ] परोक्षाया वा कित्त्वम्, पक्षे किद्वदभावाद् नलोपाभावः । **योग विभागादित्यादि**– ननु योगविभागात् परोक्षायां त्वादेरिति नानुवर्तते इति कथं न विज्ञायते ? सत्यम्– व्याख्यानतो विशेषप्रतिपत्तिरिति ॥ २. ३. ४५. ॥

## परि-नि-वेः सेवः । २ । ३ । ४६ ॥

**त० प्र०—परिनिव्युपसर्गस्थात् नाम्यन्तस्थाकवर्गात् परस्य सेवतेर्धातोः सकारस्य द्वित्वेऽप्यट्यपि षो भवति । परिषेवते, परिषिषेविषते, परिषेषेव्यते, परिषिषेवे, पर्यषेवत; निषेवते, निषिषेविषते, निषिषेवे, न्यषेवत, विषेवते, विषिषेविषते, विषिषेवे; व्यषेवत । परिनिवेरिति किम् ? अनुसेवते, प्रतिसिषेवे, प्रतिसेषेव्यते, प्रत्यसिषेवत्, अत्रोपसर्गाश्रितं षत्वं न भवति, धातोस्तु द्वित्वाश्रितं भवत्येव; उभयत्र नेच्छन्त्येके– प्रतिसिसेवे, प्रतिसेसेव्यते, प्रत्यसिसेवत् ॥ ४६ ॥**

**श० न्या०—परि०** । "षेवृङ् सेवृङ् सेवने" इति यः षोपदेशो यश्चेतरः सेवतिस्तस्योभयस्यापि **परिषेवते** इति– षोपदेशस्य पदादित्वादितरस्य तु मूलत एवाप्राप्ते षत्वम् । शिष्टं [ शेषं ] पूर्ववत् । **अत्रेति**– उपसर्गाश्रितं "परि-निवेः सेवः" [ २. ३. ४६. ] इत्यनेनेति शेषः । **द्वित्वाश्रितं भवत्येवे**ति– "नाम्यन्तस्था०" [ २. ३. १५. ] इत्यनेनेत्यर्थः । **एक** इति– ललितस्वभाव इत्यर्थः ॥छ॥ २. ३. ४६. ॥

**न्या० स०—परिनिवेः०** । सेव इति सामान्योक्तेऽपि 'षेवृङ्' इति गृह्यते, न तु 'सेवृङ' इति । कुतस्येत्यनुवृत्तिरिति पारायणमतम्, न्यासकारास्तु षेवृङ्-सेवृङौ सषोपदेशौ अग्रहीषुः ॥ २. ३. ४६ ॥

## सय-सितस्य । २ । ३ । ४७ ॥

**त० प्र०—परि-नि-विभ्यः परयोः सय-सितयोः सकारस्य**

षो भवति। परिषयः, निषयः, विषयः; परिषितः, निषितः, विषितः; सय इति सिनोतेरलन्तस्याजन्तस्य घान्तस्य वा, सित इति क्तान्तस्य रूपम्। स्यतेर्वा नियमार्थं– परिनिविपरस्यैव क्तान्तस्य स्यतेर्यथा स्यादिति, तेनोपसर्गान्तरपूर्वस्य "उपसर्गात् सुग्०" [२. ३. ३९.] इत्यादिनापि न भवति; तेन– प्रतिसितः, निःसितः, इत्यादि सिद्धम्। योगविभागाद् द्वित्वेऽपि अट्यपीति निवृत्तम्, तेन– मा विषसयदित्यत्र द्वित्वे सति पूर्वेण व्यवधानादुत्तरस्य न भवति, पूर्वस्य त्वव्यवहितत्वाद् भवत्येव– व्यसयीयत्, पर्यसितायत। कथं मा परिषिषयत्? द्वित्वे सति उपसर्गात् परस्य पूर्वस्यानेन षत्वम्, उत्तरस्य तु "नाम्यन्तस्था०" ॥ २. ३. १५. ॥ इत्यादिनेति न दोषः ॥ ४७ ॥

---

**श० न्या०—सय०।** परिनिवेरिति वर्तत इत्याह– **परि-नि-विभ्य** इति। अन्यस्य सकारस्यासंनिहितत्वात् **सय-सितस्ये**त्यवयवषष्ठीविज्ञानादनयोरेव सकारः स्थानीत्याह– **सयसितयोः सकारस्ये**ति। अथ सय सित इति कोऽयं शब्दः? नह्येवं धातुः पठ्यमानः सुग्-सुवादिवद् दृश्यत इत्याह– **सय** इत्यादि– "षिंग्ट् बन्धने" इत्यस्य "युवर्ण०" [५. ३. २८.] इत्यलन्तस्य "अच्" [५. १. ४९.] इत्यजन्तस्य "पुन्नाम्नि०" [५. ३. १३०.] इति घान्तस्य वा सय इति, सिनोतेरेव वा क्तान्तस्य सित इति, स्यतेर्वा "दो-सो-मा-स्थ इः" [४. ४. ११.] इतीत्वे "उपसर्गात् सुग्०" [२. ३. ३९.] इति सिद्धे परि-नि-विभ्य एव क्तान्तस्येति नियमार्थमित्याह– **स्यतेर्वे**त्यादि। उद्योतकरस्त्वत्राह– सिनोतेरेव ग्रहणं न्याय्यतो ज्यायः सयेत्यनेन साहचर्यात्, किञ्च स्यतिग्रहणे नियमार्थता जायते, सिनोतिग्रहणे तु विध्यर्थता, विधिनियमसम्भवे विधिरेव ज्यायान्, एवं च विध्यर्थता भवति, यदि सिनोतिग्रहणं भवतीति, न चैकेनैव सितग्रहणेनोभयस्य स्यति-सिनोतिरूपस्योपादानाद् विध्यर्थता नियमार्थतापि स्यादिति युज्यते वक्तुम्, अर्थैकत्वादेकं वाक्यमिति केषाञ्चिद् वाक्यलक्षणम्, तस्मात् सिनोतेरेव ग्रहणम्। 'परि-नि-वेः सेव-सय-सितस्य' इत्येक एव योगः क्रियतां किं योगविभागेनेत्याशङ्कयाह– **योगविभागादि**त्यादि– एकयोगे हि यथा सेवतेर्द्वित्वेऽप्यट्यपि षत्वं तथा सय-सितयोरपि स्यात्, प्रथग्योगे तु द्वित्वेऽपीत्यादि निवृत्तम्, निवृत्ते तु तस्मिन् किं सिद्धमित्याह– **तेने**त्यादि। **मा विषसयदि**ति– 'विपूर्वात् सयशब्दाण्णिजन्तान्माङा सहितादद्यतन्यां "णि-श्रि०" [३. ४. ५८.] इति ङस्ततो द्वित्वादि। द्वित्वेऽपीत्यादेर्निवृत्तत्वात् परस्य सस्य षत्वाभावात् पूर्वस्यैव सकारस्य षत्वमित्याह– **अत्र द्वित्वे सती**त्यादि। **कथमि**ति– पृथग्योगाद् द्वित्वेऽपीत्यादेर्निवृत्तत्वात् पर्याद्युपसर्गान्तरस्यैव सय-सितयोः सकारस्य षत्वविज्ञानान्**मा परिषिषयदि**ति कथमुभयत्र षत्वमित्याशङ्कार्थः। परिहरति– **द्वित्वे सती**त्यादि ॥ छ ॥ २. ३. ४७. ॥

---

**न्या० स०—सय-सित०। स्यतेर्वा नियमार्थमिति–** उद्योतकरस्त्वाह– सिनोतेरेव ग्रहणं न्याय्यं सयेत्यनेन साहचर्यात्, किञ्च स्यतिग्रहणे नियमार्थता जायते, सिनोतिग्रहणे तु विध्यर्थतापि स्यादिति, यतो विधि-नियमसम्भवे च विधिरेव ज्यायान्। न च वाच्यमेकेनैव सितग्रहणेन स्यति-सिनोत्युभयस्य उपादानाद् विध्यर्थता नियमार्थतापि स्यादिति, यतोऽर्थैकत्वादेकवाक्यमिति केषाञ्चिद् वाक्यलक्षणम्, अर्थैकत्वाच्च सयसित इति वाक्यसमाप्तौ स्यतिग्रहणार्थं वाक्यान्तरं करणीयं भवतीति सिनोतेरेव ग्रहणम्। **मा विषसयदि**ति– विषमाख्यत् "णिज् बहुलम्०" [३. ४. ४२.] अत्र द्वित्वे कर्तव्ये "णषमसत्०" [२. १. ६०.] इत्यनेन षत्वनिवृत्तौ "अन्यस्य" [४. १. ८.] इति द्विर्वचनम्। **व्यसयीयदि**ति– विषयमैच्छत् क्यनि ईः। **पर्यसितायते**ति– परिषित इवाचरत् क्यङ् "दीर्घश्च्वि०" [४. ३. १०८.] इति दीर्घः ॥ २. ३. ४७. ॥

---

## असो-ङ-सिवू-सह-स्सटाम् । २ । ३ । ४८ ॥

**त० प्र०—परि-नि-विभ्यः परस्य सिवू-सहोर्धात्वोः स्सडागमस्य च संबन्धिनः सकारस्य षो भवति, न चेत् सिवू-सहौ सो-ङविषयौ भवतः। परिषीव्यति, निषीव्यपि, विषीव्यति; परिषहते, निषहते, विषहते; परिष्करोति, विष्करः शकुनिः; नेस्तु परः सड् नास्तीति नोदाह्रियते। असोङेति किम्? परिसोढः; परिसोढव्यः; निसोढः, निसोढव्यः; विसोढः, विसोढव्यः; ङे– मा परिसीषिवत्, मा परिसीषहत्; मूलधातोस्तु षत्वं भवत्येव। सोप्रतिषेधस्तु सहेरेव न सिवस्तस्य सोरूपासंभवात्, सिवोऽनुबन्धनिर्देशात् यङ्लुपि न भवति– परिसेषिवीति। बहुवचनं परि-नि-विभिः सह यथासंख्यनिवृत्त्यर्थम् ॥ ४८ ॥**

---

**श० न्या०—असो०।** सोढ इत्यादिप्रयोगस्थस्य सहेरवयवस्य 'सो' इत्यनुकरणम्, ङ इति च ङप्रत्ययस्य, तयोर्द्वन्द्वे कृते पश्चान्नान्यपदार्थे सिवू-सहलक्षणे बहुव्रीहौ कर्मधारये च पुनर्द्वन्द्वः। **न चेत् सिवू-सहावि**ति– द्वित्वेऽपीत्यस्य निवृत्तत्वात् पर्यादिभ्योऽनन्तरस्यैव सस्य षत्वविधानात् स्सटश्च ङप्रत्यये द्वित्वेनान्तरितत्वात् प्राप्तेरभावाद् 'असो-ङ'

इति प्रतिषेधाभाव इति भावः । **परिषिव्यती**त्यादि- " षिवूच् उतौ " " षहि मर्षणे " " षः सः० " [ २. ३. ९८. ] इति षस्य सत्वम्, उक्तोपसर्गयोगरहितत्वादिस्ततोऽनेन षत्वम् । **परिष्करोती**ति- " सं-परेः कृगः० " [ ४. ४. ९२. ] इति स्सट् तस्यानेन षत्वम् । **विष्किर** इति- विपूर्वात् किरतेः " नाम्युपान्त्य० " [ ५. १. ५४. ] इति कः " ऋतां क्ङितीति० " [ ४. ४. ११६. ] इति इरादेशः " वौ विष्किरो वा " [ ४. ४. ९६. ] इति स्सडागमः । **नोदाह्रियत** इति- स्सटः षत्वमिति शेषः । **परिषोढ** इत्यादि- पर्यादिपूर्वात् सहेः क्तस्तव्यश्च " हो धुट्-पदान्ते " [ २. १. ८२. ] इति हस्य ढत्वम् " अधश्चतुर्थात्० " [ २. १. ७९. ] इति तस्य धत्वं " तवर्गस्य श्चवर्ग० " [ १. ३. ६०. ] इति धस्य ढत्वं " सहि-वहेः० " [ १. ३. ४३. ] इति धात्ववयवस्य ढस्य लोपेऽकारस्य चौत्वमिति । [ **मा परिसीषिवदि**त्यादि- ] णिगन्तात् सीव्यतेः सहतेश्चाद्यतन्यां " णि-श्रि० " [ ३. ४. ५८. ] इति ङे पूर्ववद्ध्रस्वादौ ' असोङ ' इति वचनादत्र षत्वाभावः, " नाम्यन्तस्था० " [ २. ३. १५. ] इत्यादि सामान्यलक्षणं च स्वविषये प्रवर्त्तत एवेत्याह- **मूलधातोस्त्वि**त्यादि । ' सो ' इत्येतद्रूपं सहेरेव, न सिवेः, अतः सहेरेवायम् ' असो ' इति प्रतिषेधः, तस्य प्राप्तिपूर्वकत्वादित्याह- **सोप्रतिषेध** इत्यादि । ' सिवू ' इत्यनुबन्धोपादानात् *तिवा शवा० * इत्यादिप्रतिषेधात् परेरुत्तरस्य यङ्लुबन्तस्य षत्वं न भवतीत्याह- **सिव** इत्यादि । बहुवचनस्य प्रयोजनमाह- **बहुवचनमि**त्यादि- अन्यथा परि-नि-वेरित्यस्य त्रित्वसंख्याविशिष्टत्वात् सिवू-सह-स्सटामित्यनेन यथासंख्यं स्यात्, बहुवचने तु सति तदेकत्वबहुत्वसम्पादनात् समसंख्यत्वाभावाद् यथासंख्याभाव इत्यर्थः ॥ छ ॥ २. ३. ४८. ॥

**न्या० स०—असोङ** । सोङिल्येतयोर्द्वन्द्वे पश्चात् नञाऽन्यपदार्थे सिवूसहलक्षणे बहुव्रीहौ कर्मधारये च पुनर्द्वन्द्वः ॥ २. ३. ४८. ]

## स्तु-स्वञ्जश्चाटि नवा । २ । ३ । ४९ ॥

**त० प्र०—**परि-नि-विभ्यः परस्य स्तु-स्वञ्जोर्धात्वोरसोङ्सिवू-सह-स्सटां च सकारस्याटि सति षो वा भवति । पर्यष्टौत्, पर्यस्तौत्; न्यष्टौत्, न्यस्तौत्; व्यष्टौत्, व्यस्तौत्; पर्यष्वजत, पर्यस्वजत; न्यष्वजत, न्यस्वजत; व्यष्वजत, व्यस्वजत; पर्यषीव्यत्, पर्यसीव्यत्; न्यषीव्यत्, न्यसीव्यत्; व्यषीव्यत्, व्यसीव्यत्; पर्यषहत, पर्यसहत, न्यषहत, न्यसहत; व्यषहत, व्यसहत; पर्यष्करोत्, पर्यस्करोत् । असोङसिवूसहेत्येव- पर्यसोढयत्, पर्यसीषिवत्, पर्यसीषहत् । स्तु-स्वञ्जोर्नित्यं प्राप्ते सिवू-सह-स्सटां चाप्राप्ते विभाषा ॥ ४९ ॥

**श० न्या०—स्तु-स्व०** । **पर्यष्टौदि**ति- परिपूर्वात् स्तौतेर्ह्यस्तन्या दिव् " उत औः० " [ ४. ३. ५९. ] इत्यौत्वम्, अडागमोऽनेन पक्षे षत्वम्, एवमन्यत्रापि । अत्र विभाषायाः प्राप्तिपूर्वकत्वेनाप्राप्तिपूर्वकत्वेन च द्वैरूप्यात् कथं विभाषेत्याह- **स्तुस्वञ्जेरि**त्यादि- स्तौतेः " उपसर्गात् सुग्-सुव० " [ २. ३. ३९. ] इति स्वजतेश्च " स्वञ्जश्च " [ २. ३. ४५. ] इति नित्यं प्राप्नोति, सिवू-सह-स्सटां चाव्यपीत्यस्य निवृत्तत्वादसोङेति षत्वं न प्राप्नोतीति विषयभेदात् प्राप्ता[ प्राप्त ]विभाषेयमित्यर्थः ॥ छ ॥ २. ३. ४९ ॥

**न्या० स०—स्तु-स्वञ्ज०** । **स्तु-स्वञ्जोर्नित्यं प्राप्त** इति- " उपसर्गात् सुग्० " [ २. ३. ३९. ] इति " स्वञ्जश्च " [ २. ३. ४५. ] इत्याभ्यामित्यर्थः ॥ २. ४९. ॥

## निरभ्यनोश्च स्यन्दस्याप्राणिनि । २ । ३ । ५० ॥

**त० प्र०—**निरभ्यनुभ्यश्चकारात् परिनिविभ्यश्च परस्याप्राणिकर्तृकेऽर्थे वर्तमानस्य स्यन्देः सकारस्य षो वा भवति । निःष्यन्दते तैलम्, निःस्यन्दते तैलम्; अभिष्यन्दते; अभिस्यन्दते; अनुष्यन्दते, अनुस्यन्दते; परिष्यन्दते; परिस्यन्दते, निष्यन्दते, निस्यन्दते; विष्यन्दते, विस्यन्दते । शब्निर्देशाद् यङ्लुपि न भवति- अभिसास्यन्दीति तैलम् । निरभ्यनोश्चेति किम् ? प्रतिस्यन्दते तैलम् । अप्राणिनीति किम् ? परिस्यन्दते मत्स्य उदके । पर्युदासोऽयं न प्रसज्यप्रतिषेधः, तेन- यत्र प्राणी चाप्राणी च कर्ता भवति, तत्राऽप्राण्याश्रयो विकल्पो भवति, न तु प्राण्याश्रयः प्रतिषेधः- अनुष्यन्देते मत्स्योदके, अनुस्यन्देते वा । निर्निभ्यां नेच्छन्त्येके ॥ ५० ॥

**श० न्या०—निर०** । चकारः परि-नि-वेरित्यस्यानुकर्षणार्थ इत्याह- **चकारा**दित्यादि । न प्राण्यप्राणी तस्मिन्नप्राणिनीति स्यन्देरर्थद्वारकं विशेषणं, स्यन्दत्यर्थोऽप्राणिनीत्युपचारात् स्यन्दतिरपि, स्यन्दतिश्च कर्तृस्थक्रिय इत्ययमर्थो भवतीत्याह- **अप्राणिकर्तृक** इत्यादि । **निःष्यन्दत** इति- " स्यन्दौङ् स्रवणे " इति स्यन्दतेरकृतसकारत्वान्मूलत एवाप्राप्तौ पक्षेऽनेन षत्वम् । **शब्निर्देशादि**ति- * तिवा शवा * इति प्रतिषेधादित्यर्थः । **परिस्यदन्ते मत्स्य** इति- मत्स्यस्य प्राणित्वादप्राणिनीति वचनान्न भवति । यदि प्राणिनि कर्तरि

न भवति तत् कथम् 'अनुष्यन्देते मत्स्योदके, अनुष्यन्देते वा' इति षत्वमित्याह- **पर्युदासोऽयमि**त्यादि- अयमर्थः- अप्राणिनीति पर्युदासत्वाद् विधिप्राधान्यात् सम्भवत्येकवाक्यत्वे वाक्यभेदाश्रयणस्यायुक्तत्वात्, प्रसज्यप्रतिषेधे तु न चेदित्यादिरूपस्य वाक्यभेदस्यावश्यम्भावित्वाद् यत्र प्राणी चाप्राणी च भवति तत्रापि षत्वेन भाव्यं, प्राण्यप्राणिसमुदायस्याप्राणिनः सद्भावादिति। अथ "पञ्चेन्द्रियाणि त्रिविधं बलं च०" इत्यादिप्राणयोगित्वे उदकस्यापि प्राणित्वात् "पृथिव्यप्तेजो-वायु-वनस्पतयः स्थावराः" इति पाठात् पर्युदासेऽप्यत्र षत्वप्रतिषेधः, उच्यते- "प्राण्योषधि-वृक्षेभ्यः०" [६. २. ३१.] इत्यत्रौषधिवृक्षयोः प्राणित्वेनैव सिद्धे तयोः पृथगुपादानादिह शास्त्रे त्रसा एव प्राणिग्रहणेन गृह्यन्ते, न स्थावरा इति। **एक** इति- देवनन्दि-शकट-ललितस्वभावाः, **अन्ये तु** चन्द्रादयः ॥ छ ॥ ॥ २. ३. ५० ॥

**न्या० स०—निरभ्यनोः०।** **एके** इति—देवनन्दि-शकट-ललितस्वभावाः, नेरत्तु चान्द्रादयः। **पर्युदासोऽयमि**ति- अयमर्थः- अप्राणिनीति पर्युदासत्वाद् विधेः प्राधान्यात्, सम्भवति चैकवाक्यत्वे वाक्यभेदाश्रयणस्यायुक्तत्वात्, प्रसज्यप्रतिषेधे तु न चेदित्यादिवाक्यभेदस्यावश्यंभावित्वात्, यतो यत्र प्राणी चाप्राणी च भवति। **प्रसज्यप्रतिषेध** इति- प्रसक्तं कृत्वा प्रतिषेधः प्रसज्यप्रतिषेधः "अव्ययं प्रवृद्धादिभिः" [३. १. ४८.] इति सः, "प्रसज्यस्तु निषेधकृत्" इत्यत्र तु "ते लुग् वा" [३. २. १०८.] इति प्रतिषेधलोपः। ननु तदा "अव्ययस्य" [३. २. ७.] इति कथं सेर्न लुप्? उच्यते- समाससम्बन्धी सिरत्र नाव्ययस्येति न भवति ॥ २. ३. ५०. ॥

## वेः स्कन्दोऽक्तयोः । २ । ३ । ५१ ॥

**त० प्र०—**विपूर्वस्य स्कन्देः संबन्धिनः सकारस्य षो वा भवति, अक्तयोः- न चेत् क्तक्तवतू प्रत्ययौ भवतः, द्विवचनादर्थवद्ग्रहणानपेक्षमुभयपरिग्रहः। विष्कन्ता, विस्कन्ता; विष्कन्तुम्, विस्कन्तुम्। अक्तयोरिति किम्? विस्कन्नः, विस्कन्नवान् ॥५१॥

**श० न्या०—**वेः स्क०। "स्कन्दृं गति-शोषणयोः" अषोपदेशत्वात् पदादित्वाच्च तस्याप्राप्त एव षत्वे इदं वचनम्। **द्विवचनादि**ति- **क्तयोरि**ति द्विवचनमुभयस्य क्तस्य- क्तवतु-समुदायावयवस्य क्तस्य च परिग्रहार्थम्, तेन * अर्थवद्ग्रहणे नानर्थकस्य * इति नोपतिष्ठत इत्यर्थः। **विष्कन्तेत्या**दि- विपूर्वात् स्कन्देस्तृच्-तुमौ, "एकस्वराद्०" [४. ४. ५६.] इतीडभावः, पक्षेऽनेन षत्वम्। क्ते क्तवतौ चाक्तयोरिति वचनात् षत्वप्रतिषेधे "नो व्यञ्जनस्य०" [४. २. ४५.] इति न लोपे "रदादमूर्च्छ-मदः" [४. २. ६९.] इत्युभयत्र तस्य नत्वे- **विस्कन्नः, विस्कन्नवान्** ॥ छ ॥ २. ३. ५१. ॥

**न्या० स०—**वेः०। [नेह व्याख्यातम्] ॥ २. ३. ५१.॥

## परेः । २ । ३ । ५२ ॥

**त० प्र०—परिपूर्वस्य स्कन्देः सकारस्य षो वा भवति परिष्कन्ता, परिस्कन्ता, परिष्कन्तुम्, परिस्कन्तुम्। योगविभागादक्तयोरिति नानुवर्तते, तेन- क्तयोरपि विकल्पो भवति- परिष्कण्णः, परिस्कन्नः; परिष्कण्णवान्, परिस्कन्नवान्। केचित्तु परिपूर्वस्य स्कन्देरजन्तस्य घञन्तस्य वा प्राच्यभरतविषये प्रयोगे नित्यं षत्वमन्यत्र विकल्पमिच्छन्ति, अन्ये तु प्राच्यभरतविषये प्रयोगे षत्वाभावमन्यत्र तु विकल्पमिच्छन्ति; तदुभयं नारम्भणीयमनेनैव सिद्धत्वादिति ॥ ५२ ॥**

**श० न्या०—**परेः। परिपूर्वात् स्कन्देः पूर्ववत् तृच्-तुमादौ- **परिस्कन्तेत्यादि**। **योगविभागादि**ति- यदि परेरप्युत्तरस्य स्कन्देः क्तयोः प्रतिषेध इष्टः स्यात् ततो "विपरिभ्यां स्कन्दोऽक्तयोः" इत्येकमेव योगं कुर्यादित्यर्थः, षत्वाभावपक्षे णत्वाप्रवृत्तौ नकारद्वयश्रवणम्। **केचित् त्वि**त्यादि- परिस्कन्दतीत्यचि परिस्कन्दनमिति घञि च प्राच्या ये भरतास्तत्प्रतिषेधेनोदीच्यभरतविषये प्रयोगे षत्वमनित्यं- कदाचिद् भवति कदाचिन्नेति, प्रत्ययान्तरे तु षत्वविकल्प इति भावः। **अन्ये त्वि**त्यादि- चन्द्र-पाणिनि-देवनन्दिप्रभृतयः। **तदुभय**मिति- षत्वाभावो विकल्पश्च, **अनेनैव सिद्धत्वादि**ति- वेतीत्यस्य व्यवस्थितविभाषार्थत्वादिति शेषः ॥छ॥२. ३. ५२.॥

**न्या० स०—**परेः। योगविभागादिति- विपरिभ्यां स्कन्दोऽक्तयोरित्येवंरूपात्। अनेनैवेति- वेतीत्यस्य व्यवस्थितविभाषार्थत्वादिति शेषः ॥ २. ३. ५२. ॥

## नि-र्नेः स्फुर-स्फुलोः । २ । ३ । ५३ ॥

**त० प्र०—निर्निभ्यां परयोः स्फुरति-स्फुलत्योः सकारस्य षो वा भवति। निःष्फुरतिः, निःस्फुरति; निष्फुरति, निस्फुरतिः; निःष्फुलति; निःस्फुलति, निष्फुलति, निस्फुलति। वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥ ५३ ॥**

**श० न्या०—**निर्नेः०। **निष्फुरन्तीत्यादि**- "स्फुरत् स्फुरणे" "स्फुलत् संचये च" अतस्तिव् तुदादित्वान्मध्ये शः, निसः सकारस्य रुत्वं "श-ष-से०" [१. ३. ६.]

इति तस्य सत्वमनेन धातुसकारस्य षत्वं "सस्य श-षौ" [ १. ३. ६१. ] इति षत्वम्, सत्वाभावपक्षे कदाचिद् विसर्गः कदाचिद् "व्यत्यये लुग् वा" [ १. ३. ५६. ] इति लोपः, मूर्धन्याभावपक्षे कदाचित् सकारद्वयश्रवणं कदाचिद्विसर्ग-लोपौ । यद्यपीह स्फुर-स्फुलौ द्वौ तथापि निर्नेरिति वचनभेदाद् यथासंख्याभाव इत्याह- **वचनभेद** इत्यादि ॥ छ ॥ २. ३. ५३. ॥

**न्या० स०—निर्नेःस्फु०** । **निस्फुरतीति**- निसः सकारस्य रुत्वे "श-ष-से०" [ १. ३. ६. ] इति तस्य सत्वमनेन धातुसकारस्य षत्वं "सस्य श-षौ" [ १. ३. ६१ ] इति षत्वम्, सत्वाभावपक्षे कदाचिद् विसर्गः कदाचित् "व्यत्यये लुग् वा" [ १. ३. ५६. ] इति लोपः, मूर्धन्याभावपक्षे कदाचित् सकारद्वयश्रवणं कदाचिद् विसर्ग-लोपौ ॥ २. ३. ५३. ]

## वेः । २ । ३ । ५४ ॥

**त० प्र०—वेः परयोः स्फुरति-स्फुलत्योः सकारस्य षो वा भवति । विष्फुरति, विस्फुरति; विष्फुलति, विस्फुलति । योगविभाग उत्तरार्थः ॥ ५४ ॥**

**श० न्या०—वेः** । अथ योगविभागः किमर्थः ? "स्फुर-स्फुलो निर्निवेः" इत्येक एव योगः क्रियतामित्याह- **योगविभाग उत्तरार्थ** इति- उत्तरत्र वेरेवानुवृत्तिर्यथा स्यान्न निर्नेरित्येवमर्थ इत्यर्थः ॥ छ ॥ २. ३. ५४. ॥

**न्या० स०—वेः** । स्फुर-स्फुलो निर्नि-वेरित्येकयोगभावोऽत्र ॥ २. ३. ५४. ॥

## स्कभ्नः । २ । ३ । ५५ ॥

**त० प्र०—वेः परस्य स्कभ्नातेः सकारस्य नित्यं षो भवति** । योगविभागाद् वेति निवृत्तम्, अन्यथा हि वेः स्कभ्नश्चेति क्रियेत । विष्कभ्नाति, विष्कम्भिता, विष्कम्भकः, विष्कम्भयति । श्नानिर्देशः किम् ? सश्नोर्मा भूत्- विस्कभ्नोति । स्कम्भूः सौत्रो धातुः अषोपदेशः ॥ ५५ ॥

**श० न्या०—स्कभ्नः** । **योगविभागादि**ति- अन्यथा यद्यत्रापि विकल्पः स्याद् "वेः स्कभ्नश्च" इत्येकमेव योगं कुर्यात्, समानयोग-क्षेमत्वादित्यर्थः । विपूर्वात् "स्कम्भू" इति सौत्रात् तिवि "स्तम्भू-स्तुम्भू०" [ ३. ४. ७८. ] इति श्नाप्रत्यये च ङिद्वद्भावान्नलोपे यथायोगं तृचि णके णिगि यथायोगमनेन षत्वे णत्वे- **विष्कभ्नाती**त्यादि- "व्यष्टभ्नाद् रोदसी मित्रः" इति । **विस्कभ्नोती**ति- स्तम्भादिसूत्रेण श्नुप्रत्ययः, यद्यत्रापि स्यात् तदा स्कम्भ इत्येवं निर्देशः, तस्मात् श्नानिर्देशादन्यत्र शिति प्रत्यये न षकार इति चन्द्रः, श्नानिर्देशः "ष्टभुङ् स्कभुङ् ष्टुभूङ् स्तम्भे" इति भौवादिकनिवृत्त्यर्थ इति शकटः, अत एवोत्पलेन विष्कभ्णाति विष्कभ्णोतीति श्नुप्रत्ययेऽपि षत्वमुदाहृतम् । **अषोपदेश** इत्यनेन स्कम्भेः सकारस्य मूलत एवाप्राप्तं षत्वं विधीयत इति दर्शयति ॥ छ ॥ २. ३. ५५. ॥

**न्या० स०—स्कभ्नः** । ननु श्नानिर्देशाद् यत्र श्नाप्रत्ययस्तत्रैव षत्वं प्राप्नोति, न तु तदभावे विष्कम्भितेत्यादौ ? नैवम्- श्नानिर्देशस्य श्नुनिषेधपरतया व्याख्यातत्वात् । **विष्कभ्नाती**त्यत्र क्षुभ्नादित्वाण्णत्वाभावः । **सश्नोर्मा भूदि**ति- यदाह चन्द्रः- यद्यत्रापि स्यात् तदा स्कम्भ इति निर्दिशेत्, तस्मात् श्नानिर्देशादन्यत्र शिति प्रत्यये न षकार इति । शकटस्तु- श्नानिर्देशः ष्टभुङ् स्कभुङिति भौवादिकनिवृत्त्यर्थमिति, अत एवोत्पलेनापि विष्कभ्नाति विष्कभ्णोतीति श्नुप्रत्ययेऽपि षत्वं गणपाठाभावाणत्वं च उदाहृतम् ॥ २. ३. ५५. ॥

## नि-र्दुः-सु-वेः सम-सूतेः । २ । ३ । ५६ ॥

**त० प्र०—निर्दुःसुविभ्यः परस्य समसूतिसंबन्धिनः सकारस्य षो भवति । निःषमः, दुःषमः, सुषमः, विषमः; निःषूतिः, दुःषूतिः, सुषूतिः, विषूतिः । समसूतीति नाम्नोर्ग्रहणाद् धातोर्वैरूप्ये च न भवति- निःसमति, दुःसमति, सुसमति, विसमति; निःसूतम्, दुःसूतम्, सुसूतम्, विसूतम् । अन्ये तु सम-सूत्योर्धात्वोरेवेच्छन्ति, तन्मते- निःषमति, दुःषमति, निःषूतं, दुःषूतमित्यादावेव भवति ॥ ५६ ॥**

**श० न्या०—निर्दु०** । निरादीनामुपसर्गाणां समाहारद्वन्द्वात् पञ्चमी, "षम ष्टम वैक्लव्ये" इत्यस्माजन्तस्य सर्वादिपठितस्याव्युत्पन्नस्य वा 'सम' इत्यनुकरणं, सूतेः सूयतेः सुवतेश्च क्तयन्तस्य च सूतीत्यनुकरणम् । निश्चिता सूतिरित्यादि विग्रहः । सूतीत्यदादिकस्य श्तिव्यपि भवति, सूति-सूयति-सुवतीनां क्तयन्तानां च, तत्र समेन नाम्ना साहचर्यात् क्तयन्तानामेव नाम्नां ग्रहणम्, यद्वा "अवः स्वपः" [ २. ३. ५७. ] इत्यनेन पृथग्योगात् सम-सूत्योर्नाम्नोरेव परिग्रहो न धात्वोरित्याह- **समसूती**त्यादि । * नामग्रहणे च लिङ्गविशिष्टस्यापि ग्रहणम् * इति समशब्दग्रहणात् समाशब्दस्यापि ग्रहणम्, तेन तस्याप्येभ्यः सकारस्य षत्वं प्रवर्तते- निःषमा, दुःषमेत्यादि भवति । उत्तरपदार्थप्राधान्ये तु "प्रात्यव०" [ ३. १. ४७. ] इति "दुर्निन्दा०" [ ३. १. ४३. ] इति "सुः पूजायाम्" [ ३. १. ४४. ] इति यथायथं समासः; यदा तु पूर्वपदार्थस्य

प्राधान्यं तदा तिष्ठद्गुवादिपाठादव्ययीभावे च कृते " क्लीबे " [ २. ४. ९७. ] इति ह्रस्वेऽनेन षत्वं, सेरम्भावः । **अन्ये त्विति**......... ॥ छ ॥ २. ३. ५६. ॥

**न्या० स०—नि-र्दु-सुः-वेः०** । **समे**ति सह मया वर्तते इति समः " गोश्चान्ते० " [ २. ४. ९६. ] । निर्गतो निश्चितो वा समाद्, **सम** इति समतीति प्रयोगैकदेशः, " षम ष्टम " इत्यन्तस्य च भवति । **सूती**त्यादादिकस्य " इ-कि-श्तिव्० " [ ५. ३. १३८. ] इति श्तिव्यपि भवति, सूति-सूयति-सुवतीनां स्यन्तानां च । तत्र " अवः स्वपः० " [ २. ३. ५७. ] इत्यनेन पृथग् योगान्नाम्नोरेव ग्रहणं न धात्वोरित्याह– **नाम्नोर्ग्रहणादिति**– नामग्रहणे च लिङ्गविशिष्टस्यापि, तेन सुषमा इत्यादिधात्वोरेवेच्छन्तीत्युक्त्वा कथं निःषूतमित्याद्युदाहृतम् ? सत्यम्– क्तप्रत्ययात् प्रागेव सूतेरुपसर्गेण योगाद् भविष्यति ॥ २. ३. ५६. ॥

## अवः स्वपः । २ । ३ । ५७ ॥

**त० प्र०—नि-र्दुः-सु-विपूर्वस्य वकाररहितस्य स्वपेर्धातोः सकारस्य षो भवति । निःषुषुपतुः, दुःषुषुपतुः, सुषुषुपतुः, विषुषुपतुः; निष्षुप्तः, दुःषुप्तः, सुषुप्तः; विषुप्तः । अव इति किम् ? निःस्वप्नः, दुःस्वप्नः, सुस्वप्नः, विस्वप्नः; विसुष्वाप ॥५७॥**

**श० न्या०—अव०** । निरादुपसर्गपूर्वात् " ञिष्वपंक् शये " इत्यतोऽतुसि " स्वपेः० " [ ४. १. ८० ] इति य्वृति द्वित्वेऽनादिव्यञ्जनलोपेऽनेन पूर्वसकारस्य षत्वे परस्य " नाम्यन्तस्था० " [ २. ३. १५. ] इति षत्वे– **निःषुषुपतु**रित्यादि । अव इति किमर्थम् ? सुप इत्येवोच्यताम्, न चैवं ' सुष्वाप ' इत्यत्रैकदेशविकृतस्यानन्यत्वात् षत्वं प्रसज्यत इति वाच्यम्, *अर्थवद्ग्रहणेऽनर्थकस्याग्रहणात्*, स्थाने हि द्विर्वचने समुदाय एवार्थवान्, अवयवयोस्त्वानर्थक्यं, द्विःप्रयोगेऽप्यर्थस्यानावर्त्तनाद् द्वाभ्यामर्थः प्रत्याय्यत इत्येकस्यानर्थक्यम्; न चैवं विषुषुपतुरिति न सिध्यति तत्रापि सुपोऽनर्थकत्वादिति वाच्यम्, परत्वात् य्वृति कृते सुपेर्द्विर्वचनं, तत्र स्थानित्वात् सुप्ग्रहणेन समुदायार्थस्य ग्रहणात् सिद्धं षत्वम्, द्विष्प्रयोगेऽपि स एव सुप् द्विरुक्त इति समुदायाश्रयमेव षत्वमिति; सत्यम्– दुःस्वप्न इत्यादौ स्यादिति प्रत्युदाहरति– **दुःस्वप्न** इत्यादि– " याचि-विचि-प्रच्छि० " [ ५. ३. ८५. ] इति नः ॥ छ ॥ २. ३. ५७. ॥

**न्या० स०—अवः स्वपः** । निःषुप्त इत्यादौ " ज्ञानेच्छा० " [ ५. २. ९२. ] इति क्तः ॥ २. ३. ५७. ॥

## प्रादुरुपसर्गाद् य-स्वरेऽस्तेः । २ । ३ । ५८ ॥

**त० प्र०—प्रादुःशब्दादुपसर्गाच्च नाम्यन्तस्थाकवर्गात् परस्यास्तेः सकारस्य यकारादौ स्वरादौ च प्रत्यये परे षो भवति । प्रादुःष्यात्, निष्यात्, विष्यात्, अभिष्यात्; प्रादुःषन्ति, निषन्ति विषन्ति, अभिषन्ति; शिड्नान्तरेऽपि– निःष्यात्, निःषन्ति । प्रादुरुपसर्गादिति किम् ? दधि स्यात्, मधूनि सन्ति, यदत्र मां प्रति स्यात् तद् दीयताम्, सर्पिषोऽपि स्यात् । य-स्वर इति किम् ? प्रादुःस्तः, निस्तः, अनुस्तः, अनुस्वः, अनुस्मः । अस्तेरिति किम् ? विसृतम्, अनुसृतम्, अनुसूतेः क्विपि अनुसूस्तस्यापत्यं शुभ्रादित्वादेयण् ऊलोपः– आनुसेयः । प्रादुःशब्दस्य तु कृभ्वस्तिष्वेव प्रयोगात् प्रत्युदाहरणं नास्ति ॥ ५८ ॥**

**श० न्या०—प्रादु०** । अकृतसकारत्वादप्राप्ते षत्वे इदं वचनम् । प्रादुःशब्दस्याप्रादित्वात् पृथगुपादानम्, यश्च स्वरश्चेति समाहारद्वन्द्वात् सप्तमी, " नाम्यन्तस्था० " [ २. ३. १५. ] इत्यादि यथायोगमिहोपतिष्ठत इत्याह– **प्रादुःशब्दादि**त्यादि । **प्रादुःष्यादि**त्यादि– " असक् भुवि " अतो " विधिनिमन्त्रणामन्त्रणा० " [ ५. ४. २८. ] इति सप्तमीयात् " श्नास्त्योर्लुक् " [ ४. २. ९० ] इत्यकारलोपः, अनेन षत्वम् । **दधि स्यात्, मधूनि सन्ती**ति– प्रादुरुपसर्गादिति वचनादिह न भवति । **प्रादुःस्त** इति वर्तमानायास्तस् । अथ प्रादुरुपसर्गाभ्यामकारलोपे क्रियावाचित्वादस्तेरेव सकारः सम्भवति किमस्तिग्रहणेनेत्याह– **अस्तेरिति किमि**त्यादि । **विसृतम्, अनुसृतमि**ति– " सृं गतौ " अतः क्तः प्रत्यय इति तु सामर्थ्यप्रापितं विकृतम् । ननु च सकारस्य प्रकृतत्वात् तस्य चोपसर्गात् परस्य षत्वविधानाद् * यत्क्रियायुक्ताः प्रादयस्तं प्रत्युपसर्गसंज्ञा * इति मते सकारं प्रति क्रियायोगाभावादुपसर्गत्वाभावान्नैवात्र षत्वं प्रसज्यत इति किमस्तिग्रहणेन ? अथैतदुच्यते– असति तस्मिन् प्रादुःशब्दादुत्तरस्य धात्वन्तरसकारस्य षत्वं प्रसज्यत इति तन्निवृत्त्यर्थमस्तिग्रहणमिति, एतच्च न– कृभ्वस्तीनामेवार्थस्य प्रादुःशब्दवाच्येनार्थेन सम्बन्धेन धात्वन्तरार्थस्याभिधानशक्तिस्वाभाव्यात्, अत एव प्रादुःशब्दस्य तु कृभ्वस्तिष्वेवेत्यादि वक्ष्यति, तत् कुतोऽयं प्रसङ्ग इत्याशङ्क्य प्रत्युदाहरणं दर्शयति । **अनुसूते**रित्यादि । **तदपत्यमि**ति– " चतुष्पाद्भ्य एयञ् " [ ६. १. ८३. ] इत्येयञ्, वृत्तौ तु सारसंग्रहाकाराद्यभिप्रायेण शुभ्रादित्वादित्युक्तम् । **ऊलोप** इति– " अकद्रूपाण्ड्वोः० " [ ६. ४. ६९. ] इत्यनेनेति शेषः । **प्रादुःशब्दस्य त्वि**ति– व्याख्यातप्रायम् ॥ छ ॥ २. ३. ५८. ॥

**न्या० स०—प्रादुरु०** । शुभ्रादित्वादिति– न्यासे तु " चतुष्पाद्० " [ ६. १. ८३. ] इति एयञ्, वृत्तौ तु सारसंग्रहाद्यभि-

प्रायेण "सुभ्र्वादिभ्यः" [ ७. ३. १८२. ] इत्युक्तम्। **विसृतमित्यादि**– विसरतीति क्विपि तोऽन्ते * क्विबन्ता धातुत्वं न त्यजन्ति * इति न्यायात् 'विसृत्' इत्येवं रूपाद् धातुमात्रादम्-रूपे स्वरादौ प्रत्ययेऽस्तेरिति किमिति व्यावृत्तेर्न द्वयङ्गवैकल्यम्, यदा तु क्तस्तदापि अस्तौ सति स्वरस्य प्रत्ययेति चिन्तेति न द्वयङ्गविकलता ॥ २. ३. ५८. ॥

## न स्सः । २ । ३ । ५९ ॥

**त० प्र०**—कृतद्विर्भावसकारसंबन्धिनः सकारस्य षो न भवति। **सुपिस्स्यते, सुतुस्स्यते**; अत्र सुपूर्वस्य पिसेस्तुसेश्च सकारस्य क्ये "अदीर्घात्०" [ १. ३. ३२. ] इत्यादिना द्विर्भावः। ननु '**दधिस्यते, मधुस्यति, सर्पिस्करत्, अग्निसात् करोति**' इत्यादिषु प्रतिषेधाभावात् षत्वं प्राप्नोति? उच्यते– स्सस्सडागमयोः स्सात् प्रत्ययस्य च द्विःसकारपाठस्य षत्वप्रतिषेधार्थत्वेनाभिधास्यमानत्वात् षत्वं न भवति ॥ ५९ ॥

**श० न्या०**—**न स्सः**। सुपिस्स्यत इत्यादिप्रयोगस्थो द्विरुक्तः सकारः स [ स्स् ] इत्यनुक्रियत इत्याह– **कृतद्विर्भावे**त्यादि। "पिस्ठ गतौ" "तुस शब्दे" ततो वर्तमानायास्तेप्रत्यये "क्यः शिति" [ ३. ४. ७०. ] इति क्ये "अदीर्घाद्०" [ १. ३. ३२. ] इति सस्य द्विर्भावे "नाम्यन्तस्था०" [ २. ३. १५. ] इति प्राप्तस्य षत्वस्यानेन प्रतिषेधे– **सुपिस्स्यते, सुतुस्स्यत** इति। कथमत्र सकारस्य द्विरुक्तत्वं [ इति ] यः शङ्कते तं प्रत्याह– **अत्रे**त्यादि। अत्र द्विरुक्तस्यैव सकारस्य प्रतिषेधविषयत्वेन व्याख्यातत्वेऽपि "असच् लौल्ये" [ ४. ३. ११५. ] "संपरेः कृगः स्सट्" [ ४. ४. ९१. ] "व्याप्तौ स्सात्" [ ७. २. १३०. ] इति विहितस्य सकारस्य द्विरुक्तत्वाभावेऽपि तत्र द्वितीयसकारस्य षत्वप्रतिषेधार्थत्वेन व्याख्यास्यमानत्वात् षत्वाभाव इत्याक्षिप्य परिहरति– **नन्वि**त्यादि। अथ कुसर-धूसर-वेसर-केसरादीनां प्रत्ययसकारस्य षत्वप्रतिषेधो वक्तव्यः। न वक्तव्यः * उणादयोऽव्युत्पन्नानि नामानि * इति भविष्यन्तीति, अबुधबोधनाय व्युत्पाद्यमाना अप्युणादयो व्युत्पत्तिनिमित्तकार्यं न लभन्ते। अथ वृक्ष इत्यादिसिद्धयर्थं व्युत्पत्तिहेतुकं कार्यमवश्यमभ्युपेयम्, एवं तर्हि बहुवचनात् षत्वाभावः ॥ छ ॥ २. ३. ५९. ॥

**न्या० स०**—न स्सः। **सुपिस्स्यत** इत्यादिप्रयोगस्थो द्विरुक्तः सकारः स्स इत्यनुक्रियते इत्याह– **कृते**त्यादि। **दधिस्यते** अत्र "अस् च लौल्ये" [ ४. ३. ११५. ] स्सः ॥ २. ३. ५९. ॥

## सिचो यङि । २ । ३ । ६० ॥

**त० प्र०**—सिञ्चतेर्धातोः सकारस्य यङि प्रत्यये परतः षो न भवति। **सेसिच्यते, अभिसेसिच्यते**; परत्वादुपसर्गलक्षणमपि षत्वं बाधते। एवमुत्तरत्रापि। यङीति किम्? **अभिषिषिक्षति**। इकारः किम्? **अभिषिच्यते** ॥ ६० ॥

**श० न्या०**—सिचो०। "नाम्यन्तस्था०" [ २. ३. १५. ] इति "स्था-सेनि०" [ २. ३. ४०. ] इति च प्राप्तस्य षत्वस्यायं प्रतिषेध इति यथाक्रममुदाहरणद्वयं द्रष्टव्यम्। कथं पुनरभिसेसिच्यत इत्यत्र प्रतिषेधो यावता "स्था-सेनि०" [ २. ३. ४०. ] इति सूत्रेण प्रतिषेधविषय एव षत्वमारभ्यमाणं यथा पदादिलक्षणं प्रतिषेधं बाधते तथा विशेषविहितत्वात् "सिचो यङि" [ २. ३. ६०. ] इत्येतमपीत्याशङ्कयाह– **परत्वादि**ति– अयमर्थः– * पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते न परान् * इत्युपसर्गात् षत्वं पदादिलक्षणं प्रतिषेधं बाधिष्यते, न "सिचो यङि" [ २. ३. ६०. ] इति, अथवा * येन नाप्राप्ते यो विधिरारभ्यते [ ते ]न तस्य बाधनं, * न चाप्राप्ते पदादिलक्षणे प्रतिषेधे उपसर्गात् सिचः षत्वमारभ्यत इति तदेव बाध्यते, "सिचो यङि" [ २. ३. ६०. ] इति प्राप्ते चाप्राप्ते चेति न तस्य बाधनमिति। ननु "ण-षमसत् परे०" [ २. १. ६० ] इत्यत्र प्रकरणव्यत्यासवद् योगानामपि व्यत्यासः, ततश्च "सिचो यङि" [ २. ३. ६०. ] इति पूर्वस्य प्रतिषेधस्य "स्था-सेनि०" [ २. ३. ४०. ] इति परेऽसत्त्वादभिसेसिच्यत इत्यत्र षत्वं प्राप्नोति, उच्यते– प्रकरणे प्रकरणमसत्, न तु योगे योग इति विधि-प्रतिषेधयोश्चैकं प्रकरणमिति सिद्धमिष्टम्। **अभिषिषिक्षती**ति– पूर्ववत् सन्नादि, "स्था-सेनि०" [ २. ३. ४०. ] इत्युभयत्र षत्वम्। **अभिसिच्यत** इति– क्यः ॥ छ ॥ २. ३. ६० ॥

**न्या० स०**—सिचो०। षत्वमिति– "स्था-सेनि०" [ २. ३. ४०. ] इत्यनेन ॥ २. ३. ६०. ॥

## गतौ सेधः । २ । ३ । ६१ ॥

**त० प्र०**—गतौ वर्तमानस्य सेधतेर्धातोः सकारस्य षो न भवति। **अभिसेधति, अनुसेधति गाः**, अभिगच्छति– अनुगच्छतीत्यर्थः; **अभिसेधयति, अनुसेधयति**– गमयतीत्यर्थः; **अभिसिसेधिषति, अनुसिसेधिषति** अभिजिगमिषति, अनुजिगमिषतीत्यर्थः। गताविति किम्? **प्रतिषेधति, निषेधति**– पापान्निवारयतीत्यर्थः ॥ ६१ ॥

**श० न्या०—गतौ०** । " स्था-सेनि० " [ २. ३. ४०.] इति प्राप्तस्य षत्वस्यायं प्रतिषेधः । **अभिसेधती**ति–" षिधू गत्याम् "। **अभिगच्छती**त्यादिना अस्य गत्यर्थतां दर्शयति । **अभिसेधयती**ति– अत्र णिगः प्रकृतिर्धातुर्गत्यर्थ एवेति समुदायस्य धात्वन्तरत्वेऽपि निषेधः । **प्रतिषेधती**ति– " स्था-सेनि० " [ २. ३. ४०. ] इति षत्वम्, अत्र निवारणार्थत्वाद् गताविति वचनात् प्रतिषेधाभावः ॥छ॥२. ३. ६१.॥

**न्या० स०—गतौ से०** । ननु कूसर-धूसर-केसरादिषु प्रत्ययसकारस्य षत्वप्रतिषेधो वक्तव्यः, नैवम्– * उणादयोऽव्युत्पन्नानि नामानि * इत्यबुधबोधनार्थं, व्युत्पाद्यमानान्यप्युणादयो व्युत्पत्तिकार्यं न लभन्ते । इत्थं तर्हि वृक्ष इत्यत्रापि षत्वं न प्राप्नोति, उच्यते– तर्हि बाहुलकात् षत्वाभावः ॥ २. ३. ६१. ॥

## सुगः स्य-सनि । २ । ३ । ६२ ॥

**त० प्र०—**सुनोतेः संबन्धिनः सकारस्य स्ये सनि च प्रत्यये परे षो न भवति । अभिसोष्यति परिसोष्यति, अभ्यसोष्यत्, पर्यसोष्यत्; सनि– सुसूषतेः क्विपि– सुसूः, सुसूषतीति तु नोदाह्रियते, णिस्तोरेव षणि इति नियमेनैव व्यावर्तितत्वात्, अभिसुसूषतीत्यपि नोदाहृियते, अद्वित्वे इति व्यावृत्त्यैव निवर्तितत्वात् । स्यसनीति किम् ? सुषाव, अभिषुणोति ॥ ६२ ॥

**श० न्या०—सुगः०** । **अभिसोष्यती**ति– भविष्यन्त्याः स्यति " उपसर्गात् सुग्० "[ २. ३. ३९. ] इति प्राप्तस्य षत्वस्यात्र प्रतिषेधः । **अभ्यसोष्यद्**िति– क्रियातिपत्त्याः स्यत्, नाम्यन्तलक्षणो गुणः " अड् धातोः० " [ ४. ४. २९. ] इत्यडागमः, अड्व्यपीति वचनात् तेनैव प्राप्तं षत्वं प्रतिषिध्यते । **सुसूरि**ति–सोतुमिच्छतीति सन् पूर्ववद् दीर्घत्वादिः । 'सुसूस' इति स्थितात् क्विप्, षः " अतः " [ ४. ३. ८२. ] इत्यकारलोपः, षत्वस्य परेऽसत्त्वात् पदान्तत्वात् षत्वप्रतिषेधान्नायं सन् षत्वभूत इति णिस्तोरेवेति नियमाभावाद् " नाम्यन्तस्था० " [ २. ३. १५.] इति षत्वप्राप्तिरिति प्रतिषिध्यते, षत्वभूते तु सनि णिस्तोरेवेति नियमादुपसर्गात् परस्याप्यद्वित्व इति वचनात् षत्वप्रतिषेधस्य सिद्धत्वादनुपपन्नमुदाहरणमित्याह– **सुसूषती**त्यादि ॥ छ ॥ २. ३. ६२. ॥

**न्या० स०—सुगः स्य०** । **सुसूरि**ति– वर्णविधौ स्थानित्वाभावात् षणीत्यभावः । **अभ्यसोष्यद्**ित्यत्राप्यड्व्यपीति वचनात् " उपसर्गात् सुग्० " [ २. ३. ३९. ] इति प्राप्तं निषिध्यते ॥ २. ३. ६२. ॥

## रषृवर्णान्नो ण एकपदेऽनन्त्यस्याऽल-च-ट-तवर्ग-श-सान्तरे । २ । ३ । ६३ ॥

**त० प्र०—**रेफ-षकार-ऋवर्णेभ्यः परस्याऽनन्त्यस्य नकारस्य रषृवर्णैरेवैकपदे वर्तमानस्य णो भवति, न चेन्निमित्तनिमित्तिनोरन्तरे लकार-चवर्ग-टवर्ग-तवर्ग-शकार-सकारा भवन्ति; शेषवर्ण-व्यवधानेऽपीत्यर्थः । तीर्णम्, चतुर्णाम्, पुष्णाति, नृणाम्, नॄणाम्; व्यवधानेऽपि भवति– करणम्, वृक्षाणाम्, करिणाम्, ऋषीणाम्, गुरुणा, गुरूणाम्, करेण, वृंहणम्, अर्केण, मूर्खेण, स्वर्गेण, अर्घेण, दर्पेण, रेफेण, दर्भेण, धर्मेण, आर्येण, सर्वेण; अर्हेण । रषृवर्णादिति किम् ? तेन । एकपद इति किम् ? अग्निर्नयति, नृभिर्नृभिः, नेतृभिर्नेतृभिः । पद इत्येतावतैवैकपदे लब्धे एकग्रहणं नियमार्थम्, एकमेव यन्नित्यं तत्र यथा स्यात्; यदेकं चानेकं च तत्र मा भूत्– चर्मनासिकः, मेषनासिकः । अनन्त्यस्येति किम् ? वृक्षान् । लादिवर्जनं किम् ? विरलेन, अर्चनम्, मूर्छनम्, अर्जनम्, झर्झनम्, किरीटेन, कर्मठेन, मूडेन, दृढेन, कर्णेन, कीर्तनम्, तीर्थेन, नर्देन, क्रोधेन, रशना, रसना । अधिकारश्चायमा णत्वविधेः ॥६३॥

**श० न्या०—रषृ०** । आस्तीर्णमित्यादौ व्यवस्थितो रेफोऽनुक्रियते, तस्य चाकार उच्चारणार्थः, कुष्णातीत्यादौ व्यवस्थितषकारः, अनुकरणसामर्थ्याच्च " रादेफः " [ ७. २. १५७. ] इति " वर्णाव्यया० " [ ७. २. १५६. ] इति रेफाकारौ न भवतः, तत्र व्यवस्थितार्थत्वानुवृत्तेः, नृणामित्यादौ व्यवस्थितश्च ऋवर्णः, नकारो दर्शितप्रयोगव्यवस्थितः, तस्य च कार्यित्वात् प्रथमोपादेयत्वात् स्थानिषष्ठी, णकारश्चानेनैव विधीयमानोऽनुकृतः, तस्य च स्वरूपेणार्थेनार्थवद्भावात् कार्यत्वात् प्रथमा । **एकपद** इति– विशेषणसमासादवयविन एवाधारविवक्षया सप्तमी, वृक्षे शाखेति यथेति । एकपदशब्दस्य सम्बन्धिशब्दत्वादन्यस्य च सम्बन्धिनोऽनुपादानाच्छ्रुतत्वान्निमित्तनिमित्त्यपेक्षयैकपदत्वम्, अतो वक्ष्यति– **रषृवर्णै**रिति– [ **अनन्त्यस्य** ] अन्ते भवोऽन्त्यः, दिगादित्वाद् ये नञ्समासात् षष्ठी । **चटतवर्गे**ति– द्वन्द्वगर्भः षष्ठीतत्पुरुषः, ततः पुनर्द्वन्द्वस्य व्यवधानार्थेनान्तरेण तृतीयासमासे नञ्तत्पुरुषात् सप्तमी, अस्य तात्पर्यमाह– **न चेदि**त्यादि–रषृवर्णा निमित्तं, नकारो निमित्ती, तयोरन्तरे– मध्ये इत्यर्थः । ननु च येन विना यन्न भवति, यस्मिन् सत्येव भवति, तत् तस्य निमित्तं, विना च स्थानिना आदेशो न भवतीति निमित्त्यपि निमित्तमेवेति किं पृथग् निमित्तिन उपादानेन ? निमित्तयोरन्तर इति वक्तव्यम्, नैवम्– स्थानिनिवृत्त्या आदेश-

प्रादुर्भावः, रषृवर्णादित्येतत् तु न निवर्तते, तत्र रषृवर्गादित्यस्य भाव एव णत्वस्य भावो न त्वभावे, निमित्तिनः पुनर्नस्याभाव एव भाव इति रषृवर्गादित्युक्तमेव निमित्तश्रुत्या प्रतिपद्येत न न इत्युक्तमिति पृथग्निमित्त्युपादानम् । निमित्तानां बहुत्वान्निमित्तिनश्चैकत्वाद् बहूनां द्वन्द्वे बहुवचनं प्राप्नोति तथापि बहूनामपि निमित्तानां निमित्तत्वमात्रसामान्यविवक्षयाऽवान्तरभेदत्यागेन सूत्रे एकत्वेन निर्देशाद् रादिनिमित्तं च निमित्ती चेति द्वन्द्वे पश्चाद् भेदविवक्षा । प्रसज्यप्रतिषेधादितरैर्व्यवधानेऽपि भवत्यत आह- **शेषे**त्यादि । तरतेः कर्मणि क्ते इरादेशे दीर्घत्वे " रदाद्० " [ ४. २. ६९. ] इति तस्य नत्वेऽनेन णत्वे तस्य द्वित्वे- **तीर्ण्णम्**, " संख्यानाम्० " [ १. ४. ३३. ] इति नामादेशे पूर्ववत् **चतुर्ण्णाम्**, आदेशा-ऽनादेशरूपद्वयपरिग्रहार्थमुदाहरणद्वयोपादानम् । " पुषश् पुष्टौ " **पुष्णाति**, अत्र " तवर्गस्य० " [ १. ३. ६०. ] इत्यनेनैव णत्वे सिद्धे षकारग्रहणं कृषणमित्यादौ व्यवहितार्थं, सति तु षग्रहणे परत्वादनेनैव णत्वम् । कृतिः- **करणमि**त्यादौ क्रमेणाकारादिव्यवधाने णत्वं दर्शयति । [ **बृंहणम्** ] " बृहु शब्दे च " इत्युदितो नागमेऽनटि " शिड्हे० " [ १. ३. ४०. ] इत्यनुस्वारे ऋकारस्यैकव्यवधानासम्भवादनेकव्यवधाने, एव**मर्केणे**त्यादौ, सर्वत्र तृतीयाया इनादेशः, अर्तेः " स्था-ऽर्ति० " [ उणा० १०९. ] इति घे- अर्घः, अर्हत्यनेनेति व्यञ्जनाद् घञि न्यङ्क्वादित्वाद् घे वा; " दृपौच् " [ हर्ष-मोहनयोः " इत्यतो ] घञि दर्पः; दृशो [ " दृश् विदारणे " इत्यतो ] " गृदृ-रमि० " [ उणा० ३२७. ] इति भे- दर्भः । **रषृवर्णे**ति- अथ ऋवर्णग्रहणं किमर्थम् ? योऽसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति, तथाहि- येषां दर्शनमर्धमात्राकालो रेफ ऋकारेऽस्तीति तन्मतेन यथा केवलस्याप्रयोगादास्तीर्णादिषु वर्णान्तरारोपाश्रयाद् रेफाणत्वं भवति, एवं मातृणामित्यादावपि भविष्यति; येषामपि दर्शनं मात्राचतुर्भागो रेफ ऋकार इति तन्मतेऽपि र-षाभ्यां रेफो गृह्यमाणस्तत्सवर्णत्वाद् भिन्नकालस्यापि ऋकारस्थस्य ग्राहक इति णत्वं सिद्ध्यति; यत्तूच्यते- रेफोष्मणां सवर्णा न सन्तीति तद् भिन्नस्थानास्यप्रयत्नवर्णान्तरापेक्षया; अथवा र-षाभ्यामिति रेफाकृतिर्निर्दिश्यत इति ऋकारस्थादपि रेफाणत्वं सिध्यतीति; अत्रोच्यते- नहि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते, तद्भिन्नत्वाद् वर्णबुद्धेरनुपादानात् द्रव्यवत्, तथाहि- मांसं न विक्रेयमिति सत्यपि निषेधे गावो विक्रियन्ते, तत्र मांसबुद्धेरभावात्, यदप्युक्तं- 'सवर्णत्वाद् रेफ ऋकारस्थं रेफं सावर्ण्याद् गृह्णाति, तदपि न- यतो नेदं परिभाषितमस्ति, न च ऋकारस्थस्य रेफस्य स्थान-प्रयत्नौ, सऋकारस्यैव स्थानप्रयत्नत्वाद्, तदसति सावर्ण्ये ऋस्थस्याग्राह्यत्वम्, यथा च नरसिंहावयवानां नरत्व-सिंहत्वयोगाभावात् पुरुष-मृगराजाभ्यामेकाकृतियोगाभावः, एवं वर्ण-वर्णैकदेशयोरपीति । अत प्रक्लृप्यमानमित्यवयवलकारव्यवधाने णत्वाभावदर्शनाद् ग्रहणपक्ष आश्रीयते, इह समुदायस्य कार्येषु व्यापारे अवयवस्य स्वनिमित्ते कार्ये मा भूद् व्यापारः, यथा- अग्ने इन्द्र इत्यादावेकारोऽयादेशं प्रतिपद्यते, न तु तदवयव इकारः समानदीर्घत्वम्, इह तु मातृणामिति समुदायस्य न क्वचिद् विधौ निषेधे वा व्यापार इत्यवयवः स्वाश्रयकार्यं प्रति कस्मान्निमित्तत्वं न प्रतिपद्यते, भेदेन चान्यत्रोपलम्भाद् रेफस्य; एवमपि न सिध्यति- रेफरूपपरेणेकारभागेन व्यवधानात्, इकारभागं च व्यवधायकमिच्छन्ति, वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ये व्यवपृक्ता अपि वर्णा भवन्ति, यच्चात्र रेफाद् भक्तेः परमिकारं, न तत् किञ्चिदपि व्यवपृक्तं दृश्यते, मात्रार्धार्धस्य पृथग्भावादिति ऋवर्णग्रहणम् । अथाचार्यप्रवृत्तेर्भविष्यति, यदयं क्षुभ्नादिषु नृनमनशब्दं पठति, इदं ज्ञापकम् ' ऋकारादपि नो णो भवति ' इत्यनुमापयति । अथवा वर्णैकदेशोऽपि रेफो गृह्यते, रेफाकृतिर्वा निर्दिश्यते, न तु वर्णात्मिकैव रेफव्यक्तिः, भक्तिव्यवधानेऽपि वा णत्वं भवतीत्यनुमीयते, आकृतेश्च साक्षादमूर्तत्वादवधिभावाभावात् तदालिङ्गिता व्यक्तिर्वर्णात्मिका इतरा चावधिभावेन ग्रहीष्यते, इतरा च ऋकारादपोद्धर्तुं न शक्यत इति सामर्थ्यादकार एव तद्द्वारेणावधिभावेन ग्रहीष्यते, नैवम्- वृद्ध्यर्थं नृनमनशब्दोपादानं स्यात्- नार्नमनिरिति; यत् तर्हि तृप्नोतिशब्दं पठति, ऋकारोपलक्षणं तत् स्यात्- नृणामिति, दैर्घ्यान्न स्यान्नॄणामिति ऋवर्णग्रहणम् । " वीप्सायाम् " [ ७. ४. ८०. ] इति द्वित्वे- **नृभिर्नृभिरि**त्यादि द्विःप्रयोगो द्विर्वचनमित्याश्रयणाद् भिन्नपदत्वमिति । **पद इत्येवे**त्यादि- अन्यथा पद इत्युपादानेऽपि अपदस्थयोर्निमित्तनिमित्तिनोरसंभवात् सामर्थ्यादेकत्वसंख्याविवक्षया एकत्वे लब्धेऽग्निर्नयतीत्यादौ भिन्नपदस्थितयोर्निमित्त-निमित्तिनोः प्रतिषेधस्य सिद्धत्वात्, समासे त्वेकविभक्तित्वादैकपद्यमन्त्यविभक्त्यपेक्षयाऽनैकपद्यमपि । [ **चर्मनासिकः, मेषनासिकः** ] " णसि कौटिल्ये " नसत इति नासिका, चर्मविकारो नासिका यस्येति मेषवन्नासिका यस्येति " गोश्चा० " [ २. ४. ९६. ] इति ह्रस्वः । [ **विरलेने**त्यादि- ] विपूर्वाद् रमेः " मुरलोरल० " [ उणा० ४७४. ] इति डित्यले- विरलः, अर्च्यते मूर्च्छ्यते अर्ज्यते झर्यते इत्यनट्, " कृत् विक्षेपे " " तॄ-कॄ० " [ उणा० १५१. ] इति कीटे- किरीटः, कर्मणि घटते- कर्मठः " तत्र

घटते कर्मणष्ठः " [ ७१. १३७. ] इति ठः, " मृड्श् सुखने ', " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– मृडः, दृहे-र्दृंहेर्वा क्तप्रत्यये " बलिस्थूल० " [ ४. ४. ६८. ] इति इड्-निषेधादौ दृढः, क्रमः " इणुर्विशावेणि० " [ उणा० १८२. ] इति णे– कर्णः, तरतेः " नी-नूरमि० " [ उणा० २२७. ] इति किति थे– तीर्थम्, नर्दः कुधेश्च घञि– नर्दः, क्रोधः, " अशौटि व्याप्तौ " अतो " अशो रश्चादौ " [ उणा० २७०. ] इत्यने– रशना, " रसण् आस्वादनादौ " अतो " ष्वरसि० " [ उणा० २६९. ] इत्यने– रसना । ननु क्रियमाणेऽपि प्रतिषेधेऽलचटतेति प्रतिषेधारम्भादन्यव्यवायस्येष्टत्वात् तद्विषये तु " पञ्चम्या निर्दिष्टे परस्य " [ ७. ४. १०४. ] इति परिभाषाया निर्दिष्टाऽविकलाया उपस्थानाद् यत्र लकारादिव्यवायोऽन्यव्यवायश्च तत्रापि णत्वप्रसङ्गात् प्रतिषेधो वक्तव्यः, आदर्शेन न वक्तव्यः, लकारादिव्यवायात् प्रसज्याश्रयणात् " पञ्चम्या० " [ ७. ४. १०४. ] इति परिभाषोपस्थानाद् व्यवाये णत्वाप्रसङ्गादयं प्रतिषेध आरभ्यमाणः स्वरादिव्यवाय एव णत्वमभ्यनुजानाति, न लचटादिव्यवाये, तस्य निर्दिष्टग्रहणेन निवर्त्तितत्वात् । किञ्च सामर्थ्येनापि प्रसज्यवृत्तित्वं शक्यते प्रतिपादयितुं, यदि यत्र लकारादिनाऽन्येन च व्यवायस्तत्रापि स्याण्णत्वं तदा स्वरादिव्यवायमन्तरेण लकारादिना केवलेन व्यवायासम्भवादन्तरेपीत्येवं ब्रूयात्, तस्माल्लकारादिग्रहणं नियमार्थम्– लकारादिव्यवाये न भवति; न च यत्रानिष्टैरेव व्यवायस्तदर्थं भविष्यति– मृत्स्ना, कृत्स्नेसीति वाच्यम्, यतो यद्येतावदेव प्रयोजनं स्यात् शसान्तरे नेत्येवं ब्रूयात्, अस्मादेव निषेधादन्यव्यवाये णत्वमनुमास्यते, अलब्धेऽपि प्रतिषेधेन विधानं– स्वरादिव्यवाये एकेन द्व्यादिभिर्वा विध्यर्थम्, अन्यथा निंस्स इति षत्ववदनेकव्यवाये न स्यात्, प्रतिषेधस्तु यथा गर्गैर्न भोक्तव्यं, प्रत्येकं समुदितैश्च न भुज्यते, एवमिहाप्येकेन द्वाभ्यां बहुभिश्च व्यवाये प्रतिषेधः । विधिसूत्रमिदम्, इतश्चैकपदवर्जेनाणत्वविधिरुत्तरेषु योगेषु यथासम्भवं चतुष्टयमनुवर्त्तते, अधिकमनुक्तं तत्र कियत्त इत्यर्थः । अत्राह– **अधिकारश्चायमि**ति । ॥ छ ॥ २. ३. ६३. ॥

**न्या० स०**—रषृवर्णा० । ननु ऋवर्णग्रहणं किमर्थम्? यत ऋवर्णादपि तन्मध्यव्यवस्थितरेफाश्रयं णत्वं भविष्यति, अत एव पाणिनिनापि रषाभ्यामित्येवोक्तम्, उच्यते– नहि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते तद्भिन्नत्वाद् वर्णबुद्धेरनुपादानाद्, तथाहि– मांसं न विक्रेयमिति सत्यपि निषेधे गावो विक्रियन्ते, तत्र मांसबुद्धेरभावात् । **शेषवर्णव्यवधानेऽपी**ति– प्रसज्यप्रतिषेधादितरैर्व्यवधानेऽपि भवति । क्षुभ्नातीति– अत्र " तवर्गस्य० " [ १. ३. ६०. ] इत्यनेनैव णत्वे सिद्धे षकारग्रहणं कषणमित्यादौ व्यवहितार्थं, तदर्थं च सद् परत्वात् " तवर्गस्य० " [ १. ३. ३०. ] इति बाधित्वा णत्वं प्रवर्तयति । **नृभिर्नृभिरि**ति– द्विःप्रयोगो द्विर्वचनमित्याश्रयणाद् भिन्नपदत्वमित्यर्थः । **विरलेने**ति विपूर्वाद्रमेः " मुरल० " [ उणा० ४७४. ] इति निपातनाद् डित्यले । **ऋषीणामि**त्यादौ दीर्घरूपे स्यादिविधौ कर्त्तव्ये पूर्वकृतमपि णत्वमसिद्धं भवति ॥ २. ३. ६३. ॥

## पूर्वपदस्थान्नाम्न्यगः । २ । ३ । ६४ ॥

**त० प्र०**—पूर्वपदस्थाद् रषृवर्णादगकारान्तात् परस्य सामर्थ्यादुत्तरपदस्थस्य नकारस्य णकार आदेशो भवति, नाम्नि– संज्ञायां विषये । द्रुणसः, खुरणसः, खरणाः, खुरणाः, शूर्पणखा, चन्द्रणखा, वार्ध्रीणसः, हरिवाहणः, नरवाहणः, पुष्पणन्दी, श्रीणन्दी स्त्री । नाम्नीति किम्? मेषनासिकः, चर्मनासिकः । अग इति किम्? ऋगयनम् । एकस्मिन्नेव पदे इति पूर्वसूत्रे विज्ञानादुत्तरपदस्थस्य समासे न प्राप्नोतीति वचनम् । खरपस्यापत्यं खारपायणः, मातृभोगाय हितो मातृभोगीणः । गर्गभगोऽस्या अस्तीति गर्गभगिणीत्यादौ तु उत्तरपदसंबन्धी नकारो न भवतीति एकपदत्वात् पूर्वेणैव णत्वं भवति, यदा तु गर्गाणां भगिनीति विग्रहस्तदैकपदत्वाभावाद् गर्गभगिनीत्येव भवति । कथं 'देवदारुवनम्, कुबेरवनम्, मनोहरवनम्, प्रभङ्करवनम्', इत्यादिसंज्ञायां णत्वं न भवति? उच्यते– " कोटर-मिश्रक-सिध्रक-पुरग-सारिकस्य वणे " [ ३. २. ७६. ] इति णत्वनिपातनस्य नियमार्थत्वेन व्याख्यास्यमानत्वात् संज्ञायां कोटरादिभ्य एव वनशब्दस्य णत्वं भवति नान्येभ्य इति ॥ ६४ ॥

**श० न्या०**—पूर्व० । पूर्वपदशब्दः समासे यत् पूर्वं पदं तत्र रूढ इह गृह्यते, तत्र तिष्ठति " स्था-पा-स्ना० " [ ५. १. १४२. ] इति के रषृवर्णादित्यस्य समानाधिकरणं विशेषणमत आह– **पूर्वपदस्थादि**त्यादि । रूढेन च पूर्वशब्देनोत्तरपदमाक्षिप्यते, तदन्तरेण तस्यासम्भवात्, तच्च नकारस्य विशेषणमत आह– **सामर्थ्यादि**त्यादि । ननूत्तरपदग्रहणमन्तरेणोत्तरपदस्थस्येति कथं लभ्यते? तस्मात् पूर्वपदस्थान्निमित्तात् परस्य नकारस्य संज्ञायामेव णत्वमिति नियमात् पदसंज्ञायां तद्धितपूर्वपदस्थस्यापि णत्वं न प्राप्नोति– खरपस्यापत्यं नडाद्यायनणि– खारपायणः, करणं प्रियं यस्य स करणप्रिय इत्युत्तरपदग्रहणं कर्त्तव्यम्, न कर्तव्यम्, पूर्वपदमुत्तरपदमिति सम्बन्धिशब्दावेतौ, तत्र यथोत्तरपदं सम्बन्धिशब्दत्वात् पूर्वपद-

माक्षिपति– " अलनुत्तरपदे० " [ ] इत्यादौ, तथेहोपादीयमानं पूर्वपदं सम्बन्धिशब्दत्वादुत्तरपदमाक्षिपति, यथा लोके– मातरि वर्त्तितव्यं, पितरि शुश्रुषितव्यमित्युक्ते यद्यपि स्वस्यां स्वस्मिन्निति च नोच्यते तथापि सम्बन्धात् [ सम्बन्धिशब्दत्वात् ] स्वं [ यं ] प्रति या माता यं [ स्वं ] प्रति यः पितेति गम्यते, एवमिहापि यद्युत्तरपदस्थस्येति नोच्यते तथापि सम्बन्धादेतद् गन्तव्यम्– यत् प्रति पूर्वपदं तत्स्थस्यैव नकारस्यासंज्ञायां व्यावृत्तिः क्रियते, न तद्धितस्य नापि पूर्वपदस्थस्येति खारयायणादौ पूर्वेणैकपदाश्रयणं णत्वं भवत्येव । " द्रुं गतौ " " द्यु-द्रुभ्याम् " [ उणा० ७४४. ] इति डित्युप्रत्यये द्रुः, द्रुरिव नासिका यस्य " अस्थूलाच्च० " [ ७. ३. १६१. ] इति नसादेशोऽनेन णत्वे– **द्रुणसः**, अत्र चावयवाश्रयणं व्युत्पत्तये न व्यवहारार्थम्, तेनासत्यप्यवयवार्थे यत्रायं रूढः सोऽनेनाभिधीयते, सत्यप्यवयवार्थे यत्र न रूढः स नाभिधीयते, एवमन्यत्रापि संज्ञाशब्देषु द्रष्टव्यम् । खनेः " जठरक्रकर० " [ उणा० ४०३. ] इति डित्यरे खशब्दान्मध्वादित्वान्मत्वर्थीये रे वा– खरः, " खुरत् छेदने " " खुरक्षुर० " [ उणा० ३९६. ] इति निपातनात् खुरः, खरवत् खुरवन्नासिका यस्येति पूर्ववन्नसादेशे " खरखुराद्० " [ ७. ३. १६०. ] इति नसित्यादेशे– **खरणस** इत्यादि । शृणातेः " कॄ-शॄ-स्तम्भ ऊर्चान्तस्य " [ उणा० २९८. ] इति पे– शूर्पः, तद्वन्नखा यस्या इति " नख-मुखादनाम्नि " [ २. ४. ४०. ] इति संज्ञायां ङीनिषेधात् " आत् " [ २. ४. १८. ] इत्यापि– **शूर्पणखे**त्यादि । **[ वार्ध्रीणसः ]** " वृधेः भी-वृधि० " [ उणा० ३८७. ] इति रे– वर्ध्रः, वर्ध्रस्येयं वार्ध्री, सा नासिका यस्येति पूर्ववन्नसः, " तद्धितस्वर० " [ ३. २. ५५. ] इति पूर्ववन्निषेधः । हरिर्नरो वा वाहनं यस्य **हरिवाहन** इत्यादि । पुष्प्यतीत्यचि पुष्पम्, पुष्पाणि श्रियं च नन्दयतीति " कर्मणोऽण् " [ ५. १. ७२. ] इत्यणि अणन्तत्वात् ङ्यां– **पुष्पणन्दी, श्रीणन्दी** । **मेषे**ति– योगिकावेतौ, न संज्ञेति णत्वाभावः, अत एव च नसाभावोऽपि, अस्यापि नाम्नि विधानात् । अयतेऽनेनेत्ययनम्, ऋचामयनम्– **ऋगयनमि**ति– " कृति " [ ३. १. ७७. ] इति षष्ठीसमासः, " च-जः० " [ २. १. ८६. ] इति कत्वे " धुटः० " [ २. १. ७६. ] इति गत्वे गकारान्तं पूर्वपदमिति णत्वाभावः । ननु शिक्षादिष्वृगयनपाठादेव णत्वनिषेधो भविष्यति, किमग इत्यनेन ? सत्यम्– अबाधकान्यपि ज्ञापकानि भवन्ति, तदग इति यदि नोच्यते तदा कदाचिदृगयनमित्यत्र णत्वमपि स्यात्, इत्यग इति प्रतिषेधः । ननु समासेऽन्तर्विभक्त्यपेक्षया पृथक् पदत्वेऽपि समासाद् या विभक्तिस्तदपेक्षया एकपदत्वात् पूर्वेणैव णत्वं सिद्धं किमनेनेत्याह– **एकस्मिन्नेवे**त्यादि– समासे कृते यद्यप्येकं पदं भवति तथाप्येकमेव यन्नित्यं, समासे तु पूर्वोत्तरपदविभागापेक्षायां भिन्नपदत्वमप्यस्तीति पूर्वेण णत्वाप्रसङ्गाद् विध्यर्थमिदं सूत्रमारम्भणीयमिति भावः । **खरपस्ये**त्यादि व्याख्यातप्रायम् । " भोगोत्तरपद० " [ ७. १. ४०. ] इतीने– **मातृभोगीणः** । **[ गर्गभगिणी ]** गृणातेः " गम्यमि० " [ उणा० ९२. ] इति गे– गर्गः, भज्यतेऽनेनेति " गोचर-संचर० " [ ५. ३. १३१. ] इति घे– भगः, गर्गाणां भगः सोऽस्यास्तीति " अतोऽनेक० " [ ७. २. ६. ] इति इन् । अथ खारपायण इत्यत्र कथं णत्वम्, यतः खरशब्दस्यापि पदत्वमस्तीति तत्स्थत्वाद् रेफस्यैकं पदमेव नास्ति, अत्राहुः– यत्र द्वावपि निमित्त-निमित्तिनावेकपदत्वं व्यभिचरतस्तत्र णत्वाभावः, इह तु रेफस्य व्यभिचारेऽपि नकारस्यैकपदस्थत्वाव्यभिचाराण्णत्वं प्रवर्त्तत एव, **यदा त्वि**ति– भिन्नपदस्थत्वान्निमित्त-निमित्तिनोरिति भावः । **कथमि**त्यादि गतार्थम् । **[ देवदारुवनमित्यादि– ]** दृणातेः " कृ-वा-पा-जि० " [ उणाः १. ] इत्युणि– दारु, देवप्रियं दारु– देवदारु, कौतेः " कु-गु-पति० " [ उणा० ४३१. ] इति केरप्रत्यये– कुबेरः, वातेः " विदन-गगन० " [ उणा० २७५. ] इति कित्यने– वनम्, तयोर्वनेन षष्ठीसमासः, संज्ञे एते वनविशेषस्य, प्रभां करोतीति टे पृषोदरादित्वाद्ध्रस्वे मागमे च– प्रभङ्करः । **[ कोटरे**त्यादि– **]** " कुटत् कौटिल्ये " " ऋच्छि-चटि-वटि-कुटि० " [ उणा० ३९७. ] इत्यरे बाहुलकाद् गुणे– कोटरः, " मिश्रण् संपर्चने " मिश्रयतीति णके– मिश्रकः, सिध्यतेः सेधतेर्वा " ऋज्यजि-तञ्चि० " [ उणा० ३८८. ] इति किति रे– सिध्रः, तथा यावादित्वात् स्वार्थिकेऽज्ञाताद्यर्थविवक्षायां वा के– सिध्रकः, पुरं गच्छतीति " नाम्नो गमः० " [ ५. १. १३१. ] इति डे– पुरगः, शृणातेः " कृ-शॄ-कुटि० " [ उणा० ६१८. ] इति णिदिप्रत्यये– शारिः, स्वार्थिके के शारिं कायतीति वा शारिका, अत एव पूर्वे शिरः शकुनाविनि– शारिः, शारिं कायति डे आपि च– शारिका ॥ छ ॥ २. ३. ६४. ॥

---

**न्या० स०—पूर्वपदस्था०** । **सामर्थ्यादि**ति– अयमर्थः– रूढेन पूर्वपदमाक्षिप्यते तदन्तरेण तस्यासम्भवात्, तच्च नकारस्य विशेषणम् । **पुष्पणन्दी**ति– " पुष्पच् " पुष्प्यन्तीति अचि– पुष्पाणि२ नन्दयति अण् ङीः– पुष्पणन्दी आचार्यः, वत्स-ऋषभ-कार्पटैर्निश्चिक्ये, दिगम्बरेण तु योपान्त्यः, स च न शिष्टसम्मतः । वार्ध्रीणसः वर्ध्रस्येयं " तस्येदम् " [ ६. ३. १६०. ] अण्

ङीः “ तद्धितस्वरे० ” [ २. ४. ९२. ] इति पुंवन्निषेधः । **ऋगयनमिति**– शिक्षादिषु ऋगयनपाठादेव णत्वनिषेधे सिद्धे किमग्रहणेन ? सत्यम्– अबाधकान्यपि ज्ञापकानि भवन्ति । **उत्तरपदसम्बन्धी नकारो न भवतीति**– “ प्रत्ययः प्रकृत्यादेः ” [ ७. ४. ११५.] इति न्यायात् । **पूर्वेणैव णत्वमिति**– ननु पूर्वेणापि कथम् ? यतः खरपशब्दस्यान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वमस्ति, तत्स्थत्वाद् रेफस्य चैकपदत्वाभावादिति, अत्रोच्यते– यत्र द्वावपि निमित्तनिमित्तिनावेकपदत्वं व्यभिचरतस्तत्र णत्वाभावः इह तु रेफस्य व्यभिचारेऽपि नकारस्य एकपदस्थत्वाव्यभिचारः, यद्वा सित्येवेति नियमेन आयनण्प्रत्यये खरपशब्दस्य पदत्वस्य निरस्तत्वात् पूर्वेणैव भवत्येव । **मनोहरा वृक्षविशेषाः** । **प्रभङ्करेति**– प्रभां करोति “ सङ्ख्याहर्दिवा० ” [ ५. १. १०२. ] इति टे “ नवा खित्कृदन्ते० ” [ ३. २. ११७. ] इति पृथग्योगाद्ध्रस्वत्वे मोऽन्तः । **कोटरमिश्रकेत्यादि**– कुटत् “ ऋच्छि-चटि० ” [ उणा० ३९७. ] इत्यरे बाहुलकाद् गुणे, मिश्रण् णके, सिध्यतेः सेधतेर्वा “ऋज्यजि०” [ उणादि० ३८८. ] इति रे यावादित्वात् स्वार्थिके कुत्सितादौ वा । पुरं गच्छतीति “ नाम्नो गमः० ” [ ५. १. १३१. ] इति । शृणातेः “ कृशृकुटि० ” [ उणादि०६१९. ] इति णिदि प्रत्यये– शारिः, स्वार्थिके के शारिं कायतीति वा ॥ २. ३. ६४.]

## नसस्य । २ । ३ । ६५ ॥

**त० प्र०—पूर्वपदस्थाद् रषृवर्णात् परस्य नसशब्दसंबन्धिनो नकारस्य णो भवति । प्रगता प्रवृद्धा वा नासिका यस्य स प्रणसः, एवं निर्णसः; प्रणसं मुखं, निर्णसं मुखम् ॥६५॥**

**श० न्या०—नस०** । “ उपसर्गात्० ” [ ७. ३. १६२. ] इति विहितस्य नसादेशस्य नसेत्यनुकरणम् ॥ छ. ॥ २. ३. ६५. ॥

**न्या० स०—पूर्वे०** [नात्र व्याख्यातम्] ॥ २. ३. ६५. ॥

## निष्प्रा-ऽग्रे-ऽन्तः-खदिर-कार्श्या-ऽम्र-शरेक्षु-प्लक्ष-पीयुक्षाभ्यो वनस्य । २ । ३ । ६६ ॥

**त० प्र०—निरादिभ्यः परस्य वनशब्दनकारस्य णकार आदेशो भवति । बहुवचनं व्याप्त्यर्थम्, तेन संज्ञायामसंज्ञायां च भवति; अन्यथा हि “कोटरमिश्रकसिध्रक०” [ ३. २. ७६. ] इत्यादिवक्ष्यमाणनियमबलेन संज्ञायां न स्यात् । निर्वणम्, प्रवणम्, अग्रेवणम्, “ पारेमध्येऽग्रेऽन्तः षष्ठ्या वा ” [ ३. १. ३०. ] इत्यव्ययीभावः, तत्संनियोगे च पूर्वपदस्यैत्वम्; अन्तर्वणम्, खदिरवणम्, कार्श्यवणम्, वचनसामर्थ्यात् शकारव्यवधानेऽपि भवति; आम्रवणम्, शरवणम्, इक्षुवणम्, प्लक्षवणम्, पीयुक्षावणम्, पीयुक्षाशब्दोऽव्युत्पन्न आबन्तः ॥ ६६ ॥**

**श० न्या०—निष्प्रा०** । निरादीनि नामानुकरणानि, पीयुक्षाशब्द आबन्तानुकरणम्, एषामितरेतरयोगद्वन्द्वादर्थवशाद् विभक्तिपरिणामेन प्रथमानिवृत्तौ पञ्चम्युपपत्तिः, निष्प्राग्रेन्तरो नौषधिवचना नापि वृक्षवचनाः, तेभ्यः संज्ञायां कोटरादिनियमेन व्यावर्तितत्वादप्राप्तं णत्वं विधीयते, असंज्ञायामप्येकपदत्वाभावादप्राप्तमेव, इक्षु-शरशब्दावोषधिवचनौ, शेषा वृक्षवचनाः, तेषां यद्युत्तरसूत्रे नाम्नीति नाधिक्रियते तदा संज्ञायां कोटरादिनियमेन णत्वस्य व्यावर्तितत्वादुत्तरेणाप्राप्ते विध्यर्थं, यदा तु बहुवचनालिङ्गितं नाम्नीत्यधिक्रियते तदा संज्ञायां कोटरादिनियमस्यापवादत्वेन बाधितत्वादुभयत्रोत्तरेण विकल्पे प्राप्ते नित्यार्थम् । नाम्नीत्यधिकृतत्वादनाम्नि न प्राप्नोतीति बहुवचनमत आह– **बहुवचनमित्यादि**– गतार्थम् । [ **निर्वणम्, प्रवणम्,** ] निर्गतं निकृष्टं वा प्रगतं प्रकृष्टं वा वनं प्रादिसमासौ, वनस्यान्तः– **अन्तर्वणम्** । [ **खदिरवणमित्यादि**– खदेः “ मदि-मन्दि-चन्दि० ” [ उणा० ४१२. ] इति इरे– खदिरः; कार्श्यशब्दो वृक्षविशेषवाची अव्युत्पन्नः, अथवा कृशयतेः “ नाम्युपान्त्य० ” [ ५. १. ५४. ] इति के ष्यणि धर्म-धर्मिणोरभेदोपचारात् कार्श्यगुणयुक्तो वृक्षोऽपि कार्श्यः; अमेः “ चि-जि० ” [ उणा० ३९२. ] इति रे दीर्घत्वे च– आम्रः; शीर्यतेऽनेनेति “ पुन्नाम्नि० ” [ ५. ३. १३०. ] इति घे– शरः । [ “ इषश् आभीक्ष्ण्ये ” इत्यतः ] “ मस्जी-ष्यशिभ्यः० ” [ उणा० ८२६. इति ] सुकि– इक्षुः; [ प्लुषू दाहे ” इत्यतः ] “ प्लुषेः प्लष् च ” [ उणा० ५६६. ] इति– से– प्लक्षः; पीयुक्षेति ह्रस्वमध्योऽव्युत्पन्नः, “ लाक्षा-द्राक्षा० ” [ उणा० ५९७. ] इति निपातनाद् वा; एषां बहुवचनान्तानां वनशब्देन समासः, उत्तरपदार्थस्वरूपपर्यालोचनावशेन पूर्वपदार्थस्योपसर्जनस्यापि बहुत्वसंख्यावगतेः सामर्थ्याद् बहुवचनान्तानां समासप्रवृत्तिरविरुद्धा ॥ छ. ॥ २. ३. ६६. ॥

**न्या० स०—निष्प्राग्रे०** । निष्प्राग्रेन्तरो नौषधिवचना नापि वृक्षवचनाः, तेभ्यः संज्ञायां कोटरादिनियमेन व्यावर्तितत्वादप्राप्तं णत्वं विधीयते, असंज्ञायामप्येकपदत्वाभावादप्राप्तमेव । इक्षु-शरशब्दावौषधिवचनौ, शेषा वृक्षवचनास्तेषां संज्ञायां कोटरादिनियमेन णत्वस्य व्यावर्तितत्वादुत्तरेणाप्राप्ते विध्यर्थमसंज्ञायां तूत्तरेण विकल्पे प्राप्ते नित्यार्थम् । **कार्श्यवणमिति**– कार्श्यशब्दो वृक्षविशेषवाची

अव्युत्पन्नोऽथवा कृश्यतेः "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के रूपणि धर्म-धर्मिणोरभेदोपचारात् कार्श्यगुणयुक्तो वृक्षोऽपि कार्श्यः । पीयुक्षेति– पीयुक्षाशब्दो द्राक्षापर्यायः, द्राक्षाविशेषो वा । "पीङ्च्" क्विपि पीः, पियं याति "पीमृग०" [उणा० ७४१.] इति किदुः, पीयुं क्षायति "आतो डो०" [ ५. १. ७६. ] इति डः ॥ २. ३. ६६. ॥

## द्वि-त्रिस्वरौषधि-वृक्षेभ्यो नवाऽनिरिकादिभ्यः । २ । ३ । ६७ ॥

**त० प्र०—** द्विस्वरेभ्यस्त्रिस्वरेभ्यश्च इरिकादिवर्जितेभ्य ओषधिवाचिभ्यो वृक्षवाचिभ्यश्च परस्य वनशब्दसंबन्धिनो नकारस्य णो वा भवति । ओषधिः– दूर्वावणम्, दूर्वावनम्; मूर्वावणम्, मूर्वावनम्; व्रीहिवणम्, व्रीहिवनम्; माषवणम्, माषवनम्; नीवारवणम्, नीवारवनम्; कोद्रववणम्, कोद्रववनम्; प्रियङ्गुवणम्, प्रियङ्गुवनम्; वृक्ष– शिग्रुवणम्, शिग्रुवनम्; दारुवणम्, दारुवनम्; करीरवणम्, करीरवनम्; शिरीषवणम्, शिरीषवनम्; बदरीवणम्, बदरीवनम्; प्रियङ्गुवणम्, प्रियङ्गुवनम् ।

"ओषध्यः फलपाकान्ता, लता गुल्माश्च वीरुधः ।
फली वनस्पतिर्ज्ञेयो, वृक्षाः पुष्पफलोपगाः ॥ १ ॥"

इति यद्यपि भेदोऽस्ति तथाप्यतिबहुत्वार्थबहुवचनबलाद् वृक्षग्रहणे वनस्पतीनामपि ग्रहणं भवति, अत एव च यथासंख्यमपि न भवति, तथा संज्ञायामसंज्ञायां च भवति । द्वि-त्रिस्वरेति किम् ? देवदारुवनम्, भद्रदारुवनम् । ओषधिवृक्षेभ्य इति किम् ? विदारीवम्, पितृवनम्, शिरीषाणामदूरभवो ग्रामोऽपि शिरीषास्तेषां वनं शिरीषवनम् । अनिरिकादिभ्य इति किम् ? इरिकावनम्, मिरिकावनम्, तिमिरवनम्, चीरिकावनम्, कर्मरिवनम्, क्षीरवनम्; हरिवनम् । इरिकादिराकृतिगणः । इरिकादिविशेषवर्जनाद् विशेषाणामेवेह विधिः, तेनेह न भवति– द्रुमवनम्, वृक्षवनम् ॥ ६७ ॥

**श० न्या०—** द्वि-त्रि० । द्वौ च त्रयश्च ते स्वरा येषां ते च ते ओषधिवृक्षाश्च, ततः पञ्चमीबहुवचनम् । दूर्वतीत्यचि "भ्वादेः०" [ २. १. ६३. ] इति दीर्घत्वे– दूर्वा; मूर्वाऽव्युत्पन्नो मूर्वेर्वाऽचि; [ "व्रीश् वरणे" इत्यतो ] "व्रियो हिक्" [ उणा० ७१०. ] इति हिकि– व्रीहिः; [ "मांक् माने" इत्यतो ] "वृ-कृ-तॄ-मीङ्-माभ्यः षः" [ उणा० ५४०. ] इति षे– माषः; "नेर्वुः" [ ५. ३. ७४. ] इति घञि "घञ्युपसर्गस्य०" [ ३. २. ८६. ] इति दीर्घत्वे– नीवाराः; केनउदकेन, उद्यन्ते– क्लिद्यन्त इति उन्देः "कैरव-भैरव०" [ उणा० ५१९. ] इति बहुवचनादवप्रत्यये रागमे च– कोद्रवाः; अन्ये तु– द्रवन्तीति द्रवाः, कौ द्रवाः– कुद्रवाः, "नाम्नि" [ ३. १. ९४. ] इति समासः; यद्वा द्रवणं द्रवः, कुत्सितो द्रवो येषां ते कुद्रवाः, इति कुद्रवशब्दोऽयमिति मन्यन्ते; तथा च सारस्वतादिदेशेष्वित्थमेव प्रसिद्धः, दारुशब्देन देवदारुरभिधीयते; "प्रीँगुश् तृप्ति-कान्त्योः" अस्मात् "प्री-कै-पै०" [ उणा० ७६१. ] इत्यङ्गुकि– प्रियङ्गुः– रालकः फलिनी चोभयत्रोदाहियते; "सिग्रु-गेरु-नमेर्वादयः" [ उणा० ८११. ] इति शिंगुटो ["शिंगट् निशाने" इत्यतो] रौ– शिग्रुः; किरतेः "कृ-शृ-पॄ-पूरः०" [ उणा० ४१८. ] इति ईरे– करीरः; [ "शृश् हिंसायाम्" इत्यतः ] "ऋजि-शृ-पृभ्य०" [ उणाः ५५४. इति ] किदितीषे– शिरीषः; बदतेः "ऋच्छि-चटि-वटि०" [ उणा० ३९३. ] इति अरे गौरादित्वात् ङ्यां–बदरी; एषां वनशब्देन षष्ठीसमासेऽनेन णत्वम् । फलमात्रसम्बन्धिनो वनस्पतेः पुष्पमात्रसम्बन्धिनश्चावकेशिन आपाततो भिन्नलक्षणत्वेऽपि वृक्षत्वमुपपादयन् यथासंख्यं च परिहरन् संज्ञायां नियमव्यावृत्तं णत्वमुपदर्शयति– **ओषध्य** इत्यादि– उष्यतेऽनेनेति "व्यञ्जनाद् घञ्" [ ५. ३. १३२. ] इति घञि– ओषः, ओषो धीयतेऽस्यामिति "व्याप्यादाधारे" [ ५. ३. ८८. ] इति कौ "इतोऽक्त्यर्थात्" [ २. ४. ३२. ] इति ङ्याम्– **ओषध्यः**, "उषेरधिः" [उणा० ६७५.] इति वा; फलस्य पाकेनान्तो– विनाशः शोषो यासां ताः **फलपाकान्ताः** ओषधयः– व्रीह्यादयो विज्ञेयाः, **लताः**– प्रतानवत्यो मालत्यादयः, **गुल्माः**– ह्रस्वस्कन्धास्तरवो बहुकाण्डपत्रवन्तो विज्ञेयाः, उभयमेतद् **वीरुतः**; उत्पलस्त्वेवं व्याचष्टे– लताः– गुल्माः, ताभ्यो विलक्षणा वीरुधः, ता ओषधय इति; पुष्पं विना फलमेव यस्य स प्लक्षादिः **फली वनस्पतिः**; पुष्पं च फलं च तदुपगच्छति "नाम्नो गमः०" [५. १. १३१.] इति डे– **पुष्पफलोपगा** इति; न चोभयमेव ये उपगच्छन्ति ते एव वृक्षाः, किं तर्हि ? येऽप्यन्यतरत्– पुष्पं फलं च वा उपगच्छन्ति तेऽपि वृक्षा एव, तत्र वेतसादयः पुष्पमेव, [ प्लक्षादयः फलमेव, ] आम्रादयस्तूभयमप्युपगच्छन्ति, तत्र वृक्षो वनस्पतित्वमवकेशित्वं च न व्यभिचरति, वनस्पतिरवकेशी च वृक्षत्वं व्यभिचरतः, अत एव च वनस्पत्यादिग्रहणमकृत्वा वृक्षग्रहणं कृतं, तदन्तर्गतत्वाद् वनस्पत्यादेरिति संज्ञायां विभाषायाः कोटरादिनियमेनापोदितत्वेऽपि परेऽसदिति नियमं प्रति विकल्पस्यासत्त्वेऽपि च बहुवचनस्य व्याप्त्यर्थत्वादसंज्ञावत् तत्रापि णत्वं सिद्धमिति, एतदर्थेन च बहुवचनेन वृक्षग्रहणे वनस्पतेर्ग्रहणं

सिद्धमपि मन्दमतिशङ्काव्युदासार्थमनूद्यते, यथासंख्याभावोऽप्यत एव । वीन् दारयतीत्य[ णि ] ङ्यां- विदारी, तस्या वनम्, पितुर्वनं- **पितृवनम् । शिरीषाणामिति-** ग्रामविशेषेऽपि रूढत्वाद् वृक्षवाचित्वाभावाण्णत्वाभावः । "इंण्क् गतौ" अतः "इण्-धाभ्यां वा" [ उणा० ३८९. ] इति किति रप्रत्यये- इरा, ततोऽल्पार्थे कपि आपि इत्वे च- इरिका, अव्युत्पन्नो वा; एवं तिरिकाशब्दोऽपि । तिम्यतेः "शुषीषि-बन्धि-रुधि०" [उणा० ४१६.] इति किति इरे- तिमिरः । चीति रिणाति "क्वचित्" [ ५. १. १७१. ] इति डे गौरादित्वाद् ङ्यां- चीरी, ततः स्वार्थिके के आपि "ङ्या-दीदूतः के" [ २. ४. १०४. ] इति ह्रस्वत्वे- चीरिका । करोतेः "कृगो मादिश्च" [ उणा० ४०७. ] इत्यारप्रत्यये मकारागमे च- कर्मारः । **इरिकादिविशेषवर्जनादि**ति- **अनिरिकादी**त्यत्र नञः पर्युदासत्वेन सदृशग्रहणादिरिकादि-विशेषसदृशान्यविशेषे एव विधिर्न सामान्य इत्यर्थः । **तेने**त्यनेन तत्फलमाह- द्रुमाणां वनं, वृक्षाणां वनमिति विग्रहः ......॥ छ ॥ २. ३. ६७. ॥

**न्या० स०—द्वि-त्रिस्वरौ०** । **कोद्रववणमिति-** केन-अम्भसा उद्यन्ते "कैरव०" [ उणा० ५१९. ] इति साधुः, केनोद्द्रवन्त्युच्छब्दायन्तेऽच्चि वा । **ओषध्यः फलपाकान्ता** इति- उष्यतेऽनेनेति "व्यञ्जनाद् घञ्" [ ५. ३. १३२. ] इति घञि- ओषः, ओषो धीयतेऽस्यामिति- ओषधिः "व्याप्यादाधारे" [ ५. ३. ८८. ] इति कौ "इतोऽक्त्यर्थात् [ २. ४. ३२. ] इति ङ्याम्- **ओषध्यः**, "उषेरधिः" [ उणा० ६७५. ] इति वा । फलस्य पाकेनान्तो विनाशः शोषो यासां ताः **फलपाकान्ताः**, **लताः** प्रतानवत्यो मालत्यादयः, लता वल्ली कर्कोट्यादिका । **गुल्माः** ह्रस्वस्कन्धास्तरवो बहुकाण्डपत्राः केतक्यादयः । एतल्लतागुल्मरूपं द्वयं **वीरुधः**; उत्पलस्त्वेवं व्याचष्टे- लता गुल्मास्तेभ्यो विलक्षणा वीरुधः । पुष्पं विना फलमेव यस्य स प्लक्षादिः **फली** । पुष्पं च फलं च उपगच्छन्ति- **पुष्पफलोपगाः** "नाम्नो गमः०" [ ५. १. १३१. ] इति डे **वृक्षाः** पुष्पफलोपगा इति । न चोभयमेव उपगच्छन्ति त एव वृक्षाः किं तर्हि ? येऽप्यन्यतरत् पुष्पं फलं वा उपगच्छन्ति तेऽपि वृक्षा एव, तत्र वेतसादयः पुष्पमेव, प्लक्षादयः फलमेव, आम्रादयस्तूभयमप्युपगच्छन्ति, तत्र वृक्षो वनस्पतित्वमवकेशित्वं च न व्यभिचरति । वनस्पतिरवकेशी तु वृक्षत्वं व्यभिचरतः, यतः फली वनस्पतिर्ज्ञेयः फलवन्ध्यस्त्ववकेशीति, अत एव च वनस्पत्यादिग्रहणमकृत्वा वृक्षग्रहणं कृतं तदन्तर्गतत्वाद् वनस्पतिस्यादेरिति । विदारी लताविशेषः ॥ २. ३. ६७. ॥

## गिरिनद्यादीनाम् । २ । ३ । ६८ ॥

**त० प्र०—गिरिनदीत्यादीनां नकारस्य वा णो भवति । गिरिणदी, गिरिनदी; गिरिणखः, गिरिनखः; गिरिणद्धः, गिरिनद्धः; गिरिणितम्बः, गिरिनितम्बः; वक्रणदी, वक्रनदी; वक्रणितम्बा, वक्रनितम्बा; चक्रणितम्बा, चक्रनितम्बा; माषोणः, माषोनः; तूर्यमाणः, तूर्यमानः; आर्गयणः, आर्गयनः;—ऋगयनं वेत्त्यधीते वेत्यण्, ऋगयनस्य व्याख्यानं तत्र भवो वा शिक्षादित्वादण् । बहुवचनाद् यथादर्शनमन्येऽपि भवन्ति ॥ ६८ ॥**

**श० न्या०—[ गिरि० ]** गिरि-नद्यादीनि नोत्तरपदानि किन्तु पूर्वोत्तरपदसमुदायाः, तत्सम्बन्धिनस्तदेकदेशनकारस्यायं णत्वविकल्प इत्याह- **गिरि-नदीत्यादीनां नकारस्ये**त्यादि । **गिरिणदी**ति- षष्ठीसमासः, एवं- **गिरिणख** इति । **गिरिणद्ध** इति- गिरिणा गिरौ वा नद्ध इति तत्पुरुषः । **गिरिणितम्ब** इति- अत्र षष्ठीतत्पुरुषः, नितम्ब इति "बलि-नितनिभ्यां बः" [ उणा० ३१७. इति बः, ] **वक्रणदी**ति- विशेषणसमासः । **वक्रणितम्बे**त्यन्यपदार्थः । एवं **चक्रणितम्बे**ति । **माषोण** इति- माषेणोन इति समासः । **तूर्यमाण** इति- तूर्यस्य मानमिव मानमस्य, तूर्यस्य मान इति वा समासः । **ऋगयनमि**त्यादिना **आर्गयण** इत्यस्य सिद्धिमाह । गिरि-नद्यादयः प्रयोगतोऽनुसर्तव्या इत्याह- **बहुवचनमि**त्यादि ॥ छ ॥ २. ३. ६८. ॥

**न्या० स०—गिरि न०** । **तूर्यमाण** इति- तूर्यं मानमस्येति वाक्ये निमित्त-निमित्तिनोरेकपदस्थत्वाभावादप्राप्ते विकल्पः, तूर्यतेस्त्वानशि श्ये मागमे च "रषृवर्णा०" [ २. ३. ६३. ] इति नित्यं प्राप्ते । **शिक्षादित्वादिति-** अन्यथा बहुस्वरत्वात् प्रायो बहुस्वरादिकण् स्यात् ॥ २. ३. ६८. ॥

## पानस्य भाव-करणे । २ । ३ । ६९ ॥

**त० प्र०—पूर्वपदस्थेभ्यो रषृवर्णेभ्य परस्य भावे करणे च यः पानशब्दस्तत्संबन्धिनो नकारस्य णो वा भवति । क्षीरपाणं, क्षीरपानं वर्तते; कषायपाणं, कषायपानं वर्तते; सौवीरपाणं, सौवीरपानं वर्तते । करणे- क्षीरपाणं, क्षीरपानं भाजनम्; कषायपाणः, कषायपानः कंसः । भावकरण इति किम् ? पीयतेऽस्मिन्निति पानः, क्षीरपानो घोषः ॥ ६९ ॥**

**श० न्या०—पान०** । **क्षीरपाण** इति- पीतिः पानम् "अनट्" [ ५. ३. १२४. ] इति भावेऽनट्, ततः क्षीरस्य पानमिति षष्ठीसमासः । **पीयतेऽस्मिन्नि**त्यनेनाधारेऽनट्

दर्शयति, तत्र च ' भावकरणे ' इति वचनाण्णत्वविकल्पो न भवति ॥ छ ॥ २. ३. ६९. ॥

**न्या० स०—पानस्य० । सौवीरपाणमिति–** सौवीरेषु प्रायो भवं बाहुलकादकर्ण बाधित्वा भवेऽण्, सुवीराणामिदं " तस्येदम् " [ ६. ३. १६०. ] इति वा सौवीरं काञ्जिकम् ॥ २. ३. ६९. ॥

## देशे । २ । ३ । ७० ॥

**त० प्र०—पूर्वपदस्थाद् रषृवर्णात् परस्य पानशब्दनकारस्य णो नित्यं भवति, देशे– समुदायेन चेद् देशो गम्यते; योगविभागाद् नवेति निवृत्तम् । पीयत इति पानम्, क्षीरं पानं येषां क्षीरपाणा उशीनराः,** सुरापाणाः प्राच्याः, **सौवीरपाणा वाहीकाः,** कषायपाणा गान्धारयः; तात्स्थ्यात् **मनुष्याभिधानेऽपि देशो गम्यते । देशे इति किम् ? दाक्षीणां पानं दाक्षिपानम्, क्षीरपाना गोपालकाः ॥ ७० ॥**

**श० न्या०—देशे० ।** दिश्यत इति देशः । **समुदायेन चेदिति**–णत्वे सति पूर्वोत्तरपदेन स्वार्थमभिदधता तत्पृष्ठपातितया चेद् देशो गम्यते तदा णत्वं भवतीत्यर्थः । **योगविभागादिति**– वेत्यनुवृत्तौ " पानस्य भावकरणदेशे " इत्येक एव योगः क्रियेतेत्यर्थः । कर्मसाधनोऽत्र पानशब्द इति दर्शयति– **पीयते** इति । **क्षीरपाणा उशीनरा** इति– वष्टेः " पदि-पठि० " [ उणा० ६०७. ] इति इप्रत्यये बाहुलकात् किस्वे य्वृति– उशयः, तेषां नरः, बहुलवचनाद् दीर्घत्वे– उशीनरः, तस्यापत्यानि " राष्ट्र-क्षत्रियात् " [ ६. १. १२४. ] इति विहितस्य " बहुष्वस्त्रियाम् " [ ६. १. १२४. ] इति द्रेरञो लुप् । सुनोतेः " ऋज्यजि-तञ्चि० " [ उणा० ३८८. ] इति किति रेफे आपि च– सुरा, * आकृतिग्रहणा जातिः० * इतिवत् सामान्येन पानेत्यस्य संस्कारात् सुराशब्देन सामानाधिकरण्येऽपि स्त्रीत्वाभावात् सुरा पानं येषामिति विग्रहः । प्राचि भवाः " द्युप्रागपाक्० " [ ६. ३. ८. ] इति ये– प्राच्याः । अजतेः " ऋज्यजि० " [ उणा० ३८८ ] इति किति रेफे वीभावे च– वीरः, वीरयतेर्वाऽचि; शोभना वीरा यस्मात् तत् सुवीरम्, तस्येदं तत आगतं वा सौवीरम् । बहिर्जाताः " बहिषष्टीकण् च " [ ६. १. १६. ] इति टीकणि– बाहीकाः । कषतेः " कुलि-लुलि-कलि० " [ उणा० ३७२. ] इति काये– कषायः । गन्धमारातीति डे– गन्धारः, तस्यापत्यानीति " अत इञ् " [ ६. १. ३१. ] इतीञि– गान्धारयः । अतिशयोऽत्र प्रतीयते न तु क्षीरादिस्तात्स्थ्यात् पानसम्बन्धमात्रं तस्यान्यत्रापि भावात् । ननु क्षीरपाणादयः शब्दा मनुष्येषु वर्तन्ते, तत्सामानाधिकरण्यादुशीनरादयोऽपि तत्रैव, तत् कथमिह देशो गम्यत इत्याह– **तात्स्थ्यादित्यादि**– अयमर्थः– उशीनरादिदेशवासिनां तथाप्रतीतत्वादुशीनरादिदेशसम्बन्धद्वारायातत्वाच्च मनुष्येषूशीनराः, व्याख्याया देशावगतिः, उशीनरादयो हि शब्दाः संज्ञात्वेन पूर्वं देशेष्वेव प्रवृत्ताः, पश्चात् तु तत्स्थानसम्बन्धान्मनुष्येषु, तेन मनुष्याभिधानेऽपि देशाभिधानं गम्यते, यथा मञ्चाः क्रोशन्तीति मञ्चसम्बन्धद्वारेण मनुष्येष्वपि वर्तमानान्मञ्चशब्दान्मञ्चाभिधानं गम्यते, यदि हि मञ्चाभिधानं न गम्येत, मञ्चाधारविशिष्टाः पुरुषा न प्रतीयेरन्, नापि * गृहीतविशेषणा विशेष्ये बुद्धिः * इति न्यायादिति । **दाक्षिपानमिति** नात्र देश उच्यते इति देश इति वचनान्न भवति ॥ छ ॥ २. ३. ७०. ॥

**न्या० स०—देशे० । योगविभागादिति**– अन्यथा "पानस्य भावकरणदेशे " इति क्रियेत, तथाऽत्र कर्मसाधनपानशब्दो गृह्यते भावकरणप्रधानस्य तु पूर्वेण विकल्प एव । **उशीनरा** इति– उश्यत इति " रथादिभ्यः कः " [ ५. ३. ८२. ] वष्टीति क्विपि वा य्वृति गौरादिङ्याम्– उशी नगरी, तस्या नराः; यद्वा वष्टेः " पदि-पठि० " [ उणा० ६०७. ] इति इप्रत्यये बाहुलकात् किस्वे य्वृति– उशयः, तेषां नरः, बहुलवचनाद् दीर्घत्वे– उशीनरः, तस्यापत्यानि " राष्ट्रक्षत्रियात् " [ ६. १. ११४. ] इति विहितस्य " बहुष्वस्त्रियाम् [ ६. १. १२४. ] इति द्रेरञो लुप् । **सौवीरेति**– अजतेः " ऋज्यजि० " [ उणा० ३८८. ] इति किति रे " अघञ्क्य० " [ ४. ४. २. ] इति वीभावे च– वीरः, वीरयतेर्वाऽचि– वीरः, शोभना वीरा यस्मात् तत् सुवीरं, तस्येदं तत आगतं वा । **गान्धारयः** गन्धारस्यापत्यं वृद्धम् " अत इञ् " [ ६. १. ३१. ] गान्धारिः– राष्ट्रक्षत्रियसरूपः, ततो गान्धारीणां राजानः, गान्धारे राज्ञोऽपत्यानि वा " गान्धारिसाल्वेयाभ्याम् " [ ६. १. ११५. ] " यस्कोऽञ्या० " [ ६. १. १२६. ] इति " बहुष्वस्त्रियां " [ ६. १. १२४. ] लुप् । ननु क्षीरपाणादयः शब्दा मनुष्येषु वर्तन्ते, तत्सामानाधिकरण्यादुशीनरादयोऽपि तत्रैव तत् कथमिह देशो गम्यते इत्याह– **तात्स्थ्यादिति**– अयमर्थः– उशीनरादयो हि शब्दाः संज्ञात्वेन पूर्वं देशेष्वेव प्रवृत्ताः, पश्चात् तु तत्स्थानसंबन्धात् मनुष्येषु, तेन मनुष्याभिधानेऽपि देशाभिधानं गम्यते । **दाक्षीणां पानमिति**– अत्र कर्तरि षष्ठी ॥ २. ३. ७०. ॥

## ग्रामा-ऽग्रान्नियः । २ । ३ । ७१ ॥

**त० प्र०—ग्रामा-ऽग्राभ्यां परस्य नियो नकारस्य णो**

भवति । ग्रामणीः, अग्रणीः । ग्रामाग्रादिति किम्? खरनीः, मेषनीः ॥ ७१ ॥

**श० न्या०**—ग्राम० । **ग्रामणीः, अग्रणीः**, ग्रामं नयति, अग्रं नयतीति क्विप् " ङस्युक्तं कृता " [ ३. १. ४९. ] इति समासः ॥ छ ॥ २. ३. ७१. ॥

**न्या० स०**—ग्रामाग्रा० । ननु * गतिकारक० * इति न्यायाद् विभक्त्युत्पत्तेः प्रागेव समासे निमित्त-निमित्तिनोरेकपदस्थत्वात् "रषृवर्णा०" [ २. ३. ६३. ] इत्यनेनैव णत्वं सिद्धमेव किमनेनेति ? सत्यम्- नियमार्थं- यदि नियो णत्वं स्यात् तदा ग्रामाग्रादेव, तेन खरनी-मेषनीत्यादौ पूर्वेणापि न भवति ॥ २. ३. ७१ ॥

## वाह्याद् वाहनस्य । २ । ३ । ७२ ॥

**त० प्र०**—वोढव्यं वाह्यम्, तद्वाचिनो रेफादिमतः पूर्वपदात् परस्य वाहनशब्दसंबन्धिनो नकारस्य णो भवति । उह्यतेऽनेनेति वहनम्, प्रज्ञादित्वात् स्वार्थिकोऽण्, अतो वा निपातनादुपान्त्यदीर्घत्वम्; इक्षुवाहणम्, शरवाहणम् । वाह्यादिति किम्? सुरवाहनम्, संबन्धमात्रमत्र विवक्षितम्; नरवाहनः, नात्र वाह्यात् परं वाहनम्, किं तर्हि? वाहनात् ॥ ७२ ॥

**श० न्या०**—वाह्या० । वहेरर्हेऽर्थे ध्यणि- वाह्यं वहनार्हमिक्ष्वादि, तेन यदापि वाहने वहनार्थमिक्ष्वादिवाह्यं नारोपितं भवति, तदर्थं तु केवलमुपकल्पितं भूतलस्थं, तदापि भवत्येव । वाहनं- शकटादि, **इक्षुवाहणमिति**- इक्षूणां वाहनमिति विग्रहः, एवं- **शरवाहणमिति** । **सुरवाहनमिति**- स्वस्वामिभावलक्षणे सम्बन्धेऽत्र षष्ठी, न तु वहनक्रियापूर्वके कर्मकरणसम्बन्धे, यदा तु सुरा अपि वाह्यत्वेन विवक्ष्यन्ते तदा णत्वं भवत्येव, नरा वाहनमस्य- **नरवाहनमिति**- अत्र नरा वाहनत्वेन विवक्षिता इति न वाह्यात् परत्वमिति दर्शयति ॥ छ ॥ ॥ २. ३. ७२. ॥

**न्या० स०**—वाह्याद् वा० । वोढव्यं वाह्यमिति- वहेरर्हेऽर्थे ध्यणि- वाह्यं वहनार्हमिक्ष्वादि, तेन यदापि वाहने वहनार्थमिक्ष्वादि वाह्यं नारोपितं भवति, तदर्थं तु केवलमुपकल्पितं भूतलस्थं तदापि भवत्येव । **सम्बन्धेति**- स्वस्वामिभावलक्षणेऽत्र षष्ठी न तु वहनक्रियापूर्वके कर्मकरणसम्बन्धे, यदा तु सुरा अपि वाह्यत्वेन विवक्ष्यन्ते तदा णत्वं भवत्येव । यदा तु नरवाहनशब्दः कुबेरवाचकस्तदा " पूर्वपदस्था० " [ २. ३. ६४. ] इति प्राप्तस्य णत्वस्य " क्षुभ्नादीनाम् " [ २. ३. ९६. ] इत्यनेन निषेधः, यदा तु यौगिको न संज्ञाशब्दस्तदा " पूर्वपदस्था० " [ २. ३. ६४. ] इति न णत्वं, यथात्र व्यावृत्त्युदाहरणे ॥ २. ३. ७२. ॥

## अतोऽह्नस्य । २ । ३ । ७३ ॥

**त० प्र०**—रेफादिमतोऽकारान्तात् पूर्वपदात् परस्याह्नशब्दसंबन्धिनो नकारस्य णो भवति । पूर्वाह्णः, अपराह्णः । अत इति किम्? निरह्नः, दुरह्नः । अह्न इत्यकारान्तनिर्देशादिह न भवति-दीर्घाह्नी शरत् ॥ ७३ ॥

**श० न्या०**—अतो० । अत इत्यनेन सन्निहितत्वात् पूर्वपदं विशिष्यते, न तु रषृवर्णादित्याह- **अकारान्तात् पूर्वपदादिति** । पूर्वमह्नः, अपरमह्नः " पूर्व-पराऽधर० " [ ३. १. ५२. ] इति समासे " सर्वांशसंख्या० " [ ७. ३. १०८. ] इत्यट्यह्नादेशेऽनेन णत्वे- **पूर्वाह्ण** इति । अह्नो निष्क्रान्तः प्रादिसमासे, निन्दितमह्नो " दुर्निन्दा० " [ ३. १. ४३. ] इति समासे पूर्ववदडादौ- **निरह्नः, दुरह्न** इति । दीर्घाण्यहानि यस्यामिति बहुव्रीहौ " अनो वा " [ २. ४. ११. ] इति ङ्याम् " अनोऽस्य " [ २. १. १०८. ] इत्यकारलोपेऽप्यह्न इति रूपाभावाण्णत्वाभावे- **दीर्घाह्नी शरद्** इति ॥ छ ॥ २. ३. ७३. ॥

**न्या० स०**—अतोऽह्नस्य० । दीर्घाह्नी शरदिति- दीर्घाह्नी दीर्घाहाः दीर्घाहा रूपत्रितयम् ॥ २. ३. ७३. ॥

## चतुस्त्रेर्हायनस्य वयसि । २ । ३ । ७४ ॥

**त० प्र०**—' चतुर् त्रि ' इत्येताभ्यां पूर्वपदाभ्यां परस्य हायनशब्दसंबन्धिनो नकारस्य वयसि गम्यमाने णो भवति । चतुर्हायणो वत्सः, चतुर्हायणी वडवा; त्रिहायणो वत्सः, त्रिहायणी वडवा । वयसीति किम्? चतुर्हायना, त्रिहायना शाला, ङीरपि वयस्येव भवति । चतुस्त्रेरिति किम्? सहस्रहायनः पुरुषः, लक्षहायनः पक्षी ॥ ७४ ॥

**श० न्या०**—चतु० । कालकृता प्राणिनां शरीरावस्था- वयः । **गम्यमान** इत्यनेन समुदायवाच्यतामस्यापोहति । **चतुर्हायणो वत्सः** चत्वारो हायनाः- संवत्सरा अस्येति बहुव्रीहिः, अत्र वत्सस्य वयो गम्यत इति णत्वम्; एवं- **चतुर्हायणी वडवेति**- " संख्यादेर्हायनाद्० " [ २. ४. ९. ] इति ङीः; एवं- **त्रिहायण** इत्यादि । **चतुर्हायना शालेति**- पूर्ववदत्र बहुव्रीहिः, वयसः प्राणिधर्मत्वात् शालायामभावाद् वयसीति वचनादत्र णत्वं ङीप्रत्ययश्च न भवति । **सहस्रहायनः पुरुष** इति... ॥ छ ॥ २. ३. ७४. ॥

**न्या० स०—चतु०** । [ नेह व्याख्यातम् ] ॥ २. ३. ७४. ॥

## वोत्तरपदान्तनस्यादेरयुव-पक्वा-ऽह्नः । २ । ३ । ७५ ॥

**त० प्र०**—पूर्वपदस्थाद् रषृवर्णात् परस्योत्तरपदान्तभूतस्य तथा नागमस्य स्यादेश्च नकारस्य णो वा भवति, न चेत् स नकारो युवन्-पक्वा-ऽहन्शब्दसंबन्धी भवति । उत्तरपदान्त— **व्रीहिवापिणौ, व्रीहिवापिनौ; माषवापिणौ, माषवापिनौ; व्रीहिवापिणी, व्रीहिवापिनी कुले; माषवापिणी, माषवापिनी कुले; व्रीहिवापिणः, व्रीहिवापिनः; माषवापिणः, माषवापिनः; व्रीहिवापीणि, व्रीहिवापीनि कुलानि; व्रीहिवापिणा, व्रीहिवापिना ।** न— **व्रीहिवापाणि, व्रीहिवापानि कुलानि; माषवापाणि, माषवापानि कुलानि;** " इवु व्याप्तौ " इत्यस्यानटि— **प्रेण्वनं, प्रेन्वनं;** " हिवु प्रीणने, पिवु सेचने " इत्यनयोः शतरि— **प्रहिण्वन्, प्रहिन्वन्; प्रपिण्वन्, प्रपिन्वन्;** हिवोरेव ह्यस्तन्यां— **प्राहिण्वन् प्राहिन्वन्;** बहुलवचनादनाम्नापि समासः, समासे हि पूर्वोत्तरपदव्यवहारः; पुरुषश्च वारि चेति **पुरुषवारिणी** इत्यत्र तु परमपि विकल्पं बाधित्वाऽन्तरङ्गत्वादेकपदाश्रितं "रषृवर्णात्०" [ २. ३. ६३. ] इत्यादिना नित्यमेव णत्वम् । स्यादि— **व्रीहिवापेण, व्रीहिवापेन; माषवापेण, माषवापेन; व्रीहिवापाणाम्, व्रीहिवापानाम्; माषवापाणाम्, माषवापानाम्;** व्रीहिवापान्, माषवापानित्यत्र तु अनन्त्यस्येत्यधिकाराद् न भवति । उत्तरपदेति किम् ? गर्गाणां भगः— गर्गभगः, सोऽस्या अस्तीति समासादिन्— गर्गभगिणी, अत्रोत्तरपदस्यान्तो नकारो न भवतीति विकल्पो न भवति, एकपदस्थत्वात् तु मातृभोगीण इत्यादिवन्नित्यमेव णत्वं भवति । अन्तादिग्रहणं किम् ? गर्गाणां भगिनी गर्गभगिनी, एवं दाक्षिभगिनी; अत्र न नकारोऽन्तः किन्तु ङीप्रत्ययः । यद्येवं माषवापिणी, माषवापिनीत्यत्र नकारस्योत्तरपदान्तत्वाभावात् विकल्पो न प्राप्नोति, उच्यते— ※ गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् प्रत्ययोत्पत्तेः ※ इति न्यायात् प्रागेव स्त्रीप्रत्ययादन्तरङ्गत्वादश्वक्रीतीत्यादावकारान्तेनेव क्रीतशब्देन नकारान्तेन वापिन्शब्देनोपपदसमासः पश्चात् स्त्रीप्रत्ययः, विभक्त्यन्तत्वाभावेऽपि च रूढत्वादुत्तरपदत्वम्, ततश्चोत्तरपदस्यान्तो नकार इति णत्वविकल्पो भवति । अयुवपक्वाह्न इति किम् ? **आर्ययूना, क्षत्रिययूना; प्रपक्वानि, परिपक्वानि; प्रपक्वेन परिपक्वेन; प्रपक्वानाम्, परिपक्वानाम्; दीर्घाह्नी शरत्, दीर्घाह्ना निदाघेन, त्र्यह्नि, चतुरह्नि** " संख्या-साय-वेरह्नस्याहन् ङौ वा " [ १. ४. ५०. ] इति अह्नस्याह्नादेशः । अलचटतवर्गशसान्तर इत्येव— **गर्दभवाहिनौ, गर्दभवाहिनः** ॥ ७५ ॥



**श० न्या०—वोत्त०** । वत्रान्त इतिवदन्तशब्दोऽवसानवर्त्येकदेशवचनः, **उत्तरपदान्तस्ये**ति- पर्यन्तावयवत्वं प्राप्तस्येत्यर्थः, समानाधिकरणं चेदं स्थानिनो नकार[ स्य ] विशेषणम्, **तथा नागमस्ये**ति- यतोऽन्तत्वं नागमत्वं च नकारस्योपपद्यते, स्यादित्वं त्वनुपपन्नं, नहि नकारमात्रं स्यादिरस्ति, भावेऽप्यनन्त्य इत्यधिकारेण तस्य णत्वं व्यावर्त्यत इति **स्यादेरि**ति- स्याद्यवयवस्येत्यर्थः । व्रीहीन् वपतीत्यभीक्ष्णं साधु वेति व्रीह्यादेर्जातित्वात् " अजातेः शीले " [ ५. १. १५४. ] इति णिनोऽभावात् [ व्यक्तिविवक्षायां, ] [ साध्वर्थविवक्षायां ] " साधौ " [ ५. १. १५५. ] " व्रताऽऽभीक्ष्ण्ये " [ ५. १. १५७. ] इति वा णिनि " ङस्युक्तं कृता " [ ३. २. ४९. ] इति समासे नकारस्य भिन्नपदस्थत्वादनन्तत्वाच्च पूर्वेणाप्राप्तौ पक्षेऽनेन णत्वे- **व्रीहिवापिणावि**त्यादि, एवमुत्तरत्रापि । **व्रीहिवापाणी**ति- व्रीहीन् वपतीति " कर्मणोऽण् " [ ५. १. ७२. ] [ इत्यण् ] पूर्ववत् समासः, ततो जस् शस् वा, तस्य शिः " स्वराच्छौ " [ १. ४. ६५. ] इति नागमः, " नि दीर्घः " [ १. ४. ८५. ] इति दीर्घः, अत्रैकपदत्वात् पूर्वेण नित्ये प्राप्ते पक्षे णत्वम् । अथ प्रकरणे प्रकरणस्यासत्त्वमाश्रीयते, न तु योगे योगस्येति तदा एकपदाश्रितत्वेनान्तरङ्गत्वाद् " रषृवर्णात्० " [ २. ३. ६३. ] इति नित्यं णत्वमित्याह- **अत्र त्वि**त्यादि । उप्यतेऽस्मिन्नित्याधारे घञि- वापः क्षेत्रं, व्रीहेर्वापस्तेनेति टाया इनादेशे- **व्रीहिवापेणे**त्यादि । अन्तेस्येतावत्युच्यमाने पूर्वपदस्य सम्बन्धिशब्दत्वादुत्तरपदाक्षेपेऽपि श्रुतत्वाद् यस्यैव समुदायस्य पूर्वपदमवयवस्तदवयवस्यैव नकारस्य णत्वविकल्पः स्यादित्याह- **उत्तरपदेती**त्यादि । **गर्गाणां भगिनी- गर्गभगिनी**त्यादौ यथा प्रथमं ङीस्ततः समासः, तथा **माषवापिणी**त्यादावपीत्युत्तरपदान्तत्वाभावाण्णत्वविकल्पो न प्राप्नोतीत्याक्षिपति- **यद्येवमि**त्यादि । परिहरति- **उच्यत** इत्यादि- सुबोधम् । अथ विभक्तिमन्तरेण पूर्वपदत्वाभावात् कथमुत्तरपदान्तो नकारो येन णत्वविकल्प इत्याह- **विभक्ती**त्यादि । **आर्ययूना, क्षत्रिययूने**ति- विशेषणसमासः, ततष्टायां " श्वन्-युवन्० " [ २. १. १०६. ] इत्यादिना वकारस्योत्वम् । **परिपक्वानी**ति- " प्रात्यवपरि० " [ ३. १. ४७. ] इति समासः । **गर्दभवाहिनामि**ति- पूर्ववण्णिन् ॥ छ. ॥ २. ३. ७५. ॥

**न्या० स०—वोत्तर०** । प्राप्ताप्राप्तविभाषेयम्, तथाहि—

लिखितेषु येषु प्रयोगेषु * गतिकारक * इति न्यायात् स्याद्युत्पत्तेः प्रागेव समास इत्येकपदत्वात् प्राप्ते; व्याघ्रीवत् पामा येषां तानि व्याघ्रीपामाणि, व्याघ्रीपामानि वेत्यादिषु स्वदर्शितेष्वप्राप्ते; पाणिनिस्तु अप्राप्ते विभाषां मन्यते, मन्मतेऽपि वापोऽस्त्यनयोः– वापिनौ, व्रीहीणां वापिनाविति यदा क्रियते तदा प्राप्ते, व्यक्तिविवक्षायाम् "अजातेः शीले" [ ५. १. १५४. ], साध्वर्थविवक्षायां "साधौ" [ ५. १. १५५. ], भृशाभीक्ष्ण्यार्थविवक्षायां "भृशाभीक्ष्ण्ये०" [ ७. ४. ७३. ] णिन् । अत्रोत्तरपदस्यान्तोऽनकारो न भवतीति– किन्तु "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति न्यायेन गर्गभग इत्येवं समुदायस्य । [ गर्दभवाहिनौ इति– ] गर्दभं वहत इत्येवंशीलौ, गर्दभवद् वहत इति वा "कर्तुर्णिन्" [ ५. १. १५३. ] ॥ २. ३. ७५. ॥

## कवर्गैकस्वरवति । २ । ३ । ७६ ॥

त० प्र०—पूर्वपदस्थाद् रषृवर्णात् परस्य कवर्गवति एकस्वरवति चार्थादुत्तरपदे सति उत्तरपदान्तस्य तथा नागमस्य स्यादेश्च नकारस्य णो भवति, न चेत् स नकारः पकशब्दसंबन्धी भवति । स्वर्गकामिणौ, मोक्षकामिणौ; स्वर्गगामिणौ, वृषगामिणौ; स्वर्गगामिणी, वृषगामिणी; स्वर्गकामाणि, मोक्षकामाणि कुलानि; उरःकेण, उरᳵकेण; गुरुमुखेण, ऋषिमुखेण; क्षीरमेघाणाम्, पुष्पमेघाणाम् । एकस्वर– ब्रह्महणौ, वृत्रहणौ; क्षीरपाणि, यूषपाणि; क्षीरपेण, यूषपेण; उरःपेण, उरᳶपेण; क्षीरपाणाम्, यूषपाणाम् । पुरोगान् परममृगानित्यत्र तु अनन्त्यस्येत्यधिकाराद् न भवति । अपकस्येत्येव– क्षीरपकानि, यूषपकानि, क्षीरपकेन, यूषपकेन, क्षीरपकानाम्, यूषपकानाम्, अलचटतवर्गशसान्तर इत्येव– माषत्यागिनः, द्रव्यत्यागेन, माषजानि, माषजेन । नित्यार्थं वचनम् ॥ ७६ ॥

श० न्या०—कव० । कवर्गैकस्वरवतीत्यनेन पूर्वपदसन्निधापितमुत्तरपदं विशेष्यत इत्याह– कवर्गवतीत्यादिना । उत्तरपदान्तनस्यादेरिति वर्तत इत्याह– उत्तरपदान्तस्येत्यादि । सत्यपि त्रितयानुवर्तने प्रतिषेधस्य प्राप्तिपूर्वकत्वात् कवर्गवत्त्वात् पकशब्दस्यैव प्रतिषेध इत्याह– न चेदित्यादि । सुपूर्वादर्जयतेः सुखेन पुण्यकर्मभिरर्ज्यत इति घञि न्यङ्क्वादित्वात् के– स्वर्गः, तं कामयत इत्येवंशीलौ "अजातेः शीले" [ ५. १. १५४. ] णिनि– स्वर्गकामिणौ, मुच्यन्ते प्राणिनः कर्ममलकलङ्केनात्रेति "मा-वा-वद्यमि०" [ उणा० ५६४. ] इति से मोक्षः । वृषेः "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के– वृषः । उरः कायतीति "आतो डः" [ ५. १. ७६. ] इति डे टाया इनादेशे– उरःकेण, [ गुरुमुखेणेत्यादि– ] गुरोर्मुखमृषेर्मुखमिति षष्ठीसमासः, एवं– क्षीरमेघाणामित्यादि । ब्रह्माणं वृत्रं च हतवन्तौ "ब्रह्म-भ्रूण-वृत्रात् क्विप्" [ ५. १. १६१. ] इति क्विपि– ब्रह्महणौ, वृत्रहणौ । क्षीरं यूषं च पिबन्ति डे– क्षीरपाणि यूषपाणि । उरःपेणेति– पूर्ववत् पातेर्डः । पुरो गच्छतीति "नाम्नो गमः०" [ ५. १. १३१. ] इति डे शसि च– पुरोगान् । परमृगानिति– परे च ते मृगाश्चेति विशेषणसमासः । पूर्वेण सिद्धे किमर्थमित्याह– नित्यार्थं वचनमिति ॥ छ ॥ २. ३. ७६. ॥

न्या० स०—कवर्गैक० । न चेदिति– सत्यपि त्रितयानुवर्तने प्रतिषेधस्य प्राप्तिपूर्वकत्वात् कवर्गवत्त्वात् पकशब्दस्यैव प्रतिषेध इति । स्वर्गकामिणाविति– सुखेन पुण्यकर्मभिरर्ज्यत इति घञि न्यङ्क्वादित्वाद् गे तं कामयेते इत्येवंशीलौ । मोक्षकामिणाविति– मुच्यन्ते प्राणिनः कर्ममलकलङ्केनात्रेति "मावावद्यमि०" [ उणा० ५६४. ] इति से । माषजानि माषेषु जातानि "सप्तम्या डः" [ ५. १. १६९. ] न तु मासाज्जातानि जातित्वात् । नित्यार्थमिति– अयमर्थः– * गतिकारक० * इति न्यायेन निमित्त-निमित्तिनोरेकपदस्थत्वाद् "रषृवर्णा०" [ २. ३. ६३. ] इति नित्यं प्राप्ते "वोत्तर०" [ २. ३. ७५. ] इति विकल्पितं पुनरनेन नित्यं विधीयत इत्यर्थः ॥ २. ३. ७६. ॥

## अदुरुपसर्गा-ऽन्तरो ण-हिनु-मीना-ऽऽनेः । २ । ३ । ७७ ॥

त० प्र०—दुर्वर्जोपसर्गस्थादन्तःशब्दस्थाच्च रषृवर्णात् परस्य णकार-हिनु-मीना-आनिसंबन्धिनो नकारस्य णो भवति, णेति णोपदेशा धातवो गृह्यन्ते, उपसर्गाण्णत्वविधानात् । प्रणमति, परिणमति; प्रणयति, परिणयति; प्रणामकः, परिणामकः; प्रणायकः, परिणायकः; अन्तर्– अन्तर्णयति, अन्तर्णायकः; हिनु– प्रहिणोति, प्रहिणुतः; मीना– प्रमीणाति, प्रमीणीतः; हिनु-मीनाग्रहणे विकृतस्यापि भवति, एकदेशविकृतस्यानन्यत्वात्; आनि– प्रयाणि, प्रवपाणि, प्रापयाणि । आनीत्यर्थवत एव ग्रहणादनर्थकस्य न भवति– प्रवृद्धा वपा येषां तानि प्रवपानि मांसानि । अदुरिति किम्? दुर्नयः, दुर्नीतम् । उपसर्गान्तरिति किम्? प्रातर्नयति, पुनर्नयति । * येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा भवन्ति * इतीह न भवति– प्रगता नायका यस्मात् प्रणायको देश इति । ण-हिनु-मीना-ऽऽनेरिति किम्? प्रनृत्यति, अणोपदेशत्वात् णत्वं न भवति । अलचटतवर्गशसान्तर इत्येव– प्रतिनमति, प्रददानि । परिनर्दनमित्यत्र तु क्षुभ्नादित्वात् न भवति ॥ ७७ ॥

**श० न्या०—अदु०** । '**ण**' इति णकारादिधातोरेकदेशः, '**हिनु**' इति "हिनुते" इत्यादेः, '**मीना**' इति मीनातीत्यादेः, '**आनि**' इति पञ्चमीतृतीयैकवचनस्यानुकरणम् । **णोपदेशा** इति– उपदिश्यतेऽनेनेत्युपदेशो धातुपाठः, तत्र येषां णकारोऽस्ति ते णोपदेशाः, उपदेशनं वा– उपदेशः प्रथममुच्चारणं, वैयधिकरण्येऽपि गमकत्वाद् बहुव्रीहिः, उपदिश्यते– प्रथममुच्चार्यते इति णोपदेशः, ण उपदेशो येषां ते तथोक्ताः । अत्र हेतुमाह– **उपसर्गादि**त्यादि– उपसर्गेण धातुराक्षिप्यते, धातुमन्तरेण तस्यासम्भवादित्यर्थः । पूर्वपदस्थादित्यधिकारात् पूर्वपदग्रहणसामर्थ्यात् समास एव पूर्वपदमुत्तरपदं चेत्यस्य सम्भवात् समासलाभात् तस्मिन्नेवैतस्य कार्यस्य विज्ञानात् प्रणमतीत्यादिसिद्ध्यर्थमसमासेऽपीति कर्तव्यम्, अपिग्रहणात् प्रणायक इत्यादेः समासेऽपि सिद्धिः, न कर्तव्यं, हिनु-मीना-ऽऽनिग्रहणात् समासस्यासम्भवात् पूर्वपदस्थादित्यस्य निवृत्तत्वादविशेषेणोपसर्गाण्णत्वविधानात् पूर्वपदादित्यस्य निवृत्तत्वादिति । अथ 'प्रहिणोति, प्रमीणीते' इत्यत्र गुणे ईकारे च कृते हिनु-मीनेत्येतद्रूपविरहादसद्विधौ स्वरस्य स्थानिवद्भावप्रतिषेधात् कथं णत्वमित्याह– **हिनु-मीने**त्यादि । **आनीत्यर्थवत** इति–अयमर्थः– प्रवपानीत्यत्र शेः प्रकृतेः प्रवपानीति समुदायस्य चार्थवत्त्वादानीत्यस्य पृथगर्थाभावादनर्थकत्वाद् * अर्थवद्ग्रहणे० * इति न्यायादग्रहणाण्णत्वाभाव इति, उपसर्गत्वाभावाद् वा, अत एव प्रवृद्धा इति विग्रहो वृत्तौ दर्शितः, नह्यत्रानिना सहोपसर्गयोगः । यद्येवं प्रयाणीत्यत्रापि न प्राप्नोति, नह्यत्राप्यानिं प्रत्युपसर्गयोगः, किन्तु धातुं प्रति, नैवम्– योगस्यार्थद्वारकत्वात् तत्र प्रयोगविषयस्यैव धातोराश्रयणात् तस्य च (न) कश्चित्संसृष्टस्याभावात् समुदायस्थस्यैवाश्रितत्वादित्यानिशब्दान्तं समुदायं प्रति य उपसर्गस्तस्मात् परस्य समुदायस्य य आनिस्तस्य णत्वमिति सूत्रार्थसंप्रत्ययाददोषः; एवं णकारेऽपि द्रष्टव्यम्, अन्यथा णकारमात्रं प्रत्युपसर्गत्वाभावाण्णत्वासिद्धिः स्यादिति । अथ प्रनायको देश इत्यत्र प्रस्योपसर्गस्य णोपदेशस्य धातोश्च भावाण्णत्वं कस्मान्न भवतीत्याह– **येने**त्यादि । [ **प्रदानि** ] प्रपूर्वो "दावृंक् लवने" इति । **परिनिदनमि**ति– परिपूर्वो "णद अव्यक्ते शब्दे" अत्र निमित्त-निमित्तिनोः सद्भावेऽपि क्षुभ्नादित्वाण्णत्वाभावः ॥ छ ॥ २. ३. ७७. ॥

**न्या० स०—अदुरुप०** । हिनु-मीना-ऽऽनिग्रहणात् समासस्यासम्भवाद् पूर्वपदस्थादित्यस्य निवृत्तावविशेषेणोपसर्गाण्णत्वविधिः । **हिनु-मीनाग्रहणे** इति– अथ 'प्रहिणोति प्रमीणीते' इत्यत्र गुणे इकारे च कृते हिनु-मीनेत्येतद्रूपविरहाद् "स्थानीवा०" [ ७. ४. १०९. ] इत्यस्याप्यसद्विधौ स्वरस्य स्थानिवद्भावप्रतिषेधात् कथं णत्वमित्याह– **विकृतस्यापी**ति । **प्रवपानि मांसानी**ति– उप्यत इति वपा भिदादित्वात् । **आनीत्यर्थवत** इति– * येन धातुना युक्ता० * इति न्यायो धातोर्ज्ञातव्यो न नाम्न इति नाम्न उपसर्गत्वं भवत्येव, प्रवपानीति समुदायस्यार्थवत्त्वादानीत्यस्य पृथगर्थाभावादनर्थकत्वम्, उपसर्गत्वाभावाद् वा, अत एव प्रवृद्धा इति विग्रहो वृत्तौ दर्शितः, नह्यत्रानिना सहोपसर्गयोगः । यद्येवं प्रयाणीत्यत्रापि न प्राप्नोति, नह्यत्रापि आनिं प्रति उपसर्गयोगः, किन्तु धातुं प्रति, नैवम्– योगस्यार्थद्वारकत्वात् तत्र प्रयोगविषयस्यैव धातोराश्रयणात् तस्य च न कश्चिदसंसृष्टस्य भावात् समुदायस्थस्यैवाश्रितत्वादित्यानिशब्दान्तं समुदायं प्रति य उपसर्गस्तस्मात् परस्य समुदायस्य य आनितस्तस्य णत्वमिति **सूत्रार्थसंप्रत्यया**ददोषः । एवं णकारेऽपि द्रष्टव्यम्, अन्यथा णकारमात्रं प्रत्युपसर्गत्वाभावाण्णत्वासिद्धिः स्यादिति ॥ २. ३. ७७. ॥

## नशः शः । २ । ३ । ७८ ॥

**त० प्र०—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य नशेः शकारान्तस्य संबन्धिनो नकारस्य णो भवति । प्रणश्यति, परिणश्यति; प्रणाशः, परिणाशः; अन्तर्णश्यति । श इति किम् ? प्रनष्टः, परिनष्टः; प्रनङ्क्ष्यति; परिनङ्क्ष्यति । नशेरणोपदेशात् पूर्वेणासिद्धे विध्यर्थमिदम् ॥ ७८ ॥**

**श० न्या०—नश०** । श इति नशो धातोर्विशिषणमित्याह– **नशेः शकारान्तस्ये**ति । प्रपूर्वात् परिपूर्वाच्च "नशौच् अदर्शने" इत्यतस्तिवि श्येऽनेन णत्वे– **प्रणश्यती**त्यादि । **प्रनष्ट** इति– क्तः "यज-सृज०" [ २. १. ८७. ] इति षत्वं "तवर्गस्य०" [ १. ३. ६०. ] इति तस्य टत्वम् । **प्रनङ्क्ष्यती**ति– पूर्ववत् षत्वं "ष-ढोः कः सि" [ २. १. ६२. ] इति कत्वम्, णत्वं धुटीति वचनात् साक्षाच्छकारान्तत्वाभावान्निवर्त्यते । **नशेरि**ति– अस्माकमयमणोपदेश इत्यर्थः ॥ छ. ॥ २. ३. ७८. ॥

**न्या० स०—नशः शः** । **प्रनष्ट** इति– अत्र "नशो धुटि" [ ४. ४. १०९. ] इति नागमस्य "नो व्यञ्जनस्य०" [ ४. २. ४५. ] इति लुक् । **प्रनङ्क्ष्यतीत्यादि**– अत्र परेऽसदित्यन्तरङ्गत्वात् पूर्वं कृतमपि णत्वं षत्वादावसत्त्वात् षत्वे कृतेऽप्येकदेशविकृतस्यानन्यत्वात् प्राप्तमपि श इति वचनात् साक्षाच्छकारान्तत्वाभावान्निवर्त्यते । **नशेरणोपदेश** इति– अस्माकं मतेऽयमणोपदेश इत्यर्थः, कलापके तु णोपदेशः ॥ २. ३. ७८. ॥

## नेङ्मा-दा-पत-पद-नद-गद-वपी-वही-शमू-चिगू-याति-वाति-द्राति-प्साति-

## स्यति-हन्ति-देग्धौ । २ । ३ । ७९ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्योपसर्गस्य नेर्नकारस्य माङादिषु धातुषु परेषु णो भवति । ङकारोपलक्षितो मा माङ्, तेन माङ्मेङोर्ग्रहणम्, न माति-मीनाति-मिनोतीनाम् । प्रणिमिमीते, परिणिमिमीते; प्रणिमयते, परिणिमयते । ङकारनिर्देशश्च नानुबन्धार्थः, किन्तु मात्यादिनिवृत्त्यर्थः, तेन यङ्लुप्यप्युदाहरिष्यते । दा इति संज्ञापरिग्रहात् ददाति-दयति-यच्छति-द्यति-दधाति-धयतीनां ग्रहणम्— प्रणिददाति, परिणिददाति; प्रणिदयते, परिणिदयते; प्रणियच्छति, परिणियच्छति; प्रणिद्यति, परिणिद्यति; प्रणिदधाति, परिणिदधाति; प्रणिधयति, परिणिधयति; पत–प्रणिपतति, परिणिपतति; पद्– प्रणिपद्यते परिणिपद्यते; नद्– प्रणिनदति, परिणिनदति; गद्– प्रणिगदति, परिणिगदति; वपी– प्रणिवपति, परिणिवपति; वही - प्रणिवहति, परिणिवहति; शमू– प्रणिशाम्यति; परिणिशाम्यति; चिग्– प्रणिचिनोति, परिणिचिनोति; याति– प्रणियाति, परिणियाति; वाति– प्रणिवाति, परिणिवाति; द्राति– प्रणिद्राति, परिणिद्राति; प्साति– प्रणिप्साति, परिणिप्साति; स्यति– प्रणिस्यति, परिणिस्यति; हन्ति– प्रणिहन्ति, परिणिहन्ति; देग्धि– प्रणिदेग्धि, परिणिदेग्धि; तृचि– प्रणिमाता, प्रणिदातेत्यादि; अन्तरः खल्वपि– अन्तर्णिमिमीते, अन्तर्णिदेग्धि । अडागमस्य धात्ववयवत्वेन व्यवधायकत्वाभावात् प्रण्यमिमीतेत्यादावपि भवति, प्रण्यास्यतीत्यादौ तु आङा व्यवधानेऽपि प्रतिषेधाभावाद् भवति । अदुरित्येव– दुर्निमाता । उपसर्गान्तर इत्येव– प्रातर्निमिमीते । वप्यादीनामनुबन्धेन तिवा च निर्देशो यङ्लुप्निवृत्त्यर्थः, तेन ' प्रनिवावपीति ' इत्यादौ न भवति, पूर्वेषु तु भवति– प्रणिमामाति, प्रणिमामेतीत्यादि । ङ्मादिष्विति किम् ? प्रनिमाति, प्रनिमीनाति; प्रनिमिनोति, प्रनिदायन्ते व्रीहयः; प्रनिदायन्ते पात्राणि ॥ ७९ ॥

---

**श० न्या०**—नेर्ङ्मा० । नेः स्थानित्वेनोपादानेऽपि न इत्यनुवर्तनाद् व्यधिकरणषष्ठीत्याह– **नेर्नकारस्ये**ति । **'ङ्मा'** इत्यत्रोपलक्षणङकारस्य फलमाह– **तेने**त्यादि । **प्रणिमिमीते** इति–" ह्वः शिति " [ ४. १. १२. ] इति द्विर्वचनम् । **ङकारनिर्देशश्चे**ति– यातीत्यादिवत् तिव्निर्देशोऽपि नास्तीति चकारेण सूच्यते । **दा इतीति**– * स्वं रूपं शब्दस्य० * इति न्यायादिति शेषः । **प्रणियच्छती**ति– दामो यच्छादेशः । **प्रणिद्यती**ति– " ओतः श्ये " [ ४. २. १०३. ] इत्योकारलोपः । **प्रणिशाम्यती**ति– " शमसप्तकस्य " [ ४. २. १११. ] इति दीर्घः । मादादिषु य उपश्लिष्टस्तस्यैवोपसर्गात् परस्य णत्वम्, **प्रण्यमिमीते**त्यादौ त्वटा व्यवधानान्न प्राप्नोतीति यस्य भ्रान्तिस्तन्निवृत्त्यर्थमाह– **प्राण्यमास्ते**त्यादौ विकरणात् तत्समुदायभक्तत्वेऽपि स्वरादिव्यवायस्येष्टत्वात् तत्र हि संघातभक्तत्वान्नासावयवात्र्यवग्रहणे शक्यो ग्रहीतुं, न च तत्र रेफशकारादेर्निमित्तस्य निमित्तिनश्च नकारस्य व्यवाय आश्रितः, इह तु नेः परे मा-दादयोऽव्यवहिता इति णत्वाप्रसङ्ग इति वाच्यम्, तत्रापि निमित्तविशेषणं, न कार्यविशेषणम्, यत्र यन्निमित्तं तस्य व्यवाये न णत्वमिति मादीनामपि निमित्तत्वात् तद्व्यवाये णत्वं न सिध्यतीत्याह– **प्रणश्यती**त्यादि । **वप्यादीनामि**ति– * तिवा शवा० * इति नियमादित्यर्थः ॥ छ. ॥ २. ३. ७९. ॥

---

**न्या० स०**—नेर्ङ्मादा० । **न माती**त्यादि– ननु मिनोति-मीनात्योर्मारूपाभावाद् ग्रहणाशङ्कापि कुतः ? उच्यते– " मिग्-मीगोऽखलचलि " [ ४. २. ८. ] इत्यनेनात्वविधानात् । **नानुबन्धार्थ** इति– यथा रीत्या धातुपाठे माङित्यपाठि तया रीत्या यदि सूत्रेऽपि क्रियेत तदाऽनुबन्धनार्थः स्यात्, अत्र तु विशेषणं– ङकारेण उपलक्षितो मा– इति । ननु " सप्तम्या निर्दिष्टे पूर्वस्य " [ ७. ४. १०५. ] तच्चानन्तरस्य न व्यवहितस्येति न्यायात् प्रण्यास्यतीत्यादौ आङा व्यवधाने न प्राप्नोतीत्याह– **आङा व्यवधानेऽपी**ति– अयमर्थः– " पदेऽन्तरे० " [ २. ३. ९३. ] इति णत्वनिषेधकसूत्रे आङो वर्जनात् आङा व्यवधानेऽपि भवति ॥ २. ३. ७९. ॥

---

## अक-खाद्यषान्ते पाठे वा । २ । ३ । ८० ॥

**त० प्र०**—पाठे– धातूपदेशे ककार-खकारादिः षकारान्तश्च यो धातुस्ताभ्यामन्यस्मिन् धातौ परेऽदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य नेर्नकारस्य णो वा भवति । प्रणिपचति, प्रनिपचति; परिणिपचति, परिनिपचति; प्रणिभिनत्ति, प्रनिभिनत्ति; परिणिभिनत्ति, परिनिभिनत्ति; प्रणिपापच्यते, प्रनिपापच्यते; प्रणिपापचीति, प्रनिपापचीति; प्रणिपिपक्षति, प्रनिपिपक्षति; प्रण्यपीपचत्, प्रन्यपीपचत्; प्रणिष्टभ्नाति, प्रनिष्टभ्नाति; स्तम्भेः सौत्रेषु पाठात् पाठविषयत्वम् । पूर्वसूत्रारम्भसामर्थ्यात् पूर्वसूत्रविभक्तोऽस्य विषयः, तेन ' प्रणिमयते, प्रणिदयते ' इत्यादौ पूर्वेण नित्यमेव णत्वम् । अक-खादीति किम् ? प्रनिकरोति, प्रनिकिरति, प्रनिखनति; प्रनिखादति । अषान्त इति किम् ? प्रनिद्वेष्टि, प्रनिपिनष्टि । पाठ इति किम् ? इह च प्रतिषेधो यथा स्यात्– प्रनिचकार, प्रनिचखाद, प्रनिपेक्ष्यति । इह च मा भूत्– प्रणिवेष्टा, प्रनिवेष्टा;

प्रणिदेष्टा, प्रनिदेष्टा; यङ्लुपि नेच्छन्त्येके- प्रनिपापचीति, प्रनिसासन्ति इत्यादि ॥ ८० ॥

---

**श० न्या०—अक०** । पाठो धातूपदेश इति पर्यायावेताविलाह- **पाठे- धातूपदेश** इति । उपसर्गस्थान्निर्मित्तान्नेरक-खादावषान्ते च णत्वविकल्पस्यारम्भादुपसर्गेण च धातोः सन्निधापितत्वात् तस्यैवाकखाद्यषान्त इति विशेषणमित्याह- **ककारेत्यादि**- कश्च खश्च क-खौ, तावादी यस्य न स्तः सोऽक-खादिर्धातुः, षश्चान्तो यस्य नास्ति सोऽषान्त इत्यर्थः । आद्यन्तग्रहणे उभे अपि त्रिस्पष्टार्थे, अन्यथाऽकखेऽकषे इति वचनात् केन तदादिविधिः ? केन तदन्तविधिरिति व्याख्यानात् संदेहस्य निवर्तिष्यमाणत्वादिति । प्रतिपूर्वात् पचेरितवि पक्षेऽनेन णत्वे-**प्रणिपचती**त्यादि, एवमन्यत्रापि। **सौत्रेष्वि**ति-सौत्राणां धातूनां सूत्रमेव धातूपदेश इत्यर्थः । पाठ इत्यनेन यङ्लुबन्तस्य व्युदस्तत्वान्मा-दा-पत-पद-नद-गदां यङ्लुबन्तानां पूर्वसूत्रस्य चरितार्थत्वात् तेषामेवान्यत्र प्रणिमिमीत इत्यादावयं विकल्पो मा भूदिति शेषग्रहणं कर्त्तव्यम्, तेनैव परेऽसदिति विकल्पस्यासत्त्वात् तत्र " नेर्ङ्मादा० " [ २. ३. ८०. ] इति परविधेरेव नित्यं प्रवर्त्तनाद् विमुक्त एवास्य विषय इत्याह- **पूर्वसूत्रारम्भसामर्थ्यादि**त्यादि- पूर्वसूत्रारम्भ एव विकल्पस्यासत्त्वेन समर्थ इत्यर्थः । करोतेः खादेश्च णत्रि द्वित्वे " कङश्चञ् " [ ४. १. ४६. ] इति चत्वे प्रयोगेऽकखादित्वेऽपि पाठेन खादित्वात् प्रतिषेधाण्णत्वाभावे- **प्रतिचकारे**त्यादि । " पिष्लृप् सञ्चूर्णने " " विष्लृंकी व्याप्तौ " " दिशींत् अतिसर्जने, " '**यङ्लुपि न**' इति अत्र छेदः, यङ्लुपि सति न भवति, पाठ इत्यनेन यङ्लुबन्तस्य व्युदासात् । ललितस्त्वभावादयो यङ्लुप्यपीच्छन्ति- प्रणिपापचीति, प्रनिपापचीतीत्याह- **इच्छन्त्यन्ये**, यदि तु यङ्लुबन्तस्यापि प्रयोगे णत्वविकल्पो दृश्यते तदा **यङ्लुबन्तस्य नेच्छन्त्यन्ये** इति अविच्छेदेन वाक्यार्थो द्रष्टव्यः ॥ छ ॥ २. ३. ८०. ॥

---

**न्या० स०—अकखा०** । अत्राकखादिषान्त इति सिद्धे नञ्द्वयं सुखार्थम्, नञ्द्वये हि सति कखादेः षान्तस्य च वर्जनं प्रतीयते, एकस्मिंस्तु कखादेः किंविशिष्टस्य षान्तस्येति प्रतीतिः स्यात्; असंभवान्न भविष्यतीति न च वाच्यम्, " कषशिष " [ ] इत्यादावेवंविधस्यापि दर्शनात् । **सौत्रेषु** पाठादिति- ननु स्तम्भेर्धातुष्वपाठात् कथं पाठविषयत्वम् ? उच्यते- सौत्राणां सूत्रमेव धातूपदेशः । **प्रनिवेष्टे**ति-" विशंत् प्रवेशने " इत्यस्य रूपम् ॥ २. ३. ८०. ॥

## द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा । २ । ३ । ८१ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्यानितेर्नकारस्य द्वित्वे चाद्वित्वे चान्ते चानन्ते च वर्तमानस्य णो भवति, परिपूर्वकस्य तु वा भवति । द्वित्वे- प्राणिणिषति, प्राणिणत्; अद्वित्वे- प्राणिति, पराणिति; अन्ते- हे प्राण् !, हे पराण् !; परेस्तु वा, द्वित्वे- पर्यणिणिषति, पर्यनिनिषति; पर्याणिणत्, पर्यानिनत्; अद्वित्वे- पर्यणिति, पर्यनिति; अन्ते- हे पर्यण्, हे पर्यन्; परिपूर्वकस्य द्वित्वे अन्ते च नित्यं णत्वमिच्छन्त्येके, अन्ये तु अन्तेऽनन्ते च नेच्छन्त्येव; ये तु द्वित्वे कृतेऽपि पुनर्द्वित्वमिच्छन्ति तन्मतेऽपि ' द्वित्वे ' इति वचनात् द्वयोरेवाद्ययोर्णत्वं भवति, न तु तृतीयस्य- प्राणिणिषयतेर्ङे प्राणिणिनिषत् । अनन्त्यस्येत्यधिकारात् अन्ते न प्राप्नोतीति अन्तवचनम् । अनितीति तिवा निर्देशो दैवादिकनिवृत्त्यर्थः, न तु यङ्लुप्निवृत्त्यर्थः, यङोऽसंभवात् ॥ ८१ ॥

---

**श० न्या०—द्वित्वे०** । प्रपूर्वाद् " अन श्वसक् प्राणने " इत्यस्य (स्मात्) प्राणितुमिच्छतीति सनीटि णत्वस्यासिद्धत्वादन्त्यादौ द्विर्वचने द्वित्वग्रहणाद् द्वयोर्नकारयोरनेन णत्वे- **प्राणिणिषती**ति । ननु पूर्वस्य नकारस्य ' अन्तेऽप्यनीतेः ' इति णत्वसिद्धौ ' द्वित्वेऽपि ' इत्युच्यमाने परस्यैव णत्वं प्राप्नोति, * तक्रकौण्डिन्य * न्यायेन बाधितत्वात् पूर्वस्य न स्यादिति द्वयोरिति वक्तव्यम्; नैवम्- नात्र द्वित्वेऽपीत्यत्र द्विर्वचनमभिप्रेतं, किं तर्हि ? द्वयोर्नकारयोर्भावो द्वित्वं नकारद्वयं, तेन द्वयोरिति गम्यते एव, द्विर्वचनं तु सामर्थ्याक्षिप्तं तदन्तरेण नकारद्वयस्यासम्भवादिति । ननु औडढदित्यादिसिद्धये * परत्वासत्त्वमद्वित्वे* इत्यवश्यमाश्रयणीयम्, अन्यथा धत्व-ढत्वादीनां द्विर्वचनविषयेऽप्यसत्त्वात् ' हृत ' इति द्वित्वे औजढदित्येव स्यात्, ततश्चान्तेऽप्यनितेरिति कृतणत्वस्य द्वित्वे प्राणिणिषतीति सिद्धं, किमर्थं द्वित्वेऽपीति, उच्यते- अस्य न्यायस्य प्रायिकत्वज्ञापनार्थमेतदिति; यदत्रोत्पलदेवः- तत् क्रियमाणं ' पूर्वत्रासिद्धीयमद्विर्वचने ' इत्यस्यानित्यत्वं ज्ञापयति, तेन औजढदिति घत्व-ढत्व-ष्टुत्व-ढलोपानामसिद्धत्वात् ' हृत ' इति द्विरुच्यते इति यदुक्तं तदुपपन्नं भवति, अनित्यत्वस्य च ज्ञापने द्विर्वचने ढत्वादीनामसिद्धत्वाभावात् ढशब्दो द्विरुच्यते, तस्मिन् द्विरुक्तेऽभ्यास[ स्य ] ह्रस्वे कृते- औडढदित्यनिष्टप्रयोगप्रसङ्गः, तस्मात् ' पूर्वत्रासिद्धीयमद्विर्वचने ' इत्यस्यानित्यत्वज्ञापनायास्यारम्भः, एवं द्विर्वचने णत्वस्यासिद्धत्वादन्त्यादिरेव निशब्दो द्विरुच्यत इति । प्रपूर्वादनेस्तिवि " रुत्पञ्चकात्० " [ ४. ४. ८८. ]

इतीटि– **प्राणिति** । प्राणितीति क्विपि आमन्त्र्यसेर्लुकि "नामन्त्र्ये" [२. १. ९२.] इति नकारलोपप्रतिषेधे हे **प्राण्!**, पर्यणितुमिच्छतीति सन्निटि "स्वरादेः०" [४. १. ४.] इति द्वित्वे– **पर्यणिणिषति** । पर्यणन्तं प्रयुङ्क्ते इति णिगि ङौ "णि-श्रि०" [३. ४. ५८.] इति ङे ह्रस्वादौ "स्वरादेः०" [४. ४. ३१.] इति वृद्धौ **पर्याणिणत्** । **परिपूर्वस्ये**ति– अनन्ते चेत्यपि द्रष्टव्यम् । **एक** इति– पाणिनिप्रभृतयः, प्रस्तुततरं चेदं दर्शनमिति । **अन्ये त्वि**ति– पाणिनिसूत्रव्याख्यातार एव, तेऽपि द्वित्वे नित्यमिच्छन्त्येव । **ये त्वि**ति– देवनन्दी । **अनन्त्यस्ये**ति– अन्तश्च पदापेक्षो गृह्यते न स्वनित्यपेक्षो व्यभिचाराभावात् ॥ छ ॥ २. ३. ८१. ॥

**न्या० स०**—द्वित्वेऽप्यन्ते० । प्राणिणिषतीत्यादौ द्वयोरप्यनेनैव णत्वं द्वित्व इति वचनात् । '**प्राणिणिषति**' इत्यत्र परे द्वित्वे कर्त्तव्ये णषशास्त्रमसद् द्रष्टव्यमिति न्यायाद् द्वित्वे कृते णत्वम् । हे **प्राण्!** अन्ते "नामन्त्र्ये" [२. १. ९२.] इति नलोपनिषेधात् नान्तत्वं संभवतीत्यामन्त्र्ये दर्शितम् । ननु द्वित्वेऽपि कृतेऽन्तेऽपीति वचनादन्तेऽपि शब्दादनन्तेऽपि भविष्यति, किं **द्वित्वेऽपी**त्यनेन ? नैवम्– द्वित्वेऽपीत्यस्याभावे प्राणिणिषतीत्यत्र प्रथमनकारेऽन्तेऽपीत्यस्य चरितार्थत्वाद् द्वितीयनकारस्य णत्वं न स्यात्, टवर्गेण व्यवधानात्, अन्तेऽपीत्यत्रापिशब्दाभावे द्वित्वेऽप्यन्त एव स्यादिति, न तु प्राणिणिषतीत्याद्यनन्तेऽपि । ननु द्वित्वे सति अन्तस्थो नकारः क सम्भवति ? उच्यते– प्राणितेः सनि प्राणिणिषन्तं प्रयुङ्क्ते णिगि अल्लोपे क्विपि प्राणिणिषमाचष्टे णिजि पुनः "त्र्यन्त्यस्वरादेः" [७. ४. ४३.] इत्यनेन इसिति लोपे क्विपि हे प्राणिण् ! इत्यादौ आमन्त्र्यत्वाच्च नलोपाभावः ॥ २. ३. ८१. ॥

## हनः । २ । ३ । ८२ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य हन्तेर्नकारस्य णो भवति । प्रहण्यते, पराहण्यते, निर्हण्यते, अन्तर्हण्यते, प्रहणनम्, पराहणनम्, निर्हणनम्, परिहणनम्; अन्तर्हणनम् । प्रघ्नन्ति, प्राघानीत्यादौ "हनो घि" [२. ३. ९४.] इति प्रतिषेधान्न भवति । अदुरित्येव– दुर्हनः ॥८२॥

**श० न्या०**—हनः । **हन** इत्यवयवषष्ठीयमित्याह–**हन्तेर्नकारस्ये**ति । **प्रहण्यत** इति– कर्मण्यविवक्षितकर्मत्वाद् भावे वात्मनेपदम्, "क्यः शिति" [३. ४. ७०.] इति क्यः । अथ हन इत्युच्यमाने प्रघ्नन्तीत्यादावेकदेशविकृतस्यानन्यत्वाण्णत्वं प्राप्नोति, तन्निवृत्त्यर्थं "हनोऽतः" इति वक्तव्यम्, हन्तेर्नकारस्याकारात् परस्यैव णत्वं यथा स्यादिति; न वक्तव्यमित्याह– **प्रघ्नन्ती**त्यादि– "गम-हन०" [४. २. ४४.] इत्यकारलोपः, "हनो घ्नः०" [२. १. ११२.] इति घ्नादेशः । **प्राघानी**ति– पूर्ववदद्यतन्यामात्मनेपदं ततो मध्ये ञिच्लोपः "ञि-णवि०" [४. ३. १०१.] इति घनादेशः, "ञ्णिति" [४.३.५०.] इति वृद्धिः ॥ छ ॥ २. ३. ८२. ॥

**न्या० स०**—हनः० । प्रघ्नन्तीत्यादौ हन् इत्युच्यमानेऽप्येकदेशविकृतस्यानन्यत्वाण्णत्वं प्राप्नोतीत्याह– **हनो घी**ति ॥२.३.८२.॥

## व-मि वा । २ । ३ । ८३ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य हन्तेर्नकारस्य वकारे मकारे च परे णो भवति । प्रहण्वः, प्रहन्वः; प्रहण्मः, प्रहन्मः; प्रहण्मि, प्रहन्मि; प्राहण्वहे, प्राहन्वहे, प्राहण्महे, प्राहन्महे; अन्तर्हण्वः अन्तर्हन्वः; अन्तर्हण्मः; अन्तर्हन्मः ॥ ८३ ॥

**श० न्या०**—वमि० । **वमी**ति– वस्-मिवादौ सम्बन्धिनौ वकार-मकारावनुक्रियेते, वकारेऽकार उच्चारणार्थः, वश्च मश्चेति समाहारद्वन्द्वादौपश्लेषिकेऽधिकरणे सप्तमी । पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् । **प्राहण्वहे** इति– प्राङ्पूर्वाद्धन्तेः "आङो यम-हन०" [३. ३. ८६.] इति कर्तर्यात्मनेपदम् ॥ छ ॥ २. ३. ८३. ॥

**न्या० स०**—**वमि वा** । पूर्वेण नित्यं प्राप्ते विकल्पार्थम् । '**प्राहण्वहे**' इत्यत्र "आङो यम-हनः०" [३. ३. ८६.] इत्यात्मनेपदम् ॥ २. ३. ८३. ॥

## निंस-निक्ष-निन्दः कृति वा । २ । ३ । ८४ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य निंसादीनां धातूनां नकारस्य कृत्प्रत्यये परे णो वा भवति । प्रणिंसनम्, प्रनिंसनम्; प्रणिक्षणम्, प्रनिक्षणम्; प्रणिन्दनम्, प्रनिन्दनम् । कृतीति किम् ? प्रणिंस्ते, परिणिंस्ते; प्रणिक्षति, परिणिक्षति; प्रणिन्दति, परिणिन्दति; णोपदेशत्वान्नित्यं भवति ॥ ८४ ॥

**श० न्या०**—निंस० । "णिसुकि चुम्बने" "णिक्ष चुम्बने" "णिदु कुत्सायाम्" एषां सौत्राण्यनुकरणानि, ततः षष्ठी, न तु पञ्चमी, पञ्चम्यां ह्येभ्यः परस्य कृद्विषयस्य नकारस्याप्राप्तौ णत्वविकल्पः स्यात्, एवं च "स्वरात्" [२. ३. ८५.] इत्यस्यानन्तरं "निंस-निक्ष-निन्दो वा" इति स्पष्टार्थं विदध्यात् । **नित्यमि**ति– "अदुरुपसर्ग०" [२. ३. ७७.] इत्यनेनेति शेषः ॥ छ ॥ २. ३. ८४. ॥

**न्या० स०**—निंस-निक्ष० । नित्यं भवतीति– "अदुरुपसर्ग०" [ २. ३. ७७. ] इत्यनेनेति शेषः । **णोपदेशत्वात्** "अदुरुपसर्ग०" [ २. ३. ७७. ] इत्यननेन, * गतिकारकङस्युक्तानां० * इति न्यायादविभिक्त्यन्तैः कृदन्तैः सह प्रादीनां समासे सति निमित्त-निमित्तिनोरेकपदस्थत्वात् "रषृवर्णा०" [ २. ३. ६३. ] इत्यनेन वा नित्यं णत्वे प्राप्ते विकल्पार्थमिदम् ॥ २. ३. ८४. ॥

## स्वरात् । २ । ३ । ८५ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य कृद्विषयस्य नकारस्य स्वरादुत्तरस्य णो भवति । प्रहाणः, प्रहाणवान्; प्रहीणः, प्रहीणवान्; परिहीणः, परिहीणवान्; प्रगूणः, प्रगूणवान्; प्रयाणम्, परियाणम्; प्रवपणम्, परिवपणम्; प्रयायमाणम्, परियायमाणम्; प्रयायिणौ, परियायिणौ; अप्रयाणिः, अपरियाणिः; प्रयाणीयम्, परियाणीयम्; प्रवहणीयम्, परिवहणीयम्; यथासंभवं 'क्त क्तवतु अन आन इन् अनि अनीय' इत्येते प्रत्ययाः प्रयोजयन्ति । स्वरादिति किम्? प्रभुग्नः, प्रभुग्नवान् । अदुरित्येव– दुर्यानः पन्थाः । कृतीत्येव– प्रयापेन । अलचटतवर्गशसान्तर इत्येव– प्रकॢप्यमानम्, परिकॢप्यमानम्; प्रेण्वनम्, प्रेन्वनम्; प्रदानम्, प्रधानम् ॥ ८५ ॥

**श० न्या०**—स्वरा० । कृतीति विषयसप्तमीयं, न निमित्तसप्तमी, तस्यां हि स्वरात् परस्य धातोर्नकारस्य कृति निमित्तभूते णत्वमिति सूत्रार्थः स्यात्, तथा च सति "न ख्यापूग्०" [ २. ३. ९०. ] इत्यादिप्रतिषेधोऽनर्थकः प्राप्तेरभावात्, नहि ख्यादीनां कृति निमित्तभूते स्वरात् परो धातुनकारोऽस्ति येन प्राप्तौ प्रतिषेधोऽर्थवान् स्यादिति । न च स्वरादिति 'अदुरुपसर्गान्तर' इत्यस्य विशेषणं धातोर्वा "देशेऽन्तरो यम-हनः" [ २. ३. ९१. ] इति प्रतिषेधादनेन हि प्राप्तस्य प्रतिषेधः, न चान्तःशब्दो धातुर्वा स्वरान्तो वा येन प्रतिषेधोऽर्थवान् स्यादिति; कृतोऽपि न विशेषणं, कृतो यः स्वरस्ततः परस्य नकारस्येति व्याप्तेर्न्यायात्, अन्यथा 'प्रहीण' इत्यादौ न स्यादिति स्वरादिति कृन्नकारस्येदं विशेषणं, नोपसर्गस्य न च धातोरित्याह– **कृद्विषयस्य नकारस्य स्वरादुत्तरस्येति**– उपसर्गविशेषणे हि प्रभुग्न इत्यत्रापि स्यात् । **प्रहाण** इति– "ओहांङ्क् गतौ" । **प्रहीण** इति– "ओहांक् त्यागे" "एषामीर्व्यञ्जने०" [ ४. २. ९७. ] इतीकारः । **प्रगूण** इति– "गुंत् पुरीषोत्सर्गे" "दुगोरू च" [ ४. २. ७७. ] इति क्तयोस्तस्य नत्वमूकारश्च । "यांक् प्रापणे" **प्रयाणम्** । "डुवपीं बीजसन्ताने" **प्रवपणम्** । **प्रयायमाणमिति**– "शत्रानशौ०" [ ५. २. २०. ] इत्यानश् । **प्रयायिणाविति**– प्रयातोऽवश्यमिति "णिन् चावश्यकाधमर्ण्ये" [ ५. ४. ३६. ] इति णिन् । **अप्रयाणिरिति**– अप्रयाणं "नञोऽनिः शापे" [ ५. ३. ११७. ] इत्यनिः । **प्रयोजयन्तीति**– णत्वमिति शेषः । **प्रकॢप्यमानमिति**– "कृपौङ् सामर्थ्ये" कर्मण्यानश् क्यः "ऋर ऌलम्०" [ २. ३. ९९. ] इति ऌकारः, वर्णैकदेशस्य वर्णग्रहणेन ग्रहणात् समुदायव्यापारे चावयवस्यापि स्वव्यापारानुच्छेदेन व्यापारात् ऌकारे उच्चार्यमाणे तदवयवस्य लकारस्याप्युच्चारितत्वात् तन्निमित्तः प्रतिषेधो न विरुध्यत इति । **प्रेण्वनम्, प्रेन्वनमिति**– प्रपूर्वात् "इवु व्याप्तौ च" इत्यतः "उदितः०" [ ४. ४. ९८. ] इति नागमेऽनट् "वोत्तरपदान्तनस्यादेः०" [ २. ३. ७५. ] इति णत्वविकल्पः ॥ छ. ॥ २. ३. ८५. ॥

**न्या० स०**—स्वरात् । * गतिकारक० * इति न्यायात् "रषृवर्णा०" [ २. ३. ६३. ] इति सिद्धमेव, किन्तु **प्रयायिणौ परियायिणावित्यत्र** "वोत्तर०" [ २. ३. ७५. ] इति वा णत्वं स्यात् तन्निवृत्त्यर्थमिदमारभ्यते । **कृद्विषयस्येति**– कृतीति विषयसप्तमीयं, न निमित्तसप्तमी, तस्यां हि स्वरात् परस्य धातोर्नस्य कृति निमित्ते णत्वमिति सूत्रार्थः स्यात्, न चैतत्, असंभवात्, नहि ख्यादीनां कृति निमित्तभूते स्वरात् परो धातुनकारोऽस्ति, येन प्राप्तौ प्रतिषेधोऽर्थवान् स्यादिति स्वरादिति कृन्नकारस्य विशेषणम्, न "अदुरुपसर्गान्तर०" [ २. ३. ७७. ] इत्यस्य, धातोर्वा, "देशेऽन्तरो यम-हनः" [ २. ३. ९१. ]" इति प्रतिषेधाद् अनेन हि प्राप्तस्य स प्रतिषेधः । न चान्तःशब्दो धातुर्वा स्वरान्तो येन प्रतिषेधोऽर्थवान् स्यादिति, किञ्चोपसर्गविशेषणे प्रभुग्न इत्यत्रापि स्यात् । कृद्विशेषणमपि न, तस्मिन्नपि कृते कृतो यः स्वरस्ततः परस्य नकारस्येति स्थिते प्रयाणीयमित्यादौ प्राप्तिः, प्रहीण इत्यादौ न स्यादिति । **प्रकॢप्यमानमिति**– वर्णैकदेशस्य वर्णग्रहणेन ग्रहणात् समुदायव्यापारे चावयवस्य लकारस्याप्युच्चारणमित्यलचटेति प्रवर्तत एव, यत ऌकारस्य मध्येऽर्धमात्रो लकारोऽग्रे, पश्चाच्च तुरीयः स्वरभागोऽस्ति ॥ २. ३. ८५. ॥

## नाम्यादेरेव ने । २ । ३ । ८६ ॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य नागमे सति नाम्यादेरेव धातोः परस्य स्वरादुत्तरस्य कृद्विषयस्य नकारस्य णो भवति । प्रेङ्खणम्, प्रेङ्गणम्; प्रेङ्खमाणः, प्रेङ्गमाणः; अत्र शानः, प्रेङ्खिणौ, प्रेङ्गिणौ; अप्रेङ्खणिः, अप्रेङ्गणिः; प्रेङ्खणी-

यम्, प्रेङ्कणीयम् । नाम्यादेरिति किम् ? प्रमङ्गनम्, प्रकम्पनम् । एवकार इष्टावधारणार्थः, न एव सति नाम्यादेरिति हि नियमे इह णो न स्यात्– प्रेहणम्, प्रोहणम्; पूर्वेण सिद्धे नियमार्थं वचनम् । नग्रहणं नागमादेशोपलक्षणार्थम् । नकारस्य व्यवधाने हि प्राप्तिरेव नास्ति– प्रेन्वनम् । व्यञ्जनान्तादेवायं नियमः, ण्यन्तात् तु "णेर्वा" [ २. ३. ८८. ] इति परत्वात् विकल्प एव– प्रमङ्गणा, प्रमङ्गना ॥ ८६ ॥

**श० न्या०** । नाम्या० । **ने** इति सत्सप्तमीयं, न परसप्तमी, नाम्यादेर्धातोर्नागमे निमित्तभूते स्थानिनो नकारस्याभावादित्याह– **नागमे सतीति** । **प्रेङ्खणम्, प्रेङ्कणमिति**– " उख नख० " इति गत्यर्थदण्डके " इखु " इति पठ्यते " इगु " इत्यपि, तयोरुदित्वान्नागमः " म्नां धुड्वर्गे० " [ १. ३. ३९. ] इति ङकारः, ततोऽनट् । **प्रेङ्खमाण** इति– " वयः-शक्ति-शीले " [ ५. २. २४. ] इति शानः । **एवकार** इति– नाम्यादेरेव नागमे सति न त्वन्यस्मादिति, ततश्च प्रमङ्गनमित्यादौ नाम्यादेरेव नागमे सतीति नियमेन निवर्त्तितत्वात् " स्वरात् " [ २. ३. ८५. ] इत्यनेन णत्वं न भवति । एवकारमन्तरेणेष्टव्यतिरेकं दर्शयति– **न एवे**त्यादि । **पूर्वेणे**ति– " स्वरात् " [ २. ३. ८५. ] इत्यनेनेत्यर्थः । **नग्रहणमि**ति– यथा 'शिड्नान्तरेऽपि' इत्यत्र नग्रहणं तदादेशोपलक्षणार्थम्, एवमन्यत्रापि, एवं ह्यभिन्नः प्रक्रमो भवति, अपि च नियमार्थोऽयमिष्यते, नग्रहणे च नागमादेशोपलक्षणे " स्वरात् " [ २. ३. ८५. ] इत्यनेन णत्वस्य सिद्धत्वान्नियमार्थोऽयमुपपद्यते– नाम्यादेरेव नागमे सतीति; स्वार्थसमर्पके तु [ न ]ग्रहणे **प्रेण्वनमि**त्यादौ 'अलचटतवर्ग' इति प्रतिषेधात् " स्वरात् " [ २. ३. ८५. ] इत्यनेन प्राप्तेरभावादप्राप्तमेव णत्वमनेन विधीयते, तस्मादस्य नियमार्थतां प्रक्रमभेदं चेच्छता नग्रहणं तदादेशोपलक्षणार्थं मन्तव्यमिति । **नकारव्यवधाने ही**ति– प्रक्रमभेदादिदोषादिति शेषः, प्रक्रमाभेदे च सम्भवति प्रक्रमभेदस्याज्यायस्त्वादिति, नाम्यादयश्च नागमेऽष्टावेव, तत्र " इदु परमैश्वर्ये " " इवु व्याप्तौ च " " ऋ[इ]जुङ् गतौ " " ऋजुङ् भर्जने च " अमीषां च-त-ट-चवर्गैर्व्यवधानाद् विधेरभावः, शेषाश्चत्वार " उख नख० " इत्यादिदण्डकपठिता एव प्रायेण प्रयोजयन्ति, तत्र त्रयो दर्शिताश्चतुर्थस्य तूदाहार्यम्, तत्र यदि प्रक्रमभेदमप्यङ्गीकृत्य नागमे सति सूत्रोपात्तत्वान्नकारव्यवधानेऽपि नकार एव सति विध्यर्थमिदं स्यात्, तदा इवुरेव परिशिष्यते, ततश्च 'नाम्यादेरेव ने' इत्यपनीय 'इन्व' इत्येवं क्रियते, तस्माद् गुरुकरणं व्याप्त्यर्थम्, अत एवोक्तं नागमादेशोपलक्षणार्थम् । ननु स्वरान्तव्यवच्छेदार्थं व्यञ्जनान्तादिति कर्तव्यम्, न च वाच्यं नागमे स्वरान्तधातोरसंभवः, णिगन्तानां स्वरान्तत्वसम्भवादत आह– **ण्यन्तात्** त्वित्यादि– अयमभिप्रायः– प्रेङ्खणमित्यादावस्यावकाशः, प्रयापणेत्यादौ " णेर्वा " [ २. ३. ८८. ] इत्यस्य, प्रेङ्खणेत्यादौ तूभयप्राप्तौ परत्वाद् विकल्प एव, अत एव प्रमङ्गणेत्यादौ नियमाप्रवृत्तिः ॥ छ ॥ २. ३. ८६. ॥

**न्या० स०—नाम्यादेरे०** । प्रेङ्खणमित्यादौ " कवर्गैक० " [ २. ३. ७६, ] इति नागमस्य न णत्वं " म्नां० " [ १. ३. ३९.] इति बहुवचनेन बाधितत्वात् । **परत्वाद् विकल्प** इति– प्रेङ्खणमित्यादौ " नाम्यादे० " [ २. ३. ८६. ] इत्यस्यावकाशः, प्रयापणेत्यादौ " णेर्वा " [ २. ३. ८८. ] इत्यस्य, 'प्रेङ्खणा, प्रेङ्खना' इत्यादौ तूभयप्राप्तौ परत्वाद् विकल्प एव, अत एव प्रमङ्गणमित्यादौ नियमाप्रवृत्तिः ॥ २. ३. ८६. ॥

## व्यञ्जनादेर्नाम्युपान्त्याद् वा ॥ २ । ३ । ८७ ॥

**त० प्र०—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परो यो व्यञ्जनादिर्नाम्युपान्त्यो धातुस्ततः परस्य कृद्विषयस्य स्वरादुत्तरनकारस्य णो वा भवति । प्रमेहणम्, प्रमेहनम्; प्रकोपणम्, प्रकोपनम्; प्रगुप्यमाणम्, प्रगुप्यमानम्; प्रकोपिणौ, प्रकोपिनौ; अप्रकोपणिः, अप्रकोपनिः; प्रकोपणीयम्, प्रकोपनीयम् । व्यञ्जनादेरिति किम् ? प्रेहणम्, प्रोहणम् । नाम्युपान्त्यादिति किम् ? प्रवपणम्, प्रवहणम् । स्वरादित्येव– प्रभुग्नः, परिभुग्नः । अदुरित्येव– दुर्मोहनः, दुर्गूहनः । अलचटतवर्गशसान्तर इत्येव– प्रभेदनम्; प्रभोजनम् । " स्वरात् " [ २. ३. ८५. ] इत्यनेन नित्यं प्राप्ते विभाषेयम् ॥ ८७ ॥**

**श० न्या०**—व्यञ्ज० । उभयत्राप्यन्यपदार्थे धातुर्विशेष्यत इत्याह– **व्यञ्जनादेरि**त्यादि । प्रमेहः प्रकोप इत्यनटि– **प्रमेहणमि**त्यादि । " गुपच् व्याकुलत्वे " " वय-शक्ति-शीले " [ ५. २. २४. ] इति शाने श्ये– **प्रगुप्यमाणः** । " ईहि चेष्टायाम् " प्रेहा– **प्रेहणम्**, व्यञ्जनादित्वाभावाद् विकल्पाभावः । अथ नाम्युपान्तानां धातूनां व्यञ्जनान्तत्वाव्यभिचारात् सम्भवे व्यभिचारे च विशेषणस्यार्थवत्त्वाद् व्यञ्जनादित्युक्तेऽपि तदन्तप्रतिपत्तेरभावान्मध्यपतितस्य चोपान्तभूतेन नामिना आक्रान्तत्वात् पारिशेष्यादादिसम्प्रत्यय एव, किमादिग्रहणेन ? उच्यते– व्यञ्जनं यन्नाम्युपान्तमित्यपि सम्बन्धः स्यात्, अथ स्वरव्यञ्जनसमुदायस्वान्नाम्युपान्तत्वस्य व्यञ्जनस्वभावानुपपत्तेर्नैष सम्बन्ध उपपद्यत इति चेत् ? एवं तर्हि प्रतिपत्तिर्गरीयसीत्यादिग्रहणम् ।

**प्रभुग्न** इति– "भुजोंत् कौटिल्ये" कर्मणि क्तः "सूयत्याद्योदितः" [४. २. ७०.] इति नत्वम्। "स्वरात्" [२. ३. ८५.] इति नित्ये प्राप्ते विकल्पार्थं वचनमिदमित्याह– **[स्वरादिति]** ॥ छ ॥ २. ३. ८७.]

**न्या० स०**—व्यञ्जनादे०। **दुर्मोहन** इति– दुर्मुह्यतेऽनेनास्मिन् वा "करणाधारे" [५. ३. १२९.] अनट्, दुर्मुह्यतीति नन्द्यादिभ्यो वा। **दुर्गूहन** इत्यत्र "गोहः स्वरे" [४. २. ४२.] ऊत् ॥ २. ३. ८७.॥

## णेर्वा। २। ३। ८८॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परस्य ण्यन्ताद् धातोर्विहितस्य स्वरादुत्तरस्य कृद्विषयस्य नकारस्य णो वा भवति। प्रमङ्गणा, प्रमङ्गना; प्रयापणम्, प्रयापनम्; प्रयापिणौ, प्रयापिनौ; अप्रयापणिः, अप्रयापनिः; प्रयापणीयम्, प्रयापनीयम्। विहितविशेषणं किम्? प्रयाप्यमाणः, प्रयाप्यमान इति यकेन व्यवधानेऽपि यथा स्यात्। अलचटतवर्गशसान्तर इत्येव– प्रदापनम्, प्रतियापनम्। अनाम्यादिभ्यो धातुभ्यो नागमे सति "नाम्यादेरेव ने" [२. ३. ८६.] इति नियमेनाऽप्राप्ते, शेषेभ्यस्तु "स्वरात्" [२. ३. ८५.] इत्यनेन नित्यं प्राप्ते उभयत्र विभाषेयम् ॥ ८८ ॥

**श० न्या०—णेर्वा। णेरिति** पञ्चमीनिर्देशादनन्तर एव कृति णत्वं स्यादिति प्रयाप्यमाण इत्यादिसिद्ध्यर्थं क्यादिव्यवायेऽपीति वक्तव्यम्, न वक्तव्यम्, सूत्रेषु यथेष्टं वाक्याध्याहाराण्ण्यन्ताद् यो विहितः कृत् तद्विषयस्य तस्येति विज्ञायत इत्याह– **ण्यन्ताद् धातोर्विहितस्येति**– ण्यन्तात् परो यः कृदित्येवमप्याश्रीयमाणे न दोषः, ण्यन्तस्य कृतश्च स्वरादिव्यवायेऽपि णत्वस्याभ्यनुज्ञानादिति। प्रपूर्वान्मङ्गतेर्णिगि "णिवेत्त्यास०" [५. ३. १११.] इति स्त्रियामने आपि च– **प्रमङ्गणा**; एवं– यातेर्णिगन्तात् "अर्त्ति-रि०" [४. २. २१.] इति प्वागमे पूर्ववदनडादौ– **प्रयापणम्**। णेरिति पञ्चम्या विहितविशेषणं प्रागुक्तं, तस्य प्रयोजनमाह– **विहिते**त्यादि। किमियं प्राप्ते विभाषा पक्षे निवर्त्तनफला?, उताप्राप्ते पक्षे प्रापणफला?, उतोभयत्र प्राप्ते चाप्राप्ते च तदुभयफला?, तत्र यदि प्राप्ते प्रयापणमित्यादि सिद्ध्यति, न प्रमङ्गणेत्यादि नियमेन निवर्त्तितत्वात्, अथाप्राप्ते तर्हि विपर्ययः, अथोभयत्रोभयसिद्धेरदोषः, एवं तर्हि व्याप्तिन्यायादुभयत्रेयं विभाषेत्याह– **अनाम्यादिभ्य** इत्यादि ॥ छ ॥ २. ३. ८८. ॥



**न्या० स०**—णेर्वा। **शेषेभ्यस्त्विति**– नागमरहितेभ्यः ॥ २. ३. ८८. ॥

## निर्विण्णः। २। ३। ८९॥

**त० प्र०**—निर्पूर्वाद् विदेः सत्ता-लाभ-विचारार्थात् परस्य क्तनकारस्य णत्वं निपात्यते। निर्विण्णः प्राव्राजीत्। कश्चित् तु वेत्तेरपीच्छति– निर्विण्णवानिति च ॥ ८९ ॥

**श० न्या०**—निर्वि०। **सत्ता-लाभ-विचारार्थादिति**– "विदिंच् सत्तायाम्" "विद्लृंती लाभे" "विदिंप् विचारणे" इति पठितात्, न "विदक् ज्ञाने" इत्यतस्तस्य सेट्कत्वादिति, इतरेषां त्वनिट्त्वादिति। एते त्रयोऽपि धातूनामनेकार्थत्वाद् वैराग्ये वर्तन्ते। **निर्विण्ण** इति– "रदादमूर्च्छमदः०" [४. २. ६९.] इति क्तकारस्य धातुदकारस्य च नत्वं, ततोऽलचटतवर्गेति प्रतिषेधाण्णत्वाप्राप्तौ क्तनकारस्य णत्वं निपात्यते, धातुनकारस्य तु "तवर्गस्य श्चवर्ग०" [१. ३. ६०.] इति णत्वम्। **कश्चित् त्विति**– यदि वेत्तिरपि वैराग्यार्थ इति ॥ छ ॥ २. ३. ८९. ॥

**न्या० स०**—निर्विण्णः। सत्तेत्यादि– एते त्रयोऽपि धातूनामनेकार्थत्वाद् वैराग्ये वर्तन्ते। **निर्विण्ण** इति– "विदक् ज्ञाने" इत्यस्य सेट्त्वात्। * गतिकारक० * इति न्यायात् "रषृवर्ण०" [२. ३. ६३.] इति सिद्धमेव, किमनेन? सत्यम्– अलचटेति व्यावृत्त्याऽप्राप्तौ क्तनकारस्य णत्वं निपात्यते, धातुनकारस्य तु "तवर्गस्य०" [१. ३. ६०.] इति, "रषृवर्णा०" [२. ३. ६३.] इत्यनेन वा सिद्धमेव ॥ २. ३. ८९. ॥

## न ख्या-पूग्-भू-भा-कम-गम-प्याय-वेपो णेश्च। २। ३। ९०॥

**त० प्र०**—अदुरुपसर्गा-ऽन्तःशब्दस्थाद् रषृवर्णात् परे ये ख्यादयोऽण्यन्ता ण्यन्ताश्च धातवस्तेभ्यः परस्य कृद्विषयस्य नकारस्य णो न भवति। प्रख्यानम्, प्रख्यायमानम्, प्रख्यायिनौ, अप्रख्यानिः, प्रख्यानीयम्; पूग्– प्रपवनम्, प्रपूयमानम्, प्रपाविनौ, अप्रपवनिः, प्रपवनीयम्; भू– प्रभवनम्, प्रभूयमानम्, प्रभाविनौ, अप्रभवनिः, प्रभवनीयम्; भा– प्रभानम्, प्रभायमानम्, प्रभायिनौ, अप्रभानिः, प्रभानीयम्; कम्– प्रकमनम्, प्रकम्यमानम्, प्रकामिनौ, अप्रकमनिः, प्रकमनीयम्; गम्– प्रगमनम्, प्रगम्यमानम्, प्रगामिनौ, अप्रगमनिः, प्रगमनीयम्; प्याय्– प्रप्यानः, प्रप्यानवान्, प्रप्यायनम्, प्रप्यायमानम्, प्रप्यायिनौ, अप्र-

ण्यायनिः, प्रण्यायनीयम्; वेप्– प्रवेपनम्, प्रवेपमानम्, प्रवेपिनौ, अप्रवेपनिः, प्रवेपनीयम्; ण्यन्तेभ्योऽपि– प्रख्यापनम्, प्रपावनम्, प्रभावना, प्रभापनम्, प्रभापना, प्रकामना, प्रगमना, प्रप्यायना, प्रवेपनम्; अण्यन्तेभ्यो नित्यं वेपो ण्यन्तेभ्यश्च विकल्पेन प्राप्ते प्रतिषेधः। पूगो गकारः किम्? पवतेर्निवृत्त्यर्थः, तेन प्रपवणम्, प्रपूयमाणम्, इत्यादि। ख्यातेर्णत्वमिति कश्चित्– प्रख्याणम्, प्रख्यायमाणम् ॥ ९० ॥

**श० न्या०**—न ख्या०। ख्या इति निरनुबन्धोपादानं चक्षादेशस्य "ख्यांक् प्रकथने" इत्यस्य च परिग्रहार्थम्। "पूग्श् पवने," "भू सत्तायाम्" अस्यादेशो वा, "भांक् दीप्तौ," "कमूङ् कान्तौ," "गम्लृं गतौ," "ओप्यायैङ् वृद्धौ," "टुवेपृङ् चलने," पूर्ववदनडादि। एवं ण्यन्तेभ्योऽपि प्रतिषेधस्य प्राप्तिपूर्वकत्वाद् यथायोगं प्राप्तिं दर्शयति– **अण्यन्तेभ्य** इत्यादि– नित्यं "स्वरात्" [ २. ३. ८५. ] इत्यनेन, वेपो विकल्पेन "व्यञ्जनादे०" [ २. ३. ८१. ] इत्यनेन, ण्यन्तेभ्यश्च विकल्पेन "णेर्वा" [ २. ३. ८७. ] इत्यनेनेत्यर्थः। अथ पूगिति गकारः किमर्थ इत्याह– **पूग** इत्यादि। **ख्यातेरिति**– कश्चित्– चन्द्रगोमीति; ण्यन्तस्य धात्वन्तरत्वात् पक्षेऽनुवाददोषप्रसङ्गाच्च निषेधो न प्राप्नोतीति णिग्रहणात् ॥ छ ॥ २. ३. ९०. ॥

**न्या० स०**—न ख्या-पूग्०। ख्या इति निरनुबन्धोपादानं ख्यादेशस्य "ख्यांक् प्रकथने" इत्यस्य च परिग्रहार्थम्। **नित्यमिति**– "स्वरात्" [ २. ३. ८५. ] इत्यनेन। **वेपो विकल्पेनेति**– "व्यञ्जनादेर्नाम्युपा०" [ २. ३. ८७. ] इत्यनेन। **ण्यन्तेभ्यश्चेति**– णेर्वा" [ २. ३. ८७. ] इत्यनेन ॥ २. ३. ९०. ॥

## देशेऽन्तरोऽयन-हनः । २ । ३ । ९१ ॥

**त० प्र०**—अन्तःशब्दात् परस्यायनशब्दस्य हन्तेश्च संबन्धिनो नकारस्य देशेऽभिधेये णो न भवति। अन्तरयतेऽस्मिन्निति– अन्तरयनो देशः, एवमन्तर्हननो देशः। देश इति किम्? अन्तरयणं वर्तते, अन्तर्हणनम्, अन्तर्हण्यते। अन्तर्घणो देश इति तु निपातनात्। अन्तर इति किम्? प्रायणो देशः, प्रहणनो देशः। अयन-हन इति किम्? अन्तर्णमनो देशः ॥ ९१ ॥

**श० न्या०**—देशे०। **अन्तरयनो देशः** इति– अयतेरेतेर्वा "करणाधारे" [ ५. ३. १२९. ] इत्यनट्, एवं हन्तेरप्यनटि– **अन्तर्हननः** "स्वरात्" [ २. ३. ८५. ] इति "हनः" [ २. ३. ८२. ] इति च प्राप्तं णत्वमनेन निवर्त्यते। अन्तरायः– **अन्तरयणमि**ति। अन्तर्हतिः– **अन्तर्हणनम्**, अत्र देशविषयत्वाभावात् "स्वरात्" [ २. ३. ८५. ] इति "हनः" [ २. ३. ८२. ] इति च णत्वम्। यद्येवं कथमन्तर्घणो देश इति देशविषये णत्वमित्याह– **अन्तर्घण** इत्यादि– अन्तर्घण इति बाहीकेषु देशविषयस्येयं संज्ञा। उपसर्गादन्तरश्चेत्यन्तर्ग्रहणेऽनुवर्त्तमानेऽपि पुनरुपादानमुपसर्गादिति निवृत्त्यर्थम्, तेनोपसर्गात् परस्यायन-हन इत्येतस्य देशविषयेऽपि णत्वमित्याह– **अन्तरि**त्यादि। **प्रायणो देशः** पूर्ववदनडादिः। अन्तर्णम्यतेऽस्मिन्निति पूर्ववदनटि णोपदेशत्वात् "अदुपसर्गान्तरः०" [ २. ३. ७७. ] इति णत्वे– **अन्तर्णमन** इति ॥ छ. ॥ २. ३. ९१. ॥

**न्या० स०**—देशेऽन्तरो०। "स्वरात्" [ २. ३. ८५. ] इति "हनः" [ २. ३. ८२. ] इति च यथासंख्यं प्राप्ते प्रतिषेधः। **अन्तर्घण** इति– "हनोऽन्तर्घनान्त०" [ ५. ३. ३४. ] इत्यलन्तो निपात्यते, बाहीकेषु देशविशेषस्येयं संज्ञा। प्रायणो देश इति– इं ढुं, इण्क् वा, प्रेयतेऽस्मिन्निति अनटि "स्वरात्" [ २. ३. ८५. ] इति णत्वे, अयतौ तु "उपसर्गस्यायौ" [ २. ३. १००. ] इति लत्वं स्यात् ॥ २. ३. ९१. ॥

## षात् पदे । २ । ३ । ९२ ॥

**त० प्र०**—पदे परतो यः षकारस्तस्मान्निमित्तात् परस्य नकारस्य णो न भवति। सर्पिष्पानम्, यजुष्पानम्, दुष्पानम्; अत्र "पानस्य भाव-करणे" [ २. ३. ६९. ] इति, निष्पानमिति "स्वरात्" [ २. ३. ८५. ] इति, निष्पायनमिति "णेर्वा" [ २. ३. ८८. ] इति प्राप्ते प्रतिषेधः। षादिति किम्? निर्णयः, निर्याणम्। पद इति किम्? पुष्णाति, सर्पिष्केण ॥ ९२ ॥

**श० न्या०**—षात् प०। "समासेऽसमस्तस्य" [ २. ३. १३. ] इत्यादिना विहितस्य षकारस्य **ष** इत्यनुकरणम्, अकार उच्चारणार्थस्ततः पञ्चमी। **पदे** इति परे सप्तमीत्याह– **पदे परत** इत्यादि। **सर्पिष्पानमि**ति– सर्पिषः पानमिति षष्ठीसमासः; एवं– **यजुष्पानम्**, अत्र "समासेऽसमस्तस्य" [ २. ३. १३. ] इति षत्वम्। **दुष्पानमि**ति– "निर्दुर०" [ २. ३. ९. ] इति षत्वप्राप्तिं दर्शयति– **अत्रे**त्यादि **निष्पानमि**ति– अत्रापि "निर्दुर०" [ २. ३. ९. ] इति षत्वम्। अत्रापि परेऽसदिति "स्वरात्" [ २. ३. ८५. ] इत्यस्यासत्त्वात् "पानस्य०" [ २. ३. ६९. ] इत्यनेनैव प्राप्तिः, यदि च प्रकरणे प्रकरणमसत्त्व तु योगे योग इत्याश्रीयते तदा परत्वात् "स्वरात्" [ २. ३. ८५. ] इत्यने-

नैव प्राप्तिरित्याह- **स्वरादि**ति । निर्णीतिर्निर्णयनं वा- **निर्णयः** " युवर्ण० " [ ५. ३. २८. ] इत्यल् । **पुष्णातीति**- " पुषश् पुष्टौ " अत्र पदमध्यऽव्यवस्थितत्वात् पद इति प्रतिषेधाभावाद् " रषृवर्णाद्० " [ २. ३. ६३. ] इति णत्वम् । **सर्पिष्कजे**ति- कुत्सितादौ कप् ॥ छ ॥ २. ३. ९२. ॥

**न्या० स०—षात् पदे** । **सर्पिष्पानमि**ति- नन्वत्र षकाराश्रितं मा भूण्णत्वं, सर्पिस्रेफाश्रितं कथं नहि ? उच्यते- यत्रोत्पद्यमानस्य णत्वस्य निमित्तद्वयं भवति तत्र प्रत्यासत्त्याऽनन्तरमेव गृह्यते इति । **सर्पिष्केणे**ति- सर्पिः कायतीति सर्पिस् अम् काधातुः अग्रे इति स्थिते क इत्यस्याविभक्त्यन्तत्वात् पदत्वाभाव इति नानेन णत्वप्रतिषेधः । ननूत्तरपदमपि पदमुच्यते यथा " वेदूतोऽनव्यय० " [ २. ४. ९८. ] इत्यत्र पदे इत्युक्तेऽपि उत्तरपदे इति वृत्तिकृता व्याख्यानात्, तद्वदिहापि पदे इत्युक्तेऽपि उत्तरपदमपि लप्स्यते, तत् कथं सर्पिष्केणेत्यत्र व्यावृत्तिः ? सत्यम्- * नानिष्टार्था शास्त्रप्रवृत्तिः * इति न्यायादेवंविधं व्याख्यानं न सर्वत्रापि युक्तं, किं त्वभिप्रेतसिद्ध्यर्थं क्वचिदेव; यद्वा कुत्सिताद्यर्थे कप् तदा निर्विवादमेव ॥ २. ३. ९२. ॥

## पदेऽन्तरेऽनाङ्यतद्धिते । २ । ३ । ९३ ॥

**त० प्र०—आङन्तं तद्धितान्तं च वर्जयित्वाऽन्यस्मिन् पदे निमित्त-निमित्तिनोरन्तरे व्यवधायके नकारस्य णो न भवति । प्रावनद्धम्, पर्यवनीतम्, माषकुम्भवापेन, व्रीहिकुम्भवापेन, [ एवम्- ] चतुरङ्गयोगेन, भर्तृबाहुयुग्मेन, शेषभीममुखेन । अत्र यदा माषकुम्भस्य वाप इति, माषाः कुम्भो वापोऽस्येति वा समासस्तदा " वोत्तरपदान्तनस्यादे० " [ २. ३. ७५. ] इति विकल्पे प्राप्ते प्रतिषेधः, यदा तु माषस्य कुम्भवाप इति तदा " कवर्गैकस्वरवति " [ २. ३. ७६. ] इति नित्ये प्राप्ते; एवं शेषेष्वपि यथासंभवं वाच्यम् । अन्ये तु माषाणां कुम्भवाप इति व्यवधायकस्योत्तरपदावयवत्वे प्रतिषेधं नेच्छन्ति, तन्मते- माषकुम्भवापेणेत्यादौ नित्यमेव णत्वम् । अपरे तु माषकुम्भस्य वाप इति व्यवधायकस्य पूर्वपदावयवत्वे प्रतिषेधं नेच्छन्ति, तन्मते- माषकुम्भवापेण, माषकुम्भवापेनेत्यादौ विकल्प एव भवति । अनाङीति किम् ? प्राणद्धम्, पर्याणद्धम्; प्रण्यास्यति, प्रण्यापचति । अतद्धित इति किम् ? आर्द्रगोमयेण, शुष्कगोमयेण, परमापूपमयेण, यूषयावकेण ॥ ९३ ॥**

**श० न्या०—पदे०** । **प्रावनद्धमि**ति- प्रावनह्यते स्म, पर्यवनीयते स्म- **पर्यवनीतम्**, " एकस्वरादनुस्वारेतः " [ ४. ४. ५६ ] इतीडभावः, " नहाऽऽहोर्ध-तौ [ २. १. ८५. ] इति ढत्वापवादो धत्वम्, ततो यदा " गति-क्वन्य० " [ ३. १. ४२. ] इत्यत्र द्वयोः समर्थयोः समास इत्यपेक्ष्य[ते] तदावयवस्य ( तदाऽवशब्दस्य ) नद्धशब्देन पश्चात् प्रशब्द-स्यात्रनद्धशब्देन, यदा तु सामर्थ्यमात्रमेव केवलं तस्य निमित्तं, न तु द्वित्वसंख्येति पक्षस्तदा प्राऽवयोरेककालमेव नद्धशब्देन समासः, अत्र प्रत्ययलोपलक्षणेनावशब्दस्य स्याद्यन्तत्वाद् पदत्वान्निमित्तनिमित्तिनोर्व्यवधायकत्वादनेन प्रतिषेधाद् " अदुरुपसर्गान्तरः० " [ २. ३. ५७. ] इति णत्वं न भवति । **एवमि**ति- [ **चतुरङ्गयोगेन** ] चत्वार्यङ्गानि यस्य तेन योगः, यदिवाऽङ्गैर्योगोऽङ्गयोगः, चतुर्णामङ्गयोगश्चतुरङ्गयोगस्तेन, पूर्ववत् " कवर्गैकस्वरवति " [ २. ३. ७६. ] इति णत्वं प्राप्तम्, एवं- **भर्तृबाहुयुग्मेने**त्यादावपि । **अन्ये त्विति**- ते ह्युत्तरपदत्वे चापदादिविधौ प्रत्ययलोपलक्षणस्य प्रतिषेधं मन्यमानाः पदत्वाभावान्निषेधाप्रवृत्तौ नित्यं णत्वमिति मन्यन्ते । **प्राणद्धमि**ति " अदुरुपसर्गान्तरः० " [ २. ३. ५७. ] इति णत्वम् । **प्रण्यास्यती**ति- " नेर्मादा० " [ २. ३. ७९. ] इति णत्वम् । **आर्द्रगोमयेणे**ति- " गोः पुरीषे " [ ६. २. ५०. ] इति गोशब्दान्मयट्, तत आर्द्रं च तद् गोमयं चेति विशेषणसमासः । **परमापूपमयेणे**ति- " प्रकृते मयट् " [ ७. ३. १. ] इति मयट् । **यूषयावकेणे**ति- स्वार्थिकः कः ॥ छ ॥ २. ३. ९३. ॥

**न्या० स०—पदेऽन्तरे०** । **चतुरङ्गयोगेन**- अत्र " कवर्गैक० " [ २. ३. ७६. ] इति प्राप्तं निषिध्यते । ' माषकुम्भस्य वापः, माषस्य कुम्भवापः ' इत्यस्मिंश्च वाक्ये " वृत्त्यन्तोऽसषे " [ १. १. २५. ] इति पदसंज्ञानिषेधेऽपि भूतपूर्वकपदत्वमाश्रीयते । **कवर्गैकस्वरवति** इति- कवर्गांशेन विशेषविहितत्वात्, न तु " वोत्तर० " [ २. ३. ७५. ] इति विकल्पः । **यूषयावकेणे**ति- यवानां विकारः " विकारे " [ ६. २. ३०. ] अण् वृद्धिः, याव एव " यावादिभ्यः कः " [ ७. ३. १५. ] यूषेण- मांसमुद्गादिरसेन, मिश्रः, यावकः- अलक्तकः- यूषयावकस्तेन ॥ २. ३. ९३. ॥

## हनो घि । २ । ३ । ९४ ॥

**त० प्र०—हन्तेर्नकारस्य घकारे निमित्त-निमित्तिनोरन्तरे सति णो न भवति । वृत्रघ्ने, वृत्रघ्ना, वृत्रघ्नः; ब्रह्मघ्नः; शत्रुघ्नः । संज्ञायां " पूर्वपदस्थान्नाम्न्यगः " [ २. ३. ६४. ] इति, असंज्ञायां तु " कवर्गैकस्वरवति " [ २. ३. ७६. ] इति; प्रघ्नन्ति, प्राघ्नन्, प्राघानि, प्रघानिष्यते इत्यादिषु तु " हनः " [ २. ३. ८२. ] इति प्राप्ते प्रतिषेधः । हन इति किम् ? अर्घेण, परिघेण । घीति किम् ? वृत्रहणौ, प्रहणनम् ॥ ९४ ॥**

**श० न्या०—हनो०।** अन्तर इति वर्तते, तच्च घीत्यनेन सम्बन्ध्यत इत्याह- **घकार** इत्यादि। वृत्रं हतवानिति क्विपि तल्लुकि टायां ङयि च "अनोऽस्य" [ २. १. १०८. ] इत्यकारलोपे "हनो ह्नः०" [ २. १. ११२. ] इति घ्नादेशे- **वृत्रघ्ना, वृत्रघ्ने** इति। एवं- ब्राह्मणं शत्रुं च हतवान् "ब्रह्मादिभ्यः" [ ५. १. ८५. ] इति टकि "गम-हन०" [ ४. २. ४४. ] इत्यकारलोपे पूर्ववद् घ्नादेशे- **ब्रह्मघ्नः, शत्रुघ्नः,** इति, अत्र नामत्वात् "पूर्वपदस्थात्०" [ २. ३. ६४. ] इति प्राप्तं णत्वं निवर्त्यत इति। **अघेण, परिघेण,** इति- अत्र न हनो नकारः किन्तु स्यादेरिति "रषृवर्णात्०" [ २. ३. ६३. ] इति "कवर्गैकस्वरवति" [ २. ३. ७६. ] इति भवत्येव णत्वम् ॥ छ. ॥ २. ३. ९४. ॥

**न्या० स०—हनो०।** [ नेह व्याख्यातम् ] ॥ २. ३. ९४. ॥

## नृतेर्यङि । २ । ३ । ९५ ॥

**त० प्र०—**नृतेर्धातोर्नकारस्य यङ्विषये णो न भवति। **नरीनृत्यते, नरिनर्ति, नर्नर्ति, नरीनृतीति;** अत्र "रषृवर्णात्०" [ २. ३. ६३. ] इत्यादिना प्राप्तिः। यङीति किम्? हरिरिव नृत्यतीति हरिणर्ती नाम कश्चित्, "पूर्वपदस्थान्नाम्न्यगः" [ २. ३. ६४. ] इति णत्वम् ॥ ९५ ॥

**श० न्या०—नृते०।** **यङी**ति विषयसप्तमीत्याह- **यङ्-विषये** इति। **नरीनृत्यत** इति- "नृतैच् नर्तने" यङ् "ऋमतां रीः" [ ४. १. ५५. ] **नरिनर्ति, नर्नर्ति,** "रि रौ च लुपि" [ ४. २. ५६. ] इति रिरागमः। **नरीनृती**ति- यङ्तुरुस्तो.०" [ ४. ३. ६४. ] इतीत्। **हरिणर्ती**ति- "कर्तुर्णिन्" [ ५. १. १५३. ] इति णिन् ॥ छ. ॥ २. ३. ९५. ॥

**न्या० स०—नृतेर्यङि।** हरिणर्त्तीत्यत्र "कर्तुर्णिन्" [ ५. १. १५३. ] ॥ २. ३. ९५. ॥

## क्षुभ्नादीनाम् । २ । ३ । ९६ ॥

**त० प्र०—**क्षुभ्ना इत्येवमादीनां नकारस्य णो न भवति। क्षुभ्नाति, क्षुभ्नीतः, क्षुभ्नन्ति, क्षुभ्नन्, क्षुभ्नानः; तृप्नोति, तृप्नुतः, तृप्नुवन्ति, तृप्नुवन्, तृप्नुवानः; आचार्यस्य भार्या- आचार्यानी, आचार्यस्य भोग आचार्यभोगस्तस्मै हित आचार्य-भोगीनः; एषु "रषृवर्णात्" [ २. ३. ६३. ] इत्यादिना प्राप्ते, सर्वनाम, नृनमनः, परिनृत्तम्, गुरुनृत्तम्, परिनर्तनम्, ग्रामनटः, शरनदः, शरनदी, गिरिनगरम्, परिनिवेशः, श्रीनिवासः, शबराग्निः, दर्भानूपः, हरिनन्दी, हरिनन्दनः, गिरिगहनम्; एषु "पूर्वपदस्थात्०" [ २. ३. ६४. ] इत्यादिना प्राप्ते, परिनन्दनम्- अत्र "अदुरुपसर्गान्तरो०" [ २. ३. ७७. ] इत्यादिना प्राप्ते; सुप्रख्येन, अत्र "कव-र्गैकस्वरवति" [ २. ३. ७६. ] इति प्राप्ते प्रतिषेधः। क्षुभ्ना, तृप्नु, आचार्यानी, आचार्यभोगीन, सर्वनामन्, नृनमन, नृनमेत्येके; नृत्त, नर्तन, नट, नद, नड इत्येके; नदी, नगर, निवेश, निवास, अग्नि, अनूप, नन्दिन्, नन्दन, गहन, नदन; ख्याग् इति क्षुभ्नादिः। बहुवचनमाकृतिगणार्थम् ॥ ९६ ॥

**श० न्या०—क्षुभ्ना०।** "रषृवर्णात्०" [ २. ३. ६३. ] इत्यादिशास्त्रेण प्राप्तस्य णत्वस्य प्रतिषेधोऽयमारभ्यते। **क्षुभ्ने**ति रूपग्रहणं, न तु यङ्लुपि निवृत्त्यर्थं, लुप्ततिव्निर्देशेन धातु-ग्रहणं तदा हि क्षोभणमित्यत्रापि स्यात्, एवं- **तृप्नु** इत्यत्रापि; यद्येवं **क्षुभ्नीत** इत्यादौ णत्वशास्त्रस्य परेऽसत्त्वादीकारादौ कृते क्षुभ्नेति रूपाभावान्न प्राप्नोति, उच्यते- णत्वशास्त्रेऽसद्विधा-वित्यस्यानिवृत्तत्वात् स्वरादेशस्य स्थानिवद्भावादेकदेशविकृतस्या-नन्यत्वाद् वा भविष्यतीत्यदोषः। **क्षुभ्नातीत्यादि**- "क्षुभश् संचलने," "तृपट् प्रीणने," "मातुलाचार्य०" [ २. ४. ६३. ] इति ङ्यामानि च- **आचार्यानी**। "भोगोत्तर०" [ ७. १. ४०. ] इति ईने- **आचार्यभोगीनः**। सर्वेषां नाम **सर्वनाम**। **नृनमन** इति- करणेऽनट्, नृणां नृषु वा नमनमिति विग्रहः। **परिनृत्तम्** क्लीबे क्तः। **गुरुनृत्तमि**ति षष्ठीसमासः। **परिनर्तनमि**ति- भावेऽनट्। [ **ग्रामनटः** ] नटतीत्यचि- नटः, ततो ग्रामशब्देन षष्ठीसमासः, एवं- **शरनदः, शरनदी**त्यादयः षष्ठीसमासाः। परिनिविशन्तेऽस्मि-न्निति "व्यञ्जनात्" [ ५. ३. १३२. ] इति घञि- **परि-निवेशः**। **श्रीनिवास** इति- श्रियो निवास इति, श्रियो निवसन्त्यस्मिन्निति पूर्ववद् घञि- श्रीनिवासः। शबरस्याग्निः- **शबराग्निः**। **दर्भानूप** इति- अनुगता आपोऽस्मिन्निति "ऋक्पूः०" [ ७. ३. ७६. ] इति समासान्तोऽत् "अनो-र्देशे०" [ ३. २. ११०. ] इति अबित्यस्योप्, ततः षष्ठी-समासः। **हरिनन्दी**ति- हरिरिव नन्दतीति "कर्तुः०" [ ५. १. १५३. ] इति णिन्। **हरिनन्दन** इति- अनान्तेन षष्ठीसमासः, एवं- **गिरिगहनमि**ति। **परिनन्दनमि**ति- परिनन्देरनट्। सर्वैव णत्वप्राप्तिर्वृत्तावुक्तेति नेहोच्यते। [ **सुप्र-ख्येन** ] सुष्ठु प्रचष्टे "उपसर्गादातः" [ ५. १. ५६. ] इति डे- सुप्रख्यः, तत इनादेशः, "न ख्या-पूग्०" [ २. ३. ९०. ] इत्यत्र कृन्नकारस्य प्रतिषेधात् डप्रत्ययान्तोऽत्र पठ्यते। **बहुवचनमि**ति- क्षुभ्नादिराकृतिगणः, बहुवचनेन

चास्याकृतिगणता द्योत्यते, तेनाप्यन्योऽप्यविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः ॥ छ. २. ३. ९६. ॥

**न्या० स०—क्षुभ्नादीनाम्** । क्षुभ्नेति लुप्ततिव्निर्देशेन धातुग्रहणं, न तु यङ्लुप्निवृत्त्यर्थम्, अनुबन्धनिर्देशे हि क्षोभणमित्यत्रापि स्यात्, एवं तृप्नु इत्यत्रापि । यद्येवं तर्हि क्षुभ्नीत इत्यादौ णत्वशास्त्रस्य परेऽसत्त्वादीकारादौ कृते क्षुभ्नेति रूपाभावान्न प्राप्नोति, उच्यते– स्वरादेशस्य स्थानिवद्भावादेकदेशविकृतस्यानन्यत्वाद् वा भविष्यतीत्यदोषः। बहुवचनेन चास्याकृतिगणता द्योत्यते, तेनान्योऽप्यविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः, तेन धनदवाचकनरवाहनशब्दस्य न णत्वम् । **नूनमेत्येक** इति– अविभक्तिको निर्देशः, अकारान्तस्त्वयं ज्ञातव्यः ॥ २. ३. ९६. ॥

## पाठे धात्वादेर्णो नः । २ । ३ । ९७ ॥

**त० प्र०**—पाठविषये धात्वादेर्णकारस्य नकार आदेशो भवति । **णीग्– नयति, णम्– नमति, णह्– नह्यति । पाठ इति किम् ?, णकारीयति । धात्विति किम् ? णकारः । आदेरिति किम् ? भणति । सर्वे च नादयो णोपदेशाः– नृति, नन्दि, नर्दि, नशि, नाटि, नक्कि, नाध, नाथृ, नॄवर्जम् । नाटीति "नटण् अवस्यन्दने" इत्यस्य वर्जनम्, भौवादिकस्य तु "णट नृत्तौ" इत्यस्य–प्रणटति, प्रणाटयति । णोपदेशश्चैषां "णहिनुमीनाने:" इत्यस्य विषयव्यवस्थार्थः** ॥९७॥

**श० न्या०**—पाठे० । धातोरादिर्धात्वादिस्तस्य, सम्बन्धे षष्ठी, ण इत्यपि तथैवेत्युभयत्र समानाधिकरणे षष्ठी, नकारोऽनेनैव विधीयमान आदेश इत्याह– **धात्वादेरि**त्यादि । **णकारीयती**ति– णकारमिच्छतीति "अमाव्ययात्०" [ ३. ४. २३. ] इति क्यन्, अत्र पाठ इत्यनेन धातूपदेशस्य ग्रहणात् तत्र च णकारीयतेरनुपदेशान्नत्वाभावः । के पुनस्ते धातवो णकारादयः पठ्यन्त इत्याह– **सर्वे चे**त्यादि । अथ कस्मादादावेव ते नकारादयो न पठ्यन्ते ? तथा च सति नेदमारब्धव्यमित्याह– **णोपदेशश्चैषामि**त्यादि– येषां णकारादीनामुपदिष्टानामनेन णकारस्यादिभूतस्य नकारो विधीयते तेषामेवोपसर्गस्थान्निमित्तात् प्रयोगे णत्वं नान्येषामित्येवंविधां व्यवस्थामिष्टानिष्टप्रविभागेन दर्शयितुं णोपदेशस्तेषामित्यर्थः ॥ छ. ॥ २. ३. ९७ ॥

**न्या० स०—पाठे धा०** । नन्वादिग्रहणं किमर्थं ? तमन्तरेणापि णोपदेशबलान्नत्वं न भविष्यति, अन्यथा मनित्येव पठ्येत, नैवम्– णोपदेशस्य "अदुरुपसर्गा०" [ २. ३. ७७. ] इति णत्वे फलमस्ति, तथाहि– उपसर्गपूर्वस्य प्रणमति, अन्यत्र तु भवतीति स्यादित्यादिग्रहणं कर्त्तव्यमेव । **पाठ इति किमिति**– पाठ इत्यनेन धातूपदेशस्य ग्रहणाण्णकारीयतेरनुपदेशान्नत्वाभावः । अथैते नादय एव पठ्यन्तां, तथा च सति नेदमारब्धव्यं भवतीत्याह– **णोपदेशश्चे**ति, एवमुत्तरत्र षोपदेशेऽपि ॥ २. ३. ९७. ॥

## षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः । २ । ३ । ९८ ॥

**त० प्र०**—पाठे धात्वादेः षकारस्य **सकार आदेशो भवति, न चेत् षकारः ष्ट्यै-ष्ठिव-ष्वष्कसंबन्धी भवति । षहि– सहते । षिच्– सिञ्चति । पाठ इत्येव– षण्ढीयति । धात्वित्येव– षण्ढः । आदेरित्येव– लषति । ष्ट्यादिवर्जनं किम् ? ष्ट्यायति, ष्ठीवति, ष्ठीव्यति, ष्वष्कते । स्वर-दन्त्यपरसकारादयः स्मि-स्विदि-स्वदि-स्वञ्जि-स्वपयश्च षोपदेशा, सृपि, सृजि, स्त्या, स्तॄ, स्तृ, सृ, सेकृवर्जम् । षोपदेशश्चैषां षत्वविषयव्यवस्थार्थः** ॥ ९८ ॥

**श० न्या०**—षः सो० । पाठ इत्यस्यानुवृत्तस्योपयोगं दर्शयति– **षण्ढीयती**ति– षण्ढ इत्यत्र नामोपदेशेऽस्य पठितत्वेऽपि धातुग्रहणानुवर्त्तमानात् तदादेः षकारस्य सकारो न भवतीति । **लषती**ति– असत्यादिग्रहणानुवर्त्तने धात्वन्तरषकारस्यापि सकारः स्यात् । ननु षकारस्योपदेशसामर्थ्यादेव सत्वं न प्रवर्त्तिष्यते, उपदिष्टः षकारो यदि सकारः क्रियेत षकारोपदेशो व्यर्थः स्यात् सकार एव पठ्येत; उच्यते– लेष्टुरित्यत्र "अनादेशादेः०" [ ४. १. २४. ] इत्येत्वे कृते कृतसकारत्वेन षत्वसिद्ध्यर्थत्वात् षोपदेशो न व्यर्थ इत्यत्रापि सत्वं स्यादिति । **ष्ट्यादी**ति– "ष्ट्यैं संघाते" "ष्ठिवूच् निरसने" "ष्वष्कि गतौ" । अथ षादयः के उपदिष्टाः ? के पुनस्ते ? यतो लक्षणमन्तरेण तेषामसंकीर्णतया प्रत्येतुमशक्यत्वात् पाठस्य च लोकप्रमादाद् विचलनात्, उच्यते– यथा पठ्यन्ते आगमपारम्पर्यादभ्रष्टसमाश्रयणेन पाठमात्रादेव षादीनां निर्णयः कर्तुं शक्यत एव, अथ स्मरणस्य शाब्दत्वात् सम्यग्निश्चायकत्वाभावाल्लक्षणस्यैव सम्यग्निश्चायकत्वमिति यो मन्यते तं प्रति पूर्वाचार्यप्रसिद्धं षादीनां लक्षणमाह– **स्वरदन्त्ये**त्यादि– स्वर-दन्त्यौ परावयवौ सकारं पूर्वमवयवमपेक्ष्य येषां ते च [ ते ] सकारादयश्चेति विग्रहः । अस्य लक्षणस्याव्याप्तिपरिहारार्थमाह– **स्मिस्विदी**त्यादि– एषामोष्ठ्यदन्त्यो-छ्यपरत्वे स्वरदन्त्यपरत्वाभावात् स्मिप्रभृतयो न षोपदेशाः स्युरिति स्म्यादिग्रहणम् । अतिप्रसक्तस्य लक्षणस्यापवादमाह– **सृपी**त्यादि । अथ षादीन् धातून् उपदिश्य तेषां किमर्थमनेन सकारः क्रियते ? आदावेव सादयः पठितव्याः, तथा चेदमनारब्धव्यं सम्भवती( व्यमेव भवती )त्याशङ्कापनोदार्थ-

माह– **षोपदेशश्चे**त्यादि– यदि हि ये एते षादयः पठितास्ते सादय एव पठ्येरन्, तथा च सति नाम्यन्तस्थादिनिमित्ताद् येषां धातूनां सकारस्य षत्वमिष्यते तान् स्वरूपेण पठित्वा तदीयस्य सकारस्य षत्वं विधातव्यम्, एवं चातिशयेन ग्रन्थगौरवं स्यात्, षाद्युपदेशे तु षादित्वात् सकारे कृते स कृतः सकार इति 'असीषहत्, असीषिचत्' इत्यादौ षत्वं भवति, अन्यत्र न भवतीति व्यवस्था सिध्यति, ग्रन्थगौरवं च परिहृतं भवतीति। "ष्ट्यै स्त्यै संघाते च" इति दन्त्यपरत्वात् षोपदेशत्वे प्राप्ते एकस्य षोपदेशत्वं निवार्यते, उभयोः पाठसामर्थ्यात्, यदि हि द्वयोरपि षोपदेशत्वं निवार्येत एक एव पठ्येत, एवमनिवार्यमाणेऽपि षोपदेशत्वेऽनयोरेकः षोपदेशोऽपरो विपरीत इति। ष्ठिवेष्ठकारपरत्वेन षकारलक्षणेन षोपदेशत्वं नास्ति, "ष्ठिवूक्लम्वाचमः" [ ४. २. ११०. ] इति निर्देशात् षोपदेशत्वेऽनेन लक्षणेन सत्वं प्राप्तं प्रतिषिध्यते, थकारपरत्वे तु षकारस्य स्वरदन्त्यपर इत्यनेन षोपदेशत्वात् सत्वे प्राप्ते प्रतिषेधः; ष्वष्केस्तु स्वरदन्त्यपर इत्यनेन लक्षणेन षोपदेशनिरासे प्राप्ते सत्वनिषेधद्वारेण ष्वष्केः षोपदेशत्वं ज्ञाप्यत इति ॥ छ. २. ३. ९८. ॥

**न्या० स०—षः सोऽष्ट्यै०**। न च वाच्यमत्राप्यादेरित्यधिकाराभावेऽपि पाठबलादेव लषतीत्यादौ सत्वं न भविष्यति, अन्यथा लस् इति कुर्यात्, यतः षकरणस्यान्यदपि फलमस्ति, यथा कृतत्वात् परोक्षायां षत्वे विलेषुरित्यादि सिद्ध्यति, न– आदिग्रहणाभावे प्रस्तुते लसतीति स्यात् ॥ २. ३. ९८. ॥

## ऋ-र लृ-लं कृपोऽकृपीटादिषु । २ । ३ । ९९ ॥

**त० प्र०—**कृपेर्धातोर्ऋकारस्य लृकारो रेफस्य च लकार आदेशो भवति, स चेत् कृपिः कृपीटादिविषयो न भवति। **क्लृप्तः, क्लृप्तवान्, क्लृप्यते, चिक्लृप्सति, अचीक्लृपत्, कल्पते, कल्पयति, कल्पिता, कल्प्ता, कल्पकः, कल्पः, चलीक्लृप्यते, चलीकल्प्ति।** अकृपीटादिष्विति किम्? **कृपीटम्, कृपणः, कृपाणः; कृपः, कर्पूरः, कर्परः; कर्पटः, कर्पटिः;** इत्यादि। **बहुवचनमाकृतिगणार्थम्** ॥ ९९ ॥

**श० न्या०—ऋर०।** **ऋर** इति समाहारद्वन्द्वात् स्थानषष्ठी। **लृ-लमि**ति– समाहारद्वन्द्वात् प्रथमैकवचनम्, अकार उच्चारणार्थः। **कृप** इत्यवयवसम्बन्धे षष्ठी। **अकृपीटादिष्वि**ति विषयसप्तमीत्याह– **कृपेरि**त्यादि। **क्लृप्तः, क्लृप्तवानि**ति– "क्तौ सामर्थ्ये" अतः क्त-क्तवतू। **क्लृप्यते** "क्यः शिति" [ ३. ४. ७०. ] इति क्यः। **चिक्लृप्सति** कृप इत्यतः सन् "उपान्त्ये" [ ४. ३. ३४. ] इति तस्य किद्भावाद् गुणाभावः। **अचीक्लृपदि**ति– कृपेः "प्रयोक्तृव्यापारे णिग्" [ ३. ४. २०. ] "ऋद्वर्णस्य" [ ४. २. ३७. ] इति गुणबाधनार्थमृकारः, ततो दिः, "णि-श्रि०" [ ३. ४. ५८. ] इति ङकारः, द्विर्वचनादि, एतेषु अन्तरङ्गत्वात् प्रागेव ऋकारस्य लृकारः। **कल्पयती**ति– णिग् गुणः। **कल्पिता, कल्प्ते**ति– "धूगौदितः" [ ४. ४. ३८. ] इति पक्षे इट्। **कल्पक** इति णकः। **कल्प** इति– घञ्। अथ वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते इति पक्षस्याप्याश्रितत्वात् ऋकार-लृकारयो रेफलकारग्रहणेनैव तदेकदेशत्वाद् ग्रहणात् कृपो रो लमित्युक्तेऽपि क्लृप्त इत्यादावृकारस्य लृकारः सिध्यति, किं स्थान्यादेशतया तयोरुपादानेनेति, उच्यते– वर्णैकदेशानां वर्णग्रहणेनाग्रहणमित्यपि पक्षोऽस्तीति ज्ञापनार्थं पृथगुपादानम्, तथा चायमेव पक्षः प्रसृततरोऽत्र तत्र तत्राश्रितो द्रष्टव्यः, यदाहुः– अत्र पूर्ववर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत् कार्यं न भवति, तच्छायानुकारिणो हि ते न पुनस्त एव, पृथक्प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्तीति। कृपेः "तृ-कृ-कृपि०" [ उणा० १५१. ] इति कीटे– **कृपीटम्**, एवं– "कृ-गृ-पृ-कृपि०" [ उणा० १८८. ] इति किल्लणे– **कृपणः**। तथा "कृपि-विषि०" [ उणा० १९१. ] इत्याणकि– **कृपाणः**, नाम्युपान्त्यत्वात् के– **कृपः**, "मी-मसि-पशि०" [ उणा० ४२७. ] इत्यूरे– **कर्पूरः**, "जठर-क्रकर०" [ उणा० ४०३. ] इत्यरे– **कर्परः**, "दिव्यवि०" [ उणा० १४२. ] इत्यटे– **कर्पटः**। "कृपिशकिभ्यां०" [ उणा० ६३०. ] इत्यटौ– **कर्पटिः**, बहुवचनं कृपीटादेराकृतिगणत्वं द्योतयतीत्याह– **बहुवचनमि**त्यादि ॥ छ. ॥ २. ३. ९९. ॥

**न्या० स०—ऋर लृलम्०**। अथ 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इत्यस्यापि पक्षस्याश्रितत्वाद् लृकार-लकारयोरेफ-लकारग्रहणेनैव ग्रहणात् किं द्वयोरुपादानेन? "कृपे रो लः" इत्येव क्रियताम्, नैवम्– क्वचिद् वर्णैकदेशानां वर्णग्रहणेनाग्रहणमिति ज्ञापनार्थम्। "दूरादामन्त्र्यस्य०" [ ७. ४. ९९. ] इत्यत्र ऋद्वर्जितस्य स्वरस्य प्लुतत्वं वदन् स्वरद्वारेणैव सिद्धे पुनरपि यत् लृकारग्रहणं करोति तदेव बोधयति– ऋत्प्रतिषेधे लृतोऽपि प्रतिषेधप्रसङ्ग इति * ऋकारापदिष्टं कार्यं लृकारस्यापि * इति। **अचीक्लृपत्** अत्र "ऋद्वर्णस्य" [ ४. २. ३७. ] "ऋतोऽत्" [ ४. १. ३८. ], अत एव च 'चलीकृप्यते' इत्यादौ "ऋमतां

री:" [ ४. १. ५५. ] "रिग्रौ च लुपि" [ ४. १. ५६. ] इति सिद्धम् ॥ २. ३. ९९. ॥

## उपसर्गस्याऽयौ । २ । ३ । १०० ॥

**त० प्र०**—उपसर्गसंबन्धिनो रेफस्य "अयि गतौ" इत्यस्मिन् धातौ परे लकारादेशो भवति । प्लायते, पलायते, पल्ययते, प्लल्ययते; अत्रानेकवर्णव्यवधानान्नेच्छन्त्येके । प्रतिपूर्वस्य प्रयोग एव नास्तीत्यन्ये– निलयनम्, दुलयनम् । कथं निरयते ? दूरयते ? रुत्वस्यासिद्धत्वात् निसो दुसश्च न भवति । उपसर्गस्येति किम् ? परस्यायनं– परायनम् । अयाविति किम् ? "इंण्क् गतौ" अल्– प्रायः, परायः । अयीति इकारनिर्देशोऽयि गतावित्यस्य परिग्रहार्थः ॥ १०० ॥

**श० न्या०**—उप० । उपसर्ग इति संज्ञा "धातोः पूजार्थ०" [ ३. १. १. ] इति धातुयोगे, उपसृज्यतेऽनेनेत्युपसृजत्यनेन वा करणे घञ्, तस्यावयवसम्बन्धे षष्ठी । **अयावि**ति सप्तमी । अत्र द्वौ पक्षौ सम्भवतः– उपसर्गस्यायतिपरस्य यो रेफस्तस्य लत्वमित्येकः, रेफस्योपसर्गावयवस्यायतिपरस्येति द्वितीयः, **उपसर्गसम्बन्धिनो रेफस्ये**त्यादिवृत्तिग्रन्थ उभयोरपि पक्षयोः साधारणत्वेन योजयितव्यः, तत्राद्ये पक्षे रेफस्योपसर्गविशेषणत्वादुपसर्गस्यैव च श्रुतत्वादयतिना सम्बन्धात् तयोरेवाव्यवधानाश्रयणादेकस्यैकेनानेकेन च वर्णेन व्यवधाने सर्वत्र रेफस्य लत्वं सिध्यति; द्वितीये पक्षे विशेषणत्वेनोपसर्गस्याप्राधान्यादनुमीयमानस्यापि रेफस्य कार्यित्वेन प्राधान्यात् तस्यैवायतिना सम्बन्धात् तयोश्चानन्तर्यस्यासम्भवाद् वचनप्रामाण्यादेकेन वर्णेन व्यवधानाश्रयणात् प्रत्ययत इत्यादौ संघाते व्यात्मकेन व्यवायाल्लत्वाभावः । निर्दुरोश्चानन्तर्यसम्भवेऽप्युपसर्गस्येति वचनात् तयोरेव न ग्रहणम् । प्र-परा-परिपूर्वादयतेस्तेप्रत्यये शवि लत्वे– **प्लायत** इत्यादि । **एक** इति– येऽयतिना साक्षात् सम्बन्धमिच्छन्ति । **अन्य** इति– व्याख्यातृणां शिक्षयितारः पूर्व एव, केयं भवतोर्विशेषणविशेष्यभावे विप्रतिपत्तिः, यतः प्रयुक्तानां शब्दानां शास्त्रेणानुगमः क्रियते, न च प्रतिपूर्वोऽयतिः प्रयुज्यत इति लत्वस्य प्रवृत्त्यप्रवृत्त्योर्युष्माकं कोऽभिनिवेश इति । दुरय्यते निन्दार्थवृत्तित्वात् खलभावेऽनटि– **दुलयनम्** । दुस् सान्त एवेति लत्वं मन्यते पूर्वे । अयीति इकारोपादानस्य फलमाह– **अयी**त्यादि ॥ छ. २. ३. १००. ॥

**न्या० स०**—उपसर्गस्यायौ । **दुलयन**मिति– दुलय्यते निन्दार्थवृत्तित्वात् खलभावेऽनटि सिद्धम् ॥ २. ३. १००. ॥

## ग्रो यङि । २ । ३ । १०१ ॥

**त० प्र०**—यङि प्रत्यये परे गिरते रेफस्य लकारादेशो भवति । गर्हितं निगिरति– निजेगिल्यते । गृणातेस्तु यङेव नास्ति । केचित् तु तस्यापीच्छन्ति, लत्वं तु नेच्छन्ति । यङीति किम् ? निगीर्यते ॥ १०१ ॥

**श० न्या०**—ग्रो य० । ग्र इति रेफापेक्षा षष्ठी । "गॄत् निगरणे" "गॄ-लुप०" [ ३. ४. १२. ] इति यङि इरादेशे द्वित्वे गुणे "भ्वादेः०" [ २. १. ६३. ] इत्यस्य परे लविधावसत्त्वात् प्रागेवानेन रेफस्य लत्वे– **निजेगिल्यते** । **ग्र०** इति सामान्यनिर्देशेऽपि "न गृणा०" [ ३. ४. २३. ] इति गृणातेर्यङ्निषेधाद् गिरतेरेवात्र लत्वमित्याह– **गृणातेरि**त्यादि । **केचिदि**ति– पूर्वे व्याख्यातारः, यङ्विधावत्र च 'गॄ' इति सामान्येनोपादानात्, तदा तस्य लत्वं भवति । देवनन्दी तु अत्र "गिरो यञ्" इति सूत्रं कुर्वन् लत्वं गृणातेर्नेच्छति, अत आह– **लत्वं नेच्छन्ती**ति– अत्रापि केचिदिति सम्बन्धनीयम् । निपूर्वाद् गिरतेः क्ये– **निगीर्यते** ॥ छ. ॥ २. ३. १०१. ॥

**न्या० स०**—ग्रो यङि । **निजेगिल्यत** इति– अत्र "भ्वादेः०" [ २. १. ६३. ] इत्यस्य परे लत्वेऽसत्त्वम् । **यङेव नास्तीति**– "न गृणा-शुभ-रुचः" [ ३. ४. १३. ] इति निषेधात् । **तस्यापीच्छन्तीति**– तन्मते निजेगीर्यते इति भवति ॥ २. ३. १०१ ]

## नवा स्वरे । २ । ३ । १०२ ॥

**त० प्र०**—गिरते रेफस्य स्वरादौ प्रत्यये विहितस्य लकारो वा भवति । गिलति, गिरति; निगलनम्, निगरणम्; निगालकः, निगारकः । स्वर इति किम् ? निगीर्णः, निगीर्णवान् । विहितविशेषणं किम् ? इह च यथा स्यात्– निगाल्यते, निगार्यते; इह च मा भूत्– गिरौ, गिरः ॥ १०२ ॥

**श० न्या०**—नवा० । गॄतस्तिवि शे इरादेशेऽनेन लत्वे– **गिलति**, पक्षे **गिरति** । निर्गीर्यत इत्यनटि गुणे रो वा लत्वे– **निगलनम्** । निगिरतीति णके वृद्धौ– **निगालक** इत्यादि । निगीर्यते स्म, निगिरति स्म क्त-क्तवत्वोः "ऋल्वादेः०" [ ४. २. ६८. ] इति तस्य नकारे– **निगीर्ण** इत्यादि । ननु निपूर्वात् गॄतो णौ वृद्धौ क्ये उभयं प्राप्नोति– लकारो णिलोपश्च, तत्र नित्यत्वात् पूर्वं णिलोपेन भाव्यम्; न च प्रत्ययलोपलक्षणेन णिलोपस्य स्थानिवत् प्राप्तेर्लत्वस्यापि नित्यत्वम्, वर्णाश्रये प्रत्ययलक्षणस्य प्रतिषेधात् स्वरादिमात्राश्रये-

णान्तरङ्गत्वाल्लकारोऽशित्प्रत्ययाश्रयत्वाद् बहिरङ्गाण्णिलुकः प्रागेव भवतीत्यपि न वाच्यम्, यतो णिलोपविधौ विषयसप्तम्याश्रयणादुभयोः समानैवान्तरङ्गता; उच्यते- स्वर इति नेयं लकारापेक्षा निमित्ता सप्तमी, किं तर्हि? रेफापेक्षा, नवेत्यस्य कार्यविशेषणस्य निमित्तात् पूर्वनिर्देशात्, तेन स्वरादौ प्रत्यये यो विहितो रेफस्तस्य निर्निमित्तो लकारः प्रवर्त्तते, तेन निगाल्यत इत्यादौ लकारो भवति, गिराविरयादौ तु न भवति, अत आह- **विहितविशेषणमि**त्यादि ॥ छ ॥ २. ३. १०२. ॥

**न्या० स०**—नवा स्वरे। निगाल्यत इति- अत्र निपूर्वाद् गृतो णौ वृद्धौ लकारो णिलोपश्चेत्युभयप्राप्तौ नित्यत्वात् पूर्वं णिलोपः, न च * प्रत्ययलोपे प्रत्ययलक्षणम् * इति न्यायेन लत्वस्यापि प्राप्तौ तस्यापि नित्यत्वं वर्णाश्रये प्रत्ययलक्षणस्य प्रतिषेधात् ॥ २. ३. १०२. ॥

## परेर्घा-ऽङ्क-योगे । २ । ३ । १०३ ॥

**त० प्र०**—परिसंबन्धिनो रेफस्य 'घ अङ्क योग' इत्येतेषु शब्देषु परेषु लो वा भवति। पलिघः, परिघः; पल्यङ्कः, पर्यङ्कः; पलियोगः, परियोगः ॥ १०३ ॥

**श० न्या०**—परे०। परिहण्यतेऽनेनेति "परेर्घः" [ ५. ३. ४०. ] इत्यलि निपातनाद् घादेशेऽनेन लत्वे- **पलिघः**। अङ्कयतीत्यचि- अङ्कः, अङ्कं परिगतोऽङ्केन वा परिगतः- **पल्यङ्कः** "प्रात्यव०" [ ३. १. ४७. ] इत्यादिना समासः, अञ्च्यतेऽनेनेति वा "व्यञ्जनाद्०" [ ५. ३. १३२. ] इति घञि- अङ्कः, व्यक्तिश्चात्राञ्चेरर्थः, अङ्को हि लक्षणं, लक्षणेन च लक्ष्यस्य व्यक्तिः क्रियते। **पलियोग** इति- युक्तिर्योगः, पूर्ववत् प्रादिसमासः ॥ छ ॥ २. ३. १०३. ॥

**न्या० स०**—परेर्घाङ्कयोगे। पल्यङ्क इति- अङ्कमस्यच्, अङ्कं परिगतोऽङ्केन वा परिगतः, एवं- परियोगः ॥२. ३. १०३.॥

## ऋफिडादीनां डश्च लः । २ । ३ । १०४ ॥

**त० प्र०**—ऋफिड इत्यादीनामृ-रो लृ-लौ डकारस्य च लो भवति वा। लृफिडः, लृफिलः; ऋफिलः, ऋफिडः; लृतकः, ऋतकः; कपलिका, कपरिका; तिलिपिलीकम्, तिर्पिरीकम्; कपिलकम्, कपिरकम्; लोमानि, रोमाणि; अङ्गुलिः, अङ्गुरिः; पुलुषः, पुरुषः; तलुनः, तरुणः; सलिलम्, सरिरम्; अलम्, अरम्; मूलम्, मूरम्; कलीलः, करीरः; कलम, कर्म; मुकुलम्, मुकुरम्; पांसुलः, पांसुरः; लेखा, रेखा; लिक्षा, रिक्षा; लोहितम्, रोहितम्, इत्यादि। अर्थभेदेऽपि- इला भूमिः, इरा अमृतम्; तल्पलो गजपृष्ठैकदेशः, तर्परः पशूनां कण्ठघण्टः; कलभो बालहस्ती, करभ उष्ट्रः; शलभः पतङ्गः, शरभोऽष्टापदः; कालो वर्णः, कारो रक्षानिर्वेशः; वालः केशः; वारः क्रियाभ्यावृत्तिः; लघुरपचितपरिणामः, रघुः राजा; गलः प्राण्यङ्गम्, गरो विषम्; एवं- मुद्गल- मुद्गर, मण्डल- मण्डर; कन्दल- कन्दरादयोऽपि द्रष्टव्याः। एकार्थेऽपि दृश्यते- गलं गरं च; बडिशम्, बलिशम्; डश्च लः; ऋफिलः, ऋफिडः; वलभी, वडभी; चूला, चूडा; इला, इडा; व्यालः, व्याडः; पुरोलाशः, पुरोडाशः; षोलशः, षोडशः; बलिशम्, बडिशम्; पुलिनम्, पुडिनम्, पीला, पीडा। यथादर्शनमन्येऽपि ऋफिडादौ द्रष्टव्याः। संयुक्तस्य आदेश्च न दृश्यते- पाण्डुः, कण्डूः, डामरः, डीनः, डुण्डुभः; डिण्डिमः ॥ १०४ ॥

**श० न्या०**—ऋफि०। ऋफिडादीनामित्यवयवसम्बन्धे षष्ठीत्याह- **ऋफिडादीनामि**त्यादि। ऋफिडादयः षड् अव्युत्पन्नाः, व्युत्पत्तौ चार्त्तेर्बहुलवचनात् फिडक्प्रत्ययः। अर्तेरेव क्ते कुत्सितादौ के च- **ऋतकः**। "कवृङ् वर्णे" कपेः सौत्रस्य वा "स्थविर-पिठिर०" [ उणा० ४१७. ] इत्यादिवचनादिरिकप्रत्यये आपि च- **कपरिका**। "तृपौच् प्रीतौ" इत्यस्य "सृणीकाऽस्तीक०" [ उणा० ५०. ] इत्यादिवचनादीके इरागमे उपान्त्यस्य इरादेशे च- **तिर्पिरीकम्**। कपिरशब्दादेव के- **कपिरकम्**। रुहेः "सात्मन्नात्मन्०" [ उणा० ९१६. ] इति मनि लुकि च जसि शसि वा- **रोमाणि**। "अगु गतौ" इत्यतः "उदितः स्वरात्०" [ ४. ४. ९८. ] इति नागमे कृते "मस्यसि०" [ उणा० ६९९. ] इतीत्युरिप्रत्यये- **अङ्गुरिः**। "पॄश् पालन-पूरणयोः" अतो "विदिपृभ्यां कित्" [ उणा० ५५८. ] इत्युषे- **पुरुषः**। तरतेः "यम्यजि०" [ उणा० २८८. ] इति उने- **तरुणः**। "सृं गतौ" अतो "मदि-मन्दि०" [ उणा० ४१२. ] इति इरे- **सरिरम्**। नञ्पूर्वाद् रातेः "गमि०" [ उणा० ९३७. ] इति बहुवचनाड्डित्यमि- **अरम्**। "मूङ् बन्धने" अतः "ऋज्यजि०" [ उणा ३८८. ] इति किति रे- **मूरम्**। किरतेः "कृ-शॄ-पॄ-पूग्०" [उणा० ४१८.] इति ईरे- **करीरम्**। करोतेर्मनि- **कर्म**। "मकुङ् मण्डने" इत्यस्य "मङ्केर्नलुक् चोच्चास्य" [ उणा० ४२४. ] इत्युरे- **मकुरः**। "पसुण् नाशने" "पंसेर्दीर्घश्च" [ उणा० ७१८. ] इत्युप्रत्यये- पांसुः, पांसवो विद्यन्ते यस्य "मध्वादिभ्यः" [ ७. २. २६. ] इति रे- **पांसुरः**। रिखेः सौत्रस्य भिदादित्वाद् अङि निपातनाद् गुणे- **रेखा**। "रिष हिंसायाम्" इत्यतः

" ऋजि-रिषि० " [ उणा० ५६७. ] इति किति से- **रिक्षा** । रुहेः " हृ-श्या-रुहि० " [ उणा० २१० ] इति किदिते- [ इते- ] **रोहितम्** । एते रत्वे लत्वे चाभिन्नार्थाः । ननु शास्त्रान्तरे लकारस्थाने रेफो विधीयते, तथाहि- " बाल-मूल-लघु-लोम-सूला-ऽङ्गुलादीनां वा लो रमापद्यते इति वक्तव्यम्, एवं- कपिलक इत्यादीनाम्, उच्यते- तैरेवोक्तम्- र-लयोरेकत्व-स्मरणमिति केचित्, किमिदमेकत्वस्मरणम् ? समानविषयत्वम्, एवं च यत्र रो विहितस्तत्राविहितोऽपि लो विहितः, एवं लस्य विधाने रस्यापि विधानम्, तत्र प्रयोज्यानुसारेण व्यवस्था, क्वचित् र एव केवलः, क्वचित् ल एव, क्वचिदुभय-मित्यदोषः । एतेः " इण्-धाभ्यां वा " [ उणा० ३८९. ] इति किति रेफे आपि च- **इरा** । तृप्यतेः " जठरकर्कर० " [ उणा० ४०३. ] इत्यादिवचनादरे- **तर्परः** । किरतेः शृणा-तेश्च " कॄ-शॄ-गॄ-शलि० " [ उणा० ३२९. ] इत्यभे- **करभः** **शरभः** । बाहुलकाद् घञि करणे- **कारः** । वृणोतेर्बाहुलकाद् घञि **वारः** । " रघुङ् गतौ " " रङ्घि-लङ्घि-लिङ्घेर्नलुक् च " [ उणा० ७४०. ] इति उप्रत्यये- **रघुः** । गीर्यतेऽनेनेति " पुन्नाम्नि० " [ ५. ३. १३०. ] घे लत्वे च- **गलः** । गिरति प्राणानिति लिहाद्यचि- **गरः** । " मुदि हर्षे " " मुदि-गूरिभ्यां टिद् ग-जौ चान्तौ " [ उणा० ४०४. ] इत्यरे गकारागमे च- **मुद्गरः** । मण्डेः " जठर-कर्कर० " [ उणा० ४०३. ] इत्यादिवचनादरे- **मण्डरः** । " कदुङ् वैक्लव्ये " " ऋषि-चटि-वटि० " [ उणा० ३९७. ] इत्यरे- **कन्दरः** । [ **ऐकार्थ्ये** ] एकोऽभिन्नोऽर्थो ययोस्तयोर्भाव ऐकार्थ्यम् । वडेः " सौत्रात् कॄ-शॄ-गॄ-शलि० " [ उणा० ३२९. ] इत्यभे गौरादित्वाद् ङ्यां च- **वडभी** । " चुदण् सञ्चोदने " णिज-न्ताद् भिदादिनिपातनादङि- **चूडा** । " ईडिक् स्तुतौ " ईड्यते- स्तूयते आत्माऽस्यामिति " म्लेच्छीडेर्ह्रस्वश्च वा " [ उणा० ३. ] इत्यप्रत्यये ह्रस्वत्वे आपि- **इडा** । " व्येंग् संवरणे " " ऋ-स-तॄ-व्या-लिह्यवि० " [ उणा० १७१. ] इत्यडे- **व्याडः** । पुरो दाश्यते इति घञि पृषोदरादित्वाद् दस्य डत्वे- **पुरोडाशः** । षट् च दश चेति " एकादश-षोडश० " [ ३. २. ९१. ] इति षषोऽन्तस्योत्वे दस्य च डत्वे- षोडश, तेषां पूरणः " संख्यापूरणे डट् " [ ७. १. १५५. ] इति डटि- **षोडशः** । वडेः सौत्रात् " कुलि-कनि० " [ उणा० ५३५. ] इति किशे- **वडिशम्** । " पुल महत्वे " " वृजि-मुहि० " [ उणा० २८३. ] इति किदिने- **पुलिनम्**, निर्देशस्य समानत्वात् क्वचिल्लकारस्य डकारोऽपि- **पुडिनम्** । " पीडण् गहने " " भीषि-भूषि० " [ ५. ३. १०९. ] इति बहु-वचनादङि- **पीडा** । " पनि स्तुतौ " " पनेर्दीर्घश्च " [ उणा० ७६६. ] इति डुप्रत्यये- **पाण्डुः** । " कष हिंसायाम् " " कषेर्ण्डछौ च षः " [ उणा० ८३१. ] इति- **कण्डूः** । " दमूच् उपशमे " " दमेर्णिद् वा दश्च डः " [ उणा० ४०२. ] इति णिदरे- **डामरः** । " डीङ्च् गतौ " " गत्यर्था-कर्मक० " [ ५. १. ११. ] इति कर्तरि क्ते " सूयत्याद्यो-दितः " [ ४. २. ७०. ] इति तस्य नत्वे- **डीनः** । " दमूच् उपशमे " " दमो दुण्ड् च " [ उणा० ३३५. ] इत्युमे- **दुण्डुभः** । डिण्डिमेति ध्वनिमततीति " क्वचित् " [ ५. १. १७१. ] इति डे- **डिण्डिमः** ॥ छ. ॥ २. २. १०४. ॥

**न्या० स०—ऋफिडादीनां०** । अर्तेर्बाहुलकात् फिडक्प्रत्यये- **ऋफिडः** । अर्तेरेव क्ते कुत्सादौ च के- **ऋतकः**, ऋतं सत्यं कायति " आतो डो० " [ ५. १. ७६. ] इति डे वा । कं- सुखं परं यस्यां " शेषाद् वा " [ ७. ३. १७५. ] इति कचि आपि इत्वे- **कपरिका** । तृपेः " सृणीकास्तीका० " [ उणा ५०. ] इति- **तर्परीकं** गन्धद्रव्यविशेषः । कपिरशब्दात् के- **कपिरकं**, कम्पयतीति वा " कीचक० " [ उणा० ३३. ] इति निपातः । **रोमाणी**ति- स्रवन्तीति मन् । **अङ्गुरि** इति- " अगु गतौ " " मस्यसि० " [ उणा० ६९९. ] इति उरौ । नञ्पूर्वाद् रातेः " गमिजनि० " [ उणा० ९३७. ] इति बहुलवचनाद् डत्यमि- **अरम्** । **मूर**मिति- " मूङ् बन्धने " " ऋज्यजि० " [ उणा० ३८८. ] इति किति रे । **करीर** इति- " कॄशॄपॄ० " [ उणा० ४१८. ] इति ईरे- करीरः । **पांसुर** इति- " मध्वादिभ्यो रः " [ ७. २. २६. ] । लिखेः समानार्थाद् रिखो भिदाद्यङि- **रेखा** । **लिक्षे**ति- रिषेः " ऋजिऋषि० " [ उणा० ३८८. ] इति किति से । **गर** इति- गिरति प्राणान् लिहाद्यचि । **मण्डर** इति- मण्डेः " जठर० " [ उणा० ४०३. ] इति अरे । **कन्दर** इति- " कदुङ् वैक्लव्ये " " ऋच्छि-चटि० " [ उणा० ३९७. ] इत्यरे । **ऐकार्थ्ये** इति- एकोऽभिन्नोऽर्थो ययोस्तयोर्भावे । **वलभी**ति- वडेः सौत्रात् " कॄ-गॄ शॄ-शलि० " [ उणा० ३२९. ] इत्यभे गौरादिङ्यां च- वडभी । **चूडे**ति- चुदण् णिजन्ताद् भिदाद्यङि निपातः । **इडे**ति- ईड्यते- स्तूयते आत्माऽस्यां " म्लेच्छीड० " [ उणा० ३. ] इति । **व्याड** इति- व्येंग् " ऋ-स-तॄ-व्या-लिह्यवि० " [ उणा० १७१. ] इत्यडे । **पुरोडाश** इति- पुरो दाश्यते घञि " पृषोदरादयः " [ ३. २. १५५. ] । वडेः सौत्रात् " कुलिकनि० " [ उणा० ५३५. ] इति किशे- **वडिशम्** । **पुलिन**मिति- " पुल महत्वे " " वृजि-महि० " [ उणा० २८३. ] किदिने- **पुलिनम्** ।

निर्देशस्य समानत्वात् क्वचिड्डकारस्य डकारोऽपि– पुडिनम् । पीडेति– “ भीषि-भूषि० ” [ ५. २ १०९. ] इत्यादिना बहुवचनादङ् । पाण्डुरिति– “ पनेर्दीर्घश्च ” [ उणा० ७६६. ] इति डुप्रत्ययः । कण्डूरिति–“ कषेर्ण्डद्वौ च षः ” [ उणा० ८३१. ] इति । डामर इति– “ दमेर्णिद्वा दश्च डः ” [ उणा० ४०२. ] । डीन इति– डीङ्च् “ सूयत्याद्योदितः ” [ ४. २. ७०. ] इति नकारे “ डीयश्व्यैदितः ” [ ४. ४. ६१. ] इति इड्निषेधे– डीनः । डुण्डुभ इति– डुण्डुशब्देन भातीति डुण्डुभः । डिण्डिम– शब्दमततीति “ क्वचित् ” [ ५. १. १७१. ] इति डे– डिण्डिमः, अथवा “ डिमेः कित् ” [ उणा० ३५६. ] ॥ २. ३. १०४. ॥

## जपादीनां पो वः । २ । ३ । १०५ ॥

त० प्र०—जपादिशब्दसंबन्धिनः पकारस्य वकारादेशो वा भवति । जवा, जपा; पारावतः, पारापतः त्रिविष्टपम्, त्रिपिष्टपम्; पारावारः, पारापारः; कवाटः, कपाटः; विष्टवम्, विष्टपम्; कवलः, कपलः; अवाची, अपाची । जपादयः प्रयोगतोऽनुसर्तव्याः ॥ १०५ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधान-स्वोपज्ञशब्दानुशासनबृहद्वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः समाप्तः ॥ २ । ३ ॥

मूलराजासिधारायां, निमग्ना ये महीभुजः ।
उन्मज्जन्तो विलोक्यन्ते, स्वर्गगङ्गाजलेषु ते ॥ २ । ३ । ३ ॥

श० न्या०—जपा० । जपादीनामित्यवयवसम्बन्धे षष्ठीत्याह– जपादीनामित्यादि । जपतीत्यचि– जपा । परात्– विप्रकृष्टादापततीति क्विप्, तस्यापत्यमिति पारापतः । “विष्लृंकी व्याप्तौ ” “ विष्टपोलप० ” [ उणा० ३०७. ] इति– विष्टपम् । तृतीयं विष्टपं– त्रिविष्टपम् । प्राच्यास्तु त्रिपिष्टपमिति पठन्ति, अस्यापि पस्य बाधत्वे [ वा वत्वे ]– त्रिविष्टपम्, संज्ञाशब्दो ह्ययं यथाकथञ्चिद् व्युत्पाद्यः । पारयतीति– पारः, न पारोऽपारः, अपारस्य पारः– पारापारः, राजदन्तादित्वात् पारस्य प्राग्निपातः । “ कपुङ् चलने ” “ कपाट–विराट० ” [ उणा० १४८. ] इत्याटे नलोपे च– कपाटः । विष्टपं पूर्ववत् । के– तालुनि पलति– कपलः । अपामञ्चतीति क्विपि “ अञ्चोऽनचार्याम् ” [ ४ २. ४६. ] इति नलोपे “ अञ्चः ” [ २. ४. ३. ] इति ङ्याम्– अपाची ॥ छ. २ ३. १०५. ॥

इत्याचार्यवर्यश्रीहेमचन्द्रमुनीन्द्रविरचिते स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे शब्दमहार्णवन्यासे द्वितीयस्याध्यायस्य तृतीयः पादः ॥ छ. [ ग्रन्थ १३९१. ]

[ मूलराजासिधारायां, निमग्ना ये महीभुजः ।
उन्मज्जन्तो विलोक्यन्ते, स्वर्गङ्गाजलेषु ते ॥ ७ ॥ ]

अनुसन्धानकारस्य—

ये महीभुजः मही– पृथ्वीम्, भुञ्जन्ति– पालयन्तीति महीभुजः– राजानः, प्रतिपक्षभूपा इति भावः, मूलराजासिधारायां मूलराजस्य– मूलराजनाम्नो नृपस्य, असिधारायां– खड्गफलके, अर्थात् खड्गप्रहारप्रवाहे, निमग्नाः तलभूमिं प्राप्ताः, प्राणान् विहाय भूमौ पतिता इत्यर्थः, स्वर्गङ्गाजलेषु स्वर्गङ्गायाः– स्वर्गभूमौ प्रवहन्त्या मन्दाकिन्याः, जलेषु– पानीयेषु, उन्मज्जन्तः उपरि निर्गच्छन्तः, विलोक्यन्ते दृश्यन्ते, तत्रत्यदेवैरिति शेषः, तथा च परमाश्चर्यमिदं यदिह खड्गधारापतितानां लोकान्तरस्थगङ्गाप्रवाहे उन्मज्जनमिति । अनेन राज्ञा संग्रामे निहता राजानः सूर्यमण्डलं भित्त्वा स्वर्गं गच्छन्तीति कविसमयप्रसिद्ध्या स्वर्गं गता व्योमगङ्गाजलेषु विहरन्तो दृश्यन्त इति तात्पर्यम्, उक्तं च– “ द्वाविमौ पुरुषौ लोके, सूर्यमण्डलभेदिनौ परिव्राड् योगयुक्तश्च, रणे चाभिमुखो हतः ॥ ” इति । तथा चात्रासङ्गत्यलङ्कारध्वनिः “ कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः ” इति लक्षणात् ॥

न्या० स०—जपादीनां पो वः । जप्यति जप्यतः (?) सो “ व्यध-जप-मद्भ्यः ” [ ५. ३. ४७. ] इत्यल् । पारापत इति– परात् विप्रकृष्टादापततीति क्विपि परापत्, तस्यापत्यम् । त्रिविष्टपमिति– विष्लृंकी “ विष्टपोलप० ” [ उणा० ३०७. ] इति तृतीयं विष्टपं, प्राच्यास्त्रिपिष्टपमिति पठन्ति । पारापार इति– पारयतीति पारः, न पारोऽपारः, अपारः पारोऽस्य पारापारः, राजदन्तादित्वात् पारस्य प्राग् निपातः । कपाट इति– “ कपुङ् चलने ” “ कपाटविराट० ” [ उणा १४८. ] इति निपातः । विष्टपमिति– विष्टं पातीति “ क्वचित् ” [ ५. १. १७१. ] इति डे । कवल इति– के– तालुनि पलति ॥ २. ३. १०५. ॥

इति द्वितीयस्याध्यायस्य तृतीयः पादः ॥ २ । ३ ॥

## चतुर्थः पादः ।

## स्त्रियां नृतोऽस्वस्रादेर्ङीः । २ । ४ । १ ॥

त० प्र०—स्त्रियां वर्तमानान्नकारान्तादृकारान्ताच्च स्वस्रादिवर्जितान्नाम्नो ङीः प्रत्ययो भवति । राज्ञी, अतिराज्ञी, तक्ष्णी, दण्डिनी, छत्रिणी; कर्त्री, हर्त्री । स्त्रियामिति किम् ? पञ्च सप्त दश नद्यः, नान्तायाः संख्याया युष्मदस्मदोरिवालिङ्गत्वात्; अत एव नकारलोपेऽपि “ आत् ”

[ २. ४. १८. ] इत्यावपि न भवति । अस्वस्रादेरिति किम् ? स्वसा, अतिस्वसा, परमस्वसा, दुहिता, ननान्दा, याता, माता, तिस्रः, चतस्रः; तिसृ-चतस्रादेशस्य विभक्त्यानन्तर्यनिमित्तत्वात् संनिपातलक्षणत्वेन तद्विघातकत्वाभावादेव ङीनिवृत्तौ सिद्धायां स्वस्रादिषु तयोः पाठः संनिपातलक्षणन्यायस्यानित्यत्वज्ञापनार्थः, तेनातिदध्न्या कन्ययेत्यादौ विभक्तिनिमित्तेऽनादेशे सति ङीः सिद्धो भवति; एवं– या सेत्यादिषु अकारादेशे आवपि ॥ १ ॥

---

श० न्या०—स्त्रियाम्० । ङयाद्यणादिप्रत्ययविधौ प्रकृतिनिर्देशार्थं नामग्रहणं कर्त्तव्यम्, अन्यथा धातोरपि प्रसङ्गः; नैष दोषः– नह्यत्र धातुग्रहणमस्ति, तदभावे च प्रकृतिमात्राद् विधीयमानानां ङ्यादीनामुत्सर्गत्वात् प्रकृतिविशेषधातोर्विधीयमानास्तिवादयोऽपवादत्वाद् बाधका भविष्यन्ति, स्त्रीत्वाद्यभावश्च । एवं तर्हि तिबन्तात् ङ्यादिप्रसङ्गः, तत्र यथा तिवादीनां साधनाश्रयसंख्याभिधायित्वं तथा तद्गतलिङ्गाभिधायित्वमपि स्यादिति, तदर्थमपि न वाच्यम्– क्रियाप्रधानत्वादाख्यातस्य, क्रियायाश्चासत्त्वभूतत्वाच्छब्दशक्तीनां च नियतत्वात् सत्त्वधर्मेण लिङ्गेनायोगात्, तदुक्तं हरिणा—

“ एकत्वेऽपि क्रियाख्याते, साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो, भेदस्तत्र तदाश्रयः ॥ १ ॥
तस्मादवस्थितेऽप्यर्थे, कस्यचित् प्रतिबध्यते ।
शब्दस्य शक्तिर्न त्वेष, शास्त्रेऽन्वाख्यायते विधिः ॥ २ ॥ ”

शोभनं पचतीत्यादौ तु क्रियाविशेषणस्य नपुंसकत्वं, न तु क्रियायाः, पचतिरूपमित्यादौ तु रूपबाद्यन्तार्थस्य क्रियायाः शब्दशक्तिस्वाभाव्यादेव नपुंसकत्वम्, नानारूपा हि शब्दानां शक्तयो न सामान्यतो दृष्टेनानुमानेन व्यवस्थापयितुं शक्यन्ते । तर्ह्यणादयस्तिवाद्यन्तान्मा भूवन्नित्येवमर्थं तत्र कर्त्तव्यं, यथैव गर्गस्यापत्यमित्यपत्यापत्यवत्सम्बन्धादिसम्भवस्तथा पचति यस्तस्यापत्यमिति सर्वनामप्रत्यवमृष्टतिबन्तार्थाधारसम्बन्धसम्भवादणादिप्राप्तिः । ननु षष्ठ्यन्तादपत्ये प्रत्ययो विधीयते, सर्वनाम्नश्चात्र षष्ठ्यन्तत्वं न तिबन्तस्य, नैष दोषः– गर्गास्यापत्यमित्यत्रापि वाक्यगोचरैव षष्ठी सम्बन्धप्रतिपादनायोपादीयते, प्रत्ययस्तु नाम्न एवोत्पद्यते, लुब्विधानद्वारेण त्वाचार्याः स्वाभाविकीं प्रत्ययस्यानुत्पत्तिमाचक्षते, “ ङसोऽपत्ये ” [ ६. १. २८ ] इति तु षष्ठीनिर्देशः सति सम्बन्धे प्रत्ययविधानार्थो, न तु षष्ठ्यन्तात् प्रत्ययोत्पत्त्यर्थः । किञ्च क्रियाप्रधानत्वादाख्यातस्य तस्याश्चासत्त्वरूपत्वाच्छब्दान्तरप्रत्यवमृष्टस्यापत्यादियोगसम्भवेऽपि त्याद्यन्तप्रतिपाद्यस्य साधनस्य क्रियां प्रति गुणभूतस्यापत्यादिभिर्योगाभावादणादिप्रसङ्गाभावः, नहि यथा पाचकस्यापत्यमिति सम्बन्धप्रतिपत्तिस्तथा पचत्यपत्यमित्यत्रापि। धातोरप्यणाद्यनुत्पत्तिः धात्वर्थस्यापत्यादियोगाभावाद् वाक्यार्थस्याप्यसत्त्वभूतत्वाच्छक्तिलिङ्गापत्यादियोगाभावाद् वक्ष्यमाणप्रत्ययानुत्पत्तिरेव । भवतु वा सर्वनामपरामृष्टस्यार्थस्यापत्यादियोगस्तथाप्याचार्यप्रवृत्तेरणादयो न भविष्यन्ति, यदयं क्वचित् तद्धितवृत्तौ “ त्यादेश्च प्रशस्ते रूपप् ” [ ७. ३. १०. ] इत्यत्र त्यादिग्रहणं करोति । एवं तर्हि “ प्रत्ययः प्रकृत्यादेः ” [ ७. ४. ११५. ] इत्यत्र विशेषणार्थं नामग्रहणम्, यदि हि प्रकृत्याश्रयणेन विधिर्भवति तदा तदादिग्राहकत्वं भवति, उच्यते– इह तावत् प्रयोजनं नास्ति, ग्रहणवद्भ्यो ङ्यादीनां विधानात्, ग्रहणं चोपादानं, तच्च क्वचित् साक्षाद्, यथा– “ गौरादिभ्यः० ” [ २. ४. १९. ] इति गौरादीनां, क्वचिद् विशेषणद्वारेण, यथा– “ आत् ” [ २. ४. १८. ] इत्यकारेणादन्तानां, क्वचिदनुबन्धनिर्देशेन, यथा– “ अधातूदृदितः ” [ २. ४. २. ] इति, अत्र च स्त्रियामिति स्त्र्यर्थाभिधायी शब्द आक्षिप्तः, नकार-ऋकाराभ्यां स विशिष्यते । अथापि कश्चिदग्रहणो “ वयस्यनन्त्ये ” [ २. ४. २१. ] इति, तदपि न– अनन्त्य इति प्रकृतेराक्षेपात् सामर्थ्याक्षिप्तस्याप्युपादानस्य सम्भवात् । भवतु वा कश्चिदग्रहणस्तथापि स्त्रियामित्यनुवर्त्तनाद् यत् तच्छब्दरूपं स्त्रियां वर्त्तते तस्मादुत्पत्तिरिति तत्र तद्विशेषणमित्यदोषः । **स्त्रियामि**ति– स्त्रीत्वे, स्त्रीलिङ्गे इत्यर्थः । स्त्यानप्रसवौ हि लिङ्गलक्षणमुक्तम्, तत्र स्त्यानमिति स्त्यायतेः, स च संघाते पठ्यते, संघातश्च संहननं पिण्डिभावो विस्तारस्य तिरोभावोऽपचयो ह्रस्वत्वमल्पतेत्येवंस्वभावं स्त्रीत्वम् । प्रसवः प्रवृत्तिरुपचयो वर्द्धमानता वैपुल्यं विकास आविर्भाव इति पुंस्त्वम् । तथाहि– लोकेऽल्पतायुक्तोऽर्थः सर्वैः स्त्रीवचनैः शब्दैरुच्यते, महत्तायुक्तस्तु पुंवचनैः, तथाहि– स एव कुण्डार्थः कुण्डीत्युच्यमानोऽल्पत्वादिविशिष्टो गम्यते, यतोऽल्प एव कुण्डार्थः कुण्डीति प्रतिपत्तिं जनयति, एवं– पीठः पीठीति, पीठ इति श्रुते हि सोपचयेऽर्थे प्रतीतिरुपजायते, पीठीति तु संपिण्डिते संकुचिताकारे स्वल्पत्वयुक्ते; एवमन्यत्रापि सैव च स्त्रीवचनानां शब्दानामभिधानस्वभाववशादल्पताऽभिधानस्वभावागोचरीभूता स्वार्थिकैः क्वचित् केवलमभिव्यज्यते, यथा– कुण्डी, कुण्डिकेति; शकटी, शकटिकेति; काष्ठी, काष्ठिकेति; कुमारी, कुमारिकेति । तदेतत् स्वभावसिद्धमल्पत्वं स्त्रीवचनानां शब्दानां स्वार्थिकैरेव केवलमभिद्योत्यते, लावण्यमिव यौवनविभ्रमैः, नह्यसन्नेवार्थो द्योतित इति शक्यते वक्तुम् । योऽपि नित्यस्त्रीविषयः शब्दः खट्वाबलाकादिकः सोऽप्यल्पताविशिष्ट एव स्वभावाद् शब्दैरभिधीयते,

तथाविधप्रतीतेस्तेभ्यो जायमानत्वात्, किं बहुना, ? अनुभव एवायं यत् पुंवचनशब्दात् स्त्रीवचनः शब्दोऽपचीयमानताविशिष्टः प्रतीयते, पुंवचनस्तु शब्दो वैपुल्यवत्याविर्भावात्मकेऽर्थे प्रतीतिं जनयति- वृक्षः पट इति। स्थितिस्तु-संस्त्यानप्रवृत्तिसामान्यमुभययान्तरालवर्त्तिनी साम्यावस्था विशेषाविवक्षा नपुंसकम्, अत एव तल्लिङ्गसर्वनामाभिधीयते। एताश्चावस्थाः शब्दगोचरा एवेति श्रीशेषराजः, यदाह- संस्त्यानं प्रसवः स्थितिर्ह्रस्वोपचयमाध्यस्थदशाः शब्दैकगोचरा इति। हरिरप्याह—

" आविर्भावस्तिरोभावः, स्थितिश्चेत्यनपायतः।
धर्मो मूर्त्तिषु सर्वासु लिङ्गत्वेनानुदर्शितः ॥ १ ॥" इति,

धर्मपालेनापि व्याख्यातम्- स्थित्यादयो मूर्त्यवस्थाविशेषाः, तत्राविर्भावः- क्रियासु सामर्थ्यातिरेकः स्थैर्यमुपचीयमानता पौंस्नं, तिरोभावः- मार्दवमपचीयमानता स्त्रैणम्, उदयास्तमयासंस्पर्शेन आत्मन्युपात्तभेदेऽवस्थानं- नपुंसकमिति। **स्त्रियामि**त्युच्यते, स्त्रीशब्दस्तु शुक्लादिशब्दवद् गुणमात्रे गुणिनि च वर्त्तते, तत्र यदा गुणमात्रमिह [स्त्रीत्वं] स्त्रीशब्देनोच्यते, तदा द्रव्यवाचिनो नाम्नः स्त्रीत्वे वाच्ये ङ्यादय इति [स्त्रीत्वं प्रत्ययार्थः] पक्षः संपद्यते, यदा तु स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते तदाऽपरं पक्षद्वयं सम्भवति- स्त्रीत्वोपलक्षितद्रव्यवाचिनो नाम्नो ङ्यादय इति स्त्रीसमानाधिकरणपक्षसम्भवः, अथवा स्त्रीत्वयुक्तद्रव्यवाचिनोऽङ्गीकृतस्त्रीत्वान्नाम्न इति प्रकृत्यर्थविशेषणपक्षसम्भवः। तत्र स्त्रियामभिधेयायामिति पक्षे प्रकृत्यर्थोपसर्जनस्य स्त्रीत्वस्य प्रत्ययेनाभिधानात् तस्य चैकत्वात् कुमार्यौ कुमार्य इति द्विवचनबहुवचनानुपपत्तिः। यद्यपि शब्दादीनां पर्यायाणामवस्थाविशेषो लिङ्गम्, अवस्थाश्चावस्थातुर्न भिन्नास्तथापि यथा रूपादीनां पर्यायाणां सन्निवेशमात्रे घटे रूपादीनां बहुत्वेऽपि सन्निवेशस्याभेदविवक्षायां घट इत्येकवचनं भवत्येवमवस्थाविशेषस्य लिङ्गस्याप्येकत्वमेव संस्त्यानादेरिति मन्यन्ते। कालितरेत्यादौ च ङीप्रत्ययेन स्त्रीत्वस्योक्तत्वादाप् न प्राप्नोति, स्त्रीशब्दे च ङीर्न प्राप्नोति, संस्त्यानवाचित्रप्रत्ययान्तेन स्त्रशब्देन स्त्रीत्वस्याभिधानात्। स्त्रीसमानाधिकरणपक्षेऽपि भूतमियं ब्राह्मणी, कारणमियं ब्राह्मणी, आवपनमियमुष्ट्रिकेत्यादौ स्त्रीत्वोपलक्षितब्राह्मण्यादिवृत्तित्वाद् भूतादिशब्दानां तत्सामानाधिकरण्यात् स्त्रीप्रत्ययप्रसङ्गः। प्रत्ययार्थपक्षे दोषोऽयं नावतरति, भूतादीनां चैतन्य-प्रधान-सम्भवनार्थवृत्तित्वात् तदर्थस्य स्त्रीत्वेन सम्बन्धाभावात् प्रत्ययोत्पत्तिप्रसङ्गाभावः। पञ्च ब्राह्मण्यः, षड् [दश] ब्राह्मण्य इति ष्णान्तसंख्यायाः प्रतिषेधो वाच्यः, स्त्र्यर्थाभिधाने तु न दोषः, संख्यानस्य विवक्षितत्वात् स्त्रीत्वाभावः, तथा स्त्रीशब्दसामानाधिकरण्याद् ब्राह्मण्यादिषु स्त्रीप्रत्ययः सिध्यति, स्त्रीशब्दे तु पदान्तरप्रयोगाभावाद् ब्राह्मण्यादिपदाक्षेपाभावाच्च प्रत्ययो न प्राप्नोति, नहि तेनैव तस्य सामानाधिकरण्यं भवति, अथ ब्राह्मण्याद्यपेक्षया स्त्रशब्दात् प्रत्ययः क्रियते तदेतरेतराश्रयदोषोपपत्तिः, प्रत्ययोत्पत्तौ परस्परापेक्षणात्। तृतीयपक्षे तु न दोषः, स्त्रीत्वयुक्तेऽर्थेऽङ्गीकृतसंस्त्याने वर्त्तमानात् स्वार्थे ङ्यादय इत्यर्थो भवति, यदाह वार्त्तिकम्- " सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणात् स्वार्थे टाबादयः" इत्यमुमर्थं हृदि संप्रधार्य प्रकृत्यर्थविशेषणतां दर्शयति- **स्त्रियां वर्त्तमानादि**त्यादि। अथवा पुनरस्तु स्त्रियामभिधेयायामिति, न च तत्र वचनाद्यनुपपत्तिदोषः, गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति, एवमिहापि यद् द्रव्यं श्रितं स्त्रीत्वं तस्य ये लिङ्गवचने। यद्यपि गुणमात्रे प्रत्ययः क्रियते तथापि हि गुणगुणिनोरभेदविवक्षायां स्वाभाविकत्वाद् वा गुणप्रधानभावव्यवस्थायाः कुमारीशब्देन द्रव्यस्यैवाभिधानात् तद्गतसंख्यानिमित्ता वचनोत्पत्तिः, द्रव्यवाचिना च नित्यं सामानाधिकरण्यमिति भावः। तदुक्तं हरिणा—

" सोऽयमित्यभिसम्बन्धादाश्रयं प्रतिपद्यते।
स्त्रीत्वं स्वभावसिद्धो, वा गुणभावविपर्ययः॥" इति।

स्त्रीत्वस्य स्त्रीत्वेन योगादनेकप्रत्ययोत्पत्तिरपि भवति, युज्यते हि भावो भावेन, यथैषिषतीत्यत्रेषिरिषिणा युज्यते, निमन्त्रयेतेति निमन्त्रश्च निमन्त्रेणेति, युक्तं तत्र काल-साधनभेदात्, एषितुमित्यस्येषेर्बाह्यं भोजनादिकं साधनं, तुमः कालमात्रे विधानात् सर्वकालश्च प्रत्ययः, इच्छतीत्यपरस्याभ्यन्तरमिषिरेव कर्म, स चैषिषतीत्यत्र प्रकृत्यर्थत्वादाभ्यन्तरः, वर्तमानकालश्च प्रत्ययः, इह पुनर्भेदहेत्वभावादेकमेव स्त्रीत्वम्, इच्छायास्त्वभिन्नरूपाया अपि काल-साधनभेदाद् भवतु भेदग्रहणम्। इह पुनरेकं स्त्रीत्वम्, एकं स्त्रीत्वमिति वदता स्त्रीत्वमित्युपगतं भवता, तत्र खट्वादिष्वसदपि मृगतृष्णावद् यद्युपलभ्यते लिङ्गम्, अविचारितरमणीयेन तेन प्रसिद्धो व्यवहारस्तदा स्त्रीतेत्यादौ द्वितीयस्याप्युपलम्भोऽस्तु। अथैकम[प्य]नुमानगम्यं, द्वितीयमप्यनुमानाद् गम्यताम्, द्रव्यपर्यायाच्च यत् [द्रव्यपर्यायान्वयात्] सर्वव्यक्तीनां तत् परिणाम एवेदं विश्वं, गुणानां च प्रवृत्तिर्लिङ्गम्, तत्र प्रवृत्तेरपि प्रवृत्तिसद्भावाल्लिङ्गयोगोऽस्त्वित्यर्थः। कस्य वा स्त्रीत्वं नाम गुणः ? द्रव्यस्य, तत्र यदि गुणसमुदायो द्रव्यंचिकीर्षा गोतेत्यादौ कृत्तद्धिताभिहिते भावे लिङ्गाभावः, अथेदम्-तदितिसर्वनामप्रत्यवमर्शयोग्यं वस्तु द्रव्यं तदा स्त्रीत्वस्यापि द्रव्यरूपत्वादपरेण स्त्रीत्वेनाविरुद्धो योगः। कृदभिहितो हि भावो द्रव्यवद् भवतीति स्त्रीत्वमिति स्त्रीत्वेनाभिहितं द्रव्यवद् भवतीत्यदोषः। कालितरेत्यत्र चान्योऽप्रकर्षयुक्तोऽर्थोऽन्यश्च

प्रकर्षयुक्तः, अवस्थाभेदाद् वाचकभेदाच्चैक एवार्थो भिद्यते इति प्रकृष्टे यद् वर्तते स्त्रीत्वं तदभिधानायाप् भवति । कारीषगन्ध्येति च "ष्या पुत्रपत्योः०" [ २. ४. ८३. ] इति आबन्तनिर्देशादाप्, एकमपि स्त्रीत्वमादेशप्रत्ययाभ्यामभिधीयते, स्त्रीति च "कुन्त्यवन्तेः स्त्रियाम्" [ ६. १. १२१. ] इति निर्देशादिति ।

**राज्ञी**ति- राजन् ततो नान्तत्वात् ङीः "अनोऽस्य" [ २. १. १०८. ] इत्यकारलोपः, "तवर्गस्य०" [ १. ३. ६०. ] इति नकारस्य ञकारः । अतिक्रान्ता राजानम्- **अतिराज्ञी**, अत्र समासान्तविधेरनित्यत्वात् समासान्तो न भवतीत्युद्द्योतकरः । समासात् समासान्तः, समासार्थादुत्तरपदाद् वेति पक्षद्वये समासात् समासान्त इति पक्षस्याश्रयणात् समासे कृतेऽन्तरङ्गत्वाद् ङ्यां ततो नान्तत्वाभावात् समासान्ताभाव इति । एवं- **तक्ष्णी**ति । दण्डोऽस्यास्ति छत्रमस्यास्तीति इनि ङ्यां च- **दण्डिनी**त्यादि । करोतीति हरतीति तृचि शीलादौ तृनि वा ऋकारान्तत्वाद् ङ्यां- **कर्त्री, हर्त्री** । अथ नान्तत्वात् संख्यावाचिनो ङीप्रत्ययो नेष्टः, स कथमृते प्रतिषेधात् स्यादित्याशङ्कायामाह- **पञ्च-सप्ते**त्यादि- नान्ता हि संख्यागणनद्वारेण शब्दशक्तिस्वाभाव्यात् स्त्रीत्वादिप्रसिद्धिमत्तामनपेक्ष्य संख्येयमाहेति युष्मदस्मदोरिव स्त्रीत्वाभावः; स्त्रीहि[ नहि ]युष्मदस्मदी स्त्रीत्वं पुंस्त्वं नपुंसकत्वं वाभिधेयभेदमुपाददाते लोके, ततस्तद्भेदाप्रतीतेरिति । **अत एव** लिङ्गाभावादित्यर्थः । **स्वस्रे**ति- अत्र ङीप्रत्ययाभावात् "ऋदुशनस्०" [ १. ४. ८४. ] इति सेर्डादेशः, एवं परमस्वस्रेत्यादावपि । अथ तिसृ-चतसोर्विभक्त्यानन्तर्येण विधीयमानत्वात् सन्निपातलक्षणन्यायादानन्तर्यविघाते ङीप्रत्ययाभावेऽस्य सिद्धत्वात् किमर्थं स्वस्रादिषु पाठ इति, नैष दोषः- अस्य न्यायस्यानित्यत्वज्ञापनार्थत्वादित्याह- **तिसृ-चतस्रादेशस्ये**त्यादि । **तेने**त्यादिना तदनित्यत्वेन सिद्धं दर्शयति- **अतिदध्न्या** इति- दध्यतिक्रान्तयेति विग्रहः, ततष्टा "दध्यस्थि०" [ १. ४. ६३. ] इत्यनादेशः, "अनोऽस्य" [ २. १. १०८. ] इत्यकारलोपः, सन्निपातन्यायस्यानित्यत्वाद् विभक्तिनिमित्तत्वेऽपि नान्तत्वाद् ङीः । एवमन्यत्रापि ॥ छ ॥ २. ४. १. ॥

---

**न्या० स०—स्त्रियां नृतो०** । **स्त्रियां वर्तमानादि**ति- 'स्त्रीत्वयुक्तेऽर्थे वर्तमानात् स्वार्थे ङयाबादयः' इति मतं सम्मतं निर्वहति, यथाह- वार्तिकं "सिद्धं तु प्रातिपदिकविशेषणात् स्वार्थे टाबादयः"। **अतिराज्ञी**ति- पूजितो राजा स्त्री चेदतिराज्ञी, "पूजास्वतेः०" [ ७. ३. ७२. ] इति समासान्तप्रतिषेधः । राजानमतिक्रान्तेत्यपि कृते समासान्तविधेरनित्यत्वमिति काशिका ॥ २. ४. १. ॥

---

## अधातूदृदितः । २ । ४ । २ ॥

**त० प्र०**—धातुवर्जितो य उदित् ऋदिच्च प्रत्ययोऽप्रत्ययो वा तदन्तान्नाम्नः स्त्रियां वर्तमानाद् ङीः **प्रत्ययो भवति** । उदित्- **भवती, गोमती, यवमती, श्रेयसी, विदुषी** । **ऋदित्- पचन्ती, दीव्यन्ती, महती; एषु प्रत्यय उदृदित् तदन्तं नाम । अतिभवती, अतिमहती; अत्र नामाव्युत्पत्तिपक्षे उदृदित्, तदन्तं समासनाम । भवती, महतीति तु व्यपदेशिवद्भावेन तदन्तम् । निर्गोमती, अतिपुंसीत्यत्र प्रत्ययस्योदित्वात् गोमदादिशब्दोऽपि उदित् तेन तदन्तं समासनाम । अधात्विति किम्? सुकन्, सुकंसौ; सुहिन्, सुहिंसौ- स्त्रियौ ॥ २ ॥**

---

**श० न्या०—अधा०** । **'ऋदुदितः' [ उदृदितः ]** इति सामान्यनिर्देशात् प्रत्ययाप्रत्यययोरविशेषेण ग्रहणमित्याह- **प्रत्ययोऽप्रत्ययो वे**ति । अथात्र ङीप्रत्ययेन प्रत्ययार्थसम्बन्धयोगात् प्रकृत्याक्षेपादन्यस्य धात्वादेरसम्भवान्नाम्नेति लभ्यते, तत्र च विशेषण-विशेष्यभावे कामचाराद् यदि नाम्ना उदिद् ऋदिद् विशिष्यते तदा उदृदितः प्राधान्यात् तेन तदन्तविधेरसम्भवः, न च नामान्तमुदृदित् सम्भवतीति नाम्न उदृदित इति पक्षः । यदा तु उदृदिता नाम विशिष्यते तदा तदन्तविधावुदृदिदन्तान्नाम्न इति पक्षो भवति । पक्षद्वयेऽपि चाव्याप्तिः, तत्राद्ये पक्षे- भवती महतीति सिद्ध्यति, सर्वादौ भवच्छब्द उदित् इत्युच्यते, महच्छब्दोऽपि शतृवदिष्यते; अतिभवती अतिमहती तु न सिद्ध्यति, समासनाम्न उदृदित्वाभावात्, प्रधाने च तदन्तविधेरनुपस्थानादिति । द्वितीयपक्षे तु- भवती महतीत्यसिद्धिः, न च व्यपदेशिवद्भावात् सिद्धिः, व्यपदेशिवद्भावो हि नाम्ना नेष्यते इति, उभयपक्षेऽपि निर्गोमतीत्यादि न सिद्ध्यति "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति न्यायात् । तथाद्ये पक्षे- गोमतीत्यत्रापि न सिद्ध्यति, उदित्त्वं च मतोर्गोमानित्यादौ नागमार्थमिति । द्वितीये तु- गोमतीति सिद्ध्यति, मतोरुदित्वात् तदन्तत्वाच्च गोमच्छब्दस्येति । गोमतो निष्क्रान्तेति समासे तु निरादेः समुदायान्मतोर्विधानाभावात् ङीर्न स्यादिति; उच्यते- उभयथाप्यदोषः, तथाहि- तत्राद्ये पक्षे- अतिभवती अतिमहतीत्यादावपि सिद्धिर्वक्तुं शक्यते, नाम्नोऽन्यपदार्थत्वेन परिहाराच्छब्दरूपस्यैव तत्त्वेनाश्रयणान्नाम्ना नाम्नोऽग्रहणान्नाम्नो ग्रहणाभावाद् * ग्रहणवता नाम्ना तदन्तविधिर्न * इत्यस्य * व्यपदेशिवद्भावो नाम्ना नेष्यते * इत्येतस्य च न्यायस्य प्रादुर्भावाभावाद् वा व्यपदे-

शिवद्भावादिति । ननु नाम्ना उदृदितो विशेषणाद् विशेष्येण कथं तदन्तविधिः ? एवं तर्हि तन्त्रेण योगद्वयमुच्चार्यते, तत्रैकस्मिन् योगे– नाम्ना उदृदिद् विशिष्यते, द्वितीये तु– उदृदिता नामेत्यदोषः । द्वितीये तु पक्षे भवती-महतीति व्यपदेशिवद्भावात् प्रयोगभेदवानिति (?) [ प्रयोगभेदेन भवान् भवतीति ] यच्छब्दरूपं प्रयुज्यते तस्यायं भवच्छब्दोऽन्त इति कल्पनयेति, इत्ययमेवार्थः, '**एषु प्रत्यय**' इत्यादिवृत्तिग्रन्थेन यथायोगं दर्शयतीति । " कसुकि गति-शातनयोः " " हिंसुप् हिंसायाम् " " उदितः स्वराद्० " [ ४. ४. ९८. ] इति नकारागमे सुष्ठु कंस्ते सुष्ठु हिनस्ति– **सुकन्** इत्यादि– अत्र धातोरुदित्वात् प्रतिषेधः । **अधात्विति** पर्युदासस्याश्रयणात् तस्य च विधिप्रधानत्वात् प्रतिषेधस्यानुमितत्वेन गौणत्वात् गोमन्तमिच्छति स्त्री गोमतीति विधि-निषेधप्राप्तावधात्वाश्रितो विधिरेव, न तु धात्वाश्रितः प्रतिषेध इति ॥ छ ॥ २. ४ २. ॥

**न्या० स०—अधातू०** । अधात्विति पर्युदासाश्रयणात् तस्य च विधिप्रधानत्वात् प्रतिषेधस्यानुमितत्वेन गौणत्वाद् गोमन्तमिच्छतीति स्त्री गोमत्यतीति विधि-निषेधप्राप्तौ अधातुत्वाश्रितो विधिरेव, न तु धातुत्वाश्रितः प्रतिषेधः । **गोमदादिशब्दोऽप्युदिदिति**– अवयवधर्मेण समुदायोऽपि व्यपदिश्यते, अत्रावयव उदित्, तद्धर्मेण समुदायोऽपीत्यर्थः । **सुकन्नित्यादि**– " न्सम्हतो० " [ १. ४. ८६. ] इत्यत्र महत्साहचर्यात् क्विबन्तस्य कंसो न ग्रहणमित्यर्थस्य ज्ञापितत्वादत्र न दीर्घः । **प्रत्ययस्योदित्वादिति**– " अजादेः " [ २. ४. १६. ] इत्यत्र इति-व्याख्यानेन तदन्तस्य ग्रहणे सिद्धे यदिदं व्याख्यानं तद् युक्त्यन्तरस्यापि दर्शनार्थम्, यत एकस्यापि साध्यस्य सिद्ध्यर्थं बह्व्योऽपि युक्तय उपन्यस्यन्ते ॥ २. ४. २. ॥

## अञ्चः । २ । ४ । ३ ॥

**त० प्र०—अञ्चन्तान्नाम्नः स्त्रियां ङीर्भवति । प्राची, प्रतीची, अपाची, उदीची ॥ ३ ॥**

**श० न्या०—अञ्चः०** । प्र-प्रत्यपोत्पूर्वादञ्चेः क्वौ "अञ्चोऽनर्चायाम्" [ ४. २. ४६. ] इति नलोपेऽनेन ङ्याम् " अच्च् प्राग्दीर्घश्च " [ २. १. १०४. ]" " उदच उदीच् " [ २. १. १०३. ] इति कृते– **प्राची**त्यादि । अर्चायां तु नलोपाभावे– प्राञ्ची प्रत्यञ्चीति भवति, अत एव सूत्रे धातुस्वरूपानुकरणमञ्च इति, अन्यथा " अचः " इति निर्दिश्यते ॥ छ. ॥ २. ४. ३. ॥

**न्या० स०—अञ्चः** । **अञ्च** इति कृतनलोपाभावस्य धातुरूपस्याञ्चेर्निर्देशः, तेनार्चाविवक्षणे नलोपाभावे तदविवक्षणे लोपे ङीः सिद्धः । " अचः " इति निर्देशे तु " अच्च् प्राग्दीर्घश्च " [ २. १. १०४. ] इतिवत् कृतनलोपस्यैव स्यात् । इत्थं च प्राञ्ची प्रत्यञ्चीत्यादौ ङीर्नागच्छेत् ॥ २. ४. ३. ॥

## ण-स्वरा-घोषाद् वनो रश्च । २ । ४ । ४ ॥

**त० प्र०—वन इति वन्-क्वनिप्-ड्वनिपामविशेषेण ग्रहणम्, णकारान्तात् स्वरान्तादघोषान्ताच्च यो विहितो वन् प्रत्ययस्तदन्तान्नाम्नः स्त्रियां ङीर्भवति, वनोऽन्तस्य च तत्संनियोगे रो भवति । ण– ' ओणृ '– अवावरी । स्वर– ' धा '– धीवरी, अतिधीवरी; ' पा '– पीवरी, ' कृ '– सहकृत्वरी, राजकृत्वरी; सुत्वरी । अघोष– ' दृश् '– मेरुदृश्वरी । णस्वराघोषादिति किम् ? ' युध् '– सहयुध्वा, ' यज् '– यज्वा स्त्री । विहितविशेषणं किम् ? शृणातीति शर्वरी, स्वराद् विहितत्वाद् गुणे कृते घोषवतो यथा स्यात् । वन इति किम् ? श्वयतेः "श्वन्मातरिश्वन्०" [ उणा० ९०२. ] इत्यादिनाऽनि प्रत्ययेऽन्तलोपे च सति– शुनी, अतिशुनी; मङ्घेर्नलोपेऽवागमे च– मघोनी । नान्तत्वादेव ङीः सिद्धस्तन्नियमार्थं रविधानार्थं च वचनम् ॥४॥**

**श० न्या०—णस्व०** । वनतेः क्विबन्तस्य " अहन्पञ्चमस्य० " [ ४. १. १०७. ] इति दीर्घत्वे वनिति रूपाभावाद् विजन्तस्य च प्रयोगादर्शनात् प्रत्ययस्यैव ग्रहणमित्याह– **वन इती**त्यादि । ननु भवतु प्रत्ययग्रहणं, तथापि * निरनुबन्धग्रहणे न सानुबन्धकस्य * इति क्वनिप्-ड्वनिपोर्ग्रहणं न प्राप्नोति, उच्यते– क्वनिबादेरनेकानुबन्धत्वान्निरनुबन्धैकानुबन्धयोरेव सद्भावेऽस्याः परिभाषाया उपस्थानादनित्यत्वाच्च सामान्याश्रयणादनुपस्थानाददोषः । विहितविशेषणेऽत्र पञ्चमीत्याह– **विहित** इति । ओणतेः "मन् वन् क्वनिप्०" [ ५. १. १४७. ] इति वनि " वन्याङ् पञ्चमस्य " [ ४. २. ६५. ] इति णकारस्यात्वेऽवादेशे " णस्वरा० " [ २. ४. ३. ] इति ङ्यां रेफे च **अवावरी,** अवावरीति प्रयोगस्य स्थविरेणोक्तत्वात्, स्वयूथ्यैश्चानूदितत्वात् तदनुरोधेन णग्रहणमस्माभिः क्रियमाणमत्रैव विधिं प्रयोजयन्ति । अपरे त्वस्य छन्दोविषयत्वं प्रतियन्तो भाषायामोणेरपि ते नेच्छन्तीति । एवं दधातेः "एषामीर्व्यञ्जने०" [ ४. २. ९७. ] इतीत्वे– **धीवरी** । धीवानमतिक्रान्ता– **अतिधीवरी** । एवं पिबतेः– **पीवरी** । करोतेः " सह-राजभ्यां कृग्युधेः " [ ५. १. १६७. ] इति क्वनिपि " ह्रस्वस्य तः० " [ ४. ४. ११३. ] इति तागमे– **सहकृत्वरी, राजकृत्वरी** । सुनोतेः " सु-यजोर्ङ्वनिप् " [ ५. १. १७२. ] इति ङ्वनिपि– **सुत्वरी** । **मेरुदृश्वरी** " दृशः

क्वनिप्" [५. १. १६६.] इति क्वनिप्। **सहयुध्वेति-** "युधिंच् संप्रहारे" "सहराजभ्यां०" [५. १. १६७.] इति क्वनिप्। यं[**यज्वा**] "यजीं देवपूजादौ" "सु-यजो-र्ङ्वनिप्" [५. १. १७२.] इति ङ्वनिप्। आशङ्कापूर्वं विहितविशेषणफलमाह- **विहितेत्यादि-** अन्यथा हि शृणोतेर्वनि गुणे कृते रेफस्याघोषत्वाभावात् तत्परो वन्निति ङी-रेफयोर-भावात्- **शर्वरीति** न सिध्येदिति। **वन इति किमिति-** अर्थवत इति शेषः। अथ वनो नान्तत्वात् तदन्तात् "स्त्रियां नृतः०" [२. ४. १.] इति ङीः सिद्ध एव, किमर्थमिद-मित्याह- **नान्तत्वादित्यादि** ण-स्वराऽघोषादेव वनो ङीर्भवति, न तु घोषादिति नियमेन सहयुध्वेत्यादौ पूर्वेणापि न भवति। सन्नियोगशिष्टत्वेन तात्पर्यपर्यालोचनया रेफादेशार्थं वचनमिति, सन्नियोगाशिष्टत्वे हि यज्वेत्यादौ "णस्वराघोषात्०" [२. ४. ४.] इति ङीप्रतिषेधे रेफः प्रवर्त्तते [प्रवर्तेत]। अथ वन्निति प्रत्यय-ग्रहणं कृद्ग्रहणं वा, तत्र प्रत्ययग्रहणे "प्रत्ययः प्रकृत्यादेः" [७. ४. ११५.] इति, कृद्ग्रहणे च "कृत् सगतिकारकस्य०" [७. ४. ११७.] इति 'अतिधीवरी, बहुधीवरी' इति न सिद्ध्यति, नैष दोषः- अत्र तदन्तविधेर्ज्ञापयिष्यमाणत्वात्॥ छ. ॥ २. ४. ४.॥

**न्या० स०—णस्वराघो०।** वनतेः क्विबन्तस्य "अह-न्पञ्चमस्य०" [४. १. १०७.] इति दीर्घत्वे वन्निति रूपा-भावाद्, विजन्तस्य च प्रयोगादर्शनात् प्रत्ययस्यैव ग्रहणमित्याह- **वन इति वन्-क्वनिपित्यादि-** ननु * निरनुबन्धग्रहणे न सानु-बन्धकस्य * इति क्वनिप्-ङ्वनिपोर्ग्रहणं न प्राप्नोति, उच्यते- * निरनुबन्धग्रहणे क्वचित् सानुबन्धस्य ग्रहणम् * इति न्यायान्न दोषः। **वनोऽन्तस्येति-** ननु "प्रत्ययस्य" [७. ४. १०८.] इति सर्वस्यापि प्राप्नोति तत् कथमुक्तमन्तस्येति? सत्यम्- वात् न् वन् इति कृते भविष्यति। **अतिशुनी** पूजितः श्वाऽतिश्वा, स्त्री चेदतिशुनी, यद्वा अतिक्रान्तः श्वा ययेति बहुव्रीहिः, श्वानमतिक्रान्तेति कृते "गोष्ठातेः शुनः" [७. ३. ११०.] इति समासान्तः स्यात्। **मघोनीति-** मघोनो भार्याभेदोपचारेण मघोनी। **नियमा-र्थमिति-** णस्वराघोषादेव वनो ङीर्भवति, तेन सहयुध्वेत्यादौ पूर्वेणापि न भवति। विपरीतनियमस्तु "स्त्रियां नृतः" [२. ४. १.] इत्यस्यारम्भात्, विपरीतनियमे हि राज्ञीत्यादौ स्वरात् परस्य नकारस्यावस्थानात् "स्त्रियां नृतः०" [२. ४. १.] इत्यनेन ङीर्न स्यात् ॥ २. ४. ४.॥

## वा बहुव्रीहेः। २। ४। ५॥

**त० प्र—णस्वराघोषात् परो यो विहितो वन् प्रत्यय-स्तदन्ताद् बहुव्रीहेः स्त्रियां ङीप्रत्ययो वा भवति, रश्चान्तादेशः। प्रियावावरी, प्रियावावा स्त्री; बहुधीवरी, बहुधीवा; बहुमेरु-दृश्वरी, बहुमेरुदृश्वा स्त्री। णस्वराघोषादित्येव- प्रिययज्वा स्त्री ॥ ५॥**

**श० न्या०—वा ब०।** प्रियोऽवावा यस्याः, बहवो धीवानो यस्या इति बहुव्रीहौ विकल्पेन ङ्यां रेफे च- **प्रियावावरीत्यादि। णस्वराघोषादिति-** अनन्तरसूत्रादिति शेषः॥ छ.॥ २. ४. ५.॥

**न्या० स०—वा बहु०। बहुमेरुदृश्वरीति-** अन्ये चन्द्र-गोम्यादयो "नोपान्त्यवतः" [२. ४. १३.] इति प्रतिषेध-मिच्छन्तो बहुमेरुदृश्वेत्येव कथयन्ति। स्वमते तु व्यक्त्या सूत्रस्य प्रवर्तनान्न निषेधः॥ २. ४. ५.॥

## वा पादः। २। ४। ६॥

**त० प्र०—बहुव्रीहेस्तन्निमित्तकपाच्छब्दान्तात् स्त्रियां ङीर्वा भवति। द्विपदी, द्विपात्; त्रिपदी, त्रिपात्; बहुव्रीहिनिमित्तो यः पादिति बहुव्रीहिणा पाच्छब्दस्य विशेषणत्वादिह न भवति- पादमाचष्टे पाद्, त्रयः पादोऽस्याः- त्रिपात् स्त्री ॥ ६॥**

**श० न्या०—वा पा०।** बहुव्रीहेरित्यनुवर्त्तनात् तस्य च पाच्छब्देन विशेषणात् "सु-संख्यात्" [७. ३. १५०.] इति विहितः समासान्तः पाच्छब्दो निर्दिश्यत इत्याह- **पाच्छब्दान्तादिति। द्विपदी** द्विपादित्यतो बहुव्रीहेर्ङीस्ततो "य-स्वरे०" [२. १. १०२.] इति पद्भावः; एवं- **त्रिपदीति।** अथ "पदिंच् गतौ" इत्यतो ण्यन्तात् क्विपि कृते यत् पादिति रूपं तदिह कस्मान्न विज्ञायते? उच्यते- पादयतेः क्विबन्तस्य प्रयोगादर्शनमिति प्राग्निर्णीतत्वाददोषः; प्रयोगेऽपि क्रियाकारकसम्बन्धमात्रं पादः क्विबन्तात् प्रतीयते, न तु विशिष्टार्थप्रतीतिः, द्विपाच्छब्दश्च विशिष्टार्थवचन इति कुतस्ततः स्त्रीप्रत्यय इति। ननु मा भूत् पदेर्णिगि क्विप्, पादशब्दाण्ण्यन्ताद् भविष्यति, नैवम्- पूर्वोक्तहेतुद्वयात् तदभावात् तत्राप्यप्रसङ्गः, भवेऽपि वा तस्याग्रहणमित्याह- **बहुव्रीहि-निमित्त** इत्यादि ॥ छ.॥ २. ४. ६.॥

**न्या० स०—वा पादः। इह न भवतीति-** अथ "पदिंच् गतौ" इत्यतो ण्यन्तात् क्विपि कृते यत् पादिति रूपं तदिह कस्मान्न विज्ञायते? उच्यते- पादयतेः क्विबन्तस्य प्रयोगादर्शनमिति; प्रयोगेऽपि वा क्रियाकारकसम्बन्धमात्रं पादः क्विबन्तात् प्रतीयते न तु विशिष्टार्थप्रतीतिः, द्विपाच्छब्दश्च विशिष्टार्थावयव इति॥ २. ४. ६.॥

## ऊध्नः । २ । ४ । ७ ॥

**त० प्र०—ऊधन्निति कृतनकारादेशस्योधसो ग्रहणम्, तदन्तान्नाम्नो बहुव्रीहेः स्त्रियां ङीर्भवति । कुण्डोध्नी, घटोध्नी, महोध्नी; पीवरोध्नी । "अनो वा" [२. ४. ११.] इति विकल्पे प्राप्ते वचनम् । समासान्तविधौ 'ऊधन्' इत्यादेशे नान्तत्वादेव ङीः सिध्यति, किन्तु पञ्चभिः कुण्डोध्नीभिः क्रीत इतीकणि तल्लुपि च 'पञ्चकुण्डोधन्' इति प्रकृतेः सौ पञ्चकुण्डोदिति स्यात् पञ्चकुण्डोधेति चेष्यते ॥ ७ ॥**

**श० न्या०**—ऊध्नः । ऊधःशब्दान्ताद् बहुव्रीहेः स्त्रियामयं ङीः प्रत्यय आरभ्यते, "स्त्रियामूधसो न्" [७. ३. १६९.] इति समासान्तश्च तत्रैव, तत्रानयोः समुच्चयवर्जं प्रकारान्तरं नोपपद्यते, समुच्चये च क्रमं दर्शयति- **ऊधन्नितीत्यादि** । अयमर्थः- ऊधनिति नकारान्तनिर्देश एव बहुगोमत्केति सिद्धयर्थं समासार्थादुत्तरपदात् समासान्त इति पक्षोऽप्यस्तीति ज्ञापयति, तस्यैव चात्र समाश्रयणादकृत एव समासे बहुव्रीह्यर्थे उत्तरपदे समासान्तो नकारस्ततो ङीप्रत्यय इति । कुण्डमिवोधो यस्या इत्यादि वाक्यं त्वलौकिकमप्रयोगार्हं बालव्युत्पत्तयेऽतिवाहकशरीरस्थानीयं व्याख्यातृभिरुपदर्श्यते, कुण्डमिवोधो यस्या इति विग्रहे "स्त्रियामूधसो न्" [७. ४. १६९.] इति नकारेऽन्तादेशे कृते ऊधन्नन्तत्वाद् बहुव्रीहेर्ङ्यामकारलोपे- **कुण्डोध्नी**; एवं- **घटोध्नी**त्यादि । **"अनो वा" [२. ४. ११.] इति विकल्प** इति- नित्यार्थमिति शेषः । ननु च "स्त्रियामूधन् ऊधसः" इति किं नोच्यते, एवं ह्युच्यमानेऽनन्तत्वाभावाद् "अनो वा" [२. ४. ११.] इति ङीविकल्पाप्राप्तिः "स्त्रियां नृतः०" [२. ४. १.] इत्येव सिद्धत्वादेतन्न वक्तव्यं भवति, इत्याह- **समासान्तविधावि**त्यादि- यद्यूधन् इति समासान्तो विधीयेत तदा पञ्चभिः कुण्डोध्नीभिः क्रीत इतीकणि "अनाम्न्यद्विः प्लुप्" [६. ४. १४१.] इति तस्य लुपि "ङ्यादेः०" [२. ४. ९५.] इति ईकारस्यापि लोपे पञ्चकुण्डोदिति प्राप्नोति, पञ्चकुण्डोधेति चेष्यते, तन्न स्यादित्यूधन् इति समासान्तः कर्तुं न शक्यते, नकार एव वक्तव्यः, ततश्चेदमपि कर्तव्यमित्यर्थः ॥ छ ॥ २. ४. ७. ॥

**न्या० स०**—ऊध्नः । ऊधन् इत्यादेश इति- अयमर्थः- यदि समासान्तविधौ ऊधन्नित्यादेशं न कुर्यात् किन्तु न इत्येव ततः "अनो वा" [२. ४. ११.] इत्यनेन विकल्पः स्यात्, न तु "स्त्रियां नृत०" [२. ४. १.] इत्यनेन नित्यं ङीरिति । **पञ्चकुण्डोधेति**- ननु लुपः पित्त्वात् "क्यङ्मानि०" [३. २. ५०.] इत्यनेन पुंवद्भावः कथं न भवति ? उच्यते- "कौण्डिन्यागस्त्ययोः०" [६. १. १२७.] इत्यत्र कौण्डिन्यनिर्देशान्न भवति; यद्वा "स्त्रियामूधसो न्" [७. ३. १६९.] इत्यत्र स्त्रियां विषये व्याख्यानात्, विषयव्याख्यानं हि निर्निमित्तत्वार्थम्, ततो यदि पुंवद्भावोऽभिप्रेतः स्यात् तदा ङ्यामूधसोऽनिति सनिमित्तकमेव कुर्यात्; ननु ङ्यामिति कृते ङीरपि कथम् ? उच्यते- तदा गौरादौ पठ्येत ऊधन्शब्दः; यद्वा ऊधस इति सूत्रं क्रियेत । ननु ङ्यामिति कृते ङीरपि कथं ? निमित्तव्याख्यानमेव क्रियतां, तस्मिन्नपि न किञ्चिद् विनङ्क्ष्यति, निमित्तव्याख्याने हि "मूल्यैः क्रीते" [६. ४. १५०.] इकणि तल्लुपि "ङ्यादेः०" [२. ४. ९५.] इति ङीनिवृत्तौ तन्निमित्तकसमासान्तस्यापि निवृत्तिः प्राप्नोति, ततश्च पञ्चकुण्डोधा इति विसर्गान्तं रूपं प्राप्नुयादिति समासान्तविधौ सनिमित्तक आदेशो नाकारि ॥ २. ४. ७. ॥

## अशिशोः । २ । ४ । ८ ॥

**त० प्र०—अशिशु इत्येतस्माद् बहुव्रीहेः स्त्रियां ङीर्भवति । अविद्यमानः शिशुरस्या अशिश्वी । बहुव्रीहेरित्येव- न शिशुः- अशिशुः ॥ ८ ॥**

**श० न्या०—अशि० । न शिशुरित्यनेन** "नञ्" [३. १. ५१.] इत्ययं तत्पुरुषः समासो न बहुव्रीहिरिति दर्शयति । ननूधन्शब्दस्याशिशुशब्दस्य च बहुव्रीहिविशेषणत्वेन समानार्थत्वादेकयोग एव कुतो न क्रियत इति, उच्यते- बहुव्रीहावप्यूध्न इति तदन्तस्य विधिः, अशिशोरिति च स्वरूपस्येति योगविभागः ॥ छ ॥ २. ४. ८. ॥

**न्या० स०—अशिशोः** । ननु ऊधन्शब्दस्याशिशुशब्दस्य च बहुव्रीहिविशेषणत्वेन समानार्थत्वादेकयोग एव क्रियताम् ? उच्यते- बहुव्रीहावप्यूध्न इति तदन्तस्य विधिः, अशिशोरिति च स्वरूपस्येति योगविभागः ॥ २. ४. ८. ॥

## संख्यादेर्हायनाद् वयसि । २ । ४ । ९ ॥

**त० प्र०—संख्यादेर्हायनशब्दान्तान्नाम्नो बहुव्रीहेः स्त्रियां वयसि गम्यमाने ङीर्भवति । द्विहायनी, त्रिहायणी, चतुर्हायणी; अत्र "चतुस्त्रेर्हायनस्य वयसि" [२. ३. ७४.] इति णत्वम् । संख्यादेरिति किम् ? अतीतहायना । हायनादिति किम् ? द्विवर्षा कन्या । वयसीति किम् ? द्विहायना, त्रिहायना, चतुर्हायना शाला, कालकृता प्राणिनां शरीरावस्था वय इति णत्वमपि न भवति । बहुव्रीहेरित्येव- शते हायनेषु संभूता जाता भवा वेति इकणि तल्लुपि च- शतहायना स्त्री ॥ ९ ॥**

**श० न्या०—संख्या० । वयसि गम्यमाने** इति-

प्रत्ययान्तेन वयश्चेद् गम्यत इत्यर्थः। **द्विहायनी**ति- द्वौ हायनावस्या इति विग्रहस्ततो ङीः, एवं- **त्रिहायणी**त्यादि। कथमत्र णत्वमित्याह- **अत्रे**त्यादि। **अतीतहायने**ति- अतीतो हायनोऽतीता वा हायना यस्या इति बहुव्रीहिः, बाला वृद्धा वा गम्यत इत्यस्ति वयः, संख्यादेरिति वचनान्न भवति। **द्विवर्षे**ति- द्वे वर्षेऽस्या इति विग्रहः। **द्विहायने**त्यादौ तु वयो नास्तीति न ङीर्न च णत्वमिति वयोलक्षणपूर्वकमिदमेवाह- **कालकृते**त्यादि। **शते हायनेष्वि**ति- त्रिष्वप्यर्थेषु "तत्र कृत०" [६. ३. ९४.] इत्यावणो "द्विगोरनपत्ये०" [६. १. २४.] इति लोपे **शतहायने**त्यत्र स्त्रिया वार्द्धकं वयो गम्यते, संख्या चादिरस्ति, परं द्विगुरयं, न बहुव्रीहिरिति ङीर्न भवति ॥ छ. ॥ २. ४. ९. ॥

**न्या० स०—सङ्ख्यादे०।** इकगि तल्लुपि चेति- "वर्षाकालेभ्यः" [६. ३. ८०.] इत्यस्य, शकटाभिप्रायेणेदमुक्तम्। तन्त्रोद्द्योतस्तु शतहायनशब्दस्य कालवाचकत्वाभावे "तत्र कृत०" [६. ३. ९४.] इत्यनेनाणेवेतीच्छति ॥ २. ४. ९. ॥

## दाम्नः । २ । ४ । १० ॥

**त० प्र०—संख्यादेर्दामन्शब्दान्तान्नाम्नो बहुव्रीहेः स्त्रियां ङीर्भवति। द्विदाम्नी, त्रिदाम्नी। संख्यादेरित्येव- उद्दामानम्, उद्दामाम्, उद्दाम्नीं वडवां पश्य, "अनो वा" [२. ४. ११.] इति विकल्पस्यापवादो योगः ॥ १० ॥**

**श० न्या०—**दाम्नः। **द्विदाम्नी**ति- द्वे दामनी अस्या इति बहुव्रीहिः। उद्गतं दामास्या इति बहुव्रीहौ संख्यादित्वाभावाद् "दाम्नः" [२. ४. १०.] इति नित्यत्वाप्रवृत्तौ 'अनो वा" [२. ४. ११.] इति विकल्पे- **उद्दामानमि**त्यादि त्रैरूप्यम्। अथ 'दामन्'शब्दस्य नकारान्तत्वात् स्त्रियां बहुव्रीहौ "स्त्रियां नृतः" [२. ४. १.] इति ङीर्भविष्यति किमनेनेत्याह- **अनो वे**तीत्यादि ॥ छ. ॥ २. ४. १०. ॥

**न्या० स०—**दाम्नः। [नेह व्याख्यातम्] ॥ २. ४. १०. ॥

## अनो वा । २ । ४ । ११ ॥

**त० प्र०—अन्नन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा भवति। उत्तरत्रोपान्त्यवतः प्रतिषेधादुपान्त्यलोपिन एवायं विधिः। बहुराज्ञ्यौ, बहुराजे, बहुराजानौ; दीर्घाणि अहानि यस्यां दीर्घाह्नी, दीर्घाहा, दीर्घाहाः शरत्; बहुतक्ष्ण्यौ, बहुतक्षे, बहुतक्षाणौ। बहुव्रीहेरित्येव- अतिराज्ञी, निस्तक्ष्णी ॥ ११ ॥**

**श० न्या०—**अनो०। **उपान्त्यवतः प्रतिषेधादि**ति- "नोपान्त्यवतः" [२. ४. १३.] इत्यनेनेति शेषः। **बहुराज्ञ्यावि**ति- बहवो राजानोऽनयोरिति बहुव्रीहिः, ङीविमुक्ते च पक्षे "ताभ्यां वाप् डित्" [२. ४. १५.] इति पक्षे डिदाबिति त्रैरूप्यम्; एवमन्यत्रापि। **अतिराज्ञी, निस्तक्ष्णी** अतिक्रान्ता राजानं, निर्गता तक्ष्ण इति च विग्रहः ॥ छ. ॥ २. ४. ११. ॥

**न्या० स०—**अनो०। [नेह व्याख्यातम्] ॥ २. ४. ११. ॥

## नाम्नि । २ । ४ । १२ ॥

**त० प्र०—अन्नन्ताद् बहुव्रीहेः स्त्रियां- नाम्नि संज्ञायां नित्यं ङीर्भवति। अधिराज्ञी, सुराज्ञी नाम ग्रामः; बहुराज्ञी, बहुसाम्नी नाम पुरी; अयमप्युपान्त्यलोपवत एव विधिः, नित्यार्थं वचनम्, तेन पक्षे डाप् विकल्पेन न भवति ॥ १२ ॥**

**श० न्या०—**नाम्नि०। अधिको राजाऽस्याः शोभनो राजाऽस्या इति बहुव्रीहौ ङ्याम्- **अधिराज्ञी**त्यादि। **अयमपी**ति- न केवलं पूर्व इत्यपेरर्थः। **नित्यार्थ** इति- अन्यथा विकल्पस्य पूर्वेणैव सिद्धत्वाद् वचनानर्थक्यं स्यादित्यर्थः। नित्यार्थत्वस्य फलमाह- **तेने**त्यादि- असति ह्यस्मिन् यथाऽन्यत्र त्रैरूप्यं तथा संज्ञाविषयेऽपि स्यादिति। ईकारान्तमेव नाम प्रयुक्तं दृश्यते, नान्यदिति प्रयोगानुसारेण प्रतिपत्तिर्गरीयसीति, तत्राप्यप्रतिषेधात् तदन्तमपि नामधेयत्वेन विनियुज्येत तदर्थं नाम्नीत्युच्यते ॥ छ. ॥ २. ४. १२. ॥

**न्या० स०—**नाम्नि। [नेह व्याख्यातम्] ॥ २. ४. १२. ॥

## नोपान्त्यवतः । २ । ४ । १३ ॥

**त० प्र०—यस्य उपान्त्यलोपो नास्ति स उपान्त्यवान्, तस्मादन्नन्ताद् बहुव्रीहेः स्त्रियां ङीर्न भवति। नायम् "अनो वा" [२. ४. ११.] इति सूत्रविहितस्यैव प्रतिषेधः, किन्तु "स्त्रियां नृतो०" [२. ४. १.] इत्यस्यापि। सुपर्वा, सुपर्वाणौ; सुशर्मा, सुशर्माणौ; प्रियश्वा, प्रियश्वानौ। उपान्त्यवत इति किम्? बहुराज्ञी। बहुव्रीहेरित्येव- अतिपर्वणी यष्टिः। अन इत्येव- सदण्डिनी ॥ १३ ॥**

**श० न्या०—**नोपा०। **यस्ये**ति- ङ्यां "न वमन्तसंयोगात्" [२. १. १११.] इति प्रतिषेधेनेति शेषः। **नायमि**ति- अयमर्थः- यदि "अनो वा" [२. ४. ११.] इत्यस्यैव प्रतिषेधः स्यात्, तदा "अनोऽनुपान्त्यवतो वा" इत्येकयोगः क्रियेत, न च कृतस्तस्मात् सामान्येन प्रकरणस्य

निषेधात् "स्त्रियां नृतः" [२. ४. १.] इत्यस्यापि प्रतिषेध इति। पिपर्त्तेः पृणातेर्वा शृणोतेश्च मनि शोभनं पर्व यस्या ययोश्चेत्यादिबहुव्रीहावनेन ङीप्रतिषेधात्- **सुपर्वे**त्यादि, एवं- **प्रियश्वे**त्याद्यपि। अथाकारेण न उपान्त्यवत्त्वात् प्रियश्वेत्यादौ तु ङीप्रत्यये "श्वन्-युवन्-मघोनः" [२. १. १०६.] इत्युकारेण प्रवर्त्तमानेन तस्य व्याहतत्वात् तेनोपान्त्यवत्त्वाभावात् कथं प्रतिषेध इति, नैष दोषः- उपान्त्यग्रहणादुपान्त्यशब्देनोपान्त्यमात्रस्याभिधानात्, अन्यथा "नान्वतः" इति विदध्यात्, तेन यस्यैव "अनोऽस्य" [२. १. १०८.] इति लुग् भवति तस्यैव "अनो वा" [२. ४. ११.] इति ङीविकल्पोऽन्यस्मात् प्रतिषेध एवेति। **अतिपर्वणी**ति- पर्वण्य[ा]तिक्रान्तेति "प्रात्य०" [३. १. ४७.] इति तत्पुरुषः ॥ छ. ॥ २. ४. १३. ॥

**न्या० स०**—नोपान्त्य०। उपान्त्यलोपो नास्तीति- "न वमन्तसंयोगात्" [२. १. १११.] इति निषेधेनेत्यर्थः। **स्त्रियां नृत इत्यस्यापीति**- अन्यथा "अनोऽनुपान्त्यवतो वा" इत्येकयोगः क्रियेत। **अतिपर्वणी**त्यत्राव्युत्पत्तिपक्षाश्रयणात् "णस्वराघोष०" [२. ४. ४.] इति ङी रश्च न भवति, किन्तु नान्तत्वात् "स्त्रियां नृतः०" [२. ४. १.] इत्यनेन [ङीः]। **सदण्डिनी**ति- अत्र "इनः कच्" [७. ३. १७०.] इति कच् प्राप्तः "सहात् तुल्ययोगे" [७. ३. १७८.] इति निषिध्यते ॥ २. ४. १३. ॥

## मनः । २ । ४ । १४ ॥

**त० प्र०**—मनन्तान्नाम्नः स्त्रियां ङीर्न भवति। सीमा, सीमानौ; पामा, पामानौ। * अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति, * तेन महिमानमतिक्रान्ता- अतिमहिमेत्यादावपि ङीप्रतिषेधो भवति। बहुव्रीहेरिति निवृत्तं, योगविभागात् ॥ १४ ॥

**श० न्या०**—मनः। **सीमे**त्यादि- सीमन्-पामन्शब्दौ व्युत्पादितौ। रूपवदर्थस्यापि व्याकरणेऽनुप्रवेशाद् * अर्थवद्ग्रहणे० * इति न्यायात् कथ**मतिमहिमे**त्यादावनर्थकात् प्रतिषेध इत्याह- **अनिनस्मन्नि**त्यादि। प्रकृतत्वान्मनन्ताद् बहुव्रीहेरेव प्रतिषेधेन भाव्यमित्याशङ्क्याह- **बहुव्रीहेरिति निवृत्तमिति**। कुत एतदित्याह- **योगविभागादि**ति- इहापि यदि बहुव्रीहेरित्यनुवर्त्तेत तदा योगविभागमकृत्वा "न मन्नुपान्त्यवद्भ्याम्" इत्येकमेव योगं कुर्यादित्यर्थः। अतिक्रान्तो महिमा ययेति बहुव्रीहावपि "अनो वा" [२. ४. ११.] इत्यस्य "मनः" [२. ४. १४.] इत्यस्य च द्वयोरन्यत्र चरितार्थत्वात् परत्वात् प्राप्तमपि प्रतिषेधं बाधित्वा विशेषविहितत्वात् "अनो वा" [२. ४. ११.] इति विकल्प एव ॥ छ. ॥ २. ४. १४. ॥

**न्या० स०**— मनः। **ङीर्न भवती**ति- बहुव्रीहौ मन्नन्तेऽपि अन्नन्तद्वारा ङीर्भवत्येव, यथा "दातुं प्रदानोचितभूरिधाम्नीम्" [किराता० स. ३.] इति। **अतिमहिमे**त्यत्र अतिक्रान्तो महिमा ययेति बहुव्रीहौ "अनो वा" [२. ४. ११.] इत्यस्य "मनः" [२. ४. १४.] इत्यस्य च द्वयोरन्यत्र चरितार्थत्वात् परत्वात् प्राप्तमपि प्रतिषेधं बाधित्वा विशेषविहितत्वाद् "अनो वा" [२. ४. ११.] इति विकल्प एव। **योगविभागादि**ति- न मन्नुपान्त्यवद्भ्यामित्येवंरूपा[करणा]त् ॥ २. ४. १४. ॥

## ताभ्यां वाऽऽप् डित् । २ । ४ । १५ ॥

**त० प्र०**—मन्नन्तान्नाम्नोऽन्नन्ताच्च बहुव्रीहेः स्त्रियामाप् प्रत्ययो वा भवति, स च डित्; पक्षे यथाप्राप्तम्। सीमे, सीमाः; सुपर्वे, सुपर्वाः; पक्षे पूर्वाभ्यां प्रतिषेधाद् ङीर्न भवति- सीमानौ, सीमानः; सुपर्वाणौ, सुपर्वाणः। उपान्त्यलोपिनस्तु बहुव्रीहेर्ङीरपि भवति- बहुराजे, बहुराजाः; बहुराजानौ, बहुराजानः; बहुराज्ञ्यौ, बहुराज्ञ्यः। उद्दामाम्, उद्दामानम्, उद्दाम्नीं वडवां पश्य। "दातुं प्रदानोचितभूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम्।" [किराता० स० ३]। एवमुपान्त्यलोपिनोऽन्नन्तस्य बहुव्रीहेः स्त्रियां ङीडाप्विकल्पाभ्यां त्रैरूप्यम्। उपान्त्यवतस्तु डाप्प्रतिषेधाभ्यां द्वैरूप्यं भवति। डित्करणमन्त्यस्वरादिलोपार्थम्। डाप् इत्यकृत्वा डिद्विधानमुत्तरत्राप एवानुवृत्त्यर्थम् ॥ १५ ॥

**श० न्या०**—ताभ्यां०। मन इति निर्विशेषणस्य प्रकृतस्यानश्च यथानुक्रान्तस्य ताभ्यामित्यनेन ग्रहणमित्याह- **मन्नन्तान्नाम्नोऽनन्ताच्च बहुव्रीहे**रिति। **सीमे** इत्यादीनि- सर्वत्र "डित्यन्त्यस्वरादेः" [२. १. ११४.] इत्यन्त्यस्वरादिलोपः। **पूर्वाभ्यामि**ति- "नोपान्त्यवतः" [२. ४. १३.] इति "मनः" [२. ४. १४.] इति चेति। **ङीरपी**ति- "दाम्नः" [२. ४. १०.] इत्यनेन "अनो वा" [२. ४. ११.] इत्यनेन च। बहवो राजानो ययोर्यासां वेति बहुव्रीहौ- **बहुराजे** इत्यादि। **उपान्त्यलोपिन** इत्यादि स्वोक्तं परोक्तेन द्रढयितुमाह- **दातुमि**त्यादि। **एवमि**ति- उक्तप्रकारेणेत्यर्थः, तमेव पुनः स्पष्टयति- **उपान्त्यलोपिन** इत्यादि। **डाप्प्रतिषेधाभ्यामि**ति- "ताभ्यां वा०" [२. ४. १५.] इति डाप्, "नोपान्त्य-

वतः " [ २. ४. १३. ] इति ङीप्रतिषेधश्च, ताभ्यां द्वैरूप्यमित्यर्थः । यद्येवं वाग्रहणमतिरिच्यते, तदन्तरेणाप्युक्तत्रैरूप्यादिसिद्धेः, तथाहि– उपान्त्यलोपे नोपान्त्यं, तस्य बहुव्रीहेरनेन डाप्, " अनो वा " [ २. ४. ११. ] इति वचनाङ्ङीः, वाशब्दस्यानर्थक्यं मा भूदिति ङ्यभावश्चेति त्रैरूप्यम्, " वा बहुव्रीहेः " [ २. ४. ५. ] इति वचनाद् वनन्तस्यापि तथैव त्रैरूप्यम् । उपान्त्यवतोऽप्यनेन डाप्, " नोपान्त्यवतः " [ २. ४. १३. ] इति ङीप्रतिषेधश्चेति द्वैरूप्यम्, एवं मनन्तादप्युक्तप्रतिषेधोऽनेन डाबिति वचनसामर्थ्यात् परस्परमबाधया भविष्यतः । यदि ङीप्रतिषेधविषय एव डाप् स्यात् तदा "उपान्त्यवतश्च डाप्" इत्येवं कुर्यात्, चकारेण निर्विशेषणोऽन् परामृश्यते, तस्मात् पृथग्योगाड्डाप्-ङीप्रतिषेधाभ्यां द्वैरूप्यसिद्धेर्वाग्रहणमतिरिच्यते, ( ? उच्यते– ) वाग्रहणे तु सति दोषः, मन्तस्यापि दामादेर्वाग्रहणात् पक्षे ङ्यां प्रापितायां दाम्नीति स्यात्, पक्षे " मनः " [ २. ४. १४. ] इति तु प्रतिषेधोऽप्यर्थवान्, वन्नन्तानामुपान्त्यलोपिनां च चातूरूप्यमापतति, अनेन डाप्, पक्षे ङीतौ [ ङी-रौ ] पूर्वेण च निषेधः " अनो वा " [ २. ४. ११ ] इति च शुद्धो ङीः– सुधीवा, सुधीवानौ, सुधीवर्यौ, सुधीव्न्यौ इति; त्रैरूप्यं चेष्टमिति, एवं सुपूर्वादेरपि पक्षे ङीरित्युपान्तवतोऽपि रूपत्रयमनिष्टमापद्यते; उच्यते– वाग्रहणस्य स्वरूपावधारणार्थत्वाददोषः । **डित्करणमि**ति– " डित्यन्त्यस्वरादेः " [ २. १. ११४. ] इत्यनेनेत्यर्थः । एवं तर्हि डाबिति लाघवार्थमुच्यतामित्याह– **डावि**त्यादि ॥ छ. ॥ २. ४. १५. ॥

**न्या० स०—ताभ्यां वा । पूर्वाभ्यामि**ति– " मनः " [ २. ४. १४. ] " नोपान्त्यवतः " [ २. ४. १३. ] इत्येताभ्याम् ।
" महत्त्वयोगाय महामहिम्नामाराधनीं तां नृपदेवतानाम् ।
**दातुं प्रदानोचितभूरिधाम्नी**मुपागतः सिद्धिमिवास्य विद्याम् ॥ "

**त्रैरूप्यमि**ति– " वा बहुव्रीहेः " [ २. ४. ५. ] इति वचनात् वन्नन्तस्यापि त्रैरूप्यं, तेन सुधीवे, सुधीवानौ सुधीवर्यौ ॥ २. ४. १५. ॥

## अजादेः । २ । ४ । १६ ॥

**त० प्र०—अजादिभ्य आवृत्त्याऽजादीनामेव स्त्रियां वर्तमानेभ्य आप् प्रत्ययो भवति, बाधकबाधनार्थमनकारार्थं च वचनम् । अजा, एडका, अश्वा, चटका, मूषिका, कोकिला;** एभ्यो जातिलक्षणस्य ङीप्रत्ययस्यापवाद आप्; **बाला, होडा,** पाका, वत्सा, मन्दा, विलाता, कन्या, मध्या, **मुग्धा; विलातेत्यन्ये न पठन्ति, तेन– विलातीत्यपि, एभ्यो वयोलक्षणस्य; ज्येष्ठा, कनिष्ठा, मध्यमा; एभ्यो धवयोगलक्षणस्य च; पूर्वापहाणा, अपरापहाणा, निपातनाद् णत्वम्, संप्रहाणा, परप्रहाणेत्यप्यन्ये, एषु टिल्लक्षणस्य; त्रीणि फलानि समाहृतानि त्रिफला, अत्र द्विगुलक्षणस्य । कुञ्चा, देवविशा, उष्णिहा; एषु व्यञ्जनान्तत्वात् " आत् " [ २. ४. १८. ] इत्यनेनाप्राप्तेरजादिपाठः, कश्चिदेतेभ्यो विकल्पेनेच्छति; तन्मते– कुङ्, देवविट्, उष्णिक् । अन्ये तु– कुञ्चानालभेत, उष्णिहककुभौ, देवविशश्च मनुष्य इति प्रयोगदर्शनात् अकारान्ता एवैत इति मन्यन्ते । अजादेरित्यावृत्त्या षष्ठीसम्बन्धः किम्? अजादिसम्बन्धिन्यामेव स्त्रियामभिधेयायां यथा स्यात्, तेनेह न भवति– पञ्चानामजानां समाहारः– पञ्चाजी, दशाजी; अत्र समाहारः समासार्थः स्त्री; नासावजशब्दसंबन्धिनी; अत एव च ज्ञापकादत्र स्त्रीप्रकरणे तदन्तादपि भवति, तेन– महांश्चासावजश्चेति सामान्येन विग्रहे स्त्रीविवक्षायां महाजा परमाजेति सिद्धम्, एवमतिभवती, अतिमहती, अतिधीवरी, अतिपीवरी, परमशूद्रेत्यादि ॥ १६ ॥**

**श० न्या०—अजा०** । नन्वजादेरिति पञ्चमी षष्ठी वा? पञ्चमी चेत् तदा **पञ्चानामजानां समाहारः– 'पञ्चाजी'** इत्यत्रापि " द्विगोः समाहारात् " [ २. ४. २२. ] इति ङीं बाधित्वा आप्प्रसङ्गः । अथैतद्दोषभयादजादिना स्त्रीविशेषणात् षष्ठीपक्षोऽजादेः सम्बन्धिनी या स्त्रीति, तेनाजादिनामाभिधेयसमवेतं स्त्रीत्वमिह गृह्यते, पञ्चाजीत्यत्र तु समासाभिधेयसमाहारगतं स्त्रीत्वं न त्वजशब्दार्थगतमित्यापोऽप्रसङ्गः । अत्र च पक्षे प्रकृत्यनिर्देशात् कस्मादाप्? उच्यते– अजादेरित्येकमपि पदमावृत्त्या द्विधा, ततश्चैकस्मात् पञ्चमी, अपरस्मात् षष्ठीत्यदोषः, अत आह– **अजादिभ्य आवृत्त्ये**त्यादि । अथवा मा भूत् पञ्चमी, षष्ठ्यन्तमेव भवति( तु ), न च प्रकृत्यनिर्देशदोषः, यतो यद्यन्यतोऽजादिव्यतिरिक्तान्नाम्नः प्रत्यय उत्पद्येत ततोऽजादिसम्बन्धिस्त्रीत्वं नाभिहितं स्यादिति सामर्थ्यात् स्त्रीत्वविशेषणोपक्षीणानामप्यजादीनामेव प्रकृतित्वं विज्ञास्यते ततः, एतदप्यसङ्गतं– तुल्यार्थेभ्यश्छागादिभ्यष्टाबुत्पत्तावजाद्यर्थसमवेतमेव स्त्रीत्वमुक्तं भवतीति तेभ्य एव प्राप्नोति । एवं तर्हि प्रत्यासत्तेरजादीनामेव प्रकृतित्वं गम्यते, न शब्दान्तरस्य, असन्निकृष्टाद्धि कार्यभाक्त्वेन कल्प्यमानाद् युक्तं यत् सन्निकृष्टस्य [ प्र ]कृतकार्यभाक्त्वं तथैव लोके व्यवहारदर्शनात् । नन्वजादेरकारान्तत्वात् " आत् " [ २. ४. १८. ] इत्यनेनैवाप् भविष्यति, किमेनेनेत्याह– **बाधकबाधनार्थमि**त्यादि– अयमर्थः– " आत् " [ २. ४. १८. ] इत्यस्य सामान्यविहितत्वेनोत्सर्गत्वात् " जातेरयान्त० " [ २. ४. ५४. ] इत्यादयो विशेषविहितत्वादपवादत्वेन बाधकाः स्युरतस्तद्बाधनार्थं,

कुञ्चेत्यादावजादिपठितानकारान्तेभ्यः प्राप्त्यर्थं चावश्यं कर्तव्यमिति । "अज क्षेपणे च" अचि- **अजा** । "ईडिक् स्तुतौ" 'कीचकपाचक०" [ उणा० ३३. ] इति निपातनात्- **एडकः (का)**, अस्यैवाङ्पूर्वस्य णके- **एडकः (का)**, "अशौटि व्याप्तौ" "लटिखटि०" [ उणा० ५०५. ] इति वे- **अश्वा** । "चटङ् भेदे" "दृ-कॄ-नॄ०" [ उणा० २७. ] इत्यके- **चटका** । "मुषश् स्तेये" "मुषेर्दीर्घश्च" [ उणा० ४३. ] इतीके- **मूषिका** । "कुकि आदाने" "कल्यनि०" [ उणा० ४८१. ] इति इले- **कोकिलः(ला)** । एते जातिनिमित्तकाः प्रवर्त्तन्त इति बाधकबाधनार्थत्वमुपदर्शयति- **एभ्य** इत्यादि । "बल प्राणनादौ" ज्वालादित्वाण्णे- **बाला** । "हुडत् निमज्जने" इत्यतो ण्यन्तादचि, उणाद्यप्रत्यये वा **होडा** । "पांक् रक्षणे" "भीण्-शलि०" [ उणा० २१. ] इति के- **पाका** । वदतेः "मा-वा-वद्यमि०" [ उणा० ५६४. ] इति से- **वत्सा** । "मदुङ् स्तुत्यादौ" अतोऽचि, उणाद्यप्रत्यये वा- **मन्दा** । विपूर्वाल्लातेः के- **विलाता** । "कनै दीप्त्यादौ" "स्था-छा-मा०" [ उणा० ३५७. ] इति ये- **कन्या**, एते सप्त बाल्यवचनाः । "शिक्याऽऽस्याढ्यमध्य०" [ उणा० ३६४. ] इति निपातनात्- **मध्या** । "मुहौच् वैचित्ये" क्ते- **मुग्धा** । **वयोलक्षणस्ये**ति- "वयस्यनन्त्ये" [ २. ४. २१. ] इत्यनेनेत्यर्थः । वृद्धशब्दस्य प्रकर्षविवक्षायामिष्ठे "वृद्धस्य०" [ ७. ४. ३५. ] इति ज्यादेशे- **ज्येष्ठा** । अल्पशब्दस्य युवन्शब्दस्य तथैवेष्ठे "अल्पयूनोः०" [ ७. ४. ३३. ] इति कनादेशे- **कनिष्ठा** । मध्यशब्दात् "मध्यान्मः" [ ६. ३. ७६. ] इति जातार्थमप्रत्यये- **मध्यमा** । **धवयोगलक्षणस्ये**ति- "धवाद्योगादपालकान्तात्" [ २. ४. ५९. ] इत्यनेन "वयस्यनन्त्ये" [ २. ४. २१. ] इत्यनेन चेत्यर्थः । **पूर्वापहाणे**ति- अपहीयतेऽस्यामनया वेति "करणाधारे" [ ५. ३. १२९. ] अनट्, तस्य पूर्वशब्देन षष्ठीसमासः, अत्रानटष्टित्वात् "अणञेय०" [ २. ४. २०. ] इति ङीः प्राप्नोति, तस्य बाधा । अथान्तरङ्गत्वात् समासात् प्रागेव ङीः कस्मान्न भवति ?, नैवम्- * अन्तरङ्गादनवकाशं बलीयः * अन्यथा वचनानर्थक्यादाबेव भवति, णत्वं तु निपातनादाबन्तसन्नियोग एव, एवम्- **अपरापहाणे**ति । **द्विगुणलक्षणस्ये**ति- "द्विगोः समाहारात्" [ २. ४. २२. ] इत्यनेनेत्यर्थः । **कुञ्चे**ति- त्रयोऽपि क्विबन्ताः, छान्दसा एते इति पूर्वं इति न मतव्यक्तेर्निबन्धः कृतः । **पञ्चाजी**ति- "द्विगोः समाहारात्" [ २. ४. २२. ] इति ङीः । ननु * नामग्रहणे न तदन्तस्य * इति न्यायात् अजाद्यन्तादापः प्राप्तिरेव नास्ति, किमावृत्त्या षष्ठीसम्बन्धव्याख्यानेन ? अत आह- **अत एव चे**त्यादि । भवन्तं महान्तं धीवानं पीवानमतिक्रान्तेति प्रादितत्पुरुषे- **अतिभवती**त्यादि । "शदॢं शातने" "शदेरूच्च" [ उणा० ३९४. ] इति रे, अस्योत्वे च महाजेतिवत् कर्मधारये- **परमशूद्रा** । नन्वत्र प्रकरणे तदन्तविधेर्ज्ञापितत्वात् केवलानां कार्याप्राप्तेः व्यपदेशिवद्भावस्य नाम्ना प्रतिषेधात् तदर्थं यत्नः कार्यः, यथा पूर्वैः, यदुत्पलः- आबन्तानामजा एडकेति गणपाठसामर्थ्यात् केवलेभ्योऽपि भवति, न यतितव्यम्- यतः स एवाह- अन्ये तु- तदन्तविधिज्ञापनेन ययोः परिभाषयोः प्रातिपदिकश्रुतिरस्ति तयोरनुपस्थानं ज्ञाप्यते, * ग्रहणवता० * इति * व्यपदेशिवद्भाव० * इति च परिभाषयोरुपस्थानाभावात् तदन्तेभ्यः केवलेभ्यश्च सिद्धा टाबुत्पत्तिरिति नार्थ आबन्तपाठेन । उद्द्योतकरोऽप्याह- अन्ये त्वाहुः- तदन्तविधिना केवलं तदन्तस्य कार्यं साध्यते, न तु केवलस्य निवर्त्यते, शब्दार्थत्वात्, तेन सिद्ध्यति केवलादपि । यदुत्पल एवाह- आबन्तानां गणपाठः पुंवद्भावबाधनार्थः, तत्र ये जातिशब्दास्तेषामाबन्तानां पाठे एतत् प्रयोजनं नोत्पद्यते, जातेः पुंवद्भावस्य प्रतिषेधात्, तेभ्योऽन्येषां पुंवद्भावबाधनार्थम्, एतच्च क्वचन मते कथं सिद्ध्यति, आबन्तगणपाठाभावात्, नैवम्- आबन्तानां पाठसामर्थ्यादेव । यदुद्द्योतकरः- आबन्तपाठसामर्थ्याद्धि पुंवद्भावो न भविष्यति, अजा भार्या यस्यासौ- अजाभार्या इति । अजादेरित्यावृत्त्येति व्याख्यातप्रायम् । नन्वज इत्येवमादेः स्त्रियां वर्तमानादाबिति विज्ञायमाने कः प्रसङ्गः ? पञ्चाजशब्दाद्, येनावृत्त्या षष्ठी व्याख्यायत इत्याह- **अत एव चे**त्यादि- चः समुच्चये, पञ्चाजीत्यादावापूनिवृत्त्यर्थाज्ज्ञापकाच्चा- [ व ]न्त एवेति, यद्यजाद्यन्तादाप् न स्यात् पञ्चाजीत्यादावाब् निवृत्त्यर्थमावृत्त्या षष्ठीसम्बन्धाश्रयणमनर्थकं स्यादप्राप्तेरिति सम्बन्धाश्रयणात् तदन्तादपि भवतीति ज्ञापकस्य फलं दर्शयति- **तेने**त्यादि ॥ छ. ॥ २. ४. १६. ॥

---

**न्या० स०—अजादेः०** । एडकेत्यत्र 'ईडिक्' "कीचक०" [ उणा० ३३. ] इति । **बाले**ति- "बल प्राणने" बलतीति वा ज्वलादिणः । **होडा** इत्यत्र "हुडत् निमज्जने" ण्यन्तादचि उणाद्यप्रत्ययो वा । **मन्दे**ति- 'मदुङ्' अचि, उणाद्यप्रत्ययो वा । **मन्दा-विलाते** इति- मध्यमवयसौ स्त्रियौ । **मध्ये**ति- "शिक्यास्याढ्यमध्य०" [ उणा० ३६४. ] इति निपातनात् मध्या । विपूर्वाल्लातेः के- **विलाते**ति न्यासः । **पूर्वापहाणे**ति- पूर्वश्चासौ अपहानश्च पूर्वापहानः, स्त्री चेत् **पूर्वापहाणा**, एवम्- **अपरा-**

**पहाणा** इति– यद्वा पूर्वमपहीयतेऽस्यामिति " करण० " [ ५. ३. १२९. ] इत्यनट्, यद्वा अपहीयतेऽस्यामनया वा " करणाधारे " [ ५. ३. १२९. ] अनट् । अपहानशब्दोऽपि टिद्द्वारेण ङीप्रत्ययाभावार्थमजादौ द्रष्टव्यः, तेन पूर्वा च साऽपहाना चेति आबन्तेन वाक्यं कार्यम्, क्रियाशब्दत्वाच्च " पूर्वपदस्था० " [ २. ३. ६४. ] इति णत्वाभावः । संप्रहीयते परेण प्रहीयते भुजिपत्यादिनाऽनट्, स्वराणत्वम् । **क्रुञ्चा, उष्णिहा, देवविशेत्यादि**– अत्र त्रयोऽपि क्विबन्ताः, छान्दसा एते इति पूर्वे इति न मतव्यक्तेर्निबन्धः कृतः । * नामग्रहणे न तदन्तस्य * इति न्यायादजाद्यन्तादापः प्राप्तिरेव नास्ति किमावृत्तिव्याख्यानेनेत्याह– **अत एव चेति** ॥ २. ४. १६. ॥

## ऋचि पादः पात्-पदे । २ । ४ । १७ ॥

**त० प्र०—**पादिति कृतपाद्भावः पादशब्दो गृह्यते, तस्याबन्तस्य ऋच्यभिधेयायां पात् पदेति निपात्यते । त्रिपात् चतुष्पात् ऋक्, त्रिपदा गायत्री, चतुष्पदा पङ्क्तिः । ऋचीति किम् ? द्विपाद्, द्विपदी; चतुष्पाद्, चतुष्पदी ॥ १७ ॥

**श० न्या०—**ऋचि० । " वा पादः " [ २. ४. ६. ] इति ङ्यां प्राप्तायां तदपवादोऽयमुच्यते, त्रयः पादा यस्याश्चत्वारः पादा यस्या इति विग्रहे आबन्तस्य पादाद्यादेशे– **त्रिपादि**त्यादि । **द्विपदी**ति– " वा पादः " [ २. ४. ६. ] इति ङीः ॥ छ. ॥ २. ४. १७. ॥

**न्या० स०—ऋचि पादः०** । ननु " ऋचि पादो वा " इति क्रियताम्, ऋचि अभिधेयायां वाप् भवतीति सूत्रार्थः, नविकल्पपक्षे ऋच्यभिधेयायामपि " वा पादः " [ २. ४. ६. ] इति ङीः स्यात् । " वा पादः " [ २. ४. ६. ] इति प्राप्तेऽयमारभ्यते ॥ २. ४. १७. ॥

## आत् । २ । ४ । १८ ॥

**त० प्र०—**अकारान्तान्नाम्नः स्त्रियां वर्तमानादाप् प्रत्ययो भवति । खट्वा, सर्वा, या, सा । खट्वादीनामकारान्तत्वम्– अतिखट्वः, प्रियखट्वः; पञ्चभिः खट्वाभिः क्रीतः– पञ्चखट्व इत्यादिप्रयोगदर्शनात्, उपदेशाच्च निश्चीयते । आदिति किम् ? सोमपाः स्त्री, दृषद्, समिद्, आदित्यधिकृतमुत्तरत्र यथासम्भवं योजनीयम् ॥ १८ ॥

**श० न्या०—**आत् । 'खट्व सर्व' इति स्थितादापि– **खट्वा, सर्वे**ति । **या, से**ति– " आ द्वेरः " [ २. १. ४१. ] इत्यकारः, तत आप् । ननु '**या सा**' इत्यादीनामनेकलिङ्गानां 'यः सः' इत्यादावकारान्तप्रयोगादर्शनादकारान्तत्वनिर्णयादस्तु तत आप्, खट्वादीनां तु नित्यं स्त्रियां वर्त्तमानत्वादकारान्तप्रयोगादर्शनात् तदनिश्चयात् कथं तेभ्य आबितीत्याशङ्क्याह– **खट्वादीनामि**त्यादि– अतिक्रान्तः खट्वां, प्रिया खट्वा यस्य " गोश्चान्ते० " [ २. ४. ९६. ] इति ह्रस्वे, पञ्चभिः खट्वाभिः क्रीत इतीकणो लुपि " ङ्यादेर्गौणस्य० " [ २. ४. ९५. ] इति स्त्रीप्रत्ययस्य निवृत्तौ, अकारान्तदर्शनादकारान्ततानिश्चयः, यद्यकारान्तो न स्यात् ततो नाबन्त इति तस्योच्यमानो ह्रस्वोऽपि न स्यादित्यर्थः । **सोमपा** इति– सोमं पिबतीति क्विप् विच् वा, आदिति वचनादत्राप् न भवति । ननु चात्रापूभावाभावयोराकारश्रुतेरविशिष्टत्वात् किं तदभावेन प्रार्थ्यत इति, उच्यते– आपि सति " दीर्घ-ङ्याप्० " [ १. ४. ४५. ] इति सेर्लोपः स्यात् । तथा कीलालपः कन्याः पश्येत्यत्र " लुगातोऽनापः " [ २. १. १०७. ] इति तस्य लुग् न स्यात् । **अधिकृतमि**ति– अधिकार इत्यर्थः ॥ छ. ॥ २. ४. १८ ॥

**न्या० स०—आत्** । ननु या सेत्यादीनां 'यः, सः' इत्यादावकारान्तप्रयोगदर्शनादकारान्तत्वनिर्णयादस्तु तत आप्, खट्वादीनां तु नित्यं स्त्रियां वर्त्तमानत्वादकारान्तप्रयोगादर्शनात् तदनिश्चयात् कथं तेभ्य आबित्याशङ्क्याह– **खट्वादीनामिति** । **उपदेशाच्चेति**– यद्यकारान्तो न स्यात् ततो नाबन्त इति तस्याप्द्वारेण ह्रस्वोऽपि न स्यादित्यर्थः । **आदिति किमिति**– अवर्णादिति क्रियतामित्यर्थः । **सोमपाः स्त्रीति**– सोमं पीबतीति विच्, आदिति वचनादत्राप् न भवति । ननु चात्राप्भावाभावयोराकारश्रुतेस्तथैव विद्यमानत्वात् किं तद्भावेन विनश्यतीति ? उच्यते– आपि सति " दीर्घङ्याब्० " [ १. ४. ४५. ] इति सेर्लोपः स्यात्, तथा सोमपः कन्याः पश्येत्यत्र " लुगातोऽनापः " [ २. १. १०७. ] इति शसि लुग् न स्यात् ॥ २. ४. १८. ॥

## गौरादिभ्यो मुख्यान्ङीः । २ । ४ । १९ ॥

**त० प्र०—**गौरादेर्गणान्मुख्यात् स्त्रियां ङीः प्रत्ययो भवति, मुख्यादित्यधिकारोऽयम् । **गौरी, शबली । गौर, शबल, कल्माष, सारङ्ग, पिशङ्ग, हरिण, पाण्डुर [ पाण्डर ], अमर, सुन्दर, विकल, विष्कल, पुष्कल, निष्कल; गौरादीनां** गुणवचनत्वेनाजातिवाचित्वादप्राप्ते पाठः । **यस्तु विकलेति कालविशेषवाची आबन्तः स विगता कलेति भविष्यति । दास, चेट, विट, भिक्षुक, बन्धक, पुत्र, गायत्र, आनन्द, टेट, कटेट, नट; एषामजातिवचनत्वादप्राप्ते पाठः । काव्य, शैव्य, मत्स्य, मनुष्य, मुकय, हय, गवय, ऋश्य, द्रुण, ओकण; एषां जातिवाचित्वेऽप्यष्टानां यान्तत्वाद् द्रुणौकणयोर्नित्यस्त्रीविषयत्वादप्राप्ते पाठः । भौरिकि, भौलिकि, भौलिङ्गि, औद्राह-**

मानि, आलम्बि, आलब्धि, कालब्धि, सौधर्म, आयस्थूण, आरद; भौरिकि-भौलिकयोः कौड्यादित्वात्, शेषाणां त्वणिञन्तानां गुरूपान्त्यत्वात् ष्ये प्राप्ते पाठः। कथं भौरिक्या ?, भौलिक्या ? कौड्यादिपाठात् ष्योऽपि। आपच्चिको राष्ट्रसरूपः क्षत्रियस्तस्यापत्यं स्त्री आपच्चिकीत्यत्र शकादित्वात् ञ्यलोपेऽपि जातिवाचित्वाद् ङीर्भवति, एवं दोटी। वरट, नाट, मूलाट, पाट, सृपाट, पेट, पट, पटल, पुट, कुट, फाण्टश, धातक, केतक, तर्कार, शर्कार, बदर, कुवल, लवण, बिल्व, आमलक, मालत, वेतस, अतस, आढक, कदर, कदल, गुडूच, वाकुच, नाच, माच, कुम्भ, कुसुम्भ, यूष, मेथ, सूष, मूष, करीर, सल्लक, वल्लक, मल्लक, मालक, मेध, पिप्पल, हरीतक, कोशातक, शम, तम, सुसव, शृङ्ग, भृङ्ग, बिम्ब, वर्वर, पाण्ड, लोहाण्ड, शष्कण्ड, पिण्ड, मण्डर, मण्डल, यूप, सूप, सूर्प, सूर्म, मठ, पिठर, ऊर्द, गूर्द, सूर्द, खार, काकण, द्रोण, अरीहण, उकण, वृश, आसन्द, अलिन्द, कन्दल, सलन्द, देह, देहल, शष्कुल, शच, सूच, मञ्जर, अलज, गण्डज, वैजयन्त, शाल्मक, उपरतस, छेद; एषां नित्यस्त्रीविषयत्वादप्राप्ते पाठः। क्रोष्टु, सरस्; अनयोरनकारान्तत्वादप्राप्ते पाठः। अनड्वाही, अनडुही; अत एव पाठादनडुह्शब्दस्य ङ्यामुकारस्य पक्षे वाशब्दादेशः सौ नित्यं नागमाभावश्च। प्रत्यवरोहिणी, पृथिवी, आग्रहायणी; सप्रत्ययपाठः पुंवद्भावनिषेधार्थः। अनड्वाहीभार्यः, अनडुहीवृन्दारकेत्यादि(दौ) तद्धितलोपेऽपि लुगभावार्थश्च। पञ्चानड्वाहिः, दशानडुहिः, आश्मरथ्यः; गोत्रयञन्ताद् डायन् मा भूत्, ङ्येव यथा स्यादित्यस्य पाठः। एहि, पर्येहि; अनयोरिदन्तत्वाद् विकल्पे प्राप्ते नित्यार्थः पाठः। बहुवचनमाकृतिगणार्थम्, तेन– नद, मह, भष, प्लव, चर, गर, तर, गाह, देव, सूद, अराल, उदवड, चण्ड, उमाभङ्ग, हरीकण, वटर; अधिकर। एषण करणे इति केचित्, इष्यते– अन्विष्यतेऽनया दोष इति "इषोऽनिच्छायाम्" [ ५. ३. ११२. ] इत्यने सति एषणी– वैद्यशलाका; करणादन्यत्रैषणा, अन्वेषणा; आवेव; तदन्ये न मन्यन्ते। मुख्यादिति किम् ?, बहुनदा भूमिः ॥ १९ ॥

**श० न्या०—गौरा०।** "गुंत् पुरीषोत्सर्गे" इत्यस्य "खुर-क्षुर०" [ उणा० ३९६. ] इति निपातनाद् **गौरः**। [ "शमूच् उपशमे" इत्यतः ] "शमेर्वे च वा" [ उणा० ४७०. ] इत्यले– **शबलः**। "कलि शब्दसंख्यानयोः" "कुलेश्च माषक्" [ उणा० ५६३. ] इति [ माषकि– ] **कल्माषः**। सर्तेः "सृ-वृ-नृभ्यः०" [ उणा० ९९. ] इति णित्यङ्गे– **सारङ्गः**। "पिंशत् अवयवे" "विडि-विलि-कुरि०" [ उणा० १०१. ] इति कित्यङ्गे– **पिशङ्गः**। हरतेः "द्रु-हृ-वृहि०" [ उणा० १९४. ] इति इणे– **हरिणः**। पण्डते– याति मनोऽस्मिन्निति "जठर-कर्कर०" [ उणा० ४०३. ] इत्यादिशब्दादरे निपातनाद् वृद्धौ– **पाण्डुरः** [ **पाण्डरः** ]। न म्रियते इत्यचि– **अमरः**। [ सुन्दिः सौत्रः शोभायाम् ] सुन्देः "ऋच्छि-चटि-वटि०" [ उणा० ३९७. ] इत्यरे– **सुन्दरः**, सुष्ठु नन्दयतीति पृषोदरादित्वाद् वा– **सुन्दरः**। विपूर्वात् कलेः "अः" [ उणा० २. ] इत्यप्रत्यये– **विकलः**। अस्यैव "वर्चस्कादिषु०" [ ३. २. ४८. ] इति षकारागमे– **विष्कलः**। "पुषश् पुष्टौ" "वलि-पुषेः कलक्" [ उणा० ४९६. ] इति [ कलकि– ] **पुष्कलः**। निस्पूर्वात् कलेरप्रत्यये "निर्दुर्०" [ २. ३. ९. ] इति षत्वे– **निष्कलः**। **गौरादीनामि**त्यादिना गणपाठे फलमाह। **यस्त्वि**त्यादि सुगमम्। [ "दासृग् दाने" ] दासते "दसूच् उपक्षये" दास्यत इति वा– **दासः** इति क्षीरस्वामी। चेटतीति लिहादित्वादचि– **चेटः**। "विट शब्दे" इत्यतो "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के– **विटः**। भिक्षेः "सन्-भिक्षा०" [ ५. २. ३३. ] इत्युप्रत्यये स्वार्थिके के च– **भिक्षुकः**। "बन्धंश् बन्धने" "दृ-कॄ-नॄ०" [ उणा० २७. ] इत्यके– **बन्धकः**। "पूग्श् पवने" "पुत्रादयः" [ उणा० ४५५. ] इति त्रे– **पुत्रः**, पुन्नाम्नो नरकात् त्रायते इति वा। "गैं शब्दे" गीयते इति "पुत्रादयः" [ उणा० ४५५. ] इति निपातनाद् **गायत्रः**, गायतस्त्रायत इति वा। आङ्पूर्वान्नन्देरचि– **आनन्दः**। टेकतेः "अः" [ उणा० २. ] इत्यकारे बहुलवचनात् कस्य टत्वे– **टेटः**। "इट गतौ" "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के कटशब्देन षष्ठीसमासे– **कटेटः**। "णमं प्रह्वत्वे" "नमितनि०" [ उणा० १३९. ] इति टेऽन्त्यलोपे च– **नटः**, नटतीति वाऽचि– **नटः**। **एषामि**ति– क्रियादिवचनत्वेनेति शेषः। "कबृङ् वर्णे" "पदि-पचि०" [ उणा० ६०७. ] इत्यादिशब्दादिकारे– कविः, "शीङ्क् स्वप्ने" "छविछिवि०" [ उणा० ७०६. ] इति वौ ह्रस्वत्वे च– शिविः, ततः कवेरपत्यमिति "कुर्वादेः" [ ६. १. १००. ] इति ञ्ये, शिवेरपत्यमिति "दुनादि०" [ ६. १. ११८. ] इति ञ्ये– **काव्यः**, **शैव्यः**, ततो ङ्यां तद्धितयकारलोपे– कावी, शैवी। [ "मदैच् हर्षे" इत्यतः ] "मदेः स्यः" [ उणा० ३८३. ] इति स्ये– **मत्स्यः**। "मनोर्याणौ षश्चान्तः" [ ६. १. ९४. ] इति **मनुष्यः**। "मुचेर्धयधुयायौ" [ उणा० ३७१. ] इति

**मुकयः**। "हय हर्य क्रान्तौ च" इत्य[ तोऽ ]चि- **हयः**। "गुंङ् शब्दे" "कु-गु-वलि०" [उणा० ३६५.] इत्यये- **गवयः**। "ऋश् गतौ" "ऋशि-जनि०" [उणा० ३६१.] इति किति ये- **ऋश्यः**। "द्रुं गतौ" "द्रोर्वा" [उणा० १८४.] इति किति णे- **द्रुणः**। "उचच् समवाये" चिक्कणादिनिपातनादणे कत्वे- **ओकणः**, श्यामोकर्णीति पर्यन्तबन्धनस्य किलाख्या। **एषामि**त्यादिना फलं दर्शयति। भवतेः "भू-सू-कुशि०" [उणा० ६९३.] इति किति रिप्रत्यये स्वार्थिके के च-भूरिकः, ऋफिडादित्वाल्लत्वे-भूलिकः, तयोरपत्यमिति "अत इञ्" [६. १. ३१.]- **भौरिकिः, भौलिकिः**। "भलि परिभाषणे" "भलेरि-दुतौ चातः" [उणा० १०३.] इति इङ्गकि अकारस्योकारे- भूलिङ्गः, भुवि लिङ्गं- कीर्त्तिरस्येति वा पृषोदरादित्वाद् भुवो-ह्रस्वत्वे- भुलिङ्गः, तस्यापत्यं "साल्वांशा०" [६. १. ११७.] इति इञि- **भौलिङ्गिः**। उद्वाहतेरानशि उद्वाहमानस्यापत्यम् "अत इञ्" [६. १. ३१.] इञि- **औद्वाहमानिः**। न विद्यते लम्बो यस्यासावलम्बस्तस्यापत्यमिति इञि- **आलम्बिः**। अलं चिनोति कालं चिनोति "क्वचित्" [५. १. १७१.] इति डे पूर्वपदयोः पृषोदरादित्वादलच्भावे-अलच कलच, तयोरपत्यमितीञि- **आलचि, कालचि**। शोभनो धर्मो यस्याः "द्विपदाद्०" [७. ३. १४१.] इत्यनि "ताभ्यां वाप् डित्" [२. ४. १५.]-सुधर्मा, तस्या अपत्यम् "अदोर्नदी-मानुषी०" [६. १. ६७.] इत्यणि- **सौधर्म**, यदा तु सुधर्मस्यापत्यमिति "ऋषि०" [६. १. ६१.] अण् तदा ङीः सिद्ध एवेति। अय इव स्थूणा यस्य तस्यापत्यं शिवाद्यणि- **आयस्थूण**। **आरटे[ट्टे]**ति चिन्त्यम्, अन्ये त्वारटतीत्यचि ङ्यामारटी, आषाढी पौर्णमासीत्याहुः। **भौरिक-भौलिक्योरि**त्यादिना बाध्यबाधकभावोपदर्शनेन फलमाह, भौरिकि-भौलिक्योः ष्योऽपि दृश्यते, अत आह- **कथमि**त्यादि। आङ्पूर्वात् "पिचिग् कुट्टने" "आङः पणि-पनि०" [उणा० ३९.] इति बहुवचनादिके बाहुलकात् पूर्वेकारस्याकारे- आपच्चिक, आपच्चिकेत्यन्ये, तस्यापत्यमिति- **आपच्चिकी**त्यत्र पाठाभावात् कथं ङीः, अत आह- **आपच्चिको राष्ट्रसरूप** इत्यादि। **दोटी**ति चिन्त्यम्। वृणोतेः "दिव्यवि०" [उणा० १४२.] इत्यटे-**वरटः**। न अटतीत्यचि नखादित्वात् **नाट**। मूलैरटतीत्यचि- **मूलाट**, पाटयतीत्यचि- **पाट**। सृपेः "स-सृपेः कित्" [उणा० १४६.] इत्याटे- **सृपाट**। "पिट शब्दे च" लिहाद्यचि- **पेट**। पटतेरचि- **पट**। पटेः "मृदि-कुन्दि०" [उणा० ४६५.] इत्यले- **पटल**।

"पुटत् संश्लेषणे" "नाम्युपान्त्य०" [५. १. ५४.] इति के-**पुट**। "कुटत् कौटिल्ये" कुटयतेऽस्यामिति **कुटी**। फणेः "पञ्चमा[ड्डः" उणा० १६८. इति] डे प्रज्ञादित्वादणि तत्र शेते "क्वचित्" [५. १. १७१.] इति डे- **फाण्टश**। धागो धेटो [ट्धे इत्यतः] वा "इण्यशि०" [उणा० ७७.] इति बहुवचनात् तककि बाहुलकादीत्वाभावे- **धातकी**। "कित निवासे" णके- **केतक**। तरतेः "त्रः कादिः" [उणा० ४०६.] इत्यारे- **तर्कारः**। तर्कमियर्ति- अर्गं जनयति नवेति [सं]देहं करोति तीक्ष्णत्वादिति वाऽणि- तर्कारः। शृणातेः "द्वार-शृङ्गार०" [उणा० ४११.] इत्यादिग्रहणादारे निपातनात् कातनात् [कागमात्] कारे- **शर्कार**। "बद स्थैर्ये" "ऋच्छि-चटि-वटि०" [उणा० ३९७.] इत्यरे- **बदर**। "कुङ् शब्दे" "कोर्वा०" [उणा० ४६९.] इति कित्यले- **कुवल**। क्रियति स्वदते वा "चिक्कण-कुक्कण०" [उणा० १९०.] इति निपातनाद् **लवण**, ततो ङ्या- लवणी ओषधिः, समुद्रपार्श्वस्रोतो यत्र वहनानि स्थाप्यन्ते इत्येके। लवणा यवागूरिति गुणशब्दोऽजादिषु द्रष्टव्यः। "विलत् भेदने" "निघृषी०" [उणा० ५११.] इति किति वप्रत्यये- **विल्व**। आङ्पूर्वात् "मलि-धारणे" इत्यतः "कीचक-पेचक०" [उणा० ३३.] इत्यादिवचनादके, आमं लातीति वा डे स्वार्थिके के च- **आमलक**। "मलि धारणे" "दृ-पृ-भृ-मृ-शी०" [उणा० २०७.] इति बहुवचनादते बाहुलकाद् वृद्धौ- **मालत**। "वींक् प्रजनादौ" "तसश्च" [उणा० ५८०.] इति तसे- **वेतस**। अवतेः "तप्यणि०" [उणा० ५६९.] इत्यसे- **अतस**। आङ्पूर्वाद् ढौकतेः "कीचक-पेचक०" [उणा० ३३.] इति डित्यके- **आढक**। कदेः सौत्रात् "ऋच्छि-चटि-वटि०" [उणा० ३९७.] इत्यरे- **कदर**, ऋफिडादित्वाल्लत्वे- **कदल**। "गुडत् रक्षायाम्" अतो "गुडेरूचट्" [उणा० १२०.] इति **गुडूच**। वारि संकोचयतीति "मूलविभुजादयः" [५. १. १४४.] इति के निपातनाद् **वाकुच**। नाथतेः "कूर्च-चूर्चादयः" [उणा० ११३.] इति वचनाचटि थकारलोपे च- **नाच**। माचयतीत्यचि- **माच**, काकवन्माचयतीति काकमाचीति क्षीरस्वामी। "कैं शब्दे" "कुसच् श्लेषे" "का-कुसिभ्यां कुम्भः" [उणा० ३३७.] इति कित्युम्भे- **कुम्भ, कुसुम्भ**। "युक् मिश्रणे" "योरूच वा" [उणा० ५४१.] इवेति षे ऊकारे च- **यूष**। "मेथृग् संगमे च" इत्यतोऽचि- **मेथ**। "षूत् प्रेरणे" "मूङ् बन्धने" आभ्यां "स्नु-पू-सू०" [उणा० ५४२.] इति **किति षे**-

**सूष, मूष**। "कृत् विक्षेपे" इत्यतः "कॄ-शॄ-पॄ-गॄ०" [ उणा० ४१८.] इति ईरे- **करीर**। सल्लेः सौत्रात् "वल्लि संवरणे" "मल्लि धारणे" एभ्यो "दॄ-कॄ-नॄ०" [ उणा० २७.] इत्यके- **सल्लक, वल्लक, मल्लक**। मलतेर्णके- **मालक**। मेधतेरचि- **मेध**। [ पलतेः ] "पॄ-पलिभ्यां टित् पिप् च पूर्वस्य" [ उणा० ११.] इति- **पिप्पल**। हरतेः "स्वरेभ्यः०" [ उणा० ६.] इति इप्रत्यये तकतेरचि हरिरिव तक इति विग्रहे बहुलवचनाद् दीर्घत्वे- **हरीतक,** हरति रोगानिति "हृ-रुहि०" [ उणा० ७९.] इति ईतके वा- **हरीतक**। [ कुंङ् शब्दे ] "क्रोर्वा" [ उणा० ५२९.] इति शप्रत्यये कोशमततीति णके- **कोशातकी,** कोषातकेति केचित्। शमयति दोषानिति उणाद्यप्रत्यये **शम,** ङ्यां- शमी। ताम्यन्त्यस्यां हा राम! हा तातेति विप्रयुक्तावाः स्त्रिय इति **तमी** रात्रिः। सवनं- सवः, शोभनः सवोऽस्यामिति विग्रहे- **सुसवी** ओषधिजातिः। "शॄश् हिंसायाम्" इत्यस्य "शृङ्ग-शार्ङ्गादयः" [ उणा० ९६ ] इति निपातनात्- **शृङ्ग,** ङ्यां च शृङ्गी विषम्, विषाणे तु पुं-नपुंसकम्। बिभर्तेः "भृ-वृभ्यां०" [ उणा० ९४.] इति गे नागमे च- **भृङ्ग**। "बन्धंश् बन्धने" अतो "डी-नी-बन्धीन्धि०" [ उणा० ३२५ ] इति डिदिम्बे- **बिम्ब**। "वृगट् वरणे" "कॄ-गॄ-शॄ०" [ उणा० ४४१ ] इति वरे- **वर्बर**। "पणि व्यवहार-स्तुत्योः" "पञ्चमाड्डः" [ उणा० १६८.] इति डे बाहुलकाद् दीर्घत्वे- **पाण्ड**। लुनातेः "लूगो हः" [ उणा० ५८६.] इति हे, अणतेश्च "कण्यणि०" [ उणा० १६९.] इति डे लोहमिवाण्डमस्या **लोहाण्डी** नाम शकुनिः। "कण शब्दे" "कण्यणि०" [ उणा० १६९.] इति डे षट् कण्डान्यस्या इति पृषोदरादित्वात् षकारस्य तालव्ये शकारे तृतीयत्वाभावे- **शष्कण्डी,** षष्कण्डीत्यन्ये, हैमवतो कश्चिद् वृक्षः। "पिड्ङ् संघाते" अचि- **पिण्ड**। "मडु भूषायाम्" "जठर-ककर०" [ उणा० ४०३.] इत्यादिवचनात्- **मण्डर,** अस्यैव ऋफिडादित्वाल्लत्वे "मृदि-कन्दि०" [ उणा० ४६५.] इत्यले वा- **मण्डल**। यौतेः सुनोतेश्च "यु-सु-कु०" [ उणा० २९७.] इति पे दीर्घत्वे च- **यूप, सूप**। "सृं गतौ" "कॄ-गॄ-शॄभ्यः०" [ उणा० ४४१.] इति पे अन्तस्योरादेशे च- **सूर्प**। "सूत् प्रेरणे" अतो "रुक्मगीष्मकूर्मसूर्म०" [ उणा० ३४६.] इति मे रागमे च- **सूर्म**। मठतेर्मठन्ति- निवसन्ति अस्यामिति "स्थादिभ्यः०" [ ५. ३. ८२.] इति के कर्त्तर्यचि वा- **मठी**। "पिठ हिंसा-संक्लेशयोः" अतो "मृगुन्दि०" [ उणा० ३९९.] इति किल्यरे- **पिठर**। "उर्दि मानक्रीडनयोश्च" अचि दीर्घत्वे च- **ऊर्दी** विमानम्। "गुर्दि क्रीडायाम्" **गूर्द**। सुपूर्वादूर्दतेः- **सूर्द**। खनेः "द्वार-शृङ्गार-भृङ्गार०" [ उणा० ४११.] इति- **खार**। काकान् नयतीति "क्वचित्" [ ५. १. १७१ ] इति डे पृषोदरादित्वाण्णत्वे- **काकण**। द्रवतेः "द्रोर्वा" [ उणा० १८४ ] इति णे- **द्रोण**। ईहेर्नैन्या- दित्वादने- अरीगामीहनः- **अरीहण,** "पूर्वपदस्थात्०" [ २. ३. ६४.] इति णत्वम्। "उचच् समवाये" "चिक्कण०" [ उणा० १९०.] इति निपातनादणे कत्वे गुणाभावे च- **उकण**। "वृशच् वरणे" "नाम्युपान्त्य०" [ ५. १. ५४.] इति के- **वृश**। आङ्संपूर्वाद् ददातेः 'उपसर्गादातः' [ ५. ३. ११०.] इति के- **आसन्द**। "अली भूषणादौ" "कल्यलि०" [ उणा० २४६.] इति इन्दकि- **आलिन्द**। "कुदुङ् वैक्लव्ये" "मृदि-कन्दि०" [ उणा० ४६५.] इत्यले- **कन्दल**। **सलन्द** इति चिन्त्यम्। "दिहींक् लेपे" देग्धीति लिहाद्यचि- **देह**। दिहेः "मृदि-कन्दि०" [ उणा० ४६५.] इत्यलि- **देहल**। शकेः "हृषिवृति०" [ उणा० ४८५.] इत्युले वर्चस्कादित्वात् षकारे- **शष्कुल**। "शचि व्यक्तायां वाचि" अचि- **शच**। "षिवूच् उतौ" "सिवेडित्" [ उणा० १२१.] इति डित्यूचे- **सूच**। "मजु शब्दे" [ मञ्जिः सौत्रः ] "ऋच्छिचटिवटि०" [ उणा० ३९७.] इत्यरे- **मञ्जर**। **अलज गण्डूज** इति चिन्त्यौ। विजयतेः "तॄजि-भू-वदि०" [ उणा० २२१.] इत्यन्ते तस्यायमित्यणि- **वैजयन्ती**। शलतेः "शल्यणेः०" [ उणा० ५९.] इति णित्यूके- **शालूक**। उपरि तस्यतीति लिहाद्यचि पृषोदरादित्वाद्रेरित्य[ स्ये ]कारस्याकारे- **उपरतस**। छिनत्तेस्त्वचि- **छेद**। **अप्रास** इति- "जातेरयान्तनित्यस्त्री०" [ २. ४. ५४.] इत्यादिनेत्यर्थः। सर्त्तेः "अस्" [ उणा० ९५२.] इत्यसि- **सरस्,** अस्य पाठफलं दर्शयति- **अस्यानकारान्तत्वादि**त्यादि। "अनसो वहेः क्विप् सश्च डः" [ उणा० १००६.] इति- अनड्वह्, ङ्याम्- **अनड्वाही**त्यादि। अनड्वाहीत्यस्य सिद्धयर्थमुपपत्तिं दर्शयति- **अत एवे**त्यादि। प्रत्यवपूर्वाद्रुहेस्ताच्छीलिके णिनि ङ्यां च- **प्रत्यवरोहिणी**। "प्रथिष् प्रख्याने" "प्रथेरिवट् पृथ् च" [ उणा० ५२१.] इति इवटि पृथादेशे च- **पृथिवी**। अग्रं हायनस्याग्रे हायनोऽस्या इति वा प्रज्ञादित्वात् स्वार्थिकेऽणि ङ्यां च- **आग्रहायणी**। अनड्वाहीप्रभृतीनां सप्रत्ययानां पाठे फलमाह- **सप्रत्ययपाठ** इत्यादि- यदि प्रत्ययेन सह पाठे पुंवद्भावादीकारो निवर्त्तेत सप्रत्ययपाठोऽनर्थकः स्यात्, तत्र गौरा-

दिवत् प्रकृतिमात्रमेव पठेयेत, अत ईकार एव यथात्र श्रूयेत मा पुंवद्भावो भूदित्येवमर्थं सह प्रत्ययेन ईकारेण पाठ इत्यर्थः । **नन्वनड्वाहीभार्य** इत्यादौ " स्वाङ्गान् ङीर्जातिश्चामानिनि " [ ३. २. ५६. ] इत्यनेन पुंवद्भावो न भविष्यति, किमीकारान्तपाठेन ? नैष दोषः– जातेरन्यत्र जात्यादेरुदाह्रियमाणत्वात्, उदाहरणकिंक्रयम् (?), उदाहरणं स्व**नडुहीवृन्दारिके**ति द्रष्टव्यम्, प्रतिषेधविषयेऽपि " पुंवत् कर्मधारये " [ ३. २. ५७. ] इति पुंवद्भावप्राप्तेः । ननु तथापि पृथिवीशब्दस्याग्रहायणीशब्दस्य च स्वतः स्त्रीत्वात् " परतः स्त्री० " [ ३. २. ४९. ] इति पुंवद्भावो न भविष्यति, किमर्थमनयोस्तथापाठः ? उच्यते– नहि सप्रत्ययपाठस्य पुंवद्भावप्रतिषेध एव प्रयोजनम्, किन्तु तद्धितलोपे लुगभावोऽपि, तत्र क्वचिद् द्वयं क्वचिदेकं यथासम्भवमूहनीयम् । अन्ये तु परतः स्त्रीत्वमप्याग्रहायणीशब्दस्य प्रतिपद्यन्ते, यदाहोद्द्योतकरः– अस्त्यत्र भाषितपुंस्कत्वम्, आग्रहायणः पुंस्यप्याग्रहायणो यस्येत्यर्थे दृष्टत्वात्, इति केचित्, इति । अश्नोतेर्मनि रमेश्च " नी-नूरमि० " [ उणा० २२७. ] इति किति थेऽश्मेव रथो यस्य तस्यापत्यं वृद्धमिति विगृह्य गर्गादित्वाद् यञि– **आश्मरथ्य,** स्त्रियां दृश्यमानो ङीप्रत्ययः साधुर्मन्तव्यः । **एहि, पर्येहीति**– आङ्पूर्वात् परिपूर्वाच्च ईहतेः "नाम्युपान्त्य०" [उणा० ६०९.] इति किदिकारः, एहि एहीति– पर्येहीति, या सातत्येन हि सैवमुच्यते । पाठे फलं– दर्शयति– **अनयोरि**त्यादि । " णद अव्यक्ते शब्दे " " मह पूजायाम् " " भष भर्त्सने " " प्लुं गतौ " " चर भक्षणे च " " गृत् निगरणे " " तॄ प्लवनतरणयोः " " गाहोङ् विलोडने " " दिवूच् क्रीडादौ " " षुदि क्षरणे "– एभ्यो दशभ्योऽजन्तेभ्यो ङीः । उदकेन भृता– **उदवडी,** अत एव निपातनाद् भृतशब्दस्य वडभावः । " अव रक्षणादौ " " अवेर्हृस्वश्च वा " [ उणा० ३४२. ] इति किति मे "मव्यवि-श्रि-वि०" [ ४. १. १०९. ] इत्यूटि हृस्वत्वे च उमाया भङ्ग इव भङ्गोऽस्या **उमाभङ्गी** नाम काचिदोषधिः, माभङ्गीत्यन्ये, हरिशब्दाद् " इतोऽक्त्यर्थात् " [ २. ४. ३२. ] इति ङ्यां– हरी, तस्या कणा इव कणा अस्या **हरीकणी,** हरयः कणा अस्या " घञ्युपसर्गस्य बहुलम् " [ ३. २. ८६. ] इति दीर्घत्वे वा । " वट वेष्टने " " ऋच्छिचटि-वटि० " [ उणा० ३९७. ] इत्यरे– **वटर** । अधिकः कारो यस्या **अधिकारी** । **एषण करण** इति– एषणशब्दः करणेऽर्थे गौरादिः, **तदन्ये न मन्यन्ते–** एषणी शलाकेति अनटैव सिद्धत्वात् । खार-गुञ्जुच-सूचानां टित्त्वात् पाठे फलं नोपलभ्यते । क्रोष्टुशब्दस्य " स्त्रियाम् " [ १. ४. ९३. ] इत्यनेन " क्रोष्टृ " इति निर्निमित्तादेशविधानात् ऋकारान्तादेव ङीः सिद्धस्तदर्थं क्रोष्टुशब्दोऽत्र न पठनीयः । चण्ड-अरालावपि शोणादिपाठात् । नन्वमुख्यस्य समासावयवभूतत्वेन समुदायरूपत्वात् तत्र चावयवाश्रयस्य कार्यस्याभावात् तद्व्यावृत्त्यर्थं मुख्यग्रहणमतिरिच्यते, तथाहि– यदवयवे कार्यमकृतार्थं तत् समुदायस्य भवति, यथा– जुगुप्सत इत्यात्मनेपदम्; यत्त्ववयवे कृतार्थं तन्न समुदायस्य, यथा– पणायतीत्यात्मनेपदम् । तदन्तविधिश्च ग्रहणवति निषिद्ध इत्यनर्थकमिदम्; नानर्थकम्– अमुख्यव्यावृत्त्यर्थत्वेनाधिकारार्थत्वात्, तेन बहवः कुरुचरा अस्यामिति बहुव्रीहौ गौणादपि बहुकुरुचरेत्यत्र कुरुचरशब्दाद् ङीर्न भवति, " अणञेय० " [ २. ४. २०. ] इत्यत्र टिन्नाम गृह्यते, तच्च किञ्चित् साक्षाट्टित्, यथोभयट्, किञ्चिदवयवद्वारेण, अवयवे हि यत्र टित्त्वमकिञ्चित्करं तत्र समुदायार्थं, तद् विज्ञायते, स चावयवः क्वचिद्धातुष्टिद् भवतीति स्तनंधयीति, क्वचित् तद्धितस्त्वनडादिः, क्वचित् कृदनडादिः, तत्र यं समुदायं सोऽवयवो न व्यभिचरति तदर्थमवयवस्य टित्त्वमित्याशयेनोच्यते– कुरुचरशब्दादिति, न तु कृद्ग्रहणपरिभाषाश्रयणात्, नहि टिदिति कृत एव ग्रहणं तद्धितस्यापि ग्रहणात्, यद्येवं कुरुचरशब्दादुच्यमानः प्रत्ययः कथं बहुकुरुचरशब्दाद् भवति, तदन्तविधिना प्रसज्यते इति चेत् ? एवं तर्हि ग्रहणवतापि तदन्तविधिज्ञापनार्थं मुख्यग्रहणम्, तेनातिभवती, अतिमहतीति पूर्वत्र तदन्तादपि भवतीति । ननु तत्राप्युक्तम्, शब्दरूपस्योदृदित्त्वान्नामग्रहणं नास्तीति * ग्रहणवता न तदन्तविधिः * इत्यपि नोपतिष्ठते, एवं तर्हि ( गौणेना ) " ण स्वराघोषाद्० " [ २. ४. ४. ] इति षन्नन्तस्य नाम्नो ग्रहणात् तदन्तविधेरभावादतिधीवरीत्यत्र न प्राप्नोति तदर्थमेतदिति, तदपि न– " अजादेः " [ २. ४. १६. ] इत्यत्र तदन्तविधेर्ज्ञापितत्वात् । तर्हि गौणेनापि तदन्तविधिः स्यादिति बहुकुरुचरशब्दादपि प्राप्नोति । किञ्च नह्यमुख्यं समासावयवभूतमिति परिभाषितमस्ति, तत्रापिशलिना प्रोक्तं तदधीते या सा आपिशला ब्राह्मणीति " वृद्धेऽञः " [ ६. ३. २८. ] इत्यञ्, ततोऽध्येत्र्यां तदधीते इत्यण्, तस्य " प्रोक्तात् " [ ६. २. १२९. ] इति लुप्, प्रोक्तप्रत्ययस्याञोऽत्र मुख्यत्वाभावाद् ङीर्न भवति । यद्यपि प्रत्यये लुप्ते प्रकृतेरेव तदर्थाभिधानाद् अञन्तस्य मुख्यता, तथापि नात्र मुख्यग्रहणेनाणायन्तं विशेष्यते, किन्त्वणादिरेव यो मुख्य इति, अत्र च प्रोक्तार्थस्य गौणत्वादर्थद्वारेणाञ्प्रत्ययो गौण इति ङ्यभावः,

यस्त्वध्येत्र्यामुपपन्नस्तस्य लुप्तत्वादणो योऽकार इति विज्ञानाद् वर्णविधित्वेन स्थानित्वाभावात् तदाश्रयो ङीर्न भवति। न चैवं जातिशब्दस्यातिप्रसङ्गो वाच्यः, कुन्तेरपत्यम्, गान्धारेरपत्यं स्त्री "दुनादि०" [६. १. ११८.] इति "गान्धारिसाल्वेयाभ्याम्" [६. १. ११५.] इति च विहितस्य ञ्यस्याम्श्च "कुन्त्यवन्तेः०" [६. १. १२१.] इति "द्रेरञणः०" [६. १. १२३.] इति लुपि प्रत्ययार्थं प्रति प्रकृत्यर्थस्य च गौणत्वात् "जातेः०" [२. ४. ५४.] इति ङीप्रत्ययाभावात् कुन्ती गान्धारीति प्रयोगाभाव इति, यतः प्रत्यये लुप्ते प्रकृतिरेवापत्यजातिमाह, सा च मुख्यैवेति ङीः सिद्धः, एतदर्थमप्यत्र मुख्यग्रहणम्, न विधेयम्, यतस्तत्र स्त्रियामिति वर्त्तते, तेनाणादि विशेषयिष्यामः, स्त्रियां योऽणादिरिति, आपिशलिशब्दात् तु यः प्रोक्तार्थेऽञ् प्रत्ययः स स्त्रियां विहित इति। एवमपि काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी, तामधीते काशकृत्स्ना स्त्रीत्यत्र प्राप्नोति, नैष दोषः- अध्येत्र्यामुपपन्नस्याणो लुप्तत्वादन्यस्य[स्य च] श्रूयमाणादुत्पन्नस्य ङीप्रत्ययस्य "ङ्यादेर्गौणस्य०" [२. ४. ९५.] इति निवृत्तत्वात् सकृत्प्रवृत्तौ च शास्त्रस्य चरितार्थत्वात् पुनः प्रवृत्त्यभावः, अध्येत्र्यां स्त्रियां वृत्त्याकारान्तत्वादाबेव भवति। एवं तर्हि प्रधानेन तदन्तविधिर्भवतीति ज्ञापनार्थं मुख्यग्रहणम्। न च "अजादेः" [२. ४. १६.] इत्यत्र ज्ञापित इति वाच्यम्, यतस्तत्र ज्ञापकेन प्रधानेन यथा भवति तथाऽप्रधानेनापि स्यादित्यवश्यमिदं कर्त्तव्यमित्याह- **मुख्यादि**त्यादि- बहवो नदा यस्यामिति बहुव्रीहौ नदशब्दस्यामुख्यत्वात् तदन्तविधेरभावाद् गौरादित्वेऽपि ङीर्न भवति। प्रधानेन तु तदन्तविधिर्भवतीति- कुम्भकारी, नगरकारीति, अन्यथा हि "प्रत्ययः प्रकृत्यादेः" [७. ४. ११५.] इत्यवयवादुत्पत्तिः प्राप्नोति; न च "कृत् सगतिकारकस्यापि" [७. ४. ११७.] इति संघाताद् भविष्यतीति वाच्यम्, कृदकृद्रूपत्वादणस्तद्धितोऽप्यस्ति कृदपीति कृत्वा परिभाषानुपस्थानात्। न च कुम्भशब्दस्य कारीशब्देन ङ्यन्तेन "ङस्युक्तं०" [३. १. ४९.] इति समासे तन्नाम्नः प्रत्ययो भविष्यतीति वाच्यम्, * गतिकारकोपपदानां कृद्भिः० * इति पूर्वं समास इति कारशब्दादवयवाद् ङीप्रत्यये तत एव एयणि तस्यैव वृद्धिर्न कुम्भशब्दस्येति कौम्भकारेयो न सिद्ध्यतीति प्रधानतदन्तविध्यर्थं मुख्यादिति स्थितम्। न चायं कारी प्रजापत्य[न]न्वयत्वात्, लोके च प्रजापतिशब्देन व्यवह्रियमाणत्वात्। ननु कारशब्दादपि ङीप्रत्यये विहिते कुम्भकारीशब्दादेयण् भविष्यति "गौणो ङ्यादिः" [७. ४. ११६.] इति नियमात् प्रधाने तदादिनियमाभावात्, तथा च परमकारीषगन्धीपुत्र इत्यत्र इञ् भवति; एवं तर्हि तदादिनियमाभावादनियमः प्रसज्यते, तथा च कदाचित् कारीशब्दात् प्रत्ययः कदाचित् कुम्भकारीशब्दात्, यदा च कुम्भकारीशब्दात् प्रत्ययस्तदा सिध्यति- कौम्भकारेयः, कारीशब्दात् तु प्रत्ययविधाने न सिध्यतीति पाक्षिको दोषः। न च नियमनिषेधेनाधिकस्य तदन्तस्य कार्यं विधीयते न न्यूनस्येति वाच्यम्, न्यूनत्वाभावादिति। न च शोभनानि पर्णान्यस्या इति बहुव्रीहौ पर्णशब्दस्योपसर्जनत्वात् "पाककर्णपर्ण०" [२. ४. ५५.] इति ङीप्रत्ययाभावः यतः कृतसमासः सुपर्णशब्दो जातिवाचि नाम, तच्च मुख्यमेवेति। बहुकुक्कुटा नगरीत्यत्र जातिवाचिनः कुक्कुटशब्दस्य गौणत्वात् समासस्य चाजातिवाचित्वाद् ङीप्रत्ययाभाव इति ॥ छ. ॥ २. ४. १९. ॥

---

**न्या० स०—गौरादिभ्यो०।** **गौरे**ति- गूयते उपादेयता "खुर-क्षुर०" [उणा० ३९६.] इति निपातः, यद्वा 'गुरैव्' गुरति मनोऽस्मिन् घञि गोर एव **गौर** इति क्षीरस्वामी। शाम्यति एकत्वमिति "शमेर्वं च वा" [उणा० ४७०.] इत्यनेनाऽलप्रत्ययः, मकारस्य वः। कलयति "कुलेश्च माषक्" [उणा० ५६३. **कल्माष**] सरति वर्णभावम् "स-वृ-नृभ्यो णित्" [उणा० ९९.] अङ्गः [**सारङ्ग**]। "पिशत् अवयवे" पिशतीति "विडि-विलि-कुरि-मृडि-पिशिभ्यः कित्" [उणा० १०१.] अङ्गे **पिशङ्ग**। हरतीति- "हृ-सृहि-दक्षिभ्य इणः" [उणा० १९४.] [**हरिण**] पण्डते मनोऽत्रेति "जठर०" [उणा० ४०३.] इति साधुः [**पाण्डुर**]। सुष्ठु नन्दयत्यच् "पृषोदर०" [३. २. १५५.] इति **सुन्दर**, अथवा सुन्दिः सौत्रः सौन्दर्ये वर्तते। विपूर्वात् कलेः "अः" [उणा० २.] इत्यप्रत्यये, यत्र विकला सामग्री तत्र विगता कला लेशो यस्याः, अन्यत्र विकले च। **विष्कल** इति-गणपाठसामर्थ्यात् षकारः, यद्वा "वर्चस्कादि०" [३. २. ४८.] इति षकारः। [**पुष्कल**] पुष्कलार्थे पुषेः कलक्। **निष्कले**त्यत्र निस्पूर्वात् कलेरप्रत्यये "निर्दुर्०" [२. ३. ५६.] इति षत्वम्। चेटतीति लिहाद्यचि- **चेटः**। "विट शब्दे" इत्यतो "नाम्युपान्त्यः" [५. १. ५४.] इति के- **विटः**। टेकते "अः" [उणा० २.] इत्यकारे बाहुलकत्वात् कस्य टत्वे **टेटः**। अट पट इट एटतीति "नाम्युपान्त्य०" [५. १. ५४.] इति के इटः, कटशब्देन षष्ठीसमासः। "नट नृत्तौ" नटतीत्यच्, एते त्रयोऽपि नर्तकाः। कवेः शिवेरपत्यं "कुर्वादि०" [६. १. १००.] "दुनादि०" [६. १. ११८.] इति ञ्ये- **काव्य शैव्य,** ततो ङ्यां "व्यञ्जनात्तद्धितस्य" [२. ४. ८८.] इति यलोपे- कावी शैवी। **मुकय** इति- वेसरः। **कुणे**ति- कच्छपी। **ओकणे**ति- "उचच् समवाये" चिक्कणादिनिपातनादणे

कत्वे च– **ओकण**, श्यामोकणी, श्रीकरणादिव्यापारानन्तरं गुप्त्यादौ पर्यन्तबन्धनस्य किलाख्या । **भौरिकीत्यत्र**– भवतेः "भू-सू-कुशि०" [उणा० ६९३.] इति किति रिप्रत्यये स्वार्थिके के च– भूरिक, ऋफिडादित्वाल्लत्वे– भूलिक, तयोरपत्यम् "अत इञ्" [६. १. ३१.] । **भौलिङ्गीति**– "भलि परिभाषणादौ" "भलेरिदुतौ चातः" [उणा० १०३.] इङ्गकि अकारस्योकारे– भुलिङ्ग, अथवा भुवि लिङ्गं कीर्तिरस्येति वा पृषोदरादित्वात् भुवो ह्रस्वत्वे– भुलिङ्ग, तस्यापत्यं **भौलिङ्गि** "सात्वांश०" [६. १. ११७.] इति इञ् । **आलञ्चीत्यत्र** "अली भूषण०" शतृ, अलन्तं कलन्तं चिनोति "क्वचित्" [६. २. १४५.] अलञ्चस्यापत्यं कलञ्चस्यापत्यम् "अत इञ्" [६. १. ३१.] । **सौधर्मेति**– सुधर्मस्यापत्यम् ऋष्यण् तदा ङीः सिद्ध एव, अथवा शोभनो धर्मो यस्याः "द्विपदाद्धर्मादन्" [७. ३. १४१.] इत्यन्, "ताभ्यां वाप् डित्" [२. ४. १५.] डापि– सुधर्मा, सुधर्माया अपत्यं "ङ्याप्त्यूङः" [६. १. ७०.] इति एयण्-बाधकः "अदोर्नदी०" [६. १. ६७.] इत्यण्, यद्वा सुधर्मणोऽपत्यं "ङसोऽपत्ये" [६. १. २८.] अण् । **आयस्थूणेति**- अयस्थूणस्यापत्यं शिवादेरण्, यद्वा "ऋषि-वृष्ण्यन्धक०" [६. १. ६१.] कुरुद्वारोऽण्, आयस्थूण ऋषिः । अरदस्यापत्यम् "ऋषि-वृष्ण्यन्धक०" [६. १. ६१.] इति कुरुद्वारोऽण् । **आपच्चिकीति**– आपदं चिन्वन्ति परेषां "क्वचिड्डः" [उणा० १६८.] आपच्चाः पुरुषास्ते अस्य सन्ति "अतोऽनेक०" [७. २. ६.] इति इकः । आ समन्तात् पिच्चयति शत्रून् "कुशिक०" [उणा० ४५.] इति वा साधुः । अपच्चिकस्यापत्यं "दुनादि०" [६. १. ११८.] इति ञ्यः, शकादित्वाल्लुप् । **दोटीति**– दोटस्यापत्यं "पुरमगध०" [६. १. ११६.] इत्यण् "द्रेरञणोऽप्राच्य०" [६. १. १२३.] इति लुप् । **नाटी** ओषधिः । **मूलाटी** ओषधिः । **पाटेति**– गणितम् । **सूपाटेति**– छेदपाटी । **पेटी** समूहः । **फाण्टशी** ओषधिः । **धातकी** वृक्षविशेषः । **तर्करी** ओषधिः । **शर्कारी** वृ० वि० । **लवणी** ओ० । **कदरी-कदल्यौ**– वृक्षौ । **गुडूची** ओ० । **बाकुची** "कूर्च०" [उणा० ११३.] इति साधुः । बावची । **नाची-माच्यौ** ओषध्यौ । **कुम्भी** आधारः शाकविशेषश्च । **कुसुम्भी** ओ० । **पूषी** ओ० यवागू-विशेषो वा । **मेषी** ओ० । **सूषी** शाकवि० । **मूषी करीरी** दन्तमूलम् । **वल्लकी** वीणा । **मल्लकी** विचिकिलः । **मालकी** ओषधिः, ग्रामान्तराटवी च । **मेथी** वाली शकटन्यासे । "मुरलोरल०" [उणा० ४७४.] इति **पिप्पलः** । **कोषातक** इति केचित् । कोषं कोशं घातति णके । **शमी** शिवा वृक्षश्च । **सुषवी** शाकभेदः कृष्णजीरकं कारवेल्लः कपिकच्छूश्च । सुसवीति पाठ इति केचित् । शोभनः सवोऽस्याः । **शृङ्गी** विषं कारवेल्लश्च । **भृङ्गी** ओ० । **बर्बरी** ओ०, कुञ्चितकेशा च । **पाण्डी** ओ० । **लोहाण्डेति**– लोहमिवाण्डं यस्या लोहाण्डी नाम शकुनिः, ओषधिश्च । **शष्कण्डी** ओ० । **मण्डरी** ओ० । **मण्डली** ओ० समुदायश्च । **पूपी सूपी सूर्पी** ओषध्यः । **सूर्मी** लोहमयी प्रतिमा । **पिठरी** स्थाली । **वुर्दी** विमानविशेषः । **गूर्दी** क्रीडा । **सूर्दी** ओ० । **काकणेति**– काकान् नयतीति "क्वचिड्डः" [उणा० १६८.] "पृषोदर०" [३. २. १५५.] इति णत्वम् । **द्रोणी** जलक्षेपणी कुण्डिका । **अरोहणी** ओ० । **ओकणी** ओ० क्षुद्रजन्तुश्च । **वृसी** तालव्योपान्त्योऽपि । आङ्-सम्-ददातेः "उपसर्गा०" [५. ३. ११०.] इति डे– **आसन्दः** । **अलन्दी** संनिपातहन्त्री ओषधिः । **कन्दली** प्ररोहः । **सलन्दी देही** ओषध्यौ । मञ्जेः सौत्रात् **मञ्जरी** । **अलजी** ओ० । गण्डाज्जायते इति "पृषोदर०" [३. २. १५५.] इति **गण्डजी** ओ० । विजयन्तस्येयं **वैजयन्ती** । **शाल्मकी** ओ० । उपरि तस्यतीति गणपाठादेरत्वम्– **उपरतसी** ओ० । **सच्छेदी** ओ० । प्रत्यवरोहतीत्येवंशीला क्रियाशब्दः **प्रत्यवरोहिणी** । ननु तथापि पृथिवीशब्दस्याग्रहायणीशब्दस्य च स्वतः स्त्रीत्वात् "परतः स्त्री०" [३. २. ४९.] इति पुंवद्भावो न भविष्यति किमर्थमनयोस्तथा-पाठः, उच्यते– नहि सप्रत्ययपाठस्य पुंवद्भाव एव प्रयोजनं किन्तु तद्धितलोपे लुगभावोऽपि, तत्र क्वचिदेकं यथासंभवमूहनीयम् । **अनड्वाहीभार्य** इति– अनड्वाहीशब्दो व्यक्तौ प्रवर्त्तितः, जातिवाचित्वे तु "स्वाङ्गान्ङी०" [३. २. ५६.] इत्यनेन पुंवन्निषेधः सिद्धः । आङ्पूर्वस्य "ईहि चेष्टायाम्" इत्यस्य एहते इति वाक्ये "मन्यादिभ्यः किः" [ ] इति कौ– **एहिः**, एवं पर्येहते **पर्येहिः** । **चरी** गूढपुरुषी । **गरी** भक्षिका । **तरी** तरित्री स्त्री । **गाही** अवगाहिका । **सूदी** सूपकारिणी । **अराल** इति पक्षिविशेषार्थोऽत्र द्रष्टव्यः, वक्रार्थस्तु शोणादौ द्रष्टव्यः । **उदवढ** इति– "वढ आग्रहणे" सौत्रो धातुः, उदकं वढति इति **उदवढः** पानीयहारिणीवाचकः कृमिजातिविशेषो वा । **चण्ड** इति– गौरीवाचकश्चण्डशब्दोऽत्र द्रष्टव्यः, कोपनावाचकस्तु शोणादौ द्रष्टव्यः । उमाया भङ्ग इव भङ्गो यस्याः । हरी ओषधिस्तस्या इव कणा यस्याः, हरयः सुवर्णवर्णाः कणा यस्या वा । **वटरः** क्षुद्रजन्तुः, अधिकारं कारयति या स्त्री । **करणे** इति– करणकारके इत्यर्थः । "ईषच् गतौ" ॥ २. ४. १९. ॥

## अणञेयेकण्-नञ्-स्नञ्-टिताम्

## । २ । ४ । २० ॥

**त० प्र०**—अणादिप्रत्ययानां योऽकारस्तदन्तान्नाम्नः प्रत्यासत्तेस्तेषामेवाणादीनां वाच्यायां स्त्रियां वर्तमानाद् ङीर्भवति । **अण्**– उपगोरपत्यमौपगवी, तपोऽस्या अस्तीति तापसी,

कुम्भकारी, काण्डलावी याति; अञ्– उत्सस्यापत्यमौत्सी, विदस्यापत्यं पौत्री– वैदी, छत्र-चुरा-तपःशीलेति छत्रादित्वादञि– छात्री, चौरी, तापसी; एयण्– सुपर्ण्या अपत्यं सौपर्णेयी, वैनतेयी; एयच्– शिलायास्तुल्या शिलेयी, एयञ्– शैलेयी, “ शिलाया एयच्च ” [ ७. १. ११३. ], निरनुबन्धनिर्देशः सामान्यग्रहणार्थः । इकण्– अक्षैर्दीव्यति आक्षिकी, प्रस्थेन क्रीता प्रास्थिकी; नञ्– स्त्रिया अपत्यमियं वा स्त्रैणी; स्नञ्– पुंसोऽपत्यमियं वा पौंस्नी; टित्– जानु ऊर्ध्वं प्रमाणमस्या जानुदघ्नी, जानुद्वयसी, जानुमात्री, पञ्च अवयवा यस्याः पञ्चतयी, एवं द्वयी, त्रयी; शक्तिरायुधमस्याः शाक्तीकी, एवं याष्टीकी; ह्यो भवा ह्यस्तनी, एवमद्यतनी, श्वस्तनी, चिरन्तनी, परुत्तनी; भूतपूर्वा भिक्षुः– भिक्षुचरी, सक्तुधानी, गायनी, कुरुचरी; प्रत्ययसाहचर्यादागमटितो न भवति– पठिता विद्या । शुनिन्धयी, स्तनन्धयीत्यादौ तु धातोष्टित्करणस्यानन्यार्थत्वादटितोऽपि भवति । अणादीनां षष्ठीनिर्देशेनाकारस्य विशेषणं किम् ? पाणिनिना प्रोक्तं पाणिनीयम्, “ तदधीते० ” [ ६. २. ११७. ] इत्यण्, तस्य “प्रोक्तात्” [ ६. २. १२९. ] इति लोपे– पाणिनीया कन्येति ङीर्यथा मा भूत् । प्रत्यासत्त्या तैरेवाणादिभिः स्त्रिया विशेषणं किम् ? गौतमेन प्रोक्ता नीतिगौतमीति, ताम् “ अधीते ” [ ६. २. ११७. ] इत्यण्, तस्य “ प्रोक्तात् ” [ ६. २. १२९. ] इति लोपे “ङ्यादे०” [ २. ४. ९५. ] इत्यादिना ङीलोपे च ङीर्यथा न स्यात्– गौतमा कन्या, अस्त्यत्राणोऽकारो न तु तदभिधेया नीतिलक्षणा स्त्रीप्रत्ययार्हा, यदभिधेया तु कन्यालक्षणा स्त्रीप्रत्ययार्हा न तस्याकारोऽस्ति इति । तथा बहुकुम्भकारा नगरी, बहुकुरुचरेत्यादि ॥ २० ॥

**श० न्या०—अण०** । आदिति वर्त्तते, तस्याणादयो विशेषणमित्याह– **अणादिप्रत्ययानां योऽकार** इति । **औपगवी**ति– “ङसोऽपत्ये” [ ६. १. २८. ] इत्यण् । **तापसी**ति– ज्योत्स्नादित्वादण् । **कुम्भकारी**त्यादि– “ कर्मणोऽण् ” [ ५. ३. १४. ] इत्यण् “ ङस्युक्तं कृता ” [ ३. १. ४९. ] इति समासः । **औत्सी**ति– “ उत्सादेरञ् ” [ ६. १. १९. ] इत्यञ् । **वैदी**ति– “ विदादेर्वृद्धे ” [ ६. १. ४१. ] इत्यञ् । **छात्री**त्यादि– शीलमित्यधिकृत्य “ अङ्स्थाच्छत्रादेरञ्० ” [ ६. ४. ६०. ] इत्यञ् । **सौपर्णेयी वैनतेयी** “ ङ्याप्त्यूङः ” [ ६. १. ७०. ] इत्येयण् । “ शिलाया एयच्च ” [ ७. १. ११३. ] इति तस्य तुल्य इत्यधिकृत्य शिलाया एयचि एयञि च– **शिलेयी, शैलेयी** । शकटादन्य– ( शकटादयः ) अत्रैयचः स्त्रियां वृत्तिं नोपयन्ति । **निरनुबन्धनिर्देश** इति– सानुबन्धनिर्देशे हि यस्यैव सूत्रे निर्देशस्तस्यैव प्रयोगे कार्यं स्यात्, निरनुबन्धनिर्देशस्तु सामान्येन एयण्-एयच्-एयञां परिग्रहार्थो भवतीति । **आक्षिकी**ति– इकणित्यधिकृत्य “ तेन जित० ” [ ६. ४. २. ] इतीकण् । **स्त्रैणी**ति– “ प्राग्वतः स्त्रीपुंसात्० ” [ ६. १. २५. ] इति नञ्, “ रषृवर्णात्० ” [ २. ३. ६३. ] इति णत्वम् । **पौंस्नी** पूर्वेणैव स्नञ्, “ पदस्य ” [ २. १. ८९. ] इति सलोपः, “ तौ मुमोऽव्यञ्जने० ” [ १. ३. १४. ] इत्यनुस्वारः । **जानुदघ्नी, जानुद्वयसी**ति– “ वोर्ध्वे दघ्नट् द्वयसट् ” [ ७. १. १४२. ] । **जानुमात्री**ति– “ प्रमाणान्मात्रट् ” [ ७. १. १४०. ] । **पञ्चतयी**ति– “ अवयवात् तयट् ” [ ७. १. १५१. ] इति तयट् । **द्वयी, त्रयी**ति– “ द्वित्रिभ्याम्० ” [ ७. १. १५२. ] इत्ययट् । **शाक्तीकी, याष्टीकी**ति– “ शक्ति-यष्टेष्टीकण् ” [ ६. ४. ६४. ] इति टीकण् । “ सायं-चिरं-प्राह्णे-प्रगेऽव्ययात् ” [ ६. ३. ८८. ] इति तनटि– **ह्यस्तनी**त्यादि । **भिक्षुचरी**ति– “ भूतपूर्वे० ” [ ७. २. ७८. ] इति चरट् । **सक्तुधानी**ति– सक्तवो धीयन्तेऽस्यामिति “ करणाधारे ” [ ५. ३. १२९. ] इत्यनट् । गायतीति “ टनण् ” [ ५. १. ६७. ] इति टनणि– **गायनी** । कुरुषु चरतीति “ चरेष्टः ” [ ५. १. ३८. ] इति टे– **कुरुचरी** । अथ पठितेत्यत्र प्रत्ययभक्तत्वादिटः क्तस्य टित्वमस्तीति टिदन्तत्वाद् ङीः कुतो नेत्याह– **प्रत्ययसाहचर्यादि**त्यादि । यद्येवं कथं शुनीं धयतीति शुनीपूर्वात् “ ट्धें पाने ” इत्यतः “ शुनी-स्तन-मुञ्ज–कूल० ” [ ५. १. ११९. ] इति खश्, “ खित्यनव्यया० ” [ ३. २. १११. ] इति मान्तो ह्रस्वश्च, नह्यत्र प्रत्ययष्टिदस्तीत्याह– **शुनिंधयी**त्यादि– धातोष्टित्करणस्य स्त्रीप्रत्ययं मुक्त्वाऽन्यत् प्रयोजनं नास्तीत्यनन्यार्थत्वात् सामर्थ्यादटितोऽपि प्रत्ययाद् ङीप्रत्ययो भवति, इटस्तु “ णेरनिटि० ” [ ४. ३. ८३. ] इत्यादौ टित्करणस्य चरितार्थत्वान्न स्त्रीप्रत्ययोत्पत्तिनिमित्तत्वमिति । **पाणिनीयमि**ति– “ दोरीयः ” [ ६. ३. ३२. ] इतीयः, **पाणिनीया कन्ये**ति– अणादिभिः षष्ठीनिर्देशेनाकारस्य विशेषणादणादीनां योऽकारस्ततो ङीः प्रत्यय इति विज्ञानादत्राणो लुप्तत्वादीयप्रत्ययाकाराद्ङीर्न भवतीति । **प्रत्यासत्त्ये**ति– पूर्वसूत्रे व्याख्यातप्रायम् ॥ छ. ॥ २. ४. २०. ॥

**न्या० स०—अणञेयेकण्०** । काण्डान् लविष्यामीति **काण्डलावी** “ कर्मणोऽण् ” [ ५. ३. १४. ] । **पाणिनीयमि**ति– पणनं पणः “ पणेर्माने ” [ ५. ३. ३२. ] अल्, सोऽस्यास्तीति पणी, तस्यापत्यं वृद्धं “ ङसोऽपत्ये ” [ ६. १. २८. ] अण्, पाणिनस्यापत्यं युवा “ अत इञ् ” [ ६. १.

२१.], पाणिनिना प्रोक्तं "तेन प्रोक्ते" [६. ३. १८१.] इति विषये "यूनि लुप्" [६. १. १३७.] इति इञो लुप्, अन्यथा "वृद्धेञः" [६. ३. २८.] इति स्यात्, यतो "वृद्धाद्यूनि" [६. १. ३०.] इत्यत्र यूनोऽपि वृद्धसंज्ञाकार्यदर्शनादित्युक्तम्, ततोऽत्रापि इञन्तस्यावृद्धेऽपि वर्तनं ज्ञेयं, ततो "दोरीयः" [६. ३. ३२.]। **बहुकुम्भकारा नगरी**ति- अत्र बहवः कुम्भकारा यस्यामिति कार्यम्, यदा तु बह्व्यः कुम्भकार्यो यस्यामिति क्रियते तदा "ऋन्नित्यदितः" [७. ३. १७१.] इति कचि बहुकुम्भकारीकेति भवति ॥ २. ४. २०.॥

## वयस्यनन्त्ये । २ । ४ । २१ ॥

**त० प्र०**—प्राणिनां कालकृता शरीरावस्था बाल्ययौवनादि वयः, तस्मिन्ननन्त्येऽचरमे वर्तमानादकारान्तान्नाम्नः स्त्रियां ङीर्भवति । कुमारी, किशोरी, वर्करी, कलभी, तरुणी, तलुनी, वधूटी, चिरिण्टी । धवयोगाभावविशिष्टं वयः कुमारीशब्दस्य प्रवृत्तिनिमित्तम्, न तु धवयोगाभावमात्रम्; वृद्धकुमारी तु उपमानात् । अनन्त्य इति किम्? वृद्धा, स्थविरा । आदित्येव- शिशुः । कथं द्विवर्षा?, त्रिवर्षा?, उत्तानशय्या?, लोहितपादिकेति? नैता वयःश्रुतयोऽर्थात् तु वयो गम्यते । बाला वत्सेत्यादयस्त्वजादौ ॥ २१ ॥

**श० न्या०**—वय०। **वयो बाल्ययौवनादि**ति- आदिशब्दो वृद्धत्वोपसंग्रहार्थः । **अनन्त्ये** इत्यस्य पर्यायः- **अचरम** इति- अस्थाविर इत्यर्थः । "कमेरत उच्च" [उणा० ४०९.] इत्यारे- **कुमार** । कृशेः "कोर-चोर-मोर-किशोर०" [उणा० ४३४.] इति उरे निपातनात् **किशोर** । "वृगृट् वरणे" "कि-शॄ-वृभ्यः०" [उणा० ४३५.] इति करे- **वर्कर** । "कलि शब्द-संख्यानयोः" "कृ-शॄ-गॄ-शलि-कलि०" [उणा० ३२९.] इत्यभे- **कलभ** । तरतेः "यम्यजिशकि०" [उणा० २८८.] इत्युने- **तरुण**, "ऋफिडादीनां०" [२. ३. १०४.] इति लत्वे- **तलुन** । "बन्धंश् बन्धने" "बन्धेः" [उणा० १५७.] इति कूटे- **वधूट** । चिरिणोतेः "टिण्टश्चर् च वा" [उणा० १५०.] इति टिण्टे- **चिरिण्ट** । एतेषां कुमारादयश्चत्वारः प्रथमवयोवचनाः, तरुणादयस्तु तावन्त एव कौमारादुत्क्रम्य नवयौवनवचना इति सर्वत्र ङीः । ननु च नायं कुमारीशब्दः प्रथमे वयसि वर्तते, धवयोगाभावेऽस्य दर्शनात्, तथा च वृद्धायामपि प्रयुज्यते- वृद्धा कुमारीति; नैतदस्ति- कुमारीशब्दस्य प्रथम एव वयसि रूढत्वात्, यस्तु तस्य वृद्धायामपि प्रयोगः स कुमारीसाधर्म्याद् धवयोगाभावात्, भवति ताद्धर्म्यात्ताच्छब्द्यम्, यथा- गौर्वाहीक इति सम्प्रधार्याह- **धवयोगाभावविशिष्टमि**त्यादि- न धवयोगाभावमात्रं प्रवृत्तिनिमित्तं व्यभिचारादित्यर्थः । ननु प्रथमद्वितीयभेदेन वयसोर्द्वैविध्यात् प्रथमग्रहणमेव स्पष्टार्थं क्रियतां, किमनन्त्यग्रहणेन? उच्यते- इह हि केचिच्चत्वारि वयांसीच्छन्ति- कौमार-यौवन-मध्यम-वृद्धत्वानि, तथा चाहुः—

"प्रथमे वयसि नाधीतं, द्वितीये नार्जितं धनम् ।
तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति ? ॥"

अन्ये तु त्रीणीच्छन्ति- कौमार-यौवन-स्थविरत्वानि, तथा चाहुः—

"पिता रक्षति कौमारे, भर्ता रक्षति यौवने ।
पुत्रास्तु स्थाविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥"

केचित् तु बाल-मध्य-वृद्धत्वानि त्रीणीच्छन्ति—

"आषोडशो भवेद् बालो, यावत् क्षीरान्निवर्तकः ।
मध्यमः सप्ततिं यावत्, तत्परो वृद्ध उच्यते ॥"

अपरे तु द्वे वयसी इच्छन्ति- यावन्त्यो वृद्धिमत्योऽवस्थास्ताः सर्वा राशीकृत्य प्रथमं वयो व्यवस्थाप्यते, यास्तु हानिमत्यस्ता द्वितीयमिति, इतीदमेव दर्शनमाश्रित्य कैश्चित् प्रथमग्रहणं कृतं "वयसि प्रथमे" [पा० ४. १. २०.] इति, सर्वदर्शनसंग्रहार्थं त्वत्रानन्त्यग्रहणमिति न विरोधः । वर्धतेः क्ते- **वृद्धा** । तिष्ठतेः "स्थविर-पिठर०" [उणा० ४१७.] इति निपातनात्- **स्थविरा** । **कथमि**ति- बालैव हि **द्विवर्षे**त्यादि भवति, तथाहि- द्वे वर्षे भूते इति "प्राणिनि भूते" [६. ४. ११२.] इत्यकारप्रत्ययेन बालैव प्रतीयते, एवं- **त्रिवर्षे**त्यादि, एवम्- **उत्तानशय्ये**ति- अन्यथा स्वप्तुमजानती बालाभिधीयते, **लोहितपादिके**त्यप्यनुपजातद्रव्यान्तरसम्बन्धत्वात् द्रव्यान्तरसम्बन्धजन्मना वैवर्ण्येन निर्वर्तितलौहित्यपादा बालैव प्रतीयते, इति प्रथमे वयसि वर्तमानत्वादेभ्यो भवितव्यमेव ङीप्रत्ययेनेत्याशङ्कार्थः । परिहरति- **नैता वयःश्रुतय** इति- नैते वयोवचनाः शब्दा इत्यर्थः, ये हि नामश्रवणमात्रेणैव प्रकरणाद्यनपेक्षबाल्यादिभेदभिन्नं वयः प्रत्याययन्ति त एव वयःश्रुतयो यथा कुमारीत्यादयः, **द्विवर्षा त्रिवर्षे**ति तु "वर्षादयश्च वा" [६. ४. १११.] इत्यकारे शालाऽपि गम्यते, वृद्धाऽपि ह्यन्यथा स्वप्तुमशक्नुवती- उत्तानशय्या भवति, लोहितपादिकेत्यपि लोहितौ पादावस्या इति अलक्तकरसादिरञ्जनोपजनितलौहित्यसम्बन्धपादसम्बन्धमात्रादन्याऽप्यभिधीयत इति । नैतेऽर्थादिनिरपेक्षाः प्रथमं वयो गमयन्तीत्याह- **अर्थात् त्वि**त्यादि । अथ बाला वत्सेत्यादौ कस्मान्न भवतीत्याह- **बाले**त्यादि- अजादित्वादावेव

बाधक इत्यर्थः । द्विवर्षेत्यादावप्येतत् परिहारान्तरं द्रष्टव्यम् । अथ कुमारीशब्दस्य जातित्वाज्जातिलक्षणेनैव स्त्रीप्रत्ययेन भवितव्यम्, तथा च कुमारीभार्य इत्यत्र " स्वाङ्गान्ङीर्जातिश्च० " [ ३. २. ५६. ] इति पुंवद्भावप्रतिषेधोऽपि दृश्यते, जातित्वं तु कुमारीत्वस्यायावद्द्रव्यभाविनोऽपि आकृतिग्रहणत्वात्, अनेनैव न्यायेन किशोर्यादेरपि जातित्वमविवादसिद्धमेवेति किमर्थमेतदुच्यत इति; सत्यम्– प्रपञ्चार्थत्वादस्येत्यदोषः । यावद्द्रव्यभाविनीं तु लोकप्रसिद्धां जातिमभिप्रेत्य कुमार्यादीनामजातित्वात् पुनर्वचनमर्थवदित्यलम् ॥ छ ॥ २. ४. २१. ॥

**न्या० स०—वयस्य०** । **कुमारी**ति– एतेषां कुमारादयश्चत्वारः प्रथमवयोवचनाः, किञ्च तदन्तादपि विधिरिष्टः, परमश्चासौ कुमारश्च, स्त्री चेत् परमकुमारी । **तरुणी**ति– तरुणादयस्तु तावन्त एव कौमारादुत्क्रम्य नवयौवनवचना इति । **द्विवर्षा** इति– द्वे वर्षे भूता " प्राणिनि भूते " [ ६. ४. ११२. ] इत्यः । **उत्तानशय्ये**ति– उत्ताना शेते " ऊर्ध्वादिभ्यः० " [ ५. १. १३६. ] अः ॥ २. ४. २१. ॥

## द्विगोः समाहारात् । २ । ४ । २२ ॥

**त० प्र०—**समाहारद्विगुसंज्ञकान्नाम्नोऽकारान्तात् स्त्रियां ङीर्भवति । पञ्चपूली, पञ्चाजी, दशराजी, द्विकुडवी, पञ्चकुमारी । कथं त्रिफला ? अजादिपाठात् ॥ २२ ॥

**श० न्या०—द्विगोः०** । समाहारविशेषितेन द्विगुना नाम विशिष्यत इत्याह– **समाहारे**त्यादि– द्वे गावौ पूर्वोत्तरपदलक्षणे यस्य " गोश्चान्ते० " [ २. ४. ९६. ] इति ह्रस्वे द्विगुरिति संज्ञा, सम्यगाहरणमेकीकरणं– समाहारः । " पूल संघाते " " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– पूलः, पञ्चानां पूलानां समाहारः– **पञ्चपूली**त्यादि– "पात्रादिवर्जित० " इत्यादिलिङ्गानुशासनेन स्त्रीत्वम् । दशानां राज्ञां समाहारः " राजन्-सखेः० " [ ७. ३. १०६. ] इत्यटि– **दशराजी** । " अन्नाबन्त० " [ लिङ्गानु० ] इति स्त्रीत्वम्, एवं– पञ्चखट्वीत्यपि दृष्टव्यम् । " कुडत् बाल्ये च " "कितिकुडि० " [ उणा० ५१८. ] इति कित्यवे– कुडवः, द्वयोः कुडवयोः समाहार इति पूर्ववत् स्त्रीत्वम् । **कथमि**त्यादि– सुन ( ? सुगमम् ) । अथात्र समाहारग्रहणमतिरिच्यते, न च पञ्चाश्वेति क्रीतेकणो लुपि असमाहारेऽपि प्रसङ्ग इति वाच्यम्, अनेन सामान्यतः सिद्धे उत्तरसूत्रस्य परिमाणान्तादेव तद्धितलुकीति नियमार्थतया पर्यवसायात्, नातिरिच्यते, तद्धितलुक्येव परिमाणादिति विपरीतनियमप्रसङ्गे द्विकुडवीत्यादौ समाहारद्विगोः परिमाणान्ताद् ङीप्रत्ययस्याप्राप्तेः । न च 'परिमाणादेव तद्धितलुकि' इत्युत्तरसूत्रं विवक्षितनियमसाधकं करिष्याम इति वाच्यम्, विधि-नियमसम्भवे विधेरेव ज्यायस्त्वान्नियमेऽनुवाददोषादिति ॥ छ. ॥ २. ४. २२. ॥

**न्या० स०—द्विगोः समा०** । सम्यगाहरणमेकीकरणं समाहारः । **समाहारद्विगुसंज्ञे**ति– समाहारविशेषितेन द्विगुना नाम विशिष्यते, अयमर्थः– समाहृतिं विना पञ्च रात्रयः प्रिया अस्य पञ्चरात्रप्रिय इत्यादावपि ङीः स्यात् । ननु द्वन्द्वसमाहारस्य " द्वन्द्वैकत्व० " [ लिङ्गानुशासने ] इति नपुंसकत्वविधानेन स्त्रीत्वाभावात् समाहारादित्युक्तेऽपि द्विगोः समाहारादिति लप्स्यते, किं द्विगुग्रहणेन ?, अथोत्तरार्थमित्यपि न वाच्यम्, तद्धितलुकीति करणात्, नैवम्– समाहारादित्युक्तौ समाहारान्तान्नाम्न इत्याशङ्क्येत, ततश्च वाक्त्वचमतिक्रान्ता अतिवाक्त्वचीति स्यात्, इष्टं च अतिवाक्त्वचेति ॥ २. ४. २२. ॥

## परिमाणात् तद्धितलुक्यबिस्ताऽऽचित-कम्बल्यात् । २ । ४ । २३ ॥

**त० प्र०—**परितः– सर्वतो मानं परिमाणम्, तच्च रूढिवशात् प्रस्थादि, यदाहुः—" ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः " ॥ १ ॥, बिस्तादिभ्यो यदन्यत् परिमाणं तदन्ताद् द्विगोरकारान्तात् तद्धितलुकि स्त्रियां ङीर्भवति । द्वाभ्यां कुडवाभ्यां क्रीता– द्विकुडवी, त्रिकुडवी; द्व्याढकी, त्र्याढकी । परिमाणादिति किम् ? पञ्चभिरश्वैः क्रीता– पञ्चाश्वा, दशाश्वा; द्विशता, त्रिशता । तद्धितलुकीति किम् ? द्विपण्या । अबिस्ता-ऽऽचित-कम्बल्यादिति किम् ? द्वाभ्यां बिस्ताभ्यां क्रीता– द्विबिस्ता, त्रिबिस्ता, द्विपरमबिस्ता; द्व्याचिता, त्र्याचिता; द्विकम्बल्या, त्रिकम्बल्या ॥ २३ ॥

**श० न्या०—परि०** । **सर्वतः** आरोह-परिणाहाभ्यां, मीयते– परिच्छिद्यतेऽनेनेति अनटि– परिमाणम् । **तद्धितलुकी**ति षष्ठीतत्पुरुषः । **अबिस्ताचितकम्बल्यादि**ति द्वन्द्वगर्भो नञ्तत्पुरुषः । परिच्छिनत्तिक्रियाकरणमात्रं परिमाणं नेह ग्राह्यं, मानादित्यकरणादित्याह– **तच्चे**त्यादि । तदेव पूर्वाचार्योक्तेन द्रढयति– **यदाहुरि**त्यादि– अर्थे कार्यासम्भवात् परिमाणवाची यः शब्दस्तदन्तादित्यर्थः । क्रीतार्थकणः " अनाम्न्यद्विः० " [ ६. ४. १४१. ] इति लुपि– **द्विकुडवी** । आङ्पूर्वाद् ढौकतेः " कीचक-पेचक० " [ उणा० ३३. ] इति डित्यके– पूर्ववद् **द्व्याढकी**त्यादि । " अशौटि व्याप्तौ " " लटि-खटि० "

[ उणा० ५०५. ] इति वे पूर्ववदिकणो लुप्यापि- **पञ्चाश्वेति** । दश दशतो मानमस्य " विंशत्यादयः " [ ६. ४. १७३. ] इति निपातनात् **शतम्**, शेषं पूर्ववत्- **द्विशते**त्यादि । " पणि व्यवहार-स्तुत्योः " पणाय्यतेऽसाविति " णेर्माने " [ ५. ३. ३२. ] इत्यलि द्वाभ्यां पणाभ्यां क्रीतेति " पणपाद० " [ ६. ४. १४८. ] इति ये तस्य च विधानसामर्थ्याच्चालुपि आपि- **द्विपण्या** । " बिसच् प्रेरणे " " शी-री-भू-दू० " [ उणा० २०१. ] इति किति ते-बिस्तः, " द्वि-त्रि-बहोः० " [ ६. ४. १४४. ] इतीकणो लुप्यापि च- **द्विबिस्ता**; एवं- त्रिभिर्बिस्तैः क्रीता- **त्रिबिस्ता**, द्वाभ्यां परमबिस्ताभ्यां क्रीता- **द्विपरमबिस्ता** । अथ कथमत्र बिस्तान्तवर्जने परमबिस्तान्तस्य निषेधः ? न च वाच्यं परमबिस्तान्तोऽपि बिस्तान्त एव, अन्तशब्दस्य ह्यवयवार्थत्वात् तस्य चारम्भकत्वान्नात्र बिस्तः शब्द आरम्भकोऽपि तु परमबिस्तः, नह्यवयवावयवः समुदायावयवो भवति, वाक्यभेदप्रसङ्गदोषाच्च प्रसज्यवृत्तिश्चात्र [ नञ् ] नाश्रीयते; नैवम्- अत्र प्रकरणे तदन्तविधेर्ज्ञापितत्वाद् बिस्ताद्यन्तत्वात् तस्यापि प्रतिषेधः । ननु बिस्तादयस्तु ह्युन्मानवचनाः, तथाहि- बिस्तशब्देन षष्टिः पलशतान्युच्यन्ते, आचितशब्देन तौलकं, कम्बल्यशब्देनाप्युर्णापलशतमशीतिपलशतं वा, तत्रापरिमाणत्वान्ङीप्रसङ्गाभावात् किं निषेधेन ?, नैवम्- अनेकार्थानि हि नामानि भवन्ति, तत्र देशविशेषे परिमाणार्थान्यपेतानि सन्ति, तदर्थं युज्यत एव निषेधः । केचित् त्वमीषामुन्मानवाचिनां प्रतिषेधादन्योन्मानवाचिशब्दाद् द्विपलीत्यादेरपि ङीर्भवतीत्याहुः, तन्न सहृदयहृदयंगममिति ॥ छ. ॥ २. ४. २३. ॥

---

**न्या० स०—परिमाणा०** । सर्वत आरोह-परिणाहाभ्यां मीयते परिच्छिद्यतेऽनेनेति परिमाणम्, परिच्छित्तिक्रियाकरणमात्रं परिमाणं नेह ग्राह्यं, मानादित्यकरणादित्याह- **तच्चे**ति । **तदन्ता-दि**ति- अर्थे कार्यासम्भवादिह, परिमाणवाची यः शब्दस्तदन्तादित्यर्थः । आढौकते मानाय अचि पृषोदरेत्यादिना साधुः, अथवा " कीचक० " [ उणा० ३३. ] इति साधुः । **द्विशते**त्यादि- " शताद्यः " [ ६, ४. १४५. ] इत्यस्य विधानसामर्थ्यान्न लुप्, तस्य च विकल्पेन प्रवृत्तेः पक्षे " संख्या-डतेः० " [ ६. ४. १३०. ] इति कः, " अनाम्न्यद्विः प्लुप् " [ ६. ४. १४१. ] । **द्विपण्ये**ति- " पणपाद० " [ ६. ४. १४८. ] इति ये तस्य च विधानसामर्थ्यादलुपि । ननु बिस्तादय उन्मानवचनाः, तथाहि- बिस्तशब्देन षष्टिः पलशतान्युच्यन्ते, आचितशब्देन तौलकम्, कम्बल्यशब्देनाप्यूर्णापलशतम्; तत्राऽपरिमाणत्वाद् ङीप्रसङ्गाभावात् किं निषेधेन ?, नैवम्- अनेकार्थानि हि मानानि भवन्ति, तत्र देशविशेषे परिमाणार्थान्यपि तानि सन्ति, तदर्थं युज्यत एव निषेधः । " द्वित्रिबहोर्निष्कबिस्तात् " [ ६. ४. १४४. ] इति इकण्लोपो द्विबिस्ताशब्दे ॥ २. ४. २३. ॥

---

## काण्डात् प्रमाणादक्षेत्रे । २ । ४ । २४॥

**त० प्र०—प्रमाणवाचिकाण्डशब्दान्तादक्षेत्रविषयाद् द्विगोस्तद्धितलुकि सति स्त्रियां ङीर्भवति । आयामः- प्रमाणम्, द्वे काण्डे प्रमाणमस्याः- द्विकाण्डी, त्रिकाण्डी रज्जुः । प्रमाणादिति किम् ? द्वाभ्यां काण्डाभ्यां क्रीता- द्विकाण्डा, त्रिकाण्डा शाटी । अप्रमाणादपीच्छन्त्यन्ये, तन्मते- द्विकाण्डी, त्रिकाण्डी शाटीत्येव भवति । अक्षेत्र इति किम् ? द्वे काण्डे प्रमाणस्याः- द्विकाण्डा, त्रिकाण्डा क्षेत्रभक्तिः । अक्षेत्र इति द्विगोर्विशेषणं किम् ? काण्डस्य क्षेत्रविषयत्वेऽपि यथा स्यात्- द्वाभ्यां काण्डाभ्यां क्षेत्रसंज्ञिताभ्यां क्रीता द्विकाण्डी वडवा, नात्र द्विगुः क्षेत्रविषयः, किं तर्हि ? काण्डशब्द इति ॥ २४ ॥**

---

**श० न्या०—काण्डात्०** । कणेः " कण्यणि-खनिभ्यो णिद् वा " [ उणा० १६९. ] इति डे- काण्डः, प्रमीयतेऽनेनेत्यनटि- प्रमाणं, " क्षित् निवास-गत्योः " क्षियन्ति- निवसन्त्युप्तानि बीजानि वृद्धिं गच्छन्ति ततो (? वास्मिन्निति) " हु-या-मा-श्रु-वसि० " [ उणा० ४५१. ] इति त्रे- क्षेत्रम्, ततो नञ्समासः । षोडशहस्तप्रमाणं काण्डं, तस्य च केवलस्य स्त्रियां वृत्त्यसम्भवादनुवृत्तस्य द्विगोर्विशेषणं, तस्यैव समासे हि गुणीभूतत्वात् समासस्य तु प्रधानत्वात् तस्यैवाक्षेत्र इति विशेषणम्, अक्षेत्रादित्यकरणाच्चेत्यत आह- **अक्षेत्रविषयाद् द्विगोरि**ति । आयामस्तु प्रमाणं स्यादिति लक्षणादन्यत्वात् पूर्वेणाप्राप्तत्वाद् विध्यर्थमिदमित्याह- **आयामः प्रमाणमि**ति । " प्रमाणान्मात्रट् " [ ७. १. १४०. ] तस्य च " द्विगोः संशये च " [ ७. १. १४४. ] इति लुपि- **द्विकाण्डी**त्यादि । क्रीतेकणः " अनाम्नि० " [ ६. ४. १४१. ] इति लुपि- **द्विकाण्डे**त्यादि । **अन्ये** इति- शकटः । **अक्षेत्रे**त्यादि- पूर्ववन्मात्रटो लुप् । **क्षेत्रभक्तिरि**ति- भक्तिग्रहणं तद्धितार्थस्य स्त्रीत्वार्थम् । **अक्षेत्र इती**त्यादि- अयमर्थः- यदि काण्डमेव क्षेत्रेण विशिष्यते तदा काण्डशब्द एव केवलोऽयं वर्त्तत इत्यर्थः स्यात्, ततश्चेह प्रतिषेधः स्यात्- **द्विकाण्डी वडवा**, इह तु न स्यात्- द्विकाण्डा क्षेत्रभक्तिरिति ॥ छ ॥ २. ४. २४. ॥

---

**न्या० स०—काण्डात् प्र०** । क्षियन्ति निवसन्त्युप्तानि

बीजानि वृद्धिं वा गच्छन्त्यस्मिन्निति " हु-या-मा० " [ उणा० ४५१. ] इति त्रे- क्षेत्रम्, षोडशहस्तप्रमाणं काण्डम् । क्षेत्रभक्तिरिति- भक्तिग्रहणं तद्धितार्थस्य स्त्रीत्वार्थम् । क्षेत्रसंज्ञिताभ्यामिति- यकाभ्यां काण्डाभ्यां क्षेत्रं परिच्छिन्नं ते ते काण्डे अपि क्षेत्रसंज्ञिते ॥ २. ४. २४. ॥

## पुरुषाद् वा । २ । ४ । २५ ॥

त० प्र०—प्रमाणवाचिपुरुषशब्दान्ताद् द्विगोस्तद्धितलुकि स्त्रियां ङीर्वा भवति । द्वौ पुरुषौ प्रमाणमस्याः- द्विपुरुषी, द्विपुरुषा; त्रिपुरुषी, त्रिपुरुषा परिखा । प्रमाणादित्येव- द्वाभ्यां पुरुषाभ्यां क्रीता- द्विपुरुषा, त्रिपुरुषा वडवा । तद्धितलुकीत्येव- पञ्चपुरुषा- रज्जुः, प्रमाणभूताः पञ्च पुरुषाः समाहृताः- पञ्चपुरुषी " द्विगोः समाहारात् " [ २. ४. २२. ] इति नित्यमेव ॥ २५ ॥

श० न्या०—पुरु० । " पॄश् पालन-पूरणयोः " " विदिपृभ्यां कित् " [ उणा० ५५८. ] [ इति किदुषे- ] पुरुषः, चतुर्हस्तः पुरुषः, स चानुवृत्तस्य द्विगोर्विशेषणमित्याह- प्रमाणेत्यादि । ननु पुरुषशब्दस्य जातिवचनत्वात् प्रमाणे वृत्त्यभावात् कथमुच्यते- प्रमाणवाचिपुरुषादिति; न च पदान्तरसम्बन्धेन शब्दानामर्थान्तरवृत्तिदर्शनाद् यथा सिंहशब्दो जातिवचनोऽपि माणवकशब्दसन्निधाने शौर्यादिगुणमाचष्टे, एवं प्रमाणशब्दसन्निधानात् तदर्थवृत्तित्वमस्य नायुक्तम्; द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये प्रमाणशब्दसन्निधानात् प्रमाणवृत्तिता, वृत्तौ तु द्विपुरुषी गङ्गेत्यत्र प्रमाणशब्दासन्निधानात् कथं पुरुषगतप्रमाणवृत्तित्वमिति; उच्यते- वृत्तिविषयेऽनुपपद्यमानगङ्गासम्बन्धः पुरुषशब्दस्तद्गते प्रमाणे वर्तते, साहचर्याद् यथोष्ट्रमुख इत्यादावुष्ट्रशब्दो मुखे, अत एव सूत्रे प्रमाणग्रहणमिति सर्वमवदातमिति । द्विपुरुषीति- पूर्ववत् मात्रटो, " हस्तिपुरुषाद् वाण् " [ ७. १. १४१ ] इत्यणो वा लुप् । द्विपुरुषेति- पूर्ववदिकणो लुप् ॥ छ. ॥ २. ३. २५. ॥

न्या० स०—पुरुषाद् वा । द्विपुरुषीति- मात्रटो " हस्तिपुरुषाद् वाण् " [ ७. १. १४१. ] इत्यणो वा " द्विगोः संशये च " [ ७. १. १४४. ] इति लुप् ॥ २. ४. २५. ॥

## रेवत-रोहिणाद् भे । २ । ४ । २६ ॥

त० प्र०—भं- नक्षत्रम्, रेवत-रोहिणाभ्यां नक्षत्रशब्दाभ्यां स्त्रियां ङीर्भवति । रेवती, रोहिणी । यदापि " चित्रा-रेवती-रोहिण्याः स्त्रियाम् " [ ६. ३. १०८. ] इति जातार्थीयस्याणो लुकि ङीप्रत्ययस्यापि लुग् भवति, तदापि नक्षत्रशब्दत्वात् पुनरनेन ङीर्भवति- रेवत्यां जाता- रेवती, रोहिण्यां जाता- रोहिणीति । भ इति किम्? रेवता, रोहिणा । कथं " रेवतीरमणो बलः, रेवती, शुष्करेवती ? " रेवच्छब्दो मत्वर्थीयान्तोऽस्ति, तत उदिल्लक्षणो ङीः । कथं रोहिणी ?, कटुरोहिणी ? रोहिणशब्दः प्रकृत्यन्तरमस्ति, ततो जातिलक्षणो ङीर्भविष्यति ॥ २६ ॥

श० न्या०—रेव० । रेवतशब्दोऽव्युत्पन्नः, रीयते इति विचि- रे, तस्माच्च मतुप्रत्यये " नाम्नि " [ २. १. ९५. ] इति मस्य वकारे पृषोदरादित्वादकारान्तत्वे वा रेवत । रुह्यते- पुण्यकृद्भिः प्राप्यत इति रोहः- स्वर्गः, रुह्यतेऽस्मिन्निति वा " व्यञ्जनाद् घञ् " [ ५. ३. १३२. ], नीयतेऽनया नयनी, रोहस्य नयनी रोहनयनी, तस्य पृषोदरादित्वाद् रोहिणेत्यादेशः । ननु कथं रेवती कन्येत्याह- यदापीत्यादि । नन्वनक्षत्रशब्दादपि रेवताद् दृश्यत इत्याह- कथमित्यादि- सुगमम् । रेशब्दान्मतुप्रत्यये रेवत् । ननु रोहिणशब्दादनक्षत्रार्थाद् ङीप्रत्ययो न प्राप्नोतीत्याह- कथमित्यादि- अर्थभेदात् प्रकृतिभेदः ॥ छ. २. ४. २६. ॥

न्या० स०—रेवत-रो० । रेवत्यां जाता रेवतीति- अत्र कन्या वाच्या, ततो गौणोऽपि रेवतीशब्दो नक्षत्रे वर्तते । ननु गौरादिभ्यः " [ २. ४. १९. ] इत्यतो मुख्याधिकारे मुख्यादेव प्राप्नोति, तत् कथमत्र गौणात् ?, सत्यम्- मुख्याधिकारेऽपि काऽपि शाब्दया वृत्त्या काऽप्यार्थ्या वृत्त्या प्राधान्यं प्राप्तम्, अत्र तावदार्थ्या वृत्त्या प्राधान्यम्, कथं ? नक्षत्रलक्षणोऽर्थो यदि वाच्यो न भवेत् तदा कथं तद्विशिष्टः कालो वाच्यः स्यादमुना प्रकारेणेति । कथं रेवतीति- रीङ्च् रीयते विच् गुणः, रेर्मेधोऽस्यास्ति मत् " नाम्नि " [ २. १. ९५. ] वत्वम् । रोहिणीति- स्त्रीपर्यायत्वादत्र रोहिणशब्दस्यानक्षत्रार्थाद् ङीर्न प्राप्नोतीत्याशङ्का । प्रकृत्यन्तरमिति- अर्थभेदात् प्रकृतिभेद इत्यर्थः ॥ २. ४. २६. ॥

## नीलात् प्राण्यौषध्योः । २ । ४ । २७ ॥

त० प्र०—नीलशब्दात् प्राणिनि औषधौ च स्त्रियां ङीर्भवति । नीली वडवा, नीली गौः, नीली औषधिः । प्राण्यौषध्योरिति किम्? नीला शाटी ॥ २७ ॥

श० न्या०—नीला० । " णील वर्णे " " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के नीलगुणशब्दोऽयं, नीलं गुणमुपादाय यदा स्त्रियां वर्तते तदा ङीरित्यर्थः । नीला[ ली ] औषधिजातिरिति जातिशब्दादपि जातौ सिध्यन्नीलात्

"जातेः०" [ २. ४. ५४. ] इत्यप्राप्तेऽनेनैव ङीः, ये तु नीलः पट इत्यर्थान्तरेऽप्यस्यर्थदर्शनादनित्यस्त्रीत्वमभ्युपगच्छन्ति तेषां गुणशब्दस्यैवेदमुदाहरणं, जातिशब्दात् तु "जातेः०" [ २. ४. ५४. ] इति ङीः सिद्ध एव ॥ छ. ॥ २. ४. २७. ॥

न्या० स०—नी०। नीलीत्यत्र जातिशब्दादपि जातौ नित्यस्त्रीत्वात् "जातेः०" [ २. ४. ५४. ] इत्यप्राप्तेऽनेनैव ङीः। ये तु नीलः पट इत्यर्थान्तरेऽस्यर्थस्यापि दर्शनादनित्यं स्त्रीत्वमभ्युपगच्छन्ति तेषां गुणशब्दस्यैवेदमुदाहरणम्, जातिशब्दात् तु "जातेः" [ २. ४. ५४. ] इति ङीः सिद्ध एव ॥ २. ४. २७. ॥

## क्ताच्च नाम्नि वा । २ । ४ । २८ ॥

त० प्र०—नीलशब्दात् क्तान्ताच्च शब्दरूपात् स्त्रियां ङीर्वा भवति, नाम्नि-संज्ञायाम्। नीली, नीला; प्रबद्धा चासौ विलूना चेति प्रबद्धविलूनी, प्रबद्धविलूना ॥ २८ ॥

श० न्या०—क्ताच्च०। प्रबध्यते स्म क्ते प्रबद्धा चासाविति पदविभागदर्शनमात्रम्, न तु समारम्भकं वाक्यमिदं, प्रबद्धविलून इत्येवंरूप एव समुदाय एव संज्ञावाची, न तु तत्रावयवार्थोऽस्ति, यथा गौरखर इत्यर्थः। समुदायव्युत्पादनेऽवयवार्थस्य स्त्रीत्वाभावात् तदविवक्षित्वैव समासः, यदाहोद्द्योतकरः—महाशूद्री आभीरजातिरिति—महांश्चासौ शूद्रश्चेति व्युत्पत्तिमात्रार्थं वाक्यं कृत्वा "सन्महत्०" [ ३. १. १०७. ] इति समासः; "आन्महत" [ ] इत्यात्वे जातिलक्षणो ङीप्, अन्तरङ्गत्वात् पूर्वं डापि कृते सुप्युत्पन्ने समासेन भाव्यम्, महती शूद्रा—महाशूद्रेति टापोऽनिवृत्तत्वाद् ङीर्न सिद्ध्यति, एवमिहापि; बहुलाधिकाराद् वा प्रबद्धाशब्दस्यागत्यादित्वेऽपि विलूनशब्देन प्रत्ययोत्पत्तेः प्रागेव समासः ॥ छ. ॥ २. ४. २८. ॥

न्या० स०—क्ताच्च०। प्रबद्धा चासौ विलूना चेतीति—अर्थकथनमिदं, प्रबद्धश्चासौ विलूनश्च स्त्री चेदिति तु कार्यम्, अन्यथा गौणत्वाभावात् "गोश्चान्त०" [ २. ४. ९६. ] इत्यत्राप्रवृत्तावदन्तत्वाभावाद् ङीर्न स्यात्, औषधिविशेषः, अखण्डः संज्ञाशब्दः, व्युत्पत्तिमात्रमिदम् ॥ २. ४. २८. ॥

## केवल-मामक-भागधेय-पापा-ऽपर-समाना-ऽऽर्यकृत-सुमङ्गल-भेषजात् । २ । ४ । २९ ॥

त० प्र०—एभ्यः स्त्रियां ङीर्भवति, नाम्नि। केवली नाम ज्योतिः, मामकी, भागधेयी, पापी, अपरी, समानी, आर्यकृती, सुमङ्गली, भेषजी। नाम्नीति किम्? केवला। मामकशब्दादणन्तत्वेनैव ङीसिद्धौ नाम्नि नियम्यते, तेन—मामिका बुद्धिरित्यसंज्ञायामण्लक्षणोऽपि ङीर्न भवति ॥२९॥

श० न्या०—केव०। केवलादिसमाहारद्वन्द्वात् पञ्चमी। "केवृङ् सेवने" "मृदिकन्दि०" [ उणा० ४६५. ] इत्यले ङ्यां—केवली। ममेवायं "वा युष्मद०" [ ६. ३. ६७. ] इत्यञि अस्मदो ममकादेशे ङ्यां—मामकी। भज्यत इति घञि भागः, ततो "नामरूप०" [ ७. २. १५८. ] इति स्वार्थे धेयप्रत्यये—भागधेयी। "पां पाने" "भापाचणि०" [ उणा० २९६. ] इति पे—पापी। पिपर्त्तीत्यचि—परः, तस्य नञ्समासे—अपरी। मननं—मानः, घञ्, सह मानेन वर्तत इति बहुव्रीहौ—समानी। अर्यते इति घ्यणि—आर्यः, तस्य कृतेन *गतिकारक०* इति न्यायात् प्रत्ययोत्पत्तेः प्रागेव तृतीयासमासे—आर्यकृती। "मगु गतौ" "मृदु-कन्दि०" [ उणा० ४६५. ] इत्यले शोभनं मङ्गलमस्या इति सुमङ्गली। "भेष्टृग् भये" घञि भेषं जयति "क्वचित्" [ ५. १. १७१. ] इति डे—भेषजी। मामकशब्दादित्यादि—ननु कथं मामकग्रहणं नियमार्थं? शोभनो मामकोऽस्याः सुमामकेत्यत्र तदन्तविधेरिष्टत्वाद् विध्यर्थताऽप्युपपद्यत एव, विधि-नियमसम्भवे हि विधेरेव ज्यायस्त्वात्; सत्यामपि वा नियमार्थतायां विपरीतनियमः कस्मान्न भवति—मामकशब्दस्यैव नाम्नीति; अत्रोच्यते—इह प्रकरणे तदन्तविधेरिष्टत्वेऽपि मुख्याधिकारादमुख्यमामकशब्दान्ताद् ङीः [ कथं ] स्यात्, केवलैरेवैतैः संज्ञाप्रतीतिर्न त्वमुख्यतदन्तैः, अत एव केवला एव केवलादय उदाहृता न कृतसमासा इत्युपपद्यत एव नियमार्थता; विपरीतनियमोऽपि न, तदा हि केवलादीनामपि संज्ञायां [ ङीः ] निवर्तितः स्यात्, वचनारम्भसामर्थ्यान्नियमो बाध्येतेति तेषां वैषम्यं स्यात्; यथोक्तनियमे तु न किञ्चिन्नोपपद्यत इति ॥ छ. ॥ २. ४. २९. ॥

न्या० स०—केवल-माम०। केवलीति—केव्यते—सेव्यते केवलिभिरिति "मृदि-कन्दि-कुण्डि०" [ उणा० ४६५. ] इत्यलः। मामकशब्दादिति—ननु कथं मामकग्रहणं नियमार्थं? शोभनो मामकोऽस्याः सुमामकेत्यत्र तदन्तविधेरिष्टत्वाद् विध्यर्थताप्युपपद्यत एव, विधि-नियमसंभवे हि विधेरेव ज्यायस्त्वात्; सत्यामपि वा नियमार्थतायां विपरीतनियमः कस्मान्न भवति—मामकशब्दस्यैव नाम्नीति; अत्रोच्यते—इह प्रकरणे तदन्तविधेरिष्टत्वेऽपि मुख्याधिकारादमुख्यमामकशब्दान्तान्न ङीः, केवलैरेव चैतैः संज्ञाप्रतीतिर्न

स्वमुख्यतदन्तैः, अत एव केवला एव केवलादय उदाहृता न कृतसमासा इत्युपपद्यत एव नियमार्थता; विपरीतनियमोऽपि न भवति, तदा हि केवलादीनामपि संज्ञायां ङीर्निवर्त्तितः स्यात्, संज्ञापि बाध्येति तेषां वैषम्यं स्यात्, यथोक्तनियमे तु न किञ्चिन्नोपपद्यत इति । अपरीति– पिपर्त्तीति अचि परः, तस्य नञ्समासेऽपरी । भेषजीति– "भेषृग् भये" घञि भेषं जयति "क्वचित्" [ ५. १. १७१. ] इति डे । मामकी– मातुली । भागधेयी– बलिः । पापी, अपरी ओषध्यौ । समानी छन्दः । आर्यकृती क्रियाविशेषः । सुमङ्गली छन्द ओषधिर्वा । भेषजी ओषधिः ॥ २. ४. २९. ॥

## भाज-गोण-नाग-स्थल-कुण्ड-काल-कुश-कामुक-कट-कबरात् पक्वाऽऽवपन-स्थूलाऽकृत्रिमाऽमत्र-कृष्णाऽऽयसीरिरंसु-श्रोणि-केशपाशे । २ । ४ । ३० ॥

**त० प्र०**—भाजादिभ्यो दशभ्यो यथासंख्यं पक्वादिष्वर्थेषु स्त्रियां ङीर्भवति, नाम्नि । भाज्यत इति भाजी पक्वा चेत्, भाजान्या; गोणी आवपनं चेत्, गोणान्या; नागी स्थूला चेत्, नागान्या; जातौ तु नाग्येव, तस्याः स्थौल्याभावात् । स्थली अकृत्रिमा चेत्, स्थलान्या; कुण्डी अमत्रं चेत्, कुण्डान्या; काली कृष्णा चेत्, कालान्या; कुशी आयसी चेत्, कुशान्या; कामुकी रिरंसुश्चेत्, कामुकान्या; कटी श्रोणी चेत्, कटान्या; कबरी केशपाश[ :– केशवेष ]श्चेत्, कबरान्या; जानपदशब्दादपि वृत्ताविच्छन्त्यन्यः–जानपदी वृत्तिः, वृत्तेरन्यत्र– जानपदा मदिरा ॥ ३० ॥

**श० न्या०**—भाज० । भाजेत्यादिसमाहारद्वन्द्वात् पञ्चमी, पक्वेत्यादिसमाहारद्वन्द्वात् सप्तमी । "भजग् विश्राणने" भाज्यते– विश्राण्यते दीयते वा णिजन्तात् "णि-वेत्यास०" [ ५. ३. १११. ] इत्यने प्राप्तेऽत एव निर्देशात् "शंसि-प्रत्ययात्" [ ५. ३. १०५. ] इत्यप्रत्यये ङ्यां– **भाजी, पक्वा** भिक्षा; पचेः क्ते "क्षै-शुषि०" [ ४ २. ७८. ] इति कृत्तस्य वकारे– पक्वा । गोणशब्दोऽव्युत्पन्नः, आवपन्ति धान्यानि यत्रावपनम् । नागशब्दोऽव्युत्पन्नो गुणवचनः, तत्र यदा स्थौल्यं गुणमुपादाय तद्वति वर्त्तते तदाऽनेन ङीः । "स्थूलणि परिबृंहणे" णिजन्तादचि आपि– **स्थूला, अन्येति**– तन्वी दीर्घनाम वा, यदा तु नगे भवो नाग इति व्युत्पाद्यस्तदा हस्तिपर्यायाजातिशब्दादहिजातिशब्दाद् वा "जाते०" [ २. ४. ५४. ] इत्यनेनैव ङीः । "ष्ठल स्थाने" अचि तिष्ठतेर्वा "स्थो वा" [ ५. ३. ९६. ] इति कित्यले ङ्यां– **स्थली,** करणेन निर्वृत्ता "ड्वित०" [ ५. ३. ८४. ] इति त्रिमकि– कृत्रिमा, **अन्या** पौरुषेयी । "कुगत् शब्दोपकरणयोः" "कु-गु-हु-नी-कुणि०" [ उणा० १७०. ] इति किति डे बाहुलकात् "[ अहन् ] पञ्चमस्य०" [ ४. १. १०७. ] इति दीर्घत्वाभावे– **कुण्डी,** त्रिलिङ्गोऽयम् । "अम गतौ" "वृग्-नक्षि०" [ उणा० ४५६. ] इत्यत्रे– **अमत्रं** भाजनं, यत्र घृताद्यानीयते । **कुण्डान्ये**ति– "कुडुङ् दाहे" "क्टेटः०" [ ५. ३. १०६. ] इत्यप्रत्यये "आत्" [ २. ४. १८. ] इत्याप्, क्रियाशब्दोऽयम्, इह कुण्डशब्दस्य ङीविधानं स्पष्टार्थमेव जातिवचनत्वात् "जातेः०" [ २. ४. ५४. ] इत्यनेनैव सिद्धत्वात् । कालयति मनोऽचि ङ्यां– **काली** । "कुंक् शब्दे" "कोर्वा" [ उणा० ५२९. ] इति किति शे– **कुशी** । अयसो विकार **आयसी** "विकारे" [ ६. २. ३०. ] अण्, **अन्या** काष्ठमयी तदाकृतिर्वल्गा वा, भग्नस्यास्थ्नः प्रतिष्टम्भ इत्येके; कथम् "अतः कृ-कमि०" [ २. ३. ५. ] इत्यत्रायस्कुशा, अयोविकारस्यात्र स्पष्टं प्रतीतेः, नैवम्– सम्बन्धसामान्यविवक्षायामयोविकारत्वाभावे साधुरयम् । "कमूङ् कान्तौ" "शॄ-कम०" [ ५. २. ४०. ] इत्युकणि– **कामुकी,** रन्तुमिच्छुः– **रिरंसुः** मैथुनेच्छुरित्यर्थः, **अन्ये**ति– मैथुनादन्यत् कामयमाना । कटेरचि– **कटी,** "श्रुं गतौ" (?) [ "श्रुंट् श्रवणे" ] "का-वावी०" [ उणा० ६३४. ] इति णौ– **श्रोणिः** । ननु कटिशब्दात् "इतोऽक्त्यर्थात्" [ २. ४. ३२. ] इति ङ्यां कटीति सिद्ध्यति, किमनेन ? सत्यम्– श्रोणौ कटेति मा भूदित्येवमर्थम्, न च वाच्यं कटशब्दस्य श्रोणेरवाचकत्वं विज्ञास्यते, यतो यदि कटशब्दः श्रोणौ न स्यात् तदा द्वाभ्यां कटीभ्यां क्रीतेति "अनाम्न्य०" [ ६. ४. १४१. ] इतीकणो लुपि "ङ्यादेः०" [ २. ४. ९५. ] इति ङीनिवृत्तौ द्विकटा, त्रिकटेत्यकारान्तश्रुतिर्न स्यात् । "कुंक् शब्दे" "ऋच्छि-चटि-वटि०" [ उणा० ३९७. ] इत्यरे– **कबरी,** क्लिशेः "क्लिशः के च" [ उणा० ५३०. ] इति शे– केशः, "पांक् रक्षणे" "पा-दा-वमि०" [ उणा० ५२७. ] इति शे– पाशः, **केशपाशः केशवेषः,** विष्लृंकी घञि वेषः, केशानां वेषः केशवेषः, केशरचनाविशेष इत्यर्थः, **अन्या** कबरवर्णेत्यर्थः । जनपदे भवा उत्सादयन्तादात्मयापनरूपायां वृत्तौ जानपदी वृत्तिरित्येतदर्थं जानपदशब्दमिह पठन्ति, स नेह पठ्यते, वृत्तावृत्तावपि चाणन्तत्वात् ङ्येव भवति, यदाह– जानपदी वृत्तिश्चेत्, जानपदी अन्या, स्वरार्थमेव तेषामिह पाठः । कश्चित् तु तद्व्याख्याता व्यावृत्तौ वृत्तेरन्यत्रा-

पमिच्छति, तत्र युक्तम्, अत एव वृत्तौ- **अन्य** इत्येकवचनेन तदपास्यत्वं सूचितम् ॥ छ. ॥ २. ४. ३०. ॥

**न्या० स०**—भाज-गोण०। भाजीति- " भजण् विश्राणने " इत्यस्य भाज्यते- विश्राण्यते दीयते " णिवेत्त्यास० " [ ५. ३. १११. ] इत्यने प्राप्ते बाहुलकात् " शंसि० " [ ५. ३. १०५. ] इति अः, अथवा " स्थादिभ्यः कः " [ ५. ३. ८२. ] इति कः। **कुण्डी**ति- इह कुण्डशब्दस्य ङीविधानं विस्पष्टार्थमेव, जातिवचनात् " जातेः० " [ २. ४. ५४. ] इत्यनेनैव सिद्धत्वात्। **कुण्डान्ये**ति- " कुडुङ् दाहे " " क्रेट० " [ ५. ३. १०६. ] इत्यप्रत्यये " आत् " [ २. ४. १८. ] इत्यापि क्रियाशब्दोऽयम्। कालयति मन इति अचि [ **काली** ]। **कुशान्ये**ति- काष्ठमयी तदाकृतिर्वल्गा वा। **केशपाश** इति- " क्लिशः के च " [ उणा० ५३०. ] इति शे- केशः। " पांक् रक्षणे " " पा-दा-वमि० " [ उणा० ५२७. ] इति शे- पाशः। **केशपाशः केशवेषः** केशानां वेषः केशरचनाविशेष इत्यर्थः। **नागे**ति- न अगः " नक्षादयः " [ ३. २. १२८. ] ॥ २. ४. ३०. ॥

## नवा शोणादेः । २ । ४ । ३१ ॥

**त० प्र०**—शोणादेर्गणात् स्त्रियां ङीर्वा भवति। शोणी, शोणा; चण्डी, चण्डा। शोण, चण्ड, अराल, कमल, कृपण, विकट, विशाल, विशङ्कट, भरूज, ध्वज, कल्याण, उदार, पुराण, बहु, बहुः, बह्वी;- एवंनामा काचित्, गुणवचनात् तूत्तरेणैव भविष्यति। हन्- वृत्रघ्नी, वृत्रहा। चन्द्रभागान्नद्याम्- चन्द्रभागी, चन्द्रभागा नाम नदी, नद्या अन्यत्र चन्द्रभागा नाम देवता। अनद्यामिति केचित्- चन्द्रभागी, चन्द्रभागा काचित्, अनद्यामित्येव- चन्द्रभागा नाम नदी। अण्णन्तान्नद्यामित्येके- चान्द्रभागी, चान्द्रभागा नाम नदी; अण्णन्तान्नित्यं प्राप्ते विकल्पः। अनद्यां तु नित्यं ङीः- चान्द्रभागी छाया। अन्ये तु अण्णन्तादेवार्थभेदेन विकल्पमिच्छन्ति- नद्यामाप्प्रत्ययोऽन्यत्र ङीप्रत्ययः- चान्द्रभागा नदी, चान्द्रभागी वनराजिः ॥ ३१ ॥

**श० न्या०**—नवा०। " शोणृ वर्णे " अचि- **शोण** उज्ज्वलो वर्णः। " चडुङ् कोपे " अचि- **चण्डः**, " ऋंक् गतौ " " ऋ-कृ-मृ० " [ उणा० ४७५. ] इत्याले- **अरालः**, एतौ गौरादौ न पठितव्यौ कार्यस्यानेनैव सिद्धत्वात्। " कमूङ् कान्तौ " " मृदि-कन्दि० " [ उणा० ४६५. ] इत्यले- **कमल**। " कृपौङ् सामर्थ्ये " " कृ-शृ-पॄ-कृपि० " [ उणा० १८८. ] इत्यणे- **कृपण**। विशब्दाद् " वेर्विस्तृते शाल-शङ्कटौ " [ ७. १. १२३. ] इति " कटः " [ ७. १. १२४. ] इति च- **विकट-विशाल-विशङ्कटाः**। " भ्रस्जैङ् भर्जने " णिगन्तादचि अत एव पाठाद् रेफात् परतो दीर्घे ऊकारागमे- **भरूजाः** स्नेहभृष्टाः किल तन्दुलाः। ध्वजेरचि- **ध्वजी**। कलेः " कल्याण० " [ उणा० १९३. ] इत्याणकि ] यागमे च, कल्यमानयतीति वा " क्वचित् " [ ५. १. १७१. ] इति डेऽत एव पाठाण्णत्वे- **कल्याण**। उदाङ्पूर्वाद्दर्तेरचि घञि वाऽत एव पाठात् स्त्रियामपि, अर्त्तेर्घञन्तस्योद्गत आरो गतिरस्येति बहुव्रीहौ वा- **उदार**। पुराशब्दात् " पुरो नः " [ ६. ३. ८६. ] इति ने- **पुराण**। " वहीं प्रापणे " " मि-वहि० " [ उणा० ७२६. ] इत्युप्रत्यये- **बहु**। केवलस्य हन्शब्दस्याप्रयोगात् तदन्तमुदाहरति-। [**वृत्रघ्नी**ति।] चन्द्रभागान्नद्यामिति गणसूत्रम्, तद[र्थे]पूर्वव्याख्यातॄणां वैमत्यम्, तत्र केचिच्चन्द्रभागा नद्यामभिधेयायां ङीप्रत्ययमुत्पादयन्ति वेति; अन्ये तु चन्द्रभाग इति छिन्दन्ति, अनद्यामभिधेयायामिति; अन्ये तु चन्द्रभागौ पर्वतौ वा, "प्रभवति" [ ६. ३. १५७. ] इत्यणन्तं चान्द्रभागेति पठन्ति, तत्र किंचित् केचिदादृत्य सूत्रयन्ति, तत्र जयादित्यश्चान्द्रभागान्नद्यामिति पठति, केचित् तत्राप्यनणन्तं पठन्ति, चन्द्रस्तु चन्द्रभागान्नद्यामिति, व्याचष्टे च चन्द्रभागेति रूढं नद्याम्, अन्यत्र चन्द्रभागीति भवति; अन्ये तु चन्द्रभागादनद्यामिति; तदेतत् सर्वं **चन्द्रभागान्नद्यामि**त्यादिना दर्शयति ॥ छ. ॥ २. ४. ३१. ॥

**न्या० स०**—नवा शो०। **शोणी**ति- " शोणृ वर्णे " अस्याऽचि- शोण उज्ज्वलो वर्णः, निर्दोषरक्तवर्ण इत्यर्थः। **चण्डी**ति- कोपनायामनेनैव विकल्पः, गौर्यां तु गौरादिपाठान्नित्यं ङीः। **अराल**शब्दो वक्रार्थोऽत्र द्रष्टव्यः, पक्षिविशेषे तु गौरादौ। लक्ष्म्यां **कमली** कमला। भरोर्भर्षेर्जातः- **भरुजः**- ऋषिविशेषः। **भरूजे**ति तु पाठान्तरम्, तदा " भृजैङ्- भर्जने " णिगन्तादचि, अत एव पाठाद् रेफात् परतो दीर्घे ककारागमे- **भरूजाः**- स्नेहभृष्टाः किल तन्दुलाः। **ध्वजी** ध्वजा कलपालभार्या दशवक्त्रा च। **वृत्रघ्नी**ति- केवलस्य हन्शब्दस्याप्रयोगात् तदन्तमुदाहरति। **चन्द्रभागी**ति- चन्द्रभागयोः पर्वतयोरदूरभवा नद्यपि चन्द्रभागी। अणन्तान्नद्यामित्येके। **चान्द्रभागी**ति- चन्द्रभागाभ्यां गिरिभ्यां प्रभवति अण् ॥ २. ४. ३१. ॥

## इतोऽक्त्यर्थात् । २ । ४ । ३२ ॥

**त० प्र०**—इकारान्तान्नाम्नः स्त्रियां ङीर्वा भवति, न चेत् तत् क्त्यर्थप्रत्ययान्तं स्यात्। भूमी, भूमिः; अङ्गुली, अङ्गुलिः; धूली, धूलिः; आली, आलिः; धमनी, धमनिः; दर्वी, दर्विः; श्रोणी, श्रोणिः; राजी, राजिः; आवली, आवलिः; यष्टी, यष्टिः; शारी, शारिः; सरणी, सरणिः; अशनी, अशनिः;

**भरणी, भरणिः, शकृत्करी, शकृत्करिः; आत्मंभरी, आत्मंभरिः; कपी, कपिः; अही, अहिः; तारी, तारिः, मुनी, मुनिः; अञ्चती, अञ्चतिः; अङ्कती, अङ्कतिः; अंहती, अंहतिः; शकटी, शकटिः; शक्री, शक्रिः, रजनी, रजनिः; धरणी, धरणिः रात्री, रात्रिः । अक्त्यर्थादिति किम्? कृतिः; हृतिः, अजननिः, अकरणिः, ज्यानिः, ग्लानिः; हानिः । कथं साती?, सातिः?– तिगन्ताद् भविष्यति । अन्ये तु अञ्चति-अङ्कति-अंहति-शकटि-शक्रि-शारि-तारि-अहि-कपि-मुनि-रात्रि-यष्टिभ्यः कटि-श्रोणि-प्रभृतिप्राण्यङ्गवाचिभ्यः क्तिवर्जितकृदन्तेभ्यश्चेकारान्तेभ्य इच्छन्ति, नान्येभ्यः, तन्मते– शोभनो गन्धो यस्याः सा सुगन्धिः, सुरभिगन्धिः; निर्गता कौशाम्ब्या निष्कौशाम्बिः, आणिः, शाणिः-इत्यादिषु न भवति, क्तिमात्रवर्जनाच्चाकरणि-अजननि-ज्यानि-ग्लानिप्रभृतिषु न प्रतिषेधः ॥ ३२ ॥**

---

**श० न्या०—इतो०** । इत इत्यधिकृतस्य नाम्नो विशेषणं, तेन च तदन्तविधिरित्याह– **इकारान्तान्नाम्न** इति । क्तेरर्थो यस्येति विग्रहे पश्चान्नञ्समासः । भवतेः “ कृभूभ्यां कित् ” [ उणा० ६९०. ] इति मिप्रत्यये– **भूमिः** । “ अगु गतौ ” इत्यतो “ मस्यसि० ” [ उणा० ६९०. ] इत्युरिप्रत्यये ऋफिडादित्वाल्लत्वे–**अङ्गुलि** । “ धूञ् कम्पने ” “ धू-सूभ्यां लिक्० ” [ उणा० ७०१. ] इति लिकि– **धूलि** । अलेः “ कृ-शृ-कुटि० ” [ उणा० ६१९. ] इति णित्यौ वृद्धौ– **आलि** । धमतेः सौत्रात् “ सदि-वृत्यमि० ” [ उणा० ६८०. ] इत्यनौ– **धमनि** । “दृश् विदारणे” “ दृ-पृ-वृभ्यः० ” [ उणा० ७०४. ] इति वौ– **दर्वि** । श्रुवः “ का-वा० ” [ उणा० ६३४. ] इति णौ– **श्रोणि** । राजेः “ कमि-वमि० ” [ उणा० ६१८. ] इति इकारे– **राजि** । आङ्पूर्वाद् वलेः “ पदि-पठि० ” [ उणा० ६०७. ] इति इकारे– **आवलि** । यजेः “ प्लु-ज्ञा-यजि० ’ [ उणा० ६४६. ] इति तौ– **यष्टि** । शृणोतेः “ कृ-शृ-कुटि० ” [ उणा० ६१९. ] इति णित्यौ–वृद्धौ– **शारि** । सर्तेः “ ऋ-हृ-सृ० ” [ उणा० ६३८. ] इत्यणौ– **सरणि** । अश्नुतेः “ सदि-वृति० ” [ उणा० ६८०. ] इत्यनौ– **अशनि** । अर्तेः “ ऋ-हृ-सृ० ” [ उणा० ६३८. ] इत्यणौ– **अरणि** । शकेः “ शक ऋत् ” [ उणा० ८९१. ] इति ऋति– शकृत्, शकृत् करोतीति “ शकृत्-स्तम्बात्० ” [ ५. १. १००. ] इति इप्रत्यये– **शकृत्करि** । आत्मानमेव बिभर्त्ति “ कुक्ष्यात्मोदरात्० ” [ ५. १. ९०. ] इति खौ– **आत्मंभरि** । कम्पेरंहेश्च “ अम्भि-कुण्ठि० ” [ उणा० ६१४. ] इति इप्रत्यये नलोपे च– **कपि, अहि** । तारयतेः “ स्वरेभ्यः ” [उणा० ६०६.] इति इप्रत्यये– **तारि** । “ मनिंच् ज्ञाने ” “ मनेः० ” [ उणा० ६१२. ] इति इप्रत्ययेऽस्य चोत्वे– **मुनि** । [ अञ्चेः ] “ अञ्चेः क च वा ” [ उणा० ६५६. ] इत्यतौ– **अञ्चति, अङ्कति** । शक्नोतेः “ कृपि-शकिभ्याम्० ” [ उणा० ६३०. ] इत्यटौ– **शकटि** । “ शसू हिंसायाम् ” “ राशत्० ” [ उणा० ६९६. ] इति बहुवचनात् त्रौ– **शस्त्रि** । रञ्जेः “ रञ्जेः कित् ” [ उणा० ६८१. ] इति कित्यनौ– **रजनि** । “ धृङ् धारणे ” “ ऋ-हृ-सृ० ” [ उणा० ६३८. ] इत्यणौ– **धरणि** । “ राक् दाने ” “ राशत्० ” [ उणा० ६९६. ] इति त्रौ– **रात्रि** । कृगो हृगश्च “ स्त्रियां क्तिः ” [ ५. ३. ९१. ] इति क्तौ– **कृतिः, हृतिः** । **अजननिः, अकरणिरि**ति– “ नञोऽनिः शापे ” [ ५. ३. ११७. ] इत्यनिः । “ ग्ला-हा-ज्यः ” [ ५. ३. ११८. ] इत्यनौ– **ग्लानिरि**त्यादि । **कथमि**ति– सनोतेः “ तिक्कृतौ० ” [ ५. १. ७१. ] इति तिकि “ तौ सनः० ” [ ४. २. ६४. ] इत्याकारे– **साति,** अत्रापि क्तिप्रत्ययोऽस्तीत्याशङ्कार्थः । परिहरति– **तिगन्तावि**त्यादि । **अन्ये त्वि**ति– । पाणिनेः पूर्वे । **सुगन्धिरि**ति– “सुपूत्युत्सुरभेर्गन्धादिद् गुणे”[७. ३. १४४.] इति इकारः । **निष्कौशाम्बिरि**ति– “ गोश्चान्ते० ” [ २. ४. ९६. ] इति ह्रस्वः । अणतेः “ कृ-शृ-कुटि० ” [ उणा० ६१९. ] इति णौ वृद्धौ च– **आणि** । श्यतेः “ का-वा-वी० ” [ उणा० ६३४. ] इति बहुवचनाण्णौ– **शाणि** । **क्तिमात्रवर्जनादि**ति– न तु क्त्यर्थवर्जनादित्यर्थः ॥ छ. ॥ २. ४. ३२. ॥

---

**न्या० स०—इतोऽक्त्यर्थात्** । **आवली**ति– आङ्पूर्वाद् वलेः “ पदि-पठि० ” [ उणा० ६०७. ] इति इकारे । **सरणी**ति– स्त्रियते गम्यतेऽनया “ ऋ-हृ-सृ० ” [ उणा० ६३८. ] इत्यादिनाऽणिः । **भरणी**ति– अग्निनिर्मथनकाष्ठम् । जनपदे भवा जाता वा “ उत्सादेरञ् ” । [ ६. १. १९. ] । अञ्चतेर्भार्याऽभेदोपचारेण **अञ्चती**ति– अग्निभार्या, अप्राप्तमपि धवयोगात् स्त्रीत्वम् । अङ्कतिः– वायुर्ब्रह्माग्निः, तेषां भार्याऽभेदोपचारेण– **अङ्कति** । **अंहती**ति– दानेऽपि “ तिरयो-ऽहति-शाणी ” [ लिङ्गानुशासने ] इति स्त्रीत्वम् । **शस्त्री**ति– “ शसू हिंसायां ” “ रा-शदि० ” [ उणा० ६९६. ] इति बहुवचनादत्रौ । **सातिरि**ति– “ वन षण भक्तौ ” सन्यादित्याशास्यमाना “ तिक्-कृतौ० ” [ ५. १. ७१. ] इति तिकि “ न तिकि दीर्घश्च ” [ ४. २. ६९. ] इति आत्वम् । **शाणिरि**ति– श्यतेः “ का-वा-वी० ” [ उणा० ६३४. ] इति बहुवचनाण्णौ । **क्तिमात्रे**ति– न तु क्त्यर्थवर्जनादित्यर्थः । **कथमि**ति– अत्रापि क्तिप्रत्ययोऽस्तीत्याशङ्कार्थः । **अन्ये त्वि**ति– पाणिनेः पूर्वे । ननु ‘ कृच्छेषा उणादयः ’ इति न्यायात् कृदन्तेभ्यश्चेत्यनेनै-

वाञ्छतिप्रभृतीनामुणादीनां ङीर्भविष्यति किं तेषां पृथगुपादानेन ? सत्यम्– तन्मते उणादीनामञ्चतिप्रभृतिशोण्यन्तानामेव भवति, तेनाणीत्यादीषु ङीर्न भवति ॥ २ ४. ३२. ॥

## पद्धतेः । २ । ४ । ३३ ॥

**त० प्र०—**पद्धतिशब्दात् स्त्रियां ङीर्वा भवति । पद्धती; पद्धतिः । क्त्यर्थे आरम्भः ॥ ३३ ॥

**श० न्या०—**पद्ध० । हननं हतिः, पादस्य हतिः पद्धतिः " हिमहति० " [ ३. २. ९६. ] इति पादस्य पद्भावः । अथ किमर्थमिदमिकारान्तत्वात् पद्धतिशब्दात् पूर्वेणैव ङीः सिद्ध्यतीत्याह– **क्त्यर्थे** इत्यादि– सुबोधम् ॥ छ. ॥ २. ४. ३३. ॥

**न्या० स०—पद्धतेः** । पादाभ्यां हन्यते " श्वादिभ्यः " [ ५. ३. ९२. ] क्तिः, " हिम–हति० " [ ३. २. ९६. ] पदादेशः, अथवा हननं– हतिः, पादस्य हतिः ॥ २. ४. ३३. ॥

## शक्तेः शस्त्रे । २ । ४ । ३४ ॥

**त० प्र०—**शक्तिशब्दाच्छस्त्रे स्त्रियां ङीर्वा भवति । शक्ती, शक्तिः । शस्त्र इति किम् ? शक्तिः– सामर्थ्यम् ॥ ३४ ॥

**श० न्या०—**शक्तेः० । शक्यतेऽनया हन्तुमिति श्वादित्वात् क्तौ ङ्यां च– **शक्ती** । शक्तिशब्दस्य क्त्यन्तत्वादक्त्यर्थादिति प्रतिषेधे प्राप्ते शस्त्रवाचिनो विकल्पे आरभ्यते, इति अन्यत्र न भवति– शक्तिः सामर्थ्यमिति ॥ छ ॥ २. ४. ३४. ॥

**न्या० स०—शक्तेः शस्त्रे** । शक्तिशब्दस्य क्त्यन्तत्वादक्त्यर्थादिति प्रतिषेधे प्राप्ते शस्त्रवाचिनो विकल्प आरभ्यत इति ॥ २. ४. ३४. ॥

## स्वरादुतो गुणादखरोः । २ । ४ । ३५ ॥

**त० प्र०—**स्वरात् परो य उकारः सामर्थ्यादेकवर्णव्यवहितस्तदन्ताद् गुणवचनात् खरुवर्जितान्नाम्नः स्त्रियां ङीर्वा भवति । गुणादिति सामान्योक्तावपि केवलगुणवृत्तेः स्त्रीत्वायोगात् ततो द्रव्यवृत्तेः प्रत्ययः । पट्वी, पटुः; मृद्वी, मृदुः; बह्वी, बहुः; साध्वी, साधुः; तन्वी, तनुः; लघ्वी, लघुः; विभ्वी, विभुः । स्वरादिति किम् ? पाण्डुर्भूमिः । उत इति किम् ? श्वेता पटी । गुणादिति किम् ? आखुः स्त्री, चिचीषुः स्त्री । अखरोरिति किम् ? खरुरियम् ।

" सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च, सोऽसत्त्वप्रकृतिर्गुणः " ॥ १ ॥

इति गुणमिह परिभाषन्ते । सत्त्वं– द्रव्यम्, तत्रैव निविशते– तदेवाश्रयति यः स गुण इति संबन्धः । द्रव्यादपैत्यपगच्छति– यथाऽऽम्रनीलता पीततायामुपजातायाम्, पृथग्जातिषु– भिन्नजातीयेषु दृश्यते, यथा सैव नीलता आम्रे दृष्टा तरुणतृणेषु दृश्यते, एतेन सर्वेण जातिर्गुणो न भवतीत्युक्तं भवति । आधेय– उत्पाद्यो यथा कुसुमयोगाद् गन्धो वस्त्रे, यथा वाऽग्निसंयोगाद् घटे रक्तता । अक्रियाजो– नित्यः, तद्यथाऽऽकाशादिषु महत्त्वादिः । तदेवं गुणस्योत्पाद्यत्वाऽनुत्पाद्यत्वप्रकारद्वयप्रदर्शनेनोत्पाद्यत्वैकप्रकारस्य कर्मणो व्यवच्छेदः । असत्त्वप्रकृतिः– द्रव्यस्वभावरहितः, अनेन द्रव्यस्य व्यवच्छेदः ॥ ३५ ॥

**श० न्या०—**स्वरा० । अर्थे कार्यासम्भवादुत इत्यादिविशेषणायोगाच्चोपचाराद् गुणवचनः शब्दो गुण इत्युच्यते, तस्योत इति पञ्चम्यन्तं समानाधिकरणं विशेषणम् । **अखरो**रिति खरुशब्दव्युदासेनापि **गुणा**दिति विशिष्यत इत्याह– **स्वरात् पर** इत्यादि । स च गुणवचनः शब्दो गुणनिमित्तो द्रव्ये वर्त्तमान एव स्त्रियां वर्तत इति विनापि वचनग्रहणं गुणमुक्त्वा द्रव्यवचनो यस्तत एव प्रत्ययो लभ्यत इत्याह– **पट्वी**ति– अत्र कन्यादिद्रव्यवृत्तिः पटुशब्दः । **पाण्डुर्भूमि**रिति– अत्रोकारो न स्वरात् पर इति ङीर्न भवति । यद्येवं पट्वीत्यादावपि न स्वरात् पर इति न स्यात्, नैष दोषः– नह्येकेन वर्णेन व्यवधानमन्तरेण स्वरात् पर उकारः सम्भवति यदन्तो गुणवचनः शब्दो भवति, तितउ इति परिवपनवाची न गुणवचनो न च स्त्रियां न च ततोऽन्यस्तादृशोऽस्ति, तदस्तित्वे च साक्षात् स एवोपादीयेत, अनेकेन तु व्यवधानमन्तरेणापि स्वरात् पर उकारः सम्भवति, ततः सामर्थ्यादेकेन वर्णेन व्यवधानमत्राश्रीयत इत्युक्तम्– **सामर्थ्यादेकवर्णव्यवहित** इति । यद्युत इति नोच्येत तदा सर्वत्र स्त्रीप्रकरणे विशेषानुपादानेऽत इत्यधिकारात् श्वेतेत्यत्रापि स्यादित्याह– **उत** इत्यादि । खरुशब्दो गुणवचनो मूर्खपर्यायत्वात् । **आखु**रिति जातिशब्दः । **चिचीषु**रिति क्रियाशब्दः, चेतुमिच्छतीति सन् ततो दीर्घादिः, सन्नन्तात् तु " सन्भिक्षा० " [ ५. २. ३३. ] इत्युप्रत्ययः, अत्र गुणादिति वचनाद् ङीर्न भवति । अथ " गुणोऽरेदोत् " [ ३. ३. २. ] इति परिभाषितः, विशेषणं गुण इति शास्त्रीयः, यथा– यस्य गुणस्य हि भावादित्यत्र, तथा गुणोऽप्रधानमिति लौकिकः, यथा च– गुणभूतावयमप्रधानभूता[ ववयम् ] इत्यर्थः, तत् कस्येह ग्रहणम् ? उच्यते– उत इति वचनान्न परिभाषितस्य ग्रहणम्, नह्यरेदोतमुकारोऽस्ति; नापि विशेषणस्य, तस्य त्वप्रत्ययवाच्यस्य सर्वत्र सम्भवाव्यवच्छेद्याभावाद् गुणग्रहणानर्थक्यप्रसङ्गादिति; नापि लौकिकस्याप्रधानस्य ग्रहणम्, गौणादित्य-

करणात्, तस्माद् यादृशोऽत्र गुणो गृह्यते तल्लक्षणमाह- **“सत्त्वे निविशते०”** इत्यादि। इदमेव स्पष्टार्थं व्याचष्टे- **सत्त्वं द्रव्यमि**त्यादि। तत्र निराधारस्य गुणस्यासम्भवात् सामर्थ्यादाधारे लब्धे सत्त्वग्रहणं नियमार्थमित्याह- **तत्रैवे**त्यादि। **द्रव्यादपैती**ति- ननु गुणाः कथं द्रव्यादपयान्ति, तथा चैवं द्रव्यलक्षणकाराः- क्रियावद् गुणवत् समवायिकारणं द्रव्यमिति, ततश्च न जातु द्रव्यं विरहय्य शुद्धो गुणः कथमप्यासितुमुत्सहत इति, नैवम्- न ब्रूमो द्रव्याद्द्रव्यपरिहारेण स्वतन्त्रा आसते, किं तर्हि? आगमापायिनो द्रव्यमन्ये जहति, केचिदाक्रमन्तीत्याह- **यथा आम्रादि**त्यादि- जातेरिव द्रव्ये नित्यावस्थानं तेषां नास्तीति तात्पर्येण प्रतिपाद्यते, तेन जातेर्वैधर्म्याद् गुणग्रहणेन जातेरग्रहणं सिद्धं भवति; यदि वा सम्भवति कस्मिंश्चित् सूक्ष्मदृशामनुमानागम्ये योगिप्रत्यक्षलक्ष्ये क्षणे द्रव्याणां गुणविरहितानां भावः, द्रव्यं हि समवायिकारणं, गुणानां तत्समवेतानामुत्पत्तेः, यावच्च प्राग् द्रव्यं नोत्पन्नं तावत् कथं गुणानां तत्समवेतानां भावः स्यात् कारणस्य कार्यात् पूर्वभावात्, तदेवं द्रव्यस्य स्वोत्पत्तिकालेऽवश्यं गुणरहितोऽभ्युपेयः, ततस्तस्मिन्नुत्पन्नेऽनन्तरं रूपादिगुणसमवाय इति, अपैतीति कश्चिन्नोपपद्यत इति। **पृथग्जातिष्वि**त्यसमासः, समासे हि जात्यन्तावीयः प्रसज्येत, तत्र व्यक्तिषु जात्याधारेषु दृश्यमानो जातिषु दृश्यत इत्युच्यते; एतेन जातेर्गुणत्वं निवारितं, सा हि द्रव्ये निविशमाना द्रव्यं न कदाचिज्जहाति, न च भिन्नजातीयानि द्रव्याण्याश्रयति। यद्यपि गवाश्वादिषु प्राणित्वमस्ति तथापि प्राणित्वेन तेषामेकजातीयत्वमेव। क्रियायास्तु पूर्वोक्तलक्षणयोगाद् गुणत्वं प्राप्नोति, सापि हि द्रव्ये निविशते कदाचिद् द्रव्यान्निवर्तते, निःक्रियं हि द्रव्यं कदाचिद् भवति, कदाचित् सक्रियं, भिन्नजातीयानि च द्रव्याण्याश्रयतीत्याह- **आधेय** इत्यादि। **उत्पाद्यो** निर्वर्त्य इत्यर्थः। **अक्रियाज** इति- क्रिया व्यापारः, ततो जातः क्रियाजः, न क्रियाजोऽक्रियाजो नित्य इत्यर्थः, तदेवं गुणस्योत्पाद्यत्वानुत्पाद्यत्वप्रकारद्वयदर्शनेन कर्मणां गुणत्वनिवृत्तिः कृता भवति। एवं तु द्रव्यस्यापि गुणत्वं प्राप्नोति, अवयविद्रव्यमवयवद्रव्येष्वेव निविशते, असमवायिकारणसंयोगनिवृत्तौ च विनाशात् ततोऽपैति भिन्नजातियेषु च हस्तपादादिषु दृश्यते, नित्यानित्यभेदाच्च द्विविधम्, निरवयवद्रव्यस्यात्मपरमाण्वादेर्नित्यत्वादवयविद्रव्यस्य त्वनित्यत्वादित्याह- **असत्त्वप्रकृति**रिति- अद्रव्यस्वभाव इत्यर्थः॥ छ.॥ २. ४. ३५.॥

**न्या० स०—स्वरादुतो०**। अर्थे कार्यासम्भवादुत इत्यादिविशेषणायोगादुपचाराद् गुणवचनः शब्दो गुण इत्युच्यते। **स्त्रीत्वायोगा**दिति- उकारान्तस्य पुंस्त्वविधानादित्यर्थः। **खरुरियमि**ति- क्रूरा मूर्खा दर्पिष्ठा श्वेता वा स्त्री, “खरुः स्यादश्व-हरयोर्दर्प-दन्त-सितेषु च”। यद्यपि महत्त्वरूपस्याकाशगुणस्यापैतीति विशेषणं न घटते तथाप्याम्रादिस्थितनीलादिगुणस्य घटमानं सर्वस्यापि विशेषणं भवति, यथा कस्यचिद् गोश्चन्द्रक इति विशेषणं चिह्नं कृतं चन्द्रकोऽयं गौरिति, पश्चाद् गोसमूहोऽपि चन्द्रकोऽयमित्युच्यते तथाऽत्रापि भविष्यति॥ २. ४. ३५.॥

## श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च। २। ४। ३६॥

**त० प्र०—एभ्यो वर्णवाचिभ्यः स्त्रियां ङीर्वा भवति, तत्संनियोगे तकारस्य नकारश्च भवति। श्येनी, श्येता एनी, एता; हरिणी, हरिता; भरणी, भरता; रोहिणी रोहिता; लत्वे- लोहिनी, लोहिता। वर्णादिति किम्? श्येता, एता। चकारो नकारस्य ङीसंनियोगशिष्टतार्थः॥ ३६॥**

**श० न्या०—श्येतै०**। श्येतादयः शब्दाः, तेषां वर्णत्वमनुपपन्नमतोऽयमर्थो विज्ञायत इत्याह- **वर्णवाचिभ्य** इत्यादि- वर्णः कृष्णनीलादिः। **तत्सन्नियोग** इति- यदा ङीप्रत्ययस्तदैषां तकारस्य नकार इत्यर्थः। वाधिकारः प्रधानत्वात् प्रत्ययविधिनैव सम्बध्यते, न नकारादेशेन, तेन ङीप्रत्यये सति नकारादेशो न विकल्प्यत इति। “श्यैङ् गतौ” अतो “हृश्यारुहि०” [ उणा० २१०. ] इति इते- [ **श्येत**, “इंण्क् गतौ” इत्यतः “दम्यमि०” [ उणा० २००. ] इति ते- **एत**, “रुहं जन्मनि” इत्यतः “हृ-श्या-रुहि०” [ उणा० २१०. ] इतीते- ] **रोहित**। अथ कथं लोहिनीति, न लोहितशब्द इह पठ्यते, अस्ति चायं प्रयोग इत्याह- **लत्व** इत्यादि- ऋफिडादित्वादिति शेषः। **चकार** इति- यदि चकारो न क्रियेत “श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नः” इत्युच्यमाने श्येतादेर्वर्णवाचिनो ङीर्भवति, तकारस्य नकारो भवतीति, अयं नकारो ङीसन्नियोग एव भवति, असतीत्य[ असति चग्रहणे त्व ]यमर्थो न लभ्यते, विधेरनपेक्षत्वात् ततश्च ङ्यभावेऽपि नकारः स्यात्, चकारे तु नैवेति यत्परश्चकारः श्रूयते तस्य भावे द्वितीयापेक्षता प्रतीयते, तेन केवलो नकारो न भवति, सन्नियोग एव तु भवति, इति नकारस्य चकारो ङीसन्नियोगशिष्टतार्थः क्रियत इति॥ छ.॥ ॥ २. ४. ३६.॥

**न्या० स०—श्येतैत०**। वाऽधिकारः प्रधानत्वात् प्रत्ययविधिनैव संबध्यते। **श्येनीति**- शुभ्रा। **एनी** कर्बुरा शुभ्रा वा।

हरिणी नीला । भरणी पाटला धूसरा श्वेतवर्णा वा । रोहिणी रक्ता इत्यर्थः ॥ २. ४. ३६. ॥

## क्नः पलिता-ऽसितात् । २ । ४ । ३७ ॥

**त० प्र०—**त इति चेति चानुवर्तते, पलितासिताभ्यां स्त्रियां ङीर्वा भवति, तत्संनियोगे तकारस्य क्नादेशश्च । पलिक्नी, पलिता; असिक्नी, असिता ॥ ३७ ॥

**श० न्या०—क्नः प०** । ङीप्रत्ययसम्बन्धे पञ्चमी, तस्यैव च विकल्प इत्याह– **ङीर्वा भवती**ति । त इत्यनुवर्तमानस्य तकारस्यादेशो ङीप्रत्ययसन्नियोगे, तदर्थश्चेह चकारोऽनुवर्तत एवेत्याह– **तत्सन्नियोग** इत्यादि । " पल गतौ " इत्यतो " हृ-श्या-रुहि० " [ उणा० २१०. ] इति इते– **पलित** । सिनोतेः " मुसि-तनि० " [ उणा० २०३. ] इति ते– **सित,** पश्चान्नञ्वृत्त्याऽसितशब्देनाधर्मानृतन्यायेन सितप्रतिपक्षो वर्ण उच्यते, तदैव ङीप्रत्ययः क्नादेशश्च, यदा तु सिता बद्धा, न सिताऽसितेति तदा न स वर्ण इति तत्र द्वयमपि न भवति । पलितशब्दोऽपि केशरोगविषये वर्णे, अन्ये तु पलिक्नीति भाषायां नेच्छन्ति, यदुद्द्योतकरः " गतो गणस्तूर्णमसिक्निकानाम् " इति भाषायां प्रमादयोग एवेति ॥ छ ॥ २. ४. ३७. ॥

**न्या० स०—क्नः पलिता०** । ङीप्रत्ययसम्बन्धे पञ्चमी, तस्यैव च विकल्प इत्याह– **ङीर्वे**ति । **असिक्नी**ति– असितशब्देनाधर्मानृतन्यायेन सितप्रतिपक्षो वर्ण उच्यते, तदैव ङीप्रत्ययः क्नादेशश्च, यदा तु सिता– बद्धा, न सिताऽसितेति तदा न स वर्ण इति तत्र द्वयमपि न भवति । पलितशब्दोऽपि केशरोगविषये वर्णे, पलितमस्या अस्ति अभ्रायः, या गौर्लब्ध्यपि गर्भं दधाति सा **असिक्नी** अन्तःपुरदूती च ॥ २. ४. ३७. ॥

## असह-नञ्-विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः । २ । ४ । ३८ ॥

**त० प्र०—**सह-नञ्-विद्यमानवर्जितपूर्वपदं यत् स्वाङ्गं, तदन्तात् क्रोडादिगणवर्जितान्नाम्नोऽकारान्तात् स्त्रियां ङीर्वा भवति । **पीनस्तनी, पीनस्तना; अतिक्रान्ता केशानतिकेशी, अतिकेशा माला; निष्क्रान्ता केशेभ्यो निष्केशी, निष्केशा यूका; स्वडी, स्वडा वृश्चिकी, अडो नाम वृश्चिकावयवः । असह-नञ्-विद्यमानपूर्वपदादिति किम् ? सहकेशा, अकेशा, विद्यमानकेशा । स्वाङ्गादिति किम् ? बहुयवा । अक्रोडादिभ्य इति किम् ? कल्याणी क्रोडा अस्याः कल्याणक्रोडा, क्रोड-शब्दः स्त्रीक्लीबलिङ्गः; कल्याणखुरा, पीनगुदा, एकशफा, दीर्घबाला, भव्यभाला, सुगला, सुभगा; कल्याणी उखा– स्फिक् यस्याः सा कल्याणोखा, कल्याणगोखा । बहुवचनमाकृतिगणार्थम्, तेन– किशलयकरा, मृणालभुजेत्यादि । आदिरित्येव– परमशिखा ।**

**" अविकारोऽद्रवं मूर्तं, प्राणिस्थं स्वाङ्गमुच्यते ।**
**च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥ १ ॥ "**

**इति च स्वाङ्गम् । अविकार इति किम् ? बहुशोफा । अद्रवमिति किम् ? बहुकफा । मूर्तमिति किम् ? बहुज्ञाना । प्राणिस्थमिति किम् ? दीर्घमुखा शाला । च्युतं च प्राणिनस्तदिति किमर्थम् ? अप्राणिस्थादपि पूर्वोक्ताद् यथा स्यात्– बहुकेशी, बहुकेशा रथ्या । तन्निभं च प्रतिमादिष्विति किमर्थम् ? प्राणिस्थसदृशादपि पूर्वोक्ताद् यथा स्यात्– पृथुमुखी, पृथुमुखा प्रतिमा । कथं कल्याणं पाणिपादमस्याः कल्याणपाणिपादा इत्यत्र न भवति ? स्वाङ्गसमुदायो हि न स्वाङ्गम्, बहुस्वरत्वेन वक्ष्यमाणनियमबलाद् वा न भवतीति । द्विपादी, त्रिपादीत्यत्र तु " द्विगोः समाहारात् " [ २. ४. २२. ] इति विशेषविधानाद् नित्यमेव ङीर्भवति । अस्वाङ्गपूर्वपदादेवेच्छन्त्यन्ये– पाणी एव पादौ यस्याः सा पाणिपादा, मुखमेव नासिका यस्याः सा मुखनासिका ॥ ३८ ॥**

**श० न्या०—असह०** । सहश्च नञ् च विद्यमानश्च सह-नञ्-विद्यमानाः, ते पूर्वपदं यस्य तत् तथोक्तम्, पश्चान्नञ्समासः, पूर्वोत्तरपदयोः समास एव सम्भवात् पूर्वपदोपादानात् समासलाभात्, अत इत्यधिकारादकारान्तस्य स्वाङ्गस्य स्त्रियां कार्यविधानात्, तस्य च समासे मुख्यस्याकारान्तस्य स्त्रीत्वाभावात् स्वाङ्गमुपसर्जनमिह गृह्यते । यद्येवं पूर्वपदग्रहणमतिरिच्यते, ' असहनञ्विद्यमानात् ' इति पर्युदासात् " पञ्चम्या निर्दिष्टे परस्य " [ ७. ४. १०४ ] तत्रानन्तरस्येति न्यायात् सहादिवर्जितेभ्यो यदुत्तरमव्यवहितं स्वाङ्गमुपसर्जनं तदन्तादिति विज्ञानात् पूर्वपदस्य लब्धत्वात्, नैवम्– असति पूर्वपदग्रहणे पञ्चमीनिर्देशमात्रादिहापि प्रतिषेधः प्रसज्येत– विद्यमानं च तन्मुखं– विद्यमानमुखं, कल्याणं विद्यमानमुखं यस्याः सा– कल्याणविद्यमानमुखीति । नन्वेतदनुपपन्नं– सहादिभ्यो यदुत्तरं स्वाङ्गं तदन्तात् प्रतिषेध इति विज्ञायमाने कथमत्र प्रतिषेधस्य प्राप्तिः ? अत्र हि विद्यमानशब्दात् परं यत् स्वाङ्गं न तदन्ताद् विधिरस्ति, तस्य स्त्रियामवृत्तेः, विधिपूर्वकश्च प्रतिषेधः कथमत्र सम्भाव्यते ?, यच्च स्त्रियां वर्तते कल्याणादि न तदुपसर्जनस्वाङ्गान्तं, विद्यमानमुखान्तत्वात् तस्य, स्यादेतद्– विद्यमानमुखशब्दो यस्यान्तस्तस्य मुखशब्दोऽप्यन्तः, अवयवावयवत्वात्, नैवम्– उपसर्जनस्य स्वाङ्गस्य सहादिवर्जितेभ्य उत्तरस्य ग्रहणात्; न चात्र विद्यमानशब्दात् परं स्वाङ्गमुपसर्जनमस्ति, कर्मधारये तस्य प्राधान्यात्, बहुव्रीहौ च तदन्तस्य समुदाय-

स्योपसर्जनत्वात्; स्यादेतद्– विद्यमानं मुखं यस्य [ स ] विद्यमानमुखः, कल्याणो विद्यमानमुखो यस्याः सा कल्याणविद्यमानमुखीत्यत्रासति पूर्वपदग्रहणे प्रतिषेधः प्राप्नुयात्, नैष दोषः– सहादिभ्यो यदुत्तरं स्वाङ्गं तदन्तात् स्त्रीत्वे प्रतिषेध इति विज्ञायमाने कथमत्र प्राप्नुयात् ? द्वौ ह्यत्र बहुव्रीही, तत्र [य] उपसर्जनस्वाङ्गान्तो नासौ स्त्रीवृत्तिः, यश्च स्त्रीवृत्तिः स न वर्जितस्वभावस्वाङ्गान्तोऽवयवावयवस्यानारम्भकत्वादवयवत्वेनाग्रहणात्, नैवम्– असति पूर्वपदग्रहणे " पञ्चम्या निर्दिष्टे० " [ ७. ४. १०४. ] इति न्यायात् सहादिभ्यो व्यवहितं यत्र स्वाङ्गं तत्रैव प्रतिषेधः स्यात्, विद्यमानं कल्याणं मुखं यस्याः सा विद्यमानकल्याणमुखेति न स्यात्, सति तु पूर्वपदग्रहणे विद्यमानशब्दस्य पूर्वपदत्वात् तदानन्तर्याभावेऽपि ङीनिषेधः सिद्धः । पीनौ स्तनौ यस्याः ( शोभनोऽङ्को यस्याः ) सा **पीनस्तनी**ति बहुव्रीहिः, अन्यत्र प्रादितत्पुरुषः, अनयोरेव [ समासयोः ] प्रायेण स्वाङ्गस्योपसर्जनत्वं, **सहकेशे**त्यादौ सर्वत्र च बहुव्रीहिः । **कल्याणक्रोडे**ति– " परतः स्त्री पुंवत् " [ ३. २. ४९ ] इति पुंवद्भावः, **क्रोडशब्दः स्त्रीक्लीबलिङ्ग** इति– यदुक्तं स्वोपज्ञलिङ्गानुशासनकारिकायां—

" स्त्रीक्लीबयोर्नखं शुक्तौ, विश्वं मधुकमौषधे ।
माने लक्ष्यं मधौ कल्यं, क्रोडोऽङ्के तिन्दुकं फले ॥ " इति ।

**कल्याणखुरे**त्यादयो बहुव्रीहयः । [ " गुंत् पुरीषोत्सर्गे " इत्यतः ] " गोः कित् " [ उणा० २३९. ] इति [ किति दे– ] गुदः । शायते– तनूक्रियते इति शफः, " शफ–कफ० " [ उणा० ३१६. ] इति निपातनाच्छफः । " भलि परिभाषणे " घञि– भालः, शेषास्तु व्युत्पादिताः । **बहुवचनमि**ति आकृतिगणार्थतायाः फलं दर्शयति– **तेने**त्यादि । **परमशिखे**ति– परमा शिखा– परमशिखा, अत्रान्तरङ्गत्वादापि कृते तदन्तेन समासस्तत आदित्यधिकारान्न भवति, उपलक्षणमिदम्, कल्याणपाणिरिति तु प्रत्युदाहरणम् । यत्र स्वाङ्गादित्युच्यते तत्र यदि स्वमात्मीयमङ्गं– स्वाङ्गमिति विज्ञायेत तदास्मात् प्रतिपत्तव्यो यस्य तदङ्गमिति, यदि स एव [ तर्हि ] स्वग्रहणानर्थक्यं तस्य तत्सम्बन्धाव्यभिचारात्, तस्मात् पारिभाषिकमिह स्वाङ्गं ग्रहीतव्यमिति तस्य लक्षणमाह– **अविकारोऽद्रवं मूर्त्तं प्राणिस्थं स्वाङ्गमुच्यते** इति प्रथमं लक्षणं, विकारो वातादिक्षोभजन्मा शोफादिरतत् स्वाङ्गं न भवति, तेनेह ङीर्न भवति– **बहुशोफे**ति– शोफस्य विकाररूपत्वादिति । द्रवणं द्रवः, न द्रवोऽस्येत्यद्रवं, द्रवतीति वा द्रवं, न द्रवमद्रवं स्वाङ्गम्, नेह भवति– **बहुकफे**ति– कफे हि द्रवः । रूपादियोगो मूर्तिः, असर्वगतद्रव्यपरिमाणं वा, तद्योगान्मूर्त्तं पुद्गलद्रव्यम्, **बहुज्ञाने**त्यत्र तु ज्ञानस्यात्मधर्मत्वान्मूर्त्तत्वाभावान्न भवति । आयुरुच्छ्वासबलेन्द्रियाणि प्राणाः, ते[ ये ]षां सन्ति ते प्राणिनः, ते चेह " प्राण्यौषधिवृक्षेभ्योऽवयवे च " [ ६. २. ३१. ] इति प्राणिग्रहणानन्तरं वृक्षौषधिग्रहणाद् द्वीन्द्रियादयस्त्रसा उच्यन्ते, तत्रस्थं स्वाङ्गं, तेनेह न भवति– **दीर्घमुखा शाला,** शालायाः प्राणरहितत्वेनाप्राणित्वात् प्राणिस्थमिति वचनादप्राप्तिरिति । अपरं लक्षणद्वयमुच्यते– **च्युतं च प्राणिनस्तत्** तद्–अविकारादिलक्षणयुक्तं प्राणिनः प्रच्युतमपि स्वाङ्गं भवति, तेनेह ङीर्भवति– **बहुकेशी**त्यादि । तदिति वचनादिह न भवति– **बहुकफा रथ्ये**ति । **तन्निभं च प्रतिमादिष्वि**ति– आदिशब्दादालेख्यादिपरिग्रहः, यत् प्राणिस्थं स्वाङ्गं तत्तुल्यं च स्वाङ्गं भवति, तस्य विषयं दर्शयति– **प्रतिमादिष्वि**ति– तेनेह भवति– **पृथुमुखी**त्यादि । दीर्घमुखा शालेत्यत्र तु मुखं– द्वारं, तन्न तन्निभमिति न भवति । **कथमि**ति– पाणी च पादौ च पाणिपादमिति द्वन्द्वगर्भे बहुव्रीहौ पाणिपादेत्यस्योत्तरपदस्य स्वाङ्गत्वाद् विकल्पः प्राप्नोतीति आशङ्कार्थः । **स्वाङ्गशब्दो [ समुदायो ] ही**त्यादिना परिहरति, अत्र हि पाणीत्येकं स्वाङ्गं पादेत्यपरं, तदनयोः समुदायरूपं पाणिपादेत्येवं स्वाङ्गमस्ति, यथा स्कन्धाङ्गुल्यादिसमुदायः पाणिरिति । परिहारान्तरमप्याह– **बहुस्वरत्वेने**त्यादि । द्वयोः पादयोः समाहार इत्यादिविग्रहे **द्विपादी**त्यादि । अत्र पूर्वपदादित्यतः समाहारमात्रग्रहणाद् । द्विगोरपि प्राप्तौ ङीविकल्पो विशेषविधानेन बाध्यत इत्याह– **अत्र त्वि**त्यादि । **अन्य इ**ति... ॥ छ ॥ २. ४. ३८. ॥

---

**न्या० स०—असहन०** । सह-नञ्-विद्यमानशब्दानां पूर्वपदरूपाणां वर्जनाद् मध्यपदेन स्वाङ्गस्य व्यवधानेऽपि ङीप्रतिषेधः, यथा– विद्यमानं कल्याणं मुखं यस्याः सा विद्यमानकल्याणमुखेति । **पीनगुदे**ति– " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– गुदं स्त्रीणामपाङ्गम्– अपकृष्टमङ्गम्, कल्याणं गुदमस्या इति न्यासः । **भव्यभाले**ति– " भलि भल्लि परिभा० " घञि– भालः ललाटः । **कल्याणगोखे**ति– उखाशब्दसान्निध्यात् स्त्रीत्वं ज्ञायते । गोरिव खम्– इद्रियं यस्याः सा गोखा, कल्याणा गोखा यस्या इति, अवयवविशेषो जघनरूपः । **अविकार** इति– विकारो वातादिजन्मशोफादिः । **अद्रवमि**ति– द्रवणं द्रवः, न द्रवोऽस्येत्यद्रवम्, द्रवतीति द्रवं, न द्रवमद्रवं वा । **मूर्त्तमि**ति– रूपादियोगो मूर्त्तिः, असर्वगतद्रव्यपरिमाणं वा, तद्योगान्मूर्त्तं पुद्गलद्रव्यम् । **च्युतं च प्राणिन** इति–अपरं लक्षणद्वयमुच्यते, तद्– अविकारादिलक्षणयुक्तं, प्राणिनः च्युतमपि स्वाङ्गं भवति ॥ २. ४. ३८. ॥

## नासिकोदरोष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गा-ऽङ्गगात्र-कण्ठात् । २ । ४ । ३९ ॥

**त० प्र०—** असह-नञ्-विद्यमानपूर्वपदेभ्य एभ्यः स्वाङ्गेभ्यः स्त्रियां ङीर्वा भवति, पूर्वेण सिद्धे नियमार्थमिदम्, तेन—नासिकोदराभ्यामेव बहुस्वराभ्याम्, ओष्ठादिभ्य एव च संयोगोपान्त्येभ्यो भवति, नान्येभ्यः । तुङ्गनासिकी, तुङ्गनासिका; कृशोदरी, कृशोदरा; बिम्बोष्ठी, बिम्बोष्ठा; दीर्घजङ्घी, दीर्घजङ्घा; समदन्ती, समदन्ता; चारुकर्णी, चारुकर्णा; तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा; मृद्वङ्गी, मृद्वङ्गा; सुगात्री, सुगात्रा; स्निग्धकण्ठी, स्निग्धकण्ठा । असह-नञ्-विद्यमानपूर्वपदादित्येव—सहनासिका, अनासिका, विद्यमाननासिका; सोदरा, अनुदरा; विद्यमानोदरा; इत्यादि । नियमः किम् ? पृथुजघना, सुललाटा, दृढहृदयेत्यादौ बहुस्वराद् न भवति; कल्याणगुल्फा, सुपार्श्वा इत्यादौ संयोगोपान्त्यान्न भवति । अङ्ग-गात्र-कण्ठेभ्यो ङीप्रत्ययं नेच्छन्त्यन्ये । केचित् तु दीर्घजिह्वशब्दादपीच्छन्ति—दीर्घजिह्वी, दीर्घजिह्वा कन्येति ॥ ३९ ॥

**श० न्या०—** नासि० । जनेः " स्था-ऽर्ति-जनिभ्यः० " [ उणा० १०९. ] इति घे- जङ्घा । किरतेः " इणुर्विश० " [ उणा० १८२. ] इति णे- कर्णः । कणतेः " वनि-कणि० " [ उणा० १६२. ] इति ठे-कण्ठः । शेषास्तु पूर्वं साधिताः । असहादिपूर्वपदस्वाङ्गान्तत्वान्नासिकाद्यन्तादपि पूर्वेणैव ङीः सिद्धः, किमर्थमिदमित्याह- **पूर्वेणे**त्यादि । नियमफलमाह- **तेने**त्यादि । " तुजु वलने च " इत्यतो घञि उद्गादित्वाद् गे- तुङ्गः । बिम्ब्या विकारः फलं हिमायनः " फले " [ ६. २. ५८. ] लुपि " ङ्यादेर्गौणस्य० " [ २. ४. ९५. ] इति ङीनिवृत्तिः । समशब्दोऽजन्तः । तुङ्गा नासिका यस्या इत्यादि विगृह्य " एकार्थं चा० " [ ३. १. २२. ] इति समासे यथासम्भवं " गौश्चान्ते० " [ २. ४. ९६. ] इति ह्रस्वत्वे " वौष्ठौतौ समासे " [ १. २. २७ ] इति पक्षे आकारलोपे **तुङ्गनासिकी**त्यादि । **पृथुजघने**ति- [ हन्तेः ] " हनेर्घत-जघौ च " [ उणा० २७२. ] इत्यने- जघनम्, पृथु जघनमस्याः कल्याणौ गुल्फावस्या इति विगृह्य " आत् " [ २. ४. १८. ] इत्याप् । " गल अदने " " कलि-गलेरस्योच्च " [ उणा० ३१५.] इति गुल्फ । **अन्य** इति- भाष्यकारादयः । जयादित्यस्त्विच्छन्ति, यतः शिवेन लक्ष्यानुरोधेनोक्ताः । **केचित् त्वि**ति- पूर्वे हि दीर्घजिह्वी च छन्दसी[ ति ] पाठाच्छन्दोविषयममुं मन्यन्ते ॥ २. ४. ३९. ॥

**न्या० स०—** नासिको० । **सहनासिके**ति- सहस्य सो विकल्पेन भवतीत्यत्र न । **तुङ्गनासिकी**ति- " तुजु वलने च " इत्यस्य घञि उद्गादित्वाद् गे- तुङ्गा । **समदन्ती**ति- समशब्दोऽजन्तः । **कल्याणगुल्फे**ति- " गल अदने " " कलि-गलेरस्योच्च " [ उणा० ३१५. ] इति फे- गुल्फः, कल्याणौ गुल्फावस्याः ॥ २. ४. ३९. ॥

## नख-मुखादनाम्नि । २ । ४ । ४० ॥

**त० प्र०—** असह-नञ्-विद्यमानपूर्वपदाभ्यां स्वाङ्गाभ्यां नख-मुखशब्दाभ्यां स्त्रियां ङीर्वा भवति, अनाम्नि- असंज्ञायामेव । शूर्पनखी, शूर्पनखा; अतिनखी, अतिनखा; चन्द्रमुखी, चन्द्रमुखा; अतिमुखी, अतिमुखा । अनाम्नीति किम् ? शूर्पणखा, व्याघ्रणखा, वज्रणखा, गौरमुखा, श्लक्ष्णमुखा, कालमुखा; संज्ञाशब्दा एते ॥ ४० ॥

**श० न्या०—** नख० । **शूर्पनखी**ति-शूर्प इव नखोऽस्या इति समासः, शूर्पाकारनखयोगोऽत्र विवक्ष्यते, न संज्ञेति पाक्षिको ङीर्भवति, एवम्- **अतिनखी**त्यादि । **शूर्पणखे**ति- " पूर्वपदस्थान्नाम्नि० " [ २. ३. ६४. ] इति णत्वम् । **संज्ञाशब्दा एत** इति- न तु यौगिका इत्यर्थः ॥ छ. ॥ २. ४. ४०. ॥

**न्या० स०—** नखमु० । **संज्ञाशब्दा एते** इति- न तु यौगिका इत्यर्थः ॥ २. ४. ४०. ॥

## पुच्छात् । २ । ४ । ४१ ॥

**त० प्र०—** असह-नञ्-विद्यमानपूर्वपदात् स्वाङ्गात् पुच्छात् स्त्रियां ङीर्वा भवति । दीर्घपुच्छी, दीर्घपुच्छा; अतिपुच्छी, अतिपुच्छा । असह-नञ्-विद्यमानपूर्वपदादित्येव- सपुच्छा, अपुच्छा, विद्यमानपुच्छा ॥ ४१ ॥

**श० न्या०—** पुच्छा० । नासिकादिनियमान्निवृत्तौ वचनम्, यद्येवं नासिकादिसूत्र एव कुतो न पठ्यते ? किमर्थं पृथगुद्दिश्यत इति, उच्यते- पुच्छादित्येवोत्तरसूत्रेऽनुवर्त्तताम्, माऽन्यदित्येवमर्थत्वाददोषः ॥ छ. ॥ २. ४. ४१. ॥

**न्या० स०—** पुच्छात् । नासिकादिनियमान्निवृत्तौ वचनम्। यद्येवं नासिकादिसूत्र एव कुतो न पठ्यते ? किमर्थं पृथगुद्दिश्यत इति, उच्यते- पुच्छादित्यस्यैवोत्तरत्रानुवृत्त्यर्थम् ॥ २. ४. ४१. ॥

## कबर-मणि-विष-शरादेः । २ । ४ । ४२ ॥

**त० प्र०—** कबरादिपूर्वात् पुच्छात् स्त्रियां नित्यं ङी-

भवति, पुनर्विधानं नित्यार्थम् । कबरं– कर्बुरं कुटिलं वा पुच्छमस्याः– कबरपुच्छी, मणिः पुच्छेऽस्या मणिपुच्छी, विषं पुच्छेऽस्या विषपुच्छी; शरं पुच्छेऽस्याः शरपुच्छी ॥ ४२ ॥

श० न्या०—कब० । विकल्पस्य पूर्वेणैव सिद्धत्वात् सूत्रप्रयोजनमाह– **पुनर्विधानम्**इत्यादि । कबरशब्दो वर्णवाची कुटिलवाची चेत्याह– **कबरम्**इत्यादि । **मणिपुच्छी, विषपुच्छी** इन्द्वादित्वान्मणि-विषयोः पूर्वनिपातः । वृत्तिविषये शरतुल्ये पुच्छे शरशब्दः, तेन शरः पुच्छमस्या इति विग्रहः, आकाराऽऽकारवतोर्भेदविवक्षया वृत्तौ व्यधिकरणबहुव्रीहिर्दर्शितोऽर्थस्तु न भिद्यत इति; एवं मणिपुच्छीत्यादावपि द्रष्टव्यम् ॥ छ. ॥ २. ४. ४२. ॥

न्या० स०—कबरम० । "न सप्तमीन्द्वादिभ्यश्च" [ ३. १. १६५. ] इत्यनेन मणिपुच्छीत्यादिषु मण्यादिशब्दानां पूर्वनिपातः ॥ २. ४. ४२. ॥

## पक्षाच्चोपमानादेः । २ । ४ । ४३ ॥

त० प्र०—उपमानपूर्वात् पक्षशब्दात् पुच्छशब्दाच्च स्त्रियां ङीर्भवति । उलूकस्येव पक्षावस्या उलूकपक्षी शाला, उलूकस्येव पुच्छमस्या उलूकपुच्छी सेना ॥ ४३ ॥

श० न्या०—पक्षा०–उपमीयतेऽनयेत्युपमा– उपमानम्, प्रसिद्धसाधर्म्यादप्रसिद्धविषये येन ज्ञानमुपजन्यत इति । **उलूकपक्षी**ति– अत्रोलूकशब्द उलूकपक्षे उलूकपुच्छे च वर्तते; यथोष्ट्रमुखे उष्ट्रशब्दः, अतश्चोलूकशब्द उपमानं भवतीत्युलूकः पक्षावस्या इत्यादि विग्रहः, उलूकस्येव पक्षावस्या इत्यादि त्वर्थकथनम् ॥ छ. ॥ २. ४. ४३. ॥

न्या० स०—पक्षाच्चो० । उपमीयतेऽनयेति बाहुलकात् "उपसर्गादातः" [ ५. ३. ११०. ] इत्यङ्, प्रसिद्धसाधर्म्यादप्रसिद्धविषये येन ज्ञानमुपजन्यत इति । "कबर-मणि-विष-शरादेः पक्षाच्चोपमादेस्तु" इत्येकयोगाकरणात् स्वाङ्गादेरिति निवृत्तम् । **उलूकस्येव पक्षावस्या** इति– अत्र उलूकशब्द उलूकपक्षे उलूकपुच्छे च वर्तते, यथोष्ट्रमुखे उष्ट्रशब्दः, अतश्चोलूकशब्द उपमानं भवतीत्युलूक इव पक्षावस्या इत्यादिविग्रहः, उलूकस्येव पक्षावित्यादि त्वर्थकथनम् ॥ २. ४. ४३. ॥

## क्रीतात् करणादेः । २ । ४ । ४४ ॥

त० प्र०—करणमादिरवयवो यस्य तस्मात् क्रीतान्ताद् नाम्नोऽकारान्तात् स्त्रियां ङीर्भवति । अश्वेन क्रीयते स्म अश्वक्रीती, धनक्रीती, वस्त्रक्रीती, विभक्त्युत्पत्तेः पूर्वमेव कृदन्तेन समासः; मनसाक्रीती, अलुप् । करणग्रहणं किम् ? सुक्रीता, दुष्क्रीता । आदिग्रहणं किम् ? अश्वेन क्रीता, नह्यत्र करणं क्रीतान्तस्य नाम्न आदिरवयवो भवति, ऐकपद्याभावात् । कथं "सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी" इति, धनं च सा क्रीता चेति कर्मधारयोऽयम्, करणविवक्षायामपप्रयोग एव । केचित् तु धनेन क्रीतेत्यत्राबन्तेनापि समासमिच्छन्ति बहुलाधिकारात्, तदाऽकारान्तत्वाभावात् ङीर्न भवति ॥ ४४ ॥

श० न्या०—क्रीता० । आदिशब्दः प्राच्यस्यावयवस्य वाचक इत्याह– **करणमादिरि**त्यादि– तस्य च करणमाद्यवयवः समास एवोपपद्यत इति विशेषणसामर्थ्यात् समासो लभ्यते । **अश्वक्रीती**ति– "कारकं कृता" [ ३. १. ६८. ] इति समासः, अत इत्यधिकारादन्तरङ्गोऽप्याबत्र विषये न भवति, अत अश्वक्रीत इति स्थिताद् ङीः । **विभक्त्युत्पत्ते**रिति– *गतिकारकोपपदानाम्* इति न्यायाद् विभक्त्युत्पत्तेः प्रथममेव समासः, अन्यथा विभक्त्यन्तस्य समासेऽन्तरङ्गे "आत्" [ २. ४. १८. ] इत्यापि विभक्तौ चाऽकारान्तता दुर्लभा स्यादित्यर्थः । **अलु**बिति– "नाम्नि" [ ३. २. १८. ] इत्यनेनेति शेषः । **सुक्रीते**ति– शोभनं क्रीतेति विग्रहः, प्रादिसमासोऽप्यस्याबन्तेनैव । अश्वेन क्रीता इति क्रियमाणेऽपि करणादिग्रहणे आदिशब्दस्य व्यवस्थावाचित्वात् प्राप्नोति, एषोऽपि हि करणादिरित्याशङ्कायामाह– **नह्यत्रे**त्यादि– विभक्त्या व्यवहितत्वान्न भविष्यति, कर्मादीनां द्योतका विभक्तय इति दर्शने इदमुच्यते, अन्यथा विभक्तेः करणाभिधाने व्यवधानाभावः । यद्येवं मनसाक्रीतीति "नाम्नि" [ ३. २. १८. ] इत्यलुकि विभक्त्या व्यवधानाद् ङीर्न सिद्ध्यति, नात्र करणमादिरस्मात् क्रीतशब्दात् सोऽयं करणादिः, किन्त्वादिशब्दस्यावयववचनत्वात् करणमादिरवयवो यस्य नाम्नः, समासनाम चान्यपदार्थः, तेन करणादेर्नाम्नः क्रीताद् ङीर्भविष्यति, वाक्ये चैकपद्याभावात् समासाभावात् क्रीतान्तस्य नाम्नोऽसम्भवाद् ङीर्न भविष्यतीति । **सा हि तस्य धनक्रीते**ति प्रयोगदर्शनादाह– **कथमि**त्यादि । साधयन्नाह– **धनं च से**त्यादि । धनेन क्रीतेति प्रतिपत्तौ च प्रयोग एव न, भाष्य-वार्तिककारादिभिरनुक्तत्वादित्यत आह– **करणविवक्षायामि**त्यादि । **केचित्त्वि**ति– जयादित्यः । अत्र हेतुमाह– **बहुलाधिकारादि**त्यादि– अयं चार्थो "ङस्युक्तं कृता" [ ३. १. ४९. ] इत्यत्र निर्णेष्यते ॥ छ. ॥ २. ४. ४४. ॥

न्या० स०—क्रीतात् कर० । केचित् त्विति– तन्मतेऽपि

प्रत्ययोत्पत्तेः प्रागिति समासो बहुलाधिकाराल्लभ्यते, मन्मतेऽपि बहुलाधिकाराश्रयणे तथैव ॥ २. ४. ४४. ॥

## क्तादल्पे । २ । ४ । ४५ ॥

**त० प्र०—क्तप्रत्ययान्ताद् नाम्नः करणादेरल्पेऽर्थे स्त्रियां ङीर्भवति । अभ्रविलिप्ती द्यौः, सूपविलिप्ती स्थाली; अल्पाभ्रा, अल्पसूपेत्यर्थः । अल्प इति किम् ? चन्दनानुलिप्ता स्त्री, अनल्पेन चन्दनेन लिप्तेत्यर्थः ॥ ४५ ॥**

**श० न्या०—क्ताद०** । अल्प इति करणादेरित्यस्य विशेषणमित्याह- **करणादेरल्पेऽर्थे** इति । आप्नोतेः " खुर-क्षुर-दूर-गौर० " [ उणा० ३९६. ] इति रप्रत्ययेऽभ्रशब्दो निपात्यते, अभ्रैर्विलिप्तेति पूर्ववदस्याद्यन्तेन समासः, एवं- **सूपविलिप्ती**ति- सुनोतेः " सु-सु-कु० " [ उणा० २९७. ] इति पे ऊत्वे च सूप, ङ्यन्तेऽल्पार्थस्य गम्यमानत्वादल्पशब्दस्याप्रयोगः, तमल्पार्थं दर्शयति- **अल्पाभ्रे**त्यादि । **चन्दनानुलिप्ते**ति- स्तोकेन चन्दनेन समालभनासम्भवान्न तस्याल्पत्वमुपाधिर्विवक्ष्यते, इत्यल्पत्वाभावाद् ङीर्न भवतीत्याह- **अनल्पेने**त्यादि ॥ छ. ॥ २. ४. ४५. ॥

**न्या० स०—क्तादल्पे** । **अभ्रविलिप्ती**ति- पूर्ववदस्याद्यन्तेन समासः । **सूपविलिप्ती**ति- अल्पार्थस्य गम्यमानत्वादल्प-शब्दस्याप्रयोगः ॥ २. ४. ४५. ॥

## स्वाङ्गादेरकृत-मित-जात-प्रतिपन्नाद् बहुव्रीहेः । २ । ४ । ४६ ॥

**त० प्र०—स्वाङ्गादेः कृतादिवर्जितात् क्तान्ताद् बहुव्रीहेः स्त्रियां ङीर्भवति । शङ्खौ भिन्नावस्याः शङ्खभिन्नी, ऊरुभिन्नी, केशविलूनी; गलकोत्कृत्ती** । कृतादिवर्जनं किम् ? **दन्तकृता, दन्तमिता, दन्तजाता, दन्तप्रतिपन्ना । बहुव्रीहेरिति किम् ? हस्ताभ्यां पतिता हस्तपतिता, पादपतिता ॥ ४६ ॥**

**श० न्या०—स्वाङ्ग०** । पूर्ववत् पारिभाषिकं स्वाङ्गम् । **शङ्खभिन्नी** शाम्यतेः " शमि-मनिभ्यां० " [ उणा० ८४. ] इति खे- शङ्खः, भिदेः क्तप्रत्यये " रदादमूर्च्छमदः० " [ ४. २. ६९. ] इति नत्वे- भिन्न, " क्तः " [ ३. १. १५१. ] इति क्तान्तस्य पूर्वनिपाते प्राप्ते " जाति-काल-सुखादेर्नवा " [ ३. १. १५२. ] इति जातित्वाच्छङ्खशब्दस्य पूर्वनिपातः; एवम्-**ऊरुभिन्नी**त्यादि- " अर्त्तेरूर्च " [ उणा० ७३६. ] इति- ऊरु । " क्लिशः के च " [ उणा० ५३०. ] इति शे- केश । गलशब्दात् के – गलक, उत्पूर्वात् कृन्ततेः " डीयश्व्यैदितः " [ ४. ४. ६१. ] इति इड्भावे- उत्कृत्त । दन्ताः कृता मिता जाताः प्रतिपन्ना वाऽस्या इति विगृह्य "एकार्थं चा०" [ ३. १. २२. ] इति समासः । **हस्तपतिता, पादपतिते**ति कारकसमासः ॥ छ. ॥ २. ४. ४६. ॥

**न्या० स०—स्वाङ्गादेः०** । पूर्ववत् पारिभाषिकं स्वाङ्गम् । **क्तान्ताद् बहुव्रीहेरि**ति- कृतादिवर्जितो यः- क्तः क्तान्त इति " विशेषणमन्तः " [ ७. ४. ११३. ] इति न्यायात्, सोऽन्ते यस्य बहुव्रीहेः । " जातिकाल० " [ ३. १. १५२. ] इति शङ्खादेः प्राग् निपातः । हस्ताभ्यां पतित इति कार्यमन्यथा अदन्तत्वाभावेनैव ङीप्राप्तिर्नास्ति ॥ २. ४. ४६. ॥

## अनाच्छादजात्यादेर्नवा । २ । ४ । ४७ ॥

**त० प्र०—आच्छादवर्जिता या जातिस्तदादेः कृतादिवर्जितक्तान्ताद् बहुव्रीहेः स्त्रियां ङीर्वा भवति । शाङ्गरो जग्धोऽनया शाङ्गरजग्धी, शाङ्गरजग्धा; पलाण्डुभक्षिती, पलाण्डुभक्षिता । अनाच्छादग्रहणं किम् ? वस्त्रच्छन्ना, वसनच्छन्ना । जात्यादेरिति किम् ? मासयाता, संवत्सरयाता, बहुयाता, अयाता, सुयाता, सुखयाता, दुःखयाता; पूर्वेणापि न भवति, अस्वाङ्गादित्वात् । अकृताद्यन्तादित्येव- कुण्डकृता, कुण्डमिता, पलाण्डुजाता, वृक्षप्रतिपन्ना । क्तादित्येव- शाङ्गरप्रिया ॥४७॥**

**श० न्या०—अना०** । आच्छादशब्दः करणसाधनः, तस्य च नञ्विशिष्टस्य जात्या कर्मधारयः, तत आदिशब्देनावयवार्थेन बहुव्रीहिः, तेन च क्तान्तमजातकृतमितप्रतिपन्नादिति विशेष्यं विशिष्यते, तेन च बहुव्रीहिरित्येतदाह- **आच्छादवर्जिते**त्यादि । शाङ्गरशब्दस्तालव्यादिरव्युत्पन्नः, अत्तेः क्तिप्रत्यये " यपि चादः० " [ ४. ४. १६. ] इति जग्धादेशे ततो बहुव्रीहौ- **शाङ्गरजग्धी** । " पलि-मृभ्यामाण्डुकौ " [ उणा० ७६७. ] इति पलाण्डु । छादयतेः " णौ दान्त-शान्त० " [ ४. ४. ७४. ] इति निपातनाच्छन्नम्, वस्त्रं छन्नमनयेत्यादिविग्रहे- **वस्त्रच्छन्ने**त्यादि । मास-संवत्सरशब्दौ कालवचनौ, बहुशब्दो गुणवचनः, नञ् अभाववचनः, सुख-दुःखशब्दौ गुणवचनौ । ननु जात्यादित्वाभावान्मा भूदनेन ङीप्रत्ययः, पूर्वेण तु कुतो न भवतीत्याह- **पूर्वेणापी**त्यादि । कुण्डं कृतं मितमनया पलाण्डुर्जातोऽनया वृक्षात् प्रतिपन्नमनयेति विग्रहः । **शाङ्गरप्रिये**ति- शाङ्गरं प्रियमस्या इति विग्रहः ॥ छ. ॥ २. ४. ४७. ॥

**न्या० स०—अनाच्छा०** । आच्छादशब्दः करणसाधन[ण]कप्रत्ययान्तः, तस्य च नञ्विशिष्टस्य जात्या कर्मधारयः, तत आदिशब्देनावयवार्थेन बहुव्रीहिः कार्यः । **शाङ्गरजग्धी**ति- शाङ्गर-

शब्दस्तालव्यादिरव्युत्पन्नः। मासयातेत्यादिषु मास-संवत्सरशब्दयोः कालवचनत्वाद् बहु-सुख-दुःखानां च गुणवचनत्वान्नजरत्वभाववचनत्वादजात्यादेरिति व्यावृत्त्या निषिध्यते। **वृक्षप्रतिपन्नेति**– वृक्षात् प्रतिपन्नमनया। **शार्ङ्गरप्रियेति**– शार्ङ्गरं प्रियमस्याः ॥ २. ४. ४७. ॥

## पत्युर्नः । २ । ४ । ४८ ॥

**त० प्र०—पत्यन्ताद् बहुव्रीहेः स्त्रियां ङीर्वा भवति, तत्संनियोगेऽन्तस्य नकारादेशश्च। दृढः पतिरस्या दृढपत्नी, दृढपतिः; स्थिरपत्नी, स्थिरपतिः; स्थूलपत्नी, स्थूलपतिः; वृद्धपत्नी, वृद्धपतिः। मुख्यादित्येव– बहुस्थूलपतिः पुरी, अत्र हि पत्यन्तो बहुव्रीहिर्मुख्यो न भवति, यस्तु मुख्यः स पत्यन्तो न भवति; यदापि स्थूलश्चासौ पतिश्चेति कर्मधारये सति बहवः स्थूलपतयो यस्यामिति बहुव्रीहिस्तदापि स्थूलपत्यन्तो बहुव्रीहिर्न पत्यन्त इति न भवति ॥ ४८ ॥**

**श० न्या०**—पत्युः०। मुख्यादिति वर्त्तते, पत्युरिति पञ्चम्यन्तमधिकृतस्य बहुव्रीहेर्विशेषणं, तेन च तदन्तविधिरित्याह– **पत्यन्तादि**त्यादि– मुख्यादिति शेषः। **न** इत्यकार उच्चारणार्थः। **दृढपत्नी**ति– दृढेः "बलि-स्थूल०" [ ४. ४. ६९. ] इति निपातनात्– दृढ, एवं तिष्ठतेः "शुषी०" [ उणा० ४१६. ] इति किति इरे– स्थिर। **मुख्यादि**ति मुख्यात् पत्यन्ताद् बहुव्रीहेरित्येवेत्यर्थः, बहुस्थूलपतिरित्यत्र तु सर्वथा स्थूलपत्यन्तो बहुव्रीहिरित्याह– **अत्र ही**त्यादि ॥ छ. ॥ २. ४. ४८. ॥

**न्या० स०**—पत्युर्नः। **पत्युरि**ति पञ्चम्यन्तमधिकृतस्य बहुव्रीहेर्विशेषणं, तेन च तदन्तविधिरित्याह– **पत्यन्तादि**ति। **बहुस्थूलपतिः पुरी**ति– स्थूलाः पतयो यासां ताः स्थूलपतय इति कृते "पत्युर्नः" इति नविकल्पनाद् बहवः स्थूलपतयो यस्याम्। **मुख्यो न भवती**ति– द्वितीयेन बहुव्रीहिणा बाधितत्वात्। **पत्यन्तो न भवती**ति– किं तर्हि ? स्थूलपत्यन्तः ॥ २. ४. ४८. ॥

## सादेः । २ । ४ । ४९ ॥

**त० प्र०—सादेः– सपूर्वात् पतिशब्दात् स्त्रियां ङीर्वा भवति, अस्य च नकारोऽन्तादेशः; पूर्वेणैव सिद्धे पुनर्वचनं बहुव्रीहिनिवृत्त्यर्थम्। ग्रामस्य पतिः– ग्रामपत्नी, ग्रामपतिः; आशापत्नी, आशापतिः; अधिष्ठात्री पतिः– अधिपत्नी, अधिपतिः; ईषदूना पतिः– बहुपतिः, बहुपत्नी। सादेरिति किम् ? पतिरियम्, ग्रामस्य पतिरियम्। मुख्यादित्येव– अतिक्रान्ता पतिमतिपतिः। गौणादपीच्छन्त्यन्ये– अतिपत्नी, अतिपतिः। यदा तु पत्नीशब्दस्य षष्ठ्यन्तेन समासस्तदा राजपत्नी शूद्रपत्नीत्याद्येव भवति ॥ ४९ ॥**

**श० न्या०—सादेः**। सहशब्दो विद्यमानवचनो न तु तुल्ययोगवचनः "सपत्न्यादौ" [ २. ४. ५०. ] इति निर्देशात्, तुल्ययोगे हि पूर्वेण शब्देन सह पतिशब्दस्य नकारो भवतीति सूत्रार्थे सपत्नीति निर्देशो न स्यात्, अवयवस्य प्रत्यासन्नत्वादादिशब्दोऽवयववचनो न व्यवस्थावचनस्तस्य विप्रकर्षात्, तत्र ग्रामस्य पतिरियं ब्राह्मणीत्यत्र वाक्ये प्रसङ्गादित्याह– **सादेः– सपूर्वात् पतिशब्दादि**ति– विद्यमानपूर्वावयवादित्यर्थः। पकारस्य पूर्वावयवस्य सर्वदा विद्यमानत्वादव्यभिचाराच्छब्दान्तरेण विशेषणं विज्ञायते। अथ न शब्दः शब्दान्तरस्यावयव उपपद्यत इति चेत् ? न– अत एव समस्तस्य ग्रहणं, तदादि वाक्यापेक्षया यच्छब्दान्तरं स विद्यमान आदिः पूर्वोऽवयवोऽस्येति सादिः पतिशब्दो भवति, अन्यथा नामविशेषणत्वे सत्यनिष्टप्रसङ्गः, तथाहि– पतिशब्दान्तस्य पत्युः पकारस्यैव पूर्वस्यावयवस्य सर्वदाविद्यमानत्वाव्यभिचारात् सादिरिति विशेषणसामर्थ्याच्छब्दान्तरं श्रयितव्यम्, तथा च ग्रामपत्नीत्यादि न सिध्येत्, नह्यत्र पतिशब्दान्तस्य नाम्नः शब्दान्तरमवयवः पूर्वोऽस्तीति शब्दान्तराढौकनेऽपि न शब्दस्य शब्दान्तरमवयव उपकल्पत इति प्रसङ्गस्तदवस्थ एवेति। अथ पत्यन्तात् पूर्वेणैव सिध्यति, किमर्थमिदमित्याह– **पूर्वेणैवे**त्यादि। **[ आशापत्नी ]** आशायाः पतिरिति तत्पुरुषः। "नाम्नः प्राग्०" [ ७. ३. १२. ] इति बहौ– **बहुपतिः**। इह सादेरित्यनेनैकार्थ्याक्षेपात् केवलस्यासमस्तस्य च न भवतीत्याह– **सादेरि**त्यादि। मुख्यादिति पत्यन्तस्य विशेषणं, न तु पतिशब्दस्य, यतः पूर्वे– अनुपसर्जनादिति प्रातिपदिकस्य विशेषणं न पतिशब्दस्य, अन्यथा सर्वोपसर्जनाद् बहुव्रीहौ दृढपत्नीत्यत्र न स्यात्, अत्रापि च तथैव। केचित् तु पतिशब्दस्येदं विशेषणं कुर्वन्ति, तदभिप्रायेण प्रत्युदाहृतम्– **मुख्यादित्येवे**ति। **अन्य** इति– पूर्वे, अस्यैव प्रस्तुतत्वात्। कथं राजदारेषु राजपत्नीति निरयम् ? अत आह– **यदा त्वि**त्यादि– केवलस्य पतिशब्दस्य "ऊढायाम्" [ २. ४. ५१. ] इत्यनेनात्र नित्यं ङीरित्यर्थः ॥ छ. ॥ २. ४. ४९. ॥

**न्या० स०**—सादेः। सह विद्यमानवचनो न तु तुल्ययोगवचनः सपत्न्यादाविति निर्देशाद्, तुल्ययोगे हि पूर्वेण शब्देन सह पतिशब्दस्य नकारो भवतीति सूत्रार्थे सपत्नीति निर्देशो न स्यात्। ननु 'सादेः पत्युर्नः' इत्येकयोगो विधीयतां, सादित्वेन बहुव्रीहावपि अन्यस्मिन् वा भविष्यति, नैवम्– मुख्यादित्यधि-

काराद् सादावेव स्याद्, न तु बहुव्रीहौ, पृथग्योगे तु पूर्वसूत्रे मुख्यादिति बहुव्रीहिसमासस्यैव विशेषणं, न पत्युः ॥ २. ४. ४९. ॥

## सपत्न्यादौ । २ । ४ । ५० ॥

**त० प्र०—सपत्न्यादौ यः पतिशब्दस्तस्मात् स्त्रियां ङीर्भवति, नकारश्चान्तादेशः; पुनर्विधानं नित्यार्थम् । समानः पतिरस्याः समानस्य पतिरिति वा– सपत्नी, एवम्– एकपत्नी, वीरपत्नी, पिण्डपत्नी, भ्रातृपत्नी, पुत्रपत्नी; षडेते सपत्न्यादयः । समुदायनिपातनं समानस्य सभावार्थम्, पुंवद्भावप्रतिषेधार्थं च– सपत्नीभार्यः, सपत्न्या अयं– सापत्नः ॥ ५० ॥**

**श० न्या०—सप०** । के सपत्न्यादयः ? येषां समासानां पत्युत्तरपदानां समानादीनि पूर्वपदानि ते सपत्न्यादयः, कुत एतत् ? समान-एक-वीर-पिण्ड-भ्रातृ-पुत्राणां च षण्णामेव गणे पाठात्, न सपत्न्यादीनाम्, ततश्चायमर्थः– सपत्न्यादिषु साध्यत्वेन विषयभूतेषु समानादिभ्यः परात् पत्युर्ङीर्नकारश्चान्तादेशः, एवं हि तेषां साध्यता भवति– यदि समानादीनि पूर्वपदानि भवन्ति, तेन सामर्थ्याल्लभ्यते– समानादिभ्यः परात् पत्युरिति, अत आह– **सपत्न्यादिषु यः पतिशब्द** इति– सपत्न्यादिषु यः पतिशब्दः स्थित इत्युपश्लेषसप्तमी तु न घटते, सपत्न्यादीनां नकारविशिष्टानामुपादानात् तत्र पतिशब्दस्य शुद्धस्याविद्यमानत्वात् । **पुनरि**ति– " पत्युर्नः " [ २. ४. ४८. ] इत्यनेनैव सिद्धत्वादिति भावः । सपत्न्यादयो हि बहुव्रीहिसमासाः, गणस्तु न पठित उदाहरणैरेवावगतत्वात् । समानादेरकृत्वा समुदायनिपातनफलमाह– **समुदाये**ति– लक्षणाभावेऽपीत्यर्थः । द्वितीयफलमाह– **पुंवद्भावे**त्यादि– " परतः स्त्रीपुंवत्० " [ ३. २. ४९. ] इति " तस्येदम् " [ ६. ३. १६०. ] इत्यणि शिवाद्यणि वा " जातिश्च० " [ ३. २ ५१. ] इति प्राप्नोति । ननु कथं पुंवद्भावप्राप्तिः ? यतः सपत्नीशब्दस्य परतः स्त्रीत्वाभावात्, यदि हि सपत्नशब्दोऽप्येकस्मिन्नेवार्थे पुंस्यपि दृश्येत तदा तस्मिन्नप्रवृत्तिनिवृत्तेः स्त्रियां वर्तमाना स्यात् ( ? तदा तस्मिन्नेकप्रवृत्तिनिमित्ते स्त्रियां वर्तमानादस्य स्यात् ) परतः स्त्रीत्वम्, यश्च सपत्नशब्दः पुंस्यपि दृश्यते स शत्रुत्वं प्रवृत्तिनिमित्तमादाय वर्त्तते, सपत्नीशब्दस्तु समानः पतिरस्या इत्यमुमर्थं प्रवृत्तिनिमित्तीकृत्य यौगिकतयाऽर्थे प्रवर्त्तत इति समानायामाकृतौ सपत्नशब्दस्य पुंस्त्वादर्शनात् परतः स्त्रीत्वाभावान्न प्राप्नोत्येव पुंवद्भावः, नैवम्– सपतिशब्दस्य पुंस्यपि दर्शनात्, यदेव च सपत्नीशब्दस्य समानपतित्वं प्रवृत्तिनिमित्तं तदेव सपतिशब्दस्यापीत्यस्त्येव परतः स्त्रीत्वं सपत्नीशब्दस्य, न च वाच्यम्– सपतिशब्दो नकाराश्रवणादन्य एव, यतः श्येनी भार्या यस्य श्येतभार्य इत्यत्रापि पुंवद्भावो न स्यात्, श्येनीशब्दे श्रूयमाणनकारस्य पुंस्त्वार्थश्येतशब्देऽश्रवणादित्यसमञ्जसं स्यात् । तस्मादेकप्रवृत्तिनिमित्तस्य शब्दस्य पुंसि दर्शनात् तस्यैव स्त्रियां वर्त्तमानादन्यादृश्यत्वेऽपि न भवत्येव शब्दान्तरमिति सर्वं समञ्जसमेव ॥ छ ॥ २. ४. ५०. ॥

**न्या स०—सपत्न्यादौ । सभावार्थमि**ति– धर्मादिषु पत्नीशब्दस्यापाठादित्यर्थः । **पुंवद्भावप्रतिषेधार्थं चे**ति– "परतः स्त्री०" [ ३. २. ४९. ] इति " जातिश्च णि० " [ ३. ३. ५१. ] इति च प्राप्तस्य ॥ २. ४. ५०. ॥

## ऊढायाम् । २ । ४ । ५१ ॥

**त० प्र०—पत्युः केवलादूढायां– परिणीतायां स्त्रियां ङीर्भवति, नकारश्चान्तादेशः । पत्नी, यजमानस्य पत्नी, वृषलस्य पत्नी । ऊढायामिति किम् ? पतिरियं संगृहीता, अभार्या वेत्यर्थः ॥ ५१ ॥**

**श० न्या०—ऊढा०** । याऽग्निसाक्षिपूर्वकेण पाणिग्रहणेन परिणीता सेहोढा गृह्यते । तदन्तविधिश्च नामग्रहणे नाश्रीयते इत्याह– **पत्यु**रित्यादि । यजेः शाने षष्ठ्यां च– **यजमानस्य** । वर्षतेः " तृपि-वपि-कुपि० " [ उणा० ४६८. ] इति कित्यले– वृषल । **संगृहीते**ति– अनग्निसाक्षिकं कामादितो दारकर्मत्वे परिगृहीतेत्यर्थः । **अभार्ये**ति– भार्याया अन्याऽप्रधानभूता भगिन्यादिरुच्यते ॥ छ. ॥ २. ४. ५१. ॥

**न्या० स०—ऊढायाम्** । याऽग्निसाक्षिपूर्वकेण पाणिग्रहणेन परिणीता सेह गृह्यते । तदन्तविधिश्च नामग्रहणे नाश्रीयत इत्याह– **केवला**दिति । **संगृहीते**त्यत्र अनग्निसाक्षिकं कामार्दितम[ नसा ]दारकर्मत्वे परिगृहीतेत्यर्थः । **अभार्या चे**त्यत्र भार्याया अन्या अप्रधानभूता भगिन्यादिरुच्यते ॥ २. ४. ५१. ॥

## पाणिगृहीतीति । २ । ४ । ५२ ॥

**त० प्र०—इतिशब्दः प्रकारार्थः, पाणिगृहीतीप्रकाराः शब्दा ऊढायां स्त्रियां ङ्यन्ता निपात्यन्ते । पाणिर्गृहीतोऽस्याः पाणौ वा गृहीता– पाणिगृहीती, एवं– करगृहीती, पाण्यात्ती, करात्ती । ऊढायामिति किम् ? यस्या यथाकथञ्चित् पाणिर्गृह्यते सा पाणिगृहीता । बहुव्रीहावेवेच्छन्त्यन्ये ॥ ५२ ॥**

**श० न्या०—पाणि० । प्रकारार्थ** इति– सदृशार्थ इत्यर्थः, पाणिगृहीतीसदृशा इत्यर्थः । **पाणिर्गृहीतोऽस्याः** अग्निसाक्षिक इति शेषः, भार्याया हि विवाहाय पाणिरग्निसाक्षिको गृह्यते, एवं ह्यूढा भवति । केचिदाहुः– यदा त्वसदृशीं ब्राह्मणादि-

विवाहाय पाणौ गृह्णाति सा भार्यापि न पाणिगृहीती, पाणिगृहीतैव(तेव) सा, सदृशीं ब्राह्मणादिरेव ( सदृशी ब्राह्मण्यादिरेव ) ब्राह्मणादेः पाणिगृहीती भवति, एवम्भूतार्थ एव पत्नीशब्दोऽपीति। **पाणिगृहीती**ति– गृह्णातेः क्ते "गृह्णोऽपरोक्षायाम्०" [ ४. ४. ३४. ] इतीटो दीर्घत्वं "जाति-काल०" [ ३. १. ५२. ] इति पूर्वनिपातः। **पाण्यात्ती**ति– आङ्पूर्वाद् ददातेः क्तः "स्वरादुपसर्गाद् दस्ति०" [ ४. ४. ९. ] इति तकारः। **पाणिगृहीते**ति– यदा ऊढेति नायमर्थः, किन्तु ऊढाया अन्यस्या वा पाणिर्गृहीतोऽस्या इति सम्बन्धमात्रं विवक्ष्यते तदा पाणिगृहीतेत्येवं भवतीति। **अन्य** इति– पूर्वे ॥ छ. ॥ २. ४. ५२.॥

**न्या० स०—पाणि०**। पाणिगृहीती इति प्रकारो येषां ते तथा, जसः सूत्रत्वाल्लुप् ॥ २. ४. ५२.॥

## पतिवत्न्यन्तर्वत्न्यौ भार्या-गर्भिण्योः ॥ २ । ४ । ५३ ॥

**त० प्र०—भार्या– अविधवा स्त्री, तस्यामभिधेयायां पतिमच्छब्दाद् ङीरस्य च पतिवत्नादेशः,** तथा गर्भिण्यां स्त्रियामभिधेयायामन्तर्वच्छब्दाद् ङीरस्य चान्तर्वत्नादेशो निपात्यते; निपातनादेव च अधिकरणप्रधानादप्यन्तःशब्दान्मत्वर्थीयो मतुर्भवति। भार्येति किम्? पतिमती पृथ्वी। गर्भिणीति किम्? अन्तरस्यां शालायामस्ति ॥ ५३ ॥

**श० न्या०—पति०**। **अविधवे**ति– धवो भर्ता यस्य पाणिगृहीती, विगतो धवो यस्याः सा विधवा, न विधवा-अविधवा, जीवत्पतिरित्यर्थः, गर्भः– कुक्षिगतोऽस्या [ अ ]स्तीति गर्भिणी, तत्र यथासंख्यं पतिवत्नी, अन्तर्वत्नी च निपात्यते। तत्र यद् यत्र निपात्यते तदाह– **पतिमच्छब्दादि**त्यादि– पतिशब्दात् "तदस्यास्त्यस्मिन्०" [ ७. २. १. ] इति मतुर्भवतीति मकारस्य वत्वलक्षणमन्यत्रास्तीति तदनेन साध्यत इति। अस्तिसामानाधिकरण्येन मतोर्विधानादन्तःशब्दस्य चाधिकरणप्रधानस्यास्तिना सामानाधिकरण्याभावात् तदाधेयेनैव च सामानाधिकरण्यान्मतोरभावात् कथं ततो यापि ( ? ङ्यादि ) निपात्यत इत्याह– **निपातनादेव चे**त्यादि– एतेनान्तःशब्दान्मतुरेव साध्यते, वत्वं त्ववर्णोपान्त्यत्वात् सिद्धमिति, चशब्दो मतुश्चेत्येवं सम्बध्यत इति। अन्ये तु प्रथमासमर्थान्मतोर्विधानादन्तःशब्दस्य चाधिकरणप्रधानत्वात् प्रथमासमर्थता नास्तीत्येवं मतोरभावं वर्णयन्ति; तच्चापरे विचारका अधिकरणार्थस्यानामार्थरूपापन्नतयाऽनेनाभिधानादव्ययाल्लुबिवधानलिङ्गाच्चान्तःशब्दादव्ययादपि प्रथमोत्पत्तिर्न्याय्यैवेति प्रथमासमर्थतां समर्थयमाना न क्षमन्त इति; एतदेव च युक्तमुत्पश्यामो यतोऽव्ययानां शक्तियोगेऽपि न कारकविभक्तिरसंख्यत्वात्, नहि शक्तिमात्रप्रतिबद्धा कारकविभक्तेरुत्पत्तिः, किं तर्हि? संख्याप्रतिबद्धाऽपीति "द्वितीयायाः काम्यः" [ ३. ४. २३. ] इत्यत्र तु द्वितीयाग्रहणं कर्मयोगोपलक्षणम्, यथा "ङसोऽपत्ये" [ ६. १. २८. ] इत्यत्र ङस्ग्रहणं सम्बन्धमात्रोपलक्षणं, न तु तदन्तात् प्रत्ययविधानार्थं, तेन स्वःकाम्यतीत्यादिसिद्धिः। **पतिमती पृथ्वी**ति– नात्राविधवाऽर्थ इति निपातनं न भवति। **अन्तरस्यां शालायामस्ती**ति– अत्र गर्भिण्यर्थाभावादेतत्साध्ये मतुरेव न भवति, दूर एवान्यदिति ॥ छ. ॥ २. ४. ५३.॥

**न्या० स०—पतिवत्न्यन्त०**। अधिकरणप्रधानादपीति– "तदस्यास्त्यस्मिन्०" [ ७. २. १. ] इत्यत्र तदिति प्रथमान्ताद् विहितत्वेनाऽप्राप्त इत्यर्थः ॥ २. ४. ५३. ॥

## जातेरयान्त-नित्यस्त्री-शूद्रात् ॥ २ । ४ । ५४ ॥

**त० प्र०—जातिवाचिनोऽकारान्तान्नाम्नः स्त्रियां ङीर्भवति,** न चेत् तद् यान्तं नित्यस्त्रीजातिवाचि शूद्रशब्दो वा भवति। तत्र जातिः काचित् संस्थानव्यङ्ग्या, यथा– गोत्वादिः, सकृदुपदेशव्यङ्ग्यत्वे सत्यत्रिलिङ्गाऽन्या, यथा– ब्राह्मणत्वादिः, अत्रिलिङ्गत्वं देवदत्तादेरप्यस्तीति सकृदुपदेशव्यङ्ग्यत्वे सतीत्युक्तम्, गोत्र-चरणलक्षणा च तृतीया, यदाहुः—

"आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या, गोत्रं च चरणैः सह" ॥१॥ इति।

कुक्कुटी, सूकरी, तटी, पात्री; तथा ब्राह्मणी, वृषली; तथा नाडायनी, चारायणी; कठी, बह्वृची। जातेरिति किम्? मुण्डा, शुक्ला, कृता, देवदत्ता। अयान्तेति किम्? इभ्या, क्षत्रिया, वैश्या, अर्या; गवयी, हयी, मुकयी, मनुषी, मत्सी, ऋश्यी इति गौरादिपाठात्। अन्तग्रहणं साक्षात्प्रतिपत्त्यर्थम्, तेन– वतण्डस्यापत्यं पौत्रादि स्त्रीति यञ्, तस्य लोपे स्थानिवद्भावेऽपि वतण्डीत्यत्र यान्तलक्षणः प्रतिषेधो न भवति। नित्यस्त्रीजातिवर्जनं किम्? मक्षिका, यूका, खट्वा। कथं तर्हि द्रोणी?, कुटी?, अत्र हि शब्दयोर्नित्यस्त्रीत्वाभावेऽपि द्रोणी-कुटीजातेर्नित्यस्त्रीत्वात् प्रतिषेधः प्राप्नोति;– नैवम्– गौरादिपाठाद् भविष्यति। शूद्रवर्जनं किम्? शूद्रा। कथं महाशूद्री– आभीरजातिः?, नात्र शूद्रशब्दो जातिवाची, किं तर्हि?– महाशूद्रशब्दः, यत्र तु शूद्र एव जातिवाची तत्र

**भवत्येव ङीनिषेधः– महती चासौ शूद्रा च महाशूद्रेति । जातिलक्षणस्य चायं प्रतिषेधः, तेन–धवयोगे भवत्येव शूद्रस्य भार्या– शूद्री । आदित्येव–आखुः, तित्तिरिः; कोयष्टिः । मुख्यादित्येव– बहुशूकरा भूमिः, बहुब्राह्मणा शाला । कथं सुपर्णी ? सुपर्णशब्दस्यापि जातिवाचित्वात्, तस्य च मुख्यत्वात् ॥ ५४ ॥**

**श० न्या०—जातेः०** । जायतेऽनया भिन्नेष्व(भिन्नेष्व- भिन्नाव)भिधान-प्रत्ययाविति जातिः क्तिः, नन्वत्र कथं क्तिः, परत्वादनटा भाव्यम्, यद् वाक्यकारः– "अजप्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन" इति; न चात्रासरूपविधिः प्रवर्त्तते, अनटःक्ता( क्तय )पवादत्वाभावात्, स्त्रियां हि क्तिर्विहितः, पुंनपुंसकेऽनटोऽवकाशः, अपवादत्वेन च बाधाप्रसङ्गेऽसरूपविधिर्नाम्नात इति परत्वादनट् प्राप्नोति, नापवादत्वात् क्तेः परतोऽप्यसरूपविधिरिष्टः पूर्वैः; उच्यते– अत एव **निपातनात् क्तिरि**ति– अनुपदकारस्त्वाह– परत्वेनापि बाधकत्वेऽसति सरूपविधिर्भवतीति क्तेरपि सिद्धिः । जातिः– सामान्यमभिन्नबुद्धिध्वनिप्रसवनिबन्धनमर्थः, तत्र च कार्यासम्भवात् तद्वाचिनो ग्रहणमित्याह– **जातिवाचिन** इति– तत्र जातिशब्देन सामान्यमात्रग्रहणे शुक्लादिशब्दानामपि गुणादिसामान्योपादायिनां ग्रहणप्रसङ्गाद् व्यावर्त्याभावाज्जातेरित्यानर्थक्यात्, संज्ञाव्युदासस्य चासंज्ञायामित्युपादानेनैव सिद्धत्वाज्जातेरित्युपादानाद् विशिष्टैव जातिर्गृह्यत इत्याह– **तत्र जातिरि**त्यादि । एतदेव श्रीशेषदेवभट्टारकप्रोक्तेन द्रढयति– **यदाहुः**– "**आकृतिग्रहणे**त्यादि । आकृतिशब्दोऽन्यत्र जातिपर्यायः, यथा– आकृत्यभिधानाद् वैकविभक्तौ वा जन्यानयन इति, इह तु जातिपर्यायस्य ग्रहणानुपपत्तिः, विवक्षितार्थस्य तद्ग्रहणे प्रतिपादयितुमशक्यत्वात्, तस्मादिहाकृतिशब्देन संस्थानविशेष उच्यते, आक्रियते– व्यज्यतेऽनयेति व्युत्पत्त्या व्यक्तिरुच्यते इत्यर्थः । गृह्यतेऽनेनेति ग्रहणमिति करणसामान्ये पदं संस्क्रियते, तत्राकृतिशब्दसन्निधानात् स्त्रीत्वप्रतिपत्तिः स्त्रीप्रत्ययनिमित्तं न भवति, आकृतिर्ग्रहणं यस्याः सा आकृतिग्रहणा, अवयवसन्निवेशविशेषव्यङ्ग्येत्यर्थः । एतेन गोत्वादिलक्षणा जातिः संगृहीता भवति, ब्राह्मणत्वादिस्तु न संगृहीता, तत्संग्रहणार्थमाह– **लिङ्गानां च न सर्वभागि**ति– याऽपि सर्वाणि लिङ्गानि न भजते सा व्यक्तिभिरनभिव्यज्याऽपि जातिर्बोधव्या, यथा– विप्रो विप्रीति द्वाभ्यामेव लिङ्गाभ्यामेवं विधाया जातेः सम्बन्धो न तृतीयेन नपुंसकेन; प्राक्तनेन लक्षणेनासंगृहीताया जातेः संग्राहकमिदं लक्षणं, न तु तस्यातिप्रसक्तस्य व्यवस्थापकमिति त्रिलिङ्गभागप्याकृतिग्रहणा जातिरिति द्रष्टव्यम्, यथा– तटस्तटी तटमिति । सर्वशब्दस्य लिङ्गानामित्येतदनपेक्षस्य समासभाक्त्वं विण्प्रत्ययनिमित्तं च नित्यसापेक्षकत्वेन गमकत्वान्न विरुध्यते । उभयलक्षणलक्षिताऽपि जातिः सकृदुपदिष्टा निःशेषेण ग्राह्येति– **सकृदाख्यातनिर्ग्राह्ये**ति– तथा कान्यकुब्जे वसन्ते काले प्राप्तयौवने पिण्डे गोत्वमुपदिष्टं, पाटलिपुत्रे ग्रीष्मे काले वृद्धे पिण्डे ज्ञायत एव, एवं चैका नित्या प्रत्येकं परिसमाप्ता च जातिर्निश्चीयते, नह्येकत्वमन्तरेण पिण्डान्तरेण ग्रहणमुपपद्यते, यदि च न नित्या पिण्डविनाशे जातेरपि विनाशान्न पिण्डान्तरे गृह्येत, प्रत्येकापरिसमाप्तौ च यत्राऽपि पिण्ड उपदिश्यते तत्रापि न गृह्येत, किमुत पिण्डान्तरे, अंशेन ह्यवस्थानेंऽश एव गृहीतः स्यान्न जातिः, न जात्यंशो जातिरनेकप्रसङ्गात्; तदेवमाकृतिर्ग्रहणं यस्या, न च सर्वाणि लिङ्गानि भजते; सकृदाख्यातनिर्ग्राह्या च याऽसौ जातिरिति लक्षणद्वयशेषतया व्याख्येयम् । अनेन च लक्षणेन कुक्कुटत्व-ब्राह्मणत्वादीनां जातित्वमुक्तं, न देवदत्तत्वादेः, तस्य नियतपिण्डसमवेतत्वात् तथाविधविशिष्टवाच्यत्वाद् भेदोपपत्तेः, वाचकशब्दसादृश्यमात्रमेव प्रतीयते, न च ब्राह्मणत्वमिव देवदत्तत्वं नाम किञ्चिदपरिमितसकलपिण्डसाधारणमुपदेशसचिव( सहाय )प्रत्यक्षेण लक्ष्यत इति, इति संज्ञाशब्देभ्यो विशेषः, देवदत्तादयो हि संज्ञाशब्दाः कामं भवन्त्युपदेशसहायप्रत्यक्षव्यपेक्षिणः, सकलव्यक्तिसाधारण्यं तु तेषामाकाशलेख्यप्रख्यं, देवदत्त इत्यादौ त्ववस्थाभेदपरिकल्पितभेदत्वादेकत्रैव पिण्डे यद्यपि जातिशब्दत्वं तथापीह जातिग्रहणान्नैवंविधा जातिराश्रीयत इत्युक्तप्रायम् । अत्र केचिदाहुः– सकृदाख्यातनिर्ग्राह्येत्येतदाद्यलक्षणशेषभूतमिव ( मेव ) नोभयं( य )शेषम्, नहि ब्राह्मण्यं नाम सकृदाख्यातं पिण्डान्तरे गोत्रमिवाध्यवसातुं शक्यम् । अन्ये त्वाहुः– देवदत्तादीनां तु संज्ञाशब्दानां सत्युपदेशसहायप्रत्यक्षव्यङ्ग्यत्वे न जातिशब्दत्वम्, तत्र हि पिण्डे प्राक्संज्ञासम्बन्धाद् यादृशः प्रत्ययो जायते तादृश एव निवृत्तेऽपि संज्ञासम्बन्धे, व्यापारिते हि शब्दे संज्ञित्वमात्रं परिस्फुरति, नाधिकं किञ्चित्, यदुक्तं– " प्राक्शब्दाद् यादृशी बुद्धिः शब्दादपि हि तादृशी ।" ब्राह्मण्यं तु नाम वस्तुगतं व्यक्तिव्यतिरिक्तं देशान्तरे कालान्तरे पिण्डान्तरे उपदेशसहायप्रत्यक्षव्यङ्ग्यतयानिवेद्यमानमास्ते, न तु तथा देवदत्तत्वं नाम, एतच्च कारिकायामनभिहितमपि जातिशब्दार्थानुगमाल्लभ्यते, जायतेऽनया भिन्नेष्वभिन्नावभिधान-प्रत्ययाविति जातिरित्येवं व्याख्याने सर्वं सुस्थमित्याहुः । अथ कुमारत्वादीनां कथं जातित्वम् ? एष्टव्यं तेषां जातित्वम्, इतरथा हि कुमारी भार्याऽस्य– कुमारीभार्य इत्यत्र " स्वाङ्गान्ङीर्जातिश्च० " [ ३. २. ५६. ] इति पुंवद्भाव-

प्रतिषेधो न स्यात्, उच्यते- अस्त्येवात्र जातित्वं संस्थानविशेषव्यङ्ग्यत्वात्, ज्ञायते हि निपुणैर्दर्शनादेवेयं कुमारीति; ननु कुमारीशब्देन पुंसा सहासं प्रयोगमात्रमुच्यते, न तु जातिरिति कथं जातित्वं ? तथाहि- अननुभूतपुरुषसम्बन्धा कुमारीत्युच्यते, नैतदस्ति- खट्वाप्यननुभूतपुरुषसम्बन्धा, सा कस्मात् कुमारीशब्देन नाभिधीयते, तस्मान्न पुरुषविरहमात्रेण कुमारीशब्दस्तत्रार्थे वर्त्तते, किं तर्हि ? पुरुषसम्बन्धविरहमुपलक्षणीकृत्य जातिविशेष एव हस्त्यादिशब्दवत् कुमारीशब्देनोच्यते, तथाहि- न सर्वो हस्तीत्युच्यते, किं तर्हि ? कश्चिदेवोपलक्षणीकृतवस्तुसम्बन्धो जातिविशेष एव, भवति कुमारत्वादीनां जातिशब्दत्वमेवम्- " वयस्यनन्त्ये " [ २. ४. २१. ] इत्यत्र कुमारीत्यनुदाहरणमेव; यदा तु—

" प्रादुर्भाव-विनाशाभ्यां, सत्त्वस्य युगपद् गुणैः ।
असर्वलिङ्गां बह्वर्थां, तां जातिं कवयो विदुः ॥ "

इति जातिलक्षणं तदा कुमारीत्वं न जातिरिति पुंवद्भावो भवत्येव, यतः सत्येव पिण्डे कुमारीत्वं निवर्त्तते, तदा वयोलक्षण एव ङीः । केषाञ्चित् सम्बन्धिशब्दानां क्रियाशब्दानां चार्थस्यासत्यपि जातित्वे जातिनिबन्धनं शास्त्रे कार्यमिष्टम्, तदर्थं तत्रापि जातित्वं परिभाषयन्नाह- **गोत्रं च चरणैः सहे**ति- द्विविधमिह गोत्रं- प्रवराध्यायपठितमपत्यप्रत्ययाभिधेयं च, यदाह- अनन्तरापत्यं वृद्धापत्यं युवापत्यं च गोत्रमिति । इदमेवात्र गृह्यते, अस्यैव परिभाषितत्वात्, तदभिधायिनोऽपत्यप्रत्ययान्ता अप्यभेदोपचारात्, ते चापत्यापत्यवत्सम्बन्धद्वारेणापत्ये प्रवृत्ता अपि सम्बन्धिशब्दाः, चरणशब्दाश्च कठादयः क्रियाशब्दाः, कठादिप्रोक्ताध्ययनाय यथास्वं व्रतचरणक्रियानिमित्तत्वेनाध्येतृषु प्रवृत्तत्वात्, तदर्थस्य लोके जातित्वेनाप्रसिद्धस्यापि जातिकार्यप्रसाधनाय वाचनिकं जातित्वमभ्युपेयते, तेन नाडायनी चारायणी कठीति जातिलक्षणो ङीः सिद्धो भवति । न च " स्त्रीपुंसयोरपत्यान्ताः " इत्यसर्वलिङ्गत्वे च नाडायनादीनां चाध्ययनक्रियानर्हत्वात् नपुंसके वृत्त्यभावात् सकृदाख्यातनिर्ग्राह्यताऽस्तीति न पूर्वलक्षणेन संग्रहः । तथा च न कयाचिदाकृत्या एष नाडायनः कठो वैश्या[ख्यायते, नवा]ख्यानेऽप्याकृत्यन्तरे तयोर्निर्ग्राह्यताऽस्तीति । इति लक्षणत्रयलक्षिताया जातेरुदाहरणान्याह- **कुक्कुटी**त्यादि- कुकेः " नर्कुट-कुकुट० " [ उणा० ११५. ] इति निपातनात् कुटि- कुक्कुटः । नडस्यापत्यं चरस्यापत्यं वृद्धं स्त्रीति नडादित्वादायनणि वृद्धौ ङ्यां च- **नाडायनी, चारायणी** । कठतेरचि- कठः, बह्व ऋचो यस्य " नञ्-बहोर्ऋचः० " [ ७. ३. १३५. ] इति समासान्तेऽपि- बह्वृचः, कठेन बह्वृचेन च प्रोक्तं वेदमधीत इति "तेन प्रोक्ते" [ ६. ३. १८१. ] इत्यणन्तात् " तद्वेत्त्यधीते " [ ६. २. ११७. ] इत्यणः " प्रोक्तात् " [ ६. २. १२९. ] इति लोपे प्रोक्ताथर्स्य च " कठादिभ्यः० " [ ६. ३. १८३. ] इति लोपे ङ्यां च- **कठी, बह्वृची** । **मुण्डे**ति- मुण्डशब्दो मुण्डनक्रियोत्पाद्ये गुणे तद्योगाद् द्रव्ये वर्त्तते, शुक्लशब्दो गुणवचनः, कृत-**देवदत्तौ** क्रिया-यदृच्छाशब्दौ । इभमर्हति " " दण्डादेर्यः " [ ६. ४. १७८. ] इति ये- **इभ्या** । " क्षत्रादियः " [ ६. १. ९३. ] इति **क्षत्रिया** । " विंशत् प्रवेशने " " शिक्यास्य० " [ उणा० ३६४. ] इत्यादिवचनाद् ये निपातनाद् वृद्धौ- **वैश्या** । " स्वामि-वैश्येऽर्यः " [ ५. १. ३३. ] इति- **अर्या** । अथ कथं गवयादिशब्दानां यान्तत्वाद् ङी इत्याह- **गौरादिपाठादि**ति । अय इत्युक्तेऽपि यमात्रस्य क्रियामवृत्तेर्नामविशेषणत्वेन तदन्तप्रतिपत्तेर्यान्त इति गम्यते, किमन्तग्रहणेनेत्याह- **अन्तग्रहणमि**त्यादि । मक्षिकादयः शब्दा नित्यस्त्रीजातिविषया इति न भवतीत्युदाहरति- **मक्षिके**त्यादि । ननु कथं बलाका-खट्वादयः शब्दा नित्यस्त्रीविषया भवन्ति ? संज्ञाशब्दत्वेनैषां पुंसि नपुंसके च प्रयोगस्य प्रतिषेद्धुमशक्यत्वात्, नहि बलाको बलाकं, खट्वः खट्वमित्यादि कस्यचिन्नाम क्रियमाणं निवारयितुं शक्यमिति; उच्यते- इदानीं संज्ञाशब्दत्वेन पुंसि नपुंसके वा बलाकादिशब्दः प्रयुज्यमानो बलां( बलमा )कायतीत्येवं यौगिकत्वेन यदृच्छया वा प्रयुज्यते, न जातुचिज्जातिवचनो भवति, शब्दान्तरमेवैतत् संज्ञात्वेन प्रयुक्तम्, यस्तु पक्षिविशेषे वर्त्तते स जातिशब्द एव नित्यस्त्रीविषय एव च । अथवाऽनित्यस्त्री जातिविशेषणद्वारेण शब्दस्य विशेषणं न साक्षात्- अनित्यस्त्रीजात्यर्थस्य वाचको यः शब्दस्ततः प्रत्यय इति, एवं च समानाकृतित्वं लभ्यते- समानायामाकृतौ योऽनित्यस्त्रीजात्यर्थ इति, नहि भिन्नाकृतौ जात्यर्थो भवति, अभिन्नाभिधान-प्रत्यय-हेतुत्वाज्जातेः, तस्माद् भिन्नाकृतित्वे जातित्वं न स्यात्, तेनानित्यस्त्रीत्यनेन जात्यर्थस्य विशेषितत्वात् समानाकृतित्वस्यान्तर्भावो भवति, तथा च ब्राह्मणलक्षणोऽर्थ एकस्मिन्नेव ब्राह्मण्ये वर्त्तमानः कदाचित् स्त्रीत्ववाचकेन शब्देनाभिलभ्यते कदाचित् पुंस्त्ववाचकेन- ब्राह्मणी, ब्राह्मण इति, तदयं समानायामाकृतौ भवत्यनित्यस्त्रीजात्यर्थः । यस्त्वेष बलाकशब्दः पुंसि नपुंसके च संज्ञात्वेन विनियुक्तः स आकृत्यन्तरं खल्वनित्यस्त्रीविषयो भवति, समानायामाकृतौ हि नित्यस्त्रीजात्यर्थवाचित्वमेव, नहि पक्षिविशेषजातौ बलाकाशब्दः पुंवचनोऽस्ति । साक्षाच्छब्दविशेषणपक्षस्तु व्यवच्छेद्याभावादनित्यस्त्रीति विशेषणानर्थक्यान्नाश्रयणीय इति, नहि कश्चिच्छब्दोऽनित्यस्त्रीविषयो न भवति, अत्रापि संज्ञात्वेन प्रयुज्यमानत्वाल्लिङ्गान्तरवर्त्तित्वसम्भवात् किमनित्य-

स्त्रीत्यनेन व्यवच्छिद्यत इत्यनर्थकमेव स्यादिति स्थितमेतज्जात्यर्थद्वारकमनित्यस्त्रीति शब्दस्य विशेषणम् । यद्येवं तर्हि द्रोणी, कुटीत्यादि न सिध्यति, नहि समानायामाकृतौ द्रोणीशब्दोऽनित्यस्त्रीजात्यर्थवाचकः, नहि गवादन्यां द्रोणशब्दः पुंसि प्रयुज्यते, किं तर्हि ? आकृत्यन्तरे प्रमाणविशेषे, गवादन्यां तु नित्यस्त्रीजात्यर्थवाच्येवेति पृच्छति– **कथं तर्हि** इत्यादि– अत्र शब्दस्यैवानित्यस्त्रीत्वं न जात्यर्थस्येति प्रश्नतात्पर्यार्थः । परिहरति– **नैवमित्यादिना** । श्रीशेषभट्टारकस्तु साक्षाच्छब्दविशेषणपक्षमभ्युपगम्याह, यथा–अस्तु कश्चिदस्त्रीविषयमित्यादि, एवं द्रोणीति सिद्ध्यति, द्रोणशब्दस्य क्वचित् परिमाणादौ पुंवृत्तित्वात्, किन्त्वेतस्मिन् पक्षे न कश्चिन्नित्यस्त्रीविषयः शब्दः सम्भवतीति यथोक्तनयेन व्यवच्छेद्याभावाद् नित्यस्त्रीति न कर्तव्यं भवतीति, सत्यमिच्छत्येवैतद् भगवान्, बलाका माक्षिकेत्याद्यजादिषु पाठः करिष्यते । यदि त्वन्य एव संज्ञाशब्दो बलाकाशब्दो जातिशब्दस्त्वन्य एवेति न्याय आश्रीयते ततः संज्ञाशब्दात् प्राप्तिरेव नास्तीति साक्षाच्छब्दविशेषणपक्षेऽपि न कश्चिद् दोष इति कैय्यटः ।

तदेवं समानायामाकृतौ योऽनित्यस्त्रीजात्यर्थवाचक इत्यमुष्मिन् कल्पे द्रोणीत्यादिसिद्धिः गौरादिपाठात् । भाष्यकारस्तु न, तत्र पाठानभ्युपगमेऽपि द्रोणीत्यादिसिद्ध्यर्थं समर्थवादितया साक्षाच्छब्दविशेषणमभ्युपगम्यानेनैव ङीप्रत्ययं साधयति, अस्त्रीविषयादिति च प्रत्याचष्टे, बलाका-मक्षिकादींस्त्वजादिषु पठति । **नात्रेति**– अत्र महाशूद्र[शब्दो न च त]स्यायं प्रतिषेधः, कथं तर्हि शूद्रस्य भार्या– शूद्रीत्यादि( ह– ) **जातिलक्षणस्य चेत्यादि** । **बहुसूकरेति**– बहवः सूकरा अस्यामित्यन्यपदार्थत्वात् सूकरशब्दः स्वार्थे स्त्रियां न वर्त्तत इति मुख्यत्वाभावः ॥ छ ॥ २. ४. ५४. ॥

**न्या स०—जातेरया०** । जातिः सामान्यमभिन्नबुद्धिध्वनिप्रसवनिबन्धनमर्थः, तत्र च कार्यासम्भवात् तद्वाचिनो ग्रहणमित्याह– **जातिवाचिन** इति । **सकृदुपदेशव्यङ्ग्यत्वे** इति– उभयोरपि संबध्यते । **आकृतिग्रहणेत्यत्र** गृह्यतेऽनेनेति [ गृहणम्, ] आकृतिः– अवयवरचना ग्रहणं यस्याः । **लिङ्गानां चेति**– लिङ्गानां सर्वं– सर्वत्वं भजति लिङ्गसमुदायं वा, सर्वं भजते वा । **सकृदाख्यातेत्यत्र** सकृदाख्याता सती नियमेन ग्राह्या । **पात्रीति**– अव्युत्पन्नोऽयं, "हु-या-मा०" [ उणा० ४५१. ] इति त्रप्रत्ययान्तो वा, त्रडन्तस्य तु टिद्द्वारा ङीः सिद्ध एव । **ब्राह्मणीति**– अयमप्यव्युत्पन्नः, "चिक्कण०" [ उणा० १९०. ] इति निपातो वा, ब्रह्म अणति कर्मणोऽणि पृषोदरादिनिपाते, अपत्याणि वाऽणन्तत्वाद् ङीः सिद्ध एव । **बहुवृचीति**– "नाप्रियादौ" [ ३. २. ५३. ] इत्यनेन न पुंवन्निषेधः, तत्र पूरण्यबन्तस्य ग्रहणात् । यद्यपि कठादयोऽपि ब्राह्मणविशेषास्तथापि कठादीनामत्रिलिङ्गत्वं न, यथा– कठेन प्रोक्तं वेत्त्यधीते वा– कठं ब्राह्मणकुलमिति तुर्यं जातिलक्षणं विधेयमेव । **कुटीति**– मतान्तरेण कुटीशब्दस्य नित्य-स्त्रीत्वं, स्वमते "गृहे कुटः" [ लिङ्गानु० पुंस्त्री० श्लो० २] इति लक्षणेन पुंस्त्रीत्वमिति मतान्तरेणेदं दर्शितम् । **कथं महाशूद्रीति**–केवलात् शूद्रात् ङ्यां महती चासौ शूद्री चेति महाशूद्रीति परस्याभिप्रायः । महांश्चासौ शूद्रश्चेति व्युत्पत्तिमात्रमिदम्, यथा– पलिक्नीत्यत्र वृत्तिनिमित्तं जातिः, जातिद्वारेण ङीः । **आभीरजातिरिति**– वैश्यभेद एव, आभीरो गवाद्युपजीवी । **कथं सुपर्णीति**– पर्णशब्दस्यैव जातित्वं, तस्य च कृते समासे अमुख्यत्वमित्यभिप्रायः ॥ २. ४. ५४. ॥

## पाक-कर्ण-पर्ण-वालान्तात् । २ । ४ । ५५ ॥

**त० प्र०**—पाकाद्यन्ताज्जातिवाचिनो नाम्नः स्त्रियां ङीर्भवति । **ओदनस्येव पाकोऽस्याः– ओदनपाकी, क्षणं क्षणेन वा पाकोऽस्याः– क्षणपाकी, आखुकर्णी, शङ्कुकर्णी, मुद्गपर्णी, सालपर्णी, गौरिव वाला अस्याः–गोवाली, अश्ववाली; संज्ञा एता ओषधीजातीनाम्** । **जातेरित्येव– बहुपाका यवागूः** । आसां जातीनां नित्यस्त्रीरूपत्वाद् **वचनम्, एवमुत्तरसूत्रत्रयेऽपि** ॥ ५५ ॥

**श० न्या०**—पाक० । पचनं– पाकः, घञ्, [ "कृतविक्षेपे" "पृश् पालनपूरणयोः" ] "इणुर्वि०" [ उणा० १८२. ] इति णे– कर्णः, पर्णः, वाल्यत इति घञि वालः, एषां कृतद्वन्द्वानामन्तशब्देन बहुव्रीहिः । आखोः कर्ण इव कर्णः पत्रं यस्याः, शङ्कुरिव कर्णोऽस्याः, मुद्गस्येव पर्णान्यस्याः, "सल गतौ" सल्यत इति घञि– सालो दन्त्यादिः, अश्वस्येव वाला अस्या इत्यवयवार्थस्याप्रधानत्वेऽपि समासार्थस्य जातिरूपस्य मुख्यत्वाद् मुख्यादिति न विरुध्यते । बहुः पाकोऽस्याः, नायं जातिप्रवृत्तिनिमित्तोऽपि तु क्रियासम्बन्धनिमित्त इति न भवति । पूर्वेण न सिध्यति नित्यस्त्रीत्वेन प्रतिषेधादत आह– **आसामित्यादि** ॥ छ. ॥ २. ४. ५५. ॥

**न्या० स०—पाककर्ण०** । **आखुकर्णीति**– आखोः कर्ण इव कर्णः पत्रं यस्याः, शङ्कुरिव कर्णोऽस्याः, मुद्गस्येव पर्णान्यस्याः, "सल गतौ" सल्यत इति घञि– सालः, दन्त्यादिः, सालस्येव पर्णान्यस्याः ॥ २. ४. ५५. ॥

## असत्-काण्ड-प्रान्त-शतैकाञ्चः पुष्पात् । २ । ४ । ५६ ॥

**त० प्र०**—सदादिरहितशब्दपूर्वो यः पुष्पशब्दस्तदन्ता-जातिवाचिनो नाम्नः स्त्रियां ङीर्भवति । शङ्खपुष्पी, सुवर्णपुष्पी, हिरण्यपुष्पी । सदादिप्रतिषेधः किम् ? सत्पुष्पा, काण्डपुष्पा, प्रान्तपुष्पा, शतपुष्पा, एकपुष्पा, प्राक्पुष्पा, प्रत्यक्पुष्पा ॥ ५६ ॥

**श० न्या०**—असत्० । सदादिद्वन्द्वगर्भोन्नञ्तत्पुरुषात् पञ्चमी, पर्युदासाच्च सदादिभ्योऽन्यः परिगृह्यते, तेन च पुष्पादिति विशेष्यते, जातेरिति केवलस्य च स्त्रियां वृत्त्यभावात् तदन्तश्च लभ्यत इत्याह– **सदादी**त्यादि । पुष्यतीरयचि– पुष्पम् । शङ्खादिवर्णे शङ्खादिशब्दः, तेन शङ्खादि पुष्पं यस्याः, सन्ति काण्डे प्रान्ते शतमेकं च पुष्पं पुष्पाणि वा यस्या इति विग्रहः । अञ्चतिर्लुप्तधाप्रत्ययान्तः, प्राक् प्रत्यक् पुष्पं यस्या इति विग्रहः ॥ छ. ॥ २. ४. ५६. ॥

**न्या० स०**—असत्काण्ड० । **शङ्खपुष्पी**ति– शङ्खादिवर्णः[र्णे] शङ्खादिशब्दः, तेन शङ्खादि पुष्पं यस्याः । **सत्पुष्पे**त्यादि– अत्र सन्ति काण्डे प्रान्ते शतमेकं च पुष्पं पुष्पाणि वा यस्या इति विग्रहः । **प्राक्पुष्पे**ति– अञ्चतिर्लुप्तधाप्रत्ययान्तः, प्राक् प्रत्यक् पुष्पं यस्याः ॥ २. ४. ५६. ॥

## असं-भस्त्रा-ऽजिनैक-शण-पिण्डात् फलात् । २ । ४ । ५७ ॥

**त० प्र०**—समादिवर्जितशब्दपूर्वो यः फलशब्दस्तदन्ता-जातिवाचिनो नाम्नः स्त्रियां ङीर्भवति । वासीफली, पूगफली; दाडिमफली । समादिप्रतिषेधः किम् ? संफला, भस्त्राफला, अजिनफला, एकफला; एकाच्छेच्छन्त्यन्ये, शणफला, पिण्डफला; औषधिजातिविशेषाणां संज्ञा एताः ॥५७॥

**श० न्या०**—असं० । वसतेः "कृ-शृ-कुटि०" [ उणा० ६१९. ] इति णितीकारे ङ्यां च– वासी, [ "पूरश् पवने" ] "पूमुदिभ्यां कित्" [ उणा० ९३. ] इति [ किति गे– ] पूगः, ददातेः "दो डिमः" [ उणा० ३५५. ] इति डिमे– दाडिमम्, वासीव पूगो दाडिमं च फलं यस्या इति विग्रहे **वासीफली**त्यादि । सङ्गतं भस्त्रेव, अजिनमिव, एकं च फलमस्या इति विग्रहे– **संफले**त्यादि । **अन्य** इति– पूर्वे । "शण दाने" अचि– शणः, शणस्येव पिण्डश्च फलान्यस्या इति विग्रहे **शणफले**त्यादि । **एता** इति– संफलेत्यादय इत्यर्थः ॥ छ. ॥ २. ४. ५७. ॥

**न्या० स०**—असंभस्त्रा० । **दासीफली**ति– दासीव पूगो दाडिमं च फलं यस्या इति । **संफले**ति– संगतं भस्त्रेव अजिनमिव एकं च फलमस्याः । **शणफले**ति– शणस्येव फलान्यस्याः । **पिण्डफले**ति– पिण्डाकाराणि फलान्यस्याः पिण्डफला कटुतुम्बी, यन्निघण्टुः– "कटुकाऽलाबुती तुम्बी लम्बा पिण्डफला तथा" ॥ २. ४. ५७. ॥

## अनञो मूलात् । २ । ४ । ५८ ॥

**त० प्र०**—नञ्वर्जितशब्दपूर्वो यो मूलशब्दस्तदन्ता-जातिवाचिनो नाम्नः स्त्रियां ङीर्भवति । दर्भमूली, शीर्षमूली । अनञ इति किम् ? अमूला ॥ ५८ ॥

**श० न्या०**—अन० । [ "मूङ् बन्धने" ] "शुक-शी-मूभ्यः कित्" [ उणा० ४६३. ] इति ले– मूलम्, दर्भस्येव शीर्षे मूलं यस्याः, न विद्यते मूलमस्याः ॥ छ. ॥ २ ४. ५८. ॥

**न्या० स०**—अनञो० । दर्भमूलीत्यत्र दर्भस्येव शीर्षे च मूलं यस्याः । अमूलेत्यत्र न विद्यन्ते मूलानि यस्याः ॥ २. ४. ५८. ॥

## धवाद् योगादपालकान्तात् । २ । ४ । ५९ ॥

**त० प्र०**—धवो– भर्ता, तद्वाचिनोऽकारान्ताद् योगात्– संबन्धात् स्त्रियां वर्तमानात् पालकान्तशब्दवर्जितान्नाम्नो ङीर्भवति । प्रष्ठस्य भार्या– प्रष्ठी, एवं प्रचरी, गणकी, महामात्री, कुमार्यां भवो भर्ता– कौमारः, तस्य भार्या– कौमारी प्रष्ठादयो हि शब्दा धववाचिनोऽपि योगात्– सोऽयमित्यभेदोपचारेण भार्यायां वर्तन्ते, यदा तु "तस्येदम्" [ ६. ३. १६०. ] इति व्यतिरेकविवक्षा तदा तद्धितो भवति– प्राष्ठी, प्राचरी । धवादिति किम् ? परिसृष्टा, प्रजाता, प्रसूता; सर्वत्र विनिर्लुठितगर्भेत्यर्थः, अस्त्यत्र योगस्तेन विना प्रसवाभावात्, न तु धववाचि नाम । योगादिति किम् ? देवदत्तो धवः, देवदत्ता भार्या स्वत एव, न तद्योगात् । अपालकान्तादिति किम् ? गोपालकस्य भार्या– गोपालिका, एवं– पशुपालिका, अविपालिका । आदित्येव– सहिष्णोर्भार्या– सहिष्णुः । कथं ज्येष्ठस्य भार्या– ज्येष्ठा ?, एवं कनिष्ठा ?, मध्यमा ? अजादिपाठात् ॥ ५९ ॥

**श० न्या०**—धवा० । यस्मिन् जीवत्यविधवेति भवति, मृते तु विधवेति, स धवो भर्त्तेत्याह– **धवो भर्त्ते**ति । अर्थे कार्यासम्भवादाह– **तद्वाचिन** इति । **योगादि**ति– अस्य पर्यायः **सम्बन्धादि**ति– सम्बन्धश्च सम्बन्धिनमपेक्षते, स

च प्रत्यासन्नत्वाद् धव एव विज्ञायते, तेन धवेन स्त्रियाः सम्बन्धादित्यर्थः । प्रतिष्ठत इति प्रष्ठः, "स्था-पा-स्ना०" [५. १. १४२.] इति कः "प्रष्ठोऽग्रगे" [२. ३. ३२.] इति षत्वम्, नाम्नोत्तरपदात् स्यादिमुत्पाद्य षत्वं क्रियते, अन्यथा संख्यासम्बन्धाल्लिङ्गसम्बन्धस्यान्तरङ्गत्वादाप् स्यात्, ततः स्यादौ समासेऽकारान्तत्वाभावाद् ङीर्न स्यात्, तस्माद् * गतिकारक०* इति प्राक् स्याद्युत्पत्तेः समासे प्रष्ठशब्दोऽकारान्तो भवतीति सिध्यति ङीः, अत्र प्रस्थानक्रियाकर्तृत्वात् प्रष्ठो भर्त्तोच्यते, तद्योगादिह प्रष्ठशब्दस्य स्त्रियां वृत्तिरिति ङ्यां- **प्रष्ठी** । प्रचरतीति प्रचरः, तद्भार्या- **प्रचरी** । एवं- गणयतीति गणकः, तद्भार्या- **गणकी** । महती मात्रा यस्य स महामात्रः, तद्भार्या- **महामात्री** । **कुमार्यां भव** इति- यो ह्यपूर्वपतिं कुमारीमुपपन्नः स तत्र भवो भवति, एवं च कुमार्या भर्त्ता कौमार उच्यते, तस्य भार्या- **कुमारी**ति । नन्वपूर्वपतिमुपपन्नेत्यपूर्वत्वे द्योत्ये कुमारीशब्दात् प्रथमान्तादेव स्वार्थे तद्धितमुत्पाद्यैवंविशेषकुमार्येव कुमारीति पूर्वेऽभिदधति, भवतां तु धवयोगात् तद्भार्याऽन्यापीत्यर्थः, उच्यते- प्रत्यासत्तेः सैवापूर्वपतिः कुमारी कौमारभावनिमित्तभूता कौमारीत्युच्यते, न त्वितरेति, यस्यां हि भवश्यं कौमार इति व्यपदिश्यते सा कौमारपर्यायस्य हेतुभूता कौमारस्यासन्ना भवति, यास्त्वितरा न तत्रायं कौमार इति ताः कौमाराद् विप्रकृष्यन्ते, यदि हि तस्येदमित्यभिसम्बन्धेन वृत्तिर्वेदितव्या, नह्ययमेताभिसम्बन्धस्तस्येदमिति, किन्तु सोऽयमित्यपि, अभेदाच्च भेदस्य निवृत्तत्वात् तद्धितानुत्पत्तिः, भेदस्य तु विवक्षायां तद्धितो न निवार्यत इत्याह- **प्रष्ठादयोऽपी**त्यादि । अयमर्थः- चतुर्भिः प्रकारैरतस्मिन् स इति भवति, तात्स्थ्याद् यथा- मञ्चा हसन्तीति, बालेषु मञ्चस्त्वाध्यारोपान्मञ्चशब्दप्रवृत्तिर्हसन्तीति पदान्तरप्रयोगाद् विज्ञायते । ताद्धर्म्याद् यथा- जटिनं यान्तं ब्रह्मदत्त इत्याह, ब्रह्मदत्तधर्मलाभाज्जटिनि तद्रूपारोपः; सिंहो माणवको गौर्वाहीक इत्यादावपि ताद्धर्म्यात् तद्रूपारोपात् तच्छब्दप्रवृत्तिः । तथा च हरिः—

"गोत्वानुषङ्गो वाहीके, निमित्तात् कैश्चिदिष्यते ।
अर्थमात्रं विपर्यस्तं, शब्दः स्वार्थे व्यवस्थितः ॥"

तत्सामीप्याद् यथा- गङ्गायां घोषः कूपे गर्गकुलमिति । तत्साहचर्याद् यथा- कुन्तान् प्रवेशय, यष्टीः प्रवेशयति; इह तु साहचर्यात् स्त्रियां प्रष्ठत्वाध्यारोपः । अथवा अप्रतिष्ठमानायामपि तस्यां प्रष्ठशब्दो वर्त्तते, यथा- पञ्चभिर्हलैः कृषति, एवं स्त्रिया अपि प्रस्थानक्रियादौ प्रतिसंविधानाचरणात् तदङ्गभावात् कर्तृत्वं स्यादेव, यथा ह्यसौ पापमकुर्वत्यपि संविधात्रीत्वात् कर्तृत्वमाप्यत एव, यथा वा स्वामिदासौ पचत इति स्वामिनः संविधातृत्वात् पक्तृत्वं दासस्य च साक्षात् तथा स्त्री-पुंसयोः प्रस्थातृत्वमिति; पुरुषगतायाः प्रस्थानक्रियायास्तस्यामारोपाद् वेति । सर्वे एते प्रष्ठादयः शब्दाः पुंसो वाचकाः, पुंयोगात् तु यदिच्छ( यदेत्थ )मुत्तरकालं स्त्रियां वर्त्तन्ते तदा एतेभ्यो ङीर्भवति, यतो गणनादिक्रियास्वभावं यद् गणकादिशब्दानां प्रवृत्तिनिमित्तं तस्य पुंस्येव संभवो न स्त्रियां तस्मात् पुंशब्दा एते पुंसो वाचकाः, धवग्रहणं तु भार्याप्रतिपत्त्यर्थमित्युक्तम्- **धववाचिनोऽपी**ति, नन्वयुक्तमेतत्- स्त्रियामपि हि गणनादिक्रियाणां सम्भवात्; किञ्च येषां शब्दानां जातिरपि प्रवृत्तिनिमित्तं तेषामपि पुंयोगविवक्षायामिष्यत एव ङीः, तत् किमुच्यते पुंस्येव प्रवृत्तिनिमित्तसम्भवोऽस्ति न स्त्रियामिति, यथा- ब्राह्मणस्य स्त्री ब्राह्मणी, अत्र सत्यपि ब्राह्मण्ये तस्याः प्रवृत्तिनिमित्तेऽनेन ङीर्भवत्येव, यथा शूद्रावर्जनेऽपि पुंयोगे ङीर्विधीयत इति, यतो जातेरित्यस्य शेषतया प्रतिषेधविधानादस्यैव प्रतिषेधात् सूत्रान्तरेण भवत्येवेति, यदेव हि पुंसि शूद्रत्वं ब्राह्मण्यं प्रवृत्तिनिमित्तं तदेव स्त्रियामपि दृश्यत इति चेत् ?; नैवम्- गणनाग्रेसरादिव्यापाराणां स्त्रियामनौचित्याल्लौकिकानामप्रसिद्धत्वात् पुंस्येव सम्भव इति । प्रष्ठादीनां हि स्वयं स्त्रीवृत्तित्वमपश्यन्तः पुंयोगात् स्त्रियां वर्त्तत इत्येवं गौणीं कल्पनामाश्रित्य प्रष्ठीति सूत्रकृतः साधितवन्तः, यत्र तु ब्राह्मणीप्रभृतीनां मुख्यं स्वयं ब्राह्मणजात्यादिप्रवृत्तिनिमित्तं सम्भवति तत्र तदनादृत्य कः खलु स्वस्थचेता गौणीं स्त्रीवृत्तितामुपादाय शब्दमुपपादयेत् । तस्माद् यत्र स्वतः स्त्रीवृत्तित्वं शब्दस्य प्रवृत्तिनिमित्तमस्ति न तत्रानेन ङीर्भवति, किं तर्हि ? जातिलक्षण एव; यदि च कथञ्चिद् गणक-प्रष्ठादीनां स्त्रीवृत्तित्वं समर्थ्यते तदा ततः स्त्रियामावेव भवति- गणिका प्रष्ठेति; एतद्विपरीतविषयो ह्ययं विधियोगात् स्त्रीत्वप्रतिपत्तेः, येन यत्र स्वतोऽस्त्रीवृत्तित्वे पुंयोगात् स्त्रीवृत्तित्वं तत्रानेन ङीरिति । यदप्युक्तं- सत्यपि शूद्रत्वजातिलक्षणे प्रवृत्तिनिमित्ते शूद्रीति पुंयोगविवक्षायां ङीर्भवतीति, तदसत्- नहि तत्र यैव शूद्रा सैव शूद्रस्य भार्या शूद्रीत्येवं प्रतिपादयिषिता, किं तर्हि न या शूद्रा, क्षत्रियाणी ब्राह्मणी वा, तत्र शूद्रस्य भार्या- शूद्रीत्येवं भवति । **विनिर्लुठितगर्भे**ति- अयमर्थः- पुमान् हि विहितगर्भाधानात् प्रसूतः परिसृष्ट इति कथ्यते, ततश्च प्रसवकादीनामपि धववाचित्वात् कथमिव प्रत्युदाहरणत्वे स्युरिति, नैवम्- पुमान् हि कामं गर्भमाधत्ते न तु ततो गर्भो विलुठतीति । परिसर्ग-प्रसवौ सम्बन्धनिमित्तौ, न च तौ पुंमासमाचक्षाते इत्याह- **अस्त्यत्र योग** इत्यादि । अन्ये त्वाहुः- परिसर्गो दोहद उच्यते, तेन परिसृष्टा- परिसर्गा, जातदोहदेत्यर्थः, प्रजनः- प्रथमं गर्भग्रहणम्, प्रसवस्तु गर्भ-

विनिर्लुठनम्, एतैश्च योषित एव सम्बन्धो न पुंसः, पुंसंयोगनिमित्ता एते, न तद्वाचिन इत्यर्थः। **प्रजाते**ति- "आः खनिसनिजनः" [ ४. २. ६०. ] इति आत्वम्। **देवदत्तो धव** इति- अनेन देवदत्तशब्दस्य धववाचित्वं प्रदर्श्यते। **देवदत्ता भार्ये**ति- यथा देवदत्तः स्वत एव देवदत्तस्तथाकृतनामत्वान्न त्वर्थान्तरयोगात्, एवमियमपि प्रथममेव देवदत्तेत्यर्थः। **स्वत** इत्यनेन व्यवच्छिन्नं दर्शयति- **न तद्योगादि**ति- न धवयोगादित्यर्थः। **[ गोपालकस्य ]** पालयतीति पालकः, गवां पालक इति "अकेन क्रीडाजीवे" [ ३. १. ८१. ] इति कर्मषष्ठीसमासः। ननु गोपालनक्रियायाः पुंसि स्त्रियां वा न विशेषः कश्चिदिति गोपालिकादीनां स्वत एव स्त्रीवृत्तित्वसद्भावादावेव भविष्यति, किं प्रतिषेधेनेति, नैवम्- यत्र हि स्वतः स्त्रीवृत्तित्वं दुर्लभप्रार्थनं तत्र पुंयोगनिमित्तामौपका[चा]रिकीं वृत्तिमाश्रित्यानेन ङीः स्यादिति प्रतिषेध उच्यते, तेन देवदत्तादीनामपि पुंयोगस्याविवक्षितत्वाद् देवदत्तेति भवति, पुंयोगविवक्षायां तु देवदत्तीति। **कथमि**ति-वृद्धतमः- ज्येष्ठः "गुणाङ्गाद् वा०" [ ७. ३. ९. ] इति इष्ठः, "वृद्धस्य च ज्यः" [ ७. ४. ३५ ] इति [ ज्यादेशः, ] तस्य भार्या- **ज्येष्ठा,** एवम्- अल्पतमः- कनिष्ठः, पूर्ववदिष्ठः, "अल्पयूनोः०" [ ७. ३. ३३. ] इति कनादेशः, मध्ये जातः- मध्यमः "मध्यान्मः" [ ६. ३. ७६. ] इति मः; पुंयोगविवक्षायां स्त्रीवृत्तित्वात् प्रतिषेधेन वा संगृहीतत्वादेभ्योऽपि ङीः प्राप्नोतीति प्रश्नार्थः। समाधत्ते- **अजादिपाठादि**ति ॥ छ. ॥ २. ४. ५९. ॥

---

**न्या० स०—धवाद् योगा०।** **सम्बन्धादि**ति- सम्बन्धश्च संबन्धिनमपेक्षते, स च प्रत्यासन्नत्वाद् धवस्यैव विज्ञायते, तेन धवेन स्त्रिया सम्बन्धादित्यर्थः। **कौमारी**ति- कुमारी एव प्रतीयते। **योगात् सोऽयमि**ति- अत्र सोऽयमित्यभिसम्बन्धेन वृत्तिर्वेदितव्या, न त्वयमेवाभिसम्बन्धस्तस्येदमिति, किन्तु सोऽयमित्यपि, अभेदाच्च भेदस्य निवृत्तत्वाद् तद्धितानुपपत्तिः। **व्यतिरेकविवक्षे**ति- प्रष्ठस्येयमिति भेदविवक्षेत्यर्थः। **अस्त्यत्र योग** इति- परिसर्ग-प्रसवौ सम्बन्धनिमित्तौ, न च तौ पुमांसमाचक्षात इत्याह- **अस्त्यत्रे**ति। अन्ये त्वाहुः- परिसर्गो दोहद उच्यते, तेन परिसृष्टा सपरिसर्गा, जातदोहदेत्यर्थः। प्रजनः-प्रथमं गर्भग्रहणं, प्रसवस्तु गर्भविनिर्लुण्ठनम्, एतैश्च योषित एव सम्बन्धो न पुंसः, पुरुषसंयोगनिमित्ता एते, न तद्वाचिन इत्यर्थः। **गोपालकस्ये**ति- पालयतीति पालकः, गवां पालक इति "अकेन क्रीडाजीवे" [ ३. १. ८१. ] इति कर्मषष्ठीसमासः ॥ २. ४. ५९. ॥

## पूतक्रतु-वृषाकप्यग्नि-कुसित-कुसिदादै च । २ । ४ । ६० ॥

**त० प्र०**—एभ्यो धवनामभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङीर्भवति, तत्संनियोगे ऐकारश्चान्तादेशः। पूतक्रतोर्भार्या- पूतक्रतायी, एवं- वृषाकपायी, अग्नायी, कुसितायी, कुसिदायी। योगादित्येव- पूताः क्रतवो यया सा पूतक्रतुः, एवं- वृषाकपिर्नाम काचित् ॥ ६० ॥

---

**श० न्या०**—**पूत०**। पूगः क्ते- पूतः, कृगः "कृ-लाभ्याम्०" [ उणा० ७८०. ] इति कित्यतौ- क्रतुः, पूतः क्रतुर्येनेति बहुव्रीहिः। वृषाकपिशब्दोऽव्युत्पन्नः, यद्वा वृषेः "नाम्युपान्त०" [ ५. १. ५४. ] इति के- वृषः, कम्पतेः "अम्भिकुण्डि०" [ उणा० ६१४. ] इति इप्रत्यये नलोपे च- कपिशब्दः, तत्र षष्ठीतत्पुरुषे बहुलवचनाद् दीर्घत्वम्। अगतेः "वी-यु-सु-वहि०" [ उणा० ६७७. ] इति नौ- अग्निः। "कुसच् श्लेषे" "कुशि-पिशि०" [ उणा०२१२. ] इति किदिते- कुसितः, "कुसेरिदेदौ" [ उणा० २४१. ] इति ह्रस्वादाविदे- कुसिदः, ततः पूतक्रतुश्चेत्यादिसमाहारद्वन्द्वाद् ङीप्रत्ययसन्नियोगे पञ्चमी, 'ऐ' इत्यादेशसन्नियोगे च षष्ठी• विपरिणामो द्रष्टव्यः। **पूतक्रतायी**ति- अत्र पूतः क्रतुर्येनेति पवनक्रियाकर्तृधववाचिशब्दस्य तद्योगात्- सोऽयमित्यभिसम्बन्धात् प्रवृत्तिनिमित्ताध्यारोपात् स्त्रीवृत्तित्वलाभादनेन ङीप्रत्ययोऽन्तस्यैत्वं तत आयादेशः; एवं- **वृषाकपायी**त्यादावपि द्रष्टव्यम्; या तु स्वयमेव पूतक्रतुस्तत्र धवयोगात् प्रवृत्तिर्नेति न प्रत्ययो नाप्यादेश इति, एवमन्यत्रापि। पूतक्रतु-वृषाकप्यग्नीनामकारान्तत्वाभावाद् "धवाद्०" [ २. ४. ५९. ] इत्यनेन ङीप्रत्ययस्यासिद्धत्वात् तदर्थमप्युपादनम्, कुसित-कुसिदयोस्त्वकारान्तत्वात् पूर्वेणैव प्रत्ययसिद्धावैकारार्थमेवेति। चकार आदेशस्य प्रत्ययसन्नियोगशिष्टतार्थः, असति तस्मिन्नैकारादेश एव विज्ञायेत, ततः परत्वान्नित्यत्वाच्चैकारे जातेऽकारान्तताविघाताद् ङीप्रत्ययो न स्यादिति। ननु पञ्चमीनिर्देशात् प्रत्ययप्रकरणत्वाच्चैकारः प्रत्यय एव विज्ञायेत, ततश्च समानप्रत्ययेन सह ङीप्रत्ययस्य पाक्षिकी प्रवृत्तिः स्यात्, कथमुक्तम्- ऐकारश्चान्तादेश इति, नैष दोषः- "एयेन्नायी" [ ३. २. ५२. ] इति निर्देशात्, नह्यैकारस्य प्रत्ययत्वेऽग्नायीति ॥ छ. ॥ २. ४. ६०. ॥

---

**न्या० स०—पूतक्रतु०।** ननु कुसिदादै चेति पञ्चमीनिर्देशादैकारः प्रत्यय एव विज्ञायते, ततश्च ङी ऐकारश्च प्रत्ययौ भवत इति सूत्रार्थः कथं न लभ्यते, कथमुक्तमैकारश्चान्तादेश इति,

नैष दोषः– " पयेऽग्नायी " [ ३. २. ५२. ] इति निर्देशात्, न ऐकारस्य प्रत्ययत्वे अग्नायीति भवति । वृषो धर्मः, कपिर्वराहस्ताद्रूप्यात् पृषोदरादित्वाद् दीर्घे– वृषाकपिः, वृषं दानवमाकम्पितवान् वा " अभि-कुण्ठि " [ उणा ६१४. ] इति इः । कुसित-कुसिदौ ऋषी ॥ २. ४. ६०. ॥

## मनोरौ च वा । २ । ४ । ६१ ॥

**त० प्र०—मनोर्धवनाम्नस्तद्योगात् स्त्रियां वर्तमानाद् ङीर्वा भवति, तत्संनियोगे औकार ऐकारश्चान्तादेशो भवति । मनोर्भार्या– मनावी, मनायी, मनुः ॥ ६१ ॥**

**श० न्या०—मनो०** । प्रत्ययसन्नियोगार्थश्चकारोऽनुवर्त्तते, वाशब्दो विकल्पार्थः, प्रथमविधेयतया प्रधानेन ङीप्रत्ययेन सम्बध्यते, न त्वौकारेण, तत्सन्निधानेनाप्रधानत्वादित्याह– **ङीर्वा भवती**ति । **औ चे**ति चकारेणैकारोऽनुकृष्यत इत्याह– **औकार ऐकारश्चे**ति । **मनोर्भार्ये**ति– मन्यतेः " भृ-मृ-तृ-सरि० " [ उणा० ७१६. ] इत्युप्रत्यये– मनुः ॥ छ. ॥ २. ४. ६१. ॥

**न्या० स०—मनोरौ०** । प्रत्ययसंनियोगार्थ चकारोऽनुवर्त्तते । वाशब्दः प्रथमं विधेयतया प्रधानेन ङीप्रत्ययेन संबध्यते, न त्वौकारेण तत्संनियोगविधानेनाप्रधानत्वादिति ॥ २. ४. ६१. ॥

## वरुणेन्द्र-रुद्र-भव-शर्व-मृडादान् चान्तः । २ । ४ । ६२ ॥

**त० प्र०—एभ्यो धवनामभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङीर्भवति, तत्संनियोगे च आनन्त आगमो भवति । वरुणस्य भार्या– वरुणानी, एवम्– इन्द्राणी, रुद्राणी, भवानी, शर्वाणी, मृडानी । कश्चित् त्वाहिताग्नेर्भार्या– आहिताग्न्यानी, एवं– प्रजापत्यानी, वणिजानीत्यादावपीच्छति; इन्द्रमाचष्टे इन्द्, तद्भार्या– इन्द्राणी, एवं– मातुलानीत्यपरः ॥ ६२ ॥**

**श० न्या०—वरु०** । " वृञ् वरणे " " ऋ-कृ-वृ० " [ उणा० १९६. ] इत्युणे– वरुणः, " इदु परमैश्वर्ये " " भी-वृधि० " [उणा० ३८७.] इति रे– इन्द्रः, रोदितीति "ऋज्यजि०" [ उणा० ३८८. ] इति किति रप्रत्यये– रुद्रः, यन्निरुक्तम्– यस्माद् रोदिति तस्माद् रुद्र इति । भवतेरचि– भवः, " शर्व गतौ " अचि– शर्वः, " मृडश् क्षोदे " " नाम्युपान्त० " [ ५. १. ५४. ] इति के– मृडः, ततः समाहारद्वन्द्वात् पञ्चमी । **आन् चे**त्यविकारनिर्देशोऽसंदेहार्थः । नन्वकारकरणसामर्थ्यादेव " लुगस्यादेत्यपदे " [ २. १. ११३. ] इत्यस्य बाधितत्वात् समानदीर्घत्वे रुद्राणीप्रयोगस्य सिद्धत्वाद् 'आन्' इत्यागमस्य दीर्घोच्चारणमतिरिच्यते, अत्रोत्पलः शिवोक्तमनुवदति– दीर्घग्रहणे प्रयोजनं चिन्त्यम्; अन्ये त्वाहुः– एभ्यो णौ क्विपि सति व्यञ्जनान्तेभ्योऽपि यथा स्यादिति; अन्ये [ तु ] एतत् प्रयोजनं न क्षमन्ते– इन्द्रभार्याया एवेन्द्राणीत्यतो वृद्धव्यवहारे प्रतिपत्तिः, न त्विन्द्रमाचक्षाणस्य भार्यायाः, लौकिकार्थानुरोधेन चान्वाख्यानं क्रियते, न तु तद्विरोधेन । अन्ये तु– ' अनुपात्ताया अपि प्रकृतेर्दीर्घकरणेन आन्-ङीप्रत्ययौ कल्प्येते इत्याहुः, तेनाहिताग्नेः प्रजापतेर्वणिजश्च [ भार्या ] आहिताग्न्यानीत्यादि, शिष्टैरेते न प्रयुज्यत इति चेत्? मा प्रयुयुक्षत, यथावल्लक्षणमप्रयुक्त इत्येवमेतेषामन्वाख्यानं न विरुध्यते इति । सर्वमुपदर्शयति– **कश्चित् त्वि**त्यादिना ॥ छ. ॥ ॥ २. ४. ६२. ॥

**न्या० स०—वरुणेन्द्र०** । **आनन्त आगमो भवती**ति– आनिति दीर्घोच्चारणं मतसंग्रहार्थम्, अन्तग्रहणाभावे तु आनपि भिन्नप्रत्ययः स्यात् । किञ्चान्तग्रहणाभावे " अनेकवर्णः सर्वस्य " [ ७. ४. १०७. ] इति सर्वस्यादेशः स्यात् ॥ २. ४. ६२. ॥

## मातुलाचार्योपाध्यायाद् वा ।२।४।६३॥

**त० प्र०—एभ्यो धवनामभ्यस्तद्योगात् स्त्रियां वर्तमानेभ्यो ङीर्भवति, तत्सन्नियोगे चाऽऽनन्तो वा भवति । मातुलस्य भार्या– मातुलानी, मातुली; एवम्– आचार्यानी, क्षुभ्नादित्वाण्णत्वाभावः, आचार्यी, आचार्यीति नेच्छन्त्यन्ये, उपाध्यायानी, उपाध्यायी; अन्ये तु– मातुला, आचार्या, उपाध्यायेत्यपीच्छन्ति, तदर्थं ङीरपि विकल्पनीयः ॥ ६३ ॥**

**श० न्या०—मातु०** । मातुर्भ्रातेति " पितृमातुः० " [ ६. २. ६२. ] इति डुले– मातुलः । आचर्यत इति " ऋवर्णव्यञ्जनाद्० " [ ५. १. १७. ] इति घ्यणि– आचार्यः । उपेत्याधीयतेऽस्मादिति " इङोऽपादाने तु टिद् वा " [ ५. ३. १९. ] इति घञि– उपाध्यायः । ङीप्रत्ययस्य धवयोगे पूर्वेणैव सिद्धत्वादनूद्यमानत्वादान एव विधीयमानत्वात् तस्यैव वाशब्देन सम्बन्ध इत्याह– **आन् अन्तो वा भवती**ति । **अन्य** इति– पूर्वे । **अन्ये त्वि**ति– शकट एव, यदा त्वपेत्याधीयते यस्या इत्यपादानभूता स्त्री तदा " इङोऽपादाने तु टिद् वा " [ ५. ३. १९. ] इति विकल्पेन टित्वाद्– उपाध्यायी, उपाध्यायेत्यपि रूपद्वयं भवति ॥ छ. ॥ २. ४. ६३. ॥

**न्या० स०—मातु०** । [ नेदं व्याख्यातम् ] ॥ २. ४. ६३. ॥

## सूर्याद् देवतायां वा । २ । ४ । ६४ ॥

**त० प्र०**—सूर्यशब्दाद् धवनाम्नस्तद्योगाद् देवतायां स्त्रियां वर्तमानाद् ङीर्वा भवति, तत्संनियोगे आन् चान्तः । सूर्यस्य भार्या– सूर्याणी, पक्षे आबेव– सूर्या । देवतायामिति किम् ? सूर्यस्यादित्यस्य मनुष्यस्य वा भार्या मानुषी– सूरी । सूर्याणीति नेच्छन्त्यन्ये ॥ ६४ ॥

**श० न्या०**—सूर्या० । देवतायामित्यधिकृतस्य स्त्रियामित्यस्य विशेषणं, न सूर्यादित्यस्येत्याह– **देवतायां स्त्रियामिति** । **सूर्ये**ति– एतदेव च प्रसततरत्वात् पूर्वे बहु मन्यन्ते । **सूर्यस्यादित्यस्ये**ति– भगवतोऽपि हि सूर्यस्य वरप्रदानेन मानुषी या भार्या सा सूरी, यथा– कुन्ती । **अन्य** इति– पूर्वे, सूर्याणीति तु शकट एव ॥ छ. ॥ २. ४. ६४. ॥

**न्या० स०**—**सूर्याद्दे०** । सूर्यास्यादित्यस्येति– भगवतोऽपि हि सूर्यस्य वरप्रदानेन मानुषी या भार्या या– सूरी, यथा– कुन्ती । **सूर्याणीति नेच्छन्त्यन्ये** इति– पूर्वे, सूर्याणी तु शकट एव ॥ ॥ २. ४. ६४. ॥

## यव-यवना-ऽरण्य-हिमाद् दोषलिप्युरु-महत्त्वे । २ । ४ । ६५ ॥

**त० प्र०**—धवाद् योगादिति च निवृत्तम्, यवादिभ्यः शब्देभ्यो यथासंख्यं दोषादौ गम्यमाने स्त्रियां ङीर्भवति, तत्संनियोगे आन् चान्तः । दोषे– दुष्टो यवो– यवानी, यवानां दोषकारि सहचरितं द्रव्यान्तरम्, अप्रसवधर्मा यव एवेत्यन्ये । लिपौ– यवनानामियं लिपिः– यवनानी, उक्तार्थत्वात् "तस्येदम्" [ ६. ३. १६०. ] इत्यण् न भवति । उरुत्वे– उर्वरण्यम्– अरण्यानी । महत्त्वे– महद्धिमं– हिमानी । लिपीति किम् ? यावनी वृत्तिः, यवनस्य भार्या– यवनी । यवा-ऽरण्य-हिमानां तु दोषाद्यभावे स्त्रीत्वमेव नास्तीति न प्रत्युदाह्रियते, संज्ञायां तु भवत्येव– यवा, यवना, अरण्या; हिमा नाम काचित् ॥ ६५ ॥

**श० न्या०**—यव० । यौतेरचि– यवः, नन्द्यादित्वादने च– यवनः । "ऋक् गतौ" "धाग्-राजि०" [ उणा० ३७९. ] इत्यन्ये– अरण्यम् । हिनोतेः "क्षु-हिभ्याम्०" [ उणा० ३४१. ] इति किति मे– हिमम् । **धवयोगादिति च निवृत्तमि**ति– दोषाद्यर्थविशेषोपादानादिति शेषः, नहि धवयोगे दोषाद्यर्थप्रतीतिरिति भावः । **दुष्टो यवो यवानी**ति– अवयवार्थ एवंविधोऽसन्नेव व्युत्पत्तये परिकल्प्यते । **द्रव्यान्तरमि**ति– यवजातेर्हि जात्यन्तरं यवानीत्यर्थः । **अप्रसवधर्मा यव एवे**ति– यथाकथञ्चिद् दुष्टो यव इति प्रतीयमानोऽर्थो यवानीत्यर्थः । **यवनानी**ति– यवनदेशजन्मानो यवनास्तेषां लिपिरित्यर्थः । यद्येवं "तस्येदम्" [ ६. ३. १६०. ] इत्यण् कस्मान्न भवतीत्याह– **उक्तार्थत्वादि**ति– अण्विषये विधानादित्यर्थः, यदुपाध्यायः– 'तस्येदम्' बाधको ङीरिति । उरु-महत्त्वयोरेकार्थत्वेऽपि यथासंख्यार्थं पृथगुपादानम् । तेन– **अरण्यानी, हिमानी**ति– महदरण्यं, महद्धिममित्यर्थः । **यावनी**ति– "तस्येदम्" [ ६. ३. १६०. ] इत्यण् । **यवनी**ति– "धवाद् योगाद्०" [ २. ४.   ] इति ङीः । **यवारण्यहिमानामि**ति– एतेषां दोषाद्युपाधिक एवार्थे शब्दशक्तिस्वाभाव्यात् स्त्रीवृत्तित्वं, नान्यथा, विषयभेदे हि शब्दशक्तयो भिन्ना भवन्तीत्यर्थः ॥ छ. ॥ २. ४. ६५. ॥

**न्या० स०**—**यव-यवना०** । यौतेरचि यवः, नन्द्यादित्वादने च यवनः । **धवाद् योगादिति च निवृत्तमि**ति– दोषाद्यर्थविशेषोपादानादिति शेषः । **दुष्टो यव** इति– अत्रावयवार्थ एवंविधोऽसन्नेव व्युत्पत्तये परिकल्प्यते, यवजातेर्हि जात्यन्तरं यवानीत्यर्थः । **द्रव्यान्तरमि**ति– राळक इत्यर्थः । उरु-महत्त्वयोरेकार्थत्वेऽपि पृथगुपादानं यथासंख्यार्थम् । **अण् न भवती**ति– तद्विषये ङीविधानादित्यर्थः ॥ २. ४. ६५. ॥

## आर्य-क्षत्रियाद् वा । २ । ४ । ६६ ॥

**त० प्र०**—आभ्यां स्त्रियां ङीर्वा भवति, तत्संनियोगे आन् चान्तः । आर्याणी, आर्या; क्षत्रियाणी, क्षत्रिया; अधवयोगेऽयं विधिः, धवयोगे तु विशेषविधानात् पूर्वेण नित्यं ङीरेव– आर्यस्य भार्या– आर्यी, एवं– क्षत्रियी । धवयोग एवायं विधिरिति कश्चित्, तन्मते– आर्यस्य भार्या– आर्याणी, आर्या; एवं– क्षत्रियाणी, क्षत्रिया; धवयोगादन्यत्र आर्या क्षत्रियेत्येव भवति ॥ ६६ ॥

**श० न्या०**—आर्य० । अर्यते इति "ऋवर्ण०" [ ५. १. १७. ] इति घ्यणि– आर्य, क्षत्रस्यापत्यं "क्षत्रादियः" [ ३. १. ९३. ] इति इये– क्षत्रिय । धवयोगस्याधिकारस्य पूर्वसूत्रे निवृत्तत्वात् स्वार्थेऽयं विधिरित्याह– **अधवे**त्यादि– अर्यत इति "ऋवर्ण०" [ ५. १. १७. ] इति सामान्येन विधानान्निषेधाभावाद् धवयोगेऽप्यनेन ङीः प्राप्नोतीत्यत आह– **धवयोगे** त्वित्यादि । **धवयोग एवायं विधिरिति केचिदि**ति– यदुपाध्यायः– केचित् पुंयोग एवेच्छन्ति, अन्ये तु स्वार्थे एवेच्छन्ति, पुंयोगे त्वार्यी क्षत्रियीत्येवं भवितव्यमिति ॥ छ. ॥ २. ४. ६६. ॥

**न्या० स०—आर्य०।** [ नेह व्याख्यातम् ] ॥ २. ४. ६६. ॥

## यञो डायन् च वा । २ । ४ । ६७ ॥

**त० प्र०—यञ्प्रत्ययान्तात् स्त्रियां ङीर्भवति, तत्संनियोगे डायन् चान्तो वा भवति। गार्गी, गार्ग्यायणी; वात्सी, वात्स्यायनी ॥ ६७ ॥**

**श० न्या०—यञो०।** साक्षान्निर्दिष्टस्य डायन एव वाशब्देन सम्बन्धो, नानुमितेन ङीप्रत्ययेन प्रत्यासत्तेः, "षावटाद् वा" [ २. ४. ६९. ] इत्यस्यानर्थक्याद् वेत्यत आह- **डायन् चान्तो वे**ति। "गृश् शब्दे" "गम्यमि०" [ उणा० ९२. ] इति गे, गर्गस्यापत्यं वृद्धं स्त्री "गर्गादेः०" [ ६. १. ४२. ] इति यञि ङ्याम् "अस्य ङ्यां०" [ २. ४. ८६. ] इति "व्यञ्जनात् तद्धित०" [ २. ४. ८८. ] इत्यकार-यकारयोर्लुकि- **गार्गी**, डायनि च- **गार्ग्यायणी**। "वद व्यक्तायां वाचि" "मावावद्यमि०" [ उणा० ५६४. ] इति से- वत्स, शेषं पूर्ववत्। **डायन्नि**ति ङित्वं "कौरव्य०" [ २. ४. ७०. ] इत्यत्रासुरिशब्देकारलोपार्थम्, अन्यथा "समानानाम्०" [ १. २. १. ] इत्यनेन दीर्घत्वस्य सिद्धत्वात् ॥ छ. ॥ २. ४. ६७. ॥

**न्या० स०—यञो डा०।** डायन् चेत्यत्र ङित्करणमासुरायणीत्यत्र प्रयोजनार्थम्। **डायन् चान्तो वा भवतीति**- साक्षान्निर्दिष्टस्य डायन एव वाशब्देन सम्बन्धो, नाऽनुमितेन ङीप्रत्ययेन प्रत्यासत्तेः, "षावटाद् वा" [ २. ४. ६९. ] इति सूत्रकरणाद् वा ॥ २. ४. ६७. ॥

## लोहितादिशकलान्तात् । २ । ४ । ६८ ॥

**त० प्र०—लोहितादिभ्यः शकलान्तेभ्यो यञन्तेभ्यः स्त्रियां ङीर्भवति, तत्संनियोगे डायन् चान्तः। लौहित्यायनी, सांशित्यायनी, कात्यायनी, शाकल्यायनी ॥ ६८ ॥**

**श० न्या०—लोहि०।** बहुव्रीहिद्वयगर्भात् कर्मधारयात् पञ्चमी। यदि यञ इति नाधिक्रियेत तदा 'लोहिता' इत्यत्र "श्येतैत०" [ २. ४. ३६. ] इति ङीविकल्पपक्षे, शकलस्य भार्या- शकलीत्यत्र चानेन ङीर्डायन् च स्यात्, लौहित्यायनीत्यादौ च यञन्तान्न स्यादत आह- **यञन्तेभ्य** इति। "शोंच् तक्षणे" संपूर्वात् क्ते "शो व्रते" [ ४. ४. १३. ] इति इकारे- **संशित**। कायतेः "पृषि-रञ्जि०" [ उणा० २०८. ] इति कित्यतेऽकारलोपे च- कत। लोहितादिर्गर्गाद्यन्तर्गणः, तत्राद्यन्तावधिग्रहणं पूर्वोत्तरव्यवच्छेदार्थं, तेन लोहितात् पूर्वेषामनडुहादीनां शकलादुत्तरेषां कण्ठादीनामुभयेषामपि षावटवर्जितानां ङ्यां द्वैरूप्यमेव, लोहितादिशकलान्तानां तु लौहित्यायनीत्यादि एकरूपतैव भवति। पूर्वेण डायनः पाक्षिकत्वान्नित्यार्थोऽयं योगः ॥ छ. ॥ २. ४. ६८. ॥

**न्या० स०—लोहिता०।** अत्र यदि यञ इति नाधिक्रियते तदा 'लोहिता' इत्यत्र "श्येतैत०" [ २. ४. ३६. ] इति ङीविकल्पपक्षे, सकलस्य भार्या- शकलीत्यत्र चानेन ङी डायन् च स्यात्, लोहित्यायनीत्यादौ च यञन्तान्न स्यादत आह- **यञन्तेभ्य** इति। कायतेः "पृषि-रञ्जि०" [ उणा० २०८. ] इति कित्यते आकारलोपे च- कतः ॥ २. ४. ६८. ॥

## षावटाद् वा । २ । ४ । ६९ ॥

**त० प्र०—षकारान्तान्नाम्नोऽवटशब्दाच्च यञन्तात् स्त्रियां वा ङीर्भवति, तत्संनियोगे डायन् चान्तः। पौतिमाष्यायणी, पौतिमाष्या; शार्कराक्ष्यायणी, शार्कराक्ष्या; गौकक्ष्यायणी, गौकक्ष्या; आवट्यायनी, आवट्या ॥ ६९ ॥**

**श० न्या०—षाव०।** अत्र ङी-डायनोरुभयोरनुवर्त्तनात् प्राधान्याद् ङीप्रत्ययेनैव वाशब्दस्य सम्बन्धो नान्वाचीयमानेन डायनेत्याह- **वा ङीरि**ति। सन्नियोगशिष्टत्वाच्च ङ्यभावे पौतिमाषीत्यादौ डायन् न भवति ॥ छ. ॥ २. ४. ६९. ॥

**न्या० स०—षावटाद् वा।** अत्र ङी-डायनोरुभयोरनुवर्त्तनात् प्राधान्यात् ङीप्रत्ययेनैव वाशब्दस्य सम्बन्धो, नाऽन्वाचीयमानेन डायनेत्याह- **स्त्रियां वा ङीर्भवती**ति ॥ २. ४. ६९. ॥

## कौरव्य-माण्डूका-ऽऽसुरेः । २ । ४ । ७० ॥

**त० प्र०—एभ्यः स्त्रियां ङीर्भवति, तत्संनियोगे डायन् चान्तः। कौरव्यायणी, माण्डूकायनी, आसुरायणी ॥ ७० ॥**

**श० न्या०—कौर०।** कुरोरपत्यं स्त्री "कुर्वादेः०" [ ६. १. १००. ] इति ञ्ये, कुरूणां जनपदस्य राज्ञीति वा "दुनादि०" [ ६. १. ११८. ] इति ञ्ये, तस्य च "कुरोर्वा [ ६. १. १२२. ] इति लुपः पाक्षिकत्वात् तत "आत्" [ २. ४. १८. ] इत्यापि प्राप्तेऽनेन ङ्यां डायनि च- **कौरव्यायणी**। जयादित्यप्रभृतयस्तु कौरव्यशब्दाद् ब्राह्मणवचनादेवानेन ङीः, राष्ट्रक्षत्रियवचनात् तु "दुनादि०" [ ६. १. ११८. ] इति विहितस्य ञ्यस्य स्त्रियां नित्यं लुब्विधानात् कौरव्येति रूपाभावात् तत्र हि नित्यं ञ्यस्य लुपि "उतोऽप्राणिनश्च०" [ २. ४. ७३. ] इत्यूङि- कुरूरित्येव भवतीति मन्यन्ते। **कौरवी**ति- तस्येदंविवक्षायां कुरुशब्दादुत्सा-

यञन्ताद् ङीः । असुरस्यापत्यम् " अत इञ् " [ ६. १. १. ] इति इञि " नुर्जातेः " [ २. ४. ७२. ] इति ङीप्राप्तौ डायनर्थमनेन ङीः । मण्डूकस्यापत्यं स्त्री " पीलासाल्वा० " [ ६. १. ६८. ] इत्यणि " अणञेय० " [ २. ४. २०. ] इति ङीप्राप्तौ डायनर्थमनेन ङीः ॥ छ. ७०. ॥

**न्या० स०—कौरव्य०।** **कौरव्यायणीति**– यदा कुरोर्ब्राह्मणस्यापत्यं तदा " कुर्वादेर्ञ्यः " [ ६. १. १००. ], यदा तु कुरो राज्ञोऽपत्यं तदा " दुनादि० " [ ६. १. ११८. ] इत्यनेन, अयं चानयोर्विशेषः– दुनादीत्यस्य द्रिसंज्ञत्वाद् बहुषु लुप् भवति । मण्डूकस्यापत्यं " पीला-साल्वा० " [ ७. १. ८७. ] इत्यण् । असुरस्य ऋषेरपत्यं स्त्री " बाह्वादि० " [ ६. १. ३२. ] इञ् ॥ २. ४. ७०. ॥

## इञ इतः । २ । ४ । ७१ ॥

**त० प्र०—इञ्प्रत्ययान्तान्नाम्न इकारान्तात् स्त्रियां ङीर्भवति । सुतंगमेन निर्वृत्तेति इञि सौतंगमी, एवं मौनिचित्ती इत इति किम् ? इञादेशात् ष्याद् मा भूत्– वराहस्यापत्यं– वाराह्या, एवं– बालाक्या, कारीषगन्ध्या, कौमुदगन्ध्या ॥७१॥**

**श० न्या०—इञ०।** **इञी**ति– " सुतङ्गमादेरिञ् " [ ६. २. ८५. ] इत्यनेन, मुनेरिव चित्तं यस्येति पूर्ववदिञ् । वृणोतेः " वृ-कटि-शमिभ्य० " [ उणा० ५९१. ] इत्याहे– वराह, तस्यापत्यम् " अत इञ् " [ ६. १. ३१. ] इतीञि तस्य " अनार्षे वृद्धे० " [ २. ४. ७८. ] इति ष्यादेशे– **वाराह्या** । बलतेः " शलि-बलि० " [ उणा० ३४. ] इत्याके– बलाका, तस्यापत्यं स्त्री गोत्रं " बाह्वादिभ्यः० " [ ६. १. ३२. ] इति इञः पूर्ववत् ष्यादेशे– **बलाक्या** । एवं– करीषस्येव कुमुदस्येव गन्धोऽस्या इति " वोपमानात् " [ ७. ३. १४७. ] इतीत्समासान्तस्य पाक्षिकत्वात् तस्यापत्यमिति विगृह्य " अत इञ् " [ ६. १. ३१. ] इत्यकारान्तादिञः " अनार्षे वृद्धे० " [ २. ४. ७८. ] इति ष्यादेशे– **कारीषगन्ध्या** । अपत्येञन्तस्य मनुष्यजातिवचनत्वादुत्तरेणै[ व सिद्धा ]वजात्यर्थोऽयमारम्भः, यद् वार्त्तिकम्– इञुपसंख्यानमजात्यर्थम्; एवं तर्हि इत इत्यतिरिच्यते, अनपत्यार्थस्येञ इकाराव्यभिचारात्, सत्यम्– उत्तरार्थमिदम्, उत्तरत्र चानेनायं व्यवच्छिद्यते– व्यञ्जनान्तमन्यस्वरान्तं च, तत्र व्यञ्जनान्तमुत्तरत्रैव प्रत्युदाहरिष्यते, अन्यस्वरान्तं चोत्तरसूत्रव्यावर्त्यं वाराह्यादि, इञ एवादेशत्वेन प्रत्यासत्त्याऽत्रापि प्रत्युदाहृतम्, इह तु स्पष्टार्थमेवेत इत्युपादानम् ॥ छ. ॥ २. ४. ७१. ॥

**न्या० स०—इञ इतः ।** **इकारान्तादि**ति– तद्धितप्रकरणसाहचर्याद् " प्रश्नाख्याने वेञ् " [ ५. ३. ११९. ] इति इञ् न गृह्यते, पूर्वसूत्रे आसुरिग्रहणात् । डायन् नानुवर्त्तते, अन्यथा इञन्तद्वारेण सिद्धम् । अपत्येञन्तस्य मनुष्यजातिवचनत्वादुत्तरेणैव सिद्धेऽजात्यर्थोऽमारम्भः ॥ २. ४. ७१. ॥

## नुर्जातेः । २ । ४ । ७२ ॥

**त० प्र०—नुर्मनुष्यस्य या जातिस्तद्वाचिन इकारान्तान्नाम्नः स्त्रियां ङीर्भवति । अवन्तेः कुन्तेश्चापत्यमिति ञ्यः, तस्य लोपे– अवन्ती, कुन्ती, दाक्षी, प्लाक्षी, तैकायनी, ग्लुचुकायनी । इत इत्येव– विशोऽपत्यमित्यञ्, तस्य च लोपे– विट्, एवं– दरद्; अवन्तीयतेः क्विप्, तस्य लोपे– अवन्तीः स्त्री । नुरिति किम् ? तित्तिरिः । जातेरिति ? निष्कौशाम्बिः कन्या ॥ ७२ ॥**

**श० न्या०—नुर्जाते०।** नुरित्यत्र जातेरित्यस्य सम्बन्धे षष्ठीत्यर्थद्वारेणाह– **नुर्मनुष्यस्ये**त्यादि । अवतेः " वद्यवि० " [ उणा० ६६५. ] इत्यन्तौ– अवन्ति । एवं– " कुङ् शब्दे " ततः " कुच्योर्नोऽन्तश्च " [ उणा० ६५२. ] इति तौ नागमे च– कुन्ति । **तस्य लोपे** इति– " दुनादि० " [ ६. १. ११८. ] इति विहितस्य ञ्यस्य " कुन्त्यवन्तेः स्त्रियाम् " [ ६. १. १२१. ] इत्यनेनेत्यर्थः । दक्षस्यापत्यं प्लक्षस्यापत्यमिति " अत इञ् " [ ६. १. ३१. ] इतीञि अनेन ङ्यां च– **दाक्षी, प्लाक्षी** । **तैकायनी**ति– " तिकादेः० " [ ६. १. १०७. ] इत्यायनिञ् । **ग्लुचुकायनी**ति– " अदोरायनिः० " [ ६. १. ११३. ] इत्यायनिः । एवं– मातव्यो मेयः, उदकेन मेयो " नाम्न्युत्तरपदस्य च " [ ३. २. १०७. ] इति उदे, उदमेयस्यापत्यमितीञि– **औदमेयी** । विशतीति विट्, **तस्य लोपे** इति– " राष्ट्र-क्षत्रियात्० " [ ३. १. ११४. ] इति विहितस्य " द्रेरञणः० " [ ६. १. १२३. ] इत्यनेनेत्यर्थः । एवं चास्य " गोत्रं च चरणैः सह " इति जातित्वम्, यद्वा मनुष्यपर्यायत्वात् स्वयमेव जातित्वम् । " दॄ भये " इत्यतः " शॄ-दॄ-भसेः० " [ उणा० ८९४. ] इत्यादि– दरद्, तस्यापत्यं " पुरु-मगध० " [ ६. १. ११६. ] इत्यणः पूर्ववल्लोपे– **दरदि**ति । **अवन्तीरि**ति– यद्यत्र ङीः स्यात् तदा " दीर्घङ्याब्० " [ १. ४. ४५. ] इति सेर्लोपः स्यात् । इत इत्यस्य विडितेत्यादि प्रत्युदाहरणं भवति, परमार्थतस्तु क्यन्नन्तस्य क्रियाशब्दत्वात् व्यर्थवृत्तित्वाज्जातित्वाभाव एव । **तित्तिरिः** पक्षिजातिर्न मनुष्यजातिरिति न भवति । **निष्कौशाम्बिरि**ति– कौशाम्ब्या निर्गतेति क्रियाशब्दत्वाजातेरिति वचनादिह न भवति ॥ छ. ॥ २. ४. ७२. ॥

**न्या० स०**—दुर्जातेः । अवन्ती, कुन्ती, "दुनादि०" [ ६. १. ११८. ] इति ञ्यः "कुन्त्यवन्तेः०" [ ६. १. १२१. ] इति लुप् । **तैकायनी** "तिकादेरायनिञ्" [ ६. १. १०७. ] । **ग्लुचुकायनी** "अदेरायनिः" [ ६. १. ११३. ] । तस्य च लोपे इति– "राष्ट्रक्षत्रियात्०" [ ६. १. ११४. ] इति विहितस्य "द्रेरञणः०" [ ६. १. १२३. ] इत्यनेनेत्यर्थः । एवं– **दरदिति** "पुरमगध०" [ ६. १. ११६. ] इति विहितस्याणः, एवं चास्य "गोत्रं च चरणैः सह" इति जातित्वम्; यद्वा मनुष्यपर्यायत्वात् स्वयमेव जातित्वम् । **अवन्तीः स्त्रीति**– अवन्तेरपत्यं बहवो माणवकाः "दुनादि०" [ ६. १. ११८. ] ञ्यः, "बहुषु०" [ ६. १. १२४. ] इति लुप्, अवन्तीनिच्छति या स्त्री क्यन्, अवन्तेरपत्यं या स्त्रीति तु कृते "दुनादि०" [ ६. १. ११८. ] ञ्यस्य "कुन्त्यवन्तेः०" [ ६. १. १२१. ] इत्यनेन लुपि क्यनः प्रागेव ङीः स्याद् ॥ २. ४. ७२. ॥

## उतोऽप्राणिनश्चाऽयुरज्ज्वादिभ्य ऊङ् । २ । ४ । ७३ ॥

**त० प्र०**—उकारान्तान्नृजातिवाचिनोऽप्राणिजातिवाचिनश्च नाम्नः स्त्रियामूङ् प्रत्ययो भवति, युशब्दान्तं रज्ज्वादींश्च वर्जयित्वा । कुरूः, इक्ष्वाकूः, ब्रह्मबन्धूः, धीवबन्धूः; अप्राणिनश्च– अलाबूः, कर्कन्धूः; ब्रह्मा बन्धुरस्या इत्यत्रोङः पूर्वं "शेषाद् वा" [ ७. ३. १७५. ] इति कच् प्रत्ययः परोऽपि न भवति, तत्र बहुलाधिकारात् । उत इति किम्? विट्, वधूः, ऊङि हि सति वधूमतिक्रान्तोऽतिवधूरित्यत्र ह्रस्वः स्यात्, यथा– अतिब्रह्मबन्धुरित्यत्र । अप्राणिनश्चेति किम्? आखुः, कृकवाकुः । जातेरित्येव– पटुः, चिकीर्षुः– स्त्री; काकुः– स्वरभेदः, शङ्कुः– संख्याविशेषः । अयुरज्ज्वादिभ्य इति किम्? अध्वर्युः स्त्री, चरणत्वाज्जातिः; रज्जुः, हनुः । बहुवचनमाकृतिगणार्थम् । कथं तर्हि भीरु! गतं निवर्तत इति? भीरुशब्दस्य हि क्रियावाचित्वाज्जातिलक्षणस्योङोऽभावे संबोधने ओत्वं प्राप्नोति, नैवम्– ताच्छीलिकानां संज्ञाप्रकारत्वान्मनुष्यजातिवचनत्वम्, तथा चोङि सति ह्रस्वत्वं सिद्धम् । अन्ये तु "असूर्यंपश्यरूपा त्वं किमभीरुरराय॑से" इति प्रयोगदर्शनाज्जातिवचनत्वमनिच्छन्त ऊङं न मन्यन्ते ॥७३॥

**श० न्या०**—उतो० । किरतेः "कृ-ग्र०" [ उणा० ७३४. ] इत्युप्रत्यये ऋकारस्य च उरादेशे– कुरु, तस्यापत्यं "दुनादि०" [ ६. १. ११८. ] इति विहितस्य ञ्यस्य "कुरोर्वा" [ ६. १. १२२. ] इति लुपि "गोत्रं च चरणैः सह" इति जातित्वादूङि– **कुरूरिति** । एवम् "इषत् इच्छायाम्" इत्यतः "इषेः स्वाकुक्" [ उणा० ७५७. ] इति स्वाकुकि– इक्ष्वाकु, तस्यापत्यमिति "राष्ट्रक्षत्रियात्०" [ ६. १. ११४. ] इत्यञो "द्रेरञणः०" [ ६. १. १२३. ] इति लोपे ऊङि च– **इक्ष्वाकूः** । **ब्रह्मबन्धूरिति**– ब्रह्मा बन्धुरस्या इत्यन्यपदार्थः, एवं– **धीवबन्धूरिति** । अथ "ब्रह्मबन्धुरधिक्षेपे" इति श्रुतेर्ब्रह्मबन्ध्वादिशब्दो न जातिवचन इति न युक्तमनयोरुदाहरणमिति, नैवम्– तपःश्रुतादिगुणहीनो लुप्तधर्मा जात्या केवलं ब्राह्मणो ब्राह्मणेनोत्पन्नत्वाद् ब्राह्मणव्यपदेशार्हो ब्रह्मबन्ध्वादिरुच्यते, इति तत्र वर्त्तमानो भवत्येवायं जातिशब्द इति, अन्यत्र तु सदाचारे ब्राह्मणे केनचिदारोप्यमाणः कुत्सावचन इतीयता[यं]मधिक्षेपवचनः, यथा– श्वशब्दः सारमेये जातिवचनोऽन्यत्र तु पुरुषादावारोप्यमाणः कुत्सावचन इति । अत्र च "लिङ्गानां न सर्वभाक्" इतिजातित्वम् । **अप्राणिनश्चेति**– प्राणिजातिवर्जितेत्यर्थः । **अलाबूः, कर्कन्धूरिति**– कथं पुनरत्रोङ्प्रत्ययः, अनयोरुणादावूकारान्तयोरेव व्युत्पादनात्, तथाहि– तत्र "कृषि-चमि-तनि-धन्यन्दि-सर्जि-खर्जि-भर्जि-लस्जीषिभ्य ऊः" [उणा० ८३९.] [ इत्यत ] ऊरित्यनुवर्त्तमाने "नञो लम्बेर्नलुक् च" [उणा० ८३८.] इत्यलाबूरिति, तथा "शकेरन्धूः" [ उणा० ८४८. ] [ इत्यतोऽन्धूः ] इत्यधिकृत्य "कृगः कादिः" [ उणा० ८४९. ] इति कर्कन्धूरित्यूकारान्तावेव व्युत्पादिताविति । यदत्र स्थविरः– कः पुनरत्रोङि सत्यसति वा विशेषः ? यावतोभयत्र तदेव रूपं स एव च स्वर इति, आचार्यरत्नमतिरपि– अलाबूः कर्कन्धूरित्यूकारादप्यूङ्विधानं ङिति लुपि पूर्व्यां वा (?) यथा स्यादित्याह । अथ पूर्वैः ऊकारान्तामाभ्यामूङुदाहृत इति तद्दर्शनादत्राप्यप्राणिनश्च ऊ ऊङिति प्रश्लेषादूकार ऊङ् भवतीत्युदाह्रियते इति, नैवम्– विभक्त्युदात्तत्वप्रतिषेधस्य पूर्वैः प्रतिपादितस्वरविषयस्य फलस्य भवद्भिरनादरणात्, अत एव देवनन्दिनापि स्वरविशेषस्यानादरणादाभ्यामूङ् नोक्त इति । ये तु पद्मैरलाबूभिः क्रीत इति तद्धितलोपे पद्मालाबुरिति ह्रस्वार्थं मृगय्यादिष्वलाबु-कर्कन्धु-शब्दौ ह्रस्वान्तौ पठित्वा ऊङं विदधति, तत् तु वयं न प्रतीमः– प्रयुक्तानामन्वाख्यानादेवंविधस्य च प्रयोगस्यादर्शनादिति । अलाबु फलमित्यत्र "क्लीबे" [ २. ४. ९७. ] इति, अलाबु-कर्कन्धु-दृन्भुफलमित्यत्र "वेदूतः०" [ २. ४. ९८. ] इत्यौत्तरपदिकं च ह्रस्वत्वं भविष्यतीति, सत्यम्– उदाहरणान्तरमत्र द्रष्टव्यम्, दीर्घान्तोदाहरणं तु पूर्वाचार्यानुरोधात् प्रदत्तम्, उत इति तकारस्य तैर्मुखसुखार्थत्वेन व्याख्यातत्वादप्राणि-

जातेश्चेत्यत्रोपसंख्याने दीर्घादप्यूङि सिद्धेः, अस्मन्मते त्वत्र, युक्तिप्रयोजने पूर्वोक्ते एव यथासंभवं वेदितव्ये इति। अत्र ब्रह्मा बन्धुर्यस्या इति बहुव्रीहौ कृते कचः पाक्षिकत्वात् तदभावे, कुरुरित्यादावबहुव्रीहौ च चरितार्थमूङं बाधित्वा समासार्थसमासान्त इति पक्षाश्रयणात् परत्वात् समासार्थात् समासान्त इत्यन्तरङ्गत्वाच्च " शेषाद् वा " [ ७. ३. १७५. ] इति कच्प्रत्ययः कस्मान्न भवति ? उच्यते– दीर्घोच्चारणसामर्थ्याद् द्वावूङ्प्रत्ययौ परिकल्प्येते, तौ च पृथक् पृथक् विधीयेते, तत्रैकस्य विधानस्य कुरुरित्यादिरूपं प्रयोजनम्, द्वितीयस्य तु बलवता विध्यन्तरेण यत्र बाधः प्राप्नोति तत्र तद् बाधित्वा अस्यैव प्रवृत्तिः प्रयोजनमिति। अथोकारद्वयविधाने प्रमाणाभावः क्लेशप्रतिपत्तिश्चाशङ्क्यते तदा तत्र बहुलाधिकारादिह कच् न भविष्यतीति सर्वपूर्वपक्षमाह– **ब्रह्मा बन्धुरस्या** इत्यादि। अथ ब्रह्मबन्धूरित्यत्र तरबादिवद् " ऋन्नित्यदितः " [ ७. ३. १७१. ] इति नित्यदिल्लक्षणः कच् कस्मान्न भवति, द्विर्विधानेन बहुलाधिकारेण वा ब्रह्मबन्धुशब्दादेव ह्रस्वान्तात् कच्प्रत्ययो निवर्त्यते, न तूदन्तात्; उच्यते– नित्यदिद्ग्रहणान्नित्यदिदन्ताद् बहुव्रीहेः कच् विज्ञायते, अयं तु ब्रह्मबन्धूरिति न नित्यदिदन्त ऊङि सत्येव तद्भावादिति। **विद्, वधूरिति**– यद्युत इति न स्यादिहाप्यूङ् प्रसज्येत। ननु विडिति भवतु प्रत्युदाहरणम्, वधूशब्दस्य[श्च] " वहेर्धं च " [ उणा० ८३२. ] इत्यूप्रत्यये धकारे च स्वत एवायमूकारान्तः, तत्रोङि सत्यसति च को विशेषः ? इत्याह– **ऊङि ही**त्यादि। आङ् पूर्वात् खनेः " पराङ्भ्यां० " [ उणा० ७४२. ] इति डित्युकारे– **आखुः**, कृकमव्यक्तं वक्ति ब्रूते वेति " कृकस्थूराद् वचः० " [ उणाः ७२८. ] इति णित्युप्रत्यये कादेशे च– **कृकवाकुः** कुक्कुटी, नेयं मनुष्यजातिरप्राणिजातिर्वेत्यप्राणिनश्चेति वचनादूङ् न भवति। पठतेः " मृ-मृ-तृ-त्सरि० " [ उणा० ७१६. ] इत्युप्रत्यये– **पटुः, चिकीर्षुरि**ति– " सन्भिक्षा० " [ ५. २. ३३. ] इत्युप्रत्ययः, अत्र जातेरित्यनुवर्त्तनाद् गुणशब्दात् क्रियाशब्दाच्च न भवति। कायतेः शाम्यतेश्च " कै-शी-शमि० " [ उणा० ७४९. ] इति कुप्रत्यये– **काकुः, शङ्कुः**। अध्वरं यातीति केवय्वादिनिपातनाद्– **अध्वर्युः**, युशब्दान्तोऽयं " चरणैः सह " इति मनुष्यजातिवाची। " स्यन्दि-सृजिभ्यां सिन्ध-रज्जौ च " [ उणा० ७१७. ] इति– **रज्जुः**। " कृ-हनेस्तुक्-नुकौ " [ उणा० ७९१. ] इति– **हनुः**। बहुवचनस्य फलं दर्शयति– **बहुवचनमि**त्यादि। **कथमि**ति स्वाशङ्कामेव विवृणोति– **भीरुशब्दस्य ही**त्यादि। **ह्रस्वत्वमि**ति– " ह्रस्वस्य गुणः " [ १. ४. ४१. ] इत्यनेनेत्यर्थः। परिहरति– **नैवमि**ति। **संज्ञाप्रकारत्वादि**ति– संज्ञाभेदत्वादित्यर्थः। **अन्य** इति– ॥ छ. ॥ २. ४. ७३. ॥

**न्या० स०**—उतोऽप्रा०। ऊङिति दीर्घनिर्देश उत्तरार्थः, तेन " नारी सखी० " [ २. ४. ७६. ] इत्यत्र श्वश्रूरिति दीर्घान्तो निपातः सिद्धः। **कुरूरि**ति– तस्यापत्यं " दुनादि० " [ ६. १. ११८. ] इति विहितस्य ञ्यस्य " कुरोर्वा " [ ६. १. १२२. ] इति लुपि " गोत्रं च चरणैः सह " इति जातित्वादूङ्। **इक्ष्वाकूरि**ति– " राष्ट्रक्षत्रियात्० " [ ६. १. ११४. ] इति अञ्, तस्य " द्रेरञण० " [ ६. १. १२३. ] लुप्। **ब्रह्मबन्धूरि**ति– अत्र च " लिङ्गानां च न सर्वभाक् " इति जातित्वम्। **तत्र बहुलाधिकारादि**ति– समासान्तप्रकरणे इत्यर्थः, यद्वा ऊश्चासावूङ् चेति द्विर्विधानादन्यः प्रत्ययो न भवतीति कैयटमतम् ॥ २. ४. ७३. ॥

## बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि
## । २ । ४ । ७४ ॥

**त० प्र०**—**बाहुशब्दान्तान्नाम्नः कद्रु-कमण्डलुभ्यां च नाम्नि विषये स्त्रियामूङ् प्रत्ययो भवति**। **मद्रबाहूः, भद्रबाहूः, कद्रूः, कमण्डलूः; संज्ञा एताः**। **नाम्नीति किम् ? वृत्तौ बाहू अस्या वृत्तबाहुः** ॥ ७४ ॥

**श० न्या०**—बाह्व०। अन्तग्रहणं तदन्तविध्यर्थम्, अक्रियमाणे हि तस्मिन् यः स्त्रीसंज्ञायां वा बाहुशब्दस्तस्मात् केवलादूङ् विधीयते, यथैव हि देवदत्तशब्दः स्त्री-पुंसयोः संज्ञा, एवं बाहुशब्दोऽपि, अप्राणिनश्चेत्यनेन भुजाभिधायकाद् बाहुशब्दादूङ् सिद्धो न तु संज्ञाशब्दात्, अन्तग्रहणात् तु तदन्ताद् बाहुशब्दात् क्रियते, न तु केवलात्। **मद्रबाहूरि**ति– माद्यतेर्भन्दतेश्च " भीवृधि० " [ उणा० ३८७ ] इति " मन्देर्वा " [ उणा० ३९१. ] इति च रप्रत्यये नलोपे च– मद्र-भद्रशब्दौ, वहतेः " मि-वहि० " [ उणा० ७२६. ] इति णित्युप्रत्यये– बाहुशब्दः, मद्रौ भद्रौ च बाहू यस्या इत्यवयवार्थकल्पना यथाकथञ्चित् समुदायस्य संपादनार्थात्[ र्थं ] क्रियत इति। कत्पूर्वाद् द्रवतेः " हरिपीतमित० " [ उणा० ७४५. ] इति डित्युप्रत्यये– कद्रुः। कम्पूर्वादनितेः " गुहलु० " [ उणा० ८२४. ] आदिनिपातनात् कमण्डलुः। कद्रुशब्दस्य गुणविशेषवचनत्वेऽपि " स्वरादुतः० " [ २. ४. ३५. ] इति वचनाद् ङ्यभावे(ऽ)जातिवचनत्वात् ऊङ्(ङ)भावेऽपि स्वरूपेणावस्थानेऽप्राप्ते संज्ञायामूङ् विधीयते। कमण्डलुशब्दस्य चाप्राणिजातित्वादप्राणिनश्चेत्यूङि प्राप्ते नियमः क्रियते, रज्ज्वादिपाठेन

चोङ्प्रतिषेधे प्राप्ते विधिः क्रियत इति; नन्वस्याप्राणिजातिवचनत्वे " चतुष्पाद्भ्य एयञ् " [ ६. १. ८३. ] इत्यत्र कामण्डलेय इति कथमुदाहरति, चतुष्पाज्जातिवाचित्वात् प्राणिजातित्वमव्यभिचरितमेव, सत्यम्– अप्राणिजातिवचनोऽयं शब्दान्तरमेव, आनन्त्याच्छब्दानामिति ॥ छ ॥ २. ४. ७४ ॥

**न्या० स०—बाह्वन्त०** । अन्तग्रहणं तदन्तविध्यर्थम्, अक्रियमाणे हि तस्मिन् यः स्त्रीसंज्ञायां बाहुशब्दस्तस्मात् केवलादूङ् विधीयते, यथैव हि देवदत्तशब्दः स्त्री-पुंसयोः संज्ञा, एवं बाहुशब्दोऽपि; अप्राणिनश्चेत्यनेन भुजाभिधायकाद् बाहुशब्दादूङ् सिद्धो न तु संज्ञाशब्दात्, अन्तग्रहणात् तु तदन्ताद् बाहुशब्दात् क्रियते, न तु केवलात्। **मद्रबाहूरित्यत्र** मद्रौ मद्रौ बाहू यस्या इत्यवयवार्थकल्पना यथाकथञ्चित् समुदायस्य संपादानार्थं क्रियते। **कमण्डलूरित्यत्र** कमण्डलुशब्दस्य चाप्राणिजातित्वादप्राणिनश्चेत्यूङि प्राप्ते नियमः क्रियते, रज्ज्वादिपाठेन च ऊङ्प्रतिषेधे प्राप्ते विधिः क्रियत इति । नन्वस्याप्राणिजातिवचनत्वात् " चतुष्पाद्भ्य एयञ् " [ ६. १. ८३. ] इत्यत्र कामण्डलेय इति कथमुदाहरति, चतुष्पाज्जातिवाचित्वात् प्राणिजातित्वमव्यभिचरितमेव, सत्यम्– अप्राणिजातिवचनोऽयं शब्दान्तरमेव, आनन्त्यात् शब्दानामिति ॥ २. ४. ७४.॥

## उपमान-सहित-संहित-सह-सफ-वाम-लक्ष्मणाद्यूरोः । २ । ४ । ७५ ॥

**त० प्र०**—उपमानादिपूर्वपदादूरुशब्दात् स्त्रियामूङ् प्रत्ययो भवति। करभ इव ऊरू यस्याः सा– करभोरूः, एवं– नागनासोरूः, कद्लीस्तम्भोरूः, सहितोरूः, संहितोरूः, सहोरूः, सफोरूः, वामोरूः, लक्ष्मणोरूः । उपमानाद्यादेरिति किम् ? वृत्तोरुः, पीनोरुः । कथं स्वामिन ऊरू– स्वाम्यूरू, हस्तिन इव स्वाम्यूरू यस्याः सा– हस्तिस्वाम्यूरुः वडवा ? एवं– करभमात्रूरुः; नात्रोरुशब्द उपमानादिपूर्वोऽपि तु स्वाम्यूरुमात्रूरुशब्दौ ॥ ७५ ॥

**श० न्या०—उप०** । उपमीयतेऽनेनेति " करणाधारे " [ ५. ३. १२९. ] इत्यनटि– उपमानम् । संधीयते स्मेति क्ते " धागः " [ ४. ४. १५. ] इति हौ कृते " समस्ततत-हिते वा " [ ३. २. १३९ ] इति पाक्षिके मकारलोपे– सहित, सह हितेन वर्तते इति वा– संहित। सहत इत्यचि– सह, अवयवो वा ( अव्ययशब्दो वा ) विद्यमानार्थः। सफशब्दः संक्लिष्टार्थोऽव्युत्पन्नो दन्त्यादिः। वमीति ( वमतीति ) ज्वलादित्वाण्णे– वाम। लक्ष्मीरस्यास्तीति " लक्ष्म्या अनः " [ ७. २. ३२. ] इत्यनेन– लक्ष्मण । " ऑतरूर्व " [ उणा० ७३६. ] इति– ऊरु । उपमानादिरादिर्यस्येतिलुप्तपञ्चमीकमूरुणा समस्तं वा पदमिति । आदिशब्दः पूर्वावयववचनः, तेन च समासलाभादूरोरुत्तरपदत्वं गम्यते, अतश्चाह– **उपमानादिपूर्वादूरुशब्दादिति**– अयं चार्थः " क्रीतात् करणादेः " [ २. ४. ४४. ] इत्यत्र निर्णीतः । **करभोरूरिति**– " कृ-शृ-गृ-शलि० " [ उणा० ३२९. ] इत्यभे– करभ । नगे भवोऽणि– नागः । नास्यते इति " क्तेटः० " [ ५. ३. १०६. ] इत्यप्रत्यये– नासा । कदलशब्दाद् गौरादित्वाद् ङ्यां– कदली । स्तम्भेरचि– स्तम्भ । सहितौ संहितौ सहौ विद्यमानौ वा सफौ वामौ लक्ष्मणौ ऊरू यस्या इति विग्रहवाक्यम् । वृतेः क्ते वृत्त, प्यायः क्ते " क्तयोः० " [ ४. १. ९२. ] इति ' पी ' इत्यादेशे " सूयत्याद्योदितः " [ ४. २. ७०. ] इति तस्य नकारे– पीन, वृत्तौ पीनावूरू यस्या इति नात्रोपमानोपमेयभावः प्रतीयत इति न भवति । **कथमि**त्यादि– यद्यत्रादिग्रहणमकृत्वाऽन्तग्रहणं क्रियेत तदा ऊर्वन्तादिति विज्ञायमानेऽप्यत्राप्यूङ् प्रसज्येत, भवति ह्युपमानात् परोऽयमूर्वन्तः ॥ छ. ॥ २. ४. ७५. ॥

**न्या० स०—उपमान०** । कुत्सितौ अपलक्षणौ ऊरू यस्याः, शश्रुपर्यायावेतौ । सफशब्दः संक्लिष्टार्थोऽव्युत्पन्नो दन्त्यादिरिति न्यासकृत् । लक्ष्मणादूरोरिति कृते ' सहिता ऊरुः, हे संहित ! ऊरुर्वर्तते ' इत्यादावपि स्यात् । आदिशब्दः पूर्वावयववचनः, तेन च समासलाभादूरोरुत्तरपदत्वं गम्यते, अत आह– **उपमानादिपूर्वपदादिति** ॥ **नागनासोरूरिति**– नगे भवा अणि– नागाः, नास्यत इति " क्तेटः " [ ५. ३. १०६. ] इत्यप्रत्यये– नासा । **कदलीस्तम्भोरूरिति**– कदलशब्दाद् गौरादित्वाद् ङ्याम् । **कथमिति**– यद्यत्रादिग्रहणमकृत्वाऽन्तग्रहणं क्रियेत तदा ऊर्वन्तादिति विज्ञायमानेऽत्राप्यूङ् प्रसज्येत, अस्ति ह्यत्रोपमानात् परोऽयमूर्वन्तः– स्वाम्यूरुशब्दः, हस्तिस्वाम्यूरुरिति । **वडवेत्यादि**– यथा हस्तिनः सम्बन्धित्वेन स्वाम्यूरू आयातस्तथा वडवाया अपि, एतावता उच्चैस्त्वं वडवाया निवेदितम् ॥ २. ४. ७५. ॥

## नारी सखी पङ्गू श्वश्रू । २ । ४ । ७६ ॥

**त० प्र०**—एते शब्दाः स्त्रियां ङ्यन्ताश्च ऊङन्ताश्च निपात्यन्ते । नृ-नरयोर्ङ्यां नारादेशः– नारी । सखिशब्दात् सखशब्दाच्च बहुव्रीहेर्ङीः– सखी, सह खेन वर्तते या सापि– सखी; निपातनसामर्थ्याद् धवयोगेऽपि भवति– सख्युः स्त्री– सखी । पङ्गुशब्दादजातावूङ्– पङ्गूः । श्वशुरशब्दाच्च जातिलक्षणे धवयोगलक्षणे च ङीप्रत्यये प्राप्ते ऊङ् उकाराकारयोर्लोपश्च– श्वश्रूः ॥ ७६ ॥

**श० न्या०—नारी०।** नृशब्दस्य "स्त्रियां नृतः०" [२. ४. १.] इति, नरशब्दस्य च जातिलक्षणो धवयोगलक्षणश्च ङीरस्त्येव, तत्सन्नियोगे नारादेशविधानार्थं निपातनम्। सखिशब्दाद् "इतोऽक्त्यर्थात्" [२. ४. ३२.] इति विकल्पे प्राप्ते, धवयोगेऽप्यप्राप्ते, सखशब्दाच्च सह खं यस्या यया वेति बहुव्रीहेरपि प्राप्तेऽनेन ङीः। "पैं शोषणे" "प्री-कै-पै०" [उणा० ७६१.] इत्यङुकि- पङ्गु, यद्यप्ययं गुणवचनस्तथापि नात्र स्वरात् पर उकार इति "स्वरादुतः०" [२. ४. ३५.] इति, अमनुष्यजातित्वादप्राणिजात्यभावाच्च "उतोऽप्राणिनः०" [२. ४. ७३.] इति च ङी[रूङ् च] न प्राप्नोति, अतोऽत्र कस्मिंश्चिदपि स्त्रीप्रत्ययेऽप्राप्ते एवोङ्विधानम्। शु-पूर्वादश्नु[श्नो]तेः "श्वशुर-ककुन्दुर०" [उणा० ४२६.] इत्युरे- श्वशुर, द्वौ तालव्यौ। अयं च यदा संज्ञाशब्दस्तदा आपि श्वशुरा इत्येव भवति, न तु श्वश्रूरिति, यतः—

"सुप्रसिद्धपदार्था ये, स्वतन्त्रा लोकविश्रुताः।
शास्त्रार्थस्तेषु कर्त्तव्यो नान्येषु न तदुक्तिषु॥" इति;

न चैवं संज्ञाशब्दादापाऽपि न भाव्यमिति वाच्यम्- यतो विशिष्टशब्दोपादानेऽयं न्यायः, आपस्त्वकारान्तादविशेषेण विधानम्॥ छ.॥ २. ४. ७६.॥

**न्या० स०—नारी सखी०।** पङ्गुशब्दादजातावूङिति- यद्यप्ययं गुणवचनस्तथापि नात्रैकवर्णव्यवहितस्वरात् पर उकार इति "स्वरादुतः० [२. ४. ३५.] इति, अमनुष्यजातित्वादप्राणिजातित्वाभावाच्च "उतोऽप्राणिनः०" [२. ४. ७३.] इति वाऽप्राप्तेऽनेनोङ्। श्वश्रूरित्यत्र द्वावपि तालव्यौ। अयं च यदा श्वशुरशब्दः संज्ञाशब्दस्तदा आपि श्वशुरा इत्येव भवति, न तु श्वश्रूरिति॥ २. ४. ७६.॥

## यूनस्तिः। २। ४। ७७॥

**त० प्र०—**युवन्शब्दात् स्त्रियां तिः प्रत्ययो भवति, नकारान्तत्वाद् ङीप्रत्यये प्राप्ते तदपवादो योगः। युवतिः। यूनीत्यपि कश्चित्, न तच्छिष्टसंमतम्। कथं युवती?, यौतेरौणादिककिदतिप्रत्ययान्तात् "इतोऽक्त्यर्थात्" [२. ४. ३२.] इति ङीर्भविष्यति। मुख्यादित्येव- अतियूनी, निर्यूनी॥ ७७॥

**श० न्या०—यून०।** "स्त्रियां नृतः" [२. ४. १.] इति ङीप्राप्तावयं विधिरित्याह- **नकारान्तत्वादि**त्यादि **युवतिरि**ति- "नाम सिद्०" [१. १. २१.] इति। पदत्वे नलोपः, अयं च युवतिशब्दो वयोवचनो मनुष्येष्वन्यत्र च इति न मनुष्यजातिः, मनुष्यजातिर्हि सैव या मनुष्येष्वेव, तेन यद्यप्याकृतिग्रहणा जातिरिति युवत्यर्थो जातिर्भवति तथापि मनुष्यजातित्वाभावाद् "नुर्जातेः" [२. ४. ७२.] इति ङीर्न भवति। यद्येवं कथमयं कवेः प्रयोगः—

"रोचते मम घृतं सह मुद्गैः, शाल्यो दधिशरं ककराश्च।
चन्दनं कवियु[क्]थाश्च विचित्राश्चारुहेमरसनाश्च युवत्यः॥"

अत्र हि "जस्येदोत्" [१. ४. २२.] इति गुणे युवतय इति भाव्यम्। अत्र केचिदाहुः- "इतोऽक्त्यर्थात्" [२. ४. ३२.] इति ङीः। अन्ये त्वाहुः- तिप्रत्ययेनैव स्त्रीत्वस्योक्तत्वात् पुनस्तदभिधाने स्त्रीप्रत्ययो न युक्तः, *उक्तार्थानामप्रयोगः* इति न्यायात्, तेन युवती इत्यसाधुरेवायम्। अन्ये त्वाहुः- वयोवचनत्वेऽपि शब्दशक्तिमाहात्म्याद् युवतिशब्दस्य मनुष्यजातित्वात् "नुर्जातेः" [२. ४. ७२.] इति ङीः; न चास्य नित्यप्रसङ्गः, "पोटा-युवति-स्तोक०" [३. १. १११.] इति निर्देशात्। **कश्चिदि**ति...। युवतिशब्दान्मनुष्यजातित्वाद् (जातित्वाभावाद्) ङीर्न प्राप्नोतीति, पर्यनुयुक्ते- **थकमि**त्यादि, **यौतेरि**त्यादिना च समाधत्ते। **अतियूनी**त्यादि- युवानमतिक्रान्तेत्यादिप्रादितत्पुरुषस्य पूर्वपदार्थप्राधान्याद् युवन्शब्दोऽत्राप्रधानमिति॥ छ.॥ २. ४. ७७.॥

**न्या० स०—यूनस्तिः।** युवतिरित्यत्र ङीरिति जातिग्रहणे *सकृद् बाधित०* इति न्यायात् पश्चात् "इतोऽक्त्यर्थात्" [२. ४. ३२.] इत्यपि न॥ २. ४. ७७.॥

## अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्त्यस्य ष्यः। २। ४। ७८॥

**त० प्र०—**अनार्षे वृद्धे विहितौ यावणिञौ प्रत्ययौ तदन्तस्य सतो बहुस्वरस्य गुरूपान्त्यस्य नाम्नोऽन्त्यस्य स्त्रियां ष्य इत्यादेशो भवति, गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि भवति; गुरुग्रहणं हि दीर्घपरिग्रहणार्थं संयोगपरपरिग्रहार्थं च, अन्यथा दीर्घोपान्त्यस्येत्युच्येत। करीषस्येव गन्धोऽस्य करीषगन्धिः, तस्यापत्यं पौत्रादि स्त्री इत्यण्, तस्य ष्यादेशः- कारीषगन्ध्या, एवं- कौमुदगन्ध्या। देवदत्तस्यापत्यं पौत्रादि स्त्री इतीञ्, तस्य ष्यादेशः- दैवदत्त्या, एवं- वाराह्या, बालाक्या। अनार्ष इति किम्? वासिष्ठी, वैश्वामित्री। वृद्ध इति किम्? वराहस्य प्रथमापत्यं स्त्री- वाराही, अहिच्छत्रे जाता- आहिच्छत्री, एवं- कान्यकुब्जी। अणिञ इति किम्? ऋतभागस्यापत्यमिति बिदादित्वादञ्- आर्तभागी, एवम्- आर्ष्टिषेणी। बहुस्वरेति किम्? दाक्षी, प्लाक्षी। गुरूपान्त्यस्येति किम्? औपगवी, कापटवी। अणिञन्तस्य सतो बहुस्वरादिविशेषणं किम्? द्वारस्यापत्यं पौत्रादि स्त्री इतीञि- दौवार्या, तथा-

उडुलोम्नोऽपत्यमितीञि- औडुलोम्या, सारलोम्या; अत्रेञः पूर्वमबहुस्वरत्वेऽगुरूपान्त्यत्वे च सत्यपीञि सति बहुस्वरत्वाद् गुरूपान्त्यत्वाच्च यथा स्यात्। स्त्रियामित्येव- कारीषगन्धः, वाराहिः पुमान् । मुख्यस्येत्येव- बहवः कारीषगन्धा यस्यां सा- बहुकारीषगन्धा, निर्वाराहिः । कथं सौधर्मी ?, आयस्थूणी ?, भौलिङ्गी ?, आलम्बी ?, आलच्वी ?, कालच्वी औद्वाहमानी ?;- गौरादिपाठात्। षित्करणं " ष्या पुत्रपत्योः० " [ २. ४. ८३. ] इत्यत्र विशेषणार्थम् ॥ ७८ ॥

---

श० न्या०—अना० । " ऋषैत् गतौ " ऋषन्ति- जानन्तीति " नाम्युपान्त्य० " [ उणा० ६०९. ] इति किदिकारे- ऋषयः, ऋषीणामिदं तत्र भवं वा- आर्षम्, पश्चान्नञ्समासः । **अणिञ** इति- अण् च इञ् चेति समाहारद्वन्द्वः । बहवः स्वरा यस्य तद् बहुस्वरम्, गुरुरुपान्त्यो यस्य तद् गुरूपान्त्यम्, ततः कर्मधारयः । अणन्ताद् " अणञेयेकण्० " [ २. ४. २०. ] इति, इञन्ताच्च " नुर्जातेः " [ २. ४. ७२. ] इति ङ्यां प्राप्तायां तदपवादः ष्यादेश आरभ्यते । अत्रेदं चिन्त्यते- किम् ' अनार्षे वृद्धे ' इत्यादिविशेषणसम्बन्धमनुभूयाणिञौ तदन्तं प्रत्याययतः ? उत तदन्तस्यैव प्रत्यायितस्य विशेषणसम्बन्धः ?, तत्राद्ये पक्षे ' अनार्षे वृद्धे ' इति च विशेषणद्वयं संगच्छते, ' अनार्षे वृद्धे ' इत्यत्र च तयोर्विधानसम्भवात्, बहुस्वरेत्यादिविशेषणस्य तु सम्भवाभावः समुदायस्यानेन विशेषणेन सम्भव-व्यभिचारौ, न तु वर्णमात्रयोरणिञोरिति । द्वितीये पक्षे चैतत् संगच्छते, न तु ' अनार्षे वृद्धे ' इति चेति, समुदायस्य ' अनार्षे वृद्धे ' इत्यत्र चानाम्नातत्वाद्, अणिञौ हि तत्राम्नायेते, तस्मात् कथमत्र विशेषण-विशेष्यभावयोजनेति यः संशयीत तं प्रत्यभीष्टं विशेषण-विशेष्यभावं दर्शयितुमाह- **अनार्षे वृद्धे विहितौ यावणिञौ प्रत्ययौ तदन्तस्ये**त्यादि । एतेनैतद् दर्शयति- यस्य यद् विशेषणमुपपद्यते तस्य तत् क्रियते, उक्तं हि- सिद्धं तु विशेषण-विशेष्ययोर्यथेष्टत्वमिति । **अन्त[ न्त्य ]स्ये**त्यादेशसम्बन्धे षष्ठीत्याह- **अन्त( न्त्य )स्य[ ष्य ]इत्यादेशो भवती**ति । ननु वाराह्यत्यादावुपान्त्यस्य वर्णस्य गुरुत्वात् सिध्यति ष्यादेशः, कारीषगन्धीत्यादौ त्वनेकव्यञ्जनव्यवहितस्य गुरोर्वर्णस्योपान्त्यत्वाभावान्न प्राप्नोतीत्याह- **गुरुग्रहणादि**त्यादि स्पष्टार्थम् । **अणि**ति- " ङसोऽपत्ये " [ ६. १. २८. ] इत्यनेनेत्यर्थः । **इञि**ति- " अत इञ् " [ ६. १. ३१. ] इत्यनेनेति शेषः । **वासिष्ठी**ति- वस्वस्यास्तीति वसुमान्, प्रकृष्टो वसुमान् " गुणाङ्गाद्० " [ ७. ३. ९. ] इतीष्ठे " विन्मतोः० " [ ७. ४. ३०. ] इति मतोर्लुकि " त्र्यन्त्यस्वरादेः " [ ७. ४. ४३. ] इत्युकारलोपे- वसिष्ठः, अथवा ज्ञानातिशययोग्यो हि वसुः, सोऽतिशयितः- वसिष्ठः । विश्वं मित्रमस्य विश्वस्य मित्र इति वा दीर्घत्वे- विश्वामित्रः, तस्यापत्यमिति " ऋषि-वृष्ण्यन्धक० " [ ६. १. ६१. ] इत्यण्, ततो ङीः, अनयोर्ऋषित्वादनार्ष इति वचनादत्र ष्यादेशो न भवति । अहेरिव च्छत्रमस्याहिच्छत्रम्, " प्राग्जिताद्० " [ ६. १. १३. ] इत्यणि- **अहिच्छत्री । कान्यकुब्जी**ति- कुब्जः " कुब्जः कुब्-कुलौ च " [ उणा० १२९. ] इति जे- कुब्जा, कन्या कुब्जा यत्रेति " ङ्यापो बहुलम्० " [ २. ४. ९९. ] इति ह्रस्वत्वे- कान्यकुब्जं, तत्र जातेति पूर्ववदण् । **आर्त्तभागी**ति- बिदाद्यञन्तादणिञोरभावात् ष्यादेशो न भवति । ननु च ऋषिवचन एवायमृतभागशब्दः, तत्रानार्षत्वमपि नास्तीति व्यङ्गविकलत्वम्, एवमेतद् गीयते- एषा आर्त्तभागी प्राच्यानां गृहेषु; इदं तत्र दृश्यताम्- शास्त्रेऽस्मिन् देशान्तरेऽपि ऋषिश्रुत्या विहितः " ऋषि-वृष्ण्यन्धक० " [ ६. १. ६१. ] इति प्रत्यय आर्ष इति रूढः, अयं तु " बिदादिभ्यः " इत्येवं विहितत्वादनार्ष इति प्रत्युदाह्रियते । न चावश्यमिदमेव केवलं प्रत्युदाहरणं किं त्वन्यान्यपि सन्तीत्याह- **एवम्-आर्ष्टिषेणी**ति । **दाक्षी, प्लाक्षी**ति- दक्षस्यापत्यं प्लक्षस्यापत्यम् " अत इञ् " [ ६. १. ३१. ] । [ **औपगवी**ति- ] उपगता गावोऽस्यानेन वेत्युपगुः, तस्यापत्यं स्त्री " ङसोऽपत्ये " [ ६. १. २८. ] इत्यण्, " अस्वयम्भुव० " [ ७. ४. ७०. ] इत्यव्, एवं- कपटोरपत्यं स्त्री **कापटवी**ति । **अणिञन्तस्य सत** इति व्याख्यातप्रायम् । [ **दौवार्ये**ति- ] " उभत् पूरणे " इत्यस्य " द्वार-शृङ्गार० " [ उणा० ४११. ] इत्यारे निपातनाद् द्वादेशे- द्वारं, तस्यापत्यं स्त्री " अत इञ् " [ ६. १. ३१. ] इतीञ्, " द्वारादेः " [ ७ ४. ६. ] इति वृद्धिः; शेषं पूर्ववत् । उडूनीव लोमान्यस्या बाह्वादित्वादिञादौ- **औडुलोम्या, शारलोम्या । कारीषगन्ध** इति- करीषगन्धेरपत्यं पुमान् " ङसोऽपत्ये " [ ६. १. २८. ] इत्यण्, एवं- वराहस्यापत्यम् " अत इञ् " [ ६. १. ३१. ] इतीञि- **वाराहिः**, अत्राणिञन्तस्य स्त्रीवृत्तित्वाभावात् ष्यादेशाभावः । **बहुकारीषगन्धा, निर्वराहिरि**ति- अत्राणिञन्तस्य स्त्रीवृत्तित्वेऽपि मुख्याधिकारात् तस्यान्यपदार्थे मुख्यत्वाभावाच्च भवति । **कथमि**ति- सौधर्मीत्यादीनामणिञन्तत्वात् स्त्रियां ष्यादेशः कस्मान्न भवतीति प्रश्नार्थः । समाधत्ते- **गौरादिपाठादि**ति । अथ षकारस्य प्रयोगेऽनुपयोगात् किमर्थं करणमित्याह- **षित्करणमि**त्यादि ॥ छ. ॥ २. ४. ७८. ॥

**न्या० स०—अनार्षे०** । **अन्त्यस्य** ष्य इति– अणन्तमिञन्तं च बहुस्वरं नाम निर्दिष्टमिति * निर्दिश्यमानानाम् * इति न्यायेन सकलस्याप्यादेशे प्राप्तेऽन्त्यग्रहणम्, उत्तरार्थं च, तेन " भोजसूतयोः० " [ २. ४. ८१. ] इत्यत्र " अनेकवर्णः सर्वस्य " [ ७. ४. १०७. ] इति न्यायान्न सर्वयोर्भोज-सूतशब्दयोः ष्यादेशः । **दैवदत्त्येति**– शब्दशक्तिस्वाभाव्यात् ष्यादेश आबन्तसहित एव स्त्रीलिङ्गमभिव्यनक्ति, एवं– **कारीषगन्ध्येत्य**त्रापि । **कान्यकुब्जी**त्यत्र कन्या कुब्जा यत्रेति " ङ्यापो बहुलम्० " [ २. ४. ९९. ] इति ह्रस्वः, यद्वा कन्याशब्दं केचित् परतः स्त्रीलिङ्गं मन्यन्ते । **आर्तभागी**ति– ननु च ऋषिवचन एवायमृतभागः, तत्रानार्षत्वमपि नास्तीति प्रत्युदाहरणविकलत्वम्, सत्यम्– शास्त्रेऽस्मिन् प्रदेशान्तरेऽपि ऋषिश्रुत्या विहितः " ऋषि-वृष्ण्यन्धक० " [ ६. १. ६१. ] इति प्रत्यय आर्ष इति रूढः, अयं तु " बिदादिभ्यः " [६. १. ४१.] इत्येवं विहितत्वादनार्ष इति प्रत्युदाह्रियते; ऋतः– प्राप्तो भगः– पुण्यं येन, अथवा ऋतेन– सत्येन भज्यते वा । **औपगवी**ति– उपगता गावोऽस्यानेन वेत्युपगुः । **बहुकारीषगन्धा निर्वाराहिरि**त्यत्राणिञन्तस्य स्त्रीवृत्तित्वेऽपि मुख्याधिकारात् तस्यान्यपदार्थे गुणीभूतत्वेन मुख्यत्वाभाव इति । नन्वेते ङ्याबादयः स्त्रीप्रत्ययाः स्त्रीत्वस्य द्योतका न तु वाचकाः, तत्र यथा विद्युदादयः शब्दाः स्त्रीप्रत्ययमन्तरेण स्वमहिम्नैव स्त्रीत्वं प्रतिपादयन्ति तथा खट्वादयोऽपि प्रतिपादयिष्यन्ति, किमेभ्यः स्त्रीप्रत्ययविधानेन ? उच्यते– विचित्रशक्तयो हि भावा भवन्ति, तेऽत्र यथा– घनतरतिमिरनिकरनिरुद्धपदार्थसार्थेऽपि निशीथे गगनतलप्रसृमरांशुरचिरांशुरितरनिरपेक्षतयैवात्मानं प्रकाशयति, न चैवं स्तम्भादयः, तेऽपि चास्मदादीनां प्रदीपादिप्रकाशकसव्यपेक्षा आत्मानं प्रकाशयन्त्येव, संश्लिष्टानां तु प्रदीपादिनिरपेक्षा एव; यथा वा सूर्योपलश्चण्डांशुकरनिकरसंपर्कसमासादितमाहात्म्यः स्वयं शीतोऽपि सान्तरमवस्थितं दाह्यं दहति, न तु प्रत्यासन्नं, प्रत्युत, तत्र शैत्यमुपदर्शयति, तथा शब्दा अपि शक्तिवैचित्र्यात् क्वचित् पदत्वेन पदान्तरसापेक्षेण पदान्तरानपेक्षेण च स्त्रीत्वं प्रतिपादयन्ति, तत्र पदान्तरसापेक्षेण यथेयं गौरित्यादि, अत्र गवाद्यर्थस्योभयलिङ्गत्वादियमिति पदान्तरापेक्षेण गवादिपदेन स्त्रीत्वं प्रतिपाद्यते, तस्य स्त्रीत्वाप्रतिपादने इयमिति न स्यात् । पदान्तरानपेक्षेण नाममात्रेणादेश-प्रत्ययाभ्यां च, तत्र नाममात्रेण यथा– स्वसा दुहितेत्यादयः, अत्र नाममात्रमेव स्त्रीत्वप्रतिपत्तौ समर्थमिति स्त्रीप्रत्ययाभावः, आदेशेन सप्रत्ययेनाप्रत्ययेन च, सप्रत्ययेन– क्रोष्ट्री, कारीषगन्ध्येति, अप्रत्ययेन– तिस्रः, चतस्र इति; प्रत्ययेनैकेनानेकेन च, तत्रैकेन– राज्ञी, खट्वेति; अनेकेन सान्तरेण निरन्तरेण सान्तरनिरन्तरेण च, सान्तरेण– कालितरा हरिणितरेति, निरन्तरेण– आर्याणी भवानी, सान्तरनिरन्तरेण– आर्याणितरा भवानितरेति । तदेवमनेकप्रकाराणां लिङ्गप्रतिपत्तौ नैकः प्रकारः शक्यो नियन्तुम्, शब्दशक्तिस्वाभाव्यात् ॥ २. ४. ७८. ॥

## कुलाख्यानाम् । २ । ४ । ७९ ॥

**त० प्र०**—पुणिक-भुणिक-मुखरप्रभृतयः कुलाख्याः, कुलमाख्यायते आभिरिति कृत्वा, तासामनार्षे **वृद्धे**ऽणिञन्तानामन्तस्य स्त्रियां ष्यो भवति; **अबहुस्वरागुरूपान्त्यार्थं वचनम्** । पुणिकस्यापत्यं पौत्रादि स्त्री–पौणिक्या, भौणिक्या, मौखर्या, गौप्त्या । **वृद्ध इत्येव– पौणिकी, भौणिकी;– अत्र प्रथमापत्ये इञ्** । **अनार्ष इत्येव– गौतमी** । **गौरादित्वात् तु भौरिकी, भौलिकी** ॥ ७९ ॥

**श० न्या०—कुला०** । कुलमाचक्षते– व्यपदिशन्ति, कुलमाख्यायते आभिरिति च स्थादित्वात् के– कुलाख्याः, स्वप्रभवस्यापत्यसन्तानस्य व्यपदेशकाः पुणिक-भुणिक-मुखरप्रभृतयः । अथ कुलाख्यानामणिञन्तानां स्त्रियां ष्यादेशः पूर्वेणैव सिद्धः, किमर्थमिदमित्याह– **अबहुस्वरे**त्यादि । पुणतीति " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– पुणः, सोऽस्यातीति " अतोऽनेकस्वरात् " [ ७. २. ६. ] इति के– पुणिकः । भुणशब्दोऽव्युत्पन्नः, भणेरचि पृषोदरादित्वादस्योत्वे वा– भुणः । मुहेः " जठर-ककर० " [ उणा० ४०३. ] इति निपातनादरे खकारादेशे च– मुखरः । गुपेः क्तप्रत्यये– गुप्तः, तस्यापत्यम् " अत इञ् " [ ६. १. ३१. ] इतीञः ष्यादेशे– **पौणिक्ये**त्यादि । अणन्तानां कुलाख्यानां ष्यो नोदाहृतः, स्वयं तूदाहार्यः– शतक्रतोरपत्यं स्त्री शातक्रतव्यादि । **वृद्ध एवेति– पौणिकी**त्यादौ वृद्ध इत्यनुवर्त्तमानात् प्रथमापत्ये इञः ष्यादेशो न भवति । गोतमस्यापत्यम् " ऋषि-वृष्ण्यन्धक० " [ ६. १. ६१. ] इत्यणि 'अनार्षे' इत्यनुवर्त्तनादत्र ष्यादेशादेशाभावः । **भौरिकी**त्यादावतिप्रसङ्गं निवर्त्तयति– [ **गौरादित्वादि**ति ] ॥ छ. ॥ २. ४. ७९. ॥

**न्या० स०—कुलाख्यानाम्** । कुलमाचक्षते– व्यपदिशन्ति यतः कुलाख्याः, यद्वा कुलमाख्यायते आभिरिति " स्थादिभ्यः कः " [ ५. ३. ८२. ] बाहुलकात् स्त्रीत्वं स्वप्रभवस्यापत्यसंतानस्य व्यपदेशिकाः पुणिक-भुणिक-मुखरप्रभृतयः । **पौणिक्ये**त्यत्र पुणति भणति अच्, " पृषोद० " [ ३. २. १५५. ], पुणो भुणोऽस्यास्तीति " अतोऽनेक०" [ ७. २. ६. ] इति इकः । **गौरादित्वात् तु भौरिकी भौलिकी**ति– अयमर्थः– प्रथममनेन प्राप्तावस्य बाधनार्थं गौरादौ पाठः, ततस्तत्र पाठाद् ङीरेव केवली मा भूदिति क्रौड्यादौ पाठः ॥ २. ४. ७९. ॥

## क्रौड्यादीनाम् । २ । ४ । ८० ॥

**त० प्र०**—अबहुस्वरागुरूपान्त्यार्थोऽनन्तरापत्यार्थश्चारम्भः, 'क्रौडि' इत्येवमादीनामणिञन्तानामन्तस्य स्त्रियां ष्यादेशो भवति । क्रोडस्यापत्यं क्रौडिः, स्त्री– क्रौड्या, लाड्या । क्रौडि, लाडि, व्याडि, आपक्षिति, आपिशलि, सौधातकि, मौरिकि, मौलिकि, शाल्मलि, शालास्थलि, कापिष्ठलि, रौढि, दैवदत्ति, याज्ञदत्ति इत्यादय इञन्ताः । चौपयत, चैकयत, चैटयत, बैल्वयत, शैकयत; एतेऽणन्ताः । ष्यस्यादेशत्वात् क्रौडेयः चौपयतेय इत्यादिषु आपत्यस्य यस्य लोपः सिद्धः, अन्ये त्वत्र ष्यस्य प्रत्ययत्वमिच्छन्तो यलोपं नेच्छन्ति– क्रौड्येयः, चौपयत्येयः । बहुवचनमाकृतिगणार्थम् ॥ ८० ॥

**श० न्या०**—क्रौड्या० । ननु क्रौडिप्रभृतीनामणिञन्तत्वात् पूर्वेण ष्यादेशस्य सिद्धौ किमर्थं पुनरारम्भ इत्याह– **अबहुस्वरे**त्यादि– अनेन पूर्वलक्षणस्य यथायोगमप्राप्तिर्दर्श्यते, तत्र क्रौड्यादीनां केषाञ्चिद् बहुस्वरत्वाभावादापक्षितिप्रभृतीनामगुरुपान्त्यत्वाद् दैवदत्ति याज्ञदत्त्योश्चानन्तरापत्यत्वादप्राप्तिरिति । करोतेः "विहड-कहोड०" [ उणा० १७२. ] इत्यडेऽकारस्य च निपातनादोकारे– क्रोडः । लडतेरचि– लडः । विविधमडतीति– व्यडः । अपपूर्वात् क्षियतेः क्ते– अपक्षितः । सुशब्दाद् दधातेस्तृचि– सुधातृ । मुरिक-मुलिकौ साधितौ । "शाड्ङ् श्लाघायाम्" लत्वे "रुचि-कुटि-कुषि०" [उणा० ५०२.] इति मलकि– शाल्मलः । शालायाः स्थलमिव स्थलमस्याः [ शालास्थला, ] एवं– कपिष्ठला । रुहेः क्ते– रूढः । देवदत्त-यज्ञदत्तौ साधितौ । क्रोडादिभ्यस्तस्यापत्यमित्यर्थे "अत इञ्" [६. १. ३१.] इति इञि कृते, सुधातृशब्दाच्च "व्यासवरुट०" [ ६. १. ३८. ] इतीञि, अन्तस्य चाकि कृते 'क्रौडि' इत्यादयो भवन्तीत्याह– **इञन्ता** इति । "चुप मन्दायां गतौ" णिगि शतरि तस्यापत्यमित्यणि– **चौपयत**, एवं– "चीकण् आमर्षणे" इत्यतो युजादिणिजन्तात् "चिट प्रैष्ये" इत्यतः प्रयोक्तृव्यापारणिगन्ताच्च पूर्ववत् शत्रादौ– **चैकयत, चैटयत** । बिल्वमाचष्टे "णिज् बहुलम्०" [ ३. ४. ४२. ] इति णिचि शत्रादौ च– **बैल्वयत** । **शैकयते**ति– शीकमानं प्रयुङ्क्ते इति पूर्ववण्णिगादिः । क्रौड्यादीनामिति षष्ठीनिर्देशादन्तस्येत्यधिकाराच्च ष्य इत्यादेशोऽयं, तेन च तत्सिद्धत्वं दर्शयति– **ष्यस्ये**त्यादि– इञ आपत्यत्वात् तदादेशत्वे ष्यस्यापि स्थानिवद्भावेनापत्यत्वात् "तद्धितयस्वरे०" [ ३. २. ५५. ] इति लोपः सिध्यतीत्यर्थः । क्रोडस्यापत्यं स्त्री– क्रौड्या, चौपयतोऽपत्यं चौपयत्या, या( तस्या ) अपत्यमिति "ड्याप्त्यूङः" [६. १. ७०.] इत्येयणि "अवर्णेवर्णस्य" [७. ४. ६८.] इत्याकारलोपे "तद्धितयस्वरे०" [ ३. २. ५५. ] इति यलोपे– **क्रौडेयः, चौपयतेय** इति । **अन्ये त्वि**ति– पूर्वे इत्यर्थः, यदुत्पलः– एवं तर्ह्यत्र यलोपो नेष्यते, तदनिष्टेश्च पञ्चमीनिर्देश एव लिङ्गमिति । उद्द्योतकरस्त्वाह– अप्रत्ययत्वेऽप्यस्य स्वार्थिकत्वेनापत्यत्वाद् यकारलोपे– क्रौडेय इति भवतीत्यादेशप्रत्ययपक्षयोरविशेष इति । बहुवचनफलमाह– **बहुवचनमि**त्यादि ॥ छ. २. ४. ८०. ॥

**न्या० स०**—क्रौड्यादीनाम् । क्रोडस्यापत्यमित्यत्र करोतेः "विहड-कहोड०" [ उणा० १७२. ] इत्यडेऽकारस्य निपातनादोकारे । व्याडीत्यत्र विविधमडतीति व्यडः । **मौलिकीत्यत्र** बिभर्तेः "कुशिक०" [ उणा० ४५. ] इत्यादिना मुरिक, ऋफि-डादिलत्वे– मुलिक, क्रौड्यादिपठितयोर्मुरिक-मुलिकयोर्मौरिक्या मौलिक्या, गौरादिपाठाद् मौरिकी मौलिकी च । **शाल्मलीत्यत्र** शाडः "रुचि-कुटि" [ उणा० ५०२. ] इति मलक्, शाल्मयोऽस्य सन्ति वा "अभ्रादिभ्यः" [ ७. २. ४६. ], शाल्मलस्यापत्यमिञ् । **शालास्थलीत्यत्र** शालायाः स्थलमिव स्थलमस्य; एवं– कपिष्ठलः । **इञन्ता** इत्यत्र क्रोडादिभ्यस्तस्यापत्यमित्यर्थे "अतः०" [ ६. १. ३१. ] इति इञि कृते, सुधातृशब्दात् तु "व्यास-वरुट०" [ ६. १. ३८. ] इति इञि अन्तस्याकि कृते– **क्रौडि** इत्यादयो भवन्ति । [ **चौपयत** ] "चुप मन्दायां" णिगन्तात् शतृप्रत्ययः । **चैकयते**त्यत्र "चीक शीकण्" "चिट प्रैष्ये" "ककुङ्" यथासंभवं णिज् णिग् वा, पश्चात् शतृ, ततोऽपत्यार्थेऽण् । **बैल्वयत** इत्यत्र बिल्वमाचष्टे "णिज् बहुलम्०" [ ३. ४. ४२. ] इति णिचि शत्रादौ च । **ष्यस्यादेशत्वादिति**– अत्र क्रौड्यादीनामिति षष्ठीनिर्देशादन्तस्येत्यधिकाराच्च ष्य इत्यादेशोऽयम्, तेन यद सिद्धं तद् दर्शयति ॥ २. ४. ८०. ॥

## भोज-सूतयोः क्षत्रिया-युवत्योः । २ । ४ । ८१ ॥

**त० प्र०**—भोज-सूतशब्दयोरन्तस्य क्षत्रिया-युवत्योरभिधेययोः स्त्रियां ष्यादेशो भवति । भोज्या– भोजवंशजा क्षत्रिया, सूत्या– प्राप्तयौवना मानुषीत्यर्थः, अन्ये सूतसंबन्धिनी युवतिः– सूत्या, न सर्वेत्याहुः । क्षत्रिया-युवत्योरिति किम् ? भोजा, सूता ॥ ८१ ॥

**श० न्या०**—भोज० । उभयत्र द्विवचनं यथासंख्यार्थम् । तदुदाहरणे दर्शयति– **भोज्ये**त्यादि– अयमर्थः– यदा भोजशब्देन क्षत्रिया क्षत्रियवंशजा स्त्री प्रतिपाद्यते तदा तदन्तस्य "जातेः०"

[ २. ४. ५४. ] इति ङीप्रत्ययापवादः ष्यादेशो भवति । एवं– यदा सूतशब्देन प्राप्तयौवना स्त्री प्रतिपाद्यते तदा तदन्तस्य ष्यादेशः, अन्यत्र त्वाबेव । **अन्य** इति–... । **सूतसम्बन्धिनी**ति– सूतजातिसम्बन्धिनीत्यर्थः, ब्राह्मण्यां क्षत्रियादुत्पन्नः सूतः, स रथप्राजनकर्मणा जीवति, सूतकर्म चात्रोपचारात् सूतशब्देनोच्यते, तत्सम्बन्धिनीति सूतकर्म कुर्वती रथस्य प्राजित्री स्त्री युवतिः सूत्या न सर्वेति ॥ छ. ॥ २. ४. ८१. ॥

**न्या० स०—भोज-सूत०** । " जातेः० " [ २. ४. ५४.] इति ङीप्रत्ययापवादोऽनेन ष्यादेशः । मूलोदाहरणे सूतस्तरुण उच्यते । **सूतसम्बन्धिनी युवतिरिति**– क्षत्रियाद् ब्राह्मण्यां जातः सूतः, प्राजनकर्मणि प्राजितृत्वे सूतशब्दः, तस्य कर्मणः सम्बन्धिनी तत्कर्त्री सूत्येति, कोऽर्थः ? रथप्राजित्री ॥ २. ४. ८१ ॥

## दैवयज्ञि-शौचिवृक्षि-सात्यमुग्रि-काण्ठेविद्धेर्वा । २ । ४ । ८२ ॥

**त० प्र०**—एषामिञन्तानां स्त्रियामन्तस्य ष्यादेशो वा भवति, इञन्तमात्रनिर्देशात् पौत्रादौ प्राप्ते प्रथमापत्ये त्वप्राप्ते विभाषा । दैवयज्ञ्या, दैवयज्ञी; शौचिवृक्ष्या, शौचिवृक्षी; सात्यमुग्र्या, सात्यमुग्री; काण्ठेविद्ध्या, काण्ठेविद्धी ॥ ८२ ॥

**श० न्या०**—दैव० । इज्यते इति यज्ञः, देवो यज्ञो यस्यासौ देवयज्ञः । शुचिर्वृक्षो यस्यासौ शुचिवृक्षः, उद्द्योतकरस्तु शुचेः " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– शुचो वृक्षो यस्येत्याह । असतेः " शिक्यास्या० " [ उणा० ३६४. ] इति ये निपातनात्– सत्यम्, उच्चेरुषेर्वा " क्षुर-क्षुर-गौर० " [ उणा० ३९६. ] इति निपातनाद्– उग्रम्; सत्यमुग्रं यस्यासौ सत्यमुग्रः, पृषोदरादित्वान्मागमः ; सत्यमिति मान्तमव्ययं वा, सत्यमुचं रातीति वा सत्यमुग्रः । कणेः " वनि–कणि० " [ उणा० १६२. ] इति ठे– कण्ठः, विध्यतेः क्ते " ज्या-व्यध० " [ ४. १. ८१. ] इति य्वृति– विद्धम्, कण्ठे विद्धमनेनासौ कण्ठेविद्धः, " अमूर्धमस्तकात्० " [ ३. २. २२. ] इति सप्तम्या अलुक्, एभ्यः पौत्राद्यपत्यविवक्षायामिञि प्राप्ते विभाषा, प्रथमापत्यविवक्षायां त्वप्राप्ते उभयत्र विभाषेयमित्याह– **इञन्तमात्रनिर्देशादि**त्यादि । नन्वेते स्त्रीप्रत्ययाः स्त्रीत्वस्य द्योतका न तु वाचकाः, तत्र यथा विद्युदादयः शब्दाः स्त्रीप्रत्ययमन्तरेण स्वमहिम्नैव स्त्रीत्वं प्रतिपादयन्ति तथा खट्वादयोऽपि प्रतिपादयिष्यन्ति, किमेभ्यः स्त्रीप्रत्ययविधानेन ?, उच्यते– विचित्रशक्तयो हि भावा भवन्ति, तत्र तथा [यथा] घनतरतिमिरनिरुद्धपदार्थसार्थेऽपि निशीथे गगनतलप्रसमरांशुरचिरांशुरितरनिरपेक्षतयैवात्मानं प्रकाशयति, नैवं स्तम्भादयः, तेऽपि चास्मदादीनां प्रदीपादिप्रकाशकसव्यपेक्षा एवात्मानं प्रकाशयन्ति, संपातिनां तु तदपेक्षा एव । यथा वा सूर्योपलश्चन्द्रचण्डांशुकरनिकरसंपर्कसमासादितमाहात्म्यः स्वयं शीतोऽपि सोन्तरमधःस्थितं दार्ध्य दहति, न तु प्रत्यासन्नं, प्रत्युत तत्र शैत्यमुपदर्शयति । तथा शब्दा अपि शक्तिवैचित्र्यात् केचित् पदत्वेन पदान्तरसापेक्षेण पदान्तरानपेक्षेण च स्त्रीत्वं प्रतिपादयन्ति, तत्र पदान्तरसापेक्षेण यथेयं गौरित्यादि, अत्र गवाद्यर्थस्योभयलिङ्गत्वादियमिति पदान्तरापेक्षेण गवादिपदेन स्त्रीत्वं प्रतिपाद्यते, तस्य स्त्रीत्वाप्रतिपादने इयमिति न स्यात्; पदान्तरानपेक्षेण नाममात्रेणादेश-प्रत्ययाभ्यां च, तत्र नाममात्रेण यथा स्वसा दुहितेत्यादयः, अत्र नाममात्रमेव स्त्रीत्वप्रतिपत्तौ समर्थमिति स्त्रीप्रत्ययाभावः; आदेशेन सप्रत्ययेनाप्रत्ययेन च, सप्रत्ययेन क्रोष्ट्री कारीषगन्ध्येति, अप्रत्ययेन तिस्रः, चतस्र इति; प्रत्ययेनैकेनानेकेन च, तत्रैकेन राज्ञी खट्वेति, अनेकेन सान्तरेण[ निरन्तरेण सान्तर ] निरन्तरेण च, सान्तरेण कालितरा, रोहिणितरेति, निरन्तरेण– आर्याणी, भवानी, सान्तरनिरन्तरेण आर्याणितरा, भवानितरा, इति । तदेवमनेकप्रकारायां लिङ्गप्रतिपत्तौ नैकप्रकारः शक्यो नियन्तुम्, शब्दशक्तिस्वाभाव्यादिति ॥ छ. ॥ २. ४. ८२. ॥

**न्या० स०**—दैवयज्ञि० । **दैवयज्ञ्ये**ति– देव एव यज्ञः पूजनीयो यस्य स तथा । **शौचिवृक्ष्ये**त्यत्र स्वमते शुचिर्वृक्षोऽस्येति, उद्द्योतकरस्तु– शुचेः " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के– शुचो वृक्षोऽस्येत्याह । **सात्यमुग्र्ये**ति– सत्यमुग्रं यस्य असौ सत्यमुग्रः, अत एव निर्देशाद् मोऽन्तः मान्तमव्ययं वा, सत्यं मुञ्चति क्विपि सत्यमुचं रातीति वा डे । **काण्ठेविद्ध्ये**ति– यदा कण्ठे विध्यते स्म तदा " तत्पुरुषे कृति " [ ३. २. २०. ] इति अलुप्, यदा तु कण्ठे विद्धमनेन तदा " अमूर्द्धमस्तकात् " [ ३. २. २२. ] इत्यलुप् ॥ २. ४. ८२. ॥

## ष्या पुत्र-पत्योः केवलयोरीच् तत्पुरुषे । २ । ४ । ८३ ॥

**त० प्र०**—मुख्य आबन्तः ष्यः पुत्र-पतिशब्दयोः केवलयोः परयोस्तत्पुरुषे समासे ईच् भवति, चकारो " वेदूतो० " [ २. ४. ९८. ] इत्यादौ विशेषणार्थः । कारीषगन्ध्यायाः पुत्रः– कारीषगन्धीपुत्रः, एवं– कारीषगन्धीपतिः; कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः; परमकारीषगन्धीपुत्रः, परम-

कारीषगन्धीपतिः। ष्येति किम्? गौकक्ष्यापुत्रः, इभ्यापुत्रः, क्षत्रियापुत्रः। पुत्र-पत्योरिति किम्? कारीषगध्याकुलम्। केवलयोरिति किम्? कारीषगन्ध्यापुत्रकुलम्, कारीषगन्धीपुत्रस्य कुलमिति विग्रहे तु– कारीषगन्धीपुत्रकुलमित्यपि भवति। तत्पुरुष इति किम्? कारीषगन्ध्यापतिरस्य कारीषगन्ध्यापतिरयं ग्रामः। मुख्य इत्येव– अतिक्रान्ता कारीषगन्ध्यामतिकारीषगन्ध्या, तस्याः पुत्रोऽतिकारीषगन्ध्यापुत्रः ॥ ८३ ॥

**श० न्या०**—ष्या पु०। '**ष्या**' इति "अनार्षे वृद्धे०" [ २. ४. ७८. ] इत्यादिना विहितस्य ष्यस्याबन्तस्य मुख्यस्यानुकरणम्। पुत्रश्च पतिश्च पुत्र-पती, राजदन्तादित्वाल्लघ्वक्षरादपि पतिशब्दात् पुत्रशब्दस्य पूर्वनिपातः, तयोरौपश्लेषिकेऽधिकरणे सप्तमी। चकारस्य प्रयोगेऽदर्शनात् किमर्थमुपादानमित्याह– **चकार** इत्यादि। तत्पुरुष इति समासविशेषस्य संज्ञा तस्मिन्, अवयव्याप्याधारतया निर्दिश्यते, वृक्षे शाखेति यथा। **करीषगन्ध्यायाः पुत्रः** इति "षष्ठ्ययत्नात्०" [ ३. १. ७६. ] इति तत्पुरुषं दर्शयति। "गौणो ङ्यादिः" [ ७. ४. ११६. ] इति नियमात् प्रधाने ङ्यादौ "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इत्यनुपस्थानात् तदन्तस्यापि कार्यं दर्शयति– **परमकारीषगन्धीपुत्र** इत्यादि– कर्मधारयस्योत्तरपदार्थप्राधान्यादत्र स्त्रीप्रत्ययस्य प्राधान्यम्, स्त्र्यधिकारेण ष्यणिञोः स्थाने विधीयमानत्वात् स्त्रीप्रत्ययो भवति, प्रत्ययत्वेन च प्रत्ययग्रहणपरिभाषोपस्थापनं (प्राधान्यान्नभवति) उपसर्जने तु तत एव नियमात् "प्रत्ययः प्रकृत्यादेः" [७. ४. ११५.] इत्युपस्थानादतिक्रान्ता कारीषगन्ध्यामतिकारिषगन्ध्या, तस्या पुत्र इत्यादौ न भवतीत्यमुमेवार्थं **मुख्य इत्येवे**त्यनेन दर्शयिष्यते। षकारानुबन्धस्य प्रयोजनमुपदर्शयन्नुदाहरति– **गौकक्ष्यापुत्र** इत्यादि– गौकक्ष्यापुत्रः– गोकक्षस्यापत्यं वृद्धं स्त्रीति गर्गादित्वाद् यञ्, "इणः कित्" [ उणा० ३२८. ] इति भे इभः, तमर्हतीति दण्डादित्वाद् यः, एवं "क्षत्रादियः" [ ६. १. ९३. ] इति इयः ] सर्वत्र जातित्वेऽपि यान्तत्वाद् ङ्यभावे "आत्" [ २. ४. १८. ] इत्याप्, तत्र पुत्रशब्देन तत्पुरुषः। **कारीषगन्ध्यापुत्रकुलमि**ति– पुत्रस्य कुलं– पुत्रकुलम्, ततः कारीषगन्ध्याशब्देन पुनस्तत्पुरुषः, अत्र केवलग्रहणमन्तरेण ष्यान्तस्येति ( ष्यान्तस्येचि ) विधीयमाने पुत्र-पत्योस्तदादाविति प्रसङ्गः स्यात्, अयमभिप्रायः– पुत्रपत्योरित्यौपश्लेषिकेऽधिकरणे सप्तमी, उपश्लेषश्च यथा ताभ्यां केवलाभ्यां ष्यान्तस्यास्त्येवमुत्तरपदादिभूताभ्यामपीति। अथ ष्यान्तस्य पुत्र-पत्योश्चाधिकरणतया तत्पुरुषस्य निर्दिश्यमानत्वात् प्रत्यासत्तेर्यस्यैव तत्पुरुषस्य ष्यान्तोऽवयवस्तस्यैव यौ पुत्र-पती अवयवौ, न तत्पुरुषान्तरस्य, तयोः ष्यस्येञ् भवति, तदादौ तु पुत्र-पती अन्यस्यावयवौ, अन्यस्य तु ष्यान्त इतीञ् न भविष्यति, एवं तर्हि तत्पुरुषेण सन्निधापितस्योत्तरपदस्य पुत्रपतिशब्दाभ्यां विशेषणात्, विशेषणेन च तदन्तविज्ञानात् पुत्रपतिशब्दान्तयोरुत्तरपदयोरतिप्रसङ्गः स्यात्, यतो विधि-विधान-विधिभाजां सन्निधाने तदन्तविधिर्भवति, तत्र विधिरीञ्भावो विधानं पुत्रपती विधिभाक् तु ष्यान्त इति तदन्तनिराकरणार्थं केवलग्रहणम्, नैषोऽपि दोषः– सिद्धं तु विशेषण-विशेष्ययोर्यथेष्टत्वादिति प्रतिपादनात् तत्पुरुषसन्निधापितेनोत्तरपदेन पुत्र-पत्योर्विशेषणात् तयोश्चोत्तरपदान्तयोरसम्भवादुत्तरपदस्य च समासावयवत्वे च पुत्रपत्यनवयवत्वादन्तशब्दस्य चावयववचनत्वात् पुत्रपत्योरुत्तरपदयोरित्येव विज्ञानादिति, सत्यम्– पुत्र-पत्योरुत्तरपदेन विशेषणात् तदन्तविधेरभावो युक्तो, विशेषण-विशेष्यभावे तु कामचाराद् यदा तत्पुरुषाक्षिप्तमुत्तरपदं पुत्र-पतिभ्यां विशिष्यते तदा स्यादेव तदन्तप्रतिपत्तिरिति केवलग्रहणम्, वृत्तौ तु तदाद्युदाहरणमुपलक्षणम्, कारीषगन्ध्यापरमपुत्र इत्यादि तदन्तोदाहरणमपि द्रष्टव्यम्, **कारीषगन्धीपुत्रस्ये**त्यादिना तु पुत्रशब्देनैव तत्पुरुषे कार्यं दर्शयति, तत्पुरुष इति वचनात् कारीषगन्ध्या पतिरस्येत्यादिबहुव्रीहौ न भवति ॥ छ. ॥ २. ४. ८३. ॥

**न्या० स०**—ष्या पुत्र०। ष्याशब्दाद् "दीर्घङ्याप्०" [ १. ४. ४५. ] सूत्रत्वाद् वा सेर्लुप्। **पुत्रपत्योरि**त्यत्र सौत्रनिर्देशात् "लघ्वक्षर०" [ ३. १. १६०. ]इति पतिशब्दस्य न पूर्वनिपातः। अत्र केवलग्रहणमन्तरेण ष्यान्तस्येति विधीयमाने पुत्र-पत्योस्तदादावतिप्रसङ्गः स्यात्, अयमभिप्रायः– **पुत्रपत्यो**रित्यौपश्लेषिकेऽधिकरणे सप्तमी, उपश्लेषश्च यथा ताभ्यां केवलाभ्यां ष्यान्तस्यास्त्येवमुत्तरपदादिभूताभ्यामपीति। अथ ष्यान्तस्य पुत्रपत्योश्चाधिकरणतया तत्पुरुषस्य निर्दिश्यमानत्वात् प्रत्यासत्तेर्यस्यैव तत्पुरुषस्य ष्यान्तोऽवयवस्तस्यैव यौ पुत्र-पती अवयवौ, न तत्पुरुषान्तरस्य, तयोः ष्यस्य ईञ् भवति, तदा तु पुत्र-पती अन्यस्यावयवौ, अन्यस्य तु ष्यान्त इति ईञ् न भविष्यति। एवं तर्हि तत्पुरुषेण सन्निधापितस्योत्तरपदस्य पुत्र-पतिशब्दाभ्यां विशेषणाद् विशेषणेन तदन्तविज्ञानात् पुत्र-पतिशब्दान्तयोरुत्तरपदयोरतिप्रसङ्गः स्यात्, यतो विधि-विधान-विधिभाजां संनिधाने तदन्तविधिर्भवति, तत्र विधिरीञ्भावो, विधानं पुत्र-पती, विधिभाक् च ष्यान्त इति तदन्तग्रहणनिराकरणार्थं केवलग्रहणम् ॥ २. ४. ८३. ॥

## बन्धौ बहुव्रीहौ । २ । ४ । ८४ ॥

**त० प्र०**—मुख्य आबन्तः ङ्यो बन्धुशब्दे केवले परतो बहुव्रीहौ समासे ईज् भवति । कारीषगन्ध्या बन्धुरस्य– कारीषगन्धीबन्धुः, कौमुदगन्धीबन्धुः; परमकारीषगन्धीबन्धुः, परमकौमुदगन्धीबन्धुः । बन्धाविति किम् ? कारीषगन्ध्या-पतिर्ग्रामः । केवल इत्येव– कारीषगन्ध्याबन्धुकुलः; कारीषगन्धीबन्धुकुल इत्यत्र कारीषगन्धीबन्धुः कुलमस्येति विग्रहः । बहुव्रीहाविति किम् ? कारीषगन्ध्याया बन्धुः– कारीषगन्ध्याबन्धुः । मुख्य इत्येव– अतिकारीषगन्ध्या बन्धुरस्य– अतिकारीषगन्ध्याबन्धुः ॥ ८४ ॥

**श० न्या०**—बन्धौ० । पूर्वेण तुल्यगम्यम्, तत्र तु ङ्यान्तस्य पूर्वपदस्य पुत्र-पत्योरुत्तरपदयोस्तत्पुरुष आधारः, इह तु बहुव्रीहिरित्येतावान् विशेषः । " बन्धश् बन्धने " अतो " भृ-मृ-तृ-त्सरि० " [ उणा० ७६१. ] इत्युप्रत्यये– बन्धुः ॥ छ. ॥ २. ४. ८४. ॥

**न्या० स०**—बन्धौ० । [नेह व्याख्यातम्] ॥ २. ४. ८४. ॥

## मात-मातृ-मातृके वा । २ । ४ । ८५ ॥

**त० प्र०**—मुख्य आबन्तः ङ्यो मातादिषु केवलेषु परेषु बहुव्रीहौ समासे ईज् वा भवति । कारीषगन्ध्या माता यस्य स कारीषगन्धीमातः कारीषगन्ध्यामातः, परमकारीषगन्धीमातः, परमकारीषगन्ध्यामातः; कारीषगन्ध्या माता यस्य स कारीषगन्धीमाता, कारीषगन्ध्यामाता; कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः; मातेति निर्देशाद् मातृशब्दस्य पुत्रप्रशंसामन्त्र्यमन्तरेणापि पक्षे मातादेशः, अन्यथा मातृशब्देनैव गतत्वाद् मातशब्दोपादानमनर्थकं स्यात् । मातृ-मातृकशब्दयोश्च भेदेनोपादानादृदन्तलक्षणः कच् प्रत्ययोऽपि विकल्प्यते ॥ ८५ ॥

**श० न्या०**—मात० । सिद्धस्वरूपं कार्यान्तरनिमित्ततयाऽनूद्यते, न तु जननीवाचको मातशब्दः क्वचित् सिद्धः, " मातुर्मातः० " [ १. ४. ४०. ] इत्यस्य च पुत्रप्रशंसामन्त्र्यविषयत्वादिह तु तदभावात् कथं तस्मिन् ङ्यान्त ईज्भावमापद्यत इत्याशङ्कायामाह– **मातेति निर्देशादि**त्यादि– मातशब्दोपादानादामन्त्र्याभावेऽपि पक्षे मातुर्मातादेश इत्यर्थः । यद्येवं मातृशब्दप्रयोगेण न भाव्यमादेशस्य स्थानिनो निवर्त्तकत्वात्, अनिवर्त्तकत्वेऽपि कचा भवितव्यम्, ततश्च मातृशब्दोपादानमिहासङ्गतम्, अथ कज् न स्यात् तर्हि मातृकोपादानमनर्थकमित्यत आह– **मातृ-मातृकशब्दयोश्चे**त्यादि– अपिशब्दान्मातादेशोऽपि विकल्पत इत्यर्थः ॥ छ. ॥ २. ४. ८५. ॥

**न्या० स०**—मात० । [ नेह व्याख्यातम् ] ॥ २. ४. ८५. ॥

## अस्य ङ्यां लुक् । २ । ४ । ८६ ॥

**त० प्र०**—ङीप्रत्यये परे पूर्वस्याकारस्य लुग् भवति । कुरुचरी, मद्रचरी । अस्येति किम् ? दण्डिनी, कर्त्री ॥८६॥

**श० न्या०**—अस्य० । **ङ्यामि**ति सप्तम्यन्तनिर्देशात् " सप्तम्या पूर्वस्य " [ ७. ४. १०५. ] इति परिभाषोपस्थानादकारस्य पूर्वत्वं विज्ञायत इत्याह– **पूर्वस्याकारस्ये**ति । **कुरुचरी**ति– टित्वात् ङ्यामकारलोपः । " स्त्रियां नृतः० " [ २. ४. १. ] इति ङ्यां– **दण्डिनी**त्यादि ॥ छ. ॥ २. ४. ८६. ॥

**न्या० स०**—अस्य ङ्याम्० । ईजाधिकारे समानदीर्घत्वेनैव प्रयोगजातं सेत्स्यति, किं लुको ग्रहणेन ? सत्यम्– यदा पञ्चभिः कुमारीभिः क्रीत इति इकणो लुपि * उभयोः स्थाने० * इति न्यायादीचोऽपि ङीव्यपदेशे ङीनिवृत्तौ व्यञ्जनान्तता, ईज्व्यपदेशे तु इकारान्तता, [ तदा ]मा भूदिति लुक्ग्रहणम् ॥ २. ४. ८६. ॥

## मत्स्यस्य यः । २ । ४ । ८७ ॥

**त० प्र०**—मत्स्यशब्दसंबन्धिनो यकारस्य ङ्यां लुग् भवति । मत्सी । कथं मत्स्यो नाम कश्चित् तस्यापत्यं स्त्रीति इञ् ङी– मात्सी ? ङीनिमित्तादेशस्यापि ङीग्रहणेन ग्रहणात् ॥ ८७ ॥

**श० न्या०**—मत्स्य० । **य** इति मत्स्यशब्दस्थः कृताकारलोपो यकारोऽनुकृतः, ततः स्थानसम्बन्धे षष्ठी । **मत्स्यस्ये**त्यवयवसम्बन्धे षष्ठीत्याह– **मत्स्यस्ये**त्यादि । मत्स्यशब्दाद् गौरादित्वाद् ङ्याम् " अस्य ङ्याम्० " [ २. ४. ८६. ] इत्यलोपे– **मत्सी** । ननु ङ्यामित्यस्य यकारविशेषणत्वे विज्ञायमाने मत्सीत्यत्र " स्वरस्य परे प्राग्विधौ " [ ७. ४. ११०. ] इत्यकारलुचः स्थानिवद्भावाद् ङ्यां यकारासम्भवात् कथं लुगिति ? अथ वचनाद् भविष्यतीति चेत् ? अस्तु, मत्स्यस्येयं " तस्येदम् " [ ६. ३. १६०. ] इत्यणि अकारलोपेऽणन्तत्वाद् ङ्याम् " अस्य ङ्याम्० " [ २. ४. ८६. ] इत्यणोऽकारलोपे द्वयोरकारयोर्लुचः स्थानिवद्भावान्मात्सीत्यत्र यकारलुग् न सिद्ध्यतीति, उच्यते– " न सन्धिङि० " [ ७. ४. १११. ] इति स्थानिवद्भावप्रतिषेधादवयवस्थानिवद्भावप्रतिषेधो ङ्यामिति मत्स्यविशेषणेऽप्याश्रयणीय एव । **कथमि**ति– " पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वर० " [ ६. १. ११६. ] इति द्रेरणः शङ्कानिरासार्थं **मत्स्यो नाम कश्चिदि**त्युक्तम् । **इञि**ति– " अत इञ् " [ ६. १. ३१. ] इत्यनेन, **ङी**ति– " अणञेय० " [ २. ४. २०. ] इति, " नुर्जातेरिः " [ २. ४.

७२. ] इत्यनेन वा; अत्रेञो ङीप्रत्ययस्य च स्थानेऽस्यैकादेशत्वाद् ङीत्वाभावाद् ङ्यामुच्यमाना लुप् कथं स्यादिति प्रश्नार्थः । समाधत्ते- **ङीनिमित्ते**त्यादि- अयमर्थः- यथा मातरपितरयोः परस्परापेक्षयोर्जातः पुत्रो मातुश्च भवति पितुश्च भवति, एवं ङीप्रत्ययस्याङीप्रत्ययस्य च स्थाने जातस्यैकादेशस्य स्थानिवद्भावेन ङीग्रहणेन ग्रहणमित्यर्थः । ननु तथापि मत्स्यशब्दस्योच्यमानः कथं मत्स्यीति ( मात्स्यी इति शब्दस्य ) स्यात्, ततोऽन्यत्वात्, नैवम्- एकदेशविकृतस्यानन्यत्वात् स्यादिति ॥ छ. ॥ २. ४. ८७. ॥

**न्या० स०—मत्स्यस्य यः ।** मत्सीति- ननु ङ्यामिति "सप्तम्या निर्दिष्टे पूर्वस्य" [ ७. ४. १०५. ] तत्रानन्तरस्येति न्यायान्मत्सीत्यत्र "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इत्यकारलुचः स्थानिवद्भावाद् ङ्यां निमित्ते यकारासंभवात् कथं लुगिति, नैवम्- वचनादेकेन वर्णेन व्यवधानमाश्रीयते । ननु भवेत्त्वेवं परं मत्स्यस्येयं "तस्येदम्" [ ६. ३. १६०. ] इत्यणि मत्स्याकारलोपे अणन्तत्वाद् ङ्याम् "अस्य ङ्याम्०" [ २. ४. ८६. ] इत्यणोऽकारलोपे द्वयोरकारयोः स्थानिवद्भावाद् मात्सीत्यत्र यलुक् न प्राप्नोति, नैवम्- "न सन्धि०" [ ७. ४. १११. ] इति स्थानिवद्भावप्रतिषेधात्, प्रथमपक्षे तु "न सन्धि०" [ ७. ४. १११. ] इत्यस्य चिन्तापि न कृता, उत्तरान्तरेणैव सिद्धत्वात् ॥ २. ४. ८७. ॥

## व्यञ्जनात् तद्धितस्य । २ । ४ । ८८ ॥

**त० प०—**व्यञ्जनात् परस्य तद्धितस्य यकारस्य ङ्यां लुग् भवति । मनोरपत्यं स्त्री- मनुषी, गर्गस्यापत्यं पौत्रादि स्त्री- गार्गी, सोमो देवता अस्याः- सौमी दिक्, उचितस्य भाव औचिती, चातुरी, वृकात् टेण्यणि- वार्केणी; समिध आधाने टेण्यणि- सामिधेनी । व्यञ्जनादिति किम् ? कारिकाया अपत्यं- कारिकेयी, हारिकेयी । तद्धितस्येति किम् ? वैश्यस्य भार्या- वैश्यी ? ङ्यामित्येव- आवट्या ॥ ८८ ॥

**श० न्या०—व्यञ्ज० ।** **तद्धितस्ये**त्यनन्तरस्य यकारस्य कार्यिणः समानाधिकरणं विशेषणमित्याह- **तद्धितस्ये**त्यादि । **व्यञ्जनादि**ति सामान्येनोपादानात् प्रकृत्यवयवाद् **गार्गी**ति, प्रत्ययावयवाद् **वार्केणी**ति लुक् सिद्धा । **मनोरपत्यमि**ति- "मनोर्याणौ०" [ ६. १. ९४. ] इति ये षागमे गौरादित्वाद् ङ्यामकारलोपे च- **मनुषी** । **गार्गी**ति- गर्गादित्वाद् यञ्, "यञः०" [ २. ४. ६७. ] इति ङीः । **सौमी**ति- "क-सोमात्०" [ ६. २. १०७. ] इति ट्यण् "अणञेय०" [ २. ४. २०. ] इति ङीः । **औचिती**ति- राजादित्वाट्ट्यण्, एवं- **चातुरी**त्यपि । **वार्केणी**ति- "वृकाट्टेण्यण्" [ ७. ३. ६४. ] इति टेण्यण् । **सामिधेनी**ति- टित्त्वाद् ङीः । **कारिकेयी**ति- "ङ्याप्त्यूङः" [ ६. १. ७०. ] इत्येयणि "अणञेय०" [ २. ४. २०. ] इति ङीः, एवं- **हारिकेयी**ति- व्यञ्जनादिति वचनादत्र स्वरपरत्वाल्लोपो न भवति । **वैश्यी**ति- "धवाद् योगात्०" [ २. ४. ५९. ] इति ङीः, एवं- ( हारिकेयी ? । ) विदन्त्यनयेति विद्या, तामधीते स्त्री- अणन्तत्वाद् ङ्यां कृद्यकारत्वाल्लोपाभावे- **वैद्यी,** अस्यैव सुप्रसिद्धत्वात् पूर्वं बुद्धावपारोहात् तत्प्रदर्शनं न्याय्यं, न तु वैदस्य स्त्री- वैदीति । **आवट्ये**ति- गर्गादित्वाद् यञ्, "षावटाद् वा" [ २. ४. ६९. ] इति विकल्पाद् ङ्यभावे यलोपाभावः ॥ छ. ॥ २. ४. ८८. ॥

**न्या० स०—व्यञ्जना० ।** **तद्धितस्ये**त्यत्र तद्धितसम्बन्धिनो यकारस्येति वैयधिकरण्ये षष्ठी, यकारस्य किंविशिष्टस्य ? **तद्धितस्य** तद्धितरूपस्येति तु सामानाधिकरण्ये सामिधेनीत्यादौ न स्यात् । औचितीति- "उचच् समवाये" उच्यति- समवैति प्रकृतैः स्वभावैः "कुशी-पिशि०" [ उणा० २१२. ] इति किदितः । [**वार्केणी**] वृकाः शस्त्रजीविनस्तेषां संहतिः । **सामिधेनी**ति- समिधामाधानी । **वैश्यी**ति- विशति अध्ययनार्थं यज्ञशालायामिति "शिक्या-ऽऽस्या-ऽऽढ्य०" [ उणा० ३६४. ] इति साधुः, येषां मते विशोऽपत्यमिति "विशो जातौ" [ ] इति सूत्रेण ट्यण्प्रत्यये वैश्यशब्दः साध्यते तन्मते यलोपः प्राप्नोत्येव । पतनं- पतः, ततोऽन्यद्- अपतः, तत्र साधु- **अपत्यम्**, एवं- विदन्त्यनयेति विद्या, तामधीते स्त्री अणन्तत्वाद् ङ्यां कृद्यकारत्वाल्लोपाभावे- वैद्यी, अस्यैव सुप्रसिद्धत्वात् पूर्वं बुद्धावुपारोहात् तत्प्रदर्शनं न्याय्यं, न तु वैदस्य स्त्री- वैदीति न्यासकारः ॥ २. ४. ८८. ॥

## सूर्या-ऽगस्त्ययोरीये च । २ । ४ । ८९ ॥

**त० प्र०—**अनयोर्यकारस्य ङीप्रत्यये ईयप्रत्यये च लुग् भवति । सूर्यस्य भार्या मानुषी- सूरी । सूर्यस्येयमित्यणि- सौरी प्रभा । अगस्त्यस्येयम्- आगस्ती, सौर्यस्यायं- सौरीयः, एवमागस्तीयः । ईये चेति किम् ? सूर्यो देवताऽस्य- सौर्यः, अगस्त्यस्यायम्- आगस्त्यः ॥ ८९ ॥

**श० न्या०—सूर्या० ।** **सूरी**ति- धवयोगे ङीः । **सौरी**ति- "तस्येदम्०" [ ६. ३. १६०. ] इत्यणन्तत्वाद् ङीः, एकदेशविकृतस्यानन्यत्वात् सौर्यपि सूर्यग्रहणेन गृह्यते । अगपूर्वात् सौत्रात् स्तम्भेः "अग-पुलाभ्यां स्तम्भेर्डित्" [ उणा० ३६३. ]

इति ङिति यकारे- अगस्त्यः, अगं स्त्यायतीति वा तस्याय-मित्यणि- आगस्त्यः, पूर्ववद् ङ्याम्- **आगस्ती । सौरीय** इति- " दोरीयः " [ ६. ३. ३२. ] इतीयः । **सौर्य** इति- " प्राग्जितात्० " [ ६. १. १३. ] इत्यण् । **आगस्त्य** इति- " तस्येदम् " [ ६. ३. १६०. ] इत्यण् । ' ईये ' इत्युक्ते ङ्यामिति निवर्त्तेतेति **च**शब्दः ॥ छ. ॥ २. ४. ८९. ॥

**न्या० स०—सूर्या०** । सौरीयागस्तीयशब्दयोः प्रथमं देवतार्थेऽण्, इदमर्थे पश्चादीयः ॥ २. ४. ८९. ॥

## तिष्य-पुष्ययोर्भाणि । २ । ४ । ९० ॥

**त० प्र०—भस्य- नक्षत्रस्य संबन्ध्यण्- भाण्, यो भात् इत्युल्लेखेन विधीयते, तिष्य-पुष्ययोर्यकारस्य भाणि परतो लुग् भवति । तिष्येण चन्द्रयुक्तेन युक्ता- तैषी रात्रिः, तैषमहः; पौषी रात्रिः; पौषमहः; तिष्येण गुरूदयवता युक्तः संवत्सरः- तैषः संवत्सरः, एवं- पौषः; तिष्ये भवः- तैषः शिशुः, एवं- पौषः । तिष्य-पुष्ययोरिति किम् ? सिध्येन चन्द्रयुक्तेन युक्तं- सैध्यमहः । भाणीति किम् ? तिष्यो देवताऽस्य- तैष्यश्चरुः, पुष्यस्य माणवकस्येदं- पौष्यम् । अन्ये तु तिष्य-पुष्ययोर्नक्षत्रे वर्तमानयोः सामान्येऽणि नित्यं सिध्यशब्दस्य तु विकल्पेन यलोपमिच्छन्ति, तन्मते तिष्यो देवताऽस्य- तैष्य इत्यत्रापि प्राप्नोति । तथा सिध्येन युक्तं- सैधमहः, सैध्यमहः, सैधी रात्रिः, सैध्यी रात्रिरित्यपि ॥ ९० ॥**

**श० न्या०—तिष्य०** । **भाणी**त्यस्यार्थकथनद्वारेण विग्रहं दर्शयति- **भस्ये**त्यादि । " कृप्य-भिद्योध्य० " [ ५. १. ३९. ] इति निपातनात् तिष्य-पुष्यशब्दौ क्यबन्तौ । **तैषी रात्रिः, तैषमह** इति- " चन्द्रयुक्तात् काले० " [ ६. २. ६. ] इत्यण्, ततः " अवर्णेवर्णस्य " [ ७. ४. ६८. ] इत्यकारलोपे यलोपः । **तैषः संवत्सर** इति- " उदितगुरोः० " [ ६. २. ५. ] इत्यण् । **सैध्यमह** इति- "कृप्य-भिद्योध्य०" [ ५. १. ३९. ] इति निपातनात् सिध्यशब्दः, ततः " चन्द्रयुक्तात् काले० " [ ६. २. ६. ] इत्यण् । **तैष्यश्चरु**रिति- " देवता " [ ६. २. १०१. ] इत्यण् । **पौष्यमि**ति- " तस्येदम् " [ ६. ३. १६०. ] इत्यण् । **अन्ये त्वि**ति- यदाचार्यरत्नमतिः- नक्षत्र इति तिष्य-पुष्ययोर्विशेषणमिति । तेषामनिष्टमुद्भावयति- **तन्मते** इत्यादिना ॥ छ. ॥ २. ४. ९०. ॥

**न्या० स०—तिष्य-पुष्य०** । तैषः शिशुः, अत्र भवार्थे " भर्तु-संध्या० " [ ६. ३. ८९. ] इति अण्, जातार्थे तु " बहुला-ऽनुराधा० " [ ६. ३. १०७. ] इति लुप् स्यात् । **अन्ये त्वि**ति- यदाचार्यरत्नमतिः- नक्षत्र इति तिष्यपुष्ययोर्विशेषणं, ' तन्मते ' इत्यादिना तेषामनिष्टमुद्भावयति ॥ २. ४. ९०. ॥

## आपत्यस्य क्य-च्व्योः । २ । ४ । ९१ ॥

**त० प्र०—व्यञ्जनात् परस्यापत्यस्य यकारस्य क्ये च्वौ च परतो लुग् भवति । गार्ग्यमिच्छति- गार्गीयति, एवं- वात्सीयति; गार्ग्य इवाचरति- गार्गायते, एवं- वात्सायते; अगार्ग्यो गार्ग्यो भूतः- गार्गीभूतः, एवं- वात्सीभूतः । आपत्यस्येति किम् ? संकाशेन निर्वृत्तं- सांकाश्यं, तदिच्छति- सांकाश्यीयति; सांकाश्यायते, सांकाश्यीभूतः । व्यञ्जनादित्येव- कारिकेयीयति, कारिकेयायते, कारिकेयीभूतः ॥ ९१ ॥**

**श० न्या०—आप०** । पतनं- पत्, ततोऽन्यत्- अपत्, तत्र साधु- अपत्यम्, तत्र भवः- आपत्यः, तस्य, स्थानसम्बन्धे षष्ठी । **क्य** इति क्यनादिरपास्तनकाराद्यनुबन्धो निर्दिश्यते । गिरतेः " गम्यमि० " [ उणा० ९२. ] इति गे- गर्गः, वदेः " मा-वा-वद्यमि० " [ उणा० ५६४. ] इति से- वत्सः, " गर्गादेर्यञ् " [ ६. १. ४२. ] इति यञि- गार्ग्यः, वात्स्यः, क्यन्यापत्ययकारलोपे " क्यनि " [ ४. ३. ११२. ] इतीत्वे- **गार्गीयति, वात्सीयति**; क्यङि च "दीर्घश्च्वियङ्० " [ ४. ३. १०८. ] इति दीर्घत्वे- **गार्गायते** इत्यादि । भवतेरकर्मकलक्षणे क्ते- **भूतः, अगार्ग्यो गार्ग्य** इत्यादिविग्रहे " कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्याम्० " [ ७. २. १२६. ] इति च्वौ यलोपे " ईश्चाववर्णस्य " [ ४. ३. १११. ] इतीत्वे- **गार्गीभूतः । संकाशेने**त्यादि- सुपन्थ्यादित्वाच्चातुर्थिको ञ्यः, अस्यानापत्यत्वादापत्यस्येति वचनात् क्यनादौ लुग् न भवति । करोतीति स्त्री कारिका, तस्या अपत्यं " ङ्याप्त्यूङः " [ ६. १. ७०. ] इत्येयणि क्यनादौ च व्यञ्जनादिति वचनाल्लुगभावात् **कारिकेयीय**तीत्यादि ॥ छ. ॥ २. ४. ९१. ॥

**न्या० स०—आपत्यस्य०** । अपत्ये भव आपत्यः, तस्य स्थानसम्बन्धे षष्ठी । **गार्गीयतीति**- * येन नाव्यवधानम्० * इति न्यायादीकाराऽकारादिना व्यवहितस्यापि यस्य लुक् । **गार्गायते** इति- यदा गार्ग्य इवाचरति " कर्तुः क्विप्० " [ ३. ४. २५. ] इति क्विपि तल्लुपि तेप्रत्यये " क्यः शिति " [ ३. ४. ७०. ] इति क्य आनीयते तदाऽनेन यलोपो न भवति, च्विसाहचर्यात्, यतश्च्व्यर्नाम्न एव परतो विहितो गृह्यते, अयं तु नामधातोरिति । **सांकाश्यीभूत** इति-असाङ्काश्यः साङ्काश्यो देशो भूतः॥ २. ४. ९१.॥

## तद्धितय-स्वरेऽनाति । २ । ४ । ९२ ॥

**त० प्र०—व्यञ्जनात् परस्यापत्ययकारस्य यकारादा-**

वाकारादिवर्जिते स्वरादौ च तद्धिते लुग् भवति । गार्ग्ये साधुः– गार्ग्यः, गर्गाणां समूहो– गार्गकम्, एवं– वात्सकम्; गार्ग्यस्यायं– गार्गीयः, एवं– वात्सीयः । आपत्यस्येत्येव– संकाशेन निर्वृत्तं– सांकाश्यम्, तत्र भवः– सांकाश्यक; एवं– काम्पील्यकः । तद्धितेति किम् ? गार्ग्येण, वात्स्येन । य-स्वर इति किम् ? गार्ग्यरूप्यः । अनातीति किम् ? गार्ग्यायणः । क्यअनादित्येव– कारिकेयिः, हारिकेयिः ॥ ९२ ॥

**श० न्या०—तद्धि०।** न आत्– अनात्, तस्मिन् **अनाति,** अनाकारादावित्यर्थः । **गार्ग्य** इति " तत्र साधौ " [ ७ १. १५ ] इति यः । **गार्गकमि**ति– " गोत्रोक्ष० " [ ६. २. १२. ] इत्यकञि " न प्राग्जितीये स्वरे " [ ६. १. १३५. ] इति यञो लुपि प्रतिषिद्धेऽनेन लोपः । " दोरीयः " [ ६. ३. ३२. ] इति ये– **गार्गीयः** । संकाश्यत इति संकाशः, कम्पनं– कम्पः, सोऽस्तीति कम्पी, तमिलतीति मूलविभुजादित्वात् के समानदीर्घत्वे– कम्पीलः, सुपन्थ्यादित्वात् ञ्ये ततः " प्रस्थपुरवहान्तयोपान्त्य० " [ ६. ३. ४३. ] इत्यकञि चातुरर्थिकप्रत्ययावयवत्वादनापत्यत्वाल्लोपाभावे– **सांकाश्यकः, काम्पिल्यक** इति । **गार्ग्येण, वात्स्येन** " टा-ङसोः० " [ १. ४. ५. ] इति टाया इनादेशः । भूतपूर्वो गार्ग्यस्येति विगृह्य " षष्ठ्या रूप्यप्० " [ ७. २. ८०. ] इति रूप्यपि– **गार्ग्यरूप्यः** । गार्ग्यस्यापत्यं " यञिञः " [ ६. १. ५४. ] इत्यायनणि ' अनाति ' इति वचनाल्लोपाभावे– **गार्ग्यायणः** । कारकेयस्यापत्यम् " अत इञ् " [ ६. १. ३१. ] इतीञि– **कारकेयिः,** एवं– **हारिकेयिः** ॥ छ. ॥ २. ४. ९२. ॥

**न्या० स०—तद्धितय०।** गार्गकमिति– गर्गस्यापत्यानि यञ्, तस्य च " न प्राग्जितीये० " [ ६. १. १३५. ] इत्यनेन निषेधाद् " यञञोऽश्यापर्णान्त० " [ ६. १. १२६. ] इति न लुप्, ततो गर्गाणां समूहो गार्गकं " गोत्रोक्ष० " [ ६. २. १२. ] अकञ् । **गार्गीय** इति– गार्ग्यस्यायं शिष्यश्चेत्, अन्यथा " गोत्राददण्ड० " [ ६. ३. १६९. ] इत्यकञ् स्यात् । **काम्पील्येति**– कम्पनं कम्पः, कम्पोऽस्यास्तीति– कम्पी, कम्पिनमिलति " मूलविभुजादयः " [ ७. १. १४४. ] कः, समानदीर्घत्वम् । **गार्ग्यरूप्य** इत्यत्र भूतपूर्वो गार्गस्येति विगृह्य " षष्ठ्या रूप्यप्चरट् " [ ७. २. ८०. ] इति रूप्यपि; अथवा गार्ग्यादागतः " नृ-हेतुभ्यः " [ ६. ३. १५६. ] इति रूप्यः ॥ २. ४. ९२. ॥

## बिल्वकीयादेरीयस्य । २ । ४ । ९३ ॥

**त० प्र०—नडादिषु** बिल्वादयः पठ्यन्ते, तेषां कीयप्रत्ययान्तानामिह निर्देशः, बिल्वकीयादीनां दशानां शब्दानामवयवस्येयस्य तद्धितयस्वरे परे लुग् भवति; अनाति इति नानुवर्तते; आतोऽसंभवात् । बिल्वाः सन्त्यस्यामिति– बिल्वकीया नाम नदी, तस्यां भवा– बैल्वकाः; एवं– वैणुकाः, वैत्रकाः, वैतसकाः, त्रैकाः, ताक्षकाः, ऐक्षुकाः, काष्ठकाः; कापोतकाः; कौञ्चकाः । बिल्वकीयादेरिति किम् ? नाडकीयः, प्लाक्षकीयः । तद्धितयस्वर इत्येव– बिल्वकीयाः, बिल्वकीयरूप्यम् ॥ ९३ ॥

**श० न्या०—बिल्व०।** ननु बिल्वकीयादयो द्विधा– केचिन्नडादेः कीये सति, अपरे कुत्सिताद्यर्थकप्रत्ययान्तादीये सति, तत् केषामिह ग्रहणम् ? उच्यते– आदिशब्दस्य व्यवस्थावाचित्वादपरेषामनिष्टत्वान्नडादिपाठव्यवस्थितानामेवैषां ग्रहणमित्याह– **नडादिष्वि**त्यादि । बिल्वा बिल्वानि वा वेणवो वेत्राणि वेतसास्त्रयस्तक्षाण इक्षवः काष्ठानि कपोताः कुञ्चाः सन्त्यस्यामिति विगृह्य " नडादेः कीयः " [ ६. २. ९२. ] इति कीये कृते " आत् " [ २. ४. १८. ] इत्यापि ततो भवार्थेऽणि, काष्ठकीया इत्यत्र तु " कोपान्त्याच० " [ ६. ३. ५६. ] इत्यणि, ईयस्य लुकि– **बैल्वका** इत्यादि । नडादेः कीयेऽणि च बिल्वकीयादित्वाभावाल्लोपाभावे– **नाडकीय** इत्यादि । बिल्वकीयस्य भूतपूर्वमिति **बिल्वकीयरूप्यम्** ॥ छ. ॥ २. ४. ९३. ॥

**न्या० स०—बिल्वकीया०।** ननु बिल्वकीयादयो द्विधा– केचिन्नडादेः कीये सति, अपरे कुत्सिताद्यर्थकप्रत्ययन्तादीये सति, तत् केषामिह ग्रहणमित्याशङ्क्य आदिशब्दस्य व्यवस्थावाचित्वादित्याह– नडादिष्वित्यादि । बिल्वो वेणवो वेत्राणि वेतसास्त्रयस्तक्षाण इक्षवः काष्ठानि कपोताः कुञ्चाः सन्त्यस्यामिति विग्रहे " नडादेः कीयः " [ ६. २. ९२. ] " आत् " [ २. ४. १८. ] इत्याप्, ततो भवार्थेऽण् । **काष्ठकीया इत्यत्र तु** काष्ठकीयशब्दः कच्छादौ द्रष्टव्यः, ततः कच्छादिपाठाद् " कोपान्त्याच्चाण् " [ ६. ३. ५६. ] अन्यथा " दोरीयः " [ ६. ३. ३२. ] स्यात् । **कौञ्चका** इति– कुञ्चाशब्दस्य कीये नडादिपाठाद् ह्रस्वः, कुञ्चकीयायां भवाः । नन्वत्र ईयग्रहणं किमर्थम् ? बिल्वकीयादेरित्येव क्रियताम्, एवमपि कृते बैल्वका इत्यादीन्यणि " अवर्णेवर्णस्य " [ ७ ४. ६८. ] इति ईयाकारलोपे ततो " बिल्वकीयादेः " इत्यनेनाधिकारायातस्य यकारमात्रस्य लोपे पुनः " अवर्णेवर्णस्य "[ ७. ४. ६८. ] इति ईकारलोपे सेत्स्यन्ति; न च वाच्यं बिल्वकीयादेरित्यनेन यकारलोपे कर्तव्ये " स्वरस्य० " [ ७. ४. ११०. ] इति परिभाषयाऽकारलोपस्य स्थानित्वम्, " न संधि० " [ ७. ४. १११. ] इति यविधौ स्थानित्वनिषेधेऽपि ईकारलोपे स्थानित्वमस्त्येवेति ईयग्रहणम् ।

ननु तर्हि "बिल्वकीयादेर्यस्य" इति क्रियताम्, एवं कृते यकाराधिकारे पुनर्यद् ग्रहणं करोति तदेवं ज्ञापयति– अत्र सस्वरस्यैव यस्य लुक्, सस्वरलोपे च स्वरव्यञ्जनसमुदायत्वात् "स्वरस्य०" [७. ४. ११०.] इति स्थानित्वाभावे सर्वं भविष्यति, सत्यम्– एवं कृते एषाप्याशङ्का स्यात्– अनेन यकारलोपे ईकारस्य लुग् न भवतीति, यदीकारलोपोऽपि सम्मतः स्यात् तदा ईयस्येति कुर्यादिति ॥ २. ४. ९३. ॥

## न राजन्य-मनुष्ययोरके । २ । ४ । ९४ ॥

**त० प्र०—राजन्य-मनुष्यशब्दयोर्यकारस्याकप्रत्यये परतो लुग् न भवति । राजन्यानां समूहो– राजन्यकम्, एवं– मानुष्यकम् । "तद्धितयस्वरेऽनाति" [२. ४. ९२.] इति यलोपे प्राप्ते प्रतिषेधोऽयम् ॥ ९४ ॥**

**श० न्या०**—न रा० । **राजन्यकमि**ति– राज्ञोऽपत्यानि "जातौ राज्ञः" [६. १. ९२.] इति ये ततो "गोत्रोक्ष०" [६. २. १२.] इत्यकञि– **राजन्यकम्** । **मानुष्यकमि**ति– "मनोर्याणौ०" [६. १. ९४.] इति ये षागमः, ततः पूर्ववदकञ् । प्रतिषेधस्य प्राप्तिपूर्वकत्वादत्र प्राप्तिं दर्शयति– **"तद्धितयस्वरे०" [२. ४. ९२.]** इत्यादिना ॥ छ. ॥ २. ४. ९४. ॥

**न्या० स०—न राजन्य० । राजन्यकमि**ति– राज्ञोऽपत्यमिति "जातौ राज्ञः" [६. १. ९२.] इति ये "अनोऽट्ये ये" [७. ४. ५१.] इति निषेधादनो लुगभावे राजन्यानां समूहः "गोत्रोक्ष०" [६. २. १२.] इति अकञ् ॥ २. ४. ९४. ॥

## ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः । २ । ४ । ९५ ॥

**त० प्र०—ङ्यादेः प्रत्ययस्य गौणस्याक्विबन्तस्य तद्धितलुकि सति लुग् भवति, गोणी-सूचीसंबन्धिनस्तु न भवति । सप्त कुमार्यो देवतास्य– सप्तकुमारः, पञ्चभिर्धीवरीभिः क्रीतः– पञ्चधीवा, पञ्चेन्द्राण्यो देवतास्य– पञ्चेन्द्रः, एवं– पञ्चाग्निः; एषु ङीनिवृत्तौ तत्संनियोगशिष्टयोरागमा-ऽऽदेशयोरपि निवृत्तिः । द्विस्त्रः, पञ्चभिर्युवतिभिः क्रीतः– पञ्चयुवा, एवं– पञ्चखट्वः, पञ्चसखः, द्विपङ्गुः, त्रिकरभोरुः; कुवल्या विकारः फलं– कुवलम्, एवं– बदरम्, आमलकम् । ङ्यादेरिति किम्? पञ्चभिः प्रेयोभिः क्रीतः– पञ्चप्रेयान् । गौणस्येति किम्? अवन्तेरपत्यं स्त्री– अवन्ती, एवं कुन्ती, कुरूः; अत्र हि तद्धितलुकि कृते जातौ ङ्यूङौ इत्यगौणत्वम् । अक्विप इति किम्? कुमारीमिच्छति क्यन्, कुमारीयतीति क्विप्, तस्य लोपे– कुमारी, ततः पञ्च कुमार्यो देवता अस्य– पञ्चकुमारी; एवं– पञ्चेन्द्राणी, पञ्चयुवती । तद्धितलुकीति किम्? औपगवीत्वम् । कथं हरीतक्याः फलं विकारोऽवयवो वा हरीतकी?, एवं कोशातकीत्यादि?; अत्र लुबन्तस्य स्त्रीत्वात् पुनर्गौरादिलक्षणो ङीः । अगोणी-सूच्योरिति किम्? पञ्चभिर्गोणीभिः क्रीतः– पञ्चगोणिः, दशगोणिः, पञ्चसूचिः, दशसूचिः ॥ ९५ ॥**

**श० न्या०**—ङ्यादे० । अभावात्मकेन तद्धितलुका ङ्याद्यन्तस्य पौर्वापर्यानुपपत्तेस्तद्धितलुकीति सत्सप्तमी व्याख्या, न परसप्तमीत्याह– **तद्धितलुकि सती**ति– लुगिति लुप [एव] उपलक्षणं, तेनागोमती गोमतीभूता– गोमतीभूतेत्यत्र च्वेरभावेऽपि लुप्त्वाभावाद् ङीनिवृत्तेरभावात् (वः) । **सप्तकुमार** इति– "संख्या समाहारे०" [३. १. ९८.] इति द्विगुसमासः, ततो देवतार्थस्याणः "द्विगोरनपत्ये०" [६. १. २४.] इति लुकि ङीप्रत्ययस्यापि लोपः । "मूल्यैः क्रीते" [६. ४. १५०.] इतीकणि "अनाम्न्यद्विः प्लुप्" [६. ४. १४१.] इति लुपि– **पञ्चधीवा** । अथ **पञ्चेन्द्रः, पञ्चाग्नि**रित्यत्र पूर्ववत् समासादौ कृते ङीप्रत्ययनिवृत्तौ "वरुणेन्द्र०" [२. ४. ६२.] इत्यादिविहितयोरागमादेशयोः कथं निवृत्तिरित्याह– **एष्वि**त्यादि । द्वाभ्यां स्त्रीभ्यां क्रीत इति "मूल्यैः क्रीते" [६. ४. १५०.] इतीकणः "अनाम्नि०" [६. ४. १४१.] इति लुपि स्त्रीप्रत्ययनिवृत्तौ **द्विस्त्रः**, एवं– **पञ्चयुवे**त्याद्यपि । **कुवलमि**ति– कुवली-बदरीशब्दाद् गौरादिङ्यन्ताद्धेमाद् यवः, आमलकीशब्दाच्च "दोः०" [६. २. ४९.] इति मयटः "फले" [६. २. ५८.] इति लुप्, ततो ङीनिवृत्तिः– **कुवलम्, बदरम्, आमलकम्** । प्रियशब्दस्य प्रकृष्टार्थस्य "गुणाङ्गाद् वा०" [७. ३. ९.] इति ईयसौ "प्रिय-स्थिर-स्फिर०" [७. ४. ३८.] इति प्रादेशे पञ्चभिः प्रेयोभिरित्यादि विगृह्य पूर्ववदिकणो लुपि ङ्यादेरभावात् प्रत्ययानिवृत्तौ– **पञ्चप्रेयान्**िति । अथ '**अवन्ती कुन्ती कुरूः**' इत्यत्र ङ्यादेर्लुक् कस्मान्न भवति? अस्ति ह्यत्र "दुनादि-कुरु०" [६. १. ११८.] इति ञ्यस्य तद्धितस्य "कुन्त्यवन्तेः०" [६. १. १२१.] इति "कुरोर्वा" [६. १. १२२.] इति च लुप्, "नुर्जातेः" [२. ४. ७२.] इति "उतोऽप्राणिनश्च०" [२. ४. ७३.] इति ङ्यूङावपीति, उच्यते– गौणस्येति वचनादनयोर्गौणत्वाभावात्, यथा चागौणत्वं तद् दर्शयति– **अत्र ही**त्यादि । **औपगवीत्वमि**ति– अत्र न तद्धितस्य लुगिति ङीनिवृत्तिर्न भवति । **कथमि**ति– हरीतक्याः फलमित्यादि विगृह्य

" प्राण्यौषधि० " [ ६. २. ३१. ] इत्यणि तस्य " फले " [ ६. २. ५८. ] इति लुप्, इत्यस्ति तद्धितलुक्, ङीनिवृत्तिः कस्मान्न भवतीति प्रश्नार्थः । समाधत्ते– **अत्रे**त्यादि– अत्र लुगन्तेन योऽर्थ उच्यते सोऽपि स्वभावात् स्त्रीति ङीनिवृत्तावपि पुनर्ङीः, एवं– विदारी मूलम्, आमलकी फलमित्यादि, तथा विशाखाभिश्चन्द्रयुक्ताभिर्युक्तः काल इति " चन्द्रयुक्तात्० " [ ६. २. ६. ] इत्यणो लुपि ङ्यादिनिवृत्तौ पुनरापि विशाखा काल इति, फलमित्युक्तप्रक्रियया लुक् प्रदर्श्यत इति । **अगोणी-सूच्योरि**ति प्रतिषेधात् पूर्ववदिकणो लुप्यपि गौरादिङीप्रत्ययस्य निवृत्त्यभावे " गोश्चान्ते० " [ २. ४. ९६. ] इति ह्रस्वत्वे– **पञ्चगोणिरि**त्यादि ॥ छ. ॥ २. ४. ९५. ॥

**न्या० स०**—ङ्यादेर्गौण० । लुगिति लुप एव उपलक्षणं, तेनाऽगोमती गोमती भूता– गोमतीभूतेत्यत्र च्वेरभावेऽपि लुबभावाद् ङीनिवृत्तेरभावः । **पुनर्गौरादिलक्षणो ङीरि**ति, एवं– विदारी मूलम्, आमली फलमित्यादि । तथा विशाखाभिश्चन्द्रयुक्ताभिर्युक्तः कालः " चन्द्रयुक्तात्० " [ ६. २. ६. ] इत्यणो लुपि ङ्यादिनिवृत्तौ पुनरापि विशाखा काल इति । **[द्विस्त्रः]** द्वे स्त्रियौ देवते अस्य, अण्, " द्विगोरन० " [ ६. १. २४. ] लुक् । **पञ्चसख** इति– यदा सखिशब्दाद् ङ्यां पञ्चभिः सखीभिः क्रीत इति वाक्ये कृते इकणो लोपेऽनेन ङीनिवृत्तौ(त्तिः) तदा " राजन्-सखेः० " [ ७. ३. १०६. ] इति समासान्तः; यदा तु सखशब्दात् " नारी सखी० " [ २. ४. ७६. ] इति ङीस्तदा ङीनिवृत्तौ सिद्धमेव । कुवल-बदराभ्यां गौरादिङ्यन्ताभ्यां हेमायन् " प्राण्यौषधि० " [ ६. २. ३१. ] इत्यण् यथासंख्येन, आमलकात् "दोरप्राणिनः" [ ६. २. ४९. ] इति मयट् " फले " [ ६. २. ५८. ] लुप् । **तद्धितलुकि कृते** इत्यत्र पञ्चभिर्धीवरीभिः क्रीता इतीकणि लुकि " ङ्यादेः " [ २. ४. ९५. ] इति ङ्यभावे पुनर्ङ्यां प्रिया पञ्च धीवर्यो यस्येत्यपि कृते " ङ्यादेः० " [ २. ४. ९५. ] इति ङ्यभावः– प्रियपञ्चधीवा ॥ २. ४. ९५. ॥

## गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ । २ । ४ । ९६ ॥

**त० प्र०**—गौणस्याक्विपो गोशब्दस्य ङ्याद्यन्तस्य च नाम्नोऽन्ते वर्तमानस्य ह्रस्वो भवति, न चेदसावंशिसमासान्त ईयस्वन्तबहुव्रीह्यन्तो वा भवति । चित्रा गावोऽस्य– चित्रगुः, शबलगुः, पञ्चभिर्गोभिः क्रीतः– पञ्चगुः, शतगुः, कौशाम्ब्या निर्गतो– निष्कौशाम्बिः, एवं– निर्वाराणसिः, निःश्रेयसिः; खट्वामतिक्रान्तोऽतिखट्वः, प्रिया खट्वा यस्य स प्रियखट्वः, अतिब्रह्मबन्धुः, अतिवामोरुः । गौणस्येत्येव– सुगौः, किंगौः, राजकुमारी, परमब्रह्मबन्धूः; नक्षत्रमाला । अक्विप इत्येव– गामिच्छति क्यन्, गव्यतीति क्विप्– गौः, ततः प्रिया गौः अस्य प्रियगौः; कुमारीमिच्छति क्यन्, क्विप्– कुमारी, ततः प्रियश्चासौ कुमारी च– प्रियकुमारी चैत्रः । गोश्चेति किम् ? अतितन्त्रीः, अतिलक्ष्मीः, अतिश्रीः, अतिभ्रूः । अन्त इति किम् ? गोकुलम्, कुमारीप्रियः, कन्यापुरम्; अत्र गोशब्दो ङ्याद्यन्तं च समासार्थे न्यग्भूतत्वाद् गौणम् । सुगोप्रियः, राजकुमारीप्रियः; एवं– पञ्चशालाप्रिय इत्यादौ तु यद्यपि गोशब्दान्तं ङ्याद्यन्तं च नामान्यपदार्थे गुणीभूतं तथापि न तदपेक्षयाऽन्त्यत्वम्, यदपेक्षया चान्त्यत्वं न तदपेक्षया गौणत्वमिति न भवति । ननु च ङ्यादीनां प्रत्ययत्वात् " प्रत्ययः प्रकृत्यादेः " [ ७. ४. ११५. ] इति यस्मात् स विधिस्तदादेर्ग्रहणम्, इतीह न प्राप्नोति– अतिराजकुमारिः, अतिरत्नमाल इति, सत्यम्– "गौणो ङ्यादिः" [ ७. ४. ११६. ] इति मुख्ये स्त्रीप्रत्ययेऽयं न्यायो नोपतिष्ठते, राजकुमारी-रत्नमालाशब्दयोश्च स्त्रीप्रत्ययान्तयोर्मुख्यत्वमेव, तेन– ङ्यादिप्रत्ययान्तमात्रं विधानानपेक्षमिह गृह्यते । इह कस्मान्न भवति ?– बहुकुमारीकः, बहुब्रह्मबन्धूक इति; परत्वात् प्रथममेव कपि कृतेऽन्त्यत्वाभावात् । अनंशिसमासेयोबहुव्रीहाविति किम् ? अर्धं पिप्पल्याः– अर्धपिप्पली, एवं– तुर्यभिक्षा, बह्व्यः श्रेयस्यो यस्य स– बहुश्रेयसी पुरुषः, एवं– प्रियश्रेयसी ॥ ९६ ॥

**श० न्या०**—गोश्च० । ईयांश्चासौ बहुव्रीहिश्च– ईयोबहुव्रीहिः, ईयस्वन्तो बहुव्रीहिरित्यर्थः, अंशिना समासः– अंशिसमासः " पूर्वापर० " [ ३. १. ५२. ] इत्यादिविहितः, ततो द्वन्द्वान्नञ्समासः । गौणस्येति वर्तते, तच्च गोरित्यस्य चकारानुकृष्टङ्याद्यन्तस्य च समानाधिकरणं विशेषणमित्याह– **गौणस्ये**त्यादि । **चित्रा गावो यस्ये**ति– अत्र बहुव्रीहेरन्यपदार्थप्रधानत्वाद् गौणगोशब्दान्तः समास इत्यर्थः । एवं– **शबलगुः । पञ्चगुरि**ति– अत्रापि क्रीत इति तद्धितार्थस्य प्राधान्याद् गोशब्दार्थस्य गौणत्वम् । " प्रात्यवपरि० " [ ३. १. ४७. ] इति प्रादिसमासे प्राद्यर्थस्य प्राधान्याद् ङ्याद्यन्तस्य गौणत्वमिति दर्शयति– **कौशाम्ब्या निर्गत** इत्यादि– एवमन्यदपि । **गौणस्येत्येवे**ति– शोभनो गौः, कुत्सितो गौः, राज्ञः कुमारीत्यादौ तत्पुरुषस्योत्तरपदार्थप्राधान्याद् गवाद्यर्थस्य गौणत्वाभावाद्ध्रस्वत्वाभाव इति । **गोश्चेति किमि**ति– तेन कृत्स्त्रिया धातुस्त्रियाश्च न भवतीत्यर्थः । ङ्यादेः स्वार्थिकप्रत्ययत्वाल्लिङ्गस्य च द्रव्यधर्मत्वात् तस्य च नामविशेषणत्वाद् गुणस्य च सजात्यनतिक्रमेण प्रवर्त्तनात् तद्विशेषणत्वे चान्त-

लाभादन्तग्रहणमतिरिच्यते; न चैवं खट्वापादो मालापाद इत्यत्रापि प्रसङ्गः, यतो नाम स्त्रीप्रत्ययश्चोभयमत्राश्रीयते, तत्र यद्युभयोः स्थाननिष्पत्त्या नाम्नोऽन्तवत् तदा स्त्रीप्रत्ययः परो नास्तीति, अथ प्रत्ययस्यादिवत् तदा तदरिक्तनामाभावात् तदन्तो न भवति, युगपदेकादेशस्योभयाश्रयणे च *उभयोः स्थान० * इति न्यायानवतरः, अन्यतरव्यपदेशस्यैवेष्टः; तर्हि गोसमासनिवृत्त्यर्थमन्तग्रहणं, गोनिवृत्त्यर्थं तावद्- गोकुलमिति व्यपदेशिवद्भावेनान्तत्वात्, समासनिवृत्त्यर्थं च- कुमारीप्रिय इति, तदुदाहरति- **गोकुलमि**त्यादि। गोऽर्थेन तावन्नार्थो * व्यपदेशिवद्भावो नाम्ना न * इति न्यायात्, समासार्थेनापि नार्थः, गौणग्रहणेन गो-ङ्यादी विशिष्येते, ताभ्यां च सामर्थ्याक्षिप्तेन नाम्ना तदन्तविधिः, * ग्रहणवता न तदन्तविधिः * इत्येतच्च प्रत्ययविषयत्वान्नोपतिष्ठत इति नास्त्यत्र प्राप्तिः, 'सुगोप्रियः, राजकुमारीप्रियः, सेनानीकुमारीपुत्रः' इत्यादि प्रत्युदाहर्तव्यमिति चेत् ? नैवमित्याह- **सुगोप्रिय** इत्यादि- प्रधानं गौणमिति च सम्बन्धिशब्दावेतौ, तत्र सम्बन्धादेतद् गन्तव्यम्- यं प्रति यदप्रधानं तस्य चेत् सोऽन्तो भवति, अत्र ह्यन्यन्नाम प्रति गोन्तत्वम्, अन्यत् प्रति गोशब्दस्य गौणत्वमिति, एवमन्यत्रापि। एवं तर्हि बहुव्रीहौ न प्राप्नोति, तत्र ह्यन्यपदार्थं प्रति गौणत्वं, तं प्रति तु नास्त्यन्तत्वम्- प्रियखट्वः, पञ्च कुमार्यः प्रिया अस्य पञ्चकुमारीप्रिय इति। एवं तर्हि सर्वान्त्यप्रतिपत्त्यर्थं ग्रहणम्। अथ स्त्रीप्रत्ययग्रहणे प्रत्ययग्रहणपरिभाषोपस्थानाद् राज्ञः कुमारीमतिक्रान्तोऽतिराजकुमारिरित्यादावधिकस्य न प्राप्नोति, न ह्यत्र राजकुमारशब्दादेर्ङ्यादिरित्याक्षिपति- **ननु** चेत्यादिना। समाधत्ते- **सत्यमि**त्यादिना। अयमर्थः- राज[त्व]विशिष्टा हि कुमारी राजकुमरीशब्देन प्रतिपाद्यत इति स्त्रीप्रत्ययस्य प्राधान्यात् तदन्तस्य प्राधान्यमिति। अथवा क्वचिदप्रधानेऽपि, तदा नियमो न भवति "दीर्घङ्याब्व्यञ्जनात्०" [ १. ४. ४५. ] इति दीर्घग्रहणात्, अन्यथा निष्कौशाम्बिरतिखट्व इत्यादौ गौणत्वादङ्यन्तत्वात् सेर्लोपो न भविष्यति, किं दीर्घग्रहणेन ?। **इह कस्मादि**ति- बहुकुमारीक इत्यत्रान्तरङ्गत्वाद् ह्रस्वः प्राप्नोति, न च "न कचि" [ २. ४. १०५.] इति प्रतिषेध उपतिष्ठते, अस्य व्यवहितत्वात् * अनन्तरस्य विधिः प्रतिषेधो वा * इति न्यायात्, यदि तु सर्वस्याः प्राप्तेरयं निषेधः स्यात् तदिहापि प्रसज्येत- प्रियं ग्रामणि ब्राह्मणकुलमस्य प्रियग्रामणिक इति; उच्यते- कचि कृतेऽनन्त्यत्वान्न भविष्यति ह्रस्वत्वं, तत्र समासान्त इति वचनात् कचेव समासान्त इति ङ्यादिप्रत्ययान्तं समुदायस्यान्तं न भवति। नन्वन्तरङ्गत्वादित्युक्तम्, सत्यमुक्तं, किं त्विदमिह संप्रधार्य- कच् क्रियताम्, ह्रस्वत्वं वेति, तत्र परत्वात् कच्, सावकाशश्च कच् बहुयवागूक इत्यत्र, तस्मिंश्च कृतेऽन्त्यत्वाभाव इत्याह- पञ्चभ्यः शष्कुलीभ्य आगतं- पञ्चशष्कुलिरूप्यम्, पञ्चशष्कुलिमयमित्यत्र तूत्तरपदानवयवत्वात् समासनाम्नोऽन्ते वर्त्तमानत्वात् पूर्वं ह्रस्वत्वे सति रूप-मयटौ। न च गौणस्त्रीप्रत्ययान्तनाममात्रापेक्षत्वाद् ह्रस्वोऽन्तरङ्गः, कच् तु समासविशेषं बहुव्रीहिं नित्यादिदुत्तरपदमपेक्षत इति बहिरङ्ग इति वक्तुमुचितम्, अन्तरङ्गतरत्वात् कचः, तथाहि- "समासान्तः" [ ७. ३. ६९ ] इत्यत्र तादर्थ्यात् ताच्छब्द्यं भवति, येषां पदानां तावत् समासो, न तावत् तेषामन्यद् भवति, कचं तावत् प्रतीक्षत इत्यवयवापेक्षत्वात् कचः समुदायापेक्षो ह्रस्वो बहिरङ्ग इति पूर्वमेवासौ भवतीति। "समेंऽशे०" [ ३. १. ५४. ] इति "द्वि-त्रि-चतुष्पूरण०" [ ३. १. ५६. ] इति च समासे- **अर्धपिप्पली**त्यादि। प्रकृष्टार्थस्य प्रशस्यस्य ईयसौ "प्रशस्यस्य श्रः" [ ७. ४. ३४. ] इति श्रादेशे "अधातूदृदितः" [ २. ४. २. ] इति ङ्यां बहुशब्देन बहुव्रीहौ "ईयसोः" [ ७. ३. १७७. ] इति कच्प्रतिषेधे- **बहुश्रेयसी**ति। ननु द्वन्द्वसमासे कुक्कुटमयूर्यावित्यत्र ह्रस्वः प्राप्नोति, समुदायार्थेऽवयवार्थस्य गुणभावात्, उच्यते- अवयवार्थावेव परस्परसंहितौ द्वन्द्वार्थः, न च तत्र समुदायो नाम कश्चिदस्ति, सकलपदार्थप्रधानत्वाद् द्वन्द्वस्य गौणत्वाभावाद्ध्रस्वत्वाभावः, यदाहुः शेषः- द्वन्द्वोऽयमुभयपदार्थः, तत्र कदाचित् पूर्वपदस्य यल्लिङ्गं तत् समासस्य स्यात् कदाचिदुत्तरपदस्य, इष्यते च- उत्तरपदस्यैव यल्लिङ्गं तत् समासस्य स्यादिति, तच्च नान्तरेण यत्नं सिध्यतीति। ननु यदि व्यतिरिक्तः समुदायो नास्तीत्युच्यते तदा "परलिङ्गो द्वन्द्वः" [ लिङ्गानुशासने० परलि० १ ] इति न घटते, द्वयाभावात्, तथाहि- यदाऽपेक्षितपरस्परौ विरुद्धलिङ्गौ अवयवार्थावेव समुदायार्थस्तदा पर्यायेण लिङ्गद्वय प्रसक्तौ नियमार्थमिदं संपद्यते, परस्य सम्बन्धि लिङ्गं द्वन्द्वस्य क्रियते, स च नास्तीत्ययं निर्देशो नोपपद्यते, नैष दोषः- केवलाकेवलावस्थाभेदाश्रयेण भेदमाश्रित्यैवं निर्देशः कृतः, व्यतिरिक्तसमुदायदर्शने तु मुख्य एव व्यपदेशः। इह हि त्रीणि दर्शनानि, अवयवा एवापेक्षितपरस्परा द्वन्द्वार्थो न तु तद्व्यतिरिक्तः समुदायोऽस्ति, तत्र दर्शने नियमार्थमिदम्। अवयवार्थव्यतिरिक्तो वा समुदायो द्वन्द्वार्थः, स चावयवसिद्धेनैव लिङ्गेन लिङ्गवानित्यत्रापि दर्शने पर्यायेण लिङ्गप्राप्तौ वचनमिदं नियमार्थं संपद्यते। यदा तु समुदायो द्वन्द्वार्थः, स चालिङ्ग इति तदा विध्यर्थमिदं भवति। ननु व्यतिरिक्तसमुदायाङ्गीकरणे समुदायार्थेऽवयवार्थस्य गुणभावाद् गौणत्वात् कुक्कुट-

मयूर्याविल्यत्र ह्रस्वत्वप्रसङ्गस्तदवस्थ एव, उच्यते– व्यतिरिक्तद्वन्द्वार्थाभ्युपगमेऽप्यवयवानां कार्यसम्बन्धात् फलतः प्राधान्यमेव। यदि वा "परलिङ्गो द्वन्द्वः" [लिङ्गानु०] इति शब्दशब्दार्थावतिदिश्येते, तत्रौपदेशिकस्य ह्रस्वत्वमतिदेशिकस्य श्रवणं भविष्यति, तस्य चागौणत्वात् तदन्तस्य चान्ते वर्तनाद्ध्रस्वत्वाभावः, तत्र हि लिङ्गशब्देन लिङ्गाभिधायी प्रत्ययोऽर्थश्च तन्त्रेणैवोच्यते इत्यर्थलाभात्। इह तर्हि दन्ता(त्ता) च कारीषगन्ध्या च– दन्ता(त्ता)कारीषगन्ध्ये, दन्ता(त्ता) च गार्ग्यायणी च– दन्ता(त्ता)गार्ग्यायण्यौ, दन्ता(त्ता) च युवतिश्च– दन्ता(त्ता)युवत्यौ, द्वौ ष्यौ, द्वौ डायन्यौ द्वौ तिशब्दौ प्राप्नुतः ह्रस्वत्वेनैकस्य निवृत्तिर्भविष्यति, हसति– स्वरूपाच्च्यवतेऽभावरूपतामापद्यत इति ह्रस्व इत्यन्वर्थसंज्ञाविज्ञानाद् द्वन्द्वे एकस्याभावो भविष्यतीति। सर्वत्र च लौकिकप्रयोगः प्रामाण्येनाश्रीयत इत्यनवस्था न भवति। यद्येवं "क्लीबे" [२. ४. ९७.] इत्यत्रास्यानुवृत्तेः परस्याभावः प्राप्नोति, उच्यते– इह केषाञ्चिन्मतेन स एव शब्द उत्तरत्रानुवर्तते, केषाञ्चित् पूर्वोपात्तसदृशशब्दान्तरानुमानम्, तत्रोत्तरसूत्रे तत्सदृशसंज्ञाशब्दग्रहणमिति सर्वं समञ्जसमिति। **बहुश्रेयसी**ति– "दीर्घङ्याब्व्यञ्जनात् सेः" [१. ४. ४५.] इति लोपे विवदमानाः केचिदाहुः– ङ्यादेर्लोपेन न भाव्यम्, ङ्यापोः स्त्रीप्रत्यययोर्ग्रहणात् स्त्रीप्रत्यये चागौणे तदादिनियमाभावादत्रोपसर्जनत्वाद् ङीप्रत्ययस्य तदादिनियमाद् ङ्यादिलोपस्य प्रसङ्गाभावात्। अन्ये त्वाहुः– तत्र दीर्घग्रहणं ह्रस्वनिवृत्त्यर्थं कृतम्, निष्कौशाम्बिरतिखट्व इत्यादौ लोपो मा भूत्-यदि च गौणे सर्वत्र तदादिनियमः स्यात् तदा ह्रस्वाल्लोपस्य प्रसङ्गाभावात् तद्व्यावृत्तये दीर्घग्रहणं न कुर्यात्, कृतं तु यथेष्टमुपसर्जनादपि दीर्घाल्लोपं ज्ञापयतीति बहुश्रेयसीति सिद्धमिष्टम् ॥ छ. ॥ २. ४. ९६. ॥

**न्या० स०—गोश्चान्ते०**। अंशिसमासवर्जनात् समासस्यान्त एव ह्रस्वः। **नन्वर्द्धपिप्पली**ति 'अनंशिसमासेयोबहुव्रीहौ' इति न्यासवृत्तौ किमिति दर्शितं? यतो ह्रस्वत्वेऽपि कृतेऽपि "परलिङ्गो द्वन्द्वोंऽशी०" [लिङ्गानुशासने] इति वचनाद् पिप्पलीलिङ्गे "इतोऽक्त्यर्थात्" [२. ४. ३२.] इति ङ्यां रूपं तथैव, सत्यम्– "इतोक्त्यर्थात्" [२. ४. ३२.] इति वैकल्पिको ङीः, ततोऽर्द्धपिप्पलिः, अर्धपिप्पलीति रूपद्वयं स्यात्, इष्यते चार्द्धपिप्पलीत्येव। ननु तर्हि– **तुर्यभिक्षे**ति किमर्थं दर्शितम्? यतोऽत्रापि "परलिङ्गो द्वन्द्वोंऽशी०" इति वचनाद् भिक्षेत्युत्तरपदस्य स्त्रीत्वे ह्रस्वत्वे कृतेऽपि पुनरापि सति 'तुर्यभिक्षा' इत्येव भवति, सत्यम्– तुर्यभिक्षेति सिध्यत्येव, परं तु तुर्यभिक्षामतिक्रान्तो यः सोऽतितुर्यभिक्ष इति ह्रस्वत्वं स्यात्, यतस्तुर्यभिक्षेति उत्तरपदलिङ्गत्वे पुनरापि तुर्यभिक्षेत्याबन्तः, "प्रत्ययः प्रकृत्यादेः" [७. ४. ११५.] इति न्यायात्, वर्जने च सति भिक्षैवाबन्तः, ततः पूर्वपदार्थप्रधानत्वादंशिसमासस्य "गौणो ङ्यादिः" [२. ४. ९५.] इति न्यायोपढौकनात् "गोश्चान्ते०" [२. ४. ९६.] इति ह्रस्वाभावादतितुर्यभिक्षा इति भवति, एतदेव साधु ॥ २. ४. ९६. ॥

## क्लीबे। २। ४। ९७॥

**त० प्र०—क्लीबे–नपुंसके वर्तमानस्य स्वरान्तस्य नाम्नो ह्रस्वो भवति। कीलालपं, ग्रामणि, नतभ्रु, अतिहि, अतिरि, अतिद्यु, अतिनु कुलम्, अधिस्त्रि, उपवधु। काण्डे, कुड्ये, युगवरत्राय युगवरत्रेन्द्र इत्यादावेत्व-दीर्घत्वादेर्निमित्तान्तरापेक्षत्वेन बहिरङ्गस्यासिद्धत्वाद् ह्रस्वत्वं न भवति। काण्डीभूतं, शुक्लीभूतमित्यादावव्ययानामलिङ्गत्वाच्च ॥ ९७ ॥**

**श० न्या०—क्लीबे**। क्लीबतेरचि के वा– क्लीबशब्दः। ननु 'काण्डे, कुण्डे [कुड्ये], रमते ब्राह्मणकुलम्' इत्यादिविभक्तिनिवृत्त्यर्थं नामग्रहणं कर्तव्यम्, अन्यथा विभक्त्यन्तस्यापि ह्रस्वप्रसङ्गः; न च नपुंसकलिङ्गं द्रव्यस्यैव सम्भवति, द्रव्यवाचित्वं च नाम्न एव, न स्याद्यन्तस्य शक्तिप्रधानत्वाद्, नापि त्याद्यन्तस्य क्रियाप्रधानत्वादिति वक्तुमुचितं; द्वयोरपि शक्ति-शक्तिमतोरभिधानादस्ति नपुंसकार्थवृत्तित्वं विभक्त्यन्तस्यापि, तत्र 'काष्ठे (काण्डे)' इत्यन्तवद्भावेन 'रमते' इत्यत्र तु [यथैव] 'साधनाश्रयद्रव्य' (साधनाश्रयां) संख्यामाख्यातमुपादत्ते तथा तल्लिङ्गमपीति; न कर्तव्यं लिङ्गायोगात्, तथाहि– विभक्त्यन्तं किञ्चिच्छक्तिप्रधानं– 'काण्डे कुण्डे' (कुड्ये) इति, किञ्चित् क्रियाप्रधानम्– रमते ब्राह्मणकुलमिति, न चात्र लिङ्गयोगोऽस्ति, असत्त्वरूपत्वाद् विभक्त्यर्थस्य लिङ्गप्रतिपादनासामर्थ्यात्, आख्यतस्य शक्त्याश्रयद्रव्यसंख्याप्रतिपादने सामर्थ्यं, न तु लिङ्गप्रतिपादनेऽपि चित्रत्वाद् भावशक्तीनाम्। 'काण्डे' इत्यत्रापि संख्यायाः प्राधान्यान्नपुंसकत्वायोगः। यदि त्ववयवधर्मेण समुदायो व्यपदिश्यते ततः क्रियमाणेऽपि नामग्रहणे इह प्रसज्येत–['काण्डे'] द्वे ह्यत्र नामसंज्ञे– अवयवस्यापि समुदायस्यापि, गृह्यते ह्युभयोः स्थानिष्पन्नत्वेन नामविभक्त्योरेकादेशो नामग्रहणेनेति। अथ सूत्रे विशेषस्यानुपादानात् कथं विभक्त्यन्तस्य निवृत्तिरिति चेत्? उच्यते– "क्लीबे" इति सप्तमीनिर्देशाद् 'यद् तद्' इत्याक्षेपात् क्लीबे यत् तस्येति विशेषलाभः। यन्नपुंसके साक्षाद् वर्तते तस्यैव यदा नपुंसक-

स्वलक्षणो गुणस्तदा ह्रस्वो भवति, यस्य त्ववयवद्वारकस्तस्य मा भूत्, अथवा तस्यैवानुपजातव्यतिरेक(स्य ह्रस्वः,) विभक्त्यन्तं चोपजातव्यतिरेकमिति ह्रस्वाभावः। यदि तु तथा नपुंसकमभिमतं स्यात् तदा "नपुंसकस्य शिः" [ १. ४. ५५. ] इतिवत् षष्ठ्या निर्दिशेत्। यद्वा कुण्डे युगवरत्रायेत्यत्रैदेशदीर्घत्वादीनां निमित्तान्तरसापेक्षत्वेन बहिरङ्गत्वादसिद्धत्वान्न भवतीत्याह- **काण्डे** इत्यादि। ननु तथाप्यवयवप्रतिषेधो वक्तव्यः- दोषा ब्राह्मणकुलम्, दिवा ब्राह्मणकुलमिति, दोषासहचरितत्वाद् ब्राह्मणकुलमेव दोषाशब्देनोच्यत इत्यस्ति प्राप्तिः, नैवम्- नह्यत्र दोषा-दिवाशब्दौ नपुंसके वर्तते, किं तर्हि? अधिकरणं नपुंसकस्य, यतो दोषाशब्दो रात्रावित्यस्यार्थे वर्तते, दिवाशब्दोऽप्यहनीत्यत्रेति ब्राह्मणकुलसाधनानां क्रियाणामधिकरणं कालो भवन् ब्राह्मणकुलस्याप्यधिकरणं भवति- दोषा दृश्यते चरत्यधीते वेत्याधेयव्यवधानेनाधिकरणस्य क्रियाधारणाद्ध्रस्वत्वाप्रसङ्गः। यद्येवं काण्डीभूतमित्यादौ प्रकृतिविकारभेदविवक्षायां च्विप्रत्ययः, द्वयोरप्यत्र तयोर्नपुंसकत्वाद् ह्रस्वः प्राप्नोति; न च कृतेऽपि ह्रस्वे "दीर्घश्च्वियङ्यक्क्येषु च" [ ४. ३. १०८. ] इति दीर्घो भविष्यतीति वाच्यम्, ह्रस्वस्य बहिरङ्गत्वाद् दैर्घ्ये कर्तव्येऽसिद्धत्वादित्याशङ्कायामाह- **काण्डीभूतमि**त्यादि- यथा चाव्ययानामलिङ्गत्वं तथा प्रागुक्तमिति ॥ छ. ॥ २. ४. ९७. ॥

**न्या० स०—क्लीबे।** **अधिस्त्री**ति- आधारार्थप्रधानत्वात् प्रथमा, सामान्यविशेषभावेन सप्तमी वा, विश्रान्तन्यासकारैस्तु यत्र तत्रापि सप्तमीष्टा। **काण्डे, कुड्ये,** इति-नन्वत्र "पदं वाक्यमव्ययं च०" [ लिङ्गानु० ] इति वचनादलिङ्गत्वे ह्रस्वत्वप्राप्तिरेव नास्ति, तत् कथमुक्तम्- **असिद्धत्वादि**ति, सत्यम्- पदस्यालिङ्गत्वेऽपि काण्डकुड्ययोरवयवयोर्यल्लिङ्गं तद् यदा समुदाये 'काण्डे कुड्ये' इत्येवंरूपे उपचर्यते तदा प्राप्तिः, यद्वा 'काण्डे कुड्ये' इत्यत्र योऽस्य स्थाने परेण इकारेण सह एकारः स कश्चिद् नपुंसकाकारसम्बन्धी कश्चित् पदसम्बन्धी कथ्यते, उभयोः स्थाने निष्पन्नत्वात्। युगेति- युज्यते इति "वर्षादयः क्लीबे [ ५. ३. २९. ] अल् गुणाभावो गत्वं च निपात्यते ॥ २. ४. ९७. ॥

## वेदूतोऽनव्ययय्वृदीच्ङीयुवः पदे ।२।४।९८॥

**त० प्र०—ईकारोकारयोरुत्तरपदे परतो ह्रस्वो वा भवति, न चेत् तावव्ययौ य्वृत्-ईच्रूपौ ङीरूपौ इयुवृस्थानौ च भवतः। लक्ष्मिपुत्रः, लक्ष्मीपुत्रः; ग्रामणिपुत्रः, ग्रामणीपुत्रः; ब्रह्मबन्धुपुत्रः, ब्रह्मबन्धूपुत्रः; खलपुपुत्रः, खलपूपुत्रः। ईदूत इति किम्? खट्वापादः, गोकुलम्। अव्ययादिवर्जनं किम्? अव्यय- काण्डीभूतम्, वृषलीभूतम्, ऊरीकृत्य, उररीकृत्य; य्वृत्- इन्द्रहूपुत्रः, शकहूपुत्रः; ईच्- कारीषगन्धीपुत्रः, कौमुदगन्धीपतिः; ङी-गार्गीपुत्रः, वात्सीपुत्रः; इयुवृ- श्रीकुलम्, भ्रूकुलम्, यवक्रीकुलम्, कटप्रूकुलम्। उत्तरपद इति किम्? अग्नी पश्य, पटू पश्य ॥ ९८ ॥**

**श० न्या०—वेदू०।** अव्ययादौ द्वन्द्वे कृते पश्चान्नञ्समासः। अव्ययादिवर्जिताभ्यामीदूद्भ्यां समासमन्तरेण विभक्त्या व्यवधानात् परस्य पदस्यासम्भवात् पद इति वचनादुत्तरपदं गम्यते, "ते लुग् वा" [ ३. २. १०८. ] इति संज्ञायां पूर्वपदलोपाद् वेत्याह- **उत्तरपद** इति। इयुवितीयुवो ह्रस्वत्वायोगादियुवृस्थानौ गृह्येते इत्याह- **इयुवृस्थानौ चे**ति। लक्ष्म्याः पुत्र इत्यादिविग्रहे पक्षेऽनेन ह्रस्वत्वे- **लक्ष्मिपुत्र** इत्यादि। **खट्वापादः, गोकुलम्,** खट्वायाः पादो गवां कुलमिति समासः, **ईदूत** इति वचनादिह न भवति। **काण्डीभूतम्, वृषलीभूतमि**ति- "कृभ्वस्तिभ्यां कर्म-कर्तृभ्याम्०" [ ७. २. १२६. ] इति च्विः, "ईश्चावर्णस्य०" [ ४. ३. १११. ] इतीत्वम्। ऊरी-उररीशब्दौ व्युत्पादितौ "ऊर्याद्यनुकरण०" [ ३. १. २. ] इति गतिसंज्ञायां "गति-क्वन्यः०" [ ३. १. ४२. ] इति समासे "अनञः०" [ ३. २. १५४. ] इति कृगः परस्य क्त्वो यबादेशे- **ऊरीकृत्ये**त्यादि। इन्द्रं ह्वयते, शकं ह्वयते इति क्विपि "यजादि-वचेः०" [ ४. १. ७९. ] इति य्वृति "दीर्घमवोऽन्त्यम्" [ ४. १. १०३. ] इति दीर्घत्वे पुत्रशब्देन षष्ठीसमासे- **इन्द्रहूपुत्रः, शकहूपुत्र** इति। **कारीषगन्धीपुत्रः, कौमुदगन्धीपति**रिति- कारीषगन्ध्यायाः पुत्र इत्यादिविग्रहे "ष्या पुत्र-पत्योः०" [ २. ४. ८३. ] इतीच्। गर्गस्य वत्सस्य वाऽपत्यं वृद्धं स्त्री गर्गादियञो "यञो डायन् च०" [ २. ४. ६७. ] इति ङ्यां "व्यञ्जनात्०" [ २. ४. ८८. ] इति लुकि षष्ठीसमासे- **गार्गीपुत्र** इत्यादि। श्रयति- भजते भाग्ययुक्तानितिशीलेति "दिद्युद्-ददृद्०" [ ५. २. ३८. ] इति क्विपि- श्रीः, तस्याः कुलं- **श्रीकुलम्**। [ **भ्रूकुलम्** ] भ्रमति भ्रम्यति भ्राम्यति इति भ्रूः, तयोः कुलमिति विग्रहः। यवक्रियः कुलमित्यादि तत्पुरुषे- **यवक्रीकुलमि**त्यादि। **अग्नी पश्य, पटू पश्ये**ति- औकारस्य "इदुतः०" [ १. ४ २१. ] इति औता सहेदूतौ। नन्वत्रोत्तरपदमात्रे ह्रस्वो वक्तव्यः, अथ यदेव सर्वान्त्यं पदं तदेव लोकविज्ञानादुत्तरपदं, तस्मिन्नुच्यमानो ह्रस्वोऽलाबुकर्कन्धुदृम्भुफलमित्यत्र न स्यात्; न वक्तव्यः, अलाबूश्च कर्कन्धूश्चालाबु-कर्कन्ध्वौ, ते च दृन्भूश्चालाबुकर्कन्धुदृन्भ्वः,

तासां फलमिति विग्रहेऽलाबुकर्कन्धुदृन्भुफलमिति भवति । न चैवमल्पस्वरत्वाद् दृन्भ्वाः पूर्वनिपातः प्राप्नोति, राजदन्तादिष्वस्य पाठात्, स च त्रिपदेऽपि द्वन्द्वे कर्त्तव्य एव । अथ दृन्भ्वाः फलं- दृन्भुफलम्, कर्कन्धूश्च दृन्भुफलं च कर्कन्धुदृन्भुफलम्, अलाबूश्च कर्कन्धुदृन्भुफलं च- अलाबुकर्कन्धुदृन्भुफलमिति । एवमप्यलाबुकर्कन्ध्वाः फलेनान्ततः सम्बन्ध इति चेत्? नैष दोषः- समुदायशब्दस्यावयवे वर्त्तनात् सम्बन्धाच्च फलमिति गम्यत इति ॥ छ. ॥ २. ४. ९८. ॥

**न्या० स०**—वेदूतोऽन०। **इन्द्रहूपुत्र** इति- इन्द्रं ह्वयति “असरूपोपवादे०” [५. १. १६.] इत्यणपवादे क्विपि “यजादिवचेः०” [४. १. ७९.] इति य्वृति “दीर्घमवोऽन्त्यम्” [४. १. १०३.] इन्द्रहूः पुत्रः। **शकहूपुत्र** इति- शकस्यापत्यानि “पुरुमगध०” [६. १. ११६.] इत्यण् “शकादिभ्यो०” [६. १. १२०.] लुप् शकान् ह्वयति, शेषं पूर्ववत्। **वृषलीभूतमिति**- अवृषलं वृषलं भूतं, मतान्तरेणेदं वाक्यम्, अन्यथा अत्रिलिङ्गत्वान्न प्राप्नोति, “अत्रिलिङ्गाऽन्या” इति च जातिलक्षणे लिखितत्वादस्यात्रिलिङ्गत्वम् ॥ २. ४. ९८. ॥

## ङ्यापो बहुलं नाम्नि । २ । ४ । ९९ ॥

**त० प्र०**—ङ्यन्तस्य आबन्तस्य च नाम्न उत्तरपदे परतो नाम्नि- संज्ञायां विषये ह्रस्वो भवति बहुलम्। **भरणिगुप्तः, रोहिणिमित्रः, महित्रातः, महिदत्तः, महिगुप्तः, शिलवहम्, शिलप्रस्थम्; क्वचिद् विकल्पः- रेवतिमित्रः, रेवतीमित्रः; पृथिविदत्तः, पृथिवीदत्तः; पृथिविगुप्तः, पृथिवीगुप्तः; गङ्गमहः, गङ्गामहः; गङ्गदेवी, गङ्गादेवी; शिंशपस्थलम्, शिंशपास्थलम्। क्वचिन्न भवति- फल्गुनीमित्रः, नान्दीमुखम्, नान्दीतूर्यम्, नान्दीकरः, नान्दीघोषः, महीफलम्, महीकरः, महीविशालः, लोमकागृहम्, लोमकाखण्डः, लेपिकागृहम्, लेपिकाखण्डः, गङ्गाद्वारम्। ङ्याप इति किम्? श्रीपुरम्, विष्टापुरम्। उत्तरपद इत्येव- भरण्याः, रोहिण्याः। नाम्नीति किम्? नदीस्रोतः, खट्वापादः ॥ ९९ ॥**

**श० न्या०**—ङ्यापो०। ङीप्रत्ययसाहचर्यादापः प्रत्ययस्य ग्रहणम्, न तु क्विबन्तस्याप्नोतेरिति। **भरणिगुप्त** इति- बिभर्त्तेरनट्, टित्वाद् ङीः, “श्येतैतत०” [२. ४. ३६.] इति भरतस्य वा भरणी, भरणीभिर्गुप्त इति “कारकं कृता” [३. १. ६८.] इति समासः। **रोहिणिमित्र** इति- “रेवतरोहिणाद्०” [२. ४. २६.] इति ङीः, रोहिणी मित्रमस्येति विग्रहः, एवं- **महित्रात** इत्यादि- महीति गौरादिपाठाद् ङीः। वहतीति वहम्, शिलाया वहं- **शिलवहम्**, अत्रापो ह्रस्वः, एवं- **शिलप्रस्थम्**। बहुलवचनात् क्वचिद्विकल्पः क्वचिदप्रवृत्तिरिति **क्वचिदि**त्यादिना दर्शयति। “रेवतरोहिणाद् भे” [२. ४. २६.] इति [ङ्यां] रेवती, रेवती मित्रमस्येति विग्रहे पक्षे ह्रस्वत्वे- **रेवतिमित्र** इत्यादि। **पृथिविदत्त** इत्यादिषु तृतीयासमासः। **गङ्गमह** इत्यादिषु षष्ठीसमासः। फाल्गुन्यो मित्रमस्य **फाल्गुनीमित्रः**। नान्दिरित्यव्युत्पन्न इकारान्तः, यद्वा नन्देः “पदि-पठि-पचि०” [उणा० ६०७.] इति इकारे बाहुलकाद् दीर्घत्वे “इतोऽक्त्यर्थात्” [२. ४. ३२.] इति ङ्यां मुख-तूर्याभ्यां षष्ठीसमासे- **नान्दीमुखम्, नान्दीतूर्यम्**। नान्दीं करोतीति- “संख्या-ऽहर्दिवा०” [५. १. १०२.] इति- **नान्दीकरः**। **नान्दीघोष** इत्यादयस्त्रयः षष्ठीसमासाः। मह्यां विशालो- **महीविशालः**। **लोमकागृह**मित्यादिः षष्ठीसमासः ॥ छ.. ॥ २. ४. ९९. ॥

**न्या० स०**—ङ्यापो०। ङीसाहचर्यादापः प्रत्ययस्य ग्रहणं, न तु क्विबन्तस्याप्नोतेरित्याह- **आबन्तस्य चेति**। नन्देः “पदि-पठि०” [उणा० ६०७.] इति इः, बाहुलकाद् दीर्घे- नान्दी, तस्या मुखम्। **विष्टापुरमिति**- विशं तायते क्विपि “य्वोः प्वय्व्यञ्जने” [४. ४. १२१] लुप्, पृषोदरादित्वात् डत्वाभावे- विष्टा, विष्टः पूः, “ऋक्पूः०” [७. ३. ७६.] अत् समासान्तः। **रोहिणी**ति- “रेवत-रोहिणाद् भे” [२. ४. २६.] ङीः, गवि वाच्यायां तु “जातेरयान्त०” [२. ४. ५४.] इति वा ङीः। लोमभिः कायतीति लोमका। **भरिण्या** इति- यद्यनेन ह्रस्वः स्याद् तदा ‘भरिण्याः, भरिणेः’ इति रूपं स्याद्, इदानीं तु ‘भरिण्याः’ इत्येकमेवेष्टम् ॥ २. ४. ९९. ॥

## त्वे । २ । ४ । १०० ॥

**त० प्र०**—ङ्याबन्तस्य त्वे प्रत्यये [परे] बहुलं ह्रस्वो भवति। रोहिण्या भावः- **रोहिणित्वम्, रोहिणीत्वम्; अजत्वम्, अजात्वं वा ॥ १०० ॥**

**श० न्या०**—त्वे०। **रोहिणित्वमिति**- “भावे त्व-तल्” [७. १. ५५.] इति त्वः। अथ “ङ्यापो बहुलं त्वनाम्नि” इत्येकयोग एव कथं न क्रियते? तत्रैवं विज्ञास्यते- त्वप्रत्यये नाम्नि च ह्रस्वो भवतीति, नैवम्- तत्र ह्युत्तरपदे इत्यस्ति, ततश्च त्वप्रत्यये नाम्नि चोत्तरपदे ह्रस्वो भवतीति विज्ञानाद् रोहिणित्वफलमजत्वफलमित्यत्र स्यात्, इह न स्यात्- रोहिणित्वमजत्वमिति पृथगुच्यते। “त्वे” इति ह्रस्वत्वं छन्दोविषयमित्येके, यजयादित्यः- संज्ञायामसम्भवाच्छन्दस्येवोदा-

हरणानि, तदजाया अजत्वमजात्वं वा, तद्रोहिण्या रोहिणित्वं रोहिणीत्वं वा ॥ छ. ॥ २. ४. १००. ॥

**न्या० स०—त्वे** । अथ "ङ्यापो बहुलं त्वे नाम्नि" इत्येकयोग एव कथं न क्रियते, तत्रैवं विज्ञास्यते– त्वप्रत्यये नाम्नि च ह्रस्वो भवतीति; नैवम्– तत्र ह्युत्तरपद इत्यस्ति, ततश्च त्वप्रत्यये नाम्नि चोत्तरपदे ह्रस्वो भवतीति विज्ञानाद् रोहिणित्वफलमजत्वफलमित्यत्र स्याद्, इह न स्याद्– रोहिणित्वमिति पृथगुच्यते ॥ २. ४. १००.॥

## भ्रुवोऽच्च कुंस-कुट्योः । २ । ४ । १०१ ॥

**त० प्र०—**भ्रूशब्दस्य कुंस-कुट्योरुत्तरपदयोः परयोर्ह्रस्वोऽकारश्च भवति । भ्रुकुंसः, भ्रकुंसः, भ्रुकुटिः, भ्रकुटिः, भ्रूकुंस-भ्रूकुटिशब्दावपीच्छन्त्यन्ये ॥ १०१ ॥

**श० न्या०—भ्रुवो०** । " त्रसु पिसु कुसुण् भासार्थाः" कुंसयतीति– कुंसः, कुटतेः " नाम्युपान्त०" [ उणा० ६०६. ] इति किदिकारे– कुटिः, भ्रुवोः कुंसः, भ्रुवोः कुटिरिति विग्रहे ह्रस्वत्वेऽकारे च– **भ्रुकुंसः** इत्यादि । **अन्य** इति– अमरः, स हि दीर्घान्तमपीच्छति, यदाह– "भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः।" इति, तथा " भ्रकुटिः भ्रुकुटिः भ्रूकुटिः स्त्रियः।" इति ॥ छ. ॥ २. ४. १०१. ॥

**न्या० स०—भ्रुवोऽच्च०** । भ्रुवौ कुंसयति " कर्मणोऽण्" [ ५. १. ७२. ] इति, भ्रुवः कुटिः कौटिल्यं वा । भ्रूकुंस-भ्रूकुटिशब्दावपि नारायणकण्ठी मन्यते ॥ २. ४. १०१.॥

## मालेषीकेष्टकस्यान्तेऽपि भारि-तूल-चिते । २ । ४ । १०२ ॥

**त० प्र०—**माला-इषीका-इष्टकाशब्दानां केवलानामन्ते वर्तमानानां च भारिन्-तूल-चितशब्देषूत्तरपदेषु परेषु ह्रस्वो भवति यथासंख्यम् । मालां बिभर्त्तीत्येवंशीलः– मालभारी, उत्पलमालभारी; मालभारिणी, उत्पलमालभारिणी; इषीकतूलम्, मुञ्जेषीकतूलम्; इष्टकचितम्, पक्केष्टकचितम् । इदमेवान्तःग्रहणं ज्ञापकम् ※ ग्रहणवता नाम्ना न तदन्तविधिः ※ इति, तेन–दिग्धपादोपहतः सौत्रनाडिरित्यादौ पदादेशा-ऽऽयमणप्रत्ययादयो न भवन्ति ॥ १०२ ॥

**श० न्या०—माले०** । " मांक् माने" इत्यतः " शा-मा-श्या-शाकि०" [ उणा० ४६२. ] इति ले– **माला,** " इषत् इच्छायां" " ऋच्यृजि०" [ उणा० ४८. ] इति ईके, " इष्यशि०" [ उणा० ७७. ] इति च तकक्ि– **इषीका, इष्टका,** ततः समाहारद्वन्द्वे... उत्पलानि, तेषां माला, तां बिभर्त्तीति पूर्ववण्णिन्, स्त्रियां तु " स्त्रियां नृतः०" [ २. ४. १. ] इति ङीः । तूलतेर्लिहाद्यचि, नाम्युपान्त्यत्वाद् वा के– तूलम्, इषीकायास्तूलम्– **इषीकतूलमि**ति । मुञ्जेः शब्दार्थादचि– मुञ्जः; तस्येषीका, तस्यास्तूलमिति विग्रहः । चीयते स्म– चितम्, इष्टकाभिश्चितम्– **इष्टकचितं** " कारकं कृता" [ ३. १. ६८. ] इति समासः । पक्काश्च ता इष्टकाश्च ताभिश्चितं– **पक्केष्टकचितम्** । मालादिभिः प्रकृतस्य नाम्नो विशेषणात् तदन्तलाभात् केवलस्य व्यपदेशिवद्भावाद्ध्रस्वसिद्धौ किमर्थमन्तग्रहणमित्याशङ्कायामाह– **इदमेवे**त्यादि ॥ छ. ॥ २. ४. १०२. ॥

**न्या० स०—मालेषी०** । मालादिभिः प्रकृतस्य नाम्नो विशेषणाद् तदन्तलाभाद् केवलस्य व्यपदेशिवद्भावाद् ह्रस्वसिद्धौ किमर्थमन्तग्रहणमित्याशङ्कायामाह– इदमेवेति ॥ २. ४. १०२.॥

## गोण्या मेये । २ । ४ । १०३ ॥

**त० प्र०—गोणीशब्दस्य मानवाचिन उपचारान्मेये वर्त्तमानस्य ह्रस्वो भवति । गोण्या मितो गोणिः । मेय इति किम् ? गोणी ।** ॥ १०३ ॥

**श० न्या०—गोण्या०** । गोणीशब्दस्यावपनवृत्तित्वान्मेयेवृत्त्यभावात् कथं तत्र ह्रस्वत्वमिति ? न च गोणी मानमस्येति मात्रट् विज्ञायते, तदा हि गोणीमात्र इति मात्रडन्तो विज्ञायेत, न गोणीति; न च " मानादसंशये लुप्" [ ७. १. १४२. ] अस्ति, तत्र प्रमाणादित्यनुवर्त्तनात् तस्य चायाममानत्वाद् गोणीशब्दस्य च तदभावादिति, मानादित्यस्य प्रमाणविशेषणत्वान्मानवाच्येव यत् प्रमाणवाचीति विज्ञानादावपनेऽपि वर्त्तमानत्वाद् गोणीशब्दान्न भवतीति कथमस्य मेये वृत्तिरित्याह– **उपचारान्मेये वर्त्तमानस्ये**ति– विनैव तद्धितेन गोणीशब्दो गोणीप्रमितेऽर्थे व्रीह्यादावुपचाराद् वर्तते, यथा– प्रस्थप्रमिते प्रस्थ इति, तस्यायं ह्रस्व इत्यर्थः । सत्यामपि तद्धिते लुचि ' अगोणीसूच्योः ' इति प्रतिषेधेऽपि " गोश्चान्ते०" [ २. ४. ९६. ] इति समासे ह्रस्वस्य विज्ञानादिह नास्तीत्येतदर्थमपीदमारभ्यते एवेति [ **मेय** इति– ] । **गोणी**त्वावपनं न मेयोऽर्थ इत्यर्थः ॥ छ. ॥ २. ४. १०३. ॥

**न्या० स०—गोण्या०** । विनैव तद्धितेन गोणीशब्दो गोणीप्रमितेऽर्थे व्रीह्यादावुपचाराद् वर्तते, यथा प्रस्थप्रमिते प्रस्थ इति, तस्य चायं ह्रस्व इति सूत्रारम्भ इत्यर्थः । सत्यामपि वा तद्धितलुचि ' अगोणीसूच्योः ' इति प्रतिषेधे " गोश्चान्ते०" [ २. ४.

९६.] इति च समासे ह्रस्वस्य विज्ञानादिह नास्तीति तदर्थमिदमारभ्यते ॥ २. ४. १०३. ॥

## ङ्यादीदूतः के । २ । ४ । १०४ ॥

**त० प्र०—**ङीप्रत्ययस्याऽऽकारेकारोकाराणां च के प्रत्यये [परे] ह्रस्वो भवति । कुमारिका, पटूविका, सोमपकः, कीलालपकः, सोमपिका, कीलालपिका, लक्ष्मिका, तन्त्रिका, वधुका, यवागुका, ब्रह्मबन्धुका । ङीग्रहणं पुंवद्भावबाधनार्थम् । काकः पाक इत्यादौ तु ॐप्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव ग्रहणम्ॐ इति न्यायान्न भवति ॥ १०४ ॥

**श० न्या०—**ङ्यादी० । कुमारीशब्दात् "कुमारीक्रीडन०" [७. ३. १६.] इति स्वार्थिके के आप्यनेन ह्रस्वत्वे- **कुमारिका । पटूविके**ति- "स्वरादुतः०" [२. ४. ३५] इति ङीः, कुत्सिताद्यर्थे "प्राग् नित्यात्०" [७. ३. २८.] इति कप् । सोमं पिबतीति विचि कुत्सिताद्यर्थे पूर्ववत् कपि ह्रस्वत्वे- **सोमपकः**, एवं- **कीलालपकः**, स्त्रियां त्वापि "अस्यायत्तत्०" [२. ४. १११.] इति ह्रस्वस्येत्वे- **सोमपिके**त्यादि । सोमपिकेत्यादौ ह्रस्वस्य दारदिकेत्यादौ पिति पुंवद्भावस्य सावकाशत्वात् पट्विकेत्यादौ चोभयप्राप्तौ परत्वात् पुंवद्भावे पट्विकेत्यादि न सिध्यतीत्याह- **ङीग्रहणमि**त्यादि- ङीग्रहणमनवकाशत्वात् पुंवद्भावं बाधत इत्यर्थः । अथ कायतेः पिबतेश्च "भीण्शलिवलि०" [उणा० २१.] इति के- '**काकः, पाकः**' इत्यादौह्रस्वः कस्मान्न भवति ? उच्यते- कित्यकरणादकारस्य कार्यत्वात् तत्सहितस्यैवार्थवतो ग्रहणात् तस्य च प्रत्ययस्यैव सम्भवादुणादीनामव्युत्पन्नत्वान्न भवतीत्याह- **प्रत्ययाप्रत्यययोरि**त्यादि- व्युत्पत्तिपक्षे तु "उणादयो बहुलम्" [५. २. ९३.] इति बहुलवचनादौणादिकस्याग्रहणात् तद्धित एव कार्यं विज्ञायत इति ॥ छ. ॥ २. ४. १०४. ॥

**न्या० स०—**ङ्यादीदू० । **सोमपिके**त्यादौ ह्रस्वस्य दारदिकेत्यादौ च पिति पुंवद्भावस्य सावकाशत्वात् पट्विकेत्यादौ चोभयप्राप्तौ परत्वात् पुंवद्भावे **पट्विके**त्यादि न सिध्यतीत्याह- **ङीग्रहणमि**त्यादि- ङीग्रहणमनवकाशत्वात् पुंवद्भावं बाधत इत्यर्थः । **प्रत्ययाप्रत्यययोरिति न्यायान्न भवती**ति- ककतेरचि पृषोदराद्यात्वं- काकः, पचनं- पाकः, घञि "क्तेऽनिटः०" [४. १. १११.] इति कत्वम् । अथ कायतेः पिबतेश्च "भीण्-शलि-वलि०" [उणा० २१.] इति यदा कस्तदा ह्रस्वः कस्मान्न भवति ? उच्यते- उणादीनामव्युत्पन्नत्वात्, व्युत्पत्तिपक्षे तु बहुलवचनान्न भवति ॥ २. ४. १०४ ॥

## न कचि । २ । ४ । १०५ ॥

**त० प्र०—**ङ्यादीदूतः कचि प्रत्यये परे ह्रस्वो न भवति । बहुकुमारीकः, बहुकीलालपाकः, बहुलक्ष्मीकः, बहुब्रह्मबन्धूकः; खार्या क्रीतं- खारीकम्, एवं- काकणीकम्, "खारी-काकणीभ्यः कच्" [६. ४. १४९.] इति कच् । "न कचि" [२. ४. १०५.] इति प्रतिषेधः पूर्वसूत्रे ॐ निरनुबन्धग्रहणे न सानुबन्धस्य ॐ इति न्यायस्याभावज्ञापनार्थः, तेन- निषादकर्ष्वां जातो- नैषादकर्षुकः, एवं- शाबरजम्बुक इत्यादाविकणि ह्रस्वः सिद्धः ॥ १०५ ॥

**श० न्या०—**न क० । **बहुकुमारीक** इति- बह्व्यो बहवो वा कुमार्यो यस्मिन्निति विग्रहः, अत्र हि कचि कृते "गोश्चान्ते०" [२. ४. ९६.] इति "ङ्यादीदूतः०" [२. ४. १०४.] इति ह्रस्वद्वयप्राप्तावप्यनन्तरत्वाद् "ङ्यादीदूतः०" [२. ४. १०४.] इत्येवानुकृष्यते, न तु "गोश्चान्ते०" [२. ४. ९६.] इति व्यवहितत्वात् । न चास्याप्रतिषेधे बहुलक्ष्मीक इत्यादौ ङ्याद्यन्तत्वाभावाद् "ङ्यादीदूतः०" [२. ४. १०४.] इति केवलस्य ह्रस्वस्य प्राप्तावस्य चरितार्थत्वाद् बहुकुमारीक इत्यत्र "गोश्चान्ते०" [२. ४. ९६.] इत्यादिना ह्रस्वत्वं प्राप्नोतीति वाच्यम्, समासान्त इत्यधिकारात् समासावयवत्वेन कचः कल्पना, समासार्थव्यवस्थिताच्चोत्तरपदादस्य विधीयमानत्वेन समासस्यान्ततया ग्रहीतुं शक्यत्वात्, तत्सहितस्योत्तरपदस्य पूर्वपदेन समासप्रवृत्तेः, कृते तु समासे समासादुत्पद्यमानस्य कचो वचनशतैरपि समासावयवत्वेन वक्तुमशक्यत्वात्, आरम्भकस्यैवावयवत्वादवयवान्तरारब्धस्य च निष्ठां प्राप्तस्यारम्भकान्तरानुपपत्तेः, पूर्वं कचि सति ङ्यादेर्गौणस्यान्तत्वाभावाद् "गोश्चान्ते०" [२. ४. ९६.] इति ह्रस्वाभावः । ननु * निरनुबन्धकग्रहणे न सानुबन्धकस्य * इति न्यायात् क इत्युच्यमानस्य ह्रस्वस्य कचि प्राप्तेरभावात् किमर्थं प्रतिषेध इत्याह- **तेने**त्यादि । निपूर्वात् सहेर्घञि- निषादः, कृषतेः "कृषि-चमि-तनि०" [उणा० ८२९.] इति ऊप्रत्यये- कर्षूः । "शॄ गतौ" इत्यतः "ऋच्छि-चटि-वटि०" [उणा० ३९७.] इत्यरे, शवं रातीति वा डे- शबरः, "जनैचि प्रादुर्भावे" इत्यतः "कमि-जनिभ्यां बूः" [उणा० ८४७.] इति बूप्रत्यये- जम्बूः, तत्रोभयत्र षष्ठीसमासे "उवर्णादिकण्" [६. ३. ३९.] इतीकणि "ऋवर्णोवर्ण०" [७. ४. ७१.] इतीकारलोपे पूर्वेण ह्रस्वत्वे- **नैषादकर्षुकः** इत्यादि ॥ छ. ॥ २. ४. १०५. ॥

**न्या० स०—**न कचि । **बहुलक्ष्मीक** इत्यत्र एकत्वे "पुमनडुन्नौ०" [७. ३. १७३.] बहुत्वे तु 'शेषाद् वा' [७. ३.

१७५. ] कच् । पूर्वसूत्रे क इति निरनुबन्धे कचि प्राप्तिरेव नास्तीत्याह– न कचीति प्रतिषेध इति– नैषादकर्षुकः, शाबरजं० ॥ २. ४. १०५. ॥

## नवाऽऽपः । २ । ४ । १०६ ॥

**त० प्र०—आपः कचि परे ह्रस्वो वा भवति, पूर्वेण प्रतिषेधे प्राप्ते पक्षे ह्रस्वार्थमिदम् । प्रियखट्वकः, प्रियखट्वाकः; बहुमालकः, बहुमालाकः ॥ १०६ ॥**

**श० न्या०—नवा० ।** **पूर्वेणे**त्यादिनाऽस्य पक्षे विध्यर्थतां दर्शयति । प्रिया खट्वा यस्येति बहुव्रीहौ “ शेषाद् वा ” [ ७. ३. १७५. ] इति कचि पक्षेऽनेन ह्रस्वत्वे– **प्रियखट्वक** इत्यादि ॥ छ. ॥ २. ४. १०६. ॥

**न्या० स०—नवापः ।** [ नेह व्याख्यातम् ] ॥ २. १०६. ॥

## इच्चाऽपुंसोऽनित्क्याप्परे । २ । ४ । १०७ ॥

**त० प्र०—आबेव परो यस्माद् न विभक्तिः स आप्परः, अपुंलिङ्गार्थाच्छब्दाद् विहितस्यापः स्थाने इकारो ह्रस्वश्च वा भवतः, अनितोऽनकारानुबन्धस्य प्रत्ययस्यावयवभूते कि– ककारे आप्परे परतः । अल्पा खट्वा– खट्विका, खट्वका, खट्वाका; परमखट्विका, परमखट्वका, परमखट्वाका; प्रिया खट्वा यस्याः सा– प्रियखट्विका, प्रियखट्वका, प्रियखट्वाका । चकारो ह्रस्वानुकर्षणार्थः, तेनोभयविकल्पे त्रैरूप्यं सिद्धम् । अपुंस इति किम् ? सर्विका । न विद्यते खट्वा अस्या इति “ गोश्चान्ते० ” [ २. ४. ९६. ] इत्यादिना ह्रस्वत्वे स्त्री-पुंससाधारणात् पुनरापि– अखट्वा, सैवाल्पा– अखट्विका, तथा खट्वामतिक्रान्ता– अतिखट्वा, सैवाल्पा– अतिखट्विका, अत्रापुंस्काद् विहित आप् न भवतीति त्रैरूप्यं न भवति । “ ङ्यादीदूतः के ” [ २. ४. १०४. ] इत्यनेन तु ह्रस्वे कृते “अस्या०” [ २. ४. १११ ] इत्यादिनेत्वमेव भवति, कश्चित् त्वपुंस्काद् विहित आबस्तीति भवत्येव रूपत्रयम्– न विद्यते खट्वा यस्याः सा– अखट्विका, अखट्वका, अखट्वाका । अनिदिति किम् ? अनुकम्पिता दुर्गादेवीति कप्नि– दुर्गका, “ ङ्यादीदूतः के ” [ २. ४. १०४. ] इत्यनेन ह्रस्व एव भवति । कीति किम् ? खट्वाता, मालाता । आप्पर इति किम् ? प्रियखट्वाकः पुरुषः । आबेव परो यस्मादिति बहुव्रीहिः किम् ? प्रियखट्वाकमतिक्रान्ताऽतिप्रियखट्वाका, अत्र हि प्रथमं द्वितीया परा पश्चादाबिति । आप इत्येव– मातृका ॥ १०७ ॥**

**श० न्या०—इच्चा० ।** न पुमान् अपुमान्, तस्माद् **अपुंस** इति तत्पुरुषः, तत्र यद्यपि पुमानर्थस्तथाप्यर्थे कार्यासम्भवात् तदर्थाभिधायिनि शब्दे प्रतिपत्तिरित्याह– **अपुंलिङ्गार्थाच्छब्दादि**ति । न् इद् यस्यासौ– नित्, ततोऽन्यः– अनित्, तत्र यद्यनिदित्यनिन्मात्रं गृह्येत तदा “ नरिका मामिका ” [ २. ४. ११२. ] इतीत्वशासनमनर्थकं स्यात् “ अस्यायत्० ” [ २. ४. १११. ] इत्यनेनैव सिद्धेः, अतोऽनिदिति प्रत्ययो विज्ञायते, ततश्च “ नरिका मामिका ” [ २. ४. ११२. ] इत्यत्र ककारस्य प्रत्ययावयवत्वाभावादित्वं न प्राप्नोतीति तदर्थवद् भवति । तस्यानितः ककार इति षष्ठीसमासः कर्मधारयो वा, तत्रापि ककारमात्रस्यानितः प्रत्ययस्याभावादनिदवयव एवोपचाराद् गृह्यते इत्याह– **अनितोऽनकारानुबन्धकस्ये**त्यादि । आपीत्युपश्लेषसप्तम्यैवानुपश्लिष्टे ककारे इत्वमित्यर्थस्य सिद्धेः परग्रहणं नियमार्थमित्युक्तम्– **आबेवे**त्यादि । चकारेण ह्रस्वोऽनुकृष्यते । “नवापः” [ २. ४. १०६. ] इत्यतो विकल्पानुवृत्तेरुभयस्यापि विकल्प इत्याह– **इकारो ह्रस्वश्च वा भवत** इति । **खट्विके**ति– ताभ्यां विमुक्ते पक्षे आकारः श्रूयत एवेति त्रैरूप्यमेवेति, खट्वशब्दोऽपुमर्थः, तत आप्, “ कुत्सिताल्प० ” [ ७. ३. ३३. ] इति कपि तत आप्, तत्र पूर्वस्यापः “ ङ्यादीदूतः० ” [ ७. २. १०४. ] इति नित्यं ह्रस्वे प्राप्ते इकारो ह्रस्वश्च विकल्पेन भवतः, तद्विमुक्ते चाकार इति; एवं– **परमखट्विके**त्यादावपि द्रष्टव्यम् । **चकार** इति– असति हि चकारे विध्यन्तरोपादानाद् ह्रस्वप्रतिपत्तिर्न स्यादित्यर्थः, शेषं व्याख्यातप्रायम् । **अपुंस इति किमि**ति– यदि सूत्रेऽपुंस इत्यापो विशेषणं न स्यात् तदाऽनित्कि आपि सति सत्सप्तमीविज्ञानात् परस्याप्यापः ‘ सर्विका ’ इत्यादौ स्यात्, अत एवैतन्निवृत्तये पूर्वं पूर्वस्येत्यापो विशेषणमाहुः । अथ सम्भवत्युपश्लेषे सत्सप्तमी न शक्या प्रतिपत्तुं, लौकिकप्रयोगव्याघातात् तदनुवादकत्वात् स्मृतिशास्त्रस्येति पूर्वस्यापः कार्यित्वम्, सार्विकेत्यत्र तु तदभावादिति चेत् ? एवं तर्हि अखट्विका ’ इत्यादौ दोषः स्यात्, अत एवाह– **न विद्यते** इति– अत्राखट्वेति, अतिखट्वेति च बहुव्रीहिः [ तत्पुरुषश्च ] “ गोश्चान्ते० ” [ २. ४. ९६. ] इति ह्रस्वत्वे स्त्रीपुंससाधारणः, ततो नापुल्लिँङ्गार्थाच्छब्दादाबिति “ कुत्सिताल्प० ” [ ७. ३. ३३. ] इति कपि पुनरापि चापुंस इति वचनाद् विकल्पस्याभावात् त्रैरूप्याभावाद् “ ङ्यादीदूतः० ” [ २. ४. १०४. ] इति ह्रस्वत्वे “ अस्या० ” [ २. ४. १११. ] इतीत्वे– अखट्विकेत्येकमेव रूपमिति । यदा तु न विद्यते खट्वाऽस्या इत्यखट्वाकेति समासान्तः कच् तदा भवत्येवानेन त्रैरूप्यम्,

आपोऽपुंसो विहितत्वादित्याह- **केचित्त्वि**त्यादि । **दुर्गके**ति- "नाम्न्युत्तरपदस्य वा" [ ३. २. १०७. ] इति देवीशब्दस्य लुक्, अनुकम्पायां द्योत्यायां "लुक्युत्तरपदस्य०" [ ७. ३. ३८. ] इति कप् न, अनित इति वचनाद् विकल्याभावाद् "ङ्यादीदूतः०" [ २. ४. १०४. ] इति ह्रस्वत्वमेव । **खट्वाता, मालाते**ति- "भावे त्वतल्" [ ७. १. ५५. ] इति तल् । **प्रियखट्वाकः पुरुष** इति- अत्र विभक्तिपरत्वादाप्परत्वाभावाद् विकल्पाभावः । **आबेव परोऽस्मादि**ति- आपीत्युपश्लेषसप्तम्याप्याबुपश्लिष्टे ककार इत्युक्तेऽपि सिध्यति, किं परग्रहणमिति प्रश्नार्थः । समाधत्ते- **प्रियखट्वाकः** इत्यादि । इदमेव विवृणोति- **अत्र ही**त्यादि । नन्वेवं खट्विकेत्यादावाबनापोरेकादेशस्य परं प्रत्यादिवद्भावादाब्ग्रहणेन ग्रहणेऽपि "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ] इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् "स्वरस्य परे०" [ ७. ४. ११०. ] इति स्थानिवद्भावादकारेण व्यवधानात् ककारस्याप्परत्वाभावादित्वादि कार्यं न प्राप्नोतीति; वचनप्रामाण्यादेकेन वर्णेन व्यवधानाश्रयणेऽपि 'एतिकाश्चरन्ति' इत्यादौ त्यदाद्यत्वसम्बन्धिनैकेनाकारेण दकारात्पूर्वेण च द्वितीयेन स्थानिवद्भावाद् वर्णद्वयव्यवधाने न स्यादिति; नैष दोषः- "अस्यायत्तत्०" [ २. ४. १११. ] इत्यत्र यत्तदोर्वर्जनात् "सप्तम्या०" [ ७. ४. १०५. ] इति परिभाषाया निर्दिष्टाङ्गवैकल्येन श्रुतिकृतस्यानन्तर्याश्रयणात् तस्य च 'एतिका' इत्यादावपि सम्भवादित्वादेः प्रवर्त्तनात्, श्रुतिकृतानन्तर्यसमाश्रयणे च परित्यक्तनिर्दिष्टपरिभाषस्यास्य वचनस्य चरितार्थत्वान्निर्दिष्टपरिभाषाया निवारिते विषये रथकट्यादावप्रवर्त्तनादिति । **मातृके**ति- कुत्सितादिविवक्षायां मातृशब्दात् कप्, अत आप्, आप इत्यधिकारादृकारस्येत्वं न भवति । ननु यथेहाप् नास्ति तथा मिमीत इति धान्यमातुरपि मातृशब्देनाभिधानादपुंस इत्यपि नास्ति, ततो द्वयङ्गविकलत्वान्नेदं प्रत्युदाहरणं युज्यते, प्रत्युदाहरणं हि तदङ्गाभावे कार्याभावं प्रदर्शयत् तदङ्गसामर्थ्यप्रदर्शनार्थमुपादीयते, तत्राङ्गद्वयवैकल्ये कतराङ्गस्य वैकल्यादिह कार्याभाव इति निर्णयाभावादेकस्याप्यभाव इति; नैष दोषः- जननीवचनस्यान्यस्यैवाव्युत्पन्नस्य मातृशब्दस्य ग्रहणात् । यद्वा प्रत्युदाहरणदिगियं, स्वसृकेत्यादि प्रत्युदाहरणं द्रष्टव्यम् ॥ छ ॥ २. ४. १०७. ॥

---

**न्या० स०—इचापुंसो०** । न् इत्- अनुबन्धो यस्य प्रत्ययस्याऽसौ- नित्, न नित्- अनित्, तस्य सम्बन्धी क्- अनिक्, तस्मिन् । प्रिया खट्वा यस्याः "शेषाद्वा" [ ७. ३. १७५. ] विकल्पेन कचि- **प्रियखट्विके**त्यादि रूपत्रयं भवति । आपीति कृते उपश्लेषसप्तम्यैव आबुपश्लिष्टे ककारे इत्वमित्यर्थस्य सिद्धेः परग्रहणं नियमार्थमित्याह- **आबेव पर** इति । **सर्विके**ति- सर्वा नाम काचित्, ततः स्वार्थे "यावादिभ्यः कः" [ ७. ३. १५. ] "ङ्यादीदूतः के" [ २. ४. १०४. ] ह्रस्वत्वे "अस्यायत्तत्०" [ २. ४. १११. ] इकारः । सर्वादेः सर्वशब्दस्य तु "त्यादिसर्वादेः०" [ ७. ३. २९. ] इत्यनेनाऽन्त्यस्वरात् प्रागकि- **सर्विके**ति- अत्रापः स्थानित्वमपि न स्यात् । **मातृके**ति- ननु यथा इहाप् नास्ति तथा मिमीते इति धान्यमातुरपि मातृशब्देनाभिधानात् 'अपुंसः' इत्यपि न स्यात्, ततो द्व्यङ्गविकलत्वान्नेदं प्रत्युदाहरणं युज्यते, प्रत्युदाहरणं हि तदङ्गाभावे कार्याभावं प्रदर्शयत् तदङ्गसामर्थ्यप्रदर्शनार्थमुपादीयते, तत्राङ्गद्वयवैकल्येऽन्यतराङ्गस्य वैकल्यादिह कार्याभाव इति निर्णयाभावादेकस्याप्यभाव इति; नैष दोषः- जननीवचनस्यान्यस्यैवाव्युत्पन्नस्य मातृशब्दस्य ग्रहणात्, यद्वा प्रत्युदाहरणदिग्मात्रमिदं, तेन **स्वसृके**त्यादि प्रत्युदाहरणं द्रष्टव्यम् ॥ २. ४. १०७. ॥

---

## स्व-ज्ञा-ऽज-भस्त्रा-ऽधातुत्ययकात् । २ । ४ । १०८ ॥

**त० प्र०—स्व-ज्ञा-ऽज-भस्त्रेभ्यः, अधातोरत्यप्रत्ययस्य च यावयवौ यकार-ककारौ ताभ्यां च, परस्यापः स्थानेऽनित्प्रत्ययावयवे ककारे आप्परे परत इकारो वा भवति । कुत्सिता स्वा ज्ञातिः- स्विका, स्वका; अस्विका, अस्वका; निःस्विका, निःस्वका; बहुस्विका, बहुस्वका; ज्ञातिधनाख्यायामसर्वादित्वादकोऽभावे कप्रत्ययान्तः स्वशब्दः । ज्ञिका, ज्ञका; अज्ञिका, अज्ञका; निर्ज्ञिका, निर्ज्ञका; बहुज्ञिका, बहुज्ञका; अजिका, अजका; अनजिका, अनजका; निरजिका, निरजका; बह्वजिका, बह्वजका । भस्त्राग्रहणं स्त्री-पुंससाधारणवृत्तेर्ग्रहणार्थम्- अविद्यमाना भस्त्रा यस्याः सा- अभस्त्रा, सैवाल्पा- अभस्त्रिका, अभस्त्रका; एवं- निर्भस्त्रिका, निर्भस्त्रका; बहुभस्त्रिका, बहुभस्त्रका; अतिभस्त्रिका, अतिभस्त्रका; अत्र हि गौणस्य ह्रस्वत्वे कृते समासात् स्त्री-पुंससाधारणादाबिति पूर्वेण न सिध्यति; यदा त्वपुंस्कादाप् विधीयते तदा पूर्वेण त्रैरूप्यमेव- भस्त्रिका, भस्त्रका, भस्त्राका; न भस्त्रा- अभस्त्रा, साऽल्पा चेत्- अभस्त्रिका, अभस्त्रका, अभस्त्राका; एवं- परमभस्त्रिका, परमभस्त्रका, परमभस्त्राका । यकार- इभ्यिका, इभ्यका; क्षत्रियिका, क्षत्रियका; आर्यिका, आर्यका । ककार- चटकिका, चटकका; मूषकिका, मूषकका; एलकिका, एलकका । धातुत्यवर्जनं किम्? सुनयिका, सुशयिका; अशोकिका, सुपाकिका; दाक्षिणात्यिका, पाश्चात्यिका,**

**इहस्यिका, अमात्यिका । आप इत्येव– कुत्सिता स्वा– आत्मा आत्मीया वा सर्वादित्वादकि– स्विका । सांकाश्ये भवा योपान्त्यलक्षणेऽकञि– सांकाश्यिका, एवं– काम्पील्यिका, हृदिकं भजति हार्दिकिका; अत्र “ गोत्रक्षत्रियेभ्योऽकञ् प्रायः ” [ ६. ३. २०८. ] इत्यकञ्, एवं– आफलिकिका, सर्वत्रोत्तरेण नित्यमिकारः । कथं बह्वपत्यिका ? बह्रपत्यका ?; नात्र त्यप्रत्ययः, *प्रत्यया-ऽप्रत्यययोश्च प्रत्ययस्यैव ग्रहणम्* । अथ शुष्किकेत्यत्र कथं न विकल्पः ? कादेशस्य कस्यासिद्धत्वात् ॥ १०८ ॥**

---

**श० न्या०—स्व-ज्ञा०** । यश्च कश्च– यकं, धातुश्च त्यश्च– धातुत्यौ, तयोर्यकं– धातुत्ययकं, ततो नञ्तत्पुरुषगर्भात् स्वश्च ज्ञश्चेत्यादिसमाहारद्वन्द्वात् पञ्चमी । इह पूर्वसूत्रे य इवेति चकारः स नानुवर्तते, [ अतो ] ह्रस्वविकल्पाभावः, तेनेत्त्वविमुक्ते पक्षे नित्यमेव ह्रस्वः । अपुंस इत्यपि नास्ति, ततः पुमर्थादप्ययं विधिः, अवशिष्टं तु सर्वमनुवर्तते । स्वशब्दस्य “ स्वमज्ञाति-धनाख्यायाम् ” इति वचनाज्ज्ञातिधनाभ्यामन्यत्र सर्वादित्वात् तत्र च “ त्यादि-सर्वादेः० ” [ ७. ३. २९. ] इत्यन्त्यात् स्वरात् पूर्वमकि सति ककारात् पूर्वस्यापोऽसम्भवाद् “ अस्य० ” [ २. ४. १११. ] इति वक्ष्यमाणेन तत्र नित्यमित्वे– अस्विकेत्येव भावात्; ज्ञाति-धनयोस्तु सर्वादित्वाभावात् कुत्सितादिविवक्षायां कपि ततः पूर्वस्यापः सम्भवादसर्वादेरेवोदाहरणं प्रयुज्यत इति दर्शयति– **कुत्सिता स्वा ज्ञातिरि**ति । यद्यपि स्वशब्दः “ स्वो ज्ञातावात्मनि क्लीबे त्रिष्वात्मीये धने स्त्रियाम् ” इति पठ्यते, तथापि कुत्सिताद्यर्थविषये ज्ञातावपि स्त्रीत्वमत एव पाठात्, भवति ह्युपाधिभेदाल्लिङ्गयोगस्तदन्यलिङ्गत्वं च, यथा पचतिरूपमित्यलिङ्गस्यापि नपुंसकलिङ्गत्वं, कुटीरमिति स्त्रीलिङ्गस्यापि नपुंसकलिङ्गत्वम्, विचित्रा हि शब्दशक्तयः, अत एव पूर्वैः– लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य । कुत्सिताद्युपाधिरहितस्य तु यथोक्तलिङ्गयोगः, अत एवाचार्यपाणिनिः “ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ” [ पा० सू० ७. ३. ४७. ] इति सूत्रे ‘ स्वा ’ इत्येतावन्तं पठितवानिति नास्ति शास्त्रविरोध इति । अत्र स्विकेत्यादावित्वशासनादेव “ क्यङ्-मानि-पित्तद्धिते ” [ ३. २. ५०. ] इति पुंवद्भावादाकारो निवर्तत इति । न च बह्वयः स्वा अस्या इति बहुव्रीहौ “ गोश्चान्ते० ” [ २. ४. ९६. ] इति ह्रस्वत्वे– कप्यापः स्थानिवद्भावात् “ अस्या० ” [ २. ४. १११. ] इति नित्यमित्त्वे प्राप्तेऽयं विकल्पो भवतीतीत्त्वशासनस्यार्थवत्त्वात् स्विकेत्यादौ नैवापो निवर्तकत्वमिति वाच्यम्, आप इत्याकारेण प्रश्लेषादाकाररूपैस्यवापः कार्यविज्ञानात्; न च कचीदमित्वशासनमर्थवत्, तत्र ह्यसत्यप्यस्मिन् “ नवापः ” [२. ४. १०६.] इति ह्रस्वे “ अस्यायत्० ” [ २. ४. १११. ] इति इत्त्वे– बहुस्विका, बहुस्वकेति सिद्धेः, यतः सत्यप्यस्मिंस्तदेव द्वैरूप्यमिति । **अस्वि**केति– बहुव्रीहिस्तत्पुरुषो वा, तत्पुरुषे त्वसर्वादेरेवोदाहरणम्, सर्वादावकः सद्भावात् पूर्वोक्तदोषप्रसङ्गात्; बहुव्रीहौ तु सर्वादिरसर्वादिश्चोभयमिति, तत्रोपसर्जनत्वेन सर्वादित्वाभावादगनुत्पत्तौ “ गोश्चान्ते० ” [ २. ४. ९६. ] इति ह्रस्वत्वे पुनराप्, ततः कप्, आपीत्वविकल्पः । **निःस्विके**त्याद्यपि बहुव्रीहिस्तत्पुरुषो वा । **बहुस्विके**त्यादि तु बहुव्रीहिः । **ज्ञातिधनाख्यायामि**ति व्याख्यातप्रायम् । जानातीति “ नाम्युपान्त्य० ” [ ५. १. ५४. ] इति के आपि च– ज्ञा, ततः पूर्ववत् कपि– **ज्ञिके**त्यादि । नञा बहुव्रीहि-तत्पुरुषयोरन्यतरस्मिन् कृते– **अज्ञिके**त्यादि । एवम्– **अजिके**त्यादि । भस्त्राशब्दवर्जितानां त्रयाणां नित्येत्त्वबाधनार्थमित्त्वप्रतिषेधो विकल्पेन क्रियत इति युक्तम्, भस्त्राशब्दस्य तु नित्यस्त्रीविषयत्वादपुंल्लिङ्गार्थादाब्विधानात् “ इच्चापुंसः० ” [ २. ४ १०७. ] इत्यनेनैव वैकल्पिके इत्त्वप्रतिषेधे सिद्धे यदिह तस्योपादनं तदिह स्त्रीपुंससाधारणार्थमित्याह– **भस्त्राग्रहणमि**त्यादि– गौणत्वे हि तस्य पुमर्थसाधारणादाप् सम्भवतीति “ इच्चापुंसः० ” [ २. ४. १०७. ] इत्यनेन सिद्धिर्न भवति, बहुव्रीहौ गतिसमासे च गौणत्वमस्ति, बहुव्रीहौ ह्यन्यपदार्थस्य प्राधान्याद्वर्त्तिपदार्थस्य गुणभावः, गतिसमासेऽपि पूर्वपदार्थस्य प्राधान्यादुत्तरपदार्थस्य गौणत्वम्, तत्र बहुव्रीहौ तावद् गौणत्वं दर्शयति– **अविद्यमाने**त्यादि– अत्र हि “ गोश्च० ” [ २. ४. ९६. ] इति ह्रस्वत्वे भस्त्राशब्दः पुमर्थसाधारणोऽपि– अभस्त्रो देवदत्त इति, ततो योऽसावाबुत्पद्यते स स्त्री-पुंससाधारणात् परः– अभस्त्रा देवदत्ता, ततः “ कुत्सिताल्प० ” [ ७. ३. ३३. ] इति कपि आपि चानेनेत्त्वविकल्पः । एवं– निर्गता भस्त्राया निर्भस्त्रा बहुव्रीहिवत् प्रादिसमासेऽपि ङ्याद्यन्तस्य गौणत्वाद् ह्रस्वत्वे कृते पूर्ववत् स्त्री-पुंससाधारणादाबिति पूर्वेण न सिध्यतीति दर्शयति– **अत्र ही**त्यादि । बहुव्रीहि-प्रादिसमासाभ्यामन्यत्र समासे केवलस्य च भस्त्राशब्दस्य गौणत्वाभावाद् पुमर्थत्वात् पूर्वेण त्रैरूप्यमेवेत्याह– **यदा त्वि**त्यादि । इभमर्हतीति– इभ्या, ततः कुत्सिताद्यर्थे कपि तत आपि वैकल्पिके इत्त्वे– **इभ्यिका, इभ्यका** । [ मुषेः ] “ मुषेर्दीर्घश्च ” [ उणा० ४३. ] इतीके पूर्ववदाबादौ च– **मूषिकिके**त्यादि । **एलकिके**ति– “ ईडिक् स्तुतौ “ कीचक-पेचक० [ उणा० ३३. ] इत्यके निपातनाद् गुणे आपि ऋफिडादित्वाल्लत्वे– एलिका, ततः पुनः कबादि । नीतिः– नयः, शीतिः– शयः, “ युवर्ण० ” [ ५.

२. २८. ] इत्यलि सुशब्देन बहुव्रीहावापि कुत्सिताद्यर्थे कपि "क्यादीदूतः०" [ २. ४. १०४. ] इति ह्रस्वत्वे "अस्यायत०" [ २. ४. १११. ] इति नित्यमित्त्वे- **सुनयिके**त्यादि। एवं- शोचनं- शोकः, पाचनं- पाकः, ततो नञा सुशब्देन च बहुव्रीहौ पूर्ववदाबादौ च- **अशोकिका, सुपाकिके**ति। **दाक्षिणात्यिका, पाश्चात्यिके**ति- "दक्षिणापश्चात्०" [ ६. ३. १३. ] इत्यण्। **इहत्यिका, अमात्यिके**ति- "क्वेहामात्र०" [ ६. ३. १६. ] इति त्यच्। **स्विके**ति- ककारात् पूर्विकस्यापोऽसम्भवादत्रेत्त्वविकल्पाभावः। **योपान्त्यलक्षणे** इति- "प्रस्थ-पुर-वहान्त-योपान्त्यधन्वार्थात्०" [ ६. ३. ४३. ] इत्यनेन विहिते इत्यर्थः। **हृदिक**मिति- हरतेः "कुशित-हृ.दिक०" [ उणा० ४५. ] इति किदिको निपातनाद् दागमश्च। **श्वाफल्किके**ति- शुनः परात् फलेः "निष्क-तुरुष्क०" [ उणा० २६. ] इति कप्रत्ययो निपातनाद्वृद्धत्वं च। **उत्तरेणे**ति- "अस्यायत्-तत्०" [ २. ४. १११. ] इत्यनेनेत्यर्थः। **कथमि**ति- बह्न्यपत्यानि यस्याः सा बह्वपत्या, ततः कुत्सिताद्यर्थे कपि आपि प्रत्यययकारात् परस्यापो धातुत्ययकादिति प्रतिषेधे वैकल्पिकस्येत्त्वस्याभावात् कथं **बह्वपत्यिके**त्यादि सिध्यतीति प्रष्टुरभिप्रायः। समाधत्ते- **नात्र प्रत्यय** इति। अत्र हेतुः- **प्रत्ययाप्रत्ययोरि**त्यादि। पुनः पृच्छति- **अथे**ति। **शुष्किके**ति- "क्षै-शुषि-पचो मकवम्" [ ४. २. ७८. ] इति कस्य ककारः। समाधत्ते- **कादेशस्ये**त्यादि। **कादेशस्य कस्यासिद्धत्वादि**ति- "कादिशोऽषि" [ २. १. ६१. ] इत्यनेनेति शेषः ॥ छ. ॥ २. ४. १०८. ॥

**स्या० स०—स्वज्ञाज०**। धातुश्च त्यश्च- धातुत्यौ, न धातुत्यौ- अधातुत्यौ, यश्च कश्च- यकम्, अधातुत्ययोर्यकम्- अधातुत्ययकम्, स्वश्च ज्ञश्च अजश्च भस्त्रश्च अधातुत्ययकं च- स्वज्ञाजभस्त्राधातुत्ययकं, तस्मात्। अत्र सूत्रेऽपुंस इति नानुवर्ततेऽसंभवात्, आरम्भसामर्थ्याच्च। **[ कुत्सिता ] स्वा ज्ञातिः- स्विका** इति- यद्यपि स्वशब्दः "स्वो ज्ञातावात्मनि क्लीबे, त्रिष्वात्मीये धनेऽस्त्रियाम्" इति पठ्यते तथापि कुत्सिताद्यर्थविषये ज्ञातावपि स्त्रीत्वमत एव पाठाद्, भवति ह्युपाधिभेदाद् ह्रस्वे कृते लिङ्गयोगस्तदन्यलिङ्गत्वं च, यथा पचतिरूपमित्यलिङ्गस्यापि नपुंसकलिङ्गत्वम्, कुटीरमिति स्त्रीलिङ्गस्यापि नपुंसकलिङ्गत्वम्। विचित्रा हि शब्दशक्तयः; यद्वा ज्ञातिरत्र स्त्रीरूपा विवक्षिता, तेन योनिमन्नामत्वात् स्वशब्दस्य स्त्रीत्वम्। न विद्यते स्वा यस्या इति कृते कपि- **अस्विका, अस्वके**ति रूपे, कपि निमित्तभूते विकल्पपक्षे "अस्यायत्तत्०" [ २. ४. १११. ] इति न, विकल्पसामर्थ्यात्, क्वचित्तु "नवापः" [ २. ४. १०६. ] इति ह्रस्वे कृते "अस्यायत्तत्०" [ २. ४. १११. ] भवत्येव, न च सूत्रविकल्पः प्रवर्त्तते, सूत्रं विनापि अस्विका अस्वकेति सिध्यतीति, अस्विकेति रूपमेकरूपेणैव गतार्थमिति। **दाक्षिणात्यिके**ति- दक्षिणस्यां भवा "दक्षिणापश्चात्०" [ ६. ३. १३. ] इति त्यण्, अत्र "सर्वादयोऽस्यादौ" [ ३. २. ६१. ] इति पुंवद्भावो न भवति, "दक्षिणापश्चात्०" [ ३. २. ६१. ] इत्यत्र आकारनिर्देशात्; यद्वा "कौण्डिन्यागस्त्ययोः०" [ ६. १. १२७. ] इति ज्ञापकात्। **स्वा आत्मा आत्मीया वे**ति- स्त्रीसम्बन्ध्यत्रात्मा विवक्षितः, तस्य च योनिमता स्त्रीशरीरेणाभेदोपचाराद् योनिमन्नामत्वात् 'स्वा' इत्यत्र स्त्रीत्वम्, बाहुलकाद् वा स्त्रीत्वम्। **श्वाफल्किके**ति- श्वानं फालयति- श्वफल्कः, अन्धकविशेषः ॥ २. ४. १०८. ॥

# द्व्येष-सूत-पुत्र-वृन्दारकस्य। २। ४। १०९॥

**त० प्र०—आप इति निवृत्तं पृथग् योगात्, एषामन्तस्यानिष्प्रत्ययावयवे ककारे आप्परे परत इकारादेशो वा भवति। द्विके, द्वके; एषिका, एषका; केवलयोरेवानयोर्विकल्पेनेकारः। यदा तु 'न द्वे, न एषा, न द्वके, न एषका' इत्यादिविग्रहे कृते विभक्तेर्लुपि सत्यां पुनः समासाद् विभक्तौ तामाश्रित्य त्यदाद्यत्वं तत आप्, स च स्थानिवद्भावेन विग्रहकालभाविन्या विभक्तेः परो न तु कात्, तदा 'अनेषका, अद्वके' इत्यत्रेकारो न भवति। अस्विकेत्यादौ तु न विभक्तेः पर आप्, किन्तु कादेव। सूतिका, सूतका; पुत्रिका, पुत्रका; वृन्दारिका, वृन्दारका। द्विशब्दसाहचर्यादेषेति सर्वादेः कृतविकारस्यैतदो निर्देशः, तेनेषेर्णकादिप्रत्ययान्तस्याविकृतस्यैतच्छब्दस्य च न भवति- इच्छतीति- एषिका, एता एव- एतिकाः ॥ १०९॥**

**श० न्या०—द्व्येष०**। आप इ[ती]ति निवृत्तमित्यत्र हेतुमाह- **पृथग्योगादि**ति- अन्यथा समानविषयत्वादेकमेव योगं कुर्यादित्यर्थः। अज्ञाते द्वे "त्यादि-सर्वादेः" [ ७. ३. २९. ] इत्यकि त्यदाद्यत्वे आपि "औता" [ १. ४. २०. ] इत्येत्वेऽनेन वैकल्पिके इत्वे- **द्विके, द्वके** इति। अज्ञाता एषेति विगृह्य पूर्ववदगादौ "तः सौ सः" [ २. १. ४२. ] इति सत्वे "नाम्यन्तस्था०" [ २. ३. १५. ] इति षत्वे- **एषिके**त्यादि। एष-द्विशब्दौ नञ्पूर्वावित्त्वविकल्पं न प्रयोजयतः। तत्राकि कृते नञ्समासः, नञ्समासे वाऽगिति द्वयी गतिः, उभयोरपि च पक्षयोर्विभक्तेः पर आबिति, यतः

* अन्तरङ्गान् विधीन् बहिरङ्गा लुब् बाधते * इति समासार्थायाः विभक्तेस्त्यदाद्यत्वात् पूर्वं लुपा भाव्यम्। प्रत्ययलक्षणं च नास्ति, समुदायाद् या विभक्तिस्तामाश्रित्य त्यदाद्यत्वे सत्यापा भाव्यम्, स च विग्रहकाले भाविन्या विभक्त्या व्यवधीयते; **अस्विके**त्यादौ तु विभक्तेः पूर्वमाबिति न व्यवधानमित्याह- **केवलयोरि**त्यादि। **सूतिके**ति- सुपूर्वाद् वयतेः क्तः, सूते स्मेति वा क्तः, तत आबन्तात् कुत्सितादौ कप्। पुत्रशब्दात् कुत्सितादौ कपि आबादौ च- **पुत्रिके**त्यादि- कृत्रिमः पुत्र इति वा " तनु-पुत्र० " [ ७. ३. २३. ] इति कः। वृन्दमस्यास्तीति " वृन्दात्० " [ ७. २. ११. ] इत्यारके- **वृन्दारिके**त्यादि। इच्छतेर्णके, एतदश्च सौ, एषेति रूपस्य ककारात् पूर्वभागस्य च सिद्धावप्येतद एव कृतविकारस्य रूपं गृह्यते, नान्यदित्याह- **द्विशब्दसाहचर्यादि**त्यादि। सविकारनिर्देशसिद्धं दर्शयति- **तेने**त्यादि ॥ छ. ॥ २. ४. १०९. ॥

**न्या० स०—न्येषसूत०**। यदा तु न द्वे न एषेति एषद्विशब्दौ नञ्पूर्वावित्विकल्पं न प्रयोजयतः, तत्रापि कृते नञ्समासेऽनञ्समासे वाऽऽबिति द्वयी गतिः, उभयोरपि च पक्षयोर्विभक्तेः पर आबिति, यतः * अन्तरङ्गानपि विधीन् बहिरङ्गापि लुप् बाधते * इति समासार्थाया विभक्तेस्त्यदाद्यत्वात् पूर्वं लुपा भाव्यं, प्रत्ययलक्षणं च नास्तीति समुदायाद् या विभक्तिस्तामाश्रित्य त्यदाद्यत्वे सत्यापा भाव्यम्, स च विग्रहकालभाविन्या विभक्त्या व्यवधीयते। तर्हि द्विके इति मूलप्रयोगेऽपि कुत्सिते द्वे इति तद्धितवृत्तौ " त्यादिसर्वादेः " [ ७. ३. २९. ] इत्यकि औकारस्य लोपे तद्धितान्तात् औकारे तदाश्रये त्यदाद्यत्वे आपि च तद्धितवृत्तिनिमित्तस्य औकारस्य स्थानिवद्भावाद् न प्राप्नोति, नैवम्- उभयोरपि औकारयोरेकपदभक्तत्वेन व्यवधानं न भवति, 'अद्विके' इत्यत्र तु समासभक्तस्य औकारस्य प्रथमेन द्विशब्दभक्तेन औकारेण व्यवधानं भवत्येव। **सूतिके**ति- सुपूर्वाद् वयतेः क्तः, सूते स्मेति वा क्तः, तत आबन्तात् कुत्सितादौ कप्। **पुत्रिके**ति- पुत्रशब्दात् कुत्सितादौ कपि आबादौ च, कृत्रिमः पुत्र इति वा " तनु-पुत्राऽणु-बृहती० " [ ७. ३. २३. ] इति कः। **वृन्दारिके**ति- प्रशस्तं वृन्दमस्या अस्तीति वृन्दारकः, ततो " जातेरयान्त० " [ २. ४. ५४. ] इति बाधायै " अजादेः० " [ २. ४. १६. ] इत्याप् ॥ २. ४. १०९. ॥

## वौ वर्तिका । २ । ४ । ११० ॥

**त० प्र०—वौ**- शकुनावभिधेये वर्तिकेतीत्त्वं वा निपात्यते। वर्तते इति णके- **वर्तिका, वर्तका- शकुनिः**। वाविति किम्? **वर्तिका- भागुरिर्लोकायतस्य व्याख्यात्रीत्यर्थः** ॥ ११० ॥

**श० न्या०—वौ व०**। **वर्त्तिके**ति कृतेत्त्वविकल्पः शकुनौ साधुर्भवति, अन्यत्र तु नित्यमित्त्वमित्याह- **वावित्यादि**। भागुरिर्लोकायतस्य वर्तिका व्याख्यात्रीति सम्बन्धः ॥ छ. ॥ ॥ २. ४. ११०. ॥

**न्या० स०—वौ वर्त्तिका०**। **वर्त्तिका भागुरिरिति**- वर्तयतीति णके " अस्यायत्तत्० " [ २. ४. १११. ] इति इकारः। भागुरिः आचार्यः, बाहुलकात् स्त्रीलिङ्गः, लोके आयतं- लोकायतं नास्तिकशास्त्रम् ॥ २. ४. ११०. ॥

## अस्याऽयत्-तत्-क्षिपकादीनाम् । २ । ४ । १११ ॥

**त० प्र०**—**यत्-तत्-क्षिपकादिवर्जितस्य नाम्नो योऽकारस्तस्यानित्प्रत्ययावयवे ककारे आप्परे परत इकारो भवति, वेति निवृत्तं पृथग्योगात्। जटिलिका, बधिरिका, मुण्डिका, कारिका, पाचिका, मुद्रिका। अस्येति किम्? गोका, नौका। अनित्कीत्येव- जीवका, नन्दका " आशिष्यकन् " [ ५. १. ७०. ] । अनित इति पर्युदासेन प्रत्ययग्रहणादिह न भवति- शक्नोतीति- शका, तका। आप्पर इत्येव- कारकः, हारकः। आबेव परो यस्मादिति नियमः किम्? बहुपरिव्राजका मथुरा, बहुमद्रका सेना, विभक्त्यन्तादयमाबिति प्रतिषेधः। यत्-तत्-क्षिपकादिवर्जनं किम्? यका, सका, क्षिपका, ध्रुवका, धुवका, लहका, चरका, चटका, इष्टका, एडका, एरका, करका, अवका, अलका, दण्डका, पिप्पका, कन्यका, मेनका, द्वारका, रेवका, सेवका, धारका, उपत्यका, अधित्यकेत्यादि। बहुवचनमाकृतिगणार्थम् ॥ १११ ॥**

**श० न्या०—अस्या०**। **यत्-तत्-क्षिपकादिवर्जितस्ये**ति- यद्यसावकारो यदादिसम्बन्धी न भवतीत्यर्थः। **वेति निवृत्तमि**ति- अत्र हेतुः- **पृथग्योगादि**ति- यद्यत्रापि विकल्पः स्यात् तदा स्वका, स्विकेत्यादौ "ङ्यादीदूतः०" [ २. ४. १०४. ] इति ह्रस्वत्वेऽनेनैव वैकल्पिकत्वेत्त्वस्य सिद्धत्वात् स्व-ज्ञा-ऽज-भस्त्रेत्यादीनां पृथगुपादानमनर्थकं स्यादित्यर्थः। **जटिलिके**ति- " काला-जटा-घाटात् क्षेपे " [ ७. २. २३. ] इति इलः, ततः कुत्सितादिकबन्तादाप्, अत इत्वम्। " बन्धश् बन्धने " " शुषीषिबन्धि० " [ उणा० ४१६. ] इति किदिरे ततः पूर्ववत् कबादौ- **बधिरिका**। **मुण्डिके**ति- मुण्डयतीति " णक-तृचौ " [ ५. १. ४८. ] णकः, एवं- **कारिके**त्यादि। **गोका, नौके**ति- अत्रास्येति

वचनादित्त्वाभावः । **जीवका, नन्दके**ति– जीवतान्नन्दतादित्यर्थः । **पर्युदासेने**ति– शक्नोतेस्तकतेश्चाचि आपि च– **शाका, तके**ति, धातोरयं ककारो न प्रत्ययावयव इति– अनित इति प्रत्ययपरिग्रहादित्वं न भवति, प्रत्ययपरिग्रहे च " नरिका मामिका " [ २. ४. ११२. ] इति लिङ्गमुक्तमेव । **कारकः, हारकः** पूर्ववण्णकः । परिव्रजन्तीति णके बहवः परिव्राजका यस्यामिति समासे समासार्थविभक्तेरापि आप एव परत्वाभावादित्वाभावे– **बहुपरिव्राजिके**ति, एवं– **बहुमद्रिके**ति । ननु चात्र ककारादाप् श्रूयते, नान्यदिति कथं प्रतिषेध इत्याह– **विभक्त्यन्तादि**त्यादि । **यका, सके**ति– " त्यादि-सर्वादेः० " [ ७. ३. २९. ] इत्यक्, त्यदाद्यत्वम्, " तः सौ सः " [ २. १. ४२. ] इति तत्तकारस्य सकारः । क्षिपतेः " नाम्युपान्त्य० " [ ५. १. ५४. ] इति के कुत्सितादौ कपि– **क्षिपका** । " ध्रुत् गत्यादौ " " धूत् विधूनने " आभ्यामचि " कुटादेः० " [ ४. ३. १७. ] इति ङित्वाद् गुणाभावे "धातोरिवर्णोवर्णस्य०" [ २. १.५०. ] इत्युवि कबादौ च– **ध्रुवका, धुवका** । " चर भक्षणे च " " चटण् भेदे " आभ्यां " दृ-कॄ-नॄ० " [ उणा० २७. ] इत्यके– **चरका, चटका** । इषेः " इष्यशि० " [ उणा० ७७. ] इति तककि– **इष्टका** । " ईडिक् स्तुतौ " " ईरिक् गतौ " आभ्यां " कीचक-पेचक० " [ उणा० ३३. ] इत्यकि निपातनाद् गुणे– **एडका, एरका** । " कॄत् विक्षेपे " " अव रक्षणादौ " " अली भूषणे " एभ्यो " दृ-कॄ-नॄ० " [ उणा० २७. ] इत्यके– **करके**त्यादि । दण्डयतीति णके– **दण्डका** । **पिप्पक-लहकौ** चिन्त्यौ । " कनै दीप्त्यादौ " " स्था-छा-मा० " [ उणा० ३५७. ] इति ये– कन्या, सैवाल्पा " कुत्सिता-ऽल्पा० " [ ७. ३. ३३. ] इति कपि " ङ्यादीदूतः० " [ २. ४. १०४. ] इति ह्रस्वत्वे– **कन्यका** । मनेः " कीचक-पेचक० " [ उणा० ३३. ] इत्यके– **मेनका** । " दृं वरणे " " रेवृङ् गतौ " " सेवृङ् सेवने " " धृंग् धारणे " एभ्यो णके– **द्वारके**त्यादि । उपाधिशब्दाभ्यां पर्वतस्यासन्नायामधिरूढायां च भुवि यथासंख्यम् " उपत्यकाधित्यके " [ ७. १. १३१. ] इत्यके– **उपत्यका, अधित्यका** । बहुवचनफलमाह– **बहुवचनमि**त्यादि ॥ छ. ॥ २. ४. १११. ॥

**न्या० स०—अस्यायत्त०** । **पृथग्योगादि**ति– अयमर्थः– यद्यत्रापि विकल्पः स्यात् तदा ' स्विका, स्वका ' इत्यादौ " ङ्यादीदूतः० " [ २. ४. १०४. ] इति ह्रस्वत्वेऽनेन वैकल्पिकस्य इत्वस्य सिद्धत्वात् "स्वज्ञाजभस्त्रा०" [२.४.१०८.] इत्यादीनां पृथगुपादानमनर्थकं स्यादित्यर्थः । **मुण्डिके**ति– मुण्डयतीति " णक-तृचौ " [ ५. १. ४८. ] इति णकः । **मद्रिके**ति– माद्यतीति रप्रत्ययः, ततो " व्रजिमदाद् देशात् कः " [ ६. ३. ३८. ] इति कप्रत्ययः । **प्रत्ययग्रहणादि**ति– अथवा प्रत्ययपरिग्रहे च " नरिका-मामिका " [ २. ४ ११२. ] इति ज्ञापकौ । **बहुपरिव्राजके**ति– ननु चात्र ककारादावेव श्रूयते नान्यदिति कथं प्रतिषेध इत्याह– **विभक्त्यन्ते**त्यादि । **एडके**त्यादि– अत्र ईडिक् ईरिक् आभ्यां " कीचक० " [ उणा० ३३. ] इति निपातनाद् गुणे– **एडका, एरका** । **क्षिपका** आयुधविशेषः । **ध्रुवका धुवके**ति आवपनविशेषौ । **लहका** सविलासा स्त्री । **चरका** ऋषिः । **एडका** अजाविशेषः । **एरका** तृणम् । **करका** घनोपलः, त्रिलिङ्गः । **अवका** शेवालः । **अलका दण्डका** नगर्यौ । **पिप्पका** अश्वत्थस्य फलम् । **मेनका** गौरीमाता अप्सराश्च । **द्वारका** नगरी ॥ २. ४. १११. ॥

## नरिका मामिका । २ । ४ । ११२ ॥

**त० प्र०—**नरकशब्दस्य मामकशब्दस्य चाप्रत्ययावयवे ककारे आप्परे परतोऽकारस्येत्त्वं निपात्यते । नरान् कायतीति– नरिका " आतो डोऽह्वा-वा-मः " [ ५. १. ७६. ] इति डः । ममेयं– मामिका, अणि ममकादेशः, " केवल-मामक० " [ २. ४. २९. ] इत्यादिना संज्ञायां ङीप्रत्ययस्य नियमादाप्, ककारस्याप्रत्ययसम्बन्धित्वात् पूर्वेणाऽप्राप्ते वचनम् ॥ ११२ ॥

**श० न्या०—नरि०** । यदा " नॄश् नये " अतो " दृ-कॄ-नॄ० " [ उणा० २७. ] इत्यकः क्रियते तदा पूर्वेणैव सिद्धत्वान्नेदमुपयुज्यत इत्याह– **नरान् कायती**त्यादि । **ममकादेश** इति– " वा युष्मदस्मदोऽञीनञौ० " [ ६३. ६. ७. ] इत्यनेनेति शेषः । अणन्तादपि " केवल० " [ २. ४. २९. ] इति नियमादाबित्याह– **केवले**त्यादि । सूत्रप्रयोजनं दर्शयति– **ककारस्ये**ति– व्याख्यातप्रायम् ॥ छ. ॥ २. ४. ११२. ॥

**न्या० स०—नरिका०** । नेह व्याख्यातम् ॥ २. ४. ११३. ॥

## तारका-वर्णका-ऽष्टका ज्योतिस्तान्तव-पितृदेवत्ये । २ । ४ । ११३ ॥

**त० प्र०—**तारकादयः शब्दा यथासंख्यं ज्योतिरादिष्वर्थेषु इकारादेशरहिता निपात्यन्ते । तरतेर्णके– तारका– ज्योतिः, तच्च नक्षत्रं कनीनिका च, नक्षत्रमेवेत्यन्ये, अन्यत्र–तारिका । वर्णयतीति णके– वर्णका– तान्तवः प्रावरणविशेषः, अन्यत्र वर्णिका– भागुरी लोकायतस्य । अश्नोतेरौणादिके तककि– अष्टका– पितृदेवत्यं कर्म, अन्यत्राष्टौ द्रोणाः परिमाणस्या इति के– अष्टिका खारी । पितृदेवतार्थं कर्मेति " देवता-

न्तात् तदर्थे " [ ७. १. २२. ] इति ये– पितृदेवत्यमिति सिद्धम् ॥ ११३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनबृहद्वृत्तौ [ तत्त्वप्रकाशिकायां ] द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः [ २. ४. ]

श्रीमूलराजक्षितिपस्य बाहुर्बिभर्ति पूर्वाचलशृङ्गशोभाम् ।
संकोचयन् वैरिमुखाम्बुजानि यस्मिन्नयं स्फूर्जति चन्द्रहासः ॥८॥

समाप्तोऽयं द्वितीयोऽध्यायः ॥

**श० न्या०**—तार० । **णक** इति– अथवा तारयतीति तारा, सैवानुकम्पिता कपि " ङ्यादीदूतः० " [ २. ४. १०४. ] इति ह्रस्वत्वे– **तारका** । " द्युतेरादेश्च जः " [ उणा० ९९१. ] इति ज्योतिः । **णक** इति– " वर्णण् वर्णक्रियादौ " णिजन्ताद् वर्ण्यते इति कर्मणि संज्ञायां णके– **वर्णका** । **वर्णयती**ति तु चौरादिकप्रतिपत्त्यर्थस्तिवा निर्देशो न तु णकारम्भकः; अथवा वर्णयत्याधारविशेषगतमाधेयगुणं वादयतीति तान्तवस्य कर्तृत्वात् कर्तरि क्तः । **तान्तव** इति– तनोतेः " कृसि-कम्यमि० " [ उणा० ७७३. ] इति तुन्प्रत्यये– तन्तुः, ततो विकारार्थेऽण् । तान्तव इत्युक्तेऽपि न तान्तवमात्रं वर्णका, किन्तु किञ्चिदेवेत्याह– **प्रावरणविशेष** इति । **अन्यत्रे**ति– वर्णिका– भागुरी [ टीकाविशेषः ] लोकायतस्य– व्याख्यानी(त्री)त्यर्थः । **औणादिक** इति– " इष्यशि-मसि० " [ उणा० ७७. ] इत्यनेन विहितेत्यर्थः । **अष्टिके**ति– "संख्या-डतेश्च०" [ ६. ४. १३०. ] इति कः, पितृदेवत्यादन्यार्थत्वात् " अस्यायत्० " [ २. ४. १११ ] इतीत्वम् । **पितृदेवत्यमि**ति व्युत्पादयति– **पितृदेवतार्थमि**त्यादिना ॥ छ. ॥ २. ४. ११३. ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे शब्दमहार्णवन्यासे द्वितीयस्याध्यायस्य चतुर्थपादः ।

संपूर्णश्च द्वितीयोऽध्यायः ।

' ग्रन्थाग्र० १७२० । १४९३ वर्षे ' इति लीम्बडीभाण्डागारप्रतौ लिखितमस्ति ।

[ श्रीमूलराजक्षितिपस्य बाहुर्बिभर्ति पूर्वाचलशृङ्गशोभाम् ।
संकोचयन् वैरिमुखाम्बुजानि यस्मिन्नयं स्फूर्जति चन्द्रहासः ॥ ८ ॥ ]

अनुसन्धानकारस्य—

**श्रीमूलराजक्षितिपस्य** क्षितिं– पृथ्वीं, पाति–रक्षतीति क्षितिपः– राजा, मूलराजः– तन्नामकः, क्षितिपः– मूलराजक्षितिपः, श्रिया युक्तो मूलराजक्षितिपः– श्रीमूलराजक्षितिपः, तस्य, **बाहुः** दक्षिणः करः, **पूर्वाचलशृङ्गशोभां** पूर्वः– पूर्वदिक्स्थितः, अचलः– पर्वतः– पूर्वाचलः, उदयगिरिरित्यर्थः, तस्य शृङ्गस्य-शिखरस्य, शोभां-कान्तिम्, **बिभर्ति** धारयति । कथमित्याह– **यस्मिन्** बाहुरूपे पूर्वाचलशिखरे, **वैरिमुखाम्बुजानि** वैरिणां– शत्रूणां, मुखानि–आननान्येव, अम्बुजानि– कमलानि, **संकोचयन्** मुकुलयन्, **अयं** प्रत्यक्षं दृश्यमानः, **चन्द्रहासः** कृपाणः, अथ च चन्द्रस्य–शशिनः, हासः– हास इव प्रकाशः, **स्फूर्जति** विद्योतते । अयमाशयः– अयं मूलराजनृपबाहुरुदयगिरिशिखरसदृशः, चन्द्रवत्प्रकाशमान-वैरिमुखकमलसंकोचक-खड्गसहितत्वादिति । अत्र वैरिमुखाम्बुजानीति रूपकम्, चन्द्रहासपदे श्लेषश्चेति ताभ्यामनुप्राणिता पूर्वाचलशृङ्गशोभां बिभर्तीत्युपमा, उदयगिरिशिखरस्थितश्चन्द्रो यथा कमलसंकोचकारकस्तथा मूलराजबाहुस्थितश्चन्द्रहासो वैरिमुखमालिन्यजनक इति वैयञ्जनिको बोधः ॥ ८ ॥

**न्या० स०**—**तारका व०** । णिजन्ताद् वर्ण्यत इति संज्ञायां णके– **वर्णका**, वर्णयतीति तु चौरादिकप्रतिपत्त्यर्थं तिवा निर्देशो, न तु णकारम्भकः, अथवा वर्णयति– आधारविशेषगतमाधेयगुणं वादयतीति ॥ २. ४. ११३. ॥

इत्याचार्य० द्वितीयस्याध्यायस्य चतुर्थः पादः संपूर्णः ॥

॥ समाप्तोऽयं द्वितीयोऽध्यायः ॥

॥ अर्हँ ॥

# ॥ न्यायसमुच्चयः ॥

[ "समर्थः पदविधिः" ७.४.१२२. इति सूत्रस्य बृहद्वृत्तिप्रान्ते श्रीहेमचन्द्रसूरिभगवद्भिरुक्ताः सावतरणा न्यायाः—]

**अथ ये तु शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायास्तदर्थं यत्नः क्रियते–**

***स्वं रूपं शब्दस्याशब्दसंज्ञा* ॥ १ ॥**

---

**तपोगणगगनाङ्गणगगनमणि-शासनसम्राट्-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारदकविरत्नेतिपदालङ्कृतेन श्रीविजयलावण्यसूरिणा प्रणीतो—**

## न्यायार्थसिन्धुः ॥

पार्श्वं शङ्खेश्वरस्थं सुरनरनिकरैरर्चनीयाङ्घ्रियुग्मं,
सूरीन्द्रं हेमचन्द्रं निरुपमधिषणं सर्वतन्त्रस्वतन्त्रम् ।
सम्राजं शासनस्य प्रगुणगुरुवरं नेमिसूरीश्वरं च,
नत्वा न्यायार्थसिन्धुं विरचयतितरां श्रीललावण्यसूरिः ॥१॥

---

तपोगणगगनाङ्गणगगनमणि-शासनसम्राट्-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन श्रीविजयलावण्यसूरिणा प्रणीतः—

## तरङ्गः ॥

स्तुत्वा श्रीशान्तिनाथं जिनवरममलं चक्रिणं धर्मतोऽपि,
श्रीनेमीशं मुनीशं चरणगुणनिधिं शीललीलालयं च ।
स्वीये न्यायार्थसिन्धौ प्रकटयतितरां पं०सुशीलैकहेतो-
श्चञ्चारं तरङ्गं नवनवकलनं श्रीलावण्यसूरिः ॥ १ ॥

---

सि०—संस्कृतशब्दानुशासनं समापयंस्तत्रापेक्षितान्न्यायान् संगृह्णन्नाह— **अथ ये तु शास्त्रे सूचिता** इति। अथ पूर्वोक्तरीत्या संस्कृतशब्दसाधुत्वान्वाख्यानार्थं व्याकरणविवरणानन्तरं, ये शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायास्तदर्थमयं यत्नः क्रियत इत्यन्वयः । तानेव क्रमश आह — स्वं रूपमिति-प्रकरणतो 'व्याकरणशास्त्रे' इति पदं प्रायः सर्वत्रोपतिष्ठते । 'शब्दस्य स्वं रूपं बोध्यम्' इति न्यायविधेयांशः, नन्वेवं "कर्मणि" [२.२.४०.] इत्यादौ कर्मशब्दस्य 'कर्म'शब्द एवार्थः स्यात्, तथा च कर्मशब्दयोग एव द्वितीया स्यान्न तु तण्डुलं पचतीत्यादौ कर्मसंज्ञकात् तण्डुलादिशब्दादिति चेत् ? अत्राह— **अशब्दसंज्ञेति** शब्दे-शब्दशास्त्रे या संज्ञा सा शब्दसंज्ञा, न शब्दसंज्ञा–अशब्दसंज्ञा, तथा च शब्दसंज्ञाभिन्नमेव स्वरूपं व्याकरणे शब्दस्य बोध्यमित्यर्थः । अत्र केचित्—शब्दसंज्ञेत्यत्र शब्देन संज्ञा-शब्दसंज्ञेत्यर्थमाश्रित्य संज्ञाशब्दं च भावसाधनमाश्रयन्ते, तथा च यदि तेन शब्देन कस्यचित् संज्ञा कृता स्यात् तदा तेन स्वरूपं न ग्राह्यमित्यर्थं वर्णयन्ति; तत्र तेनेति पदस्याध्याहारे मानाभावः; संज्ञायाश्च शब्दस्वरूपत्वाव्यभिचारात् शब्देन संज्ञेति विशेषणवैयर्थ्यं च, तावतापि देवदत्तादिसंज्ञानां व्यवच्छेदाभावश्च, सापि हि संज्ञा शब्देनैव कृताऽस्ति; प्रत्यासत्त्या व्याकरणे या शब्देन संज्ञेत्यर्थस्वीकारेऽपि शब्देत्यस्य वैयर्थ्यमेव, शब्दः संज्ञेति विग्रहेऽपि संज्ञाशब्दपूर्वनिपातापत्तिवत् 'शब्द'शब्दस्य वैयर्थ्यमपि दोषः। तथा च शब्दशब्दस्य शब्दशास्त्रपरत्वमुत्तरपदलोपेनाश्रित्य शब्दे–शब्दशास्त्रे या संज्ञेत्यर्थकरणमेव न्याय्यः । तथा च कर्मादिसंज्ञानां 'दा'संज्ञायाश्च न स्वरूपबोधकत्वमिति न "कर्मणि" [२.२.४०.] इत्यादौ कर्मशब्दयोगे द्वितीया, न वा "उपसर्गाद् दः किः" [५.३.८६.] इत्यादौ 'दा' स्वरूपस्य ग्रहणं, किन्तु "अवौ दा-धौ दा" [३. ३. ५.] इति सूत्रविहितसंज्ञयोर्दा-धोर्ग्रहणं सिद्धम् । *गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः* *कृत्रिमा-ऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः* इत्यनयोर्न्याययोरपवादोऽयम्, तेन "समः ख्यः" [५. १. ७७.]

इत्यत्र मुख्यः "ख्यांक् प्रकथने" इति ख्याधातुः, "चक्षिक् व्यक्तायां वाचि" इति चक्षधातोः "चक्षो वाचि०" [४. ४. ४. ] इत्यनेनादेशभूतश्चेति द्वावपि गृह्येते, उभयोरपि ख्यारूपस्याविशेषात्, अन्यथा गौणमुख्यन्यायादरे "ख्यांक्" धातोरेव ग्रहणं स्यात्, कृत्रिमाकृत्रिमन्यायादरे चादेशभूतस्यैव ग्रहणं स्यादिति नोभयोर्ग्रहणं स्यात्, तथा च गाः संख्याति संचष्टे वेत्युभयोरर्थयोः 'गोसंख्यः' इतीष्टं रूपं न सिध्येत् । अत्र न्यायेंऽशद्वयं–'शब्दस्य स्वं रूपं बोध्यम्' इति 'अशब्दसंज्ञा' इति च, तत्र प्रथमेंऽशे "नदीभिर्नाम्नि" [ ३. १. २७ ] इति सूत्रस्थं बहुवचनं ज्ञापकम्, तद्धि नदीशब्दस्यैव ग्रहणं मा भूत् किन्तु नदीविशेषाणामपि ग्रहणं यथा स्यादित्येवमर्थम्, एतन्न्यायाभावे तु एकवचननिर्देशेऽपि नदीवाचकस्य सर्वस्य ग्रहणे सिद्धे बहुवचननिर्देशो व्यर्थः स्यात्, सति चास्मिन् नदीशब्दोऽशब्दसंज्ञात्वेन स्वरूपस्यैव बोधकः स्यादिति बहुवचनग्रहणसामर्थ्यात् तद्विशेषाणां सर्वेषां ग्रहणं सिध्यति, तथा च "संख्या समाहारे" [ ३. १. २८. ] इत्युत्तरसूत्रेण पञ्चानां नदीनां समाहार इत्यर्थे यथा पञ्चनदमित्यत्राव्ययीभावसमासो भवति तथैव द्वयोर्यमुनयोः समाहारो द्वियमुनं तिसृणां गङ्गानां समाहारः त्रिगङ्गमित्यादावपि भवति । द्वितीयांशज्ञापकं तु "स्वरादुपसर्गाद्दस्ति कित्यधः" [ ४. ४. ९. ] इत्यत्र धापर्युदासः, *स्वं रूपम्०* इति न्यायेन दाशब्देन स्वरूपस्यैव ग्रहणे तु धाधातोर्ग्रहणमिह प्राप्तमेव नेति तत्पर्युदासो व्यर्थ एव, सति च शब्दसंज्ञाविषये स्वरूपग्रहणाभावज्ञापने दाशब्देन "अवौ दा-धौ दा" [ ३. ३. ५. ] इति सूत्रेण सङ्केतितयोर्दा-धोर्ग्रहणे प्रसक्ते धापर्युदासः सार्थको भवति । प्रथमांशफलं तु "कल्यग्नेरेयण्" [ ६. १. १७ ] इति सूत्रेऽग्निशब्दस्यैव ग्रहणं न तु तत्पर्यायाणाम्, एवमन्यान्यपि फलानि समुदाहरणीयानि, द्वितीयांशज्ञापनफलं तु कर्मादिसंज्ञासु स्वरूपाग्रहणमिति ॥

अत्र केचित्–उभयोरप्यंशयोरनित्यत्वं ज्ञापयन्ति तत्फलं च प्रदर्शयन्ति, तथा हि—"अस्य चाद्योंऽशोऽनित्यस्तेन "उत्स्वराद्युजेरयज्ञतत्पात्रे" [ ३. ३. २६. ] इत्यत्र "युजादेर्न वा" [ ३. ४. १८. ] इत्यनेन विकल्पितणिचश्चौरादिकयुजेर्णिचोऽभावपक्षे युजिरूपसंभवेऽपि न ग्रहणम् । अनित्यताया ज्ञापकं तु "पूङ्क्लिशिभ्यो नवा" [ ४. ४. ४५. ] इत्यत्र बहुवचनम्, तद्धि क्लिश्यति-क्लिश्नात्योर्ग्रहणार्थं न्यस्तम्, एतन्न्यायांशानित्यत्वे च तयोरुभयोरपि क्लिशिरूपसद्भावाद् बहुवचनं विनापि ग्रहणं सिध्यतीति कुतस्तदर्थं बहुवचनं प्रयुज्येतेति । द्वितीयांशोऽप्यनित्यः, तेन "प्राज्ज्ञश्च [ ५. १. ७९. ] इति "दश्चाङः" [ ५. १. ७८. ] इति पूर्वसूत्राद् द इत्यनुवृत्त्या दासंज्ञवददासंज्ञयोरपि दाव्-दैवोर्ग्रहः सिद्धः, अनित्यताज्ञापकं तु "प्राज्ज्ञश्च' [ ५. १. ७९. ] इत्यस्य वृत्तौ द इति दारूपमेवेह ग्राह्य'मित्युक्तिः ।" इति ।

अत्रेदं वक्तव्यम्–प्रथमांशस्यानित्यत्वज्ञापने न किञ्चित् फलम्, अनेन न्यायेन हि शब्देनार्थे समुपस्थापिते तस्य ग्रहणमेव वारणीयम्, तदनित्यत्वे चार्थोऽपि गृह्येतेत्येवायातं स्यादिति प्रकृते "उत्स्वराद्युजेरयज्ञतत्पात्रे" [ ३. ३. २६. ] इति सूत्रे कथमनित्यणिचो युजेर्वारणं सिद्धं स्यात्, किञ्च तत्सूत्रवृत्तौ युनक्तेरिति स्पष्टं निर्दिष्टतया तथैवोदाहृततया च न तस्य ग्रहणमिहेष्टमित्यत्र तदेव विनिगमकम् । यच्च तत्र ज्ञापकमुपन्यस्तं "पूङ्–क्लिशिभ्यो नवा" [ ४. ४. ५५. ] इत्यत्रत्यं बहुवचनं तदपि न समीचीनमिति प्रतिभाति, तदंशसत्त्वेऽपि यथा क्लिश्यति–क्लिश्नात्योरुभयोः क्लिशिरूपत्वाव्यभिचारादुभयोर्ग्रहणं भविष्यति तथैव तदभावेऽपि विनिगमनाविरहेणोभयोर्ग्रहणं साध्यते, तच्च विनापि बहुवचनं सिध्यत्येवेति न तदनित्यत्वज्ञापनार्थं बहुवचनस्यावश्यकता, "क्लिशिच् उपतापे" इति दिवादिपठितस्यैकारानुबंधत्वेन तस्यैवेह क्लिशिरूपत्वेन ग्रहणं स्यात्, न तु क्र्यादिषु "क्लिशौश् विबाधने" इत्यौकारानुबन्धत्वेन पठितस्य* तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम्* इति न्यायेनेति तद्वारणाय बहुवचनमिति प्रतीयते । यच्च द्वितीयांशानित्यत्वज्ञापकमुपन्यस्तं तदपि न साधु क्वचिदन्यत्र फलाभावात्, ज्ञापनं हि न केवलं स्वसार्थक्यायैव भवति, किन्तु विषयान्तरे फलार्थम्, तस्य चानुपलम्भेन ज्ञापनानौचित्यात् । प्रत्युत वृत्तौ ज्ञाख्यासाहचर्येण दारूपग्रहणस्य साधनेनास्यांशस्य सत्त्वमेवानुमीयते, एतदभावे हि स्वत एव दारूपस्य ग्रहणं स्यात् । न ह्यपवादेनोत्सर्गस्यानित्यत्वं ज्ञाप्यते; तथा चोभयांशनित्यत्वमेव, यदि च क्वचित् स्वरूपस्य तदर्थकस्य च ग्रहणमिष्टं तर्हि*क्वचिदुभयगतिः*इति न्यायस्यैव शरणीकरणीयत्वमित्यन्यत्र विस्तरः ॥ १ ॥

त०—परमकारुणिकः श्रीमान् भगवान् हेमचन्द्राचार्यः स्वल्पायासेन पदसाधुत्वावबोधकं संस्कृतशब्दानुशासनं सप्तभिरध्यायैः संगृह्य तदुचितान् न्यायानपि स्वरूपतः संजिघृक्षुरादावित्थं भूमिकामाह—"**अथ ये तु शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायास्तदर्थं यत्नः क्रियते**" इति । अत्र **अथे**त्ययं शब्दः किमर्थक इति विचारणीयम्, न च मङ्गलार्थः,

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥" [ ]

इत्युक्ततया तस्य मङ्गलार्थत्वसिद्धेरिति वाच्यम्, अन्यार्थमानीयमानोदककुम्भवत् अर्थान्तरबोधनाय प्रयुक्तस्यैवाथशब्दस्य मङ्गलार्थत्वस्य शास्त्रकारव्यवहारविषयत्वात् । अथशब्दार्थाश्च–

"अथाथो संशये स्यातामधिकारे च मङ्गले ।
विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये ॥"

इति मेदिनीकोशानुसारं संशयाद्या बहवः, तत्रान्येषामप्राकरणिकत्वादिह प्रकरणानुसारमानन्तर्यार्थकस्यैव ग्रहणमुचितमिति संक्षिप्य निश्चिनुमः, पूर्वं च हैमशब्दानुशासनशास्त्रवृत्तेरुक्तत्वात् तदनन्तरमस्य वाक्यस्योक्तत्वेन तदानन्तर्यस्यैवेह ग्रहीतुमौचित्यात्; तथा च शब्दसाधुत्वानुकूलसूत्राणां व्याख्यातत्वेन तत्प्रसङ्गसङ्गत्या तदुपकारकाणां न्यायानां स्मृतिविषयत्वे सत्युपेक्षानर्हत्वरूपमवश्यवक्तव्यत्वमापतितमिति भावः । तथा चैतद्व्याकरणप्रवृत्त्यनन्तरमेतदुपकारकाणां न्यायानामनुशासनाय यत्नः क्रियत इति भावः, एतेन व्याकरणप्रवृत्त्या सहानन्तर्यसम्बन्धोऽपि सूचितः । प्रयोजनं चासन्दिग्धशास्त्रप्रवृत्तिरूपमेव । तत्र नीयते सन्दिग्धोऽर्थो निर्णयमेभिरिति विग्रहे "न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम्" [५.३.१३४.] इति सूत्रेण घञि न्यायशब्दो निपातितः, तत्रार्थनिर्णयकरणत्वरूपस्य लक्षणस्य फलितत्वेन संज्ञासूत्र-विधिसूत्रादीनामप्यर्थनिर्णयानुकूलतया न्यायत्वप्रसक्तिरिति स्वाभिलषितन्यायपदबोध्यप्रकृतग्रन्थप्रतिपाद्यन्यायानामेव लक्षकं लक्षणान्तरमवश्याश्रयणीयम्, तच्चेत्थम्—विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वाप्रकारकशक्यविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं न्यायत्वमिति । न्यायेन कस्यचिद् विधिशास्त्रस्य कुत्रचित् प्रवृत्तेः कुत्रचिन्निवृत्तेश्चावश्यंभावेन तदुपयोगिबोधजनकत्वं न्यायेऽक्षतमेव, विधिसूत्रस्यापि विध्यन्तरप्रवृत्त्याद्युपयोगित्वस्य सत्त्वात् तन्निवृत्तये साधुत्वाप्रकारकेति बोधविशेषणम्, अधिकारसूत्राणां "भवे" [६. ३. १२३.] इत्यादीनामपि विधिशास्त्रप्रवृत्त्युपयोगिसाधुत्वाप्रकारकबोधजनकत्वेन तद्व्यावृत्तयेऽधिकारशास्त्रभिन्नत्वमिति विशेषणम् ॥

तान् न्यायान् विशिनष्टि–**ये त्विति** । **शास्त्रे सूचिता लोकप्रसिद्धाश्चे**ति–अनेन तेषां न्यायानां स्वकल्पितत्वनिरासपूर्वकं शास्त्रप्रक्रियोपयोगित्वं सूचितं भवति, तथा च व्याकरणसूत्राणां नव्यत्वेऽपि न्यायरूपाणामेषां व्याकरणान्तरेष्वपि व्यवहृतत्वेन परम्पराप्राप्तत्वेन चिरन्तनत्वमित्यपि व्यक्तं वेदितव्यम् । **'शास्त्रे'** इत्यनेन प्रकृतव्याकरणशास्त्रे इत्यवगन्तव्यम्, तेन लोकप्रसिद्धानामपि सूचीकटाहन्याय-काकाक्षिगोलकन्याय-डमरुकमणिन्याय-घण्टालालान्यायादीनामिहासंगृहीतत्वेन न न्यूनता, तेषां शास्त्रे सूचितत्वाभावात्; यद्यपि भवत्येवैषामपि क्वचिदवसरेऽत्राऽपि शास्त्रे समुपयोगस्तथापि तेषां प्रकृतशास्त्रेऽनुल्लिखितत्वेन तदसंग्रहेऽपि न हानिः । **लोकसिद्धाश्चे**ति-लोकश्चेह व्याकरणप्रवर्तकप्रामाणिकाप्तजनसमुदाय एव, तत्र प्रसिद्धत्वेन तेषामप्रामाणिकत्वशङ्कानिरासः । **तदर्थमि**ति–ते न्याया एवाऽर्थाः–प्रयोजनानि प्रतिपाद्यत्वेन यत्र कर्मणि तद् यथा स्यात् तथेति भावः । **यत्नः** तत्स्वरूपलाभहेत्वादिनिर्देशरूपः, **क्रियते** विधीयत इत्यर्थः ॥

प्रतिज्ञातं प्रस्तौति–**स्वं रूपं शब्दस्ये**त्यादिना । शब्दानुशासने शब्दैरेव सर्वव्यवहारात् तद्बोध्यनिर्णयप्रयोजकस्य न्यायस्यैव प्रथमं निरूपणीयत्वेनावसरप्राप्तत्वादाह–**स्वं रूपमि**ति–शब्देन हि अर्थः प्रत्याय्यते, अर्थप्रत्यायनार्थमेव शब्दानां प्रयोगात्, तत्र शब्दशास्त्रीयकार्याणामर्थे बाधात् शब्द एव शब्दस्य बोध्यो व्याकरणशास्त्रे इति निश्चीयते, तथा च शब्देन तदर्थकशब्दमात्रस्य ग्रहणापत्तौ तत्स्वरूपस्य तत्पर्यायाणां तद्विशेषाणां च ग्रहणे प्राप्ते नियमार्थोऽयं न्यायः–यत्र शब्दग्रहणं तत्र तस्य स्वरूपमेव ग्राह्यमिति । पाणिनीये तन्त्रे तु संज्ञासूत्रत्वमस्य स्वीक्रियते, संज्ञापक्षेऽपि नियमार्थत्वं संभवत्येव, देवदत्तादयो हि संज्ञाशब्दा नियमार्था एव, 'सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः, सर्वशब्दशक्तिप्रत्याय्यशक्तियुक्तश्चार्थः' इति व्यवहाराय नियमः क्रियते, नियमस्वरूपं च द्विधा–'देवदत्तशब्देनायमर्थो ग्राह्यः' इति 'अयमर्थो देवदत्तशब्देनैव बोधनीयः' इति च । वस्तुतस्तु सर्वेषां शब्दानां सर्वार्थवाचकत्वेऽपि तदस्मदादीनां ज्ञानविषयो न, सर्वार्थशब्दानां विशिष्यास्मदादिभिर्ज्ञातुमशक्यत्वात्, किन्तु योगिनामेव तज्ज्ञानम्, एवं च शास्त्राधिकारिणोऽस्मदादीन् प्रति शास्त्रस्य विधायकत्वमेव न नियमार्थत्वम्, किन्तु प्रकरणादस्यैवार्थस्य शास्त्रे उपस्थितौ अर्थादेव नियमः फलतीति 'व्यवहाराय नियम' इत्युपपन्नं भवति । ननु रूप-रूपिणोरत्र भेदाभावात् शब्दस्येति षष्ठ्यनुपपन्ना, संज्ञा-संज्ञिसम्बन्धश्चानुपपन्न इति चेत्? सत्यम्–' रूपशब्देन "कल्यग्नेरेयण्" [६. १. १७.] इत्यादिसूत्रगृहीताग्निशब्दादिनिष्ठाग्निशब्दत्वादिकं शुकसारिकापुरुषोदीरितभिन्नशब्दव्यक्तिसमवेतं सामान्यमभिधीयते, तथा चानेकसमवेतत्वं सामान्यलक्षणघटकं न दुर्लभम्, न च शुकसारिकाद्युच्चारणेषूच्चारणक्रियैव भिद्यते न शब्द इति वाच्यम्, ताल्वादिव्यापाररूपस्योच्चारणस्य श्रवणानर्हत्वेन शब्दश्रवणानन्तरं जायमानवक्तृविशेषानुमानानुपपत्तेः, उदात्तत्वादिविरुद्धधर्माध्यासाच्च भेदसिद्धेः, वर्णनिष्ठत्वेन प्रतीयमानानामुदात्तत्वादीनां ध्वनिनिष्ठत्वकल्पने मानाभावादिति भावः । तथा च रूपशब्दस्य सामान्यार्थकत्वे 'व्यक्तेः सामान्यं संज्ञा' 'सामान्यस्य वा व्यक्तिः' इति व्याख्याने कामचारः । अयमाशयः–स्वशब्द आत्मीयत्वेन रूपेण व्यक्तिबोधकः; एवं च शब्दस्य तत्तज्जातिविशिष्टस्य स्वं–व्यक्तिः, रूपं–सामान्यसंज्ञकमिति प्रथमव्याख्यानाभिप्रायः, शब्दस्य रूपमुद्दिश्य स्वमित्यनेन व्यक्तिसंज्ञकत्वं विधीयते इति द्वितीयव्याख्यानार्थः । एवं चोपपद्यते सामानाधिकरण्यम्, तथा च व्यक्तिः कार्यं प्रतिपद्यमाना सामान्यप्रतिबद्धैव प्रतिपद्यते,

सामान्यमपि कार्यं प्रतिपद्यमानं व्यक्तिद्वारेणैव प्रतिपद्यते इति फले न कश्चिद् भेदः । पाणिनीयतन्त्रे च सूत्ररूपेणायं न्यायः पठितः, महाभाष्ये च [ पा० सू०—१. १. ६८. ] अस्य न्यायस्य वैयर्थ्यं प्रतिपादितं, तदाशयश्च नागेशेन शब्देन्दुशेखरे संज्ञाप्रकरणे इत्थं प्रतिपादितः—"अर्थे कार्यस्य बाधेऽपि उपस्थितत्वात् 'राज्ञः' इत्यादौ [ राजशब्दात् प्रत्ययविधायकसूत्रस्थराज्ञ इति पदे इति भावः ] तज्जन्यबोधे प्रकारतया भासमानस्य राजन्शब्दस्यैव ग्रहणं भविष्यतीति व्यर्थं सूत्रम् । उपस्थितार्थत्यागे मानाभावेन तस्य विशेषणतयाऽन्वयसम्भवेन च अर्थवत्परिभाषापि सिद्धा । लक्ष्यानुसारात् तत्तत्संज्ञाकरणज्ञानरूपप्रकरणाच्च षान्तसंख्यावाचकषष्शब्दस्य संज्ञाकरणेन शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहणज्ञापनाच्च 'उपसर्गे घोः' [ पा० सू० ३. ३. ९२. ] इत्यादावदोषेणाशब्दसंज्ञेत्यपि व्यर्थम्" इति' "अत एव जनपदापत्यपशुदेवतादिशब्देषु न दोषः, अत एव वृक्षादिषु विशेषाणां ग्रहणम्, "स्वे पुषः" [ पा० सू० ३. ४. ४०. ] इत्यत्र पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणम्, "सभा राजा" [ पा० सू० ४. २. २३. ] इत्यत्र पर्यायाणामेव ग्रहणम्, "पक्षिमत्स्यमृगान् हन्ति" [ पा० सू० ४. ४. ३५. ] इत्यादौ मृगपक्षिणोः पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणम्, मत्स्यपदेन स्वरूपस्य विशेषाणां मीनरूपपर्यायस्य च ग्रहणं सिद्धयति, अन्यथा तदर्थं यत्नः कर्तव्यः + + + + लक्ष्यानुसारिव्याख्यानेन च मम सर्वेष्टसिद्धिः" इति च । अस्यायमाशयः—"कल्यग्नेरेयण्" [ ६. १. १७. ] "जातौ राज्ञः" [ ६. १ ९२. ] इत्यादिसूत्रेषु अग्निराजादिपदैस्तदर्थस्योपस्थितावर्थे कार्यस्य बाधेऽपि तदर्थकसर्वशब्दात् प्रत्ययोत्पत्त्यापत्तेस्तद्वारणाय न्यायः समाश्रीयते । तच्च शब्देनार्थोपस्थितावपि तत्र [ शाब्दबोधे ] शब्दस्यापि प्रकारतया भासमानत्वस्य

"न सोऽस्ति प्रत्ययो लोके, यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं, सर्वं शब्देन भासते ॥"

इति वाक्यपदीयानुसारं सिद्धत्वेन वह्निरूपार्थवाचकाग्निशब्दात् नृपतिरूपार्थवाचकराजशब्दादेव च प्रत्ययोत्पत्त्यैव सिद्धमिति नास्यावश्यकता । *अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्* इत्यस्य न्यायस्य साधनार्थमपि नास्यावश्यकता, स्वभावत एव शब्दादर्थस्योपस्थितौ तत्त्यागे मानाभावेन तन्न्यायस्य सिद्धत्वात् । लक्ष्यानुसारिव्याख्यानस्य न्यायसत्त्वेऽपि तत्र तत्रावश्यकत्वेन व्याख्यानेनैव सकलार्थसिद्धिरिति । तथा हि—"स्वस्नेहनार्थात् पुषः" [ ५. ४, ६५. ] इत्यत्र स्वशब्दस्य तत्पर्यायस्य तद्विशेषाणां च ग्रहणं भवतीति स्वपोषमात्मपोषं रैपोषं धनपोषं गोपोषमित्यादयः प्रयोगा भवन्ति । "पक्षि-मत्स्य-मृगार्थाद् घ्नति" [ ६. ४. ३१. ] इत्यत्र मृगपक्षिणोः पर्यायाणां विशेषस्य स्वरूपस्य च ग्रहणं भवति, मत्स्यपदेन स्वरूपस्य, विशेषाणां मीनरूपस्य पर्यायस्य न त्वन्येषां "पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः । विसारः शकली च०" इत्यमरोक्तानां पर्यायाणाम् । यद्यपि प्रकृतसूत्रेऽर्थग्रहणेन वृत्तौ साधितमेतत्, तथा हि तत्र वृत्तिः—"अर्थग्रहणात् तत्पर्यायेभ्यो विशेषेभ्यश्च भवति" इति, तथापि तदुपलक्षणं लक्ष्यानुसारिव्याख्यानस्यैव, कथमन्यथा मीनरूपपर्यायादेव स्यान्न पृथुरोमादिभ्यः, तथा चेदृशव्यवस्थार्थं लक्ष्यानुसारिव्याख्यानस्यैव शरणीकरणीयत्वेन तेनैव सिद्धे नार्थोऽनेन न्यायेनेति भाष्याशयः । एवं चैवं व्याख्यानेनैव सिद्धेऽस्त्रत्योभयांशस्यानित्यत्वज्ञापनायां क्लिष्टकल्पनमनुचितमेव, तथा हि—"प्राज्ज्ञश्च" [ ५. १. ७९. ] इत्यत्र दारूपग्रहणेन वृत्तिकृत्प्रतिपादितेन तद्विषयेऽशब्दसंज्ञेत्यंशस्य यद्यपि प्रवृत्त्यभावोऽनुमीयते, तथापि न तदनित्यत्वसाधकं भवितुमर्हति, तथा सति ज्ञारूपसाहचर्यस्य वृत्तिकृदाश्रितस्यासंगत्यापत्तेः । एतस्य तदनित्यतानुमापकत्वाख्यानं चानुचितं, पक्षमात्रवृत्तेर्हेतोरसाधारण्यात्, व्याप्तिग्रहणाय हि हेतोः पक्षादन्यत्रापि वृत्तिरावश्यकी, न च तदिह दर्शितमिति । प्रतिपादितं च तदीयन्यासग्रन्थे तस्यातात्त्विकत्वं भङ्ग्यन्तरेणेति सुधीभिर्विचार्यम् ॥ १ ॥

## *सुसर्वार्धदिक्शब्देभ्यो जनपदस्य* ॥२॥

सि०—पूर्वन्यायेन सर्वत्र शब्दस्य स्वं रूपमेव बोध्यमिति निर्णीतम्, तथा च सर्वत्र स्वरूपग्रहणस्यैव प्रसक्तौ "अतः स्मोऽम्" [ १. ४. ५७. ] इत्यादेरकारान्तेषु प्रवृत्तिर्न स्यादिति "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषासूत्रमारब्धम्, एवं च प्रत्ययविधावपि तदन्तविधिप्रसक्तौ गर्गादिभ्यो विहितो यञ् परमगर्गादिभ्योऽपि स्यादिति तद्वारणाय *ग्रहणवता नाम्ना न तदन्तविधिः* इति न्यायः स्वीक्रियते, तथा च "बहुविषयेभ्यः" [ ६. ३. ४५. ] इति सूत्रेण बहुविषयेभ्यो जनपदेभ्यो विधीयमानः प्रत्ययस्तन्मात्रादेव स्यान्न तु तदन्ताच्छब्दादिति सुमागधक इत्यादिलक्ष्याणामसिद्धिरित्याशङ्कायां न्यायोऽयं निर्णयाय समाश्रीयते, स चायं न्यायः पदान्तराध्याहारेण व्याख्येयः—जनपदस्य यत् कार्यमुच्यमानं स्यात् तत् सुसर्वादिभ्यः परस्यापि भवतीति । 'सुसर्वाऽर्धदिक्शब्देभ्यः' इत्यत्र स्वादयः सर्वे प्रसिद्धा एव, दिक्शब्दश्च दिशि दृष्टः शब्द इति व्युत्पत्त्या दिग्वाचकत्वेन रूढः शब्द उच्यते । तत्र, सुसर्वाऽर्धदिशः' इत्येतावतैव दिग्वाचकात् परस्य ग्रहणे सिद्धे शब्दग्रहणेन सम्प्रति दिग्वाचकत्वाभावेऽपि दिशि दृष्टत्वमात्रेण तस्य दिक्शब्दत्वाद् ग्रहणं भवति; दृष्टश्चैवं दिक्शब्दग्रहणं—"प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः" [ २. २. ७५. ] इति सूत्रेऽपि । अत्र ज्ञापकं—"सुसर्वा—ऽर्धाद् राष्ट्रस्य"

[ ७. ४. १५. ] "अमद्रस्य दिशः" [ ७. ४. १६. ] इति सूत्रद्वयमेकदेशानुमत्या सम्मिल्य, तथा हि—राष्ट्रवाचिनः सुसर्वार्धात् परस्योत्तरपदभूतस्य वृद्धिः प्रथमेन विधीयते "बहुविषयेभ्यः" [ ६. ३. ४५ ] इत्यादिसूत्रविहितान् प्रत्ययान् निमित्तत्वेनाश्रित्य; द्वितीयेनापि "अमद्रस्य दिशः" [ ७. ४. १६. ] इति सूत्रेण मद्रभिन्नस्य राष्ट्रवाचकस्योत्तरपदस्य दिग्वाचकात् परस्य राष्ट्रवाचित्वनिमित्तके प्रत्यये परतो वृद्धिर्विधीयते, ततश्च "बहुविषयेभ्यः" [ ६. ३. ४५. ] इत्यादीनां *ग्रहणवता०* इति न्यायविरोधात् तदन्तेभ्यः प्रत्ययविधायकत्वाभावेन निमित्तानुपलम्भादेतयोर्निर्विषयत्वमेव स्यादिति पूर्वं सूत्रं सुसर्वार्धपूर्वस्य जनपदस्य प्रत्ययविधौ ग्रहणस्यानुमापकं, परं च दिग्वाचकपूर्वस्य । तथा च ज्ञापकस्य बाधकतया *ग्रहणवता०* इति न्यायं बाधित्वाऽनेन न्यायेन "बहुविषयेभ्यः" [ ६. ३. ४५. ] इत्यादीनां सुसर्वार्धदिक्शब्दपूर्वादपि प्रत्ययविधानेन सुमगधेषु भवः—सुमागधकः, सर्वमगधेषु भवः—सर्वमागधकः, अर्धमगधेषु भवः—अर्धमागधकः, मगधानां पूर्वो भागः—पूर्वमगधाः, तेषु भवः—पूर्वमागधक इत्यादयः सिध्यन्ति, पूर्वमागधक इत्यत्र च पूर्वशब्दस्य सम्प्रति देशावयववाचकत्वेऽपि दिशि दृष्टत्वेन दिक्शब्दत्वात् प्रत्ययः । ज्ञापकस्य विशेषविषयत्वाश्रयणाच्च सुसर्वार्धदिक्शब्दभिन्नपूर्वस्य जनपदस्य प्रत्ययविधौ ग्रहणं न भवतीति ऋद्धमगधेषु भव इत्यर्थेऽकञोऽभावेन "भवे" [ ६. ३. १२३. ] इत्यनेनाणेव भवतीति आर्धमगधक इत्येव, तत्रोत्तरपदवृद्धेरप्यप्राप्तेः । अयं च न्यायोऽव्यापक एव परिच्छिन्नविषयत्वादिति नास्यानित्यताज्ञापकसंभव इति नित्य एवायम् ॥ २ ॥

## *सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥२॥*

**त०**—निरूपिताऽस्य प्रसङ्गसङ्गतिर्वृत्तौ पूर्वन्यायेन शब्दस्य स्वं रूपमेव बोध्यमित्यादिना । पाणिनीये तन्त्रे "येन विधिस्तदन्तस्य" [पा० सू० १. १. ७२.] इति सूत्रेण प्राप्तस्य तदन्तविधेः "समासप्रत्ययविधौ प्रतिषेधः" इति वार्तिकेन निषेधः पठ्यते महाभाष्ये, तथा च प्रत्ययविधौ तदन्तग्रहणाभावात् बहुविषयेभ्यो जनपदेभ्यः केवलेभ्य एव प्रत्ययः स्यान्न तु तदन्तेभ्य इति तदपवादभूतं "सुसर्वार्धदिक्शब्देभ्यो जनपदस्य" इति वचनं वार्तिकरूपेण पठ्यते महाभाष्ये, तथा च न ज्ञापकादिकं तत्राश्रीयते, *ग्रहणवता नाम्ना न तदन्तविधिः* इति न्यायश्च 'समासप्रत्ययविधौ प्रतिषेधः' इति वार्तिकस्थप्रत्ययांशानुवादमात्रमिति परिभाषेन्दुशेखरे स्पष्टम् । अत्रेदं विचार्यते—स्वमते* ग्रहणवता नाम्ना न तदन्तविधिः* इति न्यायस्यायं न्यायोऽपवादभूत इति हि वृत्तौ प्रतिपादितम्, स न्यायश्च विशिष्य गृहीतनामस्वेव विधिषु तदन्तविधेः प्रतिषेधकः, ध्वनितं चेदम् "असमासे निष्कादिभ्यः" [ पा० सू० ५. १. २०. ] इति सूत्रे महाभाष्ये, तथा च तत्रत्यं भाष्यम्—"ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते; न च ठञ्विधौ काचित् प्रकृतिर्गृह्यते" इति, तत्र कैयटः—यत्र विशिष्टा प्रकृतिरुपादीयते तत्रैव तदन्तविधेः प्रतिषेधः, ठञ्विधौ "[ प्राग्वतेष्ठञ्" पा० सू० ५. १. १८. ] इत्यत्र तु प्रातिपदिकाधिकारात् प्रातिपदिकमात्रं प्रकृतित्वेनाश्रीयते" इति व्याचख्यौ । तथा च विशिष्य आनुपूर्व्यवच्छिन्नविषयताप्रयोजकपदेन नामग्रहण एव तदन्तविधिनिषेधकोऽसौ न्यायः, "बहुविषयेभ्यः" [ ६. ३ ४५. ] इति सूत्रं हि न विशिष्य किमपि नाम गृह्णाति किन्तु बहुत्वविषयेभ्यो राष्ट्रवाचिनामभ्य इति सामान्यत एव, ततश्च सुमागधकादिषु * ग्रहणवता० * इति न्यायस्याप्रवृत्त्या स्वत एव "बहुविषयेभ्यः" [ ६. ३. ४५. ] इति प्रत्ययः स्यादेवेति न प्रकृतस्य न्यायस्योत्थानस्यावश्यकतेति । अत्रोच्यते—आनुपूर्व्यवच्छिन्नविषयताप्रयोजकपदेन नामग्रहण एव तस्य तदन्तविधिनिषेधस्य प्रवृत्तिरिति स्वीकारे "द्विस्वरादनद्याः" [ ६. १. ७१. ] इत्यादिष्वपि नामग्रहणवत्त्वाभावात् तदन्तविधेरप्रतिषेधे 'दात्तेय' इत्यत्र दत्ताशब्दादिव परमदत्ताशब्दादपि एयण् स्यात्, ततश्च आनुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वमपहाय नामवृत्तिविषयताप्रयोजकत्वमेव ग्रहणवन्नामत्वमित्यास्थेयम्, [ प्रतिपादयिष्यते चैतत्तन्न्यायव्याख्यावसरे विस्तरेण ], एवं च "बहुविषयेभ्यः" [ ६. ३. ४५. ] इत्युक्त्या बहुवचनमात्रविषयाणामङ्ग-वङ्ग-वृजि-मद्र-मगध-पञ्चालादीनां नाम्नां विषयतायाः समुपस्थित्या नामवृत्तिविषयताप्रयोजकपदत्वमस्याक्षतमेवेति तदन्तविधिप्रतिषेधप्राप्तिरक्षतैवेति तत्प्रतिषेधकोऽयं न्याय आवश्यक एवेति । नन्वत्र "सुसर्वार्धाद्राष्ट्रस्य" [ ७. ४. १५. ] इति "अमद्रस्य दिशः" [ ६. ४. १६. ] इति च वृद्धिविधानं यज्ज्ञापकत्वेनोपन्यस्तम्, तन्नोचितं, यतः "मद्रादञ्" [ ६. ३. २४.] इति सूत्रवृत्तावेतद्विहितस्याञ्प्रत्ययस्य "बहुविषयेभ्यः" [ ६. ३. ४५. ] इति प्राप्तस्याकञः, तदपवादभूतस्य "वृजिमद्राद्देशात् कः" [ ६. ३. २८. ] इति विहितस्य कस्यापवादत्वं यदुक्तं तत् तयोः [ अकञ्-कयोः ] तदन्तादप्राप्त्या न संगच्छत इति तथा वचनं ज्ञापयति यत्—सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिप्रापको न्यायोऽस्तीति प्रतिपादितत्वेन तस्यैव ज्ञापकत्वोपन्यासस्यौचित्यादिति चेत्? सत्यम्, तस्यैकदेशानुमत्या दिक्शब्दविषये तन्न्यायसत्त्वानुमापकत्वसम्भवेऽपि सुसर्वार्धांशे वृद्धिविधायकसूत्रस्यैव ज्ञापकत्वस्याश्रयणमुचितमेति दिक्शब्दांशेऽपि तादृशस्य वृद्धिविधायकस्यैव ज्ञापकत्वमाश्रयणीयमिति विचारेण तस्यानुल्लेखात्, ज्ञापिते च तस्मिन् न्यायेऽत्राञोऽकञ्कापवादत्ववचनमपि तदुदाहरणत्वेनोचितमेवेति न

काप्यनुपपत्तिः, सति सूत्रस्य ज्ञापकत्वसम्भवे वृत्तिवचनस्य ज्ञापकत्वाश्रयणं वृत्तिकृतां न संगतं स्यात्, स्ववचनेन विशेषवचनकल्पनायाः प्रौढित्वख्यापकत्वात्, तथा च "तर्हीदमेव ज्ञापकं सुसर्वार्धदिक्शब्देभ्यस्तदन्तविधेः" इति वृत्तौ 'इदमेव' इत्येवशब्दोऽप्यर्थकः—इदमपीति; यदि च 'इदमेव'इत्यस्याञ्विधानमेवेत्यर्थः, तस्य च "दिक्पूर्वपदान्मद्राचानाम्नः" इत्येकयोगे कर्तव्ये पृथग्योगकरणादनुवर्तमानणप्रत्ययबाधनार्थत्वं 'प्राग्जितादण्' इत्यधिकारप्राप्ताण्विधानार्थत्वं चाश्रित्य 'मद्रात्' इत्येव सूत्रयितव्ये अञ्विधानं बाधकबाधनार्थं सत् बाध्ययोरकञ्कयोस्तदन्तेऽपि प्रवृत्तिं सूचयतीति भावः, तर्हि तदप्यस्तु—एकदेशानुमत्या ज्ञापकम्, सर्वांशेन तु वृद्धिविधायकसूत्रद्वयमेव ज्ञापकमित्यास्थेयमित्यलं बहुगवेषणेनेति । तथा च बहुविषयेभ्यो राष्ट्रवाचिभ्यो योऽकञादिविधिरुक्तः स तदन्तविधिनाऽवयवप्राधान्यविवक्षया वा यद्यपि तदन्तेभ्योऽपि प्राप्तः किन्तु *ग्रहणवता०* इति न्यायेनात्र तदन्तविधेः प्रतिषेधादप्राप्तोऽनेन न्यायेन प्रतिप्रसूयत इति सिद्धम् । ननु पूर्वमागधक इत्यादौ पूर्वेषु मगधेष्विति विगृह्य मगधशब्दादेव प्रत्ययं विधाय पश्चात् पूर्वशब्देन समासे तत्र वृद्धिविधायकसूत्रस्य चारितार्थ्यसम्भवे न तस्य ज्ञापकत्वमुचितमिति चेत्? न—"दिगधिकं संज्ञा-तद्धितोत्तरपदे" [ ३. १. ९८. ] इति सूत्रेण तद्धिते विषयभूते एव कर्मधारयसमासविधानेन समासात् पूर्वं प्रत्ययोत्पत्तेरसम्भवेन समासे कृत एव तदुत्पत्तेः; असमस्तस्य केवलस्य मगधशब्दस्य पूर्वशब्दमपेक्षमाणस्य सापेक्षमसमर्थमिति न्यायेनासमर्थत्वादसामर्थ्ये च सति तद्धितप्रत्ययोत्पत्तेरसम्भवात्, "समर्थः पदविधिः" [ ७. ४. १२०. ] इति सूत्रेण समास-नामधातु-कृत्तद्धितोपपदविभक्ति-युष्मदस्मदादेश-प्लुतरूपाणां पदविधीनां समर्थपदाश्रयत्वविधानात्, सामर्थ्यं च व्यपेक्षा एकार्थीभावश्च, व्यपेक्षायाः सामर्थ्यस्य वाक्ये सम्भवेऽपि एकार्थीभावरूपसामर्थ्यस्य समासादिनिष्ठस्य समासादौ विहिते एव सम्भवादिति समासात् पूर्वं नास्ति तद्धितोत्पत्तिरिति पूर्वमागधक इत्यादेर्न्यायं विनाऽसिद्धिरेवेति ॥ २ ॥

---

## * ऋतोर्वृद्धिमद्विधाववयवेभ्यः * ॥ ३ ॥

**सि०**—तदन्तविधिप्रापकपूर्वन्यायप्रकरणात् तत्समानविषयो न्यायो व्याख्यातुमवसरप्राप्त इति पूर्वन्यायसदृशोऽयं न्यायो व्याख्यातुमुपक्रम्यते । वृद्धिः कार्यत्वेनास्त्यस्मिन्निति वृद्धिमान्, तथा च यस्मिन् प्रत्यये वृद्धिर्विधीयते स प्रत्ययो वृद्धिमान्, स च "वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते" [ ७. ४. १. ] इति सूत्रानुसारं ञ्णित् प्रत्ययः, ऋतोरिति पञ्चम्यन्तम्, तथा च ऋतुवाचकाच्छब्दात् ञ्णित्प्रत्ययविधौ ञ्णित्प्रत्ययस्य विधाने कर्तव्ये तदवयवपूर्वात् ऋत्वन्तादपि स प्रत्ययो भवतीति न्यायार्थः । तेन "वर्षाकालेभ्यः" [ ६. ३. ८०. ] इति सूत्रविहित इकण् यथा वर्षासु भवमित्यर्थे वार्षिकमित्यत्र भवति, तथा वर्षाणां पूर्वो भाग इत्यर्थे "पूर्वापराधरोत्तरमभिन्नेनांशिना" [ ३. १. ५०. ] इति समासे पूर्ववर्षा इति, तासु भवमित्यर्थेऽपि तेनेकण्प्रत्यये कृते "अंशादृतोः" [ ७. ४. १४. ] इत्यवयववाचकात् परस्य ऋतुवाचकस्य वर्षाशब्दस्यादिस्वरस्य वृद्धौ पूर्ववार्षिकमिति भवति; एवं शिशिरे भवमित्यर्थे यथा शैशिरमिति भवति, तथा शिशिरस्य पूर्वो भागः पूर्वशिशिरं, तत्र भवमित्यर्थे पूर्वशैशिरमित्यत्राऽपि "भर्तुसन्ध्यादेरण्" [ ६. ३. ८९. ] इत्यण् भवति, वृद्धिश्च पूर्ववदेव "अंशादृतोः" [ ७. ४. १४. ] इत्यनेनोत्तरपदादिस्वरस्य । वृद्धिमद्विधाविति च वृद्धिनिमित्तकप्रत्ययभिन्नविधौ तदन्तविधिव्यावर्तनाय, तथा च "प्रावृष एण्यः" [ ६. ३. ९२. ] इति विहित एण्यप्रत्यये वृद्धिप्राप्त्यभावेन तद्विधौ तदन्तग्रहणाभावात् प्रावृषः पूर्वो भागः पूर्वप्रावृट्, तस्यां भवमित्यर्थे तत्प्राप्त्यभावात् ऋतुनिमित्तक एवाण् भवति—पूर्वप्रावृषमिति, न तु एण्यः । अवयवेभ्य इति च ज्ञापकसाजात्यप्रदर्शनम्, अन्यथा हि पूर्वन्यायाद् दिक्शब्देभ्य इत्यनुवृत्त्या दिक्शब्दपूर्वपदस्याऽपि ग्रहणमित्येव सिध्येतेति पूर्वासु ऋत्वन्तरैर्व्यवहितासु वर्षासु भवमित्यर्थेऽपि "वर्षाकालेभ्यः" [ ६. ३. ८०. ] इति वर्षालक्षण इकण् न भवति किन्तु काललक्षण एव, तथा च "अंशादृतोः" [ ७. ४. १४. ] इत्युत्तरपदवृद्धिरपि न भवति पूर्वशब्दस्यांशवाचित्वाभावात् । एवं पूर्वस्मिन् शिशिरे भवमित्यर्थे ऋतुलक्षणोऽण् न भवति किन्तु काललक्षण इकणेवेति पौर्ववार्षिकम्, पौर्वशैशिरिकमिति, अत्र "वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते" [ ७. ४. १. ] इत्यादिस्वरस्यैव वृद्धिः । अस्य ज्ञापकं तु "अंशादृतोः" [ ७. ४. १४. ] इत्यनेनोत्तरपदस्य ऋतुवाचिनोंऽशवाचिनः परस्य वृद्धिविधानमेव, तद्धि अंशवाचिपूर्वपदात् परस्मादृतुवाचिनः ञ्णित्प्रत्ययोत्पत्तौ सत्यामेव संगच्छेत, न च ततः प्रत्ययस्य प्राप्तिरस्ति *ग्रहणवता नाम्ना०* इति तदन्तविधिनिषेधात्, तथा च तद् व्यर्थमेव स्यादिति स्वसार्थक्याय तदन्तविधिं ज्ञापयतीत्यवयववाचिपूर्वादृत्वन्तादपि ञ्णित् प्रत्ययः सिद्धो भवति ॥ ३ ॥

---

## *ऋतोर्वृद्धिमद्विधावयवेभ्यः ॥ ३ ॥*

**त०**—एतन्न्यायफलप्रदर्शनावसरे यत्तु कैश्चित्—"पूर्वावयवयोगात् पूर्वाः—प्रथमा वर्षाः—पूर्ववर्षाः, तासु भवमित्यर्थे "पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम्" [ ३. १. १०३. ] इति सूत्रेण कृतसमासात् पूर्ववर्षाशब्दादपि "वर्षाकालेभ्यः" [ ६. ३. ८०. ] इत्यकणि पूर्ववार्षिकम्' इत्युक्तं तन्न रोचयामहे, तथा

हि-पूर्वावयवसम्बन्धनिमित्तकस्तत्र पूर्वशब्दप्रयोगो न तु वास्तविकः, तथा च तत्र पूर्वशब्दस्य नावयववाचित्वमपि तु तत्सम्बद्धप्रथमवर्षावाचित्वमित्यवयवत्वाभावात् पूर्वासु वर्षासु भवमित्यर्थ इव न तदन्तविधेः प्राप्तिर्न वा तत्र "अंशाहतोः" [ ७. ४. १४. ] इति वृद्धिरपि प्राप्ता, पूर्वशब्दस्य स्वार्थबाधे हि अर्थान्तरसङ्क्रमणमेव प्रथमवर्षालक्षकत्वम्, शक्यार्थबाध एव हि लक्षणायाः स्वीकारात्, एवं चावयववाचित्वाभावः स्पष्ट एव । एवं वृद्धिमद्विधाविति किमिति, अवयवेभ्यः किमित्यपि पदकृत्यप्रदर्शनप्रकारोऽयुक्त इव प्रतिभाति, "अंशाहतोः" [ ७. ४. १४. ] इति वृद्धिविधायकेन सूत्रेण ज्ञापितस्यास्य न्यायस्य स्वविषयसाजात्यवदेव वस्तु ज्ञापनीयं, येन स्वस्य चारितार्थ्यं स्यात्, नहि प्रत्ययविधौ तदन्तविधिरिति ज्ञापयितुं शक्यते, असति बाधके हि प्रमाणानां सामान्ये पक्षपातः, अस्ति चात्र बाधकं-ग्रहणवतेति न्यायस्य निर्विषयत्वापातो बहुलक्ष्योपप्लवश्च; तथा च तन्न्यायव्याप्यमेव किमपि ज्ञापनीयं येन स्वस्य चारितार्थ्यमिष्टलक्ष्यसिद्धिश्च भवेत्, तत्र ज्ञाप्यरूपोपस्थापकं चान्यन्न किञ्चिदस्तीति ज्ञापकशास्त्रीयोद्देश्यनिमित्ताभ्यामेव ज्ञाप्यरूपं गृह्यत इति वृद्धिमत्प्रत्ययविषयत्वमवयवविषयत्वं च ज्ञाप्येऽर्थेऽवश्यमेवेष्टव्यम् । तथा चेत्थं व्यावर्त्य प्रदर्शनं न्यायाप्रवृत्तिस्थलपरिचयमात्रार्थमिति स्वीकर्तव्यम् । यद्यप्यवयवेभ्य इत्यस्याभावेऽपि कथञ्चिदेकदेशे स्वरितत्वप्रतिज्ञया पूर्वन्यायाद् दिक्शब्देभ्य इत्यस्यानुवृत्त्या दिग्वाचकशब्दानामवयववाचित्वस्यापि दर्शनाज्ज्ञापकसार्थक्यसंभावनया तदंशे शङ्कयितुं शक्यते, तथापि तत्क्लिष्टकल्पनामात्रम्, गमके सत्येवैकदेशे स्वरितत्वस्वीकारात् । न्यायानां च ज्ञापकभेदात् परस्परासम्बद्धत्वेन परस्परोपकारकत्वाभावात् । ज्ञापकसूत्रे च 'ऋतोः' सामान्येनैवोपादानमिति ऋतुसामान्यमेव ज्ञाप्यार्थशरीरेऽपि प्रवृष्टमिति निर्विशेषं न सामान्यमिति नैयायिकाभ्युपगमरीत्या ऋतुविशेषवाचकविषये "वर्षाकालेभ्यः" [ ६ ३. ८०. ] इत्यत्र ऋतुसामान्यवाचकविषये "भर्तुसन्ध्यादेः" [ ६. ३. ८९. ] इत्यत्र चोभयत्र तदन्तविधिः, तदनुकूलमेव च पूर्ववार्षिकमिति पूर्वशैशिरमिति चोदाहरणद्वयं प्रदर्शितं वृत्तौ । ननु पूर्वासु ऋत्वन्तरैर्व्यवहितासु वर्षासु भवमित्यर्थे यत्–काललक्षण इकण् भवतीत्युक्तं तन्न चारु, वर्षाशब्दस्यैव कालवाचित्वात् पूर्ववर्षाशब्दस्य तदभावात्, न चे तदन्तविधिना प्राप्तिः *ग्रहणवता०* इति तदन्तविधिप्रतिषेधादिति चेत्? सत्यम्–"वर्षाकालेभ्यः" [ ६. ३. ८०. ] इत्यत्र यथाकथंचित् कालवृत्तेः शब्दस्य कालवाचकत्वेनाश्रयणात्, अत एव "भर्तुसन्धादेरण्" [ ६. ३. ८९. ] इति सूत्रे भार्थात् ऋत्वर्थात् सन्ध्यादेश्च कालार्थादित्युक्तं वृत्तौ, अन्यथा नक्षत्राद्यर्थानां कालार्थत्वाभावात् तेषां कालार्थत्वविशेषणमसङ्गतमेव स्यात् । *ग्रहणवता०* इति न्यायश्च विशिष्य तत्तन्नामत्वेन केनचित् प्रतिनियतधर्मेण वा संगृह्य यत्र नामग्रहणं तत्रैव प्रवर्तेत इति पूर्वमुक्तत्वात् । "वर्षाकालेभ्यः" [ ६. ३. ९०. ] इत्यत्र च बहुवचननिर्देशेन यथाकथंचित् कालवृत्तीनामेव ग्रहणमिति प्रागुक्तमिति न तत्र ग्रहणवतेति न्यायस्य प्रवृत्तिः, यथाकथंचित्कालवृत्तीनां तत्र ग्रहणादेव साक्षात्कालवृत्तिभ्यो मास-संवत्सर-दिवसादिशब्देभ्यः प्रत्यये, मासे भवं मासिकं संवत्सरे भवं सांवत्सरिकं, दिवसे भवं दैवसिकमितिवत् निशासहचरितमध्ययनं निशा प्रदोषसहचरितमध्ययनं प्रदोष इति निशाप्रदोषशब्दाभ्यामुपचरितार्थवृत्तिभ्यामपि प्रत्यये तयोर्जयीत्यर्थेऽपि कालवाचित्वनिमित्तकेकण्प्रत्यये नैशिकः प्रादोषिक इति भवति । एवं कदम्बपुष्पसहचरितः कालः कदम्बपुष्पम्, यवबुससहचरितः कालो यवबुसमित्यादिरूपेणोपचरितार्थानामपि कालवृत्तित्वेन ग्रहणं ततस्तन्निमित्तकप्रत्ययोत्पत्तिश्च भवति, एवंविधाश्चोपचरितार्थपराः कालवृत्तयो न केनचिदुपसंग्राहकरूपेण निर्देष्टुं शक्यन्त इति न तद्ग्रहणस्य नामग्रहणत्वमिति न तत्र *ग्रहणवता०* इत्यस्य प्रवृत्तिरिति तत्त्वम् । एवं च ऋतुवाचिभ्यो योऽणादिविधिरुक्तः स तदन्तविधिनाऽवयवप्राधान्यविवक्षया वा ऋत्वन्तेभ्योऽपि यदि स्यात् तदैव "अंशाहतोः" [ ७. ४. १४. ] इत्यस्य सार्थक्यमिति, तच्च न सिध्यति *ग्रहणवता०* इति तदन्तविधिप्रतिषेधादिति तन्न्यायबाधकोऽयं न्यायो वृद्धिविधायकेन तेन ज्ञापित इति तदन्तविधेः प्रतिप्रसवोऽयं न्याय इति सारम् । पाणिनीये तन्त्रे चायं न्यायः "येन विधिस्तदन्तस्य" [ पा० सू० १. १. ६९. ] इति सूत्रे समासप्रत्ययविधौ प्रतिषेध इति वार्तिकनिषिद्धतदन्तविधिप्रतिप्रसवरूपेण वार्तिकत्वेनोक्त इति वचनरूपमेवेदमिति न तत्र ज्ञापकापेक्षाऽस्ति । फलं चोभयोस्तन्त्रयोः समानमेवेति ॥ ३ ॥

## ॥ स्वरस्य ह्रस्व-दीर्घ-प्लुताः ॥ ॥ ४ ॥

सि०—"एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः" [ १. १. ४. ] इत्यनेन एक-द्वि-त्रिमात्राणां ह्रस्व-दीर्घ-प्लुतसंज्ञाः विहिताः, ह्रस्वादिविधिप्रदेशेषु च प्रायः स्थानिविशेषा अनुक्ताः, तत्र कस्य स्थाने ते आदेशा इत्यनिर्णयप्रसङ्गे निर्णयार्थोऽयं न्यायः प्रस्तूयते । ह्रस्व-दीर्घ-प्लुता आदेशाः स्वरस्यैव स्युर्न तु व्यञ्जनस्येति न्यायार्थः । तत्र ह्रस्वविधायकं सूत्रं "क्लीबे" [ २. ४. ९७. ] इति, तत्रैतन्न्यायबलादेव नपुंसकवृत्तेः स्वरान्तस्य नाम्नो ह्रस्वः स्यादित्यर्थो लभ्यते, तत्र च "षष्ठ्याऽन्त्यस्य" [ ७. ४. १०६. ] इति परिभाषासूत्रेणान्त्यस्य ह्रस्वो भवति, यथा श्रिया सह वर्तते यत् कुलं तत् सश्रि, अत्र ईकारस्य ह्रस्वः । तथा च पदोपस्थापकोऽयं न्यायः, यत्र ह्रस्वादयो विधीयन्ते तत्र स्थानिनिर्देशपरं 'स्वरस्य' इति पदमुपतिष्ठत इत्यर्थात्, एतद-

भावे च “क्लीबे” [२. ४. ९८.] इत्यस्य नपुंसकवृत्तेर्नाम्नो ह्रस्वः स्यादित्यर्थे यद्यपि सश्रि कुलमित्यादि सिद्ध्यति, नाम्न इति षष्ठ्या निर्दिष्टत्वेन “षष्ठ्यान्त्यस्य” [७. ४. १०६.] इति परिभाषयाऽन्त्यस्य स्वरस्यैव ह्रस्वो विधीयते, किन्तु ‘तत्’ इत्यादि व्यञ्जनान्तस्थलेऽपि तत्प्रवृत्तौ तकारस्य स्थाने तदासन्नो ह्रस्व ऌकारः स्यादिति तद्वारणायास्यावश्यकत्वम् । एवं दीर्घविधेरुदाहरणम्—“अच्च् प्राग् दीर्घश्च” [२. १. १०४.] इति, अत्रापि स्वरस्येत्युपस्थित्या ‘प्रतीचः’ इत्यत्र प्रतेरिकारस्य दीर्घः, स्वरस्येति वचनाच्चायं दीर्घो व्यञ्जनस्य न भवति, यथा दृषदमञ्चतीति तान् ‘दृषच्चः’ इति, न चात्र दकारस्यासन्नो दीर्घो नास्तीति वाच्यम्, दन्त्यस्थानसाम्येन ऌकारस्यैव दीर्घत्वात् । प्लुतोदाहरणं यथा—“दूरादामन्त्र्यस्य गुरुर्वैकोऽपि लनृत्” [७. ४. ९९.] इति ‘हे चैत्र३ एहि’ इत्यत्र हि स्वरस्यैव प्लुतो भवति, तत्फलं तु “प्लुतोऽनितौ” [१. २. ३२.] इत्यसन्धिः । ज्ञापकश्चास्य न्यायस्य ह्रस्वादिविधौ स्थानिनिर्देशाभाव एव । प्लुतविधौ यद्यपि “सम्मत्यसूयाकोप०” [७. ४. ८९.] इत्यादिसूत्रे स्थानी निर्दिष्टो दृश्यते तथापि ह्रस्व-दीर्घयोः सहचारित्वमात्रेण प्लुतस्यापि न्याये पाठः । अथवा यदि कुत्रचिदन्यव्याकरणे स्थानी न निर्दिष्टः स्यात् तत्राऽपि स्वरस्य प्लुतो भवेदित्येवमर्थः पाठः, न्यायसूत्राणामेषां सकलव्याकरणसाधारणत्वात्, यथा पाणिनीयव्याकरणे “ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः” [पा० सू० ८. २. ९१.] इति सूत्रेण आदेः प्लुतो विधीयते, स च स्वरस्यैव यथा स्यादित्येवमर्थं तदावश्यकमिति संभावनामात्रेण स्वकीयतन्त्रानुसारमप्युदाहृतमिति बोध्यम् ॥ ४ ॥

## *स्वरस्य ह्रस्व-दीर्घ-प्लुताः* ॥ ४ ॥

त०—विधिशास्त्रोपकारकेषु न्यायेषु प्रक्रान्तेषु तदुपकारकत्वेन बुद्ध्युपारूढतयाऽयमपि न्यायोऽवसरप्राप्त इति व्याख्यायते । अत्रेदं विचार्यते—किमयं न्यायः “षष्ठ्याऽन्त्यस्य” [७. ४. १०६.] इति परिभाषाया अपवादभूतोऽथवा शेषभूत इति, तथाहि—‘क्लीबे” [२. ४. ९७.] *इत्यादौ * नपुंसकवृत्तित्वयोग्यतया नाम इति लब्धम्, तच्च षष्ठ्यन्तम्, तथा च “षष्ठ्याऽन्त्यस्य” [७. ४. १०६.] इत्यस्यापि विषयः, ह्रस्वविधायकतया अस्य न्यायस्य च, तत्र यद्ययं न्यायस्तदपवादभूत एव स्यात् तर्हि गाः पाति यत् कुलं तत् ‘गोपम्’ इत्यादौ गोशब्दोकारस्य ह्रस्वः स्यात्, सुवाक् कुलमित्यादावनन्त्यस्य ‘वा’घटकाकारस्य च स्यात्, अतश्च तच्छेषभूत इत्यास्थेयम् । तथा च स्वरस्यान्त्यस्येत्यर्थे, अथवोभयोरपि नामविशेषणत्वात् स्वरान्तस्य नाम्न इत्यर्थे, गोपमित्यादावन्त्यस्यैव भवति, सुवाक् कुलमित्यादौ नाम्नः स्वरान्तत्वाभावाच्च न भवति, किन्तु “क्रमो दीर्घः परस्मै” [४. २. १०९.] “ष्ठिवूक्लम्वाचमः” [४. २. ११०.] इत्यादौ स्वरान्तत्वाभावेनाप्रवृत्त्या तत्र ‘स्वरस्य’ इति वक्तव्यं स्यात्, येन तेषां स्वरस्य दीर्घो भवेदिति चेत्? सत्यम्—अत एव पदोपस्थापकपक्षस्याश्रयणात् अयमाशयः—नायं “षष्ठ्याऽन्त्यस्य” [७. ४. १०६.] इति परिभाषाया अपवादभूतो नापि शेषभूतः, किन्तु तदसम्बद्धः स्वतन्त्र एव ह्रस्वादिविधिषु स्वरस्येति पदमुपस्थापयति । तत्र च विशेष्यविशेषणभावस्य कामचारत्वाल्लक्ष्यानुसारं क्वचिद् गृह्यमाणेन नामादिनेदं विशेष्यते क्वचिच्च तस्यैवेदं विशेषणं भवति, तथा च नामादेर्विशेष्यत्वे स्वरान्तस्य नाम्नो ह्रस्व इत्याद्यर्थे सति “षष्ठ्याऽन्त्यस्य” [७. ४. १०६.] इति परिभाषामाहात्म्येन स्वरान्तस्य नाम्नोऽन्त्यस्य ह्रस्वो भवति, स्वरस्य विशेष्यत्वे च “क्रमो दीर्घः०” [४. २. १०९.] क्रमः स्वरस्य दीर्घो भवतीत्याद्यर्थाश्रयणान्न क्वापि दोषः । स्पष्टश्चायमर्थः “अचश्च” [पा० सू० १ २. २९.] इति सूत्रे महाभाष्ये । अयं च न्यायो यत्र ह्रस्वदीर्घादिशब्देन ह्रस्वदीर्घादीनां विधानं तत्रैव प्रवर्तते न तु यत्र स्वरूपतो दीर्घादिविधानं तत्र । यथा “दिव औः सौ” [२. १. ११७.] इत्यनेन दीर्घस्वरूपस्यौकारस्य विधानेऽपि नायं न्यायः प्रवर्तते, तेन स्वरभिन्नस्य व्यञ्जनस्य वस्य औकारादेशो भवति । एवम् “आ द्वेरः” [२. १. ४१.] इत्यनेन ह्रस्वस्याकारविधानेऽपि तत्र नास्य प्रवृत्तिरिति तदादिशब्दान्त्यस्याकारो भवति, उभयत्र दीर्घह्रस्वशब्दाभ्यामविधानात् । नन्वेवं तदर्थं यत्नः कर्तव्यो येन विज्ञायेतेदं यत् संज्ञया विधाने एवायं न्यायः प्रवर्तत इति इति चेत्? न—ह्रस्वो दीर्घः प्लुत इत्येवं भाव्यमानः स्वरः स्वरस्य स्थाने भवतीत्येवं व्याख्यानादेव तल्लाभात् । केचित्तु—“ननु व्यञ्जनस्यार्द्धमात्रिकत्वेनैकमात्रत्वादिलक्षणानां ह्रस्वत्वादीनां प्रसङ्ग एव नास्तीति कोऽर्थोऽत्र न्यायेन?, मैवम्—अर्द्धमात्रिकयोः समुदाये एकमात्रत्वमपि सम्भवेत्, तथा च प्रतक्ष्येत्यत्र क्षस्य ह्रस्वसंज्ञत्वे “ह्रस्वस्य तः०” [४. ४. ११३.] इति तागमप्रसङ्ग इत्यादौ साफल्यात् । स्वरस्येत्येकवचनोक्तेश्च तितउ छत्रमित्यत्राद्युतोः समुदितयोर्द्विमात्रत्वेऽपि दीर्घसंज्ञाया अभावात् “अनाङ्-माङः०” [१. ३. २८.] इति द्वित्वविकल्पो न स्यात्” इति वदन्ति, अपरे त्वेवमाहुः—तदेतत् परिभाषाऽसम्बद्धार्थकथनमेव, इयं हि परिभाषा ह्रस्वादिविधिविषयेऽनिर्दिष्टस्थानित्वेन स्थानिनिर्देशार्था व्यञ्जनस्य तत्स्थानित्वप्रतिषेधार्था चेति तदीयग्रन्थे स्पष्टत्वात्, ‘प्रतक्ष्य, तितउ छत्र’मित्यादौ हि न ह्रस्वदीर्घविधानस्य विषयः किन्तु ह्रस्वदीर्घसंज्ञाविषयः, तथा च नात्रैतन्न्यायचर्चाऽऽवश्यकी । अयमाशयः—स्वरस्येति कथनेन व्यञ्जनस्य स्थाने ह्रस्वाद्यादेशस्यैव व्यावृत्तिर्भवितुं शक्नोति न तु व्यञ्जने ह्रस्वत्वस्य, एवं स्वरस्येत्येकवचने-

नैकस्यैव स्वरस्य स्थाने दीर्घाद्यादेशः, न तु स्वरद्वयस्य स्थाने इत्येव कथयितुं शक्यते, न तु समुदितयोः स्वरयोर्दीर्घत्वाभावः [ दीर्घसंज्ञाभावः ] इति । तथा चेदं कथनं ह्रस्वादिसंज्ञाविधायकसूत्रविषयमेवोचितम्, ह्रस्वादिसंज्ञाविधायकसूत्रं च "एकद्वित्रिमात्रा ह्रस्व-दीर्घ-प्लुताः" [ १. १. ५. ] इति, तत्र च व्यञ्जनसमुदायस्य स्वरसमुदायस्य च संज्ञाव्यावृत्त्यर्थमेव "औदन्ताः स्वराः" [ १. १. ४. ] इति पूर्वसूत्रात् 'औदन्ताः' इति पदमनुवर्त्य एक-द्वि-त्रिमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्वादिसंज्ञाः स्युरित्यर्थः प्रदर्शितो वृत्तौ । तथा चेह नेदं शङ्कासमाधानं युक्तमिति । पाणिनीये तन्त्रे महाभाष्येऽपि "ऊकालोऽच् ह्रस्वदीर्घप्लुतः" [ पा० सू० १. २. २७. ] इति ह्रस्वादिसंज्ञाविधायकसूत्रे 'अच्' इति पदस्य [ स्वरार्थकस्य ] प्रयोजनप्रदर्शनायैव प्रतक्ष्यादीनामुपादानं कृतमस्ति । तथाहि—"अचश्च" [ पा० सू० १. २. २८. ] इति सूत्रशेषे अथ पूर्वस्मिन् योगे अज्ग्रहणे सति किं प्रयोजनम् ? "अज्ग्रहणं संयोगाच् समुदायनिवृत्त्यर्थम्" अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थम्, अच्समुदायनिवृत्त्यर्थं च, संयोगनिवृत्त्यर्थं तावत् प्रतक्ष्य, प्ररक्ष्य, "ह्रस्वस्य पिति कृति तुक्" [ पा० सू० ६. १. ७१. ] इति तुङ् मा भूदिति, अच्समुदायनिवृत्त्यर्थं तितउच्छाया "दीर्घात् पदान्ताद्वा" [ पा० सू० ६. १. ७६. ] इति विभाषातुङ् मा भूदिति । स्पष्टमेवैतद्भाष्यस्य ह्रस्वादिसंज्ञाविषयत्वं न तद्विधिविषयत्वम् । तथा च ह्रस्वादिविधिविषयके न्याये प्रतक्ष्येत्यादिलक्ष्यव्यावृत्तिप्रदर्शनमसम्बद्धमेवेत्यलमधिकेनेति ॥ ४ ॥

## *आद्यन्तवदेकस्मिन्* ॥ ५ ॥

**सि०**—अत्रैकशब्दोऽसहायार्थकः, न तु संख्यार्थकः, बहुषु सत्स्वपि एकत्वस्य तन्मध्यपतितत्वेन तस्याव्यावर्तकत्वं स्यात्, एतच्च विवरणे स्पष्टम् । तथा चास्य न्यायस्य **एकस्मिन्** असहाये–आदित्वा-ऽन्तत्वव्यवहारप्रयोजकशून्ये, **आद्यन्तवत्** आदिश्चान्तश्चाद्यन्तौ तयोः सतोरिवेत्यर्थे आद्यन्तवदिति सप्तम्यन्तादिवार्थे वतिः [ 'वत्' प्रत्ययः ], आद्यन्तयोः सतोर्यादृशो व्यवहारो भवति तादृशो व्यवहारः, तन्निमित्तकं कार्यं च स्यादित्यर्थः, वस्तुतस्तु व्यवहारस्यापि कार्यार्थतया कार्यमेवातिदिश्यते न व्यवहार इत्येव स्वीकर्तव्यम् । अयमाशयः–सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स 'आदिः' इत्युच्यते, सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्त इत्युच्यते, ततश्च अन्यस्मिन् सत्येवाद्यन्तव्यवहारस्तन्निमित्तकं कार्यं च भवति, असति चान्यस्मिन्नसहाये [ एकस्मिन् ] आद्यन्तव्यवहारो न प्राप्त इति तन्निमित्तकानि कार्याणि न सिध्यन्तीति तदर्थं यत्नः कर्तव्य इत्ययं न्यायः समाश्रीयते, तथा चैकस्मिन्नप्राप्तकार्यप्रापणार्थोऽयं न्याय इति, स्पष्टमेतद् "आद्यन्तवदेकस्मिन्" [ पा० सू० १. १. २१ ] इति सूत्रे महाभाष्ये । आदिवद्भावस्य कल्पना यथा–"ईङ्च् गतौ" इत्यस्य परोक्षायाम् 'अयांचक्रे' इत्यादौ, तत्र हि "गुरुनाम्यादेरनृच्छूर्णोः" [ ३. ४. ४८. ] इत्यां विधेयः, स च नाम्यादेर्धातोर्विधीयते यथा–'ईहाञ्चक्रे' इत्यादौ, अयं च 'ई' मात्ररूपत्वान्न नाम्यादिः, आदित्वस्य परस्मिन् सत्येव संभवात्, इत्यनेन न्यायेन 'ई'कारमात्रे नाम्यादित्वकल्पना क्रियते, ततश्चां सिद्धो भवति । यथाऽयं वर्णविषये प्रवर्तते तथा नामविषयेऽपि, तथा च यत्रैकमेव नाम विद्यते. तत्र तदादित्वतदन्तत्वप्रयुक्तं कार्यं न प्राप्नोतीति तत्राप्यनेन तदादित्वादिकल्पना क्रियते, यथा–"इन्द्रे" [ १. २. ३०. ] इत्यस्य "सप्तम्या आदिः" [ ७. ४. ११४. ] इति परिभाषया इन्द्रादौ शब्दे परे इति न्यासकारादिसम्मतव्याख्यापक्षे 'गवेन्द्रयज्ञः' इत्यादाविन्द्रयज्ञशब्दे परे एव प्रवृत्तिः स्यान्न तु केवले 'गवेन्द्र' इत्यादाविन्द्रशब्दे परे इति तत्रापि प्रवृत्त्यर्थमेतन्न्यायाश्रयणेन इन्द्रशब्दमात्रस्येन्द्रशब्दादित्वाद् भवति गवेन्द्र इत्यस्य सिद्धिः । एतन्न्यायस्यादिवत् कार्यांशे ज्ञापकं तु "यस्वरे पादः पदणिक्यघुटि" [ २. १. १०२. ] इति सूत्रे णिपर्युदासकरणम्, तद्धि णेः स्वरादित्वेन तत्र पदादेशो मा भूदित्यर्थमेव कृतम्, णेश्चेकारमात्ररूपत्वेनासहायत्वात् [ अन्यस्याभावात् ] स्वरादित्वं नास्त्येवेति तत्र प्राप्तिरेव नेति तद्वर्जनं व्यर्थं सदेकस्मिन्नपि तदादित्वव्यवहारं तत्प्रयुक्तकार्यं च ज्ञापयति । एकस्मिन्नपि तदन्तत्वकल्पना वर्णविषये यथा–'एता' इत्यादौ, तथा हि–"नामिनो गुणोऽक्ङिति" [ ४. ३. १. ] इति गुणो नाम्यन्तस्य विधीयमानो यथा 'चेता, जेता' इत्यादौ पूर्वस्य विद्यमानत्वेन नामिनोऽन्तत्वस्य सत्त्वात् स्वभावत एव भवति तथा 'एता' इत्यादौ न प्राप्नोति, तत्र धातोरिकारमात्ररूपत्वेन नाम्यन्तत्वाभावात्, सति चानेन न्यायेन नाम्यन्तत्वातिदेशे गुणो भवतीति । नामविषये एकस्मिँस्तदन्तत्वकल्पना यथा–'सर्वस्मै' इत्यादौ, तथा हि–"सर्वादेः स्मै-स्मातौ" [ १. ४. ७. ] इत्यत्र सर्वादेरिति पदस्य स्याद्यधिकारस्थत्वेन, स्यादिना च नाम विनाऽनुपपद्यमानेन 'नाम्नः' इति पदस्याक्षेपो भवति, येन विना यदनुपपन्नं तेन तदाक्षिप्यते इति न्यायात्, तच्च विशेष्यं सर्वादेरिति च विशेषणम्, ततश्च "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषया सर्वाद्यन्तस्य नाम्न इत्यर्थ इति न्यासकारव्याख्यानुसारं "परमसर्वस्मै" इत्यादावेव स्मायादेशः प्राप्नोति न तु 'सर्वस्मै' इत्यादौ पूर्वस्याभावेन सर्वाद्यन्तत्वाभावात्, अनेन न्यायेन चैकस्मिन्नपि सर्वशब्दे सर्वाद्यन्तत्वकार्यस्यातिदेशाद् भवति स्मायादेशः ।

**अत्रांशे ज्ञापकं तु "ह्विणोरप्विति व्यौ" [ ४. ३. १५. ] इति सूत्रेण यत्वविधानम्, तद्धि यन्तीत्यादौ "धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये" [ २. १. ५०. ] इति सूत्रेण प्राप्तस्येयो बाधनार्थम्, अनेन चेयादेश इवर्णान्तस्य विधीयते न चेण्धातुरिवर्णान्त इति तस्याप्राप्त्या "इवर्णादेरस्वे स्वरे यवरलम्" [ १. २. २१. ] इत्यनेनैव यादेशे सिद्धे व्यर्थमेव तत् स्यादित्येकस्मिन्नपि तदन्तत्वं कल्पयतीति इण्धातोरिवर्णान्तत्वं भवति, ततश्चेयादेशो मा भूदिति यविधानचारितार्थ्यमिति ॥ ५ ॥**

## ✻आद्यन्तवदेकस्मिन्✻ ॥ ९ ॥

**त०**—अत्र **एकस्मिन्नि**त्यत्रैकपदस्य संख्यापरत्वेन व्याख्यानं कैश्चित् कृतं, तन्न शोभनम्–बहुषु सत्स्वपि एकस्य विद्यमानत्वेन तत्राप्येकस्मिन्नेवाद्यन्तवद्भावः स्यादिति तन्मात्रे कार्यप्रसक्तिः, तथा च सभासन्नयनशब्दे आकारस्यादित्वे तस्य 'दु' संज्ञा स्यादिति तत्र भव इत्यर्थे "दोरीयः" [ ६. ३. ३२. ] इतीयप्रत्ययः स्यात् । तथा दरिद्राधातोरिकारस्याप्यन्तत्वं स्यादिति तत इवर्णान्तलक्षणोऽल् प्रत्ययः स्यात् । किञ्च आद्यन्तवदित्यस्य 'आदित्वेनान्तत्वेन च प्रकल्प्य' इति व्याख्यानमादिवत् अन्तवदित्यर्थकं प्रथमान्ताद् वत्प्रत्यय इत्याशयकं प्रतिभाति, तदपि न साधु–एकस्मिन्नित्यस्य सप्तम्यन्तस्योपमेयत्वेन उपमानभूतादपि तस्या एव विभक्तेरौचित्यादुपमानोपमेययोः समानविभक्तित्वस्य सर्वसम्मतत्वात्, भिन्नविभक्तिकत्वे चोपमानोपमेयभावो न स्यात्, स्पष्टं चेदं सर्वम् "आद्यन्तवदेकस्मिन्" [ पा० १. १. २१. ] इति सूत्रे कैयटे, तथा हि—एकशब्दोऽसहायवाची, न संख्यावाची, बहुष्वपि व्यवस्थितैकत्वसंख्यास्तीति किमेकस्मिन्नित्यनेन कृतं स्यात् ?, एकस्मिन्नित्युपमेये सप्तमीनिर्देशात् आद्यन्तवदिति सप्तम्यन्ताद् वतिर्विज्ञायते, यथा मथुरावत् पाटलिपुत्रे प्राकार इति । द्वयोर्ह्युपमानोपमेययोराधाराधेयभावसम्बन्धबोधनाय वाक्यं प्रयुज्यते, यदि च तयोर्भिन्नविभक्तिकत्वं स्यात् तदोपमानोपमेयभाव एव न गम्येतेति । व्याख्यातं चेदं पूर्वोक्ताशयपरत्वेनोद्द्योते नागेशेन । तथा चाद्यन्तयोः सतोरिवेत्याद्यन्तवत् इत्यर्थः । अत्र मतुप्रत्ययान्तत्वेन व्याख्यानमपि न मनोहरम्, अस्यातिदेशशास्त्रत्वेनेवार्थस्यैव वतेर्युक्तत्वात्, मत्वर्थीयमतुप्रत्ययान्तमास्थाय आद्यन्तयोः सतोरिव कार्यं मन्तव्यमिति इवार्थत्वेन व्याख्यानं च कथं सङ्गच्छेत ?, तथा च पूर्वापरविरुद्धमिवेदं स्यात् । अस्य च न्यायस्य लोकसिद्धत्वमेवेति नात्र ज्ञापकापेक्षा तथापि अभ्युच्चयाय ज्ञापकमप्युपन्यस्तम्, लोकसिद्धत्वं चास्याग्रे प्रतिपादयिष्यते । आदिवद्व्यपदेशांशेऽस्य न्यायस्यानित्यत्वमपि कैश्चिदुक्तम्, तत्फलं च 'ईये, ईयाते' इत्यादिरूपसिद्धिरिति कथितम्, तदपि न मनोहरम्, अनित्यत्वज्ञापकोपन्यासं विना तादृशरूपाणामसिद्धया तदनुरोधेनानित्यत्वकल्पनस्यायुक्तत्वात्, बृहद्वृत्त्यादौ 'अयांचक्रे' इत्यस्यैवोदाहृतत्वात्, एकत्रैव लक्ष्ये नित्यत्वानित्यत्वयोरुभयोराश्रयणस्यानौचित्याच्च, यत्तु 'ईये' इत्यादिरूपाणां निराकरणाभावेन 'अप्रतिषिद्धं संमतं भवति' इति न्यायात् तेषां सम्मतत्वमित्युक्तं, तदपि न, तेषां क्वापि प्रसिद्धत्व एव तन्निरासस्यावश्यकत्वमिति तदनिरासेन तेषामनभिधानत्वमेव स्वीकार्यम्, पाणिनीये व्याकरणे च "आद्यन्तवदेकस्मिन्" [ पा० सू० १. १. २१. ] इति सूत्रेऽस्य सूत्रस्याव्यापकत्वेन केवलमाद्यन्तापदिष्टकार्यमात्रसाधकत्वेन व्यापकं वचनमाश्रितमेतत्स्थाने, तद्धि 'व्यपदेशिवदेकस्मिन्' इति । तथा हि भाष्यम् "तत्र व्यपदेशिवद्वचनम्, तत्र व्यपदेशिवद्भावो वक्तव्यः, व्यपदेशिवदेकस्मिन् कार्यं भवतीति वक्तव्यम्, किं प्रयोजनम्? एकाचो द्वे प्रथमार्थम्, वक्ष्यति एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देश इति, तस्मिन् क्रियमाणे इहैव स्यात् 'पपाच, पपाठ', 'इयाय, आर' इत्यत्र न स्यात्, व्यपदेशिवदेकस्मिन् कार्यं भवतीति सिद्धं भवति" इति । अयमाशयः–'आद्यन्तवदेकस्मिन्' इत्येतावत्युक्ते हि यत्रादित्वव्यवहारोऽन्तत्वव्यवहारो मुख्यो न प्राप्नोति तत्र तद्व्यवहारनिमित्तकं कार्यं स्यादित्येव लभ्यते । यत्रैकस्मिन् समुदायव्यवहारनिबन्धनं कार्यमिष्टं तन्न स्यात्, यथा "आद्योऽंश एकस्वरः" [ ४. १. २. ] इत्यनेन अनेकस्वरस्य धातोरेकस्वरस्यांशस्य द्वित्वं विधीयते, तत्र एकस्वरशब्दे बहुव्रीहिः, अन्यथा स्वरमात्रस्यैव द्वित्वं स्यात्, न तु स्वरविशिष्टस्यांशस्य, तथा च एकः स्वरो यत्रेत्यर्थेऽन्यपदार्थस्य समुदायस्यावश्यकत्वेन 'इयाय, आर' इत्यादौ द्वित्वं न स्यात्, तत्र धातोः स्वरमात्ररूपत्वात्, न च स व्यवहारः [ एकस्वरत्वव्यवहारः ] प्रकृतेन न्यायेन प्राप्त इति तदर्थं व्यपदेशिवदेकस्मिन्निति वक्तव्यम् । एवं प्रत्ययावयवे प्रत्ययत्वव्यवहारस्य प्रत्ययेऽपि प्रत्ययावयवत्वव्यवहारादेश्च तत्र तत्रावश्यकस्य सिद्ध्यर्थमपीदं वक्तव्यम् । अस्य चायमर्थः–निमित्तसद्भावान्मुख्यो व्यपदेशो यस्यास्ति स व्यपदेशी, यस्तु व्यपदेशहेत्वभावादविद्यमानव्यपदेशः स तेन तुल्यं वर्तते कार्यं प्रतीति व्यपदेशिवद्भवतीत्युच्यते । अत्र च न ज्ञापकाद्यपेक्षेत्यपि "अवचनाल्लोकविज्ञानात् सिद्धम्" इति वार्तिकेनोक्तं तत्रैव भाष्ये, तच्च बहुभिर्दृष्टान्तैः प्रसाधितम् । तत्रायं निष्कर्षः—यथा बहुषु पुत्रेषु सत्सु 'अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनिष्ठः' इत्येतदुपपन्नं भवति, तथैकस्मिन्नपि 'अयमेव ज्येष्ठः कनिष्ठो मध्यमो वा' इति व्यवहारः क्रियत एव । यथा वा बहुकृत्वोऽपि प्रसूता प्रथमपुत्रेण काचिद्धन्यते, तथा याऽप्यग्रे प्रसोष्यते साऽपि काचित् पूर्वोत्पन्नेन पुत्रेण हन्यत इति तत्र प्रथमगर्भेण हतेति मुख्यः प्रयोगः, किन्तु या नापि

प्रसूता नापि प्रसोष्यते साऽपि कुक्षिस्थेन गर्भेण हता सती प्रथमगर्भेण हतेत्युच्यते, तत्र तस्या एव गर्भान्तरधारणयोग्यताऽध्यवसायेन भाविगर्भापेक्षया प्रथमगर्भेण हतेति व्यपदेशः; स्त्र्यन्तरेषु वा बहुपुत्रत्वे सति आद्यगर्भस्य प्रथमव्यपदेशदर्शनात् तथाविधस्य प्रथमगर्भव्यपदेशः, गर्भपदमत्रापत्यवाचि । यथा वा कदापि पूर्वमनागतोऽग्रेऽप्यनाजिगमिषुः कथयति इदं मे प्रथममागमनमिति, तत्रान्यसम्बन्धिषु बहुष्वागमनेष्वाद्यस्यागमनस्य प्रथमत्वादेकस्मिन्नप्यागमने प्रथमत्वव्यवहारः, तथा आद्यन्तहीनेऽपि अन्तत्वादित्वव्यवहारः, अन्यस्मिन्नसत्यपि एकस्वरवत्त्वव्यवहारादिश्च लोकत एव सिद्ध इति नात्र ज्ञापकापेक्षेति । एवं च लोकसिद्धेनानेन न्यायेनेण्धातोः इवर्णान्तत्वे सिद्धे इयादेशेन भाव्यमिति तद्बाधनार्थं "ह्विणोरप्विति व्यौ" [ ४. ३. १५. ] इति यत्वविधानमपि सार्थकम् । कश्चित्तु नास्ति पूर्वो यस्मात् स आदिः नास्ति परो यस्मात् सोऽन्त इत्याद्यन्तलक्षणं विधायैकस्मिन्नपि तस्य [ आदित्वस्य अन्तत्वस्य च ] सम्भवेन नायं न्याय आवश्यक इत्याह । भाष्यकारस्तु अन्यस्मिन् सत्येवादित्वादिव्यवहारस्य लोकतो लाभाद् वचनमारब्धव्यमेवेत्याह । यद्यपि पूर्वोपदर्शितरीत्या लौकिकेन व्यपदेशिवद्भावेनैकस्मिन्नपि आद्यन्तव्यवहारः सिद्ध एव, तथापि गौणत्वात् तस्य व्यवहारस्य गौणमुख्यन्यायानुसारं तत्र कार्येण न भवितव्यमिति कस्यचित् सन्देहः स्यादिति तं प्रति वचनस्यावश्यकत्वमेवेति तात्पर्यम् ॥

अत्र नव्या अन्तत्वादित्वासहायत्वादीन्येवं परिष्कुर्वन्ति–अन्तत्वं यत्किञ्चिद्विशिष्टत्वम्, वैशिष्ट्यं स्वघटकत्व-स्वघटकवर्णप्रागभावाधिकरणक्षणावृत्तित्वोभयसम्बन्धेन । आदित्वं यत्किञ्चिद्विशिष्टत्वम्, वैशिष्ट्यं च स्वघटकत्व-स्वघटकवर्णध्वंसाधिकरणक्षणावृत्तित्वैतदुभयसम्बन्धेन । एवं मध्यमत्वं च स्वघटकत्व-स्वघटकवर्णप्रागभावाधिकरणक्षणवृत्तित्व-स्वघटकवर्णध्वंसाधिकरणक्षणवृत्तित्वैतत्त्रितयसम्बन्धेन यत्किञ्चिद्विशिष्टत्वम् ।' यथा–रामशब्देऽकारस्यान्तत्वं, तत्र स्वं–समुदायः 'राम'रूपः, तद्विशिष्टत्वमकारे स्वघटितत्वेन [समुदायान्तर्गतत्वेन], स्वघटकवर्णानां रेफादीनां यः प्रागभावाधिकरणक्षणः, तत्रावृत्तित्वेन च सिद्धम् । एवं तत्रैव शब्दे रेफस्यादित्वमपि, तस्यापि तत्समुदायविशिष्टत्वात्, वैशिष्ट्यनियामकयोः स्वघटकत्वस्वघटकवर्णध्वंसाधिकरणक्षणावृत्तित्वसम्बन्धयोः सत्त्वात्, अस्ति हि समुदाये रेफघटितत्वम्, रेफे च समुदायघटकाकारादिवर्णध्वंसाधिकरणक्षणावृत्तिम् । एवमाकारादौ मध्यमत्वञ्च, समुदायस्याकारादिघटितत्वात्, स्वघटकान्तिमवर्णप्रागभावाधिकरणक्षणवृत्तित्वस्य स्वघटकरेफध्वंसाधिकरणक्षणवृत्तित्वस्य च सत्त्वात् । असहायत्वं च–अतिदिश्यमानधर्मवदसमभिव्याहृतत्वे सति अतिदिश्यमानधर्मवदघटकत्वे सति अतिदिश्यमानधर्मवदघटितत्वम् । तेन 'सभासन्नयन'शब्दे 'भा' शब्दाकारस्य नादित्वमसहायत्वाभावात्, अतिदिश्यमानसभासन्नयननिरूपितादित्वधर्मवत्सभासमभिव्याहृतत्वेन तदसमभिव्याहृतत्वाभावात्, न वा सभासन्नयनशब्दे 'दु'त्वातिदेशः, अतिदिश्यमानदुत्वधर्मवद्भासन्नयनशब्दघटकत्वेन द्वितीयविशेषणाभावात्, न वा आसन्नयनशब्दे नामत्वातिदेशः, अतिदिश्यमाननामत्वधर्मवत्सभासन्नयनघटकत्वेन विशेष्यांशाभावात् । यद्यपि सभासन्नयनशब्दे दुत्वादिदेशाभावायैकस्यापि विशेषणस्य शक्तत्वं तथापि तत्तद्धर्मातिदेशभेदेनांशत्रयस्यापि साफल्यम् । एवं दरिद्राशब्दघटकेकारे न दरिद्रानिरूपितान्तत्वम्, न वा दरिशब्दे धातुत्वम्, न वा दरिद्राशब्दे इवर्णान्तत्वम्, असहायत्वाभावात्, । एवं प्रकाराः परिष्कारा विस्तारभयान्न प्रदर्शिताः । नामविषयेऽन्तवद्भावस्योदाहरणं यदुक्तं 'सर्वस्मै' इति तस्यायमाशयः–"अत आः स्यादौ" [ १. ४. १. ] इति सूत्रस्थं 'स्यादौ' इति पदं पादसमाप्तिं यावदनुवर्त्तते, स्यादिप्रत्ययश्च नाम विनाऽनुपपन्न इति तेन 'नाम्नः' इति पदमप्याक्षिप्यते, ततश्च "सर्वादेः स्मै-स्मातौ" [ १. ४. ७. ] इति सूत्रे सर्वादेरिति नाम्न इति च षष्ठ्यन्तं पदद्वयमुपस्थितम्, तयोश्च पदयोः संभवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति न्यायेनेह वैयधिकरण्यासंभवेन च सामानाधिकरण्येनैवान्वयः । तथा च सर्वादेरिति पदं विशेषणमेव नामापेक्षया व्याप्यवृत्तित्वादिति "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषया सर्वाद्यन्तान्नाम्नः परयोर्ङेङस्योः सर्वाद्यन्तनामसम्बन्धिनोर्वा ङे-ङस्योः स्मै-स्मातावादेशावित्यर्थौ लभ्यते, ततश्च 'परमसर्वस्मै' इत्याद्येव मुख्यमुदाहरणम्, सर्वस्मै इत्यत्र सर्वाद्यन्तत्वाभावान्न प्राप्नोतीत्येतन्न्यायापेक्षेति । पाणिनीयतन्त्रे च *व्यपदेशिवद्भावोऽप्रातिपदिकेन* इत्येतन्न्यायापवादभूतो न्यायः पठ्यते, तथा च नामविषये नायं न्यायः प्रवर्तते, 'सर्वस्मै' इत्यादौ च न दोषः, सर्वादेः सर्वनामसंज्ञा विधीयते, ज्ञापकेन च सर्वाद्यन्तस्यापि संज्ञा भवतीत्युभयोः कार्यं सिद्ध्यतीति । एवमादिवद्भावोऽपि नामविषये न भवति "इन्द्रे" [ १. २. ३०. ] इति सूत्रस्थानीयस्य "इन्द्रे च" [ पा० सू० ६. १. १२४. ] इति सूत्रस्येन्द्रशब्दावयवे स्वरे परे प्रवृत्तिरित्याश्रीयत इति यथा 'इन्द्रयज्ञः' इति शब्दे परे प्रवर्तते तथेन्द्रशब्दे परेऽपीति न काऽप्यनुपपत्तिः, स्वमते च न्यासकारव्याख्यामनुसृत्य 'इन्द्रादौ शब्दे परे' इत्यर्थमाश्रित्य नामविषये आदिवद्भावोदाहरणतया तद्व्याख्यातम् । वस्तुतस्तु–"सप्तम्या आदिः" [ ७. ४. ११४. ] इति परिभाषाऽपि वर्णविषये एव प्रवर्तते, न नामविषये इत्येतत्सूत्रस्थवृत्तिग्रन्थेनानुमीयते, तथाहि–तत्र "इन् ङी-स्वरे लुक्" [ १. ४. ७९ ] "ह्युक्तोपान्त्यस्य शिति स्वरे" [ ४. ३. १४. ] "उत औविंति

व्यञ्जनेऽद्वेः" [ ४. ३. ५९. ] इत्यादिसूत्राणां वर्णविषयाणामेवोदाहृतत्वम्, युक्तं चैतत् स्वरे व्यञ्जने वा परे विधीयमानं कार्यं तन्मात्रे सत्येव प्रवर्त्तेत, नाधिके–यथा 'अघुट्स्यादौ स्वरे परे विधीयमानं कार्यं स्वरमात्ररूपे स्यादावेव स्यात्, नाधिके इति तत्र तदादौ प्रवृत्त्यर्थमिदमारब्धम्, "इन्द्रे" [ १. २. ३०. ] इत्यादौ च इन्द्रयज्ञशब्देऽपि परे प्रवृत्तौ बाधकाभावः, तत्राऽपीन्द्रशब्दस्य सत्त्वात्, नहि तत्र विशेष्यं किञ्चिदस्ति येन तदन्तविधिप्रसक्तिरिति तदन्तविध्यपवादभूताया अस्याः परिभाषायाः प्रवृत्तेरयोग्यत्वात् *उत्सर्गसमानदेशा अपवादा* इति न्यायात् । पाणिनीये च "सप्तम्या आदिः" [ ७. १. ११४. ] इति परिभाषास्थाने स्पष्टमेव "यस्मिन् विधिस्तदादावल्ग्रहणे" इति पठ्यते, तथा च अल्पदस्य तत्र वर्णमात्रार्थतया वर्णग्रहणमात्रमेव तद्विषय इति स्पष्टम् ॥ ५ ॥

## *प्रकृतिवदनुकरणम्* ॥ ६ ॥

**सि०**—प्रकृतिः–अनुकार्यं शब्दस्वरूपम्, **अनुकरणं** स्ववृत्त्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकम्, तत् **प्रकृतिवत्** अनुकार्यवृत्तिधर्मवद्भवतीति न्यायार्थः; तथा चानुकार्ये ये धर्मा धातुत्वादयस्तेऽनुकरणेऽसन्तोऽप्यतिदिश्यन्त इति तन्निमित्तकानि [ प्रकृतिमुद्दिश्य विहितानि ] कार्याणि तत्र कार्याणीत्यर्थः । तथा च "परिव्यवात् क्रियः" [ ३. ३. २७. ] इत्यत्र धात्वनुकरणस्य 'क्री' इत्यस्य धातुवद्भावात् धातुकार्यं तत्र भवतीति "संयोगात्" [ २. १. ५२. ] इतीयादेशः सिध्यति, त्वक्करणाच्च सर्वथा धातुत्वाभावेन धातुत्वनिबन्धनास्त्यादयो न भवन्ति, किन्तु स्यादय एव; किञ्च तत एव कारणादस्य नामत्वमपि, अन्यथा "अधातुविभक्तिवाक्यमर्थवन्नाम" [ १. १. २७. ] इति नामसंज्ञाविधायके सूत्रे धातोः पर्युदस्तत्वेन नामसंज्ञाऽपि दुर्लभा स्यात् । अत्र च ज्ञापकं 'क्रियः' इति निर्देशनमेव, एतन्न्यायाभावे च तादृशनिर्देशस्यासंगतत्वमेव स्यात्, एतन्निर्देशादेव च यत्किञ्चित्कार्याय प्रकृतिवद्भावो भवति यत्किञ्चित्कार्याय नेत्यपि ज्ञायते, तथाहि–तत्रैवेयादेशाय प्रकृतिवद्भावो भवति, नामत्वाय न भवति । तथा चास्य न्यायस्यास्थिरत्वं स्पष्टमेव, अत एव "तदः सेः स्वरे पादार्था" [ १. ३. ४५. ] इति सूत्रे 'तद्' शब्दस्य सर्वादित्वाभावे तस्य सर्वादित्वनिमित्तकं कार्यं तदन्तर्गणभूतत्यदादित्वनिमित्तकं च कार्यं न भवति, अन्यथा अनेन न्यायेन प्रकृतिवत्त्वातिदेशे तस्मादिति निर्देशः स्यादिति ॥ ६ ॥

## *प्रकृतिवदनुकरणम्* ॥ ६ ॥

**त०**—अर्थभेदात् लोकेऽनुकार्यानुकरणयोर्भिन्नतयैव प्रतीतेः शास्त्रेऽनुकरणेऽनुकार्योद्देश्यककार्यार्थमवश्यं यत्नः कर्त्तव्यः, तदर्थमयं न्यायः पठ्यते । अनेन च न्यायेन तत्र–अनुकरणे, प्रकृतिवत्त्वम्–अनुकार्यधर्मवत्त्वम्, अतिदिश्यते । अतिदेशस्थले यद्यपि अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभाव इति स्वभावसिद्धम्, तथापि अनेनातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्यं न विनिवर्त्यते धर्मिग्राहकमानात् । "परिव्यवात् क्रियः" [ ३. ३. २८. ] इति हि न्यायस्यास्य ग्राहकं मानम्, तत्र 'क्रियः' इति निर्देशस्यातिदिश्यमानधर्मधातुत्वविरुद्धस्वाश्रयधर्मधातुभिन्नत्वनिमित्तकनामत्वनिमित्तकस्याद्युत्पत्तिरूपकार्याभावेऽनुपपद्यमानत्वेन एतदतिदिश्यमानधर्मविरुद्धकार्यस्यापि सत्त्वमभ्यनुज्ञायते । स्पष्टं चैतत् । "क्षियो दीर्घात्" [ पा० सू० ८. २. ४६. ] इति सूत्रे महाभाष्ये, तेन हि सूत्रेण दीर्घीभूतात् क्षियः [ क्षि–धातोः ] परस्य क्तयोस्तस्य नत्वं विधीयते, तत्र च यथा "क्षेः क्षी चाऽध्यार्थे" [ ४. २. ७४. ] इति सूत्रे ह्रस्वात्परस्य नत्वव्यावृत्त्यर्थम् 'अध्यार्थे' इति पठ्यते तथा दीर्घादिति पठ्यते, तस्य प्रयोजनकथनावसरे 'क्षिय' इति निर्देशस्यानुपपद्यमानत्वमुत्थाप्य इत्थमुक्तम्–"नात्र निर्देशः प्रमाणं शक्यं कर्तुम्, यथैव ह्यत्राप्राप्ता विभक्तिः, एव मियङ्[इया] देशोऽपि, नात्राप्राप्ता विभक्तिः, सिद्धा विभक्तिः प्रातिपदिकादिति [ नामत्वेन विभक्तिः सिद्धेति भावः ] कथं प्रातिपदिक[नाम]संज्ञा, अर्थवत् प्रातिपदिकमिति । ननु चाधातुरिति प्रतिषेधः प्राप्नोति, नैष धातुः, धातोरेषोऽनुकरणम्; यद्यनुकरणमियङादेशो न प्राप्नोति, प्रकृतिवदनुकरणं भवतीतीयङादेशो भविष्यति; यदि प्रकृतिवदनुकरणं भवतीत्युच्यते, स्वाद्युत्पत्तिर्न प्राप्नोति; एवं तर्ह्यातिदेशिकानां स्वाश्रयाण्यपि न निवर्त्तन्ते, + + + + + ।" एतेन च प्रकृतिकार्यस्य स्वाश्रयकार्यस्य च तत्र सत्त्वमनुज्ञातम् । तथा च प्रकृतिकार्यमियादेशः स्वाश्रयकार्यं नामत्वनिमित्तकस्याद्युत्पत्तिरित्युभयं भवति । अन्ते चास्य न्यायस्यानित्यत्वमपि ध्वनितम्, तथाहि–अथाप्येतन्नास्ति–प्रकृतिवदनुकरणं भवतीति, एवमपि न दोषः, धातोरजादौ यद्रूपं तदनुक्रियत इति । अस्याशय इत्थं प्रदर्शितः कैयटेन–इहाऽनुकर्त्ता कदाचित् सामान्यमनुकरोति कदाचिद् विशेषम्, तत्र यदा सामान्यमनुक्रियते तदा विशेषनिबन्धनस्य कार्यस्य सामान्येऽभावात् प्रकृतावदृष्टत्वादनुकरणेऽप्यभावः; यदा तु विशेषोऽनुक्रियते, तदा तन्निबन्धनं कार्यमनुकरणे प्रवर्त्तते । तत्र यदा धात्वधातुसामान्यं क्षिमात्रमनुक्रियते तदा इयङोऽप्राप्तिरिति चिक्षियतुरित्यादौ कृतेयङादेशस्येदमनुकरणमिति । अयं भावः–यदि नामत्वधातुत्वादिविशेषं मनसि निधायानुक्रियते कश्चिच्छब्दस्तर्हि तत्र तद्विशेषकृतं कार्यमपि स्यादेव; यदि च न विशेषोऽनुक्रियतेऽपि तु शब्दत्वेन सामान्यधर्मेणानुक्रियते तदा तत्र विशेषनिमित्तकं कार्यं न भवतीति लक्ष्यानुसारादुभयोः पक्षयोः स्वत एव लाभेन नास्य न्यायस्यावश्यकत्वम् । स्याद्वादबलेनो-

भयोः पक्षयोश्च संभव एव, अयमेवार्थः कैश्चित् शब्दार्थानुकरणं शब्दानुकरणं चेत्यनुकरणस्य द्वैविध्यमाश्रित्य साधितः । तदाशयश्च—यत्रानुकार्या-ऽनुकरणयोर्भेदविवक्षा तत्र शब्दः प्रकरणादनुकार्योऽर्थो यस्य तत् शब्दार्थम्, तच्च तदनुकरणमिति शब्दार्थानुकरणम्; यत्र तु तयोर्भेदविवक्षा तत्रानुकार्यरूपस्यार्थस्यानुकरणस्वरूपे एवान्तर्हितत्वात् शब्द एवानुकरणमिति शब्दानुकरणम् । तथा च शब्दार्थानुकरणस्थले प्रकृतिकार्यं भविष्यति, न शब्दानुकरणस्थल इति ॥ ६ ॥

## ॥एकदेशविकृतमनन्यवत्॥ ॥ ७ ॥

सि०—"'देवौ' इत्यादौ विभक्त्या सह सन्धिकार्ये कृते "तदन्तं पदम्" [ १. १. २०. ] इति पदत्वं न प्राप्नोति, "प्रत्ययः प्रकृत्यादेः०" [ ७. ४. ११५. ] इति परिभाषया प्रकृतेरेव तदन्तत्वं युक्तमिति प्रकृतेरिह विकृतत्वात् तस्य प्रकृतित्वेनाश्रयितुमशक्यत्वात्, अतस्तत्र पदत्वसिद्ध्यर्थं न्यायमाह—एकदेशविकृतमिति—एकदेशः समुदायस्यावयवः कश्चिद् विकृतो यस्मिन् तदेकदेशविकृतम्, यन्निष्ठविकारप्रतियोगी एकदेश इति यावत्, यथा 'देवौ' इत्यत्र स्यादिः 'औ'इति तद्रहिता प्रकृतिश्च 'देव्' इति, तत्र चैकदेशो विकृतः—विकारेण सम्बद्धः, तत्र देविति वकारान्तनिष्ठविकारप्रतियोगी देवेत्यकारान्तस्यैकदेशोऽकारः, तथा च यदेकदेशविकृतः, अर्थात् यदेकदेशप्रतियोगिकविकारविशिष्टो यो भवति स ततोऽन्यो न भवतीत्यर्थः । तथा च देवशब्दैकदेशाकारप्रतियोगिकविकारविशिष्टो देविति वान्तः सोऽकारान्तादन्यो न भवतीति तत्र प्रकृतित्वं सिध्यति । न च * भूतपूर्वकस्तदुपचारः * इत्यनेन सिद्धिरिति नात्रैतन्न्यायावश्यकतेति वाच्यम्, तेन न्यायेन समुदायवृत्तिधर्मस्य—धातुत्वादेः साम्प्रतिकाभावे सति भूतपूर्वस्याऽपि ग्रहणेन तदुपचारप्रवर्तकत्वात्, एतच्चान्यत्र विवेचयिष्यते । न च 'अनन्यवत्' इत्यनेनान्यसादृश्यं निषिध्यते, न त्वन्यत्वमिति तत्रान्यत्वं स्यादेवेति वाच्यम्, यतोऽन्यसादृश्यस्यापि निषेधेऽन्यत्वाभावः सुतरामेव सिध्यति, अत एव विकृतादप्यर्थबोधः सिध्यति, अन्यथा शक्ततावच्छेदिकाया दकारोत्तराकारोत्तरवकारोत्तराकाररूपाया आनुपूर्व्या अज्ञानात् ततो बोधो न स्यात् । अत्र "वाता-ऽतीसार-पिशाचात् कश्चान्तः" [ ७. २. ६१. ] इति सूत्रे 'अतीसार'शब्दस्य कृतोपसर्गदीर्घस्य ग्रहणेऽप्यकृतदीर्घस्यापि 'अतिसार'शब्दस्य ग्रहणात् तत्रापि 'अतिसारकी' इति रूपं भवतीति केचित् । वस्तुतस्तु—जराशब्दस्य यथा टाविभक्तौ 'जरसा' इति रूपं "जराया जरस् वा" [ २. १. ३. ] इति जरसादेशे कृते भवति तथा निर्जरशब्दस्यापि टाविभक्तौ 'निर्जरसा' इति रूपं भवति, तत्राऽप्यनेन न्यायेन 'जर' इत्यस्य जरात्वातिदेशात् । एकदेशपदं चोपलक्षणं भूयोऽवयवविकाराभावस्य, तथा च यावताऽवयवविकारेण तत्त्वं न विहन्यते तावदवयवविकारे सत्यपि नान्यत्वमित्यर्थः; तेन यथा प्र-निपूर्वस्य हन्तेः क्ते "यमि-रमि०" [ ४. २. ५५. ] इति सूत्रेण नलोपे सति प्रणिहत इति रूपमेतन्न्यायबलेन तत्र हन्रूपत्वस्यातिदेशाद् भवति, तथा प्रणिघ्नन्तीत्यादौ "गम-हन-जन०" [४. २. ४४.] इत्यल्लोपे "हनो ह्नो घ्नः" [ २. १. ११२. ] इति घ्नादेशे कृतेऽपि हन्रूपत्वातिदेशात् "नेर्ङ्गादापत०" [ २. ३. ८९. ] इति नेर्नो णत्वं भवत्येव । न च धातूपसर्गयोः कार्यमन्तरङ्गमिति न्यायेन पूर्वमेव नेर्णत्वे कृते पश्चात्साधनयोगे नात्रास्य न्यायस्यावसर इति वाच्यम्, "णषमसत् परे०" [ २. १. ६०. ] इति वचनात् परे स्यादिविधौ च कर्तव्ये णत्वशास्त्रस्यासत्त्वेनाप्रवृत्तेः । यत्र चार्धं तदधिकं वा विकृतं तत्र जातिव्यञ्जकभूयोऽवयवदर्शनाभावेन तत्त्वाप्रतीतौ नास्य न्यायस्य प्रसङ्गस्तत्र तु स्थानिवद्भावेनैव निर्वाहः । अयं च न्यायः "सख्युरितोऽशावैत्" [ १. ४. ८३. ] इति सूत्रे 'इत' इत्यनेन ज्ञाप्यते, तद्धि सखीशब्दस्यैत्वनिषेधार्थम्, एतन्न्यायाभावे च सखीशब्दस्य दीर्घत्वेनैत्वप्राप्तिरेव नेति तन्निषेधार्थस्य तस्य वैयर्थ्यं स्पष्टमेवेति तद्व्यर्थं सन्न्यायमिमं ज्ञापयति । वस्तुतस्तु नात्र न्याये ज्ञापकापेक्षा अस्य लोकसिद्धत्वात्, भवति हि लोके च्छिन्नपुच्छे शुनि श्वत्वव्यवहारः स्वभावत एव, तथैकदेशविकृतेऽपि तत्त्वव्यवहारो भविष्यत्येव, एवं च लोकसिद्धेनानेन न्यायेन सखीशब्दस्यापि सखिशब्दत्वेन ग्रहणं स्यादिति 'इत' इत्यस्य सार्थक्यं स्पष्टमेव । लक्ष्यानुरोधाच्च क्वचिदस्यानाश्रयणमपि भवति, सूचितं चैतत् "संख्याऽहर्दिवा०" [ ५. १. १०२. ] इति' सूत्रे लिपी-लिब्योरुभयोर्ग्रहणेन, तेन 'अभीयात्' इत्यत्र अभीत्युपसर्गस्य 'ईयात्' इत्यनेन संधौ जाते "आशिषीणः" [ ४. ३. १०७. ] इति ह्रस्वो न भवति, अन्यथा 'अभ्–ईयात्' इत्येकदेशविकृते 'अभ्' शब्दे एकदेश विकृतत्वेनोपसर्गत्वमादाय तत्प्रवृत्तिः स्यादिति ॥ ७ ॥

## ॥एकदेशविकृतमनन्यवत्॥ ॥ ७ ॥

त०—अत्र केचिद् विकृतपदं विसदृशपरं व्याचख्युः, तथा च तेषां व्याख्यानम्—एकस्मिन् प्रदेशे वैसदृश्येनान्यत्वं न गण्यत इत्यादि । तत्रायं विचारः स्फुरति—विकृतपदं कथं विसदृशमित्यर्थं बोधयेत्? किञ्चेह विसदृशत्वं स्वाभाविकं गृह्यते विकारकृतं वा? नाद्यः—तथा सति 'सकृत्, शकृत्' इत्यादिरूपाणां स्वाभाविकैकदेशविसदृशानामन्यत्वं न स्यात्; विकारकृतमिति चेत्? तर्हि विकारापन्नमित्यर्थं विहाय विसदृशमित्यर्थकरणे किं मूलम्?, यच्चोक्तम्–

'ननु विकृतमिति शब्दस्य विकारापन्नमिति व्याख्या प्राक्तन्यां न्यायवृत्तावस्ति सैव युष्माकमप्यत्र कर्तुं युक्ता, तत् कथं वैसदृश्येनेत्यूचे, उच्यते–विकारापन्नमिति व्याख्याने भूतपूर्वकन्यायेन प्रकृतन्यायविषयस्य सर्वथाऽपहारात् प्रकृतन्यायो निर्विषय एव स्यात्' इत्यादि, तदपि न मनोरमम्–किं व्याख्याभेदेन लक्ष्यमपि भिद्यते ? उत लक्षणमात्रम् ? नाद्यः–लक्ष्यस्य लक्षणाननुसारित्वात्, लक्ष्याणि पूर्वस्थितान्यनुसृत्यैव हि लक्षणानि क्रियन्ते सर्वैः, नहि पूर्वं लक्षणं ततो लक्ष्यमिति, ततश्चास्य न्यायस्य यत्र वास्तविको विषयो निर्जरशब्दादिगत'जर'शब्दादिस्तत्र किं भवद्रीत्या भूतपूर्वकन्यायस्य नावतारः ? अस्ति चेत् किमनेन व्याख्यानेन कृतं स्यात् । किञ्च अतिसारकीत्यस्य प्रकृतन्यायस्यासाधारणोदाहरणत्वं यदुक्तं तदपि न शोभनम्, अत्र विकारकृतमेव वैसदृश्यं ग्राह्यमिति पूर्वमुपपादितत्वेन 'अतिसार'शब्दे विकारकृतं वैसदृश्यं नास्ति, नहि दीर्घस्य पूर्वं स्थितस्य ह्रस्वो विधीयते किन्तु ह्रस्वस्यैव दीर्घो विधीयते पाक्षिकः, इति सूत्रे ह्रस्वग्रहणे सति दीर्घे विकारकृत वैसदृश्ये सत्यपि तस्य ग्रहणमनेन न्यायेन कल्पयितुं शक्यते, प्रकृते तु "वातातीसारपिशाचात् कश्चान्तः" [ ७. २. ६१. ] इति सूत्रे दीर्घ एवातीसारशब्दे पठ्यते, तथा च नात्रानेन न्यायेन 'अभिसार'शब्दस्य ग्रहणमुचितम्, तथा सति हि तस्य ग्रहणस्येष्टत्वे ह्रस्वमेव सूत्रे पठेत् दीर्घस्यानेन न्यायेन ग्रहीतुं शक्यतया मात्रालाघवात्, न च तथा पठितमिति तस्य ग्रहणं नाभिमतं सूत्रकृतामित्यनुमीयते, वृत्तावपि तदनुदाहरणात्, अत एव "विवधवीवधाद्वा" [ ६. ४. २५. ] इति सूत्रे उभयोरेव ग्रहणं कृतं दृश्यते, अन्यथैकतरग्रहणेनानेन न्यायेनोभयोरपि ग्रहणे सिद्धे उभयोर्ग्रहणमनर्थकं स्यात्; यद्यपि तत्राऽपि विवधशब्दस्यैव ग्रहणे कृतेऽनेन न्यायेन वीवधशब्दस्यापि ग्रहणं शक्यते कर्तुमिति व्यर्थमेवोभयोर्ग्रहणं तथापि तदपि वैकल्पिकरूपयोः शब्दान्तरत्वमेवेत्यस्य विनिगमकम् । तथा च 'अतिसारकी' इति नास्योदाहरणमिति युक्तमुत्पश्यामः । एवमनित्यत्वफलप्रदर्शनावसरे यदुक्तं तैरेव–"ततश्च यथा सूरस्य मर्त्तादिभ्यो यः" [ ७. २. १५९. ] इति स्वार्थिके यप्रत्यये सूर्य इति स्यात् तथा शूरस्य शूर्य इति न स्यात्" इति तदपि न मनोरममिति प्रतिभाति, सूर-शूरशब्दयोः सूर्यार्थत्वे सत्यप्युभयोर्भिन्नप्रकृतिकतया विकारकृतवैसदृश्याभावात् परस्परग्रहणप्रसङ्गस्यानेन न्यायेनोपपादयितुमशक्यत्वात् । यत्तु "साल्वाद् गोयवाग्वपत्तौ" [ ६. ३. ५४. ] इत्यत्रैकदेशविकृतस्यानन्यत्वात् सल्वशब्दोऽपि ग्राह्य इत्युक्तम् इति अन्येनैतादृशविषये प्रकृतन्यायप्रवृत्तिरिति सूचितं, तदपि न चारु साल्वादिति सूत्रवृत्तौ साल्वशब्दविषये नियमं प्रदर्श्य 'अयं च विभागः सल्वशब्दस्यादोरपि विज्ञेयः' इत्येतदुक्तम्, तस्यायमाशयः–साल्वसल्वयोरुभयो राष्ट्रवाचित्वेन साल्वशब्दविषये योऽयं नियमः प्रदर्शितः स यदि सल्वशब्दविषये न स्यात् तर्हि तस्मादेव शब्दादन्यत्राऽर्थे साल्वकप्रयोगस्याप्यापत्तौ वृथायं प्रयासः स्यादिति सूत्रसार्थक्याय सल्वशब्दविषयेऽप्ययं विभागः स्वीकार्य इति, तथा च नायं सामान्यतोऽस्य न्यायस्य विषयः, किन्तु सूत्रारम्भसामर्थ्यलब्ध इति नानेनान्यत्रैवंविषये तत्प्रवृत्तिः शक्या कर्तुं दीर्घोच्चारणवैयर्थ्यापातात् । किञ्च कच्छादिष्वपि साल्वशब्द एव पठ्यते इति सल्वशब्दस्य राष्ट्रवाचित्वमपि सन्दिग्धमेवेति यदि केनचित् तस्यापि राष्ट्रवाचित्वं भ्रान्त्या प्रतिपन्नं स्यात् तर्हि तत्राप्ययं विभागो ज्ञेय इत्येतावन्मात्रमेव प्रकृतवृत्तिग्रन्थस्याभिमतमित्यास्थेयमित्यलमत्रविषये बहुप्रपञ्चितेन । विकृतावयवनिबन्धनकार्ये तु नायं न्यायः प्रवर्त्तते, छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहारवद् विकृतावयवव्यवहारस्य दुरुपपादत्वात्, अयमाशयः–एकदेशविकृतस्यानन्यत्वं तत्रैव भवति यत्र तस्य विकृतावयवस्योद्देश्यत्वेन ग्रहणं न स्यात्, नहि छिन्नपुच्छस्य शुनः श्ववत्‌ पुच्छवत्त्वमपि कैश्चिद् व्यवह्रियते । तेन राजकीयमित्यादौ राज्ञो नकारस्य ककारादेशे सति नान्तत्वाभावात् "अनोऽस्य" [ २.१.१०९. ] इत्यकारलोपो न । एवमक्तपरिमाणग्रहणेऽपि नायं न्यायः प्रवर्त्तते, अक्तपरिमाणं च परिच्छिन्नपरिमाणम्, तेन संख्यात्वव्याप्यधर्मानयने परिमाणत्वव्याप्यधर्मानयने तद्घटितधर्मानयने च नास्य प्रवृत्तिः, तेन शतत्व-शतमुद्राघटितमञ्जूषात्वशेटकत्वशेटकपरिमितधान्यघटितमञ्जूषात्वयोश्च नातिदेशः, तत्रापि पूर्वोक्ता छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहाराभावमूलिका युक्तिरेव मानम् । ध्वनितं चेदं "येन विधिस्तदन्तस्य" [ पा० सू० १.१.७२. ] इति सूत्रे भाष्यकैयटयोः, तथा हि–'अक' सहितानां सर्वादिशब्दानां सर्वनामादिसंज्ञाशास्त्रे ग्रहणं कर्तव्यमिति विचार प्रघट्टके–"तदेकदेशविज्ञानाद् वा सिद्धम्" तदेकदेशविज्ञानाद् वा सिद्धमेतत्, तदेकदेशभूतस्तद्ग्रहणेन गृह्यते, तद्यथा–गङ्गा, यमुना, देवदत्तेति । अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुना ग्रहणेन गृह्यते, तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते, विषम उपन्यासः, इह केचिच्छब्दा अक्तपरिमाणानामर्थानां वाचका भवन्ति, य एते संख्याशब्दाः परिमाणशब्दाश्च, पञ्च, सप्त इत्येकेनाप्यपाये न भवन्ति, 'द्रोणः, खारी, आढकम्' इति नैवाधिके भवन्ति न न्यूने, केचिद् यावदेव तद् भवति तावदेवाहुः, य एते जातिशब्दा गुणशब्दाश्च, तैलं घृतमिति । खार्यामपि भवन्ति, द्रोणेऽपि, शुक्लो नीलः कृष्ण इति, हिमवत्यापि भवतिवटकणिकामात्रेऽपि द्रव्ये । इमाश्चापि संज्ञाः [ सर्वनामव्ययादिसंज्ञाः ] अक्तपरिमाणानामर्थानां क्रियन्ते, ताः केनाधिकस्य स्युरिति ।" एवं च परिच्छिन्नपरिमाणग्रहणे नैकदेशविकृतन्यायस्य प्रवृत्तिरिति भाष्यतात्पर्यमिति नागेशेन स्पष्टमुक्तं

तत्रैवोद्योते । नन्वेवमेतन्न्यायस्वीकारे "स्थानीवावर्णविधौ" [ ७. ४. १०९. ] इति स्थानिवद्विधायकपरिभाषासूत्रस्य वैयर्थ्य-मेव, अनेनैवादेशरूपविकारे सत्यपि स्थानिबुद्ध्या कार्यस्य संभवादिति चेत्? न-यत्र स्वर्धं तदधिकं वा विकृतं तत्र जाति-व्यञ्जकभूयोऽवयवदर्शनाभावेन तत्त्वाप्रतीतौ कार्यसिद्ध्यर्थं विकृत-वर्णरूपावयवत्वप्रतीत्यर्थं च तस्यावश्यकत्वात् । अयमाशयः-यत्रार्धं तदधिकं वा विकृतं तत्रायं न्यायो न प्रवर्त्तेत इत्युपपादि-तत्वेन तादृशस्थले वर्णभिन्नविकृतावयवत्वप्रतीतिरनेन न्यायेन कर्तुं न शक्यत इति तदर्थं "स्थानीवा०" [ ७.४.१०९ ] इत्यादिसूत्र-मावश्यकम् । *भूतपूर्वकस्तदुपचारः* इति न्यायश्च यत्रास्य न्यायस्य "स्थानीवा०" [ ७. ४. १०९. ] इति सूत्रस्य च न प्रवृत्तिस्तत्र प्रवर्त्तेत इति सर्वेषां विषयविभागो ज्ञेयः ॥ ७ ॥

## *भूतपूर्वकस्तदुपचारः* ॥ ८ ॥

सि०—पूर्वं भूतो भूतपूर्वः, स इवेति **भूतपूर्वकः, तदुपचारः** तस्य—सम्प्रति विद्यमानस्यभूत पूर्वस्थानेऽपि युज्यमानस्य, **उपचारः**—कार्यार्थं व्यवहारः; अथवा तस्य पूर्वं प्रयुक्तस्य, **उपचारः—भूतपूर्वकः**, यथा पूर्वं भूतस्तथैव सम्प्रति तदभावे-ऽपीत्यर्थः; कार्यप्रवृत्तिसमये तत्तन्निमित्तस्यासन्निधानेऽपि तत्त-द्वचनसामर्थ्यात् भूतपूर्वमपि तादृशधर्ममादाय तत् तत् कार्यं प्रवर्तनीयमिति भावः । अयं च न्यायो यत्र "स्थानीवा०" [ ७. ४. १०८. ] इत्यादिना प्रसिद्धातिदेशशास्त्रेण कथमपि शास्त्रप्रवृत्तिनिमित्तभूतो धर्मो न लभ्यः, तेन च शास्त्रानर्थक्य-शङ्का, तत्र शास्त्रारम्भसामर्थ्यादेव तथोपचारं करोतीति नात्र ज्ञापकविशेषापेक्षा; तथापि यदि ज्ञापकापेक्षा स्यात् तर्हि "ऋदुदितः" [ १. ४. ७०, ] इति पृथग्योग एवास्य न्यायस्य ज्ञापको बोध्यः । तथा हि—तत्र वृत्तौ पृथग्योगो श्वादिव्युदासार्थ इत्युक्तम्, न हि घुटि परे श्वादिर्धातुः सम्भवति, धातोर्नाम-त्वाभावाद् घुटश्च नाम्नो विधानात्, ततश्च श्वादेरन्यथैव वारणसम्भवे तदर्थं योगविभागस्यानावश्यकत्वम्, तथा च सम्प्रति नाम्नोऽपि भूतपूर्वस्य श्वादेरपि नोऽन्तो मा भूदित्येत-दर्थकः पृथग्योग एतन्न्यायसत्त्वमनुमापयति । *नानिष्टार्था शास्त्रप्रवृत्तिः* इति न्यायेन यत्रैतन्न्यायप्रवृत्ताविष्टं कार्यं सम्प-द्यते तत्रैवायं न्यायः प्रवर्तते, यत्र चैतत्प्रवृत्त्याऽनिष्टसम्भावना तत्र न प्रवर्तेत इति न तदर्थमपि ज्ञापकापेक्षा, तेन 'विज्ञपय्य' इत्यादौ "मारण-तोषण-निशाने ज्ञश्च" [ ४. २. ३०. ] इति कृतह्रस्वस्य ज्ञपेर्भूतपूर्वज्ञापिरूपत्वोपचाराभावात् "लघो-र्यपि" [ ४. ३. ८६. ] इत्यनेन लघूपान्त्यधातुलक्षणो णेरय् सिद्धः । एवं च न्यायस्वभावादेवानिष्टेऽर्थे औदासीन्य-सिद्धावपि यदि ज्ञापकापेक्षा स्यात् तर्हि "संख्यानां र्णाम्" [ १. ४. ३३. ] इति सूत्रस्थं बहुवचनं ज्ञापकं बोध्यम्, तद्धि 'अष्टानाम्' इत्यत्र परत्वात् "वाऽष्टन आः स्यादौ" [ १. ४. ५३. ] इत्यात्वे कृते नान्तत्वाभावात् भूतपूर्वनान्त-त्वमादायापि संख्यावाचिशब्दादामो नाम्भावार्थं कृतम्, अस्य न्यायस्य च जागरूकत्वे बहुवचनं विनापि भूतपूर्वोपचारे सिद्धे तद्वैयर्थ्यं स्पष्टमेव, तथा च तेन बहुवचननिर्देशेनास्य न्यायस्य क्वचिदौदासीन्यमपीत्यनुमीयत इति ॥ ८ ॥

## *भूतपूर्वकस्तदुपचारः* ॥ ८ ॥

**त०**—यत्त्वस्य न्यायस्य प्रण्यवधीदित्यत्र णत्वसिद्धिः फल-मित्युक्तं, तन्न शोभनम्, तत्र "स्थानीवावर्णविधौ" [ ७. ४. १०९. ] इत्यनेन स्थानिवद्भावेनैव गतार्थत्वादेतन्न्यायानवसरात्। न च स्थानीवेति परिभाषाद्वयमस्यैव न्यायस्य प्रपञ्च इति न तयाऽस्यान्यथासिद्धिरिति वाच्यम्, अग्रेऽस्य विषयस्य विवेचयि-ष्यमाणत्वात्, एवमत्र ज्ञापकत्वेन "नेर्ङ्गदा०" [ २. ३. ६९. ] इति सूत्रे वधेरपाठ इति यदुक्तं तदपि न चारु, नहि स्थानिन आदेशाश्च सूत्रेषु पठ्यन्ते । किञ्च तत्र वधेरपाठात् कथं न्यायो ज्ञापयितुं शक्यते? ज्ञापनं तेन विनाऽनुपपन्नेन प्रमाण-सिद्धेन वस्तुना तदाक्षेप एव, यथा दिवा भुञ्जानस्य देवदत्तस्य पीनत्वं रात्रिभोजनेन विनाऽनुपपद्यमानं रात्रिभोजनमाक्षिप-तीति, नहि तथा वधेः पाठाभावानुपपत्तिः केनापि प्रमाणेन सिद्धा, सा च तदा सिद्ध्येत यदि क्वचित् प्रण्यवधीदिति प्रयोगः शास्त्रकृता कृतः स्यात्, सोऽपि च वधेर्णत्वविधायकसूत्रेऽपाठा-दनुपपद्यमानो भूतपूर्वकमुपचारं कल्पयेत् स्वयमेव, न च तत्र पाठाभावस्य कल्पकतोचिता, पूर्वप्रदर्शितरीत्या च तस्यापि प्रयो-गस्य नानुपपद्यमानत्वं वधेरादेशत्वात् । न च न वधेरादेशत्व-मपि तु प्रकृत्यन्तरमेवेदं प्रत्ययविशेषप्रकृतित्वेन नियम्यते-वधिर्हि हिंसार्थकोऽन्यत्रोच्यते स एव तत्र प्रयोक्तव्यो न हन्तिरिति तात्पर्यादिति वाच्यम्, तर्हि भूतपूर्वन्यायस्याप्यप्रसरापत्तेः, तस्माद् वधेरादेशत्वमेव स्वीकार्यं, तथैव च तत्र "इ-कि-श्तिव् स्वरूपार्थे" [ ५. ३. १३२. ] इति इरपि सिद्ध्यति । अथ स्थानीवेत्यादयोऽस्यैव प्रपञ्च इति चेत्? तासां परिभाषाणां प्रत्य-क्षसिद्धतयाऽनुमानिकेनानेन न्यायेन गतार्थत्वाभावात्, न्याया हि लोकशास्त्रव्यवहारादिभिरनुमीयन्त इत्यानुमानिकाः, स्थानी-वेत्यादयश्च शास्त्रकृता स्वयमेवोक्ता इति प्रत्यक्षसिद्धाः, नहि प्रत्यक्षसिद्धमानुमानिकेन बाधितुं शक्यते । तथा च यत्रानयोः परिभाषयोर्न प्रवृत्तिरस्ति च किमपि तादृशं वचनं येन भूतपूर्व-धर्माश्रयणं विना न कार्यं सिद्ध्यति तत्रैवास्य न्यायस्य विषय इति स्वीकार्यमिति । पाणिनीयव्याकरणे च परिभाषेन्दुशेखराख्ये न्यायसंग्रहग्रन्थे नागेशोपाध्यायैः *साम्प्रतिकाभावे भूतपूर्व-

गतिः* इति न्यायाकारः सूचितः । "नामि" [ पा० सू० ६. ४. ३. ] इति सूत्रे भाष्येऽस्य न्यायस्योल्लेखः समुपलभ्यते, तत्र च केवलमेतदेव दृश्यते–'तत्र वचनाद्भूतपूर्वगतिर्विज्ञास्यते' इति, तावता च भूतपूर्वगतिरित्येतावदेव न्यायविधेयम्, साम्प्रतिकाभाव इति तु स्वरूपकथनम्, साम्प्रतिकाभावे सत्येव तद्गतेराश्रयणस्यावसरात् । तत्रास्य न्यायस्य उल्लेखप्रसङ्गश्चायमासीत्··· "नामि" [ पा० सू० ६. ४. ३. ] इति हि स्वरान्तानां नाम्नां षष्ठी बहुवचने दीर्घविधायकं सूत्रम्, यथा स्वमते "दीर्घो नाम्यतिसृचतसृषः" [ १. ४. ४८. ] इति सूत्रम् । तत्रेदं शङ्कितं पूर्वपक्षिणा–'आमि इत्येवोच्यताम्, दीर्घे कृतेऽपि भूतपूर्वगत्या "ह्रस्वापश्च" [ १. ४. ३२. ] इति नुट् [ स्वमते नामादेशः ] भविष्यति' इति, तत्र च बहु विचार्य अन्ते उत्तरसूत्रे "नोपधायाः [ पा० सू० ६. ४. ७. ] इत्यत्रानुवृत्त्यर्थमावश्यकः सनकारपाठः स्पष्टप्रतिपत्तये इहैव कृत इति समाहितम् । अनेन हि सूत्रेण नकारान्तस्य शब्दस्योपान्त्यस्य नामि दीर्घो विधीयते, स आमि चेत् विधास्यते तर्हि 'चर्मणाम्' इत्यादावपि भविष्यतीति तत्र मा भूदित्येतदर्थं नामि दीर्घविधानमावश्यकमिति । तथा च तत्रत्यं भाष्यस्थं संग्राहकं वार्त्तिकम्–"नामि दीर्घ आमि चेत स्यात् कृते दीर्घे न नुड् भवेत् वचनाद् यत्र तन्नास्ति, नोपधायाश्च चर्मणाम् ॥ इति । अनेन च स्थानीवेति परिभाषातोऽस्य न्यायस्य विविक्तविषयत्वमपि सूचितं भवति । नहि देवशब्दस्य आमि दीर्घे कृते 'देवा–आम्' इति स्थिते स्थानिवद्भावेन तत्र ह्रस्वान्तत्वं संभवति, अत्र देवशब्दस्य स्थानित्वाभावात्, देवशब्दाकारस्य स्थानित्वेऽपि तस्येह नामकार्यित्वाभावात्, तथा च नात्र स्थानिवद्भावविषय इति न्यायस्यास्यावश्यकता भवतीति॥८॥

## *भाविनि भूतवदुपचारः* ॥ ९ ॥

**सि०—भाविनि** आगामिनि–अग्रेऽवश्यं सम्पद्यमाने धर्मे, **भूतवत्** सम्पन्नवत्, **उपचारः** व्यवहारः, स च कार्यनिमित्तक एवेति भाविधर्मादिनिमित्तकमपि कार्यं क्वचिल्लक्ष्यानुरोधाद् वचनसामर्थ्याच्च कार्यमित्यर्थः, यथा तृणामित्यादौ पदे "रषृवर्णान्नो ण एकपदेऽनन्त्यस्य०" [ २. ३. ६३. ] इत्यादिना णत्वं क्रियते, तथा रवणं तक्षणमित्यादौ स्याद्युत्पत्तेः पूर्वं पदत्वाभावेऽपि भाविपदत्वमाश्रित्य णत्वं क्रियत एव । पूर्वन्यायवदस्यापि साम्प्रतिकाभावे एव प्रवृत्तिः, तथा च यत्र यो धर्मः सम्प्रति नास्ति कार्यानुरोधात् सूत्रादिसार्थक्याय च तस्याश्रयणमावश्यकं तत्र भाविनोऽपि धर्मस्याश्रयणम् । अयमपि न्यायो लोकसिद्ध एव, दृश्यते हि लोके 'ओदनं पचति देवदत्तः' इत्यादिप्रयोगे भाविनो धर्मस्य भूतवदुपचारः, तथाहि–"भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः" इत्यमरकोशानुसारमोदनं सिद्धमन्न[पक्वमन्न]मुच्यते, यदि च तत् पक्वं कथं तत् पक्तव्यमिति व्यवह्रियते । तथा च तत्र भाविनि स्वरूपे भूतवदुपचारेणौदनशब्दप्रयोगः, तथैव भाविनि पदेऽपि पदत्वव्यवहारः, एवं च नात्र ज्ञापकापेक्षा । अयं च भाविधर्मोपचारो लक्ष्यानुरोधादेवेति नानिष्टेऽर्थे भवति, *नानिष्टार्था शास्त्रप्रवृत्तिः* इति न्यायाच्च, तथा च 'अपाठीद्' इत्यादौ अटि भाविनि सति स्वरादित्वसंभावनायामपि पूर्वं स्वरादित्वोपचाराभावेन "व्यञ्जनादेर्वोपान्त्यस्यातः" [ ४. ३. ४७. ] इति वृद्धिः सिद्धा । तथा चानिष्टे विषयेऽप्रवृत्तिरपि स्वत एव सिद्धेति न तदर्थमपि ज्ञापकापेक्षेति ॥ ९ ॥

## *भाविनि भूतवदुपचारः* ॥ ९ ॥

**त०**—अयं न्यायः संज्ञाविषय एव प्रवर्त्तते, लोकव्यवहारमूलकतया लोके संज्ञाविषय एव तथा व्यवहरणात्, उपपादयिष्यते चैतदग्रे । तथा च संज्ञाविषयकमेवोदाहरणं—रवणं तक्षणमिति । अत्र ज्ञापकापेक्षा नेत्युक्तं वृत्तौ, तेन कैश्चिदत्र यज्ज्ञापकमुपन्यस्तं तदनावश्यकम् । किञ्च न तज्ज्ञापकं भवितुमर्हति, तथा हि–तेषां ग्रन्थः–निवेदकन्त्वस्य "रषृवर्णात्०" [ २ ३. ६३. ] इत्यनेन पदे एव णत्वविधानम्, तथा हि–णत्वं तावत्तृणामित्यादिपदेष्विव रवणादिनामस्वपि दृश्यते, "रषृवर्णात्०" [ २ ३. ६३. ] इति सूत्रेण च पदे एव विहितम्, ततो ज्ञायते नाम्नां णत्वे कर्त्तव्ये 'एष न्यायोऽस्तीति धिया सूत्रे पदे' इत्युक्तम्, इति । अत्रेदमुच्यते–'पदे' इति हि निमित्त-निमित्तिनोर्भिन्नपदस्थत्वव्यावृत्तये समुपादीयते, न च तत्प्रयोजनं 'पद' इत्यस्याभावे सम्पद्यते इति तदर्थं सार्थकं तत् कथमिदं ज्ञापयितुं प्रभवेत्, ज्ञापनं हि तेन विनाऽनुपपद्यमानेन वस्तुना भवतीति प्रागपि प्रतिपादितम् । तथा च निमित्त-निमित्तिनोर्भिन्नपदस्थत्वव्यावर्त्तकमिदं न रवणादिषु णत्व प्रवृत्तौ बाधकं स्यात्, पदत्ववत्येव प्रवृत्तिरित्यंशे तात्पर्याभावात्, भवति चात्र पदसंज्ञायां सत्यामपि णत्वप्रवृत्तिस्वीकारे बाधकाभावः । कृत्प्रत्ययोत्पत्तिमात्रेण तस्य नामत्वे सति स्यादौ सति च पश्चात् कार्यान्तरकरणे दोषाभावादिति नात्र तस्य न्यायस्याश्रयणीयता । लौकिकव्यवहारेण सिद्धे च तस्मिन् नामत्वादितः पूर्वमपि णत्वप्राप्तिरित्यन्यदेतत् । तथा चेदं ज्ञापकत्वकथनं चिन्त्यमेव । पाणिनीयादितन्त्रे च नेदृशो न्यायोऽवलम्बितः, न चायं न्यायः परिभाषेन्दुशेखराख्यन्यायसंग्रहे सङ्गृहीतः । यद्यपि भाष्यकृता क्वचिद् भाविन्याः संज्ञायाः समाश्रयणं भवतीति प्रतिपादितम्–'इग्यणः सम्प्रसारणम्" [ पा० सू० १. १. ४५. ] इति सूत्रे भाष्ये, तथापि न तत् तादृशन्यायवचनकल्पनापरं किन्तु लोकसिद्धविषयकथनमात्रम्, तथा हि–तत्र भाष्येऽनेन सूत्रेण वाक्यस्य संज्ञा क्रियते ?

उत वर्णस्येति प्रश्ने वर्णस्य संज्ञेति सिद्धान्तपक्षे दूषणवार्तिकमिदमुक्तम्–'वर्णसंज्ञा चेन्निर्वृत्तिः' इति, व्याख्यातं चेत्थम्–"वर्णसंज्ञा-चेन्निर्वृत्तिर्न सिद्धयति ष्यङः "सम्प्रसारणम्" [ पा० सू० ६. १. १३. ] इति स एव तावदिह दुर्लभो यस्य संज्ञा क्रियते । अथापि कथंचिल्लभ्येत, केनासौ यणः स्थाने स्यात्, अनेन ह्यसौ व्यवस्थाप्यते, तदितरेतराश्रयं भवति, इतरेतराश्रयाणि कार्याणि च न प्रकल्पन्ते" इति, अयमाशयः–'यणः इक् भवति' ( यवराणां ऋत् भवति ) इति वाक्यं न 'सम्प्रसारण'संज्ञं, किन्तु तत्तत्स्थाने विधीयमाना इकारोकार-ऋकारा एव 'सम्प्रसारण'संज्ञा भवन्ति' इत्यर्थस्य समाश्रयणे "ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे" [पा० सू० ६.१.१३.] इत्यादिविधिसूत्रैः सम्प्रसारणसिद्धिर्न स्यात्, यणः स्थाने विधीयमानत्वे सति तस्य सम्प्रसारणसंज्ञा स्यात्, संज्ञायां च सत्यां विधानं स्यादिति परस्पराश्रयत्वात्, परस्पराश्रयं च कार्यं न सम्पद्यत इति कार्यशब्दवादे सम्प्रसारणविधानमसम्भवि स्यादिति । ततः परमनेकानि समाधानि दत्त्वा दूषयित्वा चान्ते इत्थमुक्तम्–"एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते, तद्यथा–कश्चित् कंचित्तन्तुवायमाह–अस्य सूत्रस्य शाटकं वय' इति, स पश्यति–'यदि शाटकः, न वातव्यः, अथ वातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य संज्ञाऽभिप्रेता । स मन्ये वातव्यो यस्मिन्नुते 'शाकट' इत्येतद् भवतीति । एवमिहापि स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य 'संप्रसारण'मित्येषा संज्ञा भविष्यतीति अयमाशयः–नित्यशब्दवादे तु यत्र यणः स्थाने इक् प्रयुक्तो दृश्यते तत्र 'सम्प्रसारण'शब्देन व्यवहारः कार्य इत्याश्रयणे नान्योन्याश्रयः । कार्यशब्दवादेऽपि सूत्रशाटकन्यायेन भाविनीं संज्ञामाश्रित्य व्यवहारः कार्यः, यथा–'अस्य सूत्रस्य शाटकं वय' इति तन्तुवायं प्रति कथिते वाक्ये यस्मिन्नुते सति 'शाटक' इत्येषा संज्ञा भवतीति विज्ञायते, तथाऽत्रापि यस्य यणः स्थाने विधीयमानस्य संप्रसारणसंज्ञा भविष्यति स विधेय इत्येवं विधिप्रदेशेषु भाविसंज्ञायाः समाश्रयणमिति । अनेन च भाष्यसन्दर्भेण संज्ञानिमित्तके कार्ये क्वचिद्भाविनीं संज्ञामादायापि व्यवहारो भवति लोकवदिति विज्ञायते । तथा च भाविनि भूतवदुपचार इति न्यायोऽपि संज्ञाविषय एव प्रयोक्तव्यो नान्यत्रेति 'अपाठीत्' इत्यादौ व्यञ्जनादित्वं स्वरादित्वं वा न संज्ञेति न तद्विषयेऽस्य प्रवृत्तिसंभावनेति नानित्यत्वकल्पनाऽवश्यकीति विज्ञेयमिति ॥ ९ ॥

---

## ॐयथासंख्यमनुदेशः समानाम्ॐ ॥ १० ॥

**सि०**—सम्यक् ख्यानं-संख्या, बुद्धिः, ज्ञानमित्यर्थः; न च संख्याशब्दस्य बुद्धौ न प्रयोग इति वाच्यम्, "यत् सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते [ भगवद्गीता अ० ५, श्लो० ५ ] इत्यादौ संख्याशब्दस्य बुद्धिवाचकत्वस्य दृष्टत्वात् । बुद्धिकर्तृत्वप्रतिपादकत्वेनैव च 'सांख्य'शास्त्रस्य तच्छब्देन व्यपदेशः । **समानां** साम्यवताम्, साम्यं च संख्यया । तथा च समसंख्यावतामुद्देशिनाम्, **अनुदेशः** पश्चाद्भववाक्यार्थकालिकः सम्बन्धः, **यथासंख्यं** संख्या-बोधक्रममनतिक्रम्य भवतीति न्यायार्थः । संख्या-गणनमिति वा, तथा च यथागणनं वाक्यार्थबोधकालिकः सम्बन्धो भवतीति वाऽर्थः । संख्याशब्दस्यैकत्वादौ रूढस्य तु नेह ग्रहणं तथा सति वाक्यार्थानुपपत्तेः । अत्रोद्देशिनोऽनुदेशिनश्च उच्चार्यमाणा उच्चार्यमाणप्रतिपाद्याश्च गृह्यन्ते । उद्देश्यनुदेशिशब्दौ पूर्वोच्चार्यमाण-पश्चादुच्चार्यमाणपरौ न तूद्देश्यविधेयपरौ, तथा सति अनूद्यमानानां यथासंख्यमन्वयो न स्यात् । यथा "कर्तुर्जीव-पुरुषान्नश्-वहः" [ ५. ४. ६९. ] इति सूत्रे जीव-पुरुषयोर्नश्-वहोश्चानूद्यमानयोरेव यथासंख्यं भवति, न तु विधीयमानेन तस्यैकत्वेन, यथासंख्यान्वयासंभवात् । एतदुदाहरणं तु–"ङे-ङस्योर्या-ऽऽतौ" [ १. ४. ६. ] इत्यादि, अत्र हि पूर्वं द्वन्द्वसाधुत्वाय 'ङे-ङस्' समुदायस्य 'यात्'समुदायेन सहान्वयबोधविवक्षा भवति, पश्चाल्लक्ष्यसंस्कारकवाक्यार्थबोधकाले ङेर्यकारेण ङसेराता च सम्बन्ध एतन्न्यायकृतः, अन्यथा इतरेतरयोगनिर्दिष्टतया प्रत्येकमादेशद्वयापत्तिः । **समानामिति** किम्? "नमस्-पुरसो गतेः क-ख-प-फि रः सः" [ २. ३. १. ] अत्र नमस्-पुरसोः क-खाद्यैः सह समानवचननिर्देशेऽपि वस्तुनः समसंख्यत्वाभावेन समत्वाभावान्न यथासंख्यम्, संख्या चेह वचनरूपा गणनारूपा च गृह्यते, इत्युभयथा साम्य एव समत्वव्यवहारादिह वचनेन साम्येऽपि गणनया साम्याभावात्; एवं "तौ मु-मो व्यञ्जने स्वौ" [ १. ३. १५. ] मु-मयोरनुस्वारा-नुनासिकत्वाभ्यां संख्यासाम्येऽपि वचनसाम्याभावान्न यथासंख्यं किन्तु पर्यायेण द्वयोरेव सर्वत्र विधानम् । ज्ञापकं त्वस्य "च-ट-ते सद्वितीये" [ १. ३. ७. ] इति गुरुसूत्रकरणम्, अन्यथा "च-छ-ट-ठ-त-थे" इति लघुभूतमेव सूत्रं कुर्यात्, तदकृत्वा गुरुसूत्रकरणं ज्ञापयति–यदिह विधेयानां श-ष-सानां त्रित्वेन षड्भिः सह यथासंख्यमन्वयो न स्यादिति त्रय एव सूत्रे निर्दिष्टाः, ते च त्रयो यथायथं स्वकीयेन द्वितीयेन सह पर्यायेण स्वोद्देश्यक्रमादेशमनुभवन्ति, तथा चैतन्न्यायस्य सत्ताऽनेन गुरुसूत्रकरणेनानुभूयते । लक्ष्यानुसारं च क्वचिद् वचनसाम्याभावेऽपि गणनामात्रसाम्येन न्यायोऽयं प्रवर्तते, यथा–"भुज-पत्यादिभ्यः कर्मा-ऽपादाने" [ ५. ३. १२८. ] इत्यत्र, अत्र हि वचनवैषम्येऽपि गणनासाम्येन भुजादिभ्यः कर्मणि पत्यादिभ्योऽपादाने इति यथासंख्यमन्वयो भवति । क्वचिच्चोभयसत्त्वेऽपि नास्य प्रवृत्तिः, यथा "पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ

पुरवधश्चैषाम्" [ ७. २. ११५. ] इत्यत्र, अत्र हि "दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः" [ ७. २. ११२. ] इति सूत्रादनुवर्त्तमानैर्दिग्-देश-कालैः सह गणनवचनसाम्येऽपि पूर्वा-ऽवरा-ऽधराणां न यथासंख्यमिति ॥१०॥

---

## ❋ यथासंख्यमनुदेशः समानाम् ❋ ॥१०॥

**त०**—अनुपूर्वकदिश्धातोः पश्चाद्कथनमर्थः, उत्पूर्वकदिश्धातोः सिद्धज्ञानमर्थः, एवं प्रतिनिर्पूर्वकदिश्धातोरपूर्वज्ञानमर्थः, ततश्च करणे घञि—अनुदेशोद्देशप्रतिनिर्देशशब्दानां सिद्धिः । तथा च न्याये अनुदेशपदेनोपस्थितिः पश्चाद्कथवाक्यार्थबोधविषयीभूताकाङ्क्षाभास्यसम्बन्ध उच्यते। समानामिति चावर्त्तते, एकत्रानुयोगित्वमपरत्र प्रतियोगित्वं च षष्ठ्यर्थः । **समानामि**त्यस्य तुल्य संख्यावतामित्यर्थः । **यथासंख्यमि**त्यस्य संख्याकर्मकातिक्रमणकर्तृत्वाभाववानित्यर्थः । तथा च तुल्यसंख्याप्रतियोगिकस्तुल्यसंख्यानुयोगिकश्चाकाङ्क्षाभास्यसम्बन्धः संख्याकर्मकातिक्रमणकर्तृत्वाभाववान् भवतीति वाक्यार्थः । अत्र पक्षे संख्या क्रमः, क्रमश्चापेक्षाबुद्धिविशेषविषयता, आकाङ्क्षाभास्यसम्बन्धे सङ्ख्याकर्मकातिक्रमणकर्तृत्वं च स्वप्रतियोगिवृत्त्यपेक्षाबुद्धिविशेषविषयताविजातीयापेक्षाबुद्धिविषयतावदनुयोगिकत्वम् ,तदभावश्च स्वप्रतियोगिवृत्त्यपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वम् , साजात्यं च स्वनिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसंख्यात्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वम् , स्ववृत्ति-स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वविशिष्टत्वावच्छिन्नधर्मितात्व-स्ववृत्ति-स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वावच्छिन्नधर्मितात्वैतदन्यतरवत्त्वम्-एतदुभयधर्माभ्याम् , यथा "कर्तुर्जीवपुरुषान्नश्वहः" [ ५. ४. ६९. ] इत्यादौ तुल्यसंख्यावत्-जीवपुरुषप्रतियोगिकः, तुल्यसंख्यावत् नश्वहानुयोगिकश्च य आकाङ्क्षाभास्याव्यवहितोत्तरत्वादिः सम्बन्धः,तत्र स्वप्रतियोगिजीववृत्त्यपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावन्नशनुयोगिकत्वम् , एवं स्वप्रतियोगिपुरुषवृत्ति-अपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावद्वहनुयोगिकत्वमिति संख्याकर्मकातिक्रमणकर्तृत्वाभावः । संख्याकर्मकातिक्रमणकर्तृत्वं च स्वप्रतियोगिजीववृत्त्यपेक्षाबुद्धिविशेषविषयताविजातीयापेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वम् , नश्निष्ठापेक्षाबुद्धिविशेषविषयताया जीवनिष्ठापेक्षाबुद्धिविशेषविषयतासजातीयत्वात् बहुनिष्ठापेक्षाबुद्धिविशेषविषयतायाश्च जीवनिष्ठापेक्षाबुद्धिविशेषविषयताविजातीयत्वाच्च साजात्यलक्षणसमन्वयश्चान्यत्रप्रदर्शितरीत्योहनीय इति नेह प्रतन्यते । यद्यपि स्थानिताख्यलौकिकप्रमाणेन यथा "शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय" इत्यादौ स्थानानुसारं क्रमेण शत्रुमित्रादिपदानामर्था जयेत्यादिपदार्थैः सम्बध्यन्ते तथा शास्त्रेऽपि स्थानाख्यलौकिकप्रमाणादेव क्रमिकान्वये सिद्धेऽयं न्यायो नावश्यकः, तथापि "ङेङस्योर्याऽऽतौ" [ १. ४. ६. ] इत्यादिसूत्रेषु समासनिर्देशे साहित्ये द्वन्द्वविधानादुभयोः सहैवैकत्रान्वयः स्यादित्यप्राप्तक्रमिकान्वयविधानार्थमस्य न्यायस्यावश्यकत्वमिति ज्ञेयम् ; किञ्च "इवर्णादेरस्वे स्वरे यवरलम्" [ १. २. २१. ] इत्यादौ यत्रोद्देशिनां न साक्षादुच्चारणं किन्तु शब्दान्तरैराख्यानं तत्र सूत्रे स्थानस्याश्रुतत्वात् स्थानाख्यप्रमाणस्याप्रवृत्तावप्राप्तक्रमान्वयबोधार्थं चास्य न्यायस्यावश्यकत्वम् । अयं च न्यायो धर्मसाम्य एव प्रवर्त्तते न व्यक्तिसाम्ये, व्यक्तीनामानन्त्येन तत्साम्यस्य दुरुपपादत्वात् ॥

पाणिनीयतन्त्रे सूत्ररूपेणायं न्यायः पठितः, तच्च सूत्रमष्टाध्याय्याः प्रथमाध्यायस्य तृतीये पादे दशमम् , तत्रापि महाभाष्ये लौकिकस्थानप्रमाणेनास्य गतार्थत्वमाशङ्क्य संज्ञया समासेन च यत्रोच्यते तदर्थमिदमिति समाहितम् , तथा हि—"किमर्थं पुनरिदमुच्यते" इत्याक्षेपभाष्यम् , तस्याशयः—सूत्रं विनापि लोकसिद्धस्थानाख्यप्रमाणेनैव "शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय" इतिवत् सिद्धिरस्तीति नावश्यकता सूत्रस्येति, तत्र समाधानवार्त्तिकम्—"संज्ञासमासनिर्देशात् सर्वप्रसङ्गोऽनुदेशस्य, तत्र यथासंख्यवचनं नियमार्थम्" इति, तद्भाष्यम्—"संज्ञया समासैश्च निर्देशाः क्रियन्ते, संज्ञया तावत्—परस्मैपदानां णलतुसुस्थलतुसणल्वमाः" इति, [ पा० सू० ३. ४. ८२. ] समासैः "तूदीशलातुरवर्मतीकूचवाराड्-ठक्-छण्-ढञ्-यकः" [ पा० सू० ४. ३. ९४. ] इति, समाससंज्ञानिर्देशादेतस्मात् कारणात् सर्वप्रसङ्गः, सर्वस्योद्देशस्य सर्वोऽनुदेशः प्राप्नोति, इष्यते च यथासंख्यं स्यादिति, तच्चान्तरेण यत्नं न सिद्ध्यतीति तत्र यथासंख्यवचनं नियमार्थम् , एवमर्थमिदमुच्यते" इति कैयटेनेत्थं प्रदीपितम्—"परस्मैपदानां णलतुस्" [ पा० सू० ३. ४. ८२. ] इत्यत्र संज्ञया सर्वे युगपत् प्रत्याय्यन्ते इति नास्ति पाठक्रमाद् व्यवस्था, लोकेऽप्यजाविधनौ देवदत्त-यज्ञदत्तौ इति समासनिर्देशे नास्ति क्रमनियमः, द्वन्द्वेऽनेकावयवात्मकः समुदायः एकेनैव शब्देन प्रत्याय्यते इति कुतः क्रमनियमः स्यात् ?" इति । "यद्यपि संज्ञा प्रत्येकं पर्याप्तेति न संज्ञाकृतं युगपत् प्रत्यायनं, किन्त्वेकशेषप्रमाणबललभ्यं तत् 'ब्राह्मणानामर्घपाद्याचमनीयानी'तिवत् , तत्र ब्राह्मणत्रित्वेऽपि नार्घादीनां क्रमनियमः, तथापि संज्ञाया नवकसाधारण्यमेव तत्र मूलमिति संज्ञानिर्देशादित्युक्तम्" इति च नागेशेन विवृतम् । तत्र चैतावत् सारम्—संज्ञया विधीयमानेषु कार्येषु सर्वेषां संज्ञिनां युगपदेवोपस्थितौ तैः सह क्रमान्वयः स्थानाख्यप्रमाणेनासिद्ध इति तदर्थं, समासस्थले च समासावयवानां समुदायोपसर्जनतया समुदायस्यैव पदान्तरार्थेनान्वयात् तत्राऽपि स्थाना-

ख्यप्रमाणस्य न प्रसर इति तत्र यथासंख्यमन्वयनियमार्थमिदं सूत्रमिति ॥

अथ 'समानाम्' इत्यस्य साम्यवतामित्यर्थः, तत्र साम्यं शब्दतो ग्राह्यमर्थतो वेति निर्णयाय–"किं पुनः शब्दतः साम्ये संख्यातानुदेशो भवत्याहोस्विदर्थतः" इत्येवं विचाराधिकरणमारब्धम्, तदाशयश्च कैयटेनेत्थं प्रकटितः–"यद्यप्यर्थे शब्दस्य गुणभावादर्थत एव साम्यं न्याय्यं तथापि शब्दधर्मेणाप्यर्थस्य व्यपदेशो दृश्यते, यथा–भ्रमरशब्दस्य द्विरेफत्वात् द्विरेफो भ्रमर इति, तथा द्व्यक्षरं मांसं, द्व्यक्षरमस्थि, तस्माच्छब्दतोऽपि साम्यमत्राशङ्कितम्", तस्यायमाशयः—यद्यप्यर्थप्रत्यायनार्थमेव शब्दः प्रयुज्यत इति शब्दस्य गुणत्वमर्थस्य प्राधान्यमित्यर्थत एव साम्यं ग्राह्यमिति नास्ति संदेह इति न विचारारम्भावश्यकता, तथापि वाच्यवाचकयोरभेदोपचारात् शब्दधर्मेणाप्यर्थस्य व्यवहारो लोके भ्रमरादिपदार्थे द्विरेफवत्त्वादिव्यवहारविधया क्रियत एवेति शब्दस्यापि तत्र प्राधान्यदर्शनादस्ति शङ्का [ ५. ३. १. ] इति, शब्दतः साम्यविवक्षापक्षे चायमर्थः—शब्दतः संख्यया समानां योऽनुदेशः पश्चाद्भव उच्चार्यमाणेन सम्बन्धः स यथासंख्यमिति, तथा च संज्ञया निर्दिष्टानां प्रतिनिर्दिष्टेन सह न शब्दतः साम्यं भवति, संज्ञाया एकरूपत्वात् तेषां चानेकत्वादिति तत्र दोषः स्यादित्याह–उभयोः पक्षयोर्दोष-गुणौ विवेचयन् भाष्यकृत् । तथा च शब्दसाम्यपक्षदूषणवार्त्तिकम्–"संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां, डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः" इति [ तद्भाष्यम्, ] अगमको निर्देशोऽनिर्देशः, "परस्मैपदानां णलतुसुस्थलथुसणल्वमाः" [पा० सू० ३. ४. ८२ ] इति णलादयो बहवः, 'परस्मैपदाना'मित्येकः शब्दः, वैषम्यात् संख्यातानुदेशो न प्राप्नोति । डारौरसः प्रथमस्य, "लुटः प्रथमस्य डारौरसः" [ पा० सू० २. ४. ८५. ] डारौरसो बहवः प्रथमस्येत्येकः शब्दः, वैषम्यात् संख्यातानुदेशो न प्राप्नोति । "एचोऽय वायावः" [ पा० सू० ६. १. ७८. ] अयवायावो बहवः, एच इत्येकः शब्दः, वैषम्यात् संख्यातानुदेशो न प्राप्नोतीति । अयमाशयः–परस्मैपदशब्देन परोक्षास्थानिका नव त्यादय आदेशा उपस्थाप्यन्ते इति तेषां नवानां णलादिभिर्नवभिः सह साम्यमर्थत एवास्ति, न तु शब्दतः, इति शब्दतः साम्यस्य ग्रहणे संख्यातानुदेशो न प्राप्नोति । एवम्–लुटः [ श्वस्तन्याः ] प्रथमपुरुषस्य स्थाने विधीयमानाः डारौरसः [ ता-तारौ-तारसः ] बहवः, प्रथमस्येत्येकः शब्द इति संख्यातानुदेशो न प्राप्नोति । एवम्–एचोऽयवायावः [ पा० सू० ६. १. ७८. ] इति सूत्रे अयवायावश्चत्वारः, एच इत्येकं पदमिति शब्दतः साम्याभावात् संख्यातानुदेशो न प्राप्नोतीति शब्दतः साम्याश्रयणं न युक्तमिति । अथास्त्वर्थतः साम्यमिति चेत् ? अत्रापि पक्षे दूषणसद्भावात्, तथाहि–तत्र दूषणप्रदर्शनवार्त्तिकम्–"अर्थतश्चेल्लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषः" इति, तद्भाष्यम्–"अर्थतश्चेल्लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषो भवति, "स्यतासी लृलुटोः" [ पा० सू० ३. १. ३३. ] स्यतासी द्वौ, लृलुटोरित्यस्य त्रयोऽर्थाः, वैषम्यात् संख्यातानुदेशो न प्राप्नोति । "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" [ पा० सू० ३. १. १३४. ] इति नन्द्यादयो बहवः, ल्युणिन्यचस्त्रयः, वैषम्यात् संख्यातानुदेशो न प्राप्नोति । "अरीहणादयः" [ पा० सू० ४. २. ८० ] पठिताः बहवः, वुञादयः सप्तदश, वैषम्यात् संख्यातानुदेशो न प्राप्नोति । "सिन्धुतक्षशिलादिभ्योऽणञौ" [ पा० सू० ४. ३. ९३. ] सिन्धुतक्षशिलादयो बहवः, अणञौ द्वौ, वैषम्यात् संख्यातानुदेशो न प्राप्नोति" इति । अस्यायमाशयः–गृह्यमाण [ उच्चार्यमाण ] शब्दार्थभूतानां संख्यया साम्यं विवक्षितमित्यर्थो विज्ञायते चेत् तदा यत्र गणेन निर्देशः क्रियते तत्र तदर्थभूता बहवो भवन्ति, प्रत्ययाश्च न तावन्त इति संख्यातानुदेशो न प्राप्नोति, यथा "भौरिक्याद्यैषुकार्यादेर्विधभक्तम्" [ ६. २. ६८. ] भौरिक्यादयो बहवः, इषुकार्यादयश्च बहवः, प्रत्ययौ द्वाविति संख्यातानुदेशो न प्राप्नोतीत्युभयोः पक्षयोर्दोष इति, इत्थमुभयोः पक्षयोर्दोषान् प्रदर्श्य शब्दतः साम्यं स्वीकृत्य तस्मिन् पक्षे प्रसक्तान् दोषान् "स्थानेऽन्तरतमः" [ पा० सू० १. १. ५०. ] इति सूत्रेण [ "आसन्नः" ७. ४. १२०. इति परिभाषासूत्रेणेत्यर्थः ] परिजहार । ततश्च यत्र यथासंख्यमनिष्टं तत्र कुत्रचिदुपायान्तरमपि च प्रक्रियानुसारं प्रदर्श्य स्वरितत्वप्रतिज्ञया "स्वरितेनाधिकारः" [ पा० सू० १. ३. ११. ] इत्यग्रिमसूत्रस्थस्वरितेनेति पदमनुवर्त्य नवासमानयोगवचनादिति वार्त्तिकेन च समाहितम्, एकस्मिन् योगे उच्चारितानामेव यथासंख्यं भवति, न त्वन्यत्रोच्चारितानामित्यर्थत्वेन तस्य वार्त्तिकस्य सर्वदोषाः परिहृताः । तस्यायमाशयः–अनुदेश उच्चारणम्, योगान्तरे तु शब्दस्योच्चारणेऽपि अत्र तस्यानुमानमेवेति नानुदेशप्राप्तिरिति न्यायसिद्धैव तत्रास्य न्यायस्याप्रवृत्तिरिति; स्वमते चानिष्टस्थलेऽप्रवृत्तयेऽस्यानित्यत्वमेवाश्रीयते, तदपि समानयोगपठितानामेव यथासंख्यमिति स्वीकारेणैव सिद्धम्, तथाहि–'दिग्देशकालेषु' इति हि पदं "पूर्वापराधरेभ्योऽसस्तातौ पुरवधश्चैषाम्" [ ७. २. ११५. ] इति सूत्रे न पठितमपि तु "दिक्शब्दाद् दिग्देशकालेषु प्रथमा-पञ्चमी-सप्तम्याः" [ ७. २. ११३. ] इति सूत्रादेवानुवृत्तमिति तेन सह न यथासंख्यं भविष्यतीति ॥१०॥

## *विवक्षातः कारकाणि* ॥ ११ ॥

**सि०**—'विवक्षातः' इत्यत्र तसूप्रत्ययस्थानिन्याः पञ्चम्याः प्रयोज्यत्वमर्थः कारकत्वं च क्रियायां जनकत्वेनान्वयित्वम्, तद्वन्ति च यद्यपि पदानि न भवन्ति, पदानां शब्दरूपत्वेन क्रिया-

जनकत्वासंभवात्, तथापि स्वार्थद्वारा क्रियाजनकत्वं तेषामिति पदमपि कारकं निगद्यते। वस्तुतस्तु इह शास्त्रे स्यादिविभक्तिसमुदाय एव कारकत्वव्यवहारो दृश्यते तासां कारकत्वनिमित्तकत्वात्, तथा च तानि **कारकाणि** कारकविभक्तयः, विवक्षाप्रयोज्यानि, इत्यर्थः, विवक्षा च वक्तुरिच्छा। तथा च वक्ता यत्राकारकेऽपि कारकत्वं विवक्षति तदकारकमपि कारकं भवति, कारकान्तरमपि कारकान्तरतां गच्छति, कारकत्वं न वा लभते इति न्यायार्थः पर्यवस्यति। कारकविशेषाणां लक्षणानि नियतानि, तानि च न परस्परं व्यभिचरन्तीति न हेत्वादेः कदाचिदपि कारकत्वं (कर्तृत्वं) प्राप्नोति, विवक्षायाः कारकत्वप्रयोजकत्वाङ्गीकारे च हेतोरपि कर्तृत्वं विवक्ष्यते चेत् तदा भवति स कर्तापि, यथा—'भिक्षा वासयति भिक्षुकं ग्रामे' इति, अत्र हि भिक्षावासहेतुभूताऽपि विवक्षावशात् कर्तृत्वं प्राप्ता, हेतोश्च व्यापारशून्यत्वेन कारकत्वं नास्त्येव, तदभावाच्च तत्र कर्तृत्वमप्राप्तमेव विवक्षावशादेव [ कर्तृत्वं ] भवति; भिक्षाया वासं प्रति कारकत्वे सति तु 'भिक्षयोषितः' इति प्रयोगे "कारकं कृता" [ ३. १. ६८. ] इति समासः स्यात्। एवं कारकस्यापि कारकत्वेनाविवक्षायां सम्बन्धमात्रबोधिका षष्ठ्येव भवति, यथा-माषाणामश्नीयादिति। क्वचिच्च कारकान्तरं कारकान्तरतां गच्छति, यथा—'ओदनः पच्यते स्वयमेव' इति, अत्र कर्मकारकमपि ओदनो विवक्षावशात् कर्तृतां यातः; तथा असिश्छिनत्ति' इति, अत्र करणस्यासेः कर्तृत्वविवक्षा। "स्मृत्यर्थदयेशः" [ २. २. ११. ] इत्यस्य वृत्तिकृता नियमार्थत्वोपवर्णनेन ज्ञापितोऽयं न्यायः। तथा हि—तत्र सूत्रे वृत्तिः "ननु कर्माविवक्षायां पक्षे माषाणामश्नीयादित्यादिवत् शेषषष्ठी सिद्धैव तत् किमनेन? सत्यम्, किन्तु "षष्ठ्ययत्नाच्छेषे [ ३. १. ७६. ] इत्ययत्नजे शेषे षष्ठ्याः समासो वक्ष्यते, ततो मातुः स्मृतमित्यादौ समासो मा भूदित्यनेन प्रकारेण यत्नाच्छेषो विधीयते, नियमार्थं च" इति, नियमप्रकारश्चेत्थं वर्णितः—एषां धातूनां कर्मैव शेषत्वेन विवक्ष्यते न कारकान्तरमिति, तथा चास्य न्यायस्यासत्त्वे सूत्रं विना पाक्षिककर्मत्वस्यासिद्ध्या सूत्रस्य नियमार्थत्वं न संघटेत इति तस्य विध्यर्थत्वमेव स्यादिति मात्रा स्मृतमित्यादावपि कर्तृत्वाद्यविवक्षा स्यादिति तत्रापि षष्ठी स्यात्। अनेन च न्यायेन संभवत्कारकत्ववत एव कारकविशेषत्वेन विवक्षाऽविवक्षा वा क्रियते, न त्वपूर्वं कारकत्वं तत्रोत्पाद्यते, अतश्च षष्ठ्या वाच्यस्य सम्बन्धस्य न कारकत्वेन विवक्षेति बहूनामिदं वस्त्रमित्यादौ कारकत्वविवक्षाभावेन "बहुल्पार्थात् कारकादिष्टानिष्टे प्शस्" [ ७. २. १५०. ] इति प्शस् प्रत्ययो न भवति, विवेचितं चैतदन्यत्र ॥ ११ ॥

## * विवक्षातः कारकाणि ॥ ११ ॥ *

**त०**—नायं न्यायः पाणिनीये तन्त्रे न्यायत्वेन सङ्गृहीतः, किन्तु भाष्यकारादिव्यवहारबलादयमर्थः स्वतः सिद्ध एवेति प्रतीयते, क्रियते च तदनुकूलो व्यवहारः सर्वत्र, भाष्यकृता च "कारके" [ पा० सू० १. ४. २३. ] इति सूत्रं व्याचक्षाणेन कारकाणां विवक्षाधीनत्वमिति सूचितम्। पाणिनीयतन्त्रे हि अपादानादीनां तत्तत्संज्ञाभिः सह कारकसंज्ञापि विधीयत इत्याश्रीयते, तथा च सर्वत्रापादानादिविधायकसूत्रेष्वस्य सूत्रस्य "कारके" इत्यस्याधिकारो भवति, तथा च कारकसंज्ञं सदपादानसंज्ञमित्यर्थो भवति। अत्र च सूत्रे प्रथमार्थे सप्तमी निर्दिष्टा, तथा च संज्ञाधिकारत्वमस्येति सिद्धान्तः, तस्यैव स्फोरणाय प्रसङ्गेन कारकाणां विवक्षाधीनत्वं सूचितम्। तथा हि—कारकशब्दार्थनिर्णयमधिकृत्य शङ्कते—"किमिदं 'कारके'? [ भाष्यम् ] इति, अयमाशयः—इह सूत्रे विधेयानिर्देशेन 'कारके' इति सप्तम्यन्तपदस्य स्वार्थत्वासंभवाद्यमधिकार एव स्यात्, तत्र सप्तमीनिर्देशान्न संज्ञाधिकारत्वसंभवः, संज्ञाया भाव्यमानत्वाद् भाव्यमाने च प्रथमानिर्देशस्य न्याय्यत्वात्। अथ विशेषत्वेन कारकपदमधिक्रियत इत्याख्यायते तर्हि कारकसंज्ञारहितस्यापि कारकत्वं प्राप्नोति, तादृशस्थले च कर्मादिषड्विधस्यैव कारकत्वेन ग्रहणं दृश्यते कारकत्वं च क्वचिदन्यत्रापि दृश्यते, यथा नटस्य गाथां शृणोतीति, अस्ति क्रियाहेतुत्वेन नटस्यात्र कारकत्वम्, किन्तु तस्य कारकसंज्ञाभावान्न तत्र कारकत्वव्यवहारः। उक्तशङ्कायां समाधानमाह—"संज्ञानिर्देशः" इति, प्रथमायाः स्थाने सप्तमीं विधाय संज्ञानिर्देश एवायं कृत इति भावः। पुनरनुयोगभाष्यम्—"किं वक्तव्यमेतत्?" इति, विना वचनं सप्तम्यन्तस्यास्य 'संज्ञाधिकारत्वं न विज्ञास्यत इति वक्तव्यं संज्ञाधिकारोऽयमित्यनुयोगः। समाधानभाष्यम् "नहि, कथमनुच्यमानं गंस्यते?, इह हि व्याकरणे ये वा एते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते, या वा एता कृत्रिमाः 'टि' 'घु' 'भा'दिसंज्ञाः, न चायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दः, न खल्वपि कृत्रिमसंज्ञाः, अन्यत्राविधानात्, संज्ञाधिकारश्चायम्; तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः? इति। अयमाशयः—इह व्याकरणशास्त्रे लोकप्रसिद्धैरपत्यसमूहादिशब्दैर्व्यवहारो दृश्यते कृत्रिमैश्च 'टि' 'घु' 'भ' आदिशब्दैः। कारकशब्दश्च ध्रुवादीनाम् [ अपादानसंज्ञोद्देश्यभूतानाम् ] लोके न प्रसिद्धो वाचकः, न वा शास्त्रे कारकमिति कृत्रिमा संज्ञाकृता, अस्ति चात्र संज्ञाधिकारेऽस्य पाठ इति शास्त्रे लोके च प्रसिद्ध्यभावात् भूतविभक्त्यनुपपत्त्या भाव्यमानविभक्तेः प्रथमायाः स्थाने सप्तमीकृतेति मत्वा संज्ञानिर्देश एवायमिति स्वीकार्यमिति, तत्राक्षेपवार्तिकम्—"कारक इति संज्ञानिर्देशश्चेत् संज्ञिनो निर्देशः" इति, तद्भाष्यम्—'कारक इति संज्ञानिर्देशश्चेत्

संज्ञिनोऽपि निर्देशः कर्तव्यः, साधकं निवर्तकं कारकसंज्ञं भवतीति वक्तव्यम्" इति, अयमाशयः—यद्यपि "अपायेऽवधिरपादानम्" [२. २. २९.] इत्यादौ संज्ञिनोऽवध्यादयो निर्दिश्यन्त एव तथापि क्रियाहेतुत्वेन विशिष्टोऽवधिः संज्ञी वक्तव्य इति; तथा च यत् क्रियायाः साधकमवध्यादि तत् कारकसंज्ञं सदपादनसंज्ञं भवतीति फलति । अन्यथानुपपत्तिप्रदर्शनवार्तिकम्–इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्य" इति, तद्भाष्यम्–इतरथा ह्यनिष्टं प्रसज्येत, अकारकस्याप्यपादानसंज्ञा प्रसज्येत, क्व? ग्रामस्य समीपादागच्छति" इति । अयमाशयः–क्रियायां साधकं कारकं सदपादानसंज्ञं भवतीत्यनुक्ताववधिः कारकसंज्ञमपादानसंज्ञं च भवतीत्यर्थो लभ्यते, तथा च यथा यो वृक्षशाखायाः पतति वृक्षादप्यसौ पततीति, तथा यो ग्रामसमीपादागच्छति ग्रामादप्यसावागच्छतीति ग्रामस्याप्यपायावधित्वेनापादानत्वं स्यात्; क्रियासाधकमित्युक्तौ चागमेन निवर्तकत्वाभावादेव न दोषः, ग्रामस्य समीपविशेषणत्वेनासाधकत्वादिति । आक्षेपप्रतिक्षेपभाष्यम्–"नैष दोषः, नात्र ग्रामोऽपाययुक्तः, किं तर्हि? समीपम्, यदा च ग्रामोऽपाययुक्तो भवति, भवति तदापादानसंज्ञा, तद्यथा–ग्रामादागच्छतीति" इति । अत्र कैयटः "समीपविशेषणत्वेनोपादानादेव ग्रामस्यापाययोगो नास्ति, स हि संश्लेषपूर्वकः, संश्लेषश्च सन्नसन् वा बुद्ध्या कल्प्यते, स च ग्रामसमीपस्यैव विवक्षितो न ग्रामस्येत्यर्थः, ग्रामात् समीपादिति चोक्ते वस्त्वन्तरापेक्षं ग्रामस्यैव सामीप्यं प्रतीयते, न तु ग्रामापेक्षमस्य सामीप्यम्" इति । तत आक्षेपान्तरवार्तिकम्–"कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति" इति । तद्भाष्यम्–कर्मसंज्ञा च प्राप्नोत्यकथितस्य, क्व? ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति । आक्षेपबाधकभाष्यम्–"नैष दोषः, अयमकथितशब्दोऽस्त्येवासंकीर्तिते वर्तते, तद्यथा-कश्चित् कश्चित् संचक्ष्याह–असावत्राकथितः–असंकीर्तित इति गम्यते" इति । अयमाशयः–ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्राकारकस्याकथितत्वेन [ पाणिनीयेऽप्रधानकर्मणो ह्यकथितत्वं समाश्रित्य "अकथितं च" [ पा० सू० १. ४. ५१. ] इत्यनेन कर्मसंज्ञा विधीयते ] कर्मसंज्ञा स्यात्, इति शङ्का, तत्राकथितशब्दस्यासंकीर्तितपरत्वेनासंकीर्तितत्वं च वर्जितत्वं, वर्जनं च प्रसक्तस्य सजातीयस्यैव भवतीति कारकस्यैव कर्मसंज्ञा भवति, न तु ब्राह्मणस्य पुत्रं प्रतिविशेषणस्येति न दोष इत्युत्तरम् । पुनराक्षेपसाधकभाष्यम्–"अस्त्यप्राधान्ये वर्तते, तद्यथा–'अकथितोऽसौ ग्रामे, अकथितोऽसौ नगरे' इत्युच्यते यो यत्राप्रधानो भवति, तद्यदा अप्रधानेऽकथितशब्दो वर्तते तदैष दोषः "कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इति । अयमाशयः–'अयमत्र ग्रामेऽकथित इति लौकिकप्रयोगेणाप्राधान्यवाची अकथितशब्दः, अप्राधान्यं च प्रधानभिन्नत्वमेव, न तु वर्जितप्राधान्यकत्वम्, प्रधानत्वसंभावनावत्यपि लोकेऽप्रधानशब्दप्रयोगात् । अत्र चेप्सिततमत्वात् पन्थाः प्रधानं, न पुत्रो नापि ब्राह्मण इति, अकथितशब्दस्याप्रधानत्वपरत्वे ब्राह्मणस्याप्यकथितत्वेन कर्मत्वं प्राप्नोति कारकसंज्ञाया विशिष्टविषयत्वाभावे । एवमाक्षेपान्तरमप्याह–"अपादानं च वृक्षस्य पर्णं पतति" इति, तद्भाष्यम्–"अपादानसंज्ञा च प्राप्नोति, क्व? वृक्षस्य पर्णं पतति" इति । अयमाशयः–पूर्वोक्ते ग्रामस्य समीपादागच्छतीत्यत्र समीपस्यावधेः सत्त्वाद् ग्रामस्यापादानसंज्ञाऽभावेऽपि वृक्षस्य पर्णं पततीत्यत्रान्यस्यावधेरभावाद् वृक्षस्यापादानसंज्ञा स्यादेवेति । एतत्समाधानवार्तिकम्- "न वाऽपायस्याविवक्षितत्वात्" इति, तद्भाष्यम्–"न वा एष दोषः, किं कारणम्?" अपायस्याविवक्षितत्वात्, नात्रापायो विवक्षितः, किं तर्हि? सम्बन्धः, यदा चापायो विवक्षितो भवति, भवति तदापादानसंज्ञा, तद्यथा–वृक्षात् पर्णं पततीति । सम्बन्धस्तु तदा न विवक्षितो भवति, न ज्ञायते कङ्कस्य वा कुररस्य वा" इति । अयमाशयः–वृक्षस्य पर्णं पततीत्यनेन वाक्ये वृक्षसम्बन्धित्वमेव पर्णे विवक्षितं, न तु वृक्षस्यापायावधित्वम्, यदा चावधित्वं विवक्ष्यते तदाऽपादानसंज्ञा भवत्येवेति नात्र दोष इति । एवं सति ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्रोक्तं दोषं पुनः स्मारयति [ भाष्ये ]–"अयं तर्हि दोषः–कर्मसंज्ञाप्रसङ्गश्चाकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इति । आक्षेपबाधकभाष्यम्–"नैष दोषः, महतीयं संज्ञा क्रियते 'कारक' इति, संज्ञा च नाम यतो न लघीयः; कुत एतत्? लघ्वर्थं हि संज्ञाकरणम्, तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनम्–अन्वर्था संज्ञा यथा विज्ञायेत–करोतीति कारकम्" इति । अयमाशयः–अन्वर्था हि संज्ञा महती संज्ञोच्यते, संज्ञायाः संक्षेपेण कथनमेव प्रयोजनमिति 'टि-घु-भ' आदिसंज्ञावत् लघ्वी काचित् संज्ञा कृता स्यात्, सा च न कृतेति कारकमिति महासंज्ञाकरणादनुमीयते यत्–क्रियानिवर्तकत्वरूपविशेषयुक्ता अवध्यादयः संज्ञित्वेन निर्दिष्टा इति । तथा च ब्राह्मणस्य क्रियानिर्वर्तकत्वरूपकारकत्वाभावेन न कर्मत्वमिति । इत्थं कारकाधिकारस्य संज्ञाधिकारत्वं संसाधितम्, कारकपदस्य क्रियासाधकपरत्वमिति च महासंज्ञया साधितम्, एतेन च प्रबन्धेन कारकाणां विवक्षाधीनत्वमित्यपि स्पष्टमेव प्रतिपादितम्, इतोऽग्रे च प्रतिकारकं क्रियाकर्तृत्वं कथमिति शोभनतया प्रदर्शितं, तच्चान्ततः कारकाणां विवक्षाधीनत्वमित्यर्थपर्यवसाय्येव भवतीति तावानेवांशो विलिख्यते । सर्वत्रापि कारके यथाकथञ्चित् कर्तृत्वं विद्यत एवेति प्रदर्शिते सर्वस्यापि कर्तृसंज्ञा कुतो नेत्याशङ्कायां समाधानवार्तिकम्–"न वा स्वतन्त्रपरतन्त्रत्वात् तयोः पर्यायेण वचनं, वचनाश्रया च संज्ञा" इति, तद्भाष्यम्–"न वा एष दोषः, किं कार-

णम्? स्वतन्त्रपरतन्त्रत्वात्, सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यं च विवक्षितम्, तयोः पर्यायेण वचनम्, तयोः स्वातन्त्र्य-पारतन्त्र्ययोः पर्यायेण वचनं भविष्यति, तद्यथा—बलाहकाद् विद्योतते विद्युत्, बलाहके विद्योतते, बलाहको विद्योतत इति" इति, सर्वत्र कारके स्वातन्त्र्य-पारतन्त्र्ययोर्विवक्षाधीनं कर्तृत्वादि, तदधीनाश्च विभक्तयः यथा—निःसरणाङ्गे विद्योतने द्युतेर्वाच्ये पृथग्भावे च विवक्षिते बलाहकाद् विद्योतते विद्युदिति; स्थित्यङ्गे द्योतने द्युतेर्वृत्तौ 'बलाहके विद्योतते' इति, बलाहके स्थित्वा ज्योतीरूपा विद्युद् विद्योतते इत्यर्थात्; विद्युतो बलाहकस्य चाभेदविवक्षायां बलाहको विद्योतत इति प्रयोगः। एवमेव स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रेति स्थाली पचतीति प्रयोगः, कर्तृस्थे यत्ने कथ्यमाने च स्थाली परतन्त्रेति स्थाल्यां पचतीति प्रयोग इति। अत्राक्षेपभाष्यम्—"ननु च भोः कर्तृस्थेऽपि यत्ने कथ्यमाने स्थालीसम्भावनक्रियां धारणक्रियां च करोति, तत्रासौ स्वतन्त्रा, क्वेदानीं परतन्त्रा स्यात्" इति। अत्र समाधानभाष्यम्—"एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा, तद्यथा—अमात्यादीनां राज्ञा सह समवाये पारतन्त्र्यम्, व्यवाये स्वातन्त्र्यम्" इति। अयमाशयः—धात्वर्थानाश्रयायाः स्थाल्याः प्रधानधात्वर्थाश्रयेण समवाये पारतन्त्र्यमिति तत्र देवदत्तः स्थाल्यां पचतीति प्रयोगः, प्रधानविरहे च स्थाल्या एव धात्वर्थाश्रयत्वमिति तत्र तस्याः प्राधान्येन स्थाली पचतीति प्रयोग इति। अत्र शङ्कते—"किं पुनः प्रधानम्" इति, सामग्रीतः कार्योत्पादे सर्वेषां तत्र समानत्वान्न कस्यचित् प्राधान्यं प्रतीयत इति प्रश्नाशयः। समाधानभाष्यम्—"कर्ता, कथं पुनर्ज्ञायते कर्ता प्रधानमिति, यत् सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति" इति। अत्र कैयटः—"तदधीनप्रवृत्तित्वात् करणादीनां, तस्य च प्रागन्यतः शक्तिलाभात्, प्रतिनिध्यदर्शनात्, करणाभावेऽपि 'आस्ते, शेते' इत्यादौ केवलस्य कर्तुर्दर्शनात् कर्तृरहितानां करणादीनामदर्शनात् प्राधान्यं कर्तुरित्यर्थः" इति। अत्राक्षेपभाष्यम्—"ननु च भोः प्रधानेनापि वै समवाये स्थाल्या अनेनार्थोऽधिकरणं कारकमिति, नहि कारकमित्यनेनाधिकरणत्वमुक्तम्, अधिकरणमिति वा कारकत्वम्, उभौ चान्योन्यविशेषकौ भवतः, कथम्? एकद्रव्यसमवायित्वात्, तद्यथा—'गार्ग्यो देवदत्त' इति, नहि गार्ग्य इत्यनेन देवदत्तत्वमुक्तम्, देवदत्त इत्यनेन वा गार्ग्यत्वम्, उभौ चान्योन्यविशेषकौ भवत एकद्रव्यसमवायित्वात्" इति। अस्यायमाशयः—प्रधानेन कर्त्रा सह प्रयोगेऽपि स्थाल्या अधिकरणत्वसिद्धये कारकत्वमभिप्रेतम्, कारकत्वं च क्रियाप्रवर्तकत्वमेवेति तस्यापि कर्तृत्वमावश्यकम्, अन्यथाऽधिकरणं कारकमिति विशेषणविशेष्यभावो न स्यादिति। अथ समाधानभाष्यम्—"एवं तर्हि सामान्यभूता क्रिया वर्तते, तस्या निर्वर्तकं कारकम्" इति अत्र कैयटः—"सर्वेषां कारकाणां साध्यत्वेन साधारणी क्रिया, ततश्च सर्वेषां तस्यां कर्तृत्वम्, अवान्तरव्यापारविवक्षायां तु करणादिरूपत्वम्, यथा मातापित्रोरपत्योत्पादने कर्तृत्वम्, भेदविवक्षायां तु अयमस्यामियमस्माज्जनयतीत्यधिकरणत्वमपादानत्वं च व्यवतिष्ठते। कर्तृसंज्ञा तु करणत्वाद्यवस्थायां न भवति "स्वतन्त्रः कर्ता" [ २. २. २. ] इत्यत्र कारकत्वादेव स्वातन्त्र्ये लब्धे पुनः स्वतन्त्रश्रुतिर्नियमार्था, तेन स्वतः स्वातन्त्र्यमेव यस्य कर्तृसंज्ञा तस्य, न तु पारतन्त्र्यसहितस्वातन्त्र्ययुक्तस्य, कारकसंज्ञा तु वस्तुस्थित्या विद्यमानमनुद्भूतत्वेनाविवक्षितमपि स्वातन्त्र्यमाश्रित्य करणादीनां विधानसामर्थ्यात् प्रवर्तते। यत्र च शक्तीनां निमित्तनिमित्तिभावेन युगपद्विवक्षा तत्र संज्ञानां विप्रतिषेध उच्यते, यथा—धनुषा विध्यतीति, विनापायविवक्षया धनुषः साधकतमत्वभावात् संज्ञाद्वयप्रसङ्गे परत्वात् करणसंज्ञा। असिश्छिनत्तीति सत्येव साधकतमत्वे स्वातन्त्र्यस्य विवक्षितत्वात् परत्वात् कर्तृसंज्ञा, तदा तु तैक्ष्ण्याधीनं करणत्वम्, तैक्ष्ण्यादीनां तु कर्तृत्वविवक्षायामात्मनः करणत्वम्, तैक्ष्ण्यमेव हि विवक्षावशाद् द्वेधाऽवतिष्ठते कर्तृत्वेन करणत्वेन च। वस्तुस्थित्या त्वेक एवार्थात्मेति कर्तृत्वं करणत्वस्य बाधकमुच्यते" इति। एतेन प्रदर्शितेन भाष्य-कैयटग्रन्थेन कारकाणां विवक्षाधीनत्वं न्यायतः प्राप्तमिति न तत्र वचनावश्यकतेति प्रतीयते। स्वमते चास्यैवार्थस्य संक्षेपतः प्रतिपादनाय न्यायोऽयं समाश्रीयते। एवं च विवक्षाया अपि वस्तुस्वभावमूलत्वादेव सम्बन्धे कारकत्वविवक्षा न भवति, कारकविभक्तिभिः सम्बन्धार्थस्य बोधयितुमशक्यत्वात्, सम्बन्धस्य च कारकत्वायोग्यत्वादिति तत्र कारकत्वविवक्षाभावार्थं न्यायस्य व्यभिचारित्वाश्रयणमकिञ्चित्करमेव, विवक्षायां वक्तुः प्राधान्येन तत्र न्यायस्य स्वातन्त्र्याभावादित्यास्तां विस्तरः ॥११॥

## ※अपेक्षातोऽधिकारः※ ॥ १२ ॥

**सि०—अपेक्षणमपेक्षा आकाङ्क्षा, तस्या इति पञ्चम्यर्थे तस्, पञ्चम्याश्चेह ज्ञापकत्वमर्थः। अधिकरणमधिकार इति भावसाधनोऽधिकारशब्दः, अधिक्रियत इति वाधिकार इति कर्मसाधनोऽपि भवितुमर्हति। लोके नियोगः प्रेरणं तद्विषयीभूतं कार्यं वाधिकारशब्देनोच्यते—स तत्राधिकृतः, तत्र कार्ये विनियुक्त इत्यर्थः, तत् तेनाधिकृतम्, विनियोगवशादधिष्ठितमित्यर्थः, इत्युभयथाऽधिकारशब्दस्य प्रयोगदर्शनात्। तत्र शब्दस्य द्विविधं कार्यम्—अर्थबोधः स्वरूपबोधो वा, तत्रार्थबोधस्य वचनान्तरेणानपेक्षितत्वाद् द्वितीये स्वरूपबोधरूपे पर्यवसानमिति वचनान्तरेणाकाङ्क्षितस्य पदस्य योगे योगे समुपस्थानमधिकारशब्दार्थः फलति। तत्रोपस्थानं प्राय उत्तरयोगेष्वेव भवति, क्वचित् पूर्वयोगेऽपि लक्ष्यानुरोधादपकर्ष-**

रूपोऽधिकारो भवति । तथा च वचनान्तरापेक्षाज्ज्ञाप्योऽधिकारः-उत्तरत्र समुपस्थानमिति न्यायार्थः । एवं चाधिकारस्य ज्ञापकापेक्षा न भवति, लक्ष्यानुसारिभिर्वचनैराकाङ्क्षितत्वमात्रेणापेक्षितं पदमधिकृतं विज्ञायत इति भावः । तत्रापेक्षया प्रवृत्तिवदनपेक्षया निवृत्तिरपि स्वतः सिद्धा भवतीति न तदर्थमपि ज्ञापकाद्यपेक्षेति सूचयितुमेवायं न्यायः प्रवृत्तः, यथा-"णषमसत् परेस्यादिविधौ च०" [ २. १. ६०. ] इति सूत्रस्थं असत् परे इति पदं "रात् सः" [ २. १. ९०. ] इति सूत्रपर्यन्तमेवाधिक्रियते, न तत ऊर्ध्वम्, 'स्यादिविधौ' इति च "नोर्म्यादिभ्यः" [ २. १. ९९. ] इति यावदित्येषोऽर्थोऽनेन न्यायेन ज्ञापकं विनाऽपि साधितः । एतन्न्यायज्ञापकं तु-"समानानां तेन दीर्घः" [ १. २. १. ] इति सूत्रस्थं समानानामिति पदम्, समानानामिति पदे हि "ह्रस्वा-ऽऽपश्च" [ १. ४. ३२. ] इति सूत्रेणामो नाम् विहितः, "ह्रस्वापश्च" [ १. ४. ३२. ] इति सूत्रे चामोनामिति न श्रूयत इति कथं तेन तस्य स्थाने तस्य विधानं स्यात् 'आमो नाम्' इति पदद्वयं च "आमो नाम् वा" [ १. ४. ३१. ] इति पूर्वसूत्रे एव पठितम्, ततश्च तदधिकारं विना तत्सम्बन्ध इह सूत्रे [ ह्रस्वापश्चेत्यत्र ] दुर्लभः, तदसम्बन्धे च समानानामिति निर्देशोऽनुपपन्न इति तं विनाऽनुपपद्यमानः स पूर्वसूत्रस्थपदानामपेक्षावशादधिकार इत्यर्थकमिमं न्यायमाक्षिपत्येव, तदुपपादकान्तरस्यानुपलम्भात्; एतच्चानुवृत्तौ ज्ञापकम् । निवृत्तौ तु-"ऐदौत् सन्ध्यक्षरैः" [ १. २. १२. ] इति सूत्रे सन्ध्यक्षरैरिति पदमेव ज्ञापकम्, अत्र हि उपसर्गसम्बन्धिभिन्नस्याकारस्यैव विधानम् "ऋत्यारुपसर्गस्य" [ १. २. ९. ] इत्यतोऽनुवर्तमानस्य 'उपसर्गस्य' इत्यस्य पदस्य निवृत्तिं विना न सिध्यति, न च तन्निवृत्तौ किमपि ज्ञापकान्तरमुपलभ्यते, ततश्चापेक्षाभावादेव निवृत्तिरिति कल्प्यते; तथा चैतन्न्यायस्य प्रवृत्ति-निवृत्त्योरुभयोरपेक्षाप्रयोज्यत्वबोधकत्वं सुसम्पन्नम् । अयं च न्यायोऽपेक्षामाश्रित्यैव प्रवर्तत इति यत्र निरपेक्षाबोधकं किञ्चिल्लिङ्गं भवति तत्र स्वभावत एव न प्रवर्तते, यथा "प्रत्यये च" [ १. ३. २. ] इत्यत्र चकारोऽनुवर्तमानवाग्रहणस्य स्वस्मिन् विषये निवृत्तिबोधक इति तत्र निवृत्तोऽपि वाशब्द उत्तरत्रानुवर्तते, तन्मूलक एव चकारस्योत्तरत्र वाग्रहणनिवृत्त्यर्थत्वव्यवहारो वृत्तौ कृतः, तत्र हि विनाऽपि चकारं पूर्वसूत्रस्थपदयोस्तत्रानुवृत्तानां 'वा' 'पदान्ते' 'अनुनासिक' इति पदानामनुवृत्तिसिद्धौ क्रियमाणश्चकारः किमपि वैलक्षण्यं सूचयति, तच्च स्वघटितयोगस्य नित्यत्वमेव, एवं च वाग्रहणनिवृत्त्यर्थत्वेन क्रियमाणश्चकारो वाग्रहणस्याधिकारत्वं सूचयति, तत्फलं चोत्तरत्रानुवृत्तिरेव । तथा चानेन चकारकरणरूपेण लिङ्गेनैतन्न्यायप्रवृत्तिं विनाऽप्यनुवृत्ति-निवृत्त्योर्वैलान्तरेण लभ्यत्वमिति सूच्यते । अपेक्षावशादेव च मध्ये विशेषातिदेशाद् विच्छिन्नोऽप्यधिकारोऽग्रेऽपेक्षितश्चेत् तर्हि प्रवर्तेत एव । अधिकारस्यैवं विषयत्वादेवाधिकारविषये मण्डूकप्लुतिन्यायोऽपि स्वीक्रियते, अयमाशयः-अधिकारस्य द्वयी गतिः-धाराप्रवाहन्यायेन मण्डूकप्लुतिन्यायेन च, यत्राविच्छिन्न एवाधिकारो यथाऽपेक्षं प्रवर्तते परत्र निवर्तते च तत्र धाराप्रवाहगतिराश्रीयते, यत्र च मध्ये विच्छिद्य पुनः प्रवर्तते तत्र मण्डूकगतिः । तत्र धाराप्रवाहानुवृत्तिः प्रसिद्धैव, मण्डूकप्लुतानुवृत्तिश्च यथा-"धातोरिवर्ण०" [ २. १. ५०. ] इत्यतोऽनुवर्तमानो धातोरित्यधिकारो "भ्रूश्नोः" [ २. १. ५३. ] इत्यादिसूत्रत्रये विशेषातिदेशसद्भावादसम्बद्धोऽपि "योऽनेकस्वरस्य" [ २. १. ५६. ] इत्यत्रापेक्षातः पुनरनुवृत्तः । इत्थं चानेनैव न्यायेनेदृशस्थलस्यापि निर्वाहे *विशेषातिदिष्टो विधिः प्रकृताधिकारं न बाधते* इति न्यायान्तरस्वीकारे न किमपि फलम् । केचित्तु "धातोरिवर्ण०" [ २. १. ५०. ] इत्यतो धातोरित्यस्यानुवृत्तिः धाराप्रवाहन्यायेनैव चलति, मध्ये च सूत्रत्रयेऽसम्भवादसम्बध्यमानोऽप्यविच्छिन्न एवेति न मण्डूकप्लुतिरत्रेत्याहुः, तन्मते च मण्डूकप्लुतेरुदाहरणं यथा—"अलृवर्गात् स्वरे वोऽसन्" [ १. २. ४०. ] इति सूत्रस्थोऽसन्नित्यधिकारः "अइउवर्णस्यान्तेऽनुनासिकोऽनीदादेः" [ १. २. ४१. ] इति सूत्रं मध्ये लङ्घयित्वा "तृतीयस्य पञ्चमे" [ १. ३. १. ] "प्रत्यये च" [ १. ३. २. ] इति सूत्रयोर्गत इति तेन 'ककुम्मण्डलम्, अम्मयः' इत्यादौ समासान्तर्वर्तिविभक्त्या "नामसिदय्व्यञ्जने" [ १. १. २१. ] इत्यनेन च क्रमात् पदसंज्ञासत्त्वे पदान्तस्यापि मस्यासत्त्वात् "तौ मु-मः०" [ १. ३. १४. ] इत्यनुस्वारा-ऽनुनासिकौ न भवतः । एतच्चावश्यमेव स्वीकार्यं यदुभयत्रपक्षे [ धाराप्रवाहे मण्डूकप्लुतौ च ] अपेक्षात एवाधिकार इति नैतन्न्यायं विना तयोः सिद्धिरिति ॥ १२ ॥

## * अपेक्षातोऽधिकारः ॥ १२ ॥ *

त०—सूत्राणि हि यथासम्भवमल्पाक्षराणि विधीयन्ते, "अल्पाक्षरमसन्दिग्धम्०" इत्यादिना सूत्रस्य लक्षितत्वेनाल्पाक्षरत्वस्य तत्र गुणत्वात्, किन्तु असंदिग्धत्व-सारवत्त्व-विश्वतोमुखत्वानां सिद्ध्यर्थं तत्र पदान्तराणामपेक्षा भवत्येव, तत्रैकप्रकरणपठितानां सूत्राणां मध्ये तत्प्रकरणसामान्यार्थसूचकं पदमेकत्रैव पठ्यते, आकाङ्क्षावशाच्च तस्य प्रतियोगमुपस्थितिर्भवति स एव चाधिकारशब्देन प्रयुज्यते; लोकेऽपि प्रथमे वाक्ये समुपात्तं पदमाकाङ्क्षावशादग्रिमवाक्येष्वपि सम्बध्यत एव, यथा अत्र विद्यालये देवेन्द्रः पठति, महेन्द्रोऽध्यापयति, सुरेन्द्रो वाचयति' इत्यादिवाक्येषु पूर्ववाक्यस्थे 'अत्र विद्यालये' इति पदे अनुवर्तेते एव ।

इत्थञ्च विनाऽपि ज्ञापकमपेक्षातः प्रतियोगं शब्दोपस्थानं सम्भाव्यत एवेति लोकसिद्धोऽयं न्यायस्तथापि स्वशास्त्रसम्मतत्वसूचनाय पूर्वाचार्यादिप्रक्रियामनुसृत्य ज्ञापकादिकमुपन्यस्तम् । पाणिनीये तन्त्रे चैतत्स्थानीयं परिभाषासूत्रमेव पाणिनिना कृतम्, तच्च "स्वरितेनाधिकारः" [ पा० सू० १. ३. ११. ] इति, भाष्यकृता च सूत्रस्य प्रयोजनस्फोरणायेत्थं शङ्कासमाधी कृते, तथाहि–"किमर्थमिदमुच्यते ?" इति सूत्रप्रयोजनाक्षेपभाष्यम्, तदाशयश्च आकाङ्क्षादिवशात् प्रस्तुतपदस्य सम्बन्धो लोक इव व्याकरणशास्त्रेऽपि भविष्यत्येवेति न सूत्रप्रयोजनं किमपीति । ततः समाधानवार्तिकम् "अधिकारः प्रतियोगं तस्यानिर्देशार्थः" इति, तद्भाष्यम्–"अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थ" इति । किमिदं प्रतियोगमिति ? योगं योगं प्रति प्रतियोगमिति, योगे योगे तस्य ग्रहणं मा कार्षम्" इति । पुनराक्षिपति–"किं गतमियता सूत्रेण" इति, किमयमर्थोऽधिकारशब्देन वक्तुं शक्यते उत नेति तदाशयः, समाधत्ते–गतमित्याह, कुतः ? लोकतः, तद्यथा–लोके 'अधिकृतोऽसौ ग्रामे, अधिकृतोऽसौ नगरे' इत्युच्यते यो यत्र व्यापारं गच्छति, शब्देन चाप्यधिकृतेन कोऽन्यो व्यापारः शक्योऽवगन्तुमन्यदतो व्यापारात्" इति अधिकारशब्दो व्यापारार्थकः, शब्दस्य चार्थबोधनं व्यापारः, स च स्वस्थान एव परिक्षीण इति कोऽन्यस्ततोऽधिको व्यापारः स्यात् प्रतियोगमुपस्थितिभिन्न इति प्रतियोगमुपस्थानमेवात्राधिकारशब्दार्थ इति तदाशयः समाधानबाधकवार्तिकम्–"न वा निर्दिश्यमानाधिकृतत्वाद् यथा लोके" इति । तद्भाष्यम्–"न वा एतत् प्रयोजनमस्ति, किं कारणम् ? निर्दिश्यमानाधिकृतत्वात्, यथा लोके निर्दिश्यमानमधिकृतं गम्यते, तद्यथा–'देवदत्ताय गौर्दीयताम्, यज्ञदत्ताय, विष्णुमित्राय' इति गौरिति गम्यते । एवमिहापि–"पदरुजविशस्पृशो घञ्" [ पा० सू० ३. ३. १६. ] "सृस्थिरे" [ पा० सू० ३. ३. १७. ] "भावे" [ पा० सू० ३. ३. १८. ] घञिति गम्यते" इति, वचनं विनाऽपि लोकव्यवहारादेव सूत्रसाध्योऽर्थः सिद्ध इति वृथा सूत्रमिति भाष्याशयः । अथ समाधानवार्त्तिकम्–"अन्यनिर्देशस्तु निवर्त्तकस्तस्मात् परिभाषा" इति । भाष्यम्–"अन्यनिर्देशस्तु निवर्त्तको भवति, तद्यथा–'देवदत्ताय गौर्दीयताम्, विष्णुमित्राय कम्बलः' इति कम्बलो गोर्निवर्त्तको भवति; एवमिहापि "अभिविधौ भाव इनुण्" [ पा० सू० ३. ३. ४४. ] घञो निवर्त्तकः स्यात्, तस्मात् परिभाषा" इति । अयमाशयः–धाराप्रवाहेनानुवृत्तिस्थले लोकन्यायेन सिद्धावपि यत्रान्यविधेयादिसम्बन्धात् प्रकृतविधेयादिनिवृत्तिर्भवति, तत्र तदग्रे पुनः प्रकृतसम्बन्धाय परिभाषासूत्रमिदमावश्यकमिति, एषा च युक्तिः स्वकीये न्याये [ अपेक्षातोऽधिकार इत्यत्रा ]पि वक्तुं शक्यत एव । अत्रैवान्ते कियत्पर्यन्तमधिकार इत्यस्यार्थस्य निर्णयाय व्याख्यानस्यैव शरणीकरणीयतया लोकन्यायव्याख्यानाभ्यामेव सर्वार्थसिद्धावेतत् सूत्रं व्यर्थमिति प्रस्तुत्य फलान्तरतया स्थापितं सूत्रम्, तथाहि–"न तर्हीदानीमयं योगो वक्तव्यः" इत्याक्षेपभाष्यम् । "वक्तव्यश्च, किं प्रयोजनम् ? स्वरितेनाधिकारगतिर्यथा विज्ञायेत । अधिकं कार्यम्, अधिकः कारः" । अयमाशयः–प्रतियोगमुपस्थितार्थस्य तस्य परिभाषासूत्रस्यानावश्यकत्वेऽपि अधिकारबोधायेदमावश्यकम्, स्वरितत्वं हि निर्दिश्य एतदधिकारपठितानां ग्रहणमिति बोधनं यथा स्यात्, इत्येकं प्रयोजनम्, स्वरितत्वयुक्तेन शब्देनाधिकं कार्यं यथा स्यात्, इत्यर्थबोधनायापि सूत्रमिदमावश्यकम्, स्वरितत्वयुक्तस्य चाधिकोव्यापारो यथा बुध्येत तदर्थमपीदमावश्यकम्, इति । क्रमेणोदाहरति–'अधिकारगतिः "गोस्त्रियोरुपसर्जनस्य" [ पा० सू० १. २. ४८. ] इत्यत्र 'गोटाङ्' ग्रहणं चोदितं तन्न कर्तव्यं भवति, स्त्रीग्रहणं स्वरयिष्यते, स्वरितेनाधिकारगतिर्भविष्यतीति "स्त्रियाम्" [ पा० सू० ४. १. ३. ] इत्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते, तत्र स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति" [ अधिकार गतिः ] । द्वितीयफलोदाहरणम्–"अधिकं कार्यम्, अपादानमाचार्यः किं न्याय्यं मन्यते ? यत्र प्राप्यनिवृत्तिः, तेनेहैव यथा स्यात्–ग्रामादागच्छति, नगरादगच्छति; सांकाश्यकेभ्यः पाटलिपुत्रा अभिरूपतरा इत्यत्र न स्यात्, स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति । तथा अधिकरणमाचार्यः किं न्याय्यं मन्यते ?, यत्र कृत्स्न आधारात्मा व्याप्तो भवति, तेनेहैव स्यात्–तिलेषु तैलं दध्नि सर्पिरिति; गङ्गायां घोषः, कूपे गर्गकुलमित्यत्र न स्यात्, स्वरितेनाधिकं कार्यमित्यत्रापि सिद्धं भवति [ अधिकं कार्यम् ] । तृतीयफलोदाहरणम्–"अधिकं कारः, पूर्वविप्रतिषेधाश्च न पठितव्या भवन्ति । "गुण–वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषिद्धम्" "नुमचिरतृज्वद्भावेभ्यो नुट्" इति, नुम्नुटौ स्वरयिष्येते, तत्र स्वरितेनाधिकः कारो भवतीति नुम्नुटौ भविष्यतः" इति । अयमाशयः–स्वरितत्वं नाम स्वरविशेषः, स च यत्रार्थविशेषो बुबोधयिषितस्तत्र करिष्यते, तेन च यत्र स्त्रीप्रत्ययग्रहणमिष्टं यथा "गोस्त्र्यन्ते ह्रस्वोऽनंशिसमासे यो बहुव्रीहौ" [ २. ४. ९६. ] इत्यादौ, तत्र च ङ्याद्यन्तस्य इति क्रियते, तेनान्येषां 'स्त्रियां क्तिः" इत्यादिस्त्रीप्रत्ययानां ग्रहणं न भवति, तथा 'अतितन्त्रीः' इत्यादिशब्दानामपि ह्रस्वत्वं न भवति, तथैव पाणिनीयेऽपि तद्विषयके "गोस्त्रियोरुपसर्जनस्य" [ पा० सू० १.४.४८. ] इति सूत्रेऽतितन्त्रीरित्यादौ ह्रस्वव्यावृत्त्यर्थं 'गोटाङ् ग्रहणं कर्तव्यम्, तत्र च टाङ्प्रत्याहारः, टापः टाशब्दादारभ्य ष्यङो ङकारं यावदिति तेनेष्टसिद्धिरित्यादि तत्र सूत्रे महाभाष्ये प्रतिपादितम्, स्वरितेनाधिकारगतिरित्यर्थमाश्रित्य च तत् खण्डितम् । तथा च "गोस्त्रियोः" [ पा० सू० १.२.४८ ]

इति सूत्रस्थस्त्रीशब्दे स्वरितत्वं विधाय तत्र "स्त्रियाम्" [४. १. ३.] इति सूत्राधिकारविहितानामेव प्रत्ययानां स्त्रीप्रत्ययत्वेन ग्रहणमिति बोधनेन दोषाभाव इति, एतच्चाधिकारगतिरिस्वस्योदाहरणम्, स्वरितेनाधिकं कार्यमिति चार्थः स्वीक्रियते, अधिशब्दस्याधिकार्थकत्वात् कारशब्दे बाहुलकात् कर्मणि घञि तस्य कार्यार्थपरत्वात्। तथा चाधिकारेण स्वरितत्वसमधिगतेनाधिकं कार्यं भवतीत्यपायेऽवधिभूतस्यापादानत्वमिति वस्तुस्थितौ सत्यां प्रमादायातीत्यादावेवापादनत्वं स्यात्, न तु सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यादौ, अत्र हि बुद्ध्या सांकाश्यकैः सह विषयीकृताभेदाः पाटलिपुत्रका अभिरूपतरत्वरूपप्रकर्षाश्रयेण तेभ्यो विभज्यन्ते इति मुख्यापायाभावादपादानत्वमप्राप्तमित्यपादानशब्दे स्वरितत्वप्रतिज्ञाने सति बुद्धिपरिकल्पितापायाश्रयणेनापि भवति। एवमधिकरणमपि कृत्स्नव्याप्तावेव भवति–यथा तिलेषु तैलमित्यादौ, गङ्गायां गावः कूपे गर्गकुलमित्यादौ च कृत्स्नस्याधारस्य व्याप्त्यभावान्नाधिकरणत्वं प्राप्नोति, अधिकरणशब्दे च स्वरितत्वप्रतिज्ञाने तेनाधिकस्यापि कार्यस्य लाभाद् भवति तत्राप्यधिकरणसंज्ञेति। एतच्चापायानां त्रैविध्यमाधारस्य च षोढात्वमाश्रित्य वृत्तावपि संगृहीतमेवेति–"अपायेऽवधिरपादानम्" [२. २. २९.] इति "क्रियाश्रयस्याधारोऽधिकरणम्" [२. २. ३०.] इति सूत्रयोर्बृहद्वृत्तौ स्पष्टम्। एतच्चापादानाधिकरणशब्दयोरधिककार्यकारित्वमूलकमेवेति भाष्यतो ज्ञायते। तथा चैतत् स्वमतेऽपि संग्राह्यमेवेत्यधिकं कार्यमिति स्वमतेऽप्युदाहर्तव्यमेव। 'अधिकः कार' इति च क्वचित् पूर्वशास्त्रस्याऽपि परशास्त्रबाधकत्वस्य लक्ष्यानुसारमाश्रयणीयस्य सिद्ध्यर्थं स्वीक्रियते, तदपि स्वशास्त्रे संग्राह्यमेव यदि तादृशं लक्ष्यं लक्षणीयं स्यात्। 'अधिकः कारः' इति विग्रहेऽधिकारस्य कथं परबाधकत्वमित्याशङ्कामपि लौकिकदृष्टान्तेनापनुनोद भाष्यकृत्, तथाहि–[आक्षेपभाष्यम्–]

कथं पुनरधिकः कार इत्यनेन पूर्वविप्रतिषेधाः शक्या न पठितुम्? [समाधानभाष्यम्–] लोकतः, तद्यथा–लोकेऽधिकमयं कारं करोतीत्युच्यते–योऽयं दुर्बलः सन् बलवद्भिः सह भारं वहति, एवमिहाऽप्यधिकमयं कारं करोतीत्युच्यते–योऽयं पूर्वः सन् परं बाधते॥ इति, स्पष्टमिदं भाष्यम्। तथा च *अपेक्षातोऽधिकारः* इति न्यायो न केवलं पदानामनुवृत्तिनिवृत्त्योरेवाख्यायकः, किन्तु यादृशेऽर्थे यत्पदस्य शक्तिर्निर्धारिता, यावच्च येन शास्त्रेण स्वभावतः कार्यं क्रियते, ततोऽधिकस्यापि कार्यस्य लाभार्थः, क्वचिद् बाध्यस्यापि बाधकत्वार्थश्चेति प्रकृतमहाभाष्यैकयोगक्षेमत्वाल्लभ्यत इति बोध्यम्॥ १२॥

## *अर्थवशाद्विभक्तिविपरिणामः* ॥१३॥

**सि०—अर्थः**—प्रकृते तात्पर्यविषयीभूतोऽभिधेयः, तस्य वशात्–आनुकूल्यात्, विभक्तेः–पूर्वनिर्दिष्टायाः, विपरिणामः–परावृत्तिः, भवतीति शेषः। पूर्वसूत्रे निर्दिष्टस्य पदस्यानुवृत्तिस्थलेऽनुवर्तनादेवार्थान्तरस्य प्रत्यायकत्वं न सम्भवति तदनुकूलविभक्तेरभावात्, न चानुवर्तनादेव विभक्त्यन्तरोत्पत्तिः सम्भवति, अनुवृत्तिक्रियायां तादृशसामर्थ्याभावात्, 'नहि गोधा सर्पन्ती सर्पणक्रियावत्त्वात् सर्पतां याति' इति दृष्टत्वात्, तथा च विभक्तिविपरिणामाय कश्चिद् यत्नः करणीय इति तदर्थमयं न्यायः समाश्रीयते। एवं च स्वीकृतेऽस्मिन् न्याये "अत आः स्यादौ जस्-भ्याम्-ये" [१. ४. १.] इत्यतोऽनुवर्तमानस्य षष्ठ्यन्ततयाप्यत इति पदस्य "भिस ऐस्" [१. ४. २.] इत्यत्र पञ्चम्यन्ततया विपरिणामः सम्पद्यते, अन्यथा तात्पर्यविषयीभूतार्थानवगमापत्तेः। ज्ञापकं त्वस्य न्यायस्य "अद् व्यञ्जने" [२. १. ३५.] इत्यत्र स्थानिनोऽनुपादानम्, अत्र च स्थानित्वेन पूर्वसूत्रादनुवर्तमान 'इदम्'शब्द इष्टः, स च तत्र षष्ठ्यन्तः, अत्र च षष्ठ्यन्तत्वे तस्याश्रीयमाणे "षष्ठ्यान्त्यस्य" [७. ४. १०६.] इति परिभाषासूत्रप्रवृत्त्या मकारस्य स्थाने एवाकारादेशः स्यादिति 'आभ्याम्' इत्यादीष्टरूपासिद्धिः स्यादिति सम्पूर्णस्य स्थाने आदेशः स्यादित्येतमर्थमत्र प्रथमान्त 'इदम्'शब्दः पठनीयः, स च न पठित इति पूर्वतोऽनुवृत्तस्यैवार्थवशाद् विभक्तिविपरिणामेनेह प्रथमान्तत्वमिति सिद्धं भवति, तथा चास्य ज्ञापनं स्पष्टमेव। एवं चाग्रिमसूत्रे "अनक्" [२. १. ३६.] इत्यत्र 'अनक्' इति प्रथमान्तविशेषणेनापि विभक्तिविपरिणामः समर्थितः। अयं च न्यायो यत्र विभक्तिविपरिणामार्थं न यत्नः कृतस्तत्रैव प्रवर्तते, न तु तदर्थं यत्र यत्नः कृतस्तत्रैतन्न्यायानुसरणेन तस्य यत्नस्य वैयर्थ्यं शङ्कनीयम्, 'नासूया तत्र कर्तव्या यत्रानुगमः क्रियते' इति भाष्योक्तेः, तेन च "तृतीयस्य पञ्चमे" [१. ३. १.] इत्यतोऽनुवर्तमानस्य तृतीयस्येति पदस्यैतन्न्यायेन पञ्चम्यन्ततया परिणामसंभावनायां सत्यामपि "ततो हश्चतुर्थः" [१. ३. ३.] इत्यत्र तत इति करणस्य नासङ्गतत्वम्, 'ततः' इति निर्देशादस्यानित्यत्वं तु नाशङ्क्यम्, अन्यत्र फलाभावात्। ज्ञापकसिद्धस्य न्यायस्य सूत्राक्षरवैयर्थ्यापादनसामर्थ्याभावात्, तस्माज्ज्ञापकसिद्धं न सर्वत्रेति सामान्यन्यायेनैवेदृशस्थले निर्वाह इति॥ १३॥

### *अर्थवशाद् विभक्तिविपरिणामः* ॥ १३॥

**त०**—शास्त्रेष्वेकस्यैव पदस्य क्वचिद् द्वयोरर्थयोर्बोधनायोच्चारणं क्रियते, तत्र च न शक्यतेऽर्थद्वयस्य विभिन्नविभक्तिविषयस्य बोधनाय युगपद् विभक्तिद्वयमुच्चारयितुम्, एकत्र पदेऽनेकविभक्तेरसंभवात्; तथा च तस्यैव पदस्य विभक्तिविपरिणामेनाऽन्वयः क्रियते लोकवत्, लोकेऽपि यथा 'सर्वे छात्रा गमिष्यन्ति,

अध्यापकश्च' इत्युक्तेऽध्यापकेऽन्वयार्थं गमिष्यतीति विभक्तिवचनविपरिणामः क्रियते, तत्रैव 'अहं च' इत्युक्ते पुरुषस्यापि विपरिणामो भवति-गमिष्यामीति । तथा चायमप्यर्थो लोकसिद्ध एवेति पाणिनीये तन्त्रे नायं न्यायः परिभाषेन्दुशेखरे सङ्गृहीतो दृश्यते । भाष्यादिपर्यालोचनया चायमर्थस्तत्र तत्र समाश्रित इति ज्ञायते, तथाहि-"अङ्गस्य" [ पा० सू० ६. ४. १. ] इत्यधिकारसूत्रमर्थवशात् क्वचित् षष्ठ्यन्तमपि पञ्चम्यन्तं सम्पद्यते, यथा—"अतो भिस ऐस्" [ पा० सू० ६. १. ९. ] इत्यत्र, तथा हि-अदन्तादङ्गादित्यर्थः सम्पद्यते, अन्यथा विशेषणविशेष्यभावाभावात् तदन्तविधिर्न स्यात्; यद्यपि तत्र सूत्रे [ अङ्गस्येति सूत्रे ] महाभाष्ये उपायान्तरमपि प्रदर्शितं तथापि दीक्षितादिभिर्विभक्तिविपरिणाम एव स्वीकृतः । किञ्च "भ्यसोऽभ्यम्" [ पा० सू० ७. १. ३०. ] इति सूत्रे महाभाष्ये "शेषे लोपः" [ पा० सू० ७. २. ९०. ] इति सूत्रेण शेषस्य लोप इत्यर्थोऽपि समाश्रितः, स च विभक्तिविपरिणामेनैव सिद्ध्यति नान्यथा, तत्र मपर्यन्तात्छेषस्य लोप इत्यर्थः समाश्रितः, "मपर्यन्तस्य" [ पा० सू० ७. २. ९१. ] इत्यधिकारसूत्रे च षष्ठी श्रूयते, साऽपि प्रकृतार्थानुरोधेन पञ्चम्या विपरिणमयितव्या; एवं च बहुषु स्थलेषु विभक्तिविपरिणामेन कार्यं सम्पादितम् । "स्थानिवदादेशोऽनल्विधौ" [ पा० सू० १. १. ५६. ] सूत्रे च महाभाष्ये-"यां काञ्चिद् विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या" इति स्पष्टमेव प्रतिपादितम् । तथा च पाणिनीयेऽपि तन्त्रे सिद्धवदस्य न्यायस्यार्थः समाश्रीयते ॥ १३ ॥

## *अर्थवद्ग्रहणे नानर्थकस्य* ॥ १४ ॥

**सि०**—इह हि व्याकरणशास्त्रे शब्द एव कार्यी, स च द्विविधो दृश्यते—सार्थको निरर्थकश्च, तत्र समुदायस्य सार्थकत्वमवयवस्य च निरर्थकत्वम्, समुदाय एव शक्तिग्रहात् । तत्रैकः शब्दः क्वचित् समुदायरूपः क्वचिच्चैकदेशरूपः, यथा—'जातीयर्' प्रत्ययघटक-'तीय'शब्दः, क्वचित् समुदायरूपोऽपि, यथा—'द्वितीय' इत्यादौ, इह चावयवरूपतयाऽनर्थकः । तत्र 'तीय'ग्रहणे विनिगमकाभावात् कीदृशस्य ? सार्थकस्यैव निरर्थकस्यैव उभयस्य वा ग्रहणमित्याशङ्कायामयं न्यायः पठ्यते, तत्र च 'सम्भवति ग्रहणं कार्यम्' इति च पदत्रयमध्याहृत्य न्यायस्य व्याख्या सम्पद्यते । अर्थवतः शब्दस्य प्रत्ययभूतस्य प्रकृतिभूतस्य वा ग्रहणे सम्भवति सत्यनर्थकस्य तस्य ग्रहणं न कार्यमित्यर्थः । तत्र प्रत्ययग्रहणं यथा—"तीयं ङित्कार्ये वा" [ १. ४. १४. ] इत्यत्र तीयस्य ग्रहणम्, तत्र चैतन्न्यायसहकारात् "द्वेस्तीयः" [ ७. १. १६५. ] इत्यनेन विहितस्य सार्थकस्य तीयप्रत्ययस्यैव ग्रहणम्, न तु 'जातीयर्' प्रत्ययघटकस्य तीयस्य, तस्यैकदेशत्वात् प्रकारार्थस्यावाचकत्वेनानर्थकत्वात्, तेन पटुजातीयायेत्यादौ "तीयं ङित्कार्ये वा" [ १. ४. १४. ] इति स्मायादयो न भवन्ति । प्रकृतिग्रहणं यथा—"इन्-हन्-पूषा-ऽर्यम्णः शि-स्योः" [ १. ४. ८७. ] इत्यत्र 'हन्'इत्यादीनां ग्रहणम्, एतन्न्यायबलाच्च तत्रार्थवत एव हनो ग्रहणेन निरर्थकस्य 'प्लीहन्' इत्यादि शब्दनिष्ठस्य 'हन्' इत्यस्य न ग्रहणं भवति, तेन 'वृत्रहणौ' इत्यादाविव 'प्लीहानौ' इत्यादौ नियमाप्रवृत्तिरिति "नि दीर्घः" [ १. ४. २५. ] इति दीर्घः सिद्ध्यति । अत्र च ज्ञापकं "ऋ-स्वसृ-नप्तृ०" [ १. ४. ३८. ] इति सूत्रे नप्त्रादीनां ऋन्तानामेव पृथगुपादानम् । तच्चोणादीनामव्युत्पन्ननामत्वपक्षे तत्रत्यतृ-शब्दस्यानर्थकत्वेनानेन न्यायेन तृशब्देन ग्रहणं न स्यादिति तत्र पक्षे नप्त्रादीनामार्विधानार्थं क्रियते, एतन्न्यायाभावे तु तत्र [ अव्युत्पन्ननामत्व ] पक्षेऽपि तेषां ऋन्तत्वसत्त्वादेवारि सिद्धे तद्वैयर्थ्यं स्पष्टमेव स्यात् । अनित्यश्चायं "संख्याडतेश्चाशत्तिष्टेः कः" [ ६. ४. ३०. ] इति सूत्रे डतिग्रहणात्, तद्धि तत्रति वर्जनेन डत्यन्तस्य ग्रहणं न स्यादिति शङ्कयैव कृतम्, अन्यथा "डत्यतु संख्यावत्" [ १. १. ३५. ] इति सूत्रेण डतिप्रत्ययान्तस्य संख्यावद्भावविधानात् संख्याग्रहणेनैव डत्यन्तस्यापि ग्रहणे सिद्धे किं तेन कृतं स्यात्, एतन्न्यायध्रौव्ये तु डत्यन्तस्य त्यन्तत्वेन ग्रहणं न स्यात्, विंशत्यादिशब्देऽर्थवतस्तिशब्दस्य संभवेनानर्थकस्य डत्यवयवतिशब्दस्याग्रहणात्, इति डत्यन्तस्यावर्जने सिद्धे संख्यात्वेन तस्य ग्रहणे पृथक् डतिग्रहणवैयर्थ्यं स्पष्टमेव, तच्च व्यर्थं सत् अस्य न्यायस्यानित्यत्वं ज्ञापयति । एवं च *अनिनस्मिन् ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति* इति न्यायोऽप्यस्य स्वविषये निवारको युक्त एव ॥ १४ ॥

## *अर्थवद्ग्रहणे नानर्थकस्य* ॥ १४ ॥

**त०**—अयमत्राभिसन्धिः-'घटमानय, घटमुच्चारय' इत्युभयविधप्रयोगदर्शनात्, प्रथमेऽर्थस्य द्वितीये शब्दस्य च बोधदर्शनात्, शब्दानामर्थे शब्दे च शक्तिरिति प्रतीयते । अर्थे शक्त्यभावे 'घटमानय' इति वाक्याद् घटकर्मकमानयनं न प्रतीयेत, तदनुरोधेनार्थमात्रे शक्तिस्वीकारे 'घटमुच्चारय' इति कथिते घटशब्दकर्मकमुच्चारणं न प्रतीयेत, प्रतीयते चोभयमित्युभयत्र शब्दस्य शक्तिरिति स्वीकार्यम् । न चार्थे शक्तिः शब्दे च लक्षणेति वाच्यम्, विनिगमनाभावाच्छब्द एव शक्तिरर्थे लक्षणेत्येव कुतो न स्यात् ?; न चेष्टापत्तिः कर्तुं शक्या, बाधप्रतिसन्धानाभावेऽपि घटादिपदात् कम्बुग्रीवादिमतोऽर्थस्य प्रतीत्या

लक्षणाऽसंभवात्, शक्यार्थबाधे हि लक्षणा भवति; न च 'घटमानय'इत्यादौ घटशब्दस्य-शब्दार्थकतामाश्रित्य शब्दस्यानयनं कथं स्यादिति बाधं प्रतिसन्धाय तस्य कम्बुग्रीवादिमति लक्षणेति कस्यचित् प्रतिपत्तुर्गोचरी भवति; एवं 'घटमुच्चारय' इत्यत्रापि योजनीयम् । न चार्थे प्रचुरः प्रयोगः शब्दे चाल्प इति प्रयोगप्राचुर्येणार्थे [ कम्बुग्रीवादिमति ] घटपदस्य शक्तिः, शब्दे तस्य लक्षणेति निर्णेयम्, प्रयोगप्राचुर्यस्य प्रसिद्धयप्रसिद्धिनियामकत्वेऽपि शक्तिनियामकत्वस्यादर्शनात्, लक्षणामूलस्य बाधप्रतिसन्धानस्य शब्दार्थत्वपक्षेऽप्यदर्शनाच्च । न च व्यवहारेण शक्तिनिर्णयः, व्यवहारस्य पूर्वरीत्योभयत्र तुल्यत्वात् । एवं च—

"न सोऽस्ति प्रत्ययो लोके, यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥"

इति वाक्यपदीयेनार्थबोधेऽपि शब्दस्यापि शाब्दबोधे भानमिति प्रमाणतयोदाहर्तुं शक्यमेव, एवं च शब्दस्य शब्देऽर्थे च शक्तिरभ्युपेयैव । तथा च 'घटमानय' इत्यादौ घटशब्दवाच्यं कम्बुग्रीवादिमन्तमर्थमानय, 'घटमुच्चारय' इत्यादौ घटरूपार्थबोधकं 'घट'शब्दमुच्चारयेति क्रमेण बोधो जायते । तत्र शब्दविशिष्टेऽर्थे, अर्थविशिष्टे शब्दे च शब्दानां शक्तिकल्पने शक्यतावच्छेदके गौरवात्, लाघवात् सर्वेषां शब्दानां स्ववृत्तिश्रूयमाणानुपूर्व्यवच्छिन्ने, घटत्वादितद्रूपावच्छिन्ने च खण्डशः शक्तिः कल्प्यते, स्ववृत्तीत्यत्र स्वपदं शक्तपदपरम्, यथा-'घट' इति शक्तं पदम्, तद्वृत्तिः श्रूयमाणा या आनुपूर्वी-घकारोत्तराकारोत्तरटकारोत्तराकारस्वरूपा, तयाऽवच्छिन्नं घट इति पदम्, तत्र घटत्वादि यत् प्रातिस्विकं रूपं प्रवृत्तिनिमित्तभूतं तदवच्छिन्ने च कम्बुग्रीवादिमति व्यक्तिविशेषे खण्डशः शक्तिरिति तात्पर्यम् । लोके आनयनादिकार्यस्य शब्दे बाधादर्थस्य विशेष्यतया शब्दस्य चार्थे विशेषणतया बोधः, शास्त्रे च "जातौ राज्ञः" [ ६. १. ९२. ] इत्यादौ मांसपिण्डविशेषरूपस्यार्थस्य प्रत्ययेन सहान्वयासंभवात् शब्दस्य विशेष्यतयाऽर्थस्य च शब्दे विशेषणतया बोधः । तथा च तत्तदर्थविशिष्टे शब्दे तत्तत्कार्यमिति व्याकरणशास्त्रे निर्णयः । तथा चायं न्यायः फलित इति नात्र ज्ञापकाकाङ्क्षा, तदुक्तं नागेशेन परिभाषेन्दुशेखरे एतत्परिभाषाव्याख्यानावसरे 'विशिष्टरूपोपादाने उपस्थितस्यार्थस्य विशेषणतयाऽन्वयसम्भवे तत्त्यागे मानाभावोऽस्या मूलमिति, विशिष्टरूपोपादान इत्युक्त्या च आनुपूर्व्यवच्छिन्नविषयताप्रयोजकपदोपादान एवायं न्यायः प्रवर्तते, न तु वर्णोपादाने, एकस्मिन् वर्णे पूर्वापरवर्णान्तराभावेन विशिष्टरूपत्वाभावात् । तथा च यत्र वर्णमात्रोपादानं तत्र नायं न्यायः प्रवर्त्तत इति वर्णानामनर्थकानां सार्थकानां च ग्रहणं भवति, तदुक्तं "लस्य" [ पा० सू० ३. ४. ७७. ] इति सूत्रे महाभाष्ये—"लादेशे सर्वस्य प्रसङ्गोऽविशेषात् [ वार्तिकम् ]" "लादेशे सर्वस्य प्रसङ्गः, सर्वस्य लकारस्य प्राप्नोति, अस्यापि प्राप्नोति-लुनाति लभते, किं कारणम्? अविशेषात्, न हि कश्चिद् विशेष उपादीयते—एवंजातीयस्य लकारस्यादेशो भवतीति, अनुपादीयमाने विशेषे सर्वप्रसङ्गः, ततः समाधानवार्तिकम्—'अर्थवद्ग्रहणात् सिद्धम्' इति, भाष्यम्—"अर्थवतो लकारस्य ग्रहणम्, न चैषोऽर्थवान्" इति ततः, आक्षेपवार्तिकम्—"अर्थवद्ग्रहणात् सिद्धमिति चेन्न वर्णग्रहणेषु" इति, भाष्यम्—"अर्थवद्ग्रहणात् सिद्धमिति चेत्? तन्न, किं कारणम्? वर्णग्रहणमिदम्, न चैतद्वर्णग्रहणेषु भवति—'अर्थवद्ग्रहणे नानर्थकस्य'" इति । अत्र कैयटः—"लस्येत्यत्र लकारेऽकार उच्चारणार्थः, ततश्च वर्णमात्रस्यायं निर्देशः, वर्णनिर्देशेषु विद्यमानाऽप्यर्थवत्ता शब्देन नाश्रिता, वर्णरूपमात्रस्याश्रयणात् । तथा च यस्येति लोपोऽनर्थकस्याऽपि भवति—दैवदत्तिरिति"इति । अयमाशयः—पाणिनीये तन्त्रे लडादयो दश लकारा आस्थिताः, तेषां स्थाने एव त्यादय आदेशा भवन्ति, तत्र चादेशविधायकं "लस्य" [ पा० ३. ४. ७७. ] इति सूत्रं, तत्रेयमाशङ्का—इहाविशेषेण लस्यादेशो विधीयत इति 'लुनाति, लभते' इत्यादिषु धात्ववयवलकारस्यापि त्यादय आदेशाः स्युरिति, तत्र *अर्थवद्ग्रहणे नानर्थकस्य* इति परिभाषया—न्यायेन वारणं न सम्भवति, तत्र वर्णमात्रस्याश्रितत्वेनास्य न्यायस्याप्रवृत्तेरिति, तत्र च [ लस्येति ] विशिष्टरूपोपादानमाश्रितं तदर्थमिति वर्णग्रहणे नास्य प्रवृत्तिरिति सिद्धम्, एतद्भाष्यप्रकरणाच्च वर्णानामर्थविशिष्टे वर्णे एका शक्तिरपरा च वर्णमात्रे । तथा च शास्त्रे वर्णो यत्र उपात्तो वर्त्तते तत्र लोक इवार्थविशेष्यकबोधे कार्याणां बाधादपरा या वर्णमात्रनिरूपिता शक्तिस्तयैव वर्णमात्रस्य बोधः, न तु विशिष्टरूपोपादान इवार्थविशिष्टवर्णबोधः, इति तत्रानर्थकस्यापि वर्णस्य ग्रहणं भवति । अर्थवैशिष्ट्यं च शब्दे स्वविषयकबोधजनकत्वेन तात्पर्यविषयत्वसम्बन्धेन, तथा च "तीयं ङित्कार्ये वा" [ १. ४. १४. ] इति सूत्रे समुपादीयमानस्तीयशब्दः पूरणार्थविषयकबोधजनकत्वेन तात्पर्यवानिति तत्र तदर्थवैशिष्ट्यं सिद्धमिति जातीयरिघटितस्य तीयस्य तादृशार्थबोधजनकत्वाभावेन न तस्य ग्रहणम् । एतेन "बोधकत्वसम्बन्धेनार्थवैशिष्ट्ये यदि बोधकता फलोपधायकता—कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तित्वरूपा, तदा यदा प्रतिबन्धकवशाद् बोधाभावस्तदा 'द्वितीयस्मै' इत्यादावपि स्मायादेशो न स्यात्, यदि च स्वरूपयोग्यतैव बोधकता, सा च बोधजनकतावच्छेदकानुपूर्वीरूपा, तर्हि पटुजातीयायेत्यादावपि तादृशानुपूर्व्याः सत्त्वेन स्मायादेशप्रसङ्गः" इत्यपास्तम्, तात्पर्यायविशेष्यतापर्याप्तेर्जातीयशब्दघटकतीयशब्देऽभावात् सिद्धान्ते दोषाभावात् । यद्यपि लोकेऽर्थबोधकता 'द्वितीय' इत्यादिसमुदाय-

स्यैव, न तीयमात्रस्य "न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययः" इति भाष्यादिसिद्धान्तात्, तथापि शास्त्रीयकार्यनिर्वाहाय शास्त्रप्रामाण्यात् 'तीय'शब्देऽप्यर्थबोधकता कल्प्यते, तदुक्तं परिभाषेन्दुशेखरे एतन्न्यायव्याख्यावसरे नागेशेन—"अत्रार्थः कल्पितान्वय-व्यतिरेककल्पितः शास्त्रीयोऽपि गृह्यते" इति, अस्यार्थः-अत्र न्यायेऽर्थपदेन न केवलं लौकिकप्रयोगप्रसिद्ध एवार्थो गृह्यते, किन्तु कल्पितौ यावन्वय-व्यतिरेकौ ताभ्यां कल्पितः-शास्त्रकारैरारोपितः शास्त्रीयोऽप्यर्थो गृह्यत इति । अयमाशयः—वैयाकरणसिद्धान्ते शब्दानां नित्यत्वेन तत्र भागस्याभावात् स्फोटरूपमखण्डमेव पदं वाक्यं वार्थबोधकमिति प्रकृतीनां प्रत्ययानां चार्थवत्त्वमसम्भवि, तथाऽपि शास्त्रकारैः शास्त्रीयप्रक्रियानिर्वाहायान्वय-व्यतिरेकाभ्यां—यत्सत्त्वे यादृशार्थबोधो भवति, यदसत्त्वे च तादृशार्थबोधो न भवतीति रूपाभ्यां प्रकृति-प्रत्यययोरावापोद्धाराभ्यां शक्तिः कल्पिता, सापि शास्त्रीयप्रक्रियानिर्वाहायालमिति तीयस्य पूरणार्थे "द्वेस्तीयः" [ ७. १. १६५. ] इति शास्त्रेण विहितत्वात् तस्य पूरणार्थवाचकत्वमास्थीयते, इति तेनैवार्थेनार्थवत्त्वं तस्येति तदर्थविहीनो 'जातीय'घटितस्तीयो न गृह्यत इति । यत्र कल्पितावप्यन्वय-व्यतिरेकौ न स्तः, यथा 'यावक' इत्यादौ कप्रत्ययाभावे योऽर्थः प्रतीयते स एव कप्रत्ययसत्त्वेऽपि, तत्र प्रत्यय इति महासंज्ञा [ अन्वर्थसंज्ञा ] बलेन कप्रत्ययस्य प्रकृत्यर्थेनैवार्थवत्त्वं स्वीक्रियत इति सोऽप्यर्थः शास्त्रीयप्रक्रियानिर्वाहाय स्वीक्रियते । परं चैतन्मते "गोश्चान्ते ह्रस्वो०' [ २. ४. ९६. ] इत्यादौ गोपदेन कोऽर्थो विवक्षितः ? यदि गोत्वावच्छिन्नस्तर्हि पशुतात्पर्येण प्रयोगे चित्रगुरित्यादौ ह्रस्वः स्यात्, किरणादितात्पर्येण प्रयुक्ते च न स्यात्, ततश्च लोके यावन्तोऽर्था गोपदेन बोध्यन्ते तत्सकलार्थतात्पर्यकोऽयं सूत्रस्थो गोशब्द इति वक्तव्यम्, अन्यथा किरणादितात्पर्यके ह्रस्वत्वं न स्यात्,

"स्वर्गे रश्मौ च वज्रे च, बलीवर्दे च गौः पुमान् ।
स्त्री सौरभेयी दिग्बाणदृग्वाग्भूध्वप्सु भूम्नि च ॥"

इति कोशरीत्या गोशब्दस्यानेकार्थवाचकत्वं प्रसिद्धमेव । तथा च सकलार्थवाचिगोशब्दबोधतात्पर्येणेह गोशब्दो गृहीत इति सर्वस्य ग्रहणमिति; तदपि न—सर्वेषामर्थानां सकृदुच्चरिताद् गोशब्दाद् बोद्धुमशक्यत्वात्, सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति न्यायात् । एवं च प्रतिशक्यतावच्छेदकं सूत्रमावर्त्तनीयम्, तथा च किरणतात्पर्यकस्य गोशब्दस्य, पृथिवीतात्पर्यकस्य गोशब्दस्य, गोत्वावच्छिन्न[पशु]तात्पर्यकस्य गोशब्दस्येत्यादिक्रमेणार्थः कर्तव्यः, न त्वर्थवाचकस्य गोशब्दस्येत्येवंरूपेण, अर्थत्वेन रूपेणार्थे गोपदशक्तेरभावात्, एवं रीत्या नानार्थकस्थले सर्वत्रावृत्तौ गौरवम् । एवं "ङ्याब्दीदूतः के" [ २. ४. १०४. ] इत्यादावर्थविशिष्टे कशब्दे परे इत्याद्यर्थो न स्यात् । प्रत्ययजन्यबोधे प्रकृतिसमभिव्याहारस्य कारणत्वात्, अन्यथाऽणादिशब्दादप्यपत्याद्यर्थबोधप्रसङ्गात् । यदि तु लौकिके प्रयोगे कशब्दप्रकारककुत्साद्यर्थविशेष्यकबोधस्यैव सत्त्वेन, तादृशबोध एव प्रकृतिसमभिव्याहारस्य कारणत्वम्, सूत्रे तु "ङ्याब्दीदूतः के" [ २. ४. १०४. ] इत्यादावर्थप्रकारकशब्दविशेष्यकबोधस्य सत्त्वेन न तत्र प्रकृतिसमभिव्याहारापेक्षेत्युच्यते, तथापि कार्यतावच्छेदके कशब्दनिष्ठप्रकारतानिरूपितकुत्साद्यर्थनिष्ठविशेष्यतायाः प्रवेशे गौरवम् । तथा चेदृशस्थले *स्वं रूपं शब्दस्याशब्दसंज्ञा* इति न्यायेनैव निर्वाह इत्यास्थेयम्, तेन च न्यायेन शास्त्रघटकशब्देऽपूर्वः सङ्केतो बोध्यते, स चार्थत्वावच्छिन्ने स्ववृत्तिरूपावच्छिन्ने च । तथा च "गोश्चान्ते ह्रस्वो०" [ २. ४. ९६. ] इत्यादावर्थविशिष्टस्य गोशब्दस्येत्यर्थेन सर्वत्रार्थे प्रयुज्यमानस्य गोशब्दस्यैकेनैव सूत्रेण ग्रहणनिर्वाह इति नावृत्तेरावश्यकता, "ङ्याब्दीदूतः के" [ २. ४. १०४. ] इत्यादावप्यर्थविशिष्टे कशब्दे परे इत्येवार्थः, तत्र न प्रकृतिसमभिव्याहारस्य कारणत्वम्, अपि तु कुत्साद्यर्थबोधे एवेति न विशेषरूपेण कार्यकारणभावकल्पनप्रयुक्तमपि गौरवमिति विभावनीयं सुधीभिरिति ।

अत्रेदं प्रविचार्यते—अस्य न्यायस्य चञ्चलत्वमास्थेयं न वेति ?, विधिपक्षस्तु वृत्तावेवोपपादित इतीह निषेधपक्ष एवोपपादयितुमिष्टः । तथाहि—यदस्य चञ्चलत्वं तत्रोक्तं तत् प्राचामनुरोधादेव । तथा हि—लघुन्यासकारैः "संख्याडतेश्चाशत्तिष्टेः कः" [ ६. ४. १३० ] इति सूत्रव्याख्यायामित्थमुक्तम्—ननु डतिग्रहणं किमर्थं ? संख्याद्वारेणापि गतत्वात्, त्यन्तद्वारेण प्रतिषेधः स्यादिति न वाच्यम्, अर्थवद्ग्रहणेति न्यायेन तेः सार्थकस्योपादानात्; उच्यते—ष्ट्यन्तद्वारेण षष्टिवर्जनं ज्ञापयति—अत्राव्युत्पत्तिपक्ष इति, अव्युत्पत्तिपक्षे च न्यायस्याप्रवृत्तिः, किञ्च न्यायस्यानित्यत्वज्ञापनार्थं डतिग्रहणम्, तेनैकसप्ततिरित्यत्र त्यन्तद्वारेण प्रतिषेधः सिद्धः, अन्यथा सप्ततिरित्येव त्यन्तो नैकसप्ततिरिति न स्यात्, अव्युत्पत्तिपक्षश्च कस्मान्निश्रीयते ? षष्टिग्रहणात् [ ष्टिग्रहणादित्युचितम् ], अन्यथा षष्टिशब्दस्य तिप्रत्ययान्तत्वात् त्यन्तद्वारेण प्रतिषेधे सिद्धेऽस्योपादानमनर्थकं स्यात्" इति । अत्रेदमुच्यते—यदि षष्टिवर्जनार्थं कृतेन ष्ट्यन्तवर्जनेनात्राव्युत्पत्तिपक्ष एवाश्रीयत इति समाश्रीयते, तदा च तेरनर्थकत्वेनार्थवतस्तिशब्दस्य सम्भवाभावेनैवास्य न्यायस्याप्रवृत्तौ डतेरपि वर्जने प्राप्ते संख्यात्वेन नैव सिद्धिरिति कथमिव डतिग्रहणेनैतन्न्यायस्यास्थिरत्वं ज्ञापयितुं शक्यम्, एतन्न्यायस्यानित्यत्वे सत्यप्यप्रवृत्तिरेवेष्टा; सा चाव्युत्पत्तिपक्षाश्रयणेनैव साधितेति विध्यर्थं डतिग्रहणस्यावश्यकत्वेन वैयर्थ्याभावात् । न चानेन डति ग्रहणेनास्य न्यायस्यानित्यत्वं ज्ञाप्यतां, ष्टिवर्जने-

नाव्युत्पत्तिपक्षो वेत्यत्र विनिगमकाभाव इति वाच्यम्, ष्टिग्रहणवैयर्थ्यापत्तेरेव विनिगमकत्वम्। अयमाशयः—डतिग्रहणेनास्य न्यायस्यानित्यत्वज्ञापने कृतेऽपि ष्टिवर्जनस्य सार्थक्यं न सम्भवति, तद्विषये एतन्न्यायव्यापाराभावात्, नहि षष्टिशब्दे तिशब्दस्यानर्थकत्वं केनाऽपि मन्यते व्युत्पत्तिपक्षे, ष्टिवर्जनेनाव्युत्पत्तिपक्षज्ञापने कृते तु डतेरपि सार्थक्यं लघुन्यासरीत्या सम्भवतीति तस्यैव ज्ञापकत्वमुचितम्; किञ्च यथाकथञ्चित् डतिग्रहणस्याप्येतन्न्यायानित्यत्वज्ञापकत्वं स्वीक्रियताम्, किन्तु तथा स्वीकारे फलाभावः; न च एकसप्ततिरित्यत्र कप्रत्ययाभावः फलत्वेनोक्त एवोदाहृते लघुन्यासग्रन्थे इति वाच्यम्, तत्कथनस्याप्यविचारितरमणीयत्वात्, सप्ततिशब्दे तिशब्दः सार्थकः, एकसप्ततिशब्दे च सनिरर्थक इति विचारस्य बुद्ध्यऽनारोहात्। किं प्रत्ययग्रहणे प्रकृत्यादेरेव ग्रहणमिति वत् अयमपि न्यायो यतः स विहितस्तदन्तत्वे सत्येवार्थवत्त्वमन्यथा नेति बोधयति येनैतन्न्यायप्रवृत्तावेकसप्ततिशब्दस्य त्यन्तत्वं न स्यात्, न चैवम्, तस्मादेतत् फलकथनमविचारितमेव रमणीयमिति प्रतीमः। न च *अनिनस्मन्ग्रहणानि०* इति न्यायेनापोह्यमानत्वमेवास्यास्थिरत्वे मूलमिति वाच्यम्, तत्र ज्ञापकान्तरस्याग्रे प्रतिपादितत्वेनैतदस्थिरत्वस्य तत्राप्रयोजकत्वात्, तथा चास्यास्थिरत्वे न किञ्चित् फलमिति वृत्तौ तत्प्रतिपादनं प्राचामनुरोधेनैवेति विज्ञेयमिति॥१४॥

## *लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्* ॥ १५ ॥

सि०—समानशब्दयोः कस्यचिद् ग्रहणेऽभिप्रेतेऽन्यस्य चानभिप्रेते तत्राभिप्रेतग्रहणसिद्ध्यर्थं पूर्वम् *अर्थवद्ग्रहणे नानर्थकस्य* इति न्याय उक्तस्तत्प्रसङ्गेन तत्समान एवायं न्यायः स्मृतः। लक्ष्यतेऽनेनेति लक्षणं लिङ्गं सूत्रं च, तदाश्रित्य सम्पन्नं रूपमपि लक्षणमुपचारात् तथा च लक्षणपदं लाक्षणिकार्थकम्। पदं पदं प्रति निर्दिश्य उक्तः प्रतिपदोक्तः, स च क्वचिच्छब्दस्वरूपरूपः क्वचिच्च विधिरूप इति यथाप्रयोगं व्यवस्था विज्ञेया। लक्षणं च प्रतिपदोक्तश्चानयोरितरेतरयोगस्तयोरित्यर्थः। उभयोरपि रूपयोर्विध्योर्वा सम्भवतोः सतोः प्रतिपदोक्तस्यैव विधे रूपस्य वा ग्रहणमिति न्यायार्थः। तत्र प्रतिपदोक्तस्यैवेत्येवकारेण लाक्षणिकग्रहणव्युदासः। ततश्च यत् सामान्येन केनचित् लक्षणेन विहितं, यच्च तच्छब्दमनूद्य विहितं, तयोर्मध्ये तच्छब्दानुवादेन विहितमेव बलवदिति तदेव ग्राह्यमिति फलति। अत्र च ज्ञापकं "आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे" [ ३. १. २०. ] इत्यादिसूत्रैः प्रतिपदोक्ततया बहुव्रीहिविधानम्, तद्धि "प्रमाणी-संख्याड्डः" [ ७. ३. १२८. ] इति डसमासान्तविधायेतत्प्रकरणविहितबहुव्रीहेरेव ग्रहणार्थम्। एतन्न्यायाभावे तु—प्रतिपदोक्तस्यैव ग्रहणमित्यर्थस्याभावे "एकार्थं चानेकार्थं च" [ ३. १. २२. ] इति विहितसमासेनैव सिद्धौ प्रतिपदोक्ततया समासविधानस्य वैयर्थ्यं स्पष्टमेव। ज्ञापिते त्वस्मिन् "आसन्ना दश येषां ते आसन्नदशाः' इत्यादावेव "प्रमाणी-संख्याड्डः" [ ७. ३. १२८. ] इति डो भवति, न तु 'प्रिया दश येषां ते प्रियदशानः' इत्यादौ सामान्येन "एकार्थं चानेकं च" [ ३. १. २२. ] इति विहितसमासस्थले, तस्य सामान्येनैकार्थत्वादिलक्षणेन विधानात्, आसन्नदशा इत्यत्र च "आसन्नादूराधिक०" [ ३. १. २०. ] इति प्रतिपदोक्ततया संख्याशब्दमुच्चार्य ] विधानात्। एवं "नोऽप्रशानोऽनुस्वारा-ऽनुनासिकौ च पूर्वस्याधुट्परे" [ १. ३. ८. ] इति सूत्रे प्रतिपदोक्तस्यैव नकारस्य ग्रहणात् त्वन्तत्रेत्यादौ "तौ मु०" [ १. ३. १४. ] इति विहितानुनासिकस्य नकाररूपस्य न ग्रहणमिति नात्र नकारस्य सकारो भवति, अत्र हि नकारो न प्रतिपदोक्ततया विहितोऽपि तु अनुनासिकत्वेन रूपेण लक्षणेनेति लाक्षणिकत्वं तस्य स्पष्टमेवेति, यत्र च नकारः प्रतिपदोक्ततया विधीयते तत्र च भवत्येव, यथा—भवांस्तत्रेत्यत्र, अत्र हि 'नोन्त' इति नकारमेवोक्त्वा विहितो नकार इति प्रतिपदोक्तः। अस्य च लक्ष्यानुसारित्वेन क्वचिदप्रवृत्तिरपि, अत एव "ह्रस्वस्य गुणः" [ १. ४. ४१. ] इत्यादौ प्रतिपदोक्तो लाक्षणिकश्च ह्रस्वो ह्रस्वशब्देन गृह्यत इति। हे कर्तः! इत्यत्रेव हे निष्कौशाम्बे! इत्यत्रापि गुणः सिद्धो भवति, अन्यथा कर्तृशब्दे "णक-तृचौ" [ ५. १. ४९. ] इत्यनेन तृशब्दस्य प्रतिपदोक्ततया विहितत्वात् तत्र गुणसत्त्वेऽपि निष्कौशाम्बिशब्दे निर्गतः कौशाम्ब्या इत्यर्थे समासे "गोश्चान्ते०" [ २. ४. ९६. ] इति ह्रस्वत्वे इकारस्य लाक्षणिकत्वान्न स्यात्। लक्षणशब्दस्य सूत्रपरत्वेन व्याख्यानफलं च हन्तेर्ह्यस्तन्यां दिवि 'अहन्' इत्यत्र लाक्षणिकत्वेन "अह्नः" [ २. १. ७४. ] इति रुत्वं न भवति, किन्त्वव्युत्पन्नस्य दिनार्थकस्याहन्शब्दस्यैव भवति। लक्षणेन—ह्यस्तनीरूपेण चिह्नेन निर्वृत्त इत्यर्थाश्रयणेऽप्यत्र दोषवारणमिति केचित्। वस्तुतस्तु लक्षणेन—सूत्रेण निष्पन्नं लाक्षणिकमित्येकस्यैवार्थस्याश्रयणेऽपि दोषाभाव इति लक्षणशब्दस्य चिह्नार्थकत्वमपि किमर्थमास्थेयम्? नहि व्याकरणे लक्षणं विना किमपि कार्यं भवति, तथा चाग्रे प्रतिपदोक्तत्व-लाक्षणिकत्वलक्षणयोर्व्याख्यानावसरे प्रतिपदोक्तभिन्नत्वमेव लाक्षणिकत्वमिति प्रतिपादयिष्यते। तथा च न लक्षणपदस्येह चिह्नपरत्वमास्थेयमित्येव साधु। यद्यपि प्रतिपदोक्तस्यापि लक्षणनिष्पन्नत्वं भवति, कार्यमात्रस्य व्याकरणे लक्षणाधीनत्वात्, तथापि लक्षणेन पदं पदं प्रति निर्दिश्य विहितत्वं प्रतिपदोक्तत्वम्, तद्भिन्नत्वं लाक्षणिकत्वमित्येव तयोर्भेद इत्यवधेयम्। विस्तरतश्चायं विवरणे समवलोकनीय इति ॥ १५ ॥

## *लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्* ॥ १५ ॥

**त०**—अत्र लक्षणशब्दोऽभ्रादित्वादप्रत्ययान्तः, लक्षणमस्यास्तीति विवक्षितत्वात्; लक्षणया वा लक्षणपदं लाक्षणिकपरम्, तत्त्वं च लाघवात् प्रतिपदोक्तभिन्नत्वमेव, लक्षणशब्दस्य चिह्न-सूत्रोभयार्थकत्वेनेह विवक्षितत्वात् तस्यानेकार्थकत्वेनानुगतलक्षणासंभवात्, प्रतिपदोक्तत्वस्य चानुगतत्वात्। तथा च यदर्थे विशेषणतया प्रतिपदोक्तत्वं विवक्षितं तद्विशिष्टत्वं प्रतिपदोक्तत्वम्, वैशिष्ट्यं च स्ववृत्त्यानुपूर्व्यवच्छिन्नविधेयताश्रयत्व-स्वार्थान्वय्यर्थकपदवृत्त्यानुपूर्वीमत्पदप्रयोज्योद्देश्यतानिरूपितविधेयताश्रयत्वैतदन्यतरसम्बन्धेन, पूर्वसम्बन्धो यत्र विधेयस्य विशेष्यत्वेन ग्रहणं तादृशस्थलपरः, द्वितीयश्च यत्र विधेयस्य विशेषणतया ग्रहणं तादृशस्थलपरः। प्रथमस्य लक्ष्यं यथा—"नोऽप्रशानो०" [ १. ३. ९. ] इत्यत्र न-पदम्, तदर्थे एव प्रतिपदोक्तत्वस्य विवक्षितत्वात्, तेन नपदवृत्त्यानुपूर्व्यवच्छिन्नविधेयताश्रयत्वं यत्र स्यात्, यथा भवानित्यादौ नोन्त इति नशब्दमुच्चार्य विधीयमाने नकारे, तत्रैव प्रतिपदोक्तत्वं तस्य, त्वन्तत्रेत्यत्र न। द्वितीयसम्बन्धस्य लक्ष्यं च—"ऋते तृतीयासमासे" [ १. २. ८. ] इत्यत्र तृतीयासमासपदम्, तथाहि—तत्र तृतीयान्तमुद्दिश्य विहितः समास एव गृह्यते, न तु यथाकथञ्चित् तृतीयान्तस्य विहितः समासः, तथा च—परमेण ऋतेनेति परिनिष्ठितविभक्तया समासे परमर्तेनेत्यत्रार्न भवति, तत्र समासपदान्वयितृतीयार्थकतृतीयापदवृत्त्यानुपूर्वीमत्पद[तृतीयापद]प्रयोज्योद्देश्यतानिरूपितविधेयताश्रयत्वाभावात्, एवमन्यत्रापि यथायथं लक्षणं सङ्गमनीयम्। परिभाषेन्दुशेखरे च नागेशेनास्य न्यायस्य नापूर्वार्थविधायकत्वमपि तु न्यायसिद्धार्थानुवादकत्वमेवेति प्रतिपादितम्, तथा हि, तत्रत्यो ग्रन्थः—लक्षणं लाक्षणिकमुपचारात्, तत्तद्विभक्तिविशेषाद्यनुवादेन विहितो हि समासादिः प्रतिपदोक्तः, तस्यैव ग्रहणं, शीघ्रोपस्थितिकत्वात्। द्वितीयो हि विलम्बोपस्थितिकः। + + + + इदमेव ह्येतत्परिभाषाबीजम्।" इति। अयमाशयः—यद्धि लक्षणानुसन्धानपूर्वकं विज्ञायते तस्य विलम्बेनोपस्थितेः, तच्छब्दानुवादेन विहितस्य शीघ्रमुपस्थितस्य ग्रहणे सति शास्त्रस्य कृतार्थत्वात्, विलम्बेनोपस्थितस्य ग्रहणे मानाभाव एवैतन्न्यायबीजभूत इति नात्र ज्ञापकापेक्षा, तथापि दार्ढ्यप्रदर्शनाय ज्ञापकमप्युपन्यस्तमेतद्वृत्तौ। यत्तु—"आत्सन्ध्यक्षरस्य" [ ४. २. १. ] इति सूत्रे वृत्तौ धातोरित्यस्य सम्बन्धस्य कृतत्वेनास्य न्यायस्य वर्णग्रहणेऽप्रवृत्तिः, अन्यथा अन्ते सन्ध्यक्षरस्य नामसु लाक्षणिकस्यैव सत्त्वेनानेन न्यायेन तत्र दोषाभावात् धातोरनुवृत्तिर्व्यर्थैव स्यात्; वर्णग्रहणे चाप्रवृत्तौ नामान्तस्य सन्ध्यक्षरस्यापि स्यादिति धातोरित्यनुवृत्तिः सार्थिका" इत्याहुः, तदसत्—उणादीनामव्युत्पन्नत्वपक्षे 'गो'इत्यादिशब्दानां लाक्षणिकत्वाभावेन तत्रात्वव्यावृत्त्यर्थं धातोरित्यस्यानुवृत्तेरावश्यकत्वेन ज्ञापकत्वासंभवात्, अत एव "औत्" [ पा० सू० १. १. १५. ] इति सूत्रे महाभाष्ये वर्णग्रहणेऽप्यस्य न्यायस्य चर्चा कृता ॥ १५ ॥

## *नामग्रहणे लिङ्गविशिष्टस्यापि [ ग्रहणम् ]* ॥ १६ ॥

**सि०**—नाम्नो ग्रहणं बोधनं येन तन्नामग्रहणं पदं, तत्र तद्विषये, नामबोधकपदे समुच्चारिते सति प्रत्यासत्त्या तेनैव पदेन **लिङ्गविशिष्टस्यापि** लिङ्गबोधकप्रत्ययविशेषसम्बद्धस्यापि ग्रहणं बोधनं भवतीति न्यायार्थः। लिङ्गप्रत्ययकृतवैरूप्येण शब्दभेदाल्लिङ्गविशेषबोधकत्वरूपार्थभेदाच्च सामान्येन विशेषेण वा निर्दिष्टस्य नाम्नस्तत्तल्लिङ्गविशेषबोधकप्रत्ययविशिष्टस्य तस्य ग्रहणं न स्यादित्यप्राप्तस्य तद्ग्रहणस्य प्रापणार्थोऽयं न्यायः अत्र च ज्ञापको "राजन् सखेः०" [ ७. ३. १०६ ] इति सूत्रस्थो नान्तनिर्देशः, सहि यत्रास्य नकारान्तमेव रूपं तत्रैव समासान्तोऽट् स्यादित्येवमर्थं कृतः, स च महती चासौ राज्ञीत्यर्थे महाराज्ञीत्यत्राट् मा भूदित्येवमर्थ एव। यदि चायं न्यायो न स्यात् तर्हि 'राज-सखेः०" इति करणेऽपि राज्ञीशब्दस्य स्वरूपत एव राजशब्दत्वाभावेन प्रत्ययाप्राप्तौ तद्ग्रहणं व्यर्थमेव स्यादिति प्रकृतन्यायस्य सत्तां सूचयति, ज्ञापिते त्वस्मिन् राजग्रहणे स्त्रीप्रत्ययविशिष्टस्य तस्या [ राज्ञीत्यस्या ] ऽपि ग्रहणं प्राप्तमिति तद्वारणार्थो नान्तनिर्देशः स्वांशे चरितार्थः। फलं च "त्यदामेनदेतदो द्वितीयाटौस्यवृत्त्यन्ते" [ २. १. ३३ ] इत्यत्र त्यदामिति बहुवचनेन तदादिगणपठितनाममात्रनिर्देशेऽपि त्यदाद्यधिकारे सर्वत्र स्त्रीत्वादिविशिष्टानामपि त्यदादीनां ग्रहणम्, तेन 'सा, स्या' इत्यादौ "तः सौ सः" [ २. १ ४२. ] इति ते कर्तव्ये त्यदादेः सेश्चापाव्यवधानाभावेन सत्वप्रवृत्तिर्भवति, अन्यथा आपा व्यवधाने सिपरत्वाभावेन सत्वं न स्यात्, लिङ्गविशिष्टस्यापीत्यनेन लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणे बोधिते आपश्च लिङ्गबोधकप्रत्ययत्वेन तद्विशिष्टस्यापि नामत्वेनैव ग्रहणे 'ता, त्या' इत्यनयोस्त्यदादित्वानपायात्। नामग्रहणे इत्युक्त्या च यत्र लिङ्गप्रत्ययविशिष्टस्य ग्रहणं न तत्र नामग्रहणं भवति, यथा—"अतः कृकमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य" [ २. ३. ५. ] इत्यत्र 'कुशा' इति लिङ्गप्रत्ययविशिष्टस्य ग्रहणे 'कुश' इत्यविकृतस्य नाम्नो ग्रहणाभावे 'अयः कुशः' इत्यत्र रः सो न भवति। न्यायान्तरवदयमपि न्यायश्चपल इति "सर्वादि-विष्वग्-देवाड्डद्रिः" [ ३. २. १२२. ] इति सूत्रस्थ-विष्वक्शब्देन 'विषूची' इति लिङ्गप्रत्ययविशिष्टः शब्दो

न गृह्यत इति विषूचीमञ्चतीत्यर्थे न तस्य सूत्रस्य प्रवृत्तिः।, तत्प्रवृत्तौ च तत्रापि डद्रयादेशेऽनिष्टरूपप्रसक्तिरिति ॥ १६ ॥

## *नामग्रहणे लिङ्गविशिष्टस्यापि [ग्रहणम्]* ॥ १६ ॥

**त०**—अत्र लिङ्गपदं लिङ्गबोधकप्रत्ययपरं लक्षणया । प्रत्ययविशिष्टस्य हि रूपान्तरत्वेनाग्रहणे प्राप्त एव न्यायप्रवृत्तेरावश्यकत्वम्, प्रत्ययाभावे हि लिङ्गार्थमात्रवैशिष्टयेऽपि तद्ग्रहणे बाधकाभावादर्थभेदेन शब्दभेदस्यासति विशेषबाधकेऽत्र शास्त्रेऽस्वीकारात् । न च *एकदेशविकृतमनन्यवत्* इति न्यायेनैव लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणे सिद्धे किमर्थोऽयं न्याय इति शङ्कनीयम्, नामग्रहणस्य परिच्छिन्नपरिमाणग्रहणत्वेन परिच्छिन्नपरिमाणग्रहणे चोक्तन्यायाप्रवृत्तेस्तद्याख्यावसरे प्रतिपादितत्वात् । किञ्चात्रैकदेशविकृतत्वमपि नास्ति, किन्तु वर्णान्तराधिक्यमिति तन्न्यायस्यावसराभावाच्च । ननु "अत इञ्" [ ६. १. ३१. ] इत्यादौ 'अदन्तान्नाम्नः' इत्यर्थात् तस्यापि नामग्रहणत्वेन तत्राप्येतन्न्यायप्रवृत्तौ रमा गौरीत्यादिस्त्रीप्रत्ययविशिष्टादप्येतन्न्यायसहकारेण प्रत्ययः स्यादिति चेत् ? न-नामत्व-तद्व्याप्यानुपूर्वीप्रकारेण बोधके नामग्रहणे सतीति निवेशेनादोषात् । अत्पदं चादन्तत्वप्रकारेण बोधकम्, अदन्तत्वं च न नामत्वरूपं तद्व्याप्यं चेति तेन रूपेण [ अदन्तत्वेन ] ग्रहणे नामग्रहणत्वाभावेन प्रकृतन्यायाप्रवृत्तेः। नन्वेवं "कुमारः श्रमणादिना" [३.१.११५.] इति सूत्रनिर्दिष्टे श्रमणादिगणे श्रमणा-प्रव्रजिता-कुलटा-गर्भिणीत्यादीनां स्त्रीलिङ्गविशिष्टानां शब्दानां पाठात् *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्* इति स्वीकृत्य कुमारीशब्देनैव सह श्रमणादीनां समास इति यदुक्तं वृत्तौ तन्न संगच्छेत, "कुमारण् क्रीडायाम्" इति क्रीडार्थकधातोरपि सत्त्वेन कुमारत्वस्य नामत्वव्याप्यत्वाभावेन कुमारत्वेन रूपेण बोधके कुमारशब्दे न्यायाप्रवृत्तेरिति चेत् ? न-नामत्वव्याप्यशाब्दबोधीयविषयताप्रयोजकस्यैव नामग्रहणपदेन ग्रहणात्, प्रकृतसूत्रे [ "कुमारः श्रमणादिना" इति सूत्रे ] कुमारप्रकृतिकस्याद्यन्तस्यैव बोधेन तत्रत्यकुमारपदप्रयोज्यविषयताया नामत्वव्याप्यत्वेनादोषात् । नन्वेवम् "अत इञ्" [ ६. १. ३१. ] इत्यत्रापि "ङसन्तादपत्ये" [ ६. १. २९. ] इत्यस्योपस्थितत्वान्ङसन्तत्वस्य नामत्वव्याप्यत्वात् 'अदन्तान्ङसन्तनाम्नः' इत्यर्थस्यैव स्वीकार्यत्वेनादन्तत्वावच्छिन्नशाब्दबोधीयविषयताया अपि नामत्वव्याप्यत्वेनात्पदस्यापि नामग्रहणत्वापत्तिरिति न्यायप्रवृत्त्या रमादिशब्देभ्योऽपि प्रत्ययः स्यादिति चेत् ? न-नामत्वावच्छिन्नविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताभिन्नविषयताया एव ग्रहणेनादोषात् । अदन्तत्वावच्छिन्नविषयताया नामत्वावच्छिन्नविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नत्वेन तद्भिन्नत्वाभावात् । अस्य च न्यायस्यानित्यत्वं "स्त्रियाम्" [ ३. २. ६९. ] इति सूत्रेण ज्ञायते, अन्यथा महत्याः करः-महाकर इत्यादावपि "महतः कर-घासविशिष्टे डाः" [ ३. २. ६९. ] इत्यनेनैव सिद्धे किमेतेन प्रयोजनं स्यात्, यत् तु कृतमिदं सूत्रं तेन ज्ञायतेऽस्यानित्यत्वमेव शङ्कितमिति । तथा च यत्र प्रवृत्तिरस्य न्यायस्य नेष्टा तत्रानित्यत्वाश्रयणं कार्यम् । अत एव-"ङ्याप् प्रातिपदिकात्" [ पा० सू० ४. १. १. ] इति सूत्रे महाभाष्येऽस्य न्यायस्य प्रयोजनानि दोषाँश्च प्रदर्शयित्वा—

"एतेऽस्याः परिभाषाया दोषाः,
एतानि च प्रयोजनानि स्युः ।
एते दोषाः समा भूयांसो वा–,
तस्मान्नार्थोऽनया परिभाषया ॥

नहि दोषाः सन्तीति परिभाषा न कर्त्तव्या लक्षणं वा न परिणेयम्, नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा नोप्यन्ते । दोषाः खल्वपि साकल्येन परिगणिताः, प्रयोजनानामुदाहरणमात्रम् । कुत एतत् ? नहि दोषाणां लक्षणमस्तीति । तस्माद् यान्येतस्याः परिभाषायाः प्रयोजनानि, तदर्थमेषा कर्तव्या, प्रतिविधेयं च दोषेषु" इत्युक्तम् । तस्यायमाशयः-यद्यपीह दोष-प्रयोजनयोः समत्वमेव प्रतिभाति, दोषाणामेव भूयस्त्वं वा, तथापि प्रयोजनानां लक्षणवत्त्वेन तेषामिह साकल्येन परिगणनं न कृतमतोऽपि बहुतराणि प्रयोजनान्यस्याः सन्ति । सन्ति चेमे दोषा अपि, किन्तु दोषसत्त्वमात्रेण प्रयोजनवत्कार्यस्याननुष्ठानं न लोकसिद्धम्, सत्यपि भिक्षुकादिसंभवे पाकादिकृतेः सत्यपि च मृगाद्युपद्रवसम्भवे कृष्यादिकृतेश्च दर्शनात् । तथा च प्रयोजनवत्त्वादयं न्यायः कर्त्तव्य एव, दोषाणां च प्रतिविधानं कर्त्तव्यम्, प्रतिविधानं चानित्यत्वाश्रयणमेवेत्युक्तं कैयटेन तत्रैव, अनित्यत्वेन चानिष्टस्थले न प्रवृत्तिरिति भावः ।

अत्र केचित्-'स' इति पुंल्लिङ्गेऽप्येतन्न्यायप्रवृत्त्यैव "आ द्वेरः" [ २. १. ४१. ] इत्यत्वप्रवृत्तिः, 'ते' इति नपुंसकद्विवचनेऽपि न्यायेनैवात्वमिति तयोरपि पुंल्लिङ्ग-क्लीबयोरेतदुदाहरणत्वमाहुः, तन्न-लिङ्गपदस्य लिङ्गप्रत्ययविशिष्टपरत्वेन व्याख्यातत्वात् । पुंल्लिङ्ग-क्लीबयोस्तु स्वाभाविक्येव प्रवृत्तिः, यत्र हि प्रत्ययादिवैशिष्टयेन शब्दभेदसंभावनयाऽप्रवृत्तिशङ्का तत्रैव न्यायप्रवृत्तेरावश्यकत्वात्, पुंल्लिङ्ग-क्लीबयोस्तु शब्दस्वरूपे भेदाभावेन प्रवृत्तौ बाधकाभावात् । अयस्कुशेत्यत्र विकारत्वाविवक्षायां "भाज-गोण-नाग-स्थल-कुण्ड-काल-कुश०" [ २. ४. ३०. ] इति ङीनें, तत्र हि अयः-प्रधाना कुशा, अयःसहिता वा कुशेत्यर्थः, मयूरव्यंसकादित्वाच्च प्रधानपदस्य सहितपदस्य वा

लोपः । यथाऽऽबन्तस्य ग्रहणं तथैव ङीप्रत्ययान्तस्यापि ग्रहणमेतन्न्यायसहकारेण बोध्यम् । तथा च "अतः कृकमि०" [ २. ३. ५. ] इति सूत्रे कुम्भपदेन कुम्भीत्यस्यापि ग्रहणे-अयस्कुम्भीत्यत्रापि रः सो भवतीति विज्ञेयम् ॥ १६ ॥

## *प्रकृतिग्रहणे यङ्लुबन्तस्यापि [ग्रहणम्]* ॥ १७ ॥

**सि०**—प्रकृतिशब्दस्यान्यत्र प्रधानपुरुषादौ रूढत्वेऽपि शब्दशास्त्रे प्रत्ययविधावुद्देश्यत्वेनाश्रीयमाणः शब्दः प्रकृतिरित्युच्यते । तत्र प्रत्यासत्त्या यस्य प्रकृतित्वेनाश्रितस्य ग्रहणमिष्टं तत्र यङ्लुबन्तस्यापि तस्य ग्रहणं विज्ञेयमित्यर्थः । यद्यपि प्रकृतिपदं नाम-धातूभयवाचकं प्रत्ययविधौ यथायथमुभयोरेवोद्देश्यत्वेनाश्रीयमाणत्वात् तथापि यङो धातोरेव विधानेनेह प्रत्यासत्त्या यत्र यङ्प्रकृतिभूतो धातुर्गृह्यते तत्र यङ्लुबन्तोऽपि गृह्यते इति विज्ञेयम् । अत्र च ज्ञापकम् "एकस्वरादनुस्वारेतः" [ ४. ४. ५६. ] इति सूत्रे 'एकस्वराद्' इति वचनम्, अनुस्वारेतां धातूनां स्वभावत एकस्वरत्वेन व्यावर्त्याभावात् 'एकस्वराद्' इति विशेषणस्य वैयर्थ्याद् व्यर्थीभूतं च तदेतन्न्यायसत्तां ज्ञापयति । सति चास्मिन् यङ्लुबन्तस्यानेकस्वरत्वेन तद्व्यावृत्तये एकस्वरग्रहणस्य चारितार्थ्यम् । न च हन्तेर्वधादेशे तस्यादन्तत्वादनेकस्वरत्वेन स्थानिवद्भावाच्च तस्यानुस्वारेत्त्वेन तत्र प्राप्तस्येण्निषेधस्याप्रवृत्त्यर्थमेकस्वरादिति चरितार्थमिति वाच्यम्, तावन्मात्रप्रयोजनकत्वे "अवधानुस्वारेतः" इति वधिवर्जनादेवावधीदित्यादिसिद्धौ सामान्येनानेकस्वरवर्जनार्थस्यैकस्वरादित्यस्य वैयर्थ्यस्य दुरपह्नवत्वात्, सति हि वधातिरिक्तानेकस्वरनुस्वारेद्धातुबाहुल्ये तदर्थं सामान्यसूत्रकरणस्यौचित्यं स्यात्, न तु तथाऽस्ति, तच्च तदैव स्याद् यदि यङ्लुबन्तस्यापि प्रकृतिग्रहणेन ग्रहणं स्यात्, तच्चानेनैव न्यायेन सम्पाद्यमिति व्यर्थमेकस्वरादिति वचनं न्यायमिमं ज्ञापयतीति युक्तमेव । ज्ञापिते चास्मिन्न्याये 'चर्कृ' इत्यादीनां बहूनामनेकस्वराणामनुस्वारेतां सद्भावेन तद्व्यावृत्त्यर्थमेकस्वरादित्यस्य सार्थक्यम् । तथा च 'चर्कृ' इत्यादीनामनेकस्वरत्वेन तत्र नेण् निषेध इति । अस्य च चापल्येनाभिमन्यायेन बाधः सिद्धो भवति । फलं चास्य न्यायस्य 'प्रणिदादेति' इत्यत्र "नेर्ङ्गादा०" [ २. ३. ७९. ] इति नेर्णत्वसिद्धिः, अन्यथा कृतद्वित्वस्य रूपभेदेन दाग्रहणेनाग्रहणं स्यात् ॥ १७ ॥

### *प्रकृतिग्रहणे यङ्लुबन्तस्यापि [ग्रहणम्]* ॥ १७ ॥

**त०**—यङ्लुबन्तस्थले हि प्रकृतिर्द्विरुच्यत इत्येतावदेव वैरूप्यम् । तथा च द्विर्वचनस्य द्विःप्रयोगमात्रत्वमिति द्विःप्रयोगो द्विर्वचनं षाष्ठमिति महाभाष्येऽप्युक्तम् । तथा च प्रयोगद्वयरूपे समुदायेऽनेन प्रकृतित्वबोधनमित्यायाति । तच्च युक्तिसिद्धमेवेति नात्र ज्ञापकापेक्षा, नह्येकमेव रूपं द्विधोच्चारितं स्वस्माद् भिद्यते, तथा च वृत्तौ ज्ञापकोपन्यासः प्राचामनुरोधेनैव, किञ्च ज्ञापितेऽपि न्याये 'एकस्वरात्' इत्यस्य स्वांशे चारितार्थ्याभावः, *तिवा शवाऽनुबन्धेन०* इत्याद्यग्रिमन्यायेनैकस्वरनिमित्तकस्य कार्यस्य यङ्लुबन्तेऽप्रवृत्त्या तन्निवृत्त्यर्थस्यैकस्वरग्रहणस्य वैयर्थ्यं स्पष्टमेव, अवधीदित्यादीनां तन्निवृत्त्यर्थत्वस्य पूर्वमेवापनोदितत्वात् । न च ज्ञापिते न्याये यङ्लुबन्तस्यापि निवृत्तये तस्य सार्थक्येनाग्रिमन्याये एकस्वरनिमित्तस्य ग्रहणं न कार्यमिति वाच्यम्, अस्याभावे यङ्लुबन्ते स्वत एव निषेधाप्रवृत्तेरेतज्ज्ञापकस्यैकस्वरादित्यस्य वैयर्थ्यतादवस्थ्यात् । तस्मात् स्वतः सिद्धमिमं न्यायमाश्रित्य यङ्लुबन्तस्यापि प्रकृतिग्रहणेन ग्रहणे तत्रापीण्निषेधः स्यादित्यग्रिमन्याये एकस्वरनिमित्तस्य कार्यस्य यङ्लुपि न प्रवृत्तिरित्याश्रितमित्यास्थेयम् । तथा च प्रकृतसूत्रस्थमेकस्वरादिति पदमेकस्वरनिमित्तकार्यस्य यङ्लुबन्तेऽप्रवृत्तिरित्यंशे एव ज्ञापकमिति स्वीकार्यम्, अत एव पाणिनीये तन्त्रे "एकस्वरानुस्वारेतः" [ ४. ४. ५६. ] इत्येतत्सूत्रसमानार्थके "एकाच उपदेशेऽनुदात्तात्" [ पा० सू० ७. २. १०. ] इति सूत्रे महाभाष्ये 'एकस्वरात्' इत्येतत्स्थानीयस्य 'एकाचः' इति पदस्य प्रयोजनकथनावसरे यङ्लुग्व्यावृत्तिरेव प्रयोजनत्वेनोक्ता, न तु प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणमिति न्यायो ज्ञापितः, तथाहि–तत्र भाष्येऽन्यानि प्रयोजनानि प्रदर्शयित्वा, तेषां खण्डनं च विधाय वध्यर्थहन्तेर्वधादेशस्थले इट्प्रतिषेधाभावार्थत्वमेकाज्ग्रहणस्योक्त्वा तस्य श्रूयमाणैकाच्परत्वमाश्रित्य च यङ्लुबन्तेऽपि निषेधाप्रवृत्तिरिति सूचितम्, यङ्लुबन्ते च प्रकृतेरनुदात्तत्वे [ अनुस्वारेत्त्वेऽपि ] श्रूयमाणैकत्त्वा[ एकस्वरत्वा ]भावात् । प्रकृतिग्रहणेन यङ्लुबन्तस्य ग्रहणं च 'द्विःप्रयोगो द्विर्वचनम्' इत्याश्रित्यैव कैयटेनोक्तम्, तथाहि तत्रत्यकैयटग्रन्थः–द्विःप्रयोगे द्विर्वचने भवति भिदिरुपदेशेऽनुदात्त उपदेशे एकाजित्यतो लोपे कृते [ 'बेभिदिता' इत्यत्र ] सम्प्रत्यनेकाच्त्वेऽपि प्रतिषेधप्रसङ्गः, श्रूयमाणे त्वेकाच्याश्रीयमाणे आवृत्तिसंख्ययैकत्वसंख्याया बाधनात् प्रतिषेधाभावः" इति । इत्थं चैतन्न्यायं विनापि द्वित्वस्य द्विःप्रयोगमात्रत्वमाश्रित्य प्रकृतित्वं यङ्लुबन्ते स्वाभाविकमिति तदाश्रित्य प्रवर्त्तमानमिण्निषेधं वारयितुमेकस्वरादिति पदं श्रूयमाणैकस्वरबोधनपरमिति समाश्रयणीयमित्येकस्वरनिमित्तं कार्यं यङ्लुपि न भवतीति *तिवा शवा०* इत्यादिन्यायोक्तैकस्वरनिमित्तस्य यङ्लुप्यभावोऽपि सिद्ध इतीदमपि 'एकस्वरात्' इति पदमग्रिमन्याये प्रमाणभूतमिति स्वीकार्यम् । एषैव च सरणिः

पाणिनीयानामपि सम्मता । परिभाषेन्दुशेखरे च-इमं न्यायं पूर्वपक्षत्वेन प्रक्रम्यास्य भाष्ये क्वाप्यनुल्लेखादस्वीकार्यत्वमुक्तम्, तथाहि–"यदपि–"ननु हन्तेर्यङ्लुकि आशीर्लिङि वधादेशो न स्यादत आह–*प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्* १००, षाष्ठद्वित्वस्य द्विःप्रयोगत्वसिद्धान्तेन प्रयोगद्वयरूपे समुदाये प्रकृतिरूपत्वबोधनेनेदं सिद्धम्, अत एव 'जुहुधि' इत्यादौ द्वित्वे कृते धित्वसिद्धिरिति, तदपि न–भाष्येऽदर्शनात् । किञ्च तेन सिद्धान्तेन प्रत्येकं द्वयोस्तत्त्वबोधनेऽपि समुदायस्य तत्त्वबोधने मानाभावात्" इति । अयमाशयः–द्विर्वचनस्य द्विःप्रयोगरूपत्वे प्रत्येकस्य प्रकृतित्वानपाय एव बोधयितुं शक्यते, तथा च तस्मिन् परतः तस्मात् परतश्च यत् कार्यं भवेत् तत्पूर्वभाग-परभागाभ्यां सेद्धुं शक्नुयादपि, किन्तु समुदायस्य प्रकृतिरूपत्वं न प्राप्तुं शक्यत इति नायं न्यायस्ततः सिध्यति, भाष्ये क्वाप्यस्यादर्शनाच्चास्याश्रयणमनुचितमिति । एतत्साध्यानां कार्याणां च पूर्व-परभागाभ्यां पृथक् पृथक् सिद्धिः । यथा 'प्रणिदादेति' इत्यत्र दापरतः नेर्नकारस्य णत्वं विधीयमानं 'दा' इति पूर्वभागस्य दासंज्ञकत्वमाश्रित्य कार्यम्, एवं "हुधुटो हेर्धिः" [ ४. २. ८३. ] इति विधीयमानोऽप्यादेशः 'जुहुधि' इत्यत्र परभागस्य हुरूपत्वमाश्रित्य विधेयः, एवं सर्वप्रयोजननिर्वाहे सिद्धेऽस्य न्यायस्य नावश्यकत्वम् । तथा च यङ्लुबन्ते परभागस्यैकस्वरत्वमनुस्वारेत्त्वं चादाय्येण् मा भूदित्येकस्वरपदं यस्येण्निषेधो विधित्सितस्तत्प्रकृतेः श्रूयमाणैकस्वरत्वविज्ञानार्थमिति न दोषो भवतीति विज्ञेयमिति विभावनीयम् ॥१७॥

## *तिवा शवाऽनुबन्धेन, निर्दिष्टं यद्गणेन च । एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुपि* ॥ १८ ॥

**सि०**—पूर्वेण न्यायेन प्रकृतेर्ग्रहणे यङ्लुबन्तस्यापि ग्रहणात् प्रकृतिमुद्दिश्य विहितानां सर्वेषां कार्याणां यङ्लुप्यपि प्राप्तिः, तन्न्यायानङ्गीकर्तृमते च द्विःप्रयोगमाश्रित्य यङ्लुबन्तपूर्वपरभागयोः प्रकृतिरूपत्वमाश्रित्य तत्र कार्यप्राप्तिरिति तेषां कार्याणां यङ्लुबन्तेऽभावायायं न्याय आश्रीयते । अत्र निर्दिष्टमिति पदं तिवाऽऽदिभिः चतुर्भिरपि सम्बध्यते, चकारेण प्रत्येकस्य तत्रान्वयित्वकल्पनात्, यथा–ईश्वरं गुरुं च भजस्वेत्यत्र, तथा च तिवा शवा अनुबन्धेन गणेन च निर्दिष्टं कार्यमेकस्वरनिमित्तं च कार्यं निर्दिष्टधातोर्यदि यङ्लुप् स्यात् तदा न स्यादिति न्यायार्थः । तत्र तिवा निर्दिष्टं द्विधा–अलुप्तेन तिवा, लुप्तेन च, तिविह 'इ-कि-श्तिव् स्वरूपाऽर्थे" [ ५. ३. १३८. ] इति सूत्रविहितो धातुस्वरूपनिर्देशकार्थ एव, न तु वर्तमानाया व्याख्यानात्; न च तदग्रे स्याद्यभाव इति वाच्यम्, अनुकरणत्वे तत्सम्भवात्; वस्तुतस्तु श्तिवा इत्येव निर्देशो युक्तो व्याख्यानाद् वरं करणमिति न्यायात्, श्तिवो लुप्तत्वं च सौत्रनिर्देशलभ्यम् । तत्रालुप्तेन तिवा निर्देशो यथा–"न कवतेर्यङः" [ ४. १. ४७. ] इति, अनेन च कस्य चत्वनिषेधो यथा कोकूयत इति यङि भवति तथा चोकवीतीति यङ्लुपि न भवति, अनेन न्यायेन निषेधात् । लुप्तेन तिवा निर्देशो यथा–"ङे पिब पीप्य्" [ ४. १. ३३. ] इति, अत्र पिबतेरिति निर्देष्टव्ये पिब इति निर्देशः सौत्रत्वात् तेर्लुपो विधानेन, स चायं पीप्यादेशः पिबन्तं प्रायुक्त–अपीप्यदित्यत्र यथा भवति तथा पापतं प्रायुक्तं 'अपापयत्' इत्यत्र न भवति, प्रकृतन्यायप्रवृत्तेः । शवा निर्दिष्टं यथा–"निसस्तपेऽनासेवायाम्" [ २. ३. ५१. ] इति निसः सस्य षत्वम्, तच्च यथा निष्टपतीत्यादौ भवति तथा 'भृशं निष्टपति' इत्यर्थे निस्तातपीतीत्यादि यङ्लुबन्ते न भवति । अनुबन्धनिर्देशो यथा–"गा-पा-स्था-सा-दा-मा-हाकः" [ ४. ३. ९६. ] इति, अत्र हि हाक इति ककारेणानुबन्धेन सह निर्देशात् हेयादित्यादौ विहितमेत्वं जहायादित्यादि यङ्लुबन्ते न भवति । गणेन निर्देशश्च त्रिधा–सङ्ख्यया, आदिशब्देन बहुवचनेन च । तत्र "रुत्पञ्चकाच्छिदयः" इत्यत्र पञ्चकादिति संख्यया गणनिर्देशेनेट् विहितः, स च यथा–स्वपितीत्यादौ भवति तथा सोषोप्तीत्यादौ न भवति, आदिशब्देन गणनिर्देशो यथा–"लृदिद्द्युतादिपुष्यादेः परस्मै" [ ३. ४. ६४. ] इति, एतच्च सूत्रं यथाऽद्युतदित्यादौ प्रवर्तते यथाऽदेद्योतीदित्यादौ न प्रवर्तते । बहुवचनेन गणनिर्देशो यथा–"तेर्ग्रहादिभ्यः' [ ४. ३. ३३. ] इति, अनेन ग्रहादिभ्यः परस्याशितस्तिप्रत्ययस्यादौ "स्ताद्यशितः" [ ४. ४. ३२. ] इत्यनेन प्राप्तस्येटोऽनुज्ञा विधीयते, ग्रहादिभ्य एव परस्य तेरादिरिट् नान्यधातुभ्यः परस्येति नियमविधायकत्वादस्य सूत्रस्य ग्रहादिभ्यः परस्य ते विषये इटोऽनुज्ञापकत्वमेव, नियमसूत्राणां विधिमुखेनापि प्रवृत्तेः स्वीकारात्, ग्रहादिभ्योऽन्यत्र निषेधमुखेन प्रवृत्तिरिति तत्र निवर्तकत्वमिति, अन्यत्रापि तु नियमशास्त्रस्थले व्यवस्था विज्ञेया; तथा च ग्रहादिभ्य इति गणनिर्दिष्टत्वादयं यङ्लुपि न प्रवर्तते, यथा–बरभाष्टिरिति । एकस्वरनिमित्तं यथा–"एकस्वरानुस्वारेतः" [ ४. ४. ५६. ] इति सूत्रविहित इण्निषेधः, स च यथा 'शक्त' इत्यादौ भवति तथा शाशकित इत्यादौ यङ्लुबन्ते न भवति, तस्य प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम्* इति पूर्वन्यायानुसारमेकस्वरत्वस्याप्यतिदेशेनेह प्राप्तिरिति केचित्, द्विर्वचनस्य द्विःप्रयोगमूलिका प्राप्तिरिति परे, विवेचितं चैतत् पूर्वन्यायविवरणावसरे । एतन्न्यायज्ञापकं तु तत्र तत्र तिवादिनिर्देशकरणमेव,

तेषां च प्रायेण प्रयोजनान्तराभावाद् यङ्लुप्यप्रवृत्त्यर्थत्वमेवेति विज्ञायते । अस्य न्यायस्य च पञ्चांशाः, तत्राद्यं पञ्चमं चांशं विहाय शेषेषु त्रिष्वंशेष्वस्यानित्यत्वमिति लक्ष्यानुरोधादवगम्यते, ततश्च द्वितीयांशस्यास्थिरतया "पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्" [ ४. ३. ६६. ] इत्यनेन शवूनिर्दिष्टोऽपि सिचो लुबिण्निषेधश्च यथा—अपादित्यत्र भवति तथा-अपादित्यादियङ्लुबन्तेऽपि भवति, अस्य स्थिरत्वे तु तत्र न स्यात् । तृतीयांशानित्यत्वस्योदाहरणम्—नरीनृत्त इति, अत्र "डीयश्व्यैदितः०" [ ४. ४. ६१. ] इत्यनुबन्धनिर्दिष्टोऽपीड्निषेधः 'नृत्तः' इत्यादाविव भवत्येव, अस्य स्थिरत्वे तु न स्यात् । चतुर्थांशानित्यत्वे तु 'परस्पृष्ट' इति फलम्, अत्र "स्पृशादिसृपो वा" [ ४. ४. ११२. ] इति गणनिर्दिष्टोऽप्यदागमो भवति, अस्य स्थिरत्वे तु न स्यात् ॥ १८ ॥

## *तिवा शवाऽनुबन्धेन, निर्दिष्टं यद् गणेन च । एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुपि* ॥ १८ ॥

त०—अत्र बहुवचनेन गणनिर्देशस्य "तेग्रहादिभ्यः" [ ४. ४. ३३. ] इति यदुदाहरणं वृत्तौ दत्तं तत् प्राचामनुरोधेन, वस्तुतस्तु इदमप्यादिशब्देन गणनिर्देशस्यैवोदाहरणम्, बहुवचनेन गणनिर्देशश्च "कर्तर्यनद्भ्यः शव्" [ ३. ४. ७१. ] इत्येवमादिः, स च यङ्लुबन्ते प्रवर्तत एव, यङ्लुपामदादौ पाठसामर्थ्यादित्यन्यदेतत् । तथा च बहुवचनेन गणनिर्देशाद् यङ्लुबन्ते प्रवृत्त्यभावस्य फलं मृग्यम् । एवम्—अनुबन्धनिर्देशांशस्यानित्यत्वफलं यदुक्तम्—"डीयश्व्यैदितः क्तयोः" [ ४. ४. ६१. ] इति, तदपि प्राचामनुरोधेनैव, अस्यानुबन्धनिर्देशत्वाभावात्, अनुबन्धनिर्देशो हि "गा-पा-स्था-दा-मा-हाकः" [ ४. ३. ९६. ] इत्येवमादिर्यत्र स्वरूपत एवानुबन्धो निर्दिश्यते, प्रकृते चानुबन्धस्योपसर्जनतयोपादानं न तु स्वरूपेणेत्यस्यानुबन्धेन निर्दिष्टत्वाभावः सुतरामिति यङ्लुपि प्रवृत्तिरव्याहतैव, ईदृशस्यानुबन्धनिर्दिष्टत्वस्वीकारे च "एकस्वरादनुस्वारेतः" [ ४. ४. ५६ ] इत्यस्याप्यनुबन्धनिर्दिष्टत्वमेवेति तन्मूलकमेवैतन्न्यायोदाहरणं तत् स्यान्न त्वेकस्वरनिमित्तस्योदाहरणम् । "डीयश्वि०" [ ४. ४. ६१. ] इति सूत्रे वृत्तौ नृतादीनामैदित्त्वस्य यङ्लुबर्थत्वकथनं तु केवले 'नृत्त' इत्यादिस्थले "वेटोऽपतः" [ ४. ४. ६२. ] इति निषेधेनैव सिद्धेऽनुबन्धस्याचारितार्थ्यात्, समुदायरूपस्य यङ्लुबन्तस्येड्व्यावृत्त्यर्थमेव विज्ञायत इत्याशयकं *केवलेऽचरितार्था अनुबन्धाः समुदायस्योपकारका भवन्ति* इति न्यायमूलकम्, न तु तावताऽनुबन्धनिर्देशनिमित्ताया यङ्लुप्यप्रवृत्तेरनित्यत्वमभ्यूहितुं शक्यम्, अनुबन्धकरणसामर्थ्येनास्य बाध इति कल्पनादनुबन्धनिर्दिष्टत्वस्य प्रकृतसूत्रे [ "डीयश्व्यैदितः०" इत्यत्र ] अभावस्योपपादितत्वाच्च, आचार्येण 'नरीनृत्त' इत्यादाविण्निषेधाभावायोपायान्तरमनाश्रित्यानुबन्धनिर्देशसामर्थ्यस्याश्रयणादेवास्य न्यायस्यानुबन्धांशेऽनित्यत्वमायाति, यदि ह्यस्य स्थिरत्वमिष्टं स्यादाचार्यस्य तर्हि नानुबन्धसामर्थ्यमाश्रितं स्यादिति यदुक्तं तदपि परास्तं वेदितव्यमस्यानुबन्धनिर्देशत्वाभावादेव । एवं चैतद्विषयकः सर्वोऽपि प्राच्यो विचारो निर्मूलः प्रतिभाति । यदि चानुबन्धनिर्देशोऽपि द्विधा-स्वरूपेण, उपसर्जनतया [ 'ऐदितः' इत्यादिपदेन ] चेति स्वीक्रियते, अत एव यङ्लुपि इङ्कितः कर्तरि" [ ३. २. २२. ] इति विहितस्यात्मनेपदस्य यङ्लुप्यप्रवृत्तिरिति मन्यते, तदाऽत्रत्यानुबन्धनिर्देशस्यैकस्वरनिमित्तत्वस्य चोभयांशस्य बाधायैदित्करणमित्यास्थेयम् । न च *प्रकृतिग्रहणेन यङ्लुबन्तस्यापि ग्रहणम्* इति न्यायेनैकस्वरत्वस्यापि यङ्लुबन्तेऽतिदेश इति वाच्यम्, एकस्वरत्वस्याशास्त्रीयत्वेन तस्यातिदेशेनातिदेष्टुमशक्यत्वात्, अनेकस्वरत्वस्य साक्षाद्विद्यमानत्वेन तत्रैकस्वरत्वस्य बोधयितुमशक्यत्वात्, परिच्छिन्नपरिमाणस्यातिदेशाभावाच्च । ननु तर्हि किमतिदिश्यतेऽनेन न्यायेन [ *प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम्* इत्यनेन ] इति चेत्? प्रकृतिनिष्ठमनुस्वारेत्त्वादिकमेवातिदिश्यत इति गृहाण, यथा-प्रणिदादेतीत्यादौ प्रकृतिनिष्ठं दात्वं 'दादा' इति समुदायेऽतिदिश्यते, तथा चैकस्वरत्वस्यातिदेष्टुमशक्यत्वात् 'नरीनृत्त' इत्यादौ "वेटोऽपतः" [ ४. ४. ६२. ] इत्यस्याप्राप्त्या इण्निषेधो न स्यादिति ऐदित्करणसामर्थ्येन "डीयश्व्यैदितः०" [ ४. ४. ६१. ] इत्यस्य प्राप्तिरिह साध्यते, तत्रापि चैकस्वरादित्यस्यानुवृत्तिः स्वीकार्यैव, अन्यथा तदग्रिमे "वेटोऽपतः" [ ४. ४. ६२. ] इति सूत्रेऽपि तदनुवृत्तिर्न स्यात् । एवं च डीयश्व्यैदितः०" इति सूत्रस्था वृत्तिरपि समञ्जसा स्यात्, तथाहि तत्र वृत्तिः—"कृतै-नृतै-चृतै-इत्येतेषां चेट्त्वेन क्तयोरिट्प्रतिषेधे सिद्धे ऐदित्त्वं यङ्लुबर्थम्, तेन चरीकृतः चरीकृत्तवान्+++++इत्यत्रानेकस्वरत्वेऽपीट्प्रतिषेधः सिद्धः" इति । तथा चानेकस्वरत्वेऽपीहैकस्वरनिमित्त इट्प्रतिषेध इत्यायाति, तथा चैकस्वरनिमित्तस्य कार्यस्य यङ्लुपि न प्रवृत्तिरित्यंशोऽपि बाधित एव । तत्रायं विवेकः—यद्यैदित्करणसामर्थ्यादैदित्त्वनिमित्तक एव तत्र प्रतिषेधः, तर्ह्येतन्न्यायस्योभयांशस्य [ अनुबन्धनिर्देशविषयस्य, एकस्वरनिमित्तविषयस्य च ] बाधरूपमस्थिरत्वमायाति, यदि चैदित्करणसामर्थ्यादनेकस्वरत्वेऽप्येकस्वरनिमित्तस्य "वेटोऽपतः" [ ४. ४. ६२. ] इत्यस्य प्रवृत्तिरित्याश्रीयते, तदा एकस्वरनिमित्तांशमात्रस्य बाध इति केवलमनुबन्धनिर्देशांशस्यास्थिरतासूचकमिदमिति प्राचामुक्तिश्चिन्तनीयैवेति प्रतिभाति ॥

पाणिनीये तन्त्रे च दीक्षितादिभिर्मध्यवर्त्तिभिराचार्यैः "एकस्वरानुस्वारेतः" [४. ४. ५६.] इति सूत्रस्थानीये "एकाच उपदेशेऽनुदात्तात्" [पा० सू० ७. २. १०.] इति सूत्रे एकस्वरादित्यर्थकस्य 'एकाचः' इत्यस्य सामर्थ्यादयं न्याय एकदेशानुमत्या सिद्धः, तत्र च 'श्तिप्' आदिनिर्देशा अपि समर्थका इति स्वीक्रियते, किन्तु नवीनैर्नागेशादिभिरयं न्यायोऽस्वीकृतः, तथाहि-परिभाषेन्दुशेखरे पूर्वपक्षरूपेणेमं न्यायं व्याख्याय 'तदपि न-भाष्यानुक्तत्वात्, वधिव्यावृत्त्यर्थमेकाज्ग्रहणस्यावश्यकत्वाच्च। न च वधिः स्थान्युपदेशो एकाजेवेति वाच्यम्, साक्षादुपदेशासम्भवेनैतद्विषये स्थान्युपदेशाग्रहणात्, उपदेशावच्छेदेनैकाजित्यर्थाच्च। + + + + अजर्घा बेभिदीतीत्यादौ श्नम्-श्यनादयस्तु चर्करीतं चेत्यदादौ पाठेन यङ्-लुगन्ते गणान्तरप्रयुक्तविकरणस्याप्राप्त्या न भवन्ति, छान्दसत्वादेव कार्यान्तराणामपि छन्दसि दृष्टप्रयोगेष्वदृष्टानामभावो बोध्यः, भाषायां तु तादृशानामभाव एव। श्तिप्-शपादिनिर्देशास्तु-"भवतेरः" [पा० सू० ७. ४. ७३.] इत्यादिनिर्देशा इव नार्थसाधकाः" इति । अयमाशयः- यदि प्राचीनैरेतन्न्यायज्ञापकमास्थीयते "एकाच उपदेशेऽनुदात्तात्" [पा० सू० ७. २. १०.] इति सूत्रस्थमेकाच इति पदं तस्य भाष्यकारेण फलान्तरपरतया कथनादेतन्न्यायस्यानाश्रयणाच्च नायं न्यायो भाष्यकृतामभिमत इत्यायाति । यङ्लुपश्च प्रायश्छन्दस्येव प्रयोगेण छन्दसि च दृष्टस्यैवानुविधानाच्च कोऽपि दोषः, क्वचिद् भाषायामपि यङ्लुपः प्रयोगस्य ज्ञापकादिना लब्धत्वेऽपि यत्रैतन्न्यायं विना न निर्वाहस्तादृशप्रयोगाणां भाषायामनभिधानमेवेति स्वीकार्यम् । श्तिवा शपा वा निर्देशस्तु धातुमात्रनिर्देशपर इति तेन नैतन्न्यायसिद्धिरुचितेति ॥ १८ ॥

## *सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य* ॥ १९ ॥

**सि०**—सन्निपातः—द्वयोः सम्बन्धः, सन्निपतनम्—एकस्मिन् कार्ये सम्बन्धनं सन्निपात इति व्युत्पत्तेः, स लक्षणो—निमित्तं यस्य तादृशो विधिः, **तद्विघातस्य** तस्य—निमित्तभूतस्य सम्बन्धस्य, विघातः नाशः; तं विहन्ति इति तद्विघातः, निमित्तविघातको विधिर्वा, तस्य अनिमित्तम्, भवतीति शेषः । केचित्-सन्निपतति संगच्छते कार्यमस्मिन्निति सन्निपातः—निमित्तं, तल्लक्षणं—चिह्नं यस्य स सन्निपातलक्षण इत्यर्थमाहुः, तन्न साधु—सन्निपात-लक्षणशब्दयोरेकार्थत्वापातात्, लक्षणं हि चिह्नत्वेन निमित्तमेवेति निमित्तनिमित्तक इत्यर्थ एव पर्यवस्येत्, स च न साधुः । उपजीव्यविरोधस्यायुक्तत्वमिति लौकिकन्यायमूलोऽयं न्यायः, उपजीवयतीत्युपजीव्यः, ण्यन्तात् कर्तरि बाहुलकाद् यप्रत्ययः, तस्य यो विरोधो नाशानुकूलो व्यापारः स उपजीवकेन कर्तुमशक्य इति लौकिकन्यायार्थः । लोके पितृघातकादीनां निन्दितत्वस्य दर्शनाच्छास्त्रेऽपि तस्यायुक्तत्वमिति न तद् विधेयमिति भावः । यत्तु लोके पितृघातकपुत्रादौ कार्यादपि कारणविघातस्य दर्शनाद् व्याकरणे तथात्वनिषेधार्थोऽयमारम्भ इति, तन्न युक्तम्—लोकेऽपि तस्यायुक्तत्वेनैव प्रसिद्धेः, तन्मूलकत्वस्यैवात्रापि कल्पनौचित्यात् । ज्ञापकं चास्य "धातोरनेकस्वरात्०" [४. ४. ६.] इत्यत्र सामान्यरूपेणानेकस्वरादित्युक्तिः, द्विधा हि धातोरनेकस्वरत्वं स्वाभाविकं परोक्षानिमित्तं च, तत्र स्वाभाविकादनेकस्वरादाम् भवति—चकासामासेत्यादौ, पपाचेत्यादौ परोक्षाहेतुकादनेकस्वराच्च न भवति; तथा च तदर्थं विशिष्य सूत्रे किमपि वचनमावश्यकमिति तदनुक्त्वा सामान्येनानेकस्वरादिति कथनं परोक्षानिमित्तकस्यानेकस्वरत्वस्येहाग्रहणं न्यायसिद्धमेवेति सूचयति, न चान्यः कश्चन न्यायः पूर्वसिद्धस्तादृश इति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न्यायमेव ज्ञापयतीति विज्ञायते; अस्ति चात्र णवूरूपां परोक्षां निमित्तीकृत्य जातमनेकस्वरत्वमिति तत्स्थाने आमादेशरूपं तद्विघातं न करिष्यतीति पपाचेत्यस्य सिद्धिर्भवति । "भिस ऐस्" [१. ४. २.] इति सूत्रे ऐस्करणसामर्थ्याच्चायमनित्य इति विज्ञायते, अन्यथा एस्करणेऽपि "ऐदौत् सन्ध्यक्षरैः" [१. २. १२.] इत्यस्य प्रवृत्त्या देवैरित्यादिसिद्धौ सत्यामैस्करणं व्यर्थमेव । न च एस्करणे 'देव-एस्' इति स्थितौ "लुगस्यादेत्यपदे" [२. १. ११३.] इत्यल्लोपे देवेरिति स्यात्, न तु देवैरिति वाच्यम्, देवेरिति तु इस्करणेनापि सिध्यति, अथापि यद् 'एस्' क्रियते तत्सामर्थ्यादेवाल्लोपस्य बाधात्; एवं च "भिस ऐस्" [१. ४. २.] इति सूत्रे ऐस्करणमतिजरसैरित्याद्यर्थमिति प्रतीयते, तत्र हि जरामतिक्रान्तैरित्यर्थे समासे जराशब्दस्य "गोश्चान्ते ह्रस्वोऽनंशि०" [२. ४. ९६.] इति ह्रस्वे कृते भिस ऐसादेशे *एकदेशविकृत*न्यायेन जराशब्दत्वं मत्वा जरसादेशे सति अतिजरसैरिति भवति, तत्र च एस्करणे "ऐदौत् सन्ध्यक्षरैः" [१. २. १२.] इत्यस्याप्राप्त्या अतिजरसेरिति स्यात्, एवं चातिजरसैरित्यादिसिद्ध्यर्थं विधीयमानमैस्करणमेतस्य न्यायस्यानित्यतां विना नोपपद्यते, अस्यानित्यत्वाभावे हि ऐसि कृते अदन्तत्वनिमित्तस्य तस्य अदन्तत्वविघातकजरसादेशं प्रति निमित्तत्वाभावेन अतिजरसैरित्यस्यासिद्धिः स्पष्टैवेति तदर्थकस्यैस्करणस्य वैयर्थ्यमपि स्यादेवेति व्यर्थं सत् तदस्य न्यायस्यानित्यत्वं ज्ञापयितुमलम् । तथा चानित्यताज्ञापनस्यातिजरसैरिति फलं सम्यगेवेति विज्ञेयम् ॥ १९ ॥

## *सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य* ॥ १९ ॥

**त०**—अत्र तद्विघातशब्दस्य द्विधा सिद्धिः-विहननं-विघातः, तस्य विघात इत्येका, अत्र च पक्षे विपूर्वकाद्धन्तेर्भावे घञ्। तं विहन्तीति तद्विघातः इत्यर्थे कर्मण्युपपदे कर्तरि अण्प्रत्ययेन तद्विघातशब्दसिद्धिरिति द्वितीया विधा, तत्र द्वितीयपक्षे विधिरिति करणे 'कि'प्रत्ययान्तम्, विधीयतेऽनेनेति विधिरित्यर्थात्, तथा च शास्त्रपरं तत्। तदा सन्निपातलक्षणशास्त्रीयाभ्यनुज्ञादानवाक्ये तद्विघातकातिरिक्तशास्त्रत्वेन संकोचः, अयमेव नीतिशास्त्रप्रयुक्तः सङ्कोचः कथ्यते, नीतिशास्त्रज्ञो हि राज्याधिकारी स्वापेक्षया गुणवत्तरं विद्वांसं स्वोन्मूलनभिया न प्रवेशयिष्यति। तत्रादौ तत्तच्छास्त्रैः स्वोत्तरप्रवृत्तिमच्छास्त्रस्याभ्यनुज्ञानमपि विधीयते, यथा–"इवर्णादेरस्वे स्वरे य-व-र-लम्" [ १. २. २१. ] इत्यादिविधिशास्त्रैस्तादृशविधेयघटितस्य साधुत्वमितरस्य तदर्थकस्यासाधुत्वं बोध्यते, तेनैकरूपेण सुधी+उपास्यः सुध्युपास्येत्यादीनामसाधुत्वं सिध्यति, एवं गोशब्दस्य साधुत्वबोधनाद् गाव्यादीनामसाधुत्वं भवति। तथा च परिनिष्ठितस्यापि सुध्युपास्य इति विसर्गान्तरूपस्यासाधुत्वापत्तिः। 'उदिते जुहोत्यनुदिते जुहोति' इतिवत् शास्त्रद्वयप्रामाण्यात् पर्यायापत्तिर्वा स्यादिति "इवर्णादेरस्वे स्वरे यवरलम्" [ १. २. २१. ] इत्यादिशास्त्राणां तदुत्तरप्रवृत्तिमता शास्त्रेण यस्य साधुत्वं बोध्यते तदपि साध्विति स्वोत्तरप्रवृत्तिमच्छास्त्रस्याभ्यनुज्ञादानमपि विधेयम्। तत्तच्छास्त्रैः साधुत्वविधानफलं च "शब्दशास्त्रीयसाधुत्वविधायकशास्त्रं साधुष्वेव प्रवर्तते" इति नियमपरिरक्षणमेव, तेनासाधुगगरीत्यादिशब्दघटकेकारादिषु नैतच्छास्त्रप्रवृत्तिः। अयं भावः—साधुत्वं द्विविधम्, एकं शास्त्रप्रवृत्त्यर्हत्वरूपं शास्त्रप्रक्रियानिर्वाहाय परिकल्पितं प्रकृतिप्रत्ययादिगतार्थवत्त्वरूपमिव अपरं पुण्यजनकतावच्छेदकीभूतो व्याकरणशास्त्रज्ञानाभिव्यङ्ग्यः शब्दनिष्ठो जातिविशेषो मुख्यमेव, तच्च 'यदिह परिनिष्ठितत्वेन ज्ञाप्यं तत् साधु' इत्यर्थापत्तिकल्पितवाक्येन बोध्यते इति। तदुक्तं मञ्जूषायां नागेशभट्टेन–साधूनामेव प्रत्ययविधावुद्देश्यत्वेन प्रकृतित्वम्, खण्डसाधुत्वबोधनद्वारा समुदायसाधुत्वबोधकं व्याकरणमर्थवत्त्वबोधनवदिति। एतेन साधुत्वाऽसाधुत्वरूपविरुद्धधर्मावच्छिन्नस्य बोधनादिदं शास्त्रमप्रमाणमेवेत्यपास्तम्। स्वोत्तरप्रवर्तमानशास्त्रान्तरबोधिताऽसाधुत्वासमानाधिकरणं च साधुत्वं पुण्यजनकतावच्छेदकमिति वैयाकरणसमयः। एवं चानेन न्यायेन तत्तच्छास्त्राभ्यनुज्ञावाक्यीयस्वोत्तरप्रवृत्तिमत्पदार्थे मदीयसन्निपातविघातकातिरिक्तेनेति सङ्कोचः क्रियते। अनित्यत्वविषये तु–एतन्न्यायप्रयोज्यसङ्कोचस्वरूपघटकस्वसन्निपातविघातकशास्त्रे तत्तच्छास्त्रातिरिक्तत्वेन सङ्कोचः, यथा "भिस ऐस्" [ १. ४. २. ] इत्यत्र ऐस्करणेनास्यानित्यत्वेन ऐसादेशशास्त्रीयाभ्यनुज्ञावाक्यघटकसन्निपातविघातकपदे जरसादेशविधायकशास्त्रातिरिक्तत्वेन सङ्कोचात् 'अतिजरसैः' इत्यत्र जरसादेशे कर्तव्ये नास्य प्रवृत्तिः माधवादयस्तु–अनित्यत्वविषये एतन्न्यायकृतसङ्कोचाभाव एवेत्याहुः। अथास्मिन् न्याये तद्विघात इत्यत्र विघातशब्दो भावघञन्तः, विधिशब्दश्च कर्मकिप्रत्ययान्तो 'विधीयते इति विधिः' इत्यर्थको विधेयपरः, तदा सन्निपातविघातकशास्त्रविधेये सङ्कोचो भवति, येन स्वस्योपकृतं तस्य विघातोऽयुक्त इति हि धर्मशास्त्रम्। तथा च स्वोपजीव्यसन्निपातविघातः स्वेन न न्याय्य इति न्यायार्थः। तथा च तत्तच्छास्त्रविधेये स्वनिमित्तभूतसन्निपातविघातकातिरिक्तत्वेन स्वनिमित्तसन्निपातसम्पादकशास्त्रीयकसन्निपातविघातकातिरिक्तत्वेन च सङ्कोचोऽनेन क्रियते। स्वोपकारकनाशकर्तुरभ्यनुज्ञादाने स्वयं वा स्वोपकर्तुर्नाशकरणे उपजीव्यविरोधः स्पष्ट एव। एवं चानयोः पक्षयोरेकतरपक्षाश्रयणेनेष्टसिद्धावपि द्वितीयपक्षः [ विघातशब्दो भावघञन्तो विधिशब्दश्च कर्मसाधन इति ] एव भाष्यादिसम्मतः। अस्य न्यायस्योपजीव्यविरोधस्यायुक्तत्वमूलकत्वादेवात्र न केवलं पूर्वपरयोः सम्बन्ध एव सन्निपातशब्देन गृह्यते, अपि तु विशेष्यविशेषणसन्निपातोऽपि। ज्ञापकसिद्धत्वस्वीकारे च तत्साजात्यात् पौर्वापर्यरूपः सन्निपात एव गृह्येत, विशेषणविशेष्यभावसन्निपातस्यापि ग्रहणे च 'ग्रामणि कुलम्' इत्यादौ "क्लीबे" [ २. ४. ९७. ] इति ह्रस्वे कृते "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इति तागमो न भवति, स्वरान्तनामत्वरूपविशेष्यविशेषणभावसन्निपातेन जातस्य ह्रस्वस्य तद्विघातकतागमेऽनिमित्तत्वात्, तागमे सति हि स्वरान्तत्वविघातः स्पष्ट एव। न च ह्रस्वस्य नपुंसकत्वरूपार्थाश्रयत्वेन बहिरङ्गतयाऽसिद्धत्वमिति तत्र तागमस्य प्राप्तिरेव नेति वाच्यम्, अर्थकृतबहिरङ्गत्वस्याश्रयणं न भवतीत्यग्रे निरूपयिष्यमाणत्वात्। यदि च 'ग्रामणि कुलम्' इत्यत्र "वेदूतोऽनव्ययय्वृदीच्ङीयुवः पदे" [ २. ४. ९८. ] इत्यनेन ह्रस्वः, स चोत्तरपदनिमित्तक इति तागमे सति पूर्वोत्तरपदयोः सन्निपातविघात इह न शङ्क्यः, पदद्वयाश्रयत्वेन बहिरङ्गस्य ह्रस्वस्य तागमं प्रत्यसिद्धत्वादित्युच्यते, तदा वृत्रहभिर्भ्रूणहभिरित्यादौ नलोपे कृते नान्तनामत्वरूपसन्निपातविघातमादायाऽयं न्यायः प्रवर्तेत इत्याश्रयणीयम्, तथापि विशेष्यविशेषणभावरूपस्य सन्निपातस्याश्रयणमित्यायातमेवेति। पाणिनीये च तन्त्रे "कृन्मेजन्त०" [ पा० सू० १. १. ३९. ] इति सूत्रे महाभाष्येऽयं न्यायो गुणदोषप्रदर्शनपूर्वकं व्याख्यातः, तत्रान्ते इत्थं निर्णीतम्–"यद्यपि, अस्य न्यायस्य स्वीकारे बहवो दोषा अपि सन्त्येव, तथापि न्यायोऽवश्यं स्वीकार्यः, दोषेषु प्रतिविधानं कर्तव्यम्" इति।

प्रतिविधानं चानित्यत्वाश्रयणमेव । अनित्यत्वे ज्ञापकं च पूर्वं प्रदर्शितमेव । अस्य च न्यायस्य सन्निपातलक्षणविधित्वं लिङ्गम् । तथा च यो यः सन्निपातलक्षणविधिस्तत्र सर्वत्रास्य प्रवृत्त्या पूर्वोक्तरूपेण सङ्कोचः क्रियते, यत्र चास्यानित्यत्वादप्रवृत्तिरिष्टा तत्रैतत्कृतः सङ्कोचो नेति विज्ञेयम् । स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो यः सन्निपातस्तद्विघातस्य स्वातिरिक्तशास्त्रस्य स्वयमनिमित्तमित्यर्थोऽस्य न्यायस्य फलति, एवं च देवायेत्यादौ आत्वस्य सिद्धयेऽनित्यत्वमेवाश्रयणीयम्, एवमन्येष्वपि दोषेषूह्यमिति ॥ १९ ॥

## ※असिद्धं बहिरङ्गमन्तरङ्गे※ ॥ २० ॥

सि०—सिद्धं निष्पन्नं लब्धसत्ताकमिति यावत्, तदेव च सच्छब्देनोच्यते, तद्भिन्नमसिद्धम्-अनिष्पन्नमलब्धसत्ताकमसदित्यर्थः । तत्र अन्तरेणापि वतिं वत्यर्थो गम्यते, यथा-'अब्राह्मणं ब्राह्मण इत्याह, ब्राह्मणवदिति गम्यते' इति भाष्यरीत्या सिद्धमप्यसिद्धमित्याहेत्यसिद्धवदिति गम्यत इत्यसिद्धमित्यस्यासदिवेत्यर्थः पर्यवसन्नः । अत्र बहिरङ्गस्योद्देश्यतयाऽन्तरङ्गात् पूर्वं निर्देशेऽपि बहिरङ्गत्वस्यान्तरङ्गत्वज्ञानाधीनत्वात् पूर्वमन्तरङ्गत्वमेव विशेयं, पाठक्रमादर्थक्रमो बलवानिति न्यायरीत्याऽप्यन्तरङ्गस्यार्थज्ञानकाले पूर्वमुपस्थितत्वात् । तथा चोक्तमभियुक्तैः प्रथममन्तरङ्गलक्षणं ततो बहिरङ्गलक्षणम्, तथा हि—

"प्रकृतेराश्रितं यत् स्याद्, यद्वा पूर्वं व्यवस्थितम् ।
यस्य चाल्पनिमित्तानि, अन्तरङ्गं तदुच्यते ॥ १ ॥
प्रत्ययस्याश्रितं यत् स्याद्, बहिर्वा यद् व्यवस्थितम् ।
बहूनि वा निमित्तानि यस्य तद् बहिरङ्गकम् ॥ २ ॥ इति ।

एतच्चान्तरङ्गबहिरङ्गशब्दाभ्यामपि लभ्यते । तथा हि-अन्तः मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतानि, अङ्गानि-निमित्तानि यस्य तदन्तरङ्गम्, एवं तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं च बहिरङ्गम् ।*नित्यादन्तरङ्गम् [ बलवत् ]* इति वक्ष्यमाणे न्यायेऽन्तरङ्गस्य बलवत्त्वमुच्यते, तच्च बहिरङ्गस्य दौर्बल्यज्ञानाधीनमिति तद्दौर्बल्यहेतुसाधकोऽयं न्यायः, यतश्चान्तरङ्गे कार्ये कर्त्तव्ये बहिरङ्गमसदिव भवति, ततोऽन्तरङ्गं बहिरङ्गान्नित्यादपि बलवद् भवतीत्युभयोरेकवाक्यतया बोधः । अन्तरङ्गे कर्तव्ये जातं समकालप्राप्तिकं च बहिरङ्गमसिद्धमिति न्यायार्थः । तत्र जातस्य बहिरङ्गस्यासिद्धत्वं यथा-गिर्योरिति, अत्र 'गिरि ओस्' इति स्थितौ यत्वे कृते "भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने" [ २. १. ६३. ] इति दीर्घे कर्तव्ये जातस्यापि यत्वस्य प्रत्ययाश्रितत्वाद् बहिर्भूतनिमित्तकत्वाद्वा बहिरङ्गत्वेन प्रकृत्याश्रितत्वादन्तर्भूतनिमित्तकत्वाद्वाऽन्तरङ्गदीर्घे प्रत्यसिद्धत्वं भवतीति दीर्घो न भवति । समकालप्राप्तिकस्य बहिरङ्गस्यासिद्धत्वफलं तु 'पट्व्या मृद्व्या' इत्यादि, 'पटु+ई+आ' इतिस्थिते समकालप्राप्तिकमपीकारस्य यादेशं बहिरङ्गतयाऽसिद्धं बाधित्वा पूर्वमुकारस्य वादेशे पश्चादीकारस्य यादेशे च 'पट्व्या, मृद्व्या' इति सिद्ध्यतः, अन्यथा परत्वादीकारस्य यादेशे उकारस्य वकारो न स्यात् । यथा वा 'अयजे इन्द्रम्' इत्यत्र 'अयज+इ+इन्द्रम्' इति स्थिते वाक्यसंस्कारपक्षे "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घं समकालप्राप्तिकं बहिरङ्गं प्रबाध्यान्तरङ्गत्वादेकारे-अयजे इन्द्रमिति सिध्यति । समकालप्राप्तिकस्यापि बहिरङ्गस्यानेन न्यायेनासिद्धत्वबोधनादेव "ओमाङि" [ १.२.१८. ] इति सूत्रे आङ्ग्रहणं चरितार्थम्, तद्धि 'अद्य+आ+ऊढा'इति स्थिते धातूपसर्गयोः कार्यमन्तरङ्गमित्यन्तरङ्गत्वाद् 'आ+उ' इत्यनयोरोत्वे पश्चात् "ऐदौत् सन्ध्यक्षरैः" [ १. २. १२. ] इत्यस्याप्रवर्त्तनार्थं कृतम्, अन्यथा पूर्वं मद्यशब्दाकारेण सहाकारस्य "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घत्वे पश्चादोत्वे 'अद्योढा' इत्यस्य सिद्धौ व्यर्थमेव स्यात्, अत्र साधनबोधकक्तप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोगे पश्चादद्यशब्दस्य समुदायसम्बन्ध इति ओत्वस्यान्तरङ्गत्वमिति "सम्प्रसारणाच्च" [ पा० सू० ६. १. १०८. ] इति सूत्रे महाभाष्ये स्पष्टम् । यत्तु-'विशेषापेक्षात् सामान्यापेक्षमन्तरङ्गं विशेषापेक्षे विशेषधर्मस्याधिकस्य निमित्तत्वात्' इति, तन्न-विशेषस्य व्याप्यत्वेन व्यापकस्यानुमानेनोपस्थितावपि तस्य निमित्तत्वे मानाभावेनाधिकधर्मनिमित्तकत्वानुपपादनात्, भाष्ये एवंविधान्तरङ्गबहिरङ्गभावस्य क्वाप्यनुल्लेखाच्च । पूर्वोपस्थितनिमित्तकस्य बलवत्त्वबोधकोऽयं न्यायो लोकतोऽपि सिद्ध इति महाभाष्यकारेणोक्तम्-"अचः परस्मिन् पूर्वविधौ" [ पा० सू० १. १. ५७. ] इति सूत्रे "सा चाप्येषा [ परिभाषा ] लोकतः सिद्धा, कथम्? प्रत्यङ्गवर्त्ती लोको लक्ष्यते, तद्यथा-पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत् करोति, ततः सुहृदाम्, ततः सम्बन्धिनाम् । प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेऽर्थे वर्त्तते, सामान्ये वर्त्तमानस्य व्यक्तिरुपजायते, व्यक्तस्य सतो लिङ्गसङ्ख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भवतीति । यथैव चानुपूर्व्याऽर्थानां प्रादुर्भावः, तथैव शब्दानामपि, तद्वत् कार्येऽपि भवितव्यम्" इति । अयमर्थः-अङ्गमङ्गं प्रति प्रत्यङ्गम्, अङ्गशब्देन प्रत्यासत्तिर्लक्ष्यते, अङ्गानां प्रत्यासन्नत्वात्, एवं च प्रत्यासन्नवाची प्रत्यङ्गशब्दः तथा च लोको यथा प्रत्यासत्तिमपेक्ष्यैव कार्याणि करोति, यथा सुप्तोत्थितः पूर्वं स्वशरीरकार्याणि करोति, शरीरस्य सकलान्यापेक्षया सामीप्यात् सकलभोगसाधनत्वाच्च, ततः सुहृदां सौहार्दस्यासत्तिहेतुत्वात्, ततः सम्बन्धिनाम्, असम्बद्धजनापेक्षया तेषामासन्नत्वात्, तथा शब्दशास्त्रेऽपि येन क्रमेणार्थानां सामीप्यं

तेनैव क्रमेण शब्दोपस्थितिः,शब्दोपस्थितिक्रममनुरुध्यैव चार्थोपस्थितिः, तथा च लिङ्ग-संख्यादिस्वासन्नार्थयुक्तस्य बाह्यार्थेन योग इति बाह्यार्थवाचिशब्दसम्बन्धोऽपि तेनैव क्रमेणेत्युपसर्गसम्बन्धादिभ्यः पश्चादन्यशब्दसम्बन्ध इति विज्ञेयम्। ननु अन्वितस्य बाह्यार्थयोगो भवतीत्ययुक्तम्, शब्दार्थसम्बन्धस्य नित्यत्वेन प्रतिपादितत्वात्, शब्दस्य विरम्य व्यापाराभावाद् युगपदेव सकलार्थप्रतीतेः क्रमाभिधानमप्यसङ्गतमिति चेत्? उच्यते—नित्येऽपि शब्दार्थसम्बन्धेऽक्रमेऽप्यर्थप्रतिपादने उपायभावेनासन्तमपि क्रमं प्रकृत्याद्यर्थं चाश्रित्योपेयव्यवस्थापनात्, तत्र नागृहीतविशेषा बुद्धिः सामान्य उपजायते, इति प्रथमं सामान्यं [ प्रवृत्तिनिमित्तम् ] अभिधीयते, ततस्तदनुरक्ता द्रव्ये प्रतीतिः, लिङ्ग-सङ्ख्या-शक्तीनामाश्रयोऽपि द्रव्यमेवेति तदेव पूर्वमभिधातव्यम्, ततः संख्यापेक्षया लिङ्गं समासन्नमिति तदभिधीयते, द्व्यादिसङ्ख्या हि वस्त्वन्तरापेक्षोपजायते, एकत्वसङ्ख्याऽपि वस्त्वन्तरापेक्षद्वित्वादिव्यवच्छेदं करोतीति बहिरङ्गा, साऽपि सजातीयपदार्थापेक्षत्वादन्तरङ्गा, कर्मादीनि तु विजातीयक्रियापेक्षणाद् बहिरङ्गाणि, इति न्यायप्राप्तः क्रमः इति, तथा च 'पट्व्या' इत्यादौ पूर्वं स्त्रीत्वनिमित्तको ङीरुत्पद्यते इति तन्निमित्तको यकारादेशः, पश्चात् कारकविभक्त्या तृतीयया योग इति तन्निमित्तको यकारादेश इति न्यायसिद्धमेवैतत्परिभाषा [ न्याय ] निमित्तभूतं पूर्वोपस्थितनिमित्तकस्यान्तरङ्गत्वमिति समुदितार्थः। एतच्च "यद्वा पूर्वं व्यवस्थितम्" इत्यनेनोक्तम्। प्रकृत्याश्रितस्यान्तरङ्गत्वं तु पूर्वोपस्थितनिमित्तकत्वमेव, अङ्गशब्देन निमित्तस्यैव ग्रहणात्, उद्देश्यत्वेन प्रकृत्याश्रितत्वं नेह ग्राह्यम्, अन्तरङ्गशब्दमर्यादया तदलाभात्। एवमल्पापेक्षस्यान्तरङ्गत्वं बह्वपेक्षस्य बहिरङ्गत्वमित्यपि न, तदर्थस्यापि शब्दमर्यादया लाभात्, विवेचयिष्यते चैतदग्रे विवरणे। बहिर्निमित्तकत्वरूपबहिरङ्गत्वस्य 'तच्चारु' इत्यप्युदाहरणम्। अत्र चवर्गयोगजं चत्वमुभयपदाश्रितत्वाद् बहिरङ्गमित्येकपदाश्रिते "च-जः क-गम्" [ २. १. ८६. ] इति कत्वे कर्तव्येऽसिद्धमिति कत्वं न भवति। ज्ञापकं त्वस्य न्यायस्य "न सन्धि-ङी-य-क्वि-द्वि-दीर्घासद्विधावस्क्लुकि" [ ७. ४. १११. ] इति सूत्रे सन्धिविधित्वेन द्वित्वविधौ स्थानिवद्भावनिषेधे सिद्धेऽपि द्विग्रहणम्, तद्धि दध्यत्रेत्यादौ यत्वादेरेतन्न्यायप्राप्तासिद्धत्वद्वारेणापि जायमानस्य स्थानिवद्भावस्य निषेधार्थम्, यतो दध्यत्रेत्यादौ "अदीर्घाद् विरामैकव्यञ्जने" इति [ १. ३. ३२. ] द्वित्वे क्रियमाणे "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इति प्राप्तं स्थानिवत्त्वं प्रतिषेद्धुमेव तत्र सूत्रे [ "न सन्धि०" इति सूत्रे ] द्विग्रहणं क्रियते, तच्चान्तरेणापि द्विग्रहणं सेत्स्यत्येव द्वितीय-तृतीयपादयोर्विधीनां क्रमशः स्वरव्यञ्जनसन्धिविधित्वेन तृतीयपादस्थस्य द्वित्वस्य व्यञ्जनसन्धिविधित्वात् सन्धिग्रहणेनैव निषेधात्, ततश्च द्विग्रहणं व्यर्थं सत् शास्त्रान्तरेणापि प्राप्तं स्थानिनिमित्तकं कार्यं न स्यादित्येवमर्थतया पर्यवस्यति, तच्च शास्त्रं नान्यदुपलभ्यते ऋतेऽस्मान्न्यायादिति न्यायस्यास्य सत्त्वमाक्षिपति द्विग्रहणमिति, एतन्न्यायप्राप्तासिद्धत्वमूलकस्थानिसत्त्वनिषेधाय द्विग्रहणं स्वांशे चरितार्थम्। यद्यपि "न सन्धि०" [ ७. ४. १११. ] इति सूत्रस्थं नञ् पदं प्रकरणप्राप्तेन स्थानी वेत्यनेनैव सम्बद्धमित्येतन्न्यायप्राप्तासिद्धत्वनिषेधाय नालमिति शङ्कितुं शक्यते, तथापि द्विग्रहणसामर्थ्येनाप्रकरणस्थस्यानुमानिकस्याप्यस्य निषेध इत्याश्रीयते। वस्तुतस्तु एतन्न्यायसिद्धौ तस्यार्थक्यम्। तेन चैतन्न्यायसिद्धिरिति परस्पराश्रयत्वप्रसङ्गः, तथापि लोकसिद्धस्यास्य न्यायस्य निषेधार्थं तदित्याश्रित्य व्याकरणेऽपि तत्प्रवृत्तिर्द्विग्रहणेनानुमीयत इत्याश्रयणीयमिति चारु॥ २०॥

## *असिद्धं बहिरङ्गमन्तरङ्गे* ॥ २० ॥

त०—अन्तरङ्ग-बहिरङ्गशब्दयोः परस्परापेक्षार्थनिरूपकत्वेन तल्लक्षणेऽन्योन्याश्रयः स्यादिति मत्वाऽभियुक्तैः प्रकृतेराश्रितं यत् स्यादित्यादि परस्परानाश्रितमेव लक्षणमुक्तम्। तत्र प्रकृत्याश्रितस्यापि पूर्वोपस्थितनिमित्तकत्वरूपमेवान्तरङ्गत्वमिति प्रतिपादितं वृत्तौ। तथा च पूर्वं व्यवस्थितमित्येवान्तरङ्गलक्षणम्। 'यस्य वाऽल्पनिमित्तानि' इत्यनेनोक्तमल्पापेक्षस्यान्तरङ्गत्वं तु नवीना न स्वीकुर्वन्ति, तथा हि—परिभाषेन्दुशेखरे संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणस्थापनमुखेन नागेशेनेत्थं खण्डितं तत्—"ननु "येन विधिस्तदन्तस्य" [ पा० सू० १. १. ७२. ] इति सूत्रे भाष्ये "इको यणचि" [ पा० सू० ६. १. ७७. ] इत्यादावपि तदन्तविधौ 'स्योन' इत्यत्रान्तरङ्गत्वाद् यणो गुणबाधकत्वमिष्यते, तत्र सिद्ध्येद्, ऊनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इत्यन्तरङ्गत्वाद् गुण एव स्यादित्युक्तम्। अत्र कैयटः—सिवेर्बाहुलकादौणादिके नप्रत्यये गुणवलोपोठां प्रसङ्गे ऊठ् अपवादत्वाद् वलोपं बाधते, गुणं त्वन्तरङ्गत्वाद् बाधते, गुणो ह्यङ्गसम्बन्धिनीमिग्लक्षणां लघ्वीमुपधामार्धधातुकं चाश्रयति; ऊठ् तु वकारान्तमङ्गमनुनासिकादिं च प्रत्ययमित्यल्पापेक्षत्वादन्तरङ्गः, तत्र कृते यण्-गुणौ प्राप्नुत इति; एवं च संज्ञापेक्षस्यापि बहिरङ्गत्वं स्पष्टमेवोक्तमिति चेत्? न—तदन्तविधावपि बहुपदार्थापेक्षत्वरूपबहिरङ्गत्वस्य गुणे सत्त्वेन तत्र दोषकथनपरभाष्यासङ्गतेः, बहिरङ्गान्तरङ्गशब्दाभ्यां बह्वपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादयाऽलाभाच्च। तथा सति असिद्धं बह्वपेक्षमल्पापेक्ष इत्येव वदेत्' इत्यादिना। तथा च 'ऊनशब्दमाश्रित्य यणादेशो नशब्दमाश्रित्य गुण इत्य-

न्तरङ्गत्वाद् गुण एव स्यादिति भाष्यस्य क आशय इति चेत्? ऊनशब्दे परे यणो विधानाद् गुणनिमित्तकस्य नकारस्य तदन्तर्गतत्वमिति गुणस्यान्तरङ्गत्वमित्यन्तर्भूतनिमित्तकत्वमन्तरङ्गत्वमित्यत्रैव भाष्यतात्पर्यात्। तथा च बहिरङ्गत्वेन विवक्षितं यच्छास्त्रं तद्घटकेन सप्तम्यन्तेन पञ्चम्यन्तेन षष्ठ्यन्तेन वा प्रथमान्तभिन्नेन येन केनचित् पदेनाऽऽश्रीयमाणो यावान् शब्दसमुदायस्तद्घटको यच्छास्त्रीयसप्तम्यन्तपञ्चम्यन्तान्यतरपदेन गृह्यते तदन्तरङ्गमिति भाष्याशयः। यकारविधायक[ यण् ]शास्त्रीयसप्तम्यन्तेनाचीति पदेनाश्रीयमाण 'ऊन' इति समुदायस्तद्घटको नशब्दो गुणशास्त्रस्थेन सप्तम्यन्तेन गृह्यत इति गुणशास्त्रमन्तरङ्गमिति फलितम्, न तु बह्वपेक्षत्वं बहिरङ्गत्वमल्पापेक्षत्वमन्तरङ्गत्वमिति। एतेन संज्ञानिमित्तकस्यापि बहिरङ्गत्वं नेति सिद्धं मन्तव्यम्, अन्यथाऽत्र गुणस्यान्तरङ्गत्वं न स्यात्, तत्रानेकसंज्ञाया अपेक्षितत्वात्; एवमर्थनिमित्तकस्यापि न बहिरङ्गत्वम्, अङ्गशब्देन 'शब्द' रूपनिमित्तस्यैव ग्रहणात्, शब्दशास्त्रे तस्यैव प्राधान्यात्। अत एव "दीर्घो नाम्यतिसृचतसृष्रः" [ १. ४. ४७. ] इति सूत्रे 'अतिसृचतसृ' इति पर्युदासः सार्थकः, अन्यथा तिस्राद्यादेशस्य स्त्रीत्वरूपार्थनिमित्तकत्वेन बहिरङ्गत्वात् तयोरसिद्धतया "त्रेस्त्रयः" [ १. ४. ३४. ] इति त्रयादेशे तस्य वैयर्थ्यं स्पष्टमेव। न च त्रयादेशोत्तरं तिस्रादेशे दीर्घवारणाय 'अतिसृचतसृ' इति पर्युदासकरणं सार्थकमिति वाच्यम्, त्रयादेशस्येव दीर्घस्याप्यन्तरङ्गत्वेन पूर्वं प्रवृत्तौ पश्चात् तिस्रादेशे *लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते* इति न्यायेन पुनर्दीर्घाप्राप्त्या तद्वैयर्थ्यस्य दुर्वारत्वात्। न च "त्रेस्त्रयः" [ १. ४. ३४. ] इत्यादावुद्देश्यनिमित्तयोर्विशिष्टरूपत्वेन विशिष्टरूपोपादाने चार्थवद्ग्रहणन्यायोपस्थित्या प्रकृतिप्रत्ययोभयार्थस्य निमित्तत्वेन तिस्रादेश–त्रयादेशयोरुभयोरप्यर्थनिमित्तकत्वेन बहिरङ्गत्वं सममेवेति वाच्यम्, तिस्रादेशे तत्परिभाषोपस्थितार्थस्य विभक्तिसंज्ञारूपार्थस्य च साम्येऽपि स्त्रीत्वरूपार्थस्याधिक्येन वैषम्यात्, वस्तुतस्तु तिस्रादेशविधायकस्याल्पनिमित्तकत्वमेन, न साम्यम्, तथा हि–तत्रार्थवद्ग्रहणन्यायोपस्थाने 'अर्थाश्रयः, अर्थत्वम्, अर्थः' इत्यंशत्रयोपस्थितिः, स्त्रीत्वरूपार्थस्य स्त्रीत्वजातेश्चेति द्वयस्येति पञ्चानामुपस्थितिः, "त्रेस्त्रयः" [ १. ४. ३४. ] इत्यत्र च त्र्यंशे आमंशे चार्थवद्ग्रहणन्यायोपस्थित्या प्रत्येकमंशत्रयोपस्थितिरित्यंशषट्कोपस्थितिरिति त्रयादेशस्यैवाधिकापेक्षत्वमिति तत्र कर्तव्ये तिस्रादेशस्य नानेन न्यायेनासिद्धत्वं शक्यते वक्तुमिति, न तेन [ अतिसृचतसृ ] इति पर्युदासेनार्थनिमित्तकस्य न बहिरङ्गत्वमिति समर्थयितुं शक्यते परे तु–अर्थापेक्षमन्तरङ्गत्वं बहिरङ्गत्वं च वदता नार्थगतताल्पत्वाधिकत्वे अपेक्षणीये, अर्थव्यक्तीनामानन्त्यात् तयोर्निर्धारयितुमशक्यत्वात्, किन्त्वर्थगतधर्मे विषयत्वे वा न्यूनत्वाधिकत्वे अपेक्षणीये, तथा चामंशेऽर्थोपस्थितावपि तत्रत्यार्थत्वधर्मतत्त्रिशब्दांशे उपस्थितार्थस्वरूपधर्मस्य भेदाभावेनाधिकधर्मस्यानाश्रयणात्, अवच्छेदकभेदेन विषयताभेदादर्थत्वावच्छिन्नविषयताया अप्येकत्वेनानाधिक्यात्। तथा च त्रयादेशे त्रित्वमर्थत्वमामूसंज्ञा, तिस्रादेशे त्रित्वमर्थत्वं विभक्तिसंज्ञेति धर्मत्रयनिमित्तकत्वं समानम्, अधिकं स्त्रीत्वं निमित्तमिति तस्य बहिरङ्गत्वमिति नार्थनिमित्तकस्य बहिरङ्गत्वमिष्टम् 'अतिसृचतसृ' इति पर्युदासं कुर्वतो ग्रन्थकर्तुरिति युक्तमेवेत्याहुः। वस्तुतस्तु–अन्तर्भूतनिमित्तकत्वं, शीघ्रोपस्थितनिमित्तकत्वम्, अपरनिमित्तकत्वमित्याद्यनेकविधमन्तरङ्गत्वं तत्तल्लक्ष्यानुरोधात् स्वीक्रियते। अथापरनिमित्तकस्यान्तरङ्गत्वे किं मानमिति चेत्? अत्रोच्यते–"अतः स्यमोऽम्" [ १. ४. ५७. ] इति सूत्रे तपरकरणमेव मानम्, तद्धि दीर्घादकारात् परयोः स्यमोरमादेशो माभूदित्येवमर्थम्, क्लीबे च "क्लीबे" [ २. ४. ९७. ] इत्यनेन ह्रस्वविधानाद् दीर्घस्याभावेन तद्व्यावृत्त्यर्थस्य तस्य वैयर्थ्यमेव, तच्च व्यर्थं सत् 'अपरनिमित्तकमन्तरङ्गम्' इति ज्ञापयति, ततश्च अश्च आश्चेति द्वन्द्वे [ समाहारे ]स्यादेर्लुकि 'अ+आ' इति स्थिते समानदीर्घापेक्षया अपरनिमित्तकत्वेनान्तरङ्गत्वात् पूर्वं क्लीबत्वनिमित्तके ह्रस्वत्वे ततः समानदीर्घे *लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते* इति न्यायेन पुनर्ह्रस्वत्वाप्राप्त्या 'अतः' इति तपरकरणेन सेरमादेशाभावे "अनतो लुप्" [ १. ४. ५९. ] इति लुपि 'आ' इति सिध्यति, अन्यथा कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं दीर्घे ततो ह्रस्वत्वे व्यावर्त्यालाभेन तस्य [ 'अतः' इति तपरकरणस्य ] वैयर्थ्यमेव स्यादिति। ननु ज्ञापितेऽप्यपरनिमित्तकस्यान्तरङ्गत्वे 'अ+आ' इति स्थिते ह्रस्वस्यापरनिमित्तकत्वेनान्तरङ्गत्वं, समानदीर्घस्यान्तर्भूतनिमित्तकत्वेनान्तरङ्गत्वमित्युभयोः साम्यमेवेति नान्तरङ्गत्वेनेह व्यवस्था शक्या कर्तुमिति चेत्? न–बहिरङ्गत्वेन विवक्षितशास्त्रघटकसप्तम्यन्तपदेनाश्रीयमाणसमुदायघटकवृत्तिविषयताप्रयोजकसप्तम्यन्तपदघटितत्वस्यैवान्तरङ्गत्वरूपत्वात्, ह्रस्वविधायके च तादृशसप्तम्यन्तपदाभावेन दीर्घस्यान्तरङ्गत्वाभावात्। अयमाशयः–यदा दीर्घस्यान्तरङ्गत्वं ग्राह्यं तदा ह्रस्वे बहिरङ्गत्वं विवक्षणीयं, [ साधनीयं ] ह्रस्वविधायकं शास्त्रं च "क्लीबे" [ २. ४. ९७. ] इति, तत्र च सप्तम्यन्तपदमपि तदेव, तच्च क्लीबत्वरूपार्थपरं न तु शब्दपरमिति तादृशसप्तम्यन्तपदेन समुदायस्याश्रयणाभावात् तद्घटकवृत्तिविषयताया एवाप्रसिद्धेस्तदपेक्षया दीर्घस्यान्तरङ्गत्वं दुरुपपादमिति। तथा च ह्रस्वस्यैवान्तरङ्गत्वमपरनिमित्तकत्वरूपमिति पूर्वं ह्रस्वे ततो दीर्घे 'आ' इति तपरकरणव्यावर्त्त्यं स्थिरमेवेति। यदि च "अतः स्यमोऽम्" [ १. ४. ५७. ] इति सूत्रे तपरकरणं न समकालग्रहणार्थम्, अपि तु "आत् स्यमोऽम्" इति करणे क्लिष्टत्वापत्त्या मुखसुखार्थमेव, अश्च अश्चेति समाहारद्वन्द्वे 'अम्' इत्येवरूपं युक्तमिति

मन्यते तदा अपरनिमित्तकत्वमन्तरङ्गत्वं माऽस्तु, अन्तर्भूतनिमित्तकत्वेनापि तत्र तत्र [ अपरनिमित्तकत्वोदाहरणस्थले ] ज्ञापकादिनापि निर्वाहसंभवात्। अथवा *न स्वरानन्तर्ये* इत्यग्रिमन्यायेनैव तत्र सर्वत्र निर्वाहः, स्वरनिष्ठान्यानन्तर्यनिमित्तके कार्ये कर्तव्ये कृते च यदन्तरङ्गं प्राप्नोति तत्र कर्तव्ये बहिरङ्गासिद्धत्वं नेत्यर्थात्। ननु समकालप्राप्तबहिरङ्गस्यासिद्धत्वे यत् "ओमाङि" [ १. २. १८. ] इति सूत्रे आङ्ग्रहणं मानत्वेनोक्तं वृत्तौ तन्न शोभनम्, 'अद्य+आ+ऊढः' इति स्थिते "समानानां तेन दीर्घः" [ १. २. १. ] इति प्राप्तं दीर्घत्वं परत्वात् प्रबाध्य "अवर्णस्येवर्णादिनैदोदरल्" [ १. २. ६. ] इत्यस्य प्रवृत्त्या ओत्त्वे समानदीर्घाप्राप्त्या "ऐदौत् सन्ध्यक्षरैः" [ १. २. १२. ] इत्यस्य बाधनार्थमाङीत्यस्य चारितार्थ्येन नोक्तार्थे ज्ञापकत्वं तस्य युक्तमिति चेत्? न-परापेक्षयाऽपवादस्य बलवत्त्वेन पूर्वं दीर्घस्यैव प्रवृत्तौ तत ओत्त्वे रूपसिद्धौ व्यर्थस्य तस्य ज्ञापकत्वसंभवात् न च ज्ञापनोत्तरमपि न स्वांशे चारितार्थ्यमन्तरङ्गापेक्षयाऽप्यपवादस्य बलीयस्त्वादिति वाच्यम्, अपवादस्यापि दीर्घस्यान्तरङ्गबहिरङ्गभावाभावविषये दैत्यारिरित्यादौ चरितार्थस्य प्रकृतेऽन्तरङ्गेण ओत्वेन बाधसंभवात्, तदुक्तम्-"अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते'' इति । ननु आङ्पूर्वकेण्धातोः 'एहि' इति रूपं, तदनुकरणे एहिशब्देऽनुकार्यघटकैकारे पूर्वान्तवद्भावेनाङ्त्वात् *अनुकरणं प्रकृतिवत्* इत्यतिदेशेनाङ्त्वेऽनुकरणैकदेशभूतैकारे देवादिशब्दयोगे प्राप्त ऐत्त्वबाधनपुरःसरमवर्णलोपार्थमाङ्ग्रहणस्यावश्यकत्वेन न ज्ञापकत्वसम्भव इति चेत्? न-ज्ञापकतापरभाष्यप्रामाण्येनानित्यं प्रकृतिवदनुकरणमित्यतिदेशमादाय लब्धाङ्त्वे प्रकृत[ "ओमाङि" इति ]सूत्राप्रवृत्तेः । अत्रेदं विचार्यते-यदुक्तं वृत्तौ-' 'पूर्वं धातोरुपसर्गयोगे' इति, तत्र किं मूलम्? इति चेत् "सुट्कात् पूर्वः" [ पा० सू० ६. १. १३५. ] इति सूत्रस्थं भाष्यमेव मानमिति गृहाण, तत्र हि सूत्रशेषे धातूपसर्गयोः कार्यं यत् तदन्तरङ्गम्' इत्युक्तम्, तत्र शङ्कते-"कुत एतत्" इति, उत्तरमाह-"'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इति । नैतत् सारम्-'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण, साधनं हि क्रियां निर्वर्त्तयति, तामुपसर्गो विशिनष्टि, अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्, सत्यमेवमेतत्-यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते, अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति, तस्य 'आस्यते गुरुणा' इत्यकर्मक उपास्यते गुरुरिति केन सकर्मकः स्यात्?" इति । तत्र कैयटः पूर्वं धातुरिति प्रतीकमादाय "विशिष्टा क्रिया साधनेनार्थलाभाय सम्बध्यत इति पूर्वं विशेषणेन [ उपसर्गद्योत्यार्थेन ] युज्यत इत्यर्थः" इत्याह । नैतत् सारमिति प्रतीकावतरणमित्थमाह-"इतरो लब्धस्वरूपा क्रिया विशेषणमाकाङ्क्षतीति मत्वाह-नैतदिति" इति । सत्यमेवमेतदिति भाष्यावतरणमित्थमाह-"इतरो विशिष्टा क्रिया साधनेन साध्यते, न तु साधनाल्लब्धस्वरूपाऽन्यतो विशेषं लभते इति मत्वा बुद्धिनिरूपितविशिष्टसाध्यभाविसाधनसम्बन्धाश्रयेणाह-सत्यमिति" इति, उक्तकैयटरीत्या भाष्यकृतामाशय इत्थमायाति-यद्यपि क्रियायोग एव सत्युपसर्गसंज्ञा भवति, क्रिया च साधनसाध्यैवेति साधनसम्बन्धः प्रथमं तत उपसर्गसम्बन्ध इति प्रतिभाति, तथापि साधनेनाप्युपसर्गार्थविशिष्टैव क्रिया साध्या, अन्यथा 'उपास्यते गुरुः' इत्यत्राकर्मकाद् 'आस्' धातोः कर्मणि लकारो न स्यात् इति, भाविसाधनसम्बन्धसाध्यस्वरूपं बुद्धौ परिकल्प्योपसर्गयोगानन्तरमेव साधनयोग इति धातूपसर्गयोः कार्यस्यान्तरङ्गत्वे बीजमिति । उद्द्योते नागेशस्तु-नैतत् सारमित्यादिभाष्यमेवं वर्णयति-"भाष्ये नैतत् सारमिति-वक्ष्यमाणोऽभिप्रायः । तस्यासारतां दर्शयन् 'पूर्वं धातुः साधनेन' इत्यस्य युक्तत्वं दर्शयति-साधनं हीति । क्रियां-तत्प्रतीतिम् । साधनयोगेन हि साध्यत्वेन धात्वर्थप्रतीतिः, साध्यत्वस्य साधननिरूप्यत्वात् क्रियायोगे चोपसर्गत्वमिति भावः । तदाह-तामुपसर्ग इति । तां-साध्यत्वेन प्रतीताम् । तत्र विशेषणीभूतमर्थमुपसर्गो द्योतयतीत्यर्थः । अभिनिर्वृत्तस्य-साध्यत्वेन ज्ञातस्य, विशेषः-विशेषणम्, उपसर्गेण शक्यो द्योतयितुम् । एवं च पूर्वं धातुरुपसर्गेणेति नैतत्सारमिति भावः । इतर एतदङ्गीकुर्वन्नेवान्तरङ्गत्वं व्युत्पादयितुमाह-सत्यमेवमेतत्, यस्त्वसाविति-उपसर्गसंज्ञकशब्दयोगात् पूर्वं साधनयोग इति सत्यमेव, परन्तु त्वदभिमतं धातूपसर्गसम्बन्धकृतमर्थमभ्यन्तरं कृत्वा-स्वबोध्यं कृत्वा, धातोः पूर्वं नियमेनाकाङ्क्षितत्वात् साधन-तत्कार्यप्रत्यययोगे कृते क्रियात्वावगतावुपसर्गसंज्ञकशब्दयोगः, अन्यथा केवलधातुतः सर्वत्राप्रतीयमानः सोऽर्थः, कथं श्रोत्रा बुध्येतेति भावः । यो हि मन्यत इति-शब्दसम्बन्धवदर्थसम्बन्धोऽपि पश्चादिति यो मन्यत इत्यर्थः ।" इति । अत्रत्यस्वमतसार इत्थं प्रकटितो नागेशेन परिभाषेन्दुशेखरे एतन्न्यायविवरणावसरे-"यत् तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन, उपसर्गेण-तत्संज्ञकशब्देन, साधनेन-कारकेण तत्प्रयुक्तकार्येण, अत एवानुभूयत इत्यादौ सकर्मकत्वात् कर्मणि लकारसिद्धिरिति, तन्न-क्रियायाः साध्यत्वेन बोधात् साध्यस्य च साधनाकाङ्क्षतया तत्सम्बन्धोत्तरमेव निश्चितक्रियाबोधेन साधनकार्यप्रवृत्त्युत्तरमेव क्रियायोगनिमित्तोपसर्गसंज्ञकस्य सम्बन्धौचित्यात् । + + + + + उपसर्गद्योत्यार्थान्तर्भावेण धातुनैवार्थाभिधानादुक्तेषु [ अनुभूयते आनन्दः, उपास्यते गुरुरित्यादिषु ] कर्मणि लकारसिद्धिः, पश्चाच्छ्रोतुर्बोधायोपसर्गसम्बन्ध" इति । अयमाशयः-पूर्वं धातुरुपसर्गेण युज्यत इति भाष्यस्योपसर्गसंज्ञक-

शब्देन पूर्वं धातोर्योग इति नार्थः, क्रियायोग एवोपसर्गसंज्ञायाः सम्भवेन, क्रियायाश्च साध्यरूपत्वात् साधनसम्बन्धोत्तरमेव [साधन-कारकवाचकप्रत्ययसम्बन्धोत्तरमेव] साध्यत्वलाभात् पूर्वं साधनसम्बन्धस्यैवौचित्यात् । तथा चोपसर्गद्योत्यस्यार्थान्तरस्य धात्वर्थेऽन्तर्भावं कृत्वा धातुनैव कर्मादीनामभिधानात् सकर्मकत्वप्रयुक्तकार्योपपत्तेश्च, उपसर्गेणेत्यस्योपसर्गद्योत्यार्थेनेत्यर्थः । उपसर्गद्योत्यार्थसम्बन्धस्यान्तर्भावमात्रेण सकर्मकत्वादिसिद्धेर्न तदर्थद्योतकशब्दसम्बन्धस्यापि पूर्वमुपगमावश्यकत्वम् । शब्दार्थसम्बन्धस्यानादित्वाद् भूधातोर्ज्ञानार्थत्वस्य 'आस्'धातोरुपासनार्थत्वस्य चोपसर्गसम्बन्धात् प्रागपि सत्त्वेन सकर्मकत्वात् कर्मणि लकारे बाधकाभावः, उपसर्गः पश्चात् सम्बध्यमानः प्रयोक्तुर्ज्ञानोपासनाद्यर्थतात्पर्यं श्रोतारं ग्राहयति, अत एव श्रोतुर्बोध उपसर्गसम्बन्धोत्तरमेव, नहि श्रोतृबोधः कर्मसंज्ञायां कर्मणि लकारे वा कारणं येन पूर्वं कर्मणि लकारो न स्यात्, अत एव वृत्तौ-साधनबोधकप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोग इति प्रतिपादितमित्यवधेयम् । धातूपसर्गकार्यस्यान्तरङ्गत्वोपपत्तिश्चेत्थम्-बुद्ध्यारूढानामेवार्थानां बोधनाय शब्दप्रयोगात् सर्वेषामर्थानां तत्तदर्थबोधकशब्दप्रादुर्भावात् प्रागेवास्थितत्वात्, साधनबोधकशब्दनिमित्तककार्यापेक्षयोपसर्गनिमित्तककार्यस्य शीघ्रोपस्थितनिमित्तकत्वेनान्तरङ्गत्वात् पूर्वमेवोत्पत्तिरिति । तथा च 'अप+आ+ऊढः' इत्यादावुपसर्गनिमित्तककार्यस्यान्यकार्यापेक्षयाऽन्तरङ्गत्वेन समकालप्राप्तिकं बहिरङ्गं समानदीर्घं बाधित्वा प्रवृत्तिरुचितेति, तत्र औत्वबाधनार्थमाङ्ग्रहणं स्वांशे चरितार्थमिति बोध्यम् । अत एव च पूर्वं धातुरुपसर्गेण सम्बध्यते पश्चात् साधनेनेति द्विर्वचनादड़ागमाच्च पूर्वः स्सडेवेति प्रतिपादितं "सं-परेः कृगः स्सट्" [४. ४. ९१.] इति सूत्रवृत्तौ । तस्याप्ययमेवाशयः-संचस्कारेत्यादौ परोक्षापेक्षया भूषणरूपोपसर्गार्थस्य प्रथमतरमेवोपस्थितत्वेन तन्निमित्तकः स्सट् परोक्षादिनिमित्तकद्वित्वादितोऽन्तरङ्गतरक इति । अत्रेदं बोध्यम्-दैशिक-कालिकादिभेदादन्तरङ्गत्वमनेकविधम्, तत्र दैशिकं प्रथमोपस्थितनिमित्तकत्वरूपमन्तरङ्गत्वं 'पद्ध्या मृद्व्या' इत्यादौ, कालिकं प्रथमोपस्थितनिमित्तकत्वम् 'अद्योढा' इत्यादौ, नव्यमते-अपरनिमित्तकत्वेनाप्यन्तरङ्गत्वं 'पचावेदम्' इत्यादौ पाणिनीयमते, स्वमते च-अश्व आश्वेति द्वन्द्वे ह्रस्वत्वस्यापरनिमित्तकत्वेनान्तरङ्गत्वमुक्तमेव । एवमेकपदसम्बन्धिवर्णद्वयापेक्षत्वम्, प्राचां मतेऽर्थकृतसंज्ञाकृताल्पापेक्षत्वं पूर्वं पूर्वमन्तरङ्गत्वमित्यादि च यथासंभवं लक्ष्यानुरोधादन्तरङ्गत्वं, तद्भिन्नत्वं च बहिरङ्गत्वमाश्रयणीयमिति, स्वयमूहनीयं सुधीभिरिति नेह प्रपञ्चितम् ।

परिष्काररसिकाश्चैतेषु सर्वप्रधानमन्तर्भूतनिमित्तकत्वमन्तरङ्गत्वं शब्दमर्यादालब्धमिति तदित्थं परिष्कुर्वन्ति-स्वप्रवृत्तौ निमित्तत्वेनाश्रीयमाणो यावान् शब्दसमुदायस्तद्विशिष्टं शास्त्रं 'स्वा'पेक्षयान्तरङ्गम्, वैशिष्ट्यं च स्वघटकनिमित्तकत्व-स्वघटकेतरानिमित्तकत्वोभयसम्बन्धेनेति । तथा च 'गिर्योः' इत्यत्र बहिरङ्गत्वेन विवक्षितं शास्त्रं यत्वविधायकं, तदेव स्वपदेन ग्राह्यम्, तत्प्रवृत्तौ निमित्तत्वेनाश्रीयमाणः शब्दसमुदायः 'गिरि+ ओस्' इति, तद्विशिष्टत्वमन्तरङ्गत्वेन जिघृक्षिते "भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने" [२. १. ६३.] इति दीर्घविधायके शास्त्रेऽस्त्येव, स्व-बहिरङ्गशास्त्रीयनिमित्तभूतशब्दसमुदायः, तद्घटकरेफनिमित्तत्वेन तदितरघटकोदासीनवर्णानिमित्तत्वेन चोभयसम्बन्धेन तादृशसमुदायविशिष्टत्वस्याक्षतत्वात् । इत्थमेवान्यत्रापि लक्षणं सङ्गमनीयमिति संक्षेपः ॥ २० ॥



## *न स्वरानन्तर्ये* ॥ २१ ॥

**सि०**—पूर्वन्यायोऽनुवर्तते, अन्यथा 'न' इत्यस्यासम्बद्धत्वं स्यात् । यद्यपि न्यायानामेषां ज्ञापकसापेक्षतया न पौर्वापर्यमस्ति, ततश्च न पूर्वेण परस्य न्यायस्य कोऽपि सम्बन्धः, सर्वेषामेषां स्वातन्त्र्यात्, तथापि प्राचां व्याख्यानमनुरुध्य पूर्वन्यायसम्बन्धः परिकल्पनीय एव । तथा च स्वरयोरानन्तर्यं स्वरानन्तर्यं तस्मिन् स्वरानन्तर्ये इति निमित्तार्थे सप्तमी। स्वरयोरानन्तर्यनिमित्तके अन्तरङ्गे [कर्तव्ये] बहिरङ्गमसिद्धं न भवतीति न्यायार्थः । आनन्तर्यं च व्यवधानाभावः, यथा-'द्व्येष, बभूवुषा' इत्यनयोः क्रमशो बहिरङ्गयोर्गुणोषादेशयोरन्तर्भूतनिमित्तकयोर्यथाक्रमं "पूर्वास्यास्वे स्वरे य्वोरियुव्" [४. १. ३७.] इति "धातोरिवर्ण०" [२. १. ५०.] इति च सूत्राभ्यां विहितयोरियुवादेशयोरन्तरङ्गयोः कर्तव्ययोरसिद्धत्वं न भवति, उभयोरपि स्वरस्थानिकत्वेन स्वरादिनिमित्तकत्वेन च स्वरानन्तर्यनिमित्तकत्वात्, तथा च तावादेशौ भवतः । एतस्य न्यायस्य ज्ञापकं च सूत्रकृतां "वृत्त्यन्तोऽसषे" [१. १. २५.] इति निर्देशकरणमेव, अत्र हि वृत्त्यन्तशब्दात् परस्य से रोः "अतोऽति रोरुः" [१. ३. २०.] इत्यनेन विहितस्य उत्वस्य पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गत्वात्, एकपदस्थितवर्णद्वयापेक्षत्वेनान्तरङ्गे "अवर्णस्येवर्णादिनैदोदरल्" [१. २. ६.] इत्यनेनैत्वे कर्तव्येऽसिद्धत्वं यदि स्यात् तर्हि ओत्वं न स्यादिति स निर्देशोऽसङ्गत एव स्यात्, पश्यति च लक्ष्यैकचक्षुष्क आचार्यः स्वरानन्तर्ये पूर्वस्य न्यायस्याप्रवृत्तिमिति तादृशं निर्देशं करोति, तथा च पूर्वन्यायस्य स्वरानन्तर्येऽप्रवृत्तिं विनाऽनुपपद्यमानोऽयं निर्देशः पूर्वन्यायप्रतिषेधकममुं न्यायमाक्षिपतीति सिद्धम् । अयं च न्यायो वस्तुतः पूर्वन्यायस्यानिष्टस्थलेऽप्रवृत्तिसूचक एवेति नास्यानित्यतासंभावना यथा-"स्थानी वा०" [७. ४. १०९.] इति "स्वरस्य परे०"

[ ७. ४. ११०. ] इति परिभाषयोः सजातीयः पूर्वन्यायस्तथा तत्परिभाषयोर्निषेधरूपाया "न सन्धि०" [ ७. ४. १११. ] इति परिभाषायाः सजातीयोऽयं न्याय इति बोद्धव्यम् । वस्तुतस्तु 'इयेष' इत्यत्र स्वे स्वरे परे इयुवादेशविधानसामर्थ्यादेव तत्र नासिद्धत्वं न वा "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११० ] इति स्थानिवद्भाव इति विनाऽपि न्यायं तत्र सिद्धिरिति 'बभूवुषा' इत्येव न्यायोदाहरणं विज्ञेयम् । यत्त्विह—"स्थानिवद्भावमाशङ्क्य "स्वरस्य परे०" [ ७. ४. १००. ] इत्यत्र सप्तमीनिर्देशेन "सप्तम्या [ निर्दिष्टे ] पूर्वस्य" [ ७. ४. १०५. ] इति परिभाषया अनन्तरपरनिमित्त एवादेशः स्थानिवत्, इह च णवा सह गुणस्थानिनि इकारस्य व्यवहितत्वान्न स्थानिवद्भावः इति केचिदूचुः, तन्न युक्तम्—"लघोरुपान्त्यस्य" [ ४. ३. ४. ]इति सूत्रे समुपस्थितस्याक्ङितीत्यस्य क्ङिद्भिन्नप्रत्ययवाचकस्य सप्तम्यन्तत्वेन तत्र च "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ]इत्यस्योपस्थितिरवश्यं स्वीकार्येति तद्विहितो गुणोऽपि प्रत्ययानन्तरस्यैव भवति, किन्तु उपान्त्यस्य कदाचिदपि प्रत्ययानन्तरत्वासम्भवेन*येन नाव्यवधानं तेन व्यवहितेऽपि भवति* इति न्यायेनैकवर्णव्यवधानेऽपि प्रवृत्तिर्भवति, न तावता तस्य परनिमित्तकादेशाभावत्वम् । किञ्च "स्वरस्य परे०" [ ७. ४. ११०. ] इति "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ] इति चोभे अपि परिभाषे, परिभाषाणां च विधिसूत्राणि प्रति शेषतया गुणत्वम्, गुणानां च न परस्परं सम्बन्धः, गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यादिति न्यायात्; युक्तं चैतत्-यथा राजसेवकानां राजानं प्रत्येव सेव्यसेवकभावो न परस्परं सेव्यसेवकभावः, तथा परिभाषासूत्राणामपि परस्परमुपकार्योपकारकभावाभावात् । इत्थं च "स्वरस्य परे०" [ ७. ४. ११०. ] इत्यत्र "सप्तम्या [ निर्दिष्टे०" ७. ४. १०५ ] इत्यस्योपस्थितिरसम्भविनी, तथा च नात्र तत्परिभाषाया उपस्थितिः। किञ्च 'अस्व' इत्यस्य नञा निर्दिष्टत्वेनानित्यत्वेन समाधानमपि न रमणीयम्, नञा निर्दिष्टस्यानित्यत्वे मानाभावात्, प्रत्युत निषेधाश्च बलीयांस इत्यस्यैव युक्तत्वात्, किञ्च तथा सति 'ईषतुः, ईषुः' इत्यादावपि समानदीर्घं प्रबाध्येयादेश एव स्यात्; एवं भवतु वा स्थानिवद्भावस्तथापि स्वेऽपि परेऽत्रेयादेशो भविष्यतीत्यपि निर्युक्तिकमतिप्रसङ्गावहं च वचनम् । पर्जन्यवल्लक्षणप्रवृत्त्या समाधानमपि निरालम्बनमेव, तेन हि न्यायेन निमित्तसद्भावे फलाभावेऽपि लक्षणप्रवृत्तिरित्यायाति, यथा पर्जन्यो जले स्थले वा फलमसमीक्ष्यैव जलं वर्षति तथैव फलाभावेऽपि लक्षणानां प्रवृत्तिरित्यत्रैव तत्तात्पर्यात् । एवं नञा निर्दिष्टस्यानित्यत्वेन पूर्वं समाधाय पश्चात् "न च स्थानिवद्भावेनादेशस्य स्थानिस्वरूपभवनादस्वस्वरास्थित्या कथमियुवाविति शङ्क्यमिति शङ्का निरालम्बनैव, तथाऽस्याः शङ्कायाः 'यतः स्थानिवद्भावेन स्थानिवत् कार्यमेव स्यात् न तु स्थानिवद्रूपम्, वत्करणस्यैतावन्मात्रार्थकत्वात्' इति समाधानमपि चिन्त्यमेव, स्थानिवद्भावेन स्थानिकार्यातिदेशे आदेशप्रयुक्तकार्यस्याभावात्, आदेशस्वरूपसत्त्वेऽपि तस्याकिञ्चित्करत्वात् । अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्' इत्येवमत्रत्यस्तद्ग्रन्थः सर्वोऽपि काशकुशावलम्बनमिव प्रतीयते । अन्ते च 'स्थानिवद्भावपुंवद्भाव" इत्यादिन्यायेन *नानिष्टार्था शास्त्रप्रवृत्तिः* इति न्यायेन वा यत् समाधानमुक्तं तत् कथञ्चित् स्वीकार्यं स्यात्; किन्त्वत्र सूत्रारम्भसामर्थ्यादेव स्थानिवद्भावाभावस्योपपादयितुं शक्यत्वेन वृथागतिकगत्याश्रयणम् । अत एव परिभाषेन्दुशेखरे नागेशेन "पूर्वस्यास्वेस्वरे०" [ ४. १. ३७. ] एतत्सूत्रस्थानीयस्य "अभ्यासस्यासवर्णे" [पा. सू. ६. ४. ७८.] इति सूत्रस्यारम्भसामर्थ्यादेवाभ्यासकार्ये [ द्वित्वे पूर्वस्य कार्ये ] तदुत्तरखण्डस्वरादेशस्य न स्थानिवत्त्वमिति सामान्येनैव ज्ञापितम् ॥ २१ ॥

## *न स्वरानन्तर्ये* ॥ २१ ॥

**त०**—अत्र वृत्तौ पूर्वन्यायस्थपदयोः 'बहिरङ्गम्, अन्तरङ्गे' इत्यनयोरनुवृत्तिः सूचिता, सा चावश्यक्येव । यद्यपि न्यायानां परस्परनिरपेक्षत्वं ज्ञापकसिद्धत्वेन भिन्नदेशस्थत्वं च तथा हि—पूर्वन्यायः "न सन्धिङी०" [ ७. ४. १११. ] इति सूत्रस्थद्विग्रहणेन ज्ञापितः, अयं च "कृत्यन्तोऽसषे" [ १. १. २५. ] इति निर्देशेनेति *यथोद्देशं संज्ञा-परिभाषम्* इति पक्षेऽनयोर्बहुव्यवहितत्वमिति नानुवृत्तिः सम्भवति, तथाप्याचार्यैरुभयोर्न्याययोः सहैव पठिततयाऽव्यवहितत्वमिति तदभिसन्धायैव पदानुवृत्तिः स्वीकृता । दृश्यते चैतन्न्यायस्थानीये *नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः* इति न्याये नागेशादिनापि 'अन्तरङ्गे' इति पदानुवृत्त्याश्रयणम् । तथा हि—तन्न्यायव्याख्याने तेनोक्तम् "परिभाषार्थस्तु—अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वप्रक्लृप्तिर्न, बहिष्पदेन बहिरङ्गम्, तस्य भावो बहिष्ट्वं बहिरङ्गत्वं [तस्य], तत्प्रयुक्तासिद्धत्वस्य न प्रक्लृप्तिः—न प्राप्तिरिति । 'असिद्धं बहिरङ्गम्' [ अन्तरङ्गे ] इत्युक्त्वा* नाजानन्तर्ये* इति वक्ष्यामीति भाष्योक्त्या तत्रत्यस्य 'अन्तरङ्गे' इत्यस्यानुवृत्तिसूचनात्" इति । तथा च यथा तत्र नये भाष्योक्तिप्रामाण्यादनुवृत्तिः कल्प्यते तथा स्वमतेऽपि सहपाठसामर्थ्यात् सा साध्या । केचित्तु—"न्याययोर्ज्ञापकदेशस्थत्वस्यौचित्येनोभयोर्भिन्नदेशस्थतया तत्र परस्परमसामीप्यान्न पदानुवृत्तिसम्भवः । * नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति* न्याये च 'अन्तरङ्गे' इत्येतावन्मात्रमेवानुवर्तनीयं, तच्च बहिष्ट्वपदार्थस्य नित्यसाकाङ्क्षत्वेन

लभ्यत एवेति न भाष्यव्याख्यानेन तदनुवृत्तिः कल्पनीया" इत्याहुः । परं स्वमते त्वेवं न सम्भवति बहिष्षुपदस्यापि तत्रासत्त्वादिति न्याययोरिह पाठकृतमेव पूर्वपरत्वमाश्रित्यानुवृत्तिः साधनीयैव गत्यन्तराभावात् । न्यायार्थे च जातस्य बहिरङ्गस्येत्युक्त्या समकालप्राप्तिकस्य बहिरङ्गस्य पूर्वन्यायेनासिद्धत्वं भवत्येव, अन्यथा 'अयजे + इन्द्रम्' इत्यादौ 'अयज + इ + इन्द्रम्' इति स्थितौ समकालप्राप्तिकस्य बहिरङ्गस्य समानदीर्घत्वस्याऽपि स्वरानन्तर्यनिमित्तककार्यत्वादसिद्धत्वाभावे शब्दपरविप्रतिषेधेन समानदीर्घे कृते तन्न सिद्ध्येत् । किञ्च समकालप्राप्तिकस्यापि बहिरङ्गस्यानेनासिद्धत्वाभावबोधने "ओमाङि" [ १. २. १८. ] इति सूत्रे आङ्ग्रहणस्य वैयर्थ्यमेव स्यात्, 'अद्य + आ + ऊढ' इति स्थितौ समानदीर्घस्यापि स्वरानन्तर्यनिमित्तकत्वादसिद्धत्वाभावे पूर्वं दीर्घे ओत्वे च रूपसिद्धेः । 'स्वरानन्तर्ये' इति पदस्य 'स्वरयोरान्तर्ये' इति यद् व्याख्यानं कृतं तत् प्राचामनुरोधेन वस्तुतस्तु--स्वरस्यान्यानन्तर्यमेवापेक्षितम्, तत्रान्यः स्वरो वा भवतु व्यञ्जनं वा, न तत्राग्रहः, तथा च सति लक्ष्ये क्वचिदन्यानन्तर्यनिमित्तकेऽपि कार्येऽस्य न्यायस्य प्रवृत्तिरुपपादयितुं शक्यते । एतन्न्यायज्ञापकेन च पूर्वन्यायस्यानित्यतामेव ज्ञापयन्ति केचित्, परन्तु तन्न शोभनम्--अननुगतानित्यत्वकल्पनापेक्षया वचनज्ञापनस्यैव साधीयस्त्वात्; किञ्चैवं पूर्वन्यायस्यानित्यत्वकल्पनादेव सिद्धे *अन्तरङ्गानपि विधीन् बहिरङ्गो यप् बाधते* इत्यादिन्यायानामपि वैयर्थ्यप्रसङ्गादिति ॥ २१ ॥

## *गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः* ॥ २२ ॥

सि०—गुणादागतो गौणः गुणादिति पञ्चमी हेतौ, आङ्पूर्वकागम्धातोर्ज्ञानमर्थः, क्तप्रत्ययार्थो विषयताश्रयः, ज्ञानं चेहारोपात्मकं हेतुबोधकपदसान्निध्यात्, गुणपदं गुणज्ञानपरम्, तथा च गुणप्रतिसन्धानप्रयोज्यारोपीयविषयताश्रयोऽर्थः--गौणोऽर्थः, यथा गोशब्दस्य जाड्यादिगुणनिमित्तो वाहीकार्थः 'गौर्वाहीकः' इत्यादौ, अप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुध्यते । मुखमिव प्रधानत्वान्मुख्यः प्रथमः प्रधान इत्यर्थः । गौणे ह्यर्थे शब्दः प्रयुज्यमानो मुख्यार्थारोपेण प्रवर्तते, एवं चाप्रसिद्धत्वं गौण लाक्षणिकत्वं चात्र गौणत्वम् । तथा च गौणमुख्ययोरर्थयोः सम्भवतोर्मध्ये मुख्य एवार्थे कार्यसम्प्रत्ययः, मुख्यार्थबोधक एव शब्दे कार्यप्रवृत्तिरिति न्यायार्थः । एतन्न्यायोपष्टम्भादेव "चरणस्यस्थेणोऽद्यतन्यामनुवादे" [ ३. १. १३८. ] इति सूत्रं स्थेणोः कर्तुश्चरणस्येत्यादिना व्याख्यातम्, तथाहि--"तत्रत्योऽयं वृत्तिग्रन्थः—"शाखाध्ययननिमित्तकव्यपदेशभाजो द्विजन्मानश्चरणाः कठादयः; प्रमाणान्तरप्रतिपन्नार्थस्य शब्देन सङ्कीर्तनमनुवादः, यज्ञकर्मणि संशितानुशंसनमित्येके, अनुकरणमित्यपरे, अद्यतन्यां परभूतायां यौ स्थेणौ तयोरनुकथने कर्तृत्वेन सम्बन्धिनो ये चरणास्तद्वाचिनां शब्दानां स्वैर्द्वन्द्वोऽनुवादविषये एक एकार्थो भवति" इति, यथा--उदगात् कठकालापम्, प्रत्यष्ठात् कठकौथुमम्, एषामुदयप्रतिष्ठे कश्चिदिहानुवदति, तत्र प्रतिष्ठोदयौ प्रति कठादीनां कर्तृत्वेन सम्बन्धित्वम्, सूत्रे च चरणस्येति सम्बन्धसामान्यमुक्तम्, तथापि क्रियावाचकयोः स्थेणोः सम्बन्धित्वं कर्तृत्वादिना कारकेण भवतीति तत्र कारकचक्रप्रयोक्तृत्वेन कर्तुरेव सम्बन्धित्वेन ग्रहीतुमौचित्यं मुख्यत्वादिति तादृशव्याख्यानमेतन्न्यायसत्त्वमूलकमेव । कर्तृत्वेन सम्बन्धित्वस्य ग्रहणाच्च करणत्वादिना सम्बन्धित्वे न भवति समाहारद्वन्द्वः, यथा प्रत्यष्ठात् कठ-कलापाभ्यां कश्चिदित्यादौ । अत्रैतन्न्यायबलादेव कर्ताऽपि यत्र मुख्यस्तत्रैव समाहारो भवति, गौणत्वभाजा च कर्त्रा सम्बन्धे सत्यपि न भवति, यथा प्रत्यष्ठायि कठ-कालापाभ्याम्' इत्यादाविति । अत्र हि भावे प्रत्ययस्य विधानात् कठ-कालापयोः कर्तृत्वे सत्यपि भावस्यैव प्राधान्येन, कर्तुस्तदनुयायित्वान्न प्राधान्यमिति केचिदाहुः, तन्न रोचयामहे, द्विधा न्यायव्यापाराभावात्, एकदा हि न्यायव्यापारेण कर्तृत्वेन सम्बन्धित्वमिति लब्धं पुनः कर्तुः प्राधान्यलाभार्थं न्यायप्रवर्तनाभावात् । किञ्च भावे प्रत्यये सति कर्तुरप्राधान्यमिति कुतः समायातम्? कर्ता हि तादृश्यामवस्थायामपि कारकेषु प्रधानमेव क्रियां प्रत्यपि तस्य प्राधान्यमक्षतमेव, केवलं भावार्थकप्रत्ययेन तदनभिधानात् कथं तस्य प्राधान्यं व्याहन्येत, तथा च सति कर्मणि प्रत्ययेऽपि तत्प्राधान्यं न स्यात्, तत्रापि प्रत्ययेन कर्तुरनभिधानस्य सत्त्वात्, कर्त्रनुकूलसंख्याद्यभावोऽप्युभयत्र समान एव, तथा च यदीह भावे प्रयोगः प्रसिद्धस्तर्हि प्रत्यष्ठापि कठकौथुमेनेत्येव भवितव्यं विपरीतप्रयोगे प्रमाणाभावात् । लोकसिद्ध एवायं न्याय इति यद्यपि नास्त्यत्र ज्ञापकापेक्षा तथापि प्राचां रीत्या ज्ञापकमपि प्रदर्श्यते, तथा हि--"चरणस्य" [ ३. १. १३८. ] इति सूत्रे सम्बन्धविशेषानुल्लेख एव तत्र ज्ञापकः, कर्तृत्वेन सम्बन्ध एवेहेष्ट इति जानतापि लक्ष्यैकचक्षुष्केणाचार्येण सम्बन्धविशेषनिश्चायकस्य कर्त्रादिपदस्याप्रयोग एतन्न्यायस्य व्याकरणेऽपि नियामकत्वमिति ज्ञापयतीत्यवगम्यते । किञ्चायं न्यायो न नामसम्बन्धिनि कार्ये प्रवर्तते, किन्तूपात्तं विशिष्यार्थोपस्थापकं विशिष्टरूपं यत्र तादृशपदकार्ये एव प्रवर्तते, परिनिष्ठितस्य पदान्तरसम्बन्धे हि गौणत्वप्रतीतिर्न त्वपरिनिष्ठितस्येति "धातोरिवर्णोवर्णस्य०" [ २. १. ५०. ] इत्यादीनां यथा 'शिश्रियतुः, लुलुवतुः' इत्यादौ प्रवृत्तिस्तथैव 'नियो भुवौ' इत्यादौ क्विबन्त-

त्वप्रयुक्तगौणधातुसम्बन्धिनोरपीवर्णोवर्णयोः, तत्र धातोरित्यस्य विशिष्टार्थोपस्थापकत्वेऽपि कार्यिणोरिवर्णोवर्णयोर्विशिष्टार्थोपस्थापकत्वाभावात् । एवं चैतदर्थं न्यायानित्यत्ववर्णनक्लेशो न कर्तव्यः, सकललोकसिद्धस्य च न्यायस्यानित्यत्वं तु वर्णयितुमपि न युक्तम् । एवं च वसु इच्छतः—वसूयतः, ततः क्विपि "अतः" [ ४. ३. ८२. ] इत्यल्लोपे "योऽशिति" [ ४. ३. ८० ] इति यलोपे नामत्वादौकारादिषु स्यादिषु 'वस्वौ, वस्वः' इत्यादौ धातोरिवर्ण०" [ २. १. ५०. ] इत्यस्य प्रवृत्तिर्निराबाधेति तद्बाधनार्थस्य "स्यादौ वः" [ २. १. ५७. ] इत्यस्य सार्थक्यं स्पष्टमेवेति नानित्यताज्ञापकत्वमित्यपि विज्ञेयम् । किञ्च क्विबन्तेषु धातुत्वं न गौणम्, गौणत्वस्य पूर्वन्दर्शितस्य तेष्वभावात्, तत्र हि धातुत्वस्य*क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते इति न्यायेनैव लब्धत्वात् । *प्रधानानुयोगिनो व्यवहाराः* *प्रधानानुयाय्यप्रधानम्* इति न्यायावेतन्न्यायसमानार्थकतया प्रतिभाससमानत्वेन न्यायेन गतार्थौ न वेति विवेचने प्रस्तुते गौणशब्दस्यात्र मुख्यभिन्नपरत्वमास्थायानेनैव गतार्थौ ताविति केचित् । वस्तुतस्तु प्रथमस्य लक्ष्यं यदुक्तम्—'मुनीमित्यादाविकारस्य शसोऽकारस्य चेत्युभयोः स्थानित्वेऽपि 'ई' दीर्घः स्यान्नत्वकारस्यासन्न आः, 'शतोऽता सह' इति सहार्थनिर्देशेन शसोऽकारस्य गौणत्वाद्' इति, तत्रेदं विचारणीयं–गौण-मुख्ययोरुभयोः पार्थक्येन कार्ययोगित्वे गौणस्य कार्यं न स्यात्, मुख्यस्यैव स्यादिति तात्पर्यकस्यास्य न्यायस्य तत्र कः प्रसर इति, अत्र हि उभयोः स्थाने कार्यमेकमेव विधेयमिति न गौणस्य कार्ययोगाभावः कर्तुं शक्यते । तथा च षष्ठ्या निर्दिष्टस्यैव स्थानित्वं स्थानिन एव चासन्न आदेश इति "आसन्नः" [ ७. ४. १२० ] इति परिभाषासहकारेणैव तत्र निर्णयो युक्तः, सति चानियमसन्देहे *प्रधानानुयायिनो व्यवहाराः* इति लोकसिद्ध एव न्याय आलम्बनीयः, न च तावता गौरवमुद्भावनीयम्, स्वतः सिद्धस्य स्वीकारे गौरवचर्चानवकाशात् । एवं *प्रधानानुयायि अप्रधानम् *इत्यपि चेन्न्यायस्तर्हि *प्रधानानुयायिनो व्यवहाराः *इत्यस्यैव रूपान्तरमिति स्वीकार्यं, न पृथक् तस्य न्यायान्तरत्वम्, तदाग्रहे च सोऽप्यास्तां नाम, न स्वतः सिद्धवस्तुस्वीकारे भारः । विवेचितं चैतदन्यत्रेति ॥ २२ ॥

## *गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः* ॥ २२ ॥

त०—शब्दस्य हि द्विधा प्रयोगः-मुख्यो गौणश्च, मुख्यस्तावदनादिपरम्पराऽवगतार्थविषयः, गौणश्च गुणनिमित्तकः, कस्यचिद् गुणं क्वचिदवलोक्यारोप्य चातद्वाचकः शब्दस्तत्र प्रयुज्यते स एव गौणः शब्दः, तस्य चार्थनिष्ठगौणत्वमादाय गौणत्वेन व्यवहारः, वस्तुतः शब्दे गौणत्व-मुख्यत्वयोरभावात् । तथा च गौणशब्दार्थो वृत्तौ निरूपितः गुणप्रतिसन्धानप्रयोज्यारोपीयविषयताश्रय इति, तस्य च स्वशक्यतावच्छेदकसमानाधिकरणगुणप्रतिसन्धानप्रयोज्यस्वशक्यतावच्छेदकप्रकारकारोपीयविषयताश्रयोऽर्थः स्वस्य गौणोऽर्थ इति तात्पर्यम् । यथा गौर्वाहीक इत्यादौ गोपदशक्यतावच्छेदकं गोत्वं, तत्समानाधिकरणं यज्जाड्यमान्द्यादिकं, तस्य वाहीके–संस्कारहीने पुरुषविशेषे ज्ञानात् गोपदशक्यतावच्छेदकं गोत्वं तत्रारोप्यत इति वाहीको गोपदस्य गौणोऽर्थः । एवं–'महद्भूतश्चन्द्रमाः' इत्यत्र महत्त्वसमानाधिकरणस्य शिवशिरोवहनकर्मत्वस्य कलङ्किन्यपि चन्द्रे दर्शनात् तत्र महत्त्वारोप इति चन्द्रतात्पर्यको महच्छब्दः प्रकृते गौण इति "महतः कर-घास-विशिष्टे डाः" [ ३. २. ६८. ] इति डा न भवति; एवं यः कश्चित् पुत्रादेः रामेति कृष्णेति वा नाम करोति स रामादिगतपित्राज्ञापालनकर्तृत्वादिकं गुणं पुत्रादावारोप्य तद्धेतोश्च रामत्वादिकमारोप्य रामत्वादिना बोधं करोति । तथा च गुणप्रतिसन्धानप्रयोज्यशक्यतावच्छेदकप्रकारकबोधविषयत्वरूपगौणत्वस्य तत्रापि समन्वय इति तदुपाश्रित्यैवाप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुध्यत इत्युक्तं वृत्तौ इयानेव विशेषो यदेकत्र गुणप्रतिसन्धानं प्रमात्मकमपरत्र भ्रमात्मकमिति । ननु संज्ञा नाम शब्दो, गौणश्चार्थ इति संज्ञादिरपि गौण इत्यसंगतम्, इति चेत्? न—संज्ञादिरिति पदस्य संज्ञा आदिः–प्रथमो बोधको यस्येत्यर्थपरत्वात्, सम्यग् ज्ञायते–बोध्यत इति संज्ञेति व्युत्पत्त्याऽर्थस्यैव लाभाच्च । एतन्न्यायप्रवृत्तिस्थलनिरूपणप्रसङ्गेन वृत्तौ 'उपात्तं विशिष्यार्थोपस्थाकं विशिष्टरूपं यत्र तादृशे पदकार्ये एव प्रवर्तते' इत्युक्तम्, तत्र उपात्तमित्यस्य सूत्रे उच्चार्यमाणमित्यर्थः, विशिष्यार्थोपस्थापकमित्यस्य स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नबोधकमित्यर्थः, विशिष्टरूपमित्यनेन स्ववृत्तिधर्म आनुपूर्वीरूप एव बोध्यते, तथा च स्ववृत्त्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकपदोपादान एव न्यायः प्रवर्तत इति पदत्रयेण बोधितम् । "अत इञ्" [ ६. १. ३१. ] इत्यादावत्पदस्य नामपदस्य वाऽऽनुपूर्वीरूपत्वाभावेन तदुपादानं न विशिष्टरूपोपादानम्, अत एव गौणेऽपि तस्य प्रवृत्तिः । नन्वेवं विशिष्टरूपोपादान एवास्य न्यायस्य प्रवृत्तिस्वीकारे च्व्यन्तस्य निपातत्वेन चादि[ अव्यय]त्वेन च 'अगौगौः समपद्यत गोऽभवत्' इत्यादौ "ओदन्तः [ १. २. ३७. ] इति सूत्रेणासन्धिवारणाय "ओत्" [ पा० सू० १. १. १५. ] इति सूत्रे महाभाष्ये गौण-मुख्यन्यायाश्रयणं विरुध्येत, ओत्पदस्य निपातपदस्य [ चादिपदस्य ] वा पूर्वोक्तरीत्या ओदन्तत्वाद्यवच्छिन्नविषयताप्रयोजकत्वेन आनुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वाभावेन विशिष्टरूपोपादानाभावादिति चेत्? न–निपातपदं [चादिपदं]

चादित्वेनैव चादीनामुपस्थापकमिति चादित्वस्यानुपूर्वीरूपत्वाद् विशिष्टरूपोपादानसत्त्वात् । ननु चत्वावच्छिन्ने वात्वावच्छिन्ने एवंरूपेण शक्तिकल्पनायामपि स्ववृत्त्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वस्याभाव एवेति चेत्? न–स्ववृत्तित्वं विहायानुपूर्व्यवच्छिन्नत्वस्यैव लक्षणे प्रवेशात् । ननु तथा सति शक्यतावच्छेदकभेदेन शक्तिभेदापत्त्या सर्वधर्मावच्छिन्नस्यैकदा बोधाभाव इति चेत्? न–चाद्यन्यतमत्वावच्छिन्ने शक्तिकल्पनया शक्यतावच्छेदकभेदाभावेन शक्तिभेदाभावात् । नन्वानुपूर्व्या साक्षादवच्छिन्नमुख्यविशेषताप्रयोजकपदोपादानं विशिष्टरूपोपादानमिति वक्तव्यम्, अन्यथा नामपदवृत्तिविषयताया नामत्वरूपानुपूर्व्या साक्षादवच्छिन्नत्वेन नामपदवत्त्वावच्छिन्नमुख्यविशेष्यतायाः परम्परयाऽऽनुपूर्व्यवच्छिन्नत्वेन नामपदोपादानस्यापि विशिष्टरूपोपादानत्वापत्तिः, उक्तनिवेशे त्वाद्यविशेष्यताया मुख्यविषयतात्वविरहात्, अन्त्यायाः साक्षादवच्छिन्नत्वाभावान्न दोषः, तथा च निपातपदस्य [ चादिपदस्य ] चाद्यन्यतमत्वावच्छिन्नत्वाङ्गीकारेऽपि तत्पदीयमुख्यविशेष्यतायाश्चत्वाद्यानुपूर्व्या साक्षादवच्छिन्नत्वविरहात्, चत्वादिना साक्षादवच्छिन्नायाश्च मुख्यविशेष्यतात्वाभावात् नामपदस्येवास्याप्युपादानं न तादृशम्, स्वेन साक्षादवच्छिन्नत्वं स्वावच्छिन्नत्व-स्वावच्छिन्नावच्छेदकतानिरूपितावच्छेद्यत्वाभाववत्त्वोभयसम्बन्धेन स्वविशिष्टत्वम्, मुख्यत्वं च विशेष्यतायां प्रकारत्वासामानाधिकरण्यम् । किञ्च निपातपद [ चादिपद ] इव नामपदेऽपि घटाद्यन्यतमत्वावच्छिन्ने शक्त्यापत्तिः । न च घटादीनामानन्त्याच्चादीनां च परिसंख्यातत्वान्नायं दोष इति वाच्यम्, चादेरप्याकृतिगणत्वेनोभयोः साम्यादिति चेत्? अत्र वदन्ति "ओत्" [ पा० सू० १. १. १५. ] इति सूत्रस्थमहाभाष्यप्रामाण्यान्निपातपदस्य [ चादिपस्य ] स्वाश्रयसङ्केतवत्त्वसम्बन्धेन निपातत्व-चादित्वरूपानुपूर्वीविशिष्टे शक्तिः कल्प्यते । तथा च निपात [ चादि ] पदप्रयोज्यमुख्यविशेष्यतानिरूपिता स्वाश्रयसङ्केतवत्त्वसम्बन्धावच्छिन्ना साक्षादवच्छेदकता निपातत्वरूपानुपूर्वीनिष्ठेति विशिष्टरूपोपादानत्वमुपपन्नम् । नामपदे च स्वनिरूपितसङ्केतवत्त्वसम्बन्धेन नामपदविशिष्टे शक्तिरिति मुख्यविशेष्यता नामपदेनैव साक्षादवच्छिन्ना न त्वानुपूर्व्येति न तत्र विशिष्टरूपोपादानत्वमिति दिक् । पदकार्यत्वं च विभक्त्यनिमित्तकत्वे सति स्त्रीत्वानिमित्तकत्वम्, अत एव "ओत औः" [ १. ४. ७४. ] "आ अम्-शसोऽता" [१. ४. ७५.] "भाजगोणनागस्थल०" [ २. ४. ३०. ] इत्यादीनां विभक्तिस्त्रीत्वनिमित्तकत्वेन गौणेऽपि प्रवृत्तेः । तेषामुक्तरूपपदकार्यत्वाभावात् तत्रैतन्न्यायाऽप्रवृत्तिः । स्थौल्यगुणयोगाद् गजवाचिनागशब्देऽन्यत्र प्रयुक्ते 'नागी स्थूला' इत्युदाहृतं वृत्तौ । एवं "त्रेस्त्रयः" [ १. ४. ३४. ] इत्यस्यापि पदकार्यत्वाभावाद् गौणेऽपि प्रवृत्तिरिति प्रियत्रयाणामिति दीक्षितादयः । पदकार्ये प्रवृत्तौ बीजमुक्तम्–'परिनिष्ठितस्य पदान्तरसम्बन्धे हीत्यादिना वृत्तौ' अनेन यस्मिन् समये गौणत्वप्रतीतिस्तस्मिन् समयेऽस्य न्यायस्य कार्याभाव इति सूचितम्, तेन च नामसंस्कारवेलायां गौर्वाहीक इत्यादौ न गौणत्वप्रतीतिरिति न्यायप्रवृत्त्यभावादौत्वं सिद्धयति । यदि च तत्रापि कदाचिन्नामसंस्कारवेलायामेव गौणत्वप्रतीतिस्तर्हि न्यायः प्रवर्तेत एवेति 'गोर्वाहीक' इत्येव रूपमिति केचित् । ननु विभक्त्यनिमित्तकत्वांशस्यैतत्फलितत्वेऽपि स्त्रीत्वानिमित्तत्वांशे किं प्रमाणमिति चेत्? न–"भाज-गोण-नाग०" [ २. ४. ३०. ] इति सूत्रे नागग्रहणस्यैव तत्र मानत्वात्, अन्यथा गजवाचिनागशब्दात् मुख्येऽर्थे "जातेरयान्तनित्यस्त्रीशूद्रात्" [ २. ४. ५४. ] इत्यनेनैव ङीः सिद्ध इति तस्य वैयर्थ्यं स्पष्टमेव, उक्तांशज्ञापने तु गौणे चारितार्थ्यं भवतीति न वैयर्थ्यम् । न च तत्रापि जातेरित्येवसिद्धमारोपितगजत्वजातिप्रकारेणैव तत्र बोधादिति वाच्यम्, स्वसामानाधिकरण्य-स्वनिष्ठप्रकारतानिरूपितत्वोभयसम्बन्धेन जातिविशिष्टविषयताकबोधजनकत्वरूपजातिवाचकत्वाभावात् । गां पाठयेत्यादौ मुख्यगोपदार्थस्य पाठनकर्मत्वासम्भवेन विभक्त्युत्पत्तिवेलायां प्रयोक्तृभिर्गौणार्थत्वस्य प्रतीतावप्यपदस्याप्रयोगेण बोद्धृभिः सर्वत्र पदस्यैव गौणार्थत्वस्य ग्रहेण, 'अत्वं त्वं सम्पद्यते, अमहान् महान् भूतः' त्वद्भवतीत्यादौ भाष्यप्रयोगे त्वाद्यादेशदीर्घादीनां करणेन चास्य न्यायस्य पदकार्यविषयकत्वम्, अयमाशयः–यद्यपि 'गां पाठय' इत्यादौ कर्मत्वाय पाठनक्रियान्वयस्य विभक्त्युत्पत्तिवेलायामेवावश्यकत्वेन मुख्यगोपदार्थस्य पाठनान्वयासम्भवात् गोपदस्य गौणार्थकत्वस्य वक्तुमुचितत्वेन विभक्त्यनिमित्तकत्वांशस्य न फलमिति प्रतिभाति, तथाप्युच्चारणानन्तरमेवार्थप्रतीतिः, उच्चारणं तु पदस्यैव, 'अपदं न प्रयुञ्जीत' इति भाष्यात्, तथा च पदत्वसिद्ध्युत्तरमेव श्रोतुर्गौणार्थत्वग्रहः, यदा च श्रोतुर्गौणार्थत्वग्रहसम्भवस्तदैव गौण-मुख्यन्यायप्रवृत्तिरिति कल्पनात्, प्रयोक्तुः पूर्वं गौणार्थकत्वग्रहेऽपि न न्यायप्रवृत्तिः । ननु प्रयोक्तुरेव प्रयोजननिमित्तज्ञानं भवितुं युक्तमिति तस्यैव मुख्यार्थ-तात्पर्ये शास्त्रप्रवृत्तिर्गौणार्थतात्पर्ये च शास्त्राप्रवृत्तिरित्येव कल्पना ज्यायसीति विभक्तिनिमित्तकार्ये न प्रवृत्तिरिति न फलितम्, गां पाठयेत्यादौ विभक्त्युत्पत्तिवेलायामेव गौणार्थतात्पर्यस्यावश्यकत्वादिति चेत्? तर्हि 'अत्वं त्वं सम्पद्यते, अमहान् महान् सम्पद्यते' इत्यादौ [ युष्मच्छब्दस्य ] त्वाद्यादेश[महच्छब्दस्य] दीर्घादीनां महाभाष्यकृता प्रयुक्तत्वेनास्य पदकार्यविषयकत्वं स्वीकार्यमिति । 'अत्वं त्वं सम्पद्यते' इत्यत्र च्विप्रत्ययो वैकल्पिकत्वान्न भवति, एवम्–अमहान् महान् भूत इत्यत्रापीति बोध्यम्, च्विप्रत्ययाभावेऽप्यारोपितसम्बोध्यत्वादिप्रकारेणैव बोधाद् गौणत्व-

मस्त्येव । ननु वाक्यसंस्कारपक्षाश्रयणे 'अत्वं त्वं सम्पद्यते' इत्यादौ न्यायाप्रवृत्त्यर्थं पदकार्यविषयत्वं न्यायस्येति कल्प्यते, तन्न युक्तं-पदसंस्कारपक्षाश्रयणेन तत्र दोषाभावात्, तथाहि-त्वाद्यादेशकरणेन पदं संस्कृत्याभूततद्भावविवक्षायां जातसंस्कारस्य बाधायोगेनैतेषु दोषाभावः, एकतरपक्षेण लक्ष्ये सिद्धे पक्षान्तराश्रयणेन दोषदानस्यादुष्टत्वादिति चेत्? अत्रोच्यते "शुक्लामित्युक्ते कर्मनिर्दिष्टं कर्तृ-क्रिये चानिर्दिष्टे इत्याद्युक्त्वा, इहेदानीं गामभ्याज कृष्णां देवदत्तेत्यादौ सर्वं निर्दिष्टम्, गामेव कर्म, देवदत्त एव कर्ता, अभ्याजैव क्रियेत्यर्थकेन "अर्थवत्०" [ पा० सू० १. २. ४५. ] सूत्रस्थभाष्येण 'कारकादिमात्रप्रयोगे योग्यसर्वक्रियाध्याहारे प्रसक्ते नियमार्थः क्रियावाचकादिप्रयोगः' इत्येतत्तात्पर्यकेण सामान्यतः क्रियाजन्यफलाश्रयत्वविवक्षायां द्वितीयादीनां साधुत्वान्वाख्यानस्य लाभेन, पाठनक्रियान्वयकाले प्रयोक्तुरपि पदस्यैव गौणार्थत्वप्रत्ययाद् गां पाठयेत्यादौ व्यभिचाराभावेन पदकार्यविषयत्वस्य निर्बाधत्वात् । अयमाशयः- 'शुक्लाम्' इत्युक्ते कर्म निर्दिष्टमित्यादिप्रदर्शितभाष्येण सामान्यतः क्रियाकर्मत्वविवक्षया द्वितीयादेः साधुता भवतीत्यर्थस्य लाभेन गौणस्थलेऽपि मुख्यार्थ एव क्रियाकर्मत्वविवक्षया पदं संसाध्य पश्चाद् गौणार्थविवक्षा प्रयोक्तुरपि भवतीत्ययमर्थः स्फुटं प्रतीयते । तेन फलितमेवेदं-'पदकार्येऽयं न्यायः प्रवर्तते, न प्रातिपदिक[नाम]कार्ये इति । एवमेतन्न्यायमूलकः—

"अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥"

इति प्राचीनश्लोकोऽपि पदकार्यविषयक एव । ध्वनितं चास्य न्यायस्य पदकार्यविषयकत्वम् सर्व-विश्वादीन् पठित्वा 'इत्यसंज्ञायां सर्वादिः' इति गणनिर्देशेऽसंज्ञायामिति वदता वृत्तिकृता, तथाहि-संज्ञाभूतानां सर्वादीनां मुख्यसर्वादित्वाभावेनैतन्न्यायेनैव संज्ञाभूतानां वारणसंभवे 'असंज्ञायाम्' इति कथनं व्यर्थमेव स्यात्, अस्य पदकार्यविषयकत्वे च नामकार्येषु स्मैस्मातादिषु न्यायस्याप्रवृत्त्या संज्ञाभूतानामपि तत्र सर्वादित्वेन ग्रहणे प्रसक्ते भवत्यसंज्ञायामित्यस्य सार्थक्यम् । ननु 'गौर्वाहीकः, गां पाठय' इत्यादौ गौण-मुख्यन्यायेन वृद्ध्यात्वयोरप्राप्तिमाशङ्क्य 'अर्थाश्रय एतदेवं भवति, शब्दाश्रये च वृद्ध्यात्वे' इति "ओत्" [ पा० सू० १. १. १५. ] इति सूत्रे भाष्ये समाधानकरणेन नामकार्यत्वेन तत्र न्यायप्रवृत्तिवारणं तद्भाष्यविरुद्धमिति चेत्? न-'लौकिकार्थवत्त्वयोग्यपदाश्रय एष न्यायः, तद्रहितशब्दाश्रये च वृद्ध्यात्वे' इत्येतत्तात्पर्यकत्वात् तस्य भाष्यस्य । अयमाशयः- लौकिकार्थवत्त्वस्य पदे एव सत्त्वेन 'अर्थाश्रय' इत्यस्य पदाश्रय इत्यत्रैव तात्पर्यम्, 'शब्दाश्रय' इत्यस्य च नामाश्रय इत्यत्र तात्पर्यमिति । *प्रधानानुयायिनो व्यवहाराः* इति न्यायस्योदाहरणप्रसङ्गे 'मुनीन्' इत्युदाहरणमुक्तं कैश्चित्, तत्र 'व्यवहाराः' इत्यस्य यदि कार्याणीत्यर्थस्तदा तु न तस्यैतन्न्यायात् पार्थक्यमिति यद्यपि प्रतीयते, तथापि न मुनीनित्यादिप्रयोगा एतदुदाहरणानि, उक्तरीत्यास्य न्यायस्य पदकार्यविषयकत्वस्य व्यवस्थापितत्वात्, नहि मुनीनित्यत्र पदकार्ये न्यायोपयोगः, अपि तु नामसंस्कारवेलायामेवेति तत्रास्य प्रवृत्तेरसम्भवात् । तथा च व्यवहारा इत्यस्य व्यपदेशा इत्यर्थ इति स्वीकार्यम्, यथा-ब्राह्मणग्रामोऽयमिति वर्णान्तरेष्वपि ग्राममध्ये वसत्सु ब्राह्मणानामेव तत्र प्राधान्येन ब्राह्मणग्रामत्वेन व्यपदेशो भवति । तथा च पृथगेवायं न्याय इति नास्य न्यायस्य गौण-मुख्यन्यायेऽन्तर्भावः, मुनीनित्यत्र "शसोऽता शश्च नः पुंसि" [ १. ४. ४९. ] इति दीर्घो विधेयः, स कस्यासन्नः स्यादिति विचारणा, तत्र समानस्येति षष्ठ्यन्तं स्थान्यनुवर्तते, 'अता' इति सहार्थतृतीयान्तनिर्दिष्टोऽकारः कथं कार्यभाक् स्यात्, स्थानार्थबोधकषष्ठ्यभावात्; स च यदि स्थानिनि समान एवात्मानमन्तर्भावयेत् तदैव स्यादिति तत्रान्तर्भूतस्यास्य तद्ग्रहणेनैव ग्रहणमित्युचितमेव समानमात्रस्य स्थानित्वमिति तदासन्न ईकार एव 'दीर्घः' स्यादेकवचननिर्देशाच्चेति नात्र न्यायस्यावश्यकताऽनियमाप्राप्तेरिति नेदमुदाहरणमुक्तन्यायस्येति बोध्यम् । एवं *प्रधानानुयाय्यप्रधानम्* इति न्यायः प्रस्तुतस्तत्रैव । तल्लक्ष्यं च-नीलोत्पलमित्यादावुत्पलस्यापि विशेषणत्वविवक्षायाम् "विशेषणं विशेष्येणैकार्थं कर्मधारयश्च" [ ३. १. ९६. ] इति समासे उत्पलशब्दस्य पूर्वप्रयोगाभावः' इत्युक्तम् । अयमर्थः पाणिनीये तन्त्रे महाभाष्यकृता इत्थं निर्णीतः-"विशेषणं विशेष्येण बहुलम्" [ पा० सू० २. १. ५७. ] इति सूत्रे, तथाहि-"विशेषण-विशेष्ययोरुभयविशेषणत्वादुभयविशेष्यत्वादुपसर्जनाप्रसिद्धिः" [ आक्षेपवार्तिकम् ], विशेषण-विशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनत्वस्याप्रसिद्धिः । कृष्णतिला इति कृष्णशब्दोऽयं तिलशब्देनाभिसम्बध्यमानो विशेषणवचनः सम्पद्यते, तथा तिलशब्दः कृष्णशब्देनाभिसम्बध्यमानो विशेषणवचनः सम्पद्यते, तदुभयं विशेषणं भवत्युभयं च विशेष्यम् । विशेषण-विशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेषत्वादुपसर्जनत्वस्याप्रसिद्धिः [ भाष्यम् ], अयमाशयः—विशेषणाभिमत-विशेष्याभिमतयोरुभयोरपि विशेषणत्व-विशेष्यत्वरूपरूपद्वयस्य सत्त्वात् समासे सति तयोरुभयोरप्यनियतः पूर्वनिपातः प्राप्नोति । उपसर्जनाप्रसिद्धिरित्यस्योपसर्जननियमाप्रसिद्धिरित्यर्थः । तत्र मते समासशास्त्रे प्रथमान्तत्वेनोक्तस्य उपसर्जनसंज्ञा भवति, "प्रथमानिर्दिष्टं समास उपसर्जनम्" [ पा० सू० १. २. ४३. ] इति सूत्रेण, "उपसर्जनं पूर्वम्" [ पा० सू० २. २. ३०. ] इति सूत्रेण च तस्य पूर्वप्रयोगो विधीयते; यथा स्वमते "प्रथमोक्तं प्राक्" [ ३. १.

१४८.] इति सूत्रेण, समासविधायकं सूत्रं च "विशेषणं विशेष्येणैकार्थे कर्मधारयश्च" [ ३.१.९६.] तत्र च प्रथमोक्तं विशेषणमेव, तच्चोभयमपि पर्यायेण विशेषणं भवतीत्युभयोः पर्यायेण पूर्वप्रयोगः प्राप्नोतीति कृष्ण-नीलयोः समासे कृष्णस्यैव, उत्पल-नीलयोः समासे नीलस्यैव पूर्वप्रयोग इति नियमो न सिद्ध्यतीति प्रश्नाशयः। तत्रोभयोर्विशेषणत्वं विशेष्यत्वं चेत्थमुपपादितम्—तिलशब्दोच्चारणे श्वेत-रक्त-कृष्णादिवर्णाः सर्वे तिला उपस्थिता भवन्ति, कृष्णशब्दसम्बन्धाच्च कृष्णवर्णेष्वेव तिलेषु स नियम्यते एवं च कृष्णशब्दस्य व्यावर्तकत्वेन विशेषणत्वं तिलशब्दस्य व्यावर्त्यत्वेन विशेष्यत्वम्; एवमेव कृष्णशब्दे उच्चारिते भ्रमर-कोकिल-काकादि द्रव्यमात्रं प्रतीयते, तस्य च तिलशब्देन सम्बन्धे सति स भ्रमरादिभ्यो व्यावृत्य तिलेष्वेव स नियम्यते इति तिलशब्दस्य व्यावर्तकत्वेन विशेषणत्वं कृष्णशब्दस्य व्यावर्त्यत्वेन विशेष्यत्वमिति भवत्युभयोर्विशेषणत्वं विशेष्यत्वं चेति। अत्राह—"नवाऽन्यतरस्य प्रधानभावात् तद्विशेष्यत्वाच्चापरस्योपसर्जनसिद्धिः" [समाधानवार्तिकम्], "न वा एष दोषः, किं कारणम्? अन्यतरस्य प्रधानभावात्, अन्यतरदत्र प्रधानम्, तद्विशेषकत्वाच्चापरस्य, तद्विशेषकं चापरम्, अन्यतरस्य प्रधानभावात् तद्विशेषकत्वाच्चापरस्योपसर्जनसंज्ञा भविष्यति। यदाऽस्य तिलाः प्राधान्येन विवक्षिता भवन्ति कृष्णो विशेषकत्वेन तदा तिलाः प्रधानं कृष्णो विशेषणम्।" [भाष्यम्] इति अयमाशयः—द्रव्यस्यैवानयनादिक्रियासम्भवेन तस्यैव क्रियान्वयौचित्येन तस्यैव विशेष्यत्वम्, कृष्णस्तु गुणत्वाद् द्रव्यव्यवधानेन क्रियायामुपयोगात् तिलानां विशेषणं सम्पद्यते। भाष्यस्थौ यदा-तदाशब्दौ यतस्तत इत्यर्थकाविति ज्ञेयम्। भाष्यस्थ 'यदा-तदा'शब्दौ "विवक्षिताः" इति शब्दं च यथोक्ताभिप्रायत्वेनाजानानः 'द्रव्यस्यैव विशेष्यत्वं गुणस्यैव विशेषणत्वम्' इति भाष्यकर्तुराशयमप्रतिपद्यमान इति यावत्, विवक्षामात्रनिबन्धनत्वं विशेषण-विशेष्यभावस्य प्रतिपादितमनेन भाष्येण, विवक्षायाश्च स्वातन्त्र्यादनियमात् प्रयोगानियम इति मन्यमानः पृच्छति—"कामं तर्ह्यनेनैव हेतुना यस्य कृष्णाः प्राधान्येन विवक्षिता भवन्ति तिला विशेषणत्वेन, तेन कर्तव्यं तिलकृष्णा इति" [आक्षेपभाष्यम्], पूर्वमेव प्रदर्शितोऽस्याशयः। सिद्धान्ती स्वाशयं स्फोरयन् प्रतिक्षिपति—"न कर्तव्यम्, न ह्ययं द्वन्द्वः तिलाश्च कृष्णाश्चेति, न खल्वपि षष्ठीसमासः—तिलानां कृष्णा इति, किं तर्हि? द्वाविमौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते, न च द्वयोः प्रधानशब्दयोरेकस्मिन्नर्थे युगपदवरुध्यमानयोः किञ्चिदपि प्रयोजनमस्ति। तत्र प्रयोगादेतद् गन्तव्यम्—नूनमन्यतरदत्र प्रधानं तद्विशेषकं चापरमिति। तत्र त्वेतावान् सन्देहः—किं प्रधानं किं विशेषणमिति। स चापि क्व सन्देहः—यत्रोभौ गुणशब्दौ, तद्यथा—खञ्जकुब्जः, कुब्जखञ्ज इति। यत्र ह्यन्यद् द्रव्यमन्यतरो गुणः, तत्र यद् द्रव्यं तत् प्रधानम्, तद्यथा—'शुक्लमालभेत, कृष्णमालभेत', न पिष्टपिण्डीमालभ्य कृती भवति, अवश्यं तद्गुणं द्रव्यमाकाङ्क्षति।" इति भाष्यम्। अत्र कैयटः—"नह्ययमिति नहि गुण-द्रव्यवाचिनोर्द्वन्द्व उपपद्यते, गुणवचनस्य द्रव्यापेक्षत्वादसामर्थ्याद् द्रव्येण सह विवक्षाया असंभवात्, यदि तु द्वन्द्वः स्यात् स्यादेव तिलकृष्णा इति प्रयोग इति। न खल्वपीति—गुणेन सह षष्ठीसमासनिषेधादिति भावः। प्रधानशब्दाविति—प्रथमान्तावित्यर्थः, अनेन षष्ठीसमासविपरीतत्वं कथितम्। 'एकस्मिन्नर्थे' इत्यनेन तु द्वन्द्वविपरीतत्वं कथितम्। द्वन्द्वे हि सर्वपदार्थानां प्राधान्यान्नास्ति सर्वपदानामेकस्मिन्नर्थेऽवस्थानम्, एतच्चावयवार्थापेक्षयोक्तम्, समुदायार्थापेक्षायां तु समुदायलक्षण एकस्मिन्नर्थे सर्वेषां पदानां वृत्तिरस्त्येव। प्रधानशब्दयोरिति—परस्परविशेषणत्वेनानुपकारकयोः स्वतन्त्रयोरित्यर्थः। यत्रोभाविति—द्वयोरपि गुणत्वाद् द्रव्यव्यवधानेन क्रियासाधनत्वादिति भावः। यत्र ह्यन्यतरद् द्रव्यमिति—तत्र नास्ति सन्देह इति वाक्यशेषः। यद् द्रव्यमिति—साक्षात् क्रियासाधनत्वादिति भावः। ननु तिलशब्दो जातिवाची न द्रव्यवाची, तत्र जातिविशिष्टद्रव्यवाचित्वाद् यदि द्रव्यवाचीत्युच्यते तर्हि कृष्णशब्दोऽपि गुणविशिष्टद्रव्यवचनत्वाद् द्रव्यशब्द आपद्यते इति नानयोः कश्चिद् विशेषः, नैष दोषः—उत्पत्तिप्रभृत्याविनाशाज्जातिर्द्रव्यं न जहाति, नहि शब्देन द्रव्याद् व्यतिरेको जातेः प्रत्याय्यते, नहि भवति—शाबलेयस्य गौरिति, किं तर्हि? गौः शाबलेय इति। तस्माज्जात्यात्मकमेव द्रव्यं प्रतीयत इति जातिशब्दो द्रव्यवचनत्वेनावस्थाप्यते, गुणाः पुनरुपायिनश्चापायिनश्च, 'पटस्य शुक्लः' इति व्यतिरिक्ता अपि द्रव्यात् स्वशब्देन गुणाः प्रत्याय्यन्त इति गुणात्मकत्वं द्रव्यस्य नास्तीति न गुणशब्दो द्रव्यवचनत्वेनावस्थानमर्हति।" इति। एताभ्यां भाष्य-कैयटग्रन्थाभ्यां जातिप्रवृत्तिनिमित्तकानां द्रव्यवाचिनां शब्दानां प्राधान्यम्, गुणक्रियादिप्रवृत्तिनिमित्तकानां चाप्रधानत्वमेवेति न विशेषणविशेष्यभावे कामचारः। तथा च तिलकृष्णा इत्यादिप्रयोगा असाधव एव। परिच्छेद्य-परिच्छेदकभावाच्चान्य एव विशेष्य-विशेषणभावः, स हि प्राधान्याप्राधान्यानुरोधी, तथा च कृष्णस्य परिच्छेद्यत्वेऽपि विशेषणत्वमेव न विशेष्यत्वमिति प्रधानानुयाय्यप्रधानमिति फलति। तथा च नायमर्थः *गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः* इति न्यायेन लभ्य इति नात्र तदन्तर्भाव इति समुदिताशयः। इत्थं च निर्णीते द्रव्यवाचकशब्दस्य प्राधान्ये 'अमुकदीक्षितः, देवदत्त सोमयाजी' इत्यादयो लोके प्रचलिताः प्रयोगा असाधव एवेति विज्ञेयमिति। एवमेव परिभाषेन्दुशेखरे नागेशेन पठितः *प्रधाना-ऽप्रधानयोः प्रधाने कार्यसम्प्रत्ययः* इति न्यायोऽपि भिन्न एव *प्रधाना-

नुयायिनो व्यवहाराः* इत्येतन्न्यायसमानः, तस्य न्यायस्य फलत्वेन ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेत्यत्रैकशेषाभाव उक्तः, अत्र हि "पुरुषः स्त्रिया" [ ३. १. १२६. ] इति सूत्रेणैकशेषः प्राप्नोति, पुँस्त्व-स्त्रीत्वमात्रकृत एव च भेद इत्येतन्न्यायप्रवृत्तेरावश्यकता, प्रवृत्ते चास्मिन् न्याये प्रधानस्त्रीत्वपुँस्त्वकृतविशेषस्य ग्रहणेऽपि वत्सविशेषणत्वादप्रधानब्राह्मणशब्दनिष्ठस्त्रीत्वपुँस्त्वकृतविशेषस्य सत्त्वात् तन्मात्रभेदाभावेन नैकशेषः। तथा चोक्तं— "पुमान् स्त्रिया" [ पा० सू० १. २. ६७. ] इति सूत्रमुपक्रम्य तदग्रिमसूत्रे महाभाष्ये—"इह कस्मान्न भवति ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति" इति [ भाष्यम् ], सूत्रे प्रधानाप्रधानादिपदोपादानाभावेन पुँस्त्वस्त्रीत्वकृतविशेषस्य च भेदकत्वाभावेनेहैकशेषस्य प्राप्तिरिति प्रश्नाशयः। ततः "ब्राह्मणवत्सा-ब्राह्मणीवत्सयोर्लिङ्गस्याविभक्तिपरस्य विशेषवाचकत्वादनेकशेषः" [ इति समाधानवार्तिकम् ] "ब्राह्मणवत्सा-ब्राह्मणीवत्सयोर्लिङ्गस्याविभक्तिपरस्य विशेषवाचकत्वादेकशेषो न भविष्यति, यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवति, नात्र लिङ्गं विभक्तिपरमेव विशेषवाचकम्।" [ इति भाष्यम् ] अयमाशयः—"स्यादावसंख्येयः" [ ३. १. ११९. ] इत्यतः 'स्यादौ' इति पदमनुवर्तते, तच्च तत्र सर्वस्मिन् स्यादौ विभक्तावित्यर्थपरतया व्याख्यातम्, तदेव चैकशेषनिमित्तम्, तेनैकशेषनिमित्ते विभक्तौ परतो यत्र स्त्री-पुंसमात्रकृतो विशेषस्तत्रैकशेषः, इह तु तस्यां चान्तर्वर्तिन्यां च विभक्तौ स्त्रीत्व-पुंस्त्वकृतो विशेष इति नैकशेष इति। इत्थं च "पुरुषः स्त्रिया" [ ३. १. १२६. ] इति सूत्रस्य यत्र प्रकृत्यतिरिक्तैकशेषनिमित्तस्यादिविभक्तिपरशब्दगम्य एव स्त्रीत्वपुंस्त्वरूपो विशेषस्तत्रैकशेषो विभक्तौ परतः समानानाम्, विभक्तौ समानरूपत्वं च लिङ्गबोधकातिरिक्तकृतमेव बोध्यम्। एवं चात्रायमनुमानप्रयोगः—ब्राह्मणवत्सा-ब्राह्मणीवत्सौ पक्षः, एकशेषाभावः साध्यम्, प्रकृत्यतिरिक्तैकशेषनिमित्तविभक्तिपरशब्दत्वसमानाधिकरणं यत् स्त्रीत्वबोधकत्वं तद्घटितत्वे सति तदितरस्त्रीत्वबोधकत्ववद्घटितत्वं हेतुः, व्यतिरेके ब्राह्मण-ब्राह्मण्यादिशब्दसङ्घो दृष्टान्तः, पक्षे हेतुघटकविशेष्यदलं त्वेकशेषनिमित्तत्वाभावादन्तर्वर्तिविभक्तिपरशब्दत्वसमानाधिकरणस्त्रीत्वबोधकत्ववद्घटितत्वरूपं बोध्यम्। अयं चानुमानाकारः प्रकृतसमाधानवार्तिकलभ्यः। अतोऽग्रे कथं पुनरिदं ज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेषः [ तन्मात्रकृतश्चेदेव भेदः ] इति, आहोस्विदर्थो या स्त्री तल्लक्षणश्चेदेव विशेषः" इत्यादिना विचार्य गुणदोषौ प्रदर्श्य "क्वचिच्छब्दस्त्रीकृतविशेषपरिग्रहः क्वचिदर्थस्त्रीकृतविशेषपरिग्रह इति लक्ष्यानुसाराद् व्यवस्थेति निश्चित्य "एवं च कृत्वा इहापि प्राप्नोति—ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च" इति पुनरपि दोषमुद्भाव्य "एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किम्? तदित्यनुवर्त्तते, तदित्यनेन प्रकृतौ स्त्री-पुंसौ प्रतिनिर्दिश्येते, कौ च प्रकृतौ? प्रधाने, प्रधानं या शब्दस्त्रीप्रधानं या अर्थस्त्रीति" इति समाहितम्। अयमाशयः—स्त्री-पुंसयोः सहोक्तावेकशेषः, स च प्रधानयोरेव भवतीति यत्र प्रधानस्त्रीकृतो विशेषस्तत्रैकशेषः, इहाप्रधानस्त्रीकृतोऽपीति नैकशेषः। इत्थं च *प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः* इति न्यायोऽत्र भाष्यकृता सूचितः। एवं "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" [ पा० सू० १. २. ६९. ] इति सूत्रे चायं न्यायः [ प्रधानाप्रधानयोरित्यादि ] वार्त्तिकरूपेण भाष्यकृता पठितः, एतच्च सूत्रं "क्लीबमन्येनैकं च वा" [ ३. १. १२८. ] इत्येतत्सूत्रस्थानीयम्, तस्य च सूत्रस्य प्रत्याख्यानायायं न्यायो भाष्यकृता समाश्रितः, तथा हि—"अयं योगः शक्योऽवक्तुम्" इति, तत आक्षेपभाष्यम्—"कथं शुक्लश्च कम्बलः शुक्लं च वस्त्रम्—तदिदं शुक्लं, ते इमे शुक्ले। शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं—तदिदं शुक्लम्, तानीमानि शुक्लानि।" इति। ततः समाधानवार्त्तिकम्—"प्रधाने कार्यसम्प्रत्ययाच्छेषः।" इति। "प्रधाने कार्यसम्प्रत्ययाच्छेषो भविष्यति। किं च प्रधानम्?, नपुंसकम्, कथं पुनर्ज्ञायते नपुंसकं प्रधानमिति, एवं हि दृश्यते लोके अनिर्ज्ञातेऽर्थे गुणसन्देहे च नपुंसकलिङ्गं प्रयुज्यते—किं जातमिति, द्वयं चैव हि जायते—स्त्री वा पुमान् वा। तथा विदूरेऽव्यक्तरूपं दृष्ट्वा वक्तारो भवन्ति—महिषीरूपमिव ब्राह्मणीरूपमिवेति प्रधाने कार्यसम्प्रत्ययान्नपुंसकस्य शेषो भविष्यति।" इति भाष्यम्। अत्र कैयटः—प्रधाने कार्यसम्प्रत्ययादिति—शब्देनार्थस्याभिधानमिह कार्यम्, तच्च नपुंसकानपुंसकसन्निधौ नपुंसकस्यैव भविष्यतीति नार्थः सूत्रेणेत्यर्थः, कथमिति—यथा लोके बहुषु गच्छत्सु राजा गच्छतीति प्रधानं राजा व्यपदिश्यते, राज्ञश्च प्राधान्यं तदधीनप्रवृत्तिनिमित्तत्वादन्येषाम्, इह तु नपुंसकस्य किं कृतं प्राधान्यमिति प्रश्नः। एवं हि लोके दृश्यत इति—व्यापित्वान्नपुंसकस्य प्राधान्यमाह, स्थितिर्नपुंसकं, सा च सर्वत्र विद्यत इति स्थितिरूपत्वेनैव-स्त्रीपुंसयोरपि विवक्षायां सिद्धो नपुंसकशब्दप्रयोगः। अनिर्ज्ञातेऽर्थ इति—सामान्यरूपेण ज्ञाते, स्त्रीत्वादिना विशेषरूपेणाज्ञाते इत्यर्थः। गुणसन्देह इति-गुणाः स्त्रीत्वादयः। द्वयं चैवेति—यद्यपि नपुंसकस्यापि जन्म, तथापि यत् प्रजननासमर्थं तन्नपुंसकमिति नेह नपुंसकलक्षणम्, किं तर्हि? शब्दैकगोचरत्वमेव लिङ्गलक्षणम्, तथा च नपुंसको भवतीति प्रयोग उपपद्यते। महिषीरूपमिवेति—रूपशब्दः संस्थानवचनः, यत्र दूराद् दृश्यमाने वस्तुनि निश्चयो नास्ति, केवलं सम्भावनारूपः सन्देहः, तत्रैकस्यापि शब्दस्य प्रयोगो भवति—स्थाणुरयं स्यादिति, एवमिहापि महिषीवैतत् संस्थानमित्यस्मिन्नर्थे महिषीरूपमिवेति प्रयुक्तम्, रूपशब्दोऽत्र नपुंसकलिङ्गो दृष्टान्त-

त्वेनोपात्तः, यत्र तु विशेषत्वेन निर्देशनं–शुक्लाः शाट्यः, शुक्लाः कम्बला इति, तत्र नास्ति नपुंसकप्रयोगः" इति । एवं च प्रदर्शितोदाहरणादिभिः क्लीबलिङ्गस्य प्राधान्येन, अप्रधानाभ्यां स्त्री-पुंल्लिङ्गाभ्यां तस्य सह विवक्षायामेकस्य शेषे विधीयमाने न्यायत एव क्लीबस्यैवैकशेषो भविष्यतीति तदेकशेषविधानार्थं पृथग्वचनं नारम्भणीयमिति समुदितार्थः । कैयटेन चारभ्यमाणे सूत्रे 'अरण्यारण्यान्यौ' इत्यत्र महत्त्वस्योपाधेराधिक्यान्नैकशेष इति फलमुक्तम् । इत्थं *प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः*' इति न्यायः सर्वैरादृतः, एवमेव *अन्तरङ्गोपजीव्यादपि प्रधानं प्रबलम्* इति न्यायो "हेतुमति च" [ पा० सू० ३. १. २६. ] इति सूत्रे भाष्य-कैयटयोः सूचित इति प्रधानप्राबल्यबोधका बहवो न्याया लक्ष्यानुसारेणेह शास्त्रे स्वीकृताः, तेष्वस्य *गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः* इत्यस्य विशेषादराच्छास्त्रकृदादिभिर्व्याख्यातत्वमुपलभ्यते नान्येषाम्, तेषां लोकेऽतिप्रसिद्धत्वेनाव्याख्यानेऽपि कार्यार्थमुपादातुं शक्यत्वादित्यलमतिगवेषणेनेति ॥ २२ ॥

## *कृत्रिमाऽकृत्रिमयोः कृत्रिमे* ॥ २३ ॥

सि०—क्रियया निर्वृत्तं कृत्रिमम्, तद्भिन्नमकृत्रिमं, स्वाभाविकम् । क्रिया च सङ्केतकरणादिरूपा, तथाहि–शब्दो यत्रार्थे नियम्यते सोऽर्थः कृत्रिमः, यश्च शब्दो यमर्थं स्वभावत एवाह सोऽर्थस्तस्याकृत्रिमः; तथा च कृत्रिमाऽकृत्रिमयोरुभयोः कार्ये प्राप्ते कृत्रिम एव कार्यसम्प्रत्ययः कार्यः । अयमाशयः–'सर्वे सर्वार्थवाचकाः' इति सिद्धान्तेन सर्वेषां शब्दानां सर्वार्थवाचकत्वस्य स्वाभाविकत्वे यः शब्दो यत्र विशिष्टेऽर्थे व्यवहाराय नियम्यते स तदा तत्रैव प्रतीतिं जनयति नान्यत्र । यत् तु–'कृत्रिमस्य परिभाषानिष्पन्नत्वेनौपाधिकत्वाद् गौणत्वमकृत्रिमस्य स्वाभाविकत्वेन मुख्यत्वमिति पूर्वन्यायादकृत्रिमस्यैव कार्ये प्राप्तेऽनेन कृत्रिमस्य कार्यं प्राप्यते' इति, तन्न युक्तम्–कृत्रिमस्य हि न गुणप्रयुक्तो व्यवहारः, नहि कश्चिद् गुणमाश्रित्य स्वाङ्गशब्दोऽर्थविशेषे परिभाषितः अपि तु स्वाभिमतप्रक्रियानिर्वाहायैवेति न तत्र गौणत्वम्, अप्रसिद्धत्वं गौणलाक्षणिकत्वं च गौणत्वमिति पूर्वन्यायव्याख्यावसरे प्रतिपादितत्वात् । न चाप्रसिद्धत्वेनैव कृत्रिमस्य गौणत्वमिति वाच्यम्, लोकप्रसिद्धितः शास्त्रप्रसिद्धेर्बलीयस्त्वेनाप्रसिद्धत्वाभावात्, अन्यथा तस्य बलवत्त्वमपि न स्यात् । न च तथैव [ शास्त्रप्रसिद्ध्यैव ] बलवत्त्वे सिद्धे किं न्यायेनेति वाच्यम्, न्यायस्यापूर्वार्थानवबोधकत्वात्, अस्य न्यायस्य स्वाभाविकत्वं चाग्रे निरूपितम् । उदाहरणं चास्य 'दीर्घमुखा शाला' इत्यादि, तथाहि–"असहनञ्-विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः" [ २. ४. ३८. ] इत्यत्र स्वाङ्गेन

"अविकारोऽद्रवं मूर्तं, प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥"

इति परिभाषितमेव स्वाङ्गं गृह्यत इति प्रकृतस्थले मुखस्य शालाया लोकप्रसिद्धस्वाङ्गत्वे सत्यपि प्राणिस्थत्वाभावेन परिभाषितस्वाङ्गत्वाभावान्न ङीर्भवति । अत्र ज्ञापकं च यद्यपि नापेक्ष्यतेऽस्य स्वभावसिद्धत्वस्योपपादयिष्यमाणत्वात् तथाप्यभ्युच्चयाय तदपि प्रदर्श्यते, तथा हि–"आङो यम-हनः स्वेऽङ्गे" [ ३. ३. ८६. ] इति सूत्रेऽसमस्तयोः स्वशब्दाऽङ्गशब्दयोर्ग्रहणमेव तत्र प्रमाणं विज्ञेयम्, तद्धि 'आयच्छति पादौ मैत्रस्य' इत्यादावात्मनेपदवारणार्थं कृतम्, अत्र 'स्वाङ्गे' इत्युक्तेऽपि वारणं सम्भवत्येव, स्वस्याङ्गस्येह कर्मत्वाभावात्, किन्तु स्वाङ्गपदेन पारिभाषिकमेव स्वाङ्गं गृह्येतेति तादृशस्वाङ्गत्वस्येह मैत्रपादयोरपि सत्त्वमेवेति स्वाङ्ग-पदेन तस्यापि ग्रहणप्रसक्तावात्मनेपदं दुर्वारं स्यादिति तद्वारणायात्र व्यस्ततयाऽभिधानम्, तथा च प्रकृतधातुकर्तुरेवाङ्गं स्वाङ्गपदेनेह गृह्यत इति तादृशस्वाङ्गकर्मकत्वाभावाद्भवति वारणमिति, तद्वारणार्थं कृतं व्यस्तग्रहणमेतन्न्यायसत्तां विना न सार्थकमित्येतन्न्यायसत्तां ज्ञापयतीति । एतच्च क्वचिन्नापि प्रवर्तत इत्यग्रिमन्यायव्याख्यावसरे स्फुटीभविष्यति । पाणिनीये तन्त्रे महाभाष्येऽयं न्यायो लोकव्यवहारेणैव साधितः, तथाहि–'बहु-गण-वतु-डति-संख्या" [ पा० १. १. २३. ] इति सूत्रे महाभाष्ये लोकप्रसिद्धैकादीनामपि संख्याशब्देन ग्रहणार्थं संख्या च संख्यासंज्ञा भवतीति बोधनार्थमत्र सूत्रे संख्याग्रहणमप्युद्देश्यकोटौ कर्तव्यमित्याक्षिप्तम्, तत्साधनाय चोक्तम्–'इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद् यथा लोके' इति [ वार्त्तिकम् ] "अक्रियमाणे हि संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्येष सम्प्रत्ययो न स्यात्, किं कारणम्? अकृत्रिमत्वात्, बह्वादीनां कृत्रिमा संज्ञा, *कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति* यथा लोके, तद्यथा–'गोपालकमानय, कटजकमानय' इति यस्यैषा संज्ञा भवति स आनीयते, न यो गाः पालयति, यो वा कटे जातः" इति, अयमाशयः–यथा लोके कृत्रिमायां गोपालकादिसंज्ञायां ज्ञातायां तदुच्चारणे स एव ज्ञायते न तु यो गाः पालयतीति स्वाभाविको गोपालः तथैव शास्त्रेऽपि यस्य या संज्ञा क्रियते तेन शब्देन स एव ज्ञायते, न तु यौगिकाद्यर्थः । तथा च बह्वादीनां संख्यासंज्ञायां कृतायां त एव संख्यात्वेन गृह्येरन् न तु स्वाभाविका एकद्व्यादिसंख्या इति तासामपि संख्यासंज्ञार्थमिह संख्याग्रहणं कर्त्तव्यमिति, अग्रे चोभयगतेरिहाश्रयणात् समाहितमित्यन्यत् । तथा चायं न्यायो लोकसिद्ध इति भाष्यतात्पर्यम् । विशेषश्चाग्रे प्रतिपादयिष्यते ॥ २३ ॥

## *कृत्रिमा-ऽकृत्रिमयोः कृत्रिमे* ॥ २३ ॥

**त०**—न्यायानां परस्परनिरपेक्षत्वेऽप्याकाङ्क्षितपदानुवृत्तिरेकत्र पाठसाध्येति पूर्वं प्रतिपादितमेव *न स्वरानन्तर्ये* इति न्यायव्याख्यानावसरे, तथा चात्राऽपि पूर्वन्यायात् 'कार्यसम्प्रत्ययः'' इत्यंशोऽनुवर्त्तनीयः । पूर्वन्यायापवादत्वमस्य प्राचीनैरुक्तं नातीव युक्तमित्युपपादितमेव वृत्तौ । यत्तु–'अप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुद्ध्यते, यथा-राम-कृष्णादिसाम्प्रतिकनामस्थले प्रसिद्धरामादिगतपित्राज्ञापालकत्वादिगुणारोपाद् गौणो व्यवहारः इत्यादि गौण-मुख्यन्यायव्याख्यावसरे प्रतिपादितं तल्लौकिकसंज्ञादिस्थलाभिप्रायं न शास्त्रीयपारिभाषिकशब्दाभिप्रायमिति विज्ञेयम् । प्रकृतन्यायबीजं तु प्रकरणस्याभिधानियामकत्वम्, उक्तं हि हरिणा—

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥" इति ।

तथा च संयोगादयः शब्दार्थत्वस्य सामान्यतोऽनेकत्र प्राप्तस्य विशेषे नियामका इत्यनेन लभ्यते, प्रकरणं च संयोगादिष्वेव पठितम्, अस्ति च शास्त्रे तत्तत्संज्ञाकरणरूपं प्रकरणम्, तच्च सर्वत्र अर्थाभिधानतात्पर्यमर्थविशेषे नियमयति, अत्र शास्त्रेऽनेन शब्देनायमेवार्थो बोध्य इति । अभिधापदस्य तात्पर्यपरत्वमेव 'प्रकरणस्याभिधानियामकत्वम्' इत्यत्र, न तु शक्तिपरत्वम्, तस्याः शक्यतावच्छेदकमात्रनियम्यत्वात् । अयं भावः-यस्मिन् शब्देऽनेका शक्तिस्तत्र श्रोतुः कीदृक्शक्तिज्ञानाधीनार्थबोधनेच्छया वक्त्रोच्चारितमिति निश्चयाभावात्, शाब्दबोधे समानविषयकतात्पर्यनिश्चयस्य कारणत्वात्, शाब्दबोधानुपपत्तौ प्राप्तायां प्रकरणादिना तात्पर्यनिर्णयोत्तरं बोधो भवति । एवं च शास्त्रे संख्यादिपदे एकत्वादिनिरूपिता लौकिकी, बह्वादिनिरूपिता शास्त्रीया च शक्तिरस्तीति कीदृशार्थबोधनेच्छयोच्चरितमिदमिति जिज्ञासायां स्वयमेव शास्त्रकारेण बह्वादिनिरूपितशक्तिं बोधयित्वा कथमन्यार्थबोधनेच्छयोच्चारितं स्यादिति ज्ञानरूपप्रकरणबलेन बहुगणादावेव तात्पर्यनिर्णयेन तद्विषयकबोधस्यैव शास्त्रे सम्भवेन लौकिकार्थबोधाप्रसक्तिरित्येतत्फलितमेव *कृत्रिमा-ऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः* इति न्याय इति । यत्तु कैयटेन "संज्ञाशास्त्राणां मच्छास्त्रेऽनेन शब्देनायमेवार्थो बोध्य इति नियमार्थत्वं कृत्रिमाकृत्रिमन्यायबीजम्" इत्युक्तं, तन्न-तेषामगृहीतशक्तिग्राहकत्वेन नियामकत्वायोगात्, 'सर्वे सर्वार्थवाचकाः' इत्यभ्युपगमेऽपि योगिदृष्ट्या न त्वस्मदृष्ट्या विशिष्य सर्वशब्दार्थज्ञानासम्भवात्, सामान्यज्ञानं तु न बोधोपयोगि" इति नागेशः परिभाषेन्दुशेखरे प्राह । तस्यायमाशयः–सर्वशब्देभ्यः केषाञ्चित् शक्तिभ्रमात् केषाञ्चिल्लक्षणया सर्वार्थविषयकबोधोत्पत्त्या सर्वार्थबोधकत्वं सर्वेषां शब्दानां सिद्धम् । वैयाकरणमते च बोधकतैव शक्तिरिति सर्वार्थनिरूपितशक्तिमत्त्वं सर्वेषां शब्दानां सिद्धमेव । ननु 'शक्तिभ्रमाद् बोधः, लक्षणया बोधः' इति–व्यवहारानुपपत्तिः, तव मते सर्वत्र शक्तेः सत्त्वादिति चेत्? न–परमताभिप्रायेण तद्व्यवहारस्य सत्त्वात्, अत एव सर्वे सर्वार्थवाचका इत्यभियुक्तानां व्यवहारः । एवं च शास्त्रसांकेतिकसंज्ञाशब्देषु तत्तदर्थनिरूपितशक्तेरपि सत्त्वेन तत्तत्पदेन तत्तदर्थप्रतीतेर्लौकिकशक्त्यैव सिद्धौ संज्ञासूत्राणां वैयर्थ्यात् 'अस्मच्छास्त्रेऽनेन पदेन अत एव ग्राह्याः' इति नियमार्थत्वेन कृत्रिमाकृत्रिमयोरिति न्यायः सिद्ध इति कैयटाशयो न युक्तः, उक्तरीत्या तत्तत्संज्ञापदे तत्तदर्थनिरूपितशक्तेः सत्त्वेऽपि लोके तत्पदेन तेषामर्थानां बोधाभावेन व्यवहारादिना शक्तिग्रहासम्भवेन, अज्ञातशक्त्या बोधाभावेन च शक्तिज्ञानजननाय संज्ञासूत्राणां विधायकत्वे सम्भवति नियामकत्वायोग इति नानेन प्रकारेणोक्तन्यायसिद्धिरिति । नन्वेवं सर्वे सर्वार्थवाचका इत्यस्य का गतिरित्यत आह—सर्वे सर्वार्थवाचका इति तु योगिदृष्टेति योगिनां विशिष्य तत्तद्धर्माणां ज्ञानसम्भवादिति भावः । ननु घटपदमर्थवाचकं पदत्वादित्यनुमानेन सामान्यलक्षणासहकृतेनार्थत्वावच्छिन्नसकलार्थनिरूपितशक्तिज्ञानमस्मदादीनामपि सुलभमिति चेत्?, न–अनुभवोपस्थितिशाब्दबोधानां समानप्रकारेणैव हेतुहेतुमद्भावेनार्थत्वप्रकारकशक्तिग्रहणे घटत्वादिविशेषधर्मप्रकारकोपस्थिति-शाब्दबोधयोरजननात् । तथा च प्रकरणादेव कृत्रिमस्य ग्रहणम्, तदेव चैतन्न्यायमूलमित्यग्रेऽपि "बहु-गण-वतु-डति-संख्या" [ पा० सू० १. १. २६. ] इति सूत्रे महाभाष्ये स्पष्टीकृतम् । तथा हि–"अर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति । अर्थो वाऽस्यैवंसंज्ञकेन भवति प्रकृतं वा तत्र भवति–इदमेवंसंज्ञकेन कर्तव्यम्" इति । तथा च लोकत एव सिद्धोऽयमर्थ इति भावः । अत एवायं न्यायो नागेशादिभिर्न परिभाषारूपेण पठितः परिभाषेन्दुशेखरे, केवलमुभयगतिरिह भवतीति न्यायस्योत्थाने बीजरूपेण तदवतरणे प्रदर्शित इति ॥ २३ ॥

## *क्वचिदुभयगतिः* ॥ २४ ॥

**सि०—पूर्वन्याये कृत्रिमाऽकृत्रिमयोरुभयोः प्रकृतत्वादिहोभयपदेन तावेव गृह्येते, तथा च पूर्वन्यायेन सर्वत्र कृत्रिम एव कार्यसम्प्रत्ययस्य बोधितत्वेन स्वाङ्गादिपारिभाषिकपदैः क्वापि स्वमङ्गं स्वाङ्गमिति योगार्थस्य ग्रहणं न स्यादिति प्राप्तेऽयं न्यायस्तदपवादत्वेन पठ्यते । क्वचिदित्यस्येष्टस्थले इति भावः । उभयस्य कृत्रिमाऽकृत्रिमद्वयस्यापि, गतिः–विज्ञानं कार्यित्वेन ग्रहणमिति**

यावत्, भवति–जायते । तेन "नाडी-तन्त्रीभ्यां स्वाङ्गे" [ ७. ३. १८०. ] इत्यनेन 'बहुनाडिः कायः, बहुतन्त्रीर्ग्रीवा' इत्यनयोः परिभाषितस्वाङ्गवाचकयोर्नाडी-तन्त्रीशब्दयोर्यथा ग्रहणं भवति, तथा च तत्र कच् निषिध्यते तथैव 'बहुनाडिः स्तम्बो, बहुतन्त्रीर्वीणा' इत्यत्रापि प्राणिस्थत्वाभावेऽपि यौगिकार्थमादाय स्वाङ्गत्वेन ग्रहणात् कच् निषिध्यते । ननु स्तम्बस्य अद्भिर्विना ग्लायमानत्वेनैकेन्द्रियप्राणित्वस्य स्वीकृतत्वेन तत्र कथं प्राणिस्थत्वाभाव उक्त इति चेत्? अत्रोच्यते–"प्राण्यौषधिवृक्षेभ्योऽवयवे च" [ ६. १. ३१. ] इति सूत्रे प्राणिग्रहणेनैव वृक्षौषधिग्रहणे सिद्धेऽपि पृथक् तद्ग्रहणेनेदं ज्ञाप्यते यत्–प्राणिग्रहणे व्याकरणे त्रसा एव गृह्यन्ते, न तु स्थावरा इति, तथा च तत्र नाडीशब्दस्याप्राणिस्थत्वं सुस्थिरम् । अयं च न्यायस्तत्र तत्र शास्त्र-लोकयोरुभयोर्ग्रहणदर्शनेनैव सिद्धः, तथाहि–*कृत्रिमाऽकृत्रिमयोः०* इति न्याये सत्यपि यच्छास्त्रे क्वचिदुभयस्य ग्रहणं दृश्यते, लोकेऽपि क्वचित् कृत्रिमस्य क्वचिदकृत्रिमस्य क्वचिच्चोभयोर्ग्रहणं दृश्यते, तेनास्य न्यायस्य सिद्धिरिति । पूर्वन्यायस्यानेन बाधितत्वात् प्रकरणादिवशात् सर्वथा कार्यं निर्वहति । अस्यापि च क्वाचित्कत्वं क्वचिदिति पदेनैवोच्यते, तथा च क्वचित् केवलस्याकृत्रिमस्यापि ग्रहणं भवति, यथा–"शिरोऽधसः पदे समासैक्ये" [ २. ३. ४. ] इत्यत्र कृत्रिमं विभक्त्यन्तं पदं विहाय स्वरूपस्यैव ग्रहणे–शिरस्पदम्, अधस्पदमित्यादि सिध्यति ॥ २४ ॥

## *क्वचिदुभयगतिः* ॥ २४ ॥

त०—प्रकरणस्याभिधानियामकत्वाश्रयणेन हि पूर्वन्यायः सिद्ध इत्यावेदितं तस्य न्यायस्य व्याख्यावसरे । तथा च यत्र प्रकरणेन कृत्रिमस्याकृत्रिमस्य वा ग्रहणमिति न निश्चेतुं शक्यते, अस्ति चोभयोपस्थितिः, तत्रोभयोरेव ग्रहणम्, यत्र चाप्रकरणज्ञं प्रति तदुच्चारणं तत्र केवलं कृत्रिमस्यैव ग्रहणमिति प्रतिपादितं "बहु-गण-वतु-डति-संख्या" [ पा० सू० १. १. २३. ] इति सूत्रे महाभाष्ये लौकिकदृष्टान्तेन । तथा हि–[ पूर्वन्यायानुसारं दोषं प्रदर्श्य ] नैष दोषः, अर्थात् प्रकरणाद् वा लोके कृत्रिमाऽकृत्रिमयोः कृत्रिमे सम्प्रत्ययो भवति । अर्थो वाऽस्यैवंसंज्ञकेन भवति, प्रकृतं वा तत्र भवति–इदमेवंसंज्ञकेन कर्त्तव्यमिति । आतश्चार्थात् प्रकरणाद् वा । अज्ञ हि भवान् ग्राम्यं पांशुरपादमप्रकरणज्ञमागतं ब्रवीतु–गोपालकमानय कटजकमानयेति, उभयगतिस्तस्य भवति । साधीयो वा यष्टिहस्तं गमयिष्यति ।" इति । अयमाशयः—लोके कृत्रिमग्रहणे न कृत्रिमत्वं कारणम्, किन्तु अर्थः प्रकरणं वा, अर्थः-सामर्थ्यम्, यथा–गोपालकमानय माणवकमध्यापयिष्यतीति यष्टिहस्तस्य [ गवां पालकस्य ] अध्यापनासम्भवात् संज्ञिनो ग्रहणम् । प्रकरणं च प्रस्तावः–इदमेवंसंज्ञकेन कर्तव्यमिति, तत्र प्रयोजनं प्रकृतं–प्रस्तुतं बुद्धिस्थं भवति संज्ञाया बुद्धिस्थत्वात् । यश्चाचिरागतः स्वयमूहासमर्थः स चेत् केनाऽपि गोपालकमानयेत्यादि पूर्वोक्तवाक्यमुक्तः स कदाचिदुभयमपि तदाशयं जानानः सन्देग्धि–कोऽनेन समानेतुमभिलषितः, किं गवां पालयिता, किं वा कश्चिदेतन्नामप्रसिद्ध इति । अथवा कदाचित् स योगार्थमनुरुध्य यष्टिहस्तं गवां पालकमेवानीय कृती भवतीति । तथा च न तत्र कृत्रिमस्यैव गतिरिति नियम इत्युभयगतिः सिद्धा । अत्रत्यं भाष्यं व्याचक्षाणानां मध्ये कश्चिद् भेद उपलभ्यते, तथा हि—गोपालकमानयेति श्रुतवतः पांशुरपादस्योभयगतिः, किं संज्ञेयमुत यौगिकोऽर्थो विवक्षित इति भवति, अथवा यष्टिहस्तविषयं तात्पर्यं पांशुरपादः सम्यग् ग्रहीष्यतीति कैयटाद्यभिप्रायः । अत्र केचित्–"उभयगतिस्तस्य भवतीति प्रकथनानन्तरं यष्टिहस्तविषयं तात्पर्यं ग्रहीष्यतीत्युक्तिर्न सम्यक्, किन्तूभयप्रकारकमेव ज्ञानं भाष्यकार आह–साधीय इति, साधीयः–अध्यापयिष्यतीति वाक्यशेषज्ञानात् तात्पर्यं साधीयो ग्रहीष्यति, अथवा यष्टिहस्तविषयं तात्पर्यं ग्रहीष्यति" इत्यर्थमाहुः । तथा च यथा प्रकरणात् कृत्रिमस्यैव ज्ञानं तथा क्वचिदर्थात् प्रकरणाच्चोभयस्यापि ज्ञानं लोकसिद्धमेवेति भाष्याशयः । अग्रेऽपि पूर्वपक्षिणा–'यत्रार्थः प्रकरणं च भवति तत्र केवलं कृत्रिमस्यैव ग्रहणं स्याद् यथा लोके' इत्याक्षिप्ते 'भाष्यकार आह–"न यथालोके तथा व्याकरणे, उभयगतिः पुनरिह भवति" इति । शास्त्रीयसंज्ञाशब्दो हि तन्नाम्ना लोकेऽप्रसिद्धस्यापि पदार्थस्य ग्रहणाय प्रयुज्यते, न तु लोकप्रसिद्धतदर्थनिरासाय, संज्ञाकरणस्याधिकार्थप्रतिपत्त्यर्थत्वादित्युभयोर्ग्रहणं भवतीति भाष्याशयमाह कैयटः । नागेशोपाध्यायस्तु–"व्याख्यातृपरम्परावगतवक्तृतात्पर्यानुपपत्त्या प्रकरणाद्यनादरेणोभयगतिरिति भाष्यार्थ इत्यन्ये" इत्याह । एवं च क्वोभयगतिः? क्वाकृत्रिमस्यैव? क्व कृत्रिमस्यैवेत्यर्थे लक्ष्यानुसारि व्याख्यानमेव शरणम्, न केवलन्यायानुसारमेव व्यवस्था संभविनी, उभयोर्न्याययोरस्थिरत्वात् ॥ २४ ॥

## *सिद्धे सत्यारम्भो नियमार्थः* ॥ २५ ॥

सि०—प्रमाणान्तरेण प्राप्तमेवार्थं यदि केनचिद् वचनेन विदधाति शास्त्रकृत् तर्हि तस्य वैयर्थ्यशङ्कायां न्यायोऽयं पठितः । तथा च प्रमाणान्तरप्राप्तार्थविधायकं वचनं नियमार्थं भवतीति न्यायार्थः । यथा दण्डीत्यादौ दीर्घार्थम् " इन-हन्-पूषा०" [ १. ४. ८७. ] इति वचनम्, तथाहि–सामान्यतो घुटि दीर्घविधायकेन "नि दीर्घः" [ १. ४. ८५. ] इत्यनेनैव शि-स्योरपि दीर्घो भविष्यत्येवेति विशिष्य शि-स्योः परतोऽनेन

["इन्-हन्०" इत्यादिना सूत्रेण] दीर्घविधानं व्यर्थं सत् इनादीनां शि-स्योरेव दीर्घो नान्यघुटीति नियमयति, तेन दण्डिनावित्यादौ दीर्घो न भवति । अयं च न्यायः पुनर्वचनेनैव विज्ञाप्यते, एतदभावे हि "इन्०" इत्येवमादिसूत्राणां विधित्वमेव स्वीकर्तव्यं स्यात् । तथा च सति तेषां वैयर्थ्यं स्पष्टमेव, एतत्साध्यरूपाणां "नि दीर्घः" [१. ४. ८५.] इत्यनेनैव सिद्धेरुक्तत्वात् । क्वचिच्च सिद्धे सत्यप्यारभ्यमाणो विधिर्नियमार्थो न भवति न्यायस्यास्थिरत्वात्, यथा "लिहादिभ्यः" [५. १. ५०] इति सूत्रेण लिहादिभ्य आकृतिगणेभ्योऽच् विधीयते, तत्रैव गणे कर्मोपपदेभ्योऽर्हादिभ्योऽपि भवतीति पाठेनैव 'पूजार्ह' इत्यादिसिद्धौ "अर्होऽच्" [५. १. ९१.] इत्यादिसूत्राणि वृथैवारभ्यन्त इति नियमार्थानि स्युः, न च नियमः सम्भाव्यते, तथाहि—कीदृशो नियमः स्यात्? कर्मोपपदेभ्यो लिहादिभ्योऽजेव नाणिनि चेत्? अस्यार्थस्य लिहादिपाठेनैव सिद्धेः, कर्मोपपदेभ्योऽच् चेल्लिहादिभ्य एवेति चेत्? तदपि न-अन्येभ्योऽचः प्रमाणान्तरेणाप्राप्तेरिति न प्रत्ययनियमो नापि प्रकृतिनियमः संभाव्यत इति लिहादिप्रपञ्चार्थत्वमेवैषां सूत्राणामित्यास्थेयमिति ॥ २५ ॥

## *सिद्धे सत्यारम्भो नियमार्थः* ॥ २५ ॥

त०—यद्यपि "विधिरत्यन्तमप्राप्तौ, नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥"

इति मीमांसकरीत्या पाक्षिक्यां प्राप्तौ सत्यामेव नियमः, न तु सर्वथा प्राप्तौ [तत्र चान्यत्र च प्राप्तौ] । "नि दीर्घः" [१. ४. ८५.] इत्यनेन च शि-स्योरन्यत्र च प्राप्तिरेव, न तु पाक्षिकी प्राप्तिः, पाक्षिकी प्राप्तिर्हि विकल्पस्थाने भवति । यथा-'व्रीहीनवहन्ति' इति, अत्र हि यागीयचरुनिष्पादनार्थं व्रीहीणामवघातो विधीयते, अवघातश्च निस्तुषीकरणार्थं एव, शक्यते च निस्तुषीकरणमुपायान्तरेण नखविदलनादिनाऽपि । तथा च चरुनिष्पादनार्थं निस्तुषीकरणायावघातस्य न नियता प्राप्तिरपि तु पाक्षिकी एतद्विध्यभावे हि कदाचिदुपायान्तरेणापि तत्करणस्य सम्भवात्, इत्यनेन विधिना नियम्यते-अवघातेनैव व्रीहीन् निस्तुषीकुर्यादिति । तथा च नात्र मीमांसकपरिभाषितो नियमः, किन्तु परिसंख्याविधेरेवात्र शास्त्रे नियमपदेन व्यवहारः, तदुक्तं नागेशेन परपशाह्निके महाभाष्यव्याख्यायाम्-"नन्वस्य परिसंख्यात्वात् कथं नियमत्वेन व्यवहारः?, अस्ति च नियम-परिसंख्ययोर्भेदः, पाक्षिकाप्राप्तिकाप्राप्तांशपरिपूरणफलो नियमः, अन्यनिवृत्तिफला च परिसंख्येति चेत्?, न-नियमेऽप्यप्राप्तांशपरिपूरणफलबोधनद्वाराऽऽर्थान्यनिवृत्तेः सत्त्वेनाभेदमाश्रित्योक्तेः" इति । तथा च "इन्-हन्०" [१. ४. ८७.] इत्यादिशास्त्राणां शिस्योरन्यत्र दीर्घाभाव एव तात्पर्यम् । "अर्होऽच्" [५. १. ९१.] इत्यादिषट्सूत्र्या बृहद्वृत्तौ लिहादिप्रपञ्चार्थत्वस्योक्त्या चास्य न्यायस्यास्थिरत्वमुक्तं वृत्तौ, तत्र यद्यपि न लिहादिषु पाठः पूर्वकृतोऽस्ति येन सिद्धे सत्यारम्भत्वमेषां स्यात्, लिहादिषु तथा पठित्वैतेषां तथात्वापादने च न कश्चिद् विशेषः, सूत्रैरप्राप्तांशपरिपूरणायैव गणेषु विशिष्टो विधिर्गणसूत्रैरारभ्यते, सति च सूत्रैः प्राप्तौ तदारम्भस्यैव प्रत्याख्येयत्वम्, तथा च यथास्थितलिहादिपाठे नास्त्येषां नियमत्वसंभावनेति प्रपञ्चार्थत्वमुक्तमिति नैतावतास्य न्यायस्यास्थिरत्वं कल्पयितुं शक्यं, तथापि प्राचां रीत्या तथोल्लेख आदृतो वृत्ताविति विज्ञेयम् ॥ २५ ॥

## *धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्* ॥ २६ ॥

सि०—धातोः स्वरूपस्य ग्रहणं यस्मिन् स विधिः स्वरूपग्रहणस्तस्मिन् । यद्यपि धातोरित्यस्य स्वरूपेण सम्बन्धः, स्वरूपस्य च ग्रहणेनेति स्वरूपशब्दस्य धातुना साकाङ्क्षत्वात् साकाङ्क्षमसमर्थवदिति न्यायेनासामर्थ्यादिह समासो न प्राप्नोति, तथापि

"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ॥
समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ॥"

इति हरिकथितरीत्या सापेक्षत्वेऽपि समासः कृत इत्यवधेयम् । प्रकृतहरिकारिकार्थस्तु-सर्वः, नित्यं सापेक्षः, सम्बन्धिशब्दः समस्यते, हि-यतः, सा व्यपेक्षा वाक्यवद् वृत्तावपि न हीयते । अयमाशयः—सर्वे सम्बन्धिशब्दाः—ये कमपि सम्बन्धं प्रवृत्तिनिमित्तीकृत्य स्वार्थमभिदधति ते शब्दाः सम्बन्धिशब्दा उच्यन्ते, ते च नियतमेव स्वसम्बन्धिपदार्थान्तरमाकाङ्क्षन्त्येव, यथाऽत्र स्वरूपशब्दः स्वसम्बन्धिनं धातुमाकाङ्क्षति,-तथा च ते नित्यं साकाङ्क्षा इति तेषां वाक्य इव वृत्तावपि सामर्थ्यं तिष्ठत्येवेति समासो भवति । तथा च *सापेक्षमसमर्थवत्* इत्यत्र नित्यसापेक्षातिरिक्तत्वं निवेशनीयमिति ॥

तत्रोदाहरणरूपेण द्वितीयकारिकामाह—समुदायेनेति-'येषां गुरुकुलादीनां समुदायेन सम्बन्धः, ते, अवयवान्- गुर्वादीन्, संस्पृश्य-तैः पूर्वसम्बन्ध्य, तद्वता-अवयविना समुदायेन गुरुकुलादिना, युज्यन्ते-सम्बन्ध्यते' इत्यन्वयः । अयमाशयः—देवदत्तस्य गुरुकुलमित्यादौ देवदत्तस्य गुरुणा गुरोश्च कुलेन सम्बन्धः, गुरुशब्दो हि निरूपकत्वेन देवदत्तादिपदार्थं नियमा-

काङ्क्षत्येवेति नित्यसापेक्षः, देवदत्तस्य च कुलेन सह न साक्षात्सम्बन्धः, अपि तु गुरुद्वारैव, तथा च देवदत्तशब्दो गुरुणा सम्बन्धमनुभूय पश्चात् कुलेन सह सम्बन्धमनुभवतीति तत्र समासो भवत्येव । तथैवेह स्वरूपशब्दो धातुमाकाङ्क्षन्नपि धातुना सम्बन्धमनुभवन्नेव ग्रहणेन सह सम्बन्धमनुभवति, नित्यसापेक्षत्वाच्चासामर्थ्याभावेन समासो भवत्येवेति । तथा च धातुत्वव्याप्येनानुपूर्वीरूपेण यत्र विधौ धातुरुपादीयते तत्र, तत्प्रत्यये–तस्माद्धातोर्यः प्रत्ययो विहितः, धातुत्वेन धातुं प्रकृतित्वेनाश्रित्य विहित इति भावः, तस्मिन् प्रत्यये परे कार्यस्य विज्ञानं–विधेयतावगमः, भवतीति शेषः । धातुत्वव्याप्यानुपूर्व्यवच्छिन्नोद्देश्यताकं कार्यं, धातुत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रये प्रत्यये परे भवतीति यावत् । *सर्वं वाक्यं सावधारणम्* इति न्यायात् तत्प्रत्यय एव भवति नान्यस्मिन् प्रत्यये–नामत्वमुद्दिश्य विहिते इत्यर्थो लभ्यते । *क्विबन्ता धातुत्वं नोज्झन्ति नामत्वं च प्राप्नुवन्ति* इति न्यायेन क्विबन्तानां नामत्वदशायां ततो विहिते नामत्वोद्देश्यके प्रत्यये परतोऽपि धातुत्वव्याप्येन रूपेण धातुमुद्दिश्य विधीयमानं कार्यम् "ऊद् दुषो णौ" [४. २. ४०.] इत्यादिविहितं–स्यादिति तद्वारणार्थमयं न्यायः समाश्रीयते । तथा च दुष्यन्तं प्रयुङ्क्ते दूषयतीत्यत्रेव दोषणं दुट्, तां करोतीत्यर्थे "णिज् बहुलम्०" [३. ४. ४२.] इति णिजि, दूषयतीत्यत्र "ऊद् दुषो णौ" [४. २ ४०] इत्यूत्वं न भवति, यतोऽत्र दुषो धातुत्वव्याप्येन रूपेणाश्रयणमिति धातुत्वोद्देश्यक एव णावूत्वं स्यान्न तु "णिज् बहुलम्०" [३. ४. ४२.] इति विहितनामत्वोद्देश्यके णौ, एतन्न्यायप्रवृत्तेः । एवं–"अः सृजि-दृशोऽकिति" [४. ४. १११.] इति विधीयमानोऽकिद्धुडादिप्रत्ययनिमित्तकोऽकारो यथा 'स्रष्टा द्रष्टा' इत्यादौ भवति तथा रज्जुसृड्भ्यामित्यादौ न भवति । सृजि-दृशोर्हि धातुत्वव्याप्येन रूपेणैवाकारविधाने उद्देश्यतेति धातुत्वव्याप्यानुपूर्व्यवच्छिन्नोद्देश्यताकं तत्कार्यमिति धातुत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रये प्रत्यये परत एव तत् स्यात्, न तु नामत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयेभ्यामि परतः, भ्यामोऽकिद्धुडादिप्रत्ययत्वसत्त्वेऽपि धातोर्विहितत्वाभावादिति । न चात्र क्विपः स्थानिवद्भावेनाकारस्य न प्राप्तिरिति नास्ति न्यायोपयोग इति वाच्यम्, धुटो वर्णत्वेन तस्य चात्र विशेषणतयाऽऽश्रयणेन वर्णाश्रयविधित्वात् स्थानिवद्भावाप्रवृत्तेः, विशेषणतयाऽपि वर्णाश्रये विधौ स्थानिवद्भावो नेत्यस्य पक्षस्य तत्सूत्रव्याख्यायां सिद्धान्तितत्वात् । एवं चात्र स्थानिवद्भावस्यानित्यत्वाद्याश्रयणेनाचार्यमतपोषणमित्याशयकः प्राचां विचारो नावश्यक इत्यवधेयम् । अत्र ज्ञापकं तु तत्र तत्र धातोः स्वरूपग्रहणे निमित्तत्वेनाश्रितेषु प्रत्ययेषु विशेषानुक्तिरेव, तथाहि–आचार्यैः "ऊद् दुषो णौ" [४. २. ४०.] "अः सृजि-दृशः" [४. ४. १११.] इत्यादिसूत्रेषु ण्यादीनां सामान्येन कथनं दूषयतीत्यादौ तदप्रवर्तनं च यत् कृतं दृश्यते तेन विज्ञायते यत्–धातोः स्वरूपग्रहणे तत्प्रत्यय एव कार्यं विज्ञायत इति, तथा चाचार्याचारादेवास्य न्यायस्य सिद्धिरिति ॥ २६ ॥

***धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्*॥२६॥**

त०—यत् कार्यं प्रत्ययनिमित्तकं तत्रैव व्यवस्थापकोऽयं न्यायः । पदान्तत्वादिनिमित्तके च कार्ये नास्य प्रवृत्तिः, यथा–"नशो वा" [२. १. ७०.] इति विधीयमानो गकारादेशः पदान्तत्वनिमित्तक इति तत्र धातोः स्वरूपग्रहणेऽपि न तत्प्रत्यय एव कार्यम्, अपि त्वन्यत्रापि, अत एव प्रनग्भ्यामित्यादावपि भवति; एवं "नहा-ऽऽहोर्ध-तौ" [२. १. ८५.] इत्यादिविषयेऽपि विज्ञेयम् । 'स्वरूपग्रहणे' इत्युक्ततया च "धातोरिवर्णोवर्णस्येयुवौ स्वरे प्रत्यये" [२. १. ५०.] इत्यादौ नास्य न्यायस्य प्रवृत्तिः, तत्र धातुत्वेनैव धातोर्ग्रहणं, न तु धातुत्वव्याप्यानुपूर्व्यवच्छिन्नत्वेन, तथा च 'नियौ नियः' इत्यादौ नाम्नो विहिते प्रत्यये परतोऽपि भवति । पाणिनीये तन्त्रे च "मृजेर्वृद्धिः" [पा० सू० ७. २. ११४.] इति सूत्रे महाभाष्ये *धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्* इति न्यायस्वरूपमुक्त्वा यत्र केनापि धर्मेण धातुर्गृह्यते तत्रास्याप्रवृत्तिः स्यादिति स्वरूपग्रहणमपनीय *धातोः कार्यमुच्यमानं तत्प्रत्यये भवति* इत्येव न्यायस्वरूपं स्वीकृतम् । स्वमते च प्रक्रियाभेदेनैवं [ प्रकृतरूपेण ] न्यायस्वरूपेऽपि क्षत्यभावः । किञ्च तथा सति "धातोरिवर्णोवर्णस्येयुवौ स्वरे प्रत्यये" [२. १. ५०.] इत्यस्यापि धातुप्रत्यये एव प्रवृत्त्यापत्तौ 'नियः' इत्यादावियादेशानापत्तिः, पाणिनीये च ज्ञापकेन तद्वारणं क्रियते इत्यन्यत् । ननु वृत्तौ यत्–रज्जुसृड्भ्यामित्यादौ क्विपः स्थानिवद्भावस्य वर्णाश्रयत्वेन वारणमुक्तं तन्न युज्यते, "स्थानीवावर्णविधौ" [७. ४. १०९.] इति सूत्रे 'अवर्णविधौ' इत्यस्य स्थानिवर्णाश्रये विधौ नेत्यर्थस्याश्रयणात्, इह च न स्थानिनः क्विपः कश्चिद् वर्ण आश्रीयते डकारविधाविति न तस्य निषेधस्य प्राप्तिरिति स्थानिवद्भावो दुर्वार इति चेत्?, न–*वर्णाश्रये नास्ति प्रत्ययलक्षणम्* इति न्यायान्तरानुरोधेन तदाश्रयणात् । यदि च नायं न्यायः स्वप्रक्रियासम्मत इत्याश्रीयते तर्हि आचार्योक्तिप्रामाण्यादेव तत्र न स्थानिवत्त्वमित्याश्रयणीयम् । यदि च "स्थानीवा०" [७. ४. १०९.] इति सूत्रेण भावातिदेश एव क्रियते–'स्थानिनि सति यद् भवति तद् भवति' इत्यर्थाश्रयणात्, स्पष्टं चैतत् "स्थानीवावर्णविधौ" [७. ४. १०९.] इति सूत्रस्थानीयस्य "स्थानिवदादेशोऽनल्-

विधौ" [ पा० सू० १. १. ५६. ] इति सूत्रस्य महाभाष्य इत्युच्यते, तदाऽत्र न स्थानिवद्भावप्राप्तिः, स्थानिनि क्विपि सतीह कस्यापि कार्यस्य प्राप्त्यभावात् । अकारागमबाधनार्थं हि स्थानिवद्भावकरणे स्पष्टमभावातिदेशस्याश्रयणप्रसङ्गात्, स्थानिनि क्विपि सत्यभवतोऽकारस्य तल्लोपरूपे आदेशेऽप्यभावादिदेशस्येष्टत्वावधारणात् । परसूत्रेण च भावाभावयोरुभयोरप्यतिदेशः, स्वरस्य परे प्राग्विधौ [ ७. ४. ११०. ] इति हि परसूत्रम्, तत्स्थानीये "अचः परस्मिन् पूर्वविधौ" [ पा० सू० १. १. ५७. ] इति पाणिनीये सूत्रे भावाभावयोरुभयोरप्यनेनातिदेश इति भाष्यकृता सिद्धान्तितत्वात् । तथा च तत्र सूत्रेऽनुवृत्तं स्थानीवेति पदं स्थानिनि सति यद् भवति तदादेशेऽपि भवति, स्थानिनि सति यन्न भवति तदादेशेऽपि न भवतीत्यर्थकम् । तथा हि–तत्रत्यं भाष्यम्–"काममतिदिश्यतां सच्चासच्चापि नेह भारोऽस्ति ।" अत एव गणयतीत्यादावकारलोपे कृतेऽपि तस्यानेन स्थानिवत्त्वेनोपान्त्यवृद्धिर्न भवति, स्थानिन्यकारे सत्यभवन्त्या उपान्त्यवृद्धेरादेशेऽप्यभावातिदेशात् । न चैकेनैव स्थानीवेति पदेन कथमेकत्र केवलं भावातिदेशः, अन्यत्र भावाभावयोरुभयोरप्यतिदेश इति भिन्नार्थबोधनमिति शङ्क्यम्, शब्दाधिकाराश्रयणात्, द्विविधो ह्यधिकारः-शब्दाधिकारोऽर्थाधिकारश्च, तत्रार्थाधिकारे एव पूर्वत्र योऽर्थो बोधितः स एव परत्रापि बोधनीय इति नियमः, शब्दाधिकारे च तस्य शब्दस्येह लक्ष्यानुरोधाद् भिन्नार्थकत्वमप्याश्रयितुं शक्यत इति लक्ष्यानुरोधिव्याख्यानादुभयार्थत्वसंभवात् । तथा च पूर्वसूत्रेण "स्थानीवा" [७.४.१०९.] इत्यनेनेह रज्जुउड्भ्यामित्यादावकाराभावाय स्थानिवद्भावो न स्यादित्यकारादेशवारणायेह न्यायोपयोगः स्फुट एवेति युक्तमेवात्राचार्यैस्तदुपयोगकरणमिति युक्तं पश्यामः । अत्रेदं विचार्यते–क्विपः स्वमते लुक्लुपादेरविधानम्, किन्तु "अप्रयोगीत्" [ १. १. ३७. ] इति सूत्रेण तस्य प्रयोगेऽदृश्यमानस्येत्संज्ञामात्रं विधीयते, इति तस्य न स्थानित्वं न वा तददर्शनस्यादेशत्वमिति कथं तस्य स्थानिवद्भावशङ्का, कुतश्च तत्सभाध्यर्थं चिन्तनम् । अत्र चार्थे "न वृद्धिश्चाविति०" [ ४. ३. ११. ] इति सूत्रस्थो न्यासग्रन्थोऽप्यनुकूलः, तथाहि–तत्रोक्तम् "नहि क्विपो लुक् लुप् वा किन्तु अप्रयोगीत्" [ १. १. ३७. ] इति । तथैव वृत्तिकृता 'अदर्शनं लुक् लोपः लुप् वा' इति पूर्वतन्त्रसिद्धान्तमनुसरता "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इत्यस्य वृत्तौ 'शं सुखं तत्र तिष्ठतीति क्विपि शंस्थाः पुमान्' इत्यत्र क्विप्-लुकि तस्य स्थानिवत्त्वेन प्राप्तमपि "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इतीत्वं न स्यात्, साक्षाद् व्यञ्जनस्याभावात् तत्सूत्रे च व्यञ्जनग्रहणस्य साक्षाद्व्यञ्जनप्रतिपत्तये कृतत्वादित्युक्तम्, एवं च न्यासानुसारं क्विपः स्थानिवत्त्वशङ्कैव न, वृत्तिकृदनुसारं च सेति किमत्र ज्याय इति । अत्रेदमुच्यते–तत्रत्यन्यासग्रन्थात्रत्यवृत्तिग्रन्थयोरविरोधात् काऽपि शङ्कैव नास्ति, तथाहि–"न वृद्धिश्चाविति०" [ ४. ३. ११. ] इति सूत्रवृत्तौ 'लोपोऽदर्शनमात्रमिह गृह्यते' इत्युक्तम्, तत्र अदर्शनमात्रमिति प्रतीकमुपादाय न्यासकृता 'न तु लुक्-लुपावित्यर्थः, तद्ग्रहणे हि दध्येत्यादौ (? देय इत्यादौ ) गुणप्रतिषेधो न स्यात्, अत्र हि क्विपो लुक् लुप् वा न, किन्तु "अप्रयोगीत्" [ १. १. ३७. ] इति; 'ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति सूत्रवृत्तौ "तेन क्विब्लुपि स्थानिवद्भावेनापि न भवति" इति उक्तम् । तत्र पूर्वोक्तग्रन्थस्यायमाशयः–'लोप'शब्देन यदि कश्चिदेवं मन्येत यत्–साक्षाल्लोपार्थकेन पदेन विहितकार्यस्यैवेह लोपपदेन ग्रहणमिति तन्न मन्तव्यम्, अपि तु यथा–कथञ्चिददर्शनविधायकपदेन विहितं कार्यं ग्राह्यमिति, स एव चाशयो न्यासकृतोपन्यस्तः, नैतावता लुप्-लुकोरित्संज्ञायाश्च भेदो न्यासकारस्याभिमत इत्यायाति, सर्वेषामप्यदर्शनार्थत्वाविशेषात्, अदर्शनस्य चादेशत्वमादिदयत इत्यादेश इति योगार्थानुकूलमेव, तस्य च स्थानिवत्त्वमपि लुबादिभिः सर्वैः शब्दैर्विहितस्य स्यादेव, नहि स्थानिवत्त्वमित्संज्ञकस्य न भवतीति न्यासकारेणाभिहितमिति नात्र तयोर्विरोध इति ॥ २६ ॥

## *नञुक्तं तत्सदृशे* ॥ २७ ॥

**सि०**—नञा–नञ्सहितपदेनोक्तं कार्यं तत्सदृशे–नञ्सहितपदार्थसदृशे विज्ञेयमिति सम्बन्धः, पूर्वतः 'कार्यविज्ञानम्' इत्यस्यानुवर्तमानतया तदनुकूलमेवार्थस्य कर्तव्यतौचित्यात् । नञ्सहितपदार्थश्च व्याकरणे तत्पदस्वरूपमेव, शब्दानां स्वरूपबोधकत्वस्येह *स्वं रूपं शब्दस्याशब्दसंज्ञा* इति न्यायेन सिद्धान्तितत्वात् । यत्र च शब्दशास्त्रीयसंज्ञा नञ्युक्ता तत्र संज्ञिसदृशबोधकत्वं तत्पदस्येति तत्रैव कार्यं विज्ञेयम्, यथा "प्रथमादधुटि शश्छः" [ १. ३. ४. ] इत्यत्र 'अधुटि' इति नञ्युक्तं पदं धुड्भिन्ने तत्सदृशे वर्णे एव परतः कार्यविधायकम्, न तु धुड्भिन्ने तत्सदृशे पदे । " नञा उक्तं पदं नञुक्तपदसदृशे विशेष्यभूते पदे विश्राम्यति" इति व्याख्यानमार्थिकम्, न तु न्यायार्थः, सर्वत्र पदस्यैव पदार्थत्वाभावात् नञुक्तपदस्य च पदार्थोपस्थापकत्वात् । एवं "यत् पदं नञा योगान्निषिध्यते तत्सदृशमेवापरं पदं ग्राह्यम्" इत्यपि बाहुल्याभिप्रायकम्, व्याकरणे बाहुल्येन पदस्यैव पदार्थत्वात् । वस्तुतस्तु–नञा योगान्न तत्पदं निषिध्यतेऽपि तु तत्पदार्थो निषिध्यते, नञ्पदार्थस्य निषेधस्य तत्प्रतिषेध्ये पदार्थे एवान्वयौचित्यात्, 'पदार्थः पदार्थेनान्वेति' इति न्यायात्, उदाहरणं यथा–"क्यक्ये" [ १. २. २५. ] इत्यत्र नञ्युक्तेन क्यप्रत्ययेन क्यसदृशस्य यकारादेरपि प्रत्ययस्यैव ग्रहणात्, 'गां नावं वेच्छति' इत्यर्थे

क्यनि–'गाव्यति नाव्यति' इत्यादावयावौ भवतः, न तु गोयानं नौयानमित्यादौ यकारादौ पदे परे। अत्र ज्ञापकं स्वीदृशस्थले विशेष्यानुक्तिरेव। 'क्यमिति यादौ' इति द्वयमपि विशेषणमेवेति विशेष्यमेतन्न्यायेनैव लभ्यमिति 'प्रत्यये' इत्यर्थो लभ्यते। नञा सहोक्तं नञ्युक्तमिति समासाश्रयणादेवायं न्यायः पर्युदासविषय एव प्रवर्तते, तत्रैव नञा सह प्रतिषेध्यस्य पदस्य सम्बन्धात्, अन्यत्र तु क्रियया सम्बन्ध इति क्रियायां कस्यापि कार्यान्तरस्याभावान्न्यायप्रवृत्तिरनर्थिका स्यात्। श्रूयते चैतदनुसारिणी प्राचामुक्तिः–"पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्।" इति। सादृश्यं च क्व केन रूपेण ग्राह्यमित्यत्र लक्ष्यानुसारि व्याख्यानमेव शरणम्। अतश्च "अनतो लुप्" [ १. ४. ५९. ] इति सूत्रेऽकारसादृश्ये गृह्यमाणे वर्णत्वेनैव सादृश्यं गृह्यते न तु स्वरत्वेन, ततश्च पय इत्यादावपि लुब् भवति। इत्थञ्च तत्र प्रसज्यप्रतिषेधमाश्रित्य तत्र न्यायाप्रवृत्तिकल्पना प्राचामनावश्यकी किञ्च प्रसज्यप्रतिषेधस्थले नञः क्रिययाऽन्वयस्य सत्त्वेन तत्रासामर्थ्यात् समासो न भवतीत्यसामर्थ्येऽपि सौत्रत्वात् समास इति क्लिष्टकल्पना समाश्रयणीया स्यात्। तदुक्तमन्यत्रापि—

"पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।
प्रसज्यप्रतिषेधस्तु क्रियया सह यत्र नञ्॥" इति,

यत्रोत्तरपदेन सह नञ्समासो भवति तत्र पर्युदासः, यत्र च क्रियया तस्य सम्बन्धस्तत्र प्रसज्यप्रतिषेधोऽर्थ इति कारिकार्थः। तथा च "अनतो लुप्" [ १. ४. ५९. ] इत्यत्र पर्युदास एव, वर्णत्वेनैव च सादृश्यमिति च स्वीकार्यम्। प्रसज्यप्रतिषेधवाचिनञः प्रयोगे च नायं न्यायः, तत्र सादृश्यानुपपत्तेरिति॥ २७॥

## *नञ्युक्तं तत्सदृशे* ॥ २७ ॥

त०—अयं च न्यायो न विशिष्टवचनरूपोऽपि तु स्वाभाविक एव, प्रतीयत एव नञ्समभिव्याहारे तत्सदृशान्यार्थप्रतीतिः, यथा—अब्राह्मणमानयेत्युक्तः कश्चिद् ब्राह्मणसदृशं क्षत्रियादिं पुरुषमेवानयति, न तु लोष्टकाष्ठादिकमानीय कृती भवति। तथा हि–"भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" [ पा० सू० ३. १. १२. ] इति सूत्रे महाभाष्ये 'अच्वेः' इत्युच्यमाने 'क्व दिवा भृशा भवन्ति' इत्यर्थेऽपि भृशशब्दात् क्यङ्प्रत्ययः कस्मान्न भवतीत्याशङ्क्य–"नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः [ वार्तिकम् ], नञ्युक्तमिवयुक्तं वा यत् किञ्चिदिह दृश्यते, ततोऽन्यस्मिंस्तत्सदृशे कार्यं विज्ञायते, तथा ह्यर्थो गम्यते, अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृश एवानीयते, नासौ लोष्टमानीय कृती भवति, एवमिहाप्यच्वेरिति प्रतिषेधादन्यस्मिन्नच्व्यन्ते च्विसदृशे कार्यं विज्ञायते। किञ्चान्यदतोऽच्व्यन्तं च्विसदृशम्, अभूततद्भावः।" इत्युक्तम्। तथा च स्वाभाविकार्थगतेरेव नञ्युक्तस्य सदृशार्थपरत्वमित्यायात्येतेन भाष्येण। भाष्यस्थे न्याये च 'अन्यसदृशाधिकरणे' इति दृश्यते, तस्य चार्थः–अन्यस्मिन् सदृशार्थे चेति, अधिकरणशब्दस्यार्थपरत्वात्, अर्थे हि शब्दः प्रयुज्यत इति सोऽधिकरणं शब्दस्य, तथा चान्यस्मिंस्तत्सदृशेऽर्थे इति कथनेनाभेदेऽपि सादृश्यं भवतीति सूचितम्। तथा च सादृश्यस्य न भेदघटितत्वमिति वैयाकरणसमयः सूचितो भवति, युक्तं चैतत्; तथाहि–

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रदर्शिताः॥"

इत्यभियुक्तोक्तदिशा सादृश्य-भेदयोरुभयोर्नञर्थत्वकथनं सङ्गच्छते, अन्यथा सादृश्य एव भेदस्याऽपि समाविष्टत्वेन तस्य पार्थक्येन कथनं कथं सङ्गतं स्यात्। प्रकृतस्वसम्मतन्याये च 'तत्सदृशे' इत्येतावन्मात्रोक्त्या सादृश्यस्य भेदघटितत्वमेव, भिन्नव्यक्त्योरेव सादृश्यं भवतीति यावत्, इत्यभिप्रेत्यान्यार्थस्यानुक्तिः। अत्र न्यायमञ्जूषायाम्–'अस्य न्यायस्यानित्यत्वात् पर्युदासे प्रवृत्तिर्न प्रसज्यप्रतिषेधे' इति यदुक्तं तद् विवेचितमेव वृत्तौ। एतच्च परिभाषेन्दुशेखरे नागेशोपाध्यायेनापि सूचितम्। 'अनित्यत्वे भाष्यसम्मतफलाभावात्' इति वदता। तस्यायमाशयः–नञो भेदबोधकत्वमत्यन्ताभावबोधकत्वं च स्वतःसिद्धमेव, भेदस्थले सादृश्यमात्रं लोकसिद्धमेव न्यायेन बोध्यते। तथा चास्यानित्यत्वफलमिदमेव यत्–क्वचिदसदृशोऽपि भिन्नः प्रतीयते, यथा–"अनतो लुप्" [ १. ४. ५९. ] इत्यत्रासदृशोऽपि वर्णः प्रतीयते इत्येवानित्यत्वमास्थातुरभिप्रायः। तत्र सोऽपि केनचिद् वर्णत्वादिना रूपेण सदृश एवेति तेनैव रूपेण सादृश्यस्य लक्ष्यानुरोधादाश्रयणीयतया दोषाभावेनानित्यत्वाश्रयणे न किमपि फलमिति। लोकसिद्धतया चैतन्न्यायलभ्यार्थस्य न ज्ञापकापेक्षत्वमिति ज्ञापकत्वेनाभिप्रेतमस्य फलमेवेति स्वीकर्तव्यमित्यपि नागेशादीनामभिप्रायः। तथाहि–"ग्यक्ये" [ १. २. २५. ] इत्यादौ विशेष्यानुक्तिरेवैतज्ज्ञापिकेति यत् पूर्वमुक्तं तदिह फलत्वेनैव योज्यं, यदेतन्न्यायबलादेव तत्र विशेष्योपलब्धिरिति। सादृश्यस्य च भेदाघटितत्वमित्ययमर्थः स्पष्टतया प्रतिपादितो वैयाकरणलघुमञ्जूषायां तेनेति विशेषजिज्ञासुभिस्तत एवावलोकनीयम्, इह च ग्रन्थानपेक्षिततया न प्रपञ्चितम्॥ २७॥

## *उक्तार्थानामप्रयोगः* ॥ २८ ॥

सि०—उक्तोऽर्थो येषां ते उक्तार्थास्तेषाम्–उक्तार्थानां, परप्रत्ययाद्यभिहितस्वार्थानां प्रत्ययादीनाम्, अप्रयोगः–अनुचितः

प्रयोगः—अप्रयोगः, प्रयोगो न कार्य इति न्यायार्थः अर्थप्रत्यायनार्थमेव शब्दाः प्रयुज्यन्ते, ते च सामान्यतो द्विधा प्रत्ययाः प्रकृतयश्च, तथा च येषां प्रत्ययानां प्रकृतीनां वाऽर्थाः प्रकृते प्रयुक्तैरन्यैः प्रत्ययैः पदैर्वाऽभिहितास्तेषां पुनः प्रयोगो व्यर्थ एव स्यात्, अर्थप्रत्यायनरूपस्य प्रयोजनस्य पूर्वमेव सम्पन्नत्वात्, ततश्च स्वभावसिद्ध एवार्थ इह वचनरूपेण पठित इत्यवधेयम्, यथा 'क्रियते कटस्तेन' इत्यादौ कर्मादीनामर्थानामात्मनेपदादिनोक्तत्वेन तत्र तत्र [ कर्मादौ—कटादौ ] कर्मत्वबोधिका द्वितीयादयो नोत्पद्यन्ते, किन्तु परिशिष्टे नामार्थमात्रे प्रथमैव भवति क्वचित्त लोकप्रसिद्ध्या कस्यचिद् वैचित्र्यस्य विवक्षया वोक्तार्थस्यापि प्रयोगो भवति, यथा—'अक्ष्णा काणः पदा खञ्जः' इत्यादौ, अत्र हि काणत्वस्याक्ष्णोः खञ्जत्वस्य पादयोश्च सम्बन्धे निश्चितेऽप्यङ्गिनि वैरूप्यस्य प्रतिभासनायैवं प्रयोगः क्रियते, इति विशेषार्थबुबोधिषयोक्तार्थस्याऽपि प्रयोगे दोषाऽभावः । लोकप्रसिद्ध्या वा तथा प्रयोगः, नहि लौकिकी प्रसिद्धिरनुयोक्तुं शक्या प्रवाहस्यानादित्वात् । तथा 'क्रियते कटः' इत्यादावपि कर्मत्वबोधकप्रत्ययादिप्रयोगापत्तिरिति तद्वारणार्थोऽयं न्यायः समाश्रयणीयः । "रषृवर्णा०" [ २. ३. ६३. ] इति सूत्रे एकशब्दस्य नियमार्थत्वकथनमत्र ज्ञापकम्, तथा हि तत्र वृत्तिः—"पदे इत्येतावतैवैकपदे लब्धे एकग्रहणं नियमार्थम्, एकमेव यन्नित्यं तत्र यथा स्यात्, यदेकं चानेकं च तत्र मा भूत्" इति । यच्च विध्यर्थं न सम्भवति तदेव नियमार्थं कथ्यते, *सिद्धे सत्यारम्भो नियमार्थः* इति *विधिनियमयोः सम्भवतो विधिरेव ज्यायान्* इति च न्यायाभ्याम्, विधेश्चासम्भवत्वमेतन्न्यायमूलमेव । तथाहि—यदि प्रकृतसूत्रस्यैकशब्दस्यैवैकत्वमात्रमर्थः स्यात्, स च विधावन्वियात्, किन्तु विनाप्येकशब्देनैकत्वार्थस्य तत्र बोधसंभव इति न स विध्यर्थः, यथा—"ह्रस्वोऽपदे वा" [१. २. २२.] इत्यत्रापदे इत्यैकवचनैकत्वस्य विवक्षया 'न चेत् तौ निमित्तनिमित्तिनावेकत्र पदे स्याताम्' इत्यर्थो भवति तथेहाप्येकशब्दाभावेऽपि 'पदे' इत्यत्रैकत्वस्य विवक्षया 'एकत्रपदे' इत्यर्थो लभ्येतैवेत्येकग्रहणमुक्तार्थत्वादप्रयोगार्हं विधावन्वयमलभमानं व्यर्थं सत् वृत्त्युक्तमर्थं ग्राहयतीति, तेन च 'नृनाथः' इत्यत्र समुदायस्यैकपदत्वम्, अन्तर्वर्तिविभक्त्या च प्रत्येकस्याऽपि पदत्वादनेकपदत्वं चेति नैकमेवेदं पदमिति ऋवर्णात् परस्य नस्य णत्वं न भवति । तथा चायं न्यायस्तत्राश्रित इति लभ्यते, अन्यथा 'पदे' इत्यनेनैकत्वे लब्धेऽपि पुनरप्येकपदेनैकत्वार्थस्य कथनं कथं व्यर्थं विज्ञायेत । एवं च क्वचिदुक्तार्थानामपि प्रयोगः स्पष्टार्थः *द्विर्बद्धं सुबद्धं भवति* इति न्यायानुकूलो वा, यथा—"शिरोऽधसः पदे समासैक्ये" [ २. ३. ४. ] इति सूत्रे ऐक्यशब्दप्रयोगः, अत्र हि 'समासे' इत्येकवचननिर्देशेऽप्येकत्वरूपस्यार्थस्योक्तावपि "वौष्ठौतौ समासे" [ १. २. १७. ] इत्यादिवत् निर्वाहे सिद्धे ऐक्यशब्दप्रयोगः स्पष्टार्थ एव । यत्तु कैश्चित्, 'अत्रत्यैकग्रहणेनास्य न्यायस्यानित्यत्वमिति सूच्यते' इत्युक्तं तत् तु न साधु—लोकसिद्धस्याप्यस्य न्यायस्यानित्यत्वस्य ज्ञापयितुमशक्यत्वात्, ज्ञापकसिद्धस्यैवासार्वत्रिकत्वात्; यत् तु ज्ञापकमिहोपन्यस्तं तन्नास्य न्यायस्य साधनायाऽपि तु लोकसिद्धोऽयं न्यायः शब्दशास्त्रेऽपि समाश्रीयत इत्येतावतोऽर्थस्य सूचनायैव । अस्तु वाऽत्रत्यैक्यग्रहणेन *विचित्रा सूत्राणां कृतिः* इत्येतन्न्यायज्ञापनद्वारोक्तार्थप्रयोगरूपस्य वैचित्र्यस्य सूत्रेऽनुज्ञा क्रियते इति कल्पना ॥ २८ ॥

---

### *उक्तार्थानामप्रयोगः* ॥ २८ ॥

त०—अस्य न्यायस्य लोकसिद्धत्वमपीति वृत्तौ प्रतिपादितम्, लोकसिद्धस्य चास्य ज्ञापकेन शब्दशास्त्रेऽप्यभ्यनुज्ञा क्रियते । तथा च क्रियते कट इत्यादौ कर्मण उक्तत्वाद् द्वितीया न, चित्रा गावोऽस्य सन्तीत्यादौ मतोरर्थस्य बहुव्रीहिणाभिहितत्वान्मतुर्न, गर्गस्य गोत्रापत्यानीत्यर्थे समुत्पन्नस्य यञो लुपि पुनर्यञ् न, 'सप्तपर्ण'शब्दे सप्त सप्त पर्णानि सन्ति यस्येत्यर्थसत्त्वेऽपि वीप्सायाः समासेनैवोक्तत्वाद् द्विर्वचनं नेत्यादीनि फलानि । पाणिनीयव्याकरणे तु—उक्ते कर्मादौ द्वितीयादिविभक्तीनामभावाय "अनभिहिते" [ पा० सू० २. ३. १. ] इत्यधिकारसूत्रं क्रियते । तत्रानेनैव न्यायेनोक्तार्थानामप्रयोगादेव विभक्तीनामनुत्पत्तौ सिद्धायां तस्य वैयर्थ्यमाशङ्क्येत्थं समाहितं तत्रैव महाभाष्ये—"अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनं[ वार्तिकम् ], अनभिहितस्तु विभक्त्यर्थः, कः पुनर्विभक्त्यर्थः ?, एकत्वादयो विभक्त्यर्थाः, तेष्वनभिहितेषु सत्सु कर्मादयोऽभिहिता विभक्तीनामुत्पत्तौ निमित्तानि मा भूवन्निति । तस्मादनभिहितवचनम्, तस्मादनभिहिताधिकारः क्रियते । अवश्यं चैतदेवं विज्ञेयम्—एकत्वादयो विभक्त्यर्था इति । 'अभिहिते हि प्रथमाभावः' [ वार्तिकम् ] यो हि मन्यते—'कर्मादयो विभक्त्यर्था, तेष्वभिहितेषु सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्न भविष्यति इति, प्रथमा तस्य न प्राप्नोति, क्व ? वृक्षः प्लक्षः, किं कारणम् ? प्रातिपदिकेनोक्तः प्रातिपदिकार्थ इति ।" [ इति भाष्यम् ] । अयमाशयः—कर्मादीनां विभक्त्यर्थत्वमाश्रित्य "अनभिहिते" इत्यधिकारसूत्रमाक्षिप्तम्, तन्न शोभनम् न केवलं कर्मादीनि कारकाणि विभक्तीनामर्था अपि त्वेकत्वादिका संख्याऽपि विभक्त्यर्थः । तथा हि—"नाम्नः प्रथमैक-द्वि-बहौ" [ २. २. ३१. ] इति सूत्रस्थस्य 'एक-द्वि-बहौ' इति पदस्य "कर्मणि" [ २. २. ४०. ] इत्यादिविभक्तिविधायकसूत्रैः सहैकवाक्यता भवति, तत्र यदैकत्वादीनि

विशेषणानि कर्मादीनि विशेष्याणि, [ एकस्य यत् कर्म तत्र द्वितीयैकवचनमित्येवं रूपेण ] तदा कर्म द्वितीयार्थः सम्पद्यते, तच्च यदा कृदादिप्रत्ययैरभिहितं भवति तदोक्तार्थत्वाद् द्वितीयायाः प्राप्तिरेव नेत्यनभिहिताधिकारवैयर्थ्यमायाति । यदा तु कर्मादीनां विशेषणत्वमेकत्वादीनां विशेष्यत्वं-कर्मणो यदेकत्वादि तत्र द्वितीयैकवचनमिति, तदैकत्वादयो विभक्त्यर्थाः सम्पद्यन्ते, ते चाभिहितेष्वपि कृदादिभिः कर्मादिष्वनभिहिता इति तदभिधानाय द्वितीयादीनां प्रसङ्गे तद्वारणाय कर्तव्योऽनभिहिताधिकारः । तथा च "कर्मणि" [ २. २. ४०. ] इत्यादौ सप्तमीनिर्देश एकत्वाद्यपेक्षः कर्मणि यदेकत्वादि तत्र द्वितीयेति, न त्वभिधेय-[ कर्म ]प्रतिपादनाय, एवं च कर्माद्याश्रितानामेकत्वादीनामपि विभक्त्यर्थत्वे पारम्पर्येण कर्मादीनामपि निमित्तत्वमिति कृदादिप्रत्ययैः कर्मादीनामुक्तावपि तदाश्रितैकत्वादीनामनुक्तत्वात् तन्निमित्ता द्वितीयादिविभक्तिस्तत्र मा भूदिति, अनभिहिताधिकारेणानभिहितानां कर्मादीनामेकत्वादावेव द्वितीयादिविभक्तीनामेकवचनादि भविष्यतीति नातिप्रसङ्गो भवति । किञ्च कर्मादयो विभक्त्यर्था इति मते नामार्थस्यापि विभक्त्यर्थत्वेन भाव्यमिति नामार्थस्य नाम्नैवोक्तत्वात् तत्र प्रथमा विभक्तिर्न प्राप्नोतीति 'वृक्षः प्लक्षः' इत्यादयः प्रयोगा न स्युः । एकत्वादीनां विभक्त्यर्थत्वपक्षे तु तदभिधानाय प्रथमा प्रवर्तेत इति न दोषो भवति । स्वमते तु "कर्मणि" [ २. २. ४० ] इति सूत्रे 'द्वितीया' इत्यस्यानुवर्तनात् तदपेक्षयैव सप्तमी समुचिता, न तु 'एक-द्वि-बहौ' इति पूर्वानुवृत्तापेक्षया । किञ्च संख्यायाः प्रायेण विशेषणत्वस्यैव दृष्टतया 'एकत्वविशिष्टे कर्मणि' इत्येवार्थ उचित इति कर्मण उक्तत्वे न द्वितीयाप्राप्तिरिति नानभिहिताधिकारावश्यकतेति सिद्धान्तः । अत्रेदं शङ्क्यते–"यदि कर्मादयो विभक्त्यर्थास्तर्ह्यभिहिते प्रथमायाः प्रवृत्त्या कटं भीष्ममुदारं शोभनं वा करोतीत्यादौ कटशब्दादुत्पन्नया द्वितीयया कर्मणोऽभिहितत्वात् तत्र भीष्मादिभ्यः प्रथमा प्राप्नोति, द्वितीया न प्राप्नोति, भीष्मादिविशेषणविशिष्टस्य कटस्य करोतिक्रियाव्याप्यत्वात् कर्मत्वम्, तच्च कटशब्दादुत्पन्नया द्वितीययाऽभिहितमिति भीष्मादिभ्यो द्वितीयाया अप्रसङ्गात् प्रथमा स्यात्, यथा कृतः कटो भीष्म उदारः शोभनो दर्शनीय इत्यादौ कृधातोरुत्पद्यमानेन क्तेनाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न भवति, किन्तु प्रथमैव भवतीति । अत्रेदमुच्यते–"नायं दोषो मम मते, सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्भविष्यति, अस्ति च सामर्थ्यम्, किम्? कर्मविशेषो वक्तव्यः । अथवा कटोऽपि कर्म भीष्मादयोऽपि, तत्र "कर्मणि" [ पा० सू० २. ३. २. ] इत्येव सिद्धम् । अथवा कट एव कर्म तत्सामानाधिकरण्याद् भीष्मादिभ्यो द्वितीया भविष्यति । अस्ति खल्वपि विशेषः–कटं करोति भीष्ममुदारं दर्शनीयं शोभनमिति च, कृतः कटो भीष्म उदार शोभनो दर्शनीय इति च करोतेरुत्पद्यमानः क्तोऽनवयवत्वेन सर्वं कर्माभिधत्ते, कटशब्दात् पुनरुत्पद्यमानया द्वितीयया यत् कटस्थं कर्म तत् शक्यमभिधातुं न कर्मविशेषः" । अयमाशयः–भीष्मादियुक्तकटसम्बन्धिकर्मत्वं प्रतिपाद्यम्, तत्र च यथा कटशब्देन भीष्मत्वादीनामनभिधानात् तदभिधानाय भीष्मादिशब्दप्रयोगः, तथा कटशब्दादुत्पन्नया द्वितीयया भीष्मादिशब्दाश्रिता कर्मत्वशक्तिरनभिहितेति तत्रापि तद्विशिष्टकटकर्मत्वप्रतिपादनाय द्वितीया भविष्यत्येवेति । अथवा यद् यत् करोतिक्रिययाऽऽप्तुमिष्टतमं तत् सर्वं कर्म द्रव्यं गुणो वा । न ह्यसौ कर्ता कटमात्रेण सन्तुष्यति, किन्तु भीष्मत्वादिगुणविशिष्टेन, तत्र करोतिक्रियायां पृथक् सर्वेषां कर्मत्वे प्रत्येकं द्वितीयोत्पत्तिः, पश्चात् त्वेकवाक्यतया विशेषणविशेष्यभावः । तथा च न विशिष्टस्य कर्मत्वं, किन्तु क्रियायां कर्मत्वेनान्वितयोः पश्चान्मनसा विशेषणविशेष्यभाव इत्येके । परे तु–"साक्षात्फलाश्रयस्य द्रव्यद्वारा फलाश्रयस्य च कर्मत्वम् । एवं च भीष्मस्यापि पृथक्कर्मशक्तिविशिष्टस्यैव बोधनं भीष्मपदात्, द्रव्येणाभेदान्वयात् तु तस्याः शक्तेर्वाक्यार्थबोधे विशिष्याऽग्रहः, भीष्मकटयोर्बोधश्च विशेषण-विशेष्यभावेनैव" इत्याहुः । अथवा भीष्मादीनां स्वयमकर्मत्वेऽपि विशेष्यसम्बन्धिन्यैव विभक्त्या भाव्यम्, तदेकयोगक्षेमत्वात्, केवलानां च नाम्नां *न केवला प्रकृतिः प्रयोक्तव्या* इति नियमेन प्रयोगानर्हत्वात्, ततो यथा राजसुहृदः स्वयं निर्धना अपि राजधनेनैव धनवन्तो धनफलभाजो वा तथा गुणा अपि स्वयं कर्मत्वाभाववन्तोऽपि कर्मत्ववन्तं कटादिकं विशेषयन्तस्तदीयकर्मत्वफलभाजो भवन्तीति नास्मत्पक्षे कटादिविशेषणेभ्यो भीष्मादिभ्यो विभक्त्यप्राप्तिरिति । उक्तं चैतत् "कर्मणि" [ २. २. ४०. ] इति सूत्रे बृहद्वृत्तावपि । विशेषजिज्ञासुभिश्चाकरग्रन्था अवलोकनीयाः । अक्ष्णा काण इत्यादावस्य न्यायस्य नाश्रयणमिति सूचितं वृत्तौ, तत्रायं विशेषोऽभिधीयते–काणशब्दः "कणण् निमीलने" इत्यस्माच्चौरादिकाद्धातोरच्प्रत्यये घञि वा कृते व्युत्पाद्यते, स चाक्षिसम्बन्धिनिमीलनरूपे गुणे रूढः, तथापि गुण-गुणिनोरभेदोपचारात्, काणोऽस्येत्यर्थे विहितस्य मतोर्मतान्तरे लुब्विधानाद् वा काणशब्दः काणत्वगुणविशिष्टे जनेऽपि रूढः, अक्षण्यपि च प्रयुज्यते–अक्षि काणमस्येति । तथा च काणो देवदत्त इति कथितेऽपि विवक्षितार्थप्रतीतिर्भवत्येवेत्यक्ष्णा काणो देवदत्त इति लौकिकव्यवहारादेव प्रयोग इति तत्रत्यग्रन्थाशयः । यदि च काणशब्दस्य गुणमात्रपरत्वं तर्हि निमीलनरूपगुणमात्रस्यैव तेन शब्देन प्रतीत्याऽक्ष्णा सह तस्य गुणस्य सम्बन्धप्रतिपादनायावश्यक एवाक्षिशब्दप्रयोग इति नात्र प्रकृतन्यायप्रसरावसर इति बोध्यम् । "रषृवर्णा०" [ २. ३. ६३. ] इति सूत्रे 'एकपदे' इत्यत्रैकशब्दस्य नियमार्थत्वमिति

प्रतिपादितं बृहद्वृत्तौ, तदेवानूदितमिह वृत्तावपि प्रसङ्गेन, तत्र नियमाकारश्चेत्थं प्रदर्शितः–'एकमेव यन्नित्यम्' इति, तस्य चाखण्डमेव यत् पदमित्यर्थः, अखण्डपदत्वं च पदाघटितपदत्वम्, 'नृ-नाथः' इत्यादेः समुदायस्य पदघटितपदत्वात् पदाघटितपदत्वाभावेन तत्र न णत्वप्रवृत्तिर्भवति । न च 'मातृभोगीण' इत्यादौ मातृपदघटितत्वेन पदाघटितत्वाभावेन णत्वं न स्यादिति वाच्यम्, निमित्तिमत्पदाघटितत्वमखण्डपदत्वमिति स्वीकारेण मातृपदस्य निमित्तिमत्त्वाभावेन भोगीनेत्यस्य केवलप्रत्ययस्य वा पदत्वाभावेन च 'मातृभोगीन' इति समुदाये विशिष्टाभावसत्त्वेन णत्वसिद्धौ बाधकाभावात्, निमित्तं रेफ-षकारौ निमित्ती नकार इति पारिभाषिकोऽर्थः । न च सुपर्वणेत्यादौ निमित्तिमत्पदं तु पर्वन्निति, तद्घटितत्वेन णत्वं न स्यादिति वाच्यम्, निमित्तानधिकरणनिमित्तमत्पदाघटितत्वमित्यखण्डपदत्वस्य परिष्कृतलक्षणस्वीकारात्, अत्र च पर्वन्नित्यस्य निमित्तानधिकरणत्वाभावेनाखण्डपदत्वाक्षतेर्दोषाभावात् । न च गन्धर्वस्य गानं–गन्धर्वगानमित्यादौ *गति-कारक-ङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः* इति न्यायेन गानेत्यस्य पदत्वाभावेन समुदाये निमित्तानधिकरणनिमित्तिमत्पदाभावरूपविशिष्टाभावसत्त्वेनाखण्डपदत्वाक्षतेर्णत्वमापद्येतेति वाच्यम्, पदशब्देन पदत्वयोग्यस्यार्थवतो ग्रहणेनार्थवत्त्वस्य च तत्र [ गानशब्दे ] सत्त्वेन निमित्तानधिकरणनिमित्तिमत्पदाभावरूपस्याखण्डपदत्वस्य तत्राभावेन दोषाभावात् । किञ्चैतादृशस्थले विभक्तीतरानपेक्षया लोकेऽर्थविषयकबोधजनकत्वं पदत्वमिति परिष्कारस्यादरादपि न दोषः, गानेत्यस्य तादृशपदत्वस्याक्षतेः । ननु सर्वनरेणेत्यादौ सर्वशब्दघटकरेफोत्तरत्वेन नरघटकनकारस्यापि णत्वं स्यात्, निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वस्याभाव इति च कथने च तदुत्तरविभक्तिनकारस्यापि णत्वं न स्यादि चेत्? 'रघुवर्णात्' इत्यत्र वैशिष्ट्यं पञ्चम्यर्थः, रेफ-षकार-ऋकारान्यतमविशिष्टस्य नस्य णत्वमित्यर्थः सूत्रस्य, वैशिष्ट्यं च स्वोत्तरत्व-स्वाघटितपदाघटकत्वोभयसम्बन्धेन, एकपदग्रहणं चात्रैवार्थे तात्पर्यग्राहकम् । सर्वनरेणेत्यत्र नरघटकनकारे रेफवैशिष्ट्यं नास्ति, स्वोत्तरत्वसत्त्वेऽपि स्वाघटितपदाघटकत्वरूपद्वितीयसम्बन्धाभावात् । तत्रैव विभक्तिनकारे नरघटकरेफवैशिष्ट्यमस्ति, स्वोत्तरत्व-स्वाघटितपदाघटकत्वोभयसम्बन्धसत्त्वात्, इति तस्य णत्वसिद्धिरित्यलं बहुतरक्षोदेन ।

"शिरोऽधसः पदे समासैक्ये" [ २. ३. ४. ] इति सूत्रे ऐक्यग्रहणेनास्यानिर्णीतत्वं यदुक्तं प्राचीनैस्तद्वृत्तौ प्रत्युक्तमेव, तत्रायमपि हेतुः–'समासे' इत्येतावता एकस्मिन् समासे इत्येतस्यार्थस्य लाभेऽपि परमशिरसः पदमित्यर्थे परमशिरःपदमित्यादौ सत्त्ववारणासम्भवः, अस्ति हि शिरःशब्दस्य पदशब्दस्य चैकस्मिन्नेव षष्ठीतत्पुरुषसमासे सत्त्वम् । तथा चैकस्मिन्नेव समासे इत्यर्थस्य समासान्तराघटकत्वार्थस्य नियमस्य लाभायैक्यग्रहणमिति तेनास्य न्यायस्यानिर्णीतत्वज्ञापनासंभवः । कृते चैवं नियमे शिरःपदस्य समासान्तरघटकत्वस्यापि सत्त्वेन सत्वं न भवति ॥ २८ ॥

## *निमित्ताभावे नैमित्तिकस्याऽप्यभावः* ॥ २९ ॥

सि०—लोके हि द्विविधं निमित्तकारणं दृश्यते-कार्यस्थितिनियामकं तदनियामकं च, प्रथमं यथा न्यायनये–अपेक्षाबुद्धिः, 'अयमेकः, अयमेकः' इति पूर्वमपेक्षाबुद्धिर्जायते, ततो द्वित्वसंख्योत्पत्तिः, ततोऽपेक्षाबुद्धिनाशः, ततो द्वित्वनाश इति हि क्रमोऽभ्युपेयते नैयायिकैः, तत्र अपेक्षाबुद्धिरेव द्वित्वोत्पत्तेर्निमित्तमिति निमित्तभूतापेक्षाबुद्धिनाशान्नैमित्तिकस्य द्वित्वस्यापि नाश इति कार्यस्थितिनियामकं निमित्तकारणमिति गम्यते । यथा वा वेदान्तनये प्रारब्धस्य कर्मणो विक्षेपस्थितिनियामकत्वम्, कर्म हि द्विविधं–सञ्चितं प्रारब्धं च, यत् फलप्रदानोन्मुखतां न गतं तत् प्रथमम्, यच्च फलप्रदानोन्मुखतां गतं तद् द्वितीयम्, तत्र प्रथमस्य तत्त्वसाक्षात्कारेण [ ब्रह्मसाक्षात्कारेण ] नाशः, "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥" [ मुण्डको० २.२.८. ] इति श्रुतेः । द्वितीयस्य [ प्रारब्धस्य ] कर्मणस्तु भोगादेव क्षयः, "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥" इति वचनात्, तत् कर्म यावदस्ति तावद् भोगात्मकः संसारः, तन्नाशे च संसारनाश इति संसारनिमित्तस्य प्रारब्धकर्मणो नैमित्तिकस्य संसारस्य स्थितिनियामकत्वम्, इति वेदान्तिनां प्रक्रिया । कार्यस्थित्यनियामकं च दण्डादि, तन्नाशेऽपि घटनाशादर्शनात्, तथा च द्विधाऽपि निमित्तनैमित्तिकभावस्य दर्शनाद् व्याकरणशास्त्रे निमित्तनैमित्तिकयोः को नियम इत्याशङ्कायामयं न्यायः प्रवर्तते । निमित्तस्य–समवाय्यसमवायिकारणभिन्नकारणस्य, अभावे–नाशे सति, नैमित्तिकस्य–निमित्तमाश्रित्य जातस्य कार्यस्यापि, अभावः–असत्त्वमिति न्यायाऽर्थः । तथा च व्याकरणे निमित्तकारणनाशे तन्निमित्तकस्य कार्यस्यापि नाशो भवतीत्याश्रीयते इति भावः, यथा–बिम्बशब्दाल्लताविशेषनामत्वविवक्षायां गौरादित्वान्ङीप्रत्यये सति "अस्य ङ्यां०" [ २. ४. ८६. ] इति बिम्बाकारलुकि च–'बिम्बी' इति रूपं भवति, ततो बिम्ब्याः फलमित्यर्थे हेमादित्वादञि "फले" [ ६. २. ५८. ] इति सूत्रेण फलार्थप्रत्ययस्याञो लुपि "ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः" [ २. ४. ९५. ] इति ङीनिवृत्तौ "अस्य ङ्यां लुक्" [ २. ४. ८६. ] इति ङीनिमित्तकाल्लुकोऽपि निवृत्त्या अकारस्य स्थितिर्भवतीति 'बिम्बम्' इति रूपं भवति ।

तथा च निमित्तविनाशे नैमित्तिकविनाशः स्पष्ट एवात्र । अस्य ज्ञापकं तु "न सन्धि०" [ ७. ४. १११. ] इति सूत्रेणालुकि कर्तव्ये ङीलुक् स्थानिवद्भावनिषेधोक्तिः, तथा हि–तत्सूत्रवृत्तौ ङीविधौ कर्तव्ये स्वरादेशस्य स्थानिवद्भावनिषेधस्योदाहरणं बिम्बमिति दर्शितम् । तथा हि–बिम्बमित्यत्र फलार्थकप्रत्ययस्य लुपि "ङ्यादेः०" [ २. ४. ९५. ] इति विहितस्य ङीलुकः स्वरादेशरूपत्वेन परनिमित्तकत्वेन तस्य "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इति स्थानिवद्भावे सति ङीप्रत्यये सद्भूततां प्राप्ते तस्मिन् परे "अस्य ङ्यां लुक्" [२. ४. ८६.] इति बिम्बशब्दाकारस्य लुक् प्रसज्येतेति स्थानिवद्भावः प्रतिषिध्यते । यदि चायं न्यायो न स्यात् तर्हि बिम्बशब्दाकारस्य पूर्वमेव लुप्तत्वेन तद्रक्षणार्थः स्थानिवद्भावप्रतिषेधो व्यर्थ एव स्यात्, एतन्न्यायसद्भावे तु फलप्रत्ययलुब्निमित्तके ङ्यो लुक्करणे तन्निमित्तकस्यालुको विनाशादकारस्य सद्भाव इति । तद्रक्षणार्थो ङीलुकः स्थानिवद्भावनिषेधः सार्थको भवति । इत्थं चैतन्न्यायं विनाऽनुपपद्यमानामकारप्रत्यावृत्तिं विनानुपपद्यमाना स्थानिवद्भावनिषेधोक्तिरेतन्न्यायज्ञापिका । निमित्तकारणस्य कार्यस्थितिनियामकत्वपक्षाभिप्रायश्चायं न्यायः । तदनियामकत्वपक्षाश्रयणमपि शास्त्रे दृश्यते लक्ष्यानुरोधात्, तथाहि–मुनीनामित्यादौ "दीर्घो नाम्यतिसृचतसृषः" [ १. ४. ४७.] इत्यनेन दीर्घे कृते नान्निमित्तस्य ह्रस्वस्यापायेऽपि नैमित्तिको नाम् न नश्यति । एवं चास्य पक्षस्याश्रयणे केचिज्ज्ञापकमपि ददति–"ह्रादर्हस्वरस्यानु नवा" [ १. ३. ३१. ] इति सूत्रेऽनुग्रहणं, तच्च न युक्तमिति विवेचयिष्यते विवरणे । तथा च व्यवस्थितयोरनयोः पक्षयोर्लक्ष्यानुरोधादाश्रयणेनैव सर्वलक्ष्यसिद्धौ न्यायस्यास्य विशिष्य स्वीकारोऽनावश्यक इत्यपि तत्रैव विवेचयिष्यते ॥ २९ ॥

## *निमित्तापाये नैमित्तिकस्याप्यपायः* ॥ २९ ॥

**त०**—अस्य न्यायस्य यथा लोकसिद्धत्वं तथोपपादितं वृत्तौ । वस्तुतस्तु नास्य न्यायस्यावश्यकत्वमिति नवीनाः कथयन्ति, निरूपितं चैतत् *अकृतव्यूहाः पाणिनीयाः* इति न्यायव्याख्यावसरे परिभाषेन्दुशेखरे नागेशेन । अयं च न्यायः [ अकृतव्यूहन्यायः ] प्रकृतन्याय[*निमित्तापाये नैमित्तिकस्याप्यपायः* इत्येतन्न्याय ]स्थानीयः कैयटादिभिराश्रितः, स्पष्टं चैतत् "समर्थानां प्रथमाद् वा" [ पा० सू० ४. १. ८२. ] इति सूत्रे कैयटे, किन्तु महाभाष्ये क्वाप्यस्य न्यायस्य चर्चा न कृता' । उक्तं च कैयटेनापि "असिद्धवदत्राभात्" [ पा० सू० ६. १. २२. ] इति सूत्रे "निमित्ताभावे नैमित्तिकस्याप्यभाव इति परिभाषाया भाष्यकारेणानाश्रयणात्" इति । तत्र च महाभाष्यकारस्य तत्र तत्र तन्न्यायानाश्रयणव्यवहारः प्रदर्शितः । नागेशादिभिश्चैतन्न्यायसिद्धानां प्रयोगाणामन्यथा सिद्धिः प्रदर्शिता, शक्यते च स्वमतेऽपि तथाऽस्य न्यायस्य प्रयोजनानामन्यथा सिद्धिः प्रदर्शयितुम्, तथाहि–बिम्ब्याः फलं बिम्बमित्यत्राऽलुपो निमित्तस्य ङीप्रत्ययस्य लुकि तन्निमित्तकस्यालुपो निवृत्तिरिति प्रयोजनत्वेनोक्तम्, तच्चान्यथापि सिद्धम्, तथाहि–पदावधिकेऽन्वाख्याने बिम्ब+ई+अय्+सि' इति स्थितावपरनिमित्तकत्वेनान्तरङ्गत्वादत्रो लुकि ङीलुगल्लुकोः प्राप्तौ ङीलुकः परत्वात् प्रवृत्तावल्लुको निमित्ताभावादेवाप्रवृत्तिः । इत्थं च "न सन्धि०" [ ७. ४. १११. ] इति सूत्रस्य ङीलुकः स्थानिवद्भावनिषेधकत्वमपि स्वत एव चरितार्थमिति न काचिदनुपपत्तिः । यच्चोक्तं "ह्रादर्हस्वरस्यानु नवा" [ १. ३. ३१. ] इति सूत्रेऽनुग्रहणस्यैतन्न्यायानित्यत्वज्ञापकत्वमिति तदपि विचार्यताम्, तथाहि–न्यायमञ्जूषाग्रन्थः—"अनित्यत्वस्याभावे किल प्रोर्णुनावेत्यत्र प्रथममन्तरङ्गत्वादूर्णुधातोर्नस्य द्वैरूप्ये कृते पश्चात् परोक्षाहेतुकत्वेन बहिरङ्गं द्विर्वचनं स्यात्, तथा च प्रोर्णुन्नावेत्यनिष्टं रूपं प्रसज्येतेत्यनुग्रहणं कृतम् । यदि चायं न्यायो नियत एव स्यात् तदा रेफानन्तर्यजं नस्य द्वैरूप्यं कृतमपि द्विर्वचनकरणे रेफस्य णुव्यवधानभवनेन एतन्न्यायान्निवर्तेत एवेति कुतोऽनिष्टापत्तिरिति तद्वारणाय कुतोऽनुग्रहणं कुर्यात्" इति, तन्न शोभनम्–द्वित्वस्य द्विःप्रयोगरूपत्वेन शब्दान्तरत्वाभावेनाव्यवधायकत्वात् । अयमाशयः-यदि द्वित्वेन किञ्चिद् विलक्षणं वस्तु मध्ये क्रियेत तर्हि व्यवधायकत्वमित्यानन्तर्यविघातः स्यात्, न च किमपि विलक्षणं वस्तु क्रियते, स एव 'नु' शब्दो द्विः पठ्यत इति परस्यापि 'नु' शब्दस्य पूर्वाभिन्नत्वं तदङ्गत्वमेव वा सिद्धमिति *स्वाङ्गमव्यवधायकं भवति* इति न्यायेन तत्र व्यवधानाभावात् प्रकृतन्यायप्रसराभावेन नकारद्वयस्य श्रवणं स्यादेवेति तद्वारणाय सार्थकमेवानुग्रहणमिति तज्ज्ञापकत्वकथनं कथं संगतं स्यात् । तथा च मुनीनामित्यादौ दीर्घे कृते ह्रस्वनिमित्तकस्य नामोऽविनाशाय लौकिकं निमित्तकारणस्य कार्यस्थित्यनियामकत्वमेव स्वीकर्तव्यमिति लक्ष्यानुरोधादुभयोः पक्षयोः समाश्रयणमेव युक्तं, सति तादृशे लक्ष्येऽभिहिते । पराकान्तं चात्र नवीनैर्बहुतरमिति विस्तरभिया न प्रपञ्च्यते । न च प्रोर्णुनावेत्यत्र 'णु'शब्दस्याव्यवधायकत्वं साधयता रेफादव्यवहितत्वेन तस्य [ अग्रिमनकारस्य ] णत्वं कथं वारणीयमिति शङ्क्यम्, 'णु'शब्दस्य द्वित्वं प्रत्येव स्वाङ्गत्वस्वीकारात्, णत्वस्य कृते तु तस्य व्यवधायकत्वं स्यात्सत्येवेत्यदोषात् । वस्तुतस्तु न्यायोऽयं नावश्यक इति पूर्वं वर्णितमेवेति दिक् ॥ २९ ॥

## *सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः* ॥ ३० ॥

सि०—सं-समुच्चयेन, नियोगः-विधानं-सन्नियोगः, तेन शिष्टानि-कथितानि-सन्नियोगशिष्टानि, तेषां मध्ये, एकस्य, अपाये-विनाशे सति, अन्यतरस्य-अवशिष्टस्यापि, सहैवेत्यर्थः, अपायः-विनाशः, इति सामान्यतो न्यायार्थः । यद्यप्यन्यतरपदसमभिव्याहारेण सन्नियोगशिष्टयोरिति द्विवचनमेव निर्देष्टुं युक्तम्, द्वयोरेवैकस्य निर्धारणेऽन्यतरशब्दस्य प्रयोगादिति सन्नियोगशिष्टानामिति बहुवचनमनुचितमिति प्रतिभाति, तथापि सन्नियोगशिष्टौ च सन्नियोगशिष्टौ च सन्नियोगशिष्टौ चेत्येवंरूपेण द्वित्वविशिष्टानां सन्नियोगशिष्टपदानां सहोक्तौ प्रस्तुतायामेकशेषेण सन्नियोगशिष्टानामिति बहुवचननिर्देश इति व्याख्याने दोषाभावः, विवेचयिष्यते चैतदन्यत्र, समुच्चयेन विहितघटकान्यतरस्यापाये सम्भाविते तदुभयोरप्यनुत्पत्तिः कर्तव्येति भावः । लोके युग्मजभ्रात्रादावेकस्याभावेऽपि तदन्यस्य सत्त्वदर्शनात्, सव्येतरविषाणयोरपि सहैव जातयोरेकस्य कथञ्चिद् विनाशेऽपरस्य सद्भावदर्शनाच्च तथैव शास्त्रेऽपि मा ज्ञायीति तन्निवृत्त्यर्थोऽयं न्यायः । अपायोऽभवनं च द्विधा भवति-भूत्वाऽपि निवृत्तिर्मूलतोऽप्यभवनं च द्वयमप्येतन्न्यायविषयः । तत्राद्यं यथा-पञ्चेन्द्राण्यो देवता अस्येत्यर्थे "देवता" [ ६. २. १०१. ] इत्यणि "द्विगोरनपत्ये यस्वरादेर्लुबद्विः" [ ६. १. २४. ] इति तस्य लुपि "ङ्यादेर्गौणस्य०" [ २. ४.- ९५. ] इति ङीनिवृत्तौ तत्सन्नियोगशिष्ट आनपि निवर्तेत इति पञ्चेन्द्र इति प्रयोगो भवति, द्वितीये यथा-एतान् गाः पश्येत्यत्र गोशब्दौकारस्य शसोऽता सह "आ अम्-शसोऽता" [ १. ४. ७५. ] इत्यात्वे कृते शसोऽकारस्याभावात् "शसोऽता सश्च नः पुंसि" [ १. ४. ४९. ] इति विधेययोर्दीर्घनकारादेशयोर्मध्ये दीर्घस्याभवनात् तत्सन्नियोगशिष्टो नकारादेशोऽपि न भवति समुच्चयार्थकचशब्दयोगेन विधेययोः कार्ययोरेकदेशैककालस्थनियमान्न्यायसिद्ध एवायमर्थ इति नात्र ज्ञापकापेक्षा । प्राचीनास्त्वत्र ज्ञापकमेवं वर्णयन्ति-"उद्द्योतकं त्वस्य आन्निवर्तनाय नत्वनिवर्तनाय च यत्नाकरणम् । तथाहि-पञ्चेन्द्र इत्यत्र तावद् ङ्य इव आनोऽपि निवृत्तिर्दृश्यते, न च आनो निवृत्तिः क्वाऽपि सूत्रे विहिता, ततो ज्ञायते-ङीनिवृत्तावेतन्न्यायबलात् साऽपि जातेति; तथा 'एतान् गाः' इत्यत्र गोशब्दस्य "शसोऽता सश्च" [ १. ४. ४९. ] इत्यनेन दीर्घो नाभूत् तत्र हेतुर्दृश्यते-"आ अम्-शसोऽता" [ १. ४. ७५. ] इत्यात्वे कृते सति सोऽकारो नास्ति येन सह दीर्घः क्रियते इत्येवंरूपः, नत्वाभवनस्य तु हेतुः कोऽपि न दृश्यते, प्रत्युत तद्भवनस्यैव हेतुर्दृश्यते । पुँल्लिङ्गत्वस्य सद्भावात् । तत एकान्तप्राप्तमपि नत्वं निषेद्धुं यद् यत्नो न कृतस्तज्ज्ञायते-दीर्घस्याभवने एतन्न्यायबलान्नत्वमपि न भावीत्याशयैव ।" इति । अत्रेदमुच्यते-"लक्ष्ये कार्यमदृष्ट्वा तदनुसारिलक्षणानुमानं लक्ष्यैकचक्षुष्काणां कृते स्यादपि, लक्षणैकचक्षुष्काणामद्यतनानामस्मदादीनां कृते तु तन्नोचितम्, अस्मदादयस्तु शास्त्रकृद्वचनमनुसरामः, तदभावे च लोकरीतिमेवानुसरामः, न तु लक्ष्यबलात् तादृशं वचनान्तरं कल्पयितुं प्रभवामः । आचार्यव्यवहारेण-तादृशप्रयोगाणामाचार्यैः कृतत्वेन च कल्पयितुं शक्येताऽपि, यद्याचार्यैः स्वकीयप्रयोगत्वेन तदुल्लेखः कृतः स्यात्, न चैवं तथा दृश्यते, ततश्च समुच्चयार्थचकारयोगविधेयत्वमेवैकापायेऽन्यतरापायहेतुरित्यास्थेयमिति युक्तमुत्पश्यामः । आचार्यैर्वचनरूपेणास्य न्यायस्य पठितत्वं वाऽत्र प्रमाणमस्त्विति समाश्रयणीयम्" इति वरमप्रामाणिकज्ञापकान्तरकल्पनयेत्यलमतिगवेषणया । अनेन न्यायेन स्वभावत एवान्यतरस्याभावे इतरदपि निवर्तेत इति प्रसक्ते सति गौणस्य निवृत्तौ मुख्यस्य न निवृत्तिरिति पक्षान्तरस्याग्रिमन्यायेन प्रतिपादनादस्यानित्यत्वमित्यपि लभ्यते, तेन वर्णवाचक-'एत-श्येत'शब्दाभ्यां स्त्रियां "श्येतैतहरितभरतरोहिताद् वर्णात् तो नश्च" [ २. ४. ३६. ] इति ङीप्रत्यये तकारस्य नकारादेशे-'एनी, श्येनी' इति, ताभ्यामपत्येऽर्थे "द्विस्वरादनद्याः" [ ६. १. ७१. ] इत्येयण्प्रत्यये "अवर्णेवर्णस्य" [ ७. ४. ६८. ] इतीकारलोपे-'ऐनेयः, श्यैनेयः' इति रूपे भवतः, अन्यथा ङ्यो निवृत्तौ तत्सन्नियोगशिष्टो नकारोऽपि निवर्तेत, ततश्च 'ऐतेयः, श्यैतेयः' इति रूपे स्यातामिति ॥ ३० ॥

## *सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः* ॥ ३० ॥

त०—अत्र सन्नियोगशिष्टानामिति बहुवचनस्यानौचित्यं परिहर्तुं द्वित्वविशिष्टसन्नियोगशिष्टपदानामेकशेषः प्रदर्शितो वृत्तौ । परे तु सन्नियोगशिष्टत्वं-समुच्चयेन विहितत्वं द्वयोर्द्वयोरेव दृष्टमिति प्रत्येकं बोधकतत्सन्नियोगशिष्टत्वेनोभयबोधकतात्पर्येणैकशेषं विनाऽपि सन्नियोगशिष्टपदप्रयोगो भवितुमर्हति, अन्यतरपदसमभिव्याहाररूपतात्पर्यवशात् 'घटौ' इतिवत्, तदुक्तं-"सरूपाणामेकशेष एकविभक्तौ" [ पा० सू० १. २. ६४. ] इति सूत्रे महाभाष्ये, अर्थौ अर्थौ प्रति च यत् तदपि प्रत्यर्थम्, अर्थानर्थान् प्रति यत् तदपि च प्रत्यर्थमिति । तथा च द्वित्वविशिष्टसन्नियोगशिष्टत्वावच्छिन्नबोधकतया सन्नियोगशिष्टपदस्य बहुवचनान्तरत्रोपपत्तिः । एकशेषेण तु न निर्वाहः, यावतामेकशेषः क्रियते तावतां ग्रहणेऽप्यवशिष्टानामग्रहणप्रसङ्गाद् विवक्षितसंख्याज्ञानं च दुर्लभम् । अयमाशयः-ननु द्वित्वत्वेन द्वित्वस्य शक्यताव-

च्छेदककोटौ प्रवेशे नित्यद्विवचनान्तत्वप्रयोगोपपत्तिः "ताभ्यां सन्नियोगशिष्टो ङीप् च" इति प्रयोगानुपपत्तिश्च; लक्षणया तथा बोधनसम्भवेऽपि सामान्यतो द्वित्वत्वेन द्वित्वप्रवेशेऽनभीप्सितद्वित्ववतामपि बोधप्रसङ्गः, तत्तद्द्वित्वत्वेन द्वित्वप्रवेशे तु विवक्षितानां तावतां द्वित्वानां ज्ञानं दुर्लभं स्यादिति चेत्? सत्यम्–वस्तुतो द्वित्वविशिष्टस्य सन्नियोगशिष्टत्वेन बोधकमिति तदर्थात् । एतेन "सन्नियोगशिष्टपदं द्वित्वविशिष्टसन्नियोगशिष्टत्वावच्छिन्नबोधकमित्ययुक्तमेव, 'ताभ्यां सन्नियोगशिष्टो ङीप् च' इति दीक्षितोक्त्या द्वित्वस्य सन्नियोगशिष्टपदप्रवृत्तिनिमित्तकोटावप्रवेशात्" इति कैश्चिदुक्तं, तत् परास्तम्, उभयात्मकाश्च यावन्तो सन्नियोगशिष्टास्तेषां बहुत्वाद् बहुवचनान्तत्वोपपत्तिः । अत एव एकशेषेण न निर्वाहः, प्रत्यर्थशब्दनिवेश इति पक्षे हि तदारम्भादिति। यत्तु–अष्टाध्याय्यां [हैमशब्दानुशासनरीत्या सप्ताध्याय्यां] यावन्तः सन्नियोगशिष्टास्तेषां सर्वेषामेकशेषकरणेनाशिष्टाभाव एवेति केचिदाहुः, तन्न–तावतां सन्नियोगशिष्टानामस्माकमेकशेषप्रवृत्तिकाले ज्ञानासम्भवात्, आचार्याणां तज्ज्ञानसम्भवेऽप्यसमुद्देशेन तेषां शास्त्रप्रवृत्तेः, अस्माकं तज्ज्ञानस्य तदानीमसत्त्वेन वाक्यार्थबोधविलयप्रसङ्गात् । कथञ्चित् तत्सम्भवेऽपि च तावतामेकशेषकरणेन गौरवापाताच्च । ननु स्वीकृतेऽप्यस्मिन्न्याये पञ्चेन्द्राण्यो देवता अस्येत्यर्थे "देवता" [६. २. १०१.] इत्यणि तस्य "द्विगोरनपत्ये०" [६. १. २४.] इति लुपि "ङ्यादेर्गौणस्य०" [२. ४. ९५.] इति ङीनिवृत्तावानस्यापि निवृत्तिरित्यभ्युपगम्यमाने पञ्चेन्द्रशब्दः स्वरान्तो न स्यात्, इन्द्रशब्दाकारेण सह जातस्यानो दीर्घस्य आन्शब्दनिवृत्तिकाले आन्शब्दाकारत्वेनैव ग्रहणात् तन्निवृत्तौ पञ्चेन्द्रशब्दस्य व्यञ्जनान्तत्वापत्तिरिति चेत्? न–आन्कृतस्य विशेषस्यैवापहारे स्वाभाविकस्याकारस्य स्थितौ बाधकाभावात्, *अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते* इति तन्त्रान्तरीयन्यायेनान्तरङ्गदीर्घनिमित्तविनाशकलुकः प्राबल्यबोधनात्, पूर्वं दीर्घाप्रवृत्तेर्वा । नन्वेवमपि पञ्चभिरेनीभिः क्रीतः 'पञ्चैतः' इत्यत्र क्रीतार्थकप्रत्ययस्य "द्विगोरनपत्ये०" [६. १. २४.] इति लुपि "ङ्यादेर्गौणस्य०" [२. ४. ९५.] इति ङ्यो लुपि नकारस्यापायेऽपि तकारश्रवणं न स्यात्, देवदत्तहन्तृहतन्यायादिति चेत्? न–अन्यतरापाये सम्भाविते सति उभयोरनुत्पत्तिरित्यर्थस्वीकारेणादोषात् । अग्रिमन्यायेनास्यापोद्यमानत्वेनानित्यत्वमिति प्राचीना आहुः, तदनुसारमेव वृत्तौ तदाश्रित्यैनेयादिप्रयोगाणां सिद्धिरिति प्रतिपादितम् । वस्तुतस्तु न तेन न्यायेनास्यानित्यत्वं ख्यापयितुं शक्यते, तेन गौणस्य निवृत्तौ प्रधानस्यानिवृत्तिरेव विधीयते, तदंशे चास्य न्यायस्य बाध एतावदेव बोधयितुं शक्यते, अनित्यत्वे च सति तस्य न्यायस्यावश्यकतैव न स्यात्, अनित्यत्वेनैव प्रधाननिवृत्त्यभावस्य सिद्धत्वात् । नन्वेवमेन्या अपत्यम् 'ऐनेयः' इत्यादिप्रयोगाः कथमिति चेत्? स्थानिवद्भावेनैव सिद्धत्वात् । अयमाशयः–तत्रेकारलुपि तस्य स्थानिवद्भावेनेकारबुद्ध्या तदपायाभावान्नकारस्य स्थितिर्भविष्यति । न च "स्वरस्य परे प्राग्विधौ" [७. ४. ११०.) इति सूत्रेणैवात्र स्थानिवद्भावो विधेयः, स च प्राग्वर्त्तिनि कस्मिंश्चिद् विधौ कर्तव्ये भवति, न चात्र कश्चित् प्राग्विधिः कर्तव्य इति कथं स्थानिवद्भाव इति शङ्क्यम्, यतः प्राग्विधावित्यत्र विधिशब्दो भावसाधनः, विधानं–विधिर्भावः सत्ता, प्राचो विधौ सत्तायां कर्तव्यायामित्यर्थे, प्राचो नकारस्य सत्ताऽत्र कर्तव्येति तत्प्रवृत्तौ बाधकाभावः । वस्तुतस्तु विधीयते विधिरिति कर्मसाधनविधिशब्दस्वीकारेऽपि दोषाभावः, अत्र नादेशस्यानेन न्यायेन निवृत्तिरूपे कार्ये कर्तव्ये स्थानिवद्भावप्रवृत्त्याश्रयणात् । केचित् तु–णौ परे "जातिश्चणि-तद्धितय-स्वरे" [३. २. ५१.] इति सूत्रेण पुंवद्भावविधानेनास्य न्यायस्यानित्यत्वं ख्यापयन्ति, तेषामयमाशयः–पुंवद्भावविधानस्यैतत्फलं यत् 'एनीमाचष्टे' इत्यर्थे णौ, अनेन पुंवद्भावे एतयतीति रूपं यथा स्यात्, तच्च विनाऽपि पुंवद्भावं णौ परतः "त्र्यन्त्यस्वरादेः" [७. ४. ४३.] इत्यनेनान्त्यस्वरादेर्लुकि ईकारनिवृत्तौ तत्सन्नियोगशिष्टस्य नकारस्यापि निवृत्त्या सिद्धमेव स्यात्, इति पुंवत्त्वविधानं व्यर्थं सदस्य न्यायस्यानित्यतां ज्ञापयतीति । न च पट्वीमाचष्टे पटयतीत्यादिसिद्धिस्तत्फलमिति वाच्यम्, तत्रापि ईकारनिवृत्तौ तन्निमित्तकस्य वकारस्यापि *निमित्तापाये०* इति न्यायेन निवृत्तौ पुनरप्यन्त्यस्वरादिलोपे रूपसिद्धिसंभवात् । न च *लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते* इति न्यायेन पुनरन्त्यस्वरादिलोपाप्राप्तिरिति वाच्यम्, विकारकृतभेदेन लक्ष्यभेदस्याश्रयणात् । अत्रोच्यते–दरदोऽपत्यं स्त्रीत्यर्थे "पुरु-मगध-कलिङ्ग-सूरमसद्विस्वरादण् [६. १. ११६.] इत्यणि तस्य द्रिसंज्ञायां "द्रेरञणोऽप्राच्यभर्गादेः" [६. १. १२३.] इति लुपि 'दरद्' इति, तामाचष्टे इत्यर्थे णौ पुंवद्भावेन दारदयतीति रूपमिष्टं, तदर्थं पुंवद्भावविधानस्यावश्यकत्वात्, ततश्च न तेनास्य न्यायस्यानित्यत्वं ज्ञापयितुं शक्यत इति नित्य एवायं न्याय इति ॥ ३० ॥

## *नान्वाचीयमाननिवृत्तौ प्रधानस्य* ॥ ३१ ॥

सि०—पूर्वन्यायेन सामान्यतः सन्नियोगशिष्टयोर्मध्येऽन्यतरस्य निवृत्तावपरस्यापि निवृत्तिरिति बोधितम्, तत्र निवृत्तिश्च द्विधा–भूत्वा निवर्तनं मूलतोऽप्यभवनं चेति तत्रैव न्याये प्रतिपादितम् । तत्रान्वाचीयमानस्यापि सन्नियोगशिष्टत्वेन तन्निवृत्तौ प्रधानस्यापि निवृत्तिः प्राप्नोति तद्वारणायायं न्यायः समाश्रीयते । एकस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः, यथा–भिक्षामट

गां चानयेत्यत्र भिक्षार्थं गच्छता प्रधानभूतया भिक्षया सह गवानयनस्यापि विधानम्, अन्वाचयविषयीक्रियमाणश्चान्वाचीयमानः, तस्य निवृत्तौ–स्वभावतोऽभवने सति, प्रधानस्य–तेन सह प्राधान्येन शिष्टस्य, न अपायः–निवृत्तिरिति न्यायार्थः। अत्र 'अपाय' इति पदं पूर्वन्यायादनुवर्त्य व्याख्येयम्, उक्तं च–न्यायानामाचार्येण सहपठितत्वेन परस्परसम्बन्ध इति। एतदुदाहरणम्–'बुद्धीः धेनूः' इत्यादि, अत्र पुंस्त्वाभावात् "शसोऽता०" [ १. ४. ५. ] इत्यनेन शसः सस्य नत्वाभावेऽपि प्राधान्येन शिष्टो दीर्घः स्यादेव। अस्य ज्ञापकं तु "शसोऽता सश्च नः०" [ १. ४. ५९. ] इति सूत्रेण नत्वविधेरन्वाचयार्थेन चकारेण विधानमेव, अन्वाचयेन विधानस्य चैतदेव फलं यत्-कचित् प्रधानस्यैव विधानेऽपि विधेश्चारितार्थ्यमिति, तच्चैतन्न्यायसत्त्वे एव संगतं स्यादिति ॥ ३१ ॥

## *नान्वाचीयमाननिवृत्तौ प्रधानस्य* ॥ ३१ ॥

त०—अन्वाचयेन विधानं हि तस्यानुषङ्गिकत्वं द्योतयति। तथा च न तत्र मुख्यतया विधानस्यावश्यकत्वं भवति, यथा भिक्षामट गां चानयेति नियुक्तो बटुर्यदि भिक्षार्थमटन् गां पश्यति शक्नोति चानुषङ्गिकत्वेन तामानेतुं तर्ह्यानयति, अन्यथा नानयति, न च तावताऽसावकृतकार्य इत्याख्यायते, प्राधान्येनोक्तस्य भिक्षाटनस्य सम्पादितत्वात्; तथेहापि "शसोऽता सश्च नः पुंसि" [ १. ४. ५९. ] इति सूत्रेण प्राधान्येन दीर्घ एव विधेयः, नकारादेशश्च सति पुंस्त्वे विधेयोऽसति च न विधेय इति न नियतो व्याप्यत्वात्, व्याप्यनिवृत्तौ हि न व्यापकनिवृत्तिः, अयोगोलके वह्निव्याप्यस्य धूमस्य निवृत्तावपि व्यापकस्य वह्नेरनिवृत्तेः। तथा च न्यायसिद्ध एवायमर्थ इति नात्र ज्ञापकापेक्षा, यत् तु ज्ञापकमुपन्यस्तं तद् दार्ढ्याय। वस्तुतस्तु–अत्रान्वाचयेन नकारविधानमिति न प्रामाणिकं, तथा सति च तस्यैच्छिकत्वापत्तेः, न च तथेष्टमिति नैतेन न्यायेन 'धेनूः, मतीः' इत्यादौ दीर्घः साधयितुं शक्यः, किन्तु सूत्रस्य यावदंशे प्रवृत्तिस्तावदंशे प्रवर्त्तते, यावतोंऽशस्य तु प्रवृत्तेर्निमित्तमेव नास्ति, तस्य प्रवृत्तिः कथं स्यात्। किञ्चात्र सूत्रे [ "शसोऽता सश्च नः पुंसि" इत्यत्र ] वाक्यार्थद्वयम्–शसोऽता सह पूर्वसमानस्य दीर्घः स्यादित्येकं वाक्यम्, पुंसि च शसः सस्य नत्वं स्यादिति द्वितीयम्, तत्र प्रथमस्य वाक्यस्य प्राधान्यात् तत्सत्त्व एव नत्वं प्रवर्तत इति 'एतान् गाः पश्य' इत्यादौ न प्रवर्त्तते, प्रथमवाक्याप्रवृत्तेः; धेनूरित्यादौ च प्रथमस्य वाक्यस्य प्रवृत्तावपि निमित्ताभावादेव द्वितीयं न प्रवर्त्तत इति समुच्चीयमानत्वेऽपि दोषाभावः। यदि चान्वाचीयमानत्वमेव नकारादेशस्याभिमतं तर्हि तु तस्यानुषङ्गिकत्वेनैव दुर्बलत्वं बोधितमेवेति न तन्निवृत्तौ प्रधानस्य निवृत्तिरिति न तदर्थं विशेषवचनाश्रयणमावश्यकम्। नकारादेशस्य गौणत्वेन विधानमेव हि न्यायज्ञापकमित्युच्यते; न्यायार्थश्च गौणत्वादेव सिद्ध इति किं ज्ञापनेन, अत एव पाणिनीये नये नायं न्यायो दृश्यते इति ॥ ३१ ॥

## *निरनुबन्धग्रहणे न सानुबन्धकस्य* ॥ ३२ ॥

सि०—निरनुबन्धकस्य–निर्गतोऽनुबन्धो यस्मात् तस्य, ग्रहणे–सूत्रे समुच्चारणे सति, सानुबन्धकस्य–अनुबन्धेन सहितस्य, न, ग्रहणमिति पदमर्थादाक्षिप्यते, पूर्वत्र ग्रहणपदसाहचर्यात्। "कार्यं स्यादितीहोत्तरत्र च शेषः" इति च प्राचां लेख आर्थिकः, ग्रहणाभावे हि कार्याभावः सुतरामेव सिद्धः। कश्चित् प्रत्ययादिर्निरनुबन्धः क्वचिदन्यत्र सानुबन्धश्च दृश्यते, तत्र विधिप्रदेशेषु कथं व्यवस्थेति संशये, अनुबन्धस्य लक्ष्येऽविद्यमानत्वेनोभयोरैकरूप्यादुभयोरेव ग्रहणमिति पूर्वपक्षे च प्राप्तेऽयं न्यायो निर्णयति यत्–निरनुबन्धकस्यैव ग्रहणमिति, युक्तं चैतत् शास्त्रे, उभयविधरूपदर्शनाल्लक्ष्ये तददर्शनेऽप्यवश्यमन्यतरस्मिन् परिहरणीये सति, विनिगमकान्तराभावाच्छास्त्रे श्रूयमाणं रूपवैलक्षण्यमेव विनिगमकं स्वीकार्यमिति। तथा च "येऽवर्णे" [ ३. २. १००. ] इति सूत्रे "तस्मै हिते" [ ७. १. ३५. ] इति विहिते निरनुबन्ध एव यप्रत्यये नसादेशो भवति, न तु सानुबन्धे न्यादिरूपे, तथा च नासिकायै हितं नस्यमिति भवति, न तु नासिका यत्रास्तीत्यर्थे "सुपन्थादेर्ज्यः" [ ६. २. ८४. ] इति विहितञ्यप्रत्ययान्ते नासिक्यमित्यत्र। अत्र च ज्ञापकं–"न यि तद्धिते" [ २. १. ६५, ] इत्यत्र व्यञ्जनमात्रनिर्देशः, तथा हि–तत्र निरनुबन्ध-सानुबन्धयोरुभयोरेव ग्रहणं स्यादित्येतदर्थमेव व्यञ्जनमात्रं निर्दिश्यते, अन्यथा यकारमात्रस्य कस्यापि प्रत्ययस्याभावादेव तथा निर्देशोऽसङ्गतः स्यात्, तथा च व्यञ्जनमात्रनिर्देशेन सूचयत्याचार्यः यदिह यकारादिस्वमात्रं विवक्षितमिति तथाभूतो निरनुबन्धः सानुबन्धो वा प्रत्यय इह गृह्यते। अकारसहिततयोपादाने कृते तु तादृशनिरनुबन्धयप्रत्ययस्य सम्भवात् सानुबन्धस्य यस्य ग्रहणमेतन्न्यायविरोधात् कर्तुं न शक्यत इत्येतन्न्यायाशङ्कया कृतो व्यञ्जनमात्रनिर्देश एतन्न्यायज्ञापक इति। यद्यपि 'ये' इति निर्देशे लाघवं नास्ति, 'यि' इत्येतस्य सार्धमात्रिकत्वात् 'ये' इति निर्देशस्य च सार्धद्विमात्रिकत्वादिति लाघवादेव 'यि' इति निर्देशः कृत इति कथयितुं शक्यत इति न तस्य ज्ञापकत्वं संभवति, कथञ्चिदसाङ्गत्ये सत्येव ज्ञापकत्वस्य दृष्टत्वात्, तथापि 'ये' इति व्याप्यनिर्देशमपहाय व्यापकत्वेन 'यि' इति निर्देशः सर्वसङ्ग्रहार्थः, सत्येवास्मिन्

न्याये समुपपद्यत इत्यभिमानः प्राचाम् । ननु सानुबन्धे यप्रत्यये "न यि तद्धिते" [ २. १. ६५. ] इत्यस्य प्रवृत्तिरेव नास्तीति न तस्य ज्ञापकत्वे स्वांशे चारितार्थ्यम्, ज्ञापकेषु हि स्वांशे चारितार्थ्ये सति फलमन्यत्र भवतीति तदभावेन नास्य ज्ञापकत्वमिति चेत् ? उच्यते-धुरं वहतीत्यर्थे "धुरो यैयण्" [ ७. १. ३. ] इति यप्रत्यये "भ्वादेर्नामिनः" [ २. १. ६३. ] इति प्राप्तस्य दीर्घत्वस्य निषेधस्तावद् "न यि तद्धिते" [ २. १. ६५. ] इति सूत्रेण क्रियते, केचिदन्ये वैयाकरणा धुर्यशब्दस्थं यप्रत्ययं टितमिच्छन्ति तन्मतेऽपि धुर्य इत्यत्र दीर्घनिषेधोऽनेनैव सूत्रेण भवतीति सानुबन्धेऽपि यादौ प्रत्ययेऽस्य प्रवृत्तिरिष्टा, टित्त्वस्य फलं च स्त्रियां टित्वाद् ङ्यां "व्यञ्जनात् तद्धितस्य" [ २. ४. ८८. ] इति यलोपे 'धुरी' इति प्रयोगस्तन्मते । अयं च न्यायोऽनित्यः *निरनुबन्धग्रहणे सामान्येन* इति न्यायान्तरस्याग्रे निरूपयिष्यमाणत्वेन तद्दृष्ट्याऽस्य क्वचिदप्रवृत्तेरावश्यकत्वात् ॥ ३२ ॥

### *निरनुबन्धग्रहणे न सानुबन्धस्य* ॥ ३२ ॥

त०—अनुबध्यन्तेऽपरस्मिन् सम्बध्यन्ते ये तेऽनुबन्धाः, कार्यार्थं प्रत्ययादिषु सम्बद्धा लक्ष्येष्वदृष्टा वर्णाः, दृश्यन्ते च समाना एव प्रत्यया अनुबन्धविशेषेण भिद्यमानाः । ते चानुबन्धाः कार्ये भेदकाः सन्तोऽनुवादस्थलेऽपि भेदकाः स्युरेव, किन्तु यत्रानुबन्धो नोच्चारितस्तत्र न सानुबन्धस्य ग्रहणमिष्टमित्यर्थमयं न्यायः समुपाश्रीयते । परमत्र यज्ज्ञापकमुपन्यस्तं तन्न घटते स्वांशे चारितार्थ्याभावात्, परतन्त्रसम्मतप्रयोगादिकमनुसृत्य स्वतन्त्रे व्यवस्थाया आश्रयणस्यानौचित्यात् । किञ्च न तथापि स्वांशे चारितार्थ्यं सानुबन्धे सत्यपि यकारादित्वस्यानपायात् तत्र न्यायं विनापि प्रवृत्तेर्निराबाधात् । नहि न्यायस्य पूर्वसत्त्वं स्वीकृत्य 'ये' इति पाठे सति सानुबन्धे न प्रवृत्तिः स्यादिति शङ्कया 'यि' इति कृतमिति न्यायसत्त्वमनुमापयतीति कथयितुं शक्यते, 'यि' इति करणे प्रयत्नविशेषस्याभावात्, वर्णमात्रस्य ग्रहणे हि विशिष्टरूपोपादानाभावेन कस्य ग्रहणं कस्य नेति शङ्काया अनुदयात् । निरूपितं च वर्णमात्रग्रहणेऽस्य न्यायस्याप्रवर्तनम्- 'औङ आपः' [ पा० सू० ७. १. १८. ] इति सूत्रे महाभाष्ये, 'औ' इति निरनुबन्धनिर्देशे स्वीकृते सानुबन्धकस्यौकारस्य ग्रहणं न स्यादिति शङ्किते 'अथवा वर्णग्रहणमिदं भवति, न चैतद्वर्णग्रहणेषु भवति, अननुबन्धकग्रहणे न सानुबन्धकस्येति' इत्युक्तम् । तथा च ज्ञापकान्तरमन्वेषणीयमाचार्यवचनमात्रसिद्धत्वं वाऽस्य स्वीकर्तव्यम् । पाणिनीये नये चैकस्यैव प्रत्ययस्य कार्यान्तराभाववदनुबन्धद्वयकरणेनायं न्यायो ज्ञापितः "वामदेवाड्ड्यड्ड्यौ" [ पा० सू० ४. २. ९. ] इति सूत्रे महाभाष्ये । किञ्चास्य न्यायस्य *निरनुबन्धग्रहणे सामान्येन* इति न्यायान्तरप्रतिक्षेप्यत्वादनित्यत्वमपि न युक्तम्, वर्णग्रहणे एतदप्रवृत्तिसूचकभाष्यस्वारस्यात् । न च न परतन्त्रीयवचनमस्मत्तन्त्रे व्यवस्थापकमिति शङ्कनीयम्, यतो न तद्वचनमात्रमपि तु युक्तिसहकृतम्, अनुबन्धाऽऽसञ्जनयोग्ये विशिष्टरूपे निर्दिष्टे हि सानुबन्धस्य निरनुबन्धस्य वा ग्रहणमिति विचारणा भवति, यत्र च वर्णमात्रग्रहणं तत्रेदृशसंशयाभावेन न्यायाप्रवृत्तेः । तथा च "रः पदान्ते विसर्गस्तयोः" [ १. ३. ५३. ] इत्यत्र वर्णमात्रस्य निर्दिष्टत्वेन सानुबन्धस्य निरनुबन्धस्य वा ग्रहणमिति संशयाभावेनास्य [ *निरनुबन्धग्रहणे सामान्येन* इति ] न्यायस्यानावश्यकत्वादिति तदपेक्षयास्यानित्यत्वस्वीकृतिरनर्थिकेति । सत्यनित्यत्वफले ज्ञापकसिद्धत्वेनासार्वत्रिकत्वमेव शरणमिति ॥ ३२ ॥

## *एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य* ॥ ३३ ॥

सि०—पूर्वन्यायेनानुबन्धसम्बन्धिविचारस्य प्रस्तुतत्वेन तत्सदृशविषयस्यास्य न्यायस्य प्रकरणसङ्गतत्वम् । यथा निरनुबन्धस्य ग्रहणे न सानुबन्धकस्य ग्रहणमनुबन्धस्य भेदकस्य सत्त्वात्, तथैकानुबन्धकश्चेत् प्रत्ययादिः सूत्रे समुपात्तस्तर्हि तदधिकानुबन्धस्याऽप्यन्यत्र स्थितस्य भेदकत्वौचित्यादेव तद्विशिष्टस्याग्रहणम् । तथा च द्व्यनुबन्धकस्येत्यत्र द्वित्वसंख्याऽनेकसंख्योपलक्षणार्था, एकानुबन्धकग्रहणे नानेकानुबन्धस्य ग्रहणमिति भावः । एकानुबन्धकस्येत्यत्रैकपदं द्व्यनुबन्धकत्वेनेष्टप्रत्ययादिघटितानुबन्धद्वयान्यतरपरम्, त्र्यनुबन्धकत्वेनेष्टप्रत्ययादिघटितानुबन्धत्रयान्यतमपरमिति च मन्तव्यम् । तथा च न भिन्नानुबन्धघटितविषयत्वमस्य, अन्यथा णकारानुबन्धघटितयस्य ककारानुबन्धघटितयस्य चैकानुबन्धघटितत्वसाम्यादेकग्रहणेऽपरग्रहणापत्तेः । अत्र "सूत्रोक्ते एकानुबन्धे शब्दे योऽनुबन्धोऽस्ति तस्यानुबन्धस्य द्व्याद्यनुबन्धकेऽपि सद्भावाद् द्व्याद्यनुबन्धकस्यापि ग्रहणे प्राप्ते प्रतिषेधार्थोऽयं न्यायः" इति प्राचीनानामुक्तिरपि पूर्वोक्ततात्पर्यिकैव, अन्यथा संख्यामात्रपरत्वे एकानुबन्धके योऽनुबन्धः स द्व्यनुबन्धकेऽपि स्यादेवेति नियमाभावेन तदुक्तेरसङ्गत्यापत्तेः । एतदुदाहरणं यथा- "य्वक्ये" [ १. २. २५. ] इत्यत्र एकानुबन्धस्य क्यस्य वर्जनाद् द्व्यनुबन्धके क्यनि क्यङि चावादौ भवत एव, तथा च गामिच्छति-गव्यति, नावमिच्छति-नाव्यति, गौरिवाचरति-गव्यते, नौरिवाचरति-नाव्यते इत्यादिसिद्धिः । ज्ञापकं चास्य "दीर्घश्च्वियङ्-यक्-क्येषु च" [ ४. ३. १०८. ] इति सूत्रे क्येष्विति बहुवचनम्, तद्धि क्य-क्यन्-क्यङ्-क्यङामविशेषेण संग्रहार्थम्, यदि चायं न्यायो न स्यात् तर्हि जातिविवक्षायामेकवचननिर्देशेऽपि सर्वेषां संग्रहे सिद्धे तद्वैयर्थ्यं स्पष्टमेव स्यात्,

तथा चैतन्न्यायासत्त्वे साफल्यमनुपलभमानो बहुवचननिर्देश एतन्न्यायं सूचयति । अस्य च ज्ञापकसिद्धत्वेनासार्वत्रिकत्वात् "आपो ङितां यै-यास्-यास्-याम्" [ १. ४. १७. ] इत्यत्र आप इव डापोऽपि ग्रहणेन मालायै इत्यत्रेव "ताभ्यां वाप् ङित्" [२. ४. १५.] इति डापि 'सीमायै' इत्यादावपि भवति 'यै' इत्यादिरादेशः, अन्यथा एकानुबन्धकस्यापो ग्रहणे डापो ग्रहणं न स्यादिति 'सीमायै' इत्याद्यसिद्धिरेव स्यादिति ॥ ३३ ॥

## *एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य* ॥ ३३ ॥

**स०**—अत्र संख्याविशेषो न विवक्षितः, तथा च द्व्यनुबन्धकेत्यत्र द्वित्वस्यानेकत्वोपलक्षकत्वमित्यावेदितं वृत्तौ । पाणिनीये च *तदनुबन्धकग्रहणे नातदनुबन्धकस्य* इत्येवंरूपेणायं न्यायः पठितः । तदर्थश्च तन्मात्रानुबन्धग्रहणे स चान्यश्चानुबन्धो यत्र तद्ग्रहणं नेति, अत्र च नान्यानुबन्धकृतसंख्यासाम्यमादाय दोषः । युक्तं चैवमेव न्यायस्वरूपस्वीकरणम्, प्रकृतन्यायस्वरूपे हि एकानुबन्धग्रहणे द्व्यनुबन्धकस्याग्रहणसाधनेऽपि द्व्यनुबन्धस्य ग्रहणे त्र्यनुबन्धस्य ग्रहणं न वारितं स्यात् प्रकृतन्यायाविषयत्वात्, तथा च क्यङो ग्रहणे क्यङ्षोऽपि ग्रहणं स्यात् । किञ्च 'यङ्-यक्-क्यानाम्' एकानुबन्धत्वसाम्यात् परस्परं ग्रहणापत्तिः, तद्वारणाय *तदनुबन्धकम्* इत्यादि न्यायस्वरूपं स्वीकार्यमेव । यङो भिन्नानुबन्धत्वेऽपि यक्-क्ययोस्त्वेकानुबन्धत्वमेवेति तयोः परस्परं ग्रहणवारणमनेन न्यायेन दुरुपपादम् । अत एव एकानुबन्धग्रहणे सम्भवतीत्यादि प्रकृतन्यायव्याख्यानं भाष्यकृताऽनादृतमित्यास्तां विस्तरः ॥ ३३ ॥

## *नानुबन्धकृतान्यसारूप्या-ऽनेकस्वरत्वा-ऽनेकवर्णत्वानि* ॥ ३४ ॥

**सि०**—अनुबन्धसम्बन्धिविचारस्य प्रकृतत्वात् तद्विषयमपरमपि न्यायमवसरप्राप्तत्वाद् व्याख्यातुमयं न्याय उपन्यस्तः । तत्रानुबन्धेषु पक्षद्वयं दृश्यते—अनुबन्धा बोधकानवयवा इत्येकः पक्षः, अनुबन्धा बोधकावयवा इति द्वितीयः पक्षः । अवयवस्य समवायसम्बन्धेन सम्बद्धत्वात् तत्रापि [ बोध्येऽपि ] समुपलभ्यमानत्वमावश्यकं स्यात्, न चैवं दृश्यते, शास्त्रेऽनुबन्धाः सन्तोऽपि लक्ष्ये नोपलभ्यन्ते, अतश्च अनवयवा एवेति प्रथमपक्षाशयः । अत्र पक्षे बहूनां दोषाणां सत्त्वेन द्वितीयः पक्ष एव समाश्रीयते, तत्पक्षवादिनामयमाशयः- शास्त्रे बोधके 'सन्' इत्यादिपदे तस्य समुपलभ्यमानत्वेन लक्ष्ये समुपलभ्यमानत्वाभावेऽपि तस्य बोध्यावयवत्वं माऽस्तु, बोधक'सन्'-पदावयवत्वं केन वार्यताम्? यो य एकजातीयसम्बन्धेन यत्रोपलब्धः सन्नन्यत्र नोपलभ्यते स तस्यावयव एव, अनवयवो हि काकादिरेकजातीय[संयोग]सम्बन्धेन गृहवृक्षादिषूपलभ्यते, नैवमयम्, यत्र पूर्वं दृष्टस्तदन्यत्रानुपलभ्यमानत्वादित्यवयवत्वमेव । तथा च 'कित्' 'ङित्' इत्यादिषु बहुव्रीहिसमासोऽपि स्वरसत एवोपपद्यते, अन्यथा [अनवयवत्वे ]ककार इत् यस्य स कित्, ङकार इत् यस्य स ङित् इत्यादिष्ववयवार्थकषष्ठ्यर्थे बहुव्रीहिसमासो न स्यात्, तदर्थमनेकक्लिष्टकल्पनाऽपेक्षया अवयवत्वस्वीकार एव लाघवादिति । एवं चानुबन्धकृतमनेकप्रत्ययादीनामसरूपत्वमनेकस्वरत्वमनेकवर्णत्वं च प्राप्तम्, धात्वादीनां चानेकस्वरत्वं प्राप्तम्, तच्चानिष्टमिति तद्वारणायाचार्यैर्न विशिष्य किमपि वचनमुपन्यस्तं, परन्तु तदाचारादयं न्यायः सूचित इति स इहोपन्यस्तः । तस्यायमर्थः—अनुबन्धाः—इत्संज्ञका वर्णाः, तैः कृतानि—तन्निमित्तकानि, असारूप्यं चानेकस्वरत्वं चानेकवर्णत्वं चेत्येतानि न भवन्तीति । असारूप्यं—सारूप्यभिन्नत्वम्, सारूप्यं च—[ संक्षेपेण ] स्वघटकयावद्वर्णघटितत्वम्, यथा—डप्रत्ययस्यासरूपोऽण्प्रत्ययः, तथा हि—स्वं-डप्रत्ययः, तद्घटकः—डकारोऽकारश्च, तद्घटितत्वमण्प्रत्ययस्य नास्तीत्यसरूपत्वं तयोः परस्परमस्ति । तथा चास्मिन् न्याये स्वीकृते तयोः सरूपत्वमेव भवतीत्यनयोर्विषये "असरूपोऽपादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६ ] इत्यस्य प्रवृत्त्यभावान्नित्यमेव डेनाण् बाध्यते, तथा च 'गोद' इत्यत्र "आतो डोऽह्वा-वा-मः" [ ५. १. ७६. ] इति ड एव भवति, न तु "कर्मणोऽण्" [ ५. १. ७२. ] इत्यण्, अन्यथा गोदाय इत्यनिष्टं रूपं स्यात् । अयं भावः—अपवादप्रत्ययेनोत्सर्गप्रत्ययस्यैकान्तेन बाधे प्राप्ते " असरूपोऽवादे वोत्सर्गः प्राक् क्तेः " [ ५. १. १६. ] इति सूत्रं तद्वारणाय कृतम् । अस्यार्थः—" आ तुमोऽत्यादिः कृत् " [ ५. १. १. ] इत्यतः प्रारब्धे कृत्प्रत्ययाधिकारे क्तेः प्राग् ये प्रत्यया वक्ष्यन्ते तेष्वपवादप्रत्ययेनोत्सर्गप्रत्ययो नैकान्तेन बाध्यते, किन्तु विकल्पेनोभावपि भवत एव, यदि तयोः परस्परमसारूप्यं स्यादिति; यदि पुनरुत्सर्गप्रत्ययोऽपवादप्रत्ययेन सदृशरूपः स्यात् तदा सोऽपवादप्रत्ययेन बाध्यत एवेति सामर्थ्याल्लभ्यते । इह च "कर्मणोऽण्" [ ५. १. ७२. ] इत्युत्सर्गशास्त्रम्, "आतो डोऽह्वा-वा-मः" [ ५. १. ७६. ] इति चापवादशास्त्रम्, तयोश्च कृदधिकारस्थत्वम्, ततश्चानुबन्धकृतं तयोरसदृशत्वं यद्यप्यस्ति तथाप्येतेन न्यायेनानुबन्धकृतस्यासरूपत्वस्याभावात् सरूपयोश्चात्र बाध्यबाधकभावाभावाड्ड एव भवति, न त्वणिति । अत्रांशे ज्ञापकं तु " कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा" [ ५. १. ४२. ] इत्यनेन क्यपो विकल्पेन विधानम्, तद्धि पक्षे "ऋवर्ण-व्यञ्जनाद् घ्यण्" [ ५. १. १८. ] इति सूत्रविहितो घ्यणपि यथा स्यादित्येवमर्थम्, एतन्न्यायाभावे चानुबन्धकृतासारूप्येण "असरूपोऽपवादे वोत्सर्गः

प्राक् केः" [५. १. १६.] इति सूत्रबलादेव सिद्ध इति विकल्पविधानं व्यर्थमेव, तच्च व्यर्थं सदनुबन्धकृतमसारूप्यं न भवतीति ज्ञापयति, ततश्च क्यप्-घ्यणोः सरूपत्वेन परस्परं बाध्यबाधकभावः स्यादिति क्यपो विषये घ्यणः प्रवृत्तिर्न स्यादिति विकल्पेन विधाने तस्य पाक्षिकी प्रवृत्तिर्भवति ॥ अनेकस्वरत्वं यथा--"डुपचींष् पाके" इति धातुपाठेऽनेकस्वरत्वेन पठितस्यापि परोक्षायां पपाचेत्यत्र "धातोरनेकस्वरात्०" [३. ४. ४६.] इत्याम् न भवति, स चानुबन्धकृतानेकस्वरत्वस्याभाव एव सम्भवति । अत्र च ज्ञापकं–"निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषा-ऽऽसूया-ऽनेकस्वरात्" [५. २. ६८.] इति सूत्रे निन्दादिग्रहणम्, अनुबन्धकृतस्यानेकस्वरत्वस्य स्वीकारे च निन्दादयः सर्वेऽप्यनेकस्वरा एव; "णिदु कुत्सायाम्" "हिंसुप् हिंसायाम्" इत्यादिरीत्या धातुपाठे पाठात्, ततश्चानेकस्वरत्वेनैव तेषां ग्रहणे सिद्धे पृथक् तेषां पाठो व्यर्थ एव स्यात्, अतश्च तेषां पाठेन विज्ञायते यत्–अनुबन्धनिमित्तकमनेकस्वरत्वं न सूत्रकृतामभिप्रेतमिति । तथा च पपाचेत्यत्राऽप्यनुबन्धकृतमनेकस्वरत्वमादायाम् न भवति, निन्दादीनामनेकस्वरत्वाभावेन तेषां पाठस्य चारितार्थ्यं च ॥ अनेकवर्णत्वं यथा–"वन्याङ् पञ्चमस्य" [४. २. ६५.] इति विहितस्याङादेशस्य ङकारेणानुबन्धेन सह वर्णद्वयरूपत्वेऽप्यनेन न्यायेनानेकवर्णत्वाभावबोधनात्–"घुणि भ्रमणे" "वन भक्तौ" इत्येताभ्यां धातुभ्यां "मन् वन् क्वनिप् विच् क्वचित्" [५. १. १४७.] इत्यनेन वनि 'घ्वावा, वावा' इत्यत्र "षष्ठ्याऽन्त्यस्य" [७. ४. १०६.] इति परिभाषया पञ्चममात्रस्यैवाङादेशो भवति, अन्यथा "अनेकवर्णः सर्वस्य" [७. ४. १०७.] इति परिभाषया परत्वात् पञ्चमान्तस्य धातोः सम्पूर्णस्य स्थाने आङादेशः स्यात् । अत्रांशे ज्ञापकश्च–"ष्या पुत्र-पत्योः केवलयोरीच् तत्पुरुषे" [२. ४. ८३.] इति सूत्रे ष्याशब्दस्य स्थानित्वेन षष्ठीनिर्देशस्यावश्यकत्वेऽपि 'ष्या ईच्' इत्यभेदनिर्देशः, तद्धि कारीषगन्ध्यायाः पुत्रः–कारीषगन्धीपुत्र इत्यत्र सर्वस्य ष्याशब्दस्य 'ईच्'आदेशविधानार्थः, स च षष्ठीनिर्देशेऽपि 'ईच्'आदेशस्यानेकस्वरत्वेन सिद्ध एवेति व्यर्थ एवाभेदनिर्देशः । कारीषगन्ध्याशब्दश्च करीषस्येव गन्धो यस्येत्यर्थे बहुव्रीहिसमासे "वोपमानात्" [७. ३. १४७.] इति इसमासान्ते–करीषगन्धिः, तस्यापत्यं पौत्रादि स्त्र्यर्थे "ङसोऽपत्ये" [६. १. २८.] इत्यणि "वृद्धिः स्वरेष्वादेः०" [७. ४. १.] इति वृद्धौ "अवर्णेवर्णस्य" [७. ४. ६८.] इतीकारलोपे "अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्य ष्यः" [२. ४. ७८.] इत्यनेनाणः ष्यादेशे "आत्" [२. ४. १८.] इत्यापि सति सिध्यति, तथा च संपूर्णस्य ष्याशब्दस्य 'ईच्' आदेशो यथा स्यादित्येवमर्थोऽभेदनिर्देशोऽनुबन्धकृतमनेकवर्णत्वं न भवतीति सूचयतीति सिद्धम् । यद्यपि 'ष्याया ईच्' इति षष्ठीनिर्देशे गौरवमप्यस्ति तथाप्यभेदनिर्देशे बुद्धिकृतगौरवस्यापि सत्त्वेनोभयोः साम्यमेवेति संतोष्टव्यम्, नहि वर्णोच्चारणगौरवमेव गौरवतयादरणीयं न मनोव्यापारगौरवमिति राजाज्ञास्ति । तथा चोभयनिर्देशस्य साम्येऽपि प्रसिद्धं स्थान्यादेशभावमपहाय प्रकृतिविकृतिभावरूपाभेदाश्रयणमेतन्न्यायांशज्ञापकमेवेति सुस्थम् ॥ अयं च न्यायः प्रथमांशेऽनैकान्तिकः, तेन डा-डाचोरनुबन्धमात्रकृतमसारूप्यं भवत्येवेति 'पिता कृत्वा गतः' इति पितृशब्दस्य प्रथमैकवचने "ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डाः" [१. ४. ८४.] इति डाविधानेन निष्पन्नं 'पिता' इति पदं डाजन्ततया "ऊर्याद्यनुकरणच्विडाचश्च गतिः" [३. १. ४२.] इति सूत्रेण गतिसंज्ञं न भवति, तत्र सूत्रे डाचो ग्रहणेन 'द्वितीयाकृत्य क्षेत्रं गतः' इत्यादौ "तीयशम्बबीजात् कृगा कृषौ डाच्" [७. २. १३५] इति विहितस्यैव ग्रहणात् । तथाच पूर्वत्र [पिता कृत्वा गतः] इत्यत्र गतिसंज्ञाया अभावात् "गति-क्वन्यस्तत्पुरुषः" [३. १. ४२.] इति समासो न भवतीति पूर्वोत्तरपदव्यवस्थाया अभावात् "अनञः क्त्वो यप्" [३. २. १५४.] इति यबादेशो नाभूत्, द्वितीयाकृत्य गत इत्यत्र तु "ऊर्याद्यनुकरण०" [३. १. २.] इति गतिसंज्ञया समासे यबादेशो भवत्येव । सति चाद्यांशस्य स्थैर्येऽनुबन्धकृताऽसारूप्यस्याभावादुभयोरैकरूप्येण ग्रहणं स्यादित्युभयोर्गतिसंज्ञकत्वं स्यादेव । वस्तुतस्तु नैतदर्थं न्यायाद्यांशस्यानित्यत्वमावश्यकम्, डाग्रहणे एव कर्त्तव्ये 'डाच्' इति चकारविशिष्टग्रहणात्, तद्रहितस्य ग्रहणमनिष्टमिति ज्ञातुं शक्यत्वात् । डात्वं हि डा-डाचोरुभयोरपि सामान्यं रूपं, तदनादृत्य विशेषरूपग्रहणे विशेषस्यैव ग्रहीतुमौचित्यात्, सामान्यग्रहणे विशेषग्रहणसम्भवेऽपि विशेषग्रहणे सामान्यग्रहणस्यानौचित्यात्, ततश्च शेषांशद्वयस्यैवास्याप्यंशस्यानैकान्तिकत्वं न प्रतीयते ॥ अत्रेदं विचार्यते–नानुबन्धकृतमनेकवर्णत्वमित्यस्मिन्नंशे यत् "ष्या पुत्र-पत्योः केवलयोरीच् तत्पुरुषे" [२. ४. ८३.] इति सूत्रस्थोऽभेदनिर्देशः सर्वादेशार्थं कृतो ज्ञापक इति तन्न संगच्छते, असत्यप्यभेदनिर्देशे 'ष्या' इत्यस्य प्रत्ययत्वेन तद्विषये "प्रत्ययस्य" [७. ४. १०८] इति परिभाषासूत्रस्य प्रवृत्त्या सर्वस्यैवादेशः स्यादिति तद्वैयर्थ्यस्य स्पष्टत्वात् । न च 'ष्या' इत्यस्य समुदायरूपत्वेन कथं प्रत्ययत्वमिति वाच्यम्, अण इञो वा प्रत्ययस्य स्थाने विहितत्वात्, 'तदादेशास्तद्वत्' इति सिद्धान्तात् ष्यस्य प्रत्ययत्वम्, आपश्च प्रत्ययत्वं स्वत एव, तयोश्च सम्बन्धेन

निष्पन्नस्य 'भ्या' इत्यस्यैकजातीयमाता-पितृनिष्पन्नपुत्रस्यैकजातीयत्ववत् प्रत्ययद्वयसम्पन्नस्य तस्य प्रत्ययत्वानपायात् । तथा चाभेदनिर्देशं विनाऽपि संपूर्णस्यादेशः सिद्ध एवेति ज्ञापितेऽप्यस्मिन्नंशे न तस्य चारितार्थ्यमिति चेत् ? अत्रोच्यते– व्यस्य प्रत्ययादेशत्वेन प्रत्ययत्वे सत्यपि 'भ्या' इत्यस्य प्रत्ययत्वमयुक्तम्, एकस्य तादृशस्य कस्यचित् प्रत्ययत्वाभावात्, माता-पितृजन्यपुत्रस्यैकजातीयत्वदृष्टान्तस्यानेन दार्ष्टान्तिकेन सह वैषम्यात्, नहि पुत्रे पित्रो रूपे पृथक् पृथक् साक्षाल्लक्ष्येते, इह चोभयोः [ यस्य आपश्च ] रूपे पृथक् साक्षादेव लक्ष्येते, ततश्च नायमेकप्रत्ययरूपः किन्तु प्रत्ययसमुदायरूप इति तस्य प्रत्ययत्वेन ग्रहणाभावात् "प्रत्ययस्य" [ ७. ४. १०८. ] इति परिभाषाया अप्रवृत्तेः । प्रत्ययसमुदायस्य प्रत्ययकार्यस्वीकारे च स्वाङ्गसमुदायस्यापि स्वाङ्गकार्यं स्वीकर्तव्यं स्यादिति कल्याणं पाणिपादं यस्याः सेत्यर्थे कल्याणपाणिपादेत्यत्र स्वाङ्गसमुदायस्यापि स्वाङ्गत्वेन "असहनञ्०" [ २. ४. ३८ ] इति ङीप्रत्ययस्यापि प्रसङ्गः स्यात् । यद्यपि भोजवंशजा क्षत्रिया– भोज्या, अत्र आपि परे "भोज-सूतयोः क्षत्रिया-युवत्योः" [ २. ४. ८१. ] इति सूत्रेण भोजशब्दान्त्याकारस्य 'य्य' आदेशे प्रत्ययसमुदायरूपत्वं 'भ्या' इत्यस्य नास्ति तथापि 'भ्याया' इति भेदनिर्देशे "षष्ठ्यान्त्यस्य [ ७. ४. १०६. ] इत्यस्य प्राप्त्या सर्वादेशत्वमसम्भवीत्यभेदनिर्देशस्य तदर्थत्वमस्य न्यायांशस्य ज्ञापकमित्यस्मिन्नभिप्रेतार्थे बाधकाभाव इत्येतावन्मात्रे तात्पर्यात् ॥ ३४ ॥

## *नानुबन्धकृतान्यसारूप्या-ऽनेकस्वरत्वा-ऽनेकवर्णत्वानि ॥ ३४ ॥

**त०** – एतन्न्यायस्योत्थितिबीजं चानुबन्धानां बोधकावयवत्वस्वीकार एव । 'सन्' इत्यादि प्रत्ययोपस्थापकपदं बोधकम्, 'स' इत्यादि लक्ष्यघटकशब्दस्वरूपं च बोध्यम्, बोधकेष्वनुबन्धा उपलभ्यन्ते बोध्येषु च नोपलभ्यन्ते, अतो बोधकावयवत्वमपि तेषां सन्दिह्यते, बोध्य-बोधकयोरर्थ-शब्दयोर्वैयाकरणानां मतेऽभेदेन बोध्यानवयवत्वे बोधकानवयवत्वमपि तेषां स्यादिति सन्देहः । अत्र च पाणिनीये तन्त्रे महाभाष्ये "तस्य लोपः" [ पा० सू० १. ३. ९. ] इति सूत्रे इत्थं विचारितम्–"अथ यस्यानुबन्ध आसज्यते किं स तस्यैकान्तो भवत्याहोस्विदनेकान्तः ?, "एकान्तस्तत्रोपलब्धेः" [ वार्तिकम् ], एकान्त इत्याह, कुतः ? तत्रोपलब्धेः, तत्रस्थो ह्यसावुपलभ्यते, तद्यथा वृक्षस्य शाखा वृक्षैकान्तोपलभ्यते" इति । अत्र कैयटः– "एकान्तः–एकदेशः, अवयव इत्यर्थः, अनेकान्तस्तूपलक्षणमेव केवलम्, यथा गृहस्य काकः । तत्रोपलभ्यमानस्य रूपद्वयदर्शनाद् वृक्षे शाखा-बलाकयोरिवेति प्रश्नः । [ तत्रोत्तरम्–] एकान्तस्तत्रोपलब्धेरिति । ननु यदेव संशयनिमित्तं स एव कथं निश्चयहेतुः ?, उच्यते–सामर्थ्यादवधारणमाश्रीयते–तत्रैवोपलब्धेरिति, अवयवस्तत्रैवोपलभ्यते, अनवयवस्तु तत्र चान्यत्र च । ननु वकारस्य वन-व्रण-वृक्षादिषु बहुषूपलब्धिः, न चासावनवयवः, नैष दोषः– भिन्नसमुदायविषयं वर्णान्तरमेव तदिति शकुनिभाष्ये [ यदि पुनरिमे वर्णाः शकुनिवत् स्युः, आन्यभाव्यं तु कालशब्दव्यवायादिति प्रथमाध्यायप्रथमपादभाष्ये ] प्रतिपादितम् ।" इति । तथा च लोपशास्त्रज्ञानात् पूर्वं यस्तत्रोपलभ्यत एव सोऽवयव इत्यर्थः, अन्यथा शाखाया अपि छेदनोत्तरमन्यत्रोपलम्भादनवयवत्वं स्यात् । एवं चानुपलम्भकयत्नं विनाऽपि तत्र चान्यत्र चोपलभ्यमानोऽनवयवः, तं विना तत्रोपलभ्यमान एव यः सोऽवयव इति भाष्याशय इति परे" । इत्थमनुबन्धानामवयवत्वमेवेति स्वमतं प्रदर्श्य तत्र प्रसक्तानसारूप्यादिदोषानुद्भाव्य तदुद्धरणायानवयवत्वपक्षमुपस्थाप्य तत्र च दोषोद्धारं कृत्वा "उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति, किमत्र न्याय्यमित्याशङ्क्य– "एकान्ता इत्येव न्याय्यम्, कुत एतत् ? अत्र हि हेतुर्व्यपदिष्टः, यच्च नाम सहेतुकं तन्न्याय्यम् ।" इत्येकान्तपक्षो [ अवयवत्वपक्षः ] व्यवस्थापितः [ तत्रैव महाभाष्ये ], अत्र च प्राचीन-नवीनयोर्बहुविवादः–बोध्यावयवत्वं बोधकावयवत्वं भाष्यकृतोऽभिमतमिति, किञ्चानुबन्धत्वमिति, कथं चात्र पक्षता, किं साध्यस्वरूपं, किं हेतुस्वरूपमित्यादिविषये, तच्चात्रानुपयुक्तमिति न विचार्यते । स्वमते च तत्रोपलब्धिदर्शनादवयवत्वमेव निश्चित्य तत्पक्षे समापतितानसारूप्यादिदोषानुद्धर्तुमयं न्यायः संगृहीतः । अनुबन्धानां च बोधकावयवत्वेन डा-ऽणोरनुबन्धहेतुकमसारूप्यं प्राप्तं तदनेन न्यायेन निषिद्धमिति न डविषयेऽण् भवतीति पूर्वं प्रतिपादितमेव । अत्रेदं शङ्क्यते—बोधकावस्थायामसरूपयोरित्यर्थस्य विवक्षणे सर्वेषामेव प्रत्ययानां प्रायोबोधकावस्थायामसरूपत्वेन व्यावर्त्यालाभेन "असरूपोऽपवादे०" [ ५. १. १६. ] इति सूत्रेऽसरूपग्रहणस्य वैयर्थ्यं स्यात्, किञ्च तत्र पक्ष एव न्यायस्वीकारोऽपि कर्तव्य इति लाघवानुरोधेन प्रायोगिकासरूपत्वस्यैव ग्रहणं कर्तव्यं, प्रयोगे च डा-ऽणोरसरूपत्वाभावेन सरूपत्वाड्डविषयेऽणः प्राप्तिरेव नेति नास्ति न्यायस्वीकार आवश्यक इति, अत्रोच्यते– वाक्यार्थबोधकाले लक्षणैकचक्षुषां प्रायोगिकरूपज्ञानाभावेनौपदेशिकरूपग्रहणस्यैवौचित्यमिति । अयमाशयः-प्रायोगिके हि रूपे डा-ऽणोः सारूप्यमिति लक्ष्यैकचक्षुष्का एव जानन्ति, लक्षणैकचक्षुष्काणामस्माकं कृते तु पूर्वं तस्य [ प्रायोगिकरूपस्य ] दुर्ग्रहत्वेन शास्त्रेणूपदिष्टस्यैव रूपस्य सरूपत्वादिव्यवहारप्रयोजकत्वमिति डा-ऽणोर्विरूपत्वेन "असरूपोऽपवादे०" [ ५. १. १६. ] इत्यत्रासरूपत्वेन ग्रहणाद् विकल्पेन बाधापत्तिरिति डविषयेऽणोऽप्राप्तिः, तद्वारणायैतन्न्यायांशस्वीकारस्यावश्यकत्वमिति ॥

ननु किमिदमसरूपत्वम्? न तावदसमानरूपवत्त्वं तत्, सर्वेषां रूपाणां स्वापेक्षया समानत्वेनाव्यभिचारात्; नापि स्ववृत्तिरूपवत्त्वसम्बन्धेन स्वविशिष्टत्वं स्वसरूपत्वम्, तव्य[प्रत्यय]स्य क्तप्रत्ययसरूपत्वापत्तेः, स्ववृत्तिरूपं 'त' इति, तद्वत्तोभयोरप्यस्तीति स्वविशिष्टत्वाक्षतेः । किञ्च नीलघटशब्दस्यापि घटशब्दसरूपत्वापत्तिः, स्ववृत्तिघटत्वरूपस्य तत्रापि सत्त्वादिति चेत्? अत्रोच्यते—स्वपर्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपर्याप्त्यधिकरणत्वसम्बन्धेन स्वविशिष्टत्वमेव स्वसरूपत्वम् । एतन्न्यायसहकारेण तु स्वघटकानुबन्धेतरयावद्वर्णघटितपर्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपर्याप्त्यधिकरणत्वं स्वसरूपत्वम्, परन्त्वत्र यावत्त्वं दुर्वचम्, तस्मात् स्वविशिष्टत्वं स्वसरूपत्वम्, वैशिष्ट्यं च स्वघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मवद्घटितत्व-स्वघटकावृत्तितादृशधर्मवदघटितत्वोभयसम्बन्धेन । न च सरशब्द-रसशब्दयोः परस्परवैशिष्ट्यसत्त्वात् सरूपत्वापत्तिरिति वाच्यम्, स्वं-सरशब्दः, तद्घटकावृत्तितादृशो धर्मो रशब्दोत्तरत्वविशिष्टसत्वं, तद्वान् 'रस' इति तद्घटितत्वस्यैव रसशब्दे सत्त्वात्, एवं रसशब्दघटकावृत्तितादृशो धर्मः सशब्दोत्तरत्वं, तद्घटितत्वस्यैव सरशब्दे सत्त्वेनादोषात् । न्यायबलेन तु धर्मेऽनुबन्धावृत्तित्वं निवेशनीयमित्यन्यत् । अयमाशयः—'असमानरूपवत्त्वमसरूपत्वम्' इति स्वीकारे सर्वेषां रूपाणां स्वापेक्षया साम्येन सर्वस्य स्वसरूपत्वमेव स्यादित्यसरूपपदेन कस्यापि व्यावृत्तिर्न स्यात्, इति तद्दोषपरिहाराय स्ववृत्तिरूपवत्त्वसम्बन्धेन स्वविशिष्टत्वं सरूपत्वं तद्भिन्नत्वमसरूपत्वमिति स्वीकारे स्वस्मिन् स्ववैशिष्ट्याभावेऽपि तव्यप्रत्ययस्य क्तप्रत्ययेन सह स्वरूपत्वापत्तिः, अस्ति हि तव्येऽपि तकाररूपवत्त्वं क्तप्रत्ययेऽपि च; एवं नीलघटशब्दस्य यथा घटरूपवत्त्वं तथा केवल'घट'शब्दस्यापि तादृशरूपवत्त्वमिति तयोः सरूपत्वापत्तिः; एतद्दोषपरिहाराय स्वपर्याप्तश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपर्याप्त्यधिकरणत्वसम्बन्धेन स्वविशिष्टत्वमेव स्वसरूपत्वमिति स्वीकारे पूर्वत्र तव्यप्रत्यये पर्याप्ता व्याप्यवर्तिनी या श्रावणप्रत्यक्षविषयता तकारोत्तराकारोत्तरवकारोत्तरयकारोत्तराकारत्वरूपा, तदवच्छेदको धर्मस्तादृशानुपूर्वी, तत्पर्याप्त्यधिकरणत्वं क्तप्रत्यये नास्तीति तादृशसम्बन्धेन तव्यप्रत्ययवैशिष्ट्यं क्तप्रत्यये नास्तीति न तयोः सरूपत्वम् । एतन्न्यायसहकारेण च श्रावणप्रत्यक्षविषयतायां स्वघटकानुबन्धेतरयावद्वर्णघटितत्वं विशेषणं देयम् । तथा च डाऽणोः स्वघटकानुबन्ध'ड्''ण्'वर्णेतरयावद्वर्णघटितश्रावणप्रत्यक्षविषयताया उभयोरपि पर्याप्तत्वात् तदवच्छेदकधर्मस्य 'अत्व'रूपस्योभयोरपि सत्त्वेन तदधिकरणत्वसम्बन्धेनोभयोरपि सरूपत्वमेवेति "असरूपोऽपवादे०" [५. १. १६.] इति सूत्रस्याप्रवृत्त्या न डविषयेऽण् भवति । परं त्वत्र पक्षे यावत्त्वस्य प्रवेशात् तस्य च निर्वक्तुमशक्यत्वेन दोषः, तस्मात् तदपहाय स्वघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मवद्घटितत्वस्वघटकावृत्तितादृशधर्मवदघटितत्वोभयसम्बन्धेन स्वविशिष्टत्वं स्वसरूपत्वं वाच्यम् । एवं च तव्यप्रत्यये क्तप्रत्ययवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदक'तत्व'रूपधर्मवत्तकारघटितत्वरूपप्रथमसम्बन्धसत्त्वेऽपि स्वघटकावृत्तिश्रावणप्रत्यक्षविषयतावच्छेदक'व्य'त्वरूपधर्मवद्'व्य'शब्दघटितत्वस्यैव सत्त्वेन तदघटितत्वाभावाद् द्वितीयसम्बन्धाभावेन स्वविशिष्टत्वं [क्तप्रत्ययविशिष्टत्वं] नास्तीति न तयोः सरूपत्वम् । एवं-'सर''रस'शब्दयोरपि न सरूपत्वम्, तत्र स्वं 'सर'शब्दः, तद्घटकावृत्तिर्धर्मः—रकारोत्तरसत्वरूपानुपूर्वी, तद्घटितत्वमेव रसशब्दे इति तदघटितत्वाभावेन द्वितीयसम्बन्धाभावात, एवं रसशब्दमादाय सरशब्देऽपि योजनीयम् । एतन्न्यायसहकारेण चोभयत्र सम्बन्धे धर्मेऽनुबन्धावृत्तित्वं देयमित्यनुबन्धघटितधर्ममादाय न सरूपत्वभङ्ग इति ॥

अनेकस्वरत्वमप्यनुबन्धकृतमनेन न्यायेन निषिध्यते । तत्र यद्यप्यनुबन्धानां बोधकावयवत्वमेव स्वसिद्धान्तसिद्धम्, बोध्येषु—अनुबन्धरहितप्रत्ययादिषु तस्य कदाप्यदर्शनेन तदवयवत्वस्यासम्भवात् । 'डुपचींष्' इति समुदायो बोधकः, 'पच्' इति च बोध्यः, स एव च धातुसंज्ञ इति न तत्रानेकस्वरत्वमनुबन्धकृतं प्राप्नोतीति नैतदंशस्यावश्यकता प्रतिभाति, तथाप्यनुबन्धप्रयुक्तकार्यस्य बोध्ये धातुस्वरूपे एव सम्भवेन [तत्रैवानुस्वारेदित्त्वादिप्रयुक्तकार्यस्य दर्शनेन] तस्याप्यनुबन्धसम्बन्ध एष्टव्य एवेति तस्यानेकस्वरत्वेन तत्प्रयुक्तं कार्यं स्यादेवेति तन्निवारणायास्याप्यंशस्यावश्यकत्वात् ॥

अनेकवर्णत्वमप्यनुबन्धकृतं न भवति । तत्र च "ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे" [२. ४. ८३.] इति सूत्रे सर्वादेशत्वार्थं कृतोऽभेदनिर्देशो ज्ञापक इत्युक्तमेव । तत्रेदं विचार्यते—नन्वनुबन्धानामवयवत्वपक्षेऽपि बोधकावयवत्वमेवेति 'ईच्' पदबोध्यस्य ईकारस्यानेकवर्णत्वाभावेनाभेदनिर्देशं विना सर्वादेशत्वस्यासिद्धया कथं तद्वैयर्थ्यमिति तस्य ज्ञापकत्वासंभव इति । अत्र केचित्—"अनेकवर्णबोधकबोध्यः सर्वस्येति "अनेकवर्णः सर्वस्य" [७. ४. १०७.] इति सूत्रस्यार्थः, तेनासत्यप्यभेदनिर्देशे 'ईच्' इत्यनेकवर्णवत्पदरूपबोधकबोध्य ईकारः सर्वस्य स्थाने स्यादेवेति तदर्थकोऽभेदनिर्देशो व्यर्थ एव; न च लोपादिरूप आदेशोऽप्येवं सर्वादेशः स्यात्, सोऽपि ह्यनेकवर्णवल्लोपलुबादिशब्दैर्बोध्य इति वाच्यम्, शास्त्रीयसङ्केतानाश्रयत्वस्य बोधकविशेषणत्वात् । नन्वेवं "जराया जरस् वा" [२. १. ३.] इति सूत्रस्थं 'जरस्' इति पदमपि *स्वं रूपं शब्दस्याशब्दसंज्ञा* इति [न्याय] शास्त्रसंकेतितमिति तस्यापि वर्जने सोऽप्यादेशः सर्वस्य स्थाने न स्यादिति चेत्? न—तस्य न्यायत्वेन शास्त्रत्वाभावात्, शास्त्रपदेन ह्याचार्यभाषितशासनवचनमेव गृह्यते, इदं च ज्ञापकादिसिद्धमित्यस्य

शास्त्रत्वाभावात्" इत्याहुः, तन्न-अनुस्वार-विसर्जनीयादीनामप्यनेकवर्णबोधकबोध्यत्वेन सर्वादेशतापत्तेः, शब्दमर्यादां विहाय स्वेच्छयाऽर्थकरणे सौत्राक्षराणि खण्डयित्वाऽन्यथा तेषां नामादिकरणेऽतिप्रसङ्गाच्च । तस्मादिदमत्रावधेयम्-स्वरूपबोधकस्थले स एवायमिति प्रत्यभिज्ञया बोध्य-बोधकयोरभेद इत्युपेयते, तथा च स एवायमीकारायादेशो यो बोधके 'ईच्' इत्याद्याकारक आसीदिति प्रतीत्याऽनेकवर्णत्वमप्यस्यैव धर्म इत्यस्यावश्यमेव मन्तव्यतया भवत्यनेकवर्णत्वधर्मवानीजादेश इति स्यादेवाभेद-निर्देशं विनापि सर्वस्य 'ष्या'शब्दस्य स्थाने इति स निर्देशो व्यर्थः सन् ज्ञापयितुं शक्नोति न्यायांशमिममिति । ज्ञापिते चास्मिन् न्यायांशेऽनुबन्धस्यानेकवर्णघटकवर्णपदेनाग्रहणाद् बोधकावस्थायामप्यनेकवर्णत्वस्येजादेशेऽभावेन सर्वादेशार्थमभेदनिर्देशस्य चारितार्थ्यम् । तथा च वर्णविशिष्टत्वमनेकवर्णत्वमिति फलति । वर्णश्चानुबन्धभिन्नो गृह्यते, वैशिष्ट्यं च स्वघटितत्वम्, स्वेतरो योऽनुबन्धभिन्नो वर्णस्तद्घटितत्वमित्युभयसम्बन्धेन, ईजादिपदेषु द्वितीयसम्बन्धाभावात् तस्यानेकवर्णत्वाभावः । तथा चाभेदनिर्देशं विना तस्य सर्वादेशत्वासंभव इति सर्वादेशत्वार्थमभेदनिर्देशस्य चारितार्थ्यमिति ॥ ३४ ॥

## *समासान्ता-ऽऽगम-संज्ञा-ज्ञापक-गण-नञ्निर्दिष्टान्यनित्यानि* ॥ ३५ ॥

**सि०**— समासस्य अन्तः-समासान्तः, समासचरमावयवतया विधीयमानः 'अत्' इत्यादिः । आगमः-कमपि वर्णं पदं वोद्दिश्य तत्समीपे विधीयमानो मागमादिः । संज्ञया निर्दिष्टं-संज्ञानिर्दिष्टम्, संज्ञां निर्दिश्य विधीयमानं कार्यम् । ज्ञापकेन स्वरूपबोधकेन सौत्रनिर्देशादिना गणपाठादिना च निर्दिष्टं-ज्ञापकनिर्दिष्टम् । नञा समस्तेनासमस्तेन वा निर्दिष्टं कार्यं-नञ्निर्दिष्टम् । एतानि अनित्यानि-न नियतानि लक्ष्यानुरोधात् क्वचिन्नापि भवन्ति, क्वचिदन्यथा च भवन्तीति भावः । सर्वं वाक्यं सावधारणमिति विनापि नित्यमिति कथनेनैषां नित्यत्वे प्राप्तेऽनिष्टस्थलेऽप्रवृत्त्यर्थमयं न्यायः स्वीक्रियते । अनित्यत्वकथनेनैव यथाप्रयोगदर्शनं क्वचिन्न भवन्तीति सिद्धे "यथाप्रयोगदर्शनं क्वचिदिति शेषः" इति ग्रन्थेन वाक्यपूरणं प्राचामनावश्यकम्, क्वचिन्न भवन्तीत्येव ह्यनित्यत्वमेषामिति पृथक् क्वचिदिति पूरणं व्यर्थमेव ॥

तत्र समासान्तो यथा-बह्व्य आपो यत्रेत्यर्थे बहुव्रीहिसमासे "ऋक्-पूः-पथ्यपोऽत्" [ ७. ३. ७६. ] इत्यति कृते 'बह्वपं सरः' इति भवति, क्वचिच्च 'बह्वाम्पि बह्वम्पि वा सरांसि' इत्यपि समासान्तरहितः प्रयोगः समुपलभ्यते, स च समासान्तविधेरनित्यत्वेनैव साधुः स्यात् । एतद्विषयज्ञापकश्च-"ऋक्-पूः-पथ्यपोऽत्" [ ७. ३. ७६. ] इति सूत्रे 'पथ्यपः' इति निर्देश एव, अन्यथा ऋगादीनामप्पर्यन्तानां द्वन्द्वे समासान्तप्रवृत्त्या "ऋक्-पूः-पथ्यपात्" इति निर्देशः समुचितः स्यात्, अतश्च समासान्तविधायकसूत्र एव समासान्ताकरणमाचार्याणामिममाशयं ज्ञापयति यत्-समासान्तविधिर्लक्ष्यानुसारीति क्वचिन्नापि भवतीति ॥

आगमो यथा-'पट्टा पटिता' इत्यादौ सेटः पटेर्नित्यमेवेडुचित इति विकल्प्य विहितोऽस्यागमस्यानित्यत्वं विनाऽनुपपन्नः । तथा च क्वचिदनिटोऽपि वेट्त्वं दृश्यते, यथा-पक्ता, पचिता, आस्कन्तव्यमास्कान्दितव्यमिति । अत्र च पचि-स्कन्दी उभावप्यनुस्वारेताविति पक्षेऽपीटा न भाव्यं, दृश्यते च क्वचिदिट्सहितः प्रयोगोऽपीत्यागमविधेरन्यथापि भवनरूपमनित्यत्वं विनाऽसम्भवि । तथा धावेरूदित्वात् क्त्वयोर्वेट्त्वेऽपि गतौ नित्यमिट्-धावितः, धावितवानिति; शुद्ध्यर्थे तु नेट्-धौतः, धौतवानिति । तथा जभेस्तिवि "जभः स्वरे" [ ४. ४. १००. ] इति नागमे-जम्भतीति भवति, जञ्जभीतीति यङ्लुबन्ते च नागमो न भवति, आगमस्यानित्यत्वादेव । एवं-कमेर्णिङन्तस्य आने परे मागमे-कामयमान इति भवति, तस्यैवानित्यत्वाश्रयणे च-कामयान इति मागमरहितोऽपि प्रयोगो भवति । एतदनित्यत्वसूचकं च इडाद्यागमानामनित्यत्वेन लक्ष्येषु प्रयुक्तत्वेऽपि तदर्थं यत्नाकरणमेव, तथा हि-पट्टा पटितेत्यादौ विकल्पेनेडागमादि प्रयुक्तम्, न च तदर्थं कोऽपि यत्नः शास्त्रे कृतः, तथा चैतन्न्यायांशमवलम्ब्यैव तथाप्रयोगाः सम्पादनीया इति शास्त्रकृतामाशयः प्रतीयते । अन्यत्रापि यत्र क्वचनानित्यत्वार्थं यत्नो न कृतस्तत्र तथालक्ष्यदर्शनेनैव तादृशार्थज्ञापनमुन्नेयम् ॥

संज्ञानिर्दिष्टं यथा-"धातोरनेकस्वराद्०" [ ३. ४. ४६. ] इति सूत्रेण परोक्षां संज्ञां निर्दिश्य आम् विहितः, स च चकासामासेत्यादौ नित्यमेव प्रवर्तते, दरिद्राञ्चकारेत्यादौ चानित्यत्वेन विकल्प्य प्रवर्तते, अत एव ददरिद्रावित्यपि रूपं भवति, तच्च संज्ञानिर्दिष्टस्यानित्यत्वं विनाऽसम्भवि । एतदंशज्ञापकं तु "आतो णव औः" [ ४. २. १२०. ] इत्यत्र ओकारविधानेऽपि पपावित्यादिसिद्धावौकारविधानमेव, तद्धि दरिद्राधातोः परोक्षायां णवि "अशित्यस्सन्-णकच्-णकानटि" [ ४. ३. ७७. ] इत्याकारलोपे दरीद्रावित्यस्य सिद्ध्यर्थं विधीयते, अन्यथा तत्र 'ददरिद्रो' इति रूपं स्यात् । यदि च "धातोरनेकस्वराद्०" [ ३. ४. ४६. ] इति विहित आम् नित्यः स्यात् तर्हि दरिद्रातेर्णव आमादेशे ददरिद्रावित्यस्यासंभवेन तदर्थमौकारविधानं व्यर्थमेव स्यात्, कृतं चौकारविधानं स्वसार्थक्यविधायकमेतन्न्यायांशं ज्ञापयति, ज्ञापिते च तस्मिन्नामोऽभवनेन 'ददरिद्रौ' इत्यत्र औकारश्रवणार्थमौकारविधानस्य चारितार्थ्यं भवति ॥

ज्ञापकनिर्दिष्टं यथा—"दशैकादशादिकश्च" [ ६. ४. ३६. ] इति सौत्रनिर्देशेन दशैकादशशब्दस्यादन्तत्वसिद्ध्या दशैकादशान् गृह्णातीत्येव विग्रह उचितः, परन्तु दशैकादश गृह्णातीत्यपि विग्रहो भवत्येव, स च ज्ञापकनिर्दिष्टस्यानित्यत्वमूलक एव । अस्य ज्ञापकं तु—"ऋगयनमित्यत्र णत्वनिषेधार्थमुपात्तं "पूर्वपदस्थान्नाम्न्यगः" [ २. ३. ६४. ] इति सूत्रे 'अगः' इति पदम्, णत्वनिषेधश्चात्र "शिक्षादेश्चाण्" [ ६. ३. १४८. ] इति सूत्रोक्ते शिक्षादिगणे ऋगयनमिति णत्वरहितपाठादेव सिद्धः, परं च गणपाठरूपज्ञापकनिर्दिष्टस्य णत्वनिषेधस्यैतन्न्यायांशबलेनानित्यत्वसम्भावनया तस्य दृढतासम्पादनायात्र सूत्रे "अगः" इत्युक्तम्, तच्चैतन्न्यायांशं विनाऽनुपपन्नमिति न्यायांशमिमं ज्ञापयति । तथा चोभयविधज्ञापकनिर्दिष्टस्येहोपयोगः, उदाहरणं सौत्रनिर्देशरूपज्ञापकनिर्दिष्टापेक्षं, ज्ञापकं च गणपाठरूपज्ञापकनिर्दिष्टापेक्षमिति ॥

गणनिर्दिष्टं यथा—कुटिता कुटितुमित्यादौ यथा "कुटादेर्ङिद्वदञ्णित्" [ ४. ३. १७. ] इति ङित्त्वं भवति, तेन चात्र गुणाभावः, तथा विव्यचिथेत्यादौ न भवति, अनित्यत्वादेव, अत्र च कुटादिरिति गणनिर्देशः, विव्यचिथेति रूपं च—"व्यचत् व्याजीकरणे" इत्यस्माद्धातोः परोक्षायां थवि द्वित्वादौ कृते पूर्वस्य "ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः" [ ४. १. ७०. ] इति इत्वे च कृते "कुटादेर्ङिद्वदञ्णित्" [ ४. ३. १७. ] इत्यस्य गणनिर्दिष्टत्वेनानित्यत्वात् ङित्त्वाभावे धातोर्यस्य "व्यचोऽनसि" [ ४. १. ८२. ] इति य्वृन्न, सति हि ङित्त्वे विविचिथेति रूपं स्यात्। समर्थकं चास्य विव्यचिथेत्यादौ य्वृतोऽनिष्टत्वेऽपि तदर्थं यत्नान्तराकरणमेव ॥

नञ्निर्दिष्टं यथा-"अञ्वर्गात् स्वरे वोऽसन्" [१. २. ४०] इति सूत्रे 'असन्' इति, अस्योदाहरणं यथा—'क्रुङ्+उ+आस्ते=क्रुङ्ङ्वास्ते, किम्+उ+आवपनं+किम्वावपनम्' इति, अत्रोकारस्थानीयस्य वस्यानेन सूत्रेणासत्त्वात् स्वरे परे "ह्रस्वान्ङणनो द्वे" [ १. ३. २७. ] इति पूर्वत्र प्रयोगे ङस्य द्वित्वं भवति, परत्र तु मस्य पुरो व्यञ्जनाभावात् "तौ मु-मो व्यञ्जने स्वौ" [ १. ३. १४. ] इत्यनेनानुस्वारानुनासिकौ नाभूताम् । 'असन्' इति नञ्निर्दिष्टस्यानित्यत्वफलं तु तद्+उ+अस्य मतम्=तद्व्वस्य मतमित्यत्रोकारस्य वत्वे "ततोऽस्याः" [ १. ३. ३४. ] इति वस्य द्वित्वं भवतीति, अन्यथा वत्वस्यासत्त्वात् द्वित्वं न स्यात् । एतदंशज्ञापकस्तु "व्याप्तौ स्सात्" [ ७. २. १३०. ] इति द्वितीयः सकारः, स हि 'अग्निसात्' इत्यादौ षत्वनिषेधज्ञापनार्थं कृतः, तथा हि—द्विसकारनिर्देशेन सकारादिः सात् प्रत्ययो भवतीति विज्ञायते, 'सात्' च स्वत एव सकारादिरिति तस्य सकारादित्वकथनं व्यर्थमेव, व्यभिचाराभावे विशेषणवैयर्थ्यात्, तदुक्तमभियुक्तैः—"संभवे व्यभिचारे च स्याद् विशेषणमर्थवत् ।" इति, तथा च व्यर्थः सकारादिनिर्देशो नियमज्ञापनार्थः, नियमश्चायम्—सात् सर्वदा सादिरेव स्यान्न तु कदापि तस्य विकारान्तरमिति, एतन्न्यायांशाभावे चात्र षत्वस्य प्राप्तिरेव नास्ति, सातः सकारस्य "वृत्त्यन्तोऽसषे" [ १. १. २५. ] इति सूत्रानुसारं पदादित्वात्, तथा हि—वृत्त्यन्तः पदसंज्ञको न स्यात्, असषे—सस्य षत्वभिन्ने कार्ये इति तदर्थः । तथा च सस्य षत्वे कर्तव्ये त्वप्राप्तापि पदसंज्ञा स्यादेवेति ध्वन्यते, तथा चात्र सातः प्रत्ययत्वेनाप्राप्ताऽपि पदसंज्ञा 'असषे' इति पर्युदासेन विधीयते, ततश्च तस्य सस्य पदादित्वात् षत्वस्य प्राप्तिरेव नास्तीति तदभावार्थो द्वितीयसकारनिर्देशो व्यर्थ एव स्यात्; एतन्न्यायांशसत्त्वे तु 'असषे' इति नञ्निर्दिष्टस्यानित्यत्वसम्भावनया कदाचित् सातः पदत्वाभावे सकारस्य पदमध्यस्थत्वसंभवात् षत्वं स्यादिति तद्वारणार्थो द्विसकार निर्देशः सार्थकः । तदेवमिमं न्यायांशं विनानुपपद्यमानां षत्वप्राप्तिं विनानुपपद्यमानस्तद्वारणार्थो द्विसकारपाठ इमं न्यायांशं ज्ञापयतीति सुस्थम् । अस्य च न्यायस्यादृढत्वात् केचिदेव समासान्तादयो लक्ष्यानुसारं क्वचिद् भवन्ति क्वचिन्न भवन्तीति लभ्यते । तथा चान्ये नित्यमेव भवन्ति, तेषामुदाहरणानीमानि प्रदर्श्यन्ते—यथा "इच् युद्धे" [ ७. ३. ७४. ] इति समासान्त इच् 'केशाकेशि' इत्यादौ नित्यमेव भवति । "स्वराच्छौ" [ १. ४. ६५. ] इति नागमः 'कुण्डानि, 'बदराणि' इत्यादौ नित्यमेव भवति । स्वरसंज्ञानिर्दिष्टम् "इवर्णादेरस्वे स्वरे यवरलम्" [ १. २. २१. ] इति यत्वादि दध्यत्रेत्यादौ नित्यमेव भवति। "सप्तमी चोर्ध्वमौहूर्तिके" [ ५. ४. ३०. ] इति सौत्रनिर्देशरूपज्ञापकनिर्दिष्टा उत्तरपदवृद्धिरूर्ध्वमौहूर्तिकशब्दे भवत्येव, न कदापि न भवति। "अजादेः" [ २. ४. १६. ] इत्यजादिगणनिर्दिष्ट आप् 'अजा' इत्यादौ भवत्येव। "अनवर्णा नामी" [ १. १. ६. ] इति सूत्रे नामिसंज्ञायामवर्णवर्जनं नञ्निर्दिष्टमपि नियतमेवेति। इत्थं च ये समासान्तादयोऽनित्याः—भवन्ति च न भवन्ति च, त एवेहैतन्न्यायोदाहरणत्वेनोक्ता इति ॥ ३५ ॥

### *समासान्ता-ऽऽगम-संज्ञा-ज्ञापक-गण-नञ्निर्दिष्टान्यनित्यानि* ॥ ३५ ॥

त०—अत्र समासान्तविधेरनित्यत्वे तु यत्र तत्र बहूनि लक्ष्याणि मिलन्ति, किन्त्वागमादीनामनित्यत्वज्ञापने न किमपि विशिष्टं फलमिति नवीनाः कथयन्ति, दृढतरज्ञापकाभावश्च । 'पट्वा पटिता' इत्यादिप्रयोगाणां शिष्टप्रयुक्तत्वग्रहे चोपायान्तरमाश्रयणीयम्, तद्धि तत्र तत्र विशेषवचनकल्पनमेव । यथा पाणिनीयैर्धावितमित्यादिसिद्ध्यर्थं "यस्य विभाषा" [ पा० सू०

७. २. १५ ] इति सूत्रस्य "वेटोऽपतः" [ ४. ४. ६२. ] इति सूत्रस्थानीयस्यानित्यत्वं कल्प्यते । न तु प्राचीनोक्तमागमशास्त्रस्यानित्यत्वम् । लक्ष्यैकचक्षुष्काणामाचार्याणामीदृशलक्ष्याणामिष्टत्वे तदर्थं लक्षणमवश्यमनुष्ठितं स्यात्, ज्ञापकं च दृढतरं तस्य निर्दिष्टं स्यात्, तद्विषयकयत्नाकरणे तादृशन्यायांशानुमानं त्वतिप्रसक्तम्, तथा हि–अन्यान्यपि शास्त्रकृदनुक्तानि वचनानि यथेच्छप्रयोगानुरोधेन कल्पनीयानि स्युः । एवं संज्ञानिर्दिष्टस्यानित्यत्वमपि यत्र संज्ञा विधिकोटिगतविशेषणत्वादिनोपादीयते तत्रैवेष्टव्यम्, सामान्यतः संज्ञानिर्दिष्टस्यानित्यत्वे तु प्रायः सर्वेषां शब्दशास्त्रीयकार्याणां यत्किञ्चित्संज्ञानिर्दिष्टत्वापत्त्याऽऽकुलीभावापत्तेः । "आतो णव औः" [ ४. २. १२०. ] इति च संज्ञानिर्दिष्टस्यानित्यत्वज्ञापकं तथा सति न संभाव्यते "धातोरनेकस्वरात्०" [ ३. ४. ४६ ] इति सूत्रे धातुसंज्ञाया विधेयकोटौ निर्देशाभावात्, तत्र ह्युद्देश्यकोटावेव धातुसंज्ञा समाश्रीयते । तथा च ददरिद्राविल्यादिसिद्ध्यर्थं 'दरिद्रातेराम् न' इत्येतावदेव ततः [ औकारविधानात् ] कल्पनीयम्, न तु संज्ञानिर्दिष्टमात्रस्यानित्यत्वम् । एवं ज्ञापकनिर्दिष्टस्यानित्यत्वमपि नावश्यकम्, तद्धि दशैकादश गृह्णातीत्येवं विग्रहस्य साधुत्वार्थमाश्रीयते, तत्र च "दशैकादशादिकश्च" [ ६. ४. ३६. ] इति सूत्रे तथानिर्देशस्य सूत्रमात्रविषयत्वेऽपि दोषाभावात्, दशैकादशेति च पृथगेव पदे; न चैवं चकारप्रयोगापत्तिः, कृते प्रयोगे दोषाभावात्, अकृते च 'विनाऽपि चं चार्थो गम्यते' इति सिद्धान्तेन दोषाभावः; न च तस्य निर्देशरूपज्ञापनस्य सूत्रमात्रविषयत्वे दशैकादशान् गृह्णातीति विग्रहो न स्यादिति वाच्यम्, इष्टापत्तेः । यच्चात्रांशे ज्ञापकमुपन्यस्यते–"पूर्वपदस्थान्नाम्न्यगः" [ २. ३. ६४. ] इति सूत्रस्थम् 'अगः' इति पदम्, तदपि न चारु–केवलं स्वचारितार्थ्याय ज्ञापकत्वकल्पनापेक्षया तस्य त्याग एव वरम् । कृतं च 'अगः' इत्यस्य प्रत्याख्यानं महाभाष्ये निर्देशरूपज्ञापकाश्रयणेन, तथाहि–"पूर्वपदात् संज्ञायामगः" [ पा० सू० ८. ४. ३. ] इति सूत्रे महाभाष्ये–"संज्ञायां नियमवचनेऽगप्रतिषेधान्नियमप्रतिषेधः" [ वार्तिकम् ], संज्ञायां नियमवचनेऽगप्रतिषेधान्नियमस्यायं प्रतिषेधो विज्ञायते–अग इति । तत्र को दोषः ? "तत्र नित्यं णत्वप्रसङ्गः" [ वार्तिकम् ], तत्र पूर्वेण संज्ञायां चासंज्ञायां च नित्यं णत्वं प्राप्नोति । "योगविभागात् सिद्धम्" [ वार्तिकम् ], योगविभागः करिष्यते–'पूर्वपदात् संज्ञायाम्' ततः 'अगः' गान्तात् पूर्वपदाद् या यावती च णत्वप्राप्तिः, तस्याः सर्वस्याः प्रतिषेधः । "अप्रतिषेधो वा यथा सर्वनामसंज्ञायाम्" [ वार्तिकम् ], नवाऽर्थः प्रतिषेधेन, णत्वं कस्मान्न भवति ? यथा सर्वनामसंज्ञायाम्, उक्तं च–सर्वनामसंज्ञायां निपातनाण्णत्वाभावः । यथा पुनस्तत्र निपातनं क्रियते–"सर्वादीनि सर्वनामानि" [ पा० सू० १. १. २८. ] इति । इहेदानीं किं निपातनम् ?, इहापि निपातनमस्ति, किम् ? "अणृगयनादिभ्यः" [ ४. ३. ७३. ] इति । [ ततः ] नैव वा पुनरत्र णत्वं प्राप्नोति, किं कारणम् ? समानपद इत्युच्यते, न चैतत् समानपदम्, समासे कृते समानपदम्, समानपदमेव यन्नित्यम्, न चैतन्नित्यं समानपदमेव । किं वक्तव्यमेतत् ? नहि, कथमनुच्यमानं गंस्यते ? समानग्रहणसामर्थ्यात्, यदि हि यत् समानं चासमानं च तत्र स्यात् समानपदग्रहणमनर्थकं स्यात्" इति [ भाष्यम् ] । अयमाशयः–'अग' इति पदं संज्ञायामेव [ नान्यत्र ] इति नियमेन प्राप्तस्य [ 'पूर्वपदस्थान्नाम्नि' इत्यंशेन प्राप्तस्येति भावः ] णत्वस्यैव प्रतिषेधः, अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायात् । तत्र 'ऋगयनादिशब्दानां नामत्वा-ऽनामत्वोभयदर्शनात् तत्र पूर्वसूत्रेण [ "रषृवर्णात्०" २. ३. ६३. इत्यनेन ] नित्यं णत्वं प्राप्नोतीति कृते 'अगः' इति प्रतिषेधे नात्र णत्ववारणमिति शङ्कायाम्–"पूर्वपदस्थान्नाम्नि" इत्येको योगः, "अगः" इति च योगान्तरमित्यास्थाय योगविभागसामर्थ्याच्च सर्वस्या णत्वप्राप्तेः प्रतिषेधोऽयमिति विज्ञास्यते, ततश्च न दोष इति समाधानम् । पुनर्निर्देशेनैवात्र णत्वाभाव इत्युक्तम्, स च निर्देशः "शिक्षादिभ्योऽण्" [ ६. ३. १४८. ] इति सूत्रस्थो गणपाठे ऋगयनशब्दस्य नकारविशिष्ट पाठ एव, यथा 'सर्वनाम'शब्दे सूत्रे तथा निर्देशादेव नत्वाभावः कल्पितस्तद्वत्, तथा च 'अगः' इति प्रतिषेधस्य नावश्यकतेति । किञ्च पूर्वसूत्रे 'एकपदे' इत्यत्र 'पदे' इत्येकत्वविवक्षयैवैकपदत्वे लब्धे एकग्रहणेनैकमेव यत् पदं तत्रैव यथा स्यान्न त्वेकं चानेकं चेति ज्ञाप्यत इति पूर्वमुपपादितमेव । तथा च नामतोऽन्यत्र नित्यमेकपदत्वाभावेन णत्वप्राप्तिरेव नेति न तद्वारणार्थमग इति कथनमावश्यकमिति । अयं च प्रकारः स्वमतेऽपि कर्तुं शक्य एवेति 'अग' इत्यस्य न ज्ञापनार्थत्वमुचितम् ॥

स्वप्रक्रियायां विव्यचिथेति रूपसिद्ध्यर्थं गणनिर्दिष्टस्यानित्यत्वाश्रयणं यद्यपि आवश्यकम्, तथापि तदर्थं यत्नान्तरमेव करणीयम्, अप्रामाणिकस्यानित्यत्वाश्रयणस्यापेक्षया तस्यैवौचित्यात् । पाणिनीये तु "ज्या-व्यधः ङिति" [ ४. १. ८१. ] इतिसूत्रस्थानीये "ग्रहिज्यावयिव्यधिवष्टि०" [ पा० सू० ६. १. १६. ] इति सूत्र एव विचति इति पठ्यते, "कुटादेर्ङिद्वदञ्णित्" [ ४. ३. १७. ] इतिसूत्रस्थानीये "गाङ्कुटादिभ्योऽञ्णिन्ङित्" [ पा० सू० १. २. १. ] इति सूत्रे 'व्यचेः कुटादित्वमनसि' इति कुटाद्यन्तर्गणसूत्रं पठ्यते, तत्र चानसीति पर्युदास आश्रीयते, तथा च 'पर्युदासः सदृग्ग्राही' इति न्यायेन 'असभिन्नेऽससदृशे कृत्प्रत्यये परत एव व्यचेः कुटादित्वनिमित्तकं कार्यमिति 'विव्यचिथ, अव्याचीत्' इत्यादौ ङित्त्वं न भवति । तथा स्वमते "व्यचोऽनसि [ ४. १. ८२. ] इतिसूत्रस्थव्यचेः पाठः पूर्वसूत्र

एव [ "ज्याव्यधः क्ङिति" ४. १. ८१. ] इति सूत्र एव करणीयः, कुट्टादौ च गणे "व्यचोऽनसि" इति गणसूत्रपाठः कार्यः । तथा च नानित्यत्वाश्रयणमावश्यकं भविष्यति ।

एवं नञ्निर्दिष्टस्यानित्यत्वमपि नावश्यकं, तद्वक्षेऽत्र वकारस्य द्वित्वसिद्धिर्हि तत्फलमित्युच्यते, तत्र व्यञ्जनात् परस्यैकस्यानेकस्य वा व्यञ्जनस्योच्चारणे भेदाभावेन द्वित्वाभावेऽपि क्षत्यभावात् । पाणिनीये तु द्वित्वे कर्तव्येऽसिद्धत्वस्याप्रवृत्त्यर्थं 'पूर्वत्रासिद्धीयमद्वित्वे' इति न्यायः पठ्यते । तथैव वा स्वमतेऽपि समाश्रयणीयं चतुर्ण्णामित्यादावपि णकारस्य द्वित्वार्थम् । "व्यत्तौ स्सात्" [ ७. २. १३०. ] इति सूत्रे द्विसकारनिर्देशश्चास्य न्यायांशस्य ज्ञापकत्वेनोक्तः, स चान्यथापि चरितार्थः, तथाहि–"नृत्यन्तोऽसषे" [ १. १. २५. ] इति सूत्रस्य योऽयमर्थ आक्षिप्यते–सस्य षत्वे कर्तव्ये पदसंज्ञा न स्यादिति न किन्त्वप्राप्ताऽपि पदसंज्ञा तस्य स्यादेवेति, तत्र किं मूलम् ? केवलं यस्य पदसंज्ञा प्राप्ता तस्य वृत्त्यन्तस्य षत्वभिन्ने कार्ये पदसंज्ञा नेत्येवार्थः शब्दमर्यादालभ्यः । स्सातश्च प्रत्ययत्वेनानामत्वात् पदसंज्ञाप्राप्तिरेव नेति तस्य षत्वनिषेधार्थं द्विसकारपाठ आवश्यक एवेति न तस्य ज्ञापकत्वसंभावना । इत्थं चास्य पश्चांशा नावश्यका इति प्रतिभाति, तथापि प्राचामनुरोधेन समाश्रितास्तत्र तत्र कार्यप्रवृत्त्यर्थमाश्रीयन्ते चेति । पाणिनीये तत्र परिभाषेन्दुशेखरेऽपि नागेशभट्टेन–'यत्तु' इत्यारभ्य 'संज्ञापूर्वकमनित्यम्' 'आगमशास्त्रमनित्यम्' 'गणकार्यमनित्यम्' 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' 'नञ्घटितमनित्यम्' इत्यादिन्यायानुल्लिख्य तत्र तत्र ज्ञापकफलादिकं प्रदर्श्य, तत्र भाष्येऽदर्शनादित्यादिना एते न्यायाः खण्डिताः । ज्ञापिते चास्मिन् सम्पूर्णे न्यायेऽस्याढ्यत्वमनित्यत्वं च यदाश्रितं प्राचीनैस्तदपि नोचितम्, अनित्यत्वज्ञापकस्यास्य न्यायस्यानित्यत्वे सर्वेषामेतद्विषयाणां नित्यत्वमिति फलति, तच्च स्वतः सिद्धमेवेति किं तदर्थं न्यायस्वीकारतदनित्यत्वाश्रयणगौरवेण, किञ्चानित्यत्वेन हि काचित्कत्वं कादाचित्कत्वमिति च विज्ञायते, तावतैवेष्टप्रयोगसिद्धौ तदर्थं पुनरस्याप्यनित्यत्वाश्रयणं व्यर्थमेव । तथा च समासान्तादीनां नित्यत्वं स्वतः सिद्धमेव, लक्ष्यानुरोधात् क्वचित् स्याद्वादाश्रयणादप्रवृत्तिरिति सर्वं सुस्थम् ॥ ३५ ॥

---

## ॐपूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्ॐ ॥ ३६ ॥

**सि०**—**पूर्वे**–उत्सर्गशास्त्रतः पूर्वमुक्ताः, **अपवादाः**–बाधकशास्त्राणि, **अनन्तरान्**–अग्रे वक्ष्यमाणबाध्यशास्त्रसमुदायमध्ये स्वाव्यवहितान्, उत्सर्गान्, **बाधन्ते**–प्रतिषिध्य स्वयं प्रवर्तन्ते, **नोत्तरान्** न शास्त्रान्तरव्यवहितान्, इति न्यायार्थः । स्वचारितार्थ्याय स्वविषयव्यापके परस्मिन् शास्त्रेऽवश्यं बाधनीये प्रथमोपस्थितशास्त्रमात्रबाधेन स्वचारितार्थ्यसंभवे बाधकत्वबीजस्यानवकाशत्वस्य क्षीणत्वात् तदन्यबाधे प्रमाणाभाव एवास्य न्यायस्य बीजम् । "मद्विषये यद् यत् प्राप्तं तन्मया बाध्यम्" इति बाध्यसामान्यचिन्तया स्वविषयप्राप्तसर्वशास्त्रबाधे प्राप्तेऽयं न्यायः समाश्रीयते । यथा "श्लिषः" [ ३. ४. ५६. ] इति सूत्रविहितः श्लिषोऽद्यतन्यां सक् पुष्यादिगणनिमित्तिकं "लृदिद्द्युतादिपुष्यादेः परस्मै" [ ३. ४. ६४. ] इति सूत्रविहितमङं बाधते, अतः 'अश्लिक्षत् कन्यां देवदत्तः' इत्यत्र सगेव भवति, न त्वङ्; किन्तु भाव-कर्मणोः" [ ३. ४. ६८. ] इति सूत्रविहितं ञिचं न बाधते, इत्याश्लेषि कन्या चैत्रेणेत्यत्र सक् न भवति। अत्र केचित्–"उल्लासकं त्वस्य सक्-अङ्-ञिचसूत्राणामेवमुपन्यासक्रम एव, तथाहि–अङ्-ञिचोरपवादस्तावत् सक्, तत्राप्यङ् बाधितुमिष्टो, न तु ञिच्, तथा चाङ्सूत्रादनु सक्सूत्रं चेत् क्रियते तदा बाध्योक्तेरनु बाधकोक्तिरिति न्यायानपेतः समर्थपक्ष आदृतः स्यात्, अनिष्टो ञिच्बाधोऽपि च मध्येऽपवादाः पूर्वानिति न्यायबलाट्टलति । एवं सत्यपि यद्बाधकोक्तेरनु बाध्योक्तिरित्यसमर्थपक्ष आदृतस्तदेतन्न्यायादेवेष्टसिद्धिर्भविष्यतीत्याशयैव" इत्याहुः । तत्रेदं विचार्यते–अङोऽपवादः सक् भवितुमर्हति, अङा सको विषयस्य व्यापनात्, सिचोऽपवादत्वं तु न युक्तम्, ञिचो भाव-कर्मणोरेव विधानात् तदतिरिक्ते कर्तरि प्रत्यये सकश्चारितार्थ्यसंभवात्। सत्यपि सम्भवे बाधनं भवतीति भाष्योक्तपक्षमाश्रित्य तदपवादत्वव्यवस्थापनेऽपि नैवं क्रमेण सूत्रोपन्यासो न्यायमिमं ज्ञापयितुं शक्तः, यतः सर्वेषामद्यतनीपरतो विधीयमानानां प्रत्ययानां परत्वाद् बाधनार्थमेव ञिचः प्रकरणान्ते पाठः, प्रकरणादौ च सर्वतो व्यापकस्योत्सर्गभूतस्य सिचः पाठः, तदनन्तरं तदपवादस्य सकः, ततश्चात्मनेपदपरस्मैपदयोरुभयत्र विधीयमानस्य "णि-श्रि०" [ ३. ४. ५२. ] इत्यादिसूत्रविहितस्य ङः, तदनन्तरं परस्मैपदमात्रे विधीयमानस्याङः पाठः, सर्वान्ते च भाव-कर्ममात्रविधेयस्य ञिचः, इति क्रमस्यान्यथोपपत्तिसम्भवादेतेन क्रमेण पाठः प्रकृतन्यायज्ञापक इत्याश्रयितुमशक्यम् । तस्मात् स्वचारितार्थ्याय परस्मिन् शास्त्रेऽवश्यं बाधनीयेऽव्यवहितबाधेन चारितार्थ्यसम्भवे व्यवहितबाधे प्रमाणाभाव इत्येवैतन्न्यायमूलमित्यवगन्तव्यम् ।

अयमप्यनित्य एव, तथा च "संयोगात्" [ २. १. ५२. ] इतीयादेशो यथा शिश्रियुरित्यादौ "योऽनेकस्वरस्य" [ २. १. ५६. ] इत्यनन्तरसूत्रविहितं यत्वं बाधते, तथा यवक्रियावित्यादौ "क्विब्वृत्तेरसुधियस्तौ" [ २. १. ५८. ] इति व्यवहितेन सूत्रेण विहितं यत्वमपि बाधत एवेति ॥ ३६ ॥

### *पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्* ॥ ३६ ॥

त०—अत्र "उत्सर्गशास्त्रमुक्त्वाऽपवादशास्त्रकथनमिति न्यायोपेतः पन्थाः, प्रतियोगिज्ञानस्याभावज्ञान इवापवादज्ञाने उत्सर्गज्ञानस्याप्यावश्यकत्वात्" इत्येकः पक्षः, स च लक्षणैकचक्षुष्कविषयः । "पूर्वमपवादशास्त्रमुल्लिख्य तद्विषयपरिहारेणोत्सर्गशास्त्रप्रवृत्त्यर्थं पश्चादुत्सर्गशास्त्रोल्लेखः" इति द्वितीयः पक्षः, स च लक्ष्यैकचक्षुष्कविषयः । तत्र प्रथमपक्षस्यैव शिष्यानुकूलतया तस्यैव समादरेणायं न्यायः पठ्यते । यत्रापवादशास्त्रमेव पूर्वं पठ्यते पश्चादुत्सर्गशास्त्रं तत्र केनाऽपि विशिष्टेन प्रयोजनेन भवितव्यमिति लक्षणैकचक्षुष्क आलोचयति, तच्च प्रयोजनमेतदेव यद्—अव्यवहितमेवोत्सर्गशास्त्रमयं बाधते न व्यवहितमिति । सर्वबाधस्येष्टत्वे हि सर्वानुत्सर्गान् पूर्वमुक्त्वैवापवादान् कथयेत्, यत्र न तत् कृतं तत्र पूर्वोक्त एव ग्रन्थकृतामाशय इत्युक्तन्यायः सिद्ध्यति । इति 'सक्-अङ्-ञिच्'विधायकसूत्राणामेवमुपन्यासक्रमस्य ज्ञापकत्वमुपन्यस्यतां न्यायार्थमञ्जूषाकृतामाशयं केचिद् वर्णयन्ति, तदपि न—प्रकृतशास्त्रक्रमस्योपपत्तेरुक्तत्वेन तस्य क्रमस्यात्र ज्ञापकत्वासम्भवात् ॥ ३६ ॥

### *मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्* ॥ ३७ ॥

सि०—मध्य इति वर्तमानक्रियाऽपेक्षा सप्तमी, उत्सर्गशास्त्राणां मध्ये वर्तमानाः, अपवादाः—अपवादशास्त्राणि, पूर्वान्—स्वस्मात् पूर्वं पठितान्, विधीन्—विधायकानि उत्सर्गशास्त्राणि, बाधन्ते—प्रतिषिध्य प्रवर्तन्ते, नोत्तरान्—स्वोत्तरपठितानि सूत्राणि न बाधन्त इति न्यायार्थः । यथा "ब्रह्म-भ्रूण-वृत्रात् क्विप्" [ ५. १. १६१. ] इति सूत्रेण भूते ब्रह्माद्युपपदाद्धन्तेर्विहितः क्विप् विशेषविहितत्वादपवादः, स च स्वविषये "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणं "ब्रह्मादिभ्यः" [ ५. १. ८५. ] इति टकं "हनो णिन्" [ ५. १. १६०. ] इति णिनं च बाधते पूर्वोक्तत्वात्; "क्त-क्तवतू" [ ५. १. १७४. ] इति क्तवतुं तु न बाधते परतः पठितत्वात्, अत्र अण्-टकौ कालसामान्ये विहिताविति सामान्यविहितत्वं तयोः, णिन् तु यद्यपि भूते विहितस्तथाप्युपपदविशेषानुक्तेः सामान्यविहित एवेति ते क्विपा बाध्यन्ते, स च मध्ये पठितत्वेन परतः पठितं क्तवतुं न बाधते, एतन्न्यायप्रवृत्तेः । तथा च 'ब्रह्महा' 'ब्रह्म हतवान्' इति रूपद्वयमेव भवति, न तु—ब्रह्मघातः, ब्रह्मघ्नः, ब्रह्मघातीति च । अस्य मूलं तु तादृशप्रयोगा एवेति लक्ष्यानुरोधादेवायं न्यायः समाश्रीयते इति प्राचीनाः । वस्तुतस्तु पूर्वशास्त्रबाधेन बाधकताबीजस्यानवकाशत्वस्योपक्षीणतया "स्पर्धे" [ परः " ७. ४. ११९. ] इति परिभाषासूत्रबाधे सामर्थ्याभाव एव बीजमिति युक्तः पन्थाः ॥ ३७ ॥

### *मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्* ॥ ३७ ॥

त०—अयमपि न्यायोऽपवादशास्त्रस्याविशेषात् सर्वोत्सर्गशास्त्रबाधकत्वे प्रसक्ते तस्य संकोचार्थं एव । तत्र मूलं चैतन्न्यायानुकूललक्ष्याणां सिद्धये उपायान्तराकरणमेवेति प्राचीना आहुः, तन्न युक्तम्—तादृशलक्ष्याणामनभिधान एवाचार्याणां तात्पर्यमित्येव कुतो नावधार्येत । ततश्च यत्र पूर्वं परतश्चोत्सर्गशास्त्राणि पठ्यन्ते मध्ये चापवादशास्त्रं, तत्र "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषासूत्रसहकारेणापि पूर्वशास्त्रबाधे कृते निरवकाशत्वमूलस्य बलवत्त्वस्य प्रक्षीणतया "स्पर्धे" [ ७. ४. ११९. ] इति शास्त्रबाधे प्रमाणाभावेन स्वोत्तरोत्सर्गशास्त्रबाधेऽपवादशास्त्रस्य सामर्थ्याभाव एवैतन्न्यायमूलमित्यवगन्तव्यमिति, तदेवोक्तं वृत्तौ ॥ ३७ ॥

## *यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते* ॥ ३८ ॥

सि०—यम्—उत्सर्गतया स्वविषये प्राप्तं, विधिं प्रतिविधिविषयकः, उपदेशः—कथनं लक्ष्ये प्रवृत्तत्वान्वाख्यानम्, अनर्थकः—न कमप्यर्थं साधयति, स विधिः, बाध्यते—प्रवृत्तिविकलीक्रियते, स्वयमेव न प्रवर्तेत इति यावत् । यस्य सूत्रस्य लक्ष्ये प्रवर्तने किञ्चित् फलं नास्ति तत् सूत्रं तत्र न प्रवर्त्यते, सर्वस्याः सूत्रप्रवृत्तेर्लक्ष्यसंस्कारार्थत्वाद् येन किमपि लक्ष्ये न संक्रियते स विधिरानर्थक्यान्न प्रवर्तते इति भावः । लोके मेघादिकृता वृष्टिर्जलेऽपि स्थलेऽपि च दृष्टा, यत्र च वर्षणस्य किमपि प्रयोजनं नास्ति तत्रापि मेघो वर्षति, तथा शास्त्रेऽपि प्राप्तमिति तद्वारणाय न्यायोऽयमाश्रितः । यथा—"तनि-त्यजि-यजिभ्यो डद्" [ उणा० ८९५. ] इत्यनेन डद्प्रत्यये 'तद् त्यद् यद्' शब्दा निष्पाद्यन्ते, अत्र दस्य पुनः "धुटस्तृतीयः" [ २. १. ७६. ] इति दविधिः स्यात्, न च तदुपरतिरिति तत्प्रयोगस्य कदापि परिनिष्ठितत्वं न स्यादिति तस्य प्रवर्तने फलाभावेन तस्य प्रवृत्तिरनेन न्यायेन वार्यते । तथा संचस्कारेत्यादावुपसर्गयोगानन्तरमेव पूर्वं स्सटि ततः परोक्षानिमित्तके द्वित्वे 'स्कृ-स्कृ' इति स्थितौ "अघोषे शिटः" [ ४. १. ४५. ] इति द्वित्वे पूर्वस्य स्सटो लुकि, पुनश्च स्सट्विधायकसूत्रस्य प्राप्तिसत्त्वात् स्सट् भविष्यति, अनेन न्यायेन निवर्त्यते, यतः स्सटि सत्यपि "अघोषे शिटः" इत्यस्य प्रवृत्त्या तस्य लुपि फलाभावः । लक्ष्यस्य परिनिष्ठितत्वार्थमीदृङ्न्यायस्यावश्यकत्वम् । तथा चेदृशलक्ष्यसिद्धिरेवात्र न्याये मानमिति प्राचीनाः ।

कृतस्यैव पुनः पुनः करणे हि व्यापारानुपरमप्रसङ्गेन रूपाणि कदापि न सिद्धयेयुः । एवञ्च क्रियानुपरमप्रसङ्गस्थल एवैतन्न्यायप्रवृत्तिरिति तत्त्वम् ॥ ३८ ॥

## *यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते* ॥ ३९ ॥

**सि०**—यस्य–प्रवर्त्तयितुमिष्टस्य, विधेः, निमित्तं–प्रवृत्तिप्रयोजनमस्ति, असौ विधिर्न बाध्यते, प्रवर्त्यत एवेति भावः । यथा 'तच्चारु' इत्यादौ तदो दकारस्यैव "धुटस्तृतीयः" [२. १. ७६.] इति दत्वं क्रियत एव, अग्रेऽसत्त्वबोधनेन कार्यान्तरस्य साधयिष्यमाणत्वेनं प्रयोजनसद्भावात्; तथाहि–असदधिकारविहितस्य दत्वस्य "च-जः क-गम्" [२. १. ८६.] इति परकार्ये कर्तव्येऽसत्त्वात् तस्य स्थाने विहितं "तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ" [१. ३. ६०.] इति जत्वमप्यसदेवाभूत् स्थानिधर्मात्, ततस्तत्स्थाने "अघोषे प्रथमोऽशिटः" [१. ३. ५०.] इति कृतं चत्वमप्यसदभूत्, तथा च "च-जः क-गम्" [२. १. ८६.] इत्यनेन गत्वकत्वे नाभूताम्, अन्यथा जकारसत्त्वे गत्वं चकारसत्त्वे च कत्वं दुर्वारं स्यादिति 'तक्चारु, तग्चारु' इत्यादि रूपं स्यात् । अयं च न्यायो यद्यपि नावश्यकः, सप्रयोजनस्य विधेः स्वत एव प्रवर्त्तमानत्वेन तदर्थं न्यायाश्रयणस्यानावश्यकत्वात्, तथापि पूर्वन्यायेन 'तद्' शब्दे "धुटस्तृतीयः" [२. १. ७६.] इति सूत्रस्य प्रवृत्तिः फलाभावाद् वारितेत्यत्रापि [ 'तच्चारु' इत्यादिप्रयोगेष्वपि ] तन्न्यायाश्रयणेन तत्प्रवृत्तिर्वारिता स्यादिति तन्न्यायस्यात्र प्रवृत्तिर्मा भूदित्यर्थमेवायं न्यायः समाश्रित इति प्राचीनानामाशयः ॥ ३९ ॥

*यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते* ॥ ३८ ॥

*यस्य तु विधेर्निमित्तमस्ति नासौ बाध्यते* ॥३९॥

**त०**—प्राचीनरीत्या व्याख्याताविमौ न्यायौ वृत्तिसमये । वस्तुतस्तु नानयोर्न्याययोरित्थं व्याख्यानमुचितम्, आनर्थक्यप्रसङ्गात् । तथाहि–पूर्वन्यायेन निष्प्रयोजनस्य विधेरप्रवृत्तिरित्ययमर्थो व्यापारानुपरमप्रसङ्गेन साधितः, न चैतद् युक्तम् *पर्जन्यवल्लक्षणप्रवृत्तिः* इति न्यायस्याग्रे वक्ष्यमाणत्वेन तेन न्यायेन सम्प्रति फलाभावेऽपि तात्कालिकं फलमनपेक्ष्यापि प्राप्तौ सत्यां शास्त्रप्रवृत्तिर्भवतीत्युपपादितत्वात् । इहापि च 'तच्चारु' इत्याद्यर्थं 'तद्' इत्यादौ "धुटस्तृतीयः" [२. १. ७६.] इति शास्त्रं प्रवर्तयितुमिष्टमेवेति न तस्य सर्वथाऽऽनर्थक्यम्, अनर्थकप्रवृत्तिमच्च शास्त्रं कथमुपदिष्टं स्यात्? । न च व्यापारानुपरमवारणार्थमपि न्यायोऽयमपेक्षितः *लक्ष्ये लक्षणं सकृदेव प्रवर्तते* इत्यस्यापि न्यायस्य भाष्यकारादिभिर्ध्वनितत्वात्, तदुक्तम्–"इको झल्" [पा० सू० १. २. ९.] इति सूत्रे महाभाष्ये–"अकृतकारि खल्वपि शास्त्रम्, अग्निवत्" इति । यथा अग्निर्दग्धं पुनर्न दहति तथा शास्त्रं कृतं कार्यं पुनर्न करोतीति, युक्तं चैतत्, प्रयोजनार्थमेव हि सर्वस्यापि प्रवृत्तिर्मन्दस्यापि, विना प्रयोजनमेव शास्त्रं कुतः प्रवर्तिष्यते? । परिनिष्ठितत्वं चाप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम्, पुनः प्रवृत्तिवारणायैव ह्येतल्लक्षणे 'अप्रवृत्त' इति विशेषणं दत्तम् । तथा च पूर्वन्यायस्य तदुक्तार्थत्वाभावे तद्वारणार्थस्य परस्य न्यायस्यापि न तादृशं व्याख्यानमुचितम् । अस्मन्मते चाग्रिमन्यायस्य [ *येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः* इति न्यायस्य ] अवतरणभूताविवेमौ न्यायाविति नानयोः पृथग्व्याख्यानमपेक्षितमिति । तथा च तदप्राप्तियोग्येऽचारितार्थ्यमेवाग्रिमन्याये बाधकत्वबीजमित्येताभ्यां न्यायाभ्यां प्रकटीकृतम् ॥ ३८–३९ ॥

## *येन ना प्राप्ते यो विधिरारभ्यते, स तस्यैव बाधकः* ॥ ४० ॥

**सि०**—पूर्वन्यायेष्वपवादशास्त्राणां व्यवस्था वर्णिता, सम्प्रत्यपवादपदार्थं बोधयितुमथवा बाधकत्वबीजं स्फोरयितुमिमं न्यायमाह । अत्र 'नाप्राप्ते' इति पदघटके प्राप्तपदे भावे क्तः, ततश्च येनेत्यत्र कर्तरि तृतीया, तथा च 'येन नाप्राप्ते' इत्यस्य यत्कर्तृकावश्यप्राप्तौ सत्यामित्यर्थः । 'नाप्राप्ते' इत्यत्र नञ्द्वयसत्त्वेन तस्य प्रकृतप्राप्तपदार्थदार्ढ्यबोधकत्वाद् यत्कर्तृकावश्यप्राप्तौ सत्यामारभ्यमाणो यो विधिः–विधायकशास्त्रं तद्विहितं कार्यं वा, स विधिः, तस्यैव–स्वविषयेऽवश्यप्राप्तस्यैव, विधेर्बाधकः । अत्रैवकारो भिन्नक्रमत्वेन योजनीयः–स तस्य बाधक एवेति, अन्यथा तस्य वैयर्थ्यमिव प्रतिभासेत, अन्यस्य बाधकत्वाप्राप्तेरन्ययोगव्यवच्छेदार्थस्यैवकारस्य वैयर्थ्यात्, येन हि स्वविषयो व्याप्तः स एव बाध्यो विरोधात्, यश्चोदासीनस्तेन सह बाध्यबाधकभावानौचित्यात् । बाधकपदसामीप्ये त्वेवकारेणायोगव्यवच्छेदः क्रियते, तथा च न कदाचिदपि बाधकत्वायोगः सर्वदा बाधकत्वमेवेत्यर्थः पर्यवस्यति ।

पाणिनीयादितन्त्रे चात्र न्याये एवकारो नैव पठ्यते, पूर्वन्यायादिभिः क्वचिदपवादस्यापि बाधकत्वायोगस्य कथितत्वात् । किञ्च तत्र नयेऽस्य स्वतन्त्रन्यायत्वास्वीकारः, किन्त्वपवादपदार्थपरिचायकत्वमात्रमस्येति विवेचयिष्यतेऽग्रे ।

प्राचीनैश्चैवकारस्यान्ययोगव्यवच्छेदकत्वार्थतयैव व्याख्यानं कृतमिति सम्प्रति तदनुसारमेव व्याख्यायते । यस्तु स्वविषये क्वचित् प्राप्नोति क्वचिच्च न प्राप्नोति तादृशस्यानित्यप्राप्तिमतोऽपि विधेर्बाध्यत्वे प्राप्ते एवकारेण तस्य बाध्यत्वं व्यावर्त्यते इति

तदाशयः । अवश्यप्राप्तिमत इव प्राप्त्यप्राप्तिमतोऽपि [ तादृशविधिं प्रत्यपि ] बाधकत्वे प्राप्तेऽयं न्याय आरभ्यते । यथा 'विद्वत् कुलम्, विद्वान्, हे विद्वन्!' इत्यादौ सर्वत्र सकारस्य "सो रुः [ २. १. ७२. ] इति रुत्वं प्राप्नोत्येव; एवं 'स्वनडुत् कुलम्, अनड्वान्, हे अनड्वन्!' इत्यादौ सर्वत्र हस्य "हो धुड्-पदान्ते" [ २. १. ८२ ] इति ढत्वं प्राप्नोत्येव; "पदस्य" [ २. १. ७९ ] इति संयोगान्तलोपात् तु 'विद्वान्, हे विद्वन्!, अनड्वान्, हे अनड्वन्!' इत्यादावेव प्राप्नोति, नागमेन संयोगस्य भवनात्, 'विद्वत् कुलम्, स्वनडुत् कुलम्' इत्यादौ तु न प्राप्नोति, धुटोऽभवनान्नागमाभावात् संयोगानिष्पत्तेः । एवं च सति रुत्व-ढत्वयोः संयोगान्तलोपस्य च बाधनार्थं "स्रंस्-ध्वंस्-क्वस्स्वनडुहो दः" [ २. १. ६८. ] इति दत्वविधायकसूत्रं प्रारब्धम्, परन्तु तत्सूत्रमेकान्तप्राप्तिमती रुत्व-ढत्वे एव बाधते प्रकृतन्यायात्, न तु कादाचित्कप्राप्तिमन्तं संयोगान्तलोपम्, तेन 'विद्वत् कुलं, स्वनडुत् कुलम्' इत्यादौ क्रमाद् रुत्वं ढत्वं च बाधित्वा दत्वमेव जातम्, 'विद्वान्, अनड्वान्' इत्यादौ तु दत्वसूत्रेण संयोगान्तलोपस्याबाधात् संयोगान्तलोपो भवत्येव ।

ज्ञापकं त्वस्य "स्रंस्-ध्वंस्०" [ २. १. ६८. ] इति सूत्रे क्वसः सन्तत्वविशेषणम्, तथाहि—क्वसः सकारस्य दत्वविधिर्यथा सो रुत्वं बाधते तथा संयोगान्तलोपमपि यदि बाधेत तदा क्वसः सन्तत्वं न कदापि व्यभिचरतीति तस्य सन्तत्वविशेषणं व्यर्थमेव स्यात् "संभवे व्यभिचारे च स्याद् विशेषणमर्थवत्" इति न्यायात्, यत् तु सन्तत्वविशेषणं कृतं तेनेदं ज्ञायते यत्—कदाचित् क्वसः सन्तत्वं व्यभिचरत्यपि, स च व्यभिचारस्तदैव स्याद् यदि संयोगान्तलोपः प्रवर्तेत, संयोगान्तलोपप्रवृत्तिश्चैतन्न्यायाधीनैव, ततश्च 'विद्वान्, अनड्वान्' इत्यादौ दत्वाप्रवृत्त्यर्थं कृतं सन्तत्वविशेषणमेतयोः सन्तत्वाभावप्रयोजकसंयोगान्तलोपप्रवृत्तिज्ञापनद्वारा न्यायमिमं सूचयतीति, सन्तत्वाभावेन विद्वानित्यादौ दत्वं न भवतीति प्राचीनमतानुसारि व्याख्यानम् । एवकाररहितन्यायस्वरूपस्वीकारे, एवकारस्य भिन्नक्रमतया व्याख्याने वा, अवश्यप्राप्तिमतो रुत्व-ढत्वयोर्दत्वविधिर्बाधकः स्यादेव, संयोगान्तलोपश्च नावश्यप्राप्तिमानिति तद्विषयेऽस्य न्यायस्यौदासीन्येन "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषासूत्रेण व्यवस्थायां कृतायां परत्वात् "पदस्य" [ २. १. ७९. ] इति संयोगान्तलोपे विद्वानित्यादि सिद्ध्यति, सन्तविशेषणं च संयोगान्तलोपस्याबाधात् स्वत एव चरितार्थमिति न ज्ञापकम् । अन्यविधेरवश्यप्राप्तौ विधीयमानस्य शास्त्रस्य वैयर्थ्यमेव चोक्तन्यायज्ञापकमित्यवसेयम् । विशेषश्च विवरणे विलोकनीयः ॥ ४० ॥

## *येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः* ॥ ४० ॥

**त०**—नायं स्वतन्त्रो न्यायः किन्त्वपवादपदार्थबोधक इति नागेशादीनां मतम् । तथाहि-*अन्तरङ्गादपवादो बलीयान्* इति न्यायमुल्लिख्य नागेशेनालेखि—"तत्रापवादपदार्थमाह—येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति, तत्र 'येन नाप्राप्ते यो विधिरारभ्यते स' इत्यन्तोऽपवादपदार्थः । लोके सति विरोधे बलीयसा दुर्बलस्य बाधदर्शनाल्लोकसिद्धमेवार्थमाह—'तस्य बाधक' इति । एवं च विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यताकशास्त्रस्य विशेषशास्त्रेण बाध इति फलति । विशेषशास्त्रोद्देश्यो यो विशेषधर्मावच्छिन्नः, तद्वृत्तिर्यः सामान्यधर्मः, तदवच्छिन्नोद्देश्यताकशास्त्रस्य, विशेषशास्त्रेण विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रेण बाध इति तदर्थः, सामान्यत्वं व्यापकत्वम्, विशेषत्वं व्याप्यत्वम् । ननु सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तित्वविशेषणं व्यर्थं, सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तित्वासत्त्वे तस्य सामान्यत्वासम्भवादिति चेत्?, न—उद्देश्यतावच्छेदकतावच्छेदकसम्बन्ध एव व्यापकतावच्छेदको ग्राह्य इति भ्रमवारणाय तत्सार्थक्यात्, अन्यथा उद्देश्यतावच्छेदकावच्छेदकसम्बन्धेनेत्येवोपादीयेत, तथा च सम्बन्धानुल्लेखपूर्वकं तादृशविशेषणमात्रोपादानेन कालिकातिरिक्तेन येन केनापि सम्बन्धेन वृत्तिता विवक्षितेति तात्पर्यमवसेयम् । तेन "स्वरादेर्द्वितीयः" [ ४. १. ४. ] इत्यनेन "आद्योऽश एकस्वरः" [ ४. १. २. ] इत्यस्य बाधः, तस्य ह्युद्देश्यतावच्छेदकं धात्ववयवादिभूतस्वरपरत्वविशिष्टद्वितीयैकस्वरत्वम्, तच्च यद्यप्युद्देश्यतावच्छेदकावच्छेदकस्वरूपसम्बन्धेनोर्णुनावित्यत्र नुशब्देऽस्ति, तत्र धात्ववयवप्रथमैकस्वरत्वं स्वरूपसम्बन्धेन नास्ति, किन्तूर्ण्वित्यत्रास्तीति तयोः सामानाधिकरण्यस्याप्यभावेन व्याप्यव्यापकभावस्य सर्वथाऽभावेऽपि स्वघटकस्वरत्ववदुत्तरत्वसम्बन्धेन प्रथमैकस्वरत्वस्य द्वितीयैकस्वरे सत्त्वात् तस्य द्वितीयैकस्वरत्वव्यापकत्वमुपपन्नम् ॥

नन्वत्र बाधः कः पदार्थः? न तावद् व्यापकधर्मावच्छिन्ने व्याप्यधर्मावच्छिन्नत्वबोधनम्, तथा सति "स्वरादेर्द्वितीयः" [ ४. १. ४. ] इति शास्त्रीयोद्देश्यतावच्छेदकमादिभूतस्वरत्वं व्याप्यं, तद्धर्मावच्छिन्नातिरिक्तत्वस्य "आद्योऽश एकस्वरः" [ ४. १. २. ] इति शास्त्रीयोद्देश्यतावच्छेदकप्रथमैकस्वरत्वस्य व्यापकत्वात् तद्धर्मावच्छिन्ने बोधनं स्यात्, तथा सति धातोरादिभूतो यः स्वरस्तद्भिन्नस्वरघटितो यः प्रथमैकस्वरोऽशः, तस्य द्वित्वमित्यर्थे 'आटतुः' इत्यादौ 'अट्' इत्यस्य तथाभूतस्वरभिन्नस्वरघटितत्वाभावाद् द्वित्वानापत्तेः, तथा ञिणित्तद्धितत्वस्य "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति शास्त्रीयोद्देश्यतावच्छेदकस्य व्याप्य-

तया तद्धर्मावच्छिन्नातिरिक्तत्वस्योपान्त्यवृद्धि–[ ४. ३. ५०. ]–नाम्यन्त[ ४. ३. ५१. ]वृद्ध्युद्देश्यतावच्छेदकं व्यापकीभूतं ञिण्णित्प्रत्ययत्वं, तदवच्छिन्ने बोधनेनोपान्त्यवृद्धेर्नाम्यन्तवृद्धेश्च ञिण्णित्तद्धितभिन्ने एव प्रवृत्त्या ञिण्णित्तद्धिते तयोरप्रवृत्तेन्यथैव सिद्धौ "अनुशतिकादीनाम्" [ ७. ४. २७. ] इति सूत्रेऽनुशतिकादिगणे 'पुष्करसद्'शब्दपाठेन 'आदिवृद्धिरन्त्योपान्त्यवृद्धी बाधते' इति ज्ञापनपरभाष्यविरोधापत्तेः । "अनुशतिकादीनाम्" [ ७. ४. २७. ] इति सूत्रेण हि तद्गणपठितानामुभयपदस्यस्वरेष्वादेः स्वरस्य वृद्धिर्विधीयते, तत्र 'पुष्करसद्'शब्दोऽपि गणे पठ्यते, ततोऽपत्येऽर्थे बाह्वादित्वादिञि–'पौष्करसादिः' इत्यत्रोभयपदादिस्वरस्य वृद्धिः सिद्धा, सा च आदिस्वरस्य "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति सूत्रेण "ञ्णिति" [ ४. ३. ५०. ] इत्यनेनोपान्त्यस्य च वृद्धिविधानेन सिद्धैवेति व्यर्थमेव तत्र गणे 'पुष्करसद्'शब्दग्रहणमिति तद् व्यर्थं सत् 'आदिवृद्धिरन्त्योपान्त्यवृद्धी बाधते' इति ज्ञापयतीत्युक्तं महाभाष्ये । तथाहि– "तद्धितेष्वचामादेः" [ पा० सू० ७. २. ११७. ] इति सूत्रे "तद्धितेष्वचामादिवृद्धावन्त्योपधालक्षणवृद्धिप्रतिषेधः" [ वार्तिकम् ], तद्धितेष्वचामादिवृद्धावन्त्योपधालक्षणाया वृद्धेः प्रतिषेधो वक्तव्यः–'कौष्टः, जागतः, इति । ननु चाचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते । कथमन्यस्योच्यमानाऽन्यस्य बाधिका स्यात्? । असति खल्वपि सम्भवे बाधनं भवति, अस्ति च सम्भवो यदुभयं स्यात् । "लोकविज्ञानात् सिद्धम्" [ वार्तिकम् ], सत्यपि सम्भवे बाधनं भवति, तद्यथा—दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति, एवमिहापि सत्यपि सम्भवेऽचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते । विषम उपन्यासः, नाप्राप्ते दधिदाने तक्रदानमारभ्यते, तत्प्राप्ते आरभ्यमाणं बाधकं भविष्यति, इह पुनरप्राप्तायामन्त्योपधालक्षणायां वृद्धावचामादिवृद्धिरारभ्यते–सुश्रुत्सौश्रुत इति । "पुष्करसद्ग्रहणाद्वा" [ वार्तिकम् ], अथवा यदयमनुशतिकादिषु पुष्कसच्छब्दं पठति तज्ज्ञापयत्याचार्योऽचामादिवृद्धावन्त्योपधालक्षणा वृद्धिर्न भवतीति ॥" [ भाष्यम् ] । क्रोष्टुरपत्यमित्यर्थेऽणि आदिस्वरस्य वृद्धौ कौष्ट इति भवति, जगतोऽपत्यमित्यर्थेऽणि जागत इति, इहोभयत्र क्रमेण "नामिनोऽकलिहलेः" [ ४. ३. ५१. ] "ञ्णिति" [ ४. ३. ५०. ] इति चान्त्यवृद्ध्युपान्त्यवृद्धी अपि आप्नुतः, अस्ति च सम्भवो यदुभयं स्यात्, तथा च 'कौष्टारः, जागातः' इति रूपे युक्ते इति शङ्काभाष्याशयः । सत्यपि सम्भवे बाधनं भवति, यथा–'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्युक्ते कौण्डिन्यस्यापि ब्राह्मणत्वेन दधिदानतक्रदानयोरुभयोः प्राप्तौ सत्यपि दधिदानोत्तरं तक्रदानसम्भवे तक्रदानेन दधिदानं बाध्यते, तथा सत्यपि सम्भवे उभयवृद्ध्योरादिस्वरवृद्ध्याऽन्त्योपान्त्यवृद्धी बाध्येते इत्येकदेशिनोत्तरिते दधिदानस्यावश्यप्राप्तावारभ्यमाणं तक्रदानं सत्यपि संभवे बाधकं भवति, इह चान्त्यवृद्ध्युपान्त्यवृद्ध्योर्नावश्यप्राप्तावादिवृद्धिरारभ्यते, यतः सुश्रुतोऽपत्यं सौश्रुतः, मरुतोऽपत्यं मारुतिरित्यादावन्त्योपान्त्यवृद्ध्योरप्राप्तावप्यादिवृद्धिरवकाशं लभते, इति न तक्रकौण्डिन्यन्यायेनात्रादिवृद्धेरन्त्योपान्त्यवृद्धिबाधकत्वं साधयितुं शक्यम्, ततश्चानुशतिकादिगणे पुष्करसच्छब्दपाठेनैव 'आदिवृद्धिरन्त्योपान्त्यवृद्धी बाधते' इति ज्ञापनीयमित्युत्तरग्रन्थाशयः । ज्ञापनप्रकारश्च पूर्वमुपपादित एव । प्रकृतमनुसरामः, तथा च पूर्वोक्तरीत्या बाधपदार्थस्वीकारेऽनेनैव न्यायेनादिवृद्धेरन्त्योपान्त्यवृद्धिबाधकत्वं सेत्स्यतीति वृथैव भाष्यकृता ज्ञापकानुसरणं कृतं स्यादिति पूर्वसम्बन्धः । अथैतद्दोषपरिहाराय यैर्यैर्विशेषणैर्यैर्यैर्विशेष्यभूतैः पदार्थैर्विशेषितो व्याप्यो धर्मः, तैस्तैर्विशेषितव्याप्यधर्मावच्छिन्नातिरिक्तत्वबोधनं व्यापकीभूतधर्मावच्छिन्ने बाधपदार्थ इत्यपि न युक्तम्, तथा सति यद्यपि द्वितीयैकस्वरनिष्ठपरत्वावधिभूतत्वविशिष्टं धात्ववयवादित्वविशिष्टं यत् स्वरत्वं तदवच्छिन्नातिरिक्तत्वस्य धात्ववयवप्रथमैकस्वरत्वघटकस्वरत्ववतो बोधनेनाऽऽटतुरित्यादौ 'अट्'धातुघटकस्य स्वरस्य तदतिरिक्तत्वसत्त्वान्न दोषः, उर्णुनावेत्यादौ च द्वितीयैकस्वरो 'नु'इति, तन्निष्ठपरत्वावधित्वस्य धात्ववयवादिस्वरत्वस्य चोकारे सत्त्वेन तदवच्छिन्नातिरिक्तत्वविरहान्न तद्घटितस्य द्वित्वम् । एवं चोद्देश्यतावच्छेदकावच्छेदकत्वसम्बन्धेनैव वृत्तित्वग्रहणेऽपि न दोष इति वक्तुं शक्यं, तथाप्युक्तभाष्यविरोधस्य तादवस्थ्यमेव । तथाहि–व्याप्यं ञिण्णित्तद्धितत्वं, तच्च नामावधिकपरत्वेन विशेषितं कृत्वा नामावधिकपरत्वविशिष्टञिण्णित्तद्धितत्वावच्छिन्नातिरिक्तत्वेन ञिण्णित्प्रत्ययत्वावच्छिन्ने सङ्कोचे पाठस्य चारितार्थ्याज्ज्ञापकत्वासंभवादुक्तभाष्यविरोधस्य जागरूकत्वमिति; अत्रोच्यते–तत एव भाष्याद् व्याप्यभूतया शाब्दबोधीयविषयतया व्यापकीभूतायाः शाब्दबोधीयविषयताया बाधः, शाब्दबोधीया च विषयता शाब्दबोधीयविशेष्यतया प्रकारतया च सङ्कुचिता भवति, ततश्चोपान्त्यभूतान्निष्ठविशेष्यतानिरूपिताव्यवहितपूर्वत्वसम्बन्धावच्छिन्नप्रकारतारूपोपान्त्यवृद्धिसम्बन्धिनी ञिण्णित्प्रत्ययत्वावच्छिन्ना विषयता नाम्यन्तप्रकृतिनिष्ठविशेष्यतानिरूपिताव्यवहितपूर्वत्वसम्बन्धावच्छिन्ना अन्त्यवृद्धिसम्बन्धिनी ञिण्णित्प्रत्ययत्वावच्छिन्ना प्रकारतारूपा वा विषयता, नामनिष्ठविशेष्यतानिरूपिताव्यवहितपूर्वत्वसम्बन्धावच्छिन्नञिण्णित्तद्धितत्वावच्छिन्नप्रकारतारूपविषयताया न व्यापिका, तदभाववति मरुच्छब्दप्रकृतिक इञि प्रत्यये एतस्याः सत्त्वात् । तथा च न्यायेनादिवृद्ध्याऽन्त्योपान्त्यवृद्ध्योर्बाध्याप्राप्त्या ज्ञापकेन बाधः साधित इति न तद्भाष्यविरोधः ।

अत्रत्यतत्तन्मतविचारस्तदनुकूलनिवेशप्रवेशादिश्च शास्त्रार्थरसिकैरन्यतोऽवसेयो ग्रन्थगौरवभिया नेहोपन्यस्तः ॥

इत्थं सामान्यधर्मावच्छिन्नोद्देश्यताकशास्त्रत्वं बाध्यत्वे बीजमिति संक्षिप्य विवेचितम्, सम्प्रति विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रत्वं बाधकत्वे बीजमिति वर्णयितुं सामान्यस्तत्स्वरूपमुच्यते—तदप्राप्तियोग्येऽचारितार्थ्यमेव विशेषशास्त्रस्य बाधकत्वे बीजमित्यवसेयम् । तच्च चतुर्विधम्—तदप्राप्तियोग्येऽचारितार्थ्यम् १, तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते चारितार्थ्यम् २, तदप्राप्तियोग्येऽचारितार्थ्ये सति कृतेऽचारितार्थ्यम् ३, तदप्राप्तियोग्येऽचारितार्थ्ये सत्यपवादशास्त्रप्रवृत्त्युत्तरमुत्सर्गशास्त्रप्रवृत्तावपवादशास्त्रप्रणयनवैयर्थ्यसम्भावना ४, चेति । अत्र तदप्राप्तियोग्यं च तद्विधेयाघटितं बोध्यम्, तेन तद्विधेयघटिते तदप्राप्तियोग्येऽपवादत्वेन जिघृक्षितशास्त्रस्य चारितार्थ्येऽपि न क्षतिः । तत्राद्येन बाधबीजेनोत्सर्गस्य पूर्वमप्रवृत्तिरित्येव बाधः । तथा चोत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नेऽपवादशास्त्रप्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेन सङ्कोचः । यथा—"एदापः" [ १. ४. ४२. ] इति सूत्रस्य "दीर्घङ्याब्व्यञ्जनात्सेः" [ १. ४. ४६. ] इति सूत्राप्राप्तियोग्येऽचारितार्थ्येन "एदापः" [ १. ४. ४२. ] इत्येतत्प्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेन "दीर्घङ्याब्०" [ १. ४. ४६. ] इति शास्त्रीयसिपदार्थे संकोचात् 'पद्मा+स्'इत्यवस्थायां "दीर्घङ्याब्०" [ १. ४. ४६. ] इति सूत्राप्राप्त्या "एदापः" [ १. ४. ४२. ] इति सूत्रेण सिना सहाप एकारे कृते रूपसिद्धिर्भवति, न चात्र द्वितीयबाधबीजेन निर्वाहः, तस्य बीजस्य "दीर्घङ्याब्०" [ १. ४. ४६. ] इति सूत्रविषयेऽप्रवृत्तेः । अत एव चानड्वानित्यत्र सिलोपसिद्धिः, अन्यथा "अनडुहः सौ" [ १. ४. ७२. ] इत्यनेन "दीर्घङ्याब्व्यञ्जनात्०" [ १. ४. ४६. ] इति सिलोपस्य द्वितीयबाधबीजेन बाधापत्त्या कृतेऽपि नागमे सिलोपानापत्तेः ॥

द्वितीयबाधबीजोदाहरणं च सर्वेषामिति, अत्र "अवर्णस्यामः साम्" [ १. ४. १५. ] इत्यस्य "ह्रस्वापश्च" [ १. ४. ३२. ] इति नामाप्राप्तियोग्येऽचारितार्थ्येन कृतेऽपि नामि स्थानिवद्भावेन सामादेशसंभवे चारितार्थ्याच्च द्वितीयबाधबीजेन सामादेशेन नामादेशबाधसिद्धिः । एतद्बाधश्चोत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने स्वविहितकार्याश्रयातिरिक्तत्वेन संकोचः, तथा च "ह्रस्वापश्च" [ १. ४. ३२. ] इत्यत्रामुपदार्थे "अवर्णस्यामः साम्" [ १. ४. १५. ] इति शास्त्रविहितसामाश्रयातिरिक्तत्वेन सङ्कोचात् सर्वेषामित्यत्र सामोत्तरं न नाम् । एवमत्र प्रथमबाधबीजस्य सत्त्वे साम्प्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेनाम्पदार्थे सङ्कोचात् सामः पूर्वमपि नाम् न भवति । एतदेव तक्रकौण्डिन्यन्यायस्वरूपम् ॥

तृतीयबाधबीजेन तु प्रथमबाधबीजप्रयोज्यसङ्कोचघटकस्वप्रवृत्तियोग्यार्थे स्वीयोद्देश्यतावच्छेदकावच्छिन्नेति विशेषणदानरूपः सङ्कोचः क्रियते । तथा च 'अयज+इ+इन्द्रम्' इत्यत्र विभक्तीकारस्य "समानानां तेन दीर्घः" [ १. २. १. ] इति शास्त्रप्रवृत्तियोग्यत्वेन "अवर्णस्येवर्णादिनैदोदरल्" [ १. २. ६. ] इत्यत्र "समानानां तेन दीर्घः" [ १. २. १. ] इति शास्त्रीयसमानस्वराव्यवहितपूर्वत्वविशिष्टसमानस्वरत्वरूपोद्देश्यतावच्छेदकावच्छिन्नो यः स्वप्रवृत्तियोग्यस्तदतिरिक्तस्यावर्णस्य समानस्वराव्यवहितपरसमानस्वररूपस्वप्रवृत्तियोग्यातिरिक्ते इवर्णादावित्येवंरूपस्यैव सङ्कोचस्य प्राप्त्या 'अयज+इ' इत्यत्र "अवर्णस्येवर्णादिना०" [ १. २. ६. ] इत्यस्य दुर्वारत्वेन न दीर्घः ॥

चतुर्थबाधबीजेन च "अतः स्यमोऽम्०" [ १. ४. ५७. ] इत्यस्य [ "अनतो लुप्" [ १. ४. ५९. ] इति सूत्रे 'अनतः' इति पदाभावेऽपि ] लुब्प्राप्तियोग्येऽचारितार्थ्येन, अमुत्तरं लुपि तु "अतः स्यमोऽम्" [ १. ४. ५७. ] इत्यस्य प्रणयनवैयर्थ्येन द्वितीयबाधबीजवत् स्वविहितकार्याश्रयातिरिक्तत्वेनैव लुब्विधायकशास्त्रे सङ्कोचः, तेनामुत्तरं न लुप्, प्रथमबाधबीजेन बाधाच्चामः प्रागपि न लुप्, इति बोध्यम् । एवञ्चानेन न्यायेनैव सिद्धे "अनतो लुप्," [ १. ४. ५९. ] इत्यत्र 'अनतः' इति स्पष्टार्थमेव ॥

अन्ये तु प्रथमबाधबीजेनैव सर्वत्र निर्वाहेऽन्यानि त्रीणि बाधबीजानि नाङ्गीकार्याणीत्याहुः, तेषां मतमिह विस्तरभयात् संक्षिप्य प्रदर्श्यते, तथाहि—द्वितीयबाधबीजस्य फलं सर्वेषामित्युक्तम्, तत्र "अवर्णस्यामः साम्" [ १. ४. १५. ] इत्यत्र "ह्रस्वापश्च" [ १. ४. ३२. ] इत्यत्र च 'आमः' इति पदे 'आ+आमः' इत्याकारप्रश्लेषेणाकारादेरामः साम्-नामोः प्रवृत्त्या प्रथमबाधबीजेन पूर्वं सामि आकारादेरामोऽभावेन नाम् न भवति । तृतीयबाधबीजफलस्य 'अयजे इन्द्रम्' इत्यस्य च *असिद्धं बहिरङ्गमन्तरङ्गे* इति न्यायेनैव सिद्धिरिति पूर्वमुपपादितमेव तन्न्यायव्याख्यावसरे । चतुर्थस्य बाधबीजस्य फलं ज्ञानमित्यादावमोलुबभावस्तु 'अनतः' इति कथनादेव सिद्ध इति न तस्याप्यावश्यकतेत्येकेनैव बाधबीजेन सर्वत्र निर्वाह इति संक्षेपः । विस्तरप्रेप्सुभिराकरग्रन्था अवलोकनीयाः ॥ ४० ॥

## *बलवन्नित्यमनित्यात्* ॥ ४१ ॥

सि०—निरवकाशत्वमूलकं बलवत्त्वं [ बाध्यबाधकभावं ] पूर्वन्यायैर्विचार्य, अन्यकारणमूलकं तद् विचारयितुं क्रमेण प्रवर्त्तमानो नित्यस्य बलवत्त्वप्रदर्शकं न्यायमाह—बलवदिति । नित्यं—कृताकृतप्रसङ्गि, अनित्यात्—नित्यत्वेनाभिमतशास्त्रभिन्नात् तस्मिन् प्रवृत्ते प्रवृत्त्यभाववतः शास्त्रात्, बलवत्—पूर्वप्रवृत्तिक-

मित्यर्थः । अवश्यमेकस्याप्रवृत्तौ कल्पनीयायां यद्धि शास्त्रं स्वत एव कदाचित् प्रवृत्त्यभाववत् तस्यैव प्रवृत्त्यभावः कार्यं औचित्यात्, यद्धि शास्त्रमन्यस्मिन् कृतेऽकृते च प्रवृत्तिमत् तस्याभावस्य पूर्वमक्लृप्तत्वात् तत्कल्पनस्यानौचित्यमिति भावः । एवं च नित्यस्य बलवत्त्वे तदेव बीजम्, दार्ढ्यायात्र ज्ञापकमपि प्रदर्शयिष्यत इत्यन्यत् । यथा–'अकार्ष्ट' इत्यादौ सिज्लुकि सत्यपि प्रत्ययलक्षणेन "सिचि परस्मै समानस्याङिति" [ ४. ३. ४४. ] इति वृद्धिः प्रवर्त्तिष्यत एवेति नित्या सा, ततश्चानित्यात् "धुड्-ह्रस्वाल्लुगनिटस्तथोः" [ ४. ३. ७०. ] इति सिज्लुको बलवतीति पूर्वमेव प्रवर्त्तते, ततश्च ह्रस्वाभावात् सिज्लुग् न भवति ।

अत्र ज्ञापकं तु "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति सूत्रे कलिहलिवर्जनम्, तद्धि हलिं कालिं वाऽग्रहीत्–'अजहलत्, अचकलत्' इत्यादिसिद्धये पूर्वं "ऋन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यस्य प्रवृत्त्यर्थं कृतं स्यात्, तच्च स्वत एव सिद्धम्, ऋन्त्यस्वरादिलोपस्य कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वमेव प्रवृत्त्या ततो "नामिनः०" [ ४. ३. ५१. ] इति सूत्रस्य प्राप्त्यभावादेव वृद्धिरप्राप्तेति कलि-हल्योः समानलोपित्वेन "असमानलोपे०" [ ४. १. ६३. ] इत्यादिसूत्राणां प्राप्त्यभावात्, यत् तु कृतं कलिहलिवर्जनं तदन्यत्र ऋन्त्यस्वरादिलोपापेक्षया वृद्धेर्बलवत्त्वज्ञापनाय, तच्च ज्ञापनं तस्य वैयर्थ्ये सत्येव सम्भवति, तस्य वैयर्थ्यं च प्रकृतन्यायाश्रयणेनैवेति । एवं च कलि-हलिवर्जनं प्रकृतन्यायज्ञापनद्वारा वृद्धेर्बलीयस्त्वज्ञापकम्, एतन्न्यायमात्रे ज्ञापिते च ऋन्त्यस्वरादिलोपस्य नित्यत्वेन पटुमाख्यदपीपटदित्यादावपि पूर्वमन्त्यस्वरादिलोपे कृते समानलोपित्वेन सन्वद्भावाद्यनापत्तिरिति कलि-हलिवर्जनेन वृद्धेर्बलीयस्त्वमपि ज्ञाप्यते, अन्यथा ज्ञापितेऽप्येतन्न्याये स्वस्य चारितार्थ्याभावात्, एतन्न्यायमात्रसत्त्वे हि नित्यत्वात् पूर्वमन्त्यस्वरादिलोपे समानलोपित्वेन सन्वद्भावाद्यप्रवृत्त्याऽजहलदित्यादिसिद्धेः सुसंपादत्वात् । तथा च यावता विनाऽनुपपत्तिस्तावत् सर्वं ज्ञापयतीति न्यायेन वृद्धेर्बलीयस्त्वमपि ज्ञापयति, तथा पूर्वं वृद्धौ सत्यामैकारलोपेऽसमानलोपित्वेन सन्वद्भावः स्यादिति तद्वारणाय कलि-हलिवर्जनस्य स्वांशे चारितार्थ्यम्; इति प्राचीनानामाशयः । तथाहि–तेषां ग्रन्थस्य निगमनांशः–"तदेवं पद्वादीनां प्रथमतो वृद्धेरेव सम्पादनार्थं यत् कलिहलिवर्जनोपायः सूरिभिः कृतः, तदेवंकरणाभावे नित्यत्वादेतन्न्यायेन बलवत्त्वादन्त्यस्वरादिलुक एव सर्वत्र प्रथमत एव प्रवृत्तिं भवन्तीमाशङ्क्य तन्निवारणार्थमेव । यदि त्वेष न्यायो नाभविष्यत् तदान्त्यस्वरादिलुचो बलवत्त्वाशङ्काया अप्यभावाच्चानिष्टार्थेति न्यायेन यथा शिष्टप्रयोगं सर्वाण्यपि रूपाण्युपायं विनाऽप्यसाधयिष्यन्त्य-कथम्? अचकलदित्यादीनि कलि-हल्योः प्रथमत एवान्त्यस्वरादिलुक्करणेनासाधयिष्यन्त, अपीपटदित्यादीनि तु पद्वादीनां प्रथमतो वृद्धिं कृत्वा पश्चादन्त्यस्वरादिलुक्करणेनेति । ततश्च यदेतन्न्यायाशङ्कितैः सूरिभिः पद्वादिषु प्रथमं वृद्धेर्व्यवस्थापनार्थं कलि-हलिवर्जनयत्नः कृतः स एतन्न्यायज्ञापक इति व्यक्तमेव" इति । अत्रेदमुच्यते–कलि-हलिवर्जनेन लोपापेक्षया वृद्धेर्बलीयस्त्वमित्येव ज्ञापयितुं शक्यते, तावतैव स्वस्य चारितार्थ्यात्, अपीपटदित्यादीनां सिद्धेश्च, लोपस्य वृद्ध्यपेक्षया कथं बलवत्त्वमित्यत्र तस्य व्यापाराभावात् । यावता विना न स्वस्य चारितार्थ्यं तावदेव ज्ञापनीयम् । लोपस्य बलीयस्त्वे पूर्वं नियते एव हि कलि-हलिवर्जनस्य वैयर्थ्यशङ्का भवति, तदेव कलि-हलिग्रहणं स्ववैयर्थ्यशङ्कार्थं लोपबलीयस्त्वं [ नित्यमनित्याद् बलवदिति रूपम् ] ज्ञापयिष्यतीति चित्रम् । किञ्च वृद्ध्यपेक्षया लोपस्य बलीयस्त्वं स्वत एव परत्वादपि सिद्धम्, परो हि लोपः । तथा च "स्पर्धे" [ परः ७. १. ११८. ] इति परिभाषया लोपस्य वृद्ध्यपेक्षया परत्वाद् बलवत्त्वे प्राप्ते कलि-हलिवर्जनेन वृद्धेर्बलवत्त्वं ज्ञाप्यते इति भवति, नित्यस्य बलवत्त्वज्ञापने च वृद्धेरनित्यतया दुर्बलत्वमेव स्यात्, तच्च कलि-हलिग्रहणप्रतिकूलम् । तस्मान्नित्यस्य बलवत्त्वे ज्ञापकान्तरमन्वेषणीयं, पूर्वोक्तमक्लृप्ताभावस्याभावकल्पनापेक्षया क्लृप्ताभावस्याभावकल्पनस्यैवौचित्यमिति वा न्यायसङ्गतं तन्मूलं स्वीकरणीयमिति प्रतीमः । एतेन यदि त्वेष न्यायो नाभविष्यदित्यादिना या व्यतिरेकव्याप्तिरुक्ता साऽपि प्रत्युक्ता वेदितव्या, परत्वादेव लोपस्य बलीयस्त्वात् । किञ्च *परान्नित्यं बलवत्* इति न्यायेनापि नात्र व्यवस्था सम्भविनी, नित्यत्वेनाभिमतस्य लोपस्यैव परत्वस्यापि सत्त्वात् । तथा च वृद्धेर्बलीयस्त्वमात्रज्ञापनेन स्वचारितार्थ्येऽपीपटदित्यादिरूपसिद्धौ च–निर्बाधायां सर्वोऽप्ययं प्राचीनानां ग्रन्थः किमाशयक इति विचारणीयं सुधीभिरिति ॥ ४१ ॥

## *बलवन्नित्यमनित्यात्* ॥ ४१ ॥

**त०**—बाधकत्वबीजकथनप्रसङ्गेनानवकाशत्वस्य सकलबाधकबीजप्राधान्येन तन्निरूपणमादौ कृतं *येन नाप्राप्ते०* इति न्यायेन, सम्प्रति नित्यत्वमपि क्वचिद् बाधकत्वबीजमिति वर्णयितुं न्यायोऽयमाश्रितः । अस्य च [ नित्यस्य ] बाधकत्वबीजं कृताकृतप्रसङ्गित्वमेव । कृताकृतप्रसङ्गिनोऽपि विधेः शब्दान्तरस्य शब्दान्तरे शब्दान्तराद् वा प्राप्तौ न नित्यत्वमिति *शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः* *शब्दान्तरात् प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम्* *लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः* इत्यादिन्यायैः परिभाषेन्दुशेखरे निरूपितम् । यदा तु शास्त्रव्यतिरेकेण तद्विधेय-

कार्ययोरेव नित्यत्वादिविचारः, यदापि लक्ष्यानुरोधाद् व्यत्त्यैक्यस्य लक्षणैक्यस्य वाऽनादरस्तदापि कार्यस्य सदा प्राप्तिमत्त्वेनैव नित्यत्वमित्यपि *क्वचित् कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता* इति न्यायेनोक्तं तत्रैव, तस्यायमाशयः--कृते द्वितीये नित्यत्वेनाभिमतस्य पुनः प्रसङ्गमात्रं नित्यत्वव्यवहारे प्रयोजकम्, न तु बाधकाबाधितफलोपहितप्रसङ्ग एव तथेति, तदेतन्न्यायान्तरेणापि प्रतिपादितं *यस्य च लक्षणान्तरेण निमित्तं व्याहन्यते न तदनित्यम्* तथा च तस्य नित्यत्वप्राप्तये लक्ष्ये प्रवृत्तिर्नावश्यिका, यदि लक्षणान्तरेण तस्य निमित्तं व्याहन्यते । क्वचिच्च बाधकाबाधितफलोपहितप्रसङ्ग एव नित्यत्वार्थं गृह्यते, तथा च न्यायान्तरं तदर्थमाश्रयन्ति–*यस्य च लक्षणान्तरेण निमित्तं व्याहन्यते तदप्यनित्यम्* इति । तथा च लक्षणान्तरेण निमित्तस्य व्याघाते तदप्रवृत्तौ न तस्य नित्यत्वमेषितव्यमिति भावः । सप्तमाध्याये महाभाष्यव्याख्यायां कैयटेनास्य न्यायस्योपष्टम्भकत्वेन लोकव्यवहारद्वयमुदाहृतम्–"वालि-सुग्रीवयोर्युद्ध्यमानयोर्भगवता वालिनि हतेऽपि सुग्रीवस्य वालिनः [ वाल्यपेक्षया ] प्राबल्यं न व्यवहरन्ति । भगवत्सहायैः पाण्डवैर्जये लब्धेऽपि पाण्डवानां प्राबल्यं व्यवहरन्ति च" इति । अयमाशयः–यथा भगवत्प्रयत्नेनैव सुग्रीवस्य पाण्डवानां च जयेऽविशिष्टेऽपि लोका वालिनं प्रति सुग्रीवस्य प्राबल्यं न व्यवहरन्ति, कौरवान् प्रति पाण्डवानां प्राबल्यं व्यवहरन्ति, तथा प्रकृतेऽपि लक्षणान्तरेण निमित्तविघातस्थलप्रसङ्गस्य बाधकाबाधितफलोपहितप्रसङ्गत्वाभावेऽविशिष्टेऽपि क्वचिन्नित्यत्वं क्वचिदनित्यत्वमिति लक्ष्यानुरोधेनैव व्यवस्थापनीयमिति ॥

अत्र ज्ञापकमप्युपन्यस्तं न्यायमञ्जूषायां प्राचीनैः, तच्च विवेचितमेव वृत्तौ । तत्र चाचार्यसम्मतिरपि प्रतीयत इति बृहद्वृत्तिग्रन्थेनाक्सीयते, तथाहि–"उपान्त्यस्यासमानलोपिशास्वृदितो ङे" [ ४. २. ३५ ] इति सूत्रव्याख्यायामसमानलोपिपदस्य प्रयोजनप्रदर्शनावसरे राजानमात्यदरराजदित्यादिप्रत्युदाहरणस्य सङ्गमनाय–"यत्रान्त्यस्वरादिलोपस्तत्र स्थानिवद्भावेन न सिद्ध्यतीति वचनम्" इत्युक्तम्, तत्रेदं शङ्कितम्–"ननु यत्रापि स्वर-व्यञ्जनलोपस्तत्राप्यवयवावयविनोरभेदनयेन स्वरादेश एवेति स्थानिवद्भावेनैव सिद्ध्यति, किमसमानलोपिवचनेन" इति । उत्तरयति–"सत्यम्, स्थानिवद्भावस्य अनित्यत्वख्यापनार्थं वचनम्, तेन वास्यापरिच्छिन्नवान्–पर्यवीवसत्, स्वादुकृतवान्–असिस्वदित्यादि सिद्धम् । अत्रेकारोकारयोः "नामिनोऽकलिहलेः" [ ४. ३. ५१. ] इति वृद्धौ कृतायामन्त्यस्वरादिलोपादसमानलोपित्वम् । ननु च परत्वात् प्रथमं लोपेनैव भवितव्यम्, नैवम्–कलिहलिवर्जनात् परमपि लोपं वृद्धिर्बाधते । अत एव तत्र कलि-हलिवर्जनमर्थवत्" इति । एतेन ग्रन्थेन परत्वमेवान्त्यस्वरादिलोपस्य बलवत्त्वे नियामकमिति स्पष्टमेवोक्तमित्यस्य नित्यस्य बलवत्त्वे ज्ञापककथनं कथमिव तेषां समीचीनमिति विवेचनीयं सूरिभिः । किञ्चास्यान्त्यस्वरादिलोपस्य नित्यत्वमस्त्यपि नेति विवेचितं महाभाष्ये "णौ चङ्युपधाया ह्रस्वः" [ पा० सू० ७. ४. १. ] इति सूत्रे । तथाहि–वादितवन्तं प्रयोजितवान्–अवीवदद् वीणां परिवादकेनेति वाक्येऽवीवददित्यत्र प्रथमणिचो लोपे तेन व्यवधानाद् ह्रस्वाप्राप्त्या सन्वद्भावादपि न स्यादिति तत्सिद्ध्यर्थमित्थं विचारितम्–"उपधाह्रस्वे णेर्णिच्युपसंख्यानम्" [ वार्तिकम् ], उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान्–अवीवदद्वीणां परिवादकेन । किं पुनः कारणं न सिद्ध्यति ?, णिचा व्यवहितत्वात्, णिलोपे कृते नास्ति व्यवधानम्, स्थानिवद्भावाद् व्यवधानमेव । प्रतिषिध्यतेऽत्र स्थानिवद्भावः, चङ्परनिर्ह्रासे न स्थानिवदिति । एवमग्लोपिनां नेति प्रतिषेधः प्राप्नोति, वृद्धौ कृतायां लोपः, तस्मादग्लोप्यङ्गं भवति । इदमिह सम्प्रधार्यं–वृद्धिः क्रियतां लोप इति, किमत्र कर्तव्यम् ? परत्वाद् वृद्धिः । नित्यो लोपः कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि, अनित्यो लोपोऽन्यस्य कृतायां वृद्धौ प्राप्नोति, अन्यस्याकृतायाम् । शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति, उभयोरनित्ययोः परत्वाद् वृद्धिः, वृद्धौ कृतायां लोपः, तस्मादग्लोप्यङ्गं भवति, एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति–वृद्धेर्लोपो बलीयानिति, यदयमग्लोपिनां नेति निषेधं शास्ति; नैतदस्ति ज्ञापकम्, अस्त्यन्यदेतस्य वचने प्रयोजनम्, किम् ? यत्र वृद्धावपि कृतायामगेव लुप्यते, अत्यरराजत् । यत् तर्हि प्रत्याहारग्रहणं करोति, इतरथा हि अलोपिनां नेति ब्रूयात् । एवं तर्हि वृद्धेर्लोपो बलीयानिति" इति । अस्यायमाशयः–अवीवदित्यत्र पूर्वणिलोपस्य स्थानिवद्भावेन व्यवधानाञ्चङ्परणेरभावादुपान्त्यस्य ह्रस्वो न स्यादिति तदर्थं णेर्णिचि–ण्यन्ताण्णिचि, ह्रस्वविधानार्थं किमपि वचनं कर्तव्यम् । यदि च णिलोपे कृते तस्य वचनान्तरेण स्थानिवद्भावनिषेधाद् व्यवधानाभाव इत्याश्रीयते, तथाप्यन्त्यस्वरादिलोपे समानलोपित्वादेवात्रोपान्त्यह्रस्वो न स्यात् । वृद्धौ कृतायामन्त्यस्वरादिलोपे समानलोपित्वाभाव इत्यपि न वक्तव्यम्, वृद्धेर्लोपस्य बलीयस्त्वात् । तत्र वृद्धेर्बलीयस्त्वं न कृताकृतप्राप्तिमत्त्वरूपनित्यत्वेन, वृद्धावकृतायामिकारलोपः कृतायां च ऐकारलोप इति शब्दान्तरप्राप्त्या तस्यानित्यत्वात्, किन्तु–असमानलोपिनां ह्रस्वादिनिषेधविधानसामर्थ्येन वृद्धेर्लोपस्य बलीयस्त्वज्ञापनात्, यदि च राजानमतिक्रान्तवान्–अत्यरराजदित्यादौ वृद्धौ कृतायामपि समानलोपित्वस्याक्षतेस्तदर्थं समानलोपिनां प्रतिषेध इत्याश्रीयते, तदाऽकारलोपिनामित्यर्थक'अलोपिनाम्' एव प्रतिषेधेन सिद्धे 'अक्' इति समानलोपिसमुदायवाचकशब्दोपादानस्यैव तदर्थज्ञापकत्वमित्यास्थेयम् । तथा च वृद्धेर्लोपस्य बलीयस्त्वेनावीवददित्यादौ समानलोपित्वसत्त्वात्

तत्र ह्रस्वादि न स्यादिति तदर्थं किमपि वचनमारब्धव्यमिति शङ्का स्थिरेति ॥ एतेन महाभाष्यसन्दर्भेणान्त्यस्वरादिलोपस्य नित्यत्वं नेति व्यवतिष्ठते । सति हि नित्यत्वनिमित्तके तस्य बलवत्त्वे तदर्थं ज्ञापकानुसरणक्लेशो न कृतः स्यात् । इत्थं च प्रकृतभाष्यपर्यालोचनेन पटुमाख्यदित्यर्थेऽपपटदित्येव भविष्यति, अन्त्यस्वरादिलोपस्य बलवत्त्वेन समानलोपित्वात् सन्वद्भावाद्यभावात् । तस्यैव भाष्यस्य कैयटग्रन्थेनैतत्स्फोरितम्, तथाहि–तत्रत्यप्रदीपग्रन्थः "हलिकल्योरदन्तत्वनिपातनमेव ज्ञापकं - लोपात् पूर्वं वृद्धिर्भवतीति । णिलोपस्तु वाचनिकेन पूर्वविप्रतिषेधेन वृद्धेः पूर्वं भवति । एवं पटुमाख्यदपीपटदिति सन्वद्भावप्रसङ्गात् प्रत्याहारग्रहणमेव ज्ञापकमाश्रयणीयम्, तेन वृद्धेः प्राग् लोपो विधेयः" इति । अयमाशयः—स्वमते "नामिनोऽकलिहलेः" [ ४. ३. ५१. ] इति सूत्रे कलि-हलिवर्जनमिव पाणिनीये नये "मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच्" [ पा० सू० ३. १. २१. ] इति सूत्रे कलि-हल्योरदन्तत्वनिपातनं क्रियते, तेन च वृद्धौ कृतायामपि तयोः समानलोपित्वमेव भवतीति 'अचकलत्, अजहलत्' इत्यादि सिद्ध्यति । यदि च वृद्धेर्लोपस्यैव बलवत्त्वं स्यात् तर्हि स्वमते कलि-हलि-वर्जनमिव तन्मते तयोरदन्तत्वनिपातमपि व्यर्थमेव स्यात्-ततश्च तेन निपातनेन लोपात् पूर्वं वृद्धिर्भवतीति विज्ञायते । अवीवदत्यत्र च "ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन" इति वार्त्तिकेन णिलोपस्यैव पूर्वं प्रवृत्त्या तदर्थं किमपि वचनमारब्धव्यमेव, णाविति जातिपरो वा निर्देशः स्वीकार्य इति ङपरयोर्णित्वजात्याश्रययोर्द्वयोरपि व्यवधाने ह्रस्वो भविष्यति । एवं पटुमाख्यदपीपटदित्यत्र सन्वद्भावो मा भूदित्येतदर्थं वृद्धेः प्राग् लोपो भवतीति पूर्वोक्तं ज्ञापकमाश्रयणीयमेव, तथा चापपटदित्येव रूपमुचितम् । सूत्ररीत्या चापीपटदित्युभयोः परस्परविरोधे यथोत्तरं मुनीनां प्रामाण्यमिति भाष्यकारमतस्यैव प्रामाण्यमिति नवीनाः । दीक्षितेन च सिद्धान्तकौमुद्यां–'परत्वाद् वृद्धौ सत्यां हि लोपः' इति सूत्रकारमतमुपन्यस्य पश्चाद् भाष्यमतमिदमुपन्यस्तमित्युभयत्र प्रामाण्यमङ्गीकृतमिति 'अपीपटत्, अपपटत्' इत्येव रूपद्वयमपि साधु । स्वमते च पूर्वोक्तेन "उपान्त्यस्यासमानलोपिशास्वृदितो ङे" [ ४. २. ३५. ] इति सूत्रोक्तबृहद्वृत्तिग्रन्थेन वृद्धेरेव बलीयस्त्वस्य ज्ञापनात् पटुमाख्यदपीपटदित्येव भविष्यति, तत्र वृद्धौ कृतायामन्त्यस्वरादिलोपेऽसमानलोपित्वाक्षतेः । तथा च 'अनित्यान्नित्यं बलवत्' इत्यर्थे न ज्ञापकमपि तु स्वतःसिद्धत्वमेवेति । किञ्चास्य न्यायस्य स्वतःसिद्धत्वेनानित्यत्वमपि नोचितम् । न च *नित्यादन्तरङ्गम्* इति वक्ष्यमाणन्यायेन बाध्यमानत्वादस्यानित्यत्वमिति वाच्यम्, बाधकप्रयुक्ताप्रवृत्त्याऽनित्यत्वस्यानङ्गीकारात्, बाधकाबाधितकृताकृतप्रसङ्गित्वरूपस्य नित्यत्वस्य विधिशास्त्रमात्रविषयत्वात्, लक्ष्यानुरोधाज्ज्ञापकान्तरेण वा क्वचिदप्रवर्त्तमानमेवानित्यमिति शाब्दिकसम्प्रदायेऽङ्गीकारात् । बाधकेन हि वक्ष्यमाणन्यायेनान्तरङ्गशास्त्रभिन्नत्वरूपेणानित्यपदार्थे सङ्कोच एव बाधो न तु न्यायस्य साक्षाद्बाध इति तत्त्वविदां विमर्शः । अन्त्यस्वरादिलोपस्य नित्यत्वमपि पूर्वोक्तमहाभाष्यग्रन्थे प्रत्युक्तमेव वेदितव्यम् । यत् तु न्यायार्थमञ्जूषान्यासेऽन्त्यस्वरादिलोपस्य नित्यत्वं सिद्धवत्कृत्य 'नित्यत्वादेतन्न्यायेन बलवत्त्वात्' इति न्यायमञ्जूषाप्रतीकमादाय "नन्वन्त्यस्वरादिलोपस्य न केवलं नित्यत्वादेव बलवत्ताऽस्ति, किन्तु परत्वादपि, ततोऽन्त्यस्वरादिलोपस्य परत्वहेतुकबलवत्त्वशङ्कयाऽपि प्रथमं वृद्धिभवनज्ञापनाय कलि-हलिवर्जनं कृतं स्यादिति कथं नित्यत्वस्यैव केवलस्य ज्ञापकमिदमुद्भावितं भवद्भिः?, उच्यते–प्रधानधर्मे सम्भवत्यप्रधानधर्मस्य व्यपदेशो न युज्यते, परत्वनित्यत्वयोश्च नित्यत्वमेव प्रधानो धर्मः *परान्नित्यम्* इति न्यायात्, ततः प्रधानधर्मस्य नित्यत्वस्यैव व्यपदेशः कृतः" इति । अस्यायमाशयः–अन्त्यस्वरादिलोपस्य परत्वमपि नित्यत्वमपि, तत्र स्वतः सिद्धस्य परत्वस्याप्यन्त्यस्वरादिलोपप्रयोजकत्वमिति तद्वारणायापि कलि-हलिवर्जनं कुतो नोक्तमिति नाशङ्कनीयम्, नित्यत्वस्य परत्वापेक्षया प्राधान्येन तेनैव वृद्धितो लोपस्य बलवत्त्वोद्भावनं युक्तमिति विचार्य नित्यत्वस्यैवादरादिति । अत्रेदमुच्यते–यदि परत्वमिव नित्यत्वमपि पूर्वसिद्धं बलवत्त्वप्रयोजकं प्रसिद्धं स्यात् तदा परत्वापेक्षया तस्य समादरो युक्तियुक्तः स्यात्, न त्वेवमस्ति, भवद्भिर्नित्यत्वस्य बलवत्त्वे ज्ञापकमिदमेव दीयते, ज्ञापकं च तदा भवति यदा तस्य सार्थक्यायान्य उपायो न स्यात्, अस्ति चेह परत्वरूपो लोपस्य बलवत्त्वप्रयोजक उपाय इति तमाश्रित्य कलि-हलि-वर्जनस्य लोपापेक्षया वृद्धेर्बलवत्त्वज्ञापनेन चारित्यार्थसम्भवे नित्यत्वस्यापि बलवत्त्वज्ञापकत्वायोगात्, किञ्च लोपस्य शब्दान्तरप्राप्त्याऽनित्यत्वस्य पूर्वमुपपादितत्वेनापीह नित्यत्वं तस्य बलवत्त्वप्रयोजक न भवितुमर्हति । न च शब्दान्तरप्राप्तस्यानित्यत्वं परमतसिद्धमस्मन्मते नादरणीयमिति वाच्यम्, पूर्वोक्तबृहद्वृत्तिग्रन्थे परत्वस्यैवान्त्यवारादिलोपे समादृतत्वेन परमतसिद्धस्यापि शब्दान्तरप्राप्त्याऽनित्यत्वस्य स्वीकृतप्रायत्वादिति तदनादरणं तदनुयायिनामयुक्तमेवेति ॥ ४१ ॥

## *अन्तरङ्गं बहिरङ्गात्* ॥ ४२ ॥

सि०—बलवत्त्वप्रयोजकपदार्थान्तरसंग्रहायायं न्यायः, अत्रापि पूर्वन्यायस्थं बलवदिति पदं योज्यम् । अन्तरङ्गम्—अन्तरङ्गत्वेनाभिमतं शास्त्रं, बहिरङ्गात्–स्वापेक्षया बहिर्भूतनिमित्तकात् शास्त्रात्, बलवत्–पूर्वप्रवृत्तिकमित्यर्थः । अन्तरङ्ग-बहिरङ्गपदार्थौ च पूर्वं विवेचितावेव । तथा च 'ते+इन्द्रम्,

वृक्षे+इन्द्रम्' इत्यत्र पूर्वत्र जस इत्वे परत्र ङौ विभक्तौ च कृतायाम् 'त+इ+इन्द्रम्, वृक्ष+इ+इन्द्रम्' इति स्थितौ प्राप्तात् "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घात् प्रथमम् "अवर्णस्येवर्णादिनैदोदरल्" [ १. २. ६. ] इत्योत्वमेव भवति, एकपदाश्रितवर्णद्वयनिमित्तत्वेनान्तरङ्गत्वात्, समानदीर्घस्य च पदद्वयाश्रितवर्णद्वयनिमित्तकत्वेन बहिरङ्गत्वात्। ज्ञापकं त्वत्र "वृत्यन्तोऽसषे" [ १. १. २५. ] इति सूत्रे वत्वापेक्षया बलवत्त्वेनौत्वस्य प्रवर्त्तनमेव, अत्र हि वृत्यन्तशब्दादुपस्थितस्य सेरुत्वे तस्योत्वे च कृते 'वृत्यन्त+उ+असषे' इति स्थिते उकारस्य पूर्वेण सह ओत्वं परेणाकारेण योगे च वत्वं प्राप्नोतीति परत्वात् "इवर्णादेरस्वे स्वरे यवरलम्" [ १. २. २१. ] इत्यनेन वत्वमेव प्राप्तमिति तद्विधायौत्वनिर्देशः कृत इति प्रकृतन्यायाश्रयणं कृतमिति विभाव्यते। अस्ति च तत्राप्येकपदनिष्ठवर्णद्वयाश्रितत्वेनौत्वस्यान्तरङ्गत्वम्, पदद्वयनिष्ठवर्णद्वयाश्रितत्वेन च वत्वस्य बहिरङ्गत्वम्। तथा चैतन्न्यायं विनानुपद्यमानः स निर्देश एतन्न्यायज्ञापक इति सुस्थमेव। अयं च *वार्णात् प्राकृतम्* इत्यादिभिरग्रे वक्ष्यमाणैर्न्यायैर्बाध्यत इति व्यक्तीभविष्यत्यग्रे। न च तावताऽस्यानित्यत्वं सामान्यशास्त्रस्य विशेषशास्त्रैर्बाधस्य न्यायसिद्धत्वेन तावताऽनित्यत्वव्यवहारस्यायुक्तत्वात्, अन्यथाऽनित्यत्वेनैव तादृशस्थलेऽप्रवृत्तौ विशिष्य ज्ञापकादिभिस्तत्तदर्थस्य ज्ञापने फलाभावात् तेषां न्यायानां वैयर्थ्यप्रसङ्ग इति विभावनीयमन्यत्रापि ॥ ४२ ॥

## *अन्तरङ्गं बहिरङ्गात्* ॥ ४२ ॥

**त०**—पूर्वम् *असिद्धं बहिरङ्गमन्तरङ्गे* इति न्यायो बहिरङ्गस्यान्तरङ्गापेक्षयाऽसिद्धत्वबोधकः प्रोक्तः, तेन च बहिरङ्गत्वस्य दुर्बलत्वप्रयोजकत्वमुक्तमेव, अत्रान्तरङ्गत्वस्य बलवत्त्वप्रयोजकत्वमुच्यते। न च देवदत्तापेक्षया यज्ञदत्तो दुर्बल इत्युक्ते देवदत्तस्य प्राबल्यमप्युक्तमेव यथा तथाऽन्तरङ्गापेक्षया बहिरङ्गस्य दुर्बलत्वे ज्ञातेऽन्तरङ्गस्य बलवत्त्वमपि ज्ञातमेवेति किं पुनरुक्तेनान्तरङ्गस्य बलवत्त्वेनेति वाच्यम्, पूर्वन्यायेन यत्र बहिरङ्गं जातमन्तरङ्गं च कर्त्तव्यं तत्र बहिरङ्गस्यासत्त्वमिव ज्ञेयमिति रीत्याऽन्तरङ्गस्य प्रवृत्तिः साधिता, अनेन च यत्रान्तरङ्ग-बहिरङ्गयोः समकालमेव प्राप्तिस्तत्राप्यन्तरङ्गमेव प्रवर्त्तते बलवत्त्वादित्युच्यते इति विशेषात्। वस्तुतस्तु पूर्वोक्तन्यायस्य [ *असिद्धं बहिरङ्गमन्तरङ्गे* इत्यस्य ] व्याख्यायामन्तरङ्गे कर्तव्ये जातं समकालप्राप्तिकं च बहिरङ्गमसिद्धमित्यस्यार्थस्य प्रदर्शितत्वेनास्याऽपि न्यायस्यार्थः पूर्वन्यायेनैव क्रोडीकृत इति नास्य न्यायस्य पृथक्कथनमावश्यकम्। अत एव "विप्रतिषेधे परं कार्यम्" [ पा० सू० १. ४. २. ] इति सूत्रे महाभाष्येऽन्तरङ्गस्य बलवत्त्वं प्रस्तुत्य बहूनि तस्य प्रयोजनानि प्रदर्श्य "यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा कर्त्तव्या" इत्युपसंहृत्य "यदि सन्ति प्रयोजनानीत्येषा क्रियते। ननु चेयं च कर्त्तव्या *असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे* इति। किं प्रयोजनम्?, पचावेदम्, पचामेदम्, असिद्धत्वाद् बहिरङ्गलक्षणगुणस्यान्तरङ्गलक्षणमैत्त्वं मा भूदिति। उभे तर्हि कर्त्तव्ये, नेत्याह-अनयैव सिद्धम्। इहापि 'स्योनः, स्योना' इति, असिद्धत्वाद् बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणो यणादेशो भविष्यति। यद्यसिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे इत्युच्यते-'अक्षद्यूः, हिरण्यद्यूः' असिद्धत्वाद् बहिरङ्गलक्षणस्योठोऽन्तरङ्गलक्षणो यणादेशो न प्राप्नोति। नैष दोषः-'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्युक्त्वा 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इति। सा तर्ह्येषा परिभाषा कर्त्तव्या?, न कर्त्तव्या, आचार्यप्रवृत्तिर्ज्ञापयति-भवत्येषा परिभाषेति, यदयं "षत्वतुकोरसिद्धः" [ पा० सू० ६. १. ८६. ] इत्याह। इयं तर्हि परिभाषा कर्तव्या "असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति। एषा च न कर्तव्या आचार्यप्रवृत्तिर्ज्ञापयति-भवत्येषा परिभाषेति, यदयं "वाह ऊठ्" [ पा० सू० ६. ४. १३२. ] इत्यूठं शास्ति" इत्येवं पूर्वस्य न्यायस्योभयार्थसाधकत्वं स्थापितम्। *अन्तरङ्गं बहिरङ्गाद् बलीयः* इतीदृशन्यायस्योपदर्शितबहुप्रयोजनसत्त्वेन तत्करणमावश्यकमिति यद्यपि प्रतिभाति, तथापि यत्रान्तरङ्गबहिरङ्गयोर्युगपत्प्राप्तिस्तत्र प्रकृतन्यायेन कार्यनिर्वाहेऽपि यत्र बहिरङ्गं प्रवृत्तमन्तरङ्गं च प्रवर्तयितुमिष्टं तत्रानेन न्यायेन लक्ष्यसिद्ध्यसम्भवात् तदर्थम् *असिद्धं बहिरङ्ग[ लक्षण ]मन्तरङ्ग[ लक्षणे ]* इति न्यायोऽपि स्वीकर्तव्य एवेति सिद्धान्तिनोक्ते उभयोरपि कर्तव्यत्वमापतितमिति परेणाक्षिप्तेऽनेनैव [ *असिद्धं बहिरङ्गमन्तरङ्गे* इत्यनेनैव ] सकललक्ष्यसिद्धिरिति सिद्धान्तितम्। तत्र कैयटः—"इयं हि व्यापिका पूर्वोक्तप्रयोजननिष्पादनात्। शास्त्रासिद्धत्वाश्रयणाद् बहिरङ्गलक्षणं न तावत् प्रवर्तते, अन्तरङ्गलक्षणे तु प्रवृत्ते यत्र निमित्तसद्भावस्तत्र बहिरङ्गलक्षणप्रवृत्तिः" इति। तथा च पूर्वोक्तन्यायस्य [ *असिद्धं बहिरङ्गमन्तरङ्गे* इत्यस्य ] अन्तरङ्गे कर्तव्ये बहिरङ्गमसिद्धं, तद् बहिरङ्गं कृतं चिकीर्षितं चेत्यन्यदेतत्। इत्येवमर्थवर्णनेन सकलेष्टसिद्धौ न पृथगन्तरङ्गबलवत्त्वबोधकस्य न्यायस्यावश्यकतेति पूर्वोक्तभाष्यसन्दर्भाशयः। एतेन तस्य न्यायस्य [ *असिद्धं, बहिरङ्गमन्तरङ्गे* इत्यस्य ] आवश्यकत्वे स्थिरीकृते तत्रापतितान् दोषान् *न स्वरानन्तर्ये* इति न्यायज्ञापनेन निरस्यान्ते *असिद्धं बहिरङ्गम्०* इत्यस्यापि ज्ञापकसिद्धत्वमेवेति न तदर्थमपूर्ववचनकरणावश्यकतेति शेषभाष्येण प्रतिपादितम्। स्वमते चोभयविधलक्ष्याणां स्पष्टतया संग्रहाय न्यायद्वयमपि स्वीकृतमिति विज्ञेयम् ॥ ४२ ॥

## *निरवकाशं सावकाशात्* ॥ ४३ ॥

सि०—*येन नाप्राप्ति०*न्यायेन यद्यपि निरवकाशत्वमेव बाधकत्वबीजमुक्तम्, यत्कर्तृकावश्यप्राप्तौ विधीयमानस्य हि तेन व्याप्तावकाशतया निरवकाशत्वात्, तथापि तेन सर्वथा निरवकाशत्वे एव बाधकत्वमित्यायाति, अनेन च कचिच्चारितार्थ्यसम्भवेऽपि बाध्यमानशास्त्रापेक्षयाऽल्पावकाशत्वे बाधकत्वमिति कथ्यते । तथा चात्र 'निर्'शब्दोऽल्पार्थपरः, सावकाशपदे च सहशब्दोऽधिकार्थपरः, तथा चाल्पविषयं शास्त्रं बहुविषयशास्त्राद् बलवदित्यर्थः । तथा चाल्पावकाशं शास्त्रं बह्ववकाशशास्त्रं प्रबाध्य पूर्वं प्रवर्त्तेत इति पर्यवस्यति । यथा "एद् बहु-स्-भोसि" [ १. ४. ४. ] इत्यस्य बह्वर्थे सकारादौ स्यादौ प्रवर्त्तमानत्वेन "भिस ऐस्" [ १. ४. २. ] इत्यस्य च विशिष्य भिस्येव प्रवर्त्तमानत्वेन पूर्वस्य [ एत्वविधायकस्य ] परोल्लिखित[ भिस ऐस्विधायक ]शास्त्रापेक्षया दुर्बलत्वम्, तस्य [ एत्वविधायकस्य ] बहुविषयत्वात् । तथा च 'वृक्षैः' इत्यादौ ऐसेव प्रवर्त्तते, न त्वेत्वं भवति, एत्वस्य हि 'वृक्षेभ्यः, एभिः, एभ्यः' इत्यादौ सावकाशत्वम्, ऐसश्च सर्वत्रैत्वेन व्याप्तावकाशत्वमेव, तेन चैत्वस्य परत्वेऽपि निरवकाशैस्विधायकशास्त्रदृष्ट्या दुर्बलत्वमेव । यदि हि वृक्षैरित्यादावप्येत्वमेव प्रवर्तेत तर्हि ऐस्विधायकस्य वैयर्थ्यमेव स्यात्, कृतं च तच्छास्त्रं स्वसार्थक्यायैतन्न्यायमाक्षिपति, तथा चैतत्सूत्रमेवैतन्न्यायं ज्ञापयति । अयं च न क्वापि बाध्यः, निरवकाशस्यापवादत्वेन सर्वतः प्राबल्यात् ॥ ४३ ॥

## *निरवकाशं सावकाशात्* ॥ ४२ ॥

त०—*येन नाप्राप्ति*न्यायस्यैवायं प्रपञ्च इत्युपपादितं वृत्तौ । तथा च तदप्राप्तियोग्येऽचारितार्थ्ये सति कृतेऽचारितार्थ्यमित्येवंरूपद्वितीयबाधबीजस्थलेऽपि यद्यपि पूर्वन्यायस्य प्राप्तिरस्ति तथापि तद्बाधबीजस्य तेन शब्दतो न सङ्ग्रह इति विशिष्य न्यायान्तरेण तदिह कथ्यते । लोके हि द्विधा व्यवहारा दृश्यन्ते, केचिदसम्भवे एव बाधकाः, केचित् सत्यपि सम्भवे बाधकाः, यथा 'सर्वे ब्राह्मणा भोज्यन्तां, माठर-कौण्डिन्यौ परिवेविषाताम्' इत्युक्ते ब्राह्मणत्वेन माठर-कौण्डिन्ययोः प्राप्तं भोजनं परिवेषणेन विशिष्य विहितेन बाध्यते, तत्र भोजन-परिवेषणयोर्युगपदसम्भवे एव बाधकत्वमिति; अन्यत्र च 'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय' इति व्यवह्रियते, तत्र यद्यपि तक्रदानस्य दधिदानोत्तरं ततः पूर्वं वा सम्भवोऽस्ति तथापि विशिष्य विहितत्वेन येन नाप्राप्तौ विहितत्वेन वा तक्रदानं दधिदानस्य बाधकं भवति । तथा च *येन नाप्राप्ति*न्यायः सर्वथा निरवकाशत्वे एव बाधक इति नास्ति । अयं च न्यायोऽसम्भवे एव बाधकत्वप्रदर्शक इति पूर्वन्यायादस्य विशेषः । यद्यपि पूर्वन्यायेनाप्येतल्लक्ष्याणि सिद्ध्यन्ति, तथापि बाधकत्वस्य वैचित्र्यप्रदर्शनार्थोऽयं न्याय इत्यवगन्तव्यम् ॥ ४३ ॥



## *वार्णात् प्राकृतम्* ॥ ४४ ॥

सि०—वर्णाः—अकारादयः, तत्सम्बन्धिकार्यं वार्णम्, प्रकृतिः—प्रत्ययविधावुद्देश्यत्वेनाश्रीयमाणो वर्णसमुदायरूपः शब्दः, तत्सम्बन्धिकार्यं प्राकृतम्, तथा च वर्णत्वव्याप्यधर्मावच्छिन्नोद्देश्यककार्यापेक्षया प्रकृतित्वावच्छिन्नोद्देश्यककार्यं बलवदिति न्यायार्थः । अत्र प्रकृतिपदेन धातुरेव गृह्यते न तु नाम, तत्कार्याणां वार्णेष्वेवान्तर्भावादिति केचित्, तन्न—तादृशसङ्कोचे मानाभावात्, "स्वरितो वाऽनुदात्ते पदादौ" [ पा० सू० ८. २. ६. ] इत्यादिसूत्रे भाष्यादौ 'कुमार्यै' इत्यादिनामप्रयोगविषयेऽप्येतत्प्रवृत्तिचर्चायाः कृतत्वाच्च । स्वमते चास्य ज्ञापकम् 'ऊवतुः' इत्यादिप्रयोगसिद्ध्यर्थं यत्नान्तराकरणमेवेति पूर्वे व्याख्यातारः, तदपि न समीचीनम्—तादृशरूपसिद्ध्यर्थं यत्नाकरणेन तथाविधरूपस्यैवानिष्टत्वानुमानस्य युक्तत्वात्, सति हि तादृशरूपस्येष्टत्वेऽवश्यमाचार्यैस्तदर्थं यत्नः कृतो भवेत्, न च कृतः, ततस्तस्यानिष्टत्वमेवेत्यपि कश्चिदुद्भावयेत् । अतश्च तदर्थं यत्नाकरणमस्य न्यायस्य ज्ञापकमिति न किञ्चिदेतत् । पाणिनीये महाभाष्ये च षष्ठाध्यायप्रथमाह्निकान्ते "दाश्वान् साह्वान् मीढ्वांश्च" [ पा० सू० ६. १. १२. ] इति सूत्रव्याख्यावसरेऽस्य न्यायस्य ज्ञापकसिद्धत्वं स्पष्टमेवोक्तम् । ज्ञापकं च तत्र "अभ्यासस्यासवर्णे" [ ६. ४. ७८. ] इति पाणिनीये सूत्रेऽसवर्णग्रहणम् । स्वमतेऽपि "पूर्वस्यास्वे स्वरे य्वोरियुव्" [ ४. १. ३७. ] इति सूत्रस्थम् 'अस्वे स्वरे' इति वचनं ज्ञापकं भवितुमर्हति, तथाहि—'इयेष' इत्यादौ 'इ+इष्+अ' इति स्थितौ "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इति गुणः "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घश्च समकालमेव प्राप्नुतः, तत्र दीर्घस्यान्तरङ्गत्वेन पूर्वं प्रवृत्त्याऽस्वस्वरपरत्वाभावेनास्य प्राप्तिरेव नेति तस्य वैयर्थ्यं स्पष्टमेवेति व्यर्थीभूतं तदिमं न्यायं ज्ञापयति । ज्ञापिते चास्मिन्न्याये गुणस्य प्रकृत्युद्देश्यकविधित्वेन बलवत्त्वात् तस्य पूर्वं प्रवृत्तावस्वस्वरपरत्वं भवतीति तस्य सार्थक्यं भवति । 'अस्वस्वर'ग्रहणं हि 'ईषतुः' इत्यादौ गुणादेरप्राप्त्या तत्रेयुवोरप्रवृत्त्यर्थमेव कृतं स्यात्, तत्रापि च पूर्वं समानदीर्घप्रवृत्त्याऽस्वस्वरपरत्वमसंभवमेवेति न्यायज्ञापनं विना न तस्य सार्थक्यम्, इति प्राचीनमतम् ।

नवीनास्तु—'एतन्न्यायाभावे "पूर्वस्यास्वे स्वरे०" [ ४. १. ३७. ] इति संपूर्णसूत्रमेव व्यर्थम्, न च 'इयाय, इयेष' इत्यादौ चरितार्थम्, तयोरपि पूर्वप्रवृत्तगुणस्य पूर्वप्रवृत्तवद्देश्च

रूपातिदेशेनापहारे—द्वित्वे कृते पुनः प्राप्ते गुण-वृद्धी बाधित्वाऽन्तरङ्गत्वात् समानदीर्घापत्तेः । न च ए-ऐ-ओ-औशब्देभ्य आचारक्विबन्तेभ्यः परोक्षायामियाद्यर्थं सूत्रमावश्यकमिति वाच्यम्, उक्तभाष्यादिप्रामाण्येन तेषामनभिधानात् । एवं च सम्पूर्णसूत्रस्यैव ज्ञापकतोचिता न केवलम् 'अस्वस्वर'ग्रहणस्य । यद्यपि षाष्ठप्रथमाह्निकान्तस्थे महाभाष्ये—"यदयम् "अभ्यासस्यासवर्णे" [ ६. ४. ७८. ] इत्यसवर्णग्रहणं करोति" इति ग्रन्थेनासवर्णपदसमानार्थकस्य 'अस्वस्वरे' इत्यस्यैव ज्ञापकता लभ्यते, तथापि "नह्यन्तरेण गुण-वृद्धी असवर्णपरोऽभ्यासो [ द्वित्वे पूर्वः ] भवति" इति तदुपपादनग्रन्थेन सम्पूर्णसूत्रस्यैव ज्ञापकता समायाति । न च *निमित्ताऽपाये नैमित्तिकस्याप्यपायः* इति न्यायसमानफलकेन *अकृतव्यूहाः शाब्दिकाः* इति न्यायेनेयेषेत्यादौ समानदीर्घाप्राप्तिः, यदि दीर्घो न स्यात् तर्हि गुणः स्यादिति संभावनायाः सत्त्वेन निमित्तविनाशशङ्कया सवर्णदीर्घाप्राप्त्या चास्य सूत्रस्य सार्थक्यसत्त्वेन कथं सम्पूर्णसूत्रस्य ज्ञापकतेति वाच्यम्, *निमित्ताऽपाये०* इति न्यायस्यासत्त्वात्, सत्त्वे वा पूर्वोक्तज्ञापकतापरभाष्यादिप्रामाण्येन यत्रान्तरङ्गकार्यप्रवृत्तियोग्यकालोत्तरमेव तन्निमित्तविनाशकबहिरङ्गविधेः प्राप्तिस्तत्रैव तन्न्यायप्रवृत्तिस्वीकाराच्च" इत्याहुः । अयं च न्यायो वार्ण-प्राकृतशास्त्रयोः समानस्थानिताकत्व एव प्रवर्तते, समानस्थानिताकत्वं च वार्णशास्त्रीयस्थानितावच्छेदकधर्मप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिभूतस्थानिकत्वम् । अयमाशयः—वार्णशास्त्रीयस्थानितावच्छेदकधर्मप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकीभूतो धर्मः प्राकृतशास्त्रीयस्थानितावच्छेदकधर्मप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकधर्मश्च एको यत्र तत्र समानस्थानिताकत्वमिति । यथा—'इयाय' इत्यत्र वार्णशास्त्रं "समानानां तेन दीर्घः" [ १. २. १. ] इति तदीया स्थानिता पूर्वपरोभयेति त्रितयनिष्ठा, स्थानितावच्छेदकीभूतो धर्मो यथा पूर्वत्वं परत्वं द्वित्वं च, तथा परत्वमपि तादृशपरत्वप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदको धर्मः इकारवृत्तिस्तद्व्यक्तित्वरूपः, तद्धर्मावच्छिन्नानुयोगिताकपर्याप्तिर्नामित्वप्रतियोगिताका, तादृशपर्याप्तिप्रतियोगिभूतो धर्मो नामित्वम्, तद्धर्मावच्छिन्नस्थानिताकत्वं "नामिनोऽकलिहलेः" [ ४. ३. ५१. ] इति सूत्रस्येति लक्षणसमन्वयः । यत् तु—समाननिमित्तकत्वरूपसमानाश्रयत्व एवायं न्यायः प्रवर्तेत इति केचिदाहुः, तन्न—ज्ञापितेऽपि इयायेयेषेत्याद्यसिद्धेः सूत्रवैयर्थ्यस्य तदवस्थत्वाच्च, इयायेत्यादौ हि परेकारनिमित्तकत्वं दीर्घस्य, प्रत्ययनिमित्तकत्वं वृद्धेरिति तयोः समाननिमित्तत्वाभावः सुतरामेवेति किमधिकेन परिष्करणेनेति ॥ ४४ ॥

## *वार्णात् प्राकृतम्* ॥ ४४ ॥

त०—पूर्वैर्न्यायैर्बाह्यधर्मनित्यत्वादिनिमित्तकं बलवत्त्वमुक्तम्, अनेन न्यायेनाभ्यन्तरनिमित्तकं बलवत्त्वं व्याख्यायते । तत्र वार्णादित्यस्य वर्णत्वावच्छिन्नोद्देश्यताकादित्यर्थः, प्राकृतमित्यस्य प्रकृतित्वव्याप्यधर्मावच्छिन्नोद्देश्यताकमित्यर्थः । अयं च न्यायः प्राकृत-वार्णयोः समानकार्यित्व एव प्रवर्तते, समानकार्यित्वं च वार्णशास्त्रीयस्थानिता समानाधिकरणस्थानिताकत्वं प्राकृतशास्त्रे । यथा—वेंग्धातोः परोक्षाया अतुसि 'ऊवतुः' इति भवति, तत्र 'उ+उ+अतुस्' इति स्थिते दीर्घशास्त्रीयस्थानितोभयेकारनिष्ठा, सा च परोकारनिष्ठाऽपि, उभयोः पृथगेव स्थानित्वात्, तत्समानाधिकरणा स्थानितोवादेशनिरूपिता, तन्निरूपकत्वमुवादेशशास्त्रे इति लक्षणसमन्वयः । पर्याप्त्यनिवेशाद् दीर्घीयस्थानितोभयोकारसमुदायनिष्ठा, उवादेशशास्त्रीयस्थानिता च परोकारनिष्ठेति समानस्थानिकत्वस्य न क्षतिः । ननु त्वं स्त्रीत्यत्र 'त्व+अद्+अम्' इति स्थितेऽन्तरङ्गत्वादकारलोपे कृते "शेषे लुक्" [ २. १. ८. ] इत्यस्य शेषस्य [ मन्तादवशिष्टस्य ] लुगित्यर्थे शेषस्य लोपेऽदन्तत्वाभावादाप् न भवतीति सिद्धान्तकौमुदीग्रन्थो विरुध्येत, शेषलोपीयाकारलोपीयस्थानितयोरपर्याप्त्याऽकारनिष्ठत्वेन समानस्थानिताकत्वेनानेन न्यायेन पूर्वमकारलोपे आपो दुर्वारत्वादिति चेत् ? न—वार्णशास्त्रीयस्थानितासमानाधिकरणपर्याप्तस्थानिताकत्वस्यैव समानस्थानिताकत्वपदार्थतयाऽदोषात्, ऊवतुरित्यादौ वार्णदीर्घशास्त्रीयस्थानितापर्याप्तिः परोकारेऽपि, तत्रैवोवादेशस्थानितायाः पर्याप्तेः सत्त्वात्, त्वमित्यादावलोपीयस्थानितापर्याप्तिः परोकारे, तत्र शेषलोपस्थानितापर्याप्तेरभावात् । यत् तु समाननिमित्तकत्वरूपसमानाश्रयत्वे एवैषेति, तन्न—न्यायस्वीकारेऽप्यूवतुरित्याद्यसिद्धेः, तत्र दीर्घस्य परोकारनिमित्तकत्वात्, उवादेशस्य चाकारनिमित्तकत्वात्, तयोः समाननिमित्तकत्वाभावात् । व्याख्यानादिह प्रकृतिपदेन धातुरूपप्रकृतिरेव गृह्यत इत्युक्तं वृत्तौ । पाणिनीयतन्त्रे च सामान्यतो नाम-धातूभयोरेव प्रकृतित्वेन ग्रहणम् "स्वरितो वाऽनुदात्ते पदादौ" [ पा० सू० ८. २. ६. ] इति सूत्रे महाभाष्ये 'कुमार्यै' इत्यादावस्य न्यायस्य प्रवर्तितत्वात्, तेन च नाम्नोऽपि प्रकृतिपदेन ग्रहणमिति स्पष्टमेव । धातोस्तु प्रकृतित्वेन ग्रहणमिति चैतन्न्यायज्ञापकेनैव लब्धमित्युभयग्रहणमुचितम् । अन्यच्चास्य ज्ञापकादिविषये वृत्तावेव विवेचितमिति नेह विविच्यत इति ॥ ४४ ॥

## *य्वृद् य्वृदाश्रयं च* ॥ ४५ ॥

सि०—सस्वरान्तस्थायाः स्थाने विधीयमाना इकारोकारऋकारा य्वृदितिशब्देन व्यवह्रियन्ते । तत्र स्वतो वर्णस्य स्थाने विधीयमानत्वाद् वार्णमेव, तदाश्रितं च दीर्घादिकार्य-

**मपि वर्णाश्रितत्वाद् वार्णमेव । तस्य च पूर्वन्यायरीत्या प्राकृतकार्यापेक्षया दौर्बल्यमुचितमित्यनेन न्यायेन तस्य प्राबल्यं बोध्यते । य्वृतस्तदाश्रयस्य च कार्यस्य पूर्वन्यायेन येन केनाऽपि यथाकथञ्चिद् यद् दौर्बल्यं प्राप्तं तदनेन निवार्यते सामान्यतो य्वृतस्तदाश्रयस्य च कार्यस्य बलवत्त्वं बोधयता । प्रकृताऽपेक्षया त्वेवं व्याख्यातव्यम्-य्वृत् तदाश्रयं च कार्यं वार्णमपि प्राकृताद् बलवत् । यथा-उपपूर्वकात् 'श्वि'धातोः क्त्वाप्रत्यये तस्य यबादेशे "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इति तागमो "यजादि-वचेः०" [ ४. १. ७९. ] इति य्वृचेत्युभयोः प्राप्तौ तागमः परः ह्रस्वान्तप्रकृत्याश्रितत्वात् प्राकृतश्चेति पूर्वन्यायानुसारं बलवानपि य्वृता बाध्यत इति सस्वरान्तस्थायाः स्थाने य्वृति उकारे कृते पुनः प्राप्तोऽपि तागमो य्वृदाश्रयेण "दीर्घमवोऽन्त्यम्" [ ४. १. १०३. ] इति दीर्घेण बाध्यते, ततश्च ह्रस्वाभावात् तागमस्य प्राप्तिरेव नेत्युपशूयेति रूपं सिद्ध्यति । अयं च न्याय ईदृशलक्ष्यानुरोधादेवावलम्ब्यते, नान्यत् किञ्चनात्र ज्ञापकमिति प्राञ्चः । नवीनास्तु नास्य न्यायस्यावश्यकतेति भाष्यादिग्रन्थैः प्रमाणयन्तीति प्रपञ्चितं विवरणे । लक्ष्यानुसारेणास्य स्वीकृतत्वपक्षे चास्य स्थिरत्वमेव न चञ्चलत्वमिति ॥ ४५ ॥**

---

***य्वृद् य्वृदाश्रयं च* ॥ ४५ ॥**

**त०**—य्वृतः, तदाश्रयस्य-तमाश्रित्य विधीयमानस्य च दीर्घादेः कार्यस्य, प्राबल्यबोधकोऽयं न्याय इति तावत् स्पष्टमेव । तत्रेदं विचार्यते-प्राबल्यप्रयोजकं रूपमिह किं विवक्षितम्? य्वृत्त्वमिति चेत्? किं तत् जातिरुपाधिर्वा?, न तावज्जातिः-क्वचिदेकत्रानेकत्र वैवंरूपेणाश्रितत्वाभावात्, एकैकशः क्वचिदित्वं क्वचिदुत्वं क्वचिदृत्वं च तिष्ठति नैकत्रेति नैतज्जातिः, न चोपाधिः, तस्यापि क्वचिदेकत्राश्रितत्वनियमात् । तथा च बलवत्ताप्रयोजकरूपानिर्णयान्न य्वृतो बलवत्त्वं व्यवस्थापयितुं शक्यते इति चेत्? सत्यम्-स्वमते सस्वरान्तस्थायाः स्थाने विधीयमानानामिकारादीनां प्रत्येकं य्वृदिति संज्ञेत्यवधारणात्, तथा च य्वृत्त्वं प्रत्येकवृत्ति रूपमिति तेन रूपेण बलवत्त्वं नियन्तुं शक्यत एव । परमते चान्तस्थायाः स्थाने प्रयुज्यमानानामेषां सम्प्रसारणमिति संज्ञा, यथा-"इग् यणः सम्प्रसारणम्" [ १. १. ४५. ] इति पाणिनीयसूत्रेण विधीयते तद्वदिति भावः । पाणिनीयनये चैतन्यायस्थाने *सम्प्रसारणं तदाश्रयं च कार्यं बलवत्* इति न्यायः पठ्यते, स च भाष्यकारेणान्यथा तदीयलक्ष्यसिद्ध्या खण्डितः "लिट्यभ्यासस्योभयेषाम्" [ ६.१.१७. ] इति सूत्रव्याख्यावसरे । तथाहि-तत्रैकदेशिवार्तिकम्-"अभ्याससम्प्रसारणं हलादिशेषाद् विप्रतिषेधेन" भाष्यम्-"अभ्यासस्य [ द्वित्वे पूर्वस्य ] सम्प्रसारणं भवति, हलादिशेषाद् [ व्यञ्जनस्यानादेर्लुचः ] विप्रतिषेधेन । अभ्याससंप्रसारणस्यावकाशः-इयाज, उवाप, हलादिशेषस्यावकाशः-बिभिदतुः, बिभिदुः, इहोभयं प्राप्नोति-विव्याध, विव्यधिथ । अभ्याससम्प्रसारणं भवति पूर्वविप्रतिषेधेन" इति । ततो विप्रतिषेधखण्डकवार्त्तिकम्-"न वा सम्प्रसारणसम्प्रसारणाश्रयबलीयस्त्वादन्यत्रापि" इति । भाष्यम्-"न वा वक्तव्यः । किं कारणम्? सम्प्रसारणसम्प्रसारणाश्रयस्य बलीयस्त्वादन्यत्रापि । संप्रसारणं सम्प्रसारणाश्रयं च बलीयो भवतीति वक्तव्यमन्यत्रापि, नावश्यमिहैव वक्तव्यम्" इति । ततोऽन्यानि तत्प्रयोजनानि प्रदर्शितान्यन्यथा साधितानि च । अत्रैव पुनरेवं शङ्कितं-"तदेतदनन्यार्थं सम्प्रसारणं तदाश्रयं च बलीयो भवतीति वक्तव्यम्, पूर्वविप्रतिषेधो वा वक्तव्यः, उभयं न वक्तव्यम्, उक्तमेतोभयेषां ग्रहणस्य प्रयोजनम्, उभयेषामभ्यासस्य सम्प्रसारणमेव यथा स्यात्, यदन्यत् प्राप्नोति तन्मा भूदिति ।" इति । अयमाशयः-य्वृतस्तदाश्रयस्य च कार्यस्य क्वचित् परत्वात् क्वचिन्नित्यत्वात् क्वचिच्चान्तरङ्गत्वादेव सिद्ध्या नान्यत्र तस्य न्यायस्यावश्यकताऽस्ति, केवलं विव्याध विव्यधिथेत्यादिस्थले य्वृतो व्यञ्जनस्यानादेर्लुचश्च युगपत्प्राप्तौ सत्यां पूर्वं लुचः प्रवृत्तिश्चेदिष्टस्य यकारस्य स्थाने य्वृन्न स्यादिति दोषः प्राप्नोति, सोऽपि पाणिनीयमते "लिट्यभ्यासस्योभयेषाम्" [ ६. १. १७. ] इति सूत्रे उभयेषां ग्रहणेन यथा साध्यते तथा स्वमतेऽपि परत्वादेव व्यवस्थापयितुं शक्यते । उपशूयेत्यादौ च यद्यपि पूर्वव्याख्यातृभिस्तागमस्य प्राकृतकार्यत्वं ह्रस्वान्तप्रकृत्याश्रितत्वात् य्वृतश्च सस्वरान्तस्थाश्रितत्वाद् वार्णकार्यत्वमुक्तं तथापि तागमस्यैव केवलं ह्रस्वरूपस्वराश्रितत्वाद् वार्णकार्यत्वं य्वृतश्च यजादिरूपप्रकृतिमुद्दिश्य विहितत्वात् प्राकृतकार्यत्वमिति पूर्वन्यायेनैव व्यवस्था सुशकेति नास्य न्यायस्यावश्यकत्वमिति युक्तमुत्पश्यामः । य्वृति कृते दीर्घ-तागमयोः प्राप्तौ दीर्घस्यानैमित्तकत्वेनान्तरङ्गत्वात् प्रवृत्तौ तागमप्राप्तिरेव नेत्युपशूयेत्यस्य सिद्धिरित्येवंप्रकारेण सर्वेष्टसिद्धौ नास्य न्यायस्यावश्यकतेति ॥ ४५ ॥

---

## *उपपदविभक्तेः कारकविभक्तिः* ॥ ४६ ॥

**सि०**—*बलवन्नित्यमनित्यात्* [ ४१ ] इति न्याये पठितं बलवत्पदं तदग्रिमन्यायेष्वनुवर्तमानमिह विशेष्यानुरोधात् स्त्रीत्वविशिष्टत्वेन योजनीयमित्युपपदविभक्तेः कारकविभक्तिर्बलवतीति सम्बन्धः । उप समीपे उच्चारितं पदम्-उपपदं, तन्निमित्ता विभक्तिः-उपपदविभक्तिः, क्रियाजनकार्थकविभक्तित्वं कारकविभक्तित्वम् । "शक्तार्थ-वषड्-नमः-स्वस्ति-स्वाहा-स्वधाभिः" [ २.२.६८. ] इत्यादिसूत्रस्थ 'नमः' इत्यादिपदानां हि *स्वं रूपम्०* इति न्यायेन स्वरूपमात्रबोधकत्वम्, तेन च स्वरूपेण सह देवादीनां स्वद्योत्यक्रियाकर्मत्वं सम्बन्धः,

**क्रियया सह च कर्मत्वमेव सम्बन्ध इति क्रियासम्बन्धस्यान्तरङ्गत्वेन तत्सम्बन्धमूलिकाया विभक्तेरन्तरङ्गत्वमिति तन्मूलकमेव तस्या बलवत्त्वमित्यरङ्गबलवत्त्वबोधकन्यायमूलोऽयं न्याय इति नात्र ज्ञापकान्तरापेक्षा । सिद्धे चात्र न्याये नमस्यति देवानित्यादौ "शक्तार्थ०" [ २. २. ६८. ] इत्यादिसूत्रप्राप्तचतुर्थीविभक्त्यपेक्षया कर्मत्वनिमित्तकद्वितीयाविभक्तेर्बलवत्त्वात् सैव भवति न तु चतुर्थी । "क्रुद्-द्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः" [ २. २. २७. ] इति सूत्रे 'यस्मै कोपः' इत्यनिर्दिश्य 'यं प्रति' इति निर्देशेन चास्य न्यायस्य दुर्बलत्वमिति प्राचीनाः । तदाशयश्चेत्थम्—अत्र तावत् कुध्यतिना योगादनेनैव सूत्रेण यदः सम्प्रदानसंज्ञासम्भवाच्चतुर्थी प्राप्नोति, प्रतिना योगात् "भागिनि च प्रतिपर्यनुभिः" [ २. २. ३७. ] इति द्वितीया च; यदि चायं न्याय ओजस्वी स्यात् तदोपपदविभक्तिं द्वितीयां बाधित्वा कारकविभक्तेश्चतुर्थ्या भवने यस्मै प्रति कोप इति निर्दिश्येत, चतुर्थ्यागमनादनु प्रतिशब्दस्य व्यर्थीभूतत्वाद् *निमित्ताभावे नैमित्तिकस्याप्यभावः* इति न्यायेन तत्प्रयोगस्यापि निवृत्तौ 'यस्मै कोपः' इति वा निर्दिश्येत, परमेतस्यानोजस्वित्वाच्चतुर्थीं बाधित्वा द्वितीयैवाजनीयतते यं प्रतीति निर्दिष्टमिति । अत्रेदं ब्रूमः—अत्र यच्छब्दार्थं प्रति वास्तविककोपाभावेन न सम्प्रदानसंज्ञा प्राप्नोति, अन्यथा 'मनसा क्रुद्ध्यति, शिष्यस्य क्रुध्यति विनयार्थम्, भार्यामीर्ष्यति मैनामन्यो द्राक्षीत्' इत्यादावपि सम्प्रदानत्वे चतुर्थ्यापत्तेः । तथा चात्र चतुर्थ्यप्राप्त्या प्रतिशब्दयोगे द्वितीया विहितेति नास्य न्यायस्य प्रसर इति नैतेन निर्देशेनास्य दुर्बलत्वं साधनीयम्, सति च क्वचिदप्रवृत्तिप्रयोजने उपायान्तरमन्वेषणीयमिति॥४६॥**

## *उपपदविभक्तेः कारकविभक्तिः* ॥ ४६ ॥

**त०**—नमस्यति देवानित्यत्र 'नमः करोति' इति व्युत्पत्त्या 'नमः'पदार्थस्य कृञर्थत्वेन नमःपदार्थेऽन्वयविवक्षायां चतुर्थी कृधात्वर्थफलेऽन्वयविवक्षायां कर्मणि द्वितीयेति विषयभेदादुभयोर्विभक्त्योर्व्यवस्थासंभवात् कथं चतुर्थ्यापत्तिरिति चेत्? न—"शक्तार्थ-वषड्-नमः-स्वस्ति०" [ २. २. ६८. ] इत्यादिसूत्रस्योद्देश्यतावच्छेदककुक्षौ सम्बन्धविशेषानुक्त्या क्रियाकर्मभावसम्बन्धविवक्षायामपि तत्प्रवृत्तेरत्र चतुर्थ्यापत्तेर्न्यायं विना वारयितुमशक्यत्वात् । न चैवं चतुर्थ्या अपि क्रियाजनकार्थविभक्तित्वरूपकारकविभक्तित्वेन परत्वाच्चतुर्थ्यापत्तिर्न्यायसत्त्वेऽपि दुर्वारेति वाच्यम्, क्रियाजनकत्वमात्रार्थकविभक्तेरेव कारकविभक्तित्वस्वीकारेण "शक्तार्थ-वषड्-नमः-स्वस्ति०" [ २. २. ६८. ] इत्यादिसूत्रविहितविभक्तेः 'देवाय नमः' इत्यादौ क्रियाजनकत्वरूपार्थबोधकत्वाभावेन तन्मात्रार्थकत्वरूपकारकविभक्तित्वाभावात्, "कर्मणि" [ २. २. ४०. ] इति सूत्रविहितद्वितीयायास्तु कदाऽप्यर्थान्तराबोधकत्वेन कारकविभक्तित्वस्य सुवचत्वात् । अत्र च क्रियाजनकत्वेन विवक्षितोऽर्थो ग्राह्यः, तेन मातुः स्मरतीत्यादौ वस्तुतो मात्रादेः क्रियाजनकत्वेऽपि न क्षतिः । प्रथमाया अपि कारकविभक्तित्वमिति "सहयुक्तेऽप्रधाने" [ पा० सू० २. ३. १९. ] इति सूत्रे भाष्ये ध्वनितम्, तत्रैव चायं न्यायो वचनरूपेण पठितः । तथाहि–तत्रत्यं भाष्यं–"किमुदाहरणम् ?, तिलैः सह माषान् वपतीति, तिलैर्मिश्रीकृत्य माषा उप्यन्ते, तत्र 'करणे' इत्येव सिद्धम् । इदं तर्हि पुत्रेण सहागतो देवदत्त इति, अप्रधाने कर्तरि तृतीया यथा स्यात् । एतदपि नास्ति प्रयोजनम्, प्रधाने कर्तरि लादयो भवन्तीति प्रधानकर्ता तेनाभिधीयते, यश्चाप्रधानं सिद्धा तत्र 'कर्तरि' इत्येव तृतीया । इदं तर्हि पुत्रेण सहागमनं देवदत्तस्येति, षष्ठ्यत्र बाधिका भविष्यति । इदं तर्हि पुत्रेण सह स्थूलः पुत्रेण सह पिङ्गल इति । इदं चाप्युदाहरणं तिलैः सह माषान् वपतीति । ननु चोक्तं तिलैर्मिश्रीकृत्य माषा उप्यन्ते, तत्र 'करणे' इत्येव सिद्धमिति । भवेत् सिद्धं यदा तिलैर्मिश्रीकृत्योप्येरन्, यदा तु खलु कस्यचिन्माषबीजावाप उपस्थितः, तदर्थं च क्षेत्रमुपार्जितं, तत्रान्यदपि किञ्चिदुप्यते, यदि भविष्यति भविष्यतीति, तदा न सिद्ध्यति" । इति । अयमाशयः–'पुत्रेण सह स्थूलः' इत्यादिवद् यत्र तिलानां माषवापेन सह वाप इत्येतावन्मात्रं विवक्षितं न तु तिलैर्मिश्रीकरणं तत्र तिलानां करणत्वाभावात् तृतीयाविधानार्थं सूत्रमिदमावश्यकम् । एकक्षेत्रे च वापात् कालभेदेऽपि सहभावो न विरुद्ध इति । अथात्र सूत्रे 'अप्रधाने' ग्रहणस्य फलं विवेचितम्–"सहयुक्तेऽप्रधानवचनमनर्थकमुपपदविभक्तेः कारकविभक्तिबलीयस्त्वादन्यत्रापि" [ वार्तिकम् ]; "सहयुक्तेऽप्रधानवचनमनर्थकम्, किं कारणम् ? उपपदविभक्तेः कारकविभक्तिबलीयस्त्वाद्, अन्यत्रापि *उपपदविभक्तेः कारकविभक्तिर्बलीयसी* इति प्रथमा भवति । एवमत्रापि *उपपदविभक्तेः कारकविभक्तिर्बलीयसी* इति प्रथमा भविष्यति । क्वान्यत्र ? गाः स्वामी व्रजतीति" [ भाष्यम् ]। अयमाशयः–पाणिनीये नये "सहार्थे" [२.२. ४५.] इत्यस्य सूत्रस्य स्थाने "सहयुक्तेऽप्रधाने" [ २. ३. १९. ] इति सूत्रमारभ्यते, तत्राप्रधानवचनं प्रधाननिवृत्त्यर्थं क्रियते, प्रधानस्य चान्तरङ्गत्वात् कारकविभक्तिर्भविष्यतीति नार्थस्तन्निवृत्त्यर्थेनाप्रधानवचनेन । शिष्येण सहोपाध्यायस्य गौरित्यत्रापि गवा सम्बन्धोऽन्तरङ्ग इत्युपाध्यायात् षष्ठ्येव भविष्यति न तृतीया । गाः स्वामी व्रजतीत्यत्रापि व्रजिक्रियायां गवां कर्मत्वात् तन्निबन्धनाद्द्वितीया "स्वामीश्वराधिपति०" [ २. २. ९८. ] इति प्राप्ते षष्ठी-सप्तम्यौ प्रबाध्य प्रवर्तेत इति । इत्थं च प्रधाने कारकविभक्तिः प्रथमैव भविष्यतीत्यप्रधाने एव पारिशेष्यादनेन तृतीया स्यादिति विनाप्यप्रधानवचनं सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव । अनेन च भाष्यसन्दर्भेण प्रथमाया अपि कारकविभक्तित्वं स्पष्टमेव । उक्तभाष्याच्चास्य न्यायस्य

वाचनिकत्वमेव न तु ज्ञापकसिद्धत्वमित्यपि लभ्यते । वस्तुतस्तु प्रधाननिमित्तकत्वेन कारकविभक्तीनां बलवत्त्वम्, तन्मूलकोऽयं न्यायः । नमस्यतीत्यादावपकृष्टत्वप्रकारकबोधानुकूलव्यापारात्मकनमस्कारघटकबोधान्वयमात्रं चतुर्थ्याऽपेक्ष्यते, बोधापेक्षया प्रधानीभूतव्यापारनिमित्तकत्वं द्वितीयायाः प्रधानीभूतव्यापारजन्यफलाश्रयस्य कर्मत्वादिति द्वितीया बलवती । न च कर्तृप्रत्ययस्थले व्यापारस्य प्राधान्यवत् कर्मप्रत्ययस्थले 'नमस्यन्ते देवाः' इत्यादौ वैयाकरणमते फलस्यैव प्राधान्येन साम्यमेवेति वाच्यम्, शाब्दबोधीयविशेष्यत्वरूपप्राधान्यस्य बोधे सत्त्वेऽपि जन्यत्वेनाप्रतीयमानत्वलक्षणप्राधान्यस्य व्यापारे एव तत्रापि सत्त्वात् । अत एव प्रधानक्रियानिमित्तकर्मत्वं तत्र सिद्धम्, तदर्थकत्वेन च प्रथमाया अपि प्रधाननिमित्तकत्वेन चतुर्थ्यपेक्षया बलवत्त्वम् । अत एव सहार्थे तृतीयाविधायकसूत्रेऽप्रधानग्रहणाभावे पुत्रेण सहागतः पितेत्यादौ कारकविभक्तित्वेन प्रथमायास्तृतीयाबाधकत्वेऽपि पुत्रेण सहागतस्य पितुर्धनमित्यादौ षष्ठीं बाधित्वा न तृतीयापत्तिः साहित्यरूपसम्बन्धस्य पित्रनुयोगिकस्य पित्रपेक्षया विशेष्यत्वेन प्रधानीभूतधनानुयोगिकसम्बन्धाऽपेक्षयाऽप्राधान्यात्, तन्निमित्तकषष्ठ्याः साहित्यसम्बन्धनिमित्तकतृतीयापेक्षया बलवत्त्वम् । अस्य न्यायस्य वाचनिकत्वे तु षष्ठ्याः कारकविभक्तित्वाभावेन तृतीयाबाधकत्वानापत्त्याऽप्रधानग्रहणप्रत्याख्यानासङ्गत्यापत्तेः । न चैवं "तत्र च दीयते कार्यं भववत्" [ ५. १. ९६. ] इति पाणिनीयसूत्रस्थभाष्यविरोधः, तथाहि–तत्रत्यभाष्याशयः–प्रकृतसूत्रे दीयते ग्रहणं कार्यग्रहणं च किमर्थम्? यन्मासे दीयते, यन्मासे कार्यं तदपि तत्र भवं भवतीति "तत्र भवः" [ पा० सू० ४. ३. ५३. ] इत्यनेनैव सिद्धेरित्याशङ्का, तत्र भव इत्यत्रौपश्लेषिकाधिकरणे सप्तमी, तत्र च दीयते इत्यत्र च सामर्थ्याद् "यस्य च भावेन भावलक्षणम्" [ पा० सू० २. ३. ३७. ] इति सप्तमीति तेन सप्तमी यत्र तत्र प्रत्ययार्थं दीयते ग्रहणमिति । कैयटेन चोपपदविभक्तेरिति न्यायेनौपश्लेषिकाधिकरणे सप्तमीति स्पष्टमेवोक्तम् । एतच्च भाष्यमस्य न्यायस्य वाचनिकत्वे एव संगतं स्यान्नान्यथेति तद्विरोध इति वाच्यम्, यदि सर्वत्र शास्त्रे सत्सप्तम्यैव स्यात् तर्हि "तस्मिन्निति निर्दिष्टे पूर्वस्य" [ पा० सू० १. १. ६६. ] स्वमते "सप्तम्या पूर्वस्य" [ ७. ४. ११५. ] इति परिभाषासूत्रं व्यर्थं स्यात्, अस्य हि औपश्लेषिकसप्तमी लिङ्गम्, तस्माद् व्यर्थीभूतमिदम् 'असति बाधकेऽस्मिन् शास्त्रेऽधिकरणसप्तम्येव' इति ज्ञापयति । तथा च तत्र भव इत्यत्र ज्ञापकादेवाधिकरणसप्तमीति न तदर्थमस्य न्यायस्य वाचनिकत्वाश्रयणमावश्यकमिति न तत्रत्यभाष्यविरोधः । "तत्र च दीयते" [ ५. १. ९६. ] इत्यत्र तु सामर्थ्यात् सत्सप्तमी । अत एव भाष्ये औपश्लेषिकाधिकरणं विज्ञास्यत इत्येवोक्तं, नन्वेतन्न्यायोपन्यासः । कैयटकृतो न्यायोपन्यासस्तु पूर्वोक्तज्ञापकमूलक एवेति विज्ञेयम् । अत्र केचित्–"नमस्यति देवानित्यत्र नमःपदस्य समुदायैकदेशत्वेनानर्थकत्वात् "शक्तार्थ०" [ २. २. ६८. ] इति सूत्रे चार्थवत एव नमःशब्दस्य ग्रहणाच्चतुर्थ्या अप्राप्तिरिति नात्रास्य न्यायस्य प्रसर इत्याशङ्क्य न्यायानां स्थविरयष्टिप्रायत्वेन यत्र तैर्विना कार्यं न निर्वहेत् तत्रैव तेषामालम्बनीयत्वेन *अर्थवद्ग्रहणे नानर्थकस्य* इति न्याय इह नाश्रीयते" इत्याहुः, तन्नातिचारु–यतः सति क्यनि नमस्येति समुदायस्य धातुत्वेऽपि क्यनः पूर्वं विद्यमानं नमःशब्दस्यार्थवत्त्वं केनापह्नियताम्? वृत्तिषु व्यपेक्षापक्षस्यापि सर्वसम्मतत्वात्, एकार्थीभावपक्षेऽपि भूतपूर्वकमर्थवत्त्वमादाय चतुर्थीप्रवृत्तिसंभवात् । किञ्च वाक्यसंस्कारपक्षे क्यन उत्पत्तितः पूर्वमेव तत्समकालमेव वा देवपदार्थेन सह सम्बन्धात् तस्मिन् समये नमःपदयोगस्य दुरपह्नवत्वेन तत्रैव चतुर्थीप्रवृत्तिसम्भवादिति विभावनीयं सुधीभिरिति ॥ ४६ ॥

## *लुबन्तरङ्गेभ्यः* ॥ ४७ ॥

**सि०—अर्थानुरोधादपिरत्राध्याहार्यः, बलवदिति चानुवर्तत एव, तच्च लुपः स्त्रीत्वेन स्वमते व्यवहारात् स्त्रीलिङ्गेन विपरिणमनीयम् । तथा चान्तरङ्गेभ्योऽपि विधिभ्यो बहिरङ्गाऽपि लुब् बलवती, तानपि प्रबाध्य प्रवर्तेत इत्यर्थः सम्पद्यते । अपिशब्दाध्याहारेणान्तरङ्गबाधिकाया अस्याः [लुपः] अन्तरङ्गापेक्षया दुर्बलयोः पर-नित्ययोर्बाधकत्वं सुतरामिति लभ्यते, अपवादबाधकत्वं तु न तस्य निरवकाशत्वेन प्राबल्यात्, तद्बाधकत्वस्येष्टत्वे लुबपवादादपीत्येव न्यायस्वरूपं स्वीकृतं स्यात्; अपवादस्यान्तरङ्गापेक्षयाऽपि प्राबल्येन तद्बाधकत्वे तदपेक्षया दुर्बलानां पर-नित्या-ऽन्तरङ्गाणां बाधकत्वं स्वत एव सिद्ध्येत, न च तदिष्टमिति लुबन्तरङ्गेभ्य इत्येव न्यायस्वरूपं स्वीकृतम् । फलमस्य यथा–गर्गस्य वृद्धापत्यानीत्यर्थे "गर्गादेर्यञ्" [ ६. १. ४२ ] इति यञि तस्य "बहुष्वस्त्रियाम्" [ ६. १. १२४. ] इति लुपि–गर्गा इति भवति, अत्र बहिर्भूतबहुवचनविभक्त्यपेक्षतया लुब् बहिरङ्गा, प्रकृत्याश्रिता च "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति वृद्धिरन्तरङ्गा, साऽत्र लुपः पूर्वं न प्रवर्ततेऽनेन न्यायेन लुप एव प्राबल्यबोधनात्, सत्यां च लुपि ञ्णित्प्रत्ययरूपनिमित्ताभावाद् वृद्धिर्न भवति । अयं च न्यायः "स्वमौ प्रत्ययोत्तरपदे चैकस्मिन्" [ २. १. ११. ] इति सूत्रे प्रत्ययोत्तरपदग्रहणेन प्रकाश्यते, तथाहि-तत्र स्याद्यधिकारेण 'त्वदीयः, मत्पुत्रः' इत्यादौ 'युष्मद्+अस्+ईयस्, अस्मद्+अस्+पुत्र+स्' इति स्थिते "ऐकार्थ्ये" [ ३. २. ८. ] इत्यैकार्थ्यविवक्षायामन्तवर्तिन्या विभक्तेर्लुप "त्व-मौ**

**प्रत्ययोत्तरपदे चैकस्मिन्" [ २. १. ११. ] इति त्व-मादेशौ च प्राप्नुतः, तत्र लुपः पदद्वयापेक्षैकार्थ्यापेक्षितया बहिरङ्गत्वेन विभक्तिमात्राश्रितत्वेनान्तरङ्गयोस्त्व-मादेशयोस्तदपेक्षया [ लुबपेक्षया ] बलवत्त्वात् त्व-मादेशयोः सतोर्लुप्यपि त्वदीय इत्यादिसिद्धौ निर्बाधायां तत्सिद्ध्यर्थं प्रकृतसूत्रे कृतं प्रत्ययोत्तरपदग्रहणं व्यर्थं सत्–'अन्तरङ्गेभ्योऽपि विधिभ्यो लुब् बलवती' इति विज्ञापयति, ततश्च पूर्वमेव स्यादेर्लुप्यपि निमित्ताभावात् त्व-मादेशौ न स्यातामिति तत्सिद्ध्यर्थं प्रत्ययोत्तरपदग्रहणस्य स्वांशे चारितार्थ्यम् । अस्य च न्यायस्य केनापि बाधाभावात् प्रायः स्थिरत्वमेवेति ॥ ४७ ॥**

## *लुबन्तरङ्गेभ्यः* ॥ ४७ ॥

**त०**—नन्वत्र "त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्" [ २. १. ११. ] इति सूत्रस्थप्रत्ययोत्तरपदग्रहणं ज्ञापकमिति यदुक्तं तन्न शोभनम्, तदभावे हि स्यादौ प्रत्यये युष्मदस्मदोर्मान्तस्य यथासंख्यं त्वमौ स्त इत्येवार्थः स्यात्, तथा च 'युष्मद्+अस्+ईयस्' इत्याद्यवस्थायां परत्वात् त्व-मादेशौ प्रबाध्य "तव मम ङसा" [ २. १. १५. ] इति तवादेशः स्यादिति त्वदीय इत्याद्यसिद्धिः, सति च प्रत्ययोत्तरपदग्रहणे तत्सामर्थ्यात् परमपि तवाद्यादेशं प्रबाध्य त्व-मावादेशौ भवत इति प्रत्ययोत्तरपदग्रहणस्य सति सार्थक्ये ज्ञापकत्वासम्भव इति चेत्? न–तथा सति 'प्रत्ययोत्तरपदे' इत्यंशे मन्तस्येत्यसम्बन्धो वृत्त्यादिषु कृतो व्यर्थः सन् ज्ञापक इत्यदोषात् । अयमाशयः–तव-ममादेशबाधनार्थं यदि प्रत्ययोत्तरपदं ग्रहणं क्रियत इत्यास्थीयते तदा तस्य तदपवादत्व[ तवाद्यादेशापवादत्व ]मायाति । तथा च *उत्सर्गसमानदेशा अपवादाः* इति न्यायेन तवाद्यादेशानां मन्तदेशत्वेनास्यापि मन्तदेशत्वसिद्धौ तदंशे [ प्रत्ययोत्तरपदांशे ] मन्तपदसम्बन्धो व्यर्थः सन् न्यायमिमं ज्ञापयतीत्यास्थेयम् । ज्ञापित्वे चास्मिन् न्याये तवाद्यादेशापेक्षया लुबः प्राबल्येन स्यादेर्लुप्यपि तवादीनां प्राप्त्यभावादुभयोर्विरोधाभावेन नोत्सर्गापवादत्वमिति मन्तसमुदायस्यादेशार्थं तदंशे [ प्रत्ययोत्तरपदांशे ]ऽपि मन्तपदसम्बन्ध आवश्यक इति तस्य चारितार्थ्यम् । न च स्वमते *उत्सर्गसमानदेशा अपवादाः* इति न्याय एव नास्ति, तथा च मन्तस्यादेशविधानार्थमेव तत्सार्थक्यमिति न ज्ञापकत्वसंभव इति वाच्यम्, तस्य न्यायस्यौचित्यसिद्धतयाऽवश्यस्वीकर्तव्यत्वात् । न च प्रत्ययोत्तरपदग्रहणं न केवलं तवाद्यादेशबाधकमपि त्वात्वादिबाधकमपि, तथा चात्वादीनामन्त्यस्य स्थाने विधानादुक्तन्यायेनास्यापि कदाचिदन्त्यस्थानित्वं स्यादिति तद्वारणाय मन्तसम्बन्ध आवश्यक इति वाच्यम्, ज्ञापकतापरन्यासादिग्रन्थप्रामाण्यात् तद्विषये बाध्यविशेषचिन्तापक्षस्यैवाश्रयणात् । न च तव-ममाद्यादेशविधायकसूत्रेषु 'मन्त'पदसम्बन्धो वृत्तौ न कृत इति नास्ति 'मन्त'देशत्वमुत्सर्गस्येति तदपवादस्य 'प्रत्ययोत्तरपदे' इत्यंशस्यापि न मन्तदेशत्वमिति भ्रमितव्यम्, 'मन्तपदासम्बन्धे हि ततः पूर्वस्य "युष्मदस्मदोः" [ २. १. ६. ] इत्यस्यापि सम्बन्धो न स्यात् । तथा च कस्यैते आदेशा इत्यपि न निश्चीयेत ।

ज्ञापितश्चायं न्याय एवमेव "प्रत्ययोत्तरपदयोश्च" [पा० सू० ७. २. ९८. ] इति सूत्रे महाभाष्ये, तथाहि—"किमर्थमिदमुच्यते न "त्वमावेकवचने" [ पा० सू० ७. २. ९७ ] इत्येव सिद्धम्, न सिद्ध्यति, किं कारणम्? एकवचनाभावात् । एकवचन इत्युच्यते, न चात्रैकवचनं पश्यामः । प्रत्ययलक्षणेन, "न लुमताङ्गस्य" [पा० सू० १. १. ६३] इति प्रत्ययलक्षणप्रतिषेधः। एवं तर्हि इदमिह सम्प्रधार्य–लुक् क्रियतामादेशाविति, किमत्र कर्तव्यम्? परत्वादादेशौ, नित्यो लुक्–कृतयोरप्यादेशयोः प्राप्नोत्यकृतयोरपि । अन्तरङ्गावादेशौ । एवं तर्हि सिद्धे सति यत्प्रत्ययोत्तरपदयोस्त्वमौ शास्ति तज्ज्ञापयत्याचार्योऽन्तरङ्गानपि विधीन् बाधित्वा बहिरङ्गो लुग् भवतीति । किमेतस्य ज्ञापने प्रयोजनम्? गोमान् प्रियो यस्य–गोमत्प्रियः, यवमत्प्रियः । गोमानिवाचरति–गोमत्यते, यवमत्यते । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधत इति । नैतदस्ति ज्ञापकम्, अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम्? येऽन्ये एकवचनादेशाः प्राप्नुवन्ति त्वद्बाधनार्थमेतत् स्यात्, तद्यथा–तव पुत्रः–त्वत्पुत्रः, मम पुत्रो–मत्पुत्रः, तुभ्यं हितं–त्वद्धितं, मह्यं हितं–मद्धितमिति यत् तर्हि मपर्यन्तग्रहणमनुवर्तयति, यद्यत्रान्ये एकवचनादेशा स्युर्मपर्यन्तानुवृत्तिरनर्थिका स्यात्" इति । अयमाशयः प्रत्यये उत्तरपदे च परतस्त्वमादेशविधायकेनानेन सूत्रेण न प्रयोजनम् एकवचने परतस्त्वमादेशस्य पूर्वसूत्रेण विहितत्वात् तेनैव सिद्धेरिति व्यर्थं सदिदं सूत्रं न्यायममुं ज्ञापयति । तेन 'गर्गाः' इत्यादौ वृद्ध्यभाववद् गोमान् प्रियो यस्य स गोमत्प्रिय इत्यादावेकपदाश्रयत्वेनान्तरङ्गाः सुलोपादयः स्युः, पदद्वयाश्रयणाद् बहिरङ्गो लुगिति स न स्यादिति प्रत्ययलक्षणेन नुमादिषु कृतेषु गोमान् प्रिय इत्यादिरूपापत्तिरपि न; अनेन न्यायेन बहिरङ्गस्यापि लुकः प्राबल्यबोधनात्; किन्तु तव पुत्र इति विग्रहे त्वत्पुत्र इत्यादौ तवाद्यादेशा मा भूवन्नित्येतदर्थमस्य सूत्रस्य सार्थक्येन न ज्ञापकत्वमिति मपर्यन्तस्या[ मन्तस्येत्यस्या ]नुवृत्तिरिह ज्ञापिकेति । अत्र "यत् तर्हि मपर्यन्तग्रहणमनुवर्तयति" इति भाष्यग्रन्थस्य व्याख्यायां विसंवादो दृश्यते, तथाहि, कैयटः—केचिद् व्याचक्षते–'यद्यादेशान्तराणां त्व-मौ बाधकौ स्यातां तदा मपर्यन्तग्रहणानुवृत्तिमन्तरेणोत्सर्गसमानदेशत्वादपवादानां मपर्यन्तस्य त्वमौ सिद्धाविति किं तदनुवृत्त्या? अनुवृत्त्या तु ज्ञाप्यते–

प्रागेव लुकि कृते विभक्त्यभावादसत्त्वादेशान्तरेषु त्व-मौ विधीयेते' इति । एतच्चायुक्तम्–नायं नियोगः *उत्सर्गसमानदेशा अपवादाः* इति । श्नमकज्बहुचां भिन्नदेशानामप्यपवादत्वदर्शनात् । ततश्चासत्यां मपर्यन्तानुवृत्तावादेशान्तराणामपि बाधकौ त्वमौ सर्वादेशौ स्यातामनेकाल्त्वादिति सप्रयोजना मपर्यन्तानुवृत्तिः । तस्मादन्यथा व्याख्यायते–तव-ममादय आदेशाः स्थानिप्रक्रृत्यर्थमिहानुवर्त्तन्ते, तत्र तवादीनां प्रसङ्गे सिद्धयोस्त्वमयोर्मपर्यन्तानुवृत्तिस्त्वया कृतं त्वत्कृतमित्याद्यर्था भवन्ती लुको बाधकत्वं ज्ञापयति । ततश्च तवाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्ज्ञापनाय भवति । केवला हि मपर्यन्तानुवृत्तिर्लाघवाय स्यात्, गरीयसी हि तवाद्यनुवृत्त्या स्थानिप्रतीतिः । ततो ज्ञापनाय न प्रभवेत् । तस्मात् तवाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्यथोक्तार्थज्ञापनायालम्" इति । नागेशेन च–*उत्सर्गसमानदेशा अपवादाः* इति न्यायस्यासम्भवे एव बाधकत्वमिति वार्तिकानुसारित्वेन तन्मतानुसारमेव प्रकृतन्यायस्य ज्ञापकसिद्धत्वम् । 'सत्यपि सम्भवे बाधनं भवतीति' भाष्यकृन्मते च* उत्सर्गसमानदेशा अपवादाः* इत्यस्यास्वीकारात्, प्रकृतन्यायो वाचनिक एव श्नमकज्बहुचां भिन्नदेशानामपवादत्वदर्शनेन *उत्सर्गसमानदेशा अपवादाः* इति न्यायस्यानित्यत्वं तु न स्थापनीयं तेषामुत्सर्गभिन्नदेशत्वस्य कारणान्तरप्रयोज्यत्वात् । तथाहि–'श्नम्' रुधादिधातुभ्यो विहितः शबपवादोऽपि न शबवत् प्रकृतिप्रत्यययोर्मध्ये भवति, किन्तु मित्त्वात् [ मकारानुबन्धकरणात् ] "मिदचोऽन्त्यात् परः" [ पा० सू० १. १. ४७. ] इति पाणिनिपरिभाषासूत्रानुसारमन्त्यस्वरात् परो भवति, 'अकच्' प्रत्ययः 'क'प्रत्ययापवादोऽपि कप्रत्ययवत् प्रकृतेः परो न भवति, किन्तु "अव्ययसर्वनाम्नामकच् प्राक् टेः" [ पा० सू० ५. ३. ७१. ] इति तद्विधायकसूत्रे 'प्राक् टेः' इत्युक्तत्वादन्त्यस्वरादिसमुदायात् पूर्वं भवति, एवं 'बहुच्' प्रत्ययः कल्पबादिप्रत्ययानामपवादभूतोऽपि "विभाषा सुपो बहुच् पुरस्तात् तु" [ पा० सू० ५. ३. ६८. ] इति विधायकसूत्रे पुरस्तादिति कथनेन प्रकृतेः पूर्वं भवतीति सर्वत्र विशेषवचनादेवापवादानामुत्सर्गभिन्नदेशत्वमिति न तेनोत्सर्गा-ऽपवादयोः समानदेशत्वनियमे व्याघातः ।" इत्येवंरूपेण कैयटोक्तस्य चिन्त्यत्वं साधितमित्यास्तां विस्तरः ॥ ४७ ॥

## *सर्वेभ्यो लोपः* ॥ ४८ ॥

**सि०**—विशेष्यानुरोधेन पूर्वतोऽनुवृत्तं बलवदिति पदं पुंलिङ्गेन विपरिणमयितव्यम्, तथा च सर्वेभ्यो विधिभ्यो लोपविधिर्बलवानिति न्यायार्थः सम्पन्नः । लोपपदेन चादर्शनवाचिना लुप्-लुकोः सामान्येन ग्रहणप्राप्तावपि लुपः पूर्वन्यायेन बलवत्त्वस्योक्तत्वादत्र लोपपदेन लुगेव गृह्यते पारिशेष्यात् । यथा क्विबादीनाम् "अप्रयोगीत्" [ १. १. ३७. ] इति सूत्रेण 'एति–अपगच्छतीति इत्' इति सार्थकसंज्ञाकरणाद् यददर्शनं तदपि लोपशब्देन "न वृद्धिश्चाविति क्ङिल्लोपे" [ ४. ३. ११. ] इति सूत्रे गृह्यते, तथाऽस्मिन् न्यायेऽपि लुग्लोपेत्संज्ञादीनां सर्वेषां ग्रहणं वेदितव्यम् । तथा च 'अबुद्ध' इत्यत्र "धुड्-ह्रस्वात्०" [ ४. ३. ७०. ] इत्यनेन सिचः सर्वविधिभ्यः पूर्वमेव लोपकरणात् "ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये" [ २. १. ७७. ] इति सूत्रेणादेश्चतुर्थत्वं न । न च सिचो लोपेऽपि स्थानिवद्भावेन चतुर्थत्वमादेः स्यादेवेति शङ्कनीयम्, सकारस्य वर्णमात्रत्वेन तदाश्रये विधौ स्थानिवद्भावाप्राप्तेः । एवं शं-सुखं, तत्र तिष्ठतीत्यर्थे 'शंस्थाः' इत्यत्र क्विपः पूर्वमेवेत्संज्ञारूपेऽदर्शने जाते स्थाधातोराकारस्य "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति ईर्न भवति, ईत्वविधायकसूत्रेऽयपीति पर्युदासेन व्यञ्जनलाभे सत्यपि 'व्यञ्जने' इति पदं साक्षाद् व्यञ्जनग्रहणायेति व्याख्यानात् । ज्ञापकं त्वस्य "सस्तः सि" [ ४. ३. ९२. ] इत्यत्र विषयसप्तमीव्याख्यानम्; सीत्यत्र निमित्तसप्तम्यां स्वीकृतायां तु वसेरद्यतन्यां तामि 'अवात्ताम्' इत्यादौ सिजुत्पत्त्यनन्तरं "सस्तः सि" [ ४. ३. ९२. ] इति तादेशे सिद्धे पश्चात् सिचः "धुड्-ह्रस्वात्०" [ ४. ३. ७०. ] इत्यनेन लोपेऽवात्तामिति रूपसिद्धिर्यद्यपि सम्भवति, तथापि यद् विषयसप्तमीत्वेनाचार्यैर्व्याख्यानं कृतं तस्यायमेवाशयो यत्–लोपविधेः सर्वविधिभ्यो बलवत्त्वमिति सिजुत्पत्त्यनन्तरमेव "धुड्-ह्रस्वाद्०" [ ४. ३. ७०. ] इति लोपः प्रसज्येतेति सकारपरत्वाभावेन "सस्तः सि" [ ४. ३. ९२. ] इति तादेशो न स्यात् । न च स्थानिवद्भावेन निर्वाहः, 'सि' इति वर्णमात्रस्य निमित्तत्वेनाश्रयाद् वर्णाश्रये विधौ च स्थानिवद्भावपर्युदासात् । तथा च तादेशविधानार्थमिह विषयसप्तम्याश्रयणमावश्यकमिति विषयसप्तमीत्वेन व्याख्यानमस्य न्यायस्य ज्ञापकं साध्वेव । विषयसप्तम्यां स्वीकृतायां च वसेरद्यतनीतामि 'अवात्ताम्' इत्यादौ सिचो विषयतायामेव "सस्तः सि" [ ४. ३. ९२. ] इति तत्वे पश्चात् सिचि तस्य लोपेऽपि स्थानिवद्भावेन "व्यञ्जनानामनिटि" [ ४. ३. ४५. ] इति वृद्धिः सिद्धा । अत्र च [ वृद्धौ ] सिजिति समुदायस्यैव निमित्तत्वेनाश्रयणात् समुदायस्य च वर्णरूपत्वाभावान्न स्थानिवद्भावनिषेधाशङ्का, यद्यपि लोपशब्देन लुपोऽपि संग्रहः सम्भवतीति पूर्वन्यायोऽप्यनेन न्यायेन गतार्थः स्यात् तथाऽप्याचार्यैरयं न्यायः पृथगुक्त इति नात्र लोपशब्देन लुपो ग्रहणम् । उत्तरन्यायबाध्यमानत्वाच्चास्य दुर्बलत्वम् ॥ ४८ ॥

### *सर्वेभ्यो लोपः* ॥ ४८ ॥

**त०**—लोप-लुप्-लुचामित्संज्ञायाश्चार्थतो भेदाभावेऽपि फलतः क्वचिद् भेदात् तत्सम्बन्धव्यवहारस्य भेदः । प्रत्यय-लोपादिषु सत्सु स्थानिवद्भावेन तत्प्रत्ययनिमित्तककार्यसम्पादनेऽपि लुपि सति "लुप्यय्वृल्लेनत्" [ ७. ४. ११२. ] इति निषेधात् कार्यं न भवतीति लुपो विशेषः, अत एव गोमानित्यादौ सेर्लुकि स्थानिवद्भावेन तन्निमित्तो दीर्घो भवति, गोमत् कुलमित्यादौ तु न भवति । पाणिनीये तन्त्रे च लुप्-लुकोः समानत्वमेव । यत्र स्थानिवद्भावनिषेधो नेष्टस्तत्र लोप एव विधीयते न तु लुग् लुब् वेत्यन्यदेतत् । पाणिनीये नये च प्राचीनैरयं न्यायो ज्ञापक-सिद्धत्वेनोक्तोऽपि नवीनैर्नागेशादिभिर्न स्वीक्रियते, भाष्यानुक्त-त्वादिति स्पष्टं परिभाषेन्दुशेखरे । यद्यपि स्वमतेऽपि 'अबुद्ध' इत्यत्र "गडदबादेः०" [ २. १.७०. ] इत्यतः "धुड्-ह्रस्वात्०" [ ४. ३. ७० ] इत्यस्य परत्वेन परत्वादेव सिचो लोपे चतुर्थस्य नापत्तिः, अवात्तामित्यादौ च "सस्तः सि" [ ४. ३. ९२. ] इत्यस्य लोपापेक्षया परत्वेन पूर्वमेव तादेशे पश्चात् सिचो लुकि कार्यं सिद्ध्यति, एवं 'शंस्याः' इत्यत्राऽपि 'ईर्व्यञ्जनेऽयपि' [ ४. ३. ९७. ] इत्यत्र साक्षाद् व्यञ्जने इति व्याख्यानात् क्विपश्च विधानसमकालमेवेत्संज्ञायां नेत्वप्राप्तिरिति न्यायं विनापि सर्वेष्टसिद्धिः सम्भवति, तथाप्याचार्यैः "सस्तः सि" [ ४. ३. ९२. ] इत्यत्र कृतस्य विषयसप्तमीत्वेन व्याख्यानस्य फलान्तरा-भावेन तथास्थीयते, स्वीकृते चात्र न्याये 'अबुद्ध' इत्यादयो-ऽप्यस्य न्यायस्योदाहरणानि भवितुमर्हन्तीति तथा व्याख्यात-पूर्वम् । न च तत्राधिकं विवदितव्यम्—'नासूया तत्र कर्तव्या यत्रानुगमः क्रियते' इति न्यायात् । उत्तरन्यायबाध्यत्वेनास्य दुर्बलत्वमित्युक्तं वृत्तौ प्राचामनुसारेण । वस्तुतस्तु बाधकबाध्यत्वं न दुर्बलत्वप्रयोजकमिति विवेचितमेव पूर्वमनेकत्रेति नात्र पुनरुच्यते ॥ ४८ ॥

## *लोपात् स्वरादेशः* ॥ ४९ ॥

**सि०—बलवदित्यनुवर्तमानं पुंलिङ्गतया विपरिणमनीय-मिति समानं पूर्वेण। लोपशब्दोऽपि लुग्वाची पूर्ववदेव, तदपवादत्वादस्य, उत्सर्गस्यापवादशास्त्रव्यापकत्वनियमात् । तथा च सर्वविधिभ्यो बलवतो लोपादपि स्वरादेशो बलवानिति न्यायार्थो लभ्यते । यथा श्रीर्देवताऽस्येत्यर्थे "देवता" [ ६. २. १०१. ] इत्यणि परमपि "अवर्णेवर्णस्य" [ ७. ४. ६८. ] इति ईकारलुचं बाधित्वा "वृद्धिः स्वरेष्वादेः०" [ ७. ४. १. ] इत्यादिस्वररूपस्येकारस्य वृद्धिर्भवति, तत आयादेशे—श्रायमिति रूपं सिध्यति । एतन्न्यायाभावे तु परत्वादीकारलोपे वृद्ध्यप्राप्तेरिदं रूपं न सिद्ध्येत् । अस्य ज्ञापकं तु वृद्धिसूत्रस्येकारलोपसूत्रात् प्राक् पाठः । यद्ययं न्यायो नाभीष्टः स्यादाचार्याणां तर्हि वृद्धिसूत्रमेव परतः पठेयुः । यत्र चास्य न्यायस्य प्रवृत्तिर्नेष्टा तत्र * नानिष्टार्था शास्त्रप्रवृत्तिः * इत्यग्रिमन्यायेन व्यवस्थोन्नेयेत्यग्रे स्फुटीभविष्यत्येव, तन्न्याय-व्याख्यावसरे । ततश्चास्य न्यायस्यानित्यत्वमित्यपि स्फुट-मेवेति ॥ ४९ ॥**

### *लोपात् स्वरादेशः* ॥ ४९ ॥

**त०**—यद्यपीकारलोपविधायकसूत्रस्य वृद्धिविधायकसूत्रात् प्राक् पाठेन 'लोपाद् वृद्धिर्बलीयसी' इत्येवं ज्ञापयितुं शक्यम्, तावताऽपि श्रायमित्यादिप्रयोगाणां सिद्धिः सम्भवतीति न सामा-न्यतः स्वरादेशस्यैव लोपापेक्षया बलवत्त्वज्ञापनयोग्यता, नवा तत्प्रयोजनम्, तथा चाग्रे *नानिर्दिष्टार्था शास्त्रप्रवृत्तिः* इति न्यायव्याख्यावसरे 'चिकीर्ष्यते' इत्यादावल्लोपापेक्षया दीर्घस्य प्राबल्येऽनेन न्यायेन प्राप्ते तद्बाधनायास्याप्रवृत्तिकल्पनाऽपि न करणीया भवतीति साम्प्रतं प्रतिभाति, तथापि 'असति बाधके प्रमाणानां सामान्ये पक्षपातः' इति सिद्धान्तेन सामान्यत एव ज्ञापनं क्रियते । वस्तुतस्तु ज्ञापनस्थले ज्ञापितार्थेन ज्ञापकस्य स्वांशे चारितार्थ्ये फलमन्यत्रेति सरणिर्दृश्यते, यदि केवलं स्वांशे चारितार्थ्यमेव भवेत् तदापि न तस्य सार्थक्यं स्वीक्रियते, तन्मात्रार्थत्वे वरं तदकरणमेव । इह चान्यत्र फलं यद्यपि लभ्यते किन्तु स्वांशे चारितार्थ्यं नास्ति, नहि ज्ञापितेऽस्मिन् न्याये वृद्धेः पूर्वं पाठस्य किमपि फलं निर्देष्टुं शक्यते । तथा च नैवं पाठस्य ज्ञापकत्वसंभावनेत्यन्यदेव किञ्चिदस्य न्यायस्य ज्ञापक-मन्वेषणीयम् 'स्पर्धे' [ परः, ७. ४. ११९. ] इति सूत्रेऽनु-वृत्तस्य परशब्दस्येष्टवाचित्वेन स्पर्धे सति यदिष्टं तद् भवतीति व्याख्यानेन क्वचित् पूर्वस्यैवेष्टत्वेन बलवत्त्वमिति महाभाष्योक्ता, स्वयमपि तत्रतत्राश्रितारीतिर्वाऽवलम्बनीया । तथा च श्राय-मित्यादौ पूर्वपठिताया वृद्धेरेवेष्टत्वेन सैव भविष्यतीति नार्थो-ऽनेन न्यायेन । पाणिनीये च वृद्धिरेव परस्तात् पठ्यत इति नास्य न्यायस्यावश्यकता स्वीक्रियते, तदुक्तं सिद्धान्तकौमुद्यां दीक्षितेन "साऽस्य देवता" [ ४. २. २४. ] इति प्रकरणे—"यस्य" [ ६. ४. १४८. ] इति लोपात् परत्वादादिवृद्धि-रिति । तथा च स्वमतेऽपि पूर्वोक्तरीत्या निर्वाहसम्भवे न्यायं विज्ञाप्य पश्चादनित्यत्वाश्रयणादिकष्टकल्पनाया नावश्यकतेति विभावनीयं सूरिभिरिति । किञ्चैतस्मिन् सामान्यतो ज्ञापितेऽश्व-पतेरिदमाश्वपतम्, गणपतेरिदं गाणपतमित्याद्यपि न सिद्ध्येत्, तत्रापि "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति वृद्धिः प्राप्नोतीति विशेषत एव ज्ञापनमुचितम्—*लोपादादिवृद्धिर्बल-वती* इतिरूपेण । पाणिनीये च "नामिनोऽकलिहलेः" [ ४. ३. ५१ ] इति सूत्रस्थानीयस्य "अचो ञ्णिति" [ पा०

सू० ७. २. ११२. ] इति सूत्रस्य यद्यपि लोपापेक्षया परत्वमस्ति, तथापि 'आदिवृद्धिरन्त्योपधावृद्धी बाधते' इत्यनुशतिकादिगणे पुष्करसच्छब्दपाठेन ज्ञापितत्वाद् दोषापहारः । तथा च सामान्यतः स्वरादेशबलवत्त्वज्ञापने दोषसद्भावाद् विशेषतोऽपि ज्ञापने स्वांशे चारितार्थ्याभावाच्च नायं न्यायो ज्ञापनमर्हतीत्येव विचारसरणावधिरोहतीति ॥ ४९ ॥

## *आदेशादागमः* ॥ ५० ॥

**सि०**—विशेष्यानुरोधेन बलवानिति सम्बध्यते । आदेशाऽऽगमयोः समकालप्राप्तयोरतुल्यबलयोरपि सतोरादेशापेक्षयाऽऽगमस्यैव बलवत्त्वविधायकोऽयं न्यायः । तथा च अर्पयतीत्यत्र ऋधातोर्णौ "नामिनोऽकलिहलेः" [ ४. ३. ५१. ] इति वृद्धिः "अर्त्ति-री-व्ली-ह्री-क्नुयि-क्ष्माय्यातां पुः" [४. २. २१.] इति प्वागमश्च प्राप्नुत इत्यनेनादेशरूपवृद्ध्यपेक्षया प्वागमस्य बलवत्त्वबोधनात् प्वागमे कृते "पुस्पौ" [ ४. ३. ३. ] इति गुणरूप आदेशो भवति । अस्य वाचनिकत्वमेव, ज्ञापकान्तराभावात् । अर्पयतीत्यादिसिद्ध्यर्थं यत्नान्तरस्याकरणादस्य च न्यायस्याचार्यैर्न्यायेषु पठितत्वादाचार्यवचनमेवात्र प्रमाणम् । क्वचिच्चलक्ष्यानुरोधादयं नाश्रीयते, यथा द्वयोः कुलयोरित्यत्र द्विशब्दादोसि "आ द्वेरः" [ २. १. ४१. ] इत्यदादेशे "अनाम्-स्वरे नोऽन्तः" [ १. ४. ६४. ] इति नागमे च प्राप्ते परत्वादन्तरङ्गत्वाच्चादादेश एव भवति, न नागमः । एतच्च "अनाम्स्वरेनोऽन्तः" इति सूत्रन्यासेऽपि स्पष्टमुक्तम् । न च तत्रानेन न्यायेन नागमं प्रसज्य परत्वादन्तरङ्गत्वाच्च तत्समाधानं कृतमिति नेदं स्वतो न्यायाप्रवृत्तिस्थलमिति वाच्यम्, न्यायस्यास्य वाचनिकत्वेन शास्त्रान्तरसाधारण्येन शास्त्रान्तरव्यवस्थानुसारमेव प्रवृत्त्यप्रवृत्तिनिरूपणमस्येति न्यासग्रन्थस्याशयात् । तथा च तेन न्यासग्रन्थेनास्य न्यायस्यानित्यत्वमेव दृढीभवति । न्यायानां स्थविरयष्टिप्रायत्वेन गत्यन्तराभाव एवाश्रयणमित्यपि तस्य न्यासस्याशयो वर्णयितुं शक्यते । इह चानाश्रयणेनैव लक्ष्यसिद्धिरिति बोध्यम् ॥ ५० ॥

### *आदेशादागमः* ॥ ५० ॥

**त०**—यद्यप्यर्पयतीत्यत्रान्यत्र वा प्वागमस्थले सर्वत्र वृद्धेः प्राप्तौ सत्यामेव प्वागमो विधीयत इति *येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवति* इति न्यायेन वृद्ध्यादेशस्य बाधक एव प्वागम इति, वृद्ध्यादेशे कृतेऽकृते च प्वागमस्य प्राप्तिः स्थानिवद्भावेनेति कृताकृतप्रसङ्गित्वेन नित्यत्वमपि प्वागमस्येति च तद्विधानार्थं नास्य न्यायस्यावश्यकता, तथापि *मित्रवदागमः* *शत्रुवदादेशः* इति स्वभावसिद्धन्यायानुगृहीतोऽयं न्याय इत्याचार्यैर्न्यायमध्ये पठितः, प्राप्तिसत्त्वेनेहाप्याश्रयितुं युक्त इत्यवधेयम् । यद्यपि *समासान्तागमसंज्ञाज्ञापकगणनञ्निर्दिष्टान्यनित्यानि* इति पूर्वव्याख्यातन्यायानुसारमागमस्याप्यनित्यत्वमिति कथयितुं शक्यते, तथापि तस्यापि न्यायस्यानित्यत्वमिति तन्न्यायव्याख्यावसर एवोक्तत्वेन, अस्य च कृताकृतप्रसङ्गित्वप्राप्तनित्यत्वस्य न व्याघातः । अपवादत्वं चाप्यस्येत्युक्तमेवेति न न्यायस्यास्यावश्यकता तथापि समाश्रयणीय इत्युक्तमेव । पाणिनीये च तन्त्रे नायं न्यायो दृश्यते, परत्वादिनैव तत्र व्यवस्था कृता, अस्ति चागमशास्त्रानित्यत्वबोधको न्यायस्तत्रापि प्राचीनैः समाश्रितः, परं तु नागेशादिभिर्भाष्यानुक्तत्वात् खण्डित इति नासौ प्वागमदौर्बल्यबोधनायालम्, अनाश्रयणे च प्रकृतन्यायस्य द्वयोः कुलयोरित्यादीनामाञ्जस्येन सिद्धिरिति ॥ ५० ॥

## *आगमात् सर्वादेशः* ॥ ५१ ॥

**सि०**—बलवानिति विशेष्यानुरोधेन सम्बध्यत इति समानं पूर्वेण । पूर्वन्यायेन सामान्यत एवादेशापेक्षयाऽऽगमस्य प्राबल्यं बोधितमिति 'तिसृ'रूपसर्वादेशस्य नागमापेक्षया दौर्बल्यं प्राप्तमिति तद्वारणायायं न्याय आश्रित इति पूर्वन्यायापवादत्वमस्य न्यायस्य । अत्र च ज्ञापकम् "ऋतो रः स्वरेऽनि" [ २. १. २. ] इति सूत्रस्थमनीति पदम्, तेन हि तिस्रादिऋतो रादेशविधौ नकारविषयवर्जनं क्रियते, न च तिस्रादीनां कदापि नकारादिस्वरपूर्वत्वं सम्भवति, 'प्रियतिसृणः कुलात्' इत्यादौ हि पूर्वं स्यादौ प्रत्यये परे पूर्वन्यायबलात् तिस्रादेशापेक्षया नागमस्य बलवत्त्वेन नागमे कृते तद्व्यवधानाच्च स्यादिप्रत्ययपरत्वाभावेन तिस्रादेशाप्राप्तेः । न चागमस्य स्वाङ्गत्वेन * स्वाङ्गमव्यवधायि * इति न्यायेन कथं तत्कृतं व्यवधानमिति वाच्यम्, नागमो हि 'प्रियत्रि' इति समुदायस्याङ्गम्, तिस्रादेशश्च तदवयवभूतत्रिशब्दस्य विधेय इति तन्निरूपितस्वाङ्गत्वस्य नागमेऽभावेन व्यवधायकत्वाक्षतेः, तथा च नकारादिस्वरविषये तिस्रादेरभावेन व्यावर्त्त्यालाभादनीति नकारपर्युदासो व्यर्थः सन् न्यायममुं ज्ञापयति । ज्ञापिते चात्र न्याये सर्वादेशस्य तिसृरूपस्य नागमापेक्षया पूर्वं प्रवृत्तौ तत्सम्बन्धिन ऋकारस्य रादेशाभावायानीति पर्युदासस्य सार्थक्यम् । ननु नागमापेक्षया तिस्रादेशस्य परत्वेन परत्वादेव तिस्रादेशः स्यादिति नार्थोऽनेन न्यायेनेति वाच्यम्, नागमस्य तिस्रादेशात् पूर्वं तस्मिन् कृते च प्राप्तिरिति तस्य कृताकृतप्रसङ्गित्वेन नित्यत्वात् * परान्नित्यं बलवत् * इति न्यायाद् नागम एव स्यादिति तद्वारणस्य न्यायं विनाऽसम्भवात् । कृते च तिस्रादेशे यद्यपि परत्वाद् रादेशः प्राप्नोति तथापि 'अनि' इति विषयसप्तम्याश्रयणाद् रादेशप्राप्तिसमये नागमस्य प्राप्तिरस्तीति तद्विषयतायां रादेशाप्रवृत्तिर्भवति । अयं च न्यायः केनापि न बाध्यते इति स्थिर एव ॥ ५१ ॥

## *आगमात् सर्वादेशः* ॥ ५१ ॥

**त०**—पूर्वन्यायेनागमसामान्यस्यादेशसामान्यापेक्षया बलवत्त्वमुक्तम्, अनेन च न्यायेनादेशविशेषस्य सामान्यत आगमापेक्षया बलवत्त्वं बोध्यत इति पूर्वन्यायापवादोऽयमिति प्राचां रीतिमनुसृत्य व्याख्यातम् । अत्रेदं विचार्यते–'प्रियतिसृणः' इत्यादौ नागमात् पूर्वं तिस्रादेशसिद्धिरेतन्न्यायप्रयोजनम्, तत्र पाठकृतपरत्वेन तिस्रादेशः सिद्ध एव । न च पूर्वन्यायेनादेशापेक्षयाऽऽगमस्य प्राबल्यं बोधितमिति न परत्वमिह व्यवस्थापकं स्यादिति वाच्यम्, तस्य न्यायस्यानित्यत्वस्य पूर्वन्यायव्याख्यावसरे न्यासग्रन्थाशयमनुरुध्य प्रदर्शितत्वात् । न च कृताकृतप्रसङ्गित्वेन नागमस्य नित्यत्वमिति नित्यस्य परशास्त्रापेक्षया बलवत्त्वमिति नागम एव पूर्वं स्यान्न तिस्रादेश इति वाच्यम्, तदा नास्य न्यायस्य पूर्वन्यायापवादत्वं स्यात्, किन्तु *परान्नित्यं बलवत्* इति न्यायापवादत्वमेव वक्तव्यम्, न च तावतैव निस्तारः, तस्मिन् न्याये बाधितेऽपि पूर्वन्यायप्राप्तागमबलवत्त्वस्य निवृत्त्यर्थं तदनित्यत्वाश्रयणमपि कर्त्तव्यं स्यात्, तथा च पूर्वन्यायापवादतया तदग्रे लेखनमप्रासङ्गिकं स्यादिति न कोऽपि पन्थाः समीचीन इति चेत्? सत्यम्–पूर्वन्यायापवादत्वमेवास्तु; न्यासग्रन्थे 'द्वयोः कुलयोः' इत्यत्र पूर्वन्यायाप्रवृत्त्युक्त्यैकदेशादेशविषयेऽनित्यत्वसिद्धावपि सर्वादेशविषयेऽनित्यत्वस्यासिद्धत्वात् । न च नित्यत्वान्नागमः स्यादिति वाच्यम्, शब्दान्तरप्राप्त्या नागमस्यानित्यत्वात् । *कृताकृतप्रसङ्गिनित्यत्व*वत् *शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति* इत्यस्यापि न्यायस्य भाष्यकृदादिसम्मतत्वात् । पूर्वं हि 'प्रियत्रि' इत्यस्य नागमः प्राप्तः पश्चात् 'प्रियतिसृ' इत्यस्येति शब्दान्तरप्राप्तिः स्पष्टा तस्य । वस्तुतस्तूक्तरीत्या नित्यत्वस्याव्यवस्थापकत्वानिर्णयेऽपि तिस्रादेशस्यान्तरङ्गत्वमेव तस्य पूर्वप्रवृत्तौ व्यवस्थापकत्वं भविष्यति । न च कथं तस्यान्तरङ्गत्वमिति शङ्क्यम्, नाम्यन्तस्य नपुंसकस्य हि आमूवर्जे स्यादौ स्वरे परे नागमो विहित इति तस्याधिकापेक्षत्वेन बहिरङ्गत्वम्, तिस्रादेशस्य च त्रिशब्दस्यादिप्रत्ययोभयमात्रनिमित्तत्वात् । तथा च द्वयोः कुलयोरितिवत् परत्वादन्तरङ्गत्वाच्च व्यवस्थायाः कर्तुं शक्यत्वेऽपि न्यायाश्रयणं प्रपञ्चार्थमेवेति विभावनीयम् ॥ ५१ ॥

## *परान्नित्यम्* ॥ ५२ ॥

**सि०**—**बलवत्त्वप्रयोजकं तत्तत्प्रातिस्विकरूपमुक्त्वा सम्प्रति प्रकारान्तरेण बलवत्त्वं दर्शयितुमुपक्रमत एतदादिन्यायेन । तत्र "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषया पाठकृतपरत्वस्य बलवत्त्वं प्रतिपादितमिति तदपेक्षयापि नित्यस्य बलवत्त्वबोधकोऽयं न्याय इति तत्परिभाषाऽपवादत्वमस्य । अत्र ज्ञापकं च ओणेर्ऋदित्करणम्, तद्धि मा भवान् ओणिणदित्यत्र प्राप्तस्योपान्त्यह्रस्वत्वस्य निषेधार्थं कृतम्, ह्रस्वविधायके "उपान्त्यस्यासमानलोपिशास्वृदितो ङे" [ ४. २. ३५. ] इति सूत्रे ऋदितः पर्युदासेन तत्रोपान्त्यह्रस्वो न भवति, किन्तु तत्र कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वमेव "स्वरादेर्द्वितीयः" [ ४. १. ४. ] इति द्वित्वे ओकारस्योपान्त्यत्वाभावेन ह्रस्वाप्राप्तेस्तन्निवारणार्थमृदित्करणं व्यर्थमेव, व्यर्थं सद् ऋदित्करणम् 'अनित्योऽप्युपान्त्यह्रस्वो द्वित्वात् प्रागेव स्यात्' इति ज्ञापयति । तेन च स्वांशे चारितार्थ्यं द्वित्वात् प्राक् प्राप्तस्योपान्त्यह्रस्वस्य निवृत्त्या । फलं च मा भवान् अटिटदिति सिद्धिः, तथा हि-तत्रापि 'आटि' इति ण्यन्तस्य ङपरे णौ ह्रस्वात् पूर्वं यदि द्वित्वं स्यात् तर्हि आकारस्योपान्त्यत्वाभावे ह्रस्वाप्राप्तौ मा भवान् आटिटदिति रूपं स्यात्, ज्ञापिते चोपान्त्यह्रस्वस्य द्वित्वात् प्राक् प्रवर्तने रूपं मा भवानटिटदिति सिद्ध्यति । एतन्न्यायाभावे तु परत्वादेव द्वित्वात् पूर्वमुपान्त्यह्रस्वः प्रवर्तेतैवेति मा भवान् ओणिणदित्यत्रोपान्त्यह्रस्वव्यावृत्त्यर्थमोणेर्ऋदित्करणं सार्थकमेवेति ज्ञापकत्वासम्भवः । तथा चैतन्न्यायाशङ्कयैवौणेर्ऋदित्करणं कृतमित्येतन्न्यायस्य सत्त्वमनुमापयति । मा भवान् ओणिणत् मा भवान् अटिटदित्युभयत्रोपान्त्यह्रस्वकृतविशेषस्य स्फुटप्रतिपत्तये भवानिति पदं मध्ये प्रयुक्तमिति । उदाहरणं चास्य युष्मानस्मान् वा आचक्षाणेनेति विग्रहे 'युष्या, अस्या' इति, अत्र पराभ्यामपि त्वमाभ्यां प्राक् "टाङ्योसि यः" [ २. १. ७. ] इति मस्य यत्वं सिद्धम्, तथा हि–अत्र युष्मदस्मद्भ्यां णिजि "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इति 'अद्'भागस्य लुकि धातुत्वात् क्विपि "अप्रयोगीत्" [ १. १. ३७. ] इति तल्लुकि "णेरनिटि" [ ४. ३. ८३. ] इति णिज्लुकि नामत्वेन टाप्रत्यये "त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्" [ २. १. ११. ] इति त्व-मादेशौ "टाङ्योसि यः" [ २. १. ७. ] इति यत्वं च समकालमेव प्राप्नुतः, तत्र यद्यपि त्व-मादेशौ परौ तथापि यादेशस्य कृताकृतप्रसङ्गित्वेन नित्यत्वाद् यादेश एव भवति । यद्यपि त्व-मादेशात् पूर्वं 'युष्म अस्म्' एतयोर्मस्य यादेशः, त्व-मादेशयोः कृतयोस्तु तयोरकारस्येति शब्दान्तरप्राप्त्या यादेशस्य न नित्यत्वमिति कथयितुं शक्यते तथापि क्वचित् कृताकृतप्रसङ्गित्वमात्रेणापि नित्यत्वमिति पक्षमाश्रित्योदाहरणसंगतिरास्थेया । इति प्राचां वृत्तिकृतामाशयः । स्वमतं तु विवरणे स्पष्टम् ॥ ५२ ॥**

## *परान्नित्यम्* ॥ ५२ ॥

**त०**—नित्यमपि द्विर्वचनं प्रबाध्योपान्त्यह्रस्वः प्रथमं स्यादिति ज्ञापनार्थं कृतेनोणेर्ऋदित्करणेनायं न्यायो ज्ञाप्यत इति वृत्तौ प्रदर्शितम् । तत्रेदं विचार्यते–ओणेर्ऋदित्करणस्य वैयर्थ्यं कथम्?

साम्प्रतं नास्त्ययं न्यायः, द्वित्वात् परत्वादुपान्त्यह्रस्वे प्राप्ते तन्निवारणायोणेर्ऋदित्करणमर्थवदिति कथं तज्ज्ञापयिष्यति? । किञ्चासत्यस्मिन् न्याये 'मा भवानटिटत्' इत्यत्रापि परत्वाद् द्वित्वं प्रबाध्योपान्त्यह्रस्व एव स्यादिति तत्सिद्धौ निराबाधायाम् 'अनित्योऽप्युपान्त्यह्रस्वो द्वित्वात् प्रागेव, इति ज्ञापनस्यापि नावश्यकता, तद् विनापि क्षत्यभावादिति कथमस्य न्यायस्य ज्ञापनं सम्भाव्यते । यदि चोपान्त्यह्रस्वो बहिरङ्गः, ङपरे णौ विधानेनाधिकापेक्षत्वात्, द्वित्वं तु केवलं ङमेव निमित्तत्वेनाश्रयतीत्यन्तरङ्गमित्यन्तरङ्गत्वाद् द्वित्वे कृते नोपान्त्यह्रस्वप्राप्तिरिति तस्य [ ओणेर्ऋदित्करणस्य ] वैयर्थ्यमित्युच्यते, तावतापि *परान्नित्यम्* इत्यत्र तस्य ज्ञापकत्वं कथं सेत्स्यति । बहिरङ्गोऽप्युपान्त्यह्रस्वो द्वित्वात् प्रागेवेति ज्ञापयितुं शक्नोति, तावतैव 'मा भवानटिटत्' इत्यस्यापि सिद्धिः सम्भवति । इत्थं च नायं न्यायो ज्ञापकसाध्य इत्येव विचारपथमवतरति । ननु तर्हि परापेक्षया नित्यस्य बलवत्त्वं यत् प्रसिद्धं तस्य को हेतुरिति चेत्? अत्रोच्यते—कृताकृतप्रसङ्गित्वमेव तस्य बलवत्त्वे हेतुरिति । तथा च तत्रानुमानप्रयोगः—'नित्यं शास्त्रं बलवत् कृताकृतप्रसङ्गित्वात्' इति । नन्वेवमन्तरङ्गशास्त्रापवादशास्त्रापेक्षयाऽपि तस्य बलवत्त्वं स्यादिति चेत्? न—'बहिरङ्गत्वोत्सर्गत्वरहितत्वे सति' इति पक्षविशेषणदानेनादोषात् । तथा च बहिरङ्गोत्सर्गशास्त्रभिन्नं नित्यं शास्त्रं बलवदिति समायाति । न च कृताकृतप्रसङ्गित्वमस्तु बलवत्त्वं माऽस्त्विति व्यभिचारशङ्कायां तन्निवर्त्तकोऽनुकूलस्तर्को नास्तीति वाच्यम्, अक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावकस्यैवाभावकल्पनमुचितमित्यस्यैव तर्कस्य व्यभिचारशङ्कानिवर्त्तकत्वात् । अयमाशयः—अनित्यशास्त्रस्य हि कदाचिदभावः क्लृप्त एव, यदि नित्यत्वेनाभिमतं शास्त्रं प्रवृत्तं तदा तस्य प्रवृत्त्यभावात् । नित्यत्वेनाभिमतं च शास्त्रमक्लृप्ताभावकं तस्यानित्यशास्त्रे कृतेऽकृते च प्राप्तत्वादिति यस्य कदाचिदभावः सिद्ध एव तस्यैवाभावः कल्पनीयो लाघवात्, यस्य चासिद्धोऽभावस्तस्याभावकल्पने गौरवमिति लाघवानुगृहीतोऽयं तर्कः । न चानित्यशास्त्रस्य परत्वे तस्य च "स्पर्धे" [ ७. ४. ११९. ] इति शास्त्रेण बाधबोधनात् कृताकृतप्रसङ्गित्वरूपहेतोर्बाधितत्वमिति वाच्यम्, अनेनानुमानेन नित्यस्य प्राबल्यबोधने कृते तुल्यबलत्वाभावेन तुल्यबलयोरेकत्र समावेशरूपस्पर्धाभावेन "स्पर्धे" [ ७. ४. ११९. ] इति शास्त्रस्याप्राप्तेः । न च नित्यस्य बलवत्त्वमनुमितम्, परस्य च बलवत्त्वं "स्पर्धे" [ ७. ४. ११९. ] इति शास्त्ररूपप्रमाणसिद्धमित्यनुमितापेक्षया श्रुतस्य बलवत्त्वेन कृताकृतप्रसङ्गित्वरूपहेतोर्बाधादुक्तानुमानासिद्धिरिति वाच्यम्, स्पर्धसिद्ध्यर्थं सूत्रस्यानुमानापेक्षायाः सत्त्वेन पूर्वं सूत्राप्रवर्त्तत्वाद्धेतोरबाधितत्वादित्यास्तां विस्तरेण । परिष्काररसिकास्त्वत्रैवं परिष्कुर्वन्ति—स्वविशिष्टं शास्त्रं स्वापेक्षया बलवत्, उभयत्र वैशिष्ट्यं स्वप्रवृत्तिप्राक्कालिकप्राप्तिकत्व-स्वप्रवृत्त्युत्तरकालिकप्राप्तिकत्व-स्वनिष्ठान्तरङ्गानिरूपकत्व-स्वनिष्ठापवादत्वानिरूपकत्वैतच्चतुष्टयसम्बन्धेनेति सम्बन्धद्वयेन कृताकृतप्रसङ्गित्वं संगृहीतम्, तृतीयचतुर्थाभ्यां च सम्बन्धाभ्यां नित्यापेक्षयाऽन्तरङ्ग-बहिरङ्गयोर्बलवत्त्वं च संगृहीतम्, अत्र च केवलं पक्ष-साध्ययोर्निर्देशः, हेतुस्तु कृताकृतप्रासङ्गित्वरूप एव, तत्र चापतिता दोषाः पूर्ववत् परिहार्याः । अथास्य 'युष्या, अस्या' इति यदुदाहरणमुक्तं प्राचीनैस्तत्र विचार्यते—युष्मानस्मान् वाऽऽचक्षाणेनेति विग्रहे त्व-मादेशयोः प्राप्तिरेव नास्तीति कुतस्ताभ्यां सह यादेशस्य बलाबलविचारः, त्व-मादेशौ हि एकत्वार्थप्रतिपादकयोरेव युष्मदस्मदोर्भवत इति स्पष्टमुक्तं वृत्त्यादिषु, ततश्चात्र कस्यचन परशास्त्रस्याप्राप्त्या स्वत एव यादेशेनैव भवितव्यमिति नेदमुदाहरणं संगच्छते । तथा च 'तुदति' इत्याद्येव तदुदाहरणमुचितम्, अत्र हि परमपि "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इति गुणं प्रबाध्य नित्यत्वात् "तुदादेः शः" [ ३. ४. ८१. ] इति शप्रत्यय एव भवति, सति च तस्मिन् "शिदवित्" [ ४. ३. २०. ] इति ङिद्वद्भावान्न गुणः । तथा च न्यायस्य साफल्यमिति ॥ ५२ ॥

## *नित्यादन्तरङ्गम्* ॥ ५३ ॥

**सि०—नित्यादपि बहिरङ्गशास्त्रादनित्यमप्यन्तरङ्गशास्त्रं बलवत् । अस्य न्यायस्य सूचकश्च "आशीः" [ २. ३. १३. ] इति सूत्रनिर्देश एव । तथा हि—तत्र "आशिस्"शब्दात् सौ तस्य लोपे सो रुत्वे विसर्गः "पदान्ते" [ २. १. ६४. ] इति दीर्घश्च प्राप्नुतः, विसर्गश्च कृतेऽकृते च दीर्घे भवतीति कृताकृतप्रसङ्गित्वेन नित्यः, स च परमपि दीर्घं बाधित्वा प्रवर्त्तेत यद्ययं न्यायो न स्यात्, सति चास्मिन् न्याये पूर्वव्यवस्थितनिमित्तत्वेनान्तरङ्गत्वाद् दीर्घ एव भवति, ततो विसर्गे कृते च दीर्घस्याप्राप्तेर्नासौ निर्देशः सिद्ध्येत । एतन्न्यायाभावे च नित्यत्वात् पूर्वन्यायसहकारेण विसर्गो दुर्वार इत्यनुपपद्यमानो दीर्घनिर्देशोऽयं न्यायं ज्ञापयति । फलं च येजुः योपुरित्यादौ यज्-वपोः परोक्षायामुसि *य्वृद् य्वृदाश्रयं च* इति न्यायात् प्रथमं य्वृति ततो द्वित्वे पदद्वयापेक्षत्वेन बहिरङ्गं नित्यमप्येत्वमोत्वं च प्रबाध्य एकपदाश्रयत्वेनान्तरङ्गत्वाद् दीर्घ एव भवति, तत एत्वमोत्वमिति सिद्ध्यतीष्टं रूपमिति । अयं चाग्रेतनेन न्यायेन बाध्यमानत्वादनित्यः ॥ ५३ ॥**

## *नित्यादन्तरङ्गम्* ॥ ५३ ॥

त०—पूर्वव्यवस्थितस्थानिकत्वरूपमन्तरङ्गत्वमादाय दीर्घस्येह विसर्गापेक्षया बलवत्त्वं स्वीकृत्य "आशीः" [ २. ३. १३. ] इति निर्देशसिद्धिराश्रिता, नन्वङ्गपदेन स्थानिनिमित्तादिसकल-

संप्रहाद् दीर्घनिमित्तस्य रेफस्य, दीर्घस्थानिनः, पदान्तत्वस्य च दीर्घे समाश्रयणात्, विसर्गे च रेफस्य पदान्तत्वस्य चेति द्वयस्यैव समाश्रयणाद् विसर्गापेक्षया दीर्घस्यैवाधिकापेक्षत्वेन बहिरङ्गत्वौचित्यम्, तथा च नास्य निर्देशस्य संगतिरित्युच्यते चेत् ?, न—अधिकापेक्षत्वेन बहिरङ्गत्वस्य *असिद्धं बहिरङ्गमन्तरङ्गे* इति न्यायव्याख्यावसरे प्रतिषिद्धत्वात्। वस्तुतस्तु नात्र ज्ञापकापेक्षा, बहिरङ्गापेक्षयाऽन्तरङ्गस्य प्राबल्यं पूर्वन्यायेन—*असिद्धं बहिरङ्गम्* इत्यनेनैव सिद्धमिति तदेव नित्यादप्यन्तरङ्गस्य बलवत्त्वे बीजं भविष्यतीत्यलं ज्ञापकान्वेषणेन ॥ ५३ ॥

## *अन्तरङ्गाच्चानवकाशम्* ॥ ५४ ॥

**सि०**—अनवकाशत्वं च तदप्राप्तियोग्येऽचारितार्थ्यमेव, तथा च यदप्राप्तियोग्ये यस्याचारितार्थ्यं तस्मादन्तरङ्गादपि, तद् बहिरङ्गमपि बलवदिति न्यायार्थः। अत्र च ज्ञापकं तत्तदनवकाशशास्त्रकरणमेव। यदि हि व्यापकानां शास्त्राणां प्रवृत्तिः स्यात् तर्हि व्याप्यभूतानामवकाशाभावात् तत्प्रणयनवैयर्थ्यमेव स्यादिति प्रणयनसार्थक्याय तस्य बलवत्त्वमाश्रीयते। यथा—"त्वमहं सिना प्राक् चाकः" [ २. १. १२. ] इति सूत्रेण "त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्" [ २. १. ११. ] इत्यस्य प्राप्तिविषयभूत एव त्वमहमादेशौ विधीयेते, तत्र यदि "त्व-मौ प्रत्ययोत्तरपदे०" [ २. १. ११. ] इति सूत्रमन्तरङ्गत्वात् प्रवर्तेत तर्हि त्वमहमोरवकाशाभावेन तयोर्विधानं व्यर्थमेव स्यात्। त्व-मादेशयोरन्तरङ्गत्वं तु प्रकृतिमात्रादेशत्वात्, त्वमहमादेशौ तु सिना सह प्रकृतेः स्थाने भवत इति प्रकृतिप्रत्ययोभयापेक्षाविति बहिरङ्गौ। तथा चानवकाशत्वात् तौ त्व-मादेशौ बाधेते इति तेन चायं न्यायः फलति। तथा च नात्र ज्ञापकत्वमस्य, किन्तु स्वत एव बाधकत्वम्। प्रकृतन्यायस्तु *येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति* इति न्यायमूलक एव। उदाहरणं चास्य 'त्वम्, अहम्' इति स्पष्टमेव ॥ ५४ ॥

## *उत्सर्गादपवादः* ॥ ५५ ॥

**सि०**—उत्सर्गः-सामान्यशास्त्रम्, अपवादः-विशेषशास्त्रम्, तथा च सामान्यशास्त्रापेक्षया विशेषशास्त्रं बलवदिति न्यायार्थः। अस्य ज्ञापकं च "पुंनाम्नि घः" [ ५. ३. १३०. ] इति घप्रत्ययेन सिद्धौ "गोचर-संचर-वह-व्रज-व्यज-खला-पण-निगम०" [ ५. ३. १३१. ] इति सूत्रेण गोचरादीनां निपातनम्, तद्धि "व्यञ्जनाद् घञ्" [ ५. ३. १३२. ] इति सूत्रेण प्राप्तस्य घञो बाधनार्थं क्रियते, अयं च घञ् व्यञ्जनान्ताद्धातुसामान्यात् क्रियत इत्युत्सर्गः, निपातनं च विशेषतस्तत्तच्छब्दानां क्रियत इति विशेषः, परन्तु "पुंनाम्नि घः" [ ५. ३. १३०. ] इति घश्च घञोऽपि सामान्यविहितः, व्यञ्जनान्तादव्यञ्जनान्तात् सर्वस्मादेव विधानात्, स च घञा बाधिष्यत इत्याशङ्कया घान्ता इमे निपात्यन्ते। तच्चैतन्न्यायाभावे व्यर्थमेव स्यादिति स्वसार्थक्याय न्यायमिमं ज्ञापयतीति प्राचीनाः। वस्तुतस्तु पूर्वन्यायेनापि घञोऽनवकाशतयैव बाधकत्वं प्राप्तमिति तद्वारणायैव निपातनमिदमित्यपि कल्पयितुं शक्यते। न च पूर्वन्यायेनान्तरङ्गापेक्षयाऽनवकाशस्य बलवत्त्वं बोध्यते, नोत्सर्गापेक्षयेति वाच्यम्, अन्तरङ्गादपि शास्त्रादनवकाशशास्त्रं बलवदित्येव तस्य तात्पर्यात्। यदा चान्तरङ्गादपि च व्यापकशास्त्रादनवकाशस्य बलवत्त्वं तेन बोधितं तर्हि का कथा अन्तरङ्गत्वादिबलवत्त्वप्रयोजकहेतुरहितादुत्सर्गशास्त्रादिति कैमुतिकन्यायेनैवानवकाशस्य सर्वबाधकत्वौचित्यात्। अस्ति च सर्वत्र पुंसि नाम्नि घप्रत्ययप्रसङ्गे "व्यञ्जनाद् घञ्" [ ५. ३. १३२. ] इत्यस्यानवकाशत्वं सुस्थम्। फलं चास्य 'आपचन्त्यस्मिन्नित्यापाकः' इत्यत्र पुंनाम्नि घं प्रबाध्य व्यञ्जनान्तत्वनिमित्तो घञेव भवतीति। वस्तुतस्तु नैतौ न्यायौ मूलतः पृथगिति प्रतिपादयिष्यते विवरणे। तथा च यथा पूर्वन्याये न ज्ञापकापेक्षा तथेहापीति ॥ ५५ ॥

### *अन्तरङ्गाच्चानवकाशम्* ॥ ५४ ॥
### *उत्सर्गादपवादः* ॥ ५५ ॥

**त०**—एतौ न्यायौ सहैव विव्रियेते, उभयोरपि समानफलत्वान्मतान्तरेणैकरूप्याच्च। बाधकत्वबीजानि *येन नाप्राप्तौ यो विधिरारभ्यते स तस्यैव बाधको भवति* इति न्यायव्याख्यावसरे प्रदर्शितान्येव। तानि चानवकाशेष्वपवादेषु च समानतयैव लगन्ति, अनवकाशत्वमपि केनचिच्चारितार्थ्यविघातरूपमेव, एतावान् विशेषः—अनवकाशस्थले तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते चारितार्थ्यरूपं बाधकत्वबीजं न भवति, उत्सर्गापवादस्थले तु तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते चारितार्थ्येऽपि बाधकत्वं भवति। चर्चितं चेदं परिभाषेन्दुशेखरे नागेशेन, तत्र च बाध्यसामान्यचिन्तापक्षो बाध्यविशेषचिन्तापक्षश्चेति पक्षद्वयमुक्तम्। तथाहि—"येन नाप्राप्ते" इत्यत्र येनेत्यस्य यदि स्वेतरेणेत्यर्थः, तदा स्वविषये यद् यत् प्राप्नोति तद् बाध्यं, विध्यन्तराप्राप्तविषयत्वाभावात्। इयमेव बाध्यसामान्यचिन्तेति व्यवह्रियते, अनवकाशत्वेन बाधकत्वेऽप्येषा वक्तुं युक्ता, यद्युदाहरणमस्ति, विनिगमनाविरहात्। यदि तु येनेत्यस्य लक्षणेनेत्यर्थः कार्येणेत्यर्थो वा तदा बाध्यविशेषचिन्ता। अनवकाशत्वेनऽबाधेऽप्येतद्बाधेन सार्थकमुत तद्बाधेनेत्येवं विशेषचिन्ता संभवति, यद्युदाहरणमस्ति।" इति। एतद्ग्रन्थस्य चायमाशयः—यद् *येन नाप्राप्त*न्यायेना-

नवकाशत्वेन वा बाधे उभयोः पक्षयोः बाध्यसामान्यचिन्ता–बाध्यविशेषचिन्तापक्षयोः सम्भवे सत्यपि *येन नाप्राप्त*-न्यायेन बाधे यथोभयोः पक्षयोः स्पष्टतयोदाहरणानि मिलन्ति तथाऽनवकाशत्वेन बाधे न मिलन्ति, *येन नाप्राप्त*न्यायेनाऽवकाशे सत्यसति च बाधः, अनवकाशत्वेन बाधे चावकाशाभाव एवेत्युभयोः पक्षयोः पार्थक्यमिति विवेकः । तथा च *अन्तरङ्गाच्चानवकाशम्* इति न्यायो न *येन नाप्राप्त* न्यायेन गतार्थः । *उत्सर्गादपवादः* इति न्यायश्च *येन नाप्राप्त०* न्यायसूचितबाधकत्वस्यैवानुवादक इति तस्यैव प्रपञ्चः । पाणिनीयेऽपि परिभाषेन्दुशेखरीयमुद्रितपुस्तकेषु *अन्तरङ्गादप्यपवादो बलीयान्* इति न्यायः *येन नाप्राप्त०* न्यायश्च क्वचित् स्वातन्त्र्येण पृथगुल्लिखितौ, क्वचिच्च पूर्व एव न्यायो लिखितो *येन नाप्राप्त०*न्यायश्च तत्र बीजप्रदर्शकत्वेन वर्णितः, व्याख्यानं चोभयोः सहैवोपलभ्यते । स्वमते च *येन नाप्राप्त०* न्याय एवकारघटित उपलभ्यते, तस्मिन् तन्त्रे च एवकारो न पठ्यते । तथा च स्वमते बाध्यविशेषचिन्तापक्ष एव, तन्मते चोभौ पक्षौ सम्मतौ–बाध्यविशेषचिन्तापक्षो बाध्यसामान्यचिन्तापक्षश्च । तथा च स्वमते *येन नाप्राप्त०*न्यायात् पृथक् *उत्सर्गादपवादः* इति न्यायलेखनस्यावश्यकताऽस्त्येव । तथा च *अन्तरङ्गाच्चानवकाशम्* इत्यस्याप्यावश्यकत्वमेव, पाणिनीयतन्त्रे च नास्य न्यायस्य पृथक् सत्तोपलभ्यते, अपवादत्वेनानवकाशस्यापि सङ्ग्रहात् । स्वमतेऽपि तत् कर्तुं शक्यते, किन्तूभयोरपवादत्वयोर्विद्यमानं सूक्ष्ममन्तरं [ भेदं ] ग्राहयितुं पृथगुपन्यासो युक्त एवेत्यलमधिकगवेषणया ॥ ५५ ॥

## *अपवादात् क्वचिदुत्सर्गोऽपि* ॥ ५६ ॥

**सि०—पूर्वन्यायेनोत्सर्गादपवादस्य बलवत्त्वे बोधिते लक्ष्यानुरोधात् क्वचिदस्य वैपरीत्यमप्याश्रयणीयमित्यनेन न्यायेनोच्यते । क्वचिदिष्टस्थलेऽपवादशास्त्रादुत्सर्गशास्त्रमपि बलीयो भवतीति न्यायार्थः । एतच्च लक्ष्यानुरोधादेवाचार्येण वचनरूपेण पठितं, नातोऽत्र ज्ञापकापेक्षा । अस्य च न्यायस्य स्वीकारादेव ‘मखः, मठः’ इत्यादयः प्रयोगाः सिद्ध्यन्ति, तथाहि–मखन्ति–स्वर्गं गच्छन्त्यनेनेत्यर्थे “मख गतौ” इत्यस्माद्धातोः, मठन्ति–निवसन्ति छात्रादयोऽस्मिन्नित्यर्थे “मठ निवासे” इत्यस्माद्धातोश्च क्रमशः करणाधिकरणयोरर्थयोः “व्यञ्जनाद् घञ्” [ ५. ३. १३२. ] इति घञ् प्राप्तः, स च “पुंनाम्नि घः” [ ५. ३. १३०. ] इत्यस्यापवादभूतस्तथापि प्रकृतन्यायबलेन घ एव भवति, न तु घञ् इति । अस्य च क्वचिदित्युक्त्या इष्टस्थलमात्रे प्रवृत्तिरिति न लक्ष्यानुरोधेनानित्यताश्रयणावश्यकत्वम्, अनित्यताया एतन्न्यायस्वरूप एवान्तर्भावात् ॥ ५६ ॥**

## *अपवादात् क्वचिदुत्सर्गोऽपि* ॥ ५६ ॥

**त०**—ननु कृते चारितार्थ्ये सति यो बाधकः स एवापवादशब्दशक्यः, अत्र च तस्योत्सर्गेण बाध्यत्वेऽपवादत्वमेव नास्तीति कथमत्रापवादशब्दप्रयोग इति चेत् ? न–अपवादशब्दोऽत्र बाधकत्वेनान्यत्र व्यवहृतशास्त्रपरः, तथा च यत् प्रति यस्य बाधकत्वं क्वचिद् दृष्टं तदपि तेन क्वचिद् बाध्यत इति न्यायतात्पर्यात् । पाणिनीये तन्त्रेऽपि *क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते* इति न्याय एतन्न्यायसमानविषय इव दृश्यते । यश्च कश्चन भेदः स तद्व्याख्यायां परिभाषेन्दुशेखरे स्पष्टः । तस्यायमाशयः–अपवादशब्दोऽत्र बाधकपरः, क्वचिदित्यस्य च सर्वथा निरवकाशस्थले इत्यर्थः । तथा च सर्वथानिरवकाशरूपबाधकस्थलेऽप्युत्सर्गशास्त्रं प्रवर्त्तत इति न्यायार्थः । तथा च उत्सर्गशास्त्रे कृतेऽपवादशास्त्रस्य चारितार्थ्ये सति क्वचिदपवादविषयेऽप्युत्सर्गः प्रवर्त्तत इति फलतीति । स्वमते च *अपवादात् क्वचिदुत्सर्गोऽपि* इत्युक्त्या तत्रोत्सर्गशास्त्रस्यैव बलवत्त्वं बोध्यते, न त्वपवादशास्त्रस्य तत्र प्रवृत्तिरिति लभ्यते । अनयोर्युक्तायुक्तत्वविचारश्च न संभवति, उभयोः स्वप्रक्रियानुसारं प्रवृत्तत्वात्, तदनुसारमुभयोः साधुत्वाचेति संक्षेपः ॥ ५६ ॥

## *नानिष्टार्था शास्त्रप्रवृत्तिः* ॥ ५७ ॥

**सि०—अर्थशब्दोऽत्र चतुर्थ्यर्थः, अनिष्टायेयमित्यर्थेऽर्थशब्देन सह “तदर्थार्थेन” [ ३. १. ७२. ] इति सूत्रेण चतुर्थ्यन्तानिष्टशब्दस्य तत्पुरुषसमासः, तस्य च विशेष्यलिङ्गत्ता “ङेऽर्थो वाच्यवत्” [ १३४ ] इति लिङ्गानुशासनसूत्रेण शिष्टेति शास्त्रप्रवृत्तेर्विशेष्यतया तस्य स्त्रीत्वम् । अयं च नित्यसमासः, ‘अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा’ इति तल्लक्षणात्, अत्र च अनिष्टायेति कथनेनैवार्थशब्दार्थोऽप्युक्त इति तदर्थकवाक्यासम्भवेन विग्रहासम्भवात्, वृत्त्यर्थावबोधकवाक्यस्यैव विग्रहवाक्यत्वात् । तथा चानिष्टाय शास्त्रस्य प्रवृत्तिर्न भवतीति न्यायार्थः । शास्त्रशब्देन चेह शासनकरणमुच्यते, तच्च स्वमते सूत्रं न्यायश्चेत्यनयोरिष्टसिद्ध्यर्थमेव प्रवृत्तिर्नानिष्टसिद्ध्यर्थमिति भावः । नात्र ज्ञापकापेक्षा, किन्तु साध्वनुशासनेऽस्मिन् शास्त्रे साधूनामेवानुशास्यत्वेन शिष्टैः प्रयुक्तानामेव लक्ष्यत्वात्, शिष्टैरप्रयुक्ताश्चासाधवोऽलक्ष्या इति तत्र शास्त्रप्रवृत्तेरनौचित्यमेवैतन्न्यायमूलम् । तत्र सूत्रस्यानिष्टार्थाऽप्रवृत्तिर्यथा–नयतेर्गिस्वात् फलस्य कर्तृगामित्वविवक्षायाम् “ईगितः” [ ३. ३. ९५. ] इत्यात्मनेपदसिद्धावपि “कर्तृस्थामूर्त्ताप्यात्” [ ३. ३. ४०. ] इत्यनेन नयतेर्यदात्मनेपदविधानं तन्नियमार्थम्, नियमस्वरूपञ्चेदम्–कर्तृस्थामूर्त्ताप्यादेव नयतेरात्मनेपदं स्यात्, यथा ‘श्रमं विनयते’ इत्यत्र, अत्र च शमयतीत्यर्थः । नियमानुरोधेन, च कर्तृस्थामूर्त्ताप्यत्वाभावे फलवत्कर्त्तर्यपि न स्यात्, यथा-**

चैत्रस्य मन्युं विनयति, गडुं विनयति, बुद्ध्या विनयतीति, अयं च नियमः शमयतिक्रियार्थस्यैव नयतेर्ज्ञेयो न त्वन्यार्थस्य शिष्टप्रयोगानुरोधात् । ततश्चैवं व्यवस्था सिद्ध्यति-शमयतिक्रियार्थान्नयतेर्यद्यात्मनेपदं स्यात् तदा कर्तृस्थामूर्त्ताप्यत्वसद्भावे एव, न तु तदभावे फलवत्कर्तृविवक्षायामपीति । ततश्च शमयतिक्रियातोऽन्यार्थे वर्तमानान्नयतेः फलवत्कर्तृत्वविवक्षाऽविवक्षाभ्यामात्मनेपद-परस्मैपदे सर्वत्र सिद्धे, यथा–अजां ग्रामं नयति नयते वा । एवमन्यत्रापि शिष्टप्रयोगानुरोधेन सूत्रस्याप्रवृत्तिर्विज्ञेया, यथा–'श्रीआदिनाथ' इत्यादिशिष्टप्रयोगस्थले यत्वस्याप्रवृत्तिरिति । न्यायस्य यथा–*लोपात् स्वरादेशः*इति न्यायः 'चिकीर्ष्यते' इत्यादौ न प्रवर्त्तते, एतच्च तन्न्यायव्याख्यावसर एव प्रतिपादितम् । अयमपि च न्यायोऽनैकान्तिक इति "इदमदसोऽक्येव" [ १. ४. ३. ] इत्यत्रानिष्टनियमापोहार्थमेवकारप्रयोगः सार्थकः, तथाहि–प्रकृतसूत्रस्य नियामकत्वमेवकारं विनापि सिद्धम्, यतः 'इमकैः, अमुकैः' इत्यत्र "भिस ऐस्" [ १. ४. २. ] इत्यनेनैव ऐसि सिद्धे पुनरनेनैसो विधानं नियमार्थमेव, सिद्धे सत्यारभ्यमाणस्य विधेर्नियमार्थत्वस्वाभाव्यात्, किन्तूभयथा नियमसंभावना, तथाहि–इदमदस एवाकि भिस ऐस्, न त्वन्यशब्देभ्य इत्येकः, इदमदसोऽक्येव सति भिस ऐस्, न त्वकोऽभावे इति द्वितीयः, तत्राद्यो नेष्टः, तकैर्विश्वकैरित्यादौ भिस ऐस्भावापत्तेः, द्वितीय इष्टः, एभिरमीभिरित्यादौ भिस ऐसोऽदर्शनात् । ततश्चाभीष्टनियमसिद्ध्यर्थमेवाक्येवेत्येवकारः पठितः । यदि चायं न्याय ऐकान्तिकः स्यात् तर्हि न्यायबलादेवाभीष्टनियमसिद्धौ तदर्थमेवकारपाठो न कर्त्तव्य एव, पश्यति त्वाचार्योऽस्य न्यायस्यानैकान्तिकत्वमित्येतदर्थमेवकारं पठतीति ॥ ५७ ॥

इति न्यायसमुच्चयस्य प्रथमोल्लासे कलिकालसर्वज्ञेन
भगवता श्रीहेमचन्द्रसूरीश्वरेण समुच्चितानां
सप्तपञ्चाशतो न्यायानां तपोगच्छाधिपति-
सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीम-
द्विजयनेमिसूरीश्वरपट्टालङ्कारेण
'व्याकरणवाचस्पति-शास्त्र-
विशारद-कविरत्न'इति पदा-
लङ्कृतेन विजयलावण्य-
सूरिणा विरचिता
न्यायार्थसिन्धु-
नाम्नी वृत्तिः ॥

*नानिष्टार्था शास्त्रप्रवृत्तिः* ॥ ५७ ॥

**त०**—उत्सर्गापवादशास्त्रैर्हि सकलमिदं शब्दशास्त्रं व्याप्तम्, तत्र लक्ष्यैकचक्षुष्कैराचार्यैर्यथासम्भवं प्रयुक्तानां शब्दानामर्थावबोधनाय शास्त्रमात्रप्रक्रियानिर्वाहकः प्रकृतिप्रत्ययादिविभागस्तत्तदर्थविभागश्च कल्पितः, तदनुसारीणि च लक्षणानि निर्मितानि, परमतिमहतः शब्दप्रयोगविषयस्य सम्यक्तया लक्षणैरनुशासनं दुष्करमिवेति समाकलय्य स्वशास्त्रादावेवास्य विषयस्यानैकान्तिकत्वं दर्शितं "सिद्धिः स्याद्वादात्" [ १. १. २. ] इति सूत्रेण, तदेवानैकान्तिकत्वमनेन न्यायेनाप्यनूद्यते । एतेन च यथासम्भवमिष्टप्रयोगानुसारमेव शास्त्रप्रवृत्तिरिति प्रतिपाद्यते । अन्येष्वपि हि वैयाकरणतन्त्रेष्वीदृशस्य वचनस्योपलब्धिर्दृश्यते । पाणिनीयतन्त्रेऽपि "यथालक्षणमप्रयुक्ते" इति भाष्यकारेण तत्र तत्रोद्घोष्यते, तस्य च द्विविधा व्याख्या क्रियते स्वयमेव–"अप्रयुक्ते शब्दे लक्षणानुसारमेव व्यवस्था कार्या" इति "नैव वा लक्षणमप्रयुक्ते प्रवर्त्तते, प्रयुक्तानामेव लक्षणेनान्वाख्यानात्" इति च । तत्र द्वितीयव्याख्यायामप्रयुक्तशब्दोऽनिष्टप्रयोगपरः, तथा चानिष्टप्रयोगसाधनाय शास्त्रप्रवृत्तिर्नोचितेति तदभिप्रायः । एतन्न्यायबलादेव "कर्तृस्थामूर्त्ताप्यात्" [ ३. ३. ४०. ] इत्यत्र शमयतिक्रियार्थादेव नयतेरित्यर्थो लभ्यते । यद्यपि बृहद्वृत्तावेतदर्थं नायं न्याय आहृतः, तत्र हि–'शमयतिक्रियावचनादेव नयतेरात्मनेपदं दृश्यते न प्रापणार्थात्' इत्युक्तम्, तथापि तस्यापि ग्रन्थस्यैतन्न्यायसहकारेणैव तादृशार्थो लभ्यत इति तात्पर्यमेषितव्यम् । प्रकृतबृहद्वृत्तिग्रन्थेन च शमयतिक्रियातोऽन्यार्थान्नयतेः फलवत्कर्तृविवक्षायामपि नात्मनेपदमित्येव लभ्यते । तथाहि-तत्र शमयतिक्रियातोऽन्यार्थे सर्वं परस्मैपदविषयमेवोदाहरणं प्रदत्तम्, "यथा शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतीम् । विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥" इति [ किरातार्जुनीये द्वितीयसर्गे ], अत्र "विजितक्रोधरया जिगीषवः गरीयसीम् अदूषितायतीं फलनिष्पत्तिं विगणय्य पौरुषं शिवमौपयिकं नयन्ति" इत्यर्थेऽभिधेये पौरुषस्योपायभावप्राप्तेः फलं कर्तृगाम्येवेति, तथापि नात्मनेपदमित्यभिप्रायः, 'यथा च कोपं शमं नयति, मन्युं नाशं नयति, प्रज्ञां प्रवृद्धिं नयति, बुद्धिं क्षयं नयति' इत्याद्युदाहरणेष्वपि फलवत्कर्तृत्वं स्पष्टमेवेति ॥ पाणिनीये तन्त्रे त्वेतादृशस्थले फलवत्कर्तृत्वाविवक्षया परस्मैपदं साधितम् । अस्यानैकान्तिकत्वं यदुक्तं वृत्तौ तत् प्राचामनुसारेण, वस्तुतस्तु नास्यानैकान्तिकत्वमेष्टव्यम् "इदमदसोऽक्येव [ १. ४. ३. ] इति सूत्रे एवकारसार्थक्याय हि न्यायस्यास्यानित्यत्वमिष्यते, नायं न्यायः कृतस्य वचनस्यानर्थक्याय यतेत, स्वयमेवानिष्टार्थवारणाय प्रवृत्तत्वात् । किञ्च शास्त्रस्यैवानिष्टप्रवृत्तिभयं

वारयति, शास्त्रत्वं च सूत्रन्याययोरेव स्वमते इति प्रतिपादितं पूर्वम्, ततश्च नियमस्यानिष्टार्थत्ववारणं नानेन कर्तुं शक्यत इतीष्टनियमबोधनाय सार्थक्यमेवकारस्येति तेन नास्य न्यायस्यानित्यत्वं साधयितुं शक्यते । किञ्च तत्र "नेदमसोरकि" इत्यपि न्यासः कर्तुं शक्यते, इदमदसोरकि सति भिस ऐस् नेत्यर्थेनैवेष्टसिद्धेरिति तदर्थमेवकारस्यानुपयुक्तत्वमेवेति न तेन न्यायानित्यत्वज्ञापनमुचितम् । न च तथैव न्यासः कुतो न कृतः, तथा सति सार्धमात्रालाघवमपीति वाच्यम्, विधिप्रकरणत्वेन तन्निर्वाहाय विधेरेवाश्रयणीयत्वौचित्यात् । न च नियमसूत्राणां निषेधमुखेन प्रवृत्तिरिति नियमेऽकृतेऽपि निषेध एव फलतीति वाच्यम्, विधिमुखेनापि प्रवृत्तेः स्वीकारात्, अत्र तथैवाश्रयणात् । यद्यपि विधेरिह सिद्धत्वेन निषेध एव शास्त्रतात्पर्यमिति तन्मुखेनैव प्रवृत्तिरुचिता, तथापि शब्दतो निषेधाप्रतीतेर्विधिकरणत्वाव्याघातादित्यास्तां विस्तरेणेति ॥ ५७ ॥

इति न्यायसमुच्चयस्य सिन्धुकलिते प्रथमोल्लासे कलिकालसर्वज्ञेन भगवता श्रीहेमचन्द्रसूरीश्वरेण समुचितानां सप्तपञ्चाशतो न्यायानां तपोगच्छाधिपति-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कारेण 'व्याकरण-वाचस्पति-शास्त्रविशारद-कविरत्न'इति पदालङ्कृतेन विजयलावण्यसूरिणा विरचितं तरङ्गाभिधं विवरणम् ॥

क्वचित् प्राच्यः पन्थाः क्वचिदपि च नव्यो बुधपथः,
क्वचित् स्वातन्त्र्याध्वा क्वचिदपि च तेषां समुदयः ।
श्रितोऽस्मिन् शिष्याणां मतिविकसनार्थं शुभधिया,
बुधैर्बुद्ध्वा तत्त्वं तदनुगतमर्थ्यं श्रितजने ॥ १ ॥
सूरीन्द्रं हेमचन्द्रं कलिसकलविदं संस्मरामोऽभिरामं,
धीमन्तं हेमहंसं गणिमणिममलं तं कथं विस्मरामः ।
न्यायानामर्थसार्थं निजमतघटितं धारयन्तीं यदीयां,
मञ्जूषां प्राप्य जाता वयमिह प्रभवः साधु सिन्धौ तरङ्गे ॥ २ ॥

## [ अथ न्यायसमुच्चये द्वितीयोल्लासः ]

अथान्येऽपि तत्र तत्राचार्यैः कण्ठतोऽभिप्रायतश्च व्यवहृता वाचकश्रीहेमहंसगणिना च समुचिता ये न्यायास्ते व्याख्यायन्ते-

## *प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम्* ॥ १ ॥

**सि०**—यस्मात् प्रत्ययो विधीयते स शब्दः प्रकृतिः, स च द्विविधः-धातुरूपो नामरूपश्च, तस्य ग्रहणं यत्र तच्छास्त्रं प्रकृतिग्रहणम्, तत्र स्वार्थिकप्रत्ययान्तानामपि स्वस्याः प्रकृतेरर्थ एव ज्ञाप्यो येषां ते स्वार्थिकाः, ते च ते प्रत्यया अन्ते येषां तेषामपि, [ प्रकृतीनामिति योग्यतया सम्बन्धनीयम्, ] ग्रहणं भवतीति न्यायार्थः । केवलप्रकृतिग्रहणे प्रत्ययान्तस्य ग्रहणं न प्राप्नोति स्वरूपभेदादिति तत्प्राप्त्यर्थोऽयं न्यायः । अत्र च ज्ञापकं—सर्वादिगणे नियमार्थं डतर-डतमप्रत्ययोपादानम्, तथाहि—तदुपादानेऽयमाशयः—डतर-डतमौ प्रत्ययौ, प्रत्ययस्य च केवलस्य *न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलप्रत्ययाः* इति महाभाष्यादिसम्मतरीत्या प्रयोग एव नास्तीति कुतस्तयोः संज्ञासंभवः?, ततश्च प्रत्ययः प्रकृतिं विनाऽनुपपद्यमानः प्रकृतिमाक्षिपति, *येन विना यदनुपपन्नं तत् तेनाक्षिप्यते* इति न्यायात्, ततश्च येभ्यो यत्-तत्-किमन्यैक-शब्देभ्यः स्वार्थिकौ डतर-डतमौ संभवतस्ते यदादिशब्दा डतर-डतमान्ता इह डतर-डतमाभ्यां संगृह्यन्ते, तेन यतरस्मै यतरस्मादित्यादिषु स्मायादयः सिद्धाः, किन्तु सूरिभिरस्य डतर-डतमयोरुपादानस्य नियमार्थत्वमुक्तम् । तथाहि—"सर्वादेः स्मै-स्मातौ [ १. ४. ७. ] इति सूत्रे बृहद्वृत्तिः—"डतर-डतमौ प्रत्ययौ, तयोः स्वार्थिकत्वात् प्रकृतिद्वारेणैव सिद्धे पृथगुपादानमत्र प्रकरणेऽन्यस्वार्थिकप्रत्ययान्तानामग्रहणार्थम्, अन्यादिलक्षणदार्थं च" इति । नियमाकारश्चायम्—'यदि सर्वादीनां स्वार्थिकप्रत्ययान्तानां प्रकृतिसर्वादित्वद्वारेण सर्वादित्वं स्यात् तदा डतर-डतमान्तानामेव स्यान्न त्वन्यस्वार्थिकप्रत्ययान्तानाम्' इति, तेन प्रकृष्टार्थे स्वार्थिकतममपि सर्वतमाय सर्वतमादित्येव भवति, न तु स्मायादयो भवन्ति । इत्थं चान्यस्वार्थिकप्रत्ययान्तानां सर्वादित्ववारणाय क्रियमाणस्य डतर-डतमग्रहणस्य तदैव तदर्थत्वं स्याद् यदि तेषामन्यस्वार्थिकप्रत्ययान्तानामत्र ग्रहणं केनापि प्राप्तं स्यात्, न च सा प्राप्तिः प्रकृतन्यायमन्तरेण सम्भवतीति प्रकृतन्यायं विनानुपपद्यमानं डतर-डतमयोर्नियामकत्वं प्रकृतन्यायं ज्ञापयतीति स्वीकार्यम् । तत्र धातुरूपप्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तग्रहणस्योदाहरणं यथा—"विनिमेय-द्यूतपणं पणि-व्यवहोः" [ २. २. १६. ]

**इत्यत्र पणीत्युक्तेः केवलस्यैव पणेर्ग्रहणं यद्यपि प्राप्नोति, तथापि प्रकृतन्यायसाहाय्येन स्वार्थिकायप्रत्ययान्तरस्यापि ग्रहणं भवति, तेन शतस्य शतं वा अपणिष्टेत्यादाविव शतस्य शतं वा अपणायीदित्यादावपि "विनिमेय-द्यूत०" [ २. २. १६. ] इत्यनेन व्याप्यस्य वा कर्मसंज्ञा भवति । नामरूपप्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तग्रहणं यथा–ग्रामात् परस्मिन् देशे वसतीत्यादौ केवलपरशब्दयोगे इव ग्रामात् परस्ताद् वसतीत्यादावपि ग्रामशब्दात् "प्रभृत्यन्यार्थ०" [ २. २. ७५. ] इति दिग्योगलक्षणा पञ्चमी सिद्धा, परस्तादित्यत्र च "परावरात् स्तात्" [ ७. २. ११६. ] इति सूत्रेण स्वार्थिकः स्तात्प्रत्ययो भवति । अयं च न्यायः कमेर्णिङो ङित्करणेनानित्य इति ज्ञायते, अन्यथा कमेर्ङित्त्वेन ण्यन्तस्यापि प्रकृतिग्रहणेन ग्रहणादात्मनेपदे सिद्धे तदर्थं कृतस्य णिङो ङित्त्वस्य वैयर्थ्यं स्यादेव, ततश्च व्यर्थीभूतं तदस्य न्यायस्यानित्यत्वं ज्ञापयतीति कमेर्ण्यन्तादात्मनेपदनित्यतायै तस्य स्वांशे चारितार्थ्यम्, फलं च पणायतीत्यादौ पणधातोरिदित्त्वेऽपि नात्मनेपदमिति विशेषश्च प्रतिपादयिष्यते ॥ १ ॥**

**अथान्येऽपि तत्र तत्राचार्यैः कण्ठतोऽभिप्रायतश्च व्यवहृता वाचकश्रीहेमहंसगणिना च समुच्चिता ये न्यायास्तेषां विवरणं क्रियते–**

## *प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम्* ॥ १ ॥

**त०**—यद्यपि प्रतीयतेऽर्थोऽनेनेति व्युत्पत्त्या प्रत्ययस्यापि बोध्योऽर्थः कश्चिदभिप्रेय एव, न चायादीनां कश्चिदर्थः शास्त्रे पठ्यते, न चानर्थकस्य प्रत्ययत्वं, तथापि तेषां प्रकृत्यर्थ एव विधानमिति । तथाहि—"सुपि स्थः" [ पा० सू० ३. २. ४. ] इत्यादिसूत्रेषु महाभाष्ये पठ्यते–'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे' इति । प्रत्यय इति ह्यन्वनर्था संज्ञा कृता, न चान्यस्य कस्यचनार्थस्योपस्थितिरस्ति, तथा चोपस्थितत्वात् प्रत्यासन्नत्वाच्च प्रकृत्यर्थ एव तेषां विधानमिति तदाशयः । तथा च स्व-स्वप्रकृत्यन्तरार्थप्रत्यायकत्वं प्रत्ययत्वमिति फलति । यतश्च स्वार्थिकाः प्रत्यया विधीयन्ते तस्य प्रत्ययान्तस्यापि प्रकृतिवद् व्यवहारो भवति, न च स व्यवहारो वचनं विना सेत्स्यतीत्ययं न्याय आश्रीयते । स्वार्थिकाः प्रत्ययाश्च द्विधा-केचिदाख्यातीयाः केचित् तद्धितीयाश्च, आयादयः प्रथमे, कारादयस्तमबादश्चान्ये । तत्रायादीनां कारादीनां च सामान्यतः प्रकृत्यर्थमात्र एव विधानम् । तथाहि–सूत्राणि "गुपौ-धूप०" [ ३. ४ १.] "कमेर्णिङ्" [ ३. ४. २. ] "ऋतेर्ङीयः" [ ३. ४. ३. ] इत्यादीनि आख्यातेषु; "वर्णा-ऽव्ययात् स्वरूपे कारः" [ ७. २. १५६. ] "रादेफः" [ ७. २. १५७. ] "नाम-रूप-भागाद् धेयः" [ ७. २. १५८. ] इत्यादीनि च तद्धितेषु । न चायादिषु सन्नपि समाविष्टः, स च "गुप्-तिजोः गर्हा-क्षान्तौ सन्" [ ३. ४. ५. ] "कितः संशय-प्रतीकारे" [ ३. ४. ६. ] इति सूत्राभ्यामर्थविशेषेषु विहितः, जुगुप्सते, तितिक्षते, विचिकित्सति, चिकित्सतीत्यादौ च ते तेऽर्थाः प्रकृतितः पृथगवभासन्तेऽपीति कथमायादीनां सर्वेषां स्वार्थिकत्वमित्युक्तमिति वाच्यम्, यतो धातूनामनेकार्थत्वेन गर्हादीनां धात्वर्थत्वमेव, न तूपाधिविशेषत्वम्, गर्हाद्यर्थे वर्त्तमानाद् गुप्यादेरेयं प्रत्ययो विधीयत इत्यर्थाश्रयणात्, तथा च संशयाद्यर्थानां प्रकृत्यर्थत्वमेव न तूपाधिविशेषत्वम्, उपाधिर्हि प्रकृत्यर्थभिन्नः सन् प्रकृत्यर्थविशेषको भवति । तमबादयस्तद्धितास्तु प्रकृत्यर्थादधिकं प्रकृष्टाद्यर्थमुपाधिमपेक्षन्त इत्यायादितः कारादितश्च भिन्नाः, यथा–बहूनां मध्ये प्रकृष्ट आढ्यः [ आढ्यतमः ] इत्यर्थे "प्रकृष्टे तमप्" [ ७. ३. ५. ] इत्यादि, परन्तु तत्रापि प्रकृष्टादयोऽर्था प्रकृत्यर्थविशेषणीभूता अपि प्रकृतित एवावसीयन्ते, प्रत्ययानां तत्र द्योतकतामात्रम्, समुच्चयाद्यर्थानां द्योतकत्वं यथा चादीनाम् । एवं च तद्धितस्वार्थिकेषु द्विविधत्वम्–प्रकृत्यर्थमात्रनिष्ठत्वं, प्रकृत्यर्थोपाधिद्योतकत्वं चेति ॥ अत्र शतस्य शतं वा अपणायीदिति यदुदाहरणमुक्तं तत् स्वमताभिप्रायकम् । पाणिनीयमते तु पणेर्व्यवहारे आयप्रत्ययो न भवति, तदाह दीक्षितः–"पनिसाहचर्यात् पणेरपि स्तुतावेवायप्रत्ययः" इति । तस्यायमाशयः–पनिः स्तुत्यर्थ एव, पणिस्तु स्तुति-व्यवहारोभयार्थः, तत्र स्तुत्यर्थेन पनिना साहचर्यात् पणेरपि स्तुत्यर्थकादेवायप्रत्ययो भवतीति । तथा च तन्मते धातूदाहरणं मृग्यम् । यत्तु पणायतीत्यनुदाहृत्य अपणायीदित्युदाहरणं शित्यायप्रत्ययस्य नित्यत्वेन केवलस्य पणेस्तत्रासम्भवेन सूत्रे [ विनिमेयद्यूत०" २. २. १६. इत्यत्र ] पणिग्रहणेऽपि सूत्रसार्थक्यायैवायप्रत्ययान्ते परे प्रवृत्तिरिति शङ्कावारणायेति प्राचीनाः, तन्न–पूर्वोदाहृतेन शतस्य शतं वा अपणिष्टेत्यनेनैवायप्रत्ययस्य वैकल्पिकत्वेऽवगते तादृशशङ्काया अनुत्थितेः । तथा चार्थागतं प्राकरणिकमेवोदाहरणं नान्याभिप्रायकमिति विज्ञेयम् । वस्तुतस्तु नैतादृशे विषये न्यायस्यावश्यकताऽस्ति, यत्र हि प्रकृतिः परत्वेन निमित्तीक्रियते, यतस्तत्र प्रत्ययान्तस्य भिन्नत्वेऽपि प्रकृतिभागस्य तच्छब्दत्वं न व्याहन्यते । न च तत्र विशिष्टरूपोपादानसत्त्वेनार्थवत एव तद्रूपस्य ग्रहणं, प्रत्ययसम्बन्धे च न केवलप्रकृतेरर्थवत्त्वं वृत्तावेकार्थीभावाभ्युपगमादिति वाच्यम्, प्रत्ययान्तेन प्रकृतिभिन्नार्थानभिधानात् । यत्र हि प्रकृतिमात्रप्रत्ययान्तयोरर्थे भेदस्तत्र तन्न्यायावसरेऽप्यत्र तदभावात् । तथापि स्वार्थिकप्रत्ययान्तानां सर्वत्र प्रकृतिमात्र-

ग्रहणेऽपि ग्रहणं भवतीत्येतावतोऽर्थस्यान्यत्राप्युपयुज्यमानस्य साधनाय न्यायस्यावश्यकतामाकलय्य प्रकृतिपरतो विधीयमानकार्येष्वपि तत्प्राप्त्या तदुदाहरणत्वेनेहोपन्यस्तः पणायतेः प्रयोगः। एवं ग्रामात् परस्तादित्यादावपि बोध्यम् । अत्रैतन्न्यायानित्यत्वमाश्रित्य तस्य फलत्वेन पणायतीत्यादौ य आत्मनेपदाभाव उदाहृतो वृत्तौ स प्राचामनुरोधेन । वस्तुतस्तु पणायतीत्यादावात्मनेपदाभावो बृहद्वृत्तावित्थं साधितः–"अनुबन्धस्याशवि आयप्रत्ययाभावपक्षे चरितार्थत्वादायप्रत्ययान्ताभ्यां पणि-पनिभ्यामात्मनेपदं न भवति" इति, एवं च न्यायानित्यत्वफलं कथमिदमुच्यते?। किञ्चैवं तदनित्यत्वे ज्ञापकमपि दुर्लभम्, कमेर्णिङो ङित्त्वस्यैव हि प्रकृतन्यायानित्यत्वज्ञापकत्वमिष्यते, तस्य चोक्तयुक्त्या सार्थकत्वेन ज्ञापकत्वासंभवात् । अयमाशयः–यथा पणायतीत्यत्र पणेरनुबन्धस्याशवि आयप्रत्ययाभावे चारितार्थ्येनायप्रत्ययान्तान्नात्मनेपदमित्युच्यते, तथा कमेर्ङित्त्वस्याप्यशवि णिङभावपक्षे चारितार्थ्यसम्भवेन न तेन ण्यन्तादात्मनेपदं साधयितुं शक्यत इति णिङो ङित्त्वस्य चारितार्थ्यसत्त्वेन ज्ञापकत्वासम्भव इति । अथास्य न्यायस्य ज्ञापकं यदुक्तं–नियमार्थं सर्वादिगणे डतर-डतमोपादानमिति, तदपि विचार्यते–डतर-डतमयोरुपादानस्य नियमार्थत्वकथनपरो बृहद्वृत्तिग्रन्थ उदाहृतः पूर्वं वृत्तौ, तत्र हि नियमार्थत्वोपपत्तिरित्थमुच्यते—"तयोः स्वार्थिकत्वात् प्रकृतिद्वारेणैव सिद्धे" इति । तदुपपादनपरो न्यासग्रन्थश्चायम्—"स्वार्थिकत्वात् प्रकृत्यविशिष्टतया यत्तदादिप्रकृतिद्वारकमेव सर्वादित्वं भविष्यति, किमनयोरुपादानेन" इति । एतद्विचारे डतर-डतमयोर्नियमार्थत्वाय प्रकृतन्यायस्योपयोग इति विषये नाचार्यसम्मतिरित्यायाति, अर्थभेदाच्छब्दभेद इति हि मन्यन्ते शाब्दिकाः, तत्र स्वार्थिकप्रत्यये कृते नार्थभेद इति शब्दैक्याध्यवसायादेव तत्र कार्यं भविष्यतीति न तयोर्ग्रहणमावश्यकमिति नियमार्थावेव ताविति । तथा च तत्र सर्वादित्वं स्वभावत एवेत्याचार्याशयः । अग्रे चोपसर्जनप्रतिषेधविषयकवृत्तिग्रन्थव्याख्यावसरे न्यासकृता "अथवा सर्वमादीयतेऽभिधेयत्वेन गृह्यतेऽनेनेति अन्वर्थाश्रयणात् सर्वेषां यानि नामानि तानि सर्वादीनि" इति यदुक्तं तेनाऽपि स्वार्थिकप्रत्ययान्तानां सर्वादित्वमनुमतं भवति । वस्तुतस्त्वन्वर्थसंज्ञाश्रयणे गणपाठस्यानर्थक्यमिति सर्वनामत्वे सति सर्वादिगणपठितत्वमपि सर्वादित्वप्रयोजकमिति डतर-डतमयोरिह गणे पाठाभावे तदन्तानां सर्वादित्वप्रयुक्तं कार्यं न स्यादिति तयोः पाठस्य सार्थक्येन नियमार्थत्वाभावः । अत एवाचार्यैरपि प्रयोजनान्तरमुक्तं तस्य–"अन्यादिलक्षणदार्थं च" इति । तदाशयश्च न्यासे इत्थं विवृतः–"डतर-डतमान्तानां "पञ्चतोऽन्यादेरनेकतरस्य दः" [ १. ४. ५८. ] इत्यन्यादित्वाद् दादेशो यथा स्यादित्येवमर्थं च डतर-डतमग्रहणम्, नहि 'अन्य, अन्यतर, इतर, डतर, डतम' इत्यपाठे पञ्चतोऽन्यादेरुच्यमानो दादेशो लभ्येत" इति । तथा च सत्यस्मिन् प्रयोजने वैयर्थ्याभावात् कथं ज्ञापकत्वं स्यात्। यद्यपि तदग्रे नियमार्थत्वाभावमाशङ्क्य समर्थितमपि तथापि तन्नातीव हृदयंगममिति तस्माद् ग्रन्थादेवावगम्यते । तथाहि–तत्रत्यो ग्रन्थः "ननु च सत्यस्मिन् प्रयोजने कथं स्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थं स्याज्ज्ञापकमिदम्? अन्यथाऽनुपपद्यमानं ज्ञापकं भवति, न च सत्यस्मिन् प्रयोजनेऽस्यान्यथाऽनुपपत्तिरस्ति; न च दादेशमात्रार्थत्वे दादेशविधावेव डतर-डतमग्रहणं कर्त्तव्यम्, गणे तु करणात् स्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थमपि भवतीति वाच्यम्, गणे करणमसंज्ञायामिति विशेषणार्थं स्यात्, गुरुश्च ''अन्यान्यतरेतरडतरडतमस्य" इति निर्देशः स्यादिति; उच्यते–यथेदं दादेशार्थमन्यादिपञ्चके भावाद् भवति तथा स्मै-स्मादादेशाद्यर्थमपि स्यात्, सर्वादित्वात्, तथा हि–यदि स्वार्थिकप्रत्ययान्तानां सर्वादित्वं स्यात्, तदा स्मै-स्मादादेशार्थं डतर-डतमोपादानमनर्थकं [ स्यात् ], अतः स्वार्थिकप्रत्ययान्तानां सर्वादित्वं न भवतीति तदुपादानं स्वार्थिकप्रत्ययान्तानां सर्वादित्वाभावार्थं विज्ञायत इति" इति । अस्यायमाशयः—'डतर-डतमयोः पाठः सर्वादावन्यादिपञ्चके च, तत्रान्यादिपञ्चके पाठो दादेशसम्पादनेन चरितार्थोऽपि सर्वादिपाठो व्यर्थः सन्नुक्तमर्थं ज्ञापयतीति । तत्रेदमुच्यते–यदि सर्वाद्यन्तर्गतान्यादिपञ्चके पाठः सार्थकः, तावताऽपि सार्थकत्वसिद्धावधिकप्रयोजनाभावेऽपि ज्ञापकत्वानवकाश एव । अवश्यं हि सर्वादौ क्वचिदन्यादिपञ्चकं पठनीयमिति तन्मध्यपतिताविमावपि पठितौ स्मै-स्मादादेशविधानार्थमपि भविष्यतः, अन्येषां स्वार्थिकप्रत्ययान्तानां च पाठाभावादेव न तदादेशप्राप्तिः, न च स्वार्थिकप्रत्ययान्तत्वेन प्रकृतिद्वारेण भविष्यति, तथा सति अन्वर्थसंज्ञाबलादेव सर्वेषां सर्वादिकार्यं भविष्यतीति किमनेन पाठेन कृतं स्यात्, यतश्च पाठः क्रियते ततश्च तत्पठितानुपूर्वी तत्पठितशब्दप्राधान्यवत्तदन्तानुपूर्वी च ग्राह्येति नान्येषां स्वार्थिकप्रत्ययान्तानां सर्वादिकार्यमिति । किञ्चाचार्यवचनानुरोधेन तस्य कथंचिन्नियमार्थत्वस्वीकारेऽपि न नियमार्थत्वकथनस्य प्रकृतन्यायज्ञापकत्वसंभव इति पूर्वमावेदितमेवेति । यदि चास्ति किञ्चिन्न्यायस्यानन्यथासिद्धं प्रयोजनं तर्हि वाचनिकमेवेदं स्वीकार्यमिति ॥ १ ॥

## *प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव* ॥ २ ॥

सि०—यत्र क्वचित् तादृशानुपूर्वी गृह्यते या प्रत्ययेऽप्रत्यये च सम्भवति, तत्र तादृशानुपूर्वीविशिष्टः प्रत्यय एव ग्राह्यो न त्वप्रत्यय इति न्यायार्थः। न्यायाभावेऽव्यवस्थयोभयोर्ग्रहणे प्राप्ते व्यवस्थार्थोऽयं न्यायः । अत्र पूर्वन्यायाद् 'ग्रहणम्' इति पदमनुवर्त्तते, तेन चोक्तार्थलाभः । अयं च न्यायो यत्र तत्र शास्त्रकारैर्वचनरूपेण पठित इति वाचनिक एव, तत्र तत्र तेषां

शब्दानां प्रत्ययपरत्वेन व्याख्यानमूलक एव चेति नात्र ज्ञापकविन्यासः । तथा चैतन्न्यायसत्त्वादेव "कालात् तन-तर-तम-काले" [ ३. २. २४. ] इति सूत्रे तर-तमौ प्रत्ययावेव ग्राह्यौ, न तु तरतीति तरः, ताम्यतीति तमः, इत्यजन्ते नाम्नी, तथा च तयोः परतो न सप्तम्या अलुक् । अस्य च व्याख्यानमूलकत्वाद् यत्राचार्यैः प्रत्ययत्वेन व्याख्यानं न कृतं तत्र प्रत्ययाऽप्रत्यययोरुभयोर्ग्रहणम्, तेन "स्त्रीदूतः" [ १. ४. २९. ] इत्यादौ "नारी" [ २. ४. ७६. ] इत्यादिङीप्रत्ययान्तवत् 'तरी' इत्याद्याः प्रत्ययरहिता अव्युत्पन्नाः शब्दा अपि ईदन्तत्वेन ग्राह्याः । यद्यपि 'तरी' इत्यादयोऽपि शब्दाः "तॄ-स्तॄ-तन्द्रि०" [ उणा० ७११. ] इत्यादिभिरुणादिसूत्रैर्व्युत्पाद्यन्त इति तत्रापीकारस्य प्रत्ययत्वं सम्भवति, तथापि *उणादयोऽव्युत्पन्नानि नामानि* इति न्यायमाश्रित्य तत्रेकारस्य प्रत्ययत्वाभाव उक्तः। अस्य व्याख्यानमूलकत्वेनास्थैर्यादेव "धातोरिवर्ण०" [ २. १. ५०. ] इति सूत्रे 'स्वरे प्रत्यये' इति प्रत्ययग्रहणं सार्थकम्, अन्यथा न्यायेनैव प्रत्ययार्थे लब्धे तस्य वैयर्थ्यमेव स्यात् ॥ २ ॥

## *प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव* ॥ २ ॥

**त०**—अयं न्यायः "अङ्गस्य" [ पा० सू० ६. ४. १. ] इति सूत्रे महाभाष्ये वचनरूपेण पठितः । न च तत्र ज्ञापकं किमप्युपन्यस्तमिति तन्मतेऽपीयं वाचनिक एव । किञ्च वर्णग्रहणेऽयं न्यायो न प्रवर्तते, तेन "ईश्चावर्णस्याऽनव्ययस्य" [ ४. ३. १११. ] इत्यादौ न प्रत्ययग्रहणम् । यद्यपि तत्रानव्ययस्येति पर्युदासादेव सदृशग्राहकात् प्रत्ययभिन्नस्य ग्रहणमिति कथयितुं शक्यते, तथापि "अवर्णस्येवर्णादिनैदोदरल्" [ १. २. ६. ] इत्यादौ वर्णग्रहणेऽप्रवृत्तिर्व्याख्येया । स्पष्टं चेदं तत्रैव कैयटेऽपि, इति प्राचीनमतम् । नवीनास्तु न्यायमिमं न स्वीकुर्वन्ति, तथा हि–"तित्स्वरितम्" [ पा० सू० ६. १. १८६. ] इति सूत्रे कैयट आह– "*प्रत्ययाऽप्रत्यययोः प्रत्यये संप्रत्ययः* [ प्रत्ययस्यैव ग्रहणम् ] इति परिभाषा तु भाष्य-वार्तिककाराभ्यां न क्वचिदाश्रिता" इति । यद्यपि पूर्वोदाहृते "अङ्गस्य" [ ६. ४. १. ] इति सूत्रे महाभाष्ये तस्य न्यायस्य चर्चा कृताऽस्ति, तथापि तत्सूत्रप्रत्याख्यानपरेणैकदेशिनैव तत्र तदाश्रयणमिति कैयटाशय इति नागेशेन तत्रैव [ ६. १. १८६. ] सूत्रे स्फोरितम् । तथाहि–"न क्वापि लक्ष्यसिद्ध्यर्थमाश्रितेत्यर्थः । "अङ्गस्य" [ पा० सू० ६. ४. १. ] इति सूत्रे भाष्ये तु 'तत्प्रत्याख्यानायैकदेशिनोपन्यस्ता, न तु सिद्धान्तिना इत्याशयः' इति । एवं च "तिति प्रत्ययग्रहणं कर्तव्यम्" इति "तित्स्वरितम्" [ पा० सू० ६. १. ८६. ] इति सूत्रे वार्तिकमपि सार्थकम्, अन्यथा न्यायेनैव सिद्धं वार्तिकस्य वैयर्थ्यं स्पष्टमेव । परे तु–तत्र तत्रेष्टप्रत्ययमात्रग्रहणसाधनाय न्यायोऽयमाश्रणीय एव, पूर्वोक्तवार्त्तिकं तु न्यायप्राप्तार्थानुवादरूपमेव, यत्र च न प्रत्ययमात्रग्रहणमिष्टं तत्राचार्यव्याख्यानमेव शरणीकरणीयमिति न्यायमिमं स्थापयन्ति । तथा च यथालक्ष्यमस्याश्रयणमनाश्रयणं च सिद्ध्यतीति । अयमत्र निष्कर्षः–न्यायस्वीकारे यत्र प्रत्ययग्रहणं नेष्टं तत्रास्यानित्यत्वं भाष्यकारादिव्याख्यानं च शरणीकरणीयम्, न्यायास्वीकारे च यत्र प्रत्ययमात्रग्रहणमिष्टं तत्र व्याख्यानं शरणीकरणीयमित्युभयोः पक्षयोर्दोषसाम्यात् स्थितस्य न्यायस्य स्वीकार एव युक्त इति प्राचीनपक्षरक्षणोत्सुकानां विचक्षणानामभिप्रायः ॥ २ ॥

## *अदाद्यनदाद्योरनदादेरेव* ॥ ३ ॥

**सि०**—यत्र हि अदादिषु अनदादिषु च पठितो धातुः सामान्येनोपादीयते न च किञ्चिद् व्यावर्त्तकमाश्रीयते तत्रोभयोर्ग्रहणे प्राप्ते तन्निवारणार्थोऽयं न्यायः । पूर्ववदत्राऽपि ग्रहणमिति पदमनुवर्त्तनीयम् । तथा चोभयथा संभाव्यमानधातोरुपादानेऽनदादेरेव धातोर्ग्रहणमित्यर्थः । अस्य ज्ञापकं च–'शासस्हनः शाध्येधिजहि" [ ४. २. ८४. ] इति सूत्रेऽस्तेरादादिकस्य ग्रहणसिद्ध्यर्थं शास्-हन्-साहचर्यबलग्रहणम्, तद्ध्येतन्न्यायबलादसत्यस्यस्त्योर्ग्रहणवारणार्थमेव कृतमित्यनुमीयते । अयं च न्यायः "उपान्वध्याङ्वसः" [ २. २. २१. ] इत्यत्र वस्तेराच्छादनार्थस्य व्युदासेन वसतेर्ग्रहणं व्यवस्थापयति । अयं चाचार्यव्यवहारमात्रमूलक इति यत्राचार्यैः विशेषाददादेरपि ग्रहणमिष्टं तत्र न प्रवर्तते, यथा–"ऋ-ह्री-घ्रा-घ्रा-त्रोन्द-नुद-विन्तेर्वा" [ ४. २. ७६. ] इत्यत्र भौवादिकस्येवादादिकस्यापि ऋधातोर्ग्रहः । वस्तुतस्तु ऋणमित्यस्यार्थविशेष एव नियन्त्रितत्वात् तत्र कस्यापि ग्रहणे विशेषाभावेन न तत्रानित्यत्वफलमिति तत्रत्यबृहद्वृत्तिग्रन्थबलादेवावसीयते। विस्तृतं चैतद्विवरणे ॥३॥

## *अदाद्यनदाद्योरनदादेरेव* ॥ ३ ॥

**त०**—"द्विधा हि धातवो लुग्विकरणा अलुग्विकरणाश्च, तत्रादादयो लुग्विकरणा अन्येऽलुग्विकरणाः" इति परेषां मतम् । स्वमते चादादिभ्यो विकरणं विधाय तस्य पुनर्लुग्विधानमिति गौरवमाकलय्य "कर्तर्यनद्भ्यः शव्" [ ३. ४. ७१. ] इति विकरणविधायकसूत्रेऽदादयः पर्युदस्ताः । तथा च स्वमते विकरणभाविनोऽविकरणाश्चेति रूपेणैव विभागः । तत्र विकरणभाविनोऽनदादयः, विकरणाभाववन्तश्चादादय इत्युच्यन्ते । सूत्रपठिताः कतिपये धातवोऽदादिषु पठिता अन्यत्र च, तत्र कस्य कुत्र ग्रहणमिति नियमाय न्यायोऽयमाश्रीयते । अत्र ज्ञापकं प्राचीनोक्तरीत्योपस्थापितं "शासस्-हनः शाध्येधिजहि" [ ४. २. ८४. ] इति सूत्रेऽस्तेरादादिकस्य परिग्रहार्थं साहचर्याश्रयणम् ।

तत्रेदं विचार्यते—कस्याप्येकस्यैव ग्रहणमिह कार्यं, तत् कस्येति निर्णयाभावे प्राप्ते तन्निर्णयार्थमेव साहचर्यमाश्रितमिति कुतो नाश्रीयते?, एतन्न्यायबलात् तदाश्रयणमनुमायैतन्न्यायानुमानस्य निर्मूलत्वात्, अत एव "गम-हन-विद्लृ-विश-दृशो वा" [४. ४. ८४.] इति सूत्रे लाभार्थस्य तौदादिकस्य विदेर्ग्रहणार्थमनुबन्धसहितपाठः, अन्यथाऽनेन न्यायेनैव तौदादिकस्यैव ग्रहणे सिद्धे तदर्थमनुबन्धनिर्देशो व्यर्थः स्यात्; सत्ता-विचारार्थयोस्तु आत्मनेपदित्वादेव क्वसोरभाव इति तद्ग्रहणस्य संभावनैव नास्ति । यत्तु कैश्चित् प्रकृतन्यायेनानदादेर्ग्रहणे सिद्धेऽपि निरनुबन्धन्यायेन साहचर्यन्यायेन च हन्साहचर्याज्ज्ञानार्थकस्यादादेरपि ग्रहणं स्यादिति परस्परविरुद्धन्यायद्वयाप्रवृत्तयेऽनुबन्धनिर्देश इति व्याख्यातम्, तथाहि तेषां ग्रन्थः—"अथ विद इत्युक्तेऽपि *अदाद्यनदाद्य०* इति न्यायाल्लाभार्थस्यैव ग्रहणं भविष्यति, सत्ताविचारणार्थयोरनदादित्वेऽप्यात्मनेपदित्वात् क्वसोरसंभवात्, नैवम्—निरनुबन्धपरिभाषया तौदादिकस्य ग्रहणाऽसम्भवात्, उभे ह्येते वचने परस्परविरोधिनी नैवात्र प्रवर्त्तेते, तस्माद् येन प्रकारेण निर्विशङ्कं लाभार्थस्य ग्रहणं सम्पद्यते स प्रकारो वृत्तौ दर्शित इति । अथ विशिना साहचर्याल्लाभार्थस्यैव ग्रहणं भविष्यति, किम् लृकारकरणेन ? नैवम्—यथा विशिना साहचर्यं तथा हन्तिनाऽपि साहचर्यशङ्का स्यात्, ततश्चादादेरेव ग्रहः स्यात्" इति [ प्रकृतसूत्रलघुन्यासे ], तत्रेदमुच्यते—त्रयो हि न्याया अत्रावसरप्राप्ताः—*अदाद्यनदाद्योरनदादेरेव* इति, *निरनुबन्धग्रहणे न सानुबन्धस्य* इति, *साहचर्यात् सदृशस्यैव* इति च । तत्र *निरनुबन्धग्रहण*न्यायश्च *निरनुबन्धग्रहणे सामान्येन* इति न्यायान्तरेण सत्प्रतिपक्षोऽतो दुर्बलः । *साहचर्य*न्यायेन च पूर्वसाहचर्यस्य परसाहचर्यस्य च प्राप्तौ परसाहचर्यस्य बलवत्त्वेन *अदाद्यनदाद्योरनदादेरेव* इति न्यायानुगृहीतत्वेन चानदादेरेव ग्रहणसिद्धावनुबन्धोच्चारणस्यैतन्न्यायानित्यत्वेऽसत्त्वे वा तात्पर्ये बाधाभावात् । यद्यपि शास्त्रकृद्भिरयं न्यायस्तात्पर्येण क्वचिद् गृहीतः परं कण्ठतः प्रायः क्वापि न पठित इति नवीनाः । तथाहि—'एतन्न्यायस्थानीय*लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य* इतिन्यायव्याख्यावसरे प्रोक्तं नागेशभट्टेन—"ध्वनिता चेयं परिभाषा "यस्य विभाषा" [पा० सू० ७. २. १५.] इत्यत्र भाष्ये । तत्र हि विदित इति प्रयोगे निषेधमाशङ्क्य 'यदुपाधेर्विभाषा तदुपाधेर्निषेधो "विभाषा गम-हन-विद-विशाम्" [पा० सू० ७. २. ६८.] इति शविकरणस्य ग्रहणं लुग्विकरणश्चायम्' इत्युक्तम् । तत्र चो हेतौ, यतोऽयं लुग्विकरणोऽतो विशिसाहचर्याच्छविकरणस्य ग्रहणं, न तु हन्तिसाहचर्यादस्यापि, एतत्परिभाषाविरोधादिति तदाशयः । अत एव परिभाषायां 'लुग्विकरणस्यैव' इति नोक्तम् । कण्ठतस्तु एषा भाष्ये क्वापि न पठिता । "गाति-स्था०" [पा० सू० २. ४. ७७.] इति सूत्रे "पिबतेर्ग्रहणं कर्तव्यम्" इति वार्त्तिककृता, 'सर्वत्रैव पाग्रहणेऽलुग्विकरणस्य ग्रहणम्' इति भाष्यकृता चोक्तम्" इति । तथा च व्यवहारेणायं न्यायः परिगृहीतः, किन्तु स्वरूपेण क्वचिदपि नोक्त इति प्रतिभाति । कैयटेन च "स्वरति-सूति-सूयति-धूञूदितो वा" [पा० सू० ७. २. ४४.] इति सूत्रे स्पष्टमुक्तोऽयं न्यायः, तत्र चास्य ज्ञापकमपि तेनोक्तम्—"सूङिति वक्तव्ये सूति-सूयत्योः पृथग्ग्रहणमस्य ज्ञापकम्" इति । तथा च यथा तत्र ज्ञापकसिद्धोऽयं न्यायः स्वीक्रियते तथा स्वमते किमपि दृढतरं ज्ञापकं न प्रतिभाति, वृत्त्युक्तज्ञापकस्य चान्याशयत्वसंभवस्योक्तत्वात् पूर्वोक्तकैयटग्रन्थस्यापि साहचर्यपरिभाषामाश्रित्य तत्रैव नागेशेन खण्डितत्वाच्च तन्मतेऽपि ज्ञापकत्वस्य दुरुपपादत्वाच्च । तथा चाचार्यप्रवृत्तिरेवैतन्न्यायमूलमिति ॥ ३ ॥

## *प्राकरणिका-ऽप्राकरणिकयोः प्राकरणिकस्यैव* ॥ ४ ॥

**सि०**—प्राकरणिकं प्रकरणप्राप्तम्, प्रकरणेनाधिकारेण चरतीत्यर्थे "चरति" [६. ४. ११.] इतीकणि प्राकरणिकशब्दव्युत्पत्तेः । तथा च प्राकरणिकपदेन स्वप्रकरणपठितप्रत्ययादीह ग्राह्यम्, अन्याधिकारोक्तं तु प्रकृते विवक्षितापेक्षयाऽप्राकरणिकम् । तत्र यत्रोभयोर्ग्रहणं सम्भाव्येत, तत्र प्राकरणिकस्यैव ग्रहणं न्याय्यमिति न्यायार्थः । अस्य च ज्ञापकम्—"द्रेरञणोऽप्राच्यभर्गादेः" [६. १. १२३.] इति सूत्रे "शकादिभ्यो द्रेर्लुप्" [६. १. १२०.] इति सूत्राद् द्रेरित्यनुवर्त्तमानेऽपि पुनर्द्रेर्ग्रहणम्, तद्धि एतन्न्यायबलात् प्राकरणिकस्यैव द्रेरञणोऽनेन लुब् भविष्यति नाप्राकरणिकस्येति शङ्कया द्विविधस्यापि द्रेरञणो लुब् भवेदित्येवमर्थं कृतम्, एतन्न्यायाभावे तु बाधकाभावादुभयविधस्यापि द्रेर्ग्रहणे सिद्धे तद्वैयर्थ्यं स्पष्टमेव । अयमाशयः—"द्रेरञणोऽप्राच्यभर्गादेः" [६. १. १२३.] इति सूत्रमपत्याधिकारेऽस्ति, तत्र प्रकरणे च "राष्ट्र-क्षत्रियात् सरूपाद् राजा-ऽपत्ये द्रिरञ्" [६. १. ११४.] इति द्रिसंज्ञा विधीयते, अन्या च द्रिसंज्ञा "पूगादमुख्यकाञ्ञो द्रिः" [७. ३. ६०.] इत्यायुधजीविसङ्घाधिकारेऽस्ति, सा चापत्याधिकारस्थसूत्रस्याप्राकरणिकी, अधिकारद्वयस्यापि अञण्प्रत्यया अत्र सूत्रे ग्राह्याः, तच्च विना विशेषप्रयत्नं न संभवति, तदर्थं द्रेरिति पुनः पठ्यते । तेन मद्रस्यापत्यं स्त्रीत्यर्थे "पुरु-मगध-कलिङ्ग-शूरमस-द्विस्वरादण्" [६. १. ११६.] इत्यनेनाणि तस्य च द्रिसंज्ञकत्वात् "द्रेरञणः" [६. १. १२३.] इति लुपि *प्रत्ययलोपेऽपि तल्लक्षणं कार्यं विज्ञायते* इति

न्यायाल्लुसेऽप्यणि "अणञेय०" [ २. ४. २०. ] इति ङ्यां मद्रीति सिध्यति, अत्रापत्यार्थस्य स्वप्रकरणपठितद्रिसंज्ञकस्य यथा "द्रेरञणः" [ ६. १. १२३. ] इति लुब् भवति तथैव पर्शुर्नाम काचित्, तस्या अपत्यानि बहवो माणवका इत्यर्थे "पुरुमगध०" [ ६. १. ११६. ] इत्यणि "शकादिभ्यो द्रेः" [ ६. १. १२०. ] इति तल्लुपि च पर्शवः, तेषां स्त्रीत्वविशिष्टः शस्त्रजीविसंघ इत्यर्थविवक्षायां "पर्श्वादेरण्" [ ७. ३. ६६. ] इति द्रिसंज्ञकेऽणि तस्यापि "द्रेरञणः" [ ६. १. १२३. ] इत्येव लुब् भवति, ततश्च "उतोऽप्राणिनश्चायुरज्वादिभ्य ऊङ्" [ २. ४. ७३. ] इत्यूङि पर्शूरिति भवति, एतदर्थमेव पुनर्द्रेर्ग्रहणम्, तच्चैतन्न्यायाभावे सार्थक्यमप्रतिपद्यमानं न्यायमिमं सूचयतीति सुस्थम्। एतन्न्यायफलं च "इञ इतः" [ २. ४. ७१. ] इति ङीविधायकसूत्रे "यञो डायन् च वा" [ २. ४. ६७. ] इत्यतः प्रारब्धात् तद्धिताधिकारात् तद्धितीय एवेञ् ग्राह्यः प्रकृतन्यायात्, न तु "प्रश्नाख्याने वेञ्" [ ५. ३. ११९. ] इति कृदधिकारस्थसूत्रोक्तः, तेन सुतङ्गमेन निर्वृत्ता "सुतङ्गमादेः०" [ ६. २. ८५. ] इतीञि-'सौतङ्गमी' इत्यत्र ङीर्भवति, किन्तु 'चैत्र ! कां त्वं कारिमकार्षीः' इति प्रश्ने 'सर्वां कारिमकार्षम्' इत्याख्याने च प्रयुक्तात् "प्रश्नाख्याने वेञ्" [ ५. ३. ११९. ] इति कृत्सूत्रोक्तेञन्तात् कारिशब्दान्न भवति, प्रकृतन्यायेन कृदधिकारस्थस्य ङीविधायकसूत्रे ग्रहणवारणात् । अस्य च ज्ञापकसिद्धत्वेनासार्वत्रिकत्वात् क्वचिद्प्रवृत्तिरपीति जृष्धातोरद्यतनीदिप्रत्यये 'अजरत्' इत्यादौ "ऋदिच्छ्वि" [ ३. ४. ६५. ] इत्याख्यातप्रकरणस्थेऽङ्प्रत्यये कृते तत्र यथा "ऋवर्णदृशोऽङि" [ ४. ३. ७. ] इति गुणो भवति तथैव जरणं जरेत्यादौ "षितोऽङ्" [ ५. ३. १०७. ] इति कृत्प्रकरणस्थेऽङि कृतेऽपि भवतीति । यद्यप्याख्यातकृत्प्रकरणयोरुभयोरपि धातोरेव सम्बन्धित्वेन तयोरैक्यमेवेत्यपि मतमस्ति, तथापि तत्र तत्र शास्त्रकृद्भिर्भेदेनाऽपि व्यवहारस्य कृतत्वाद् भेदपक्षमादायैवानित्यत्वफलदानमिति विज्ञेयम् । विवेचितमेतद् विस्तरतो विवरणे ॥ ४ ॥

***प्राकरणिका-ऽप्राकरणिकयोः प्राकरणिकस्यैव* ॥५॥**

**त०**—एक एव शब्दोऽनेकेष्वर्थेषु शक्तश्चेत्? कुत्र तेन कोऽर्थो ग्राह्य इत्यस्य विषयस्य निर्णयाय सामान्यतः "संयोगादयः" कारणत्वेन गृहीता अभियुक्तैः, तथाहि-तेषां वचनम्—

"संयोगो विप्रयोगश्च, साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं, शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः, कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे, विशेषस्मृतिहेतवः ॥" इति,

शब्दार्थस्य-शब्दवाच्यस्यार्थस्य, अनवच्छेदे-अनिर्णये सति, संयोगादयः, विशेषस्य-अन्यतराद्यर्थस्य, स्मृतौ-समुपस्थापकत्वे, हेतवः-कारणानि, इति तदीयः संक्षिप्तोऽर्थः; एतेषामुदाहरणानि च तत्र तत्राकरग्रन्थेषु दत्तानि । तथा च प्रकरणस्याभिधानियामकत्वमिति सकलविचारसम्मतः पन्थाः, तमेवाश्रित्य स्वमतेऽप्ययं न्यायः पठ्यते । तथा च स्वतः सिद्धोऽयमर्थ इति नात्र ज्ञापकापेक्षा, तथापि "द्रेरञणः" [ ६. १. १२३. ] इति सूत्रस्थबृहद्वृत्तिग्रन्थे-"द्रावनुवर्त्तमाने पुनर्द्रिग्रहणं भिन्नप्रकरणस्यापि द्रेर्लुबर्थम्" इति लेखनस्य प्रकृतन्यायसूचकत्वमिति मन्यन्ते प्राचीनाः । केचित् तु-सामान्यनियमोऽयं 'प्रकरणस्यार्थविशेषनियामकत्वम्' इति, तदाश्रित्यैव वृत्तिग्रन्थस्यापि साङ्गत्यसिद्धौ न पृथङ् न्यायकल्पनावश्यकत्वमित्याहुः । अस्यानित्यत्वफलं च प्राचां रीत्या "ऋवर्णदृशोऽङि" [ ४. ३. ७. ] इति सूत्रे कृत्प्रकरणाऽऽख्यातप्रकरणयोरुभयोरपि पठितस्याङो ग्रहणेन जरेत्यादिसिद्धिरित्युक्तम्, तदपि नातिसमीचीनम्-पूर्वोक्तरीत्याऽस्य ज्ञापकसिद्धत्वाभावेनानित्यत्वाभावात् । न च तर्हि कथमुभयोरङोर्ग्रहणं गुणविधायके सूत्रे इति वाच्यम्, अस्य न्यायस्य शब्दार्थनिर्णायकत्वस्यैव युक्तत्वेन, अत्र च नार्थत्वेनाङो ग्रहणमपि तु स्वरूपेणेति दोषाभावात् । अयमाशयः-यत्र हि 'अनेन शब्देन कोऽर्थो ग्राह्यः' इति संशयस्तत्र प्रकरणानुसारमर्थनिर्णयः कर्तव्य इत्यत्रैवास्य न्यायस्य तात्पर्यम्, अत्र च अङ् स्वरूपेणैव गृह्यते न तु तद्वाचकपदान्तरेणेति प्रकृतन्यायप्रसराभावः । 'द्रि'संज्ञादौ तु प्रत्ययविशेषास्तच्छब्देन प्रतिपाद्यन्त इति तेषां भेदाद् भवति संशय इह के द्रिसंज्ञया ग्राह्या इति तत्र निर्णयाय प्रवृत्तोऽयं न्यायः पुनर्द्रिग्रहणेन वारित आचार्येणेति साध्वेव, इह च तद्भिन्नविषयत्वात् । किञ्च अङ्विधायकसूत्रयोरुभयोर्धातोरेवाङ्विधायकत्वेन समानप्रकरणत्वं स्पष्टमेव । प्रथमाङ्विधायकसूत्रसमीपे गुणविधायकसूत्रं च पठितमपि न, किन्तु पृथगेव गुणप्रकरणे, इति नेह द्रिसंज्ञावत् प्राकरणिकत्वशङ्काऽपि । एवञ्च संख्या-संभद्रान्मातुर्मातुर्च" [ ६. १. ६६. ] इति सूत्रन्यासोक्तमाख्यातकृत्प्रकरणयोरैक्यमपि सम्यगेव । स्वकथितन्यायानित्यत्वफलस्य समर्थनाय तस्य पक्षान्तरत्वसाधनप्रयासोऽपि नावश्यक इति युक्तं प्रतिभाति । किञ्च न तत्रत्यन्यासग्रन्थेन 'आख्यातकृत्प्रकरणयोर्भेदपक्षः साधयितुं शक्यते, तथाहि—तत्रस्थग्रन्थः—"नन्वत्र ञ्णिति तद्धिते "नामिनोऽकलि-हलेः" [४. ३. ५१.] इति वृद्धिः कथं न भवति? उच्यते-तक्रकौण्डिन्यन्यायेन ञ्णिति तद्धिते "वृद्धिः स्वरे०" [ ७. ४. १. ] इत्यादेरेव वृद्धिः, न तु "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इत्यन्तस्य, यद्वा आख्यात-कृत्प्रकरणमेकमेव, तत्साहचर्यादत्र प्रकरणे यत् सूत्रं तद्विहितप्रत्ययो गृह्यते, अयं तु भिन्नप्रकरणविहितः" इति । अस्यायमाशयः-परिच्छेत्तृवाचकयोर्मात्रोरभिप्रायेण द्वयो-

मात्रोरपत्यमित्यर्थे "सम्बन्धिनां सम्बन्धे" इति [ ७. ४. १२१. ] इति परिभाषाबलात् "संख्या-संभद्रान्मातुर्मातुर्च" [ ६. १. ६६. ] इति सूत्रे जननीवाचकस्य मातृशब्दस्यैव ग्रहणेनात्र तदग्राह्यया "ङसोऽपत्ये" [ ६. १. २८. ] इत्यनेनैवाणि आदिस्वरस्य "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति वृद्धौ द्वैमात्र इति रूपं भवतीति बृहद्वृत्तिग्रन्थतात्पर्यम्, तत्रादिस्वरवृद्धौ सत्यामपि "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इत्यन्त्यस्वरस्यापि वृद्धिः कुतो नेत्युक्तमिति शङ्का, तत्र परत्वादादिवृद्धौ कृतायां *सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव* इति न पुनरन्त्यवृद्धिरिति यदि कश्चिदुत्तरं ब्रूयात्, स चासम्भवे एव "स्पर्धे" [ ७. ४. ११९. ] इति सूत्रेण बाधः, इह चास्ति सम्भवो यत्–स्वरेष्वादेरन्त्यस्य च वृद्धिः स्यादिति प्रतिवक्तव्यः स्यादिति, सत्यपि सम्भवे बाधसाधकेन तक्रकौण्डिन्यन्यायेन तदुत्तरं दत्तम् । स च न्यायः *सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय* इति । अयं च सत्यपि सम्भवे बाधं बोधयति । तथाहि–ब्राह्मणेषु कौण्डिन्योऽपि समाविष्ट एव, तस्मै च दधिदानोत्तरं ततः पश्चाद् वा तक्रदाने सम्भवत्यपि तक्रदानं दधिदानस्य बाधकमिति स्वीक्रियते, तथा प्रकृतेऽपि आदिस्वरवृद्धेः पूर्वं पश्चाद् वाऽन्त्यस्वरस्यापि वृद्धिर्यद्यपि सम्भवति तथाऽप्यादिवृद्ध्याऽन्त्यवृद्धिर्बाध्यते इति । यश्च माठर-कौण्डिन्यन्यायमाश्रित्यासम्भवे एव बाधकत्वमिति स्वीकरोति तन्मतेन समाधानान्तरमाह–यद्वेत्यादिना, माठरकौण्डिन्यन्यायस्वरूपं च *सर्वे ब्राह्मणा भोज्यन्ताम्, माठर-कौण्डिन्यौ परिवेविषाताम्* इति, अत्र ब्राह्मणान्तर्गतयोर्माठर-कौण्डिन्ययोर्भोजनं परिवेषणेन बाध्यते, नहि सम्भवति यत्–माठर-कौण्डिन्यौ परिवेषणं भोजनं च सह कुरुत इति, तथा चासम्भव एव बाध्यबाधकभाव इत्याग्रहग्रहिलानां सन्तोषायेह पक्षान्तरमाश्रितं–यद्वेति । अस्यायमाशयः–"नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति सूत्रमाख्यात-कृत्प्रकरणयोर्मध्ये पठ्यते, तयोश्च प्रकरणयोरैक्यमेव । तथा चाख्यातप्रकरणस्थे ञ्णिति प्रत्यये कृत्प्रकरणस्थे च तस्मिन् "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति सूत्रं प्रवर्त्तते, तद्धितप्रकरणं तु दूरव्यवहितमिति तत्प्रकरणस्थे ञ्णिति प्रत्यये तत् सूत्रं न प्रवर्त्तिष्यत इति । अयं च ग्रन्थः प्रकृते तद्धितप्रकरणेन सह "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति सूत्रप्रकरणस्य पार्थक्यमात्रं बोधयितुं प्रवृत्तो न तु तयोः प्रकरणस्यैक्यमिह बोधयितुं तस्य तात्पर्यम्, तयोरैक्योपादानं तु "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति सूत्रस्योभयोः प्रकरणयोः प्रवृत्तत्वाद् भिन्नप्रकरणेऽपि तत्प्रवृत्तिरिति सम्भवच्छङ्कापनोदनमात्रपरम् । तथा च नानेन ग्रन्थेन न्यासकारस्योभयपक्षे सम्मतिः प्रदर्शयितुं शक्यते, प्रकृतग्रन्थस्य परस्परविरुद्धलौकिक[ पूर्वप्रदर्शित ]न्यायद्वयनिमित्तकफलभेदमात्रवारणाय प्रवृत्तत्वात् । अथवा तक्रकौण्डिन्यन्यायस्य येन नाप्राप्तविषये प्रवृत्तिः, न चान्त्यवृद्ध्या सहादिवृद्धेर्येन नाप्राप्तविषयत्वमिति तस्य न्यायस्य नात्र प्रवृत्तिरिति शङ्कया वा न्यासकारेण पक्षान्तरमाश्रितमिति स्वीकरणीयम् । अयमाशयः– नाप्राप्ते [ अवश्यप्राप्ते ] दधिदाने विधीयमानं तक्रदानं दधिदानस्य बाधकं भवति *येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति* इति न्यायात्, अत्र चान्त्यवृद्धौ प्राप्तायामप्राप्तायां चादिवृद्धिविधानम्–यथा सुश्रुतोऽपत्यं सौश्रुत इति, अत्र हि नान्त्यवृद्धिर्न वोपान्त्यवृद्धिः प्राप्नोति येन नाप्राप्तविषयत्वाभावाच्च तन्न्यायप्रवृत्तिरिति प्रकरणभेदमाश्रित्य समाधानमपि सम्यगेव । स्पष्टश्चायमर्थो "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति सूत्रस्थानीये "तद्धितेष्वचामादेः" [ पा० सू० ७. २. ११७. ] इति सूत्रे महाभाष्ये, तथा हि–"तद्धितेष्वचामादिवृद्धावन्त्योपधालक्षणवृद्धिप्रतिषेधः" [ आक्षेपवार्त्तिकम् ], तद्धितेष्वचामादिवृद्धावन्त्योपधालक्षणाया वृद्धेः प्रतिषेधो वक्तव्यः–'कौष्ट्रः, जागतः' इति । ननु चाचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते, कथमन्यस्योच्यमानाऽन्यस्य बाधिका स्यात् ? असति खल्वपि संभवे बाधनं भवति । अस्ति च सम्भवो यदुभयं स्यात् । "लोकविज्ञानात् सिद्धम्" [ वार्तिकम् ] सत्यपि सम्भवे बाधनं भवति, तद्यथा–सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति, एवमिहापि सत्यपि सम्भवेऽचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते । विषम उपन्यासः, नाप्राप्ते दधिदाने तक्रदानमारभ्यते, तत्प्राप्ते आरभ्यमाणं बाधकं भविष्यति, इह पुनरप्राप्तायामन्त्योपधालक्षणायां वृद्धावचामादिवृद्धिरारभ्यते–'सुश्रुत्सौश्रुत' इति । "पुष्करसद्ग्रहणाद्वा" [ वार्तिकम् ], अथवा यदयमनुशतिकादिषु पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्योऽचामादिवृद्धावन्त्योपधालक्षणा वृद्धिर्न भवतीति" इति । अयमाशयः–यत्र तद्धितञ्णित्प्रत्ययनिमित्तका आदिस्वरस्य वृद्धिः क्रियते तत्र तन्निमित्तैव क्वचिदन्त्यस्य "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति वृद्धिः प्राप्नोति, यथा–क्रोष्टुरपत्यं 'क्रौष्ट्रः' इति; क्वचिदुपान्त्यलक्षणा वृद्धिः "ञ्णिति" [ ४. ३. ५० ] इति च वृद्धिः प्राप्नोति । [ अत्रेदं स्मरणीयम्–पाणिनीयतन्त्रे इयमुपान्त्यवृद्धिर्धातोरेव न विधीयते, किन्तु सामान्येन; स्वमते तु तत्र प्रकरणे धातोरेव प्रकृतत्वात् तथा विवरणं कृतम्, तदग्रिमे सूत्रे च नाम्नोऽपि वृद्धिरेष्टव्यैव, अन्यथा कलि-हलिवर्जनं व्यर्थमापद्येत, ततश्च तत्पूर्वसूत्रस्यापि नाम्नि प्रवृत्तौ बाधकाभावः, नामसु तद्धितवृत्त्यादावादिवृद्ध्या बाधितत्वान्न प्रवृत्तिरिति त्वन्यत् ] इत्थं च यथालक्ष्यमुभयोरपि वृद्ध्योः प्राप्त्या तत्प्रति-

षेधार्थमुपायः कर्त्तव्य इति शङ्कायां–विशेषविहिता पराचादिवृद्धिरन्त्योपान्त्यवृद्धी बाधिष्यते इति चेदुत्तरं दीयेत, तर्हि भिन्नविषयत्वादेव बाध्यबाधकभावाभाव इति प्रत्युत्तरं स्यात् । यदि एकस्यैव स्थानिनः सर्वा वृद्धयः प्राप्ताः स्युस्तर्हि बाध्यबाधकभावः सम्भवेदपि, इह चाद्यन्तोपान्त्यानां यथायथं स्थानित्वमिति विषयभेदादसंभवाभावेन नास्ति बाध्यबाधकभाव इति । अथ च लोके यथा तक्रकौण्डिन्यन्यायादिविषये सत्यपि संभवे विषयभेदेऽपि बाध्यबाधकभाव इष्यते तथाऽत्रापि सत्यपि संभवे बाध्यबाधकभावोऽस्त्विति शङ्क्यते चेत्? तदापि न निस्तारः, *येन नाप्राप्त*न्यायेन हि यस्य शास्त्रस्य स्वविषयेऽवश्यमेव प्राप्तिस्तदेव शास्त्रं स्वेन बाध्यते इति निर्णीयते, अत्र च सुश्रुतोऽपत्यं सौश्रुत इत्यादावन्त्योपान्त्यलक्षणयोर्वृद्ध्योरप्राप्तावप्यादिवृद्धिर्विधीयत इति नात्र येन नाप्राप्तत्वमिति नास्ति बाध्यबाधकभावः । तत श्च 'कौष्ट्रः, जागतः' इत्यादिलक्ष्येष्वन्त्योपान्त्यवृद्धिर्दुर्वारैवेति चेत्? अत्र प्रतिविधानम्, तथाहि–अनुशतिकादिगणे उभयपदादिस्वरवृद्धिविधानार्थं पुष्करसच्छब्दः पठ्यते, तत्फलं तु पुष्करसदोऽपत्यं पौष्करसादिरित्यत्र बाह्वादित्वादिञि उभयपदादिस्वरस्य वृद्धिरेव । यदि चादिवृद्धौ सत्यामपीहोपान्त्यवृद्धिः स्यात् तदाऽपि गणपाठफलं सिद्धमेवेति वृथैव तत्र गणे तस्य पाठः स्यादिति स व्यर्थीभूतोऽसति बाधके प्रमाणानां सामान्ये पक्षपात इति न्यायाद् 'आदिवृद्धिरन्त्योपधा-[ अन्त्योपान्त्य ]लक्षणां वृद्धिं बाधते' इति ज्ञापयति । तथा च ज्ञापकादेव 'कौष्ट्र' इत्यादौ नान्त्योपान्त्यवृद्धिरिति स्वमते चैनयोर्वृद्ध्योर्भिन्नप्रकरणत्वेनैव समाधानं कर्तुं शक्यमिति ज्ञापकाश्रयणं न कृतम् । एवं च येन नाप्राप्तविषयत्वाभावादेव तक्रकौण्डिन्यन्यायेन समाधानेऽरुचौ सत्यां यद्वाख्यात-कृत्प्रकरणमेकमेवेति समाधानान्तरं न्यासकारेण दत्तं, न तु भेदपक्षं भेदाभेदपक्षं वाश्रित्येति तेन रूपेण तदाशयवर्णनमत्र न युक्तमिति विस्तराद् विरमामः । वस्तुतस्तु "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति सूत्रस्य नाख्यातप्रकरणमात्रविषयत्वम्, आख्यातमिति हि त्याद्यन्तस्य [ तिङन्तस्य ] संज्ञा, तत्राख्यातप्रकरणविषयत्वमित्यस्य त्यादि[ तिङ् ]सम्बन्धिञ्णित्प्रत्ययविषयत्वमित्यर्थः स्यात्, न च तन्मात्रविषयत्वमस्य, तथा सति कलि-हलिवर्जनं वृथैव स्यात्, कलिं हलिं वाऽचक्षण इत्यर्थे "णिज् बहुलं नाम्नः०" [ ३. ४. ५२. ] इति णिचि तस्य त्यादित्वा[तिङ्त्वा]–भावात् तत्र वृद्धेरप्राप्तौ तद्वर्जनं वृथैव स्यात् । न च मास्तु णिचस्त्यादि[ तिङ् ]प्रत्ययत्वं किन्तु त्याद्य[तिङ]न्तप्रकरणमध्यपतितत्वं त्वस्त्येवेति वाच्यम्, एवं सति "संयोगात्" [ २. १. ५२. ] इत्यादिसूत्राणां स्यादिप्रकरणपठितानामुभयत्र प्रकरणे प्रवृत्तिर्न स्यात् । किञ्च नेदृशे विषये प्रकृतन्यायस्य प्रसरः, यतश्च यत्र शब्दो वाच्यत्वेनानेकमर्थमुपस्थापयति तत्र कोऽर्थो ग्राह्य इति संशयेऽयं न्यायो निर्णायकः, इह च न ञ्णितीति पदं वाच्यत्वेन 'अञ् अण्' इत्यादिप्रत्ययानुपस्थापयति, किन्तु ञित्त्वेन णित्त्वेन च लिङ्गेनेत्यस्य रूढपदत्वाभावादेतद्विषये प्रकृतन्यायस्य न प्रवृत्तिरिति । एवं सति 'द्वैमात्रः, कौष्ट्रः, जागतः' इत्यादिषु वृद्धिवारणाय कोऽभ्युपाय इति चेत्? अत्रोच्यते–स्वमतेऽपि "अनुशतिकादीनाम्" [ ७. ४. २७. ] इति पूर्वोत्तरपदयोरादिस्वरवृद्धिविधायकसूत्रस्थे गणपाठे पुष्करसच्छब्दपाठस्य 'आदिवृद्धिरन्त्योपान्त्यवृद्धी बाधते' इति ज्ञापनार्थत्वस्य संग्राह्यत्वेन दोषाभावात् । न च स्वमते "ञ्णिति" [ ४. ३. ५०. ] इति सूत्रे धातोरुपान्त्यस्यातो वृद्धिरिति व्याख्यातत्वेन पुष्करसदोऽपत्यं–पौष्करसादिरित्यत्र तस्याप्राप्त्योत्तरपदादिस्वरवृद्धेरप्राप्त्या कथं पाठस्य वैयर्थ्यमित्याशङ्कनीयम्, यतो धातोरिति तत्र न प्रकृतं, किन्तु पूर्वसूत्राणां प्रायो धातुविषयत्वेन धातोरित्यापातायातमिति तस्य धातुमात्रविषयत्वकल्पनानौचित्यात् । उक्तं च धातोरित्यंशस्य परिशेषलब्धत्वमिति सति संभवे नामविषयेऽपि प्रवृत्तौ बाधकाभावाच्च ॥ ४ ॥

## *निरनुबन्धग्रहणे सामान्येन* ॥ ५ ॥

**सि०**—यत् किञ्चित् वस्तु, निरनुबन्धं–कार्यविशेषहेतुभूतानुबन्धशून्यं, तत्सहितं च प्रयुज्यते निर्दिश्यते वा शास्त्रे, तस्य निरनुबन्धस्योच्चारणे–तथाभूतमेवोच्चार्य विधीयमाने कार्ये, सामान्येन–तद्रूपं समानतया यत्र वर्त्तते तेन रूपेणैव, ग्रहणम् । तथा चानुबन्धस्याप्रयोगितया तद्रहितं रूपमुभयत्र–निरनुबन्धोच्चारिते सानुबन्धोच्चारिते च तिष्ठतीति तयोरुभयोर्ग्रहणं भवति तत्रेति भावः । अस्य च सूचकम्–"अरोः सुपि रः" [ १. ३. ५७. ] इति रुसम्बन्धिभिन्नस्य रस्य सुपि परे विसर्गबाधनाय रविधायके सूत्रे रुवर्जनमेव, तद्धि "रः पदान्ते विसर्गस्तयोः" [ १. ३. ५३. ] इति सूत्रेण निरनुबन्धस्य रेफस्य स्थाने विधीयमानस्य विसर्गस्य रुसम्बन्धिरेफे प्रवृत्त्यभावेन व्यर्थं सत् प्रकृतन्यायं ज्ञापयति । तथा च तत्रोभयो रेफयोर्ग्रहणे प्रसक्ते रुसम्बन्धिभिन्नरेफस्य सुपि विसर्गवारणाय तस्य स्वांशे चारितार्थ्यम् । फलं च 'स्वः' इत्यत्र प्राकृतस्य [ स्वाभाविकस्य ] रेफस्य, 'कः' इत्यादौ रुसम्बन्धिनश्च तस्य विसर्गसिद्धिः । अयं च न्यायोऽसार्वत्रिकः *निरनुबन्धग्रहणे न सानुबन्धस्य* इति पूर्वव्याख्यातन्यायेन सत्प्रतिपक्षत्वात् ॥५॥

## *निरनुबन्धग्रहणे सामान्येन* ॥ ५ ॥

**त०**—वस्तुतस्तु *निरनुबन्धग्रहणे न सानुबन्धस्य* इति न्यायस्य पूर्वं ज्ञापकसिद्धस्य वर्णितत्वेन तत्प्रतिपक्षभूतोऽयं न्यायो नात्मानं लब्धुमीष्टे, एकस्मिन्नेव विषये विरुद्धस्य न्यायद्वयस्यानौ-

चित्यात्। ननु चोभयोरपि ज्ञापकसिद्धत्वेन कस्यौचित्यमित्यत्र विनिगमकाभावेनोभयोरपि स्वीकार आवश्यक इति वाच्यम्, एकस्य ज्ञापकेन पूर्वं स्थिरीकृतेऽर्थे तद्विरुद्धेनान्येन तदनित्यत्वज्ञापनस्यैवौचित्यात्। अत एव च "अरोः सुपि रः" [१. ३. ५७.] इति सूत्रे न्याससारसमुद्धारे-"रुवर्जनाल्लाक्षणिकन्यायो निरनुबन्धन्यायश्चानित्यः" इत्येवोक्तम्, न तु रुवर्जनस्य प्रकृतन्यायज्ञापकत्वमुक्तम्, तथा च वृत्तौ प्रकृतन्यायज्ञापनकथनं प्राचां वृत्तिकृतामनुरोधेनैव। केचित्तु-'रु'शब्दे उकारस्यानुबन्धत्वं नास्ति, कार्यार्थमेवानुबन्धकरणस्य शास्त्रकारशैलीसिद्धत्वेन 'रु'शब्दे उकारस्य कार्यान्तराभावादुच्चारणमात्रार्थत्वेन तस्यानुबन्धत्वाभावात् प्रकृतन्यायविषयत्वाभावः, इति वदन्ति, तन्न चारु-"अतोऽति रोरुः" [१. ३. २०.] "रोर्यः" [१. ३. २६.] इत्यादौ विशेषणार्थत्वस्य संभवेनोच्चारणमात्रार्थत्वाभावात्। उच्चारणार्थस्याऽपि प्रयोगाभावेनाप्रयोगित्वरूपेत्त्व[ इत्संज्ञकत्व ]सत्त्वादित्संज्ञायोग्यत्वरूपानुबन्धत्वाव्याघातात्। उकारस्य विशेषणत्वफलं च 'प्रातरत्र' इत्यादौ 'भ्रातर्गच्छ' इत्यादौ चोत्वस्याभावः। तथा च "रः पदान्ते०" [१. ३. ५३.] इत्यत्र निरनुबन्धग्रहणपरिभाषायाः प्राप्तिर्न वारयितुं शक्यत इति प्रकृतज्ञापकेन तदनित्यत्वज्ञापनमावश्यकमेवेति ॥ ५ ॥

## ※साहचर्यात् सदृशस्यैव※ ॥ ६ ॥

**सि०**—सह-अव्यभिचरितं यथा स्यात् तथा, चरति-व्यवहरतीति सहचरस्तस्य भावः साहचर्यमव्यभिचरितत्वं, तस्मात्, सदृशस्य-स्वनिरूपितसादृश्यवत एव ग्रहणं, न तु विसदृशस्येति न्यायार्थः। एकत्र निर्दिष्टेषु पदार्थेषु कश्चन सर्वथा न व्यभिचरति, कश्चन च केनचिदंशेन व्यभिचरत्यपि, तत्र यः सर्वथा व्यभिचारहीनः स एव ग्राह्य इत्याशयः। स्वरूपतोऽविशेषात् तादृशस्यान्यस्यापि ग्रहणे प्रसक्ते सहचरितव्यक्तिसादृश्यवत एव ग्रहणमिति नियमार्थोऽयं न्यायः। अयं च न्यायो लोकसिद्ध एव, लोकेऽपि हि 'राम-लक्ष्मणौ' इत्युक्ते लक्ष्मणसाहचर्याद् दशरथापत्यत्वेन सदृशस्य दाशरथेरेव रामस्य ग्रहणम्, 'राम-कृष्णौ' इत्युक्ते च कृष्णसहचरितस्य बलरामस्यैव ग्रहणम्, अतश्च नात्र ज्ञापकापेक्षा। यत् त्वविशेषोक्तिरेवैतन्न्यायबोधिकेति, तन्न चारु-अविशेषोक्तेः सामान्यग्रहणसाधकत्वेऽपि विशेषग्रहणसाधकत्वे व्यापाराभावात्। फलं त्वस्य "क्त्वा-तुमम्" [१. १. ३५.] इत्यव्ययसंज्ञाविधायकसूत्रे कृत्प्रत्यययोः क्त्वा-तुमोः साहचर्यात् कृत एवाम्प्रत्ययस्य ग्रहणं, न तु स्यादिप्रत्ययस्याम इति।

"अस्य चास्थिरत्वम्, तेन "वत्तस्याम्" [१. १. ३४.] इत्यत्र न केवलं वत्तसिसाहचर्यात्तद्धितस्यैवामो ग्रहणम्, अपि तु परोक्षास्थानिकस्यामोऽपि, तेनेदमनयोरतिशयेन किमित्यर्थे किंशब्दात् "द्वयोर्विभज्ये च तरप्" [७. ३. ६.] इत्यनेन तरपि "किन्त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम्" [७. ३. ८.] इति तरपोऽन्तस्यामादेशे च तस्य यथाऽव्ययत्वेन ततो विहितस्य सेः "अव्ययस्य" [३. २. ७.] इति लुब् भवति तथैव 'पाचयांच ुषा' इत्यत्र परोक्षास्थानजस्याप्यामोऽग्रे टाया लुप् सिद्धः" इति प्राञ्चः ॥

"वत्तस्याम्" [१. १. ३४.] इति सूत्रस्थबृहन्न्यास-न्यासग्रन्थयोस्तु प्रकृतन्यायसहकारेणैव परोक्षास्थानिकस्यामो ग्रहणं स्यादेरामोऽग्रहणं च साधितम्। तथाहि-बृहन्न्यासे-'आम्' इति षष्ठीबहुवचनस्य, तद्धितस्य, परोक्षास्थाननिष्पन्नस्य चाविशेषात् त्रयाणां ग्रहणं प्राप्नोति, द्वयोरेव चेष्यते, अतिव्याप्त्युपहतत्वादलक्षणमेतदित्याह-वत्तसीत्यादि। अयमर्थः-वत्-तसी अविभक्ती, तत्साहचर्यादामोऽप्यविभक्तेरेव ग्रहणम्, 'दरिद्राञ्चकृवद्भिः' इत्यत्र कसुस्थाननिष्पन्नस्य पचतितरामित्यस्य च ग्रहणं, तावेव हि तयोर्वत्तस्योरविभक्तित्वेन हितौ, अत आह-तद्धितस्येत्यादि, रूपापेक्षया त्वेकवचनम्। अत एव "किन्त्याद्येऽव्यय०" [७. ३. ८.] [ इत्यादिना ] इत्यत्रादिशब्द आम्विधायकसूत्रपरिग्रहार्थं उक्तः।" इति। न्यासेऽपि 'वत्तसि'-साहचर्याद् 'आम्' इति तद्धितस्य "किन्त्याद्येऽव्यया०" [७. ३. ८.] इत्यादिना विहितस्यामो ग्रहणम्" इति बृहद्वृत्तिग्रन्थव्याख्यानावसरे "तद्धितस्येत्युपलक्षणम्, ततः "धातोरनेकस्वरात्०" [३. ४. ४६.] इत्यादिना विहितस्यामो ग्रहणम्, तेन पाचयाञ्चकृवेत्यादौ टालोपे पदत्वादनुस्वारसिद्धिः। न चोपलक्षणात् षष्ठीबहुवचनस्यापि ग्रहणं किं न स्यादिति वाच्यम्, यतो य आम् आमेव भवति स गृह्यते, अयं तु नाम् साम् वा भवतीति" समाधाय "यद्वा वत्तसी अविभक्ती तत्साहचर्यादामोऽप्यविभक्तेरेव ग्रहणम्, ततो दरिद्राञ्चकृवद्भिरित्यत्र कसुस्थाननिष्पन्नस्य पचतितरामित्यत्र "किन्त्याद्येऽव्यया०" [७. ३. ८.] इति विहितस्य च ग्रहणं भवति, यत एतावेव तयोर्वत्तस्योरविभक्तित्वेन हितौ इति व्युत्पत्त्या तद्धितावित्यभिधीयते" इति बृहन्न्यासोक्तरीत्यैवोभयग्रहणं साधितम्। एतयोर्ग्रन्थयोश्चायमाशयः-बृहद्वृत्तिग्रन्थे तद्धितशब्दस्तत्सदृशपरः, सादृश्यं चाविभक्तित्वेन, सदृशग्राहित्वं च साहचर्यनिबन्धनमिति स्पष्टमेवैतन्न्यायोपयोगः कृत इति प्रतीयते। ततश्च तत्र परोक्षास्थाननिष्पन्नस्यामो ग्रहणसिद्ध्यर्थमेतन्न्यायानित्यत्वाश्रयणं प्राचां वृत्तिकृतां किंमूलकमिति नोपलभामहे। न च बृहद्वृत्तिग्रन्थस्य'तद्धित'-शब्दस्य तद्धितत्वेन प्रसिद्धप्रत्ययपरत्वाश्रयणे परोक्षास्थाननिष्पन्नस्य ग्रहणं न स्यादित्यर्थमनित्यत्वाश्रयणमावश्यकमेवेति वाच्यम्, तथा सति षष्ठीबहुवचनग्रहणवारणायोपायान्तरक-

रणस्यावश्यकतया वरमाचार्यवर्णितरीतेरेवाश्रयणमित्यदोषात्। तथा चैतदर्थं न्यायानित्यत्वाश्रयणमनावश्यकमित्येव युक्तः पन्थाः ॥ ६ ॥

***साहचर्यात् सदृशस्यैव* ॥ ६ ॥**

त०—अयं च न्यायो लोकसिद्ध एवेति वृत्तौ सूचितम्। लोकेऽपि हि साहचर्यस्यान्यतरार्थपरिग्रहकारणत्वं प्रसिद्धम्।

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥" [वाक्यपदीये]

इति हरिकारिकोक्तरीत्या शब्दार्थस्य संदेहे सति संयोगादिमध्यपतितस्य साहचर्यस्य स्वसदृशग्राहकतया निर्णायकत्वं प्रसिद्धम्। तत्र साहचर्यपदं च सादृश्यार्थत्वेन व्याख्यातम्, सहचरणं सदृशयोरेव, तयोरेव च सहविवक्षेति तयोरेव सहप्रयोगः। तथा च परस्परसादृश्येनापि युगपदेव परस्परसदृशग्रहणम्, यथा–वृत्त्युदाहृते 'रामलक्ष्मणौ' इत्यादौ रामसादृश्येन लक्ष्मणो दाशरथिर्न तु दुर्योधनात्मजः, लक्ष्मणसादृश्येन च रामो दाशरथिरेव न जामदग्न्य इति युगपदेव नियमनमिति न परस्पराश्रयत्वम्। बोधितश्च सदृशानामेव प्रयोगे सहभावः "पञ्चम्यपाङ्परिभिः" [पा० सू० २. ३. १०.] इति सूत्रस्थपरिशब्दो वर्जनार्थ एवेति साधनावसरे "कर्मप्रवचनीययुक्ते द्वितीया" [पा० सू० २. ३. ८.] इति सूत्रे महाभाष्ये–"यद्यपि तावदयं परिर्दृष्टापचारो वर्जने चावर्जने च। अयं खल्वपशब्दोऽदृष्टापचारो वर्जनार्थ एव, तस्य कोऽन्यो द्वितीयः सहायो भवितुमर्हति–अन्यदतो वर्जनार्थात्। तद्यथा–अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभः" इति। तथा च सहप्रयोगः सहभावो वा सदृशानामेवेति सादृश्येन सदृशस्यैव ग्रहणमिति "क्त्वातुमम्" [१. १. ३५.] इत्यादौ क्त्वादिना सादृश्यात् कृत एवामो ग्रहणम्, "वत्तस्याम्" [१. १. ३४.] इत्यादावविभक्तित्वेन सादृश्याच्च षष्ठीबहुवचनस्य न ग्रहणम्, तद्धितत्वेन प्रसिद्धप्रत्ययत्वेन सादृश्यग्रहणे च 'पातयांचक्रुषा' इत्यादौ क्वसोः स्थाने "धातोरनेकस्वरात्०" [३. ४. ४६.] इति विहितस्यामो ग्रहणं न स्यादिति तस्यानव्ययत्वेन ततः परस्याष्टाविभक्तेर्लुप् न स्यात्। अथाव्ययसंज्ञाया विभक्तिलोपमात्रफलत्वे मास्तु सा, यतोऽस्य नामत्वाभावेन विभक्तेरप्राप्तिरेव, ततश्चाव्ययसंज्ञया नामत्वं प्रसाध्य विभक्तिरुत्पाद्या, तस्याश्च पुनर्लुब् विधेयेति मास्तु विभक्तिः, 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायादिति चेत्? अत्रोच्यते–विभक्त्युत्पत्तौ तल्लोपे च पदत्वेन "तौ मुमो०" [१. ३. १४.] इत्यनुस्वारानुनासिकयोः पाक्षिकयोरेव फलत्वात्, अन्यथा पदत्वाभावेन "म्नां धुड्वर्गे०" [१. ३. ३९.] इत्यनेनान्त्य एव स्यादिति रूपद्वयं यदिष्यते तन्न स्यात्। ननु चाव्ययत्वाभावे स्याद्यन्तत्वनिमित्तं पदत्वं मास्तु, क्वसोः परोक्षावद्भावेन त्याद्यन्तत्वनिमित्तं पदत्वं तु भविष्यत्येवेति व्यर्थमेवाव्ययसंज्ञार्थमिह प्रयत्नकरणमिति चेत्? न–क्वसोः परोक्षावद्भावेऽपि तत्स्थानिकस्यामः परोक्षावद्भावाभावात्, अतिदेशप्राप्तधर्मस्यादेशे सुलभत्वेऽपीह "वेत्तेः कित्" [३. ४. ५१.] इति किद्विधानेन परोक्षास्थाननिष्पन्नस्यामः परोक्षावद्भावाभावसाधनात्, अन्यथा "वेत्तेरवित्" [३. ४. ५१.] इति न्यासे आमोऽवित्करणादवित्परोक्षायाश्च "इन्ध्यसंयोगात् परोक्षा किद्वत्" [४. ३. २१.] इत्यनेन कित्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। तथा च व्यर्थीभूतं कित्त्वविधानमामः परोक्षावद्भावो नास्तीति ज्ञापयति, ततश्च त्यादिविभक्त्यन्तनिमित्तं पातयामीत्यस्य पदत्वं न स्यादिति तदर्थमस्याव्ययत्वमावश्यकमेव। आमः परोक्षावद्भावाभावज्ञापनाच्च विदाञ्चकारेत्यादौ "द्विर्धातुः परोक्षा०" [४. १. १.] इति द्वित्वमपि विदो नाभूत्। यद्यपि "वेत्तेरवित्" इति करणे मात्रागौरवं प्रक्रियागौरवं चास्ति, तथाहि–'कित्' इत्यस्योच्चारणे मात्रात्रयम्, 'अवित्' इत्यस्योच्चारणे च चतस्रो मात्राः, किञ्च, प्रथममामोऽवित्त्वमेतेन साध्यं, ततश्च तस्य कित्त्वमिति साक्षात्किद्विधानापेक्षया प्रक्रियागौरवमपि, तथापि विदाञ्चकारेत्यादौ विदो गुणाभावसाधनरूपफलमुखतया न्यासान्तरस्य तत्राप्रस्तुतत्वेन लाघवगौरवचर्चाया अनुत्थानात्। कृते च प्रकृते न्यासे ज्ञापिते चास्मिन्नर्थे यदि लाघवमपि भवति तर्हि सोऽपि गुण एव। किञ्च परोक्षाविषयेऽवित्किच्छब्दौ पर्यायाविव, यतोऽवित्परोक्षाया "इन्ध्यसंयोगात् परोक्षा किद्वत्" [४. ३. २१.] इति किद्वद्भावो निश्चित एव। तथा च पर्यायशब्दानां लाघवगौरवचर्चायाः शास्त्रकारशैलीविरुद्धत्वादिहापि तच्चर्चाया अभाव एव। यच्च प्रक्रियागौरवमुद्भावितं तदपि न–न ह्यविद्भावे कृते तस्य कित्त्वविधानस्य कर्त्तव्यता तिष्ठति, शास्त्रेण ["इन्ध्यसंयोगात् परोक्षा किद्वत्" इत्यनेन] एकत्र स्वविषयसंस्कारे स्थिरीकृते विनैव व्यापारान्तरमन्यत्र तद्बोधोदयात्। पर्यायशब्दानां लाघव-गौरवचर्चाया अनादरादेव 'क्लीब'शब्दस्य 'नपुंसक'शब्दस्य च तत्र तत्र पर्यायेण व्यवहार आचार्यैः कृतः, यथा–"क्लीबे" [२. ४. ९७.] इति, "नपुंसकस्य शिः" [१. ४. ५५.] इति च, ततश्चेदृशे विषये न लाघवगौरवचर्चा। "अवित्'करणापेक्षया कित्करणे लाघवं यथोक्तार्थबोधनेऽपि समर्थं, तथैव "अनवर्णा नामी" [१. १. ६.] इत्यत्र संज्ञाया एकवचनान्तत्वोपन्यासेन संज्ञ्यपेक्षया वचनभेदं कुर्वताऽऽचार्येणान्योऽर्थोऽपि बोधितः, स चायं–"यत्र नामिनः कार्यं क्रियते तत्र यदा कार्यात् कार्यी स्वरो न्यूनः स्यात् तदैव नामिसंज्ञा-

प्रवृत्तिर्नान्यथा, तेन ग्लायति म्लायतीत्यादौ न गुणः । अत एव तत्र [ धातुपाठे ] आह–ऐकारोपदेशबलान्नामित्वाभावाद् गुणाभाव इति । न च सन्ध्यक्षराणां द्विमात्रत्वात् प्रयत्नाधिक्याभावादाधिक्याभाव इति वाच्यम्, यतो विश्लिष्टावर्णत्वेनाधिकयोरैकारौकारयोः प्रश्लिष्टावर्णत्वेन न्यून एकार ओकारश्च भवति" । अयमाशयः–एकारोच्चारणेऽकारस्य विश्लेषो नावगम्यते, तदुच्चारणे च विवृततर एवास्य प्रयत्नः, ऐकारोच्चारणे तु अकारो विश्लिष्ट एव प्रतिभासते, अतिविवृततरश्चास्यप्रयत्न इति तयोर्मात्रैक्येऽप्येकारापेक्षया ऐकारस्याधिक्यमिति । ननु यदि कार्यिस्वरस्य न्यूनत्व एव नामिसंज्ञा ततो नयतीत्यादौ गुणो न स्यात्, तत्रैकारस्य द्विमात्रत्वेन गुणेन एकारेऽपि द्विमात्रत्वस्यैव लाभेन साम्यादिति चेत्? न–तत्र समत्वेऽपि एकारस्य प्रश्लिष्टावर्णत्वेनाधिक्यं गुणस्येति संज्ञाप्रवृत्तौ बाधकाभावात् । न चैतदर्थं न वचनभेदस्यावश्यकता, किन्तु ग्लैघात्वादावैकारोपदेशबलाद् गुणस्य बाध इति वाच्यम्, आयादीनामपि बाधप्रसङ्गात् । वस्तुतस्तु–आयादेशं प्रति ऐकारस्य निमित्तत्वात् तस्य बाधो न युक्तिमान् *यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमस्ति न स विधिर्बाध्यते* इति न्यायात्, तथापि स्वस्वरूपविघातमात्ररूपबाधपक्षमादाय तथोक्तमिति न दोषः । अत एव वाऽस्त्वेर्बृहन्न्यासे पक्षान्तरमुक्तम्–"यद्वा अविद्यमानमवर्णं येष्विलवर्णवर्जनात् सन्ध्यक्षरेषु स्ववर्णभागस्यापि सद्भावात् नामिसंज्ञाभावः" इति । इत्थं व्याख्यायां यद्यपि "नाम्यन्तरस्था०" [ २. ३. १५. ] "न नाम्येकास्वरात्०" [ ३. २. ९. ] "व्यञ्जनादेर्नाम्युपान्त्याद्वा" [ २. ३. ८७. ] इत्यादिषु नामिसंज्ञाप्रदेशेषु सन्ध्यक्षरस्याग्रहणाद् दोषो भवति तथापि प्रथमे–नामिनोऽन्ते तिष्ठन्तीति व्युत्पत्त्या नाम्यन्तस्थाः सन्ध्यक्षराण्युच्यन्ते, द्वितीयेऽपि–नाम्येकस्वरादित्यस्यावृत्त्या नामी एकदेशेन स्वरो यस्येति व्याख्यानात् सन्ध्यक्षराणां संग्रहः, तृतीयेऽपि–प्रवेपणमित्यादौ सन्ध्यक्षरेषु पूर्वभागस्यावर्णत्वात्, उत्तरभागस्य च नामिरूपत्वान्नाम्युपान्त्यत्वाक्षतिरिति समाधेयमिति स्पष्टम् "अनवर्णा नामी" [ १. १. ६. ] इति सूत्रे बृहन्न्यासे । प्रकृतमनुसरामः–तथा च "वेत्तेः कित्" [ ३. ४. ५१ ] इत्यत्रावितः परोक्षायाः किद्वद्भावविधायकसूत्रव्यापकतासिद्ध्यर्थं "वेत्तेरवित्" इति न्यासस्य न्यायप्राप्तत्वेऽपि परोक्षास्थानिकस्यामो न परोक्षावद्भाव इत्यर्थज्ञापनद्वारा विदाञ्चकारेत्यादौ द्वित्वाभावादिसाधनाय क्रियमाणो "वेत्तेः कित्" इति न्यासो लघुभूतो न च प्रक्रियागौरवमिति तेन रूपेण [ परोक्षावद्भावेन ] पातयामित्यस्य स्याद्यन्तत्वनिमित्तकपदत्वासंभावनायाऽनुस्वारान्त्यवर्णसहिततरूपद्वयलाभार्थमव्ययसंज्ञासिद्धयेऽविभक्तित्वेन सादृश्यमादाय परोक्षास्थानिकस्यामो ग्रहणायेह [ "वत्तस्याम्" १. १. ३४. इति सूत्रे ] प्रकृतन्यायप्रवृत्तिरेव बृहन्न्यासादिग्रन्थानुकूलेति तदर्थं प्रकृतन्यायानित्यत्वाश्रयणमनुचितमिति । यदि च 'पातयांचक्रुषा, पातयाञ्चक्रुषा'इतिरूपद्वयस्याभिधाने दृढतरप्रमाण एव तदर्थमयं यत्न आवश्यकः, केचिदन्ये वैयाकरणा अत्राव्ययत्वं नेच्छन्ति, तन्मते च रूपैक्यमेवेति तेन मतेन सहैक्याय स्वमतेऽपि रूपैक्यमेव स्वीकार्यमित्युच्यते तदा "वत्तस्याम्" [ १. १. ३४. ] इति सूत्रे तद्धितत्वेन प्रसिद्धप्रत्ययत्वेन सादृश्यमेव ग्राह्यमिति नास्यामः संग्रहस्यावश्यकत्वम्; किन्तु प्रकृत[ "वत्तस्याम्" ]सूत्रस्थबृहन्न्यासग्रन्थपर्यालोचनया स्वमते रूपद्वयस्यैवेष्टत्वमिति तस्याप्यामः संग्रह आवश्यक एवेति प्रतीयते ॥ ६ ॥

## *वर्णग्रहणे जातिग्रहणम्* ॥ ७ ॥

सि०—'प्रत्युच्चारणं शब्दो भिद्यते' इति शब्दविदां सम्प्रदायेऽपि क्वचिच्छ्रूयत एव, महाभाष्ये च यत्र तत्रैतद् दृश्यते, तथा चैक एवाकारः प्रत्युच्चारणं भिन्न एव, ह्रस्वत्वादिकृतभेदवानपि; एवमन्येष्वपि वर्णेषु कालभेदाद् देशभेदाद् गुणभेदाच्च भेद इत्येकस्य कस्यचिद् ग्रहणेऽन्यस्य ग्रहणं न प्राप्नोतीति न्यायोऽयमाश्रीयते । तथा च वर्णग्रहणे–वर्णत्वव्याप्यजात्यवच्छिन्नग्रहणे, जातिग्रहणं–जात्यवच्छिन्नसकलव्यक्तिग्रहणमिति न्यायार्थः । तथा च न कालगुणस्वरादिभेदकृतो वर्णभेदः । अत्र च न ज्ञापकापेक्षा, लोकेऽपि जातिपक्षाश्रयेण व्यवहारस्य प्रसिद्धत्वात् । तथाहि–देवः पूज्य इत्यादौ जातिविवक्षयैव सकलदेवानां पूज्यत्वं सिद्ध्यति । यत् तु प्राञ्चः–एतन्न्यायसाध्यलक्ष्यसिद्ध्यर्थं यत्नान्तराकरणमेव एतन्न्यायज्ञापकमिति, तन्न युक्तम्–आचार्यैर्यत्नाकरणेनैतन्न्यायसाध्यलक्ष्याणामनभिधानस्यैव स्वीकर्त्तव्यत्वापत्तेः । आचार्योच्चारितेन हि केनचिल्लिङ्गेन तदनुक्तोऽपि न्यायादिः शक्यते स्वीकर्त्तुम्, न तु गमकाभावेऽपि स्वतः प्रयोगान् परिकल्प्य, तत्सिद्ध्यर्थं यत्नान्तरानुमानं युक्तम्, उक्तश्चायमर्थः पूर्वमपि । न्यायस्य कण्ठेनानुक्तत्वेऽपि वर्णग्रहणेषु जातिग्रहणरूपन्यायार्थस्याचार्येण "औदन्ताः स्वराः" [ १. १. ४. ] इति सूत्रबृहन्न्यासे स्पष्टमुक्तत्वात्, तथाहि–"इह काल-शब्दव्यवधानाभ्यां भेदो दृष्टः, यथा–असंहितायाम् "अइउवर्णस्यान्ते०" [ १. २. ४१. ] इत्यत्र कालव्यवायः "दतिः" इत्यादौ शब्दव्यवायस्तकारेण ऋकारेकारयोर्व्यवधानात् । एकत्वे तु व्यवायो न दृष्टः, यथा 'अ' इति केवलोऽकार उच्चार्यते । तथोदात्तानुदात्तस्वरितसानुनासिकनिरनुनासिकादिगुणभेदाच्च भेदः । तस्मात् कालादिव्यवायादुदात्तादिगुणभेदाच्च, नानात्वमकारादीनामपि । [ तथा च ] यद्गुणविशिष्टस्य वर्णसमाम्नाये पाठस्तद्गुणविशि-

ष्टस्य संज्ञाव्यवहारः, तेन भिन्नगुणस्य दण्डाग्रमित्यादौ दीर्घाद्यभावः [ स्यादिति चेद् ? ] उच्यते–जात्याश्रयणाददोषः, तथाहि–उदात्तादिभेदभिन्नेष्वकारादिष्वत्वादिजातेर्विद्यमानत्वात् तेषामपि संज्ञाव्यवहारः” इति । तथा च न्यायस्वरूपमनुवादयताऽऽचार्येण न्यायार्थस्य स्वतः सिद्धत्वमिति स्पष्टमेवाऽऽवेदितमिति नात्र ज्ञापकापेक्षा । न्यायफलं तु दण्डाग्रमिति आचार्यसंमतमेव, तत्रापि हि कालभेदादकारस्यान्यत्वे स्वस्वराभावेन दीर्घो न स्यात् । एवं 'जंहम्यते' इत्याद्यपि, तथाहि–“मुरतोऽनुनासिकस्य” [ ४. १. ५१. ] इति सूत्रेणाकारपुरःस्थैकानुनासिकान्तस्य 'रंरम्यते' इत्यादौ यथा म्वागमो भवति तथैवाकारपुरःस्थाऽनेकानुनासिकान्तस्य हम्मतेरपि, जातिपक्षाश्रयणेनाकारपुरःस्थानुनासिकत्वजात्यवच्छिन्नान्तस्य म्वागमविधानात् । अत्र “अस्यास्थैर्योञ्च क्वचिद् वर्णग्रहणे जातिग्रहणं स्याञ्च न स्याच्च, यथा सुपूर्वस्य “धिणुङ् ग्रहणे” इत्यस्योदित्त्वान्नागमे तस्य “तवर्गस्य श्ववर्ग०” [ १. ३. ६०. ] इति णत्वे धिण्णूरूपाद्धातोः “मन् वन्०” [ ५. १. १४७. ] इति वनि “वन्याङ् पञ्चमस्य” [ ४. २. ६५. ] इति पञ्चमजातिग्रहणाण्णद्वयस्याप्याङादेशे आङो ङित्त्वेन गुणाभावाद् यत्वे–सुध्यावा इति स्यात्, जातिग्रहणाभावे त्वन्त्यस्यैव णस्य आत्वे तथा च णकारयोगरूपनिमित्तनिवृत्त्या *निमित्ताभावे०* इति न्यायादाद्यणस्य णत्वनिवृत्तौ सुधिनावा इत्यपि स्यात् । अस्थैर्यप्रतिष्ठापकं त्वस्य काष्ठतड्क्षि कुलानीत्यादौ नागमार्थं “धुटां प्राक्” [ १. ४. ६६. ] इति बहुवचनम्, तथाहि–बहुवचनं किलानेकधुट्रूपजातिग्रहणसिद्ध्यर्थं न्यस्तम्, एतन्न्यायस्थैर्ये च 'धुट्' इत्येकवचनेनापि बहवो धुटो लभ्येरन्निति किमर्थं बहुवचनं प्रयुज्येत ?।” इति प्राचीनाः । तत्रेदमुच्यते–नायं न्यायो नियमरूपः, तेन वर्णग्रहणे सर्वत्र जातिग्रहणमेवेति नियमानाश्रयणात्, क्वचिद् व्यक्तिपक्षमाश्रित्य प्रयोगनिर्वाहसम्भवान्न्यायानित्यत्वस्याश्रयणे फलाभावात् । यद्यप्यनियमे नियमकारित्वं न्यायानां स्वभावसिद्धं तथापि यत्र लोकव्यवहारसाधारणः शास्त्रव्यवहारस्तत्रलोकवदेव व्यवस्थोचिता । तथाहि–लोके घटो द्रव्यमित्युक्ते घटत्वावच्छिन्नेषु सकलघटेषु द्रव्यत्वं विज्ञायते, घटमानयेत्युक्ते च घटत्वावच्छिन्नसकलघटानयनासम्भवादेका घटव्यक्तिरेवानयनकर्मतां प्राप्नोति, तथा यत्र जातिपक्षेण लक्ष्यसिद्धिस्तत्र जातिपक्षाश्रयणं, यत्र च व्यक्तिपक्षेण लक्ष्यसाधनं तत्र तदाश्रयणमित्यस्याञ्जसेन सकलार्थसाधकस्य मार्गस्यैवेहाश्रयणमिति न न्यायानित्यत्वं ज्ञापकेन साधनीयम् । अत एवानयोः [ जाति-व्यक्तिपक्षयोः ] शास्त्रे लक्ष्यानुसारं सम्मतत्वमिति “औदन्ताः स्वराः” [ १. १. ४. ] इति सूत्रे बृहन्न्यासेऽपि स्पष्टमुक्तम्, तथाहि–पूर्वप्रदर्शितरीत्या जातिग्रहणेन सकलवर्णसंग्रहमुक्त्वा“यद्येवं दीर्घपाठोऽपि व्यर्थः, सामान्याश्रयणेनैव तस्य लब्धत्वात्, उच्यते–व्यक्तिरप्यस्तीति 'जाति-व्यक्तिपक्षाभ्यां च शास्त्रं प्रवर्त्तते' इति ज्ञापनार्थम्” इति । तथा चोभयोः पक्षयोर्व्यवस्थितत्वमेव शास्त्रप्रवृत्ताविति लभ्यते । यच्चास्य न्यायस्यानित्यत्वे ज्ञापकमुपन्यस्तं “धुटां प्राक्” [ १. ४. ६६. ] इति सूत्रस्थं बहुवचनं, तदपि व्यक्तिपक्षेण प्राप्तस्यैकधुड्व्यक्तेरेव परिग्रहस्य बाधानायात्र जातिपक्ष एवाश्रयितव्य इति बोधनाय चेति तदपि नास्माकं प्रतिकूलम् । ननु च यद्यप्युभयोर्जाति-व्यक्तिपक्षयोर्व्यवस्थितत्वेन शास्त्रप्रक्रियानिर्वाहकत्वं तथाप्येकत्र [ वर्णविषये ] जातिपक्षस्य न्यायेन वा स्वोक्त्या वा लोकदृष्टान्तेन वा ग्रहणे निर्णीते तद्विषय एव पुनर्व्यक्तिपक्षाश्रयणस्यायुक्तत्वं विनाप्रमाणमिति निर्णीतजातिग्रहणविषये वर्णग्रहणे, पुनर्जातिपक्षाश्रयणबोधकप्रकृत[धुटां प्राक्]सूत्रस्थबहुवचनेन तत्पक्षाश्रयणस्य [ जातिपक्षाश्रयणस्य ] अनित्यत्वं बोध्यते इति न्यायानित्यबोधनमेव फलितमिति मदुक्ते न्यायानित्यत्वे को भवतामनर्षः इति चेत् ? न–नहि कश्चिदमर्षः, केवलमन्यन्यायसाधारण्येनास्यापि न्यायस्य ज्ञापकमात्रसिद्धत्वम्, अथ च ज्ञापकेनैवास्य स्थानविशेषेऽप्रवृत्तिर्बोधनीयेति न युक्तम्, अस्य न्यायस्य लोकसिद्धार्थानुवादकत्वेन विशिष्टनियमत्वाभावादित्येतावदेव मया बोधनीयम् । प्रकटीभूते चास्मिन्नर्थे यदि लोकव्यवहारतः शास्त्रीयव्यवहारस्य प्रमाणसिद्धत्वव्यवस्थापनाग्रहेण न्यायज्ञापनन्यायानित्यत्वादिज्ञापनादि च व्यवह्रियते, व्यवह्रियतां नाम न कापि क्षतिरिति ॥

अत्र च न्याये 'वर्णग्रहणे' इत्युपलक्षणम्, तेन वर्णसमुदायग्रहणेऽपि क्वचिज्जात्याश्रयणं सिद्धम्, यथा–चोरयन्तं प्रायुक्तत्यर्थेऽचूचुरदित्यत्र णिजातिराश्रिता । तथाहि–'चोरि' इति स्वार्थण्यन्तात् पुनर्हेतुमण्णावद्यतनीदिप्रत्यये “णि-श्रि०” [ ३. ४. ५८. ] इति ङः, अत्र ङात् पूर्वं णिद्वयमस्तीति यो णिङ्परस्तदव्यवहितपूर्वो धातुर्नास्ति, यश्च णिधातोरनन्तरो नासौ ङपरः, परेण णिना व्यवधानादिति “उपान्त्यस्यासमान०” [ ४. २. ३५. ] इत्यादिनोपान्त्यस्य ह्रस्वो न प्राप्नोति, “णेरनिटि” [ ४. ३. ८३. ] इति णिलोपे कृते तु समानलोपित्वं भवतीति तथापि न ह्रस्वप्राप्तिरिति “उपान्त्यस्यासमान०” [ ४. २. ३५. ] इति सूत्रे 'ङपरे णित्वजात्याश्रये परे' इत्यर्थस्याश्रयणान्न दोषो भवति । एवमर्थे समाश्रिते च पूर्वणिलोपे कृतेऽपि नासमानलोपित्वक्षतिर्णित्वजात्याश्रयस्य निमित्तत्वेन ग्रहणात्, णेरन्यस्य समानस्य लोप एव हि समानलोपित्वमाश्रीयते, तच्च यथा–कलिमाख्यदचकलदित्यादौ कलिशब्दसम्बन्धिन इकारस्य “व्यन्त्यस्वरादेः” [ ७. ४.

५३. ] इति लोपे समानलोपित्वं भवतीति तत्र "असमानलोपे सन्वल्लघुनि ङे" [४.१.६३.] इति सन्वत्त्वं तन्निमित्तं च "सन्यस्य" [४.१.५९.] इतीत्वादिकं न भवति, प्रकृतेऽचूचुरदित्यत्र च णौ समानलोपित्वाभावेनोपान्त्यह्रस्वत्वे तदनु च द्वित्वे "लघोर्दीर्घोऽस्वरादेः" [ ४. १. ६४. ] इति दीर्घे सति रूपं सिद्ध्यति । केचित् तु–"उपान्त्यस्यासमान०" [ ४. २. ३५. ] इत्यत्रापि वर्णग्रहणमेव, णौ सर्वत्र वर्णमात्रस्यावशिष्यमाणत्वादिति वर्णसमुदायग्रहणाभावेन नोपलक्षणतया वर्णग्रहणस्य व्याख्यानस्येदं फलम्" इति कथयन्ति, तन्न–शास्त्रे समुच्चारितस्य रूपस्य गृह्यमाणत्वव्यवहारौचित्यात्, शास्त्रे च णित्वेन ग्रहणं न तु वर्णत्वेन, णित्वं च न वर्णव्याप्यो धर्मः, यथा–इट्त्वस्य वर्णव्याप्यधर्मत्वाभावेन वर्णविधित्वाभावात् तदाश्रये विधौ स्थानिवद्भावो भवति, अन्यथा 'अग्रहीत्' इत्यत्रेटो दीर्घत्वे तस्य स्थानिवद्भावो न स्यादिति "इट् ईति" [ ४. ३. ७१. ] इति सिज्लोपो न स्यात्, परमिडाश्रयस्य सिज्लोपस्य वर्णविधित्वाभावेन स्थानिवद्भावो भवत्येव; एवमेवेहापि णिग्रहणं न वर्णग्रहणम्, अपि तु वर्णसमुदायग्रहणमेवेति वर्णग्रहणपदस्योपलक्षणतया वर्णसमुदायग्रहणपरत्वेऽपि स्वीकृत एवात्र प्रकृतन्यायप्रवृत्तिः संभाव्यते, नान्यथेति, विशेषो विवरणे स्पष्टीकृतः ॥ ७ ॥

## *वर्णग्रहणे जातिग्रहणम्* ॥ ७ ॥

**त०**—*प्रत्यर्थं शब्दनिवेशः* इति न्यायाद् यावन्तः पदार्था विशिष्टगुणक्रियादिविषयतया विवक्षितास्तावतां शब्दानामेकैकार्थबोधनविरतानां प्रयोगः कर्तव्यो भवति । तथा च यत्रानेकगुणवन्तो भिन्नाः पदार्था बुबोधयिषितास्तत्रैकशब्दप्रयोगे कृतेऽनेकेषां पदार्थानां ग्रहणं नैव प्राप्नोति, तथा च यत्र कञ्चिद् वर्णमुच्चार्य किमपि कार्यं विधीयते तत्र तस्यैव तद्गुणकस्यैव कार्यं स्यान्नान्येषां देशकालगुणभिन्नानां वर्णानामिति तत्सिद्ध्यर्थमयं न्याय इति वृत्तौ प्रतिपादितम्, प्रदर्शितश्च तत्र वर्णभेदप्रकारः, स्वीकृते चात्र न्याये तज्जातीयसकलवर्णग्रहणसिद्धिः । अयं च न्यायो न नवीनः, किन्तु लोकप्रसिद्धजाति-व्यक्तिपक्षद्वयमध्येऽन्यतरपक्षपरिग्रहमात्रप्रतिपादकः । अयं च जाति-व्यक्तिपदार्थवादीनां संक्षिप्त आशयः-तत्र जातिवादिन आहुः–जातिरेव शब्देन प्रतिपाद्यते व्यक्तीनामानन्त्यात् सम्बन्धग्रहणासम्भवात् । व्यक्तयो हि न केनचिदियत्तया परिच्छेत्तुं शक्यन्ते, तत्परिच्छेदाभावे च तया तया व्यक्त्या सह तस्य तस्य शब्दस्य वाच्यवाचकरूपः सम्बन्धो न ग्रहीतुं शक्यते । सा च जातिः सर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनादस्तीत्यवसीयते, प्रतिघटव्यक्ति 'घटः, घटः' इत्येवमेकरूपमेव ज्ञानं दृश्यत इति सर्वासु व्यक्तिष्वनुगतं किमपि घटत्वं सामान्यमस्तीति निश्चीयत इति यावत्, तत्र गवादयः शब्दा भिन्नद्रव्यसमवेतां जातिमभिदधति । प्रत्यात्मं भिन्नेषु गवादिव्यक्तिषु समवायेन वर्त्तमानां गोत्वादिजातिमभिधया वृत्त्या प्रतिपादयन्ति गवादयः शब्दाः, तस्यां जातौ शब्दशक्यत्वेन गृहीतायां तत्समवायात् तदवच्छिन्नं द्रव्यमविनाभावाच्छब्दजन्यप्रतीतिविषयो भवति । शुक्लादयः शब्दा गुणसमवेतां जातिमाचक्षते, गुणे तु शुक्लं रूपमित्यादौ तत्सम्बन्धात् [ तादृशजातिसमवायात् ] प्रत्ययः [ ज्ञानम् ], द्रव्ये 'शुक्लः पटः' इत्यादौ सम्बन्धिसम्बन्धात् [ तादृशगुणत्वजातिसम्बन्धिगुणसमवायात् ] प्रत्यय उत्पद्यते । संज्ञाशब्दानामप्युत्पत्तिप्रभृत्याविनाशात् पिण्डस्य कौमार-यौवनाद्यवस्थाभेदेऽपि स एवायमित्यभेदप्रत्ययनिमित्ता डित्थत्वादिका जातिरेव वाच्या । क्रियास्वपि 'पठति, पठतः, पठन्ति' इत्यादिष्वभिन्नप्रत्ययस्यानुगमात् तत्रापि जातिरस्ति सैव वाच्या । इत्थं च जाति-गुण-संज्ञा-क्रियेति चतुर्विधशब्दानां जातिरेव वाच्या, व्यक्तिस्तु जात्यविनाभावादाक्षिप्ता कार्यान्वयमती भवतीति । व्यक्तिवादिनस्तु–"शब्दस्य व्यक्तिरेव वाच्या, आनुभविकत्वादनुपपत्तिप्रतिसन्धानं विनापि प्रतीयमानत्वात्, क्रियाद्यन्वयस्य तत्रैव सम्भवात्, तस्या एव प्राधान्येन प्रतीयमानत्वाच्च । जातेस्तु शक्यतावच्छेदकत्वेनाश्रयणान्नानन्त्यादिदोषावकाशः" इत्याद्याहुः । विस्तृतं चैतद् वैयाकरणसिद्धान्तमञ्जूषायां नागेशभट्टेन । तथा च "स्मृतिर्द्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ" इति न्यायाद् व्याकरणशास्त्रे उभयोरेव पक्षयोः परिग्रहः । तदुक्तं महाभाष्येऽपि पस्पशाह्निके–"किं पुनराकृतिः पदार्थ आहोस्विद् द्रव्यम्? उभयमित्याह, कथं ज्ञायते?, उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" [ पा० सू० १ २. ५९. ] इत्युच्यते । द्रव्यं पदार्थं मत्वा "सरूपाणाम्" [ पा० सू० १. २. ६४. ] इत्येकशेष आरभ्यते" इति । अयमाशयः–सकलशास्त्रव्यवस्था एकतरपक्षाश्रयणेन न सिद्ध्यतीति पक्षद्वयाश्रयणमेव युक्तम् । एतच्चाचार्यपाणिनिनाऽपि सूचितमेवोभयपक्षाभिप्रायकसूत्रे कुर्वता, तथाहि–"जात्याख्यायाम्०" [ १. २. ५९. ] इति प्रथमेन सूत्रेण जातौ वाच्यायां तस्या एकत्वेनैकवचनस्य प्रयोगे प्राप्ते बहुवचनं विधीयते, यथा–'सम्पन्ना व्रीहयः' इति । व्यक्तिमेव पदार्थं यदि मन्येत, तर्हि व्रीहिव्यक्तिबाहुल्याद् बहुवचनं स्वभावत एव सिद्धमिति व्यर्थमेव सूत्रं स्यात् । एवं व्यक्तिं पदार्थं मत्वा एकशेष आरभ्यते, अन्यथा जातौ पदार्थे तस्या एकत्वादेकशब्दस्यैव प्रयोगे सिद्धे एकशेषविधानस्य वैयर्थ्यमेव स्यात्, व्यक्तौ पदार्थे तु व्यक्तीनां बहुत्वेन प्रतिव्यक्ति शब्दप्रयोगः स्यादित्येकशेष आवश्यकः । न च जातिपक्षेऽपि भिन्नार्थानां समानरूपाणामेकशेषार्थं सूत्रस्या-

वश्यकत्वम्, अन्यथा 'अक्षा भुज्यन्तां भज्यन्तां दीव्यन्ताम्' इत्यादौ विभीतक-शकटाङ्ग-देवनाङ्गवाचित्वेनानेकार्थस्याक्षशब्दस्यैकशेषो न स्यादिति वाच्यम्, तावतीष्वक्षत्वजातिषु काञ्चिदेकां जातिं स्वीकृत्य तस्या एव शब्दवाच्यत्वे परम्परयाऽत्र व्यक्तिप्रत्यय इति स्वीकारेणादोषात्। जातौ न जातिरिति नैयायिकानां मतं, न वैयाकरणानाम्, अनवस्थाभिया हि जातौ जातिर्न स्वीक्रियते तैः, किन्तु नास्माकं सर्वस्यां जातौ जातेरस्तित्वमित्याग्रहः, यत्र क्वचिदवच्छेदकतया साऽवश्यस्वीकरणीया तावतैव विश्रामात्। विस्पष्टं चेदं सर्वं "सरूपाणाम्" [ पा० सू० १.२.६४. ] इति सूत्रे भाष्य-कैयटयोः। प्रकृतमनुसरामः–

तथा च जाति-व्यक्तिपक्षयोर्व्याकरणशास्त्रे यथालक्ष्यं व्यवस्थितरूपेण स्वीकार इति वर्णग्रहणेषु जातिपक्ष एवाश्रयणीय इति प्रकृतन्यायप्रयोजनम्। उक्तश्च वर्णग्रहणेषु जातिग्रहणपक्षः "अइउण्" [ पा० सू० १. ] इति सूत्रव्याख्यानावसरे महाभाष्यकृताऽपि। तत्र पूर्वं व्यक्तिवादिमतेनाकारादीनां वर्णानां भेदं संसाध्य पक्षान्तरेण [ जातिपक्षेण ] समाधानमुक्तम्। इत्थमेव लक्ष्यानुरोधादुभयोः पक्षयोः परिग्रहः, लोकेऽपि तथा दर्शनात्, प्रदर्शितश्च लौकिकव्यवहारे पक्षद्वयपरिग्रहो वृत्तावेव, तथैव विशिष्टवर्णसमुदायरूप'णि'ग्रहणेऽपि जातिपक्षाश्रयणेन निर्वाहः, व्याकरणे सर्वत्रोभयपदार्थत्वस्याचार्यैरुक्तत्वेऽपि यत्र येन पक्षेण लक्ष्यसिद्धिस्तस्यैवाश्रयितुमभिमतत्वात्। एवं चात्रत्यवर्णग्रहणस्य वर्णसमुदायरूपोपलक्षणपरत्वेन व्याख्यानं नावश्यकम्, "जातिव्यक्तिभ्यां च शास्त्रं प्रवर्त्तते" इत्याचार्यवचनेन विनाऽपि तथा-व्याख्यानं 'णि'ग्रहणस्य जातिपरतया व्याख्यातुं शक्यत्वात्। अत एव "उपान्त्यस्यासमान०" [ ४.२.३५. ] इति सूत्रव्याख्यायां–"वदति स्म वीणा, तां प्रायुक्त परिवादकः, तमप्यन्यः प्रायुक्त- अवीवदद् वीणां परिवादकेनेति तु णिजात्याश्रयणात् सिद्धम्। इत्युक्तं बृहद्वृत्तौ, न तु तत्रास्य न्यायस्य चर्चा कृता। "उपान्त्यस्यासमान०" [ ४.२.३५. ] इति सूत्रस्थानीये "णौ चङ्युपधाया ह्रस्वः" [ पा० सू० ७.४.१. ] इति सूत्रे महाभाष्ये च अवीवदद् वीणां परिवादकेनेत्यादिसिद्धये "णेर्णिच्युपसंख्यानं कर्त्तव्यम्" इति वचनमेवारब्धम्, तत्र जातिपक्षाश्रयणेन निर्वाहश्च नागेशेन खण्डितः, तथाहि–"यत्तु–व्याकृतिर्निर्दिष्टव्येति, तन्न–जातेः पौर्वापर्याभावेन 'चङ्पर' इति विशेषणेनात्र व्यक्तिपक्षस्यैवाश्रयणात्" इति। अयमाशयः–'ङ्परे णौ' इत्यस्य 'ङ्परे णित्वे' इत्यर्थो जातिपक्षाश्रयणे स्यात्, न च णित्वरूपया जात्या ङस्य पौर्वापर्यं सम्भवतीत्येतादृशस्थले जातिपक्षाश्रयणं न युक्तमिति तदर्थं वचनमेवारब्धव्यम्। अत्र जातिपक्षाश्रयणवादिनस्तु जातिपक्ष इत्यस्य जात्या व्यक्तेर्निर्देश इति तज्जातीयानेकव्यक्तिपरिग्रह इति तासां व्यक्तीनां पौर्वापर्यमादाय लक्ष्यसिद्धिरिति वदन्ति ॥ ७ ॥

## *वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते* ॥ ८ ॥

**सि०**—द्विधा हि वर्णा दृश्यन्ते-समुदायरूपा अवयवरूपाश्च, तत्र समुदायरूपाः सन्ध्यक्षरत्वेन प्रसिद्धाः दीर्घादयश्च; अवयवरूपाश्च प्रत्येकमकारादयो ह्रस्वा व्यञ्जनानि च; एवम्–ऋकार-ऌकारावपि वर्णसमुदायत्वेन प्रसिद्धौ, ऋकारमध्ये हि अर्धमात्रो रेफोऽग्रे पश्चाच्च तुरीयः स्वरभागोऽस्ति; एवम्–ऌकारेऽपि लकारः स्वरभागश्च। यत्र च द्विमात्रिकौ ॠकार-ॡकारौ तत्र रेफद्वयं लद्वयं च, शिष्टः स्वरांश इति त्वन्यत्। स्पष्टं चैतत् "ऌत ऋ-ऌ ॠ-ॡभ्यां वा" [१.२.३.] इति सूत्रे बृहद्वृत्तावपि, प्राचां च प्रातिशाख्यकारादीनां मतमेतत्। तत्र ये समुदायरूपा वर्णास्तेषामवयवाः पार्थक्येन गृह्यन्ते न वेति सन्देहे लोकेऽवयवानां पार्थक्येन ग्रहणं न दृष्टमिति तत्सामान्यादिहापि न ग्रहणमिति प्राप्तेऽयं न्याय आरभ्यते, ततश्च समुदायरूपस्य वर्णस्यैकदेशोऽपि वर्णग्रहणेन–स्वतन्त्रवर्णत्वेन गृह्यते इति सिद्धं भवति, तेन प्रलीयमानमित्यादौ यथा "स्वरात्" [ २.३.८५. ] इति प्राप्तं णत्वं "रषृवर्णान्नो ण०" [ २.३.६३. ] इति सूत्रेऽलचटतवर्गेत्यादिपर्युदासान्न भवति तथा प्रक्लृप्यमानं पश्येत्यादावपि लकारव्यवधानमाश्रित्य णत्वं न भवति। अस्य च न्यायस्य प्रक्लृप्यमानमित्यादिलक्ष्यानुरोधादेवाश्रयणम्। किञ्चाग्रे समुदाहियमाणबृहद्वृत्तिग्रन्थेनापि क्वचिद् वर्णैकदेशस्य वर्णग्रहणेन ग्रहणमिति विज्ञायते। तथा हि–वर्णैकदेशस्य वर्णग्रहणेन ग्रहणात् 'कृतः कृतवान्' इत्यादौ "रदादमूर्च्छमदः क्तयोर्दस्य च" [ ४.२.६९. ] इति सूत्रेण तस्य नादेशमुद्भाव्य तत्रोक्तम्–ऋकारैकदेशरूपस्य रेफस्य रेफरूपवर्णग्रहणेनाग्रहणात् क्तस्य तो नत्वं न, "रेफात् परेण स्वरभागेन व्यवधानाद् वा" इति, यदि च क्वापि वर्णैकदेशो वर्णग्रहणेन न गृहीतः स्यात् तर्हि प्रकृते नत्वप्राप्तिशङ्कैव नोदेतीति किं तस्य समाधानेन ?। प्रकृतग्रन्थेन च पक्षद्वयेऽपि [ वर्णैकदेशस्य वर्णग्रहणेन ग्रहणेऽग्रहणे च ] प्रकृते नत्वाभाव उपपादितः। तथाहि–यदि वर्णैकदेशो वर्णग्रहणेन न गृह्यते तर्हि रेफात् परत्वाभावेनैवात्र नत्वाप्राप्तिः, अथ यदि गृह्यत इत्युच्यते तर्हि तदीयः स्वरभागश्च प्रकृतस्वरविलक्षण एव, स च मध्ये पतित इति तथापि न नत्वप्राप्तिरिति। एतेनान्यत्र सति प्रयोजने तस्य [ वर्णैकदेशस्य ] वर्णग्रहणेन ग्रहणं भवितुं शक्नोतीति स्पष्टमेवावेदितं भवति, "रषृवर्णा०" [ २.३.६३. ] इत्यत्र रेफात् पृथगृकारस्य ग्रहणाच्चाग्रहणपक्षोऽपि सूत्रकाराभि-

**मत इत्यायाति। वस्तुतस्तु–अग्रहणपक्ष एव शास्त्रकृतां विशेषसम्मत इत्यादिकं विवरणे विशेषतो विवेचितम्। यद्यपि "रषाभ्यां नोणः समानपदे" [ पा० सू० ८. ४. १. ] इति सूत्रयता, क्षुभ्नादिगणे णत्वप्रतिषेधार्थं च 'नृनमन' 'तृप्नोति' ग्रहणे कुर्वता च पाणिनिना ग्रहणपक्ष एव सूचितो भवति, तथापि भाष्यकारादीनामग्रहणपक्ष एवेष्ट इति स्पष्टं तत्रैव ॥८॥**

***वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते* ॥ ८ ॥**

**त०**—अयमर्थः पातञ्जले महाभाष्ये विशदय्य विवेचितः, तत्राग्रहणपक्ष एव च सिद्धान्तितः, तथा हि–प्रत्याहाराह्निके तृतीयमाहेश्वरसूत्रविचारप्रसङ्गे–"इदमत्र विचार्यते–य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद् वा नवा? इति। कुतः पुनरियं विचारणा? इह समुदाया अप्युपदिश्यन्ते, अवयवा अपि, अभ्यतरश्च समुदायेऽवयवः, तद्यथा–वृक्षः प्रचलन् सहावयवैः प्रचलति, तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा।" इति। अयमाशयः–आकारादयो वर्णा वनादिवत् संघातरूपाः, अनादिरूपप्रत्यभिज्ञानात् क्रमेणोपलम्भाच्च, ऐचः [ 'ऐ औ' इत्येतयोः ] प्लुते तदवयवोरिदुतोः प्लुतः "प्लुतावैच इदुतौ" [ पा० सू० ८. २. १०६. ] इति सूत्रेण विहितः, तथा च तेषु प्रागकारः पश्चादिदुताविति विज्ञायते। स्वमतेऽपि "प्रश्नार्चाविचारे०" [ ७. ४. १०२. ] इत्यनेन सन्ध्यक्षरस्यादिभूतोऽकार एव प्लवते। सर्वथा तेषां समुदायरूपत्वम् 'ए ऐ तु कण्ठतालव्यौ' इत्यादिशिक्षावचनैश्च, अवयवक्रमकृत एव स्थानक्रमस्तत्र प्रतीयत इत्यवगन्तव्यम्, न ह्येकस्य वर्णस्य स्थानक्रमेणोत्पत्तिरतः संघातरूपास्ते इति सिद्धम्। एवं ऋकार-लृकारयोरपि रेफ-लकारसदृशावयवौ, तत्र केवलवर्णकार्यमवयवेषु भवति न वेति विचारः। तत्र समुदायपरे निर्देशे सन्निहिता अप्यवयवा नान्तरीयकत्वादेजा[ सन्ध्यक्षरा ]दिसंज्ञां न लभन्ते, अवयवपरे च निर्देशे समुदायो न संज्ञाभाक्, यथा महेश्वरकृतसूत्रेषु हयवरेत्यादावनच्कस्य हलो [ अस्वरस्य व्यञ्जनस्य ] दुःखेनोच्चार्यत्वात् तैः सह निर्दिष्टोऽप्यकारोऽन्यत्र [ "अइउण्" सूत्रादौ ] प्राधान्येन निर्देशात् 'हला'दिसंज्ञां न लभत इति दध्यत्रेत्यादावनच्क एव [ अस्वर' एव यादेशः ] यणादेशः प्रवर्तते, तत्रावयवानामसत्यामप्येजादिसंज्ञायाम् एजादिस्थानीया अयादयः समुदायादेशा अपि नान्तरीयकत्वादवयवान् निर्वर्तयन्ति। एवं स्थिते 'अग्ने इन्द्रः' इत्यादौ यत्रावयवकार्यं [ दीर्घः ] समुदायकार्यं [ अयादेशः ] च प्राप्नोति, तत्रान्तरङ्गत्वात् तत्र च साक्षादुक्तत्वात् प्रत्यक्षत्वाच्चावयवकार्य[दीर्घ]प्रसङ्गः, अवयवावगतिपूर्वकत्वाद्धि समुदायकार्यस्य समुदायकार्यं बहिरङ्गम्। अयादीनां चावकाशः–अग्न आयाहीति, तत्र यथा–दधीन्द्र इत्यादौ दधिशब्दस्थ इकारो दीर्घत्वं प्रतिपद्यते, एवमेकारस्थोऽपीकारः 'अग्न इन्द्र' इत्यादौ सवर्णदीर्घत्वं प्रतिपद्येतेति ग्रहणपक्षाशङ्काबीजम्। अग्रहणपक्षाशङ्काबीजं तु–तिरोहितत्वादवयवानां समुदायकार्ये च पारतन्त्र्यात् स्वकार्यस्याप्रयोजकत्वान्नरसिंहवज्जात्यन्तरयोगाद् वर्णान्तरसारूप्यमात्रेण तत्कार्याप्रवर्त्तनमिति कैयटाशयः। ततः "कश्चात्र विशेषः" इति प्रक्रम्य ग्रहणपक्षस्वीकारे सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधस्य, दीर्घे ह्रस्वाश्रयविधिप्रतिषेधस्य, स्वरद्वयनिमित्तकविधिप्रतिषेधस्य च वक्तव्यत्वमाक्षिप्य, लोकदृष्टान्तेनाव्यपवृक्तावयवनिबन्धनकार्याभावं प्रसाध्य सन्ध्यक्षरेषु चावयवस्य पृथङ्निर्दिष्टावयवान्तरेभ्यो भेदं चाश्रित्य ग्रहणपक्षोक्तदोषोद्धारेण स पक्षः समर्थितः। अयमाशयः–सन्ध्यक्षरादीनामाकारादीनां चावयवा यदि पृथग् गृह्येरँस्तर्हि तत्र समानदीर्घत्वादीनि प्राप्नुवन्ति, यथा–'अग्ने इन्द्रम्, वायो उदकम्, एतयोः समानदीर्घत्वम्। एवम्–आलृय प्रलृयेत्यादौ ह्रस्वाश्रयतागमः, तथा वाचा तरतीत्यादौ द्विस्वरनिमित्त इकण् च प्राप्नोतीति तेषां प्रतिषेधो वक्तव्य इति दोष आपतित इति न शङ्क्यम्, यतो यथा 'तैलं न विक्रेतव्यम्, घृतं न विक्रेतव्यम्' इति निषेधानुसारं सर्षपेभ्यो गोभ्यश्च पृथग्भूतस्य तैलस्य घृतस्य च विक्रयो न क्रियते, किन्तु तैलसहिताः सर्षपादयो घृतसहिता गावश्च कामं विक्रीयन्ते, तथाऽवयवानां पार्थक्येऽपि समुदायस्थितावयवेष्ववयवाश्रयो विधिर्न भविष्यतीति दोषाभावेन ग्रहणपक्षो निर्दुष्टः। यदि च सन्ध्यक्षरेषु 'ऐ औ' इत्यनयोरकारेकारयोरकारोकारयोर्व्यपवर्गस्य स्पष्टमुपलभ्यमानत्वेन तत्र तदाश्रयकार्यप्रसङ्गशङ्का चेत्? तर्हि सन्ध्यक्षरेषु प्रतीयमानयोरवयवयोः स्वतन्त्रतद्वर्णापेक्षया प्रयत्नभेदात् तयोः पार्थक्येन तत्र समानाश्रयविध्यादीनामभाव इति। तदेवम्–आकारादिस्थस्यावयवस्य भेदेनागृह्यमाणत्वादग्रहणम्, सन्ध्यक्षरेषु प्रयत्नभेदादग्रहणम्, ऋकारस्थस्तु रेफो भेदेन प्रतिभासाद् गृह्यत इति विवेकः। इत्थं ग्रहणपक्षं प्रतिपाद्य–"अथवा पुनर्न गृह्यन्ते" इति समुदायैकदेशानां पार्थक्येनाग्रहणपक्ष उत्थाप्य सिद्धान्तितः। तत्रेदमस्य पक्षस्योत्थानबीजम्–वस्तुतः सन्ध्यक्षरादीनि नरसिंहवद् भिन्नान्येव, यथा–नरसिंहे न नरत्वव्यवहारो न वा सिंहत्वव्यवहारः, किन्तु विलक्षणजातीयत्वव्यवहारः, तथा सन्ध्यक्षरादीनामपि। सादृश्यात् सन्ध्यक्षरावयवेषु अकारादयः प्रत्यभिज्ञाततया पृथगुपलभ्यमाना अपि न सन्त्येव, सन्ध्यक्षराणां चाक्षरसमुदायरूपत्वप्रसिद्धिरपि भ्रान्तिमूलैवेति। तथा च भ्रान्त्यैव ग्रहणपक्षः समुपस्थापितो न तात्त्विक इति भावः। अग्रहणपक्षे च ऋकारस्थस्य रेफस्याऽपि पार्थक्येनाग्रहणे आनृधुरित्यादौ नागमार्थं तत्र ऋकारग्रहणस्य कर्त्तव्यत्वं स्यात्, णत्वार्थं च ऋकारग्रहणं णत्वविधौ कर्त्तव्यं स्यात्, कृप्धातो रेफस्य लादेशार्थं च ऋकारग्रहणं कर्त्तव्यं स्यादिति

दोषानुद्भाव्य तत्र तत्र ज्ञापकादिना कार्यं प्रसाध्याग्रहणपक्षः समर्थित इति । स्वमते च–अप्नृधतुरित्यादौ नागमार्थम् "अनातो नश्चान्त ऋदाद्यशौसंयोगस्य" [ ४. १. ६९. ] इति सूत्रे ऋदादिग्रहणं क्रियत एव, णत्वार्थं च "रषृवर्णात्०" [ २. ३. ६३. ] इति सूत्रे ऋकारग्रहणमपि क्रियते, क्लृप्धातोर्ॠकारस्य च लृकार एव विधीयते "ऋ-र-लृ-लं कृपोऽकृपीटादिषु" [ २. ३. ९९. ] इति सूत्रेण । तथा चाग्रहणपक्ष एव सूत्रकाराभिमत इति प्रतिभाति । यच्च "रदादमूर्च्छ-मदः" [ ४. १. ६९. ] इति सूत्रवृत्तौ–"रेफात् परेण स्वरभागेन व्यवधानाद् वा" इति समाधानान्तरमुक्तं तदपि ग्रहणवादिमतसाधारण्येन प्रयोगसाधुत्वसमर्थनायैव, न तु तेन ग्रहणपक्ष आचार्यस्य सम्मत इति प्रतिपादयितुं शक्यं, तत्र तत्र ऋकारपाठादिवैयर्थ्यप्रसङ्गात् । तथा च केवलं प्रक्लृप्यमानमित्यत्र णत्वाभावमात्रप्रयोजन एव ग्रहणपक्षपरोऽयं न्यायः समाश्रीयत इति परिशिष्यते । तत्र च स्पष्टत एव लश्रुतेर्विद्यमानत्वाद् विनाऽपि न्यायं णत्वाभावः सेत्स्यत्येवेति नार्थोऽनेन न्यायेन, विशेषस्य कस्यापि विधानाभावादिति प्रतिभाति ॥ ८ ॥

## *तन्मध्यपतितस्तद्ग्रहणेन गृह्यते* ॥ ९ ॥

**सि०**—तदिति प्रकृते गृह्यमाणमुच्यते, तथा च चिकीर्षितविधिशास्त्रगृह्यमाणशब्दमध्यपतितः–शास्त्रेण तन्मध्यपातित्वेन विहितः प्रत्ययादिः, तद्ग्रहणेन–तद्ग्राहकेण शब्देन, गृह्यते–बोध्यते इति न्यायार्थः । यथा नदी काचिद् गङ्गां प्रविष्टा गङ्गाग्रहणेनैव गृह्यते, यथा वा देवदत्तामध्यस्थो गर्भो देवदत्ताग्रहणेनैव गृह्यते लोके तथा शास्त्रेऽपि गृह्यमाणशब्दमध्यपतितो वर्णादिस्तच्छब्देनैव गृह्यते न तु भिन्नत्वेनेति भावः । तथा च धात्वादेर्मध्ये श्नादिप्रत्यय एकस्मिन्ननेकस्मिन् वा पतिते तस्य धातुत्वादिव्यवहारः स्यादेव, न तु प्रत्ययस्य मध्ये पाते तस्य खण्डितत्वबुद्ध्या कपालदशामापन्नस्य कलशादेर्जलाहरणादाविव धात्वादेर्धातुत्वनिमित्तककार्यादौ योग्यत्वाभावः, अनेन न्यायेन तत्र खण्डितत्वबुद्धेरजननात् । इत्थं च लोकदृष्टान्तेन सिद्धोऽप्ययं न्यायो ज्ञापकेनापि साध्यते, तथाहि–"त्वमहं सिना प्राक् चाकः" [ २. १. १२. ] इति सूत्रे 'प्राक् चाकः' इति वचनमेवास्य न्यायस्य ज्ञापकम् । तथा हि–युष्मदस्मदोः सौ "त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्" [ ७. ३. २९. ] इत्यकि 'युष्मकद् अस्मकद्' इत्येतयोः स्थाने त्वमहमादेशौ मा भूतामिति प्राक् चाक इत्युच्यते, यदि चाकि सति तयोर्भिन्नत्वेन ग्रहणं स्यात् तदा तयोस्त्वमहमादेशौ स्वत एवाप्राप्ताविति तद्वारणाय 'प्राक् चाकः' इति व्यर्थमेव, व्यर्थीभूतं च तदेतन्न्यायं ज्ञापयति, ज्ञापिते चात्र न्यायेऽक्सहितस्यादेशवारणार्थं 'प्राक् चाकः' इति सार्थकम् । फलं चास्य 'अरुणत्' इत्यत्रैकस्मिन् श्नेऽन्तःपतितेऽपि धातुत्वानपायात् ततः प्रागडागमः; अतृणोदित्यत्र च श्ने ईति चान्तःपतितेऽपि तद्ग्रहणेनैव ग्रहणात् ततः पूर्वमडागमश्च सिद्धः, श्नप्रत्ययात् पूर्वं तु नाडागमः कर्तुं शक्यते *कृतेऽन्यस्मिन् धातुकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च* इति न्यायात्; तथा च धातुकार्ये श्नादौ कृते एवाडागमो न ततः पूर्वमिति तेषु कृतेषु धातोः स्वरूपस्य भज्यमानत्वेन न्यायं विनाऽडागमो न स्यात् । यद्यपि तन्न्यायव्याख्यावसरेऽटः पश्चात् प्रवृत्त्यंशस्यानित्यत्वं वक्ष्यते, तथा च तेनैव पूर्वमडागमे पश्चात् श्नादौ प्रकृते दोषाभावस्तथापि "त्वमहं सिना०" [ २. १. १२. ] इत्यत्रत्य 'प्राक् चाको'ग्रहणस्य सार्थक्याय ज्ञापितस्यास्य न्यायस्य 'सर्वके' इत्यादौ जश इकारविधानम्, 'उच्चकैः' इत्यादावव्ययसंज्ञाविधानमित्यादिबहुफलसत्त्वेन प्रकृतेऽपि *कृतेऽन्यस्मिन्०* इत्यादिन्यायस्य स्वाभाविकप्रवृत्त्या पूर्वं श्नादौ कृतेऽपि रूपसिद्ध्यर्थमुदाहरणं न दोषायेति ध्येयम् । विशेषश्च विवरणे स्पष्टः ॥ ९ ॥

## *तन्मध्यपतितस्तद्ग्रहणेन गृह्यते* ॥ ९ ॥

**त०**—अक् तद्धितप्रत्ययः श्नादय आख्यातविषयाः प्रत्ययाश्च प्रकृतेर्मध्ये भवन्ति, तेषु कृतेषु च प्रकृतेः सखण्डत्वप्रतीत्या तत्र तत्र तत्तच्छब्दैर्विधीयमानानि कार्याणि न स्युः, यथा–'सर्वके' इत्यत्र 'सर्वे' इत्यर्थे [ स्वार्थे ] सर्वशब्दात् "त्यादिसर्वादेः०" [ ७. ३. २९. ] इत्यकि तत्र तद्धितान्तत्वान्नामत्वे पुनर्जसि "जस इः" [ १. ४. ९. ] इति जस इकारादेशो न स्यात्, उच्चैरित्यव्ययादकि–उच्चकैरित्यत्र सेर्लुग् न स्यात्, अरुणदित्यादौ श्ने विहिते धातुरूपापायात् तस्याडागमो न स्यात्, अभिनस्त्वमित्यादौ "सेः स-द्-धां च रुर्वा" [ ४. ३. ७९. ] इति रुश्च न स्यात्, तथा चैषां कार्याणां सिद्ध्यर्थमयं न्यायः स्वीक्रियते । "येन विधिस्तदन्तस्य" [ १. १. ७२. ] इति पाणिनीये सूत्रे महाभाष्ये प्रकरणवशादेषां कार्याणामभावमाशङ्क्य तत्र "तदन्तान्तग्रहणम्" इति समाधाय व्याख्याय च तदन्तान्तपदं प्रकृतसर्वलक्ष्यानुकूलम्, तत्र क्लिष्टकल्पनां काश्चिदालोक्य–"तदेकदेशविज्ञानाद् वा सिद्धम्" इति वार्तिकमुक्तम्, व्याख्यातं च–"तदेकदेशविज्ञानाद् वा पुनः सिद्धमेतत्, तदेकदेशभूतस्तद्ग्रहणेन गृह्यते, तद्यथा–गङ्गा यमुना देवदत्तेति, अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गा-यमुनाग्रहणेन गृह्यते, तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते ।" इति । पुनः शङ्कितम्–"विषम उपन्यासः, इह केचिच्छब्दा अव्यक्तपरिमाणानामर्थानां वाचका भवन्ति–य एते संख्याशब्दाः परिमाणशब्दाश्च, पञ्च

सप्तेति, एकेनाप्यपाये न भवन्ति, द्रोणः खारी आढकमिति नैवाधिके भवन्ति, न न्यूने । केचिद् यावदेव तद् भवति तावदेवाहुः-य एते जातिशब्दा गुणशब्दाश्च-तैलं घृतमिति, खार्यामपि भवन्ति द्रोणेऽपि । शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रेऽपि द्रव्ये । इमाश्चापि संज्ञा अक्तपरिमाणानां द्रव्याणां क्रियन्ते, ताः केनाधिकस्य स्युः" इति । अयमाशयः-परिच्छिन्नपरिमाणवाचकाः शब्दा यथा न्यूनेऽधिके च न प्रवर्तन्ते, तथा धात्वादयोऽपि शब्दाः परिच्छिन्न[ नियतानुपूर्वीक ]शब्दमात्रवाचका इति भिन्नानुपूर्वीके शब्दे कथं प्रवृत्ताः स्युः । गङ्गादयश्च शब्दास्तैलादिशब्दवज्जातिप्रवृत्तिनिमित्तका इति न्यूनेऽधिके च प्रवर्तेते, इति न तेन दृष्टान्तेनायमर्थः साधयितुं शक्यते इति । ततः "एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति-तदेकदेशभूतं तद्ग्रहणेन गृह्यते" इति । इत्येवं ज्ञापकं स्वमतानुसारमुपन्यस्य न्यायोऽयं साधितः, तत्र तन्मध्यपतितशब्दस्य स्थाने तदेकदेशभूत इति पदं न्यायशरीरे निवेशितमेतावानेव विशेषः । तदेकदेशभूतपदं च तन्मध्यपतितसमानार्थकमिति कैयटादिभिर्व्याख्यातम् । तत्रानेकदोषपरिहाराय तन्मध्यपतितत्वमित्थं परिष्क्रियते-तद्विशिष्टत्वं तन्मध्यपतितत्वं, वैशिष्ट्यं च स्वघटकपूर्वत्वस्वघटकपरत्व-स्वपर्याप्तमुख्योद्देश्यतानिरूपितविधेयताश्रयत्वैतत्त्रितयसम्बन्धेन । यथा-अतृणेदित्यादौ श्नादेः धातुविशिष्टत्वमस्ति, यतः स्वं-धातुः, तद्घटको हकारः, तत्पूर्वत्वमप्यस्ति, एवं-स्वं-धातुः, तद्घटकः 'तृ' इति शब्दः, तत्परत्वमप्यस्ति, तथा स्वं-धातुः, तत्पर्याप्ता या मुख्योद्देश्यता-रुधादिगणपठितधातुत्वावच्छिन्ना, तन्निरूपिता विधेयता 'श्न'निष्ठा, तदाश्रयत्वमपि तत्रेति सम्बन्धत्रयेण धातुविशिष्टत्वं तत्रेति तन्मध्यपतितत्वं सिद्धम् । तृतीयसम्बन्धनिवेशेन जनं रातीति 'जनरा' इति शब्दस्यापि मध्यस्थनकारत्वेऽपि जराशब्दत्वं प्रकृतन्यायेन न भवतीति न तस्य जरसादेशः, तत्रत्यनकारस्य स्वपर्याप्तमुख्योद्देश्यतानिरूपितविधेयताश्रयत्वाभावादिति कैयटादिमतम् । नवीनास्तु-तृतीयसम्बन्धस्य किमपि न फलमिति कथयन्ति, 'जनरा' शब्दे हि जराशब्दत्ववारणं यत् तस्य फलमित्युक्तं तन्न चारु, अव्यवहितोत्तरत्वसम्बन्धेन जविशिष्टरात्वस्यैव जरात्वपदार्थतया तस्य प्रकृते कस्मिन्नपि क्षणेऽसत्त्वेन तन्मध्यपतितत्वाभावेन न्यायेन कथमप्यानयनासम्भवात् । अत एव "हु-झल्भ्यो हेर्धिः" [ पा० सू० ६. ४. १००. ] इति सूत्रे महाभाष्ये-'भिन्धकि' इत्यत्राकचि कृते धित्वं न प्राप्नोतीति निर्दिश्यमानहिशब्दाभावादेव शङ्कितं, न तु तन्मध्यपतितत्वाभावात्, अत एव तत्र महाभाष्यव्याख्यावसरे-यद्येवमित्यस्य 'यदि निर्दिश्यमानस्यादेशाः' इत्येव कैयटेनापि व्याख्यातम्, अन्यथा [ तृतीयसम्बन्धनिवेशे ] तन्मध्यपतितत्वाभावादेव धित्वाप्राप्त्या निर्दिश्यमानपरिभाषा-[ न्याय ]स्वीकारस्य तच्छङ्काकारणत्वोक्तेरसङ्गत्यापत्तेः । अयमाशयः-भिद्धातोः पञ्चम्या मध्यमपुरुषैकवचने 'भिन्धि' इति रूपं भवति, तत्र हेः "हु-धुटो हेर्धिः" [ ४. २. ८३. ] इति धिर्भवति, तत्र 'भिन्द्-हि' इत्यवस्थायां "त्यादि-सर्वादेः०" [ ७. ४. २९. ] इत्यक्, अनेन धित्वं च प्राप्नोति, तत्र परत्वादकि कृते धित्वस्याप्राप्त्या 'भिन्धकि' इति रूपं न स्यादिति भाष्यकृतः शङ्का । तद्बीजं केचिन्निर्दिश्यमानहिशब्दाभावं कथयन्ति, केचित् तन्मध्यपतितत्वाभावम् । तत्र तन्मध्यपतितत्वाभाववादिनां मत एव तन्मध्यपतितत्वलक्षणे तृतीयसम्बन्धनिवेशः, तथा सति "त्यादि-सर्वादेः०" [ ७.४. २९. ]इत्यादिना त्यादि-सर्वादेरको विधानेन 'भिन्द् हि'पर्याप्तमुख्योद्देश्यतानिरूपितविधेयताश्रयस्यैवाकः सत्त्वेन, 'हि'पर्याप्तमुख्योद्देश्यतानिरूपितविधेयताश्रयत्वाभावेन तन्मध्यपतितन्यायेन 'हकि'शब्दस्य हिशब्दत्वासम्भव इति । अन्ये तु निर्दिश्यमानहिशब्दाभावादेव धित्वं न प्राप्नोतीति भाष्याशये निश्चिते तदर्थं तृतीयसम्बन्धनिवेशक्लेशो व्यर्थ एव । "अज्ञातार्थापेक्षतया बहिरङ्गोऽक्, अन्तरङ्गं धित्वमिति पूर्वं धित्वे ततोऽक्" इति नवीनाः । अथवा "हेर्धिः" इत्युभयोरपि स्थान्यादेशयोरिकार उच्चारणार्थः, वर्णमात्रस्यैव स्थानित्वमादेशत्वं चेति कृतेऽप्यकि हकारस्य धुटः परस्य सत्त्वेन तस्य च हिशब्दावयवत्वस्यापि सत्त्वेन धादेश इति समाधानमुक्तं भाष्ये। एवं च अरुणदित्यादौ *कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये०* इति न्यायस्यानित्यत्वेन प्रवृत्त्या कथंचिद्वारणसंभवेऽपि 'अभिनस्त्वम्' इत्यादौ सत्वार्थमेतन्न्यायाश्रयणस्यावश्यकत्वमेवेति स्वीकृते न्यायेऽरुणदित्यादावपि *कृतेऽन्यस्मिन्०* इति न्यायस्य स्वाभाविक्या प्रवृत्त्या पूर्वं श्नादौ कृते पश्चादेतन्न्यायसहायेनाडागम इति न किमपि हीयते । अस्य च न्यायस्य लोकज्ञापकोभयसिद्धत्वादनित्यत्वं न दृश्यते ॥ ९ ॥

## *आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते* ॥ १० ॥

**सि०---आगमाः-आगमत्वेनात्र शास्त्रे प्रसिद्धा अवयवत्वावच्छिन्नविधेयताश्रयत्ववन्तः, यद्गुणीभूताः-यस्य गुणाः-यद्गुणाः, अयद्गुणा यद्गुणा सम्पन्नाः-यद्गुणीभूताः, गुणशब्दो लक्षणयाऽवयवबोधकः, च्विप्रत्ययार्थ आहार्यज्ञानम्, भूधात्वर्थोऽविवक्षितः, क्तप्रत्ययार्थो विषयताश्रयः; तथा च आगमा यन्निरूपितावयवत्वप्रकारकाहार्यज्ञाननिरूपितविषयताश्रयाः, [ गृह्यन्तेऽनेनेति ग्रहणम्, तस्य ग्रहणं तद्ग्रहणं, तेन तद्ग्रहणेन, ग्रह्धात्वर्थो बोधः, जनकत्वमनप्रत्ययार्थः, बोधान्वयिविषयत्वं तत्पदोत्तरषष्ठ्यर्थः, गृह्यन्त इत्यत्रत्यग्रह्धात्वर्थबोधान्वयिजन्यत्वं तृतीयार्थः, बोधस्य च विषयताश्रयवत्त्वे-**

मानार्थैकदेशविषयतायामन्वयो निरूपितत्वसम्बन्धेन, तथा च ] तन्निरूपितविषयितावद्बोधनिष्ठजन्यतानिरूपितजनकतावन्निरूपितजन्यत्वविशिष्टबोधनिरूपितविषयताश्रया इति न्यायार्थः । 'यद्गुणीभूताः' इति हि 'तद्ग्रहणेन गृह्यन्ते' इति विधेयांशे हेतुभूतम्, यतस्तद्गुणीभूताः-तदवयवत्वेन शास्त्रेण बोधिता अतस्तद्ग्रहणेन गृह्यन्ते इति भावः । विशेषो विवरणे स्पष्टः । लोकेऽपि हि देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणाच्छास्त्रेऽप्यवयवत्वेन बोधकाद्यन्तशब्दाभ्यां विहितानामवयवत्वस्य सिद्धतया तद्विशिष्टस्यैव तद्ग्रहणेन ग्रहणस्यौचित्यात् । तथा च यत् कार्यं तदवयवरहितस्योक्तं तत् कार्यं तस्मिन्नवयवे सत्यपि तस्य भवतीति फलति । आगमा इत्यत्र बहुवचनं च लक्ष्यबहुत्वानुरोधेन, तथा च यत्रैको द्वौ त्रयो वा आगमाः स्युस्ते सर्वेऽपि तद्ग्रहणेन गृह्यन्ते । तत्रैकागमविशिष्टस्योदाहरणं यथा—प्रण्यपतदिति, अत्राडागमसहितस्यापि पतेः पतिग्रहणेन ग्रहणात् तस्मिन् परे ने "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति नेर्नो णः सिद्धः । आगमद्वयविशिष्टस्य यथा-प्रण्यपनीपदिति, अत्र प्रनिपूर्वस्य पतेर्यङ्लुपि दिवि "व्यञ्जनादेः०" [ ४. ३. ७८. ] इति तल्लुकि आदावटो न्यश्च्यान्ते विधानादागमद्वयसहितस्यापि पतेः पतिग्रहणेन ग्रहणात् तस्मिन् परे "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति नो णः सिद्धः । अत्र यद्यपि द्वित्वेन यः पकारोऽधिको जनितस्तस्य च नागमत्वमिति तद्विशिष्टस्य ग्रहणमनेन न्यायेन न संभवतीति कथमत्र णत्वमिति शङ्कितुं शक्यते, तथापि तस्य द्विःप्रयोगमात्रत्वेन स्वाङ्गस्वाव्यतिरेकादग्रिमन्यायेन [*स्वाङ्गमव्यवधायि*इत्यनेन ] ग्रहणान्न दोषः । आगमत्रयविशिष्टस्य यथा—'प्रण्ययंयंसीत्' इति अत्र प्रनिपूर्वस्य यमेर्यङ्लुपि अद्यतनीदिप्रत्ययेऽडागम-म्वागम-सागमेत्यागमत्रयसहितस्यापि यमो धातुत्वेन तस्मिन् परे "अकाखाद्यषान्ते पाठे वा" [ २. ३. ८०. ] इति नेर्नो णः सिद्धः । अस्य न्यायस्यार्थे औचित्यसिद्ध एवेति नात्र ज्ञापकापेक्षा, तथा हि—"अड् धातोरादिर्ह्यस्तन्यां चामाङा" [ ४. ४. २९. ] इत्यादिसूत्रे आदिशब्दः, "अनाम्स्वरे नोऽन्तः" [ १. ४. ६४. ] इत्यादिसूत्रेऽन्तशब्दश्चावयववाचिनौ, तथा चाभ्यां शब्दाभ्यां विधीयमान आगम उद्देशभूतस्य शब्दस्यावयवत्वेन बोध्यते, अवयवस्य च समुदायग्रहणेन ग्रहणमिति सर्वसम्मतमेव, न ह्येकद्वित्रिशाखानामाधिक्ये न्यूनत्वे वा वृक्षो वृक्षत्वं जहाति । अत एवोक्तं पूर्वं यद्गुणीभूता इति कथनं हेतुगर्भमिति । अत एव "क्सुष्मतौ च" [ २. १. १०५. ] इति सूत्रेण सेटः क्सोरुषादेशः सिद्ध्यति, तेन हि यथा बभूवुषीत्यादावनिटः क्सोरुषादेशो भवति तथैव पेचुषीत्यादौ "घस्येकस्वरातः क्सोः" [ ४. ४. ८२. ] इत्यनेनेटि कृते सेटोऽपि क्सोरुषादेशो भवत्येव, अन्यथा तत्रेटः श्रवणप्रसङ्गात् तदर्थं तल्लोपाय सेट एवोषादेशाय वा यत्नः करणीयः स्यात् । न चेटो निमित्तस्य क्सोरुषादेशेनापहारे नैमित्तिकस्येटोऽप्यपहारः स्यात् *निमित्ताभावे नैमित्तिकस्याऽप्यभावः* इति न्यायादिति वाच्यम्, तस्य न्यायस्यानित्यत्वात् स्थानिवद्भावेन निमित्तसद्भावाद् वा । "उपसर्गात् सुग्-सुव-सो-स्तु-स्तु-भोऽट्यप्यद्वित्वे" [ २. ३. ३९. ] इति सूत्रेऽट्यपीति करणेनायं न्यायोऽनित्यः; तेन "वे स्कन्दोऽक्तयोः" [ २. ३. ५१. ] इति षत्वविधायकसूत्रे स्कन्द्ग्रहणेनाट्सहितस्य स्कन्दोऽग्रहणाद् व्यस्कन्ददित्यादौ षत्वं न भवतीति प्रतीयते, तथाहि—एतन्न्यायसत्त्वेऽट्सहितानामपि सुगादीनां तद्ग्रहणेनैव ग्रहणाद् 'अट्यपि' इति व्यर्थमेवेति तेनास्यानित्यत्वे ख्यापिते व्यस्कन्ददित्यत्राडागमसहितस्य तस्य स्कन्द्धातुत्वेनाग्रहणात् षत्वं न भवतीति प्राञ्चः । वस्तुतस्तु 'अट्यपि' इत्यनेनास्य न्यायस्यानित्यत्वं साधयितुं न शक्यते, यतः "उपसर्गात् सुग्०" [ २. ३. ३९. ] इत्यादिसूत्रे उपसर्गात् परत्वं न धातोर्विशेषणमपि तु सकारस्य, तथाहि—उपसर्गस्थान्नाम्यादेः परस्य सुनोत्यादेः सः षो भवतीति तदर्थः, अटि कृते चाकारेण व्यवधानात् सकारस्य नाम्यादेरव्यवहितत्वं नास्तीति षत्वाप्राप्तौ षत्वार्थमट्यपीत्यावश्यकमेव । एवं च व्यस्कन्ददित्यत्र षत्वस्य स्वत एवाप्राप्तिरिति न तदर्थं न्यायानित्यत्वमाश्रयणीयम् । यदि च क्वचिदनित्यत्वाश्रयणमावश्यकमेव तर्हि "अतो म आने" [ ४. ४. ११४. ] इति सूत्रेण मागमविधानसामर्थ्यादेव तस्यानित्यत्वमिति कल्पनीयम् । तथाहि—'शयिष्यमाण' इत्यादौ मागमे विहिते तस्य चाकारग्रहणेनैव ग्रहणात् "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घे शयिष्याण इत्येव प्रयोगः स्यादिति मागमस्य वैयर्थ्यं स्पष्टमेव, व्यर्थं च सत् तदस्य न्यायस्यानित्यत्वं ज्ञापयितुमलम् । न च मागमसामर्थ्याद् दीर्घ एव बाध्यतां, न तु न्यायानित्यत्वं ज्ञाप्यतामिति वाच्यम्, साक्षाच्छास्त्रबाधकल्पनापेक्षया न्यायानित्यत्वकल्पनस्यैवौचित्यात् । *आगमोऽनुपघाती* इत्ययं न्यायोऽपि दृश्यते, स च नैतन्न्यायसमानार्थः, किन्तु यथा आदेशः स्थानिन उपघातं कृत्वैव भवति तथागमो नेत्येव बोधयति । यत् तु—एतन्न्यायसमानार्थत्वेन तन्न्यायव्याख्यानं कृत्वा तस्यात्रैवान्तर्भाव इति प्रोक्तं प्राचीनैः, तन्न चारु—शब्दशक्त्योभयोः समानार्थत्वस्याभानात् । एवं हि प्राचां ग्रन्थः—"आगमोऽनुपघातीत्यपि न्यायोऽस्ति, यथा भवानित्यत्र नागमे कृते असुरन्तुरूपो जातस्तथापि नागमस्यानुपघातित्वात् "अभ्वादेरत्वसः सौ"

[ १. ४. ९०. ] इत्यनेनात्वन्तलक्षणो दीर्घः स्यादेव, परं सोऽप्यत्रैवान्तर्भावनार्हः समानफलत्वात्। तथाहि–अनुपघातीत्यस्य तावदयमर्थो यत्–स्वव्यवधानहेतुकं यथाप्राप्तकार्याणामुपघातमागमो न करोतीति। यदि चागमानामवयवत्वेनावयविग्रहणेन ग्रहणं सिद्धं तदाऽव्यवधायित्वादनुपघातित्वं स्फुटमेव" इति। अत्रेदमुच्यते–भवानित्यादौ नास्य [*नागमोऽनुपघाती*इति न्यायस्य] फलम्, यतो नागमविधायक–"ऋदुदितः" [ १. ४. ७०. ] इति सूत्रापेक्षया दीर्घविधायकस्य "अभ्वादेरत्वसः सौ" [ १. ४. ९० ] इत्यस्य परत्वात् पूर्वं दीर्घे कृते पश्चान्नागमे न्यायोपयोगाभावात्। न च कृताकृतप्रसङ्गित्वेन नागमस्य नित्यत्वं नित्यस्य च *परान्नित्यम्*इति न्यायबलेन परापेक्षया बलवत्त्वमिति नागम एव दीर्घात् पूर्वं स्यादिति वाच्यम्, नागमे कृतेऽत्वन्तत्वविघातेन दीर्घस्यानवकाशतया नागमापवादत्वस्य कल्पयितुं शक्यत्वेन, नित्यशास्त्रापेक्षयाऽप्यपवादशास्त्रस्य बलवत्त्वात् पूर्वं दीर्घस्यैव प्रवृत्तेः। आगमस्य व्यवधायकत्वाभावे चानेन न्यायेन साधिते मागमादीनां "अतो म आने" [ ४. ४. ११४. ] इत्यादिसूत्रविहितानां वैयर्थ्यमेव स्यादिति नायं न्यायोऽव्यवधायकत्वसाधकोऽपि तु स्वभावसिद्धमागमानामनुपघातित्वं*मित्रवदागमः*इत्यादिन्यायवदनुवदति, न तु किमपि नवीनं विदधातीति मन्तव्यमिति ॥ १० ॥

## *आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते* ॥ १० ॥

**त०**—अत्र गुणपदं लक्षणयाऽवयवबोधकमित्युक्तं वृत्तौ, तत्र 'लक्षणा' इति कः पदार्थ इति चेत्? येन केनचिच्छब्देन सर्वार्थस्य बोधानुदयेन तत्पदजन्यतदर्थविषयकशाब्दबोधं प्रति तत्पदजन्यतदर्थविषयकवृत्तिज्ञानाधीनतदर्थविषयकोपस्थितिः कारणमिति नियमः स्वीक्रियते, वृत्तिश्च पद-पदार्थयोः सम्बन्धः, स च सम्बन्धो द्विविधः–शक्तिर्लक्षणा च। शक्तिश्च बोधकतारूपा, लक्षणापि यद्यपि वैयाकरणैरप्रसिद्धा शक्तिरेवेति स्वीक्रियते तथापि व्यवहाराय तल्लक्षणभेदः स्वीक्रियत एव। तथा हि–तल्लक्षणमाहुः—

"मुख्यार्थबाधे मुख्यार्थासन्नत्वे लक्ष्यतेऽपरः।
रूढेः प्रयोजनाद् वार्थो, यत् सोक्ता लक्षणा बुधैः ॥" इति

'गङ्गायां घोषः' इत्यादौ गङ्गापदमुख्यार्थस्य प्रवाहरूपस्य घोषाधारत्वं बाधितमिति तदर्थस्य सामीप्यसम्बन्धेनासन्नस्तीररूपोऽर्थः शैत्य-पावनत्वप्रतीतिरूपप्रयोजनाल्लक्ष्यते इति लक्षणसमन्वयः। रूढेरुदाहरणं च 'कर्मणि कुशलः' इत्यादि, अत्र हि कुशलशब्दस्य कुशग्राहिरूपो मुख्योऽर्थः प्रकृते बाधित इति विवेचकत्वादिसाधर्म्येणासन्नं निपुणत्वरूपमर्थं रूढेर्लक्षयति। प्रकृते च गुणशब्दस्तावत् स्वाश्रयव्यापिषु रूपादिषु रूढः, अत्र च स्वाश्रयैकदेशनिष्ठेष्ववयवेषु प्रयुज्यमानस्य तस्य मुख्यार्थस्य बाधः स्पष्टः, स्वाश्रयसमवायित्वरूपसाधर्म्येण गुणा अवयवानामासन्ना इति तेन सम्बन्धेनागमपदमवयवरूपमर्थं लक्षयति। अत्र चागमरूपाणामवयवानामात्यन्तिकं स्वाश्रयसमवायित्वद्योतनं प्रयोजनम्। यथा घटग्रहणे तद्गतरूपादीनां ग्रहणं स्वभावसिद्धं तथाऽऽगमाश्रयभूतस्य धात्वादेर्ग्रहणे तन्निष्ठानामवयवानामपि गुणवद् ग्रहणं भवत्येवेति गुणपदोक्त्या व्यज्यते। आद्यन्तशब्दाभ्यां विधानाच्चागमानामवयवत्वं स्फुटमिति वृत्तौ प्रतिपादितमेव। कैश्चिदत्र न्यायस्वरूपे एकस्तच्छब्दोऽधिकः पठ्यते। तथाहि–तेषां मते *यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते*इति न्यायस्वरूपम्, युक्तं चैतद्, एवं स्वीकृते हेतुद्वयं लभ्यते–'यतो यस्यागमा अतस्तद्गुणीभूताः, यतश्च तद्गुणीभूता अतस्तद्ग्रहणेन गृह्यन्ते' इति। तथा च तेषां मते वाक्यार्थस्वरूपमिदम्–यतो यन्निष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रया अतस्तन्निरूपितावयवत्वप्रकारकाहार्यज्ञाननिरूपितविषयताश्रयाः, यतस्तथाभूता अतस्तद्विशिष्टास्तन्निरूपितविषयितावद्बोधजनकपदजन्यबोधनिरूपितविषयताश्रया इति। स्वमते च यथा वाक्यार्थस्वरूपं तथा तद्वृत्तौ प्रदर्शितमेव। तन्मते च 'यतस्तथाभूता अतस्तद्विशिष्टाः' इति पदसमुदायोऽध्याह्रियते स्पष्टप्रतिपत्तये। तद्घटकवैशिष्ट्यं च स्वघटितत्व-स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटितत्व-स्वविशिष्टाघटितत्वैतत्त्रितयसम्बन्धेन, सम्बन्धघटकवैशिष्ट्यं च–स्वेतरत्व-स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयावयवाघटितत्वैतदुभयसम्बन्धेन। अत्रेत्थं न्यायार्थसमन्वयो बोध्यः–प्रण्यपतदित्यादावकरो यतो धातुत्वेन 'पत्'निष्ठोद्देश्यतानिरूपितादिशब्दबोधितावयवत्वावच्छिन्नविधेयताश्रयः, अतः 'पत्'निरूपितावयवत्वप्रकारकाहार्यज्ञाननिरूपितविषयताश्रयः, यत एवंभूतोऽस्तदकारविशिष्टोऽपत्'शब्दः', 'पत्'निरूपितविषयितावद्बोधनिष्ठजन्यतानिरूपितजनकतावत् पदं "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति सूत्रघटकं पत्पदं, तन्निरूपितजन्यत्वविशिष्टो बोधोऽपत्पदजन्यः, तन्निरूपितविषयताश्रयो [ 'अपत्' इति ] भवति। अकारवैशिष्ट्यम् 'अपत्'शब्दे कथमिति चेत्? इत्थम्–स्वम्–अकारः, तद्घटितत्वम् 'अपत्'शब्दे, पुनः स्वम्–अकारः, तन्निष्ठविधेयनिरूपितोद्देश्यताश्रयो धातुत्वेन 'पत्'शब्दः, तद्घटितत्वमपि 'अपत्'शब्दे, पुनः स्वम्–अकारः, तद्विशिष्टो'ऽपत्'-घटकभिन्नः, यतः स्वेतरत्वमकारे नास्ति, स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयावयवाघटितत्वमपि 'अपत्'शब्दे नास्ति, अपि तु तदुभयमुदासीनस्यैवेति तदघटितत्वं 'पत्'शब्दस्येति 'पत्'ग्रहणेन ग्रहणसिद्धिः ॥ यद्यप्यनेन न्यायेनागमविशिष्टस्यागमिवाचकपदग्राह्यत्वं बोध्यते तथापि शक्ति-लक्षणाभ्यामुपस्थितस्यैव शाब्द-

बोधविषयतया 'पत्'शब्दादावडागमविशिष्टा'ऽपद्' आदिशब्दनिरूपितशक्तिलक्षणयोरभावेन कथम् 'अपत्' इत्यस्य 'पत्' पदेन बोध इति चेत् ? अत्रोच्यते–ग्राह्यत्वाभ्यनुज्ञाने यद् विना ग्राह्यत्वं न भवति तदप्यभ्यनुज्ञातमेवेत्यदोषात् । यद्वा आगमिबोधक'पत्'शब्दादीनां स्वशक्यविशिष्टे लक्षणाऽनेन न्यायेन बोध्यते । स्वस्मिन् शक्यार्थवैशिष्ट्यं च स्वघटितत्व स्वविशिष्टाघटितत्वैतत्सम्बन्धाभ्याम्, तत्र वैशिष्ट्यं च स्वेतरत्व-स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयेतरत्वोभयसम्बन्धेन, स्वम्–आगमिबोधकं पदादिपदम्, तच्छक्यं 'पत्' इति शब्दस्वरूपं, तद्घटितत्वम् 'अपत्' शब्देऽस्ति, स्वविशिष्टाघटितत्वमप्यस्ति, यतः स्वेतरत्वं न 'पत्'शब्दे नवा स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयेतरत्वमित्युभयसम्बन्धेन स्वविशिष्टमुदासीनमेव किञ्चिदिति तदघटितत्वमस्य [ 'अपत्'शब्दस्य ] सिद्धम्, ततश्च 'पत्'शब्देना'ऽपत्'शब्दस्य लक्षणयैव बोध उभयोरुक्तलक्ष्यतावच्छेदकाक्रान्तत्वात् ॥ अत्रेदं विचार्यते शब्दनित्यत्ववादिनां मते शब्दानां कूटस्थत्वम्–अपायोपजनविकाररहितत्वमिति स्वीक्रियते । तथा चादेशस्थले यथा बुद्धिविपरिणामः कल्प्यते, यथा–"समानानां तेन दीर्घः" [ १. २. १. ] इत्यादौ समानानां समानेन सह प्रयोगप्रसङ्गे दीर्घः प्रयोक्तव्य इति, एवम्–आगमस्थलेऽप्यनागमकानां प्रयोगप्रसङ्गे सागमकाः प्रयोक्तव्या इत्येव बुद्धिविपरिणाम इत्याशयेन महाभाष्ये–अनागमकानां सागमका आदेशा इत्युक्तम्; तथा चागमस्थलेऽपि स्थान्यादेशभावकल्पनैवेति स्थानिवद्भावेनैव सिद्धे न्यायोऽयं न स्वीकार्य इति केषाञ्चिन्मतमपास्तं वेदितव्यम्; स्थानिवद्भावविधायके सूत्रे तु नानेनार्थापत्तिकल्पितेन "अनागमकानां सागमका आदेशाः" इति वाक्येन बोधितस्य स्थान्यादेशभावस्य ग्रहणम्, अपि तु साक्षात्सूत्रबोधितस्थान्यादेशभावस्यैवेत्यागमस्थले तादृशस्थान्यादेशभावस्याभावेन स्थानिवद्भावेनागमविशिष्टस्यागमिग्रहणेन ग्रहणस्य साधयितुमशक्यत्वम् । स्पष्टश्चायमर्थो "दा धा घ्वदाप्" [ पा० सू० १. १. २०. ] इति सूत्रे महाभाष्ये । तथाहि–अनेन सूत्रेण दाधोर्'घु'संज्ञा विधीयते "अवौ दाधौ दा" [ ३. ३. ५. ] इत्यनेन दासंज्ञावत्, तत्रेयं पूर्वपक्षिणा शङ्का कृता–'प्रनिदारयति' इत्यादौ दृधातोर्णिचि वृद्धौ कृतायां 'दा'शब्दोऽस्ति, तस्यापि 'घुत्वं' [ दात्वं ] कथं नेति ? । तदाह–"समानशब्दप्रतिषेधः" [ वार्तिकम् ], समानशब्दानां प्रतिषेधो वक्तव्यः–प्रनिदारयति, प्रनिधारयति । दाधा घुसंज्ञा भवन्तीति घुसंज्ञा प्राप्नोति" इति । समाधानवार्त्तिकम्–"समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात्" इति । "समानशब्दानामप्रतिषेधः, अनर्थकः प्रतिषेधोऽप्रतिषेधः । घुसंज्ञा कस्मान्न भवति ?, अर्थवद्ग्रहणात्, अर्थवतोर्दा-धोर्ग्रहणम्, न चैतावर्थवन्तौ" इति भाष्यम् । अयमाशयः–'घु'संज्ञा[ 'दा'संज्ञा ]विधायकसूत्रे विशिष्टरूपोपादानसत्त्वेन *अर्थवद्ग्रहणे नानर्थकस्य* इति न्यायोपस्थित्याऽर्थवतोरेव दा-धोः सा संज्ञा स्यात्, इह च वृद्धौ कृतायां 'दाॅ' 'धाॅ' इति समुदायस्यार्थवत्त्वं, न तु तदवयवयोर्दा-धोः, *समुदायो ह्यर्थवाँस्तस्यैकदेशोऽनर्थकः* इति न्यायात्, इति न घुसंज्ञाप्राप्तिरिति । अत्र शङ्कते–"यद्येवमिहापि तर्हि न प्राप्नोति–प्रणिदापयति प्रणिधापयति । अत्रापि नैतौ दा-धावर्थवन्तौ" इति । अयमाशयः–यदि समुदायस्यैवार्थवत्त्वम्, अर्थवतोरेव च दा-धोर्ग्रहणं तर्हि प्रणिदापयति प्रणिधापयतीत्यादौ दा-धाभ्यां णिचि प्वागमे दाप्-धापोरेवार्थवत्त्वं, न केवलयोर्दा-धोरिति घुसंज्ञा[दासंज्ञा]ऽभावे नेर्नो णो न स्यादिति । तत्र समाधानवार्त्तिकम्–"न वा ह्यर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते, यथाऽन्यत्र" इति । "न वैष दोषः । किं कारणम् ? अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते, यथाऽन्यत्र, तद्यथा–अन्यत्राप्यर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते । क्वान्यत्र ? लविता चिकीर्षितेति" इति । अत्र कैयटः–"लब्धात्मकस्य भावस्य निमित्तवशादुपचयापचयौ व्यपदेशहानिं न कुरुतः, यथा देवदत्तस्याङ्गाधिक्या-ऽङ्गच्छेदौ । इहाप्यन्तरङ्गत्वात् कृतायां दा-धोर्घुसंज्ञायां पश्चादुत्पन्नः पुगागमो घुव्यपदेशं न निवर्त्तयति नाप्यर्थवत्त्वमित्यदोषः" । अयमाशयः–प्वागमात् पूर्वमत्र दा-धोर्घुसंज्ञा [ दासंज्ञा ] निमित्तान्तरानपेक्षत्वेनान्तरङ्गत्वात् प्रवृत्ता, सा च सत्यपि प्वागमे न हीयते, यदि च कार्यकालपक्षे यदा कार्यं तदा संज्ञेति मतमाश्रीयते तदाप्यर्थवतोर्दा-धोरेव प्वागम इति दा-धोरेव ग्रहणेन गृह्यत इति न तस्यार्थवत्त्वव्याघातकत्वमिति घुसंज्ञा [ दासंज्ञा ] णत्वविधानरूपकार्यकालेऽपि सुसाध्येति । पुनराक्षिपति–"युक्तं पुनर्यन्नित्येषु शब्देष्वागमशासनं स्यात् ?, न, नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः, आगमश्च नामापूर्वः शब्दोपजनः" इति । अयमाशयः–'वियदादिवद् वर्णाः प्रकृतिप्रत्ययपदवाक्यादिरूपाः सर्गाद्यकालिकोत्पत्तिमन्तः प्रलयकालिकनाशवन्तश्च' इति पक्षे नित्येषु शब्देष्वपायोपजनविरोधादागमोऽपि विरुद्ध इत्यागमद्वारेण 'दा'शब्दस्य स्थाने 'दाप्'शब्द आदेशो विधीयत इति स्वीकार्यमिति 'दाप्'शब्द एवार्थवान् न दाशब्द इति तस्य घुसंज्ञा न प्राप्नोतीति । प्रतिबन्दीमाह–"अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः" इति । अयमाशयः–शब्दानां नित्यत्वस्वीकारे आगम इवादेशोऽपि न युक्त एव, तत्रापि स्थानिनमपनीयादेशः क्रियत इति पूर्ववदनित्यत्वप्रसङ्गः । तथा च

"यश्चोभयोः समो दोषः परिहारोऽपि तादृशः ।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥"

इति न्यायाद् यथा प्रणिदापयतीत्यादावागमेऽनित्यत्वं

तथैवादेशस्वीकारेऽपीति न किमपि वैशिष्ट्यमिति । तत्रादेशपक्षं समर्थयति–"बाढं युक्तम्, शब्दान्तरैरिह भवितव्यम् । तत्र शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिर्युक्ता" इति । अत्र कैयटः–"प्रसङ्गवाची स्थानशब्दो न निवृत्तिवाची, ततश्च सन्त एव प्रयोगे नित्याः शब्दा बुद्ध्युन्मज्जननिमज्जनद्वारेण प्रतिपाद्यन्ते । आगमस्त्ववस्थितस्यापूर्वः क्रियमाणो नित्यत्वं विरुणद्धि" । अयमाशयः–आदेशस्थले 'स्थाने' विधीयमानः शब्दो न पूर्वशब्दस्य निवृत्तिं प्राह, किन्तु तादृशशब्दप्रयोगे प्राप्ते शब्दान्तरस्य प्रयोग इति प्रसङ्गरूपप्रयोगार्थकः स्थानेशब्दः । तथा च तत्र स्थले आदेशबुद्धेरुन्मज्जनं स्थानिबुद्धेर्निमज्जनमित्येत्र स्वीक्रियत इति पूर्वशब्दस्य प्रयोगं विहाय शब्दान्तरस्य प्रयोगः क्रियत इत्येव तात्पर्यमिति न नित्यत्वहानिः । आगमस्थले तु तस्मिन् शब्दे एव किञ्चिदधिकमासज्यत इति वर्णवृद्धिरूपोपजनसत्त्वादनित्यत्वं स्पष्टमित्यादेशागमयोर्भेद इति । ततः स्वसिद्धान्त उपसंहृतः–"आदेशास्तर्हीमे भविष्यन्त्यनागमकानां सागमकाः । तत् कथम् ?

"सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥"

इति । इमे–आगमत्वेन व्यवह्रियमाणा अपि, तथा विधीयमाना अपि, आदेशाः–आदेशसदृशाः, भविष्यन्ति । आद्यन्तशब्दाभ्यां विधीयमाना इडादय आगमाः स्तादेरशित इडित्यर्थे वृत्ते नित्यत्वानुपपत्तिमूलकवाक्यान्तरकल्पनया केवल'तव्य'बुद्धौ प्रसक्तायामिकारादिस्तव्यः साधुरिति बोधः, तेनात्राप्यादेशस्थल इव बुद्धिविपरिणामस्यैव सत्त्वेन न नित्यत्वहानिरिति भावः । *आगमा यद्गुणीभूताः* इति न्यायस्य चात्रापि पक्षे स्वीकार आवश्यक एवेति प्रणिदापयतीत्यादौ न दोषः । ये त्वत्र पक्षे आगमत्वं नास्त्येवेति वदन्ति तेऽतत्त्वविदः 'अनागमकानां सागमका आदेशाः' इति कथनस्यासंगत्यापत्तेः । आगमस्थले निरवयवकबुद्धिनिमज्जन-सावयवकबुद्ध्युन्मज्जनेनागमव्यवहारस्यापि निर्बाधत्वात् । अनागमकानामित्यादि न मम मतमपि तु पाणिनेरेवेत्युक्तम्–सर्वे सर्वपदादेशा इत्यादिना । अयमाशयः–शास्त्रेऽवयवयोः स्थान्यादेशभावश्रवणेऽपि नित्यतानुपपत्तिमूलकः समुदाययोरपि स्थान्यादेशभावः कल्प्यते । एवमागमस्थलेऽवयवत्वेन विधानेऽप्यर्थापत्तिमूलकवाक्यान्तरकल्पनेन निरवयवत्वसावयवत्वबुद्ध्योर्विपरिणाममात्रेणादेशत्वव्यवहारो गौणो नित्यत्वरक्षणाय कल्प्यत इति । यथा चादेशस्थले उक्तरीत्या कल्प्यमानस्थान्यादेशभावेन श्रुतस्य स्थान्यादेशभावस्य न त्यागः, तथा सति [ श्रुतस्थान्यादेशभावत्यागे सति ] स्थानिवद्भावविधायकसूत्राणामानर्थक्यापत्तिः स्यात्, तथैवागमस्थले सूत्रे श्रूयमाणावयवावयविभावस्य न त्याग इति प्रकृतन्यायप्रवृत्तिरव्याहतैव । ईदृशस्थान्यादेशभावस्थले [ अनागमकानां सागमका आदेशा इति कल्पितस्थान्यादेशभावस्थले ] स्थानिवद्भावस्य न प्रवृत्तिः स्थानीवेति श्रुतेः श्रौतस्थान्यादेशभावानुपपत्तिमूलकतया कल्प्यमानस्थान्यादेशभावस्थले एव तत्प्रवृत्तेः, न त्वत्र केवलानुमानिके, इत्यादिना विचारेण विवृतं नागेशेन ॥ केचित् तु न्यायमिमं न मन्यन्ते —"स्थानीवावर्णविधौ" [ ७. ४. १०९. ] इति सूत्रे सर्वोऽपि [ श्रौतः कल्पितश्च ] स्थान्यादेशभावो गृह्यत इति तेनैव प्रकृतन्यायार्थसिद्धिः । न चैवम् 'अपिबत्' इत्यादावडागमसहितस्य धातोः पिबादेशः स्यादिति वाच्यम्, *कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये०* इति न्यायेनादोषात् । अथवा *निर्दिश्यमानस्यादेशा भवन्ति* इति न्यायेनादोषः, निर्दिश्यमानत्वं च षष्ठीप्रकृतिविशिष्टत्वम्, वैशिष्ट्यं च स्वजन्योपस्थितिविषयत्व-स्वजन्योपस्थितिविषयसमभिव्याहृतवर्णाघटितत्वैतदुभयसम्बन्धेन, 'श्रौति-कृवु०" [ ४. २. १०८. ] इति सूत्रस्थषष्ठीप्रकृतिविशिष्टत्वं 'पा'शब्दस्यैव न त्वपाशब्दस्येत्यदोषात्, तथाहि–स्वजन्योपस्थितीयविषयताश्रयत्वमस्ति पाशब्दस्य, स्वजन्योपस्थितीयविषयताश्रयः 'पा' इति, तत्समभिव्याहृतोऽकारः, तद्घटितत्वमपाशब्दस्य, तदघटितत्वं पाशब्दस्येति लक्षणसमन्वयात् । तथा च 'अनागमकानां सागमका आदेशाः' इति भाष्यमतेऽस्य न्यायस्य नावश्यकत्वमिति विस्तरेण प्रतिपादयन्ति । तन्मतविवेचनादिकमिह न प्राकरणिकमिति त्यज्यते, विस्तृतेप्सुभिरन्यत्र समवलोकनीयम् । यत् तु "उपसर्गात् सुग्–सुव०" [ २. ३. ३९. ] इति सूत्रस्थस्य 'अट्यपि' इत्यंशस्य प्रकृतन्यायानित्यत्वज्ञापनस्य स्थापनाय न्यायसंग्रहमञ्जूषान्यासे प्रतिपादितम्–"ननु 'शिड्नान्तरेऽपि' इत्यधिकारेणाऽन्यव्यवधानस्याननुमतत्वादटा व्यवधाने षत्वाप्राप्तेरट्यपीति तत्रोक्तमस्ति, तत् कथमिदमनित्यत्वज्ञापकमुक्तम् ? उच्यते–अस्यानित्यत्वाभावे सुगादीनां ग्रहणेनाट्सहितानामपि तेषां ग्रहणसिद्धेरटा व्यवधानमिति वक्तुमपि न शक्यम्, इत्यतो युक्तमेवेदम्; तस्मादीयमत्रभावना–अभ्यषुणोदित्यादौ सुगः षत्वं तावत् सूरेरिष्टम्, तच्च 'शिड्नान्तरेऽपि' इत्यधिकारेणाऽन्यव्यवधानानुमत्यभावादडागमव्यवधाने निषिषिधानम्, तदनु *आगमा यद्गुणीभूता* इति न्यायेन पुनः प्रसूतम्, परं न्यायानामनित्यत्वात् सूरेर्विश्वासो न, तेनाडागमव्यवधानेऽपि षत्वार्थमट्यपीत्युक्तम् ।" इति । अत्रेदमुच्यते–"उपसर्गात् सुग०" [ २. ३. ३९. ] इति सूत्रवृत्त्यादिपर्यालोचनयाऽट्यपीत्यस्य सार्थक्येन प्रकृतन्यायानित्यत्वज्ञापने सामर्थ्याभावः । तथाहि–प्रकृतसूत्रार्थः "अद्वित्वे···[एषां]सकारस्योपसर्गस्थान्नाम्यन्तस्थाकवर्गात् परस्य षो भवति, अट्यपि–अडागमे सत्यपि, अड्व्यवधानेऽपीत्यर्थः" इति, पुनश्च "शिड्नान्तरेऽपीत्यधिकारादटा व्यवधाने न

प्राप्नोतीत्यट्यपीति ग्रहणम् ।" इति, तथा च सूत्रार्थानुसारं सकारस्योपसर्गस्थनामिनोऽव्यवहितपरत्वमिह षत्वनिमित्तम्, तच्चाटा व्यवधाने बाधितमिति तद्बाधाभावायाट्यपीति सार्थकमिति बृहद्वृत्तिग्रन्थाशयः । अत्र यदि धातोरुपसर्गस्थनामिनः परत्वं निमित्तं स्यात् तर्हि धातोरेवाडागतो विहित इति तस्यानेन न्यायेन धातुग्रहणेनैव ग्रहणे प्राप्तेऽट्यपीत्यस्य वैयर्थ्यं प्रसज्येत, किन्तु सकारस्योपर्गस्थनामिनः परत्वमिष्यते, न चाडागमः सकारस्यावयवः समुदायावयवत्वात् तस्येति, तद्व्यवधाननिवृत्तावेतन्न्यायोपयोगाभावात् षत्वप्राप्त्यर्थमट्यपीत्यावश्यकमेवेति न तेनैतन्न्यायानित्यत्वम् । तस्यानित्यत्वफलस्याभिधाने–"अतो म आने' [ ४. ४. ११४. ] इति मागमविधानमेव तज्ज्ञापकमित्यावेदितं वृत्तौ । तत्र केचिदाहुः–"अनेन मागमविधानेन वर्णग्रहणेऽस्य न्यायस्य न प्रवृत्तिरित्येव ज्ञाप्यते, न तु सामान्यतोऽनित्यत्वं ज्ञाप्यते" इति, तन्न चारु–'असति बाधके प्रमाणानां सामान्ये पक्षपातः' इति लौकिकन्यायानुमोदितेन 'संभवति सामान्यापेक्षज्ञापने विशेषापेक्षज्ञापनमन्याय्यम्' इति न्यायेन विशेषज्ञापनस्यासंभवात्, महाभाष्ये वर्णग्रहणेऽपि प्रकृतन्यायस्य सञ्चारितत्वाच्च । तथाहि–"ङमो ह्रस्वादचि ङमुण् नित्यम्" [ पा० सू० ८. ३. ३२. ] इति सूत्रे महाभाष्ये 'ह्रस्वात् परस्य ङमः [ ङ-ण-नानां ] पदान्तस्य ङमुट् [ ङ-ण-ना आदिभूताः ] भवति' इत्यर्थे समाश्रिते 'कुर्वन्नास्ते' इत्यादौ पूर्वनकारस्य णत्वं प्राप्नोतीति शङ्कायां पदान्तस्य नस्यायं नागमो विहित इति *आगमा यद्गुणीभूताः०* इति न्यायेन तस्य पदान्तत्वान्न णत्वमित्युक्तम् । वर्णग्रहणे प्रकृतन्यायाप्रवृत्तौ तु तत्र वर्णस्यैव ग्रहणात् प्रकृतन्यायप्रवृत्तिर्भाष्यकृत्कृता कथं संगच्छेत ? । अयमत्र सारः–"अतो म आने" [ ४. ४. ११४. ] इति सूत्रेण धातोर्विहिते आनेऽतो 'मोऽन्तः' विधीयते, स चाकारस्यैवावयव इति तद्ग्रहणेन ग्रहणात् "समानानां तेन दीर्घः" [ १. २. १. ] इति मकारसहितस्याऽऽकारस्य स्थाने दीर्घे कृते मागमो न श्रूयेतेति तस्य वैयर्थ्यं स्पष्टमेवेति तदस्य न्यायस्यानित्यतां ज्ञापयतीति स्वमतम् । तत्र कश्चिदाह–अनेन ज्ञापकेन न्यायस्य वर्णग्रहणेऽप्रवृत्तिरेव ज्ञाप्यते, तावताऽपि स्वस्य चारितार्थ्यसम्भवात्, अस्ति हि "समानानां तेन दीर्घः" [ १. २. १. ] इति सूत्रे वर्णग्रहणमिति तत्रैतन्न्यायस्याप्रवृत्त्या मागमस्य वर्णग्रहणेनाग्रहणात् तस्य [ मागमस्य ] श्रवणं सिद्धमिति । तत्रेदमुच्यते–सामान्यत एवानित्यत्वज्ञापने सम्भवति वर्णग्रहणेऽप्रवृत्तिरूपं विशेषं कुतो ज्ञापयेत् ? । न च सामान्यतोऽनित्यत्वज्ञापने फलाभाव इति वाच्यम्, 'दिदीये' इत्यादौ दीङः परस्य स्वरादेङ्कित आदौ यकारागम इति वादिनां पाणिनीयानां मते तस्यानेन न्यायेन 'दी'ग्रहणेन ग्रहणे तत्र "योऽनेकस्वरस्य" [ २. १. ५६. ] इति यादेशापत्तेः । वर्णमात्रग्रहणे तदप्रवृत्तौ नात्र निर्वाहः, नात्र वर्णस्यागमोऽपि तु धातोरेव । किञ्च पूर्वोपदर्शितस्य "ङमो ह्रस्वादचि ङमुण् नित्यम्" [ पा० सू० ८. ३. ३२. ] इति सूत्रस्य भाष्यमपि न संगच्छेत, तत्र हि 'कुर्वन्नास्ते' इत्यादौ "ह्रस्वान्ङणनो द्वे" [ १. ३. २७. ] इति नकारस्य द्वित्वस्थाने नकारागम एवादौ विधीयते, तत्रादिभूतस्य नकारस्य 'रषृवर्णात्०" [ २. ३. ६३. ] इति णत्वं पूर्वनकारस्य पदान्तनकारागमत्वादनेन न्यायेन पदान्तत्वमाश्रित्य वारितमिति वर्णग्रहणेऽपि प्रवृत्तिः स्पष्टमङ्गीकृता, सा विरुध्येतेति । तथा च मागमेन न्यायानित्यत्वमेव ज्ञाप्यते न तु वर्णग्रहणेऽप्रवृत्तिरिति ॥ १० ॥

## *स्वाङ्गमव्यवधायि* ॥ ११ ॥

**सि०—स्वमङ्गं स्वाङ्गं, तच्चाङ्गिनो व्यवधायकं-कार्योपरोधकं न भवति । परोक्षादौ धात्वादेर्द्विरुक्तं द्विप्रयोगरूपतया स्वमङ्गमेव, तादृशाङ्गेन तस्य धातोः किमपि कार्यं न व्यवधीयते, नहि देवदत्तः स्वावयवैर्व्यवधीयते, स्वाङ्गत्वेन द्वित्वादिविधानस्य हि फलमेतद् न्यायेन प्रकाश्यते, तथा च नापूर्वमिदं वचनम् । तथाऽपि यदि ज्ञापकापेक्षा तर्हि ज्ञापकमपि निर्दिशन्ति प्राञ्चः, तथाहि–"प्रमापकं त्वस्य "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति सूत्रस्य "द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा" [ २. ३. ८१. ] इति सूत्रानन्तरोपन्यासं, तत्र द्वित्वेऽपीत्यस्यानुवर्तनं चाकृत्वा "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति सूत्रे ङ्मादिधातूनां सामान्यनिर्देशः, तथाहि नेर्णत्वं तावत् प्रणिपततीत्यादिवत् प्रणिपपातेत्यादावपीष्टम्, तच्च तदैव सिध्यति यदि "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति सूत्रं "द्वित्वेऽप्यन्तेऽप्यनितेः०" [ २. ३. ८१. ] इति सूत्रस्यानन्तरं क्रियते, तत्र च द्वित्वेऽपीत्यनुवर्त्यते । एवं हि द्वित्वेऽप्यद्वित्वेऽपि च ङ्मादिधातुषु परेषु निर्विवादं नेर्णः सिध्यति, यत् तु तथा न कृतं किन्तु सामान्येन ङ्मादिधातव एव पठितास्तज्ज्ञायते–प्रणिपततीत्यादिवत् प्रणिपपातेत्यादावपि "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इत्यनेनैव णत्वं सेत्स्यति, द्वित्वजस्य पस्य धातोः स्वाङ्गत्वात् *स्वाङ्गमव्यवधायि* इति न्यायसद्भावादित्याशयैव इति । अत्रेदमुच्यते–पूर्वं धातुरुपसर्गेण युज्यते पश्चात साधनेनेति सिद्धान्ते धातोः पूर्वमुपसर्गयोगे उपसर्गनिमित्तककार्यस्य चात एवान्तरङ्गत्वात् पूर्वं नेर्णत्वे कृते पश्चाद् द्वित्वादौ प्रणिपपातेत्यस्य सिद्ध्या तदर्थमिह "नेर्ङ्मा-दा०" [ २. ३. ७९. ] इति सूत्रस्य "द्वित्वेऽप्यन्तेऽप्यनितेः०" [ २. ३. ८१. ] इति सूत्रानन्तरं पाठस्य, तत्र द्वित्वेऽपीत्यनुवर्तनस्य वाऽप्रयोजनत्वात् तदभावस्यैतन्न्यायज्ञापकत्वायोगात् । प्राणिणिषतीत्यादौ परस्यापि नकारस्य णत्वसिद्ध्ये द्वित्वेऽपीति कथनं तु–अदुरुप-**

सर्गान्तःस्थाद्वादेरनन्तरस्यैकस्य नकारस्य णत्वे कृते वचनस्य कृतार्थत्वात् *लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते* इति न्यायाच्च परस्य नस्य णत्वं न स्यादिति तस्याऽपि णत्वविधानार्थम्, इह च [ प्रणिपपातेत्यादौ ] धातूपसर्गयोगस्य पूर्वमेव जातत्वेन नेर्नस्य णत्वे कृते पश्चाद् द्वित्वादिकार्ये न्यायप्रयोजनाभावात्। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति मतान्तरेऽपि द्विरुक्तस्य द्विःप्रयोगरूपतया तज्जातस्य णकारस्यान्यत्वबुद्ध्यनुत्पादकत्वात्। एवं चात्र न्यायोपयोगस्य कथञ्चित्सम्भवेऽपि नैवं सूत्रपाठस्य न्यायज्ञापकत्वमुचितम् । न्यायस्यास्य च स्वत एव सिद्धत्वमित्युक्तं प्राक्, एतत्फलं च संचस्कारेत्यत्र पूर्वं धातोरुपसर्गयोगे तन्निमित्तकत्वेनान्तरङ्गत्वात् "संपरेः कृगः स्सट्" [ ४. ४. ९१. ] इति स्सटि तदवसरप्राप्तेऽपि "स्सटि समः" [ १. ३. १२. ] "लुक्" [ १. ३. १३. ] इति सूत्रे बाधित्वा परत्वान्नित्यत्वाद्धातुमात्राश्रितत्वेनान्तरङ्गत्वाच्च णवि तदाश्रिते च द्वित्वादिकार्ये 'संचस्कृ' इति स्थिते धात्वङ्गेन द्वित्वजचकारेण समो व्यवधाने सति तदव्यवधानरूपस्य स्सटो निमित्तस्य नाशात् *निमित्ताभावे नैमित्तिकस्याऽप्यभावः* इति न्यायेन स्सटोऽपि निवृत्तिः प्राप्ता, साऽनेन न्यायेन स्वाङ्गस्याव्यवधायकत्वं बोधयता वार्यते इति । यदि च लोके निमित्तकारणनाशात् कार्यनाशावश्यम्भावादर्शनेन *जातः संस्कारो न निवर्त्तते* इति न्यायान्तरदर्शनेन च सत्यपि व्यवधाने स्सटो न निवृत्तिः, *निमित्ताऽभावे० *इति न्यायस्य चानियतत्वस्योक्ततयाऽत्र दोषाभावेन नेदमनन्यथासिद्धं फलमित्युच्यते, तदा पूर्वं धातुः साधनेन युज्यते इति सिद्धान्तपक्षे प्रणिपपातेत्याद्येवास्य फलमिति बोध्यम् । यत् तु—स्वाङ्गमिति किमित्याशङ्क्य पराङ्गस्य व्यवधायकत्वस्वीकारः, तत्फलं चात्र द्वित्वे कृते सम्-स्सटोर्व्यवधानात् "स्सटि समः" [ १. ३. १२. ] "लुक्" [ १. ३. १३. ] इति सूत्रयोरप्रवृत्तिरित्युक्तं तदनर्थकम्, स्वाङ्गमित्यस्याभावे न्यायस्वरूपस्यैवालाभान्न्यायवैयर्थ्यमेवामया भङ्ग्या चोदितं स्यात्, तथा सति न्यायोदाहरणासिद्धिरेव तत्र दोषत्वेन कथनीया स्यात्, नातिव्याप्तिरूपो दोषः, अतिव्याप्त्यपेक्षयाऽव्याप्तेर्बलवत्त्वात् । यदि च स्वाङ्गमिति किमित्यस्य स्वग्रहणं किमर्थमित्याशयः, तथा च 'अङ्गमव्यधायीति न्यायस्वरूपमस्तु' इति तदर्थः, तदा कथञ्चिदेतद् युज्येताऽपि, किन्तु निरुपपदस्याङ्गशब्दस्य स्वाङ्गपर्यवसायित्वमेवेति स्वशब्दाभावेऽपि स्वाङ्गमित्येवार्थः प्रतीयेतेति स्पष्टार्थमेव स्वग्रहणमित्येव वक्तव्यं, न पराङ्गव्यावृत्त्यर्थमिति युक्तमुत्पश्यामः । अस्य च न्यायस्यानैकान्तिकत्वमपि प्रदर्शितं तैरेव, तथाहि—"अस्य च व्यभिचारित्वात् "वेः स्कन्दोऽक्तयोः" [ २. ३. ५१. ] इति षत्वविधायकसूत्रे द्वित्वसहितस्य स्कन्दोऽग्रहणाद् विचिस्कन्सतीत्यादौ न षत्वम् । सव्यभिचारत्वप्रतिष्ठापकं तु प्रतितष्ठावित्यादौ द्वित्वव्यवधानेऽपि षत्वार्थं "स्था-सेनि-सेध-सिच-सञ्जां द्वित्वेऽपि" [ २. ३. ४०. ] इति सूत्रे द्वित्वेऽपीत्युक्तिः, सा हि द्वित्वे कृते सति तस्य स्वाङ्गत्वेऽपि एतन्न्यायस्य सव्यभिचारत्वाद् व्यवधायित्वं भविष्यतीत्याशङ्कया कृता ।" इति । एतस्यार्थस्य दार्ढ्याय च स्वोपज्ञन्यासेऽपि तैरित्थमुक्तम्—"ननु 'शिड्नान्तरेऽपि' इत्यधिकारात् प्राग्वदत्राऽपि द्वित्वेन व्यवधाने षत्वाप्राप्तेर्द्वित्वेऽपीति तत्रोक्तमस्ति, तत् कथमिदमनित्यत्वव्यापकमुक्तम्? उच्यते—अस्यानित्यत्वाभावे द्वित्वेन व्यवधानमिति वक्तुमपि न शक्यम्, इत्यतो युक्तमेवेदम् । तदियमत्र भावना—प्रतितष्ठावित्यादौ तावत् स्थाधातोः षत्वं सूरेरिष्टम्, तच्च 'शिड्नान्तरेऽपि' इत्यधिकारेणान्यव्यवधानानुमत्यभावाद् द्वित्वव्यवधाने निषिषिधानम्, तदनु *स्वाङ्गमव्यवधायि* इति न्यायेन पुनः प्रसूतम्, परं न्यायानामनित्यत्वात् सूरेर्न विस्रम्भः, तेन द्वित्वव्यवधानेऽपि षत्वार्थं द्वित्वेऽपीत्युक्तम्" इति । अत्रेदमुच्यते—"वेः स्कन्दोऽक्तयोः" [ २. ३. ५१. ] इति सूत्रे वेः परत्वं धातोर्विशेषणमुत सकारस्य ?, तत्र न तावत् प्रथमः—स्कन्देरित्यस्य स्वयमेव सकारविशेषणत्वात्, स्कन्देरिति पदं हि सकारं विशिनष्टि न तु कार्यभाक्, कार्यभागत्र सकारः, स एव च प्राधान्यमर्हति, तमेव च वेः परत्वेनापि विशिनष्टि सूत्रकृत् । तथा च सकारस्य वेरव्यवहितस्य षत्वं विधेयमिति विचिस्कन्सतीत्यादौ षत्वप्राप्तिर्न्यायेनापि दुरसाध्येति तदभावाय [ षत्वाभावाय ] न्यायानित्यत्वाश्रयणमनर्थकमेव । 'शिड्नान्तरेऽपि' इत्यधिकारादपि सकारोपसर्गयोर्मध्य एव व्यवधानराहित्यं लभ्यमिति तथापि न षत्वप्राप्तिः । यदि च धातोर्विशेषणं स्याद् वेरिति तदा तत् कथञ्चित् संगच्छेत, न तु तदित्यावेदितमेव। एवं च "स्था-सेनि-सेध०" [ २. ३. ४०. ] इति सूत्रे द्वित्वेऽपीति वचनमपि सार्थकमेव, द्वित्वे सति तकारेण व्यवधानान्नामिपरत्वमपि सकारे नास्ति, किमु वक्तव्यमुपसर्गस्य नामिपरत्वम् । अत एव सूत्रप्रयोजनवर्णनमुखेन द्वित्वेऽपीत्यस्य प्रयोजनमपीत्थमेव स्फोरितं बृहद्वृत्तौ, तथा हि—"सेनेरषोपदेशार्थं, स्था-सञ्जोरवर्णान्तव्यवधानेऽपि विध्यर्थं, सिच्-सञ्ज्-सेधां षणि नियमबाधनार्थं, सर्वेषामड्व्यवधाने पदादौ च षत्वार्थं वचनम्" इति । अत्रैव स्था-सञ्जोरिति प्रतीकमादाय न्यासे "उपसर्गस्थस्य नामिनोऽवर्णान्तेन द्विर्वचनेनेत्यर्थः" इत्युक्तम्, तथा चावर्णान्तेन व्यवधानं सकारस्यैवेत्येव सर्वेषामभिमतमिति प्रतिभाति । सकारस्य च न स्वाङ्गभूतो द्वित्वजो वर्ण इति न तत्र न्यायेन सिद्धिरिति तदर्थं द्वित्वेऽपीति कथनमावश्यकमेवेति न तदस्य न्यायस्यानित्यत्व-

**ज्ञापने समर्थम्। तथा च सत्यनैकान्तिकत्वावश्यकत्वेऽन्यदेव ज्ञापकसिद्धत्वादिकं हेतुतयोपादेयं, किन्त्वनित्यफलं किमपि न पश्यामः, न वाऽस्य ज्ञापकसिद्धत्वमपि, स्वाङ्गस्याव्यवधायकत्वस्य सर्वलोकसिद्धत्वात्। अस्यैव च न्यायस्य प्रपञ्चभूतः पूर्वोऽपि न्यायः, आगमानामप्याद्यन्तशब्दाभ्यां विधानेनावयवत्वाविशेषात्। तथा च यद्यप्यनेनैव न्यायेन तस्य गतार्थता सम्भवति, तथाप्यस्याप्रसिद्धतया पूर्वन्यायस्य च सकलतन्त्रप्रसिद्धतया तदुपन्यासः पृथक् कृत इति ॥ ११ ॥**

## *स्वाङ्गमव्यवधायि* ॥ ११ ॥

त०—संचस्कारेत्यादावन्तरङ्गत्वात् स्सटि कृतेऽपि द्वित्वादिना चकारस्य व्यवधानात् समोऽव्यवहितस्य कृगोऽभावात् *निमित्तापाय*न्यायेन उत्पन्नोऽपि स्सट् विनङ्क्ष्यति, प्रणिपपातेत्यादौ द्वित्वादौ कृते रूपान्तरत्वात् पतौ परे विधीयमानं नेर्णत्वं न स्यादिति च दोषद्वयस्यैवंभूतस्य चान्यस्यापि दोषस्य निवारणाय न्यायोऽयं स्वीक्रियते। अस्य चौचित्यमूलकत्वेन न ज्ञापकापेक्षेत्यादि वृत्तौ प्रतिपादितम्। पाणिनीयास्तु न्यायमिमं न मन्यन्ते, संचस्कारेत्यत्र स्सटो धातूपसर्गरूपपदद्वयनिमित्तकत्वाद् बहिरङ्गत्वमित्यन्तरङ्गत्वात् पूर्वं द्वित्वादिषु कृतेषु द्वित्वस्य द्विःप्रयोगरूपत्वपक्षे पूर्वखण्डस्यापि 'कृ'धातुत्वं स्वत एव, स्थाने द्विर्वचनं [ एकस्य कृगः स्थाने द्वित्वेन कृद्वयमादिश्यत इति ] पक्षेऽपि च स्थानिवद्भावेन चकारस्यादौ स्सट् मा भूदेतदर्थं पाणिनिना "सुट् कात् पूर्वः" [ ६. १. १३५. ] इति सूत्रं क्रियते, तत्र कात् पूर्व इति कालावधारणार्थं देशनिरूपणार्थं वेति विवादे उभयपक्षेऽपि दोषाभावः समर्थितः। तथा च कालावधारणार्थपक्षे 'कात् पूर्वः सुट् कर्त्तव्यः' कार्यान्तराच्च प्राग् भवन् कात् पूर्वो भवतीति पूर्वं स्सटि ततो द्वित्वादौ *निमित्तापाये०* इति न्यायस्य चासद्भावात् सकारश्रवणं निर्बाधं भवति। देशनिरूपणार्थत्वपक्षे च सत्यपि द्वित्वादौ ककारात् पूर्व एव सुट् स्यान्न चकारादिति कात् पूर्वग्रहणेन क्रियत इति कात् पूर्वग्रहणं समाधाय, पुनः पूर्वं स्सटि सत्यपि द्वित्वे एतद्दृष्ट्या तस्य बहिरङ्गासिद्धतया सकारस्य श्रवणं तन्निमित्तकार्यं च न स्यादिति शङ्कामुत्थाप्य तेनैव प्रसङ्गेन 'कात् पूर्व'ग्रहणमपि खण्डितं तत्रैव सूत्रे, तच्च प्रकरणं स्वमतेऽप्युपयुक्तमिति प्रदर्श्यते। तथाहि—"उपदेशिवद्वचनं च" [ वार्त्तिकम् ] उपदेशिवद्भावश्च वक्तव्यः, किं प्रयोजनम्? "लिटि गुण-चङि दीर्घप्रतिषेधार्थम्" [ वार्तिकम् ], लिटि गुणार्थं चङि दीर्घप्रतिषेधार्थं च, लिटि गुणार्थं तावत्—संचस्करतुः संचस्करुः, चङि दीर्घप्रतिषेधार्थं च—समचिस्करत्। लिटि गुणार्थेन तावन्नार्थः, वक्ष्यत्येतत् संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यं कृञर्थम्' इति। चङि दीर्घप्रतिषेधाऽर्थे नापि नार्थः। पदमितीयं भगवतः कृत्रिमा संज्ञा। युक्तमिह द्रष्टव्यं किमन्तरङ्गं किं बहिरङ्गमिति, धातूपसर्गयोः कार्यं यत् तदन्तरङ्गम्। कुत एतत्? पूर्वं धातुरुपसर्गेण युज्यते, पश्चात् साधनेनेति। नैतत्सारम्—पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण, साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टि, अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम्; सत्यमेवमेतत्, यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते, अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते—पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति, तस्य 'आस्यते गुरुणा' इत्यकर्मकः 'उपास्यते गुरुः' इति केन सकर्मकः स्यात्। एवं च कृत्वा सुट् सर्वतोऽन्तरङ्गतरको भवति। कात् पूर्वग्रहणं चापि शक्यमकर्त्तुम्" इति ॥ अयमाशयः—संचस्कारेत्यादौ कात् पूर्वग्रहणेन निर्वाहेऽपि 'संचस्करतुः, संचस्करुः' इत्यादौ स्सटः पदद्वयनिमित्तकत्वाद् गुणदृष्ट्या असिद्धत्वेन संयोगादित्वाभावात् "ऋतश्च संयोगादेर्गुणः" [ पा० सू० ७. ४. १०. ] इति संयोगादित्वनिबन्धनो गुणो न स्यात्, [ स्वमते चैतद्दोषपरिहारायैव "स्कृ-च्छृतोऽकि परोक्षायाम्" [ ४. ३. ८. ] इति सूत्रे स्कृग्रहणं क्रियत इति तत्रैव वृत्तौ स्पष्टीकृतम् ] अतश्च तस्य स्सट उपदेशिवद्भावो वक्तव्यः। तथा चोपदेशावस्थायामेव [ प्रत्ययोत्पत्तेः पूर्वमेव ] स्स विधानेन तदानीं धातोः पदत्वासिद्ध्या न पदद्वयनिमित्तकत्वं स्सट इति न तस्य बहिरङ्गत्वम्, किन्तु यथा बहिर्भूतोपसर्गनिमित्तत्वं स्सटस्तथा बहिर्भूतपरोक्षानिमित्तकत्वं गुणस्येति साम्यमेवेति। तत्रोत्तरपक्षवादिना, वार्त्तिकोक्तोपदेशिवद्भावखण्डनं कृतम्, तथाहि—उपदेशिवद्भावस्य फलद्वयमुच्यते—संचस्करतुरित्यादौ गुणः समचिस्करदित्यादौ "लघोर्दीर्घोऽस्वरादेः" [ ४. १. ६४. ] इति दीर्घाभावश्च, तत्र गुणार्थं गुणविधायकसूत्रे—["ऋतश्च संयोगादेर्गुणः" पा० सू० ७. ४. १०. इत्यत्र] 'संयोगोपध [ संयोगोपान्त्य ]-ग्रहणं कर्तव्यं कृञर्थम्' इति वार्तिकेन तत्र गुणस्य साधितत्वादुपदेशिवद्भावो नावश्यकः। दीर्घाभावार्थमपि नावश्यकः, स्सटः पदद्वयाश्रयत्वं दीर्घस्य चैकपदाश्रयत्वमिति हि दीर्घस्यान्तरङ्गत्वेन तद्दृष्ट्या स्सटोऽसिद्धत्वात् संयोगाभावेन लघुत्वात् "लघोर्दीर्घोऽस्वरादेः" [ ४. १. ६४. ] इत्यस्य प्राप्तिरुद्भाव्यते, तत्र स्सटो यदि पदं निमित्तं स्यात् तदा पदद्वयाश्रितत्वं स्यात्, न च पदस्य [ पदसंज्ञकस्य ] स्सट् विधीयतेऽपि तु धातोरेव, धातुश्च न पदं त्याद्यन्तस्यैव पदत्वादिति पदद्वयनिमित्तत्वाभावात् स्सटो बहिरङ्गत्वाभावेन नासिद्धत्वमिति लघुत्वाभावाद् दीर्घाभाव इति। किञ्चात्र स्सट एवान्तरङ्गत्वमपि, तथाहि—धातूपसर्गयोः कार्यस्य पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वमिति स्वीकार्यम्, यतः पूर्वं

धातुरुपसर्गेण युज्यते पश्चात् साधनेनेति पक्ष एव श्रेयान्, यतः 'आस्यते गुरुणा' इत्यादि प्रयोगेऽकर्मकस्यापि 'आस्' धातोः 'उपास्यते गुरुः' इत्यादिप्रयोगे सकर्मकत्वमुपसर्गसम्बन्धादेव । ततश्चोपसर्गार्थमन्तर्भाव्यैव धातुः साधनेन युज्यत इत्युपसर्गसम्बन्ध एव पूर्वमुचितः, सति चोपसर्गसम्बन्धे तन्निमित्तककार्यस्य पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वमिति स्सटोऽसिद्धत्वस्य शङ्कैव नेति तदर्थमुपदेशिवद्भावस्य वचनं नावश्यकम् । स्वीकृते चास्मिन् पक्षे कालावधारणार्थं देशविशेषावधारणार्थं वा 'कात् पूर्वः' इति स्सट्विधायकसूत्रे यत् पाणिनिना कृतं तदपि न कर्त्तव्यमित्यपरमनुकूलम्, यतः पूर्वमुपसर्गयोगे तन्निमित्तस्य स्सटः पूर्वमेव प्रवृत्तिरिति संचस्कार समस्करोदित्यादौ ककारात् पूर्वमेव नियतः स्सट् स्यात् । द्वित्वेनाटा चोपसर्गस्य व्यवधानेऽपि जातस्य स्सटो न निवृत्तिः, *निमित्तापाय०* इति न्यायस्यानित्यत्वादसत्त्वाद्वेति । नास्य न्यायस्याप्यत्रोपयोगः, प्रणिपपातेत्यादावपि पूर्वमेव नेर्णत्वे *निमित्तापाये०* इति न्यायस्य चानाश्रयणान्न दोषः । एवं रीत्या दोषाभावे सिद्धेऽपि लोकसिद्धतयैवेष न्यायः स्वीकार्यो न ज्ञापकेन साधनीयः । अस्य न्यायस्य प्रपञ्चभूत एव पूर्वन्यायः [ *आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते* इति ] इत्युक्तं वृत्तौ, तत्रेदं विचारणीयम्–आगमानां गुणीभूतत्वं तु 'आदिः' 'अन्तः' इत्यादिशब्दैर्विधानाच्छास्त्रेणैव सिद्धम् । द्वित्वनिष्पन्नस्य चकार-पकारादेरङ्गत्वं केन साधनीयम्, द्वित्वं हि न तदवयवत्वेन विधीयते येन तदङ्गं स्यात्, अपि तु धातुरेव द्विरुच्यते, "द्विर्धातुः परोक्षा-ङे०" [ ४. १. १ ] इति सूत्रस्य तथैव स्वरसात् । तथा च स एव धातुः पुनरुच्यत इति न तयोः परस्परमङ्गाङ्गिभावः समुचितः, किञ्च प्रकृतो धातुः पूर्वं परस्ताद्वेति विवेकासम्भवेनोभयोरपि तत्त्वमभ्युपेयमेव, तथा च प्रणिपपातेत्यादौ द्वित्वे पूर्वस्यापि *एकदेशविकृतमनन्यवत्* इति न्यायेन 'पत्'रूपत्वमक्षतमिति दोषाभावः । तथा च न तत्र स्वाङ्गत्वमूलकमव्यवधायकत्वमेष्टव्यमिति न तत्र न्यायप्रयोजनम् । संचस्कारेत्यादौ चैवंरीत्या नोपसर्गधात्वोरानन्तर्यक्षतिः । यदि चैकस्य धातोः स्थाने धातुद्वयमादिश्यत इति पक्षः स्वीक्रियते तदाऽपि स्थानिवद्भावेन कार्यमिति ज्ञेयम् । विवेचितौ च स्थानेद्विर्वचनद्विःप्रयोग-द्विर्वचनपक्षौ महाभाष्ये "एकाचो द्वे प्रथमस्य" [ पा० सू० ६. १. १. ] इति सूत्रे साधुतया, तथा हि– "अथ यस्य द्विर्वचनं विधीयते किं तस्य स्थाने भवति, आहोस्विद् द्विः प्रयोग इति । कश्चात्र विशेषः ? "स्थाने द्विर्वचने णिलोपवचनं समुदायादेशत्वात्" [ वार्तिकम् ], स्थाने द्विर्वचने णिलोपो वक्तव्यः–आटिटत्, आशिशत् । किं कारणम् ? समुदायादेशत्वात् । समुदायस्य समुदाय आदेशः, तत्र सम्प्रमुग्धत्वात् प्रकृतिप्रत्ययसमुदायस्य नष्टो णिर्भवतीति "णेरनिटि" [ पा० सू० ६. ४. ५१. ] इति णिलोपो न प्राप्नोति । इदमिह संप्रधार्यम्–द्विर्वचनं क्रियतां णिलोप इति, किमत्र कर्त्तव्यम् ? परत्वाण्णिलोपः । नित्यं द्विर्वचनं कृतेऽपि णिलोपे प्राप्नोत्यकृतेऽपि, अनित्यं द्विर्वचनम्, अन्यस्य कृते णिलोपे प्राप्नोत्यन्यस्याकृते, शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति । नित्यमेव द्विर्वचनम्, कथं ? रूपस्य स्थानिवत्त्वात् । "यच्च सन्यङन्तस्य द्विर्वचने" [ वार्तिकम् ], यच्च सन्यङन्तस्य द्विर्वचने चोद्यं तदिहापि चोद्यम् । किं पुनस्तत् ? 'सन्यङन्तस्येति चेदशोः सन्यनिटः······' इत्यादि, अस्तु तर्हि द्विःप्रयोगो द्विर्वचनम् । "द्विःप्रयोग इति चेण्णकारषकारादेशादेरेत्ववचनं लिटि" [ वार्तिकम् ], द्विःप्रयोग इति चेण्णकार-षकारादेशादेरेत्वं लिटि वक्तव्यम्–'नेमतुः, नेमुः, सेहे, सेहाते, सेहिरे, अनादेशादेरिति प्रतिषेधः प्राप्नोति । स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः, तत्र सम्प्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स आदेशादिर्भवति । द्विःप्रयोगेऽपि सति द्विर्वचने न दोषः । वक्ष्यति तत्र लिड्ग्रहणस्य प्रयोजनम्–लिटि य आदेशादिस्तदादेर्नेति । "इड्वचनं च यङ्लोपे" [ वार्तिकम् ], इट् च यङ्लोपे वक्तव्यः–बेभिदिता, बेभिदितुम् । एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः प्राप्नोति । स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशः, तत्र सम्प्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स भवति य एकाजुपदेशेऽनुदात्तः । द्विःप्रयोगे चापि द्विर्वचने न दोषः, एकाज्ग्रहणेनाङ्गं विशेषयिष्यामः–एकाचोऽङ्गादिति । ननु चैकैकमत्राङ्गम् । समुदाये या वाक्यपरिसमाप्तिस्तयाङ्गसंज्ञा भविष्यति । कुत एतत् ? शास्त्राहानेः । एवं हि शास्त्रमहीनं भवति । "इड्दीर्घप्रतिषेधश्च" [ वार्तिकम् ], इटो दीर्घत्वस्य च प्रतिषेधो वक्तव्यः, 'जरीगृहिता जरीगृहितुम्' 'ग्रहोऽलिटि दीर्घः" [ पा० सू० ७. २. ३७. ] इति दीर्घत्वं प्राप्नोति । स्थाने पुनर्द्विर्वचने सति समुदायस्य समुदाय आदेशस्तत्र सम्प्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टो ग्रहिः । द्विःप्रयोगे चापि द्विर्वचने न दोषः–ग्रहिणाऽङ्गं विशेषयिष्यामः–ग्रहेरङ्गादिति । ननु चैकैकमप्यत्राङ्गम्, समुदाये या वाक्यपरिसमाप्तिस्तयाङ्गसंज्ञा भविष्यति । कुत एतत् ? शास्त्राहानेः । एवं हि शास्त्रमहीनं भवति । "पदादिविधिप्रतिषेधश्च" [ वार्तिकम् ], पदादिलक्षणविधेः प्रतिषेधो वक्तव्यः, सिषेच, सुस्वाप । "सात्पदाद्योः" [ पा० सू० ८. ३. १११. ] इति षत्वप्रतिषेधः प्राप्नोति । स्थाने पुनर्द्विर्वचने सति न दोषः– समुदायस्य समुदाय आदेशस्तत्र सम्प्रमुग्धत्वात् प्रकृतिप्रत्ययस्य नष्टः स पदादिर्भवति ॥ द्विःप्रयोगे चापि द्विर्वचने न दोषः । सुप्तिङ्भ्यां पदं विशेषयिष्यामः–सुप्तिङन्तं पदम्, यस्मात् सुप्-तिङ्विधिस्तदादि सुबन्तं तिङन्तं च । ननु चैकैकस्मादप्यत्र सुप्तिङ्विधिः ? । समुदाये या वाक्यपरिसमाप्तिस्तया

पदसंज्ञा भविष्यति । कुत एतत्? शास्त्राहानेः, एवं हि शास्त्रमहीनं भवति ।

"तावेव सुप्तिङौ यौ ततः परौ सैव च प्रकृतिराद्या ।
आदिग्रहणं च कृतं समुदायपदत्वमेतेन ॥

अयमाशयः–पाणिनीये नये "एकाचो द्वे प्रथमस्य" [पा० सू० ६. १. १.] "अजादेर्द्वितीयस्य" [पा० सू० ६. १. २.] "लिटि धातोरनभ्यासस्य" [पा० सू० ६. १. ८.] इति त्रिसूत्र्यां लिटि [परोक्षायां] परेऽनभ्यास [अकृतद्विर्वचन]-धात्ववयवस्य प्रथमस्यैकस्वरस्य द्वित्वं स्यात्, स्वरादेस्त्वादिभूतात् स्वरात् परस्य द्वितीयस्यैकस्वरस्य द्विः स्यादित्यर्थो भवति। तत्रेदं शङ्क्यते–किमिदं स्थाने द्विर्वचनम्?–एकस्य स्थाने द्वावेकस्वरावादेशौ भवत इति, आहोस्विद् द्विः प्रयोगमात्रम्। अस्ति चोभयोः पक्षयोः संभवः; तथाहि–कैयटः–"तत्र 'द्वे' इत्येतत् संख्येये वर्तते, तच्च संख्येयं शब्दानामन्वाख्येयत्वेन प्रस्तुतत्वात् शब्दरूपं वा स्यात् तत्सम्बन्धि वोच्चारणम्। तत्र यदा शब्दस्वरूपं संख्येयं तदा 'एकाचः' [एकस्वरस्य] इति स्थाने योगा षष्ठी "षष्ठी स्थाने योगा" [पा० सू० १. १. ४९.] इति परिभाषोपस्थानात्। तदा स्थाने द्विर्वचनमित्येष पक्षो भवति, यथा–"अस्तेर्भूः" [पा० सू० २. ४ ५२.] ["अस्ति-ब्रुवोर्भू-वचावशिति" [४. ४. १.] इति। यदा तूच्चारणं संख्येयं तदा तस्य क्रियारूपत्वात्, क्रियायाः शब्दस्य च स्थान्यादेशभावायोगात् 'एकाचः' [एकस्वरस्य] इति कर्मणि षष्ठी विज्ञायते उच्चारणशब्दाध्याहारेण, शेषलक्षणा वा, यथा मातुः स्मरतीति द्विःप्रयोगो द्विर्वचनमित्येष पक्षो भवति। तत्र गुणदोषपरीक्षार्थो विचारः क्रियते" इति। तत्र स्थाने द्विर्वचनपक्षे–'आटिटत्, आशिशत्'इत्यादौ स्वरादेर्द्वितीयस्यैकस्वरस्य 'टि' 'शि' शब्दस्य स्थाने 'टिटि, शिशि'शब्दादेशे प्रकृतिप्रत्यययोः सम्प्रमुग्धत्वात्–विशिष्यागृह्यमाणत्वात् [को णिः क आदेश इत्यनिर्णयादिति यावत्] णेर्लोपो न प्राप्नोति। न च स्थानिवद्भावेन णित्वम्, णिमात्रस्य द्वित्वाभावात्, समुदायस्य 'टि'शब्दादेर्द्वित्वविधानात्। यदि च पूर्वं णिलोप एव क्रियतामित्युच्यते, तदा द्विर्वचनस्य कृतेऽकृते च णिलोपे प्राप्तेर्नित्यत्वेन द्विर्वचनमेव स्यादिति णिलोपानापत्तिरिति णिलोपार्थं यत्नः कर्त्तव्यः स्यादिति तत्परिहाराय द्विःप्रयोगपक्ष एव स्वीकार्य इति चेदुच्यते-[एतदेव च स्वमतम्, यतो हि स्वमते "द्विर्धातुः परोक्षा-ङे०" [४. ४. १.] इति सूत्रे धातुरिति प्रथमान्ततया निर्दिश्यते, तथा च षष्ठीविभक्त्यभावात् स्थाने द्विर्वचनपक्षस्य स्वमते नास्ति शङ्का] तत्राप्ययं दोषः 'नेमे, सेहे' इत्यादौ णकारस्य स्थाने नकार आदिश्यते षकारस्य स्थाने सकार इत्यादेशादित्वेन "अनादेशादेरेकव्यञ्जनमध्येऽतः" [४. १. २४.] इत्येत्वं न स्यात्, स्थाने द्विर्वचनपक्षे तु द्वित्वे कृते सति आदेशादिस्थानेऽनादेशादेरादेशान्न दोषो भवति [स्वमते चात्र द्वित्वं निषिध्यत इति सर्वथा आदेशादित्वमस्त्येव], यदि च परोक्षया आदेशादित्वस्य विशेषणादत्र न दोषः परोक्षानिमित्तस्यादेशस्याभावादित्युच्यते, तदा बेभिदितेति यङ्लुपि इडभावो दोषो बोध्यः। द्विःप्रयोगरूपत्वेन स्वाभाविकैकस्वरत्वाविधानात् "एकस्वरादनुस्वारेतः" [४. ४. ५६.] इतीट्प्रतिषेधात् यदि चात्रेड्विधानसमयस्थितमनेकस्वरत्वं श्रूयमाणमेव गृह्यत इत्युच्यते तदाऽपि 'जरीगृहिता' इत्यादौ "गृह्णोऽपरोक्षायां दीर्घः" [४. ४. ३४.] इति दीर्घः प्राप्नोति, स्थाने द्विर्वचनपक्षे चान्य एव धातुरिति न भवति। यदि चात्र समुदायस्य ग्रहिरूपत्वाभावाददोष इत्युच्यते, तदा 'सिषेच' इत्यादौ द्वितीयसकारस्य पदादित्वात् 'पदान्तःस्थस्य' इत्युच्यमानं षत्वं न प्राप्नोति, द्वितीयस्यापि सिचस्त्याद्यन्तत्वनिमित्तपदत्वात्, स्थाने द्विर्वचनपक्षे च समुदायस्य स्थाने 'सिच् सिच् अ' इत्यादिसमुदायरूप आदेश इति प्रमुग्धत्वात् प्रकृतिप्रत्ययस्य [प्रकृतिज्ञानस्य प्रत्ययज्ञानस्य चाभावादिति भावः] स पदादिर्न भवतीति षत्वं सिद्ध्यति। इत्थमयमपि दोषो द्विःप्रयोगरूपद्विर्वचनपक्षे परिह्रियते–द्विःप्रयोगे उच्चारणभेदाच्छब्दभेदे सत्यपि 'सिच् सिच् णव्' इत्यस्यैव पदसंज्ञा, तस्यैव त्याद्यन्ततदादित्वात् त्याद्यन्ततदादेरेव च पदत्वात्, तथा च द्वितीयसिचः पदत्वाभावेन तदीयसकारस्य पदादित्वाभावात् पदान्तःस्थत्वं सूपपन्नमिति तस्य षत्वं भवत्येवेति। इत्थं च यद्यप्युभयोः पक्षयोर्दोषोद्धारः संभवति, तथापि द्विःप्रयोगरूपद्विर्वचनपक्षस्यैव भाष्यकृता सिद्धान्तरूपेणाश्रयणादत्र च पक्षे न किमपि कञ्चिदवयविनमुद्दिश्य विधीयते इति कस्याप्यङ्गाङ्गिभाव इति नैतद्विषयेऽस्य न्यायस्योपयोगस्तन्मते इति कृतमधिकेनेति ॥ ११ ॥

## *उपसर्गो न व्यवधायी ॥ १२ ॥

**सि०**—प्रादीनामुपसर्गत्वं धातोः प्राक् प्रयोज्यत्वं च सामान्यत एव "धातोः पूजार्थस्वति-गतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक् च" [३. १. १.] इति सूत्रेणानुशिष्टम्, किन्तु तस्य व्यवहिता-व्यवहितप्रयोगविषये न किमपि नियमितं, तथापि 'धातोः प्राक्' इति निर्देशे पञ्चम्याऽव्यवहितपूर्वत्वमेव गम्यत इति तदव्यवहित एव प्रयोग उपसर्गाणाम्, तथापि तेषां पदत्वेन पदान्तरेण सहाख्यातस्य व्यवधायकत्वं प्राप्तम्, तत्राव्यवधायकत्वसाधकोऽयं न्यायः। न च 'धातोः प्राक्' इत्यत्र धातोरिति षष्ठ्यन्तत्वमाश्रित्य प्राक् पदस्य च पूर्वावयववाचित्वमाश्रित्य धातोरवयवत्वेन तेषां *स्वाङ्गमव्यवधायि* इति पूर्वोक्तन्यायेनैवाव्यवधायकत्वं

सिद्धमिति वाच्यम्, प्राक्शब्दस्य दिग्वाचकत्वेन दिक्शब्दयोगलक्षणपञ्चम्या एव तत्र प्रतिपदोक्तत्वेन प्राबल्यात्, प्राक्शब्दस्य पूर्वावयववाचकत्वस्य क्वाप्यदर्शनाच्च । अस्य च ज्ञापकम्–"गायोऽनुपसर्गाट्टक्" [ ५. १. ७४. ] इति सूत्रेऽनुपसर्गादित्युपसर्गवर्जनम्, तस्य हि साम संगायतीत्यर्थे सामसंगाय इत्यत्र टकोऽप्रवृत्त्यर्थत्वम्, यदि चोपसर्गस्य व्यवधायकत्वं स्यात् तर्हि सामसंगाय इत्यत्र कर्मणो व्यवहितत्वाद् गायतेः कर्मणः परत्वाभावाट्टकः प्राप्तिरेव नेति तद्वारणायोपसर्गपरत्ववर्जनं वृथैव स्यात्, वृथाभूतं च तदिमं न्यायं ज्ञापयति, ज्ञापिते चास्मिन् न्याये उपसर्गस्याव्यवधायकत्वे सिद्धे सामसंगाय इत्यत्रापि टकः प्राप्तिरिति तद्वारणयोपसर्गवर्जनं सार्थकम् । तथा चास्या[ टकोऽ ]प्राप्तौ "कर्मणोऽण्" [ ५. १. ७२. ] इत्येव भवतीति सामसंगाय इति सिध्यति । फलं चास्य "उक्षां प्रचकुर्नगरस्य मार्गान्" [भट्टि० स०३।५] इत्यादिकविप्रयोगाणां साधुत्वमेव । एतज्ज्ञापनाभावे न ह्यत्र "गुरुनाम्यादेः०" [ ३. ४. ४८. ] इति परोक्षाया आमादेशे कृते 'कृभ्वस्ति चानुतदन्तम्' इति परोक्षान्ततयाऽनुप्रयुज्यमानस्य कृगो मध्यस्थितेनोपसर्गेणामप्रकृतितोऽव्यवधानम्, अन्वित्यव्ययेन हि पश्चादर्थेन ततोऽव्यवहितस्यैव [ आम्प्रकृतिसन्निहितस्यैव ] कृगः प्रयोगस्यौचित्यं प्रतिभाति । यदि च मध्ये प्रशब्द उपसर्गः कविना प्रयुक्तस्तर्हि तस्य व्यवधायित्वेनानुप्रयुज्यमानत्वं कृगो न स्यात्, स्वीकृते चात्र न्याये प्रशब्दस्याव्यवधायकत्वेन कृगोऽव्यवधानादनुप्रयुज्यमानत्वं सिध्यति । "अयं च न्यायोऽनैकान्तिकः, तेन समागच्छतीत्यत्र सम आङा व्यवधानात् "समो गम्यृच्छि-प्रच्छि-श्रु-वित्-स्वरत्यर्ति-दृशः" [३. ३. ८४.] इत्यात्मनेपदं न भवति" इति प्राञ्चः । वस्तुतस्तु–उपसर्गस्यान्यं प्रत्यव्यवधायकत्वेऽनेन न्यायेनोच्यमाने उपसर्गाणां परस्परं व्यवधायकत्वमपाकर्तुं न शक्यते, तथा चोपसर्गस्याङोऽन्यं प्रत्यव्यवधायकत्वेऽपि स्वसजातीयमुपसर्गं प्रति व्यवधायकत्वं स्यादेवेति नात्रात्मनेपदप्राप्तिरिति न तदर्थमस्य न्यायस्यानित्यत्वमाश्रयणीयम् । किञ्च कर्मण्यसत्येवात्मनेपदं भवति, समागच्छतीत्यत्र कर्मणो विवक्षायां परस्मैपदं निराबाधमेवेति ॥ १२ ॥

## ※उपसर्गो न व्यवधायी※ ॥ १२ ॥

त०—धातोः प्राक् प्रयुज्यमानः प्रादिरुपसर्गसंज्ञां लभते, स च न कस्यचिदवयवः, पदत्वं च तस्य सिद्धमेव । तथा च न तस्य धात्वन्तर्गतत्वम् । एवं च "उक्षां प्रचकुर्नगरस्य मार्गान्" एवं–"बिभरां प्रचकारासौ" इति च भट्टिकविप्रयोगे आमन्तादनुप्रयुज्यमानस्य कृगः प्रेण व्यवधानं प्राप्नोति, अनुशब्दस्य पूर्वदेश-कालव्यावर्तकत्वेन पश्चाच्छब्दपर्यायत्वे लोकप्रसिद्धेऽपि 'काशीतः पश्चिमे प्रयागो मथुरा पुष्करं द्वारका' इत्यत्र देशे, 'चैत्रतः पश्चाद् वैशाखो ज्येष्ठः श्रावणः' इत्यादौ काले च पश्चाच्छब्दस्य यद्यपि व्यवहिताव्यवहितसाधारणत्वं प्राप्तं, तथापि 'अनु' इत्यस्योच्चारणसामर्थ्यादव्यवहितत्वेन प्रयुज्यमानत्वमेव कृभ्वस्तामिति प्रतीयते । अत्र च प्रेण व्यवधानादसाधुत्वं स्यादित्ययं न्याय आश्रीयते । तथा च नात्र व्यवधानमिति सिद्ध्यति । भट्टिकाव्यव्याख्याता जयमङ्गलाकारस्तु–अनुशब्दोच्चारणसामर्थ्यादव्यवहित एव प्रयोगे विधेये प्रशब्दव्यवधानं नोचितमिति 'उक्षान् प्रचकुर्नगरस्य मार्गान्' 'प्रबिभरां चकारासौ' इत्येवंरूपेण पाठं परिकल्पितवान् । "कृञ्चानु प्रयुज्यते लिटि" [ पा० सू० ३. १. ४०. ] इति सूत्रस्थमहाभाष्यग्रन्थपर्यालोचनया तु भिन्नार्थसत्त्वप्रधानशब्दव्यवधानमेव निवर्तनीयमनुप्रयोगसामर्थ्यादिति लभ्यते, उपसर्गस्य च धात्वर्थद्योतकत्वेन भिन्नार्थत्वाभावादसत्त्वप्रधानत्वाच्च न व्यवधायकत्वम् । तथाहि–तत्रत्यग्रन्थः–"किमर्थमिदमुच्यते ? अनुप्रयोगो यथा स्यात् । नैतदस्ति प्रयोजनम्, आमन्तमव्यक्तपदार्थकं, तेनापरिसमाप्तोऽर्थ इति कृत्वाऽनुप्रयोगो भविष्यति, "विपर्यासनिवृत्त्यर्थं वा" [ वार्तिकम् ], विपर्यासनिवृत्त्यर्थं तर्हि कृञोऽनुप्रयोगवचनं क्रियते, ईहांचक्रे, चक्रे ईहामिति मा भूत् । "व्यवहितनिवृत्त्यर्थं च" [ वार्तिकम् ], व्यवहितनिवृत्त्यर्थं तर्हि कृञोऽनुप्रयोगवचनं क्रियते; अन्वेव च कृञोऽनुप्रयोगो यथा स्यात्–ईहांचक्रे, व्यवहितस्य मा भूत्–'ईहां देवदत्तश्चक्रे' इति ।" इति । इत्थं चेमं ग्रन्थं कैयटो व्याचख्यौ–"अन्तरेणापि सूत्रारम्भमनुप्रयोगः सिद्धः कालसंख्या-साधनप्रत्यक्तत्वादिप्रतिपादनाय लिट्परस्य कृञः । आमन्ताद्धि कालविशेष एवावसीयते, न त्वर्थान्तरम्, तत्र समानार्थस्य धातोरनुप्रयोगो न भविष्यति, ओषामुवोषेति, उत्तरेणैव सर्वार्थाभिव्यञ्जनादामन्तस्यानर्थक्यप्रसङ्गात् । नापि भिन्नार्थस्य–ईहां पपाचेति, आमन्तसम्बद्धसाधनाद्यसंप्रत्ययात् । कृञ् तु सामान्यवचनः, सामान्य-विशेषवाचिनोश्च प्रयोगोऽर्थविशेषप्रतिपादनेऽनुगुण इति भावः" इति । अयमाशयः–परोक्षास्थानिकामन्तेन कारक–संख्यादीनां स्वमते । मतान्तरे च कालस्यापि बोधो नैव जायत इति तद्बोधनाय विनाऽपि वचनं परोक्षापरस्य कृञोऽनुप्रयोगो भविष्यत्येव । न च कृञ एव कुतोऽनुप्रयोगो भविष्यति, समानार्थस्यैव, भिन्नार्थस्यैव वा धातोः परोक्षापरस्यानुप्रयोगः कुतो न भविष्यति ?, तत्र समानार्थस्य यथा–ओषामुवोषेति, भिन्नार्थस्य यथा–ईहां पपाचेति वाच्यम्, उवोषेत्यनेनैव ओषामित्यस्यापि गतार्थत्वात् समानार्थस्याप्रयोगात्, भिन्नार्थेन तु आमन्तधातुसम्बद्धकारकादीनामसंप्रत्ययाच्च । तथा च ईहधातुर्विशेषवाची कृञ् च क्रियासामान्यवाची ततोऽनुप्रयुज्यते, इति सामान्य-

विशेषवाचिनोर्नीलो घट इत्यादाविव प्रयोगः स्वभावादेव भविष्यतीत्यनुप्रयोगविधानं नावश्यकमिति "किमर्थमिदमुच्यते" इति भाष्यप्रश्नाशयः । ततो 'अनुप्रयोगो यथा स्यात्' इति ग्रन्थं व्याचख्यौ—"यद्यप्यामन्तात् सकलार्थाभिव्यक्तिर्न भवति तथापि प्रकरणवशाद् भविष्यति, तस्मादनुप्रयोगसिद्ध्यर्थमिदं [ अनुप्रयोगविधानं ] वक्तव्यमिति भावः" इति । पुनरप्यनुप्रयोगस्यान्यथासिद्धत्वमाह भाष्यकृद्-"नैतदस्ति प्रयोजनम्" इत्यादिना । तस्य व्याख्यानम्-"पूर्वोक्तानामर्थानां [ कालसाधनादीनां ] प्रकरणादिवशादशक्या प्रतिपत्तिरिति तदर्थाभिधानायानुप्रयोगः सिध्यत्येवेति भावः" इति कैयटेन कृतम् । ततोऽनुप्रयोगवचनस्य बहुशः प्रयोजनानि मध्ये प्रतिपाद्य खण्डयित्वा चाह भाष्यकृत्-विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेत्यादिना । तस्यायमाशयः-आमन्तेनापरिसमाप्तस्यार्थस्य प्रतिपादनाय कृभ्वसां प्रयोगे सिद्धेऽपि देशनियमार्थमनुप्रयोगविधानम्, अनुशब्दस्य पश्चादर्थत्वात्, तेनामन्तस्य पश्चादेव कृञ् प्रयुज्यते न तु पूर्वं नापि व्यवहितमित्यर्थलाभ इति । अनेन च भाष्येण यद्यपि सामान्यत एव व्यवहितप्रयोगो निषिद्धः, तथापि 'ईहां देवदत्तश्चक्रे' इत्येवं व्यवहितप्रयोगस्य भाष्यकृता व्यावर्त्यत्वेन प्रदर्शनात्, अग्रे "यथाविध्यनुप्रयोगः पूर्वस्मिन्"[ पा० सू० ३. ४. ४. ] इति सूत्रे तत्खण्डनपरभाष्यव्याख्यानावसरे-"अत एव लुनीहि लुनीहीत्येवायं लुनाति"इति भाष्यप्रयोगे [ अनुप्रयुज्यमानस्य ] व्यवहितप्रयोगः संगच्छते"इति नागेशव्याख्यानेन चानुप्रयोगस्थले द्रव्यवाचकेनैव व्यवधानं व्यावर्त्तनीयमिति शिवदत्तादिभिष्टिप्पण्यां [ ३. १. ४०. ] निर्णीतम् । तत्र च वैदिकप्रयोगादीनामुदाहरणेन "उक्षां प्रचक्रुर्नगरस्य मार्गान्"-इत्यादिकविप्रयोगा अपि भाष्यानुकूला इति साधितम् । "विपर्यासनिवृत्त्यर्थं, व्यवहितनिवृत्त्यर्थं च" इति वार्त्तिकाभ्यां च "तं पातयां प्रथममास पपात पश्चात्" "प्रभ्रंशयां यो नहुषं चकार" [ रघुवंश० स० १३. ३६ ] इत्यादिव्यवहिताः "नारेश्चकार गणयामयमत्र पातान्"इत्यादिविपर्यस्ताः प्रयोगाश्च व्यावर्त्याः । तेऽपि च छन्दोवत् कवयः कुर्वन्तीति वदता भाष्यकृता साधुत्वेन गृहीता इति केचित् । वस्तुतस्तु-उक्षां प्रचक्रुरित्यादयोऽपि प्रयोगाः "तं पातयां प्रथममास"इत्यादिकविप्रयोगा इव छान्दसा एव, व्यवहितप्रयोगस्याक्षरानुगुणत्वात् । तथा चेदृशस्थले उपसर्गस्य व्यवधायकत्वमेव । "गायोऽनुपसर्गाट्टक्" [ ५. १. ७४. ] इत्यादावुपसर्गवर्जनं चोपसर्गार्थस्य धात्वर्थान्तर्भावेणोपसर्गस्य च तद्द्योतकत्वेन धात्वङ्गभूततया तस्य [ कर्मणः ] सोपसर्गधातुं प्रत्येव कर्मत्वादव्यवधायकत्वमाश्रित्यैव, अनुप्रयोगस्थले चानुप्रयुज्यमानस्य सामान्यार्थकस्यैव सूत्रविधेयत्वेन सोपसर्गस्य तस्यानुप्रयुज्यमानत्वासम्भवादुपसर्गस्य व्यवधायकत्वमेवोचितम् । 'लुनीहि लुनीहीत्येवायं लुनाति' इत्यादिभाष्यप्रयोगेषु व्यवहितत्वेनानुप्रयुज्यमानस्य प्रयोगश्च तत्राव्यवहितप्रयोगस्यानिष्टत्वसूचक एव, न तु सर्वत्रानुप्रयुज्यमानस्य व्यवहितप्रयोगे साधुत्वसूचक इत्यवधेयम् ॥ १२ ॥

## *येन नाव्यवधानं तेन व्यवहितेऽपि स्यात्* ॥ १३ ॥

सि०—येनेति कर्तरि तृतीया, न व्यवधानमव्यवधानम्, न अव्यवधानम्—नाव्यवधानम्, नैकधेत्यादाविव निषेधार्थो 'न'शब्दो न तु नञ्, तेन समासोऽसमस्तमेव वा पदम् । तथा च नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वेन यत्कर्तृकमत्रद्वय-व्यवधानं प्राप्नोति, तेन व्यवहितेऽपि [ तत्कर्तृकव्यवधानसद्भावेऽपि, कार्यं ] स्यादिति न्यायार्थः । निमित्त-कार्यिणोरव्यवधानमेव कार्यविधावपेक्षितम्, तत्र यत्र वचने निमित्त-कार्यिणोरव्यवधानमसंभवि तत्र व्यवहितेऽपि कार्यं भवति वचनप्रामाण्यात् । तथा च तादृशं वचनरूपं सूत्रमेवेह ज्ञापकम्, यथा "स्वरादुतो गुणादखरोः" [ २. ४. ३५. ] इति सूत्रेण स्वरात् परो य उत् तदन्ताद् गुणवचनात् खरुवर्जात् स्त्रियां ङीर्वा विधीयते, तत्र स्वरात् परत्वमुतः केवलं 'तितउ'शब्दे दृश्यते, किन्तु स न गुणवाची किन्तु द्रव्यवाची, ये च गुणवचनत्वेन महाभाष्याद्यनुसारं बृहद्वृत्त्यादौ परिभाषिताः शब्दास्तेषु न कोऽपि तादृश इति विधेर्वैयर्थ्यमेवायाति, किञ्चैवं खरुवर्जनमपि न युज्यते, खरुशब्देऽपि स्वरात् परस्योकारस्यासत्त्वात् तत्र प्राप्तेरेवाभावेन निषेधस्यानौचित्यादिति विधिवर्जनाभ्यामुभाभ्यां स्वसार्थक्यायायं न्यायो विज्ञाप्यते । तथा चैकव्यञ्जनव्यवधानेऽपि 'पटु-मृदु'प्रभृतीनां शब्दानामत्र उद्देश्यकोटौ ग्रहणात् ततो ङीविधानेन सूत्रस्य सार्थक्यं खरुवर्जनस्य च । फलं चान्यत्रापि भेत्तेत्यादौ "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इति गुणसिद्धिः, अन्यथा 'अक्ङिति' इति सप्तम्या "सप्तम्या पूर्वस्य" [ ७. ४. १०६. ] इति परिभाषासूत्रस्योपस्थानाद् क्ङिद्वर्जप्रत्ययाऽव्यवहितपूर्वस्यैव लघोर्नामिन उपान्त्यभूतस्य गुणः स्यादिति भेत्तेत्यादौ क्वापि गुणो न स्यात् । एतन्न्यायाच्चोपान्त्यस्य विधीयमानविधावन्त्येनैकेन वर्णेन व्यवधानस्यावश्यंभावित्वेन तेन व्यवहितेऽपि गुणप्रवृत्तौ बाधकाभावः । नाव्यवधानमिति नञ्द्वयोपादानमवर्जनीयव्यवधानग्रहणार्थमेव, तेन च यत्राव्यवधानेऽपि सूत्रप्रवृत्तिः संभाव्यते तत्र नास्य न्यायस्य प्रसरः, यथा "ज्युंङ् गतौ" इत्यस्माद्धातोर्णिगि सनि च जुज्यावयिषतीति रूपं भवति, अत्र निमित्तभूताया अवर्णान्ताया अन्तस्थाया जका-

रेण व्यवधानाद् द्वित्वे पूर्वस्योकारस्य "ओर्जान्तस्था पवर्गेऽवर्णे" [ ४. १. ६०. ] इति इत्वं न भवति, यतो ऽव्यवहिते 'यियविषति' इत्यादिलक्ष्यस्थे उकारे सूत्रस्य [ "ओर्जान्तस्थापवर्गेऽवर्णे" इत्यस्य ] चारितार्थ्यसत्त्वेन व्यवहितप्रवृत्तेरवर्जनीयत्वाभावेनावश्यव्यवधानमिह नास्ति, ततश्च जुज्यावयिषतीत्यत्र व्यवहितान्तस्थाया ग्रहणं न भवतीति नात्रेत्वप्रवृत्तिः । इमं चार्थं प्राचीना येन नाव्यवधानमिति किमित्येवं रीत्या पदकृत्यप्रदर्शनेन सूचयन्ति, तच्च न चारु- 'येन नाव्यवधानम्' इतीयतोंऽशस्याभावे न्यायस्वरूपं किं स्यात् ?, व्यवहितेऽपि स्यादित्येतावदेव । तथा च सर्वस्य शास्त्रस्य व्यवहितेऽपि प्रवृत्तिः स्यात्, न च तदिष्टं न चापि तत्र किमपि मानम् । तथा च न्याय एव किमर्थं इति तस्य प्रश्नस्याशयोऽवधारणीयः, तथा चैतन्न्यायलक्ष्यासिद्धिरेव तत्र दोषत्वेन प्रदर्शनीयाऽव्याप्तिदोषस्यातिव्याप्तिदोषापेक्षया प्राबल्यात् । यदि च समुदायद्वाराऽवयवे प्रश्नः 'नञ्द्वयोपादानं किमर्थम्' इतिरूपस्तदा साध्वेव, तथा सति प्रागुक्तास्मदाशयस्यैव स्थैर्यात् । अयं च शास्त्रसामर्थ्याक्षिप्त इति नानैकान्तिकः ॥ १३ ॥

***येन नाव्यवधानं तेन व्यवहितेऽपि स्यात्* ॥१३॥**

**त०**—यत्रोपान्त्यस्य कार्यं विधीयते तत्र निमित्तस्य सप्तम्या निर्दिष्टस्याव्यवधानं न संभवतीति किं तत्र "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ] इति परिभाषाशास्त्रबाध उत विधिवैयर्थ्यमेव ?, "स्वरादुतो गुणादखरोः" [ २. ४. ३५. ] इत्यादौ स्वरात् परत्वमुकारस्य गुणवाचकशब्देष्वदृष्टमिति विधिवैयर्थ्यम्, तथा च भेत्तेत्यादौ "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इत्यादीनामप्रवृत्तिरथ वा परिभाषाबाधात् निन्दितेत्यादावपि प्रवृत्तिः, उप्रत्ययस्य च मृद्वीत्यादावप्रवृत्तिरथ वा "पञ्चम्या निर्दिष्टे परस्य" [ ७. ४. १०४. ] इति परिभाषाबाधात् पाण्डुर्भूमिरित्यादावपि प्रवृत्तिरित्यव्याप्त्यतिव्याप्तिरूपदोषद्वयनिरासायायं न्यायः समाश्रीयते तत्तच्छास्त्रप्रणयनसामर्थ्यात्, तथा च न दोषः । अन्यैरपि न्यायोऽयं समाश्रीयत एव, परं न्यायमध्ये न पठितः परिभाषेन्दुशेखरादौ । दीक्षितादिना च "पुगन्तलघूपधस्य च" [ पा० सू० ७. ३. ८६. ] इति सूत्रव्याख्यावसरे ज्ञाप्यत्वेन निर्दिष्ट एव । 'येन नाव्यवधानं तेन व्यवहितेऽपि' इति कथनेन तेन तदन्येन च व्यवहितेऽपि कार्यमिति तु न शङ्कनीयम्, अवश्यव्यवधायकव्यवधान एव प्रवृत्तेरिष्टत्वेन तेनैव व्यवहित इत्यर्थस्यापि सामर्थ्यलब्धत्वात्, अन्यथा भेत्तेत्यादाविव भिनत्तीत्यादावपि गुणः स्यात् । तेनैव व्यवहित इत्युक्तेश्च तदन्येन व्यवधाने न प्रवर्तते । 'तेनैव व्यवहिते' इत्ययमर्थश्च न नवीनोऽपि तु नाव्यवधानमिति नञ्द्वयोपादानलभ्यः । स्पष्टं चेदं तत्रैव [ सिद्धान्तकौमुद्यां ] ध्वनितं दीक्षितेन । एवं च येन नाव्यवधानमिति नञ्द्वयोपादानस्यैव सार्थक्यप्रदर्शनं यदि प्राचीनानामभिप्रेतं स्यात् तर्हि भिनत्तीत्यादौ गुणव्यावृत्तिरेव प्रदर्शनीया स्यान्न तु जुज्यावयिषतीत्यादावित्वाद्यप्रवृत्तिरिति विभावनीयं सूरिभिरिति । एतन्न्याये "स्वरादुतो गुणादखरोः" [ २. ४. ३५. ] इति सूत्रस्य तत्रत्यखरुवर्जनस्य च ज्ञापकत्वोपन्यसनं दिङ्मात्रप्रदर्शनाय । एवंभूतानां शास्त्राणां प्रणयनेनाचार्यस्येयं शैली लक्ष्यते यत्- "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ] इत्यादिशास्त्रेषु सविशेषणस्योद्देश्यस्याव्यवहितत्वं निमित्तेन लक्ष्यते । तथा चोपान्त्ये हि अन्त्यं विशेषणत्वेन स्वरूपमध्यप्रविष्टमिति तद्व्यवधानं न गण्यते स्वस्वरूपस्याव्यवधायकत्वस्य *स्वाङ्गमव्यवधायि* इति न्यायेनैव लाभात् । एवं "स्वरादुतो गुणात्०" [ २. ४. ३५. ] इत्यादावेकस्मिन् गुणवाचके शब्दे स्वरात् परत्वं स्वरूपस्योकारस्य कथ्यमानं स्वरान्तरसमानकालिकमात्रावद्वर्णाव्यवधायकत्वं लक्षयतीति व्यञ्जनद्वयव्यवधाने मात्राकालव्यवधानान्न प्रवृत्तिरिति, ततश्च न्यायोऽयं नापूर्वार्थज्ञापक इत्यलम् ॥ १३ ॥

## *ऋकारापदिष्टं ऌकारस्यापि* ॥ १४ ॥

**सि०**—ऋकारेण अपदिश्यते इति ऋकारापदिष्टं कर्मणि क्तः, तथा च ऋकारमुच्चार्य विधीयमानं कार्यं ऌकारस्यापि भवतीति शेषः । अयं च न्यायः "दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि ऌनृत्" [ ७. ४. ९९. ] इति सूत्रे ऌग्रहणेन ज्ञाप्यते । तथाहि-ऋकारवर्जस्य स्वस्थानेन प्लुतो विधीयमान ऌकारस्यापि स्वभावत एव सिद्ध इति ऌकारस्य पुनस्तत्र ग्रहणं तस्य ऋकारवर्जनेन वर्जितत्वं द्योतयति, तच्च तदैव संभवति यदाऽयं न्यायः स्वीकृतः स्यादित्येतन्न्यायं विना सार्थक्यमलभमानम् ऌकारग्रहणमेतन्न्यायज्ञापकम् । उक्तं चैतत् प्रकृतसूत्रे बृहद्वृत्तावपि । तथाहि-"ऌकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम् । अथ ऋतः प्रतिषेधे ऌकारस्य कः प्रसङ्गः ? उच्यते-इदमेव ज्ञापकमृवर्णग्रहणे ऌवर्णस्यापि ग्रहणं भवतीति, तेनाचीक्लृपदित्यादौ ऋवर्णकार्यम् ऌवर्णस्यापि सिद्धं भवति" इति । अयमाशयः-ऋकारवर्जनेन ऌकारवर्जनमेतन्न्यायेनैव लभ्यमिति स्वसार्थक्याय ऌकारग्रहणमेतन्न्यायं ज्ञापयत्येव, तथा चाचीक्लृपदित्यत्र पूर्वमनैमित्तिकत्वात् पूर्वम् "ऋर ऌलं कृपोऽकृपीटादिषु" [ २. ३. ९९. ] इति ऋत ऌत्वे पश्चाद् द्वित्वे पूर्वस्य "ऋतोऽत्" [ ४. १. ३८. ] इति ऋकारस्य विधीयमानमत्वं ऌकारस्यापि भवतीति प्रोक्तं रूपं सिद्ध्यति, अन्यथा न सिद्ध्येत् । अत्र यद्यपि वृत्तौ पठ्यमानन्यायस्वरूपादत्र पठ्यमानस्य न्यायस्य स्वरूपे भेदः, तथापि ऌवर्णस्य क्वाऽपि

कृपेरादेशादन्यत्र तथाविधप्रयोगाभावादत्र च कार्यमात्रमेव ऌकारस्य विधेयं न तु निमित्तत्वादिकमिति मत्वा ऌकारापदिष्टमिति विशेषरूपेण कथितम् । दृश्यते चैवमपि पूर्वैरस्य न्यायस्योल्लेखः, तथाहि-"ऋर ऌलं कृपोऽकृपीटादिषु" [ ३. ३. ९९. ] इति सूत्रन्यासे–"दूरादामन्त्र्यस्य०" [ ७. ४. ९९. ] इत्यत्र ऋद्वर्जितस्य स्वरस्य प्लुतत्वं वदन् स्वरद्वारेणैव सिद्धे पुनरपि यत ऌकारग्रहणं करोति, तदेव ज्ञापयति–ऋत्प्रतिषेधप्रसङ्गे ऌतोऽपि प्रतिषेध इति ऋकारापदिष्टं कार्यम् ऌकारस्यापीति" इति । तथा च तत्र न कोऽपि फले भेद इति ज्ञेयम् ॥ १४ ॥

### *ऋकारापदिष्टं कार्यं ऌकारस्यापि* ॥ १४ ॥

त०—अन्ये वैयाकरणा ऋकार-ऌकारयोः स्वसंज्ञामाहुः, तथा च तेषां मते ऋकारमुद्दिश्य विधीयमानं कार्यम् ऌकारस्य स्वभावत एव सिद्धम् । स्वमते चैतयोः स्थानभेदात् स्वसंज्ञकत्वं नास्ति । अत एव सर्वत्र ऌकारस्य कृते पृथगेवादेशादयो विहिताः, निमित्तत्वं च तस्य स्वातन्त्र्येणैवोच्यते । तथाहि–"अवर्णस्येवर्णादिनैदोदरल्" [ १. २. ६. ] इति सूत्रे ऌकारस्याल् विहितः । "ऌत्याल् वा" [ १. २. ११. ] इत्यत्र ऌकारस्य निमित्तत्वमादेशश्च पृथगेवोच्येते । ऌकारश्च दीर्घोऽपि स्वमतेऽस्त्येवेति कॄकार इत्यादौ ऌकारस्य ॡकार एव, न तु परमतवत् ॠकारः । एवं च स्वसंज्ञाफलत्वेन परैरभिमतानि कार्याणि स्वमते विशिष्यैव विहितानीति नास्ति स्वसंज्ञाफलम् । किन्तु 'अचीक्लृपत्' इत्यादौ ऋत ऌत्वस्यान्तरङ्गत्वात् पूर्वं प्रवर्तने तत्र "ऋतोऽत्" [ ४. १. ३८. ] इत्यस्य प्रवृत्त्यर्थमयं न्याय आश्रीयते । तत्रेदं विचार्यते–नह्येकमुदाहरणं योगारम्भं प्रयोजयतीति भाष्योक्तदिशैकस्य कृपेर्ऋकारस्य स्थाने विहितस्य ऌकारस्य "ऋतोऽत्" [ ४. १. ३८. ] इत्यत्र संग्रहाय एतावतः प्रयत्नस्यापेक्षया "ऋतोऽत्" [ ४. १. ३८. ] इति सूत्र एव "ऌतोऽत्" इति ऌकारर्कारयोरुभयोरुच्चारणं कार्यं "दूरादामन्त्र्यस्य०" [ ७. ४. ९९. ] इति सूत्रे च ऌकारग्रहणं न कार्यम् । किं वा पाणिनीयतन्त्रवत् "ऋ-र ऌ-लं कृपोऽकृपीटादिषु" [ २. ३. ९९. ] इति सूत्रमसत्काण्डे पठनीयम् । तथा च ऌकारादेशस्य परदृष्ट्याऽसत्त्वेन ऋकारबुद्ध्यैव कार्योत्पत्तौ न्यायस्य तज्ज्ञापकस्य च "दूरादामन्त्र्य०" इति सूत्रस्थस्य ऌकारग्रहणस्य नावश्यकत्वमिति । यद्यप्येवं सिध्यति तथापि साभिप्रायकाचार्यवचनविरुद्धं भवतीति यथान्यासमेव स्वीकृत्य वचनमिदमाश्रयणीयमेव । एवं च सति "ऋ-ऌति ह्रस्वो वा" [ १. २. २. ]इत्यत्रोभयोर्ग्रहणस्य वैयर्थ्यमायातीति न्यायस्यास्यानित्यत्वमप्येष्टव्यम् । तत्फलं च स्वमते ऌकारस्यापि दीर्घस्य सत्त्वात् 'गम्ॡ' इत्यस्यानुकरणरूपस्य गम्ॡशब्दस्यापि गम्ॡना-मित्यादौ ऋवर्णात् परत्वेन विहितत्वं णत्वं न भवतीति । एवं क्लृप्यमानं पश्येत्यत्र णत्वं न भवति । यद्यपि *वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते* इति मते प्रक्लृप्यमानं पश्यतीत्यत्र ऌकारव्यवधानेन णत्वाभाव इति तन्न्यायव्याख्यावसरे निरूपितं तथापि ऋकारापदिष्टविधित्वेन तस्य ऌकारे प्राप्तिः स्यादेवेत्यनित्यत्वादेव स वारणीय इत्यलम् ॥ १४ ॥

### *सकारापदिष्टं कार्यं तदादेशस्य शकारस्यापि* ॥ १५ ॥

सि०—सकारेणापदिश्यते इति सकारापदिष्टं, सकारमुच्चार्य विधीयमानं कार्यं, तदादेशस्य-तमुद्दिश्य विहितस्य, शकारस्यापि भवतीति शेषः । उभयोः स्थानभेदेन भिन्नत्वादेकस्य [ सस्य ] ग्रहणे परस्य [ शस्य ] ग्रहणाप्राप्तेस्तत्प्राप्तये न्यायोऽयमाश्रीयते । *साम्प्रतिकाभावे भूतपूर्वगतिः* *भूतपूर्वकस्तदुपचारः* इति वा न्यायस्यैवायं प्रपञ्चः, यतो यः किल पूर्वं सकारः स शकारतामापन्नोऽपि सकार एव गणनीय इति भूतपूर्वक एव तदुपचार इति समायाति । अत्र च ज्ञापकं "ङ्‌णः स्सः सोऽश्चः" [ १. ३. १८. ] इति सूत्रे 'अश्चः' इत्येवंरूपेण श्च्संयोगावयवस्य शकारस्य त्सादेशवर्जनमेव । तदुक्तं प्रकृतसूत्रे बृहद्वृत्तौ–'अश्चः' इति किम् ? षट् श्च्योतन्ति, भवान् श्चोतति । श्चुतेः सोपदेशत्वात् शकारस्य सकारापदिष्टं कार्यं विज्ञायते" इति । कथं कृत्वा ज्ञापकमिति चेत् ? उच्यते–भवान् श्च्योततीत्यत्र शस्य त्सादेशाभावार्थं श्च्वर्जनमिति कथितमेव, तत्र च सकाराभावादेव त्सादेशाप्राप्तेस्तद्वर्जनस्य वैयर्थ्यमेव, तथा च तद्वर्जनं व्यर्थं सत् सकारापदिष्टं कार्यं तदादेशभूतस्य शकारस्यापीति विज्ञापयति, तथा च भवान् श्च्योततीत्यत्रापि प्राप्नोतीति तद्वारणार्थं श्च्वर्जनं स्वांशे चरितार्थम् । फलं चास्य "षस्च गतौ" इत्यस्य धातोः षस्य "षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः" [ २. ३. ९८. ] इति सादेशे, तस्य "सस्य शषौ" [ १. ३. ६१. ] इति शकारे, यङ्लुपि, अनद्यतन्यां दिवि, "व्यञ्जनाद् देः०" [ ४. ३. ७८. ] इति तल्लुकि, एतन्न्यायबलात् "संयोगस्यादौ स्कोर्लुक्" [ २. १. ८८. ] इति सकारादेशस्य शस्यापि लुकि, चस्य कत्वे च 'असासक्' इति रूपस्य सिद्धिः । ननु प्रकृतज्ञापकेन सकारस्यापदिष्टं कार्यं शकारस्यापीति सामान्यत एव ज्ञाप्यताम्, तदादेशस्येति कुतो लभ्यत इति चेत् ? *भूतपूर्वकस्तदुपचारः* इति न्यायानुग्रहादिति गृहाण । अयमाशयः–सामान्यतः सकारापदिष्टं कार्यं शकारस्यापीति ज्ञापनेऽपूर्ववचनमेवेदमाश्रयणीयं भवति, तदादेशस्येति विशेषसन्निवेशे

च *भूतपूर्वकास्तदुपचारः* इति न्यायलभ्य एवार्थ इह 'अश्चः' इत्यस्य सार्थक्याय समाश्रित इति प्रतीयते, तथा च नापूर्ववचनज्ञापनमिति लाघवम् । फलं चास्य 'भवान् शेते' इत्यादौ स्वाभाविकस्य शकारस्य सकारापदिष्टकार्यस्त्सादेशाभावः, तथा च न तदंशे ज्ञापकान्तरान्वेषणं कार्यम् । प्राञ्चस्तु–'अश्चः' इत्यस्यैव तदंशज्ञापनसामर्थ्यमपि वर्णयन्ति, तथाहि–तेषां ग्रन्थः–'अश्चः' इत्यनेन तावत् श्चुत्यादीनां श्चो वर्ज्यते, न त्वन्यः कश्चिदसंभवात्, तस्मिंश्च श्चे शः सकारादेश एवास्ति, "सस्य शषौ" [ १. ३. ६१. ] इत्यनेन तस्य कृतत्वात्, ततश्च सकारादेशस्यैव श्चस्य शकारस्य सकारकार्यं ज्ञापयता श्चवर्जनेनाखण्डोऽप्ययं न्यायो ज्ञापित एव" इति । अत्रेदमभिदध्महे–वस्तुगत्या 'अश्चः' इत्यनेन श्च्योतत्यादिशकारवर्जनलाभेऽपि शब्दतस्तदलाभेन तस्योक्तार्थज्ञापकत्वायोगात्, 'अश्चः' इति शब्देनोपस्थापितस्यैवार्थस्य ज्ञापकत्वौचित्येनार्थिकार्थस्य ज्ञापनसामर्थ्याभावात्; तस्य शाब्दबोधाविषयत्वात्, शब्दोपस्थित एवाऽर्थः शाब्दबोधे भासते इति पदवाक्यविवेचकानां सिद्धान्ताच्च, तस्मादुक्त एव तदंशलाभोपाय इति प्रतिभाति । यद्यपि पूर्वोदाहृतबृहद्वृत्तिग्रन्थे 'शकारस्य सकारोपदिष्टं कार्यं विज्ञायते, इत्येवोक्तं, न तु 'तदादेशस्य' इति, तथापि 'भवान् शेते' इत्यादौ त्सादेशाभावाय तावानंशोऽपि न्याये समावेशनीय एव । न्यासग्रन्थे चायमर्थः पृथगेवोल्लिखितः, तथाहि–तत्र बृहद्वृत्तिस्थ–'षट् श्च्योतन्ति' इति प्रत्युदाहरणप्रतीकमादाय व्याख्याय च तत् "दन्त्यापदिष्टं कार्यं तालव्यस्यापि भवति, परं दन्त्यस्थाननिष्पन्नस्य, न तु सर्वस्य" इति पृथगेव तदंशपूरणं दृश्यते । सर्वथा च तस्यावश्यकत्वमेव, वृत्तौ च तदनुक्तिः स्वयमूहनीयत्वव्यञ्जनायेति स्वीकार्यम् । यदि च श्च्योतत्यादिस्थितस्य 'श्चः' एवेदमनुकरणम् 'अश्चः' इत्यत्रेति समाश्रीयते तदा प्राचीनोक्तं तस्यैव तदादेशस्येत्यंशस्यापि ज्ञापकत्वं सम्यगेवेति ॥ १५ ॥

## *सकारापदिष्टं कार्यं तदादेशस्य शकारस्यापि* ॥ १५ ॥

**त०**—अत्र प्रक्रियाभेदेनास्य न्यायस्य केचन वैयाकरणा अनावश्यकत्वमपि मन्यन्ते । तथाहि–सकारस्थानीयस्य शकारस्य कार्यं यद्यपि सर्वेषां सकारवदिष्टमेव, तथापि तैः सूत्राणां पाठ एव तथा विहितो येन सकारमुद्दिश्य विधीयमानकार्यापेक्षया तदादेशस्य शकारस्यासत्त्वं भवतीति सकारबुद्ध्यैव तत्र कार्यं भवति । स्वमतेऽपि यद्यपि "सस्य श-षौ" [ १. ३. ६१. ] इति सूत्रे "र्हादर्हस्वरस्यानु नवा" [ १. ३. ३१. ] इति सूत्राद् 'अनु' इति पदमनुवर्त्तमानमस्ति, तथा च तत्र प्राप्यमाणकार्येभ्यः पश्चादेव शकारादेशस्य प्रवृत्तिरिति 'आसासक् मूलवृट्, मधुक्' इत्यादौ शकारादेशात् पूर्वमेव परत्वात् सकारस्य "संयोगस्यादौ स्कोर्लुक्"[ २. १. ८८. ] इति लुकि रूपसिद्धौ तत्र तादृशेषु अन्येषु वा लक्ष्येषु प्रकृतन्यायस्योपयोगो नास्ति तथापि 'अश्चः' इति ज्ञापकनिर्देशेनानुमीयमानोऽयं प्रकृतलक्ष्येष्वपि यदि प्रवर्त्तेत तर्हि न कापि क्षतिरिति समादृतः । नन्वेवमस्य न्यायस्य फलान्तराभावेन तज्ज्ञापकम् 'अश्चः' इति पदमेव परित्यज्यतामिति चेत्? न–'आचार्याः कृत्वा न निवर्त्तन्ते' इति न्यायादत्र कृतस्य तस्य पदस्यादृष्टार्थत्वसंभावनया परित्यागानर्हत्वात् । ननु श्च्योतत्यादिषु यत्र सकारस्य शकारादेशो विधीयते तत्र सर्वत्र तालव्य एव पठ्यताम्, अलं तस्य शकारादेशविधानेन तस्य पुनरश्च इत्यनेन कार्यवर्जनेन चेति चेत्? अत्रोक्तं बृहद्वृत्त्यादिषु–"तेन मधु श्च्योततीति क्विप्, मधुश्चुतमाचष्टे इति णावन्त्यस्वरादिलोपे पुनः क्विपि णिलोपे सौ तल्लुकि च यलोपे "संयोगस्यादौ स्कोर्लुक्"[ २. १. ८८. ] इति शलोपे चस्य कत्वे–'मधुग्' इति सिद्धम्"इति । तथा चोपदेशे सकाराभावे शकारपाठे च 'मधुट्' इति प्रयोगापत्तिरिति तत्रोपदेशे सकारपाठ आवश्यकः । तथा च तत्स्थानीयस्य तस्य भूतपूर्वगत्या कदाचित् त्सादेशो मा भूदित्येतदर्थमश्च इति वर्जनमावश्यकमेव । भूतपूर्वगतिश्च न्यायान्तरसिद्धैव, अयं च न्यायस्तस्यैव प्रपञ्च इत्यावेदितमेव पूर्वम् । तथा चैतज्ज्ञापकाभावेऽपि सकारादेशस्य शकारस्य सकारापदिष्टकार्यशङ्काऽस्त्येवेति तन्निराकरणाय क्रियमाणम् 'अश्चः' इति वर्जनं विशिष्य प्रकृतन्यायस्वरूपं ज्ञापयतीति सर्वमुपपन्नम् । न्यासकारस्तु धात्वादिषु दन्त्यपाठस्यैव प्रकृतन्यायज्ञापकतामाह, तथाहि–तद्ग्रन्थः "ड्नः सः त्सोऽश्चः" [ १. ३. १८. ]इति सूत्रे–ननु तर्हि उपदेशावस्थायामेव तालव्यः पठनीयः, किं दन्त्यपाठेनेति? सत्यम्–दन्त्यं पठन्नेवं ज्ञापयति–*दन्त्यापदिष्टं कार्यं तालव्यस्यापि भवति* परं दन्त्यस्थाननिष्पन्नस्य, न सर्वस्य; तेन 'भवान् शेते' इत्यादौ त्सो न भवति"इति । अत्रेदं विचारमर्हति–पूर्वोदाहृतवृत्तिग्रन्थेन 'अश्चः' इति वर्जनस्य ज्ञापकता लभ्यते, प्रकृतन्यासग्रन्थेन च धातुषु दन्त्यपाठस्येति किमत्र ज्याय इति, तत्रेदमनुरूपं प्रतिभाति यद्–दन्त्यपाठस्य फलान्तराभावेन दन्त्यत्वनिमित्तककार्यसिद्धिरेव फलं, तच्च प्रकृतन्यायज्ञापनेनैव लभ्यमिति दन्त्यपाठस्य ज्ञापकत्वमपि साध्वेव । परं वृत्तिग्रन्थानुकूल्याय तत्र 'अश्च' इति निर्देशं कुर्वंश्च' इत्यधिकं योजनीयम् । तथा च धातुषु दन्त्यं पठंस्तस्य दन्त्यकार्यविशेषवर्जनं च कुर्वन्नाचार्यः प्रकृतन्यायं ज्ञापयतीति समुदायार्थः फलति । दन्त्यत्वनिमित्तं कार्यं च वृत्तौ 'मधुग्' इत्यस्य सिद्धिरूपं प्रदर्शितमेव । तच्चेत्थं न्यासकारेण समर्थितम्–ननु 'मधुग्' इत्यत्र "स्वरस्य परे०"[ ७. ४. ११०. ] इति सूत्रेण

गिलोपरूपस्य स्वरादेशस्य स्थानिवत्त्वात् शलोपो न प्राप्नोति ? न च वाच्यं-न "सन्धि०"[ ७. ४. १११. ]इत्युपतिष्ठते इति, 'अस्क्लुकि' इति वचनाद् यथा सुपूर्वात् कुसयतेः सुकुरित्यत्र, [ इति चेत् ? ] न-'अस्क्लुकि' इत्यत्र नञ्निर्दिष्टत्वेन *नञा निर्दिष्टमनित्यम्* इति न्यायात् स्थानिवत्त्वाभाव इति" इति । अयं च न्यायो व्याकरणशास्त्रकार्यार्थमेव । आलङ्कारिकास्तु-श्लेषालङ्कारे स-शयोरैक्यं सामान्येनैव मन्यन्ते, न तत्र 'तदादेशस्य' इत्यंशो योज्यते । तथाहि—

"आदौ धनभवे येन, घृतमेधायितं तथा ।
जहे यथोर्वीशस्यश्रीः श्रीनाभेयः स वः श्रिये ॥

इत्यादौ उर्वीशस्य-राज्ञः, श्रीः, उर्वी-महती, सस्यश्रीः-धान्यसम्पत्तिरित्यर्थद्वयलाभाय श्लेष आदृतः, स च सशयोरैक्य एव संगच्छेतेत्यलम् ॥ १५ ॥

## *ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य* ॥ १६ ॥

**सि०—ह्रस्वश्च दीर्घश्च ह्रस्व-दीर्घौ, ताभ्यामपदिश्यत इति ह्रस्वदीर्घापदिष्टं, कार्यं, प्लुतस्य-ह्रस्वस्थानिकस्य प्लुतस्य ह्रस्वापदिष्टं, दीर्घस्थानिकस्य प्लुतस्य दीर्घापदिष्टं च कार्यं, न स्यादिति न्यायार्थः । यद्यपि मात्रा-कालभेदेन पृथक् २ संज्ञा "एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः" [ १. १. ५. ] इति सूत्रेण विहिता, इति ह्रस्वशब्दमुच्चार्य दीर्घशब्दमुच्चार्य च विधीयमानं कार्यं स्वत एव प्लुते न प्राप्नोति, तथापि भूतपूर्वावगतिमाश्रित्य प्राप्तिरिति तद्वारणार्थोऽयं न्यायः । "अत्र च ज्ञापकम्-ह्रस्वांशे-"ह्रस्वान्ङणन०" [ १. ३. २७ ] इति सूत्रे ह्रस्वादिति सामान्योक्तिरेव । तथाहि-अप्लुतरूपाद्ध्रस्वात् तावत् ङणनां द्वित्वमिष्टम्, प्लुतरूपात् तु नेष्टम्, तथापि सूत्रे ह्रस्वादिति सामान्येन यदूचे तदेतन्न्यायाशयैव।" इति प्राञ्चः, तन्न चारु-सामान्येनोक्ते विशेषस्य प्लुतरूपस्य ग्रहणं नेष्टमित्यस्य लक्षणैकचक्षुष्कैर्दुर्ज्ञेयत्वात्, स्वयं चाचार्येण तादृशार्थाकथनात् । तथा च ज्ञापकान्तरमन्वेषणीयम्, दीर्घांशज्ञापकेनैव वैकदेशानुमत्या वा संपूर्णन्यायज्ञापनमास्थेयम् । दीर्घांशे ज्ञापकं च "अनाङ्माङो दीर्घाद्वा छः" [ १. ३. २८. ] इत्यनेनैव प्लुतादपि सिद्धेऽपि दीर्घस्थाननिष्पन्नात् प्लुतात् परस्य छस्य द्वित्वविकल्पार्थं "प्लुताद्वा" [ १. ३. २९. ] इति सूत्रकरणम् । तथाहि-आगच्छ भो इन्द्रभूते३ च्छत्रमानय, आगच्छ भो इन्द्रभूते३ छत्रमानयेत्यत्र छस्य द्वित्वविकल्पो भूतपूर्वावगत्या पूर्वसूत्रेणैव यदि सिद्धः स्यात् तर्हि पुनरिदं सूत्रं व्यर्थं स्यात्; व्यर्थीभूतं च तदिमं न्यायं ज्ञापयति, तथा च दीर्घस्थानिकस्य प्लुतस्य दीर्घापदिष्टकार्याभावबोधनात् पूर्वसूत्रेण प्लुतात् परस्य छस्य द्वित्वं न सिद्धमिति तदर्थं सूत्रमिदमात्मांशे चरितार्थम् । फलं च ह्रस्वांशस्य हे राज३न्निहेति, अत्र परत्वान्नित्यत्वाच्च "दूरादामन्त्र्यस्य०" [ ७. ४. ९९. ] इत्यनेन प्लुते कृते तस्मात् परस्य नस्य "ह्रस्वान्ङणन०" [ १. ३. २७. ] इति न द्वित्वम् । दीर्घांशे च हे गो३-त्रात ! हे गो३त्रात ! इत्यत्र "अदीर्घाद् विराम०" [ १. ३. ३२. ] इति सूत्रेण दीर्घस्थाननिष्पन्नप्लुतात् परस्य तकारस्य प्रकृतन्यायबलेन दीर्घापदिष्टकार्याभावाद् द्वित्ववर्जनाभावेन विकल्पेन द्वित्वसिद्धिरिति । अयं च न व्यभिचारी । न चास्याप्यनित्यत्वमेषणीयमेव, अन्यथा हे बटो३ एहीत्यादौ 'बटु+स्' इति स्थितौ परत्वात् पूर्वमुकारस्य प्लुतत्वे विहिते पश्चादस्य न्यायस्य नित्यत्वात् "ह्रस्वस्य गुणः" [ १. ४. ४१. ] इति गुणो न भविष्यतीति वाच्यम्, आमन्त्र्यमात्रापेक्षत्वेन गुणस्यान्तरङ्गत्वात् प्लुतस्य तु दूरादामन्त्र्यापेक्षत्वेन बहिरङ्गत्वात् *परादन्तरङ्गं* [ बलवत् ] इति न्यायात् पूर्वं गुणस्यैव प्रवृत्तौ प्रकृतन्यायविषयाभावात्, ततश्च न तदर्थमनित्यत्वमाश्रयणीयमिति ॥ १६ ॥**

## *ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य* ॥ १६ ॥

त०—वस्तुतस्तु न्यायोऽयं नाश्रयणीयः फलाभावाज्ज्ञापकाभावाच्च । फलं तावदिह 'हे राज३न्निह' इत्यत्र "ह्रस्वान्ङणनः०" [ १. ३. २७. ] इति नकारस्य द्वित्वनिषेधाभावः, आगच्छ हे इन्द्रभूते३ च्छत्रमानयेत्यत्र छस्य द्वित्वविकल्पार्थं कृतस्य "प्लुताद्वा" [ १. ३. २९. ] इति सूत्रस्य सार्थक्यं गो३त्रातेत्यत्र तकारस्य द्वित्वविकल्प इति चोक्तम् । एतानि च फलानि न्यायं विनाऽपि सिद्धान्येव, यतो हे राज३न्निहेत्यत्र पदान्तरसम्बन्धिस्वरापेक्षद्वित्वापेक्षयाऽन्तरङ्गत्वात् परत्वाच्च प्रथमं प्लुते कृते पश्चाद्ध्रस्वाभावाद् द्वित्वाप्राप्तेः । न च भूतपूर्वावगत्या ह्रस्वत्वमाश्रित्य नकारस्य द्वित्वप्राप्तिरिति वाच्यम्, साम्प्रतिकाभावे हि *भूतपूर्वकस्तदुपचारः* इत्याश्रीयते, तथा च यत्र साम्प्रतिकतद्धर्मलाभाभावेन शास्त्रप्रवृत्तिविरहादिष्टलक्ष्यासिद्धिरित्यालोक्यते तत्रैव तन्न्यायेन कार्यजननं, न तु दोषापादनाय तन्न्यायाश्रयणम्, अन्यथा 'देवानिह' इत्यादौ ह्रस्वस्य दीर्घे विहितेऽपि भूतपूर्वकमुपचारमाश्रित्य ह्रस्वात् परत्वमादाय नकारस्य द्वित्वं स्यादित्यादि बह्वनिष्टं प्रसज्येत । अत एव च-"ह्रस्वान्ङ-ण-नः०" [ १. ३. २७. ] इति सूत्रे शब्दमहार्णवन्यासे 'राज३निह' इति ह्रस्वग्रहणव्यावर्त्यत्वेन प्रदर्शितप्रयोगव्याख्यावसरे-"राजन्"शब्दादामन्त्र्यसेर्लुकि "नामन्त्र्ये" [२. १. ९२. ] इति नलोपप्रतिषेधात्, अन्तरङ्गत्वात् परत्वाच्च प्लुते कृते ह्रस्वाभावाद् द्वित्वं न भवति" इत्येवोक्तं, न तु न्यायः समाश्रितः । तथा च दीर्घ-प्लुतयोर्भेदं वास्तविकं प्रदर्शनायाचार्येण

"प्लुताद्वा" [ १. ३. २९. ] इति सूत्रव्याख्यायां शब्दमहार्णवन्यासे 'दीर्घात्' इत्यनुवृत्तस्य पदस्य कथं प्लुतादित्यनेनान्वय इति प्रदर्शनावसरे प्रतिपादितम्–"दीर्घादित्यनुवृत्तावपि द्विमात्रत्रिमात्रयोर्विरोधात् सामानाधिकरण्यासम्भवेऽपि 'मञ्चाः क्रोशन्ती'–त्यादिवत् स्थानोपचारात् तद्व्यपदेशाद् विशेषण-विशेष्यभावः, तथा चाभिधीयते–'सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधना-ऽधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटका-ऽन्न-पुरुषेष्वतद्भावेऽपि तद्वदुपचारः" [ न्या० सू० ] । दीर्घोऽस्यास्ति स्थानित्वेनेत्यभ्रादित्वादति वा दीर्घशब्देन प्लुतोऽभिधीयते" इति । तथा च दीर्घ-प्लुतयोर्भेदो दृढ इति दीर्घकार्यं प्लुते न सम्भवतीति तदाशयः स्पष्टमायाति । तथा च दीर्घ-प्लुतयोः स्वाभाविकभेदसत्त्वाद् दीर्घोपदिष्टकार्यस्य प्लुतेऽभावात् प्लुतात् परस्य छस्य द्वित्वं पूर्वसूत्रेण न प्राप्नोतीति तदर्थं "प्लुताद् वा" [ १. ३. २९. ] इत्यस्यावश्यकत्वमेवेति न तत्सार्थक्याय न्यायावश्यकता । यत् तु–"ननु किमर्थमिदम्? यतो दीर्घत्वमाश्रित्य "अनाङ्माङो०" [ १. ३. २८. ] इत्यनेनैव द्वित्वं वा भविष्यति, सत्यम्–इदमेव ज्ञापकं–*दीर्घापदिष्टं कार्यं न प्लुतस्य* इति, ह्रस्वकार्यं च न, यथा–आगच्छ भो देवदत्त३ इति प्लुतात् प्रथमं सेर्लुक् "अदेतः" [ १. ४. ४४. ] इत्यनेन, अन्यथा प्रथमं न कुर्यात् यदि पश्चादपि स्यात्" इत्युक्तं लघुन्यासे "प्लुताद् वा" [ १. ३. २९. ] इति सूत्रे, तदपि न विचारचारु इति प्रतिभाति, यतो 'दीर्घत्वमाश्रित्य' इत्यत्र हेतुरनुक्तः, यदि च *भूतपूर्वकस्तदुपचारः* इति न्यायबलमेव हेतुरिति कथ्यते तर्हि तत्पूर्वं प्रतिषिद्धमेव, अन्यथा स्थानिवद्भावादीनामपि नावश्यकता स्यात्, बहुदोषापाताच्च । आचार्यैरेतत्सूत्रव्याख्यायामेव दीर्घ-प्लुतयोर्भेदप्रदर्शनेन तन्न्यायस्येहानाश्रयणस्य स्पष्टं सङ्केतितत्वाच्च । आगच्छ भो देवदत्त३ इत्यादौ प्रथमं सेर्लुक्करणेन नायं न्यायः सूच्यते, अपि तु ह्रस्व-प्लुतयोः स्वाभाविको भेद एवेति कुतो न साध्यते, एवं च "प्लुताद् वा" [ १. ३. २९. ] इति सूत्रस्य सार्थक्ये स्वतः सिद्धे दीर्घांशेऽपि ज्ञापकमत्र नास्ति, ह्रस्वांशे ज्ञापकाभावश्च वृत्तौ प्रतिपादित एव । एवं हे गो३ऽत्रातेत्यादौ तकारस्य द्वित्वविकल्पोऽपि दीर्घ-प्लुतयोर्भेदं स्वाभाविकमाश्रित्यैवेति न तदपि न्यायप्रयोजनमिति फल-ज्ञापकयोरभावान्नायं न्यायोऽपूर्ववचनत्वेन स्वीकार्योऽपि तु स्वतः सिद्धमेवार्थमनुवदतीति न्यायसङ्ग्रहे संग्रहीतुमनर्हं इति प्रतिभाति १६

## *संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं, न तदन्तस्य* ॥ १७ ॥

सि०—"प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति परिभाषाबलात् प्रत्ययग्रहणे तदन्तविधिर्भवति, स चाविशेषात् संज्ञाविधावुत्तरपदाधिकारस्थे विधावन्यत्र च सममेव प्राप्तः, तत्र संज्ञाविधावपि तदन्तग्रहणे "स्यादिर्विभक्तिः" [ १. १. १९. ] इत्यादावपि तदन्तविधिसत्त्वात् स्याद्यन्तस्यैव विभक्तिसंज्ञा स्यादिति प्रकृतेर्विभक्तौ विधीयमानं कार्यं न स्यादपि तु विभक्त्यन्ते परे विभक्तिनिमित्तकं कार्यं स्यात्, यथा–काष्ठगृहं युष्मत्पुत्राणामित्यादौ गृहमिति स्याद्यन्तस्य विभक्तित्वे तन्निमित्तं काष्ठशब्दस्य पदत्वम्, तदनु ततः परस्य 'युष्मद्'शब्दस्य पुत्राणामिति स्यादिविभक्तिसहितस्य वसादेशः स्यादित्येवमादयो दोषाः प्रसज्येरन्निति तद्वारणायायं न्यायः समाश्रीयते । तत्र चांशद्वयं संज्ञाधिकारे [ संज्ञाविधायके शास्त्रे ] प्रत्ययग्रहणे, प्रत्ययमात्रस्यैव ग्रहणं, न तदन्तस्येत्येकः, अपरश्चोत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तस्येत्येवंरूपः । तत्र प्रथमस्य संज्ञाविधायकशास्त्रघटकप्रत्ययबोधकं पदं तदन्तबोधकं नेत्येव साधारणतयाऽर्थो लभ्यते, तथा च "स्यादिर्विभक्तिः" [ १. १. १९. ] इति सूत्रे प्रत्ययबोधकं स्यादिपदं न तदन्तबोधकमिति न स्याद्यन्तस्य त्याद्यन्तस्य च विभक्तिसंज्ञा । अत्रांशे ज्ञापकं च "तदन्तं पदम्" [ १. १. २०. ] इति सूत्रेऽन्तग्रहणम् । तथाहि–प्रकृतसूत्रे बृहन्न्यासग्रन्थः–"ननु अन्तग्रहणं किमर्थम्? न चासत्यन्तग्रहणे स्यादेरेव पदसंज्ञा स्यात्, ततश्च 'अग्निषु' इत्यादौ पदमध्ये विधीयमानं षत्वं पदादौ न स्यादिति वाच्यम्, "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति परिभाषया तदन्तविधेर्लब्धत्वादिति; उच्यते–पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधार्थम्, तेन पूर्वसूत्रे तदन्तस्य विभक्तिसंज्ञा न भवति, अन्यथा 'शेषाय युष्मद्वृद्धिहिताय नमः' इत्यत्रैव 'ते-मे' आदिप्रसङ्ग इति" । अयमाशयः–"तदन्तं पदम्" [ १. १. २०. ] इत्यत्र तत्पदेन "स्यादिर्विभक्तिः" [ १. १. १९. ] इति पूर्वसूत्रप्रक्रान्ता विभक्तिः परामृश्यते, अन्तग्रहणाभावे च 'सा पदम्' इति निर्देशः स्यात्, किञ्च तथा सति पृथक् सूत्रकरणमप्यनावश्यकं स्यात् "स्यादिर्विभक्तिः पदं च" इति न्यासेनैवोभयसंज्ञाविधानसंभवात्, तथा सति [ केवलं विभक्तेः पदसंज्ञायाम् ] 'अग्निषु' इत्यादौ 'सु' इत्येतस्यैव पदत्वे सकारस्य पदमध्यस्थत्वाभावेन षत्वानापत्तिरिति दोषः स्यात्, अतश्च पृथक् सूत्रं विधाय तत्र "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति परिभाषासूत्रसाहाय्येन स्याद्यन्तस्य त्याद्यन्तस्य च पदत्वे 'अग्निषु' इत्यादौ दोषाभावेन 'अन्त'ग्रहणं व्यर्थमेवेति तद् व्यर्थीभूतं 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तं न गृह्यते' इति ज्ञापयति । तथा च पदसंज्ञायामपि तदन्ताग्रहणे 'अग्निषु'

इत्यादौ दोषापत्तिरिति तदर्थमन्तग्रहणं स्वांशे चरितार्थम्। फलं चान्यत्रापि संज्ञाविधाने तदन्ताग्रहणे न स्याद्यन्तस्य त्याद्यन्तस्य च विभक्तिसंज्ञेति 'शेषाय युष्मद्वृद्धिहिताय नमः' इत्यत्र शेषायेति पदात् परस्य युष्मदो वृद्धिहितायेति चतुर्थ्यन्तेन सह 'ते'आदेशो नेति। उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तस्येत्यंशे तु "न वा खित्कृदन्ते रात्रेः" [ ३. २. ११७. ] इति सूत्रस्थमन्तग्रहणं ज्ञापकम्, तदुक्तं तस्मिन्नेव सूत्रे बृहद्वृत्तौ–"इदमेवान्तग्रहणं ज्ञापकम्–इहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं न तदन्तस्य" इति, अयमाशयः–कृतः प्रत्ययत्वेन "न वा खित्कृति रात्रेः" इत्युक्तेऽपि "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति परिभाषया 'कृदन्ते' इत्यर्थलाभसम्भवेऽन्तग्रहणं व्यर्थमेव, व्यर्थीभूतं च तत् उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणाभावं ज्ञापयति, तथा च तदन्तार्थलाभार्थमन्तग्रहणं सार्थकम्। फलं चास्य "कालात् तरतनतम०" [ ३. २. ५४ ] इत्यादौ प्रत्ययमात्रस्यैव ग्रहणं न तु तदन्तस्येति। तेन पूर्वाह्णे भवः–पूर्वाह्णेतनः पूर्वाह्णतन इत्यत्रेव परमे पूर्वाह्णेतने इति विग्रहे समासे तदन्ते परे [ तनान्ते परे ] सप्तम्या अलुक् न भवति; उत्तरपदाधिकारश्च "न नाम्येकस्वरात् खित्युत्तरपदेऽमः" [ ३. २. ९. ] इति सूत्रादनुवर्त्तमानः। वस्तुतस्तु प्रकृतन्याये प्रत्ययग्रहणपदं प्रत्ययवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकपदपरं, तथा च 'कृत्'पदादौ प्रत्ययवृत्तिश्रावणप्रत्यक्षविषयताया अभावेन तदवच्छेदकधर्मावच्छिन्नविषयताप्रयोजकपदस्य कृतीत्यादेः प्रत्ययग्रहणत्वाभावेन न तत्रानेन न्यायेन तदन्तविधिनिषेधः सम्भवतीति "न वा खित्कृदन्ते रात्रेः" [ ३. २. ११७. ] इति सूत्रे 'कृति' इत्युक्तेऽपि कृदन्तार्थलाभ इति तत्रान्तग्रहणं व्यर्थमेव। न चैवं "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इत्यत्रापि प्रत्ययपदस्य प्रत्ययवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नपरत्वेऽत्र तदन्तविधिः कथं स्यादिति वाच्यम्, तत्र स्वरूपत एव प्रत्ययस्य ग्रहणात् केवलस्य कृतः प्रयोगाभावेन कृद्रूपोत्तरपदस्याभावाच्चेति प्रकृतन्यायज्ञापकत्वमन्तग्रहणस्य न युक्तम्, किन्तु "हृदयस्य हृल्लासलेखाण्ये" [ ३. २. ९४. ] इति सूत्रस्थं लेखग्रहणमेव ज्ञापकमत्रेति बोध्यम्, तथाहि–तत्र सूत्रे बृहद्वृत्तौ–"अण्सन्निधानाल्लेखशब्दोऽणन्तो गृह्यते, तेन ण्वजन्ते न भवति, हृदयस्य लेखः–हृदयलेखः" इत्युक्त्वा "अणीत्येव सिद्धे लेखग्रहणं ज्ञापकम्-उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न भवति" इति स्पष्टमेव 'ज्ञापकान्तरमुक्तम्। सति चैतस्मिन् ज्ञापके "न वा खित्कृदन्ते रात्रेः" [ ३. २. ११७. ] इति सूत्रेऽन्तग्रहणं सार्थकमेव, कृदन्तार्थलाभस्याऽसंभवात्। यदि चात्र न्यायेऽपि "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इत्यादाविव प्रत्ययत्वेन बोधकमात्रपरं प्रत्ययपदं, न तु प्रत्ययवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नपरमित्याश्रीयते, तदा तदन्तविधेः सिद्धत्वादन्तग्रहणं [ "नवा खित्कृदन्ते रात्रेः" इत्यत्र ] व्यर्थमेव, व्यर्थं च सत् तदेव ज्ञापकं कुतो नाश्रीयते? इत्युच्यते, अत एव चाचार्यैरपि तत्सूत्रे 'इदमेवान्तग्रहणं ज्ञापकम्' इत्येवंरूपेणैवकारोऽवधारणार्थः प्रयुक्त इति चेत्? तर्हि लेखग्रहणस्यैतद्द्वारैव सार्थक्यमस्तु, कृतं तस्यापि ज्ञापकत्ववर्णनेनेति विभावनीयं सुधीभिरिति। नन्वेवं ज्ञापितेऽस्मिन् न्याये "खित्यन-व्ययारुषो मोऽन्तो ह्रस्वश्च" [ ३. २. १११. ] इति सूत्रे तदन्तविध्यभावापत्तौ 'ज्ञंमन्यः' इत्यादौ तदप्रवृत्तिः स्यादिति वाच्यम्, केवलस्य खितः प्रयोगासम्भवेन तत्र सूत्रसार्थक्याय प्रकृतन्यायाप्रवृत्तिस्वीकारात्, तदुक्तं "हृदयस्य हृल्लास०" [ ३. २. २४. ] इति सूत्रे बृहद्वृत्तावेव–"खित्यनव्यय०" [ ३. २. १११. ] इत्यादौ त्वसंभवात् तदन्तग्रहणमिति। आदिपदेन "तत्पुरुषे कृति" [ ३. २. २०. ] "नेन्-सिद्धस्थे" [ ३. २. २९. ] इत्यादीनां संग्रहः। तथा च "तत्पुरुषे कृति" [ ३. २. २०. ] इत्यत्रापि केवलस्य कृतः प्रायः प्रयोगाभावात् 'कृदन्ते' इत्यर्थलाभः, तेन 'स्तम्बेरमः' इत्यादिसिद्धिः। परत्र [ "नेन्-सिद्धस्थे" ३. २. २९. ] इत्यत्र 'इन्प्रत्ययान्ते' इत्यर्थलाभश्च, केवलस्येन उत्तरपदत्वासम्भवेनैव; तथा च 'स्थण्डिलवर्त्ती' इत्यादौ "तत्पुरुषे कृति" [ ३. २. २०. ] इति प्राप्तायाः सप्तम्या अलुपोऽनेन निषेधः। एवं च प्रकृतन्यायानित्यत्वस्थलानीमानीति फलति। अनित्यत्वं हि क्वचिदप्रवृत्तिरूपमेव, तच्च ज्ञापकवशाद् भवत्वसंभवाद् भवतु कारणान्तराद् वा तत्राग्रहाभावात्। वस्तुतस्तु–असंभवोऽपि न्यायानित्यत्वज्ञापकत्वेन स्वीकर्तुं शक्यत एवेति न कोऽपि विभेदः॥ १७॥

***संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं, न तदन्तस्य॥ १७॥**

**त०**—अत्र न्यायेंऽशद्वयं-संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणनिषेधकः, उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणनिषेधकश्च, तत्र प्रथमांशस्य संज्ञाविधायकशास्त्रघटकं प्रत्ययबोधकं पदं तदन्तबोधकं नेत्यर्थकत्वमित्येव शब्दमर्यादया लभ्यते, तच्च वृत्तौ प्रदर्शितमेव, परन्त्वस्मिन्नर्थे नामसंज्ञाविधायकशास्त्रघटकं प्रत्ययबोधकं विभक्तिपदं तदन्तबोधकं न स्यात्, तथा च "अधातु-विभक्ति-वाक्यमर्थवन्नाम" [ १. १. २७. ] इति सूत्रस्यार्थे विभक्त्यन्तवर्जमित्यर्थो न लभ्येत, किन्तु विभक्तिवर्जमित्येव, ततश्च विभक्त्यन्तस्य नामसंज्ञायां तदवयवस्य स्यादेर्लुगापत्तिः,

तद्वारणाय यदि संज्ञानिष्ठविधेयतया साक्षान्निरूपिता योद्देश्यता, तत्प्रयोजकं प्रत्ययबोधकं पदं तदन्तबोधकं नेत्यर्थः, तथा च नामसंज्ञाया उद्देश्यता न साक्षात्प्रत्ययत्वेनावच्छिन्ना किन्तु अर्थवत्त्वावच्छिन्नेति प्रत्ययबोधकविभक्तिपदस्य संज्ञानिष्ठविधेयतया साक्षान्निरूपितोद्देश्यताप्रयोजकत्वाभावान्न दोष इत्युच्यते, तदा "आ तुमोऽत्यादिः कृत्"[ ५. १. १. ]इति सूत्रेऽत्यादिपदस्यापि कृत्संज्ञानिष्ठविधेयतया साक्षादवच्छिन्नोद्देश्यताप्रयोजकत्वाभावात् तत्र त्यादिपदे तदन्तार्थनिषेधानापत्त्या तदन्तबोधापत्तौ तस्य च धातुविहितत्वाभावेन तत्पदस्य वैयर्थ्यापत्तेरिति चेत्? अत्रोच्यते– संज्ञानिष्ठविधेयतया साक्षान्निरूपिता प्रत्ययत्वव्याप्यधर्मेण साक्षादवच्छिन्ना योद्देश्यता, तत्प्रयोजकशास्त्रघटकं प्रत्ययबोधकं पदं तदन्तबोधकं नेत्यर्थः । नामसंज्ञाविधायकसूत्रे विधेयतया साक्षान्निरूपिताया उद्देश्यतायाः प्रत्ययत्वेन साक्षादवच्छिन्नत्वाभावान्न दोषः, कृत्संज्ञाविधायकसूत्रे च कृत्संज्ञानिष्ठविधेयतया साक्षान्निरूपिताया उद्देश्यतायाः प्रत्ययत्वेन साक्षादवच्छिन्नतया [ धातोर्विधीयमानस्त्यादिवर्जः प्रत्ययः कृत्संज्ञ इत्यर्थे ]तत्प्रयोजकशास्त्रघटकत्वात् 'अत्यादि'पदघटितत्यादिपदे न तदन्तविधिरिति । एतन्न्यायज्ञापनानन्तरमित्थं बृहन्न्यासेऽत्र विचारितम्– यद्येवं कृत्तद्धितयोः केवलयोरेव नामसंज्ञा स्यान्न तदन्तयोः, ततश्च 'छिद्, भिद्' इत्यत्र क्विबन्तस्य न स्यात् । अर्थवत्त्वाद् भविष्यतीति न वाच्यम्, अधाविति निषेधात् । नापि प्रत्ययलक्षणेन प्राप्नोति, यतः प्रत्ययनिमित्तं यत् कार्यमन्यस्य विधीयते तत् प्रत्ययलोपे भवति, न तु प्रत्ययस्यैव यत् कार्यं तदपि, नह्यसत् कार्यित्वेन वचनशतेनापि शक्यमाश्रयितुम् । केवलस्य च तस्य नामसंज्ञायाम् 'औपगव' इत्यत्र षष्ठ्या ऐकार्थ्याभावाल्लुप् न स्यात्, तदन्तविधौ तु दोषानवकाशः; उच्यते– प्रत्ययस्य संज्ञिनस्तदन्तस्य संज्ञा न भवति, न तु प्रत्ययस्य या संज्ञा विधीयते तस्यास्तदन्ताया अन्या संज्ञा न भवतीति, यतोऽर्थवतो नामसंज्ञा, कृत्तद्धितान्तं चैवार्थवत्, न केवलाः कृतस्तद्धिता वा । ननु यद्यर्थवत्ता लौकिक्याश्रीयते, सा पदस्यैव, न कृत्तद्धितान्तस्यापि, तस्यैव लोके प्रयोगात्, अन्वय-व्यतिरेकगम्या त्वर्थवत्ता केवलानामपि कृत्तद्धितानामस्ति, ततः किमुच्यते न केवलाः कृतस्तद्धिता वेति; एवं तर्हि अर्थवद्ग्रहणसामर्थ्याल्लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते स इहाश्रीयते इत्यदोष इति । अस्यायमाशयः-यद्यपि स्वमते कृदन्ततद्धितान्तानां न विशिष्य नामसंज्ञाविधानसूत्रं, किन्तु "अधातु-विभक्ति-वाक्यमर्थवन्नाम"[ १. १. २७ ]इति सूत्रे विभक्तिवर्जनाच्छेषप्रत्ययान्तानां नामसंज्ञासिद्धिरुक्ता । तथाहि-तत्सूत्रे बृहद्वृत्तौ–विभक्त्यन्तवर्जनाचाऽऽबादिप्रत्ययान्तानां नामसंज्ञा भवत्येवेत्युक्त्वा क्रमशस्तद्धितान्ताः कृदन्ताश्च शब्दाः समुदाहृताः । बृहन्न्यासेऽपि विभक्त्यन्तेत्यादिग्रन्थावतारायेत्थमुक्तम्–"येषां प्रत्ययवर्जनं सामान्येन तैराबादिप्रत्ययस्य नामत्वाभावात् स्याद्युत्पत्तौ यत्नान्तरं विधेयम्, इह तु विभक्तिवर्जनाच्छेषप्रत्ययान्तस्य नामत्वं भवत्येव, विशेषनिषेधस्य शेषाभ्यनुज्ञाहेतुत्वादित्याह–विभक्त्यन्तेत्यादि"इति । इत्थं च विभक्त्यन्तवर्जनाच्छेषप्रत्ययान्तानां साधारण्येनार्थवत्त्वमादायैव नामसंज्ञा, न तु कृदन्तत्वेन तद्धितान्तत्वेन वा, तेन रूपेणोद्देश्यताया उपस्थापकपदाभावात्; विभक्त्यन्तवर्जनस्य च पर्युदासरूपत्वेन सादृश्यग्राहकत्वाद् विभक्तिभिन्नतत्सदृशप्रत्ययान्तस्यार्थवतो नामसंज्ञाविधानार्थत्वं न तु विभक्त्यन्तस्य नामसंज्ञाप्रतिषेधार्थत्वं विधि-निषेधसंभवे विधेरेव बलीयस्त्वात्; तथा च निषेधरूपस्य 'अधातु'इति धातुवर्जनस्य तदंशे[ प्रत्ययान्तांशे]ऽप्रवृत्त्या -तत्र [कृदन्ते क्विबन्तादौ ] नामसंज्ञेति तत्सूत्रव्याख्यायामग्रे प्रतिपादितम्, तथाहि–[ धातुवर्जने स्वीकृते ] "एवं तर्हि 'छिद्, भिद्' इत्यादीनां कथं नामसंज्ञा, यतो *न क्विबन्ता धातुत्वं जहति* इति 'अधातु' इति प्रतिषेधेन भवितव्यम्, नैवम्–'अविभक्ति' इति पर्युदासात् तत्सदृशप्रत्ययग्रहणात् पर्युदासे च विधिप्रतिषेधयोर्विधिरेव बलीयस्त्वात् 'अधातु' इति प्रतिषेधाप्रवृत्तौ नामत्वसिद्धिः"इति । तथा च न स्वमते कृदन्ते तद्धितान्ते वा कृदन्तत्वेन तद्धितान्तत्वेन वा नामसंज्ञा, किन्तु विभक्तिभिन्नप्रत्ययान्तत्वेन, सा च कृदन्तेषु तद्धितान्तेषु यथा तथैवाऽऽबाद्यन्तेष्वपीति न कोऽप्यत्र विशेषः, तथाप्यन्यत्रार्थवत्त्वेनापि सा संज्ञा संभविनी, इह च 'अधातु'इति निषेधस्य पर्युदासप्राप्तविधिवशादेवाप्रवृत्तिदर्शनरूपविशेषात् तस्यैव प्रत्ययान्तत्वार्थाभावप्रयुक्तदोषस्थलत्वेन ग्रहणमिति सन्तोष्टव्यम् । प्रकृतमनुसरामः–संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावे प्रकृतन्यायेन सिद्धे प्रत्ययस्यैव संज्ञा स्यान्न प्रत्ययान्तस्य, तथा च 'छिद्, भिद्' इत्यादौ प्रत्ययत्वाभावेन, 'अधातु' इति पर्युदासप्रभावादर्थवत्त्वमादायापि नामसंज्ञाप्रवृत्त्यभावेन नामसंज्ञा न स्यात् । नापि *प्रत्ययलोपे प्रत्ययलक्षणम्* इति न्यायेन साधयितुं शक्या, प्रत्ययनिमित्तस्यैव कार्यस्य प्रत्ययलक्षणेन लाभात्, प्रत्ययस्थानिककार्यं तु न लब्धुं शक्यते, असतः कार्यत्वस्य वचनेन साधयितुमशक्यत्वात् । यत्र च तद्धितस्थले प्रत्ययस्य विद्यमानत्वं तत्रापि 'औपगवः' इत्यादिषु लक्ष्येषु केवलस्य प्रत्ययस्य नामसंज्ञायामप्यैकार्थ्याभावादुपगुशब्दादुत्पन्नायाः षष्ठ्या लुप् न स्यात् । तदन्तविधौ तु समुदायस्य नामत्वे तदन्तर्गतत्वात् षष्ठ्या लुप् सिद्ध्यतीति; अत्रोच्यते–संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नेत्यस्य 'यत्र प्रत्ययत्वेन प्रत्ययस्य संज्ञाविधानं तत्र तदन्तग्रहणं न'इत्येवार्थो न तु 'प्रत्ययद्वारकं यत्र संज्ञाविधानं तत्र तदन्तग्रहणं न'इति । तथा च पदादिसंज्ञासु

प्रत्ययत्वेन स्यादेरेव संज्ञाविधावुद्देश्यत्वमिति तत्र न तदन्तविधिः, इह च प्रत्ययस्य नामसंज्ञायां पर्युदासद्वाराऽपि संज्ञाविधावुद्देश्यत्वमिति तदन्तग्रहणे बाधकाभावात्, यतोऽर्थवतः संज्ञाविधानेन तस्यैव तत्र साक्षादुद्देश्यत्वमर्थवत्त्वं च न प्रत्ययमात्रे इति तल्लाभाय तदन्तविधिस्तत्सामर्थ्यादेवाश्रयणात्, यतः कृदन्ते तद्धितान्ते च समुदायेऽर्थवत्ता, न केवलं कृत्सु तद्धितेषु वा प्रत्ययेषु । नन्विह अर्थवत्ता लौकिकी समाश्रीयते शास्त्रीया वा?, तत्र नाद्या, यतः कृदन्त-तद्धितान्तसमुदायेऽपि लौकिक्या अर्थवत्ताया अभाव एव, पदस्यैव लोकेऽर्थबोधकतादर्शनात् । न द्वितीया, तस्या अन्वय-व्यतिरेकाभ्यां कृत्तद्धितादिप्रत्ययेष्वपि स्वीकारात् । अयमाशयः—वास्तविकमर्थबोधकत्वं वाक्यस्यैव किन्तु वाक्यस्यानन्तत्वेन तदर्थानुशासनस्य कर्तुमशक्यत्वेन तेषु पदविभागः कल्पितः, तेषु पदेष्वप्यर्थबोधसौकर्यायान्वय-व्यतिरेकाभ्यां प्रकृति-प्रत्ययादिविभागस्तदर्थविभागश्च कल्पितः, तं कल्पितमर्थमादायैव प्रत्ययेषु कर्तृ-कर्मादिवाचकताऽपत्याद्यर्थवाचकता च व्यवह्रियते शास्त्रकारैः । तथा च शास्त्रकृत्कल्पितोऽर्थः प्रत्ययादीनामप्यस्त्येवेति कथमुच्यते—न केवलाः कृतस्तद्धिता वा अर्थवन्त इति; अत्रोच्यते-अर्थवद्ग्रहणसामर्थ्यादिह लोकेऽर्थबोधकं यत् पदं तस्य योऽर्थस्तस्य प्रत्यासत्त्यो यः स्यादिप्रकृतेरर्थः प्रसिद्धतरः प्रत्ययान्तेषु दृश्यते तादृशेनार्थेन युक्त एवाऽर्थवानिह गृह्यते; कृत्तद्धितप्रत्ययेषु तु तादृशार्थस्य न सत्त्वम्, यतस्तेषु कल्पितमर्थवत्त्वम्, इति तत्र तदन्तविधिं विनाऽनिर्वाह इति । उक्तश्चायमर्थो महाभाष्ये—"सुप्तिङन्तं पदम्" [पा० सू० १. ४. १४.] इति सूत्रे, व्याख्यातश्च कैयटादिभिरुक्तरीत्यैव । द्वितीये न्यायांशे बृहद्वृत्तिग्रन्थानुसारं ज्ञापकद्वयमुपलभ्यत इति वृत्तौ प्रतिपादितमेव । तत्र किञ्चित् पुनर्विचार्यते—"हृदयस्य हृल्लासलेखाण्ये" [ ३. २. ९४. ] इत्यत्र लेखग्रहणमणन्तलेखशब्दपरमित्युक्त्वाऽणन्तत्वेनैव तस्य ग्रहणे सिद्धे तद्वैयर्थ्यमुद्भाव्य प्रकृतन्यायज्ञापकत्वमुक्त्वाऽपि यदन्ते "नवा खित्कृदन्ते रात्रेः" [ ३. २. ११७. ] इत्यत्रान्तग्रहणस्यैव ज्ञापकत्वमिति कथनं तत् परस्परविरुद्धमिव प्रतिभाति, तथापि तत्र लेखग्रहणस्य शब्दस्वरूपविशेषणपरत्वमाश्रित्य "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषाबलात् तदन्तपरतया 'हृत्परमलेखः' इत्यादौ कृदादेशविधानार्थमावश्यकत्वमिति केषांचिन्मतं समर्थयितुं तस्य ज्ञापकत्वाभावेऽपि "नवा खित्कृदन्ते रात्रेः" [ ३. २. ११७. ] इति सूत्रोक्तस्यान्तग्रहणस्यान्यार्थतया व्याख्यातुमशक्यत्वेन तस्यैव ज्ञापकत्वमिति प्रकटितम्, सति चास्य ज्ञापकत्वे लेखग्रहणस्य सर्वथा सार्थक्यमेवेति न कोऽपि दोषः । नन्वेतस्मिन् न्यायांशे ज्ञापिते "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च [ ३. २. १११. ] इति सूत्रे खित्प्रत्ययान्ते उत्तरपदे इत्यर्थालाभाज्जंमन्य इत्यादौ कथं मोऽन्तादेश इति चेत्? न—केवलं खित्प्रत्ययमात्रस्योत्तरपदत्वाभावात् सूत्रस्य वैयर्थ्यापत्त्या तत्र तदन्तग्रहणमित्यस्यार्थस्य वृत्तावेवावेदितत्वात् । किञ्चात्र सूत्रेऽव्ययवर्जनमपि तदन्तार्थज्ञापकम्, यतः खित्प्रत्ययो धातोर्विधीयते, खितीति सप्तम्या चाव्यवहितपूर्वस्य विधिरिति प्रतीयते, न च खित्प्रत्ययादव्यवहितपूर्वमव्ययं सम्भाव्यते, ततश्चाव्ययवर्जनं व्यर्थमेवेति व्यर्थीभूतं तदत्र तदन्तविधिं ज्ञापयिष्यतीति न कोऽपि दोषः । उक्तश्चायमर्थः "हृदयस्य हृल्लेखयदण्लासेषु" [पा० सू० ६. ३. ५०] इति सूत्रे महाभाष्येऽपि, तत्र हि प्रकृतसूत्रस्थलेखग्रहणेनोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्वरूपस्यैव ग्रहणं न तदन्तस्येति ज्ञापयित्वाऽन्ते शङ्कितम्—"यद्येतज्ज्ञाप्यते "खित्यनव्ययस्य" [ पा० सू० ६. ३. ६६. ] इति खिल्येवानन्तरस्यानव्ययस्य ह्रस्वत्वं प्राप्नोति । खित्यनन्तरो ह्रस्वभावी नास्तीति कृत्वा खिदन्ते उत्तरपदे भविष्यति । ननु चायमस्ति 'स्तनन्धय'इति । अत्राऽपि शपा व्यवधानम् । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद् व्यवधानमेव । अथवैतज्ज्ञापयत्याचार्यः—खित्यनव्ययस्य न भवतीति, यदयमनव्ययस्येति प्रतिषेधं शास्ति, नहि खित्यनन्तरमव्ययमस्ति ।" इति । तथा च सूत्रसामर्थ्यस्य श्रयितुमशक्यत्वेऽपि अनव्ययस्येति प्रतिषेधसामर्थ्यादेव तत्र तदन्तग्रहणमिति भाष्याशयः । एवमेतन्न्यायसत्त्वे "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति सूत्रेऽपि सूत्रारम्भसामर्थ्यादेव तदन्तरविधिरित्यास्थेयम्, अन्यथा घञ्रूपस्योत्तरपदस्य तस्मिन् परे वोपसर्गस्याभावात् सूत्रवैयर्थ्यं स्यादेव । न च 'अ'शब्दादाचारक्विबन्ताद् घञि तत्र धातुरूपस्य प्रत्यये परतो "लुगस्यादेत्यपदे" [ २. १. ११३. ] इति लुकि कृते घञ्रूपस्योत्तरपदस्य संभव इति वाच्यम्, तत्रोपसर्गस्य दीर्घप्रयोजनभावात् । अयमाशयः—तत्रोपसर्गो यदि नाम्यन्तस्तर्हि "ह्रस्वोऽपदे वा" [ १. २. २२. ] इति ह्रस्वः स्यात्, यदि चाकारान्तस्तदा तेन सह दीर्घे कृते घञ्निमित्तकस्य दीर्घस्य प्रयोजनाभावः सुतरामेवेति । तथा च सूत्रवैयर्थ्यपरिजिहीर्षयाऽत्र तदन्तविधिराश्थेय इति न कोऽपि दोष इति ॥ १७ ॥

## ※ग्रहणवता नाम्ना न तदन्तविधिः※ ॥ १८ ॥

**सि०—"नडादिभ्य आयनण्" [ ६. १. ५३. ] इत्यादिसूत्रेषु 'नडादि'शब्दे बहुव्रीहिः, नड आदिर्येषां तेभ्य इत्यर्थात्, बहुव्रीहौ चान्यपदार्थं विशेष्यम्, तच्चेह योग्यत्वाद् नामरूपमेव । तथा च नडादिभ्यो नामभ्य आयनण् इति फलति । विशेषणं च तदन्तस्य बोधकमिति "विशेषणमन्तः"**

[ ७. ४. ११३. ] इति परिभाषया लभ्यते, ततश्च नडादिपदस्यापि तदन्तबोधकतया नडाद्यन्तेभ्यो नामभ्य आयनण् इत्यर्थः स्यात् । केवलान्नडादिशब्दाच्च व्यपदेशिवद्भावेनायनण् सिद्ध्यति । इत्थं च सूत्रनडस्यापत्यमित्यर्थेऽस्य प्रवृत्तौ सौत्रनाडायन इति स्यात्, इष्यते तु "अत इञ्" [ ६. १. ३१ ] इति इञि, अनुशतिकादित्वादुभयपदवृद्धौ–सौत्रनाडिरिति, तदर्थमयं न्यायः समाश्रीयते । तथा च "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषाबाधनार्थमेवायं न्याय इति समायाति । न्यायार्थश्च–ग्रहणवन्नामप्रयोज्यं तदन्ते विधानं न भवतीति । अत्र प्राचीनैर्न्यायावतरणार्थमेवं लिखितम्–सौत्रनाडिरित्यत्रायनण्वारणार्थत्वमुपन्यस्य "ननु काऽत्र न्यायापेक्षा ? 'सूत्रनड' इत्यस्य नडादिभ्योऽन्यत्वेनायनणः प्राप्तेरेवाभावात्, उच्यते–गवेन्द्र इत्यत्रवद् 'गवेन्द्रयज्ञ' इत्यत्रेन्द्रयज्ञशब्देऽपि परे इन्द्ररूपावयवप्राधान्यविवक्षया "इन्द्रे" [ १. २. ३०. ] इत्यनेनाव आदेशो यथा स्यात् तथात्र नडरूपावयवप्राधान्यविवक्षायां सूत्रनडशब्दादप्यायनण् प्राप्नोति, परमेतन्न्यायेन निषिद्धत्वादेव न स्यात् । इत्थं चावयवप्राधान्यविवक्षा यदि क्रियते तदैवास्य न्यायस्यावकाशः स्यात्, अन्यथा तु नामग्राहमुक्तं कार्यं तदन्तस्य क्वापि प्राप्नोत्येव नेति निरवकाशत्वमेवास्य न्यायस्य प्रसज्येत । ततश्च नामग्राहमुक्तस्य कार्यस्यावयवप्राधान्यविवक्षया, तन्नामान्तस्यापि प्राप्तौ तन्निषेधार्थोऽयं न्यायः" इति । अत्रेदमुच्यते–यदोपरिवर्णितप्रकारेण तदन्तात् प्रत्ययप्राप्तिः परिभाषारूपानुशासनसिद्धा तदाऽवयवप्राधान्यविवक्षारूपाऽनिर्धारितहेतुमाश्रित्य न्यायप्रयोजनवर्णनं नोचितम् । अत एव "मालेषीकेष्टकस्यान्तेऽपि भारि-तूल-चिते" [ २. ४. १०२. ] इति सूत्रे बृहद्वृत्तावत्रत्यान्तग्रहणस्य प्रकृतन्यायज्ञापकत्वकथनपरग्रन्थस्य व्याख्यायां तु लघुन्यासे "मालादिभिः प्रकृतस्य नाम्नो विशेषणात् तदन्तलाभात् केवलस्य च व्यपदेशिवद्भावात् ह्रस्वसिद्धौ किमर्थमन्तग्रहणमित्याशङ्कायामाह–इदमेवेति" इत्युक्तम् । एवं च "विशेषणमन्तः" [ ७. ४. ११३. ] इति न्यायबाधनार्थमेवेदं ज्ञापनमिति स्पष्टमेव, एवं चावयवप्राधान्यविवक्षा व्याख्यानभूतस्तदीयन्यासग्रन्थोऽपि चिन्त्य एव, प्रकृतविषये तादृशविवक्षाया अनाश्रयणात् । यच्च "इन्द्रे" इति [ १. २. ३०. ] इति सूत्रे 'इन्द्रस्थे स्वरे परे' इति वृत्तिग्रन्थेनावयवप्राधान्यविवक्षासाधनं तत् तु न युक्तम्, तत्रावादेशस्य निमित्तभूतः स्वर एव तदधिकारात्, स च इन्द्रशब्दस्थो ग्राह्य इति स्वत एव तस्य प्राधान्यं, न तु विवक्षाधीनम् । 'इन्द्रे' इति 'स्वरे' इत्यनुवृत्तस्य विशेषणमेव, सप्तम्या चेन्द्रशब्दस्य तादृशस्वराधिकरणत्वमेव कथ्यते, "तदादाविति वक्तव्यम्" इति तत्रत्यन्यासग्रन्थोऽपि वृत्त्यभिप्रायवर्णनरूप एव नापूर्वबोधकः, इन्द्रशब्दादिभूते स्वरे इति तत्तात्पर्यात् । इह च [ न्यायसंग्रहवृत्तिग्रन्थे ] 'इन्द्ररूपावयवप्राधान्यविवक्षया' इति कथनस्य इन्द्रयज्ञशब्दे इन्द्ररूपस्य तदेकदेशभूतस्य शब्दस्यैव प्राधान्यमिति तात्पर्यं स्फुटमेव प्रतिभातीति महानेव भेद उभयोः [ न्यासग्रन्थेन सहास्य वृत्तिग्रन्थस्य ], तत् कथं न्यासग्रन्थः स्वकीयन्यायसंग्रहन्यासे स्ववृत्तिग्रन्थमूलभूततया प्राचीनैरुपवर्णित इति विवेचयन्तु सूरयः । एतन्न्यायज्ञापकं च "मालेषीकेष्टकस्यान्तेऽपि भारि-तूल-चिते" [ २. ४. १०२. ] इतिसूत्रस्थमन्तेऽपीति पदमिति प्रकृतसूत्रे बृहद्वृत्तौ प्रतिपादितम् । तथाहि–तत्रान्तेऽपीति पदं मालभारीत्यत्रेवोत्पलमालभारीति प्रयोगेऽपि ह्रस्वप्रवृत्त्यर्थं कृतम्, तच्च "विशेषणमन्तः" [७. ४. ११३.] इति परिभाषया मालाशब्दस्य शब्दस्वरूपविशेषणतामाश्रित्य मालान्तस्याऽपि ग्रहणेनैव सिद्धमिति तदर्थं कृतमन्तेऽपीति व्यर्थमेव, व्यर्थं तदिमं न्यायं ज्ञापयति । तथा च मालेति नामग्रहणे तदन्तस्य ग्रहणं न प्राप्नोतीति तदर्थमन्तेऽपीत्यस्य स्वांशे चारितार्थ्यम् । फलं च 'नाडायन' इत्यत्रेव सूत्रप्रधानो नडः सूत्रनडस्तस्यापत्यं सौत्रनाडिरित्यत्र "नडादिभ्य आयनण्" [ ६. १. ५३. ] इति आयनण् न भवति, किन्तु "अत इञ्" [ ६. १. ३१. ] इत्येवेत्युक्तमेव । अयं च न्यायस्तरलः "केवलसखिपतेरौः" [ १. ४. २६. ] इति सूत्रे केवलग्रहणात् । तथाहि–सखिपतिशब्दयोर्नामत्वेन तद्ग्रहणे तदन्तविधेरभावात् केवलयोरेव तयोः कार्यं स्यादिति केवलग्रहणं व्यर्थं सदस्य न्यायस्यानित्यतां ख्यापयति, तथा च कदाचित् समस्तयोः [ समासान्तस्थितयोः ] सखि-पत्योरपि ग्रहणं स्यादिति तन्निवारणाय केवलग्रहणस्य चारितार्थ्यम् । फलं चानित्यत्वस्य "प्रियासृजोऽसावपृणद् द्विडस्त्रा" [ द्व्याश्रये सर्गे २ श्लो० ६७ ] इत्याचार्यप्रयोगे "दन्त-पाद नासिका०" [ २. १. १०१. ] इति सूत्रेणान्तस्थितस्याप्यसृक्शब्दस्यासनादेशो विकल्पेनेति, अन्यथा तत्रापि नामग्रहणस्य सत्त्वात् तदन्तस्याग्रहणेऽसनादेशो न स्यादिति । एतन्न्यायस्वीकारादेव "पूर्वमनेन सादेश्चेन्" [ ७. १. १६७. ] इति सूत्रे सादेश्चेति चरितार्थम्, अन्यथा पूर्वशब्दादिव कृतपूर्वशब्दादिभ्योऽपि तदन्तविधिना "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषया इन्प्रत्ययसिद्धेः सादेश्चेत्यंशस्य वैयर्थ्यमेव । पाणिनीये नये चैतत्समानविषययोः "पूर्वादिनिः" [ पा० सू० ५. २. ८६. ] "सपूर्वाच्च" [ पा० सू० ५. २. ८७. ] इति सूत्रयोर्मध्ये द्वितीयस्यैतन्न्यायज्ञापकत्वमाश्रीयते, अत एवायं न्यायः प्रत्ययविधिविषय एवेति ते वर्णयन्ति, विवेचयिष्यते

चैतद्विवरणे ॥ *उपपदविधिषु न तदन्तविधिः* इत्थमप्येतन्न्यायसमानविषयमेव न्यायान्तरं केचित् पठन्ति । अस्यायमर्थः–यत्र किञ्चित् पदमुपपदत्वेन पठ्यते तत्र तदन्तविधिना तदन्तस्य पदस्य ग्रहणं न भवति, यथा–"क्षेम-प्रिय-मद्र-भद्रात् खाण्" [ ५. १. १०५. ] इति सूत्रे क्षेमादयः शब्दाः कर्मभूता उपपदत्वेन पठ्यन्ते, तेषु स्वरूपस्यैव ग्रहणं न तदन्तस्येति योग-क्षेमौ करोति तच्छीलेत्यर्थे योगक्षेमकरीत्येव भवति, न तु तत्र खाणौ भवतः, इति योगक्षेमंकरा–योगक्षेमकारीति न भवति । अस्यापि ज्ञापकान्तरमुदाहरन्ति, यथा "नग्न-पलित-प्रियाऽन्ध-स्थूल-सुभगाढ्य-तदन्ताच्व्यर्थेऽच्वेर्भुवः खिष्णु-खुकञौ" [ ५. १. १२८. ] इति सूत्रे तदन्तग्रहणमत्र ज्ञापकमिति, तद्धि अनग्नो नग्नो भवतीति नग्नंभविष्णुर्नग्नंभावुक इतिवत् अननग्नोऽनग्नो भवतीति विग्रहे अनग्नंभविष्णुरनग्नंभावुक इत्यादिप्रयोगसिद्ध्यर्थमेव कृतम् । तच्च तदन्तविधिनैव सिद्धमिति व्यर्थं सदुपपदविधिषु न तदन्तविधिरिति ज्ञापयति । सति च प्रकृते न्याये तस्याऽपि नामग्रहणत्वेन तत्र तदन्तविधेरभावे तदन्तग्रहणस्य सार्थक्येन तन्न्यायस्य [ उपपदविधिषु तदन्तविधिर्नेत्यस्य ] प्रयोजनाभाव एव, विशेषस्यास्य सामान्येऽन्तर्भावात् । एवं *ग्रहणवता नाम्ना न तदादिविधिः* इत्यपि व्याकरणे न्यायान्तरमस्तीति सोदाहरणज्ञापकसद्भावादवगम्यते । अत्र च ज्ञापकं द्वारादिगणे तदादिविधिप्रतिपादकं "न्यग्रोधस्य च केवलस्य" [ ७. ४. ७. ] इति सूत्रम् । फलं च "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यनेनैकारविकल्पो यथा नैयङ्कवमित्यादौ भवति तथा न्याङ्कुचर्मणमित्यादौ न भवतीति प्राचीनाः प्रतिपादयन्ति । तथाहि–तेषां ग्रन्थः–"ग्रहणवता नाम्ना न तदादिविधिरित्यपि न्यायः सोदाहरणज्ञापकोऽर्थतो व्याकरणे दृश्यते । तथाहि–न्यङ्कुशब्दस्यौणादिकस्याव्युत्पत्तिपक्षे न्यङ्कोर्मृगविशेषस्येदं नैयङ्कवं न्याङ्कवमित्यत्र यथा "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यनेन न्यङ्कुशब्दस्य यकारात् प्रागैकारो विकल्पेन स्यात् तथा न्यङ्कुचर्मण इदं न्याङ्कुचर्मणमित्यत्रावयवप्राधान्यविवक्षया प्राप्तोऽपि "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यैकारविकल्पो न स्यात्, एतन्न्यायेन निषेधात् । ज्ञापकं चास्य "द्वारादेः" [ ७. ४. ६. ] इत्यत्र द्वारादीनां तदादिविधेरवयवप्राधान्यविवक्षया प्राप्तस्याप्येतन्न्यायेन निषिद्धत्वात् तत्प्रतिप्रसवकरणार्थं "न्यग्रोधस्य केवलस्य" [ ७. ४. ७. ] इति सूत्रकरणम् । तथाहि–द्वारे नियुक्त इति वाक्ये "तत्र नियुक्ते" [ ६. ४. ७४. ] इत्यनेनेकणि दौवारिक इत्यत्र "द्वारादेः" [ ७. ४. ६. ] इत्यनेन केवलस्य द्वारशब्दस्य वकारात् प्रागौकारो यथा स्यात्, तथा द्वारपालस्यापत्यं दौवारपालिरित्यत्र द्वारशब्दादिकस्य द्वारपालेति समुदायस्यापि वकारात् प्रागौकार इष्टः, स चावयवप्राधान्यविवक्षया सिध्यन्नेवाभूत्, परं *ग्रहणवता नाम्ना न तदादिविधिः* इति न्यायेन निषिद्धः, ततो द्वारादीनां तदादिविधिरपि स्यात्; न्यग्रोधस्य तु तदादिविधिर्न स्यात्, किन्तु केवलस्यैव स्यादित्यनया रीत्या द्वारादीनां तदादिविधिभवनज्ञापनार्थं "न्यग्रोधस्य केवलस्य" [७. ४. ८.] इति सूत्रं कृतम्" इति, एतदग्रेऽपि चायमेव ग्रन्थो विवृतः । तत्रेदमुच्यते–द्वारादीनां तदादिविधिज्ञापनार्थं "न्यग्रोधस्य केवलस्य" [ ७. ४. ८. ] इति सूत्रस्थं केवलग्रहणमित्येतावदेव बृहद्वृत्त्यादिग्रन्थेभ्योऽवसीयते, न तावताऽस्य न्यायस्य सत्त्वमनुमीयते । यदि तदादिविधिस्तत्र केनापि प्रमाणेन सिद्धः स्यात् तदादिविधिज्ञापनार्थं कृतेन प्रयत्नेन तदादिविधिनिषेधकप्रकृतन्यायसत्ता विज्ञाप्येतापि, न चैतदस्ति, नहि केनापि वचनेनात्रावयवप्राधान्यविवक्षाऽनुमन्यते, वक्तुरिच्छारूपायाश्च तस्याः शास्त्राव्यवस्थापकत्वात् । तथा च *स्वं रूपं०* इति न्यायेन द्वारादिपठितशब्दानां स्वरूपत एव ग्रहणं स्यान्न तदादीनामिति द्वारपालशब्दस्य तत्र ग्रहणं न स्यादिति तद्ग्रहणायात्रत्यकेवलग्रहणेन "श्वादेः०" [ ७. ४. १०. ] इति सूत्रेण वा द्वारादिषु तदादिविधिर्ज्ञाप्यते इत्येव तत्रत्यग्रन्थस्याशयः । सम्पूर्णसूत्रस्य ज्ञापकता च प्रागुक्तप्राचीनग्रन्थसम्बद्धा न तत्र प्रतीयते, सम्पूर्णसूत्रस्य नियमार्थत्वविध्यर्थत्वयोस्तत्र पक्षान्तरेण प्रतिपादनात् । तथाहि–तत्रत्यो ग्रन्थः–[ "द्वारादेः" ७. ४. ६. इति सूत्रबृहद्वृत्तौ ] "श्वादेरिति" [ ७. ४. १०. ] इति प्रतिषेधाद् द्वारादिपूर्वाणामपि भवति–द्वारपालस्यापत्यं दौवारपालिः," इति । तत्र च न्यासकारेणेत्थं व्याख्यातम्–"श्वन्शब्दोऽपि द्वारादिस्तत्र तदादेः कार्यप्रतिषेधात् तत्प्राप्तिर्विज्ञायते इत्यर्थः" इति । एताभ्यां च ग्रन्थाभ्यां द्वारादिपूर्वाणां स्वत एव कार्यप्राप्त्यभाव इति श्वादेः कार्यस्य प्राप्तिरेव नेति तत्र निषेधोऽनुपपद्यमानस्तदादिविधिद्वारा कार्यप्राप्तिं ज्ञापयतीति स्पष्टमवगम्यते । तत्र तदादेः कार्यं केनचिन्न्यायेन प्रतिषिद्धमिति नावद्योत्यते, अग्रे च "न्यग्रोधस्य केवलस्य" [ ७. ४. ७. ] इति सूत्रबृहद्वृत्तौ न्यग्रोधशब्दस्य व्युत्पन्नत्वाऽव्युत्पन्नत्वपक्षयोः सूत्रार्थं वर्णयित्वोदाहृत्य च "केवलस्येति किम्? न्यग्रोधमूले भवा न्याग्रोधमूलाः शालयः, न्यग्रोधाः सन्त्यस्मिन् ऋश्यादित्वाच्चातुरर्थिकः कः–न्यग्रोधकम्, तत्र भवो न्याग्रोधकः" इत्येवं समासघटक प्रत्ययान्तघटकयोर्न्यग्रोधशब्दयोः केवलग्रहणव्यावर्त्यत्वेन प्रदर्श्य "इदमपि द्वारादीनां तदादिविधेर्ज्ञापकम्" इत्युक्तम् । न्यासकृता च इदमपीति प्रतीकमुपादाय–"न केवलं 'श्वादेः'" इति निषेधः, किन्तु केवलग्रहणम-

पीत्यर्थः, तथा च केवलग्रहणमात्रस्यैव ज्ञापकत्वमुक्तम् । किञ्च तदग्रे सूत्रस्य पक्षभेदेन नियमार्थत्वविध्यर्थत्वप्रतिपादनपरबृहद्वृत्तिग्रन्थव्याख्यानावसरे "नन्वेतत् सूत्रमपि किमर्थं कृतमित्याह–न्यग्रोहतीति । अयमर्थः–यदा व्युत्पत्तिपक्ष आश्रीयते तदा न्यक्शब्दसाधनकाले या निशब्दात् प्रथमा तदपेक्षया निशब्दसम्बन्धिन इकारस्य पदान्तत्वात् तत्स्थानप्रादुर्भावाद् यस्यापि पदान्तत्वे "य्वः पदान्तात्" [ ७. ४. ५. ] इत्यनेनैवैदागमे सिद्धे सतीदं सूत्रं नियमार्थम् । अव्युत्पत्तिपक्षे तु यस्यापदान्तत्वात् "य्वः पदान्तात्" [ ७. ४. ५. ] इति न सिद्ध्यतीति विध्यर्थमिदम्" इति । तथा चोभयोः पक्षयोः सूत्रस्य सार्थक्यं प्रदर्शयता सम्पूर्णसूत्रस्य द्वारादिषु तदादिविधिज्ञापकत्वकथनं न तदनुकूलमिति प्रकटितमेव । द्वारादिषु हि सर्वेऽव्युत्पन्नाः प्रायोऽपदान्तवकारयकारा एव शब्दाः पठिता इति व्युत्पत्तिपक्षे सम्भावितपदान्तयकारस्य न्यग्रोधशब्दस्य तत्र पाठकल्पना तदनुगता च संपूर्णस्य सूत्रस्य द्वारादौ तदादिविधिज्ञापकत्वकल्पना च किम्मूलेति चिन्त्या । न चैतस्य न्यायस्य [ *ग्रहणवता नाम्ना न तदादिविधिः* इत्यस्य ] अभावे न्यङ्कुचर्मण इदं न्याङ्कुचर्मणमित्यत्रापि "न्यङ्कोर्वा" [ ७. ४. ९. ] इत्यनेन विकल्पेनैदागमः स्यादिति वाच्यम्,तदादेः प्राप्त्यभावात् । न चावयवप्राधान्यविवक्षया प्राप्तिरिति वाच्यम्, अवयवप्राधान्यविवक्षाया अनिरुक्तेः, केयमवयवप्राधान्यविवक्षाऽऽश्रीयते सूत्रे वा लक्ष्ये वा?, सूत्रे इति चेत्? तत्र न्यङ्कुशब्दस्यावयवो यो यकारस्तस्यैव प्राधान्यं विवक्षितं न तु शब्दस्य, तथा च तस्य यथा न्यङ्कुशब्दे सत्त्वं तथा न्यङ्कुचर्मशब्देऽपीति भवतामाशयः, तथा च नायं तदादिविधिः, तथा च तदादिविधिनिषेधार्थेन न्यायेनावयवप्राधान्यविवक्षया प्राप्तस्य कार्यस्य निषेद्धुमसामर्थ्यमेव । अथ प्रयोगे न्यङ्कुचर्मशब्दे न्यङ्कुशब्दस्यैव प्राधान्यमिति तदीय एव यकारोऽत्र विज्ञायत इति चेत्? हन्तैतावता कथं सूत्रप्राप्तिरिह स्यात्, तथाहि– "न्यङ्कोर्वा" [ ७. ४. ९. ] इति सूत्रार्थ एवं भवति– 'ञ्णित्तद्धितप्रत्ययाव्यवहितपूर्वत्वविशिष्टन्यङ्कुशब्दावयवयकारात् प्रागैकारो भवति' इति, न चास्ति न्यङ्कुचर्मन्शब्दाद् विहिते प्रत्यये न्यङ्कुशब्दस्याव्यवहितपूर्वत्वमिति तत्रावयवप्राधान्यविवक्षया प्राप्तिः कथमीर्येत इति त एव विदन्ति । अस्मन्मते तु तत्र स्वत एव नैदागमप्राप्तिरिति तदर्थमपूर्वन्यायकल्पनाऽनावश्यकीति किमधिकं विवेचकेषु । स्वतोऽप्यस्य न्यायस्य काप्यपठितत्वमिति स्वीकृतं तैरन्ते इति *ग्रहणवता नाम्ना न तदन्तविधिः* इत्येक एवेदृशोऽयं न्याय इति पर्यवस्यति । विशेषश्च विवरणे विवेचितः ॥ १८ ॥

## *ग्रहणवता नाम्ना न तदन्तविधिः* ॥ १८ ॥

**त०**—ग्रहणवतेत्यत्र तृतीयायाः प्रयोज्यत्वमर्थः, तथा च ग्रहणवन्नामप्रयोज्यं तदन्ते विधानं नेत्यर्थ इत्युक्तं वृत्तौ । तत्र किमिदं ग्रहणवत्त्वमिति चेत्? अत्र केचित्–आनुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वं तदित्याहुः, तन्न–तथा सति नडादेः [ "नडादिभ्य आयनण्" ६. १. ५३. ]इति सूत्रे आनुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वेन ग्रहणवत्त्वोपपत्तावपि "दोरीयः" [ ६. ३. ३२. ]"द्विस्वरादनद्याः"[ ६. १. ७१ ]इत्यादिसूत्रेषु 'दु'पदस्य द्विस्वरपदस्य चानुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वाभावेन निषेधाप्राप्त्या तदन्तविध्यापत्तेः । तद्दोषपरिहाराय नामत्वव्याप्यधर्मावच्छिन्नविषयताप्रयोजकत्वं ग्रहणवन्नामत्वमित्युच्यते चेत्? तथाप्युक्तदोषाणां तादवस्थ्यमेव, दुत्व-द्विस्वरत्वादीनां नामत्वव्याप्यत्वाभावात् । तन्निरासाय यदि नामत्वव्याप्यविषयताप्रयोजकत्वमेव तत्त्वमित्युच्यते, नामभ्य एव तद्धितप्रत्ययानां विधानात् तद्धितप्रकरणान्तर्गतानां दु-द्विस्वरादिशब्दानां नामत्वव्याप्यविषयताप्रयोजकत्वेन प्रकृतदोषोद्धारादिति, तथा सति "अत इञ्"[ ६. १. ३१. ]इत्यादावपि नामसम्बन्धस्यावश्यकत्वेनोक्तरीत्या अत्वावच्छिन्नविषयताया नामत्वव्याप्यत्वेन तदन्तविधिनिषेधापत्तौ 'अदन्तात् षष्ठ्यन्तान्नाम्नः' इत्यर्थानापत्तौ दाक्षिरित्यादीनामसिद्ध्यापत्तिः; इति चेत्? अत्रोच्यते–वर्णत्वव्याप्यधर्मावच्छिन्नविषयत्वाप्रयोजकत्वे सति प्रत्ययत्वव्याप्यधर्मावच्छिन्नविषयत्वाप्रयोजकत्वे च सति नामवृत्तिविषयताप्रयोजकत्वं ग्रहणवन्नामत्वमिति । न चैवं द्विस्वरपदस्यापि वर्णत्वव्याप्यस्वरत्वावच्छिन्नविषयताप्रयोजकत्वेन निषेधानापत्तौ द्विस्वरान्तादपि प्रत्ययविधानं स्यादिति वाच्यम्, धर्मितानवच्छेदकस्यैव वर्णत्वव्याप्यधर्मस्य ग्रहणेनादोषात्, द्विस्वरपदे द्विस्वरत्वस्य द्वित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्य सत्त्वात् । नन्वेवम्–"अस्-तपो-माया-मेधा-स्रजो विन्"[ ७. २. ४७. ] इत्यादौ 'अस्'पदस्यापि ग्रहणवन्नामत्वापत्त्या निषेधप्रवृत्त्या यशस्वीत्यादिप्रयोगाणामसिद्ध्यापत्तिरिति चेत्? न-प्रत्ययस्याप्यसः सत्त्वेन प्रत्ययत्वव्याप्यधर्मावच्छिन्नविषयत्वाप्रयोजकत्वाभावाददोषात् । परे तु–"एवं सति बहूनां प्रत्ययानां द्विस्वरत्वेन द्विस्वरग्रहणस्याऽपि प्रत्ययत्वव्याप्यधर्मावच्छिन्नविषयत्वाप्रयोजकत्वाभावेन तत्रापि निषेधानापत्तिरिति कथञ्चिदस्य न्यायस्यानित्यत्वमाश्रित्यैव–"अस् तपो-माया०"[ ७. २. ४७. ]इत्यादौ निर्वाहः कार्यः" इति वर्णयन्ति । "विशेषणमन्तः"[ ७. ४. ११३. ]इति परिभाषाप्राप्ततदन्तविधेरयं प्रतिषेध इत्यावेदितं वृत्तौ न्यासादिग्रन्थोपन्यासेन । पाणिनीये नये च "विशेषणमन्तः"[ ७. ४. ११३. ]इति परिभाषास्थाने "येन विधिस्तदन्तस्य"[ पा० सू० १. १. ७२. ]इति संज्ञासूत्रं पठ्यते, तत्र च

समासे प्रत्ययविधौ च तदन्तविधिप्रतिषेधाय 'समास-प्रत्ययविधौ प्रतिषेध उगिद्वर्णग्रहणवर्जम्" इति वार्तिकं पठ्यते, तत्रत्यप्रत्ययांशानुवादभूतोऽयं न्याय इति नागेशभट्टः प्राह परिभाषेन्दुशेखरे, अत एव चायं न्यायः प्रत्ययविधिविषय एवेति तन्मतम्। अत एव च "येन विधिस्तदन्तस्य"[ पा० सू० १. १. ७२. ] इति सूत्रे महाभाष्ये प्रत्ययविधिभिन्ने "अप्तृन्तृच्स्वसृनप्तृ०" [ पा० सू० ६. ४. ११. ]इत्यादिसूत्रे गृह्यमाणनाम्नाऽपि तदन्तविधिं स्वीकृत्य स्वसा परमस्वसेत्युदाहृतमिति तेनापि प्रकृतन्यायस्य प्रत्ययविधिमात्रविषयत्वमिति गम्यते। तथा च पूर्वोक्त[ "समासप्रत्ययविधौ प्रतिषेध उगिद्वर्णग्रहणवर्जम्"इति ] वार्तिकस्थप्रत्ययग्रहणेनैव गतार्थत्वाशयेनैवायं न्यायस्तत्र सूत्रे महाभाष्ये विशिष्य न पठितः। "असमासे निष्कादिभ्यः" [ पा० सू० ५. १. २०. ]इति सूत्रव्याख्यायां महाभाष्येऽयं न्यायः पठ्यते, तत्रैव चास्य क्वचिदप्रवृत्तिरपि विज्ञाप्यतेऽसमासग्रहणसामर्थ्यात्। अयं च तत्रत्यो ग्रन्थः-"असमास इति किमर्थम्? परमनिष्केण क्रीतं-परमनैष्किकम्। नैतदस्ति, निष्कशब्दात् प्रत्ययो विधीयते, तत्र कः प्रसङ्गो यत् परमनिष्कशब्दात् स्यात्, नैव प्राप्नोति, नार्थः प्रतिषेधेन। तदन्तविधिना प्राप्नोति। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्राप्नोति"। अत उत्तरं पठति-"निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्ताप्रतिषेधस्य"[ वार्तिकम् ], निष्कादिष्वसमासग्रहणं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्? एतज्ज्ञापयत्याचार्यः-"पूर्वत्र तदन्तविधेः प्रतिषेधो न भवतीति"। इति। तत्र पूर्वत्रेति पदं न्यायव्युत्पादनमात्रं न तु विवक्षितार्थम्। एतत्सूत्रेऽसमासग्रहणेनेतः पूर्वं ग्रहणवता नाम्ना न तदन्तविधिरिति न्यायो नास्तीवेति गम्यत इति तात्पर्यात्। तथा च परसूत्रविषयाण्यप्युदाहरणानि महाभाष्ये तत्रैव प्रदत्तानि। स्वमते च "मालेषीकेष्टकस्यान्तेऽपि" [ २. ४. ११२. ]इति स्यान्तेऽपीत्यंशेन प्रत्ययविधिभिन्नविषयेण ज्ञापनात् प्रत्ययाप्रत्ययविधिसाधारणोऽयं न्याय इत्यास्थीयते तथा च यत्र प्रत्ययविधिभिन्ने प्रत्ययविधौ वाऽस्याप्रवृत्तिरिष्टा तत्र "केवलसखि-पतेरौः"[ १. ४. २६. ]इति सूत्रस्थकेवलग्रहणादस्यानित्यत्वमाश्रयणीयमिति वृत्तौ प्रदर्शितमेव। यद्यपि स्वमतेऽपि "पूर्वमनेन सादेश्चेन्"[ ७. १. १६७. ]इति सूत्रस्थेन सादेश्चेत्यंशेन न्यायोऽयं ज्ञापयितुं शक्यते, तथाहि-प्रकृतन्यायाभावे 'पूर्वमनेन'इत्येतावदुक्तावेव कृतपूर्वादीनामपि तदन्तविधिना ग्रहणे सिद्धे तदर्थं कृतस्य सादेश्चेत्यंशस्य वैयर्थ्यं स्पष्टमेव। ज्ञापिते चास्मिन् न्याये पूर्वशब्दस्य नामग्रहणत्वेन तत्र तदन्तविधेरभावात् सादेः प्रत्ययो न प्राप्नोतीति तद्ग्रहणं सार्थकम्। ज्ञापिते चास्मिन् न्याये "मालेषीकेष्टकस्यान्तेऽपि०"[ २. ४. १०२. ] इति सूत्रेऽन्तग्रहणस्य स्वत एव चारितार्थ्यम्, किन्तु तथा सति [ सादेरित्यनेनास्मिन् न्याये ज्ञापिते सति ]प्रकृतन्यायस्य प्रत्ययविधिविषयत्वसंभावनया "मालेषीकेष्टकस्य०"[ २. ४. १०२. ]इति सूत्रस्थानेऽपीत्यस्य वैयर्थ्यं स्यादिति प्रत्ययविधिभिन्नविषयेणान्तेऽपीति पदेनैव ज्ञापनमुचितमास्थितम्। यत्र प्रत्ययविधिभिन्नेऽस्य न्यायस्य प्रवृत्तिरनिष्टा तत्रानित्यत्वाश्रयणेन निर्वाहः कार्यः। अनित्यत्वज्ञापकं यदुक्तं "केवलसखि-पतेरौः" [ १. ४. २६. ]इति सूत्रे केवलग्रहणं, तदपि प्रकृतन्यायस्य प्रत्ययविधिविषयत्वाभाव एव। यदि चास्य प्रत्ययविधिविषयत्वमेवेत्याश्रीयते तदा "मालेषीकेष्टकस्यान्तेऽपि"[ २. ४. १०२. ] इतिसूत्रस्थमन्तेऽपीति स्पष्टार्थमेव, "केवलसखि-पतेरौः"[ १. ४. २६. ]इति सूत्रस्थं केवलग्रहणं च सार्थकमेव। अनित्यत्वज्ञापनस्यावश्यकत्वे च "पुरुषहृदयादसमासे"[ ७. १. ७०. ] इतिसूत्रस्थमसमासे इति तज्ज्ञापकमास्थेयम्, तथाहि—पुरुषहृदयग्रहणस्य नामग्रहणत्वेन *ग्रहणवता०*इति न्यायप्राप्तौ तदन्तविधिनिषेधे परमपुरुषादिसमासात् प्राप्त्यभावेन तद्वारणार्थम् 'असमासे' इति पदं व्यर्थमेव, व्यर्थं च तदस्य न्यायस्यानित्यत्वं ज्ञापयितुमलम्। एवं च "दन्त-पाद-नासिका०" [ २. १. १०१. ]इति सूत्रे चास्य न्यायस्य प्रत्ययविधिविषयत्वस्वीकारे तदन्तविधिर्निर्बाध एवेति "प्रियासृजोऽसावपृणद् द्विडस्रा"इति द्व्याश्रयकाव्य[ स० २, श्लो० ६७ ]प्रयोगोऽपि सङ्गत एव। अस्य न्यायस्य प्रत्ययविधिमात्रविषयत्वे सामान्यतो नामग्रहणविषयत्वे वोभयथाप्युपपदविधिषु प्रवृत्तेरबाधाद् *उपपदविधिषु न तदन्तविधिः* इति न्यायोऽपि तेन गतार्थ एवेति न तस्य पृथगुल्लेख आवश्यकः॥ *ग्रहणवता नाम्ना न तदादिविधिः* इति न्यायसंग्रहप्राचीनवृत्त्युपस्थापितो न्यायश्च निर्मूल एवेति प्रतिपादितं वृत्तावेव। तदुपपादनपरो न्यासग्रन्थः केवलमिह किञ्चिद् विवेच्यते-तत्र हि न्यङ्कुशब्दस्यौणादिकत्वेनोणादीनां च व्युत्पत्त्यव्युत्पत्तिपक्षयोः समयोः शास्त्रकाराभिमतत्वेन व्युत्पत्तिपक्षे "य्वः पदान्ताद्०" [ ७. ४. ५. ] इति नित्यमैदागमे प्राप्तेऽव्युत्पत्तिपक्षे चाप्राप्ते "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यनेन विकल्पेनैदागमो विधीयत इति प्राप्ताप्राप्तविभाषेयमिति प्रतिपाद्य, 'नैयङ्कवम्, न्याङ्कवम्' इति रूपद्वयं च तत्प्रयोजनत्वेनोक्त्वा न्याङ्कुचर्मणामित्यत्र तत्प्रवृत्तिवारणाय प्रकृतन्यायः समाश्रितः। तस्मिन् विषये च न्यङ्कुशब्देऽव्युत्पत्तिपक्ष एवाश्रीयते, अन्यथा व्युत्पत्तिपक्षे "य्वः पदान्तात्" [ ७. ४. ५. ] इति नित्यमैदागमः स्यादव्युत्पत्तिपक्षे च न स्यादितीहापि रूपद्वयसत्त्वे न्यायाश्रयणस्यानावश्यकत्वापात इति न्यायसन्देहापादकत्वेन व्युत्पत्तिपक्षस्येहानाश्रयणमेवेति प्रतिपादितम्। तथाहि- तत्रत्यन्यायसद्भावोपपादनग्रन्थः-"व्युत्पत्तिपक्षाश्रयणे यकारस्य पदान्तगत्वेन "य्वः पदान्ताद्०" [ ७. ४. ५. ] इत्यैदागमे-

नैयङ्कुचर्मणमित्यपि रूपभवनेन रूपद्वयस्यापि भवनात्, न ज्ञायते–एतन्न्यायसद्भावाद् न्यङ्क्वादिशब्दप्रयोगे "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यस्य प्रवृत्तौ निषिद्धायामपि व्युत्पत्त्यव्युत्पत्तिपक्षाभ्यां द्वैरूप्यं जातम्, आहोस्विदेतन्न्यायाभावात् केवलन्यङ्कुशब्दप्रयोग इव न्यङ्क्वादिशब्दप्रयोगेऽपि पक्षद्वयेऽपि प्रत्येकं "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यस्यैव प्रवृत्त्या द्वैरूप्यं जातमिति । अव्युत्पत्तिपक्षस्यैवाश्रयणे तु यकारस्य पदान्तगत्वाभावेन "य्वः पदान्तात्०" [ ७. ४. ५. ] इत्यैदागमाभवनाद् "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यस्य त्वेतन्न्यायनिषिद्धत्वेनाप्रवृत्त्या नैयङ्कुचर्मणमिति रूपस्य कथमप्यभवनेन न्याङ्कुचर्मणमित्येकमेव रूपमव्युत्पत्तिपक्षे स्यात्, इत्येवमेतन्न्यायसद्भावः फलेन निश्चिक्ये ॥ इति । अत्रेदमुच्यते–अत्रैकं रूपमिष्टं रूपद्वयं वेति पूर्वं केनचित् प्रमाणेन निर्धारणीयम्–तदस्ति न वा ?, अस्ति चेत् तदाऽव्युत्पत्तिपक्ष एवाश्रीयताम्, "न्यङ्कोर्वा" [ ७. ४. ८. ] इत्यस्य चेह प्रवृत्तिः स्वत एव न स्यात्, ञ्णित्तद्धिताव्यवधानाभावात् । "य्वः पदान्तात्०" [ ७. ४. ५. ] इत्यत्र च न य्वो ञ्णित्तद्धितप्रत्ययाव्यवधानं निमित्तमसंभवात, तस्य चेह न्याङ्कुचर्मणमित्यत्राव्युत्पत्तिपक्षाश्रयणेनैव प्रवृत्त्यभाव इति । यदि च नैयङ्कुचर्मणमित्येवैकं रूपमिष्टं तर्हि व्युत्पत्तिपक्ष एवाश्रीयताम् । उभयविधं रूपमिष्टं चेत् पक्षद्वयमाश्रीयतामिति सर्वथा निर्वाहे सति न्यायाश्रयणमनावश्यकमेवेति न्याङ्कुचर्मणमिति रूपसिद्धिरूपेण फलेनायं न्यायो निश्चिक्ये इति कथनं निर्मूलमेव प्रतिभाति । न चैवं रीत्या 'नैयङ्कवम्, न्याङ्कवम्' इति रूपद्वयस्यापि पक्षद्वयाश्रयणेन सिद्धौ "न्यङ्कोर्वा" [ ७. ४. ८. ] इति सूत्रमपि किमर्थमनुष्ठीयते इति वाच्यम्, पक्षद्वयेऽपि रूपद्वयस्य साधुत्वलाभाय सूत्रसार्थक्यात् । कैश्चिन्न वैयाकरणैरत एवेदृशं सूत्रं नारभ्यतेऽपि, सर्वथा निर्मूलोऽयं न्याय इति प्रतिभाति, ततश्च तदर्थक्लिष्टकल्पना व्यर्थेति ॥ १८ ॥

## *अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति* ॥ १९ ॥

सि०—'अन् इन् अस् मन्' इत्येवमादयः शब्दा विधिसूत्रेषु पठ्यन्ते, तेषां च विशिष्टरूपोपादानविषयत्वात् तत्र *अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्* इति न्यायोपस्थित्याऽर्थवतामेव तेषां ग्रहणं स्यान्नानर्थकानामिति स्थिते तत्रानर्थकानामपि ग्रहणार्थं तन्न्यायापवादभूतोऽयं न्यायः पठ्यते । अस्यार्थः–'अन् इन् अस् मन्' एषां ग्रहणं येषु तानि शास्त्राणि–अनिनस्मन्ग्रहणानि, प्रयोजककर्तृभूतानि, अर्थवता–सार्थकेन स्वगृहीतरूपेण, अनर्थकेन–समुदायैकदेशतयाऽर्थपर्याप्तिरहितेन च तेन तेन रूपेण, तदन्ते विधिः–तदन्तविधिः, तम्, अन्नन्तादिषु विधानं, प्रयोजयन्ति–प्रवर्त्तयन्तीति । अत्र च "अभ्वादेरत्वसः सौ" [ १. ४. ९०. ] इति सूत्रस्थमभ्वादेरिति पदमेकदेशानुमत्या ज्ञापकमित्युक्तं तत्रैव सूत्रे बृहद्वृत्तौ । तथाहि–"अभ्वादेरिति किम् ? पिण्डं ग्रसते–पिण्डग्रः, चर्म वस्ते–चर्मवः *अर्थवद्ग्रहणे नानर्थकस्य* इत्येव सिद्धे 'अभ्वादेः' इति वचनम् *अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति* इति न्यायज्ञापनार्थम्, तेनात्रापि भवति–खरणाः खुरणाः" इति । अयमाशयः–"अभ्वादेरत्वसः०" [ १. ४. ९०. ] इत्यत्रास् सार्थक एव ग्रहीष्यते, स च 'अप्सराः' इत्यादावस्ति, 'पिण्डग्रः' इत्यादौ च 'ग्रस्' धातोरवयवभूतोऽस् समुदायैकदेशतयाऽनर्थक इति तस्येहास्ग्रहणेन ग्रहणं न स्यात्, *समुदायो ह्यर्थवान् तस्यैकदेशोऽनर्थकः* *अर्थवद्ग्रहणे नानर्थकस्य* इति न्यायाभ्यामिति तद्वर्जनार्थमिहाभ्वादेरिति पदं व्यर्थमेवेति व्यर्थीभूतं तदेकदेशानुमत्या [ स्थालीपुलाकन्यायेन ] संपूर्णन्यायमिमं ज्ञापयति । तथा चानर्थकस्याप्यसो ग्रहणे 'पिण्डग्रः, चर्मवः' इत्यादावपि दीर्घः स्यादिति तद्वारणाय अभ्वादेरिति वर्जनमावश्यकम् । फलं चास्य न्यायस्यासंशे 'खरणाः, खुरणाः' इति, 'अत्र खरस्येव नासिका यस्य खुर इव नासिका यस्येति चार्थे बहुव्रीहिसमासे "खर-खुरान्नासिकाया नस्" [ ७. ३. १६०. ] इति नसादेशे–खरणाः खुरणाः इति भवति, अत्र 'नस्'शब्दावयवस्यासोऽनर्थकत्वेऽपि प्रकृतन्यायबलेन तस्यापि तदन्तविधिप्रयोजकत्वे स्थितेऽसन्तत्वनिबन्धनो दीर्घोऽत्र सिद्धः । न च स्त्रियमस्यतीत्यर्थे 'स्त्र्यस्'शब्दस्यासन्तस्य दीर्घवारणार्थमभ्वादेरित्यस्य चारितार्थ्येन ज्ञापकत्वासम्भव इति वाच्यम्, यत एतावन्मात्रफलत्वे "अनसोऽत्वसः सौ" [ १. ४. ९०. ] इत्येव न्यासः कृतः स्यात्, येनास्धातुवर्जनं स्फुटमेव विशिष्य प्रतीयेतेति सामान्येन भ्वादिवर्जनवैयर्थ्यस्य तादवस्थ्यमेव स्यात्, यतश्च तथा न्यासमकृत्वा सामान्येन "अभ्वादेः" इति भ्वादिवर्जनमकारि तत् 'पिण्डग्रस्' इत्यादिवारणार्थमेव, तत्र चार्थवद्ग्रहणन्यायेनैव सिद्धिरिति तद्वैयर्थ्यं न्यायज्ञापनं विनाऽपनोदयितुमशक्यमेव । अथोदाहरणानि, तत्र अन् अर्थवान् यथा–'राजन्'शब्दे, अत्र हि राजिधातोः "उक्षि-तक्षि०" [ उणा० ९००. ] इत्यौणादिकेऽनि अन्मात्रस्य प्रत्ययत्वेन सार्थक्यम्, तस्य च पुंसि राजेति रूपम्, स्त्रियां च "स्त्रियां नृतोऽस्वस्रादेर्ङीः" [ २. ४. १. ] इति ङ्यां राज्ञीति । अनर्थकोऽन् यथा–अश्धातोः "षप्यशौभ्याम्" [ उणा० ९०३. ] इत्यौणादिके तनि–अष्टन् शब्दः, तस्य प्रियशब्देन सह बहुव्रीहौ प्रियाष्टा इति, इत्थं च "अनोऽस्य" [ २. १. १०८. ] इति सूत्रे उभयोरप्यनोर्ग्रहणे यथा सार्थकस्य राज्ञीत्यत्रानोऽकारस्य

लोपो भवति, तथा प्रियाष्टः पश्येत्यत्रानर्थकस्यापीति। एवम्– इन् सार्थको यथा–दण्डोऽस्यास्तीत्यर्थे दण्डशब्दात् "अतोऽनेकस्वरात्" [ ७. २. ६. ] इति इन्प्रत्यये दण्डीति। अनर्थको यथा–स्रगस्यास्तीत्यर्थे "अस्तपोमायामेधास्रजो विन्" [ ७. २. ४७. ] इति विनि स्रग्वीति, अत्र विन्प्रत्ययैकदेशभूतस्येनोऽनर्थकत्वं स्पष्टमेव, तथापि "इन्-हन्-पूष०" [ १. ४. ८७. ] इति सूत्रे उभयोरेवेनन्तत्वेन ग्रहणाद् दीर्घः सिद्ध्यति। अस् सार्थको यथा–आप्नोतेः "आपोऽप्सास०" [ उणा० ९६४. ] इत्यौणादिके असि धातोरप्सरादेशे च–'अप्सराः' इति, अत्र प्रत्ययत्वेनासः सार्थकत्वम् । अनर्थकोऽस् यथा–'खरणाः खुरणाः' इत्यत्रोक्तमेव । मन् सार्थको यथा–"स्यतेरीच्च वा" [ उणा० ९१५. ] इति मनि स्यतेरात ईत्वे च–सीमेति। अनर्थकश्चासौ यथा महतो भाव इत्यर्थे "पृथ्वादेरिमन् वा" [ ७. १. ५८. ] इति इमनि–महिमेति, महिमानमतिक्रान्तेत्यर्थे स्त्रियाम्–अतिमहिमेति, उभयत्राऽपि "मनः" [ २. ४. १४ ] इति ङीनिषेधः। "अभ्वादेरत्वसः सौ" [ १. ४. ९०. ] इति सूत्रस्थबृहन्न्यासरीत्या च अनिनादिवदतुरप्यनर्थकोऽपि तदन्तविधिं प्रयोजयतीति गम्यते । तथाहि–तत्रत्यो ग्रन्थः–"ननु *अनिनस्मन्* इत्यत्रातोरनिर्दिष्टत्वादनर्थकेन तदन्तविधेरप्रयोगाद् *अर्थवद्ग्रहणे नानर्थकस्य* इति न्यायात् 'कियान्' इत्यत्रैव दीर्घः प्राप्नोति न 'गोमान्' इत्यादाविति, नैष दोषः–अतुरनर्थकोऽपि तदन्तविधिं प्रयोजयति, मत्वादीनामुकारानुबन्धसामर्थ्यात्, अन्यथा तेषामपि शतृवद् ऋकारमेवानुबन्धं कुर्यात्"इति । अयमाशयः–'अन् इन् अस् मन्' एषां चतुर्णामिह न्याये समावेशादेषामेवानर्थकानां तदन्तविधिप्रयोजकता नान्येषामिति परिशेषन्यायाल्लभ्यते, तथा च अतुरिह सूत्रे निर्दिष्टः सार्थक एव यत्र स्यात् तत्रैवात्वन्तप्रयुक्तो दीर्घः स्यान्नान्यत्र, स च सार्थकः कियानित्यादावेव, तत्र हि किं प्रमाणमस्येत्यर्थे "इदं-किमोऽतुरिय् किय् चास्य" [ ७. १. १४८ ] इति अतुप्रत्यये किमः कियादेशे च–कियानिति भवति, तत्रातोः प्रत्ययरूपत्वेन सार्थकत्वम् । अनर्थकश्चातुर्यथा–गोमानित्यादौ, तत्र हि गावोऽस्य सन्तीत्यर्थे "तदस्यास्त्यस्मिन्निति मतुः" [ ७. २. १. ] इति मतुर्भवति, अत्र हि अतुः प्रत्ययैकदेश इति तस्यानर्थकत्वेन तत्र तदन्तविधेरभावादत्वन्तत्वाभावप्रयुक्तो दीर्घाभावः स्यादित्यतोऽतुरप्यनर्थकस्तदन्तविधिं प्रयोजयतीति स्वीक्रियते, तत्र च मानं मत्वादीनामुकारानुबन्धकरणमेव, उकारानुबन्धस्यैतदेव फलं यदतुग्रहणेनायमपि गृह्येत, नान्तादेशाद्यर्थं च शतृवदृकार एवानुबध्येतेति। ततः पुनस्तत्रैव [ प्रकृतसूत्रीयबृहन्न्यास एव ] शङ्कयित्वा समाहितम्–"ननु तथापि *तदनुबन्धकग्रहणेऽतदनुबन्धकस्य ग्रहणं न* इति [ स एवानुबन्धो यस्यासौ तदनुबन्धकः, स चासावन्यश्चानुबन्धो यस्य सोऽतदनुबन्धकः ] न्यायाद् यत्तदेतदो डावादेर्ग्रहणाप्रसङ्गः, क्तवतोरपि ककरानुबन्धसद्भावाद् ग्रहणाभावः, नैष दोषः–आनन्तर्यलक्षणेऽनुबन्धानुबन्धवतोः सम्बन्धे 'डावत्-क्तवत्'शब्दस्य डकार-ककारावनुबन्धौ प्रत्ययस्य न त्वतुशब्दस्य, अथवा डकार-ककारा-वनुबन्धौ प्रत्ययस्य न त्वतुशब्दस्य, ततश्च प्रत्ययैकदेशग्रहणादव्यापार एव पूर्वोक्तन्यायस्येति" इति । अयमर्थः–ज्ञापितेऽप्यतुशब्दस्यानर्थकस्यापि तदन्तविधिप्रयोजकत्वे यत्रातोरुकारमात्रानुबन्धकत्वं तत्रैवैतज्ज्ञापकसिद्धतदन्तविधिलब्धं कार्यं स्यात्, यत्र चाधिकानुबन्धकत्वं तत्र न स्यात् *तदनुबन्धकग्रहणे नातदनुबन्धकस्य* इति न्यायात्, तथा च "यत्तदेतदो डावादिः" [ ७. १. १४९. ] इति सूत्रविहितो डावादिरतुः, अनुबन्धानामनेकान्तत्वपक्षे स्वसमीपेऽनुबन्धे स्वावयवत्वारोपस्य स्वीकारात्, एकान्तत्वपक्षे च साक्षादेव डकारस्य तदनुबन्धत्वादधिकानुबन्धत्वमतोः, एवं क्तवतुप्रत्यये पक्षद्वयेऽपि ककारस्याधिकस्यानुबन्धत्वमिति पूर्वोक्तन्यायेन तस्याप्यतुग्रहणेनाग्रहणे 'यावान्, तावान्, एतावान्, गतवान्' इत्यादावत्वन्तत्वप्रयुक्तो दीर्घो न स्यादिति दोषोऽस्त्येवेति, अत्रोच्यते–उभयत्रपक्षे डकार-ककारावनुबन्धौ प्रत्ययस्य, इह चोक्तरीत्या [ अतुशब्दस्यानर्थकस्यापि ग्रहणरीत्या ] अतुशब्दस्य न प्रत्ययत्वमपि तु तदेकदेशपरत्वमपीति प्रत्ययमात्रग्रहणे प्रवर्त्तमानस्य पूर्वोक्तन्यायस्य [ *तदनुबन्धग्रहणे नातदनुबन्धकस्य* इति न्यायस्य ] इह विषय एव नेति नोक्तदोष इति ॥ १९ ॥

## *अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति* ॥ १९ ॥

त०—तदन्तविधिरित्यस्य ते–अनादयोऽन्ता येषां ते तदन्ताः, तेषु विधिस्तदन्तविधिरित्यर्थः । अर्थवता अनर्थकेनेत्यभेदे तृतीया, तत्पदार्थे तस्यान्वयः । अथवा लक्ष्यस्थम् 'अन्'-शब्दादिकं कर्तृ स्वान्ते विधिं प्रयुङ्क्ते करोति, तं सूत्रस्थानि अनादीनि प्रयोजयन्तीति विवक्षया प्रयोज्यकर्तरि तृतीया बोध्या। एतद्व्युत्पत्त्यनुसारमेव वृत्तावर्थः संक्षिप्य लिखितः । "अभ्वादेरत्वसः सौ" [ १. ४. ८०. ] इति सूत्रेऽभ्वादेरिति पदेनैकदेशानुमत्या न्यायोऽयं ज्ञाप्यते इत्युक्तं वृत्तौ । तस्यायमाशयः–न्याया हि सिद्धस्वरूपा एव, तेषां स्वशास्त्रे प्रवृत्तेरभ्यनुज्ञानार्थं ज्ञापकमाश्रीयते । तथा च यत्र न्यायेऽनेकेंऽशाः सन्ति तत्र यद्येकोऽपि स्वशास्त्रस्थेन केनापि वचनेन सूच्यते तर्हि तदीयः सर्वोऽप्यंशः स्वानुमतो बोध्यः । अत्र च विषये स्थालीपुलाक-

न्यायोऽनुग्राहकः, स चायं न्यायो लौकिकः, लोके यथा स्थालीस्थमेकं पुलाकं भक्तसिक्थं सिद्धं दृष्ट्वा सर्वे पुलाकाः सिद्धाः [ पक्वाः ] इति विज्ञायन्ते तथा कस्मिंश्चिद् वचनेंऽशतः प्रमाणिते सर्वं प्रमाणितं स्वीक्रियते । पाणिनीये तन्त्रे च "येन विधिस्तदन्तस्य" [ पा० सू० १. १. ७२. ] इति सूत्रशेषे महाभाष्ये वार्त्तिकरूपेण पठितोऽयं न्यायः, तथा च तन्मते वाचनिकत्वमेवास्य न ज्ञापकसिद्धत्वम् । नवीनाश्च "कार्मस्ताच्छील्ये" [ पा० सू० ६. ४. १७२. ] इति सूत्रेण 'कार्म' इति निपातनेनैकदेशानुमत्या न्यायमियं ज्ञापयन्ति । तेषामयमाशयः–'कर्मन्'-शब्देऽनोऽनर्थकत्वेन तत्र "अन्" [ पा० सू० ६. ४. १६७. ] इति सूत्रेणानो लोपाभावस्य प्राप्तस्याभावो निपातनेन विधीयते, तत्र यदि अन् सार्थक एव गृह्येत तर्हि 'कर्मन्'शब्दस्यान्नन्तत्वाभावेन लोपस्य प्राप्तिरेव नेति तदभावविधानार्थं निपातनमिदं व्यर्थमेवेति व्यर्थं तदिमं न्यायमेकदेशानुमत्या ज्ञापयतीति । परं तु "अन्" [ पा० सू० ६. ४. १६७. ] इति सूत्रे विशेष्यासत्त्वेनान्शब्दस्य स्वरूपमात्रबोधकत्वं, न तदन्तबोधकत्वमिति तत्रास्य न्यायस्य प्रयोजनाभावेन न तेन ज्ञापनं युक्तमिति परे वाचनिकमेवामुं मन्यन्ते । नागेशश्च भाष्ये वचनरूपेणायं पठित इति स्वीकृत्य अर्थवद्ग्रहणन्यायानित्यत्वमूलकममुं न्यायमाह । सर्वथा सर्वांशेऽत्र ज्ञापकमलभ्यमिति स्थालीपुलाकन्यायेन ज्ञापितमथवा वाचनिकमेवेमं सर्वे स्वीकुर्वन्तीति हृदयमिति ॥ १९ ॥

## *गा-मा-दाग्रहणेष्वविशेषः* ॥ २० ॥

सि०—*स्वं रूपं शब्दस्याशब्दसंज्ञा* इति न्यायेन शब्दस्य स्वरूपमात्रबोधकत्वे निर्णीते स्वरूपस्यापि बाह्यनिमित्तभेदात् क्वचित् कस्यचिदेव बोध इष्ट इति तद्व्यवस्थार्थं *लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्* *अदाद्यनदाद्योरनदादेरेव ग्रहणम्* *कृत्रिमाऽकृत्रिमयोः कृत्रिमस्यैव ग्रहणम्* इत्यादिन्याया उक्ताः, तेषामपि क्वचिदप्रवृत्तिबोधकोऽयं न्यायः । 'गा मा दा' इति धातुरूपत्रयस्य ग्रहणं येषु तानि गा-मा-दाग्रहणानि सूत्राणि तेषु लक्षणप्रतिपदोक्तन्यायादिकृतो विशेषो नाश्रीयतेऽपि तु सामान्येनैव तद्रूपाणां सर्वेषां धातूनां ग्रहणं भवतीति न्यायार्थः । तथा च गाग्रहणे "गाङ् गतौ" "गैं शब्दे" इत्येतौ द्वावपि ग्राह्यौ, माग्रहणे "मांक् माने" "मांङक् मान-शब्दयोः" "मेंङ् प्रतिदाने" इत्येते त्रयोऽपि, दाग्रहणे चाविशेषेणाग्रे प्रतिपाद्यमानाः षडपि दारूपाश्च गृह्यन्ते । अत्र च न्यायस्य त्र्यंशत्वाज्ज्ञापकत्रयं क्रमशः प्रकटयिष्यते । तत्र गांशे ज्ञापको "गायोऽनुपसर्गाट्टक्" [ ५. १. ७४. ] इति सूत्रे गातिं निषेद्धुं 'गाय' इति निर्देशः, अन्यथा "गोऽनुपसर्गाट्टक्" इत्युक्तेऽपि *कृत्रिमाकृत्रिम*-न्यायेन कृत्रिमस्य गायतेरेव ग्रहणादकृत्रिमस्य गातेर्ग्रहणाभावे



सिद्धे 'गाय' इति गुरुनिर्देशो वृथैव स्यात् । ज्ञापिते चास्मिन् न्यायेऽविशेषादुभयोरपि ग्रहणं स्यादिति गातेर्ग्रहणवारणाय 'गाय' इति निर्देशः सार्थकः । फलं चास्य गातेर्गायतेर्वा यङ्लुपि आशीःक्याति, ग्रामं गीतं वा जागेयादित्यत्रोभयोरपि "गा-पा-स्था-सा-दा-मा-हाकः" [ ४. ३. ९६. ] इत्येकारः सिद्धः, अन्यथा गायतेर्गारूपस्य लाक्षणिकत्वाद् गातेरकृत्रिमत्वाच्च *लक्षणप्रतिपदोक्त*न्यायेन *कृत्रिमाकृत्रिम*न्यायेन च ग्रहणं न स्यात् । अत्रांशे क्वचिदेतन्न्यायप्रवृत्त्यभावोऽपि, यथा "गस्थकः" [ ५. १. ६६. ] इत्यत्र ग इति सामान्यग्रहणेऽपि गायतेरेव ग्रहणम् ॥ १ ॥ माग्रहणेऽविशेषस्यानुज्ञापकं च "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इत्यस्य वृत्तौ–"मा इति मां-मांङ्-मेंङां ग्रहणम्" इत्युक्तिः, सा चैतन्न्यायमनुरुध्यैव युक्ता, अन्यथा *अदाद्यनदाद्योरनदादेरेव* *कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव* इति न्यायाभ्यां माग्रहणे मेंङ एव ग्रहणं प्राप्नोति न तु मात्योः । यदि *लक्षण-प्रतिपदोक्त*न्याय आश्रीयते तर्हि मात्योरेव ग्रहणं स्यान्न तु मेङः । तथा च त्रयाणां ग्रहणोक्तेरेतन्न्यायानुसरणं विनाऽयुक्तत्वमेव स्यात् । अनुज्ञाते चात्रांशे माग्रहणे "दो-सो-मा-स्थ इः" [ ४. ४. ११. ] इति सूत्रे सर्वेषामेवाविशेषेण ग्रहणे मात्योर्मेङश्च क्तेऽनेनेत्वे-मितः, मितवानिति सिध्यति । अस्याप्यंशस्यास्थिरत्वात् "मि-मी-मा-दामित् स्वरस्य" [ ४. १. २०. ] इत्यत्र माग्रहणेन सर्वेषां ग्रहणार्थं बहुवचनरूपो यत्नः सकलः । अस्यास्थिरत्वे हि मा इति सामान्यग्रहणेऽप्यविशेषात् सर्वेषां ग्रहणं स्यादेवेति तदर्थं बहुवचनरूपो यत्नो व्यर्थ एव स्यात् ॥ २ ॥ दांशे ज्ञापकं च–"दा-द्वधे-सि-सद-शदोरुः" [ ५. २. ३६. ] इत्यत्र धयतेः पृथगुक्त्या दाशब्देनेह दासंज्ञां प्रति नाग्रह इत्येव वक्तुं शक्येऽपि षडपि दारूपा ग्राह्या इत्युक्तिः, अयमाशयः–धयतेः पृथगुक्त्या दासंज्ञां प्रति नाग्रहः, तस्यापि दासंज्ञया ग्रहीतुं शक्यत्वादिति वक्तुं शक्यते, न तु सर्वेऽपि दारूपा ग्राह्या इति, तथा ग्रहणे *अदाद्यनदाद्योरनदादेरेव* इत्यादिबहूनां न्यायानां बाधकत्वात् । यच्च तथोक्तं तदेतन्न्यायानुरोधेनैवेति तदंशेऽपि [ दांशेऽपि ] न्यायोऽयमाचार्याणामभिमत इत्यनुमीयते । तथा च "प्राज्ज्ञश्च" [ ५. १. ७९ ] इत्यत्र ज्ञारूपसाहचर्याद् दारूपमेव प्रत्याग्रहो न तु दासंज्ञां प्रतीत्येतावन्मात्रं संसाध्य पश्चात् षण्णामपि दारूपाणामेतन्न्यायबलेन ग्रहणमभिलक्ष्य षड्भ्योऽपि तेभ्यो डो विहितः । यथा–"डुदांग्क् दाम् वा–धनप्रदः । दों–वृक्षप्रदः । देंङ्–पुत्रप्रदः, दांव्–केदारप्रदः । दैव्–भाजनप्रदः" इति । एतन्न्यायांशाभावे तु *अदाद्यनदाद्योः०* इति न्यायादन्येषां चतुर्णां ग्रहणं स्यान्न तु दांग्क्-दांवोः । यदि च *लक्षण-

**प्रतिपदोक्तयोः०* इति न्याय आश्रीयते तर्हि 'दों देङ् दैंव्'-वर्जानां त्रयाणामेव ग्रहणं स्यात्, *कृत्रिमाकृत्रिम*न्याया-श्रयणे चैषामेव [ दों, देङ्, दैंव्, इत्येषामेव ] ग्रहणं स्यान्न तु दाम्-दांम्क्-दांव्काम्। स्वीकृते च दाग्रहणेऽविशेषग्रहणे सर्वेषामेव दारूपत्वेन ग्रहणं भवति। यत्र च 'दा' इति संज्ञा समाश्रीयते, तत्र तु तत्संज्ञकानामेव ग्रहणमित्यन्यत् ॥ २० ॥**

## *गा-मा-दा-ग्रहणेष्वविशेषः* ॥ २० ॥

**त०**—अत्र चांशत्रयमित्युक्तं, तत्र चाद्यांश एव वस्तुतो ज्ञापकसिद्धः, अंशद्वयं तु वृत्त्यनुमतमेव, न तु तत्र ज्ञापकं किञ्चित्। तथा चैकदेशानुमतिद्वारा ज्ञापितस्यास्य न्यायस्य "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति सूत्रस्था वृत्तिः [ 'मा' इति मां-मेंङ्-माङां त्रयाणां ग्रहणमिति ] तन्न्यायलब्धार्थानुवादिका तदनुज्ञापिका वा, न तु ज्ञापिका, तत्र सिद्धवत्कृत्य तथा प्रदर्शनात्। "प्राज्ज्ञश्च" [ ५. १. ७९. ] इत्यत्र षण्णां ग्रहणं तु न वृत्त्या कण्ठत उक्तम्, तत्र हि "इह पूर्वसूत्रे च दारूपं गृह्यते, न संज्ञा ज्ञा-ख्यासाहचर्यात्" इत्येवोक्तम्, दारूपत्वेन सर्वेषां ग्रहणं, षण्णामुदाहरणं च तत्र न दृश्यते, तथापि प्रकृतन्यायेन तथोदाहर्तुं शक्यत इति न तावता तेन न्यायज्ञापनं समाश्रयितुं शक्यते। तथा चैकदेशे एव ज्ञापकमिति बोध्यम्। "गस्थकः" [ ५. १. ६६. ] इति सूत्रे गायतेरेव ग्रहणेन प्रकृतन्यायस्यानित्यत्वमित्युक्तं वृत्तौ, तदपि फलितार्थकथनमेव, न तु न्यायानित्यत्वे ज्ञापकम्। तत्र हि—"गाङः प्रत्यये शिल्पी न गृह्यते इति गायतेर्ग्रहणम्" इत्येवोक्तम्, न चैतावता न्यायानित्यत्वमाचार्यशब्दलभ्यम्, तथापि प्रकृतन्यायेनाविशेषादुभयोर्ग्रहणे प्राप्ते एकस्यैवग्रहणमिति प्रकृतन्यायाप्रवृत्तिफलमेवेति तेन न्यायानित्यत्वमनुमातुं शक्यत इति प्राचीनानामाशयः। वस्तुतस्तु तावता न न्यायस्यानित्यत्वमाचार्याभिमतमिति प्रतिपादयितुं शक्यते, प्रत्युत तत्रापि न्यायप्रवृत्तिस्वीकार एव, गाङो गत्यर्थत्वेन ततः समुत्पन्नेन प्रत्ययेन शिल्पी नाभिधातुं शक्यते, गमने शिल्पविषयाभावादिति गायतेरेव ग्रहणं, न तु गाङः, अन्यथाऽनित्यत्वमेवास्य न्यायस्योक्तं स्यात्। लघुन्यासकृता च शिल्पी न गम्यते इति प्रतीकमुपादाय—"शब्दशक्तिस्वाभाव्यात्" इत्युक्तं, न तु न्यायाप्रवृत्तिचर्चा कृता। तथाप्यप्रवृत्तिस्थलत्वेन तदुपदर्शयितुं शक्यत इत्येतावन्मात्रेण वृत्तौ तदुल्लेखः कृतः। "प्राज्ज्ञश्च" [ ५. १. ७९. ] इत्यत्र दासंज्ञा प्रत्याग्रहो न कार्य इत्युक्तिश्च वृत्तिकृतां *स्वं रूपं०*इति परिभाषया शब्दसंज्ञया संज्ञिन एव ग्रहणं प्रत्याग्रहो न कार्य इत्याशयका। तथा च स्वरूपग्रहणमेव, स्वरूपग्रहणे च स्वीकृते प्रकृतन्यायबलात् तत्राविशेषेण सर्वेषां ग्रहणं भविष्यति, तथा च तदुदाहरणस्थलमिदं न तु ज्ञापकमित्यावेदितमेव पूर्वम्। दारूपत्वं यद्यपि "दींङ् क्षये" इत्यस्यापि 'यबक्ङिति' भवति, तथा च सप्त संख्या भवति, न षडेव, तथापि तस्याकर्मकत्वेन कर्मणः परत्वं न संभवति "प्राज्ज्ञश्च" [ ५. १. ७९. ] इत्यत्र च कर्मणः परत्वमाश्रीयते इति तस्येह ग्रहणासम्भव इति षडेव दारूपा धातव उदाहृताः॥२०॥

## *श्रुता-ऽनुमितयोः श्रौतो विधिर्बलवान्* ॥ २१ ॥

**सि०**—श्रुतः—सूत्रे साक्षादेव शब्देनोच्यमानः, अनुमितः—कयाऽपि परिभाषया, केनापि प्रकरणेन वाऽधिकारवशाल्लब्धः, तयोः श्रुतानुमितयोरिति सम्बन्धे षष्ठी विध्यपेक्षा, अग्रे विधेर्निर्धार्यमाणत्वात्, विध्योरिति पदमर्थप्राप्तम्, तत्र च निर्धारणे षष्ठी। श्रुतस्यायं विधिरित्यर्थे श्रुतशब्दात् तस्येदम्" ६. ३. १६०. ] इत्यणि श्रौत इति साधुः। ततश्चायमर्थः पर्यवस्यति—श्रुतानुमितसम्बन्धिनोर्द्वयोर्विध्योः संभवतोर्मध्ये श्रुतसम्बन्धी विधिर्बलवत्त्वेनातिशयितो भवति, तथा च स एव विधीयते इति। अयं च न्यायो न्यायान्तरमूलकः, स च न्यायो जैमिनीयः "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति। 'श्रुतिः, लिङ्गं, वाक्यं, प्रकरणं, स्थानं, समाख्येति षट् प्रमाणानि अर्थनिर्णयायाश्रीयन्ते, तेषु परं प्रति पूर्वस्य बलीयस्त्वमर्थविप्रकर्षकृतम्' इति तदीयः सामान्योऽर्थः, व्याख्यास्यते चायं न्यायो विवरणे। अनेन न्यायेन लिङ्गापेक्षया श्रुतेः प्रत्यक्षश्रवणस्य बलवत्त्वं निर्णीतमेव। लिङ्गं चानुमानसाधकमेव, परिभाषया प्राप्तो ह्यर्थः लिङ्गानुमित एव, परिभाषा हि केनचिल्लिङ्गेनैव स्वकीयमर्थं विधिशास्त्रेषु बोधयन्ति। यद्यपि प्रकरणप्राप्तोऽर्थोऽनुमितार्थभिन्नः, अत एव लिङ्गाद् भेदेन प्रकरणस्य प्रमाणेषु निर्देशस्तथापि स्वमते श्रुतभिन्नतयाऽनुमितोऽर्थः सङ्कलित इत्यवगन्तव्यम्, तथा च नात्र ज्ञापकापेक्षा। प्राचीनैश्चात्र न्याये ज्ञापकमित्थं प्रदर्शितम्—"सत्ताकरं चास्य [ "ऋतां क्ङितीर्" ४. ४. ११६. इति ] सूत्रे "ऋतामृतः" इत्यकृत्वा ऋतामित्येव निर्देशः। तथाहि-ऋतामित्यस्य तावदृदन्तानामिति व्याख्या, इर् चादेशोऽनेकवर्णः, ततश्च "अनेकवर्णः०" [ ७. ४. १०७. ] इति सर्वस्य ऋदन्तधातोरिर् प्राप्नोति, इष्यते तु ऋमात्रस्यैव, तथा च "अनेकवर्णः०" [ ७. ४. १०७. ] इति परिभाषाया अवकाशनिरासाय "ऋतामृतः" इति निर्देष्टुं युक्तम्, यत् तु ऋतामित्येव निर्दिष्टं तदेतन्न्यायाशयात्, श्रुतस्य ऋत एवेर् भावी, न त्वनुमितस्य ऋदन्तस्येत्याशयैव" इति। अस्यायमाशयः—"ऋतां क्ङितीर्"[ ४. ४. ११६. ] इति सूत्रेण ऋकारस्यैवेरिष्टः, तदर्थं च यत्नान्तरं न कृतं, प्रकृतसूत्रन्यासे

च "विशेषणमन्तः" [ ७. ४. ११४. ] इति परिभाषाबलेन ऋकारान्तस्य समुदायस्य स्थानित्वम्, आदेशश्चानेकवर्ण इरिति "अनेकवर्णः सर्वस्य" [ ७. ४. १०७. ] इति परिभाषया सर्वस्य स्थाने स्यादिति तन्निवारणायास्य न्यायस्य सत्ताऽऽवश्यकीति न्यायमिममाक्षिपति, येन विना यदनुपपन्नं तेन तदाक्षिप्यते' इति न्यायात्"इति । अत्रेदं वक्तव्यं-यावदाचार्यस्य [ सूत्रकृतः ] किमपि तादृशं वचनं प्रमाणतया नोपन्यस्यते येन ऋकारमात्रस्येरादेशोऽभिमत इति तावत् केवलमनेन [ ऋतामिति ] निर्देशेन न्यायो ज्ञापयितुं न शक्यते, न्यायेन विना तादृशनिर्देशस्यानुपपद्यमानत्वविरहात् । तथा च न्यायज्ञापनाय "किरो लवने" [ ४. ४. ९३. ] इत्यादयो निर्देशा एवोपन्यसनीया यद्यवश्यं ज्ञापकनिर्देशाग्रहः स्यात्, तथा हि– "ऋतां क्ङितीर्" [ ४. ४. ११६. ] इति प्रकृतनिर्देशे सति 'किरः' इत्यादयो निर्देशा नोपपद्यन्ते, तथा निर्देशे समस्तस्य धातोरिरादेशप्रसङ्गादिति तथा निर्देशोऽनुपपन्नः सन् ऋकारमात्रस्यादेशलाभाय प्रकृतन्यायं ज्ञापयितुं प्रभवेत् । ज्ञापिते चास्मिन् न्याये श्रुतस्य ऋकारस्यैवेर्विधिर्भवति, न त्वनुमितस्य ऋदन्तस्य, ऋदन्तस्यानुमितत्वं च "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषालभ्यत्वेनैव, सा हि परिभाषा विशेषणरूपं लिङ्गमभिलक्ष्य तादृशमर्थं बोधयतीति तल्लभ्यस्यार्थस्यानुमितत्वम्, ततोऽनुमितस्य ऋदन्तस्य सम्बन्धी विधिः श्रुतस्य ऋकारस्य सम्बन्धिनो विधेरपेक्षया निर्बल इति न भवति, किन्तु ऋकारस्यैव भवतीति स निर्देशः [ 'किरः' इति निर्देशः ] उपपद्यते । एवं 'तीर्णम्' इत्यादयोऽपि प्रयोगाः सिध्यन्ति । अयं च न्यायोऽनित्य इति प्राचीना आहुः । अनित्यत्वफलं चेत्थं वर्णयन्ति–"अस्य चासार्वत्रिकत्वात् "मनोरौ च वा" [ २. ४. ६१. ] इत्यत्र वाशब्दो ङीप्रत्यये पूर्वाधिकारादनुवृत्ते सम्बध्यते, न त्वौकारे श्रुते, तेन मनोर्भार्या धवयोगे "मनोरौ च वा" [ २. ४. ६१. ] इति वा ङ्यां, ङीयोगे औदैतोश्च–मनावी, मनायी, मनुरिति त्रैरूप्यं सिद्धम्, औ चेत्यस्य वाशब्दसम्बन्धने तु ङीप्रत्ययस्य नित्यमेव भवनात्-मनावी, मनायी, मन्वी इति त्रैरूप्यं स्यात्" इति । अस्यायमाशयः–"मनोरौ च वा" [ २. ४. ६१. ] इति सूत्रे औकार एव श्रुतो ङी च प्रकरणलब्धत्वादनुमितः, तत्सम्बन्धिविधिना सह वाशब्दार्थस्य सम्बन्धो न स्याद् यदि प्रकृतन्यायोऽनित्यो न स्वीक्रियेत । तथा च ङीविधानं नित्यमेव स्यात्, औकारैकारविधानमेव विकल्पे न स्यादिति प्रकृतन्यायस्यानित्यत्वमाश्रित्य ङ्या सहापि विकल्पार्थसम्बन्धोऽभिप्रेय इति तदभावोऽपि [ङ्या अभावोऽपि] पक्षे सिध्यतीति। अत्रेदमुच्यते–श्रौतसम्बन्धानुमितसम्बन्धयोर्विध्योः परस्परविरोधे प्राप्ते हि तन्निर्णयाय श्रौतविधेर्बलवत्त्वबोधनाय न्यायोऽयं प्रवर्त्तेत, इह च श्रौतौकारविधानस्यानुमितङीविधानस्योभाभ्यामर्थाभ्यां विकल्पार्थसम्बन्धस्य च परस्परविरोधाभावेन प्रकृतन्यायप्रवृत्तेरेवाभावान्नास्ति न्यायानित्यत्वाश्रयणफलमिति । प्रत्युत "मनोरौ च वा" इत्यत्र चकारेण पूर्वानुवृत्तैकारेण सह ङ्यपि समुच्चीयत इति औकारैकाराभ्यां सहैव ङ्यपि समुच्चित इति सन्नियोगशिष्ट इति*सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः* इति न्यायेनौकारैकारादेशाभावे ङ्याः प्रवृत्तिर्नैव स्यादिति तदर्थं न्यायानित्यत्वाश्रयणमनावश्यकमेवेति । किञ्च न लक्ष्यदर्शनमात्रेणानित्यत्वं भवति, किन्तु तज्ज्ञापनार्थमपि प्रमाणमपेक्ष्यते, इत्यनित्यत्वज्ञापकप्रमाणानुपन्यासादप्यनित्यत्वमाश्रयितुमयुक्तमिति । *निर्दिश्यमानस्यैवादेशाः स्युः* इत्यपि न्यायान्तरमन्यैः स्वीक्रियते, तत्फलं चेत्थं वर्ण्यते यथा–"यस्वरे पादः०" [ २. १. १०२. ] इत्यत्र पाद इत्यस्य पादन्तस्येत्यर्थः, स चार्थोऽधिकारलब्धस्य 'नाम्नः' इति पदस्य विशेषणसामर्थ्याल्लब्धः "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषासामर्थ्यात्, ततश्च पदादेशस्यानेकवर्णत्वात् "षष्ठ्यान्त्यस्य" [ ७. ४. १०६. ] इति परिभाषां बाधित्वा "अनेकवर्णः सर्वस्य" [ ७. ४. १०७. ] इति परिभाषया पादन्तस्य नाम्नः सर्वस्य पद्भावः प्राप्नोति, इष्यते तु 'पाद्' इत्येतावत एव, तच्च प्रकृतन्यायसाध्यम्, तस्यैव [ पाच्छब्दस्यैव ] सूत्रे निर्देशात् । यथा द्वौ पादावस्येत्यर्थे बहुव्रीहौ द्विपादिति "पात् पादस्याहस्त्यादेः" [ ७. ३. १४८. ] इत्यनेन पादस्य पाद्भावात्, ततष्टायां 'द्विपदा' इति, अत्र "यस्वरे पादः०" [ २. १. १०२. ] इत्यनेन 'पाद्' इत्येतावन्मात्रस्य पदादेशः । किन्त्वयमपि न्यायः [ *निर्दिश्यमानस्यादेशाः स्युः*इति ] प्रकृतन्यायान्तर्भूत एव न तु पृथग्भूतः, तदर्थस्याप्यनेन संग्रहात् । कथमिति चेत्? इत्थम्–"यस्वरे पादः०" [ २. १. १०२. ] इत्यत्र पाद इति श्रूयते, 'नाम्नः' इति पदं च पूर्वाधिकारानुवृत्तम्, तच्च विशेष्यम्, 'पादः' इति च विशेषणमिति तद्विशेष्यबलादिह "विशेषणमन्तः" [ ७. ४. ११३. ] इति न्यायात् पादन्तस्येत्यर्थो लभ्यत इति तत्कृतं पदादेशविधानमनुमितेन सम्बद्धमिति प्रकृतन्यायेन श्रौतविधेर्बलवत्त्वबोधनादेव श्रुतस्य पाद एवादेशः सेत्स्यतीति तदर्थोऽनेन संगृहीत इति तदंशभूत एवायं न्याय इति स्वीकर्त्तव्यम् । अंशत्वं चास्य [ निर्दिश्यमानन्यायस्य ] तद्व्याप्यतया । तथाहि–प्रकृतन्यायः [ श्रुतानुमितन्यायः ] आदेशविधौ प्रत्ययादिविधौ च सर्वत्र प्रवर्त्तते, निर्दिश्यमानन्यायश्च केवलमादेशविधावेवेति तस्य व्यापकत्वमस्य व्याप्यत्वमिति तदंशभूतत्वमस्य स्पष्टमेवेति प्राचीनाः । वस्तुतस्तु न तेन न्यायेनास्य [ निर्दिश्यमानन्या-

यस्य ] गतार्थता सम्भवति, भिन्नविषयत्वात्, यत्र हि श्रुतस्यानुमितस्य च स्वातन्त्र्येण पृथगुपस्थितिस्तत्रैव श्रुतानुमितन्यायावसरात्, "ऋतां क्ङितीर्" [ ४. ४. ११६. ] इत्यादौ हि ऋदन्तानां धातूनामृकारस्य च पृथगुपस्थितिर्नास्ति, ऋतामित्यनेन हि पदेन धातुविशेषणभूतेनैवार्थ उपस्थाप्यते, न तु स्वातन्त्र्येण ऋकार इति तत्रोभयोर्विध्योः प्राप्त्यभावेन स्पर्धाभावाद् बलाबलविचारस्यायुक्तत्वात् प्रकृतश्रुतानुमितन्यायाप्रवर्त्तनात्; तत्र हि *निर्दिश्यमानस्यादेशाः स्युः*इति न्यायस्यैत्र विषयात्, अत्र हि ऋकारस्य स्वातन्त्र्येणार्थोपस्थापकत्वाभावेऽपि निर्दिश्यमानत्वाक्षतेः । ननु तर्हि *श्रुतानुमित*न्यायस्य विषयः क इति चेच्छृणु-"त्रि-चतुरस्तिसृ-चतसृ स्यादौ" [ २. १. १. ] इत्येवमादीनि सूत्राणि तन्न्यायप्रवृत्तियोग्यानि, तथाहि-तत्र स्त्रियामिति पूर्वानुवृत्तं पदं श्रुताभ्यां त्रि-चतुर्शब्दाभ्यामेव सम्बन्ध्यते, न तु 'त्रिचतुर्'शब्दयोर्विशेषणत्वमहिम्ना लब्धेन तदन्तेन स्यादिप्रकृतिना, अत एव प्रियास्तिस्रो यस्य स 'प्रियतिसा पुमान्' इत्यादौ तिस्रादेशो भवति, प्रियास्त्रयो यस्याः सा स्त्री-'प्रियत्रिः' इत्यादौ तिस्रादेशो न भवति । अत एव तस्य सूत्रस्येदं व्याख्यानम्-'त्रि-चतुर्' इत्येतयोः स्त्रीलिङ्गे वर्त्तमानयोस्तत्सम्बन्धिन्यसम्बन्धिनि वा स्यादौ, इत्यादि । तत्र च स्त्रियामित्यनुवर्त्तते इति प्रतीकमुपादाय न्यासकारेणोक्तम्-"एतच्च श्रुतत्वात् त्रिचतुर इत्यस्यैव विशेषणम्" इति । तथा चेदृशेऽर्थ एव प्रकृतन्यायप्रवृत्तिः, तत्र हि श्रुतस्य 'त्रिचतुरः' इत्यस्य, अनुमितस्य तदन्तस्य च स्यादिप्रकृतित्वदर्शनादुभयोः स्वातन्त्र्येण स्त्रियामित्यनेन सम्बन्धयोग्यतास्ति, न तथेह ऋदन्तानामृकारस्य च पृथक् २ आदेशसम्बन्धयोग्यताऽस्तीति विभावनीयं सुधीभिरिति शिष्टं विवरणे स्पष्टम् ॥ २१ ॥

## *श्रुता-ऽनुमितयोः श्रौतो विधिर्बलवान्* ॥ २१ ॥

त०—अयं न्यायो जैमिन्युक्त-"श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" [ पूर्वमीमांसायां तृतीयाध्याये ३यपादे १४ चतुर्दशं सूत्रम् ] इति सूत्ररूपन्यायमूलकः । इदं च सूत्रं किञ्चित् प्रकृतार्थोपयोगितयाऽन्यत्र चोपयुज्यमानतया संक्षेपेण व्याख्यायते-श्रुति-लिङ्गादीनि षट् प्रमाणानि मीमांसायां विनियोजकानि [ अङ्गाङ्गित्वरूप-विनियोगबोधकानि ] कथ्यन्ते । तत्र यत्रैकस्य वस्तुनः प्रमाणाभ्यां पदार्थद्वयसम्बन्धो बोध्यते, स चासंभवः, एकस्य युगपत् पदार्थद्वयेन सम्बन्धासम्भवात्, तत्रैकेनापरस्य बाधोऽवश्यं वक्तव्यः । स च बलवता दुर्बलस्य भवतीति स्थिते दौर्बल्यबोधकमिदं जैमिनिसूत्रम् । अत्र पारदौर्बल्यमित्यत्र परमेव पारमित्यर्थात् परशब्दः स्वार्थिकाणप्रत्ययान्तः । श्रुति-लिङ्गादीनां समवाये-एकत्रोपनिपाते, परस्य-एतत्सूत्रपठितेषु परस्य[ पूर्वपठितापेक्षया ] दौर्बल्यं दुर्बलत्वमित्यर्थः । तत्र निरपेक्षो रवः-श्रुतिः १, स्वकरणीये सम्बन्धबोधे प्रमाणान्तरापेक्षाहीनः शब्द इह श्रुतिशब्देनोच्यते; शब्दसामर्थ्य-लिङ्गम् २, शब्दस्यार्थप्रकाशनसामर्थ्यं लिङ्गमित्यर्थः, यदाहुः-"सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते ।" इति; परस्पराकाङ्क्षावशात् क्वचिदेकस्मिन् विषये पर्यवसितानि पदानि-वाक्यम् ३; परस्पराऽऽकाङ्क्षा-प्रकरणम् ४; समानदेशत्वं-स्थानम् ५, अयमेव क्रमोऽप्युच्यते; यौगिकः शब्दः-समाख्या ६; इति हि तेषां षण्णां स्वरूपम् । एषामुदाहरणादीनि विरोधस्थलादीनि च मीमांसान्यायप्रकाशादौ विलोकनीयानि । इह च सूत्रव्याख्यामात्रस्यापेक्षितत्वात् तन्मात्रमुच्यते । तदिदं श्रुत्यादिलक्षणं कारिकयेत्थं सङ्गृहीतं चक्रवर्त्तिभट्टाचार्येण—

"अभिधातुं पदेऽन्यस्मिन् निरपेक्षो रवः श्रुतिः ।
सर्वत्रावगता शक्तिर्लिङ्गमित्यभिधीयते ॥
संहत्यार्थं ब्रुवद् वृन्दं पदानां वाक्यमुच्यते ।
प्रधानवाक्यस्याङ्गोक्त्याऽऽकाङ्क्षा प्रकरणं मतम् ॥
स्थानं समानदेशत्वं, समाख्या यौगिको रवः ॥"इति ।

पूर्वस्य बलीयस्त्वं परदौर्बल्यकृतम्, तत्र परदौर्बल्ये कारणमुक्तम्-अर्थविप्रकर्षादिति; तस्यायमाशयः-साक्षाद्विनियोजिका श्रुतिः, सा हि अङ्गत्वेन विनियोगाय न किञ्चिदन्यदपेक्षते, लिङ्गादीनि श्रुतिं कल्पयित्वा विनियोजकानीति यावत्, तैः क्रमशः श्रुतिः कल्प्यते तावत् श्रुत्या विनियोगः क्रियतेऽर्थेन सह सन्निकर्षात्, लिङ्गादीनि तु क्रमशोऽर्थाद् विप्रकृष्टानि-लिङ्गं श्रुत्यन्तरितम्, वाक्यं द्व्यन्तरितम्, प्रकरणं त्र्यन्तरितम्, स्थानं चतुरन्तरितम्, समाख्या तु पञ्चान्तरितेति क्रमाद्दुर्बलत्वं परेषाम् । तदेतदुक्तम्—

"एक-द्वि-त्रि-चतुष्पञ्चवस्त्वन्तरकारितम् ।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनां प्रतीयते ॥
बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा ।
मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया ॥"इति ।

इदं सर्वं जैमिनीयन्यायमालाविस्तरे मीमांसान्यायप्रकाशे च स्पष्टम् । प्रकृतमनुसरामः-श्रुतिबोधितसम्बन्धस्य लिङ्गादिबोधितसम्बन्धादनुमितरूपात् प्राबल्यं यन्मीमांसकादिसमयसिद्धं तदेवानेन न्यायेनानूद्यते, न तु कश्चिदपूर्वोऽर्थः प्रकाश्यत इति नास्त्यत्र ज्ञापकान्तरापेक्षेति । यद्यप्येतन्न्यायानुसारं लिङ्गरूपप्रमाणागत एवार्थोऽनुमितः, प्रकरणप्राप्तश्च तस्मात् पृथक्, तथापि अनुमितपदं श्रुतिभिन्नप्रमाणप्राप्तार्थपरमिति स्वीकर्त्तव्यं, तदुक्तं वृत्तावपि । यच्च ज्ञापकमिहोपन्यस्तं प्राचीनैः, तच्च द्विधा खण्डितमेव वृत्तावेव । सत्येव ज्ञापकापेक्षणे वृत्तिनिर्दिष्टज्ञापका-

न्तरमेवानुसर्त्तव्यं न्यायस्य स्वमतसिद्धत्वप्रतिपादनाय ॥ अथ *निर्दिश्यमानस्यादेशाः स्युः *इति न्यायो विचार्यते । अस्य फलं तु वृत्तावुक्तमेव, ज्ञापकं च नोक्तमस्य न्यायस्य प्रकृतन्यायेऽन्तर्भावस्य करिष्यमाणत्वात् । यदि च वृत्तिशेषदर्शितदिशाऽस्य न्यायस्य न प्रकृतन्यायगतार्थत्वं तर्हि ज्ञापकमप्यत्र अन्वेषणीयमेव । तच्चेत्थं लभ्यते–"यस्वरे पादः०"[ २.१.१०२. ]इत्यादौ 'पाद्'शब्दस्तदन्तस्योपस्थापकोऽपि, ततः परा स्थानार्था विभक्तिः स्वप्रकृतिमेव स्वार्थेन योजयति, ततश्च विधेयेन सह षष्ठीप्रकृतेरेव सम्बन्धो न तु तदन्तस्यानुच्चारितस्य "उच्चारित एव शब्दः प्रत्यायको नानुच्चारितः"इति न्यायसहकारात् । अथवा 'पादः' इत्यादौ सर्वत्र स्थानिनस्तन्त्रेण निर्देशः, तथा च पादन्तस्य पाद आदेशो भवतीत्यर्थेन*निर्दिश्यमानस्यादेशा भवन्ति*इति न्यायः फलतः सेत्स्यति । अथवा "किरो लवने"[ ४. ४. ९३. ] इत्यादयो निर्देशा एव प्रकृतन्यायज्ञापकाः, अन्यथा "ऋतां क्ङितीर्" [ ४. ४. ११६. ]इत्यनेन ऋदन्तस्य सम्पूर्णस्य स्थाने इरादेशे निर्देशासंगतिः स्पष्टैव । न च पूर्वमिदं ज्ञापकं *श्रुताऽनुमितयोः*इति न्याये योजितमिति वाच्यम्, "ऋतां क्ङितीर्" [ ४. ४. ११६. ]इत्यस्य *श्रुतानुमित*न्यायज्ञापकापेक्षया प्रकृतज्ञापकस्योपन्यस्तत्वात् । वस्तुतस्तु "ऋतां क्ङितीर्" [ ४. ४. ११६. ]इत्यत्र *श्रुतानुमित*न्यायस्य न प्रसरोऽपि तु *निर्दिश्यमान*न्यायस्यैवेति वृत्तिशेषे निर्णीतत्वेनास्य[ 'किरो लवने' इति निर्देशस्य ]प्रकृतन्यायज्ञापकत्वस्यैवौचित्यात् । तथा च *निर्दिश्यमान*न्यायं विनाऽनुपपद्यमानः 'किरः' इत्यादिनिर्देशस्तन्न्यायस्य ज्ञापनायालमिति स एव ज्ञापकत्वेनादरणीयः । अत्र निर्दिश्यमानं–सूत्रे उच्चार्यमाणम्–उच्चार्यमाणसजातीयमेव, उच्चार्यमाणावयवरूपमेव चेति बोध्यम् । सूत्रे उच्चार्यमाणस्य कार्ययोगित्वाभावादुच्चार्यमाणसजातीयपर्यन्तानुधावनम् । यत्र "षष्ठ्यान्त्यस्य"[ ७. ४. १०६. ]इति परिभाषादिबलादुच्चार्यमाणसजातीयस्यापि कार्यं न भवति तदर्थमुच्चार्यमाणावयवरूपमेव चेति पक्षान्तरोपादानमिति विवेकः । उच्चार्यमाणसाजात्यं तु समानानुपूर्वीकत्वमेव, तथा च सूत्रोच्चार्यमाणसमानानुपूर्वीकस्यैव क्वचित् तदवयवरूपस्यैव वा आदेशो न तु प्रमाणान्तरेण प्रतीयमानस्येति फलति । तथा च प्रतीयमानस्य कार्याभावबोधकोऽयं न्यायः, तथा च निर्दिश्यमानत्वं शास्त्रान्तरासहकारेण षष्ठीप्रकृतिजन्योपस्थितिविषयताश्रयत्वमिति फलति । "यन्स्वरे पादः०" [ २. १. १०२. ]इत्यादौ पादन्तस्येत्यर्थो "विशेषणमन्तः" [ ७. ४. ११३. ]इति शास्त्रसहकारेणैवोपतिष्ठतीति तत्सहकारेण लब्धोऽर्थो न निर्दिश्यमानोऽपि तु 'पादः' इति षष्ठीप्रकृति'पाद्' इत्यानुपूर्वीरूप एव निर्दिश्यमान इति तस्यैवादेशो भवति, एवम् *आगमा यद्गुणीभूताः*इति न्यायेन लब्धोऽर्थोऽपि न निर्दिश्यमान इति तन्न्यायसहकारेणाऽऽगमसहितपिबतेः पिबतिग्रहणेन ग्रहणे तस्य[आगमसहितस्य]पिबादेशो न भवति । यत्र च ह्रस्वस्योच्चारणे दीर्घस्यापि कार्यं भवति तत्र स्वसंज्ञाबोधकशास्त्रसहकारेण दीर्घस्योपस्थितिरिति शास्त्रान्तरासहकारेणोपस्थितिविषत्वाभावात् तादृशस्थले दीर्घस्य निर्दिश्यमानत्वं न स्यात्, यथा–"ईश्वाववर्णस्यानव्ययस्य" [ ४. ३. १११. ] इत्यादाविति न शङ्क्यम्, तत्र वर्णग्रहणाज्जातिपक्षाश्रयणाद् वा दोषाभावात् । ननु शास्त्रान्तरसहकारेणोपस्थितिविषयस्य निर्दिश्यमानत्वाभावे देवीमञ्चतीत्यर्थे देवीशब्दस्यान्तस्य "सर्वादिविष्वग्देवाड्डद्रिः क्वचौ" [ ३. २. १२२. ] इति डद्र्यादेशो न स्यात्, तत्र हि क्वचाविति सप्तम्या निर्देशादव्यवहितपूर्वस्य "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ] इति परिभाषाबलाद् बोधे सूत्रे देवशब्दे श्रूयमाणायाः पञ्चम्याः षष्ठीप्रकल्पने देवशब्देन च देवीशब्दस्योपस्थितिः*नामग्रहणे लिङ्गविशिष्टस्यापि* इति न्यायरूपशास्त्रान्तरसहकारेणैवेति शास्त्रान्तरासहकारेणोपस्थितिविषयत्वाभावादिति चेत् ? अत्रोच्यते–षष्ठीप्रकृतिविशिष्टत्वं निर्दिश्यमानत्वम्, वैशिष्ट्यं च स्वजन्योपस्थितिविषयत्व-स्वजन्योपस्थितिविषयपूर्ववर्णाघटितत्वैतदुभयसम्बन्धेन, तथा चात्र पक्षे शास्त्रान्तरासहकारेण षष्ठीप्रकृतिजन्योपस्थितिविषयतायाः परित्यागेन प्रकृते दोषाभावः । "विशेषणमन्तः" [ ७. ४. ११३. ] *आगमा यद्गुणीभूताः०* इति शास्त्रद्वयसहकारेणोपस्थितस्य तदन्तरूपस्यागमसहितरूपस्य वार्थस्य व्यवच्छेदायैव हि शास्त्रान्तरासहकारेणेति निवेशितमासीत्, तस्य चार्थस्य प्रकृतपरिष्कारेणैव व्यवच्छेदस्य कृतत्वात्, तथा हि–'द्विपदा' इत्यादौ तदन्तविधिना 'द्विपाद्' इति समुदायस्य पदादेशः प्राप्तः स वारणीयः, तत्र षष्ठीप्रकृतिविशिष्टत्वं 'पाद्' इत्यस्यैव, न तु द्विपादित्यस्य, षष्ठीप्रकृतिपाद्शब्दजन्योपस्थितिविषयः 'पाद्' इति, तत्पूर्ववर्णो द्विशब्दघटकेकारः, तदघटितत्वाभावाद्, इति न तस्य निर्दिश्यमानत्वम्; एवम् 'अपिबद्' इत्यत्र *आगमा यद्गुणीभूताः०* इति न्यायवशाद् यद्यपि "श्रौति-कृवु-धिवु०" [ ४.२.१०८. ] इति सूत्रघटकषष्ठीप्रकृतिविशिष्टत्वम् 'अपा'इत्यस्यापि तथापि तत्र वैशिष्ट्यघटकद्वितीयसम्बन्धाभावान्न पिबादेशः, तथा हि–पाशब्दः षष्ठीप्रकृतिः, तज्जन्योपस्थितिविषय'पा'शब्दपूर्ववर्णाऽऽगमविहिताकारघटितत्वेन तदघटितत्वाभावात् । तथा च "विशेषणमन्तः" [७.४. ११३.] *आगमा यद्गुणीभूताः०* इत्युभयशास्त्रसहकारेणोपस्थितार्थस्य व्यवच्छेदः प्रकृतपरिष्कारेण सिद्ध इति शास्त्रान्तरासहकारेणोपस्थितिविषयत्वनिवेशे फलाभावेन *नामग्रहणे लिङ्गविशिष्टस्यापि* इति न्यायसहकारेणोपस्थितिविषयदेवीशब्दस्य निर्दिश्यमानत्वे बाधाभावात् तस्याप्यन्तस्य डद्र्यादेशः सिद्ध इति । अपरे तु–एवं निर्दिश्यमानत्वपरिष्कारेऽपि 'सजुषः सजूः–सजूःसजूः' इत्यादौ

"सजुषः" [ २. १. ६२. ] इति सूत्रनिर्दिष्टषष्ठीप्रकृतिविशिष्टत्वं पूर्वस्य सजूःशब्दस्य न स्यात्, पूर्वोक्तवैशिष्ट्यनियामकद्वितीयसम्बन्धाभावादिति तद्दोषपरिहाराय 'षष्ठीप्रकृतिविशिष्टत्वं निर्दिश्यमानत्वम्' इत्यत्र वैशिष्ट्यनियामकसम्बन्धद्वयमित्थमाहुः—स्वजन्यशाब्दबोधीयविषयताश्रयत्व-स्वजन्यशाब्दबोधीयविषयताश्रयाघटितत्वोभयसम्बन्धेनेति, तथा चोभयोः पृथगेव निर्दिश्यमानत्वमिति न दोषः । अन्ये तु—देवीमव्रति—'देवद्र्यङ्' इत्यत्र दोषवारणाय निर्दिश्यमानत्वमन्यथैव परिष्कुर्वन्ति—षष्ठीप्रकृतिविशिष्टत्वं निर्दिश्यमानत्वम्, वैशिष्ट्यं च स्वजन्योपस्थितिविषयत्व-स्वजन्योपस्थितिविषयताश्रयविशिष्टवर्णाघटितत्वैतदुभयसम्बन्धेन, तत्र सम्बन्धघटकवैशिष्ट्यं च—स्वसमभिव्याहृतत्व-स्वप्रकृतिकषष्ठीप्रत्ययेतरत्वोभयसम्बन्धेन, देवीत्यत्र स्वं—देवशब्दः, तज्जन्योपस्थितिविषयताश्रयो देवः, तद्विशिष्टत्वमीकारस्य नास्ति, स्वसमभिव्याहृतत्वसत्त्वेऽपि स्वप्रकृतिकषष्ठीप्रत्ययेतरत्वाभावादिति । नन्वेवमपि 'जराया जरा—जराजरा, जराजरसौ' इत्यत्रोपस्थितीयविषयताश्रयः पूर्वो जराशब्दः, तद्विशिष्ट उत्तरजराजकारः, तद्घटितत्वादुत्तरस्य निर्दिश्यमानत्वाभावेन जरसादेशो न स्यात्, न च प्रकृतिवैशिष्ट्यघटकद्वितीय[ स्वजन्योपस्थितीयविषयताश्रयविशिष्टवर्णाघटितत्वरूप ]सम्बन्धस्य स्थाने स्वजन्योपस्थितीयविषयताश्रयावधिकपूर्ववर्णाघटितत्वरूपसम्बन्धस्य निवेशादुत्तरस्य जराशब्दस्य निर्दिश्यमानत्वमक्षतमिति वाच्यम्, त्रिशब्दादाचारक्विबन्तात् कर्तरि क्विपि तागमे ततः षष्ठ्या बहुवचने आमि त्रितामित्यादावुपस्थितीयविषयताश्रयस्त्रिशब्दः, तदवधिकपूर्वो वर्ण उदासीनः, तदघटितत्वं त्रिशब्दस्येति तस्य निर्दिश्यमानत्वेन त्रयादेशापत्तेः । अथ स्वजन्योपस्थितीयविषयताश्रयत्व-स्वजन्योपस्थितीयविषयताश्रयविशिष्टवर्णाघटितत्वोभयसम्बन्धेन षष्ठीप्रकृतिविशिष्टत्वं तत्त्वम्, वैशिष्ट्यं च स्वावधिकपूर्वत्व-स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयत्वैतदन्यतरसम्बन्धेन, 'जराजरसौ निर्जरसौ' इत्यादौ समुदायस्य 'व्याघ्रपात्पदः' इत्यादौ पूर्वपाच्छब्दस्य च निर्दिश्यमानत्वाभावाय स्वावधिकपूर्वत्वरूपप्रथमसम्बन्धनिवेशः, त्रितामित्यादौ तागमविशिष्टे निर्दिश्यमानत्वाभावाय उद्देश्यताघटितो द्वितीयसम्बन्ध आदृत इति सर्वमवदातम् । नन्वेवमपि प्रतिषिचतीत्यादौ नागमविशिष्टस्य *तन्मध्यपतित*न्यायेन 'सिच्'धातुत्वेऽपि सिज्निष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयो नागमः, तद्घटितत्वेन स्वजन्योपस्थितीयविषयताश्रयविशिष्टवर्णाघटितत्वरूपद्वितीयसम्बन्धाभावेन निर्दिश्यमानत्वाभावात् "स्था-सेनि-सेध-सिच०" [ २. ३. ४०. ] इति षत्वानापत्तिरिति चेत् ? न—सम्बन्धघटकद्वितीयसम्बन्धस्थाने स्वसमभिव्याहृतत्व-स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयत्वैतदुभयसम्बन्धेन स्वविशिष्टस्वस्य निवेशनीयत्वात्, नागमस्य सिच्समभिव्याहृतत्वविरहात् पूर्वपरयोरेव समभिव्याहृतपदार्थत्वादिति चेत् ? मैवम्—'व्याघ्रपदः सुपदः' इति समुदाये उपस्थितीयविषयताश्रयपरपाच्छब्दावधिकपूर्ववर्णघटितत्वेन पूर्वस्य पदादेशाभावापत्त्याऽव्यवहितपूर्वत्वं सम्बन्धघटकं वक्तव्यम्, तथा च अस्नात्वा कालकं स्नात्वाकालकं कृत्वा स्नात्वाकालकीकृत्येत्यत्र मयूरव्यंसकादित्वात् [ ३. १. ११६ ] स्नात्वाकालक इत्यत्र समासः, पश्चाच्च्व्यन्तस्य गतिसमासे पूर्वक्त्वाप्रत्ययस्यापि "अनञः क्त्वो यप्" [ ३. २. १५४. ] इति यबादेशविधायकसूत्रघटितषष्ठीप्रकृतिक्त्वाविशिष्टत्वाद् निर्दिश्यमानत्वेन यबादेशापत्तिः, यतः स्वजन्योपस्थितीयविषयताश्रयत्वमप्यस्ति, स्वजन्योपस्थितीयविषयताश्रयः परः क्त्वा, तदव्यवहितपूर्ववर्णाघटितत्वेन तद्विशिष्टवर्णाघटितत्वं चास्ति, ततश्चात्र [ स्नात्वाकालकीकृत्येत्यत्र ] क्त्वान्तसमासावयवक्त्वापदीयनिर्दिश्यमानत्वाद् यबादेशापत्तिरिति चेत् ? अत्रोच्यते—मयूरव्यंसकादौ स्नात्वाकालकेति निपातनेन, 'अनञः' इति पर्युदासेन नञ्भिन्नपूर्वपदात् परस्योत्तरपदस्थस्यैव क्त्वो यबादेश इत्याश्रयणेन वा दोषाभाव इति । तदुक्तम्—"मयूरव्यंसकादयश्च" [ पा० सू० २. १. ७२. ] इति सूत्रे महाभाष्येऽपि—"समासनिपातनाद्वा, अवश्यमत्र समासार्थं निपातनं कर्त्तव्यम्, तेनैव यत्नेन ल्यबपि [ यबपि ] न भविष्यति । अनञो वा परस्य, अथवा अनञः परस्य ल्यपा [ यपा ] भवितव्यम्" इत्यादि । ननु "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषया * आगमा यद्गुणीभूताः * इति न्यायेन चोपस्थितस्यार्थस्य स्थानित्वालाभायैवायं न्यायः समाश्रीयते, तत्रेदं वक्तव्यमिमे शास्त्रे लक्षणाग्राहके, न शक्तिग्राहके; आद्यं शास्त्रघटकस्याभेदेन विशेषणतात्पर्यकस्य पदस्य तदन्तत्वावच्छिन्ने, अन्त्यं च तत्तच्छास्त्रघटकपदस्य स्वशक्यविशिष्टे लक्षणां ग्राहयति, वैशिष्ट्यं च स्वेतरत्व-स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरत्वोभयसम्बन्धेन स्वविशिष्टाघटितत्वस्वघटितत्वोभयसम्बन्धेन, ततश्च षष्ठीप्रकृतिशक्यत्वं निर्दिश्यमानत्वमिति स्वीकार्यम्, 'द्विपदा' इत्यत्र 'अपिबत्' इत्यत्र च न विशिष्टस्य तत्त्वमिति न दोषः । *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्* *तन्मध्यपतितस्तद्ग्रहणेन गृह्यते* *स्वं रूपम्०* इति न्यायाः "स्थानीवावर्णविधौ" [ ७. ४. ११०. ] इति परिभाषा चैतत् सर्वं शक्तिग्राहकमित्येतेषां सहकारेणोपस्थितस्यार्थस्य शक्यार्थत्वेन सर्वत्र निर्दिश्यमानत्वसिद्धिः । जराया जरसौ—जराजरसौ इत्यत्र पूर्वजराशब्दस्य निर्दिश्यमानत्वेऽपि स्वरादिस्याद्यव्यवहितपूर्वत्वाभावान्न दोषः, व्याघ्रपात्पदः स्नात्वाकालकीकृत्येत्यत्र पूर्वोक्तरीत्या *अन्त्यबाधेऽन्त्यसदेशस्य* इति न्यायेन वा दोषाभावः । न च पतिरिवाचरति—पतित्, वृषलः पतित् यस्याः सा

वृषलपतित्, पूताः क्रतवो यया सा पूतक्रतुः, सा इवाचरति–पूतक्रतुत्, इत्यादौ "सादेः" [ २. ४. ५९. ] "पूतक्रतु-वृषाकप्यग्नि०"[ २. ४. ६०. ]इति सूत्राभ्यां पतिशब्द-पूतक्रतुशब्दयोर्नकारैकारावादेशौ स्याताम्, आगमरहितयोस्तयोर्निर्दिश्यमानत्व[ षष्ठीप्रकृतिशक्यत्व ]सत्त्वादिति वाच्यम्, पूर्वोक्तेषु सर्वेष्वपि परिष्कारेष्वेतद्दोषवारणायोपायान्तरानुसरणस्यावश्यकत्वात् । तथाहि-पूतक्रतुदित्यत्रोपसर्जनत्वान्नैकारः, वृषलपतिदित्यत्र "पत्युर्नः" [ २. ४. ४८. ] इति सूत्रे पतिशब्दे इकारान्तरस्याऽपि प्रश्लेषेणात्राऽपि [ "सादेः" २. ४. ५९. इत्यत्रापि ] इकारान्तपतिशब्दस्यैव ग्रहणेन वृषलपतिदित्यादाविकारान्तत्वाभावेन दोषाभावान्मुधैव विस्तृता परिष्कारकल्पनेति चेत् ? न–इष्टत्वात्, इति पूर्वोक्तपरिष्कारकल्पनाऽऽग्रहरहिता । अनेन न्यायेन च स्वस्वनिमित्तसन्निधापितानां "षष्ठ्यान्तस्य" [ ७. ४. १०६. ] "अनेकवर्णः सर्वस्य" [ ७. ४. १०७. ] इत्यादिपरिभाषाणां न विरोधोऽपि तु समावेश एव, तथा च 'अष्टाभिः' इत्यादौ "वाष्टन आः स्यादौ" [ १. ४. ५२. ] इति सूत्रेऽस्य न्यायस्य "षष्ठ्यान्त्यस्य" [ ७. ४. १०६. ] परिभाषायाश्चोपस्थितौ निर्दिश्यमानाष्टन्शब्दान्त्यस्याकार इत्यादिरीत्या समावेशः, विरोधे सति हि बाध्य-बाधकभावो भवति । न च मास्तु विरोधः, अङ्गाङ्गिभावस्तु स्यादेवेति वाच्यम्, उभयोरपि विधिशास्त्रोपकारकत्वेन गुणशास्त्रत्वात्, 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इति न्यायेन तदयोगात् ॥ इत्थञ्चानेकफलत्वेन *श्रुतानुमित*न्यायविभिन्नविषयत्वेन न्यासकारादिभिः पृथक् पृथक् लक्ष्यभेदेनोच्चारितत्वेन च पृथगेवायं न्यायः स्वीकार्य इति संक्षेपः ॥ २१ ॥

## *अन्तरङ्गानपि विधीन् यबादेशो बाधते* ॥ २२ ॥

**सि०**—बहिरङ्गोऽपीति शेषः । यबादेशः "अनञः क्त्वो यप्" [ ३. २. १५४. ] इति सूत्रेण विधीयते, तदर्थश्च नञोऽन्यस्मादव्ययात् पूर्वपदात् परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यादिति । एवं च यबादेशे पूर्वपदमुत्तरपदं चापेक्षितमिति पदद्वयापेक्षत्वेन बहिरङ्गः, तदपेक्षयैकपदमात्रापेक्षाणि कार्याण्यन्तरङ्गाणीति तानि यबादेशापेक्षया बलवन्तीति स्थितौ यबादेशस्य बलवत्त्वविधायकोऽयं न्यायः समाश्रीयते । अन्तरङ्गानपीत्यपिशब्दात् पर-नित्ययोः सङ्ग्रहः, योऽन्तरङ्गं पराश्रित्याच्च बलवन्तमपि बाधते तस्य परनित्यबाधः कैमुतिकन्यायसिद्ध एव । अत्र ज्ञापकं च "यपि चादो जग्ध्" [ ४. ४. १६. ] इति सूत्रे यपि चेति वचनम्, अत्र चकारेण तादौ कितीति समुच्चीयते, तत्र 'प्रजग्ध्य' इत्यादौ क्त्वाप्रत्ययस्यापि तादित्वेन तादिनिमित्तको जग्धादेश एवैकपदापेक्षत्वादन्तरङ्गत्वात् प्रवर्तिष्यते, पश्चाच्च यबिति यपि चेत्यस्यानुक्तावपि यपि जग्धादेशः सिद्ध एवेति यपि चेत्यस्य वैयर्थ्यं स्पष्टमेव, व्यर्थीभूतं च तत् न्यायमिमं ज्ञापयति । तथा च ज्ञापिते न्याये पूर्वं यबादेश एव स्यात्, ततश्च तादिकित्प्रत्ययाभावेन जग्धादेशो न स्यादिति तद्विधानार्थं यपि चेत्यस्य सार्थक्यम् । फलं चास्य न्यायस्य 'प्रशम्य' इत्यादौ "अहन्पञ्चमस्य क्विङिति" [ ४. १. १०७. ] इति दीर्घत्वं प्रकृत्याश्रितत्वादन्तरङ्गमपि बाधित्वा पूर्वं यपि कृते पश्चाद् धुडादिप्रत्ययाभावान्न दीर्घत्वमिति, तदुक्तमभियुक्तैः—

> "तादौ किति जग्धि सिद्धे यपि चेति यदुच्यते ।
> ज्ञापयत्यन्तरङ्गाणां यपा भवति बाधनम् ॥" इति ।

स्पष्टं चेदं "यपि चादो जग्ध्" [ ४. ४. १६. ] इति सूत्रे बृहद्वृत्तौ । तथाहि–"एकपदाश्रयत्वेनान्तरङ्गत्वाद् यबादेशात् प्रागेव जग्धादेशे सिद्धे यप्ग्रहणम् *अन्तरङ्गानपि विधीन् यबादेशो बाधते* इति ज्ञापनार्थम्, तेन प्रशम्य, प्रपृच्छ्य, प्रदीव्य, प्रखन्य, प्रस्थाय, प्रपाय, प्रदाय, प्रधाय, प्रपठ्येत्यादौ दीर्घत्वं शत्वमूत्वमात्वमित्वमीत्वं हित्वमिट्त्वं यपा बाध्यते" इति । प्रशम्येत्यत्र दीर्घत्वाभावः पूर्वमेवोपपादितः, शत्वं प्रपृच्छ्येत्यत्र, ऊत्वं प्रदीव्येत्यत्र, आत्वं प्रखन्येत्यत्र, इत्वं प्रस्थायेत्यत्र, ईत्वं प्रपायेत्यत्र प्रदायेत्यत्र च, हित्वं प्रधायेत्यत्र, इट्त्वं प्रपठ्येत्यत्र, यबादेशेन बाध्यत इति योजनीयम् । अत्र च स्थानिवद्भावेन स्थानिवृत्तिधर्मस्य कित्त्वादेर्लाभेऽपि धुडादित्वादेर्वर्णमात्रवृत्तिधर्मत्वेन तदाश्रये विधौ स्थानिवद्भावाप्रवृत्तिरवर्णविधाविति तत्रोक्तत्वात् । यद्यपि "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति सूत्रे 'अयपि' इत्युक्तेः प्रपाय प्रदायेत्यादावीत्वं न प्राप्तं, तथा च नैतेऽस्य न्यायस्योदाहरणे तथापि तस्य 'अयपि' इति वचनस्यैतन्न्यायेन गतार्थत्वेऽपि क्वचिदनुबन्धघटितधर्मानयनेऽवर्णविधाविति न प्रवर्त्तेत इति ज्ञापनार्थत्वम्, तेनानुभूयेत्यादौ गुणनिषेधादिसिद्धिरिति स्पष्टं विवरणे ॥ २२ ॥

## *अन्तरङ्गानपि विधीन् बहिरङ्गो यबादेशो बाधते* ॥ २२ ॥

**त०**—"ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति सूत्रेऽयपीति वचनस्यैतन्न्यायसत्त्वे नावश्यकत्वम्, यतः क्ङिति अशिति ईत्वं विधीयते, यप् च न स्वतः कित्, स्थानिद्वाराऽस्य कित्वं तु न लभ्यम्, कित्वं हि ककारेत्संज्ञकत्वम्, ककारश्च वर्ण इति वर्णविधित्वेन स्थानिवद्भावाभावाद् यपः कित्त्वस्य लब्धुमशक्यत्वात्; तथा च व्यर्थं सत् तद् 'अनुबन्धघटितधर्मानयने 'अवर्णविधौ' इति प्रतिषेधो न प्रवर्त्तते इति ज्ञापयति, तेनानु-

भूयेत्यत्र यपः कित्त्वेन गुणो न, प्रोह्येत्यत्र ग्वृत्, प्रमथ्येत्यत्र नलोपश्चेत्यादिसिद्धिः । केचित् तु—अयपीति वचनाकरणलाघवार्थं "यपि चादो जग्ध्" [ ४. ४. १६. ] इति सूत्रे यपि चेत्यनेन प्रकृति-प्रत्ययमात्रनिमित्तकं कार्यं यब्विषये न भवतीति ज्ञापयन्ति, न त्विमं न्यायम् । तेषामयमाशयः—प्रजग्ध्येत्यादौ जग्धादेशात् पूर्वं यपः प्रवृत्त्यर्थमेवेदं ज्ञापनं क्रियते, तच्चोक्तज्ञापनेनापि लभ्यं, प्रशम्येत्यादयोऽपि प्रयोगाः सिद्ध्यन्त्येव, सर्वत्र प्रकृतिप्रत्ययनिमित्तकार्याभावस्यैवेष्टत्वात् । विशेषश्चायं लभ्यते यत् "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति सूत्रेऽयमपीति न कर्तव्यं भवतीति । परमेतन्न युक्तम्—अधीत्येत्यादौ तागमस्याप्यभावापत्तेः, तस्यापि प्रकृति-प्रत्ययमात्रनिमित्तकार्यत्वात् । यदि च क्त्वाश्रयाण्यनुबन्धकार्याणि यब्विषये न भवन्तीति ज्ञाप्यतामित्युच्येत तर्हि अनुभूयेत्यादिप्रयोगेषु गुणनिषेधादिकार्याणि न स्युः । वस्तुतस्तु "यपि चादो जग्ध्" [ ४. ४. १६, ] इति सूत्रे यपिग्रहणं व्यर्थं सत् स्वप्रवृत्तिविरोधिप्राप्तिबाधेन चारितार्थ्ये सति स्वप्रवृत्त्युत्तरप्राप्तिबाधे न समर्थमिति स्थानिवद्भावेन यबुत्तरप्राप्तित्ववारणाय "ईर्व्यञ्जनेऽपि" [ ४. ३. ९७. ] इति सूत्रेऽयपीत्यस्यावश्यकत्वमेव । अनेन न्यायेन चान्तरङ्गनिमित्तविनाशकस्यैव यपः प्राबल्यं बोध्यते, न तूदासीनस्य; तेन प्रेष्य गत इत्यादौ प्रपूर्वकादिष्धातोर्ण्यन्तात् क्त्वाप्रत्यये णिनिमित्तकोपान्त्यगुणात् पूर्वं न यप्, अन्यथा पूर्वं यपि "लघोर्यपि" [ ४. ३. ८६. ] इति णेरयादेशः स्यात्, सिद्धान्ते त्वत्र यपोऽन्तरङ्गगुणनिमित्तविनाशकत्वाभावेन न प्राबल्यमिति पूर्वं गुणे ततो यपि लघोरभावेऽयादेशो न भवति । व्याघ्रभूतिराचार्योऽप्येतन्न्यायज्ञापनमनेन [ यपि चेत्येतत्स्थानीयेन "अदो जग्धिर्ल्यप् तिकिति" पा० २. ४. ३६. इति सूत्रस्थल्यप्ग्रहणेन ] मन्यते, तदुक्तं तत्रैव सूत्रे महाभाष्ये—"जग्धिविधिर्ल्यपि यत्तदकस्मात् सिद्धमदस्तिकितीति विधानात् । हिप्रभृतींस्तु सदा बहिरङ्गो ल्यप् हरतीति कृतं तदुविद्धि" स्वयं च भाष्यकृतायमर्थ एवमुपनिबद्धः- जग्धौ सिद्धेऽन्तरङ्गत्वात्तिकितीति, ल्यबुच्यते । ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्, इति । स्थानिवद्भावेन प्राप्तित्ववारणार्थं कृतम्-"ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इत्यत्रायपीति च वर्णविधावप्यनुबन्धघटितधर्मानयने स्थानिवत्त्वज्ञापकमपीति पूर्वं प्रतिपादितमेवेति सर्वं सुस्थम् ॥ २२ ॥

---

## *सकृद् गते स्पर्धे यद् बाधितं तद् बाधितमेव* ॥ २३ ॥

**सि०**—सकृद्–एकवारं, गते–जाते, स्पर्धे–तुल्यबलविरोधे [ द्वयोः शास्त्रयोर्यथासम्भवं लब्धावकाशयोरेकत्र लक्ष्येऽसम्भवन्नुपनिपातस्तुल्यबलविरोधः, स एव स्पर्ध इत्युच्यते ] सति यच्छास्त्रं केनापि बलवत्त्वनिमित्तेन बाधितं चेत् तत् बाधितमेव भवति, न स्वबाधकसूत्रप्रवृत्त्यनन्तरं पुनः प्रवर्त्तेत इति न्यायार्थः, बाधकस्य शास्त्रस्य सर्वथैव तत्प्रवृत्तिबाधकत्वमिति भावः । अयं च न्यायः "स्पर्धे" [ ७. ४. ११८. ] इति सूत्रस्य नियमार्थतामूलको लौकिकन्यायमूलकश्च, तस्य नियमार्थत्वं तावदित्थम्—स्पर्धस्थले उभे अपि शास्त्रे प्रामाणिके, तत्र यथा तृच्-णकौ प्रत्ययौ धातोः पर्यायेण भवतस्तथोभयोरपि शास्त्रयोः [ पूर्व-परयोः ] पर्यायेण प्रवृत्तिः स्वत एव सिद्धेति परप्रवृत्तिविधायकमिदं सूत्रम् [ "स्पर्धे" ७. ४. ११९. ] इति नियमार्थमेव भविष्यति—परमेव भवति, न पूर्वमिति; यथा तुल्यबलयोः स्वामिनोरेकः प्रेष्यः पर्यायेण द्वयोः कार्यं करोति, यदा युगपत् तमुभौ विरुद्धदिक्क्रिययोः कार्ययोः प्रेषयतस्तदोभयोः कार्यं कर्तुमशक्नुवन् यस्तत्र [ स्वामिद्वयमध्ये ] कथमपि निर्बलतया ज्ञायते तस्य कार्यं न करोति किन्तु सबलस्यैव, तथैव परत्वेन बलवदेव शास्त्रं प्रवर्त्तते न निर्बलमिति लोकन्यायोऽप्यत्रानुकूलः । प्राञ्चश्चात्र न्याये ज्ञापकान्तरमाहुः, तच्चेत्थम्—"स्फातिदं चास्य "उदच उदीच्" [ २. १. १०३. ] इति सूत्रे णिवर्जनम्, तद्धि उदञ्चमाचष्टे इति णौ–उदयतीति रूपसिद्ध्यर्थम्, तच्च उदीचादेशकरणादनु यदि "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यन्त्यस्वरादिलुक् प्रवर्त्येत तदाऽपि सिध्यत्येव, परं विशेषविहितत्वेनान्त्यस्वरादिलोपात् प्रागेवोदीचादेशे पश्चाच्चैतन्न्यायादन्त्यस्वरादिलुकोऽप्रवृत्तेरुदीचयतीत्येव स्यात्, न तु उदयतीति ततो णिवर्जनं कृतम् । तथा चोदीचादेशं विनान्त्यस्वरादिलुकैवोदयतीति सिद्धम्" । अत्रेदमुच्यते–यदि उदीचादेशस्य विशेषविहितत्वमिष्यते तर्हि विशेषविधेः सामान्यविध्यपेक्षया बलवत्त्वेन तुल्यबलत्वाभावात् स्पर्धाभावेन प्रकृतन्यायविषयत्वस्येहोपपादयितुमयुक्तत्वेन नानेनैतन्न्यायज्ञापनं युक्तम् । यदि च प्रतिपदोक्तत्वेनोदीचादेशस्य बलवत्त्वमित्युच्यते तदापि तुल्यबलत्वाभाव एव । यद्यपि लघुन्यासेऽप्यत्र विषयेऽयं न्यायः प्रचारितः, तथाहि–तत्रत्यो ग्रन्थः–"ननु णिवर्जनं किमर्थम्? न च वाच्यं णिवर्जनाभावे [ उदञ्चमाचष्टे उदयतीत्यत्र ] उदीचादेशः स्यात्, यतो भवतु उदीचादेशः, तथापि "त्र्यन्त्यस्वरादेः" [ ७. ४. १०३. ] इति लोपे उदयतीति भविष्यति । अत्रोच्यते–विशेषविहितत्वात् लुकं बाधित्वा प्रथममेवोदीचादेशः स्यात्, ततश्च *सकृद्गते स्पर्धे०* इति न्यायात् पश्चादपि न स्यात्"इति । तथापि न तेन ग्रन्थेन ज्ञापकताऽस्य णिवर्जनस्य लभ्यते, किन्तु पूर्वोक्तरीत्या "स्पर्धे" [ ७. ४. ११८. ] इत्यस्य नियमार्थत्वेनैतन्न्यायसिद्धौ सत्यां लब्धावकाशत्वमात्रेण तुल्य-

बलत्वमाश्रित्य स्पर्धं कल्पयित्वा न्यायप्रसारेण णिग्रहणस्य सार्थक्योपपादनं न्यासकृतां स्थितस्य गतेश्चिन्तनीयत्वादिति विभाव्यम् । तन्त्रान्तरे च "उदच उदीच्" [ २. १. १०३. ] इत्येतत्स्थानीये सूत्रे णिवर्जनं न दृश्यते, ते हि उदीचयतीत्येव रूपमिच्छन्ति, तथा हि–अत्र णिवर्जनाभावे उदीचादेशेऽपि अन्त्यस्वरादिलोपो न भवति "नैकस्वरस्य" [ ७. ४. ४३. ] इति निषेधात् । न च कथमस्यैकस्वरत्वमिति वाच्यम्, तन्मते "उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते" इति स्वीकारात् । तथा चात्रापि "उदिति पूर्वपदमुपसर्गभूतमेव, तच्च धातुसंज्ञाप्रयोजके णिप्रत्यये चिकीर्षिते पृथक्करिष्यत इति 'अच्' इत्येतन्मात्रमेव णिप्रकृतिरिति, तच्चैकस्वरमेवेत्यन्त्यस्वरादिलुकोऽप्रवृत्तिः । यद्यपि स्वमतेऽपि "न प्रादिरप्रत्ययः" [ ३. ३. ४. ] इत्यनेन प्रादेर्धात्ववयवत्वं निषिध्यत इत्यत्रापि 'अच्' इत्यस्यैव धातुत्वम्, ततः पूर्वमेवाडागमो न तूदः, तथापि णिप्रकृतित्वं समुदायस्यैव स्वीक्रियते न तूपसर्गरहितस्येति लभ्यते "उदच उदीच्" [ २. १. १०३. ] इति सूत्रे उदयतीति प्रयोगदर्शनात् । तथा चैतद्विषये पाणिनीयतन्त्रेण सह फलभेद इति प्रतीयते, विशेषो विवरणे व्यक्तः । एतन्न्यायफलं तु द्वयोः कुलयोरित्यादौ नान्तादेशाभावः, तथा हि–अत्र 'द्वि+ओस्' इति स्थिते*आदेशादागमः*इति न्यायात् "अनाम्स्वरे०" [ १. ४. ६४. ] इति नोऽन्तागमः प्रथमं प्राप्तः, स च परत्वादन्तरङ्गत्वाच्च "आद्वेरः" [ २. १. ४१. ] इत्यनेन बाधितः, तस्मिन् कृते "एद् बहुस०" [ १. ४. ४. ] इत्येत्वे च विहिते यद्यपि पुनर्नागमस्य प्राप्तिरस्ति, किन्तु प्रकृतन्यायप्रवृत्त्या न भवति । अत्र हि नागमस्यात्वस्य च परस्परं पृथगेवावकाश इति तुल्यबलत्वेन स्पर्धस्य सत्त्वात् परत्वान्नागमे बाधिते पुनः प्रवृत्तौ प्रकृतन्यायसञ्चारस्यौचित्यात् । अत्र *आदेशादागमः*इति न्यायस्य तद्बाधस्य चोल्लेखः प्राचामनुरोधेन । वस्तुतस्तु "अनाम्स्वरे० [ १. ४. ६४. ] इति सूत्रस्थन्यासग्रन्थानुकूलं परत्वादन्तरङ्गत्वाच्चात्वस्य प्रवृत्तिरित्येतन्मात्रमेवोल्लेख्यम् । स्वयमेव *आदेशादागमः*इति न्यायस्य वृत्तौ तद्व्याख्यानित्यत्वफलतया द्वयोः कुलयोरित्युदाहृतत्वादत्र तन्न्यायचर्चा नावश्यकी, किन्तु परत्वादन्तरङ्गत्वादत्वमित्येतावदेव लेख्यम् । यदि हि स न्यायः प्रवृत्तस्तर्हि परत्वादिकमादेशस्य बलवत्त्वे प्रयोजकं न स्यात्तन्न्यायेन, परनित्यान्तरङ्गत्वादिप्रयुक्तबलवतोऽप्यादेशादागमस्य बलवत्त्वप्रतिपादनादिति बोध्यम् । वस्तुतस्तु परत्वमेवात्र व्यवस्थापकम्, अन्तरङ्गत्वं तु बहिरङ्गत्वसापेक्षं, बहिरङ्गत्वं च "अनाम्स्वरे नोऽन्तः" [ १. ४. ६४. ] इत्यस्य स्वरादित्वमात्राश्रयणनिमित्तं वक्तव्यं, तच्च स्यादिविशेषणभूतमेवेति स्यादितो नाधिकम्, स्यादिनिमित्तकत्वं चात्वस्यापीति द्वयोः समत्वात् । अभ्युच्चायकतयाऽन्तरङ्गत्वमपि कथञ्चित् स्वीक्रियते चेत्? अस्तु । अयं च न्यायोऽनैकान्तिकः*पुनः प्रसङ्गविज्ञान*न्यायस्यापि लक्ष्यानुरोधात् तन्त्रान्तरपरिगृहीतत्वाच्चाभ्युपेयत्वात् । तथा च प्रियतिसृणः कुलस्येत्यत्र*आगमात् सर्वादेशः*इति न्यायेन प्रथमं बाधितोऽपि नागमस्तिस्रादेशे कृतेऽपि भवति, पुनः प्रसङ्गविज्ञानात् । *पुनः प्रसङ्गविज्ञानम्* इत्यस्य सिद्धिमित्थं वर्णयन्ति–यथा लोके तुल्यबलयोः स्वामिनोरेकः प्रेष्यो भवति, स तयोः कार्यं पर्यायेण करोति, यदा तमुभौ प्रेषयतो नानादिक्षु च कार्ये तदोभयोः कार्यं न करोति यौगपद्यासंभवात्, किन्त्वेकस्य करोति, पश्चाद् यदि द्वितीयस्य कार्यस्याप्यवसरो भवति तदा तस्यापि कार्यं करोति, तथैव शास्त्रयोर्लक्ष्यार्थयोः क्वचिल्लक्ष्ये यौगपद्येन प्रवृत्त्यसंभवादप्रतिपत्तौ प्राप्तायां "स्पर्धे" [ ७. ४. ११८. ] इति सूत्रं परविध्यर्थम् [ न तु नियमार्थम् ], तत्र कृते यदि पूर्वस्यापि प्राप्तिरस्ति तदा तदपि भवत्येवेति पुनः प्रसङ्गविज्ञानसिद्धिः । स्पष्टं चेदं विप्रतिषेधे परम्" [ पा० सू० १. ४. २. ] इति सूत्रे महाभाष्ये । तथा हि–अस्यैव सूत्रस्य [ "विप्रतिषेधे परं कार्यम्" पा० सू० १. ४. २. इत्यस्य ] नियमार्थत्वेन *सकृद्गते विप्रतिषेधे यद् बाधितं तद् बाधितमेव*इति न्यायस्य सिद्धिः, विध्यर्थत्वेन च *पुनः प्रसङ्गविज्ञानात् सिद्धम्*इत्यस्य न्यायस्य सिद्धिरिति पूर्वोक्तलोकन्यायादिभिः सप्रपञ्चमुक्त्वा "किं पुनरियता सूत्रेणोभयं लभ्यम्?" इत्याक्षेपे सति समाधानभाष्यम्–"लभ्यमित्याह । कथम्? इह भवता द्वौ हेतू व्यपदिष्टौ–'तृजादिभिस्तुल्यं पर्यायः प्राप्नोति' च, अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात् इति च । तद् यदा तावदेष हेतुः–'तृजादिभिस्तुल्यं पर्यायः प्राप्नोति' इति, तदा "विप्रतिषेधे परम्" इत्यनेन किं क्रियते? नियमः, विप्रतिषेधे परमेव भवतीति । तदैतदुपपन्नं भवति–*सकृद्गते विप्रतिषेधे यद् बाधितं तद् बाधितमेव भवति*इति, यदा त्वेष हेतुः–'अप्रतिपत्तिस्तुल्यबलत्वात्' इति तदा "विप्रतिषेधे परम्" इत्यनेन किं क्रियते? द्वारम्, विप्रतिषेधे परं तावद् भवति, तस्मिन् कृते यदि पूर्वमपि प्राप्नोति तदपि भवति । तदैतदुपपन्नं भवति*पुनः प्रसङ्गविज्ञानात् सिद्धम्*इति । विशेषश्च विवरणे स्पष्टः ॥ २३ ॥

***सकृद्गते स्पर्धे यद् बाधितं तद् बाधितमेव ॥२३॥***

**त०**—स्पर्धविषयोऽयं न्यायः, स्पर्धश्च वृत्तौ व्याख्यात एव । तथा च स्पर्धविषये निर्णायकतयाऽऽरब्धायाः "स्पर्धे" [ ७. ४ ११६. ] इति परिभाषाया एवायं न्यायः प्रपञ्च इति

तत्त्वम् । तत्रास्याः परिभाषाया नियामिकत्वाश्रयणेन प्रकृतन्यायसिद्धिः, विधायिकात्वाश्रयणे च *पुनः प्रसङ्गविज्ञान* न्यायसिद्धिरिति वृत्तौ प्रतिपादितम् । तत्र यद्यपि स्वमतेऽस्य सूत्रस्य परिभाषासूत्रत्वेन परिभाषायाश्च 'अनियमे नियमकारिणीत्वं परिभाषात्वम्' इति सामान्यलक्षणानुरोधेन नियामिकात्वमेवोचितमिति विधायिकत्वाभावेन *पुनः प्रसङ्गविज्ञान* न्यायः स्वमतेऽनेन सूत्रेण साधयितुमशक्यः, तथापि लक्ष्यानुरोधेनैतन्न्यायानित्यत्वाश्रयणविधया तन्न्यायस्वीकार इति मन्तव्यम् । अत एव तत्र तत्राचार्यैरप्ययं न्यायः [*पुनःप्रसङ्गविज्ञानात् सिद्धम्* इति] समाश्रीयते । वस्तुतस्तु वृत्तिप्रदर्शितमहाभाष्योक्तयुक्त्याऽस्य सूत्रस्य परिभाषासूत्रत्वं विधिसूत्रत्वं चावश्यकमेव, प्रदर्शितलोकन्यायानुगृहीतत्वात् । अत्र कैयटेन—"लक्ष्यानुरोधेन व्यक्त्याकृतिपदार्थाश्रयणादनयोः परिभाषयोः [ न्याययोः ] विषयविभागोऽवसेयः" इत्युक्तम् । तस्यायमाशयः-व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणोपप्लवादुभयोरपि शास्त्रयोस्तत्तल्लक्ष्यविषययोरचरितार्थत्वेन पर्यायेण द्वयोरपि प्राप्तौ परमेवेति नियमार्थमिदं [ विप्रतिषेधे परं कार्यमिति सूत्रम् ]मिति *सकृद्गत* न्यायसिद्धिः । अत्र पक्षे एतन्नियमवशादेतल्लक्ष्यविषयकपूर्वशास्त्रानुपप्लव एव । जातिपक्षे तूद्देश्यतावच्छेदकाक्रान्ते क्वचिल्लक्ष्ये चरितार्थयोर्द्वयोः शास्त्रयोः सत्प्रतिपक्षन्यायेन युगपदुभयासम्भवरूपविरोधस्थले उभयोरप्यप्राप्तौ परविध्यर्थमिदमिति पुनः प्रसङ्गविज्ञानसिद्धिरिति । एतच्च नागेशभट्टो न मन्यते, तथा हि—"व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं [कर्तृ] व्याप्नोति, न जातिपक्षे इत्यत्र मानाभावात्, न ब्राह्मणं हन्यादित्यादौ जात्याश्रयसकलव्यक्तिविषयत्वार्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात् । अत एव "सरूप०" [ पा० सू० १. २. ६४. ] सूत्रे भाष्ये, जातौ पदार्थेऽनवयवेन [ साकल्येन ] विधिः प्रवृत्तौ 'गौरनुबन्ध्य' इत्यादौ सकलगवामनुबन्धनासम्भवात् कर्मणो वैगुण्यमुक्तम् ; द्रव्यवादे चासर्वद्रव्यावगतेः गौरनुबन्ध्य इत्यादावेकः शास्त्रोक्तोऽपरोऽशास्त्रोक्त' इत्युक्तम् । किञ्च नहि भाष्योक्ततृजादिदृष्टान्तस्य व्यक्तिपक्ष एव सर्वविषयत्वं न जातिपक्षे इत्यत्र मानमस्ति । अपि च व्यक्तिपक्षेऽप्यन्यव्यक्तिरूपविषयलाभेन चरितार्थयोरियं व्यक्तिर्विरोधात् स्वविषयत्वं न कल्पयतीति वक्तुं शक्यम्, जातिपक्षेऽपि तज्जात्याश्रयतद्व्यक्तिविषयत्वमेव, नैतद्व्यक्तिविषयत्वमित्यत्र विनिगमकाभावः । तत्र लक्ष्यानुरोधात् क्वचिच्छास्त्रीयदृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसम्मतमार्ग एव युक्त इति बोध्यम्" इति परिभाषेन्दुशेखरे तेनोक्तम् । अस्यायमाशयः-व्यक्तौ पदार्थे [ व्यक्तिपक्षे ] *प्रतिलक्ष्यं लक्षणोपप्लवः* [ यावन्ति लक्ष्याणि तावन्ति सूत्राणि कल्प्यन्त ] इत्यनेन हि कैयटादीनामेषोऽर्थः पर्यवस्यति-"त्रेस्त्रयः" [ १. ४. ३४. ] इत्यादिशास्त्रघटकत्र्यादिपदानां त्रित्वाद्युपलक्षिततत्तद्व्यक्तित्वावच्छिन्ने शक्तिरिति न शक्यतावच्छेदकतत्तद्व्यक्तिभेदेऽपि शक्तिभेद उपलक्षणीभूतधर्मस्यैक्यात् । एकेन पदेनैकतद्व्यक्तित्वावच्छिन्नस्यैव बोधादन्यतद्व्यक्तित्वावच्छिन्ने कार्यं न स्यादिति प्रतिलक्ष्ये लक्षणमुपप्लवते । तथा च स्पर्धस्थले द्वयोस्तद्विषयकोपप्लुतशास्त्रयोः प्राप्तौ परमेवेति नियमयति "स्पर्धे" [ ७. ४. ११८. ] इति परिभाषासूत्रम्, तन्नियमवशाच्च पूर्वमेव तद्विषयस्य पूर्वशास्त्रस्यानुपप्लव इति न तद्वैयर्थ्यशङ्का । जातिपक्षे तु एकेनैव शास्त्रेण स्वोद्देश्यतावच्छेदकाक्रान्तसकललक्ष्यव्याप्तिरिति न प्रतिलक्ष्यं लक्षणोपप्लवावश्यकता, तत्र क्वचिल्लक्ष्ये परस्परं चरितार्थयोर्द्वयोः शास्त्रयोः कस्यापि प्रवृत्तिर्न स्यात् सत्प्रतिपक्षन्यायात्, यथा विरुद्धसाध्यसाधकहेतुमत्पक्षे किमपि साध्यं न सिद्ध्यति, यथा 'शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्' 'शब्दोऽनित्यः कार्यत्वाद्घटवत्' इत्यनुमानयोः, तथा द्वयोरपि शास्त्रयोर्युगपदसम्भवादुभयोरप्यप्रवृत्तौ परविधायकमिदं "स्पर्धे" [ ७. ४. ११८. ] इति सूत्रं न नियामकमिति व्यक्तिपक्षः *सकृद्गति*न्यायसाधकः; जातिपक्षः *पुनः प्रसङ्गविज्ञान*न्यायसाधक इति । तत्रेदमुच्यते—व्यक्तिपक्षे लक्षणोपप्लवद्वारा शास्त्रेण सकलानि लक्ष्याणि व्याप्यन्ते, जातिपक्षे नेत्यत्र न मानम्, प्रत्युत जातिपक्ष एव सकललक्ष्यव्याप्तिर्न व्यक्तिपक्षे इति भाष्यादितः सिध्यति । न ब्राह्मणं हन्यादित्यादौ सकलब्राह्मणकर्मकहननस्यानिष्टसाधकत्वनिर्वाहायैव जातिपक्षाश्रयणस्य सर्वैरादृतत्वात् । किञ्च भाष्ये तृजादिदृष्टान्तेन स्पर्धे द्वयोरपि शास्त्रयोः पर्यायेण प्रवृत्तिरुक्ता, स दृष्टान्तो व्यक्तिपक्ष एव सर्वव्यक्तिविषयो न जातिपक्षे इत्यत्र किं प्रमाणम्? तथा चोभयोः पक्षयोस्तस्य दृष्टान्तस्य समत्वमेव । किञ्च व्यक्तिपक्षेऽपि स्पर्धस्थलभूतालक्ष्यव्यक्तिस्वभिन्नलक्ष्यव्यक्तिरूपविषयलाभेन चरितार्थयोः शास्त्रयोर्विरोधमवलोक्य तत्र पूर्वशास्त्रस्येव परशास्त्रस्यापि स्वविषयकत्वं न कल्पयतीति वक्तुं शक्यम् । एवं जातिपक्षेऽपि तज्जात्याश्रयस्पर्धविषयलक्ष्यभिन्नव्यक्तिविषयत्वमेव न स्पर्धविषयलक्ष्यविषयत्वमित्यत्रापि न मानम्, तथा च लक्ष्याणामुभयथा दर्शनेन यत्र परस्यैव प्रवृत्तिरिष्टा तत्र णकतृजादिदृष्टान्ताश्रयणेनोभयोः स्वत एव प्रवृत्तौ प्राप्तायां "स्पर्धे" [ ७. ४. ५४. ] सूत्रस्य नियमार्थत्वम्; यत्र चोभयोः प्रवृत्तिरिष्टा तत्र लौकिकद्विस्वामिकैकभृत्यदृष्टान्ताश्रयणेनोभयोरप्रतिपत्तौ प्राप्तायां परविध्यर्थमिदं सूत्रम्, तत्रैकस्य कार्ये कृते द्वितीयस्य कार्यमपि सति प्रसङ्गे यथा संपाद्यते तथेहापि पुनः प्रसङ्गविज्ञानमिति । अत्रेदमाशङ्क्यते—स्पर्धस्थले णकतृजादिवदुभयोः शास्त्रयोः पर्यायेण प्रवृत्तिरिति यदुक्तं तन्न शोभनम्, तथा सति विषयशून्यस्य कस्यचिल्लक्ष्यस्य साधुत्वाभावाय विधेये कृत्स्नोद्देश्यतावच्छेदकव्यापकत्वस्य भङ्गापत्तेः, पक्त्येत्यादौ

धातुत्वरूपोद्देश्यतावच्छेदकाधिकरणे स्वाव्यवहितपरत्वसम्बन्धेन णकाभावस्य सत्त्वात्; न चात्रोक्तसम्बन्धेन व्यापकत्वस्य विधेयद्वये बाधितत्वेनान्यत्र तथानियमस्वीकारेऽपि प्रकृते उद्देश्यतावच्छेदकसामानाधिकरण्यमात्रस्वीकारेण पर्यायेण प्रवृत्तौ बाधकाभाव इति वाच्यम्, तथा सति प्रकृते कदाचिद् विधेयशून्यस्य 'पच्' इत्यस्यापि साधुतापत्तेरिति; अत्रोच्यते–प्रकृते विधेयेऽन्यतरवैयर्थ्यापत्त्योद्देश्यतावच्छेदकं प्रति विधेयतावच्छेदकव्यापकताया अभानेऽप्यन्यतरत्वावच्छिन्नव्यापकताया एव शास्त्रतात्पर्यविषयत्वात्, तस्य चाबाधाद् विधेयशून्यस्य साधुत्वाप्रसक्तेः । व्यापकताघटकाधिकरणस्यान्यतरानधिकरणस्यैव प्रकृते निवेशेन विधेयतावच्छेदकावच्छिन्नव्यापकताभानेऽपि क्षत्यभावाच्च ॥ द्वयोः कार्ययोर्यौगपद्येनासम्भव एव "स्पर्धे" [ ७. ४. ११८. ] इति सूत्रप्रवृत्त्युपयोगि । एतच्च "इको गुणवृद्धी" [ पा० सू० १. १. ३. ] इति सूत्रे कैयटे स्पष्टम्, यथा–'शास्+हि' इति स्थितौ "आशिषि तुह्योस्तातङ्" [ ४. २. ११९. ] इति तातङादेशः, "शासस्-हनः शाध्येधि-जहि" [ ४. २. ८४. ] इत्यनेन प्रकृति-प्रत्ययसमुदायस्य स्थाने शाध्यादेशश्च युगपत् प्राप्नुतः, तत्र तातङादेशः पर इति तत्प्रवृत्तौ शिष्टादिति रूपं, पक्षे च शाधीति, तथा च तातङादेशो हिस्थानिकः, शाध्यादेशश्च प्रकृति-प्रत्ययोभयस्थानिक इति भिन्नस्थानिकत्वेऽपि यौगपद्येनोभयोर्विधानस्यासंभवात् "स्पर्धे" [ ७. ४. ११८. ] इति सूत्रेण व्यवस्था क्रियते । ननु 'शास्+हि' इति स्थिते ह्यन्तशासूरूपत्वं "शासस्-हनः शाध्येधि-जहि' [ ४. २. ८४. ] इति सूत्रनिमित्तमप्यस्ति "आशिषि तुह्योस्तातङ्" [ ४. २. ११९ ] इति सूत्रनिमित्तमाशीरर्थवृत्तिहिशब्दत्वमप्यस्तीति युगपदुभयोः प्रवृत्तौ को बाध इति चेत् ? न–उभयनिरूपितनिमित्तस्योद्देश्यस्य चैकशोऽसम्भवात्, यद्यपि तातङादेशे कृते तस्य स्थानिवत्त्वात् "शासस्-हनः चाध्येधि-जहि" [ ४. २. ८४. ] इत्यस्य निमित्तमस्ति तथापि तातङ्प्रवृत्त्युत्तरमेव तत्, न तु तत्प्रवृत्तिसमकालमिति युगपदसम्भवः स्पष्ट एव; एवमन्यत्रापि स्पर्धविषयेऽवगन्तव्यम् । लक्ष्यानुरोधादेव चानयोर्न्याययोर्व्यवस्थेति सर्वेषामभिमतम्, किञ्च स्पर्धे न सर्वत्र परशास्त्रस्यैव प्रवृत्तिः, किन्तु क्वचित् पूर्वशास्त्रस्यापि प्रवृत्तिरित्यपि "विप्रतिषेधे परम्" [पा० सू० १. ४. २ ] इति सूत्रे महाभाष्ये स्पष्टम् । तत्र च यत्र यत्र पूर्वशास्त्रप्रवृत्तिः स्पर्धेऽभिप्रेता तत्र तत्र वचनारम्भस्यावश्यकतामुद्भाव्य सूत्रभेदादिना च तत् प्रदूष्य "यथान्यासमेवास्तु । कथं ये पूर्वविप्रतिषेधाः ? विप्रतिषेधे परमित्येव सिद्धम् । कथम् ? परशब्दोऽयं बह्वर्थः–अस्त्येव व्यवस्थायां वर्त्तते, तद्यथा–पूर्वः पर इति; अस्त्यन्यार्थे वर्त्तते, परपुत्रः परभार्या, अन्यपुत्रोऽन्यभार्येति गम्यते; अस्ति प्राधान्ये वर्त्तते, तद्यथा–परमियं ब्राह्मण्यस्मिन् कुले, प्रधानमिति गम्यते; अस्तीष्टवाची परशब्दः, तद्यथा–परं धाम गतः, इष्टं धाम गत इति गम्यते । तद् य इष्टवाची परशब्दस्तस्येदं ग्रहणं–'विप्रतिषेधे परं यदिष्टं तद् भवति" इति । एवमाचार्यादिव्याख्यानाद् यदिष्टं तच्चेत् पूर्वपठितमेव भवेत् तदपि स्पर्धे प्रवर्तनीयमिति फलति ॥ अथ "उदच उदीच्" [ १. १. १०३. ] इति सूत्रे णिवर्जनमेतन्न्यायज्ञापकतयोक्तं प्राचीनैः, तच्च वृत्तौ विवेचितमपि स्थूणानिखननन्यायेन पुनर्विचार्यते, तथा हि–उदञ्चमाचष्टे उदयतीति सिद्ध्यर्थं णिवर्जनं क्रियते, तच्चैतन्न्यायं विना नोपपद्यते, तथा हि–एतन्न्यायाभावेऽन्त्यस्वरादिलोपं बाधित्वा सर्वादेशे [ उदीचादेशे ] सत्यपि पश्चादन्त्यस्वरादिलोपे सतीष्टरूपसिद्धिरस्त्येवेति णिवर्जनं व्यर्थमेव स्यादिति । अत्र केचित्–यत्र पदद्वयसमुदायरूपान्नाम्नो धातुसंज्ञाप्रयोजकः प्रत्ययश्चिकीर्ष्यते तत्र यदि तस्मिन् समुदाये पूर्वपदमुपसर्गसमानाकारं भवति तर्हि तस्य पृथक्कारः पाणिनीयादिवैयाकरणानामिष्टः, स्वस्यापि च तदनुमतम्, तथाहि–"न प्रादिरप्रत्ययः" [ ३. ३. ४ ] इति सूत्रेण प्रादेर्धात्ववयवत्वं निषिध्यते । तथा च तत्र 'अभ्यमनायत प्रासादीयत्' इत्याद्युदाहरणं दीयते । एवं च धातुसंज्ञाप्रयोजकप्रत्ययोत्पत्तिकाल एव तस्य पृथक्कार उचितः, अन्यथा समुदायात् प्रत्ययोत्पत्तौ समुदायस्यैव क्रियार्थत्वे धातुत्वं स्यादिति तदादावेवाडागमः स्यात्, ततश्च प्रत्ययोत्पत्तेः पूर्वमेवात्रोपसर्गस्योदः पृथक्कारे 'अच्' इत्येकस्वरमेव प्रकृतिस्वरूपं स्थितमिति तत्र "नैकस्वरस्य" [ ७. ४. ४४. ] इत्यस्य प्रवृत्त्याऽन्त्यस्वरादिलोपस्य प्राप्तिरेव नास्तीति सर्वादेशे कृते तत्प्रवृत्तिर्न स्यादेतन्न्यायादिति तत्र सर्वादेशवारणार्थं णिग्रहणं सार्थकमित्युक्तिः कथं सङ्गच्छत इति विचारणीयं सूरिभिः । यदि च "न प्रादिरप्रत्ययः" [ ३. ३. ४. ] इत्यनेन सोपसर्गस्य धातुत्वमेव प्रतिषिध्यते इति साधुत्वनिबन्धनकार्ये एवोपसर्गस्य पृथक्कारो न तु नामत्वनिबन्धने प्रत्ययोपत्तौ । तथा च 'उदच्' इत्यस्यैव णिप्रकृतित्वमिति तस्यैकस्वरत्वाभावेनेदं सर्वं सम्यगेवेत्युच्येत तर्हि णिप्रत्ययप्रयुक्तं क्रियावाचित्वमपि समुदायस्यैवेति तस्यैव धातुत्वं स्यान्न त्ववयवस्य, स्वाभाविकधातुस्थले चोपसर्गसहितस्य विशिष्टक्रियावाचकत्वेन धातुत्वेऽपि तद्रहितस्यापि सामान्यक्रियावाचित्वमक्षतमेवेत्युपसर्गपृथक्कारेऽपि न धातुत्वं हीयत इति तत्र विशेषः, अत्र चाख्यातार्थः करोत्यर्थो वा णिर्यतो विधीयेत तस्यैव धातुत्वं स्यादिति णिविधानात् पश्चादुपसर्गपृथक्कारे तस्य धात्ववयवत्वापत्त्याऽऽनर्थक्यप्रसङ्गादिति ।

एवं चोदञ्चमाचष्टे इत्यर्थे–उदीचयति, अद्यतन्यादौ–उदैचिचदित्याद्येव रूपमुचितं न तूदयतीत्यादीति युक्तं प्रतिभातीत्यपि विचारणीयमिति । एवं चात्र णिवर्जनमनर्थकमिति न तदस्य न्यायस्य ज्ञापकं भवितुमर्हति, किन्तु "स्पर्धे" [ ७. ४. ११८. ]

इति सूत्रादेवास्य न्यायस्य सिद्धिरुक्तरीत्येति स्वीकरणीयम्, ततश्चोदयतीति वृत्त्युदाहृतं रूपं प्रकृतसूत्रे णिवर्जनं च किमर्थमिति विवेचनीयम् ॥ २३ ॥

## *द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः* ॥ २४ ॥

**सि०—द्वित्वे कृते सति यः समुदायः सम्पद्यते तत्र यः पूर्वोऽवयवस्तस्य सम्बन्धिनो ये विकारास्तेषु कर्त्तव्येषु यः परत्वादिहेतुना बाधकत्वेनोत्सर्गशास्त्रतो बलवान् स बाधको न भवति, उत्सर्गशास्त्रमेव तत्र पूर्वं प्रवर्त्तेत इति न्यायार्थः । एवं च "स्पर्धे" [ ७. ४. ११८. ] इति परबलवत्त्वबोधकपरिभाषायाः *बलवन्नित्यमनित्यात्*इत्यादिन्यायानां चापवादभूतोऽयं न्यायः । ज्ञापकं चास्य "आ-गुणावन्यादेः" [ ४. १. ४८. ] इति सूत्रे न्यादिवर्जनम्, तद्धि 'वनीवच्यते, नरीनर्ति' इत्यादावात्वाभावार्थं क्रियते, आत्वाभावश्चान्यथापि सेत्स्यत्येव, न्यागमादीनामात्वाऽपवादत्वात् । ततश्च बाधकानामेषां पूर्वं प्रवृत्त्यर्थं क्रियमाणं न्यादिवर्जनं तेषामबाधकत्वबोधनविधया न्यायमिमं ज्ञापयति । ज्ञापिते चास्मिन् न्याये औत्सर्गिकप्रवृत्त्याऽऽत्वे गुणे च कृते पश्चान्न्यादिप्रवृत्त्येष्टं रूपं न सिद्ध्येदिति न्यादिवर्जनमिह सार्थकम् । फलं चास्य 'अचीकरत्' इत्यादौ सन्वद्भावात् पूर्वं "लघोर्दीर्घः०" [ ४. १. ६४. ] इति दीर्घो न प्रवर्त्तते, स हि परो नित्यश्च तथापि द्वित्वे पूर्वस्य विकार इति बाधकोऽपि न बाधको भवति, सति चास्य बाधकत्वे पूर्वमेव दीर्घे चाचाकरदिति रूपं स्यात् ॥ २४ ॥**

## *द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः* ॥ २४ ॥

**त०**—"आ-गुणावन्यादेः" [ ४. १. ४८. ] इति सूत्रे न्यादिवर्जनस्य प्रकृतन्यायज्ञापकत्वमुक्तं वृत्तौ, तत्र न्यागमादीनामात्वापवादत्वेन पूर्वं प्रवृत्तेर्न्यादिवर्जनस्य वैयर्थ्यमिति ज्ञापकताबीजमुक्तम् । न्यागमादीनामात्वापवादत्वं चानवकाशत्वेन, तदप्राप्तियोग्येऽचारितार्थ्यं ह्यनवकाशत्वम्, अस्ति चात्वाप्राप्तियोग्ये न्यागमादीनामचारितार्थ्यम्, यत्र यत्र हि न्यागमादीनां प्राप्तिस्तत्र सर्वत्रात्वस्य प्राप्तेः सत्त्वात्, तथा चानवकाशत्वेनात्वं बाधित्वा न्यागमादौ कृते आत्वस्याप्राप्तिः, आकारो हि स्वासन्नमकारमेव स्थानिनमाक्षिपति, न्यागमे कृते द्वित्वे पूर्वस्याकारान्तत्वाभावात् न्यागमादौ च कृतेऽपि तस्याकारान्तत्वाभावः स्पष्ट एव । तथा च प्राप्त्यभावादेवात्वाभावे सिद्धे न्यादिवर्जनवैयर्थ्यं स्पष्टमेव । प्रकृतन्याये ज्ञापिते तु न्यागमादेः पूर्वमेवात्वस्य प्राप्तिरिति तद्वारणाय न्यागमादिवर्जनं सार्थकम् । न च न्याद्यागमात् पूर्वं द्वित्वे पूर्वस्य न्यागमादिरहितस्य सत्त्वात् कृतेऽपि न्यागमादिवर्जने आत्वस्य दुर्वारत्वमिति वाच्यम्, यदि आत्वं न स्यात् तदा न्यागमादौ कृते 'अन्यादेः' इति निषेधः स्यादिति सम्भावनायाः सत्वेन *उपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधते* इति न्यायेन पूर्वमात्वाप्रवृत्तेः । न्यादिवर्जनाभावे तु बाधकसम्भावनाया अप्यभावेनात्वं दुर्वारं स्यादिति न्यादिवर्जनस्य सार्थक्यम्; न च तथाप्यपवादत्वान्न्यागमादौ कृते द्वित्वे पूर्वस्याकारान्तत्वाभावेनात्वाप्राप्त्या न्यागमादिवर्जनं व्यर्थमेवेति वाच्यम्, यावत्पर्यन्तं व्यर्थं तावज्ज्ञापकमिति न्यायाद् वैयधिकरण्यान्वयस्यापि ज्ञापनात् । अयमाशयः—न्यादिवर्जनेनात्र [ आत्वविधायकसूत्रे ] द्वित्वे पूर्वस्य सम्बन्धिनोऽकारस्यात्वमित्यर्थरूपस्य वैयधिकरण्यान्वयस्यापि ज्ञापनमिति । तथा च न्यागमादौ कृतेऽकारान्तत्वाभावप्रयुक्तो दोषो न स्यात्, यत्र द्वित्वपूर्वसम्बन्ध्यकारः स्यात् तत्रैवात्वप्राप्तेः । न्यागमादिवर्जने च तद्विषये नात्वप्रवृत्तिरिति । "गुणो यङ्लुकोः" [ पा० सू० ७. ४. ८२. ] "दीर्घोऽकितः" [ पा० सू० ७. ४. ८३. ] इति सूत्रयोर्महाभाष्येऽप्ययं न्याय एवमेव ज्ञापितः, तत्रापि चोक्तरीत्या वैयधिकरण्यान्वयमाश्रित्याकिद्ग्रहणस्य [ स्नमतेऽन्यादेरित्येतत्स्थानीयस्य ] सार्थक्यमुक्तमिति ॥ २४ ॥

## *कृतेऽन्यस्मिन् धातु-प्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च* ॥ २५ ॥

**सि०—"अड् धातोरादिर्ह्यस्तन्यां चामाङा" [ ४. ४. २९. ] "स्वरादेस्तासु" [ ४. ४. ३१. ] इति सूत्रयोर्विषयसप्तम्या व्याख्यानात् तासु विभक्तिष्वकृतास्वपि तद्विषयतायामेव तयोरड्-वृद्ध्योः प्राप्तिरिति पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वं तयोर्नित्यत्वं च पश्चादपि प्रसङ्गादिति सर्वथा तयोर्बलवत्त्वेऽपि न पूर्वं प्रवृत्तिरित्यनेन न्यायेनोच्यते । अन्यस्मिन्-वृद्धिभिन्नेऽड्भिन्ने च धातु-प्रत्ययकार्ये—प्रत्ययनिमित्तके धातुसम्बन्धिनि धातुस्थानिके च कार्ये, कृते सति पश्चाद् वृद्धिः, सा च यद्यपि सामान्यत एव निर्दिष्टा तथापि ज्ञापकसाजात्यादटि तद्बाध्यत्वविशेषणेनाटा सह बाध्यबाधकभावस्य तस्मिन्नेव सत्त्वाच्च "स्वरादेस्तासु" [ ४. ४. ३१. ] इति विहितैव वृद्धिरिह ग्राह्या सा, तथा वृद्ध्या परत्वादनवकाशत्वाच्च बाध्योऽट् च "अड् धातोरादिः०" [ ४. ३. २९. ] इति सूत्रविहितः प्रवर्त्तेत इति न्यायार्थः । "सामान्यतो वृद्धिमात्रस्य पश्चात् प्रवृत्तौ स्वीकृतायां तु 'अचीकरत्' इत्यादि न सिद्ध्येत्, तत्र हि णौ पूर्वं "नामिनोऽकलि-हलेः" [ ४.**

३. ५१.] इति वृद्धौ सत्यां पश्चात् ङनिमित्तकद्वित्वादिकार्याणि भवन्ति" इति प्राचीनैरुक्तं न्यासे, तच्च नावश्यकम्, यतः 'अचीकरत्' इत्यत्र वृद्धौ कृतायामपि *णौ यत् कृतं कार्यं तत् सर्वं स्थानिवद् भवति* इति न्यायेन तस्याः स्थानिवद्भावे 'कृ' इत्यस्यैव द्वित्वे "ऋतोऽत्" [ ४. १. ३८. ] इति ऋकारस्याति रूपसिद्धौ बाधकाभावात्, ततश्चासन्देहार्थमेवेत्थं व्याख्यानं युक्तम् । अत्र च न्यायेंऽशद्वयम्–'कृतेऽन्यस्मिन् धातु-प्रत्ययकार्ये पश्चाद् वृद्धिः' इत्येकः, कृतेऽन्यस्मिन् धातु-प्रत्ययकार्ये पश्चादट्' इति च द्वितीयः । तत्र प्रथमांशज्ञापकम् "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] इति सूत्रम्, तथा हि-तत् सूत्रम् "इंण्क् गतौ" अधिपूर्वं "इंक् स्मरणे" "असक् भुवि" इत्येतेषां धातूनां ह्यस्तन्यामनि परे इष्टानाम् 'आयन्, अध्यायन्, आसन्' इत्यादिरूपाणां सिद्धये, यत्वा-ऽलुग्भ्यां परत्वात् पूर्वमेव "स्वरादेस्तासु" [ ४. ४. ३१. ] इति वृद्धौ सत्यां सिद्धिसत्त्वेऽपि यत् कृतं तदेतन्न्यायांशसत्त्व एव सङ्गच्छते । एतन्न्यायांशसत्त्वे हि इंण्क्-इंकोः क्रमेण "ह्विणोरप्विति०" [ ४. ३. १५. ] "इको वा" [ ४. ३. १६. ] इति सूत्राभ्यां यत्वस्य, अस्तेः "श्वा-ऽस्त्योर्लुक्" [ ४. २. ९०. ] इत्यलुक एव प्राप्तेस्तत्करणात् पश्चाच्च स्वरादित्वाभावेन "स्वरादेस्तासु" [ ४. ४. ३१. ] इत्यस्याप्राप्त्या वृद्ध्यभावे 'आयन्' इत्यादि न सिद्ध्येदिति यत्वा-ऽलुकोर्बाधनार्थं पुनः "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] इति वृद्धिविधायकं सूत्रं स्वांशे चरितार्थम् । फलं चास्य 'ऐयरुः, अध्यैयत' इत्यादिरूपाणां सिद्धिः । अत्र हि "ऋंक् गतौ" इत्यस्य ह्यस्तन्यां प्रथमपुरुषबहुवचने द्वित्वादिषु कृतेषु "धातोरिवर्ण०" [ २. १. ५०. ] इतीयादेशे कृते वृद्धिर्भवति, एतन्न्यायांशाभावे तु वृद्धेः कृताकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं वृद्धौ 'आयरुः' इति रूपं स्यात् । एवम्–'अध्यैयत' इत्यत्र अधिपूर्वस्य "इंङ्क् अध्ययने" इत्यस्य ह्यस्तन्यां प्रथमपुरुषबहुवचने वृद्धेः पूर्वं "धातोरिवर्ण०" [ २. १. ५०. ] इतीयादेशे पश्चाद् वृद्धौ रूपं सिद्ध्यति । न्यायांशाभावे तु वृद्धेरेव नित्यत्वात् पूर्वं प्रवृत्त्या 'अध्यायत' इति रूपं स्यात् ॥ अनियतश्चायमंशः, तेन संपूर्वस्य "ऋं प्रापणे" "ऋंक् गतौ" वेत्याभ्यामद्यतन्यां "समो गम्यृच्छि०" [ ३. ३. ८४. ] इत्यात्मनेपदे 'समार्ष्ट' इत्यादौ "धुड्ह्रस्वात्०" [ ४. ३. ७०. ] इति प्राप्तात् सिज्लोपात् प्रागेव "स्वरादेस्तासु" [ ४. ४. ३१. ] इति वृद्धौ कृतायां पश्चात् तु धुड्ह्रस्वान्ताभावान्न सिज्लोपः; एतन्न्यायांशनित्यत्वे तु पूर्वं सिज्लोप एव स्याद्, धातु-प्रत्ययकार्यत्वात्, तथा च 'समार्त' इति रूपं स्यात् । द्वितीयांशज्ञापकं तु "अड् धातोः०" [ ४. ४. २९. ] इति सूत्रेऽन्विति पदानुपादानम्, तथा हि–परत्वात् कृताकृतप्रसङ्गित्वेन नित्यत्वाच्च यदि प्रथममडेव क्रियते तदा धातोः स्वरादित्वसम्पत्त्या "लघोर्दीर्घः०" [ ४. १. ६४. ] इत्यस्याप्राप्त्या 'अचीकरत्' इत्यादि न सेत्स्यति, अतश्च सर्वकार्येभ्यः पश्चादड्भवनार्थमड्विधायकसूत्रे 'अनु' इति पदोपादानमावश्यकमेवेति विजानताप्याचार्येण यत् तस्मिन् सूत्रेऽन्विति पदं नोपात्तं, तत् तेन विनाऽपि प्रकृतेन न्यायांशेन कार्यं भविष्यत्येवेत्याशयैव । ततश्चाचार्याभिमतोऽयं न्याय इत्यड्विधायकसूत्रे'ऽनु' इति पदानुपन्यासेन ज्ञाप्यते । तथा च 'अचीकरत्' इत्यादौ परोऽपि कृताकृतप्रसङ्गित्वेन नित्योऽप्यल्पनिमित्तकत्वेनान्तरङ्गोऽपि चाडागमो द्वित्व-सन्वत्त्वेत्व-दीर्घत्वादिषु धातु-प्रत्ययकार्येषु कृतेषु प्रवर्त्तेत इत्यस्वरादित्वात् "लघोर्दीर्घोऽस्वरादेः" [ ४. १. ६४. ] इत्यस्य प्रवृत्तिर्निराबाधा भवति । अयमप्यंशोऽनियतः, तत्र च ज्ञापकम् "उपसर्गात् सुग्-सुव०" [ २. ३. ३९. ] इति सूत्रेऽड्यपीति वचनम् । तथाहि–अभ्यषुणोदित्यादौ कृतेऽटि तद्व्यवधानेऽपि षत्वं स्यादित्यर्थमेवाड्यपीति तत्र पठ्यते, यदि चायं न्यायांशः स्थिरः स्यात् तर्हि पूर्वमेव षत्वे कृते पश्चादडागमे रूपसिद्धौ निराबाधायामड्यपीति व्यर्थमेव स्यात् । तथा च तत् स्वसार्थक्यायास्य न्यायांशस्यानित्यत्वमुद्घोषयति, ततश्चास्याविश्वनीयतया कदाचित् परत्वादिभिर्हेतुभिरडागमोऽपि पूर्वं प्रवर्त्तेत तदाऽपि षत्वं सिद्ध्येदेतदर्थमड्यपीत्यस्य सार्थक्यम् । यद्यपि "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] इति सूत्रस्थबृहद्वृत्तिग्रन्थेनैतत् सूत्रमेव संपूर्णस्यास्य न्यायस्य ज्ञापकमिति लभ्यते, तथा हि–तत्रत्यो ग्रन्थः–"यत्वे लुकि च स्वरादित्वाभावादुत्तरेण वृद्धिर्न प्राप्नोतीति वचनम् । विषयत्वविज्ञानात् परत्वाद् वा प्रागेव वृद्धौ कुतो यत्वा-ऽलुकोः प्राप्तिरिति चेत्? सत्यम्–इदमेव वचनं ज्ञापकं *कृतेऽन्यस्मिन् धातु-प्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च* भवति, तेन 'ऐयरुः, अध्यैयत' इत्यादावियादेशे सति वृद्धिः सिद्धा, अचीकरदित्यादौ च दीर्घत्वम्, पूर्वमटि तु स्वरादित्वान्न स्यात् ।" इति, युक्तं चैतत्–पूर्वं हि सर्वत्र "अड् धातोः०" [ ४. ४. २९. ] इत्यस्यैव प्राप्तिः स्वरादावस्वरादौ च, "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] "स्वरादेस्तासु" [ ४. ४. ३१. ] इति सूत्रे तु तदपवादे, तथा च यदि केवलवृद्धेरेव पश्चाद्भवनं ज्ञापितं स्यात्, तदाऽडागमो न नियत इति स पूर्वं प्रवर्त्तेतेति सोऽप्येतेनैव नियम्यः, उत्सर्गापवादयोस्तुल्ययोगक्षेमत्वात्, "अड् धातोः०" [ ४. ४. २९. ] इत्यादावनुपदस्यानुपादानं चेत्थं न्यायसिद्धौ चित्यमेवेति, तथापि वैचित्र्यान्न्यायांशद्वये ज्ञापकद्वयमुपन्यस्तमिति विज्ञेयम् ॥ २५ ॥

### *कृतेऽन्यस्मिन् धातु-प्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च* ॥ २५ ॥

**त०**—यद्यपि अड्विधायकसूत्रे विषयसप्तमी गृहीता, विषयसप्तम्याश्चाश्रयणं तत्परत्वाभावेऽपि तद्विषयत्वसम्भावनायामपि सूत्रप्रवृत्त्यर्थमेव क्रियते, तथापि "अड् धातोः०" [ ४. ४. २९. ] इति सूत्रे बृहद्वृत्तौ विषयसप्तम्याश्रयणस्य प्रत्ययव्यवधानेऽपि प्रवृत्त्यर्थत्वस्य व्याख्यानेनाग्रे धातुप्रत्ययादिकार्ये कृत एवाडागम इति ज्ञापयिष्यमाणोऽर्थः सूचित इति विषयसप्तम्याश्रयणसामर्थ्यादप्यडागमस्य पूर्वं प्रवृत्तिः कर्तुमशक्या, फलान्तराभावे हि विषयसप्तमी बलवती स्यात्, प्रत्ययव्यवधाने प्राप्तिरूपे फले लब्धे च तस्याः सामर्थ्यमुपक्षीणम्, ततश्च परत्वादिनिमित्तेनैवाडागमस्य बलवत्त्वेन पूर्वप्रवृत्तिरुपपादनीया, साऽप्यनेन न्यायेन वार्यते । अन्ये वैयाकरणा न्यायमिमं नाश्रयन्ते, तेषां मते हि अड्-वृद्धिविधायकशास्त्रयोर्विषयसप्तम्या पूर्वमेव तयोः प्रवृत्तिरिति 'आयन् आसन्' इत्यादि सिद्धये "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] इति वृद्धिविधानमपि नावश्यकं भवति, 'ऐयरुः' 'अध्यैयत' इत्यादौ तु 'इय्'विधायकशास्त्रस्य परत्वेन पूर्वं प्रवृत्तिः, ततो वृद्धिरिति रूपसिद्धिः, ङपरे णौ लघोर्दीर्घविधायके चास्वरादेरिति न पठ्यते, तथा चाचीकरदित्यादौ न दीर्घप्रवृत्तिदोषः, एवं च समार्छेत्यादावपि न दोष इति न्यायानित्यत्वफलमपि संगृहीतम्, "उपसर्गात् सुग्-सुव्०" [ २. ३. ३९. ] इति सूत्रेऽट्यपीति वचनं च युक्तमेव, तत्र षत्वात् प्रागेवाटः प्रवृत्तेरिति सर्वं समञ्जसं भवति । एतच्च पाणिनीये तन्त्रे "असिद्धवदत्राभात्" [ पा० सू० ६. ४. २२. ] इति सूत्रस्थमहाभाष्यकैयटग्रन्थेनापि प्रतीयते, तथा हि–तत्रायन् आसन् इत्यादिसिद्धये यत्वाल्लुकोरसिद्धत्वाश्रयणखण्डनावसरे–"सर्वेषामेष परिहारः, उपदेश इति वर्त्तते, तत्रोपदेशावस्थायामेवाडाटौ [तत्र मते स्वरादीनामटः स्थाने 'आट्' विधीयतेऽन्येषामट्] भवतः । अथवा 'आर्धधातुके' [ अशिति ] इति वर्त्तते, अथवा "लुङ्-लङ्-लृङ्क्ष्वड्" [ पा० सू० ६. ४. ७१. ] इत्यड्विधायकसूत्रे द्विलकारको निर्देशः–लुङादिषु–लकारादिष्विति इत्युक्तम् । तत्र कैयटः–"अन्तरङ्गानपि [ अपिना परनित्ययोः संग्रहः ] विधीन् बाधित्वा लुङाद्युपदेश एवाडाटौ भवतः । अथवार्धधातुकग्रहणानुवृत्तिसामर्थ्यात् [ अशितीत्यस्य सम्बन्धसामर्थ्यात् ] अकृतेषु लादेशेषु [ तत्र मते वर्त्तमानादिस्थाने 'लट्' 'लिट्' इत्यादयः सानुबन्धा लकारा एव विधीयन्ते, तेषां स्थाने तिबादय आदेशाः क्रियन्ते इति प्रक्रिया ] लावस्थायां लब्धार्धधातुकसंज्ञायामडाटौ भवतः" इत्याह [ सर्वे एव लकाराः स्वभावतोऽशितः, आदेशे सति ते यथायथं शितोऽशितश्च पश्चाद् भवन्ति ]। अथ यत्र य्वृता स्वरादित्वं भवति तत्र स्वरादित्वनिमित्त आट्, स्वमते वृद्धिः ] कथं स्यात्, उपदेशावस्थायामेव यावताऽट् प्रवर्त्तिष्यते इत्याशङ्कायां भाष्यकृता–अट एव तत्रापि विधानेन पश्चाच्चास्वरादित्वेऽटा सहैव वृद्धिरिति समाहितम् । तत्र कैयटः–"आटश्च" [ पा० सू० ६. १. ९०. ] इति यत् [ आगमभूतस्याटः "आडजादीनाम्" पा० सू० ६. ४. ७२. इत्यादि सूत्रविहितस्य स्वरादिधातौ 'प्रत्यये वा क्वचित्' वृद्धिविधायकं ] सूत्रं तत् 'अटश्च' इति क्रियते, अचीत्यधिकाराच्च [स्वरादावित्यधिकारात् ] हलि [ व्यञ्जने ] वृद्ध्यभावः । कथम्? आयन्, आसन्निति, यावतेणस्त्योर्यण्-लोपयोः कृतयोर्वृद्धिर्नास्ति [ स्वरादित्वाभावादिति भावः ], अन्तरङ्गत्वाद् वृद्धिर्भविष्यतीत्यदोषः । +++++ कृतायां वृद्धौ 'आसन्' इति तपरकरणादाकारलोपाभावः, इणोऽपि वृद्धेरैकारस्य यण् न भविष्यति, "इणो यण्" [ पा० सू० ६. ४. ८१. ] 'एः' इति योगविभागादिकारान्तस्येणो यण्विधानात् तदभावाच्चायादेशे कृते आयन् इति भविष्यति" इत्याह ॥ एतेन च ग्रन्थेन सर्वेभ्यो धातुप्रत्ययादिकार्येभ्यः पूर्वमेवाडाटस्तन्मते प्रवृत्तिः, आयन्नासन्नित्यादयश्च प्रयोगाः सुसाधा इति स्पष्टमेव । 'ऐयरुः' 'अध्यैयाताम्' इत्यादयश्च प्रयोगा यद्यपि तत्र पक्षे न सिध्यन्ति तथापि तत्र परत्वादियादेशस्य प्रवृत्तिरिति दीक्षितेनेङ्धातौ सिद्धान्तकौमुद्यामुक्तम् । नागेशभट्टश्च "न माङ्योगे" [ पा० सू० ६. ४. ७४. ] इति सूत्रव्याख्यायामुद्द्योते–'इङस्तु अध्यैयाताम्' इत्यादेर्लोकेऽनभिधानम्, पक्षयोः फलभेदापत्तेः, इत्याह । एतच्च शब्देन्दुशेखरेऽप्यदादिप्रकरणे 'इङ्'धातुव्याख्यावसरे निरूपितम् । 'ऐयरुः' इति च 'ऋ'–धातोर्जुहोत्यादिस्थस्य छान्दसत्वादेव साधु छन्दसि दृष्टानुविधानात् । यद्यपि 'ऋ' धातुव्याख्यावसरे वै०सिद्धान्तकौमुद्यां जुहोत्यादिगणे–"बहुलं छन्दसि" [ पा० सू० ७. ४. ७८. ] इत्येव सिद्धे "अर्ति-पिपर्त्योश्च" [ पा० सू० ७. ४. ७७. ] इतीत्वविधानादयं [ 'ऋ'–धातुः ] भाषायामपि" इत्युक्तं,तथापि तस्य भाषायां प्रयोगस्यानभिधानमेवेति नागेशाशयः । एवं वृद्धेरड्बाधिकाया धातुप्रत्ययकार्यात् पश्चात् प्रवृत्तिबोधकोऽस्य न्यायस्यांशो न पाणिनीयैरुपेयते । अटोऽपि तेषां मते पूर्वमेव प्रवृत्तिरित्यावेदितमेव । स्वमते चाचीकरदित्यादौ पूर्वमटि स्वरादित्वापत्त्या "लघोर्दीर्घोऽस्वरादेः" [ ४. १. ६४. ] इति सूत्रस्थास्वरादेरिति निषेधापत्त्या दीर्घाभावो मा भूदित्येतदर्थं सोंऽशः स्वीक्रियते, तेषां च मते एतद्विषये "दीर्घो लघोः०" [ पा० सू० ७. ४. ९४. ] इति सूत्रेऽस्वरादेरिति न पठ्यते । एतत्फलं हि 'और्णुनवत्' इत्यादौ दीर्घाभाव इति स्वमतम् । तन्मते च दीर्घविधायकं सूत्रं सन्वद्भावविधायकेन "सन्वल्लघुनि चङ्परेऽनग्लोपे" [ पा० सू० ७. ४. ९३. ] इति सूत्रेण समानयोगक्षेमम् । तच्च सूत्रं द्विधा व्याख्यायते, तद्व्याख्यानानु-

सारं यत्र सम्पूर्णस्य धातोर्द्वित्वं भवति तत्रैव सन्वद्भावो दीर्घश्च भवतः । अनेकस्वराणाम् 'ऊर्णु-अर्थापि-चकास्'प्रभृतीनां धातूनां च न सम्पूर्णस्य द्वित्वमिति तत्र सन्वद्भावो दीर्घश्च न भवतः । द्वितीयव्याख्यानुसारं चोर्णोतेर्दीर्घोऽर्थापयतेश्च दीर्घ-सन्वद्भावौ स्त एवेति सर्वं कारिकाभिः संगृहीतं सिद्धान्तकौमुद्यां दीक्षितेन, तथा हि—

"संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते ।
तत्रैव दीर्घः सन्वच्च नानेकाच्स्विति माधवः ॥
चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते ।
किन्त्वस्यावयवः कश्चित् तस्मादेकाच्स्विदं द्वयम् ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥
चकास्तौ तूभयमिदं न स्यात् स्याच्च व्यवस्थया ।
णेर्विशेष्यं सन्निहितं लघुनीत्यङ्गमेव वा ॥"

इति 'व्याख्याविकल्पस्य कैयटेनैव वर्णनात्" इति । अस्यायमाशयः—अस्मिन् शास्त्रे *कार्यकालं संज्ञा-परिभाषम्* इत्येकः पक्षः, तस्य च 'संज्ञा च परिभाषा चोभे कार्यप्रदेशके' इत्यर्थः, तथा चास्मिन् पक्षे तत्तत्कार्यविधिप्रदेशेषु संज्ञाशास्त्रस्य परिभाषाशास्त्रस्य चोपस्थितिर्भवति । *यथोद्देशं संज्ञा-परिभाषम्* इति च पक्षान्तरम् । उद्देशाः—संज्ञाशास्त्र-परिभाषाशास्त्रयोः पाठप्रदेशाः,ताननतिक्रम्य न तिष्ठतीति यथोद्देशम्, संज्ञाशास्त्रं परिभाषाशास्त्रं च स्वप्रदेशे स्थितमेव तत्तद्विध्यपेक्षितं स्वं स्वमर्थं समर्पयतीति तदर्थः, अस्मिन् पक्षे च कार्यप्रदेशेषु संज्ञा-परिभाषाशास्त्रविधेयांशस्यैवोपस्थितिर्न तु कृत्स्नस्य शास्त्रस्येति स्थितिः । सन्वद्भावविधायके "सन्वल्लघुनि चङ्परेऽनग्लोपे" [ पा० सू० ७. ४. ९३. ] इति सूत्रे, दीर्घविधायके "दीर्घो लघोः" [ पा० सू० ७. ४. ९४. ] इति सूत्रे च तत्रत्य[पाणिनीयमतस्थ]प्रक्रियानुसारम् 'अङ्गस्य' [ प्रत्यये परतः प्रकृतिभूतस्य ] 'अभ्यासस्य' [ द्वित्वे पूर्वस्य ] इति च पदद्वयमनुवृत्तम्, पदद्वयमपि च संज्ञाबोधकम्, तत्र 'अभ्यासस्य' इति संज्ञाबोधकपदसम्बन्धेन अभ्याससंज्ञाविधायकं "पूर्वोऽभ्यासः" [ पा० सू० ६. १. ४. ] इति सूत्रं कार्यकालपक्षे सन्निहितम्, ततश्च 'अङ्गस्य' इति पदसहितस्य सन्वद्भावविधायकस्य सूत्रस्यार्थ एवं सम्पद्यते—अङ्गस्य ये द्वे उच्चारणे तयोः पूर्वोऽभ्याससंज्ञः, स सन्वद् भवतीति । तत्र कृदन्तस्योच्चारणशब्दस्य योगे 'अङ्गस्य' इति कर्मणि षष्ठी, न त्ववयवषष्ठी कारकविभक्तेर्बलवत्त्वात् । अङ्गं च प्रत्यये परतः कृत्स्नमेव प्रकृतिरूपं न तु तदेकदेशः, ततश्च कृत्स्नमङ्गं यत्र द्विरुच्यते तत्रैव सन्वद्भावो दीर्घश्च भवतः, न त्वेकदेशमात्रस्य द्वित्वे सति । एवं च प्रकृतेरेकस्वरत्व एव कृत्स्नायाः प्रकृतेर्द्वित्वसंभावना तत्रैव च तयोः प्रवृत्तिः, अनेकस्वरासु प्रकृतिषु च न तयोः प्रवृत्तिः, तत्रैकस्वरस्यांशस्यैव द्वित्वविधानादिति माधवस्य मतम् । एवं च 'चकास्'धातोः, अर्थमाचष्ट इत्यर्थेऽर्थशब्दाण्णावात्वे प्वागमे चार्थापिधातोः, ऊर्णोतेश्चेत्येवंविधानामनेकस्वराणां ण्यन्तानां ङे कृत्स्ना प्रकृतिर्न द्विरुच्यत इति न तत्र दीर्घत्वं सन्वद्भावश्च प्रवर्त्तते; किन्त्वस्मिन् माधवाभिप्रेते व्याख्याने समाश्रिते "सन्वल्लघुनि चङ्परेऽनग्लोपे" [ पा० सू० ७. ४. ९३. ] इति सूत्रे महाभाष्ये 'अजजागरत्' इत्यत्र सन्वद्भावमाशङ्क्य णिपरकलघोर्गकाराकारस्य मध्यस्थितेन 'जा' इत्यनेन व्यवधानात् समाधानं कृतं, तद् विरुध्येत, 'जागृ'—धातोरप्यनेकस्वरत्वेन तत्र माधवव्याख्यानरीत्या सन्वद्भावस्य प्राप्तेरभावेन शङ्का-समाधानयोरुभयोरनालम्बनत्वापत्तेस्तत्र कृत्स्नस्याङ्गस्य [ संपूर्णायाः प्रकृतेः ] द्वित्वाभावात् । तथा चात्र न कार्यकालपक्षेण व्यवहारो भाष्यकृदभिमत इति यथोद्देशपक्षमाश्रित्याह—वस्तुतोऽङ्गस्यावयव इत्यादि । अयमाशयः—अङ्गस्येत्यवयवषष्ठी, न कर्मषष्ठी, तथा चाङ्गावयवस्य [ प्रकृत्यवयवस्य ] अभ्याससंज्ञकस्य [ द्विरुक्तौ पूर्वस्य ] इत्यर्थो लभ्यते । ततश्चोर्णुधातोर्ण्यन्तस्य ङे 'नु' इत्येकदेशे द्विरुक्तेऽपि दीर्घस्य प्रवृत्तिरिति और्णूनवदिति रूपम्, सन्वत्त्वस्य चेह प्रयोजनमेव नास्ति, तत्प्रयोजनभूतस्येत्त्वस्यात्राप्राप्तेः, द्वित्वे पूर्वस्याकारस्याभावात् । अर्थमाचष्ट इत्यर्थे णिचि आत्वे प्वागमे च ङे परे तदेकदेशस्य द्वित्वेऽपि सन्वद्भावदीर्घौ भवत एवेति 'आर्तीथपत्' इति रूपं भवति । परं त्वत्र पक्षे 'चकास्'धातोर्ण्यन्तस्य ङे विशेषः, स चायम्—'लघुनि चङ्परे' इत्ययमंशः कैयटेन द्विधा व्याख्यातः, 'चङ्परे' [ 'ङपरे' ] इत्यनेनान्यपदार्थतया लब्धस्य 'णौ'इत्यस्य सन्निहितं 'लघुनि' इत्येतत् पदं विशेष्यम्, तथा च चङ्परे णौ [ ङपरे णौ ] यल्लघु तत्परो योऽङ्गावयवोऽभ्यास इत्यादि प्रथमव्याख्यानम् । अङ्गमेव [ प्रकृतिरेव ] वा णेर्विशेष्यम्, तथा च चङ्परे णौ यदङ्गं [ या प्रकृतिः ] तस्य योऽभ्यासो लघुपर इत्यादि द्वितीयं व्याख्यानम् [ इदं च व्याख्यानद्वयं सिद्धान्तकौमुद्यामपि प्रदर्शितम् ] इति पक्षद्वयेन सन्वद्भावो दीर्घश्च 'चकास्' धातोर्ण्यन्तस्य न स्यात् स्याच्च, यतः प्रथमे व्याख्यानेऽत्र तयोर्न प्राप्तिर्ङपरे णौ लघोरभावात्, द्वितीये व्याख्याने चाभ्यासस्य [ द्वित्वे पूर्वस्य ] लघुपरत्वादुभयोः प्राप्तिरिति 'अचचकासत्' 'अचीचकासत्' इति रूपद्वयम् ॥ प्रकृतमनुसरामः—स्वमते नित्यत्वादटः पूर्वं प्रवृत्तौ स्वरादित्वापत्त्या दीर्घाप्राप्त्याऽचीकरदित्यादिरूपाणामसिद्ध्याऽस्य न्यायस्यान्तिमोंऽश आवश्यक एव, और्णुनवदित्यादौ च दीर्घो मा भूदेतदर्थमत्रास्वरादित्वग्रहणस्यावश्यकत्वात् । 'इय्'विधायकशास्त्रं च [ "धातोरिवर्णस्येयुव्०" २. १. ५०. ] वृद्धिविधायकशास्त्रस्य [ "स्वरादेस्तासु" ४. ३. ३१. ] इत्यस्यापेक्षया पूर्वमिति तस्यैतदपेक्षया सर्वथा

निर्बलत्वाद् वृद्धेः पश्चाद्भवनार्थं तदंशस्याप्यशक्यत्वमेवेति 'ऐयरुः' 'अध्यैयत' इत्यादीनां सिद्धिः । तथा च तज्ज्ञापनार्थम् "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] इत्यस्याप्यावश्यकत्वमिति प्रक्रियानुसारं स्थितस्य गतेश्चिन्तनीयत्वात् सर्वमुपपन्नम् । अत्र न्याये यद्यपि 'तद्बाध्योऽट्' इत्यसङ्गतमिव प्रतिभाति, तथा हि–योऽट् वृद्ध्या बाध्यः स च स्वरादिधातुविषयकः, तत्र च स बाध्यत एवेति कथं स कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये प्रवर्त्तेत; यश्च न तया बाध्यः स प्रकृतन्यायविषय एव नेति स धातुप्रत्ययकार्यात् पूर्वमपि प्रवर्त्तेतान्तरङ्गत्वान्नित्यत्वाद् वा; तथा चाचीकरदित्यत्र पूर्वमेवाटि स्वरादित्वापत्त्या दीर्घाप्रवृत्तिरूपदोषः स्यादेवेति नानेन न्यायेन तद्दोषवारणमिति 'तद्बाध्योऽट्' इति कथनमसंगतमेव; तथापि 'तद्बाध्य'पदस्योपलक्षणतया स्वरादिषु वृद्धिकृतेन बाधेनोपलक्षितो व्यञ्जनादिधातुषु प्रवर्त्तमान एवाट् तेन बोध्यते, समानसूत्रविधेयत्वलक्षणसम्बन्धात् तत्र लक्षणेत्यपि वा बोध्यम् । किञ्च तद्बाध्यपदस्य वृद्धिपरिचायकतयाऽप्युपयोग इति वृत्तावावेदितमेव । अनेनैव हि पदेन "स्वरादेस्तासु" [ ४. ४. ३१. ] इति विहितैव वृद्धिरिह ग्राह्या, न तु "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति विहिता वृद्धिः, तस्या अड्बाधकत्वाभावादिति लभ्यते । वस्तुतस्तु "लघोर्दीर्घोऽस्वरादेः" [ ४. १. ६४. ] इत्यत्रास्वरादेरिति वचनसामर्थ्यादेव योऽकृतेऽटि स्वरादिः स एवात्र स्वरादिशब्देन गृहीष्यते, अन्यथा ङविषये सर्वेषामेव धातूनामटाऽवश्यमेव भाव्यमिति स्वरादित्वापत्त्या तस्याऽव्यावर्त्तकत्वं न स्यात् । इत्थं चाकृतेऽटि यः स्वरादिरित्यर्थाश्रयणेऽचीकरदित्यादौ दोषाभावेनाटो धातु-प्रत्ययकार्यात् पश्चात् प्रवृत्तौ फलाभावेन तदंशस्य नावश्यकत्वमिति प्रतीमः । किञ्च तद्विषये यज्ज्ञापकमुपन्यस्तम् "अड् धातोः०" [ ४. ४. २९. ] इति सूत्रे 'अनु' इति पदानुपादानम्, तच्च प्रयोजनाभावमूलकमेवेति न तज्ज्ञापकं भवितुमर्हति, उपात्तं हि पदं ज्ञापकं भवति, नानुपात्तम्, ज्ञापकत्वं हि ज्ञापनकर्तृत्वम्, असतश्च कर्तृत्वे वन्ध्यासुतादीनामपि कर्तृत्वप्रसङ्गादिति । तदंशस्य ज्ञापनावश्यकत्वे "एत्यस्तेर्वृद्धिः" [ ४. ४. १३०. ] इति सूत्रस्यैव ज्ञापकत्वमिति स्वीकरणीयम्, एतच्चात्रत्यबृहद्वृत्तिग्रन्थोपन्यासेन वृत्तौ स्फुटीकृतमपि, तत्र हि सम्पूर्णन्यायस्यानेनैव ज्ञापनमिति स्पष्टमेवोक्तम् । अस्यांशस्यानावश्यकत्वे च पूर्वोक्तरीत्या स्वीकृते "उपसर्गात् सुग्-सुव्०" [ २. ३. ३९. ] इति सूत्रेऽव्यपीति सप्रयोजनमेव नित्यत्वात् पूर्वमेवाटः प्रवृत्त्या तद्व्यवधानेन षत्वाप्राप्तेरिति बोध्यम् । इत्थं चात्र पश्चादड्भवने न किञ्चिद् विनश्यतीति वृत्तिग्रन्थमुपादाय–"नन्वडागमे कृते सति तद्व्यवधानात् प्राकृतषत्वं *निमित्ताभावे०* इति न्यायान्निवर्त्तते, उपसर्ग-धात्वोरानन्तर्यं हि षत्वस्य निमित्तम् । अटा व्यवधाने च तयोर्नानन्तर्यं विनष्टमिति कथमुच्यते न किञ्चिद् विनश्यतीति शङ्कामुत्थाप्य, उच्यते–*आगमोऽनुपघाती* इति न्यायादडागमेन व्यवधानं न स्यादिति न्यासोक्तं समाधानमप्यनावश्यकम्, पूर्वोक्तरीत्या अव्यपीत्यस्य सार्थक्यस्योपपादितत्वेन तद्व्यवधाने षत्वस्य न्यायतः प्राप्तत्वादिति ॥ २५ ॥

## *पूर्वं पूर्वोत्तरपदयोः कार्यं पश्चाच्च सन्धिकार्यम्* ॥ २६ ॥

**सि०—पूर्वोत्तरपदयोरिति सम्बन्धसामान्ये षष्ठी, तथा चान्तरङ्गत्वादिहेतुयुतादपि सन्धिकार्यात् पूर्वं पूर्वोत्तरपदसम्बन्धिकार्यं भवति, पश्चात् सन्धिकार्यमिति । पूर्वोत्तरपदकार्यं च पूर्वपदमुच्चार्योत्तरपदमुच्चार्य च विहितं कार्यमिति न विज्ञेयम्, अन्यथा वृद्धिकार्यस्य पूर्वोत्तरपदकार्यत्वाभावाज्ज्ञापनासम्भवः । *अन्तरङ्गं बहिरङ्गात्* इत्यादिबलवत्त्वबोधकन्यायानामपवादोऽयं न्यायः । अत्रांशे ज्ञापकं च "य्वः पदान्तात् प्रागैदौत्" [ ७. ४. ५. ] इति सूत्रे वृद्धिप्राप्तौ सत्यामित्यर्थाश्रयणम्, तथा हि–अस्य सूत्रस्य तावदयमर्थः–ञ्णिति तद्धिते प्रत्यये परत इवर्णोवर्णयोर्वृद्धिप्राप्तौ तयोरेव स्थाने यौ य्वौ पदान्तौ ताभ्यां प्राग् यथासंख्यमैदौतौ स्यातामिति, यथा व्याकरणमधीते वेत्ति वेत्यर्थे "तद्वेत्त्यधीते" [ ६. २. ११७. ] इत्यणि–वैयाकरण इति रूपम्, एवं–स्वश्वस्यायमित्यर्थे "तस्येदम्" [ ६. ३. १६०. ] इत्यणि–सौवश्व इति रूपम् । यदि चायं न्यायांशो न स्यात् तदा व्याकरण-स्वश्वशब्दयोर्निष्पत्तिकाल एव 'वि+आकरण, सु+अश्व' इत्यवस्थायामेव पूर्वमिकारोकारयोर्यत्ववत्वभवनादिवर्णोवर्णयोरभावेन तयोर्वृद्धिप्राप्तिर्नास्तीति तयोर्वृद्धिप्राप्तौ सत्यामित्युक्त्वा विधीयमानावैदौताविह कथं स्याताम् । परमेतेन न्यायांशेन 'वि+आकरण+अण्, सु+अश्व+अण्'वि-सुशब्दयोरणि वृद्धिरूपं पूर्वपदकार्यमेव पूर्वं प्राप्स्यति न तु यत्व-वत्वरूपं सन्धिकार्यमिति संभाव्य वृद्धिप्राप्तौ सत्यामिति सूरिणाऽनुवर्त्तितम्, तत्प्राप्तौ च सत्यां "य्वः पदान्तात्" [ ७. ४. ५. ] इति सूत्रकरणसामर्थ्याद् वृद्धिं बाधित्वा यत्व-वत्वे एव स्यातां, तत ऐदौतौ चेति स्थितिः । फलं चास्य न्यायांशस्य 'अग्नेन्द्रौ' इति रूपम्, अत्र हि अग्निश्चेन्द्रश्चेत्यर्थे द्वन्द्वे कृते पूर्वपदस्याग्नेरिकारस्य "वेदसहश्रुतावायुदेवतानाम्" [ ३. २. ४१. ] इत्यात्वं द्वन्द्वसमासापेक्षत्वात् "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घापेक्षया बहिरङ्गमपि प्रथमं क्रियते, न त्वन्तरङ्गोऽपि दीर्घः, यदि पूर्वं दीर्घ एव क्रियेत तर्हि पूर्वपदोत्तरपदोभयावयवजस्य ईकारस्य *उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक्* इति न्यायेन यदि 'अग्नी' इत्येवं रूपं पूर्व-**

पदान्तत्वं व्यपदिश्यते तर्हि तस्य "वेदसहश्रुता०" [ ३. २. ४१. ] इत्यात्वे 'अग्नान्द्रौ' इति रूपं स्यात्, यदि तूत्तरपदादित्वं व्यपदिश्यते तर्हि पूर्वपदस्य 'अग्न्' इत्येवंरूपतया तदन्तस्य नस्यात्वे-अगेन्द्राविति स्यादित्युभयथापि दोष एव स्यात्, ततश्च पूर्वमात्वरूपं पूर्वपदकार्यं कृत्वा पश्चात् प्राप्तस्य "अवर्णस्येवर्णादिना०" [ १. २. ६. ] इत्येत्वस्य सन्धिकार्यस्य प्रवर्त्तनादिष्टरूपस्य सिद्धिरिति । उत्तरपदकार्यस्य पूर्वं प्रवृत्तौ ज्ञापकं तु "आतो नेन्द्रवरुणस्य" [ ७. ४. २९. ] इति सूत्रेणोत्तरपदस्य वृद्धिप्रतिषेधनम्, तथाहि–अग्नेन्द्रौ देवते अस्येत्यर्थे "देवता" [ ६. २. १०१. ] इत्यणि–आग्नेन्द्रं सूक्तमित्यत्रैतन्न्यायपूर्वांशेन पूर्वपदकार्यस्य प्रथमप्रवृत्तेः साधितत्वेन "वेदसहश्रुता०" [ ३. २. ४१. ] इत्यनेनाग्नेरिकारस्यात्वे कृते पश्चादणि परे "देवतानामात्वादौ" [ ७. ४. २८. ] इत्युभयपदवृद्धौ प्राप्तायामनेनोत्तरपदस्य वृद्धिर्निषिध्यते । स च व्यर्थ एव, यत इन्द्रशब्दे तावद् द्वौ स्वरौ, तत्र प्रथमः सन्धिनाऽपहृतः, एतन्न्यायाभावे "अवर्णस्येवर्णादिना०" [ १. २. ६. ] इत्येत्वस्यान्तरङ्गत्वात् प्रवृत्तेः, द्वितीयश्चाणि परे परत्वाद् "अवर्णेवर्णस्य" [ ७. ४. ६८. ] इति लुप्यते, ततश्चेन्द्रशब्दस्य स्वररहितत्वाद् वृद्धिप्राप्तेरेवाभावात् तस्य वैयर्थ्यं स्पष्टमेव । तथा च व्यर्थीभूय स निषेधो ज्ञापयति–पूर्वमुत्तरपदकार्ये कृते पश्चात् सन्धिकार्यमिति । तथा चेन्द्रशब्दस्याद्यस्वरस्य वृद्धिप्राप्तिर्निराबाधेति तन्निषेधस्य स्वांशे चारितार्थ्यम् । फलं चास्यांशस्य–परमायमिति, अत्र परमश्चासावयमित्यर्थे कर्मधारयाधिकारस्थे "सन्महत्परमोत्तमोत्कृष्टं पूजायाम्" [ ३. १. १०७. ] इति समासे 'परम+इदम्+सि' इति स्थितौ "अवर्णस्येवर्णादिना" [ १. २. ६. ] इत्येत्वे "अयमियं पुं-स्त्रियोः सौ" [ २. १. ३८. ] इत्ययमादेशे च प्राप्तेऽयमादेशस्य पुंस्त्वबहिर्भूतप्रत्ययादिनिमित्तत्वाद् बहिरङ्गत्वेनान्तरङ्गत्वादेत्वस्यैव प्रवृत्तौ प्राप्तायामनेन न्यायांशेन पूर्वमुत्तरपदकार्यस्यायमादेशस्यैव प्रवृत्तिरिति; यदि त्वन्तरङ्गत्वात् प्रथममेत्वं विधीयेत तदा *उभयस्थाननिष्पन्न* इति न्यायादेकारस्येदंशब्दसम्बन्धितायामेकदेशविकृतस्यानन्यत्वादेदंशब्दस्यायमादेशे परमयमिति रूपं स्यात्, यदि च एत्वस्य पूर्वपदसम्बन्धित्वस्वीकृतिस्तदा 'दम्' इत्यस्यैवावयवे समुदायोपचारेण 'इदम्'शब्दत्वव्यपदेशादयमादेशे 'परमेऽयमिति रूपं स्यात्; उभयथाप्यनिष्टमेव रूपमिति प्रकृतन्यायांशस्य तत्र प्रवृत्त्योत्तरपदसम्बन्धिकार्येऽयमादेशे पूर्वं प्रवृत्ते पश्चात् सन्धिकार्ये परमायमितीष्टरूपसिद्धिः, अयमादेशानन्तरं चैत्वस्याप्राप्त्या "समानानां तेन दीर्घः" [ १. २. १. ] इति दीर्घत्वमेव भवति । अयं च न्यायांशोऽनियतः, तथा च परम इर्यस्य तस्येत्यर्थे ङसि 'परमेः' इति रूपं भवति, अस्य न्यायस्य नित्यत्वे तु पूर्वमिकाररूपस्योत्तरपदस्य "ङित्यदिति" [ १. ४. २३. ] इत्येत्वरूपमुत्तरपदकार्यमेव प्रथमं स्यादिति 'परमैः' इत्यनिष्टं रूपं प्रसज्येतेति; एतच्च व्याख्यानं प्राचामनुरोधेन । वस्तुतस्तु वैयाकरण इत्यादावैदागमस्यादिस्वरवृद्धेर्वा न पूर्वपदकार्यत्वम्, पूर्वपदमुद्दिश्य विहितकार्यस्यैव पूर्वपदकार्यत्वौचित्यादिति वृद्धिप्राप्तौ सत्यामित्यर्थाश्रयणेनैतन्न्यायपूर्वांशज्ञापनासंभवः । न चैवं परमायमित्यत्रायमादेशस्याप्युत्तरपदकार्यत्वाभावेन तत्रैतन्न्यायाप्रवृत्तावनिष्टं रूपं स्यादिति वाच्यम्, तत्रोत्तरपदमुद्दिश्य विहितत्वाभावेऽपि वस्तुत उत्तरपदभूतस्येदंशब्दस्य कार्यविधानात्, "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति वृद्धिस्तु समुदायावयवस्य स्वरेष्वादिभूतस्य स्वरस्य विधीयते न तु पूर्वपदादिभूतस्य पूर्वपदस्य चेति ततो भेदात् । किञ्चात्र 'वैयाकरण' इत्यादावेतन्न्यायपूर्वांशे स्वीकृते सन्धिकार्यात् पूर्वं स्वरेष्वादिस्वरस्य वृद्धौ 'वै आकरण' इत्यवस्थायामायादेशे ततः पदान्ताद् यकारात् पूर्वस्थस्याकारस्यैकारादेशेऽपि रूपसिद्धौ 'तत्प्राप्तौ सत्याम्' इति वृद्धिप्राप्तिपूर्वकं तद्बाधकरूपस्यैदागमस्याश्रयितुमनावश्यकम्, इति ज्ञापितेऽपि स्वांशे चारितार्थ्याभाव एवेति विशदतया विवेचितं विवरणे ॥ २६ ॥

## *पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यं पश्चात् सन्धिकार्यम्* ॥ २६ ॥

त०—सन्धिकार्येण पूर्वोत्तरपदयोर्वर्णस्यापहारेण तस्य विकलतापत्त्या तन्निमित्तकार्यस्याभावप्रसङ्गे प्राप्तेऽयं न्याय आरभ्यते । अत्र कार्ये पूर्वपदस्योत्तरपदस्य च हेतुत्वं वस्तुसत्त्वापेक्षयैव, न तु पूर्वं पदत्वोत्तरपदत्वरूपपुरस्कारेण, तथा सति 'परमायं' 'परमाहम्' इत्यादिरूपाणामसिद्धिप्रसङ्गात्, इहापि 'परम+इदम्+सि' 'परम्+अस्मद्+सि' इत्यवस्थायामेवान्तरङ्गत्वादेत्व दीर्घयोः प्राप्त्या तत्प्रवृत्तौ वृत्त्युक्तदिशा रूपासिद्धिः स्यादिति वस्तुत उत्तरपदस्येह कार्यित्वेन प्रकृतन्यायप्रवृत्त्योत्तरपदस्थानिकयोरयमहमादेशयोः प्रवृत्तिः सूपपदा भवति । अत्र हि इदमस्मच्छब्दयोर्वस्तुत उत्तरपदत्वेऽपि तेन रूपेण कार्यित्वं नास्ति, तयोः कार्ययोरुत्तरपदाधिकारस्थत्वाभावात्, सन्धिकार्यमपीहोभयस्थाननिष्पन्नमन्यतरस्थाननिष्पन्नं च साधारण्येन गृह्यते, तेन 'आग्नेन्द्र' इत्यादावुभयस्थाननिष्पन्नेऽपि सन्धिकार्ये यथा प्रवर्त्तते तथा रात्रिमह इत्यादाविकारमात्रस्थानिकयत्वादेशेऽपि प्रकृतन्यायप्रवृत्त्या मागमरूपं पूर्वपदकार्यमेव प्रथमं प्रवर्त्तते । अत्र च न्याये प्राचीनैरंशद्वयं परिकल्प्य ज्ञापकद्वयमुपन्यस्तम्, तदनुसारमेव च वृत्तौ व्याख्यातोऽयं न्यायः ।

सुविचारणे तु न्यायस्यांशद्वयस्य कथञ्चित् स्वीकर्तुं शक्यत्वेऽपि नात्र ज्ञापकद्वयस्य सत्ताऽवसीयते, पूर्वांशज्ञापकस्य "य्वः पदान्तात् प्रागैदौत्" [ ७. ४. ५. ] इति सूत्रे 'तत्प्राप्तौ' इत्यनुवर्तनस्य ज्ञापकत्वायोगात्, येन विना यदनुपपन्नं यस्मिंश्च सति यदुपपद्येत तेनैव तज्ज्ञाप्यमिति स्थितिः, तत्प्राप्तावित्यस्यैकारोकारयोर्वृद्धिप्राप्तावित्यर्थो वर्ण्यते, तत्रेकारोकारयोर्वृद्धिप्राप्तिर्हि सति सम्भावनाविषया, यद्यत्र यत्व-वत्वे न स्यातां तर्हि तत्स्थानिनोरिकारोकारयोर्वृद्धिरेव स्यादिति तात्पर्यात्। तथा च तत्प्राप्ताविति पदमिकारोकारयोरुपलक्षणतया स्वरूपपरिचायकं, न तु विशेषणतया व्यावर्त्तकम्। तथा च वृद्धिप्राप्तिकालपर्यन्तं तयोरिकारोकारयोः स्थितिर्नावश्यकीति सन्धिकार्ये यत्वादौ कृतेऽपि तत्प्राप्तिपदस्य परिचायकत्वानपनोदेन तेनैतन्न्यायज्ञापनासंभवात्। किञ्च परिनिष्ठितं हि पदं पदान्तरमाकाङ्क्षतीति व्युत्पत्त्या यावद् व्याकरणशब्देन सर्वथा निष्पद्येत तावत् तस्य नामत्वमपि न स्यात्, नामसंज्ञायां च द्वितीयोत्पत्त्या 'व्याकरणमधीते' इत्यादि विग्रहः साध्यः स्यात्, एवं च संहितायाः सत्त्वे तावत्कालं सन्ध्यभावेन स्थातुमशक्यम्, ततश्चानेन न्यायेन तत्रत्यं सन्धिकार्यं वृद्धिप्राप्तिकालपर्यन्तं वारयितुं न शक्यते। किञ्चेयमादिवृद्धिर्न पूर्वपदकार्यं न वोत्तरपदकार्यम्, अपि तु समुदायस्येति वृत्तावेवावेदितम्। इत्थं चात्र न्यायं विनापि निर्वाहे न्यायेन चेकारस्य वृद्धिप्राप्तिसाधनासंभवाच्च नानेन 'तत्प्राप्तौ' इत्यनुवर्त्तनेनैतन्न्यायज्ञापनमुचितम्। "आतो नेन्द्रवरुणस्य" [ ७. ४. २९. ] इति सूत्रे बृहद्वृत्तौ चास्यैव सूत्रस्य संपूर्णन्यायज्ञापकता प्रदर्शिता, तथा हि–तत्रत्यो ग्रन्थः–"ननु चेन्द्रशब्दस्य द्वौ स्वरौ, तत्राद्यः सन्धिकार्येण ह्रियतेऽपरः "अवर्णेवर्णस्य" [ ७. ४. ६८. ] इत्यतोऽस्वर एवेन्द्रशब्दः, तस्य किं वृद्धिप्रतिषेधेन? सत्यम्–किन्त्वनेनैतज्ज्ञाप्यते *बहिरङ्गमपि पूर्वं पूर्वोत्तरपदयोः कार्यं भवति, पश्चात् सन्धिकार्यम्*, तेन 'पूर्वैषुकामशम' इत्यादि सिद्धं भवति" इति। न चोत्तरपदस्य वृद्धिनिषेधकेनानेन [ "आतो नेन्द्रवरुणस्य" इति सूत्रेण ] कथं पूर्वपदोत्तरपदोभयविषयकं ज्ञापनं कर्तुं शक्यत इति शङ्कनीयम्, *असति बाधके प्रमाणानां सामान्ये पक्षपातः* इति न्यायेन सामान्यतः [ समुदायावयवत्वसामान्येन ] एकदेशानुमत्या वा संपूर्णन्यायस्य ज्ञापनसंभवात्। लघुन्यासकारेण च 'वैयाकरणः' इत्यादावस्य न्यायस्याप्रवृत्तिरपि प्रतिपादिता, सा च "य्वः पदान्ताद्०" [ ७. ४. ५. ] इति सूत्रस्थतत्प्राप्तावित्यनुवर्त्तनस्य ज्ञापकत्वे कथं संगच्छेत, तथा हि–'वैयाकरणः' इत्यादिप्रयोगानुदाहृत्य "परत्वान्नित्यत्वाच्च वृद्धेः प्रागेव सर्वत्रानेनैदौतौ" इति बृहद्वृत्तिग्रन्थव्याख्यानावसरे तेनोक्तम्–"एतच्च "आतो नेन्द्रवरुणस्य" [ ७. ४. २९. ] इत्यत्र यत् 'पूर्वं सन्धिकार्यं न भवति' इति ज्ञापितं तस्यानाश्रयणेन ज्ञापकज्ञापितत्वात्, तस्य ज्ञापकस्य समाश्रयणे वा पूर्वं यत्व-वत्वाभावे ऐदौतः प्राप्तेरभावात् पूर्वमिवर्णोवर्णयोर्वृद्धौ तत आयावादेशे च य्वः प्रागैदौदिति आत एवैत्त्वौत्त्वे तान्येव रूपाणि अतः पूर्वं वृद्धिरेव स्यात्, न यत्व-वत्वे इत्याग्रहो न कार्यः" इति। अस्यायमाशयः–अत्र न्याये "आतो नेन्द्रवरुणस्य" [ ७. ४. २९. ] इति सूत्रमेव ज्ञापकम्। इह च [ वैयाकरण इत्यादौ ] न तन्न्यायस्य प्रवृत्तिः, ज्ञापकज्ञापितत्वात्। यदि च तत्प्रवृत्तिरिह स्यात् तर्हि यत्व-वत्वे पूर्वं न प्रवर्त्तेतामिति य्वः पदान्तस्याभावेन ततः प्रागैदौतौ कथं प्रवर्त्तेयाताम्, न्यायप्रवृत्तौ च यत्व-वत्वाभ्यां पूर्वं वृद्धौ कृतायामायावादेशयोः सतोराकारस्य य्वाभ्यां पूर्वस्य स्थाने ऐतौतोः करणेन रूपसिद्धौ तत्प्राप्तौ सत्यामित्युक्तेरानर्थक्यमेवेति। वस्तुतस्तु–इह न्यायस्य प्रवृत्तिचर्चाऽपि नोचिता, वस्तुतः पूर्वपदस्य उत्तरपदस्य वा कार्यित्वविरहादित्यावेदितं पूर्वमपि। अत्र न्यायप्रवृत्तौ पूर्वमिकारोकारयोर्वृद्धावायावादेशे यकार-वकाराभ्यां पूर्वस्याकारस्यैदौदादेशे रूपसिद्धिरिति यदुक्तं न्यासकृता तत्तु न युक्तमित्युत्पश्यामः, यतस्तथा सति य्वाभ्यां प्राच ऐदौदादेशावित्यर्थः कल्पनीयः स्यात्, स च प्रकृतसूत्राक्षरविरुद्धः, तथा च प्रकृतन्यायप्रवृत्ताविह 'वैयाकरणः' इति रूपासिद्धिरेव स्यादिति प्रतिभाति। यदि च "इकारोकारस्थानीयाभ्यां य्वाभ्यां प्राग् यथासंख्यमैदौतौ" इति वृत्त्युक्त्या वृद्धिप्राप्ताविति पदं तत्स्वरूपपरिचायकमात्रं, न तु वस्तुतो वृद्धिप्रवृत्तिरिहाभिलषिता, तथा सति इकारस्थानीयस्य यस्य लाभाभावादायादेशयकारो न साक्षादिकारस्थानीयोऽपि तु परम्परयैवेति न्यायप्रवृत्तावपि नात्र पूर्वं वृद्धिः 'तत्प्राप्तौ सत्याम्' इति पदेन तत्प्रवृत्त्यभावस्य स्वरसतो लाभात्। एवं चैतन्न्यायाभावेऽन्तरङ्गत्वाद् यत्व-वत्वयोः प्रवृत्तौ कदापीकारोकारयोर्वृद्धेरप्राप्त्या तत्प्राप्तौ सत्यामिति पदस्योपलक्षणतयाऽपि परिचायकत्वमसंभवमेवेति तत्प्राप्तौ सत्यामित्यर्थाश्रयणादयं न्यायांशो ज्ञाप्यत एवेत्युच्यते तदापि न निर्वाहः, न्यायेन यत्व-वत्वयोर्निरोधापत्तेः सूत्रस्यास्य प्रवृत्त्यसंभवात्। यदि च सूत्रारम्भसामर्थ्याद् यत्व-वत्वयोः प्रवृत्तिरित्युच्यते तदापि न्यायस्यानुपयोग एव। न च 'तत्प्राप्तौ सत्याम्' इति पदस्य सार्थक्यमिति वाच्यम्, तस्येह फलाभावेनानुवृत्तेरेव त्यक्तुं शक्यत्वात्। यदि च यकार-वकाराभ्यां परस्य स्वरेष्वादिभूतस्य स्वरस्य प्राप्तवृद्धिबाधनार्थं तत्प्राप्तौ सत्यामिति पदमावश्यकमित्युच्यते तदा तदर्थमेव तस्य सार्थक्येन ज्ञापकत्वाऽसम्भवात्, यदीह यकार-वकारौ न स्यातां तर्हि तत्स्थानिनोरिकारोकारयोरेव वृद्धिः स्यादिति सम्भावनामात्रेण वा 'तत्प्राप्तौ सत्याम्' इत्यस्य चारितार्थ्यात्। तस्मादिह पूर्वपदमुद्दिश्य कार्यस्य कस्यचनाभावेन वा, सन्ध्यभावे परिनिष्ठितत्वाभावेन व्याकरणादिपदानां पदान्तरेण सम्बन्धस्या-

नुपपद्यमानत्वेन पूर्वं सन्धिप्रवृत्तेरावश्यकतया वा "य्वः पदान्तात्०" [ ७. ४. ५. ] इति सूत्रविषये प्रकृतन्यायस्यानुपयोग एवेति नात्रत्येन 'तत्प्राप्तौ' इत्यनुवृत्तेन पदेनैतन्न्यायांशज्ञापनं युक्तमिति पर्यवस्यति ॥ अथ 'आतो नेन्द्रवरुणस्य' [ ७. ४. २९. ] इत्युत्तरपदवृद्धिप्रतिषेधस्य ज्ञापकत्वं विचार्यते– आग्नेन्द्रं सूक्तमित्यत्र "देवतानामात्वादौ" [ ७. ४. २८. ] इत्युभयपदवृद्धौ प्राप्तायामुत्तरपदस्यानेन वृद्धिर्निषिध्यते, तत्र अग्निश्चेन्द्रश्च देवते यस्येत्यर्थे पूर्वमग्निशब्देन्द्रशब्दयोर्द्वन्द्वे कृते 'अग्नि+इन्द्र+अण्' इति स्थितौ वृद्धेरपेक्षयाऽन्तरङ्गत्वात् समानदीर्घे तत आत्वस्याप्यप्राप्त्या आत्वविषयाभावेन 'न्द्र्' इत्यस्यास्वरत्वेन च वृद्धेरप्राप्तिः, यदि चैकवर्णाश्रयत्वाद् बहिरङ्गत्वाभावेनात्वमेव परत्वात् प्रवर्त्तते ततः सन्धिकार्यमित्युच्यते तदापि 'अग्नेन्द्र्' इत्यवस्थायामुत्तरपदस्य 'न्द्र्'रूपत्वेन वृद्धेरप्राप्तेः, आद्यस्वरस्य वृद्धौ रूपसिद्धिसत्त्वेन इन्द्ररूपस्योत्तरपदस्य वृद्धिप्रतिषेधो व्यर्थ एव, स चेमं न्यायं ज्ञापयति, ज्ञापिते च पूर्वमुभयपदस्य वृद्धिरेव स्यादिति तद्वारणायोत्तरपदवृद्धिनिषेधश्चरितार्थ इति स्थितिः । 'आग्नेन्द्रः' इत्यादिप्रयोगाश्च तस्य स्वांशे फलोदाहरणभूताः, न्यायस्य फलं तु बृहद्वृत्तौ 'पूर्वैषुकामशमः' इत्युक्तम् । अत्रापि हि पूर्वं सन्धिकार्ये प्रवृत्ते *उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाग्* इति न्यायेन 'एषुकामशमी'-शब्दे उत्तरपदत्वातिदेशेऽपि पूर्वशब्दस्य वैकल्येन दिग्वाचकत्वं न स्यादिति दिगर्थवाचकात् परत्वं न स्यात्, यदि च पूर्वशब्दस्यैव तेन न्यायेन व्यपदेश इत्याश्रीयते तदोत्तरपदमेव विकलं भवेत्, उभयव्यपदेशश्चानेन न्यायेन कर्तुमशक्यः, यदि च *एकदेशविकृत*न्यायेन 'षुकामशमी'शब्दे एव उत्तरपदत्वं प्राग्ग्रामवाचित्वं चाश्रीयते तद 'षु'शब्दोकारस्यैव वृद्धिः स्यादित्यनिष्टं प्रसज्येतेति न्यायोपयोगः ॥ पाणिनीये तन्त्रेऽपि "आतो नेन्द्रवरुणस्य" [ ७.४.२९. ] इत्येतत्सूत्रस्थानीयेन "नेन्द्रस्य परस्य" [ पा० सू० ७.३.२२. ] इति सूत्रेणैवायं न्यायो ज्ञापितो महाभाष्ये, तथा हि–"अन्तादिवच्च" [ पा० सू० ६. १. ८५. ] इति सूत्रे महाभाष्ये–"उत्तरपदवृद्धिश्चैकादेशात्" [ वार्तिकम् ], उत्तरपदवृद्धिश्चैकादेशाद् भवति विप्रतिषेधेन । उत्तरपदवृद्धेरवकाशः–पूर्वत्रैगर्त्तकः, अपरत्रैगर्त्तकः, एकादेशस्यावकाशः–दण्डाग्रम्, क्षुपाग्रम्; इहो भयं प्राप्नोति–पूर्वैषुकामशमः, अपरैषुकामशमः, उत्तरपदवृद्धिर्भवति विप्रतिषेधेन" इति वृद्धेः परत्वाद् बलवत्त्वं प्रदर्श्य शङ्कते–"एकादेशप्रसङ्गस्त्वन्तरङ्गबलीयस्त्वात्" [ वार्तिकम् ], एकादेशस्तु प्राप्नोति, किं कारणम् ? अन्तरङ्गबलीयस्त्वात्–अन्तरङ्गं बलीयो भवति, तत्र को दोषः ? "तत्र वृद्धिविधानम्" [ वार्तिकम् ], तत्र वृद्धिर्विधेया, नैष दोषः, आचार्यप्रवृत्तिर्ज्ञापयति–'पूर्वोत्तरपदयोस्तावत् कार्यं भवति, नैकादेशः, इति । यदयं "नेन्द्रस्य परस्य" [ पा० सू० ७. ३. २२. ] इति वृद्धिप्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् ? "इन्द्रे द्वावचौ, तत्रैकः "यस्य" [ पा० सू० ६. ४. १४८. ] इति लोपेन ह्रियते, अपर एकादेशेन, अनच्क इन्द्रशब्दः सम्पन्नः, तत्र को वृद्धेः प्रसङ्गः ?, पश्यति त्वाचार्यः–पूर्वोत्तरपदयोस्तावत् कार्यं भवति नैकादेश इति, ततो "नेन्द्रस्य परस्य" [ पा० सू० ७. ३. २२. ] इति वृद्धिप्रतिषेधं शास्ति ॥ इति स्पष्टाशयं भाष्यम् । एतद्भाष्यैकवाक्यतया क्षमतेऽपि "आतो नेन्द्रवरुणस्य" [ ७. ४. २९. ] इति सूत्रमेव पूर्णस्यास्य न्यायस्यैकदेशानुमत्या ज्ञापकमित्यादर्त्तव्यमिति ॥ २६ ॥

## *संज्ञा न संज्ञान्तरबाधिका* ॥ २७ ॥

**सि०**—बाध्य-बाधकभावस्यासमावेशमूलकत्वाद् यत्र द्वयोः [ बाध्यत्वेन बाधकत्वेन चाभिमतयोः ] समावेशः सम्भवति तत्र बाध्य-बाधकभावो न भवतीति स्थितिः, तत्र संज्ञानामेकस्मिन्नपि बह्वीनां समावेशः शक्यत एवेति न्याय[ औचित्य ]सिद्धमेवार्थमनेन न्यायेनाह–संज्ञा न संज्ञान्तरबाधिकेति– संज्ञा–सम्यग्ज्ञायतेऽर्थोऽनया सा, संज्ञान्तरस्य–अन्यस्याः संज्ञायाः, बाधिका–प्रवृत्तिविघातिका, न भवतीति शेषः । पूर्वरीत्यौचित्यसिद्धोऽप्ययमर्थः शास्त्रकारवचनैरप्यनुमातुं शक्यते, तथा हि-प्रादीनां शब्दानां "धातोः पूजार्थ०" [ ३. १. १. ] इत्युपसर्गसंज्ञाविधायकसूत्रमेवात्रार्थे ज्ञापकम्, यदि हि "ऊर्याद्यनुकरण०" [ ३.१.२. ] इत्यव्यवहितोत्तरसूत्रविधीयमानया गतिसंज्ञयोपसर्गसंज्ञायाः परत्वाद् बाधः स्यात् तर्हि बाधस्य नैयत्येन पूर्वसूत्रेणोपसर्गसंज्ञावचनमनर्थकमेव स्यात्, तथा चोपसर्गसंज्ञां सूत्रेण बोधयन् सूत्रकारः संज्ञानां परस्परं बाध्यबाधकभावाभावं सूचयत्येवेति 'प्रस्थः' इत्यादौ 'प्र'शब्दस्य गत्युपसर्गसंज्ञयोः सत्योः "गति-क्वन्यः०" [ ३. १. ४२. ] इति गतिसंज्ञानिमित्तस्तत्पुरुषसमासः, "उपसर्गादातो डोऽश्यः" [ ५. १. ५६. ] इत्युपसर्गसंज्ञानिमित्तस्ततः पराद् धातोर्डप्रत्ययश्च युगपद्भूताम् । अस्य च न्यायस्यौचित्यमूलकत्वाद् यत्र संज्ञा-फलयोः समावेशासंभवस्तत्र तयोर्युगपद् विधातुमशक्यतया बाध्यमानकार्यप्रयोजिका संज्ञाऽपि न प्रवर्त्तते निष्फलत्वात् संज्ञायाश्च फलवत्त्वौचित्यात्, अत एव "स्पृहेर्व्याप्यं वा" [ २. २. २६. ] इति सूत्रे वाग्रहणं चरितार्थम्, अन्यथाऽस्य न्यायस्य प्रवृत्त्या कर्मसंज्ञा-सम्प्रदानसंज्ञयोर्बाध्यबाधकभावाभावादुभयोरपि तयोः प्रवृत्तेर्विकल्पेन संज्ञाविधानाभावेऽपि विभक्तिद्वयोत्पत्त्या चैत्रं चैत्राय वा स्पृहयतीति रूपद्वयं सिध्यत्येवेति विकल्पस्य वैयर्थ्यं स्यादेव; एवं च सिद्धेऽपि द्वैरूप्ये क्रियमाणो विकल्पो यत्र संज्ञानिमित्तकार्य-

योर्विरोधस्तत्र संज्ञास्वपि बाध्यबाधकभाव इति सूचयति ॥

*प्रतिकार्यं संज्ञा भिद्यन्ते* एषोऽपि न्यायाकारः प्राचीनैर्व्याख्ययात्रैव न्याये समावेशितः । इत्थं हि तेषां व्याख्यानम्–"अस्य चेत्थमवतारः–"करणं च" [ २. २. १९. ] इति सूत्रेण दिवः करणस्य युगपत् कर्म-करणसंज्ञयोर्विधानाद् 'अक्षानक्षैर्वा दीव्यति' इति द्वैरूप्यं सिद्धम् । तथा 'अक्षैर्देवयते मैत्रश्चैत्रेण' इत्यत्राक्षशब्दस्य करणत्वात् तृतीया भवति, कर्मत्वाच्च "गतिबोधाहारार्थ०" [ २. २. ५. ] इति सूत्रेण प्राप्तं नित्याकर्मकलक्षणमणिकर्तुः कर्मत्वं न स्यात्; तथाऽक्षशब्दस्य कर्मत्वादेव देवयतेः "अणिगि प्राणिकर्तृकानाप्याण्णिगः" [ ३. ३. १०७. ] इत्यनेन प्राप्तमकर्मकलक्षणं परस्मैपदं न स्यात् । अत्राह परः–नन्वक्षैर्देवयते मैत्रश्चैत्रेणेत्यादौ संज्ञाद्वययौगपद्यं चरितार्थम्, ततोऽक्षानक्षैर्वादीव्यतीत्यादौ सत्यपि संज्ञाद्वये परत्वात् करणत्वहेतुका तृतीयैव भवितुमर्हति न द्वितीया । [ इति ] । अत्रोत्तरम्–सत्यमेतत्, परं *प्रतिकार्यं संज्ञा भिद्यन्ते*इति न्यायो यदा प्रयुज्यते तदा द्वितीयाऽपि स्यादेव । तथा हि–अस्य न्यायस्यार्थस्तावदयम्–कार्यं कार्यं प्रति संज्ञाभिधायकानि सूत्राणि भिद्यन्ते । अयं भावः–यद्यपि "करणं च" [ २. २. १९. ] इति सूत्रे युगपत् संज्ञाद्वयमस्ति, परमक्षानक्षैर्वा दीव्यतीति प्रयोगद्वयं यद् दृश्यते तत्सिद्ध्यर्थं*प्रतिकार्यं संज्ञा भिद्यन्ते* इति न्यायेन "करणं च" [२. २. १९.] इति सूत्रमावृत्त्या द्विधा व्याख्यायते, यथा–दिवः करणं कर्म स्यादिति, तथा–दिवः करणं करणं स्यादिति, इयानेव चार्थश्चकारेण सूच्यते, अव्ययानामनेकार्थत्वात् । तत्राद्यव्याख्याने इदं सूत्रं कर्मसंज्ञाया एव विधायकं, न तु करणसंज्ञाया इति कल्प्यते । एवं च सिद्धं निर्बाधमक्षान् दीव्यतीति । यतः स्पर्धे सति परत्वं चिन्त्यते, आद्यव्याख्यानपक्षे च करणसंज्ञाया विधानस्याप्यभावेन तृतीयाप्राप्तेरप्यभावात् केन सह स्पर्द्ध इति । द्वितीयव्याख्या तु अक्षैर्दीव्यतीति प्रयोगस्य तवाप्यभिमतत्वेन निर्विगानैव । एतच्चैवं व्याख्याद्वयमक्षानक्षैर्वा दीव्यतीति प्रयोगद्वयसिद्ध्यर्थमेव कृतम् । ननु क्रियतां व्याख्याद्वयमारोप्यतां च तद्बलादेकस्यापि सूत्रस्य सूत्रद्वयरूपत्वं, परं तस्मिन्नेव सूत्रद्वये विहितयोः कर्म-करणसंज्ञयोर्यः स्पर्द्धः स कथं निवर्तते ? तदनिवृत्तौ च पूर्वेण "करणं च" [ २. २. १९. ] इति सूत्रेण विहितायाः कर्मसंज्ञाया यो बाधः स केन वार्यते ? [ इति चेत् ? ] उच्यते–यदा "करणं च" [ २. २. १९. ] इत्यस्य सूत्रद्वयरूपत्वमारोपितं नासीत् तदा स्पर्द्ध आसीत्, यदा तु तस्य सूत्रद्वयत्वमारोपितं तदाऽनयोः संज्ञयोः स्वस्वसूत्रनिष्ठत्वात् स्पर्द्धो निवर्त्तते, एकस्यापि गृहस्यान्तरा भित्तिप्रक्षेपादिना गृहद्वयरूपकरणे तन्निवासिसपत्न्योरिव, अन्यथा हि सूत्रद्वयारोपयत्नस्य व्यर्थतैवापद्यते, एवं च निवृत्ते स्पर्द्धे कः कस्य बाधां कुर्यादिति । तत्रेदं तत्त्वम्–"करणं च" [ २. २. १९. ] इति सूत्रेण संज्ञाद्वयविधानमक्षैर्देवयते मैत्रश्चैत्रेणेत्यादौ चरितार्थम्, तेनाक्षानक्षैर्वा देवयतीत्यादावुक्तयुक्त्या तृतीयैव प्राप्नोति, प्रयोगश्च द्वितीयाया अपि दृश्यते, अतस्तत्समर्थनार्थं *प्रतिकार्यं संज्ञा भिद्यन्ते* इति न्यायबलं गृहीत्वैकस्यापि "करणं च" [२. २. १९.] इति सूत्रस्य भिन्नभिन्नव्याख्याभ्यां सूत्रद्वयरूपत्वमारोप्य तत्प्रथमसूत्रेण द्वितीयाऽप्यत्रानीयते इति । परमनेनापि *प्रतिकार्यं संज्ञा भिद्यन्ते*इति न्यायेन पूर्वोक्तयुक्त्या "करणं च" [ २. २. १९. ] इति सूत्रस्य भिन्न-भिन्नव्याख्याभ्यां सूत्रद्वयरूपत्वारोपणसामर्थ्यादुभयोरपि संज्ञयोः स्पर्द्धस्याभावोद्भावेन कर्मसंज्ञायाः करणसंज्ञया अबाधनं व्यवस्थापयता *संज्ञा न संज्ञान्तरबाधिका* इति न्यायस्यैवार्थो भङ्ग्यन्तरेण समर्थित इति नासौ पृथग् दर्शितः ॥" इति । अत्रेदं विचारणीयम्–*प्रतिकार्यं संज्ञा भिद्यन्ते* इत्यस्य 'प्रतिकार्यं संज्ञाविधायकानि शास्त्राणि भिद्यन्ते' इत्यर्थस्य न्यासग्रन्थसम्मतत्वेऽपि यत् संज्ञासूत्रावृत्तिकरणेन संज्ञयोर्बाध्य-बाधकभावरूपविरोधनिवृत्तिरिति कल्पयित्वेदं सर्वं व्याख्यानं निबद्धं प्राचीनैस्तन्न मनोरमं, संज्ञयोर्बाध्य-बाधकभावस्य मूलं हि विरुद्धविभक्तिद्वयहेतुत्वमेव, न तत् सूत्रावृत्तिकरणमात्रेण निवर्त्तते, विरोधहेतुनिवृत्त्यभावे च विरोधनिवृत्तिः सूत्रावृत्तिकरणसामर्थ्येन कल्प्यमाना न्यायपथं नावतरति । याऽपि एकस्मिन्नपि गृहे भित्तिव्यवधानेन गृहद्वयकरणे सपत्न्योर्विरोधनिवृत्तिरिह दृष्टान्तत्वेनोपात्ता, साऽपि न युक्ता–सपत्न्योर्हि विरोधो नैकगृहत्वनिबन्धनोऽपि तु समानपतिकात्वनिबन्धन एव, नहि तस्य हेतोर्गृहविभागेन निवृत्तिरिति कथं तद्विरोधो गृहविभागेन निवर्त्तेत । तथा च न्यासोक्तसंज्ञासूत्रभेदस्यायमाशयो यत्–यावन्ति संज्ञानिमित्तानि कार्याणि सम्भाव्यन्ते तावन्त्येव संज्ञाविधायकानि सूत्राणि कल्प्यन्ते 'प्रतिलक्ष्यं लक्षणोपप्लवः' इति महाभाष्यादिसिद्धान्तानुसारम् । तथा च–द्वितीयोत्पत्तिसम्पादककर्मसंज्ञाविधायकं "करणं च" [ २. २. १९. ] इति सूत्रं पृथगेव, अकर्मकत्वप्रयुक्तस्याणिकर्तुः कर्मत्वस्य, "अणिगि प्राणिकर्तृकानाप्याण्णिगः" [ ३. ३. १०७. ] इति परस्मैपदस्य च निवर्त्तिके कर्मसंज्ञे च पृथगेवेति तदर्थं कर्मसंज्ञाविधानाय "करणं च" [ २. २. १९. ] इति सूत्रमपि पृथगेव, ततश्च अक्षैर्देवयते यज्ञदत्तेनेत्यत्राणिकर्तुः कर्मत्वाभावेन परस्मैपदाभावेन च द्वितीयोत्पत्तिप्रयोजककर्मसंज्ञायाश्चारितार्थ्याभावेन तस्याः कर्मसंज्ञाया अनवकाशत्वेन तन्निमित्ता द्वितीयाऽप्यवश्यमेवोत्पत्स्यत इत्यक्षान्

देवयतीति प्रयोगोऽपि भविष्यत्येवेति कर्मसंज्ञायाः सावकाशत्वेन द्वितीयैव भवितुमर्हतीति शङ्का निरवकाशेति । ततश्च *संज्ञा न संज्ञान्तरबाधिका* इति न्यायस्य *प्रतिकार्यं संज्ञा भिद्यन्ते* इति न्यायेन सह फलैक्येऽपि अर्थत उभयोर्भेद एव । यथा चायमेवाशयः *प्रतिकार्यं संज्ञा भिद्यन्ते* इति न्यायस्य तथा बृहद्वृत्त्यादिग्रन्थसम्मत्या स्फुटीकरिष्यते विवरणे ॥ २७ ॥

***संज्ञा न संज्ञान्तरबाधिका* ॥ २७ ॥**

**त०**—लोके शास्त्रे च संज्ञानां समावेशः—सहावस्थानमविरोध इति यावत्, दृश्यते । तथा हि–लोके तावदेकस्यैव घटस्य कलशः कुम्भ इत्यादयः संज्ञाः श्रूयन्ते, शास्त्रेऽपि तावदत्रैव व्याकरणे एकस्यैव प्रत्ययस्य प्रत्यय-कृत-कृत्यादिसंज्ञा भवन्ति, न च तासां विरोधो भवति । युगपदसम्भवे हि विरोधः, यथा–'सर्वे ब्राह्मणा भोज्यन्तां माठर-कौण्डिन्यौ परिवेविषाताम्' इत्यादौ भोजन-परिवेषणयोर्विरोधो युगपदसंभवात्; यथा वा 'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यादौ दधिदान-तक्रदानयोर्विरोधः फलैक्यात्, तयोर्हि फलमेकमोदनसेकरूपमित्येकेन दध्नौदने सिक्ते तक्रस्योपयोगाभावात् तक्रदानेन विशिष्य विधीयमानेन दधिदानं सामान्यविहितं बाध्यते । इह च भिन्नानां संज्ञानां फलानि अविरुद्धानि भिन्नानीति भिन्नाविरुद्धफलत्वाद् विरोधाभाव इति लोकसिद्धमेव संज्ञानां विरोधाभावमयं न्यायः सूचयति । एकस्यैव प्रादेर्गत्युपसर्गसंज्ञाद्वयविधानमपि प्रकृतन्यायलभ्यार्थानुमोदकमेव न ज्ञापकम्, यत् तु ज्ञापकतयोपन्यस्तं वृत्तौ तद् दार्ढ्योपादनमात्रम् । अयं च न्यायो भिन्नाविरोधिफलत्वमूलकविरोधाभावमूलक इति यत्र फले विरोधस्तत्र च व्यवस्थार्थमन्यैर्वचनमारभ्यते, स्वमते च ज्ञापकवशान्न्यायस्यानित्यतामाश्रित्य कार्यं सञ्चाल्यते, तथा चानित्यत्वसूचकं वृत्तौ समुपन्यस्तं "स्पृहेर्व्याप्यं वा" [२.२.२६.] इति वाग्रहणम् । कैश्चिच्च स्पृहेर्व्याप्यस्य कर्म-संप्रदानोभयसंज्ञयोर्व्यवस्थार्थम् "स्पृहेरीप्सितस्य" [पा० सू० १. ४. ३६.] संप्रदानसंज्ञा, ईप्सिततमस्य च कर्मसंज्ञेति विभाग आश्रीयते, पठ्यते च बाध्यबाधकभावस्थले निर्णायकम् "आ कडारादेका संज्ञा" [पा० सू० १. ४. १.] इति सूत्रम्, तत्र चानेन सूत्रेण स्थलविशेषे तासां बाध्यबाधकत्वे सूचिते परत्वादिभिर्बाधकहेतुभिर्निर्णयः, तथा चोक्तम्–'या पराऽनवकाशा च' इति । एतत्सूत्रप्रयोजनप्रतिपादनपरो महाभाष्यग्रन्थश्चेत्थम्–"किमर्थमिदमुच्यते ? "अन्यत्र संज्ञानां समावेशान्नियमार्थं वचनम्" [वार्तिकम्], अन्यत्र संज्ञानां समावेशो भवति, क्वान्यत्र ? लोके व्याकरणे च । लोके तावत्–'इन्द्रः, शक्रः, पुरुहूतः, पुरन्दरः', 'कन्दुः, कोष्ठः, कुसूलः' इत्येकस्य द्रव्यस्य बहवः संज्ञा भवन्ति, व्याकरणेऽपि कर्त्तव्यं हर्त्तव्यमित्यत्र प्रत्यय-कृत्-कृत्यसंज्ञानां समावेशो भवति । 'पाञ्चालः, वैदेहः, वैदर्भः' प्रत्यय-तद्धित-तद्राज[द्रि]संज्ञानां समावेशो भवति । अन्यत्र संज्ञासमावेशादेतस्मात् कारणात् आकडारादपि संज्ञानां समावेशः प्राप्नोति, इष्यते चैकैव संज्ञा स्यादिति, तच्चान्तरेण यत्नं न सिद्ध्यति, एवमर्थमिदमुच्यते" इति । अस्यायमाशयः–लोके शास्त्रे च संज्ञानां बाध्यबाधकभावाभावस्योक्तयुक्त्या दृष्टत्वात् सर्वत्र तथा प्राप्तौ विरुद्धफलकसंज्ञानां बाध्यबाधकभावाभावेऽभीष्टलक्ष्याणामसिद्ध्याऽव्यवस्थापत्तेस्तत्र व्यवस्थार्थमुच्यमानमिदं सूत्रं नियमार्थम्, इत ऊर्ध्वं "कडाराः कर्मधारये" [पा० सू० २. २. ३८] इत्यतः प्राक् पठितानां संज्ञानां मध्ये एकस्यैकैव संज्ञा स्यादिति । अनेन नियमेन चान्यत्र तासां बाध्य-बाधकभावाभावोऽपि सूचितो भवत्येव । एतन्मध्ये च स्यादिविधिविषयाः कारकविषयाः समासविषया गुरुलघ्वादिसंज्ञाश्च पठ्यन्ते । तासां च परत्वानवकाशत्वादिना व्यवस्था समाश्रीयते । अथ *प्रतिकार्यं संज्ञा भिद्यन्ते* इति मतस्य विचारः प्रस्तूयते–अयमेतन्न्यायसमानार्थको न्याय इति प्राचां मतं वृत्तौ प्रदर्शितम्, इह च तन्न्यायचर्चा बृहद्वृत्त्यादिरीत्या क्रियते, तथा हि–"करणं च" [२. २. १९.] इति सूत्रे बृहद्वृत्तौ चकारफलं–"करणं वेत्येव सिद्धे चकारः संज्ञाद्वयसमावेशार्थः" इति रूपेण प्रदर्श्य लक्ष्ये तत्फलप्रदर्शनायोक्तम्–"तेनाक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र करणत्वात् तृतीया भवति, कर्मत्वाच्च गत्यादिसूत्रेण नित्याकर्मकलक्षणमणिक्कर्तुः कर्मत्वं [न भवति], देवयतेश्च "अणिगि प्राणि०" [३. ३. १०७.] इत्यादिनाऽकर्मकत्वलक्षणं परस्मैपदं न भवति" इति, ततः शङ्कितम्–"अथाक्षान् दीव्यतीत्यत्र सत्यपि संज्ञाद्वयसमावेशे परत्वात् करणत्वनिमित्तया तृतीययैव भवितव्यम् ? नैवम्–स्पर्धे हि परः, समानविषययोश्च स्पर्धः, न च द्वितीया-तृतीययोः प्रतिनियतकर्म-करणशक्त्यभिधायिन्योः समानविषयत्वमस्तीति द्वितीयाऽपि भवत्येव । *प्रतिकार्यं संज्ञा भिद्यते* इति वा दर्शनेऽनवकाशत्वात् संज्ञाद्वयस्य विभक्त्योः पर्यायेण प्रवृत्तिरविरुद्धा" इति । अत्र पूर्वस्मिन् पक्षे समानविषययोरेव विरोध इति भिन्नविषयाणां संज्ञानां विरोधाभावेन परया करणसंज्ञया पूर्वस्याः कर्मसंज्ञाया बाधाभाव इति समाधानं *संज्ञा न संज्ञान्तरबाधिका* इति न्यायार्थानुमोदकम् । द्वितीयस्मिन् पक्षे च सत्यपि विरोधेऽनवकाशायाः संज्ञायाः परया संज्ञया बाधाभावः समर्थितः, अनवकाशत्वं चेद् द्वयोरेव, तत्र कर्मत्वनिमित्तकेऽणिकर्तुः कर्मत्वाभावे परस्मैपदाभावे च प्रस्तुतेऽनवकाशत्वं कथमिति शङ्कायाः *प्रतिकार्यं संज्ञा भिद्यन्ते* इति मतान्तरेण समाधानम् । तथा च यावन्ति संज्ञानिमित्तकानि कार्याणि सम्भावितानि तावन्ति संज्ञासूत्राणि

कल्पनीयानि, तथा च द्वितीयोत्पत्तिरूपकार्यार्थं कल्पितस्य दिवः करणस्य कर्मसंज्ञाविधायकस्योपश्रुतसूत्रस्य द्वितीयोत्पत्तिं विनाऽनवकाशत्वमक्षतमेवेति तदभिप्राय इति स्पष्टमेव प्रतिभाति। न्यासकृताऽपि प्रतिकार्यमिति प्रतीकमुपादाय "एकस्यापि कर्मणः करणस्य वा कार्यं कार्यं प्रतिसंज्ञाऽभिधायिकानि सूत्राणि भिद्यन्ते इत्यर्थः" इति स्फोरयतोक्त एवार्थः प्रतिपिपादयिषितो न तु प्राचां वृत्तिग्रन्थे गृहीतं करणं चेत्यस्य व्याख्याद्वयादिकम्; सूत्रभेदेन विरोधाभावादिकं च। यदि हि सूत्रभेदेन विरोधाभावः स्यात् तर्हि स्वत एव भिन्नानां सूत्राणां कदाऽपि विरोधो न स्यात्। गृहस्यान्तरा भित्तिप्रक्षेपादिना सपत्नीद्वयविरोधाभावदृष्टान्तश्चासिद्ध एवेति प्रतिपादितं वृत्तावपि। किञ्चोक्तरीत्या *संज्ञा न संज्ञान्तरबाधिका* *प्रतिकार्यं संज्ञा भिद्यन्ते* इति न्याययोः प्रकृतेऽभिमतफलसाधकत्वे समानेऽपि न प्रतिपाद्यार्थस्य सादृश्यम्, बृहद्वृत्तौ समानफलकसंज्ञाद्वयस्य बाध्यबाधकभावसत्त्वस्य प्रथमं प्रतिपादितत्वेन तस्यार्थस्यैव मतान्तरेण *प्रतिकार्यं०* इति न्यायेन समर्थनस्य स्पष्टत एव प्रकृतन्यायप्रतिकूलत्वात्। एवं प्राचां न्यायसंग्रहीयन्यासे वृत्युक्तव्याख्यानस्य न्यासानुसारित्वमित्यपि कथनं प्रत्युक्तमेव। किञ्च तत्र स्वमतानुसारिणी या व्याख्या प्रदर्शिता साऽपि न बृहद्वृत्तिग्रन्थाशयमनुगच्छति, तथा हि–तत्रत्यो ग्रन्थः–"सरलाध्वना तु अन्यापि व्याख्याऽस्ति, तथा हि–वृक्षं प्रति विद्योतते विद्युदित्यत्रवदत्र प्रतिशब्दो लक्षणार्थे, ततोऽयमर्थः— कार्यं लक्ष्यीकृत्य तावत् भिन्नभिन्नाः संज्ञाः क्रियन्ते। अयं भावः–एकस्यैवान्यान्यसंज्ञा यत् क्रियन्ते तत् तत्संज्ञाहेतुकान्यान्यकार्यकरणार्थमेव, यथा वारिशब्दे इकारस्य स्वरसंज्ञासद्भावाद् वारीणामित्यत्र "र्हादर्हस्वरस्या०" [ १. ३. ३१. ] इति द्वे रूपे नाभूताम्, तत्रार्हस्वरस्येति वर्जनात्; ह्रस्वसंज्ञासद्भावाच्च "ह्रस्वापश्च" [ १. ४. ३२. ] इत्यनेनामो नाम्, समानसंज्ञासद्भावाच्च "दीर्घो नाम्यतिसृ०" [ १. ४. ४८. ] इत्यनेन दीर्घः, नामिसंज्ञासद्भावाच्च 'हे वारे! हे वारि!' इत्यत्र "नामिनो लुग् वा" [ १. ४. ६१. ] इत्यनेनामन्त्र्यस्य लुग्विकल्प इत्यादि। यदि तु अन्यान्यसंज्ञाहेतुकमन्यान्यकार्यं चिकीर्षितं न सिध्येत् तर्हि किमर्थमन्यान्यसंज्ञाः क्रियन्ते?, ततोऽत्राप्यक्षान् दीव्यतीत्यत्र द्वितीयान्तप्रयोगो यदि न स्यादेव, किन्तु स्पर्धे परत्वात् तृतीयान्तप्रयोग एव यदि स्यात् तदा "करणं च" [ २. २. १९. ] इति सूत्रेण दिवः करणस्य सर्वत्र कर्म-करणसंज्ञाद्वयं किमर्थमाचार्यः कुर्यात्?, अतः सार्वत्रिकस्य कर्म-करणसंज्ञाद्वयस्य विधानादेवं ज्ञायते–करणसंज्ञाहेतुकतृतीयावदेकवारं कर्मसंज्ञाहेतुकाऽक्षान् दीव्यतीति द्वितीयाऽपि स्यादेव, न तु स्पर्धे परत्वहेतुकस्तृतीयया बाध एव स्यात्, कर्मसंज्ञाविधानस्य द्वितीयाभवनस्यैव मुख्यप्रयोजनत्वात्" इति। अत्रेदमुच्यते–*प्रतिकार्यं संज्ञा भिद्यन्ते* इत्यस्य 'कार्यमुद्दिश्य संज्ञाभेद' इत्यर्थ इति कथनेन 'भिन्नानि कार्याण्युद्दिश्य स्वरूपतो भिन्नाः संज्ञाः क्रियन्ते' इत्यर्थ एव भवतामभिप्रेतः, स चाकथितोऽपि प्रतीयत एव संज्ञानां कार्यार्थत्वात्, न तावता पूर्वपक्षिणा शङ्कितस्य कर्मत्वस्य चारितार्थ्येन तृतीयया तद्बाधस्य समाधानमायाति, ततश्च तत्समाधानार्थमुपात्तस्यास्य न्यायस्य वैयर्थ्यमेव स्यात्, किञ्च कर्मत्वस्य मुख्यं प्रयोजनं द्वितीयाविधानमेवेति तदेवोद्दिश्य कर्मत्वं विहितमित्यपि कथनं निर्मूलमेव, कर्मत्वनिमित्तकेषु कार्येषु गौणमुख्यतानिर्णायकप्रमाणाभावात्, ततश्च यावन्ति तत्संज्ञाकार्याणि तावन्ति संज्ञाभिधायकवचनानीत्येकस्या अपि संज्ञाया भिन्नभिन्नकार्यार्थत्वेन भिन्नभिन्नतया विधानमित्येवार्थः श्रेयानित्यलमनया प्रसक्तानुप्रसक्तया। तदयमत्र निष्कर्षः–*संज्ञा न संज्ञान्तरबाधिका* इति न्यायस्य संज्ञानां स्वभावतो बाध्य-बाधकत्वाभावमात्रे तात्पर्यम्। कार्यद्वारा विरोधे तु बाध्य-बाधकभावो भवत्येव, तदेव च *प्रतिकार्यं संज्ञाभिद्यन्ते* इति न्यायेन मतेन वा समर्थ्यते। ध्वनितश्चायमर्थो महाभाष्ये "आकडारादेका संज्ञा" [ पा० सू० १. ४. १. ] इति सूत्रे पूर्वप्रदर्शिता-ऽग्रेप्रदर्श्यमानभाष्याभ्यां कैयटादिभिश्चायमर्थः स्फुटीकृतः। तत्रैव सूत्रे 'आकडारात्'–"कडाराः कर्मधारये" [ पा० सू० २. २. ३८. ] इत्यतः प्रागेकस्यैकैव संज्ञेति नियमपक्षः, एतदन्तरे संज्ञाविषये परं कार्यं भवतीति परकार्यविधिपक्षो वेति विचारप्रसङ्गे एका संज्ञेति पक्षे "दिवः कर्म च" [ पा० सू० १. ४. ४३. ] इति दिवः करणस्य कर्मसंज्ञाविधायकसूत्रे 'चकारः' समावेशार्थं कर्तव्यो भवतीति दोषप्रतिपादनायेत्थमुक्तम्–"साधकतमं करणम्" [ पा० सू० १. ४. ४२. ] "दिवः कर्म च" [ पा० सू० १. ४. ४३. ] इति चकारः कर्तव्यः। अक्रियमाणे हि चकारेऽनवकाशा कर्मसंज्ञा करणसंज्ञां बाधेत। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः, यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्? पूर्वा तस्य कर्मसंज्ञा, परा करणसंज्ञा। कथम्? एवं स वक्ष्यति–"दिवः साधकतमं कर्म" ततः "करणम्" करणसंज्ञं च भवति साधकतमम्; दिव इति निवृत्तम्। तत्रारम्भसामर्थ्यात् कर्मसंज्ञा, परत्वाच्च करणसंज्ञा" इति। अस्य भाष्यस्याशयः कैयटेनेत्थं स्फोरितः–"अक्षैर्देवयते देवदत्तो यज्ञदत्तेनेत्यत्रोभयोः कर्म-करणसंज्ञयोः समावेश इष्ट इति तदर्थं चकारः सूत्रे पठनीयः। + + + + यद्येवमक्षान् दीव्यतीति द्वितीयाप्रयोगो न स्यात्, तृतीयया परत्वाद् बाधितत्वात्, विभक्तिद्वयं चेष्यते। कर्मसंज्ञा च सावकाशाऽकर्मकव्यपदेशव्यावृत्त्यर्थत्वात्, करणसंज्ञाऽपि 'देवना अक्षाः' इति ल्युडर्था [ अनडर्था ]। अत्राहुः–कार्यकाले संज्ञा-परिभाषमिति पक्षोऽत्राश्रीयते, तेन

"कर्मणि द्वितीया" इत्यत्र कार्ये यत् कर्मसंज्ञाया उपस्थानं तदनवकाशमिति द्वितीया भविष्यति । अक्षाणां देवितेत्यादौ तु कृत्प्रयोगे षष्ठ्या द्वितीयाऽपवादत्वाद् बाध्यते, तृतीया तु परत्वात्" इति ॥ अनेन कैयटग्रन्थेन "करणं च" [ २. २. १९. ] इति सूत्रस्थो बृहद्वृत्तिग्रन्थः समानार्थ एव । यः किल पाणिनीयानां *कार्यकालं संज्ञा-परिभाषम्* इति पक्षः स एव 'प्रतिकार्यं संज्ञा भिद्यन्ते' इत्येवंरूपपरमतत्वेनोद्दिष्टः, ततश्चैतत्कैयटोक्तरीत्यैव तत्रत्यापि व्याख्याऽवगन्तव्या । नागेशभट्टस्त्वत्र विशेषमाह, तथा हि–केचित् तु–"साधकतमगतकर्मत्वशक्तिबोधेऽक्षान् दीव्यतीति प्रयोगे दृढतरं मानं चिन्त्यम्, कार्यकालपक्षेऽपि परत्वात् तृतीयया बाधे न्याय्ये तदनुपस्थितेरेव न्याय्यत्वात्, किञ्च तत्र फलाश्रयत्वविवक्षया कर्तुरिति [ "कर्तुरीप्सिततमं कर्म" पा० सू० १. ४. ४९. ] कर्मत्वं, न च तदा करणत्वमिति न दोषः । किञ्च "क्ङिति च" [ पा० सू० १. १. ५. ] इति सूत्रस्थकैयटरीत्या यथोद्देशपक्षेऽपि प्रधानानुरोधेन स्वात्मभेदकल्पनस्य तुल्यतया विशिष्य 'कार्यकालपक्षे' इत्युक्तिरसंगता । किञ्च कार्यकालपक्षेऽयादिभ्यः परैव प्रगृह्यसंज्ञेति "अदसो मात्" [ पा० सू० १. १. १२. ] इति सूत्रस्थभाष्योक्तरीत्या "अपादानमुत्तराणि कारकाणि बाधन्ते, गां दोग्धि पयः" इत्यत्रत्यभाषासङ्गतेराकडारस्थसंज्ञानां यथोद्देशपक्षत्वमेवेति च तदुक्त्यसङ्गतिरित्याहुः" इति । अयमाशयः–अक्षनिष्ठा कर्मत्वशक्तिरन्या करणत्वशक्तिरन्या, तत्र यद्यपि दिवः साधकतमस्य संज्ञाद्वयमपि शास्त्रेण बोधितं तथापि तत्तद्विभक्तिसमभिव्याहारे तत्तच्छक्तिबोध एव, तथा च अक्षान् दीव्यतीति प्रयोगेऽक्षेषु सदपि साधकतमत्वं [ करणत्वं ] न भासते, अपि तु क्रियाजन्यफलाश्रयत्वरूपं कर्मत्वमेव भासते । इत्थं च यादृशार्थबुबोधिषया प्रयोगस्तदर्थवाचकविभक्तेरेवोत्पत्तिर्न्याय्या । कैयटोक्तकार्यकालपक्षाश्रयणेनैतत् समाधानं च न साधु, यतो यथोद्देशपक्षेऽपि विधिसूत्रानुरोधेन संज्ञासूत्राणामात्मभेदकल्पनस्य तैरुक्तत्वात् तत्कार्यार्थं कल्पितस्य तस्य संज्ञासूत्रस्य तत्कार्याप्रवृत्तावनवकाशत्वस्य साम्यात् । तथा च यत्र परत्वादिना बाधोऽवतरति तत्र तैस्तद्विषयस्य संज्ञासूत्रस्यात्मभेदकल्पनाभाव एव स्वीक्रियते । तथा च नानयोः पक्षयोरत्र विषये कोऽपि भेदः । किञ्च प्रथमाध्यायचतुर्थपादप्रथमसूत्रादारभ्य द्वितीयाध्यायद्वितीयपादसप्तत्रिंशसूत्रपर्यन्तं तैः 'आकडारम्' इत्युच्यते, तत्र च यथोद्देशपक्ष एवेति कैयटेन स्वयमेव स्वीकृतत्वोक्त्या सह विरोधोऽपि स्फुट एव । एवं च चकारेण संज्ञाद्वयसमावेश एव युक्तोऽर्थतश्च वा व्यवस्थेहाश्रयणीयेति नागेशाशयः । स्वमतेऽपि चकारेण संज्ञाद्वयसमावेश एव बृहद्वृत्तावुक्त इत्यलमधिकेनेति ॥ २७ ॥

## *सापेक्षमसमर्थम्* ॥ २८ ॥

सि०—"समर्थः पदविधिः" [ ७. ४. ११२. ] इति परिभाषासूत्रेण सर्वोऽपि पदसम्बन्धी विधिः समर्थाश्रितः–समर्थपदाश्रित इति बोधितम् । समर्थत्वं च सामर्थ्यवत्त्वम्, सामर्थ्यं च द्विविधम्–व्यपेक्षा एकार्थीभावश्च । तत्र पृथगर्थानां पदानामाकाङ्क्षावशात् परस्परसम्बन्धो व्यपेक्षा । यत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानाद् द्व्यर्थान्यर्थान्तराभिधायीनि वा स एकार्थीभावः । तत्र वाक्ये व्यपेक्षा सामर्थ्यं, समासे एकार्थीभाव इति सामान्यतो विवेकः । सर्वं च पदसम्बन्धिकार्यमेतदन्यतरसामर्थ्यवत्पदाश्रितमिति परिभाषार्थः । तत्र व्यपेक्षासामर्थ्यवतः समुदायस्यान्तर्गतयोः पदयोः समासादिविधिः प्राप्नोति, यथा–'ऋद्धस्य राज्ञः पुरुषः, महत् कष्टं श्रितः' इत्यनयोः समुदाययोर्व्यपेक्षासामर्थ्येन समर्थत्वात् तदन्तर्गतयो राज-पुरुषपदयोः कष्ट-श्रितपदयोश्च समर्थत्वानपायात् समासः स्यादिति 'ऋद्धस्य राजपुरुषः, महत् कष्टाश्रितः' इति प्रयोगप्रसङ्ग इति तद्वारणाय न्यायोऽयमाश्रीयते–*सापेक्षमसमर्थम्* इति । अपेक्षा–पदान्तरसम्बन्धाकाङ्क्षा, तया सह विद्यत इति सापेक्षम्, तथाभूतं च पदम्, असमर्थम्–सामर्थ्यरहितं भवतीति तस्य न पदविधियोग्यत्वम् । अयमाशयः–वृत्तौ निविष्टेन हि पदेन प्रधानार्थविशेषणीभूतस्वार्थोपस्थापकेन भवितव्यम्, यच्च पदं पदान्तरमपेक्षते स्वविशेषणाय तच्च स्वयमेव प्राधान्यमनुबुभूषतीरिति कथं तत् प्रधानार्थं स्वार्थं समर्पयेदिति तस्य स्वसमभिव्याहृतपदान्तरेणासामर्थ्यं स्पष्टमेव । तथा च न्यायतः–औचित्यात् सिद्धोऽयमर्थ इति नात्र ज्ञापकापेक्षा । ईदृशेषु प्रयोगेषु समासाभावाय यत्नाकरणमेतन्न्यायज्ञापकमिति तु न युक्तमिति पूर्वमपि बहुशः प्रदर्शितमेव । "समर्थः पदविधिः" [ ७. ४. ११२. ] इत्यस्यैवायं प्रपञ्च इति प्राञ्चः । वस्तुतस्तु तया परिभाषया सहास्य न्यायस्य कः सम्बन्धः ? न कोऽपि, यत्र व्यपेक्षया सामर्थ्यं सिद्धमेव तत्रैवावयवेऽसामर्थ्यस्य बोधकत्वादस्य न्यायस्य ततो भिन्नविषयत्वात् । अत्र सूत्रे बृहद्वृत्तौ च व्यपेक्षैकार्थीभावसामर्थ्ययोर्भेदप्रदर्शनावसरे व्यपेक्षायां विशेषणयोगो भवति, एकार्थीभावे न भवतीति प्रदर्शनेनैवेदृशेषु 'ऋद्धस्य राज्ञः पुरुषः' इत्यादिषु समासाभावः सूचितः, तत्र च मानत्वेन महाभाष्योक्तं वार्त्तिकमुक्तम्, तथा हि–"ननु च राज्ञः पुरुषमानयेत्युक्ते योऽर्थ आनीयते स एव राजपुरुषमानयेत्युक्तेऽप्यानीयते तत् कोऽत्र व्यपेक्षैकार्थीभावयोर्विशेषः ? उच्यते–संज्ञाविशेषो व्यक्ताभिधानमुपसर्जनविशेषणं चयोगश्चेति" इति वाक्य-समासयोर्भेदमुपक्षिप्य उपसर्जनविशेषणांशव्याख्यानमग्रे प्रदर्शितम्, तथा हि–"तथा

**वाक्ये उपसर्जनविशेषणं भवति–ऋद्धस्य राज्ञः पुरुषः, समासे न भवति–राजपुरुषः । यथाहुः–"सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणं न प्रयुज्यते ।" इति, विशेषणयोगे हि सापेक्षत्वेनागमकत्वात् सामर्थ्यं न भवतीति" । अनेन ग्रन्थेन व्यपेक्षैकार्थीभावसामर्थ्ययोरयं विशेषो यत्–व्यपेक्षायामेकदेशस्य समासवृत्तिर्न भवति गमकत्वाभावात्, एकार्थीभावे च समासवृत्तिरिति । क्वचित् सति गमकत्वे प्रधानस्य विशेषणसापेक्षत्वेऽपि समासो भवतीति परेण न्यायेन सूचयिष्यते, क्वचिच्चाप्रधानस्याऽपि नित्यसापेक्षस्य वृत्तिर्भवति, यथा–देवदत्तस्य दासभार्येत्यादौ, अत्र हि देवदत्तस्य यो दासस्तस्य भार्येति प्रतीतेर्दासस्य देवदत्तसापेक्षत्वेऽपि नित्यसापेक्षेषु वृत्त्यन्तर्गतपदेनापि सम्बन्धस्यानुज्ञातत्वेन समासो भवतीति नायमैकान्तिको न्यायः–*सापेक्षमसमर्थम्* इति प्रपञ्चितं विवरणे ॥ २८ ॥**

---

## *सापेक्षमसमर्थम्* ॥ २८ ॥

**त०**—पदविधीनां-पदसम्बन्धिनां कार्याणां, पदात् पदे पदस्य पदयोः पदानां वा सम्बन्धिनां विधीनां, समर्थत्वं–समर्थपदाश्रितत्वं परिभाषया सूचितमाचार्यैः "समर्थः पदविधिः" [७. ४. १२२.] इति । तत्र पदविधयश्च परिगणिता बृहद्वृत्तौ–समास-नामधातु-कृत्-तद्धितोपपदविभक्ति-युष्मदस्मदादेशप्लुतरूप इति । तथा च यत्रान्यपदापेक्षा केनापि रूपेण भवति स सर्वो विधिरिह पदविधिः, स च व्यपेक्षामेकार्थीभावरूपं च सामर्थ्यमाश्रित्य भवति । उदाहरणानि चास्य बृहद्वृत्तिग्रन्थे प्रपञ्चितान्येवेति तत एव समवलोकनीयानि । व्यपेक्षैकार्थीभावयोः स्वरूपनिरूपणगर्भं साधुत्वान्वाख्यानवाक्यमेवं कल्पितं तत्रैव–"अत्र व्यपेक्षायां सम्बद्धार्थः सम्प्रेक्षितार्थो वा पदविधिः साधुर्भवति । एकार्थीभावे तु विग्रहवाक्यार्थाभिधाने यः शक्तः सङ्गतार्थः संसृष्टार्थो वा पदविधिः स साधुर्भवति, अत्र पदानि उपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा, प्रधानार्थोपादानाद् द्व्यर्थानि अर्थान्तराभिधायीनि वा भवन्ति" इति । अत्र सम्बद्धार्थ इत्यस्य सम्बद्धो झटित्येवान्वितः पदानामर्थः [ प्रतीतिविषयः ] यत्र स इत्यर्थः, संप्रेक्षितार्थ इत्यस्य संप्रेक्षया कष्टकल्पनया संजातः प्रतीतिपथमवरूढोऽर्थो यत्र स इत्यर्थः । तथा च क्लिष्टकाव्यादावपि योजनयाऽर्थानां सम्बन्धः प्रतीयत एवेति तत्रापि व्यपेक्षा सामर्थ्यं स्वीक्रियते । एकार्थीभावे च–संगतार्थ इत्यस्यान्यपदोपस्थितार्थस्यापि यत्र गतार्थत्वमित्यर्थः, संसृष्टार्थ इत्यस्य मिलितार्थ इत्यर्थः । अयमेवो चार्थो विवृतः-अत्र च पदानीत्यादिना वाक्येन, अत्र एकार्थीभावे सामर्थ्ये पदानि उपसर्जनीभूतस्वार्थानि–इतरविशेषणीभूतस्वार्थोपस्थापकानि, न तु पृथक् स्वार्थोपस्थापकानीति तात्पर्यम्, एवं तत्पुरुषादावेकं पदमुपसर्जनीभूतस्वार्थं, बहुव्रीहौ द्वन्द्वे च पदद्वयमपि तथा । तथा चेयमजहत्स्वार्था वृत्तिरिति कथ्यते । जहत्स्वार्थामभिप्रेत्याह–निवृत्तस्वार्थानीति, जहति स्वं स्वमर्थं पदानि यस्यामित्यर्थात् तत्र स्वार्थोपस्थापकत्वाभावान्निवृत्तः स्वार्थो येषां तानीत्यर्थः । उभयसाधारणं हेतुमाह–प्रधानार्थोपादानादिति । अजहत्स्वार्थापक्षे–प्रधानार्थेन स्वोपस्थितिकाले एवोपसर्जनपदार्थस्य विशेषणतयोपादानादित्यर्थः, जहत्स्वार्थापक्षे च प्रधानेन पदेन तदर्थस्याप्युपादानादित्यर्थः । बहुव्रीहिसमासे तु प्रधानं पदं समुदाय इति बोध्यम्, एवं द्वन्द्वेऽपि प्रधानं पदं समुदाय एव, तदर्थेन साहित्येन स्वविशेषणतया समासान्तर्गतपदार्थस्योपादानादुपसर्जनीभूतस्वार्थानि, यद्वा विशेष्यसाहित्यार्थोपस्थापकतया प्रधानेन समुदायेनैव समासान्तर्गतपदार्थस्याप्युपादानान्निवृत्तस्वार्थानि वेति, समाहारेतरेतरयोगयोरुभयोरपि साहित्यं विशेष्यम्, आद्येऽनुद्भूतावयवभेदम्, अन्त्ये समुद्भूतावयवभेदमित्येव तयोः [ समाहारेतरेतरयोगयोः ] भेद इति बोध्यम् । अत्र कैयटे-द्व्यर्थानीत्यस्य स्थाने व्यर्थानीति पाठः समुपलभ्यते, स एव च नागेशेनापि गृहीतः, तस्य च सन्निधानान्निवृत्तस्वार्थानीति जहत्स्वार्थापक्षेण सह सम्बन्धः, तत्र हि पदानां प्रत्येकमर्थराहित्यात् । तथा च जहत्स्वार्थापक्षेऽर्थान्तराभिधायीनीत्यस्यार्थान्तरान्वितस्वार्थाभिधायीनीत्यर्थः, प्रत्येकशक्तिसहकृतसमुदायशक्त्या विशिष्टार्थप्रतिपादकानीति भावः । पदानीति बहुवचनं बहुपदविषयबहुव्रीहि-द्वन्द्वादिसंग्रहाय । 'द्व्यर्थानि' इति बृहद्वृत्तिगृहीतपाठपक्षे च जहत्स्वार्थपक्षे एव द्व्यर्थानीति सम्बध्यते, तथा च तत्र स्वार्थेन सह समुदायार्थरूपप्रधानार्थोपस्थापकानीत्यर्थः । अर्थान्तराभिधायीनीति च समासार्थरूपस्य स्वपदार्थभिन्नस्यार्थस्याभिधायकानीत्यर्थः । ईदृशसामर्थ्यद्वयसहितस्य पदस्य पदयोः पदानां वा यो विधिर्भवति स सर्वस्तद्वतं सामर्थ्यमाश्रित्यैव भवति, असमर्थानां पदान्तरैः सह सम्बद्धुमसामर्थ्यात् । इत्थं च यत्र समुदाये सामर्थ्यं विद्यमानमपि तदवयवे न भवति, तस्य समुदायनिष्ठत्वात्; यत्र वा वृत्त्यन्तर्गततया ग्रहीतुमभिलष्यमाणं पदं तदनन्तर्गतपदेन सह सम्बद्धं तत्रासामर्थ्यमेव स्वीक्रियते, तादृशपदस्य पदयोर्वा गमकत्वाभावात्, स एवार्थोऽनेन न्यायेन प्रकटीक्रियते । एवं चायं न्यायः सापेक्षपदस्य गमकत्वाभावमूलकमेवासामर्थ्यमाहेति नाद्भुतार्थः, अतश्च नात्र ज्ञापकापेक्षेति वृत्तौ निवेदितमेव । "समर्थः पदविधिः" [ ७. ४. १२२. ] इति परिभाषाप्रपञ्चत्वमप्यस्य वृत्तावनूद्य त्यक्तम्, परिभाषाप्रपञ्चत्वमस्य तदा स्याद् यदि परिभाषाबोध्यार्थस्यैव प्रकारान्तरेणावान्तरभेदेन वाऽत्र चर्चा स्यात्, किन्तु नास्ति तत् । तया हि परिभाषया पदविधीनां समर्थाश्रितत्वं बोधितम्, अयं च न्यायः सापेक्षस्या-

सामर्थ्यं बोधयति । तथा च गमकत्वाभावमूलकं सापेक्षेऽसामर्थ्यम्, यत्र च सापेक्षत्वेऽपि गमकत्वं तिष्ठति तत्र सामर्थ्यमिति स एवार्थः परेण न्यायेन प्रकाश्यते । ध्वनितं चास्य न्यायस्य गमकत्वाभावमूलकत्वं "समर्थः पदविधिः" [ पा० सू० २. १. १. ] इति सूत्रे महाभाष्ये, तत्रास्य सूत्रस्य प्रयोजनवर्णनावसरे 'पश्य देवदत्त ! कृष्णं, श्रितो विष्णुमित्रो गुरुकुलम्' इति वाक्यद्वयमध्ये स्थितयोः कृष्ण-श्रितशब्दयोः, एवमन्यत्रापि सामर्थ्याभावे समासव्यावृत्तिं तत्प्रयोजनत्वेन प्रदर्श्य-"अथ क्रियमाणेऽपि समर्थग्रहणे इह कस्मान्न भवति-महत्कष्टं श्रित इति ?, न वा भवति-महाकष्टश्रित इति ?, भवति, यदैतद् वाक्यं भवति-महत् कष्टं महाकष्टं, महाकष्टं श्रितो महाकष्टश्रित इति । यदा त्वेतद् वाक्यं भवति-महत् कष्टं श्रित इति तदा न भवितव्यम् । तदा च प्राप्नोति, तदा कस्मान्न भवति ?, कस्य कस्मान्न भवति, किं द्वयोः, आहोस्विद् बहूनाम् । बहूनां कस्मान्न भवति ? "सुप् सुपा" [ पा० सू० २. १. ४. ] इति वर्त्तते । ननु च भो आकृतौ शास्त्राणि प्रवर्त्तन्ते, तद्यथा "प्रातिपदिकात्" [ पा० सू० ४. १. १. ] इति वर्त्तमानेऽन्यस्माच्चान्यस्माच्च प्रातिपदिकादुत्पत्तिर्भवति । सत्यमेवमेतत् । आकृतिस्तु प्रत्येकं परिसमाप्यते, न समुदाये, यावत्येतत् परिसमाप्यते प्रातिपदिकादिति तावत उत्पत्त्या भवितव्यम्, प्रत्येकं चैतत् परिसमाप्यते, न समुदाये । एवमिहापि यावत्येतत् परिसमाप्यते सुप् सुपेति तावतः समासेन भवितव्यम्, द्वयोश्चैतत् परिसमाप्यते न बहुषु । द्वयोस्तर्हि कस्मान्न भवति ? असामर्थ्यात् । कथमसामर्थ्यम् ? सापेक्षमसमर्थं भवतीति । यदि सापेक्षमसमर्थं भवतीत्युच्यते 'राजपुरुषोऽभिरूपो राजपुरुषो दर्शनीयः' अत्र न प्राप्नोति । नैष दोषः प्रधानमत्र सापेक्षम्, भवति च प्रधानस्य सापेक्षस्यापि समासः ॥" इति । एतावतो ग्रन्थस्यायमाशयः-'महत् कष्टं श्रितः' इत्यर्थेऽत्र श्रवणक्रियया सामर्थ्यसद्भावात् समासः प्राप्नोति, तथा च कष्ट-श्रितयोः समासे 'महत्कष्टश्रितः' इति त्रयाणामपि पदानां समासे उत्तरपदे विधीयमानस्यात्वस्य मध्यमपदे परेऽभावान्महत्कष्टश्रित इत्येव रूपम् । यद्यपि 'महाकष्टश्रितः' इति रूपमपि भवत्येव समस्तम्, तथापि तत्र पूर्वं महच्छब्दस्य कष्टशब्देन समासे ततः श्रितशब्देन समास इति न 'महत् कष्टं श्रितः' इति विग्रहवाक्यार्थाभिधाने तत् समर्थम् । तथा चात्रार्थे समासः कुतो नेति प्रश्नः, तत्र प्रत्याक्षिप्यते-किमत्र भवता द्वयोः समासश्चोद्यतेऽथवा त्रयाणामपि ? तत्रेदमाह-द्वयोरपि श्रितापेक्षया कर्मत्वमिति त्रयाणामपि सामर्थ्यसद्भावात् त्रयाणामपि समासः स्यादिति । अथ यदि-"सुप् सुपा" [ पा० सू० २. १. ४. ] इति स्याद्यन्तः स्याद्यन्तेन समस्यते इत्यर्थबोधकं सामान्यसूत्रमेतत् सर्वसमासविधायकेषु सूत्रेषु प्रायः सम्बध्यते, विहाय विशेषवचनम् । सम्बध्यमानसूत्रे एकत्वस्य विवक्षया एकमेव स्याद्यन्तमेकेन स्याद्यन्तेन समस्यते इति स्वीकृत्य बहूना समासाभावः समर्थ्यते; तदपि नोचितम्-सूत्राणां जातिपक्षाश्रयणेन प्रवृत्तेः स्वीकारात् स्याद्यन्तजातिपरतया तत्सूत्रस्यानेकस्याद्यन्तानां समासे बाधकाभावात् । यथा च नाम्नो विधीयमानः प्रत्ययो नैकस्मादेव नाम्नो विधीयते, अपि तु प्रत्येकं बहुभ्योऽपि नामभ्यस्तथा बहूनामपि स्याद्यन्तानां समासो भविष्यति, यथा वा 'न ब्राह्मणं हन्यात्' इत्यादौ । अत्रोच्यते-जातेः प्रत्येकं परिसमाप्तत्वान्नामसमुदायाद् यथा न प्रत्ययोत्पत्तिः किन्तु प्रत्येकान्नाम्न एव, एवं स्याद्यन्तसमुदायस्य स्याद्यन्तसमुदायेन न समासोऽपि तु प्रत्येकं स्याद्यन्तस्यैवेति बहूनां समासोऽत्र [ महत् कष्टं श्रित इत्यर्थे ] न भवति । अयं भावः-यथा स्वाङ्गत्व-जनपदत्वादेः प्रत्येकं परिसमाप्त्या स्वाङ्गसमुदाय-जनपदसमुदाययोर्न स्वाङ्ग-जनपदग्रहणेन ग्रहणं तथा प्रकृतेऽपि स्याद्यन्तसमुदायस्य न स्याद्यन्तत्वेन ग्रहणमिति, नन्वेवं द्वयोरेव [ कष्ट-श्रितयोः ] कस्मान्न समासो भवति ?, तत्रोत्तरम्-असामर्थ्यादिति । सामर्थ्याभावश्चात्र कथमिति प्रश्ने-'सापेक्षमसमर्थं भवति' इत्युत्तरम्, सापेक्षस्यासमर्थत्वे युक्तिश्च पूर्वमुपपादितैव । अथ सापेक्षस्यासमर्थत्वे दोषाः प्रदर्शिताः, यथा-'राजपुरुषो दर्शनीयः' इत्यत्र दर्शनीयपदेन विशेष्यमाणस्य पुरुषस्यासामर्थ्यात् समासो न स्यादिति । तत्र च प्रधानस्य सापेक्षत्वेऽपि सामर्थ्यमिति स्वीकृतम्, तत्र युक्तिरुक्ता कैयटेन-प्राधान्यादेवानेकेनोपकारकेणोपकार्यत्वाविरोधादिति । अत्र चाधिकमग्रिमन्यायव्याख्यावसरे वर्णयिष्यते । अन्ते चाप्रधानस्यापि सापेक्षत्वे 'देवदत्तस्य गुरुकुलम्, देवदत्तस्य दासभार्या' इत्यादौ समासमुदाहृत्य प्रकृतन्यायस्य गमकत्वाभावमूलकत्ववर्णनेन यत्र गमकत्वं तत्र सामर्थ्यं, यत्र न गमकत्वं तत्र न सामर्थ्यमिति व्यवस्थामाश्रित्य 'सापेक्षमसमर्थं भवति' इति खण्डितम् । ततश्च 'महत् कष्टं श्रितः' इत्यत्र समासः कुतो नेति शङ्का पुनरुत्थिता तदर्थं वार्त्तिककृतोक्तम् "सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न, अगुरुपुत्रादीनाम्" इति । तथा च 'कष्ट'शब्दस्य महदिति विशेषणसहितत्वेन न वृत्तिः, वृत्तस्य समासादिवृत्तिगतस्य चाप्रधानस्य राजादेर्ऋद्धस्येत्यादिना विशेषणेन सम्बन्धाभावश्च सिद्धः, 'देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्या' इत्यादिव्यावृत्तयेऽगुरुपुत्रादीनामित्युक्तम् । भाष्यकृता च तदगमकत्वादिति हेतुना खण्डितम्, तथा हि-"तत् तर्हि वक्तव्यं-सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणं न प्रयुज्यते, अगुरुपुत्रादीनामिति ? न वक्तव्यम्, वृत्तिस्तर्हि कस्मान्न भवति ? अगमकत्वात् । इह समानार्थेन वाक्येन भवितव्यं समासेन च, यश्चेहार्थो वाक्येन गम्यते-महत् कष्टं श्रित इति, नासौ जातुचित् समासेन गम्यते

महत्कष्टश्रित इति, एतस्माद्धेतोर्ब्रूमः–अगमकत्वादिति, न ब्रूमः–अपशब्दः स्यादिति । यत्र च गमको भवति भवति तत्र वृत्तिः, तद्यथा–देवदत्तस्य गुरुकुलं, देवदत्तस्य गुरुपुत्रो देवदत्तस्य दासभार्येति ।" इति । अयमाशयः–सविशेषानां वृत्त्यभावो, वृत्तस्य च विशेषणयोगाभावः, गुरुपुत्रादीनां वृत्तानामपि विशेषणयोगश्चेति सर्वोऽप्यर्थो न्यायसिद्ध एवेति तदर्थं न किमपि वचनमनुष्ठेयम् । अयं च सर्वोऽर्थो गमकत्वागमकत्वाभावमूलक एव, वाक्येनार्थस्याभिधाने प्राप्ते तदर्थे समासस्य साधुत्वमन्वाचक्षाणं शास्त्रं तस्य समानार्थत्वमप्याक्षिपत्येव, 'महत् कष्टं श्रितः' इति वाक्येन च यन्महत्त्वविशिष्टकष्टकर्मकं श्रयणं प्रतीयते तत् 'महत्कष्टश्रितः' इत्यनेन समासेन न प्रत्याययितुं शक्यते, तेन हि यः कष्टं श्रितः स महत् कर्म करोतीत्यादि प्रतीयेत, क्रियाविशेषणं वा महत्त्वं प्रतीयेत, न तु कष्टविशेषणम् , कष्टस्य समासरूपपदार्थैकदेशत्वेन 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति व्युत्पत्त्यनुसारं महत्त्वस्य तत्रान्वयासम्भवात् । तथा च समासे सत्यगमकत्वमेव समासाभावे हेतुर्नासामर्थ्यं न वाऽपशब्दत्वापत्तिः । लोके प्रयुज्यमानस्य हि साधुत्वमसाधुत्वं वा विचार्यते–यथा गौः साधुर्गाव्यादिर्वेति । महत्कष्टश्रित इत्ययं महत् कष्टं श्रित इत्येतद्वाक्यार्थे न प्रयुज्यते, प्रयुक्तानां चेदमन्वाख्यानम् , अतो नात्र समासो भविष्यति । देवदत्तस्य गुरुपुत्र इत्यादौ तु देवदत्तस्य गुरोः पुत्र इति वाक्येन योऽर्थः प्रतीयते स एव समासेन प्रतीयत इति तत्र गमकत्वेन समासो भवतीति । इत्थमगमकत्वमूलकमेवासामर्थ्यमिति तत्र व्यवह्रियते, न तु सापेक्षत्वसामान्येन, सापेक्षत्वस्यासामर्थ्यानाधायकत्वादिति समुदितोऽर्थः । ततः शङ्क्यते–"यद्यगमकत्वं हेतुः, नार्थः समर्थग्रहणेन, इहापि 'भार्या राज्ञः पुरुषो देवदत्तस्य' इति योऽर्थो वाक्येन गम्यते नासौ जातुचित् समासेन गम्यते–भार्या राजपुरुषो देवदत्तस्येति, तस्मान्नार्थः समर्थग्रहणेन । इदं तर्हि प्रयोजनम् । अयमस्त्यसमर्थसमासो नञ्समासो गमकः, तस्य साधुत्वं मा भूत्–अकिञ्चित्कुर्वाणम् , अमाषं हरमाणम् , अगाधादुत्सृष्टम्' इति । एतदपि नास्ति प्रयोजनम् । अवश्यं कस्यचिन्नञ्समासस्यासमर्थस्य साधुत्वं वक्तव्यम्–असूर्यम्पश्यानि मुखानि, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मणः' इति । अयमाशयः—यदि गमकत्वमेव वृत्तिप्रयोजकं तर्हि "समर्थः पदविधिः" [ ७. ४. ११२ ] इति परिभाषया पदविधीनां समर्थाश्रितत्वं किमित्याश्रीयते, यत्र चासामर्थ्यं तत्र वाक्यार्थस्य समासादिनाऽगमनादेव समासाद्यभावो भविष्यति, तथा चेयं परिभाषैव व्यर्था । यदि चासमर्थनञ्समासानां गमकत्वेन लोके प्रयुज्यमानानाम् 'अकिञ्चित्कुर्वाणमित्यादीनामसाधुत्वबोधनाय समर्थग्रहणमित्याख्यायते, यतो गाव्यादिशब्दवदसाधवोऽपि ते प्रयोगा लोके प्रयुज्यन्ते, तेषां च साधुत्वं प्राप्तम् , अकिञ्चित्कुर्वाणमित्यादौ किञ्चिदकुर्वाणम् , माषमहरमाणं गाधादनुत्सृष्टमित्यादिक्रमेण गमकत्वस्य दृष्टत्वात् , तद्वारणाय 'समर्थ'ग्रहणं सार्थकमिति, तदपि नोचितम् । असूर्यम्पश्यानि मुखानीत्यादि–कतिपयासमर्थसमासानां साधुत्वस्य शास्त्रकृतामपि सम्मतत्वेन तेषामेव साधुत्वं नान्येषामित्येवं नियमाय "सुडनपुंसकस्य" [ पा० सू० १. १. ४३ ] इत्यत्र प्रसज्यप्रतिषेधेन व्याख्यानस्योक्तत्वात् ततश्च तदन्येषामसाधुत्वमपि तेनैव लब्धमिति नार्थोऽनया परिभाषयेति । तत्परिभाषाभावे च तदुपकारकस्यास्य न्यायस्यापि नातिप्रयोजनीयत्वमिति ध्वनितमेवेत्यलम् ॥ २८ ॥

## *प्रधानस्य तु सापेक्षत्वेऽपि समासः* ॥ २९ ॥

सि०—तुशब्दः पूर्वन्यायादस्य वैलक्षण्यं द्योतयति, पूर्वन्यायेन हि सामान्यत एव सापेक्षस्यासमर्थत्वकथनेन तस्य समासाभावोऽप्युक्तप्राय एव । अयं च तस्य न्यायस्याप्रधानविषयतां द्योतयति तुशब्देन, प्रधानं च प्रकृतधातूपात्तव्यापाराश्रयत्वेनोपात्तं, तस्य, सापेक्षत्वेऽपि स्वविशेषणेन सम्बन्धमभिलष्यत्यपि समासो भवत्येवेति न्यायार्थः । अत्र च यद्यपि गमकत्वमेव हेतुस्तथाऽपि ज्ञापकमपि दृश्यते । तच्च "उपमेयं व्याघ्राद्यैः साम्यानुक्तौ" [ ३. १. १०२. ] इति सूत्रे 'साम्यानुक्तौ' इति कथनम् , तद्धि 'पुरुषो व्याघ्र इव शूरः' इत्यादौ पुरुष-व्याघ्रशब्दयोः समासाभावार्थमुपात्तम् , अनेन हि सूत्रेण 'पुरुषव्याघ्र' इत्यादौ समास इष्यते, तत्र व्याघ्रपदस्य स्वसदृशे लक्षणया व्याघ्रपदं व्याघ्रसदृशार्थकम् , तथा च पुरुषो व्याघ्र इवेति तदर्थः, अत्र हि पुरुष-व्याघ्रयोः सामान्यधर्मस्य कस्यचिदनुक्तिरिति समासो भवति । यत्र च सामान्यधर्मस्योक्तिर्भवति तत्र समासो नेष्टः, यथा–पुरुषो व्याघ्र इव शूर इति, अत्र हि पुरुषे व्याघ्रे च सामान्यतया विद्यमानस्य शूरत्वस्य वाचकः शूरशब्द उक्तः, अत्र समासाभावार्थमुपादीयमानं 'साम्यानुक्तौ' इति पदं सति पूर्वस्मिन् न्यायेऽत्र समासाप्राप्त्या व्यर्थमेव, अत्र विशेष्यस्य [ प्रधानस्य ] पुरुषस्य 'शूर' इति विशेषणापेक्षत्वेनासामर्थ्यात् समासाऽप्राप्तिरिति समासवारणार्थं तदनर्थकम् , तच्चेमं न्यायं ज्ञापयति, ज्ञापिते चास्मिन् प्रधानभूतस्य पुरुषस्य सापेक्षत्वेऽपि समासः स्यादिति तद्वारणाय साम्यानुक्ताविति पदं सार्थकम् । फलं च 'राजपुरुषोऽस्ति दर्शनीयः' इत्यादौ प्रधानस्य पुरुषस्य 'दर्शनीय'पदार्थापेक्षत्वेऽपि समासो भवति । प्रधानस्येति कथनाच्च 'ऋद्धस्य राज्ञः पुरुषः' इत्यादावप्रधानस्य राज्ञ ऋद्धस्येति विशेषणापेक्षत्वे न समासः । क्वचिच्चाप्रधानस्यापि सापेक्षस्य

समासो भवति, यथा–देवदत्तस्य दासभार्येति । अत्र हि देवदत्तस्य यो दासस्तस्य भार्येति प्रतीतेर्दासस्याप्रधानस्य देवदत्तस्येति विशेषणपदापेक्षत्वेऽपि समासो भवत्येव गमकत्वात् । तदुक्तं "समर्थः पदविधिः" [ ७. ४. १२२. ] इति सूत्रव्याख्यायां बृहद्वृत्तौ–"यत्र क्वचिद् विशेषणयोगेऽपि गमकत्वम्, तत्र भवत्येव समासः, यथा–देवदत्तस्य गुरुकुलं, यज्ञदत्तस्य दासभार्या । यदाह—

"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्त्तते ।
स्वार्थवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ॥" इति

वाक्यपदीये–'प्रवर्तते' इत्यस्य स्थाने 'समस्यते' इति, 'स्वार्थवत्' इत्यस्य स्थाने 'वाक्यवत्' इति च पाठः । तथा च यत्र वृत्तौ न सम्बन्धहानिस्तत्र सापेक्षत्वेऽपि समासोऽप्रधानस्यापि भवतीति । न्यायश्चायं निश्चल एवान्येनाबाध्यमानत्वात् । *"किं हि वचनान्न भवति* इति न्यायस्यायं प्रपञ्च उत्तरन्यायश्चेति प्राञ्चः, तद्व्याख्यानं च तेषाम्–"वचनमिष्टार्थप्रत्यायनं, तद्भवनाभवनापेक्षयैव हि अस्योत्तरस्य च न्यायस्योदाहरणप्रत्युदाहरणेषु समासस्य तद्द्वितीयभावप्रत्ययस्य च भवनाभवने संजाते स्तः, इत्यतः किं हि वचनादित्यस्यैवायं प्रपञ्च इति" तस्यायमाशयः–इष्टार्थप्रत्यायनायैव सर्वाणि विधिनिषेधवचनानि क्रियन्ते, न तैर्नवीनः शब्द उत्पाद्यते । ततश्चेष्टार्थप्रत्यायकत्वे शब्दस्य तदनुकूलमेव लक्षणानामाशयः कल्पनीयो न तु तद्विरुद्ध इति । तथा च गमकत्वमूलक एवायमपि न्याय इति पर्यवस्यति । एवमुत्तरोऽपि न्यायस्तन्मूल एवेति ॥ २९ ॥

## *प्रधानस्य तु सापेक्षत्वेऽपि समासः* ॥ २९ ॥

त०—"समर्थः पदविधिः" [ ७. ४. १२२. ] इति परिभाषया पदविधीनां समर्थाश्रितत्वे बोधिते पूर्वन्यायेन च सामान्यतोऽसमर्थत्वे सापेक्षस्योक्ते यत्र 'राजपुरुषोऽस्ति दर्शनीयः' इत्यादौ सापेक्षस्यापि समासः प्रयुज्यते तत्र समासोऽप्राप्तः समासस्य पदविधित्वात् पदविधेः समर्थाश्रितत्वात् सापेक्षस्य चासमर्थत्वात्, तत्र समासस्य साधुत्वबोधनार्थमयं न्यायः पठ्यते । सामर्थ्यं हि कार्यानुमेयम्, दाहरूपं कार्यं दृष्ट्वा वह्नौ दाहकत्वशक्तेरनुमानवत् । यत्र समस्तस्यापि विशेष्यस्य विशेषणेन सम्बन्धः सम्यक्तया प्रतीयते तत्र समासस्य वाक्यार्थबोधनसामर्थ्यं दृष्ट्वा तत्र सामर्थ्यं कल्प्यत इति तद्धृदयम् । अत एव 'राजपुरुषो भार्यायाः' इति प्रयोगो न भवति, अत्र पुरुषे राजसम्बन्धो भार्यासम्बन्धश्चैतदुभयं विवक्षितम्, तत्र प्रधानस्य पुरुषस्य भार्यासम्बन्धसापेक्षत्वेऽपि राज्ञा सह समासः स्यात्, प्रकृतन्यायेन प्रधानस्य सापेक्षत्वेऽपि समासस्य बोधितत्वात् । यदि च गमकत्वमेव प्रकृतन्यायमूलमित्याश्रीयते तदा 'राज्ञो भार्यायाश्च पुरुषः' इति वाक्यार्थे राजपुरुषो भार्याया इत्यस्य समासस्यागमकत्वान्न समासः । वस्तुतस्तु–'सामान्यानुक्तौ' इति पदेनोपात्तविशेषणविजातीयविशेषणयोगः प्रधानस्य भवतीति ज्ञाप्यते तथा च 'पुरुषो व्याघ्र इव शूरः' इत्यत्रोपात्तं विशेषणं व्याघ्र इति व्याघ्रसदृशार्थबोधकम्, तद्विजातीयं विशेषणं 'शूरः' इति सामान्यधर्मबोधकं, तेन योगः प्राप्नोति, एवं राजपुरुषो दर्शनीय इत्यत्रापि प्रधानस्य पुरुषस्योपात्तं विशेषणं राजसम्बन्धबोधकं राज्ञ इति षष्ठ्यन्तं पदं, तद्विजातीयविशेषणं च 'दर्शनीयः' इति, तत्सम्बन्धो भवति, 'राजपुरुषो भार्यायाः' इत्यत्र च पुरुषस्य विशेषणं भार्यारूपं षष्ठ्यन्तपदोपस्थाप्यत्वेनोपात्तविशेषणसजातीयमेवेति तद्योगो न स्यादिति न तादृशः प्रयोगो भवति । न केवलं प्रधानस्यैव सापेक्षत्वेऽपि समासो यावदप्रधानस्यापि क्वचित् सापेक्षस्य समासो दृश्यते, यथा–देवदत्तस्य गुरुकुलम्, यज्ञदत्तस्य दासभार्या, इत्यादि । अत्र बृहद्वृत्त्यादौ गमकत्वादेव समास उक्तः । महाभाष्ये तु गुरुकुलेति समुदायस्यैव षष्ठ्यन्तेन सम्बन्धमपेक्ष्य षष्ठ्युपपादिता । यदि च गुरुणैव योगमपेक्ष्य षष्ठीति स्वीक्रियते तर्हि सापेक्षस्याऽसमर्थत्वमेव न स्वीकार्यमित्यप्युक्तम् । तथाहि-तत्रत्यो ग्रन्थः–"यत्र तर्ह्यप्रधानं सापेक्षं भवति तत्र वृत्तिर्न प्राप्नोति-देवदत्तस्य गुरुकुलम्, देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्येति, नैष दोषः–समुदायापेक्षात्र षष्ठी, सर्वं गुरुकुलमपेक्षते" इति । अयमाशयः–गुरुकुलादिना समुदायेन समुपजनिते व्यतिरेके देवदत्तस्येति षष्ठी, अवयवद्वारकश्च देवदत्तस्य समुदायेन सम्बन्ध इति सामर्थ्यादवयवमपि विशेषणं स्पृशति । तदुक्तं वाक्यपदीये–

"समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवाँस्ते तु युज्यन्ते तद्वता सह ॥" इति ।

येषामर्थानां गुरुकुलादिरूपसमुदायेन सम्बन्धस्तेऽप्यर्था अवयवान् संस्पृश्य–तैः सम्बन्धमनुभूय तद्वता युज्यन्ते इति तदर्थः । तथा चावयवानामपि गुर्वादीनां देवदत्तेन सम्बन्धो लभ्यते । पुनः शङ्कते–यत्र तर्हि न समुदायापेक्षा षष्ठी तत्र ते वृत्तिर्न प्राप्नोति–'किमोदनः शालीनाम्, सक्त्वाढकमापणीयानाम्, कुतोभवान् पाटलिपुत्रकः' इति । इह चापि देवदत्तस्य गुरुकुलं, देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्या' इति । यद्येषा समुदायापेक्षा षष्ठी–स्यान्नैतन्नियोगतो गम्येत-देवदत्तस्य यो गुरुस्तस्य पुत्र इति । किं तर्हि ? अन्यस्यापि गुरुपुत्रः, देवदत्तस्य किंचिदित्येषोऽर्थो गम्येत, यतस्तु खलु नियोगतो देवदत्तस्य यो गुरुस्तस्य यः पुत्र इत्येषोऽर्थो गम्यते, अतो मन्यामहे–नैषा समुदायापेक्षा षष्ठीति । अन्यत्र खल्वपि समर्थग्रहणे सापेक्षस्यापि कार्यं भवति । कान्यत्र ? "इसुसोः सामर्थ्ये" [ पा० सू० ८. ३.

४४.] ब्राह्मणस्य सर्पिष्करोतीति, तस्मान्नैतच्छक्यं वक्तुं-सापेक्षमसमर्थं भवतीति ।" इति अयमाशयः—देवदत्तस्य गुरुकुलमित्यादौ कथञ्चित् समुदायापेक्षया षष्ठ्या उपपादनसम्भवेऽपि किमोदनः शालीनामित्यादौ केषां शालीनां किं कलमानां [श्यामशालीनां] किं रक्तशालीनामित्यर्थविवक्षायां समुदायापेक्षत्वासम्भवः, एवं सक्त्वाढकमापणीयानामित्यत्र आपणीयानां विक्रेयाणां सक्तूनामाढकमित्यर्थस्य विवक्षयाऽऽपणीयशब्दस्य सक्तुसापेक्षत्वेन समुदायसापेक्षत्वासंभवः । कुतो भवान् पाटलिपुत्रक इत्यत्र कस्मात् पाटलिपुत्रादागत इत्यर्थस्य विवक्षया समुदायापेक्षाया असम्भवोऽस्त्येव । किञ्च देवदत्तस्य गुरुपुत्र इत्यादावपि समुदायापेक्षया षष्ठीस्वीकारे योऽत्रार्थः सर्वदा प्रतीयते—देवदत्तस्य यो गुरुस्तस्य पुत्र इति, स नियमेन न प्रतीयेत, किन्तु अन्यस्य गुरुपुत्रः, देवदत्तस्य किञ्चिदन्यदित्यप्यर्थः प्रतीयते तथा च विवक्षितार्थस्य नियमतः प्रतीतये तत्र सापेक्षत्वेऽपि सामर्थ्यं वृत्तिश्चाभ्युपगन्तव्येति गुर्वपेक्षयाऽत्र षष्ठी सम्बन्धिशब्दत्वाच्चात्र स्वार्थवदपेक्षाया वृत्तावप्यहानाद् भवत्येव वृत्तिः । तदुक्तं वाक्यपदीयेऽपि—

"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वैः समस्यते ।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ॥" इति ।

एवं च सापेक्षमसमर्थं भवतीति न वक्तव्यम् । अत एव च ब्राह्मणस्य सर्पिस्करोतीत्यादौ ब्राह्मणापेक्षस्यापि सर्पिषः करोतिनाऽपेक्षामादाय "वेसुसोऽपेक्षायाम्" [२. ३. ११.] इति विकल्पेन षत्वं भवति, अन्यथा [सापेक्षस्यासामर्थ्ये स्वीक्रियमाणे] समानाधिकरणमसमर्थवदिति वचनात् परमसर्पिःकुण्डमित्यत्रेव ब्राह्मणस्य सर्पिष्करोतीत्यत्र सापेक्षमसमर्थवदिति वचनात् षत्वं न स्यात् । तथा चेदृशे स्थले स्वार्थमात्रोपस्थापकवाक्यघटकतादशायामिव वृत्तावपि सामर्थ्यं न हीयते । किमोदन इत्यादयः प्रयोगाश्च नित्यसापेक्षत्वाभावेऽपि महाभाष्यकारादिवचनादेव साधवः । एवं चैतावता ग्रन्थेन गमकत्वे सति वृत्तिर्भवति, तदसत्त्वे च नेति लभ्यते । एवं च "समर्थः पदविधिः" [७. ४. १२२] इति परिभाषा न कमपि नवीनमर्थं विधत्ते इति ॥ अत्र प्रसङ्गाज्जहत्स्वार्थाऽजहत्स्वार्थाभेदेन वृत्तेर्द्वैविध्यं पूर्वं कथितं, तस्य विशेषः प्रतिपाद्यते—द्विविधा हि वैयाकरणाः श्रूयन्ते, केचित् कार्यशब्दवादिनोऽन्ये नित्यशब्दवादिन इति । तत्र कार्यशब्दवादिनं प्रति आक्षिपति कश्चित्—"अथ ये वृत्तिं वर्तयन्ति, किं त आहुः" इति [तत्रैव २. १. १.] सूत्रे महाभाष्ये । अयमाशयः—ये एकार्थीभावरूपां वृत्तिं शास्त्रेण निष्पादयन्ति [ये शास्त्रैकगम्यं सामर्थ्यं मन्यन्ते इति भावः], तेषामयमाशयः—स्याद्यन्तं स्याद्यन्तेन सह सामर्थ्यवद् भवति, समर्थं च समाससंज्ञकमिति । समासादौ वृत्तिव्यवहारस्तु वृत्ति-वृत्तिमतोरभेदोपचारात्, तत्र शब्दार्थसम्बन्धस्य स्वाभाविकत्वमते एकार्थीभावरूपा वृत्तिर्लोकत एव सिद्धेति न किञ्चित् तत्र वक्तव्यम् । ये तु शास्त्रनिष्पाद्यां वृत्तिं मन्यन्ते ते शास्त्रविधानयोग्यं तत्स्वरूपं किमाहुः ? अत्रोत्तरं—"परार्थाभिधानं वृत्तिरित्याहुः" इति, परस्य शब्दस्य योऽर्थस्तस्य शब्दान्तरेणाभिधानं यत्र सा वृत्तिरित्यर्थः, यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते, एवं च तन्निष्ठशब्दान्तरकरणकपदार्थाभिधायकत्वं तेषां स्वाश्रयत्वेन वृत्तिव्यवहारप्रयोजकं सामर्थ्यमिति फलितम् । तच्च स्वार्थविशेषणकपुरुषार्थोपस्थितौ राजपदशक्तिज्ञानस्य सहकारित्वाद् बोध्यम् । अत्राह—"अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवत्याहोस्विदजहत्स्वार्था भवति ?, किं चातः ?, यदि जहत्स्वार्था वृत्तिः 'राजपुरुषमानय' इत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति, 'औपगवमानय' इत्युक्तेऽपत्यमात्रस्येति । अथाजहत्स्वार्था वृत्तिः, उभयोर्विध्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति । का पुनर्वृत्तिर्न्याय्या" इति । "नित्यशब्दवादिनां मते राजपुरुषादिपदानि 'राज्ञः पुरुष' इति वाक्यविषयपदसरूपावयवानि पदे वर्णवदनर्थकोपलभ्यमानावयवानि, तत्त्वतो निरवयवान्येव केवलमसत्यप्रक्रियाश्रयणेन शास्त्रेणान्वाख्यायन्त इति तेषां मते पदानामर्थस्यैवाभावात् तत्र त्यक्तत्वात्यक्तत्वसन्देहाभावात् कार्यशब्दवादिनामेव मते जहत्स्वार्थाजहत्स्वार्थयोः सन्देहः । तत्रोभयत्र पक्षे दोषः—जहत्स्वार्थपक्षे पुरुषमात्रस्यैवात्र प्राधान्येनोपस्थितेस्तस्यैवानयनं स्याद् राजपुरुषमानयेति कथने । एवं तद्धितवृत्तिस्थले प्रत्ययार्थमात्रस्यैव प्राधान्येनोपस्थितेरपत्यमात्रस्यैवानयनं स्यात्, औपगवमानयेति कथने । अथ तद्दोषपरिजिहीर्षयाऽजहत्स्वार्थावृत्तिराश्रीयते तर्हि समासे राजपुरुषादावुभयोरपि स्वार्थोपस्थापकत्वात् प्लक्षन्यग्रोधावित्यादिद्वन्द्व इव राजपुरुषावित्यादिः द्विवचनान्तप्रयोग एव स्यादिति द्वयोरपि पक्षयोर्दोषदर्शनात् कः पक्षो न्याय्य इति तदाशयः । तत्राह—'जहत्स्वार्था' इति, स्वार्थत्यागं विना स्वार्थतामात्रोपस्थाने व्यग्रस्य पदस्यार्थान्तरोपस्थापकत्वमसंभवीति जहत्स्वार्थैव वृत्तिरुचितेति भावः । तत्र शङ्कते—युक्तं पुनर्जहत्स्वार्था नाम वृत्तिः स्यात्, अग्निना यथा स्वधर्म औष्ण्यं त्यक्तुमशक्यं तथा शास्त्रबोधितस्वार्थस्य शास्त्रव्यापारं विना स्वेन त्यक्तुमशक्यत्वात् कथं जहत्स्वार्थावृत्तिसंभव इति भावः । समर्थयति—बाढं युक्तम्, एवं हि दृश्यते लोके—पुरुषोऽयं परकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति । तद्यथा—तक्षा राजकर्मणि प्रवर्त्तमानः स्वं तक्षकर्म जहाति, एवं युक्तं यद्राजा पुरुषार्थे वर्त्तमानः स्वमर्थं जह्यात्, उपगुश्चापत्यार्थे वर्त्तमानः स्वमर्थं जह्यात् । अयमाशयः—यथा कदाचित् तक्षा राज्ञा दूतादिकार्ये

नियुक्तः स्वं तक्षणकर्म जहाति तथा शास्त्रेणार्थान्तरे नियुज्यमानः शब्दोऽपि स्वार्थं जह्यादिति युक्तमेवेति । पुनः शङ्कते–"ननु चोक्तं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति, औपगवमानयेत्युक्तेऽपत्यमात्रस्येति ?" इति । समाधत्ते-"नैष दोषः–जहदप्यसौ स्वार्थं नात्यन्ताय जहाति, यः पदार्थबाधी स्वार्थस्तं जहाति । तद्यथा–तक्षा राजकर्मणि वर्त्तमानः स्वं तक्षकर्म जहाति, न तु हिक्कित-श्वसित-कण्डूयितानि, न चायमर्थः परार्थविरोधी विशेषणं नाम, तस्मात् तन्न जहाति ।" इति । अयमाशयः–त्यागमात्रं लक्ष्यीकृत्य जहत्स्वार्थेति नाम, न सर्वथा स्वार्थत्यागेन, सर्वथा स्वार्थत्यागे परोकारोऽपि कर्तुं न शक्यते, तदर्थमेव च स उपादीयते, तथा च प्रयोजनाभावात् तस्योपादानमेव व्यर्थं स्यात् । तथा च य एव धर्मस्तत्र परोपकारविरोधी स एव त्यज्यते, यथा–राजकर्मनियुक्तेन तक्ष्णा तक्षणरूपं कर्म त्यजते, न तु प्राणिमात्रसाधारणं श्वसितादि, तत्त्यागे च प्राणविच्छेदाद् राजोपकारकतैव नश्येत् । राजपदेन परार्थस्य [ पुरुषरूपस्य ] स्वार्थनिरूपितविशेष्यत्वेन बोधने तद्विशेषणत्वेन राजरूपार्थोपस्थितौ राजरूपोऽर्थः स्वरूपेण न विरोधी, किन्तु तस्य स्वगतं विशेष्यत्वमेव विरोधि, अतः स्वार्थं न हास्यति, स्वगतं विशेष्यत्वमेव विरोधिभूतं त्यजतीति न केवलस्य पुरुषस्यानयनमपि तु राजसम्बन्धविशिष्टस्यैवेति । ननु राज्ञः पुरुष इति वाक्यार्थेऽपि राजार्थस्य विशेषणत्वमेवेति कस्तस्य वृत्तौ विशेष इति चेत् ? न–वाक्ये स्वविशेषणसम्बन्धप्रतिपत्तौ सामर्थ्याविघातः, वृत्तावुपसर्जनीभूतेन स्वार्थेन प्रधानार्थस्योपस्कारात् स्वविशेषणप्रतिपत्तौ सामर्थ्यहानिर्भवतीति विशेषस्य स्पष्टत्वात् । अयमत्र सारः–पदानां तत्तद्विषयताविशिष्टे शक्तिः, अत एव बोधे विषयतानियमः । एवं च राजपदादेः राजत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नं स्वार्थः; तत्र समासे विशेष्यत्वांशत्याग इति न ऋद्धादिविशेषणान्वयोऽपि । इत्येतावतैव जहत्स्वार्थत्वमिति । वाक्ये च तत्त्यागाभावाद् भवति तस्यापि विशेषणसम्बन्धः । एवं चावयवशक्तिसहकृतसमुदायशक्त्या विशिष्टैकोपस्थितिरिति तत्त्वम् । पुनराह-"अथवाऽन्वयाद् विशेषणं भविष्यति, तद्यथा–'घृतघटस्तैलघटः' इति, निषिक्ते घृते तैले चान्वयाद् विशेषणं भवति–'अयं घृतघटोऽयं तैलघटः' इति ।" इति । अयमाशयः–यथा घृतपूर्णो घटो घृतघटः, तैलपूर्णश्च तैलघटः कथ्यते, तत्र घृते तैले च ततो निःसारितेऽपि घृततैलसम्बन्धस्य गम्यमानत्वात् 'अयं घृतघटोऽयं तैलघटः' इति व्यवहारो भवति तथा राजशब्दः स्वार्थनिमित्तं विशेषं पुरुषरूपेऽर्थे समाधाय स्वार्थं जहाति, न च तन्निमित्तं जातं विशेषदर्शनं पुरुषे निवर्त्तते, यथा–अग्निसंयोगजनितपाकजरक्तरूपादिकमग्निसंयोगे निवृत्तेऽपि न निवर्त्तते तद्वत् । एवं च राजशब्दाद् राजपदार्थप्रतीत्यभावेऽपि तच्छब्दान्वयमात्रेण वाक्ये [ 'राज्ञः पुरुषः' इत्यादौ ] यादृशविशेषणविशिष्टः पुरुषः शब्दात् प्रतीतस्तादृशस्यैवात्राप्युपस्थितिरित्यनुमानात् पुरुषपदस्य राजसम्बन्धविशिष्टपुरुषेऽर्थे शक्तिग्रहो भवति । तथा च वृत्तौ राजरूपार्थस्योपस्थितौ सत्यामपि राजादिपदजन्योपस्थित्यभावेन जहत्स्वार्थत्वमिति बोध्यम् ॥ पुनरपि दृष्टान्तं विघटयन्नाह–"विषम उपन्यासः, भवति हि तत्र या च यादृशी चार्थमात्रा । अङ्ग ! हि भवानमौ निष्टप्य घृतघटं तृणकूर्चेन प्रक्षालयतु न गंस्यते स विशेषः" इति । अयमाशयः–घृते तैले च घटान्निःसारितेऽपि तत्सम्बन्धस्य मात्रयाऽपि विद्यमानत्व एव 'अयं घृतघटोऽयं तैलघटः' इति व्यवहारः, यदि चाग्न्यादिसहायेन घटस्य शोधनं क्रियते तदा घृतादिसम्बन्धाज्ञानान्न तथाव्यवहारः, तद्वदिहापि राजपदस्य स्वार्थत्यागे राजसम्बन्धप्रत्यायकाभावाद् 'राजपुरुषमानय' इत्यादौ केवलपुरुषार्थप्रतीतिरेव स्यादिति शङ्कोदेति । तत्समाधानायाह–"यथा तर्हि 'मल्लिकापुटश्चम्पकपुटः' इति, निरकीर्णास्वपि सुमनःस्वन्वयाद् विशेषणं भवति–'अयं मल्लिकापुटोऽयं चम्पकपुटः इति" इति, अयमाशयः–यथा मल्लिकादिपुष्पाणामभावेऽपि तत्तद्गन्धसम्बन्धमात्रेण पूर्वस्थितां पुष्पसत्तामनुमाय मल्लिकापुट इत्यादिव्यवहारस्तथा वृत्तौ राजपदस्यार्थाभावेऽपि वाक्यदृष्टसार्थकराजशब्दवृत्तिवर्णानुपूर्वीसत्त्वमात्रेण वाक्ये यथा राजसम्बन्धवतः पुरुषस्यैव प्रतीतिस्तथेहापि राजसम्बन्धवतः पुरुषस्यैव पुरुषपदात् प्रतीतिरिति । समाधानान्तरमाह–"अथवा समर्थाधिकारोऽयं वृत्तौ क्रियते, सामर्थ्यं नाम भेदः संसर्गो वा । अपर आह–भेदसंसर्गौ वा सामर्थ्यमिति । कः पुनर्भेदः संसर्गो वा ?, इह 'राज्ञः' इत्युक्ते सर्वं स्वं प्रसक्तम्, 'पुरुषः' इत्युक्ते सर्वः स्वामी प्रसक्तः, इहेदानीं 'राजपुरुषमानय' इत्युक्ते राजा पुरुषं निवर्तयत्यन्येभ्यः स्वामिभ्यः, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः । एवमेतस्मिन्नुभयतो व्यवच्छिन्ने यदि स्वार्थं जहाति कामं जहातु, न जातुचित् पुरुषमात्रस्यानयनं भविष्यति ।" इति । अयमाशयः–"समर्थः पदविधिः" [ ७. ४. १२२. ] इति परिभाषया पदविधिषु–वृत्तिषु समर्थाधिकारः क्रियते, तत्र भेदः संसर्गो वा प्रत्येकं सामर्थ्यं, मिलितौ वा यथामतभेदम्, यथा 'राज्ञः' इत्युक्ते षष्ठ्या सम्बन्धिमात्रस्याक्षेपात् स्वत्वेन रूपेण सर्वस्य प्रसक्तिर्भवति । एवं 'पुरुषः' इत्येतावन्मात्रे कथिते पारतन्त्र्ये च प्रमाणान्तरेणाधिगते सति सर्वः स्वामित्वेन समुपतिष्ठते । 'राजपुरुषमानय' इत्युक्ते च राजा पुरुषमन्यस्वामिभ्यो निवर्त्तयति, पुरुषश्च राजानमन्येभ्यः स्वेभ्यः, इत्थं चोभाभ्यामुभयोर्व्यवच्छेदे कृते तन्मध्ये यदि कश्चित् स्वार्थं जहाति तदाऽपि न क्षतिः स्वकार्यस्य कृतत्वादिति न केवलपुरुषानयनप्रसक्तिरिति । तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्य स्वार्थं जहाति,

पुरुषस्तु स्वार्थमजहदेव स्वान्तरेभ्यो राजानं निवर्त्तयतीति विशेषः । अस्मिन् पक्षे समभिव्याहृतपदार्थनिरूपितसंसर्गतदतिरिक्तभेदैतदुभयवान् योऽर्थः स समासेन प्रत्याय्यते तादृशपुरुषाद्युपस्थितावेव राजादिपदं तात्पर्यग्राहकम् । अन्वयादिति पूर्वोक्ते पक्षे च पुरुषपदमेव राजसम्बन्धवत्पुरुषत्वेनोपस्थापकम्, अत्र पक्षे च पुरुषपदात् पुरुषत्वेनैव पुरुषविशेषोपस्थितिः, राजपदं तात्पर्यग्राहकमित्यनयोर्भेदः । भेदः संसर्गो वा सामर्थ्यम्; भेदसंसर्गौ वा सामर्थ्यमित्यनयोः पक्षयोराशयो नागेशेनेत्थं स्फुटीकृतः—स्वत्वसमानाधिकरणो राजभिन्नस्वामिकभेदो राजसंसर्गव्याप्य इति भेदः सामर्थ्यमिति पक्षे । संसर्गः सामर्थ्यमिति पक्षे च वृत्त्युपस्थाप्यराजसम्बन्धवद्व्यक्तिगतराजसम्बन्धो राजभिन्नस्वामिकभेदव्याप्य इति । एवं च भेदवद्व्यक्तिबोधे सा व्यक्ती राजसंसर्गवत्यपीति तद्वती व्यक्तिरपि बुद्धैव । तथा संसर्गवद्व्यक्तिबोधे सा राजभिन्नस्वामिकभेदवत्यपीति तादृशभेदवती व्यक्तिरपि बुद्धैवेति योजनीयम् । भेदसंसर्गौ वेत्यस्यायं भावः—पूर्वोक्तरीत्योभयोः समनैयत्येन विनिगमनाविरहादुभयोर्यौगपद्येनैव सामर्थ्यप्रयोजकत्वम् । इत्थं जहत्स्वार्था वृत्तिरिति पक्षे दोषोद्धारः ॥ अथाजहत्स्वार्थावृत्तिर्विचार्यते, तदाह—"अथवा पुनरस्तु अजहत्स्वार्था वृत्तिः" इति । तत्राक्षिपति—"युक्तं पुनरिदं यदजहत्स्वार्था नाम वृत्तिः स्यात्" इति । अयमाशयः—स्वार्थत्यागाभावे स्वार्थप्रतिपादनव्यग्राणां पदानां समुदायार्थप्रतिपादनस्यासम्भवादयुक्तत्वशङ्केति । समादधाति—"बाढं युक्तम् । एवं हि दृश्यते लोके—भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति, संचयायैव प्रवर्त्तते" इति । अयमाशयः—यथा भिक्षुकः क्वचिदेकयैव भिक्षया कृतार्थोऽपि क्वचिदन्यामपि भिक्षामादाय संचिनोति, तथा शब्दोऽपि क्वचिदेकार्थः क्वचित् स्वार्थोपस्थापनपूर्वकमन्यार्थोपस्थापकोऽपीति संभाव्यत एवानेकार्थशब्दवदिति । अथाजहत्स्वार्थापक्षे पूर्वोक्तं दूषणं स्मारयति "ननु चोक्तम्—उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति" इति । प्रत्याक्षिपति—"कस्याः पुनर्द्विवचनं प्राप्नोति ?" इति । अयमाशयः—'राजपुरुषः' इत्यादौ पूर्वं द्वे विभक्ती—राजनि षष्ठी पुरुषे प्रथमा, सम्प्रति चोद्यमानं द्विवचनं कस्या विभक्तेरिति वक्तव्यम्, एकया विभक्त्या गुणप्रधानभूतस्य राजपुरुषरूपार्थद्वयस्य प्रतिपादयितुमशक्यत्वादि इति । तत्राह—"प्रथमायाः" इति, प्रधानानुसारित्वादप्रधानस्य प्रधाने पुरुषे या विभक्तिस्तस्या एव द्विवचनं प्राप्नोतीति भावः । तत्राह—"न प्रथमासमर्थो राजा" इति । प्रथमया विभक्त्या राजनि विद्यमानो गुणभावो नाख्यातुं शक्यते, प्रथमया सम्बन्धार्थस्यासंप्रत्ययादिति भावः । पुनराह—"षष्ठ्यास्तर्हि प्राप्नोति" इति, सम्बन्धः षष्ठ्यर्थः, स एव चात्र प्रत्याय्यः, स चोभयनिष्ठ इति षष्ठ्या एव द्विवचनमिह प्राप्नोतीति भावः समाधत्ते—"न षष्ठीसमर्थः पुरुषः" इति, पुरुषपदोत्तरमुपात्तया षष्ठ्या पुरुषस्यापि राजसमकक्ष्यतया सम्बन्ध्यन्तरापेक्षा स्यादिति पुरुषस्य षष्ठ्या सामर्थ्यं न प्रतीयेतेति भावः । पूर्वोक्तमेव पक्षमभ्युपैति—"प्रथमाया एव तर्हि प्राप्नोति" इति, तत्र पूर्वोक्तं बाधकं स्मारयति—"ननु चोक्तं—न प्रथमासमर्थो राजा" इति । निराकरोति—"अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्नः, तत्र प्रातिपदिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति" इति । अयमाशयः—कश्चिदर्थोऽभिहितोऽपि नान्तर्भवति—यथा 'राज्ञः' इति षष्ठ्या सम्बन्धार्थोऽभिहितोऽपि न क्वचनान्तर्भूतः, कश्चिदर्थोऽन्तर्भूतोऽपि नाभिधीयते, यथा—राजसख इत्यादौ राजा सखा यस्येत्यर्थोऽन्तर्भवन्नपि न समासेनाभिधीयते बहुव्रीहिप्रसङ्गात्, कश्चिदर्थोऽभिहितोऽन्तर्भूतश्च, किन्तु नामार्थतां न व्रजति यथा—पचतीत्यादौ कर्त्ताऽभिधीयमानोऽन्तर्भवंश्च न नामार्थः । अत्र च राजपुरुषादिपदे सम्बन्धरूपोऽर्थोऽभिहितोऽन्तर्भूतो नामार्थतां च गत इति नामार्थेन सह कदाचिदपि तस्य भेदाभावान्नामार्थे विधीयमानया प्रथमयाऽसौ द्योतयितुं शक्यत इति प्रथमाया एव द्विवचनमत्र प्राप्नोतीति । अत्रोत्तरमाह वार्त्तिकेन—"संघातस्यैकार्थ्यात्सुबभावो वयवसंख्यातः सुबुत्पत्तिः" इति, "संघातस्यैकत्वमर्थः, तेनावयवसंख्यातः सुबुत्पत्तिर्न भविष्यति" । अयमर्थः—इह 'राजपुरुष'शब्दात् संघातात् विभक्त्योत्पत्तव्यम्, तेन च संघातेनावयवार्थोपकृत एकत्वसंख्यायुक्तो विशिष्टोऽर्थः प्रतिपाद्यत इति तदाश्रयमेकवचनमेवात्र भवति, न तु गुणभूतावयवसंख्यानिमित्तं द्विवचनमिति । अयमाशयः—राजपदस्य शास्त्रक्लृप्तशक्त्योपस्थितार्थत्यागे तद्बोधायातिरिक्तशक्तिकल्पने च मानाभावादजहत्स्वार्थामाश्रित्यावयवोपकृता समुदायशक्तिरिह स्वीकार्या । तत्र यद्यप्यवयवार्थस्तत्तद्विशेष्यत्वावच्छिन्नः [ राजत्वनिष्ठप्रकारतानिरूपितराजनिष्ठविशेष्यतावच्छिन्नः ] एव तथापि [ पुरुषादिनिरूपित ] विशेषणत्वेन तस्या [ राजनिष्ठाया ] विशेष्यताया आच्छादनात् तस्या अपि विशेषणतयैव प्रतीतिर्न तु स्वरूपेण इति । [ विशेषणान्वयित्वरूपेणानुपस्थितेः ] न [ ऋद्धस्येत्यादि ] विशेषणान्वयः । वाक्ये [ राज्ञः पुरुष इत्यादौ ] तु प्रत्येकपदजबोधकाले राजादिगतविशेष्यतायाः स्वरूपेणैव भानमिति विशेषणाद्यन्वयो भवत्येव । इयमजहत्स्वार्था 'वृत्तिवर्त्तनवादिनः' [ कार्यशब्दवादिनः ] 'तदवर्त्तनवादिनः' [ नित्यशब्दवादिनः ] च तुल्या । जहत्स्वार्था तु वृत्तिवर्त्तनवादिन एव । वृत्त्यवर्त्तनवादिनोऽपि मतद्वयम्—अखण्डानि निरवयवानि पदानीत्येकम्, सावयवानि [ अर्थव्युत्पादनार्थं कल्पितावयवानि ] पदानीति द्वितीयम् । तत्र प्रथमपक्षे उभयोरपि कदाप्यर्थाभावेन त्यक्तस्वार्थेत्यर्थकाजहत्स्वार्थपदप्रयोगोऽप्यसंगतः, द्वितीयपक्षे क्लृप्तशक्तेस्त्यागानौचित्येनाजहत्स्वार्थैव ।

अक्षौहिणीरथन्तरादिपदे तु जहत्स्वार्थैव सर्वेषां तत्रावयवार्थस्य कस्मिन्नपि मते प्रतीत्यभावादित्यलमतिविस्तरेण, अधिकजिज्ञासुभिराकरग्रन्था अवलोकनीयाः ॥ २९ ॥

## *तद्धितीयो भावप्रत्ययः सापेक्षादपि* ॥ ३० ॥

सि०—सापेक्षस्यासमर्थत्वे पूर्वोत्तरन्यायेन बोधितेऽसमर्थस्य च वृत्त्ययोग्यतया तद्धितीयभावप्रत्ययोत्पत्तिरूपा वृत्तिरपि ततो न स्यादिति तत्प्राप्तये न्यायोऽयमुपात्तः । तत्र भावार्थे प्रत्ययः कृदधिकारोक्तोऽप्यस्ति तस्यापि सापेक्षादुत्पत्तिप्रसङ्ग इति तद्वारणाय तद्धितीय इति पदम् । अत्र च ज्ञापकं "पुरुषहृदयादसमासे" [ ७.१.७०. ] इति सूत्रस्थम् 'असमासे' इति पदम् । अनेन हि सूत्रेणासमासविषयाभ्यां पुरुष-हृदयशब्दाभ्यां भावे कर्मणि च वाच्येऽण् त्व-तलौ च विधीयेते, तथा च पुरुषस्य भावः कर्म वेत्यर्थे 'पौरुषम्, पुरुषत्वम्' इति च रूपे; समासे तु परमस्य पुरुषस्य भाव इत्यर्थेऽस्याप्राप्तौ 'भावे त्वतल्' [ ७. १. ५५. ] इति त्व एव भवति, न त्वनेनाण्, इति परमपौरुषमिति रूपव्यावृत्त्यर्थमसमासग्रहणं क्रियते । यदि च सापेक्षादयं प्रत्ययो न स्यात् तर्हि प्रकृतेऽपि पुरुषशब्दस्य परमशब्दसापेक्षत्वेन ततः प्रत्ययः स्वत एवाऽप्राप्त इति तदप्राप्त्यर्थम् 'असमासे' इति पदं व्यर्थमेव स्यात् ततश्च स्वसार्थक्याय तज्ज्ञापयति–*तद्धितीयो भावप्रत्ययः सापेक्षादपि भवति*, इति ज्ञापिते चात्राणो वारणार्थमस्य स्वांशे चरितार्थ्यम् । फलं च काकस्य कृष्णस्य भावः 'काकस्य कार्ष्ण्यम्' इत्यत्र कृष्णस्य काकविशेषणस्य तदपेक्षत्वेऽपि ततो भावार्थकः "पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च" [ ७. १. ६०. ] इति ट्यण् सिद्ध इति । यत् तु–"गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ।" इति नामलिङ्गानुशासनवचनाद् गुण-गुणिनोरभेदोपचाराद् गुणवाचकशब्देभ्यो मत्वर्थीयप्रत्ययलुबनुशासनाद् वा शुक्लादिगुणवाचकशब्दानां गुण-गुणिपरत्वयोः सर्वसम्मतत्वेन गुणवाचकात् कृष्णशब्दाद् भावे ट्यण्प्रत्यये पश्चात् काकेन सम्बन्धादस्य प्रयोगस्य [ 'काकस्य कार्ष्ण्यम्' इत्यस्य ] सिद्धिः संभाव्यते" इति केचिदाक्षिपन्ति, तन्न शोभनम्–तथा सति कार्ष्ण्यशब्दस्य जातिवाचकतापत्त्या तस्य काकेन सह सम्बन्धासम्भवः स्यात्, नहि कृष्णगुणगतजात्या काकस्य सम्बन्धसम्भावना । यदि च कृष्णगुणवाचकेन प्रकृत्यंशेन सम्बन्धविवक्षया षष्ठीति कथ्यते तदाऽपि तस्यासामर्थ्यं स्यादेवेति ततो भावप्रत्ययाप्राप्तिस्तदवस्थैव स्यादिति गुणिपरत्वमेव कृष्णशब्दस्य स्वीकृत्य ततो गुणार्थप्रत्यायनाय भावप्रत्ययोऽत्र विधेय इति, तथा सति कृष्णशब्दस्य विशेषणत्वेन सापेक्षत्वमस्त्येवेति प्रकृतन्यायं विनाऽत्र निर्वाहासम्भव एवेति तन्मतेन समाधानम् । स्वमतेऽत्र वर्णवाचकत्वाद् गुणवाचकत्वाच्च न प्रत्ययोऽपि तु गुणाङ्गवाचकत्वादिति पूर्वोक्तशङ्काया अनवकाशत्वमेवेत्यधिकं विवरणे स्पष्टम् ॥ ३० ॥

*तद्धितीयो भावप्रत्ययः सापेक्षादपि* ॥ ३० ॥

त०—काकस्य कार्ष्ण्यमित्यादौ काकस्य कृष्णस्य [ कृष्णवर्णरूपगुणवतः ] भाव इत्यर्थे गुणाङ्गवाचकात् कृष्णशब्दात् "पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च" [ ७. १. ६० ] इति ट्यण् न प्राप्नोति, कृष्णशब्दस्य विशेषणभूतस्य विशेष्यकाकसापेक्षत्वात् सापेक्षस्य चासामर्थ्यादसमर्थस्य पदविधियोग्यत्वाभावात् । तत्र प्रत्ययसिद्धयेऽयं न्याय उपादीयते । यद्यपि कृष्णशब्दस्य कृष्णवर्णवाचित्वमप्यस्ति, तथा च "वर्णदृढादिभ्यष्ट्यण् च वा [ ७. १. ५९. ] इति ट्यणि कार्ष्ण्यपदं संसाध्य पश्चात् काकेन सम्बन्ध इति शङ्कितुं शक्यते, तथापि यत्र विशेषणत्वेन कृष्णशब्दो भावार्थाभिधानाय विवक्षितस्तत्रोक्तप्रयोगस्यासिद्धिशङ्काया निराकरणाभावात् । किञ्च–"यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्व-तलौ" इति "तस्य भावस्त्वतलौ" [ पा० सू० ५. १. ११९. ] इति सूत्रे महाभाष्योक्तवार्त्तिकव्याख्यायाम् "गुणशब्देन यावान् कश्चित् पराश्रयो भेदको जात्यादिरर्थः स सर्व इह गृह्यते, तस्य भावात्–विद्यमानत्वात्, द्रव्ये–विशेष्यभूते सत्त्वभावापन्नेऽर्थे, शब्दनिवेशः–शब्दस्य प्रवृत्तिर्यस्य गुणस्य शब्देन वाच्यस्यावाच्यस्य वा भावात् स त्वतलादिभावप्रत्ययाभिधेयः" इत्येवं वार्त्तिकार्थमुक्त्वा–"तत्र ये रूपादयः शब्दा गुणमात्रवृत्तयस्तेभ्यो गुणसमवायिनि सामान्ये भावप्रत्ययः–रूपत्वमिति, ये तु शुक्लादयो गुण-गुणिवृत्तयो गुण-गुणिनोरभेदोपचारान्मत्वर्थलोपाद् वा तेभ्यो गुणवृत्तिभ्यो गुणसमवायिनि सामान्ये एव भावप्रत्ययः, गुणिवृत्तिभ्यस्तु गुणे, अणु-महद्-दीर्घादयो नित्यं परिमाणिनि वर्त्तन्ते, न तु परिमाणमात्रे, तेन तेभ्यः परिमाणे गुणे भावप्रत्ययः" इत्यादिना कैयटेन भावप्रत्ययार्थस्य यो विचारः प्रदर्शितस्तद्रीत्या वर्णमात्रवाचकात् कृष्णशब्दाद् विधीयमानेन भावप्रत्ययेन कृष्णगुणगता जातिरेवाभिधातुं शक्यते, तस्याश्च काकेन सम्बन्धाभावात् काकस्य कार्ष्ण्यमिति प्रयोगो नैव स्यादिति तदर्थमिह गुणाङ्गवाचकस्यैव प्रयोग इति स्वीकार्यम्, गुणाङ्गवाचकाच्च विधीयमानो भावप्रत्ययः पूर्वोक्तकैयटरीत्या गुणवाचक इति तस्य काकेन सम्बन्धः साधुः घटते । एवं च–"ननु कृष्णस्य भावः कार्ष्ण्यमिति सामान्येन निष्पाद्य पश्चाद् विशेषप्रतिपत्त्यर्थं काकस्येत्यनेन योजयिष्यते, तथा च क्वैतस्यावकाशः" इति शङ्कामुल्लिख्य, "उच्यते–कृष्णस्येत्यत्र कृष्णशब्दो गुणवाची गुणाङ्गवाची

वा त्वयेष्यते ? यदि कृष्णाख्यस्य वर्णस्य वाचक इति गुणवाची तदा ट्यण् न प्राप्नोति, गुणाङ्गतस्तद्विधानात्" इति न्यायार्थमञ्जूषान्यासे समाहितं, तत्तु न युक्तमिति प्रतिभाति–यतो वर्णमात्रवाचकादपि कृष्णशब्दात् "वर्णदृढादिभ्यः" [ ७. १. ५९. ] इति ट्यणो विधानं प्रसिद्धमेवेति कुतस्तदप्राप्तिरिति पूर्वोक्तसमाधानमेव युक्तम् । तथा चेह काकेन सह सम्बन्धस्य लाभाय गुणाङ्गवाचकत्वं कृष्णशब्दस्यास्थेयमिति ततो भावप्रत्ययेन गुणस्याभिधानात् पूर्वं सामानाधिकरण्यमूलापि काकपदे षष्ठी पश्चात् सम्बन्धमूला सम्पद्यते, तथापि च सापेक्षत्वमस्त्येवेति न्यायप्रवृत्तिं विना भावप्रत्ययोत्पत्तिरिह कर्तुमशक्येति भवत्यत्र न्यायप्रसरः ॥

अथात्र न्याये ज्ञापकं यदुक्तं "पुरुषहृदयादसमासे" [ ७. १ ७० ] इति सूत्रे 'असमासे' ग्रहणमिति, तद् विचार्यते-तत्र 'असमासे' इति न पर्युदासः किन्तु प्रसज्यप्रतिषेधः, पर्युदासे हि समासभिन्नायां तत्सदृश्यां कस्याञ्चिद् वृत्तावेव स्यादित्यर्थो लभ्यते । तथा च केवलात् पुरुषहृदयशब्दान्न स्यादिति न्यासकृतः । 'असमासे' इत्यत्र च विषयसप्तमी, न सत्सप्तमी, सत्सप्तम्यामाश्रितायां चासमासग्रहणस्य वैयर्थ्यमेव स्यात्, समासे सति *ग्रहणवता नाम्ना न तदन्तविधिः* इति न्यायेन तदन्तविधिनिषेधात् परमपुरुषादिशब्देभ्यः प्रत्ययस्याप्राप्तेः । अतश्च विषयग्रहणात् समासात् पूर्वमेव समासार्थप्रक्रियावाक्य एव परमस्य पुरुषस्य भाव इत्येवं विवक्षायां पुरुषशब्दादनेनाणि "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति परिभाषया पुरुषशब्दस्यादिस्वरस्य वृद्धौ 'परमपौरुषम्' इत्यनिष्टरूपापनोदार्थमसमासे इति क्रियते, तच्चानावश्यकम्–परमस्य पुरुषस्य भाव इति विग्रहानुसारिप्रक्रियावाक्ये परमशब्देन सह सामर्थ्यमारूढस्य पुरुषशब्दस्य केवलस्य समर्थत्वाभावात् प्रत्ययाप्राप्तेः । अत्र च परमस्य पुरुषस्य भाव इति वाक्ये "सन्महत्०" [ ३. १. १०७. ] इति समासप्राप्तावपि ततो भावप्रत्यये कृते तदपेक्षया सम्बन्धषष्ठ्यां सत्यां न तत्प्राप्तिः सामानाधिकरण्याभावादिति "षष्ठ्ययत्नात्" [ ३. १. ७६. ] इति षष्ठीतत्पुरुष एव भवति, तथापि च समासविषयता तिष्ठत्येव । अतश्च केवले पुरुषे सामर्थ्याभावात् ततः प्रत्ययाप्राप्तेरिति व्यर्थमसमासेपदं प्रकृतन्यायं ज्ञापयति, तदुक्तं प्रकृतसूत्रे [ "पुरुषहृदयादसमासे" ७. १. १७. इति सूत्रे ] बृहद्वृत्तौ-"अत एव निषेधात् सापेक्षादपि भावप्रत्ययो भवति" इति । अत्र च लघुन्यासे परमपौरुषशब्दस्यान्यथाऽपि सिद्धिरित्थं निराकृता–"ननु परमं च तत् पौरुषं चेति कृते परमपौरुषमिति भवति वा ?, उच्यते–सादृश्यान्न भवति, एवं हि कृते परमस्य पुरुषस्य भावः परमं च तत् पौरुषमिति वा विशेषो न ज्ञायते इति" । तथा च तस्य रूपस्य सन्दिग्धत्वेन शास्त्रस्य चासन्दिग्धानुष्ठानसाधकतया न तस्यापि रूपस्यानुज्ञेति तदाशयः । वस्तुतस्तु–तादृशे विग्रहे सति पौरुषे एव परमत्वं प्रतीयेत, न तु पुरुषे, तथा च पुरुषे परमपदान्वये समीहिते ततोऽण् न, पौरुषे च तदन्वयविवक्षायामणि बाधकाभाव इति युक्तं प्रतिभाति । भवति ह्यर्थभेदाच्छब्दभेद इत्यर्थानुसारेणैव साधुत्वासाधुत्वव्यवस्थायाः सम्बन्धादन्यार्थे तादृशरूपसिद्धावसमासे इत्यस्य बाधकत्वं नोचितमिति पौरुषे परमत्वप्रतिपादनाय परमपौरुषमिति साध्वेवेति ॥ ३० ॥

## *गति-कारक-ङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः* ॥ ३१ ॥

**सि०**—अनेन न्यायेन कृदन्तैः सह गति-कारक-ङस्युक्तानां विभक्त्युत्पत्तेः प्रागेव समासो नियम्यते । तत्रेदमाशङ्क्यते यत्–"नाम नाम्नैकार्थ्ये समासो बहुलम्" [३. १. १८.] इति सूत्रमेव समासविधायकसूत्रेषु समुपतिष्ठते, । तथा च नाम्न एव नाम्ना सह समासो विधीयते सर्वत्र न विभक्त्यन्तस्येति विभक्त्युत्पत्तेः समासार्थमनपेक्षणात् स्वत एव सर्वत्र विभक्त्युत्पत्तेः पूर्वमेव समासः स्यादेवेति कृदन्तानां विशिष्य विभक्त्युत्पत्तेः पूर्वं समासबोधनमनवसरप्राप्तमिति; अत्रोच्यते–"नाम नाम्ना०" [ ३. १. १८. ] इत्यनेन यद्यपि विभक्त्यन्तेन सह विभक्त्यन्तं समस्यते इत्यर्थो न लभ्यते तथापि "ऐकार्थ्ये" [ ३. २. ८. ] इति सूत्रेण ऐकार्थ्यनिमित्तस्य स्यादेर्लुब्विधानादैकार्थ्यस्य च विभक्तिसहकारेणैव प्रतिपादनाद् विभक्त्यन्तस्यैव समास इति लभ्यते, न चैकस्य विभक्त्यन्तत्वे परस्परं सम्बन्धः शक्यते बोधयितुमित्युभयोः पदयोः सर्वत्र समासे विभक्त्यन्तत्वमपेक्षितमित्यायाति । तथा च यत्र गति-कारक-ङस्युक्तानां कृदन्तैः सह समासो भवति तत्र कृदन्तस्यापि स्याद्यन्तत्वं प्राप्तमिति तद्वारणाय न्यायोऽयमाश्रीयते । तत्र गतिः–"ऊर्याद्यनुकरण०" [ ३. १. २. ] इत्यादिसूत्रेण गतिसंज्ञिता उपसर्गा ऊर्यादयश्चान्ये च तत्प्रकरणपरिभाषिताः; कारकाणि प्रसिद्धानि; ङस्युक्तानि कृत्प्रकरणे–"कर्मणोऽण्" [ ५. ३. १४. ] इत्यादिरूपेण पञ्चम्यन्तपदेनोक्तानि, ङसीत्यस्य शब्दस्येह पञ्चमीस्यादिविभक्त्युपलक्षकत्वात्; एतानि विभक्त्यन्तानि कृदन्तैः सह विभक्त्युत्पत्तेः प्रागेव समस्यन्ते इति न्यायार्थः । अत्र ज्ञापकं चैकदेशानुमत्या "क्रीतात् करणादेः" [ २. ४. ४४. ] इति सूत्रेणाऽदन्तात् क्रीतशब्दात् करणादेर्ङीविधानम् । तथाहि–क्रीतशब्दस्य विशेषणं करणादेरिति, करणादित्वं च समासं विनाऽसम्भवि, समासश्च पूर्वोक्त-

रीत्या विभक्त्यन्तानामेवेति क्रीतशब्दस्यापि विभक्त्यन्तत्वे सत्येव समासेन भाव्यम्, विभक्त्युत्पत्तिश्च कारक-संख्याद्युपस्थितिनिबन्धनेति विभक्त्युत्पत्तेः पूर्वमेव लिङ्गोपस्थितिनिमित्तस्यापः प्रवृत्तिरिह स्यात्, जाति-द्रव्य-लिङ्ग-संख्या-कारकरूपाणां नामार्थानां क्रमिकोपस्थितिस्वीकारात्, पूर्वोपस्थितनिमित्तकत्वेन विभक्त्युत्पत्तितो लिङ्गनिमित्तकाबुत्पत्तेरन्तरङ्गत्वादित्यदन्तत्वाभावाददन्तात् क्रीतशब्दाद् विधीयमानो ङीर्निरवकाश एव स्यादिति सोऽदन्तादिति निर्देशो व्यर्थीभूय कारकाणां विभक्त्यन्तानां कृदन्तेन विभक्त्युत्पत्तेः पूर्वमेव समासं ज्ञापयिष्यति। एकदेशानुमत्या लक्ष्यानुरोधाच्च गति-ङस्युक्तविषयेऽप्यस्य न्यायस्य प्रामाण्यं स्वीक्रियते स्थालीपुलाकन्यायेन। तत्र गतेर्विभक्त्यन्तस्य कृदन्तेन समासस्योदाहरणं यथा—'विष्किरी' इति, अत्र विकिरति पक्षावित्यर्थे गतिसंज्ञे वौ उपपदे किरतेः "नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः" [ ५. १. ५४. ] इति के कृते पक्ष्यर्थमात्रापेक्षत्वेनान्तरङ्गत्वात् प्रथममेव "वौ विष्किरो वा" [ ४. ४. ९६. ] इति स्सटि कृते 'वि+स्किर' इति स्थिते स्किरेत्यनेन कृदन्तेन सह विभक्त्युत्पत्तेः प्रागेव "गति-क्वन्यः०" [ ३. १. ४२. ] इति तत्पुरुषसमासे ततो "असो-ङ-सिवू-सह-स्सटाम्" [ २. ३. ४८. ] इत्यनेन स्सटः सस्य षत्वे च स्त्रीत्वविवक्षायामदन्तत्वात् "जातेरयान्तनित्यस्त्रीशूद्रात्" [ २. ४. ५४. ] इति ङीः सिद्ध्यति। एतन्न्यायाभावे तु विभक्त्यन्तेन समासे समाश्रीयमाणे कर्मादिकारक-संख्याद्यपेक्षत्वेन बहिरङ्गाया विभक्तेरुत्पत्तेः पूर्वमेव स्त्रीत्वमात्रापेक्षत्वेन स्त्रीत्वस्य च कर्मादितः पूर्वमेवोपस्थित्यान्तरङ्गत्वादापः प्रवृत्त्याऽदन्तत्वाभावाद् ङीर्न स्यात्, स्वीकृते चास्मिन् न्याये विभक्त्युत्पत्तेः पूर्वमेव समासे विशेषविहितत्वादापं बाधित्वा ङीर्भवति ॥ १ ॥ कारकस्य कृदन्तेन विभक्त्युत्पत्तेः पूर्वं समासस्योदाहरणं यथा—'चर्मक्रीती' इति, अत्र 'चर्मणा अक्रायि' इत्यर्थे क्रीधातोः क्ते 'चर्मन्+टा+क्रीत' इति स्थिते एतन्न्यायबलात् स्याद्युत्पत्तेः पूर्वमेव "कारकं कृता" [ ३. १. ६८. ] इति समासे ततः स्त्रीत्वविवक्षायां "क्रीतात् करणादेः" [ २. ४. ४४. ] इत्यनेन क्रीतशब्दाददन्तान्ङीः सिद्धः, एतन्न्यायाभावे तु विभक्त्यन्तेन क्रीतशब्देन समासः स्यादिति विभक्त्युत्पत्तेः पूर्वमेव पूर्वोक्तरीत्याऽऽपि सति अदन्तत्वाभावान्ङीर्न स्यात्, कारकस्य विभक्त्यन्तत्वनियमाच्च चर्मन्शब्दस्य नलोपः सिद्धः ॥ २ ॥ ङस्युक्तस्य विभक्त्यन्तस्य कृदन्तेन विभक्त्युत्पत्तेः पूर्वं समासस्योदाहरणं यथा—'कच्छपी' इति, कच्छं पिबतीत्यर्थे नाम्नि इत्याधिकारस्थेन "स्था-पा-स्ना-त्रः कः" [ ५. १. १४२. ] इति के 'कच्छ+अम्+प' इति स्थिते विभक्त्युत्पत्तेः पूर्वमेव "ङस्युक्तं कृता" [ ३. १. ४९. ] इति तत्पुरुषसमासे स्त्रीत्वविवक्षायां "जातेरयान्त०" [२. ४. ५४.] इति ङीर्भवति, एतन्न्यायाभावे तु विभक्त्यन्तेन सह समास इति पूर्ववद् विभक्त्युत्पत्तेः पूर्वमेव स्त्रीत्वनिमित्तके आपि सति विभक्त्युत्पत्तौ समासेऽदन्तत्वाभावान्ङीर्न स्यात्। इह समासात् पूर्वं जातेरप्रतीयमानत्वान्न जातिलक्षणङीप्रत्ययस्य प्राप्तिरिति बोध्यम्। ङस्युक्तपदे ङसेः पञ्चमीविभक्त्युपलक्षकत्वस्वीकाराच्च पञ्चमीभ्यसोक्तस्यापि संग्रहाद् विषधरीत्यादिसिद्धिः, तत्र हि विषं धरतीत्यर्थे "आयुधादिभ्यो धृगोऽदण्डादेः" [ ५. १. ९४. ] इत्यच्प्रत्यये 'विष+अम्+धर' इति स्थितौ विषशब्दस्यापि ङस्युक्तत्वात् तद्विषयेऽपि प्रकृतन्यायप्रवृत्त्या धरेत्यस्य स्याद्युत्पत्तेः पूर्वमेव "ङस्युक्तं कृता" [ ३. १. ४९. ] इति तत्पुरुषसमासे ततः स्त्रीत्वविवक्षायां "जातेरयान्त०" [ २. ४. ५४. ] इति ङीः सिद्धः; यदि चात्रैतन्न्यायप्रवृत्तिर्न स्यात् तर्ह्यत्रापि पूर्ववद् विभक्त्युत्पत्तेः पूर्वमेवाऽऽपि ततो विभक्त्युत्पत्तौ समासेऽदन्तत्वाभावान्ङीर्न स्यात्। अत्र कारकांशमात्रे ज्ञापकमुपन्यस्तं नान्यत्र। प्राचीनैस्तु 'विष्किरी-कच्छपी'इत्यादिसिद्ध्यै यत्नान्तराकरणं गतिङस्युक्तविषये ज्ञापकं वर्णितं, तच्च पूर्वं तत्तत्स्थलविशेषे प्रत्युक्तमेवेति न पुनः प्रत्युच्यते, विशेषश्च विवरणे स्पष्टः ॥ ३१ ॥

## *गति-कारक-ङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः* ॥ ३२ ॥

त०—विष्किरी, कच्छपी, अश्वक्रीती' इत्यादिलक्ष्याणां सिद्धयेऽयं न्यायः समाश्रीयत इति वृत्तौ प्रदर्शितमेव। एषु हि लक्ष्येषु विभक्त्युत्पत्तेः पूर्वं समासे सति जातिलक्षणोऽन्त्ये च करणपरत्वनिमित्तो ङीर्भवति, अन्यथा स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकाणां क्रमेणोपस्थितिः, येन च क्रमेण यदर्थोपस्थितिस्तेनैव क्रमेण तदर्थनिमित्तककार्योत्पत्तिरिति सिद्धान्ताद् विभक्त्युत्पत्तेः प्रागेव स्त्रीत्वस्योपस्थित्या तन्निमित्तकस्यापः प्रवृत्त्या ङीर्न स्यादित्यावेदितमेव। तत्रेदमाशङ्क्यते-उत्सर्गापवादस्थलेऽयं क्रमो भवति यत्-उत्सर्गशास्त्रमपवादशास्त्रविषयतायां भाविन्यामपि न प्रवर्त्तते, अन्यथाऽस्य प्रवृत्तावपवादशास्त्रस्यानर्थक्यं तिष्ठेदेव, तमेव चार्थमन्ये वैयाकरणाः *उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते* इति न्यायेन सूचयन्ति, तदर्थं चैवं वर्णयन्ति - उत्सर्गशास्त्रप्रवृत्त्यभावसम्भावनाप्रयोज्यापवादशास्त्रप्रवृत्तिसंभावनायामुत्सर्गशास्त्रस्य न प्रवृत्तिरिति। तथा च विष्किरीत्यादौ यद्युत्सर्गशास्त्रमाप्सूत्रं न प्रवर्त्तेत तदाऽपवादशास्त्रं "जातेरयान्त०" [ २. ४. ५४. ] इति प्रवर्त्ततेति सम्भावनायाः सत्त्वेन पूर्वमापोऽप्रवृत्तिरेवेति विभक्त्युत्पत्तेः पश्चादपि समासे दोषाभावेन नात्र न्यायावश्यक-

तेति । अत्र केचित्–अपवादशास्त्रकृतसंकोचप्रकारेषु भविष्यदपवादविषयातिरिक्तत्वेनापि सङ्कोच इत्यस्मिन्नेवार्थे प्रकृत [ *उपसञ्जनिष्यमाण० *इत्यादि ]न्यायतात्पर्येण 'विष्किर' 'कच्छप' इत्यादिसमुदायस्यैव जातिवाचकत्वेन 'जातेरयान्त०" [ २. ४. ५४. ] इति सूत्रविषयत्वात् तदतिरिक्तत्वेन सङ्कोचसम्भवेऽपि 'स्किर-प'शब्दाभ्यामाप् स्यादेव । अथापवादविषयघटकातिरिक्तत्वेनापि सङ्कोच इति नात्रापः प्रवृत्तिः, अन्यथा सिद्धान्ते विभक्त्युत्पत्तेः प्राक् समासेऽप्यापः स्त्रीत्वमात्रनिमित्तकत्वेन तदपेक्षया जातिरूपस्याधिकस्यापेक्षणान्ङीविधानस्य बहिरङ्गत्वेनान्तरङ्गत्वादाप् स्यादेव, न चैवं सङ्कोचे 'अजया क्रीता–अजाक्रीती' इत्यादौ "क्रीतात् करणादेः" [ २. ४. ४४. ] इत्यपवादविषयघटकत्वेनाजशब्दादप्याप् न स्यादिति वाच्यम्, अपवादविषयान्तातिरिक्तत्वेन सङ्कोचे तात्पर्यादिति चेत्? न–तादृशसङ्कोचे मानाभावात्, किन्तु समकालिकापवादशास्त्रविषयातिरिक्तत्वेनैव सङ्कोचः, तथा चेहोत्सर्गस्यापोऽपवादस्य च ङीविधेः समकालप्राप्त्यभावेन तत्सङ्कोचविषयाभावाद् विभक्त्युत्पत्तेः पूर्वमापः प्रवृत्तौ बाधकाभावः, ङीस्तु ततः [ विभक्त्युत्पत्तेः ] पूर्वं न प्रवर्तेत, त्वन्मते तदवस्थायां समासाप्राप्त्या समुदाये शक्तेरनुत्पत्त्या जातिवाचकत्वाभावादित्याद्यावेदितं पूर्वं वृत्तावेव, 'चर्मक्रीती' इत्यत्रापि समासात् पूर्वं करणादित्वाभावेन न ङीप्राप्तिरिति बोध्यम् । "ङस्युक्तं कृता" [ ३. ५. ४९. ] इति सूत्रव्याख्यायां बृहद्वृत्तौ चायं न्याय 'इष्टि'त्वेनोक्तो न तु ज्ञापकसिद्धत्वेन, तथाहि–तत्रत्यो ग्रन्थः–"इह गति-कारक-ङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास इष्यते, तेन 'प्र+स्+स्थ' इत्यादौ 'चर्मन्+टा+क्रीत' 'अभ्र+टा+विलिप्त' 'कच्छ+अम्+प' इत्यादौ च समासे सति अकारान्तत्वान्ङीः सिद्धः–प्रष्ठी, चर्मक्रीती, अभ्रविलिप्ती, कच्छपी, इत्यादि । यदि पुनर्विभक्त्यन्तैः कृदन्तैः समासः स्यात् तदाऽन्तरङ्गत्वाद् विभक्तेः प्रागेव आपः प्राप्तावकारान्तत्वाभावान्ङीर्न स्यात् । तथा 'माषान्+वापिन्' 'व्रीहीन्+वापिन्' इत्यादौ समासे नकारस्यान्तत्वाण्णत्वं सिद्धं–माषवापिणी, व्रीहिवापिणी, विभक्त्यन्तेन तु समासेऽन्तरङ्गत्वाद् विभक्त्युत्पत्तेः प्रागेव ङीप्राप्तौ नकारास्यानन्त्यत्वाण्णत्वं न स्यात्" इति । तथा च तत्र वचनरूपेणैवायं पठितो न तु ज्ञापकसिद्धत्वेन । तदाशयश्चायमेव, तद्यथा–गति-ङस्युक्तविषये ज्ञापकाभावात् कारकमात्रविषये ज्ञापकत्वोपन्यासाद् वरमस्य वचनरूपत्वेनैव स्वीकार इति । अन्ये वैयाकरणास्तु–सर्वांशेनैवात्र न्याये ज्ञापकसिद्धत्वं वर्णयन्ति, परं स्वमते प्रक्रियाभेदान्न तदाश्रयितुं शक्यते, ततश्च वरं वचनरूपेणैव स्वीकारः । केचिदस्य न्यायस्यानित्यत्वमिच्छन्ति, तथा च "सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी ।" इति प्रयोगे विभक्त्युत्पत्तेः पश्चात् समासेन पूर्वमेवापः प्रवृत्त्या ङीप्राप्त्यभावाद्धनक्रीतेति सिद्ध्यति । बृहद्वृत्तौ "क्रीतात् करणादेः" [ २. ४. ४४. ] इति सूत्रव्याख्यायां तु समाधानान्तरमुक्तम्, तथाहि–"कथं "सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी ।" इति ? धनं च सा क्रीता चेति कर्मधारयोऽयम्, करणविवक्षायामपप्रयोग एव, केचित्तु–धनेन क्रीतेत्यत्राबन्तेनापि समासमिच्छन्ति, बहुलाधिकारात्, तदाऽकारान्तत्वाभावान्ङीर्न भवति" इति । तथा च स्वमतेऽस्य न्यायस्य नानित्यत्वमिष्टमिति स्पष्टम् । परिभाषेन्दुशेखरे नागेशेनापि परोक्तमनित्यत्वोदाहरणरूपेण धनक्रीतेति प्रकृत्याजादिगणे पाठकल्पनात् तस्य सिद्धिमाश्रित्य तन्मते प्रमाणाभाव उक्तः । पूर्वोक्तबृहद्वृत्तिग्रन्थे प्रकृतन्यायस्य गतिसंज्ञकस्य कृदन्तेन विभक्त्युत्पत्तेः पूर्वं समासस्य प्रष्ठीत्युदाहरणं दत्तम्, अस्माभिश्च विष्किरीति । तस्यायमाशयः–प्रष्ठीत्यस्य गत्युदाहरणत्ववत् ङस्युक्तोदाहरणत्वमपि सम्भवति, तथाहि–अत्र प्रष्ठ इत्यस्य "उपसर्गादातो डोऽश्यः" [ ५. १. ५६ ] इति डप्रत्ययान्तत्वात् तत्र चोपसर्गादिति पञ्चम्यन्तपदेनोक्तस्य प्रस्य ङस्युक्तत्वेन "ङस्युक्तं कृता" [ ३. १. ४९. ] इति सूत्रेणापि समाससम्भवान्नेदं गतेरसाधारणमुदाहरणमिति । ङस्युक्तपदं च न केवलं पञ्चम्यन्तपरमपि तु पञ्चम्यर्थविहितप्रत्ययपरमपि, तथा च *प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम्* इति न्यायात् पञ्चम्यन्ताद् यः स्वार्थिकप्रत्ययस्तस् विहितस्तदन्तस्यापि ङस्युक्तत्वेन ग्रहणं भवति, यथा–"यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः" [ ५. ३. १२५. ] इति सूत्रे "किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित्तस्' [ ७. २. ८९. ] इति तस्प्रत्ययान्तं तत इति पदम् । तथा च पूर्वोक्तसूत्रार्थः–येन कर्मणा स्पृश्यमानस्य कर्तुरङ्गस्य सुखं जायते तस्मात् कर्मणः पराद् धातोः क्लीबे भावेऽर्थेऽनट् इति, यथा–पयःपानं सुखमित्यादि, अत्र पयःशब्दस्य तत इति ङस्युक्तत्वेनैतन्न्यायादविभक्त्यन्तेनैव पानशब्देन सह "ङस्युक्तं कृता" [ ३. १. ४९. ] इति समासे कृते पयसः पानसुखमित्यादि वाक्यं न भवति, न वा पयसः पानं सुखमिति, यदि च विभक्त्यन्तेन समासः स्यात् तर्हि समासान्तरवत् कदाचिद् वाक्यमपि प्रयुज्येतेति ॥ ३१ ॥

## *समास-तद्धितानां वृत्तिर्विकल्पेन वृत्तिविषये च नित्यैवापवादवृत्तिः* ॥ ३२ ॥

**सि०—समासतद्धितानामित्यत्र विषयत्वं षष्ठ्यर्थः सम्बन्ध एव वा, समासतद्धितविषया वृत्तिर्विकल्पेन भवति, तत्सम्बन्धिनी वा वृत्तिर्विकल्पेन भवति । पदानां पृथगर्थानां शास्त्रानुशासनबलात् स्वघटकपदान्यपदार्थकथनमेव वृत्तिः,**

तदुक्तमभियुक्तैः–परार्थाभिधानं वृत्तिरिति । तत्र वृत्तेस्तात् त्रैविध्यं चातुर्विध्यं पाञ्चविध्यं वा । त्रिविधा वृत्तिरिति मते समास-तद्धित-नामधातुरूपा वृत्तयः, कृद्वृत्तिश्चतुर्थी, एकशेषवृत्तिः पञ्चमीत्यपि केचित् । क्रमेणोदाहरणानि–राजपुरुषः, औपगवः, पुत्रकाम्यति, कुम्भकारः, घटा इति, अत्र सर्वत्र परार्थाभिधानसत्त्वात् । तत्र वाक्येनार्थस्याभिधाने प्राप्ते आरभ्यमाणा वृत्तिः *येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवति*इति न्यायाद् वाक्यस्य सर्वथा बाधिकैव प्राप्तेति विकल्पेन वाक्यस्यावकाशोऽनेन न्यायेन बोध्यते । एवं चात्र विषये उत्सर्गापवादयोरपि विकल्पेन प्रवृत्तौ प्राप्तायां तत्रोत्सर्गस्य बाधेनापवादवृत्तेर्नित्यमेव प्रवृत्तिरित्यपि बोध्यते । तथा चायं न्यायश्चतुर्धा विभक्तुं शक्यते-समासस्य वृत्तिर्विकल्पेन १, समासवृत्तावपवादवृत्तिर्नित्या २, तद्धितस्य वृत्तिर्विकल्पेन ३, तत्राप्यपवादवृत्तिर्नित्या ४ इति । तत्र प्रथमेंऽशे ज्ञापकम्-"नित्यं प्रतिनाऽल्पे" [ ३. १. ३७. ] इति सूत्रे नित्यग्रहणम्, तद्धि समासविधानसामर्थ्यादेव नित्यत्वे सिद्धेऽनेन न्यायेन प्राप्तस्यैव विकल्पस्य बाधनाय कृतमित्येतन्न्यायं विनाऽनुपपद्यमानं न्यायमेनं ज्ञापयति, तेन 'शाकप्रति' इति नित्यमेव समासप्रयोगः, तदर्थप्रदर्शनं तु समासाघटकपदसहकारेणैव–शाकस्याल्पत्वमिति, 'अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा' इति तल्लक्षणात् । फलं त्वस्यांशस्य 'राज्ञः पुरुषः' इति वाक्यस्यापि 'राजपुरुषः' इति समासवत् साधुत्वमिति ॥ १ ॥ द्वितीयांशे ज्ञापकं तु "पारे-मध्ये-ऽग्रेऽन्तः षष्ठ्या वा" [ ३. १. ३०. ] इत्यत्र वाग्रहणम्, तद्धि स्वविषये पक्षे औत्सर्गिकषष्ठीसमासाभ्यनुज्ञानार्थम्, तेन च पारेगङ्गमित्यव्ययीभाववत् पक्षे गङ्गापारमिति षष्ठीसमासोऽपि, अन्यथा [ वाग्रहणाभावे ] अस्यापवादविधित्वेन स न प्रवर्त्तेत । एतन्न्यायांशाभावे तु षष्ठीसमासप्रवृत्तौ बाधकाभावे तदभ्यनुज्ञानार्थस्य वाग्रहणस्य वैयर्थ्यं स्यादेवेति तेन विना[ समासवृत्तिविषये नित्यैवापवादवृत्तिरित्यंशेन विना ]ऽनुपपद्यमानो वाशब्दस्तदंशं ज्ञापयति । फलं चास्य पूर्वोऽशः कायस्येत्यर्थे "पूर्वापराधरो०" [ ३. १. ५२. ] इत्यंशितत्पुरुषे न्यायपूर्वांशेन विकल्पेन प्रवृत्तेः पक्षे षष्ठीतत्पुरुषेण कार्यपूर्व इति प्रयोगो नेति ॥ २ ॥ तृतीयांशे ज्ञापकं तु–"नित्यं ञ-ञिनोऽण्" [ ७. ३. ५८. ] इत्यत्र नित्यग्रहणम्, तच्चानेन न्यायेन विकल्पे प्राप्ते सत्येव सार्थकतां लभते, अन्यथा विधानसामर्थ्यादेव नित्यत्वसिद्धेस्तद्वैयर्थ्यं स्यात् । तथा च नित्यग्रहणं स्वसार्थक्याय न्यायमिमं ज्ञापयति, ज्ञापिते चैतन्न्यायप्राप्तविकल्पप्रतिषेधार्थं तस्य स्वांशे चारितार्थ्यम्, तेन व्यतिहारेण व्यवक्रोशनमित्यर्थे स्त्रीत्वविवक्षायां "व्यतिहारेऽनीहादिभ्यो ञः" [ ५. ३. ११६. ] इति ञे तदनु "नित्यं ञ-ञिनोऽण्" [ ७. ३. ५८ ] इति स्वार्थेऽणि ङ्यां च व्यावक्रोशीति सिद्धिः, न चाण्प्रत्ययं विना केवलञान्तो व्यवक्रोशेति प्रयोगः, तेन प्रज्ञ एव प्राज्ञ इतिवत् व्यवक्रोशैव व्यावक्रोशीति विग्रहवाक्यं न भवति । अन्यत्र फलं च 'औपगव' इत्यादिवत् उपगोरपत्यमिति वाक्यस्यापि प्रयोगः इति ॥ ३ ॥ चतुर्थांशे ज्ञापकं च–"वोदश्वितः" [ ६. २. १४४. ] इति सूत्रे वाग्रहणम्, तद्धि स्वविधेयस्येकणोऽभावपक्षे औत्सर्गिकस्याणोऽभ्यनुज्ञानार्थं क्रियते, तच्चैतन्न्यायांशाभावे स्वभावत एव सिद्धमुभयोः शास्त्रयोः प्रवृत्तेर्निराबाधात्, प्रथमांशेन वृत्तेर्वैकल्पिकत्वज्ञापनादेव पक्षे वाक्यस्य तदन्यस्य वौत्सर्गिकविधेः प्रवृत्तेः सिद्धत्वात् । ततश्चापवादशास्त्रेणैव वृत्तिरिति रूपमिमं न्यायांशं विना वाग्रहणस्य सार्थक्यमनुपपन्नमेवेति तदेतन्न्यायांशज्ञापकं भवितुमर्हति । ज्ञापिते चास्मिन्न्याये वाग्रहणाभावे इकणेव स्यान्न त्वौत्सर्गिकोऽणिति 'औदश्वित' इति रूपं न स्यादिति तत्साधनाय वाग्रहणस्य स्वांशे चारितार्थ्यम् । फलं चैतदंशस्य गर्गस्यापत्यं वृद्धमित्यर्थे "गर्गादेः" [ ६. १. ४२. ] इति यञेव भवति, न तु "अत इञ्" [ ६. १. ३१. ] इत्यौत्सर्गिक इञ् । एवं चायं न्यायस्तत्तत्सूत्रैः प्रतीयमानस्य समासतद्धितवृत्तिविषयस्य नियमस्यानुवादमात्रं, न तु किञ्चिन्नवीनं विदधाति । अन्ये च तान्त्रिका नेदृशं न्यायं पृथगनुमन्वते, सूत्रेष्वेव तत्र तत्र नित्यग्रहणस्य वाग्रहणस्य कृतत्वाद् व्यवस्थायाः प्रतीयमानत्वात् । स्वमतेऽपि पूर्वोक्तरीत्या "नित्यं प्रतिना० [ ३. १. ३८. ] इति सूत्रे नित्यग्रहणेनान्यत्र समासे वाक्यमपि स्यादिति सूच्यते । एतच्च बृहद्वृत्तावपि तत्सूत्रव्याख्यायां स्पष्टमेवोक्तम्, एवं–"पारे-मध्ये०" [ ३. १. ३०. ] इति सूत्रे वाग्रहणेन समासविषयेऽन्यत्रापवादवृत्तेर्नित्यत्वमनुमापितमेव, नहि तेन पक्षे वाक्याभ्यनुज्ञा क्रियते इति शक्यते वक्तुं, तस्याः पूर्वज्ञापितेनापवादसमासविषये वृत्तेर्वैकल्पिकत्वेनैव सिद्धेः । तथा च समासविकल्पविधायकापवादशास्त्रेण पक्षे उत्सर्गशास्त्रस्य प्रवृत्तिरेवाभ्यनुज्ञायते इति सिद्धम् । एवं तद्धितवृत्तेर्वैकल्पिकत्वं तद्धितप्रकरणादिस्थेन "वाऽऽद्यात्" [ ६. १. ११. ] इति सूत्रात् प्रवर्त्तमानेन वाग्रहणेनैवं सिद्धम्, "वोदश्वितः" [ ६. २. १४४. ] इत्यादिसूत्रस्य वाग्रहणेन च तद्धितवृत्तीनामपवादविषयेऽन्यत्र नित्यैव प्रवृत्तिरित्यपि सूचितमेव । तथा च यत्र वाग्रहणं क्रियते तत्रैवापवादवृत्तिविषये औत्सर्गिकवृत्तिरन्यत्रापवादवृत्तिर्वाक्यं चेति निश्चीयत इति नायं न्यायोऽज्ञातविषयज्ञापकः । अत एव च नास्य चञ्चलतापि सूत्रबोध्यार्थबोधकत्वेन तदयोगात् । तथाप्येकत्र सर्वार्थस्य संग्राहकत्वेन न्यायरूपेणोपन्यास इति ॥ ३२ ॥

***समास-तद्धितानां वृत्तिर्विकल्पेन, वृत्तिविषये च नित्यैवापवादवृत्तिः* ॥ ३२ ॥**

**त०**—समास-तद्धितादिषु वृत्तिषु सर्वत्र सामर्थ्यमपेक्ष्यते, तेषां पदविधित्वेन पदविधेश्च समर्थाश्रितत्वस्य "समर्थः पदविधिः" [ ७. ४. ११२. ] इति परिभाषया भाषितत्वात् । सामर्थ्यं च द्विधा–व्यपेक्षा, एकार्थीभावश्च, तयोश्च स्वरूपं पूर्वं निरूपितमेव । तत्र व्यपेक्षायां परस्पराकाङ्क्षावशात् सामर्थ्यमिति तत्र वाक्यमेव भवति, एकार्थीभावे च संगतार्थस्य संसृष्टार्थस्य वा साधुत्वमिति तत्र वृत्तिर्भवतीत्ययं सिद्धान्तोऽभिधानस्वाभाव्यादेव समाश्रितः । तत्र तयोर्व्यवस्थितयोः पक्षयोरेकेन वाक्यमपरेण वृत्तिरिति सर्वासु वृत्तिषु वाक्यमपि भवत्येव, स एव चार्थोऽनेन न्यायेन समास-तद्धितविषयेऽनूद्यते । न्यायसिद्धोऽप्ययमर्थः शास्त्रेण तत्र तत्र वाशब्द-नित्यशब्दप्रक्षेपेण विशदीकृतः, इतीयं वस्तुस्थितिः । तत्र वृत्तिस्त्रिधा–समासवृत्तिस्तद्धितान्तवृत्तिर्नामधातुवृत्तिश्चेति भेदात् । यद्यपि "समर्थः पदविधिः" [ ७. ४. १२२. ] इति सूत्रे बृहद्वृत्तौ–"समास-नामधातु-कृत्-तद्धितेषु वाक्ये व्यपेक्षा वृत्तावेकार्थीभावः, शेषेषु पुनर्व्यपेक्षैव सामर्थ्यम्" इति वदताचार्येण कृद्वृत्तिरपि स्वीकृतेति वृत्तेश्चातुर्विध्यमुचितम्, अथापि तस्याः [ कृद्वृत्तेः ] समासवृत्तावन्तर्भावात् त्रैविध्यमेवावशिष्यते, यतः कुम्भकार इत्यादिवृद्वृत्तौ "ङस्युक्तं कृता" [ ३. १. ४९. ] इत्यादिना समासभवनात्, अत एव "वृत्त्यन्तोऽसषे" [ १. १.  ] इति सूत्रे बृहद्वृत्तिगतस्य "परार्थाभिधानं वृत्तिः, तद्वांश्च पदसमुदायः समासादिः" इति पाठस्य व्याख्यानन्यासे–"आदिशब्दान्नामधातु-तद्धितपरिग्रहः" इति वदताचार्येणापि स्वयमेव वृत्तेस्त्रैविध्यं दर्शितमिति । दीक्षितस्तु–कृत्-तद्धित-समासैकशेष-सनाद्यन्तधातुरूपाः पञ्च वृत्तय इत्याह, उपपादयन्ति चेदमपरे, तथाहि–सनाद्यन्तेष्वपि वृत्तित्वमस्त्येव, तत्रापि पठितुमिच्छतीत्याद्यर्थे पठितुमिति तुमन्तस्य परस्यार्थाभिधानमस्त्येवेति वृत्तिलक्षणसत्त्वात् । स्वीकृतं च सन्नन्तस्यापि वृत्तित्वं महाभाष्यकृताऽपि । तथाहि–"धातोः कर्मणः समानकर्तृकादिच्छायां वा" [ पा० सू० ३. १. ७. ] इति सूत्रे–"वावचनानर्थक्यं च, तत्र नित्यत्वात् सनः" [ वार्तिकम् ], वावचनं चानर्थकम्, किं कारणम्? तत्र नित्यत्वात् सनः । इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च, स्वभावतश्चैतद् भवति–वाक्यं च प्रत्ययश्च । तत्र स्वाभाविके वृत्तिविषये नित्यमेव प्रत्यये प्राप्ते वावचनेन किमन्यच्छक्यमभिसम्बद्धुमन्यदतः संज्ञायाः । न च संज्ञाया भावाभावाविष्येते । तस्मान्नार्थो वावचनेन" इति । अयमाशयः–सन्नन्तादिवृत्तिस्थले सर्वत्र वावचनं क्रियते सम्बध्यते वा, तेन तत्र वाक्यमपि भवति वृत्तिरपि भवति । एतच्च बृहद्वृत्तावपि स्वीकृतं "प्रयोक्तृव्यापारे णिग्" [ ३. ४. २०. ] इति सूत्रशेषे–"वाऽधिकार आ बहुलवचनात् पक्षे वाक्यार्थः" इति । एवं च स्वभावतो वाक्यस्य वृत्तेश्च सिद्धौ वाग्रहणमिह क्रियमाणं केन सम्बन्धं प्राप्नुयात्? यदि प्रत्ययसंज्ञया सम्बन्धः स्यात् तर्हि तु अनिष्टमेव प्रसज्येतेति वावचनं व्यर्थमेव । न च वाग्रहणाभावे सर्वदा प्रत्यय एव स्यात् प्रत्ययोत्पत्तिरूपाया वृत्तेर्वाक्यबाधकत्वसंभवादिति वाच्यम्, वाक्यस्य व्यपेक्षाविषयत्वं प्रत्ययस्य वृत्तिविषयत्वमिति विषयभेदात् । तदुक्तं तत्रैव कैयटे–"वृत्तेरेकार्थीभावविषयत्वाद् व्यपेक्षाविषयत्वाच्च वाक्यस्य भिन्नार्थत्वाद् बाध्यबाधकभावाप्रसङ्गात्" इति । तथा चैदृशे विषये वावचनं स्पष्टार्थमेवेति तदाशयः । अनेन च सन्दर्भेण सन्नन्तवृत्तिरपि पाणिनितन्त्रेऽभिमतेति स्पष्टीभवति । तत्र सनाद्यन्तपदस्य नामधातुसंग्राहकत्वेन नामधातुवृत्त्याः संग्राहसंभवेऽपि नामधातुवृत्त्या सनाद्यन्तवृत्तेरसंग्रहाद् नामधातुवृत्तिस्थाने सनाद्यन्तवृत्तिरेव पठितव्या, उपलक्षणविधया वा ज्ञेया । अथैकशेषस्य वृत्तित्वमपि विचार्यते–तत्राप्येकेन शिष्यमाणेन शब्देन लुप्यमानानां शब्दानामर्थस्याभिधानं स्वीक्रियते एव, 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायात् । तथा च परार्थाभिधानस्य तत्रापि सद्भावाद् वृत्तिलक्षणमस्त्येवेति साऽपि वृत्तिः । अत एव "समानानामर्थेनैकः शेषः" [ ३. १. ११८. ] इति सूत्रशेषे बृहद्वृत्तौ–"द्वन्द्वापवादश्चायम्" इत्युक्तम् । तथा च समासरूपवृत्त्यपवादतयाऽस्यैकशेषस्य वृत्तित्वमाचार्यस्याप्यभिमतमेवेति सिद्धं वृत्तेः पञ्चविधत्वमिति । वृत्तिविषये च वाक्यस्याभ्यनुज्ञाऽपि व्यपेक्षैकार्थीभावरूपसामर्थ्यद्वयवशात् प्राप्तैव । वृत्तिविषयेऽपवादविधेर्नित्या प्रवृत्तिरित्यस्यौत्सर्गिकशास्त्रप्रवृत्तिविषयाभावे एव तात्पर्यं न तु वाक्याभावे, सर्वत्र समासविधौ "नाम नाम्नैकार्थ्ये समासो बहुलम्" [ ३. १. १८. ] इति सूत्राद् बहुलग्रहणस्य, तद्धितविधौ च "वाऽऽद्यात्" [ ६. १. १. ] इति सूत्राद् वाग्रहणस्य चाधिकृतत्वात् । ततश्च तस्य बहुलग्रहणस्य वाग्रहणस्य च वाक्यसाधुत्वार्थत्वमेव । उक्तं चैतत् "समर्थानां प्रथमाद् वा" [ पा० सू० ४. १. ८२. ] इति सूत्रे महाभाष्येऽपि, कैयटेन च तत्रैतत् स्पष्टीकृतम् । तथाहि–तत्र भाष्यम्–"अथ तद्वावचनं नैव कर्तव्यम् । कर्तव्यं च । किं प्रयोजनम्? नित्याः शब्दाः, नित्येषु शब्देषु वाक्यस्य साधुत्वमनेनान्वाख्यायते" इति । तत्र कैयटः–"वृत्ति-वाक्ययोरवान्तरार्थभेदेऽपि प्रधानार्थभेदादैकार्थ्याद् वाक्यस्य वृत्त्या बाधः स्यात् । तथाहि–औपगवमानयेत्युक्ते योऽर्थ आनीयते, स एवोपगोरपत्यमानयेत्युक्ते । तत्र यथा गोशब्देन गावीशब्दो निवर्त्यते, सत्यामपि गावीशब्दादधिकस्य स्त्रीत्वस्य प्रतिपत्तौ जातिलक्षणार्थाभेदात्, एवं वाक्यस्यापि वृत्त्या निवृत्तिः स्यादिति

तदभ्यनुज्ञानाय वावचनमिति । नागेशेन च समासविषयेऽपि क्रियमाणस्य महाविभाषाधिकारस्यैतदुक्तस्यैव समर्थनं कृतम् ॥ एवं च वावचनसिद्धस्य सर्वत्र समासे तद्धिते च वाक्यसाधुत्वस्य निवर्तयितुमशक्यत्वात् तत्र तत्र समासे तद्धिते वा पठितेन 'वा'वचनेनापवादशास्त्रेष्वन्यत्रापवादशास्त्रस्य नित्यमेवोत्सर्गशास्त्रबाधकत्वमपि कथ्यत एवेति सर्वथा सिद्ध एवायं न्यायः ॥ ३२ ॥

## *एकशब्दस्यासंख्यात्वं क्वचित्* ॥३३॥

सि०—एकशब्दस्य संख्यावाचकत्वेनैव प्रसिद्धिरिति लक्ष्यानुरोधात् तस्य क्वचिदसंख्यावाचित्वमनेन न्यायेन व्यवस्थाप्यते । 'एकमहः' इत्युक्ते व्यक्तिविवक्षया 'अहः' इत्यनेनैवैकस्याह्नः समुपस्थितिरित्येकशब्दस्य तत्र निर्दिश्यमानाहोमात्रपरत्वं, न तु संख्यावाचकत्वमित्याश्रीयते, ततश्च तस्मिन्नर्थे तत्पुरुषसमासे "अह्नः" [ २. १. ७४. ] इति समासान्तेऽट्प्रत्यये "नोपदस्य तद्धिते" [ ७. ४. ६१. ] इत्यन्त्यस्वरादिलोपे "अह-निर्यूह-कलहाः" [ लिङ्गानु० पुं० १५. ३. ] इति पुंस्त्वे प्राप्तेऽपि "अहः-सुदिनैकतः" [ लिङ्गानु० न० ८. २. ] इति विशेषविधिना क्लीबलिङ्गत्वे-एकाहमिति सिद्धम् । यद्येकशब्दस्य संख्यात्वं गण्येत तर्हि "सर्वांशसंख्याव्ययात्" [ ७. ३. ११८. ] इत्यटि, अनेनैव चाह्नादेशे "अर्द्धसुदर्शनदेवनमह्नाः" [ लिङ्गानु० पुं० ११. १. ] इति पुंस्त्वे च-एकाह्न इत्यनिष्टं रूपं प्रसज्येत । ज्ञापकं चास्य "संख्यातपुण्यवर्षादीर्घाच्च रात्रेरत्" [ ३.७.११९. ] इति सूत्रे चकारेण "सर्वांशसंख्याऽव्ययात्" [७.३.११८.] इति सूत्रात् संख्याशब्दानुवृत्तावपि 'एकरात्र' इत्यस्यासिद्धौ तत्राद्विधानार्थमेकग्रहणम् । क्वचिदिति वचनाच्चान्यत्रैकशब्दस्य संख्यात्वेन ग्रहणमेव, तेनैकधा इत्यादौ "संख्याया धाः" [ ७.२.१०४. ] इति धाः सिद्धः । अयं च न्यायो निश्चल एव, क्वचिदित्युक्त्या स्वत एवेष्टस्थलमात्रप्रवृत्तिकत्वसूचनात् । अनिष्टप्रवृत्तिवारणायैव हि कस्यचिन्न्यायस्यानित्यत्वमाश्रीयते तदभावाच्च नानित्यतान्वेषणमिति ॥ ३३ ॥

### *एकशब्दस्यासङ्ख्यात्वं क्वचित्* ॥ ३३ ॥

त०—एकाहमित्यत्र "सर्वांशसङ्ख्याव्ययात्" [ ७. ३. ११८. ] इत्यनेनाट् अह्नादेशश्च न स्यादित्यर्थमयं न्यायः स्वीक्रियते; तच्च कार्यं केवलमत्रत्यसंख्याग्रहणेनैकशब्दस्याग्रहणमित्येतावज्ज्ञापनेनैव सेत्स्यति । अत एव "संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत्" [ ७. ३. ११९. ] इति सूत्रे बृहद्वृत्तौ—"एकग्रहणं संख्याग्रहणेनानेनैकस्याग्रहणार्थम्, तेन पूर्वसूत्रे संख्याग्रहणेनैकस्याग्रहणम्; एकमहः–एकाहम्" इत्युक्तम् । अनेन च वृत्तिकृतां तस्य विशेषार्थज्ञापनपरत्वमेवाभिप्रेतं न तु सामान्यतो न्यायज्ञापनपरत्वमित्यायाति । एकशब्दस्यासङ्ख्यात्वमपि क्वचिदिति च तस्यानेकार्थत्वप्रसिद्ध्याऽपि लभ्यत एव, तथा हि—

"एकोऽन्यार्थे प्रधाने च, प्रथमे केवले तथा ।
साधारणे समानेऽल्पे संख्यायां च निगद्यते ॥"

इत्यनेकार्थत्वं तस्य प्रसिद्धम् । तथा च "एकशब्दस्य प्रसिद्धिस्तावत्सङ्ख्यात्वस्यैव" इति न्यायसंग्रहवृत्तिकृतां लेखः 'प्रसिद्धि'पदानुरोधेनैव कथञ्चिदुन्नेयः, 'एकगुरुकः, एकाधिकरणः, एक आचार्याः' इत्यादिषु तस्यार्थान्तरवाचित्वस्य सकलप्रामाणिकजनप्रसिद्धत्वात् । अन्ये च वैयाकरणा नेमं न्यायमाश्रयन्ते, किन्तु तैरेकाहशब्दसिद्ध्यर्थमह्नादेशस्याभावाय तन्निषेधके सूत्रे एवैकग्रहणं क्रियते "उत्तमैकाभ्यां च" [ पा० सू० ५.४.९०. ] इत्यत्र । एकाहशब्दश्च तन्मते पुँल्लिङ्ग एवेति भेदः, स च "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इति महाभाष्यवचनेन लोकव्यवहारनिर्णेय इति न तत्रास्माकमवकाशो वचनस्य । पूर्वोक्तरीत्याऽस्याव्यापकत्वेन न्यायकोटावगणनीयत्वेऽपि प्राचां रीतिमनुसृत्य व्याख्यातोऽत्रेति विभावनीयं सूरिभिः ॥ ३३ ॥

## *आ दशभ्यः सङ्ख्या सङ्ख्येये वर्तते, न संख्याने* ॥ ३४ ॥

सि०—अत्र केचन—'आ दशभ्यः' इत्यस्य दशसंख्यावाचकशब्दपर्यन्तं या संख्या-तद्वाचकः शब्दः, सा संख्येये-संख्याविशिष्टे द्रव्यादौ वर्तते, न संख्याने—परिच्छेदे, इत्यर्थमाहुः । अपरे तु—"आ दशभ्यः" इत्यस्य यावद् दशशब्दश्रवणं तावत्पर्यन्तं, संख्या—तद्वाचकशब्दः, संख्येये वर्तते इत्यर्थः" इति वर्णयन्ति, अयमेव चार्थः संगतः, अन्यथा एकादशादिभ्यो बहुवचनं न स्यात् । तस्मात् 'आ दशभ्यः' इत्यस्याष्टादशपर्यन्तमित्यर्थात् तावत्पर्यन्तं यथासंख्येयं द्वित्वादि भवति, ततः परमेकोनविंशतिमारभ्य संख्यामात्रपरत्वेनैकवचनमेव । किञ्चैवं सिद्धे सति अष्टादशपर्यन्तं संख्यावाचकस्य शब्दस्य संख्येयेन सह सामानाधिकरण्येनैव प्रयोगः, ततोऽग्रे च सामानाधिकरण्येन वैयधिकरण्येन च । तथा च 'एको घटः, द्वौ घटौ, त्रयो घटाः' इत्यादि यावदष्टादश घटा इति; न तु 'घटानां त्रयः' इत्यादि । ऊनविंशत्यादिषु च—ऊनविंशतिर्विंशतिर्वा घटाः, घटानामूनविंशतिरिति च भवति, आ दशभ्य इत्युक्ततया च ततो[अष्टादशतो]ऽग्रे संख्यायां संख्येये च वृत्तेर्बोधितत्वात् । "अत्र च ज्ञापकम्—"सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः" [ ३. १. १९. ] इति सूत्रेण संख्येयेऽर्थे वर्तमानायाः संख्यायाः समासविधानमेव, तथाहि—यदि तावदयं न्यायो न स्यात् तदाऽमुका संख्या संख्येय

वर्तिनीति व्यक्तिः कथं ज्ञायेत, तदज्ञाने च कथं संख्यावर्त्तिसंख्यापरिहारेण संख्येयवर्त्तिसंख्यया सह समासः क्रियेत'' इति प्राचीनाः। तच्च न चारु–काचित् संख्या संख्येयवृत्तिरित्येतदर्थस्य ज्ञापनायोग्यत्वात्, सर्वासां संख्यानां संख्येयार्थवृत्तित्वस्य प्रसिद्धत्वात्। न च काचित् संख्या संख्येयमात्रवृत्तिरित्यर्थोऽनेन ज्ञाप्यत इति वाच्यम्, तस्या अत्राग्राह्यत्वात्, अत्र च संख्येयार्थाया ग्रहणं न तु संख्येयार्थमात्रपरायाः, अन्यथा विंशत्यादीनामिह ग्रहणं न स्यात्; अग्रिमसूत्रे च संख्येयपरत्वेन तासामपि ग्रहणस्येष्टत्वमेवेत्यास्तां तावत्। एतदग्रे "एतज्ज्ञोद्घोषकम् "आ दशभ्यः" इति पदं व्युदस्य शेषवाक्यापेक्षया योज्यम्, संख्येये वर्त्तमानाऽपि काऽपि संख्यास्तीत्येतावत एवार्थस्यानेनोद्घोष्यमाणत्वात्" इति वदता संख्येयमात्रपरत्वज्ञापनस्य स्वयमेवापोदितत्वात्। अग्रे च "अस्य चाप्रतिष्ठितत्वात् "आसन्नादूर०" [ ३. १. २०. ] इति बहुव्रीहौ "प्रमाणी-संख्याड्डः" [ ७. ३. १२८. ] इति डे च–आसन्नदशा इति, कोऽर्थः? नवैकादश वा, अत्र आसन्ना दशेति कोऽर्थः? दश संख्या येषामिति वाक्यं सिद्धम्" इति यदुक्तं, तदपि न, युक्तं भवेदनित्यत्वज्ञापनावश्यकत्वं यदि आ दशभ्यः संख्यायाः संख्येयपरत्वं भवद्रीत्या ज्ञापकमात्रसिद्धं स्यात्, न तु तथा, तस्य स्वाभाविकत्वेनाग्रे [ विवरणे ] निर्णेष्यमाणत्वात्, एवं च स्वाभाविकं दशशब्दान्तसंख्यायाः संख्येयमात्रपरत्वं कथमपोहितुं शक्यते विना प्रमाणम्, तथा च दशानामासन्ना इत्येव वाक्यम्, "आसन्नादूर०" [ ३. १. २०. ] इत्यादिसूत्रेण पृथग् बहुव्रीहिसमासविधानसामर्थ्याच्चैवमादिषु व्यधिकरणपदो बहुव्रीहिः स्वीकार्य एव, बृहद्वृत्युक्तं तादृशविग्रहवाक्यं चार्थप्रदर्शनपरमेव, स्पष्टश्चायमर्थः "आसन्नादूराधिकसंख्याः संख्येये" [ पा० सू० २. २. २५. ] इति सूत्रे महाभाष्येऽपि। स्वाभाविकसंख्येयपरत्वत्यागापेक्षया वरं सूत्रविधानसामर्थ्याद् व्यधिकरणपदबहुव्रीहिकल्पनेति। विवेचितं चैतद्विषये विवरणे विशेषत इति नेह प्रतन्यते॥३४॥

## *आ दशभ्यः संख्या संख्येये वर्त्तते, न संख्याने* ॥ ३४ ॥

**त०**—यथायमर्थः स्वाभाविको न ज्ञापकसाध्यश्च तथोपक्षिप्तं वृत्तौ, अत्र च तदेव विविच्यते, तथाहि–ज्ञापकत्वेनात्र–"सुज्वार्थे संख्या संख्येये संख्यया०" [ ३. १. १९. ] इत्यत्र संख्येये वर्त्तमानया संख्यया सह समासविधानं प्राचीनैरुक्तम्, तच्च संख्येयार्थायाः संख्याया अस्तित्वबोधकमिति रीत्या, न च संख्यायाः संख्येयार्थत्वं पूर्वमप्राप्तम्, लोकतः प्राप्ते विषये शास्त्रस्याव्यापार इति तदर्थं न्यायाश्रयणमनावश्यकम्। संख्यायाः संख्येयार्थकत्वं तु लोकप्रसिद्धं कोशादिबोधितं च, तथाहि–अमरः—

[ "विपणो विक्रयः, संख्याः संख्येये ह्यादश त्रिषु।
विंशत्याद्याः सदैकत्वे सर्वाः संख्येय-संख्ययोः॥" ]

इति, दशश्रवणं यावत् संख्यानां संख्येयपरत्वं विशेष्यलिङ्गत्वं च, विंशत्यादीनामेकवचनान्तत्वं नियतलिङ्गत्वं संख्यासंख्येयोभयवाचकत्वं च कथयति। अत्रामरकोषटिप्पणीकृता व्याख्यातॄणामन्येषामाचार्यहेमचन्द्राणां चैतद्विषयमतानि महाभाष्यादिवैयाकरणग्रन्थसम्मतिश्च यथा संगृह्य प्रदर्शितानि तानि तच्छब्दैरेव प्रदर्श्यन्ते तत्त्वनिर्णयाय–"एकाद्या दशान्ताः संख्याः संख्येयेषु वर्त्तमानास्त्रिलिङ्गाः, एका शाटी, एकः पटः, एकं कुण्डम्। दश स्त्रियः, दश पटाः, दश कुण्डानि। आदशेति अष्टादशान्ता इति क्षीरस्वामी। आदशेति दशशब्दश्रुतिपर्यन्तमष्टादशं यावत् संख्या एकादिकाः संख्येये द्रव्ये वर्त्तन्ते, हिरवधारणे, तेन सामानाधिकरण्येनैव तासां वृत्तिरित्यर्थः, यथा एको विप्रः, दश विप्रा इति, न तु वैयधिकरण्येन वृत्तिरिति, न तु एको विप्रस्य दश विप्राणामिति मुकुटः। अत्र चैकाद्या अष्टादशान्ता संख्या संख्येये वर्त्तते, यदाह वाचस्पतिः–अष्टादशभ्य एकाद्याः संख्याः संख्येयगोचराः।" इति इति स्वोपज्ञनाममालाव्याख्यायां हेमाचार्यः। इदं च प्रायिकम्, "बहुषु बहुवचनम्" [ पा० सू० १. ४. २१. ] इति सूत्रे भाष्ये "किंसम्बन्ध्येकत्वे किंसम्बन्धि द्वित्वे किंसम्बन्धिबहुत्वे इत्यर्थेषु कस्यैकस्मिन् कयोर्द्वयोः केषां बहुषु" इति प्रयोगेण संख्यापरत्वस्यापि प्रतीतेः। इदं त्वत्रावगन्तव्यम्–संख्यापरत्वेऽप्येषां स्वाश्रयद्रव्यगतसंख्याविशिष्टधर्ममात्रप्रतिपादकता, अत एवोक्तभाष्यप्रयोगे द्विवचनादिः। विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां च नित्यमेकवचनान्ता एव वर्त्तन्ते, यद्भाष्यम्–"आ दशभ्यः संख्या संख्येये वर्त्तते, ऊर्ध्वं संख्याने संख्येये च" इति। विंशतिः पटाः, विंशतिः पटानाम्; शतं गावः, शतं गवाम्; इति क्षीरस्वामी। विंशत्याद्यास्तु संख्याशब्दा एकत्वे वर्त्तमानाः संख्येये संख्याने च वर्त्तन्ते, यथा–विंशतिर्घटाः, विंशतिर्घटानाम्; शतं गावः, शतं गवाम्, इति; यदाह-वाचस्पतिः–"ऊनविंशत्यादिकास्तु सर्वाः संख्येय-संख्ययोः" इति हेमचन्द्रः। [अत्र विशेषः] संख्यामात्रार्थे वर्त्तमानाया विंशत्यादेः संख्याया द्विवचनबहुवचने अपि स्त एकशेषेण-द्वे विंशती तिस्रो विंशतयः, गवां विंशती, गवां विंशतयः" इति क्षीरस्वामी। यदा तु भेदविवक्षायां संख्यान्तरस्यार्थेऽभिधेये विंशत्यादयो वर्त्तन्ते तदा तत्सामानाधिकरण्यादुपचारेण तेभ्यो द्विवचनबहुवचने अपि भवतः, यथा–द्वे विंशती तिस्रो विंशतय इति, सामानाधिकरण्याभावेऽपि गवां विंशती, गवां विंशतय इति मुकुटः। 'द्वित्व-बहुत्वयो-

वर्त्तमानास्तु विंशत्याद्याः संख्यायामेव वर्त्तन्ते' इति हेमचंद्रः । "पङ्क्तिविंशति" [ पा० सू० ५. १. ५९. ] इति सूत्रे भाष्यप्रदीपोद्द्योते नागेशभट्टेन तु–विंशत्याद्या द्व्यादयश्च धर्मशक्ता एव, धर्म-धर्मिणोरभेदाच्च व्यक्तौ कार्याणि, तयोश्च भेदाभेदौ विंशत्यादयः कदाचिद् भेदेन संख्यां वदन्ति–'गवां विंशतिः' इति, कदाचिदभेदेन–'विंशतिर्गावः' इति, यदाप्यभेदेन तदापि धर्मगतसंख्यावैशिष्ट्येनैव ततो द्रव्यप्रतीतिः शब्दशक्तिस्वभावात्, यथा गावो धनमित्यादौ प्रीतिहेतुत्वगुणगतसंख्यावैशिष्ट्येनैव द्रव्यप्रतीतिर्धनशब्दात् । इयांस्तु विशेषः–तत्र कदाचित् स्वगतसंख्यावैशिष्ट्येनापि प्रतीतिः, अन्यगतसंख्यावैशिष्ट्यमन्यस्य कथमिति चेत् ? आरोपेणेति गृहाण । द्व्यादयस्तु स्वगतवाच्यसंख्याविशिष्टद्रव्याभेदेन तद्गतसंख्याविशिष्टमेव धर्मं प्रतिपादयन्ति शब्दशक्तिस्वभावादिति न कदाचिदपि तत्रैकवचनम् । नापि विंशत्यादिभ्यो बहुवचनम्, विंशतिप्रचये तु बहुवचनमिष्टमेव । "द्व्येकयोर्द्विवचनैकवचने" [ पा० सू० १. ४. २२. ] इत्यादौ विंशतिवदेव धर्मगतसंख्याविशिष्टद्रव्यस्यैव प्रतीतिरिति द्विवचनम् । एवं प्रतीतिरीदृशवृत्तिविषयैवेति नातिप्रसङ्ग इति निष्कर्ष उक्तः" इति [ अमरकोषटिप्पणीकारः, वर्गः ९, श्लोकः ८३ ] ।

इत्थमेकादीनां दशशब्दान्तानाम् [ अष्टादशपर्यन्तानाम् ] संख्यानां गुणिपरत्वं [ संख्येयार्थत्वम् ] विंशत्यादीनाम् [ ऊनविंशतिमारभ्य ] शतान्तानां च संख्यानां गुणगुण्युभय[ संख्या-संख्येयोभय ]परत्वमिति शब्दशक्तिस्वाभाव्यादेव निर्णयमिति न तत्र वचनस्यावश्यकतेति विषयो महता सन्दर्भेण महाभाष्यादिषु विचारितः, तस्य सर्वस्य च निष्कर्षः पूर्वोक्तनागेशग्रन्थेन संगृहीतः । एवं सति नायमर्थो ज्ञापकसाध्य इति यदुक्तं तत् सुव्यक्तं वेदितव्यम् । अस्य चार्थस्य ज्ञापकं यत्–"सुज्वार्थे०" [ ३ १. १९. ] इति सूत्रेण संख्येये संख्यायाः समासविधानमित्युक्तं, तच्च तत्सूत्रे वृत्तौ न स्पष्टम् । प्रायः सर्वत्र ज्ञापकस्य स्फोरणं क्रियत एव वृत्तिकृता । यच्चास्य न्यायस्यानित्यत्वमाश्रित्य 'आसन्नदशाः' इत्यादिप्रयोगविग्रहवाक्ये दशादीनां संख्यावाचकत्वं समर्थितं तदपि वृत्तौ प्रत्युक्तमेव, पुनरिह किञ्चिद् विचार्यते–दशशब्दस्य तत्र संख्यार्थत्वमाश्रित्य आसन्ना दश [ संख्या ] येषामित्यर्थमाश्रित्य च यदत्र समासः क्रियते तर्हि "एकाऽर्थं चानेकं च" [ ३. १. २२. ] इत्यनेनैव समासे सिद्धे "आसन्नादूराधिक०" [ ३. १. २०. ] इति सूत्रेण प्रतिपदसमासविधानं "प्रमाणी-संख्याड्डः" [ ३. १. १२८. ] इति डविधानार्थमिति तत्सूत्रशेषे बृहद्वृत्तिग्रन्थेन सूचितम्, तथा च तत्र दशादिसंख्यानां संख्यापरत्वमाचार्यस्याभिमतं, न तु तत्र न्यायानित्यत्वमाश्रितम् । तेन चैतत्सूत्रेण द्वितीयादिविभक्त्यर्थे समासविधानसामर्थ्यादेवैवं विग्रह आश्रितः, तदर्थं च स्वाभाविकं संख्येयपरत्वं त्यक्तमिति तेषां संख्यापरत्वमेतत्सूत्रज्ञाप्यमेव न तु न्यायानित्यत्वलभ्यमिति समायाति । न च तेन सूत्रेण न्यायानित्यत्वमेव ज्ञाप्यतामिति वाच्यम्, न्यायस्यैव पूर्वरीत्याऽपोदितत्वेन तदनित्यत्वचर्चाया निर्मूलत्वात् । यद्यपि तत्रत्यलघुन्यासग्रन्थे–"आ दशभ्यः संख्या" इत्यस्य प्रायिकत्वादत्र दशन्शब्दः संख्याने वर्त्तते इति न्यायार्थश्चर्चित इव, तथापि न न्यायस्य तेन समूलत्वमायाति, प्रायिकत्वादिति कथनेन तस्यार्थस्य स्वाभाविकत्वस्यैव सूचनादित्यास्तां प्रसक्तानुप्रसक्त्यानुधावनम् । वस्तुतस्तु–नायमर्थो वचनेन निर्णेयः, किन्तु शब्दशक्तिस्वभावलक्ष्यादिकमनुसृत्य यथायोगं संख्या-संख्येयोभयपरत्वं सर्वासां संख्यानामिति सकलैतद्विषयग्रन्थपर्यालोचनया समायाति । बाहुल्याभिप्रायेण चा दशभ्यः संख्या संख्येयपरा, विंशत्याद्या उभयपरा इति कथनमिति निष्कर्षः । अथ न्यायसंग्रहन्यासे–आसन्ना दशेति प्रतीकमुपादाय तत्र 'दश'शब्दस्य संख्यापरत्वमेव, न तु संख्येयपरत्वमिति शङ्कासमाधिभिः स्थिरीकृत्य पुनरपि तस्य दृढीकरणाय यदुक्तं, तदिह तदुल्लेखपूर्वकं विचार्यते–"ननु भवत्वेवम्, दशन्शब्दस्य दश संख्येत्यर्थो न स्यात् तदा किं विनश्येत्? उच्यते–यद्यत्र दश संख्येति संख्यानवृत्तिदशन्शब्देन वाक्यं न क्रियते तदा आसन्ना दश येषामिति कोऽर्थः ? दश संख्येयपदार्था येषां नवानामेकादशानां वा संख्येयानामासन्नाः सन्ति ते आसन्नदशाः, एतावतैकोनविंशतिरेकविंशतिर्वा पदार्था इत्यर्थप्रतीतिः स्यात्, तथा च नवैकादश वेति पर्यायो बृहद्वृत्त्युक्तो विघटेत, ततो दश संख्येत्येवार्थोऽवश्यं वाच्यः । ननु संख्येयवृत्तिदशन्-शब्दपक्षेऽपि आसन्ना दशेति दशसंख्याविशिष्टवस्तुनि यस्यैकस्य ययोर्द्वयोर्येषां वा त्र्यादीनां संख्येयार्थानामिति वाक्यं यदि क्रियते तदा आसन्नदशशब्देन द्वादशादयोऽपि प्रतीयन्ते, तदा कथमेकोनविंशतिरेकविंशतिर्वेत्येव संख्येयप्रतीतिः स्यादित्युक्तम् ?, उच्यते–यदि कस्मिन्नपि क्षेत्रे दश घटादीन् न्यस्य तदासन्नं वैकं द्वौ त्र्यादीन् वा घटादीन् न्यस्य, तदनु वाक्यं क्रियते, यथा–आसन्ना दश संख्येयपदार्था यस्यैकस्य संख्येयपदार्थस्य, ययोर्वा द्वयोः संख्येयपदार्थयोः, येषां वा त्र्यादीनां संख्येयपदार्थानामित्यनया रीत्या क्षेत्रापेक्षया दशवस्तूनामासन्नत्वं विवक्षितं स्यात्, तदैकादशादीनामपि प्रतीतिः स्यात्, अत्र तु संख्यापेक्षया आसन्नत्वं विवक्षितं, ततश्च दशसंख्येयानां नवैकादश वा संख्येयानि यथासन्नसंख्यावत्त्वेन संख्यापेक्षया आसन्नानि, न तथा एकादीनीति युक्तमेवोक्तमेकोनविंशतिरित्यादि" इति । अत्रेदं विचार्यते–अत्र "आसन्न-दूराधिक०" [ ३. १. २०. ] इति सूत्रेण समासो विधेयः, तदर्थश्च 'आसन्नादीनि संख्यावाचिना नाम्नैकार्थ्ये समस्यन्ते' इति, तर्हि दशन्शब्दस्य संख्येयार्थपरत्वे संख्यावाचि-

त्वमेव न स्यादिति समासाभाव एव स्यादिति कथमियमाशङ्कोदेति यत्—यदि दशन्शब्दस्य संख्यावाचित्वं न स्यात् तदा किं विनश्येदिति । अथोत्थिताऽपि चेत् ? तर्हि समासाभावेनैव समाधेया, न पुनरर्थान्तरोपन्यासेन, किञ्च बृहद्वृत्त्युक्तपर्यायकथनविरोधप्रदर्शनाय तदुपन्यासेऽपि कथमासन्ना दश पदार्था येषां संख्येयानां नवानामेकादशानां वा इति विग्रहे 'एकोनविंशत्येकविंशतिसंख्येययोः प्रतीतिः ?, येषामिति हि अन्यपदार्थोपस्थापकं पदम्, तदर्थ एव च कृतः—नवानामेकादशानामिति ते कथमेकोनविंशतितामेकविंशतितां वा गच्छेयुः ?, किं बहुव्रीहौ स्वार्थान्यपदार्थयोः पृथक् स्वातन्त्र्येण भानमाश्रीयते ?, यदि येषामित्यनेन संख्येयानामुपस्थितिराश्रीयते—दशशब्दोऽपि दशसंख्यावच्छिन्नपदार्थपरः, तर्हि कथं संख्यापेक्षयाऽऽसन्नत्वं विवक्षितं स्यात्, अस्तु वा कथंचित् संख्यापेक्षयैवासन्नत्वं तदाऽपि नवानामेकादशानां वा प्रतीतिः स्यात्, नैकोनविंशतेरेकविंशतेर्वा । आसन्नपदस्य युक्तत्वार्थत्वे दशसंख्यया नवसंख्याया एकादशसंख्याया वा योगे एकोनविंशतिरेकविंशतिर्वा संख्या प्राप्नोति, परं नासौ समासार्थः, आसन्नशब्दस्य समीपार्थकत्वमाश्रित्यैव येषामित्यस्य नवानामेकादशानां वेत्यर्थः क्रियते तर्हि कथं योगस्तदर्थः स्यात्, योगार्थत्वाभावे च दशसंख्येयपदार्था आसन्ना येषां नवानामेकादशानां वा संख्येयार्थानामिति वाक्येन कथमेकोनविंशत्येकविंशतिसंख्येयानां प्रतीतिरिति न बुद्धिपथमधिरोहति । अयं च तदीयो ग्रन्थः "आसन्नदूर०" [ ३. १. २०. ] इति सूत्रीयलघुन्यासव्याख्यानरूप एव, सोऽपि च ग्रन्थस्त्रुटित इव प्रतिभाति, तथाहि—तत्रत्यो ग्रन्थः—"यदि संख्येयवृत्तिना दशन्शब्देन आसन्ना दश येषामित्येवं वाक्यं क्रियते न दशत्वमिति तदा संख्यावाचिनेति वृत्त्यंशेन निषेधान्न स्यादनेन समासः, नवैकादश वेति पर्यायो विघटेत । यत इत्थं कृते 'एकोनविंशत्यैकविंशतिसंख्याप्रतीतिः" इति । अत्र शङ्कायाः समासाभावपर्यन्तं समाधानं निर्विवादम्, पर्यायविघटनकथनमपि साधु, यतो दशशब्दस्य संख्येयपरत्वे दश संख्येयाः पदार्था आसन्ना येषां ते नवैव एकादशैव वा कुतः स्युर्यथासम्भवमन्येऽपि भविष्यन्ति संख्येयानामानन्त्यात्, संख्यापेक्षया चासन्नत्वग्रहणे मानाभावात् । तदुपपादनपरश्च "यत इत्थं कृते एकोनविंशत्यैकविंशतिसंख्याप्रतीतिरिति ग्रन्थो मध्ये भग्न इति प्रतिभाति, असंलग्नत्वात्, पूर्वरीत्या तदर्थवर्णने न संख्याप्रतीतिरपि तु संख्येयप्रतीतिः, अथ च—एको विंशत्या एकविंशतिरिति तदीयच्छेदः स्यात्, स च प्रकृतेऽनुपयुक्तः । यदि च तादृश एव पाठः प्रामाणिकस्तर्हि तदाशय एवं वर्णनीयः स्यात्—यत इत्थमीदृशस्थले संख्येयपरत्वाश्रयणे एकोनविंशतिशब्देनैकविंशतिसंख्याया प्रतीतिः स्यात्, यतः एकोना विंशतिर्येषामित्यर्थे येषां संख्येयानामेकेनोना विंशतिर्भवति, एकविंशतिरेकोना सती विंशतिरेव भवतीत्येकोनविंशतिशब्दे बहुव्रीह्याश्रयणे संख्येयपरत्वे चैकविंशत्यर्थकत्वमेकोनविंशतिशब्दस्य घटते । 'आसन्नदश'-शब्दस्य तदर्थत्वं तु कथमपि नायातीति विभावनीयं सुधीभिरिति ॥ ३४ ॥

## *णौ यत् कृतं तत् सर्वं स्थानिवद् भवति* ॥ ३५ ॥

सि०—द्वित्वविधौ "न सन्धि-ङी-य क्वि-द्वि-दीर्घासद्विधावस्क्लुकि" [ ७. ४. ११. ] इत्यनेन स्थानिवद्भावस्य निषिद्धत्वात् तत्रेष्टप्रयोगेषु द्वित्वे कर्त्तव्येऽपि स्थानिवद्भावसाधनार्थं न्यायमाह—णौ यत् कृतमिति । अत्र णाविति विषयसप्तमी न ग्राह्या, किन्तु निमित्तसप्तम्येव, तथा च णिनिमित्तं यत् कार्यं कृतं स्यात् तत् सर्वं द्वित्वादिविषयभूतमतथाभूतं च स्थानिवद् भवति—स्थानिनि सति तस्य स्थाने वा यत् कार्यं प्राप्नोति तत् कार्यमेव तत्रापि भवति, न तु स्वनिमित्तकं कार्यम् [ यतोऽतिदिश्यमानधर्मविरुद्धस्वाश्रयनिमित्तकार्याभावोऽतिदेशस्वभावसिद्धः ] इति न्यायार्थः । णावित्यत्र विषयसप्तम्यामाश्रितायां तु शुशावयिषतीत्यत्र श्वेः सन्परे णौ विषयभूते कृतस्य, अत एवान्तरङ्गस्य "श्वेर्वा" [ ४. १. ८९. ] इति य्वृद्धावस्य स्थानिवत्त्वं न भवति, तत्रैव णिनिमित्ताया वृद्धेस्तु स्थानिवत्त्वं भवत्येव, अत एव द्वित्वे पूर्वत्रोकारः श्रूयते तन्न स्यात्, सामान्यतो णाविति निर्देशान्निमित्तभावेन विषयभावेन वा णिमाश्रित्य कृतानां सर्वेषां कार्याणां स्थानिवद्भावापत्त्या य्वृतोऽपि ण्याश्रयत्वात् स्थानिवद्भावे द्वित्वे पूर्वत्रेकार एव श्रूयेत न तूकारः । अत्र ज्ञापकं तु "ओजान्तःस्थापवर्गेऽवर्णे" [ ४. १. ६०. ] इति सूत्रे "ओः पयेऽवर्णे" इत्येतावतैव सूत्रेण निर्वाहे सत्यपि दीर्घसूत्रकरणमेव; तथाहि—तत्र सूत्रे बृहद्वृत्तिग्रन्थः—"ननु ण्यन्तानां वृद्ध्यावादेशयोः कृतयोर्द्वित्वे सति पूर्वस्य उकारान्तता न सम्भवति, तत्र "सन्यस्य" [ ४. १. ५९. ] इत्यनेनैव सिद्धे किं गुरुणा सूत्रेण ?, एतावत्तु विधेयम्—"ओः पयेऽवर्णे" इति, पिपविषते यियविषतीत्यत्र पूर्वस्योकारान्तस्येत्वं यथा स्यात्; सत्यम्—*णौ यत् कृतं कार्यं तत् सर्वं स्थानिवद् भवति*इति न्यायज्ञापनार्थं वचनम् । तेन पुस्फारयिषति, चुक्षावयिषति, शुशावयिषतीत्याद्यपि सिद्धम् । एतच्च ज्ञापकं चान्तस्थापवर्गवदन्यत्राप्यवर्ण एव द्रष्टव्यम्, तेनाचिकीर्तदित्यत्रेकारवतो द्विर्वचनं सिद्धम्" इति । अयं च बृहद्वृत्तिग्रन्थाशयः—अत्रोदाहरणेषु 'यियविषति, यियविषते' इति द्वे सन्नन्तेऽन्यानि ण्यन्तान्येव, तेषां सनि अवर्णपरजाद्यभावात्। णौ च वृद्धौ कृतायामावादेशे, द्वित्वे पूर्वत्रात एव सत्त्वेन

तेषु "सन्यस्य" [ ४. १. ५९. ] इत्येव सिद्धेः । तथा च यत्र सनि इड् भवति–यथा पूङः सनि 'ऋस्मिपूङ्अशौकॄगृदृधृप्रच्छः' [ ४. ४. ४८. ] इतीड् भवति, यौतेः सनि "इवृध-भ्रस्जदम्भश्रियूर्ण्णु०" [ ४. ४. ४७. ] इतीड् भवति, तत्र द्वित्वविधौ 'प्राक् तु स्वरे स्वरविधेः' इत्युक्तत्वात् सनश्च स्वरादित्वभावात् पूर्वं द्वित्वमेव भवति ततो गुणावादेशाविति द्वित्वे पूर्वत्रावर्णस्यासत्त्वेन "सन्यस्य" [ ४. १.५९. ] इत्यस्याप्राप्त्या तदर्थं 'ओः पयेऽवर्णे' [ ४. १. ६०. ] इत्येव सूत्र्यताम् 'जान्तःस्थापवर्गे' इत्यादिबृहता न्यासेन किं प्रयोजनम् । तथा च तेषां ग्रहणं व्यर्थं सत् न्यायमिमं ज्ञापयति । ज्ञापिते चास्मिन्न्याये जिजावयिषतीत्यादौ ण्यन्तात् सनि वृद्धेरप्रवृत्त्या प्रवृत्तौ वा तस्य स्थानिवद्भावेन उकारविशिष्टस्यैव द्वित्वे सति, पूर्वत्रोकारस्य विद्यमानत्वेन "सन्यस्य" [४. १.५९.] इत्यनेन कार्यस्य साधयितुमशक्यतया जान्तःस्थादिग्रहणं सार्थकम् । फलं चास्य–पुस्फारयिषति चुक्षावयिषतीत्यादौ द्वित्वे पूर्वत्रोकारस्य श्रवणम् । तत्र हि णिनिमित्तकस्य "चिस्फुरोर्नवा" [ ४. २. १२. ] इति आत्वस्य स्थानिवद्भावो भवति, चुक्षावयिषतीत्यादौ च णौ कृताया वृद्धेः स्थानिवद्भावश्च भवतीति । ज्ञापकस्य सजातीयापेक्षत्वेन यत्र द्वित्वे परखण्डे प्रथमः स्वरोऽवर्णो भवति तत्रैवानेन ज्ञापितेन न्यायेन स्थानिवत्त्वं भवति । तच्चावर्णवत्त्वं प्रक्रियादशायां परिनिष्ठिते रूपे वेत्यन्यदेतत् । अवर्णपरत्वसम्पादकादेशस्यैव स्थानिवत्त्वमिति भावः । तेन चाचिकीर्त्तदित्यत्रेकारस्य न स्थानिवत्त्वं, तत्रावर्णवदुत्तरखण्डादेरभावात् । प्राचीनास्तु न्यायस्यानित्यतामाश्रित्येदं रूपं साधयन्ति, तच्च न प्रकृतवृत्तिग्रन्थारूढम्, अनित्यत्वज्ञापकप्रमाणान्तराभावाच्च । ज्ञापकसिद्धत्वेनासार्वत्रिकत्वं तु नानुगतं प्रमाणम् । 'एतच्च ज्ञापकं चान्तःस्थापवर्गवदन्यत्राप्यवर्ण एव द्रष्टव्यम्' इति ग्रन्थस्य स्पष्टमेव ज्ञापकसाजात्यमूलकस्यैवास्यार्थस्य लाभे तात्पर्यात् । अतश्चात्रत्यः प्राचां ग्रन्थो न तदनुकूल इति प्रतिभाति । तथाहि–तेषां ग्रन्थः–अनैष्ठिकश्चायम् । तेन यस्य णिनिमित्तकृतकार्यस्य स्थानिवद्भावश्चिकीर्ष्यते तदाधारभूतो वर्णो वर्णसमुदायो वा अवर्णवान् यदि स्यात् तदैवायं न्यायः स्फुरेन्नान्यथा" इति । अत्रेदमुच्यते–अनैष्ठिकत्वमेव यदाश्रितं तदा तस्य स्थलविशेषनियमनं कुतो लभ्यते, स्थलविशेषनियमनं ह्यनित्यत्वज्ञापकाधीनम्, न च तत्किमपि निर्दिष्टमिति यत्किञ्चिदेतत् । स्थलविशेषस्वरूपवर्णनं च न संगतमिति निरूपितं विवरणे । ननु अचिकीर्तदिति यदुदाहृतं तच्च युक्तम्–यतः "कॄतः कीर्त्तिः" [ ४. ४. १२२. ] इति विहितस्य कीर्त्तादेशस्य न णिनिमित्तत्वमपि त्वनैमित्तिकत्वमेवेति तत्र न्यायप्रसराभावादिति चेत्? न–*येन विना यन्न स्यात् तत् तस्यानिमित्तस्यापि निमित्तम्*इति न्यायेन णिचि सत्येव विधीयमानस्य कीर्त्तादेशस्य णिनिमित्तत्वस्य दुर्वारत्वात् । "स्थानीवाऽवर्णविधौ" [ ७. ४. १०९. ] इति परिभाषायाः प्रपञ्चभूतोऽयं न्याय इति प्राचीनाः, तदपि न रुचिरं प्रतिभाति, यतो यथाकथंचिदिहापि स्थानिभूतस्योवर्णस्यैवेत्वं चिकीर्षितमिति वर्णविधिसत्त्वेन तस्याः परिभाषाया विषयाभावः । स्वमतेऽपि यत् "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इति स्थानिवत्त्वस्य द्वित्वे कर्त्तव्ये निषिद्धस्य प्रतिप्रसवरूपोऽयं न्याय इत्यवतरणे कथितम्, तदपि स्वविधौ न स्थानिवदिति स्वमात्रविधौ न स्थानिवदित्याशयकमित्याश्रित्य । वस्तुतस्तु–अप्राप्तस्यैव स्थानिवद्भावस्य विधायकमिदमित्यास्थेयमिति विवेचितं विवरणे ॥ ३५ ॥

***णौ यत् कृतं तत् सर्वं स्थानिवद् भवति* ॥ ३५ ॥**

त०—पुस्फारयति चुक्षावयिषतीत्यादौ द्वित्वे पूर्वत्रोकारस्य श्रवणार्थं पूर्वं द्वित्वे कृते णिनिमित्तकारवृद्ध्यादीनां प्रवृत्तिरिष्टा, परं सा दुर्लभा, णिमात्रनिमित्तककार्याणां ऽपरणिनिमित्तकद्वित्वापेक्षयाऽन्तरङ्गत्वेन पूर्वमेव प्रवृत्तेरौचित्यात् । ततश्च तेषु कार्येषु कृतेष्वपि स्थानिवद्भावेन स्थानिन एवोकारस्य सत्त्वमाश्रित्य द्वित्वादिकेषु सत्सु पूर्वोक्तरूपाणां सिद्धिर्भवति । यद्यपि "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इत्यत्र 'प्राग्विधौ' इत्यस्य स्वविधौ न स्थानिवदित्यर्थमाश्रित्य, अत्र च द्वित्वस्य स्थानिभूतस्वरमात्रस्थानिकत्वाभावेन स्थानिवद्भावः सिद्ध एवेत्याशङ्कितुं शक्यते, तथापि तस्यापि स्थानिवद्भावस्य द्वित्वविधौ "न सन्धिङी०" [ ७. ४. १११. ] इत्यादिसूत्रेण निषेधात् स्थानिवद्भावोऽप्राप्त एव, यदि च प्राग्विधावित्यस्य स्वविधौ न स्थानिवदित्यर्थोपलक्षकत्वे मानाभावः, यदि वाऽत्राऽपि स्थानिन उकारस्य द्वित्वानुभवकर्तृत्वेन स्वविधित्वानपाय इत्युच्यते, तदा सर्वथाऽप्राप्त एव स्थानिवद्भावोऽनेन विधीयते इति मन्तव्यम् । स्थानिवद्भावेन च स्थानिरूपमेवातिदिश्यते इति तद्व्यवहार एव तत्र न स्वव्यवहारः [आदेशरूपव्यवहारः], अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मनिमित्तककार्याभावस्यातिदेशस्वभावत्वात् । न च ज्ञापितेऽपि न्याये पिपविषते यियविषतीत्यादौ कथमित्वं परखण्डे द्वित्वपरखण्डे कृतयोर्गुणावादेशयोः "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इति स्थानिवत्त्वेनावर्णपरत्वाभावादिति वाच्यम्, सूत्रारम्भसामर्थ्यादेव तत्र स्थानिवद्भावाभावात् । ननु ज्ञापकघटितसूत्रे णिग्रहणाभावेन तत्रत्यज्ञापकेन कथं णिविषये एव स्थानिवद्भावानुमानम्? । अयमाशयः–"ओर्जान्तःस्थापवर्गे०" [ ४. १. ६०. ] इति सूत्रेण सनि इत्वं भवति, स च सन् क्वचिन्मुख्यः 'यियविषति, पिपविषते' इत्यादौ, क्वचिच्च गौणः 'अबीभवत्, अपीपवत्' इत्यादौ, तत्र च वस्तुतो

ङपरणेरेव सन्वद्भावेन सन्निमित्तककार्यकारित्वमिति यदि णावेवैतत्सूत्रेणेत्वं विधीयेत तर्हि णिविषये स्थानिवद्भावज्ञापनमेतत्सूत्रस्थेन जान्तःस्थावर्गग्रहणेन कर्तुं शक्यते, न तु तथाऽस्ति, सन्परेऽपि इत्वविधानात्, इति चेत्? सत्यम्–सनि परे विधीयमानमित्वं वस्तुतः केवलं पिपविषते यियविषतीति प्रयोगद्वय एव भवति, अन्यत्र सर्वत्र सनो णिव्यवहितस्यैव लाभात् तत्र च णौ वृद्ध्यादिषु सत्सु "सन्यस्य" [ ४. १. ५९. ] इत्येव सिद्धेर्जान्तःस्थावर्गग्रहणस्य वैयर्थ्यमिति तत् स्वसार्थक्याय स्वस्मिन् सम्भविनमेव णिनिमित्तत्वरूपं विषयं स्वज्ञाप्यस्य स्थानिवत्त्वस्य कल्पयतीत्यदोषात् । इदं च ज्ञापकं साजात्यादेव यत्र द्वित्वोत्तरखण्डे प्रथमः स्वरोऽवर्णः प्रक्रियायां परिनिष्ठिते रूपे वा लभ्यते तत्रैव प्रवर्त्तेत इति स्वमतं वृत्तौ प्रोक्तम् । प्रक्रिया च साध्यावस्था, तत्रावर्णस्योत्तरखण्डे सत्त्वं यथा 'मा भवानूनत्' इति, अत्र 'ऊन'-धातोर्णौ तत्राकारलोपे कृतेऽपि तस्य स्थानिवत्त्वाद् द्वित्वे पूर्वत्राकारः श्रूयते, अन्यथा 'नि'शब्दस्य द्वित्वे 'मा भवान् ऊनिनत्' इति रूपं स्यात्, अत्र च यद्यपि परिनिष्ठिते रूपे द्वित्वोत्तरखण्डेऽवर्णो नोपलभ्यते तथापि प्रक्रियादशायामस्तीत्यत्रापि स्थानिवत्त्वप्रवृत्तिः सुसाधा । अचिकीर्त्तदित्यादौ च प्रक्रियायां परिनिष्ठिते रूपे वाऽवर्णस्य द्वित्वोत्तरखण्डादावभावान्न स्थानिवत्त्वमिति, परिनिष्ठितरूपे द्वित्वोत्तरखण्डेऽवर्णस्य सत्त्वं च जिजयिषतीत्यादौ तिष्ठतीति तत्र स्थानिवत्त्वं भवति । प्राचीनोक्तमनित्यत्वाश्रयणं तु बृहद्वृत्तिग्रन्थप्रतिकूलं महाभाष्यव्याकरणग्रन्थप्रतिकूलं च । महाभाष्येऽपि "द्विर्वचनेऽचि" [ पा० सू० १. १. ५९. ] इति सूत्रे 'णौ कृतस्य कार्यस्योक्तज्ञापकेन स्थानिवत्त्वं विज्ञाप्य शङ्कितम्–"यद्येतज्ज्ञाप्यते 'अचिकीर्त्तत्' अत्रापि प्राप्नोति?" इति, समाधत्ते–"तुल्यजातीयस्य ज्ञापकम्, कश्च तुल्यजातीयः? यथाजातीयकाः पुयण्जयः [ पवर्गान्तःस्थाजकाराः ], कथंजातीयकाश्चैते? अवर्णपराः" इति उक्तम्, तथा च साजात्येनैवोक्तार्थलाभस्तत्राप्यभिमतः । नागेशेन च "अवर्णपराः" इति भाष्यप्रतीकमुपादाय–"अवर्णपरत्वसम्पादकादेशस्थानिन इत्यर्थः, एवं चावर्णपरत्वसम्पादकादेशस्थानित्वेन तुल्यतेति भावः । एवं च 'औननत्, औजढत्' इत्यादि चिन्त्यमेव" इत्युक्तम् । यत्र द्विरुक्तौ परभागस्याद्योऽजवर्णस्तत्रेदमिति दीक्षितादिग्रन्थः किम्मूल इति न विज्ञायते । इत्थं च प्रकृतनागेशव्याख्यानरीत्या 'मा भवानूनिनत्' इत्येव रूपं, तत्राकारलोपस्य न स्थानिवत्त्वमित्यायाति, स्वमते चावर्णस्य प्रक्रियादशायां स्थितत्वादवर्णवत्त्वमिति तत्रापि स्थानिवद्भाव आश्रीयते इत्युक्तमेव पूर्वम्, किञ्चास्य न्यायस्यानैष्ठिकतामाश्रित्यास्य प्रवृत्तिस्थलनियमनपूर्वकमप्रवृत्तिस्थलप्रदर्शनमित्थं कृतं प्राचीनैः–"यस्य णिनिमित्तकृतकार्यस्य स्थानिवद्भावश्चिकीर्ष्यते तदाधारभूतो वर्णो वर्णसमुदायो वा अवर्णवान् यदि भवेत् तदैवायं न्यायः स्फुरेन्नान्यथा" इति । एतद्ग्रन्थस्य न्यासेन व्याख्यानं च तैः प्रदर्शितम्–"पुस्फारयिषतीत्यत्र णिनिमित्तकृतकार्यस्य आत्वरूपस्याधारभूतः 'स्फा' इति वर्णः, जिजावयिषतीत्यत्र णिनिमित्तकृतकार्यस्याधारभूतो 'जाव्' इति वर्णसमुदायः" इति । अत्रोच्यते–णिनिमित्तकार्यस्य वर्णस्य वर्णसमुदायरूपस्य वर्णः कथमाधारः स्यात्, किञ्च 'स्फा' इत्यस्य वर्णत्वं कथं, किमयमेको वर्णः, स चेद् वर्णात्मकः, न हि 'जाव्' इत्यस्य वर्णसमुदायात्मकत्वम्, प्रत्येकं स्वरस्य व्यञ्जनस्य वर्णत्वम्, अनेकवर्णानां वर्णसमुदायत्वमिति 'यथा 'जाव्' इति वर्णसमुदायस्तथा 'स्फा' इत्येषोऽपि समुदायरूप एवेति मन्तव्यम् । अत्र चान्यो विशेषः पूर्वमेव प्रपञ्चित इति न पुनरुच्यते ॥ ३५ ॥

## *द्विर्बद्धं सुबद्धं भवति* ॥ ३६ ॥

सि०—क्वचित् क्वचिच्छास्त्रकृद्भिरेक एवार्थो द्विधा प्रतिपादितः, तत्र पुनरुक्तिदोषापनोदायायं न्याय आश्रीयते । द्विः—द्विवारं, बद्धं—बन्धनेन विषयीकृतं निरूपितमिति प्रकृतेऽर्थः, तत् सुबद्धम् नियतबन्धनमव्यभिचारीति यावत्, भवति । अत्र च ज्ञापकं–"गॄ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये" [ ३. ४. १२. ] "जप-जभ-दह-दश-भञ्ज-पशः" [ ४. १. ५२. ] इति सूत्रयोः 'दश' इति पुनरुक्तनिर्देशः, स हि दंशेर्यङ्लुपि दंदशीतीत्यत्र न लोपस्याप्राप्तस्य प्राप्तये निपातनरूपेण क्रियते, केनापि सूत्रेणाप्राप्तोऽपि नलोपो यङ्लुपि स्यादित्यर्थमिति यावत्, स चैकेनैव निर्देशेन सिद्ध एवेति पुनस्तदर्थमेव सूत्रान्तरे निर्देशो व्यर्थ एव । स च 'एकेन निर्देशेन सकृज्ज्ञापितस्यापि विधेर्दशैकादशशब्दस्यादन्तत्ववत् कदाचिदनित्यताऽपि दृश्यते *समासान्तागम०*इति न्यायानुसारम्, यस्तु द्विर्निर्देशेन ज्ञाप्यते स विधिर्निश्चलो भवति' इति विज्ञापयति । स चायं न्यायो यद्यपि लोके प्रसिद्धः, दृश्यते हि व्यवहारे बन्धनादौ द्विग्रन्थ्यादिदानं दार्ढ्यार्थं तथाऽपि द्विवारं 'दश' इति निर्देशेन स न्यायः शास्त्रेऽपि प्रवर्त्तमानः सूच्यते इति बोध्यम् । यदि चायं न्यायो न स्वीक्रियेत, तर्हि सकृज्ज्ञापितार्थस्यादृढत्ववद् द्विर्ज्ञापितस्यापि तथात्वं भवत् केन वार्येत । तथा च ज्ञापनफलं स्वांशे दंदशीतीत्यत्र न लोपः । अन्यत्र च 'आस्थत्' इत्यत्राङो व्यभिचाराभावः, तथाहि–"असूच् क्षेपणे"इत्यस्याद्यतन्यां दिप्रत्यये आस्थदिति रूपं भवति, अस्यतेः "शास्त्यसू-वक्ति-ख्यातेरङ्" [ ३. ४. ६०. ] इति सूत्रे पुष्यादिगणे च पाठात्, अन्येषां तद्गणपठितधातूनां क्वचिदङो व्यभिचारोऽपि भवति, यथा 'भगवन्! मा कोपीः' इति बालरामायणप्रयोगः, अत्र कुप्यतेः पुष्यादिगणपठितत्वेऽपि नाङ् । केषांचिन्मते च यङ्लुबन्ते नलोपो नेष्यते, तन्मते

चायं न्यायोऽपि न ज्ञाप्यते । यदि च क्वचिदावश्यकता स्यात् तर्हि लोकसिद्धस्यैव कार्यवशादाश्रयणम्, तथा च दन्दंशीतीत्येव रूपं तेषामिति स्पष्टमुक्तं "जप-जभ०" [ ४. १. ५२. ] इति सूत्रे बृहद्वृत्तौ ॥ ३६ ॥

## *द्विर्बद्धं सुबद्धं भवति* ॥ ३६ ॥

**त०**—लौकिकव्यवहारसिद्धोऽप्ययं न्यायो वृत्तिदर्शितदिशा लक्ष्यसंस्काराय शास्त्रेऽप्याश्रीयते इति सूचितम् । एतन्न्यायफलत्वेन यदुक्तम्–आस्थदित्यत्राङो व्यभिचाराभाव इति, तच्च यद्यपि "शास्त्यसूवक्तिख्यातेरङ्" [ ३. ४. ६०. ] इति सूत्रस्य बृहद्वृत्तिग्रन्थप्रतिकूलमिति प्रतिभाति, तथाहि–तत्र "अस्यतेः पुष्यादित्वादङि सिद्धे वचनमात्मनेपदार्थम्" इत्युक्तम्, तस्यायं भावः–पुष्यादिनिमित्तोऽङ् परस्मैपद एव भवति, एतेन चात्मनेपदपरस्मैपदोभयोरेव भवतीति यत्रास्यतेरात्मनेपदं विधीयते, तत्र 'पर्यस्थत' इत्यादावङो विधानायेह तद्ग्रहणमिति । तथापि तत्रस्थलघुन्यासे पुष्यादिपाठस्य प्रकृतन्यायज्ञापनार्थत्वमुक्तम्, तथाहि–तत्रत्यो लघुन्यासः–"आत्मनेपदार्थमिति । तर्हि आत्मनेपद-परस्मैपदयोरनेनैव सिद्ध्यति किं पुष्यादिपाठेन? सत्यम्–अस्य पुष्यादिपाठो *द्विर्बद्धं सुबद्धं भवति* इति ज्ञापनार्थः । तेनास्मादङोऽव्यभिचारः, अन्येषां तु क्वचिद् व्यभिचारोऽपि, तेन भगवन्! मा कोपीरित्यादि बालरामायणोक्तं सिद्धम्" इति । अस्यायमाशयः–आत्मनेपदार्थमत्र सूत्रेऽस्यतेः पाठस्यावश्यकत्वे तेनैव परस्मैपदात्मनेपदयोरुभयोरपि सिद्धेः पुष्यादिपाठस्य प्रकृतन्यायज्ञापकत्वमास्थेयमिति । अस्य च प्रकृतन्यायज्ञापकत्वे "०दश०" [ ४. १. ५२. ] इति निर्देशस्य प्रकृतन्यायोदाहरणत्वं, तस्य ज्ञापकत्वे चास्योदाहरणत्वमास्थेयमिति न कोऽपि विरोधः । यदि श्यार्थं दिवादौ क्वचिदवश्यं पठितव्ये पुष्यादावेवास्धातुः पठितः, अङो विधानस्यापि तत्रेष्टत्वात्, पश्चाच्चात्मनेपदे तत्सिद्ध्यर्थमत्र सूत्रे तत्पाठ इत्याश्रीयते, तदा न पुष्यादिपाठो ज्ञापकोऽपि तु "०दश०" [ ४. १. ५२. ] इति निर्देश एवेति स्वीकर्तव्यमिति ॥ ३६ ॥

## *आत्मनेपदमनित्यम्* ॥ ३७ ॥

**सि०**—आत्मनेपदस्य विशेषत्वं विशेषलक्षणविहितत्वेनेति तदव्यभिचारित्वे प्राप्ते क्वचिद् दृश्यमानव्यभिचारस्य साधुत्वाय न्यायोऽयं स्वीक्रियते । आत्मनेपदम्, अनित्यं–व्यभिचारि, व्यभिचारित्वं च द्विधा–कुतश्चिदात्मनेपदनिमित्तसहितादपि धातोस्तस्याभवनम्, कुतश्चिच्च तन्निमित्ताभावेऽपि भवनम् । अस्य ज्ञापकश्च–भ्राजेरात्मनेपदिषु धातुषु द्विधा पाठः, तथाहि–भ्राजेरात्मनेपदिषु प्रथमं तावत् "एजृङ् भ्रेजृङ् भ्राजि दीप्तौ" इति पाठं कृत्वा पश्चात् पुनरपि "राजृग् टुभ्राजि दीप्तौ" इति पाठः, स हि *द्विर्बद्धं सुबद्धम्* इति न्यायेनात्मनेपदस्याव्यभिचारार्थमेव कृतः सन् आत्मनेपदस्य व्यभिचारित्वं विनाऽनुपपन्न एवेति तद्व्यभिचारित्वं ज्ञापयति, सति हि तस्य [ आत्मनेपदस्य ] अव्यभिचारित्वे विनाऽपि द्विधा पाठेन तस्य नित्यात्मनेपदित्वे सिद्धेऽपि तन्नित्यत्वार्थं कृतो द्विधा पाठोऽनुपपन्नः [ व्यर्थः ] एव स्यात्, फलं च द्विधा पाठस्य स्वांशे चारितार्थ्यम्, ज्ञापिते ह्यात्मनेपदस्यानित्यत्वे भ्राजतेरव्यभिचरितात्मनेपदविधानात् । अन्यत्र च प्राप्तस्याप्यात्मनेपदस्याभावो यथा–"डुलभिष् प्राप्तौ" इत्यस्य परस्मैपदेऽपि प्रयोगः–"सस्य रु प्रणस्य न लभन्ति कदाचनापि" [ ] इति, "क्षीबृङ् अधार्ष्ट्ये" इत्यामात्मनेपदिनः शतृप्रत्ययस्य परस्मैपदस्य विधानम्, यथा–"कुरुद्योतं क्षीबद्दिनपतिसुधागौ तमसि मे" [ ], "क्लिशिच् उपतापे" इत्यस्मादात्मनेपदिनोऽपि शता, यथा "परार्थे क्लिश्यतः सतः" इति [ ], "षेवृङ् सेवने" इत्यस्याप्यात्मनेपदिनः परस्मैपदे प्रयोगः, यथा–"स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः ।" [ ] इति, "भाषि व्यक्तायां वाचि" इत्यस्मादात्मनेपदिनः परस्मैपदविधानम्, यथा–"मिथ्या न भाषामि विशालनेत्रे !" इति, तथा "तर्जिण् सन्तर्जने" तर्जयति, "भर्त्सिण् सन्तर्जने" भर्त्सयति, "शमिण् आलोचने" निशामयति, "भलिण् आभण्डने" भालयति, "कुत्सिण् अवक्षेपे" कुत्सयति, "वञ्चिण् प्रलम्भने" वञ्चयति, "विदिण् चेतनाख्याननिवासेषु" वेदयतीत्यादि; एषु धातूनामिङित्त्वेऽप्यात्मनेपदं नाभूत् । क्वचिदप्राप्तमप्यात्मनेपदं यथा–"षस्ज गतौ" इति परस्मैपदी, तस्मादात्मनेपदप्रयोगो यथा–"प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु" [ भगवद्गीता ], "सज्जमानमकार्येषु" इत्यादि । इत्थं चास्योभयथा व्यभिचरितं प्रदर्शितम् । तच्च लक्ष्यानुसाराज्ज्ञापकसाजात्याच्च "इङितः कर्त्तरि" [ ३. ३. २२. ] इति सूत्रविहितात्मनेपदविषयमेव, न तु "क्रियाव्यतिहारेऽगति-हिंसा-शब्दार्थ-हसो-हृ-वहश्चानन्योऽन्यार्थे" [ ३. ३. २३. ] इत्यादिसूत्रैर्विशिष्य विहितात्मनेपदविषयम्, सूत्राणां न्यायापेक्षया प्राबल्यात् । "इङितः०" [ ३. ३. २२. ] इत्यनेन हि लिङ्गद्वाराऽऽत्मनेपदं विधीयत इति लाक्षणिकम्, तैश्च प्रतिपदोक्ततया विधीयत इति *लक्षणप्रतिपदोक्त*न्यायेनापि तद्विहितात्मनेपदस्य प्राबल्यात् तस्य व्यभिचरितत्वासम्भव इति ॥ ३७ ॥

### *आत्मनेपदमनित्यम्* ॥ ३७ ॥

**त०**—आत्मनेपदं हि तत्तल्लिङ्गविशेषनिमित्तकं तत्तत्प्रकृतिविशेषोद्देश्यकं चेति "शेषात् परस्मै" [ ३. ३. १००. ] इति सामान्यतो विहितपरस्मैपदापेक्षया प्रबलमिति तस्याव्यभिचरि-

तत्वं प्राप्तमिति तद्व्यभिचारः क्वचिदुपलभ्यमानोऽपि शास्त्रकृत्सम्मत इत्यनेन न्यायेनानुमीयते । पाणिनीयेऽपि तन्त्रे 'चक्षिङ्'धातोर्ङित्करणेनैतस्य न्यायस्य ज्ञापनं प्राचीना अनुमन्यन्ते, नवीनास्तु तस्यान्यार्थतामाश्रित्य भाष्यादावस्य न्यायस्यादर्शनाच्च नात्र न्याये ज्ञापकसत्तेति यत्रात्मनेपदिभ्यो परस्मैपदप्रयोगो यत्र च परस्मैपदिभ्य आत्मनेपदप्रयोगस्तत्र आर्षत्वादिना समादधते, स्थितस्य गतेश्चिन्तनीयत्वात् । यदि हि सोऽर्थो न्यायानुमतः स्यात् तर्हि अयत्नेऽपि यथेच्छं तद्व्यभिचारः क्रियमाणः साधुत्वमश्नुवीतेत्याद्याहुः । स्वमतेऽपि भ्राजेर्द्विधा पाठस्यानुबन्धविशेषसम्बन्धार्थकत्वमिति कल्पयितुं शक्यत्वेन नात्र न्याये किमपि दृढतरं मानमिति कथयितुं शक्यते । यः कविप्रयोगेषु तत्र तत्र व्यभिचारो दृश्यते स तेषां निरङ्कुशत्वेन समाधेय इति युक्तं प्रतिभाति, एवंविधन्यायस्वीकारस्य शास्त्रीयप्रक्रियार्थमनावश्यकत्वादिति ॥ ३७ ॥

## *क्विपि व्यञ्जनकार्यमनित्यम्* ॥ ३८ ॥

**सि०**—क्विप् द्विविधः–नाम्नो विधीयमानो धातुत्वप्रयोजकः, धातोर्विधीयमानो नामत्वप्रयोजकश्च, तत्र द्विविधेऽपि क्विपि व्यञ्जननिमित्तकं कार्यम्, अनित्यं–प्राप्तमपि न भवति कचिदित्यर्थः । अत्र च ज्ञापकम्–"क्वौ" [ ४. ४. ११९. ] इति सूत्रकरणम्, मित्रशीरित्यादौ शास आस इसो विधानार्थं हि तत्, तच्च क्विपो व्यञ्जनादित्वमाश्रित्य "इसासः शासोऽङ्व्यञ्जने" [ ४. ४. ११८. ] इत्यनेनैव सिद्धमेव । तथा च सिद्धे सत्यारभ्यमाण इसादेशो ज्ञापयति–*क्विपि व्यञ्जनकार्यमनित्यम्* इति, तथा चानित्यत्वात् कदाचिन्नापि स्यादित्याशङ्कयैव सूत्रमिदमारब्धं सत् तत्रेसादेशविधानेन चरितार्थम् । फलं चान्यत्राख्यातक्विपि राजेवाचरतीत्यर्थे "कर्तुः क्विप् गल्भ-क्लीब-होडात् तु ङित्" [ ३. ४. २५. ] इति क्विपि राजानतीति प्रयोगे क्विपि विद्यमानं ककारं वकारं वा व्यञ्जनं निमित्तीकृत्य प्राप्तस्य "नाम सिदय्व्यञ्जने" [ १. १. २१. ] इति पदत्वस्याभावात् "नाम्नो नोऽनह्नः" [ २. १. ९१. ] इति नस्य लुग् नाभूदिति । कृत्क्विपि यथा–गीर्यते इत्यर्थे "क्रुत्सम्पदादिभ्यः क्विप्" [ ५. ३. ११४. ] इति क्विपि पूर्ववत् पदत्वाभावात् "पदान्ते" [ २. १. ६४. ] इति दीर्घो नेति । क्विबत्रोपलक्षणं विचोऽपि, तेन *विच्यपि व्यञ्जनकार्यमनित्यम्* इति सिद्ध्यति । तथा च मुख्यमाचष्टे इत्यर्थे णिचि णिजन्तात् "मन् वन्०" [ ५. १. १४८. ] इति विचि 'मुख्य्' इति, अत्र विचि परे "य्वोः प्वय्व्यञ्जने लुक्" [ ४. ४. १२१. ] इति यलुग् न भवति । न चात्र णिलुचः स्थानिवत्त्वाद् यलुचः प्राप्तिरेव नास्ति तेन व्यवधानादिति वाच्यम्, यविधौ "न सन्धि-ङी-य-क्वि०" [ ७. ४. १११. ] इति स्थानिवत्त्वनिषेधात् । अस्य च न्यायस्य काप्यबाध्यमानत्वादनित्यत्वमेव । किञ्च न क्वापि क्वौ व्यञ्जनकार्यं जायमानं दृश्यते । इत्थं च यद्यपि क्विपि व्यञ्जनकार्यं न भवतीत्येव निश्चयगर्भं न्यायस्वरूपमाश्रयितुं शक्यते, तथापि मतान्तरे क्वचिद् व्यञ्जनकार्यस्य क्रियमाणत्वदर्शनेन तत्संग्रहाय [ परमतसाधारण्याय ] अनित्यत्वमेव ज्ञापितमिति द्रष्टव्यम् । इत्थं च "आचार्याः कृत्वा न निवर्त्तन्ते" इत्यपि प्रसिद्धिरनुगृहीता भवति । किञ्च न्याया एते चिरन्तना अतश्च तेषां स्वरूपपरिवर्त्तनं यथासम्भवं न कार्यमित्यपि सम्प्रदायः । अत एव च [ अनित्यत्वघटितन्यायस्वरूपस्वीकारादेव ] "पां पाने" इत्यस्मात् क्विपि "अप्रयोगीत्" [ १. १. ३७. ] इति तल्लुकि, लुप्तेऽपि तत्र व्यञ्जनादित्वमाश्रित्य "ईर्व्यञ्जने०" [ ४. ३. ९७. ] इतीत्वे पीरिति जयकुमारोक्तिरपि संगच्छते, अनित्यत्वघटितत्वे न्यायस्य तत्र कादिचित्काप्रवृत्त्या तदनुरूपकार्यसिद्धेः । कैश्चिच्चायं न्यायो नैव स्वीक्रियते, तत्प्रक्रियायाश्च स्वप्रक्रियाभेदाद् विनाऽपि न्यायं कार्यसिद्धिर्भवतीत्यन्यदेतत् ॥ ३८ ॥

## *क्विपि व्यञ्जनकार्यमनित्यम्* ॥ ३८ ॥

**त०**—क्विपः क्वाप्यप्रयोगेन "अप्रयोगीत्" [ १. १. ३७. ] इति तस्येत्संज्ञा भवति, तया च संज्ञया स गच्छतीति लोप एव तस्य स्वीक्रियते । तथा च शास्त्रे उच्चार्यमाणोऽपि प्रयोगेऽदृश्यमानो वर्णो वर्णसमुदायो वाऽनेनेत्संज्ञाविधानेनानूद्यते । तत्र ककार-पकारावनुबन्धौ वकारमात्रस्य प्रत्ययत्वम्, सोऽपि प्रत्ययनिमित्ते कार्ये जाते निवर्त्तते, तदुक्तम्–"अप्रयोगीत्" [ १. १. ३७. ] इति सूत्रे बृहन्न्यासे–"क्विबादीनां तु ककार-पकारयोः कार्यार्थत्वेनेत्त्वादभावोऽस्तु, [ इकारस्य ] तदुच्चारणार्थमुपात्तस्य कृतकार्यत्वान्निवृत्तिः, यतोऽप्रयोगशब्देन शास्त्रमभिधीयते, वकाराभावे तु कस्यायमित् स्यादित्यप्रयोगिशब्दाभिधेय एव न स्यात्, प्रत्ययत्वमप्यस्यैवं सिद्ध्यति, कृतकार्यत्वाच्च स्वयं निवर्त्तते, अत एव वकारः पठितः प्रविरलविषयत्वादस्य, अन्तःस्थानां पदान्तानां प्रायः प्रयोगानिष्टेः, यदाह–"नहि यणः पदान्ताः सन्ति" [ भाष्यम्, १. १. २–आह्निकम् ] इति" इति । इत्थं च वकारस्य प्रत्ययत्वं कार्यार्थत्वं चोक्तम् । तत्र च व्यञ्जनकार्यमपि प्राप्तम्, तच्चानेन न्यायेनापनोद्यते । तथा च तत्र कित्प्रत्ययत्वादिनिमित्तं कार्यमेव स्यान्न व्यञ्जननिमित्तम् । एवं विच्यपि 'व'कारमात्रस्यैव प्रत्ययत्वमिति क्विपा विजुपलक्ष्यते इति प्रतिपादितं वृत्तौ । यद्यपि तत्फलं–मुख्यमाचष्टे इत्यर्थे णिचि ततः क्विपि 'मुख्य्' इत्यत्र यलोपाभाव उक्तः, स च पूर्वोक्तबृहन्न्यासोद्धृतेन "नहि यणः पदान्ताः

सन्ति" इति भाष्यवचनेन विरुध्यते, तथाहि–तत्र यण्पदेनान्तःस्था [ यवरलाः ] इत्युच्यन्ते, तेषां च पदान्तेऽभावकथनेन 'मुख्य्' इति यान्तप्रयोगोऽनुचित इति तदनभिधानमेवाश्रयणीयम्, तथापि प्राचीनैस्तस्योल्लेखादस्माभिरपि मतान्तरपरतया स्वीकृत्योद्धृतम् । वस्तुतस्तु नास्ति विचो ग्रहणे किञ्चित् फलं 'मुख्य्' इत्यादीनामनभिधानस्योक्तत्वात् । अन्यैश्च वैयाकरणैरेतन्न्यायस्वरूपमेव न स्वीक्रियते इति तेषां मते विच उपलक्षणत्वचर्चैव का ? ॥ ३८ ॥

## *स्थानिवद्भाव-पुंवद्भावैकशेष-द्वन्द्वैकत्व-दीर्घत्वान्यनित्यानि* ॥ ३९ ॥

**सि०**—स्थानिवद्भावः–"स्थानीवावर्णविधौ" [ ७. ४. १०९. ] इत्यादिसूत्रैरतिदिश्यमान आदेशे स्थानिव्यवहारः; पुंवद्भावः–स्त्री-क्लीब-लिङ्गानां शब्दानां वृत्त्यादावतिदिश्यमानः पुंलिङ्गस्वरूपातिदेशः; एकशेषः–"समानानामर्थेनैकः शेषः" [ ३. १. ११८. ] इत्यादिसूत्रैर्विधीयमानः; द्वन्द्वैकत्वं–द्वन्द्वगतमेकत्वं, समाहारद्वन्द्व इति यावत्; दीर्घत्वं च–यद्यप्यनेकत्रानेकधा विहितं तथापि "भ्वादेर्नामिनो दीर्घो वोर्व्यञ्जने" [ २. १. ६३. ] इतीह गृह्यते, व्याख्यानाल्लक्ष्यानुरोधाच्च; एतान्यपि कार्याणि अनित्यानि–सूत्रैरविकल्पभावेन विहितान्यपि लक्ष्यानुरोधात् तत्तज्ज्ञापकप्रामाण्याच्च क्वचिदनिष्टस्थले नापि भवन्तीति न्यायार्थः । तत्रैषामिष्टस्थलेषु प्रवृत्तिस्तु प्रसिद्धैवेति केवलमनिष्टस्थलेष्वप्रवृत्तिरेवानित्यत्वोदाहरणतया क्रमश उदाहरिष्यते । तत्र स्थानिवद्भावानित्यत्वे ज्ञापकम्–"उपान्त्यस्यासमानलोपिशास्वृदितो ङे" [ ४. २. ३५. ] इति सूत्रेऽसमानलोपिग्रहणम्, तथाहि–मालामाख्यत् 'अममालत्' इत्यादावुपान्त्यह्रस्वाभावार्थं तत् क्रियते, स च मालाशब्दाकारस्यान्त्यस्वरादिलुकः प्रसङ्गेन लुप्तस्य स्थानिवद्भावादेवाकारस्योपान्त्यत्वाभावेन सिद्ध एवेति तदर्थं क्रियमाणमसमानलोपिग्रहणं स्थानिवद्भावस्यानित्यत्वे ज्ञापकम् । तदनित्यत्वे हि कदाचित् स्थानिवद्भावाभावे ह्रस्वः स्यादिति तद्वारणायासमानलोपिग्रहणं स्वांशे चरितार्थम् । फलं चास्य स्वाद्वकार्षीदित्यर्थे स्वादुशब्दाण्णिचि उकारस्य वृद्धावन्त्यस्वरादिलुकि तस्य स्थानिवद्भावाभावदुपान्त्यह्रस्वे सति 'असिस्वदत्' इति रूपं सिध्यतीति । यद्यपि राजानमाख्यदरराजदित्यत्र "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यनेनान्त्यस्वरादेः 'अन्'-शब्दस्य लोपे स्थानिवद्भावस्य स्वरमात्रस्थानिकादेशे एव प्रवृत्त्याऽत्र च न स्वरमात्रस्य लोप इति तस्याप्राप्त्या तत्रोपान्त्यस्य ह्रस्वाभावार्थमसमानलोपिग्रहणमिति वक्तुं शक्यते, तथापि 'अन्' इत्यस्य समुदायस्यावयवेऽकारेऽपि तस्य लोपस्य स्थानित्वमिति स्वीकृत्य स्थानिवद्भावेन सिद्धिः सम्भवति, अन्यथाऽत्र समानलोपित्वमेव कथं स्यात्, नहि समानमात्रस्य लोपोऽत्रास्ति, किन्तु समानस्य तदन्यस्य चेति यथाऽवयवाश्रयमेव समानलोपित्वमेवं स्वरादेशत्वमपीति तत्रापि स्थानिवद्भावेन सिद्धिरस्त्येवेति व्यर्थमेवासमानलोपिग्रहणमिति ज्ञापकं भवत्येव। उक्तं चैतद् बृहद्वृत्तावपि "उपान्त्यस्यासमानलोपि०" [ ४. २. ३५. ] इति सूत्रव्याख्यायाम्, तथाहि–"यत्रान्त्यस्वरादिलोपस्तत्र स्थानिवद्भावेन न सिध्यतीति वचनम् । यत्र तु स्वरस्यैव लोपस्तत्र स्वरादेशत्वेन स्थानिवद्भावेनैव सिध्यति–मालामाख्यत्–'अममालत्' इत्यादि । ननु यत्रापि स्वरव्यञ्जनलोपस्तत्राप्यवयवावयविनोरभेदनयेन स्वरादेश एवेति स्थानिवद्भावेनैव सिध्यति, किमसमानलोपिवचनेन ? सत्यम्–स्थानिवद्भावस्यानित्यत्वख्यापनार्थं वचनम्, तेन वास्या परिच्छिन्नवान्–पर्यवीवसत्, स्वादु कृतवान्–असिस्वददित्यादि सिद्धम्, अत्रेकारोकारयोः "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति वृद्धौ कृतायामन्त्यस्वरादिलोपित्वादसमानलोपित्वम्" इति ॥ अत्रेदं शङ्क्यते–'असिस्वदत्, पर्यवीवसत्' इत्यादौ "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति वृद्धेः परत्वात् "अन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यन्त्यस्वरादिलोपे पूर्वं प्रवृत्तेऽत्र समानलोपित्वस्य दुर्वारत्वेन ज्ञापितेऽपि न्यायेऽत्र नोपान्त्यह्रस्वसंभव इति; अत्रोच्यते–कलि-हलिवर्जनात् परमपि लोपं वृद्धिर्बाधत इति ज्ञापनात्, अन्यथा पूर्वमन्त्यस्वरादिलोपे वृद्धेरप्राप्तौ कलि-हलिवर्जनं व्यर्थमेव स्यात्; परमपि लोपं बाधित्वा वृद्धेः प्रवृत्तौ तु 'अचकलत्'इत्यादौ समानलोपित्वेन सन्वद्भावाभावाय तद्वर्जनस्य सार्थक्यमभूत्; इह च पूर्वं वृद्धेः प्रवृत्तौ समानलोपित्वाभावात् स्थानिवद्भावेनोपान्त्यह्रस्वविघातो मा भूदित्येतदर्थं स्थानिवद्भावानित्यत्वज्ञापनं सार्थकमिति ॥ १ ॥ पुंवद्भावोऽनित्य इत्यत्र ज्ञापकं यथा–"कौण्डिन्या-ऽगस्त्ययोः कुण्डिनागस्ती च" [ ६. १. १२७. ] इति सूत्रे कौण्डिन्येति निर्देशः, तथाहि–कुण्डिनीशब्दात् वृद्धापत्यार्थे "गर्गादेः" [ ६. १. ४२. ] इति यञि "जातिश्च णितद्धितय-स्वरे०" [ ३. २. ५१. ] इति यदि पुंवद्भावः प्राप्तः स्यात् तर्हि स्त्रीत्वनिवृत्त्या 'कुण्डिन्' इति नान्तपुंल्लिङ्गरूपताप्राप्तौ "नोऽपदस्य तद्धिते" [ ७. ४. ६१. ] इतीन्लोपे 'कौण्ड्य' इति रूपं स्यादिति कौण्डिन्येति रूपं न स्यात्, तथा च स निर्देशः पुंवद्भावानित्यत्वज्ञापनं विनाऽनुपपन्न इति पुंवद्भावानित्यत्वं ज्ञापयति । तथा च तदनित्यत्वेनाप्रवृत्तौ "अवर्णेवर्णस्य" [ ७. ४. ६८. ] इतीकारलोपे तस्य स्थानिवद्भावेन "नोऽपदस्य०" [ ७. ४. ६१. ] इति प्राप्तस्येनो लोपस्याभावे कौण्डिन्येति रूपसिद्धिर्भवति । फलं त्वस्यांशस्य–दक्षिणस्यां

दिशि भव इत्यर्थे "दक्षिणापश्चात्पुरसस्त्यण्" [ ६. ३. १३. ] इति त्यणि दाक्षिणात्य इत्यत्र "सर्वादयोऽस्यादौ" [ ३. २. ६१. ] इति प्राप्तोऽपि पुंवद्भावो नाभूदिति, पुंवद्भावे सति हि 'दक्षिण' इति पुंरूपप्राप्त्या दाक्षिणत्य इति विकृतं रूपं स्यात् तच्चानिष्टम् । यद्यपि "कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च" [ ६. १. १२७. ] इति सूत्रस्थे बृहद्वृत्तिग्रन्थे कौण्डिन्य-शब्दे निपातनात् पुंवद्भावाभाव इत्येवोक्तं न तु पुंवद्भावा-नित्यत्वज्ञापकत्वमुक्तम् । 'दाक्षिणात्य' इति रूपं च दक्षिणस्यां दिशि वसतीत्यर्थे दक्षिणाशब्दात् "वा दक्षिणात् प्रथमा-सप्तम्या आः" [ ७. २. ११९. ] इत्याप्रत्यये दक्षिणा, तत्र भव इति विग्रहेऽव्ययाद् दक्षिणाशब्दात् त्यणि प्रत्ययेऽपि सिध्यतीति न पुंवद्भावानित्यत्वे ज्ञापनफलं किञ्चिदस्ति, तथापि लघुन्यासकारादिभिर्ज्ञापितोऽयमर्थ इति तदनुसृत्यास्माभिरपि स्थापितः । युक्तं च "दक्षिणापश्चात्पुरसात् त्यण्" [ ६. ३. १३ ] इति सूत्रेऽव्ययाभ्यां साहचर्यादव्ययस्यैव दक्षिणाशब्दस्य ग्रहणम्, दिग्वाचकस्य सर्वनाम्नो ग्रहणे हि सूत्रेऽपि 'दक्षिण-पश्चात्' इति रूपेण कृतपुंवद्भावस्यैव निर्देशः समुचितः स्यात्, तत्रापि पुंवद्भावानित्यत्वाश्रयणाङ्गीकारापेक्षया त्वव्ययस्यैव ग्रहणमुचितम् । यद्यपि तत्र सूत्रे बृहद्वृत्तावुभयथापि रूप-सिद्धिः प्रदर्शिता, न च पुंवद्भावस्य चर्चा कृता, अव्ययस्यैव ग्रहणमिति च मतान्तरत्वेन स्थापितम्, तथापि "कौण्डि-न्यागस्त्य०" [ ६. १. १२७. ] इति सूत्रे निपातनात् पुंव-द्भावं कथयता प्रकृतेऽपि रूपस्योभयथा सिद्धिं दर्शयताऽस्य न्यायांशस्यानावश्यकत्वं स्पष्टमेव सूचितं प्रतीयत इति विचारणीयं सूरिभिः ॥ २ ॥ एकशेषस्यानित्यत्वे ज्ञापकं यथा–'तदतदात्मकं तत्त्वमातिष्ठन्ते जैनाः' इति, अयं च शिष्टप्रयोग एकशेषस्यानित्यत्व एवोपपद्यते, अन्यथाऽत्र "त्यदादिः" [ ३. १. १२८. ] इत्येकशेषेण तदात्मकं तत्त्व-मित्येव प्रयोग उपपन्नः स्यात्; सति चानित्यत्वे तच्चातच्च तदते, ते आत्मा स्वरूपं यस्य तत् तदतदात्मकमिति तदतदोः सह प्रयोगः सिद्धो भवति । अत्रातिष्ठन्ते इति "प्रतिज्ञायाम्" [ ३. २. ६५. ] इत्यात्मनेपदम्, तच्छब्दस्य सर्वनामत्वात् तेनात्र–सत्त्वं, नित्यत्वं, सामान्यात्मकत्वम्, अभिलाप्यत्वं चोच्यते, अतच्छब्देन च तद्विपरीतमसत्त्वमनित्यत्वं विशेषा-त्मकत्वमनभिलाप्यत्वं चेति सर्ववस्तूनां सत्त्वनित्यत्वादिधर्मेषु स्याद्वादं जैनाः प्रतिजानत इति वाक्यार्थः । "त्यदादिः" [ ३. १. १२०. ] इति सूत्रेण च त्यदादेरन्येन सह द्वन्द्व-प्राप्तावेकस्य त्यदादिशब्दस्य शेषोऽपरस्य च लोपः क्रियते, अत्र च तच्छब्दस्त्यदादिः, अतच्छब्दश्च तदन्य इति तस्य लोपः प्राप्तः, परमेकशेषस्यानित्यत्वान्न भवति । तदनित्यत्वे ज्ञापकोऽपीदृशशिष्टप्रयोग एव, तदर्थं प्रयत्नान्तराकरणात् तस्य प्रयोगस्य चावश्यसाधुत्वार्हत्वात् ॥ ३ ॥ द्वन्द्वैकत्वस्यानित्यत्वे प्रमाणं च–"प्राणितूर्याङ्गाणाम्" [ ३. १. १३७. ] इति सूत्रे बहुवचननिर्देश एव, अन्यथा ईदृशस्थलेषु आचार्यस्य सर्व-त्रैकवचनप्रयोगस्यैव शैली दृश्यते लाघवार्था, तथेहापि लाघ-वायैकवचनस्यैव प्रयोगे समुचिते बहुवचनप्रयोगो विशिष्ट-कार्यज्ञापक एवेति प्रकृते बहुवचनप्रयोगेण द्वन्द्वैकत्वस्यानि-त्यत्वज्ञापनमेवेष्टमिति प्रतीयते, प्रयोजनान्तराभावात् । ज्ञापिते चात्र न्यायांशे बहुवचनप्रयोगः सार्थको भवति । फलं च 'शङ्खदुन्दुभिवीणाः' इत्यादिप्रयोगेषु तूर्याङ्गत्वेन "प्राणि-तूर्याङ्गाणाम्" [ ३. १. १३७. ] इति प्राप्तोऽपि समाहार-द्वन्द्वो नाभूत्, एतच्च प्राचां मतं, स्वमतं तु विवरणे प्रपञ्च-यिष्यते ॥ ४ ॥ दीर्घत्वस्यानित्यत्वे प्रमाणं च 'स्फूर्ज्-ऊर्ज्-ऊर्णु'-प्रभृतीनां कृतदीर्घाणामेव धातुषु पाठः, अन्यथा ह्रस्वपाठेऽपि "भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने" [ २. १. ६३. ] इति सूत्रेण दीर्घे सिद्धे दीर्घपाठो व्यर्थ एव स्यात्, तथा च दीर्घ-पाठो दीर्घस्य व्यभिचरितत्वं ज्ञापयति, स्फूर्जादीनां च दीर्घ-स्याव्यभिचारार्थं दीर्घपाठः स्वांशे चरितार्थः । फलं च कुर्दते इत्यर्थे "रम्यादिभ्यः कर्तरि" [ ५. ३. १२६. ] इत्यनेन अने कृते 'कुर्दनः' इति प्रयोगसिद्धिः । किञ्च "गुर्वै उद्यमे" इत्यस्मात् "णिन् चावश्यकाधमर्ण्ये" [ ५. ४. ३६. ] इति णिनि स्त्रियां ङ्यां गुर्विणीति प्रयोगे "भ्वादेर्नामिनः" [ २. १. ६३. ] इति दीर्घो नाभूत् । नास्य न्यायस्यानित्यत्वज्ञाप-नावश्यकता, अनित्यस्यानित्यत्वे च नित्यत्वमेव लब्धं स्यादि-त्यनित्यत्वमेव व्याहन्येत । अनित्यत्वं हि क्वचिदप्रवर्त्तमानत्व-मेव, तेनैवेष्टस्थले प्रवृत्तेरनिष्टस्थले चाप्रवृत्तेः सिद्धत्वेनानित्य-त्वज्ञापनं व्यर्थमेव स्यादिति ५ ॥ ३९ ॥

## *स्थानिवद्भाव-पुंवद्भावैकशेष-द्वन्द्वैकत्व-दीर्घत्वान्यनित्यानि* ॥ ३९ ॥

त०—अत्र न्याये पञ्चांशाः, प्रत्येकं ज्ञापकफलादीनि वृत्तौ दर्शितानि । वस्तुतस्तु स्थानिवद्भावानित्यत्वमात्रमत्र सूत्राक्षरज्ञा-प्यत्वाद् दृष्टम्, अन्यान्यनित्यत्वानि नातिप्रयोजनकानि, तच्चाग्रे स्फुटीकरिष्यते । इत्थंरूपेण ज्ञापकेन स्थानिवद्भावानित्यत्वं चान्यैरपि वैयाकरणैः स्वीक्रियते । तथा च पाणिनीये तन्त्रे "उपान्त्यस्यासमानलोपि०" [ ४. २. ३५. ] इति सूत्रस्थपर्यु-दस्यमानार्थकं "नाग्लोपिशास्वृदिताम्" [ पा० सू० ८. ४. २. ] इति सूत्रं पृथगारभ्यते, तत्रापि महाभाष्ये एवमेव स्थानिवद्भाव-साधनं दृश्यते । तथाहि–तत्रत्यो ग्रन्थः–"अग्लोपिप्रतिषेधा-नर्थक्यं च, स्थानिवद्भावात्" [ वार्तिकम् ], "अग्लोपिप्रति-

षेधश्चानर्थकः, किं कारणम् ? स्थानिवद्भावात्–स्थानिवद्भावादत्र ह्रस्वत्वं न भविष्यति । यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः, क्व च स्थानिवद्भावो नास्ति ? यो हल्चोरादेशः–अत्यरराजत् । किं पुनः कारणं हल्चोरादेशो न स्थानिवदिति ? उच्यते–अजादेशः स्थानिवदित्युच्यते, न चायमच एवादेशः । किं तर्हि ? अच्चश्चान्यस्य च । अग्लोपिनां नेत्यपि तर्हि प्रतिषेधो न प्राप्नोति, किं कारणम् ? अग्लोपिनां नेत्युच्यते, न चात्राऽगेव लुप्यते । किं तर्हि ? अक् चान्यश्च, योऽत्राग् लुप्यते तदाश्रयः प्रतिषेधो भविष्यति । यथैव तर्हि योऽत्राग् लुप्यते तदाश्रयः प्रतिषेधो भवत्येवं योऽत्राज् लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति । एवं तर्हि सिद्धे सति यदग्लोपिनां नेत्येवं प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः–'इत ऊर्ध्वं स्थानिवद्भावो न भवति' इति । अयमाशयः–स्थानिवद्भावेन मालामाख्यदममालदित्यादिरूपाणां सिद्धावपि तत्रोपान्त्यह्रस्वनिषेधार्थमारभ्यमाणमसमानलोपिग्रहणं स्थानिवद्भावानित्यत्वे ज्ञापकं भवत्येव । न चात्यरराजदित्यादौ केवलस्य स्वरस्य लोपरूपादेशाभावात् तत्र स्थानिवद्भावाप्राप्तेरुपान्त्यह्रस्वाभावार्थं तच्चरितार्थमिति वाच्यम्, केवलसमानलोपाभावेऽपि समानलोपत्वस्वीकारवत् केवलस्वरस्थानिकत्वाभावेऽपि स्वरस्थानिकत्वस्यावयवद्वारा स्वीकरणीयत्वादिति । वस्तुतस्तु "स्वरस्य परे प्राग्विधौ" [ ७. ४. ११०. ] इति सूत्रस्थानीये "अचः परस्मिन् पूर्वविधौ" [ १. १. ५७. ] इति पाणिनीयसूत्रे महाभाष्ये स्वरव्यञ्जनयोरादेशो न स्वरादेश इत्यस्यार्थस्य निर्णीतत्वेनात्र स्वरव्यञ्जनयोरादेशस्य स्वरादेशत्वस्वीकरणं शिष्यव्युत्पादनार्थमात्रमेव । तथा च राजानमतिक्रान्त इत्यरराजदित्यादौ स्थानिवद्भावात् तत्रोपान्त्यह्रस्वनिषेधार्थमसमानलोपिग्रहणस्य चारितार्थ्येन न ज्ञापकत्वसंभवः । न चात्यरराजदित्यत्र समानमात्रस्य लोपाभावात् कथं समानलोपित्वनिमित्तक उपान्त्यह्रस्वाभावः स्यादिति शङ्कनीयम्, असमानलोपिग्रहणसामर्थ्याल्लक्ष्यानुरोधाच्च समानमात्रलोपित्वाभावेऽपि समानलोपित्वस्वीकारात् । न चाममालदित्यादावसमानलोपिग्रहणं सार्थकमिति वाच्यम्, तत्र स्थानिवद्भावेनापि सिद्धेः । स्पष्टं चेदं पूर्वोदाहृतभाष्यव्याख्यायां कैयटेऽपि । एवं च स्थानिवद्भावानित्यत्वेऽपि न दृढतरं ज्ञापकम्, वास्या परिच्छिन्नवान्–पर्यवीवसत्, स्वादु कृतवान्–असिस्वददित्यादौ चोपान्त्यस्य ह्रस्वार्थमातिदेशिकमनित्यमिति सामान्यन्यायेनैव स्थानिवद्भावाभाव इत्याश्रयणीयम् । यदि चायं न्यायः स्वशास्त्रे न व्यवहृतो दृश्यत इत्युच्यते तदा बृहद्वृत्युक्तरीत्या प्रकृतन्यायांशज्ञापनमास्थेयमेवेति ॥ १ ॥

पुंवद्भावानित्यत्वविषये च ज्ञापकं निपातनरूपमेवेति तत्र पुंवद्भावोऽनुमतोऽन्यत्रापि तज्ज्ञापकत्वे न किमपि विशिष्टं फलम्, दाक्षिणात्यसिद्धिश्चान्यथाऽपि वृत्तौ प्रदर्शितैवेति तदनित्यत्वज्ञापनमपि नातिप्रयोजनीयमिति वृत्तावेव निवेदितम् ॥२॥

एकशेषस्यानित्यत्वे ज्ञापकतया 'तदतदात्मकं तत्त्वमातिष्ठन्ते जैनाः' इति प्रयोग एवोक्तः, स एव च तदुदाहरणमपि । तत्रेदमभिधीयते–तदिति सामान्यार्थकम्, अतदिति विशेषार्थकमित्युभयोर्भिन्नार्थकत्वेन शिष्यमाणेन तच्छब्देन लुप्यमानस्यातच्छब्दस्यार्थो बोधयितुमशक्य इति गमकत्वाभावादेवात्रैकशेषो न भविष्यतीति न तदनित्यत्वमास्थेयम् । अयमत्राभिसन्धिः–एकशेषारम्भशास्त्रेण नैकस्मिन् शिष्यमाणे लुप्यमानार्थाभिधायित्वं विधीयते नवीनतया, अपि तु पूर्वतः सिद्धमेवानुशिष्यते, ततश्च यस्य शिष्यमाणस्य यदर्थबोधकत्वं दृष्टचरं स एव शिष्यतेऽन्यो लुप्यत इति वस्तुस्थितिः, एतच्च शब्दानुशासनमिति शब्देनापि साध्यते । किञ्च यत्र "त्यदादिः" [ ३. १. १२०. ] इति सूत्रेणैकशेषः क्रियते त्यदादेः, तत्र 'अयं च मैत्रश्च–इमौ' इत्यादौ न मैत्रादीनां लुप्यमानानां मैत्रत्वादिना विशेषरूपेण भानम्, अपि तु इदन्त्वेन सामान्यरूपेणैव, मैत्रादित्वेन बोधश्च प्रकरणादिगम्य एव । इत्थं च तदात्मकभिन्नस्यातदात्मकस्यार्थस्य पार्थक्येन भानायात्रैकशेषाभाव एवोचितो न त्वेकशेष इति नेदमेकशेषानित्यत्वोदाहरणं युक्तम् । एतच्च "त्यदादिः" [ ३. १. १२०. ] इति सूत्रस्थलघुन्यासग्रन्थेनापि प्रतीयते, तथाहि–तत्रत्यो ग्रन्थः "स च चैत्रश्चेति । ननु च त्यदादेः सामान्यशब्दत्वात् चैत्रोऽपि स चेति निर्देष्टुं शक्यः, न च तावित्युक्ते स च चैत्रश्चेति प्रत्ययः, किन्तु स च स चेति, तत्र च स्यादौ सरूपत्वात् पूर्वेणैव सिध्यतीति व्यर्थोऽस्योपन्यासः, न व्यर्थः, स च चैत्रश्चेत्येवंविवक्षायां द्वन्द्वः प्राप्नोतीति, तथाहि–तच्छब्दो यदा चैत्रव्यतिरिक्तार्थपरामर्शीति प्रकरणादिनाऽवगतं तदा गोबलीवर्दवत् तच्चैत्राविति स्यात्, वाक्यवत् तच्छब्दस्य वृत्तावप्यपेक्षा प्रतीयत इति द्वन्द्वनिवृत्तिप्रदर्शितार्थोऽस्योपन्यास इत्यदोषः" इति । अस्यायमाशयः–"स च चैत्रश्चेत्यादिविग्रहे तावित्यादिप्रयोगे न चैत्रत्वादिना भानमपि तु तच्छब्दार्थत्वेनैव, ततश्च तच्छब्दस्यैवायं समानरूपस्यैकशेष इति नायं विशेषविधिरावश्यक इति न वक्तव्यम्, 'तच्चैत्रौ' इत्यादिद्वन्द्वसमासनिवृत्त्यर्थत्वात्" इति । तथा च तत्पदादिना सहोच्यमानोऽन्यः शब्दः सामान्यरूपेणैव तमर्थं कथयति यत्र च सामान्यतो विशेषः प्रतिपादयितुमिष्टः स्यात् तत्रावश्यं पृथङ् निर्देशः कार्यः, स च पृथक्पदत्वेन समासादिना वा यथायोगमिति नाम्रहस्तत्रैकशेषविषये । इह च तदा तदात्मकं तत्त्वमित्यादावेकशेषे कृते न तच्छब्दः स्वविरुद्धमर्थमभिधातुं शक्नुयादिति सामर्थ्याभावादेव नैकशेषः, अवश्यं चैकशेषेऽपि सामर्थ्याश्रितत्वमेषणीयमिति निर्णीतं पूर्वत्र *समासतद्धितानां वृत्तिर्विकल्पेन* इति न्यायव्याख्यायाम् । तथा चैकशेषानित्यत्वज्ञापनमपि नावश्यकमिति प्रतीमः ॥ ३ ॥

द्वन्द्वैकत्वानित्यत्वमपि न ज्ञापनार्हम् । इत्थं हि तत्र वस्तुस्थितिः—यत्रावयवगतसंख्याविवक्षा तत्र द्विवचनादिकं भवति, यत्र च समुदायविवक्षा तत्रैकत्वं भवति, ईदृशामवस्थायां व्यवस्थितायां यत्र द्वन्द्वैकत्वं विधीयते तत्र समुदायविवक्षैवाद्रियते नियमेनेति प्रतीयते । शङ्खदुन्दुभिवीणाश्चेत्यत्र च यद्यपि तूर्याङ्गत्वेनैकत्वं प्राप्तं, तथा दुन्दुभिश्च वीणा चेति द्वन्द्वं कृत्वा दुन्दुभिवीणामिति समाहारं विधाय पश्चात् शङ्खौ च दुन्दुभिवीणं चेति विग्रहे न समाहारः, किन्तु सर्वेषामितरेतरयोग एवेति "प्राणितूर्याङ्गाणाम्" [ ३. १. १३७. ] इति सूत्रस्थलघुन्यासग्रन्थतोऽप्यवसीयते, तथाहि तत्र—"यदा मृदङ्गश्च शङ्खपटहं चेति क्रियते तदा समाहारो न भवति तूर्याङ्गसमुदायत्वात्" इत्युक्तम् । अयमाशयः—यथा स्वाङ्गसमुदायो न स्वाङ्गं तथा तूर्याङ्गसमुदायो न तूर्याङ्गम्, ततश्च 'शङ्ख-दुन्दुभि-वीणाः' इत्यादावपि तूर्याङ्गसमुदायत्वमाश्रित्येतरेतरयोगसिद्धौ न तदर्थं द्वन्द्वैकत्वस्यानित्यत्वमेषणीयम् । किञ्चात्र यज्ज्ञापकत्वेनोक्तं "प्राणितूर्याङ्गाणाम्" [ ३. १. १३७. ] इति सूत्रस्थं बहुवचनग्रहणं, तदपि न घटते, तस्यान्यार्थताया बृहद्वृत्तौ प्रदर्शितत्वात्, तथाहि—"प्राण्यङ्गानां, तूर्याङ्गेषु शङ्ख-पटहादीनामप्राणिजातित्वात् पूर्वेण सिद्धे व्यक्तिविवक्षायां विधानार्थम्, जातिविवक्षायां प्राण्यङ्गाप्राण्यङ्गादिसम्भेदे एकत्वनिराकरणार्थं च वचनम्। एतज्ज्ञापनार्थमेव च बहुवचनम्" इति । तथा चायमत्रत्यग्रन्थाशयः—व्यक्तिविवक्षायां—समासावयवगतभेदविवक्षायामप्राणिजातित्वाभावान्नात्रैकत्वं प्राप्तं तत्रैकत्वविधानार्थं प्राण्यङ्गेति सूत्रम्, यत्र प्राण्यङ्गाप्राण्यङ्गानां सह विवक्षा तत्र जातिविवक्षायामपि न द्वन्द्वैकत्वं, यथा 'पाणिपणवौ' इत्यादौ, इति ज्ञापनार्थमेवेह बहुवचननिर्देशोऽत्रेति । इत्थं च कथमत्रत्येन बहुवचनेन द्वन्द्वैकत्वस्यानित्यत्वं ज्ञापयितुं युक्तं, यावता तस्यान्यार्थसाधकताऽऽचार्येण स्वत एवोक्ता । न च बहुवचनस्यैकेनैव फलेन भाव्यं न फलान्तरेणेति नास्ति नियम इति तस्य द्वन्द्वैकत्वानित्यत्वज्ञापकत्वमपि स्वीक्रियते इति वाच्यम्, 'एतदर्थमेव' इत्येवकारेण फलान्तरस्य व्यवच्छेदात् तथा च तदनित्यत्वे न किमपि ज्ञापकम् । तथा च 'शङ्ख-पटह-वीणाः' इत्यादिप्रयोगाणां सति प्रामाणिकत्वे द्वयोर्द्वन्द्वं कृत्वा पुनरेकेन द्विवचनान्तेन बहुवचनान्तेन वा द्वन्द्व इति, तत्र पूर्वद्वन्द्वस्य तूर्याङ्गसमुदायतया प्रकृतसूत्राप्रवृत्त्या इतरेतरयोगद्वन्द्वे बहुवचनं सेत्स्यतीत्येषैव गतिराश्रयणीयेति युक्तं प्रतिभाति ॥ ४ ॥

एवं भ्वादेर्नामिनो दीर्घत्वस्यानित्यत्वमपि नावश्यकम्, 'कुर्दनः' इत्यादौ दीर्घपाठस्यापि बहुत्रोपलब्धेः । यच्च 'ऊर्ज्-स्फूर्ज्-ऊर्णु' धातूनां दीर्घपाठस्य दीर्घानित्यत्वज्ञापकत्वमुपन्यस्यते तदपि न सर्वसाधारणम् । पाणिनीयादौ तन्त्रे "भ्वादेर्नामिनः०" [ २. १. ६३. ] इति सूत्रस्थानीयेन "उपधायां च" [पा० सू० ८. २. ७८. ] इति सूत्रेण रेफ-वकारयोरुपान्त्यत्वे सत्येव दीर्घो विधीयते, तत्र 'ऊर्ज' इति धातुर्दीर्घः पठ्यते, तस्यायमाशयः—तस्य चौरादिकत्वेन ण्यन्तत्वाण्णिसहितस्यैव धातुत्वात् तत्र रेफस्योपान्त्यत्वाभाव इति, ऊर्णोतेस्तु स्वत एव रेफ उपान्त्यो नास्ति, स्फुर्ज्धातुश्च तत्र ह्रस्व एव पठ्यते इति तन्मते नात्र न्याये ज्ञापकसंभवः । न्यायैश्च साधारणैर्भवितव्यमिति नास्य न्यायस्याश्रयणमुचितम् । 'कूर्दनः' इति दीर्घसहित एव पाठः, न च दीर्घपाठे छन्दसि तत्कृतः कश्चन भेदो भविष्यति, संयोगपरत्वेन तस्य गुरुत्वस्य नैयत्यात् । इत्थं च विचारितेऽस्मिन् न्याये आद्योऽश एव प्रयोजनीयो नान्त्योंऽशा इति प्रतीयत इति ॥ ३९ ॥

## ॥ ४० ॥ *अनित्यो णिचुरादीनाम्* ॥ ४० ॥

**सि०—चुरादिभ्यो धातुभ्यः स्वार्थे णिज् विहितः, स च सर्वदा प्राप्तः, दृश्यन्ते च तद्विरहिता अपि तेषां तेषां धातूनां प्रयोगाः, तत्साधनायायं न्याय आश्रितः । तथा च चुरादिगणपठितानां णिच्, तेभ्यो विहित इति यावत्, अनित्यः—यथाशिष्टप्रयोगं क्वचित् क्वचिन्नापि भवतीत्यर्थः । अत्र ज्ञापकं तु चुरादिषु पठितस्य घुष ऋदित्त्वकरणम्, तद्धि "ऋदिच्छ्वि-स्तम्भू०" [ ३. ४. ६५. ] इत्यङर्थं कृतम्, तेनाघुषदित्यादिरूपसिद्धिः, यदि चुरादीनां णिज् नित्यः स्यात् तर्हि णयन्ते तु "णि-श्रि-द्रु-स्रु०" [ ३. ४. ५८. ] इति विशेषविहितेन ङेन बाधादङोऽवकाशाभावेन तदर्थं कृतमृदित्त्वं व्यर्थमेव स्यात्, व्यर्थीभूतं च तच्चुरादीनामनित्यण्यन्तत्वं ज्ञापयति । तथा च "चुरण् स्तेये" इत्यस्य चोरतीत्याद्यपि रूपं स्यात्, "चितुण् स्मृत्याम्" इत्यस्य चिन्ततीत्यादि, "छदण् संवरणे" इत्यस्य छदनम्, "तुलण् उन्माने" इत्यस्मात् "भिदादयः" [ ५. ३. १०८. ] इत्यङि तुला इत्यादिरूपं सिध्यति । अस्य चानित्यत्वस्य प्रयोगानुसारित्वान्न नैयत्येन सर्वेषां चुरादीनां द्विधा प्रयोगः, किन्तु केषाञ्चिदेव कार्यविशेषहेतुकः, तत्तत्कार्यसाधकानुबन्धादिसूचितो णिज्रहितः प्रयोगोऽनुमन्यते । अतश्च नियतविकल्पणिजन्तत्वार्थं युजादीनां "युजादेर्नवा" [ ३. ४. १८. ] सूत्रेण विकल्पो विहितः ॥ ४० ॥**

### *अनित्यो णिचुरादीनाम्* ॥ ४० ॥

त०—चुरादिषु तत्तदनुबन्धविशिष्टा अपि धातवः पठ्यन्ते येषामनुबन्धानां फलं ण्यन्तावस्थायां न लभ्यते, अतोऽस्ति णिरहिताप्यवस्थैतेषामित्यनुमीयते, यथा—'चितुण्' इत्युदित् पठ्यते, उदित्त्वस्य साक्षात् फलं नागमः, तच्च नकारसहितपाठेनापि साध्यम्, किन्तु नकारसहितपाठे आशिषि चित्यादिति रूपं स्यात् "नो व्यञ्जनस्यानुदितः" [ ४. २. ४५. ] इति

नलोपात्, उकारविशिष्टपाठे चोदित्त्वेन नलोपस्याऽप्रवृत्त्या चिन्त्यादिति रूपं स्यादिति विशेषः । स च यदि चुरादिभ्यो णिज् नित्यः स्यात् तर्हि व्यञ्जनान्तत्वाभावेन स्वत एव नलोपस्याप्रवृत्तौ 'उदित्'पाठो व्यर्थ एव स्यात् । एवम्–ऋदित्करणमपि वृत्त्युक्तदिशा प्रकृतार्थज्ञापकम् । न च ऋदित्करणसामर्थ्याण्णिजन्तादप्यङेवास्तु ङो मास्त्विति वाच्यम्, ङस्य विशेषविहितत्वात् । ननु ण्यन्तान्ङो विधीयते, ऋदितश्चाङ्, इत्युभयोरपि विशेषविहितत्वं समानमिति वाच्यम्, ण्यन्तादङोऽप्राप्तेः, अवयवेऽचरितार्था अनुबन्धाः समुदायस्योपकारका भवन्तीति न्यायस्यात्र विषयाभावाण्ण्यन्तस्य ऋदित्त्वाभावेन ततोऽङः प्राप्तेर्दुरुपपादत्वात्, नहि तेन न्यायेनान्यस्य धर्मोऽन्यस्मिन्नारोप्यते. ऋदित्त्वं घुषेर्धर्मो न तु ण्यन्तस्य घोषयतेः, ण्यन्तस्य शब्दान्तरतायाः सर्वैः स्वीकृतत्वात् । तथा च सामान्यविशेषभावमूलकोऽत्र नाङ्ङोर्बाध्यबाधकभावः, किन्तु ण्यन्तादङोऽप्राप्तिरेव व्याख्येयेति प्रतिभाति । सामान्यविशेषरीत्या वृत्तिगतं समाधानं तु प्राचामनुरोधेन । एतन्न्यायमाश्रित्य "युजादेर्न वा" [ ३. ४. १८. ] इति णिज्विकल्पवैयर्थ्यं तु नाशङ्कनीयम्, सूत्रेण युजादीनां सर्वविभक्तिषु नैयत्येन णिचो विकल्पस्य बोधनात् । अयं च न्यायः शिष्टप्रयोगेषु दृश्यमानणिजभावसाधुत्वानुमोदकः । न च तेन सूत्रेणास्य न्यायस्याध्रौव्यमपि बोधनीयम्, अनित्यत्वस्य स्वत एवाध्रौव्यरूपत्वेन तस्याध्रौव्यस्य बोधने फलाभावादिति ॥ ४० ॥

## *णिलोपोऽप्यनित्यः* ॥ ४१ ॥

**सि०**—अपिशब्दः पूर्वन्यायस्य णिविषयत्वेन यथा चुरादीनां णिज् नित्यं विहितोऽपि क्वचिन्न भवति तथा णिलोपोऽपि क्वचिन्न भवतीति पूर्वन्यायसाम्यं व्यञ्जयति । अयं च न्यायः "भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः" [ ५. ३. १०९. ] इति सूत्रस्याङोऽधिकारे पाठेन विज्ञायते, अन्यथा "णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः" [ ५. ३. १११. ] इत्यस्य बाधनार्थं "जागुरश्च" [ ५. ३. १०४. ] इत्यतः प्रारब्धे 'अ'प्रत्ययाधिकारे एव पठितव्यं स्यात् तत् सूत्रम् । अप्रत्ययादङ्प्रत्ययस्यैतावानेव विशेषो यद्-अप्रत्यये परतो गुणादिर्भवति, अङ्प्रत्यये परतो न भवति, किन्तु प्रकृतसूत्रे भीष्यादीनां सर्वेषां ण्यन्तानामेव ग्रहणात् ततोऽप्रत्ययविधाने णेर्लोपे कृते नाम्यभावाद् गुणादीनामप्राप्तौ विशेषाभावेन तत्रैव पाठस्यौचित्यम् । एवं च तत्रापठित्वा "षितोऽङ्" [ ५. ३. १०७. ] इत्यधिकारे पाठेनाप्रत्ययाऽङ्प्रत्यययोर्विशेषोऽत्र कश्चित् सम्भावित आचार्येणेति विज्ञायते, स च तदैव स्याद् यदि णिलोपो न भवेत् । तथा चाचा-



र्येण णिलोपस्यानित्यतां सम्भाव्यैवात्र प्रकरणे तत्पाठः कृतः । तथा चायं न्यायोऽपेक्षित आचार्यस्येति प्रतीयते, सति चास्मिन् न्याये चिन्ति-पूजिभ्यामप्रत्ययो यदि क्रियेत न्यायप्रवृत्त्या च णिलोपो न भवेत् तर्हि गुणेऽयादेशे च चिन्तया पूजया चेति प्रयोगः स्यात्, इष्यते तु चिन्तिया पूज्या चेति । ततश्चाङधिकारे पाठः सार्थकः, अङि हि सति गुणाभावे पूर्वत्र "संयोगात्" [ २. १. ५२. ] इतीयि कृते चिन्तियेति, परत्र "योऽनेक०" [ २. १. ५६. ] इति यत्वे कृते पूज्येति रूपं सिद्धम् । अन्यत्र च फलम्–

"न यमेन न जातवेदसा न कुबेरेण न वज्रपाणिना ।
मघवो युधि सुप्रकम्पयाः श्वसनेनैव वसुन्धरापते ! ॥"

इति पूर्वशिष्टप्रयोगे सुप्रकम्पया इति खल्प्रत्ययान्तप्रयोगे णेर्लोपाभावाद् गुणायादेशौ सिद्धौ । "भीषि-भूषि०" [ ५. ३. १०९. ] इति सूत्रे लघुन्यासेऽप्येवमेतन्न्यायज्ञापनमवलोक्यते, तथाहि–तत्रत्यो ग्रन्थः–"अप्रत्ययाधिकारेऽप्यस्मिन् कृते साध्यसिद्धिः स्यात्, परमङ्प्रत्ययाधिकारे यत् कृतं तण्णिलोपस्यानित्यताज्ञापनार्थम्, तेन चिन्तिया, पूजिया, सुप्रकथिया इत्यादि सिद्धम्" इति । अत्र चायं विशेषो दृश्यते यत् सर्वत्रेयादेश एव कृतो न तु यादेशः, तत्र मूलं मृग्यम् ॥ ४१ ॥

### *णिलोपोऽप्यनित्यः* ॥ ४१ ॥

**त०**—अत्रायं नव्यो विचारः–"अयं च न्यायो नान्यत्र दृश्यते । न चास्यावश्यकताऽपि दृढतरा प्रतीयते । 'सुप्रकम्पया' इति प्रयोगस्य प्रामाणिकत्वे सुप्रकम्पं यातीत्यर्थे बाहुलकाद् यातेर्विचि सति तत्सिद्धिरेषणीया । 'चिन्तिया पूज्या' इत्यादीनामिष्टत्वे मूलाभावः । "भीषि-भूषि" [ ५. ३. १०९. ] इति सूत्रस्याङधिकारे पाठश्चाकारप्रत्ययस्य प्रत्ययान्तत्वेनैव सिद्धेर्विशिष्यानस्य बाधनार्थत्वख्यापनायैव । किञ्च स्पृहयतेरकारप्रत्यये णिलोपे गुणे स्पर्हेति प्रयोगापत्तेस्तद्वारणार्थं ततोऽङ्प्रत्ययस्यैवौचित्येन ण्यन्तत्वसाम्यात् सर्वेभ्योऽङ्प्रत्यय एव विहितः । उभयत्र पाठे विशेषाभावेन विनिगमकाभावादत्रैव प्रकरणे वा पाठः कृत इत्यपि वक्तुं शक्यम्, इत्थं ज्ञापकाभावादपि नायं न्याय एष्टव्य इति प्रतिभाति" इति चिन्त्योऽयं विचारः सुधीभिः ॥ ४१ ॥

## *णिच्सन्नियोग एव चुरादीनामदन्तता* ॥ ४२ ॥

**सि०**—चुरादिषु केचनादन्ता धातवः पठ्यन्ते, चुरादयश्चानित्यणिजन्ता इति पूर्वन्यायेन निर्णीतम् । तथा च चुराद्यन्तर्गततया तेभ्योऽपि कदाचिण्णिजभावः संभाव्यते, सति चादन्तत्वे णिचोऽभावेऽनेकस्वरत्वनिबन्धनानि कार्याणि तेभ्यः

प्राप्नुवन्ति तानि च नेष्टानि, किन्तु जगाण जगणतुरित्यादिरूपेणैवानेकस्वरनिमित्तकाम्रहितान्येव रूपाणीष्टानीति तेषां णिच्सन्नियोगेनैवादन्तत्वमेषितव्यमिति प्रतिभाति, तदेवानेन न्यायेन साध्यते । अत्र च ज्ञापकम्—"ई च गणः" [ ४. १. ६७. ] इति सूत्रेणाकारस्यापि विधानार्थं तत्र चकारकरणम्, अन्यथा "ई वा गणः" इति सूत्रविधानेऽपि ईकाराभावपक्षे स्वभावत एवाकारस्यैव श्रवणं स्यात्, इति तद्विधानं व्यर्थमेव स्यात् । न चानेनेकाराभावपक्षे सन्वद्भावेनेत्वे दीर्घे च पुनरप्यजीगणदित्येव रूपं स्यादिति वाच्यम्, समानलोपित्वेन सन्वद्भावाप्राप्तेः । एवं च सिद्धे सत्यपि यदित्वाभावेऽत्वविधानार्थमाचार्यश्चकारं पठति तज्ज्ञापयत्येवमादीनां धातूनां णिजभावेऽदन्तत्वाभावम् । तथा च सति यदा णिजभावे प्रेरणार्थो णिग् विधीयते तदाऽद्यतन्यां रूपद्वयस्य सिद्ध्यर्थमकारविधानमर्थवद् भवति, अन्यथा तत्रेकारस्य विकल्पेन विधानेऽपि पक्षे सन्वद्भावेनाजीगणदित्येकमेव रूपं स्यात् । तण्णिजभावे णिगि सत्यजगणदिति रूपमित्यर्थमेवाकारविधानमिति । फलं च जगाणेत्यादावनेकस्वरत्वाभावादामोऽभाव इति । न चेत्वाभावेऽकारविधानं बाधित्वा सन्वद्भावादजीगणदित्येवरूपं कुतो नेति वाच्यम्, विशेषविहितत्वात् सन्वत्त्वनिमित्तकस्येत्वस्यानेन बाधात् । "पतण् गतौ वा" इत्यत्र वाशब्दो णिजदन्तत्वयोर्विकल्पार्थं इति धातुपारायणव्याख्यानेनास्यानियतत्वमपि लभ्यते, अन्यथा वाशब्दस्य णिज्विकल्पार्थत्वमात्रोक्तावप्यदन्तत्वविकल्पस्यैतन्न्यायबलेन लब्धत्वादुभयोर्विकल्पसिद्धावुभयार्थत्वव्याख्यानासङ्गत्यापत्तेः । तथा चोभयार्थत्वव्याख्यानेनैतन्न्यायानित्यत्वाशङ्कां दृश्यतीति ॥ ४२ ॥

### *णिच्सन्नियोग एव चुरादीनामदन्तता* ॥४२॥

**त०**—अयं न्यायः पूर्वन्यायोत्थः, पूर्वेण हि न्यायेन चुरादीनां णिचोऽनित्यत्वे निवेदित एव तदभावे 'जगणतुः' इत्यादिरूपसंभवः, तत्र च तेषामदन्तत्वेऽनेकस्वरत्वापत्त्याऽऽम् स्यादिति तद्वारणार्थमेवास्योत्थानात् । तत्र णिजोऽनित्यत्वं न सर्वत्र, किन्तु यत्र किमपि तादृशमनुबन्धादिनिमित्तमस्ति, यस्य णिजन्ते प्रयोजनं नास्ति, तस्यैव धातोरनित्यो णिच्, यत्र वा किमप्यन्यच्छिष्टप्रयोगादि विनिगमकं भवेत् तत्रैव । तथा च जगणतुरित्यादिप्रयोगा यदि प्रामाणिकास्तर्हि गणयतेर्णिजनित्योऽस्तु, तदभावे च तस्यादन्तत्वमपि नास्ति, "ई च गणः" [ ४. १. ६७. ] इति सूत्रे चकारेणातोऽपि विधानात्, सर्वेषामनित्यणिज्त्वे प्रमाणाभावात् । यद्यपि "ई च गणः" इत्यस्य स्थाने "ई वा गणः" इति करणे मात्रागौरवमस्तीति लाघवमपेक्ष्यैवेत्थं सूत्रं रचितमिति कथयितुं शक्यते तथापि "ई वा गणः" इति करणे प्रक्रियालाघवस्य स्पष्टत्वेन प्रक्रियालाघवस्य मात्रालाघवापेक्षया प्रबलत्वेन च तदनुसारेण' 'ई वा गणः" इत्येव विधेयं स्यादिति चकारः प्रकृतन्यायज्ञापको भवितुमर्हति । प्रकृतसूत्रे लघुन्यासेऽपि प्रकृतार्थसूचनं दृश्यते, तथाहि तत्र—"ननु "ई वा गणः" इत्येव क्रियतामदन्तत्वेन समानलोपित्वादेव पक्षेऽजगणदिति भविष्यति, सत्यम्—चुरादिभ्यो णिज् अनित्यो, णिच्सन्नियोगे एवैषामदन्तता, तदभावे तदभावादजगणदिति न सिध्येत् किन्त्वजीगणदित्येव" इति । तथा च णिच्सन्नियोगेनैवेषामदन्ततेति सिद्धवत्कृत्योक्तम् । वस्तुतस्तु—"गणेरदन्तत्वेन समानलोपित्वात् सन्वद्भावो दीर्घत्वं च न प्राप्नोतीति ईत्वविधिः" इति बृहद्वृत्तिग्रन्थेनाप्राप्तस्येत्वस्य विधानार्थत्वमेवास्य सूत्रस्येतीत्वेन नित्येनाकारश्रयणं नैव स्यादिति तदपि विहितमित्यायाति, न तु तस्य यत्रादन्तत्वाभावे ईत्वं स्वत एव लब्धं तत्रापि प्रवृत्तिरित्यदन्तत्वाभावे रूपद्वयस्य प्रयोगे किमपि दृढतरं प्रमाणं न दृश्यते । तथा च गणयतेर्णिजभावेऽद्यतन्यामजगणदित्यस्य सिद्ध्यर्थमकारविधानस्य चारितार्थ्यमिति न निरूपयितुं शक्यत इति प्रकृतन्यायज्ञापनेऽपि स्वांशे चारितार्थ्यं न प्रतीयत इति लाघवानुरोधेनैव चकारेणात्वविधानमिति प्रतीयते । एषामदन्तत्वं च णिनिमित्तकार्यस्य प्रकृतौ वारणार्थमेव कृतमिति णिजभावेऽदन्तत्वं स्वत एव न भविष्यतीति सर्वमनवद्यम् ॥ ४२ ॥

## *धातवोऽनेकार्थाः* ॥ ४३ ॥

**सि०**—धातूनामर्था धातुपाठादौ प्रदर्शिताः, तेभ्यश्चान्येष्वपि तेषां धातूनां प्रयोगा दृश्यन्ते, तत्र किं ते प्रयोगा औचित्यमावहन्ति न वेति सन्देहेऽनेन न्यायेन तेषामन्यत्रार्थेऽपि प्रयोगस्यौचित्यमन्वाख्यायते—धातवोऽनेकार्थाः, एकस्मिन्ननेकस्मिन् वाऽर्थे यत्रानुशिष्टा न तदर्थमात्रबोधकाः, अपि तु प्रयोगवशादन्यत्राप्यर्थे साधवो मन्तव्या इति तदर्थः । अत्र चार्थे ज्ञापकम्—"तक्षः स्वार्थे वा" [ ३. ४. ७७. ] इत्येवमादिसूत्रेष्वर्थविशेषनिबन्धनेन धातूनां कार्यविधानम् । यदि हि पठितेभ्योऽर्थेभ्योऽन्येऽर्था न स्युस्तर्हि 'स्वार्थे' इत्यादि तदर्थान्तरव्यावर्त्तकं पदं व्यर्थमेव स्यात् । सति चार्थान्तरे तत्र स्वविधेयस्य 'श्नु'प्रत्ययादेर्व्यावर्त्तनाय 'स्वार्थे' इत्यादि सार्थकम् । अनेकार्थत्वं यथा "विधत्" इति धातुर्विधानार्थे पठ्यते, व्यधार्थेऽपि च प्रयुज्यते, यथा—'वेधः, वेधनम्, शब्दवेधी'इत्यादौ । "एधि" इति धातुर्वृद्धौ पठ्यते, दीप्त्यर्थेऽपि च प्रयुज्यते, यथा—"पुरश्चक्रं तवैधते", प्राप्त्यर्थेऽप्यन्यत्र, यथा—"औपवस्त्रफलमेधते" । "शुच शोके" इति पठ्यते, शुचिरित्यादिशब्दे च तस्य पवित्रार्थत्वावगमः । एवं "हंग्"

धातुर्हरणे पठ्यते, भवति च तस्यानेकेष्वर्थेषु प्रयोगः, यथा-करणार्थे तस्य प्रयोगः "क्रियाव्यतिहारेऽगति०" [३. ३. २३.] इति सूत्रबृहद्वृत्तौ विहितः, तथा हि-"इतरचिकीर्षितायां क्रियायामितरेण हरणं करणं क्रियाव्यतिहारः" इति। एवं मन्यतेर्मननार्थस्य समार्थे प्रयोगः, मतीकृता क्षेत्रभूरित्यादौ समीकृतेत्यर्थात्। अयमपि न्यायो न सर्वत्र प्रवर्त्तत इति "वियः प्रजने" [४. २. १३.] इति सूत्रसामर्थ्याद् विज्ञायते, तथाहि-वियो गर्भग्रहणे आत्वं विकल्पेन विधीयते, तेन च प्रवापयति, प्रवाययति चेति रूपद्वयसिद्धिर्भवति, तच्च रूपद्वयमन्यथापि धातुद्वयोपष्टम्भेन सेत्स्यत्येव, प्रवापयतीति तावद् "वांक् गति-गन्धनयोः" इत्यस्य णिगि सति सिद्ध्यति, प्रवाययतीति च "वींक् प्रजनन-कान्त्यसन-खादनेषु च" इत्यस्य भविष्यति। ततश्च विय आत्वविधानेन रूपद्वयसाधनस्यायमेवार्थो यत्-वातेर्गत्याद्यर्थस्य प्रजनार्थ[गर्भग्रहणार्थ]वाचकत्वं दुर्लभमिति तदर्थकस्यैव वियो रूपद्वयं सिद्ध्येदिति। यदि चायं न्यायोऽप्रतिहतः स्यात् तर्हि वातेरपि प्रजनार्थकत्वे सिद्धे किमर्थमिदं सूत्रं क्रियेत, कृतं चैतत् सूत्रमस्य न्यायस्यानियतत्वं विज्ञापयति। फलं चैतस्य-उपसर्गस्य धात्वर्थबाधकत्वकथनस्य सूरिकृतस्य साफल्यम्, तथाहि-"धात्वर्थं बाधते कश्चित् [उपसर्गः]" इति हि तद्वचनम्, उदाहृतं च यथा-प्रतिष्ठते, प्रवसति, प्रस्मरतीत्यादि, यदि चायं न्यायोऽनित्यो न स्यात् तर्हि प्रकृते धातुपाठे पठ्यमानादर्थाद् भिन्नस्यापि प्रतीयमानस्यार्थस्य धात्वर्थत्वमेवेति कुत उपसर्गस्य धात्वर्थबाधकत्वकथनसङ्गतिः स्यात्। तथा हि सति 'आचष्टे, आलोकते' इत्यादौ यथोपसर्गस्य धात्वर्थानुवर्त्तकत्वमेव स्वीक्रियते, न बाधकत्वं तथैव 'प्रतिष्ठते' इत्यादावपि स्यादिति बाधकत्वं न स्यात्। ज्ञापिते चानित्यत्वेऽप्रामाणिकत्वे वा तिष्ठत्यादेः गतिनिवृत्त्यादिरेवार्थः स्वार्थः, ततश्च 'प्रतिष्ठते'इत्यादौ प्रतीयमानो गत्यर्थ उपसर्गबललभ्य एवेत्युपसर्गस्य धात्वर्थबाधकत्वं साधु घटत इति ॥ ४३ ॥

### *धातवोऽनेकार्थाः* ॥ ४३ ॥

त० — उक्तो न्यायार्थो ज्ञापकमुदाहरणानि चोक्तानि। वस्तुतस्तु नायं न्यायो ज्ञापनसाध्यः। धातूनामुक्तेभ्योऽर्थेभ्योऽन्यत्रापि शक्तिरिति न्यायतात्पर्यम्, तथा च धातूनामन्यत्राऽर्थेऽपि शक्तिरिति धातुनिष्ठशक्तिग्राहकोऽयं न्याय इति फलति। शक्तिग्रहश्च न ज्ञापनेन भवति,

"शक्तिग्रहं व्याकरणोपमान-कोशाऽऽप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति, सान्निध्यतः सिद्धपदस्य वृद्धाः॥"

इत्युक्तेषु शक्तिग्राहकेष्वनुमानरूपस्य ज्ञापनस्यानाख्यानात्। तथा च स्वभावसिद्धमेव धातूनामनेकार्थत्वम्। न चेदं नियतमपि स्वभावत एव, केचिदनेकमर्थं बोधयन्ति केचिन्नेत्यत्रान्यस्य विनिगमकस्य वक्तुमशक्यत्वात्। अनेन च न्यायेन धातूनां यत्र क्वचनानेकार्थकथनमनूद्यत एव केवलम्। स्वशास्त्रव्यवहारश्च प्रायो धातुपाठादिषु निर्दिष्टेष्वेवार्थेषु यद्यपि प्राप्तस्तथापि यत्रान्यार्थे विशिष्य किमपि कार्यं व्यावर्त्तनीयं तत्रार्थविशेषग्रहणमपि धातूनां स्वभावसिद्धमनेकार्थावगमकत्वं द्रढयतीति "तक्षः स्वार्थे वा" [३. ४. ७७.] इत्यादीनां न वैयर्थ्यम्, एवं च स्वीक्रियेत चेत् तर्हि "वियः प्रजने" [४. २. १३.] इत्यादीनामपि सामञ्जस्यं स्वत एवेति न तैर्न्यायास्थिरत्वं ज्ञापनीयम्। अनेन न्यायेन विशेषेण सर्वेषामनेकार्थ[सर्वार्थ]वाचकत्वे समाश्रीयमाण एव वातेर्वियश्च क्रमेण प्रवापयति प्रवाययतीति रूपयोः सिद्धिमाश्रित्यैव हि तद्वैयर्थ्यं शङ्क्यते, किन्तु पूर्वोक्तरीत्याऽभिधानस्वाभाव्ये समाश्रिते न सर्वेषामपि विशेषेण सर्वार्थवाचकत्वमिति प्रजनार्थस्य विय एव रूपद्वयसाधनाय शास्त्रेणोपायः समालम्बनीय एवेति तस्य सार्थक्यं स्पष्टमेव। किञ्चैवं "धात्वर्थं बाधते कश्चिदुपसर्गः" इत्यादि वचनमपि सम्यगेव। योऽर्थो यस्माद्धातोर्नियमेन प्रतीयते स एव तदर्थ इत्युपसर्गवशादर्थान्तरभाने तस्योपसर्गस्य धात्वर्थबाधकत्वं स्पष्टमेवेति प्रतीयते। अत एव पातञ्जले महाभाष्ये-"अनेकार्था अपि धातवो भवन्ति" इत्युक्तम्, अत्राधिना सर्वेषां धातूनामनेकार्थत्वं भवत्येवेत्याग्रहो नास्थेय इति स्फोरितमेवेत्यलमधिकेन ॥ ४३ ॥

### *गत्यर्था ज्ञानार्थाः* ॥ ४४ ॥

सि०—धातुप्रसङ्गाद् धातुविषयोऽयं न्यायोऽपि चर्चितः, 'धातवः' इति च पूर्वसूत्रात् सम्बद्धम्, तथा च ये गत्यर्था धातवस्ते ज्ञानार्था अपि 'भवन्ति' इति शेषः। अत्र च ज्ञापकं-"णावज्ञाने गमुः" [४. ४. २४.] इति सूत्रे 'अज्ञाने' इतीणधातोर्विशेषणम्। गत्यर्थस्य तस्य ज्ञानार्थत्वासंभवात् तत्र निवृत्त्यर्थमज्ञाने इति विशेषणं व्यर्थमेव स्यात्, ज्ञापिते त्वस्मिन् प्रत्याययतीत्यादाविणो ज्ञानार्थत्वस्य दृष्टतया तत्र गम्यादेशाप्रवृत्त्यर्थमज्ञाने इति विशेषणं स्वांशे चरितार्थम्, फलं तु गमयति शब्दोऽर्थमित्यादौ ज्ञापयतीत्यर्थप्रतीतिः। अयं च लक्ष्यानुसारी, तेन क्वचिन्नापि प्रवर्त्तते। अस्यास्थेयत्वं च "गतिबोधाहारार्थ०" [२. २. ५.] इति सूत्रे बोधग्रहणेन विज्ञायते, तत्र हि गतेः प्राक् बोधग्रहणेन सर्वत्र गत्यर्थस्य ज्ञानार्थत्वं न नियतमिति प्रतीयते। तथा च लक्ष्यानुसाराद् व्यवस्थेयम् ॥ ४४ ॥

### *गत्यर्था ज्ञानार्थाः* ॥ ४४ ॥

त०—अत्रापि पूर्वन्यायवदेव विचारोऽवगन्तव्यः। गत्यर्थानां ज्ञानार्थत्वमपि गत्यर्थपुरस्कारेणैव। उपसर्गवशाद् प्रेरणा-

र्थकप्रत्ययवशाच्च गत्यर्थेभ्यो ज्ञानार्थावगतिः । तत्रोपसर्गस्य तु सामर्थ्यमचिन्त्यमेवेति सर्वधातुविषये स्वीकृतमेव ।

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहारा-ऽऽहार-संहार-विहार-परिहारवत् ॥"

इति प्राचीनोक्त्या । तथा चोपसर्गवशाद् गत्यर्थत्वमवगच्छतीत्यादिप्रयोगे दृश्यमानं न प्रकृतन्यायविषयः, गमयति शब्दोऽर्थमित्यादौ प्रेरणार्थकप्रत्ययवशाज्ज्ञानार्थत्वं प्रतीयमानं च गत्यर्थपुरस्कारेणैव, अर्थो ज्ञानविषयतां गच्छति, तं शब्दः प्रेरयतीत्यर्थप्रतीतिसत्त्वात् । ज्ञानविषयतारूपस्य कर्मणश्चातिप्रसिद्धत्वान्न प्रयोगो भवतीति पूर्वन्यायवदयमपि न्यायो न ज्ञापनलभ्यः, किन्तु शब्दशक्तिस्वभावलब्ध एव । इत्थं च "णावज्ञाने गमुः" [ ४. ४. २४. ] इत्यादावुपसर्गवशात् प्रेरणार्थकप्रत्ययवशाच्च यत्र ज्ञानार्थप्रतीतिस्तत्र गम्वादेशवारणार्थमज्ञाने इति विशेषणं सार्थकमेव । सर्वत्र गत्यर्थस्य बोधार्थत्वविरहाच्च "गतिबोधाऽऽहारार्थ०" [ २. २. ५. ] इत्यत्र बोधग्रहणमप्यञ्जसैव संगच्छते । तत्र यदि गत्यर्थग्रहणमेव क्रियते तर्हि 'बोधयति शिष्यं धर्मम्' इत्यादौ कर्मत्वं न स्यात्, बुद्ध्यतेर्गत्यर्थत्वाभावात्; यदि बोधार्थग्रहणमेव क्रियते तर्हि 'गमयति चैत्रं ग्रामम्' इत्यत्र बोधार्थत्वाभावात् कर्मत्वं न स्यादिति तद्वैयर्थ्यस्य प्रतिपादयितुमशक्यत्वेन प्रकृतन्यायानित्यत्वज्ञापनार्थत्वमिति वृत्तिग्रन्थे लेखः प्राचामनुरोधेनैव । गत्यर्थानां ज्ञानार्थत्वज्ञापनस्य कथमपि सम्भवेऽपि गति-ज्ञानयोर्भिन्नतया तयोरुपादानस्योक्तरीत्या परमावश्यकत्वादिति कृतं विस्तरेणेति ॥ ४४ ॥

## *नाम्नां व्युत्पत्तिरव्यवस्थिता* ॥ ४५ ॥

**सि०—अर्थवन्ति शब्दस्वरूपाणि धातु-विभक्ति-वाक्यभिन्नानि नामानि कथ्यन्ते, तानि चार्थबोधनायान्यथान्यथा व्युत्पाद्यन्ते, यथा यथा ततोऽर्थः प्रतीयते तथा तथा तेषु प्रकृतिप्रत्ययादिकल्पना क्रियते, सेयं तेषां व्युत्पत्तेरव्यवस्था। यथा वडवा-सृगाल-मयूरादयः शब्दा द्विधा व्युत्पाद्यन्ते, पृषोदरादित्वादुणादित्वाच्च । तत्र पृषोदरादौ तावत् वडवाशब्दे 'अश्वस्याम्बा' इति विग्रहः, सृगाले 'असृगालेढि' इति विग्रहः, मयूरे 'मह्यां रौति' इति विग्रहः । एतेषामेवोणादित्वे तु "वड आग्रहणे" इति सौत्राद् धातोः "वडि-वटिः" [ उणा० ५१५. ] इत्यवप्रत्यये स्त्रियां 'वडवा' इति, सृधातोः "सर्तेर्गोऽन्तश्च" [ उणा० ४७८. ] इति किलाले गागमे च—सृगाल इति। मीनातेः "मी-मसि०" [ उणा० ४२७. ] इत्यूरे गुणेऽयादेशे—मयूर इति । एवं सूर्यशब्दोऽपि कृत्प्रत्ययेन तद्धितप्रत्ययेन च व्युत्पादितः, तत्र कृति तावत् "कुप्य-भिद्योध्य-सिध्य-तिष्य-पुष्य-युग्या-ऽऽज्य-सूर्यं नाम्नि" [ ५. १. ३९. ] इत्यनेन सृधातोः क्यपि निपातितः, तद्धिते च सूरशब्दस्य मर्तादिगणे पाठात् "मर्तादिभ्यो यः" [ ७. २. १५९. ] इति स्वार्थिको यः प्रत्ययो विहित इति ततस्तद्धितान्तस्य तस्य सिद्धिः, एवमनेकधा तत्तन्नामव्युत्पादनेनैव चायमर्थः प्रतीयते यद्—एतेषां व्युत्पत्तिरव्यवस्थितेति। एतच्च "अधातु-विभक्ति-वाक्यमर्थवन्नाम" [ १. १. २८. ] इति सूत्रेण येषां रूढशब्दानां नामसंज्ञा क्रियते तद्विषये व्युत्पत्तेरव्यवस्थानं वेदितव्यम्। ये च कृदादिप्रत्ययैः धात्वादिभ्यो विहितैः समासादिना च व्युत्पाद्यन्ते तेषां व्युत्पत्तिश्च व्यवस्थितैवेति स्वीक्रियते। तथा च न तत्तत्प्रकरणप्रणनयनप्रयत्नानर्थक्यमिति ॥ ४५ ॥**

## *नाम्नां व्युत्पत्तिरव्यवस्थिता* ॥ ४५ ॥

**त०**—अयमपि न्यायः स्वाभाविक एव । [ शब्दस्य नित्यतापक्षमाश्रित्याह—] शब्दा हि नित्या न व्याकरणेन निष्पाद्यन्ते, केवलं तेषामर्थावबोधाय शास्त्रकृद्भिः प्रकृति-प्रत्ययादिविभागः कल्प्यते, तत्र यस्माच्छब्दाद् यादृशोऽर्थो लोके प्रतीयते तदनुकूलैव कल्पना क्रियते । तथा च यस्माच्छब्दाद् विभिन्नप्रकारेणार्थोपस्थितिस्तस्य विभिन्नप्रकारेण व्युत्पत्तिः कल्प्यते, तदुक्तं हरिणा—

"उपायाः शिक्षमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥" इति,

उपायाः—प्रकृति-प्रत्ययादिविभागकल्पनास्तत्तदर्थविभागकल्पनाश्च, बालानाम्—अव्युत्पन्नमतीनां प्रतिपत्तॄणाम्, उपलालनाः—संक्षेपेणार्थबोधनार्थमृजुविनोदनव्यापाराः । तत्रार्थान्तरन्यासेन परिपोषमाह—असत्ये वर्त्मनि स्थित्वा—पूर्वं रेखागवयन्यायेनासत्यरूपमेवाकारादिकं गृहीत्वा, ततः—तदुपायेन, सत्यं—वास्तविकमखण्डं शब्दकारं, समीहते—अधिगच्छतीति तदर्थः । न केवलमेकस्मिन्नेव व्याकरणेऽव्युत्पन्नानां नाम्नां व्युत्पत्तिरव्यवस्थितेति, व्याकरणान्तरेषु तादृशानां शब्दानां भिन्ना भिन्ना व्युत्पत्तिरवलोक्यते, तथाहि—पाणिनीये वडवाशब्दस्य कृत्तद्धितभेदेन व्युत्पत्तिद्वैविध्यं दृश्यते, तथाहि तद्धिते—बलं-सामर्थ्यमतिशयितमस्या इत्यर्थे "अन्येभ्योऽपि दृश्यते" इति "केशाद्वोऽन्यतरस्याम्" [ पा० सू० ५. १. १०९. ] इति सूत्रस्थेन वार्तिकेन 'व'-प्रत्यये आपि डलयोरैक्यात् साध्यते, कृदन्ते च बलं वातीत्यर्थे "आतोऽनुपसर्गे०" [ पा० सू० ३. २. ३. ] इति के, बलं वजतीत्यर्थे "अन्येष्वपि दृश्यते [ पा० सू० ३. २. १०१. ] इति सूत्रस्थेन "अन्येभ्योऽपि" इति वार्तिकेन डे च ड-लयोर्ब-वयोश्चैक्येन साध्यते । सृगालशब्दश्च 'सृजति मायाम्' इत्यर्थे विसर्गार्थकसृज्धातोर्बाहुलकात् कालन्प्रत्ययेन न्यङ्क्वा-

दित्वात् कवर्गादेशेन, असृग् आलातीत्यर्थे वा के पृषोदरादित्वादकारलोपेन च साध्यते; अयं च शब्दस्तालव्यादिरपि दृश्यते, तत्र च शृङ्गं न लातीति विग्रहं कृत्वा पृषोदरादित्वात् साध्यते । मयूरशब्दश्च "मय गतौ" इत्यस्मात् खर्जादित्वात् [ उणा० पा० ४. सूत्र-९० ] ऊरे, मीनातेरूरन्-प्रत्यये, मह्यां रौतीति विग्रहे पृषोदरादित्वाद् वा साध्यते । एवं चैषां व्युत्पत्तिरव्यवस्थितेति सर्वसम्मतम् । येषु च प्रकृति-प्रत्यययोगार्थ एव प्रवृत्तिनिमित्तत्वेन प्रतीयते तेषां च व्युत्पत्तिर्व्यवस्थितैवेति व्युत्पत्त्यव्युत्पत्तिपक्षद्वयमपि दृश्यते नामसु । तथा च रूढेष्वव्युत्पत्तिपक्षो यौगिकेषु व्युत्पत्तिपक्ष इति ॥ ४५ ॥

## *उणादयोऽव्युत्पन्नानि नामानि* ॥४६॥

सि०—उणादय इत्यनेन उणादिप्रत्ययान्ता गृह्यन्ते, प्रत्ययग्रहणे "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति न्यायात् प्रकृत्यादेः समुदायस्य ग्रहणात्, तथा चोणादिप्रत्ययान्तानि कारु-वायु-पाय्वादीनि नामानीहोणादिशब्देन गृह्यन्ते, तानि यद्यपि "उणादयः०" [ ५. २. ९३. ] इति सूत्रसूचितेन "कृवापाजि०" [ उणा० १ ] इत्यादिसूत्रसमूहेन व्युत्पादितानि, तथापि तद्व्युत्पादनं वर्णानुपूर्वीनियमनाय प्रकृति-प्रत्ययविभागपरिदर्शनार्थमेव, न तु कर्त्रैत्यादिक्रियाप्रवृत्तिनिमित्तशब्दवदन्वर्थताप्रदर्शनार्थम् । वस्तुतस्तु तान्यव्युत्पन्नान्येव रूढिशब्दत्वेन रूढेश्च योगापहारिणीत्वाद् योगार्थप्रतीत्यभावाद् व्युत्पत्तेरप्रयोजकत्वात् । अत्र च ज्ञापकम्—"अतः कृ-कमि०" [ २. ३. ५. ] इति सूत्रे कमेः पृथक् कंसग्रहणम्, तथाहि—कमिग्रहणेनैव कंसग्रहणं सेत्स्यति, कमेः "मा-वा-वधमि०" [ उणा० ५६४. ] इति सप्रत्यये कंसशब्दः साध्यत इति तत्रापि कमेः सत्त्वेन तद्ग्रहणेनैव [ कमिग्रहणेनैव ] कंसग्रहणं स्पष्टमेव । नहि केवलयोः कृ-कम्योः क्वचित्प्रयोगोऽस्ति *न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः*इति न्यायात्, तथा च प्रत्ययान्तयोरेव तयोर्ग्रहणमिष्टमिति कंसशब्दोऽपि प्रत्ययान्तः कमिरेव । एवं च यथा 'पयस्कामः' इत्यत्र कमिग्रहणेन सत्वं भवति तथा 'अयस्कंसः' इत्यत्रापि सत्वं सिद्धमेवेति पृथक् कंसग्रहणं प्रकृतन्यायसत्तां सूचयति । तथा च सति प्रकृतन्याये कंसशब्दस्य कमिप्रकृतिकत्वानभ्युपगमात् [ तत्र प्रकृतिप्रत्ययविभागानभ्युपगमात् ] तद्ग्रहणार्थं पृथक् तस्य ग्रहणमावश्यकम् । यद्ययं न्यायो न स्यात् तदा तु तदभावेऽपि सेत्स्यत्येवेति प्रकृतन्यायं विना तत्सार्थक्यं दुरुपपादमिति । फलं चास्य न्यायस्य वींक्धातोः "पटि-वीभ्याम्" [ उणा० ५७९. ] इत्यौणादिके डिसे-'विसम्' इत्यत्रास्याव्युत्पन्नत्वात् सस्य कृतत्वाभावेन षत्वं न भवतीति । अयं च न्यायो न सार्वत्रिकः, एतच्च "तृ-स्वसृ०" [ १. ४. ३८. ] इति सूत्रे तृग्रहणेनैव सिद्धे पुनर्नप्त्रादीमौणादिकानां ग्रहणस्य नियमार्थत्वकथनेनावसीयते, तथाहि—तत्र सूत्रे बृहद्वृत्तिः—"व्युत्पत्तिपक्षे तु तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थम्, तेनान्येषामौणादिकानां न भवति—पितरौ, भ्रातरौ, मातरौ, जामातरौ" इति । तथा च तृग्रहणेनैव नप्त्रादीनामपि ग्रहणं सम्भाव्यैव नियमार्थत्वकथनं संगच्छते, यदि चायं न्यायो नित्यः स्यात् तर्हि नप्त्रादीनामव्युत्पन्नत्वेन तत्र प्रकृति-प्रत्ययविभागाभावात् तेषां तृग्रहणेन ग्रहणमसंभवमिति नियमार्थत्वकथनमसंगतं स्यात्, विध्यर्थत्वस्यैव सम्भवात् । तेन नियमेन च 'पितरौ' इत्यादावार् नेति । व्युत्पत्तिपक्षाश्रयणस्य फलमन्यत्र, यथा—वपेरौणादिके "रुघर्सि०" [ उणा० ९९७. ] इत्युसि—'वपुषा' इत्यादौ सस्य कृतत्वात् षत्वं भवति । न केवलमुणादिष्वेव, अन्यत्रापि क्वचित् प्रकृति-प्रत्ययविभागो न स्वीक्रियते, यथा निपातनस्थले । तथा च 'उणादयः' इत्युपलक्षणमन्येषामपि, तेन "संख्या-डतेश्चाशत्तिष्टेः कः" [ ६. ४. १३०. ] इति सूत्रे ष्ट्यन्तवर्जनं सार्थकम्, तद्धि षष्टिशब्दस्य वर्जनार्थं क्रियते, षष्टिशब्दश्च षड् दशतो मानमस्येति विग्रहे "विंशत्यादयः" [ ६. ४. १७३. ] इति सूत्रेण तिप्रत्ययेन निपातितः, इत्थं च तस्यापि तिप्रत्ययान्तत्वमिति तिप्रत्ययान्तवर्जनेनैव तद्वर्जने सिद्धे ष्ट्यन्तवर्जनं वृथैव स्यादिति कृतेन ष्ट्यन्तवर्जनेन तत्राप्यव्युत्पत्तिपक्षः स्वीकृत इति प्रतिभाति । एवं च लक्ष्यानुरोधादेवानयोः पक्षयोर्व्यवस्थेति स्पष्टं विवरणे ॥ ४६ ॥

## *उणादयोऽव्युत्पन्नानि नामानि* ॥ ४६ ॥

त०—पूर्वन्यायेन नाम्नां व्युत्पत्तिरव्यवस्थितेति कथितमिति तत्प्रसङ्गादयं न्यायोऽपि विचारपथमायातः । यद्यपि 'उणादयः' इत्यस्य 'उणादिप्रत्ययान्ताः' इत्येवार्थ इति वृत्तावुक्तं, तथा च उणादिप्रत्ययान्ताः कारु-वायु-प्रभृतयः शब्दाः, अव्युत्पन्नाः—प्रकृतिप्रत्ययविभागशून्या इति कथनं परस्परविरुद्धमिव प्रतिभाति, यदि प्रकृति-प्रत्ययविभागशून्यत्वं तर्हि कथमुणादित्वम् [ उणादिप्रत्ययान्तत्वम् ], अथ चोणादिप्रत्ययान्तत्वं तर्हि कथमव्युत्पन्नत्वमिति शङ्का समुदेति, तथापि शास्त्रकृद्भिः शिष्यबुद्धिवैशद्याय वर्णानुपूर्वी निर्ज्ञानार्थमुणादिप्रत्ययान्तत्वेन कल्पिता अपि न वस्तुतः प्रकृति-प्रत्ययादिविभागवन्त इति न्यायार्थः । उणादीनाम् "उणादयः०" [ ५. २. ९३. ] इति सूत्रेण बहुलतया शास्त्रकृद्भिर्निर्दिष्टत्वान्न तेषां व्युत्पत्तेर्नैयत्यमिति लक्ष्यते, तद्विशेषाणां प्रधानप्रक्रियायामनिर्देशात् । दृश्यते लक्ष्यानुसारमुभयोः पक्षयोः परिग्रहणं तेषु । "तृ-स्वसृ०" [ १. ४. ३८. ] इति सूत्रस्थ-

बृहद्वृत्तिग्रन्थेनाप्युभयोः पक्षयोः सम्मतत्वमित्यायाति, तथाहि–"तृशब्दस्यार्थवतो ग्रहणेन प्रत्ययग्रहणान्नप्त्रादीनामव्युत्पन्नानां संज्ञाशब्दानां तृशब्दस्य ग्रहणेन ग्रहणं न भवतीति तेषां पृथगुपादानम्, इदमेव च ज्ञापकम् *अर्थवद्ग्रहणे नानर्थकस्य ग्रहणं भवति* इति। व्युत्पत्तिपक्षे तु तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थम्" इत्यादि। बृहन्न्यासे चेत्थं प्रपञ्चितमिदम्–"अथ नप्त्रादयः किं पृथगुपादीयन्ते? तत्र 'तृ' इत्येव सिद्धम्, अत आह–तृशब्दस्येत्यादि। अयमर्थः-तृशब्दस्य ऋकारान्तत्वाव्यभिचारात् पुनर्ऋकार इति यद् विशेषणं तद् ऋकारान्त एव य इति स्वरूपप्रतिपत्त्यर्थम्, यस्त्वधिकारापन्नः स स्थानिप्रत्यासत्त्याऽर्थः, अन्यथाऽनेकवर्णत्वात् सर्वस्य स्यात्, व्याकरणे च शब्दरूपवदर्थोऽप्याश्रीयते, अन्यथा च नप्त्रादिग्रहणमनर्थकं स्यात्। तेनार्थवतो ग्रहणे सम्भवति अनर्थकस्य ग्रहणं न भवति, स चार्थवान् प्रत्यय एवेति; यत्र त्वर्थो न संभवति तत्र वचनप्रामाण्यादनर्थकस्यापि ग्रहणं भवति, अत एव नप्त्रादीनामव्युत्पन्नानां प्रत्यस्तमितावयवार्थानां संज्ञाशब्दानां सम्बन्धिनस्तृशब्दस्य तृग्रहणेनानर्थकत्वाद् ग्रहणं न भवतीति तेषां पृथगुपादानं क्रियते। ननु नप्त्रादयोऽपि व्युत्पाद्यन्ते तत् कथमुच्यते–अव्युत्पन्नानामिति?, अत्रोच्यते–उणादिषु दर्शनद्वयं-केचिन्मन्यन्ते 'उणादयोऽव्युत्पन्नानि नामानि' इति, अपरे–'व्युत्पन्नानि' इति। लक्ष्यसिद्ध्यर्थं चेह क्वचित् किञ्चिद् दर्शनमाश्रीयते, तत्र यदा व्युत्पत्तिपक्ष आश्रीयते तदा नियमार्थं नप्त्रादिग्रहणम्–औणादिकानां संज्ञाशब्दानां नप्त्रादीनामेव न पित्रादीनामित्याह–व्युत्पत्तिपक्षे त्विति" इति। एतेन सन्दर्भेण लक्ष्यानुसारादेवेमौ पक्षौ व्यवस्थितौ पूर्वाचार्यैराश्रितावित्यायाति। तथा च नप्त्रादिग्रहणस्य नियमार्थत्वकथनं प्रकृतन्यायानित्यत्वज्ञापकमिति वृत्तौ यदुक्तं तत् पक्षान्तरस्यापि सत्त्वमस्तीत्येतावन्मात्राशयकमित्यवधेयम्। पाणिनेस्त्वव्युत्पत्तिपक्ष एवाभिमत इति "आयनेयीनीयियः फ-ढ-ख-छ-घां प्रत्ययादीनाम्" [ पा० सू० ७. १. २. ] इति सूत्रस्थमहाभाष्यादुपलभ्यते। अनेन सूत्रेण प्रत्ययादिभूतानां फादिवर्णानाम् 'आयन्' आदयो विधीयन्ते। तत्रेदं शङ्कितम्–उणादिषु ये ख-ढादयो वर्णाः प्रत्ययादौ श्रूयन्ते तेषामपि प्रकृतसूत्रनिर्दिष्टा आदेशाः स्युः, यथा शङ्खः षण्ढः।" इत्यादि। तत्रान्यानि समाधानान्युक्त्वोक्तम्–"प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम्" [ वार्तिकम् ], प्रातिपादिकविज्ञानाच्च भगवतः पाणिनेराचार्यस्य सिद्धम्—उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥" इति। तत्रोक्तं नागेशेनोद्योते—"अत्र पाणिनेरित्युक्त्या 'सर्पिषा' 'यजुषा' इत्यादिकतिपयातिरिक्तोणादिषु पाणिनेरव्युत्पत्तिपक्ष एवाऽभिप्रेत इति दर्शयति। वस्तुतः 'सर्पिषा' इत्यादौ षत्वमपि बहुलग्रहणादिति सर्वथाऽव्युत्पत्तिरेवैतेष्विति बोध्यम्" इति। अयमाशयः–'वपुषा, सर्पिषा, यजुषा' इत्यादिशब्देषूणादिप्रत्ययस्थसकारस्य कृतत्वेन षत्वसिद्ध्यर्थमेवोणादिषु व्युत्पत्तिपक्ष आश्रीयते, तच्च षत्वम् "उणादयः०" [ ५. २. ९३. ] इति सूत्रे बहुलग्रहणानुवृत्त्या बहुलग्रहणस्य च 'बहूनि कार्याणि लाति' इति व्युत्पत्त्याऽलाक्षणिकस्य कार्यस्यापि साधकत्वमिति तत्सम्बन्धिसकारस्य षत्वार्थं कृतत्वं साधयितुं शक्यत इति तेषु [ उणादिषु ] अव्युत्पत्तिपक्ष एव पाणिनेरभिमत इत्यास्थेयमिति। प्रपञ्चितं चैतन्नागेशेनैव शब्देन्दुशेखरे इति विस्तरभयान्न प्रदर्श्यते इति ॥ ४६ ॥

## *शुद्धधातूनामकृत्रिमं रूपम्* ॥ ४७ ॥

**सि०**—शुद्धाश्च ते धातवस्तेषां, रूपम्–आनुपूर्वी, अकृत्रिमम्–न केनचिदपि शास्त्रेण निष्पाद्यतेऽपि तु स्वाभाविकमेव। 'शुद्धा' इत्यनेन धातुपाठे यथा पठितास्तथाभूता न तु काञ्चन विकृतिं प्राप्ता इति भावः। धातवो हि शब्दबीजभूततया स्वकीयमकृत्रिममेव स्वरूपं दधति, न तु तेषां स्वरूपं केनापि शास्त्रेण क्रियते इति भावः। विभक्त्यादीनां रूपं शास्त्रेण यद्यपि न निष्पाद्यते किन्तु ता अपि शास्त्रकृद्भिरुच्चारिता इति शुद्धा एव, तथापि तेषु तेष्वर्थविशेषेषु तासां विधीयमानत्वेन क्रियमाणत्वमिति स्वीक्रियते। यथासम्प्रदायमनुशासनस्य भेदात् स्वसम्प्रदाये तेषां कृतत्वमिष्यते। अयं च न्याय औचित्यप्राप्त एवेति नात्र ज्ञापकापेक्षा। विभक्तिषु कृतत्वस्वीकारफलं च 'वृक्षेषु' इत्यादौ सुपः "सप्तम्यधिकरणे" [ २. २. ९५. ] इति सूत्रेण विधीयमानत्वात् कृतत्वमाश्रित्य सस्य "नाम्यन्तःस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि" [ २. ३. १५. ] इति षत्वं सिद्धम्। एवं धातोरपि धातुपाठसूत्रेणोच्चार्य कृतत्वात् षत्वं प्राप्तम्, यथा–'मुसच्' धातोरौणादिके कित्यले मुसलमित्यत्र, तस्य निषेधार्थमेवायं न्यायः स्वीक्रियते। शुद्धेति विशेषणात् "षन भक्तौ" इत्यस्य "षः सोऽष्ट्यै०" [ २. ३. ९८. ] इति से कृते 'सन्' इति रूपस्य कृत्रिमत्वात् णौ ङे 'असीषणत्' इत्यादौ "नाम्यन्तःस्था०" [ २. ३. १५. ] इति षत्वं भवत्येव। तत्र षस्य स्थाने सकारस्य विहितत्वेन कृतत्वात् शुद्धत्वाभावात्। अयं च न्यायः स्वभावप्राप्ताकृत्रिमत्वानुवादक इति नास्यानित्यता ॥ ४७ ॥

### *शुद्धधातूनामकृत्रिमं रूपम्* ॥ ४७ ॥

**त०**—प्रत्ययादिवद् धातूनामपि धातुपाठपठितसूत्रेण विधानात् कृतत्वं स्यादिति शङ्कापनोदायैव धातूनामकृत्रिमं रूपमिति सूचितमनेन न्यायेन। वस्तुतस्तु कृतत्वस्य किञ्चिदनूद्य विधीयमानत्वरूपत्वाद् धातुषु तथाभूतत्वाभावात् कृतत्वशङ्कैव नास्तीति नास्य न्यायस्यावश्यकतेति युक्तं प्रतिभाति। तथा च

स्वभावसिद्धमेव धातूनामकृत्रिमं रूपमिति न्यायेनानेनानूद्यते । न चैवं सामान्यतः सर्वेषामेव धातूनामकृत्रिमत्वस्वीकारे "षण भक्तौ" इत्यस्य सत्वे कृतेऽप्यकृतत्वमेव स्यादिति तस्यापि सकारस्य षत्वं न स्यादिति वाच्यम्, धातोः कृतत्वाभावेऽपि सकारस्य कृतत्वेन षत्वप्रवृत्तौ बाधकाभावात् । कृतस्येति पदं हि द्विधा व्याख्यायते–कृतस्य कृतस्थस्य वेति, तत्र धातोः कृतत्वाभावेन कृतस्थत्वं सकारस्य न भवतु, स्वाश्रयं कृतत्वं तु केन वारणीयम् । अन्ये च वैयाकरणा न्यायमिमं न मन्यन्ते, तथापि धातूनामकृत्रिमत्वं तु सर्वेषामभिमतमेव । धातुत्वमेव हि धातूनामकृत्रिमत्वप्रयोजकमिति न तत्र विशेषप्रयत्नापेक्षेति सिद्धार्थानुवादक एवायं न्याय इत्यनवद्यम् ॥ ४७ ॥

## *क्विबन्ता धातुत्वं नोज्झन्ति, शब्दत्वं च प्रतिपद्यन्ते* ॥ ४८ ॥

सि०—क्विबित्यस्याप्रयुज्यमानप्रत्ययोपलक्षकत्वेन विचोऽप्युपलक्षकत्वम् । तथा च क्विबन्ता विजन्ताश्च धातुत्वं–धातुत्वनिमित्तककार्यभाक्त्वं नोज्झन्ति–न त्यजन्ति, शब्दत्वं धातुत्वशून्यार्थवच्छब्दस्वरूपत्वं नामत्वमिति यावत्, प्रतिपद्यन्ते–नामत्वनिमित्तककार्यभाजश्च भवन्ति । धातुत्वं नोज्झन्तीत्युक्त्या तेषु धातुत्वमन्तर्भूतं तिष्ठति, नामत्वं त्वाविर्भूतं सत्त्वप्राधान्यात्, "क्रियाप्रधानमाख्यातं सत्त्वप्रधानानि नामानि" इति निरुक्तोक्तयास्कवचनम्, सत्त्वप्राधान्यादेव च न तेभ्यस्त्यादिविभक्त्युत्पत्तिः, तासां क्रियाप्राधान्ये एव विधानात् । एवं च स्वीकृते धातुत्वनिमित्तकप्रत्ययातिरिक्तं तत्स्थानिकं सर्वं कार्यं तेषां भवति, नामत्वनिमित्तकं च प्रत्ययाद्यपि तेभ्यो जायते इति विवेकः । धातुत्व-नामत्व-निमित्तकयोः कार्ययोरेकत्रासंभवात् तत्प्राप्त्यर्थोऽयं न्याय इति सारम् । ज्ञापकं चास्य "धातोरिवर्ण०" [२. १. ५०.] इत्युव्बाधकं "स्यादौ वः" [२. १. ५७.] इति सूत्रेण वकारविधानम्, तथाहि–वत्वं धातोरुवर्णस्य स्याद्यावनन्तरे सति विधीयते, स्यादिश्च धातोर्न विधीयतेऽपि तु नाम्न्य एव, इति धातोरनन्तरत्वं स्यादिनामसम्भवि, सति चास्मिन् न्याये क्विबन्तानामुभयविधकार्यसूचनात् तेभ्यो नामत्वनिमित्तकस्य स्यादेरुत्पत्त्या भवति स्यादिपरत्वं धातोः, धातुत्वस्यापि तेषु प्रकृतन्यायेन सूचनात् । इति प्रकृतन्यायं विनाऽनुपपद्यमानं स्याद्यनन्तरवर्त्तिधातुत्वमाश्रित्य वत्वविधानं प्रकृतन्यायं ज्ञापयतीति विज्ञायते । तथा च 'वसु इच्छति' इत्यर्थे क्यनि ततः क्विपि तल्लुकि–'वसूः, वस्वौ, वस्वः' इत्यादौ "स्यादौ वः" [२. १. ५७.] इति वत्वं सिद्धमिति स्वांशे चारितार्थ्यम् । फलं चास्य न्यायस्य 'नियौ लुवौ' इत्यादौ, धातुत्वाद् "धातोरिवर्ण०" [२. १. ५०.] इतीयुवौ, नामत्वाच्च तेषु स्याद्युत्पत्तिश्च सिद्धेति । "ननु नयनं लवनमित्यादाविवेह परत्वाद् गुण एव कुतो नेति चेत् ? न–क्विपः कित्त्वात् तस्य स्थानिवद्भावेन गुणाप्राप्तेः" इति प्राचीनाः । वस्तुतस्तु "नामिनो गुणोऽक्ङिति" [४. ३. १.] इति सूत्रेण धातोर्गुणो विधीयते, स च प्रत्यये परे, तत्र प्रत्यासत्त्या धातुत्वं मुख्यमाश्रीयत इति प्रकृते धातुत्वस्य गौणत्वान्न भवतीत्येव समाधानं युक्तम् । अत एव प्रकृतसूत्रे बृहद्वृत्तौ 'नीभ्याम्, लूभ्याम्'इत्यत्र गौणत्वादेव गुणनिवारणं कृतम्, स्थानिवत्त्वेन क्विपः कित्त्वाद् गुणाभाव इति समाधानं चायुक्तम्, तत्र हि 'क्ङिद्वर्जिते प्रत्यये परे' इत्येवंरूपेण यस्मिन् प्रत्यये गुणश्चिकीर्षितस्तस्य क्ङिद्भिन्नत्वमावश्यकम्, न चात्र औकारः क्ङित्, स्थानिवद्भावेनापि तत्र क्ङित्त्वं दुर्लभं, तस्य तद्धर्मत्वाभावात् । यदि ह्यत्र प्रसज्यप्रतिषेधः स्यात्–क्ङिति नेति तदा क्विपः स्थानिवद्भावेन गुणवर्जनं कथञ्चिच्छक्यम्, न च तथा, पर्युदासतया व्याख्यानस्यैव लाघवेनाश्रितत्वात् । एवं च यत् प्राचीनैः प्रकृतन्यायवृत्तौ–"नामिनो गुणः०" [४. ३. १.] इत्यस्य वृत्तौ तु क्विबन्तानां धातुत्वस्य गौणत्वान्न गुण इत्युक्तम्, परं तदभिप्रायः सम्यग् नावगम्यते, यतो विजन्तानां धातुत्वस्य गौणत्वेऽपि गुणो दृश्यते, यथा हिनोतीति विचि–'हेः, हयौ, हयः' इत्यादौ धातुत्वाद् गुणः शब्दत्वात् स्यादयश्चेति" इति; तदेव किमाशयकमिति नावधार्यते, यतो नीभ्यामित्यादौ धातोः क्विपि कृते तस्य नामसंज्ञायां कृतायां ततो भ्यामि च समानीते तत्र परतो गुणस्य चर्चाऽस्ति, तस्यामवस्थायां तस्य सत्त्वप्रधानतया क्रियाप्राधान्याभावाद् धातुत्वस्य न्यायबललभ्यत्वेन गौणत्वं स्पष्टमेव । हिनोतीति 'हेः' इत्यादौ च विचि कृते तस्मिन् पर एव नामसंज्ञातः पूर्वमेव गुण इति तत्र नास्ति गौणत्वमिति न काऽप्यनुपपत्तिरिति विभावनीयं सूरिभिः । अयं च न्यायो धातोर्नामत्वप्रयोजकक्विब्विषय एव, तत्रैवोभयविधकार्यस्य सिसाधयिषितत्वात्, यश्च धातुत्वप्रयोजकः क्विप् तत्र न प्रवर्त्ततेति यत्र नाम्नः क्विप् क्रियते, तस्य धातुत्वप्रयोजकतया न नामत्वनिमित्तकं कार्यमिति 'राजानति' इत्यादौ न स्याद्युत्पत्तिः, एतदर्थं च प्रकृतन्यायानित्यत्वाश्रयणमनावश्यकम् । क्विबन्ता धातुत्वं नोज्झन्तीत्युक्त्या धातुत्वस्य तत्र पूर्वं सत्त्वमधुना तत्त्याग इति संभावना प्रतीयमाना यत्र धातोर्नामत्वं जायते तद्विषयत्वं न्यायस्यावबोधयति, इह च नामत्वं पूर्वमासीत् सम्प्रति धातुत्वमायातमिति न्यायस्य विषयाभावादेवाप्रवृत्तिः, न तु तदनित्यत्वमेषणीयमितीत्युक्तं प्रतिभाति ॥ ४८ ॥

## *क्विबन्ता धातुत्वं नोज्झन्ति, शब्दत्वं च प्रतिपद्यन्ते* ॥ ४८ ॥

**त०**—क्विबन्तेषु प्रायो धातुस्वरूपमविकृतमेव तिष्ठति, क्वचिदागमादिसद्भावेऽपि *आगमास्तद्गुणीभूताः०* इति न्यायेन धातुत्वेन ग्रहणस्य सुशक्यत्वात्; सत्त्वप्राधान्यस्य च सत्त्वान्नामसंज्ञा जायतेऽतस्तन्निमित्तकस्यादिप्रत्ययोत्पत्तिरेव न तु त्यादिप्रत्ययोत्पत्तिरिति सूचितं वृत्तौ । अत्रेदं शङ्कितम् "अधातु-विभक्ति-वाक्यमर्थवन्नाम" [ १. १. २७. ] इति सूत्रे बृहन्न्यासे— "एवं तर्हि 'छिद् भिद्' इत्यादीनां कथं नामसंज्ञा ? यतः *न क्विबन्ता धातुत्वं जहति* इति 'अधातु०' इति प्रतिषेधेन भवितव्यम्, नैवम्-'अ०विभक्ति०' इति पर्युदासात् तत्सदृश-प्रत्ययग्रहणात् पर्युदासे विधि-प्रतिषेधयोर्विधेरेव बलीयस्त्वात् 'अधातु०' इति प्रतिषेधाऽप्रवृत्तौ नामत्वसिद्धिः" इति । अयमाशयः–'अहन्' इत्यादौ विभक्त्यन्तत्वाभावेनाडागमस्य च धातुभक्तत्वाद् धातुग्रहणेनैव ग्रहणात् तत्र नामत्वे नलोपो मा भूदिति धातोः पर्युदासः कृत इति तत्सार्थक्ये प्रदर्शिते 'छिद् भिद्' इत्यादिक्विबन्तस्यापि प्रकृतन्यायानुसारं धातुत्वसत्त्वात् तस्यापि नामसंज्ञा न भविष्यतीति चेत् ? न-पर्युदासस्य सदृशग्राहित्वेन धातु-विभक्त्यन्तभिन्नस्य तत्सदृशस्य प्रत्ययान्तस्य ग्रहणात् क्विबन्तस्य च मुख्यधातुत्वाभावाद् धातुसदृशत्वेन प्रत्ययस्य स्थानिवत्त्वेन विभक्त्यन्तसदृशत्वेन च नामसंज्ञासिद्धेरिति । अन्ये तु तत्र धातुत्वमेव स्वीकुर्वन्ति, तथा च तत्र धातुभिन्नत्वमसम्भवीति कृदन्तस्य नामसंज्ञार्थं पृथक् सूत्रं कुर्वन्ति । स्वमते च तत्र सत्त्वप्राधान्येन धातुभिन्नत्वस्य तत्सादृश्यस्य च स्वीकार इति रहस्यम् । अन्यद् यद् वक्तव्यं तद् वृत्तावेव स्पष्टीकृतमिति ॥४८॥

## *उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक्* ॥ ४९ ॥

**सि०**—उभयोः-पूर्वपरयोः स्थाने, निष्पन्नः-विहितो वर्णः शब्दो वा, अन्यतरव्यपदेशभाक्-अन्यतरस्य-द्वयोरेकस्य, व्यपदेशं-व्यवहारं भजत इति तादृशः । अन्यतर इति कथने-नैकस्मिन् काले कस्यचिदेकस्यैव व्यपदेशं लभते नोभयोरिति लभ्यते । लोकेऽपि माता-पितृभ्यां जायमानः पुत्र उभयोरन्यतरस्य पुत्रत्वेन व्यवह्रियते । यद्यपि स क्वचिदुभयोरपि पुत्रत्वे-नैकस्मिन्नेव काले व्यवह्रियते तथाप्यत्र तथा न लक्ष्यानुरोधात्, अन्यतरशब्दोच्चारणाच्च, विवेचितं चैतद् विवरणे । अयं च न्यायः पूर्वोक्तलोकन्यायदृष्टान्तसिद्ध एव । संवादश्चास्य "गडदबादेः०" [ २. १. ७७. ] इति सूत्रे साक्षात्प्रत्यय-ग्रहणार्थं कृतेन 'प्रत्यये' इत्यस्य ग्रहणेन भवति । तथाहि— *प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्* इति न्यायेन प्रत्ययस्यैव ग्रहणे सिद्धे प्रत्ययग्रहणं व्यर्थं सत् साक्षात्प्रत्ययग्रहणार्थमिति विज्ञायते, तेन धाधातोर्यङि द्वित्वे पूर्वस्य ह्रस्वे "द्वितीय-तुर्ययोः पूर्वौ" [ ४. १. ४२. ] इति दत्वे "श्नश्चातः" [ ४. २. ९६. ] इति धातोराल्लुकि "अदीर्घात्०" [ १. ३. ३२. ] इति धस्य द्वित्वे सति 'दद्ध्वः' इत्यत्र ध्वस्य प्रकृतिप्रत्ययस्थानजन्यत्वेन यद्येतन्न्यायबलात् प्रत्ययत्वमापद्यते, तदा कृतद्वित्वधकार-सम्बन्धिना प्रथमधकारेण धातोश्चतुर्थान्तत्वे सति आदेश्चतुर्थत्वं न भवति, अत्र 'ध्व' इति, अस्य प्रकृतन्यायेन प्रत्ययत्वलाभात् साक्षात् प्रत्ययत्वाभावात्, प्रत्ययग्रहणस्य न्यायानपेक्ष[ अनतिदिष्ट ]प्रत्ययलाभार्थत्वात् । यदि चायं न्यायो न स्यात् तर्हि प्रकृते ध्वस्य प्रत्ययत्वं कथमपि न लभ्यत इति तस्मिन् परे 'दद्ध्वः' इत्यादौ चतुर्थाक्षरस्य प्रसक्तेरेवाभावेन तद्वारणाय न्यायानपेक्षप्रत्ययग्रहणाय प्रत्ययग्रहणं क्रियेत, सति चैतस्मिन् न्याये ध्वस्योभयस्थाननिष्पन्नत्वेन प्रत्ययत्वसिद्ध्या तस्मिन् परे चतुर्थत्वप्रसक्तिरिति शङ्कया तद्वारणाय 'प्रत्यये' इति सूत्रे पठ्यते । तथा च प्रकृतन्यायं विनाऽनुपपद्यमानसार्थक्यं तत् प्रकृतन्यायज्ञापकमिति तेन स्वांशे चारितार्थ्यं भवति । एतच्च "ग-ड-द-बादेः०" [ २. १. ७७. ] इति सूत्रे लघुन्यासग्रन्थेऽपि ध्वनितम्, तथाहि—"प्रत्यये किमिति प्रतीकमुपादाय-ननु *प्रत्ययाप्रत्यययोः प्रत्ययस्यैव* इति न्यायेन प्रत्यये एव भविष्यति किं प्रत्ययग्रहणेन ? सत्यम्–'दद्ध्वः, दद्ध्वहे' इत्यत्र यदा *उभयोः स्थाने* इति न्यायेन 'ध्व' इत्यस्य प्रकृति-प्रत्ययस्थाननिष्पन्नस्य प्रत्ययव्यपदेशः स्यात् तदा आदिचतुर्थत्वं भवेत्, सति तु प्रत्ययग्रहणे न्यायनिरपेक्षो यः प्रत्ययस्तस्मिन्नेव भवति नेतरस्मिन् प्रत्ययग्रहणसामर्थ्यात्" इति अत्र हि उभयस्थाननिष्पन्नत्वेनैव 'ध्व' शब्दे प्रत्ययव्यपदेशं व्यवहारता प्रकृतन्यायोऽपि ध्वनित एव । तत्र चेदं प्रत्ययग्रहणं तत्र ज्ञापकमिति यद्यपि नायाति, तथापि लोकसिद्धोऽयं न्यायोऽत्र प्रयोजनवशादाश्रीयते इति त्वायात्येव । वस्तुतस्तु प्रकृते ध्वस्योभयस्थाननिष्पन्नत्वं नास्ति, नहि प्रकृति-प्रत्यययोरन्यस्य वा प्रकृत्यवयवस्य प्रत्ययस्य च स्थानेऽयं ध्वशब्द आदिश्यते, किन्तु प्रकृत्यवयव-प्रत्यययोर्मेलनेन 'ध्व'शब्दोऽत्र प्रतीयते इत्येतावन्मात्रम्, तत्र च प्राधान्येन व्यपदेशा भवन्ति मल्लग्रामादिवदिति लौकिकं न्यायमाश्रित्यात्रत्य'ध्व'शब्दे प्रत्ययभागस्यैव प्राधान्यात् प्रत्ययत्वव्यपदेशः स्यादिति तादृशव्यपदेशलभ्यप्रत्ययत्ववति प्रवृत्तिर्मा भूदिति प्रत्ययग्रहणसार्थक्यम् । किञ्च *प्रत्ययाप्रत्यययोः०* इत्येतन्न्यायस्यापि प्रकृते न विषय इति प्रतीयते, *अर्थवद्ग्रहण०न्यायेनैव प्रकृतशङ्काया उत्थापयितुं शक्यत्वात् । अयमाशयः–'ध्व'शब्दोऽत्र सूत्रे पठ्यते, स च यदि प्रत्ययः प्रत्ययभिन्नश्चार्थवान् भवेत् तन्नो–

भयोर्ग्रहणे प्रसक्ते *प्रत्ययाप्रत्यययोः* इति न्यायस्य व्यवस्थार्थमवतारः स्यात्, न तु तथाऽस्ति, 'ध्व' इत्यस्य प्रत्ययभिन्नस्यार्थवतोऽलभ्यमानत्वात् । तथा च प्रत्ययग्रहणवैयर्थ्यशङ्का *अर्थवद्ग्रहण*न्यायमूलिकैव । उत्तरं च *अर्थवद्ग्रहण*न्यायस्य विशिष्टरूपोपादानविषयकत्वेनात्र तस्याऽपि न प्रवृत्तिः, नवा *प्रत्यया-ऽप्रत्यययोः०* इत्यस्य प्रवृत्तिः 'ध्व'शब्दमात्रस्य प्रत्ययत्वाभावात्, 'ध्वम्' इत्यस्य 'ध्वे' इत्यस्य वा प्रत्ययत्वात्, तथा चात्र निर्णायकाभावात् तादृशानुपूर्वीमात्रग्रहणप्रसक्तौ प्रकृते च तादृशानुपूर्वीमत्त्वात् सूत्रस्य प्रवृत्तिः स्यादिति तद्वारणाय प्रत्ययग्रहणम् । यद्यपि 'ध्व'मात्रस्य प्रत्ययत्वमप्रसिद्धमेवेति प्रत्ययग्रहणे कृतेऽसम्भव एव सूत्रलक्ष्यस्य स्यादिति वक्तुं शक्यते तथापि प्रत्ययपदस्य प्रत्ययसम्बन्धिनि लक्षणया प्रत्ययसम्बन्धिनि ध्वशब्दे परे इत्यर्थान्न दोष इति तत्त्वम् । न्यायस्योदाहरणं यथा—"ईषि गत्यादौ" इति धातोराङ्पूर्वात् ध्यणि-एष्य इति, ततस्तस्य प्रेण योगे 'प्र+एष्य' इति स्थितौ आङ्-ईतोः स्थाने निष्पन्नस्यैकारस्य यदा प्रकृतन्यायेन आङादेशत्वं तदा "ओमाङि" [ १. २. १८. ] इत्यल्लोपे प्रेष्य इति भवति; धात्वादेशत्वे च सति "उपसर्गस्यानिणेधेदोति" [ १. २. १९. ] इत्यल्लोपः प्राप्नोति, तं प्रबाध्य विशेषविहितत्वात् "प्रस्यैषैष्योढोढ्यूहे स्वरेण" [ १. २. १४. ] इत्यैत्वं च प्राप्तमपि न भवति *यस्मिन् प्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति* इति न्यायात् । तथा चात्र प्राचां ग्रन्थे प्रैष्य इति रूपमपि भवतीति यदुक्तं तद् बृहद्वृत्तिग्रन्थविरुद्धमिति प्रतिभाति । तथाहि—तेषां ग्रन्थः—"यदा तु धात्वादेशत्वं तदा "उपसर्गस्यानिणेधेदोति" [ १. २. १९. ] इत्यनेन प्रस्याल्लोपः प्राप्नोति परं तं बाधित्वा विशेषविहितत्वात् "प्रस्यैषैष्योढोढ्यूहे स्वरेण" [ १. २. १४. ] इत्यैत्वे प्रैष्य इति स्यात्" इति । बृहद्वृत्तिग्रन्थश्चात्रैव सूत्रे—"कथं प्रेषः प्रेष्यः ? ईषे ईष्ये च भविष्यति, यदापि 'आ+ईष्य=एष्यः' तदापि "ओमाङि" [ १. २. १८. ] इत्यवर्णलोपे प्रेष्य इत्येव भवति *यस्मिन् प्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति* इति न्यायात्, "उपसर्गस्यानिणेधेदोति" [ १. २. १९. ] इत्यस्यैवायं बाधको, न "ओमाङि" [ १. २. १८. ] इत्यस्य" इति । तथा च यदा "आ+ईष्य' इति स्थिते एत्वं भवति, तस्य च धात्वादेशत्वं विज्ञायते तदा "उपसर्गस्य०" [ १. २. १९. ] इति यदिह प्राप्तं तत् "प्रस्यैष०" [ १. २. १४. ] इत्यादिना बाध्यं, किन्तु "ओमाङि" [ १. २. १८. ] इति तत्र प्रवर्त्ततैवेति प्रेष्य इत्येव रूपं, न तु प्रैष्य इति विज्ञेयम् । विशेषश्च विवरणे स्पष्टीकृतः । तथा च न्यायसंग्रहे प्राचां प्रैष्य इति रूपप्रदर्शनमेतद्ग्रन्थप्रतिकूलमिति व्यक्ती-



भवति । अस्य च लक्ष्यानुरोधादप्रवृत्तिरपि, तथा च राजानमाख्यादरराजादित्यत्रान्त्यस्वरादिलोपस्य अनूरूपस्वरव्यञ्जनोभयस्थानजत्वेऽपि स्वरादेशताव्यपदेश एव भवति, न तु व्यञ्जनादेशताव्यपदेशः, तद्व्यपदेशे सति हि असमानलोपित्वादुपान्त्यह्रस्वसन्वद्भावादिप्रवृत्तावरीरजदिति स्यात् । वस्तुतस्तु *नानिष्टार्था शास्त्रप्रवृत्तिः* इति न्यायेनैवात्र व्यञ्जनादेशत्वव्यपदेशाय न्यायो न प्रवर्त्ततेति तदर्थमस्यानोजस्त्वं नाश्रयणीयमिति युक्तम् ॥ ४९ ॥

***उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक्* ॥४९॥**

**त०**—अन्यतर इत्युक्तत्वादेकदा नोभयव्यपदेशः, अत एव 'अभीयात्' इत्यत्र "आशिषीणः" [ ४. ३. १०७. ] इति ह्रस्वो न भवति, अत्र धातूपसर्गकार्यत्वेनान्तरङ्गत्वाद् दीर्घे कृते उपसर्गात् परस्येणोऽभावात्; यदि चोभयस्थाननिष्पन्नस्येकारस्य पूर्वस्थानिव्यपदेशः क्रियेत तर्हि उपसर्गत्वसत्त्वेऽपि ततः परस्येणोऽभावः, यदि च धात्वादेशत्वव्यपदेशस्तर्हि इकाररहितस्योपसर्गत्वमेवालभ्यम्, उभयव्यपदेशस्तु नैव भवति, अन्यतरपदोपादानात्, इति ह्रस्वो न भवति । यद्यपि लौकिकदृष्टान्तेन मातापित्रोः पुत्रस्यान्यतरेणोभाभ्यां च व्यपदेश इतीहापि तथा प्राप्नोति, तथापि दृष्टान्तदार्ष्टान्तिकयोः सर्वांशेन साम्ये मानाभावादत्र लक्ष्यानुरोधादुभयव्यपदेश एकदा न भवति । कार्यार्थं हि व्यपदेशः, लौकिकदृष्टान्ते च व्यपदेशमात्रं न तु तत्तन्निमित्तं कार्यमवश्यं भावि, प्रकृते च व्यपदेशेन कार्यं स्यादिति तस्यानिष्टत्वेन नोभयव्यपदेश इति । अत्र "आ+ईष्यः=एष्यः, 'प्र+एष्यः' इति स्थितावस्य न्यायस्योभयथा—पूर्वव्यपदेशेन परव्यपदेशेन च प्रवृत्तौ—'प्रेष्यः, प्रैष्यः' इति रूपद्वयं प्राचीनैरुदाहृतं, तच्च वृत्तौ प्रतिक्षिप्तमपि तत्रत्यविशेषस्यास्माभिर्बृहन्न्यासानुसन्धाने प्रदर्शितस्यात्रापि दिक्प्रदर्शनं क्रियते, तथाहि—तत्र कथं 'प्रेषः प्रेष्यः' इति बृहद्वृत्तिप्रतीकमित्थमवतार्य व्याख्यातम्—"ननु प्रशब्दात् परतया 'एषः, एष्यः' इत्यनयोः स्थितौ नित्य एव ऐकारादेशोऽनेन [ "प्रस्यैषैष्य०" इत्यादिसूत्रेण ] भवेदिति 'प्रेषः प्रेष्यः' इत्येवं श्रूयमाणे रूपे नौचित्यमञ्चत इत्याह—कथं प्रेषः प्रेष्य इति, 'प्रैषः प्रैष्यः' इत्येव स्यातामिति प्रष्टुराशयः । समाधत्ते—ईषे इष्ये च भविष्यतीति, "ईष उञ्छे" इत्यतः "ईषि गति-हिंसा-दर्शनेषु" इत्यतो वा घञि ध्यणि च—ईष ईष्य इति, तयोः प्रशब्दात् परतया स्थितौ "अवर्णस्य०" [ १. २. ६. ] इत्येत्वे—प्रेषः [ प्रेषणार्थे पीडनार्थे ] प्रेष्यः [ दासे पीडनीये चार्थे ] निष्पद्येते, तत्र 'एषः, एष्यः, इति प्रशब्दात् परतो विजानतो भ्रान्तस्यैतद्रूपानौचित्यशङ्कैवानुचिता, अस्य सूत्रस्याप्राप्तेरेवेति समाधातुराशयः । ननु 'ईषः, ईष्यः' इत्यनयोः परत्वेऽस्य सूत्रस्य प्राप्तिरेव नास्तीत्यतो-

ऽत्र सूत्रेणानेन ऐकारादेशाभावो युक्तः, यदा तु आङ्पूर्वकादीष्धातोः 'एष्यः'इति निष्पद्यते तदा ऐकारादेशरहितः 'प्रेष्यः' इति प्रयोगो न युक्त इत्याशङ्कायामाह यदाऽपीत्यादि, 'आ+ईष्यः= एष्यः' इति आङ्पूर्वकादीष्धातोर्घ्यणि अवर्णस्यैत्वे एष्य इति निष्पद्यते, स च प्रशब्दात् परो भवतीत्यर्थः। तथात्वे किं भवतीत्याह–तदाऽपीत्यादि, तथा निष्पन्नस्य एष्यशब्दस्य प्रशब्दात् परतया स्थितावपि नानेनैकारादेशः, अपि तु "ओमाङि" [ १. २. १८. ] इत्यवर्णलोप एवेत्यर्थः । ननु 'आ+ईष्य' इत्यत्रा सहादेशे सत्येष्यशब्दे परे स्वविषयतां पश्यद् यथा "ओमाङि" [ १. २. १८. ] इत्यलोपः "प्रस्यैषै०" [ १. २.-१४. ] इत्यैकारादेशं बाधते, तथा आङा सहादेशरहिते पूर्वं साधिते 'एष्य'शब्दे परेऽपि स्वविषयतां पश्यत् "उपसर्गस्यानिणे०" [ १. २. १९. ] इत्यपि प्रकृतमैकारादेशं बाधतां वैषम्ययुक्त्यभावादित्याशङ्कायां तयोः [ "ओमाङि" "उपसर्गस्यानिणे०" इत्यनयोः ] वैषम्यं दर्शयति–यस्मिन्नित्यादिना, 'प्राप्ते' इत्यस्य प्राप्ते एव इत्यवधारणार्थो व्याख्यानात् । तथा चायं निर्गलितार्थः–यस्मिन्–यादृशोद्देश्यताके विधौ, प्राप्ते–व्यापकीभूतोद्देश्यतासम्बन्धेन सम्बन्धिनि सति, यो विधिरारभ्यते, तादृशोद्देश्यतानाक्रान्तेऽव्याप्यवदुद्देश्यताको [ व्याप्योद्देश्यताको ] विधिर्भवति स व्याप्योद्देश्यताकः, तस्य–व्यापकोद्देश्यताकस्य बाधको भवतीति *येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः* इति हि न्यायस्वरूपम्, तस्यैवार्थमादाय 'यस्मिन् प्राप्ते०' इत्युक्तम् । प्रकृते एषैष्यान्यतराव्यवहितपूर्वत्वविशिष्टप्रशब्दीयावर्णत्वावच्छिन्नविषयतारूपैकारादेशीयोद्देश्यताया अधिकरणे ['प्र+एषः, प्र+एष्यः' इत्यत्र] "उपसर्गस्यानि०" [ १. २. १९. ] इत्येतदीयाया एकारादिधात्वव्यवहितपूर्वत्वविशिष्टोपसर्गीयावर्णत्वावच्छिन्नविषयतारूपोद्देश्यताया अभावविरहेण व्यापकत्वमस्तीति तमेव व्यापकोद्देश्यताकम् "उपसर्गस्यानि०" [ १. २. १९. ] इति विधिमयमादेशो बाधते, "ओमाङि" [ १. २. १८. ] इत्येतदीयायास्तु आङादेशाव्यवहितपूर्वत्वविष्टावर्णत्वावच्छिन्नविषयतारूपोद्देश्यतायाः प्रकृतसूत्रोद्देश्यताया अधिकरणे आङादेशरहिते पूर्वं साधिते एषे एष्ये च परे [ 'प्र+एषः,प्र+एष्यः, इत्यत्र ] अभावेन व्यापकत्वं नास्तीत्यव्यापकोद्देश्यताकं तं विधिमयमादेशो न बाधते इति प्रघट्टार्थः । अत्रत्यविस्तृतविवेचनप्रेप्सुभिः "प्रस्यैषैष्य०" [ १. २. १४. ] सूत्रस्थमस्मदीयं न्यासानुसन्धानमवलोकनीयमिति विस्तराद् विरमामः । इत्थं च 'आ+ईष्यः= एष्यः, प्र+एष्य' इति स्थितौ प्रेष्य इत्येव रूपं न तु प्रैष्य इति सुस्थिरम् ॥ ४९ ॥

## *अवयवे च कृतं लिङ्गं समुदायमपि विशिनष्टि, चेत् तं समुदायं सोऽवयवो न व्यभिचरति* ॥ ५० ॥

सि०—अवयवे–तत्सहिततया प्रयुज्यमानसमुदायैकदेशे, कृतम्–उच्चारितं, लिङ्गम्–अनुबन्धादि, समुदायमपि–स्वसमवेतावयविनमपि, विशिनष्टि–स्वलिङ्गेन सम्बध्नाति; किं सर्वदा? नेत्याह–चेत् तमिति, सोऽवयवो यदि तं समुदायं, न व्यभिचरति–न मुञ्चति, तत्समुदायाविनाभावमूलकत्वाद् स्वार्थस्य तत्सुदायाव्यभिचारे मूलाभावाद् विशेषकत्वानौचित्यात् । अनुबन्धचारितार्थ्यमात्रमेव प्रार्थनीयं, तच्च यदि स्वाव्यभिचारिसमुदाये सम्पन्नं तर्हि स्वव्यभिचारिणि विशेषकत्वसामर्थ्याभाव इति वा । तत्र तत्रावयवेऽचारितार्थलिङ्गकरणमेव प्रकृतन्यायज्ञापकम्। उदाहरणानि यथा–"कुस्मिण्" धातोः "चुरादिभ्यः०" [ ३. ४. १७. ] इति णिचि–कुस्मयते इति, आश्चर्यार्थकाण्ङित्श्चित्रशब्दाच्चित्रं करोतीत्यर्थे "नमोवरिवश्चित्रङोऽर्चा-सेवाऽऽश्चर्ये" [ ३. ४. ३७. ] इति क्यनि–चित्रीयते इति, "महीङ् पूजायाम्" इत्यतः "धातोः कण्ड्वादेर्यक्" [ ३. ४. ८. ] इति यकि–महीयते इति, एवमादौ प्रकृतीनामिङित्त्वं प्रत्ययान्तावयवभूतेषु तेष्वचरितार्थमिति स्वस्वसम्बद्धव्यभिचर्यमाणं णिच्-क्यन्-यगन्तसमुदायमपि स्वानुबन्धकत्वेन विशिनष्टीति तस्मादपि समुदायादात्मनेपदमेव भवति । चेत् तमित्यादिविशेषणाच्च येन सह विनाभावोऽपि दृष्टस्तदविशेषकत्वमेव, यथा–'कुस्मयति, चित्रीययति, महीययति' इत्यादौ णिच्-क्यन्-यगन्तेभ्यः कुस्म्यादिभ्यः प्रयोक्तृव्यापारार्थे णिगि सति तदन्तसमुदायादिङित्त्वहेतुकमात्मनेपदं न भवति, णिगः प्रयोक्तृव्यापारे सत्येवोत्पत्तेराकस्मिकत्वेन तं समुदायं प्रति कुस्म्यादीनामव्यभिचारित्वाभावात् । अस्य च न्यायस्यानुबन्धाचारितार्थ्यमूलतत्समुदायाव्यभिचारहेतुकत्वेन ज्ञापकसिद्धत्वाभावान्नानित्यता दृश्यते ॥ ५० ॥

## *अवयवे च कृतं लिङ्गं समुदायमपि विशिनष्टि, चेत् तं समुदायं सोऽवयवो न व्यभिचरति* ॥ ५० ॥

त०—अयं न्यायोऽन्यैरपि वैयाकरणैः स्वभावसिद्धश्च लक्ष्यसिद्ध्यर्थमाश्रीयते, न ज्ञापकाद्यपेक्षाऽत्र । तत्र तत्रोच्चार्यमाणा अनुबन्धाः स्वसार्थक्याय समुदायमुपकुर्वन्तो न्यायमिमं संवादयन्तीत्येतावन्मात्रत्वेन तत्र तत्रावयवेऽचरितार्थलिङ्गकरणस्य प्रकृतन्यायज्ञापकत्वमुक्तं वृत्तौ ॥ ५० ॥

## *येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः* ॥ ५१ ॥

**सि०**—येन धातुना युक्ताः-यद्धात्वर्थक्रियाविशेषकाः प्रादयस्तं प्रत्येवोपसर्गसंज्ञा, तद्धातुनिरूपितमेवोपसर्गत्वं तेषामित्यर्थः। तथा च तदन्यधातुना सामीप्ये सत्यपि तदुपसर्गनिबन्धनं कार्यं न स्यादिति फलितम्। अस्य च ज्ञापकम् "ऋत्यारुपसर्गस्य" [ १. २. ९. ] इति सूत्रे 'उपसर्गस्य' इति वचनमेव, तथाहि-एतन्न्यायाभावेऽन्यधातुं प्रति जातमुपसर्गत्वं तदन्यधातुं प्रत्यपि स्यादेवेति प्रादेरेवोपसर्गसंज्ञकत्वेन लाघवात् प्रादिग्रहणमेवेह कृतं स्यादिति 'प्रार्च्छति, परार्च्छति' इत्यादौ सूत्रं यथा प्रवर्त्तते तथा प्रगता ऋच्छका यस्मात् स प्रर्च्छको देश इत्यत्रापि सूत्रप्रवृत्तौ प्रार्च्छको देश इति स्यात्, तद्वारणायैवोपसर्गग्रहणं क्रियते। अन्यधातूपसर्गस्यान्यधातुसम्बन्धेऽप्युपसर्गत्वस्य सत्त्वे च कृतेऽप्युपसर्गग्रहणे तत्रार् वारयितुमशक्य एवेति व्यर्थमेवोपसर्गग्रहणम्; तच्च व्यर्थीभूय प्रकृतन्यायं ज्ञापयति। ज्ञापिते च न्याये प्रगता ऋच्छका यस्मादिति विग्रहे 'प्र'शब्दस्य गम्धात्वर्थप्रकर्षद्योतकत्वेन ऋकारादिऋच्छधात्वर्थप्रकर्षद्योतकत्वाभावात् तं प्रत्युपसर्गत्वं नास्तीति न भवत्यार्। अयमाशयः—ऋच्छकशब्दे भागद्वयं प्रकृतिभागः प्रत्ययभागश्च, तत्र गतार्थमन्तर्भाव्य वर्त्तमानः प्रशब्दो 'ऋच्छक'शब्दे प्रधानीभूतं णकप्रत्ययार्थं कर्त्तारमेव विशिनष्टि, न तु धातुभागम्, कर्तृविशेषणत्वमपि गच्छत्यर्थद्वारैव। तथा च गच्छतिं प्रत्येव तस्य [ प्रशब्दस्य ] साक्षाद्विशेषणत्वं, न तु ऋच्छतिं प्रतीति ऋकारादिधातुनिरूपितोपसर्गत्वाभावान्न तत्रार् प्रवर्त्तेत इति। किञ्च पितापुत्रादिसम्बन्धिशब्दवदुपसर्गशब्दोऽपि सम्बन्धिशब्द एव, तथा च पितापुत्रादिशब्दार्थानां यथा नियतनिरूपकनिरूपितत्वं तथोपसर्गस्यापि नियतधातुनिरूपितोपसर्गत्वमेव, न तु यं कञ्चित् प्रतीति लौकिकन्यायसिद्धोऽयमर्थः। तथा चान्यधातुनिरूपितोपसर्गस्यान्यधातुं प्रति नोपसर्गत्वं किन्तु तत्र प्रादित्वमेवेति फलितम् ॥ ५१ ॥

## *येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः* ॥ ५१ ॥

**त०**—उपसृत्य धातुमर्थविशेषं सृजतीत्यर्थे उपपूर्वात् सृजेः "लिहादिभ्यः" [५. १. ५०.] इत्यचि गुणे "न्यङ्कूद्गमेघादयः" [ ४. १. ११२. ] इति गत्वे च-उपसर्गशब्दो निष्पन्नः, स च येन-यत्क्रियावाचकेन यादृशानुपूर्वीमता धातुना, युक्तः-द्योतकतारूपसम्बन्धानुयोगी, तं प्रत्येव तस्योपसर्गत्वमुचितमिति तदेवानेन न्यायेनानूद्यते। अस्य न्यायस्य ज्ञापकम्—"ऋत्यारुपसर्गस्य" [ १. २. ९. ] इति सूत्रे उपसर्गस्येति ग्रहणमित्युक्तं वृत्त्याद्युपपादितं च। तच्च तत्रत्यबृहद्वृत्तिग्रन्थादेवावसीयते, तथाहि-"उपसर्गस्येति किम्? इहर्च्छति, इह ऋच्छति *येन धातुना युक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञाः*, तेनेह न भवति-प्रगता ऋच्छका अस्मात्-प्रर्च्छको देशः, एवम्-प्रर्षभं प्रर्श्यं वनम्" इति। व्याख्यातश्चायं ग्रन्थोऽस्माभिस्तत्रत्यन्यासानुसन्धाने, तथाहि-"ननूपसर्गग्रहणाभावेऽपि 'ऋकारादौ धातौ परेऽवर्णस्यारादेशः' इत्यर्थे प्रार्च्छतीत्यादीनां सिद्धिर्निराबाधैवेति कथमुपसर्गग्रहणमित्याशङ्कते-उपसर्गस्येति किमिति। समाधत्ते-इहर्च्छतीति-अस्मिन्नर्थे "क कुत्रात्रेह" [ ७. २. ९३. ] इति निपातनात्-इहेति। 'इह+ऋच्छति' इति स्थिते उपसर्गग्रहणाभावेऽनेन नित्य आरादेशः स्यात्, स मा भूदित्युपसर्गग्रहणम्, "अवर्णस्य०" [ १. २. ६. ] इत्यस्य वैयर्थ्यं तु नाशङ्क्यम्, दीर्घे ॠकारे परे चारितार्थ्यात्, तथा चोपसर्गग्रहणे कृते प्रकृते उपसर्गस्याभावेन नास्य प्राप्तिरिति "अवर्णस्य०" [ १. २. ६. ] इत्यरादेशः "ऋ-लृति०" [ १. २. २. ] इति ह्रस्वश्च भवतः। इदमुपलक्षणं परमर्षिप्रभृतीनामपि; तथाहि-उपसर्गग्रहणाभावे इहर्च्छतीत्यादौ यथाऽरादेशबाधेनास्याऽऽरादेशस्य प्राप्तिस्तथैव परमर्षिप्रभृतिष्वपीति तत्राप्यारोऽभावाय सार्थकमुपसर्गग्रहणम्। न चोणादीनामव्युत्पत्तिपक्षे ऋकारादिधातुत्वाभावेन परमर्ष्यादावुपसर्गग्रहणाभावेऽपि न दोष इति वाच्यम्, व्युत्पत्तिपक्षे "ऋषैत् गतौ" इत्यतः "नाम्युपा०" [ उणा० ६९. ] इति किदिकारप्रत्ययेन निष्पन्नऋषिशब्दसमभिव्याहारे आरादेशप्राप्तेरप्रत्यूहत्वात्। नह्यनयोरन्यतरस्मिन् कस्मिन्नपि पक्षेऽत्र कोऽप्यारादेशमभिप्रैति। वस्तुतस्तु-उपसर्गत्वं क्रियायोगविरहे न भवतीति हेतोरुपसर्गग्रहणदशायां नान्तरीयकत्वं श्रयन्त्याः क्रियाया वाचको धातुराश्रितो विशेष्यतां गच्छंस्तदादिविधिना 'ऋकारादौ धातौ०' इत्यादिसूत्रार्थं सम्पादयति। इदानीमुपसर्गग्रहणाभावे सोपसर्गत्वमिव क्रियामन्तरेण किमप्यनुपपद्यमानमस्ति यदिह धातुमाक्षिप्य 'ऋकारादौ धातौ०' इत्यर्थं सम्पादयितुमीशीत, सत्येवं सामान्यतः शब्दस्वरूपं विशेष्यमादाय तदादिविधौ 'ऋकारादौ शब्दे परे' इत्यर्थे व्युत्पत्तिपक्षसाधारण्येन दोषः स्यादेव यदीह नोपसर्गग्रहणं क्रियेतेत्यवसेयम्। "अवर्णस्य०" [ १. २. ६. ] इति सूत्रं तु देवेन्द्र तवेहेत्यादौ कृतार्थमिति न वैयर्थ्यफलमादायैतस्याऽरो बाधः सम्भवति [ यद्यपि "अवर्णस्येवर्णादिनैदोदरल्" [ १. २. ६. ] इति सूत्रे चतुर्णामादेशानां निर्देशाच्चत्वार एव इकारोकारऋकारलृकाराः स्थानिन आक्षिप्यन्ते इति देवेन्द्र तवेहेत्यादौ चारितार्थ्यदर्शनमात्रेण न सर्वांशे चारितार्थ्यमायाति तथापि दीर्घे ॠकारे परे 'उप+ॠकारीयति' इति स्थितौ 'उपर्कारीयति' इत्यादावरादेशस्यापि चारितार्थ्यमव-

सेयम् ] । इहच्छेतीत्यत्र पक्षे ह्रस्वत्वे कृते तत्सामर्थ्यात् कार्यान्तरबाधे इह ऋच्छतीत्यपि भवतीत्याह–इह ऋच्छतीति ॥ अथ
"प्र-परा-ऽप-समन्वव-निर्दुरभि-व्यधि-सूदति-नि-प्रति-पर्यपयः ।
उप आङिति विंशतिरेष सखे! उपसर्गगणः कथितः कविभिः ॥"
इत्युक्तानां विंशतेरेव "धातोः पूजार्थ०" [ ३. १. १. ] इत्यनेनोपसर्गसंज्ञा विधीयते, नेतरस्य कस्यापीति "ऋति प्रादेः" इत्येवं लघुन्यास एव लक्ष्यग्रहणेऽलक्ष्यपरिहारे च पर्याप्नुयादित्युपसर्गपदभूतो गुरुन्यासो न युज्यत इति शङ्कामपनिनीषुराह–येन धातुनेति । अयं भावः–मैत्रोऽयं पुत्रं लालयतीत्युक्ते यथा मैत्रस्यैव पुत्रे मैत्रकृतं लालनं प्रतीयते, न देवदत्तादिपुत्रे, तथैव उपसर्गस्यामुकं कार्यं भवतीत्युक्तावपि यां क्रियामादायोक्तसूत्रेणोपसर्गसंज्ञा भवेत् तत्क्रियावाचकतद्धातुं प्रत्येव प्रादिविशेषस्योपसर्गत्वं व्यवह्रियते, क्रियान्तरयोगे उपसर्गसंज्ञां श्रयतः प्रादेस्तु क्रियान्तराभिधायिधातोः पूर्वं स्थितस्यापि नोपसर्गत्वव्यवहार इति सूत्रे उपसर्गपदोपादाने न तत्र भवत्यारादेशः, प्रादिपदोपादाने तु प्रपरेत्यादयो विंशतिः प्रादिपदेन ग्रहीतव्या इत्येतावन्मात्रबन्धनेनोपसर्गत्वानिरूपकक्रियावाचिधातोः पूर्वं विद्यमानस्य प्रादेः प्रादित्वेनोद्देश्यताको विधिर्न सुरगुरुणापि वारणीयो यः खलु विधिर्नेष्यते तत्रेति गुरुरप्युपसर्गपदसहित एव न्यास आदरणीयस्तत्रेति ॥ न्यायाक्षरार्थस्तु पूर्वमुक्त एव, तेन द्योतकताख्यसम्बन्धप्रतियोगिक्रियाविशेषवाचकधातुविशेषं प्रत्येवोपसर्गत्वेनेह वक्ष्यमाणे सूत्रान्तरलक्ष्ये न भवति, उद्देश्यत्वाऽलाभेन नायमादेशो भवतीत्यर्थः । लक्ष्यमाह–प्रगता इत्यादि–इह हि गतशब्दघटकगत्यर्थयोगे प्रशब्दस्योपसर्गत्वं विद्यते, आरादेशस्त्वयं तत्राभविष्यद् यत्र ऋकारादिधात्वर्थयोगेनोपसर्गत्वमस्यास्यत्, प्रशब्दोऽयं गत्यर्थं परिपोष्योपक्षीणशक्तिर्न शक्नोति ऋच्छत्यर्थं परिपोषयितुं येन ऋकारादिधात्वर्थक्रियायोगेनोपसर्गत्वमनुभवन् आरादेशं लभेत । ननु *येन धातुना युक्ताः प्रादयः०* इति न्याये किं बीजं? येन लघुन्यासं तिरयसीति चेद्? उच्यते–जगति जनिमतां जन्तूनां मातापितृत्वनिरूपितपुत्रत्वस्य सद्भावेऽपि यथा तन्मातृत्व-तत्पितृत्वाभ्यामेव तत्पुत्रत्वं निरूपितं भवति, नेतरमातर-पितृत्वाभ्याम्, तथैव प्रकृतेऽपि पृथक् पृथगेव तत्तद्धातुं प्रत्युपसर्गत्वं, न तु कतमच्चिदेकं प्रति जातमुपसर्गत्वमिति तद् इतरधातुं प्रत्यप्युपर्गत्वमेवेति लौकिकन्यायसिद्धोऽयं न्यायः । यद्वा यदीतरधातुं प्रति जातमुपसर्गत्वमितरधातुं प्रत्यपि स्यादुपसर्गत्वं तदाऽस्मिन्नेव सूत्रेऽन्तरेणैवोपसर्गग्रहणं प्रादिशब्दग्रहणेनैव पूर्वोक्तेनोपसर्गपदग्राह्याणां ग्रहणे सिद्धे श्रितगौरवो न्यासः कथङ्कारमुपन्यस्यते? उपन्यस्यैतं तु गुरुन्यासमाचार्यप्रवृत्तिर्ज्ञापयति–*येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञा* इति । तुल्यन्यायाद् गतिसंज्ञापक्षेऽप्ययमेव पन्था अवसेयः । ज्ञापिते त्वस्मिन् न्यायेऽन्यनिरूपितोपसर्गत्वे सत्यन्यं प्रत्युपसर्गत्वप्रयुक्तं कार्यं प्रच्छेकादौ मा भूदिति प्रादिशब्दतिरस्कारेणोपसर्गपदं सूत्रे चारितार्थ्यमश्नुति । नन्वभ्युपेयमानेऽस्मिन् न्याये प्रगता नासिका यस्येत्यर्थे "उष्ट्रमुखादयः" [ ३. १. २३. ] इति सूत्रेण गतशब्दलोपपूर्वकसमासे "उपसर्गात्" [ ७. ३. १६२. ] इति नासिकाया नसादेशो न स्यात्, क्रियायोगे सत्येवोपसर्गसंज्ञाया जायमानत्वात्, क्रियायाश्च धात्वर्थत्वाद् नासिकार्थं प्रति नोपपद्यत उपसर्गत्वमिति प्रणसं मुखमित्याद्यनुपपत्तिरिति चेत्? उच्यते–यत्र परतया धातुयोगे किमपि कार्यं विधीयते तत्रैव *येन धातुना* इति न्यायादरेणेतरस्याः क्रियाया योगे जायमानमुपसर्गत्वमितरां क्रियां प्रति नोपसर्गत्वं भवति, यथा- अभिषिञ्चत्यादिलक्ष्ये षत्वविधायके "उपसर्गात् सुग्-सुव्०" [ २. ३. ३९. ] इत्यादौ; यत्र तु परतया धातुयोगमनपेक्ष्य कार्यं विधीयते तत्र कामपि क्रियां प्रति प्रादेरुपसर्गत्वमादाय तत् तत् कार्यं विधीयते सूत्रारम्भसामर्थ्यात्, यथा–"उपसर्गादध्वनः" [ ७. ३. ८९. ] इत्यादौ, अनेन हि उपसर्गात् परस्य अध्वन्शब्दस्य अः समासान्तो भवति, यद्यत्राध्वन्शब्दार्थमपेक्ष्योपसर्गत्वं गृह्येत तदा तद् वन्ध्यापुत्रत्वमिवालीकतामुपयत् कार्याय न कल्पेत, तदेवं सूत्रमेव वैयर्थ्यमुपेयात्, यां कामपि क्रियामादायोपसर्गत्वभाजः शब्दात् परस्याध्वनः समासान्ते विधित्सिते तु प्रगतोऽध्वानमित्यर्थके 'प्राध्वो रथः' इत्यत्र गत्यर्थक्रियामादाय जातमेवोपसर्गत्वमिति भवति तत्र समासान्तः । 'प्रणसं मुखम्' इत्यत्रापि 'उपसर्गात् परस्य नासिकाशब्दस्य नसादेशो भवति' इत्यर्थकेन "उपसर्गात्" [ ७. ३. १६२. ] इत्यनेन नसादेशे विधास्यमाने नासिकार्थमपेक्ष्योपसर्गत्वग्रहणे तदसंभवितया सूत्रमेव व्यर्थं स्यादितीहापि लुप्यमानगतादिघटकगत्याद्यर्थक्रियामादाय जातमेवोपसर्गत्वं समाश्रीयत इति भवेदेव नसादेशः । न च यत्र परतया धातुयोगः किमपि कार्यं प्रयोजयति, यथा–अभिषेकशब्दादौ "स्था-सेनि-से०" [ २. ३. ४०. ] इति विधीयमानं षत्वम्, प्रकृतमिदं [ "ऋत्यारुपसर्गस्य" ] इति सूत्रं च, तत्रापरस्याः क्रियाया योगे उपसर्गत्वमनुभवन् प्रादिरुद्देश्यतया न गृह्येतेत्येतदर्थं साफल्यमश्नुतु नाम गुरुभूतमप्युपसर्गग्रहणम्, यत्र परतया धातुर्नाश्रीयते कार्याय तत्र प्रादिशब्द एवोपसर्गस्थाने कथं नाद्रियते? यथेहैव नसादेशविधायके "उपसर्गात्०" [ ७. ३. १६२. ] "उपसर्गादध्वनः" [ ७. ३. ७१. ] इत्यादाविति चेत्? मैवम्-गताद्यर्थानन्तर्भावेण प्रादीनां नासिका-ध्वन्शब्दादिना सह समासे नसादेशादिवारणायोपसर्गग्रहणस्य सार्थक्यात् । नन्वेवमुपसर्गग्रहणस्य "उपसर्गादध्वनः" [ ७. २. ७९. ] इत्यादिस्थलीयस्य चारितार्थ्ये *यत्रोपसर्गत्वं न सम्भवति०* इत्येतन्न्यायज्ञापकत्वं

सर्वसम्मतं विलुप्येतेति चेत्? न-तन्न्यायज्ञापनद्वारैव चारितार्थ्यस्य वक्तव्यत्वात् । तथाहि-प्रादिग्रहणेन लघुना सिद्धे यदुपसर्गग्रहणं गुरुभूतमुपास्यते तज्ज्ञापयति-*यत्रोपसर्गत्वं न सम्भवति तत्रोपसर्गशब्देन प्रादयो लक्ष्यन्ते, न तु सम्भवत्युपसर्गत्वे* इति, यत्रोपसर्गत्वम्-यद्विधिसूत्रीयोपसर्गात् परत्वेनोद्देश्यताश्रयीभूतोपसर्गत्वम्, न सम्भवति-तदुद्देश्यार्थस्य क्रियात्वाभावाद् वा क्रियात्वेऽपि तया सह योगाभावाद् वा न सम्भवति, तत्रोपसर्गशब्देन-तद्विधिसूत्रीयोपसर्गशब्देन, प्रादयः-तदुद्देश्यताश्रयेतरव्यक्तिनिरूपितोपसर्गत्वभाजः प्रादयः, लक्ष्यन्ते-तत्सूत्रीयोद्देश्यतया ज्ञायन्ते, न तु सम्भवत्युपसर्गत्वे-तत्सूत्रीयोपसर्गात् परतयोद्देश्यताश्रयव्यक्तिनिरूपितोपसर्गत्वे सम्भवति, न तादृशा लक्ष्यन्ते, इति न्यायार्थः । प्रकृते 'प्रणसं मुखम्, प्राध्वो रथः' इत्यादौ "उपसर्गात्" [ ७. ३. १६२. ] "उपसर्गादध्वनः" [ ७. ३. ७९. ] इत्यादिसूत्रीयोपसर्गात् परतयाऽऽश्रितयोर्नासिका-ऽध्वन्शब्दयोरर्थस्य क्रियात्वविरहेण तन्निरूपितमुपसर्गत्वं प्रादेर्न सम्भवतीति तत्रोपसर्गशब्देन नासिकादीतरार्थगताद्यर्थं क्रियारूपमादाय तद्योगेनोपसर्गत्वं प्राप्तस्य प्रादेर्ग्रहणं भवतीति भवति तत्रेष्टो नसाद्यादेशः । यत्र तु सूत्रीयोपसर्गात् परतयोद्देश्यताश्रयव्यक्तिनिरूपितमप्युपसर्गत्वं सम्भवति, यथा-"ऋत्यारुपसर्गस्य" [ १. २ ९. ] तत्र नान्यनिरूपितोपसर्गत्वमादाय कार्यं भवतीति प्रार्च्छतीत्यादौ न दोषः । केचित्तु 'यत्सूत्रीयोद्देश्यताश्रयीभूतमुपसर्गत्वं न सम्भवति तत्रोपसर्गशब्देनोपसर्गसंज्ञारहिता एव प्रादयो गृह्यन्ते, सम्भवत्युपसर्गत्वे तु न तथा, इति न्यायार्थमाचक्षते, परं तन्मते गताद्यर्थयोगानुभवेन हेतुनोपसर्गसंज्ञामनापन्नस्य प्रादेर्नासिका-ऽध्वन्-प्रभृतिना समं समासे नसादेशादिः कथं न वारणीय इति त एव प्रष्टव्याः । वयं तु नोपसर्गसंज्ञाविरहिणमुपसर्गपदेन लक्षयामः, किन्तु सूत्रीयोपसर्गात् परतयोद्देश्यताश्रयनिरूपितोपसर्गत्वविरहे व्यक्त्यन्तरनिरूपितोपसर्गत्वेऽपि प्रादिकार्यविधावाश्रयामः, इति गतादिघटकगम्याद्यर्थयोगमननुभवतः प्रादेरुपसर्गत्वविरहाद्वास्माकं तत्र नसाद्यनिष्टादेशादिः सम्भवतीति सूक्ष्मशेमुषीजुषां ध्येयम्" इति । इदं च तत्रत्यव्याख्यानमेतन्न्यायसम्बद्धमेवेतीह प्रदर्शितम् । अयमत्र निष्कर्षः-उपसर्गत्वव्यवहारप्रयोज्यं कार्यं यदि धातुगतं चिकीर्ष्यते तर्हि पुत्रादिव्यवहारवत् स्वनिरूपितोपसर्गत्ववत्प्रयोज्यतायामेव कार्यम्, अन्यथोपसर्गसंज्ञाया महासंज्ञात्वकरणमेव व्यर्थं स्यात् । यत्र च न धातुगतं कार्यं चिकीर्षितमपि तु नामादिगतं तत्राग्रिमन्यायेन निर्वाह इति विषयविभागेन सर्वलक्ष्यसंस्कारे स्वीकृते न केषामपि दोषाणामवकाश इति ॥ ५१ ॥

***यत्रोपसर्गत्वं न सम्भवति तत्रोपसर्गशब्देन प्रादयो लक्ष्यन्ते, न तु सम्भवत्युपसर्गत्वे* ॥ ५२ ॥**

सि०-पूर्वन्यायेन यद्धात्वर्थक्रियाविशेषका उपसर्गास्तस्य धातोर्योग एव तेषामुपसर्गत्वमित्यस्यार्थस्य निर्णीतत्वाद् यत्र नाम्ना युक्ताः प्रादयस्तत्र तेषामुपसर्गत्वं नास्तीत्युपसर्गात् परतयोद्दिष्टानां तेषां कार्यं न स्यादिति तत्प्रापणार्थः पूर्वन्यायापवादभूतोऽयं न्यायः । अस्यार्थः-यस्मिन्-उपसर्गात् परतयोद्दिश्य कार्यविधायके शास्त्रे, उपसर्गत्वं-क्रियावाचिधातुयोगे विधीयमानमुपसर्गत्वं, न सम्भवति-तद्युक्तस्य पदस्य क्रियावाचकत्वाभावात् क्रियावाचकत्वेऽपि च तेन सह सम्बन्धाभावान्न सम्भाव्यतां गच्छति, तस्मिन्-शास्त्रे, उपसर्गशब्देन प्रादयो लक्ष्यन्ते- तत्सूत्रीयोद्देश्यतया ज्ञायन्ते,सम्भवत्युपसर्गत्वे तु न, तथा सति उपसर्गत्वहीनाः प्रादयो न लक्ष्यन्त इति भावः । अत्र च ज्ञापकं तादृशोपसर्गपरत्वेनोद्दिष्टस्य कार्यविधायकं सूत्रमेव, यथा-प्रगतोऽध्वानं प्राध्वो रथ इत्यत्र प्रशब्दस्याध्वन्शब्दापेक्षयोपसर्गत्वविरहेऽपि "उपसर्गादध्वनः" [ ७. ३. ७३. ] इति समासान्तोऽत् भवति, अन्यथा प्रशब्दस्य गतशब्दार्थं प्रत्येवोपसर्गत्वात् प्रस्योपसर्गत्वाभावेन सूत्रस्याप्रवृत्तौ प्रसक्तायां स्वज्ञापितेन प्रकृतन्यायेनेदृशस्थले प्रादीनामुपसर्गशब्देन ग्रहणे स्थापिते भवति सूत्रप्रवृत्तिः । सूत्रारम्भसामर्थ्यानुमितस्य चास्य नानित्यत्वसम्भावना, न च तादृशं लक्ष्यमेव क्वचिदस्ति यदर्थमनित्यत्वमिष्येत । प्रगता नासिका यस्य स प्रणस इत्यादावपि "उपसर्गात्" [७. ३. १६२. ] इत्यस्य प्रवृत्तिः प्रकृतन्यायमूलिकैवेति तदप्यस्य न्यायस्य फलमिति बोध्यम् ॥ ५२ ॥

***यत्रोपसर्गत्वं न सम्भवति तत्रोपसर्गपदेन प्रादयो लक्ष्यन्ते, न संभवत्युपसर्गत्वे* ॥ ५२ ॥**

त०---पूर्वन्यायेनोपसर्गशब्दस्य सम्बन्धिशब्दरूपेण व्यवस्थायां कृतायां तदयोग्यानां नाम्नामुपसर्गनिमित्तकस्य कार्यस्याप्राप्तौ प्रसक्तायामिमं न्यायं निर्णायकत्वेनोदाहृतवानस्मि पूर्वन्यायविवरणे, तत्रैव चैतद्विषयो विशेषः प्रतिपादित इति नेह पुनर्विचार्यते । अन्यैरपि वैयाकरणैरीदृशविषये एवमेव भूतपूर्वामुपसर्गसंज्ञामादाय उपसर्गपदस्य प्राद्युपलक्षकत्वमाश्रित्य वा निर्वाहः क्रियते, तथाहि-पाणिनीयतन्त्रे महाभाष्ये "गतिश्च" [ पा० सू० १. ४. ५९ ] इति सूत्रे "गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्ताः संप्रतीति वचनम्" इति वार्तिकं सप्रयोजनं व्याख्याय तत्र दूषणवार्तिकमिदमुपात्तम्-"वद्विधिनरभावाबीत्वस्वाङ्गादिस्वरणत्वेषु दोषः" इति, तत उत्तरितम्-"वद्विधि-

नस्भावाबीत्वस्वाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात् सिद्धम्" इति। एतच्च वार्त्तिकं भाष्यकृता इत्थं व्याख्यातम्-"अनवकाशा एते विधयः, ते वचनप्रामाण्याद् भविष्यति" इति । अत्र कैयटः-"येषां हि क्रियाशब्दप्रयोगे तं प्रत्युपसर्गसंज्ञा ते संप्रलनुपसर्गसंज्ञा अपि गृह्यन्ते इत्यर्थः" इति । अनेन च यद्यपि *साम्प्रतिकाभावे भूतपूर्वगतिः* इति न्यायबलेन तादृशस्थले भूतपूर्वमुपसर्गत्वं ग्राह्यमित्यायाति, तथापि "तत्र सर्वत्रोपसर्गग्रहणं प्राद्युपलक्षणमिति भावः" इति नागेशोक्त्या प्रादिलक्षणैवेति समायाति । स्वं मतमपि तथैवेति पूर्वं प्रदर्शितमेवेत्यलमधिकेनेति ॥ ५२ ॥

## *शीलादिषु प्रत्ययेषु नासरूपोत्सर्गविधिः* ॥ ५३ ॥

सि०—"असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [५. १. १६.] इति सूत्रेणाऽपवादविषयेऽप्युत्सर्गप्राप्तप्रत्ययस्यासरूपस्य प्रवृत्तिः पक्षेऽनुज्ञायते; तस्य सूत्रस्य शीलादिष्वर्थेषु विहितानां प्रत्ययानां विषयेऽप्रवृत्तिसूचकोऽयं न्यायः। अत्र शीलादिष्वित्यत्रादिपदेन धर्म-साध्वर्थयोर्ग्रहणम्, तथा च धर्मार्थे साध्वर्थे शीलार्थे च विहितानां प्रत्ययानां विषयेऽसरूपस्योत्सर्गस्य सामान्यविहितस्य प्रत्ययस्य, विधिः-विधानम् "असरूपोऽपवादे०" [५. १. १६.] इतिसूत्रप्राप्तं न भवतीति न्यायार्थः। अस्य च ज्ञापकं "भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुच-श्चानः [५. २. ४२.] इति सूत्रे पद्यतेरनुकर्षणार्थं चकारकरणम्, अनेन हि सूत्रेणानो विधीयते, स च पद्यतेरिदित्वात् "इङितो व्यञ्जनाद्यन्तात्" [५. २. ४४.] इत्यनेनैव सिद्धः। तथा च सिद्धेऽपि सति यदनस्य विधानार्थमिह पद्यतेरनुकर्षणार्थं चकारः पठ्यते तेनायं न्यायो ज्ञाप्यते इति लभ्यते। कथं कृत्वा ज्ञापकमिति चेत्? उच्यते-"लष-पत-पद०" [५. २. ४१.] इत्युकणा बाधो मा भूदेतदर्थमेव हि "भूषा-क्रोधार्थ०" [५. १. ४२.] इति सूत्रे चकारेण पदनुकृष्यते, तच्च नावश्यकम् "असरूपोऽपवादे०" [५. १. १६.] इत्यनेन "इङितो व्यञ्जनाद्यन्तात्" [५. २. ४४.] इत्यौत्सर्गिकस्यानस्याऽनुज्ञातत्वेन बाधस्यासंभवात्। तथा च पदनुकर्षणार्थस्य चकारस्य वैयर्थ्यं स्पष्टमेव । ज्ञापिते चास्मिन् न्यायेऽनेन शीलादिप्रत्ययेष्वसरूपविधिर्निषिद्ध इति। "लष-पत-पदः" [५. २. ४१.] इत्युकणा बाधः स्यादेवेति पदोऽनुकर्षणार्थस्य चकारस्यानविधानार्थमावश्यकत्वमिति स्वांशे चारितार्थ्यम्। फलं चास्य -अलङ्करिष्णुः कन्यामिति यथा भवति तथाऽलंकर्त्ता कन्यामिति तृन्नन्तं रूपं न भवतीति। "भ्राज्यलंकृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजना-ऽपत्रप इष्णुः" [५. २. २८.] इति शीलार्थे इष्णुर्विधीयते, तेनालङ्करिष्णुरिति रूपं भवति, स चेष्णुरसरूपस्योत्सर्गप्रत्ययस्य "तृन् शील-धर्म-साधुषु" [५. २. २७.] इति विहितस्य तृनो यदि विकल्पेन बाधकः स्यात् तर्हि अलङ्कर्त्ता इत्यपि रूपं स्यादेव, किन्तु प्रकृतन्यायेन शीलाद्यर्थप्रत्ययेष्वसरूपविधेर्निषिद्धत्वेन नित्यमेवापवादस्योत्सर्गबाधकत्वमिति 'अलङ्कर्त्ता' इति तृन्नन्तं रूपमसाध्वेव न केवलमयं न्यायः शीलाद्यर्थानां प्रत्ययानां परस्परमसरूपविधावेव प्रवर्त्तते, अपि त्वन्यैरपि सहासरूपविधिर्न भवति, ततश्च शीलाद्यर्थविशिष्टे कर्तरि णकादयोऽप्युत्सर्गा न भवन्ति, इति मतान्तरसंग्रहार्थमस्य न्यायस्यान्योऽर्थ इत्थमाख्यायते-शीलादिप्रत्ययेषु विषयभूतेषु सामान्यतः कर्त्राद्यर्थविहित औत्सर्गिकः कृत्प्रत्ययोऽसरूपोत्सर्गविधिना प्राप्तोऽपि न भवति, तेनालङ्करिष्णुरित्यादौ शीलाद्यर्थे "भ्राज्यलङ्कृग्०" [५. २. २८.] इति विहितस्य इष्णुप्रत्ययस्य विषये सामान्यार्थविहितत्वात् प्राप्तः "णक-तृचौ" [५. १. ४८.] इति णको न भवतीति तत्रार्थे [ शीलाद्यर्थे ] 'अलङ्कारक' इति प्रयोगो न भवति। एतदर्थज्ञापकं च शीलाद्यर्थे 'परिवादक' इत्यस्य सिद्ध्यर्थं "वादेश्च णकः" [५. २. ६७.] इति सूत्रेण तत्रार्थे विशिष्य णकविधानम्, तथाहि-तत्रार्थेऽप्यसरूपविधिना "णक-तृचौ" [५. १. ४८.] इति णके सति परिवादकस्य सिद्धौ सत्यां तद्वैयर्थ्यं स्पष्टमेव, पश्यति त्वाचार्यो यत्-शीलाद्यर्थे विहितैस्तृन्नादिभिर्णको बाधिष्यत इति सामान्यार्थविहितस्य "णक-तृचौ" [५. १. ४८.] इत्यस्य प्रवृत्तिर्न स्यादिति परिवादक इत्यस्य सिद्ध्यर्थं "वादेश्च णकः" [५. २. ६७.] इति सूत्रं रचयति, तदिदं सूत्रं *शीलादिषु नासरूपोत्सर्गविधिः* इति न्यायो न शीलादिष्वेव परस्परमसरूपविध्यभावं वारयति, अपि तु तैः सह सामान्यविहितानामप्यौत्सर्गिकप्रत्ययानामसरूपविधिं वारयतीति ज्ञापयति । दीप्धातोः "इङितो व्यञ्जना०" [५. २. ४४.] इति सूत्रप्राप्तस्यानस्य निषेधाय "न णिङ्-य-सूद-दीपदीक्षः" [५. २. ४५.] इति सूत्रे दीपग्रहणेन प्रकृतन्यायस्य प्रथमार्थस्यानित्यत्वमिति विज्ञायते, तथाहि-दीप्धातोः "स्म्यजस-हिंस०" [५. २. ७९.] इति रो विधीयते, स च "इङितो व्यञ्जना०" [५. २. ४४.] इति विहितस्यानस्यापवादभूत इति सोऽनं बाधिष्यत एवेति तन्निषेधाय "न णिङ्-य-सूद-दीपदीक्षः" [५. २. ४५.] इति सूत्रे दीपधातोर्ग्रहणं व्यर्थमेव, न चासरूपविधेर्विकल्पेन बाधकत्वात् पक्षेऽनो भविष्यत्येवेति तद्बाधनार्थमावश्यकत्वात्र दीपग्रहणमिति वाच्यम्, प्रकृतन्याये शीलाद्यर्थेष्वसरूपविधेः प्रतिषिद्धत्वात्। एवं च प्रकृतन्यायाप्रवृत्तिं विना स्वसार्थक्यमलभमानं "न णिङ्-य-सूद०" [५. २. ५५.] इति सूत्रे दीप-

ग्रहणं प्रकृतन्यायानित्यत्वं ज्ञापयत्येव, तेन शीलाद्यर्थे "शॄ-कम-गम-हन-वृष-भू-स्थ उकण्" [ ५. २. ४०. ] इत्युकणो विषये 'आगामुकः' इति यथा भवति तथा "तृन् शील०" [ ५. २. २७. ] इति तृन्नपि भवतीति । प्रतिपादितं चैतद् विवरणेऽपि । द्वितीयव्याख्याया अपि बाहुल्येन लक्ष्यानुरोधित्वात् क्वचित् सामान्यार्थकप्रत्ययानामपि विषयेऽसरूपविधिर्विकल्पेन शीलाद्यर्थेषु भवतीति "काम-क्रोधौ मनुष्याणां खादितारौ वृकाविव" इत्यादौ शीलार्थेऽपि सामान्यविहितस्य "णक-तृचौ" [ ५. १. ४८. ] इति तृचः प्रयोगो दृश्यते । न चात्र शीलार्थे तृन्नेव कुतो न स्वीक्रियत इत्याशङ्कनीयम्, तथा सति तद्योगे कर्मणि "तृन्नुदन्ता-ऽव्यय-क्वस्वानाऽतृश्-शतृ-ङि-णकच्-खलर्थस्य" [ २. २. ९०. ] इति निषेधान्मनुष्याणामित्यत्र षष्ठी न स्यात्, वृकाभ्यां सहोपमानोपमेयभावनिर्वाहाय च शीलार्थविवक्षात्रावश्यमङ्गीकरणीयेति शीलाद्यर्थप्रत्ययैः सह सामान्यार्थविहितानां प्रत्ययानामसरूपविधिरपि क्वचिद् भवत्येवेत्यवश्यमङ्गीकरणमिति प्रकृतन्यायद्वितीयार्थस्य लक्ष्यानुरोधात् क्वचिदनाश्रयणमिति स्वीकार आवश्यक एवेति प्रतीयते ॥५३॥

***शीलादिषु प्रत्ययेषु नासरूपोत्सर्गविधिः* ॥५३॥**

**त०**—"असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इति हि सूत्रं "स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्यतः प्राग् योऽपवादस्तद्विषये, अपवादेनासमानरूप औत्सर्गिकः प्रत्ययो वा भवतीति बोधयति । तेनेत आरभ्य तत्सूत्रपर्यन्तं पठितेषु विधिषु, असरूपाः प्रत्ययाः, अपवादविषयेऽपि प्रवर्त्तन्त इति । अवश्यलाव्यमित्यत्र घ्यण्, अवश्यभवितव्यमित्यत्र तव्यश्च भवतः, अन्यथा "उवर्णादावश्यके" [ ५. १. १९. ] इत्यस्य विशेषविहितत्वेन तद्विषये तव्यस्य प्रवृत्तिर्न स्यात् तस्य सामान्यविहितत्वेनौत्सर्गिकत्वात् । अस्य च सूत्रस्य शीलाद्यर्थप्रत्ययेष्वपि प्रवृत्तौ तत्र शीलार्थका असरूपा उत्सर्गप्रत्ययाः कर्तृसामान्यार्थका णकादिप्रत्ययाश्च स्युरिति 'अलङ्करिष्णुः' इत्यत्रेष्णुरिव तृन् शीलार्थो णकादिः सामान्यार्थश्च प्रत्ययः स्यादिति तद्वारणायायं न्याय आश्रीयते । अत्र च ज्ञापकं "भूषार्थ०" [ ५. २. ४१. ] इति सूत्रे चकारेण पद्यतेरनुकर्षणमेवेति वृत्तौ प्रतिपादितम् । तच्च बृहद्वृत्तावित्थं श्रूयते—"पदेरिदित्त्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम्—अर्थस्य पदनः, ग्रन्थस्य पदनः, पदनः क्षेत्राणाम्, उत्तरत्र सकर्मकेभ्योऽपि विधिरित्येकेषां दर्शनम्, तथा चोकणा बाधितोऽप्यसरूपत्वात् पदेरनः प्रत्ययो न भवतीति चेत्? एवं तर्हि शीलादिप्रत्ययेष्वसरूपत्वेन शीलादिप्रत्ययो न भवतीति ज्ञापनार्थं पदिग्रहणम्, तेन चिकीर्षिता कटम्, अलङ्कर्ता कन्यामिति न भवति" इति । इत्थं न्यायज्ञापनं प्रदर्श्य तदनित्यत्वमपि प्रदर्शितम्, तथाहि—"कथं तर्हि गन्ता खेलः, आगामुकः; भविता भावुक इत्यादि? क्वचित् समावेशोऽपि भवति, एतदर्थमेव च 'न णिङ्-य०" [ ५. २. ४५. ] सूत्रे दीपिग्रहणम्, अन्यथा रेणाऽनोऽस्य बाध्येतेति तदनर्थकं स्यात्, अनस्यैव विषये समावेश इत्येके" इति । अयमाशयः—"भूषा-क्रोधार्थ०" [ ५. २. ४२. ] इति सूत्रेण पद्यतेरनो विधीयते, स चोत्तरसूत्रेण "इङितो व्यञ्जनाद्यन्तात्" [ ५. २. ५४. ] सिद्ध एवेति व्यर्थ एवेति यद्यपि प्रतीयते, तथापि तत्राकर्मकादित्यस्य सम्बन्धेन यत्र पद्यतेः सकर्मकत्वं यथा–"अर्थस्य पदनः' इत्यादौ, तत्र विधानार्थ इत्यास्थेयम्, इति स्वमतम् । एके चोत्तरसूत्रेण सकर्मकेभ्योऽपि विधानमिच्छन्ति, तथा च तन्मते वैयर्थ्यमेव, तथाहि–"लष-पत-पदः" [ ५. २. ४१. ] इत्युकणा बाधितोऽपि इङिन्निमित्तोऽनोऽसरूपविधिमाश्रित्य पदेर्भविष्यत्येवेति व्यर्थं सत् तत् प्रकृतन्यायज्ञापकम् । तथा चापवादेनोकणाऽनस्य बाधो मा भूदिति पुनरनेन सूत्रेण [ भूषा-क्रोधार्थेत्यनेन ] चकारबलात् स विधीयत इति स्वांशे सार्थक्यं तस्य । तत्र च यद्यपि 'शीलार्थप्रत्ययेष्वसरूपत्वेन शीलार्थप्रत्ययो न भवति' इत्येव न्यायस्वरूपत्वमुक्तमिति शीलार्थप्रत्ययैः सह सामान्यार्थविहितानां प्रत्ययानां बाध्यबाधकभावविषये न प्रकृतन्यायप्रवृत्तिरित्याभिप्रायोऽनुमीयते, तथाऽपि 'असति बाधके प्रमाणानां सामान्ये पक्षपातः' इति सामान्यतयैव शीलाद्यर्थेष्वसरूपविधेः प्रवृत्तिनिषेध एव ज्ञाप्यते इत्यास्थीयते, अन्यथाऽलङ्कारक इत्यादिप्रयोगाणां शीलाद्यर्थे वारणमशक्यं स्यात् । किञ्च "वादेश्च णकः" [ ५. २. ६७. ] इति सूत्रे बृहद्वृत्तौ–"असरूपत्वात् "णक-तृचौ" [ ५. १. ४८. ] इति सिद्धे पुनर्विधानं शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थम्, तेन 'अलंकारकः परिक्षिपः परिरटः' इत्यादि शीलाद्यर्थे न भवति" इत्युक्तम् । एवं च वृत्तावावेदितो द्वितीयोऽर्थः प्रकृतन्यायस्य पृथगेव न्यायरूपत्वेन ज्ञापित आचार्येणेति स्पष्टम् । तस्यायमाशयः–स्वमते "भूषा-क्रोधार्थः०" [ ५. २. ४१. ] इति सूत्रे चकारेण पद्यतेरनस्य विधानं सकर्मकार्थमिति सूचितमिति तथा सति तस्य प्रकृतन्यायज्ञापकत्वासंभव इति तत्र परमतेनैव प्रकृतन्यायज्ञापनमुक्तम् । अत्र च शीलाद्यर्थाऽशीलाद्यर्थयोरसरूपविधेर्विचार इति तथैव न्यायस्वरूपं सूचितमित्येकस्यैव न्यायस्योभयथा योजनसंभवे सर्वमतसंग्रह इति तदेव विचार्यास्माभिर्द्विधाऽयं न्यायो व्याख्यातः । अस्य च न्यायस्य पूर्वार्थस्यानित्यत्वं पूर्वोदाहृत"भूषा-क्रोधार्थ०" [ ५. २. ४१. ] इति सूत्रबृहद्वृत्तिग्रन्थेनैव परिज्ञातम् । यद्यपि तत्र 'अनस्यैव विषये समावेश इत्येके' इति प्रतिपादनाद् येषां मते न्यायस्य ज्ञापनं तेषां मते केवलमनस्यैवापवादेन सह समावेशः [तद्विषय एव प्रकृतन्यायाप्रवृत्तिः] इति लभ्यते, तथापि तत्र

तावन्मात्रेण लक्ष्यनिर्वाह इति द्वितीयार्थस्यैवानित्यत्वेन स्वमतसाधनमिति मत्वा "वादेश्च०" [ ५. २. ६७. ] इति सूत्रशेषे बृहद्वृत्तौ–"शीलादिकृत्प्रत्ययोऽसरूपविधिना न भवति" इति ज्ञापने सकले प्रदर्शिते "बाहुलकात् क्वचिद् भवत्यपि–"कामक्रोधौ मनुष्याणां खादितारौ वृकाविव।" अत्र णकविषये "[ निन्द-हिंस०" ५. २. ६८.] इति विधीयमानणकप्रत्ययविषये ] तृच्" इत्युक्तम्। एतच्चोदाहरणं वृत्तौ व्याख्यातपूर्वम्। शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवति' इत्यत्र शीलादिप्रत्ययेष्वित्यस्य शीलाद्यर्थेषु विहितानां प्रत्ययानां प्राप्तौ सत्यामित्यर्थः। अत्र च 'अशीलादिकृत्प्रत्यय' इत्यस्य सामान्यतः कर्तरि विहितकृत्प्रत्यय इत्यर्थः। वस्तुतस्तु 'शीलाद्यर्थेष्वसरूपविधिर्नास्ति' इति सामान्यरूप एव न्यायोऽभिप्रेय उभयथा व्याख्यानस्यावश्यकत्वात्। आश्रितश्चायं न्यायोऽन्यैरपि वैयाकरणैः सामान्यरूप एव। तथा च शीलाद्यर्थेष्वित्यत्र विषयसप्तमीमाश्रित्योभयथा व्याख्यानस्य सुकरत्वमिति बोध्यम् ॥ ५३ ॥

## *त्यादिष्वन्योऽन्यं नासरूपविधिः* ॥ ५४ ॥

**सि०**—"असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इति सूत्रबाधकन्यायकथनप्रसङ्गेन पूर्वन्यायसमानविषयोऽयमपि न्यायः स्मृतिपथमधिरूढः। इदमसरूपविधायकसूत्रं कृत्प्रत्ययेष्विव निर्दिष्टावधिपठितासु त्यादिविभक्तिष्वपि प्रवर्तेत एवेति तद्विषयेऽपि लक्ष्यसंस्कारानुरूपोऽयं न्यायः। त्यादिषु–त्यादिविभक्तीनां परस्परं बाध्यबाधकविषये, असरूपविधिः "असरूपोऽवादे०" [ ५ १. १६. ] इति सूत्रविहितो विधिः–असरूपापवादप्रत्ययस्य विकल्पेनोत्सर्गविषये प्रवृत्तिरूपं विधानं न भवतीत्यर्थः। तेनोत्सर्गरूपायास्त्यादिविभक्तेर्विषयेऽपवादरूपा त्यादिविभक्तिरेव प्रवर्तते, न तु प्रकृतसूत्रबलेनोत्सर्गरूपाया अपि पाक्षिकी प्रवृत्तिरिति फलति। अत्र च ज्ञापकं "श्रु-सद-वस्भ्यः परोक्षा वा" [ ५. २. १. ] इति सूत्रे वाग्रहणम्, तद्धि यथास्वकालमद्यतन्यादिविधानार्थमित्युक्तं तत्रैव वृत्तौ। अद्यतनी-ह्यस्तन्यौ चोत्सर्गभूतेऽपवादभूतयाऽनयैतत्सूत्रविहितया परोक्षया "असरूपोऽपवादः०" [ ५. १. १६. ] इति सूत्रबलेन विकल्पेनैव बाधिष्येते इति तयोरपि समावेशः स्वत एव सिद्ध इति वाग्रहणं व्यर्थमेव, व्यर्थीभूतं च तत् प्रकृतन्यायं ज्ञापयति। तथा चोक्तं तत्रैव सूत्रे बृहद्वृत्तौ–"असरूपत्वादेवाद्यतन्यादिसिद्धौ वावचनं विभक्तिष्वसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थम्" इति। ज्ञापिते चास्मिन् न्याये "श्रु-सद०" [ ५. २. १. ] इति विहिततया परोक्षया औत्सर्गिक्यावद्यतनी-ह्यस्तन्यौ नित्यमेव बाधिष्येते इति पक्षे यथास्वकालं तयोरपि समावेशार्थं "श्रु-सद०" [ ५. २. १. ] इति सूत्रे वाग्रहणं सार्थकम्। फलं चान्यत्र–'स्मरसि चैत्र! कश्मीरेषु वत्स्यामः' इत्यादौ "अयदि स्मृत्यर्थे भविष्यन्ती" [ ५. २. ९. ] इति सूत्रविहितभविष्यन्तीविषये प्राप्ताऽपि "अनद्यतने ह्यस्तनी" [ ५. २. ७. ] इति ह्यस्तनी न भवति। अन्योऽन्यमिति च कथनं त्यादिविभक्तीनामेव परस्परमुत्सर्गापवादतया प्रवृत्तिविषये प्रकृतन्यायप्रवृत्तिरिति सूचनार्थम्, तेन त्यादिविभक्तेरपवादभूताया विषये उत्सर्गभूता त्यादिविभक्तिरेव न समाविशति, कृत्प्रत्ययस्तु तत्र विषये भवत्येव, यथा–तत्रैवोपशुश्रावेति प्रयोगो यथा भवति, तथोपश्रुतवानिति प्रयोगोऽपि भविष्यत्येवेति ॥ ५४ ॥

## *त्यादिष्वन्योऽन्यं नासरूपविधिः* ॥५४॥

**त०**—ननु पूर्वन्याय एव 'त्यादिषु च' इति पठितव्ये किमर्थमयं पृथगुपदिश्यते इति चेत्? न–'अन्योऽन्यम्' इति विशेषकथनार्थत्वात्, त्यादिषु हि त्यादीनामेव परस्परमुत्सर्गापवादभावे प्रकृतन्यायप्रवृत्तिस्वीकारात्। न च तदपि सहैव पठ्यताम्–'शीलाद्यर्थेषु त्यादिषु चान्योन्यं नासरूपविधिः' इति वाच्यम्, तथा सति शीलादिप्रत्ययानां सामान्यार्थप्रत्ययैः सहासरूपविधिनिषेधो न स्यात्, इष्यते च सोऽपीति पूर्वन्यायव्याख्यावसरे प्रपञ्चितम्। अत्र च न्याये ज्ञापिते सति "वाऽऽकाङ्क्षायाम्" [ ५. २. १०. ] इति "ह-शश्वद्-युगान्तः-प्रच्छ्ये ह्यस्तनी वा" [ ५. २. १३. ] इति "वाऽद्यतनी पुराऽऽदौ" [ ५. २. १५. ] इत्यादिषु सर्वत्र वाग्रहणस्य सार्थक्यं सञ्जायते, अन्यथा त्यादिष्वसरूपविधिसत्त्वे तु सर्वत्र विनाऽपि वाग्रहणमुत्सर्गप्रत्ययानां पाक्षिकी प्रवृत्तिः स्यादेवेति तत्र तत्र वाग्रहणस्य वैयर्थ्यं स्यादेव। बृहद्वृत्तौ च 'वावचनं विभक्तिष्वसरूपोत्सर्गविधिनिषेधार्थम्' इत्येवोक्तम्। तथा च विभक्तिसामान्यग्रहणं कृतम्, न तु त्यादिग्रहणम्, तथापि "असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इति सूत्रगृहीतेऽवधौ त्यादय एव विभक्तयः पठ्यन्ते न तु स्यादय इति विशेषपर्यवसायित्वमेव न्यायस्येति फलति ॥ ५४ ॥

## *स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ* ॥ ५५ ॥

**सि०**—प्राक् क्तेः पठितेषु प्रत्ययेषु निर्णायकतया "असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. ५६. ] इति सूत्रमुक्तम्, क्तेः परतस्तन्निर्णयार्थमयं न्याय आश्रीयते। अत्र स्त्रीत्यनेन "स्त्रियां क्तिः" [ ५. ३. ८९. ] इत्यधिकारोक्ताः प्रत्यया गृह्यन्ते, स्त्रियामित्यस्याधिकारश्च "भावे" [ ५. ३. १२२. ] इति सूत्रपर्यन्तमस्ति। क्तिः, क्यप्, शः, यः, अः,

अङ्, अनः, क्विप्, ञः, इञ्, णकः, इत्येते प्रत्ययाः पठ्यन्ते, तेषां खलोऽनस्य च विषये अल् यदि प्राप्येत तर्हि ते प्रत्यया यथास्वमलो बाधका भवन्ति । 'अन' इत्यनेनानट् ग्राह्यः, स्त्री-खलनानां परस्परस्पर्धे च स्त्रियाः खलनौ बाधकौ स्याता-मिति न्यायार्थः । अयं च न्यायः स्पर्धमूलक इति "स्पर्धे" [ ७. ४. ११९. ] इत्यस्यैव प्रपञ्चरूपः, तत्र च परशब्दस्य पाठकृतपरत्वार्थकत्वमिष्टत्वार्थकत्वं चेति पूर्वस्यापि तेन संग्रहो भवति, कुत्र को विधिरिष्ट इत्यत्र लक्ष्यानुसारि शास्त्रकृद्व्याख्यानमेव शरणम् । तथा च स्वीकृते न्याये चयनमित्यर्थे चिधातोः "युवर्ण-वृ-दृ-वश-रण-गमृद्ग्रहः" [ ५. ३. २८. ] इत्यल्, "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिश्च प्राप्तौ, तत्र प्रकृतन्यायात् परत्वमूलके निर्णये परत्वात् क्तिरेव भवति, स्त्रीप्रत्ययत्वात् । एवं दुःखेन चीयते इत्यर्थे "दुःस्वीषतः कृच्छ्राऽकृच्छ्रार्थात् खल्" [ ५. ३. १३९. ] इति खल्, पूर्ववत् "युवर्ण०" [ ५. ३. २८. ] इत्यल् च प्राप्तौ, तत्रापि परत्वात् खलेव भवति । एवं पलाशानि शात्यन्तेऽनेनेत्यर्थे पलाशोपपदात् शातयतेः "करणाधारे" [ ५. ३. १२९. ] इत्यनटः, "युवर्ण० [ ५. ३. २८. ] इत्यलश्च प्राप्तौ परत्वादनडेवेति प्रथमांशोदाहरणानि ॥ तथा दुःखेन भिद्यते इत्यर्थे "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः, "दुःस्वीषतः०" [ ५. ३. १३९. ] इति खल् च प्राप्तः, तत्र परत्वात् खलेव भवति, प्रकृतन्यायस्वारस्यात् । तथा च 'दुर्भेदा भूः' इत्येव प्रयोगः कर्मणि खलो भवनात् । एवं 'सक्तवो धीयन्तेऽस्याम्' इत्यर्थे "स्त्रियां क्तिः" [ ५. ३. ९१. ] "करणाधारे" [ ५. ३. १२९. ] इत्याभ्यां क्रमात् क्त्यनटोः प्राप्तौ परत्वादनडेव भवतीति सक्तुधानीत्येव प्रयोगः । यद्यपि सर्वत्रात्र परत्वमूलिकैव व्यवस्थेति "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषयैव निर्वाहः सिध्यति, तथापि क्वचिद्विषये तस्याः परिभाषाया अपि न नैयत्येन व्यवस्थापकत्वमिति सूचयितुं न्यायस्वीकारः कृतः । तथा चास्य लक्ष्यानुरोधित्वेन क्वचिदप्रवृत्तिरपि, अत एव 'जयः' इत्यादिषु "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तेः, "युवर्ण०" [ ५. ३. २८. ] इत्यलश्च प्राप्तौ पूर्वोऽप्यलेव भवति परशब्दस्येष्टवाचित्वाश्रयणात्, एवं 'शिरोऽर्तिः' इत्यादौ क्त्यनटोः प्राप्तौ क्तिप्रत्यय एव, अयमाशयः-शिरसोऽर्दनमित्यर्थे "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः, "अनट्" [ ५. ३. १२४. ] इत्यनट् च प्राप्तः, तत्र परोऽप्यनट् न प्रवर्तते किन्तु क्तिरेवेति ॥ ५५ ॥

***स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ* ॥५५॥**

त०—वृत्तिप्रदर्शितदिशा यद्यपि "स्पर्धे" [ ७. ४. ११९. ] इति सूत्रेणैव प्रकृतन्यायस्य गतार्थताऽस्ति, तथाप्यन्यत्रासरूपविधिकथनेनात्र प्रकरणे "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषाया न प्रवृत्तिरिति शङ्कासम्भवात् तदपाकरणार्थं "शिरोऽर्तिः' इत्यादिप्रयोगे च पूर्वस्यैव विधेरिष्टतया स्पर्धनिमित्तकस्य परत्वबलवत्त्वस्य नेहाश्रयणमिति प्रदर्शनार्थं च प्रकृतन्यायाश्रयणम्, न्यासस्य हि स्वविरयष्टिप्रायतया क्वचिदनाश्रयणस्य युक्तत्वात्, सूत्ररूपस्य च तस्यानाश्रयणे बीजाभावात् । किञ्च न्यायानां सर्वतन्त्रसाधारणतया यत्र तन्त्रे ह्यधिकारोक्तप्रत्ययादीनामलः पूर्वतया पाठः स्यात् तत्र स्पर्धनिमित्तकव्यवस्थाया असम्भवात् तदर्थं प्रकृतन्यायस्यावश्यकत्वात् । एतच्च प्राचां दिशा, तैरेतन्न्यायस्य "स्पर्धे" [ ७. ४. ११९. ] इति सूत्रप्रपञ्चत्वेनोक्ततया तदनुसारमिहास्माभिस्तथैव व्याख्यातत्वात् । वस्तुतस्तु नात्र स्पर्धमूलिका व्यवस्था न्यायं विना सम्भविनी, यतः पर-नित्या-ऽन्तरङ्गा-ऽपवादानामुत्तरोत्तरं बलीयस्त्वस्य *परान्नित्यम्* इत्यादिन्यायैः प्रतिपादितत्वेनेह सामान्यविशेषभावमूलकबाध्यबाधकभावशङ्कायाः सत्त्वेन तदपाकरणायैव परत्वमूलिकाया व्यवस्थायाः स्थापनार्थं न्यायादरः । तथा च न्यायो लक्ष्यानुरोधमूलक एव । अन्यैश्च वैयाकरणैरेतदर्थं वचनमेवारभ्यते, तथाहि-"ईषद्-दुः-सु-षु कृच्छ्रा-कृच्छ्रार्थेषु खल्" [ पा० सू० ३. ३. १२६. ] इति सूत्रे महाभाष्ये-"अजब्भ्यां स्त्री-खलनाः" "स्त्रियाः खलनौ विप्रतिषेधेन" इति वार्तिकद्वयमेतदर्थमुक्तम् । तत्र हि तन्त्रे स्वरभेदनिमित्तमलः स्थाने द्वौ प्रत्ययौ पठ्येते-'अच्, अप्' च । तथा च सूत्रे "एरच्" [ पा० सू० ३. ३. ५६. ] "ऋदोरप्" [ पा० सू० ३. ३. ५७. ] इवर्णान्तादच् प्रत्ययो भवति भावे, ऋवर्णादुवर्णान्ताच्च 'अप्' प्रत्ययः, प्रक्रियायां वैशिष्ट्याभावेऽपि स्वरे वैशिष्ट्याद् भेदाश्रयणम्, तयोः प्राप्तौ स्त्री-खलना भवन्ति विप्रतिषेधेनेति पूर्ववार्तिकार्थः; स्त्रिया अपि खलनौ भवतो विप्रतिषेधेन [ स्पर्धेन ] इति परवार्तिकार्थः । तथा चापवादविषयेऽप्राप्तस्य परबलवत्त्वस्य विशिष्य विधानमाश्रीयते । तथैव स्वमतेऽपि विशिष्यैव विधानमेतन्न्यायरूपेण स्वीकृतमित्यवधेयम् । 'शिरोर्तिः' इति प्रयोगसाधनाय "नाम्नि पुंसि घः" [ ५. ३. १२१. ] इति सूत्रबृहद्वृत्तौ च बाहुलकादत्र क्तिरेवेति यदुक्तं तदपि प्रकृतन्यायाप्रवृत्तिज्ञापनद्वारैवेति सङ्गमनीयम्, इति प्राञ्चः, तच्च सति न्यायानित्यत्वस्य फलान्तरोपयोगे समादरणीयम्, अन्यथा बाहुलकस्य सर्वोपाधिव्यभिचारार्थत्ववत् न्यायबाधनेऽपि क्षमत्वान्न न्यायेऽविश्वासः समाश्रयणीय इति युक्तं प्रतिभाति । लक्षणैकचक्षुर्भिश्च स्वमतिवैभवेन किमपि निश्चेतुमशक्यमिति ॥ ५५ ॥

## *यावत् संभवस्तावद् विधिः* ॥ ५६ ॥

सि०—यावदिति तावदिति च क्रियाविशेषणे, तथा च यावद्वारं विधेः प्रवृत्तिः सम्भाव्यते,न केनचिन्निमित्तेन विहन्यते, तावत् प्रवृत्तिर्भवति । सकृत् प्रवृत्त्या कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तेरप्रयोजनत्वात् सत्यपि सम्भवे प्रवृत्तिर्न स्यादित्ययं

तत्प्रापकः, सति च केनचिन्निमित्तेन व्याघाते पुनः प्रवृत्तिप्रतिषेधकश्चायं न्यायः । अस्य च ज्ञापकं "य्वृत् सकृत्" [ ४. १. १०२. ] इति सूत्रम्, तद्धि "व्येंग् संवरणे" इत्यस्य "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इति कृतात्वस्य क्ये 'संवीयते' इत्यादावेकवारं "यजादि-वचेः किति" [ ४. १. ७९. ] इति सूत्रेण 'या' इत्यस्य य्वृति 'वि' इति जाते पुनः *एकदेशविकृत० *न्यायेन तस्य यजादित्वमाश्रित्य "यजादि०" [ ४.१.७९ ] इत्यनेन प्राप्तय्वृन्निषेधाय क्रियते । यदि चायं न्यायो न स्यात् तदा सकृत् सूत्रं प्रवृत्तमिति कृत्वोक्तरीत्या पुनः प्रवृत्तेरव्याहतत्वेन सम्भवेऽपि पूर्वप्रवृत्त्यैव शास्त्रार्थस्य कृतत्वात् पुनः प्रवृत्तिर्न स्यादेवेति व्यर्थमेव तत् सूत्रम् । तथा च क्रियमाणमिदं सूत्रं प्रकृतन्यायसद्भावं गमयति । ज्ञापिते च न्याये पुनरपि 'य्वृत्' स्यात्, तद्वारणार्थं सूत्रं सार्थकम् । फलं चान्यत्र सूत्रन्यायानां यावत् संभवं प्रवृत्तिः । तथा च 'त्वक्' इत्यादौ "अदीर्घात्०" [ १.३.३२. ] इति कस्य विरामनिमित्तके द्वित्वे कृते पुनरप्येकव्यञ्जनपरत्वनिमित्तके च द्वित्वे कृते ककारत्रययुतं रूपं भवति, तत्र च मध्यमस्य कस्य "धुटो धुटि स्वे वा" [ १. ३. ४८. ] इति लोपे पुनराद्यकस्यैकव्यञ्जनपरत्वनिमित्तकं द्वित्वप्राप्तमपि न भवति, एवं सत्यनवस्थाप्रसङ्गेन क्रियानुपरमप्रसङ्गात् प्रयोगस्य परिनिष्ठितत्वं न स्यादिति व्याघातात्, किञ्च *यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते* इति न्यायेन निरर्थकविधेः प्रवृत्तेर्निषिद्धत्वान्न भवति । तथा चेतुमिच्छतीत्यर्थे चिकीषतीत्यत्र परत्वाद् द्वित्वात् पूर्वमेव "स्वर-हन्-गमोः सनि धुटि" [ ४. १. १०४. ] इति दीर्घे ततो द्वित्वादौ क्यादेशे कृते पुनः केर्दीर्घो भवति । न्याये यावत्संभवं प्रवृत्तिर्यथा–ब्रूगः कृतवोचादेशस्य प्रण्यवोचतेत्यादौ णत्वार्थं *भूतपूर्वकस्तदुपचारः* इति न्यायस्य द्विवारं प्रवृत्तिः, तत्र प्रथमप्रवृत्त्या वोचादेशस्य वचत्वोपचारः, द्वितीयप्रवृत्त्या च वचादेशस्य ब्रूत्वोपचारः, तस्मिंश्च सति "अकखादि०" [ २. ३. ८०. ] इत्यनेन नेर्नो णो भवति, न्यायस्य प्रथमप्रवृत्त्या तु न कार्यसिद्धिः, तेन वोचरूपलाभेऽपि तस्य [ आदेशरूपस्य ] धातुष्वपठितत्वात्, "अकखादि०" [ २. ३. ८०. ] इति सूत्रे च धातुपाठपठितस्यैव धातोर्ग्रहणात् । इत्थं च न्यायस्यापि यथासम्भवं प्रवृत्तिरावश्यकीति साऽनेन न्यायेन सिद्धा भवति । अस्य च न्यायस्य सम्भवमूलकत्वेन यत्रासंभवो व्याघातादिर्वा तत्र स्वत एवाप्रवृत्तेरनित्यत्वाश्रयणस्य नावश्यकतेति तच्चिन्ता न क्रियते ॥ ५६ ॥

---

### *यावत् सम्भवस्तावद् विधिः* ॥ ५६ ॥

त०—'त्वक्' इत्यादौ द्विधा ककारस्य द्वित्वार्थमयं न्यायः समाश्रीयते । स्वीकृतश्चायमाचार्यैरपि, तथाहि–"य्वृत् सकृत्" [ ४. २. १०२. ] इति सूत्रे बृहद्वृत्तौ–"*यावत् सम्भवस्तावद् विधिः* इति न्यायात् पुनः प्राप्तं प्रतिषिध्यते" इत्युक्तम् । तत्र यद्यपि सिद्धतयैवायं न्यायः समुपलब्धस्तथापि ज्ञापकान्तरानुपलब्धेस्तदेव सूत्रमिह ज्ञापकमिति मन्तव्यम् । केचित् तु–'एकस्यां व्यक्तावेकं लक्षणं सकृदेव प्रवर्त्तते' इत्येकस्यां व्यक्तौ ककाररूपे एकं लक्षणम् "अदीर्घाद् विरामैकव्यञ्जने" [ १. ३. ३२. ] इति सकृदेव प्रवर्त्तिष्यत इति पुनर्द्वित्वं नोचितमित्याहुः, तन्न–पूर्वं विरामनिमित्तकं द्वित्वं भवति पश्चाच्चैककञ्जननिमित्तकमित्युद्देश्यस्याभेदेऽपि निमित्तस्य स्फुटं भेदात्, एतेन चानन्त्यापत्त्यनवस्थापत्त्यादिदोषोऽपि निरस्तः ॥ ५६ ॥

---

### *सम्भवे व्यभिचारे च विशेषणमर्थवत्* ॥ ५७ ॥

सि०—संभवः–विशेषणस्य विशेष्यसम्बन्धयोग्यता, व्यभिचारः–विशेष्यस्य तेन विशेषणेन विनाऽप्युपलभ्यमानत्वम्, तयोः सतोरेव विशेषणस्य सार्थक्यं नान्यथेति तयोरुभयोरेकस्याप्यभावे विशेषणप्रयोगो नोचित इति न्यायतात्पर्यम् । *यं विधिं प्रत्युपदेशोऽनर्थकः० *इति न्यायस्यायं प्रपञ्च इति प्राञ्चः, तत्तु–आनर्थक्यांशमात्रमादायेत्यर्थपरतया नेयम्, अन्यथा विधेयविषयस्य तस्य वाक्यार्थविषयस्य चास्य कैक्यविषयत्वम् । यच्च तैः स्वकथने हेतुरुक्तः–"अनेनापि व्यर्थविशेषणविधेरेव निषेध्यमानत्वात्" इति, सोऽपि किञ्चित्करणमात्रं विधिरिति मत्वैवेति प्रतीयते, अज्ञातज्ञापनं विधिरिति सिद्धान्ते च विशेषणत्वविवक्षाया विधित्वाभाव एव । अयं च न्याय औचित्यमूलक एव । लोकेऽपि संभवव्यभिचारयोः सतोरेव विशेषणप्रयोगस्य दर्शनात्, नहि मनुष्ये चतुष्पादिति विशेषणं दीयतेऽसम्भवात्, नापि द्विपादित्यव्यभिचारात् । क्वचित् संभवमात्रेऽपि विशेषणं भवति, यथा–'आपो द्रव्यमिति, तत्र यद्यपि वस्तुगत्याऽपामेव विशेषणत्वमिति मते व्यभिचारोऽप्यस्त्येव, यदि च विशेष्यत्वमेव तस्य विवक्षितमित्याग्रहस्तर्हि संभवपदं सम्भवाभावव्यावृत्तिमात्रप्रयोजनमित्यास्थेयम् । तथा च संभवाभावे विशेषणं नार्थवदिति फलति । प्राञ्चस्तु "तौ मु–मो व्यञ्जने स्वौ" [ १. ३. १४. ] इति सूत्रे स्वाविति ग्रहणमस्य न्यायस्य संभावकमित्याहुः । तथाहि–तेषां ग्रन्थः–"तथाहि–स्वाविति विशेषणं तावद् द्विवचनेनानुस्वारस्यानुनासिकस्य च सम्बन्धितम्, तत्र चानुस्वारः कस्यापि स्वो न स्यादित्यतस्तस्यैतद् विशेषणमसंभवि, अनुनासिकस्तु स्वोऽप्यस्वोऽपि स्यादित्यतः संभवित्वाद् व्यभिचारित्वाच्चैतन्न्यायेन तस्यैवैतद् विशेषणं सार्थकम् । एवं च सति स्वाविति विशेषणमनुनासिकस्यैव निर्देष्टुं युक्तम्, तथापि

यद् द्विवचनेनोभयोरपि निर्दिष्टं तदुभयोः सम्बन्धनेऽप्येतस्यात् स्वयमेवानुनासिकस्यैव सम्भन्त्स्यते इत्याशयैव" इति । अत्रेदमुच्यते-ज्ञापनं हि सर्वत्र स्वसार्थक्याय भवति, न च ज्ञापितेऽप्यस्मिन् न्याये स्वाविति द्विवचनस्य सार्थक्यं वक्तुं शक्यम्, द्वयोः सम्बन्धाभावात्, तथा च लौकिकव्यवहारौचित्यसिद्धोऽयं न्यायः, केवलमनुनासिकस्य विशेषणार्थमिहाऽऽश्रीयत इत्यास्थेयम् । अत एव "तौ मुमः०" [ १. ३. १४. ] इति सूत्रे बृहद्वृत्तौ–"स्वेत्यनुनासिकस्यैव विशेषणं नानुस्वारस्याऽसंभवात्" इति सिद्धवत्कृत्यैवायं न्याय आश्रितो न तु ज्ञापनमुक्तम् । अन्यत्रेदृशस्थले ज्ञापनं स्पष्टमेवोच्यते, तथा च ज्ञापकत्वासम्भवं विलोक्यैव तथा कृतमित्यवगम्यते । उदाहरणत्वेन चेदं सूत्रमुदाहर्तुं शक्यते । तथाहि–अत्र पदान्ते इति विशेषणं मग्रहणेनैव सम्बन्ध्यते, तस्य त्वं तरसीत्यादौ पदान्तत्वं 'रंरभ्यसे' इत्यादौ तदपदान्तत्वं चास्तीति सम्भव-व्यभिचारयोः सत्त्वात् । कश्चित्तु सम्भवमात्रेणाऽपि विशेषणत्वमित्युक्ततया "द्वे ब्रह्मणी वेदितव्ये" इत्यादौ ब्रह्मणो द्वित्वाव्यभिचारेऽपि द्वे इति विशेषणसार्थक्यमिति प्राह । वस्तुतस्तु तत्रोभयोरेव विदिक्रियाकर्मत्वबोधनाय तद्विशेषणमुचितमेव । न च ब्रह्मणी इति द्विवचनेनैव गतार्थं तदिति वाच्यम्, एतादृशस्थले द्विवचनस्यानुवादकत्वस्वीकारात् । तथा च नायं न्यायव्यभिचार इति ॥ ५७ ॥

## *संभवे व्यभिचारे च विशेषणमर्थवत्* ॥ ५७ ॥

त०—संभवमूलके पूर्वन्याये विचारिते सत्ययमपि सम्भवमूलकतया स्मृतिपथमधिरूढ इति व्याख्यातः । अयं च न्याय औचित्यसिद्ध एवेत्युक्तं वृत्तौ, व्याकरणान्तरेऽपि तथैव स्वीक्रियते । ग्रन्थादौ चान्येषामपि काकाक्षिगोलकन्यायादीनामिहाश्रयणमित्यावेदितमेव । वृत्त्युदाहृतबृहद्वृत्तिग्रन्थव्याख्यानावसरे महान्यासे च तदभिप्राय इत्थमावेदितः–"संभवे व्यभिचारे च विशेषणमर्थवद् भवति, क्वचिद् 'आपो द्रव्यम्' इतिवत् सम्भवमात्रेऽपि, न तु संभवाभावे । क्वचिदपि मोश्च संभवाभावात् पदान्त इति विशेषणाभावः, तच्छब्दस्य पूर्वपरामर्शित्वेऽपि सकार-लुकोः स्वत्वासम्भवात्, अनुनासिकस्य च संभवाद् द्विवचनोपादानात् तत्प्रतिबद्धानुस्वारस्य न" इति । अग्रेऽपि स्वशब्दप्रयोजनवर्णनप्रसङ्गेन–'रंरम्यते' इत्यादि– रेफोष्मणां [ रशषसहानां ] रेफोष्मव्यतिरेकेणान्ये स्वा न सन्ति स्थानास्यप्रयत्नैक्याभावात्, रेफोष्मणां चानुनासिकत्वाभावात् स्वग्रहणादनुस्वार एव, स्वग्रहणमन्तरेणानुनासिकमात्रविधानेऽत्रापि मकारस्य [ म ] एव वा णकारादिर्वा निमित्तप्रत्यासत्त्या पक्षेऽनुस्वारश्च प्रसज्येतेति स्व इत्येवानुनासिको विधीयते" इति । तथा चैतेन ग्रन्थेन प्रकृतन्यायस्यात्र प्रसिद्धरूपेणैवाश्रयणं, न तु ज्ञापितत्वरूपेणेति समायाति । स्वशब्दस्य ज्ञापकत्वासंभवश्च वृत्तौ स्पष्टीकृत एव । 'द्वे ब्रह्मणी वेदितव्ये' इत्यादौ न्यायस्य व्यभिचारप्रदर्शनमपि न युक्तम्, नहि ब्रह्मशब्दस्य सर्वदा द्वित्वविशिष्टवाचकत्वमेव, तत्र यदा द्वित्वविशिष्टस्य वेदनकर्मत्वं तदा द्विशब्दप्रयोगस्य विशेषणत्वमुचितमेव, 'ब्रह्म जानाति' इत्यादौ व्यभिचारस्य सत्वात् । यद्यपि ब्रह्मणी इति द्विवचनेन द्वित्वस्योक्तत्वाद् *उक्तार्थानामप्रयोगः* इति न्यायस्य प्रसराद् द्वे इति विशेषणं नोचितं तथापि तादृशस्थले समुच्चयस्य द्योतनाय तथाप्रयोग इति "अधि-परी अनर्थकौ" [ पा० सू० १. ४. ९४. ] इति सूत्रे भाष्ये स्पष्टम् । तथा च तत्र समुच्चयो वा वाच्यः, अनुवादकत्वं वाद्विवचनस्यास्थेयमिति ॥ ५७ ॥

## *सर्वं वाक्यं सावधारणम्* ॥ ५८ ॥

सि०—अवधारणं-निश्चयः । लोके स्याद्वादः समाश्रीयते सर्वस्याप्यनैकान्त्यात्, व्याकरणेऽपि "सिद्धिः स्याद्वादात्" [ १. १. २. ] इति सूत्रेण स्याद्वादो लक्ष्यसिद्धये स्वीकृत एव । परमसौ न सार्वत्रिकः, अन्यथा प्रयोगविधेरनाश्वस्तत्व-[ विकल्पाविकल्पनिर्णयाभाव ]प्रसङ्गादिति तस्य क्वाचित्कत्वद्योतनायैष न्याय आश्रीयते, तथा च यत् किञ्चिदिह वाक्यमुच्चार्यते, तत् सर्वं स्वकीयमर्थमवधारयत्येव–निश्चिनोत्येवेति न्यायार्थः । [ वस्तुतस्त्वत्राप्यपेक्षावैचित्र्यात् स्याद्वादो वर्तत एव ] । अत्र च ज्ञापिका तत्र तत्र सूत्रेषु विकल्पोक्तिरेव, अन्यथैतन्न्यायाभावे "ऋलृति ह्रस्वो वा" [ १. २. २. ] इत्यादौ वाग्रहणाभावेऽपि ह्रस्वः स्यादिति कथने स्याद्वादाश्रयणाद्ध्रस्वः स्याच्च न स्याच्चेति विकल्पफलस्य स्वतः सिद्धत्वेन तदुक्तिर्व्यर्थैव स्यात् । "विधि-निमन्त्रणा-ऽऽमन्त्रणा-ऽधीष्ट-संप्रश्न-प्रार्थने" [ ५. ४. २८. ] इति सूत्रेण कामचारेऽपि सप्तम्या विधानेन स्याद्वादाभावेऽपि ह्रस्वविधाने कामचारस्य बोद्धुं शक्यत्वाच्च । इत्थं च सति प्रकृतन्यायज्ञापने तस्य वाक्यस्य [ ह्रस्वः स्यादित्यस्य ] सावधारणत्वनिश्चये ह्रस्वः स्यादेवेत्यर्थे सति कामचारो न स्यादिति गुणादिविशिष्टः प्रयोगो दुर्लभः स्यादिति तदर्थं विकल्पविधानस्य स्वांशे चारितार्थ्यम् । फलं चान्यत्र "समानानां तेन दीर्घः" [ १. २. १. ] इत्यादौ दीर्घः स्यादेवेत्यवधारणाद् दीर्घविशिष्ट एव 'दण्डाग्रम्' इत्यादिप्रयोगः साधुर्न तु तद्रहित इति । वाक्यमिति चोपलक्षणं, क्वचित् पदस्याप्यवधारणपरत्वस्य लक्ष्यानुरोधात् स्वीकर्तुमावश्यकत्वात्, तथाहि–"लुगस्यादेत्यपदे" [ २. १. ११३. ] इत्यत्र 'अपदे' इति पदस्याप्यवधारणपरत्वे सति 'अपदे एव'इत्यर्थपरतयाऽपदादिस्थ एवादेति परे लुग्विधानाद् दण्डाग्रमित्यादौ "वृत्त्यन्तोऽसषे"

**[१. १. २५.] इति वृत्त्यन्तस्य पदत्वनिषेधेनाग्रशब्दस्य पदत्वाभावादपदादिस्थत्वेऽप्यग्रशब्दाकारस्य तस्मिन् परे प्राप्तोऽपि लुग् न भवति, यतोऽग्रशब्दस्याऽत्रापदत्वेऽपि नियमतोऽपदत्वाभावात्, अपदे एवेत्यवधारणेन च यस्य न कदाचित् पदत्वसम्भावना तदादिस्थ एवादेति परतः सूत्रप्रवृत्तेः, इह चाग्रशब्दस्य वृत्तिस्थस्य वृत्त्यन्तत्वावस्थायां "वृत्त्यन्तोऽसषे" [१. १. २५.] इति वचनात् पदत्वाभावेऽपि 'दण्डस्याग्रे' इत्यादिप्रयोगे पदत्वस्याक्षतेः, ततश्च नास्त्यस्यापदादिस्थत्वमेवेति नात्र लुकः प्रवृत्तिरिति । सूत्रं तु यस्यादेतः कदापि पदत्वं न सम्भाव्यते तत्र चरितार्थं तत्रैव च प्रवर्त्ततेऽपि, यथा–पचन्तीति, अत्र शवोऽकारस्यान्तिस्थेऽकारे परे लुक् भवति, स चाकारः सर्वदाऽपदादिस्थ एव न तु कदाचिदपि तस्य पदादिस्थत्वसम्भावना । पदविषयस्यावधारणस्य सूचकं च–'अपदे' इत्यवधारणरहितवचनमेव, दण्डाग्रमित्यादिसिद्धयेऽपद एवेत्यवधार्य वचनस्यावश्यकत्वेऽपि तदवचनं प्रकृतन्यायस्योपलक्षणपरत्वसंभावनयैव । यत्र चैवकारादिरवधारणार्थः पठ्यते तत्र *द्विर्बद्धं सुबद्धं भवति* इति न्यायेन दोषाभावः, अन्यथा तद्वैयर्थ्यमापद्यते, विनाप्येवकारादिना प्रकृतन्यायेनावधारणार्थलाभात् । तथा च स न्यायः प्रकृतन्यायबाधक इति बोध्यम् ॥ ५८ ॥**

## *सर्वं वाक्यं सावधारणम्* ॥ ५८ ॥

**त०**—"सिद्धिः स्याद्वादात् [१. १. २.] इति सूत्रेण सर्वस्यापि विधेरनैकान्तिकत्वे सत्यपि यदिह शास्त्रे तत्र तत्र विकल्पविधानं दृश्यते तेनैवायं न्यायो विज्ञाप्यत इत्युक्तं वृत्तौ । वस्तुतस्तु–स्याद्वादमुद्राविकलं किमपि वस्तु जगति नास्ति, यदाहुः–"आदीपमाव्योम समस्वभावं स्याद्वादमुद्रानतिभेदि वस्तु ।" [ कलिकालसर्वज्ञश्रीहेमचन्द्रसूरयः ] इति । ननु स्याद्वादस्त्वनेकान्तवादः, तत्र कथङ्कारमवधारणार्थः सङ्गतिमङ्गतीति चेत्? उच्यते — तत्रापेक्षाभेदेनावधारणार्थस्याप्यन्तर्भावात्, अत एव स्याद्वादं श्रयन्त्यां सप्तभङ्ग्यां 'स्यादस्त्येव' इत्यादिषु भङ्गेषु ह्यवधारणार्थस्याप्याश्रयणात्, अयं भावः- अत्रानेकान्तद्योतकेन स्यात्पदेन योऽर्थोऽनेकान्तात्मको दर्शितस्तत्र येनापेक्षाविशेषेण नित्यत्वमनित्यत्वं वा दर्शितं तेनापेक्षाविशेषेण तत् तथैवेति प्रदर्शनायैवकारोपादानं, तथा च स्याद्वादेऽपेक्षावैचित्र्यादनेकान्तताऽवधारणं च चारुतरमेवेति । "ऋ-लृति ह्रस्वो वा" [१. २. २.] इत्यादिषु विकल्पार्थं वाशब्दोपादानं च तत्र तत्रानेकान्तायातप्रवृत्त्यभावज्ञापनार्थम् ।

अपेक्षावैचित्र्याश्रयणं च "सिद्धिः स्याद्वादात्" [१. १. २.] इति सूत्रस्य "एकस्यैव ह्रस्व-दीर्घादिविधयोऽनेककारकसन्निपातः सामानाधिकरण्यं विशेषणविशेष्यभावश्च स्याद्वादमन्तरेण नोपपद्यन्ते" इति या बृहद्वृत्तिः, तद्व्याख्यानावसरे शब्दमहार्णवन्यासे चारुतया दर्शितम्, स चायं ग्रन्थः—"एकस्यैवेति, तथाहि–यस्यैव वर्णस्य ह्रस्वत्वं विधीयते तस्यैव दीर्घत्वादिः, तस्य च सर्वात्मना नित्यत्वे पूर्वधर्मनिवृत्तिपूर्वकस्य ह्रस्वादिविधेरसम्भवः, एवमनित्यत्वेऽपि जननानन्तरमेव विनाशात् कस्य ह्रस्वादिविधिरिति सामान्यात्मना नित्यः, ह्रस्वादिधर्मात्मना चानित्य इति । तथा द्रव्याणां स्व-पराश्रयसमवेतक्रियानिर्वर्त्तकं सामर्थ्यं कारकम्, तच्च कर्त्राद्यनेकप्रकारमभिन्नस्याप्युपलभ्यते, यथा–'पीयमानं मधु मदयति, वृक्षमारुह्य ततः फलान्यवचिनोति, विषयेभ्यो बिभ्यदनात्मज्ञस्तेभ्य एवात्मानं प्रयच्छंस्तैरेव बन्धमाप्नोति' इत्यादि, तच्च कथमेकस्य सर्वथा नित्यत्वे एकरूपां वृत्तिमवलम्बमानस्यावस्थान्तराभिव्यक्त्यनुपलम्भाभावाद् घटते? इति साध्यसाधनरूपव्यवहारविलोपः; अनित्यत्वेऽपि न घटते, तथाहि–स्वातन्त्र्यं कर्तृत्वम्, तच्च

"इदं फलमियं क्रिया, करणमेतदेष क्रमो
व्ययोऽयमनुषङ्गजं फलमिदं दशेयं मम ।
अयं सुहृदयं द्विषन् प्रकृतदेशकालाविमा-
विति प्रतिवितर्कयन् प्रयतते बुधो नेतरः" ॥

इत्येवमात्मकपरिदृष्टसामर्थ्यं कारकचक्रप्रयोक्तृत्वलक्षणम्, तदपि नानित्यस्य क्षणमात्रावस्थायित्वेनोपजननानन्तरमेव विनष्टस्य युज्यते, किं पुनः कारकसन्निपातः? इति नित्यानित्यः स्याद्वादोऽङ्गीकर्तव्यः । तथा तमन्तरेण सामानाधिकरण्यं विशेषणविशेष्यभावोऽपि नोपपद्यते । तथाहि - भिन्नप्रवृत्तिनिमित्तयोरेकत्र वृत्तिः सामानाधिकरण्यम्, तयोश्चात्यन्तभेदे घट-पटयोरिव नैकत्र वृत्तिः, नात्यन्ताभेदे भेदनिबन्धनत्वात् तस्य, नहि भवति–नीलं नीलमिति । किञ्च नीलशब्दादेव तदर्थप्रतिपत्तावुत्पलशब्दानर्थक्यप्रसङ्गः; तथैकं वस्तु सदेवेति नियम्यमाने विशेषण-विशेष्यभावाभावः, विशेषणाद् विशेष्यं क्वचिदर्थान्तरभूतमभ्युपगन्तव्यम्, अस्तित्वं चेह विशेषणम्, तस्य विशेष्यं वस्तु तदेव वा स्यादन्यदेव वा? न तावत् तदेव–नहि तदेव तस्य विशेष्यं भवितुमर्हति, असति च विशेष्ये विशेषणत्वमपि न स्यात्, विशेष्यं विशेष्यते येन तद् विशेषणमिति व्युत्पत्तेः; अथान्यत् तर्हि, अन्यत्वाविशेषात् सर्वं सर्वस्य विशेषणम्; समवायात् प्रतिनियतो विशेषण-विशेष्यभाव इति चेत्? न- सोऽप्यविष्वग्भावलक्षण एवैष्टव्यो रूपान्तरपरिकल्पनायामनवस्थाप्रसङ्गः; न चासावत्यन्तभेदेऽभेदे वा सम्भवतीति भेदाभेदलक्षणः स्याद्वादोऽकामेनाप्यभ्युपगन्तव्यः" इति ॥ ५८ ॥

## *परार्थे प्रयुज्यमानः शब्दो वतमन्तरेणापि वदर्थं गमयति* ॥ ५९ ॥

**सि०**—विनाऽवधारणवाचकपदमवधारणार्थस्य पूर्वन्यायेन

साधितत्वात् समानविषयोऽयं न्यायः स्मृतिपथमधिरूढः। परस्य शब्दस्यार्थे प्रयुज्यमानः शब्दस्तत्र स्वार्थप्रतिपादनासमर्थः सादृश्यमूलकसम्बन्धसाहाय्येन तत्सदृशार्थवाचक इति वतमन्तरेण–वतिप्रत्ययं विनाऽपि, वदर्थं–सादृश्यं, गमयति–बोधयतीति न्यायार्थः। अयमपि न्यायो लोकसिद्ध एव, तथाहि–'अग्निर्माणवकः' इत्यादौ माणवके प्रयुज्यमानोऽग्निशब्दः स्वार्थेऽसम्भवन् माणवकेऽग्निसादृश्यं लक्षणया प्रतिपादयति, तथा च तादृशस्थले शब्दार्थस्य बाधाल्लक्ष्यार्थप्रतीतिरेव। अत्र च विषये "वान्यतः पुमांष्टादौ स्वरे" [१. ४. ६१.] इति सूत्रे पुमानिति निर्देश एव मानम्, तथाहि–तत्र क्लीबे प्रयुज्यमानः पुंशब्दः स्वार्थेऽसम्भवन् वदर्थं सादृश्यं बोधयतीति पुंवदित्यर्थो गृह्यते, स चैतन्न्यायस्य स्वीकारसूचक एव। कृतश्च प्रकृतन्यायसमाश्रयोऽत्र सूत्रे बृहन्न्यासे इति विवरणे प्रतिपादयिष्यते। तथा च पुमानिति पदस्य पुंवदित्यर्थपरत्वात् तत्कार्यभाक्त्वरूपस्य सादृश्यस्य ग्रहणाच्च 'मृदवे कुलाय' इत्यादौ मृदुशब्दस्य पुंवद्भवनान्नपुंसकत्वनिमित्तः "अनामस्वरे०" [१. ४. ६४.] इति नागमो नाभूत्। अयं च न्यायो यत्र वत्करणं न क्रियते गम्यते च वत्यर्थस्तत्र तस्य समर्थनरूप एव, न तु किञ्चिन्नूतनं विधत्ते। तथा च यत्र स्पष्टप्रतिपत्तये वत्करणं तत्र न तस्य वैयर्थ्यमिति न तेनास्य न्यायस्यानित्यत्वं बोध्यम्। तथा च "परतः स्त्रीपुंवत् स्त्र्येकार्थेऽनूङ्" [३. २. ४९.] इति सूत्रे न दोषः। यत् तु तत्र वद्ग्रहणेन कश्चिदस्योपरतिरिति प्राचीनैरुक्तं तदपि प्रकृताभिप्रायकमेव। अयमाशयः–क्वचित् प्रयोजनवशाद् रूढेर्वा लक्षणया प्रयोगश्चेत् सर्वत्र लक्षणयैव प्रयोक्तव्यमिति नाग्रहः कर्तुं शक्यते, इति यदि क्वचिद्वतमन्तरेणापि वदर्थप्रतीतिस्तेन सर्वत्र तदप्रयोगस्य न नियमः कर्तुं शक्यते इति तादृशनियामकत्वे न्यायस्य तात्पर्याभावात् क्वचित् कृतमपि वद्ग्रहणमुचितमेव, न व्यर्थमिति न तन्न्यायोपरतिज्ञापनायालमिति ॥ ५९ ॥

## *परार्थे प्रयुज्यमानः शब्दो वतमन्तरेणापि वदर्थं गमयति* ॥ ५९ ॥

त०—न्यायोऽयं सिद्धवत्कृत्य "वाऽन्यतः पुमांष्टादौ स्वरे" [१. ४. ६२.] इति सूत्रे बृहन्न्यासे समुपात्तः। इत्थं च तदुत्थानम्–"इह द्विधा लिङ्गव्यवस्था, केषाञ्चित् स्वत एव लिङ्गम्, यथा–दधि-मध्वादिजातिशब्दानाम्, केषाञ्चिदन्यतो–विशेष्यात्, यथा–गुण-क्रिया-द्रव्य-सम्बन्धिनां पट्वादिशब्दानाम्, ते हि विशेष्यलिङ्गमुपाददते न तेषां स्वतो व्यवस्थितं किञ्चिल्लिङ्गमस्ति, तथाहि–पटुः पुमान्, पट्वी स्त्री, पटु कुलम्, इति विशेष्यत एव लिङ्गं दृश्यते, न तु स्वत इत्यतः 'अन्यतः' इति गुण-क्रिया-द्रव्य-सम्बन्धनिमित्तप्रवृत्तिः शब्दोऽभिधीयत इति; अन्यतो नपुंसक इत्युच्यमानेऽपि नपुंसकोपादायिना शब्देन तदैव पुंस्त्वोपादानाभावः +++++ इति चेत्? न–परार्थे प्रयुज्यमानः शब्दो वतिमन्तरेणापि वत्यर्थं गमयत्येव, यथा–अब्रह्मदत्ते ब्रह्मदत्त इति। अत्र हि निर्ज्ञाते झटिति ब्रह्मदत्ते पदार्थैकदेशभूता रूढसम्बन्धाः क्रिया-गुणास्तानुपलभ्यैव ब्रह्मदत्त इत्युच्यते, समुदायपदार्थवादिनो ह्यवयवेऽपि शब्दप्रवृत्तिरेवंभूतश्च निर्देश इति नोपपद्यते, नहि नपुंसकस्य केचिल्लिङ्गधर्माः स्वतः प्रसिद्धाः सन्तीति, अस्ति तु लोके भाविनो धर्मान् भूतवदुपादाय व्यपदेशः–एष ब्रह्मदत्त इति, लभतामयं प्रतिपद्यतामयं ब्रह्मदत्तधर्मानिति भूतवदुपादाय सोऽयमित्यभिसम्बन्धेन तच्छब्दप्रतिलम्भः, एवमिहापि भाविनो नागमाभावादीन् पुंलिङ्गधर्माननुपादाय वतिमन्तरेणापि नपुंसके तच्छब्दप्रवृत्तिरिति" इति। एवं चास्य न्यायस्य लोकन्यायसिद्धत्वमेवेति स्पष्टं प्रतिपद्यते। तथा चात्रत्यवतिनिर्देशाभावस्तन्न्यायोदाहरणभूतस्तस्येहाश्रयणे प्रमाणभूत एवेति गम्यते ॥ ५९ ॥

## *द्वौ नञौ प्रकृतमर्थं गमयतः* ॥ ६० ॥

सि०—शब्दसामर्थ्यविशेषनिर्णायकन्यायव्याख्याप्रसङ्गेनायमपि न्यायस्तद्विषयतया स्मृतिपथमधिरूढः। 'नञ्'शब्दश्चात्र निषेधार्थपरः, तथा च द्वौ निषेधौ, प्रकृतमर्थं–पूर्वनञर्थप्रतियोगिनमर्थं, गमयतः–बोधयत इत्यर्थः, अभावाभावस्य प्रतियोगिरूपत्वमिति सकलविचारकसमुदायसम्मतमर्थमयं न्याय आह, ततश्च नास्य ज्ञापकापेक्षा। गृहीतश्चायं न्यायः स्वशास्त्रेऽपीति "नेन्सिद्धस्थे" ३. २. २९. इति सूत्रे नञ्ग्रहणेन प्रतीयते, तथाहि–"न नाम्येकस्वरात्०" [३. २. ९.] इति सूत्रान्नञनुवर्तमानो विभक्तिलुपोऽभावं बोधयति, अत्र च ["नेन्सिद्ध०" ३. २. २९. इति सूत्रे] यदि नञा द्विरुक्तेन प्रकृतनञर्थ एव दृढीक्रियेत तर्हि तस्य ग्रहणं व्यर्थमेव, न ह्येकवारं कथितस्यार्थस्यादृढत्वमिति क्वापि निश्चितम्। तथा च निषेधस्यायं निषेध इति प्रतीतौ लुपो विधानमित्यायाति, तदेव चाचार्यस्याभीष्टम्। अन्यत्र यद्यपि पुनरुच्यमानोऽर्थो *द्विर्बद्धं सुबद्धं भवति* इति न्यायेन पूर्वपदार्थमेव दृढयति, तथापि नञो निषेधबोधकत्वेन पूर्वस्य निषेधस्य निषेधे पूर्वनिषेध्यस्योत्थानं भवति, ततश्च यद्यपि निषेधस्य स्वरूपेण कथनमेव युज्यते, तथापि भङ्ग्यन्तरेण प्रतिपादनात् तत्र दार्ढ्यमायाति। अत्र द्वाविति समसंख्योपलक्षणमिति चतुःषडादिनञामपि प्रकृतार्थ[प्रतियोगिरूप]दार्ढ्यबोधकत्वम्, विषमसंख्यास्तु नञर्थमेव दृढीकरिष्यन्ति। अयं च स्वभावतो यत्र निषेधद्वयस्य प्रयोगस्तत्रैव प्रकृतार्थदार्ढ्यबोधकः, यत्र च

सम्भ्रमादिना द्विश्चतुर्वा प्रयोगस्तत्र च नोपतिष्ठते, यथा–भुञ्जानोऽधिकग्रहणाय प्रेरितो न नेति सम्भ्रमादनेकवारं ब्रूते तत्र, यथा वाऽन्येनैवकारादिना सम्बद्धो नञ् नैव च नैव चेत्यादौ, एतादृशस्थलेषु हि नञर्थनिषेधस्यैव दार्ढ्यं भवति ॥ ६० ॥

***द्वौ नञौ प्रकृतमर्थं गमयतः*** ॥ ६० ॥

**त०**—लोके शब्दाभ्यासेऽर्थस्य भूयस्त्वं [दार्ढ्यं] प्रतीयते, यथा–'अहो दर्शनीया अहो दर्शनीया' इत्यादौ, तथा नञ्द्वयसत्त्वेऽपि नञर्थस्यैवाधिक्यं स्यादिति तदपनयनाय न्यायोऽयमाश्रीयते । अयं च नञः पूर्वोद्दिष्टप्रतिषेधवाचकत्वस्वाभाव्यादेव लभ्यत इति न ज्ञापकसाध्य इत्यावेदितं वृत्तौ, वस्तुतस्तु नायं न्यायः किन्तु शब्दशक्तिस्वभावपरिचयवाक्यमात्रम्, अत एव प्रकृतन्यायार्थानुकूलं व्यवहरद्भिरप्यन्यैर्न न्यायत्वेनायमादृत इति न्यायसंग्रहेऽस्य समावेशो नावश्यकः । पूर्वैः संगृहीतत्वाच्चास्माभिरपि स्थापित इत्यवधेयम् ॥ ६० ॥

## *चकारो यस्मात् परस्तत्सजातीयमेव समुच्चिनोति* ॥ ६१ ॥

**सि०**—समुच्चया-ऽन्वाचयेतरेतरयोग-समाहाराश्चत्वारश्चार्थाः । "तत्रैकमर्थं प्रति द्व्यादीनां क्रिया-कारक-द्रव्य-गुणानां तुल्यबलानामविरोधिनामनियतक्रमयौगपद्यानामात्मरूपभेदेन चीयमानता समुच्चयः" इति "चार्थे द्वन्द्वः०" [ ३. १. ११७. ] इति सूत्रे बृहद्वृत्तिः । "एकस्मिन् कारकेऽनेकक्रियाणाम्, एकस्यां क्रियायामनेककारकाणाम्, एकस्मिन् द्रव्येऽनेककारकाणाम्, एकस्मिन् कारकेऽनेकद्रव्याणाम्, एकस्मिन् धर्मिण्यनेकधर्मिणां ढौकनं समुच्चयः" इति तदर्थमाह लघुन्यासकारः । इत्येवंरूपस्य समुच्चयस्य द्योतकश्चकारो यदव्यवहितपरत्वेनोच्चारितस्तत्सजातीयमेव समुच्चिनोति । अवश्यं स्वपरस्मिन् समुच्चेतव्ये विजातीयसमुच्चयोऽपि प्राप्तस्तद्वारणायायं न्यायः । एतन्न्यायमूलं तु साजात्यमेव, सजातीयानां सजातीयैः सह समुच्चयस्य लोके दृष्टत्वात् । तत्रोपसर्गेणोपसर्गस्य समुच्चयो यथा–"प्रतेश्च वधे" [ ४. ४. ९४. ] इत्यत्र १, प्रकृत्या प्रकृतेः समुच्चयो यथा–"एतदश्च व्यञ्जनेऽनग्नञ्समासे" [ १. ३. ४६. ] इत्यत्र २, प्रत्ययेन प्रत्ययस्य यथा–"ङसौ च" [ १. ४. ३९. ] इत्यत्र ३, आदेशेनादेशस्य समुच्चयो यथा–"आ च हौ" [ ४. २. १०१. ] इत्यत्र ४, आगमेनागमस्य यथा–"अश्च लौल्ये" [ ४. ३. ११५. ] ५, अर्थेनार्थस्य यथा–"अतिरतिक्रमे च" [ ३. १. ४५. ] इत्यत्र ६, वाक्यार्थेन वाक्यार्थस्य यथा–"तस्य व्याख्याने च ग्रन्थात्" [ ६. ३. १४२. ] इत्यत्र च ७ । एषु च प्रथमे प्रतिशब्दात् पश्चादुपात्तश्चकारस्तत्सजातीयं पूर्वानुवृत्तम् 'उपात्'इत्युपसर्गवाचकपदमेव समुच्चिनोति, नान्यानर्थादीन् निमित्तान् । द्वितीये च एतच्छब्दात् परतः स्थितश्चकारस्तत्सजातीयपूर्वानुवृत्तं 'तदः' इति प्रकृतिमेव समुच्चिनोति, नान्यत् । तृतीये च ङाविति प्रत्ययात् परतः स्थितश्चकारो घुटीति प्रत्ययवाचकमेव पदं समुच्चिनोति । चतुर्थे च "आ च हौ" [ ४. २. १०१. ] इत्यादेशादाकारात् परतः समुच्चारितश्चकारः "इर्दरिद्रः" [ ४. २. ९८. ] इति सूत्रादनुवृत्तमिरिति स्वसजातीयमादेशमेव समुच्चिनोति । पञ्चमे अकार आगमः स्वसजातीयं स्सागममेव समुच्चिनोति । षष्ठेऽतिक्रमरूपार्थस्य परतः स्थितश्चकारः "सुः पूजायाम्" [ ३. १. ४४. ] इति पूर्वसूत्रस्थितं पूजायामिति पदबोध्यं पूजार्थमेव समुच्चिनोति । सप्तमे च 'तस्य व्याख्याने' इति वाक्यार्थपरत्वतात्पर्येणोच्चारितश्चकारः पूर्वाधिकृतं 'तत्र भवे' इति वाक्यार्थरूपमर्थमेव समुच्चिनोति, यद्यप्यर्थ-वाक्यार्थयोरर्थत्वेन साजात्यं समानमेव तथापि पदार्थत्ववाक्यार्थत्वकृतोऽवान्तरभेदः सुप्रसिद्ध इति पृथगुदाहरणत्वमर्हत्येव । अन्ये चात्र न्याये ज्ञापकमपि समुदाहरन्ति, तथा च तत्र तत्र पूर्वोक्तेषु स्थलेषु विजातीयसमुच्चयव्यावर्त्तनाय यत्नाकरणमेव तन्मते प्रकृतन्यायज्ञापकम्, परं तु तादृशस्य ज्ञापकत्वस्य पूर्वैरनादृतत्वान्न स्वीकरणमुचितमिति नोल्लिखितम् । यश्चानुकर्षणार्थश्चकारस्तद्विषये नायं नियमः, स च विजातीयमप्यनुकर्षत्येव ॥ ६१ ॥

***चकारो यस्मात् परस्तत्सजातीयमेव समुच्चिनोति*** ॥ ६१ ॥

**त०**—समुच्चयस्य लक्षणं बृहद्वृत्त्यनुसारं वृत्तौ प्रतिपादितमेव, तेन च लक्षणेन यद्यपि स्वजातीयेन सहैव समुच्चयः [ समुच्चये स्वसजातीयस्यैव संग्रहः ] इति नायाति, तथापि यत्र सजातीय–विजातीययोरुभयोः समुच्चयः प्राप्तस्तत्र सजातीयस्यैव समुच्चयः समुचित इत्येतावदेव प्रकृतन्यायतात्पर्यम् । कैयटेन च–"यदा परस्परनिरपेक्षाः पदार्थाः क्रियायां समुच्चीयन्ते तदा समुच्चयार्थः, स च चकारं विनापि प्रतीयते, यथा—

"अहरहर्नयमानो गामश्वं पुरुषं पशुम् ।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥"

अत्र दुःखेन यो माद्यति स यथा सुरया न तृप्यति तथा यमो गवादीन् नयमानो न तृप्यतीत्यर्थः । तत्र नयनक्रियायां गवादीनां समुच्चयः प्रतीयते, स च चं विनापि, तथा च चं विनाऽपि तदर्थो गम्यते इति प्रसिद्धिः । समुच्चये च सत्यपि न तत्र सर्वेषां साजात्यमस्ति, तथा चकारप्रयोगेऽपि न साजात्य-

मवश्यमपेक्ष्यते, केवलं विजातीयापेक्षया सजातीयसमुच्चयस्य प्राबल्यमिति लोकव्यवहारतोऽवसीयते, तद्व्यवहारसिद्धमर्थमेवायं न्याय आहेति नापूर्वः ॥ ६१ ॥

## *चानुकृष्टं नानुवर्तते* ॥ ६२ ॥

**सि०**—स्थितस्य अनु-पश्चात्, कर्षणम्-अनुकर्षः, पूर्वसूत्रपठितस्य पदस्य वाक्यस्य वोत्तरसूत्रे सम्बन्धः । स च क्वचिदधिकाररूपेण भवति, तत्र चानुकर्षणार्थस्य चकारस्य नावश्यकता भवति, तत्र हि *अपेक्षातोऽधिकारः* इति न्यायेनैव कार्यं भवति । क्वचिच्चापेक्षाया अविवक्षितत्वाच्चकारस्तदर्थं पठ्यते, स च द्विविधः—विधेयघटितसूत्राव्यवहितसूत्रस्थः, तदितरसूत्रस्थश्च, तत्र द्वितीयप्रकारकचकारविषयेऽयं न्यायः । चकारेणानुकृष्टम्-चकारबलात् पूर्वसूत्रादुत्तरसूत्रे सम्बध्यमानं पदं वाक्यं वा, नानुवर्त्तते-न स्वाग्रिमसूत्रेषु सम्बध्यत इति न्यायार्थः । अत्र च ज्ञापकम्—"स्वञ्जश्च" [ २. ३. ४५. ] इति सूत्रे बृहद्वृत्तौ—"चकारः 'परोक्षायां त्वादेः' इत्यस्यानुकर्षणार्थः, ततश्चोत्तरत्रानुवृत्तिः" इति कथनमेव । तत्र चानुकृष्टस्य पदस्योत्तरत्रानुवर्त्तनं यथा—"ग-ङ-द बादेः०" [ २. १. ७७. ] इति सूत्रे 'स्-ध्वोश्च' इति चेनानुकृष्टं 'पदान्ते' इति पदं "धागस्तथोश्च" [ २. १. ७८. ] इति तदुत्तरसूत्रे नानुवर्त्तते, तथा च तथयोरेव तत् सूत्रं प्रवर्त्ततेऽत्रत्यचकारेणानुकृष्टयोः स्-ध्वोश्च, न तु पूर्वसूत्रे चकारेणानुकृष्टे पदान्ते । चानुकृष्टस्य वाक्यस्योत्तरत्राननुवृत्तिर्यथा—"सदोऽप्रतेः परोक्षायां त्वादेः" [ २. ३. ४४. ] इति सूत्रस्थं 'परोक्षायां त्वादेः' इति वाक्यं "स्वञ्जश्च" [ २. ३. ४५. ] इति सूत्रे चकारेणानुकृष्टं तदुत्तरपठिते "परि-नि-वेः सेवः" [ २. ३. ४६. ] इति सूत्रे नानुवर्त्तते, तेन च स्वञ्जेः परोक्षायां 'परिषस्वजे' इत्यत्रादेरेव षत्वं भवति, न तूभयोरेव, सेवेस्तूभयोरेव भवति—'परिषिषेवे' इति । अनुकर्षणार्थस्य चकारस्य विषय एवायं न्याय इति यत्र समुच्चयार्थश्चकारो भवति तत्समुच्चितं पदं वाक्यं वोत्तरत्राप्यनुवर्त्तत एव, यदि लक्ष्यसिद्धौ तदपेक्षा स्यात्, यथा "मो नो म्वोश्च" [ २. १. ६७. ] इत्यत्र 'पदान्ते' इत्यस्य समुच्चयार्थश्चकारः, तेन समुच्चितं च पदान्त इति पदं "स्रंस्-ध्वंस्-क्रस्तु०" [ २. १. ६८. ] इत्याद्युत्तरसूत्रेष्वनुवर्त्तत एव । अयं च न्यायोऽनित्यः, अत एव "मारण-तोषण०" [ ४. २. ३०. ] इत्यत्र वृत्तौ—"चो 'णिचि च' इत्यस्यानुकर्षणार्थः" इत्युक्ततया चकारेणानुवृत्तमपि 'णिचि च' इति परत्र "चहणः शाठ्ये" [ ४. २. ३१. ] इति सूत्रे ततोऽप्यग्रेऽनुवर्त्तत एव । यद्यपि लघुन्यासकारादिभिः प्रकृतन्यायविरोधसंभावनयाऽयं वृत्तिग्रन्थोऽन्यथा व्याख्यातः, तथाहि—तद्ग्रन्थः—"धात्वाकर्षणे पूर्वेण सिद्धे फलाभावात् प्रकृतेरपि [ परतः ] स्थितः प्रत्ययमाकर्षति । स्वरूपाख्यानमिदं, यावताऽधिकारायातमेव चकारेणानुमीयते, अन्यथा चानुकृष्टं नोत्तरत्रेति स्यात्" इति । तथापि प्रकृतन्यायस्यान्यैरपि क्वाचित्कत्वस्येष्टतया तेन वृत्तिकृद्वचनसङ्गतिसम्भवे तस्यान्यपरत्वाख्यानमयुक्तमेव । अन्येषामेतन्न्यायानित्यत्ववर्णनप्रकारश्च विवरणे स्पष्टीकृतः ॥ ६२ ॥

## *चानुकृष्टं नानुवर्तते* ॥ ६२ ॥

**त०**—चकारस्य द्वैविध्यमुक्तं वृत्तौ, तत्र द्वितीयचकारविषयेऽयं न्याय इत्यपि तत्रोक्तम् । स चायं नियम उदाहृतसूत्रेषु संगतः, यथा—"ग-ड-द-बादेः०" [ २. १. ७७. ] इति सूत्रं विधेयघटितमेव, न तु तदव्यवहितपरम् । तत्रस्थेन चकारेणानुकृष्टं 'पदान्ते' इति पदं "घागस्तथोश्च" [ २. १. ७८ ] इत्युत्तरसूत्रे न याति । तथा वाक्यविषयोदाहृतसूत्रेष्वपि "स्वञ्जश्च" [ २. ३. ४५ ] इति विधेय'ष्'घटितसूत्राद् बहुव्यवहितमेव । न चापेक्षातोऽधिकार इति न्यायेन चशब्दप्रतिपाद्यस्यार्थस्य सिद्धत्वाच्छास्त्यनुवृत्त्यर्थेन चकारेण प्रयोजनमिति वाच्यम्, चकारेण स्पृष्टप्रतिपत्तेः, अपेक्षायास्तु व्याख्यानाधीनत्वादिति । अत्र केचित्—अयं न्यायोऽनावश्यक इति "लुटि च क्लृपः" [ पा० सू० १. ३. ९३ ] इति सूत्रस्थमहाभाष्यादप्यवसीयते, तत्र हि—"किमर्थश्चकारः ? स्य-सनोरित्येतदनुकृष्यते यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति, "द्युद्भ्यो लुङि" [ पा० सू० १. ३. ९१. ] इत्यत्रापि चकारः कर्तव्यो विभाषेत्यस्यानुकर्षणार्थम् । अथेदानीमन्तरेणापि चकारमनुवृत्तिर्भवति, इहापि नार्थश्चकारेण । एवं सर्वे चकाराः प्रत्याख्यायन्ते" इति ॥ ६२ ॥

## *चानुकृष्टेन न यथासंख्यम्* ॥ ६३ ॥

**सि०**—*यथासंख्यमनुदेशः समानाम्* इति न्यायेन समानां-समसंख्यानां मध्ये, यथागणनमुद्देशिभिः सहानुदेशिनां सम्बन्धः सूच्यते । तत्रोद्देशिनोऽनुदेशिनश्च द्विधा भवन्ति—केचित् साकल्येन सूत्रे निर्दिष्टाः केचिच्च सूत्रान्तरनिर्दिष्टा अपि चकारादिबलेन लभ्याः, तत्र ये चकारेणानुकृष्टतया लभ्यास्तेषामपि पूर्वोक्तन्यायेन संख्याक्रमानुरोधेनैव सम्बन्धे प्राप्ते तत्र नियमार्थमयं न्यायः । चानुकृष्टेन सह यथासंख्यं न भवति, चानुकृष्टोऽर्थो यथासंख्यान्वयानुपयोगीति फलितार्थः । एतन्न्यायमूलं च द्विशेरुच्चारणार्थस्य प्रयोग एव, तथा चोद्देश्यनुदेशिनोरुभयोरुच्चारणं भवति यत्र तत्रैव यथासंख्यमित्यर्थलाभ इत्यनुकृष्टेन यथासंख्याप्राप्तिरिति । केचित्त्वनिष्टस्य यथासंख्यस्य वारणार्थं यत्नाकरणमेव प्रकृतन्यायज्ञापकमित्याहुः, परन्त्वेवं ज्ञापनानौचित्यं पूर्वमुपपादितमेव ।

न्यायं फलं तु "वौ व्यञ्जनादेः सन् चाव्यः" [४. ३. २५.] इति सूत्रे 'वौ' इत्यनेन उकारेकारयोरुपस्थापकेन पदेनोपस्थापितयोस्तयोः सना, चानुकृष्टेन क्त्वाप्रत्ययेन च यथासंख्याभावः । तथाहि–सूत्रार्थः 'वौ–उकारे इकारे वोपान्त्ये सति व्यञ्जनादेर्धातोः परौ सेटौ क्त्वा-सनौ प्रत्येकं किद्वद् वा स्याताम्, न तु य्वन्तात्' इति । तथा चात्र प्रकृतन्यायसहकारेणोकारेकाराभ्यां यथासंख्याभावे 'द्युतित्वा, द्योतित्वा; लिखित्वा, लेखित्वा; दिद्युतिषते, दिद्योतिषते; लिलिखिषति, लिलेखिषति;' इत्येवमुभयोरपि विषये उभयविधयोः [उकारोपान्त्येकारोपान्त्ययोः] सूत्रं प्रवर्तते । लघुन्यासरीत्या च "राष्ट्र-क्षत्रियात् स्वरूपाद् राजा-ऽपत्ये द्रिरञ्" [६. १. ११४.] इति सूत्रेऽपत्यग्रहणेन 'समुच्चीयमानेन न यथासंख्यम्' इति विज्ञायते, तथाहि–"शक्तार्हे कृत्याश्च" [५. ४. ३५.] इति सूत्रे "बहुवचनमिहोत्तरत्र च यथासंख्यनिवृत्त्यर्थम्" इति वृत्तिग्रन्थव्याख्यावसरे–"ननु समुच्चीयमानेन सह यथासंख्यस्य "राष्ट्र-क्षत्रिया०" [६. १. ११४.] इत्यत्रापत्यग्रहणेन निरस्तत्वाद् व्यर्थं बहुवचनम्, सत्यम्–ज्ञापकज्ञापिता विधयो ह्यनित्या इति न्यायज्ञापनार्थम्" इत्युक्तं तेन [लघुन्यासकारेण], तथा च तन्मते न्यायस्वरूपं *समुच्चीयमानेन न यथासंख्यम्* इति । तस्य चानित्यत्वं "शक्तार्हे कृत्याश्च" [५. ४. ३५.] इति सूत्रस्थबहुवचनेन विज्ञायते । न्यायज्ञापनं चापत्यग्रहणेनेत्थम्–"राष्ट्र-क्षत्रिया०" [६. १. ११४.] इति सूत्रे राजनि चेत्युक्तेऽपि चकारेणापत्यार्थस्य संग्रहे सिद्धे राष्ट्रवाचिभ्यो राजनि क्षत्रियवाचिभ्यश्चापत्येऽर्थे प्रत्ययविधानार्थं यथासंख्येनान्वयः स्यादिति 'अपत्ये' इति सूत्रे समुपात्तमिति विज्ञायते । तथा च चेन समुच्चीयमानेन सह यथासंख्यमनिष्टमाचार्यस्येति विज्ञायत इति । तथा च "शक्तार्हे कृत्याश्च" [५. ४. ३५.] इत्यत्र चकारेण समुच्चीयमानया सप्तम्या सह यथासंख्यं मा भूदित्येतदर्थं बहुवचनादरणं व्यर्थमेव स्यादिति न्यायानित्यत्वज्ञापनायैव तथावचनमाचार्याणामिति विज्ञायते, अन्यथा एकवचनोच्चारणेऽपि प्रकृतन्यायबलात् तत्र शक्तार्हाभ्यामर्थाभ्यां यथासंख्याभावः स्वभावसिद्ध एवेति किमर्थं बहुवचनोच्चारणरूपो यत्नः क्रियेत । न च कृत्यानां बहुत्वाद् बहुवचनमिति वाच्यम्, कृत्यत्वजातिविवक्षया एकवचनप्रयोगस्यैवौचित्यमित्याचार्याशयात् । दृश्यते चैकत्वेन प्रयोगः, यथा–"प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ" [५. ४. २९.] इति सूत्रे पञ्चम्या सहेतरेतरयोगे द्विवचनेन निर्देशः, अन्यथा तत्राऽपि बहुवचनमेव प्रयोक्तव्यं स्यात् । शक्तार्हाभ्यां यथासंख्यसम्बन्धसंभावनार्थं च कृत्यानामेकत्वेन विवक्षाया आवश्यकत्वमेव, अन्यथा तेषां बहुत्वेन सत्यप्येकवचनेन निर्देशे समसंख्याभावेन यथासंख्याप्राप्तिरेवेति तद्वारणाय बहुवचनाश्रयणस्य वैयर्थ्यापत्तेः । तथा च कृत्यानां बहुत्वेऽपि जातिविवक्षयैकवचनप्रयोगस्यैवौचित्ये बहुवचनप्रयोगः प्रकृतन्यायस्य क्वाचित्कत्वज्ञापनार्थ एवेति "राष्ट्र-क्षत्रियात्०" [६. १. ११४.] इति सूत्रेऽपत्यग्रहणं स्पष्टार्थमेव । न्यायस्य क्वाचित्कत्वेऽपि सर्वत्राप्रवृत्तिरेव नेति चकारेणापत्यार्थानुकर्षे कदाचिन्न्यायप्रवृत्त्या यथासंख्यं न स्यादिति संभावनयाऽपत्यग्रहणमिति पूर्वोक्त'दिश्'धात्वर्थबललभ्यत्वमेवास्य न्यायस्याङ्गीकर्तव्यमिति ॥ ६३ ॥

***चानुकृष्टेन न यथासंख्यम्* ॥ ६३ ॥**

त०—अस्य न्यायस्य स्वमतानुसारिणी व्यवस्था वृत्तौ प्रदर्शिता, पाणिनीयतन्त्रेऽपि बहुधा प्रपञ्चितं विस्तारार्थिना तद्विलोक्यम् ॥ ६३ ॥

## *व्याख्यातो विशेषार्थप्रतिपत्तिः* ॥ ६४ ॥

सि०—व्याकरणप्रयोजनं हि सविशेषाणामर्थानां निश्चयः, तत्रासन्दिग्धानुष्ठानसिद्ध्यर्थेऽत्र शास्त्रे तत्र तत्राचार्यैः सन्दिग्धोच्चारणं कृतं, तत्र कस्तेषामाशय इति शिष्टपरम्परासमधिगततदीयव्याख्यानमन्तरा प्रतिपत्तुं न शक्यते इति व्याख्यानादेव निश्चयः कार्यो नान्यथेति बोधनार्थोऽयं न्यायः । विशेषार्थस्य–अन्यतरान्यतमाद्यर्थस्य, प्रतिपत्तिः–निश्चयः, व्याख्यातः–शिष्टकृतव्याख्यानादित्यर्थः । अत्र च ज्ञापकमाचार्यस्य सन्दिग्धोच्चारणमेव, तथाहि–"नेमा-ऽर्ध-प्रथम-चरम तया-ऽया-ऽल्प-कतिपयस्य वा" [१. ४. १०.] इति सूत्रे नामभिः सह पठितयोस्तया-ऽयोः प्रत्यययोरुच्चारणम्, तत्र साहचर्येण तयाऽययोः नाम्नोर्ग्रहणमुत *प्रत्ययाऽप्रत्यय*न्यायेन प्रत्यययोस्तयोर्ग्रहणमिति सन्देहः, स च व्याख्यानातिरिक्तनिमित्तेन नापनेतुं शक्यत इति तादृशमुच्चारणं सर्वत्र सन्देहेषु व्याख्यानमात्रनिवर्त्यत्वं ज्ञापयति । एतन्न्यायफलं तु करीषगन्धेरपत्यं वृद्धं स्त्रीत्यर्थे 'कारीषगन्ध्या' इत्यत्र "अणञेयेकण्-नञ्-स्नञ्-टिताम्" [२. ४. २०.] इत्यनेन ङीर्न भवति, किन्त्वदन्तत्वादाबेव भवति, अत्र हि "ङसोऽपत्ये" [६. १. २८.] इत्यणि "अनार्षे वृद्धे०" [२. ४. ७८.] इत्यनेनाणः ष्यादेशे "अणञेयेकण्-नञ्-स्नञ्-टिताम्" [२. ४. २०.] इत्यनेनाणन्तलक्षणो ङीः प्राप्तोऽपि न भवति, तत्र हि अणः स्वरूपेण ग्रहणमिति व्याख्यातम्, अत्र चाणः स्थाने ष्यादेशकरणादणः स्वरूपेणाभावः स्पष्ट एव, व्याख्यानादृते च तत्राणः स्वरूपेण ग्रहणमिति विज्ञातुम-

शक्यम् । व्याख्यानावलम्बनं च यद्यपि सर्वत्र कर्तुं शक्यते तथापि स्पष्टप्रतिपत्तये क्वचित् सूत्र एव विशेषः प्रतिपादितश्चेत् को दोषः । तथाहि–"सृजः श्राद्धे ञिक्यात्मने तथा" [ ३. ४. ८४. ] इत्यत्र श्राद्धशब्देन श्रद्धोपपन्नः कर्ता ग्राह्यः, "श्राद्धमद्यभुक्तमिकेनौ" [ ७. १. १६९. ] इत्यत्र श्राद्धमिति पितृदैवत्यं कर्म गृह्यते, तच्च व्याख्यानादेवेति तत्र प्रकृतन्यायाश्रयणं दृश्यते, किन्तु "शरदः श्राद्धे कर्मणि" [ ६. ३. ८१. ] इत्यत्र स्पष्टप्रतिपत्तये कर्मणीति पदं निविष्टमिति न दोषः; न चैतेन न्यायानित्यत्वं ज्ञापनीयम्, व्याख्यानं विना सर्वत्र विशेषार्थप्रतीतिरेवेति न्यायानाग्रहात् । तथा च कर्मणीति पितृदैवत्यस्य कर्मणोऽनायासेन बोधाय कृतमिति ॥ ६४ ॥

*व्याख्यातो विशेषार्थप्रतिपत्तिः* ॥ ६४ ॥

**त०**—सर्वथा स्वबुद्धिमाश्रित्यैव न प्रवर्तितव्यमपि तु गुरुपरम्पराप्राप्तव्याख्यानमाश्रयितव्यमिति स्वेच्छाप्रवृत्तिवारणाय शास्त्रकृद्भिः क्वचित् क्वचिद् ग्रन्थग्रन्थिः प्रयत्नादेव स्थापितः, यदाह श्रीहर्षः खण्डन**खण्डखाद्य**ग्रन्थान्ते—

"ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया,
प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु ।
श्रद्धाराद्धगुरुः श्लथीकृतदृढग्रन्थिः करोत्वादरा-
दद्वैतामृतसिन्धुसम्भवरसेष्वासञ्जनं सज्जनः ॥' १ ॥ इति,

तथा च व्याख्यानात् तन्निश्चयः कर्तव्य इति नाद्भुतं वस्तु, अपि त्वाचार्याणां शैल्येषा । तथा चायं न्यायोऽन्यैरपि वैयाकरणैर्ग्रन्थकृतां सन्दिग्धोच्चारणैरेवानुमीयते, न चानित्यत्वं तस्य स्वीक्रियते, तदावश्यकताभावस्य वृत्तौ प्रतिपादितत्वात् । किञ्चानित्यत्वज्ञापकं यदुक्तं "सृजः श्राद्धे" [ ३. ४. ८४. ] "श्राद्धं भुक्तम्" [ ७. १. ६९. ] इत्यनयोः श्राद्धशब्दस्यैकत्र श्रद्धावति परत्र पितृदैवत्ये कर्मणीति व्याख्यानात् "शरदः श्राद्धे कर्मणि" [ ६. ३. ८१. ] इत्यत्रापि व्याख्यानादेव सिद्धे कर्मणीति पदं, तदपि न युक्तम्–यतः "सृजः श्राद्धे" [ ३. ४. ८४. ] इत्यत्र "कर्तर्यनद्भ्यः शव्" [ ३. ४. ७१. ] इत्यतः कर्तरीत्यनुवर्तमानमेव श्रद्धावन्तं बोधयति योग्यत्वात्, "श्राद्धं भुक्तम्" [ ७. १. १६९. ] इत्यत्र च क्लीबत्वेन भुजिसाहचर्येण च पितृदैवत्यं कर्म विज्ञायते, न तु व्याख्यानमात्रापेक्षया, तथा चात्रापि स्वभावत एव तद्बोधाय कर्मणीत्युक्तमिति न तदेतन्न्यायानित्यत्वे ज्ञापकं भवितुमर्हतीति ॥ ६४ ॥

*यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते* ॥ ६५ ॥

**स्नि०**—यत्र–वाक्यबुद्ध्या प्रयुक्ते तदङ्गभूते पदसमुदाये, अन्यत्–अस्तिभिन्नं, क्रियापदं–साध्यत्वेनोपस्थापकं पदं, न श्रूयते–प्रयुज्यते, तत्र 'अस्तिः' इति क्रियापदस्यानुकरणं न, किन्तु धातुनिर्देशपरम्, ततश्च कालविशेषालाभादाह–भवन्तीपर इति–वर्त्तमानाप्रत्ययपर इत्यर्थः । इदं चोपलक्षणं यत्र यस्या विभक्तेः प्रयोग औचित्येन प्रतिभासमानः स्यात् तत्परत्वस्य । तथा च तत्र तत्रान्यविभक्तिपरस्याप्यस्तेः प्रयुज्यमानत्वं सिद्ध्यति । "सविशेषणमाख्यातं वाक्यम्" [ १. १. २६. ] इति वाक्यसंज्ञाविधायकसूत्रेणाख्यातस्यैव वाक्यत्वेन संकेतितत्वादाख्यातराहित्ये सति वाक्यत्वं न प्राप्तमिति तत्प्राप्तये न्यायोऽयमाख्याताध्याहारानुज्ञापकः । अत्र मूलमनुपपत्तिमूलकस्तर्क एव, तथाहि–*येन विना यदनुपपन्नं तेन तदाक्षिप्यते* इति न्यायेनाख्यातेन विनाऽनुपपद्यमानं वाक्यत्वमाख्यातपदमाक्षेप्स्यतीति तत्रान्याख्यातार्थानां सर्वत्रान्वयासम्भवादस्तेश्च सत्तार्थस्य सर्वत्र कारकेऽवश्यापेक्षणीयत्वात् तस्यैवाक्षेप इति । तत्रास्तेर्भवन्तीपरस्याक्षेपो यथा–'जम्बूद्वीपस्तत्र सप्त वर्षाणि' इति, अत्र वाक्यद्वयं, तत्र प्रथमेऽस्तीत्याक्षिप्यते, तत्र सप्त वर्षाणीत्यंशे सन्तीति । "शिर्घुट्" [ १. १. २८. ] "औदन्ताः स्वराः" [ १. १. ४. ] इत्यादौ 'भवति, भवन्ति'इत्यादिर्वर्तमानान्तः 'स्यात्, स्युः' इति सप्तम्यन्तो वाऽस्तिः प्रयुज्यते । क्वचित् पञ्चम्याशिषौ यथा–"देवो मुदे वो वृषभः परे च ।" इत्यत्र 'अस्तु' इति 'सन्तु'इति च, 'भूयाद्' 'भूयासुः'इति च वा । एवम्–'अवन्त्यां विक्रमनृपस्तस्य द्वापञ्चाशद् वीराः' इत्यत्र यथायोगं ह्यस्तन्यद्यतनी-परोक्षाणां प्रयोगः । 'अतः परं श्वो दर्शनम्' इत्यादौ श्वस्तन्याः, 'अद्य सायाह्ने विदुषां सम्मेलनम्' इत्यादौ च भविष्यन्त्याः प्रयोगः । क्रियातिपत्तिश्च क्रियातिपत्तेः प्रयोगं विना न प्रतीयत इति तस्याः साक्षादेव प्रयोग आवश्यकः, यथा–सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यदित्यादौ । एतन्न्यायसत्त्वादेव च "तदस्य पण्यम्" [ ६. ४. ५४. ] इत्यादिसूत्रेषु 'अस्ति' इति प्रयोगस्यावश्यकत्वेऽपि न कृतः । केचित्त्वेवं सूत्रनिर्देश एव प्रकृतन्यायज्ञापक इत्याहुः । अत्र चास्तीत्युपलक्षणम्, तेनान्यापि क्रिया यथौचित्यमध्याहर्त्तव्येति लभ्यते, यथा–'अर्हम्' इत्युक्ते 'प्रणिदध्महे' इति

क्रियाया योग्यतयाऽध्याहारः । केचित् त्वेतन्न्यायानित्यत्वेनान्यक्रियाध्याहारमाहुः, परं यथा 'भवन्ती'शब्दस्योपलक्षणपरतयाऽन्यविभक्तिविशिष्टक्रियाया अपि प्रयोगस्तथाऽस्तिशब्दस्याप्युपलक्षणपरत्वेनैव सिद्धौ न्याय[ औचित्य ]सिद्धस्यास्यानित्यत्वाश्रयणानौचित्यमेवेति विभावनीयम् ॥ ६५ ॥

इति न्यायसमुच्चयस्य द्वितीयोल्लासे, वाचकवतंसेन श्रीहेमहंसगणिमणिना समुच्चितानां पञ्चषष्टिमितानां न्यायानां, तपोगच्छाधिपति-सूरिचक्रचक्रवर्ति-सर्वतन्त्र-स्वतन्त्रश्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न'इति पदालङ्कृतेन विजयलावण्यसूरिणा विरचिता न्यायार्थसिन्धुनामा वृत्तिः ॥

## *यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते* ॥ ६५ ॥

**त०**—यत्र क्रिया न प्रयुज्यते तत्र वाक्यत्वं न स्यात्, आख्यातस्यैव सविशेषणस्य वाक्यत्वोपवर्णनादिति क्रियाभावस्थलेऽपि क्रियापदमाक्षेप्तव्यं भवति, तत्रान्यासां क्रियाणां प्रकरणादिवशेनाध्याहारो भवति । अस्तिक्रिया तु सर्वत्रानध्याहृताऽपि वर्त्तत एव । एतच्च "तदस्यास्त्यस्मिन्निति मतुप्" [ पा० सू० ५. २. ९४. ] इति सूत्रस्थमहाभाष्यग्रन्थादप्यवसीयते, तथाहि—तत्रास्तिग्रहणस्य प्रयोजनवर्णनावसरे उक्तम्—"न सत्तां पदार्थो व्यभिचरतीति" । तस्यायमाशयः कैयटेन प्रकटितः—"यावद् बुद्धया पदार्थो न विषयीकृतस्तावत् पदस्य प्रयोगाभावः, तस्माद् बुद्धिसत्तासमाविष्टोऽर्थो विधि-निषेध-जननादिभिः सम्बध्यते—वृक्षोऽस्ति, वृक्षो नास्ति, वृक्षो जायत इति । अत्यन्तासतोऽपि बहिःशशविषाणादीनर्थान् बुद्धया विषयीकृत्य शशविषाणादि[ पद ]प्रयोगः । तस्माद् बुद्धयारूढोपचरिता [ बुद्धयारूढेषु पदार्थेषु उपचरिता—आरोपिता ] सत्ता शब्दप्रयोगाश्रयत्वादव्यभिचारेत्यर्थः । सैव तु बुद्धिसत्ता प्रयोक्तृ-प्रतिपत्तॄणां बहीरूपतयाऽवभासते । यदि वृक्षादीनां बाह्यसत्तासमाविष्टं वस्तु वाच्यं स्यात् तदा 'वृक्षः' इत्यतः सत्तावगमादस्तीत्यस्य गतार्थत्वात् प्रयोगो न स्यात्, नास्तीत्यस्य च सत्ताविरोधात् प्रयोगाप्रसंगः, अङ्कुरो जायत इति च प्रयोगो न स्यात्, सतो जन्मविरोधात्, उपाचारसत्तायां त्वेते दोषा नावतरन्ति, बुद्धिसत्तासमाविष्टस्य बहिःसत्त्वासत्त्वजननप्रतिपादनायास्ति नास्ति, जायते इति प्रयोगयोगात् ।" इति । अस्यायमाशयः—सर्वस्य पदार्थस्य बुद्धयारूढा सत्ता पदार्थान्तरसंबन्धाय स्वीकर्तव्या, यत्र च पदार्थान्तरसम्बन्धो न विवक्षितस्तत्र सैव सत्ता बहिरपि भासते इत्यास्थेयमिति "यत्र क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीति गम्यते" इति "अनभिहिते" [ पा० सू० २. ३. १. ] इति सूत्रभाष्यादप्यवगम्यते, तत्र च 'गम्यते' इत्युक्त्या तस्यार्थस्य स्वाभाविकत्वं प्रतीयत इति न तत्र ज्ञापकापेक्षा । विभक्त्यन्तरपराया अस्तिक्रियायाः क्रियान्तरस्य वा यत्राक्षेपस्तत्र न स्वाभाविकत्वमपि तु प्रकरणादिबललभ्यमिति तेषामध्याहार एव, यथा—'प्रविश, पिण्डिम्' इत्यादौ । तथा चात्र न ज्ञापकापेक्षेति विज्ञेयम् ॥ ६५ ॥

इति न्यायसमुच्चयस्य सिन्धुकलिते द्वितीयोल्लासे, वाचकवतंसेन श्रीहेमहंसगणिमणिना समुच्चितानां पञ्चषष्टिमितानां न्यायानां, तपोगच्छाधिपति-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कारेण 'व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न'इति पदालङ्कृतेन विजयलावण्यसूरिणा विरचितं तरङ्गाभिधं विवरणम् ॥

क्वचित् प्राच्यः पन्थाः क्वचिदपि च नव्यो बुधपथः,
क्वचित् स्वातन्त्र्याध्वा क्वचिदपि च तेषां समुदयः ।
श्रितोऽस्मिन् शिष्याणां मतिविकसनार्थं शुभधिया,
बुधैर्बुद्धा तत्त्वं तदनुगतमर्प्यं श्रितजने ॥ १ ॥
सूरीन्द्रं हेमचन्द्रं कलिसकलविदं संस्मरामोऽभिरामं,
धीमन्तं हेमहंसं गणिमणिममलं तं कथं विस्मरामः ।
न्यायानामर्थसार्थं निजमतघटितं धारयन्तीं यदीयां,
मञ्जूषां प्राप्य जाता वयमिह प्रभवः साधु सिन्धौ तरङ्गे ॥२॥

## [ अथ न्यायसमुच्चये तृतीयोल्लासः ]

### अथ वाचकश्रीहेमहंसगणिवरेण समुच्चिता ये वचनविशेषा न्यायाकारास्ते व्याख्यायन्ते-

### *यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः* ॥ १ ॥

सि०—अस्य वचनस्याव्यापकत्वेन प्रकरणात् 'इटः' इति पदं सम्बध्यते । तथा च यदुपाधेः-यद्विशेषणविशिष्टस्य, विभाषा-विकल्पेनेड् विहितः, तदुपाधेः-तदुपाधिविशिष्टस्यैव "वेटोऽपतः" [ ४. ४. ६२. ] इतीट्प्रतिषेधो भवति । युक्तं चैतत्, यदा इड्निषेधसूत्रे विकल्पितेट एव इण्निषेधकार्ये ग्रहणं तदा यादृशस्य तस्येड्विकल्पो विहितस्तादृशस्यैव निषेधेन भाव्यम्, अन्यादृशस्योद्देश्यविशेषणतयाऽनुपस्थितत्वात् । तथा च नायमर्थोऽपूर्वः किन्तु सूत्रार्थमर्यादालभ्य एव । "आदितः" [ ४. ४. ७१. ] "नवा भावारम्भे" [ ४. ४. ७२. ] इति पृथक् सूत्रद्वयकरणाच्चायमर्थोऽनुमन्यते, तथाहि-तयोः सूत्रयोरेकत्र पाठेऽपि आदितां धातूनां भावारम्भार्थयोः क्तयोर्विकल्पेनेड्विधाने पारिशेष्यात् कर्तृ-कर्मादिविहितक्तयोः "वेटोऽपतः" [ ४. ४. ६२. ] इतीण्निषेधः सिध्यत्येवेति विशिष्यादितामिण्निषेधविधानं व्यर्थमेव, किन्तु प्रकृतवचनानुसारं भावारम्भ एव वेट्त्वात् तत्रैव विहितयोः क्तयोरिण्निषेधः प्राप्नोति, तत्र च विकल्पेन विहित इत्यन्यत्रार्थे विहितयोः क्तयोरिण्निषेधो विशिष्य सूत्रं विना कर्तुमशक्य इति पृथक् सूत्रमिदमारब्धम्, तथा च प्रकृतवचनसत्ता तत्रानुमतेति गम्यते । स्वीकृते चास्मिन् न्याये "आदितः" [ ४. ४. ७१. ] "नवा भावारम्भे" "वेटोऽपतः" इति सूत्रयोः परस्परं विरोधोऽपि निवृत्तः । कथं विरोध आसीदिति चेत्? शृणु-"आदितो नवा भावारम्भे" इत्यनेनादितां धातूनां भावारम्भार्थे क्तयोरिड् विकल्पेन विधीयते "वेटोऽपतः" [ ४. ४. ६२. ] इत्यनेन च भावारम्भार्थकयोरेव क्तयोः स निषिध्यत इति । पृथग्योगकरणे तु कर्तृ-कर्मादिविहितयोः क्तयोरिण्निषेधः "आदितः" [ ४. ४. ६१. ]इत्यनेन सिद्धो भावारम्भयोस्तूत्तरेण विकल्प इति व्यवस्थास्वीकारादादिद्धातुविषये क्वचिदपि "वेटोऽपतः" [ ४. ४. ६२. ] इत्यस्यावकाशाभाव इति तदप्रवृत्त्यैव विरोधाभावः सिद्धो भवति । तदेवमेतन्न्यायमूलकविरोधाभावार्थो विहितः पृथग्योगः प्रकृतन्यायानुमोदकः । फलं चास्य "गम-हन-विद्लृ-विश-दृशो वा" [ ४. ४. ८३. ] इत्यनेन लृकारेतो विन्दतेरेव वेट्त्वात् तस्यैव "वेटोऽपतः" [ ४. ४. ७१. ] इतीण्निषेधो न तु ज्ञानार्थस्य 'विदक्' इत्यस्येति तस्य क्तयोः 'विदितः, विदितवान्' इत्येव, अन्यथा *नानुबन्धकृतमसारूप्यम्* इति न्यायेनानुबन्धभेदेऽपि धातो रूपे विशेषाभावात् सर्वेषां विदां वेट्त्वनिमित्तकः क्तयोरिण्निषेधो दुष्परिहरः स्यात् । एवं केश-लोम-विस्मयाद्यर्थस्य हृषेर्वेट्त्वेन तस्यैवेण्निषेध इति तुष्ट्यर्थस्य 'हृषितः, हृषितवान्' इत्येव रूपमिति ॥ १ ॥

## [ तृतीयोल्लासः ]

### अथ वाचकश्रीहेमहंसगणिवरेण समुच्चिता ये वचनविशेषा न्यायाकारास्तेषां विवरणं क्रियते—

### *यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः* ॥ १ ॥

त०—नायं न्यायः किन्तु विशेषवचनमात्रं "वेटोऽपतः" [ ४. ४. ७१. ] इत्येतत्सूत्रमात्रविषयत्वात्, न्यायेन हि व्यापकेन भवितव्यम्, "वेटोऽपतः" [ ४. ४. ७१. ] इत्यनेन सामान्यतो विकल्पेटो धातोरिण्निषेधो विधीयते, तत्र धातोर्यत्र येनोपाधिना विशिष्टस्य विकल्प उक्तो भवेत् तदुपाधिविशिष्टस्यैव निषेधः, न तु सामान्यस्य धातोरिति नियमयत्ययम् । उपाधिश्च स्वरूपेऽनिविष्टो व्यावर्तको धर्मः, स चानुबन्धविकरणादिः, न तु निमित्तभूतः प्रत्ययादिर्वैयर्थ्यप्रसङ्गात् । एतच्च "यस्य विभाषा" [ पा० सू० ७. २. १५. ] इति सूत्रे महाभाष्येऽपि दृश्यते । तथाहि-तत्र शङ्कितम्-"यस्य विभाषाऽविदेः" [ वार्तिकम् ], यस्य विभाषाऽविदेरिति वक्तव्यम्, इह मा भूत्-'विदितः, विदितवान्' इति, तत् तर्हि वक्तव्यम्, न वक्तव्यम्, *यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः* शविकरणस्य विभाषा लुग्विकरणश्चायम्" इति । अयमाशयः-"यस्य विभाषा" [ पा० सू० ७. २. १५. ] इति सूत्रेण यस्य धातोः क्वचिद् विभाषयेड् विहितस्तस्येण्निषेधः क्रियते "वेटोऽपतः" [ ४. ४. ७१. ] इतिवत्, तत्र ज्ञानार्थस्य विदेरिट्प्रतिषेधो वक्तव्य इति शङ्कायां यदुपाधेरित्यादि भाष्यकृता समुत्तरितम्, तत्र उपाधिरित्यस्य "अभिधेयादिर्भेदकः" इति कैयटेनार्थः कृतः, तथा च तदनुसारं धातोरर्थोऽपि विशेषणभूततयोपाधिरेवेति यत्र येनार्थेन विशिष्टो धातुर्विभाषितेड् भवति तत्र तदर्थस्यैव तयोरिण्निषेध इत्यायाति, तेन च प्रकृते न कार्यनिर्वाहोऽर्थेन विन्दतेरनिर्देशादिति 'विशेषणमात्रमत्रोपाधिशब्देन लक्षितः' इति नागेश आह । तथा च भाष्योक्तं-'शविकरणस्य विभाषा लुग्विकरणश्चायम्' इत्युक्तमपि संगच्छते । पाणिनीयव्याकरणे इड्विकल्पविधायकं सूत्रं "विभाषा गमहनविदविशाम्" [ पा० सू० ७. २. ६८. ] इत्यस्ति । तत्र परतः पठितस्य विशधातोः साहचर्यं परत्वाद् बलवदिति *सहचरितासहचरितयोः सहचरितस्य* इति न्यायेन *साहचर्यात् सदृशस्यैव* इति स्वसंमतन्यायस्थानीयेन विशतेः शविकरणस्य

[ तौदादिकस्य ] साहचर्याच्छविकरण एव विन्दतिर्गृह्यते, इति तस्यैवेण्निषेधः । स्वसूत्रे तु-अनुबन्धविशिष्टस्य पाठादनुबन्धस्यापि च विशेषणविधया धातुभेदकतया तद्विशिष्टस्यैव ग्रहणमिति स्वभावप्राप्त एवायमर्थ इति नात्र ज्ञापकापेक्षा, न चापि प्रकृतार्थस्य न्यायरूपत्वमिति विज्ञेयमिति ॥ १ ॥

## *यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन सः* ॥ २ ॥

**सि०**—शास्त्रे प्रायः पदविशेषसम्बन्धमनुसृत्य कार्यं विधीयते, तत्र तादृशपदस्य तदव्यवहिता स्थितिरपेक्ष्यते, अन्यथा सम्बन्धस्य विच्छेदः स्यादिति शङ्कापनोदार्थमयमर्थो न्यायरूपेण व्यवह्रियते। यस्य येन पदेनार्थेन वाऽभिसम्बन्धः—अभिमतः सम्बन्धः स तत्र सम्बन्धिनि दूरस्थे सति दूरस्थस्य तस्य सम्बन्धानुयोगिनो भवत्येव, न तु विघटत इति न्यायार्थः । यथा "समस्तृतीयया" [ ३. ३. ३२. ] इति सूत्रेण तृतीयान्तेन युक्तात् संपूर्वकाचर्धातोरात्मनेपदं विधीयते, तच्च तृतीयान्ते पदे पदान्तरेण व्यवहितेऽपि भवत्येव, क्रियायाः करणतया तृतीयान्तस्य क्रियया सम्बन्धस्य दूरदोषेणापनेतुमशक्यत्वात् । अतश्च व्यवधानं शब्दयोर्नार्थाव्यवधानप्रयुक्तं सम्बन्धं विहन्तुं शक्नुयादिति भावः ॥ २ ॥

## *यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन सः* ॥२॥

**त०**—"संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते, तेषां यथेष्टमभिसम्बन्धो भवति" इति भाष्योक्तिमनुरुध्य, स्वभावतोऽपि वा जना यथेच्छं पदानि वाक्येषु स्थापयन्ति, तथापि यस्य पदार्थस्य येन पदार्थेन सह सम्बन्धोऽभिप्रेयते तेन स सम्बध्यत एव, न तु उच्चारणकृतव्यवधानेन सम्बन्धे कापि हानिरिति प्रकृतन्यायार्थः । अयमपि न किंमप्यपूर्वं प्रतिपादयति किन्तु स्वभावसिद्धमेवार्थमाहेति नात्र ज्ञापकापेक्षा । न च केवलमयं न्यायः शास्त्रीय एव, यस्य हि मनुष्यस्य येन सह कश्चिल्लौकिकः सम्बन्धो भवति स न दूरस्थितौ निवर्त्तते, तथा च लोकसाधारणतया नायं न्यायत्वेनान्यैर्वैयाकरणैः संगृहीत इति ॥ २ ॥

## *येन विना यन्न भवति तत् तस्यानिमित्तस्यापि निमित्तम्* ॥ ३ ॥

**सि०**—येन-वस्तुतो निमित्तत्वाभाववता, विना-तदसत्त्व इति यावत्, यन्न भवति-तदवश्यस्थितिकं, तस्य-स्वसत्तायां भवतः कार्यस्य, अनिमित्तस्यापि-स्वमन्यद् वा निमित्तमुपाश्रित्याभवतोऽपि, निमित्तमिति व्यवह्रियत इति शेषपूरणेन न्यायार्थः । तथा च सति क्वचित् तद्विरहे सति *निमित्ताभावे नैमित्तिकस्याप्यभावः* इति न्यायात् तत्कार्यं न भवति, यथा-कॄतण्धातोः कीर्त् आदेशः "कॄतः कीर्तिः" [ ४. ४. १२३. ] इति सूत्रेण विधीयते, न च तस्य किमपि निमित्तमुपात्तम्, परन्तु तस्य धातोश्चौरादिकत्वेन चुरादीनां च ण्यन्तत्वेन णिचि परत एव दृश्यते, ततश्चासौ णिच् तस्य निमित्तत्वेनानुपात्तोऽपि निमित्तीभवतीति चुरादीनामनित्यण्यन्तत्वपक्षे णिजभावे 'कॄतति' इत्येव रूपं भवति, न तु 'कीर्तति' इति न्यायफलम् । वस्तुतस्तु नायं न्यायोऽपि तु साहचर्यबललभ्योऽर्थः, अधिकं विवरणे स्पष्टम् ॥ ३ ॥

## *येन विना यन्न भवति तत् तस्यानिमित्तस्यापि निमित्तम्* ॥ ३ ॥

**त०**—अयं हि न न्यायान्तरवदपूर्वमर्थं सूचयति, किन्तु लौकिकव्यवहारेऽपि तथा प्रतीतिर्व्यपदेशश्च दृश्यत इति तेन सह साहचर्यदर्शनात् तन्मूलक एव तत्र निमित्तत्वव्यवहार इति संभाव्यते । एतन्न्यायफलं कॄततीति रूपसिद्धिरिति वृत्तौ प्रदर्शितम् । अत्र कश्चिदाह-नन्वेवं सति "कॄत ॠकारोपदेशोऽचीकॄतदित्यत्र ॠकारश्रवणार्थः" इति "कॄतः कीर्तिः" [ ४. ४. १२३. ] इति सूत्रस्थो बृहद्वृत्तिपाठो विरुध्यति, यतस्तत्राचीकॄतदित्यत्र ॠकारश्रवणमात्रफलमुक्तं, भवद्रीत्या तु कॄततीत्यत्रापि ॠकारश्रवणफलं भवतीति स्पष्ट एव विरोध इति, तन्न मनोरमम्-बृहद्वृत्तिपाठस्य तात्पर्यानवगमात्, धातुगणे एव 'कीर्तण्' इति पठ्यतां, तथा सति सूत्रारम्भमन्तरापि कीर्तयतीत्यादीनां सिद्धिरयत्नोपनतैवेति ॠकारघटितेन 'कॄतण्' इति पाठेन किमित्याशङ्कायां समाधानात्मकोऽयं बृहद्वृत्तिपाठः, 'कॄतण्' इति गणपाठे 'अचीकॄतत्' इत्यपि रूपं सिद्ध्यति, 'कीर्तण्' इति गणपाठे कृते तु 'अचिकीर्तत्' इत्येकमेव रूपं स्यादिति समाधानग्रन्थाशयः; अयं भावः-'कीर्तण्' इति गणपाठे 'अचीकॄतत्' इति रूपं न सिध्येत्, 'कॄतण्' इति पाठे कृते तु "ॠद्वर्णस्य" [ ४. २. ३७. ] इति सूत्रेण कीर्तादेशबाधक ॠकारस्य ऋकारो वा भवतीति जायमाने 'अचीकॄतत्' इति रूपे ॠकारश्रवणं भवति । ननु कथं कीर्तादेशबाध इति चेत् ? उच्यते-"ॠद्वर्णस्य" [ ४. २. ३७. ] इत्यत्रोपान्त्यस्य ॠकारस्य ऋकारस्य च संग्रहार्थं वर्णपदोपादानम्, अथात्रापि यदि कीर्तादेशः स्यात् तदाऽन्यस्य ॠकारस्योपान्त्यस्याभावाद् "ऋदतः" इत्येतावतैव निर्वाहे वर्णग्रहणमनवकाशं सत् कीर्तादेशं बाधते । ननु 'कृतण्' इति ह्रस्व एव धातुगणे पठ्यतां, तावतापि तत्सामर्थ्याद् 'अचीकृतत्' इति सिध्यति, सूत्रे च वर्णग्रहणमपि न कर्तव्यम्, एवं "कॄतः कीर्तिः" [ ४. ४. १२३. ] इति स्थाने "कृतः कीर्तिः" इति विन्यासे मात्रालघुत्वमिति लाघवमपि, सत्यम्-एवं सति 'कृतैत्' इत्यस्यापि

कीर्तादेशशङ्का स्यात् । किञ्च 'चुरादीनामनित्यो णिच्' इति णिजभावे प्रस्तुतन्यायबलेन कीर्तादेशाभावे च कर्ततीत्यनिष्टं रूपं स्यात्, इष्यते च कृततीति अतः 'कृतण्' इति पाठः सम्यक्, सम्यक् च कृततीति रूपसिद्ध्यर्थं प्रस्तुतन्यायाश्रयणमित्यलं पल्लवितेन ॥ ३ ॥

## *नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम्* ॥ ४ ॥

**सि०—**नाम्नो ग्रहणे सति उपसर्गस्य नामत्वेऽपि तस्य ग्रहणं बाहुल्येन न दृश्यते । अयमपि लक्ष्यानुरोधमूलक एव न्यायो यदि तादृशं लक्ष्यं भवति, यथा—"स्पृशोऽनुदकात्" [ ५. १. १४९. ] इति सूत्रेणोदकभिन्नान्नाम्नः परस्माद्धातोर्विधीयमानः क्विप् सत्त्वप्रधाननाम्नः परत्वे एव भवति, यथा—'घृतस्पृक्' इत्यादि, उपस्पृशतीत्यर्थे चोपरूपोपसर्गनाम्नः परत्वे सत्यपि न भवति । प्रायेणेति वचनाच्च क्वचिन्नामग्रहणे उपसर्गस्यापि ग्रहणं भवत्येव, तेन "भजो विण्" [ ५. १. १४६. ] इति नाम्नः पराद् भजेर्विधीयमानो विण् उपसर्गपूर्वादपि भवति, यथा-'प्रभाग्' इत्यादौ, यदि तथाभूतः प्रयोगः क्वचिद् दृश्येत ॥ ४ ॥

***नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम्* ॥ ४ ॥**

**त०—**अयमपि न्यायो न क्वचिदुपलभ्यते, किन्तु संभावनामूलक एव । "स्पृशोऽनुदकात्" [ ५. १. १४९. ] इत्यत्र च 'अनुदकात्' इति पर्युदासदर्शनात् 'पर्युदासः सदृग्ग्राही' इति न्यायानुरोधेनोदकभिन्नादुदकसदृशाद् द्रव्यवचनान्नाम्नः परत्व एव प्रत्ययः, न त्वद्रव्यवाचिन उपसर्गात् परत्वे इति कल्पयितुं शक्यते ।तथा च प्रकृतसूत्रव्याख्यानभूतबृहद्वृत्तिग्रन्थादप्ययमर्थो लभ्यते, तथाहि—तत्रोक्तम्-"अनुदक इति पर्युदासाश्रयणादुदकसदृशमनुपसर्गं नाम गृह्यते, तेनेह न भवति—उपस्पृशति" इति । तथा च पर्युदासबलादेव प्रकृते वारणमिति नात्र न्यायोपयोग इत्यायाति । यदि ह्ययं न्याय आचार्यस्येष्टः स्यादवश्यं स त्वत्र समाश्रितः स्यात्; सति चान्यस्मिन्नुपाये किमर्थं नवीनो न्याय आश्रीयेतेति । सति प्रयोजनेऽन्यत्र न्यायस्योपयोगेऽपि प्रकृतेऽनुपयोग एव । अन्यत्र च बहुत्र नामत्वेनोपसर्गस्य ग्रहणं दृश्यत एवेति ॥ ४ ॥

## *सामान्यातिदेशे विशेषस्य नातिदेशः* ॥ ५ ॥

**सि०—अतिदेशनम्—अन्यधर्मस्यान्यत्र आरोपणम्-अतिदेशः, तत्र सामान्यधर्मस्यातिदेशे सति तदन्तर्भूतस्यापि विशेषस्यातिदेशो न भवतीति न्यायार्थः । "निर्विशेषं न सामान्यम्" इति नयेन सामान्यस्य विशेषाविनाभावेन सामान्यातिदेशे सर्वे तदन्तर्गता विशेषा अतिदिष्टाः स्युरिति शङ्कया न्यायोऽयमाश्रीयते । अयं च न्यायोऽतिदेशस्वभावसिद्ध एव, तथाहि—"भूतवच्चाशंस्ये वा" [ ५. ४. २. ] इति सूत्रे भूतवदित्यनेन कथनेन भूतसादृश्यं विधीयते, सादृश्यं च तद्वृत्तिधर्म एव, स च धर्मः क इति जिज्ञासायां सादृश्यप्रतियोगितावच्छेदकतया शब्दादुपस्थितस्तज्ज्ञानादनुमानेनोपस्थितस्तद्व्यापको धर्मस्तस्यैवातिदेशः, न तु तद्व्याप्यधर्मातिदेशः, तस्यानुपस्थितत्वादित्येवंरूपेणायं न्यायः फलति । तेन भूतवदिति कथनेन भूतत्वमात्रस्यैव व्यापकस्य धर्मस्यातिदेशो भवति, न तु तद्व्याप्यानामनद्यतनत्व-परोक्षत्वादिविशिष्टानां भूतविशेषाणामिति 'उपाध्यायश्चेदागमत् एते तर्कमध्यगीष्महि' इत्यादावनद्यतन-परोक्षयोरपि भूतत्वमात्रेणोपस्थितिरिति तत्तदर्थप्रयुक्ते ह्यस्तनी-परोक्षे विभक्ती न भवतोऽपि तु सामान्यभूतत्वनिमित्ताऽद्यतन्येव । लोकेऽपि मनुष्यादौ पशुत्वादेः सामान्येनातिदेशस्य स्थले न तत्तद्विशेषाणां गोत्वादीनामतिदेशो गम्यत इति लोकव्यवहारसिद्धोऽप्ययं न्याय इति विज्ञेयम् ॥ ५ ॥**

***सामान्यातिदेशे विशेषस्य नातिदेशः* ॥ ५ ॥**

**त०—**सामान्योपस्थितिकाले विशेषोपस्थापकसामग्र्यभावोऽस्य न्यायस्य मूलमिति वृत्तौ प्रतिपादितम्, तस्यायमाशयः—सामान्यशब्दोपादानेन यत्र कार्यमतिदिश्यते तत्र विशेषस्याशब्दार्थत्वाद् विशेषाश्रयं कार्यं नातिदिश्यते, यत्र तु विशेषशब्दोपादानेनातिदेशस्तत्र विशेषधर्मस्यातिदेशो भवत्येव । किञ्च विशेषातिदेशे सामान्यातिदेशोऽपि भवति, यथा ब्राह्मणविशेषस्य कठत्वादिधर्मस्यातिदेशे ब्राह्मणत्वादेशः सुतरां जायते, तत्र च सामान्यमनुमानेनोपस्थितम्, व्याप्येन हि व्यापकोपस्थितिरनुमानेन भवति । "स्थानिवदादेशोऽनल्विधौ" [ पा० सू० १. १. ५६. ] इति सूत्रे महाभाष्ये चायं न्यायो वार्तिकसिद्धत्वेन पठितो दृश्यते, तत्र हि वर्णविधौ स्थानिवद्भावप्रतिषेधाय 'अनल्विधौ' इति क्रियते, तस्य च वैयर्थ्यमनेन न्यायेनाशङ्कितम्, तथाहि—"आरभ्यमाणेऽप्येतस्मिन् योगे—"अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्यादर्शनात्" [ वार्तिकम् ], अल्विधौ प्रतिषेधेऽसत्यपि विशेषणे समाश्रीयमाणे, असति तस्मिन् विशेषणेऽप्राप्तिर्विधेः, प्रसीव्य प्रदीव्य । किं कारणात्? तस्यादर्शनात्, बलादेरित्युच्यते, न चात्र बलादि पश्यामः । ननु चैवमर्थ एवायं यत्नः क्रियते—अन्यस्य कार्यमुच्यमानमन्यस्य यथा स्यादिति । सत्यम्-एवमर्थो यत्नः क्रियते, न तु प्राप्नोति, किं कारणम्? "सामान्यातिदेशे हि विशेषानतिदेशः" [ वार्तिकम् ]

सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति, तद्यथा–ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति, सामान्यं यद् ब्राह्मणकार्यं तत् क्षत्रियेऽतिदिश्यते, यद् विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते । एवमिहापि सामान्यं यत् प्रत्ययकार्यं तदतिदिश्यते, यद् विशिष्टं बलादेरिति न तदतिदिश्यते" । इति । अयमाशयः–'प्रसीव्य, प्रदीव्य' इत्यादौ क्त्वाद्यशित्प्रत्ययनिमित्त इडागमः स्थानिवद्भावेन प्राप्त इति तन्निवारणाय वर्णविधौ तन्निषेधः क्रियते, तत्र 'क्त्वा'प्रत्ययस्थितं सामान्यं प्रत्ययत्वादेवातिदिश्येत, न तु तत्र स्थितं तादित्वादीतीटः प्राप्तिरेव नेति तत्प्रतिषेधो व्यर्थ इति । अन्ते च यद्यपि "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इति सूत्रे 'अयपि' इति प्रतिषेधस्थानीयेन "नल्यपि" [ पा० सू० ६. ४. ६९. ] इति सूत्रेणास्य न्यायस्यानित्यत्वमपि साधितम्, तथाहि–यपि क्त्वावृत्तिकित्त्वातिदेशे सत्येव ईत्वं प्राप्नोति, कित्त्वं च विशेषधर्मस्तस्य चानेन न्यायेनातिदेशोऽलभ्य इति तदप्राप्तेरयपीति निषेधो व्यर्थः सन् प्रकृतन्यायानित्यत्वं ज्ञापयति । नवीना यद्यपि कित्त्वं क्त्वाप्रत्ययस्य सामान्यधर्म एवेति तदतिदेशे न्यायस्य बाधकत्वाभावान्न 'अयपि' इति निषेधेनास्यानित्यत्वं ज्ञापयितुं शक्यते इति साधयन्ति, तथापि तद्विचारः प्रकृते नातीवोपयोगीति विरम्यते ॥५॥

## *सर्वत्रापि विशेषेण सामान्यं बाध्यते, न तु सामान्येन विशेषः* ॥ ६ ॥

सि० – विशेषः–सामान्यव्याप्यं शास्त्रम्, सामान्यं–विशेषव्यापकं शास्त्रम्, सर्वत्रापि प्राप्ते प्राप्स्यति वा सामान्ये विशेषेण शास्त्रेण सामान्यशास्त्रं बाध्यते, तु–किन्तु, सामान्येन शास्त्रेण विशेषशास्त्रं न बाध्यत इति न्यायार्थः । लोकेऽपि विशेषेऽभिहिते सामान्यं विशेषानुस्यूततया भासमानमपि विशेषत्वेन रूपेणैव भासते, शब्दतो विशेषस्यैव प्रतीतेः, तथा शास्त्रेऽपि युक्तमेव, "तार्किकादिमते सामान्य-विशेषयोर्बाध्य-बाधकभावो नास्ति" इति तु केषांचिदुक्तिरप्रासङ्गिकी, तर्कादिशास्त्राणां प्रमाण-प्रमेयादिविचारपरत्वात् कस्यचिद् विधि-निषेधे तेषामव्यापारात् । अयं च बाध्यबाधकभावो विधि-निषेधविषय इति तदर्थकेषु धर्मशास्त्रादिषु प्रवर्त्तत एवायं न्यायः । व्याकरणशास्त्रे सामान्य-विशेषभावेन शास्त्राणां विधि-निषेधपरत्वात् तत्र प्रकृतन्यायस्य लक्ष्यलाभोऽस्ति, यथा–'कोऽर्थः' इत्यत्र 'क+स्+अर्थः' इति स्थितौ "सो रुः" [ २. १. ७२. ] इति सकारस्य रुत्वे कृते सति "रोर्यः" [ १. ३. २६. ] "अतोऽति०" [ १. ३. २०. ] इत्यनयोः प्राप्तौ "रोर्यः" [ १. ३. २६. ] इत्यस्य परत्वेऽपि सामान्येन स्वरे परे विधानात् सामान्यशास्त्रत्वम् "अतोऽति०" [ १. ३. २०. ] इत्यस्य चातीति विशेषस्वरे परे विधानाद् विशेषशास्त्रत्वेन तेनास्य बाधः सिध्यति । तथा च प्राप्ते सामान्ये विशेषेण तस्य बाधस्येदमुदाहरणं, प्राप्स्यति सामान्ये विशेषप्रवृत्तिस्थलोदाहरणं यथा–"सोऽहं तथापि तव" [ भक्तामरस्तोत्रे श्लो. ५ ] इत्यादि, अत्र हि "रोर्यः" [ १. ३. २६. ] "अतोऽति०" [ १. ३. २०. ] "तदः सेः०" [ १. ३. ४५. ] इत्येतेषां न सह प्राप्तिः, "तदः सेः०" [ १. ३. ४५. ] इत्यस्य प्राप्तिकालेऽन्ययोः प्राप्त्यभावात् । तथा च "रोर्यः" [ १. ३. २६. ] "अतोऽति०" [ १. ३. २०. ] इत्यनयोः प्राप्तिः "सो रुः" [ २. १. ७२. ] इत्येतत्प्राप्त्यनन्तरितेति भविष्यत्प्राप्तिकस्येदमुदाहरणमित्युक्तं प्राचीनैः । वस्तुतस्तु प्रकृतसूत्राणां सामान्य-विशेषभाव एव दुर्निरूप इति केवलं "सो रुः" [ २. १. ७२. ] "तदः सेः०" [ १. ३. ४५. ] इत्यनयोरेव सामान्य-विशेषभावः कल्पनीयः । तथा च प्राप्तस्यैवेदमुदाहरणं न तु प्राप्स्यतः । किञ्च प्रकृते "तदः सेः०" [ १. ३. ४५. ] इत्यस्य प्राप्तिरप्यत्र नास्ति, यतस्तत्र 'पादार्था' इत्युक्ततया पादपूरणे सत्येव [ लुचैव यदि पादपूर्त्तिः स्यात् तदैव ] लुग् भवति, इह च लुचं विनाऽपि पादपूर्त्तिः स्पष्टा, एतच्च तत्सूत्रे बृहन्न्यासेऽप्युक्तम्, तथाहि–'पादपूरणी' इति बृहद्वृत्तिप्रतीकमुपादाय–"लुचैव" यदि पादः पूर्यते, यत्र लुच्यलुचि च पादपूरणमविशिष्टं तत्र लोपाभावः, यथा–"सोऽयमित्यभिसम्बन्धे प्रत्यभिज्ञोपजायते ।" अत्र लुच्यपि पादपूरणं भवति, यथा–"साऽयमित्यभिसम्बन्धे" इति [ अत्रापि "सोऽयमित्यभिसम्बन्धे" इत्येवं पाठः प्रमादान्मुद्रितः ]" । इत्थं च सोऽयमित्यस्य सोऽहमित्यस्य च सर्वथा तुल्ययोग-क्षेमत्वेन तत्र प्रकृतसूत्रचर्चैव नोचिता । किञ्चात्र लुचि सत्यां स्त्रीपुंसोः सन्देहोऽप्यापततीत्यपरं दूषणम्, यद्यपि प्रकरणात् तन्निर्णयः स्यात् तथापि सत्यां गतौ किमर्थं संदिग्धप्रयोगः क्रियेत । इत्थं च तत्रैव सूत्रे लघुन्यासे यदित्थमुक्तम्–"ननु "सोऽहं तथापि तव०" [ भक्तामरस्तोत्रे श्लो० ५ ] इत्यस्मिन् प्रयोगे "तदः सेः स्वरे पादार्था" [ १. ३. ४५. ] इत्यनेन प्रतिष्णातेन निमित्तस्वरे परत्रावतिष्ठमाने सति सेर्लुक् कथं न भवति? उच्यते–"तदः सेः स्वरे०" [ १. ३. ४५. ] इति सूत्रं "रोर्यः" [ १. ३. २६. ] इति सामान्यस्वरनिमित्तसूत्रविषये "सो रुः" [ २. १. ७२. ] इत्यस्य बाधकम्, न पुनः स्वरविशेषनिमित्तस्य "अतोऽति रोरुः" [ १. ३. २०. ] इत्यस्य विषये, कुतः? *सर्वत्रापि विशेषेण सामान्यं बाध्यते न सामान्येन विशेषः* इति न्यायात्" इति, तच्च पूर्वोदाहृतबृहन्न्यासग्रन्थप्रतिकूलमेव प्रतिभाति, सूत्रप्राप्तेः स्पष्टत्वेन तत्र क्लिष्टकल्पनया समा-

धानस्थानावश्यकत्वात् । *तक्रकौण्डिन्य*न्यायेन समानप्रयोजनोऽयं, सोऽपि न्याय एतन्न्यायमूलक एव । तक्रकौण्डिन्यन्यायस्य च–तक्रं देयमस्मै इति तक्रदेयः, स चासौ कौण्डिन्यश्चेति विग्रहे मयूरव्यंसकादित्वाद् देयशब्दलोपः, तस्य च न्यायशब्देन दृष्टान्तार्थेन समानाधिकरणसमास इति सिद्धिः, तस्य प्रवृत्तिश्चैवम्–सर्वेभ्यो ब्राह्मणेभ्यो दधि देयं तक्रं कौण्डिन्याय, तत्र ब्राह्मणेषु सामान्येन कौण्डिन्योऽपि समायात इति दधिदानं तस्य पूर्ववाक्येन प्राप्तम्, परन्तु परवाक्येन विशेषतस्तस्य तक्रदानं विहितमिति दधिदानं बाधते । यद्यपि दधिदानोत्तरं ततः पूर्वं वा तक्रदानमपि विधातुं शक्यत एव, तथापि विशिष्य विधानसामर्थ्यात् तक्रमेव दीयते न दधि । तथा च सत्यपि संभवे सामान्येन विशेषस्य बाध इति प्रकृतन्यायेन [ *तक्रकौण्डिन्य*न्यायेन ] लभ्यते । यत्र चासंभवे एव बाधकत्वमिष्यते विशेषस्य तत्र *माठर-कौण्डिन्यपरिवेषण*न्यायः समाश्रीयते, तथाहि–तन्न्यायस्वरूपम्– *सर्वे ब्राह्मणा भोज्यन्ताम्, माठरकौण्डिन्यौ परिवेविषाताम्* इति, अत्र भोजन-परिवेषणयोः समकालमसम्भव एवेति परिवेषणेन विशेषतो विहितेन सामान्यतो विहितं भोजनं तयोर्बाध्यते, अनयोश्च बाधनमनुक्तमेव सामान्यविशेषभावमूलकमेव प्रतीयते इति प्रकृतन्यायसमानयोग-क्षेमाविमौ, यथा "व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् वा" [ ३.४.११. ] इति सामान्येन विहितो यङ् "गत्यर्थात् कुटिले" [ ३.४.११. ] इति गत्यर्थेभ्यो धातुभ्यो विशिष्य कुटिलेऽर्थे विहितेन यङा बाधकेन बाध्यते, न चास्ति द्वयोरर्थयोरेकदा संभव इति *माठरकौण्डिन्यपरिवेषण*न्यायेन प्रकृते बाधः । तथा च सर्वत्र सामान्य-विशेषभाव एव बाधमूलमिति ॥ ६ ॥

***सर्वत्र विशेषेण सामान्यं बाध्यते, नतु सामान्येन विशेषः* ॥ ६ ॥**

त०—अत्र यद् वक्तव्यं तद् वृत्तावेवोक्तम् । विशेषश्चायम्–अयमपि न्यायोऽनवकाशमूलक एवेति *येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः* इति न्यायेनैव गतार्थ इति न पृथग् वक्तव्यः । अपवादस्थलेऽपि सामान्य-विशेषभावप्रयुक्त एव बाध्य-बाधकभावः । विशेषस्य सामान्यान्तर्गततयाऽवश्यं प्राप्ते सामान्यशास्त्रे एव विशेषशास्त्रमारब्धमिति तत् तस्य बाधकमेवेति नायं न्यायः पृथगारब्धव्य इति ॥ ६ ॥

## *ङित्त्वेन कित्त्वं बाध्यते* ॥ ७ ॥

सि०—पूर्वन्यायवदयमपि बलाबलकथनार्थमेवोपात्तः, अत्र चैकस्मिन् धर्मिणि ङित्त्व-कित्त्वयोः प्राप्तौ किंनिमित्तकेन कार्येण भाव्यमिति शङ्काऽपनोदार्थमयं न्याय आश्रीयते । तथा च यत्र कित्त्वं पूर्वस्थितमस्ति, तत्र ङित्त्वं चेद् विहितं कथमपि, तर्हि ङित्त्वनिमित्तकमेव कार्यं तत्र स्यात् । ङित्त्व-कित्त्वयोः स्वतः परस्परं विरोधाभावात् कार्यद्वारक एव विरोध इति तत्कार्यबाधनमेव तद्बाधनमेष्टव्यम् । अयं च स्पर्धमूलक एव, तत्र "स्पर्धे" [ ७.४.११९. ] इति परिभाषासूत्रं पाठापेक्षं पूर्वत्वपरत्वमादाय प्रवर्त्तते, अयं च प्रवृत्त्यपेक्षं पूर्वत्वपरत्वमादायेति विशेषः । यथा–"णूत् स्तवने" इत्यस्य क्ते नुवितः प्रणुवित इत्यादिरूपाणि, तत्र क्तप्रत्ययस्य कित्त्वं स्वाभाविकं कुटादित्वप्रयुक्तेन ङित्त्वेन बाध्यते इति कित्त्वनिमित्तकः "उवर्णात्" [ ४.४.५८. ] इतीण्निषेधो नाभूत् । 'कित्त्वं [ पूर्वस्थितं ] बाध्यते' एतावन्मात्रोक्तौ तु 'प्रकुत्य' इत्यादौ क्त्वाप्रत्ययसम्बन्धिकित्त्वं पश्चात् प्रवृत्तस्य यपः पित्त्वेन बाधितं स्यादिति प्रकुत्येत्यत्र गुण आपद्येत, 'ङित्त्वं [ पश्चात् प्रवृत्तं ] बाधकम्' इत्येतावन्मात्रोक्तौ तु–"ध्रुंत् गतिस्थैर्ययोः" इत्यस्य क्त्वि यबादेशे प्रध्रुत्येत्यत्र कुटादित्वप्रयुक्तङित्त्वेन यपः पित्त्वस्य बाधापत्तौ तागमो न स्यात् । न्यायस्यास्यास्थैर्याच्च क्वचिदप्रवृत्तिरपीति ङित्त्वेन कित्त्वस्याबाधान्नूतः प्रणूतवानित्यपि रूपम् । एतन्न्याये ङित्त्व-कित्त्वे उपलक्षणविधया प्रयुक्ते, तेनान्यत्रापि धात्वादिसम्बन्धी पूर्वावस्थानुबन्ध उत्तरावस्थानुबन्धेन [ पूर्वावस्थानुबन्धनिमित्तकं कार्यमुत्तरावस्थानुबन्धनिमित्तकेन कार्येण ] बाध्यते । तत्र धातोरनुबन्धस्य बाधो यथा–चक्षिधातोः स्थाने आदेशभूतस्य ख्यागो गित्त्वेन [ गित्त्वनिमित्तकोभयपदित्वेन ] पूर्वावस्थास्थितेदित्त्वस्य [ तन्निमित्तनित्यात्मनेपदित्वस्य ] बाधादुभयपदित्वमेव भवति, न तु नित्यात्मनेपदित्वम्–आचख्यौ, आचख्ये, इति । प्रत्ययसम्बन्धिनोऽनुबन्धस्य [ तन्निमित्तकार्यस्य ] बाधो यथा–'युतात्' इत्यत्र तातङो ङित्त्वेन तुवो वित्त्वस्य बाधात् "उत औविति व्यञ्जनेऽद्वेः" [ ४.३.५९. ] इति औन्न । क्वचिच्च परस्तात् प्रवृत्तेनानुबन्धेन पूर्वानुबन्धस्य बाधाभावोऽपि, यथा–प्रकुत्येत्यत्रेत्युदाहृतं पूर्वमेवेति ॥ ७ ॥

***ङित्त्वेन कित्त्वं बाध्यते* ॥ ७ ॥**

त०—ङित्त्वेन पश्चात् प्रयुक्तेन पूर्वस्थितं कित्त्वं बाध्यत इति न्यायार्थः । बाध्य-बाधकभावव्याख्यानप्रसङ्गेनैतदपि औचित्यप्राप्तमिति पठितम् । अन्ये वैयाकरणा नैतदाद्रियन्ते, किन्तु यत्र पूर्वस्थितस्य कित्त्वस्य ङित्त्वेन बाध इष्टस्तत्र *येन नाप्राप्त०*न्यायेनैव निर्वाहः क्रियते, 'नुवितः' इत्यादाववश्यप्राप्ते कित्त्वे ङित्त्वं कुटादित्वप्रयुक्तं क्रियते, इति तत् [ ङित्त्वं ] तस्य [ कित्त्वस्य ] ङित्त्वेन बाधकं स्यात् । भाष्यकृता तु ङित्त्वेन कित्त्वस्य बाधो नोचित इत्येव साधितम्–'गाङ्कुटादिभ्यो-

ऽग्णिन्ङित्” [ पा० सू० १. २. १. ] इति सूत्रे, तत्र हि ङित्कितोः पृथगनुबन्धत्वकरणे प्रयोजनस्य विचारप्रसङ्गे–“कुटादीनामिट्प्रतिषेधः” [ वार्तिकम् ], कुटादीनामिट्प्रतिषेधः प्रयोजनम्, यथेह भवति–‘लूत्वा धूत्वा’ इति “श्र्युकः किति” [ पा० सू० ७. २. ११. ] इतीट्प्रतिषेधः, एवं ‘नुविता धुविता’ अत्रापि प्राप्नोति । “क्त्वायां कित्प्रतिषेधश्च” [ वार्तिकम् ], क्त्वायां कित्प्रतिषेधः प्रयोजनम्, किंच–इट्प्रतिषेधः, नेत्याह, अदेशेऽयं चः पठितः–‘क्त्वायां च कित्प्रतिषेध इति । यथेह भवति–‘देवित्वा सेवित्वा’ इति ‘न क्त्वा सेट्” [ पा० सू० १. २. १८. ] इति कित्त्वप्रतिषेधः, एवं ‘कुटित्वा, पुटित्वा’ इहापि प्राप्नोति । अथवा देश एवायं चः पठितः–क्त्वायां कित्प्रतिषेधश्चेट्प्रतिषेधश्च । कित्प्रतिषेधे उदाहृतम्, इट्प्रतिषेधो यथेह भवति–‘लूत्वा धूत्वा’ “श्र्युकः किति” [ पा० सू० ७. २. ११. ] इति, एवं ‘नुवित्वा धुवित्वा’ अत्रापि प्राप्नोति । स्यादेतत् प्रयोजनं यद्यस्य नियोगत आतिदेशिकेन ङित्त्वेनौपदेशिकं कित्त्वं बाध्येत । सत्यपि तु ङित्त्वे किदेवैषः । तस्मान्नूत्वा धूत्वेत्येव भवितव्यम्” इति सिद्धान्तितम् । अस्यायमाशयः–यद्यपि ङित्कितोर्गुणादिप्रतिषेधरूपं कार्यं समानमेवेत्येकेनैवानुबन्धेन सिध्यति, तथापि किति परे “उवर्णात्” [ ४. ४. ५२. ] इतीट्प्रतिषेधो भवति, ङिति स न भवतीति तयोः पृथक्करणमावश्यकम् । तथा च ‘नुविता, धुविता’ इत्यत्र कुटादित्वाद् ङित्त्वे सति इट्प्रतिषेधो न भवति । इत्थं तयोः पृथगनुबन्धत्वफलमुक्त्वा क्वचित् कित्वस्य ङित्त्वेन बाधनादिट्प्रतिषेधाभावोऽपि फलमिति ‘नुवित्वा, धुवित्वा’ इति सिध्यतीति सिद्धान्त्येकदेशिनोक्तम्, तत्र च सिद्धान्तिना आतिदेशिकेन [ कुटादित्वप्रयुक्तेन ] ङित्त्वेन औपदेशिकस्य [ स्वाभाविकस्य ] कित्त्वस्य निवृत्तेरसम्भवात् क्त्वाप्रत्यये कित्त्वं स्यात्स्यत्येवेति ‘नूत्वा धूत्वा’ इत्येव युक्तमिति सिद्धान्तितम् । तथा च तुल्यन्यायात् क्तेऽपि ‘नूतः’ इत्येव रूपमिष्टमिति ङित्त्वेन कित्त्वस्य बाधो नेष्टः । *येन नाप्राप्त०*-न्यायमूलको हि बाध एष्टव्यः स्यात्, नास्ति च सर्वत्र ङित्त्वविषये कित्त्वस्यावश्यप्राप्तत्वम्, ‘नुवितुम्’ इत्यादौ कित्त्वाप्राप्तेः । तथा च नायं न्यायः पाणिनीयानामाहृत इति स्पष्टम् । यपः पित्त्वस्यापि ङित्त्वेन बाधाशङ्का नास्ति ङित्त्वापेक्षया पित्त्वस्य स्वाभाविकत्वात्, ङित्त्वं हि क्त्वाप्रत्ययस्यैव कुटादित्वात् प्राप्तं, न तु यपः, तस्यादेशत्वेन प्रत्ययत्वाभावात्, प्रत्ययस्थानिकत्वेन हि तत्र प्रत्ययत्वमानेयमिति साक्षात्प्रत्ययत्ववति क्त्वाप्रत्यये एव ङित्त्वप्रवृत्त्यौचित्यात् । तथा च यपि ङित्त्वं स्थानिधर्मः पित्त्वमात्मधर्म इति पित्प्रयुक्तं कार्यं तत्र स्यादेव । उपलक्षणतया पूर्वावस्थानुबन्धस्योत्तरावस्थानुबन्धबाधकत्वमपि न्यायाभावे कुतः स्वीकार्यम् । चक्षिस्थानीये ख्याञादेशे च स्वत एव ञित्त्वप्रयुक्तं कार्यं स्यादेव । एवं युतादित्यादावपि स्वाश्रयानुबन्धनिमित्तकमेव कार्यं न तु स्थानिस्थितानुबन्धनिमित्तकं तस्य स्थानिवद्भावलभ्यत्वात्, ‘ङिच्च पिन्न, पिच्च ङिन्न’ इति “हलः श्नः शानज्झौ” [ पा० सू० ३. १. ८३. ] इति सूत्रे महाभाष्ये सिद्धान्तितत्वाच्चेति सर्वं सुस्थम् । स्वाश्रयानुबन्धकार्येण सह क्वचित् स्थानिसम्बन्ध्यनुबन्धनिमित्तमपि कार्यं भवत्येवेति प्रकृत्येत्यादौ स्थानिवत्त्वाद् यपः कित्त्वेन गुणाभावोऽपि सिद्ध्यति ॥ ७ ॥

## *परादन्तरङ्गं बलीयः* ॥ ८ ॥

**सि०**—परत्वं पाठापेक्षया पूर्वत्वेनाभिमतशास्त्रोच्चारणध्वंसाधिकरणक्षणे पठितत्वम्, तच्च पूर्वापेक्षया बलवत्त्वप्रयोजकमिति “स्पर्धे” [ ७. ४. ११९. ] इति सूत्रेण प्रतिपादितमेव । परस्मान्नित्यस्य बलवत्त्वं *परान्नित्यम्* इति न्यायेन नित्यापेक्षयाऽन्तरङ्गस्य बलवत्त्वं *नित्यादन्तरङ्गम्* इति न्यायेन, अन्तरङ्गादप्यनवकाशस्य बलवत्त्वम् *अन्तरङ्गादनवकाशम्* इति न्यायेन च प्रतिपादितं, सम्प्रति परा-ऽन्तरङ्गयोः परस्परं स्पर्धे सति कस्य बलवत्त्वमित्याकाङ्क्षायां न्यायमिममुदाहरन्ति । अत्रापि च परस्य दौर्बल्यप्रयोजकं बहिरङ्गत्वमेवेति *असिद्धं बहिरङ्गमन्तरङ्गे* इति न्यायस्यैवायं प्रपञ्चः । तथा च तेनैव गतार्थोऽप्युदाहरणभेदमनुरुध्य पृथगुच्चार्यते । उदाहरणमस्य यथा–‘स्योमा’ इति । अत्र सीव्यतेः “मन् वन्०” [ ५. १. १४७. ] इति मनि “य्वोः प्वय्व्यञ्जने लुक्” [ ४. ४. १२१. ] इति वलोपे “लघोरुपान्त्यस्य” [ ४. ३. ४. ] इति गुणे “अनुनासिके च च्छ्वः शूट्” [ ४. १. १०८. ] इत्यूटि च प्राप्ते ऊट् वलोपमपवादत्वाद् गुणं च नित्यत्वाद् बाधते इति तौ प्रबाध्य ऊटि कृते तत उपान्त्यगुण-यत्वयोः प्राप्तौ गुणस्य बाह्यप्रत्ययनिमित्तकत्वेन बहिरङ्गत्वाद् यादेशापेक्षया परत्वे सत्यप्यनेन न्यायेन पूर्वं यादेशे तत उपान्त्यगुणस्याभावादूटो गुणे कृते रूपं सिद्ध्यति । इत्थं चायं न्यायोऽन्तरङ्ग-बहिरङ्गभावमूलक एवेति न नवीनस्तथापि पूर्वैः पृथग् लिखित इत्यस्माभिरपि व्याख्यात इति बोध्यम् ॥ ८ ॥

## *परादन्तरङ्गं बलीयः* ॥ ८ ॥

**त०**—*परान्नित्यम्* नित्यादन्तरङ्गम्* *अन्तरङ्गाच्चानवकाशम्* इत्येतैः पूर्वव्याख्यातैर्न्यायैः पर-नित्या-ऽन्तरङ्गा-ऽनवकाशानामुत्तरोत्तरं बलीयस्त्वं साधितम् । ततश्च परापेक्षया बलवतो नित्यादप्यन्तरङ्गस्य बलवत्त्वे सिद्धान्तिते परादपि बलवत्त्वं कैमुतिकन्यायसिद्धमेवेति नायं पृथग्गणनामर्हति, तथापि वैचित्र्यार्थमुल्लेखोऽस्येति ॥ ८ ॥

***प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायते* ॥ ९ ॥**

सि०—लोपनं छेदनं लोपः, वर्णस्य नित्यत्वपक्षेऽखण्डस्य नित्यस्य छेदनाद्यसम्भवीति तददर्शनमिह लोपशब्देन ग्राह्यम्, अत एव पाणिनिना "अदर्शनं लोपः" [पा० सू० १. १. ६०.] इति लोपसंज्ञाऽपि विहिता । एवं च लुप्-लुगादिशब्दैरुच्यमानोऽर्थो लोपशब्दस्यापि वाच्यः । तत्र लुकि स्थानिवद्भावेन सिद्धिरिति लुप्येवास्य न्यायस्य प्रयोजनम्, तत्र हि 'लुप्यवृल्लेनत्' [७. ४. ११२.] इति सूत्रेण स्थानिवद्भावस्य निषिद्धत्वात् । न च तेन निषिद्धे स्थानिवद्भावेऽनेन प्रत्ययलक्षणं कार्यं चेद् विधीयेत व्यर्थं तत् सूत्रं स्यादिति वाच्यम्, तेन हि लुपि सत्यां लुप्तप्रत्ययपरत्वनिबन्धनस्यैव कार्यस्य निषेधात्, अनेन च न्यायेन लुप्तप्रत्ययान्तनिर्दिष्टकार्याणामनुमतत्वात् । अत्र च ज्ञापकं "सिजिवदोऽभुवः" [४. १. ३.] इति सूत्रे भूवर्जनम्, तद्धि अभूवन्नित्यत्रानः पुसादेशनिषेधार्थं कृतम्, तस्य चेहप्राप्तिरेव नास्ति, सूत्रे विद्यमानसिजन्तस्य ग्रहणात्, इह च सिचो लुप्तत्वात् । तथा च भूवर्जनाभावेऽपि सिजन्तत्वाभावादेव पुसोऽभावे सिद्धे सति तदर्थं कृतं भूवर्जनं प्रकृतन्यायं विना न सार्थक्यं प्राप्नुयात्, प्रकृतन्यायेन हि प्रत्ययान्तनिमित्तकार्यस्याभ्यनुज्ञानात् सिजन्तत्वं स्यादिति तद्वर्जनं सार्थकं भवति । फलं चास्य मासेन पूर्वायेति वाक्ये यथा "तृतीयान्तात् पूर्वापरं योगे" [१. ४. १३.] इति पूर्वशब्दस्य सर्वादित्वनिषेधेन 'स्मै' आदेशो न भवति तथा 'मासपूर्वाय'इत्यत्र "ऐक्यार्थे" [३. २. ८.] इति समासान्तःपातिन्यास्तृतीयाया लुप्यपि प्रकृतन्यायसहकारेण तृतीयान्तत्वे लब्धे सर्वादित्वनिषेधो भवति । एवं 'पापचीति' इति यङ्लुबन्ते *लुबन्तरङ्गेभ्यः* इति न्यायात् पूर्वमेव यङो लुपि प्रकृतन्यायबलाद् यङन्तत्वनिबन्धनं "सन्यङश्च" [४. १. १३.] इति द्विस्वं भवति । अयं च क्वचिदप्रवृत्तिरपि भवति, तत्र यौधेयशब्दस्य "द्रेरञणोऽप्राच्यभर्गादेः" [६. १. १२३.] इति अञ्लोपविधायकसूत्रस्थभर्गादिगणे पाठ एव ज्ञापकः, तथाहि–युधा नाम काचित्, तस्या अपत्यानीत्यर्थे "द्विस्वरादनद्याः" [६. १. ७१.] इत्येयणि–यौधेया इति, ततः स्त्रीत्वविशिष्टशस्त्रजीविसङ्घविवक्षायां "यौधेयादेः" [७. ३. ६५.] इत्यञि "अणञेय०" [२. ४. २०.] इति ङ्यां–यौधेय्य इति । अत्राञो लुबभावार्थं "द्रेरञणोऽप्राच्यभर्गादेः" [६. १. १२३.] इति सूत्रे भर्गादिगणे यौधेयशब्दपाठः कृतः, तेनाञो लुगभावे यौधेयीनां संघो 'यौधेयम्' इत्यत्र "सङ्घघोषाङ्कलक्षणेऽञ्यञिञः" [६. ३. १७२.] इत्यनेनाण् भवति । अत्र कैश्चिदञो लुगभावस्य फलमन्-निमित्ताया वृद्धेरनिवृत्तिरपीत्युक्तम्, तच्चिन्त्यम्–यतो यौधेयशब्दादेयणन्तादेवाञ् भवतीति अञं विनापि वृद्धिरिह पूर्वसिद्धैव, ततश्चाञन्तलक्षणस्याणो विधानमेव भर्गादिगणे यौधेयशब्दपाठस्य फलम् । यदि चायं न्यायः स्थिरः स्यात् तर्हि अञो लुपि सत्यामपि न्यायसाहाय्येनाञन्तनिमित्तोऽण् स्यादेवेति तदर्थं भर्गादिगणे यौधेयशब्दपाठो व्यर्थ एव स्यात्, तथा च स्वसार्थक्याय स प्रकृतन्यायानित्यत्वं ख्यापयति, ततश्च कदाचिदेतन्न्यायाप्रवृत्त्याण् न स्यादित्याशङ्कानिवृत्त्यर्थं तस्य [भर्गादिगणे यौधेयशब्दपाठस्य] सार्थक्यम् । यदि चात्राञो लुप् स्यात् तर्हि तत्र "सङ्घघोषाङ्क०" [६. ३. १७२.] इत्यस्याप्राप्त्या "गोत्राददण्डमाणवशिष्ये" [६. ३. १६९.] इत्यकञ् स्यात्, यथा 'पञ्चालस्य राज्ञोऽपत्यानि' इत्यर्थे "राष्ट्रक्षत्रियात् सरूपाद् राजापत्ये द्रिरञ्" [६. १. ११४.] इत्यञि "बहुष्वस्त्रियाम्" [६. १. १२४.] इति तल्लुपि च 'पञ्चालाः' इति, ततः पञ्चालानां सङ्घ इत्यर्थे प्रकृतन्यायस्यानित्यत्वादञन्तत्वाभावेन "सङ्घाङ्क०" [६. ३. १७२.] इत्यस्याप्राप्त्या "गोत्राददण्ड०" [६. ३. १६९.] इत्यकञि पाञ्चालकमिति भवति, तथेहापि अकञेव स्यादिति तन्नाचार्यस्येष्टमित्येतदर्थमेव प्रत्ययलक्षणकार्यस्य प्रकृतन्यायलभ्यस्यानित्यत्वज्ञापनाय भर्गादिगणे यौधेयशब्दः पठित इति ॥ ९ ॥

***प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायते* ॥ ९ ॥**

त०—लोपशब्दार्थो वृत्तौ प्रतिपादितः । प्रत्ययस्य लोपेऽदर्शने सत्यपि प्रत्ययलक्षणं–प्रत्ययनिमित्तं कार्यं विज्ञायते–अनुज्ञायत इति न्यायार्थः । अत्र द्विधा प्रत्ययग्रहणं दृश्यते, तत्र प्रथमप्रत्ययग्रहणाभावे–लोपे सति प्रत्ययलक्षणं कार्यं विज्ञायत इतीयत्युच्यमानेऽपि प्रत्यासत्त्या प्रत्ययस्यैव लोपो विज्ञास्यत एवेति तन्न कार्यमिति चेत्? अत्रोक्तं महाभाष्ये–"प्रत्ययलोपे प्रत्ययलक्षणम्" [पा० सू० १. १. ६२.] इति सूत्रे–"लोपे प्रत्ययलक्षणम्' इतीयत्युच्यमाने सौरथी वैहतीति गुरूपोत्तमलक्षणः ष्यञ् प्रसज्येत" इति । अयमाशयः–तथा सति कस्यापि लोपे सत्यपि प्रत्ययस्य लक्षणं–दर्शनं प्रादुर्भाव इत्यर्थो विज्ञायेतेति सुरथस्य विहितस्य चापत्यं वृद्धं स्त्रीत्यर्थे "अत इञ्" [६. १. ३१.] इतीञि, सुरथशब्दस्य रम्धातुनिष्पन्नत्वाद् विहतशब्दस्य च हनधातुनिष्पन्नत्वात् तयोः सम्बन्धिनोर्मकार-नकारयोः सत्त्वे गुरूपान्त्यत्वाद् यथा "अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्त्यस्य ष्यः" [२. ४. ७८.] इति ष्यस्य प्राप्तिस्तथा तयोर्लोपे सत्यपि स्यादिति । प्रत्ययग्रहणे कृते तु विरुद्धत्वान्नायमर्थो भवति–"प्रत्ययस्य लोपे सति तस्यैव पुनः प्रादुर्भावः" इति, एवं हि

लोपविधानमनर्थकं स्यात्, तस्मात् प्रत्ययलोपे सत्यपि प्रत्ययनिमित्तं कार्यं भवतीति वाक्यार्थ आश्रीयते। पुनराशङ्कितस्य स्थापनं इत्थं कृतम्–"नैष दोषः। नैवं विज्ञायते–लोपे प्रत्ययलक्षणं भवति–प्रत्ययस्य प्रादुर्भाव इति, कथं तर्हि प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि भवति" इति। अयमाशयः–प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि प्रत्यये भवतीत्यर्थस्य व्याख्यानात् प्रतीयमानत्वेन सौरथी वैहतीत्यत्र प्रत्ययलोपाभावेन प्रकृतन्यायविषयाभावान्नास्ति प्रथम'प्रत्यय'ग्रहणस्य प्रयोजनमिति। तत उक्तम्–"इदं तर्हि प्रयोजनम्, सति प्रत्यये यत् प्राप्नोति तत् प्रत्ययलक्षणेन यथा स्यात्, लोपोत्तरकालं यत् प्राप्नोति तत् प्रत्ययलक्षणेन मा भूदिति। किं प्रयोजनम्? 'ग्रामणिकुलम्, सेनानिकुलम्' औत्तरपदिके ह्रस्वत्वे कृते "ह्रस्वस्य पिति कृति तुक्" [पा० सू० ६. १. ७१.] इति तुक् प्राप्नोति, स मा भूदिति" इति। अयमाशयः–प्रत्ययग्रहणे कृते प्रत्ययशब्दोऽत्र लुप्तसप्तमीको निर्दिश्यते, तथा च प्रत्यये सति यत् कार्यं दृष्टं तल्लोपेऽपि भवति। न च 'ग्रामणीः सेनानी'रित्यत्र प्रत्यये सति तागमो दृष्टः, तस्मिन् समये ह्रस्वाभावात्, इति कृते क्विलोपे ह्रस्वत्वे सति प्राप्तस्तुक् न भवति; एतदर्थं प्रथमप्रत्ययग्रहणमावश्यकमिति। पुनः शङ्कितम्–"यदि तर्हि यत् सति प्रत्यये प्राप्नोति तत् प्रत्ययलक्षणेन भवति, लोपोत्तरकालं यत् प्राप्नोति तन्न भवति,–'जगत् जनगत्' इति, अत्र तुक् न प्राप्नोति लोपोत्तरकालं ह्यत्र तुगागमः। तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन" इति। अयमाशयः–प्रत्यये सति जगदित्यादौ तागमो न भवति, किन्तु प्रत्ययलोपस्यान्तरङ्गत्वात् पूर्वं प्रवृत्तौ प्रकृतन्यायेन प्रत्ययलक्षणकार्यानुज्ञया तागमो भवति, स च पूर्वोक्तार्थस्वीकारे न स्यादिति दोषसद्भावादुक्तार्थलाभाय प्रत्ययग्रहणं नावश्यकमिति। ततः प्रत्याक्षिप्तम्–"कस्मान्न भवति–ग्रामणिकुलम्, सेनानिकुलम्? बहिरङ्गं ह्रस्वत्वम्, अन्तरङ्गस्तुक्। *असिद्धं बहिरङ्गमन्तरङ्गे* इति। अयमाशयः–आद्ये प्रत्ययग्रहणाभावेऽपि 'ग्रामणिकुलम्, सेनानिकुलम्' इत्यादौ ह्रस्वत्वस्य कुलादिरूपोत्तरपदापेक्षत्वेन बहिरङ्गत्वं, तागमस्य च प्रत्ययमात्रापेक्षत्वेनान्तरङ्गत्वमिति तागमदृष्ट्या ह्रस्वस्यासिद्धतया न तत्र तागमप्राप्तिरिति न तन्निवारणार्थमाद्यप्रत्ययग्रहणमावश्यकमिति। ततः सिद्धान्तितम्–"इदं तर्हि प्रयोजनम्, कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्, एकदेशलोपे मा भूदिति 'आघ्नीत, संरायस्पोषेण ग्मीय इति" इति। अयमाशयः–कृत्स्नप्रत्ययलोपे एव प्रत्ययलक्षणं कार्यं यथा स्यान्न तु 'प्रत्ययैकदेशलोपे' इत्यस्यार्थस्य लाभायाद्यप्रत्ययग्रहणमावश्यकम्, तेन प्रत्ययैकदेशलोपे प्रत्ययलक्षणं न भवति। इत्थमाद्यप्रत्ययग्रहणसार्थक्यं प्रदर्श्य द्वितीयप्रत्ययग्रहणस्यापि सार्थक्यमित्थं सशङ्कं प्रदर्शितम्–"अथ द्वितीयप्रत्ययग्रहणं किमर्थम्? प्रत्ययलक्षणं यथा स्यात्, वर्णलक्षणं मा भूदिति, गवे हितं–गोहितम्, रायः कुलं–रैकुलमिति" इति। एतदाशयः कैयटेनेत्थं वर्णितः–"प्रत्ययलोपे तल्लक्षणमित्युच्यमाने प्रत्ययस्य यत्र कार्ये निमित्तभावः प्रत्ययस्वरूपाश्रयणेन वर्णरूपताऽऽश्रयणेन वा तत् सर्वं स्यात्, सर्वनाम्नो वस्तुमात्रपरामर्शित्वात्। प्रत्ययग्रहणे सति प्रत्ययनिमित्तमेव कार्यं प्रत्ययलोपे सति भवति, न वर्णरूपतानिमित्तम्" इति। तथा च 'गवे हितम्' इत्यर्थे समासे "ऐक्यार्थे" [३.२.१८.] इति विभक्तिलुकि सत्यां वर्णनिमित्तं कार्यमवादेशः प्रत्ययलक्षणेन न भवति, एवं 'रायः कुलमित्यर्थे समासे विभक्तिलुकि वर्णनिमित्त आयादेशो न भवतीति। अयं च तत्रत्यः ["प्रत्ययलोपे प्रत्ययलक्षणम्" १. १. ६२. इति सूत्रस्थो] विचारः स्वमतेऽस्मिन् न्यायेऽपि सङ्गत इति संग्राह्य एव। एवं प्रकृतन्यायस्य स्थानिवद्भावेन–गतार्थत्वविषयकस्तत्रत्यविचारः स्वमतेऽस्य लुगर्थत्ववर्णनेन गतार्थ इवेति नात्र प्रदर्शितः, तन्मते च वर्णविधौ स्थानिवद्भावाभावेन यत्र एकवर्णमात्रस्यैव प्रत्ययत्वं तत्र तल्लोपेऽपि तन्निमित्तं कार्यं स्यादित्यर्थं प्रत्ययलक्षणवचनाश्रयणम्। यद्यपि वर्णाश्रये प्रत्ययलक्षणमपि नेष्टं तथापि तस्य वर्णप्राधान्ये एव निषेधकत्वम्, स्थानिवद्भावनिषेधस्त्वप्राधान्येनापि वर्णाश्रयणे प्रवर्तत इति यत्र प्रत्ययस्य प्राधान्यं वर्णस्य चाप्राधान्यं तत्र प्रत्ययलक्षणनिषेधिनो वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति वचनस्यावसराभावात् प्रत्ययलक्षणार्थं सूत्रमिति सिद्धान्तितम्। एतदपि स्वमते न प्रतिकूलम्। अन्यश्च विशेषो विस्तरभयान्न प्रपञ्चितः॥ ९॥

## *विधि-नियमयोर्विधिरेव ज्यायान्* ॥ १०॥

**स्वि०—विधिः–अप्राप्तप्रापणम्, नियमः–पाक्षिकप्राप्तौ नित्यप्राप्तिसाधनम्, तयोरुभयोरेकत्र विषये सम्भवे सति विधिरेव ज्यायान्–प्रशस्यतमः, स एव समाश्रयणीय इति न्यायार्थः। अत्र च मूलम्–नियमेऽश्रुताया अन्यनिवृत्तेः कल्पनरूपं गौरवमेव। शास्त्रेषु व्याख्याया बुद्धिबलापेक्षत्वेनानियतत्वाद् यथारुचि नियमपरत्वेन विधिपरत्वेन च व्याख्यानमाश्रीयते, इह च व्याकरणे तस्या नियमनायायं न्याय आश्रीयते। अथवा सर्वशास्त्रसाधारणोऽयं न्यायः, मीमांसकादिभिरपि समादृतत्वात्, विवरिष्यते च मीमांसकसमयः संक्षेपेण विवरणे। तथा च "प्रत्यभ्यतेः क्षिपः" [३. ३. १०२.] इत्यत्र "क्षिपींत् प्रेरणे" इत्ययं तौदादिको गृह्यते, तस्योभयपदित्वेन परस्मैपदस्य पक्षे प्राप्तत्वात् सर्वदा प्राप्तिरनेन सूत्रेण विधीयते, "क्षिपींच् प्रेरणे" इति केवलपरस्मैपदी दैवादिको न ग्राह्यः, तस्मात् परस्मैपदस्यैव प्राप्तत्वेन पुनरनेन विधाने 'प्रत्यभ्यतिभ्य एव परस्मैपदं नोपसर्गान्तरपूर्वान्नवानुपसर्गाद्' इति नियमाकारः स्यात्, स चानिष्ट इति विधिरेवाश्रीयते॥ १०॥**

***विधि-नियमयोर्विधिरेव ज्यायान्* ॥ १० ॥**

**त०**—त्रिधा हि शास्त्रं दृश्यते—विधिर्नियमः परिसंख्या च, तेषां च लक्षणं जैमिनिना कारिकया संगृहीतम् । तथाहि—

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥"

तथा चात्यन्ताप्राप्तस्य प्राप्तिफलकं विधिशास्त्रं, यथा—'सोमेन यजेत' इत्यादि, यागस्य केनापि वचनान्तरेण प्राप्त्यभावे सति तत्प्रापकत्वात् । नियमस्तु—'व्रीहीनवहन्ति' इत्यादिः, अवघातस्य तण्डुलनिष्पादकत्वं शास्त्रमात्रसाध्यं नास्ति, किन्तु लोकतोऽपि सिद्धम्, तथा च लोकसिद्धत्वाद् विधातुमनर्होऽपि तण्डुलनिष्पत्तयेऽवघातः शास्त्रेण विधीयमानो नियमाय भवति अवघातेनैव तण्डुलान्निष्पादयेत्, न तु नखविदलनादिना । तथा च पक्षे प्राप्तोऽवघातः शास्त्रे नियम्यते, तथा चावघातनिष्पन्नैरेव तण्डुलैः सम्पादितो यागोऽपूर्वजननायालं, न तु नखविदलिततण्डुलनिष्पन्न इति लभ्यते । प्रकृतोद्देशेऽन्यत्र च शास्त्रविधेयस्यान्यत एव प्राप्तौ प्रकृतोद्देश्ये विधानं परिसंख्या । व्याकरणशास्त्रे च प्रायः परिसंख्यैव नियमपदेन व्यवह्रियते । परिसंख्यायां च दोषत्रयं मीमांसकैरुक्तम्—प्राप्तबाधः, अन्यनिवृत्तिः, परार्थपरिकल्पना च । तथा च "प्रत्यभ्यतेः क्षिपः" [ ३. ३. १०२. ] इत्यत्र परिसंख्यारूपनियमः समाश्रीयेत तर्हि अनुपसर्गपूर्वकात् प्राप्तस्य परस्मैपदस्य बाधः, अन्योपसर्गपूर्वकान्निवृत्तिः, अश्रुतस्यैवकारार्थस्य [ परार्थस्य ] लाक्षणिकस्य कल्पना चेति दोषत्रयं स्यादिति तदपेक्षया विधिरेव ज्यायान् । नियमेऽप्यन्यनिवृत्तिरूपस्याश्रुतार्थस्य कल्पनं भवत्येवेति तत्रापि गौरवमेवेति विधिरेव सर्वथा ज्यायानिति तत्त्वम् । प्रकृते च "प्रत्यभ्यतेः क्षिपः" [ ३. ३. १०२. ] इत्यत्र नियमस्वीकारे तदुपसर्गवर्जितस्य क्षिपेः प्रयोगाभाव एव प्रसज्येत । कुत इति चेच्छृणु—एतदुपसर्गपूर्वकादेव परस्मैपदमिति नियमे सत्यन्योपसर्गपूर्वकादनुपसर्गाच्च परस्मैपदं न स्यात्, विधायकसूत्राभावाच्चात्मनेपदं न स्यादिति निरुपसर्गादन्योपसर्गपूर्वकाच्चाख्यातप्रयोगो नैव स्यादित्यतोऽप्यत्र विधिरेव ज्यायान् इति ॥ १० ॥

## *अनन्तरस्यैव विधिर्निषेधो वा* ॥ ११ ॥

**सि०—प्रत्यासत्तिन्यायमूलोऽयं न्यायः, निषेधशास्त्रस्य निषेध्याकाङ्क्षतया सामीप्यात् पूर्वमुपस्थितस्यानन्तरस्य विधेर्निषेधेन चारितार्थ्ये सति तद्भिन्नस्य व्यवहितस्य निषेधे सामर्थ्याभाव एवात्र मूलमिति भावः । एवं विधिपक्षेऽपि समीपस्थस्य विधेरेव केनापि निषिद्धस्य प्रतिविधानम्, नित्यविहितस्य वा विकल्पेन विधानं युक्तं, न तु व्यवहितस्य, विलम्बोपस्थितिकत्वाद्, इति विधेरप्यनन्तरस्यैव संभव इति तत्त्वम् । तत्रानन्तरनिषेधं दृष्टान्तीकृत्यैवानन्तरविधिरिह सिसाधयिषित इति पूर्वं निषेध एवोदाह्रियते, यथा "नामक्ये" [ २. १. ९२. ] इति सूत्रेण "नाम्नो नोऽनह्नः" [ २. १. ९१. ] इत्यनन्तरसूत्रविहितस्यैव नकारलुको निषेधः क्रियते, न तु व्यवहितैः "रात् सः" [ २. १. ९०. ] इत्यादिसूत्रैर्विहितानां सकारलुगादीनाम् । एवं विधिरपि, यथा—"क्लीबे वा" [ २. १. ९३. ] इत्यनन्तरसूत्रविहितस्य नकारलुको निषेधस्यैव विकल्पेन विधानं क्रियते, न तु ततः पूर्वैः "रात् सः" [ २. १. ९०. ] इत्यादिसूत्रैर्विहितानां सकारलुगादीनां विकल्प इति । अत्रोक्तं प्राचीनैः—"यद्यपि शब्दशक्तिरेवैषा—यद् विधिर्निषेधो वाऽनन्तरस्यैव स्यादिति, परं शब्दशक्तेरेवानुवाद्ययं न्यायो *विचित्राः शब्दशक्तयः* इत्यादिन्यायवद्" इति, तत्र शब्दशक्तिरित्यस्य शब्दस्वभाव इति तात्पर्यमवधारयामः, नहि वृत्तिरूपया शक्त्या तस्यान्येन सह सम्बन्धो नियन्तुं शक्यते, 'विचित्राः शब्दशक्तयः' इत्यत्रापि शब्दशक्तिस्वभाव एव शब्दशक्तिपदेन ग्राह्य इति विवेचयिष्यते तत्रैव ॥ ११ ॥**

***अनन्तरस्यैव विधिर्निषेधो वा* ॥ ११ ॥**

**त०**—"नामक्ये" [ २. १. ९२. ] इत्यादिसूत्रे निषेध उक्तः, किन्तु निषेध्यस्वरूपं नोक्तम्, तत्र किं पूर्वोक्तानां सर्वेषां विधीनामयं निषेध उत यस्य कस्यचिदेकस्य, सर्वेषां निषेधोऽनिष्टः, यस्य कस्यचिदिति पक्षे च कस्येति न निर्णीतम्; एवं विधेरपि यत्र न विशिष्य विज्ञानं तत्रानिश्चय इति तन्निश्चयार्थायं न्याय उपादीयते; यत्र च विधेरपवादरूपस्य बाध्यशास्त्रद्वयमध्ये पाठः, ते च शास्त्रे व्यवहिते अव्यवहिते च 'तत्र*मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्* इति न्यायस्यास्य च विषयतायां सत्यामयं न्याय एव बलीयानिति "अष्टाभ्य औश्" [ पा० सू० ७. १. २१. ] इति सूत्रे कैयट आह । तथाहि—'अष्टपुत्रः, अष्टभार्यः' इत्यादौ सामासिकविभक्तिलुचि प्राप्तायाम् 'औ' आदेशस्य लुकोऽपवादतया 'औ' आदेशः कथं वारणीय इत्यस्य विचारावसरे महाभाष्ये *अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा* इति न्यायेनानन्तरां "ङतिष्णः संख्याया लुप्" [ १. ४. ५४. ] इति सूत्रविहितामेव लुपम् 'औ' आदेशो बाधिष्यते, न तु सामासिकलुचमिति भाष्ये निर्णीतम् । तत्र *मध्येऽववादाः पूर्वान् विधीन् बाधन्ते* इति न्यायप्रसक्तिरायाता, यतः पाणिनीये तन्त्रे द्वितीयाध्याये सामासिको लुग् विहितः, सप्तमाध्याये च विभक्तिलुप्, सा च 'औ' आदेशस्यानन्तरं पाठिता, तत्र द्वयोर्न्याययोः प्राप्तौ केन प्रवर्तितव्यमित्यस्य विचारे—"नैष दोषः, यत्र द्वावपि व्यवहितौ पूर्वोत्तरौ तत्र पूर्वानुभवाहित-

स्मृत्युपारूढस्य पूर्वस्य बाधो युक्तः, इह त्वनेकाध्यायव्यवहितो द्वितीयाध्यायविहितो लुङ् महता यत्नेन स्मरणीयोऽनन्तरस्त्वनुभवनीय इति स एव बाध्यते । अथवा सत्यामसत्यां चोपलब्धौ प्रत्यासत्त्याऽनन्तरस्यैव बाधेन भाव्यम् । एतच्च लुकः समकक्षत्वमभ्युपगम्योक्तम् । भिन्नकक्षौ त्वेतौ लुकौ, एकस्य सर्वत्र प्राप्त्याऽपरस्य क्वचित्प्राप्त्या" इति, स्वमते तु यद्यप्यत्र विषये द्वयोर्न्याययोः प्राप्तिर्नास्ति, यतो विभक्तिलुप् सामासिकलुक् च द्वे अपि उत्तरपठिते एव, तथापि द्वितीयया युक्त्या [ समकक्षत्व-विषमकक्षत्वरूपया ] प्रकृते निर्वाह इति बोध्यम् । अथवा लक्ष्यानुरोधादपि व्यवस्थेति नागेशेन पक्षान्तरमुक्तम् । तथा च क्वचित् स्वरितत्वप्रतिज्ञानात् क्वचित् सामर्थ्येन चायं न्यायोऽपि बाध्यत इति नागेशेन परिभाषेन्दुशेखरे विवेचितम् ॥ ११ ॥

## *पर्जन्यवल्लक्षणप्रवृत्तिः* ॥ १२ ॥

**सि०**—लक्षणानां-सूत्राणां, प्रवृत्तिः-स्वलक्ष्ये प्रवर्तनं, पर्जन्यवत्-मेघवद् भवति, यथा पर्जन्यो वर्षासमये कुत्र जलमपेक्ष्यते कुत्र नेत्यविचार्यैव जले वा स्थले वा ऊने वा पूर्णे वा सर्वत्र वर्षति तथैव लक्षणमपि मम प्रवृत्त्याऽत्र किमपि वैलक्षण्यं रूपभेदादि स्यान्नवेत्यविचार्यैव प्रवर्त्तेत इति भावः । स्वोद्देश्यव्यापकेन हि लक्षणेन भवितव्यमिति सविशेषणे स्वोद्देश्ये सति फलमनपेक्ष्यैव प्रवर्त्तते व्यापकत्वलाभायेत्यव्याप्तिदोषाभाव एव तस्य तथा प्रवृत्तौ मूलम् । तथा च गोपायति, पापच्यते, चिकीर्षति, पुत्रीयतीत्यादावायादिप्रत्ययानामदन्तत्वेन तदन्तधातूनामदन्तत्वात् शव आकाङ्क्षाया अभावेऽपि "कर्तर्यनद्भ्यः शव्" [ ३. ४. ७१. ] इति शव् सिध्यति । एवं दधि अत्रेत्यत्र ह्रस्वस्यापि "ह्रस्वोऽपदे वा" [ १. २. २२. ] इति पुनर्ह्रस्वः, यद्यपि ह्रस्वविधानस्यात्र फलान्तरमप्यस्त्येव, यतो ह्रस्वविधिसामर्थ्यादेवात्र यत्वादिसन्धिकार्यं न भवति; तथापि तन्न तस्य साक्षात् फलमपि तु परम्परयेति प्रकृतन्यायविषयत्वं भवितुमर्हत्येव । पर्जन्यवदित्युपमया च तात्कालिकफलाभाव एव सादृश्यमुपादीयते, यथा ऊने पूर्णे च समानरूपेण वर्षतः पर्जनस्य वर्षायाः पूर्णे तात्कालिकं फलं नास्ति किन्तु स्थायिफलं तु तत्रापि भवत्येव, ततो निर्गतेन पयसा धान्यादिसिञ्चनरूपम् । लक्ष्यानुरोधाच्चास्य क्वचिदप्रवृत्तिरपि भवति, अत एव "समानानां तेन दीर्घः" [ १. २. १. ] इति सूत्रे समानानामिति बहुवचनस्याग्रेतनसूत्रसमानव्याप्त्यर्थं प्रयोगः । तदुक्तं तत्रैव सूत्रे बृहद्वृत्तौ—"बहुवचनं व्याप्त्यर्थम्, तेनोत्तरसूत्रेण ऌ-ऋतोऽपि ऋ-ऌति ह्रस्वो भवति-कृकृषभः, होतृऌकारः, अन्यथा 'ऋस्तयोः" [ १. २. ५. ] इति परत्वाद् ऋरेव स्यात्" इति । अयमाशयः—समानानामिति पदे बहुवचनस्य व्याप्त्यर्थत्वेन तस्यैवाग्रेऽनुवर्तनात् समानानां यद् यत् कार्यं प्राप्तं तत् सर्वं स्यादित्यर्थलाभात् "ऋ-ऌति ह्रस्वो वा" [ १. २. २. ] इति सूत्रमत्र प्रवर्त्तते, अन्यथा "ऋस्तयोः" [ १. २. ५. ] इत्यस्यैव प्रवृत्तिः स्यात् परत्वादिति बहुवचनस्य फलमुक्तम्, तस्यायमाशयः—यद्यपि ह्रस्वस्य स्वत एव वर्तमानत्वेन ह्रस्वविधाने न साक्षात् फलं तथापि कार्यान्तरबाधनाय तद् विधीयते, तच्च प्रकृतन्यायेनैव सिद्धमिति किं तदर्थं व्याप्त्यर्थकबहुवचनाश्रयणेन, ह्रस्वस्य च वैकल्पिकत्वेन पक्षे "ऋस्तयोः"[१.२.५.] इत्यस्यावकाशलाभसंभवात्, सति चास्य न्यायस्यानित्यत्वे ह्रस्वस्य ह्रस्वो न स्यादिति बहुवचनसामर्थ्याद् भवति, तथा च तेन बहुवचनेन प्रकृतन्यायानित्यत्वं विज्ञायते । एतच्च प्राचामनुरोधेन, अस्माभिस्तु "स्पर्द्धे [ ७. ४. ११९. ] इति परिभाषाबाधनार्थं बहुवचनमिति वर्णितं न्यासानुसन्धाने, तच्च तत एवावलोकनीयमिति ॥ १२ ॥

## *पर्जन्यवल्लक्षणप्रवृत्तिः* ॥ १२ ॥

**त०**—पर्जन्यो यथाऽसम्भवत्स्वकृतविशेषे जलपूर्णेऽपि प्रवर्त्तते तथा शास्त्रमप्यसम्भवत्स्वकृतविशेषेऽपि प्रवर्त्तेत इति न्यायार्थः । अत्र च शास्त्रस्य स्वीयोद्देश्यतावच्छेदकावच्छेदेन प्रवृत्तिरेव मूलमिति वृत्तौ प्रतिपादितमेव । न च *नहि प्रयोजनमनुद्दिश्य कस्यचित् प्रवृत्तिः* इति न्यायेन प्रवृत्तिः प्रयोजनव्याप्यैवेति प्रयोजनं विना कथं शास्त्रप्रवृत्तिरनुमोद्यत इति वाच्यम्, परम्परया प्रयोजनस्य सर्वत्र दृश्यमानत्वात्, साक्षात् तत्कृतरूपभेदरूपप्रयोजनाभावे सत्यपि प्रवृत्तिरिति हि प्रकृतन्यायस्वारस्यम् । "इको झल्" [ पा० सू० १. २. ९. ] इति सूत्रे महाभाष्येऽपि चायं न्याय उक्तः केनचिद् भेदेन, तथाहि-"दीर्घाणामपि दीर्घवचन एतत् प्रयोजनं-गुणो मा भूदिति । कृतकारि खल्वपि शास्त्रं पर्जन्यवत्, तद्यथा-पर्जन्यो यावदूनं पूर्णं च सर्वं वर्षति" इति । तथा च दीर्घस्यापि दीर्घवचने तत्कृतरूपे विशेषाभावेऽपि सूत्रान्तरप्रवृत्तिविघातरूपं प्रयोजनान्तरमस्त्येवेति निष्प्रयोजनत्वाभावोऽप्येवंरूपेण ग्रन्थेन दृढीकृतः । कृतकारित्वरूपमेव च तत्र साक्षात्प्रयोजनशून्यत्वमिति । अत एव 'ऊखतुः' इत्यादौ द्वित्वे सति पूर्वमेव "ह्रस्वः" [ ४. १. ३९. ] इति ह्रस्वे ततो दीर्घः सिध्यति, अन्यथा पूर्वं ह्रस्वप्रवृत्तेः प्रयोजनाभावेन दीर्घे सति ततो ह्रस्वे रूपं न सिध्येत् । यदि चायं न्यायो न स्यात् तदा पूर्वं ह्रस्वस्य ह्रस्वकरणे फलाभावेनैव ह्रस्वाप्रवृत्तिरिति *वार्णात् प्राकृतम्* इति न्यायस्यापि नावसरः, स्वीकृते च न्याये दीर्घह्रस्वयोर्युगपत् प्राप्त्या *वार्णात् प्राकृतम्* इति न्यायसहकारेण पूर्वं ह्रस्वो ततो दीर्घे *लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते* इति न्यायेन पुनर्ह्रस्वत्वं न भवतीति रूपसिद्धिर्भवति, विवेचितं चैतदन्यत्र विस्तरेणेति ॥ १२ ॥

## *न केवला प्रकृतिः प्रयोक्तव्या* ॥ १३ ॥

सि०—प्रकृतिर्द्विधा—नामरूपा धातुरूपा च, सा केवला—प्रत्ययरहिता न प्रयोक्तव्या । नामार्थमात्रविवक्षायां केवलस्य नाम्नः, धात्वर्थमात्रविवक्षायां च केवलस्य धातोरपि च प्रयोगे प्राप्ते नियमोऽनेन न्यायेन क्रियते—न केवला प्रकृतिः प्रयोक्तव्या, किन्तु यथायोगं प्रत्ययसहितैवेति । एवं च केवलं नामार्थविवक्षायामपि साधुत्वार्थिका प्रथमा प्रयुज्यते, केवलधात्वर्थविवक्षायामपि घञादयो धात्वर्थाभिधायका भावार्थे त्यादयो वा प्रयुज्यन्ते । केचित् त्वाहुः—"धातोः प्रत्ययान्तत्वे विवादाभावेन केवलत्वशङ्काया अभावान्नाम्नस्तु वक्ष्यमाणरीत्या प्रत्ययोत्पादे विवादस्य सत्त्वेन केवलत्वाशङ्कासद्भावान्नामरूपैव प्रकृतिरिहाधिक्रियते" इति । तत्र केवलधात्वर्थविवक्षायां धातोरपि प्रयोगः कुतो नेति रूपेण संभवतो विवादस्य सत्त्वेन धातोः प्रत्ययान्तत्वे विवादाभावेनेति न किञ्चिदेतत् । यच्च 'कटं करोति भीष्ममुदारं दर्शनीयम्' इत्यत्र कटस्यैव कर्मत्वेन तत एव द्वितीया स्यात्, भीष्मादिभ्यो न स्यादिति प्रकृतन्यायेन तेभ्योऽपि द्वितीयोत्पाद्यते सामानाधिकरण्येन विशेषणसिद्धये इति प्रकृतन्यायोदाहरणमुक्तं, तदपि न रोचयामहे—सामानाधिकरण्यार्थमिति द्वितीयोत्पत्तौ हेतुर्भवितुमर्हति, न तु विभक्त्युत्पत्तौ, विभक्त्युत्पत्तौ च प्रकृतन्यायो हेतुः । तथा च प्रथमाविभक्त्युत्पत्त्यापि प्रकृतन्यायोदाहरणत्वसिद्धौ द्वितीयोत्पत्तिचर्चा प्रकृतानुपयोगिनी । यच्चेश्वरसुहृदां निर्धनत्वेऽपीश्वरधनेनैव धनवत्त्वमित्यादिदृष्टान्तप्रदर्शनं, तदपि द्वितीयोत्पत्तिकारणमेव, न प्रकृतन्यायोपकारि । यदपि च प्रकृतन्यायेन प्रथमैवानेतुं शक्यत इति सयुक्तिकं प्रतिपाद्य न्यायार्थस्यान्यथा व्याख्यानम्—क्रियारहिता प्रकृतिर्न प्रयोज्येति; तदपि व्याकरणशास्त्राधिकारबहिर्भूतम्, पदसंस्कारमात्राधिकारत्वाद् व्याकरणस्य, न केवला प्रकृतिरित्यस्य 'प्रत्ययरहिता' इत्यर्थस्यैव योग्यत्वात् संयोगवद् विप्रयोगस्यापि सम्भावितसहचारवत्तैव योजनीयत्वात् । प्रत्ययापेक्षं हि प्रकृतित्वं, कैवल्यं च प्रकृतेः प्रत्ययराहित्यमेव न, क्रियाराहित्यं, क्रियाराहित्ये वाक्यत्वं न स्यादिति कथयितुं शक्यते, न पदत्वं न स्यादिति, ततश्च "यथा कटस्य करोतिना सम्बन्धस्तथा भीष्मादीनामपि, यथैव ह्ययं कटं करोति तथा तद्गतान् भीष्मादिगुणानपि, तत्र यद् यत् करोतिना व्याप्तुमिष्टं तत् सर्वं द्रव्यं गुणश्च कर्मेति सर्वेषां पृथक्कर्मत्वे सर्वेभ्यो द्वितीया, पश्चात् त्वेकवाक्यतया विशेषणविशेष्यभाव इति विशेषणानां विशेष्यसमानविभक्त्युपपादनार्थोऽयं न्यायः" इत्युक्तं, तदपि न प्रकृतन्यायार्थानुरोधीति विवेचितमन्यत्र, प्रकृतन्यायेन केवलप्रकृतेः प्रत्ययरहितायाः प्रयोगमात्रस्यैव नियम्यत्वेन *विभक्तिविशेषनियमने व्यापाराभावादिति ध्येयम्* ॥ १३ ॥

## *न केवला प्रकृतिः प्रयोक्तव्या* ॥ १३ ॥

त०—प्रत्ययविधावुद्देश्यत्वेनाश्रीयमाणः शब्दः प्रकृतिः, सा च व्याकरणशास्त्रे द्विधैव दृश्यते—नामरूपा धातुरूपा च, द्विधाऽपि सा प्रत्ययसहितैव प्रयोक्तव्या, न तद्रहिता । प्रत्यया हि कमपि विशिष्टमर्थं प्रत्याययन्त एव प्रत्ययत्वं भजन्ते; तथा च यत्र प्रकृत्यर्थमात्रविवक्षा तत्रान्यार्थप्रत्यायनरूपप्रयोजनाभावात् तत्र प्रत्ययो न स्यात्, इति प्रकृतन्यायेन साधुत्वसम्पादिकायाः पदत्वसम्पादिकाया वा विभक्तेरवश्यं प्रयोगः साध्यते, इत्येतद्वृत्तौ प्रतिपादितम् । तत्र प्राचीनानां व्याख्यानमपि चिन्तितम् । परैश्च वैयाकरणैरस्य न्यायस्य सिद्धिर्ज्ञापकेन क्रियते । तच्च ज्ञापकं पाणिनीयमते—"परश्च" [ ३. १. २. ] इति सूत्रमेव, तथाहि—महाभाष्ये तत्र सूत्रे बहु विचारितम्—किमर्थमिदं सूत्रमिति, अक्रियमाणेऽपि हि सूत्रे प्रत्ययविधिषु पञ्चमीश्रवणात् "पञ्चम्या निर्दिष्टे परस्य" [ ७. ४. १०४. ] इति परिभाषया प्रत्ययः पर एव भविष्यति । यद्यपि तत्र षष्ठी निर्दिश्यत इति परस्य स्थाने भवतीत्यर्थः संभवति तथापि प्रकृतेः परस्य प्रत्ययस्य साधुत्वमित्येवं तत्र साधुत्वस्यैव प्रत्ययविषयस्य विधानं स्वीकरिष्यते, इत्येवमादिभिरुपायैः "परश्च" [ पा० सू० ३. १. २. ] इति सूत्रस्य वैयर्थ्यमुपपाद्य—"प्रयोगनियमार्थं तर्हि परग्रहणं कर्त्तव्यम् । अथैतस्मिन् प्रयोगनियमार्थे किमयं प्रत्ययनियमः—'प्रकृतिपर एव प्रत्ययः प्रयोक्तव्यः, अप्रकृतिपरो न' इति, आहोस्वित् प्रकृतिनियमः—'प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या, अप्रत्ययपरा न' इति । कश्चात्र विशेषः? "तत्र प्रत्ययनियमे प्रकृतिनियमाभावः" [ वार्तिकम् ], तत्र प्रत्ययनियमे सति प्रकृतेर्नियमो न प्राप्नोति, अप्रत्ययिकायाः प्रकृतेः प्रयोगः प्राप्नोति ।++++++ अस्तु तर्हि प्रकृतिनियमः, "प्रकृतिनियमे प्रत्ययानियमः" [ वार्तिकम् ], प्रकृतिनियमे सति प्रत्ययनियमो न प्राप्नोति ।++++ "सिद्धं तूभयनियमात्" [ वार्तिकम् ], सिद्धमेतत्, कथम्? उभयनियमात्, उभयनियमोऽयं—'प्रकृतिपर एव प्रत्ययः, प्रत्ययपरैव च प्रकृतिः' इति । किं वक्तव्यमेतत्? नहि, कथमनुच्यमानं गंस्यते? परग्रहणसामर्थ्यादन्तरेणापि परग्रहणं स्यादेवायं परः । पर एव स्यादित्येवमर्थं परग्रहणम्" इति । तथा परग्रहणकृतो नियमो द्विविधः सम्पद्यते 'नित्यं परः प्रत्ययो यथा स्यात् मा कदाचित् परो न प्रयोजि' इत्यर्थेनैव द्विविधो नियमः—'न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलप्रत्ययः' इति । तथा च नामार्थमात्रविवक्षायामपि प्रथमा भवति, धात्वर्थमात्रविवक्षायामपि प्रथमपुरुषैकवचनं भवतीति । कटं कुरु भीष्ममुदारं दर्शनीयमिति च "अनभिहिते" [ पा० सू० २. ३. १. ] इति सूत्रे महाभाष्ये कर्मण उक्तत्वाद् द्वितीया न प्राप्नोतीति विचारेणोत्थापितं; सर्वेषां कर्मत्वेन सामानाधि-

करण्यानुरोधेन वा समाहितमिति तत्र प्रकृतन्यायविषयाभाव एवेति तत्रैव विस्तरेण प्रतिपादितम् । प्राचीनैश्चैतदुदाहरणत्वकल्पनं किमाशयेनेति न प्रतीयते, “कर्मणि” [ २. २. ४०. ] इति सूत्रे बृहद्वृत्तौ–‘कटं करोति भीष्ममुदारम्’ इति वर्णनप्रसङ्गेऽग्रे *न केवला०* इति न्याय उपात्तस्तावताऽस्य न्यायस्यैतदुदाहरणत्वं न स्वीकर्तव्यम्, तत्रान्योदाहरणसिद्ध्यर्थमवश्यस्वीकरणीयेनानेन न्यायेनात्र प्रथमा स्यात्, किन्तु तथा सति सामानाधिकरण्यमत्र न सेत्स्यतीति सामानाधिकरण्यार्थं द्वितीयाऽत्र योग्येति तात्पर्यात् । तथा ‘अपदं न प्रयुञ्जीत’ इति सिद्ध्यर्थमेव प्रकृतन्यायोपादानं, तन्निषेधानुगतो वाऽयं न्याय इति विवेचनीयं सुधीभिरिति ॥ १३ ॥

## *क्विबर्थं प्रकृतिरेवाह* ॥ १४ ॥

**सि०**—प्रकृतिप्रत्ययौ सहभूयार्थं कथयतः, यत्रोभावपि श्रूयमाणौ तत्रेयं व्यवस्था; यत्र च केवलं प्रकृतिः श्रूयते तत्र प्रकृतिरेव प्रत्ययस्याप्यर्थं कथयति, यत्र केवलं प्रत्ययः श्रूयते तत्र प्रकृत्या मिश्रं स्वार्थं प्रत्यय एवाह, यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायात् । यथा–क्विप्प्रत्ययः क्वापि न श्रूयते, तत्र प्रकृतिरेव तत्प्रत्ययार्थमपि कथयति, यथा–‘छिद् भिद्’ इत्यादौ । अस्यापत्यम् ‘इः’ इत्यादौ प्रकृत्यर्थसहितमपत्यार्थं केवलप्रत्यय एव कथयति । अयं च न्यायः क्विप्प्रत्ययस्थलार्थं व्यवह्रियते । प्राचीनैश्चायं न्यायोऽन्यथा व्याख्यातः, ‘णिच्-क्विबन्तयोर्युष्मदस्मदोः शब्दभेदादर्थभेदाच्चाप्राप्तस्य सर्वादित्वस्य प्रापणोऽर्थोऽयं न्याय इति तेषां सारांशः । तथाहि–त्वां मां वा आचक्षाणे इत्यर्थे णिजन्तात् क्विपि ‘युष्म् अस्म्’ इति मान्ताद् ङौ “टाङ्योसि यः” [ २. १. ७. ] इति प्राप्तं यत्वं बाधित्वा परत्वात् त्व-मादेशे पश्चाच्च तदकारस्य यत्वप्राप्तावपि *सकृद् गते०* इति न्यायेनाप्रवृत्तौ णिच्-क्विबन्तयोर्युष्मदस्मदोः सर्वादित्वाभावात् स्मिन्नादेशाभावे ‘त्वे मे’ इति स्यात्, इष्टं तु ‘त्वस्मिन् मस्मिन्’ इति, तदर्थं चायं न्याय उपादीयते । अस्य चार्थः–क्विबन्तयोर्युष्मदस्मदोर्योऽर्थस्तमर्थं क्विब्रहिता युष्मदस्मद्रूपा प्रकृतिरेवाह, नहि प्रकृतिं विना क्विब् भवतीति । एतेनायं भावः–अगुडित इव [ असन्नद्ध इव ] गुडितोऽपि [ सन्नद्धोऽपि ] गजो गज एवोच्यते, नहि गजं विना गुडना भवति, तथा केवलाविव णिच्-क्विबन्तावपि युष्मदस्मच्छब्दौ तावेवेष्येते, न त्वपरं किञ्चित्, एवं च केवलयोस्तयोः सर्वादित्वमस्तीति कृत्वा णिच्-क्विबन्तयोरपि सर्वादित्वं विवक्ष्यते । न चात्र शब्दभेदस्यार्थभेदस्य च साक्षादेव लक्ष्यमाणत्वादयुक्तैवेयं विवक्षेति वाच्यम्, “सिद्धिः स्याद्वादात्” [ १. १. २. ] इति सूत्रेणाभिन्नानामपि भेदविवक्षाया भिन्नानामप्यभेदविवक्षायाश्चानुज्ञानात्, कथमन्यथा पीयमानं मधु मदयतीत्यत्रैकस्यैव कर्मत्वं कर्तृत्वं चेत्याद्युपपद्यते, ततो यथा मधुनोऽभेदेऽपि भेदविवक्षा तथाऽत्र भेदेऽप्यभेदविवक्षा, ततश्च णिच्-क्विबन्तयोर्युष्मदस्मदोः केवलाभ्यां ताभ्यां सहाभेदविवक्षया सर्वादित्वाद् ङेः स्मिन्नादेशे–त्वस्मिन् मस्मिन्नित्यपि स्यात्, इति तैरुक्तम् । स चायमर्थः “मोर्वा” [ २. १. ९. ] इति सूत्रे बृहद्वृत्तावपि पक्षान्तरत्वेनोक्तः–“युवां युष्मान् आवामस्मान् वाचष्टे [इत्यर्थे] णिचि क्विपि तल्लुकि च–‘युष्म् अस्म्’ इति मान्तत्वम्, [ तयोः ] टाङ्योसि नित्यत्वात् त्वमादिकार्येभ्यः प्रथममेव पूर्वेण मकारस्य मत्वे–युष्मा, अस्मा, युष्मि, अस्मि, युष्मोः, अस्मोः । अथ शब्दान्तरप्राप्त्या य त्वमप्यनित्यमित्याश्रीयते तदा परत्वात् पूर्वं त्वमाद्यादेशे अकारस्य यत्वे–त्व्या, म्या, त्वि, म्यि, युव्योः, आव्योः । अथ *सकृद्गते स्पर्धे यद् बाधितं तद् बाधितमेव * इत्याश्रीयते तदा यत्वाभावे–त्वेन, मेन, युवयोः, आवयोः, त्वे, मे; अत्रासर्वादिसम्बन्धित्वाद् ङेः स्मिन्नादेशो न भवति । अथ *क्विबर्थं प्रकृतिरेवाह* इति सर्वादिसम्बन्धित्वं तदा भवत्येव स्मिन्नादेशः ।” इति । अत्रेदं वक्तव्यम्–अत्र प्रथमकल्प एवाचार्यस्य स्वाभिमतः, तत्र यद्यर्थकशब्दाभावात्, इतरेषु तु पक्षेषु यद्यर्थकाथशब्दप्रयोगेणानभिमतत्वं सूचितम्, अन्तिमपक्षे च नितरामसम्मतत्वमुचितम्, यत आचक्षाणार्थण्यन्तात् क्विपि निष्पन्नं ‘युष्म् अस्म्’ इति रूपं गौणत्वान्न सर्वादि भवितुमर्हति, संज्ञोपसर्जनीभूतानां सर्वादित्वस्यानिष्टत्वात् । किञ्च “सर्वादेः स्मै-स्मातौ” [ १. ४. ७. ] इति सूत्रे बृहद्वृत्तौ–“द्वियुष्मद्भवत्वस्मदां स्मायादयो न सम्भवन्तीति सर्वविभक्त्यादयः प्रयोजनम्” इत्युक्ततया ‘त्वस्मिन्’ इत्यादिप्रयोगाणामनिष्टत्वस्य सुतरां विज्ञानात् । अत्र च आचक्षाणण्यन्तस्थले आचष्टेरेव प्राधान्यमिति युष्मदस्मदोर्गौणत्वं स्पष्टमेवेति, न स्वमते न्यायस्येदमसाधारणं फलमिति विवृतं विवरणे ॥ १४ ॥

## *क्विबर्थं प्रकृतिरेवाह* ॥ १४ ॥

**त०**—अस्य न्यायस्य स्वमता प्राचीनमता च व्याख्या वृत्तौ प्रदर्शिता । न च स्वमतव्याख्यायां ‘त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्” [ २. १. ११. ] इति सूत्रे बृहद्वृत्तौ आचक्षाणण्यन्ताभ्यां युष्मदस्मद्भ्यां क्विपि तत्र सर्वादित्वलाभार्थं प्रकृतन्यायोपयोगः कृतः कथं संघटेतेति वाच्यम्, तस्य परमतानुसारित्वस्य वृत्तौ प्रतिपादितत्वात् । परे तु प्रकृतन्यायेनान्तर्भूतक्विबर्थस्य सर्वादिगणमध्यगतत्वमिच्छन्ति, तच्च नास्य न्यायस्य विषयः शब्देनालाभात्, प्रकृतन्यायगतशब्देन हि यत्र क्वचन नाम्नो

धातोर्वा क्विप् विधीयते तत्र क्विपोऽश्रूयमाणत्वेन कथं तदर्थप्रतीतिरिति शङ्काया निवृत्तिमात्रं क्रियते, न तु तत्र क्विबर्थविवक्षायामपि स्वाभाविकार्थप्रयुक्तं कार्यम्, क्विपोऽश्रूयमाणत्वेऽपि रूपादिभेदस्य स्पष्टमुपलभ्यमानत्वेन संज्ञोपसर्जनीभूतस्य च सर्वादित्वव्युदासेन क्विबन्तस्य आचक्षाणार्थे वर्तमानस्य सर्वादित्वसिद्ध्यसंभवात् । प्रदर्शितं हि महता ग्रन्थेन संज्ञाभूतानामुपसर्जनानां च सर्वादीनां सर्वादित्वमूलकार्यानौचित्यमाचार्येण स्वयमेव "सर्वादेः स्मै-स्मातौ" [ २. १. ११. ] इति सूत्रे महान्यासे । तथा चात्र 'युष्मद् अस्मद्' शब्दयोः क्विबन्तयोः प्रकृतित्वलाभेऽपि तत्प्रयुक्तान्यन्यानि कार्याणि भवन्तु नाम, सर्वादित्वप्रयुक्तं कार्यं तु नोचितमिति त्वस्मिन् यस्मिन्निति प्रकृतन्यायोदाहरणत्वेन न प्रदर्शयितुं शक्यत इति विभावयामः ॥ १४ ॥

## *द्वन्द्वात् परः प्रत्येकमभिसम्बध्यते* ॥ १५ ॥

**सि०—सह विवक्षायां द्वन्द्वविधानाद् द्वन्द्वगतानां पदानां सर्वेषामेव समर्थेनान्येन सहैव सम्बन्ध उचितः, तथापि प्रकृतन्यायेन तस्य प्रत्येकं सम्बन्धः प्रतिपाद्यते । अत्र 'द्वन्द्वात् परः' इत्युपलक्षणं पूर्वस्यापि, तथा च द्वन्द्वात् पूर्वमपि श्रूयमाणः शब्दः प्रत्येकं सम्बध्यत एव । तत्र परस्योदाहरणं–"एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः" [ १. १. ५. ] इति, अत्र मात्राशब्दस्य प्रत्येकमभिसम्बन्धः । पूर्वोदाहरणं यथा–"द्वेरजगोऽप्राच्यभर्गादेः" [ ६. १. १२३. ] इति, अत्र द्वन्द्वात् पूर्वं श्रूयमाणस्य नञः प्राच्यभर्गाभ्यामुभाभ्यां प्रत्येकं सम्बन्धः । अत्र च न्याये शब्दशक्तिस्वभाव एव मूलमिति परन्यायमूलकोऽयमिति ॥ १५ ॥**

### *द्वन्द्वात् परः प्रत्येकमभिसम्बध्यते* ॥ १५ ॥

**त०**—अन्यैर्वैयाकरणैः *द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते* इति व्युत्पत्तिरङ्गीक्रियते, तदेकदेश एव चेह न्यायत्वेनोल्लिखितः, युक्तं तु पूर्वोच्चारितस्यापि पदस्य प्रत्येकेन सम्बन्धभवनम् । दृश्यते च तथा प्रयोग इति व्याकरणान्तरवत् स्वमतेऽपि पूर्वस्यापि प्रत्येकमभिसम्बन्धो न्याय्य इति तथा प्रदर्शितो वृत्ताविति ॥ १५ ॥

## *विचित्राः शब्दशक्तयः* ॥ १६ ॥

**सि०—शब्दानां शक्तयः–अभिधानसामर्थ्यानि, विचित्राः–परस्परविलक्षणानि भवन्ति, न तासां विनिगमकं किञ्चिदस्तीति भावः । अत्र च तत्तद्वैचित्र्यदर्शनमेव मूलम्, तेन यत्र लिङ्ग-संख्यादौ वैचित्र्यं दृश्यते तत्र तत् तथैवेति स्वीकरणीयम्, न शास्त्रेण तत्र किमपि कर्तुं शक्यते, यथाकथञ्चिदन्वाख्यानं शास्त्रेण क्रियते । तत्र लिङ्गवैचित्र्यं यथा–तटादिषु शब्देषु त्रिलिङ्गत्वमित्यादि । अन्यच्च प्रशस्तं पचतीत्यर्थे "त्यादेश्च प्रशस्ते रूपप्" [ ७. ३. १०. ] इति स्वार्थिके रूपपि–पचतिरूपमित्यादौ "पदं वाक्यमव्ययं चेत्यसंख्यं च०" [ लिङ्गा० न० श्लो०–१ ] इति लिङ्गानुशासनादलिङ्गस्यापि त्याद्यन्तपदस्य प्रत्ययविशेषयोगेन क्लीबलिङ्गत्वम् । तथा 'कुत्सिता स्वा–ज्ञातिः, इत्यर्थे कप्रत्यये आपि "स्व-ज्ञा-ऽज-भस्त्राऽधातु-त्य-य-कात्" [ २. ४. १०८. ] इत्याप इत्वे–स्विका, अत्र ज्ञातौ "कामल-कुद्दाला-ऽवयव-स्वाः" [ लि० पु० श्लो० १४–१ ] इति लिङ्गानुशासनात् पुँल्लिङ्गस्यापि स्वशब्दस्य कुत्सितार्थविवक्षणाद् वाक्यावस्थायां कप्रत्ययान्तत्वे च स्त्रीलिङ्गत्वम् । तथा ह्रस्वा कुटीत्यर्थे "कुटी-शुण्डाद् रः" [ ७. ३. ४८. ] इति स्वार्थिके रे–'कुटीरः' इति पुँल्लिङ्गत्वम्, 'कुटीरम्' इति क्लीबत्वं च क्वचित्, कुटीशब्दस्य "लालसो रभसो वर्त्तिवितस्ति-कुक्ष्यस्त्रुटिः" [ लि० पुं० स्त्री० श्लो० ३–२ ] इति वचनात् पुंस्त्रीलिङ्गस्यापि प्रत्ययान्तरयोगेन पुंक्लीबलिङ्गत्वम् । तथा ह्रस्वं वनं–वनिका, अत्र वनशब्दस्य नान्तत्वात् "न-ल-स्तु-त-त्त-संयुक्त०" [ लि० न० १– १ ] इति पाठात् क्लीबलिङ्गस्यापि स्वार्थे कपि स्त्रीत्वम् । तथा च केचिच्छब्दाः पदान्तरापेक्षया केचिच्च स्वत एव तत्तल्लिङ्गानि कथयन्ति । तत्र पदान्तरापेक्षया यथा–अयं गौः, इयं गौरिति, अत्र गोशब्दस्योभयलिङ्गत्वेऽपि 'अयमियम्' इति पदान्तरापेक्षां विना तत्तल्लिङ्गस्य प्रतीतिर्न भवति । पदान्तरानपेक्षास्तु त्रिभिः प्रकारैर्लिङ्गानि कथयन्ति–नाममात्रेण आदेशेन प्रत्ययेन च, नाममात्रेण–स्वरूपत एव, यथा–पिता मातेति, अत्र न कस्यचिदन्यस्यापेक्षाऽपि तु स्वरूपत एव लिङ्गप्रतीतिः; आदेशेन यथा 'तिस्रः' इति, अत्र स्त्रीत्वं विनाऽनुपपद्यमानेन तिस्रादेशेन स्त्रीत्वं प्रतीयते, प्रत्ययेन यथा–राज्ञीति, अत्र स्त्रीत्वनिमित्तकेन ङीप्रत्ययेन स्त्रीत्वं प्रतीयते । संख्यावैचित्र्यं यथा–'दाराः, सुमनसः, अप्सरसः' इत्यादौ वस्त्वेकत्वेऽपि बहुवचनमित्यादि । स चायमर्थो न कारणनिर्देशपुरःसरं व्याख्यातुं शक्यत इति शब्दशक्तिवैचित्र्यमूलक एवावसीयते ॥ १६ ॥**

### *विचित्राः शब्दशक्तयः* ॥ १६ ॥

**त०**—अत्र शब्दशक्तिपदेन शब्दानां प्रातिस्विकः स्वभाव एव गृह्यते, येन शब्दस्वाभाव्येनैकमेव वस्तु भिन्नैः शब्दैरुच्यमानं भिन्नानि लिङ्गानि वचनानि च विधत्ते । यथा–'सर्वं वस्तु, सर्वः पदार्थः, सर्वा व्यक्तिः' इत्येवंरूपेण वस्तु-पदार्थ-व्यक्तिशब्दैः प्रतिपाद्यमाने सर्वस्मिन् लिङ्गत्रयमपि प्रयुज्यते । यथा वा–दार-

कलत्र-पत्नीशब्दा एकमेवार्थं कथयन्तोऽपि तत्तल्लिङ्गभाजो भवन्ति, तथा च न वस्तुतन्त्रं लिङ्गमपि तु शब्दतन्त्रमेव । एवं संख्याया अप्येष एव क्रमः, केचिच्छब्दा एकमर्थमभिदधाना अपि बहुत्वभाजो भवन्ति, यथा-दार-ऽप्सरः–सुमनःशब्दाः; केचनानेकार्थानभिदधाना अप्येकत्वभाजो भवन्ति, यथा–'वनम्, समूहः, अक्षतम्, विंशतिः' इत्यादयः शब्दा बहुत्वसंख्याविशिष्टमर्थमभिदधाना अप्येकत्वेनैवोपस्थापयन्तीत्यादयो विशेषाः शब्दशक्तिस्वभावमात्रसमर्थनीयाः । विचारितं चैतद्विषये "स्त्रियाम्" [ ४. १. ३. ] इति पाणिनीयसूत्रेऽन्यत्र च तत्तत्स्थलेषु महाभाष्यादौ । विस्तरभियेह न विशदय्य प्रदर्शितमिति । एवं क्वचित् कश्चिदर्थः शब्दप्रयोगमन्तरेण न प्रतीयते, क्वचिच्च विनापि शब्दप्रयोगं प्रतीयते, यथा–हस्तेनातिक्रामतीत्यर्थे "णिज् बहुलं नाम्नः०" [ ३. ४. ४. ] इति णिचि–'अतिहस्तयति' इत्यत्रातिशब्दं विनाऽतिक्रमार्थो न प्रतीयत इति स प्रयुज्यते, श्वेताश्वेनातिक्रामतीत्यर्थे च "श्वेताश्वा-ऽश्वतर-गालोडिता-ऽऽह्वरकस्याश्वतरेतकलुक्" [ ३. ४. ४५. ] इत्यनेनाश्वशब्दलुकि–श्वेतयतीत्यत्र त्वतेः प्रयोगं विनापि तदर्थप्रतीतेर्नातिः प्रयुज्यते । तथा ख्णम् प्रत्ययो यथाऽऽभीक्ष्ण्ये विधीयते तथा णम् प्रत्ययोऽपि, किन्तु ख्णम्–प्रत्ययस्थले द्वित्वमाभीक्ष्ण्यद्योतनाय दृश्यते, यथा–भोजं भोजं यातीति, अत्र हि "ख्णम् चाभीक्ष्ण्ये" [ ५. ४. ४८. ] इति ख्णम् विधीयते, णमि तु द्वित्वं विनाप्याभीक्ष्ण्यं प्रतीयते, यथा–'गेहानुप्रवेशमास्ते इत्यत्र, अत्र हि 'गेहमनुप्रविश्यानुप्रविश्यास्ते' इत्यर्थे "विश-पत-पद-स्कन्दो वीप्सा-ऽऽभीक्ष्ण्ये" [ ५. ४. ८१. ] इति णम् भवति । एवमादिषु वैचित्र्यस्य कारणं शब्दस्वाभाव्यमेवेति ॥ १६ ॥

## *किं हि वचनान्न भवति* ॥ १७ ॥

**सि०—वचनम्-इष्टार्थप्रत्यायनाय तादृशशब्दप्रयोगः, तद्बलात्, किं शास्त्रेण साक्षादविहितमपि कार्यं न भवति? अपि तु सर्वं भवत्येव; इष्टार्थप्रत्यये सति शिष्टप्रयोगमनुसृत्य केचिच्छास्त्रेण साक्षादविहिता अपि विधयो भवन्त्येवेत्यर्थः । तुल्यन्यायादिष्टार्थप्रत्ययेऽसति च केचिद् विधयः शास्त्रविहिता अपि क्वचिन्न प्रवर्त्तन्त इत्यपि लभ्यते । यथा "समर्थः पदविधिः" [ ७. ४. १२२. ] इति परिभाषया सर्वेषां पदसम्बन्धिविधीनां समर्थाश्रितत्वं प्रतिपादितम्, इत्यसामर्थ्ये सति समासरूपः पदविधिर्विधातुं न युक्तः, तथापि 'असूर्यम्पश्या राजदाराः' इत्यादौ सूर्यमपि न पश्यन्तीत्यर्थे नञो दर्शनार्थेन सामर्थ्ये सूर्यपदार्थेन सह सामर्थ्याभावेऽपि च "असूर्योग्रद् दृशः" [ ५. १. १२६. ] इति सूत्रेऽसूर्य इति निर्देशरूपवचनात् सूर्यशब्दस्य नञा सह समासो भवति । एवम्–'अवत्सीयो गोधुक्' इत्यादौ वत्सेभ्यो न हित इत्यर्थविवक्षायां नञो हितेन सह सम्बन्धे सत्यप्यर्थप्रत्ययस्य जायमानत्वाद् वत्सशब्देन सह समासोऽसामर्थ्येऽपि । तदित्थमिह "समर्थः पदविधिः" [ ७. १. १२२. ] इति परिभाषाबाधः स्पष्टः । वचननिर्देशात् प्राप्ताप्रवर्त्तनं यथा–"नहाहोर्धतौ" [ २. १. ८५. ] इत्यादौ धातुनिर्देशे प्राप्ता अपि इ-कि-श्तिवो न भवन्ति । इष्टार्थप्रत्ययाभावे प्राप्ताप्रवृत्तिर्यथा–'सर्वस्य भद्रं भूयात्' इत्यत्र प्राप्तोऽपि षष्ठीसमास इष्टार्थप्रत्ययाभावशङ्कया न भवति । तथाहि–सर्वभद्रं भूयादिति कथने कस्येत्याकाङ्क्षा स्थास्यतेवेति निराकाङ्क्षप्रतिपत्तये समासो न प्रवर्त्तते । इष्टार्थप्रत्यायनमूलकत्वाद् 'अभिधानलक्षणाः कृत्तद्धितसमासाः' इत्यादि प्रायो वादः, अभिधानम्–इष्टार्थप्रत्यायनं, तदेव लक्षणं–निमित्तं येषां तथाभूता इति तदर्थः । एवं वचनात्–सूत्रोक्तविधानबलात्, किं न भवति–अप्राप्तमपि विधीयत इत्यादिरूपाऽपि प्रकृतन्यायव्याख्या दृश्यते । तथा च 'श्रेष्ठः, श्रेयान्' इत्यादावेष्ठेयस्वोः परयोः प्रशस्यशब्दस्य श्रादेशविधानसामर्थ्यात् तस्य गुणाङ्गत्वाभावेऽपि "गुणाङ्गाद् वेष्ठेयसू" [ ७. ३. ९. ] इतीष्ठेयसू सिद्धौ । गुणाङ्गशब्देन गुणप्रवृत्तिनिमित्तः शब्दोऽभिधीयते, यथा पट्वादिशब्दः पटुत्वादिगुणप्रवृत्तिनिमित्तकः, प्रशस्यशब्दश्च प्रशंसाप्रवृत्तिनिमित्तकः, प्रशंसा च स्तुतिक्रियारूपा न गुणरूपा, ततश्चायं शब्दः पाचकादिशब्दवत् क्रियाप्रवृत्तिनिमित्तक एव न गुणप्रवृत्तिनिमित्तक इत्यप्राप्तावपि तौ प्रत्ययौ तयोः परतः श्रादेशविधानरूपवचनबलादेव प्रवर्त्ततः । तथा च वचनबलादिष्टार्थप्रत्यानरूपाभिधानबलाच्चाप्राप्तमपि विधीयते, प्राप्तमपि निवर्त्यत इति प्रकृतन्यायस्य क्वचिदप्राप्तप्रापकत्वं क्वचित्प्राप्तनिवर्त्तकत्वं वचनेषु अभिधानेषु च प्रतिपादनं विषयः । स च स्वभाव सिद्ध एवेति नात्र ज्ञापकाद्यपेक्षेति ॥ १७ ॥**

## *किं हि वचनान्न भवति* ॥ १७ ॥

**त०**—अयं न्यायो वचनस्याभिधानस्य चाद्भुतसामर्थ्यबोधकः । अयमाशयः–व्याकरणशास्त्रेण न शब्दा विरच्यन्तेऽपि त्वखण्डाः शब्दा लघीयसोपायेनार्थप्रत्यायनाय यथाशक्ति प्रकृति-प्रत्ययादिभिरुपायैः सामान्य-विशेषरूपैः शास्त्रैरन्वाख्यायन्ते । तत्र यदि कश्चिदर्थः शास्त्रैरप्रतिपाद्यमानोऽपि [ अविधीयमानोऽपि ] क्वचिद् दृश्येत, क्वचिच्च शास्त्रविहितोऽप्यर्थः प्रवर्त्तमानो न दृश्येत तत्र न शङ्का कार्या, यदि तादृशः शिष्टप्रयोगः स्यात्, यदि वा तादृशेन शब्देनेष्टोऽर्थः परम्परयाऽभिधीयमानो दृश्येत । तस्य चानुज्ञानं द्विधा ज्ञेयम्, क्वचिदाचार्याणां तादृशप्रयोगकरणेन क्वचिच्चेष्टार्थप्रत्यायनसामर्थ्यसत्त्वासत्त्वदर्शनेन, एष

एवार्थोऽनेन न्यायेन प्रतिपाद्यते । एतादृशाः [ यथापूर्वो न्यायोऽयमेतत्परश्च न्यायः ] प्रायोऽन्यैर्वैयाकरणैर्न्यायकोटौ न परिगणिताः, तथापि भवन्ति लक्ष्यसिद्ध्युपकारका इति व्याख्याता अस्माभिः ।

एवमेतदतिरिक्ता अपि केचन न्यायाः क्वचित् क्वचित् पठ्यन्ते, यथा–१ ***विचित्रा सूत्राणां कृतिः*** २ ***मात्रालाघवमप्युत्सवाय मन्यन्ते वैयाकरणाः*** ३ ***ते वै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्च*** इत्यादयो न्यायानुसारिणो वाग्विशेषाः । ते च सूत्ररचनार्थमेवोपयुक्ता न तु लक्ष्यसिद्धाविति लक्ष्यैकचक्षुष्कानामनुपादेया इतीह न व्याख्याताः ॥

तत्र ***विचित्रा सूत्राणां कृतिः*** इत्यस्योदाहरणं यथा– "धातोरिवर्णोवर्णस्येयुव्०" [ २. १. ५०. ] इत्यत्रेवर्णोवर्णस्य स्थाने युवर्णस्येत्येतदपि प्रयोक्तुं शक्यते, यथा–"युवर्ण-वृ-दृ०" [ ५. ३. १८. ] इत्यत्रेवर्णोवर्णयोः स्थाने युवर्णशब्दपाठः, भवति च तथा पाठे लाघवं, किन्तु सूत्राणां कृतेर्वैचित्र्यबोधनायैव तथा पठितम् ॥ १ ॥

***मात्रालाघवमप्युत्सवाय मन्यन्ते वैयाकरणाः***

इत्यस्यार्थः–मात्रयाऽपि–सूक्ष्ममपि, लाघवं वैयाकरणा उत्सवाय–हर्षाय मन्यन्त इति । लाघवं च द्विधा–शब्दतः प्रक्रियातश्च, तत्र शब्दतो लाघवं यथा–"आपो ङितां यै-यास्-यास्-याम्" [ १. ४. १७. ] इत्यत्र ङित्चतुष्केण [ 'ङे ङसि ङस् ङि' इत्येतैः ] सह यथासंख्यलाभाय 'य्याम्' इत्येतदन्तात् पदाज्जसमानीय सौत्रत्वात् तल्लोपो विहितः । प्रक्रियालाघवं यथा–'भीलुक' इत्यस्य सिद्ध्यर्थं "भियो रु-रुक-लुकम्" [ ५. २. ७६. ] इति सूत्रे लुकप्रत्ययस्य रुकप्रत्ययात् पृथग् विधानम्, अन्यथा रुके कृतेऽपि "ऋफिडादीनाम्०" [ २. ३. १०४. ] इति सूत्रे ऋफिडादिगणे पाठेनैवाकृतिगणत्वेन वा लत्वं स्यादेवेति किमर्थं पृथक् प्रत्ययविधानं स्यात्, पश्यति त्वाचार्यस्तथा सति प्रक्रियागौरवमिति पृथगेव प्रत्ययं करोति, गणकार्याणामाकृतिगणत्वेन साधनं हि प्रयोगानुसरणम्, प्रयोगानुसरणे च गौरवं स्पष्टमेवेति तदपेक्षया प्रत्ययान्तरकरणे एव लाघवम् ।

एवं ***ते वै विधयः०*** इत्यादेरयमर्थः–शास्त्रेषु द्विधा वचनानि दृश्यन्ते–कानिचित् संक्षिप्तानि कानिचिद् विस्तृतानि, तत्र ये सूक्ष्ममतयस्तान् प्रति लक्षणं–संक्षेपेण वचनम्, ये च स्थूलधियस्तान् प्रति प्रपञ्चः, शास्त्रस्य हि परानुग्रह एव प्रयोजनम्, तत्र प्रतिपत्तॄणामुभयप्रकारत्वदर्शनात्, तत्र लक्षणं यथा–"तत्पुरुषे कृति" [ ३ २. २०. ] इत्यनेन अज्ञ्जनात् परस्याः सप्तम्याः कृदन्ते उत्तरपदे तत्पुरुषे लुग् निषिध्यते 'स्तम्बेरम्' इत्यादौ, अयमेवार्थोऽग्रे प्रपञ्चितः, यथा–"शय-वासि-वासेष्वकालात्" [ ३. २. २५. ] "वर्ष-क्षर-वरा-ऽप्-सरः-शरोरो-मनसो जे" [ ३. २. २६. ] इति सूत्राभ्यामेषु शब्देषु पूर्वविषये एव अलुग् विकल्पेन विधीयते, यथा–'बिलेशयः, बिलशयः' इत्यादि, 'वर्षेजः, वर्षजः' इत्यादिश्च । एवं–"द्यु-प्रावृड्-वर्षा-शरत्-कालात्" [ ३. २. २८. ] एषु नित्यमलुप् विधीयते, यथा–'दिविजः' इत्यादि । "नेन्-सिद्ध-स्थे" [ ३. २. २९. ] एषु लुबभावो निषिध्यते, तथा च लुबेव भवति, यथा–'स्थण्डिलशायी' इत्यादि । एष च सर्वः प्रपञ्चविषयः "तत्पुरुषे कृति" [ ३. २. २४. ] इति लक्षणसूत्रेणैव सिद्धः, यतस्तत्र "अद्व्यञ्जनान्तात् सप्तम्या बहुलम्" [ ३. २. १८. ] इति सूत्राद् बहुलमित्यस्यानुवृत्तिः, संभाव्यते, तदनुवृत्त्या च

"क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥"

इत्यादिवैचित्र्यलाभसद्भावात् सूत्रचतुष्टयानुष्ठानं प्रपञ्चार्थमेव । एवं **पारिशेष्या**दयोऽपि न्यायाः सूत्रस्य नोपयोगिन एवेतीह नोपन्यस्ताः, स च न्यायः "नाम्नः प्रथमैकद्विबहौ" [ २. २. ३१. ] इत्यादिसूत्ररचनायामुपयुक्तः, तन्न्यायबलादेव हि कर्मादिशक्तिषु द्वितीयाविभक्तीनां विहितत्वात् पारिशेष्यादेव प्रथमाया नामार्थमात्रे विधानमिति सूत्रार्थः प्रतीयते । एवं–***यथोद्देशं निर्देशः*** इत्यादयोऽपि लक्ष्यैकचक्षुष्कप्रयोजना एवेति नेह क्वापि गृहीता इति ॥ १७ ॥

## *न्यायाः स्थविरयष्टिप्रायाः* ॥ १८ ॥

**सि०–यथा स्थविरैर्गमनागमनकालेषु कार्यवशादेव यष्टयः समवलम्ब्यन्ते, नान्यथा, तथा न्याया अपि शिष्टप्रयोगसिद्ध्यर्थमेवाश्रीयन्ते नान्यथा । तथा च शिष्टप्रयोगप्रातिकूल्ये न्यायानाश्रयणमेव । एकस्मिन्नेव लक्ष्ये कस्यचित् कार्यस्य साधनाय न्यायाश्रयणं दृश्यते, तदन्यकार्ये च कर्तव्ये तदनाश्रयणमपि दृश्यते, तच्चायुक्तमिति शङ्काव्युदासायायं न्याय आश्रीयते । अत्र च मूलं तत्र तत्र तथाऽऽचार्याणां व्याख्यानमेव, यथा–रायमतिक्रान्तानां कुलानामित्यर्थे 'अतिरि'-शब्दस्य आमि "क्लीबे" [ २. ४. ९७. ] इति ह्रस्वत्वे सति तत्प्रयुक्ते नामादेशे सति *एकदेशविकृतमनन्यवत्* इति न्यायात् "आ रायो व्यञ्जने" [ २. १. ५. ] इत्यात्वं प्राप्तं, तच्च *सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य* इति न्यायमाश्रित्य वार्यते, यतस्तस्मिन् कृते नामादेशनिमित्तस्य सन्निपातस्य विघातः स्यात्, किन्तु तत्रैव "दीर्घो नाम्यति-सृ-चतसृ०" [ १. ४. ४७. ] इति दीर्घे कर्तव्ये स न्यायो नाश्रीयते, ततश्च 'अतिरीणाम्' इति दीर्घः सिध्यति । एवं "वत्तस्याम्" [ १. १. ३४. ] इत्यत्र वत्तस्योस्तद्धितयोः**

साहचर्यादामोऽपि तस्यैव ग्रहणं प्राप्तं, परन्तु साहचर्यन्याया-नाश्रयणात् परोक्षास्थानजोऽप्याम् गृह्यते, तत्रैव षष्ठीबहुवचनस्यामो ग्रहणवारणाय स न्याय आश्रीयते । तथा च स्थविरयष्टिप्रायत्वं न्यायानां स्पष्टमेवेति ॥ १८ ॥

इति न्यायसमुच्चयस्य तृतीयोल्लासे वाचकावतंसेन
श्रीहेमहंसगणिमणिना समुच्चितानामष्टादशानां
वचनविशेषाणां न्यायाकाराणां, तपोगच्छा-
धिपति-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-
श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कारेण
'व्याकरणवाचस्पति-शास्त्रविशा-
रद-कविरत्न' इति पदालङ्कृ-
तेन विजयलावण्यसूरिणा
विरचिता न्यायार्थसिन्धु-
नामा वृत्तिः ॥

## *न्यायाः स्थविरयष्टिप्रायाः* ॥ १८ ॥

**त०**—न्यायाः प्रायो ज्ञापकसिद्धा एवेह पूर्वं प्रदर्शिताः, केचिदस्पष्टमुपलब्धज्ञापका अपि यथाकथञ्चिदनुमिता एव । तथा च शास्त्रकृता सर्वत्रैषां न्यायानां प्रयोगस्येष्टत्वे कण्ठत एवोच्चारणं विधेयं स्यात् संज्ञा-परिभाषादिसूत्रवत् तच्च न कृतमिति तैस्तैर्ज्ञापकैरनुमीयन्ते । अनुमीयमानानि च वचनानि सन्दिग्धानि भवन्तीति यत्र शिष्टप्रयोगाणामानुकूल्यं तत्रैव तेषामाश्रयणं युक्तं लक्ष्यानुकूलत्वात्, लक्ष्यसिद्ध्यर्थमेव च लक्षणादीनामुपादानात् । शास्त्रकृद्भिः कण्ठतोऽनुच्चारितत्वमेवैतेषां दौर्बल्यबोधकम्, कण्ठत उच्चारितानां श्रुतत्वं, ज्ञापकसिद्धानां चानुमितिप्राप्तत्वम् । तथा चैषामाश्रयणमनाश्रयणं च यद्यपि शिष्टप्रयोगमात्रविज्ञेयम्, तथापि तत्र तत्रानित्यत्वज्ञापकान्यपि शास्त्रकृद्वचनानि प्रदर्शितान्येव । नन्वाचार्यादिभिः कण्ठतोऽनुक्तत्वाद् यदेषामनित्यत्वेन लक्ष्यानुरोधादाश्रयणमनाश्रयणं चेत्युच्यते तत्र वरम्, शब्दोच्चारणजन्यक्लेशानुत्पत्त्याऽनुमानाद् बोधनस्यान्यथासिद्धत्वेन प्रकृतार्थज्ञापकत्वायोगादिति चेत्? न–नहि शब्दोच्चारणजनककण्ठताल्वाद्यभिघातरूपगौरवमेवादर्त्तव्यं, न ज्ञानजनकमनोव्यापाररूपगौरवमिति राजाज्ञास्तीत्यादिरूपेणेदृशार्थस्य तत्र तत्र निरस्तत्वात् । यद्यपि यत्र न्यायो नाश्रीयते तत्रापि किमपि ज्ञापकमवश्यमेष्टव्यम्, यथोक्ते अतिरीणामित्यत्रात्वे कर्त्तव्ये *सन्निपातलक्षण* न्यायः समाश्रीयते दीर्घे नेत्यत्र "दीर्घो नाम्यतिसृ-चतसृ०" [ १. ४. ४७. ] इति सूत्रे 'तिसृ-चतसृ'वर्जनमेव ज्ञापकम्, अन्यथा सन्निपातन्यायेनैव तिसृणामित्यादौ दीर्घवारणसंभवे तद्वर्जनं व्यर्थमेव स्यात्; "वृत्स्याम्" [ १. १. ३४. ] इत्यत्र च अविभक्तित्वेन सादृश्यग्रहणे साहचर्यन्यायाश्रयणेनैव परोक्षास्थानजस्यामो ग्रहणं, षष्ठीबहुवचनस्याग्रहणमिति साधितं तत्रैव सूत्रे बृहन्न्यासे, उपायान्तरं च तत्र प्रदर्शितम्, अथवा आमेव य आम् इति व्याख्यानम्; षष्ठीबहुवचनाम् तु 'मनसाम्' इत्यादौ आम्, 'मतीनाम्' इत्यादौ नामिति तस्य न ग्रहणमिति । एवं रीत्या प्रायः सर्वत्र न्यायाश्रयणानाश्रयणे बीजं प्रदर्शयितुं शक्यत एव । तथापि क्वचिदप्रवृत्तिमूलानुपलम्भेऽपि लक्ष्यानुरोधादपि न्यायाप्रवृत्तिः कर्तुं शक्यत एवेत्यर्थमेव न्यायोऽयमुपात्त इत्यवधेयमिति शम् ॥ १८ ॥

इति न्यायसमुच्चयस्य सिन्धुकलिते तृतीयोल्लासे वाचकाव-
तंसेन श्रीहेमहंसगणिमणिना समुच्चितानामष्टादशानां
वचनविशेषाणां न्यायाकाराणां, तपोगच्छाधिपति-
सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-श्रीमद्विजयनेमि-
सूरीश्वरपट्टालङ्कारेण 'व्याकरणवाचस्पति-
शास्त्रविशारद-कविरत्न' इति पदालङ्कृतेन
विजयलावण्यसूरिणा विरचितं
तरङ्गाभिधं विवरणम् ॥

क्वचित् प्राच्यः पन्थाः क्वचिदपि च नव्यो बुधपथः,
क्वचित् स्वातन्त्र्याध्वा क्वचिदपि च तेषां समुदयः ।
श्रितोऽस्मिन् शिष्याणां मतिविकसनार्थं शुभधिया,
बुधैर्बुद्ध्वा तत्त्वं तदनुगतमर्घ्यं श्रितजने ॥ १ ॥
सूरीन्द्रं हेमचन्द्रं कलिसकलविदं संस्मरामोऽभिरामं,
धीमन्तं हेमहंसं गणिमणिममलं तं कथं विस्मरामः ।
न्यायानामर्थसार्थं निजमतघटितं धारयन्तीं यदीयां,
मञ्जूषां प्राप्य जाता वयमिह प्रभवः साधु सिन्धौ तरङ्गे ॥२॥

## [ चतुर्थोल्लासः ]

### अतः परं प्राक् प्रदर्शितन्यायसजातीय एवानुक्तार्थसाधको न्यायो विस्तरेण व्याख्यातुं पृथक् प्रदर्श्यते, स चायम्—

### *शिष्टनाम-निष्पत्ति-प्रयोग-धातूनां सौत्रत्वाल्लक्ष्यानुरोधाद् वा सिद्धिः* ॥ १ ॥

सि०—इह हि यथासम्भवं लक्ष्याणि बुद्धौ सङ्कलय्य तत्साधनार्थं लक्षणानि शास्त्रकृद्भिः सूत्रितानि, परं नाम्नामानन्त्यात् तत्तत्प्रयोगविषयाणां क्रियादिपदानां च साकल्येन सङ्कलनमसम्भवि, उक्तं च भाष्यकृता पस्पशाह्निके—"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं शब्दपारायणं जगौ, तथापि नान्तं जगाम" इति । ततश्च बहूनि नामानि, बह्वयश्च निष्पत्तयः, बहवश्च प्रयोगविशेषा नामा-ऽऽख्यातप्रकृतिभूता धातवश्च शब्दानुशासने साक्षाद् न सङ्कलिताः, तेषां संग्रहायायं न्यायः समाश्रीयते । तथा चायमर्थः—शिष्टाः—शब्दशास्त्रे व्याख्यानकर्मणि नायाता अनुक्ता इत्यर्थः, ये नामानि च निष्पत्तयश्च प्रयोगाश्च धातवश्च, तेषां [ इह शब्दानुशासनेऽनुक्तावपि ] सौत्रत्वात्-सूत्राणि—आचार्यप्रणीतानि, तेषु निर्दिष्टाः—सौत्राः, तेषां भावः—सौत्रत्वं, तस्मात्; लक्ष्यानुरोधात्—लक्ष्यं—शिष्टसम्प्रदायप्रयोगः, तस्यानुरोधात्—तद्गौरवबलादिति भावः, सिद्धिः—निष्पत्तिः । अत्र प्रकृतार्थबोधाय समुपयुक्तोऽपि सिद्धिशब्दो न्यायसंग्रहरूपग्रन्थस्यान्ते प्रयुक्तो मङ्गलार्थोऽपि सम्पन्नः । ग्रन्थान्तेऽपि मङ्गलाचरणं शिष्टपरम्पराप्राप्तमेव, उक्तं च महाभाष्ये—"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि च, अध्येतारश्च सिद्धार्था यथा स्युः" इति । तत्र तत्राकृतोपायकशब्दधात्वादिप्रयोगान् विदधताऽऽचार्येणैवायं न्यायः सूचित इति नात्र ज्ञापकविशेषोपन्यासावश्यकताऽस्ति । तत्र नाम्नां सौत्रत्वात् सिद्धिर्यथा—'चतुर्थी, षष्ठी' इत्यादिसौत्रनिर्देशात् 'चतुर्थ, षष्ठ' इत्यादिनाम्नां प्रकृतशब्दानुशासनसूत्रप्रातिकूल्येऽपि सिद्धिरिति । तद्यथा—'चतुर्णां षण्णां वा पूरणी' इत्यर्थे चतुर्-षष्-शब्दाभ्यां क्रमात् "चतुरः" [ ७. १. १६३. ] "षट्-कति-कतिपयात् थट्" [ ७. १. १६२. ] इति सूत्राभ्यां थट्प्रत्यये "नाम सिद्व्यञ्जने" [ १. १. २१. ] इति पदत्वे—'चतुस्थी, षट्ठी' इति प्रयोगौ प्राप्नुतः, परं "चतुर्थी" [ २. २. ५३. ] "अज्ञाने ज्ञः षष्ठी" [ २. २. ८०. ] इति सौत्रप्रयोगाद् व्यञ्जनसन्धिकार्याणि न जातानि । एवंभिस्सटा, कच्छाटिका, ग्रामटिकेत्यादिप्रयोगाणां शिष्टपरम्पराप्रयोगात् सिद्धिः, तथाहि—अभ्युपसर्गपूर्वात् "प्सांक् भक्षणे" इत्यस्माद् धातोः "उपसर्गादातः" [ ५. ३. ११०. ] इत्यङि "इडेत्पुंसि चातो लुक्" [ ४. ३. ९४. ] इत्यालुकि पृषोदरादित्वादुपसर्गाद्यकारलोपे पकारस्य च सकारादेशे स्त्रिया आपि आपः प्राक् कुत्सार्थविवक्षया टागमे च—भिस्सटा, कुत्सितमन्नं भिस्सटेत्युच्यते । तदुक्तं लिङ्गानुशासनटीकायामाचार्यैः—"कुत्सिता भिस्सा भिस्सटा—दग्धिका, लक्ष्यानुरोधाट्टागमः" इति । अमरकोशे च—"भिस्सटा, दग्धिका०" [ २. ९. ४९. श्लो० ] इत्युक्तम्, तट्टीकाकृद्भिश्च 'भिस्सां टीकत इति व्युत्पाद्य भिस्सोपपदाट्टीक्धातोरयं शब्दः साधितः, वाचां व्युत्पत्तिवैचित्र्यात् । कच्छाटिका तु—

"नौकाङ्गे परिधाने च पश्चादञ्चलपल्लवे ।
कच्छा तु चीरिकायां तु वाराह्यां च निगद्यते ॥"

इति हेमकोशात् परिधानीयपश्चादञ्चलपल्लवार्थात् कच्छाशब्दात् कुत्सितार्थे के आपि लक्ष्यानुरोधादेव कात् पूर्वं टागमे ह्रस्वादौ कृते सिध्यति, तदुक्तं लिङ्गानुशासनटीकायामाचार्यैः—"अञ्चलपल्लवे चार्थप्राधान्यात् कच्छाटिकेत्यपि, यद् गौडः—"कच्छा-कच्छाटिके समे" इति । ग्रामटिकेति च ग्रामशब्दात् कुत्साद्यर्थे के स्त्रीत्वविवक्षायामापि टागमे इत्वादौ कृते सिध्यति । एवं—'कान्दविकः, वैणविकः, काम्बविकः' इत्यादौ "ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्" [ ७. ४. ७१. ] इतीकस्येतो लुग् न भवति । तथा च कन्दुः पण्यमस्येत्यर्थे "तदस्य पण्यम्" [ ६. ४. ५४. ] इतीकणि "अस्वयंभुवोऽव्" [ ७. ४. ७०. ] इत्यवादेशे सिध्यति, कन्दुना कृतं कान्दवं, तत् पण्यमस्येति वा सिध्यति; परे तु कन्दुः—मद्यनिर्माणोपयोगिपात्रं 'कराही' इति ख्यातम्, तत्र संस्कृतं भक्ष्यमित्यर्थे कान्दवं प्रसाध्य तस्मात् पण्यार्थे इकणि कृते 'कान्दविक' इति साधयन्ति, तच्च "आपूपिकः कान्दविको भक्षकारः" [ अ० २ । ९ । २८७ श्लो० ] इत्यमरकोशटीकायां स्पष्टम् । वेणुः—वेणुवादनं शिल्पमस्येत्यर्थे "शिल्पम्" [ ६. ४. ५७. ] इतीकणि अवादेशे सिध्यति, अत्र लक्ष्यानुरोधात् "ऋवोवर्ण०" [ ७. ४. ७१. ] इतीकण इलोपाभावः; परे तु वेणुशब्दाद् विकारार्थे वैणवं संसाध्य ततः शिल्पार्थे इकणि कृते साधयन्तीति तन्मते न लक्ष्यानुरोधाश्रयणमावश्यकं भवति; एवं-कम्बुः—कम्बुवादनं शिल्पमस्येत्यर्थे पूर्ववत् काम्बविकसिद्धिः; अत्रापि परे विकारार्थे काम्बवं संसाध्य पश्चादिकणा काम्बविकं संसाधयन्ति, स्वमते इकारलोपाभावाय लक्ष्यानुरोधाश्रयणं तन्मते प्रत्ययद्वयविधानरूपप्रक्रियागौरवाश्रयणमित्युभयोः साम्यमेव ॥

शिष्टानां निष्पत्तीनां सौत्रत्वात् सिद्धिर्यथा–"अं-अः अनुस्वार-विसर्गौ" [ १. १. ९. ] "आपो ङितां यै-यास्-यास्-याम्" [ १. ४. १७. ] इत्यनयोः सूत्रयोः क्रमादौ-जसोर्विभक्त्योः सौत्रत्वादेव लुग् निष्पन्नः, लक्ष्यस्यैतादृशस्यान्यत्रानुपलब्धेर्न लक्ष्यानुरोधकृता सिद्धिरिह प्रदर्शिता । तथा चाग्रेऽपि यत्र यस्यैव हेतोः संभवः स एव प्रदर्शयिष्यते ॥

प्रयोगविशेषाणामर्थविशेषे नियन्त्रणादिकमपि लक्ष्यानुरोधकृतं भवति, यथा–रणादिधातूनां शब्दार्थत्वस्य साम्येऽपि भावे क्तान्ताः प्रयोगा अर्थविशेषे नियन्त्रिता लक्ष्यानुरोधादेव, तदुक्तं हैमधातुपारायणे–"इह च [ धातूनां ] शब्दार्थत्वाविशेषेऽपि रणितं नूपुरादौ, मणितं सुरतकूजिते, कणितमार्त्ते, क्वणितं वीणादौ रूढम्; एवमन्यत्रापि–कूजितं विहगादौ, बृंहितं गजे, हेषितं हये, वाशितं पशुषु, गर्जितं मेघादौ, [ क्वचिद् गर्जितं सिंहादौ ], गुञ्जितं सिंहादौ, [ क्वचिद् गुञ्जितं भ्रमरादौ ], इत्यादिकं लक्ष्यानुरोधादूह्यम् ।" इति ॥

धातूनां च सौत्रत्वात् संग्रहो लक्ष्यानुरोधाच्च, तत्र सौत्रा धातवः "धातोः कण्ड्वादेर्यक्" [ ३. ४. ८. ] इति सूत्रे कण्ड्वादिगणनिर्देशादभ्यूहिता बृहद्वृत्त्यादिषु विस्तरतो वर्णिताः । अन्येऽपि स्तम्भूप्रभृतयः सूत्रेषु तत्र तत्र पठिता धातवो "बहुलमेतन्निदर्शनम्" इति चुराद्यन्तर्गणसूत्रेणाचार्यैः सङ्गृहीताः । चुलुम्पादयश्च तत्र तत्र प्रयोगपथमायाता वाक्यकरणीयत्वेन प्रदिपादिता धातुपारायणादौ, तेऽपि प्रकृतन्यायविषयतां नातिक्रामन्ति । सौत्रादिधातूनामर्था अपि कविकल्पद्रुमादिग्रन्थेषु प्रतिपादिता इति विस्तरभयादिह नोच्यन्ते । तेष्वपि क-च-ट-त-पादिवर्णा अनुबन्धत्वेनासञ्जितास्तेषामनुबन्धानां फलानि च यथावसरं निरूपयिष्यन्ते । तत्तदनुबन्धवशलब्धतत्तद्गणान्तःस्थत्वविज्ञानात् तत्तद्गणपाठप्रयुक्तविकरणादिलाभः, गणविशेषपाठानुज्ञापकानुबन्धाभावे च शवेव विकरणम् । इ-ङित्त्वकृतमात्मनेपदमी-ञित्त्वकृतमुभयपदं तदुभयविरहनिबन्धनं च "शेषात् परस्मै" [ ३. ३. १००. ] इति परस्मैपदमित्याद्यवधेयम् । अतः परमनुबन्धफलप्रदर्शनार्थं दिङ्मात्रं रूपाणि प्रदर्श्यन्ते । तथा च "स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोः श्ना च" [ ३. ४. ७८. ] इति सूत्रपठितः स्तम्भूधातुः स्तम्भार्थः, स्तम्भश्च क्रियानिरोधः, स चोकारानुबन्धः, तस्माद् वर्त्तमानायां प्रथमपुरुषैकवचने पूर्वोल्लिखितसूत्रेण श्ना-श्नु प्रत्ययौ क्रमाद् भवत इति स्तभ्नाति स्तभ्नोतीति रूपे; क्ये च "नो व्यञ्जनस्यानुदितः" [ ४. २. ४५. ] इति नलोपे–स्तभ्यत इति, क्त्वि च कृते ऊदित्वात् "ऊदितो वा" [ ४. ४. ४२. ] इति वेटि–स्तब्ध्वा, स्तम्भित्वेति रूपद्वयम्; वेट्त्वादेव च क्तयोः परतो "वेटोऽपतः" [ ४. ४. ६२. ] इति क्तयोरिण्निषेधात्–स्तब्धः स्तब्धवानिति; अद्यतन्याम् "ऋदिच्छ्वि-स्तम्भू-म्रुचू०" [ ३. ४. ६५. ] इति वाऽङि–अस्तभत् अस्तम्भीदिति । एवम्–अग-पुलाभ्यां परस्मात् स्तम्भेः "अग-पुलाभ्या०" [ उणा० ३६३. ] इति डिति ये सति अगं स्तभ्नातीत्यर्थे–अगस्त्यः, पुलं स्तभ्नातीत्यर्थे च–पुलस्त्य इति रूपे भवतः; स्तभ्नातीत्यर्थे "जजल-तितिल०" [ उणा० १८. ] इत्यादिना सूत्रेण निपातनात्–तिन्तिभ इति, तस्माद् वृद्धापत्यार्थे गर्गादित्वाद् यञि–तैन्तिभ्य इति । अस्य धातोः सौत्रेष्वादौ पाठेनाभ्यर्हितत्वाद् वर्णक्रमं परित्यज्य पूर्ववर्णनं कृतम्, एवं–लौकिकेषु धातुषु क्रुवेः, वाक्यकरणीयेषु चुलुम्पेश्चादौ पाठेऽप्याचार्यवचनमेव मूलमिति ध्येयम्, तथाहि–तैः "बहुलमेतन्निदर्शनम्" इति चुराद्यन्तर्गणसूत्रस्य व्याख्यानावसरे–"तेनात्रापठिता अपि क्रुविप्रभृतयो लौकिकाः, स्तम्भूप्रभृतयः सौत्राः, चुलुम्पादयश्च वाक्यकरणीया उदाहार्याः" इत्युक्तम् ॥ १ ॥

अथान्त्यवर्णक्रमेण सौत्रधातूनां विशिष्टप्रयोगादिप्रदर्शनार्थं दिगुच्यते, तत्रादन्तेषु–"तन्द्रा आलस्ये" इत्यस्मात् तन्द्रातीत्यर्थे "शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेरालुः" [ ५. २. ३७. ] इत्यालुर्विधीयत इति तन्द्रालुरिति प्रयोगः ॥ २ ॥

इदन्ताश्चत्वारः–तत्र "कि ज्ञाने" इत्यस्मात् कयतीत्यर्थे "जनि-पणि०" [ उणा० १४०. ] इत्यादिसूत्रेण टप्रत्यये दीर्घे च विहिते–कीट इति रूपम्; तस्मादेव "कि-शॄ-वॄभ्यः करः" [ उणा० ४३५. ] इति करे–केकरो वक्रदृष्टिः; अस्मादेव "तिनिशेतिशादयः" [ उणा० ५३७. ] इति सूत्रे आदिग्रहणात् किशप्रत्यये–कीशः–मर्कटः ॥ ३ ॥

"पति पतने" इत्यस्मात् पतयतीत्याद्यर्थे "शीङ्-श्रद्धा०" [ ५. २. ३७. ] इत्यादिपूर्वोल्लिखितसूत्रेणालौ सति–पतयालुरिति, "पतण् गतौ वा" इत्यस्माच्चौरादिकादपि पतयालुरिति सेद्धुमर्हति ॥ ४ ॥

"गृहि ग्रहणे" गृहयति, अगृहायीत्, इति, "गृहणि ग्रहणे" इति चौरादिकादन्तस्य तु–गृह्यते अजगृहतेत्यादि, उभाभ्यामपि "शीङ्-श्रद्धा०" [ ५. २. ३७. ] इति पूर्वोदीरितसूत्रेणालौ विहिते–गृहयालुरिति ॥ ५ ॥

"चिरिट् हिंसायाम्" इत्यस्माच्चिरिणोतीत्यर्थे "चिरेरिटो भ् च" [ उणा० १४९. ] इतीटप्रत्यये भान्तादेशे जातित्वात् स्त्रियां ङ्यां–चिर्भिटी-वालुङ्की, अस्मादेव "ङिण्टश्चर् च वा" [ उणा० १५०. ] इति सूत्रेण ङिति इण्टप्रत्यये प्रकृतेर्विकल्पेन चरादेशे–चरिण्टी चिरिण्टी च प्रथमवयाः स्त्री, प्रथमवयोवाचित्वनिबन्धनमेव स्त्रियां ङीः ॥ ६ ॥

अथोदन्तौ द्वौ धातू-"जु वेगे" "जुंङ् गतौ" इत्येताभ्यामुभाभ्यामपि-'जवः, जवनः' इत्यादयः प्रयोगाः । यद्यपि निघण्टुवृत्तौ 'जु' इति सौत्राद् धातोर्जव इत्यादयः साधिताः, तत्त्वार्थान्तरपरिग्रहाय भविष्यति । पाणिनीयादितन्त्रे च धातुपाठेऽयं धातुर्नैव पठितः केवलं सौत्र एव, तन्मतानुसारेण वा तदुल्लेखः । तथाहि-"जुचङ्क्रम्य" [ पा० ३. २. १५०. ] इति सूत्रे भट्टोजिदीक्षित आह-'जु' इति सौत्रो धातुर्गतौ वेगे चेति ॥ ७ ॥

"क्रुङ् गतौ" इत्यस्मात् क्रवते, क्रूयते, क्रव्यमित्यादयः ॥८॥

अथ ऊदन्तः-"भूङ् प्राप्तौ" इत्येकः, तस्मात् "भूङः प्राप्तौ णिङ्" [ ३. ४. १९. ] इति वा णिङि-भावयते, भवते, इत्यादयः, क्ते-भावितम्, भूतमित्यादयश्च ॥ ९ ॥

अथ ककारान्ताः षड् धातवः-"तर्क विचारे" अकारः श्रुतिसुखार्थ उच्चारणार्थो वा, न त्वनुबन्धः, चौरादिकानदन्तान् धातून् विहाय सर्वत्राऽकारान्तेष्वयं क्रमो विज्ञेयः । तर्कति, तर्क्यन्ते-प्रमितिविषयीक्रियन्ते पदार्था अनेनेति-तर्कः ॥१०॥

"कक्क कर्क हासे" कक्कति, भूते क्ते-कक्कितः, "क्तेटो गुरोर्व्यञ्जनात्" [ ५. ३. १०६. ] इत्यप्रत्यये-कक्का, अचि प्रत्यये-कक्कः ॥ ११ ॥

कर्कधातोः कर्कतीत्यर्थे "दिव्यवि-श्रु-कु-कर्वि-शकि०" [ उणा० १४२. ] इत्यादिसूत्रेणाटि प्रत्यये-कर्कटः-कपिलः कुलीरश्च, स्त्रियां जातित्वाद् ङीः-कर्कटी-त्रपुसी, "कर्केरारुः" [ उणा० ८१३. ] इत्यारुप्रत्यये-कर्कारुः-क्षुद्रचिर्भटी । उणादिबृहद्वृत्तौ प्रकृतसूत्रव्याख्यानावसरे-कर्केति सौत्रादित्युक्त्याऽस्यापि सौत्रत्वं स्पष्टमेव ॥ १२ ॥

"सिक सेकने" सेकतीत्यर्थे "पृषि-रञ्जि-सिकि०" [ उणा० २०८. ] इति सूत्रेण किति अते प्रत्यये स्त्रियां-सिकताः-वालुकाः ॥ १३ ॥

"मर्क संप्रच्छने" मर्कतीत्यर्थे "दिव्यवि०" [ उणा० १४२. ] इति सूत्रेण टे-मर्कटः-वानरः, "कैरव-भैरव०" [ उणा० ५१९. ] इति सूत्रे आदिग्रहणेन निपातनात्-मार्कवः-केशरञ्जनः ॥ १४ ॥

"चक्कि भ्रमणे" चक्कत इत्यर्थे "वाश्यसि-वासि-मसि०" [ उणा० ४२३. ] इति सूत्रेण उरप्रत्यये-चक्कुरः-रथोऽनवस्थितश्च ॥ १५ ॥

"मकि गतौ" मकत इत्यर्थे "ककि-मकि०" [ उणा० २४५. ] इत्यन्दप्रत्यये-मकन्दो नाम राजा, येन निर्वृत्ता माकन्दी नाम नगरी ॥ १६ ॥

अथ खान्तः-"रिखिर्लिख्यर्थे" रेखति चित्रकृत्, "भिदादयः" [ ५. ३. १०८. ] इति भावार्थेऽङि निपातनाद् रेखा ॥ १७ ॥

अथ गान्तः-"कगे संप्रहारे" अस्माद् "बहुलमेतन्निदर्शनम्" इति चुराद्यन्तर्गणसूत्रेण स्वार्थे चुरादित्वाण्णिचि ततः णम्परे "कगे-वनू-जनै-जृष्-क्नस्-रञ्जः" [ ४. २. २५. ] इति वा दीर्घे-कगं कगं कागं कागम्, मिथोऽभीक्ष्णं संप्रहृत्येत्यर्थः, अयं मौन इत्यपि केचित्, कगति-मौनमाश्रयतीत्यर्थः । अयं क्रियासामान्यार्थ इति पाणिनीयाः, । तथाहि-सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः-'कगेनोच्यते' अस्यायमर्थ इति विशिष्य नोच्यते क्रियासामान्यार्थत्वात्, अनेकार्थत्वादित्यन्ये" । इत्याह, तथा च कगतीत्युक्ते यथाप्रकरणं याति भुङ्क्ते स्वपितीत्यादयोऽर्था बोद्धुं शक्यन्ते, अस्यैदित्त्वेनाद्यतन्यां प्राप्ताया "व्यञ्जनादेर्वोपान्त्यस्यातः" [ ४. ३. ४७. ] इति वृद्धेः "न श्वि-जागृ-शस-क्षण-ह्मयेदितः" [ ४. ३. ४९. ] इति निषेधात्-'अकगीत्' इत्येव रूपम् ॥ १८ ॥

अथ घान्तः-"अर्घ मूल्ये" महार्घः,

"दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥"
इति महिम्नस्तोत्रे पुष्पदन्तः ॥ १९ ॥

अथ चान्तः "मर्चण् शब्दे" मर्चयतीति चौरादिके स्वार्थे णिचि तस्य चानित्यत्वात् तदभावे मर्चतीत्यर्थे "भीण्-शलि-वलि-कल्यति-मर्च्यर्चि०" [ उणा० २१. ] इत्यादिसूत्रेण के "च-जः क-गम्" [ २. १. ८६. ] इति चः कत्वे-मर्कः-देवदारुः, वायुः, दानवः, मनः, पन्नगः, विघ्नकारी च । उणादिवृत्तिग्रन्थे "मर्चः सौत्रो धातुः प्राप्तौ" इत्याचार्याः ॥ २० ॥

अथ जान्तास्त्रयः-"मञ्ज सौन्दर्ये च" चात् शब्दे, मञ्जतीत्यर्थे उणादिषु "पञ्चेधिठादयः" [ उणा० १६६. ] इति सूत्रेणादिशब्दबलान्निपातनात्-मञ्जिष्ठा, "ऋच्छि-चटि०" [ उणा० ३९७. ] इत्यादिसूत्रेण अरे स्त्रियां गौरादित्वान्ङ्यां-मञ्जरी-आम्रादिशिखा, "कृ-शृ-पॄ-पूर-मञ्जि०" [ उणा० ४१८. ] इत्यादिसूत्रेण ईरप्रत्यये-मञ्जीरं-नूपुरः, एवमस्मादेव "कुमुलतुमुल-निचुल०" [ उणा० ४८७. ] इत्यादिना उलप्रत्ययान्ततया निपातनात्-मञ्जुलं-मनोज्ञम्, "खलि-फलि-वृ-पॄ०" [ उणा० ५६०. ] इत्यादिना ऊषप्रत्यये स्त्रियां-मञ्जूषा-काष्ठकोष्ठः, एवं "भृ-मृ-तॄ०" [ उणा० ७१६. ] इत्यादिसूत्रे बहुवचननिर्देशादस्मादपि उप्रत्यये-मञ्जुः ॥ २१ ॥

"पञ्ज रोधे" पञ्जतीत्यर्थे "नाम्नि पुंसि च" [ ५. ३. १२१. ] इत्यके स्त्रियां-पञ्जिका, "ऋच्छि-चटि०" [ उणा० ३९७.] इत्यादिसूत्रेण अरे-पञ्जरः-शुकाद्यवरोधसद्म ॥ २२ ॥

"कञ्ज शब्दे" कञ्जतीत्यर्थे "अग्यङ्गि-मदि-मन्दि०" [ उणा० ४०५. ] इत्यादिसूत्रेणारप्रत्यये-कञ्जारः-कुसूलजातिः, यूपः, व्यञ्जनं च ॥ २३ ॥

अथ टान्तास्त्रयः–"रण्ट प्राणहरणे" तस्मात् कुपूर्वात् "को रु-रुण्टि-रण्टिभ्यः" [ उणा० २८. ] इत्यकप्रत्यये–कुरण्टकः–वर्णगुच्छो वृक्षजातिविशेषः ॥ २४ ॥

"घटु शब्दे" उदित्वाद् "उदितः स्वरान्नोऽन्तः" [ ४. ४. ९८. ] इति नागमे–घण्टति, अस्मादेवाचि–घण्टः, स्त्रियां घण्टा च–वाद्यविशेषः ॥ २५ ॥

"मट ह्रासे" ह्रासो ह्रस्वत्वम्, मटतीत्यर्थे "कृ-पृ-कटि-पटि-मटि०" [ उणा० ५८९. ] इत्यहप्रत्यये–मटहः–ह्रस्वो भुजाद्यवयवः ॥ २६ ॥

अथ ठान्तः–"कुठ छेदने" कोठतीत्यर्थे "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के–कुठः–वृक्षः, अस्मादेव "तुषि-कुठि०" [ उणा० ४०८. ] इत्यारे–कुठारः–परशुः ॥ २७ ॥

अथ डान्ताश्चत्वारः–"कुड शब्दे" "लिहादिभ्यः" [ ५. १. ५०. ] इत्यचि–क्रोडः–सूकरः, अङ्के वक्षसि च क्रोडा क्रोडम्, "स्त्री-नपुंसकयोः क्रोडा वक्षसि स्यात् किरौ पुमान्।" इति गौडः ॥ २८ ॥

"उड सङ्घाते" ओडतीत्यर्थे "उडेरुपक्" [ उणा० ३११. ] इत्युपकि–उडुपः–प्लवः ॥ २९ ॥

"वड आग्रहणे" वडतीत्यर्थे "कृ-शृ-गृ-शलि-कलि-गलि०" [ उणा० ३२९. ] इत्यभे स्त्रियां–वडभी–वेश्माग्रभूमिका, ऋफिडादित्वाल्लत्वे–वलभीत्यपि। "वडि-वटि-पेलृ०" [ उणा० ५१५. ] इत्यवे स्त्रियां–वडवा–अश्वा । "कुलि-कनि-कणि-पलिवडिभ्यः किशः" [ उणा० ५३५. ] इति किति इश-प्रत्ययेवडिशं–मत्स्यग्रहणम् ॥ ३० ॥

"णडण् अवस्यन्दने" अवस्यन्दनं–भ्रंशः । अयं णोपदेशः, णडि-णटि-णुदि-णाधयश्चत्वारो णोपदेशा इत्यन्यत्रोक्तत्वात्, तत्फलं तु "पाठे धात्वादेः०" [ २. ३. ९७. ] इति णो ने विहिते तस्य "अदुरुपसर्गान्तरो ण-हिनु-मीना-ऽऽनेः" [ २. ३. ७७. ] इति सूत्रेण णत्वम्, प्रणाडयतीति । अस्मादेव घञि डस्य लत्वे–प्रणालः । चौरादिकणिचोऽनित्यत्वाद-भावेऽचि–नडः–तृणजातिः । "नडेर्णित्" [ उणा० ७१२. ] इति णिति ईप्रत्यये–नाडी–आयतसुषिरं द्रव्यम्, अर्ध-मुहूर्त्तश्च । नाडीशब्दात् स्वार्थे के–'नाडिका' इत्यपि, "नटण् अवस्यन्दने" इत्यस्य स्थाने "णडण्" इति नन्दी प्राह" इति धातुपारायणे कथितम् । तस्मात् परपठितधातुषु यद्यप्ययं पठितुं युक्तस्तथापि "नडेर्णित्" [ उणा० ७१२. ] इति सूत्रे नडेः सौत्रादिति बृहद्वृत्तिग्रन्थात् स्वमतेऽपि सौत्रेष्वयं पठितुं युक्त इति पठितः ॥ ३१ ॥

"किणत् शब्द-गत्योः" किणतीत्यर्थे "नाम्नि पुंसि च" [ ५. ३. १२१. ] इति णके–केणिका–पटकुटी । "निघृषी-ण्यृषि-स्नु-पुषि-किणि०" [ उणा० ५११. ] इति किति वे–किण्वं–सुराबीजं पापं च ॥ ३२ ॥

अथ तान्ताश्चत्वारः–"कुत गुम्फ-प्रीत्योः" कुत्यते–गुम्फ्यते छागरोमभिरिति कुतपः–कम्बलविशेषः, "भुजि-कुति-०" [ उणा० ३०५. ] इति किति अपे सिध्यति, श्राद्धकालार्थे च कोतन्ति–प्रीयन्ते पितरोऽस्मिन्नित्यर्थः ॥ ३३ ॥

"पुत गतौ" पोतन्ति–मधुने गच्छन्तीति विग्रहे "कृति-पुति-लति-भिदिभ्यः कित्" [ उणा० ७६. ] इति किति तिक-प्रत्यये–पुत्तिका–मधुमक्षिका ॥ ३४ ॥

"लत आदाने" आङ्पूर्वादस्मात् "कृति-पुति०" [ उणा० ७६. ] इति किति तिके स्त्रियाम्–आलत्तिका–गानप्रारम्भः । निरुपसर्गात्–लत्तिका–वाद्यविशेषो गौगोधा च । गोपूर्वाद् गोलत्तिका–गृहगोधा । अवपूर्वाद्–अवलत्तिका–गोधा ॥ ३५ ॥

"सात सुखे" अस्माण्णिगि "साहि-साति-वेद्यु-देजि-धारि-पारि-चेतेरनुपसर्गात्" [ ५. १. ५९. ] इति शे- सातयः–सुखकारी ॥ ३६ ॥

अथ थान्तः–"कथ वाक्यप्रबन्धे" अयं चुराद्यन्तर्गत इति मते स्वार्थे णिचि, मतान्तरे प्रयोजकव्यापारे णिगि–कथयति, अचीकथत् । शिष्टप्रयोगोऽपि–"भूरिदाक्षिण्यसम्पन्नं यत् त्वं सान्त्वय्यचीकथः" [ महाभारते ], कथणिति चुरादिपठितस्य तु समानलोपित्वेन तस्याद्यतन्यामचकथदिति रूपम् ॥ ३७ ॥

अथ दान्ताश्चत्वारः–"उद आघाते" ओदति "कुटि-कुलि-कल्युदिभ्य इञ्चक्" [ उणा० १२३. ] इति किति इञ्चप्रत्यये उदिञ्चः–कोणो येन तूर्यं वाद्यते, परपुष्टश्च ॥ ३८ ॥

"क्षद हिंसा-संवरणयोः" क्षदति "त्रट्" [ उणा० ४४६. ] इति सूत्रेण धातुसामान्याद् विहितः त्रट्–क्षत्रम्, तस्यापत्य-मित्यर्थे "क्षत्रादियः" [ ६. १. ९३. ] इतीये–क्षत्रियः । "त्वष्टृ-क्षत्तृ०" [ उणा० ८६५. ] इति तृप्रत्ययान्तनिपातनेन–क्षत्ता–नियुक्तः, अविनीतः, दौवारिकः, मुसलः, पारशवः, रुद्रः, सारथिश्च । प्रकृतोणादिसूत्रबृहद्वृत्तौ "क्षद खदने सौत्रः" इत्युक्तम्, तत्रापि खदनं–हिंसैवेति प्रतीयते ॥ ३९ ॥

"सुन्द हिंसा-सौन्दर्ययोः" अचि–सुन्दः, उपपूर्वकस्य उपसुन्दः, एतन्नामकौ दैत्यौ यौ स्त्रीनिमित्तं परस्परं प्रहृत्य मृताविति पुराणे प्रसिद्धिः । "ऋच्छि-चटि०" [ उणा० ३९७. ] इत्यरे–सुन्दरः–मनोज्ञः ॥ ४० ॥

"कदि वैक्लव्य-छेदनयोः" कदते अनटि–कदनम् । "पिच-ण्डैरण्ड-खरण्डादायः" [ उणा० १७६. ] इति सूत्रे आदिग्रह-णेन निपातनात्–कोदण्डः–धनुः । "कदेर्णिद्वा" [ उणा० ३२२. ] इति सूत्रे वैकल्पिके णित्यम्बे–कादम्बः–हंसः, कदम्बः–वृक्षजातिः । "द्वार-श्रृङ्गार-भृङ्गार-कल्हार कान्तार-

केदार-खारडादयः" [ उणा० ४११. ] इति सूत्रे निपातनात् कदेरत एदादेशे आरप्रत्यये च-केदारः-क्षेत्रं व्रप्रश्च । "मृदि-कन्दि०" [ उणा० ४६५. ] इति सूत्रेणाले गौरादित्वान्ड्यां-कदली, यद्यप्युक्तसूत्रे कदेः पाठो न दृश्यते, नवा वृत्तौ कदलीशब्दोल्लेखो दृश्यते, तथापि

"संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥"

इति प्राचामुक्तेः कदेरप्यलप्रत्ययः कल्पनीयः, अत एवाचार्यैरपि स्वोपज्ञाभिधानचिन्तामणिवृत्तावुक्तम्-कदिः सौत्रः, कद्यते कदली "मृदि०" [ उणा० ४६५. ] इत्यलः ॥ ४१ ॥

अथ धान्तः-"मिधृग् मेधा-हिंसा-सङ्गमेषु" अस्मात् क्ये-मिध्यते, मेधतीति "मेधृग् सङ्गमे च" इति पठितस्य । "वौ व्यञ्जनादेः०" [ ४. ३. २५. ] इति क्त्वो वा कित्त्वे-मिधित्वा, मेधित्वा । भिदादौ निपातनादङि-मेधा ॥ ४२ ॥

अथ नान्तः-"धनक् धान्ये" धान्यपदं धान्योपलक्षित-क्रियोपलक्षकम्, एवं चोपलक्षणतया व्याख्यानस्य फलं क्रियार्थत्वनिमित्तं धातुत्वमेव, यथा "णील वर्णे" इत्यस्य धातुपारायणे वर्णपदस्य वर्णोपलक्षितक्रियापरत्वेन व्याख्यानं कृतं तथेहापि व्याख्यानमाश्रयणीयमेव । ह्वादित्वात् शिति "ह्वः शिति०" [ ४. १. १२. ] इति द्वित्वे-दधन्ति । "भृ-मृ०" [ उणा० ७१६. ] इत्युप्रत्यये-धनुः-अस्त्रं दानमानं च । "कृषि-चमि-तनि-धन्यन्दि०" [ उणा० ८२९. ] इति ऊप्रत्यये धनूः-धान्यराशिः, ज्या, वरारोहा च स्त्री ॥ ४३ ॥

अथ पान्ताश्चत्वारः-"रिप कुत्सायाम्" रेपति "अस्" [ उणा० ९५२. ] इति सूत्रविहितः सर्वधातुप्रकृतिकोऽस्-प्रत्ययः-रेपः-पापम् ॥ ४४ ॥

"कप कम्पने" कपति । "ऋ-कृ-मृ-वृ-तनि-तमि-चपि-कपि०" [ उणा० ४७५. ] इत्याले-कपालं-घटाद्यवयवः शिरोऽस्थि च । "कटि-पटि-कण्डि-गण्डि०" [ उणा० ४९३. ] इत्योले-कपोलः-गण्डः ॥ ४५ ॥

"क्षुप ह्रासे" "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के-क्षुपः-ह्रस्वशाखस्तरुः ॥ ४६ ॥

"टुप संरम्भे" टोपति, आटोपनम्, आटोपः ॥ ४७ ॥

अथ बान्तः, "बिम्ब दीप्तौ" बिम्बति ॥ ४८ ॥

अथ भान्ताः पञ्च-"रिभि स्तुम्भू स्कम्भू स्तम्भे" विरेभते स्म इत्यर्थे "क्षुब्ध-विरिब्ध०" [ ४. ४. ७०. ] इत्यादिसूत्रेण क्तान्तनिपातनादिटोऽभावे-विरिब्धः स्वरः, विरिभितमन्यत् ॥ ४९ ॥

स्तुम्भू इत्यस्य "स्तम्भू-स्तुम्भू०" [ ३. ४. ७८. ] इति श्ना-श्नोः सतोः-स्तुभ्नाति, स्तुभ्नोति । क्ये नस्य लुकि-स्तुभ्यते, ऊदित्वात् क्त्व वेटि-स्तुब्ध्वा, स्तुभित्वा, वेट्त्वनिमित्तक एव क्तयोः "वेटोऽपतः" [ ४. ४. ६२. ] इतीडभावः-स्तुब्धः, स्तुब्धवान् ॥ ५० ॥

स्कम्भू, अस्यापि पूर्वोक्तसूत्रेण श्ना-श्नोर्विधानाद् रूपे साम्यम्, विशेषश्च विष्कभ्नातीत्यत्र "वेः स्कभ्नः" [ २. ३. ५५. ] इति षः, 'स्कभ्नः' इति श्नानुकरणनिर्देशात् श्नौ तु विस्कभ्नोतीत्येव ॥ ५१ ॥

"स्कुम्भू विस्तारणे च" चात् स्तम्भे, प्राग्वदेव सर्वकार्यं श्नाश्वादि, केवलं "जम्बीर०" [ उणा० ४२२. ] इत्यादिसूत्रे ईरप्रत्ययान्तनिपातनात्-कुम्भीरः-जलचरः । "ककुप्-त्रिष्टुबनुष्टुभः" [ उणा० ९६२. ] इति सूत्रे कपूर्वस्य स्कुभ्नातेः 'ककुप्' निपात्यते, कं-वायुं ब्रह्म च स्कुभ्नन्तीति ककुभो दिशः, कुपूर्वात् कुकुप्-उष्णिक्छन्दः । एतेषां धातूनामेकत्र प्रयोगो यथा—

"मुसलक्षेपहुङ्कारस्तोभैः कलभखण्डिनि ! ।
कुचविष्कम्भमुत्तभ्नन् निःस्कुभ्नातीव ते स्मरः ॥" इति,

[ कश्चिन्नायको नायिकायाश्चाटुं रचयति- ] हे कलभखण्डिनि ! धान्यनिस्तुषीकारिणि ! स्मरः, मुसलस्य क्षेपे धान्यखण्डनायोद्यमने, हुङ्काराणां-मुसलक्षेपकालजातानां स्वाभाविकानां हुमितिशब्दानां, स्तोभैः-विश्रामैः, ते-तव, कुचयोर्विष्कम्भं-विस्तारम्, उत्तभ्नन्-ऊर्ध्वीकुर्वन्, निस्कुभ्नातीव-विस्तारयतीवेत्यर्थः ॥ ५२ ॥

"दभ वञ्चने" दभति । अस्मात् "आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमः" [ ५. १. २०. ] इति ध्यणि दाभ्यः-वञ्चनीयः । बाहुलकात् स्वार्थे णिचि-दाभयति ॥ ५३ ॥

अथ मान्तौ द्वौ-"डिम हिंसायाम्" डेमति । "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के-डिमः-दृश्यकाव्यविशेषः काव्यानुशासनादौ लक्षितः । अस्मादेव "डिमेः कित्" [ उणा० ३५६. ] इति किति डिमे-डिण्डिमः-वाद्यविशेषः ॥ ५४ ॥

"धम शब्दे" दधाम । धमतीत्यादि तु ध्मांधातुनाऽपि सिध्यति । "ध्वसि-रसि-रुचि०" [ उणा० २६९. ] इति सूत्रे आदिग्रहणादस्मादप्यने-धमनः-तृणजातिः । "भिल्ला-ऽच्छभल्ल-सौविदल्लादयः" [ उणा० ४६४. ] इति सूत्रे आदिग्रहणेन निपातनात्-धम्मिल्लः-केशपाशः । "सदि-वृत्यमि-धमि०" [ उणा० ६८०. ] इत्यनौ-धमनिः-मन्या रसवहा शिरा च ॥ ५५ ॥

अथ यान्तः-"पीय पाने" पीयति । "खलि-फलि-बृ-पृ०" [ उणा० ५६०. ] इत्यूषे-पीयूषं-प्रत्यग्रप्रसवक्षीरविकारः, अमृतं घृतं च । "लाक्षा-द्राक्षा-भिक्षादयः" [ उणा० ५९७. ] इति सूत्रे आदिशब्देन निपातनात्-पीयूक्षा-द्राक्षाविशेषः ॥ ५६ ॥

अथ रान्तास्त्रयः—“उर गतौ” ओरति । “उरेरशक्” [ उणा० ५३१. ] इति किल्यशे—उरशः—ऋषिविशेषः ॥ ५७ ॥

“तुर त्वरणे” तोरति । आङ्पूर्वादस्मात् “नाम्युपान्त्य०” [५. १. ५४.] इति के—आतुरः—रोगी । केवले तु—तुरः—शीघ्रगामी । तुरो गच्छतीत्यर्थे “नाम्नो गमः०” [ ५. १. १०१. ] इति डे—तुरगः । “दॄ-कॄ-शॄ-पॄ-भॄ-वॄ०” [ उणा० १८७. ] इति सूत्रे उपलक्षणार्थत्वोपगमादस्मादपि अणे—तोरणम् । “नाम्युपान्त्य-कॄ-गॄ-शॄ-पॄ-पूङ्भ्यः कित्” [ उणा० ६०९. ] इति किति इप्रत्यये—तुरिः—तन्तुवायोपकरणम् ॥ ५८ ॥

“तन्द्रि साद-मोहयोः” सादो विषण्णता, मोहो मौढ्यम्। तन्द्रते । ततन्द्रे । तन्द्रितः । तन्द्रा—आलस्यम्, “क्तेटो गुरोर्व्यञ्जनात्” [ ५. ३. १०६. ] इत्यप्रत्ययः । “तॄ-स्तॄ-तन्द्रि-तन्त्र्यविभ्य ईः” [उणा० ७११.] इति ईप्रत्यये-तन्द्रीः—मोहनिद्रा ॥ ५९ ॥

अथ लान्ताः षट्—“चुल परिवेष्टने” चोलति । “नाम्युपान्त्य०” [ ५. १. ५४. ] इति के—निचुलः । अचि—चोलः ॥ ६० ॥

“उल दाहे” ओलति । “निष्क-तुरुष्क०” [ उणा० २६. ] इति निपातनात्-उल्का-औत्पाकं ज्योतिः, अग्निज्वाला च । केचिज्ज्वलेरेवायमुलादेशो निपातनादिति वर्णयन्ति। “शम्बूक-शाम्बूक-वृधूक-मधूकोलूकोरुबूक-वरूकादयः” [ उणा० ६१. ] इति निपातनाद्—उलूकः-काकारिः, प्रकृतसूत्रे बृहद्वृत्तौ च ‘अलेरुच्चोपान्त्यस्य’ इत्युक्त्वोलूकशब्द उदाहृत इति तदनुसारमयमलधातुनाऽपि साध्यः । “तुरुष्क०” [ उणा० २६. ] इत्यादिसूत्रबृहद्वृत्तावपि उल्कशब्दव्युत्पादनसमये ‘ज्वलेरुलादेशश्च, उलेः सौत्रस्य वा’ इत्युक्तत्वादस्य सौत्रत्वप्रसिद्ध्याऽनेनापि उल्कशब्दः सिध्यतीति मत्वाऽस्माभिरुदाहृतम् । “विष्टपोलप-वातपादयः” [ उणा० ३०७. ] इति सूत्रे निपातनात्—उलपः—ऋषिः, उलपं-पर्वततृणं पङ्कजं जलं च । “उलेः कित्” [ उणा० ८२८. ] इति किति अक्षुप्रत्यये—उलक्षुः-तृणजातिः ॥ ६१ ॥

“लुल कम्पने” लोलति । लुलितम् । “कुलि-लुलि-कलि-कषिभ्यः कायः” [ उणा० ३७२. ] इति किति आये-लुलायः—महिषः ॥ ६२ ॥

“सल्ल गतौ” सल्लति । “दॄ-कॄ-नॄ-स्तृ-भृ-घृ०” [ उणा० २६. ] इति अके गौरादित्वाद् ङ्यां—सल्लकी—वृक्षविशेषः, सत्कृत्य लक्ष्यते—स्वाद्यते गजैरिति वा—सल्लकीति प्रकृतसूत्रे बृहद्वृत्तिः ॥ ६३ ॥

“हल्ल घूर्णने” हल्लति । “दॄ-कॄ०” [ उणा० २७. ] इत्यके—हल्लकी—रक्तोत्पलजातिः । यद्यपि “दॄ-कॄ०” [ उणा० २७. ] इति सूत्रे हल्लिर्न पठ्यते तथापि बहुवचननिर्देशादवगम्यते इति व्युत्पादितम् ॥ ६४ ॥

“भिलण् भेदे” भेलयति । णिचोऽनित्यत्वे केवलादचि—भेलः—तरण्डः, ड लयोरैक्यात्—भेडः—अजः । “विलि-भिलि०” [ उणा० ३४०. ] इति किति मे—भिल्मं—भास्वरम् ॥ ६५ ॥

अथ वान्तौ द्वौ—“धन्व तव गतौ” धन्वति । “उक्षि-तक्षि०” [ उणा० ९००. ] इत्यन्प्रत्यये—धन्वा—मरुः, धनुश्च ॥ ६६ ॥

तव, तवति । “तवेर्वा” [ उणा० ५५० ] इति णिति इषे—ताविषः, तविषो वा-स्वर्गः, ताविषं तविषं वा—बलं तेजश्च । टिद्विधानात् स्त्रियां ङ्यां ताविषी तवषी च—वात्या देवकन्या च ॥ ६७ ॥

अथ शान्तास्त्रयः—“पशी स्पशी बाधन-ग्रथनयोश्च” बाधनं प्रतीघातः, चाद् गतौ, पशति, पशते । गतौ कुटिलार्थे यङि “जप—जभ०” [ ४. १. ५२. ] इति म्वागमे—पम्पश्यते । यङ्लुपि—पम्पशीति पम्पष्टि ॥ ६८ ॥

स्पशी—स्पशते, स्पशति। णौ ङे सन्वद्भावापवादभूते “स्मॄ-दॄ-त्वर-प्रथ-म्रद-स्तॄ-स्पशेरः” [ ४. १. ६५. ] इति द्वित्वे पूर्वस्य अत्वे—अपस्पशत् । णौ क्ते “णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञसम्” [ ४. ४. ७४. ] इति सूत्रेण णिलुग्-ह्रस्वयोः समुच्चयेन वैकल्पिके निपातने- स्पष्टं स्पाशितम्। अचि—स्पशः—चरः । घञि—स्पाशः—बन्धनम् । अत एव सेयमुभयतःपाशा रज्जुरिति प्रयुज्यते । “स्पशि-भ्रस्जेः स्लुक् च” [ उणा० ७३१. ] इति उः प्रत्ययः स्लुक् चेति—पशुः—तिर्यङ् मन्त्रवध्यश्च जनः ॥ ६९ ॥

“ऋशत् गति-स्तुत्योः” ऋशति । “ऋशि-जनि-पुणि-कृतिभ्यः कित्” [ उणा० ३६१. ] इति किति ये—ऋश्यः—मृगजातिः ॥ ७० ॥

अथ षान्तौ द्वौ—“भिष भये” भेषति रोगोऽस्मादित्यर्थे “भिषेर्भिष-भिष्णौ च वा” [ उणा० १३१. ] इत्यजप्रत्यये पाक्षिके भिषादेशे—भिषजः, भिष्णादेशे च—भिष्णजः—वैद्यः । उभयोरादेशयोरभावे—भेषजम्—औषधम् । “ऋधि-पृचि-भिषिभ्यः कित्” [ उणा० ८७४. ] इति किति अज्प्रत्यये—भिषक्—वैद्यः । “सम्प्रदानाच्चान्यत्रोणादयः” [ ५. १. १५. ] इत्यनेनापादाने उणादिप्रत्ययानां निषेधेऽप्येते शब्दा भीमादिषु कृतपाठानुमानाः “भीमादयोऽपादाने” [ ५. १. १४. ] इति सूत्रेणैवाजा-ऽज्प्रत्ययान्ता अनुशिष्टा इति विज्ञेयं लक्ष्यानुरोधात् ॥ ७१ ॥

"युषी सेवने" योषति, योषते। "हृ-सृ०" [उणा० ८८७.] इति इत्प्रत्यये–योषित् स्त्री । प्रकृतसूत्रबृहद्वृत्तौ च योषति–गच्छति पुरुषमिति व्युत्पत्तिरुपदिष्टेति युष्धातोर्गत्यर्थत्वमपि तदनुमतमिति प्रतिभाति। "युष्यसिभ्यां क्मत्" [ उणा० ८९९. ] इति किति मदि–युष्मत्, अत्र युषेः सेवनार्थत्वमुक्तम् ॥ ७२ ॥

अथ सान्तास्त्रयः–"लुस हिंसायाम्" लोसति। "ऋषि-वृषि-लुसिभ्यः कित्" [ उणा० ३३१. ] इति कित्यभे–लुसभः–हिंस्रः, मत्तहस्ती वनं चेति बृहद्वृत्तिः, लुसभो बालहस्तीति केचित् ॥ ७३ ॥

"पसी गति-बन्धन-निवासेषु" पसते, पसति। गतौ कुटिलार्थे यङि "जप-जभ०" [४. १. ५२.] इति सूत्रे दन्त्यान्तस्यापि पाठस्येष्टत्वाद् म्वागमे पम्पस्यते। यङ्लुपि–पम्पसीति, पम्पस्ति। बन्धने बाहुलकात् स्वार्थिके णिचि–पासयति पाशैरश्वम् । निवासे "मृ-शी-पसि-वस्यतिभ्यस्तादिः" [ उणा० ३६०. ] इति तादौ ये-पस्त्यं गृहम् ॥ ७४ ॥

"भसक् भर्त्सन-दीप्त्योः" अयं ह्वादिः, "ह्वः शिति" [ ४. १. १२. ] इति द्विर्त्वे–बभस्ति, क्ते–भसितम्। "हु या-मा-श्रु-वसि-भसि०" [ उणा० ४५१. ] इति त्रे स्त्रियां–भस्त्रा–चर्ममयमावपनमुदरं च। अत्रोक्तं बृहद्वृत्तौ–"भसिं जुहोत्यादौ स्मरन्ति"। तथा च पाणिनीयादौ "भस भर्त्सन-दीप्त्योः" इति जुहोत्यादिगणे पठ्यते। "मन्" [ उणा० ९११. ] इति सर्वधातुप्रकृतिके मनि–भसितं तदिति भस्म–भूतिः ॥ ७५ ॥

अथ हान्तौ द्वौ–"लुहं हिंसा-मोहयोः" लोहति। अनुस्वारेत्वात् "एकस्वरादनुस्वारेतः" [ ४. ४. ५६. ] इतीडभावे–लोढा, लोढुम्। अचि–लोहम्। "मृदि-कन्दि०" [ उणा० ४६५. ] इत्यलप्रकरणे "मुरलोरल०" [ उणा० ४७४. ] इति सूत्रे आदिग्रहणाद् लोहलोऽपि निपात्यते, स चास्फुटवाचि रूढ इति केचित्। "मुरलोरल०" [ उणा० ४७४. ] सूत्रे च काहलशब्दोऽव्यक्तवाचि जने व्युत्पादितः, काहला–वाद्यविशेष इत्यपि तत्रैव। लोहलशब्दश्च तत्र न दृश्यते ॥ ७६ ॥

"रिहं हिंसा-कत्थनादौ" कत्थनं-श्लाघा। रेहति। अनुस्वारेत्वादिट् न–रेढा, रेढुम् । रिह्यत इति क्ते स्वार्थे के च कृते-रीढकः–पृष्ठवंशः । भिदादित्वादङि गणे निपातनात्–रीढा–अवज्ञा ॥ ७७ ॥

अथ क्षान्तौ द्वौ–यद्यपि मूर्धन्यान्तत्वेनानयोः षान्तेषु पाठो युक्तस्तथापि वर्णमालासु क्षस्य पृथगपि पाठस्य लोकव्यवहारदृष्टत्वेन वैचित्र्यार्थमन्ते पठितौ, एवमग्रे परपठितधातुष्वपि क्षान्तानामन्ते पाठे हेतुरूह्यः। "चुक्ष शौचे" चुक्षति। क्ते–चुक्षितः। "क्तेटो गुरोर्व्यञ्जनात्" [ ५. ३. १०६. ] इत्यप्रत्यये–चुक्षा, चुक्षा शीलमस्येत्यर्थे "अङ्गस्थाच्छत्रादेः" [ ६. ४. ६०. ] इत्यञि चौक्षः, तस्य भावः कर्म वा "पतिराजान्त०" [७. १. ६०.] इति ट्यणि–चौक्ष्यम्॥७८॥

"चिक्षि विद्योपादाने" चिक्षते, चिक्षितः, चिक्षा, इति पूर्ववत् ॥ ७९ ॥

इत्येतेषां धातूनां सौत्रत्वाल्लक्ष्यानुरोधाच्च सिद्धिः ॥

अथ गहयतिं यावद् वक्ष्यमाणा धातवः प्रायश्चौरादिका एव, तत्र क्लवि, चुलुम्पि, कूचि, उद्घुषि, उल्लकसि, कंशत्यादिपञ्चकं, स्तनादिषट्कं च चुरादित्वप्रयुक्तं कार्यं न लभत इति विज्ञेयम् । चुरादयो धातवोऽसंख्येया एव सन्ति, तेषामियत्ताया अवधारयितुमशक्यत्वात्, अतश्च ते यथालक्ष्यदर्शनमेवानुसर्त्तव्याः । अत एव चन्द्रगोमीनामा वैयाकरणो द्वित्रानेव धातून् दिङ्मात्रप्रदर्शनार्थं चुरादिषु पठितवान्।

अथ पूर्वं लौकिका धातवो वर्ण्यन्ते, तत्र क्लविवर्जास्तेऽदन्ता विज्ञेयाः–"क्लवि वैक्लव्ये" विक्लवते। अचि–विक्लवः। अस्य लोके प्रयोगो यथा—

"मिलन्त्याशासु जीमूता विक्लवन्ते दिवि ग्रहाः।" इति 'विक्लवन्ते' इत्यस्य विच्छायीभवन्तीत्यर्थः।

"निसर्गदुर्बोधमबोधविक्लवाः,
क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया,
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥"

[ किरातार्जुनीये स० १ श्लो० ३ ] इति च भारविः ॥१॥

"वीजण् व्यजने" वीजयति। "राजहंसैरवीज्यन्त" [          ] इति कर्मणि लौकिकप्रयोगः। ङे अदन्तत्वेन "अतः" [ ४. ३. ८२. ] इत्यलुकि समानलोपित्वात् "उपान्त्यस्य०" [ ४. २. ३५. ] इत्यनेनोपान्त्यह्रस्वाभावे–अविवीजत्। विपूर्वस्य "ईजि कुत्सने" इत्यस्य च णौ वीजयतीत्यत्र सारूप्येऽपि "व्यैजयत्, व्यैज्यन्त, व्यैजिजत्' इत्यादिरूपं स्यादिति भेदः ॥ २ ॥

"हीलण् निन्दायाम्" हीलयति। ङे प्राग्वदुपान्त्यह्रस्वाभावे–'अजिहीलत्' इति रूपम्। क्ते–हीलितः। "णि-वेत्त्या०" [ ५. ३. १११. ] इत्यने–हीलना। णिचोऽनित्यत्वे "क्तेटो गुरोर्व्यञ्जनात्" [ ५. ३. १०६. ] इति 'अ'प्रत्यये–हीला ॥३॥

"अन्दोलण् हिन्दोलण् प्रेङ्खोलण् दोलने" दोलनम्–उत्क्षेपः। ङे "स्वरादेर्द्वितीयः" [ ४. १. १४. ] इति द्वितीयांशस्य द्वित्वे तत्रापि "न बदनं०" [ ४. १. ५. ] इति नस्य द्वित्वनिषेधे समानलोपित्वाच्च "उपान्त्यस्य०" [ ४. २. ३५. ] इति ह्रस्वाभावे–आन्दुदोलत् ॥ ४ ॥

हिन्दोलण्-हिन्दोलयति। अजिहिन्दोलत् ॥ ५ ॥

प्रेङ्खोलण्–प्रेङ्खोलयति । डे-अपिप्रेङ्खोलत् ॥ ६ ॥

"रूषण् रूक्षण-व्याप्त्योः" रूषयति । अटन् रूषयति भुवमित्यर्थे पृषोदरादित्वात्–आटरूषकः । ङे समानलोपित्वाद् ह्रस्वाभावे-अरुरूषत् । लक्ष्यं यथा—

"परिभ्रमन् लोहितचन्दनोचितः,
पदातिरन्तर्गिरिरेणुरूषितः ।
"महारथः सत्यधनस्य मानसं,
दुनोति नो कच्चिदयं वृकोदरः ॥"

[ किरात० स० ३ ] इति भारविः ।

एवमादयो धातवो लौकिकप्रयोगेषु प्रसिद्धाः, प्रकृतधातुपाठादिषु पाठाभावेऽपि लक्ष्यानुरोधादनुसर्त्तव्या इति शास्त्रकृतां परामर्शः ।

अथ वाक्यकरणीयाः "चुलुम्प च्छेदने" चुलुम्पति । "कञ्चुकां-ऽशुक-नंशुक-पांशुक०" [ उणा० ५७. ] इत्यादिसूत्रे निपातनादन्त्यस्वरादिलोपपूर्वके किदुकप्रत्यये–चुलुकः–करकोशः । "कीचक-पेचक०" [ उणा० ३३. ] इत्यादिसूत्रे आदिग्रहणात्–चुलुम्पकः–कृमिजातिः । लक्ष्यं यथा—

"निपानं दोलयन्नेष प्रेङ्खोलयति मे मनः ।
पवनो वीजयन्नाशा ममाशामुच्चुलुम्पति ॥" [ ] ॥१॥

"कूच उद्भेदने" कूचति "नाम्नि पुंसि च" [५. ३. १२१.] इति णके स्त्रियां–कूचिका–चित्रकरलेखनी कुञ्चिका च ॥ २ ॥

"घटण् बन्धने" निर्घाटयति । णके–घाटकः । णिचोऽनित्यत्वात्तदभावेऽचि घटः–तुला ॥ ३ ॥

"उल्लुडण् उट्टीकने" अदन्तः । उलयोरभेदाद्–उल्लुलयतीत्यपि । तथा च माघः—

"अग्रे क्रमेलकसमागमभीतभीत–
स्तावत् खरः प्रखरमुल्लुलयांचकार ।
यावच्चलासनविलोलनितम्बबिम्ब–
विस्रस्तवस्त्रमवरोधवधूः पपात ॥"

[ शिशुपालवधे ],

अत्रालुकः स्थानिवत्त्वादुपान्त्यगुणो न ॥ ४ ॥

"अवधीरण् अवज्ञायाम्" । लक्ष्यं यथा–"तत्र धर्ममवधीरय धीर०" [ ] ङे आववधीरत् ॥ ५ ॥

"उद्धुषत् उल्लकसत् उच्छ्वसने" प्रथमः कुटादिः, उद्धुषत्युल्लकसति चाङ्गमनेन–उद्धुषणमुल्लकसनं च–रोमाञ्चः । अत्र "कुटादेः०" [ ४. ३. १७. ] इत्यनटो ङित्त्वाद् गुणाभावः । अत्र लौकिकानां वाक्यकरणीयानां च धातूनां ग्रन्थभेदेन पाठसाङ्कर्यं दृश्यते, केचित् कुत्रचिल्लौकिकेषु पठिता अपि, ग्रन्थविशेषे वाक्यकरणीयेषु निबद्धाः, वाक्यकरणीयत्वेनान्यत्र ख्याताश्च परत्र लौकिकेषु पठिता दृश्यन्ते । लक्षणभेदश्चैषामवलोक्यते, तेनैषां लौकिकत्वस्य वाक्यकरणीयत्वस्य च निश्चयो लक्ष्यैकचक्षुष्कैरेवावधारणीयः, न तु लक्षणैकचक्षुष्कैरस्माभिर्लक्षणस्य तादृशस्यानुपलब्धेरिति न तदर्थं प्रयत्यते । यानि चैषां लक्षणानि विवरणे प्रतिपादितानि तान्यपि प्रायिकान्येव ॥ ६–७ ॥

अथ सौत्र-लौकिक-वाक्यकरणीयेभ्योऽन्येऽपि येऽदन्ता धातवो धातुपारायणादौ पठितास्तेषामपि प्रयोगविशेषपरिज्ञानाय परेषां तद्वर्णनव्यवहारस्य च परिपालनायेह शिष्यबुद्धिवैशद्यार्थं प्रदर्शनं क्रियते–"खचण् बन्धने" "तडित् खचयतीवाशाः" इति वर्षावर्णने वाल्मीकिः, "आसने रत्नखचिते" इत्यादिश्च कवीनां बहुशः प्रयोगोऽस्य । अस्यादन्तत्वेन "अतः" [ ४. ३. ८२. ] इत्यलुकः स्थानिवद्भावादुपान्त्यवृद्धिर्न, ङे समानलोपित्वात् "असमानलोपे०" [ ४. १. ६२. ] इति पूर्वस्य सन्वद्भावो दीर्घश्च न ॥ १ ॥

"ओजण् बल-तेजसोः" ओजयति । सनि "स्वरादेः०" [ ४. १. ४. ]इति जेर्द्वित्वे-ओजिजयिषति, ङे- औजिजत्, न चालुकः स्थानिवद्भावाज्ज इत्यस्यैव द्वित्वं युक्तमिति कथं जिशब्दस्य द्वित्वमिति शङ्क्यम् "अतः" [ ४. ३. ८२. ] इत्यस्य वृत्तौ णिविषये अलुक् स्यादिति व्याख्याया दर्शनेन णेर्विषयतायामेवालुकः प्रवृत्त्या तस्य परनिमित्तकत्वाभावेन "स्वरस्य परे०" [ ७. ४. ११०. ] इत्यस्य च परनिमित्तकस्वरादेशस्यैव स्थानिवद्भावविधानात् स्थानिवत्त्वाप्रवृत्तेः, यद्यप्यत्रोपान्त्यकार्यस्य द्वित्वात् प्रबलत्वेन द्वित्वात् पूर्वम् "उपान्त्यस्य०" [ ४. २. ३५. ] इति ह्रस्वः प्राप्नोति तथापि समानलोपित्वेन न भवति । अचि सति-ओजं–विषमसंख्यास्थानम् । "अस्" [ उणा० ९५२. ] इति सर्वधातुप्रकृतिकेऽसि-ओजः–बलम् ॥ २ ॥

"स्फुटण् प्राकट्ये" स्फुटयति, अलुकः स्थानिवद्भावाद् गुणाभावः । स्फुटयत्यर्थमित्यचि-स्फोटः ॥ ३ ॥

"तुच्छण् आच्छादने" तुच्छयति ॥ ४ ॥

"स्कन्धण् समाहारे" स्कन्धयति । यद्यपि स्फुट-तुच्छ-स्कन्धादयः शब्दाः प्रसिद्धा एव, तेभ्यः करोत्यर्थे णिजि स्फुटं करोति स्फुटयतीत्यादयः प्रयोगाः साधयितुं शक्यन्त एव, तथा चैषामदन्तधातूनां चुरादौ पाठो नावश्यक इति प्रतिभाति, तथापि चुरादिषु पाठात् तेषां चानित्यणिजन्ततया क्वचिण्णिचं विनाऽपि धातुपाठप्रयुक्तः क्रियात्वेन प्रयोगः सिद्ध्येदित्यभिप्रायेणेह पाठः । एषां चादन्तत्वेनानेकस्वरत्वनिमित्तानि कार्याण्यपि भवन्ति, अन्यथा णिचोऽभावेऽनेकस्वरत्वाभावान्न स्युः, यद्यपि णिच्सन्नियोग एव चुरादीनामदन्तता इति सिद्धान्तस्तथापि

न्यायानां स्थविरयष्टिप्रायत्वेन तस्येहानाश्रयणं लक्ष्यानुरोधादिति ध्येयम् । तथा चानेकस्वरत्वादेकस्वरत्वनिमित्तको यङ् "व्यञ्जनादेकस्वरात्०" [ ३. ४. ९. ] इति विहितो न भवति, तथा "धातोरनेकस्वरात्०" [ ३. ४. ४६. ] इति परोक्षाया आम् च भवति, एवं शीलाद्यर्थे "निन्द-हिंस०" [ ५. २. ६८. ] इति णके-स्फुटक इत्यादि च सिध्यति । कैश्चित्तु-एवंप्रकाराणां धातूनामतो लुकं बाधित्वाऽन्त्यवृद्धिविधानात् प्वागमकरणाच्च स्फुटापयतीत्यादीनि रूपाणि सम्मतानि । अत्र कैश्चित् तुच्छधातोर्लक्ष्यप्रदर्शनाय माघकवेः "पांसुर्दिशां मुखमतुच्छय दुत्थितोऽद्रेः" [ शिशुपालवधे ६. ] इत्युदाहृतं, परन्तु साम्प्रतिके मुद्रितपुस्तके "पांसुर्दिशां मुखमतुत्थयदुत्थितोऽद्रेः" इत्येव पाठः समुपलभ्यते, पाणिनीयचुरादिगण पाठे च "तुत्थ आवरणे" इति पठ्यते, किमत्र युक्तमिति लक्ष्यैकचक्षुष्का एव निर्णेतुमलम् ॥ ५ ॥

"ऊषण् छेदने" ऊषयति । सनि "स्वरादेः०" [ ४. १. ४. ] इति षिशब्दस्य द्वित्वे-ऊषिषयिषति, ङे-औषिषत्, प्रागुक्तन्यायेन अल्लुको णिविषयतायामेव विधानात् स्थानिवद्भावाभावः । 'मा भवानूषिषत्' इत्यत्रादन्तत्वेन समानलोपित्वाद् द्वित्वात् पूर्वं प्राप्तः "उपान्त्य०" [ ४. २. ३५. ] इति ह्रस्वो न ॥ ६ ॥ इत्यादि ।

अथ "कुशु [ 'कुशु' इति क्वचित् पाठः, किन्तु समुपलभ्यमानधातुपारायणपुस्तके 'कुशु' इत्येव पाठः समुपलभ्यते ] पिशु कुसु दसु त्रसु" अनुक्तार्थाः । उदित्त्वान्नागमे-कुंशतीत्यादिरूपाणि । यद्यप्येते चुरादौ भासार्थत्वेन पठिताः, किन्त्वार्थान्तरेऽपि ते धातवः सन्तीति धातुपारायणे कथितम्, परन्तु लक्ष्यादर्शनेनार्थानां निर्णयस्य कर्तुमशक्यत्वेनास्माभिरनुक्तार्थत्वेनोक्ताः, सति च लक्ष्यदर्शने प्रकरणवशादेवैषामर्थनिर्णयः कार्य इति हृदयम् । यद्यप्यन्येषामपीदृशानां धातूनामर्थनिर्णयायेयमेव गतिस्तथाप्येते दिगर्थमुक्ताः ॥ ५ ॥

अथ परपठिता धातवः, अत्र प्रकरणे ये धातवः परैरधिकाः पठ्यन्ते ते, ये च हैमधातुपाठे पठिता अपि परैरन्यथा पठ्यन्ते, तेऽपि प्रदर्श्यन्ते शिष्यबुद्धिवैशद्यार्थम् । तत्र प्रथमं त्रिंशददन्ता धातवः प्रदर्श्यन्ते-"खेडण् भक्षणे" खेडयति । ङे समानलोपित्वात् "उपान्त्यस्य०" [ ४. २. ३५. ] इति ह्रस्वाभावे-अचिखेडत् ॥ १ ॥

"पणण् विक्रये" ण्यन्तात् "युवर्ण-वृ-दृ-वश-रण-गमृद्ग्रहः" [ ५. ३. २८. ] इत्यलि अदन्तत्वादेव णिनिमित्तवृद्ध्यभावे णिलोपे-विपणः-विक्रयः, "पणि व्यवहार-स्तुत्योः" इत्यस्य चेवर्णाद्यन्तत्वाभावेनालोऽप्राप्त्या घञि-विपाण इति स्यात् ॥ २ ॥

"वित्तण् दाने" वित्तयति । क्ते-वित्तितः । क्त्वि-वित्तयित्वा । अदन्तत्वसामर्थ्यादतो लुगभावे तस्य मतान्तरप्रसिद्ध "अचो ञ्णिति" [ पा० सू० ७. २. ११५. ] इति वृद्धौ-वित्तापयतीत्यपीति केचित् ॥ ३ ॥

"कर्त्त कर्त्र कत्थण् शैथिल्ये" कर्त्तापयति । 'कर्त्तयति, अचकर्त्तत्' इत्यादि तु "कृतैत् छेदने" "कृतैप् वेष्टने" इत्याभ्यामपि स्वार्थिके णिचि स्यात् ॥ ४ ॥

कर्त्रण्-कर्त्रयति, कर्त्रापयति, कर्त्रितम् ॥ ५ ॥

कत्थण्-कत्थापयति । 'कत्थयति' इति तु "कत्थि श्लाघायाम्" इत्यस्यापि स्वार्थिके णौ सिद्धम् ॥ ६ ॥

"श्लथ शरण् दौर्बल्ये" श्लथयति । अशश्लथत्, अदन्तत्वनिबन्धनौ वृद्ध्यभाव-सन्वद्भावाभावौ ॥ ७ ॥

शरण्-शरयति । अदन्तत्वाद् वृद्धिर्न-अशशरत्, समानलोपित्वात् सन्वद्भाव-दीर्घौ न ॥ ८ ॥

"छदण् संवरणे" छदयति । यद्यपि छदेर्घटादिपाठात् णौ "घटादेः०" [ ४. २. २४. ] इति ह्रस्वे छदयतीत्यादिरूपमदन्तत्वाभावेऽपि सिध्यति, तथापि घटादौ ऊर्जनार्थकस्यैव पाठादिह संवरणरूपेऽर्थान्तरे तथा रूपसिद्धिः फलम् । किञ्च तस्य [ घटादेः ] प्रयोक्तृव्यापारविवक्षायामेव णेर्लाभ इह च स्वार्थेऽपीति विशेषः । यद्यपि "बहुलमेतन्निदर्शनम्" इत्युक्ततया घटादेरपि स्वार्थे णिर्लभ्यत एव, तथापि तस्यादन्तत्वाभावेन ङे 'अचिच्छदत्' इति रूपं स्यात्, अस्य चादन्ततया समानलोपित्वेन 'अचच्छदत्' इति रूपमिति विशेषः स्पष्ट एवेति चुरादावदन्ततया पाठ आश्रीयते ॥ ९ ॥

"लभण् प्रेरणे" अदन्तत्वाद् वृद्ध्यभावे-लभयति, लभितम् । "णि-वेत्ति०" [ ५. ३. १११. ] इति अने-विलभना ॥ १० ॥

"श्रपण् पाके" श्रपयति । ङे-अशश्रपत् । क्ते-पाकार्थे शृतमिति निपातनात्, शृतं-हविः क्षीरं वा, क्षीरहविर्भ्यामन्यत्र श्रपितमित्येव ॥ ११ ॥

"खादण् क्षेपे" खादयति । ङे-अचखादत् ॥ १२ ॥

"स्तन ध्वन स्वन स्यम शब्दे" । अनेकस्वरत्वहेतोर्भृशाभीक्ष्ण्येऽप्येभ्यो यङ् न भवति, तस्मादेव हेतोः परोक्षाया आमि-स्तनाञ्चकारेत्यादि रूपं भवति । शीलाद्यर्थे "निन्द-हिंस०" [ ५. २. ६८. ] इति णके-स्वनकः स्यमक इत्यादि । 'स्तनकः, ध्वनकः' इत्यादि 'स्तनयति, अतस्तनत्, ध्वनयति, अदध्वनत्' इत्यादि च यथा प्रकृताभ्यां स्तन-ध्वनाभ्यां सिध्यति तथा "स्तनण् गर्जे" "ध्वनण् शब्दे" इत्याभ्यां चुराद्यदन्ताभ्यां स्वपठितधातुभ्यामपि सिध्यति । स्वनस्य चावतंसन एव घटादित्वमित्यतोऽत्रादन्तेषु पाठादर्थान्तरेऽपि स्वनय-

तीति सिद्धम् । अदन्तत्वेन समानलोपित्वाच्च ङे–असस्वनदिति, स्यमस्य चासस्यमदिति, अनदन्तत्वे त्वनयोर्ङेऽसमानलोपित्वात् सन्वद्भावे–'असिस्वनत्, असिस्यमत्' इति रूपे स्याताम् । स्यमयतीति त्वदन्तत्वाभावेऽपि 'अमोऽकम्यमि-चमः" [ ४. २. २६. ] इति ह्रस्वे स्यादेव ॥ १३ ॥ ॥ १४ ॥ १५ ॥ १६ ॥

"षम ष्टम वैक्लव्ये" षोपदेशाविमौ । अत्र–शास्त्रे षम १–ष्टम २–षेकृ ३–ष्वर्त्ति ४–षाधि ५–षन्ति ६–षुन्भि ७–षुरि ८–षिलि ९–षान्त्व १०–ष्णुसि ११–ष्णसि १२–ष्टृहि १३–ष्टृंहि १४–ष्टृक्षय: १५ पञ्चदश धातवः सादित्वेऽपि पाठे षोपदेशाः सन्ति, ततश्च "षः सोऽष्ट्यै-ष्ठिव०" [ २. ३. ९८ ] इति षस्य सत्वे कृते सस्य कृतत्वेन "नाम्यन्तस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि" [ २. ३. १५. ] इति षत्वं भवति, तेनात्र णौ सनि–'सिषमयिषति, तिष्टमयिषति, इति रूपयोः सिद्धिः । णौ ङे अदन्तत्वात् सन्वद्भावाद्यभावे–'अससमत्, अतस्तमत्' इति । अनेकस्वरत्वाच्च यङपि न, परोक्षायाश्चाम् भवतीति–समाञ्चकार, स्तमाञ्चकारेत्यादि। शीलाद्यर्थे "निन्द-हिंस०" [ ५. २. ६८. ] इति णके–समकः स्तमक इति ॥ १७ ॥ १८ ॥

"ललण् ईप्सायाम्" ललयति, ङे पूर्ववत् सन्वद्भावाद्यभावात्–अललत् । "ललिण् ईप्सायाम्" इत्यस्य तूपान्त्यवृद्ध्या–लालयते, अलीललतेत्यादि ॥ १९ ॥

"मलण् धारणे" मलयति । "युवर्ण०" [ ५. ३. ३८. ] इत्यलि–परिमलः । "वल्पुल वल्पूल पल्पुल पप्पूल वल्पुलण् लवन-पवनयोः" पञ्चाप्येते ओष्ठ्यमध्याः । वल्पुलयतीत्यादि क्षेत्र-सबुसधान्ययोः कर्मतया प्रयोगे। ङे सन्वद्भावाद्यभावात्–'अववल्पुलत्' इत्यादि ॥ २१–२५ ॥

"कुमालण् क्रीडायाम्" कुमालयति, अचुकुमालदित्यादि । सुपूर्वादच्चि–सुकुमालः । रलयोरभेदात् सुकुमार इत्यपि ॥२६॥

"पशण् अनुपसर्गो वा" विकल्पेनादन्त इत्यर्थः । अयं च प्रकृतेऽनिर्दिष्टार्थोऽपि कैश्चिद् गत्यर्थ इष्टः । पशयति, पाशयति, अपपशत्, अपीपशदित्यादि, अदन्तत्वस्य वैकल्पिकत्वेन पक्षे वृद्धिः सन्वद्भावादि च भवति । अनुपसर्ग इति किम् ? उपसर्गे सति 'प्रपशति, प्रपशते' इत्यादि, पशी इति सौत्रस्योभयपदिनः प्रयोगेऽदन्तत्वनिबन्धनकार्याभावो यथा स्यात् ॥ २७ ॥

"शशण् कान्तौ" शशयति । ण्यन्तस्येवर्णान्ततया "युवर्ण०" [ ५. ३. २८. ] इत्यलि–शशः ॥ २८ ॥

"अन्सण् विभाजने" व्यंसयति । व्यंसको धूर्तः, मयूरव्यंसकः । सनि "स्वरादेः०" [ ४. १. ४. ] इति सेर्द्वित्वे–व्यंसिसयिषति, "शिड्ढेऽनुस्वारः" [ १. ३. ४०. ] इत्यत्र 'अनु' इत्यधिकारात् सर्वेषु कार्येषु कृतेषु पश्चात् तस्य प्रवृत्त्या द्वित्वे कर्त्तव्ये नकारस्यैव सत्वेन तस्य "न बदनं संयोगादिः" [ ४. १. ५. ] इति नकारस्य द्वित्वं निषिध्यते, एवं ङे–व्यंसिसत्, पूर्वमेवानुस्वारे तु तत्सहितस्य द्वित्वेऽनिष्टप्रयोगापत्तिः । अदन्तत्वसामर्थ्यात् कदाचिदतो लुगभावे वृद्धौ प्वागमे च–व्यंसापयतीत्यपि ॥ २९ ॥

"गहण् गहने" गहयति, गहापयतीत्यादि ॥ ३० ॥ इत्यदन्ताः परपठिताः ॥

अथ द्वावादन्तौ–"गाक् जन्म-स्तुत्योः" ह्वादिरयम्, "ह्वः शिति" [ ४. १. १२. ] इति द्वित्वे- जगाति ॥ ३१ ॥

"माङ्च् माने" मायते, श्यस्य शित्त्वादत्र "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इतीत्वं नास्ति तत्राशितीत्युक्तत्वात् । "नेर्ङ्मा-दा०" [ २. ३. ९७. ] इति नेर्णत्वे–प्रणिमायते ॥ ३२ ॥

अथ चत्वार इदन्ताः–"किक् ज्ञाने" ह्वादित्वात् "ह्वः शिति" [ ४. १. १२. ] इति द्वित्वे–चिकेति ॥ ३३ ॥

"क्षि जिरिद् हिंसायाम्" क्षिणोति ।

"यदि नाम जिगीषयापि ते निपतेयुर्वचनेषु वादिनः ।
चिरसंगतमप्यसंशयं क्षिणुयुर्मानमनर्थसंचयम् ॥"
[ सिद्धसेनीयचतुर्थद्वात्रिंशिकायां श्लो० १४ ]

तथा—

"शस्त्रेण रक्ष्यं यदशक्यरक्षं, न तद्यशः शस्त्रभृतां क्षिणोति ।"
[ रघुवंशे द्वि० स० ] इति कालिदासः ।

"क्षिणूयी हिंसायाम्" इत्यस्य तु गुणे–क्षेणोतीति स्यात् ३४ जिरिद्–जिरिणोति ॥ ३५ ॥

"चिग्ण् चये०" अयं चुरादिरपि घटादिः, "घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे" [ ४. २. २४. ] इति ह्रस्वे–चययति । "चिस्फुरोर्नवा" [ ४. २. १२. ] इत्यात्वं त्वस्य परैर्नेष्यते । ञिणम्परे णौ तु वा दीर्घे–अचायि, अचयि, चायं चायं, चयं चयम् । णिजनित्यत्वपक्षे च–चयति, चयते । अचुरादेरघटादेश्च "चिंग्ट् चयने" इत्यस्य तु–चिनुते, चिनोतीत्यादि, णौ तु "चिस्फुरोर्नवा" [ ४. २. १२. ] इत्यात्वविकल्पनात्–चापयति, चाययतीत्यादि, ञिणम्परे णौ तु–अचापि, चापं चापम्, अचायि, चायं चायम्, इति भवति । पाणिनीयैस्तु–चौरादिकस्य घटादेरप्यात्वविकल्प इष्यत इति 'चपयति चययति' इति द्वैरूप्यं तस्यापि भवतीति स्पष्टं चुरादिगणे वै० सिद्धान्तकौमुद्याम् ॥ ३६ ॥

अथ नव इदन्ताः–"दीधीङि दीप्ति-देवनयोः" दीधीते । क्तौ–निपातनाद् दीधितिः । ३७ । "ई वेवीङि प्रजन-कान्त्य-

सन-खादन-गतिषु" प्रजनं-प्रथमगर्भग्रहणम्, असनं-क्षेपः, अशनं वा-तृप्तिः । ईते गौः, प्रथमगर्भं गृह्णातीत्यर्थः । एवं-वेवीते ॥ ३८ ॥ ३९ ॥

"क्षीष्श् हिंसायाम्" क्षीणाति, क्षीतः, क्षीतवान् । षित्त्वात् "षितोऽङ्" [ ५. ३. १०७. ] इत्यङि-'क्षिया' इति तु "क्षिष्श् हिंसायाम्" इत्यस्मादपि सेत्स्यति ॥ ४० ॥

"व्रींश् वरणे" "भ्रींश् भरणे" एतौ प्वादी । "प्वादेर्ह्रस्वः" [ ४. २. १०५. ] इति ह्रस्वे-व्रिणाति, भ्रिणाति । प्वादित्वस्यास्वीकारे-व्रीणाति, भ्रीणातीत्यपि ॥ ४१ ॥ ४२ ॥

"प्लींश् शोषणे" ओष्ठ्योपान्त्योऽयम्, प्वादिर्ल्वादिश्चायम् । प्वादित्वाद् ह्रस्वे-लिप्नाति, ल्वादित्वाच्च क्त-क्तवतु-क्तीनां तकारस्य "ऋल्वादेरेषां तो नोऽप्रः" [ ४. २. ६८. ] इति नकारे-ल्पीनः, ल्पीनवान्, ल्पीनिः इति । अनुस्वारेत्त्वादिडभावे-ल्पेता, ल्पेतुम् ॥ ४३ ॥

"ल्वींष् गतौ" अस्य प्वादित्वं ल्वादित्वं वा नानुमन्वते, तेन 'ल्वीनाति' इति । क्तादीनामपि तकारस्य नकाराभावे-ल्वीतः, ल्वीतवान्, ल्वीतिः, इत्येव ॥ ४४ ॥

"ज्रीण् वयोहानौ" युजादिरयम्, ततश्च "युजादेर्नवा" [ ३. ४. १८. ] इति वा णिचि-ज्राययति, ज्रयति । "जॄण्" इत्यस्य तु-जारयति, जरतीति स्यात् ॥ ४५ ॥

अथ द्वावुदन्तौ-"खुंङ् गतौ" खवते, चुखुवे । अनुस्वारेत्त्वादिडभावे-खोता, खोतुम् ॥ ४६ ॥

"धुग्ट् कम्पने" धुनुते, धुनोति । लक्ष्यं यथा- 'पद्मान्तराणि च दुनोति धुनोति पक्षौ" "धूग्ट् कम्पने" इत्यस्य तु धूनोति, धूनुत इत्यादि, "धूगौदितः" [ ४. ४. ३८. ] इति वेटि-धूता धवितेत्यादि । अस्य चानुस्वारेत्त्वात्-धोता, धोतुम्, क्ते-विधुत इति । यथा "आराधयन्ति विधिवद् विधुतान्यकृत्याः" ॥ ४७ ॥

अथ त्रय ऊदन्ताः-"गूं गृत्च् पुरीषोत्सर्गे" अत्र द्वितीयस्य चित्त्वेऽपि प्रथमो भ्वादिरेव, अनुस्वारेच्च, द्वितीयस्तु तुदादिरिति विवेचनीयम्, एतदर्थसूचनार्थमेव चकारस्य प्रयोगोऽन्यत्र च तदप्रयोगः, अन्यत्र च सर्वत्रानेकधातुप्रान्तस्थेन काद्यनुबन्धेन तन्नत्यानां सर्वेषामेव तदनुबन्धफलभाक्त्वम् । गवति । अनुस्वारेत्त्वादिडभावे-अगौषीत् । गूत्वा । "गुंङ् शब्दे" इत्यस्य तु गवते, "धूड्-ह्रस्वात्०" [ ४. ३. ७०. ] इति सिज्लिकि-न्यगुत, क्त्वि गुत्वेति च भवति । गोता, गोतुं, गोतव्यमिति तूभयोः सममेव ॥ ४८ ॥

गृत्, कुटादिरयम्, तेन सिचः "कुटादेः०" [ ४. ३. १७. ] इति ङित्त्वे "सिचि परस्मै समानस्याङिति" [ ४. ३. ४४. ] इति वृद्धिर्न, इटि ईति च "धातोरिवर्ण०" [ २. १. ५०. ] इत्युवादेशे च-न्यगुवीत्, तृजादीनामपि ङित्त्वाद् गुणाभावे-गुविता, गुवितुं, गुवितव्यम् । क्त्वाप्रत्यये "उवर्णात्" [ ४. ४. ५८. ] इतीड्निषेधे-गूत्वा । "गुंत् पुरीषोत्सर्गे" इत्यस्य तु-अनुस्वारेत्त्वादिडभावे-न्यगुषीदित्यादि, गुता, गुतुं, गुतव्यमित्यादि च ॥ ४९ ॥

"दूद् हिंसायाम्" दूनोति "टुदुंट् उपतापे" इत्यस्य दुनोतीत्यादि भवति ॥ ५० ॥

अथ ॠदन्ता अष्टौ-"जॄं अभिभवे" जरति । यथा च "यमी जरति कर्माणि" इति । अनुस्वारेत्त्वादिडभावे-जर्त्ता, जर्तुम् । शीलार्थे "वयः-शक्ति-शीले" [ ५. २. २४. ] इति शाने जरमाणो नाम कश्चित्, तस्यापत्यं वृद्धमित्यर्थे "गर्गादेः०" [ ६. १. ४२. ] इति यञि-जारमाण्यः ॥ ५१ ॥

"घृक् क्षरण-दीप्त्योः" "सृक् गतौ" "हृक् बलात्कारे" त्रयो ह्वादौ, "हवः शिति" [ ४. १. १२ ] इति द्वित्वे-जघर्त्ति, ससर्त्ति, जहर्त्ति । ५२ । ५३ । ५४ ॥

"स्पृंट् पालन-प्रीत्योः" ओष्ठ्योपान्त्योऽयम् स्पृणोति, पस्पार । अनुस्वारेत्त्वादिण् न-स्पर्त्ता, स्पर्तुम् ॥ ५५ ॥

"ऋट् कृण्श् हिंसायाम्" ऋणोति । "ऋणूयी गतौ" इत्यस्य गुणे-अर्णुते, अर्णोतीति स्यात् ॥ ५६ ॥

"कॄश्, ल्वादिरयम्, तेन तो ने-कृणः, कृणवान्, कृणिः । कृग्शस्तु-कीर्णः, कीर्णवान्, कीर्णीरिति । कृणातीति तु कृग्शोऽपि स्यात् ॥ ५७ ॥

"वृग्श् वरणे" अयमपि ल्वादिः, तेन क्तादीनां तः "ऋल्वादेः०" [ ४. २. ६८. ] इति नकारे-वृणः, वृणवान्, वृणिः । वृग्शस्तु "ओष्ठ्यादुर्" [ ४. ४. ११७ ] इत्युरि-वूर्णः, वूर्णवान्, वूर्णिरिति । वृणातीति तूभयोस्तुल्यमेव ॥ ५८ ॥

अथ ॠदन्तास्त्रयः-"चॄ भक्षण-गत्योः" चीर्णा, अचारि गवा, आचीर्णं तपः । अस्य च क्त-क्तवत्वोरेव कृति प्रयोगो, न तु प्रत्ययान्तरे ॥ ५९ ॥

"पॄक् पालन-पूरणयोः" ह्वादिरयम् । तसि "हवः शिति" [ ४. १. १२. ] इति द्वित्वे पूर्वस्य "पृ-भृ-मा-हाङामिः" [ ४. १. ५८. ] इति इत्वे "ओष्ठ्यादुर्" [ ४. ४. ११७. ] इत्युरि "भ्वादेर्नामिनः०" [ २. १. ६३. ] इति दीर्घे च-पिपूर्त्तः, अन्तौ परे-पिपुरति, सप्तमीयाति-पिपूर्यात्; पिपर्त्तीत्यादि तु "पृंक्" इत्यस्यापि स्यादेव ॥ ६० ॥

"दॄङ्च् भये" दीर्यते । कर्मकर्त्तरि भाव-कर्मणोश्च 'दीर्यते' इति तु "दॄ भये" इत्यनेनापि सिध्यति ॥ ६१ ॥

अथ ओदन्तः-"ज्योङ् उपनयन-नियमन-व्रतादेशेषु" उपनयनं-मौञ्जीबन्धः, नियमः-संयमः, व्रतादेशः-संस्कारादेशः । क्ते-जीतः "ज्या-व्यधः क्ङिति" [ ४. १. ८१. ]

इति ण्वृत्। "व्यञ्जनान्तः स्थातोऽख्याध्यः" [ ४. २. ७१. ] इति नत्वं तु नेष्यते परैः, आगमानामनित्यत्वादिदपि न ॥६२॥

अथ कान्ताः पञ्च–"दकु कृच्छ्रजीवने" आङ्पूर्वात् हौ उदित्वान्ने आदङ्क, आदङ्केति त्याद्यन्तप्रतिरूपमव्ययमप्यस्ति ६३

"तिकृङ् टेकृङ् षेकृङ् गतौ" णौ ङे ऋदित्त्वात् "उपान्त्यस्य०" [ ४. २. ३५. ] इति ह्रस्वाभावे–अतितेकत्, अटिटेकत्; अनृदितोस्त्वेतयोः–अतीतिकत्, अटीटिकदिति स्यात्। 'तेकते, टेकते' इत्यादि तु ऋदितानृदितोस्तुल्यमेव। असिषेकत्, षेकः षोपदेशत्वेन "षः सः०" [ २. ३. ९८. ] इति षस्य सत्वे कृतत्वात् "नाम्यन्तस्था०" [ २. ३. १५. ] इति षत्वम्। एवं णौ सनि- सिषेकयिषति। केवलस्य तु षत्वापत्ते सनि "णिस्तोरेवास्वद-स्विद-सहः षणि" [ २. ३. ३७. ] इति नियमान्न षः–सिसेकिषते, अषोपदेशत्वे तु षस्य कृतत्वाभावेन षत्वप्राप्तेरेवाभावात्–असिसेकत्, सिसेकयिषतीत्येव स्यात्। 'सेकते' इत्यादि तु षोपदेशाषोपदेशयोरुभयोस्तुल्यमेव ॥ ६४ ॥ ६५ ॥ ६६ ॥

"चिकण् व्यथने" चिकयति। उणादावणे- चिक्कणः, असे–चिक्कसः-यवक्षोदः ॥ ६७ ॥

अथ खान्तास्त्रयः–"चखु गतौ" उदित्वान्ने–चङ्खति। किति नस्य लुगभावे–चङ्ख्यते चङ्खितः। "क्तेटः०" [ ५. ३. १०६. ] इति अः–चङ्खा ॥ ६८ ॥

"खक्ख हसने" खक्खति। खक्खितः। "क्तेटः०" [ ५. ३. १०६. ] इत्ये–खक्खा ॥ ६९ ॥

"लिखत् अक्षरविन्यासे" कुटादिरयम्, तेन तृजादिषु ङित्त्वाद् गुणाभावे–लिखिता, लिखितुम्, लिखनीयम्। अकुटादेस्तु–लेखिता, लेखितुम्, लेखनीयमित्यादि स्यात्। लिखतीत्यादि तूभयथापि। केचित् कड-स्फर-स्फलानपि कुटादौ पठन्ति, तत्पाठबलात् तेषां णिति वृद्धिनिषेधं चाहुः- यथा–कडकः, स्फरकः, स्फलक इत्यादि, तत् तु प्रकृते न प्रदर्शितम्, उक्तरूपाणामिष्टत्वेऽचप्रत्ययान्तात् स्वार्थे कपि सिद्धिसंभवात् ॥ ७० ॥

अथ घान्ताः पञ्च–"घग्घ हसने" घग्घति, घग्घितः, "क्तेटः०" [ ५. ३. १०६. ] इत्ये–घग्घा ॥ ७१ ॥

"दघ सघ तिघ चषघट् हिंसायाम्" दघ्नोति। घञि–दाघः, निदाघः ॥ ७२ ॥

सघट्–णौ सनि अषोपदेशत्वेन सस्य कृतत्वाभावात् षत्वाभावे–सिसाघयिषति। एवं णौ ङे–असीसघदित्यादि, षोपदेशत्वे तु षत्वमपि स्यादेव। सघ्नोतीतूभयथापि ॥ ७३ ॥

तिघट्–तिघ्नोति, तितेघ, ॥ ७४ ॥

चषघट्–चषघ्नोति। अनेकस्वरत्वात् परोक्षाया आमि चषघांचकार ॥ ७५ ॥

अथाष्टौ चान्ताः–"मुचि कल्कने" कल्कनं-दम्भः शाठ्यं कथनं च। मोचते ॥ ७६ ॥

"अचूग् अचुग् गतौ" अचते, अचति। आचे, आच। अचिता, अचितुम्। ऊदित्वात् क्त्वि वेटि–अक्त्वा, अचित्वा। "अञ्चू" इत्यस्य तु गतौ ऊदित्वात् क्त्वि वेटि–अङ्क्त्वा, अञ्चित्वेति द्वैरूप्यं स्यात् ॥ ७७ ॥

अचुग्–उदित्वान्ने–अञ्चति, अञ्चते। क्ये नस्य लुगभावे–अञ्च्यते। इटि–अञ्चितम्, यथा–"कुर्वन्नुदञ्चिते नेत्रे" "अञ्चूग्" इत्यस्य तु–ऊदित्वेन वेट्त्वात् क्तयोः "वेटोऽपतः" [ ४. ४. ६२. ] इतीड्निषेधे "अञ्चोऽनर्चायाम्" [ ४. २. ४६. ] इति नस्य लुकि च 'उदक्त' इति रूपं भवति ॥ ७८ ॥

"टुयाचृग् याञ्चायाम्" ड्वित्वात् "ड्वितोऽथुः" [ ५. ३. ८३. ] इत्यथौ–याचथुः। ऋदित्वात् णौ ङे उपान्त्यह्रस्वाभावे–अययाचत्। 'याचते' इत्यादि तु–"डुयाचृग्" इत्यतोऽपि स्यात् ॥ ७९ ॥

"विचूंकी पृथग्भावे" ह्वादिरयम्। "ह्वः शिति" [ ४. १. १२. ] इति द्वित्वेऽन्तौ–वेविचति, परेषामिष्टत्वेन "निजां शिति०" [ ४. १. ५६. ] इत्येत्वम्। वेवेक्तीत्यादि तु "विजृंकी" इत्यस्यापि स्यात्। णिगि–वेचयतीत्यादि। ऋदित्त्वादङि–अविचत्। विवेचनं, विवेकः, इत्यादि तु "विचूंपी पृथग्भावे" इत्यस्यापि स्यात् ॥ ८० ॥

"चर्चत् परिभाषणे" चर्चति। "नाम्नि पुंसि च" [ ५. ३. १२१. ] इति णके स्त्रियां–चर्चिका। चर्चती चर्चन्ती स्त्रीकुले वा, अत्र "अवर्णादश्नोऽन्तो वाऽतुरीङ्योः" [ २. १. ११५. ] इति विकल्पेनान्तादेशः ॥ ८१ ॥

"खचश् भूतप्रादुर्भावे" भूतप्रादुर्भावः–अतिक्रान्तस्य पुनरुत्पत्तिः। "तवर्गस्य०" [ १. ३. ६०. ] इति श्नो नस्य ञत्वे–खच्ञाति, हौ "व्यञ्जनाच्छ्नाहेरानः" [ ३. ४. ८०. ] इति श्नाहेरानादेशे-खचान, खचिता, खचितुम् ॥ ८२ ॥

"गुर्चण् निकेतने" "भ्वादे०" [ २. १. ६३. ] इति दीर्घे–गूर्चयति ॥ ८३ ॥

अथ छान्तः-"पिच्छत् बाधने" पिच्छति, पिपिच्छ, पिच्छिता, पिच्छितुम्, पिच्छती पिच्छन्ती स्त्री कुले वा। अचि स्त्रियां–पिच्छा ॥ ८४ ॥

अथ जान्ताः सप्त–"लुजु हिंसा-बल-दान-निकेतनेषु" उदित्वान्ने–लुञ्जति। क्ये नस्य लुगभावे–लुञ्ज्यते ॥ ८५ ॥

"भ्रिज गतौ" भ्रेजति। यङि–देभ्रिज्यते। यङ्लुपि देभ्रिजीति, देभ्रेक्ति। भ्रजेस्तु भर्जति, दरीभृज्यत इत्यादि ॥ ८६ ॥

"रिजि गति-स्थाना-ऽर्जनोर्जनेषु" ऊर्जनं-प्राणनम्। आगमानित्यत्वादिटोऽभावे–उद्रिक्तः ॥ ८७ ॥

"ओनजैङ् व्रीडे" नजते । क्ते–ओदित्त्वात् तो ने, ऐदित्त्वाच्च "डीयश्वि०" [ ४. ४. ६१. ] इति क्तयोरिड्निषेधे–नग्नः, नग्नवान्, स्वार्थे के स्त्रियां–नग्निका–अरजाः स्त्री । प्रानजिष्ट, अणोपदेशत्वात् "अदुरुपसर्गान्तरो०" [ २. ३. ६६. ] इति नस्य णो न ॥ ८८ ॥

"मृजैकि संपर्चने" मृक्ते । ऐदित्वात् "डीयश्वि०" [ ४. ४. ६१. ] इत्यनेन क्तयोरिड्निषेधे–मृक्तः, मृक्तवान् ॥ ८९ ॥

"वृजैप् वर्जने" "रुधां स्वराच्छ्नो नलुक् च" [ ३. ४. ८२. ] इति श्नेऽन्तौ वृञ्जन्ति, ववर्ज । घञि जस्य गत्वे–वर्गः । वृणक्तीत्यादि तु "वृचैप् वरणे" इत्यनेनापि स्यात् ॥ ९० ॥

"मर्जण् शब्दे" मर्जयति । क्ते–मर्जिता–रसाला ॥ ९१ ॥

अथ टान्तास्त्रयोदश–"शौटृ गर्वे" शौटति, शुशौट । ऋदित्वात् णौ ङे "उपान्त्यस्य०" [ ४. २. ३५. ] इति ह्रस्वाभावे–अशुशौटत् ॥ ९२ ॥

"यौटृ सम्बन्धे" सम्बन्धः–श्लेषः । यौटति, युयौट । ऋदित्वात्–अयुयौटत् । णके–यौटकं–युग्मम् । यौटितः, ॥ ९३ ॥

"मेटृ म्रेटृ म्लेटृ लौटृ उन्मादे" । मेटति, म्रेटति, म्लेटति, लौटति । ऋदित्त्वादुपान्त्यह्रस्वाभावे अमिमेटत्, अमिम्रेटत्, इत्यादि ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥

"स्फटु विशरणे" उदित्वान्नागमे–स्फण्टति वस्त्रम् । क्विति नस्य लुगभावे–स्फण्ट्यते । णिगि स्वार्थे णिचि वा–स्फण्टयति ॥ ९८ ॥

"मुटु प्रमर्दने" मुण्टति । अचि–मुण्टः । "ते हुन्ति कुण्ट-मुण्टा" ॥ ९९ ॥

"नट नृत्तौ" अणोपदेशत्वात् णत्वाभावे प्रनटति । णौ–प्रनाटयति, नतावेवास्य घटादित्वादत्र न ह्रस्वः । णोपदेशस्य घटादेस्तु–प्रणटति, प्रणटयतीत्यादि स्यात् ॥ १०० ॥

"णटि नतौ च" चान्नृत्तौ । "पाठे धात्वादेः०" [ २. ३. ९७. ] इति णस्य ने कृते णोपदेशत्वात् "अदुरुपसर्ग०" [२. ३. ७७.] इति णत्वे प्रणटते । नेटे, नेटाते, नेटिरे ॥१०१॥

"अट्टि अद्दति हिंसा-ऽतिक्रमयोः" अतिक्रमः–उल्लङ्घनम् । सनि इटि ट्टेर्द्वित्वे "व्यञ्जनस्यानादेः" [ ४. १. ४४. ] इति टस्य लुकि–अतिट्टिषते । 'अद्ट' इति दोपान्त्यस्य तु सनि इटि "न बदनम्०" [ ४. १. ५. ] इति दस्य द्वित्वनिषेधात् "स्वरादेः" [ ४. १. ४. ] इति द्वितीयांशस्य टेरेव द्वित्वम्, "तवर्गस्य०" [ २. ३. ६०. ] इति दो डे तस्य "अघोषे प्रथमः०" [ २. ३. ५०. ] इति टे च 'अट्टिटिषते' इति स्यात् । 'अट्टते' इति तूभयोरपि स्यादेव । एवमद्दतेरपि बोध्यम् ॥ १०२ ॥

अद्दति–सनि इटि द्तेर्द्वित्वे "व्यञ्जनस्यानादेः" [ ४. १. ४४. ] इति तो लुकि–अटिद्दिषते, क्विपि "पदस्य" [ २. १. ८९. ] इति संयोगान्तलोपे–अद्, टान्तदोपान्त्यस्य तु 'अत्' इति । अत्र 'अद्दत्' इत्ययं तान्तोऽपि रूपादिसाम्याट्टान्तेषु पठितः । अग्रेऽपि पाठव्यतिक्रमेऽयमेवेदृश एव वा लाघवादिहेतुरूहनीयः ॥ १०३ ॥

"मिटुण् स्नेहने" स्नेहनं स्नेहयोजनम्, उदित्त्वान्ने–मिण्टयति ॥ १०४ ॥

"सुट्टण् अनादरे" डेऽषोपदेशत्वात् षत्वाभावे–असुसुट्टत्, सनि च तथैव–सुसुट्टयिषति, षोपदेशत्वे तु षत्वमपि स्यादेव, सुट्टयतीति चोभयोरपि ॥ १०५ ॥

"शटि शलिण् श्लाघायाम्" शाटयते । अटि–शाटः । "णिवेत्ति०" [ ५. ३. १११. ] इत्यने स्त्रीत्वात्–शाटना ॥ १०६ ॥

शलिण्–शालयते ॥ १०७ ॥

अथ ठान्तौ द्वौ–"रुठि प्रतीघाते" द्युतादिरयम् । रोठते, रुरुठे । अद्यतन्यां "द्युद्भ्यः०" [ ३. ३. ४४. ] वाऽऽत्मनेपदम्, पक्षे "शेषात्०" [ ३. ३. १२०. ] इति परस्मैपदं च तत्र "लृदिद्-द्युतादि०" [ ३. ४. ६४. ] इत्यङि–अरुठत्, आत्मनेपदे त्वङोऽप्राप्त्या–अरोठिष्ट ॥ १०८ ॥

"चुठुण् हिंसायाम्" चुण्ठयति ॥ १०९ ॥

अथ दश डान्ताः–"चुडु अल्पीभावे" उदित्वान्ने–चुण्डति, चुचुण्ड । अचि–चुण्डः ॥ ११० ॥

"पिड सङ्घात-शब्दयोः" अचि–पेडा–वस्त्रादिभाजनविशेषः ॥ १११ ॥

"कड्ड कार्कश्ये" क्विपि "पदस्य" [ २. १. ८९. ] इति संयोगान्तलोपे "विरामे वा" [ १. ३. ५१. ] इति डस्य विकल्पेन टत्वे–कड्, कट् । 'कद्ड' इति दोपधपाठे तु 'कद्, कत्' इति स्यात् । कड्डतीति तूभयोरपि ॥ ११२ ॥

"अड्ड अभियोगे" क्विपि प्राग्वत् कार्ये–अड्, अट् । सनि तु ड्डेर्द्वित्वे–अडिड्डिषति, दोपधस्य तु क्विपि प्राग्वत् अद्, अत्, सनि "न बदनम्०" [ ४. १. ५. ] इति दस्य द्वित्वनिषेधे डेरेव द्वित्वे–अड्डिडिषतीत्यादि च स्यात् । अड्डतीत्यादि तूभयोः समम् ॥ ११३ ॥

"चुड्ड हावकरणे" हावः–भावसूचनम् । क्विपि प्राग्वत्–चुड्, चुट्, दोपधस्य तु 'चुत्, चुद्' इति । चुड्डतीत्यादि तूभयोरपि ॥ ११४ ॥

"तुड्ड तोडने" तोडनं–दारणम्, यथा–"तुड्डत्यंहः सकलमचिरात् तोडयत्यश्रियं च ।" इति कविरहस्ये ॥ ११५ ॥

"क्ष्विड्डा अव्यक्ते शब्दे" क्ष्वेडति, अक्ष्वेडीत् । जीत्त्वात्

"ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः" [ ५. २. ९२. ] इति वर्तमाने काले क्ते–क्ष्विष्टः । आदित्त्वात् "आदितः" [ ४. ४. ७१. ] इतीण्निषेधः । अचि–क्ष्वेडः–विषम् । गेह एव क्ष्वेडतीत्यर्थे "ग्रहादिभ्यो णिन्" [ ५. १. ५३. ] इति णिनि "पात्रेसमितेत्यादयः" [ ३. १. ९१. ] इति तत्पुरुषसमासे निपातनात् तेनैव सप्तम्यलुपि च–गेहेक्ष्वेडी । भिदादित्वादङि क्ष्वेडा–सिंहनादः ॥ ११६ ॥

"ञिक्ष्विडाङ् मोचन-स्नेहनयोः" द्युतादिरयम् । क्ष्वेडते, अद्यतन्यां "द्युद्भ्यः०" [ ३. ३. ४४. ] इति विकल्पेनात्मनेपदम् , पक्षे "शेषात्" [ ३. ३. १००. ] इति परस्मैपदं च, तत्र सति द्युतादित्वादङि–अक्ष्विडत्, आत्मनेपदे तु नाङ्, तेन–अक्ष्वेडिष्ट । शीलाद्यर्थे "इङितः" [ ५. २. ४४. ] इत्यने–प्रक्ष्वेडनः–सर्वलोहमयो बाणः ॥ ११७ ॥

"अडट् व्याप्तौ" अड्णोति ॥ ११८ ॥

"ओलडुण् लडुण् उत्क्षेपे" उदित्त्वान्ने–लण्डयति । क्त-क्तवत्वोः परयोः "सेट्क्तयोः" [ ४. ३. ८४. ] इति णेर्लुकि ओदित्करणबलादिड्व्यवधानेऽपि "सूयत्योदितः" [ ४. २. ७०. ] इति क्तयोस्तकारस्य नत्वे–लण्डिनः, लण्डिनवान् । "णिवेत्ति०" [ ५. ३. १११. ] इत्यने स्त्रियां–लण्डना । णिचोऽनित्यत्वादभावे–लण्डति । अनित्यत्वादिटोऽप्यभावे ओदित्वात् क्तयोस्तो नत्वे "तवर्गस्य०" [ १. ३. ६०. ] इति णत्वे च–लण्ड्णः, लण्ड्णवान् । यदि त्वोकारस्य धात्ववयवत्वमेव नानुबन्धत्वमिति मतं तदा–ओलण्डयति, ओलण्डितः, ओलण्डितवान्, ओलण्डना, इत्यादिरूपाणि ॥११९॥

लडुण्–उदित्वान्नागमे–अवलण्डयत्युष्ट्रम् ॥ १२० ॥

"त्रुडिण् छेदने" उत्त्रोडयते तृणम् ॥ १२१ ॥

अथ णान्ताश्चत्वारः–"फण गतौ" अघटादिरयम् । णौ फाणयति गाम्, गत्यर्थस्यास्य घटादित्वाभावात् "घटादेः०" [ ४. २. २४. ] इति ह्रस्वो न । अनेकार्थत्वान्निःस्नेहनार्थोऽप्ययम्, यथा–फाणयति घटम्, निःस्नेहयतीत्यर्थः । फाण्यते द्रवत्वादिति–फाणितं–खण्डश्चोतः । घटादेस्तु ह्रस्वे–फणयति, फण्यते, फणितमित्यादि । फणतीत्यादि तूभयोरपि ॥ १२२ ॥

"अणिण् प्राणने" प्राणनं–जीवनव्यापारः । अण्यते, आणे ॥ १२३ ॥

"घृणू घणूयी दीप्तौ" तत्राद्यात् "तिक्कृतौ नाम्नि" [ ५. १. ७१. ] इति तिकि "न तिकि दीर्घश्च" [ ४. २. ५९. ] इति निषेधान् "अहन्पञ्चमस्य क्वि-क्ङिति" [ ४. १. १०७. ] इति दीर्घस्य "यमि-रमि-नमि-गमि०" [ ४. २. ५५. ] इति णलुकश्चाभावे "तवर्गस्य०" [ १. ३. ६०. ] तस्य टे–घृण्टिः । नान्तस्य तु तिकि 'न तिकि०' [ ४. २. ५९. ] इति दीर्घ-नलुकोर्निषेधे "ऋतां क्ङिति" "क्षुभ्नादीनाम्" [ १. ३. ३९. ] इति नस्य णत्वाभावे नान्तत्वे–घृन्तिरिति । अस्मादेव क्त्वाप्रत्यये, ऊदित्त्वाद् विकल्पेनेटि सेटः "क्त्वा" [ ४. ३. २९. ] इति कित्त्वनिषेधात्–घर्णित्वेति, इडभावे "यमिरमि०" [ ४. २. ५५. ] इति णस्य लुकि–घृत्वेति, क्त्वि चेट्त्वात् क्तयोरिडभावे णलुकि–घृतः, घृतवानिति, क्तौ णलुकि–घृतिरिति । 'घर्णोति, घर्णुते' इति तु नान्तणान्तयोस्तुल्यमेव ॥ १२४ ॥

घणूयी–घणुते, घणोति, जघाण, जघणे । ऊदित्वात्–क्त्वि वेटि-घणित्वा, इडभावे "यमि-रमि०" [ ४. २. ५५. ] इत्यन्तलुकि-घत्वा, वेट्त्वात् क्तयोरिडभावे–घतः, घतवानिति ॥ १२५ ॥

अथ तान्ताः षट्–"इतु बन्धने" उदित्वान्नागमे–इन्तति । किति नस्य लुगभावे–इन्त्यते । "गुरुनाम्यादेः०" [ ३. ४. ४८. ] इति परोक्षाया आमि–इन्ताञ्चकार ॥ १२६ ॥

"ज्युति भासने" उणादौ इसि प्रत्यये–ज्योतिः ॥ १२७ ॥

"कितक् ज्ञाने" ह्वादिरयम्, तस्मात् "ह्वः शिति" [ ४. १. १२. ] इति द्वित्वे–चिकेत्ति । न न चिकेत्तीत्यर्थे नखादित्वान्निपातने–नाचिकेतो नाम कश्चित् । 'केतति, केतनम्' इत्यादयस्तु भौवादिककितिना साधवः ॥ १२८ ॥

"पतिंच् ऐश्वर्ये" पत्यते अधिपतिं, अपस, पत्स्यते । धातुपारायणे त्वनुस्वारेतोऽन्यस्य 'पतिष्यते, अपतिष्ट' इतीडुदाहृतः, तच्चागमशास्त्रस्यानित्यत्वादिति कश्चित् । वस्तुतस्तु–आगमशास्त्रस्यानित्यत्वमिडभावे हेतुर्भवितुमर्हति, न तु निषेधस्याप्रवृत्तौ, तथा च प्रकृतधातोः परमतानुसारित्वेन तत्र चास्य सेट्त्वमेवेति तदनुसारमेव धातुपारायणीयपाठः संभवति । तत्र चानिट्कारिकास्वस्य धातोः पाठस्यानुपलम्भोऽस्त्येवेति बोध्यम् ॥ १२९ ॥

"वावृतु विवरणे" यथा-"ततो वावृत्यमाना सा रामशालां न्यविक्षत ।" इति [ भट्टिकाव्ये ], अत्र च वावृत्यमानेत्यस्य 'वरयन्ती' इत्यर्थः, शूर्पणखाया वर्णनप्रसङ्गोऽयम् । उदित्वात्–क्त्वि वेट्–वावर्त्तित्वा, वावृत्त्वा, वेट्त्वादेव क्तयोरिट् न–वावृत्तः, वावृत्तवान्, अत एव "वृत्ते तु वृत्त-वावृत्तौ" इति निघण्टुः ॥ १३० ॥

"ष्वर्त्तण् गतौ" षोपदेशत्वात् सिष्वर्त्तयिषतीत्यादिप्रयोगे सस्य षत्वम्, अषोपदेशत्वे तु सिस्वर्त्तयिषतीत्यादि स्यात् । स्वर्तयतीत्यादौ तु न भेदः ॥ १३१ ॥

अथ थान्तौ द्वौ–"पथ पाथिण् प्रक्षेपणे" छे–अपपथत् । "पृथण् प्रक्षेपणे" इत्यस्य "ऋदवर्णस्य" [ ४. २. ३७. ] इत्यनेन ऋकारस्य ऋकारे कृते–अपीपृथदिति रूपं भवति, ऋकारादेशाभावपक्षे च "लघोरुपान्त्यस्य" [ ४. ३. ४. ]

इति गुणे-अपपर्थदिति प्रकृतधातुसदृशमेव रूपं भवति । पर्थयतीति तु तुल्यमेव ॥ १३२ ॥

पार्थण्-पार्थयति । ङे-अपपार्थत् ॥ १३३ ॥

अथ दान्ता अष्टौ-"पद स्थैर्ये" पदति ॥ १३४ ॥

"कदिष् क्रदिष् क्लदिष् वैक्लव्ये" कदते, क्रदते, क्लदते । षित्त्वस्य सर्वैः सम्बन्धात् तन्निमित्तेऽङि-कदा, क्रदा, क्लदा, इति ॥ १३५ ॥ १३६ ॥ १३७ ॥

"मन्दि जाड्ये" मन्दते । क्ये नस्य लुकि-मद्यते ॥१३८॥

"खुर्दि गुधि क्रीडायाम्" "भ्वादेः०" [ २. १. ६३. ] इति दीर्घे-खूर्दते, चुखूर्दे, गोधते, जुगुधे । "वौ व्यञ्जनाऽऽदेः सन् चाय्वः" [ ४. ३. २५. ] इति विकल्पेन क्त्वा-सनोः कित्त्वे-गुधित्वा, गोधित्वा, जुगुधिषते, जुगोधिषते ॥ १३९ ॥ १४० ॥

"ऊवेदृग् ऊबन्धृग् आलोचने" वेदते, वेदति । ऊदित्वात् क्त्वि वेद्-वेदित्वा, वेत्त्वा । वेदृत्वादेव क्तयोर्नेट्-वेन्नः, वेन्नवान्, वेन्ना-नाम काचिन्नदी । ऋदित्त्वाद् वाऽङि-अवेदत्, अवेदीत्, आत्मनेपदे त्वङोऽभावाद्-अवेदिष्ट ॥ १४१ ॥

ऊबन्धृग्-बुन्धते, बुन्धति । बुबुन्धे, बुबुन्ध । बुन्धिता बुन्धितुम् । ऊदित्वात् क्त्वि वेटि नलोपे च-बुधित्वा, बुद्ध्वा । ऋदित्वात् परस्मैपदे वाऽङि-अबुधत्, अबुन्धीत्, आत्मनेपदे तु-'अबुन्धिष्ट' इत्येकमेव ॥ १४२ ॥

"णुदीत् प्रेरणे" ईदित्त्वात् कर्तृगामिनि फले आत्मनेपद-विधानात्-नुदते, नुनुदे, "णुदंत्" इत्यस्य तु-नुदति, नुनोदेत्याद्येव । णोपदेशत्वात्-प्रणुदतीत्याद्युभयोरेव ॥ १४३ ॥

अथ धान्ताश्चत्वारः-"वध हिंसायाम्" । लक्ष्यं चास्य यथा-"यत्र सालप्रतीकाशः कर्णोऽवध्यत संयुगे ।" तथा "नास्ति चेद् भक्षको यत्र वधकोऽपि न विद्यते ।" इति च । वधक इत्यत्र, अवधीदित्यत्र च "न जनवधः" [ ४. ३. ५४. ] इति वृद्धिनिषेधः । अन्यत्र तु बबाध, लक्ष्यं यथा-"नूनं न सत्त्वेष्वधिको बबाध, तस्मिन् वने गोप्तरि गाहमाने ।" [ र० वं० स० २ ] ॥ १४४ ॥

"णाधृङ् याच्ञोपतापैश्वर्याशीःषु" णोपदेशत्वात् प्रणाधत इत्यादौ णत्वम् । ऋदित्वात् णौ ङे उपान्त्यह्रस्वाभावे 'अननाधत्', इत्यादि तूभयोरेव समम् ॥ १४५ ॥

"साधंच् षाधंट् संसिद्धौ" साधयत्यन्नम् ॥ १४६ ॥

षाधंट्-षोपदेशत्वात् सनि 'सिषात्सति' इत्यत्र सस्य षत्वम्, अनुस्वारेत्त्वाद्वेडभावः । ण्यन्तात् सनि-सिषाधयिषति, णौ ङे-असीषधत्, असोपदेशस्य तु-सिसात्सति, सिसाधयिषतीत्यादि । केवलस्य च साध्नोतीत्यादि । अनुस्वारेत्त्वादिडभावे-'साद्धा, साद्धुम्' इति तूभयोस्तुल्यमेव ॥१४७॥

"गृधण् वञ्चने" णिजन्तस्यापीष्टिवशात् "प्रलम्भे गृधिवञ्चेः" [ ३. ३. ८९. ] इत्यात्मनेपदे-गर्धयते बटुम् । स्वमते तु-णिगन्तस्यैवात्मनेपदमिष्टम् ॥ १४८ ॥

अथ नान्तौ द्वौ-"मन स्तम्भे" ममान । मनतीत्यादि तु "म्नां अभ्यासे" इत्यस्यापि भवति ॥ १४९ ॥

"जनक् जनने" ह्वादिरयम् । शिति द्वित्वे-जजन्ति । "जजान गर्भं मघवा" अत्रेन्द्रो जनयामासेत्यर्थः, अन्तर्भावितण्यर्थत्वात् । जज्ञतुः, "जज्ञुः पादाम्बुरुहि तव विभो!" "जनैचि प्रादुर्भावे" इत्यस्य तु-जायते, जज्ञे, जज्ञाते, जज्ञिरे, इत्यादि ॥ १५० ॥

अथैकादश पान्तास्त्रयः फान्ताश्च, पान्तेष्वाद्यौ घटादी-"क्षप प्रेरणे" णौ घटादित्वाद् ह्रस्वे-क्षपयति । "उपक्षपयति प्रावृट्" आसन्नीभवतीत्यर्थः । ञिणम्परे तु णौ वा दीर्घे-अक्षापि, अक्षपि, क्षापं क्षापं क्षपं क्षपम् । "क्षपण् प्रेरणे" इत्यघटादेः क्षपेस्तु-अदन्तत्वादुपान्त्यवृद्ध्यभवनेन क्षपयतीत्यादि यद्यपि तुल्यं तथापि 'ञिणम्परे णौ घटादिनिमित्तकवैकल्पिकदीर्घीभवनेन-अक्षपि, क्षपं क्षपमित्येव स्यात्, न तु-अक्षापि, क्षापं क्षापमिति दीर्घाश्रयं रूपमिति विशेषः ॥१५१॥

"त्रप लज्जायाम्" घटादित्वाण्णौ ह्रस्वे-त्रपयति । ञिणम्परे णौ वा दीर्घे-अत्रापि, अत्रपि, त्रापं त्रापं, त्रपं त्रपमिति । "त्रपौषि लज्जायाम्" इत्यघटादेस्तु णावुपान्त्यवृद्धौ-त्रापयतीत्यादि, ञिणम्परे च-अत्रापि, त्रापं त्रापमित्येव, न त्वत्रपि त्रपं त्रपमिति ह्रस्वाश्रयाणि रूपाणि ॥ १५२ ॥

"सप समवाये" असोपदेशत्वाद् णौ सनि षत्वाभावे-सिसापयिषति, णौ ङे-असीसपत् । षोपदेशत्वे तु षत्वे-सिषापयिषति, असीषपदित्यादि ॥ १५३ ॥

"हेपृङ् गतौ" । हेपते । णौ ङे ऋदित्त्वादुपान्त्यह्रस्वाभावे-अजिहेपत् ॥ १५४ ॥

"तुप तुम्प तुफ तुम्फ रिम्फत् हिंसायाम्" । तुपति, तुपती तुपन्ती स्त्री कुले वा, "अवर्णादश्नः०" [ २. १. ११५. ] इत्यन्तादेशविकल्पः । भौवादिकस्य तुपेस्तु-तोपतीत्यादि, ईङ्योस्तु शतुः 'श्य-शवः' [ २. १. ११६. ] इत्यन्तादेशो नित्यमेवेति 'तुपन्ती स्त्री कुले वा' इत्येकमेव, एवमन्येष्वपि भावनीयम् ॥ १५५ ॥

तुम्प-तुम्पति, प्रस्तुम्पति गौरित्यपि, शे परे "नो व्यञ्जनस्य०" [ ४. २. ४५. ] इति प्राप्तोऽपि नस्य लुक् परैर्नेष्यते । तुम्पती तुम्पन्ती स्त्री कुले वा, भौवादिकस्य तु नित्यमेवान्तादेशः ॥ १५६ ॥

तुफ-तुफतीत्यादि तुपवत् ॥ १५७ ॥

तुम्फ-तुम्फतीत्यादि तुम्पवत् ॥ १५८ ॥

रिम्फत्-रिम्फति, रिरिम्फेत्यादि ॥ १५९ ॥

"तृप तृम्पत् तृप्तौ" तृपति, तृम्पतीत्यादि ॥१६०॥१६१॥

"स्तुप स्तूपण् समुच्छ्राये" स्तोपयपि । अषोपदेशत्वात् सस्य षत्वाभावे-तुस्तोपयिषति, अतुस्तुपत् । ष्टूपणस्तु-स्तूपयति, तुष्टूपयिषति, अतुष्टुपदित्यादि ॥ १६२ ॥

स्तूपण्-अषोपदेशत्वात् तु स्तूपयिषतीति षत्वं न । ङे "उपान्त्यस्य०" [ ४. २. ३५. ] इति ह्रस्वे-अतुस्तुपत् । स्तूपयतीत्यादि तु ष्टूपणोऽपि स्यादेव ॥ १६३ ॥

"तुपुण् अर्दने" उदित्वान्नागमे-तुम्पयति । किति नस्य लुगभावे-तुम्प्यते, । भौवादिकतुम्पेस्तु-किति नस्य लुकि-तुप्यत इति ॥ १६४ ॥

अथ त्रयोदश बान्ताः-"घर्ब कन्ब खन्ब गन्ब चन्ब तन्ब नन्ब पन्ब बन्ब शन्ब षन्ब गतौ" । घर्ब-घर्बति । घर्बितः, क्ते सेट्त्वात् "क्तेटः०" [ ५. ३. १०६. ] इत्यः-घर्बा॥१६५॥

कन्ब-कम्बति । किति नस्य लुकि-कब्यते । एवं-खन्बादीनां बन्बपर्यन्तानामूह्यम् ॥ १६६-१७३ ॥

शन्ब-शम्बतीत्यादि पूर्ववत् । णिगि चुरादेराकृतिगणत्वात् स्वार्थे णिचि वा-शम्बयति ॥ १७४ ॥

षन्ब-"षः०" [ २. ३. ९८. ] इति षस्य सत्वे-सम्बति, सब्यते, सम्बितः, सम्बा, इत्यादि । णौ सनि षोपदेशत्वात् सस्य षत्वे-सिषम्बयिषति ॥ १७५ ॥

"साम्बण् सम्बन्धे" साम्बयति । अषोपदेशत्वात् षत्वाभावे-सिसाम्बयिषति, णिचोऽनित्यत्वात् तदभावे-सिसाम्बिषति । अलि-साम्बः ॥ १७६ ॥

"कुटुम्बिण् धारणे" कुटुम्बयते ॥ १७७ ॥

अथाष्टौ भान्ताः-"सुन्भ नभि हिंसायाम्" अषोपदेशत्वात् षत्वाभावे-सुसुम्भयिषति, असुसुम्भत् ॥ १७८ ॥

नभि-द्युतादिरयम्, तन्निबन्धनेऽङि-प्रानभत्, "द्युद्भ्यः०" [ ३. ३. ४४. ] इत्यात्मनेपदपक्षे त्वङोऽभावे-प्रानभिष्ट, णोपदेशत्वाभावान्न णत्वम्, णोपदेशत्वे तु-प्रानभत्, प्राणभिष्टेति स्यात् ॥ १७९ ॥

"षुन्भ भाषणे च" चाद्धिंसायाम्, "षः सः०" [ २. ३. ९८. ] इति षकारस्य सकारे-सुम्भति । णौ ङे-असुषुम्भत् । णौ सनि च-सुषुम्भयिषति । केवलात् तु षत्वापन्ने सनि "णिस्तोरेव०" [ २. ३. ३७. ] इति नियमात् षत्वाभावे-सुसुम्भिषति कुपूर्वादस्मादचि-कुसुम्भः । अस्य प्रयोगो यथा-"सावष्टम्भनिशुम्भसुम्भना" इति ॥ १८० ॥

"ष्टभुङ् स्तम्भे" टपरषादिरयम्, यस्तु सूरिभिः पठितः स च ष्टुंक्वत् तपरसादिः, षोपदेशत्वार्थं तु ष्टभुङ इति पेठे, तेन तस्य "षः सोऽष्ट्यै०" [ २. ३. ९८. ] इति षः सो भविष्यति, अस्य तु षः सत्वं नेष्यते परैः । उदित्वान्नागमे-ष्टम्भते । किति नस्य लुगभावे-ष्टम्भ्यते । यङि-टाष्टम्भ्यते, यङ्लुपि-टाष्टम्भिध, सनि-टिष्टम्भिषते, णौ सनि-टिष्टम्भयिषति, णौ ङे-अटिष्टम्भत् । सूरिपठितस्यास्य तु षः सत्वे कृते *निमित्ताभावे०*इति न्यायात् टस्याप्यभावे तकारस्यैव श्रवणमिति-स्तम्भते, स्तम्भ्यते, तास्तम्भ्यते, तास्तम्भिध, इति । तथा षत्वापन्ने सनि "णि-स्तोरेव०" [ २. ३. ३७. ] इति नियमात् तिस्तम्भिषते इति, ण्यन्तस्य तु निषेधाभावात् षत्वे सति-तिष्टम्भयिषतीति, णौ ङे-अतिष्टम्भदित्यादि ॥ १८१ ॥

"डभु डिभुण् सङ्घाते" उदित्वान्नागमे-डम्भयति । णिचोऽनित्यत्वात्तदभावेऽपि कित्युदित्वान्नस्य लुगभावे-डम्भ्यते । एवं डिम्भ्वादिष्वपि ॥ १८२ ॥

डिभुण्-डिम्भयति, डिम्भ्यते । अचि-डिम्भः ॥ १८३ ॥

"दभु दिभुण् वञ्चने" उदित्वान्नागमे-दम्भयति, दम्भ्यते ॥ १८४ ॥

दिभुण्-दिम्भयतीत्यादि पूर्ववत् ॥ १८५ ॥

अथ मान्तौ द्वौ-"छम्र गतौ" गतिरत्र छद्मप्रकाररूपा प्रकरणवशात् । छम्रति । सिचि-अच्छम्रीत् । णवि-चच्छम्र ॥१८६॥

"सामण् सान्त्वने" ङे उपान्त्यह्रस्वे-असीसमत्, चुराद्यदन्तस्य तु-अससामदिति ॥ १८७ ॥

अथ रान्तास्त्रयः-"तुरक् त्वरणे" ह्वादिरयम् । शिति द्वित्वे सति-तुतोर्ति ॥ १८८ ॥

"षुरत् ऐश्वर्य-दीप्त्योः" षपाठात् सस्य षत्वे-सुषोर, असूषुरत्, सुषोरयिषति । अषोपदेशस्य तु-सुसोरेत्यादि । सुरतीत्यादि तूभयोस्तुल्यम् ॥ १८९ ॥

"गुद्रुण् अनृतभाषणे" गुन्द्रयति । अचि-गुन्द्रा-उत्तममुस्ता ॥ १९० ॥

अथ लान्ता एकादश, तत्राद्यौ घटादी-"स्खल संचलने" "दल विशरणे" णौ घटादित्वाद्ध्रस्वे स्खलयति, दलयति; ञिणम्परे णौ तु वा दीर्घे-अस्खालि, अस्खलि; स्खालं स्खालं, स्खलं स्खलम्, अदालि, अदलि, दालं दालं दलं दलम् । अघटाद्योस्तु ह्रस्वाभावे-स्खालयति, दालयति, अस्खालि, अदालि, स्खालं स्खालम्, इत्याद्येव । स्खलति, दलतीति तूभयोरेव समम् ॥ १९१ ॥ १९२ ॥

"स्थल स्थाने" अषोपदेशत्वात् षत्वाभावे णौ सनि-तिस्थालयिषति । ङे-अतिस्थलत् । षोपदेशस्य तु षत्वे-तिष्ठालयिषतीत्यादि । स्थलतीति तूभयोरेव समम् ॥१९३॥

"बलि परिभाषण-हिंसा-दानेषु" ओष्ठ्यादिरयम् । बलते । दन्त्यौष्ठ्यवादित्वाभावेन "न शस-दद वादि-गुणिनः" [ ४. १. ३०. ] इत्येत्वनिषेधाभावात् 'अनादेशादेरेकव्यञ्जनमध्येऽतः" [ ४. १. २४. ] इत्येत्वे द्वित्वाभावे च-बेले बेलाते बेलिरे ॥ १९४ ॥

"षिलत् उञ्छे" उञ्छः-कणश आदानम्, षोपदेशत्वात् सस्य षत्वे-सिषेल, असीषिलत्, सिषेलयिषति । षोपदेशत्वाभावे च-सिसेलेत्यादि । सिलतीति तूभयोरपि ॥ १९५ ॥

"पुलत् महत्त्वे" पुलति, भ्वादेस्तु-पोलतीत्यादि ॥१९६॥

"बल वलण् प्राणने" आद्य ओष्ठ्यादिर्द्वितीयो दन्त्योष्ठ्यादिः, उभावपि घटादी, तेन घटादित्वनिमित्ते ह्रस्वे–बलयति, वलयति । ञिणम्परे णौ वा दीर्घे–अबालि, अबलि, बालं बालं, बलं बलम्, अवालि, अवलि, वालं वालं, वलं वलम् ॥ १९७ ॥ १९८ ॥

"मुलण् रोहणे" मोलयति । णिचोऽनित्यत्वादभावे "नाम्युपान्त्य०" [५. १. ५४.] इति के–मुलः ॥ १९९ ॥

"पालण् रक्षणे" ण्यन्तात् "स्वरेभ्य इः" [उणा० ६०६.] इति इः, ततः स्त्रियां ङीः–पाली ॥ २०० ॥

"गलिण् स्रावणे" गालयते, उद्गालयते । ण्यन्तात् पूर्ववत् इः–गालिः, स्त्रियां ङीः–गाली ॥ २०१ ॥

अथ वान्तास्त्रयः–"क्षीवृ निरसने" क्षीवति । क्ते "अनुपसर्गाः क्षीबोल्लाघ-कृश-परिकृश-फुल्लोत्फुल्ल-संफुल्लाः" [४. २. ८०.] इति निपातनस्य क्षीवृङ एवेष्टत्वादस्य क्षीवितः ॥ २०२ ॥

"चीवी आदान-संवरणयोः" णौ ङे उपान्त्यह्रस्वे–अचीचिवत्, चीवृगस्तु–ऋदित्वादुपान्त्यह्रस्वाभावे–अचिचीवदिति । चीवते इत्यादि तूभयोरपि ॥ २०३ ॥

"षान्त्वण् सामप्रयोगे" षोपदेशत्वात् सस्य षत्वे– सिषान्त्वयिषति, अषोपदेशस्य तु–सिसान्त्वयिषतीत्यादि । सान्त्वयतीति तूभयोरपि ॥ २०४ ॥

अथ शान्ताश्चत्वारः–"रश शब्दे" रशति । औणादिके अने–रशना–मेखला, मौ–रश्मिः । णिति इकारे–राशिः ॥ २०५ ॥

"वाशृङच् शब्दे" णौ ङे ऋदित्वादुपान्त्यह्रस्वाभावे–अववाशत्, वाशिचस्तु–उपान्त्यह्रस्वे–अवीवशत् । वाश्यते इत्यादि तूभयोरेव ॥ २०६ ॥

"लश लषण् शिल्पयोगे" लाशयति लाषयति वा दारु, भ्रमादिना तक्ष्णोतीत्यर्थः ॥ २०७ ॥

"दाशिण् दाने" दाशयते, ङे–अदीदशत । "दाशृग् दाने" इत्यस्य तु ऋदित्वादुपान्त्यह्रस्वाभावे–अददाशतेत्यादि ॥ २०८ ॥

अथ षान्ता अष्टौ–"खष हिंसायाम्" खषति, चखाष ॥ २०९ ॥

"सूष शूष प्रसवे" अषोपदेशत्वात् षत्वाभावे–सुसूष, षोपदेशस्य तु–सुषूष । सूषतीत्यादि तूभयोरेव ॥ २१० ॥

शूषति–शूषति । अचि–शूषा–शाकजातिः ॥ २११ ॥

"घषुङ् करणे" उदित्वान्नागमे तस्य "शिड्हे०" [१. ३. ४०.] इत्यनुस्वारे–घंषते, घंषिता "घसुङ् करणे" इत्यस्य तु–घंसते, इत्यादि ॥ २१२ ॥

"धिषक् शब्दे" ह्वादिरयम्, तेन शिति द्वित्वे–दिधेष्टि ॥ २१३ ॥

"मुषक् खण्डने" पुष्पादिरयम् । मुष्यति, पुष्पादित्वादङि–अमुषत ॥ २१४ ॥

"घूष घूसण् कान्तीकरणे" घूषयति, घूसयति ॥ २१५ ॥ २१६ ॥

"धृषिण् सामर्थ्यवारणे" धर्षयतेऽरीन् ॥ २१७ ॥

अथ षट् सान्ताः–"जर्स परिभाषण-हिंसा-तर्जनेषु" जर्सति । जर्सन्ती स्त्री कुले वा, ई-ङ्योः "श्य शवः" [२. १. ११६.] इति शतुर्नित्यमन्तादेशः । 'जर्सन्ती' इति रूपप्रदर्शनं चास्य धातोस्तौदादिकत्वशङ्कापनुत्त्यै धातुपारायणे कृतमित्यस्माभिरपि तदर्थमेवोपात्तमिति बोध्यम् । तौदादिकस्य तु "अवर्णादश्न०" [२. १. ११५.] इति शतुर्वैकल्पिकेऽन्तादेशे रूपद्वयं स्यात् ॥ २१८ ॥

"ष्णुसच् अदने" "षः सः०" [२. ३. ९८.] इति सत्वे–स्नुस्यति । षोपदेशत्वात् षत्वे–सुष्णोस, णौ ङे–असुष्णुसत्, णौ सनि–सुष्णोसयिषति । केवलात् तु षत्वापन्ने सनि "णिस्तोरेव०" [२. ३. ३७.] इति नियमात् षत्वाभावे–सुस्नुसिषति, सुस्नोसिषति, अत्र च "वौ व्यञ्जनादेः०" [४. ३. २५.] इति सेट्सनः कित्त्वविकल्पाद् गुणो वैकल्पिकः; एवं सेट्क्त्वोऽपि कित्त्वस्य विकल्पात्–स्नुसित्वा, स्नोसित्वा ॥ २१९ ॥

"ष्णसूच् निरसने" घटादिरयम् । "षः सः०" [२. ३. ९८.] इति षः सत्वे णौ घटादित्वनिमित्तके ह्रस्वे च–स्नसयति, ञिणम्परे णौ वा दीर्घे–अस्नसि, अस्नासि, स्नासं स्नासं, स्नसं स्नसम्, णौ सनि–सिष्णसयिषति । अघटादेस्तु–स्नासयति, अस्नासि, स्नासं स्नासं, सिष्णासयिषतीत्यादि स्यात् । स्नसतीति तूभयोरेव ॥ २२० ॥

"दासट् हिंसायाम्" दास्नोति ॥ २२१ ॥

"उध्रसूश् उञ्छे" उध्रस्नाति, ह्नौ श्नाहेरानादेशे–उध्रसान, अनेकस्वरत्वात् परोक्षाया आमि–उध्रसांचकार । सनि उदिध्रसिषति । ऊदित्वात् क्त्वि वेटि–उध्रसित्वा, उध्रस्त्वा । उत्पूर्वस्य ध्रस्नातेस्तु–उद्ध्रस्नाति, उद्ध्रसान, उद्दध्रास, उद्दिध्रसिषति, क्त्वि यपि–उद्ध्रस्येत्यादि स्यात् ॥ २२२ ॥

"उध्रसण् उत्क्षेपणे" उध्रासयति, ङे–औदिध्रसत्, उत्पूर्वस्य ध्रासेस्तु उद्ध्रासयति, उददिध्रसत्, इत्यादि ॥ २२३ ॥

अथ हान्ताः पञ्च–"गृहौङ् ग्रहणे" औदित्वादिड्विकल्पे–गर्हिता, गर्ढा । वेट्त्वात् क्तयोरिडभावे–गृढः, गृढवान् । क्तौ–गृढिः । "नाम्युपान्त्य०" [५. १. ५४.] इति के–गृहम्, गृहाः ॥ २२४ ॥

"स्रन्हूङ् विश्वासे" दन्त्यादिः, द्युतादिरयं, स्रंहते । "द्युद्भ्योऽद्यतन्याम्" [३. ३. ४४.] इति विकल्पेनात्मनेपदे–अस्रंहिष्ट, परस्मैपदे द्युतादित्वादङि–अस्रहत् । ऊदित्वात् क्त्वि वेटि सेटः क्त्वः "क्त्वा" [४. ३. २९.] इति कित्त्वाभावे "नो व्यञ्जनस्य०" [४. २. ४८.] इति नस्य लुकोऽप्राप्तौ–स्रंहित्वा, इडभावपक्षे तु हो ढत्वादौ सति "ढस्तड्ढे" [१. ३. ४२.] इति ढलुपि दीर्घे च–स्राढ्वा ॥ २२५ ॥

"ष्टृहौ ष्टृन्हौत् उद्यमे" णौ सनि षोपदेशत्वात् सस्य सस्य षत्वे–तिष्टर्हयिषति ॥ २२६ ॥

ष्टृन्हौत्–प्राग्वत् सस्य षत्वे–तिष्टृंहयिषति । अषोपदेशयोस्त्वेतयोः–'तिस्तर्हयिषति, तिस्तृंहहिषति' इत्येव ॥ २२७ ॥

"दहुण् रक्षणे" दंहयति । णिचोऽनित्यत्वादभावेऽप्युदित्वात् क्ये नस्य लुगभावे–दंह्यते ॥ २२८ ॥

अथ क्षान्ताश्चत्वारः–"ष्टृक्ष गतौ" णौ सनि–तिष्टृक्षयिषति । अषोपदेशस्य तु षत्वाभावेन तिस्तृक्षयिषति ॥२२९॥

"जक्षुङ् गति-दानयोः" घटादिरयम् । उदित्वान्न–जङ्क्षते । किति नस्य लुगभावे–जङ्क्ष्यते । जजङ्क्ष । जङ्क्षिता । क्ते–जङ्क्षितः । "क्तेटः०" [ ५. ३. १०६ ] इत्ये–जङ्क्षा, णौ–जङ्क्षयति । ञिणम्परे णौ"घटादेः०" [ ४. २. २४. ] इति वा दीर्घे–अजाङ्क्षि, अजङ्क्षि । जाङ्क्षं जाङ्क्षं, जङ्क्षं जङ्क्षम् ॥२३०॥

"भक्षी अदने" भक्षते, बभक्षे, भक्षति, बभक्ष, भक्षितुम्, भक्षितम् ॥ २३१ ॥

"ऋक्षट् उपशमने" ऋक्ष्णोति । अचि–ऋक्षं–नक्षत्रम् ॥ २३२ ॥ इत्यादि ॥

कैश्चित् परैर्भ्वादिपठिता अपि धातवश्चुरादिषु पठिता णिजर्थं, त एव क्वचिदात्मनेपदार्थं, क्वचिदात्मनेपदिनः परस्मैपदार्थं, क्वचिदर्थभेदाय क्वचिदनिटोऽन्यत्रेडागमार्थं च पुनः पठिता दृश्यन्ते । तेऽत्र प्रायो नोदाहृताः, चुरादिषु शेषे "बहुलमेतन्निदर्शनम्" इत्युक्ततया चौरादिकणिचो यथाप्रयोगं सर्वधातुभ्योऽपि बाहुल्येन प्रयोक्तुं शक्यत्वात्, आत्मनेपदस्य चानित्यत्वेन परस्मैपदिभ्योऽपि सौलभ्यात्, धातूनां चार्थनिर्देशस्य दिक्प्रदर्शनमात्रत्वेन तेषामनेकार्थत्वात्, आगमशास्त्रस्यानित्यतयेडागमस्याप्यनित्यत्वाच्च ।

आगमिका अपि धातवः केचिदेभ्योऽन्ये दृश्यन्ते, यथा–"दटृ आच्छादने" दटिता पट्टशाला ॥ १ ॥

"विकुर्व विक्रियायाम्" "भ्वादेः०" [ २. १. ६३. ] इति दीर्घस्यानित्यत्वादभावे–विकुर्वति, विकुर्वितुम्, विकुर्वित्वा ॥२॥

"कुर्व करणे" पूर्ववद् दीर्घाभावे–कुर्वति । अस्य विपूर्वस्य क्विव अपि–विकुर्व्य ॥ ३ ॥

"उषण् निवासे" अदन्तः । "णि-वेत्ति०" [ ५. ३. १११. ] इत्यने–पर्युषणा ॥ ४ ॥

"युहं उद्धरणे" निर्यूठम् ॥ ५ ॥

इत्यादि । एते च सर्वे लौकिका धातवोऽपठिता अपि लक्ष्यानुसारादेव सिद्धा इति प्रकृतन्यायविषयतयोदाहृताः ।

॥ इति शम् ॥

इति न्यायसमुच्चयस्य चतुर्थोल्लासे पूर्वदर्शित-
न्यायसजातीयस्य विस्तरतो व्याख्यातुं
पृथगुपात्तस्य न्यायस्य, तपोगच्छाधि-
पति-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-
श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कारेण
'व्याकरणवाचस्पति-शास्त्रविशा-
रद-कविरत्न' इति पदालङ्कृ-
तेन विजयलावण्यसूरिणा
विरचिता न्यायार्थसिन्धु-
नामा वृत्तिः ॥

**समाप्ता न्यायसमुच्चयस्य सिन्धुनामा वृत्तिः ।**

## प्रशस्तिः ।

[ वसन्ततिलकानि ]

अस्ति प्रसिद्धविभवं निकषो बुधानां, विद्याविलासिजनसेवितमादरेण ।
श्रीमज्जिनायतनपूर्णकलेवरं सत्, पुण्यं पुरं सुकलयन्निजनाम सत्यम् ॥ १ ॥
तत्र स्थितिं विदधता किल वृष्टिकाले, लावण्यसूरिमुनिपा विजयान्वितेन ।
न्यायार्थसिन्धुरयमारचितो बुधानां, मोदाय मन्दमनसामपि बोधनाय ॥ २ ॥
श्रीहेमहंसगणिना रचिताऽतिमञ्जु-मंजूषिका सुविमला बहुलार्थयुक्ता ।
सन्न्यायसंग्रहगता बृहता युता च, न्यासेन किन्तु नहि तेन नवीनतोषः ॥ ३ ॥
ज्ञात्वेति तत्पथपरिष्करणार्थमेव, तत्प्रत्ननूत्नजनतोपकृतौ प्रयत्नः ।
मध्यस्थवृत्तिमवलम्ब्य कृतोऽयमास्तां, न्यायार्थबोधरुचिलोकहिताय शश्वत् ॥ ४ ॥
आकाश-चन्द्र-गगना-ऽक्षिमितेऽत्र वर्षे, सद्दैक्रमेऽवासित एष गुरोः प्रसादात् ।
आचन्द्रभास्करमुपेत्य परां प्रसिद्धिं, सिद्धिं करोतु पठतां च मनोरथानाम् ॥ ५ ॥

## [ चतुर्थोल्लासः ]

अथ पूर्वदर्शितन्यायसजातीय एवानुक्तार्थसाधको न्यायो विस्तरेण विव्रियते—

### *शिष्टनाम-निष्पत्ति-प्रयोग-धातूनां सौत्रत्वाल्लक्ष्यानुरोधाद् वा सिद्धिः*

**त०** —अयं न्यायो न केवलं न्यायसङ्ग्रहशिष्टांशपूरक एवाऽपि तु सकलशब्दशास्त्रशिष्टांशपूरकः । शब्दशास्त्रविषये तत्र तत्र महाभाष्यकृदादिभिरुद्घोषितं यत्–"प्रयुक्तानामिदमन्वाख्यानम्" इति । सत्यप्याचार्याणां बहुदर्शित्वे कलिकालसर्वज्ञताभाजनत्वे च स्वदृष्ट्या तेषामपि छद्मस्थत्वात् छद्मस्थानां च सम्भवति कदाचित् किञ्चिद्विषयकमननुसन्धानमित्यनुक्तोपायकशब्दप्रयोगदर्शने शिष्याः कदाचित् तस्य साधुत्वे संशयमाप्नुयुरिति तेषां संशयापनोदायैवायं न्याय आश्रित इति प्रतीयते । नाम्नां चानन्तत्वं जगदानन्त्यात् सुसिद्धमेव । निष्पत्तयश्च निपातनरूपा आचार्यैः सर्वांशस्य लक्षणमात्रगम्यत्वाभावज्ञापनायैव तत्र तत्र प्रयुक्ताः । प्रयोगाश्च तत्तद्धातूनामेकार्थत्वेऽप्यनादिलोकव्यवहारसिद्धतत्तदर्थविशेषसम्बन्धनिबन्धना एवेति ते लक्ष्यानुरोधं विना न शक्या अन्यैरुपायैरुपदेष्टुमिति तदर्थं तदाश्रयणमावश्यकमेव, न केवलमर्थविशेषसम्बन्ध एव शब्दानां नियतोऽपि तु देशविशेषसम्बन्धोऽपि । यदाह महाभाष्यकारः पस्पशाह्निके–"एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते, तद्यथा–शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या भाषन्ते 'शव' इति । हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु" इति । शब्दप्रयोगविषयस्यातिमहत्त्वमपि तत्प्रकरण एव महाभाष्ये प्रपञ्चितम् । तथा च साकल्येन सर्वप्रयोगसङ्ग्रहोऽप्यसाध्य एवेति स्वमतिशिष्टप्रयोगसहकारेण प्रकृतशास्त्राविरोधेन च तत्र तत्र साधुत्वमनुसन्धेयमिति लक्ष्यानुरोधात् प्रयोगसिद्ध्यभिप्रायः । अत्र च सौत्र-लौकिक-वाक्यकरणीय-परपठितभेदेन चतुर्द्धा धातवो वृत्तौ समुदाहृताः । तत्र सौत्रा धातवस्तावदित्थमनुगन्तव्याः–क्रियावाचित्वे सति धातुपाठापठितत्वे सति तत्तद्विधिसूत्रपरिगृहीतत्वं सौत्रत्वमिति । लौकिकत्वं च क्रियावाचित्वे सति धातुपाठापठितत्वे सति सूत्रापरिगृहीतत्वे च सति केवललोकप्रयोगावगतसत्ताकत्वम् । वाक्यकरणीयत्वं च क्रियावाचित्वे सति धातुपाठापठितत्वे सति सूत्राग्रहीतत्वे सति शिष्टप्रयोगप्रयोज्यग्रहविषयत्वम् । यद्यपि परपठितधातूनामपि प्रकृतवाक्यकरणीयेषु सङ्ग्रहः शक्यः कर्त्तुं तथापि धातुपाठत्वेन तद्धातुपाठस्यापि ग्रहीतुं शक्यत्वेन तदपठितत्वं तेषां सन्दिग्धमिति पृथगेव तदुपन्यासः कृतः । वर्णिताश्च सौत्रादयो धातवो वृत्तौ, तत्र च यत्र क्वचन विवरणस्यापेक्षासीत् तत् संक्षिप्य तत्रैव प्रदर्शितम् । परपठितधातुषु ये सूरिपठितधातव एवान्यैरन्यथा पठिताः, ये च केवलाधिका एव पठितास्तेषां स्वरूपपरिचयाय संक्षिप्य विव्रियते । तथाहि–**"खेडण्"** इत्यस्य स्थाने "खेटण्" इति सूरिसम्मतः पाठः, प्रकृतपाठस्तु देवनन्दिपरिगृहीतः, परमयमुच्चारणभेदकृतो लेखकप्रमादकृतश्च भेदो भवितुमर्हति, तथापि "स्मृतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ ।" इति प्राचीनोक्तिमनुसृत्योभावपि धातू संग्राह्यावेव । **पणणित्यधिकमेव** केचित् पठन्ति । **"वित्तण्"** इति च "व्ययण् वित्तसमुत्सर्गे" इति पाठे वित्तेति धात्वन्तरमिति मत्वा केचिदाहुः, समुत्सर्गश्च दानमेव । कविकल्पद्रुमादौ च दानार्थेऽयं पठित इत्यस्माभिरपि तदुदाहृतम् । **"कर्त"** इति–"कत्रण् शैथिल्ये" इत्येतं "कर्त्तण्" इति केचिदाहुः, **"कर्त्रण्"** इति चन्द्रः, **"कत्थण्"** इति देवनन्दी । **"श्लथ"** इति–"श्रथण् दौर्बल्ये" इत्यस्यैव ऋफिडादित्वाल्लत्वममन्यमानाः केचिल्लत्वविशिष्टमेव पेठुः । **"शरण्"** इति–"शारण् दौर्बल्ये" इत्येतस्यैव रूपान्तरेण पाठो नन्दिसम्मतः । **"छदण्"** संवरणे" इत्येतं केचिददन्तमाहुः । **"लभण्"** इति–"लाभण् प्रेरणे" इत्येतस्य स्थाने सभ्याः पेठुः । **"श्रपण्"** इत्ययमधिक एव कैश्चित् पठ्यते । **"खोदण्"** इति "खोटण् क्षेपे" इत्येतमेव केचिद् दान्तं मन्यन्ते । **"स्तन"** इत्यादयः षड् भ्वादौ व्यञ्जनान्ताः पठितास्तानेवादन्तान् सभ्याः पठन्ति । **"मलण्"** इति–"मलि धारणे" इत्येतमेव चुरादावदन्तत्वेन केचित् पठन्ति । **"वल्पुल०"** इति "पल्पूलण् लवन-पवनयोः" इत्ययमेव रूपभेदेन कैश्चिदन्यथाऽन्यथा पठ्यते । तथा चास्य वल्पुल वल्पूल पल्पुल पल्पूल वल्पूलेति स्वरूपाण्युपलभ्यन्ते । **"कुमालण्"** इति–"कुमारण् क्रीडायाम्" इत्यस्यैव लत्वविशिष्टः पाठः । **"पशण्"** इति–"पषण् अनुपसर्गो वा" इति चुरादावदन्तत्वेन पठितस्य तालव्यान्तत्वं वाऽदन्तत्वं च केचिन्मन्यन्ते । **"शशण्"** इत्यधिकमेव धातुः सूर्यप्रज्ञप्तिवृत्तौ दृश्यते । **"अंसण् विभाजने"** इति–"अंशण् समाघाते" इत्येतस्यैव रूपान्तरम्, समाघातशब्दश्च धातुपारायणे विभाजनवचनत्वेन व्याख्यातः । **"गा०"** इत्यादि, गां ह्वादौ माङं च दिवादौ केचिदधिकमेव पठन्ति । **"जिरिद्०"** इत्यादि, जिरिदं स्वादौ, चिरणं च चुरादिगतं घटादित्वेन केचिदधिकमेव पेठुः । **"दीधी-ई-वेवी"** धातूनपि पाणिन्यादयोऽधिकानेव पेठुः, तत्र दीधी-वेवी धातू ते छान्दसौ मन्यन्ते । **प्वादी एताविति**, सूरिभिस्तु "व्री-श्री०" धातू क्र्यादौ प्वादेर्बहिरेव पठितौ । **"ल्पींश्"** इति–अमुं केचिदधिकमेव पेठुः । **"ल्वींश्"** इति–सूरिभिरयं प्वादिमध्ये पठितः । **"ज्रीण्"** इति–युजादिमध्यस्य "जॄण् वयोहानौ" इत्यस्यैव स्थानेऽयं नन्दिना पठ्यते । **"खुड्"** इति–"उड्

कुङ्'' इत्यादिवत् कैश्चिद् गत्यर्थे पठ्यते, **''धुगट्''** च स्वादावधिक एव पठ्यते । **''गॄ''** इति–''गुङ् शब्दे'' इत्येतमेव दीर्घान्तं परस्मैपदिनं पुरीषोत्सर्गेऽर्थे केचिदाहुः । **''गूत्''** इति–''गुंत् पुरीषोत्सर्गे'' इत्ययमेव कुटादिस्थो दीर्घः सेट् च कैश्चिन्मन्यते । **''दूट्''** इत्येतं केचिदधिकमेव स्वादौ पठन्ति, **''जॄं''** इति–''ज्रिं अभिभवे'' इत्ययमेव रूपान्तरेण कैश्चित् पठितः । **''घृ-सृ-हृ''** इत्येतेऽधिका एव ह्वादौ कैश्चिदूहिताः **''स्पृंद्''** इति–''स्मृंद्र पालने च'' इत्येतस्यैव पोपान्त्यत्वेन पाठः । **''ऋट्''** इत्येतं स्वादावधिकमेव पेठुः । **''कृग्श्''** इति–''कृग्श् हिंसायाम्'' इति पठित एव ह्रस्वान्तः कैश्चिन्मन्यते । एवं **''वृग्श्''** इत्ययमपि ''वृग्श् वरणे'' इत्यस्यैव ह्रस्वान्तपाठः । **''चृ भक्षण-गत्योः''** इति–चरतिसमानार्थोऽयमन्य एव धातुः क्त-क्तवतुविषयत्वेन कैश्चित् स्मर्यते, उक्तश्चायमर्थः ''रदादमूर्छमदः'' [ ४. २. ६९. ] इत्यस्य वृत्तौ **''पृक्''** इति–''पृंक्'' इत्ययमेव दीर्घान्तः सेट् चेत्येके प्राहुः । **''दॄङ्च्''** इति–''दृ भये'' इत्ययमेव कैश्चिद् दिवादावपि पठ्यते । **''ज्योङ्''** इति–''दीक्षि मौण्ड्येज्योपनयनदानेषु'' इति वृद्धपाठं केचिद् भित्वा ''दीक्षि मौण्ड्ये'' ''ज्यो उपनयनदानेषु'' इति पठन्ति, ङकारं चात्मनेपदित्वज्ञापनाय तत्र न्यस्यन्ति । **''दकु''** इति च ''तकु कृच्छ्रजीवने'' इत्यस्य स्थाने कैश्चित् पठ्यते । **''तिक्रुङ्''** इति–''तिकी-टिकी गत्यर्थौ'' भ्वादिष्वात्मनेपदिनौ पठितौ, तावेव केचिददितौ मन्यन्ते । **''षेक्रुङ्''** इति च ''सेक्रुङ्'' इत्यस्यैव षोपदेशत्वं प्राहुः । **''चिक्कण्''** इति–चुक्कणः स्थाने कौशिकेन स्वीकृतः । **''चखु''** ( वखु ) इति च ''चख [ वख ] गतौ'' इत्यस्य स्थाने पठ्यते । **''खक्ख''** इति–''कक्ख हसने'' इत्यस्यैवान्यथा पाठः । **''लिखत्''** इति–अमुं केचित् कुटादौ पेठुः । पाणिनीये तन्त्रे च ''लिख अक्षरविन्यासे'' इति धातुः कुट्धातोरादौ पठ्यते, तस्य कुटादित्वप्रयुक्तकार्यसिद्ध्यर्थं कुटस्यादिः कुटादिरिति तत्पुरुषसमासोऽपि तत्र तन्त्रेण निर्दिष्ट इति केचिदाहुः । तथा चैतेन कुटादिपाठेन फलैक्यम् । **''घग्घ''** इति ''गग्घ'' इत्यस्यैवान्यथा पाठः । **''दघ-तिघ-चषघान्''** स्वादावधिकानेव केचित् पेठुः । **''सघ''** इति–''षघट्र हिंसायाम्'' इत्यस्यैवाऽषोपदेशत्वं मन्यन्ते । **''मुचि''** इति–''मचि कल्कने'' इत्यस्य स्थाने चन्द्रः पपाठ । **''अञ्चूग्०''** इति–''अञ्चू० गतौ च'' इत्यस्यैव स्थाने ''अचूग्'' इत्येके ''अचुग्'' इत्यपरे । **''ड्वयाचृग्''** इति–ड्वितः डुयाचृगः स्थाने ड्वितः पाठः । **''विचृंकी''** इति–''विजृंकी'' इत्यस्यैव स्थाने पठ्यते सभ्यैः । **''चर्चत्''** इति–''झर्चत्'' इत्यस्य स्थाने । **''खचश्''** इति–''खवश्'' इत्यस्य स्थाने । **''गुर्चण्''** इत्यधिक एव कैश्चित् पठ्यते । **''पिच्छत्** बाधने'' इति–''मिच्छत् उत्क्लेशे'' इत्यस्य स्थाने द्रमिलैः पठ्यते, उत्क्लेशश्च बाधनमिति धातुपारायणे प्रोक्तमिति स एवार्थ इह स्पष्टप्रतिपत्तये दत्तः । **''भुजु''** इति–अयमप्यधिक एव ''तुज पिजुण्''वत् पठ्यते । **''भ्रिज''** इति–''भ्रज गतौ'' इत्यस्यैवान्यथा पाठः । **''रिजि''** इति–गत्यादौ पठितस्य ''ऋजि'' इत्यस्यैवान्यथा पाठ उद्रिक्तादिरूपसिद्ध्यर्थः, स्वमते तु–'रिचूंपी विरेचने'' इत्यनेनैव तत् सिद्ध्यति । **''ओन-जैङ्''** इति–''ओलजैङ् व्रीडे'' इत्ययमेव नादिरिति चन्द्रः । **''मृजैकि''** इति–''पृचैङ् सम्पर्चने'' इत्यस्यैवार्थं कौशिकसम्मतः पाठः । **''वृजैप्''** इति–''वृचैप् वरणे'' इत्ययमेव जान्तो वर्जनार्थश्चेत्ये । के**''मर्जण्''** इति–''मार्जण् शब्दे'' इतिवत् केषाञ्चित् सम्मतः । **''शौट्ट०''** इति–''शौडृ गर्वे'' इत्यादयः षड् डान्ता भ्वादिषु पठितास्तेषामेव टान्तत्वमन्येषां सम्मतम् । **''स्फडु''** **''मुडु''** इति–''स्फट विशरणे'' ''मुट मर्दने'' इत्येतावेवोदिताविति परे । **''नट''** इति–''णट नृतौ'' इत्ययमेवाणोपदेशः । **''णटि''** इति–नटेर्भ्वादावात्मनेपदित्वं नन्दिसम्मतमिति धातुपारायणे प्रोक्तम्, नटिश्च भ्वादौ, घटादिर्नत्यर्थोऽन्यश्च नृत्यर्थः, उभयोश्चात्मनेपदित्वज्ञप्त्यर्थं ''णटि नतौ च'' इतीह पठितम् । **''अतुट''** इति–टोपान्त्यस्य हिंसातिक्रमार्थस्य तोपान्त्यत्वेन पाठः । **''अट्ति''** इति–प्रागुक्तस्यैव टोपान्त्यत्वं तान्तत्वं चान्येषां सम्मतम् । **''मिट्टण्''** इति–''मिदुण् स्नेहने'' इत्यस्यैव टान्तत्वम् । **''सुट्टण्''** इति–''षुट्टण्'' इत्ययमेवाषोपदेशोऽनादरार्थश्चेत्येके । **''शटि''** इति–''शठिण् श्लाघायाम्'' इत्यस्य स्थाने ''शट'' इति नन्दी प्राह, ''शल'' इति तु कौशिकः । **''रुठि''** इति–''रुटि प्रतीघाते'' इत्ययमेव ठान्त इत्यन्ये । **''बुठुण्''** इति–''बुधुण् हिंसायाम्'' इत्ययमेव ठान्तः कैश्चिन्मन्यन्ते । **''चुडु''** इति–''चुटु अल्पीभावे'' इत्ययमेव डान्त इत्यन्ये । **''पिड''** इति–''पिट शब्दे'' इत्येतमेव डान्तं केचित् पठन्ति, तत्फलं पेडेति सिद्धिः । स्वमते च ''पेलृ गतौ'' इत्यस्यादपि डलयोरैक्यात्–पेडेति सिद्धम् । **''कडु''** इति–''कडृ कार्कश्ये'' इत्यादयस्त्रयो दोपान्त्या भ्वादौ ये पठितास्त एव डोपान्त्या इत्यन्ये । **''तुडु''** इति–''तुड तोडने'' अयमेव संयुक्तडान्त इत्यन्ये । **''ञिक्ष्विडा''** इति–परस्मैपदिष्वव्यक्तशब्दार्थो ''ञिक्ष्विदा'' धातुः पठ्यते, द्युतादौ चात्मनेपदित्वेन ''ञिक्ष्विदा स्नेहन-मोचनयोः'' इति पठ्यते, तावुभौ डान्तावित्यन्ये । नन्वेवं लाघवार्थं ''ञिक्ष्विडाग्'' इति गिदुभयपदी द्युतादिषु पठ्यतामर्थाश्च त्रयोऽपि तत्रैव निर्दिश्यन्ताम्, ङिदङितोरर्थभेदश्च धातूनामनेकार्थत्वेन परिहरणीय इति चेत्? सत्यम्–ङित्त्वं विना प्रक्ष्वेडनेति रूपस्यासिद्ध्या ङिदवश्यं पठनीय इति क्ष्वेडतीत्यादिपरस्मैपदिरूपसिद्ध्यर्थमङितोऽपि पाठ आवश्यक एवेत्युभयोः

पार्थक्येनैव पाठ आदत इति परमाशयात् । "अड्ड" इत्यमुमधिकमेव केचित् पेठुः । "ओलडुण्" इति-धातावोकारो न धात्ववयवः किन्त्वनुबन्ध इत्येके । "भडुण्" इति-अयं चान्द्रसम्मतो धातुः । "त्रुडिण्" इति-"त्रुटिण् छेदने" इत्यस्यैव डान्तत्वमित्येके । "फण गतौ" इति-स्वमते घटादावयमस्ति, अन्ये चाघटादिमिमं मन्यन्ते । "अणिच्" इति-"अनिच् प्राणने" इत्यस्यैव णान्तत्वम् । "घृणू" इति-अयं दीप्तौ तनादौ नान्त एव "रषृवर्णा० [ २. ३. ६३. ] इति णत्वं विधाय पठ्यते, स एव स्वाभाविकनान्त इति केचित् । "घणूयी" इति-"घृणूयी" इत्यस्यैवाकारोपान्त्यत्वमन्ये मन्यन्ते । "इतु" इति-"अतु बन्धने" इत्यस्य स्थाने कैश्चित् पठ्यते । "ज्युति" इति-ज्योतिःशब्दसिद्धयै कौशिकसम्मतो धातुः "जुतृङ् भासने" इत्यस्य स्थाने पठ्यते । स्वमते तु "द्युति दीप्तौ" इत्यस्मात् "द्युतेरादेश्च जः" [ उणा० ९९१. ] इति इसि दकारस्य जकारे-ज्योतिःशब्दसिद्धिः । "कितक्" इति-ह्वादावयमधिक एव कैश्चित् पठ्यते । "पतिच्" इति-"तपिंच्० ऐश्वर्ये" इत्यस्यैव वर्णव्यत्ययेन द्रमिलसम्मतः पाठः । "वावृतूचि" इति-"वृतूचि वरणे" इत्यस्यैव स्थाने कैश्चित् पठ्यते । "ष्वर्तण्" इति-"स्वर्तण् गतौ" इत्यस्यैव षोपदेशपाठः । "पर्थ पार्थण्" इति-"पृथण् क्षेपणे" इत्यस्यैव स्थाने मतभेदेनैतौ पठ्येते । "पद" इति-"बद स्थैर्ये" इत्ययमेव पकारादिः कण्ठसम्मतः । "कदिष्" इत्यादि-"कदुङ् क्रदुङ् क्लदुङ् वैक्लव्ये" एषामनुदित्त्वं नन्दी प्राह । "मन्दि" इति-"मदुङ् स्तुति-मोदादौ" इत्यस्य स्थाने चन्द्रेण जाड्येऽर्थे पठितः । "खुर्दि गुधि" इति-"गुर्दि गुदि क्रीडायाम्" इत्यनयोः स्थाने कैश्चित् पठ्येते । "ऊवेदृग्" इत्यादि-"ऊवुन्दृग् निशामने" इत्यस्य स्थाने "ऊवेदृग्" इति केचित्, "ऊन्धृग्" इत्यन्ये । निशामनं चालोचनमिति धातुपारायणे प्रोक्तम्, तदनुसारेणेहालोचनार्थत्वमेवोक्तम् । "णुर्दीत्" इति-"णुदंत् प्रेरणे" इत्ययमेव ईदिदित्येके । "वध" इति-केऽप्यमुमधिकमेव पठन्ति । "णाधृङ्" इति-नाधृङः स्थानेऽयं णोपदेश इति केचित् । "साधंच्" इति-केचित् साधेः श्यमिच्छन्ति, तन्मतानुसारमयं दिवादित्वेनैव पठितः । "षाधंट्" इति-"साधंट् संसिद्धौ" इत्यस्यैव षोपदेशत्वमेकेषां मतम् । "गृधण्" इति-"गृधूच् अभिकाङ्क्षायाम्" इति दिवादिं केचिच्चुरादिं मन्यन्ते । "मन" इति-"मनिण् स्तम्भे" इत्यस्यैव चान्द्रसम्मतः पाठो ममानेत्यादिसिद्धयर्थः । "जनक्" इति-अयमधिक एव ह्वादौ कैश्चित् पठ्यते । "क्षप प्रेरणे" "त्रप लज्जायाम्" इति-इमौ सूरिभिर्घटादेर्बहिः पठितौ, कश्चिद् घटादौ मन्यते । "षप" इति-"षप समवाये" इत्ययमेवाषोपदेश इत्येके । "ह्वेपृङ्" इति-"मेपृङ् रेपृङ्" इत्यादिवदयमपि गत्यर्थ इति कौशिकः । "तुप०" इत्यादि-"तुप-तुम्प-तुफ-तुम्फाः" ये भ्वादौ पठितास्ते तुदादावपि सन्तीति केचित् । "तृप तृम्पत्" इति-फान्तौ "तृफ तृम्फत्" एतौ पान्तावित्यन्ये । "स्तुप स्तूपण्" इति-"ष्टूपण् समुच्छ्राये" इत्ययं "स्तुपण्" इत्यन्ये, अषोपदेशः "स्तूपण्" इति परे । "तुपुण्" इति-"तुबुण् अर्दने" इत्यस्य स्थाने, अधिक एव वाऽयमिति परे । "घर्व" इति-"अर्व-कर्व०" इत्यादिवदयमपि गत्यर्थ इति, केचित् । "कन्ब०" इत्यादि-"कर्ब-खर्ब०" इत्यादीनां रेफस्य स्थाने नकारं कौशिकः पपाठ । "साम्बण्" इति-"सम्बण् बन्धने" इत्यस्य स्थाने कैश्चित् पठ्यते । "कुटुम्बिण्" इति-"तन्त्रिण् कुटुम्बधारणे" इत्यत्र "कुटुम्ब" इत्ययं धातुरेव पृथगिति चान्द्राः । "सुन्भ" इति-"शुम्भ भाषणे" इत्यस्यैव हिंसार्थत्वमथ दन्त्यादित्वं चेत्येके । "नभि" इति-द्युतादिस्थो "णभि हिंसायाम्" इत्ययमेवाणोपदेश इति केचित् । "षुन्भ" इति-पूर्वपठितो दन्त्यादिरेव षोपदेश इति गुप्तः । "डभु डिभुण्" इति-"डपु डिपुण्" इत्येतावेव भान्ताविति केचित् । "दभु दिभुण्" इति-एतौ धातुपारायणसूचितौ, तत्र यद्यप्यर्थकथनं न कृतं तथापि दभेः सौत्रस्य वञ्चनार्थत्वमुक्तमिति तत्सहचरिताविमावपि तदर्थाविति मत्वा वञ्चनार्थौ पठितौ, दभिश्च "आशु-यु-वपि०" [ ५. १. २०. ] इति सूत्रे पठितस्तत्रैव तस्य वञ्चनार्थत्वं वृत्तावुक्तम्, दभिश्च सौत्रधातुष्वेव पठित इतीह पुनर्न पठितः । "छद्म" इति-"स्वर च्छद्मगतौ" इति धातुपाठे "छद्मति" इति धातुरेव पृथगिति कौशिकः । "सामण्" इति-अदन्तोऽयं चन्द्रेण व्यञ्जनान्तः पठ्यते । "तुरक्" इत्ययमधिक एव केषाञ्चित् सम्मतः । "षुरत्" इति-"सुरत् ऐश्वर्ये" इत्ययमेव षोपदेश इति केचित् । "गुट्टण्" इति-"कुट्टण् अनृतभाषणे" इत्ययमेव गादिः परेषां मते । "स्खल चलने" "दल विशरणे" एतावघटादित्वेन पठितौ परेषां मते घटादी स्तः । "स्थल" इति-"ष्ठल स्थाने" इत्यस्यैवाषोपदेशत्वं मन्यन्ते । "बलि" इति-"भलि परिभाषण-हिंसा-दानेषु" इत्यस्य स्थाने ओष्ठ्यादिं बलिं केचिदाहुः । "बिलत्" इति-"सिलत् उञ्छे" इत्यस्यैव षोपदेशत्वमिति केचित् । "पुलत्" इति-"पुल महत्त्वे" इत्यस्य तुदादित्वमपि मन्यन्ते । "मुलण्" इति-"मूलण् रोहणे" इत्यस्यैव ह्रस्वादित्वं नन्दी प्राह । "पलण् रक्षणे" इत्यस्यैव स्थाने "पाल" इति चन्द्रः, उभयो रूपे विशेषाभावेऽपि धातुपारायणेऽस्य पृथगेव चर्चितत्वादिह पाठः कृतः । "गलिण्" इत्यमुमधिकमेव केचित् पठन्ति, "क्षीवृ" इत्ययमपि तथा । "चीवी" इति-"चीवृग् झषीवत्" इत्येतमुदितमेके नेच्छन्ति, तेनोभयपदित्वज्ञापनायात्रैवं पेठे, झषीश्चादान-संवरणयोरर्थयोः पठ्यते, ततश्चायमपि तदर्थयोः पठ्यते ।

"**षान्त्वण्**" इति–"सान्त्वण् सामप्रयोगे" इत्ययमेव षोपदेश इति केचित् । "**रश**"इति–अयमधिक एव केषाञ्चिन्मते । "**वाशृङ्च्**" इति–"वाशिच् शब्दे" इत्यस्यैव ऋदित्त्वं केचिन्मन्यन्ते। "**लश लषण्**" इति–"लसण् शिल्पयोगे" इत्ययमेव तालव्यान्त इति कौशिकः, मूर्धन्यान्त इत्यन्ये । "**दाशिण्**" इत्ययमधिक एव परसम्मतः । '**खष**" इति–"कष शिष०" इत्यादिवदयमपि हिंसार्थ इति कण्ठः । "**सूष शूष**" इति–"षूष प्रसवे" इत्ययमषोपदेश इत्येके, तालव्यादिरिति चारकाः । '**घषुङ्**" इति–"घसुङ् करणे" इत्ययमेव मूर्धन्यान्तत्वेन चन्द्रसम्मतः । "**धिषक्**" इतीमं ह्रादावधिकं केचित् पठन्ति । "**मुषच्**" इति–पुष्पादिस्थो "मुसच् खण्डने" इत्ययं षान्त इत्यपरे । "**जत्सि**" इतीममधिकमेव केचित् पठन्ति । "**ष्णुसच्**" द्रमिलैरधिकमेव पठ्यते । "**ष्णसूच्**" इत्ययं घटादिबहिर्भूतो घटादित्वेनैकैर्मन्यते । "**दासट्**" इत्यधिक एव । "**उध्रसूश्**" "**उध्रसण्**" इति–"ध्रसूश् उञ्छे" "ध्रसण् उत्क्षेपे" इति द्वावप्युकारादी इत्येके । "**गृहौङ्**" इति–"ग्लहौङ् ग्रहणे" इत्यस्य स्थाने इति केचित् । "**स्रन्हूङ्**" इति–द्युतादिस्थः "स्रम्भूङ् विश्वासे" इत्ययमेव हान्त इति परे । **ष्टृहौ ष्टृन्हौत्**" इति–"स्तृहौ स्तृंहौत् हिंसायाम्" इत्येतौ षोपदेशाविल्येके । "**दृहुण्**" इत्यमुं केचिदधिकमेव पठन्ति । "**ष्टृक्ष**" इति–"स्तृक्ष गतौ" इत्ययमेव षोपध इति चन्द्रः । "**जक्षुङ्**" इति–"क्षजुङ् गतिदानयोः" इत्यस्य वर्णविपर्ययेण कौशिकसम्मतोऽयम् । "**भक्षी**" इति–"भ्लक्षी भक्षणे"इत्यस्य स्थाने इति केचित्। "**ऋक्षद्**" इति–अयमधिक एव स्वादौ कैश्चित् पठ्यते। एवं निरूपितः परपठितधातूनां परिचयः । स्वार्थिकणिज्मात्रार्थं चन्द्रो "धृण् धारणे" इति पपाठ, स च "बहुलमेतन्निदर्शनम्" इत्युक्त्यैव साधितः । तल्लक्ष्यं च 'मैत्राय शतं धारयति' इत्यत्र "रुचिकृप्यर्थ-धारिभिः" [ २. २. ५५. ] इत्युत्तमर्णाच्चतुर्थी सिद्धा । स्वमते च तत्सिद्धिः कर्मकर्त्तुः शतस्य केनचित् प्रेरणे णिगि चौरादिकणिचो बाहुलकत्वाद् वा । आत्मनेपदार्थं पाठो यथा–"कृत् विक्षेपे" इत्यस्य 'कारयते' इति सिद्धये "कृण् विज्ञाने" इति चन्द्रः पपाठ । तस्य च स प्रयोगो विज्ञानार्थे विवक्षितो धातूनामनेकार्थत्वाश्रयणेन साध्यमानोऽप्यात्मनेपदमात्रसिद्धिः फलम् । "षचि सेचने" इत्यस्य धातूनामनेकार्थत्वात् समवाये वृत्तिसत्त्वेऽपि परस्मैपदार्थं "सच समवाये" इति चन्द्रेण पठ्यते । एवमिडर्थमपि क्वचित् पाठभेदो दृश्यते, यथा–"उषू दाहे" इत्यस्योदित्त्वेन स्वमते क्त्वि वेट्त्वात् क्तयोरिड्निषेधात्–उष्टः उष्टवानित्येव भवति । अन्यैस्तु तत्रेट्सिद्धयर्थम् "उष दाहे" इति पाठः सम्मत इति क्त्वि नित्यमिटि–उषित्वेत्येकमेव, क्तयोश्च उषितः, उषितवानितीट्सहितं रूपमिति । तदप्यागमशास्त्रस्यानित्यत्वादेव सिद्धमिति सकलेष्टसाधकस्यास्य न्यायस्य संक्षिप्तं विवरणम् ॥

प्रायोऽस्मिन् न्यायसङ्ग्रहे श्रीहैमशब्दानुशासनोपयुक्ताः सर्वेऽपि न्यायाः सङ्गृहीता एव, कतिचनैतेभ्यो भिन्ना अपि *अनेकान्ता अनुबन्धाः* *एकान्ता अनुबन्धाः* *यथोद्देशं संज्ञापरिभाषम्* *कार्यकालं संज्ञापरिभाषम् *इत्यादयः; एवं *सकृद् गते स्पर्धे यद् बाधितं तद्बाधितमेव*इति न्यायस्यापवादभूतः*पुनः प्रसङ्गविज्ञानम्* इति चैवमादयोऽपि न्यायाः सूरिभिः क्वचिन्न्यासादावुपयुक्ताः सन्ति । इमे च न्यायाः पातञ्जलमहाभाष्यादौ यत्र तत्र व्यवहृताः । परमेषां लक्ष्यानुरोधेनैवाश्रयणीयतया तदनुरोधेनैव व्यवस्थापनीयतया वा प्रकृतन्यायेनैव गतार्थत्वमिति नाधिकं तत्परिचयाय प्रयत्यते । सूरिभिश्च वैयाकरणपरम्पराप्राप्तप्रथमादिसंज्ञानामन्यैः । [ पाणिन्यादिभिः ] इव तत्तन्त्रप्रसिद्धानां लौकिकन्यायसिद्धानामेषां प्रकरणवशादुल्लेखः कृतः, न तावता तेषामवश्यसंग्रहणीयत्वमायाति । किञ्चानुबन्धविषये 'एकान्तत्वस्यैव' तैरपि स्वीकृतत्वेन तस्यैव च न्याय्यत्वेन, अनुबन्धपदव्युत्पत्तिलभ्यत्वेन चात्र सन्देहाभावेन तन्निर्णयाय नास्य न्यायतयोपयोगोऽपि तु सिद्धार्थत्वेनैवेति ध्येयम् । एवं यथोद्देशकार्यकालपक्षयोरपि तत्र तत्र लक्ष्यानुसारित्वेनाश्रयणं तैरपि स्वीकृतमेव । एवं *पुनः प्रसङ्गविज्ञान*न्यायव्याख्यावसरे नागेशादिभिरपि लक्ष्यानुसारित्वमेव स्वीकृतमित्ययमेव न्यायस्तत्तदवशिष्टन्यायविषयसङ्ग्राहक इत्यलमतिविस्तरेणेति ॥ शम् ॥

इति न्यायसमुच्चयस्य सिन्धुकलिते चतुर्थोल्लासे पूर्वदर्शित-
न्यायसजातीयस्य विस्तरतो व्याख्यातुं पृथगुपात्तस्य
न्यायस्य, तपोगच्छाधिपति-सूरिचक्रचक्रवर्ति-
सर्वतन्त्रस्वतन्त्र-श्रीमद्विजयनेमिसूरीश्वर-
पट्टालङ्कारेण 'व्याकरणवाचस्पति-
शास्त्रविशारद-कविरत्न' इति पदा-
लङ्कृतेन विजय-लावण्य-
सूरिणा विरचितं तरङ्गा-
भिधं विवरणम् ॥

क्वचित् प्राच्यः पन्थाः क्वचिदपि च नव्यो बुधपथः,
क्वचित् स्वातन्त्र्याध्वा क्वचिदपि च तेषां समुदयः ।
श्रितोऽस्मिन् शिष्याणां मतिविकसनार्थं शुभधिया,
बुधैर्बुद्ध्वा तत्त्वं तदनुगतमर्प्यं श्रितजने ॥ १ ॥
सूरीन्द्रं हेमचन्द्रं कलिसकलविदं संस्मरामोऽभिरामं,
धीमन्तं हेमहंसं गणिमणिममलं तं कथं विस्मरामः ।
न्यायानामर्थसार्थं निजमतघटितं धारयन्तीं यदीयां,
मञ्जूषां प्राप्य जाता वयमिह प्रभवः साधु सिन्धौ तरङ्गे ॥२॥

# तरङ्गप्रशस्तिः ।

[ उपजातिः ]

श्रीनाभिजातं शुभशान्तिनाथं, सुभव्यराजीनयनामृतं च ।
प्रकाशिपं श्रीशुभवर्द्धमानं, नमामि नित्यं जिनराजराजम् ॥ १ ॥

[ शार्दूलविक्रीडितानि ]

लोकालोकविलोकिनो जिनपतेर्दूरीकृतांहस्ततेः, सोल्लासैरमराधिपैः कृतनतेः सूर्यातिगाङ्गद्युतेः ।
गीरीशस्य च नश्च शासनपतेः सिद्धार्थसत्सन्ततेः, पट्टं धर्मधुरन्धरं विजयते वीरप्रभोः सन्मतेः ॥ २ ॥

तत्र श्रीश्रुतकेवली गणिमणिश्चारित्रचूडामणिर्निर्ग्रन्थाभिधमच्छगच्छमतनोत् स्वामी सुधर्माभिधः ।
कोटीशः किल सूरिमन्त्रकलनात् कोटीति नाम्नोज्वलं, गच्छं चाच्छमतिश्च सुस्थित इति श्रीसूरिपोऽनु व्यधात् ॥ ३ ॥

चन्द्रं चन्द्रकलाकलापधवलं भूयोयशोमालिनं, गच्छं चानु चकार चारुचरणः श्रीचन्द्रसूरीश्वरः ।
तत्रैवानु च सूरिराट् शमनिधिः सामन्तभद्राभिधो, व्यातेने वनवासिगच्छममलं लीनं गुणानां गणे ॥ ४ ॥

संतापापहरं समाश्रितनृणां शाखावलीलालितं, दीक्षादानशुभास्पदं सुचरणाबद्धं विशालोन्नतम् ।
श्रेयांसं वटगच्छमच्छमतुलं सत्पुण्यपण्यापणमाचार्याधिप आततान तदनु श्रीसर्वदेवाभिधः ॥ ५ ॥

भूपालेन च मेदपाटपतिना दृष्ट्वा तपो दुष्करं, सान्वर्थं च महातपा इति पदं यस्मै ददे सम्मदात् ।
पुण्यात्मा विदधे ततः स च जगच्चन्द्राभिधः सूरिराट्, षष्ठं प्रष्ठगुणालयं किल तपागच्छं सदच्छाशयम् ॥ ६ ॥

गच्छेऽस्मिंश्च परम्परागतमहोवैशद्यलीलालये, श्रद्धाचारचितां कुलालयमये राद्धान्तमार्गाध्वगे ।
श्रीहीरेण जिनेन्द्रशासनशिरोहीरेण धीरेण च, भूपालाऽकबरप्रबोधनकृता पुण्यात्मना सूरिणा ॥ ७ ॥

मोहेलापतिपाटने पटुतमे सद्धर्मसेनाकरे, श्रीसेनेन च सैनिकेन गुणिना श्रेयोऽर्थिना सूरिणा ।
श्रीदेवेन च सूरिणा विबुधतास्फातिं परां बिभ्रता, श्रीसिंहेन च पापनागहरिणा श्रीसूरिणोल्लासिते ॥ ८ ॥

पृथ्वीं पादप्रचारतो विदधतो ध्वस्तान्धकारां वरां, निर्मातुः शमसागरोदयरमां सद्वृत्तताशालिनः ।
सत्सौम्याकृतिमालिनः कुवलयाऽऽनन्दं ददानस्य च, साधोस्तारकपस्य वृद्धिविजयाभिख्यस्य वै सद्गुरोः ॥ ९ ॥

पादाम्भोजरजोमरन्दमधुपो विद्याविलासालयो, भूपालावलिमौलिलालितपदाम्भोजो जनानन्ददः ।
उच्चाचारप्रचारप्रोद्यतमना नानामुनीनां गुरुरुद्वोढाऽऽगमयोगमुख्यविधिना प्रस्थानपञ्चत्परः ॥ १० ॥

स्वं चास्वं समयं सदा सहृदयं विद्वांश्च दिव्याकृतिर्नित्यं धर्मकथाविधौ विलसता माधुर्यमाबिभ्रता ।
गम्भीरध्वनिना घनाघनरवं हास्यास्पदं कुर्वता, तारेणाखिलभव्यकेकिनिकराऽऽनन्दं ददानः सना ॥ ११ ॥

तीर्थानामवने समुद्धृतिकृतौ लीनान्तरालः सदा, शीलं शैशवतोऽमलं च कलयन्नाचार्यचूलामणिः ।
सम्राट् श्रीजिनशासनस्य वसतिः प्रौढप्रतापश्रियो, राराजीतितरां जगद्गुरुरयं श्रीनेमिसूरीश्वरः ॥ १२ ॥

[ वसन्ततिलकानि ]

ईडे सुदर्शनधरं पुरुषोत्तमं तं, मैत्रीयुतं समुदयश्रियमादधानम् ।
सन्नन्दनं सुमनसामनुरागचङ्गं, विज्ञानतामरसतामरसाकरं च ॥ १३ ॥

भव्यालिपङ्क्तिकलं जडतातिगं च, नित्यं पुनानमखिलं किल साधुपद्मम् ।
सन्दर्शिताऽमृतपथं वरदेशनातो लावण्यमन्दिरमुदारमनोऽभिरामम् ॥ १४ ॥

साधुस्वकस्तुररवस्तुतकीर्तिजालं, भक्त्या नरेन्द्रनतपादकजं शिवाय ।
संसज्जयन्तमथ दक्षसुशीलमाशु, कल्याणकेलिमथकेवलकेलिधाम ॥ १५ ॥
नित्यं जिनं परधिया किल लोकमानं, सच्चन्दनं जनमनोभवतापहारम् ।
सन्मङ्गलं विबुधगीतगुणावलीं च, चक्रिं सदाचरणकान्तहितं मतीशम् ॥ १६ ॥
साधुकञ्चनवरकान्तं, सदातपोदयाञ्चितम् ।
विनोदजं सदामोदं, वितन्वानं महाशयम् ॥ १७ ॥ [ अनुष्टुप् ]

[ उपजातिः ]

चञ्चन्महानन्दविवर्धमानं, दिव्यं विकाशं च दधानमाशु ।
जितेन्द्रपाठं सुमनोहरं चा–मोदं ददानं मलयप्रकाशम् ॥ १८ ॥ [ पञ्चभिः कुलकम् ]

[ वसन्ततिलकानि ]

पुण्ये पुरे निवसता चतुरोऽत्र मासान्, वर्षासु पुण्यचयमर्जयतोपदेशैः ।
लावण्यसूरिविदुषैष कृततरङ्गो न्यायार्थसिन्धुविवृतिं विदधत् प्रशस्ताम् ॥ १९ ॥
श्रीहेमहंसगणिनीतिरिह क्वचित् तु, प्रत्युच्यते नवपथप्रकटीक्रियार्थम् ।
नात्मप्रकर्षगतये विमृशन्तु तत्त्वं, सन्तस्तथा प्रकटयन्तु मतं स्वकीयम् ॥ २० ॥
अत्र प्रसङ्गवशतः किल पाणिनीयो, मार्गो विवृत्य कथितः क्वचिदस्ति सम्यक् ।
स स्यात् क्वचित् स्वमतपोषणकृत् क्वचिच्च, नूत्नार्थबोधनकृते पठतां शिशूनाम् ॥ २१ ॥
मध्ये मया रुगुपघातवशेन साक्षान्नालोकि मुद्रणपुरोभवरूपमस्य ।
तेनाऽत्र सम्भवति यत् स्खलितं समीक्ष्य, तत् सज्जनाः शुभधिया परिशोधयन्तु ॥ २२ ॥

[ पुष्पिताग्रा ]

गगन-विधु-ख-नेत्र-सम्मितेऽब्दे, नरपतिविक्रमराज्यतो गतेऽद्य ।
समवसितिमगादयं तरङ्गो, भवतु चिराय जनोपकारकारी ॥ २३ ॥

# [ परिशिष्टम्–२ ]

## न्यायसमुच्चयस्थन्यायानामकाराद्यनुक्रमेण सूचिपत्रम्–


| न्यायः– | पृष्ठम्. |
|---|---|
| **अ** | |
| ( १ ) अदाद्यनदाद्योरनदादेरेव० । | ९८ |
| ( २ ) अनन्तस्यैव विधिर्निषेधो वा । | २१९ |
| ( ३ ) अनित्यो णिच् चुरादीनाम् । | १८४ |
| ( ४ ) अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्त० । | १३५ |
| ( ५ ) अन्तरङ्गं बहिरङ्गात् । | ७९ |
| ( ६ ) अन्तरङ्गाच्चानवकाशम् । | ९२ |
| ( ७ ) अन्तरङ्गानपि विधीन् यबादेशो बाधते । | १४३ |
| ( ८ ) अपवादात् क्वचिदुत्सर्गोऽपि । | ९३ |
| ( ९ ) अपेक्षातोऽधिकारः । | २२ |
| ( १० ) अर्थवद्ग्रहणे नाऽनर्थकस्य । | २६ |
| ( ११ ) अर्थवशाद् विभक्तिपरिणामः । | २५ |
| ( १२ ) अवयवे कृतं लिङ्गं समुदायमपि विशिनष्टि चेत्तं० । | १९४ |
| ( १३ ) असिद्धं बहिरङ्गमन्तरङ्गे । | ३७ |
| **आ** | |
| ( १४ ) आगमात् सर्वाऽऽदेशः । | ८९ |
| ( १५ ) आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते । | १११ |
| ( १६ ) आत्मने पदमनित्यम् । | १७९ |
| ( १७ ) आ दशभ्यः सङ्ख्या सङ्ख्येये वर्तते न सङ्ख्याने । | १७३ |
| ( १८ ) आदेशादागमः । | ८९ |
| ( १९ ) आद्यन्तवदेकस्मिन् । | ९ |
| **उ** | |
| ( २० ) उक्तार्थानामप्रयोगः । | ५५ |
| ( २१ ) उणादयोऽव्युत्पन्नानि नामानि । | १८९ |
| ( २२ ) उत्सर्गादपवादः । | ९२ |
| ( २३ ) उपपदविभक्तेः कारकविभक्तिः० । | |
| ( २४ ) उपसर्गो न व्यवधायी । | १२० |
| ( २५ ) उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक् । | १९२ |
| **ऋ** | |
| ( २६ ) ऋकारापदिष्टं कार्यं लृकारस्यापि । | १२३ |
| ( २७ ) ऋतोर्वृद्धिमद्विधावयवेभ्यः । | ६ |
| **ए** | |
| ( २८ ) एकदेशविकृतमनन्यवत् । | |
| ( २९ ) एकशब्दस्याऽसङ्ख्यात्वं क्वचित् । | १७३ |
| ( ३० ) एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य । | ६३ |
| **क** | |
| ( ३१ ) किं हि वचनान्न भवति । | २२४ |
| ( ३२ ) कृत्रिमाऽकृत्रिमयोः कृत्रिमे । | ४९ |
| ( ३३ ) कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च । | १४८ |
| ( ३४ ) क्वचिदुभयगतिः । | ५० |
| ( ३५ ) क्विपि व्यञ्जनकार्यमनित्यम् । | १६० |
| ( ३६ ) क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते । | १९१ |
| ( ३७ ) क्विबर्थं प्रकृतिरेवाह । | २२२ |
| **ग** | |
| ( ३८ ) गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः । | १६८ |
| ( ३९ ) गत्यर्था ज्ञानार्थाः । | १८७ |
| ( ४० ) गामादाग्रहणेष्वविशेषः । | १३७ |
| ( ४१ ) गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः । | ४३ |
| ( ४२ ) ग्रहणवता नाम्ना न तदन्तविधिः । | १३० |
| **ङ** | |
| ( ४३ ) ङित्त्वेन कित्त्वं बाध्यते । | २१५ |
| **च** | |
| ( ४४ ) चकारो यस्मात् परस्तत्सजातीयमेव समुच्चिनोति । | २०६ |
| ( ४५ ) चानुकृष्टं नानुवर्तते । | २०७ |
| ( ४६ ) चानुकृष्टेन न यथासंख्यम् । | २०७ |
| **ण** | |
| ( ४७ ) णिच्सन्नियोगे एव चुरादीनामदन्तता । | १८५ |
| ( ४८ ) णिलोपोऽप्यनित्यः । | १८५ |
| ( ४९ ) णौ यत् कृतं कार्यं तत् सर्वं स्थानिवद् भवति । | १७६ |
| **त** | |
| ( ५० ) तद्धितीयो भावप्रत्ययः सापेक्षादपि । | १६७ |
| ( ५१ ) तन्मध्यपतितस्तद्ग्रहणेन गृह्यते । | ११० |
| ( ५२ ) तिवा शवाऽनुबन्धेन० । | ३३ |
| ( ५३ ) त्यादिष्वन्योऽयं नाऽसरूपोत्सर्गविधिः । | २०० |
| **द** | |
| ( ५४ ) द्वन्द्वात् परः प्रत्येकमभिसम्बध्यते । | २२३ |
| ( ५५ ) द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः । | १४८ |
| ( ५६ ) द्विर्बद्धं सुबद्धं भवति । | १७८ |
| ( ५७ ) द्वौ नञौ प्रकृतमर्थं गमयतः । | २०५ |
| **ध** | |
| ( ५८ ) धातवोऽनेकार्थाः । | १८६ |
| ( ५९ ) धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् । | ५२ |

न्यायः— पृष्ठम्.

**न**

( ६० ) न केवला प्रकृतिः प्रयोक्तव्याः । २२१
( ६१ ) नत्रुक्तं तत्सदृशे । ५४
( ६२ ) न स्वराऽऽनन्तर्ये । ४१
( ६३ ) नाऽनिष्टार्था शास्त्रप्रवृत्तिः । ९३
( ६४ ) नाऽनुबन्धकृतान्यसारूप्यानेकस्वरत्वाऽनेकवर्णत्वानि । ६४
( ६५ ) नान्वाचीयमाननिवृत्तौ प्रधानस्य । ६१
( ६६ ) नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम् । २१३
( ६७ ) नामग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणम् । ३०
( ६८ ) नाम्नां व्युत्पत्तिरव्यवस्थिता । १८८
( ६९ ) नित्यादन्तरङ्गम् । ९१
( ७० ) निमित्ताऽभावे नैमित्तिकस्याऽप्यभावः० । ५८
( ७१ ) निरनुबन्धग्रहणे न साऽनुबन्धकस्य । ६२
( ७२ ) निरनुबन्धग्रहणे सामान्येन । १०२
( ७३ ) निरवकाशं साऽवकाशात् । ८१
( ७४ ) न्यायाः स्थविरयष्टिप्रायाः । २२५

**प**

( ७५ ) परादन्तरङ्गं बलीयः । २१६
( ७६ ) परान्नित्यम् । ९०
( ७७ ) परार्थे प्रयुज्यमानः शब्दो वतमन्तरेणाऽपि वदर्थं गमयति । २०४
( ७८ ) पर्जन्यवल्लक्षणप्रवृत्तिः । २२०
( ७९ ) पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यं पश्चात् सन्धिकार्यम् । १५२
( ८० ) पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् । ७१
( ८१ ) प्रकृतिग्रहणे यङ्लुबन्तस्याऽपि [ ग्रहणम् ] । ३२
( ८२ ) प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम् । ९५
( ८३ ) प्रकृतिवदनुकरणम् । १२
( ८४ ) प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायते । २१७
( ८५ ) प्रत्ययाप्रत्यययोः प्रत्ययस्यैव । ९७
( ८६ ) प्रधानस्य तु सापेक्षत्वेऽपि समासः । १६२
( ८७ ) प्राकरणिकाऽप्राकरणिकयोः प्राकरणिकस्यैव । ९९

**ब**

( ८८ ) बलवन्नित्यमनित्यात् । ७६

**भ**

( ८९ ) भाविनि भूतवदुपचारः । १६
( ९० ) भूतपूर्वकस्तदुपचारः । १५

**म**

( ९१ ) मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् । ७२

न्यायः— पृष्ठम्.

**य**

( ९२ ) यत्राऽन्यत् क्रियापदं न श्रूयते तत्राऽस्ति-भवन्तीपरः प्रयुज्यते । २०९
( ९३ ) यत्रोपसर्गत्वं न संभवति तत्रोपसर्गशब्देन प्रादयो लक्ष्यन्ते न तु संभवत्युपसर्गत्वे । १९७
( ९४ ) यथासङ्ख्यमनुदेशः समानाम् । १७
( ९५ ) यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः । २११
( ९६ ) यस्य तु विधेर्निमित्तमस्ति नाऽसौ विधिर्बाध्यते । ७३
( ९७ ) यस्य येनाऽभिसम्बन्धो दूरस्थस्याऽपि तेन सः । २१२
( ९८ ) यावत् संभवस्तावद्विधिः । २०१
( ९९ ) येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः । १९५
(१००) येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः । ७३
(१०१) येन विना यन्न भवति तत् तस्यानिमित्तस्याऽपि निमित्तम् । २२१
(१०२) येन नाव्यवधानं तेन व्यवहितेऽपि स्यात् । १२२
(१०३) यं विधिं प्रति उपदेशोऽनर्थकः स विधिर्बाध्यते । ७२
(१०४) य्वृद् य्वृदाश्रयं च । ८२

**ल**

(१०५) लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् । २९
(१०६) लुबन्तरङ्गेभ्यः । ८६
(१०७) लोपात् स्वरादेशः । ८८

**व**

(१०८) वर्णग्रहणे जातिग्रहणम् । १०५
(१०९) वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते । १०८
(११०) वर्णात् प्राकृतम् । ८१
(१११) विचित्राः शब्दशक्तयः । २२३
(११२) विधिनियमयोर्विधिरेव ज्यायान् । २१८
(११३) विवक्षातः कारकाणि । १९
(११४) व्याख्यातो विशेषाऽर्थप्रतिपत्तिः । २०८

**श**

(११५) शिष्टानामनिष्पत्तिप्रयोगधातूनां सौत्रत्वाल्लक्ष्यानुरोधाद्वा सिद्धिः । २२७
(११६) शीलादिप्रत्ययेषु नाऽसरूपोत्सर्गविधिः । १९८
(११७) शुद्धधातूनामकृत्रिमं रूपम् । १९०
(११८) श्रुताऽनुमितयोः श्रौतो विधिर्बलीयान् । १३८

**स**

(११९) सकारापदिष्टं कार्यं तदादेशस्य शकारस्यापि । १२४
(१२०) सकृद्गते स्पर्धे यद् बाधितं तद् बाधितमेव । १४४
(१२१) संज्ञा न संज्ञान्तरबाधिका । १५५

| न्यायः– | पृष्ठम्. |
|---|---|
| (१२२) संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य । | १२७ |
| (१२३) सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । | ३५ |
| (१२४) सन्नियोगशिष्टानामेकापायेऽन्यतरस्याऽप्यपायः । | ६० |
| (१२५) संभवे व्यभिचारे च विशेषणमर्थवत् । | २०२ |
| (१२६) समासतद्धितानां वृत्तिर्विकल्पेन वृत्तिविषये च नित्यैवापवादवृत्तिः । | १७० |
| (१२७) समासान्ता-ऽऽगम-संज्ञा-ज्ञापक-गण-नञ्-निर्दिष्टान्यनित्यानि । | ६८ |
| (१२८) सर्वत्रापि विशेषेण सामान्यं बाध्यते न तु सामान्येन विशेषः । | २१४ |
| (१२९) सर्वं वाक्यं सावधारणम् । | २०३ |
| (१३०) सर्वेभ्यो लोपः । | ८७ |

| न्यायः– | पृष्ठम्. |
|---|---|
| (१३१) सापेक्षमसमर्थम् । | १५९ |
| (१३२) सामान्यातिदेशे विशेषस्य नातिदेशः । | २१३ |
| (१३३) साहचर्यात् सदृशस्यैव । | १०३ |
| (१३४) सिद्धे सत्यारम्भो नियमार्थः । | ५१ |
| (१३५) सुसर्वार्धदिक्शब्देभ्यो जनपदस्य । | ४ |
| (१३६) स्वरस्य ह्रस्वदीर्घप्लुताः । | ७ |
| (१३७) स्वं रूपं शब्दस्याशब्दसंज्ञा । | १ |
| (१३८) स्वाङ्गमव्यवधायि । | ११६ |
| (१३९) स्त्रीखलना अलो बाधकाः, स्त्रियाः खलनौ । | २०० |
| (१४०) स्थानिवद्भाव-पुंवद्भावैकशेष-द्वन्द्वैकत्व-दीर्घत्वान्यनित्यानि । | १८१ |
| **ह** | |
| (१४१) ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य । | १२६ |

# न्यायार्थसिन्धु-तरङ्गसहितन्यायसमुच्चयस्य शुद्धाशुद्ध-प्रदर्शकपत्रम्

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३ | ५६ | °शब्देनायमर्थो ग्राह्यः | °शब्देनायमेवार्थो बोध्यः |
| ,, | ६६ | °पुरुषोदीरित | °पुरुषाद्युदीरित |
| ५ | १४ | इत्यादीनां | इत्यादिना |
| ,, | २५ | नास्यानित्यता ज्ञापक० | नास्य नित्यतायां ज्ञापक० |
| ७ | ३७ | भर्तुसन्धादे रण | भर्तुसन्ध्यादेरण् |
| ८ | १० | दृषदमश्नतीति | दृषदमश्नन्तीति |
| ,, | ७७ | चर्चाऽऽवश्यकी। | चर्चाऽऽवश्यिका" इति। |
| ९ | ५६ | मात्रस्येन्द्रादिशब्दत्वात् | मात्रस्येन्द्रादिशब्दत्वात् |
| १० | ५७ | व्यवहारो मुख्यो | व्यवहारो वा मुख्यो |
| ११ | ५१ | विस्तारभयान्न | विस्तरभयान्न |
| १३ | ७० | 'अम्' शब्दे | 'अभ्' शब्दे |
| १४ | १९ | अभिसार | अतिसार |
| ,, | ४९ | तर्हीं | तर्हि |
| ,, | ७६ | हिमवत्यापि | हिमवत्यपि |
| ,, | ७८ | मव्ययादि | माव्ययादि |
| १५ | २ | स्थानिवद्विधा° | स्थानिवत्त्वविधा° |
| ,, | १५ | भूत पूर्वस्थानेप्र युज्य | भूतपूर्वस्थाने प्रयुज्य |
| ,, | ५७ | दिवा भुञ्जानस्य | दिवाऽभुञ्जानस्य |
| ,, | ६७ | न्यायास्याप्यप्र. | न्यायस्याप्यप्र. |
| १६ | ४१ | व्यवह्रियते | व्यवह्रियेत |
| १८ | ९ | पदेनोपस्थितिः पश्चा° | पदेनोपस्थितिपश्चा° |
| ,, | ३५ | बहुनिष्ठा | वह्निष्ठा |
| ,, | ६२ | ठक् | ढक् |
| १९ | ५ | संख्यातातुदेशो | संख्यातानुदेशो |
| ,, | ८ | द्विरेफौ | द्विरेफो |
| ,, | ४० | चेत् ? अत्रापि | चेत् ? न अत्रापि |
| २० | ६७ | एता कृत्रिमाः | एताः कृत्रिमाः |
| २४ | ६७ | वृद्ध्यौत्व | वृद्ध्यौत्व |
| २६ | २० | सूत्रे | इति सूत्रे |
| २९ | ६९ | दिनार्थकस्याहन् | दिनार्थकस्याहन् |
| ३० | ४२ | औत् | ओत् |
| ३२ | ५२ | तत्रापीयुनिषेधः | तत्रापीण्निषेधः |
| ,, | ६० | यङ्लुक्व्यावृत्तिः | यङ्लुग्व्यावृत्तिः |
| ,, | ६२ | प्रदर्शयित्वा | प्रदर्श्य |
| ,, | ६५ | प्रकृतेरनुदात्तत्वे | प्रकृतेरनुदात्तेत्त्वे |
| ,, | ६६ | श्रूयमाणैकच्त्वा. | श्रूयमाणैकाच्त्वा. |
| ३३ | ४८ | प्रायुक्त+++प्रायुक्तं | प्रायुङ्क्त+++प्रायुङ्क्त |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३४ | ७ | अपादित्यादि | अपापादित्यादि |
| ,, | ९ | ङियश्चैदितः | ङीयश्च्यैदितः |
| ,, | २४ | ङीयश्चयैदितः | ,, |
| ,, | ४७ | अत एवयङ्लुपि | अत एव |
| ,, | ४८ | ( ३-२ २२ ) | ( ३-३-२२ ) |
| ३५ | ११ | बेमिदीती | बेभिदीती |
| ,, | ,, | श्नमुश्यनादयः | श्यन्श्नमादयः |
| ,, | १५ | श्चिप्शपा | श्तिप्शपा |
| ,, | २९ | लक्षणो | लक्षणं |
| ,, | ६२ | देवैरिति | देवैरितीति |
| ,, | ६३ | वाच्यम् ; देवैरिति | वाच्यम् ; यतः, देवैरिति |
| ३६ | ६२ | पित्कृतिः | पित्कृति |
| ३९ | ३० | कत्वमेन | कत्वमेव |
| ,, | ८० | अश्वेति | आश्वेति |
| ४४ | १४ | याप्यप्रधानम् | याप्यप्रधानम् |
| ४५ | ९ | विशेषता | विशेष्यता |
| ,, | २३ | स्यार्य | स्यायं |
| ,, | ३७ | प्रवृत्तेः | प्रवृत्तिः |
| ,, | ३८ | प्रवृत्तिः | प्रवृत्तेः |
| ४६ | ६४ | विशेषेण | विशेष्येण |
| ,, | ७२ | विशेषत्वा | विशेष्यत्वा |
| ४७ | २ | तत्र च | इति, तत्र च |
| ,, | १० | विशेषत्वम् | विशेष्यत्वम् |
| ,, | १२ | सति स | सति |
| ५० | ४९ | अत एव | एत एव |
| ,, | ५६ | योगिदृष्टेति | योगिदृष्टयेति |
| ५२ | ७४ | पूर्वसम्बन्ध्य | पूर्वं सम्बन्ध्य |
| ५३ | २१,४३ | दूषयती | दोषयती |
| ५४ | १९ | धिकाराश्च | धिकारश्च |
| ५५ | १४ | तत्र न्यायाप्रवृत्ति | न्यायाप्रवृत्ति |
| ५६ | २८ | इत्यैक | इत्येक |
| ,, | ४३ | अत्रत्यैक | अत्रत्यैक्य |
| ५९ | ४५ | अय्+सि | अयू+सि |
| ६४ | १९ | तदनुबन्धकम् | तदनुबन्धक० |
| ६५ | १ | बलादेव सिद्ध | बलादेव ष्यण् सिद्ध |
| ,, | १६ | प्रेत्त | प्रेत |
| ,, | ७० | द्वयस्येवा | द्वयस्येवा |
| ६६ | ९ | षस्य | ष्यस्य |
| ,, | ६४,७५,७८ | डा-ऽणो | डाणो |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
| --- | --- | --- | --- |
| ६८ | ८ | घर्मेवा | धर्मेवा |
| ,, | ७३ | दरीद्रावित्यस्य | ददरिद्राविल्यस्य |
| ६९ | ८८ | गृहे | ग्रहे |
| ७० | ५३ | कृते | कृतेऽपि |
| ७१ | २९ | तात्रतैवेष्ठ | तावतैवेष्ट |
| ७२ | ६१ | लक्ष्ये | लक्ष्यं |
| ७४ | ४ | सत्वं | रुत्वं |
| ७५ | ८० | बाध्या | बाधा |
| ७७ | ४१ | घ्यन्त्य | घ्यन्त |
| ७८ | ४१ | ज्ञापक कथनं | ज्ञापकत्व कथनम् |
| ,, | ७१ | तत्र वृद्धेर्बली | तत्र लोपस्य वृद्धेर्बली |
| ७९ | ६९ | प्रयोजक | प्रयोजकं |
| ८० | ५७ | शात्ति | शास्त्रि |
| ८२ | ४९ | भयेकार | भयोकार |
| ८३ | ६४ | बार्णे | वार्णे |
| ८४ | २५ | उपायातर | उपायान्तर |
| ८५ | ९ | बोधे | फले |
| ,, | २९ | न्यायेनोप | न्यायेनौप |
| ,, | ३२ | सत्सप्तम्यैव | सत्सप्तम्येव |
| ,, | ४१ | नन्वेत | नत्वेत |
| ,, | ५० | वृत्तिषु व्यपेक्षा | वृत्तिषु पक्षे व्यपेक्षा |
| ८६ | २३ | पदं ग्रहणं | पदग्रहणं |
| ,, | २७ | ज्ञापित्वे | ज्ञापिते |
| ,, | ६१ | त्वद्बाधनार्थं | तद्बाधनार्थं |
| ८७ | २४ | अकब् | अकच् |
| ८८ | ३ | तत्सम्बन्ध | तत्सम्बद्ध |
| ९० | २७ | व्यवस्थापकत्वं | व्यवस्थापकं |
| ,, | ६४ | तत्लकि | तल्लुकि |
| ९१ | ६६ | ततो विसर्गे | विसर्गे |
| ,, | ६९ | निर्देशोऽयं | निर्देशोऽमुं |
| ९२ | ७५ | त्वेनऽबाधे | त्वेन बाधे |
| ,, | ७६ | सार्थक | सार्थक्य |
| ९३ | ४२ | कृते चारिताथ्र्ये | कृतेऽचारिताथ्र्ये |
| ९४ | २१ | ऐस् भावा | ऐसभावा |
| ९५ | ४ | नेदमसोरकि | नेदमदसोऽकि |
| ,, | ६१ | स्वार्थिकतममपि | स्वार्थिकतमपि |
| ९६ | १६ | विशेषश्चप्रति° | विशेषश्चाग्रे प्रति° |
| ९९ | १३ | अदायनदाय | अदायनदायोः |
| ,, | ७२ | पूगादमुख्यकाञ्ञो | पूगादमुख्यकाञ्ञ्यो |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १०० | १४ | तद्धिताधिकारात् | तद्धितप्रकरणात् |
| ,, | १७ | ङीर्भवति | ङीर्भवति |
| १०२ | ३१ | तिङन्तरस्य | तिङन्तस्य |
| ,, | ४८ | पुष्कसच्छब्दस्य | पुष्करसच्छब्दस्य |
| १०३ | ४५ | पाचयांचकुषा | पाचयांचक्रुषा |
| ,, | ६३ | पाचयाञ्चक्रुषे° | °पाचयाञ्चकुषे° |
| १०४ | ३७ | विधेयोति | विधेयेति |
| ,, | ५३ | पातयामील्तस्य | पातयामित्यस्य |
| १०५ | ७ | विवृत्ततर | विवृततर |
| १०६ | १९ | सुध्यावा | सुध्यावा |
| ,, | २१ | सुधिनावा | सुधिनावा |
| ,, | ६७ | चोरी | चोरि |
| १०७ | १४ | इद् ईति | इद ईति |
| ,, | ३२ | वादीनां | वादिनां |
| ,, | ५५ | कार्यान्वयमती | कार्यान्वयवती |
| ११० | ६५ | धातुरुपा | धातुरूपा |
| ११२ | २९ | अकाखा | अकखा |
| ,, | ४९ | स्तुस्तुभोऽव्य° | स्तुस्तुभोऽव्य° |
| ,, | ५६ | अव्यपि | अव्यपि |
| ,, | ६१ | मव्यपी | मव्यपी |
| ११४ | ४३ | धार् | धार् |
| ११५ | ७० | तस्मादीय | तस्मादिय |
| ११६ | ३८ | स्वरादेङ्कित | स्वरादेःङ्कित |
| ,, | ५३ | द्विप्रयोग | द्विःप्रयोग |
| ११९ | १७ | तयैवेष | तयैवैष |
| १२० | ६५ | इतिकस्या° | इति न कस्या° |
| १२१ | ५९ | इहांचक्रे | ईहांचक्रे |
| १२३ | ७३ | पूर्वमनैमित्तिकत्वात् पूर्वम्. "क्रूर०; | पूर्वमनैमित्तिकत्वात् "क्रूर० |
| १२४ | ७ | यत लकार | यत् लकार |
| ,, | ५७ | ङ्ः त्सः सोऽश्वः | ङ्ः सः त्सोऽश्चः |
| १२५ | १ | पूर्वकास्तदु | पूर्वकस्तदु |
| ,, | १९ | सकारोपदिष्टं | सकारापदिष्टं |
| ,, | ६७ | पठत्नैवं | पठन्नेवं |
| १२६ | ७८ | वास्तविकं प्रदर्शनाय | वास्तविकमिति प्रदर्शनाय |
| १२९ | ८२ | कार्यत्वस्य | कार्यित्वस्य |
| १३० | ६७ | प्रयोजनभावात् | प्रयोजनाभावात् |
| १३१ | ३३ | विवक्षा व्याख्यान | विवक्षाव्याख्यान |
| १३२ | ५२ | स्यात् तदादिविधि | स्यात्तदातदादिविधि |
| ,, | ७८ | व्यावर्त्यत्वेन प्रदर्श्य | व्यावर्त्यत्वं प्रदर्श्य |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १३३ | १६ | चिन्त्या | चिन्त्यम् |
| ,, | ४६ | ]इति सूत्रे | इति सूत्रे ] |
| १३४ | १९ | प्रातिपदिकेन तदन्तविधिः | प्रातिपदिकेन न तदन्तविधिः |
| ,, | २८ | इति स्यान्ते | इति सूत्रस्यान्ते |
| ,, | ४३ | सूत्रस्थाने | सूत्रस्यान्ते |
| १३५ | ५७ | स्वरणाः इति | खुरणाः इति |
| ,, | ६७ | तादवास्थ्यमेव | तादवस्थ्यमेव |
| १३६ | १ | एबम् | एवम् |
| ,, | ४ | मेघास्रजो | मेधास्रजो |
| ,, | ४८ | न त्वतुशब्दस्य | न तु तदेकदेशस्य |
| १३७ | ३ | कस्मिश्चिद् | कस्मिंश्चिद् |
| ,, | ६३ | सकलः | सफलः |
| ,, | ७० | अदाघनदाघो | अदाद्यनदाद्यो |
| १३८ | ६९ | ऋतां क्ङितीर् | ऋतां क्ङितीर् ( अत्र प्रकरणे सर्वत्र ह्रस्व ऋकारस्य स्थाने दीर्घः पठनीयः ) |
| १३९ | ५ | श्यकीति | रियकेति |
| ,, | ३७ | विकल्पे न | विकल्पेन |
| १४० | ३१ | शयपादे | श्यपादे |
| ,, | ४९ | योगिकः | यौगिकः |
| ,, | ७६ | प्रमाणागत | प्रमाणावगत |
| ,, | ७८ | श्रतिभिन्न | श्रुतिभिन्न |
| १४१ | ४४ | विषत्वाभावात् | विषयत्वाभावात् |
| ,, | ४९ | विश्वग्देवा | विष्वग्देवा |
| ,, | ५० | क्यञ्चविति | कयञ्चाविति |
| १४३ | ५७ | मिद्त्वं | मिद्च |
| ,, | ५८ | भावाः | भावः |
| ,, | ६१ | इद्त्वं | इद् |
| १४४ | ९ | ऽयमपीति | ऽयपीति |
| १४५ | १ | प्रसारेण | प्रसरेण |
| ,, | ३४ | नावश्यकी | नावश्यिका |
| १४६ | १ | नियामिकत्वा | नियामिकात्वा |
| ,, | ४४ | प्रतिलक्ष्ये | प्रतिलक्ष्यं |
| ,, | ६६ | { स्पर्धस्थलमूतालक्ष्य { व्यक्तिस्वभिन्न° | { स्पर्धस्थलभूता लक्ष्यव्यक्तिः { स्वभिन्न° |
| १४७ | ४६ | ( १. १. १०३ ) | ( २।१।१०३ ) |
| १४८ | ३ | विवेचनीयम् । | विवेचनीयमित्याद्यूचिरे, तन्न; उपसर्गसमानाकारमित्यादेर्ज्ञापकसिद्धत्वेनासार्वत्रिकत्वादाचार्यवचनप्रामाण्यादिहाप्रवृत्तावुदयतीति स्वेष्टरूपसिद्ध्यर्थं णिवर्जनमावश्यकमिति तदुक्तरीत्योक्तन्यायज्ञापकमपि भवत्येवेति |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १४८ | ६३,७२ | स्वरादेस्तास्तु | स्वरादेस्तासु |
| १४९ | ३३ | संपूर्वस्य | संपूर्वाभ्यां |
| १५० | ५६ | पूर्वमेवाडाटस्तन्मते | पूर्वमेवाडाटोस्तन्मते |
| १५२ | ४२ | नुपद्याती | नुपघाती |
| १५३ | ५९ | तेऽपि स्वांशे | तेऽपि न्याये स्वांशे |
| १५३ | ६१ | कार्यं कार्यं पश्चात् | कार्यं पश्चाच्च |
| ,, | ६६ | पूर्वं पदत्वो° | पूर्वपदत्वो° |
| ,, | ७६ | रात्रिमहः | रात्रिमटः |
| १५४ | १४ | व्याकरणशब्देन | व्याकरणशब्दो न |
| १५५ | २६ | तद 'घु'शब्दो° | तदा 'घु' शब्दो° |
| १५६ | ५३ | स्पर्द्धस्याभावोद्भावेन | स्पर्द्धाभावस्योद्भावनेन |
| ,, | ६२ | निवृद्धिः | निवृत्तिः |
| ,, | ७५ | कर्मसंज्ञे च पृथ° | कर्मसंज्ञे पृथ° |
| १५८ | ५ | भिधायिकानि | भिधायकानि |
| ,, | ४० | °भवनस्येव | °भवनस्यैव |
| ,, | ५२ | प्रसक्तानुप्रसत्तया | प्रसक्तानुप्रसक्तचर्चया |
| ,, | ७८ | व्यावृत्यर्थत्वात् | व्यावृत्त्यर्थत्वात् |
| १५९ | २० | भाषासङ्कृते° | भाष्यासङ्कृते° |
| ,, | ६२ | बुभूषतीरिति | बुभूषतीति |
| १६० | १२ | वृत्यन्तर्गत | वृत्त्यन्तर्गत |
| ,, | ६२ | °स्वार्थपक्षे | स्वार्थापक्षे |
| १६१ | ४२ | बहूना | बहूनां |
| १६२ | ४ | सविशेषानां | सविशेषणानां |
| १६४ | २१ | सर्पिस्करोती° | सर्पिष्करोती° |
| ,, | ३७ | ,, | ,, |
| ,, | ५५ | विध्यमान | विद्यमान |
| | | [ तत्रैव २. १. १. ] सूत्रे | तत्रैव [ २. १. १. ] सूत्रे |
| ,, | ७३ | स्यात्, अभिना | स्यात्" इति । अभिना |
| १६५ | ५ | पदार्थबाधी | पदार्थ विरोधी |
| ,, | १४ | त्यजते | त्यज्यते |
| १६६ | ४१ | भावः समाधत्ते | भावः । समाधत्ते |
| १६७ | ६ | पुर्वोत्तरन्यायेन | पूर्वोक्तन्यायेन |
| ,, | २६ | ठ्यण् | ठ्यण् |
| १६८ | ३८ | भवति वा | भवति न वा |
| १६९ | ५८ | यत्नाचरा° | यत्नान्तरा° |
| १७१ | १ | वृत्तेस्तात् | वृत्तेस्तावत |
| ,, | ३३ | कार्यपूर्वं | कायपूर्वं |
| १७२ | २३ | [ १. १. ] | [ १. १. २५ ] |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १७३ | २३ | संख्यातपुण्य° | संख्यातैकपुण्य° |
| १७६ | ६५ | °स्थापवगे | स्थापवर्गे |
| १७७ | २ | पूङः | पूङः |
| ,, | ५६ | ङ्परणि° | बहिर्भूतसन्-ङ्परणि° |
| ,, | ७३ | द्वित्वपरखण्डे | ( द्वित्वपरखण्डे ) |
| १७५ | २० | जिजयिषती° | जिजविषती° |
| ,, | २२ | महाभाष्यव्याकरणग्रन्थ | महाभाष्याद्याकरग्रन्थ |
| ,, | ६० | °न लोपस्या° | नलोपस्या° |
| १८१ | ३३ | भावदुपान्त्य° | भावादुपान्त्य° |
| १८२ | १ | [ ६. ३. ३. ] | [ ६. ३. १३. ] |
| ,, | ,, | पुरमस्त्यण् | पुरसस्त्यण् |
| १८३ | ७६ | तदा तदात्मकं | तदतदात्मकं |
| १८४ | ३ | ईदशा | ईदृश्या |
| ,, | ७ | वीणामिति | वीणमिति |
| ,, | २५ | मेवेह | मेव हि |
| ,, | ३५ | युक्तं प्रतिभाति । | युक्तं प्रतिभाति । वस्तुतस्तु तथा सति द्विवचनं क्लीबत्वं च स्यात्, इतरेतरयोग-द्वन्द्वेऽवयवगतसंख्याविवक्षायाः सत्त्वेन समासस्य द्व्यवयवकत्वात्, परवल्लिङ्गत्वाच्च । तथा चैकवद्भावानित्यत्वं, महाभाष्यानुमतं तूर्यवादकानामेव तूर्याङ्गत्वमिति वा श्रयणीयम् |
| ,, | ३७ | "कुर्दनः" | "कूर्दनः" |
| ,, | ४२ | धातुदीर्घः | धातुर्दीर्घः |
| १८६ | १० | यदित्वा० | यदीत्वा० |
| ,, | २५ | दड्य० | द्रड्य |
| १८८ | ३३ | वडि-वटिः | वडि-वटि० |
| ,, | ६६ | शब्दकारं | शब्दाकारं |
| १८९ | १४ | न्यायात् | परिभाषया |
| १९१ | ३१ | स्यादिना० | स्यादीना० |
| ,, | ६४ | तत्त्वप्रधान० | सत्त्वप्रधान |
| ,, | ७८ | मितीत्युक्तं | मिति युक्तं |
| १९२ | ६६ | व्यवहारता | व्यवहरता |
| १९३ | ३२ | घेदोति | धेदोति |
| ,, | ४२ | माख्याद० | माख्यद- |
| १९४ | ३० | विष्टावर्ण- | विशिष्टावर्ण- |
| १९५ | ५९ | पमर्य्यादा- | परमर्य्यादा- |
| ,, | ७४ | वाधः | बाधः |
| १९६ | ४९ | किममि | किमपि |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १९६ | ७१ | [ ऋत्यारुपसर्गस्य ] इति | [ ऋत्यारुपसर्गस्येति ] |
| १९७ | १४ | श्रिततयो- | श्रितयो- |
| ,, | २९ | विधावाश्रयामः | विधानमाश्रयामः |
| ,, | ७५ | युक्ता संप्रतीति | युक्तास्संप्रतीति |
| १९८ | ३ | भविष्यति | भविष्यन्ति |
| १९९ | २ | इत्युकत्णो | इत्युकणो |
| ,, | ३२ | तश्च | तच्च |
| ,, | ५६ | स्वरूपत्वमुक्त- | स्वरूपमुक्त |
| ,, | ५८ | रित्याभिप्रायो | रित्यभिप्रायो |
| २०० | ३ | सकले | सफले |
| २०१ | १७ | करणधारे | करणाधारे |
| ,, | ३६ | किरेवेति | क्तिरेवेति |
| २०२ | १४ | यावत् संभवं | यावत्संभवं |
| ,, | १९ | द्वित्वप्रास- | द्वित्वं प्रास- |
| ,, | ४८ | कञ्जन | व्यञ्जन |
| ,, | ६० | मच्च | यश्च |
| २०३ | १४ | रं रभ्यसे | रं रम्यते |
| २०४ | ३४ | वैचित्या | वैचित्र्या |
| ,, | ५८ | वितकयन् | वितर्कयन् |
| २०५ | ८ | शब्दार्थस्य | शक्यार्थस्य |
| ,, | ७३ | निषेधस्य | निषेध्यस्य |
| २०७ | ५६ | स्पृष्ट | स्पष्ट |
| २०८ | १ | न्यायं फलं | न्यायफलं |
| ,, | ३ | तौ | वौ |
| २१० | ३ | प्रयोगस्तया | प्रयोगस्तथा |
| २११ | १९ | सिध्यत्वेवेति | सिध्यत्येवेति |
| ,, | ७२ | लक्षितः | लक्षितम् |
| २१२ | ३३ | तदसत्व | तदसत्त्व |
| ,, | ७५ | कृतः | क्रुतः |
| २१३ | २५ | दवप्यय | दप्यय |
| ,, | ४२ | भूतवच्चाशस्ये | भूतवच्चाशंस्ये |
| २१५ | १४ | तक्र | तत्र |
| ,, | ५८ | उपलक्षविध | उपलक्षणविध |
| २१६ | ३२ | माहृत | मादत्त |
| २१७ | २४ | ऐक्यार्थे | ऐकार्थ्ये |
| ,, | २९ | अयं च | अस्य च |
| ,, | ५६ | दजन्त्यत्वा- | दजन्तत्वा |
| ,, | ७० | गुरुपो. | गुरुपो- |
| २१८ | ३० | रूपोत्तरपदा- | रूपपरपदा |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २१८ | ४७ | ऐक्यार्थे | ऐकार्थ्ये |
| २१९ | ४१ | एवोदाद्रियते | एवोदाह्रियते |
| ,, | ६६ | एवं | एव |
| ,, | ,, | औश्न् | औश्न् |
| ,, | ७६ | पाठिता | पठिता |
| २२० | ३० | तात्कान्तिक | तात्कालिक |
| २२१ | ५९ | रूपाद्यैः | रुपाद्यैः |
| २२२ | २४ | णिजन्तात्। क्विपि | णिजन्तात् क्विपि, |
| ,, | ४२ | कतृत्वं | कर्तृत्वं |
| ,, | ५० | मत्वे | यत्वे |
| ,, | ,, | युष्मा | युष्या |
| ,, | ५१ | य त्वमप्य. | यत्वमप्य- |
| २२३ | ८ | [ २. १. ११. ] | [ १. ४. ११. ] |
| २२४ | ३८ | असूर्योप्रद् | असूर्योप्राद् |
| ,, | ४४ | नहाद्दोर्घतौ | नहाद्दोधतौ |
| ,, | ४९ | स्थास्यतेवेति | स्थास्यत्येवेति |
| ,, | ५५ | वेष्ठेयस्वोः | विष्ठेयस्वोः |
| ,, | ६३ | प्रवर्त्ततः | प्रवर्त्तेते |
| ,, | ,, | प्रत्यान | प्रत्यायन |
| २२५ | २३ | श्याम् | याम् |
| ,, | ३९ | सम्प्रम्या | सप्तम्याः |
| ,, | ४० | स्तम्बेरमू | स्तम्बेरम |
| २२६ | २९ | जन्यकेशा | जन्यक्लेशा. |
| २२८ | ३३ | स्ना | स्ना |
| २३० | १३ | कुड | कुड |
| ,, | १५ | किरौ | किटौ |
| २३१ | ३० | गाण्डः | गण्डः |
| ,, | ५५,५७ | कलभ | कलम |
| २३२ | १९ | औत्पाकं | औत्पातिकं |
| ,, | ६३ | सेयमुभयतः पाशा | सेयमुभयतः स्पाशा |